COLLECTION OF HINDU LAW TEXTS No. 25 (1)

Śri VAIDYANÂTHA DIXITA'S

SMṚTIMUKTĀPHALAM

PART I

VARṆÂŚRAMADHARMA KÂṆḌA

25c

EDITED BY

J. R. GHARPURE, B. A., LL. B., Honours-in-Law
Principal, Law College Poona, Advocate, High Court,
Fellow of the University of Bombay.

BOMBAY.

First Edition

Digitized and Uploaded by:
Hari Parshad Das (HPD)
on 06 July 2013

1937

Printed at the Aryabushan Press, 936/3 Bhamburda Peth,
Poona City, by A. V. Patvardhan and
Published by V. J. Gharpure, at the Office of
the Collection of Hindu Law Texts,
Angrewadi Girguam, Back Road, Bombay 4.

धर्मशास्त्रग्रन्थमाला [ग्रन्थाङ्कः २५ (१)

श्री

वैद्यनाथ दीक्षितीय

स्मृतिमुक्ताफलम्

(प्रथमः खंडः)

वर्णाश्रमधर्मकाण्डम्

जगन्नाथ रघुनाथ घारपुरे

बी. ए., एल्एल्. बी., ऑनर्स इन् लॉ.

पुण्यपत्तनस्थव्यवहारधर्मशालायां मुख्याध्यापकः

मुंबई विश्वविद्यालयसदस्यः

इत्यनेन संपादितः ।

प्रथमावृत्तिः

शकाब्दाः १८५८ क्रिस्ताब्दाः १९३७.

पुण्यपत्तने ' आर्यभूषण ' मुद्रणालये ' अनंत विनायक पटवर्धन ' इत्यनेन मुद्रितः,
मोहमय्यां ' विश्वनाथ जगन्नाथ धारपुरे,' इत्यनेन प्रकाशितश्च ।

श्री

श्री वैद्यनाथ दीक्षितीय स्मृतिमुक्ताफलस्थ वर्णाश्रमधर्मकाण्डस्य

विषयानुक्रमणिका

विषयाणि	पृष्ठम्
मंगलाचरणम्	१
धर्मप्रमाणानि	,,
श्रुतिस्मृतिप्रामाण्यम् ...	२
धर्मनिरूपणम्	,,
धर्ममूलानि	,,
शिष्टाः, तेषां लक्षणम् ...	३
स्ववर्णाश्रमधर्मानुष्ठानफलम् ...	,,
आचारप्रशंसा	४
सदाचारलक्षणम् ...	५
स्मृतिप्रशंसा	६
श्रुतिस्मृत्यादीनां बलाबलनिरूपणम्	७
श्रुतिद्वैधे, स्मृतिद्वैधे ...	,,
स्मृतिकर्तारः	८
धर्मदेशाः	९
निषिद्धदेशाः	,,
,, अपवादाः	१०
युगधर्माः	११
कलिसामर्थ्यम् ...	१२
युगसामर्थ्यवर्णनप्रयोजनम् ...	१३
कर्मपरिभाषा	१४
मुख्यगौणकालयोः ...	,,
कर्मकर्तृप्रतिरूपकानाम् ...	,,
दिवारात्रौ–कर्तव्यानाम् ...	,,
द्विद्रियमाभावे... ...	१५
स्वशाखोक्त–परशाखोक्तयोः ...	,,
आसनानि	,,
प्रातिनिधिमुख्ययोः ...	१६
वासोवेष्टने	,,

विषयाणि	पृष्ठम्
सृष्टिप्रकारः	१६
वर्णधर्माः	१७
यजनम्	,,
यज्ञमहिमा	१८
श्रौतस्मार्तयज्ञाः	१९
यजनप्रशंसा, अयजननिन्दा ...	२०
यज्ञे दक्षिणा–भोजनादि	...२०,२१,२२
आधानकर्तृणाम् ...	२३
पितुर्वैधुर्ये	,,
अग्रजानुजयोः	,,
परिवेत्तृणाम्	,,
विधुराचारः, विधुराग्निः ...	२५
मृतपत्नीकस्य	२६
अग्न्युत्पत्तिप्रकारः ...	२७
याजनम्	,,
तत्राधिकृताः	२८
वेदाध्ययनम्	२९
सार्थवेदोऽध्येतव्यः ...	,,
अध्यापनम्	३०
गुरुशिष्ययोः	,,
विद्यादाने पात्रापात्राणि ...	३१
अपात्रे अर्थकरणाद्वा ...	,,
उपाकरणम्	३२
उपाकर्मकालः	,,
उत्सर्जनम्, तत्कालश्च ...	३३
तेषां ज्यैष्ठे	,,
उपवीतधारणम्	३४
अनध्यायाः	३५
नित्याः, नैमित्तिकाः ...	३४

विषयाणि	पृष्ठम्
आकामिकाः	३४
तत्र अर्थवादाः	३५
युगाद्यः	३७
अनध्यायापवादाः ...	३८
नैत्यकादौ नानध्यायः ...	३९
दानम्	४०
तत्रैविध्यम्	४१
गोदानम्, तत्फलम् ..	४२
विद्यादानम्	४३
भीतानामभयदानम् ...	,,
महीवस्त्रप्रतिमादानानि ...	,,
दशदानानि	४५
विविधदानमन्त्राः ...	४६
दानस्य देशकालौ ...	४७
प्रतिश्रुत्य अप्रदानम् ...	४८
पात्रापात्रविचारः ...	४९
षट् अब्राह्मणाः ...	४९
पात्रे एव दानम् ...	५०
पात्रनिरूपणम्	५१
देवलकाः वार्धुषिकाः ...	,,
पाषंडिनः	,,
पुरुषाधमाः	५२
सप्तविधं धनम्	,,
अदेयानि, देयानि, च ...	५३
प्रतिग्रहः	,,
प्रतिग्राह्याणि	५२,,५५
तत्र प्रतिषेधाः पर्युदासाश्च ...	५४
कुटुंबार्थं ग्राह्याणि ...	५६
केभ्यः प्रतिग्राह्यम् ...	५७
कदा	,,
असत्प्रतिग्रहः	५८
तत्प्रकाराः	,,
प्रतिग्रहविधिः	,,
ब्राह्मणस्य वृत्यंतराणि ...	५९

विषयाणि	पृष्ठम्
आपद्वृत्तयः	६०
अविहितवृत्तयः	६१
पातनीयाः	६२
आपत्तौ जीवनानि ...	६३
प्राण्युपघातदोषापनुत्तये ...	६३
क्षत्रियधर्माः	६४
नृपस्य व्रतानि	६५
वैश्यधर्माः	६६
शूद्रधर्माः	६६।६७
शूद्रापराधे	६८
शूद्राणां वृत्तयः	६९
ब्राह्मणानां श्रैष्ठ्यम् ...	,,
जातिविवेकः	७०
अनुलोम–प्रतिलोमाः ...	,,
तज्जाः	७१
कुण्डगोलकादयः ...	,,
सावर्ण्यप्राप्तौ कारणानि ...	७२
संस्काराः	७३
तेषां भेदाः	,,
गर्भादानम्	७४
तत्कालः	,,
ऋतुयौगपद्ये	७५
ज्येष्ठपुत्रस्य	७६
ऋतौ गमनमवश्यम् ...	७७
गर्भोत्पत्यनुकूलकालः ...	,,
पुंसवनम्	७८
तत्कालः	,,
सीमंतोन्नयनम्	,,
अकृतसीमंतायाः प्रसवे ...	७९
जातकर्म	८०
नामकरणम्	८१
नामधेयानि	८२
कर्णवेधः	,,

विषयाणि	पृष्ठम्
निष्क्रमणम्	८२
अन्नप्राशनम्	,,
चूडाकरणम्	८३
तत्कालः	८४
संस्काराणां फलम् ...	,,
अक्षरन्यासः	,,
तत्कालः	८६
उपनीतधर्माः	,,
उपनयनम्	,,
काम्योपनयनम्	८७
उपनयनकालः	८८
नृपस्य व्रतानि	८९
गौणकालः	९०
यज्ञोपवीतम्	९१
उपवीत–निवीत–प्राचीनावीतानि	९२
वाससोऽसंभवे अनुकल्पः ...	९३
दंडधारणम्	,,
अजिनानि	,,
वासांसि	९४
पालाशकर्म	९५
मेखला	,,
भिक्षाचर्या	९६,९७
संध्योपक्रमः	९८
कालातिक्रमप्रायश्चित्तम् ...	९९
ब्राह्मणभोजनसंख्या ...	,,
उपनयनकर्तारः	,,
यमलयोः	१००
मूकोन्मत्तादीनाम् ...	,,
जडबधिराधीनाम् ...	१०१
औरसादयः	,,
क्षेत्रजाः; नियोगः ...	१०२
ज्येष्ठपुत्रस्य दानस्वीकारौ ...	१०३
गुर्वादिनिरूपणम् ...	१०४
माता सदैव पूज्या ...	१०५

विषयाणि	पृष्ठम्
पितुर्गरीयस्त्वम्	१०५
पितरौ सर्वथा न त्याज्यावुपेक्षणीयौ वा	१०६
एतदपवादाः	,,
मान्यतानिमित्तानि ...	,,
मार्गप्रदानार्हाः	१०७
अभिवादनम्	,,
गुरोः पादोपसंग्रहणम् ...	१०८
पूज्याः	१०९
अभिवादनप्रकारः ...	११०
गुरुसंनिहिते	१११
गुरुवत्पूज्या गुरुपत्न्यादयः ...	११५
प्रत्यभिवादनम्	११२
ब्रह्मचारिधर्माः ...	११३
गुरुसमीपे नम्रभावः ...	११४
भक्ष्यभोज्यानि	,,
सार्थवेदोऽध्येतव्यः ...	११५
विद्याधिगमोपायाः ...	११६
अध्यापनम्	,,
तत्र विशेषाः	,,
वेदव्रतानि	११७
पुनरुपनयनम्	,,
पुनः संस्काराः	११८
तत्र वर्ज्याः	,,
ब्रह्मचर्यकालावधिः ...	,,
अध्येतृसामर्थ्यानुरूपतः ...	,,
गोदानविधिः	११९
स्नातकानाम्	११९
तेषां भेदाः	,,
स्नातकविधिः	१२०
नैष्ठिकधर्माः	,,
नैष्ठिकव्रतानि	१२१
अवकीर्णी	१२२
तत्प्रायश्चित्तानि	,,
आपस्तंब–गौतम–मन्वाद्युक्तानि	

विषयाणि		पृष्ठम्
स्नातकधर्माः	... ...	१२३
विवाहः	... ...	१२३
कन्यालक्षणानि	... ...	"
कन्यादोषाः	... ...	१२४
सापिण्ड्यम्	... ...	१२४
वधूवरयोर्वयःप्रमाणम्	...	१२५
पुत्रिकाकरणम्	... ...	१२६
सगोत्रत्वसप्रवरत्वादि	...	"
सगोत्रविवाहे	... ...	१२७
सापिंडाविवाहे	... ...	१२८
मातुःसपत्न्याः	... ...	"
द्व्यामुष्यायणके	... ...	"
मातुलकन्यापरिणयः	...	१३०
देशजातिकुलधर्माणां प्रामाण्यम्		१३१
विवाहे वर्जनीयानि	...	१३२
" कुलानि	...	१३३
असवर्णाविवाहे	... ...	"
शूद्राविवाहे	... ...	"
वरलक्षणम्	... ...	१३३
वरपरीक्षा	... ...	१३४
षंढभेदाः । तेषां लक्षणानि च	...	"
त्याज्यवराः	... ...	१३५
कन्यादानकालाः	...	"
गौरी–रोहिण्यादिकन्याभेदाः	...	"
तेषां विवाहे	... ...	"
रजोदर्शनादुपरि	... ...	१३६
बालिशाविवाहे	... ...	"
दात्रभावे कन्यया वरणम्	...	"
विवाहमध्ये रजोदर्शने	...	१३७
आसप्तमपदान्न विवाहः	...	१३८
तत्पूर्वं विवाहविघ्ने-भंगे वा	...	१३८
शुल्कम्	... ...	"
तत्र विशेषः	... ...	"

विषयाणि		पृष्ठम्
कन्यादूषणे	... ...	१३९
अनाख्याय दुष्टकन्यादाने	...	"
वृथादूषणे	... ...	१४०
कन्यादातारः	... ...	"
विवाहभेदाः	... ...	"
" प्रकाराः लक्षणानि	...	१४१
" फलानि च	...	"
धर्म्यविवाहाः अधर्म्याश्च	...	१४२
शुल्कदानम्	... ...	१४३
" ग्रहणम्	...	"
तद्दोषः	... ...	"
कन्याविक्रये	... ...	१४४
विवाहे होमः कर्तव्यैव	...	१४५
शोभनद्वयसन्निपाते	...	"
एकमातृप्रसूतानाम्	...	"
यमलयोः	... ...	"
" ज्यैष्ठ्यनिरूपणम्	...	१४६
सिंहस्थे गुरौ	... ...	१४७
जन्मनक्षत्रे	... ...	"
त्रिज्यैष्ठ्ये	... ...	"
ज्येष्ठानां ज्येष्ठमासे	...	"
ऋद्धिपरीक्षा	... ...	१४८
" आपस्तंबेनोक्ता	...	"
" आश्वलायनोक्ता	...	"
कन्यादानकालनियमक्रमः	...	१४९
पुनर्विवाहः	... ...	"
औपासनारंभकालः	...	"
स्थालीपाकोपक्रमः	...	१५०
अन्वारंभणेष्टिः	... ...	"
अधिवेदनम्	... ...	१५१
अधिवेदनार्हा	... ...	"
द्वितीयाविवाहकालः	...	१५२
अर्कविवाहः	... ...	"

विषयाणि	पृष्ठम्
उन्मत्तादीनां विवाहनिराकरणम्	१५३
पतितादीनां धर्मनिरूपणम् ...	”
दारसंग्रहस्य फलम् ...	१५४
स्त्रीरक्षणक्रमः	१५५
ग्रहाश्रमसाफल्यम् ...	”
दम्पत्योर्मिथ आचरणम् ...	१५६
प्रोषितभर्तुः स्त्रीधर्माः ...	”
पतिव्रताधर्मः	१५७
स्त्रीपातनीयानि ...	१५८
गर्भिणीधर्माः	१५९
गर्भावस्था	१६०
विधवाधर्माः	१६१
अनुगमनम्	१६२
देशांतरगते प्रेते पत्यौ ...	१६२
गूढव्यभिचारिणींप्रति ...	१६३
गृहस्थधर्मचर्या ...	१६४
गृहस्थाश्रमप्रशंसा ...	१६६ १६७
वानप्रस्थधर्माः	१६९ १७०
यतिधर्माः	१७१
यतिभेदाः	१७२
आतुरसंन्यासः	१७३
” विधिः	१७४
संन्यासफलम्	१७५, १७६
जीवच्छ्राद्धम्	१७७
तत्र विधिः	१७८,१८१
आतुरसंन्यासक्रमः ...	१८२
संन्यासभेदाः	१८३
चत्वारः	”
कुटीचकः	”
बहूदकः	१८४
” धर्माः	”

विषयाणि	पृष्ठम्
हंसः	१८४
” धर्माः	”
परमहंसः	१८५
” धर्माः	”
यत्यान्हिकधर्माः... ...	१८७
एकरात्रमेव वासः ...	१९०
दिगम्बरलक्षणम्... ...	१९३,१९४
ज्ञानस्य मोक्षहेतुत्वम् ...	१९५
दन्तधावनम्	१९६
स्नानादि	१९७
विष्णुपूजाक्रमः	१९८
भिक्षाचर्या	१९९
माधुकरश्रेष्ठ्यम्... ...	२००
माधुकरभेदाः	”
माधूकरम्	”
प्राक्प्रणीतम्	”
अयाचितम्	”
तात्कालिकम्	”
उपपन्नम्	”
केभ्यो भिक्षा ग्राह्या ...	२०१
सार्ववर्णिकभिक्षानिषेधः ...	”
भिक्षापात्राणि	२०२
भिक्षापात्रभोजननिषेधः ...	”
आहारशुद्धिः	२०३
भिक्षाप्रशंसा	२०४
चातुर्मास्यविधिः ...	२०५
प्राणायामविधिः ...	२०६
यतेर्निषिद्धानि	२०७
आरूढपतितादीनाम् ...	२०८
संन्यासदीक्षाफलम् ...	”
मोक्षाचारफलम्... ...	”

एतत्पुस्तकसंशोधने यानि पुस्तकानि यैश्च सुमनस्कतया प्रेषितानि तेषां नामानि संज्ञाश्च यथा

क—भारतमंत्रिसंग्रहात् आंग्लदेशतः प्रेषितानि ग्रन्थलिप्यां लिखितानि—

ख—मद्रपुरसंग्रहात्प्राप्तानि ग्रंथलिप्याम्.

क्ष— { सप्तपुरस्थ श्रीद्राविडमहाशयसंग्रहात् रावबहादुर भिकाजी व्यंकटेश द्रवीड इत्येतैः प्राप्तम् ।

ग—मुद्रितानि—

परमुपकृतं नो यैरिमानि प्रेषितानि—

जगन्नाथ रघुनाथ घारपुरे

अथ स्मृतिमुक्ताफलम्

श्रीगणेशाय नमः । हरि ओम् ।

अंके विहारिणमनुक्षणमद्रिजायास्तं केवलं कलभमद्भुतमाश्रयामः ॥
नित्यं ए एष बहुभिर्निजसेवकानां प्रत्यूहपुंजकवलैः परितोषमेति ॥ १ ॥
पारावती विधिमुखावलिसौधपंक्तेर्मायाविहीनजनमानसराजहंसी[1] ॥
योगीश्वरैरपि विमृग्यनिजस्वरूपा वागीश्वरी दिशतु मे वचसां समृद्धिम् ॥ २ ॥
श्रीरामचंद्रचरणद्वयपद्मकोशान्मां[2] यातु मे चपलमानसचंचरीकः ॥
मुक्तेर्वशीकरणचूर्णमहो यदीयं[3] गात्रेषु बिभ्रति रजोऽपि रजोविहीनाः ॥ ३ ॥
भवकोदंडदलनं भवबंधविमोचनं । दशकण्ठरिपुं वंदे दशस्यंदननंदनम् ॥ ४ ॥
शरणं[4] तमुपैमि साधुसेव्यं सदयं कञ्चन देवताविशेषम् ।
सहसा चरणांबुजं यदीयं मुनिवैधुर्यनिरासहेतुरासीत् ॥ ५ ॥
उरुविस्तरधर्मशास्त्रवार्द्धैरुपलब्धं महता परिश्रमेण ॥
श्रवणेषु निधीयतां किमन्यैः **स्मृतिमुक्ताफल**मेकमेव सद्भिः ॥ ६ ॥
वैद्यनाथाध्वरी नाम दासो वाधूलवंशजः । स्मृतिमुक्ताफलं नाम कुरुते सारसंग्रहम् ॥ ७ ॥
क नु विशकलितं तु धर्मशास्त्रं क च पुनराकलने मम प्रवृत्तिः ॥
सरलमतिजुषस्तथाऽपि संतः सततमिदं मम साहसं सहंताम् ॥ ८ ॥

धर्मप्रमाणनिरूपणम् । **तत्रादौ धर्मप्रमाणानि** निरूप्यंते । तत्र **मनुः** (२।६)
" वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् । आचारश्चैव साधूनामात्मनस्तुष्टिरेव च " ॥ इति । जातावेकवचनं । धर्ममूलं धर्मस्य प्रमाणं । न केवलं विध्यात्मक एव वेदो धर्मप्रमाणं किं तु मंत्रार्थवादात्मकोऽपीत्युक्तमखिल इति । अथ यत्र प्रत्यक्षो वेदो नोपलभ्यते तत्र कथमित्यत उक्तं 'स्मृतिशीले च तद्विदाम्' इति । तद्विदां वेदार्थविदां **स्मृतिः** धर्मशास्त्रेतिहासपुराणानि; **शीलं** च धर्ममूलं साद्भिः संभावनीयताहेतुरात्मगुणसंपच्छीलं । तदुक्तं **महाभारते** (शां. प. १२४।६८)
" तत्तत्कर्म[6] तथा कुर्याद्येन श्लाघ्येत संसदि । शीलं[7] समासेनैतत्ते कथितं कुरुनंदन " ॥ इति । अत्रोदाहरणं युधिष्ठिरस्य यक्षरूपधारिधर्मात् स्वसोदरानादरेण नकुलस्य जीवितवरणम् । तद्विदामाचारश्चैव धर्ममूलम् । धर्माधिकारनिमित्तशौचाचमनादिलक्षणक्रियाविशेष आचारः । **साधूनां** परमधार्मिकाणा**मात्मनस्तुष्टिः** मनसो रुचिः । सा च धर्ममूलं । प्रमाणांतरागोचरत्त्वेन धर्मं प्रति संशायितेष्वर्थेषु यो धर्मत्वेन मनसे रोचते स धर्म इत्यर्थः ।

यद्यप्यप्रत्यक्षो वेदो धर्मस्य मूलभूतोऽस्मदादिभिर्नोपलभ्यते तथापि मन्वादय उपलब्धवंत इत्यनुमीयते । यथाह्यापस्तंबः " तेषामुत्सन्नाः पाठाः प्रयोगादनुमीयंते " इति । तथा च प्रत्यक्षो वेदस्तेषां धर्मप्रमाणम् । अन्येषां वेदाः स्मृत्यादिकं च प्रमाणमित्यर्थः ।
याज्ञवल्क्यश्च (आचारे श्लो. ७)
"श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः। सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृतम्"॥इति। सम्यक्संकल्पजः कामः शास्त्राविरुद्धं यथा स्वर्गकामेन मया ज्योतिष्टोमयागः कर्त्तव्य इत्यादिः । **व्यासः**
" धर्ममूलं वेदमाहुर्ग्रंथराशिमकृत्रिमम् । तद्विदां स्मृतिशीले च साध्वाचारं मनः प्रियम् " ॥ इति ।
हारीतः

---

१ क्ष-सि । २ क्ष-वा । ३ क्ष-मदीयं । ४ **कग**-पाठः । ५ **क, ग**-चोद्धे । ६ तच्चु इतिभारतीयपाठः । ७ **क्ष**-कीर्ति

"वेदाः प्रमाणं स्मृतयः प्रमाणं धर्मार्थयुक्तं वचनं प्रमाणम् ।
यस्य प्रमाणं न भवेत् प्रमाणं कस्तस्य कुर्याद्वचनं प्रमाणम्" ॥ इति ।

आपस्तंबः (१।२-३) "धर्मज्ञसमयः प्रमाणं वेदाश्चेति" । **गौतमः** (१।१) "वेदो धर्ममूलं। तद्विदां च स्मृतिशीले" इति । तेन नित्यनिर्दोषवेदमूलकत्वादुपनयनादिरेव धर्मः । न शाक्यादिकल्पितागममूलकचैत्यवंदनकेशोल्लुंच्छनादिरिति ।

इति **धर्मप्रमाणनिरूपणम् ।**

अथ स्मृतेः प्रामाण्यम् । तत्र **शंखः** "वेदमूलाः स्मृतयः" इति । **मरीचिः**
"दुर्बोधा वैदिकाः शब्दाः प्रकीर्णत्वाच्च येऽखिलाः । तत्रैत एव दृष्टार्थाः स्मृतितंत्रे प्रतिष्ठिताः"॥इति।

मनुः (अ. २)—
"श्रुतिं पश्यंति मुनयः स्मरंति च तथा स्मृतिम् । तस्मात्प्रमाणमुभयं प्रमाणैः प्रमितं भुवि ॥
"योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद्विजः । स साधुभिर्बहिष्कार्यो नास्तिको वेदनिंदकः"॥ ११॥इति।

हारीतः—
"न यस्य वेदा न च धर्मशास्त्रं न वृद्धवाक्यं हि भवेत्प्रमाणम् ॥
"सोऽधर्मकृद्दुष्टिहतो दुरात्मा नात्माऽपि तस्येह भवेत्प्रमाणम्" ॥ इति । **देवलः**—
"मन्वादयः प्रयोक्तारो धर्मशास्त्रस्य कीर्तिताः । तत्प्रयुक्तप्रयोक्तारो गृह्यकारास्तु मंत्रतः" ॥इति ।

अंगिराः—
"प्रमाणानि प्रमाणज्ञैः परिपाल्यानि यत्नतः । सीदंति हि प्रमाणानि प्रमाणैरव्यवस्थितैः"॥ इति।

इति **स्मृतिप्रामाण्यम्**

अथ धर्मनिरूपणम्

"वाक्कर्मजन्योऽभ्युदयनिःश्रेयसहेतुरपूर्वाख्य आत्मगुणो धर्मः" इति **हरदत्तः** ।

अत्र मनुः (२।१)
"विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः । हृदयेनाभ्यनुज्ञातो यस्तं धर्मं व्यवस्यत" ॥ इति । विद्वद्भिर्वेदार्थविद्भिरद्वेषरागिभिः सद्भिर्धर्मो नित्यं सेवितः धर्मत्वेन नित्यमनुष्ठितः न शोकमोहादिना कादाचित्कनिमित्तेन । किंच हृदयेनाभ्यनुज्ञातः । इदमेव श्रेय इति स्वारस्ययुक्तेन हृदयेन स्वीकृतः । एवंभूतो योऽर्थस्तं धर्मं व्यवस्यत हे महर्षयो निश्चिनुतेत्यर्थः । **स एव** (१।१०८)
"आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च । तस्मादस्मिंस्त्रये युक्ते नित्यं स्यादात्मवान्द्विजः"॥ इति। त्रये श्रौतस्मार्ताचारेष्वित्यर्थः । **याज्ञवल्क्यः** (१।६)
"देशे काल उपायेन द्रव्यं श्रद्धासमन्वितं । पात्रे प्रदीयते यत्तत्सकलं धर्मलक्षणम्" ॥
देशः कुरुक्षेत्रादि । **काल** उपरागादिः । **उपायः** शास्त्रोक्तेतिकर्तव्यताकलापः । **द्रव्यं** गवादि । **श्रद्धा** आस्तिक्यबुद्धिः । तदन्वितं यथा भवति तथा पात्रे प्रदीयते यत्तद्धर्मस्योत्पादकम् । किमेतावदेव धर्मस्योत्पादकम् । नेत्याह **सकलमिति** । अन्यदपि यागादि । तत्सकलं धर्मस्य कारकम् । **विश्वामित्रः**—
"यमार्याः क्रियमाणं हि शंसंत्यागमवेदिनः । स धर्मो; यं विगर्हंति तमधर्मं प्रचक्षते" ॥ इति ।

व्यासः—
"सत्यं दमस्तपः शौचं संतोषो ह्रीः क्षमाऽऽर्जवम् । ज्ञानं शमो दया ध्यानमेष धर्मः सनातनः"॥ इति ।

---

१ **ख**–विकल्पित । २ **क्ष**–तूभे । ३ **क्ष**–दुष्ट । ४ **क्ष**–समंततः; **कग**–स्तु तन्त्रतः । ५ 'निबोधन' इति पाठः । ६ **क**–परमो; **खग**–प्रथमो । ७ 'सदायुक्तो' इति मुद्रितमानवे । ८ **क्ष**–चारात्ताग्नि । ९ **क्ष**–एतद्ध । १० **ख**–कारणं ।

बृहस्पतिः—

" दानं[1] यज्ञः सतां पूजा वेदधारणमार्जवम् । एष धर्मः परो ज्ञेयः फलवान्प्रेत्य चेह च ॥

"भोगेष्वसक्तिः सततं तथैवात्मावलोकनम् । श्रेयः परं मनुष्याणां प्राह पंचशिखो मुनिः"॥ इति ।

परं धर्ममाह **याज्ञवल्क्यः** (१।८)—

"इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम् । अयं तु परमो धर्मो यद्योगेनात्मदर्शनम् " ॥ इति **योगेन** चित्तवृत्तिनिरोधेन । **आपस्तंबः** (१।२०।६-७) "न धर्माधर्मौ चरत आवं स्व इति । न देवगंधर्वा न पितर इत्याचक्षतेऽयं धर्मोऽयं धर्म इति । यत्त्वार्याः क्रीयमाणं प्रशंसंति स धर्मो यद्गर्हंते सोऽधर्मः"इति । आवमिति छांदसं रूपम् । आवामित्यर्थः । यदि हि धर्माधर्मौ विग्रहवन्तावावां स्व इति ब्रुवाणौ चरेताम् यदि वा देवादयः प्रकृष्टज्ञाना ब्रूयुरिमौ धर्माधर्माविति तदोपलब्धिः[2] स्यात्; तदभावाच्छिष्टा यं प्रशंसंति स धर्मः । यद्गर्हंते सोऽधर्म इत्यर्थः । इति **धर्मनिरूपणम्** ॥

शिष्टलक्षणमाह बौधायनः (१।१।५) " शिष्टाः खलु विगतमत्सरा निरहंकाराः कुंभीधान्या[3] अलोलुपाः । दंभदर्पलोभमोहक्रोधविवर्जिताः " इति । **स एव**—

" धर्मशास्त्ररथारूढा वेदखड्गधरा द्विजाः । क्रीडार्थमपि यं ब्रूयुः स धर्मः परमः स्मृतः॥" इति ।

याज्ञवल्क्यः (१।९)—

"चत्वारो वेदधर्मज्ञाः पर्षत् त्रैविद्यमेव वा । सा ब्रूते यं स धर्मः स्यादेको वाऽध्यात्मवित्तमः"॥इति। तिस्रो विद्या अधीयत इति **त्रैविद्यास्तेषां** समूहः त्रैविद्यमित्यर्थः । **पराशरः** (८।१५)—

"चत्वारो वा त्रयो वाऽपि यं ब्रूयुर्वेदपारगाः । स धर्म इति विज्ञेयो नेतरैस्तु सहस्रशः" ॥ इति ।

आपस्तंबः (१।२०।८-९)—" सर्वजनपदेष्वेकांतसमाहितमार्याणां वृत्तं सम्यक् विनीतानां वृद्धानामात्मवतामलोलुपानामदांभिकानां वृत्तसादृश्यं भजेतैवमुभौ लोकावभिजयति " । इति । विनयशमादिगुणोपेतानामार्याणां सर्वजनपदेषु यदेकांतेनाव्यभिचारेण समाहितमनुष्ठितं वृत्तमनुष्ठानं, न मातुलसुतापरिणयनवत्कतिपयविषयं, तद्वृत्तसादृश्यं भजेत; एवं कुर्वन्नुभौ लोकावभिजयतीत्यर्थः ।

सर्ववर्णानां स्वस्वधर्मानुष्ठाने फलनिरूपणम् । स एव (२।१।२।२-३)—

"सर्ववर्णानां स्वधर्मानुष्ठाने परमपरिमितं सुखम् । ततः परिवृत्तौ कर्मफलशेषेण जातिं रूपं वर्णं बलं मेधां प्रज्ञां द्रव्याणि धर्मानुष्ठानमिति प्रतिपद्यते । तच्चक्रवदुभयोर्लोकयोः सुख एव वर्त्तते" इति । अस्यार्थः—सर्वेषां वर्णानां वर्णाश्रमप्रयुक्तधर्मानुष्ठाने परमपरिमितमुत्कृष्टमक्षय्यं सुखं स्वर्गाख्यं भवति; न केवलमेतावत्किंतर्हि, ततः परिवृत्तौ पुनर्जन्मनि कर्मफलशेषेणाभुक्तांशेनाभिजात्यादीनि प्रतिपद्यते; तस्माच्चक्रवदुभयोर्लोकयोरिह चामुष्मिंश्च सुख एव वर्त्तते न जातुचिद्दुःख इति । **तैत्तिरीयकोपनिषदि** श्रूयते " धर्म इति धर्मेण सर्वमिदं परिगृहीतं धर्मान्नाति दुश्चरं तस्माद्धर्मे रमंते " इति । **धर्म इति** धर्मो नाम नित्यनैमित्तिकादि श्रौतं स्मार्तं च कर्म; तेन धर्मेण सर्वमाध्यात्मिकादिभेदभिन्नमिदं जगत्परिगृहीतं स्थितम् तस्माद्धर्मात्परं नास्ति वैदिकैर्मुमुक्षुभिः श्रेयोर्थिभिश्च धर्म एव कर्तव्यः; तस्माद्धर्मे रमंत इत्यर्थः **तत्रैव**[4] पुनः श्रूयते—" धर्मो विश्वस्य जगतः प्रतिष्ठा । लोके धर्मिष्ठं प्रजा उपसर्पंति । धर्मेण पापमपनुदति । धर्मे सर्वं प्रतिष्ठितम् । तस्माद्धर्मं परमं वदंतीति "। अयमर्थः । धर्मः पूर्वोक्तः, विश्वस्य जगतः प्रतिष्ठा प्रतितिष्ठत्यनेनेति प्रतिष्ठा; श्रौतस्मार्तकर्मभिः समस्तजगद्ध्रियत इत्यर्थः । लोके धर्मिष्ठमतिशयेन धर्मानुष्ठातारं प्रजा धर्मावाप्त्यर्थमधर्मापाकरणार्थं[5] वोपसर्पंति ।

१ **खभक्ष**-ज्ञान । २ **कग**-लब्ध, । ३ **क्ष**-धाना । ४ नारायणोपनिषदि । ५ **ख**-र्मोप- ।

धर्मेण विहिताकरणप्रतिषिद्धसेवननिमित्तं पापमपनुदति। धर्मे सर्वं प्रतिष्ठितमितरथा बाधितं स्यात् तस्माद्धर्मं परमं वदंतीति धर्मविद् इति। **चंद्रिकायाम्**

“ वर्णत्वमेकमाश्रित्य यो धर्मः संप्रवर्त्तते। वर्णधर्मः स उक्तस्तु यथोपनयनं किल ॥

“ तथैवाश्रममाश्रित्य अधिकारः प्रवर्त्तते। स एवाश्रमधर्मः स्याद्भिक्षादंडादिको यथा ॥

“ वर्णत्वमाश्रमत्वं च योऽधिकृत्य प्रवर्त्तते। स वर्णाश्रमधर्मस्तु यथा मौंजी तु मेखला”॥इति **मनुः** (४।२३८-२४३)—

“धर्मं शनैः संचिनुयाद्वल्मीकमिव पुत्तिकाः। परलोकसहायार्थं सर्वभूतान्यपीडयन् ॥

“नामुत्र हि सहायार्थं पिता माता च तिष्ठतः। न पुत्रदारा न ज्ञातिर्धर्मस्तिष्ठति केवलः॥

“एकः प्रजायते जंतुरेक एव प्रमीयते। एकोऽनुभुंक्ते सुकृतमेक एव च दुष्कृतम् ॥

“मृतं शरीरमुत्सृज्य काष्ठलोष्टसमं क्षितौ। विमुखा बांधवा यांति धर्मस्तमनुगच्छति ॥

“तस्माद्धर्मं साहायार्थं नित्यं संचिनुयाच्छनैः। धर्मेण हि सहायेन तमस्तरति दुस्तरम् ॥

“धर्मप्रधानं पुरुषं तपसा वीतकल्मषम्। परलोकं नयत्याशु भास्वंतं खे शरीरिणम् ॥

“श्रुतिस्मृत्युदितं कुर्वन्निबद्धः स्वेषु कर्मसु। धर्ममूलं निषेवेत सदाचारमतंद्रितः” ॥इति॥

धर्मस्य मूलं धर्ममूलम्। धर्मस्याचाराधीनत्वम्। **आचारप्रशंसा**। **स एव** (१।११०)—

“ एवमाचरतो दृष्ट्वा धर्मस्य मुनयो गतिम्। सर्वस्य तपसो मूलमाचारं जगृहुः परम् ” ॥

“ आचाराद्विच्युतो[1] विप्रो न वेदफलमश्नुते। आचारेण तु संयुक्तः संपूर्णफलभाग्भवेत् ” ॥

(४।१५६-१५८).

“ आचाराल्लभते ह्यायुराचारादीप्सिताः प्रजाः। आचाराद्धनमक्षय्यमाचारो हंत्यलक्षणम् ॥

“ दुराचारो हि पुरुषो लोके भवति निंदितः। दुःखभागी च सततं व्याधितोऽल्पायुरेव च ॥

“ सर्वलक्षणहीनोऽपि यः सदाचारवान्नरः। श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति ” ॥

वसिष्ठः (६।३)—

“ आचारहीनं न पुनंति वेदा यद्यप्यधीताः सह षड्भिरंगैः ॥

“ छंदांस्येनं मृत्युकाले त्यजंति नीडं शकुंता इव जातपक्षाः ॥

“ कपालस्थं यथा तोयं श्वदृतौ च यथा पयः। दुष्टं स्यात्स्थानदोषेण वृत्तहीने तथा श्रुतम्॥

“ ब्राह्मणस्य तु देहोऽयं नोपभोगाय कल्पते। इह क्लेशाय महते प्रेत्यानंतसुखाय च ”॥

पराशरः (६।२)

“ चतुर्णामपि वर्णानामाचारो धर्मपालकः। आचारभ्रष्टदेहानां भवेद्धर्मः पराङ्मुखः ” ॥

“ शिष्टानामभिमतो दयादाक्षिण्याद्यन्वितो वृत्तिविशेष आचारः” इति **माधवीये**। **बृहस्पतिः**—

“ शौर्यवीर्यार्थरहितस्तपोज्ञानविवर्जितः। आचारहीनः पुत्रस्तु मूत्रोच्चारसमः स्मृतः ” ॥

शौर्यादिरहितः क्षत्रियपुत्रः अर्थरहितो वैश्यपुत्रः तपोज्ञानाचाररहितो ब्राह्मणपुत्र इति विवेकः ॥

भगवान्—

“ वर्णानामाश्रमाणां च या मर्यादा मया कृता। तां ये समनुवर्तंते प्रसादस्तेषु संभवेत् ” ॥

आश्वमेधिके—

“श्रुतिः स्मृतिर्ममैवाज्ञा यस्तामुल्लंघ्य वर्तते। आज्ञाछेदी मम द्रोही मद्भक्तोऽपि न वैष्णवः” ॥इति”

स्मृत्यंतरे—

“ यथेक्षुहेतोः सलिलं निषेचितं तृणानि वल्लीरपि च प्रसिंचति।

---

१ **कखग**–सूयते, । २ **खकग**–त्पच्चुतो। ३ **कजक्ष**–समुदाचार–द्विजः। ४ **क्ष**–कूपावस्थे। ५ **कखग**–नंद। ६ **क**–वेदा।

एवं नरो धर्मपथेन वर्त्तयन्यशश्च कामांश्च वसूनि सोऽश्नुते ” ॥ **नारदः—**
“ धिग्जन्माचाररहितं जन्म धिङ्मानवर्जितम् । शूद्रेऽपि दृश्यते वृत्तं ब्राह्मणे न तु दृश्यते ॥
‘ शूद्रोऽपि ब्राह्मणो ज्ञेयो ब्राह्मणः शूद्र एव सः । हरिभक्तिपरो वाऽपि हरिध्यानरतोऽपि वा ॥
“भ्रष्टो यः स्वाश्रमाचारात्पतितः सोऽभिधीयते ॥
“वेदो वा हरिभक्तिर्वा भक्तिर्वाऽपि महेश्वरे । स्वाचारात्पतितं मूढं न पुनाति द्विजोत्तमम् ॥
“पुण्यक्षेत्राभिगमनं पुण्यतीर्थनिषेवणम् । यज्ञो वा विविधो ब्रह्मंस्त्यक्ताचारं न रक्षति ॥
“आचारात्प्राप्यते स्वर्ग आचारात्प्राप्यते सुखम् । आचारात्प्राप्यते मोक्ष आचारात्किं न सिध्यति”॥
महाभारते आनुशासनिके—
“आचाराल्लभते चायुराचाराल्लभते श्रियम् । आचाराल्लभते कीर्तिं पुरुषः प्रेत्य चेह च ॥
“ये नास्तिका निष्क्रियाश्च गुरुशास्त्रातिलंघिनः । अधर्मज्ञा दुराचारास्ते भवंति गतायुषः”॥ इति ।
पारिजाते—
“ सदाचारेण देवत्वमृषित्वं च तथैव च । प्राप्नुवंति कुयोनित्वं मनुष्यास्तद्विपर्यये ” ॥
सदाचारलक्षणम् विष्णुपुराणे (तृतीयांशे अ. ११ श्लो. २-३)—
“ सदाचारवतां पुंसां जितौ लोकावुभावपि ।
“ साधवः क्षीणदोषास्तु सच्छब्दः साधुवाचकः । तेषामाचरणं यत्तु सदाचारः स उच्यते ” ॥
संस्कारमंजर्याम्
“यस्मिन्देशे य आचारः पारंपर्यक्रमागतः । श्रुतिस्मृत्यविरोधेन सदाचारः स उच्यते” ॥
मनुः—
“ धर्मव्यतिक्रमो दृष्टो महतां साहसं तथा । तदन्वीक्ष्य प्रयुंजानः संसीदत्यवरोऽबलः ॥
“ तेजोमयानि पूर्वेषां शरीराणींद्रियाणि च । दोषैस्ते नोपलिप्यंते पद्मपत्रमिवांभसा ” ॥
कतकभरद्वाजावन्योन्यं व्यत्यस्य भार्ये जग्मतुः । वसिष्ठश्चांडालीमक्षमालीं प्रजापतिश्च स्वां दुहितरमित्यादि धर्मव्यतिक्रमो दृष्टः । जामदग्न्येन रामेण पितृवचनादविचारेण मातुः शिरश्छिन्नमित्यादि साहसं दृष्टम् । तदन्वीक्ष्य प्रयुंजानः। तादिति “नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्” (१।२।६९) इत्येकशेष एकवद्भावश्च । तं व्यतिक्रमं तच्च साहसमन्वीक्ष्य दृष्ट्वा स्वयमपि तथा प्रयुंजानोऽवर इदानींतनः अबलः दुर्बलः संसीदति प्रत्यवैति । तेषामपि किं दोषः । नेत्याह तेजोमयानीति । तद्यथैषीकातूलमग्नौ प्रोतं प्रदूयत एवं ह्यस्य सर्वे पाप्मानः प्रदूयंत इति श्रुतेः । **अत्रापस्तंबः**–(२।१३।७-९) “ दृष्टो धर्मव्यतिक्रमः साहसं च पूर्वेषाम् । तेषां तेजोविशेषेण प्रत्यवायो न विद्यते तदन्वीक्ष्य प्रयुंजानः सीदत्यवरः ” इति । **गौतमः** (१।३-४) “दृष्टो धर्मव्यतिक्रमः साहसं च महताम् । न तु दृष्टार्थे । अवरदौर्बल्यात् ” इति । न तु दृष्टार्थे धर्मव्यतिक्रमादाविदानींतनस्य साधीयसी प्रवृत्तिरित्यर्थः । **बोधायनः—**
“ अनुष्ठितं तु यद्देवैर्मुनिभिर्यदनुष्ठितम् । नानुष्ठेयं मनुष्यैस्तदुक्तं कर्म समाचरेत् ” ॥
याज्ञवल्क्यः (आ. १५६)—
“ कर्मणा मनसा वाचा यत्नाद्धर्मं समाचरेत् । अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न तु ” ॥
धर्मं विहितमपि लोकविद्विष्टं यस्मादस्वर्ग्यमित्यर्थः ।

इति **धर्मनिरूपणम् ॥ सदाचारनिरूपणम् ॥**

---

१ क्ष–रतो । २ क–आ । ३ स–भ्य । ४ क–दि । ५ क–अधमाश्च । ६ कजग–कथित ।

अथ स्मृतिप्रशंसा। मनुः (१।१०३)--
" धर्मशास्त्रमधीयानो ब्राह्मणः संशितव्रतः। मनोवाग्देहजैर्नित्यं कर्मदोषैर्न लिप्यते॥
" अर्हः स्याद्धव्यकव्यानामर्हश्च पृथिवीमिमाम्। ग्रहणाद्धर्मशास्त्रस्य ब्रह्मलोकमवाप्नुयात्॥
" विदुषा ब्राह्मणेनेदमध्येतव्यं प्रयत्नतः। शिष्येभ्यश्च प्रवक्तव्यं सम्यङ् नान्येन केनचित्॥
" इदं स्वस्त्ययनं श्रेष्ठमिदं बुद्धिविवर्धनम्। इदं यशस्यं सततमिदं नैश्रेयसं परम्॥
" धर्मशास्त्रमधीयानो ब्राह्मणः क्षत्रियोऽथ विट्। पुनाति हि पितॄन्सर्वान्सप्तसप्तावरांस्तथा॥
" अमार्गेण प्रवृत्तानां व्याकुलेंद्रियचेतसाम्। निरर्तकं धर्मशास्त्रं व्याधीनामिव भेषजम्॥
" श्रुतिस्मृती चक्षुषी द्वे द्विजानां न्यायवर्त्मनि। मार्गमुज्झंति तद्धीना प्रयतंति पथश्च्युताः"॥
हारीतः—
"यथा हि वेदाध्ययनं धर्मशास्त्रमिदं तथा। अध्येतव्यं ब्राह्मणेन नियतं स्वर्गमिच्छता"॥
शंखलिखितौ—
" रागद्वेषाग्निदग्धानामज्ञानविषपायिनाम्। चिकित्सा धर्मशास्त्राणि व्याधीनामिव भेषजम्"॥
स्मृतिरत्नावल्याम्
" स्मृतिं विना न हि ज्ञानं धर्मस्य भवति क्वचित्[1]। न जातु ज्ञायते रूपमालोकेन विना यथा"॥
याज्ञवल्क्यः (आ. ३)—
"पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः। वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश"॥
विद्यानां स्थानानि चतुर्दश धर्मस्य स्थानानि हेतवः। एतानि त्रैवर्णिकैरध्येतव्यानि तदंतर्गतत्वाद्धर्मशास्त्रमध्येतव्यम्। शूद्रं प्रकृत्य यमः-"तस्मादस्याधिकारोऽस्ति न वेदेषु न तु स्मृतौ" इति।
मनुरपि (२।१६)—
निषेकादिश्मशानांतो मंत्रैर्यस्योदितो विधिः। तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य कस्यचित्॥
मानवस्य धर्मशास्त्रस्य श्रैष्ठ्यं दर्शयत्यंगिराः—
" यत्पूर्वं मनुना प्रोक्तं धर्मशास्त्रमनुत्तमम्। न हि तत्समतिक्रम्य वचनं हितमात्मकम्॥
" वेदादुपनिबद्धत्वात्प्राधान्यं तु मनोः स्मृतम्। मन्वर्थविपरीता तु या स्मृतिः सा न शस्यते"॥
श्रुतिरपि —" यद्वै किंच मनुरवदत्तद्भेषजम्" इति। व्यासहारीतौ—
" अवेक्षेत च शास्त्राणि मन्वादीनि द्विजोत्तमः। वैदिकान्नियमान्वेदान् वेदांगानि च सर्वशः॥
"धर्मशास्त्रं सदा पाठ्यं ब्राह्मणैः शुद्धमानसैः। वेदवत्पठितव्यं च श्रोतव्यं च दिवानिशम्॥
" स्मृतिहीनाय विप्राय श्रुतिहीने तथैव च। दानं भोजनमन्यच्च दत्तं कुलविनाशनम्॥
" तस्मात्सर्वप्रयत्नेन धर्मशास्त्रं पठेत् द्विजः॥
"श्रुतिस्मृती च विप्राणां चक्षुषी द्वे विनिर्मिते। काणस्तत्रैकया हीनो द्वाभ्यामंधः प्रकीर्तितः"॥
विष्णुः (९८।६२)—
"पुराणं मानवो धर्मः सांगो वेदचिकित्सितम्। आज्ञासिद्धानि चत्वारि न हंतव्यानि हेतुभिः"॥
वसिष्ठः—
"अप्रामाण्यं च वेदानामार्षाणां चैवं कुत्सनम्। अव्यवस्था च सर्वत्र एतन्नाशनमात्मनः"॥
व्यासः—
" तेन स्मार्तमनुष्ठानमंतरेण न वैदिकम्। प्रवर्त्तने द्विजातीनां कर्मशुद्धिमभीप्सताम्"॥
प्रचेताः—

---

१ क चापि।

"अमीमांसा बहिःशास्त्रा ये चान्ये वेदवर्जिताः। यत्ते ब्रूयुर्न तत्कुर्याद्वेदाद्धर्मो विधीयते"॥इति।
चतुर्विंशतिमते—
"अर्हच्चार्वाकवाक्यानि बौद्धा[1]दिपठितानि च। विप्रलंभकवाक्यानि तानि सर्वाणि वर्जयेत्" ॥ इति।

इति स्मृतिप्रशंसा

अथ श्रुतिस्मृत्यादीनां बलाबलनिरूपणम्। मनुः (२।१४)
"श्रुतिद्वैधं तु यत्र[2] स्यात्तत्र धर्मावुभौ स्मृतौ। उभावपि हि तौ धर्मौ सम्यगुक्तौ मनीषिभिः" ॥
अत्रोदाहरणमाह **स** एव (२।१५)—
"उदितेऽनुदिते चैव समयाविष्टिते तथा। सर्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिः" ॥
समयाविष्टिते उदितानुदित इत्यर्थः। अयं च यथाकल्पसूत्रं व्यवस्थितविकल्पः। तथा च **सुमंतुः**—
"धर्मशास्त्रगतिर्भिन्ना सर्वकर्मसु भारत। उदितेऽनुदिते चैव होमभेदो यथा भवेत् ॥
"तस्मिन्कुलक्रमायातमाचारं त्वाचरेद्बुधः। स[3] गरीयान्महाबाहो सर्वशास्त्रोदितादपि"॥ इति।
मनुः (४।१७८)—
"येनास्य पितरो याता येन याताः पितामहाः। तेन यायात्सतां मार्गस्तेन गच्छन्न रिष्यति"॥इति।
स्मृत्यादिद्वैधेऽपि विकल्प एव द्रष्टव्यः। तथा च **गौतमः** (१।५)—"तुल्यबलविरोधे विकल्पः" इति। तुल्यबलयोः श्रुत्योः स्मृत्योश्च विरोधे विकल्प इत्यर्थः। **लौगाक्षिः**
"श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी। अविरोधे सदा[4] कार्यं स्मार्त्तं वैदिकवत्तदा" ॥
विरोधाधिकरण**न्यायो**ऽत्रानुग्राहको द्रष्टव्यः। तथाहि– अध्वरे महावेद्यां सदोनामकस्य मंडपस्य मध्ये काचिदुदुंबरशाखा स्तंबत्वेन निखाता भवति तामुद्दिश्य वस्त्रवेष्टनं स्मर्यते– "औदुंबरी सर्वा वेष्टयितव्या" इति। तत्र संशय एषा स्मृतिः प्रमाणं न वेति। तत्र "अष्टका कर्तव्या" इत्यादिस्मृतेर्मूलवेदानुमापकत्वेन यथा प्रामाण्यम् तथैव सर्ववेष्टनस्मृतिः प्रमाणमिति पूर्वपक्षः। "औदुंबरीं स्पृष्ट्वोद्गायेत्" इति प्रत्यक्षश्रुतौ स्पर्शो विधीयते। न चासौ सर्ववेष्टने सत्युपपद्यते। तथा च सर्ववेष्टनस्मृतिमूलभूतवेदानुमानस्य प्रत्यक्षश्रुतिविरुद्धस्य कालात्ययापदिष्टत्वेन निर्मूला सर्ववेष्टनस्मृतिरप्रमाणमिति सिद्धांत इति। **संग्रहे**
"श्रुतिस्मृतिपुराणेषु विरुद्धेषु परस्परम्। पूर्वं पूर्वं बलीयः स्यादिति न्यायविदो विदुः" ॥ इति।
चतुर्विंशतिमते—
"स्मृतेर्वेदविरोधेन परित्यागो यथा भवेत्। तथैव लौकिकं वाक्यं श्रुतिबाधात्परित्यजेत्"॥ इति।
व्यासः—
"धर्मं यो बाधते धर्मः स न धर्मः कदाचन। अविरोधी तु यो धर्मः स धर्मः सद्भिरुच्यते ॥
"तस्माद्विरोधे धर्मस्य निश्चित्य गुरुलाघवम्। तयोर्भूयस्तनं विद्वान्कुर्याद्धर्मविनिर्णयः"॥ इति।
एवं स्मृत्याचारयोर्विरोधे स्मृतिर्बलीयसी। "श्रुतिस्मृतिविहितो धर्मस्तदलाभे शिष्टाचारः प्रमाणम्" इति **वसिष्ठस्मरणात्** (१।४–५)। सदाचारद्वैविध्ये तु यस्मिन्देशे यस्मिन्काले यस्मिन्पुरुषे रागद्वेषरहितस्य शिष्टत्वातिशयबुद्धिः तादृशस्याचारो मुख्यत्वेन ग्राह्यः। एतदेवाभिप्रेत्य गुरोः शिष्यानुशासने **तैत्तिरीयाः**[6] समामनंति—

---

१ **कखग**-बौद्धानि। २ **कखग**-यत्र। ३ **स**-सा। ४ **थ**-यदा। ५ **खक्ष**-स्वस्य।
६ शीक्षोपनिषदि।

" अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् । ये तत्र ब्राह्मणाः संमर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्मकामाः स्युः । यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथाः" इति॥ संमर्शिनः युक्तिकुशलाः । युक्ताः शास्त्रतत्परा आयुक्ताः तदर्थानुष्ठाननिरताः । अलूक्षाः क्रोधादिवर्जिताः । धर्मकामाः जीवन्मुक्तत्वकर्मण्यौदासीन्यमकुर्वाणाः उक्तरीत्या कस्यचिच्छिष्टाचारविशेषस्य मुख्यत्वे सत्यपरो गौणो भविष्यति न तु सर्वथैवानाचारः । एवं च सत्येकामेव तैत्तिरीयशाखामधीत्य बोधायनापस्तंबादिमतभेदेन परस्परविरुद्धमनुष्ठानमाचरतामुभयविधानां पुरुषाणां स्वस्वपुरुषपारंपर्यक्रमागत एवाचारो मुख्यः । कदाचित्तदसंभवे मतांतरेणाप्यनुष्ठानमेव श्रेयो न तु सर्वथा तल्लोपो युक्तः । **इति श्रुत्यादीनां बलाबलम् ।**

अथ **स्मृतिकर्तृनिरूपणम्** । **पराशरः** (१।२०)—

"कल्पे कल्पे क्षयोत्पत्त्या ब्रह्मविष्णुमहेश्वराः । श्रुतिस्मृतिसमाचारनिर्णेतारश्च सर्वदा "॥

क्षयसहिता उत्पत्तिः क्षयोत्पत्तिः । तयोपलक्षिता भवंति कल्पे कल्पे महाकल्पे अवांतरकल्पे च । ब्रह्मविष्णुमहेश्वरा महाकल्पावसाने क्षीयंते महाकल्पादावुत्पद्यंते । एवमवांतरकल्पानामवसाने प्रारंभे च स्मृत्यादीनां निर्णेतारो मन्वादयः क्षयोत्पत्तिभ्यामुपलक्ष्यंते । चकारेणानुक्तो धर्मः समुच्चीयते । सर्वदेत्यनेन सृष्टिसंहारप्रवाहस्यानादित्वमनंतत्वं च दर्शितम् । **स** एव (१।२१)

"न कश्चिद्वेदकर्ता च वेदं श्रुत्वा चतुर्मुखः । तथैव धर्मान् स्मरति मनुः कल्पांतरे तथा"॥

कल्पांतरे धर्मान् स्मरति इति पदत्रयं पूर्वार्धेऽपि संबध्यते । महाकल्पे चतुर्मुखः परमेश्वरेण दत्तं वेदं श्रुत्वा तत्र विप्रकीर्णान्वर्णाश्रमादिधर्मान्स्मृतिग्रंथरूपेण उपनिबध्नाति तथैव स्वायंभुवो **मनुः** प्रत्यवांतरकल्पं वेदोक्तधर्मान्ग्रथ्नाति । मनुग्रहणेनात्रि**विष्णवादय** उपलक्ष्यंते । मन्वादीनाह **याज्ञवल्क्यः** (आ. ४–५)—

" मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽगिराः । यमापस्तंबसंवर्ताः कात्यायनबृहस्पती ॥
" पराशरव्यासशंखलिखिता दक्षगौतमौ । शातातपो वसिष्ठश्च धर्मशास्त्रप्रयोजकाः " ॥

उशनःशब्दांतस्य द्वंद्वैकवद्भावः । **स्मृतिरत्ने**—

" मनुर्बृहस्पतिर्दक्षो गौतमोऽथ यमोऽगिराः । योगीश्वरः प्रचेताश्च शातातपपराशरौ ॥
" संवर्तोशनसौ शंखलिखितावत्रिरेव च । विष्ण्वापस्तंबहारीता धर्मशास्त्रप्रवर्तकाः ॥
" एते ह्यष्टादश प्रोक्ता मुनयो नियतव्रताः " ॥ **अंगिराः**—
" जाबालिर्नाचिकेतश्च स्कंदो लोकाक्षिकाश्यपौ । व्यासः सनत्कुमारश्च शंतनुर्जनकस्तथा ॥
" व्याघ्रः कात्यायनश्चैव जातुकर्णिः कपिंजलः । बोधायनश्च काणादो विश्वामित्रस्तथैव च ॥
" पैठीनसिर्गोभिलश्चेत्युपस्मृतिविधायकाः"॥ **शंखः**—"मनुयमदक्षविष्ण्वंगिरोबृहस्पत्युशनापस्तंबगौतमसंवर्तात्रेयहारीतकात्यायनशंखलिखितपराशरव्यासशातातपप्रचेतोयाज्ञवल्क्यादयः" इति ।

तथा—

" वसिष्ठो नारदश्चैव सुमंतुश्च पितामहः । बभ्रुः कार्ष्णाजिनिः सत्यव्रतो गार्ग्यश्च देवलः ॥
" जमदग्निर्भरद्वाजः पुलस्त्यः पुलहः क्रतुः । आत्रेयश्छागलेयश्च मरीचिर्मत्स्य एव च ॥
" पारस्करो ऋष्यशृंगो बैजावापस्तथैव च । इत्येते स्मृतिकर्तार एकविंशतिरीरिताः"॥ **संग्रहे**—
" अष्टाशीतिसहस्राणि मुनयो गृहमेधिनः । पुनरावर्तिनो बीजभूता धर्मप्रवर्तकाः ॥
" एतैर्यानि प्रणीतानि धर्मशास्त्राणि वै पुरा । तान्येतानि प्रमाणानि न हंतव्यानि हेतुभिः ॥

---

१ **कखगक्ष**–लक्षण । २ **कखग**–सदाचार । ३ **कखग**–श्रुत्या । ४ **कखग**–विहन्यानि ।

"यस्तानि हेतुभिर्हन्यात्सोंऽधे तमसि मज्जति"। **अग्निवेश्यः** "बोधायनमापस्तंबं सत्याषाढं द्राह्यायणमागस्त्यं शाकल्यमाश्वलायनं शांभवीयं कात्यायनमिति नवानि पूर्वसूत्राणि। वैखानसं शौनकीयं भारद्वाजमाग्निवेश्यं जैमिनियं माधुर्यं माध्यंदिनं कौंडिन्यं कौषीतकमिति नवान्यपरसूत्राण्यष्टादशसंख्याकाः शारीराः संस्काराः" इति। इति **स्मृतिकर्तृनिरूपणम्** ॥

अथ **धर्मदेशाः**। **याज्ञवल्क्यः** (१।२) "यस्मिन्देशे मृगः कृष्णः तस्मिन्धर्मान्निबोधत"। कृष्णसारो मृगो यस्मिन्देशे स्वच्छंदं विहरति तस्मिन्देशे धर्मा अनुष्ठेया इत्यर्थः। तथा **संवर्त्तः**—

"स्वभावाद्यत्र विचरेत्कृष्णसारः सदा मृगः। धर्मदेशः स विज्ञेयो द्विजानां कर्मसाधनम्"॥

स्मृतिचंद्रिकायां

"कृष्णसारैर्यवैर्दर्भैश्चातुर्वर्ण्याश्रमैस्तथा। समृद्धो धर्मदेशः स्यादाश्रयेरन्विपश्चितः"॥

मनुः (२।१७–१८)—

"सरस्वतीदृषद्वत्योर्देवनद्योर्यदंतरम्। तं देवनिर्मितं देशं ब्रह्मावर्तं प्रचक्षते॥

"यस्मिन्देशे य आचारः पारंपर्यक्रमागतः। वर्णानां सांतरालानां स सदाचार उच्यते"॥

सांतरालानां वर्णसंकरजसहितानां। स सदाचारः तस्य धर्मं प्रति प्रामाण्यमित्यर्थः।

स एव (२।१९–२३)—

"कुरुक्षेत्रं च मत्स्याश्च पांचालाः शूरसेनयः। एष ब्रह्मर्षिदेशो वै ब्रह्मावर्तादनंतरः"॥

अनंतरः किंचिन्न्यूनः।

"एतद्देशप्रसूतस्य सकाशादग्रजन्मनः। स्वं स्वं चरित्रं शिक्षंते पृथिव्यां सर्वमानवाः"॥

अग्रजन्मनः ब्राह्मणस्य। शिक्षंतेऽवगच्छंति।

"हिमवद्विंध्ययोर्मध्यं यत्प्राग्विनशनादपि। प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः"॥

विनशनं सरस्वत्या अंतर्धानदेशः।

"आ समुद्रात्तु वै पूर्वादा समुद्रात्तु पश्चिमात्। तयोरेवांतरं गिर्योरार्यावर्त्तं विदुर्बुधाः॥

"कृष्णसारस्तु चरति मृगो यत्र स्वभावतः। स ज्ञेयो याज्ञिको देशो म्लेच्छदेशस्त्वतः परम्"॥

अतःपरं एभ्यो ब्रह्मावर्त्तादिभ्योऽन्यः। म्लेच्छा यज्ञानधिकृताः।

"एतान्द्विजातयो देशान्संश्रयेरन्प्रयत्नतः। शूद्रस्तु यस्मिन्कस्मिंश्चिन्निवसेद्वृत्तिकर्शितः"॥

हारीतः (१।१६)—

"कृष्णसारो मृगो यत्र स्वभावेन प्रवर्त्तते। तस्मिन्देशे वसन्धर्मैः सिध्यंति द्विजपुंगवाः"॥

व्यासः

"ब्रह्मावर्त्तः परो देशो ऋषिदेशस्त्वनंतरः। मध्यदेशस्ततो न्यून आर्यावर्तस्त्वनंतरः॥

"चातुर्वर्ण्यव्यवस्थानं यस्मिन्देशे न विद्यते। तं म्लेच्छदेशं जानीयादार्यावर्त्तमतः परम्"॥

न म्लेच्छदेशे श्राद्धं कुर्यान्न गच्छेन्म्लेच्छविषयमिति॥ **आदिपुराणे**—

"अधर्मदेशमध्ये तु कृत्वा क्रतुशतान्यपि। न गच्छति द्विजश्रेष्ठ स्वर्गमार्गं महानपि"॥

चंद्रिकायां—

"आर्यावर्त्तमतिक्रम्य विना तीर्थक्रियां द्विजः। आज्ञां चैव तथा पित्रोरैंदवेन विशुध्यति"॥

आपस्तंबः (१।१५।२२) "प्रभूतैधोदकग्रामे यत्रात्माधीनं प्रयमणं तत्र वासो धर्म्यो ब्राह्मणस्य"। प्रभूतानि एधांसि उदकं च यस्मिन् तस्मिन्ग्रामे ब्राह्मणस्य वासो धर्म्यः। तत्रापि

---

१ क-स्मृति

२-[स्मृ. मु. फ.]

न सर्वत्र। किं तर्हि यत्रात्माधीनं प्रयमणं प्रायत्यं मूत्रपुरीषप्रक्षालनादीनि यत्रात्माधीनानि तत्र। यत्र तु कूपेष्वेवोदकं तत्र बहुकूपेष्वपि न वस्तव्यम्। यदाह **बोधायन:**

"उदपानोदके ग्रामे धार्मिको वृषलीपतिः। उषित्वा द्वादशसमाः शूद्रसाधर्म्यमृच्छति" ॥

यथा वृषलीपतिः शूद्रसाधर्म्यमृच्छति तथा धार्मिकोऽपि एवंविधे ग्रामे वसन्शूद्रसाधर्म्यं प्राप्नोतीत्यर्थः। **संग्रहे**—

"कूपस्नानं तु यो विप्रः कुर्याद्द्वादशवार्षिकम्। स तेनैव शरीरेण शूद्रत्वं यात्यसंशयः" ॥ इति।

मनुः (४।६०–६१)

"नाधार्मिके वसेद्ग्रामे न व्याधिबहुले भृशम्। नैव प्रपद्येताध्वानं न चिरं पर्वते वसेत् ॥

"न शूद्रराज्ये निवसेन्नाधार्मिकजनावृत्ते। न पाषंडजनाकीर्णे नोपसृष्टेऽत्यजैर्नरैः" ॥

उपसृष्टे गृहीते उपद्रुते वा। **व्यासः**—

"पापदेशाश्च ये केचित् पापैरध्युषिता जनैः। गत्वा देशानपुण्यांस्तु कृत्स्नं पापं समश्नुते" ॥

चंद्रिकायां—

"सौराष्ट्रं सिंधुसौवीरमावंत्यं दक्षिणापथम्। गत्वैतान्कामतो देशान्कलिंगांश्च पतेद्विजः ॥

"अंगवंगकलिंगांध्रान्पार्वतीयान् खषांस्तथा। सिंधुसौवीरसौराष्ट्रान्पारदानांध्रमालवान् ॥

"निवासाय द्विजो नित्यमनापदि विवर्जयेत्। एतानप्यापदि गृही संश्रयेद्वृत्तिकर्शितः" ॥

बोधायनः (१।१।२९–३१)

"आवंतयोऽगा मगधा सौराष्ट्रा दक्षिणापथाः। उपावृत्सिंधुसौवीरा एते संकीर्णयोनयः ॥

"सिंधुसौवीरसौराष्ट्रांस्तथा प्रत्यंतवासिनः। अंगवंगकलिंगांश्च गत्वा संस्कारमर्हति ॥"

प्रत्यन्तवासिनः चंडालप्रदेशाः "आरट्टान्कारस्करान्पुण्ड्रान् सौवीरान् वंगकलिंगान् प्राग्यूनानि च गत्वा पुनस्तोमेन यजेत् सर्वपृष्ठ्या वा (३०)"। अथाप्युदाहरंति (३१)

"पद्भ्यां स कुरुते पापं यः कलिंगान् प्रपद्यते। ऋषयो निष्कृतिं तस्य प्राहुर्वैश्वानरं हविः" ॥ इति।

इति **धर्मदेशनिरूपणम्**। अथ **निषिद्धदेशापवादाः**। **व्यासः**—

"ते देशास्ते जनपदास्ते शैलास्ते तथाश्रमाः। पुण्यत्रिपथगा येषां मध्ये याति सरिद्वरा ॥

"प्रभासे पुष्करे काश्यां निमिषेऽमरकंटके। गंगायां सरयूतीरे निवसेद्धार्मिको जनः ॥

"अंतर्वेदिर्मध्यदेशो ब्रह्मावर्त्तं च याज्ञियम्। मिश्रकं सरयूतीरं पुष्करं नैमिषं तथा ॥

"देशानेतान्निवासाय संश्रयेरन् द्विजातयः" ॥ **धर्मशास्त्रसारे**—

"चांद्रायणानि कृच्छ्राणि महासांतपनानि च। प्रायश्चित्तानि दीयंते यत्र गंगा न विद्यते ॥

"कावेरी तुंगभद्रा च कृष्णा वेणी च गौतमी। भागीरथी च विख्याताः पंचगंगाः प्रकीर्तिताः" ॥

पितामहः—

"शूद्रराज्येऽपि निवसेद्यदि मध्ये तु जान्हवी। सोऽपि पुण्यतमो देशो नार्यैरपि समाश्रितः" ॥

गौतमः (९।६५) "प्रभूतैधोदकयवसकुशमाल्योपनिष्क्रमणमार्यजनभूयिष्ठमनलससमृद्धं धार्मिकाधिष्ठितं निकेतमावसितुं यतेत"। एधाः काष्ठादीनि। 'इध्ममेधः समित्' इत्य**मरकोशे** (२।४।१३)। साहचर्यनियमेन नपुंसकलिंगत्वमेवोचितमेधःशब्दस्य। तथाहि **पांड्यकुलोदये** "स्थापिते सदसि जातवेदसि प्रापितैधसमभीरतेजसि" इति। अत्र तु आर्षोऽयमेधःशब्द अकारांतः। एधाः काष्ठादीनि। पाकाद्यर्थमुदकं स्नानपानयोग्यम्। यवसास्तृणानि गवाद्यर्थम्। अत्रापि समाधानं तु पूर्ववत्। कुशा दर्भा इष्ट्याद्यर्थम्। माल्यानि पुष्पाणि देवतार्चनार्थम्। उपनिष्क्रमणं बाह्यसंचारार्थमव-

---

१ **कख**–पाठः। २ इदंतु **क**–गौ न पठतः। ३ **ख**–गणा। ४ **ख**–सो **प**–पद्यपि। ५ **क**–प्रानूनानि। ६ **खगक्ष**–ष्ण।

काशः । एधादीनि प्रभूतानि यत्र । आर्यास्त्रैवर्णिकाः, तैर्जनैर्भूयिष्ठं व्याप्तम् । अलसाः कृत्येषु निरुद्यमाः । तद्विपरीता अनलसास्तैः समृद्धम् । धार्मिकैरधिष्ठातृभिरधिष्ठितमेवंभूतं निकेतनं स्थानमावसितुं यतेत । एवंभूते स्थाने यत्नैरपि निवसेदित्यर्थः । इति **निषिद्धदेशापवादाः ।**

अथ युगधर्माः । मनुः (१।६७, ६९)

" दैवे रात्र्यहनी वर्षं प्रविभागस्तयोः पुनः । अहस्तत्रोदगयनं रात्रिः स्याद्दक्षिणायनम् ॥

"चत्वार्याहुः सहस्राणि वर्षाणां तत्कृतं युगम् । तस्य तावच्छती संध्या संध्यांशश्च तथाविधः " ॥

वर्षाणां देववर्षाणाम् । संध्या युगारंभकालः । संध्यांशः युगावसानकालः ।

"इतरेषु ससंध्येषु ससंध्यांशेषु च त्रिषु । एकापायेन वर्तंते सहस्राणि शतानि च" (१।७०)॥

इतरेषु त्रेताद्वापारकलियुगेषु । एकापायेन एकलोपेन । **पराशरः—**

" कृतं त्रेता द्वापरं च कलिश्चेति चतुर्युगम् । दिव्यैर्वर्षसहस्रैस्तु तद्द्वादशभिरुच्यते " ॥

मनुः (१।८३)—

" अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशतायुषः । कृते त्रेतादिषु त्वेषां वयो ह्रसति पादशः " ॥

यत्पुनः इतिहासपुराणेषु बहुवर्षसहस्रजीवित्वमुक्तं तत्तेषां श्रद्धातपसा साधितमिति वेदितव्यम् । तथा च **महाभारते** कृतयुगपुरुषानधिकृत्योच्यते

"यावद्यावदभूच्छ्रद्धा देहं धारयितुं नृणाम् । तावत्तावदजीवंस्ते नासीद्यमकृतं भयम् ॥ " इति ।

स एव (१।८४–८६)—

" वेदोक्तमायुर्मर्त्यानामाशिषश्चैव कर्मणाम् । भवंत्यनुयुगं लोके प्रभावाश्च शरीरिणाम् " (८४) ॥

आयुश्चतुर्वर्षशतादि । आशिषः फलानि । प्रभावः शापानुग्रहादिशक्तिः । अनुयुगं युगानुरूप्येण पूर्णानि । हीनानि हीनतराणि हीनतमानीत्यर्थः ।

" अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरे परे । अन्ये कलियुगे नृणां युगह्रासानुरूपतः (८५) ॥

"तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते । द्वापरे यज्ञमेवाहुर्दानमेव कलौ युगे " (८६)॥

परं प्रधानमित्यर्थः । युगस्वभावकृतेतरधर्मानादर एवकाराभ्यां सूचितः । **पराशरः** (१।२३)–

" कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः । द्वापरे शंखलिखितौ कलौ पाराशराः स्मृताः"॥

"अभिगम्य कृते दानं त्रेतास्वाहूय दीयते । द्वापरे याचमानाय सेवया दीयते कलौ " ॥

युगस्वभावेनैवमेव दीयत इत्यर्थः । **स एवाह** (१।२९, २५)—

" अभिगम्योत्तमं दानमाहूयैव तु मध्यमम् । अधमं याचमानाय सेवादानं तु निष्फलम् ॥

" त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत् । द्वापरे कुलमेकं तु कर्तारं तु कलौ युगे" ॥

पतितो यस्मिन्देशे निवसेत्तं देशं वर्जयेत् । कुलत्यागो नाम पतितस्य कुले विवाहभोजनाद्यप्रवृत्तिः । कर्मत्यागः संभाषणादिवर्जनम् ।

" कृते संभाषणादेव त्रेतायां स्पर्शनेन च । द्वापरे त्वन्नमादाय कलौ पतति कर्मणा (२६) ॥

" कृते तत्क्षणतः[3] शापस्त्रेतायां दशभिर्दिनैः । द्वापरे त्वेकमासेन कलौ संवत्सरेण तु (२७) ॥

"कृते त्वस्थिगताः प्राणास्त्रेतायां मांसमाश्रिताः । द्वापरे रुधिरं चैव कलौ त्वन्नादिषु स्थिताः" (३२)॥

इति युगधर्मनिरूपणम्,

कलिसामर्थ्यं प्रपञ्चयति **स** एव (अ. १ श्लो. ३०–३१)

" जितो धर्मो ह्यधर्मेण सत्यं चैवानृतेन च । जिताश्चौरैस्तु राजानः स्त्रीभिश्च पुरुषाः कलौ ॥

---

१ क–आयुः । २ क्ष–कर्तृ । ३ क्ष–क्षणिकः । ४ क्ष–कृतो ।

" सीदंति चाग्निहोत्राणि गुरुपूजा प्रणश्यति। कुमार्यश्च प्रसूयंते तस्मिन्कलियुगे सदा " ॥
अधर्मस्य जयो नाम पादत्रयोपेतत्वम्। एकेन पादेन वर्तमानत्वं धर्मस्य पराजयः॥
तथा **माधवीये पराशरे** (पृ. ८२. पं १-५)
" कृते चतुष्पात्सकलो व्यां[1]जोपाधिविवर्जितः। वृषः प्रतिष्ठितो धर्मो मनुष्येष्वभवत्पुरा॥
" धर्मः पादविहीनस्तु त्रिभिरंशैः प्रतिष्ठितः। त्रेतायां द्वापरेऽर्धेन व्यामिश्रो धर्म इष्यते॥
"त्रिपादहीनस्तिष्ये तु सत्तामात्रेण तिष्ठति"। **विष्णुपुराणे मैत्रेयं प्रति पराशरः** (६।१)—
" सर्वे ब्रह्म वदिष्यंति संप्राप्ते तु कलौ युगे। नानुतिष्ठंति मैत्रेय शिश्नोदरपरायणाः॥
" यदा यदा सतां हानिर्वेदमार्गानुसारिणाम्। तदा तदा कलेर्वृद्धिरनुमेया विचक्षणैः॥
" मुखं दग्धं परान्नेन हस्तौ दग्धौ प्रतिग्रहात्। मनो दग्धं परस्त्रीभिर्ब्रह्मशापः कु[2]तः कलौ॥
" वर्णाश्रमाचारवती प्रवृत्तिर्न कलौ नृणां। न[3] सामयजूऋग्धर्मविनिष्पादनहेतुकी॥
" विवाहा न कलौ धर्म्या न शिष्यगुरुसंस्थितिः। न दांपत्यक्रमो नैव वन्हिदेवार्चनक्रमः॥
" सर्वमेव कलौ शास्त्रं यस्य यद्वोचते द्विज। देवताश्च कलौ सर्वाः सर्वः सर्वस्य चाश्रमः॥
" धर्मो यथाभिरुचितैरनुष्ठानैरनुष्ठितः। वित्तेन भविता पुंसां स्वल्पेनाढ्यमदः कलौ॥
" परित्यजंति भर्त्तारं वित्तहीनं तथा स्त्रियः। भर्त्ता भविष्यति कलौ वित्तवानेव योषिताम्॥
"अर्थाश्चात्मोपभोगार्था भविष्यंति कलौ युगे। स्त्रियः कलौ भविष्यंति स्वैरिण्यो ललितस्पृहाः॥
" अस्नानभोजिनो नाग्निदेवतातिथिपूजकाः। करिष्यंति कलौ प्राप्ते न च पिंडोदकक्रियाः॥
" दुर्भिक्षभयपीडाभिरतीवोपद्रुता जनाः। गोधूमान्नयवान्नाढ्यं देशं यास्यंति दुःखिताः॥
" वेदमार्गे प्रलीने तु पाषंडाढ्ये ततो जने। अधर्मवृत्त्या लोकानामल्पमायुर्भविष्यति॥
" श्वश्रूश्वशुरभूयिष्ठा गुरवश्च नृणां कलौ। स्यालाद्याहार्यभार्याश्च सुहृदो मुनिसत्तम॥
"कस्य माता पिता कस्य सदा कर्मात्मकः पुमान्। इति चोदाहरिष्यंति श्वशुरादिगता नराः॥
" निःस्वाध्यायवषट्कारे स्वधास्वाहाविवर्जिते। तदा प्रविरलो धर्मः क्वचिल्लोकेऽपि वत्स्यति॥
"तत्राल्पेनैव यत्नेन पुण्यस्कंधमनुत्तमम्। करोति तं कृतयुगे क्रियते तपसा हि यः "॥ इति।
कूर्मपुराणे (पूर्वार्ध अ. ३०)
"राजानः शूद्रभूयिष्ठा ब्राह्मणान्घातयंति च। भ्रूणहत्यावीरहत्या प्रजायेते प्रजासु वै॥ ७॥
"विनिंदंति महादेवं ब्रह्माणं पुरुषोत्तमम्। आम्नायं धर्मशास्त्राणि पुराणानि कलौ युगे॥ ९॥
" शुक्लदंता धृताक्षाश्च मुंडाः काषायवाससः। शूद्रा धर्मं चरिष्यंति युगांते समुपस्थिते॥१३॥
"ताडयंति द्विजेंद्रांश्च शूद्रा राजोपसेविनः। सेवावसरमालोक्य द्वारि तिष्ठंति वै द्विजाः॥१७,२०॥
"वाहनस्थान् समावृत्य शूद्रान् शूद्रोपसेविनः। सेवंते ब्राह्मणास्तत्र स्तुवंति स्तुतिभिः कलौ॥२१॥
"अध्यापयंति वै वेदान् शूद्राणां शूद्रसेवकाः। पठंति वैदिकान् शब्दान् नास्तिका घोरमाश्रिताः॥२२॥
" तपोयज्ञफलानां च विक्रेतारो द्विजोत्तमाः। यतयश्च भविष्यंति शतशोऽथ सहस्रशः॥ २३॥
" नाशयंति ह्यधीतानि नाधिगच्छंति चानघ। गायंति लौकिकैर्गानैर्दैवतानि नराधिप॥ २४॥
"वामाः पाशुपताचारास्तथा वै पांचरात्रिकाः। भविष्यंति कलौ तस्मिन्ब्राह्मणाः क्षत्रियास्तथा॥२५॥
"कुर्वंति चावताराणि ब्राह्मणानां कुलेषु वै। दधीचिशापनिर्दग्धाः पुरा दक्षाध्वरे द्विजाः॥२७॥
" निंदंति च महादेवं तमसाविष्टचेतसः। ये चान्ये शापनिर्दग्धा गौतमस्य महात्मनः॥ २८॥
" सर्वे तेऽवतरिष्यंति ब्राह्मणाद्यासु योनिषु। विनिंदंति हृषीकेशं ब्राह्मणा ब्रह्मवादिनः "॥३०॥

---

१ क-निर्व्याजोपाधिवर्जितः। २ क-रुतः। ३ क्ष-ससाम। ४ क्ष-जिता।

युगसामर्थ्यवर्णनस्य प्रयोजनमाह पाराशरः (१।३३)

"युगे युगे च ये धर्मास्तत्र तत्र च ये द्विजाः । तेषां निंदा न कर्त्तव्या युगरूपा हि ते द्विजाः"॥ युगरूपा युगानुरूपाः कालपरतंत्रा इति यावत् । अत्र **माधवीये**-नन्वेवं कलौ पापिनां अनिंद्यत्वात्कृत्स्नं धर्माधर्मव्यवस्थापकं शास्त्रं विप्लवेत । अतः कथमनिंदेति । तत्रोच्यते–नानामुनिभिस्तत्तद्युगसामर्थ्यस्य उचितप्रायश्चित्तस्य प्रपंचितत्वात्तदुभयं पर्यालोच्य निंदानिंदयोर्व्यवस्था कल्पनीया । यः पुरुषो युगे सामर्थ्यमनुसृत्य विहितानुष्ठानं प्रतिषिद्धवर्जनं प्रमादतः कृतपापस्य प्रायश्चित्तं यः कर्तुं शक्तोऽपि न कुर्यात्तद्विषयाणि 'भ्रूणहत्या पितुस्तस्य सा कन्या वृषली स्मृता' इत्यादीनि निंदावचनानि। अशक्तविषयं तेषां निंदा न कर्त्तव्येतिवचनम्। तस्मान्न कोऽपि धर्मशास्त्रस्य विप्लव इति । तदाह **पराशरः** (१।३४)—

"युगे युगे तु सामर्थ्यं शेषं मुनिविभाषितं । पराशरेण चाप्युक्तं प्रायश्चित्तं विधीयते"॥ इति । शेषं विशिष्टम् । तत्तद्युगसामर्थ्यं **मन्वादिमुनि**भिर्विशेषेण भाषितं **पराशरेणा**प्युक्तं प्रायश्चित्तं च तैर्विधीयते । अतः शक्ताशक्तविषये निंदानिंदे इत्यर्थः । **व्यासः**—

"यत्कृते दशभिर्वर्षैस्त्रेतायां हायनेन तत् । द्वापरे तच्च मासेन ह्यहोरात्रेण तत्कलौ ॥

"ध्यायन्कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन् । यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम् ॥

"अनेकदोषयुक्तस्य कलेरेष महान्गुणः । विशेषाद्ब्राह्मणो रुद्रमीशानं शरणं व्रजेत्"॥

शिवसर्वस्वे

"यावन्न कीर्त्तयेद्रामं कलिकल्मषसंभवम्। तावत्तिष्ठति देहेऽस्मिन्भयं चात्र प्रवर्त्तते"॥

च्यवनस्मृतौ—

"श्रुतिस्मृतिपुराणेषु रामनाम समीरितम् । तन्नामकीर्तनं भूयस्तापत्रयविनाशनम्"॥ **बृहस्पतिः**

"कृते यद्द्वधर्मः स्यात्त्रेतायां तु ऋतुत्रयात् । द्वापरे तु त्रिपक्षेण कलावन्हा च तद्भवेत् ॥

"न च वृत्तं न शुद्धार्थो न शुद्धिर्मनसः कलौ । यतोऽतः सत्यमेवैकं नराणामुपकारकम्"॥

अथ कलियुगनिषिद्धधर्माः । पराशरः—

"ऊढायाः पुनरुद्वाहो ज्येष्ठांशं गोवधं तथा । कलौ पंच न कुर्वीत भ्रातृजायां कमंडलुम्"॥

स्मृत्यर्थसारे—

"देवरेण सुतोत्पत्तिर्वानप्रस्थाश्रमग्रहः । दत्ताक्षतायाः कन्यायाः पुनर्दानं परस्य च ॥

"समुद्रयात्रास्वीकारः कमंडलुविधारणम् । महाप्रस्थानगमनं गोपशुश्च सुराग्रहः ॥

"अग्निहोत्रहवण्याश्च लेहोलीढापरिग्रहः । असवर्णासु कन्यासु विवाहश्च द्विजातिषु ॥

"वृत्तस्वाध्यायसापेक्षमघसंकोचनं तथा । अस्थिसंचयनादूर्ध्वमंगस्पर्शनमेव च ॥

"प्रायश्चित्तविधानं च विप्राणां मरणांतिकम् । संसर्गदोषः पापेषु मधुपर्के पशोर्वधः ॥

"दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः । शामित्रं चैव विप्राणां सोमविक्रयणं तथा ॥

"दीर्घकालं ब्रह्मचर्यं नरमेधाश्वमेधकौ । कलौ युगे त्विमान्धर्मान्वर्ज्यानाहुर्मनीषिणः"॥ इति ।

धर्मशास्त्रसुधानिधौ

"गोत्रान्मातृसपिंडात्तु विवाहो गोवधस्तथा । विधवायां प्रजोत्पत्तिर्देवरस्य नियोजनम् ॥

"आततायिद्विजाग्र्याणां धर्मयुद्धेन हिंसनम् । द्विजस्याब्धौ तु निर्याणं शोधितस्यापि संग्रहः ॥

"सत्रदीक्षा च सर्वेषां कमंडलुविधारणम् । महाप्रस्थानगमनं गोसंज्ञप्तिश्च गोसवे ॥

---

१ क्ष-मनुष्यत्वात्। २ कखग-प्रस्थपरि। ३ ख-लीलौ ल्रोह्या। ४ कग-कलौ।

" सौत्रामण्यामपि सुराग्रहणस्य च संग्रहः । संसर्गदोषः स्तेनाद्यैर्महापातकनिष्कृतिः ॥
" वरातिथिपितृभ्यश्च पशूपाकरणक्रिया । सवर्णानां तथा दुष्टैः संसर्गः शोधितैरपि ॥
" अयोनौ संग्रहे वृत्ते परित्यागो गुरुस्त्रियाः । शूद्रेषु दासगोपालकुलमित्रार्धसीरिणाम् ॥
" भोज्यान्नता गृहस्थस्य तीर्थसेवा च दूरतः । शिष्यस्य गुरुदारेषु गुरुवद्वृत्तिरीरिता ॥
"आपद्वृत्तिर्द्विजाग्र्याणामश्वस्तनिकता तथा । ब्राह्मणानां प्रवासित्वं मुखाग्निधमनक्रिया ॥
" बलात्कारादिदुष्टस्त्रीसंग्रहो विधिचोदितः । यतेस्तु सर्ववर्णेषु भिक्षाचर्या विधानतः ॥
" नवोदके दशाहं च दक्षिणा गुरुचोदिता । ब्राह्मणादिषु शूद्रस्य पचनादिक्रियाऽपि च ॥
" भृग्वग्निपतनैश्चैव वृद्धादिमरणं तथा ॥
" गोतृप्तिशिष्टे पयसि शिष्टैराचमनक्रिया । पितापुत्रविरोधेषु साक्षिणां दंडकल्पनम् ॥
" यत्र सायं गृहस्थत्वं सूरिभिस्तत्त्वतत्परैः । एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः ॥
" निवर्तितानि कर्माणि व्यवस्थापूर्वकं बुधैः । समयश्चापि साधूनां प्रमाणं वेदवद्भवेत् " ॥

कलौ देवरेण पुत्रोत्पादनं प्रतिषेधत्यापस्तंबः (२।२७।२-६) "सगोत्रस्थानीयां न परेभ्यः समाचक्षीत । सगोत्रायैव तु समाचक्षीत । कुलायैव हि स्त्री प्रदीयत इत्युपदिशंति । तदिंद्रियदौर्बल्यं विप्रतिपन्नमविशिष्टं हि परत्वं पाणेस्तव्द्यतिक्रमे खलु पुनरुभयोर्नरकः" इति । अनपत्यो भर्त्ता तत्पित्रादिर्वा सगोत्रस्थानीयां भार्यां स्नुषां वा न परेभ्योऽसगोत्रेभ्यः समाचक्षीत । अस्यामपत्यमुत्पाद्यमिति स्वगोत्राय देवराय सपिंडेभ्यो वा समाचक्षीत । कुलायैव हि स्त्री प्रदीयत इति । तदद्य विप्रतिपन्नं विप्रतिषिद्धं भर्त्तुर्व्यतिक्रमे इंद्रियपारंतत्र्यादतिप्रसंगः स्यादिति देवरादिपाणेरपि गृहीतात्पाणेरन्यत्त्वाविशेषादित्यर्थः ॥

अथ कर्मपरिभाषा

"मुख्यकाले यदावश्यं कर्म कर्त्तुं न शक्यते । गौणकालेऽपि कर्त्तव्यं गौणोऽप्यत्रेदृशो भवेत्" ॥ इति ।

स्मृतिरत्नावल्याम्—

" स्वकालादुत्तरो गौणः कालः पूर्वस्य कर्मणः । यद्वाऽऽगामिक्रियामुख्यकालस्याप्यंतरालवत् ॥
" गौणकालत्वमिच्छंति केचित्प्राक्तनकर्मणि । गौणेष्वेतेषु कालेषु कर्म चोदितमाचरन् ॥
" प्रायश्चित्तप्रकरणे प्रोक्तां निर्वृत्तिमाचरेत् । प्रायश्चित्तमकृत्वा न गौणकाले समाचरेत् ॥
" दिवोदितानि कर्माणि प्रमादादकृतानि वै । यामिन्याः प्रहरो यावत्तावत्कर्माणि कारयेत् ॥
" मुख्यकाले हि मुख्यं चेत्साधनं नैव लभ्यते । तत्कालद्रव्ययोः कस्य मुख्यत्त्वं गौणताऽपि वा ॥
"मुख्यं कालं समाश्रित्य गौणमप्यस्तु साधनम् । न मुख्यद्रव्यलोभेन गौणकालप्रतीक्षणम्" ॥ इति ।

स्कान्दे—

"आत्मा पुत्रः पुरोधाश्च भ्राता पत्नी पिता सखा । इज्यायां धर्मकार्ये च जायंते प्रतिरूपकाः ॥
" एभिः कृतं महादेवि स्वयमेव कृतं भवेत् " ॥ इति । **संग्रहे**—

"रात्रौ प्रहरपर्यंतं दिवाकृत्यानि कारयेत् । ब्रह्मयज्ञं च सौरं च वर्जयित्वा विशेषतः" ॥ इति ।

कात्यायनः—

" यत्रोपदिश्यते कर्म कर्त्तुरंगं न तूच्यते । दक्षिणस्तत्र विज्ञेयः कर्मणां पारगः करः " ॥ इति ।

मनुः

" कुत्सिते[२] वामहस्तः स्याद्दक्षिणः स्यादकुत्सिते । यज्ञोपवीतिना कार्यं सर्वं कर्म प्रदक्षिणम् ॥
" आसीन ऊर्ध्वः प्रव्हो वा नियमो यत्र नेदृशः । तदासीनेन कर्त्तव्यं न प्रव्हेन न तिष्ठता " ॥

---

१ **कखग**-तस्य । २ **कखग**-नो ।

कात्यायनः
"यत्र दिङ्नियमो न स्याज्जपहोमादिकर्मसु। तिस्रस्तत्र दिशः प्रोक्ता ऐंद्री सौमी तदंतरा"॥इति।
स्मृतिचंद्रिकायाम्—
"मनः प्रसादात्सत्योक्त्या तपसा स्नानकर्मणा। आचम्य चात्मनः शुद्धिं कृत्वा कर्म समाचरेत्॥
"संकल्पः कर्मणामादौ वैदिकानां विधीयते। इदं कर्म करिष्यामीत्युच्चार्य त्वाचरेत्ततः"॥इति।
आश्वलायनः—
"प्रधानस्य क्रियायां तु सांगं तत्क्रियते पुनः। तदंगाकरणे कुर्यात्प्रायश्चित्तं न कर्म तत्॥
"प्रवृत्तमन्यथा कुर्याद्यदि मोहात्कथंचन। यतस्तदन्यथाभूतं तत एव समापयेत्॥
"समाप्तं यदि जानीयान्मयैतदयथाकृतम्। तावदेव पृथक्कुर्यान्निवृत्तिं सर्वकर्मणाम्"॥**शातातपः—**
"बह्वल्पं वा स्वगृह्योक्तं यस्य कर्म प्रचोदितम्। तस्य तावति शास्त्रार्थे कृते सर्वं कृतं भवेत्॥
"श्रौतेषु सर्वशाखोक्तं सर्वस्यैव यथोचितम्। स्मार्त्तं साधारणं तेषु गार्ह्येष्वपि च कर्मसु॥
"सर्वशाखोपसंहाराद्युक्तः श्रौतो यथाविधिः। सर्वस्मृत्युपसंहारात्स्मार्त्तोऽप्युक्तस्तथा विधिः"॥इति।
स्मृत्यर्थसारे
"प्राचीदिशामनुक्तौ स्यादुदीचीशानदिक् तथा। तिष्ठत्वप्रह्वतानुक्तावासीनत्वं च कर्मसु॥
"प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्त्तते। स नाप्नोति फलं तस्य परत्रेति श्रुतिस्मृती"॥
"न सांपरायिकं तस्य दुर्मतेर्विद्यते फलमिति" पाठांतरम्।
"सामयाचारिका धर्मा जातिभेदकुलोद्भवाः। ग्रामाचाराः परिग्राह्या ये च विध्यविरोधिनः॥
"युगधर्माः परिग्राह्याः सर्वत्रैव यथोचितम्"। इति। **कात्यायनः—**
"यन्नाम्नातं स्वशाखायां पारक्यं न विरोधि च। विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादि कर्मवित्॥
"आत्मतंत्रे तु यन्नोक्तं तत्कुर्यात्पारतंत्रिकम्" इति॥ पारक्यं परकीयम्। स्वसूत्रोक्तं कर्म परित्यज्य पारक्यं कर्म कुर्वतो दोषमाह **दक्षः—**
"स्वकं कर्म परित्यज्य यदन्यत्कुरुते द्विजः। अज्ञानादथवा ज्ञानात्त्यक्तेन पतितो भवेत्"॥
स्वसूत्रालाभे **वृद्धमनुः—**
"स्वसूत्रेऽविद्यमाने तु परसूत्रेण वर्तते। बोधायनमतं कृत्वा स्वसूत्रफलभाग्भवेत्॥
"विधिदृष्टं तु यत्कर्म करोत्यविधिना तु यः। फलं न किंचिदाप्नोति क्लेशमात्रं तु तस्य तत्"॥ इति।
स्मृत्यंतरे—
"अकाले यत्कृतं कर्म कालं प्राप्य पुनः क्रिया। कालातीतं तु यत्कुर्यादकृतं तद्विनिर्दिशेत्"॥ इति।
आश्वलायनः
"श्रौतं वा यत्र पौराणं स्मार्त्तं वापि विनिर्णये। गीर्दृढा तत्र न चलेन्न्यायाद्वा स्वानुमानतः॥
"यत्र गीरदृढा तत्र कुर्याच्चैवानुमानतः॥
"यत्र यद्यथा प्रोक्तं तत्र कुर्यात्तथा च तत्। नान्यथा स्वानुमानेन कुर्यात्प्राज्ञोऽपि मानवः"॥ इति।
भारद्वाजः—
"आसनं स्वस्तिकं प्रोक्तं जपादीनि प्रकुर्वतः। कुशे शय्यासनं वापि वीरासनमथापि वा॥
"जानूर्वोरंतरे सम्यक् कृत्वा पादतले उभे। ऋजुकायः समासीनः स्वस्तिकं तत्प्रचक्षते॥
"एकं पादमथैकस्मिन्विन्यस्योरौ तु संस्थितः। इतरस्मिंस्तथा चोरुं वीरासनमुदीरितम्॥
"उर्वोरुपरि विप्रेंद्र कृत्वा पादतले उभे। अंगुष्ठौ चानुबध्नीयाद्धस्ताभ्यां व्युत्क्रमेण तु॥
"पद्मासनं वदेदेतत्सर्वेषामपि पूजितम्"॥

---

१ क-उदक्कर्म। २ क-यद्येतत्। ३ खग-पुनः। ४ ङ-न्नावृत्तिः। ५ ङ-क्रियते।

स्मृत्यर्थसारे—

" उपात्ते तु प्रतिनिधौ मुख्यार्थो यदि लभ्यते । तत्र मुख्यमनादृत्य गौणेनैव समापयेत् ॥
" मुख्याभावे यदा गौणमुपात्तं सद्विनश्यति । तत्र मुख्योपमं गौणं ग्राह्यं गौणोपमं न तु ॥
" यस्मिन्कस्मिन्नुपात्ते तु मुख्ये प्रचरिते[1] सति । अन्यत् द्रव्यं विजानीयं सजातीयमथापि वा ॥
" उपादाय प्रयुंजानो द्रव्यं कृत्स्नमवाप्नुयात् " ॥ **भरद्वाजः**—
" अज्ञाता यदि वा मंत्राः स्वस्वगृह्येषु चोदिताः । उपवीतप्रमुख्यानां तेषां वै धारणे द्विजाः ॥
"केवलं प्रणवो वापि व्याहृतित्रितयं तु वा । स्यातां विप्रादिवर्णेषु द्ववितौ सर्वशाखिनाम्" ॥इति ।

शांडिल्यः—

" प्रदक्षिणे प्रणामे च पूजायां हवने जपे । न कण्ठावृतवस्त्रः स्याद्दर्शने गुरुदेवयोः " ॥

बोधायनः (२।६।५८–५९)—

" कर्तव्यमुत्तरं वासः पंचस्वेतेषु कर्मसु । स्वाध्यायोत्सर्गदानेषु भोजनाचमयोस्तथा ॥
"हवनं भोजनं दानमुपहारः प्रतिग्रहः । बहिर्जानु न कार्याणि तद्वदाचमनं स्मृतम्"॥इति ।

अन्यैच्च[2]—

"स्नानमाचमनं होमं भोजनं देवतार्चनम् । प्रौढपादो न कुर्वीत स्वाध्यायं पितृतर्पणम् ॥
"आसनारूढपादस्तु जान्वोर्वा जंवयोस्तथा । कृतावसक्थिको यस्तु प्रौढपादः स उच्यते " ॥

वस्त्रादिना कृतपादबंधः कृतावसक्थिकः ।

" होमः प्रतिग्रहो दानं भोजनाचमने जपः । बहिर्जानु न कार्याणि सांगुष्ठानि सदा चरेत् " ॥
"तद्वदाचमनं स्मृतिमिति" ॥ इति **परिभाषा** ॥

अथ सृष्टिप्रकारः । तत्र **मनुः** (१।७)—

" योऽसावतींद्रियग्राह्यः सूक्ष्मोऽव्यक्तः सनातनः । सर्वभूतमयोऽचिंत्यः स एव स्वयमुद्बभौ " ॥
अव्यक्तः अविदितस्वभावः । सनातनः अनादिनिधनः । योऽसौ केवलं[3] योगशास्त्रप्रसिद्धः । स एष परमः पुमान्सर्वभूतमयः प्रपंचस्वरूपः । स्वयं न कस्यचिन्नियोगेन नापि कर्मवशेन । उद्बभौ व्यक्तीबभूव ।

"सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः। अप एव ससर्जादौ तासु वीर्यमवासृजत्"(१।८)॥
अवासृजदुप्तवान् । अंशेनानुप्राविशदित्यर्थः ।

"आपो नारा इति प्रोक्ता आपो वै नरसूनवः। ता यदस्यायनं पूर्वं तेन नारायणः स्मृतः"(१।१०)॥
नरस्य पुरुषस्य सूनवः भगवता सृष्टा इत्यर्थः । वै शब्दो हेतौ । ता आपः अस्य नरस्य पूर्वं प्रथममयनमनुप्रवेशस्थानमासीदित्येतेन नारायणः स्मृतः ।

" तदंडमभवद्धैमं सहस्रांशुसमप्रभम् । तस्मिन्जज्ञे स्वयं ब्रह्मा सर्वभूत[4]पितामहः " (१।९) ॥
तज्जलानुप्रविष्टं भगवद्वीर्यं हैमं हेममयं अत एव ब्रह्मा हिरण्यगर्भाख्यः तस्मिन्नंडे स्वयं भगवान्ब्रह्मरूपधारी जज्ञे ।

"यत्तत्कारणमव्यक्तं नित्यं सदसदात्मकम् । तद्विसृष्टः स पुरुषो लोके ब्रह्मेति कीर्त्यते"(१।११)॥
कारणशब्देन नारायण उच्यते । सदसदात्मकं सत्कारणं प्रकृत्यादिकं असत्कार्यं प्रपंच उभयात्मा देहो यस्य तस्य तत्तथोक्तम् । तद्विसृष्टस्तेन कारणाख्येन भगवता सृष्टः । पुरुषशब्दोऽयं राजपुरुषशब्दवदधिकारिवचनः । भगवन्नियोगकर इत्यर्थः ।

---

१ **कखग**–परिगते । २ **ट**–पा ठ । ३ **कग**–एवं । ४ **ग**–लोक ।

"तस्मिन्नंडे स भगवानुषित्वा परिवत्सरम्। स्वयमेवात्मनो ध्यानात्तदंडमकरोद्विधा" (१।१२)॥ भगवान्भगवन्मयो ब्रह्मा।

"ताभ्यां स शकलाभ्यां तु दिवं भूमिं च निर्ममे। मध्ये व्योमदिशश्चाष्टावपां स्थानं च शाश्वतम्"॥ दिवं स्वर्गादिलोकपंचकम्। भूमिं सपातालां मध्ये व्योम अंतरिक्षलोकं अष्टौ दिशश्च शाश्वतं यावत्प्रलयावस्थानं अपां स्थानं समुद्रं च निर्ममे।

सर्वभूतानि सिसृक्षतो हिरण्यगर्भस्योपादानं शरीरांश इति श्लोकत्रयेणाह **मनुः** (१।१४-१६)

"उद्बबर्हात्मनश्चैव मनः सदसदात्मकम्। मनसश्चाप्यहंकारमभिमंतारमीश्वरम्॥
"महांतमेव चात्मानं सर्वाणि त्रिगुणानि च। विषयाणां गृहीतॄणि शनैः पंचेन्द्रियाणि च॥
"तेषामवयवान्सूक्ष्मान् षण्णामप्यमितौजसाम्। संनिवेश्यात्ममात्रासु सर्वभूतानि निर्ममे"॥

मनः महत्तत्त्वं सदसदात्मकं प्रकृतिविकृत्यात्मकं मनसो महत्त्वादनंतरमभिमंतारमस्मिताप्रत्ययरूपमीश्वरम्। सर्वकर्मप्रवर्तकमहंकारं च उद्बबर्ह उद्धृतवान्। महांतमात्मानं स्थूलमतःकरणं मन इति यावत्। स्वरूपेण विषयरूपेणेंद्रियरूपेण च त्रिगुणीभूयावस्थानात्त्रिगुणानीति तन्मात्राणि शब्दान्युच्यंते। तथा विषयाणां गृहीतॄणि पंच ज्ञानेंद्रियाणि चकारात्कर्मेंद्रियाणि शनैः क्रमादुद्बबर्ह। तेषां महदहंकारं मनस्तन्मात्रज्ञानकर्मेंद्रियाणि षण्णाममितौजसामुपयुज्यमानेष्वप्यवयवेषु दीपवदक्षयवीर्याणामवयवानामंशेनात्ममात्रासु स्वजीवांशेषु संनिवेश्य आकलय्य सर्वभूतानि दवमनुष्यादीनि निर्ममे। एतदुक्तं भवति। आत्मीयानां महदहंकारमनस्तन्मात्रज्ञानकर्मेंद्रियाणामंशाः सर्वभूतोपादानमिति।

"सर्वेषां तु सनामानि कर्माणि च पृथक् पृथक्। वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे (२१)॥
"कर्मणां तु विवेकाय धर्माधर्मौ व्यवेचयत्। द्वंद्वैरयोजयच्चेमाः सुखदुःखादिभिः प्रजाः (२६)॥
"लोकानां तु विवृध्यर्थं मुखबाहूरुपादतः। ब्राह्मणं क्षत्रियं वैश्यं शूद्रं च निरवर्त्तयत् (३१)॥
"सर्वस्यास्य तु सर्गस्य गुप्त्यर्थं स महाद्युतिः। मुखबाहूरुपज्जानां पृथक्कर्माण्यकल्पयत्"॥इति(८७)॥

सुबालोपनिषदि श्रूयते—"तस्मात्तमः संजायते तमसो भूतादि भूतादेराकाशमाकाशाद्वायुर्वायोरग्निरग्नेरापः। अद्भ्यः पृथिवी। तदंडं समभवत्तत्संवत्सरमात्रमुषित्वा द्विधाकरोदधस्ताद्भूमिमुपरिष्टादाकाशं मध्ये पुरुषः" इति। **तैत्तिरीयश्रुतिरपि** "ब्राह्मणोऽस्य मुखमासीत्। बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पभ्द्याम् शूद्रो अजायत" इति च। तथा **महोपनिषदि** "एको ह वै नारायण आसीत्। सोऽन्यं कामं मनसाऽध्यायत्। तस्य ध्यानस्थस्य ललाटात्स्वेदोत्प्रससार ता आपोऽभवन्। तासु वीर्यमवासृजत्तद्धिरण्मयमण्डमभवत्। तस्मिन् ब्रह्मा चतुर्मुखोऽजायत" इति। **नारायणोपनिषदि** च "अथ पुरुषो ह वै नारायणोऽकामयत। प्रजाः सृजेयेति। नारायणाद्ब्रह्माऽजायत" इति। **हारीतः** (१।९-१३)

"नारायणः परो देवो जगत्सृष्ट्वा जलोपरि। सुष्वाप भोगिपर्यंकशयने तु श्रिया सह॥
"तस्य सुप्तस्य नाभौ तु महत्पद्ममभूत्किल। पद्ममध्येऽभवद्ब्रह्मा वेदवेदांगभूषणः॥
"स चोक्तस्तेन देवेन जगत्सृष्टौ पुनः पुनः। सोऽपि सृष्ट्वा जगत्सर्वं सदेवासुरमानुषम्॥
"यज्ञसिध्द्यर्थमनघान्ब्राह्मणान्मुखतोऽसृजत्। असृजत्क्षत्रियान् बाह्वोर्वैश्यानप्यूरुदेशतः॥
"शूद्रांश्च पादयोः सृष्ट्वा तेषां चैवानुपूर्वशः। यथा प्रोवाच भगवान्ब्रह्मयोनिः पितामहः"॥ इति।

---

१ **कग**-नंशाकलन **ख**-नामशेनात्म। २ **कग**-समानानि। ३ **कट**-पाठः। ४ **क**-कर्म।

प्रोवाच धर्मानिति शेषः । सृष्टौ परस्परविरुद्धानां श्रुतीनां स्मृतीनां च कल्पभेदेन व्यवस्था द्रष्टव्या । इति सृष्टिः ॥

अथ वर्णधर्माः । तत्र देवलः

"ब्राह्मण्यां ब्राह्मणाज्जातः संस्कृतो ब्राह्मणो भवेत् एवं क्षत्रियविट्शूद्रा ज्ञेयाः स्वेभ्यः स्वयोनिजाः"॥ इति । शातातपः

"तपो दमो दया दानं सत्यं धर्म श्रुतं घृणा । विद्या विज्ञानमास्तिक्यमेतद्ब्राह्मणलक्षणम्" ॥ याज्ञवल्क्यः (आचारे ९०)—

"सवर्णेभ्यः सवर्णासु जायंते हि सजातयः । अनिंद्येषु[1] विवाहेषु पुत्राः संतानवर्धनाः"॥ हारीतः (१।१५,१७–१८)—"ब्राह्मण्यां ब्राह्मणेनैव उत्पन्नो ब्राह्मणः स्मृतः ।

"षट्कर्माणि वै निजान्याहुर्ब्राह्मणस्य महात्मनः । तैरेव सततं यस्तु वर्तयन्सुखमेधते ॥

"अध्यापनं चाध्ययनं यजनं याजनं तथा । दानं प्रतिग्रहश्चेति षट्कर्माणीति चोच्यते" ॥ मनुः (१।८८)—

"अध्यापनं चाध्ययनं यजनं याजनं तथा । दानं प्रतिग्रहश्चेति षट्कर्माण्यग्रजन्मनः" ॥ याज्ञवल्क्यः (आचारे ११८)—

"इज्याध्ययनदानानि वैश्यस्य क्षत्रियस्य च । प्रतिग्रहोऽधिको विप्रे याजनाध्यापने तथा"॥ इति । तत्र ब्राह्मणस्येज्यादीनि त्रीणि धर्मार्थानि प्रतिग्रहादीनि त्रीणि वृत्त्यर्थानि "षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका । याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः"॥ इति मनुस्मरणात् (१०।७६) । अत इज्यादीन्यावश्यकर्तव्यानि न प्रतिग्रहादीनि । तदाह गौतमः (१०।१-३)–"द्विजातीनामध्ययनमिज्यादानं ब्राह्मणस्याधिकाः प्रवचनयाजनप्रतिग्रहाः । पूर्वेषु नियमः" इति । आपस्तंबः (२।१३।१)– "सवर्णापूर्वाशास्त्रविहितायां यथर्तु गच्छतः पुत्रास्तेषां कर्मभिः संबंधः" इति । सवर्णा च अपूर्वा च शास्त्रविहिता चेति कर्मधारयः । सवर्णा सजातीया । अपूर्वा अनन्यपूर्वा । शास्त्रविहिता शास्त्रोक्तब्राह्मादिविवाहसंस्कृता । एवंभूतायां भार्यायां यथर्तुगमनकल्पेन गच्छतो ये पुत्रा जायंते तेषां कर्मभिः संबंधो भवतीत्यर्थः । कर्माण्यपि स एवाह (२।१०।४) "स्वकर्म ब्राह्मणस्याध्ययनमध्यापनं यज्ञो याजनं दानं प्रतिग्रहणं दायाद्यं सिलोंच्छ" इति । दायाद्यं दायस्वीकारः । सिलोंच्छः क्षेत्रादिषु पतितानि मंजरीभूतानि ततश्च्युतानि च धान्यानि सिलशब्दार्थः । तेषामुंच्छनमंगुलिभिर्नखैर्वा आदानम् । एतान्यष्टौ ब्राह्मणस्य स्वकर्मेत्यर्थः । इति वर्णधर्माः ॥

अथ यजनम् । यज्ञे श्रुतिः[2] । "यज्ञ इति यज्ञो हि देवानां यज्ञेन हि देवा दिवं गता यज्ञेनासुरानपानुदंत यज्ञेन द्विषंतो मित्रा भवंति यज्ञे सर्वं प्रतिष्ठितं तस्माद्यज्ञं परमं वदंति" । यज्ञ इति यज्ञो नामाधानाग्निहोत्रादि । स हि देवानां संबंधी । देवत्वस्य प्रापकत्वात् । तदेवाह । यज्ञेन हि देवा इति । अत्र श्रुत्यंतरम्[3] । "यज्ञेन वै देवाः स्वर्गं लोकमायन्" इति । यज्ञेनासुरानपानुदंत । यज्ञेन द्विषंतः शत्रवः मित्राणि भवंति । ऋत्विक्प्रसर्पकादिदक्षिणादानेन दानं यज्ञानां वरूथं गृहस्थानीयम् । दाने हि यज्ञास्तिष्ठंति । तदभावे कुतो यज्ञः । 'मृतो यज्ञस्त्वदक्षिणः' । "यो अदक्षिणेन यज्ञेन यजेत स यज्ञः प्रक्षामोऽनायुः" इत्यादिवाक्येभ्यो दानस्य यज्ञे अवश्य-

---

१ अनित्येषु । २ नारायणोपनिषदि । तै० सं० आरण्यके 'सहवै' उपनिषदि ।

कर्तव्यत्वात् यज्ञे सर्वं प्रतिष्ठितं सर्वस्य जगतो यज्ञाधीनत्वात् यस्माद्यज्ञं परमं वदंति भगवंत इत्यर्थः। अत्र व्यासः (भगवद्गीता अ. ३ श्लो. १०-१२)—

" सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः। अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥
" देवान्भावयतानेन ते देवा भावयंतु वः। परस्परं भावयंतः श्रेयः परमवाप्स्यथ ॥
"इष्टान्भोगान्हि वो देवा दास्यंते यज्ञभाविताः। तैर्दत्तानप्रदायैभ्यो यो भुंक्ते स्तेन एव सः"॥ इति।

यज्ञस्य त्रैविध्यमाह भगवान् (भ. गी. अ. १७ श्लो. ११-१३)—

" अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते। यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ॥
" अभिसंधाय तु फलं दंभार्थमपि चैव यत्। इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसम् ॥
" विधिहीनमसृष्टान्नं मंत्रहीनमदक्षिणम्। श्रद्धाविरहितं यज्ञं तामसं परिचक्षते " ॥ इति।

हारीतः—

" यज्ञेन लोका विमला[1] विभांति यज्ञेन देवा अमृतत्वमाप्नुवन्।
" यज्ञेन पापैर्बहुभिर्विमुक्तः प्राप्नोति लोकान्परमस्य विष्णोः " ॥

" नास्त्ययज्ञस्य लोको वै नायज्ञो विंदते शुभं। अनिष्टयज्ञोऽपूतात्मा भ्रश्यति छिन्नपर्णवत् "॥

माधवीये—

"नास्तिक्यादथ वाऽऽलस्याद्योऽग्नीन्नाधातुमिच्छति। यजेत वा न यज्ञेन स याति नरकान्बहून् ॥
"तस्मात्सर्वप्रयत्नेन ब्राह्मणो हि विशेषतः। आधायाग्नीन्विशुद्धात्मा यजेत परमेश्वरम्" ॥ इति।

कार्ष्णाजिनिः—

"पुत्रमुत्पाद्य कर्मैतत्कुर्याद्वैतानिकं द्विजाः। यथाकथंचिदादध्यात्प्राप्तं[2] चेत्साधुतो धनम्" ॥ इति।

प्रजापतिः—

"सर्वसंस्थाधिकारी स्यादाहिताग्निर्धने सति। आदध्यान्निर्धनोऽप्यग्नीन्नित्यं पापभयाद्द्विजः " ॥

वसिष्ठः—"अवश्यं ब्राह्मणोऽग्नीनादधीत दर्शपूर्णमासाग्रयणैश्चातुर्मास्यपशुसोमैश्च यजेत"इति।

हारीतोऽपि—

"पाकयज्ञान्यजेन्नित्यं हविर्यज्ञान्त्सुनित्यशः। सौम्यांस्तु विधिपूर्वेण य इच्छेद्धर्ममव्ययम्"इति। ते च गौतमेन दर्शिताः (८।१८-२४)—" अष्टका पार्वणश्राद्धं श्रावण्याग्रहायणीचैत्र्याश्वयुजीति सप्त पाकयज्ञसंस्थाः। अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यान्याग्रयणेष्टिनिरूढपशुबंधः सौत्रामणीति सप्त हविर्यज्ञसंस्थाः। अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त सोमसंस्थाः " इति। अष्टका हेमंतशिशिरयोरष्टमीषु क्रियमाणं श्राद्धम्। पर्वणि भवः पार्वणः स्थालीपाकः। श्राद्धं मासिश्राद्धम्। श्रावणी सर्पबलिः श्रावण्यां पौर्णमास्यां तत्क्रियते। आग्रहायणी पौर्णमासी। तस्यां क्रियमाणः सर्पबलेरुत्सर्गः। हेमंतप्रत्यवरोहणाख्यं च कर्म आग्रहायणीशब्देनोच्यते। चैत्री चैत्रपौर्णमास्यां क्रियमाण ईशानबलिः। आश्वयुजी आग्रयणम्। अग्न्याधेयादयः श्रुतिप्रसिद्धाः। बौधायनः (१।२।६)—" कृष्णकेशोऽग्नीनादधीतेति श्रुतिः " इति। स एव (१।५।८२)—

" अयज्ञेनाविवाहेन वेदस्योत्सादनेन च। कुलान्यकुलतां यांति ब्राह्मणातिक्रमेण च " ॥ इति।

गर्गः—"प्रधानं वैदिकं कर्म गुणभूतं तथेतरत्। गुणनिष्ठाप्रधानं तु हित्वा गच्छत्यधोगतिम् ॥
" यो वैदिकमनादृत्य कर्म स्मार्तेतिहासिकम्। मोहात्समाचरेद्विप्रो न स पुण्येन युज्यते ॥
"श्रौतं कर्म न चेच्छक्तः कर्तुं स्मार्तं समाचरेत्। अत्राप्यशक्तः करणे कुर्यादाचारमंततः"॥ इति।

---

१ क्ष-विपुला। २ क्ष-प्राप्यं।

अग्निहोत्रदर्शपूर्णमासविषये श्रुतिः। (तै.सं.१।६।९)–"प्रजापतिर्यज्ञानसृजताग्निहोत्रं चाग्निष्टोमं च पौर्णमासीं चोक्थ्यं चामावास्यां चातिरात्रं च । तानुदमिमीत । यावदग्निहोत्रमासीत्तावानग्निष्टोमो यावती पौर्णमासी तावानुक्थ्यो यावत्यमावास्या तावानतिरात्रः" इति ॥ प्रजापतिरग्निहोत्रादीन्षड्भागान-सृजत्तत्राग्निहोत्रपौर्णमास्यमावास्यायागाः अल्पैर्द्रव्यमंत्रक्रियाविशेषैः साध्या अल्पफलाः, अग्निष्टोमोक्थ्यातिरात्रयागा बहुभिर्द्रव्यमंत्रविशेषैः साध्या अधिकफलाः-इति विमर्शे सत्यनुग्रहेण तुलया त्रीणि द्वंद्वानि उन्नितवान्। तदनुग्रहादग्निहोत्रादीन्यग्निष्टोमादितुल्यानि संपन्नानि । एवं वेदने फलमाह श्रुतिः (१।६।९)–"य एवं विद्वानग्निहोत्रं जुहोति यावदग्निष्टोमेनोपाप्नोति तावदुपाप्नोति । य एवं विद्वान्पौर्णमासीं यजते यावदुक्थ्येनोपाप्नोति तावदुपाप्नोति । य एवं विद्वानमावास्यां यजते यावदतिरात्रेणोपाप्नोति तावदुपाप्नोति" इति । ज्ञानयुक्तस्य कर्मणः फलाधिक्यं छंदोगा आमनंति–"यदेव विद्यया करोति तदेव वीर्यवत्तरं भवति" इति

पुनरपि दर्शपूर्णमासौ प्रशंसति (१।६।९) "परमेष्ठिनो वा एष यज्ञोऽग्र आसीत्तेन स परमां काष्ठामगच्छत्तेन प्रजापतिं निरवासाययत्तेन प्रजापतिः परमां काष्ठामगच्छत्तेनेंद्रं निरवासाय-यत्तेनेंद्रः परमां काष्ठामगच्छत्तेनाग्नीषोमौ निरवासाययत्तेनाग्नीषोमौ परमां काष्ठामगच्छताम् । य एवं विद्वान्दर्शपूर्णमासौ यजते परमामेव काष्ठां गच्छति" इति। परमे पदे सत्यलोके तिष्ठतीति पर-मेष्ठी चतुर्मुखः; तस्य चाग्रे पूर्वस्मिन्कल्पे यजमानत्वेनावस्थितस्यैष दर्शपूर्णमासयज्ञः प्रवृत्तः; तेन चेश्वरार्पणबुध्द्याऽनुष्ठितेन यजमानः परां काष्ठामिदं परमेष्ठित्वपदं प्राप्तवान् । प्रजापतिर्दक्षादिः । तं पूर्वस्मिन्जन्मनि तेनोत्तमफलहेतुदर्शपूर्णमासोपदेशेन निरवासाययत् अनुष्ठानाय प्रेरितवान् स च तस्मिन्जन्मनि यजमानस्तेनानुष्ठानेन परमां काष्ठां दक्षत्वादि पदं प्राप्तवान् एवमितरत्रापि योज्यम् । तथाऽग्निहोत्रं प्रशंसति–" अग्निहोत्रꣳ सायंप्रातर्गृहाणां निष्कृतिः स्विष्टꣳ सुहुतं यज्ञक्रतूनां प्रायणꣳ सुवर्गस्य लोकस्य ज्योतिस्तस्मादग्निहोत्रं परमं वदंति" इति । अग्निहोत्र-मिति कर्मनाम । तत्सायंप्रातश्च निर्वर्तितं गृहाणां गृहस्थाश्रमिणामार्जितपापानां निष्कृतिः प्रायश्चित्तम् । स्विष्टं शोभनयागहेतुः । सुहुतं शोभनहोमहेतुः । यज्ञक्रतूनां प्रायणम् । यज्ञा दर्श-पूर्णमासादयः । क्रतवः अग्निष्टोमादयः । एतेषां यज्ञक्रतूनां प्रायणं कारणभूतम् । सुवर्गस्य लोकस्य ब्रह्मलोकादेः । ज्योतिः प्रकाशकम्। ब्रह्मलोकादिप्राप्तिहेतुरिति यावत् । तथाऽन्यत्र श्रूयते– "तस्मादाहुरग्निहोत्रं वै देवा गृहाणां निष्कृतिमपश्यन्"इति । "अग्निहोत्रप्रायणा यज्ञाः"इति च।

हारीतः—

" नाग्निहोत्रात्परो धर्मो नाग्निहोत्रात्परं तपः । नाग्निहोत्रात्परं श्रेयो नाग्निहोत्रात्परं यशः ॥

" नाग्निहोत्रात्परा सिद्धिर्नाग्निहोत्रात्परा गतिः । नाग्निहोत्रात्परं स्थानं नाग्निहोत्रात्परं व्रतम् ॥

"ओंचो व्याहृतयस्तिस्रः स्वधा स्वाहा नमो वषट्। यस्यैते वेश्मनि सदा ब्रह्मलोकस्थ एव सः"॥ इति ।

सत्यव्रतः—

" सिलोञ्छिनां च यो धर्मस्त्वहन्यहनि यत्फलम् । तद्दर्शपूर्णमासं च ये यजंति द्विजातयः ॥

" न तेषां पुनरावृत्तिर्ब्रह्मलोकात्कदाचन " ॥ वृद्धमनुः

"नित्याग्निहोत्रं दर्शश्च पूर्णमासः पितृक्रिया। आतिथ्यं वैश्वदेवं च ब्रह्मलोकस्य शाश्वतः"॥ इति ।

वृद्धमनुः—

" यस्य त्रैवार्षिकं धान्यं पर्याप्तं भृत्यवृत्तये । अधिकं वापि विद्येत स सोमं पातुमर्हति॥

---

१ ख–मते । २ नारायणोपनिषदि । ३ कखग–अन्या ।

"पुण्यान्यन्यानि कुर्वीत श्रद्दधानो जितेंद्रियः । न त्वल्पदक्षिणे यज्ञैर्यजेताथ कथंचन॥
"इंद्रियाणि यशः स्वर्गमायुः कीर्तिं प्रजां पशून् । हन्त्यल्पदक्षिणे यज्ञस्तस्मान्नाल्पधनो यजेत् ॥
" प्राजापत्यमदत्वाऽश्वमग्न्याधेयस्य दक्षिणाम् । अनाहिताग्निर्भवति ब्राह्मणो विभवे सति"॥ इति ।

व्यासः—

"अन्नहीनो दहेद्राष्ट्रं मंत्रहीनस्त्वथर्त्विजः । आत्मानं दक्षिणाहीनो नास्ति यज्ञसमो रिपुः"॥

याज्ञवल्क्यः (आ. १२४)–" प्राक्सौमिकीं क्रियां कुर्याद्यस्यान्नं वार्षिकं भवेत् " इति । एतानि **मन्वादिवचनानि** काम्ययागविषयाणि । यतो विहितदक्षिणापर्याप्तद्रव्याभावेऽपि नित्यं न लोपयेदित्याह **बोधायनः**--

" यस्य नित्यानि लुप्तानि तथैवागंतुकानि च । विपथः सोऽपि न स्वर्गं गच्छेत्तु पतितो हि सः ॥
"तस्मात्कंदैः फलैर्मूलैर्मधुनाऽथ रसेन वा । नित्यं नित्यानि कुर्वीत न च नित्यानि लोपयेत्"॥इति ।

स्मृत्यर्थसारे

" विवाहात्परमाधाय जुव्हन्देवाग्निहोत्रकम् । दर्शपूर्णमासाग्रयणसोमयागान्क्रमाच्चरेत् ॥
" सर्वथा प्रथमः सोमयागः कार्यो द्विजातिभिः । यथासंभविनांगेन शक्त्या दत्वा तु दक्षिणाम्॥
" व्रात्यदुर्ब्राह्मणत्वादिमहादोषोपशांतये "॥ इति । **संग्रहे**—
" अग्निहोत्रपरिभ्रष्टः प्रसक्तः क्रयविक्रये । वर्णसंकरकर्ता च ब्राह्मणो वृषलैः समः " ॥

प्रजापतिः—

" अग्निहोत्रफला वेदा सषडंगपदक्रमाः । अग्निहोत्रसमो धर्मो न भूतो न भविष्यति ॥
" दर्शं च पूर्णमासं च लुप्त्वाऽथोभयमेव वा । एकस्मिन्कृच्छ्रपादेन द्वयोरर्धेन शोभनम्[1]" ॥ इति ।

मनुः (४।१०)--

" वर्त्तयंस्तु शिलोंछाभ्यामग्निहोत्रपरायणः । इष्टीः पार्वायणांतीयाः केवला[2] निर्वपेत्सदा " ॥

पर्व चायनं च पर्वायने । तयोरंतः पर्वायणांतः । तत्र भवाः पार्वायणांतीयाः । दर्शपूर्णमासाग्रयणलक्षणाः केवलाः फलाभिसंधिरहिताः नित्या इष्टीर्निर्वपेत्सिलोंच्छवृत्तिरप्येतावच्छ्रौतं कर्म कुर्यान्न ततोऽधिकमित्यर्थः । **असंकुचितवृत्तेर्वृत्त्यंतराण्याह स एव** (४।२५–२६)--

" अग्निहोत्रं च जुहुयादाद्यंते द्युनिशोः सदा । दर्शेन चार्धमासांते पूर्णमासेन चैव हि ॥
"सस्यांते नवसस्येष्ट्या तथर्त्वंते द्विजोऽध्वरैः । पशुनाप्ययनांते तु समांते सौमिकैर्मखैः" ॥ इति ।

अनयोरयमर्थः । द्युनिशयोरहोरात्रयोराद्यंते । अर्धमासांते पक्षयोरंते पर्वणोरिति यावत् । सस्यांते सस्यपाककाले । नवसस्येष्ट्याऽऽग्रयणेन अध्वरैश्चातुर्मास्यैः । पशुना निरूढपशुबंधेन । समांते संवत्सरांते । सौमिकैः सोमवद्भिरिति । **आपस्तंबः** (१।१३-२२;१४।१-२)–"निवेशे हि वृत्ते नैयमिकानि श्रूयंते अग्निहोत्रमतिथयोयच्चान्यदेवं युक्तम् " इति । निवेशे वृत्ते दारकर्मणि निर्वृत्ते नैयमिकानि नियमेन कर्त्तव्यानि नित्यान्यग्निहोत्राणि श्रूयंत इत्यर्थः । **आथर्वणे श्रूयते**–" यस्याग्निहोत्रमदर्शपूर्णमासमनाग्रयणमतिथिवर्जितमहुतमवैश्वदेवमविधिना हुतं आ सप्तमांस्तस्य लोकान्हिनस्ति " इति । अस्यार्थः-यस्याग्निहोत्रिणः अग्निहोत्रमदर्शम् आग्नेयोऽष्टाकपाल ऐंद्रं दधि ऐंद्रं पय इति यागत्रयवर्जितम् अपौर्णमासमाग्नेयोपांश्वग्नीषोमीययागत्रयवर्जितम् अनाग्रयणमाग्रयणेष्टिरहितम् अतिथिवर्जितम् आतिथ्याख्यकर्मणा सत्क्रियमाणः सोमोऽतिथिः तद्वर्जितं

---

१ कग–शोधनम् । २ कग–कवला ।

सोमयागरहितमित्यर्थः । अहुतं कस्मिंश्चित्काले आलस्यादिना होमवर्जितम् । अवैश्वदेवं वैश्वदेवहोमरहितम् । अविधिना हुतं मंत्रदेवतादिविपर्यासेन हुतम् । आसप्तमांल्लोकान् हिनस्तीति त्रयः पितृपितामहप्रपितामहाः त्रयः पुत्रपौत्रप्रपौत्राः आत्मा च सप्तमः तान्पुरुषान्भूरादिलोकांश्च हिनस्तीति । **याज्ञवल्क्यः** (आ. १२५)—

" प्रतिसंवत्सरं सोमः पशुः प्रत्ययनं तथा । कर्तव्याग्रयणेष्टिश्च चातुर्मास्यानि चैव हि ॥
" एषामसंभवे कुर्यादिष्टिं वैश्वानरीं द्विजः "॥ इति । **मनुरपि** (४।२८; ११।२७, ४१)—
" नवेनानर्चिता ह्यस्य पशुहव्येन चाग्नयः । प्राणानेवात्तुमिच्छंति नवान्नामिषगृध्निनः ॥
" इष्टिं वैश्वानरीं चापि निर्वपेदब्दपर्यये । क्लृप्तानां पशुसोमानां निष्कृत्यर्थमसंभवे ॥
" अग्निहोत्र्यपविध्याग्नीन् ब्राह्मणः कामकारतः । चांद्रायणं चरेन्मासं वीरहत्यासमं हि तत् " ॥

श्रुतिरपि " वीरहा वा एष देवानां योऽग्निमुद्वासयते " इति । **स्मृतिभास्करे**—
" निर्धने धनसाध्येषु नित्येष्वपि कृतेषु च । चौर्यादन्यैः कुमार्गैर्वा इज्यार्थं धनमाहरेत् ॥
" सूर्यग्रहे कुरुक्षेत्रे मघीकृष्णाजिनादिकम् । चंडालात्प्रतिगृह्यापि यजेदावश्यकैर्मखैः"॥ इति ।

एतत् वचनं यत्किंचिद्धनसंपादनेनाप्यावश्यकानि कर्तव्यानीत्येवंपरम् । तथा च **यमः**—
" धर्मविद्ब्राह्मणः शूद्राद्यज्ञार्थं नाहरेत् धनम् । जायते प्रेत्य चंडालः शूद्रार्थेनेष्टदेवतः ॥
" उपादाय धनं शूद्राद्योऽग्निहोत्रमुपाविशेत् । शूद्राग्निहोत्री स भवेद्ब्रह्मवादिषु गर्हितः " ॥ इति ।

व्यासः—"कुटुंबार्थे तु सच्छूद्रात्प्रतिग्राह्यमयाचितम् । क्रत्वर्थमात्मने चैव न हि याचेत कर्हिचित्"॥

मनुरपि (११।२४, ४३, ४२)—
" न यज्ञार्थं धनं शूद्राद्विप्रो भिक्षेत धर्मवित् । यजमानो हि भिक्षित्वा चंडालः प्रेत्य जायते ॥
" तेषां सततमज्ञानां वृषलाग्न्युपसेविनाम् । पदा मस्तकमाक्रम्य दाता दुर्गाणि संतरेत् ॥
"ये शूद्रादधिगम्यार्थमग्निहोत्रमुपासते । ऋत्विजस्ते च शूद्रा हि ब्रह्मवादिषु गर्हिताः " ॥ इति ।

छागलेयः "यः शूद्रादधिगम्यार्थमग्निहोत्रमुपाचरेत् । दाता तत्फलमाप्नोति कर्ता च नरकं व्रजेत्"॥ **याज्ञवल्क्यः** (आ. १२७)—"चंडालो जायते यज्ञकरणाच्छूद्रभिक्षितात्" । एतानि शूद्रप्रतिग्रहनिषेधकानि वचनानि नित्यव्यतिक्रमविषयाणि; "चंडालात्प्रतिगृह्यापि यजेदावश्यकैर्मखैः" इति नित्यस्यावश्यकत्वस्मरणादिति **स्मृतिरत्नावल्यादावभिहितम्** । **मनुः**—
"यज्ञार्थं भिक्षितं द्रव्यं यः सर्वं नोपयोजयेत् । श्वपाकयोनौ जायेत स तद्भुक्त्वा तु दुर्मतिः"॥ इति ।

यमः—
"यज्ञार्थमर्थं भिक्षित्वा यो न सर्वं प्रयच्छति । स याति भासतां विप्रः काकतां वा शतं समाः " ॥

याज्ञवल्क्यः (आ. १२७) " यज्ञार्थमददद् द्रव्यं भासः काकोऽपि वा भवेत् " इति ॥

स्मृतिभास्करे—
" वाजपेये क्रतौ सर्वदक्षिणानामसंभवे । गावः सप्तदशैकेषां संभवेऽपीति सामगाः ॥
" न लभ्यंते यदा गावो दक्षिणात्वेन चोदिताः । प्रत्येकं तत्र निष्कं स्यात्तदर्धं पादमेव वा " ॥

नित्यविषयमेतत् । **शंखः**—
" सहस्रं भोजयेत्सोमे ब्राह्मणानां शतं पशौ । चातुर्मास्येषु सर्वेषु शतं पर्वणि पर्वणि " ॥

स्मृत्यंतरे—

---

१ कग-उपवासेत् ख-उपाचरेत् । २ क्ष-तदा । ३ ट-यमः । ४ कखगक्ष-कलौ ।

"द्विजभोजनमत्रैव सोमयागे सहस्रकम् । पशौ शतं दर्शेष्टौ स्युः भोज्या ऋत्विज एव वा"॥
स्मृतिभास्करे—
" तावदग्निं विना कुर्यान्नित्येष्टिं सौमिकीं क्रियाम् । यथालब्धगुणोपेतां यथासंभवदक्षिणाम् ॥
" संनिधौ यजमानः स्यादुद्देशत्यागकारकः । असन्निधौ तु पत्नी स्यादध्वर्युस्तदनुज्ञया ॥
" स्याद्दर्शपूर्णमासेष्टौ चतुर्णामृत्विजां क्रिया । चत्वारश्चेन्न लभ्यंते त्रयः कुर्युस्त्रयोऽपि वा ॥
" न संभवति कुर्यातां द्वावेवेष्टिं कथंचन ॥
"यदि द्वावपि न स्यातां एकेनापि समापयेत् । यजमानः प्रयुंजीत तत्रानाज्ञातनिष्कृतिम्"॥इति ।
अखंडादर्शे—
"दायप्राप्तैः स्वकृष्या वा लब्धैः शिष्टप्रतिग्रहात् । यजेत श्रद्धया विष्णुं श्रेयोऽर्थी नान्यथा यजेत्" ॥
व्यासः—
" संशुद्धैर्यजमानैश्च ऋत्विग्भिश्च तथाविधैः । शुद्धैर्द्रव्योपकरणैर्यष्टव्यमिति निश्चयः ॥
" तथाकृतेषु यज्ञेषु देवानां तोषणं भवेत् । तुष्टेषु देवसंघेषु यज्वा यज्ञफलं लभेत् ॥
" देवाः संतोषिता यज्ञैर्लोकान्संवर्धयंत्युत । उभयोर्लोकयोश्चैव भूतिर्यज्ञैः प्रदृश्यते " ॥
आधानकर्तॄन्प्रति **चतुर्विंशतिमते** विशेषो दर्शितः—
" जीवे पितरि नादध्यादग्निहोत्रं कदाचन । तथैव भ्रातरि ज्येष्ठे न यजेन्न विवाहयेत् " ॥ यत्तु
" पिता पितामहो यस्य अग्रजो वाऽथ कस्यचित् । तपोग्निहोत्रमंत्रेषु न दोषः परिवेदने "॥ इति
तत्स्वपितॄवैधुर्यादिविषयम् । **तत्रैवोक्तम्**—
'ज्येष्ठभ्रात्रा त्वनुज्ञातः कुर्यादग्निपरिग्रहम् । अनुज्ञातोऽपि वा पित्रा नादध्यान्मनुरब्रवीत्" ॥ इति ।
शातातपः—
" दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते । परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ॥
" अज्ञे देशांतरस्थे च पतिते प्रव्रजितेऽपि वा । योगशास्त्रनियुक्ते च न दोषः परिवेदने ॥
" कुब्जवामनषंढेषु गद्गदेषु जडेषु च । जात्यंधे बधिरे मूके न दोषः परिवेदने ॥
" एकमातृप्रसूतानां भ्रातॄणां परिवेदने । दोषः स्यात्सर्ववर्णेषु नेतरेष्वब्रवीन्मनुः ॥
" परिवेत्तुर्न चाग्निस्तु न वेदा न तपांसि च" इति ॥ **सुमंतुः**—
"व्यसनासक्तचित्तो वा नास्तिको वाऽथ वाऽग्रजः । कनीयान् धर्मकामश्चेदाधानमथ कारयेत् ॥
" पितुर्यस्य तु नाधानं कथं पुत्रस्तु कारयेत् । अग्निहोत्राधिकारोऽस्ति शंखस्य वचनं तथा " ॥
'**वृद्धवसिष्ठः**
" अग्रजस्तु यदानग्निरादध्यादनुजः कथम् । अग्रजानुमतः कुर्यादग्निहोत्रं यथाविधि "॥ इति ।
शातातपः—" नाग्नयः परिविंदंति न वेदा न तपांसि च " ॥ **हारीतः**—
" सोदराणां तु सर्वेषां परिवेत्ता कथं भवेत् । दारैस्तु परिविद्यंते नाग्निहोत्रेण नेज्यया " ॥ इति ।
पराशरोपि—
" पितृव्यपुत्रः सापत्न्यः परनारीसुतस्तथा । दाराग्निहोत्रसंयोगे न दोषः परिवेदने " ॥
परनारीसुतः दत्तक्रीतादिः । **स एव**—
" ज्येष्ठो भ्राता यदा तिष्ठेदाधानं नैव कारयेत् । अनुज्ञातस्तु कुर्वीत शंखस्य वचनं तथा " ॥
कारयेत्कुर्यादित्यर्थः । **माधवीये**—" अनुज्ञातः कनिष्ठो ज्येष्ठात्पूर्वमाधानं कुर्यात्पित्रा

१ [illegible] । २ [illegible]—म । ३ ग्र—शस्य ।

त्वनुज्ञातोऽपि पितुः पूर्वं न कुर्यात् । पित्रादेर्वैधुर्यादिना प्रतिबंधे कुर्यात् ” इति ॥

वृद्धयाज्ञवल्क्यस्तु ज्येष्ठस्यापि कदाचित्परिवेत्तृत्वमाह—

“ आवसथ्यमनादृत्य प्रेतायां यः प्रवर्त्तते । अनाहिताग्निर्भवति परिवेत्ता तथोच्यते ”॥ इति ।

आवसथ्ये औपासने ब्रह्मौदनपाकमकृत्वा निर्मथ्याग्निना कृत्वा यः प्रथमाधानं[1] करोति स परिवेत्तेत्यर्थः । “ वसंते ब्राह्मणोऽग्निमादधीत ग्रीष्मे राजन्यः शरदि वैश्यः ” इति **श्रुत्युक्ते** (तै. ब्रा. १।१।२।७) काले पर्वण्युक्तनक्षत्रे वाऽग्निराधेयः । तदाह **व्यासः**—

“ वसंते ब्राह्मणस्य स्यादाधेयोऽग्निर्यथाविधि । क्षत्रियस्याग्निराधेयो ग्रीष्मे तु श्रेष्ठ उच्यते ॥

“ शरद्यथ वैश्यस्याप्याधानीयो हुताशनः ” इति । पुनराधाननिमित्तमाहापस्तंबः

“ अग्नीनाधायैतस्मिन्संवत्सरे यो नर्ध्नुयात्स पुनरादधीत ” इति । तथा च **श्रुतिः** (तै. सं. १-५-१) “ भागधेयं वा अग्निराहित इच्छमानः प्रजां पशून्यजमानस्योपदोद्रावोद्वास्य पुनरादधीत भागधेयेनैवैन[2] समर्धयत्यथो शांतिरेवास्यैषा ” इति । निमित्तांतरमाह **स एव** “ यदरण्योः समारूढो नश्येद्यस्य वोभावनुगतावभिनिम्रोचेदभ्युदियाद्वा पुनराधेयं तस्य प्रायश्चित्तिः ” इति । समारूढा[3]ग्न्योररण्योर्नाशे पुनराधेयम् तथा प्रणयनात्पूर्वं केवलगार्हपत्यानुगमने प्रणयनानंतरमजस्रे वा गार्हपत्याहवनीययोरुभयोरनुगमने प्रतिनिधौ[4] चास्थापिते सूर्यो यद्यभिनिम्रोचेदस्तं गच्छेदुदियाद्वा तदा पुनराधेयं कार्यमित्यर्थः । केचित्तु केवलगार्हपत्यानुगमने प्रतिनिध्यस्थापनेऽपि न पुनराधानं किं तु प्रायश्चित्तमेवेति वदंति । **आश्वलायनः**—“सर्वाश्चेदनुगतानादित्योऽभ्युदियाद्वाऽभ्यस्तमियाद्वाऽग्न्याधेयं पुनराधेयं वा” इति ॥ **कात्यायनः**—

“ विहायाग्निं सभार्यश्चेत्सीमामुल्लंघ्य गच्छति । होमकालव्यपेतस्य पुनराधानमिष्यते ”॥

शौनकः—

“ अग्नावनुगते यत्र होमकालद्वयं व्रजेत् । उभयोर्विप्रवासे वा लौकिकोऽग्निर्विधीयते ॥

“ प्रोषिते तु यदा पत्नी यदि ग्रामांतरं व्रजेत् । होमकाले यदि प्राप्ता न दोषेण प्रयुज्यते ॥

“ अथ तत्रैव वसति होमकालव्यतिक्रमः । लौकिकाग्निर्विधीयेत काठकश्रुतिदर्शनात् ॥

“ यजमानश्च पत्नी च उभौ प्रवसतो यदि । आ होमान्न निवर्तेतां पुनराधानमर्हति ” ॥

संग्रहे “ केचित्तु पत्न्यस्तमयोदयोश्चेद्ग्रामादिसीमामतिलंघ्य गच्छेत् ।

“समुद्रगां सिंधुं गतोऽन्यदापि स्याल्लौकिको वन्हिरिति ब्रुवंति” ॥ “चतूरात्रमहूयमानोऽग्निर्लौकिको भवति ” इति श्रुतिः । **आपस्तंबः**—“ न ग्राममध्यादग्नीनतिहरेयुर्यद्यतिहरेयुर्लौकिकाः संपद्येरन्यावत्यारं ग्राममर्यादा नद्यः स्युस्तावद्व्यतिक्रामंतावन्वारभेयातां यदि नान्वारभेयातां लौकिकाः संपद्येरन् ” इति ।

बौधायनः—

“ अचोदितेन पाकेन कृतेनोद्धरणेन वा । लौकिकोऽग्निः स विज्ञेयः पुनराधानमर्हति ॥

“नैकयाऽपि विना कार्यमाधानं भार्यया द्विजः । अकृतं तद्विजानीयात्सर्वानान्वारभंत यत् ॥

“ज्येष्ठायां दोषहीनायां कनीयस्या यदाग्निमान् । ब्रह्महत्या भवेत्तस्य प्रतिपर्वणि सर्वदा ” ॥

मनुः (५।१६७, १६८)—

“भार्यायै पूर्वमारिण्यै दत्त्वाऽग्नीनंत्यकर्मणि । पुनर्दारक्रियां कुर्यात्पुनराधानमेव च ॥

“ एवं वृत्तां सवर्णां स्त्री द्विजातिः पूर्वमारिणीम् । दाहयेदग्निहोत्रेण यज्ञपात्रैश्च धर्मवित्” ॥ इति ।

याज्ञवल्क्योऽपि (आचारे ८९)—

---

१ कखग–प्रथमप्राधान । २ क्ष–न्या । ३ क्ष–ढो । ४ क–द्वि

“दाहयित्वाऽग्निहोत्रेण स्त्रियं वृत्तवतीं पतिः । आहरेद्विधिवद्दारानग्नींश्चैवाविलंबयन्” ॥ इति ।
कात्यायनः—
“ स्त्री धर्मचारिणी साध्वी मृता दाह्या तथाऽग्निना । विपरीता न दाह्या तु पुनर्दारक्रिया तथा ॥
“ मृतायां चैव भार्यायां द्वितीयायां कथंचन । समुत्सृजेदग्निहोत्रं मोहितो यो द्विजोत्तमः ॥
“ ब्रह्मोज्झं तं विजानीयान्नात्र कार्या विचारणा ॥
“द्वितीयां वै तु यो भार्यां दहेद्वैतानिकाग्निभिः । तिष्ठंत्यां प्रथमायां तु सुरापानसमं हि तत्॥” इति ।
‘एतदाधाने सहाधिकृताया अग्निदाने वेदितव्यमिति’ **विज्ञानेश्वरीये** (पृ. २५ पं. १४)। **कपर्दी**–
“यदि त्वनेकभार्यस्य काचित्पत्नी मृता तदा । निर्मथ्येनैव सा दाह्या तदग्निं धारयेत्पतिः॥” इति ।
“ यदि त्वनेकभार्यः स्यात् विभज्याग्निं दहेन्मृताम्” इति तु स्मार्ताग्निविषयम् । तत्राग्निसंसर्गस्य विभागस्य **बोधायना**दिभिरुक्तत्वात्पुनर्दारक्रियासंभवे पूर्वमृतायाः पत्न्या अग्निदानम् । असंभवे तु “निर्मथ्येन पत्नीं दाहयित्वा अग्निहोत्रं यावज्जीवं यावदाश्रमांतरं वा जुहुयात्”। यदाहुर्**बह्वृचाः**
“ अपत्नीकोऽप्यग्निहोत्रमाहरेदित्याहुः । यदि नाहरेत् अनद्धा पुरुषः । कोऽनद्धा पुरुष इति । न देवान्न पितॄन् न मनुष्यानिति ।तस्मादपत्नीकोऽप्यग्निहोत्रमाहरेदिति ” । **भारद्वाजः**—
सूत्रम् “ यद्यपत्नीकः स्यादुभाभ्यां तस्य संस्कारः औपासनाग्निहोत्राभ्यामिति ” ‘निर्मन्थ्येन पत्नीमिति’ । **जैमिनिरपि सूत्रम्** “आहिताग्निश्चेत्पूर्वं जाया म्रियेत तां निर्मन्थ्येन दहेत् सान्तपनेन वा ” इति । **आश्वलायनः सूत्रम्** “ आहार्येणानाहिताग्निं पत्नीश्च ” इति ।
कपर्दी च
“अपत्नीकोऽग्निभिः कुर्यान्नित्यनैमित्तिकाः क्रियाः।अकाम्या अङ्गवैकल्या न हि काम्यासु तत्समम्॥
“आहिताग्निः पूर्वमृतां स्वाग्निभिर्दाहयेत् स्त्रियम्। शक्ये विवाहेऽथाशक्ये नैर्मन्थ्येनैव दाहयेत्”॥इति।

किञ्च आचारोऽप्यत्र दृष्टः शिष्टतमानां पूर्वेषां कण्वविभाण्डकादीनां यथा च भगवतो दाशरथेस्तस्मादभावेऽपि पत्न्या नाग्निहोत्रादिनिवृत्तिः । तथा **विष्णुः**—
“ मृतायामपि भार्यायां वैदिकाग्निं न संत्यजेत् । उपाधिनाऽपि तत्कर्म यावज्जीवं समापयेत् ।
“ अन्ये कुशमयीं पत्नीं कृत्वा तु गृहमेधिनः । उपासते ह्यग्निहोत्रं यावज्जीवमतन्द्रिताः ॥
“रामस्तु कृत्वा सौवर्णां सीतां पत्नीं यशस्विनीम् । ईजे बहुविधैर्यज्ञैः सहितो भ्रातृभिर्वशी॥” इति ।
मैत्रायणीश्रुतिरपि—
“यस्तु स्वैरग्निभिर्भार्यां संस्करोति कथंचन । असौ मृतः स्त्री भवति स्त्री चैषा स पुमान् भवेत्”॥इति ।
त्रिकाण्डी च—
“यस्य भार्याऽतिदूरस्था मृता वा व्याधिताऽपि वा ।अनिच्छुः प्रतिकूला वा तस्याः प्रतिनिधौ क्रिया”॥
इति । **यत्त्वापस्तम्बवचनम्** सूत्रं “ दारकर्मणि यद्यशक्त आत्मार्थमग्न्याधेयं कुर्यादग्निहोत्रं दर्शपूर्णमासावाग्रयणञ्च शेषाणि कर्माणि न भवन्तीति” तत्पत्नीमृतेः पूर्वं विच्छिन्नाग्निविषयम् । तथा च **कपर्दिभाष्यम्**—“ विच्छिन्नाग्नेः कदाचित्पत्नीमरणे यावज्जीवं श्रुतेरवगतत्वात् दारान्तरग्रहणे चासामर्थ्यादात्मार्थमग्न्याधेयं कार्यमिति ” । **स एव**—
“ नष्टोत्सृष्टाऽनलसहचरी दाहकृत्येन कुर्यात्प्रेताधानं मथितदहनस्तत्क्रियायां प्रकल्प्य ” इति ॥ नष्टाग्निरुत्सृष्टाग्निर्वा पत्नीमरणे दाहार्थं प्रेताधानं कुर्यात् । किन्तु दाहकृत्ये मथिताग्निरेव कल्प्यः । ततः आत्मार्थमग्न्याधेयं कुर्यात् । आधानप्रभृति यजमान एवाग्नयो भवन्ति । ‘ यजमानो वा अग्नेर्योनिरिति ’ **श्रुतेः** (तै. सं. ३।४।१०) । यदपि **कपर्दिवचनम्**—

---

१ अतःपरं पृ. २७ प. २७ पर्यन्तं **कखग** पाठः ।

“ पत्नीदाहोपयुक्ताग्नेरग्न्याधेयात्पुरा मृतौ । प्रेताधानं तु कर्तव्यमग्न्याधानं तु जीवतः ॥
“ पत्नीदाहोपयुक्ताग्नेर्विच्छिन्नाग्निसमत्वतः । नाद्दत्य ऋतुनक्षत्रं नारम्भार्थादिकं च न ” ॥ इति ।

तत्पुनः कृतोद्वाहविषयम्।‘पुनर्दारक्रियां कुर्यात्पुनराधानमेव च’ इति मन्वादिस्मरणात् (५।१६७)। न च ‘अग्न्याधानं तु जीवत’ इत्येतदशक्यविवाहविषयम् । ‘अथाशक्ये नैर्मन्थ्येनैव दाहयेत्’ इति वचनात् । तदेवं शक्यविवाहः पत्नीं स्वाग्निभिर्दाहयित्वा पुनर्दारक्रियां कृत्वा अविलंबेनाग्नीनादध्यात् । अशक्यविवाहस्तु निर्मन्थ्येन पत्नीं दाहयित्वा यावज्जीवमग्नीन्परिचरेदिति स्थितम् । अपरे तु पत्नीदाहोपयुक्ताग्निर्विधुर आत्मार्थमग्न्याधेयं कृत्वा यावज्जीवमग्निहोत्रं कुर्यादित्याहुः। तथा च ‘ अपत्नीकोऽपि अग्निहोत्रमाचरेत् ’ इति, ‘ दारकर्मणि यद्यशक्तः आत्मार्थमग्न्याधेयं कुर्यात् । पत्नीदाहोपयुक्ताग्निः अग्न्याधेयं कृत्वा तत्पुरा मृतौ ’ इत्यादीनि पूर्वोक्तानि वचनानि तद्विषयतया योजयन्ति ।

‘ पत्नीदाहोपयुक्ताग्नेरग्न्याधेयं तु जीवतः ’ इति वचनं यः शक्याशक्यसंशयविषयः ‘ पत्नीदाहोपयुक्ताग्निः सन् विवाहं न शक्नुयात् ’ तद्विषयम् । ततश्च ‘ आहिताग्निः पूर्वमृताम् ’ इत्यनेन न विरुध्यते । विच्छिन्नाग्नेः पत्नीमरण इत्यादि भाष्यस्यापि कदाचित्पत्नीमरणे सति विच्छिन्नाग्नेरिति योजनेति ते वर्णयन्ति । यद्यपि ‘पाणिग्रहणाद्धि सहत्वं कर्मसु’ इत्यादिभिः पतिवत् पत्न्या अपि स्वामित्वमवगम्यते तथापि नोभयोस्तुल्यता । ‘पत्नीवदस्याग्निहोत्रम्’ इत्यादौ यजमानस्यैव प्राधान्येन स्वामित्वावगमात् । ‘ज्योतिष्टोमेन यजेत’ इत्यादावेकवचनश्रुत्या च यजमानस्यैवाधिकारत्वावगमात् । तदङ्गतया पत्न्याः स्वामिकोट्यनुप्रवेशात्स्वामित्वं सहत्वं च निर्वोढव्यम् । ‘पत्नी हि पारीणह्यस्येशे’ इति श्रुत्या (तै. सं. ६।२।१) गृहोपकरणरूपधनैकदेशस्वामित्वमवगम्यते । अत एव ‘ उपाधिनाऽपि तत्कर्म यावज्जीवं समापयेत् ’ इति पत्न्याः प्रतिनिधिः स्मर्यते । अन्यथा ‘ न च प्रतिनिधिर्मन्त्रस्वामिदेवाग्निकर्मसु ’ इति स्वामिप्रतिनिधिनिषेधेनोपाधिना कर्म समापनमयुक्तं स्यात् । न च वचनात् प्रतिनिधिस्थापनमिति वाच्यम् । वचनादेव पत्न्याभावेऽपि अग्निहोत्रादेरनिवृत्तेः । कपर्दी च—

“अस्ति स्वामित्वलेशोऽस्यास्तत्प्राचुर्यं तु भर्तरि । स हि प्रधानं विधिभिस्तस्यैवाथ क्रिया यतः” ॥ इति।

अनेनैव न्यायेनानाहिताग्नेरपि शक्ये विवाहे औपासनेन पूर्वमृतां पत्नीं दाहयित्वा विवाहः कार्यः । अशक्ये तु नैर्मन्थ्येन दाहयित्वा धार्यौपासन इति द्रष्टव्यम् ।

अत्र आश्वलायनो विशेषमाह—

“ स्मार्ताग्निनाग्निभिर्दग्ध्वा मृतां पत्नीं च तां त्रिभिः । शिष्टाग्निनोद्वहेदन्यां पुनश्चैवाग्निमान्यजेत् ॥
“ प्रागुद्वाहाच्च शिष्टाग्नौ स्मार्तस्याग्नेर्यथाविधि । शुश्रूषेदप्यपत्नीक इष्टिं कुर्याच्च वा न वा ॥
“ सायंप्रातर्होमधर्ममर्धाग्नावपि सञ्चरेत् ” इति ॥

अनाहिताग्निः पूर्वमृतां पत्नीमौपासनार्धेन दग्ध्वा शिष्टार्धे सायंप्रातर्जुह्वन् स्थालीपाकं च कुर्वन् तस्मिन्नन्यामुद्वहेत् । पुनरुद्वाहमकुर्वन्वा सायंप्रातर्होममर्धाग्नावेव यावज्जीवं सञ्चरेत् । आहिताग्निस्तु त्रिभिरग्निभिस्तां दग्ध्वा पुनरुद्वाहानन्तरमग्निमान् भूत्वा यजेत् । उद्वाहाशक्तौ निर्मन्थ्येन पत्नीं दग्ध्वा यावज्जीवमग्निहोत्रं कुर्वन् पर्वणोरिष्टिं कुर्यादित्यर्थः । भारद्वाजोऽपि—

“ दंपत्योरुभयोरेको यदि प्राणैर्वियुज्यते । भर्ता वा यदि वा पत्नी जीवन्विधुर उच्यते ॥
“ द्वयोः साधारणो वह्निः सहसंस्कारसंस्कृतः । प्रेतं विधिबलाद्धेति पत्नीं भर्तारमेव वा ॥

“ संस्कृत्य विधिवत्प्रेतं वह्निर्जीवन्तमश्नुते ’ ॥ इति । तदेवमेकाग्निः पत्न्या अग्निमदत्वार्धं दत्वा वा अपत्नीकोऽपि यावज्जीवमौपासनं परिचरेत् । केचित्तु औपासनाग्निना पत्नीं दग्ध्वा विधुरोऽप्यग्निमुत्पाद्यौपासनं कुर्यादिति ॥

अग्न्युत्पत्तिप्रकारः क्रियाकल्पकारिकायामभिहितः—

“ उद्धृत्य वह्निं प्रणवेन पूर्वमन्वग्निमन्त्रेण हरेत्पुरस्तात् ।
“ निधाय ‘ पृष्टो दिवि ’ मन्त्रकेण ततस्तु होमः शकलैश्चतुर्भिः ॥
“ रेखादयो नैव च तत्सतां स ‘ विश्वानिनोद्यान ’ इमे च मन्त्राः ।
“ आरोहणं नास्त्यवरोहणं स्याद्त्पत्तिरेवं विधुरानलस्य ॥
“ नित्यानि नैमित्तिककाम्यकर्माण्यत्रैव कुर्याद्विधुरः सदैव ” ॥ इति । एवमुत्पाद्य सायंप्रातरौपासनं कुर्यात् । कर्मान्तेऽग्निर्लौकिक इत्याहुः । तथा च **भारद्वाजः**—

“ आधाय विधिवद्वह्निं भर्ता पत्न्यपि वा पुनः । यावज्जीवं परिचरेदोषधीभिर्यथाविधि ॥
“ स्थालीपाकं चाग्रयणमस्मिन्नग्नौ विधीयते ।आ प्राणविप्रयोगान्तं न जहात्येष पावकः ॥
“प्राणैर्वियुक्ते संस्कुर्याद्विधुरं विधुराग्निना” ॥ इति । ‘स्त्री चैवं भर्तरि प्रेते’ इति वचनाद्भर्तरि प्रेते पत्न्यप्यौपासनं परिचरेदित्यर्थः । अत्र **सार्वभौमीये**–‘ पाणिग्रहणाद्धि गृहमेधिनोर्व्रतम्’ इति द्विवचनस्वारस्याद्न्यतरात्यये स्मार्तकर्मानधिकारज्ञापनाद्वाभ्यां कर्माणि कर्तव्यानीत्युभयाधिकारित्वेनैव गार्ह्यकर्मादौ सङ्कल्पाच्च विधुरस्याश्रमान्तरपरिग्रहार्हत्वाय सन्ध्यावन्दनमात्रं कर्तव्यमिति ।

तथा च तस्याग्न्याभावं सिद्धवत्कृत्य मन्त्रजपेन तत्फलावाप्तिमाह **शौनकः**

“महत्तत्प्रजपेत्सूक्तं पञ्चवारं दिनेदिने ! औपासनं विना दोषो न स्पृशेद्विधुरं ततः ॥
“अग्ने नय’जपेदृचं पञ्चवारं दिनेदिने । विधुरस्याग्निकस्यैव यत्फलं तद्भवेद् ध्रुवम्”॥इति।

शातातपोऽपि—

“अनग्निरपि यो विप्रः सदाचारपरो यदि । श्राद्धादिषु समस्तेषु सोऽपि ग्राह्यो मनीषिभिः ॥
“अनग्निकस्य वेदोऽग्निर्वेदहीनोऽप्यनग्निकः । साऽग्निकोऽप्यनधीतश्चेदनग्निक इति स्मृतः ॥
“ वैधुर्यं न तु बाधेत पुत्रवान्यदि यो द्विजः । तथा च वेदविच्चैव सर्वकर्मसु सोऽर्हति ॥
“पुत्रवान्मृतभार्योऽपि सोऽग्निमानिति संस्कृतः । पुत्र एवाग्निरित्याहुः पुत्रार्थं दारसङ्ग्रहः ॥
“मृतायामपि भार्यायां प्रत्यक्षाग्निर्विनश्यति । आत्मन्यग्निर्न नश्येत्तु तस्मात्कर्मार्ह एव सः”॥ इति ॥
एवं चैकाग्नेर्विधुरस्याग्निस्वभावासद्भावयोः शिष्टाचारप्राचुर्येण व्यवस्थाऽवगन्तव्या । इति **यजनम्**॥

अथ **याजनं** निरूप्यते ।

तत्र विधिः **श्रूयते**—“ द्रव्यमार्जयन्ब्राह्मणः प्रतिगृह्णीयाद्याजयेदध्यापयेद्वा ” इति । न चायं नित्यविधिः । अकरणे प्रत्यवायादिनित्यलक्षणाभावात् । अपि तु काम्यविधिः । द्रव्यार्जनकामस्य तत्राधिकारात् । तत्रापि नापूर्वविधिः । जीवनोपायत्वेन याजनस्य प्राप्तत्वात् । अग्निहोत्रं जुहुयादष्टकाः कर्तव्या इत्यादिवदत्यंताप्राप्त्यभावात् । अत्यंताप्राप्तप्रापणं ह्यपूर्वविधिः । नापि परिसंख्या । एकस्यानेकत्र प्राप्त्यभावादेकस्योभयत्र प्राप्तस्यान्यतो निवृत्त्यर्थमेकत्र पुनर्वचनं परिसंख्या ।

---

१ ज स्यनेक; क्ष–स्यानेकपुत्रप्राप्त्य ।

" इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्त " इत्यत्र मंत्रलिंगसामर्थ्यादश्वाभिधान्या गर्दभाभिधान्याश्च रशनाया ग्रहणे विनियुक्तः पुनरश्वाभिधानीमादत्त इति वचनेनाश्वाभिधान्यां विनियुज्यमानो गर्दभाभिधान्या निवर्तते। तथा च 'पंच पंचनखा भक्ष्या' इत्यत्र स्वेच्छया शशादिषु श्वादिषु च प्राप्तं पुनः शशादिषु श्रूयमाणं श्वादिभ्यो निवर्त्तत इति। तस्मात्पक्षे प्राप्तत्वात् 'समे देशे यजेत' 'प्राङ्मुखोऽन्नानि भुंजीत' इतिवन्नियमविधिरयम्। मंत्रेष्वृष्यादिज्ञानं च याजनांगत्वेन **छंदोगब्राह्मणे** समाम्नायते " यो ह वा अविदितार्षेयछंदोदैवतब्राह्मणेन मंत्रेण याजयति वाऽध्यापयति वा स्थाणुं वर्च्छति गर्तं वा पद्यते प्र वा मीयते पापीयान्भवति। यातयामान्यस्य छंदांसि भवंतीति " तदज्ञातृयाजकस्य दोषाभिधानात् " याजयित्त्वा प्रतिगृह्य वाऽनश्नन् त्रिः स्वाध्यायं वेदमधीयेत " इत्यादीनि अयाज्ययाजनविषयाणि। तथा च **देवलः** 'यः शूद्रान्पतितांश्चापि याजयेदर्थकारणात्।याजितो वा पुनस्ताभ्यां ब्राह्मणोऽयाज्ययाजकः'॥इति। **मनुः** (३।६५)—

" अयाज्ययाजनैश्चैतैर्नास्तिक्येन च कर्मणाम्। कुलान्यकुलतां यांति यानि हीनानि मंत्रतः ॥

"संवत्सरेण पतति पतितेन समाचरन्। याजनाध्यापनाद्यौनान्न तु शय्यासनादिना"॥(११।१८०)।

पतितेन संसर्गं कुर्वन् शयनादिना संवत्सरेण पतति। याजनादिना तु संवत्सरेण न किंतु सद्यः पततीत्यर्थः। यौनं विवाहः। **देवलः**—

"याजनं योनिसंबंधं स्वाध्यायं सहभोजनम्। कृत्वा सद्यः पतत्येव पतितेन न संशयः"॥

बोधायनः (२।१।६२)—

"संवत्सरेण पतति पतितेन समाचरन्। याजनाध्यापनाद्यौनात्सद्यो न तु शय्यासनादिभिः"॥इति। **आपस्तंबः** (१।२१।५) " न पतितैः संव्यवहारो विद्यते। तेषामभ्यागमनं भोजनं विवाहमिति च वर्जयेत् " इति (१।१।३३)। **व्यासः**—

" संवत्सरेण पतति संसर्गं कुरुते तु यः। यानशय्यासनैर्नित्यं जानन्वै पतितो भवेत् ॥

"याजनं योनिसंबंधं तथैवाध्यापनं द्विजः। कृत्वा सद्यः पतेत् ज्ञानात्सहभोजनमेव वा"॥ **संवर्त्तः**—

" महापातकसंयोगी ब्रह्महत्यादिभिर्नरः। तत्संसर्गविशुध्यर्थं तस्य तस्य व्रतं चरेत् " ॥ इति।

यमः—" प्रतिग्रहाध्यापनयाजनानां प्रतिग्रहं श्रेष्ठतमं वदंति।

" प्रतिग्रही शुध्यति जप्यहोमैः याज्यं तु पापैर्न पुनन्ति वेदाः" ॥ **इति याजनम्** ॥

अथाध्ययनम्।"स्वाध्यायोऽध्येतव्यो ब्राह्मणेन षडंगो वेदोऽध्येय"**इति श्रूयते**(सह वै उपनिषदि)। अनेन अर्थज्ञानपर्यंतं अध्ययनं विधीयते इति न्यायसिद्धम्। मंत्राः पुनरविदितार्थानुष्ठाना अनुष्ठेयार्थप्रकाशनासमर्थाः। तस्मात्प्रतिपन्नवेदार्थेऽनुष्ठाताभिलषितानि कर्मफलानि प्राप्नोति न च प्रत्यवैतीति वेदोऽध्येतव्यः तदर्थश्च प्रतिपत्तव्यः। अत्र **मनुः** (२।१६५)—

" तपोविशेषैर्विविधैर्व्रतैश्च विधिचोदितैः। वेदः कृत्स्नोऽधिगंतव्यः सरहस्यो द्विजन्मना " ॥

व्रतैः प्राजापत्यादिभिः। कृत्स्नः सांगः। **स** एव (२।१६६)—

" वेदमेव सदाभ्यस्येत् तपस्तप्स्यन् द्विजोत्तमः। वेदाभ्यासे हि विप्रस्य तपः परमिहोच्यते " ॥

इह वेदे। उच्यते "तपो हि स्वाध्याय " इति **श्रूयते**।

"योऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम्। स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः"(१६८)॥

" कुविवाहैः क्रियालोपैर्वेदानध्ययनेन च। कुलान्याशु विनश्यंति ब्राह्मणातिक्रमेण च (३।६३)॥

---

१ **ट**–पाठः। २ **क्ष**–भो। ३ **ट**–ह्वा। ४ **क्ष**–न यजनं कर्म पुनर्निवेदाः। ५ **कग**–निष्कारणं।

"मंत्रवन्ति समृद्धानि कुलान्यल्पधनान्यपि। कुलसंख्यां च गच्छंति कर्षंति च महद्यशः॥

"यदधीतमविज्ञानं निगदेनैव शब्द्यते। अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्"॥

श्रूयते च (निरुक्ते १।८)—

"स्थाणुरयं भारहावः किलाभूदधीत्य वेदान् न विजानाति योऽर्थम्। योऽर्थज्ञ इत्सकलं भद्रमश्नुते स नाकमेति ज्ञानविधूतपाप्मा"॥ इति। **मनुरपि** (१२।१००)—

"सेनापत्यं च राज्यं च दंडनेतृत्वमेव च। सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति॥

"इतिहासपुराणज्ञः पदवाक्यप्रमाणवित्। अंगोपकारवेदी च वेदार्थं ज्ञातुमर्हति"॥ इति।

इतिहासो भारतरामायणादिः। **कूर्मपुराणे** (उत्तरार्धे अ. १४ श्लो. ८४–८७)—

"योऽन्यत्र कुरुते यत्नमनधीत्य श्रुतिं द्विजः। स वै मूढो न संभाष्यो वेदबाह्यो द्विजातिभिः॥

"न वेदपाठमात्रेण संतुष्टो वै द्विजोत्तमः। पाठमात्रावसानस्तु पंके गौरिव सीदति॥

"योऽधीत्य विधिवद्वेदं वेदार्थं न विचारयेत्। स सान्वयः शूद्रसमः पात्रतां न प्रपद्यते"॥

याज्ञवल्क्यः—

"पारंपर्यागतो येषां वेदः सपरिबृंहणः। तच्छाखाकर्म कुर्वीत तच्छाखाध्ययनं तथा॥

"यः स्वशाखां परित्यज्य पारक्यमधिगच्छति। स शूद्रवद्बहिष्कार्यः सर्वकर्मसु साधुभिः॥

"अधीत्य शाखामात्मीयां परशाखां ततः पठेत्"॥ **मनुः** (२।१५७–१५८)—

"यथा काष्ठमयो हस्ती यथा चर्ममयो मृगः। ब्राह्मणश्चानधीयानः त्रयस्ते नामधारकाः"॥ इति।

"यथा षंढोऽफलस्त्रीषु यथा गौर्गवि चाफला। यथा चाज्ञेऽफलं दानं तथा विप्रोऽनृचोऽफलः"॥

पराशरः (८।२८)—

"ये पठंति द्विजा वेदं पंचयज्ञरताश्च ये। त्रैलोक्यं तारयंत्येते पंचेंद्रियरता अपि"॥

संवर्त्तः "वेदं चैवाभ्यसेन्नित्यं शुचौ देशे समाहितः" इति। **दक्षः**—

"वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः। तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पंचधा"॥

व्यासः—

"वेदाभ्यासं ततः कुर्यात्प्रयत्नाच्छक्तितो द्विजः। वेदमध्यापयेच्छिष्यान् धारयेच्च विचारयेत्॥

"अधीतमपि यो वेदं विमुंचति यदा नरः। भ्रूणहा स तु विज्ञेयो वियोनिमधिगच्छति"॥

मनुः (११।१९८)—

"शरणागतं परित्यज्य वेदं विप्लाव्य च द्विजः। संवत्सरं यवाहारस्तत्पापमपसेधति"॥

याज्ञवल्क्यः (आ. ४०)—

"यज्ञानां तपसां चैव शुभानां चैव कर्मणाम्। वेद एव द्विजातीनां निःश्रेयसकरः परः"॥

यज्ञादीनां बोधकत्वेन निःश्रेयसकरः। **व्यासः**—

"हरिरोमिति निर्दिश्य यत्कर्म क्रियते बुधैः[३]। अधीयतेऽपि राजर्षे तद्धि वीर्यकरं भवेत्"॥

आपस्तंबः (१।१३।६–७)—"ओंकारः स्वर्गद्वारं तस्माद् ब्रह्माऽध्येष्यमाणः एतदादि प्रतिपद्येत। विकथां चान्यां कृत्वा एवं लौकिक्या वाचा व्यावर्त्तते ब्रह्म"॥इति। ब्रह्म वेदं स्वर्गसाधनम् अध्येष्यमाणः स्वर्गद्वारं प्रणवमादौ कृत्वा प्रतिपद्येत उपक्रमेत। अध्येतुमध्ययनेन अनुपयुक्ता कथाविकथां चान्याकृत्वेतदादिप्रतिपद्येत। एवं सति ब्रह्म वेदः लौकिक्या वाचा व्यावर्त्तते तथा व्यामिश्रितं न भवतीत्यर्थः। **अथर्वणे श्रूयते**—"प्रणवं देवा असुरजयार्थं प्रार्थयंतः। वरं वृणी-

१ 'स चाक्षः शब्दकल्पस्व' इति पाठः। २ ग—निभाति। ३ ख—न गै०।

च्चेत्यब्रुवंस्तान् प्रणवोऽब्रवीत् न मामनिराधित्वा ब्राह्मणा ब्रह्म वदेयुर्यदि वदेयुः अब्रह्मैव स्यादिति। तस्मादोंकारः पूर्वमुच्यत इति। एव एव हि पुरस्तादुच्यते एव पश्चादितीति च"। इत्यध्ययनम्॥

अथाध्यापनम्। स्मृतिरत्ने—

" याजनाध्यापने शुद्धे तथा पूतप्रतिग्रहः। एष सम्यक्समाख्याता त्रितयी तस्य जीविका "॥

अध्यापने नियमानाह **यमः**—

"सततं प्रातरुत्थाय दंतधावनपूर्वकम्। स्नात्वा हुत्वा च शिष्येभ्यः कुर्यादध्यापनं नरः "॥

मनुरपि (२।७०)—

" अध्येष्यमाणं तु गुरुर्नित्यकालमतंद्रितः। अधीष्व भो इति ब्रूयाद्विरामोऽस्त्विति चारमेत्॥

" आचार्यपुत्रः शुश्रूषुर्ज्ञानदो धार्मिकः शुचिः। शक्तोऽर्थदोऽर्थी स्वः साधुरध्याप्या दश धर्मतः॥ (२।१०९)

"धर्मार्थौ यत्र न स्यातां शुश्रूषा वाऽपि तद्विधा। तत्र विद्या न वक्तव्या शुभं बीजमिवोषरे (११२)॥

"विद्ययैव समं कामे मर्तव्यं ब्रह्मवादिना। आपद्यपि च घोरायां न त्वेनामिरिणे वपेत् (११३)॥

"विद्या ब्राह्मणमेत्याह शेवधिस्तेऽस्मि रक्ष मां। असूयकाय मां माऽदाः तथास्यां वीर्यवत्तमा (११४)॥

"यमेव तु शुचिं विद्यान्नियतं ब्रह्मचारिणम्। तस्मै मां ब्रूहि विप्राय निधिपायाप्रमादिने" (११५)॥

शेवधिरित्यादिविद्याया वचनं शेवधिर्निधिः। ते शेवधिरस्मि विद्या जानीयाः। निधिपालाय विद्यानिधिपालाय। **स एव** (२।११६)—

" ब्रह्म यस्त्वननुज्ञातमधीयानादवाप्नुयात्। स ब्रह्मस्तेयकृद्विप्रो नरकं प्रतिपद्यते॥

"नापृष्टः कस्यचिद्ब्रूयात् न चान्यायेन पृच्छतः। जानन्नपि हि मेधावी जडवल्लोक आचरेत्(११०)॥

" अधर्मेण तु यः प्राह यश्चाधर्मेण पृच्छति। तयोरन्यतरः प्रैति विद्वेषं वाऽधिगच्छति" (१११)॥

प्राह वचनं करोति। प्रैति म्रियते।

विद्याधर्मस्त्रियो विशिष्टतराश्चेदविशिष्टादप्यपादानादवश्यमुपादेया इत्याह **स एव** (२।२३८)

" श्रद्दधानः शुभां विद्यामाददीतावरादपि। अंत्यादपि परं धर्मः स्त्रीरत्नं दुष्कुलादपि "॥

एतदेव दृष्टांतेनोपपादयति (२।२३९–२४३)

" विषादप्यमृतं ग्राह्यं बालादपि सुभाषितम्। अमित्रादपि सद्वृत्तममेध्यादपि कांचनम्॥

"स्त्रियो रत्नं तथा विद्या धर्मः शौचं सुभाषितम्। विविधानि च शिल्पानि समादेयानि सर्वतः॥

" अब्राह्मणादध्ययनमापत्काले विधीयते। अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरोः "॥

अब्राह्मणात्क्षत्रियवैश्याभ्याम्।

"अधीयीरन्स्वकर्मस्थास्त्रयो वर्णा द्विजातयः। प्रब्रूयात् ब्राह्मणस्त्वेषां नेतराविति निश्चयः(१०।१)॥

" ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः। चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पंचमः "॥ (१०।४)

हारीतः—

"मंत्रार्थज्ञे जपञ्जुह्वंस्तथैवाध्यापयन् द्विजः। स्वर्गलोकमवाप्नोति नरकं तु विपर्यये"॥

लिखितं पाठं निषेधति **नारदः**—

" पुस्तकप्रत्ययाधीतं नाधीतं गुरुसंनिधौ। भ्राजते न सभामध्ये जारगर्भ इव स्त्रियाः"॥ इति।

स एव—

"हस्तहीनस्तु योऽधीते स्वरवर्णविवर्जितः। ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति"॥

हारीतः—

१ क्ष-तृतीयं। २ क्ष-कर्तव्यं। ३ क्ष-ऐस्म। ४ क्ष-त्यं।

" अध्यापनं च त्रिविधं धर्मार्थं चार्थकारणात् । शुश्रूषाकरणाच्चेति त्रिविधं परिकीर्तितम् ॥
" येषामन्यतमाभावे वृथाचारे भवेद् द्विजाः । तत्र विद्या न दातव्या पुरुषेण हितैषिणा ॥
"योग्यानध्यापयेच्छिष्यानयोग्यानपि वर्जयेत् " ॥ **याज्ञवल्क्यः** (आ. २८)—
"कृतज्ञोऽद्रोहि मेधावी शुचिः कल्पोऽनसूयकः। अध्याप्यो धर्मतः साधुः शक्ताप्तो ज्ञानवित्तदः"॥ **व्यासः**—
"कृतज्ञश्च तथाऽद्रोही मेधावी शुभकृन्नरः । आप्तः प्रियोऽथ विधिवत् षडध्याप्या द्विजोत्तमैः"॥इति। **आपस्तंबः** (२।५।१८)—"यथागमं शिष्येभ्यो विद्यासंप्रदाने नियमेषु च युक्तः स्यादेवं वर्त्तमानः पूर्वापरान् संबन्धानात्मानं च क्षेमे युनक्ति " इति । येन प्रकारेणागमपाठार्थयोस्तथैव शिष्येभ्यो निर्मत्सरेण विद्या संप्रदेया । एवंभूतो विद्यासंप्रदाने युक्तोऽवहितः स्यात् च गृहस्थस्य नियमाध्यापनेऽन्यत्र च तेष्वपि युक्तः स्यादेवं वर्त्तमानः पूर्वान्पितृपितामहप्रपितामहानपरान् पुत्रपौत्रनप्तॄन्कर्मणिवर्त्तुस्वसंबंधिनः पुरुषानात्मानं च क्षेमे अभयस्थाने नाकपृष्ठे युनक्ति स्थापयतीत्यर्थः ॥
बोधायनः (१।२।४९–५०)—
"धर्मार्थौ यत्र न स्यातां शुश्रूषा वाऽपि तद्विधा । विद्यया सह मर्तव्यं न चैनामूषरे वपेत्॥
"अग्निरिव कक्षं दहति ब्रह्मपृष्ठमनादृतम् । तस्माद्वै शक्यं न ब्रूयाद्ब्रह्म मानमकुर्वताम्" ॥ इति । **स एव** (१।२।४२–४३)—"अब्राह्मणादध्ययनमापदि शुश्रूषाऽनुव्रज्या च यावदध्ययनम्"॥इति । **गौतमः** (९।६८)—" सत्यधर्मार्यवृत्ती शिष्टाध्यापकः" इति । **स एव** (७।१) " आपत्कल्पो ब्राह्मणस्याब्राह्मणाद्विद्योपयोगोऽनुगमनं शुश्रूषा समाप्ते ब्राह्मणो गुरुः"॥ इति । न चापररात्रमधीत्य पुनः प्रतिसंविशेन्न स्वप्यादित्यर्थः । **मनुः** (४।९९)
"नाविस्पष्टमधीयीत न शूद्रजनसंनिधौ । नानिशीथे परिश्रांते ब्रह्माधीत्य पुनः स्वपेत्"॥ **व्यासः**—
"अनध्यायेष्वधीतं यद्यच्छूद्रस्य च संनिधौ । प्रतिग्रहनिमित्तं च नरकाय तदुच्यते"॥ इति। **स एव**—
"आत्मार्थं भोजनं यस्य रत्यर्थं यस्य मैथुनम् । वृत्त्यर्थं यस्य चाधीतं स याति नरकान्बहून्" ॥
शातातपः—
"वेदाक्षराणि यावंति नियुंज्यादर्थकारणात् । तावंति भ्रूणहत्या वै वेदविक्रय्यमाप्नुयात् " ॥
छागलेयः—
" प्रख्यापनं प्राध्ययनं प्रश्नपूर्वप्रतिग्रहः । याजनाध्यापने वादः षड्विधो वेदविक्रयः " ॥ प्रख्यापनं अहं चतुर्वेदीत्यादि राजमंदिराद्वाक्रोशः । स्वस्योत्कर्षार्थमध्ययनं प्राध्ययनम् । कियन्मे दास्यतीत्युक्त्वा प्रतिग्रहो याजनमध्यापनम् । प्रश्नपूर्वाणि इतरमधिक्षिप्य स्वविद्याख्यापने परस्परं विवादः । **शातातपः**—
" प्रश्नपूर्वं तु यो दद्याद्ब्राह्मणाय प्रतिग्रहम् । स पूर्वं नरकं याति ब्राह्मणस्तदनंतरम् " ॥
स्मृतिसंग्रहे—
"गायत्रीं मूल्यमादाय यः परस्मै प्रयच्छति । स जीवन्नन्त्यजातित्वं संप्राप्नोति न संशयः"॥
शौनकः—
" वेदाक्षराणि यावंति नियुंक्ते त्वर्थकारणात् । तावंति भ्रूणहत्या वै लभते नात्र संशयः ॥
" अर्थार्थं भोजनार्थं वा यो वेदाक्षरमुच्चरेत् । चांडालः स तु विज्ञेयः सर्वकर्मबहिष्कृतः"॥ इति । भृतकाध्ययनभृतकाध्यापने उपपातकेषु पठति **याज्ञवल्क्यः** (प्रा. २३५)—" भृतकाध्ययनादानं भृतकाध्यापनं तथा " ॥ इति । इत्यध्यापनम् ।

अथोपाकरणम् ॥ **मनुः** (४।९५–९६)—

“ श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधि । युक्तश्छंदांस्यधीयीत मासान्विप्रोऽर्धपंचमान् ॥

“ पुष्ये तु छंदसां कुर्याद्बहिरुत्सर्जनं द्विजः । माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनि ” ॥

अध्वर्यूणां श्रावण्यां प्रौष्ठपद्यां छंदोगानामिति व्यवस्थितविषयोऽयं विकल्प इति तद्व्याख्यानम् । ग्रामाद्बहिरुत्सर्जनाख्यं कर्म प्रथमेऽहनि प्रथमायां तिथौ पुष्येऽध्वर्यूणां माघे छंदोगानाम् । **आपस्तंबः** (१।९।१–३)—“ श्रावण्यां पौर्णमास्यामध्यायमुपाकृत्य मासं प्रदोषे नाधीयीत तैष्यां पौर्णमास्यां रोहिण्यां वा विरमेदर्धपंचमांश्चतुरो मासानित्येके” इति ॥

“मेषादिस्थे सवितरि यो यो दर्शः प्रवर्तते । चांद्रमासास्तत्तदंताश्चैत्राद्या द्वादश स्मृताः ॥

“तेषु या या पौर्णमासी सा सा चैत्र्यादिकाः स्मृताः । कादाचित्केन योगेन नक्षत्रस्येति निर्णयः”॥

तदेवं सिंहस्थे सवितरि याऽमावास्या तदंते चांद्रमासे या मध्यवर्तिनी पौर्णमासी सा श्रावणी । श्रवणयोगस्तु भवतु वा मा वाऽभूत् । तस्यामध्यायमुपाकृत्य स्वगृह्योक्तेन विधिना ‘उपाकर्म स्वगृह्योक्ते काल ’ **इत्यत्रिस्मरणात्** । स्वगृह्योक्तकाले उपाकर्म कृत्वा स्वाध्यायमधीयीत । अधीयानश्च मासमेकं प्रदोषे प्रथमे रात्रिभागे नाधीयीत । तैष्यां पौर्णमास्यां तैषे मासि तिष्यात्पूर्वा या रोहिणी तस्यां विरमेत् । स्वगृह्योक्तविधिना उत्सर्जनं कुर्यात् । अनयोः पक्षयोः पंच मासानधीयीत अर्धपंचमानिति अर्धं पंचमो येषां ते अर्धपंचमाः । अर्धाधिकांश्चतुरो मासानधीयीतेत्येके मन्यंते । अस्मिन्पक्षे प्रौष्ठपद्यामुपाकरणं शाखांतरदर्शनादिति । तथा **गौतमः** (१६।१) “श्रावणादिवार्षिकं प्रौष्ठपदीं वोपाकृत्य तदादि छन्दांस्यधीयीत”। तदिदमध्ययनं वार्षिकं प्रतिसंवत्सरं भवति अर्धपंचमान्पूर्णान्यावद्दक्षिणायनं वाऽधीयीतेत्यर्थः। **बोधायनस्तु** (१।५।१४३)—“ श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्य तैष्यां माघ्यां वोत्सृजेयुः ” ॥ इति । **याज्ञवल्क्यः** (आ. १४२)—

“ अध्यायानामुपाकर्म श्रावण्यां श्रवणेषु वा । हस्तेनौषधिभावे वा पंचम्यां श्रावणस्य वा ” ॥

ओषधीनां प्रादुर्भावे सति श्रावणमासस्य पौर्णिमास्यां श्रवणयुक्ते वा दिने हस्तेन युक्तायां पंचम्यां वा स्वगृह्योक्तविधिना कुर्यात् ।

अत्र व्यवस्था दर्शिता **स्मृतिसारे**—श्रावण्यां पौर्णमास्यां श्रावणमासस्य श्रवणे वा पंचम्यां हस्ते वा पंचमीहस्तयोगे भाद्रपदपौर्णमास्यां तत्रापि श्रवणे हस्ते वा पंचम्यां पंचमीहस्तयोगे वा यथास्वकुलाचारं कुर्यादिति । **कालादर्शेऽपि**—

“अध्यायानामुपाकर्म श्रावण्यां तैत्तिरीयकाः । बह्वृचाः श्रवणे कुर्युः सिंहस्थोऽर्को भवेद्यदि ॥

“सहस्तशुक्लपंचम्यां न तद्ग्रहणसंक्रमे । असिंहार्के प्रोष्ठपद्यां श्रवणे च व्यवस्थया” ॥ इति ।

अर्कः सूर्यः सिंहराशिस्थितो यदि स्यात्तदा तैत्तिरीयाः श्रावणमासस्य पौर्णमास्यामध्यायानामुपाकर्म कुर्युः । बह्वृचाः श्रवणनक्षत्रयुक्ततिथौ कुर्युः । तत्रासंभवे तन्मास एव हस्तनक्षत्रयुक्तपंचम्यां वा कुर्यात् । ग्रहणे संक्रमे च तदुपाकर्म न कुर्युः । असिंहार्क इति यदि सूर्यः सिंहराशिस्थितो न भवति तदा प्रोष्ठपद्यां भाद्रपदपौर्णमास्यां श्रवणे च व्यवस्थया कुर्युः । प्रोष्ठपद्यां तैत्तिरीयकाः कुर्युः । बह्वृचाः श्रवणर्क्षयुक्ततिथाविति व्यवस्था । चकारात् भाद्रपदमासे हस्तनक्षत्रयुक्ततिथाविति सूचितम् । तथाह **गार्ग्यः**—

“ पर्वण्यौदयिके कुर्युः श्रावणं तैत्तिरीयकाः । बह्वृचाः श्रवणे चैव ग्रहसंक्रांतिवर्जिते ” ॥

औदयिके उदयकालव्यापिनी । **गौभिलोऽपि**—

---

१ अ—वा । २ अ—रू । ३ अ—स्या । ४ अ—भाद्रपदपौर्णमासे । ५ अ [illegible] ।

" पर्वण्यौदयिके कुर्युः श्रावणं तैत्तिरीयकाः । बह्वृचाः श्रवणर्क्षे तु हस्तर्क्षे सामवेदिनः " ॥ इति ।

स एव—

"छंदोगाभिहिताः कुर्युः प्रातरौत्सर्गिकीं क्रियाम् । अपराह्णेऽप्युपाकर्म पुष्यहस्तर्क्षयोर्द्विजाः" ॥

हस्तर्क्षे उपाकर्म पुष्यर्क्षे उत्सर्गं कुर्युः ।[2]

" अध्यायानामुपाकर्म कुर्यात्कालेऽपराह्णिके । पूर्वाह्णे तु विसर्गः स्यादिति वेदविदो विदुः ॥

"उपाकर्मणि चोत्सर्गे यथाकालं समेत्य च । ऋषीन् दर्भमयान्कृत्वा पूजयेत्तान् द्विजस्ततः" ॥ इति ॥

सामवेदिनः सिंहभाद्रपदे मौढ्यादिना दूषिते सति कन्यामास अपरपक्षे हस्तनक्षत्रे उपाकरणं कुर्वंति । तत्र सायं त्रिमूहूर्त्तव्यापि हस्तनक्षत्रं ग्राह्यम् । मौढ्यादिरहिते तु सिंहभाद्रपदे शुक्ले उदयादिसंगवान्तव्यापि हस्तर्क्षं ग्राह्यम् । तथा **संग्रहे** " हस्तर्क्षेऽनुदये शुक्ले त्रिमुहूर्त्तास्तगे सिते " इति । हस्तर्क्षे त्वाष्ट्रर्क्षेण संयुतं संगवांतयुगिति च । **तिथिदर्पणे च**—

"औदयिके संगवस्पर्शे श्रुतौ पर्वणि चार्कभे[3] । कुर्युर्नभस्युपाकर्म ऋग्यजुःसामगाः क्रमात्" ॥ इति ।

संगवस्पर्शे संगवांतस्पर्शे । अत्र **वृद्धगार्ग्यः**—

" घटीपरिमितः कालः संगवादूर्ध्वपर्वणि । औदयिकमिति प्राहुर्मुनयः स्मृतिचिंतकाः " ॥

गर्गः " परेन्हि संगवादूर्ध्वं पूर्णिमाश्रवणं व्रजेत् " । **स्मृत्यंतरे**—

" सन्धिः संगवतः पश्चादर्वाङ्मध्यंदिनाद्यदि । तत्रैवोपाकृतिं कुर्यात्सद्यश्च समिदाहुतिः " ॥

"संधिः संगवतः प्राक्चेत्पूर्वस्मिन्पर्वणि क्रिया । श्वोभूते समिदाधानमेष श्रावणिको विधिः" ॥

तथाऽध्वर्यूनधिकृत्य स्मर्यते

"श्रावणी पौर्णमासी तु संगवात्परतो यदि । तदैवौदयिकी ग्राह्या नान्यदौदयिकी भवेत्" ॥ इति ।

तदेवं उदयादि द्वादशघटिकाधिकं किंचित्कालव्यापिन्यां पौर्णमास्यां यजुःशाखिन्यामुपाकर्म । उदयादिद्वादशघटिकाव्यापिनि हस्तनक्षत्रे छंदोगानां मौढ्यादिदूषिते तु सिंहभाद्रपदे कन्यापरपक्षे सायं त्रिमुहूर्त्तव्यापिनी । हस्तनक्षत्रे छंदोगानां बह्वृचानां तु सूर्योदयात्परं घटिकाद्वयव्यापिनि श्रवणनक्षत्रे । तथैव **संग्रहे**

"उदयव्यापिनं चैव विष्णवर्क्षे घटिकाद्वयम् । तत्कर्म सार्थकं स्याच्च तदोपाकरणं भवेत्" ॥

वसिष्ठः मलमायां—

"यां तिथिं समनुप्राप्य श्रवणं घटिकाद्वयम् । तस्यामुपाकृतिं कुर्युराश्वलायनशाखिनः" ॥ इति ।

गार्ग्यः—

" अर्धरात्रादधस्ताच्चेत्संक्रांत्यां ग्रहणेऽपि वा । न कर्त्तव्यमुपाकर्म परतश्चेन्न दोषभाक्" ॥

तथा **पैद्धतौ**—

" मलमासे निपतिते सूतके मृतकेऽपि वा । ग्रहणे संक्रमे वाऽपि मौढ्येऽपि गुरुशुक्रयोः ॥

" प्रौष्ठपद्यामथाषाढ्यामुपाकरणमिष्यते । प्रौष्ठपद्यामुपाकुर्याच्छ्रावणं दूषितं यदि ॥

"आषाढे वाऽपि कर्त्तव्यं प्रौष्ठपद्यां च दूषिते । मासत्रयेऽपि दोषश्चेच्छ्रावण्यामेव कारयेत्" ॥

व्यासः—

" श्रावण्यामथवाऽऽषाढ्यां प्रौष्ठपद्यामथापि वा । दुष्टायां पूर्वपूर्वस्यामुत्तरस्यां विधीयते ॥

" कालत्रयेऽपि दोषे तु श्रावण्यामेव कारयेत् । पौर्णमास्यास्तु नित्यत्त्वादापस्तंबस्य शासनात् ॥

" मुक्त्वा भाद्रपदाषाढ्यौ श्रावण्यामेव कारयेत्" ॥ इति ।

---

१ **क्ष**–धि । २ **ख**–अन्यच्च । ३ **क्ष**–हे । ४ **कखग**–स्थिति । ५ **कखग**–श्रावणव्रते । ६ **कखग**–आवर्तनाद्यादि । ७ **क्ष**– एवाधिको । ८ **क्ष**–घटिकाव्याधिना । ९ **खग**–व्यापिनि त्वेन । १० **कखग**– पद्धतौ । ११ **कखग**–वसिष्ठः ।

"अधीतवेदविद्यानां कर्त्तव्यं तु द्विजन्मनाम् । अध्यायांगमिदं नित्यमिति होवाच भार्गवः ॥
"वेदोपाकरणे प्राप्ते कुलीरस्थे दिवाकरे । उपाकर्म न कर्त्तव्यं कर्त्तव्यं सिंहयुक्तके ॥
"सिंहदर्शा तु या पूर्वा पूर्णा सा श्रावणी मता । तत्रैवोपाकृतिं कुर्यात्सिंहस्थोऽर्को भवेन्न वा" ॥

इत्यादीनां वचनानां परस्परविरुद्धानां देशभेदेनाविरोधमाहुः

"कुलीरे सूर्यसंयुक्ते उपाकुर्यात्तु दक्षिणे । नर्मदोत्तरदेशे तु कर्त्तव्यं सिंहयुक्तके" ॥ इति । आंध्रमहाराष्ट्रककर्णाटककायस्था दाक्षिणात्या तद्व्यतिरिक्ताः सर्वे नर्मदोत्तरतीरस्था इत्यभियुक्तवादः । गुरुशुक्रमौढ्ये मलमासे च प्रथमोपाकरणं प्रतिषेधति **वृद्धमनुः**—

"गुरुभार्गवयोर्मौढ्ये मलमासे तथैव च । प्रथमोपाकृतिर्न स्यात्कुर्याच्चेत्स विनश्यति" ॥ इति । यत्तु "प्राधान्येन विधानाच्च मनुनाऽध्यायकर्मणः । प्रथमोपाकृतिश्चापि कर्त्तव्येत्याह गौतमः" ॥ इति **गौतम**वचनं तत्कृतशांतिविषयम् । यदाह **बृहस्पतिः**—

"शांतिं कृत्वा तयोर्वाऽपि शुक्रदेवेंद्रमंत्रिणोः । होमैर्दानैर्जपैर्वाऽपि तयोरुदितमंत्रकैः ॥
"कर्त्तव्यं श्रावणं विप्रैरिति जीवेन भाषितम्" ॥ इति ।

श्रावणप्रोष्ठपदाषाढेषु एकस्मिन्दोषरहिते प्रथमोपाकृतिः कर्त्तव्या । त्रिष्वपि दुष्टेषु श्रावणमासे शांतिपूर्वका कर्त्तव्या । उदितमंत्रकैः गृहयज्ञोक्तमंत्रैः । **पद्धतिग्रंथे** 'बृहस्पते अति यदर्य' इति **बृहस्पतेः** । 'प्रवः शुक्राय' इति **शुक्रस्य** । "आप्यायस्व स मे तु" इति मलमासो **सोमस्य** । सूर्योपरागसंक्रांतौ 'चित्रं देवानाम्' 'उदुत्यं जातवेदसं' "सूर्यो देवीमुषसम्" "उद्वयंतमसस्परि' 'आ सत्येन रजसा देवो वः सवितोत्पुनातु' इति **सूर्यस्य** । सोमोपरागे 'सोमो धेनुम्' इति षड्भिः 'नवो नवो भवति' इति च **सोमस्य** शांतिहोमं कृत्वा उपाकरणांगहोमं कुर्यादिति ।

"प्रथमोपक्रमे प्राप्ते कुलीरस्थे रवौ सति । उपाकर्म न कुर्वीत कुर्यात्सिंहस्थिते रवौ" ॥ यत्तु "यज्ञोपवीतं कर्त्तव्यं श्रावणे गुरुशुक्रयोः । बाल्ये मौढ्येपि वार्धक्ये कर्त्तव्यं नित्यकर्मवत्" इत्यादि तत् छाखाधीशस्य शक्तिसद्भावविषयमिति । **सार्वभौमीये** तत्रैव—

"ऋग्यजुः सामाथर्वेशा जीवशुक्रकुजेंदुजाः । शाखाधीशे शक्तियुक्ते तच्छाखाध्ययनं शुभम् ॥
"एको मूढो भवेदन्यः स्वोच्चमित्रांशगो यदि । स्वराशिमूढगौ चैव मौढ्यदोषो न विद्यते" ॥ इति

आत्रे[3]यदर्शनात् शुक्रे शक्तियुते गुरुमौढ्येऽपि यजुःशाखोपाकर्म कर्त्तव्यम् । शुक्रमौढ्यादावप्येवम् । मौढ्यादिदोषेषूपाकर्मवर्जनस्मरणं स्वशाखाधीशस्य शक्त्यभावविषयमिति शाखाधीशस्य शक्तौ सत्यामपि मासत्रयदोषे श्रावणमासे शांतिपूर्वकमेवोपाकर्म कर्त्तव्यमित्यन्ये । एतच्चोपाकरणं गृहस्थब्रह्मचारिणोः साधारणं कर्म । मन्वादिभिर्गृहस्थधर्ममध्ये उपाकरणस्य विधानात् । "उपाकर्म तथोत्सर्गं वनस्थानामपीष्यते । धारणाध्ययनं कृत्वा गृहिणां ब्रह्मचारिणाम्" ॥ इति **देवल**स्मरणात् । "अधीयीत गृहस्थोऽपि नियमाद् ब्रह्मचारिवत्" इति **व्यास**स्मरणात् । "समावृत्तो ब्रह्मचारी कल्पेन यथान्यायमितरः" इति **शौनक**स्मरणाच्च । अत्र ब्रह्मचारिकल्पेनेति ईषदसमाप्तौ कल्पविधानात् गृहस्थस्य मेखलाजिनदंडविरहितमुपवीतधारणं तर्पणहोमादिकमविरुद्धं कर्त्तव्यतयाऽवगम्यते ।

अत्रोपवीतधारणमाह **भरद्वाजः**—"अथ यज्ञोपवीतस्य धारणे कथ्यते विधिः ।
"स्नात्वा शुद्धः शुचौ देशे प्रक्षालितपदद्वयः । करद्वंद्वपवित्रश्च कृतोदस्पर्शनो द्विजः ॥
"उपविश्यासने दर्भे प्राणानायम्य मं[4]त्रतः । मंत्रं सदैवमुच्चार्य ब्रह्मसूत्रं गले क्षिपेत् ॥

---

१ **सग**–पूर्णिमा । २ **कखग**–प्राबल्ये सति वेदितव्यमिति । ३ **खग**–त्यादिवचन । ४ **खग**–वाग्यतः ।

" दक्षिणं बाहुमुद्धृत्य शिरसैव सह द्विजः । गृहस्थस्य वनस्थस्य सूत्रं प्रति पुनः पुनः ॥
" मंत्रोच्चारणमाचामद्वितयं क्रमशः स्मृतम् " ॥ **शांडिल्यः**—
" आर्द्रवासा न कुर्वीत कर्म किंचित्कथंचन । राक्षसं तद्धि विज्ञेयं तस्माद्यत्नेन वर्जयेत् ॥
' उपवीतादिकं धार्यं उपाकर्मणि तन्नवम् । अनवं वा नवं वाऽपि पुरातनमिह त्यजेत्"॥**स्मृतिसारे**–
" मौंजीयज्ञोपवीतादि नवमेव तु धारयेत् । कटिसूत्रं चैव नवं नववस्त्रमुपाकृतौ " ॥
व्रतचतुष्टयेऽप्येवं स्मर्यते
" मेखलामजिनं दंडं वस्त्रं यज्ञोपवीतकम् । पूर्वोपयुक्तमुत्सृज्य धारयेयुर्नवं व्रते"॥ इति ।
अत्र कपर्दी—
" प्रजापतिमुखान् देवानेकैकं त्रिस्तिलोदकम् । उद्धृत्य तर्पणं कुर्याच्छ्रावण्यां तैत्तिरीयकाः " ॥
उपाकर्मणि ब्रह्मचारिणां वपनमावश्यकम् । ' श्रावण्यां पौर्णमास्यां शिष्यं वापयित्वेति '
वैखानसे दर्शनात्
"क्षुरकर्म न कर्तव्यं चौलात्परमृतुत्रयम् । तथोपनयनादूर्ध्वमुपाकर्म विना क्वचित्"॥ इति **स्मृतेश्च** ।
तत्र तिथिवारादिदोषो न चिंत्यः
" वैधे कर्मणि तु प्राप्ते कालदोषं न चिंतयेत् । सद्यः क्षौरं तु कुर्वीत मातापित्रोर्मृतौ तथा " ॥ इति
वसिष्ठस्मरणात् । एवं प्रत्यब्दं श्रावण्यामुपाकर्म कार्यम् । **कात्यायनः**—
" प्रत्यब्दं यदुपाकर्म सोत्सर्गं विधिवत् द्विजैः । क्रियते छंदसां तेन पुनराप्यायनं परम् ॥
" अयातयामैश्छंदोभिर्यत्कर्म क्रियते द्विजैः । क्रीडमानैरपि तदा तत्तेषां सिद्धिकारणम्"॥ इति

इत्युपाकरणम् ॥

अथानध्यायाः ॥ **मनुः** (४।९७)—
"यथाशास्त्रं तु कृत्वैवमुत्सर्गं छंदसां बहिः । विरमेत्पक्षिणीं रात्रिं यद्वाऽप्येकमहर्निशम्"॥
तद्वेदाध्ययनम्
"अत ऊर्ध्वं तु छंदांसि शुक्लेषु नियतः पठेत् । वेदांगानि च सर्वाणि कृष्णपक्षेषु संपठेत्" ॥
एतदुपाकृत्याध्ययनं स्नातकानां ब्रह्मचारिणामपि साधारणम्
"इमान् नित्यमनध्यायानधीयानो विवर्जयेत् । अध्यापनं च कुर्वाणः शिष्याणां विधिपूर्वकम्॥
"उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतम् । अष्टकासु त्वहोरात्रमृत्वंतासु च रात्रिषु"॥ (४।१०१)
उपाकर्मणि त्रिरात्रमुत्सर्गे तु पूर्वोक्तपक्षिण्यहोरात्राभ्यां सह विकल्प इति **विज्ञानेश्वरः**
(पृ. ४१ पं. १९) । प्रथमाध्ययने त्र्यहमितरत्र पक्षिण्यहोरात्रं वा
"उत्सर्गे प्रथमाध्यायेऽत्वनध्यायस्त्र्यहं भवेत् । धारणाध्यापनादौ तु पक्षिणीं दिनमेव वा "॥ इति
मनुस्मरणादित्यन्ये ।
"मार्गशीर्षे तथा प्रोष्ठे माघमासे तथैव च । तिस्रोऽष्टकाः समाख्याताः कृष्णपक्षेषु सूरिभिः"॥ इति ।
विष्णुस्तु "तिस्रोऽष्टकाः तिस्रोऽन्वष्टकास्तिस्रः पूर्वेद्युः । प्रौष्ठपदे हेमंतशिशिरयोरपरपक्षेषु"॥ इति ।
नित्यानध्यायानाह **हारीतः**—
" प्रतिपत्सु चतुर्दश्यामष्टम्यां पर्वणोर्द्वयोः । श्वोऽनध्यायेऽद्य शर्वर्यां नाधीयीत कदाचन " ॥
मनुः (४।११४)—
"आमावास्या गुरुं हंति शिष्यं हंति चतुर्दशी । ब्रह्माष्टकापौर्णमास्यौ तस्मात्ताः परिवर्जयेत्" ॥
ब्रह्म वेद वीर्यं घ्नन्ति अष्टका पौर्णमास्या। नैमित्तिकानध्यायानाह **याज्ञवल्क्यः** (आ. १४८-१५१)-
" श्वक्रोष्टुगर्दभोलूकसामबाणार्तनिस्वने । अमेध्यशवशूद्रान्त्यश्मशानपतितांतिके ॥

---

१ क्ष-क्रिय । २ खग-वृद्धि ।

"देशेऽशुचावात्मनि च विद्युत्स्तनितसंप्लवे। भुक्त्वाऽऽर्द्रपाणिरंभोंतरर्धरात्रेऽतिमारुते॥
"पांसुप्रवर्षे दिग्दाहे संध्यानीहारभीतिषु। धावतः पूतिगंधे च शिष्टे च गृहमागते॥
"खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणरोहणे। सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान्विदुः"॥ इति। स एव (आ. १४४।१४५)

"त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबंधुषु। उपाकर्मणि चोत्सर्गे स्वशाखाश्रोत्रिये तथा॥
"संध्यागर्जितनिर्घातभूकंपोल्कानिपातने। समाप्य वेदं द्युनिशमारण्यकमधीत्य च"॥

द्युनिशमहोरात्रमनध्यायः।

"पंचदश्यां चतुर्दश्याष्टम्यां राहुसूतके। ऋतुसंधिषु भुक्त्वा च श्राद्धिकं प्रतिगृह्य च" (१४६)॥

ऋतुसंधिः प्रतिपत्। द्युनिशमनध्यायः।

"पशुमंडूकनकुलश्वाहिमार्जारमूषकैः। गतेंऽतरे त्वहोरात्रं शक्रपाते तथोच्छ्रये" (१४७)॥

शक्रपातः आश्वयुक्शुक्लद्वादशी। उच्छ्रयः भाद्रपदशुक्लद्वादशी। यत् पुनर्गौतमेनोक्तं (१।६०) "श्वनकुलमंडूकसर्पमार्जाराणां त्र्यहमुपवासमनध्यायो विप्रवासश्च" इति तत्प्रथमाध्ययनविषयमिति **विज्ञानेश्वरीये** (पृ. ४२ पं. ११)। **मनुः** (४।१०२-१०३)—

"कर्णश्रवेऽनिले रात्रौ दिवापांसुसमूहने। एतौ वर्षास्वनध्यायावध्यायज्ञाः प्रचक्षते॥
"विद्युत्स्तनितवर्षेषु महोल्कानां च संप्लवे। आकालिकमनध्यायमेतेषु मनुरब्रवीत्"॥

विद्युदादिप्रादुर्भावकालादारभ्य नाडिकाषष्टिराकालः। तत्र भवमाकालिकम्। येयमुक्ता विद्युदादिरिति प्रवृत्तिः सा वर्षासु संध्ययोश्चेदाकालिकानध्ययननिमित्तं भवेदन्यदा चेत् नेत्याह **स एव** (४।१०४)—

"स्वतस्त्वभ्युदितान्विद्यान्यदाप्रादुष्कृताग्निषु। तदा विद्यादनध्यायमनृतावभ्रदर्शने"॥

प्रादुष्कृताग्निषु विहृतेष्वग्निषु संध्ययोरिति यावत्। एतान्विद्युदादीनभ्युदितान्विद्यात्पश्येत्तदा आकालिकमनध्यायं विद्यात्। अनृतौ वर्षर्तुव्यतिरिक्ते चर्तौ अभ्रसंप्लवे आकालिकमनध्यायं विद्यात्।

"निर्घाते भूमिचलने ज्योतिषां चोपसर्जने। एतानाकालिकान्विद्यादनध्यायानृतावपि (१०५)॥

'उपसर्जने उपप्लवे। चलनादौ अपिशब्दादनृतावपि।

"अंतःशवगते ग्रामे वृषलस्य च संनिधौ। अनध्यायो रुद्यमाने समवाये जनस्य च (१०८)॥

"उदके मध्यरात्रे च विण्मूत्रे च विसर्जिते। उच्छिष्टे श्राद्धभुक्तो च मनसापि न चिंतयेत् (१०९)॥

"प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनम्। त्र्यहं न कीर्तयेद्ब्रह्म राज्ञो राहोश्च सूतके"(११०)॥

एकोद्दिष्टस्य नवश्राद्धादौ केत्यते निमंत्र्यतेऽनेनेति केतनं द्रव्यम्। राज्ञः सूतके पुत्रजन्मनि राहुसूतके ग्रहणमुक्ते च। त्र्यहं न कीर्तयेदिति। एतत् ग्रस्तास्तमयाविषयम्। 'रवीन्दोर्ग्रहणे चैव नाधीयीत् दिवानिशम्' इति स्मरणात्।

"शयानः प्रौढपादश्च बद्ध्वा चैवावसक्थिकाम्। नाधीयीतामिषं जग्ध्वा सूतकान्नाद्यमेव च"॥ (११२)॥

पादस्योपरि पादो यस्य सः प्रौढपादः। वस्त्रादिना अवसक्थिका बध्वा नाधीयीत।

"नीहारे बाणशब्दे च संध्ययोरुभयोरपि। अमावास्याचतुर्दश्योः पौर्णिमास्यष्टकासु च (११३)॥

"पांसुवर्षे दिशां दाहे गोमायुविरुते तथा। श्वखरोष्ट्रे च रुवतातिपंक्तौ न पठेत् द्विजः (११५)॥

"नाधियीत स्मशानांते ग्रामांते गोव्रजे तथा। वसित्वा मैथुनं वासः श्राद्धिकं प्रतिगृह्य च"(११६)॥[3]

इत्यादिकं प्रपंचयति **स एव** (४।११७)—

"प्राणि वा यदि वाऽप्राणि यत्किंचिच्छ्राद्धिकं भवेत्। तदालभ्याप्यनध्यायः पाण्यास्यो हि द्विजोत्तमः" (११७)

आलभ्य दत्तं पाणिना स्पृष्ट्वा प्रतिग्रह्य एव भोजनमित्याह पाण्यास्यो हीति।

---

१ **कखग**-पाठः। २ **क्ष**-पंके च। ३ **कखग**- श्मशानान्ते श्मशानसमीपे। गोव्रजे-गोष्ठे मैथनं मिथुनसंबंधि प्रतिगृह्य भुक्त्वा श्राद्धिकं प्रतिगृह्य च।

"न विवादे न कलहे न स्तेये न च संकरे। न भुक्तिमात्रे नाजीर्णे न वमित्वा न शुक्तके" (१२१)॥

वाग्युद्धं विवादः । अंगयुद्धं कलहः । शस्त्रयुद्धं संगरः । शुक्तके भुक्तस्यान्नस्य यातयामस्य गंधरसाविर्भावे ।

"अतिथीन्नाननुज्ञाप्य मारुते वाऽतिवायति । रुधिरे तु सुते गात्राच्छस्त्रेण च परिक्षते (१२२)॥

"सामध्वनौ ऋग्यजुषं नाधीयीत कदाचन । वेदस्याधीत्य चैवान्तमारण्यकमधीत्य च" (१२३)॥

सामध्वनौ सामाधीत्य तत्क्षणमेव ऋग्यजुषां नाधीयीत । वेदास्यांतमुपनिषदमारुणकेतुकं चाधीत्य ऋग्यजुषं नाधीयीत । सामध्वनावृग्यजुषामनध्यायेऽर्थवादमाह स एव (४।१२४)—

"ऋग्वेदो देवदैवत्यो यजुर्वेदस्तु मानुषः । सामवेदः स्मृतः पित्र्यस्तस्मात्तस्याशुचिर्ध्वनिः॥

" पशुमंडूकमार्जारसर्पश्वनकुलादिषु । अंतरागमने विद्यादनध्यायमहर्निशम्" (१२६) ॥

"द्वावेव वर्जयेन्नित्यमनध्यायौ प्रयत्नतः।स्वाध्यायभूमिं चाशुद्धामात्मानं चाशुचि द्विजः"(१२७)॥

नित्यमापद्यपि । अनेन नान्येषामनध्यायनिमित्तानामापद्यनुज्ञा सूचिता । नारदः—

"अयने विषुवे चैव शयने बोधने हरेः । अनध्यायस्तु कर्त्तव्यो मन्वादिषु युगादिषु" ॥ इति ।

मन्वादयो मत्स्यपुराणेऽभिहिताः (अ. १७ श्लो. ६८)—

" आश्वयुक्शुक्लनवमी कार्तिकी द्वादशी तथा। तृतीया चैत्रमासस्य तथाभाद्रपदस्य च ॥

"फाल्गुनस्याप्यमावास्या पुष्यस्यैकादशी सिता । आषाढस्यापि दशमी माघमासस्य सप्तमी ॥

"श्रावणस्याष्टमी कृष्णा आषाढस्यापि पूर्णिमा। कार्तिकी फाल्गुनी चैत्री ज्यैष्ठी पंचदशी सिता॥

"मन्वंतरादयश्चैते दत्तस्याक्षयकारकाः" इति । युगादयोऽपि विष्णुपुराणेऽभिहिताः (३।१४।१२)—

" वैशाखमासस्य सिता तृतीया नवम्यसौ कार्तिकशुक्लपक्षे ॥

"नभस्य मासस्य च कृष्णपक्षे त्रयोदशी पंचदशी च माघे"॥ इति । शयनमाषाढशुक्लद्वादशी । बोधनं कार्तिकशुक्लद्वादशी । व्यासः—

"श्लेष्मातकस्य छायायां शाल्मलेर्मधुकस्य च । कदाचिदपि नाध्येयं कोविदारकपित्थयोः " ॥

हारीतः

"महानवम्यां द्वादश्यां भरण्यामपि पर्वसु । तथाऽक्षयतृतीयायां शिष्या नाध्यापयेद्द्विजः ॥

"माघमासे तु सप्तम्यां रथाख्यायां तु वर्जयेत् । अध्यापनं समभ्यञ्जन् स्नानकाले च वर्जयेत्" ॥

द्वादश्यां श्रवणद्वादश्यां । भरण्यां भाद्रपदभरण्याम् । तदाह वृद्धगार्ग्यः—

" ऋक्षेषूद्वाहनक्षत्रे स्वाध्याये परिवर्जयेत् । द्वादश्यां श्रवणं भाद्रे भरणी च महालये " ॥ इति ।

शातातपः "आभाकासितपक्षेषु मैत्रश्रवणरेवती । द्वादश्यां संस्पृशेयुश्चेत्तत्रानध्ययनं विदुः"॥इति।

गार्ग्यः—"मैत्रर्क्षात्षोडशर्क्षेषु वर्षेऽनध्ययनं विदुः । अतिवर्षे त्रिरात्रं स्यादल्पवर्षे तु वासरम् " ।

मैत्रर्क्षमनुराधा । तस्मादारभ्य मृगशीर्षांतेषु । अतिवृष्टौ त्रिरात्रमल्पवृष्टौ वासरमित्यर्थः । जाबालिः—

"नाधीयीत नरो नित्यमादावंते च पक्षयोः । आदौ च हीयते वृत्तिरंते ब्रह्म प्रहीयते" ॥ इति ।

पक्षादिः प्रतिपत्पक्षांतः पंचदशी । तथा पुराणे हनुमद्वचनं

"सा स्वभावेन तन्वंगी त्वद्वियोगाच्च कर्षिता । प्रतिपत्पाठशीलस्य विद्येव तनुतां गता"॥ इति।

बोधायनः—" सायंप्रातः संध्ययोश्च नाधीयीत महानिशि ॥

"प्रातःसंध्या त्रिनाडी स्यात्सायंसंध्या तथाविधा।महानिशा तु विज्ञेया चतस्रो घटिकास्तथा"॥इति।

---

१ कखग—चतुर्दशी । २ खग—रामायणे ।

वृद्धगौतमः—

"यायाद्व्रजोऽन्तरे व्याघ्रो नैवाधीयीत हायनम् । शशोऽपि वा श्वपाकोऽजः षण्मासानिति सूरयः"॥ **गौतमः** (१६।५–१३; १४)—"नाधीयीत वायौ दिवापांसुहरे । कर्णश्राविणि नक्तम् । वाणभेरी मृदंगरथगर्तार्तशब्देषु श्वसृगालगर्दभसंह्लादे । रोहितेन्द्रधनुर्नीहारेषु । अभ्रदर्शने चापत्तौ । मूत्रित उच्चारिते । निशासंध्योदकेषु । वर्षति च । संकुलोपाहितवेदसमाप्तिच्छर्दि-श्राद्धमनुष्ययज्ञभोजनेष्वहोरात्रम् " इति च । संकुलो राजाद्युपद्रवः । उपाहितोऽग्निदाहः । छर्दिर्भुक्तोद्गारः । श्राद्धं पार्वणम् । मनुष्ययज्ञः सीमंतादि । **आपस्तंबः** (१।९।४) –'निगमे-ष्वध्ययनं वर्जयेत्' इति । निगमाश्चत्वारः[1] । **स एव** (१।९।६–८)—

" श्मशाने सर्वतः शम्याप्रासाद्ग्रामेणाध्यवसिते क्षेत्रेण वा नानध्यायो ज्ञायमाने तु तस्मिन्नेव देशे नाधीयीत" इति । शम्या क्षिप्ता यावति देशे पतति ततोऽर्वाक्प्रदेशे श्मशानसमीपे नाध्येयम् । यदा श्मशानं ग्रामतया क्षेत्रतया वाऽध्यवसितं स्वीकृतं तदाऽध्येतव्यमेव । यदि अव-सितमपि श्मशानं ज्ञायते अयं स प्रदेश इति तदा तावत्येव प्रदेशे नाधीयत न शम्याप्रासा-दादित्यर्थः । **स एव** (१।९।२०-२१)–"संध्यावनुस्तनिते रात्रिम् । स्वप्नपर्यंतं विद्युति" इति । सायं-संध्याया मेघगर्जने रात्रिं सर्वां नाधीयीत । तत्र विद्युति सत्यां स्वप्नपर्यंतं प्रहरावशिष्टां रात्रिं नाधीयीतेत्यर्थः । प्रातःसंध्यायामाह **स एव** (१।९।२२) । " उपव्युषं यावता वा कृष्णां रोहिणीमिति शम्याप्रासाद्विजानीयादेतस्मिन्काले विद्योतमाने सप्रदोषमहरनध्यायः " इति । उपव्युषसि व्युषति सत्यां परेद्युः सप्रदोषमहरनध्यायः । प्रदोषादूर्ध्वमध्ययनं यावता कालेन शम्याप्रासादर्वागवस्थितां गां कृष्णामिति वा रोहिणीं गौरवर्णामिति वा जानीयादेतस्मिन्काले उपव्युषसि वेत्यन्वयः । **स एव** (१।९।२३–२४)—

"दह्रेऽपररात्रे स्तनयित्नुनोर्ध्वमर्धरात्रादित्येके" वर्षर्ताविदम् । इतरर्तौ **स एवाह** । (१।२१।२७,२९) 'विद्युत्स्तनयित्नुर्वृष्टिश्चापर्तौ यत्र संनिपतेयुस्त्र्यहमनध्यायः । एकेन द्वाभ्यां वैतेषां कालम् " इति । यस्मिन्देशे यो वर्षाकालस्ततोऽन्यस्तत्रापर्तुः । तत्र यदि विद्युदादयः समुदिताः स्युः तदा त्र्यहमनध्यायः । एतेषां विद्युदादीनां मध्ये एकेन द्वाभ्यां वा संयोगे आकालमनध्यायः । परेद्युरेतस्मात्कालादित्यर्थः । **स्मृत्यर्थसारे—**

" चतुर्दश्यष्टमीपर्वप्रतिपद्वर्जितेषु तु । वेदांगन्यायमीमांसाधर्मशास्त्राणि चाभ्यसेत् ॥

" उदयेऽस्तमये वाऽपि मुहूर्तत्रयगापि यत् । तद्दिनं तदहोरात्रं चानध्यायविदो विदुः "॥ इति ।

" केचिदाहुः क्वचिद्देशे यावत्तद्दिननाडिकाः । तावदेव त्वनध्यायो न तस्मिन्न दिनांतरे ॥

" अधिकायां त्रयोदश्यां चतुर्दश्यां दिवा यदि । अमावास्या च दृश्येत तदानध्ययनं भवेत्" ॥

अत्र त्रयोदशीवृध्यादिनद्वये स्वाध्यायदिनद्वयमापन्नाधिकेत्युच्यते । अत्र तस्यां त्रयोदश्यामन-ध्ययनम् । यदि चतुर्दश्यां दिवा अमावास्या स्वल्पापि दृश्येतेत्यर्थः ।

"प्रणवव्याहृतीनां च गायत्र्याः शिरसस्तथा । नित्यनैमित्तिके काम्ये व्रते यज्ञे क्रतौ तथा ॥

"प्रवृत्ते काम्यकार्ये च नानध्यायास्तथा स्मृताः । देवतार्चनमंत्राणां नानध्यायाः सदा तथा"॥

आपस्तंबोऽपि (१।१२।९) "विद्यां प्रत्यनध्यायः श्रूयते न कर्मयोगे मंत्राणाम्"॥इति[2]। **संग्रहे–**

"अल्पं जपेदनध्याये पर्वण्यल्पतरं जपेत् । श्रीरुद्रं पवमानं च गृहीतनियमादृते"॥ इति[3] ।

मनुः । (२।१०५)

---

१ ख, ग–मश्चत्वारः । २ ख, ग– + तेन । ३ ख, ग–अग्रे ।

“ वेदोपकरणे चैव स्वाध्याये चैव नैत्यके । नानुरोधोऽस्त्यनध्याये होममंत्रेषु चैव हि”॥
कूर्मपुराणे (अ. उ. १४ श्लो. ८२–८३)
“अनध्यायश्च नांगेषु नेतिहासपुराणयोः । न धर्मशास्त्रेष्वन्येषु पर्वण्येतान्विसर्जयेत् ”॥ इति ।
कालादर्शे—
“ पूर्वं चोर्ध्वमनध्यायमहःसंक्रमणे निशि । दिवा पूर्वोत्तरा रात्रिरिति वेदविदो विदुः ”॥ इति ।
“ स्वाध्यायस्य ह्यनध्यायो मुहूर्तद्वितयादधि । स्यात्किंचिदपि न प्राहुरनध्यायं च संशये ॥
“ यदा भवेदनध्यायतिथिरुत्तरभागिनी । तदा पूर्वतिथौ रात्रौ नाधीयीतेति निश्चयः” ॥
अनयोरर्थः । स्वाध्यायस्याह्नि अनध्यायो मुहूर्तद्वितयादधि । ऊर्ध्वं किंचिदपि स्यात्तदनध्यायं प्राहुः । पूर्वोक्तनिमित्तसंदेहादनध्यायसंशये चानध्यायं प्राहुः । यदोत्तरभाविनी तिथिरनध्यायो भवेत् तदा पूर्वतिथिरात्रौ नाधीयीतेति निश्चय इति ॥ अत्र **बोधायनः**—
“ यद्यनध्यायदिनं अत्रापि स्वाध्यायदिने द्विमुहूर्तादुपरि दृश्येत निमित्तविशयने[1]नाध्यायं प्राहुरिति विज्ञायते ” इति । **हारीतः**—
“श्वोनध्यायेऽद्य शर्वर्यां नाधीयात कदाचन । चातुर्मास्यद्वितीयासु वेदाध्यायं विसर्जयेत्”॥ इति ।
किं च आषाढकार्तिकफाल्गुनकृष्णद्वितीयाश्चातुर्मास्यद्वितीयाः। **गौतमोऽपि** (१६।३७–३८)–
“ कार्तिकीफाल्गुन्याषाढीपौर्णिमासीति तिस्रोऽष्टकास्त्रिरात्रौ ” ॥ इति । उक्तपौर्णमासीष्वारभ्य त्रिरात्रं तथा तिस्रोष्टकाः तत्र सप्तम्यादयस्तास्वपि त्रिरात्रमनध्याय इत्यर्थः ।
प्रदोषानध्यायमाह **वृद्धगार्ग्यः**—
“ रात्रौ यामद्वयादर्वाक्सप्तमी स्यात्त्रयोदशी । प्रदोषः स तु विज्ञेयः सर्वविद्याविगर्हितः ॥
“रात्रौ नवसु नाडीषु चतुर्थी यदि दृश्यते । प्रदोषः स तु विज्ञेयो वेदाध्यायविगर्हितः॥
“आद्यंतयोः कलामात्रं यदि पश्येत्त्रयोदशी । प्रदोषः स तु विज्ञेयः सर्वशब्दविगर्हितः”
“ त्रयोदशी यदा रात्रौ यामस्तत्र निशामुखे । प्रदोष इति विज्ञेयो ज्ञानार्थी मौनमाचरेत् ॥
“ भोजनं मैथुनं यानमभ्यंगं हरिदर्शनम् । अन्यानि शुभकार्याणि प्रदोषे नैव कारयेत् ”॥
वृद्धमनुः—
“त्रयोदश्यां च सप्तम्यां चतुर्थ्यामर्धरात्रतः । नार्वागध्ययनं कुर्याद्यदीच्छेत्तत्र धारणम् ” ॥ इति ।
स एव—
“ रात्रौ यामद्वयादर्वाग्यदि पश्येत्त्रयोदशीम् । सा रात्रिः सर्वकर्मघ्नी शंकराराधनं विना” ॥ इति।
स्कांदे—
“ त्रिमुहूर्तः प्रदोषः स्याद्रवावस्तंगते ततः । मितसंध्यस्त्रयोदश्यां न स्मरेच्च मनोहितम् ॥
“अन्होऽष्टमां संप्रयुक्तं रात्र्यर्धं मौनमाचरेत् । प्रदोषे भानुवारे च चरराश्युदये तथा ॥
“ स्वल्पदानाद्दणं शिष्टं विनश्यति न संशयः ” ॥ **लिखितः**
“ छिद्राण्येतानि विप्राणां येऽनध्यायाः प्रकीर्तिताः । छिद्रेभ्यः स्रवति ब्रह्म ब्राह्मणेन यदर्जितम् ॥
“तत्काले तस्य रक्षांसि श्रियं ब्रह्म यशो बलम् । सर्वमादाय गच्छंति वर्जयंति च तत्फलम्”॥ इति ।
स्मृत्यर्थसारे—
“ चतुर्थ्यां पूर्वरात्रौ तु नवनाडीप्रदर्शने । चातुर्मास्याद्वितीयासु वेदाध्यायं विवर्जयेत्” ॥
आषाढफाल्गुनकार्तिककृष्णतृतीयाश्चतुर्मास्यद्वितीयाः। **गौतमोपि** (१६।३७–३८)–“कार्तिकी-

१ **कखग**–(ना) नध्यायविशयमप्य (नध्याय) ।

फाल्गुन्याषाढीपौर्णमासीस्तिस्रोऽष्टकास्त्रिरात्रम्" ॥ इति उक्तपौर्णमासीरारभ्य त्रिरात्रं तथा तिस्रोऽष्टकाः सप्तम्यादयः तास्वपि त्रिरात्रमनध्याय इत्यर्थः ।
"नाध्येयं पूर्वरात्रौ स्यात्सप्तमी च त्रयोदशी । अर्धरात्रात्परस्ताच्चेन्नाध्येयं पूर्वरात्रकम्" ॥

स्मृत्यंतरम्—
"कृष्णपक्षे तृतीयायां फाल्गुनाषाढकार्तिके । शुक्लाश्वयुग्द्वितीयायां नैवाध्ययनमाचरेत् ॥
"अनध्यायेष्वध्ययने प्रजानायुः श्रियं तथा । ब्रह्म वीर्यं च तेजश्च निकृंतति यमः स्वयम् ॥
"मंत्रवीर्यक्षयभयादिंद्रो वज्रेण हंति च । ब्रह्मराक्षसता चांते नरकं च भवेद्ध्रुवम् ॥
"अत्र गाथां यमोद्गीतां कीर्तयंति पुराविदः ॥
"आयुरस्य निकृंतामि प्रज्ञामस्याद्देऽथ वा । य उच्छिष्टः प्रवदति स्वाध्यायं वाऽधिगच्छति ॥
"यश्चानाध्यायकालेऽपि मोहादभ्यस्यति द्विजः।तस्माद्युक्तोऽप्यनध्याये नाधीयीत कदाचन॥"इति
"अनध्यायेष्वधीयीत द्विजस्तैन्यं करोति यः" ॥ इति **अनध्यायः** ॥

अथ **दानं निरूप्यते** । तत्र दाने **श्रुतिः**[१]—"दानमिति सर्वाणि भूतानि प्रशꣳसंति दानान्नाति दुष्करं तस्माद्दाने रमंत" इति । अन्यच्च—"दानं यज्ञानां वरूथं दक्षिणा लोके दातारꣳसर्वभूतान्युपजीवंति दानेनारातीरपानुदंत दानेन द्विषंतो मित्रा भवंति दाने सर्वं प्रतिष्ठितं तस्माद्दानं परमं वदंति" इति च । **मनुः** (४।२३१)—
"यत्किंचिदपि दातव्यं याचितेनानसूयया । उत्पत्स्यते हि तत्पात्रं यत्तारयति सर्वतः" ॥

याज्ञवल्क्यः (आ. २०३)—
"दातव्यं प्रत्यहं पात्रे निमित्ते तु विशेषतः । याचितेनापि दातव्यं श्रद्धापूर्वं तु शक्तितः ॥
"गोभूतिलहिरण्यादि पात्रे दातव्यमर्चिते । नापात्रे विदुषां किंचिदात्मनः श्रेय इच्छता ॥" इति ।

देवलः—
"ध्रुवमजस्रकं काम्यं नैमित्तिकमिति क्रमात् । वैदिको दानमार्गोऽयं चतुर्धा वर्णितो द्विजैः ॥
"प्रपारामतटाकादिसर्वकामफलध्रुवम् । तदाजस्रिकमित्याहुर्दीयते यद्दिने दिने ॥
"अपत्यविजयैश्वर्यस्त्रीबालार्थं यदिष्यते । इच्छासंज्ञं तु तद्दानं काम्यमित्यभिधीयते ॥
"कालापेक्षं क्रियापेक्षमर्थापेक्षमिति स्मृतम् । त्रिधा नैमित्तिकं प्रोक्तं सहोमं होमवर्जितम्" ॥

व्यासः (कूर्मपुराणे उ. २६।४–८)—"नित्यं नैमित्तिकं काम्यं विमलं चेति कथ्यते ।
"अहन्यहनि यत्किंचित् दीयतेऽनुपकारिणे । अनुद्दिश्य फलं तस्माद्ब्राह्मणाय तु नित्यकम् ॥
"यत्तु पापोपशांत्यर्थं दीयते विदुषां करे । नैमित्तिकं तदुद्दिष्टं दानं सद्भिरनुष्ठितम् ॥
"अपत्यविजयैश्वर्यस्वर्गार्थं यत्प्रदीयते । दानं तत्काम्यमाख्यातमृषिभिर्धर्मचिंतकैः ॥
"ईश्वरप्रीणनार्थं यद्ब्रह्मवित्सु प्रदीयते । चेतसा भक्तियुक्तेन दानं तद्विमलं शिवम् ।
(भगवद्गीतायां अ. १७ श्लो. २०–२२)
"दातव्यमिति यद्दानं दीयतेऽनुपकारिणे । देशे काले च पात्रे च तद्दानं सात्विकं स्मृतम् ॥
"यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः । दीयते च परिक्लिष्टं तद्राजसमुदाहृतम् ॥
"अदेशकाले यद्दानं अपात्रेभ्यश्च प्रदीयते । असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥
"सात्विकानां फलं भुंक्ते देवत्वे नात्र संशयः । अतोऽन्यथा तु मानुष्ये राजसानां फलं भवेत् ॥

---

१ नारायणोपनिषदि ।

“ तामसानां फलं भुंक्ते तिर्यक्त्वे मानवः सदा ॥
“ एकस्मिन्नप्यतिक्रांते दिने दानविवर्जिते । दस्य्वग्निमुषितेनैव युक्तमाक्रंदितं भृशम् ॥
“ यस्य वित्तं न धर्माय नोपभोगाय देहिनाम् । नापि कीर्त्यै न यशसे तस्य वित्तं निरर्थकम् ॥
“ तस्माद्वित्तं समासाद्य दैवाद्वा पौरुषात्तथा । दद्यात्सम्यग् द्विजातिभ्यः कीर्तनानि न कारयेत् ॥
“ सीदते द्विजमुख्याय योऽर्थिने न प्रयच्छति । सामर्थ्ये स तु दुर्बुद्धिर्नरकायोपपद्यते ॥
“ अक्षरद्वयमभ्यस्तं नास्ति नास्तीति यत्पुरा । तदिदं देहि देहीति विपरीतमुपस्थितम् ॥
“दीयमानं तु यो मो[1]हाद्गोविप्राग्निसुरेषु च । निवारयति पापात्मा तिर्यग्योनिं भजेत्तु सः” ॥ इति ।
मनुः (४।२३२–२३७)—
“ वा[2]रिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्नदः । तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम् ॥
“ भूमिदो भूमिमाप्नोति दीर्घमायुर्हिरण्यदः । गृहदोऽग्र्याणि वेश्मानि रूप्यदो रूपमुत्तमम् ॥
“ वासोद[3]श्चंद्रसालोक्यमश्विसालोक्यमश्वदः । अनडुहः श्रियं जुष्टां गोदो ब्रध्नस्य विष्टपम् ॥
“यानशय्याप्रदो भार्यामैश्वर्यमभयप्रदः । धान्यदः शाश्वतं सौख्यं ब्रह्मदो ब्रह्मसार्ष्टितम्” ॥
ब्रह्म वेदः । सार्ष्टितां सायुज्यम् ।
“ सर्वेषां तु प्रदानानां ब्रह्मदानं विशिष्यते । वा[4]र्यन्नगोमहीवासस्तिलकांचनसर्पिषाम् ॥
“ येन येन तु भावेन यद्यद्दानं प्रयच्छति । तत्तेनैव भावेन प्राप्नोति प्रतिपूजितः ” ॥
भावेन श्रद्धादिना । न केवलं दात्रा प्रतिगृहीत्रैर्वाचनीयः किंतु देयद्रव्यमपि ताभ्यामित्याह **स एव** (४।२३८–२४०)—
“ योऽर्चितं प्रतिगृह्णाति दद्यादर्चितमेव वा । तावुभौ गच्छतः स्वर्गं नरकं तु विपर्यये ॥
“ न विस्मयेत तपसा वदेदिष्ट्वा च नानृतम् । नार्तोऽप्यपवदेद्विप्रान् न दत्त्वा परिकीर्तयेत् ॥
“ यज्ञोऽनृतेन क्षरति तपः क्षरति विस्मयात् । आयुर्विप्रापवादेन दानं तु परिकीर्तनात् ॥
“ न वार्यपि प्रयच्छेत्तु बैडालव्रतिके द्विजे । न बकव्रतिके पापे नावेदविदि धर्मवित् (१९२) ॥
“ त्रिष्वप्येतेषु दत्तं हि विधिनाऽप्यर्जितं धनम् । दातुर्भवत्यनर्थाय परत्रादातुरेव च (१९३) ॥
“यथा प्लवेनोपलेन निमज्जत्युदके तरन् । तथा निमज्जतोधस्तादज्ञौ दातृप्रतीच्छकौ”(१९४)॥
बैडालवृत्तिकबकवृत्तिकयोः स्वरूपमाह **स एव** (**मनुः** ४।१९५–१९६)—
“ धर्मध्वजी सदा लुब्धश्छाद्मिको लोकडांभिकः । बैडालव्रतिको ज्ञेयो हिंस्रः सर्वातिसंधकः ॥
“अधोदृष्टिर्नैकृतिकः स्वार्थसाधनतत्परः । शठो मिथ्या विनीतश्च बकव्रतचरो द्विजः ”॥
श्लोकद्वयस्यायमर्थः । धर्मध्वजी धर्मलिंगी । छाद्मिको व्याजवृत्तिः । डाम्भिकः विशिष्टवेषेण स्वदोषतिरस्कारी । अतिसंधकः वंचकः । अधोदृष्टिः परानवेक्षी । नैकृतिकः गूढैरुपायैः परानर्थकारी । शठः नृशंसः । **स एव** (४।१९७)—
“ ये बकव्रतिनो विप्रा ये च मार्जारलिंगिनः । ते पतंत्यंधतामिस्रे तेन पापेन कर्मणा (१९७)॥
“अलिंगी लिंगवेषेण यो वृत्तिमुपजीवति । स लिंगिनां हरत्येनस्तिर्यग्योन्यां च जायते ”(२००)॥
इति । **याज्ञवल्क्यः** (आचारे २०४।२०५)—
“हेमशृंगी शफै रूप्यैः सुशीला वस्त्रसंयुता । सकांस्यपात्रा दातव्या क्षीरिणी गौः सदक्षिणा ॥
“दाता स्वर्गमवाप्नोति वत्सरान्रोमसंमितान् । कपिला चेत्तारयति भूयश्चासप्तमं कुलम् ॥

---

१ क्ष–दोषान् । २ क्ष–पारदः । ३ क्ष–वाससोमिंद्र । ४ क्ष–वाद्यन्य ।

"संवत्सरोमतुल्यानि कुलान्युभयतोमुखी । दाता स्वर्गमवाप्नोति पूर्वेण विधिना ददत् (२०६)॥
"यावद्वत्सस्य पादौ द्वौ मुखं योन्यां च दृश्यते । तावद्गौः पृथिवी ज्ञेया यावद्गर्भं न मुंचति (२०७)॥
हेमशृंगाद्यसंभवेऽप्याह स एव—
"यथाकथंचिद्दत्वा गां धेनुं वाऽधेनुमेव वा । अरोगामपरिक्लिष्टां दाता स्वर्गे महीयते (२०८) ॥
"श्रांतसंवाहनं रोगिपरिचर्या सुरार्चनम् । पादशौचं द्विजोच्छिष्टमार्जनं गोप्रदा समम्"(२०९)॥
श्रांतसंवाहनं आसनादिदानेन श्रमापनोदना । रोगिपरिचर्या औषधदानादिना । हरिहरादीनामर्चनं सुरार्चनम् । गोप्रदा समं गोदानसमम् । स एव (अ. २१०)—
"भूदीपांश्चान्नवस्त्रांभस्तिलसर्पिःप्रतिश्रयान् । नैवेशिकं स्वर्णधुर्यं दत्वा स्वर्गे महीयते" ॥
प्रतिश्रयः प्रवासिनामावासदानम् । नैवेशिकं कन्यादानम् । धुर्यं बलीवर्दः ।
"गृहधान्याभयोपानच्छत्रमाल्यानुलेपनम् । यानं वृक्षं प्रियं शय्यां दत्वाऽत्यंतसुखी भवेत् (२११)॥
"सर्वधर्ममयं ब्रह्म प्रदानेभ्योऽधिकं यतः । तद्ददत्समवाप्नोति ब्रह्मलोकमविच्यवम्"॥ इति। (२१२)
अविच्यवं च्युतिरहितम् । परस्वत्वापादानमात्रं वेदादेर्दानं स्वत्वनिवृत्तेः कर्तुमशक्यत्वात् । धर्मदानमपि स्मर्यते
"देवतानां गुरूणां च मातापित्रोस्तथैव च । पुण्यं देयं प्रयत्नेन नापुण्यं चोदितं क्वचित्"॥इति।
अपुण्यदाने तदेव वर्धेत दातुर्लोभादिना प्रवृत्तस्य प्रतिगृहीतुरपि ।
"यः पापं स्वबलं ध्यात्वा प्रतिगृह्णाति दुर्मतिः । गर्हिताचरणात्तस्य पापं तावत्समाश्रयेत् ॥
"समद्विगुणसाहस्रमानंत्यं च प्रदातृषु " ॥ इति स्मरणात् । शातातपः—
"तिलान् ददत्तिलस्नायी शुचिर्नित्यं तिलोदकी । होता दाता तिलानां च शतवर्षाणि जीवति"॥
संवर्त्तः—
"श्रोत्रियाय कुलीनायार्थिने च विशेषतः । यद्दानं दीयते भक्त्या तद्भवेत्सुमहत्फलम् ॥
"यद्यदिष्टतमं लोके यच्च स्याद्दयितं गृहे । तत्तद्गुणवते देयं तदेवाक्षय्यमिच्छता ॥
"तांबूलं चैव यो दद्यात् ब्राह्मणेभ्यो विशेषतः । मेधावी सुभगः प्राज्ञो दर्शनीयश्च जायते ॥
"दद्याच्च शिशिरेष्वग्निं बहुकाष्ठं प्रयत्नतः । कायाग्निदीप्तिं प्राज्ञत्वं रूपसौभाग्यमाप्नुयात्॥
"अलंकृत्य तु यः कन्यां भूषणाच्छादनादिभिः । दद्यात्स्वर्गमवाप्नोति पूजयन्नुत्सवादिषु ॥
"कपिलाश्वतिलानागरथदासीगृहाण्यपि । कन्यासुवर्णरत्नानि महादानानि ते दश ॥
"आधासशतलब्धस्य प्राणेभ्योऽपि गरीयसः । गतिरेका हि वित्तस्य दानमन्या विपत्तयः ॥
"यस्य वित्तं न दानाय नोपभोगाय देहिनः । पुण्यकीर्तेर्न धर्माय तस्य वित्तं निरर्थकम् ॥
"स्थितादेर्धर्मविश्राममर्थिभ्यः किं न दीयते । इच्छानुरूपो विभवः कदा कस्य भविष्यति ॥
"तैलमामलकं प्राज्ञः पादाभ्यंगं ददाति यः । प्रहृष्टः स नरो लोके सुखी चैव सदा भवेत् ॥
"अनड्वाहौ च यो दद्याद्युगसीरेण संयुतौ । अलंकृत्य यथाशक्तिर्धूर्वहौ शुभलक्षणौ ॥
"सर्वपापविशुद्धात्मा सर्वकामसमन्वितः । वर्षाणि वसति स्वर्गे रोमसंख्याप्रमाणतः ॥
"भूमिं सस्यवतीं श्रेष्ठां ब्राह्मणे वेदपारगे । गां दत्वा द्विःप्रसूतां च स्वर्गलोके महीयते ॥
"यावंति सस्यमूलानि गोरोमाणि च सर्वशः । नरस्तावंति वर्षाणि स्वर्गलोके महीयते ॥
"अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः
"लोकत्रयस्तेन भवंति दत्ता यः कांचनं गां च महीं च दद्यात् ॥

---

१ क्ष-दत्वा । २ क्ष-प्रशंस्यं स्यात् तत्क । ३ क्ष-सर्व । ४ खग-विपुलं । ५ क्ष-दयिकं
६ खग-यासादधर्मपिग्रासं ।

“ सर्वेषामेव दानानामन्नदानं परं स्मृतम् । सर्वेषामेव भूतानां यतस्तज्जीवनं परम् ॥
“ मृत्तिकागोशकृद्दर्भानुपनीतं तथोत्तरम् । दत्वा गुणाढ्यविप्राय कुले महति जायते ॥
“ मुखवासं तु यो दद्याद्दंतधावनमेव च । पादशौचं तथा स्नानं शौचं च गुदलिंगयोः ॥
“ यः प्रयच्छति विप्राय शुचिबुद्धिः सदा भवेत् ॥
“ ब्रह्मचारियतिभ्यश्च वपनं यश्च कारयेत् । नखकर्माणि कुर्वीगश्चक्षुष्मान् जायते नरः ।
“ देवागारे द्विजातीनां दीपं दत्त्वा चतुष्पथे । स विज्ञानेन संपन्नः चक्षुष्मांश्च[1] भवेत्सदा ॥
“ यो येनैवार्थितो विप्रस्तदस्य प्रतिपादयेत् । तृणकाष्ठसमेऽप्यर्थे गोप्रदानसमं भवेत् ॥

मनुः—

“ त्रीण्याहुरतिदानानि गावः पृथ्वी सरस्वती । अतिदानं हि दानानां विद्यादानं ततोऽधिकम् ॥
“ विद्यानां च परा विद्या ब्रह्मविद्या समीहिता । अतस्तद्दातुरस्त्येव लाभः स्वर्गापवर्गयोः ॥
“ यो दद्यात् ज्ञानमज्ञानं कुर्याद्वा धर्मदेशनम्। स कृत्स्नां पृथिवीं दद्यात्तेन तुल्यं न तद्भवेत्”॥

सारसमुच्चये—

“ एकतः क्रतवः सर्वे समाप्तवरदक्षिणाः । एकतो भयभीतस्य प्राणिनः परिरक्षणः ॥
“ महतामपि यज्ञानां कालेन क्षीयते फलम् । भीताभयप्रदानस्य क्षय एव न विद्यते ”॥

शांडिल्यः—

“अयाचितानि देयानि सर्वदानानि यत्नतः । अन्नं विद्या च कन्या च अनर्थिभ्यो न दीयते ॥
“ आश्रुतस्याप्रदानेन दत्तस्य हरणेन च । जन्मप्रभृति यद्दत्तं तत्सर्वं नश्यति ध्रुवम् ।
“मा ददस्वेति यो ब्रूयात् गव्यग्नौ ब्राह्मणेषु च । तिर्यग्योनिशतं प्राप्य चंडालेष्वभिजायते ॥
“द्वाविमौ पुरुषौ लोके स्वर्गस्योपरि तिष्ठतः । अन्नप्रदाता दुर्भिक्षे सुभिक्षे हेमवस्त्रदः” ॥

देवलः—

“स्वल्पत्वं वा बहुत्वं वा दानस्याभ्युदयावहम् । श्रद्धा भक्तिश्च दानानां वृद्धिक्षयकरे हि ते ॥
“शौचं शुचिर्महाप्रीतिरर्थिनां दर्शने तथा । सत्कृतिश्चानसूया च दानश्रद्धेत्युदाहृता ।
“ दाता प्रतिगृहीता च श्रद्धादेयं च धर्मयुक् । देशकालौ च दानानामंगान्येतानि षड्विदुः ।
“अपापरोगी धर्मात्मा दित्सुरव्यसनः शुचिः । अनिंद्यः शिवकर्मा च षड्भिर्दाता प्रशस्यते ॥
“अन्नविद्या[3]वधू[4]स्त्रीणां गोभूरुक्माश्वहस्तिनाम् । दानान्युत्तमदानानि उत्तमद्रव्यदानतः ॥
“ विद्याद्योच्छादनं वासः परिभोगौषधानि च । दानानि मध्यमानीति मध्यमद्रव्यदानतः ॥
“ उपानत्प्रेष्ययानानि छत्रपात्रासनानि च । दीपकाष्ठफलादीनि चरमं बहुवार्षिकम् ॥
“ इष्टं दत्तमधीतं च प्रणश्यत्यनुकीर्तनात् । श्लाघानुशोचनाभ्यां वा भग्न[6]तेजो विपद्यते ॥
“ तस्मादात्मकृतं पुण्यं न वृथा परिकीर्तयेत् ” ॥ **बृहस्पतिः**—
“अतोयं[7] सात्विकं दानमुदपूर्वं तु शान्तिकम् । आशिषा पौष्टिकं दद्यात्रिविधं दानलक्षणम् ”॥ इति । **आपस्तंबस्तु** (२।९।८-९) “ सर्वाण्युदकपूर्वाणि दानानि । यथाश्रुतिविहारे ” इति । विहारे यज्ञकर्मणि । अन्य[8]दानानि सर्वाणि उदकपूर्वाण्येवेत्यर्थः । **स एव** (२।१०।१-२)‘ ‘भिक्षणे निमित्तमाचार्यो विवाहो यज्ञो मातापित्रोर्बुभूर्षार्हतश्च । नियमविलोपस्तत्र गुणान्समीक्ष्य यथाशक्ति देयम्” इति । भिक्षणं याचनम् । तत्राचार्यादयो निमित्तम् । बुभूर्षा भर्तुमिच्छा । अर्हतो विद्यादिमतोऽग्निहोत्रादौ नियमे योग्यस्यार्थस्याभावेन लोपस्तत्रैवंभूते भिक्षणे याचकश्रुतवृत्तादीन्गुणान्समीक्ष्य

---

१ क्ष–संपन्नश्च । २ ख–ना । ३ क्ष–सिद्धा । ४ ख–वर । ५ ख–गौ । ६ क्ष–भिन्न । ७ क–यत् । ८ ख–यानि ।

शक्त्यनुरूपमवश्यं देयमदाने प्रत्यवेयात्। **आपस्तंब एव** (२।१०।२) "इंद्रियप्रीत्यर्थस्य तु भिक्षणनिमित्तम्। न तदाद्रियेत" इति। इंद्रियप्रीत्यर्थस्य स्रक्चंदनवनितादेस्तन्मूलस्य भिक्षणं नियमे। न निमित्तं दानं न भवति तस्मान्न तदाद्रियेत। दानेपि न प्रत्यवायः। तत्र दृष्टान्तमाह "धर्मप्रजासंपन्नायां प्रथमायां पत्न्यां द्वितीयाविवाहोऽपि न निमित्तम्। पुत्राभावे तु निमित्तं भवत्येव", तथा **भविष्योत्तरे**–"सुवर्णयाचकानां च विद्यां चैवोर्ध्वरेतसाम्। कन्यां चैवानपत्यानां ददतां गतिरुत्तमाम्"॥इति। **गौतमः**–(५।१९-२२) "गुर्वर्थनिवेशौषधार्थवृत्तिक्षीणयक्ष्यमाणाध्ययनाध्वसंयोगवैश्वजितेषु द्रव्यसंविभागो बहिर्वेदि। भिक्षमाणेषु कृतान्नमितरेषु। प्रतिश्रुत्याप्यधर्मसंयुक्ते न दद्यात्। क्रुद्धहृष्टभीतार्तलुब्धबालस्थविरमूढमत्तोन्मत्तवाक्यान्यनृतान्यपातकानि"॥ इति। निवेशो विवाहः। वृत्या हीनो वृत्तिक्षीणः। नित्यं यज्ञं करिष्यन् यक्ष्यमाणः। अध्ययनेन संयोगो यस्य सः अध्ययनसंयोगः। अध्वनि वर्त्तमानः अध्वसंयोगः। वैश्वजितः विश्वजिद्यागे सर्वस्वदानेन निर्द्रव्यः। यज्ञे दक्षिणाकाले सदस्येभ्यो यद्दानं ततोऽन्यत्र बहिर्वेदिद्रव्यस्य हिरण्यादेर्दानमावश्यकं अदाने प्रत्यवेयात्। इतरेषु उक्तव्यतिरिक्तेषु भिक्षमाणेषु कृतान्नं पक्वान्नं देयं प्रतिश्रवो दास्यामीति संवादः। तं कृत्वाऽपि अधर्मसंयुक्ते विषये न दद्यात्। हृष्टः हर्षवशेन कृत्याकृत्यविवेकशून्यः। लुब्धो लोभवशेन। क्रुद्धः कोपवशेन। मत्तो मद्यादिना मदद्रव्येणाप्रकृतिंगतः। उन्मत्तो भ्रांतः। एतदादीनां वाक्यानि अयथार्थान्यपातकानि न पापं नयंति। तेषां प्रतिश्रुत्यापि अदाने न दोष इत्यर्थः। **बोधायनः** (२३-६१)—
"अन्ने शूतानि भूतानि 'अन्नं प्राणम्' इति श्रुतिः। तस्मादन्नं प्रदातव्यमन्नं हि परमं हविः"॥ इति।

व्यासः—

"अर्थानामुदिते पात्रे श्रद्धया प्रतिपादनम्। दानमित्यभिनिर्दिष्टं भुक्तिमुक्तिफलप्रदम्॥
"यस्तु दद्यान्महीं भक्त्या ब्राह्मणायाहिताग्नये। स याति परमं स्थानं यत्र गत्वा न शोचति॥
"भूमिदानात्परं दानं विद्यते नेह किंचन। अन्नदानं तेन तुल्यं विद्यादानं ततोऽधिकम्"॥

महाभारते आनुशासनिके (अ. १०१।६४)—

"अन्नमेव प्रशंसंति देवाः सर्षिगणाः पुरा। लोकतंत्रा हि यज्ञाश्च सर्वमन्ने प्रतिष्ठितम्॥
"अन्नेन सदृशं दानं न भूतो न भविष्यति॥
"कुटुंबं पीडयित्वाऽपि ब्राह्मणाय महात्मने। दातव्यं भिक्षवे चान्नमात्मनो भूतिमिच्छता॥
"पानीयदानं परमं दानानां मनुरब्रवीत्। तस्मात्कूपांश्च वापीश्च तटाकानि च खानयेत्॥
"निदाघकाले पानीयं यस्य तिष्ठत्यवारितम्। स कृच्छ्रं विषमं दुर्गं न कदाचिदवाप्नुयात्॥
"बलकामो यशस्कामः पुष्टिकामश्च नित्यदा। घृतं दद्याद्द्विजातिभ्यः सततं शुचिरात्मवान्"॥

उपमन्युः—

"शिवलिंगं तु यो दद्यात् शिवभक्ताय तन्मनाः। स्वर्णरूप्यादिरूपं वा सोमं संपूज्य शक्तितः॥
"सर्वदानाधिकं पुण्यं संप्राप्य करणात्यये। गाणपत्यमवाप्यैव गणैः सह स मोदते॥
"शालग्रामशिलामूर्तिं विष्णुमाराध्य भक्तितः। विष्णुभक्ताय यो दद्याद्ब्राह्मणाय सदक्षिणाम्॥
"पंचाशत्कोटिविस्तीर्णभूमिदानेन यत्फलम्। तत्फलं समवाप्नोति देहांते वैष्णवं पदम्॥
"कुर्यात्प्रतिकृतिं देवं सुवर्णेन स्वशक्तितः। शेषपर्यंकशयनं श्रिया देव्या युतं तथा॥
"शंखचक्रगदायुक्तं वासुदेवं सुरेश्वरम्। दत्वा गुणाढ्यविप्राय विष्णुलोके महीयते"॥

---

१ अ-प्रतिनयंति। २ क-श्रि। ३ ख-सा।

व्यासः

" गोभूर्हिरण्यदानानि यमाश्च नियमास्तथा । गृहदानस्य वै लोके कलां नार्हंति षोडशीम् ॥
" यः कारयेन्मठं शैलं शिवायतनसंनिधौ । स शैवं पदमासाद्य कल्पायुतशतं वसेत् ॥
" गां पंकाद्ब्राह्मणीं दास्याद्वृत्तिं लोपाद्विजं वधात् । मोचयन्मुच्यते पापादाजन्ममरणांतिकात् ॥
" अनाथप्रेतसंस्कारं शून्यलिंगप्रपूजनम् । दीनांधकृपणेभ्यश्च दानं सर्वाघनाशनम् " ॥

योगीश्वरः—

" स्वर्णयुक्तं ताम्रपात्रं गोघृतेन समन्वितम् । आत्मावलोकनं कृत्वा ब्राह्मणाय निवेदयेत् ॥
" अनेन विधिना दानं यः कुर्यात्प्रयतो नरः । सर्वपापविनिर्मुक्तः स याति परमां गतिम्" ॥

स्मृतिरत्ने कन्यादानमंत्रः

"कन्यां लक्षणसंपन्नां कनकाभरणैर्युताम् । दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया" ॥

पुस्तकदानम्—

" सर्वविद्यास्पदं ज्ञानकारणं विमलाक्षरम् । पुस्तकं संप्रयच्छामि प्रीता भवतु भारती " ॥

शालग्रामदानम्—

" शालग्रामाचलोद्भूतां शिलां पापप्रणाशिनीम् । सुवर्णकुसुमोपेतां गृहाण त्वं द्विजोत्तम " ॥

नारायणमूर्तिदानमंत्रः—

" नारायण जगन्नाथ शंखचक्रगदाधर । नाशयाशु महारोगान् दानेनानेन केशव " ॥

उमामहेश्वरदानमंत्रः[3]—

" प्रसीदतु भवो नित्यं कृत्तिवासा महेश्वरः । पार्वत्या सहितो देवो जगदुत्पत्तिकारकः ॥
"शिवशक्त्यात्मकं यस्माज्जगदेतच्चराचरम् । असतस्तु समादाय साधुभ्यो यः प्रयच्छति ॥
" धनस्वामिनमात्मानं स तारयति निश्चितम् । तस्माद्दानेन सर्वं मे करोतु भगवांश्छिवः" ॥

ब्रह्मांडपुराणे "महिषीं वत्ससंयुक्तां सुशीलां च पयस्विनीम् । रक्तवस्त्रेण पुष्पेण अलंकृत्य प्रयत्नतः ॥
"श्रोत्रियाय सुशांताय दत्वा मृत्युं जयेन्नरः । कालमृत्युस्वरूपा सा महिषी रक्तभूषणा ॥
" पुच्छदेशे प्रदातव्या अतः शांतिं प्रयच्छ मे " ॥ पाद्मे—
" तिलपूर्णं ताम्रपात्रं सुवर्णेन समन्वितम् । तत्पात्रं ब्राह्मणे दत्वा ब्रह्मलोके महीयते ॥
" देवदेव जगन्नाथ वांछितार्थफलप्रद । तिलपात्रं प्रदास्यामि तवाग्रे सुस्थिरोऽस्म्यहम् ॥
" गोभूतिलहिरण्याज्यवासोधान्यगुडानि च । रूप्यं लवणमित्याहुर्दश दानान्यनुक्रमात् ॥
" गवामंगेषु तिष्ठंति भुवनानि चतुर्दश । यस्मात्तस्माच्छिवं मे स्यादतः शांतिं प्रयच्छ मे ॥
[4]" सर्वसस्याश्रया भूमिर्वराहेण समुद्धृता । अनंतसस्यफलवत्यतः शांतिं प्रयच्छ मे ॥
[5]" तिलाः पापहरा नित्यं विष्णोर्देहसमुद्भवाः । तिलदानादसह्यं मे पापान् नाशय केशव ॥
" हिरण्यगर्भगर्भस्थं हेमबीजं विभावसो । अनंतपुण्यफलदमतः शांतिं प्रयच्छ मे ॥
" कामधेनुसमुद्भूतसर्वक्रतुषु संस्थितम् । देवानामाज्यमाहारमतः० मे ॥
" शीतवातोष्णसंत्राणं लज्जाया लक्षणं परम् । देहालंकरणं वस्त्रमतः शांतिं प्रयच्छ मे ।
" धन्यं करोषि दातारमिह लोके परत्र च । प्राणिनां जीवनं धान्यमतः० मे ।
" यथा रसानां प्रवरस्तथैवेक्षुरसः स्मृतः । मम चैव परां लक्ष्मीं ददस्व गुड सर्वदा ।

---

१ क–कम । २ ख–चख । ३ ग–महादेव । ४ ख+ [illegible]दानमंत्रः । ५ ख+ [illegible] ।

" पितृप्रीतिकरं नित्यं विष्णुशंकरयोरपि । शिवनेत्रोद्भवं रूप्यमतः० मे ।

"रसानामग्रजं श्रेष्ठं लवणं बलवर्धनम् । ब्रह्मणा निर्मितं साक्षाद्तः०मे ॥ **इति दशदानमंत्राः ।**

" सालग्रामाशिलाचक्रे भुवनानि चतुर्दश । तस्माद्स्य प्रदानेन प्रीतो भवतु केशवः ।

शिवलिंगदानमंत्रः

" कैलासवासी गौरीशो भगवान्भगनेत्रहा । चराचरात्मको लिंगरूपी दिशतु वांछितम् " ॥

अन्नदानमन्त्रः

" अत्र प्रजापतिर्विष्णुब्रह्मेंद्रशिवभास्कराः । अग्निवायुस्तथापश्च अतः शांतिं प्रयच्छ मे " ॥

शर्करादानमंत्रः

" अमृतस्य कलोत्पन्ना इक्षुसारं च शर्करा । सूर्यप्रीतिकरा नित्यम० मे " ॥

आज्यावेक्षणदानमंत्रः

" अलक्ष्मीपरिहारार्थं सर्वांगेषु व्यवस्थितम् । तत्सर्वं शमयाज्य त्वं श्रियं पुष्टिं च देहि मे ॥

चणकदानमंत्रः

" गोवर्द्धनगिरिद्वारे समवे हरिरक्षिता । चणकाः सर्वपापघ्ना अतः०मे ॥

माषदानमंत्रः

" यस्मान्मधुवने काले विष्णोर्देहसमुद्भवाः । पितृप्रीतिकरा माषम०मे ॥

मुद्गदा०

"मुद्गा बीजानि वै यस्मात्प्रियाणि परमेष्ठिनः । तस्मादेषां प्रदानेन अ०मे ॥

अन्नदानमंत्रांतरम्

" अन्नेन जायते विश्वं प्राणिनां प्राणधारणम् । तंडुलं वैश्वदेवार्थपाकेनान्नं प्रयच्छ मे "॥

श्रीतांबूलदानमंत्रः

" पूगो ब्रह्मा हरिः पर्णं चूर्णं साक्षान्महेश्वरम् । एतेषां संप्रदानेन संतु मे भाग्यसंपदः"॥

शाकदाने

" सर्वदेवप्रियकरं शाकतृप्तिकरं नृणाम् । ददाति सर्वभद्राणि मम संतु मनोरथाः " ॥

जलदा०

" जीवनं सर्वभूतानां सर्वभूतं जलं यतः । सर्वदानोत्तमं पुण्यमतः० मे ॥

कंबलदान०

" ऊर्णाच्छादनसुश्लाघ्यं शीतवातभयापहम् । यस्माद् दुःखनिवारं तु अतः०मे ॥

उपानद्दा०

" उपानहौ प्रदास्यामि कंटकादिनिवारकौ । सर्वस्थानेषु सुखदावतः०मे ॥

औषधदा०

" प्राणिनां जीवनोपाय प्राणिनां शाश्वतं पदम् । तस्मादौषधदानेन सर्वपापैः प्रमुच्यते "॥

कूष्मांडदानम्

" कूष्मांडं घृतसंयुक्तं तिलमिश्रं तु यत्फलम् । पुत्रपौत्राभिवृध्यर्थं अतः०मे ॥

सूर्यदा० " पद्मासनः पद्मकरो द्विबाहुः पद्मप्रियः सप्ततुरंगवाहः ।

" दिवाकरो लोकगुरुः किरीटी मयि प्रसादं विदधातु देवः " ॥

आयसदा०

" यस्मादायसकर्माणि तवाधीनानि सर्वदा । लांगलाद्यायुधादीनि तस्माच्छांतिं प्रयच्छ मे " ॥

छागदानमंत्रः

" यस्मात्त्वं छाग यज्ञानामंगत्वेन व्यवस्थितः । यानं विभावसोर्नित्यमतः०मे " ॥

ताम्रदानमंत्रः

" ताम्रं शुद्धिकरं सर्वदेवप्रियकरं शुभम् । सर्वरक्षाकरं नित्यम०मे " ॥

कांस्यदा०

" शुद्धं कांस्यमिहामुत्र पात्रयोग्यं मनोहरम् । निर्मितं पापशमनम०मे " ॥

छत्रदा०

" वर्षवातातपत्राणामातपत्रं यशस्करम् । अस्य प्रदानाद्भूतानि सुखं यच्छंतु मे सदा "॥

व्यजनदा०

"व्यजनं वायुदेवत्यं धर्मकाले सुखप्रदम् । तस्मादस्य प्रदानेन शान्तिरस्तु सदा मम "॥

फलदा०

" फलं मनोरथफलं प्रददाति सदा नृणाम् । पुत्रपौत्राभिवृध्यर्थम०मे ॥

दानस्य देशकालौ ॥

याज्ञवल्क्यः (व्य० १७५)—

" स्वं कुटुंबाविरोधेन देयं दारसुतादृते । नान्वये सति सर्वस्वं यच्चान्यस्मै प्रतिश्रुतम् " ॥

बृहस्पतिः—(अ. १५ श्लो. ३)

" कुटुंबभक्तवसनाद्देयं यदतिरिच्यते । अन्यथा दीयते यद्धि न तद्दानफलप्रदम् " ॥

शंखलिखितौ

" आहारं मैथुनं निद्रां संध्याकालेषु वर्जयेत् । कर्म चाध्ययनं चैव तथा दानप्रतिग्रहौ " ॥

" कुरुक्षेत्रे गयातीर्थे तथा वामकरण्डके । एवमादिषु तीर्थेषु दत्तमक्षयतामियात् ॥

व्यासः–"अयने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः । संक्रान्त्यादिषु कालेषु दत्तं भवति चाक्षयम् ॥

" प्रयागादिषु तीर्थेषु पुण्येष्वायतनेषु च । दत्तं चाक्षयमाप्नोति नदीषु च नदेषु च " ॥

संवर्त्तः–"अयने विषुवे चैव व्यतीपाते दिनक्षये । चंद्रसूर्यग्रहे चैव दत्तं भवति चाक्षयम् ॥

" अमावास्या द्वादशी च संक्रांतिस्तु विशेषतः । एताः प्रशस्तास्तिथयो भानुवारस्तथैव च ॥

" अत्र स्नानं जपो होमो ब्राह्मणानां च तर्पणम् । उपवासस्तथा दानमेकैकं पावनं स्मृतम्"॥इति ।

" पौर्णमासीषु सर्वासु मासर्क्षसहितासु च । दत्तानामिह दानानां फलं दशगुणं भवेत् ॥

" सहस्रगुणितं दानं भवेद्दत्तं युगादिषु । कर्मश्राद्धादिकं चैव तथा मन्वंतरादिषु "॥

याज्ञवल्क्यः—

"शतमिंदुक्षये दानं सहस्रं तु दिनक्षये । विषुवे शतसाहस्रं व्यतिपातेष्वनंतकम् " ॥ **भरद्वाजः**–

"व्यतिपाते वैधृतौ यद्दत्तमक्षय्यकृद्भवेत् । द्वौ तिथ्यंतावेकवारे यस्मिंस्तत्स्याद्दिनक्षयः ॥

"तस्मिन्दानं जपो होमः स्नानं चैव फलप्रदम् " ॥ **सुमंतुः**—

" वानप्रस्थस्य पक्वान्नं तांबूलं ब्रह्मचारिणः । संन्यासिनः सुवर्णं च दाताऽपि नरकं व्रजेत् ॥

" बहूनां न प्रदातव्या गौर्वस्त्रं शयनं स्त्रियः । तादृग्भूतं तु तद्दानं दातारं नोपतिष्ठति " ॥

यमः—

“प्रतिश्रुताप्रदानेन दत्तस्य हरणेन च। जन्मप्रभृति यत्पुण्यं तत्सर्वं हि प्रणश्यति॥
“आशाकरस्त्वदाता च दातुश्च प्रतिषेधकः। दत्तं च यः कीर्तयति स पापिष्ठतरः स्मृतः॥
“काले संकल्पिते दाने आ मासं न प्रदीयते। मासे मासे शतं वृद्धिर्यावत्संवत्सरं भवेत्”॥

नारदः—

“ब्राह्मणाय यदुद्दिष्टं तत्सद्यः संप्रदीयते। अहोरात्रमतिक्रम्य तद्दानं द्विगुणं भवेत्॥
“त्रिरात्रं षड्गुणं दद्याद् दशरात्रं तु षोडश। मासे शतगुणं दद्याद्वत्सरं तु सहस्रकम्॥
“वत्सरात्परतो नास्ति दाता तु नरकं व्रजेत्। ब्राह्मणस्य तु यद्दत्तं तदभावे तु तद्धनम्॥
“सकुल्ये तस्य निनयेत्तदभावेऽस्य बंधुषु। दद्यात्सजातिशिष्येभ्यस्तदभावेऽप्सु निक्षिपेत्”॥

आपस्तंबः (२।१५।१२) “देशतः कालतः शौचतः सम्यक्प्रतिगृहीतृतः” इति दानानि प्रतिपादयति इति। **वाल्मिकिः**—

“उत्पतन्नपि चाकाशं विशन्नपि रसातलम्। अटन्नपि महीं कृत्स्नां नादत्तमुपतिष्ठते॥
“दत्तं हि प्राप्यते स्वर्गे दत्तमेवोपभुज्यते। यत्किंचिद्दत्तमश्नाति नादत्तमुपतिष्ठते”॥

यत्तु ‘दानं क्रयो धर्मश्चापत्यस्य न विद्यते” **इत्यापस्तंबस्मरणम्** (२।१३।१०)। “स्वकुटुंबाविरोधेन देयं दारसुतादृत” इति यदपि **याज्ञवल्क्यवचनं** (व्य. १७५) तज्ज्येष्ठपुत्रविषयं एकपुत्रविषयं च। द्वादशविधेषु पुत्रेषु दत्तक्रीतयोरपि **मन्वादिभिः** पठितत्त्वात् “दत्तौरसेतरेषां तु पुत्रत्वेन परिग्रहः” इति दत्तौरसव्यतिरिक्तानामेव पुत्राणां कलौ वर्ज्यत्वस्मरणाच्च। **तथा च वसिष्ठः** (अ. १५।३–६) “न ज्येष्ठं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा। न चैकं पुत्रं। स हि संतानाय पूर्वेषां। न स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वाऽन्यत्रानुज्ञानाद्भर्तुः। पुत्रं प्रतिगृहीष्यन्बंधूनाहूय राजनि चावेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा अदूरबांधवं संनिकृष्टमेव प्रतिगृह्णीयात्”॥ इति। **बह्वृचब्राह्मणेऽपि** शुनःशेपाख्याने ज्येष्ठं पुत्रं न प्रयच्छेदित्यादि॥

इति **दानम्**।

अथ पात्रनिरूपणम्॥ मनुः (१।९९–१००)—

“ब्राह्मणो जायमानो वै पृथिव्यामधिजायते। ईश्वरः सर्वभूतानां धर्मकोशस्य चैव हि॥
“सर्वं स्वं ब्राह्मणास्येदं यत्किंचिज्जगतीगतम्। श्रैष्ठ्येनाभिजनेनेदं सर्वं वै ब्राह्मणोऽर्हति”॥

स्मृतिसारे—

“सर्वस्य प्रभवो विप्राः श्रुताध्ययनशालिनः। तेभ्यः क्रियापराः श्रेष्ठास्तेभ्योऽप्यध्यात्मवित्तमाः”॥

स्मृत्यर्णवे—

“अज्ञेभ्यो ग्रंथिनः श्रेष्ठा ग्रंथिभ्यो धारिणो वराः। धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्योऽध्यवसायिनः”॥

यमः— “विद्यायुक्तो धर्मशीलः प्रशांतः क्षांतो दांतः सत्यवादी कृतज्ञः।
“स्वाध्यायवान् धृतिमान् गोशरण्यो दाता यज्वा ब्राह्मणः पात्रमाहुः॥
“स्वाध्यायाढ्यं योनिमंतं प्रशांतं वैतानस्थं पापभीरुं बहुज्ञम्॥
“स्त्रीषु क्षांतं धार्मिकाणां शरण्यं व्रतैः क्लांतं तादृशं पात्रमाहुः॥”

याज्ञवल्क्यः (आ. २००)—

“न विद्यया केवलया तपसा वाऽपि पात्रता। यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रचक्षते”॥

१ क्ष-स्व।

शातातपः[1]—
" यथाश्वा रथहीनाः स्यू रथश्चाश्वैर्यथा विना । एवं तपो ह्यविद्यस्य विद्या वाऽप्यतपस्विनः ॥
" यथान्नं मधुसंयुक्तं मधु चान्नेन मिश्रितम् । एवं तपश्च विद्या च संयुक्तं भेषजं महत् " ॥
वसिष्ठः—
" किंचिद्वेदमयं पात्रं किंचित्पात्रं तपोमयम् । पात्राणामपि तत्पात्रं शूद्रान्नं यस्य नोदरे " ॥
ब्रह्मवैवर्ते—
" ये पूर्वं पूजिता एव पुरस्तात्स्युर्नमस्क्रिया । तां निराकृत्य चान्येषु कुर्वन्भक्तिं व्रजत्यधः " ॥
देवलः—" मातुश्च ब्राह्मणश्चैव श्रोत्रियश्च ततः परम् । अनूचानस्तथा भ्रूणऋषिकल्पऋषिर्मुनिः ॥
" इत्येतेऽष्टौ समुद्दिष्टा ब्राह्मणाः प्रथमं श्रुतौ । तेषां परः परः श्रेष्ठो विद्यावृत्तविशेषतः " ॥
एतेषां लक्षणं स एवाह-
" ब्राह्मणानां कुले जातो जातिमात्रो यथा भवेत् । अनुपेतः क्रियाहीनो मात्र इत्यभिधीयते ॥
" एकदेशमतिक्रम्य वेदस्याचारवानृजुः । स ब्राह्मण इति ख्यातो निभृतः सत्यवाग् घृणी ॥
एकदेशातिक्रमो वेदस्य किंचिन्न्यूनस्याध्ययनम् । निभृतः शांतः ।
" एकां शाखां सकल्पां वा षड्भिरंगैरधीत्य वा । षट्कर्मनिरतो विप्रः श्रोत्रियो नाम धर्मवित् ॥
" जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते । विद्यया चापि विप्रत्वं त्रिभिः श्रोत्रिय उच्यते ॥
" वेदवेदांगतत्त्वज्ञः शुद्धात्मा पापवर्जितः । शेषं श्रोत्रियवत्प्राप्तः सोऽनूचान इति स्मृतः ॥
" अंतर्व्रतगुणोपेतयज्ञस्वाध्याययंत्रितः । भ्रूण इत्युच्यते शिष्टैः शेषभोजी जितेंद्रियः ॥
" लौकिकं वैदिकं चैव सर्वं ज्ञानमवाप्य च । आश्रमस्थो वशी नित्यमृषिकल्प इति स्मृतः " ॥
लौकिकमर्थार्जनादिकम् ॥
" ऊर्ध्वरेताः तपस्वग्र्यो नियताशी न संशयः । शापानुग्रहयोः शक्तः सत्यसंधो भवेदृषिः " ॥
" निवृत्तः सर्वतत्त्वज्ञः कामक्रोधविवर्जितः । ध्यानार्थो निष्क्रियो दांतस्तुल्यमृत्कांचनो मुनिः" ॥
यमः—" शीलं संवासतो ज्ञेयं शौचं संव्यवहारतः । प्रज्ञा संकथना ज्ञेया त्रिभिः पात्रं परीक्ष्यते " ॥
बोधायनः—" वेदानां किंचिदधीत्य ब्राह्मण एकां शाखामधीत्य श्रोत्रिय अंगाध्याय्यनूचानः॥
कल्पाध्यायी ऋषिकल्पः सूत्रप्रवचनाध्यायी भ्रूणः " ॥ इति ।
दक्षः- " समं द्विगुणसाहस्रमनंतं च यथाक्रमम् । दाने फलविशेषः स्याद्धिंसायामेवमेव हि ॥
[3]" सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे । प्राधीते शतसाहस्रमनंतं वेदपारगे " ॥
गौतमोऽपि (५।१८)-" समद्विगुणसाहस्रानंत्यानि फलान्यब्राह्मणश्रोत्रियवेदपारगेभ्यः" इति ।
" सांगं सकल्पं सरहस्यं च यो वेदमधीरते स वेदपारगः " इति **हरदत्तः** ।
"अब्राह्मणास्तु षट् प्रोक्ता ऋषिः शातातपोऽब्रवीत् । आद्यो राजभृतस्तेषां द्वितीयः क्रयविक्रयी ॥
" तृतीयो बहुयाज्यः स्याच्चतुर्थो ग्रामयाजकः । पंचमस्तु भृतस्तेषां ग्रामस्य नगरस्य च ॥
"अनादित्यां तु यं पूर्वां सादित्यां चैव पश्चिमाम् नोपासीत द्विजः संध्यां स षष्ठोऽब्राह्मणः स्मृतः" ॥ इति ।
संवर्त्तस्तु—
" उत्पत्तिप्रलयौ चैव भूतानामागतिं गतिम् । वेत्ति विद्यामविद्यां च स भवेद्वेदपारगः " ॥ इति ।
बृहस्पतिः "श्रोत्रिये चैव साहस्रमाचार्ये द्विगुणं तथा । आत्मज्ञे शतसाहस्रमनंतं त्वग्निहोत्रिणि" ॥
व्यासः—"प्रथमं तु गुरोर्दानं दद्यात् श्रेष्ठमनुक्रमात् । ततोऽन्येषां च विप्राणां दद्यात्पात्रानुसारतः ॥

---

१ वसिष्ठ धर्मसूत्रे अ. २६।१७-१८ । २ क्ष-व्रत । ३ मनुस्मृ-७।८५ । ४-क्ष तत्वेषा ।

'अथैकभविकं दानं कर्मयोगरतात्मना । शतजन्मद्रवं दानं गोषु ज्ञेयं महाफलम् ॥
" द्विगुणं च तदेकैकं तथा वै वर्णसंकरे । शूद्रे चतुर्गुणं प्रोक्तं विशि चाष्टगुणं भवेत् ॥
" क्षत्रिये षोडषशगुणं ब्रह्मबंधौ तदेव तु । द्वात्रिंशद्धि कृतं दानं वेदाध्ययनतत्परे ॥
" शतघ्नं तद्विनिर्दिष्टं प्राधीते लक्षसंमितम् । अनंतं च तदेवोक्तं ब्राह्मणे वेदपारगे " ॥

अथा[१]पात्रनिरूपणं । शातातपः

" नष्टं देवलके दत्तमप्रतिष्ठं च वार्धुषौ । यच्च वाणिज्यके दत्तं न च तत्प्रेत्य नो इह ॥
" देवार्चनरतो विप्रो वित्तार्थी वत्सरत्रयम् । स वै देवलको नाम हव्यकव्येषु गर्हितः " ॥ इति ।

स्मृतिसंग्रहे—

" देवार्चनपरो यो[२] हि परार्थं वित्तकांक्षया । चतुर्वेदधरो विप्रः स चंडालसमो भवेत् ॥
" कर्मदेवलकाः केचित्कल्पदेवलकाः परे । शुद्धदेवलकाः केचित्त्रिधा देवलकाः स्मृताः ॥
" अर्थार्थी कालनिर्देशी यो देवं पूजयेत्सदा । कर्मदेवलको नाम सर्वकर्मबहिष्कृतः ॥
" पांचरात्रविधानज्ञो दीक्षाविरहितोऽर्चकः । चतुर्वेदाधिकारोऽपि कल्पदेवलकः स्मृतः ॥
" आगमोक्तिविधानज्ञो रुद्र[३]काल्युपजीवकः । शुद्धदेवलको नाम सर्वकर्मबहिष्कृतः ॥
" आर्षेयोक्तविधाने तु देवलत्वं न विद्यते । तस्मात्सर्वप्रयत्नेन वैदिकेनैव पूजयेत् " इति ॥

यमः– " समर्घं धनमादाय महार्घं यः प्रयच्छति । स वै वार्धुषिको नाम यश्च वृध्द्योपजीवति ॥
"यस्तु निंदन्परगुणान्प्रशंसत्यात्मनो गुणान् । स वै वार्धुषिको नाम ब्रह्मवादिषु गर्हितः" ॥ इति ।

वृद्धमनुः—

"पात्रभूतोऽपि यो विप्रः प्रतिगृह्य प्रतिग्रहम् । असत्सु विनियुंजीत तस्मै देयं न किंचन ॥
"संचयं कुरुते यश्च प्रतिगृह्य समं ततः । धर्मार्थं नोपयुङ्क्ते च न तं तस्करमर्चयेत्" ॥

व्यासः– " परस्थाने वृथादानमशेषं परिकीर्तितम् । आरूढपतिते चैव अन्यथार्थधनैश्च यत् ॥
" व्यर्थमब्राह्मणे दानं पतिते तस्करे तथा । गुरोश्चाप्रीतिजनके कृतघ्ने ग्रामयाजके ॥
" वेदविक्रयके चैव यस्य चोपपतिर्गृहे । न वार्यपि प्रयच्छेत्तु नास्तिके हैतुके तथा ॥
" न पाषंडेषु सर्वेषु नावेदविदि धर्मवित् " ॥ **पराशरः**–
"युक्तिछलेन सर्वत्र यः शास्त्र[४]विहितेष्वपि । संशयं कुरुते सोऽयं हैतुको नास्तिकाधमः" ॥

प्रजापतिः

" स्वधर्मस्य परित्यागी पाषंडीत्युच्यते बुधैः । तत्संगकृत्तत्समः स्यात् तावुभावपि पापिनौ ॥
" ये तु सामान्यभावेन मन्यन्ते पुरुषोत्तमम् । ते वै पाषंडिनो ज्ञेया नरकार्हा नराधमाः " ॥

नारदः–" षंढस्य पुत्रहीनस्य दंभाचाररतस्य च । नक्षत्रपाठकस्यापि दत्तं भवति निष्फलम् " ॥

विष्णुधर्मोत्तरे–"परस्थाने वृथादानमशेषं परिकीर्तितम् । आरूढपतिते चैव त्वन्यथार्थैर्धनैश्च यत् ।
" व्यर्थमब्राह्मणे दानं पतिते तस्करे तथा । गुरोश्चाप्रीतिजनके कृतघ्ने ग्रामयाजके ॥
" वेदविक्रयिके चैव यस्य चोपपतिर्गृहे " ॥

वृद्धमनुः–"स्त्रीभिर्जितेषु यत् दत्तं व्यालग्राहे तथैव च । ब्रह्मबंधुषु यद्दत्तं यद्दत्तं वृषलीपतौ ॥
" परिचारकेषु यद्दत्तं वृथादानानि षोडश " ॥ वृषलीपतिलक्षणमाह **दक्षः—**
"पितृगृहे तु या कन्या रजः पश्यत्यसंस्कृता । सा कन्या वृषली ज्ञेया तत्पतिर्वृषलीपतिः" ॥

---

१ क्ष–पात्र । २ क्ष–ह्यासीत्परार्थं । ३ क्ष–भूत । ४ क्ष–यत्र वा ।

देवलः—
"वंध्या च वृषली ज्ञेया वृषली च मृतप्रजा । अपरा वृषली ज्ञेया कुमारी या रजस्वला "॥ इति ।
व्यासः—
" पंग्वंधबधिरा मूका व्याधिनोऽपहताश्च ये । भर्त्तव्यास्ते तु सततं न तु देयः प्रतिग्रहः ॥
" यस्त्वसद्भ्यो ददातीह सद्द्रव्यं धर्मनाशनम् । स पूर्वाभ्यधिकः पापी नरके पच्यते नरः ॥
" यतीनां कांचनं दत्वा तांबूलं ब्रह्मचारिणः । चोराणामभयं दत्वा दाता तु नरकं व्रजेत्"॥
मनुः—
" अनर्हते यद्ददाति न ददाति यदर्हते । अर्हानर्हापरिज्ञानात् धनाद्धर्माच्च हीयते " ॥
यमः—
" अव्रतानाम[1]मंत्राणां जातिमात्रोपजीवनाम् । नैषां प्रतिग्रहो देयो न शिला तारयेच्छिलाम् ॥
" अपविद्धाग्निहोत्रस्य गुरोर्विप्रियकारिणः । द्रविणं नैव दातव्यं सततं पापकर्मणः ॥
"न प्रतिग्रहमर्हन्ति वृषलाध्यापका द्विजाः । शूद्रस्याध्यापनाद्विप्रः पतत्यत्र न संशयः"॥
वृषलस्वरूपमाह **पराशरः**—
" अग्निकार्यपरिभ्रष्टाः संध्योपासनवर्जिताः । वेदं च येऽनधीयानास्ते सर्वे वृषलाः स्मृताः ॥
" उपारुदंति दानानि गौ रथः कांचनं क्षितिः । अश्रोत्रियस्य विप्रस्य करं दृष्ट्वा निराकृतेः ॥
"राजधानी यथा शून्या यथा कूपश्च निर्जलः । यथाहुतमनग्नौ तु तथा दत्तं द्विजब्रुवे"॥
अपात्रे दातुर्दोषमाह **व्यासः**—
" दुर्विप्रा गणिका वेश्या विटूचारणकारवः । सततं यं प्रशंसंति तं विद्यात्पुरुषाधमम् ॥
" ये च ज्योतिषकाश्चौराः कुंडगोलाश्च याचकाः । सौनिका यं प्रशंसंति तं विद्यात् पुरुषाधमम् ॥
" उत्कोचजीविनो भ्रष्टा वेश्यापतिविदूषकाः । गायका यं प्रशंसंति तं विद्यात्पुरुषाधमम्" ॥ इति ।
आपस्तंबः—"अन्नदाने न कर्तव्यं पात्रावेक्षणमण्वपि । अन्नं सर्वत्र दातव्यं धर्मकामेण वै द्विजाः॥
" दीनांधकृपणादिभ्यो वाग्विहीनेषु यत्तथा । विकलेषु तथाऽन्येषु जडे बधिरपंगुषु ॥
" गेवृत्तेषु च यद्दत्तं तत्स्याद्बहुफलं धनम् ॥
" विवाहमेखलाबंधप्रतिष्ठादिषु कर्मसु । आपन्नेषु तु यद्दत्तमक्षय्यं तदुदाहृतम् "॥ देवपित्र्यव्यतिरिक्तविषयम् । तत्र शुचिमन्मंत्रवतः सर्वकृत्येषु भोजयेम् " कृतान्नमितरेषु " इति **गौतमवचनम्**
अथ **द्रव्याख्यदानांगमुच्यते**— (५।२०)॥
" यद्यादिष्टं विशिष्टं च न्यायप्राप्तं च यद्भवेत् । तत्तद्गुणवते देयमित्येतद्दानलक्षणम् ॥
"तत्पुनस्त्रिविधं ज्ञेयं शुक्लं शबलमेव च । कृष्णं तु तस्य विज्ञेयो विभागः सप्तधा पुनः ॥
" श्रुतशौर्यतपःकन्यायाज्यशिष्यान्यथागतम् । धनं सप्तविधं शुक्लमुदयो यस्य तद्विधः ॥
कन्यागतमार्षविवाहे यद्गृहीतं गोमिथुनादि । उदयः फलं ददात्य[3]स्य शुद्धमित्यर्थः ॥
" कुसीदकृषिवाणिज्यशिल्पशुल्कानुवृत्तितः । कृतोपकाराद्दाप्तं च शबलं समुदाहृतम् " ॥
शुल्कमाकरादिभ्यो द्रव्यागमः । अनुवृत्तिः सेवा ।
" पार्श्वकद्यूतचौर्यार्थिप्रतिरूपकसाहसैः । व्याजेनोपार्जितं यत्तत्सर्वेषां कृष्णमुच्यते ॥
पार्श्वकोपार्जितमुत्कोचादिलब्धं तध्द्युपार्जितं परपीडालब्धं प्रतिरूपकर्माणि प्रतिरूपादैः प्रतिरूपकरणं साहसं स्वप्रमाणयथांगिकारेण पश्यतो हरत्वादिकम् । व्याजो डंभतपःप्रभृति ।

१ क्ष–आवृत्ताना । २–ख तत्कृष्णं समुदाहृतम् । ३ क्ष–ष्य ।

" शुक्लेन वार्तेन कृतं पुण्यं बहुफलं भवेत् । शबलं मध्यमफलं कृष्णं हीनफलं धनम् ॥
"शुक्लवित्तेन यो धर्मं प्रकुर्याच्छ्रद्धयान्वितः । तीर्थे पात्रे समासाद्य देवत्वे तत्समश्नुते ॥
" राक्षसेन च भावेन वित्तेन शबलेन च । यद्दद्याद्दानमर्थिभ्यो मानुषत्वे तदश्नुते ॥
" तमोवृत्तस्य यो दद्यात्कृष्णवित्तेन मानवः । तिर्यक्त्वे तत्फलं प्रेत्य समश्नाति नराधिपः ॥
" स्वंकुटुंबाविरोधेन देयं दारसुताहृते । नान्वये सति सर्वस्वं यच्चान्यस्मै प्रतिश्रुतम् ॥
" तस्मात्त्रिभागं वित्तस्य जीवनाय प्रकल्पयेत् । भागद्वयं तु धर्मार्थमनित्यं जीवनं यतः "॥
विक्तं पंचधा विभज्य भागत्रयं जीवनाय भागद्वयं धर्माय परिकल्पयेत् ।
" एकां गां दशगुर्दद्याद्दद्याद्द्वादश गोशति । शतं सहस्रगुर्दद्यात्सर्वे तुल्यफलाः स्मृताः ॥
" कुटुंबं पीडयित्वा तु ब्राह्मणाय महात्मने । दातव्यं भिक्षवे चान्नं ब्राह्मणो भूतिमिच्छता ॥
"सौदायिकं क्रमायातं स्वयं प्राप्तं च यद्भवेत् । त्रिज्ञातिस्वाम्यनुज्ञाते दत्तं सिद्धिमवाप्नुयात्" ॥
सौदायिकं विवाहलब्धं तद्भार्ययाऽनुज्ञातम् क्रमायातं ज्ञातिभिरनुज्ञातम् । भृत्येन सता युद्धे लब्धं स्वाम्यनुज्ञातम् ।
" यच्च वाचा प्रतिज्ञातं कर्मणा नोपपादितम् । तद्धनं ऋणसंयुक्तमिह लोके परत्र च ॥
" सप्तधा तान्नरो हन्याद्वर्तमानांश्च सप्त च । अतिक्रांतान्सप्त हन्याद्प्रयच्छन्प्रतिश्रुतम् ॥
" संश्रुत्य यो न यच्छेत याचित्वा यश्च नेच्छति । उभावनृतकावेतौ वृषा पापमवाप्नुतः ॥
"ब्राह्मणस्य तु यद्द्रव्यं सान्वयस्यैव नास्ति सः । सकुल्ये तस्य निनयेत्तदभावेऽस्य बंधुषु ॥
"यदा तु न कुलस्य स्यान्न च संबंधिबांधवाः । दद्यात्सजातिशिष्येभ्यस्तदभावेऽप्सु निक्षिपेत् ॥
" यज्ञोपकरणं द्रव्यं ब्राह्मणेषु महाफलम् । युद्धोपकरणं द्रव्यं क्षत्रिये द्विजपुंगवाः ॥
" पुण्योपयोगि तद्वैश्ये शूद्रे शिल्पोपयोगि च । यस्योपयोगि यद् द्रव्यं देयं तस्यैव तद्भवेत् ॥
" येन येन च भावेन यस्य वृत्तिरुदाहृता । तत्र तस्यैव दातव्यं पुण्यकामेन धीमता ॥
" मृष्टान्नं मानवो दत्त्वा मृष्टान्नानि तु कांक्षिणा । अक्षय्यं फलमाप्नोति स्वर्गलोकं च गच्छति" ॥

व्यासः—

" कृष्णाजिनं...चैतत्तथा विद्यां कमंडलुम् । धीरः पुण्यमवाप्नोति दत्वैतान् ब्रह्मचारिणाम् ॥
"वस्त्रं शय्यासनं धान्यं भस्म वेश्म परिच्छदम् । गृहस्थाय तु यद्दत्तं श्रेयो बहुफलं सदा ॥
" यो दद्याद्यतये भिक्षां पात्रं दत्तं तथैव च । कृत्स्नां यां पृथिवीं दद्यात्तेन तुल्यं न तत्फलम् ॥
" बाले क्रीडनकान्दत्वा मृष्टमन्नं तथैव च । फलं मनोहरं चापि अग्निष्टोमफलं भवेत् ॥
" प्रार्थितं बालकानां च दातव्यं स्यात्प्रयत्नतः । बालानां प्रार्थितं दत्वा नाकलोके महीयते ॥
" बालकाः पूजनीयाः स्युर्धर्मकामैश्छुभिर्नरैः । तेषां भोज्यप्रदानेन गोदानफलमाप्नुयात् ॥
" तस्मात्सर्वप्रयत्नेन बालानग्रे तु भोजयेत् । गंधमंगलतांबूलं रक्तवस्त्रादिकं स्त्रियः ॥
" स्त्रीणां प्रदानं दातव्यं भर्तृगेहेषु नान्यथा ।
" द्रव्येणान्यायलब्धेन यः करोत्यौर्ध्वदेहिकम् । न स तत्फलमाप्नोति तथार्थस्य पुरागमात् ॥
" अपहृत्य परस्यार्थं दानं यस्तु प्रयच्छति । स दाता नरकं याति यस्यार्थस्तस्य तत्फलम् ॥
" परिभुक्तमवज्ञातमपर्याप्तमसत्कृतम् । यः प्रयच्छति विप्रेभ्यस्तत्सर्वमवतिष्ठते " ॥
परिभुक्तं गृहीतोपयोगं वस्त्रादि । अपर्याप्तं स्वकार्याक्षमम् ॥
" सामान्यं याचितं न्यासमाधिर्दाराश्च तद्धनम् । अन्वाहितं तु निक्षेपः सर्वस्वं चान्वये सति ।

१ ख-तत । २ याज्ञवल्कीये व्य. अ. १७५

"आपत्स्वपि न देयानि नववस्त्रादि पंडितैः । यो ददाति स मूढात्मा प्रायश्चितीयते नरः"॥ सामान्यमनेकस्वामिकम् । याचितं संव्यवहारार्थमयाचितं त्वानीतम् । वस्त्रालंकारादिन्यासं गृहस्वामिनेऽदर्शयित्वा तत्परोक्षमेव च गृहस्वामिनेऽर्पणीयमिति । गृहजनहस्ते स्थापितं द्रव्यमाधिः प्रसिद्धम् । दाराः कलत्रं तद्धनं दारधनम् ।

"अध्यग्न्यध्यावाहनिकं दत्तं च प्रीतिकर्मणि। भ्रातृमातृपितृप्राप्तं स्त्रीधनं षड्विधं स्मृतम्"(९।१९४)॥ अध्यग्नि अग्निसाक्षिकं यत्स्त्रियै दत्तम् । अध्यावाहनिकं विवाहकालेऽपि दत्तम्। प्रीतिकर्मणि स्त्रीपुंसंबंधेन भावितं चाप्तादिभ्यः प्राप्तं वा । अन्वाहितं यदेकस्य हस्ते स्वामिनि देहीति निमित्तान्निक्षेपः गृहस्वामिसमक्षं स्थापितं द्रव्यम्। "[1]न त्वेकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा न तु स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वा " ॥

"बहुभ्यो न प्रदेयानि गौर्गृहं शयनं स्त्रियः । विभक्तदक्षिणा ह्येता दातारं तारयंति हि ॥
" एका ह्येकस्य दातव्या न बहुभ्यः कथंचन । विवशां रोहिणीं रक्ष्यां विवत्सां शृंगभीषणीम् ॥
" क्षीणक्षीणशरीरां गां दत्त्वा दोषमवाप्नुयात् ।
"न व्यंगां रोहिणीं वंध्यां न क्षत्रहृतवत्सलाम्। न वामनां वेहद्[2]गर्भां दद्याद्विप्राय गां नरः"॥
वेहद्गर्भां गर्भोपघातिनीम् ।

" न चोषरां न निर्दग्धां महीं दद्यात्कथंचन । न स्मशानपरीतां च न च पापनिषेविताम् " ॥ पापा हिंस्रा प्राणिनाम् ।

"न नर्कादिकूलनिकटा भूमिर्देया कदाचन। न च दद्याद्विजश्रेष्ठो या चतुःसंधिसंस्थिता ॥
" दुःखं ददाति योऽन्यस्य ध्रुवं दुःखं स विंदति । तस्मान्न कस्यचिद्दुःखं दातव्यं दुःखभीरुणा ॥
" सुवर्णं रजतं ताम्रं यतिभ्यो यः प्रयच्छति । न तत्फलमवाप्नोति तत्रैव परिवर्त्तते " ॥
परिवर्त्तते धर्मविपरीतं जनयतीत्यर्थः ।

" न शूद्राय हविर्दद्यात्सर्पिः क्षीरं तिलं मधु। न शूद्रः प्रतिगृह्णीयात्तेषामन्यं निवेदयेत् "॥ तेषामिति क्षीरादीनां क्रयार्थमन्यद्द्रव्यं निवेदयेत्यर्थः । ' कृसरं पायसापूपदधिमधुकृष्णाजिनानि शूद्रेभ्यो न दद्यात् ' ।

" यया कयाऽपि वा वृत्या निजकर्मात्ययन्सदा। पितरौ बिभृयात्सम्यक् साध्वीं भार्यां शिशूनपि ॥
" मोहाद्वा वृत्तेर्हेतोर्वा धर्मलोभाच्छठाच्च वा । पितरौ त्यजतो वृद्धौ गतिरूर्ध्वा न विद्यते ॥
"अनाथौ पितरौ पुत्रं साध्वीं भार्यां च वाऽत्मजाम्। शक्तस्य त्यजतो मोहाद्गतिरूर्ध्वा न विद्यते॥
" गुर्वर्थमतिथीनां च भृत्यानां च विशेषतः। शूद्राणां प्रतिगृह्णीयान्न च भुंक्ते स्वयं ततः " ॥

अथ प्रतिग्रहो निरूप्यते । मनुः (८।११२)—
" सिलोंछमप्याददीत विप्रो जीवन्यतस्ततः । प्रतिग्रहात्सिलं श्रेयस्ततो ह्युंच्छः प्रशस्यते ॥
"सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः । प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च (११५)॥
"प्रतिग्रहसमर्थोपि प्रसंगं तत्र वर्जयेत् । प्रतिग्रहेण ह्यस्[3]याशु ब्राह्मं तेजः प्रणश्यति (४।१८६) ॥
प्रतिग्रहविधिज्ञो विद्यायुक्तश्च प्रतिग्रहसमर्थः । अयावदर्था पुनः पुनः प्रवृत्तिः प्रसंगः ।
स एव (८।१०२)
" नाध्यापनाद्याजनाद्वा गर्हिताद्वा प्रतिग्रहात्। दोषो भवति विप्राणामनलार्कसमा हि ते" ॥ इति।
अगर्हितप्रतिग्राहद्प्यप्रतिग्रहः श्रेयानित्याह **याज्ञवल्क्यः** (आ. २१३)—

१ वासिष्ठे अ. १५।३–५ । २ क्ष–हेम । ३ क्ष–त ।

"प्रतिग्रहसमर्थोऽपि नादत्ते यः प्रतिग्रहम्। ये लोका दानशीलानां स तानाप्नोति पुष्कलान्"॥ इति।

व्यासः—

"द्विजातिभ्यो धनं लिप्सेत् प्रशस्तेभ्यो द्विजोत्तमः। अपि वा जातिमात्रेभ्यो न तु शूद्रात्कथंचन॥
"प्रतिग्रहरुचिर्न स्याद्यात्रार्थं तु समाहरेत्। स्थित्यर्थादधिकं गृह्णन्ब्राह्मणो यात्यधोगतिम्॥
"अभ्युष्णात्सघृतादन्नादच्छिद्राच्चैव वाससः। अपरप्रेष्यभावाच्च भूय इच्छन् पतत्यधः"॥

नारदः—

"धनमूलाः क्रियाः सर्वा अतस्तस्यार्जनं मतम्। वर्धनं रक्षणं भोग इति तस्य विधिः क्रमात्"॥
तत्परंत्रिविधं ज्ञेयमित्यादिपूर्वोक्तमवगंतव्यम्॥ **सप्तर्षिसंवादे—**
"धर्मार्थः संचयो यस्य द्रव्याणां स प्रशस्यते। तपसंचय एवासौ विशिष्टो द्रव्यसंचयात्॥
"यथा यथाऽनुगृह्णाति ब्राह्मणोऽसत्प्रतिग्रहम्। तथा तथाऽस्य संतोषात् ब्रह्मतेजोऽभिवर्धते॥
"आकिंचन्यं च राज्यं च तुलायां समतोलयत्। आकिंचनत्त्वमधिकं राज्यादपि जितात्मनः"॥
"यो राज्ञः प्रतिगृह्यैव शोचितव्ये प्रहृष्यति। स वै संयाति मूढात्मा नरकानेकविंशतिम्"॥

स्मृत्यंतरे—

"तीर्थे पापं न कुर्वीत विशेषाच्च प्रतिग्रहम्। दुर्जनं पातकं तीर्थे दुर्जनाच्च प्रतिग्रहः"॥

मनुः (४।८४)—

"न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः। सूनाचक्रध्वजवतां वेशेनैव च जीविनाम्॥
"अपि पापकृतो राज्ञः प्रतिगृह्णन्ति साधवः। पृथिवीं नान्यदिच्छंति पावनं ह्येतदुत्तमम्"॥
अक्षत्रियजातस्य राज्ञः द्रव्यं न प्रतिगृह्णीयात्। सूना हिंसा। चक्रं तैलयंत्रं तद्वान् ध्वजवान् सुराकारि। वेशः वेशकर्म। एषु तारतम्यमाह **स एव** (४।८५)—
"दशसूना समश्चक्री दशचक्रिसमो ध्वजी। दशध्वजिसमा वेश्या दशवेश्या समो नृपः"॥
राजन्यप्रसूतेरपि लुब्धस्य प्रतिग्रहे दोषमाह **स एव** (४।८७, ९१)—
"यो राज्ञः प्रतिगृह्णाति लुब्धस्योच्छास्त्रवर्तिनः। स पर्यायेण यातीमान् नरकानेकविंशतिम्॥
"एतद्विदित्वा विद्वांसो ब्राह्मणा ब्रह्मवादिनः। न राज्ञः प्रतिगृह्णंति प्रेत्य श्रेयोऽभिकांक्षिणः"॥

याज्ञवल्क्यः (आ. १४१)— (४।९१)

"प्रतिग्रहे सूनि चक्री ध्वजिवेश्या नराधिपाः। अष्टादशगुणं पूर्वात्पूर्वादेते यथाक्रमम्"॥

स एव (आ. १३०)—

"राजान्तेवासियाज्येभ्यः सीदन्निच्छेद्धनं क्षुधा। डम्भहेतुकपाषण्डिबकवृत्तींश्च वर्जयेत्"॥

कात्यायनः—

"उपन्यस्तेन यल्लब्धं विद्यया पणपूर्वकम्। शिष्यादार्त्विज्यतः प्रश्नासंदिग्धप्रश्ननिर्णयात्॥
"विज्ञानशंसनाद्वादाल्लब्धं प्राध्ययनाच्च यत्। धनमेवंविधं सर्वं विज्ञेयं धर्मसाधनम्॥
"अयाचितसिलोंच्छैश्च शिष्यदत्तैः क्रमागतैः। जीवेत्कर्मविशुद्धेभ्यः प्रतिगृह्यापि वा धनम्॥
"याचितेनापि वाऽर्तेन दैन्यं हित्वा शमस्थितः। स्तोकादानेन वा नित्यं प्रतिगेहमतंद्रितः॥
"दधिक्षीरघृतादीनां लवणस्य पशोस्तथा। विक्रयिभ्योऽपि नादद्यादश्वविक्रयिणस्तथा॥
"कौसीदकात्तथा भोक्तुः श्राद्धस्य सततं तथा"॥ कौसीदको वार्धुषिकः।

---

१ क्ष—धृ। २ क्ष—अ

" न ग्रामयाजकेभ्यश्च नागम्यागामिनस्तथा । वणिग्भ्यश्च तथा शूद्राद्विसृष्टाग्नेर्न चाहरेत् " ॥
मनुः (११।१६)—

"तथैव सप्तमे भक्ते भक्तानि षडनश्नता । अश्वस्तनविधानेनाहर्तव्यं हीनकर्मणः " ॥
त्र्यहमुपोष्यान्यत्रालाभे चतुर्थदिने तद्दिनमात्रपर्याप्तं शूद्रतो गृह्णीयादित्यर्थः **स एव**

"गृह्णन्गोभूहिरण्यादि तथा नैव विचारयेत् । कृतान्नं तु गृहीतं तु बहुशः सुपरीक्षितात्"॥
बृहस्पतिस्मृतौ—

"वृद्धौ च मातापितरौ साध्वी भार्या सुतः शिशुः । अप्यकार्यशतं कृत्वा भर्तव्या मनुरब्रवीत्"॥
अपि कार्यशतमित्यपि पाठांतरम् । **हारीतः**—" विदितात्प्रतिगृह्णीयाद्गृहकर्मप्रसिद्धये " इति ।
अंगिराः—

" यत्तु राशीकृतं धान्यं खले क्षेत्रेऽथ वा भवेत् । शूद्रादपि गृहीतव्यमित्यांगिरसभाषणम् " इति ।
व्यासः—

" कुटुंबार्थे तु सच्छूद्रात् प्रतिग्राह्यमयाचितम् । कृत्वर्थमात्मने चैव न हि याचेत कर्हिचित्॥
" वृत्तिसंकोचमन्विच्छेन्नेहेत धनविस्तरे । धनलोभप्रवृत्तिस्तु ब्राह्मण्यादेव हीयते " ॥ इति ।
चतुर्विंशतिमते—

" सीदंश्चेत्प्रतिगृह्णीयाद्ब्राह्मणेभ्यस्ततो नृपात् । ततस्तु वैश्यशूद्रेभ्यः शंखस्य वचनं तथा॥
" आमं मांसं मधु घृतं धान्यं क्षीरं तथौषधम् । गुडतक्ररसा ग्राह्या निवृत्तेनापि शूद्रतः " ॥
याज्ञवल्क्यः (आ. २१६)—

" देवातिथ्यर्चनकृते गुरुभृत्यार्थमेव च । सर्वतः प्रतिगृह्णीयात् आत्मवृत्त्यर्थमेव च " ॥
अनापद्यधार्मिकराजप्रतिग्रहं निन्दति **स एव याज्ञवल्क्यः** (आ. १४०)—

" न राज्ञः प्रतिगृह्णीयात् लुब्धस्योच्छास्त्रवर्तिनः " । इति । **स्कान्दे**—

"मरुदेशे निरुदके ब्रह्मरक्षस्त्वमागतः । राजप्रतिग्रहात्पुष्टिः पुनर्जन्म न विंदति"॥ इति ।
ब्रह्मांडपुराणे—

" अनापद्यपि धर्मेण याज्यतः शिष्यतस्तथा । गृह्णन्प्रतिग्रहे विप्रो न धर्मात्परिहीयते " ॥ इति ।
आपद्विषये **मनुराह** (१०।१०२)—

" सर्वतः प्रतिगृह्णीयाद्ब्राह्मणस्त्वनयं गतः । पवित्रं दुष्यतीत्येतद्धर्मतो नोपपद्यते " ॥
अनयं गतः आपदं गतः ।

"जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः । आकाशमिव पंकेन न स दोषेण लिप्यते (१०४)॥
" अजीगर्तः सुतं हंतुमुपासर्पद्बुभुक्षितः । न चालिप्यत दोषेण क्षुत्प्रतीकारमाचरन् (१०५) ॥
"श्वमांसमिच्छन्नार्तोऽत्तुं धर्माधर्मविचक्षणः । प्राणानां रक्षणार्थाय वामदेवो न लिप्तवान् (१०६) ॥
" भरद्वाजः क्षुधार्तस्तु सपुत्रो निर्जने वने । बह्वीर्गाः प्रतिजग्राह वृधोस्तक्ष्णो[1] महातपाः (१०७)॥
"क्षुधार्तश्चात्तुमभ्यागाद्विश्वामित्रश्च जाघनीम्।चंडालहस्तादादाय धर्माधर्मविचक्षणः"॥इति(१०८)
अनापद्यपि प्रतिग्राह्याण्याह **मनुः** (४।२५०)—

" एधोदकं मूलफलमन्नमभ्युद्यतं च यत् । सर्वतः प्रतिगृह्णीयान्मध्वथाभयदक्षिणाम् " ॥
अभयदक्षिणा अभयदानम् ॥

---

१ **क्षकखग**--वृधैस्तीक्ष्णैर्महातपाः ।

"आहृतामुद्यतां भिक्षां पुरस्तादप्रवेदिताम् । मेने प्रजापतिर्भोज्यामपि दुष्कृतकारिणः"॥ (२५१) भिक्षामन्नम्

"न तस्य पितरोऽश्नंति दशवर्षाणि पंच च । न च हव्यं वहत्यग्निर्यस्तामभ्यवमन्यते" (२५२)॥

तस्य तदीयां तां भिक्षां अवमन्यते प्रत्याख्याति । अन्यदप्यभ्युदितं प्रतिग्राह्यमाह **स एव**--(४।२५३)

"शय्यां गृहान्कुशान्गंधानपःपुष्पं मणिं दधि । धाना मत्स्यान् पयो मांसं शाकं चैव न निर्णुदेत्"॥इति।

आपस्तंबः (१।१८।१)---"मध्वामं मार्गं मांसं भूमिर्मूलफलानि रक्षा गव्यूतिर्निवेशनं युग्यघासश्चोग्रतः प्रतिग्राह्याणि" इति । आमं तंडुलादि । मार्गमांसं मृगमांसं । भूमिः शालेयादिक्षेत्रं । रक्षा अभयदानं । गव्यूतिर्गोमार्गः । निवेशनं गृहम् । युग्यो बलीवर्दस्तस्य घासो भक्षणं पलालादि । एतान्यनापदि उग्रतोऽपि ग्राह्याणि । उग्रः वैश्याच्छूद्रायां जातः पापकर्मा वा । ततोऽपीत्यर्थः । **स एव** (१।१८।७-८)--- "नात्यंतमन्ववस्येद्वृत्तिं प्राप्य विरमेत्" इति । अत्यंतं नावसीदेद्यथाकथंचिज्जीवेत् । यदा तु विहिता वृत्तिर्लभ्यते तदा निषिद्धाया वृत्तेर्विरमेदित्यर्थः । **विशेषवचनम्**

" गुर्वर्थमतिथीनां वा भृत्यानां वा विशेषतः । शूद्रान्नं प्रतिगृह्णीयान्न तु भुंक्ते स्वयं ततः ॥

" प्रतिग्राह्यं परिक्षेत पुरस्ताद्धि प्रतिग्रहे । अन्नस्य तु विशेषेण महान्नं न प्रतिग्रहः ॥

" दुष्कृतं निखलं नृणामनाधारव्यवस्थितम्" । **गौतमः** (अ.१७ सू.१-५)--" प्रशस्तानां स्वकर्मसु द्विजातीनां ब्राह्मणो भुंजीत।प्रतिगृह्णीयाच्चैधोदकयवसमूलफलमध्वभयाभ्युद्यतशय्यासनावसथयानपयोदधिधानाशफरीप्रियंगुस्रक्मार्गशाकान्यप्रणोद्यानि सर्वेषाम्। पितृदेवगुरुभृत्यभरणेऽप्यन्यत् । वृत्तिश्चेन्नांतरेण शूद्रात्" इति । स्वकर्मसु वर्णाश्रमप्रयुक्तेषु ये प्रशस्तास्तेषामेव गृहे ब्राह्मणो भुंजीतैषामेव सकाशात्प्रतिगृह्णीयाच्च ।एधोदकानि तु सर्वेषामप्रशस्तानामपि सकाशाद् ग्राह्याणि । शफरी मत्स्यविशेषः । पितृभरणं श्राद्धकरणम् । देवभरणमग्निहोत्रादि । गुरवः पित्रादयः । भृत्याः पुत्रदारादयः । तेषां भरणं भक्तादिदानम् । एतेषु निमित्तेष्वन्यदप्रणोद्यं सर्वं सर्वतः प्रतिग्राह्यमंतरेण जीवनं न निवर्तते तदा शूद्रादपि प्रतिगृह्णीयादित्यर्थः । " शूद्रेभ्योऽपि समादद्याच्छुद्धेभ्य इति मे मतिः " इति **आश्वलायनः**---

"यया कयाऽपि वा वृत्त्या निजकर्मात्यजन् सदा । पितरौ बिभृयात्सम्यक् साध्वीं भार्यां शिशूनपि ॥

" मोहाद्वा वृत्तिहेतोर्वा धर्मलोभाच्छठाच्च वा । पितरौ त्यजतो वृद्धौ गतिरूर्ध्वा न विद्यते ॥

"अनाथौ पितरौ वृद्धौ साध्वीं भार्यां तथात्मजान् । शक्तस्य त्यजतो मोहात् गतिरूर्ध्वा न विद्यते ॥

" गुर्वर्थमतिथीनां च भृत्यानां च विशेषतः । शूद्रान्नं प्रतिगृह्णीयात् न च भुङ्क्ते स्वयं ततः ॥

" शूद्रेभ्योऽपि समादद्यात् शुद्धेभ्य इति मे मतिः " । इति । **याज्ञवल्क्यः** (आ. २१५)--

" अयाचिताहृतं ग्राह्यमपि दुष्कृतकारिणः । अन्यत्र कुलटाषंढपतितेभ्यस्तथा द्विषः " ॥

हारीतः---

" चिकित्सकस्य मृगयोर्वैश्यायाः कितवस्य च । षंढसूतकयोश्चैव उद्यतामपि वर्जयेत् " ॥

अत्र **मनुः** (४।२५४-२५५)---

" गुरून्भृत्यांश्चोज्जिहीर्षन्नर्चिष्यन् देवतातिथीन् । सर्वतः प्रतिगृह्णीयान्न तु तृप्येत्स्वयं ततः ॥

"गुरुषु त्वभ्यतीतेषु विना वा तैर्गृहे वसन्। आत्मनो वृत्तिमन्विच्छन्गृह्णीयात्साधुतः सदा" ॥ तैर्विना गुरुर्विना स्वयं न प्रतिगृह्णीयात्। द्रव्यनिरपेक्षेषु गुरुष्वित्यर्थः। **हेमाद्रौ—**

"असत्प्रतिग्रहः प्रोक्तः कालतो देशतस्तथा। स्वरूपतो जातितश्च कर्मतश्चेति पंचधा" ॥

कालो ग्रहणादिः। देशः कुरुक्षेत्रादिः। स्वरूपं मेषीकृष्णाजिनादिकम्। जातिः शूद्रादिः। कर्म पतनीयवृत्तिः। **तत्रैव—**

"मेषीं च महिषीमाज्यं गामप्युभयतोमुखीम्। कारणं कालपुरुषं पुरुषं च तिलाचलम्॥

"अजाविकं तथाश्वं च मरणे चाद्यमासिकम्। दुर्दानान्याहुरेतानि; प्रतिगृह्णंति ये द्विजाः॥

"न तेषां वदनं पश्येद्दृष्ट्वा चक्षुर्निमीलयेत् ॥

"कृष्णाजिनं च महिषं मेषीं चोभयतोमुखीम्। दासीं च प्रतिगृह्णानो न भूयः पुरुषो भवेत् ॥

"प्रेतान्नं प्रेतशय्यां च नग्नप्रच्छादनं भजन्। उत्क्रांतिं कालरूपं च न भूयः पुरुषो भवेत् ॥

"बहुशो द्विजवित्तानामपि स्तेयं तरिष्यति" ॥ आतुरं मुमूर्षुः।

"सर्वालंकारवस्त्राणि प्रतिगृह्य मृतस्य तु। नरकान्न निवृत्ते तं धानां तिलमयं तथा ॥

"कालं च महिषीमाज्यमेकोद्दिष्टमृतुत्रये। दाता प्रतिगृहीतारं पश्येच्चेत्पुण्यनाशनम्" इति ॥

"आविकं त्वैधिकं वस्त्रं तूलं तूलपटीं तथा। काञ्चनं शिबिकां गाश्च भूमिं धान्यं धनं स्त्रियः॥

"दासीं दासं गृहं यानं रसद्रव्यं तथा पशून्। प्रतिगृह्य यतिश्चैतान्पतितो नात्र संशयः" ॥

जाबालिः—

"यतिहस्तगतं द्रव्यं गृह्णीयाज्ज्ञानतो यदि। अधः स नयते मूढः कुलानामेकविंशतिम्" ॥

याज्ञवल्क्यः (आचारे २०२)—

"विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः। गृह्णन् प्रदातारमधो नयत्यात्मानमेव च" ॥

मनुः (४।१८७)-

"न द्रव्याणामविज्ञाय विधिं धर्म्यं प्रतिग्रहे। प्राज्ञः प्रतिग्रहं कुर्यादवसीदन्नपि क्षुधा"॥

यत्किंचित्प्रतिगृह्णीयात्सर्वमुत्तानस्त्वांगीरसः प्रतिगृह्णात्वित्येव प्रतिगृह्णीयादिति विधिः ॥

द्रव्यप्रतिग्रहविधिः ॥

विशेषतो हिरण्यादिकमविदुषा न प्रतिग्राह्यमित्याह **स एव मनुः** (४।१८८–१८९)

"हिरण्यं भूमिमश्वं गामन्नं वासास्तिलान्घृतम्। अविद्वान्प्रतिगृह्णानो भस्मीभवति दारुवत् ॥

"हिरण्यमायुरन्नं च भूर्गौश्चाप्योषतस्तनुम्। अश्वश्चक्षुस्त्वचं वासो घृतं तेजस्तिलाः प्रजाः" ॥

औषतः दहतः। दाहश्चात्र रोगः ॥

"अतपास्त्वनधीयानः प्रतिग्रहरुचिर्द्विजः। अंभस्यश्मप्लवेनेव दात्रैव सह मज्जति (१९०) ॥

"तस्मादविद्वान्बिभियाद्यस्मात्कस्मात्प्रतिग्रहात्। अल्पकेनाप्यविद्वान् हि पंके गौरिव सीदति ॥

"वानस्पत्यं फलं मूलं दार्वग्न्यर्थं तृणानि च। तृणं च गोभ्यो ग्राह्यार्थमस्तेयं मनुरब्रवीत्" ॥ (८।३४०)। तथैव चेति मुद्रितपाठः

"चणकव्रीहिगोधूमयवानां मुद्गमाषयोः। अनिषिद्धो ग्रहीतव्यो मुष्टिरेकोध्वनिर्जितैः" ॥

आपस्तंबः (१।२८।३–५) "शम्योषा युग्यघासो न स्वामिनः प्रतिषेधयन्ति। अतिव्यवहारो व्यृद्धो भवति सर्वत्रानुमतिपूर्वं इति हारीतः"। शम्योषाः कोशधान्यानि माषमुद्गादयः ॥

---

१ अ–त्वसिकं। २ अ· दाहक·। [illegible]

गौतमः (१२।२५)— " गोग्न्यर्थे तृणमेधान्वीरुद्वनस्पतीनां च पुष्पाणि स्ववदाददीत फलानि चापरिवृतानाम् " इति ।

मनुः (८।३४२)—

"द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके। आददानः परक्षेत्रान्न हस्तच्छेदमर्हति "॥

द्विजेभ्योऽन्यो दण्ड्य एव ।

" तृणं वा यदि वा काष्ठं मूलं वा यदि वा फलम् । अनापृष्टं तु गृह्णानो हस्तच्छेदनमर्हति " ॥

इति **स्मृतेः** । **संवर्तदक्षौ**—

" यस्तु जापी सदा होमी परपाकविवर्जितः । सर्वरत्नामिमां पृथ्वीं प्रतिगृह्णन्न लिप्यते" ॥

व्यासः—

" प्रतिगृह्य द्विजो नित्यं दुग्धा गौरिव गच्छति । पुनराप्यायते धेनुस्तृणैरमृतसंभवैः ॥

" एवं जपैश्च होमैश्च पुनराप्ययते द्विजः " इति ॥ **मनुः** (१०।१११)—

" जपहोमैरपैत्येनो याजनाध्यापनैः कृतम् । प्रतिग्रहनिमित्तं तु त्यागेन तपसैव च " ॥ इति

विष्णुधर्मोत्तरे—

" ग्राह्यं प्राणप्रदानं तु चंडालात्पुल्कसादपि । जीवन्सर्वमवाप्नोति जीवन्कर्म करोति च ॥

" शरीरं धर्मसर्वस्वं रक्षणीयं प्रयत्नतः " ॥ **इति प्रतिग्रहविधिः** ॥

अथ ब्राह्मणस्य वृत्त्यन्तराण्याह मनुः (४।२-६)—

"ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन च । सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन॥

" ऋतमुञ्छसिलं प्रोक्तममृतं स्यादयाचितम्। मृतं तु याचितं प्रोक्तं प्रमृतं कर्षणं स्मृतम् ॥

" सत्यानृतं तु वाणिज्यं तेन चैवापि जीव्यते । सेवा श्ववृत्तिराख्याता तस्मात्तां[1] परिवर्जयेत् "॥

पूर्वपूर्ववृत्त्युपायालाभे परः पर आस्थेयः । एवं वृत्त्युपायान्नियम्योपेयमपि नियम इति ।

" कुसूलधान्यको वा स्यात्कुंभीधान्यक एव च । त्र्यैहिको वाऽपि भवेदश्वस्तनिक एव वा ॥ (७)

" चतुर्णामपि चैतेषां द्विजानां ग्रहमेधिनाम् । ज्यायान्परः परो ज्ञेयो लोकजो धर्मवित्तमः"॥ (८)

कुसूलात् किंचिन्न्यूना धान्याधारी कुंभी । द्वयोरन्होरैहिकमिह भोग्यं वस्तु यस्य स त्र्यैहिकः । श्वो भोज्यं वस्तु श्वस्तनं तद्यस्य नास्ति स अश्वस्तनिकः । चतुर्णां कुसूलधान्यादीनां एव तावदुपेयपरिमाणतश्चातुर्विध्यं ग्रहमेधिनामुक्तम् । उपायपरिमाणतोऽप्याह **स एव** (४।९)—

" षट्कर्मैको भवत्येषां त्रिभिरन्यः प्रवर्तते । द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसूत्रेण जीवति " ॥

एषां मध्ये एकः षट्कर्मा भवति । षड्भिर्ब्राह्मणनियतैर्याजनाध्यापनप्रतिग्रहैस्त्रैवर्णिकनियतैः प्रमृतसत्यानृतकुसीदैश्चार्थसंचये प्रवर्तत इत्यर्थः । त्रिभिर्याजनाध्यापनप्रतिग्रहैः द्वाभ्यां याजनाध्यापनाभ्यां 'प्रतिग्रहः प्रत्यवरः' (अ. ८-१०५) इति निंदितत्त्वात्प्रतिग्रहो विवर्जनीय इत्यर्थः ॥ ब्रह्मसूत्रेण अध्यापनेन विहितयाऽपि वृत्त्या हिंसारहितया तदशक्तौ हिंसाबाहुल्यरहितया वा जीवेदित्याह **स एव** (४।२-३)—

" अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः। या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि ॥

" यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्मभिरगर्हितैः । अक्लेशेन शरीरस्य कुर्वीत धनसंचयम् "॥ इति।

लौकिकवैदिककर्मणामवश्यकर्तव्यानां निवृत्तिर्यात्रा । **स एव** (४।११-१२)—

---

१ क्ष-व्रतां ।

“ न लोकवृत्तं वर्तेत वृत्तिहेतोः कथंचन । अजिम्हामशठां शुद्धां जीवेद्ब्राह्मणजीविकाम् ॥
“ संतोषं परमास्थाय सुखार्थी संयतो भवेत् । संतोषमूलं हि सुखं दुःखमूलं विपर्ययः” ॥ इति ।

याज्ञवल्क्यः (आचारे १२८)—
“कुसूलकुम्भीधान्यो वा त्र्याहिकोऽश्वस्तनोऽपि वा।जीवेद्वाऽपि शिलोंछेन श्रेयानेषां परः परः”॥इति।
एतच्चातिसंयतत्वं यायावरं प्रति उच्यते । न ब्राह्मणमात्राभिप्रायेण । तथा सति “त्रैवार्षिकाधिकान्नो यः स हि सोमं पिबेद्द्विजः” (या. व. आ. १२४) इत्यादिभिर्विरोधः स्यात् । तथा च द्वैविध्यमुक्तं **देवलेन** “ द्विविधो गृहस्थो यायावरः शालीनश्च । तयोर्यायावरः प्रवरो याजनाध्यापनप्रतिग्रहरिक्थचयवर्जनात्षट्कर्माधिष्ठितः । प्रेष्यचतुष्पदगृहग्रामधनादियुक्तो लोकानुवृत्तिः शालीनः” इति । **व्यासः**—
“द्विविधस्तु गृही ज्ञेयः साधकश्चाप्यसाधकः । अध्यापनं याजनं च पूर्वस्याहुः प्रतिग्रहम्॥
“कुसीदं कृषिवाणिज्यं प्रकुर्वीतास्वयंकृतम् । आपत्कल्पः स्वयं ज्ञेयः पूर्वोक्तो मुख्य इष्यते ॥
“असाधकस्तु यं प्रोक्तो गृहस्थाश्रमसंस्थितः । शिलोंछे तस्य कथिते द्वे वृत्ती परमर्षिभिः ॥
“अमृतेनाथवा जीवेन्मृतेनाप्यथवापदि । अयाचितं स्यादमृतं मृतं भैक्षं तु याचितम्” ॥ इति ।

शांडिल्यः—
“ अयाचितोपपन्नेषु नास्ति दोषः प्रतिग्रहे । अमृतं तद्विदुर्देवास्तस्मात्तन्नैव निर्णुदेत् ” ॥ इति ।
अथापद्वृत्तिः ॥ तत्र मनुः (८।८१-८२)
“ अजीवंस्तु यथोक्तेन ब्राह्मणः स्वेन कर्मणा । जीवेत्क्षत्रियधर्मेण स ह्यस्य प्रत्यनंतरः ॥
“उभाभ्यामप्यजीवंस्तु कथं स्यादिति चेद्भवेत् । कृषिगोरक्ष्यमास्थाय जीवेद्वैश्यस्य जीविकाम्”॥

व्यासः—
“ क्षत्रवृत्तिं परामाहुर्न स्वयं कर्षणं द्विजैः । तस्मात्क्षत्रेण वर्तेत वर्तनेनापदि द्विजः ॥
“तेन चैवाप्यजीवंस्तु वैश्यवृत्तिं कृषिं यजेत्”॥ इति । **याज्ञवल्क्यः** (प्रायश्चित्ते ३५)—
“क्षात्रेण कर्मणा जीवेद्विशां वाऽप्यापदि द्विजः । निस्तीर्यतामथात्मानं पावयित्वा न्यसेत्पथि”॥
आपन्निस्तरणानंतरं स्वमार्गे वर्ततेत्यर्थः । **गौतमः** (७।६-७)—“ तदलाभे क्षत्रियवृत्तिस्तदलाभे वैश्यवृत्तिः ” ॥ इति । **मनुः** (८।७९)—
“शस्त्रास्त्रभृत्त्वं क्षत्रस्य वणिक्पशुकृषीर्विशः । आजीवनार्थं धर्मस्तु दानमध्ययनं यजिः”॥

देवलः—
“ यागाध्ययनदानास्त्रप्रजारक्षाभयादि च । दंडनीतिर्धनुर्वेदः क्षत्रियस्यानुवृत्तये ॥
“शौर्यं तेजो धृतिर्धाष्ट्र्यं युद्धे चाप्यपलायनम् । दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥
“स्वाध्यायादीनि कर्माणि कुसीदं पशुपालनम्।कृषिक्रिया च वाणिज्यं वैश्यकर्माण्यमूनि च”॥इति।
“वरं स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात् । परधर्मेण जीवन्हि सद्यः पतति जातितः”॥ इति ।
इत्यादीनि **मन्वादि**वचनानि आपदि विगुणस्यापि स्वधर्मस्य याजनादेः संभवे वेदितव्यानि । असंभवे त्वापदि क्षत्रियादिवृत्तिः । इयं हि हिंसाप्राया कलौ वर्जनीया ।
“आततायिद्विजाग्र्याणां धर्मयुद्धेन हिंसनम् । आपद्वृत्तिर्द्विजाग्र्याणामश्वस्तनिकता तथा”॥इति।
कलौ निषिद्धत्वात् । “ क्षत्रवृत्त्या वैश्यवृत्तिः प्रशस्ता स्यात् कलौ युगे ” **इत्याश्वलायनः** ।

आपस्तंबः (१।२०।१०-११)—"अविहिता ब्राह्मणस्य वाणिज्या आपदि व्यवहरेत् पण्यानामपण्यानि व्युदस्यन्" इति । क्रयश्च विक्रयश्च वाणिज्या । अपण्यानि व्युदस्यन्वर्जयन्पण्यानि व्यवहरेत् विक्रीणीयाद्वेत्यर्थः । कृत्स्नाया वैश्यवृत्तेरुपलक्षणमिदम् । अपण्यानि **स्वयमाह** (१।२०।१२-१६; २१।१-४)—" मनुष्यान् रसान् रागान्गंधानन्नं चर्म गवां वशां श्लेष्मोदके तोक्मकिण्वे पिप्पलिमरीचे धान्यं मांसमायुधं सुकृताशां च । तिलतंडुलांस्त्वेव धान्यस्य विशेषेण न विक्रीणीयात् । अविहितश्चैतेषां मिथो विनिमयोऽन्नेन चान्नस्य मनुष्याणां च मनुष्यै रसानां च रसैर्गंधानां च गंधैर्विद्यया च विद्यानामक्रीतपण्यैर्व्यवहरेत । मुंजबल्वजैर्मूलफलैस्तृणकाष्ठैरविकृतैर्नात्यंतमन्ववस्येद्वृत्तिं प्राप्य विरमेत्"॥ इति । मनुष्या दासादयः । रसा गुडलवणादयः क्षीरादयो वा । रागाः कुसुंभादयः । गंधाश्चंदनादयः । गवां मध्ये वशा वंध्या । गौश्लेष्मविश्लिष्टचर्मादिसंधानहेतुभूतं जतुप्रभृति तोक्मानि ईषदंकुरितानि व्रीह्यादीनि । किण्वं सुराप्रकृतिकं द्रव्यम् । सुकृतं पुण्यं तस्य फलं सुकृताशाम् । धान्यानां मध्ये तिलतंडुलानेव विशेषतो न विक्रीणीयादन्येषां विकल्पः विनिमयः । परिवर्तनं येषां विक्रयः प्रतिषिद्धस्तेषां परस्परेण विनिमयोऽप्यविहितः प्रतिषिद्धस्तेष्वेव केषांचिदन्नादीनां विद्यान्तानां विनिमयो भवत्येव । अक्रीतानि स्वयमुत्पादितानि अरण्यादाहृतानि तैर्व्यवहरेत । मुञ्जबल्वजास्तृणविशेषाः । तृणविकारो रज्वादिभावः । काष्ठानां विकारः । स्थूणादिभावः न पुनरत्यंतमवसीदेत्प्रतिषिद्धानामपि विक्रयविनिमयाभ्यां जीवेदित्यर्थः । अत्र **मनुः** (८।८६-८९)—

" सर्वान्रसानपोहेत कृतान्नं च तिलैः सह । अश्मनो लवणं चैव पशवो ये च मानुषाः॥
" सर्वं च तांतवं रक्तं शाणक्षौमाविकानि च । अपि चेत्स्युररक्तानि फलमूले तथौषधीः ।
"आपः शस्त्रं विषं मांसं सोमं गंधांश्च सर्वशः । क्षीरं क्षारं दधि घृतं तैलं मधु गुडं कुशान् ।
"आरण्यांश्च पशून्सर्वान् दंष्ट्रिणश्च वयांसि च । मद्यं नीलं च लाक्षांश्च सर्वांश्चैकशफान्पशून् ॥
"त्रपुसीसे तथा लोहं रजतं चैव सर्वशः । बालांश्चर्म तथाऽस्थीनि वसास्नायूनि रोचनाम्"॥ इति।

यत्तु"काममुत्पाद्य कृष्यां तु स्वयमेव कृषीवलः । विक्रीणीत तिलान् शुद्धान्धर्मार्थमचिरस्थितान्" ॥ (८।९०) इति **मानव**वचनं तद्विनिमयाभिप्रायमिति व्याख्यातारः । स्वयमुत्पादिततिलविक्रये न दोष इत्यन्ये । **वसिष्ठः** (२।३७-३९) " रसा रसैः समतो हीनतो वा तिलतंडुलपक्वान्नविहिता मनुष्याश्च परिवर्तनीयाः " इति । **मनुः** (८।९२-९३)—

"सद्यः पतति मांसेन लाक्षया लवणेन च । त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयात् ॥
" इतरेषां त्वपण्यानां विक्रयादिह कामतः । ब्राह्मणः सप्तरात्रेण वैश्यभावं निगच्छति ॥
" एका गौर्न प्रतिग्राह्या द्वितीया न कथंचन । सा चेद्विक्रयमापन्ना दहत्या सप्तमं कुलम् ॥
" गवां विक्रयकारी तु गवि रोमाणि यानि तु । तावद्वर्षसहस्राणि पंकेष्वेवावसीदति ॥
" दानाभ्यंजनहोमेभ्यो यदन्यत्कुरुते तिलैः । क्रिमिभूतश्च विष्टायां कर्मणा तेन पापकृत् ॥
" क्रीताः प्रतिगृहीताश्च न विक्रेयास्तिलाः स्मृताः " । **बोधायनः** (२।१।५२)—

" पितॄन्वा एष विक्रीणीते यस्तिलान्विक्रीणीते । ब्राह्मणान्वा एष विक्रीणीते यस्तडुंलान्विक्रीणीते " इति । **पराशरः** (२।८)—

"तिला रसा न विक्रेया विक्रेया धान्यतः समाः। विप्रस्यैवंविधा वृत्तिस्तृणकाष्ठादिविक्रयः॥"इति। विक्रेया विनिमेयाः। यावद्भिः प्रस्थैस्तिला दत्तास्तावद्भिरेव धान्यांतरमुत्पादेयं नाधिकमित्यर्थः। तिलन्यायो रसेऽपि घृतादौ योजनीयः। **गौतमोऽपि** (७।८-२३)— "तस्यापण्यं गंधरसः कृतान्नतिलशाणक्षौमाजिनानि। रक्तनिर्णिक्ते वाससी। क्षीरं सविकारं मूलफलपुष्पौषधमधुमांसतृणोदकापण्यानि। पशवश्च हिंसासंयोगे। पुरुषवशा कुमारीवेहतश्च नित्यम्। भूमिव्रीहियवाजाव्यश्ववृषभधेन्वनडुहश्चैके। नियमस्तु। रसानां रसैः। पशूनां च। न कृतान्नलवणयोः। तिलानां च। समेन तु पक्वस्य संप्रत्यर्थे। सर्वथा तु वृत्तिरशक्तावशूद्रेण। तदप्येके प्राणसंशये" इति। तस्य वैश्यवृत्तेर्ब्राह्मणस्यापण्यमविक्रेयं रक्तं लाक्षादिविकृतं निर्णिक्तं रजकादिधौतं ते वाससी अपण्ये अपथ्यं विषादि पशवो गवादयः ते चाप्यपण्या हिंसासंयोगे सौनिकादौ वेहदृषभः पुरुषादयोऽपि नित्यं हिंसासंयोगादन्यत्रापि रसानां रसैरेव विनियमः कर्तव्यस्तद्यथा तंडुलं दत्वा घृतं ग्राह्यमिति। लवणस्य कृतान्नस्य न केनचिदपि विनियमः कर्तव्यः। तिलानां च धान्यैर्विनाऽन्यैर्विनिमयो न कर्त्तव्यः। क्षुधितस्य संप्रति इदानीमेव बुभुक्षायां समेनामेन पक्वस्य विनिमयः प्रस्थतडुलं दत्वा तावता पक्व ओदनो विनिमेयः। अशक्तः सर्वथा प्रतिषिद्धानामपि विक्रयविनिमयाभ्यां जीवेन्न शूद्रकर्मणा तदपि प्राणसंशये एके मन्यंते। शौद्रमपि कर्मोच्छिष्टभक्षणादिकम्। इत्यर्थः तथा च **व्यासः**—

"धर्मार्थकाममोक्षाणां प्राणाः संस्थितिहेतवः। तानि घ्नतां किं न हतं रक्षता किं न रक्षितम्"॥

शातातपः—

"सद्यः पतति मांसेन लाक्षया लवणेन च। त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयी॥

"आममांससुरासोमलाक्षालवणसर्पिषाम्। विक्रये चाप्यपण्यानां द्विजश्चांद्रायणं चरेत्"॥ इति॥

पराशरः (१।३७)— "षट्कर्मनिरतो विप्रः कृषिकर्म च कारयेत्" इति

"हिंसाप्रायां पराधीनां कृषिं यत्नेन वर्जयेत्। भूमिं भूमिशयांश्चैव हंति काष्ठैरयोमुखैः" ॥ इति **मनुवचनं** (१०।८३-८४) स्वयंकृताभिप्रायम्। तथा च **गौतमः**॥ (१०।५) "कृषिवाणिज्ये चास्वयंकृते" इति **मनुबृहस्पतिः** स्वयंकर्तृकां तां कृषिमंगीचकार

"कुसीदं कृषिवाणिज्यं प्रकुर्वीत स्वयं कृतम्। आपत्काले स्वयं कुर्यान्नैनसा युज्यते द्विजः"॥

इति। बाढं कारयितुमप्यशक्तस्य तत्कर्तृत्त्वमापत्काल इति विशेषितत्त्वात् युगांतरेषु कारितत्वमापद्धर्मः। कलौ कारयितृत्वं मुख्यधर्मः कर्त्तृत्त्वमापद्धर्मः प्राधान्येन कलियुगधर्मप्रतिपादने प्रवृत्तेन **पराशरेण** (२।१-२)

"अतः परं गृहस्थस्य कर्माचारं कलौ युगे। संप्रवक्ष्यामि" इत्युपक्रम्य "कृषिकर्म च कारयेत्" इति आचारत्वेनाभिधानात्कारयितृत्त्वं मुख्यं "आपत्काले स्वयं कुर्यात्" इति **स्मृतेः** कर्तृत्वमापद्धर्म इति **माधवीये**।

"अत्यापदि स्वपित्रोस्तु पालनाय स्वयं यदि। यः करोति कृषिं सोऽपि हलाग्रं न स्पृशेद्विजः॥

"शावं निर्वापि चेद्यश्च यश्च स्याद्धलकृद्विजः। घोरं तमसि मज्जंति ते विप्रा नामधारकाः"॥

इत्याश्वलायनयाज्ञवल्क्यौ (प्रा. ३६-४०)

---

१ क्ष-नियमः। २ क्ष-कृतां।

" फलोपलक्षौमसोममनुष्यापूपवीरुधाम् । तिलौ[1]दनरसक्षारान् दधि क्षीरं घृतं जलम् ॥
" शस्त्रासवमधूच्छिष्टं मधु लाक्षा च बर्हिषः । मृच्चर्मपुष्पकुतपकेशतक्रविषक्षितीः ॥

कुतपः कंबलश्चमरिः

" कौशेयं तैललवणमांसैकशफसीसकान् । शाकार्द्रौषधिपिण्याकपशुगन्धांस्तथैव च ॥
" वैश्यवृत्त्याऽपि जीवन्नो विक्रिणीत कदाचन । धर्मार्थं विक्रयं नेयास्तिला धान्येन तत्समाः ॥
" लाक्षालवणमांसानि पतनीयानि विक्रये । यवो दधि च मद्यं च हीनवर्णकराणि तु ॥
" कृषिः शिल्पं भृतिर्विद्या कुसीदं शकटं गिरिः । सेवानूपो भैक्षचर्यमापत्तौ जीवनानि तु" (४२) ॥

आपत्तौ जीवनानीतिविशेषणादनापदवस्थाया इयं सेवावृत्तिरनेन नाभ्यनुज्ञायते । यथा अनापदि वैश्यवृत्तिः स्वयंकृता कृषिर्विप्रक्षत्रिययोरभ्यनुज्ञायते एवं शिल्पादीनि अभ्यनुज्ञायंते । विद्या भृतकाध्यापकद्वारा । कुसीदं वृध्यर्थं द्रव्यप्रयोगः । तत्स्वयं कृतमभ्यनुज्ञायते । शकटं धान्यादिवहनद्वारा । गिरिस्तद्गतमूलं धनादिद्वारेण जीवनहेतुः । अनूपं प्रचुरतृणवृक्षजलप्रायप्रदेशः । एतान्यापत्तौ जीवनानीत्यर्थः । कृषौ वर्जनीयान्योजयंश्च बलीवर्दानाह श्लोकद्वयेन **पराशरः** (२।४-५)

" क्षुधितं तृषितं शांतं बलीवर्दं न योजयेत् । हीनांगं व्याधितं क्लीबं वृषं विप्रो न वाहयेत् ॥
" स्थिरांगं नीरुजं दृप्तं सुनर्दं षंढवर्जितम् । वाहयेद्दिवसस्यार्धं पश्चात्स्नानं समाचरेत् " ॥

स्नापयेदित्यर्थः । **हारीतः**—

" अष्टागवं धर्म्यहलं षड्गवं जीवितार्थिनाम् । चतुर्गवं नृशंसानां द्विगवं ब्रह्मघातिनाम् ॥
" बालानां दमनं चैव वाहनं च न शस्यते । वृद्धानां दुर्बलानां च प्रजापतिवचो यथा " ॥

प्राण्युपघातदोषापनयनाय यथाशक्ति जपादिकं विधत्ते **पराशरः** (२।६)–

"जप्यं देवार्चनं होमं स्वाध्यायं चैवमभ्यसेत् । एकद्वित्रिचतुर्विप्रान्स्नातकान् भोजयेद्द्विजः" ॥ इति ।

पुनः प्रतिकारं वक्तुं कृषौ पापाधिक्यं दर्शयति **स एव** (२।९)

" ब्राह्मणश्चेत्कृषिं कुर्यात्तन्महादोषमाप्नुयात् ।
" संवत्सरेण यत्पापं मत्स्यघाती समाप्नुयात् । अयोमुखेन काष्ठेन तदेकाहेन लांगली" ॥ इति ।

स एव (२।१३) " विप्राणां त्रिंशकं भागं सर्वपापैः प्रमुच्यते ।
" यो न दद्याद्द्विजातिभ्यो राशिमूलमुपागतः । स चोरः स च पापिष्ठो ब्रह्मघ्नं तं विनिर्दिशेत् "

चंद्रिकायां

" अदत्वा कर्षको गेहं[2] यस्तु धान्यं प्रवेशयेत् । तस्य तृष्णाभिभूतस्य क्रूरं पापं ब्रवीम्यहम् ॥
" दिव्यं वर्षसहस्रं तु दुरात्मा कृषिकारकः । मरुद्देशे भवेद् वृक्षः सपुष्पफलवर्जितः ॥
" तस्यांते मानुषो भूत्वा कदाचित्कालपर्यये । दरिद्रो व्याधितो मूर्खः कुलहीनश्च जायते ॥
" भूमिं भित्त्वौषधिं छित्वा कृमिकीटपिपीलिकाः । पुनंति खलयज्ञेन कर्षका नात्र संशयः॥" इति ।

कर्षकस्यायं खलयज्ञो नित्यकाम्य इति वचनद्वयबलादवसीयते । अकरणे प्रत्यवायात्तस्य नित्यत्वाच्छेदनादिपापनिवर्तकत्वात्काम्यत्वम् । **नारदः**

" आपत्स्वपि हि कष्टासु ब्राह्मणस्य न वार्धुषम् । भ्रूणहत्यां च तुलया वार्धुष्यं समतोलयत् ।
" अतिष्ठत् भ्रूणहा कोट्यां वार्धुषिः समकम्पत[3] " ॥ इति अत्र **मनुः**—(८।१४१; १०।९५)

---

१ अ–दद्यौ । २ अ–देवि । ३ अ–कंपत ।

“ अशीतिभागं गृह्णीयान्मासाद्वार्धुषिकः शते । जीवेदेतेन राजन्यः सर्वेणाप्यनयं गतः ” ॥
अनयं आपदम् ।
याज्ञवल्क्यः (२।३७)—
“ अशीतिभागो वृद्धिः स्यान्मासि मासि सबंधके । वर्णक्रमाच्छतं द्वित्रिश्चतुःपंचकमन्यथा” ॥
अन्यथा अबंधके । **पराशरः** (२।७)—
“ स्वयं कृष्टे तथा क्षेत्रे धान्यैश्च स्वयमर्जितैः । निर्वपेत्पंचयज्ञांश्च क्रतुदीक्षाश्च कारयेत् ” ॥
बोधायनः (१।५।८५)—
“ वेदः कृषिविनाशाय कृषिर्वेदविनाशिनी । शक्तिमानुभयं कुर्यादशक्तश्च कृषिं त्यजेत् ” ॥ इति ॥
“ विप्राणां दासवृत्तिस्तु वर्ज्या यत्नेन सर्वदा ” **इत्याश्वलायनः** ।
अथ **क्षत्रियधर्माः** ॥ **मनुः** (१०।७७–७८)—
“ त्रयो धर्मा निवर्तन्ते ब्राह्मणात्क्षत्रियं प्रति । अध्यापनं याजनं च तृतीयश्च प्रतिग्रहः ॥
“ वैश्यं प्रति तथैवैते निवर्तेरन्निति स्थितिः ” ॥ **याज्ञवल्क्यः** (आचारे ११९)
“ प्रधानं क्षत्रिये कर्म प्रजानां परिपालनम् । कुसीदं कृषिवाणिज्यपाशुपाल्यं विशः स्मृतेः” इति ।
अभिषेकादिगुणयुक्तस्य राज्ञो विशेषधर्मानाह **याज्ञवल्क्यः** (आ. ३०९–३११)
“ महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः । विनीतः सत्वसंपन्नः कुलीनः सत्यवाक्शुचिः ॥
“ अदीर्घसूत्रः स्मृतिमानक्षुद्रो पुरुषस्तथा । धार्मिकोऽव्यसनश्चैव प्राज्ञः शूरो रहस्यवित् ॥
“ स्वरंध्रगोप्ताऽऽन्वीक्षिक्यां दण्डनीत्यां तथैव च । विनीतस्त्वथ वार्तायां त्रय्यां चैव नराधिपः” ॥
“ ब्राह्मणेषु क्षमी स्निग्धेष्वजिम्हः क्रोधनोऽरिपुः । स्याद्राजा भृत्यवर्गेषु प्रजासु च यथा पिता ॥ (३३४)
“पुण्यात्षड्भागमादत्ते न्यायेन परिपालयन् । सर्वदानाधिकं यस्मात्प्रजानां परिपालनम्(३३५)॥
“चाटतस्करदुर्वृत्तमहासाहसिकादिभिः । पीड्यमाना: प्रजा रक्षेत्कायस्थैस्तु विशेषतः (३३६) ॥
“साधून्संमानयेद्राजा विपरीतांश्च घातयेत् । उत्कोचजीवने द्रव्यहीनान् कृत्वा विवासयेत्(३३९)॥
प्रमाकर इति पाठांतरं । उत्कोचपरिधानाय द्रव्यग्रहणरूपकर्म ।
“ सद्दानमानसत्कारान् श्रोत्रियान्वासयेत्सदा ।
“उपायाः साम दानं च भेदो दंडस्तथैव च । सम्यक्प्रयुक्ताः सिद्ध्येयुर्दंडस्त्वगतिका गतिः(३४६)॥
“संधिं च विग्रहं यानमासनं संश्रयं तथा । द्वैधीभावं गुणानेतान्यथावत् परिकल्पयेत् (३४७)॥
संधिर्व्यवस्थाकरणम् । विग्रहोऽपकारः । यानं परंप्रति यात्रा । आसनमुपेक्षा । संश्रयो बलवदाश्रयणम् । स्वबलस्य द्विधाकरणं द्वैधीभावः ॥
मनुः (९।३०१–३११)
“ कृतं त्रेता युगं चैव द्वापारं कलिरेव च । राज्ञो वित्तानि सर्वाणि राजा हि युगमुच्यते ॥
“ कलिः प्रसुप्तो भवति स जाग्रद्वापरं युगम् । कर्मस्वभ्युदितस्त्रेता विचारस्तु कृतं युगम् ॥
“इन्द्रस्यार्कस्य वातस्य यमस्य वरुणस्य च । चंद्रास्याग्नेः पृथिव्यां च तेजोवृत्तं नृपश्चरेत् ।
“ वार्षिकांश्चतुरो मासान्यथेंद्रोऽभिप्रवर्षति । तथाभिवर्षेत् स्वं राष्ट्रं कामैरिंद्रव्रतं चरन् ॥
“ अष्टौ मासान्यथादित्यस्तोयं हरति रश्मिभिः । तथा हरेत्करं राष्ट्रात्सम्यगर्कव्रतं हि तत् ॥

१ क्ष–सदाः । २ ग–स्तथा ।

" प्रविश्य सर्वभूतानि यथा चरति मारुतः । तथा चारैः प्रवेष्टव्यं व्रतमेतद्धि मारुतम् ॥
" यथा यमः प्रियद्वेष्यौ प्राप्ते काले नियच्छति । तथा राज्ञा नियन्तव्याः प्रजास्तद्धि यमव्रतम् ॥
" वरुणेन यथा पाशैर्बध्यते वारुणैर्नरः । तथा पापान् निगृह्णीयाद् व्रतमेतद्धि वारुणम् ॥
" परिपूर्णं यथा चंद्रं दृष्ट्वा हृष्यंति मानवाः । तथा प्रकृतयो यस्मिन् स चांद्रव्रतिको नृपः ॥
" प्रतापयुक्तस्तेजस्वी नित्यं स्यात्पापकर्मसु । दुष्टसामंतहिंस्रश्च तदाग्नेयं व्रतं स्मृतम् ॥
" यथा सर्वाणि भूतानि धरा धारयते समम् । तथा सर्वाणि भूतानि बिभ्रतः पार्थिवं व्रतम् ॥
" एतैरुपायैरन्यैश्च युक्तो नित्यमतंद्रितः । स्तेनान्राजा निगृह्णीयात् स्वराष्ट्रे पर एव वा ॥
" परामप्यापदं प्राप्तो ब्राह्मणान् न प्रकोपयेत् । ते ह्येनं कुपिता हन्युः सद्यः सबलवाहनम् ॥
" यान्समाश्रित्य तिष्ठंति देवा लोकाश्च सर्वदा । ब्रह्म चैव धनं येषां को हिंस्यात्तान् जिजीविषुः॥
" अविद्वांश्चैव विद्वांश्च ब्राह्मणो दैवतं महत् । प्रणीतश्चाप्रणीतश्च यथाग्निर्दैवतं महत् ॥
" एवं यद्यप्यनिष्टेषु वर्तते सर्वकर्मसु । सर्वथा ब्राह्मणः पूज्यः परमं दैवतं हि सः ॥
" यदधीते यद्यजते यद्दाति यदर्चति । तस्य षड्भागभाग्राजा सम्यक् भवति रक्षणात्(८।३०६)॥
" अरक्षितारं राजानं बलिषड्भागहारिणम् । तमाहुः सर्वलोकस्य समग्रमलहारकम् (३०९) " ॥

बोधायनः (१।५।१०२)—

" न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते । विषमेकाकिनं हंति ब्रह्मस्वं पुत्रपौत्रकम्" ॥ इति । तस्माद्राजा ब्राह्मणस्वं नाददीत परमं ह्येतद्विषं यद्ब्राह्मणस्वमिति । " सर्वतोधुरं पुरोहितं वृणुयात्तस्य शासने वर्तेत संग्रामे न निवर्तेत " इति च (१।५।७–९) । **गौतमः** (१०।७–१८) "रक्षणं सर्वभूतानाम् । न्याय्यदंडत्वम् । बिभृयाद्ब्राह्मणाञ्छ्रोत्रियान् । निरुत्साहांश्च ब्राह्मणानकरांश्चोपकुर्वाणांश्च योगश्च विजये । भये विशेषेण । चर्या च रथधनुर्भ्यां संग्रामे संस्थानमनिवृत्तिश्च । न दोषो हिंसायामाहवे । अन्यत्र व्यश्वसारथ्येनायुधकृतांजलिप्रकीर्णकेशपराङ्मुखोपविष्टस्थलवृक्षारूढदूतगोब्राह्मणवादिभ्यः"इति । सर्वरक्षणं शास्त्राविरुद्धश्च दंडश्च राज्ञो धर्मः । अधीतवेदान्ब्राह्मणानन्नादिदानेन बिभृयाज्जीवनार्थमुत्साहं कर्तुमसमर्थान् ब्राह्मणानपि बिभृयात् । ये पूर्वदत्ता अकरा अग्रहारा ब्राह्मणादिभ्यः तांश्च यथापूर्वं बिभृयादुपकुर्वाणानधीयानान् ब्रह्मचारिण्यश्च बिभृयात् । योग उपायः । जये पराभिभवनिमित्ते भये सति विशेषेण योगः कार्यः । युद्धे अवस्थायामपलायनं च । चर्या चरणं रथहस्त्यादिकमारूढो धनुर्बाणादिहस्तश्चरेत् । युद्धे शत्रूणां हिंसायां न दोषः । व्यश्वेति विशब्दस्त्रिभिः संबध्यते व्यश्वो विसारथिर्व्यायुध इति । स्थलमुन्नतप्रदेशः । दूतो वार्ताहरः । गौरस्मि ब्राह्मणोऽस्मीति ये वदंति ते गोब्राह्मणवादिनः । एतेभ्योऽन्यत्र हिंसायां न दोषः । एतेषु दोष इत्यर्थः । **स** एव– (१०।४३–४४) "निध्यधिगमो राजधनम् । न ब्राह्मणस्याभिरूपस्य राजा सर्वस्येष्टे ब्राह्मणवर्जम्" इति च । **व्यासः** (११।१)—

"न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते । देवस्वं चापि यत्नेन सदा नापहरेत्ततः"॥इति । **आपस्तंबः** (२।२५।१५; २६।१–४)–" क्षेमकृद्राजा यस्य विषये ग्रामेऽरण्ये वा तस्करभयं न विद्यते । भृत्यानामनुपरोधेन क्षेत्रं वित्तं च ददत् ब्राह्मणेभ्यो यथार्हमनंतांल्लोकानभिजयति । ब्राह्मणस्वान्यपजिगीषमाणो राजा यो हन्यते तमाहुरात्मयूपो यज्ञोऽनन्तदक्षिण इति"।आहुर्धर्मज्ञाः। "एतेन राज्ञा ब्राह्मणद्रव्यप्रत्यायनार्थं युध्यमानास्तनुत्यजोऽन्येऽपि शूरा व्याख्याताः । प्रयोजने युध्यमानास्तनुत्यजो ग्रामेषु नगरेषु चेति" । ब्राह्मणस्वानि चोरादिभिरपहृतानि अप-

१ क्ष–पि ।

जिगीषमाणो ब्राह्मणेभ्यो दानाय तानपजित्य ग्रहीतुमिच्छन्योऽपि राजा युद्धे चोरैः हन्यते तमात्मयूपो यज्ञोऽनंतदक्षिण इत्याहुर्धर्मज्ञाः। एतेन राज्ञा ब्राह्मणद्रव्यप्रत्यायनार्थं युध्यमानास्तनुत्यजोऽन्येऽपि शूरा व्याख्याता आत्मयूपा अनंतदक्षिणा यज्ञा इति । **मनुः** (७।१३४)—

"म्रियमाणोऽप्याददीत न राजा श्रोत्रियात्करन् । न च क्षुधाऽस्य संसीदेच्छ्रोत्रियो विषये वसन् ॥

"मोहाद्राजा स्वराष्ट्रं यः कर्शयत्यनवेक्षया । सोऽचिराद्भ्रश्यते राज्याज्जीविताच्च सबांधवः"॥

इति (७।११२) । **पराशरः** (१।५३।१।५७, ५९)—

" अव्रता ह्यनधीयाना यत्र भैक्ष्यचरा द्विजाः । तं ग्रामं दंडयेद्राजा चोरभक्तप्रदो हि सः ॥

" क्षत्रियो हि प्रजा रक्षन्छस्त्रपाणिः प्रदंडवान् । निर्जित्य परसैन्यानि क्षितिं धर्मेन पालयेन् ॥

" पुष्पं पुष्पं विचिनुयान्मूलच्छेदं न कारयेत् । मालाकार इवाऽऽरामे न यथाऽऽगारकारकः (३।३७)॥

" द्वाविमौ पुरुषौ लोके सूर्यमंडलभेदिनौ । परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः (३८) ॥

" यत्र यत्र हतः शूरः शत्रुभिः परिवेष्टितः । अक्षयान् लभते लोकान्यदि क्लीबं न भाषते (३८)॥

" यस्तु भग्नेषु सैन्येषु विद्रवत्सु समंततः । परित्राता यदा गच्छेत्स तु क्रतुफलं लभेत् (४०) ॥

" यस्य च्छेदक्षतं गात्रं शरमुद्गरयष्टिभिः । देवकन्यास्तु तं वीरं हरंति रमयंति च (४१) ॥

" देवांगनासहस्राणि शूरमायोधने हतम् । त्वरमाणाः प्रधावंति मम भर्ता ममेति च (४२) ॥

" यं यज्ञसंघैस्तपसा च विप्राः स्वर्गैषिणो वाऽत्र यथैव यांति ।

" तथैव यान्त्येव हि तत्र वीराः प्राणान्सुयुद्धेन परित्यजंति (४४) ॥

" ललाटदेशे रुधिरं स्रवेद्यस्याहवे तु प्रविशेच्च वक्त्रम् ।

" तत्सोमपानेन किलास्य तुल्यं संग्रामयज्ञे विधिवच्च दृष्टम् " (४३) ॥ **विष्णुपुराणे**—

"दुष्टानां शासनाद्राजा शिष्टानां परिपालनात् । प्राप्नोत्यभिमतान् लोकान्वर्णसंस्थाकरो नृपः"॥ इति।

इति क्षत्रियधर्माः । अथ वैश्यधर्माः । मनुः (१।९०)—

" पशूनां रक्षणं दानमिज्याध्ययनमेव च । वणिक्पथं कुसीदं च वैश्यस्य कृषिमेव च " ॥

वणिक्पथं वाणिज्यार्थं स्थलछलजलयात्रा । कुसीदं वार्धुष्यम् । अकल्पयदित्यनुवर्त्तते । **हारीतः**—

"गोरक्षां कृषिवाणिज्यं कुर्याद्वैश्यो यथाविधि। दानं देयं यथाशक्त्या ब्राह्मणानां च भोजनम्"॥इति।

पराशरः (१।६०)—

" लोभकर्म तथा रत्नं गवां च परिपालनम् । कृषिकर्म च वाणिज्यं वैश्यवृत्तिरुदाहृता "॥

मनुः (९।३२६)

"वैश्यस्तु कृतसंस्कारः कृत्वा दारपरिग्रहम् । वार्तायां नित्ययुक्तः स्यात्पशूनां चैव रक्षणे(३२६)॥

" मणिमुक्ताप्रवालानां लोहानां तांतवस्य च । गंधानां च रसानां च विद्यादर्घबलाबलम् (३२९) ॥

"बीजानमुप्तिविच्च स्यात्क्षेत्रदोषगुणस्य च । मानयोगांश्च जानीयात्तुलायोगांश्च सर्वतः(३३०)॥

"सारासारं च भांडानां देशानां च गुणागुणम् । लाभालाभं च पण्यानां पशूनां च विवर्धनम्(३३१)॥

"भृत्यानां च भृतिं विद्याद्भाषाश्च विविधा नृणाम् । द्रव्याणां स्थानयोगं च क्रयविक्रयमेव च(३३२)॥

"धर्मेण च द्रव्यवृद्धावातिष्ठेद्यत्नमुत्तमम् । दद्याच्च सर्वभूतानां दानमेव प्रयत्नतः (३३३)" ॥ इति ।

इति वैश्यधर्माः । अथ शूद्रधर्माः ॥ पराशरः ॥ (१।६१)

" शूद्रस्य द्विजशुश्रूषा परमो धर्म उच्यते । अन्यथा कुरुते किंचित्तद्भवेत्तस्य निष्फलम् " ॥

द्विजशुश्रूषया जीवनासंभवे स एवाह (१।६२)—

---

१ क्ष–येत् । २ क्ष–वधस्त । ३ ख–च । ४ लोहकर्म इति मद्रितपाठः । ५ क्ष–कृत्वा ।

"लवणं मधु तैलं च दधि तक्रं घृतं पयः। न दुष्येच्छूद्रजातीनां कुर्यात्सर्वेषु विक्रयम्"॥ इति। सर्वेषु लवणादिषु विक्रयं कुर्यात्। आपद्यपि वर्ज्यानाह (१।६३–६४)—

"विक्रीणन् मद्यमांसानि ह्यभक्ष्यस्य च भक्षणम्। कुर्वन्नगम्यागमनं शूद्रः पतति तत्क्षणात्॥

"कपिलाक्षीरपानेन ब्राह्मणीगमनेन च। वेदाक्षरविचारेण शूद्रश्चांडालतां व्रजेत्॥

"विकर्म कुरुते शूद्रा द्विजसेवाविवर्जिताः।भवंत्यल्पायुषास्ते वै निरर्थं यात्यसंशयः(२।१६)"॥इति।

मनुः (९।३३४।३३५)—

"शुश्रूषैव तु शूद्रस्य धर्मो निश्रेयसः परम्॥

"शुचिरुत्कृष्टशुश्रूषुर्मृदुवागनहंकृतः। ब्राह्मणाद्याश्रयो नित्यमुत्कृष्टां जातिमश्नुते"॥

"अशक्नुवंस्तु शुश्रूषां शूद्रः कर्तुं द्विजन्मनाम्। पुत्रदारात्ययं प्राप्तो जीवेत्कारुककर्मभिः (१०।९९)॥

"यैः कर्मभिः प्रचरितैः शुश्रूष्यंते द्विजातयः। तानि कारुककर्माणि शिल्पानि विविधानि च(१००)॥

"शूद्रस्तु वृत्तिमाकांक्षन्क्षत्रमाराधयेदिति। धनिनं वाऽप्युपाराध्य वैश्यं शूद्रो जिजीविषेत्(१२१)॥

"स्वर्गार्थमुभयार्थं वा विप्रानाराधयेत्तु सः। जातब्राह्मणशब्दस्य सा[१] ह्यस्य कृतकृत्यता (१२२)॥

"विप्रसेवैव शूद्रस्य विशिष्टं कर्म कीर्त्यते। यदतोऽन्यत्र कुरुते तद्भवत्यस्य निष्फलम् (१२३)॥

"न शूद्रे पातकं किंचिन्न च संस्कारमर्हति। नास्याधिकारो धर्मेऽस्ति नाधर्मात्प्रतिषेधनम् (१२६)॥

"धर्मेप्सवस्तु धर्मज्ञाः सतां वृत्तिमनुष्ठिताः। मंत्रवर्ज्यं न दुष्यंति प्रशंसां प्राप्नुवंति च (१२७)॥

"यथा यथा हि सद्वृत्तमातिष्ठत्यन[४]सूयकः। तथा तथेमं चामुं च लोकं प्राप्नोत्यनिंदितः (१२८)॥

"शक्तेनापि हि शूद्रेण न कार्यो धनसंचयः। शूद्रो हि धनमासाद्य ब्राह्मणानेव बाधते (१२९)॥

"उच्छिष्टमन्नं दातव्यं जीर्णानि वसनानि च। पुलाकाश्चैव धान्यानां जीर्णाश्चैव परिच्छदाः"(१२५)॥इति उच्छिष्टं भोजनपात्रे भुक्तशिष्टमेतद्दासविषयम्। नाब्राह्मणायोच्छिष्टं प्रयच्छेदित्येतत्तु अदासविषयम्॥ गृहस्थशूद्रविषयमित्यन्ये। तथा च **व्याघ्रः**—

"उच्छिष्टमन्नं दातव्यं शूद्राय गृहमेधिने। गृहस्थाय तु दातव्यमनुच्छिष्टं दिने दिने"॥ इति।

देवलः—

"शौद्रोऽयं धर्मो द्विजातिशुश्रूषा पापवर्ज्यं कलत्रादिपोषणं कर्षणं पशुपालनं भारोद्वहन-पण्यव्यवहारश्चित्रकर्म नृत्यगीतवीणामृदंगवादनानि" इति। **याज्ञवल्क्यः** (आ. १२०।१२१)—

"शूद्रस्य द्विजशुश्रूषा तयाऽजीवन् वणिग्भवेत्। शिल्पैर्वा विविधैर्जीवेद्द्विजातिहितमाचरन्॥

"भार्यारतिः शुचिर्भृत्यभर्ता श्राद्धक्रियारतः। नमस्कारेण मंत्रेण पंचयज्ञान्न हापयेत्"॥

गौतमः (१०।५१–५८; ६०–६७)—

"शूद्रश्चतुर्थो वर्ण एकजातिस्तस्यापि सत्यमक्रोधः शौचमाचमनार्थे पाणिपादप्रक्षालन-मेवैके श्राद्धकर्म भृत्यभरणं स्वदारवृत्तिः। परिचर्या चोत्तरेषां तेभ्यो वृत्तिं लिप्सेत। जीर्णान्युपान-च्छत्रवासः कूर्चादीन्युच्छिष्टाशनं शिल्पवृत्तिश्च यं चायमाश्रयेत् भर्तव्यस्तेन पुण्यक्षीणोऽपि। तेन चोत्तरस्तदर्थोऽस्य निचयः स्यादनुज्ञातोऽस्य नमस्कारो मंत्रः। पाकयज्ञैः स्वयं यजेतेत्येके" इति। एकजातिः। उपनयनमितरेषां द्वितीयजन्म तस्य तन्नास्ति प्राकृतनेषु **गृह्यकार** आह—

"शूद्रस्यापि निषेकपुंसवनसीमंतोन्नयनजातकर्मनामकरणोपनिष्क्रमणान्नप्राशनचौलान्यमंत्रकाणि यथाकालमुपदिष्टानि" इति। "आचमनस्थाने पाणिपादप्रक्षालनमेव भवति नान्य आचमनकल्प

---

१ **क्ष**–या। २ **क्ष**–कृत्यस्य। ३ **कखग**–शूद्रस्य। ४ **क्ष**–अनुष्ठानेन सूयकः। ५ **क्ष**–या। ६ **क्ष**–नि।

इत्येके "। मनुस्तु सकृदन्वुज्ञानमिच्छति (५।१३८)–"स्त्री शूद्रोऽपि सकृत्" इति । नित्यस्नानविषयेऽप्युशना आह–"सच्छूद्रः स्नायादसच्छूद्रः पाणिपादौ प्रक्षालयेत्" इति । श्राद्धकर्मामावास्यादौ आमश्राद्धं मन्त्रवर्ज्यं कर्तव्यम् । स्वदारवृत्तिरेवास्य भवति नाश्रमान्तरेषु प्राप्तिरिति । कूर्चं वृस्यादि, जीर्णान्युपयुक्तानि उपानदादीनि परिचरते दासाय देयानि। यमसौ पूर्वमाश्रितः कर्माण्यकरोत् क्षीणोऽसमर्थोऽपि तेनासौ भर्तव्यः। तेन च शूद्रेण उत्तरो वृत्तिक्षीणो भर्तव्यः। तदर्थं उत्तरपोषणार्थं अस्य शूद्रस्य निचयः स्यात् । अस्य वैश्वदेवादिषु देवतापदं चतुर्थ्यन्तं मनसा ध्यात्वा नमो नम इत्येवंरूपो मंत्रोऽनुज्ञातो धर्मज्ञैः । अपर आह–

"देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च । नमः स्वधायै स्वाहायै नित्यमेव नमो नमः" ॥

अयं मंत्रो नमस्कारशब्देन विवक्षितः । स पित्र्येषु कर्मसु भवति । पक्वगुणकेषु गार्ह्येषु पाकयज्ञशब्दः प्रसिद्धः । यथाहापस्तंबः– "लौकिकानां पाकयज्ञशब्दः" इति । तैः पाकयज्ञैः शूद्रोऽपि स्वयं यजेतेत्यर्थः । आपस्तंबः (१।१।६–८)–"अशूद्राणामदुष्टकर्मणामुपायनमुपनयनं वेदाध्ययनमग्न्याधेयं फलवन्ति च कर्माणि। शुश्रूषा शूद्रस्येतरेषां वर्णानाम्। पूर्वस्मिन्पूर्वस्मिन्वर्णे निःश्रेयसं भूयः" इति । मनुः–

"येनांगेनावरो वर्णो ब्राह्मणस्यापराध्नुयात् । तदंगं तस्य च्छेतव्यं तन्मनोरनुशासनम् ॥
"न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविष्कृतम्।न चास्योपदिशेद्धर्मं[1] न चास्य व्रतमादिशेत्(५।८०)॥
"यस्तस्य धर्मं व्याचष्टे यो ऽस्यैवादिशति व्रतम्।सोऽसंवृतं नाम तमस्तेनैव सह गच्छति(८१)"॥इति।

उच्छिष्टं भक्षितशेषम् । हविष्कृतं पुरोडाशादि । न शूद्राय मतिं दद्यात् । न चास्योपदिशेद्धर्ममित्यादि निषेधः शूद्रानुपयोगि वैदिकाग्निहोत्रादिधर्मज्ञानविषयः । "श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः" इति इतिहासपुराणादिश्रवणस्य ब्राह्मणमुखेन शूद्रस्यापि विहितत्वात्। किंच स्मृत्युक्ते शूद्राणामपि उपदेशे प्रतिषेधाभावो वाच्यः । अन्यथा "शूद्रश्चतुर्थो वर्ण एकजातिस्तस्यापि सत्यमक्रोधः शौचमाचमनार्थे पाणिपादप्रक्षालनमेवैके । श्राद्धकर्म । भृत्यभरणं स्वदारवृत्तिः परिचर्या चोत्तरेषाम" इत्यादिगौतमादिधर्मोक्तानां स्मृत्युक्ताशौचामश्राद्धादीनां चोपदेशाभावे तद्विषयतादृशधर्माणामनुष्ठानात् तद्वचनानामननुष्ठानलक्षणमेव । गौतमः (१२।१–५)–"शूद्रो द्विजातीनभिसंधायाभिहत्य च वाग्दंडपारुष्याभ्यामंगमोच्यो येनोपहन्यादार्यस्त्र्यभिगमने लिंगोद्धारः स्वहरणं च । गोप्ता चेद्वधोऽधिकोऽथास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणमुदाहरणे जिह्वाच्छेदो धारणे शरीरभेदः । आसनशयनवाक्पथिषु समप्रेप्सुर्दंड्यः" इति । वाचा परुषयाऽभिसंधाय निर्भर्त्स्य दण्डपारुष्येण चाभिहत्य दण्डेन परुषं ताडयित्वा स्थितः शूद्रो येनाङ्गेनापराध्नुयात् तदङ्गं मोच्यः वियोजनीयः। वाचा निर्भर्त्सने जिव्हाच्छेद्यो भुजादिना ताडने हस्तादिच्छेद्यः । आर्यास्त्रैवर्णिकाः तेषां स्त्रियो शूद्रो यद्यभिगछेत्तदा तस्य लिंगोद्धारणं कर्तव्यं सर्वस्वहरणं स शूद्रस्तासां गोप्ता रक्षिता यदि भवति तदा वधः प्रमाणमधिको दंडः । अथ इति वाक्यालंकारे। अस्य शूद्रस्य वेदमुपशृण्वतः उपसृत्य बुद्धिपूर्वं शृण्वतः श्रोत्रे त्रपुणा जतुना च द्रवीकृतेन प्रतिपूरयितव्ये। उदाहरणे वेदोच्चारणे तस्य जिव्हा च्छेद्या। हृदयेनावधारणे परश्वादिना शरीरं भेद्यम्। शूद्रश्चेदासनादिषु द्विजातिभिः साम्यं प्रेप्स्यति तत्तुल्यभावं ततोऽसौ दंड्यः । दंडश्चापस्तंबेन दर्शितः (२।२७।१५)–"वाचि

१ क्ष–ब्रह्म। २ क्ष– + भक्षितशिष्टं ।

पथि शय्यायामासने समीभवतो दंडस्ताडनम् ” इति । वृत्त्यर्थं शूद्रं सेवमानस्य ब्राह्मणस्य निष्कृतिमाहापस्तंबः (१।२७।११)– “ यदेकरात्रेण करोति पापं कृष्णं वर्णं ब्राह्मणः सेवमानः। चतुर्थकाल उदकाभ्यवायी त्रिभिर्वर्षैस्तदपहंति पापम् ” इति । पराशरः (१२।३२)–– “शूद्रान्नं शूद्रसंपर्कं शूद्रेण च सहासनम्। शूद्रात् ज्ञानागमश्चापि ज्वलंतमपि पातयेत्”॥ इति।

नारदः

“शूद्राणां मासिकं कार्यं वपनं न्यायवर्तिनाम्। वैश्यवच्छौचकल्पश्च द्विजोच्छिष्टं तु भोजनम्”॥इति। **इति शूद्रकर्म । अथ ब्राह्मणानां श्रैष्ठ्यम् । आपस्तंबः** (१।१।४–५)–– “ चत्वारो वर्णा ब्राह्मणक्षत्रियवैश्यशूद्रास्तेषां पूर्वः पूर्वो जन्मतः श्रेयान् ” ॥ इति । **मनुः** (१।९३–९५)––
“ उत्तमांगोद्भवात् ज्यैष्ठ्याद्ब्रह्मणश्चैव धारणात् । सर्वस्यैवास्य सर्गस्य धर्मतो ब्राह्मणः प्रभुः ॥
“ तं हि स्वयंभूः स्वादास्यात्तपस्तप्त्वादितोऽसृजत् । हव्यकव्याभिवाह्याय सर्वस्यास्य च गुप्तये ॥
“ यस्यास्येन सदाऽश्नंति हव्यानि त्रिदिवौकसः । कव्यानि चैव पितरः किंभूतमधिकं ततः ॥
“ उत्पत्तिरेव विप्रस्य मूर्तिर्धर्मस्य शाश्वती । स हि धर्मार्थमुत्पन्नो ब्रह्मभूयाय कल्पते (९८)॥
“ ब्राह्मणो जायमानो वै पृथिव्यामधिजायते । ईश्वरः सर्वभूतानां धर्मकोशस्य गुप्तये” (९९)॥
इत्यादि । “न शूद्राय मतिं दद्यान्न चास्योपदिशेद्धर्मम्” (४।८१) इत्यादिनिषेधः शूद्रानुपयोगिवैदिकाग्निहोत्रादिधर्मज्ञानविषयः । “ श्रावयेच्चतुरो वर्णान्कृत्वा ब्राह्मणमग्रतः ” इति इतिहासपुराणादिश्रवणस्य ब्राह्मणमुखेन शूद्रविषयेऽपि विहितत्त्वात् । किंच स्मृत्युक्तशूद्रधर्माणामपि उपदेशप्रतिषेधाभावो वाच्यः । अन्यथा “ शूद्रश्चतुर्थो वर्ण एकजातिः । तस्यापि सत्यमक्रोधः शौचमाचमनार्थे पाणिपादप्रक्षालनमेवैके श्राद्धकर्म भृत्यभरणं स्वदारवृत्तिः तुष्टिः परिचर्या चोत्तरेषाम् ” (१।५१–५७) इत्यादिगौतमादि धर्मोक्तानां स्मृत्युक्तशौचश्राद्धादीनां च उपदेशाभावे तद्विषयतादृशधर्माणामननुष्ठानात्तद्वचनानामननुष्ठानलक्षणमप्रामाण्यमापद्यते तस्माच्छूद्रानुष्ठानानुपयोगिधर्मविषय एव निषेधः । न तु चातुर्वर्ण्यगृहस्थसाधारणधर्माणामहिंसास्तेयादिरूपाणां प्रातिस्विकशौचाचामश्राद्धद्विजशुश्रूषादिधर्माणामपि । न च स्वानुष्ठानानुपयोगिधर्मश्रवणे कस्याप्यप्रसक्तेः प्रतिषेधो व्यर्थ इति वाच्यम् । धर्मः श्रुतो वा दृष्टो वेति धर्मात्र श्रवणे फलाभिधानात्स्वधर्म इति विशेषाभावाच्छूद्रव्यतिरिक्तानां त्रैवर्णिकानां यथा सर्ववर्णधर्मश्रवणे अधिकारः संन्यासव्यतिरिक्तानां यथा सर्वाश्रमसाधारणधर्मे अधिकारः त्रैवर्णिकस्त्रीणां पुरुषधर्मे पुरुषाणां च स्त्रीधर्मे यथाधिकारः तथा शूद्रस्यापि प्रसक्ते तद्विषये प्रतिषेधस्यार्थवत्वात् ।

“सर्वस्वं ब्राह्मणस्येदं यत्किंचिज्जगतीगतम्। ज्यैष्ठ्येनाभिजनेनेदं सर्वं वै ब्राह्मणोऽर्हति(१००)”॥
“स्वमेव ब्राह्मणो भुंक्ते स्वं वस्ते स्वं ददाति च।अनृशंस्याद्ब्राह्मणस्य भुंजते हीतरेजनाः (१०१)”॥
इति स्तुतिः । स्तेयादिषु पतनदंडप्रायश्चित्तोपदेशात् । **याज्ञवल्क्यः** (आ. १९८)––
“ तपस्तप्त्वाऽसृजद्ब्रह्मा ब्राह्मणान्वेदगुप्तये । तृप्त्यर्थं पितृदेवानां धर्मसंरक्षणाय च ” ॥

शातातपः––

“ जन्मनैव महाभागो ब्राह्मणो नाम जायते । माताऽसौ सर्वभूतानां वर्णश्रेष्ठः पिता गुरुः ॥
“ नास्त्येषां पजनीयोऽन्यस्त्रिषु लोकेषु कश्चन । वेदविद्याविशेषेण पजयंतः परस्परम् ॥

" अन्योन्यगुरवो विप्रा अन्योन्यातिथयः स्मृताः। अन्योन्यमुपकुर्वाणास्तारयंति तरन्ति च ॥
" योहि यां देवतामिच्छामाराधयितुमीहते। सर्वोपायप्रयत्नेन संतोषयतु स द्विजान् ॥
" देवतादिव्यभूतेषु क्वचित्काचित्प्रतिष्ठिता। ब्राह्मणो देवताः सर्वास्तस्मात्संपूजयेत्सदा " ॥

श्रुतिरपि— " ब्राह्मणो वै सर्वा देवता " इति " यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसंतीति " च। **मनुः** (१।९६–९७)—

"भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः। बुद्धिमत्सु नराः श्रेष्ठा नरेषु ब्राह्मणाः स्मृताः ॥
" ब्राह्मणेषु तु विद्वांसो विद्वत्सु कृतबुद्धयः। कृतबुद्धिषु कर्तारः कर्तृषु ब्रह्मवेदिनः " ॥ इति।

विद्वांसो वेदविदः। कृतबुद्धयः परिचितवेदार्थकर्त्तारश्चोदितधर्मकृतः। ब्रह्मवेदिनः परमात्मवेदिनः। 'कर्तृषु ब्रह्मवेदिन' इति वदता ब्रह्मविद्भिरपि कर्म कर्त्तव्यमिति सूचितम्। इति **ब्राह्मणश्रैष्ठ्यम्**।

अथ जातिविवेकः। तत्र मनुः (१०।५–६)—

" सर्ववर्णेषु तुल्यासु पत्नीष्वक्षतयोनिषु। आनुलोम्येन संभूता जात्या ज्ञेयास्त एव ते ॥
" स्त्रीष्वनंतरजातासु द्विजैरुत्पादितान्सुतान्। सदृशानेव तानाहुर्मातृदोषविवर्जितान् " ॥

देवलः—

" तेषां सवर्णजाः श्रेष्ठास्तेभ्योऽन्वगनुलोमजाः। अंतराला बहिर्वर्णाः पतिताः प्रतिलोमजाः " ॥

मनुः—" अवरासूत्तमाज्जाताश्चानुलोमा इति स्मृताः।

"नृपायां विप्रतो जातः सवर्णो ब्राह्मणो भवेत्। आयुर्वेदाथर्ववेदधनुर्वेदान्सदा पठेत् ॥
" गजाश्वारोहणं तस्य सवर्णस्य विधीयते। अस्यामनेन चौर्येण जातो नक्षत्रजीविकः ॥
" विप्रस्य त्रिषु वर्णेषु नृपतेर्वर्णयोर्द्वयोः। वैश्यस्य वर्ण एकस्मिन्षडेतेऽपसदाः स्मृताः"॥

(१०) **याज्ञवल्क्यः** (आ. ९१–९२)—

"विप्रान्मूर्धावसिक्तो हि क्षत्रियायां विशः स्त्रियाम्। अंबष्ठः शूद्र्यां निषादो जातः पारशवोऽपि वा ॥
"वैश्याशूद्र्योस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ। वैश्यात्तु करणः शूद्र्यां विन्नास्वेष विधिः स्मृतः"॥

एष सवर्णमूर्धावसिक्तादिसंज्ञाविधिः विन्नासु ऊढासु स्मृतः। यत्तु "ब्राह्मणेन क्षत्रियायामुत्पादितः क्षत्रिय एव भवति क्षत्रियेण वैश्यायां वैश्य एव वैश्येन शूद्रायां शूद्र" इति **शंखस्मरणम्**— तत्क्षत्रियादिजातिप्राप्त्यर्थं न तु सवर्णादिसंज्ञानिराकरणार्थम्। अतश्च मूर्धावसिक्तादीनां क्षत्रियादेरुक्तैव दंडाजिनोपवीतादिभिरुपनयनादि कार्यमिति **विज्ञानेश्वरः** (पृ.२९ पं.२२)॥

मनुरपि (१०।८)—

" ब्राह्मणाद्वैश्यकन्यायामंबष्ठो नाम जायते। निषादः शूद्रकन्यायां यः पारशव एव वा ॥
" क्षत्रियाद्वैश्यकन्यायां माहिष्योंऽबष्ठ इत्यसौ। आयुर्वेदमथाष्टांगं पठेदेष स्ववृत्तये ॥
"अस्यामनेन चौर्येण जातश्चाश्विक उच्यते। अश्वानां विक्रयस्तेषां शुश्रूषा वृत्तिरस्य तु ॥
" वैश्यतः शूद्रकन्यायामुग्रको नाम जायते। मेषाविविक्रयश्चास्य वृत्तिः कम्बलविक्रयः ॥
"अन्तःपुराणि वा रक्षेन्नृपाणामाज्ञया सदा। चौर्येण कटकारः स्यात्कटविक्रयकर्मवान् ॥
"क्षत्रियाच्छूद्रकन्यायां क्रूराचारविहारवान्। क्षत्रशूद्रवपुर्जंतुरुग्रो नाम प्रजायते ॥ (९)
"ब्राह्मणाद्वैश्यकन्यायां निषादो नाम जायते। मंत्रौषधक्रियां कुर्यान्नित्यं शालिक्यकर्म च ॥
"चौर्येण कटकारः स्याद्रूर्ध्वं नापित एव सः। नाभ्यूर्ध्ववपनं वृत्ति कुंभानां करणं मृदा ॥

" ब्राह्मणाच्छूद्रकन्यायां जातः पारशवस्तथा। भद्रकाल्यर्चनं तस्य नृत्तं वाद्यं च वृत्तये॥
" अस्यां वै चोरसंगत्या निषादो जायते सुतः। जीवेद्दंभेन गानेन मृगाणां हिंसयाऽपि वा॥
"क्षत्रियाच्छूद्रकन्यायां जातो दौःषंत उच्यते। वनौकसां संग्रहणं मत्स्यानां ग्रहणं तथा॥
" खड्गादिशस्त्रकरणं दौःषंतस्य तदुच्यते॥
" अस्यामनेन चौर्येण शूलिको जायते नरः। नित्यं शूलधरश्चैव राज्ञां दंड्यांस्तु दंडयेत्॥
" माहिष्यात्करणायां तु रथकारस्तु जायते। अथ पर्यायनामानि तक्षशिल्पी च वर्धकी॥
" लोहकारः कर्मकारः विद्यते यजनं तथा। उपवीतं विधानेन कुर्यादाधानमप्यसौ॥
" वास्तुशास्त्रमधीयानः प्रासादप्रतिमादिकम्। यज्ञपात्राण्द्विजातीनां हेमान्याभरणानि च॥
" कृष्युपस्करणं लेख्यं कर्माण्यस्योदितानि च"। शंखः—

"रथकारस्तस्येज्याधानोपनयनसंस्कारक्रियाश्च प्रतिष्ठा रथसूत्रवास्तुविद्याध्ययनवृत्तिता च" इति। इत्यनुलोमजातिः॥ अथ कुण्डगोलकादिजातिः। मनुः—

" ब्राह्मण्यां सधवायां तु जारजातः स कुंडकः। विधवायां गोलकः स्यादेतौ श्राद्धे बहिष्कृतौ॥
" नृपायां क्षत्रियाज्जातश्चौर्याद्भोज इति स्मृतः। नाभिषेकः पट्टधरो राजके रंजयेत्प्रजाः॥
" वैश्यायां वैश्यतश्चौर्यान्मणिकारश्च जायते। मुक्तानां वेधनं शंखलवनं रत्नरंजनम्॥
" अस्यैव मणिकारस्य त्रीणि कर्माणि वृत्तये॥
" शूद्रायां शूद्रतश्चौर्याज्जातो माणवको भवेत्। अश्वानां तृणदानेन वर्त्तयेदेष नित्यशः"॥

अथ प्रतिलोमजातिनिरूपणम्। प्रातिलोमानाह याज्ञवल्क्यः (आ. ९३–९४)—

" ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहकस्तथा। शूद्राज्जातस्तु चंडालः सर्वधर्मबहिष्कृतः॥
" क्षत्रिया मागधं वैश्याच्छूद्रात्क्षत्तारमेव च। शूद्रादायोगवं वैश्याज्जनयामास वै सुतम्"॥

मनुः (१०।११)—

"क्षत्रियाद्विप्रकन्यायां सूतो भवति जातितः। प्रतिलोमेषु च श्रेष्ठो विष्णोरभ्यर्चनं तथा॥
" धर्मावबोधनं तस्य सारथ्यं कटविक्रयः। नित्यं द्विजवदाधार इति सूतस्य वृत्तयः॥
" नृपायां वैश्यतो जातः कथितो मागधश्च सः। नृपप्रशंसनं कुर्यात्तंत्रिवीणाश्च वादयेत्॥
" अस्यामनेन चौर्येण पुलिंदो नाम जन्मतः। हिंसया दुष्टसत्वानामरण्ये वर्त्तयेदयम्॥
" तैलपिण्याकलवणविक्रयेणैव वर्त्तयेत्। अभोज्यान्नः स्वयं शूद्रैरस्पृश्योऽपि भवत्युत॥
" ग्रामादिष्वपराह्णेषु प्रविशन् दंडमर्हति॥
" वैश्यान्मागधवैदेहौ राजविप्रांगनासुतौ। शूद्रादायोगवक्षत्ता चंडालश्चाधमो नृणाम्॥
" वैश्यराजन्यविप्रासु जायंते वर्णसंकरः।

" यथैव शूद्रो ब्राह्मण्यां बाह्यजं तु प्रसूयते। यथा बाह्यंतरो बाह्यं चातुर्वर्ण्ये प्रसूयते॥
" आयोगवश्च क्षत्ता च चंडालश्चाधमो नृणाम्। प्रातिलोम्येन जायंते शूद्रादपसदास्त्रयः॥
" वैश्यान्मागधवैदेहौ क्षत्रियात्सूत एव तु। प्रतीपमेव जायंते परेऽप्यपसदास्त्रयः॥ (१७)
" जातो निषादाच्छूद्रायां जात्या भवति पुल्कसः। (१८) उग्रात्तु जातः क्षत्तायां श्वपाक इति कीर्त्यते॥

" चंडालश्वपचानां तु बहिर्ग्रामात्प्रतिश्रयः। चैत्यद्रुमश्मशानेषु शैलेषूपवनेषु च॥
" वसेयुरेते अज्ञाता वार्त्तया च स्वकर्मभिः। वासांसि मृतचेलानि भिन्नभांडे च भोजनम्॥

---

१ क्ष-मानि।

" कार्ष्णायसमलंकारः परिव्रज्या च नित्यशः। न तैः समयमन्विच्छेत्पुरुषो धर्ममाचरन्॥
" वर्णापेतमविज्ञातं नरं कलुषयोनिजम्। आर्यरूपमिवानार्यं कर्मभिः स्वैर्विभावयेत्॥
" अनार्यता निष्ठुरता क्रूरता निष्क्रियात्मता। पुरुषं व्यंजयन्तीह लोके कलुषयोनिजम्॥
" पितुर्वा भजते शीलं मातुर्वोभयमेव वा। न कथंचन दुर्योनिः प्रकृतिं स्वां विमुञ्चति॥
" स्वस्वजातेर्हि यत्कर्म कथितं तेन वर्तयेत्। अन्यथा वर्तमाने हि सत्यं पतति जातितः"॥

याज्ञवल्क्यः (आ. ९५)–"असत्संतस्तु विज्ञेयाः प्रतिलोमानुलोमजाः"। असंतः प्रतिलोमजाः सन्तश्चानुलोमजा ज्ञातव्या इत्यर्थः। अनुलोमप्रतिलोमजातीनामनन्तत्वेन वक्तुमशक्यत्त्वादत्र न लिख्यते। इति प्रतिलोमजातिः

पुनः सावर्ण्यप्राप्तौ कारणमाह याज्ञवल्क्यः (आ. ९६)—

"जात्युत्कर्षो युगे ज्ञेयः सप्तमे पंचमेऽपि वा। व्यत्यये कर्मणां साम्यं पूर्ववच्चाधरोत्तरम्"॥

जातयो मूर्धावसिक्काद्यास्तासामुत्कर्षो ब्राह्मणत्त्वादिजातिप्राप्तिः। युगे जन्मनि। सप्तमे पञ्चमे अपि शब्दात्षष्ठे वा बोद्धव्या। व्यवस्थितश्चायं विकल्पः। ब्राह्मणेन शूद्रायामुत्पादिता निषादी सा ब्राह्मणेनोढा दुहितरं काञ्चिज्जनयति। साऽपि ब्राह्मणेनोढा अन्यामित्यनेन प्रकारेण षष्ठी सप्तमं ब्राह्मणं जनयति। ब्राह्मणेन वैश्यायामुत्पादिता अंबष्ठी। साऽप्येतेन प्रकारेण पंचमी षष्ठं ब्राह्मणं जनयति। मूर्धावसिक्ताऽप्यनेन प्रकारेण चतुर्थी पंचमं ब्राह्मणं जनयति। एवमुग्रा क्षत्रियोढा माहिष्या च यथाक्रमं षष्ठपंचमं च क्षत्रियं जनयति। तथा करणी वैश्योढा पंचमं वैश्यं जनयति। एवं ब्राह्मणादीनां क्षत्रियादिहीनवृत्त्या क्षत्रियादिहीनजातिर्भवतीत्याह " व्यत्यये कर्मणाम् " इति। कर्मणां व्यत्यये वृत्त्यर्थानां कर्मणां विपर्यासे सति यद्याप-द्विमोक्षेऽपि तां वृत्तिं न परित्यजंति तदा सप्तमे षष्ठे पंचमे वा जन्मनि साम्यं यस्य हीनस्य कर्मणा जीवति तत्समानजातित्वं भवति। तद्यथाः। ब्राह्मणः शूद्रवृत्त्या जीवंस्तामपरित्यजन्यद्रि पुत्रमुत्पादयति सोऽपि तथैव वृत्त्या जीवन्पुत्रान्तरमित्येवं परंपरया सप्तमे जन्मनि शूद्रमेव जनयति। एवं वैश्यवृत्त्या जीवन्षष्ठो वैश्यं क्षत्रियवृत्त्या जीवन् पंचमे क्षत्रियमिति पूर्ववच्चाधरोत्तरमधरे चोत्तरे चाधरोत्तरम्। यथा मूर्धावसिक्तायां क्षत्रियवैश्यशूद्रैरुत्पादिता अंबष्ठायां वैश्यशूद्राभ्यां निषाद्यां शूद्रेण उत्पादिता अपरे प्रतिलोमजा तथामूर्धावसिक्तांबष्ठनिषादादिषु ब्राह्मणोत्पादितां माहिष्योग्रयोर्ब्राह्मणेन क्षत्रियेण च उत्पादिता करण्यां ब्राह्मणेन क्षत्रियेण वैश्येन च उत्पादिता उत्तरे अनुलोमजा एवमधरोत्तरं पूर्ववत्संकरवत्सदसत् सदिति बोद्धव्यमित्यर्थः॥

मनुः (१०।२०)—

"द्विजातयः सवर्णासु जनयंन्त्यव्रतान्सुतान्। तान्सावित्रीपरिभ्रष्टान् व्रात्यानित्यभिनिर्दिशेत्"॥

बोधायनोऽपि

"त्रिषु वर्णेषु सादृश्यादव्रतान् जनयन्तु यान्। तान्सावित्रीपरिभ्रष्टान् व्रात्यान् इत्याहुर्मनीषिण"॥ इति।

अथ गर्भाधानादि। याज्ञवल्क्यः (आ. १०)—" ब्रह्मक्षत्रियाविट्शूद्रा वर्णास्त्वाद्यास्त्रयो द्विजाः। निषेकादिश्मशानांतास्तेषां वै मंत्रतः क्रियाः"॥ निषेको गर्भाधानम्। तत्र मनुः (२।२६)—" वैदिकैः कर्मभिः पुण्यैर्निषेकाद्यैर्द्विजन्मनाम्। कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च "॥

अंगिराः "चित्रकर्म यथानेकैरंगैरुन्मील्यते शनैः। ब्राह्मण्यमपि तद्वत्स्यात् संस्कारैर्विधिपूर्वकैः"॥

मनुः (२।२७)—

" गार्भैर्होमैर्जातिकर्मचौलमौंजीनिबंधनैः । बैजिकं गार्भिकं चैनो द्विजानामपमृज्यते" ॥ बीजं शुक्रशोणितम् । तद्दोषजनितं बैजिकम् । अशुचिगर्भनिवासजनितं गार्भिकम् ॥ तथा च **याज्ञवल्क्यः** (आ. १३)–" एवमेनः शमं याति बीजगर्भसमुद्भवम् " ॥ इति । संस्काराश्च **गौतमेन** दर्शिताः (८।१४–२४)–" गर्भाधानपुंसवनसीमंतोन्नयनजातकर्मनामकरणान्नप्राशनचौलोपनयनम् । चत्वारि वेदव्रतानि । स्नानं सहधर्मचारिणीसंयोगः । पंचानां यज्ञानामनुष्ठानं देवपितृमनुष्यभूतब्रह्मणामेतेषां चाष्टकापार्वणश्राद्धं श्रावण्याग्रायणीचैत्र्याश्वयुजीति सप्त पाकयज्ञसंस्थाः । अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासा वाग्रयणं चातुर्मास्यानि निरूढपशुबंधसौत्रामणीति सप्त हविर्यज्ञसंस्थाः । अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयातिरात्राप्तोर्याम इति सप्त सोमसंस्थाः । इत्येते चत्वारिंशत्संस्कारा अष्टावात्मगुणाः । दया सर्वभूतेषु क्षांतिरनुसूया शौचमनायासो मंगलमकार्पण्यमस्पृहा " इति ॥ वेदव्रतानि प्राजापत्यादीनि । स्नानं समावर्तनम् । सहधर्मचारिणीसंयोगो विवाहः । पंचानां देवयज्ञादीनामहरहरनुष्ठानं पंचैते पृथक्संस्काराः एतेषां वक्ष्यमाणानामष्टकादीनामनुष्ठानमित्यर्थः । अष्टकादयः पूर्वं व्याख्याताः । **मनुनोप**निष्क्रामणाख्यं कर्माप्युक्तम् (२।३४)— "चतुर्थे मासि कर्तव्यं शिशोर्निष्क्रमणं गृहात्" इति । तदिह नादृतं चत्वारिंशद्ग्रहणादेतावंतः संस्कारास्तेनान्यानि श्रौतानि स्मार्तानि च कर्माणि न संस्कारेष्वंतर्भवंति । दयादीनां लक्षणमाह **बृहस्पतिः**—

" परे वा बंधुवर्गे वा मित्रे द्वेष्टरि वा सदा । आपदो रक्षणं यत्तु दयैषा परि कीर्तिता ॥
" बाह्ये चाभ्यंतरे चैव दुःख उत्पादिते परैः । न प्रकुर्वति नो हंति सा क्षमा परिकीर्तिता ॥
" यो धर्ममर्थं कामं वा लभते मोक्षमेव वा । न द्वेष्यात्तं सदा प्राज्ञः साऽनसूया स्मृता बुधैः ॥
" अभक्ष्यपरिहारश्च संसर्गश्चाप्यनिंदितैः । स्वधर्मे च व्यवस्थानं शौचमेतत्प्रकीर्तितम् ॥
" यदारंभे भवेत्पीडा नित्यमत्यंतमात्मनः । तद्वर्जयेद्धर्ममपि सोऽनायासः प्रकीर्तितः ॥
" प्रशस्ताचरणं नित्यमप्रशस्तविवर्जनम् । एतद्धि मंगलं प्रोक्तमृषिभिस्तत्त्वदर्शिभिः ॥
" स्तोकादपि हि दातव्यं मुदितेनांतरात्मना । अहन्यहनि यत्किंचिदकार्पण्यं हि तत् स्मृतम् ॥
" यथोत्पन्नैस्तु संतोषः कर्तव्यः स्वार्जितैर्धनैः । परार्थं नाभिलाषेत साऽस्पृहा परिकीर्तता "॥ इति ।

यस्य चत्वारिंशत् संस्काराः अष्टौ वाऽत्मगुणाश्च स ब्राह्मणः सायुज्यमाप्नोतीत्याह **शंखः**—

" संस्कारैः संस्कृतः पूर्वैरुत्तरैरपि संस्कृतः । नित्यमष्टगुणैर्युक्तो ब्राह्मणो ब्रह्मलौकिकम् ॥

" ब्राह्मं पदमवाप्नोति तस्मान्न च्यवते पुनः" ॥ इति गर्भाधानादयः पूर्वे संस्काराः उत्तरे त्वष्टकादयः । तथा **हारीतः**–" द्विविध एव संस्कारो भवति ब्राह्मो दैवश्च । गर्भाधानादिसमावर्तान्ते ब्राह्मः । पाकयज्ञहविर्यज्ञसौम्याश्चेति दैवाः । ब्राह्मेण संस्कारेण संस्कृत ऋषीणां समानानां सायुज्यं गच्छति दैवेनोत्तरेण संस्कृतो देवानां समानतां सलोकतां सायुज्यं गच्छति" इति । एतच्च आत्मगुणहीनसंस्काराभिप्रायेण । अत एव **गौतमः**–(८।२५) "यस्यैते चत्वारिंशत्संस्कारा न चाष्टावात्मगुणा न स ब्रह्मणः सायुज्यं सालोक्यं च गच्छति" इति। अतश्च यस्यैते चत्वारिंशत्संस्कारा अष्टावात्मगुणाश्च तस्यैवेदं ब्रह्मणः सायुज्यप्राप्तिलक्षणं फलमिति मंतव्यम् । अत्र च गर्भाधानादय उपनयनपर्यंता एव संस्काराः सर्वेषां त्रिजातीनां नियताः । न पुनःस्नानादयः । तथात्वे 'यमिच्छेत् कर्तुं तमाविशेत्' 'यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत्' इत्यादिभिर्विरोधः स्यात् ॥

अथ गर्भाधानम्। तत्र **मनुः** (३।४५-४९)—

"ऋतुकालाभिगामी स्यात्स्वदारनिरतः सदा। पर्ववर्जं व्रजेच्चैनां तद्व्रतो रतिकाम्यया" ॥
"ऋतुः स्वाभाविकः स्त्रीणां रात्रयः षोडश स्मृताः। चतुर्भिरितरैः सार्धमहोभिः सद्विगर्हितैः ॥
"तासामाद्याश्चतस्रस्तु निंदितैकादशी च या। त्रयोदशी च शेषास्तु प्रशस्ता दश रात्रयः ॥
"युग्मासु पुत्रा जायंते स्त्रियोऽयुग्मासु रात्रिषु। तस्माद्युग्मासु पुत्रार्थी संविशेदार्त्तवे स्त्रियम् ॥
"अमावास्यामष्टमीं च पौर्णमासीं चतुर्दशीम्। ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः" ॥

बृहस्पतिः—

"ऋतुकालाभिगमनं पुंसां कार्यं प्रयत्नतः। सदैव वा पर्ववर्ज्यं स्त्रीणामभिमतं हि तत्" ॥

याज्ञवल्क्यः (आ. ८१)-

"यथाकामी भवेद्वाऽपि स्त्रीणां वरमनुस्मरन्। स्वदारनिरतश्चैव स्त्रियो रक्ष्या यतः स्मृताः" ॥

भार्येच्छानतिक्रमेण प्रवृत्तिरिति यथाकामी स्त्रीणां वरमिंद्रदत्तमनुस्मरन्। यथा (तै. स. २।५।१) "स स्त्रीषꣳसादमुपासीददस्यै ब्रह्महत्यायै तृतीयं प्रतिगृह्णीतेति। ता अब्रुवन्वरं वृणामहै ऋत्वियात्प्रजां विंदामहै काममाविजनितोः संभवामेति तस्मादृत्वियास्त्रियः प्रजां विंदंते काममाविजनितोः संभवंति वारे वृतꣳ ह्यासां तृतीयं ब्रह्महत्यायै प्रत्यगृह्णन् सा मलवद्वासा अभवत्" इति। स्त्रीषꣳसादं स्त्रीसमूहम् ऋत्वियादिति ऋतुः प्राप्तोऽस्येति ऋत्वियमार्त्तवमुच्यते। छंदसि घसिति घस्। तस्येयः। आविजनितोः। विजननं प्रसवः। भावलक्षणे स्थे णिति जने स्तोसुन्प्रत्ययः। संभवः संयोगः। प्रथमसंयोगे गर्भो भवतीति यद्यपि द्वितीयादिप्रवृत्तिरप्रजार्था तथापि कामानुरूपमाप्रसवात्संभवाम। गर्भश्च सुखं वर्धतामिति वारे वरणकाले आसामभिव्रतं हि ब्रह्महत्यायै षष्ठ्यर्थे चतुर्थी प्रत्यगृह्णन्स्त्रियः मलवद्वासाः रजस्वला। वासोग्रहणं वाससि रजस्पर्शात् प्रभृत्यप्रायत्यमस्तीति सूचनार्थः। **याज्ञवल्क्यः** (आ. ७९)—

"षोडशर्तुर्निशाः स्त्रीणां तस्मिन्युग्मासु संविशेत्। ब्रह्मचार्येव पर्वण्याद्याश्चतस्रश्च वर्जयेत्" ॥ निशाग्रहणं दिवसप्रतिषेधार्थम्। अत एव **शंखलिखितौ**— "नार्तवे दिवा मैथुनं व्रजेदल्पवीर्याश्च दिवा प्रसूयंतेऽल्पायुषश्चेति"। युग्मास्विति बहुवचनं समुच्चयार्थम्। तेनैकस्मिन्नप्यृतावप्रतिषिद्धासु युग्मासु सर्वासु रात्रिषु गच्छेदेवं गच्छन्ब्रह्मचार्येव भवति। अतश्च "अत्र ब्रह्मचर्यं चोदितं तत्र गच्छतोऽपि न ब्रह्मचर्यस्खलनप्रयुक्ते दोषोऽस्तीति" **विज्ञानेश्वरः** (पृ. २० पं. १-३)। पर्वाण्याद्याश्च तत्र च वर्जयेदिति। तथाच **श्रुतिः** "नामावास्यायां च पौर्णमास्यां च स्त्रियमुपेयाद्यदुपेयान्निरिंद्रियः स्यात्" ॥ इति। "तस्मान्मलवद्वाससा न संवदेत न सहासीतेति। यां मलवद्वाससꣳ संभवंति यस्ततो जायतेऽसौ अभिशस्त" इति च। युग्मास्वप्युत्तरोत्तरवैशिष्ट्यमाहापस्तंबः (३।९।१)—"चतुर्थीप्रभृत्या षोडशीमुत्तरामुत्तरां युग्मां प्रजानिःश्रेयसमृतुगमन इत्युपदिशंति" इति। एतच्चतुर्थेऽह्नि गमनं रजोनिवृत्तौ द्रष्टव्यम्। एतदेवाभिप्रेत्य **कात्यायनः**—

"रजस्वलां चतुर्थेऽह्नि स्नानाच्छुद्धिमवाप्नुयात्" इति। **हारीतश्च**—"चतुर्थेऽह्नि स्नाताया युग्मासु च" इति। तदाह **गोभिलः**—"यदर्तुमती भवत्युपरतशोणिता तदा संभवकालः" **इति** ॥

पराशरः— (७।१७-१९)

" स्नाता रजस्वला या तु चतुर्थेऽहनि शुध्यति । कुर्याद्रजोनिवृत्तौ तु दैवपित्र्यादि कर्म च ॥
" साध्वाचारा न तावत्सा रजो यावत्प्रवर्तते । रजोनिवृत्तौ गम्या स्त्री गृहकर्मणि चैव हि ॥
"प्रथमेऽहनि चण्डाली द्वितीये ब्रह्मघातकी । तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुध्यति" ॥इति ।

चंडाल्यादिगमने यावत् प्रत्यवायः तावत् रजस्वलागमनेऽपि । **श्रुतिरपि**–" तिस्रो रात्रीर्व्रतं चरेत्" इति ॥ एवं चतुर्थदिनवर्ज्यत्वस्मरणं रजोनुवृत्तिविषयं अल्पायुर्धनवर्जितपुत्रोद्भवाभिप्रायं वा । तथा **व्यासः**–

" रात्रौ चतुर्थ्यां पुत्रः स्यादल्पायुर्धनवर्जितः । पंचम्यां पुत्रिणी नारी षष्ठ्यां पुत्रस्तु मध्यमः ॥
" सप्तम्यामप्रजा योषिदष्टम्यामीश्वरः सुतः । नवम्यां सुभगा दारा दशम्यां च परः पुमान् ॥
" एकादश्यामधर्म्या स्त्री द्वादश्यां पुरुषोत्तमः । त्रयोदश्यां सुता लोकवर्णसंकरकारिणी ॥
" धर्मविच्च कृतज्ञः स्यादात्मवेत्ता दृढव्रतः । प्रजायंते चतुर्दश्यां गुणौघैर्जगतीपतिः ॥
" राजपत्नी महाभोगा राजवंशगताऽथवा । जायते पंचदश्यां तु बहुपुत्रा पतिव्रता ॥
"विद्यालक्षणसंपन्नः सत्यवादी जितेन्द्रियः । आश्रयः सर्वभूतानां षोडशे जायते पुमान्" ॥ इति ।

याज्ञवल्क्यः (आ. ८०)–

" एवं गच्छन्स्त्रियं क्षामां मघामूलं च वर्जयेत् । स्वस्थ इंदौ सकृत्पुत्रं लक्षण्यं जनयेत्पुमान् " ॥

स्वस्थ इंदौ चंद्रबले सति मघामूले विहाय क्षामां कृशां सकृद्गच्छन् लक्षण्यं लक्षणयुक्तं च पुत्रं जनयेदित्यर्थः । **बृहस्पतिः**—

"स्त्रियाः शुक्रेऽधिके स्त्री स्यात्पुमान् पुंसोधिके भवेत् । तस्माच्छुक्रविवृध्यर्थं वृष्यं स्निग्धं च भक्षयेत् ॥
" लघ्वाहारां स्त्रियं कुर्यादेवं संजनयेत्सुतम् " । वृष्यं वीर्यवर्धनं द्रव्यम् ॥ **मनुः** (३।४९)–

"पुमान् पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियाः । समेऽपुमान्पुंस्त्रियौ वा क्षीणेऽल्पे च विपर्ययः" ॥

अपुमान् नपुंसकः । पुंस्त्रियौ वा यमलौ यदि तदा बीजविभागः । तदाह **यमः**–

" यदि संयोगकाले तु पुरुषो रागमोहितः । द्विधा समुत्सृजेच्छुक्रं यमकं तत्र जायते " ॥ इति ।

क्षीणे निःसारे अल्पे च विपर्ययः गर्भाग्रहणम् । स्त्री भवत्यधिके स्त्रिया इत्यत्र रजसीत्यध्याहारः । अथवा शुक्रशब्दस्यैव रजोवाचकत्वं चेत्यवगंतव्यम् । **सायणीये**–

" षष्ठ्यष्टमीं पंचदशीं चतुर्थीं चतुर्दशीमप्युभयत्र हित्वा
शेषाः शुभाः स्युस्तिथयो निषेके वाराः शशांकार्यसितेंदुजानाम् ॥
" विष्णुः प्रजेशरविमित्रसमीरपौष्णमूलोत्तरावरुणभानि निषेककार्ये ।
पूज्यानि पुष्यवसुशीतकराश्विचित्रादित्याश्च मध्यमफला विफलाः स्युरन्याः " ॥

विष्णुः श्रवणम् । प्रजेशो रोहिणी । रविर्हस्तः । मित्रः अनुराधा । समीरः स्वाती । पौष्णो रेवती । वरुणः शतभिषक् । वसु धनिष्ठा । शीतकरः मृगशिराः । आदित्याः पुनर्वसू ।

" वृषभमिथुनकर्कसिंहकन्या तुलघटचापझषाः शुभा भवंति ।
यदि शुभबलकारिणोऽनुकूला निधनविशुद्धिकरा निषेककार्ये " ॥

निधनमष्टमस्थानम् । ऋतुयौगपद्ये तु गमनक्रममाह **देवलः**—

" यौगपद्ये तु तीर्थानां विप्रादिक्रमशो व्रजेत् । रक्षणार्थमपुत्रां वा ग्रहणक्रमशोऽपि वा ॥

तीर्थस्य ऋतुः । **पराशरः** (४।१४)—

“ ऋतुस्नातां तु यो भार्यां संनिधौ नोपगच्छति । घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः ”॥

बोधायनः—

“ऋतुस्नातां तु यो भार्यां संनिधौ नोपगच्छति। पितरस्तस्य तन्मासं तस्मिन् रेतसि शेरते”॥ **इति।**

संनिधिग्रहणादसंनिधौ अशक्तौ च न दोषः । तथा **देवलः**–

“ स्वयं दारान् ऋतुस्नातान् स्वस्थश्चेन्नोपगच्छति । भ्रूणहत्यामवाप्नोति गर्भं प्राप्तं विनाश्य सः ॥
“ त्रीणि वर्षाण्यृतिमतीं यो भार्यां नोपगच्छति । स तुल्यं भ्रूणहत्याया दोषमृच्छत्यसंशयम् ॥
“ ऋतौ नोपैति यो भार्यामनृतौ यश्च गच्छति । तुल्यमाहुस्तयोः पापमयोनौ यश्च सिंचति ” ॥

अनृतुगमनप्रतिषेधः स्त्रिया इच्छाभावे वेदितव्यः । अन्यथा “ यथाकामी भवेत् ” इत्यादिवचनविरोधः स्यात् । तथा च **गौतमः** (५।१–२)–“ऋतावुपेयात्सर्वत्र वा प्रतिषिद्धवर्जम्” इति । **आपस्तंबः** । (२।१०।२२)–“ भोक्ता च धर्माविप्रतिषिद्धान्भोगान् ” इति । **श्रूयते** च “ स्त्रीरक्षणम् अप्रमत्तारक्षत तन्तुमेतममावां क्षेत्रे परबीजानि वाप्सुः ” इति । **महाभारतेऽपि**–

“ अग्निहोत्रफला वेदा दत्तभुक्तफलं धनम् । रतिपुत्रफला दारा शीलवृत्तफलं श्रुतिम्” ॥ इति ।

व्यासः–

“ अनृतावृतुकाले वा दिवारात्रे तथापि वा । प्रोषितस्तु स्त्रियं गच्छेत्प्रायश्चित्तीयते न च ” ॥

ऋतुकालातिक्रमदोषापवादमाह **व्यासः**–

“ व्याधितो बंधनस्थो वा प्रवासेष्वथ पर्वसु । ऋतुकालेषु नारीणां भ्रूणहत्या प्रमुच्यते” ॥

भ्रूणहतिशब्दस्तृतीयांतः । **बोधायनः**–

“यस्तु पाणिगृहीताया आस्ये गच्छति मैथुनम्। तस्येह निष्कृतिर्नास्तीत्येवमाह प्रजापतिः”॥ इति।

व्यासः–

“ परदारान्न गच्छेत्तु मनसाऽपि कथंचन । परदाररतिः पुंसामुभयत्रापि भीतिदा ॥
“ इति मत्वा स्वदारेषु ऋतुमत्सु बुधो व्रजेत् ” ।

अजातपुत्रस्यैवात्रर्तुगमननियमः । **तथा कूर्मपुराणे** (उत्तरार्धे १५।११)— “ ऋतुकालाभिगामी स्याद्यावत्पुत्रोऽभिजायते ” इति। **वसिष्ठोपि** (१७।१–२)–

“ऋणमस्मिन्संनयत्यमृतत्वं च गच्छति। पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम्” ॥ इति ।

“ [1]जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासी प्रजयाहि मनुष्यः पूर्णः ” ॥

“ संतानरहितो जंतुरिह लोके परत्र च । न पूयते वृथा जन्म कुलं तस्य विनश्यति ॥

“ अनंताः पुत्रिणां लोका नापुत्रस्य लोकोऽस्ति, प्रजामनुप्रजायसे, तदुतेमर्त्यामृतम्” इत्याद्याः **श्रुतिस्मृतयः** एकेनापि पुत्रेण चरितार्थाः । तथा च **मनुः** (९।१०५)–

“ ज्येष्ठेनैव तु पुत्रेण पुत्रीभवति मानवः। पितॄणामनृणश्चैव स तस्मात्सर्वमर्हति ” ॥ इति ।

“दशास्यां पुत्रानाधेहि” ॥ “एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्” इत्याद्यास्त्वनेकपुत्रप्रशंसापराः । एवं च बहुपुत्रेच्छायां सत्यां जातपुत्रस्य ऋतुगमनातिक्रमे न दोषः । **अत एव मनुः** (९।१०७)—

“ यस्मिन्नृणं संनयति येन चानंत्यमश्नुते । स एव धर्मजः पुत्रः कामजानितरान्विदुः” ॥ इति ।

आनुशासनिके तु–

---

१ (तै. सं. ६।३,१०,५) शतपथब्राह्म (१।७।२।११)

" कल्मषं गुरुशुश्रूषा हन्यान्मानो महद्यशः । अपुत्रत्वं त्रयः पुत्रा कुर्वंति दश धेनवः"॥ इति ।

सायणीये–

" गर्भाधानर्क्षमारभ्य नक्षत्रे जननं भवेत् । नवमे दशमे वापि द्वादशे वाऽथ निश्चितम् ॥

" आधानर्क्षं समारभ्य प्रसवो द्वादशे यतः । विज्ञाय शुभनक्षत्रं तद्गंतव्यं विशेषतः ॥

" दारप्रियैरलंकारैरलंकृत्य प्रसन्नधीः । प्रियासमीपे शयनं संविशेत्प्रहरद्वयम्"॥ **अपरार्के–**

"न स्वपेद्येषु देशेषु तेषु देशेषु चाप्यथा । दीक्षितो वर्जयेद्यत्नात्कृत्वा श्राद्धं च मानवः"॥

दीक्षितोऽनुमतदीक्षः । यस्मिन्प्रदेशे स्त्री स्वपिति तत्र न स्वपेत् । वर्जयेन्मैथुनमिति शेषः । **व्यासः–**

" नास्नातां तु स्त्रियं गच्छेदातुरां न रजस्वलाम् । नोपयाद्गर्भिणीं नारीं दीर्घमायुर्जिजीविषुः ॥

"नानिष्टां न प्रकुपितां न सशक्तां न रोगिणीम् । नादक्षिणां नान्यकामां नाकामां नान्ययोषितम् ॥

" क्षुत्क्षामां नातिभुक्तां वा स्वयं चैतैर्गुणैर्युतः । स्नातः स्रग्गंधधूपप्रीतो व्यवायं पुरुषो व्रजेत् "॥

शांडिल्यः—

" न गच्छेद्गर्भिणीं भार्यां मलिनां सितमूर्ध्वजां । रजस्वलां रोगवतीं नायोगो न बुभुक्षितः ॥

" सुवस्त्रवेषधरया स्नातया शुद्धचित्तया । अरोगया दयितया स्वयमेवंविधं स्वपेत् ॥

" धातुक्षयो रोगवृद्धिरश्रीः सत्कर्मविप्लवः । सौभाग्यायुर्यशो नाशः पुंसां स्त्रीस्वतिसंगिनाम् " ॥

संवर्तः–

''रजस्वलां च यो गच्छेत् गर्भिणीमष्टमासिकीम् । तस्य पापविशुद्ध्यर्थमतिकृच्छ्रं विशोधनाम्"॥इति।

भारद्वाजः—

"भार्यासंभोगसमये पुष्पकालं विनान्यदा । उपवीतमृतौ कुर्यान्निवीतमनृतौ तथा"॥ **मनुः–**

" उपवीती स्त्रियं गच्छेदृतुकाले तु वै बुधः । निवीतमनृतौ कुर्यात्तद्दोषस्य निवृत्तये ॥

" मुक्तवसना योषिदमुक्तवसनः पुमान् । संविशेतामुभौ मुक्तवसनौ कलिराविशेत् " ॥ संविशेदित्युक्त्या रतिकाले मुक्तवसनत्वमादृतमासीत् । अमुक्तवसनत्वं निद्राकाल इति ।

"ऋतौ तु गर्भशंकित्वात्स्नानं मैथुनिनः स्मृतम् । अनृतौ तु यदा गच्छेच्छौचमूत्रवदिष्यते" इति ।

गौतमः (९।२६)— " न मिथुनीभूत्वा शौचं प्रति विलंबेत " इति । मिथुनीभूत्वा स्त्रियमुपगम्य शौचं प्रति न विलंबेत तत्क्षण एव कुर्यात् । अत्र शौचं क्षालनं न तु वस्त्रादीनां शोधनं "शुक्रे तिस्रो मृत्तिकाः" इति वचनात् । **आपस्तंबः** (२।१।२३; २।१)– " उदकोपस्पर्शनमपि वा लेपान्प्रक्षाल्याचम्य प्रोक्षणमंगानाम् " इति । उदकोपस्पर्शनं स्नानं तच्च पुंस एव । अंगानां तु हरिद्राजलप्रोक्षणमिति । **स एव** (१।३२।२)— " मिथुनीभूय च न तया सर्वां रात्रीं शयीत " इति । (२।१।२०।२३)–"स्त्रीवाससैव संनिपातः स्यात् । यावत्संनिपातं च सह शय्या । ततो नाना" इति । स्त्रीवाससा स्त्रीसंयोगार्थवाससा । संनिपातः संयोगः । **कालादर्शे–**

" रजोदृष्टेश्चतुर्थ्याद्या षोडशाहादृतुः स्मृतः । पुत्रोत्पत्तिकरा युग्मा वासराः सप्त शोभनाः ॥

" पुत्र्युत्पत्तिकराः षट् च मध्यमाश्चायुजः स्मृताः । अतिप्रशस्ता दिवसा उभयत्रोत्तरोत्तराः ॥

" राक्षसर्क्षं मखर्क्षं च पंच पर्वाणि वर्जयेत् " ॥ इति । रजोदर्शनादारभ्य चतुर्थ्याद्या आषोडश त्रयोदशवासराः ऋतुः । गर्भोत्पत्त्यनुगुणकालो ऋतुः । उभयत्र युग्मास्वयुग्मासु च । राक्षसर्क्षं मूलनक्षत्रम् **तन्त्रे—**

---

१ क्ष–मुक्त । २ क–प्रातपितं । ३ क्ष–सक्तां । ४ क–सिक्त । ५ कखग–तं पृष्ठमागतः

६ क–श्रा । ७ कखग–न वि । ८ कखग–गौतमः ।

" चतुर्दश्यष्टमी पक्षद्वये दर्शश्च पूर्णिमा। संक्रांतिश्चेति पर्वाणि पंच प्राहुर्महर्षयः"॥ इति । **कूर्मपुराणे** (उ. १५।१२)—

" षष्ट्यष्टमीं पंचदशीं द्वादशीं च चतुर्दशीम्। ब्रह्मचारी भवेन्नित्यं तद्वज्जन्मत्रयेऽहनि"॥ इति। इति **गर्भाधानम्** ।

अथ पुंसवनम् । **आपस्तंबः**—" पुंसवनं व्यक्ते गर्भे तिष्येण " ॥ इति । पुंसवनमिति कर्मनामधेयम् । येन कर्मणा गर्भिणी पुमांसमेव सूते तत्पुंसवनम् । पुमांसं सूत इत्यर्थवादः । पुंसवनस्य नित्यत्त्वात् अत्रोवङादेशः छांदसः । **आश्वलायनस्तु** पुंसवनमिति गुणमेव प्रायुंक्ते । तच्च व्यक्तगर्भे । अस्ति गर्भः। इति निश्चिते व्यक्तिश्च तृतीये चतुर्थे वा मासे तिष्येण पुष्यनक्षत्रे कर्तव्यमित्यर्थः । **कालादर्शेऽपि**—

" तृतीये वा चतुर्थे वा मासि पुंसवनं भवेत् । गर्भव्यक्तौ स्मृतं तच्च लोकसिद्धाक्रिया हि सा॥ तत्पुंसवनं स्मृतं सा गर्भव्यक्तिक्रियाः तृतीयचतुर्थमासभवत्वेन लोकसिद्धचेत्यर्थः । **याज्ञवल्क्यः** (आ. ११)– " गर्भाधानमृतौ पुंसः सवनं स्पन्दनात्पुरा " । स्पन्दनाद्गर्भचलनात्पुरा कर्तव्यमित्यर्थः । **बृहस्पतिस्तु** गर्भस्पंदने पुंसवनमाह–"गर्भाधानमृतौ कुर्यात्सवनं स्पंदिते शिशौ " इति । **बैजावापः**– " मासि द्वितीये तृतीये वा पुरा स्पंदने " इति ।

पारस्करोऽपि (१।१४।१।२)— " मासि द्वितीये तृतीये वा यदहः पुन्नक्षत्रेण चंद्रमा युक्तः स्यात् " इति । पुन्नक्षत्राणि **रत्नकोशेऽ**भिहितानि— " हस्तो मूलश्रवणपुनर्वसुमृगशिरस्तथा तिष्यः पुमांसः " इति । **जातूकर्ण्यः**—

" द्वितीये वा तृतीये वा मासि पुंसवनं भवेत् । व्यक्ते गर्भेऽथवा कार्यं सीमंतेन सहाथ वा " ॥ **धर्मोद्योते** ॥ " तृतीये पुंसवः कृत्वा षष्ठे वा सप्तमेऽपि वा ।

" सीमंतोन्नयनं कार्यं न कुर्यात्पुंसवं यदि । " पुंसवं प्राग्विनिर्वर्त्य ततः सीमंतमुन्नयेत् " ॥ आधानसंस्कारमुख्येन सर्वेषां गर्भाणामयं संस्कार इति प्रथमगर्भ एव पुंसवनमित्येके । ' पुमांसं जनयति ' इत्यापस्तंबवचनं गर्भे गर्भे कर्तव्यतापरमिति पुत्रेप्सुना प्रतिगर्भं कर्तव्यमित्यन्ये । इति **पुंसवनम्** ।

अथ सीमंतोन्नयनम् । तत्र **बैजावापः**– "अथ सीमंतोन्नयनं मासि चतुर्थे पंचमे षष्ठे वा" इति । **याज्ञवल्क्यः** (आ. ११)–"षष्ठेऽष्टमे वा सीमंतो मास्येते जातकर्म च" । एते जाते जातकर्मेत्यर्थः । **लोकाक्षिः**–" तृतीये गर्भमासे सीमंतोन्नयनं कारयेत् " इति । **कालादर्शे**—

" सीमंतोन्नयनं तुरीये मासि षष्ठेऽष्टमे वा " इति । **शंखः** " गर्भस्पंदने सीमंतोन्नयनं यावद्वा प्रसवः" इति । एतदुक्तकालस्य केनचिन्निमित्तेन प्रतिबंधे सति द्रष्टव्यम् । तदाह **काश्यपः**—

" षष्ठे वा सप्तमे मासि सीमंतोन्नयनं भवेत् । अष्टमे नवमे मासि यावद्वा प्रसवो भवेत्" ॥ इति । एतच्च स्त्रीसंस्कारत्त्वात्सकृदेव कार्यम् । न प्रतिगर्भम् । तथा **चापस्तंबः**–" सीमंतोन्नयनं प्रथमे गर्भे चतुर्थे मासि" इति । **सांख्यायनगृह्येऽ**पि–"सप्तमे मासि प्रथमे गर्भे सीमंतोन्नयनम्" इति। **हारीतः**—

" सकृत्संस्कृतसंस्काराः सीमंतेन द्विजास्त्रियः । यं यं गर्भं प्रसूयंते स सर्वः संस्कृतो भवेत् " ॥ **देवलः**–" सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृता " इति । केचित्सीमंतोन्नयनं गर्भसंस्कार इति प्रतिगर्भमावर्त्तयंति । तथा च **विष्णुः**—

"सीमंतोन्नयनं कर्म तत्स्त्रीसंस्कार उच्यते। केचिद्गर्भस्य संस्काराद्गर्भे गर्भे प्रयुंजते" ॥ इति। एतेषां च पक्षाणां स्वस्वगृह्यानुसारेण व्यवस्था द्रष्टव्या।

अकृतसीमंतायाः प्रसवे **सत्यव्रत आह**—

"स्त्री यदाऽकृतसीमंता प्रसूयेत कथंचन। गृहीतपुत्रा विधिवत्पुनः संस्कारमर्हति" ॥

गार्ग्यः—

"यदि सीमंततः पूर्वं प्रसूयेत कथंचन। तदानीं पटके गर्भं स्थाप्य संस्कारमाचरेत् ॥

"मृतो देशांतरगतो भर्त्ता स्त्री यद्यसंस्कृता। देवरो वा गुरुर्वाऽपि सपिंडो वा समाचरेत्" ॥

इति **सीमन्तोन्नयनम्। अथ जातकर्म**। तत्र **विष्णुः**—"जातकर्म ततः कुर्यात्पुत्रे जाते यथोदितम्"। स्वगृह्य इति शेषः। ततः स्नानादनन्तरम्। तथा च **संवर्त्तः**—"जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते"। **जाबालिः**—"कुर्यान्नैमित्तिकं स्नानं शीताद्भिः कार्यमेव च"। **वसिष्ठः**—

"पुत्रजन्मनि यज्ञे च तथा संक्रमणे रवेः। राहोश्च दर्शने स्नानं प्रशस्तं नान्यथा निशि"। यज्ञेऽवभृतस्नानम्। **व्यासः**—

"रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः। नैमित्तिकं तु कुर्वीत स्नानं दानं च रात्रिषु ॥

"ग्रहणोद्वाहसंक्रांतियात्रार्तिप्रसवेषु च। दानं नैमित्तिकं ज्ञेयं रात्रावपि न दुष्यति ॥

"पुत्रजन्मनि यात्रायां शर्वर्यां दत्तमक्षयम्" ॥ रात्रिस्नाने विशेषमाह **सांख्यायनः**—

"दिवा यदाहृतं तोयं कृत्वा स्वर्णयुतं तु तत्। रात्रिस्नाने तु संप्राप्ते स्नायादनलसंनिधौ" ॥

मनुः (२।२९)—"प्राङ्नाभिवर्धनात्पुंसो जातकर्म विधीयते"। **संवर्त्तः** ॥ "मंत्रवत्प्राशनं चास्य हिरण्यमधुसर्पिषाम्"। **बैजावापः**—

"जन्मनोऽनंतरं कार्यं जातकर्म यथाविधि। दैवादतीतकालं चेदतीते सूतके भवेत् ॥

"यावन्न छिद्यते नालं तावन्नाप्नोति सूतकम्। छिन्ननाले ततः पश्चात्सूतकं तु विधीयते" ॥ इति।

व्यासः—

"अछिन्ननाभ्यां कर्त्तव्यं श्राद्धं वै पुत्रजन्मनि। आशौचोपरमे कार्यमथवा नियतात्मभिः" ॥

एतद् द्रव्याभावे वेदितव्यम्। श्राद्धमेतदामद्रव्येण हेम्ना वा कार्यम्। यथाह **प्रचेताः**—

"स्त्रीशूद्रस्वपचश्चैव[1] जातकर्मणि वाऽप्यथ। आमश्राद्धं तथा कुर्याद्विधिना पार्वणेन तु" ॥

स्वपचः स्वयंपचः। **बोधायनः**—

"अन्नाभावे द्विजाभावे प्रवासे पुत्रजन्मनि। हेमश्राद्धं संग्रहे च कुर्याच्छूद्रः सदैव हि" ॥

आदिपुराणे तु जातश्राद्धे पक्कान्ननिषेधो दर्शितः—

"जातश्राद्धे न दद्यात्तु पक्कान्नं ब्राह्मणेष्वपि। यस्माच्चांद्रायणाच्छुद्धिस्तेषां भवति नान्यथा" इति।

वृद्धयाज्ञवल्क्यः—

"कुमारजन्मदिवसे विप्रैः कार्यः प्रतिग्रहः। हिरण्यभूगवाश्वाजवासःशय्यासनादिषु ॥

"तत्र सर्वं प्रतिग्राह्यं कृतान्नं तु विवर्जयेत्। भक्षयित्वा तु तन्मोहात् द्विजश्चान्द्रायणं चरेत्" ॥

सकुल्यानां तु कृतान्नप्रतिग्रहे दोषाभावः "सूतके तु सकुल्यानां न दोषं मनुरब्रवीत्" इति स्मरणात्। तच्च कृतान्नं सकुल्यब्रह्मचारिव्यतिरिक्तविषयम्। अन्नदानं सकुल्येभ्योऽपि दद्यादित्याह **शंखः**—"सर्वेषां सकुल्यानां द्विपदचपुष्पदधान्यहिरण्यादि दद्यात्" इति। **व्यासः**—

---

१ कग–श्च।

" देवाश्च पितरश्चैव पुत्रे जाते द्विजन्मनाम् । आयांति तदहस्तस्मात्पुण्यं पूज्यं च सर्वदा ॥
"तत्र दद्यात्सुवर्णं तु भूमिं गां तुरगं रथम् । छत्रं छागं वस्त्रमाल्ये शयनं चासनं गृहम् ॥
"जाते कुमारे तदहः कामं कुर्यात्प्रतिग्रहम् । हिरण्यधान्यगोवासश्चित्रान्नगुडसर्पिषाम् " ॥

पराशरः (१२।२२)—

"खलयज्ञे विवाहे च संक्रांतौ ग्रहणे स्मृतौ । पुत्रे जाते व्यतीपाते दत्तं भवति चाक्षयम्" ॥

यत्तु " कुमारप्रसवे नाभ्यामच्छिन्नायां गुडतिलहिरण्यगोधान्यप्रतिग्रहेष्वदोषः " इति **शंख**-स्मरणं यदपि " प्राङ्नाभिच्छेदनात्संस्कारः पुण्यार्थान्कुर्वन्ति छिन्नायामाशौचम् " इति **हारीत**स्मरणं । यदपि " छिन्ने नाले ततः पश्चात्सूतकं तु विधीयते " । इति **बैजावाप**स्मरणं तत्सर्वं नालछेदात्पूर्वमेव जातकर्मश्राद्धं च कर्त्तव्यमित्येवंपरम् । तदाह **सत्यव्रतः**—" पुत्र-जन्मन्या नाभिकर्त्तनात्पुण्यं दानं कृतं जातकर्मश्राद्धं कुर्यात्" इति ॥ दानप्रतिग्रहयोस्तु कृत्स्नं जन्मदिनं प्रशस्तमेव बहुस्मृतिसंमतत्वात् । तत्र **वृद्धमनुः**—" जाते कुमारे तदहः कामं कुर्या-त्प्रतिग्रहम् " । **याज्ञवल्क्यः** (प्रा. १९)—" तदहर्न प्रदुष्येत पूर्वेषां जन्मकारणात् " **हर-दत्तश्च**— " जाते कुमारे पितॄणामामोदात्पुण्यं तदहः " । आमोदो हर्षः । **गौतमः**— " प्राङ्नाभिवर्धनात्पुण्यं तदहरित्येके " । **शंखश्च**—" कुमारप्रसवे नाभ्यामच्छिन्नायां गुडति-लहिरण्यवस्त्रगोधान्यप्रतिग्रहेष्वदोषस्तदहरित्येके " इति । **संग्रहेऽपि**— " पुण्यत्त्वात्पुत्रजन्माहे देयं ग्राह्यं सदा परैः " इति । **जातुकर्ण्यः**—

" मृताशौचे समुत्पन्ने पुत्रजन्म यदा भवेत् । आशौचे निर्गते कुर्याज्जातकर्म च नाम च ॥
"जननाशौचमुत्पन्ने पुत्रजन्म यदा भवेत् । जननानंतरं कुर्याज्जातकर्म यथाविधि" ॥ **पूर्णसंग्रहे**—
"ग्रहणे चैव गंगायां पुत्रस्यैव च जन्मनि । आशौचं नास्ति भुक्तोऽपि स्नानदानादिकं चरेत्" ॥ इति ।

प्रजापतिः—

"आशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत् । कर्त्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेन शुध्यति " ॥

स्मृत्यर्थसारे— " जाते पुत्रे पिता स्नात्वा रात्रौ संध्ययोर्ग्रहणे वा वृद्धिश्राद्धं कृत्वा जातकर्म कुर्यात् । आशौचांतरमध्ये च कुर्यात् " इति । आशौचांतरमध्ये कुर्यादिति पुत्रजन्मन्याहिताग्नेरिष्टिः **श्रूयते** (तै. सं. २।२।५)–

" वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते यदष्टाकपालो भवति गायत्रियैवैनं ब्रह्मवर्चसेन पुनाति यन्नवकपालस्त्रिवृतैवास्मिंस्तेजो दधाति यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति यदेकादशकपालस्त्रिष्टुभैवास्मिन्निंद्रियं दधाति यद्द्वादशकपालो जगत्यैवास्मिन्पशून् दधाति यस्मिञ्जात एतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इंद्रियावी पशुमान्भवति " । यदष्टाकपाल इत्यादिना द्वादशकपालः स्तूयते । जातस्य पूतत्वादिकमिष्टेः फलमिति दर्शयति । यस्मिन्नित्यादिना इयं चेष्टिः काम्या आथर्वादिकपुत्रगतब्रह्मवर्चसादिकाननासंवलितस्यैव जन्मनोऽधिकारहेतुत्वा-भ्युपगमाज्जातेष्टिः प्रवृत्तेश्च जीवत्पुत्रगतपुत्रत्वादिफलरागाधीनत्त्वात्पुत्रजन्माख्यनिमित्त-संयोगेन श्रुता।पीहेयमिष्टिर्यदीष्ट्या यदि पशुना यदि सोमेन यजेतामावास्यायां पौर्णमास्यां वेति विधिना आशौचानंतरं पर्वण्येव कर्तव्या जननानंतरमेव संशासनात् जातकर्म कर्त्तव्यम् ॥ **स्मृतिरत्ने**—

---

१ क्ष–तदन्नं ।

" सर्वैः स्वजन्मदिवसे स्नातैर्मंगलशालिभिः । गुरुदेवाग्निविप्राश्च पूजनीयाः प्रयत्नतः ॥

" स्वनक्षत्रे च पितरस्तथा देवाः प्रजापतिः । प्रतिसंवत्सरं यत्नात् कर्त्तव्यश्च महोत्सवः " ॥

इति **जातकर्म** । **अथ नामकरणम्** । तत्र **मनुः** (२।३०)—

" नामधेयं दशम्यां तु द्वादश्यां वाऽस्य कारयेत् । पुण्ये तिथौ मुहूर्ते वा नक्षत्रे वा गुणान्विते"॥ दशम्यां द्वादश्यां तिथौ जन्मदिनाद्दशमे द्वादशे वा दिवस इत्यर्थः । पुण्ये मुहूर्त्त इत्यन्वयः । **यमः**—

" नामधेयं दशम्यां तु द्वादश्यां वाऽस्य कारयेत् । पुण्ये नक्षत्रदिवसे मुहूर्तं वा गुणान्विते " ॥ **गोभिलः**– " दशरात्राच्छतरात्रात्संवत्सराद्वा नाम कुर्यात् " इति । **बह्वृचपरिशिष्टेऽपि**—

" जननाद्दशरात्रे शतरात्रे संवत्सरे वा नामकरणम् " इति । **याज्ञवल्क्यः** (आ. १२)—

" अहन्येकादशे नाम चतुर्थे मासि निष्क्रमः । षष्ठेऽन्नप्राशनं मासि चूडा कार्या यथाकुलम् "॥ **स्मृतिरत्ने**– " ततस्तु नाम कुर्वीत पितैव दशमेऽहनि ।

"यद्वा पितुरभावः स्याद्योग्यत्वमथापि वा । अन्यो वा कुलवृद्धो वा जातकर्मादि कारयेत्"॥ कुर्यादित्यर्थे । **शंखोऽपि**–" कुलदेवतानक्षत्राभिसंबंधं पिता कुर्यादन्यो वा कुलवृद्धः" इति । **व्यासः**–"नामधेयं दशम्यां तु केचिदिच्छंति सूरयः । द्वादश्यामथवा रात्रौ मासे पूर्णे तथापरे ॥ " अष्टादशेऽहनि तथा वदंत्यन्ये मनीषिणः " ॥ **पारस्करः**– (१।१७।१) " दशम्यामुत्थाप्य ब्राह्मणान्भोजयित्वा पिता नाम करोति" इति । **शङ्खोऽपि**–"दशम्यामुत्थाप्य पिंडविवर्धनं पितॄणां तत्र सांनिध्यम्" इति । उत्थाप्य पूर्वशय्यातः । पिंडविवर्धनं श्राद्धम् । नामस्वरूपमाह **मनुः** (२।३१)—

"मंगल्यं ब्राह्मणस्य स्यात्क्षत्रियस्य बलान्वितम् । वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितम् " ॥ मंगलबलधननिंदाप्रतिपादकान्येव तेषां क्रमेण नामधेयानि भवंतीत्यर्थः ।

स एवोपपदान्यथाह (२।१२)—

" शर्मवद्ब्राह्मणस्य स्याद्राज्ञो रक्षासमन्वितम् । वैश्यस्य पुष्टिसंयुक्तं शूद्रस्य प्रेष्य संयुतम् " ॥ शर्मरक्षापुष्टिप्रेष्यवाचकान्येव तेषां क्रमेण उपपदानीत्यर्थः । एवं चैव नामधेयानि भवंति । भद्रशर्मा शक्तिपालो धनपुष्टो हीनदास इति । अन्ये तु शर्मादीनामर्थपरत्वं मन्यंते । न तु शब्दपरत्वम् । अस्मिन्मते सुमत्रिः धृतराष्ट्रः निधिपालः पशुसंघ इत्यादीनि भवंति । **यमोऽप्युत्तरपदे** विशेषमाह—

"शर्मा देवश्च विप्रस्य वर्म त्राता च भूभुजः। भूतिर्दत्तश्च वैश्यस्य दास्यं शूद्रस्य कारयेत्"॥ इति । अत्रापि मंगल्यं ब्राह्मणस्येत्यादि **मनूक्तः** पूर्वपदे नामधेयानि द्रष्टव्यानि ।

एवं च भद्रशर्मा भद्रदेव इति वा ब्राह्मणस्य नामधेयम् । एवमितरेषामप्यूह्यम् । **आश्वलायनः**—

" शर्मांतं ब्राह्मणस्योक्तं वर्मांतं क्षत्रियस्य तु । गुप्तदासपदां तस्मादभिधा वैश्यशूद्रयोः " ॥ **आपस्तंबः**(६।१५।८)–"दशम्यामुत्थितायां स्नातायां पुत्रस्य नाम दधाति पिता माता" इति । उत्थितायां सूतिकागृहान्निष्क्रान्तायां स्नातायाम् । एवं च दशमेऽहनि नामकरणे सूतीगृहान्निर्गत्य स्नातव्यमित्युक्तं भवति । सूतिकाशुद्ध्यर्थमेकादशेऽहनि च स्नानं भवति । इतिशब्दश्चार्थे मातापितरौ सहितौ नाम धत्त इति । इममर्थं **मंत्रवर्णोऽप्याह**–(तै.सं.१।५।१०)" मम नाम प्रथमं

जातवेदः पिता माता च दधतुर्यदग्रे" इति। प्रकारांतरेण नाम्नो लक्षणमाहापस्तंबः(६।१५।९-१०)-"द्व्यक्षरं चतुरक्षरं वा नामपूर्वमाख्यातोत्तरं दीर्घाभिनिष्ठानान्तं घोषवदाद्यन्तरंतस्थमपि वा यस्मिन्स्वित्युपसर्गः स्यात्तद्धि प्रतिष्ठितमिति ब्राह्मणम्" इति। द्रव्यवाचकं सुबंतं पदं नाम तत्पूर्वं यस्य तन्नाम पूर्वमाख्यातं क्रियावाचि क्विबंतमुत्तरपदं यस्य नाम्नः तदाख्यातोत्तरम्। दीर्घाभिनिष्ठानां दीर्घोऽभिनिष्ठानश्चांते यस्य नाम्नः तत्तथोक्तम्। आभिनिष्ठान इति विसर्जनीयस्य पूर्वाचार्याणां संज्ञा। घोषवान्वर्गतृतीयश्चतुर्थो वा वर्ण आदिर्यस्य नाम्नः तद्घोषवदादि। अंतरंतस्थं अंतः मध्ये अंतस्था यरलवयस्य नाम्नस्तत्त्र्यक्षरस्य वार्दा गीर्दा इत्याद्युदाहरणं वा। उदकं ददातीति वार्दाः। गीरं ददातीति गीर्दाः। चतुरक्षरस्य हिरण्यदा इत्यादि। अपि वेति त्र्यक्षरादिविशेषणविकल्पः। यस्मिन्नाम्नि स्वित्ययमुपसर्गः स्यात्तन्नाम प्रतिष्ठितं आयुष्मद्यज्ञादिक्रियावच्च भवति। यथा सुजातः सुदर्शन इत्यादि। **बैजावापः**-"पिता नाम करोतीत्येकाक्षरं द्व्यक्षरं त्र्यक्षरं चतुरक्षरमपि मितं वा घोषवदाद्यंतरंतस्थं दीर्घाभिनिष्ठानान्तमिति कृदंतं कुर्यान्न तद्धितांतम्" इति च। **बौधायनः** विकल्पांतराण्याह (२।१।२८-२९)—"ऋष्यणूकं देवताणूकं वा यथा वैषां पूर्वपुरुषाणां नामानि स्युः" इति। अणूकमभिधायकम्। **शङ्खोऽपि**-"कुलदेवतानक्षत्राभिसंबन्धं पिता कुर्यात्" इति। स्त्रीणां नामधेयं **मनु**राह(२।३३)-"स्त्रीणां सुखोद्यमक्रूरं विस्पष्टार्थं मनोहरम्। मङ्गल्यं दीर्घवर्णान्तमाशीर्वादाभिधानवत्" ॥ इति। सुखोद्यं सुखोच्चारणक्षमम्। दीर्घवर्णः आकार ईकारो वा। अत एव **पारस्करः**(१।१७।४)-"अयुगाक्षरमाकारान्तं स्त्रियाः" इति। **शंखोऽपि**-"ईकारांतं स्त्रीणामेवं कृते नाम्नि शुचि तत्कुलं भवति" इति। **आपस्तंबोऽपि** (६।१५।११)-"अयुजाक्षरं कुमार्याः" इति। अयुजाक्षरं विषमाक्षरम्। अयुजाक्षरमिति छांदसम्। यथा श्रीः यशोदा पार्वतीति। अत्र यथास्वगृह्यं यथाकुलाचारं वा व्यवस्था। **इति नामधेयम्।** **कर्णवेधः सायणीये** दर्शितः—

"कार्तिके पौषमासे वा चैत्रे वा फाल्गुनेऽपि वा। कर्णवेधं प्रशंसंति शुक्ले पक्षे शुभे दिने॥
"शिशोरजातदंतस्य मातुरुत्संगसर्पिणः। सौचिको वेधयेत्कर्णौ सूच्या द्विगुणसूत्रया" ॥ इति।

इति कर्णवेधः। अथ निष्क्रमणम्। मनुः (२।३४)—"चतुर्थे मासि कर्तव्यं शिशोर्निष्क्रमणं गृहात्" इति। **स्मृतिचन्द्रिकायां** (पृ. २१-३१; पृ. २२. पं. १-३)-

"द्वादशेऽहनि कर्तव्यं शिशोर्निष्क्रमणं गृहात्। चतुर्थे मासि कर्तव्यं तथाऽन्येषां मतं विभो" ॥

निष्क्रमणानन्तरं कर्तव्यमाह **शङ्खः**—"चतुर्थे मासि कर्तव्यं बालस्यादित्यदर्शनम्"।

यमोऽपि-

"ततस्तृतीये कर्तव्यं मासि सूर्यस्य दर्शनम्। चतुर्थे मासि कर्तव्यं शिशोश्चंद्रस्य दर्शनम्"॥इति। तथा **स्मृत्यर्थसारे**-"निष्क्रामणं चंद्रसूर्यदेवतादर्शनं च द्वादशेऽहनि तृतीये चतुर्थे वा मासि कुर्यात्" इति। **इति निष्क्रमणम्॥ अथान्नप्राशनम्। तत्र मनुः** (२।३४)—

"षष्ठेऽन्नप्राशनं मासि यच्चेष्टं मंगलं कुले"। **यमः**-

"ततोऽन्नप्राशनं मासि षष्ठे कार्यं यथाविधि। अष्टमे वाऽपि कर्तव्यं यच्चेष्टं मंगलं कुले"॥

लौकाक्षिः-"षष्ठे मासेऽन्नप्राशनं जातेषु दंतेषु वा" इति। **शंखः**-"संवत्सरात्प्राक्संवत्सर इत्येके" इति। **आपस्तंबः** (५।१६।१)-"जन्मनोऽधिषष्ठे मासि ब्राह्मणान्भोजयित्वाऽऽशिषो

वाचयित्वा दधिमधुघृतमोदनमिति सङ्सृज्योत्तरैर्मंत्रैः कुमारं प्राशयेत्" इति। जन्मनोऽधि जन्मदिनमारभ्य दिवसगणनया षष्ठे मासे। यदाह **बृहस्पतिः**—

"पंचाशद्दिवसात् त्रिघ्नात् पश्चात् त्रिहतषष्टिकात्। अर्वागेवोत्तमा भुक्तिः" इति। अत्रापि यथास्वगृह्यं व्यवस्था। **मार्कंडेयः**—

"देवतापुरतस्तस्य धात्र्युत्संगगतस्य च। अलंकृतस्य दातव्यमन्नं पात्रे च कांचने॥
"मध्वाज्यकनकोपेतं प्राशयेत्पायसं ततः। कृतप्राशमयोत्संगात् धात्री बालं समुत्सृजेत्"॥

अन्नप्राशनानंतरं बालस्य जीविकापरीक्षामाह **स एव**—

"तस्याग्रतोऽथ विन्यस्य शिल्पभांडानि सर्वशः। शस्त्राणि चैव वस्त्राणि ततः पश्येत्तु लक्षणम्॥
"प्रथमं यत्स्पृशेद्बालस्ततो भांडं स्वयं तदा। जीविका तस्य बालस्य तेनैव तु भविष्यति"॥ इति।

इत्यन्नप्राशनम्। अथ **चूडाकरणम्**। तत्र **मनुः** (२।३५)—

"चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः। प्रथमेऽब्दे तृतीये वा कर्तव्यं श्रुतिचोदनात्"। द्विजातिग्रहणेन शूद्रपर्युदासः। चूडा शिखा। धर्मतः कुलधर्मतः। श्रुतिचोदनादिति श्रूयते हि— (ऋ. सं. ५।१।२२; तै. सं.)
"यत्र बाणाः संपतंति कुमारा विशिखा इव" इति। **याज्ञवल्क्यः** (आ. १२)— "षष्ठेऽन्नप्राशनं मासे चूडा कार्या यथाकुलम्"॥ इति **शौनकोऽपि**—"तृतीये वर्षे चौलं यथाकुलधर्मं वा" इति। यस्मिन्कुले यदा येन प्रकारेण चूडाकर्म तथा तथैव कार्यमित्यर्थः। **यमः**—
"ततः संवत्सरे पूर्णे चूडाकर्म विधीयते। द्वितीये वा तृतीये वा कर्तव्यं श्रुतिचोदनात्। यथाकुलं यथाशाखं चूडा कार्या द्विजातिभिः"॥ **बैजावापः**—"त्रिवर्षे चूडाकरणम्" इति। **शंखः**—"तृतीये वर्षे चूडाकर्म पंचमे वा"। इति। **लौगाक्षिः**—"तृतीयस्य वर्षस्य भूयिष्ठे गते चूडां कारयते दक्षिणतश्चूडा वासिष्ठानां वामतो भारद्वाजानामुभयतः काश्यपानाम्"॥ **मृकंडुः**—"पंच चूडा आंगीरसो वाजिमेके मंगलार्थं शिखिनोऽन्ये यथा कुलधर्मं भवति"। वाजिः केशपंक्तिः। अन्ये तु शिखामात्रं यत्रकश्चन मंगलार्थं कुर्वंतीत्यर्थः। **आपस्तंबः** (६।१६।६–७)—"यथर्षि शिखा निदधाति। यथा वैषां कुलधर्मः स्यात्" इति। यथर्षि यावतो ऋषयः स्वप्रवरे तावतीः शिखा निदधाति। एकार्षेयस्यैका शिखा त्र्यार्षेयस्य द्वे शिख इत्यादि। अथवा येन प्रकारेण येषां कुलजानां धर्मः प्रवर्तते तथा शिखा कर्तव्येत्यर्थः। अत्र च जन्मप्रभृति वर्षसंख्या वेदितव्या। "जन्मनोऽधितृतीये वर्षे चौलं पुनर्वस्वोरिति" इत्यापस्तंबस्मरणात्। (गृ. १६।३) अधितृतीये अर्धाधिकतृतीये अत्र पुनर्वसुग्रहणं विहितनक्षत्रोपलक्षणार्थम्। अत एव **व्यासः**—

"अश्विनीश्रवणस्वातीचित्रा पुष्यपुनर्वसु। धनिष्ठारेवतीज्येष्ठामृगहस्तेषु कारयेत्॥
"नक्षत्रे तु न कुर्वीत यस्मिंजातो भवेन्नरः। न प्रोष्ठपदयोः कार्यं नैवाग्नेये च भारत॥
"तिथिं प्रतिपदं रिक्तां विष्टिं चैव विसर्जयेत्। वारं शनैश्चरादित्यभौमानां रात्रिमेव च"॥ इति।

गर्गः—

"पुत्रचूडाकृतौ माता यदि सा गर्भिणी भवेत्। शस्त्रेण मृत्युमाप्नोति तस्मात् क्षौरं विवर्जयेत्"॥

नारदः—

"सूनोर्मातरि गर्भिण्यां चूडाकर्म न कारयेत्। पंचाब्दात्प्रागथोर्ध्वं तु गर्भिण्यामपि कारयेत्॥

"आरभ्याधानमाचौलात्कालातीते तु कर्मणाम् । आज्यव्याहृतिभिर्हुत्वा प्रायश्चित्तं यथाचरेत् ॥
"एतेष्वेकैकलोपे तु पादकृच्छ्रं समाचरेत् । चौलकेऽर्धं तु सर्वत्र मत्या तु द्विगुणं चरेत्" ॥

इति **चौलकर्म** । अथ **स्त्रीणां जातकर्मादि** । तत्र **याज्ञवल्क्यः** (आ. १३)—

"तूष्णीमेताः क्रिया स्त्रीणां विवाहश्च समंत्रकः" । एता जातकर्मादिचूडाकरणपर्यंताः क्रियास्तूष्णीं विना मंत्रेण कार्या इत्यर्थः । **मनुरपि** (२।६६)—

"अमंत्रका तु कार्येयं स्त्रीणामावृदशेषतः । संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम्" ॥

आवृत् जातकर्मादिक्रिया । **गोभिलस्तु** विशेषमाह—"तूष्णीमेताः क्रियाः स्त्रीणाममंत्रेण तु होमः" इति । स्त्रीणामप्युक्तकालातिक्रमे प्रायश्चित्तमाह **कात्यायनः**—

"संस्कारा अतिपद्येरन्स्वकालाच्चेत्कथंचन । हुत्वैतदेवकर्तव्यं यत्तूपनयनादयः" ॥इति । एतदेव सर्वप्रायश्चित्तमेव । सर्वप्रायश्चित्तमपि तेनैवोक्तम् । "सर्वप्रायश्चित्तं च पंचभिः प्रत्यृचं 'त्वन्नो अग्ने' इति द्वाभ्याम् 'अयाश्चाग्ने' 'येशतम्' 'उदुत्तम्' इति च" इति । स्त्रीणामुपनयनकालातिपत्तौ व्रात्यप्रायश्चित्तं भवत्येवेति **चंद्रिकायां** (पृ. २४ पं. ७) । स्त्रीणां विवाह एवोपनयनमित्याह **मनुः** (२।६७)—

"वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृतः । पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिक्रिया" ॥ इति । तत्र गुरुकुलवासोऽग्निकार्यं चोत्तरार्धेनोक्तः । पतिसेवा गुरुशुश्रूषा गृहकृत्यकरणमग्निपरिचर्येत्यर्थः । अतश्चात्रापि तत ऊर्ध्वं कामचरादिवर्जनं "प्रागुपनयनात्कामचारवादेत्यादि" (गौतमसू. २।१।२) च समानम् । यत्तु **हारीतेनोक्तं** "द्विविधा स्त्रियो ब्रह्मवादिन्यः सद्योवध्वश्च । तत्र ब्रह्मवादिनीनामुपनयनमग्नींधनं वेदाध्ययनं स्वगृहे च भिक्षाचर्या" इति "सद्योवधूनां तूपस्थिते विवाहे कथंचिदुपनयनं कृत्वा विवाहः कार्यः" इति तत्कल्पांतराभिप्रायम् । तथा च **यमः**—

"पुराकल्पे तु नारीणां मौंजीबंधनमिष्यते । अध्यापनं च वेदानां सावित्रीवचनं तथा ॥
"पिता पितृव्यो भ्राता वा नैनामध्यापयेत्परः ।
"स्वगृहे चैव कन्याया भैक्षचर्या विधीयते । वर्जयेदजिनं चीरं जटाधारणमेव च" ॥ इति ।

स्मृत्यर्थसारे—"एते संस्कारा बीजगर्भदोषापनुत्तये यथास्वाचारं कार्याः स्त्रीणां तूष्णीं स्युर्विवाहस्तु समंत्रकः । स्वकालातिक्रमे व्याहृतिहोमपूर्वं कार्याः । एतेषामेकैकलोपे पादकृच्छ्रं मत्यालोपे द्विगुणः" इति । इति **जातकर्मादि** ।

अथाक्षराभ्यासः । **मार्कंडेयः**—

"प्राप्ते तु पंचमे वर्षे ह्यप्रसुप्ते जनार्दने । षष्ठीं प्रतिपदं चैव वर्जयित्वा तथाऽष्टमीम् ॥
"रिक्तां पंचदशीं चैव सौरभौमदिने तथा । एवं सुनिश्चिते काले विद्यारंभं तु कारयेत्" ॥

सायणीये—

"उत्तरायणगे सूर्ये कुंभमासं विवर्जयेत् । बालस्य पंचमे वर्षे प्राप्ते भानौ कुलीरगे ॥
"आरभेताक्षरं तत्र शुभकाले यथोदिते ॥
"वारे दिनेशभृगुपुत्रबृहस्पतीनां विद्वानसौ भवति योऽपि विमूढबुद्धिः ॥
"चंद्रे च चंद्रतनये च भृशं च सत्वविघ्नंकरोत्यवनिजो विजयो विनाशम् ॥
"वैष्णवादित्यतिष्येंदुश्रविष्ठास्वातिवारुणाः । मैत्रेंद्रहस्तचित्राश्च विद्यारंभेषु पूजिताः" ॥

मार्कंडेयः—

" पूजयित्वा हरिं लक्ष्मीं देवीं चैव सरस्वतीम् । स्वविद्यासूत्रकारांश्च स्वां विद्यां च विशेषतः ॥
" एतेषामेव देवानां नाम्ना तु जुहुयाद्घृतम् । दक्षिणाभिर्द्विजेन्द्राणां कर्तव्यं चात्र पूजनम् ॥
" प्राङ्मुखो गुरुरासीनो वारुणाभिमुखं शिशुम् । अध्यापयेत्तु प्रथमं द्विजाशीर्भिः सुपूजितम् ॥
"ततः प्रभृत्यनध्यायान्वर्जनीयान् विवर्जयेत् । अष्टमीद्वितयं चैव पक्षान्ते च दिनद्वयम्" ॥ इति ।

इत्यक्षराभ्यासः ॥ " **अथानुपनीतधर्माः** । **अत्रापस्तम्बः** (२।१५।१९–२५)–"आऽन्नप्राशनाद्गर्भा नाप्रयता भवंत्या परिसंवत्सरादित्येके यावता वा दिशो न प्रजानीयुः । ओपनयनादित्यपरम् । अत्र ह्यधिकारः शास्त्रैर्भवति । सा निष्ठा । स्मृतिश्च " इति । अन्नप्राशनात्प्राक् गर्भा बाला अप्रयता न भवंति रजस्वलादि स्पर्शेऽपि । यावत्संवत्सरो न परिपूर्यते तावन्नाप्रयता इत्येके मन्यन्ते । यावद्वा दिग्विभागज्ञानं नास्ति तावन्नाप्रयताः । उपनयादर्वाङ्नाप्रयता इत्यपि दर्शनम् । अत्रोपपत्तिरत्र ह्यधिकार इति हि यस्मादत्र ह्युपनयने सति विधिनिषेधशास्त्रैरधिकारो भवति । सा निष्ठा तदुपनयनमवसानमधिकारस्यास्मिन्नर्थे स्मृतिश्चास्तीत्यर्थः । तथा **दक्षः**—

" जातमात्रः शिशुस्तावद्यावदष्टसमा वयाः । सोऽपि गर्भसमो ज्ञेयो गर्भमात्रप्रकाशितः ॥
"भक्ष्याभक्ष्ये तथा पेये वाच्यावाच्ये तथाऽनृते । अस्मिन्काले न दोषः स्यात्स यावन्नोपनीयते ॥
" उपनीते च दोषोऽस्ति क्रियमाणैर्विगर्हितैः " ॥ इति ।

न चापेय इत्यनेन मद्यादिपाने न दोष इति शंकनीयम् । 'वर्जयेत्' इत्यनुवृत्तौ 'नित्यं मद्यं ब्राह्मणः' इति **गौतम**स्मरणात् (२।२५) । तत्र च नित्यग्रहणमनुपनीतस्यापि प्रतिषेधार्थं न च प्रागुपनयनात्ब्राह्मण्यमेव नास्तीत्यपि शंकनीयम्—

"ब्राह्मण्यां ब्राह्मणेनैव ह्युत्पन्नो ब्राह्मणः स्मृतः। सवर्णेभ्यः सवर्णासु जायन्ते हि स जातयः"॥

इति **हारीतयाज्ञवल्क्या**भ्यामुत्पत्तिमात्रेण साजात्यस्याभिधानात् (आ. ९०) " गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनयनमिति " **मनुना** (२।३६) ब्राह्मणस्य सत उपनयनविधानाच्च । **गौतमः** (२।१–१०)– " प्रागुपनयनात्कामचारवादभक्षोऽहुताद्ब्रह्मचारी यथोपपादितमूत्रपुरीषो भवति । नास्याऽऽचमनकल्पो विद्यते । अन्यत्रापमार्जनप्रधावनावोक्षणेभ्यो न तदुपस्पर्शनादाशौचं । न त्वेवैनमग्निहवनबलिहरणयोर्नियुंज्यात् । ब्रह्माभिव्याहारयेदन्यत्र स्वधानिनयनादुपनयनादिर्नियमः " । कामाचार इच्छाचरणम् । कामवादोऽश्लीलानृतादिभाषणम् । कामभक्षः पर्युषितादिभक्षणम् । एतेषु प्रागुपनयनान्न दोषः । एतच्च महापातकव्यतिरिक्तविषयं " स्यात्कामचारवादभक्षोक्तिर्महतः पातकादृत " इति **स्मरणात्** । तत्करणे प्रायश्चित्तं भवत्येव ।

" आशीतिर्यस्य वर्षाणि बालो वाऽप्यूनषोडशः । प्रायश्चित्तार्धमर्हन्ति स्त्रियो रोगिण एव च ॥
"उनैकादशवर्षस्य पंचवर्षात्परस्य च । चरेद्गुरुः सुहृच्चैव प्रायश्चित्तं विशुद्धये ॥
" अतो बालतरस्यास्य नापराधो न पातकम् । राजदंडश्च नास्यातः प्रायश्चित्तं च नेष्यते " इति ॥

अत्र यद्यपि सामान्येन प्रागुपनयनादित्युक्तं तथापि षष्ठाद्वर्षात्प्रागेव कामाचारादि द्रष्टव्यम् । ततः परं पित्रादिभिर्वर्णधर्मेषु नियोक्तव्यः । अनियुञ्जानास्तु प्रायश्चित्तिनो दण्ड्याश्चेति **मिताक्षर्यां** क्वचित्कामभक्षणस्यापवादमाह । अहुताद्धुतशिष्टं चरुपुरोडाशादि तदत्तीति । अहुतात् न हुताद्यथाऽयमहुतात्स्यात्तथा पित्रा नियुज्येतेत्यर्थः । तथा च **यमः**—

" वैश्वदेवं पुरोडाशमग्निमध्याच्च यद्धुतम् । यद्याच्छिशुराकृष्य मात्रा रक्ष्यः प्रयत्नतः" ॥ इति । वैश्वदेवं वैश्वदेवशिष्टम् । कामाचारस्यापवादः । ब्रह्मचारीति गर्भाष्टमादावुपनयनातिक्रमेऽपि स्त्रीषु न प्रसजेत् न च ब्रह्मचारीत्येतत ब्रह्मचारिधर्मप्राप्त्यर्थमिति शंकनीयम् ।

" न ह्यस्य विद्यते कर्म किञ्चिदामौंजीबन्धनात् । वृत्त्या शूद्रसमस्तावद्यावद्वेदे न जायते " इति वसिष्ठस्मरणात् (२।६) । यथोपपादेति मूत्रपुरीषौ यथोपपद्यते तिष्ठतः प्राङ्मुखस्य पथि कुड्यादौ तथैव तौ कुर्यात् । नास्येति अस्यानुपनीतस्य कल्पप्रतिषेधात् आचमनमात्रमनुज्ञायते । तच्च " स्त्रीशूद्रौ तु सकृत् सकृत् " इति " स्त्रीशूद्रेण समस्तावद्यावद्वेदे न जायते " इति स्मरणात् । अन्यत्रेति अवमार्जनमुच्छिष्टलिप्तस्य हस्तादेः सोदकेन पाणिना शोधनम् । प्रधावनं गुदे शोधनम् । अवोक्षणं रजस्वलादिस्पृष्टस्य प्रोक्षणम् । यद्यप्यवमार्जनादयः आचमनकल्पेनान्तर्भवंति तथापि पर्युदासमुखेन ते विधीयन्ते । एतन्त्रितयं षष्टवर्षात्प्रागिति बालस्य भूतपिशाचादिभ्यो रक्षार्थं कुर्यात् । तदाह शातातपः– " बालानां पंचमवर्षाद्रक्षार्थं शौचं कुर्याच्छुध्यर्थं परतः स्वयमेव कुर्यात " इति । पञ्चवर्षादूर्ध्वं चंडालादिस्पर्शे स्नापयितव्यः । गौतमः (२।७)– "न तदुपस्पर्शनादाशौचं" । षष्टवर्षात्प्राक्चण्डालादिस्पृष्टस्य तस्यानुपनीतस्याशुचित्वं । न तस्योपस्पर्शनेन स्नानं भुक्तोच्छिष्टस्य कृतमूत्रपुरीषस्य चोपस्पर्शनेऽपि नाचमनमिति हरदत्तः । स्मृतिचंद्रिकायां तु विशेषो दर्शितः । आचमनकल्पप्रतिषेधात्स्त्रीशूद्रवदाचमनमात्रमवमार्जनादिकं चास्ति तावन्मात्रेण तस्य प्रयतत्वात्तदुपस्पर्शनात्पित्रादेरशुद्धिर्नास्ति । न तु चण्डालादिस्पृष्टस्य तस्य स्पर्शेऽपि गौतमवादे चण्डालादेरप्रकृतत्वात् " पतितचण्डालसूतिकोदक्याशवस्पृष्टितत्स्पृष्टयुपस्पृष्टयुपस्पर्शने सचैलम् " इत्यत्र (अ. १४ सु. २७) वयोविशेषानभिधानाच्चेति न त्वेवेनमग्निहवनबलिहरणयोर्नियुंज्यानमनुपनीतमग्निहवने औपासनहोमादौ वैश्वदेवे यद्बलिहरणं तत्र च न नियुञ्जीत तस्य मंत्रविहीनत्वादित्यभिप्रायः । न च मंत्रान्ग्राहयित्वा विनियोग इत्याह (२।८) " न ब्रह्माभिव्याहारयेदन्यत्र स्वधानिनयनात् "इति । स्वधानिनयनं प्रेतकर्म । तत्रानुपनीतस्यापि मंत्राध्ययनमविरुद्धमित्यर्थः । मनुरपि (२।१७१–१७२)––

"न ह्यस्मिन्युज्यते कर्म किञ्चिदामौंजिबंधनात । नाभिव्याहारयेद् ब्रह्म स्वधानिनयनादृते" ॥ इति । स्मृत्यर्थसारे–– " उपनयनात्प्रागुच्छिष्टादावप्रयता न स्युः महापातकवर्जं तेषां चण्डालादिस्पर्शे सचैलस्नानं प्रागन्नप्राशनादभ्युक्षणं प्राक्चौलादाचमनं पश्चात्स्नानमित्येके पित्रोः स्वधानिनयनादृते च मन्त्रान्न ब्रूयुः " इति । आपस्तंबः (२।१५।१९–२५)–" अन्नप्राशनादूर्ध्वमाशयन, अर्भका परिसंवत्सरादित्येक यावता वा दिशो न प्रजानीयुरोपनयनादित्यपरम् । अत्र ह्यधिकारः शास्त्रैर्भवति मा तिष्ठति पित्रोः स्वधानिनयनादृते च मंत्रान्न ब्रुयुरिति" ॥ वसिष्ठः–(२।७)– "अन्यत्रोदककर्मस्वधापितृसंयुक्तेभ्यः" इति । इत्यनुपनीतधर्माः ॥

अथोपनयनम् । तत्र मनुः (२।३६)––

"गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम् । गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः" ॥ गर्भाष्टमे गर्भादारभ्याष्टमे उपनयनमेवोपनायनम् । अब्दसंख्यानियमस्यायमभिप्रायः । ब्रह्मक्षत्रविशां गायत्रीत्रैष्टुभजागतैः छंदोभिः सहजत्वं श्रूयते । (तै. सं. ७।१।१।४)–' ' गायत्रीछंदो रथंतरꣳ साम ब्राह्मणो मनुष्याणामजः पशूनां तस्मात्ते मुख्या मुखतो ह्यसृज्यंतेति ।

१ क्ष–यो दया ।

त्रिष्टुप्छंदो बृहत्साम राजन्यो मनुष्याणामविः पशूनामिति । जगती छंदो वैरूपं साम वैश्यो मनुष्याणां गावः पशूनाम्” इति च । गायत्र्यादिभिरेतेषामुपनयनं च स्मर्यते (वासिष्ठे ४।३)– “गायत्र्या ब्राह्मणमुपनयीत । त्रिष्टुभा राजन्यं जगत्या वैश्यम्” इति । ततश्चोपनयनाब्दा अपि स्वस्वच्छंदोक्षरसमसंख्या भावितुमर्हतीति छन्दसां चाक्षरसंख्या श्रूयते (तै. सं. ३।४।९।७)– “अष्टाक्षरा गायत्री एकादशाक्षरा त्रिष्टुप् द्वादशाक्षरा जगती” इति । एकैकपादाभिप्रायेयम् । तथा च श्रुतिः । (तै. सं. २।५।१०।३)–“ चतुर्विंशत्यक्षरा गायत्री चतुश्चत्वारिंशदक्षरा त्रिष्टुप् अष्टाचत्वारिंशदक्षरा जगती ” इति । हारीतः— “ छंदःसु पादाक्षरसमुदायवदब्दसमूहे उपनयनम् ” इति । गायात्र्यादिपादाक्षरसंमितेऽब्द इत्यर्थः । ततश्चाष्टमैकादशद्वादशेष्वेव वर्षेषु ब्राह्मणक्षत्रियवैश्यानां मुख्यमुपनयनमिति । याज्ञवल्क्यः (आ. १४)—

“गर्भाष्टमेऽष्टमे वाब्दे ब्राह्मणस्योपनायनम् । राज्ञामेकादशे सैके विशामेके यथाकुलम्” ॥ गर्भाज्जन्मनो वाऽरभ्याष्टमे । विशः वैश्यस्य । सैके एकादशे द्वादश इत्यर्थः । कुलस्थित्या केचिदुपनयनमिच्छन्ति । श्रुतिरपि–“अष्टवर्षं ब्राह्मणमुपनयीत” इति । अत्रापस्तम्बः (४।१०।२-४)– “ गर्भाष्टमेषु ब्राह्मणमुपनयीत गर्भैकादशेषु राजन्यं गर्भद्वादशेषु वैश्यं वसन्तो ग्रीष्मः शरदृतवो वर्णानुपूर्व्येण ” इति । गर्भ अष्टमो एषामिति गर्भाष्टमाः । जननप्रभृति सप्त गृह्यन्ते । एवं यद्यपि सप्तस्वप्युपनयनं प्राप्तं तथापि जन्मादित्रिषु चौलान्तसंस्कारैरवरुद्धत्वाच्चतुर्थेऽप्यक्षराभ्यासाभावेनासामर्थ्यान्न क्रियते अतोऽत्रोपादेयगता बहुत्वसंख्या कपिञ्जलन्यायेन गर्भषष्ठसप्तमाष्टमेषु त्रिष्वेवावतिष्ठते । एवं च “ वर्षत्रयं मुख्यकाल ” इत्यापस्तम्बमतिरित्येके । अन्ये तु गर्भाष्टमे एव वर्षे न तु षष्ठसप्तमयोः तयोर्गर्भाष्टमत्वाभावाद्बहुवचनं छान्दसमिति वदन्ति । अत्र यथाकुलाचारव्यवस्था । गौतमः (१।६।८)— “ उपनयनं ब्राह्मणस्याष्टमे एकादशद्वादशयोः क्षत्रियवैश्ययोर्गर्भादिसंख्यावर्षाणाम् ” इति । काम्योपनयनमाह स एव (१।७)– “ नवमे पञ्चमे वा काम्यम् ” इति । यदाहांगिराः— “ब्रह्मवर्चसकामस्य पञ्चमेऽब्देऽग्रजन्मनः । आयुष्कामस्य नवमे कार्यं मौञ्जीनिबन्धनम्”॥ इति । मनुः (२।३७)—

“ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे । राज्ञो बलार्थिनः षष्ठे वैश्यस्यार्थार्थिनोऽष्टमे”॥

अंगिराः—

“ षष्ठे तथा द्वादशे च राज्ञो वृद्धिबलायुषोः । इहायुषोस्तु वैश्यस्य ह्यष्टमे च चतुर्दशे”॥ ईहा कृष्यादिविषया चेष्टा । स्मृतिरत्ने—

“ सप्तमे चाष्टमे वर्षे नवमे दशमे तथा । एकादशे द्वादशे च ह्युपनीयुर्द्विजातयः ॥

“ ब्रह्मवर्चसमायुष्यं तेजोन्नाद्यं तथैव च । पशूंश्च कामयाना वै प्राप्नुवन्ति यथाक्रमम् ”॥ इति । बोधायनोऽपि (२।५।५–६)— “ सप्तमे ब्रह्मवर्चसकाममष्टम आयुष्कामं नवमं तेजस्कामं दशमेऽन्नाद्यकाममेकादश इंद्रियकामं द्वादशे पशुकामं त्रयोदशे मेधाकामं चतुर्दशे पुष्टिकामं पंचदशे भ्रातृव्यन्तं षोडशे सर्वकामम् ” इति । तथा च भरद्वाजः–“ वसन्ते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यं वर्षासु रथकारम् ” इति । चन्द्रिकायां—

“ ऋतुर्वसन्तः शुभदोऽग्रजन्मनां ग्रीष्मो नृपाणां च शरद्विशां च ॥

" व्रतस्य बंधे यदि वाऽखिलानां माघोदयः पञ्च भवन्ति मासाः " ॥

ज्योतिःशास्त्रे च—"माघादिषु तु मौञ्जीबन्धः पञ्चसु शस्यत" इति ॥ **धर्मसारसुधानिधौ**—

" विप्रं वसन्ते क्षितिपं निदाघे वैश्यं घनान्ते व्रतिनं विदध्यात् ॥

" माघादिशुक्रान्तकपञ्चमासाः साधारणा वा सकला द्विजानाम्" ॥ **वृद्धवसिष्ठः**—

" विप्रस्य क्षत्रियस्यापि मौञ्जी स्यादुत्तरायणे । दक्षिणे तु विशां कुर्यान्नानध्याये न संक्रमे ॥

" अनध्यायेऽपि कुर्वीत यस्तु नैमित्तिको भवेत् ॥

" ज्येष्ठे मासि विशेषेण सर्वज्येष्ठस्य चैव हि । उपनीतस्य पुत्रस्य जडत्वं मृत्युरेव च" ॥

वृद्धगार्ग्यः—

" स्वाध्यायवियुजो घस्राः कृष्णप्रतिपदादयः । प्रायश्चित्तनिमित्ते तु मेखलाबन्धने मताः " ॥

घस्राः वासराः ॥ **व्यासः**—

" विप्रश्चातीतकालश्चेच्छस्ता शुक्ला चतुर्दशी । कृष्णे तु प्रतिपच्चेष्टा प्रायश्चित्तोपनायने" ॥

अपरार्के—

" नष्टे चन्द्रेऽष्टमे शुक्रे निरंशे चैव भास्करे । कर्तव्यं नोपनयनं नानध्याये गलग्रहे ॥

" राशेः प्रथमभागस्थो निरंशः सूर्य उच्यते । त्रयोदशीचतुष्कं तु सप्तम्यादित्रयं तथा ॥

" चतुर्थ्येकादशी प्रोक्ता नव[1] चैते गलग्रहाः ॥

" गुरुर्भृगुसुतो धात्रीपुत्रः शशधरात्मजः । स्युरेते ऋग्यजुःसामाथर्वणामधिपाः क्रमात्" ॥

धात्रीपुत्रोऽङ्गारकः । शशधरात्मजो बुधः । तद्वासरे तच्छाखीयस्य उपनयनं कर्तव्यमित्यर्थः ।

तथा **सायणीये**—

" गुरोः कवेर्लोहितस्य अंगिरस्य च वासराः । ऋग्यजुःसामाथर्वणां शस्ताः स्युर्व्रतबंधने " ॥

वृद्धगार्ग्योऽपि—" बुधत्रयेंदुवाराणि[2] शस्तानि व्रतबंधने " । **स एव**

" शाखाधिपे बलिनि केन्द्रगते तु मौञ्जीबन्धस्तदीयदिवसेषु सुखाय क्लृप्तः ॥

" अस्मिन्बलेन रहिते तु पुनर्द्विजानां स्याद्वर्णसंकर इति प्रवदन्ति तज्ज्ञाः ॥

" हस्तत्रये पुष्यधनिष्ठयोश्च पौष्णाश्विसौम्यादितिविष्णुभेषु ॥

" शस्ते तिथौ चन्द्रबलेन युक्ते कार्यो द्विजानां व्रतबन्धमोक्षौ " ॥

द्विजत्वकारणमाह **याज्ञवल्क्यः** (आ. ३९)—

" मातुर्यदग्रे जायन्ते द्वितीयं मौन्जिबन्धनात् । ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः स्मृताः" ॥

वसिष्ठोऽपि (२।३)— " मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धने " । इति । **मनुरपि** (२।१६९–१७०)—

" मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धने । तृतीयं यज्ञदीक्षायां द्विजस्य विधिचोदितम् ॥

"तत्र यद्ब्रह्मजननं मौन्जीबन्धनचिन्हितम् । तत्रास्य माता सावित्री पिता त्वाचार्य उच्यते" ॥

आचार्यस्य पितृत्वे हेतुमाह **स एव** (२–१७)—

" वेदप्रदानादाचार्यं पितरं परिचक्षते । न ह्यस्य विद्यते कर्म किञ्चिदामौन्जिबन्धनात् " ॥

वेदप्रदानात्सर्ववेदस्वरूपसावित्रीप्रदानादुपनयनाख्यम् । जन्मप्रदानादिति यावत् ।

आपस्तम्बः (१।१।१६–१८)—

" स हि विद्यातस्तं जनयति तच्छ्रेष्ठं जन्म शरीरमेव मातापितरौ जनयतः " ॥ इति ।

अथ गौणकालाः । तत्र मनुः (२।३८)—

---

१ **क**–अष्टावेते । २ **ख**–बुधस्यैव ।

" आ षोडशाद् ब्राह्मणस्य सावित्री नातिवर्तते । आ द्वाविंशात्क्षत्रबन्धोरा चतुर्विंशतेर्विशः " ॥ सावित्री उपनयनम् । क्षत्रबन्धोः क्षत्रियस्य । आकारोऽत्राभिविधिवचनः । मुख्यकल्पसंख्या द्वैगुण्यानुगुण्यात्तदाह **व्यासः**—

"औपनायनिकः कालः परः षोडशवार्षिकः । द्वाविंशतिः परोऽन्यस्य स्याच्चतुर्विंशतिः परः"॥ इति। परः अन्तिमः । तत ऊर्ध्वं गौणकालोऽपि नास्ति इत्यर्थः । **याज्ञवल्क्यः** (आ. ३७)—

" आ षोडशाच्च द्वाविंशाच्चतुर्विंशाच्च वत्सरात् । ब्राह्मणक्षत्रियविशामौपनायनिकः परः " ॥ **आपस्तम्बः** (१।१।२७)—

" आ षोडशाद् ब्राह्मणस्यानात्यय आ द्वाविंशात्क्षत्रियस्य चतुर्विंशाद्वैश्यस्य " । **गौतमो**ऽपि (१।१३)–" आषोडशाद्ब्राह्मणस्य पतिता सावित्री " इति । **मनुः** (२।३९)—

" अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः । सावित्रीपतिता व्रात्या भवंत्यार्यविगर्हिताः " ॥ अतः षोडशादिभ्यः । असंस्कृतः अनुपनीतः । सावित्रीपतिताः सावित्र्युपदेशहीनाः । व्रात्याः व्रात्यनामानः । **स एव** (२।४०)—

"नैतैरपूतैर्विधिवदापद्यपि कदाचन । ब्राह्मान् यौनांश्च संबन्धान्नाचरेत् ब्राह्मणैः सह"॥ अपूतैरकृतप्रायश्चित्तैः । ब्राह्मान् अध्ययनाध्यापनादीन् । यौनान्कन्यादानप्रतिग्रहादीन् । **चन्द्रिकायाम्**–

" व्रात्यस्याकृतचित्तस्य न कार्यमुपनायनम् । अध्यापनं याजनं च विवाहादि विवर्जयेत् " ॥ **यमः**– " समतिक्रान्तकालाश्च पतिताः सर्व एव ते ॥

"ब्राह्मणक्षत्रियविशां कालश्चेदत्यगादयम् । सावित्रीपतिता व्रात्याः परिहार्याः प्रयत्नतः"॥ इति। **बोधानायनो**ऽपि–"अत उर्ध्वं पतितसावित्रीका भवन्ति । नैतानुपनयेयुर्नाध्यापयेयुर्न याजयेयुर्न विवाहयेयुः" । एतानकृतप्रायश्चित्तानिति शेषः । प्रायश्चित्तमपि **याज्ञवल्क्येनोक्तम्** (आ. ३८)–

"अत ऊर्ध्वं भवंत्येते सर्वधर्मबहिष्कृताः। सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोः"॥ व्रात्यस्तोमो व्रात्यानां प्रायश्चित्तार्थः क्रतुः। तं विहायान्यत्र नाधिकारः । तत्र त्वपत्नीकस्यानधीतवेदस्याकृताधानस्य वचनादधिकारः । **वसिष्ठस्तु** प्रायश्चित्तान्तरमप्याह (११।७६–७९)—

"पतितसावित्रीक उद्दालकव्रतं चरेत् द्वौ मासौ यावकेन वर्तयेन्मासं पयसाऽर्धमासमामिक्षयाऽष्टरात्रं घृतेन षड्रात्रमयाचितं त्रिरात्रमहोरात्रमुपवसेदश्वमेधावभृथं वा गच्छेद् **व्रात्यस्तोमेन** वा यजेत " इति । अस्यार्थः । उद्दालकमुनिना दृष्टं व्रतमुद्दालकव्रतम् । तत्स्वरूपमाह । द्वौ मासावित्यादिना यावको यवकृतं यवागूः । तयैव मासद्वयं वर्तेत । अयाचितं तु सर्वव्रतसाधारणं हविष्यन्तच्च सकृदेव। उपवासे तु उदकस्यापि निवृत्तिः । पूर्वमम्बुभक्षणेनैव त्रिरात्रविधानादिति । **आपस्तम्बः** (१।१।२७-३१)-"यथाव्रतेषु समर्थः स्याद्यानि वक्ष्यामः । अतिक्रान्ते सावित्र्याः काले ऋतुं त्रैविद्यकं ब्रह्मचर्यं चरेत् । अथोपनयनम् । ततः संवत्सरमुदकोपस्पर्शनम् । अथाध्याप्यः" इति । अस्यार्थो **हरदत्तेना**भिहितः। यथा व्रतेषु समर्थः स्यात्तथैतावान् कालः प्रतीक्ष्यः । पूर्वमेव तु सामर्थ्ये सत्यष्टमवर्षाद्यतिक्रमेऽपि प्रायश्चित्तं भवति । एवं षोडशादिभ्य उर्ध्वं कियन्तंचित्कालमसमर्थानां पश्चात्सामर्थ्ये सति प्रायश्चित्तं भवत्येव । तच्च प्रायश्चित्तमाह । अतिक्रान्ते सावित्र्या इति। यः सावित्र्या काल उक्तः तदतिक्रमे त्रैविद्यकं त्र्यवयवा विद्याः त्रिविद्याः तामधीयते त्रैविद्याः । तेषामिदं त्रैविद्यकमेवंभूतं व्रतं ब्रह्मचर्यमग्निपरिचर्यामध्ययनं गुरुशुश्रूषामिति परिभाव्य सकलं ब्रह्मचारिधर्मं चरेत्कियन्तं कालमृतुं 'कालाध्वनोरत्यंतसंयोगे' द्वितीया । अथोपनयनं एवं चरितव्रतः उपनेतव्यः । ततः संवत्सर-

---

१ क्ष–गायत्री । २ क्ष–त्र । ३ ख–न प्रसक्तिः ४ क्ष–द्वाप्य । ५ पा. म. २।३।५ ।

मुद्रकोपस्पर्शनं स्नानं कर्तव्यम् । शक्तस्य त्रिषवणस्नानमन्यस्य यथाशक्ति । अथाध्याप्यः । एवं चरितव्रतः पश्चादुपनेय इति । यत्तु **जैमिनिनोक्तम्**–" नातिषोडशवर्षमुपनयीत प्रस्रस्तवृषणो ह्येष वृषलीभूत " इति तदकृतप्रायश्चित्तविषयम् । **स्मृत्यर्थसारे**– " उपनयनं गर्भाज्जन्मतो वाऽष्टमे वर्षे एकादशे द्वादशे वा विप्रादीनां क्रमात्कार्यमा षोडशाद्वा द्वाविंशाद्वा चतुर्विंशाच्च विप्रादीनां क्रमात्कार्यमत ऊर्ध्वं सावित्रीपतिता व्रात्याः स्युस्तेषां चीर्णप्रायश्चित्तानामुपनयनादयः स्युः " इति । इति गौणकालः । **अथ यज्ञोपवीतम्** । तत्र **मनुः** (२।४४)—

" कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत् । शाणसूत्रमयं राज्ञो वैश्यस्याविकसूत्रकम्" ॥

कार्पासविकारः कार्पासम् । सूत्रमिति यावत् । ऊर्ध्ववृतं सव्यहस्ततले न्यस्य दक्षिणहस्ततलेन ऊर्ध्ववर्तितम् । आविकसूत्रकमविरोमनिर्मितसूत्रमित्यर्थः । **गृह्यपरिशिष्टेऽपि**– "उपवीतमयुग्मसरं विषमतंतुकं त्रिवृद्यज्ञोपवीतम्" इति । अयुग्मसरमयुग्मगुणमेकैकगुणो विषमतंतुकः त्रितंतुक अन्यथा नवतंतुकत्वव्याघातात् । तदाह **देवलः**–" यज्ञोपवीतं कुर्वीत सूत्रेण नवतंतुकम्" इति । श्रुतिरपि " नव वै त्रिवृत " इति । **कात्यायनः**–"त्रिवृदूर्ध्वं वृतं कार्यं तंतुत्रयमधो वृतम् " इति ।

बृहस्पतिः—

"कार्पासिकं सदा ग्राह्यं शुचि क्षेत्रे विशोधितम् । जीवभर्तृकया नार्या ब्राह्मण्या सूत्रकं कृतम्"॥

स्मृतिसारे—

" छेदे विनाशे वा स्नातः कन्यया निर्मितं शुभम् । विधवाद्याभिरथवा सूत्रं गृह्णीत वै शुचिः" ॥

माधवीये—

" यज्ञोपवीतं कुर्वीत सूत्रं तु नवतंतुकम् । त्रिवृदूर्ध्वं वृतं कार्यं तंतुत्रयमधोवृतम्" ॥ ऊर्ध्ववृतस्य लक्षणमुक्तं चंद्रिकायाम्—

" करेण दक्षिणेनोर्ध्वंगतेन त्रिगुणं कृतम् । वलितं वा त्रिकं सूत्रं त्रिवृदूर्ध्ववृतं स्मृतम्" ॥

ऊर्ध्वं गतेन दक्षिणेन करेण यद्वलितं तदूर्ध्ववृतमित्यर्थः । प्रतितंतु देवताभेदानाह **देवलः**—

" ओंकारः प्रथमस्तंतुर्द्वितीयोऽग्निस्तथैव च । तृतीयो नागदैवत्यश्चतुर्थः सोमदेवतः ॥

" पंचमः पितृदैवत्यः षष्ठश्चैव प्रजापतिः । सप्तमो वायुदैवत्यो धर्मश्चाष्टम एव च ॥

" नवमः सर्वदैवत्य इत्येता नव देवताः ॥

" ग्रामान्निष्क्रम्य संख्याय षण्णवत्यंगुलीषु तत् । तावत्त्रिगुणितं सूत्रं प्रक्षाल्याब्लिंगकैस्त्रिभिः ॥

" देवागारेऽथ वा गोष्ठे नद्यां वाऽन्यत्र वा शुचौ । सावित्र्या त्रिविधं कुर्यान्नवसूत्रं तु तद्भवेत् ॥

" अथ त्रिवेष्टितव्यं स्यात्पितॄणां तृप्तिदं हि तत् । त्रिस्ताडयेत्करतलं देवानां तृप्तिदं हि तत् ॥

" सव्ये सूत्रं गृहीत्वाऽस्मिन् स्थापयेद्भूरिति ब्रुवन् । पत्रं पुष्पं फलं वापि व्याहृतीभिः प्रतिक्षिपेत् ॥

" अभिमंत्र्याथ भूरग्निं चेति वर्गत्रयं त्रिभिः । हरिब्रह्मेश्वरेभ्यश्च प्रणम्यावाहयेदिति ॥

" यज्ञोपवीतमित्यादि मंत्रः स्यादवधारणे । यज्ञोपवीतमंत्रेण व्याहृत्या वाऽपि धारयेत्" ॥

गृह्यपरिशिष्टे " यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तादायुष्यमग्र्यं प्रति मुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः " इति धारणे मंत्रोऽभिहितः । **बौधायनः**– " यज्ञोपवीतं प्रतिमुंचन्वाचयति यज्ञोपवीतं परमं पवित्रमिति " । ग्रंथिनियममाह **देवलः**– " एकेन ग्रंथिना तंतुः द्विगुणस्त्रिगुणोऽथ वा " । परिमाणांतरमप्याह **कात्यायनः**—

" त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रंथिरिष्यते ।

---

१ क–मग । २ क–वसु; ख–विष्णु । ३ ख–नेनेव तन्तवः । ४ क–श्चे । ५ क्ष–वादये;

" पृष्ठवंशे च नाभ्यां च धृतं यद्विन्दते कटिम् । तद्धार्यमुपवीतं स्यान्नातिलंबं न चोच्छ्रितम् "॥
वसिष्ठशातातपौ—

" नाभेरूर्ध्वमनायुष्यमधो नाभेस्तपः क्षयः । तस्मान्नाभिसमं कुर्यादुपवीतं विचक्षणः"॥

एतदलाभेऽपि परिमाणांतरमाह **देवलः**—"स्तनादूर्ध्वमधो नाभेर्न कर्तव्यं कदाचन" इति॥ **भृगुः**—

" उपवीतं बटोरेकं द्वे तथेतरयोः स्मृते । एकमेव यतीनां स्यादिति शास्त्रस्य निश्चयः"॥

देवलः—

" ब्रह्मचारिण एकं स्यात्स्नातस्य द्वे बहूनि वा । तृतीयमुत्तरीयं स्याद्वस्त्राभावे तदिष्यते "॥

स्मृतिसारे—

"एकवेदस्य चैकं स्यादथवा वेदसंख्यया । बहूनि चायुष्कामस्य स्यादिकाम्यं प्रचक्षते " ॥

भरद्वाजः—

" मंत्रं सदैवमुच्चार्य ब्रह्मसूत्रं गले क्षिपेत् । दक्षिणं बाहुमुद्धृत्य शिरसैव सह द्विजः ॥

"गृहस्थस्य वनस्थस्य सूत्रं प्रति पुनः पुनः । मंत्रोच्चारणमाचामेद्वितयं क्रमशः स्मृतम् ॥

" यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि । तृतीयमुत्तरीयं तु वस्त्राभावे तदिष्यते ॥

" एकैकमुपवीतं स्यादाद्यन्ताश्रमिणोर्द्वयोः । दशाष्टौ वा गृहस्थस्य चत्वारि वनवासिनः॥

"विना यज्ञोपवीतेन दिनमेकमपि द्विजः । स्थितः शूद्रत्वमायाति पुनः श्वानो भविष्यति ॥

"क्रोधाद्वा यदि वा लोभाद् ब्रह्मसूत्रं छिनत्ति यः । स कुर्यात्त्रीणि कृच्छ्राणि कृच्छ्रमेकमथापि वा"॥

भृगुः—

"सदोपवीतिना भाव्यं सदा बद्धशिखेन च । विशिखो व्युपवीतश्च यत्करोति न तत्कृतम्"॥ इति।
न चानेन सदोपवीतित्वं कर्मकाल एवेति संकोचनीयम् । यतः स एवाह—

" मंत्रपूतं स्थितं काये यस्य यज्ञोपवीतकम् । नोद्धरेत्तु ततः प्राज्ञो यदिच्छेच्छ्रेय आत्मनः ॥

" कायस्थमेव तत्कार्यमुत्थाप्यं न कदाचन । सकृदुत्तारणात्तस्य प्रायश्चित्तीयते द्विजः " ॥

व्यासः—

"विना यच्छिखया कर्म विना यज्ञोपवीतकम् । राक्षसं तद्धि विज्ञेयं समस्ता निष्फलाः क्रियाः"॥
अतोऽग्नीन्धनादेः पूर्वमेव यज्ञोपवीतं धार्यमुपनयने । **भृगुः**—

" सूत्रं सलोमकं चेत्स्यात्ततः कृत्वा विलोमकम् । सावित्र्या दश कृत्वाऽद्भिर्मंत्रिताभिस्तदुक्षयेत्॥

" विच्छिन्नं वाऽयतो यातं भुक्त्वा निर्मितमुत्सृजेत् । उपानहौ च वासश्च धृतमन्यैर्न धारयेत् ॥

" उपवीतमलंकारं स्रजं करकमेव च"॥ **मनुस्तु**—धृतयज्ञोपवीतादिविनाशे प्रतिपत्तिमाह(२।६४)—

" मेखलामजिनं दंडमुपवीतं कमंडलुम् । अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मंत्रतः "॥ इति ।

पितामहः—

" य एतन्नाभिजानाति यज्ञसूत्रसमुद्भवम् । वेदोक्तं निष्फलं तस्य स्नानदानजपादिकम् " ॥

"ब्राह्मणो यो न जानाति उपवीतस्य संस्थितम् । मोहात्मा वहते भारं पशुर्गौरिव सर्वदा"॥ इति ।
उक्तोपवीतालाभेऽपि **देवल** आह—

" कार्पासक्षौमगोवालशणवल्कतृणोद्भवम् । सदा संभवता धार्यमुपवीतं द्विजातिभिः " ॥ इति ।
तृणोद्भवं कुशनिर्मितम् । तथा च **गोभिलः**—"यज्ञोपवीतं कुरुते सूत्रं वस्त्रं कुशरज्जुं च"॥ इति।
सूत्रमपि वस्त्राभावे वेदितव्यम्। " वाससा यज्ञोपवीतार्थान्कुर्यात्तदभावे त्रिवृता सूत्रेण " **इति**

१ **कखग**–कथंचनेति । २ **क्ष**–म । ३ **क्ष**–भावे ।

ऋष्यशृंगस्मरणात् । " नित्यमुत्तरं वासः कार्यमपि वा सूत्रमेवोपवीतार्थे " (२।४।२१-२२) **इत्यापस्तंबेन** वाससोऽसंभवे अनुकल्पत्वेन सूत्रस्याभिधानाच्च । **हारीतः**—

" मुक्तामयोपवीतं च चामीकरमथापि वा । धार्यं तत्सर्ववर्णानां महादानादिकर्मसु " ॥

स्मृत्यर्थसारे—

" वस्त्रं यज्ञोपवीतार्थे त्रिवृत्सूत्रं च कर्मसु । शुचौ देशे शुचिस्तत्र संहतांगुलिमूलके ॥
"आवेष्ट्य षण्णवत्या तु त्रिगुणीकृत्य यत्नतः । अब्लिंगैस्तु त्रिभिः सम्यक्प्रक्षाल्योर्ध्वं वृतं तु तत् ॥
" अप्रदक्षिणमावृत्तं सावित्र्या त्रिगुणीकृतम् । अथ प्रदक्षिणावर्तं नवं स्यान्नवसूत्रकम् ॥
" त्रिरावेष्ट्य दृढं बध्वा हरिब्रह्मेश्वरान्नमेत् " ॥ इति । **बोधायनः**— " ब्राह्मणकन्यकया ब्राह्मणविधवया वा शुद्धस्नातया कृताचान्ततया निर्मितं सूत्रं गृहीत्वा प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य चतुरंगुलमात्रषण्णवतिसूत्रपरिमंडलम् " इति । **स एव**—

" चतुर्वेदस्य चत्वारि त्रिवेदस्य त्रिकं भवेत् । द्वे स्यातां वै द्विवेदस्य एकमेवैकवेदिनः" ॥ इति । कथं संनिवेश्यमुपवीतमित्यपेक्षायां **मनुराह** (२।६३)—

" उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः । सव्ये तु प्राचीनावीति निवीती कंठसज्जने " ॥ सूत्रस्य कर्णसज्जनं निवीतमिति संज्ञा तदस्यास्तीति निवीती । निवीतस्य मध्ये दक्षिणे पाणावुद्धृते यः संनिवेशविशेषः तदुपवीतं तदस्यास्तीत्युपवीती । सव्ये पाणावुद्धृते यः संनिवेशविशेषस्तत्प्राचीनावीतं नाम तदस्यास्तीति प्राचीनावीतीत्यर्थः । **तथा च श्रुतिः** (**सह वै** उपनिषदि)—" दक्षिणत उपवीय दक्षिणं बाहुमुद्धरतेऽवधत्ते सव्यमिति यज्ञोपवीतमेतदेव विपरीतं प्राचीनावीतमिति " । विषयविशेषमुपवीतादिना दर्शयति **श्रुतिरेव** (तै. सं. २।५।११।१)— " निवीतं मनुष्याणां प्राचीनावीतं पितृणामुपवीतं देवानाम् " इति । निवीतं मनुष्याणां स्वं मनुष्यकार्येषु ऋषितर्पणादिषु प्रशस्तम् । प्राचीनावीतं पितॄणां कर्मणि पितृयज्ञादौ प्रशस्तम् । यज्ञोपवीतं देवानामिति कर्मणि अग्निहोत्रादौ प्रशस्तमित्यर्थः ।

व्यासः—

" उद्धृत्य दक्षिणं बाहुं सव्यांसे तु समर्पितम् । उपवीतं भवेन्नित्यं निवीतं कंठसज्जितम् ॥
" सव्यं बाहुं समुद्धृत्य दक्षिणे तूद्धृतं द्विजैः । प्राचीनावीतमित्याहुः पितृकर्मणि योजयेत् ॥
" देवागारे गवां गोष्ठे होमे जप्ये तथैव च । स्वाध्याये भोजने नित्यं ब्राह्मणानां च संनिधौ ॥
" उपासने गुरूणां च संध्ययोः साधुसंगमे । उपवीती भवेन्नित्यं विधिरेष सनातनः " ॥ इति ।

आपस्तंबोपि (१।१५।१)- " उपासने गुरूणां वृद्धानामतिथीनां होमे जप्यकर्मणि भोजन आचमने स्वाध्याये च यज्ञोपवीती स्यात् " इति । एतेषु कर्मसु यज्ञोपवीतविधानात्कालांतरे नावश्यंभाव इति केचिद्व्याचक्षते ।

" कायस्थमेव तत्कार्यमुत्थाप्यं न कदाचन । यज्ञोपवीतिना भाव्यं सदा बद्धशिखेन च " ॥

इत्यादि **बहुस्मृति**विरोधाच्छिष्टाचारविरोधाच्च तदनादरणीयमित्यन्ये ।

उपनयनदीक्षामध्ये उपवीतहानौ उपनयनानंतरं दिनचतुष्टयमध्ये यज्ञोपवीतस्य हानौ

" गार्ह्येषु कर्मस्वपराधदृष्टावब्राह्मणोक्तेषु तु निष्कृतिः स्यात् ।
"एकाहुतिं व्याहृतिभिश्च हुत्वा स्मार्तेष्वथादेश इहासुयाम" ॥ इति **न्यायेन सर्वप्रायश्चित्तं**

---

१ क्ष-यत्तं । २ क्ष-वेश ।

हुत्वा अनाज्ञातत्रयं च जपं च कृत्वा पुनश्च यज्ञोपवीतं धार्यमित्याहुः।

इति **यज्ञोपवीतनिर्माणादि**॥

अथ दंडधारणम्। अत्र **मनुः** (२।४५)—

"ब्राह्मणो बैल्वपालाशौ क्षत्रियो वाटखादिरौ। पैप्पलौदुंबरौ वैश्यो दंडानर्हति धर्मतः"॥ पैप्पलः आश्वत्थः। धर्मतः समानधर्मयोगादित्यर्थः। ब्राह्मणो बैल्वदंडं धर्मतोऽर्हति। उभयोरपि ब्रह्मवर्चससंबंधसामान्यात्। ब्रह्मवर्चसाधिकारणं ब्राह्मणः। बैल्वस्तु ब्रह्मवर्चसविकारः। "असौ वा आदित्यो यतो जायते ततो बिल्व उदतिष्ठत्स योन्येव ब्रह्मवर्चसमवरुंधे" इति **श्रुतेः** (तै. सं. २।१।८)—"ब्राह्मणः पालाशं चार्हति उभयोर्गायत्रत्वात्। "गायत्रो वै ब्राह्मणः गायत्रः पर्ण" इति हि **श्रूयते**—"वाटदंडं क्षत्रियो धर्मतोऽर्हति। उभयोरेकवर्णत्वात् तदुक्तमैतरेयब्राह्मणे (७।५।५)—"क्षत्रं वा एतद्वनस्पतीनां न्यग्रोधः क्षत्रं राजन्य" इति। खादिरं चार्हति उभयोर्बलिष्ठत्वसामान्यात्। वैश्यः पैप्पलमर्हति। अश्वत्थस्य वैश्योजः संबंधात्। "मरुतां वा एतदोजो यदश्वत्थः" (तै. सं. २।३।१।५)। "मरुतो वै देवानां विश इति हि" **श्रूयते** (तै. सं. ५।४।७।७)॥ औदुंबरं चार्हति उभयोः पशुसंबन्धसामान्यात्। पशुपालो वैश्यः प्रसिद्धः। पशुविकार उदुंबरः। "देवा वा ऊर्जं व्यभजन्त तत उदुंबर उदतिष्ठत् ऊर्क् पशवः" इति **श्रुतेः** (तै. ब्रा. १।१।३)॥ बैल्वपालाशाविति द्वंद्वनिर्देशोऽपि विकल्प एव विवक्षितः। यदाह **यमः**—

"विप्रस्य दंडः पालाशो बैल्वो वा धर्मतः स्मृतः। अश्वत्थः क्षत्रियस्याथ खादिरो वाऽपि धर्मतः॥

"औदुंबरोऽथ वैश्यस्य प्लाक्षो वा दंड उच्यते। एतेषामप्यलाभे तु सर्वेषां सर्वयज्ञियाः"॥ इति। **गौतमोऽपि** (१।२१)—"यज्ञियो वा सर्वेषाम्" इति। **आपस्तंबोऽपि** (१।२।३८)—"पालाशो दंडो ब्राह्मणस्य नैय्यग्रोधस्कंधजो वाङ्ग्रो राजन्यस्य बादर औदुंबरो वा वैश्यस्य वार्क्षो दंड इत्यवर्णसंयोगेनैक उपदिशंति" इति॥ इति। वार्क्षः यज्ञियार्हवृक्षसंभूतः। स सवर्णसाधारणः।

मनुः (२।४६–४७)—

"केशांतिको ब्राह्मणस्य दंडः कार्यः प्रमाणतः। ललाटसंमितो राज्ञः स्यात्तु नासांतिको विशः॥

"ऋजवस्ते तु सर्वे स्युरव्रणाः सौम्यदर्शनाः। अनुद्वेगकरा नृणां सत्वचोऽनग्निदूषिताः"॥

गौतमः (१।२४–२५)—"अपीडिता यूपवक्राः सशल्काः। मूर्द्धललाटनासाग्रप्रमाणाः" इति। अपीडिताः वल्लीवेष्टनादिभिः। यूपवक्का यूपवन्नताग्रा इत्यर्थः। **व्यासः**—

"शिरोललाटनासाग्रप्रमाणा यूपवन्नताः" इति। **शंखः**—"केशावधिललाटांसतुल्याः प्रोक्ताः क्रमेण ते" इति। **वसिष्ठस्तु** विशेषमाह (११।५५–५७)—"ब्राणसंमितो ब्राह्मणस्य। ललाटसंमितः क्षत्रियस्य। केशसंमितो वैश्यस्य" इति।

कूर्मपुराणे (उ. ११।१५)—

"धारयेद्बैल्वपालाशौ दंडौ केशांतिकौ द्विजः। याज्ञार्हवृक्षजं वाऽथ सौम्यमव्रणमेव च"॥ इति।

बोधायनः (१।२।१६)—"मूर्द्धललाटनासाग्रप्रमाणो याज्ञियस्य वृक्षस्य दंडः" इति।

इति **दण्डनिरूपणम्**॥

अथाजिनानि। तत्र **गौतमः** (१।१६)—"कृष्णरुरुबस्ताजिनानि" इति। कृष्णः कृष्णमृगः। रुरुः पृषतमृगः। बस्तः छागविशेषः। एतेषामजिनानि चर्माणि ब्राह्मणक्षत्रियविशां क्रमेणोत्तरीयाणि भवंति। **मनुरपि** (२।४१)—"कार्ष्णरौरवबास्तानि चर्माणि ब्रह्मचारिणः" इति।

---

१ ख–तैत्तिरीय। २ केश... ३ ब्राण...इति वासिष्ठपाठः।

आपस्तंबः (१।२।१०)– “अजिनं त्वेवोत्तरं धारयेत्” इति । उत्तरमुत्तरीयम् । **पारस्करोऽपि** (२।५।१६–१८)–“ऐणेयमजिनमुत्तरीयं ब्राह्मणस्य रौरवं राजन्यस्य । बास्तं गव्यं वा वैश्यस्य । सर्वेषां वा गव्यम्” इति । **बृहस्पतिरपि**–

“ब्राह्मणस्याजिनं कार्ष्णं रौरवं क्षत्रियस्य तु । बस्ताजिनं तु वैश्यस्य सर्वेषां वा गवाजिनम्”॥ इति ।

शंखः–“ कृष्णरुरुबस्ताजिनान्युत्तरीयाणि ” इति । **इत्यजिनानि** ।

अथ **वासांसि** । तत्र **गौतमः** (१।१७–१८)–“वासांसि शाणक्षौमचीरकुतपाः । सर्वेषां कार्पासं चाविकृतम्” इति । शाणविकारः शाणः । क्षुमा अतसी । तद्विकारः क्षौमम् । श्वेतपट्ट इत्यन्ये । कुतपः पार्वतीयाजरोमनिर्मितः कंबलः । कार्पासं च वासः । सर्वेषां तदविकृतं कुसुंभादिरागद्रव्यैररक्तमित्यर्थः । **स एव** (१।१९–२०)–“ काषायमप्येके । वार्क्षं ब्राह्मणस्य मांजिष्ठहारिद्रे इतरयोः ” इति । एके आचार्याः । कषायेण रक्तमपि धार्यं मन्यंते । तत्र विशेषः । वार्क्षं ब्राह्मणस्य वृक्षकषायेण रक्तं वार्क्षम् । मंजिष्ठया रक्तं मांजिष्ठम् । हरिद्रया रक्तं हारिद्रम् । ते इतरयोः क्षत्रियवैश्ययोर्वाससी इत्यर्थः । **आपस्तंबः** (१।२।४०–४१; १।३।१–२)–“वासः । शाणीक्षौमाजिनानि । काषायं चैके वस्त्रमुपदिशन्ति । माञ्जिष्ठं राजन्यस्य । हारिद्रं वैश्यस्य ” इति । वस्यते कौपीनमाच्छाद्यते येन तत वासः । व्याकृतं **हरदत्तेन** । **मनुरपि** (२।४१)—“ वसीरन्नानुपूर्व्येण शाणक्षौमाविकानि च”इति । **वसिष्ठः** (११।६४–६६)–“शुक्लमहतं वासो ब्राह्मणस्य कार्पासं मांजिष्ठं क्षौमं क्षत्रियस्य पीतं कौशेयं वैश्यस्य ” इति । अहतस्य लक्षणमाह **प्रचेताः**—

“ईषद्धौतं नवं वस्त्रं सदशं यन्न धारितम् । अहतं तद्विजानीयात्सर्वकर्मसु पावनम् ” ॥ इति ।

उपनयने प्रथमतः कौपिनं धार्यं ततोऽहतेन वाससा परिधापनीयमुत्तरीयं च कृष्णाजिनमिति व्यवस्था । तथा च **यमः**—

“कार्पासं क्षौमकुतपाश्मर्वल्वजकंबलाः । सर्वं तु धारयेच्छुक्लं वासस्तत्परिधानिकम्”॥ इति । “नव वासः सद्यः कृतोतमुत्तराभ्यामभिमंत्र्योत्तराभिस्तिसृभिः परिधाप्य ” **इत्यापस्तंबवचनात्** (गृ. सू. ४।१०।१०) । परिहितवस्त्रपुच्छेनैवाच्छादनीयामिति मंतव्यम् । “वासश्चतुर्थीमुत्तरयादत्तेन्यत्परिधाप्य” इति वचनाच्चतुर्थदिनेऽपि विनैव कौपीनं कटिवेष्टितवस्त्रैकदेशेनाच्छादनप्रसंगात्तस्मात्तद्वचनं कौपीनादुपरि मंत्रतो वस्त्रनीयमित्येवं परम । तथा **स्मरण्याख्ये स्मृतिसंग्रहे** —“ कौपीनाच्छन्नं कृतशौचं कुमारं दक्षिणत उपवेश्य” इति । तथा च **त्रिकांडी**–“ तत्रैवं कुमारस्य कौपीनधारणमाचमनं परिषेचनमापोशनं प्राणाहुतीरित्यादीनि भवेयुः” इति । **भारद्वाजोऽपि**—

“ यज्ञोपवीतमजिनं मौंजीं दंडं कमण्डलुम् । स्वोक्तं वासश्च कौपीनं धारयेत्प्रथमाश्रमी ॥

“परेऽह्नि मेखला दंडमजिनं चोपवीतकम् । धारयेत्तु पुराणानि त्यजेद्वस्त्राणि वा नव”॥इति ।

परेऽह्नि चतुर्थदिवस इत्यर्थः । तथा च **शातातपः**—

“चतुर्थेऽहनि संप्राप्ते सुस्नातः कृतमंगलः । त्रिभिर्विप्रैः समायुक्तो गुरुर्गच्छेत्सशिष्यकः ॥

“ग्रामात्प्राचीमुदीचीं वा दिशं नान्यदिशं व्रजेत् ।

“ उक्तासु ब्रह्मवृक्षो नास्ति चेद्धर्मयोग्य[1]कः । यत्र यत्र ब्रह्मवृक्षस्तां दिशं वा व्रजेद्गुरुः ॥

“ ब्रह्मवृक्षमथासाद्य द्विजैः पुण्याहवाचनम् । वाचयेद्वृक्षयेन्मूलं मार्जयेद्गोमयोदकैः ॥

“ वृक्षे चतुर्मुखं यष्ट्वा नमस्कुर्यात्प्रतिक्षणम् ।

---

१ त्वग–स्कंद ।

" कौपीनं दंडमजिनमुपवीतं च मेखलाम् । नवानि धारयित्वाऽथ पुराणानि परित्यजेत् ॥ "वृक्षाग्रे स्थापयेद्यत्नात्कौपीनाजिनमेखलाः । वासः प्रदद्याद्गुरवे ब्राह्मणेभ्यस्तु दक्षिणाम्" ॥ इति । एतच्च पालाशकर्म स्मृतिसिद्धं गृह्यभाष्यादौ च लिखितम् । **स्मृत्यर्थसारे च**—

" दंडः पलाशन्यग्रोधपिप्पला यज्ञवृक्षजाः । ते केशफालनासांतप्रमाणाश्च क्रमात् द्विजैः ॥ " धार्याः श्लक्ष्णाः सदा धार्यं कौपीनं कटिसूत्रकम् । कौपीनमहतं धार्यं खंडवासश्च पार्श्वयुक्" । उपनयनानंतरं त्रिरात्रं क्षारलवणादिवर्जमधःशायी ब्रह्मचार्युपनयनव्रतं चरेच्चतुर्थेऽन्हि कौपीनदंडाजिनमेखलोपवीतानि पूर्वाणि त्यजेत् । तेषां त्यागनियम इति । एवं च प्रथमदिने । कौपीनधारणस्य बहुस्मृतिसिद्धत्वादावश्यकं तत्प्रतीयते । परिहितवस्त्रैकदेशेनाच्छादने प्रमाणं मृग्यम् । इति पालाशनिरूपणम् । **अथ मेखला** । तत्र **मनुः** (२।४२–४३)—

"मौंजी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला । क्षत्रियस्य तु मौर्वी ज्या वैश्यस्य शणतांतवी ॥ " मुञ्जालाभे तु कर्त्तव्या कुशाश्मान्तकबल्वजैः । त्रिवृता ग्रंथिनैकेन त्रिभिः पंचभिरेव वा " ॥ अनयोरयमर्थः । त्रिवृत्त्रिगुणा । समा समगुणा । श्लक्ष्णा परिघर्षणे सुस्पर्शा । मूर्वाविकारो मौर्वी । इति ज्याविशेषणम् । मुंजालाभ इति मुंजाग्रहणं मूर्वाशणतंतोरप्युपलक्षणम् । कुशादयो विप्रादीनां यथासंख्यम् । अश्मन्तकस्तरुविशेषत्वक् । बल्वजः तृणविशेषः । त्रिवृत् त्रिवृतैकेन ग्रन्थिना त्रिवृद्भिः त्रिवृद्ग्रन्थिभिः पञ्चत्रिर्वोपलक्षिता । त्रयाणां वर्णानां ता नियमेनायं ग्रन्थिविकल्पः । नात्र यथासंख्यं वाशब्देन एकविषयत्वावगमादिति । **व्यासोऽपि**—

"मौंजी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला । मुंजालाभे कुशानां तु ग्रंथिनैकेन वा त्रिभिः" ॥ **यमः**—"विप्रस्य मेखला मौंजी ज्या मौंजी क्षत्रियस्य तु । शणसूत्री तु वैश्यस्य मेखला धर्मतः स्मृता ॥ "एतासामप्यलाभे तु कुशाश्मान्तकबल्वजैः । मेखला त्रिवृता कार्या ग्रंथिनैकेन वा त्रिभिः" ॥ इति । **पैठीनसिः**—" मौंजी मेखलाऽश्मंतकी च ब्राह्मणस्य । बल्बजी मौर्वी वा राजन्यस्य । शाणी क्षौमी वा वैश्यस्य" इति । **वसिष्ठः** (११।५८–६०)—" मौंजी मेखला ब्राह्मणस्य धनुर्ज्याक्षत्रियस्य तांतवी वैश्यस्य " इति । **प्रचेताः**—" त्रिगुणं प्रदक्षिणा मेखला " इति । **गौतमः** (१।१५) "मौंजी ज्या मौर्वी सौत्र्यो मेखलाः क्रमेण" इति । **बोधायनोऽपि** (१।२।१३-१४)—" एषां क्रमेण मौंजी धनुर्ज्याशाणीति मेखला " इति । **आपस्तंबः** (१।२।३३)—" मौंजी मेखला त्रिवृद्-ब्राह्मणस्य शक्तिविषये दक्षिणावृत्तानाम् " इति । शक्तिविषये शक्तौ सत्यां दक्षिणेनावृत्तानां मुंजानां कर्त्तव्यम् । कटिसूत्रमपि धार्यमित्याह **संवर्त्तः**—

"कटिसूत्रं विना कर्म श्रौतस्मार्तं करोति यः । सर्वं तन्निष्फलं विद्यात्सोऽपि नग्न इति श्रुतिः" ॥ इति । इदं च ब्रह्मचारिगृहस्थसाधारणम् । कटिसूत्रधारणाभावे कर्ममात्रस्य निष्फलत्वाभिधानात् धृतवस्त्रेऽपि नग्नत्वागमाच्च । इति **मेखलानिरूपणम्** ॥ **अथ भिक्षाचर्या** । तत्र **मनुः** (२।४९)— " प्रतिगृह्येप्सितं दंडमुपस्थाय च भास्करम् । प्रदक्षिणं परीत्याग्निं चरेद्भैक्षं यथाविधि ॥

" भवत्पूर्वंचरेद्भैक्षमुपनीतो द्विजोत्तमः । भवन्मध्यं तु राजन्यो वैश्यस्तु भवदुत्तरम्" ॥ भवत्पूर्वं भवतिशब्दपूर्वम् । **गौतमः** (२।४२)—"आदिमध्यांतेषु भवच्छब्दः प्रयोज्यो वर्णानुपूर्व्येण" इति । प्रयुज्यैव दर्शयति **बोधायनः**—" भवति भिक्षां देहि " इति ब्राह्मणो भिक्षेत । " भिक्षां भवति देहीति " राजन्यो 'देहि भिक्षां भवति' इति वैश्य उपनयनांगत्वेनोक्तोऽप्ययं भिक्षाचरणविधिः सार्वत्रिकः प्रत्येतव्यः । उपनयनांगभिक्षायां नियममाह **मनुः** (२।५०)—

"मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम्। भिक्षेत भिक्षां प्रथमं या चैनं न विमानयेत्"॥ विमानं प्रत्याख्यानम्। **गौतमः**—

" अग्रे भिक्षेत जननीमप्रत्याख्यायिनी च या। ब्राह्मणं तादृशं वाऽपि स्त्रियमग्रे तु याचयेत्॥

" गर्भिणीं नैव याचेत विधवामंतिमां न च"॥ **कारिकाकारः**—

" अग्रे भिक्षेत जननीमप्रत्याख्यायिनी च या। पश्चात्पितरमन्यांश्च आचार्यं बांधवांस्तथा"॥

वसिष्ठः— " अप्रत्याख्यायिनं पूर्वं स्त्रियं वा तादृशीं पुनः।

"भिक्षेत भिक्षां प्रथमं भवान् भिक्षां ददात्विति। भवति भिक्षां देहीति स्त्रियं वाऽग्रेऽपि मातरम्।

" मौंजीकर्मविसर्गांतमामभैक्षं समाहरेत्। पक्वान्नमाहरेन्नित्यमासमावर्त्तनाद्बटुः"॥ इति **गृह्यतात्पर्यदर्शने**ऽप्याममैक्षमुक्तम्—" त्रीण्यहानि प्रत्यहमामभैक्षमाचरेत्। चतुर्थेऽहनि अन्नसंस्कारेण संस्कृतस्य" इति। ब्रह्मचारिणो नित्यभिक्षामाह **व्यासः**—

" गृह्योक्तविधिनोपेतं पवित्र्योत्तरीयकम्। दंडं पात्रं समादाय नमस्कृत्य गुरुं रविम्॥

" भिक्षार्थं तु ततो मौनी द्विजवेश्म तथा व्रजेत्"॥ **मनुः** (२।१४३–१४५)—

" वेदयज्ञैरहीनानां प्रशस्तानां स्वकर्मसु। ब्रह्मचार्याहरेद्भैक्षं गृहेभ्यः प्रयतोऽन्वहम्॥

" गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु। अलाभे त्वन्यगेहानां पूर्वं पूर्वं परित्यजेत्॥

" सर्वं वाऽपि चरेद्ग्रामं पूर्वोक्तानामसंभवे। नियम्य प्रयतो वाचमभिशस्तांस्तु वर्जयेत्"॥

याज्ञवल्क्यः (आ. २९–३०)—" ब्राह्मणेषु चरेद्भैक्षमनिंद्येष्वात्मवृत्तये॥

" आदिमध्यावसानेषु भवच्छब्दोपलक्षिता। ब्राह्मणक्षत्रियविशां भैक्षचर्या यथाक्रमम्"॥

यत्तु " सार्ववर्णिकं भैक्षचरणमभिशस्तपतितवर्जम्" इति **गौतमवचनं** (२।४१) यदपि **व्यासवचनं**

" ब्राह्मणक्षत्रियविशश्चरेयुर्भैक्ष्यमन्वहम्। सजातीयगृहेष्वेव सार्ववर्णिकमेव वा"॥ इति तत्र सर्वशब्दः प्रकृतवर्णत्रयपरः। एतच्च पूर्वोक्तसजातीयालाभविषयम्। तथा च **भविष्यत्पुराणे**—

"सर्वं वा विचरेद्ग्रामं पूर्वोक्तानामसंभवे। अंत्यवर्जं महाबाहो इत्याह भगवान्प्रभुः"। अंत्यः शूद्रः।

" चातुर्वर्ण्यं चरेद्भैक्षमलाभे व्रतिको द्विजः"। इत्येतदप्यापद्विषयम्। **तथा विष्णुः**—

" क्षत्रवैश्यगृहेष्वेव क्रियावत्स्वपि साधुषु। चातुर्वर्ण्यं चरेद्भैक्षमापत्काल उपस्थिते"॥

अंगिराः—" आममेवाददीतास्मादवृत्तावेकरात्रकम्" इति। **पराशरः**—

" यस्तु वेदमधीयानः शूद्रान्नमुपभुंजते। शूद्रो वेदफलं याति शूद्रत्वं चाधिगच्छति"॥

एकान्ननिषेधमाह **याज्ञवल्क्यः** (आ. ३२)

"ब्रह्मचर्ये स्थितो नैकमन्नमद्यादनापदि। ब्राह्मणः काममश्नीयात् श्राद्धे व्रतमपीडयन्"॥

मधुमांसादिवर्जितेनेत्याह **मनुरपि** (२।१८८)—

" भैक्षेण वर्तयेन्नित्यं नैकान्नादी भवेद्व्रती। भैक्षेण व्रतिनो वृत्तिरुपवाससमा स्मृता॥

" व्रतो वा देववद्दैवत्ये पित्र्ये कर्मण्यथर्षिवत्। काममभ्यर्थितोऽश्नीयाद् व्रतमस्य न लुप्यते"॥

अत्रिः—

" शाकभक्षाः पयोभक्षा ये चान्ये यावकाशिनः। सर्वे ते भैक्षभक्षस्य कलां नार्हंति षोडशीम्॥

" तप्तकांचनवर्णेन गवां मूत्रेण यावकम्। पिबेत् द्वादशवर्षाणि न तद्भैक्षसमं भवेत्"।

न चात्र श्रवणादनियतं भिक्षाचरणमिति वाच्यम्। अकरणे **मनुना प्रायश्चित्तविधानात्**।

मनुः (२।१८७)—

"अकृत्वा भैक्षाचरणमसमिध्य च पावकम् । अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत्" इति ॥
यमः—
"आहारमात्रादधिकं न क्वचिद्भैक्षमाचरेत् । युज्यते स्तेयदोषेण कामतोऽधिकमाहरन् ॥
"माधूकरं य आदाय ब्राह्मणेभ्यः प्रयच्छति । स याति नरकं घोरं भोक्ता भुंक्ते च किल्बिषम् ॥
"तस्मान्नाहरेद्भैक्षमतिरिक्तं कदाचन" ॥ **स्मृतिसंग्रहे**—

"ब्रह्मचारी तु भैक्षान्नमुच्छिष्टं न समाचरेत् । अशक्तौ निखनेद्भूमावप्सु वाऽपि प्रवेशयेत्" । अकामतोऽधिकाहरणे तस्य प्रतिपत्तिनियममाहापस्तंबोऽपि (१।३।७।४१)—"न चोच्छिष्टं कुर्यात् अशक्तौ भूमौ निखनेत् अप्सु वा प्रवेशयेत् । आर्याय वा पर्यवदध्यात् । अंतर्धिने वा शूद्राय" इति । अंतर्धिने आचार्यस्य दासायेत्यर्थः। स एव (१।३।२५-२६)-"सायंप्रातरमत्रेण भिक्षाचर्यं चरेद्भिक्षमाणोऽन्यत्रापपात्रेभ्योऽभिशस्ताच्च स्त्रीणां प्रत्याचक्षाणानां समाहितो ब्रह्मचारीष्टं दत्तं हुतं प्रजां पशून्ब्रह्मवर्चसमन्नाद्यं वृंक्ते । तस्मादु ह वै ब्रह्मचारिसंघं चरंतं न प्रत्याचक्षीत" इति । अमत्रेण पात्रेण । न हस्तादिना । भिक्षाप्रत्याख्यानं निंदति । स्त्रीणामिति । वृंक्ते अच्छिनत्तीत्यर्थः । एतच्च व्रताध्ययनादियुक्तब्रह्मचारिविषयम् । अत एव **वसिष्ठपराशरौ** (३।४)—

"अव्रता ह्यनधीयाना यत्र भैक्षचरा द्विजाः । तं ग्रामं दंडयेद्राजा चोरभक्तप्रदो हि सः" ॥
अत्रिः—
"हस्तदत्ता तु या भिक्षा लवणं व्यंजनानि च । भुक्त्वा ह्यशुचितां याति दाता स्वर्गं न गच्छति" ॥
मनुः (२।५१)—
"समाहृत्य तु तद्भैक्ष्यं यावदर्थममायया । निवेद्य गुरवेऽश्नीयादाचम्य प्रयतः शुचिः" ॥ गुर्वसंनिधाने तत्पुत्रभार्यादिभ्यो निवेदयेत् । तदाह **गौतमः** (२।४६)— "असंनिधौ तद्भार्यापुत्रसब्रह्मचारिसद्भ्यः" इति । सब्रह्मचारी सहाध्यायी । संतः श्रोत्रियाः । तथा **चापस्तंबः** (१।३।३१-३६)—"तत्समाहृत्योपनिधायाचार्याय प्रब्रूयात्तेन प्रदिष्टं भुंजीत । विप्रवासे गुरोराचार्यकुलाय तैर्विप्रवासेऽन्येभ्योऽपि श्रोत्रियेभ्यः । नात्मप्रयोजनश्चरेत् । भुक्त्वा स्वयममत्रं प्रक्षालयीत" इति । **हारीतः**—"भैक्षमपेक्षितं पर्यग्निकृतमादित्यदर्शितमनुज्ञातममृतसंमितं प्राहुस्तदश्नन् ब्रह्मचारी ब्रह्मप्रसिद्धिमवाप्नोति" इति । **याज्ञवल्क्यः** (आ. ३१)—
"कृताग्निकार्यो भुंजीत वाग्यतो गुर्वनुज्ञया । आपोशनक्रियापूर्वं सत्कृत्यान्नमकुत्सयन्" ॥ इति । **चंद्रिकायां**—"लोहे मृन्मये वा पात्रे भुंजीतैतच्च भुक्त्वा स्वयं प्रक्षालयीत" इति । **वसिष्ठः** (६।३)—
"अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनः । द्वात्रिंशत्तु गृहस्थस्य अमितं ब्रह्मचारिणः" ॥
आपस्तंबः—
"आहिताग्निरनड्वांश्च ब्रह्मचारी च ते त्रयः । अश्नंत एव सिध्यंति नैषां सिद्धिरनश्नताम्" ॥ इति ।
इति भिक्षाचर्या । अथ **संध्योपक्रमः** । **व्यासः**—
"गायत्रीं तु गुरोर्लब्ध्वा सायं संध्यामुपक्रमेत् । कालयोरग्निपूजां च कालयोर्भैक्षमाहरेत् ॥
"निमन्त्रणादिना भुक्त्वा गुर्वर्थं भैक्षमाहरेत्"
"[1]संध्यात्रयं न कर्तव्यं यावन्मौंजी निबध्यते । संध्यात्रयं तु कर्तव्यं सायमादि ततः परम्" ॥
प्रचेताः—

---

१ **कखग**—गौतमः ।

“ मौंजीबन्धदिने तिष्ठेत्सावित्रीमभ्यसन् गुरोः । सूर्येऽस्तशिखरं प्राप्ते सायं संध्यां समभ्यसेत् ॥

“सावित्रीं प्राप्य गुरुणा मंत्राध्यायाद्यथोदितात् । अभ्यस्योपासयेत्संध्यां सायमादि यथाक्रमम्”॥

स्मृत्यंतरे—

“ उपायनो हि कर्तव्यं सायं संध्योरुपासनम् । आरभेद्ब्रह्मयज्ञं तु मध्यान्हे तु परेऽहनि ॥

“ अनुपाकृतवेदस्य ब्रह्मयज्ञः कथं भवेत् । वेदस्थाने तु गायत्री गद्यतेऽन्यत्समं भवेत् ॥ ” इति ।

जैमिनिस्तु विशेषमाह—

“यावद्ब्रह्मोपदेशस्तु तावत्संध्यादिकं न च । ततो मध्याह्नसंध्यादि सर्वं कर्म समाचरेत्”॥ इति ।

इति संध्योपक्रमनिरूपणम् । अथ समिदाधानम् । तत्र **याज्ञवल्क्यः** (१।२५)—

“ अग्निकार्यं ततः कुर्यात्संध्ययोरुभयोरपि ” । **मनुः** (२।१८५–१८६)—

“ अग्नींधनं भैक्षचर्यामधश्शय्यां गुरोर्हितम् । आ समावर्तनात्कुर्यात्कृतोपनयनो द्विजः ॥

“ दूरादाहृत्य समिधः संनिदध्याद्विहायसि । सायंप्रातश्च जुहुयात्ताभिरग्निमतंद्रितः ” ॥

भूमिष्ठजंतुसंक्रांतिर्मा भूदिति विहायासे इत्युक्तम् । ‘ आकाशे ’ रज्वादिषु स्थापयेदित्यर्थः । **सुमंतुरपि**—“ ब्रह्मचर्यं ततो भैक्ष्यं संध्ययोरग्निकर्म च ” इति । केचित्सायमेवाग्निकार्यमिच्छंति । तदाहापस्तंबः (१।४।१६–१७)—“ सायंप्रातर्यथोपदेशम् । सायमेवाग्निपूजेत्येके ” इति । **लौगाक्षिः**—“सायमेवाग्निर्विधीयते इत्येके ” इति । समिदाहरणे नियममाह **वैजावापः**—“ पुरास्तमयात्प्रागुदीचीं दिशं गत्वा अहिंसन्नरण्यात्समिध आहरेत् ” इति । **आपस्तंबोऽपि** (१।४।१५)—“ नास्तमिते समिद्धाहारो गच्छेत् ” इति । **व्यासः**—

“ पालाश्यः समिधः कार्याः खादिर्यस्तदलाभतः । शमीरोहीतकाश्वत्थास्तदभावेऽर्कवेतसौ[1] ” ॥

समित्प्रमाणमाह **कात्यायनः**—

“नांगुष्ठादधिका कार्या समित्स्थूलतया क्वचित् । न वियुक्ता त्वचा चैव न सकीटा न पाटिता ॥

“प्रादेशान्नाधिका न्यूना तथा न स्यात् विशाखिका । नासपर्णा न निर्वीर्या होमेषु तु विजानता ॥

“विशीर्णा विदला ह्रस्वा वक्रा सशुषिराः कृशाः । दीर्घाः स्थूला घुणैर्दुष्टाः कर्मसिद्धिविनाशिकाः”॥

इति । सार्वत्रिकं नियमविशेषमाहापस्तंबः (१।१५।१२)—“नाप्रोक्षितामिंधनमग्नावादध्यात्” इति । अग्निकर्माकरणे प्रत्यवायमाह **हारीतः**—

“पुरा जग्राह वै मृत्युर्हिंसयन् ब्रह्मचारिणम् । अग्निस्तं मोक्षयामास तस्मात्परिचरेद्धि तम् ॥

“ ब्रह्मचारी यदा त्वग्नावादध्यात्समिधं न हि । गृह्णीयात्तं तदा मृत्युरादध्यात्समिधस्ततः” ॥ इति ।

बोधायनोऽपि (१।२।५२–५४)—‘ ब्रह्म वै मृत्यवे प्रजाः प्रायच्छत्तस्मै ब्रह्मचारिणमेव न प्रायच्छत्सोऽब्रवीदस्तु मह्यमप्येतस्मिन्भाग इति । यामेव रात्रिं समिधं नाहरता इति । तस्माद्ब्रह्मचारी यां रात्रिं समिधं नाहरत्यायुष एव तामवदाय वसति । तस्माद्ब्रह्मचारी समिधमाहरेत्” इति । ब्रह्मा जगत्कारणं ईश्वरः । प्रजा मारयितुं मृत्यवे प्रायच्छत् । ब्रह्मचारिणं न प्रददे । अथ मृत्युराह । मह्यं मम एतस्मिन्ब्रह्मचारिण्यपि भागः अंशोऽस्त्विति । ब्रह्माब्रवीत्सा रात्रिस्तवावसरः यामेव रात्रिं समिधं नाहरति इति । आयुष इति द्वितीयार्थे षष्ठी । तस्यां रात्रावायुर्गृह्णातीत्यर्थः । **गौतमः** (२।१२)—“अग्नीन्धनभैक्षाचरणादीनि सप्तरात्रमकृत्वाज्यहोम” इति । **बृहस्पतिः**—

“ अवकीर्णिव्रतं कुर्यात्सप्तरात्रमसंशयम् ” इति । **मनुरपि** (२।१८७)—

“ अकृत्वा भैक्षचरणमसमिध्य च पावकम् । अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत् ” ॥ इति ।

1 क–लाभेर्कतेजसौ ।

इति समिदाधाननिरूपणम्। अथ चौलादिजातककर्मादि[1]कालातिपत्तिप्रायश्चित्तम्।

तत्र **कात्यायनः**—

" कालातीतेषु कार्येषु प्राप्तवत्स्वपरेषु च। कालातीतानि कृत्वा तु विदध्यादुत्तराणि च ॥
" लुप्ते कर्मणि सर्वत्र प्रायश्चित्तं विधीयते। प्रायश्चित्ते कृते पश्चाल्लुप्तं कर्म समाचरेत् ॥
" गर्भाधानादिचौलांते स्वकाले विधिना कृते। प्रत्येकं पादकृच्छ्रं स्यात् द्विगुणं स्यादनापदि ॥
" आ षोडशाद् ब्राह्मणस्य ह्यष्टकाद् व्रतहायने। आज्याहुतीश्च जुहुयादिमं मे वरुणद्वयम् ॥
" त्वं नः स त्वं नो मंत्रौ द्वौ त्वमग्ने तु प्रजापते। ये ते शतमुदुत्तमं व्याहृतीर्जुहुयात्ततः ॥
" अभ्युदिकं तु तंत्रेण सर्वकर्मण्यनुक्रमात्। उपायनव्रतं कुर्याच्छूद्रतुल्योऽन्यथा भवेत् " ॥

ब्राह्मणभोजनसंख्यामाह भास्करः—

" दश द्वादश वाऽग्रतौ प्रसूतौ च द्वयं द्वयम्। सीमंते पुंसवे नाम्नि भूरि ब्राह्मणभोजनम् ॥
" ब्राह्मणाश्चैव पंचाशच्चौले तूपायने शतम्। विवाहे तु यथाशक्ति ह्याधाने शतभोजनम् ॥
" भोजयित्वा शतं विप्रान्कुर्यादेवोपनायनम्। अशक्तोऽपि यथाशक्ति कृत्वा कर्म समाचरेत् ॥
" प्रतिगृह्योपनीत्यर्थमिति तेनाचरेद्यदि। ब्राह्मणत्वफलं सर्वं दातारमधिगच्छति ॥
" शूद्राच्च प्रतिगृह्णीयात्स मूढो नरकं व्रजेत्" ॥ इति च। मातरि रजस्वलायां गर्भिण्यां च कर्मनिषेधः **प्रयोगपारिजाते**—

" न विवाहोपनयने गर्भिणी मलिनी प्रसूः। गर्भस्यापि विपत्तिः स्याद्दंपत्योश्च शिशोस्तथा" ॥

प्रसूर्माता गर्भिणी वा मलिनी मलवद्वासा वा भवेद्यदि। पुत्रस्य विवाहोपनयने पित्रा न कर्त्तव्ये। करणे दोषः। गर्भस्य जायापत्योः सुतस्य च विपत्तिः स्यादिति। **वरदराजीये**—

" ईडाकरणपूर्वं तु जननी चेद्रजस्वला। न कर्त्तव्या चोपनीतिरिति स्मृतिविदां मतम् "॥

ईडाकरणं नांदीश्राद्धकरणं ततः पूर्वं रजस्वला चेदित्यर्थः। **तत्रैव**—

" करणे व्रात्यतां यायान्न कर्मण्यो भवेद्बटुः। वेदपाठे व्रतादौ च ह्यनर्हो दारकर्मणि ॥
" उपनीतिश्च कर्त्तव्या पुनश्च ब्राह्मणैः सह। अनुज्ञां प्राप्य विदुषां पीत्वा च ब्रह्मकूर्चकम् ॥
" कर्मण्यो जायते वर्णी नात्र कार्या विचारणा ॥

" बटोर्माता गर्भिणी स्यान्न कुर्याच्चौलकर्म च। पंचमासादधः कुर्यादत ऊर्ध्वं न कारयेत् ॥
" कर्त्तृभार्या गर्भिणी चेद्वास्तुकर्मोपनायनम्। षण्मासात्परतः सोऽपि न कुर्यादिति **शौनकः**—
" गर्भिणी यदि पत्नी स्यान्न कुर्यादुपनायनम्। पंचमासादधः कुर्यादत ऊर्ध्वं न कारयेत् " ॥

उपनयनकर्त्तारमाह व्यासः—

" वेदैकनिष्ठं धर्मज्ञं कुलीनं च कुटुंबिनम्। स्वशाखामनालस्यं विप्रमक्रुद्धमत्वरम् ॥
" कर्त्तारमीप्सेद्विप्रं वा चतुर्थाश्रमिणं न तु " ॥ **विष्णुः**—

" कृच्छ्रत्रयं चोपनेता त्रीन्कृच्छ्रांश्च परश्चरेत्। सावित्रीमभ्यसेन्नित्यं पवित्राणि च संस्मरन् " ॥

वृद्धवसिष्ठः—

" पिता पितामहो भ्राता ज्ञातयो गोत्रजाग्रजाः। उपायनेऽधिकाराः स्युः पूर्वाभावे परः परः "॥

आपस्तंबः (१।१।११-१२)-" तमसो वा एष तमः प्रविशति यमविद्वानुपनयते यश्चाविद्वानिति हि ब्राह्मणम्। तस्मिन्नभिजनविद्यासमुदेतं समाहितं संस्कर्त्तारमीप्सेत् " इति। यं

---

१ क्ष—स।

माणवकमविद्वानजानानः उपनयते तथा यश्च स्वयमविद्वान्सन्नुपनीयते सोऽपि तमसः सकाशात्तम एव प्रविशति समाहितं विधिप्रतिषेधेष्ववहितमित्यर्थः। **बोधायनः**—

" जातकर्मादिसंस्कारे पिता श्रेष्ठतमः स्मृतः। अभावे स्वकुलीनः स्याद्बांधवो वाऽन्यगोत्रजः॥
" आर्यावर्तसमुद्भूतस्तस्याभावे स्वसूत्रकः। ब्राह्मणः सर्ववर्णानां श्रोत्रियो वा स्ववर्णजः॥
" गृहस्थः सर्ववर्णेषु श्रेष्ठ इत्यभिधीयते। अभार्यस्त्वधमो ज्ञेय उपकुर्वाणनैष्ठिकौ॥
" आचार्यो मध्यमो ज्ञेयो सगोत्रौ व्रतिनावपि। वानप्रस्थयतीनां तु कर्तृत्वं नेष्यते सदा॥
" जितेंद्रियो जितद्वंद्वस्तपोदानपरायणः। सत्यवादी[1] जितः प्राज्ञो मेधावी नियतः शुचिः॥
" निःसंदिग्धः कुलीनश्च श्रौतकर्मणि तत्परः। निग्रहानुग्रहे दक्षः सर्वदोषविवर्जितः॥
" गायत्रीमंत्रकुशल आचार्यः स उदाहृतः। कुलद्वये तथोत्पन्ने प्राप्ते गर्भाष्टमे बटुः॥
" मौंजीबंधनकर्मार्थं स्वशाखाध्यायिनं द्विजम्। स्वगोत्रप्रवरं नो चेदाश्रयेदन्यगोत्रजम्"॥

इति। **उपनयनकर्तृनिरूपणम्**। अथ **यमलाद्युपनयने**[3]। **संग्रहे**—

" एकगर्भप्रसूतौ चेदेकवेदिमवाप्य च। एकाचार्यैकलग्ने च कुर्यान्मौंजीव्रतं यतः॥
" चौलोपनयने चैव जातकर्माणि नाम्नि च। चतुर्व्रतोपाकरणे यमलानां समं भवेत्"॥

कालादर्शे—

"भ्रातृद्वये स्वसृयुगे स्वसृभ्रातृयुगे तथा। समानाऽपि क्रिया कार्या मातृभेदे तथैव च"॥

"पुंयुग्मे स्त्रीयुग्मे स्त्रीपुंयुग्मे च समकाला क्रिया कार्या। मातृभेदेऽपि तथेत्यर्थः। मातृभेदे विशेषः स्मर्यते—

" एकत्रलग्ने यदि पुत्रयुग्मशुभाय मौंजीव्रतकर्म कुर्यात्॥
" आचार्ययुग्मं खलु वेदियुग्मं नांदीमुखान् स्वस्य पितृंश्च नित्ये॥
" पृथग्भवावेकलग्ने सोदरावुपनायने। आचार्योऽन्यः पिताऽन्यस्तु भ्राता वा पितृसोदरः"॥ इति।

अथ **मूकोन्मत्ताद्युपनयम्**। **स्मृतिरत्ने**—

" षंढांधबधिरस्तब्धजडगद्गदपंगुषु। कुब्जवामनरोगार्तशुष्कांगिविकलांगिषु॥
" मत्तोन्मत्तेषु मूकेषु शयनस्थे निरिंद्रिये। ध्वस्तपुंस्त्वेषु चैतेषु संस्काराः स्युर्यथोचितम्॥
"मूकोन्मत्तौ न संस्कार्याविति केचित्प्रचक्षते। कर्मस्वनधिकाराच्च पातित्यं नास्ति च द्वयोः॥
" तदपत्यं च संस्कार्यमपरे त्वाहुरन्यथा"॥ **स्मृत्यंतरे**—
" मूकोन्मत्तौ न संस्कार्यौ कर्मस्वनधिकारितः। तदपत्यं तु संस्कार्यं यज्ञार्हमिति च **श्रुतिः**॥
" ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणस्तु श्रुतेर्बलात्। कर्मस्वनधिकारोऽपि संस्कारार्ह इति **श्रुतिः**॥
" मूकोन्मत्तादिसंस्कारे त्वाचार्यः सर्वमाचरेत्। मुहूर्तं निरीक्षेत गायत्रीं स्पृश्य वा जपेत्॥
" मूकांधादिषु चोद्वाहे कन्यास्वीकरणं विना। पाणिग्रहं विना सप्तपदादिक्रमणं विना॥
" विप्रेण कारयेत्सर्वं पंगोः सप्तपदान्यपि॥
" केचिदाहुर्द्विजाज्जातौ संस्कार्यौ कुंडगोलकौ। अमृते जारजः कुंडो मृते भर्तरि गोलकः॥
" द्विजातिप्रतिलोमानां केचिदाहुः पुरागमाः"॥ **व्यासः**—
" विद्याग्रहणशक्तस्य होमकर्मक्षमस्य च। उपायनेऽधिकारोऽस्ति मूकादीनां कृताकृतम्"॥ इति।

आपस्तंबः (१।१।९-१०)-" उपनयनं विद्यार्थस्य श्रुतितः संस्कारः। सर्वेभ्यो हि वेदेभ्यः सावित्र्यनूच्यत इति हि ब्राह्मणम्"। इति। विद्ययार्थः प्रयोजनं यस्य स विद्यार्थः। तस्यायं श्रुति-

---

१ ख-गूर्जितः। २ क्ष-वरः, क-परः। ३ कख-+कर्तारः। ४ क-यौ कर्मस्वनाधिकारतः।

विहितः संस्कारः । उपनयनं नाम विद्यार्थस्येति वचनान्मूकादेर्न भवति । अनेकवेदाध्यायिनां वेदव्रतवदुपनयनमपि भेदेन कर्तव्यमिति प्राप्ते । उच्यते । सर्वेभ्य इति । ततश्च सावित्र्यनुवचनेन सर्वे वेदा अनूक्ता भवंतीत्येकमेवोपनयनं सर्वार्थम् । आथर्वणस्य तु वेदस्य पृथगुपनयनं कर्तव्यम् । तथा च तत्रैव श्रूयते—“नान्यत्र संस्कृतो भृग्वंगिरसोऽधीयीत” इति । **पतितानामुपनयनाभावमाहापस्तंबः** (१।१।६)—“अशूद्राणामदुष्टकर्मणामुपयनम्” इति । “प्रागुपनयनात्कामचारवादभक्ष” इति (२।१) गौतमवचनं ब्रह्महत्यादिपातकव्यतिरिक्तविषयमिति पूर्वमेवोक्तम् । **स्मृत्यर्थसारे**—“षंडांधादिषु यथोचितं संस्कारः । मूकोन्मत्तावसंस्कार्यावित्येके । कर्मस्वनधिकारात्पातित्यं नास्ति । तदपत्यं संस्कार्यम् । ब्राह्मण्यां ब्राह्मणोत्पन्नो ब्राह्मण एवेति स्मृतेः । अन्ये न संस्कार्याविति आहुः । होमं तावदाचार्यः कुर्यात् । उपनयनं च विधिना आचार्यसमीपनयनं सावित्रीसमीपनयनं सावित्रीवाचनं वा अन्यदंगं यथाशक्ति कार्यम्” इति । जडबधिरमूकादीनामुपनयनकल्पो **बोधायनादिभिरुक्तः** । तत एव ग्राह्यः ।

अथौरसादीनामुपनयननिरूपणम् । स्मृतिरत्ने—

“औरसः पुत्रिकापुत्रः क्षेत्रजो गूढजस्तथा । कानीनश्च पुनर्भूतो दत्तः क्रीतश्च कृत्रिमः ॥

“दत्तात्मा च सहोढश्च अपविद्धः सुतस्तथा । एते द्वादशपुत्राश्च संस्कार्याः स्युर्द्विजातयः” ॥ इति ।

औरसादीनां लक्षणमाह **मनुः** (९।१६६–१७७)—

“स्वे क्षेत्रे संस्कृतो यस्तु स्वयमुत्पादयेद्धि यम् । तमौरसं विजानीयात्पुत्रं प्राथमकल्पिकम् ॥

“यस्तल्पजः प्रमीतस्य क्लीबस्य व्याधितस्य वा । स्वधर्मेण नियुक्तायां स पुत्रः **क्षेत्रजः** स्मृतः ॥

“माता पिता वा दद्यातां यमद्भिः पुत्रमापदि । सदृशं प्रीतिसंयुक्तं स ज्ञेयो **दत्त्रिमः** सुतः ॥

“सदृशं तु प्रकुर्याद्यं गुणदोषविचक्षणम् । पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयस्तु **कृत्रिमः** ॥

“उत्पद्येत गृहे यस्य न च ज्ञायेत कस्य सः । स्वगृहे गूढउत्पन्नो यस्य स्यात्तस्य तल्पजः ॥

“मातापितृभ्यामुत्सृष्टं तयोरन्यतरेण वा । यं पुत्रं परिगृह्णीयादपविद्धस्तु स स्मृतः” ॥

“पितृवेश्मनि कन्या तु यं पुत्रं जनयेद्रहः । तं **कानीनं** वदेन्नाम्ना वोढुः कन्यासमुद्भवम् ॥

“या गर्भिणी संस्क्रियते ज्ञाताऽज्ञाताऽपि वा सती । वोढुः स गर्भो भवति **सहोढ** इति चोच्यते ॥

“क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमंतिकात् । स **क्रीतकः** सुतस्तस्य सदृशोऽसदृशोऽपि वा ॥

“या पत्या वा परित्यक्ता विधवा वेच्छयाऽऽत्मनः । उत्पादयेत्पुनर्भूत्वा स **पौनर्भव** उच्यते ॥

“मातापितृविहीनो यस्त्यक्तो वा स्यादकारणात् । आत्मानं संस्पृशेद्यस्मै स्वयं दत्तस्तु स स्मृतः” ॥

याज्ञवल्क्योऽपि (व्य. १२८–१३२)—

“औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतः । क्षेत्रजः क्षेत्रजातस्तु स्वगोत्रेणेतरेण वा ॥

“गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः । कानीनः कन्यकाजातो मातामहसुतो मतः ॥

“अक्षतायां क्षतायां वा जातः पौनर्भवः सुतः । दद्यान्माता पिता वायं स पुत्रो दत्तको भवेत् ॥

“क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात्स्वयंकृतः । दत्तात्मा तु स्वयंदत्तो गर्भे विन्नः सहोढजः ॥

“उत्सृष्टो गृह्यते यस्तु सोऽपविद्धो भवेत्सुतः” ॥ इति । **मनुः** (९।१८०)—

“क्षेत्रजादिसुतानेतानेकादश यथोदितान् । पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः” ॥ इति ।

एतानि गौणपुत्रपरिग्रहसंस्कारवचनानि युगांतरविषयाणि । कलौ तत्परिग्रहस्य निषिद्धत्वात् ॥

“अनेकधाकृताः पुत्रा ऋषिभिर्ये पुरातनैः । न शक्यन्तेऽधुना योक्तुं शक्तिहीनैः कलौ द्विजैः” ॥

इति वचनात्। अत्र क्षेत्रजपुत्रोत्पादनाय सप्रकारं सापवादं च नियोगमुक्त्वा पुनरेव प्रतिषेधति **मनुः** (९।५९–६०)—

" देवराद्वा सपिंडाद्वा स्त्रिया सम्युक् नियुक्तया। प्रजेप्सिताऽधिगंतव्या संतानस्य परिक्षये॥
" विधवायां नियुक्तस्तु घृताक्तो वाग्यतो निशि। एकमुत्पादयेत्पुत्रं न द्वितीयं कथंचन॥
" विधवायां नियोगार्थे निर्वृत्ते तु यथाविधि। गुरुवच्च स्नुषावच्च वर्तेयातां परस्परम् (६२)॥
" नोद्वाहिकेषु मंत्रेषु नियोगः कीर्त्यते क्वचित्। न विवाहविधावुक्तं विधवावेदनं प्रति (६५)॥
" अयं द्विजैर्हि विद्वद्भिः पशुधर्मो विगर्हितः। मनुष्याणामपि प्रोक्तो वेने राज्यं प्रशासति (६६)॥
" स महीमखिलां भुंजन्राजर्षिप्रवरः पुरा। वर्णानां संकरं चक्रे कामोपहतचेतनः (६७)॥
" तदा प्रभृति यो मोहात्प्रमीतपतिकां स्त्रियम्। नियोजयत्यपत्यार्थे तं विगर्हंति साधवः (६८)"।

अत्र मनोरभिप्रायमाह **बृहस्पतिः**—

" नियोगमुक्त्वा मनुना निषिद्धः स्वयमेव तु। युगऱ्हासादशक्योऽयं कर्तुमन्यैर्विधानतः॥
" तपोज्ञानसमायुक्ताः कृते त्रेतायुगे नराः। द्वापरे च कलौ नृणां शक्तिहानिर्विनिर्मिता॥
" संकल्पेन कृताः पुत्राः ऋषिभिर्यैः पुरातनैः। न शक्यतेऽधुना कर्तुं शक्तिहीनैर्नरैरिति॥
" क्षेत्रजो गर्हितः सद्भिस्तथा पौनर्भवः सुतः। कानीनश्च सहोढश्च गूढजः पुत्रिकासुतः।
" दत्तोऽपविद्धः क्रीतश्च कृत्रिमो दत्रिमस्तथा"॥ इति[1]। अत्र दत्तनिषेधस्त्वसगोत्राभिप्रायः। यदाह **शौनकः**—

" ब्राह्मणानां सपिंडेषु कर्तव्यः पुत्रसंग्रहः। तदभावे सगोत्रे वा न चान्यत्र तु कारयेत्॥
" क्षत्रियाणां सजातौ वा गुरुगोत्रसमोऽपि वा। वैश्यानां वैश्यजातेषु शूद्राणां शूद्रजातिषु॥
"सर्वेषां चैव वर्णानां ज्ञातिष्वेव न चान्यतः। दौहित्रं भागिनेयं वा शूद्राणां त्वापदो यदि"॥ इति।

सर्वेषां ज्ञातिष्वेव पुत्रपरिग्रहः। दौहित्रं भागिनेयं वा गृह्णीयाच्छूद्राणां त्वापदि दौहित्रादिग्रहणमित्यर्थः। अत एव कलियुगधर्मान्वदद्भिः "दत्तौरसेतरेषां च पुत्रत्वेन परिग्रहः" इति दत्तपर्युदासेन न गौणपुत्रपरिग्रहनिषेधः कृतः। अतः सति संभवे सगोत्रादेव दत्तपरिग्रहः कर्तव्यः। तथा च **मनुः** (९।१८२)—

" भ्रातृणामेकजातानामेकश्चेत् पुत्रवान्भवेत्। सर्वे ते तेन पुत्रेण पुत्रिणो मनुरब्रवीत्"॥

सति भ्रातृपुत्रे अन्यस्मात्पुत्रपरिग्रहो न कर्तव्य इति भाव इति मानवे व्याख्याने। अत्र **विज्ञानेश्वरोऽपि** (पृ.–९० पं. १६–१७)– " यत्तु भ्रातृणामेकजातानामिति मानववचनं तदपि भ्रातृपुत्रस्य पुत्रीकरणसंभवे अन्येषां पुत्रीकरणनिषेधार्थं न पुनः पुत्रत्वप्रतिपादनाय" इति। **कालादर्शेऽपि**– " अपुत्रो भ्राता भ्रातृपुत्रसंभवे तेनैव पुत्रीकुर्यान्नान्येनेति 'भ्रातृणामेकजातानामिति' मनुवचनस्यार्थः। अन्यथा 'पत्नी दुहितर' इति न्यायस्यासामंजस्य प्रसंगादिति। यत्तु

" गोत्रांतरप्रविष्टानां दाय आशौचमेव च। ज्ञातित्वं च निवर्तेत तत्कुले सर्वमिष्यत "॥ इति

यदपि **मनुवचनम्** (९।१४१–१४२)—

" उपपन्नो गुणैः सर्वैः पुत्रो यस्य तु दत्रिमः। स हरेतैव तद्रिक्थं संप्राप्तोऽप्यन्यगोत्रतः॥
"गोत्ररिक्थे जनयितुर्न हरेद्दत्रिमः सुतः। गोत्ररिक्थानुगः पिंडो व्यपैति ददतः स्वधाम् "॥ इति

यदपि **स्मृत्यंतरम्**—

---

1 ख+स्वीकारविषयः।

" गोत्रांतरप्रविष्टास्तु संस्कार्यास्तत्कुले न तु। जननेनैव पितरो दानेनैव निवर्तिताः॥
" दत्तस्य परिवेत्तृत्वमाशौचं दायमेव च। श्रितगोत्रा तु संग्राह्यं श्रौतं स्मार्तं तथैव च "॥ इति एतत्सर्वं स्वगोत्रजालाभविषयम्। तथा च स्मर्यते—

" वंशजानामभावे तु प्रशस्तो मातृवंशिजः। तदभावे सुतो दत्तो विहितो विधिनेतरः॥
"ज्ञातीनां कुलजातानामुत्तमः परिकीर्तितः। मध्यमा मातृकुलजा अधमाः परगोत्रजाः॥
" स्वकल्पोक्तविधानेन दत्तपुत्रप्रतिग्रहः "॥ इति। अत्र कात्यायनः—
" दत्तानूढा च कन्या या पतित्वं सप्तमे पदे। तथैव दत्तपुत्रस्य पुत्रत्वं जातकादिभिः॥
"यः प्रदत्तोऽपि पुत्रार्थं जातकर्मादिवर्जितः। नासौ गच्छति पुत्रत्वं कथं वा रिक्थभाग् भवेत्"॥

प्रजापतिः—
" पुत्रं गृहीत्वा संस्कृत्य वयोवस्थाश्रितं पिता। नामगोत्रादि तत्सर्वं कुर्यादौरसवत्ततः॥
" पंचमे सप्तमे वर्षे अष्टमे नवमे तथा। दद्यातां पितरौ पुत्रं गृह्णीयातां च दंपती "॥ इति

संग्रहे च—
"उत्तमं द्वादशाहेषु दत्तस्य ग्रहणं शिशोः। आचौलान्मध्यमं हीनमूर्ध्वमा मौंजिबंधनात्॥
" कृतोद्वाहस्य पुत्रत्वं कुलक्षयकरं भवेत् "॥ इति। **स्मृत्यंतरेऽपि**—
" साश्रमं नैव दद्यात्तु दद्यादापद्यनाश्रमम्। आपद्यपि च दद्यातां द्वितीयं ब्रह्मचारिणम् "॥ इति।
" भर्तुरूर्ध्वं तु या नारी पुत्रं दातुं न साऽर्हति। ग्रहीतुं वाऽग्रजं नातो **बोधायन**वचो यथा "॥

दक्षः—
" आपद्यपि च कष्टायां न दद्यादग्रजं सुतम्। भर्तृहीना तथा पत्नी दद्याच्चेन्नरकं व्रजेत्॥
"अप्रजा विधिवा नारी पितृभ्रातानुज्ञया। पुत्रं तु प्रतिगृह्णीयादन्यथा नरकं व्रजेत्"॥ इति। तथा
" आपद्यनग्रजं दद्यात् ब्रह्मचर्याश्रमं सुतम्। द्वादशाब्दं धर्मपत्नी शुनःशेफवदेव वा "॥ इति।

यत्तु " दानं क्रयश्च धर्मश्चापत्यस्य न विद्यते " इति **आपस्तंब**स्मरणम् (२।१३।१०) यदपि " स्वकुटुंबाविरोधेन देयं दारसुतादृते " इति **याज्ञवल्क्य**वचनं (व्य. १७५) तज्ज्येष्ठपुत्रविषयं एकपुत्रविषयं च। तथा च वसिष्ठः (१५।३-६)— "न ज्येष्ठं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा। न चैकं पुत्रं स हि संतानाय पूर्वेषाम्। न स्त्री पुत्रं दद्यात् प्रतिगृह्णीयाद्वाऽन्यत्रानुज्ञानाद्भर्तुः। पुत्रं प्रतिग्रहीष्यन्बंधूनाहूय राजनि चावेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा दूरबांधवं संनिकृष्टमेव प्रतिगृह्णीयात्" इति। **बहूच ब्राह्मणेऽपि शुनःशेपाख्याने** " ज्येष्ठं पुत्रं न प्रयच्छेत् " इति। **शौनकोऽपि**—

" नैकपुत्रेण कर्त्तव्यं पुत्रदानं कदाचन। बहुपुत्रेण कर्त्तव्यं पुत्रदानं प्रयत्नतः "॥ इति। **बोधायनः**— " शौणितशुक्रसंभवो मातृपितृनिमित्तम्। तस्य प्रदानपरित्यागविक्रियेषु मातापितरौ प्रभवतः। न त्वेकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा। स हि संतानाय पूर्वेषाम्। न तु स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वाऽन्यत्रानुज्ञानाद्भर्तुः " इति। "एवं कृते औरस उत्पद्येत यदि स तुर्यभाक् भवति" इति च। पुत्रपरिग्रहकल्पस्तु **शौनकबोधायनादि**भिरभिहितः।

पुत्रपरिग्रहफलं दर्शयति **जाबालिः**—
" पुत्रस्वीकारमात्रेण पितरं त्रायते सुतः। दत्तः पुत्रत्वमाप्नोति ग्रहीता मुच्यते ऋणात् " इति। तथा च **मंत्रलिंगमपि**— " धर्माय त्वा गृह्णामि संतत्यै त्वा गृह्णामि " इति। यत्तु **वचनं**—

" स्वकुलं पृष्ठतः कृत्वा यो वै परकुलं व्रजेत्। तेन दुश्चरितेनासौ काण्डपृष्ठ इति स्मृतः ॥
" त्यक्तं पितृकुलं यस्मादनर्हः सर्वकर्मसु " इति । तत्स्वयंदत्तविषं विवाहानंतरदत्तविषयं वा। अथ गुर्वादिनिरूपणम्—

तत्र मनुः (२।१४२)—

" निषेकादीनि कर्माणि यः करोति यथाविधि । संभावयति चान्नेन स विप्रो गुरुरुच्यते "॥
निषेको गर्भाधानम्। निषेकग्रहणाद्न्नग्रहणाच्च पितैवायम्। स एव (२।१४०।१४१)—
" उपनीय तु यः शिष्यं वेदमध्यापयेत् द्विजः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते ॥
" एकदेशं तु वेदस्य वेदांगान्यपि वा पुनः । योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते ॥
"उपाध्यायादशाचार्य आचार्याणां शतं पिता। सहस्रं तु पितुर्माता गौरवेणातिरिच्यते"॥ (१४५)
याज्ञवल्क्यः (आ. ३४-३५)—
" स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति । उपनीय ददद्वेदमाचार्यः स उदाहृतः ॥
" एकदेशमुपाध्याय ऋत्विग्यज्ञकृदुच्यते। एते मान्या यथापूर्वमेभ्यो माता गरीयसी "॥ इति । पितुरेव मुख्यमुपनयनादिकर्तृत्वं तदभावे पितृसमत्वाज्ज्येष्ठस्य तयोर्द्वयोरभावे अयोग्यतायां वा अन्यस्योपनयादिकर्तृत्वम्। यदाह बृहस्पतिः—
" एवं दंडादिभिर्युक्तं संस्कृत्य तनयं पिता। वेदमध्यापयेद्यत्नाच्छास्त्रं मन्वादिकं तथा "॥ इति। ज्येष्ठस्य पितृसमत्वं मनुना स्मर्यते (९।१०८)—
" पितृवत्पालयेत्पुत्रान् ज्येष्ठो भ्राता यवीयसः। पुत्रवच्चापि वर्त्तेरन्ज्येष्ठे भ्रातरि धर्मतः "॥ इति। पितुरयोग्यतायां यमः—
" नाध्यापयति नाधीते पतनीयेषु वर्त्तते। इत्येतैर्लक्षणैर्युक्तः कर्तव्यो न पिता गुरुः " ॥ इति । गुरुरत्रोपनेता। आपस्तंबः (१।१।१४-१५)– " यस्माद्धर्मानाचिनोति स आचार्यस्तस्मै न द्रुह्येत्कदाचन " इति । शंखः–" भृतकाध्यापको यस्तु स उपाध्याय उच्यते " ॥ विष्णुरपि (२९।२)– " यस्त्वेनं मूल्येनाध्यापयेत्तत उपाध्यायः " इति । मनुः (२।१४२)—
"अग्न्याधेयं पाकयज्ञानग्निष्टोमादिकान् मखान्। यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते"॥
देवलः—
" उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः । मातुलः श्वशुरस्त्राता मातामहपितामहौ ॥
" वर्णज्येष्ठः पितृव्यश्च पुंस्येते गुरवः स्मृताः ॥
" माता मातामही गुर्वी पितुर्मातुश्च सोदराः । श्वश्रूः पितामही ज्येष्ठा धात्री च गुरवस्त्रियाम् ॥
" इत्युक्तो गुरुवर्गोऽयं मातृतः पितृतो द्विधा । गुरूणामपि सर्वेषां पूज्याः पंच विशेषतः ॥
" यो भावयति यः सूते येन विद्योपदिश्यते । ज्येष्ठो भ्राता च भर्त्ता च पंचैते गुरवः स्मृताः ॥
" तेषामाद्यास्त्रयः श्रेष्ठास्तेषां माता सुपूजिता "॥ इति । स्मृतिरत्ने—
" पिता माता तथाऽऽचार्यस्तज्जाया चाग्रजस्तथा । पितामहश्च तत्पत्नी गुरवः प्रथमा मताः ॥
" ऋचं वा यदि वाऽर्धर्चं पादं वा यदि वाऽक्षरम्। सकाशाद्यस्य गृह्णीयान्नियतं तत्र गौरवम् "॥
व्यासोपि—
" मातामहो मातुलश्च पितृव्यः श्वशुरो गुरुः । पूर्वजः स्नातकश्चर्त्विक् मान्यास्ते गुरवस्तथा ॥

" मातृष्वसा मातुलानी स्वसा धात्री पितृष्वसा । पितामही पितृव्यस्त्री गुरुस्त्री मातृवच्चरेत् " ॥
मनुः (२।१३३)—
" पितुर्भगिन्यां मातुश्च ज्यायस्यां च स्वसर्यपि । मातृवद्वृत्तिमातिष्ठेन्माता ताभ्यो गरीयसी " ॥
माता पूज्यतमेत्यत्र हेतुमाह **व्यासः**—
"मासान् दशोदरस्थं या धृत्वा शूलैः समाकुला । वेदनाविविधैर्दुःखैः प्रसूयेत विमूर्च्छिता ॥
"प्राणैरपि प्रियान्पुत्रान्मन्यते सुतवत्सला । कस्तस्या निष्कृतिं कर्त्तुं शक्तो वर्षशतैरपि" ॥ निष्कृतिः आनृण्यं तत्र **शंखः**—"न पुत्रः पितुर्मुच्येतान्यत्र सौत्रामणियागाज्जीवन्नृणान्मातुः " ॥ इति ।
यत्तु पौराणिकं वचनम्—

"द्वौ गुरू पुरुषस्येह पिता माता च धर्मतः । तयोरपि पिता श्रेयान्बीजप्राधान्यदर्शनात् ॥
" अभावे बीजिनो माता तदभावे तु पूर्वजः ॥ " इति तन्महागुरुविषयम् । **तथा च स्मर्यते**—
"उत्पाद्य पुत्रं संस्कृत्य वेदमध्याप्य यः पिता । कुर्याद्वृत्तिं च स महान्गुरुः पूज्यतमः स्मृतः" ॥ इति
अथ ब्रह्मचारिणां जनकमात्रपेक्षयाऽऽचार्यो गरीयानित्याह **मनुः** (२।१४६-१४८)—
" उत्पादकब्रह्मदात्रोर्गरीयान्ब्रह्मदः पिता । ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च शाश्वतम् ॥
" कामान्माता पिता चैनं यदुत्पादयतो मिथः । संभूतिं तस्य तां विद्याद्यद्योनावधिजायते ॥
" आचार्यस्त्वस्य यां जातिं विधिवद्वेदपारगः । उत्पादयति सावित्र्या सा सत्या साऽजरामरा " ॥
जातिं जन्म । आचार्यगरीयस्त्वमेव प्रकारांतरेण प्रतिपादयति—

"अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः । तमपीह गुरुं विद्याच्छ्रुतोपक्रियया तया (१४९) ॥
अल्पविद्याप्रदमपि गुरुं विद्याद्बहुविद्याप्रदं किं पुनरिति मनोरभिप्रायः । **गौतमः** (२।५६)-
" आचार्यः श्रेष्ठो गुरूणां मातेत्येके " इति । यस्तु बालो वृद्धमध्यापयति सोऽपि तस्य गरीयानित्याह **विष्णुः**- " बाले समानवयसि वाऽध्यापके गुरुवद्वर्त्तेत " इति इममेवार्थमितिहासपूर्वमाह **मनुः**—(२।१५०-१५६)

" ब्राह्मस्य जन्मनः कर्त्ता स्वधर्मस्य च शासिता । बालोऽपि विप्रो वृद्धस्य पिता भवति मंत्रदः ॥
" अध्यापयामास पितॄन्छिशुरांगिरसः कविः । पुत्रका इति होवाच ज्ञानेन परिगृह्य तान् ॥
" ते तमर्थमपृच्छंत देवानागतमन्यवः । देवाश्चैतान्समेत्योचुर्न्याय्यं वः शिशुरुक्तवान् ॥
" अज्ञो भवति वै बालः पिता भवति मंत्रदः । अज्ञं हि बालमित्याहुः पितेत्येव च मंत्रदम् ॥
" न हायनैर्न पलितैर्न वित्तैर्न च बन्धुभिः । ऋषयश्चक्रिरे धर्मं योनूचानः स नो महान् ॥
" न तेन स्थविरो भवति येनास्य पलितं शिरः । यो वै युवाऽप्यधीयानस्तं देवाः स्थविरं विदुः ॥
" आचार्यस्य पिता चैव माता भ्राता च पूर्वजः । नार्त्तेनाप्यवमंतव्या ब्राह्मणेन विशेषतः (२२५) ॥
" आचार्यो ब्रह्मणो मूर्तिः पिता मूर्तिः प्रजापतेः । माता पृथिव्या मूर्तिस्तु भ्राता स्वा मूर्तिरात्मनः (२२६) ॥
" यन्मातापितरौ क्लेशं सहेते संभवे नृणाम् । न तस्य निष्कृतिः शक्या कर्त्तुं वर्षशतैरपि (२२७) ॥
"तयोर्नित्यं प्रियं कुर्यादाचार्यस्य च सर्वदा । तेषु हि त्रिषु तुष्टेषु तपः सर्वं समाप्यते (२२८) ॥
" एषां त्रयाणां शुश्रूषा परमं तप उच्यते । न तैरनभ्यनुज्ञातो धर्ममन्यं समाचरेत् (२२९) ॥
" त एव हि त्रयो लोकास्त एव त्रय आश्रमाः । त एव च त्रयो वेदास्त एवोक्तास्त्रयोऽग्नयः (२३०) ॥

" त्रिष्वप्रमाद्यन्नेतेषु त्रीन्लोकान्विजयेद् गृही । दीप्यमानश्च वपुषा देववद्दिवि रोचते " (२३२) ॥
न केवलमयं ब्रह्मचारिणां धर्मः किंतूत्तरेषामपीति प्रदर्शितो गृहीति । स एव (२।२३३-२३७)–
" इमं लोकं मातृभक्त्या पितृभक्त्या तु मध्यमम् । गुरुशुश्रूषया त्वेव ब्रह्मलोकं समश्नुते ॥
" सर्वे तस्यादृता धर्मा यस्यैते त्रय आदृताः । अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः ॥
" यावत्त्रयस्ते जीवेयुस्तावन्नान्यं समाचरेत् । तेष्वेव नित्यं शुश्रूषां कुर्यात्प्रियहिते रतः ॥
" त्रिष्वेतेष्विह कृत्यं हि पुरुषस्य समाप्यते । एष धर्मः परः साक्षादुपधर्मोऽन्य उच्यते" ॥ इति ।
व्यासोऽपि—" उपाध्यायं पितरं मातरं चापि द्रुह्यन्ति मनसा कर्मणा वा ॥
" तेषां पापं भ्रूणहत्याविशिष्टं नान्यस्तेभ्यः पापकृदस्ति लोके " ॥ **देवलः**—
" यावत्पिता च माता च द्वावेतौ निर्विकारिणौ । तावत्सर्वं परित्यज्य पुत्रः स्यात्तत्परायणः ॥
" माता पिता च सुप्रीतौ स्यातां पुत्रगुणैर्यदि । स पुत्रः सकलं धर्मं प्राप्नुयात्तेन कर्मणा " ॥
विकारो मरणम् । **स एव**—
" नास्ति मातृसमं दैवं नास्ति पितृसमो गुरुः । तयोः प्रत्युपकारोऽपि न कथंचन विद्यते"॥ इति ।
व्यासः—
"परित्यजंति ये रागादुपाध्यायं गुरुं तथा । न मानयंति मोहाद्वा ते यांति नरकान्बहून् ॥
" यो भ्रातरं पितृसमं ज्येष्ठं मूर्खो विमन्यते । तेन दोषेण संप्रेत्य निरयं घोरमृच्छति ॥ " इति ।
मनुः (४।१६२)—
" आचार्यं च प्रवक्तारं पितरं मातरं गुरुम् । न हिंस्याद्ब्राह्मणं गां च सर्वांश्चैव तपस्विनः " ॥
न हिंस्यान्न कुप्यात् । अत्रापवादमाह **स एव**—
" गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः । उत्पथं प्रतिपन्नस्य परित्यागो विधीयते " ॥
दोषयुक्तोऽपि पिता न त्याज्य इत्याह **यमः**—
" अशुद्धौ तु परित्यागः पातकेऽयाज्ययाजने । उपाध्यायेऽथ याज्ये वा न पितुस्त्याग इष्यते" ॥
मनुः (२।२०८)—
" बालः समानजन्मा वा शिष्यो वा ज्ञानकर्मणि । अध्यापयन्गुरुसुतो गुरुवन्मानमर्हति " ॥
व्यासः—
" गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः । पतिरेव गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः " ॥
मनुः (२।१३५)—
" ब्राह्मणं दशवर्षं च शतवर्षं च भूमिपम् । पितापुत्रौ विजानीयात्तयोस्तु ब्राह्मणः पिता"॥
इति गुर्वादिनिरूपणम् । अथान्योन्यं मान्यत्वनिमित्तान्याह **याज्ञवल्क्यः** (आ. ११६)—
"विद्याकर्मवयोबंधुवित्तैर्मान्या यथाक्रमम् । एतैः प्रभूतैः शूद्रोऽपि वार्धके मानमर्हति" ॥
विद्या श्रुतिस्मृती । कर्म यज्ञादि । वयः आत्मनोऽतिरिक्तम् । बंधुत्वं स्वजनसंपत्तिः । वित्तं धनम् । एतैर्युक्ताः क्रमेण मान्याः पूजनीयाः । एतैः कर्मबंधुवित्तैः प्रभूतैः प्रवृद्धैर्युक्तः शूद्रोऽपि वार्धके नवतेरूर्ध्वं मानमर्हतीत्यर्थः । **मनुरपि** (२।१३६–१३७)—
" वित्तं बंधुर्वयः कर्म विद्या भवति पंचमी । एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥
" पंचानां त्रिषु वर्णेषु भूयांसि गुणवन्ति च । यत्र स्युः सोऽत्र मानार्हः शूद्रोऽपि दशमीं गतः" ॥
भावप्रधानो निर्देशः । पंचानां वित्तादीनां मध्ये त्रिषु वर्णेषु यस्मिन्भूयांसि विद्यादीनि यस्मिन्वा

गुणवंति श्रेष्ठानि विद्यादीनि स्युः स मानार्हः इति च । वर्षशतस्यांतिमो दशमो भागो दशमीगतः नवतिहायनातीत इत्यर्थः । **गौतमोपि** (७।१८–२०)– " वित्तबंधुजातिकर्मविद्यावयांसि मान्यानि परबलीयांसि । श्रुतं तु सर्वेभ्यो गरीयस्तन्मूलत्वाद्धर्मस्य " इति ॥ **इति मान्यतानिमित्तम् । अथ मार्गप्रदानार्हानाह मनुः** (२।१३८–१३९)—

" चक्रिणो दशमीस्थस्य रोगिणो भारिणः स्त्रियाः । स्नातकस्य च राज्ञश्च पंथा देयो वरस्य च ॥
" तेषां तु समवेतानां मान्यौ स्नातकपार्थिवौ । राजस्नातकयोरेव स्नातको नृपमानभाक् " ॥

चक्रं अनोरथाद्युपलक्षणम् । तेन यो गच्छति स चक्री । तस्य निर्गुणस्यापि पंथा देयः । एवं दशमीस्थस्य वृद्धतरस्य । भारिणः भारवाहकस्य । स्नातकस्य गृहस्थस्य ब्राह्मणस्य । वरस्य श्रेष्ठस्य विवाहोद्युक्तस्य । विद्याव्रतस्नातस्य इति **विज्ञानेश्वरः** (पृ. ३३) । समवेतानां मार्गे संगतानां मान्यौ मार्गदानेन । नृपमानभाक् नृपदत्तमार्गभागित्यर्थः । **याज्ञवल्क्योऽपि** (आ. ११७)–

" वृद्धभारिनृपस्नातस्त्रीरोगिवरचक्रिणाम् । पंथा देयो नृपस्तेषां मान्यः स्नातश्च भूपतेः" ॥

शंखः—" बालवृद्धमत्तोन्मत्तोपहतदेहभाराक्रांतस्त्रीनृपस्नातकप्रव्रजितेभ्योऽथ ब्राह्मणायाग्रे पंथा राज्ञ इत्येके तच्चानिष्टं गुरुर्ज्येष्ठश्च ब्राह्मणो राजानमतिशेते तस्मै पंथा देयः" इति । तेषां परस्परसमवाये विद्यादिभिर्विशेषो द्रष्टव्यः । **व्यासः**—

" पंथा देयो ब्राह्मणाय स्त्रियै राज्ञे ह्यचक्षुषे । वृद्धाय भावहीनाय रोगिणे दुर्बलाय च" ॥

स्त्री चात्र गर्भिणी वेदितव्या । तथा च **बोधायनः**—

" पंथा देयो ब्राह्मणाय गवे राज्ञे ह्यचक्षुषे । वृद्धाय भारतप्ताय[1] गर्भिण्यै दुर्बलाय च " ॥ इति ।

गौतमः (७।२१–२२)– " चक्रिदशमीस्थानुग्राह्यवधूस्नातकराजभ्यः पथो दानम् । राज्ञा तु श्रोत्रियाय " इति । अनुग्राह्यो रोगार्तः । वधूर्नवोढा । **आपस्तंबः** (२।११।५–९)—

"राज्ञः पंथा ब्राह्मणेनासमेत्य । समेत्य तु ब्राह्मणस्यैव पंथाः । यानस्य भाराभिनिहितस्यातुरस्य स्त्रिया इति सर्वैर्दातव्यो वर्णज्यायसां चेतरैर्वर्णैरशिष्टपतितमत्तोन्मत्तानामात्मस्वस्त्ययनार्थेन सर्वैरेव दातव्यः " इति । राजा ब्राह्मणेन यदि समेतो न भवति तस्य तदा पंथा देयः । समेतश्चेद्ब्राह्मणस्यैव पंथाः । यानं शकटरथगजादि । भाराभिहतः भाराक्रांतः । वर्णज्यायसामुत्कृष्टवर्णानां निकृष्टवर्णैः पंथा देयः । आत्मस्वस्त्ययनमात्मत्राणम् । तेन प्रयोजनेन तदर्थं न त्वदृष्टार्थमित्यर्थः । अत्र **कौटिल्येन** देयस्य पथः प्रमाणमुक्तम् (अर्थशास्त्रे २।२५) " पंचारत्निरथपथश्चत्वारो हस्तिपथो द्वौ द्वौ पशुक्षुद्रमनुष्याणाम् " इति । **इति मार्गदाननिरूपणम्**—

अथाभिवादनम् । तत्र **याज्ञवल्क्यः**—(आ. २६) " ततोऽभिवादयेद्वृद्धानसावहमिति ब्रुवन् " । ततः अग्निकार्यादनंतरमित्यर्थः । आशीर्वचनार्थो नमस्कारोऽभिवादनम् । **मनुरपि** (२।१२२।१२४)—

" अभिवादात्परं विप्रो ज्यायांसमभिवादयन् । असौ नामाहमस्मीति स्वं नाम परिकीर्त्तयेत् ॥
भोः शब्दं कीर्तयेदंते स्वस्य नाम्नोऽभिवादने । नाम्नः स्वरूपभावो हि भो भाव ऋषिभिः स्मृतः"॥ इति ।

अभिवादात्परमभिवादय इति शब्दादुपरि देवदत्तनामाहमस्मीति स्वं नाम ब्रूयात् । अस्योपरि भो शब्दं कीर्त्तयेत् । अभिवाद्यस्य नाम्ना संबोधयितुमयुक्तत्वात् भोशब्देन संबोधयेत् । भोभावः भोशब्दसत्तानाम्नः स्वरूपभावः नाम्नः स्वरूपसत्ता समस्तनामधेयकार्यकारणसमर्थो भोशब्द इत्यर्थः । तथा चायं प्रयोगः— 'अभिवादये देवदत्तनामाहमस्मि भोः' इति ।

---

१ कखग–तृप्ताय ।

अत्र गौतमः (६।५)– "स्वनाम प्रोच्याहमयमित्यभिवादो ज्ञसमवाये" इति। तद्व्याख्याता हरदत्तः। यः प्रत्यभिवादनविधिज्ञस्तेन संगमे स्वनाम च प्रोच्य उच्चैरुच्चार्याहं शब्दं चोक्त्वाऽयमिति च ब्रूयात्। अयमिति प्रत्यक्षोपदेशः। अस्मि शब्दः प्रयोक्तव्य इत्याहुः। अंते च भोशब्दं प्रयुज्यते। 'अभिवादये हरदत्तोऽहमस्मि भो" इति प्रयोगः। 'हरदत्तनामाहम्' इति केचित्। 'हरदत्तशर्माहम्' इत्यपरे॥ 'हरदत्तशर्मा नामाहमस्मि भोः' इति प्रयोग इत्यन्ये इति। शर्मान्तं ब्राह्मणस्येति वचनादत्र यथास्वकुलाचारं व्यवस्था। **भरद्वाजः**—

"कंडूय पृष्ठतो गां तु कृत्वा चाश्वत्थवंदनम्। उपगम्य गुरून्सर्वान्विप्रांश्चैवाभिवादयेत्"॥

मनुः (२।११७)—

"लौकिकं वैदिकं वाऽपि तथाऽध्यात्मिकमेव वा। आददीत यतो ज्ञानं तं पूर्वमभिवादयेत्"॥ इति।

आपस्तंबः—(१।५।१२–१६) "गुरोस्तिष्ठन्प्रातरभिवादमभिवादयीतासावहं भो इति। समानग्रामे च वसतामन्येषामपि वृद्धतराणां प्राक् प्रातराशात्। प्रोष्य च समागमे। स्वर्गमायुश्चेप्सन्। दक्षिणं बाहुं श्रोत्रसमं प्रसार्य ब्राह्मणोभिवादयीतोरःसमं राजन्यो मध्यसमं वैश्यो नीचैः शूद्रः प्रांजलिम्" इति। **विष्णुः**—

"जन्मप्रभृति यत्किंचिच्चेतसा धर्ममाचरेत्। सर्वं तन्निष्फलं याति ह्येकहस्ताभिवादनात्"॥ इति।

एतद्द्विद्विषयम्। यतः स एवाह—

"शिष्याणां चाशिषं दद्यात्पादोपग्रहणं गुरोः। स्पृष्ट्वा कर्णौ तु विदुषां मूर्खाणां चैकपाणिना"॥ इति।

आश्वलायनः—

"वामं वामेन संस्पृश्य दक्षिणेन तु दक्षिणम्। हस्तेन हस्तौ कर्णाभ्यां[1] गुरूणामभिवादयेत्॥

"वामोपरि करं कृत्वा दक्षिणं नाम चोच्चरेत्। जानुप्रभृति पादांतमालभ्य पदयोर्नमेत्"॥

एतच्च प्रत्युत्थाय कर्तव्यम्। तदाहापस्तंबः—

"ऊर्ध्वं प्राणा ह्युत्क्रामंति यूनः स्थविर आयति। प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यते"॥

स एव (१।१४।१४–२२)— "ज्ञायमाने वयोविशेषे वृद्धतरायाभिवाद्यम्। विषमगतायागुरवे नाभिवाद्यम्। अन्वारुह्य वाऽभिवादयीत। सर्वत्र तु प्रत्युत्थायाभिवादनम्। अप्रयतेन नाभिवाद्यम्। तथा प्रयताय अप्रयतश्च न प्रत्यभिवदेत्। पतिवयसस्त्रियः। न सोपानद्वेष्टितशिरा अवहितपाणिर्वाऽभिवादयीत" इति। अस्यार्थः। वयो विशेषे ज्ञायमाने पूर्वं वृद्धतरायाभिवादनं कर्त्तव्यम्। पश्चाद्वृद्धाय। विषमगताय उच्चस्थाने नीचैस्थाने वा स्थिताय गुरुव्यतिरिक्ताय नाभिवाद्यम्। गुरवे तु अभिवाद्यमेव। अन्वारुह्य वाभिवादयीत। एतद् गुरुविषयम्। अन्वावरुह्येतेतदपि द्रष्टव्यम्। न्यायस्य तुल्यत्वात्सर्वत्र गुरावगुरौ च पतिवयसस्त्रियः तेन तदनुरोधेन ज्येष्ठभार्यादिष्वभिवादनमवहितपाणिः समित्कुशादिहस्त इति। **मनुः** (२।११९)—

"शय्यासनेऽध्याचरिते श्रेयसा न समाविशेत्। शय्यासनस्थश्चैवैनमवरुह्याभिवादयेत्"॥

श्रेयसा गुर्वादिनाचरिते परिगृहीतयोः शय्यासनयोरधि उपरि समाचरेत्। न समुपविशेत्। स एव **मनुः** (२।१२१)—

"अभिवादनशीलस्य नित्यं वृद्धोपसेविनः। चत्वारि सम्यग्वर्धन्ते ह्यायुः प्रज्ञा यशो बलम्"॥ इति।

बोधायनः (१।२।३१–३४)–"नासीनो नासीनाय न शयानो न शयानाय नाप्रयतो नाप्रयताय

---

१ **कख**–कर्णौ हस्ताभ्यां।

शक्तिमद्विषये मुहूर्तमपि नाप्रयतः स्यात् । समिद्धार्युदकुंभपुष्पान्नहस्तो नाभिवादयेत् । यच्चान्यदप्येवं युक्तं न समवायेऽभिवादनमत्यंतशो भ्रातृपत्नीनां युवतीनां च गुरुपत्नीनां जातवीर्यः इति एवं युक्तमपि पितृदेवताद्यर्थे द्रव्ययुक्तमपि नाभिवादयेत् । न समवायेत्यंतशः अत्यंतसमीपे स्थित्वेत्यर्थः । जातवीर्यो जातशुक्रः । चशब्दात्पितृव्यादिपत्नीनामपि युवतीनां ग्रहणम् । शंखः—
"नोदकुंभहस्तोऽभिवादयेन्न भैक्षं चरन्न पुष्पाज्यहस्तो नाशुचिर्न देवपितृकार्यं कुर्वन्नशयानः" इति ।
आपस्तंबः—

" समित्पुष्पकुशाज्यांबुमृदन्नाक्षतपाणिकम् । जपं होमं च कुर्वाणं नाभिवादयते द्विजम्" ॥ इति ।
मनुः (२।२१०)—

" गुरुवत्प्रतिपूज्यास्तु सवर्णा गुरुयोषितः । असवर्णास्तु संपूज्याः प्रत्युत्थानाभिभाषणैः " ॥
" गुरुपत्नी तु युवती नाभिवाद्येह पादयोः । पूर्णविंशतिवर्षेण गुणदोषो विजानता"(२१२)॥
स्मृत्यर्थसारे—

"उदक्यां सूतिकां नारीं पतिघ्नीं गर्भघातिनीम् । पाषंडं पतितं व्रात्यं महापातकिनं तथा ॥
" नास्तिकं कितवं स्तेनं कृतघ्नं नाभिवादयेत् । मत्तं प्रमत्तमुन्मत्तं धावंतमशुचिं नरम् ॥
" वमन्तं जृम्भमाणं च कुर्वंतं दंतधावनम् । अभ्यक्तशिरसं स्नानं कुर्वंतं नाभिवादयेत् ॥
" जपयज्ञगणस्थांश्च समित्पुष्पकुशानलान् । उदपात्रार्घ्यभैक्षान्नं वहंतं नाभिवादयेत् ॥
" अभिवाद्य द्विजश्चैनानहोरात्रेण शुध्यति ॥
" अभिवाद्यांधकारस्थं शय्यास्थं पादुकांघ्रिकम् । उच्छिष्टं जपहोमार्चारतं चोपवसेत्त्र्यहम् ॥
" दूरस्थं जलमध्यस्थं धावंतं धनगर्वितम् । रोगाक्रांतं मदोन्मत्तं षड्विप्रान्नाभिवादयेत् " ॥

" क्षत्रियवैश्याभिवादने विप्रस्याहोरात्रं शूद्राभिवादने त्रिरात्रं कृच्छ्रं तु रजकादिषु चंडालादिषु चांद्रं स्यात् " इति । शातातपः—

" अभिवाद्यो नमस्कार्यः शिरसा वंद्य एव च । ब्राह्मणः क्षत्रियाद्यैस्तु श्रीकामैः सादरं सदा ॥
" नाभिवाद्यास्तु विप्रेण क्षत्रियाद्याः कथंचन । ज्ञानकर्मगुणोपेता यद्यप्येते बहुश्रुताः ॥
"क्षत्रं वैश्यं वाऽभिवाद्य प्रायश्चित्तं कथं भवेत् । ब्राह्मणानां दशाष्टौ च अभिवाद्य विशुध्यति ॥
" अभिवाद्य द्विजः शूद्रं सचैलं स्नानमाचरेत् । ब्राह्मणानां शतं सम्यगभिवाद्य विशुध्यति ॥
"अर्चयेत्पुंडरीकाक्षं देवं चापि त्रिलोचनम् । ब्राह्मणं वा महाभागमभिवाद्य विशुध्यति"॥
ब्राह्मणेष्वपि क्वचिदपवादमाह विष्णुः—

" सभासु चैव सर्वासु यज्ञे राजगृहेषु च । नमस्कारं प्रकुर्वीत ब्राह्मणान्नाभिवादयेत् ॥
"विप्रौघदर्शनात् क्षिप्रं क्षीयन्ते पापराशयः । वन्दनान्मङ्गलावाप्तिः स्पर्शनादच्युतं पदम्"॥
स्मृतिरत्नावल्याम्—

"वर्षैर्वयोऽधिकाशीतिस्तीर्त्वा मासचतुष्टयम् । यो जीवेत्स तु वन्द्यः स्यात् विष्णोरपि सुपूजितः"॥
एतत्सवर्णाविषयम् । **मनुः**—

" यस्य देशं न जानाति स्थानं त्रिपुरुषं कुलम् । कन्यादानं नमस्कारं श्राद्धं तस्य विवर्जयेत्"॥
चंद्रिकायाम्—

"ज्यायानपि कनीयांसं संध्यायामभिवादयेत । विना पुत्रं च शिष्यं च दौहित्रं दुहितुः पतिम्"॥

स्मृतिभास्करे—
" सर्वे चापि नमस्कार्याः सर्वावस्थासु सर्वदा । आशीर्वाच्या नमस्कार्यैर्वयस्यस्तु पुनर्नमेत् " ॥
वृद्धमनुः—
" अभिवादने तु सर्वत्र पादस्पर्शनमेव वा । विप्राणां प्रांजलिः कार्यो नमस्कारः स उच्यते " ॥
स्मृत्यर्थसारे– अभिवादने पादस्पर्शनं नास्ति कुर्याद्वा ।
" अभिवादे नमस्कारे तथा प्रत्यभिवादनम् । आशीर्वाच्या नमस्कार्यैर्वयस्यस्तु पुनर्नमेत् ॥
" स्त्रियो नमस्या वृद्धाश्च वयसा पतिदेवताः । देवताप्रतिमां दृष्ट्वा यतिं चैव त्रिदंडिनम् ॥
" नमस्कारं न कुर्याच्चेदुपवासेन शुध्यति " ॥ इति । **स्मृतिरत्ने**—
" स्रुक्पाणिकमनाज्ञातमशक्तं रिपुमातुरम् । योगिनं च तपःस्कं कनिष्ठं नाभिवादयेत् " ॥
मनुः (२।१३४)—
"दशाब्दाख्यं पौरसख्यं पंचाब्दाख्यं कलाभृताम् । त्र्यब्दपूर्वं श्रोत्रियाणामल्पेनापि स्वयोनिषु"॥
समानपुरवासिनां दशभिर्वर्षैः पूर्वः सखा भवति । ततोऽधिको ज्यायान् । कलाभृतां गीतादिविद्याभृतां पंचाब्दपूर्वः सखा श्रोत्रियाणां वेदाध्यायिनां त्र्यब्दपूर्वः सखा स्वयोनिषु भ्रातादिषु स्वल्पेनापि वयसा पूर्वः सखा भवति । ततोऽधिकोऽभिवाद्य इत्यर्थः । **आपस्तंबः** (१।१४।२६-३१)–
"कुशलमवरवयसं वयस्यं वा पृच्छेत् । अनामयं क्षत्रियम् । अनष्टं वैश्यम् । आरोग्यं शूद्रम् । नासंभाष्य श्रोत्रियं व्यतिव्रजेत् । अरण्ये च स्त्रियम् " इति । श्रोत्रियं पथिसंगतमसंभाष्य न व्यतिक्रामेत् । अरण्ये सहायरहितदेश स्त्रियमेकाकिनीं दृष्ट्वा असंभाष्य न व्यतिव्रजेत् । संभाषणं च मातृवद्भगिनीवच्च भगिनी किं ते करवाणि न भेतव्यमिति । **मनुरपि** (२।१२७–२९)—
" ब्राह्मणं कुशलं पृच्छेत्क्षत्रबंधुमनामयम् । वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च ॥
"परपत्नी च या स्त्री स्यादसंबंधा च योनितः । तां ब्रूयाद्भवतीत्येवं सुभगे भगिनीति वा " ॥ **यमः**–
" स्वस्तीति ब्राह्मणो ब्रूयादायुष्मानिति भूमिपः । वर्धतामिति वैश्यस्तु शूद्रस्तु स्वागतं वदेत्" ॥
तथा च **भविष्यत्पुराणे**–" ब्राह्मणः सर्ववर्णानां स्वस्तिकुर्यादिति स्थितिः " ॥ स्वस्तिशब्दार्थमाह **यमः**—
"यत्सुखं त्रिषु लोकेषु व्याधिव्यसनवर्जितम् । यस्मिन्सर्वे स्थिताः कामास्तत्स्वस्तीत्यभिसंज्ञितम्" ॥
व्यासः—
" कदाचित्कवचं भेद्यं तोमरेणं शरेण वा । अपि वज्रशताघातैर्ब्राह्मणाशीर्न भिद्यते " ॥
मनुः (२।१३०)—
"मातुलांश्च पितृव्यांश्च श्वशुरानृत्विजो गुरून् । असावहमिति ब्रूयात्प्रत्युत्थाय यवीयसः" ॥
असावहमिति देवदत्तमिति ब्रूयान्नाभिवादयेत्यर्थः । तथा **स्मृतिरत्ने**—" ऋत्विक्पितृव्यश्वशुरमातुलानां यवीयसाम् प्रश्रयाः प्रथमं कुर्यात् प्रत्युत्थायाभिभाषणम् " इति । **बोधायनः** (१।२।४६)— " ऋत्विक्पितृव्यश्वशुरमातुलानां तु यवीयसां प्रत्युत्थायाभिभाषणम् " इति । **गौतमोऽपि** (६।९)–" ऋत्विक्श्वशुरपितृव्यमातुलानां तु यवीयसाम् प्रत्युत्थानमभिवाद्याः " इति । यत्तु **वसिष्ठापस्तंबाभ्यामुक्तम्** (१३।४१)– " ऋत्विक्श्वशुरपितृव्यमातुलानवरवयसः प्रत्युत्थायाभिवदेत् " इति तत् अभिवदेत् आभिमुख्येन वदेदित्यभि-

१ क्ष–नाराचेण ।

भाषणमात्राभिप्रायमिति **स्मृतिचंद्रिकादौ** व्याख्यातम् (पृ. ३८ पं. २)। **हरदत्तस्तु**–"अवरवयसः ऋत्विगादयोऽपि अभिवादयंते तानभिवादयमानान्प्रत्युत्थायाभिवदेत् । नान्येष्विव यथासुखमासीन इति व्याकृतवान् । गुर्वादिविषये त्वभिवादने विशेषमाह **गौतमः** (१।५३)–"गुरोः पादोपसंग्रहणं प्रातः" इति । समवायेन्वहमभिगम्य तु विप्रोष्य मातृपितृतद्बंधूनां पूर्वजानां विद्यागुरूणां तद्गुरूणां च संनिपाते परस्येति च पित्रादीनां समवाये संगमे प्रतिदिनं पादोपसंग्रहणं कुर्यात् । तेषां च युगपत्संनिपाते परस्योपसंग्रहणम् । **आपस्तंबोऽपि** (१।५।१८-१९)–"उदिते त्वादित्ये त्वाचार्येण समेत्योपसंग्रहणम् । सदैवाभिवादनम्" इति । समावृत्तेन सर्वे गुरव उपसंग्राह्याः प्रोष्य च समागम इति च । **स एव** (१।८।१९-२०)–"आचार्यप्राचार्यसंनिपाते[1] प्राचार्यायोपसंगृह्योपसंजिघृक्षेदाचार्यम् प्रतिषेधेदितरः" इति । **मनुरपि** (२।२०५)—

"गुरोर्गुरौ संनिहिते गुरुवद्वृत्तिमाचरेत् । न चातिसृष्टो गुरुणा स्वान्गुरूनभिवादयेत्" ॥ इति ।

आपस्तंबः (१।६।३५)— "यस्मिंस्त्वनाचार्यसंबंधाद्गौरवं वृत्तिस्तस्मिन्नन्वकस्थानीयोऽप्याचार्यस्य" इति । यस्मिंस्तु पुरुषो शिष्याचार्यभावमंतरेणापि विद्याचारित्रादिना लौकिकानां गौरवं भवति तस्मिन्नन्ववस्थानीयेऽप्याचार्ये या वृत्तिः स कर्तव्येत्यर्थः । उपसंग्रहणस्वरूमाह **स एव** (१।५।२१–२२)–"दक्षिणेन पाणिना दक्षिणं पादमधस्तादभ्यधिमृश्य सकुष्ठिकमुपसंगृह्णीयात् उभाभ्यामेवोभावभिपीडयत उपसंग्राह्यावित्येके" इति ॥ आत्मनः दक्षिणेन पाणिनाऽऽचार्यस्य दक्षिणं पादमधस्तादभ्यधिमृश्य अभिशब्द उपरि भावे अधस्ताच्चोपरिष्टाच्चाभिमृश्य सकुष्ठकं सगुल्फं सांगुष्ठमित्यन्ये । उपसंगृह्णीयादिदमुपसंग्रहणं एतत्कुर्यादुभाभ्यामेव पाणिभ्यामुभावे वाचार्यस्य पादावभिपीडयतो माणवकस्य उपसंग्राह्यावित्येके मन्यंत इत्यर्थः । अत्र **मनुः** (२।७२)—

"व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः । सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन तु दक्षिणः"॥ इति ।

बोधायनः (१।२।२७-२८)–"श्रोत्रे संस्पृश्य मनः समाधायाधस्ताज्जान्वोरा पद्भ्याम्" इत्युपसंग्रहणम् इति । एतच्च गुरुपत्नीनामपि कार्यम् । तथा च **मनुः** (२।२१०)—

"गुरुवत्प्रतिपूज्याः स्युः सवर्णा गुरुयोषितः ।

"मातृष्वसा मातुलानी श्वश्रूरथ पितृष्वसा । संपूज्या गुरुपत्नीवत्समस्ता गुरुभार्यया ॥ (१३१)

"भ्रातृभार्योपसंग्राह्या सवर्णाऽहन्यहन्यपि । विप्रोष्य तूपसंग्राह्या ज्ञातिसंबंधियोषितः ॥ (१३२)

"अवृद्धा गुरुपत्नी च नोपसंग्रहमर्हति" । **स्मृत्यर्थसारे**–"उपसंग्रहणं नाम अमुकगोत्रो देवदत्तशर्मा नामाहं भो अभिवादये इत्युक्त्वा कर्णौ स्पृष्ट्वा दक्षिणोत्तानपाणिना गुरोर्दक्षिणं पादं सव्येन सव्यं गृहीत्वा शिरोऽवनमनम्" इति। "अत्र गुरवो मातास्तन्यदधात्री च पितामहादयो मातामहश्चान्नदाता भयत्राता चार्यश्चोपनेता मंत्रविद्योपदेष्टा तेषां पत्न्यश्चोपसंग्राह्याः समावृत्ते च बालेऽध्यापके समवयस्केऽध्यापके गुरुवच्चरेत्" इति । **इत्यभिवादननिरूपणम्** ।

अथ प्रत्यभिवादनम् । तत्र **मनुः** (२।१२५)—

"आयुष्मान्भव सौम्येति वाच्यो विप्रोऽभिवादने। अकारश्चास्य नाम्नोऽते वाच्यः पूर्वाक्षरः प्लुतः"॥

अभिवादने कृते सति विप्रः द्विजः कनीयान्ज्यायसा वाच्यः। अस्य कनीयसो नाम्नोऽते पूर्वाक्षरः प्लुतः। अक्षरशब्देन स्वर एव विवक्षितः। व्यंजनस्य प्लुतासंभवात् । यस्मादकारात्पूर्व-

---

[1] करवग- + परस्योपसंग्रहणं ।

मक्षरं प्लुतं भवति स पूर्वाक्षरप्लुतः । अकारश्च वाच्यः । आयुष्मान्भव सौम्य देवदत्ता अ इति वाच्य इति यावदिति मानवे व्याख्याने । आपस्तंबोऽपि (१।५।१७)—

" प्लावनं च नाम्नोऽभिवादनप्रत्यभिवादने च पूर्वेषां वर्णानाम् " इति । अत्र हरदत्तः—

अभिवादनस्य यत्प्रत्यभिवादनं तत्राभिवादयितुनाम्नः प्लावनं कर्त्तव्यं प्लुतः कर्त्तव्यः पूर्वेषां वर्णानां शूद्रवर्जितानां अभिवादयमानानां ।" प्रत्यभिवादेऽशूद्रे " इति पाणिनीयस्मृतिः (८।२।८३)। तत्र वाक्यस्य टेरित्यनुवृत्तेः प्रत्यभिवादवाक्यस्यांते नामप्रयोगः । तस्य टेः प्लुतः । आयुष्मान्भव सौम्येति वाच्यो विप्र इति स्मृत्यंतरवशान्नाम्नश्च पश्चादकारः 'आयुष्मान्भव सौम्य देवदत्ता अ' इति प्रयोगः । शंभुः विष्णुः पिनाकपाणिः चक्रपाणिः इत्यादि नाम्नां संबुद्धौ गुणे कृते एचोऽप्रगृह्यस्य दूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुताविन्त्ययमपि विधिर्भवति । अंते अकारः तयोर्व्यावचि संहितायामिति यकारवकारौ च भवतः । तथा च प्रयोगः । शंभाव विष्णाव पिनाकपाणाय चक्रपाणाय इति व्यंजनांतेषु च । अग्निचिकद् इत्यादि प्रयोग इति । वसिष्ठोऽपि—

"आमंत्रितो योंऽत्यः स्वरः स प्लवत " इति । एवं च अभिवादनकृन्नामगतांतिमस्वरातिरिक्ते पूर्वोकारः पठितव्यः । अंतिमस्वरश्च प्लावयितव्य इति हरदत्तादीनां बहूनामभिमतम् । स्मृतिचंद्रिकायां पराशरमाधवीये च मनुवचनमन्यथा व्याख्यातम् । तथा हि । पूर्वमक्षरं यस्यासौ पूर्वाक्षरः । पूर्वमक्षरं च सामर्थ्याद्व्यंजनं स्वराणां स्वरपूर्वकत्वात्संभवात् । अतश्चाभिवादकनामगतो व्यंजननिष्ठोऽतिमस्वरः प्लावनीयः अकारेणांतिमस्वरमात्रमुपलक्ष्यते । अशेषनाम्नामकारांतत्वाभावात् । न त्वत्रापूर्वाकारो विधीयते । तथा च सत्येवं प्रयोगो भवति । आयुष्मान्भव सौम्य देवदत्ता इतीति । एतेषां मते पूर्वाक्षर इति पृथक्पदं द्रष्टव्यम् । अत्रातिरिक्ताकारपक्ष एव शिष्टाचारानुगुणः । मनुः (२।१२६)—

" यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम् । नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः ॥

"नामधेयस्य ये केचिदभिवादं न जानते । तान्प्राज्ञोऽहमिति ब्रूयात्स्त्रियः सर्वास्तथैव च"॥(१२३)इति।

पतंजलिः—

"अविद्वांसः प्रत्यभिवादे नाम्नो येन प्लुतिं विदुः । कामं तेषु च विप्रोष्य स्त्रिष्विवायमहं वदेत्"॥इति । अहं वदेत् । अहमिति वदेदित्यर्थः । यमः—

" यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम् । आशिषं वा कुरुश्रेष्ठ स याति नरकं ध्रुवम् ॥

" अभिवादे कृते यस्तु तं विप्रं नाभिवादयेत् । श्मशाने जायते वृक्षो गृध्रकाकोपसेवितः ॥

" अभिवादे तु यः पूर्वमाशिषं न प्रयच्छति । यद् दुष्कृतं भवेत्तस्य तस्माद्भागं प्रचक्षते ॥

" तस्मात्पूर्वाभिभाषी स्याच्चंडालस्यापि धर्मवित् । सुरां पिबेतिवक्तव्यमेवं धर्मो न हीयते" ॥ इति ।

मनुः (२।१२६)—

" न वाच्यो दीक्षितो नाम्ना यवीयानपि यो भवेत् । भो भवत्पूर्वकं चैवमभिभाषेत धर्मवित् "। संनिधौ भोशब्दः । यथा भो यजमानेति । असंनिधौ भवच्छब्दः । यथा 'तत्र भवान्यजमान' इति ।

स्मृतिरत्ने—

" आचार्यं चैव तत्पुत्रं तद्भार्यां दीक्षितं गुरुम् । पितरं च पितृंश्चैव मातरं मातुलं तथा ॥

" हितैषिणं च विद्वांसं श्वशुरं यतिमेव च । न ब्रूयान्नामतो विद्वान्मातुश्च भगिनीं तथा ।" इति ॥

इति प्रत्यभिवादननिरूपणम् । अत्र ब्रह्मचारिधर्मः । संवर्तः—

" ततोऽधीयीत वेदं तु वीक्षमाणो गुरोर्मुखम् । सायं प्रातश्च भिक्षेत ब्रह्मचारी समाहितः ॥
" निवेद्य गुरवेऽश्नीयात्प्राङ्मुखो वाग्यतः शुचिः " ॥ दक्षः—
" प्रातर्माध्यान्हयोः स्नानं वानप्रस्थगृहस्थयोः । यतेस्त्रिषवणं प्रोक्तं सकृत्तु ब्रह्मचारिणः" ॥
अत्र विशेषमाह विष्णुः– "दंडवन्मज्जनम् " इति । अनेनाङ्गनैर्मल्यं न कार्यमित्युक्तम् । अत एवाहापस्तंबः (१।२।३०) " नाप्सु श्लाघमानः स्नायात् " इति । चंद्रिकायाम्—
" मेखलामजिनं दंडमुपवीतं च नित्यशः । कौपीनं कटिसूत्रं च ब्रह्मचारी तु धारयेत् "॥
यमः—
" दंडं कमंडलुं वेदं मौंजीं च रशनां तथा । धारयेद्ब्रह्मचर्यं च भिक्षान्नाशी गुरौ वसन् " ॥
वेदो दर्भमुष्टिः । गुरौ गुरुगृह इत्यर्थः । याज्ञवल्क्यः (आ. २६)—
" गुरुं चैवाप्युपासीत स्वाध्यायार्थं समाहितः । आहूतश्चाप्यधीयीत लब्धं चास्मै निवेदयेत् "॥
मनुः (२।७४)—
" ब्रह्मणः प्रणवं कुर्यादादावंते च सर्वदा । स्रवत्यनोंकृतं पूर्वं परस्ताच्च विशीर्यते " ॥
" ब्रह्मारंभेऽवसाने च पादौ ग्राह्यौ गुरोः सदा " (७१) । अंगिराः—
" प्राप्ते वेदानुवचने निसर्गे चान्वहं गुरोः । उपसंग्रहणं कार्यं विप्रोष्य त्वागतेन च " ॥
मनुः (२।१९१–१९३)—
" चोदितो गुरुणा नित्यमप्रचोदित एव वा । कुर्यादध्ययने योगमाचार्यस्य हितेषु च ॥
" शरीरं चैव वाचं च बुद्धींद्रियमनांसि च । नियम्य प्रांजलिस्तिष्ठेद्वीक्षमाणो गुरोर्मुखम् ॥
"नित्यमुद्धृतपाणिः स्यात्साध्वाचारः समाहितः । आस्यतामिति चोक्तः सन्नासीताभिमुखे गुरोः"॥
उद्धृतपाणिः वस्त्रादिभिरप्रच्छादितपाणिः ॥
" हीनान्नवस्त्रवेषः स्यात्सर्वदा गुरुसंनिधौ । उत्तिष्ठेत्प्रथमं चास्य चरमं चैव संविशेत् ॥ (१९४)
"प्रतिश्रवणसंभाषे शयानो न समाचरेत् । नासीनो न च भुंजानो न तिष्ठन्न पराङ्मुखः"॥ (१९५)
प्रतिश्रवणमात्मानं प्रति गुरुणा प्रयुज्यमानस्य वाक्यस्य श्रवणं प्रतिसंभाषा । गुरुं प्रति स्ववाक्यम् प्रतिश्रवणसंभाषे कथं कुर्यादित्याकांक्षायामाह स एव (१।१९६–१९७)—
" आसीनस्य स्थितः कुर्यादभिगच्छंस्तु गच्छतः । प्रत्युद्गम्य त्वाव्रजतः पश्चाद्धावंश्च धावतः ॥
" पराङ्मुखस्याभिमुखो दूरस्थस्यैत्य चांतिकम् । प्रणम्य तु शयानस्य निदेशे चैव तिष्ठतः "॥
प्रणम्य प्रणतो भूत्वा । निदेशे विनते देशेऽश्वभ्रादौ ।
"नीचं शय्यासनं चास्य नित्यं स्याद् गुरुसंनिधौ । गुरोश्च चक्षुर्विषये न यथेष्टासनो भवेत्"॥(१९८)
नित्यमुत्तराश्रमेष्वपि ।
"न व्याहरेदस्य नाम परोक्षमपि केवलम् । न चैवास्यानुकुर्वीत गतिभाषितचेष्टितम्" ॥ (१९९)
केवलं तत्र भवदादिशब्दरहितम् ।
"गुरोर्यत्र परीवादो निंदा वाऽपि प्रयुज्यते । कर्णौ तत्र पिधातव्यौ गंतव्यं वा ततोऽन्यतः॥(२००)
"परीवादी खरो भवति श्वा वै भवति निंदकः । परिभोक्ता कृमिर्भवति कीटो भवति मत्सरी ॥ (२०१)
परिभोक्ता गुरोर्भोगादधिकभागी ।
"दूरस्थो नार्चयेदेनं न क्रुद्धो नांतिके स्त्रियाः । यानासनस्थश्चैवैनमवरुह्याभिवादयेत्" ॥(२०२)
अंतिके स्त्रिया रहसि पत्नीसहितमित्यर्थः ।

"प्रतिवातेऽनुवाते च नासीत गुरुणा सह। असंश्रवे चैव गुरौ न किंचिदपि कीर्त्तयेत् (२०३)॥ प्रतिवाते पुरतो नासीत। अनुवाते पृष्ठतः पार्श्ववातयोरप्युपलक्षणम्। यथा स्वशरीरस्पृष्टो वातो नैनं स्पृशेत्तथासीतेति। असंश्रवे सुखसंश्रवणायोग्यदेशे

" गोश्वोष्ट्रयानप्रासादस्वास्तरेषु कटेषु च। आसीत गुरुणा सार्धं शिलाफलकनौषु च (२०४)॥ गोश्वोष्ट्रयुक्तं यानं गोश्वोष्ट्रयानम्। स्वास्तरः तृणादिसमूहः।

"बालः समानजन्मा वा शिष्यो वा यज्ञकर्मणि। अध्यापयन् गुरुसुतो गुरुवन्मानमर्हति"॥(२०८) यज्ञकर्मणि आचार्ये यज्ञादिकर्मपरवश इत्यर्थः। गुरुपुत्रे गुरुवृत्तीनां प्राप्तानामपवादमाह **स एव** (२।२०९)—

" उच्छादनं च गात्राणां स्नापनोच्छिष्टभोजने। न कुर्याद्गुरुपुत्रस्य पादयोश्चावनेजनम्॥

"अभ्यंजनं स्नापनं च गात्रोच्छादनमेव च। गुरुपत्न्या न कार्याणि गात्राणां च प्रसाधनम् (२११)॥ प्रसाधनं अलंकारः।

" अविद्वांसमलं केचिद्विद्वांसमपि वा पुनः। प्रमदा ह्युत्पथं नेतुं कामक्रोधवशानुगम् (२१४)॥

" मात्रा स्वस्रा दुहित्रा वा न विविक्तासनो भवेत्। बलवानिंद्रियग्रामो विद्वांसमपि कर्षति॥(२१५)

"अहिंसयैव भूतानां कार्यं श्रेयोऽनुशासनम्। वाक्चैव मधुरा श्लक्ष्णा प्रयोज्या धर्ममीप्सिता॥(१५९)

"यस्य वाङ्मनसी शुद्धे सत्ये गुप्ते च सर्वदा। स वै सर्वमवाप्नोति वेदांतोपगतं फलम्॥ (१६०) सर्वदा आश्रमांतरेऽपि।

"नारुंतुदः स्यादार्तोऽपि न परद्रोहकर्मधीः। यया चोद्विजते वाचा नालोक्यां तामुदीरयेत्॥(१६१)

" सवेतमांस्तु नियमान्ब्रह्मचारी गुरौ वसन्। संनियम्येन्द्रियग्रामं तपोवृध्यर्थमात्मनः॥ (१७५)

"नित्यं स्नात्वा शुचिः कुर्याद्देवर्षिपितृतर्पणम्। देवताभ्यर्चनं चैव समिदाधानमेव च॥ (१७६)

"वर्जयेन्मधुमांसानि गंधमाल्यरसान्स्त्रियः। शुक्तानि चैव सर्वाणि प्राणिनां चैव हिंसनम्॥(१७७)

"अभ्यंगमंजनं चाक्ष्णोरुपानच्छत्रधारणम्। कामं क्रोधं च लोभं च नर्तनं गीतवादनम्॥(१७८)

"द्यूतं च जनवादं च परिवादं तथाऽनृतम्। स्त्रीणां च प्रेक्षणालंभमुपघातं परस्य च"॥ इति (१७९)।

याज्ञवल्क्यः (आ. ३३)—

" मधुमांसांजनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनम्। भास्करालोकनाश्लीलपरिवादादि वर्जयेत्"॥ मधु क्षौद्रमुच्छिष्टमगुरोः। तथा च **वसिष्ठः** (१४।२०)। " उच्छिष्टमगुरोरभोज्यम्" इति। " स चेद्व्याधीयीत कामं गुरोरुच्छिष्टं भेषज्यार्थं सर्वं प्राश्नीयात्" (२३।९) इति च। व्याधीयीत व्याधिमनुभवतीत्यर्थः। **माधवीये**—

"नादर्शं चैव वीक्षेत नाचरेद्दंतधावनम्। गुरूच्छिष्टं भेषजार्थं प्रयुंजीत न कामतः"॥ इति।

आपस्तंबः (१।४।२१)—"पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोक्तव्यम्" इति। गुरोरुच्छिष्टस्य भोज्यत्वादेव तद्भार्यापुत्रेषु चैवमिति गुरुधर्मातिदेशेन प्राप्तस्योच्छिष्टभोजनस्यापवादमाह **गौतमः** (२।३८)—" नोच्छिष्टाशनस्नापनप्रसाधनपादप्रक्षालनोन्मर्दनोपसंग्रहणानि" इति। **स एव** (२।१९-२१)—" वर्जयेन्मधुमांसगंधमाल्यदिवास्वप्नांजनाभ्यंजनयानोपानच्छत्रकामक्रोधलोभमोहवादवादनस्नानदंतधावनहर्षनृत्यगीतपरिवादभयानि। गुरुदर्शने [1]कर्णप्रावृतावसक्थिकापाश्रयणपादप्रसारणानि निष्ठीवनहसितविजृंभितावस्फोटनानि" इति। **मनुः** (२।२१९)—

---

१ 'कण्ठ' इति पाठः

" मुंडो वा जटिलो वा स्यादथ वा स्याच्छिखाजटी " इति । **कात्यायनः**—" सशिखं वपनं कार्यमास्नानाद्ब्रह्मचारिणः " इति । एतच्छंदोगाभिप्रायम् । **सुमंतुः**—
" ब्रह्मचर्यं तपो भैक्ष्यं संध्ययोरग्निकर्म च । स्वाध्यायो गुरुवृत्तिश्च चर्येयं ब्रह्मचारिणः ॥
" यच्च शिष्येण कर्तव्यं यच्च दासेन वा पुनः । कृतमित्येव तत्सर्वं कृत्वा तिष्ठेत्तु पार्श्वतः ॥
" किंकरः सर्वकारी च सर्वकर्मसु कोविदः ।
" न स्नानेन न होमेन नैवाग्निपरिचर्यया । ब्रह्मचारी दिवं याति स याति गुरुपूजनात् " ॥

यमः—
" गुर्वधीनोऽस्वतंत्रः स्यात्पूर्वोत्थायी गुरोर्गृहे । सदा जघन्यसंवेशी जितशिश्नो जितोदरः ॥
" जितनिद्रो जितालस्यो जितक्रोधो जितार्थवान् । गंधमाल्यं चित्रवस्त्रं वर्जयेद्दंतधावनम् ॥
" सर्वं पर्युषितं वर्ज्यं घृतं च लवणं तथा । मलापकर्षणस्नानं शूद्राद्यैरपि भाषणम् ॥
" गुरोरवज्ञां च तथा ब्रह्मचारी विवर्जयेत् " ॥ **व्यासः**—
" अभुक्तवति नाश्नीयादपीतवति नो पिबेत् । न तिष्ठति तथासीत नासुप्ते प्रस्वपेत्तथा ॥
" नास्य निर्माल्यशयनं पादुकोपानहावपि । आक्रामेदासनं नास्य च्छायादीन्वै कदाचन ॥
" यथाकालमधीयीत यावन्न विमना गुरुः । आसीत न गुरोः कूर्चे पीठके वा समाहितः ॥
" आसने शयने चैव नैव तिष्ठेत्कथंचन " ॥ **संवर्तः**—
"दिवा स्वपिति चेत्स्वस्थो ब्रह्मचारी तु पर्वणि । स्नात्वा सूर्यं समभ्यर्च्य गायत्र्यष्टशतं जपेत् ॥
"भिक्षाटनमकृत्वा तु स्वस्थोऽप्येकान्नमश्नुते । अस्नात्वा चैव यो भुङ्क्ते गायत्र्यष्टशतं जपेत् ॥
" ग्रासस्य नियमो नास्ति प्रथमाश्रमवासिनः । इतरेषां क्रमेणैव द्वात्रिंशत्षोडशाष्ट च ॥
"आपोशनमकृत्वा तु यो भुंक्तेऽनापदि द्विजः । भुंजानस्य यदा ब्रूयात् गायत्र्यष्टशतं जपेत्"॥ इति ।

हारीतः—
"उपनीतो माणवको वसेद्गुरुकुलेष्वथ । गुरोः कुले प्रियं यत्स्यात्कर्मणा मनसा गिरा ॥
" ब्रह्मचर्यमधःशय्या तथा वन्हेरुपासनम् । उदकुंभान्गुरोर्दद्याद्गोग्रासं चेंधनानि च ॥
" कुर्याद्ध्ययनं चैव ब्रह्मचारी यथाविधि । विधिं त्यक्त्वा प्रकुर्वाणो न स्वाध्यायफलं लभेत् ॥
"यः कश्चित्कुरुते धर्मं विधिं हित्वा दुरात्मवान् । न तत्फलमवाप्नोति कुर्वाणोऽपि विधिच्युतः ॥
" तस्माद्वेदव्रतानीह चरेत्स्वाध्यायसिद्धये । शौचाचारमशेषं तु शिक्षयेद्गुरुसंनिधौ ॥
" शयनात्पूर्वमुत्थाय दर्भमृद्दंतधावनम् । वस्त्रादिकमथान्यच्च गुरवे प्रतिपादयेत् ॥
" स्नाने कृते ततः पश्चात्स्नानं कुर्वीत दंडवत् " ॥ इति । **नारदः**—

" अविद्याग्रहणाच्छिष्यः शुश्रूषेत्प्रयतो गुरुम् । तद्वृत्तिर्गुरुदारेषु गुरुपुत्रे तथैव च " ॥ **हारीतः**—" हयरथगजचैत्यवृक्षवृषभारोहणमहानदीप्रतरणमहासाहसविरुद्धानि वर्जयेत् " इति । **आपस्तंबः** (१।२।१९–२४)—"आचार्याधीनः स्यादन्यत्र पतनीयेभ्यः । हितकारी गुरोरप्रतिलोमयन्वाचा । अधासनशायी । नानुदेश्यं भुंजीत । तथा क्षारलवणमधुमांसानि । अदिवास्वापी" इति (१।३।११–२१)। "अनृत्तदर्शी । सभाः समाजांश्चागंता । अजनवादशीलः । रहःशीलः । गुरोरुदाचारेष्वकर्ता स्वैरिकर्माणि । स्त्रिभिर्यावदर्थसंभाषी । मृदुः शांतो दांतो ह्रीमान् दृढधृतिः " इति च । **शंखः**—"न वेदमनधीत्यान्यां विद्यामधीयीतान्यत्र वेदांगेभ्यः " इति । **हारीतोऽपि**—"वेदो निधि ब्राह्मणस्य तत्परिज्ञानार्थमंगानि" इति । **लघुव्यासः**—

"वेदस्याध्ययनं सर्वं धर्मशास्त्रस्य चापि यत्। अजानतोऽर्थं तत्सर्वं तुषाणां खंडनं यथा॥
"यथा पशुर्भारहारी न तस्य भजते फलम्। द्विजस्तथार्थानभिज्ञो न वेदफलमश्नुते॥
"ज्ञानं कर्म च संयुक्तमुक्त्यर्थं कथितं यथा। अधीतं श्रुतसंयुक्तं तथा श्रेष्ठं न केवलम्॥
"समुचितं स्तोकमपि श्रुताधीतं विशिष्यते। चतुर्णामपि वेदानां केवलाध्ययनात् द्विजः"॥ इति।
चंद्रिकायाम्—

"धर्मशास्त्रं तु विज्ञेयं शब्दशास्त्रं तथैव च। पुराणानीतिहासांश्च तथाख्यानानि यानि च॥
"महात्मनां च चरितं श्रोतव्यं नित्यमेव च"। इति। **वसिष्ठः**—

"यच्छाखीयैस्तु संस्कारैः संस्कृतो ब्राह्मणो भवेत्। तच्छाखाध्ययनं कुर्यात् त्यक्त्वा तत्पतितो भवेत्॥
"न जातु परशाखोक्तं बुधः कर्म समाचरेत्। आचरन्परशाखोक्तं शाखारंडः प्रकीर्तितः"॥ इति।
विद्याधिगमोपायमाह **नारदः**—

"योऽहेरिव गणाद्भीतः सौहित्यान्नरकादिव। राक्षसीभ्य इव स्त्रीभ्यः स विद्यामधिगच्छति॥
"यत्कीटैः पांसुभिः श्लक्ष्णैर्वल्मीकः क्रियते महान्। न तत्र बलसामर्थ्यादुद्योगस्तत्र कारणम्॥
"शनैर्विद्या शनैरध्वा आरोहेत्पर्वतं शनैः"॥ सौहित्यं तृप्तिः। तथा विघ्नहेतूनपि **स एवाह**—
"द्यूतं पुराणशुश्रूषा नाटकासक्तिरेव च। स्त्रियस्तंद्री च निद्रा च विद्याविघ्नकराणि षट्॥
"गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा। अथवा विद्यया विद्या चतुर्थं नोपलभ्यते"॥
अध्यापने च नियमविशेषानाह **यमः**—

"सततं प्रातरुत्थाय दंतधावनपूर्वकम्। स्नात्वा हुत्वा च शिष्येभ्यः कुर्यादध्यापनं नरः"॥
गौतमः (२।४८)—"शिष्यशिष्टिरवधेन"। इति। शिष्टिः शासनम्। अवधेन ताडनमकृत्वेत्यर्थः। निर्भर्त्सनेन साधयितुमशक्तौ स **एवाह** (२।४९)—"अशक्तौ रज्जुवेणुदलाभ्यां तनुभ्याम्" इति। **मनुरपि** (८।३००-३०१)—

"भार्या पुत्रश्च दासश्च शिष्यो भ्राता च सोदरः। प्राप्तापराधास्ताड्याः स्यू रज्ज्वावेणुदलेन वा॥
"पृष्ठतस्तु शरीरस्य नोत्तमांगे कथंचन। अतोऽन्यथा तु प्रहरन्प्राप्तः स्याच्चोरकिल्बिषम्"॥
यमः—"संवत्सरोषिते शिष्ये गुरुर्ज्ञानमनिर्दिशन्। हरते दुष्कृतं तस्य शिष्यस्य वसतो गुरुः"॥
मनुः (१२।१२४)—

"तपो विद्या पवित्रस्य निःश्रेयसकरं परम्। तपसा कल्मषं हंति विद्ययाऽमृतमश्नुते"॥
"अनेन क्रमयोगेन संस्कृतात्मा द्विजः शनैः। गुरौ वसन्संचिनुयाद्ब्रह्माधिगमिकं तपः॥ (२।१६४)
"तपोविशेषैर्विविधैर्व्रतैश्च विधिचोदितैः। वेदः कृत्स्नोऽधिगंतव्यः सरहस्यो द्विजन्मना"॥(१६५)
व्रतैः प्राजापत्यादिभिः। कृत्स्नः सांगः। **अत्रापस्तंबः**। (१।५।१-४)—"नियमेषु तपःशब्दः। तदतिक्रमे विद्याकर्म निस्रवति ब्रह्म सहापत्यादेतस्मात्। कर्तपत्यमनायुष्यं च। तस्मादृषयोवरेषु न जायंते नियमातिक्रमात्" इति। अस्मिन्ब्रह्मचारिधर्मप्रकरणे ये नियमा निर्दिष्टास्तेषु तपःशब्दो द्रष्टव्यः। तेषां नियमानामतिक्रमे विद्याग्रहणं तत्कर्म ब्रह्म एतस्मान्नियमातिक्रमिणाध्येतुः पुरुषादपत्यसहितान्निस्रवति ब्रह्मयज्ञादिषूपयुज्यमानमप्यकिंचित्करमित्येषोऽर्थो विवक्षितः। न केवलमकिंचित्करम् प्रत्युतानर्थकारीत्याह। कर्तपत्यमनायुष्यं च इति। श्वभ्राभिधायी नरको लक्ष्यते। पतत्यनेनेति पत्यम्। नरकपतनहेतुर्भवति। अनायुष्करं च तस्मान्नियमातिक्रमादवरेष्ववर्चीनेषु कलियुगवर्तिषु ऋषयो मंत्रद्रशो न भवंति। अनियमस्येदानीमवर्जनीयत्वादित्यर्थः।

१ कर्त—गर्त।

अथ वेदव्रतानि । **स एव**– " छन्दसां साधनार्थं हि व्रतानीह चरेद्बुधः " इति । व्रतानि च तेनैवोक्तानि " प्राजापत्यं सौम्यमाग्नेयं वैश्वदेवं च " इति । **भरद्वाजः**–" अथातो व्रतादेशविसर्जने व्याख्यास्यामः। पर्वण्युदगयन आपूर्यमाणपक्षे पुण्यनक्षत्रे होतृव्रतमुपनिषद्व्रतं शुक्रियं गोदानम् " इति । तथा **बोधायनोऽपि**–"चत्वारि वेदव्रतानि होतारः शुक्रियाण्युपनिषद् आरण्यान्युदगयन आपूर्यमाणपक्षे पुण्ये नक्षत्रे शुक्रियारंभो गोदानं षोडशे वर्षे " इति । **आश्वलायनोऽपि**– " चत्वारि वेदव्रतानि महानाम्निमहाव्रतमुपनिषदो[1] गोदानमिति । उदगयन आपूर्यमाणपक्षे कल्याणे नक्षत्रे गोदानं षोडशे वर्षे कर्त्तव्यम् " इति । **गर्गः**—

" व्रतं कुर्यात्तु सावित्रं विधिनारण्यकव्रतम् । वेदव्रतानि कुर्वीत ततो वेदान् समभ्यसेत् ॥

"उत्तरायणगे सूर्ये शुक्ले पक्षे शुभे दिने । स्वाध्यायदिवसे कुर्यान्नक्षत्राण्यत्र चौलवत्"॥ **भरद्वाजः**–

" उत्तरायण आपूर्यमाणपक्षे च पर्वणि । वेदव्रतानि चत्वारि कुर्यात्पूर्वाह्ण एव च ॥

" दक्षिणे त्वयने वाऽपि श्रावणस्य तु पर्वणि । सौम्यं वेदव्रतं कुर्यात्प्राजापत्यादि चात्र हि "॥

वृद्धात्रेयः—

"वेदव्रतानि चत्वारि कुर्यात्कालस्तु चौलवत् । उपाकर्मवदिच्छंति व्रतेष्वन्येषु चैव हि "॥ इति ।

आपस्तंबः—

" सौम्यव्रतं प्रकुर्वीत यथावच्छुक्रियव्रतम् । प्राजापत्यादि चत्वारि भवेयुस्तद्दिनेऽपि वा ॥

" प्राजापत्यव्रतं कृत्वा तदधीत्य विसृज्य च । सौम्यव्रतमुपाकृत्य विसृज्याग्नेयमाचरेत् ॥

" उत्सृज्य वैश्यदेवाख्यमुपक्रम्य समुत्सृजेत् " इति । **स्मृत्यर्थसारे**–" उपनयनाद्युपाकर्मांतं सावित्रीव्रतं ततो वेदव्रतारण्यकव्रतानि प्रतिव्रतमुपनयनमेतेषां लोपे त्रीन्वा षड्वा द्वादश वा कृच्छ्रान् चरित्वा पुनर्व्रतं कुर्यात् " । इति **ब्रह्मचारिधर्मनिरूपणम्** । **अथ पुनरुपनयनम्** ।

अत्रापस्तंबः—

" अजिनं मेखलादंडं भैक्षाचर्यं च यस्त्यजेत् । पुनःसंस्कारमर्हेत् तु विधिदृष्टेन कर्मणा "। इति ।

पराशरः (१२।३)—

" अजिनं मेखलादंडं भैक्षाचर्यव्रतानि च । यदि मध्ये निवर्त्तेरन्पुनः संस्कारमर्हति " ॥ इति ।

व्यासः—

" सिंधुसौवीरसौराष्ट्रान् तथा प्रत्यंतवासिनः । अङ्गवङ्गकलिंगांश्च गत्वा संस्कारमर्हति "॥

प्रत्यंतोऽन्त्यदेशः ।

" हिमवत्कौशिकौ विंध्यं पारंपर्यस्य पश्चिमम् । तीर्थयात्रां विना गत्वा पुनः संस्कारमर्हति" ॥

आदित्यपुराणे—

" सौराष्ट्रसिंधुसौवीरानवंतीदक्षिणापथम् । एतान्देशान्द्विजो गत्वा पुनः संस्कारमर्हति"॥

बोधायनः–" अथोपनीतस्य व्रात्यव्रतानि भवंति । नान्यस्योच्छिष्टं भुंजीतान्यत्र पितृज्येष्ठाभ्यां न स्त्रिया सह भुंजीत मधुमांसं श्राद्धं सूतकान्नमदशाहक्षीरं छत्राकं निर्यासं विलयनं गणान्नं शूद्रान्नमित्येतेषूपयुक्तेषु पूर्वकृतसंस्कारो न तिष्ठति" इति । अतः पुनरुपनयनं कर्तव्यमित्यर्थः ।

स एव—

"अमत्या वारुणीं पीत्वा प्राश्य मूत्रपुरीषके । ब्राह्मणः क्षत्रियो वैश्यः पुनः संस्कारमर्हति"॥ इति ।

---

१ ख–दिषत् । २ ख–पक्रम्य । ३ खग–तं पपं । ४ क्ष–स्काधिकं । ५ क्ष–चोः ।

"ब्रह्मचारिणः शवकर्मणा व्रतान्निवृत्तिरन्यत्र मातापित्रोराचार्याच्च" इति । मनुः—

"अज्ञानात्प्राश्य विण्मूत्रं सुरासंसृष्टमेव च । पुनः संस्कारमर्हति त्रयो वर्णा द्विजातयः"॥

पराशरः—

"विण्मूत्रभक्ष्यशुध्यर्थं प्राजापत्यं समाचरेत् । पंचगव्यं च कुर्वीत स्नात्वा पीत्वा च शुध्यति"। एतच्च संस्कारात्प्रागेवेति वेदितव्यम् । तथा च विष्णुः (५१।३–५)– " विड्वराहग्रामकुक्कुटगोमांसभक्षणेषु च सर्वेष्वेतेषु द्विजातीनां प्रायश्चित्तांते पुनःसंस्कारं कुर्यात् " इति । यमः " भूसुरो मद्यपाने च कृते गोभक्षणेऽपि च । तप्तकृच्छ्रपरिक्लिष्टो मौंजीहोमेन शुध्यति " ॥

शातातपः—

" लशुनं गृंजनं जग्ध्वा पलांडुं च तथा द्विजः । उष्ट्रमानुषकेभाश्वरासभक्षीरभोजनात् ॥

" उपायनं पुनः कुर्यात्तप्तकृच्छ्रं चरेन्मुहुः " । संग्रहे—

"चंडालान्नं द्विजो भुक्त्वा सम्यक् चांद्रायणं चरेत् । बुद्धिपूर्वे तु कृच्छ्राब्दं पुनः संस्कारमर्हति"॥

कृतोर्ध्वदेहिकविषये

"जीवन्यदि समागच्छेद् घृतकुंभे निमज्ज्य च । उद्धृत्य स्नापयित्वाऽथ जातकर्मादि कारयेत्॥इति।"

गृह्यरत्ने— " अंगवंगकलिंगसौवीरसौराष्ट्रावंतिमात्स्यादिदेशगमने द्विजस्य पुनःसंस्कारः । तीर्थयात्रायां न दोषः । विण्मूत्रप्राशने मद्यपाने सिंधुतरणे च पुनःसंस्कारः । पितृमातामहाचार्योपाध्यायमातुलव्यतिरिक्तप्रेतकार्ये पितृज्येष्ठभ्राताचार्यव्यतिरिक्तोच्छिष्टभोजने मधुमांसप्रेतान्नशौचान्नगणिकान्नशूद्रान्नभोजने ब्रह्मचारिणः पुनरुपनयनं कार्यम् । ज्येष्ठे पश्चात्कृतोपनयने पूर्वोपनीतः कनिष्ठः पुनरुपनेयः " ॥

" पतनीयानि यान्येव कर्माण्याहुर्महर्षयः । तानि कृत्वा द्विजो मोहात्पुनःसंस्कारमर्हति " ॥

पुनरुपनयने वर्ज्यान्याह मनुः (२१।१५१)—

" वपनं मेखला दंडो भैक्षाचर्या व्रतानि च । निवर्त्तन्ते द्विजातीनां पुनःसंस्कारकर्मणि ॥

" कालश्चैव वसंतादिर्न निरीक्ष्यः कथंचन " इति । संस्कारमंजर्याम्– " अथ पुनःसंस्कारं व्याख्यास्यामः । समिदाधाने विशेषः । पुनस्त्वादित्या इतिसमिदाधानम् । अथ व्रात्यप्रायश्चित्तं जुहोति । 'यन्म आत्मनः' ' पुनरग्निश्चक्षुरदात् ' इति द्वाभ्यामथ पक्वान्नं जुहोति "सप्त ते अग्ने समिधः सप्तजिव्हा" इति । स्विष्टकृत्प्रभृतिसिद्धमा धेनुवरप्रदानात् इति । अथापरः कल्पः । गुरोरुच्छिष्टं वा भुंजीत । दक्षिणादानं मेखलादेर्निवृत्तिः । अन्यत्सर्वं स्वगृह्योक्तं कर्तव्यमिति । अपरः कल्पः । आ परिधानात्कृत्वा पालाशीं समिधाय व्रात्यप्रायश्चित्तं करोति इति । अथापरः कल्पः । ब्राह्मणवचनात्सावित्र्या शतकृत्वो घृतमभिमंत्र्य प्राश्य कृतप्रायश्चित्तो भवति इति । एतेषु पक्षेषु गुरुलघुनिमित्तापेक्षया व्यवस्था द्रष्टव्या" । इति पुनरुपनयननिरूपणम् ।

अथ ब्रह्मचर्यकालावधिः । अध्येतृसामर्थ्यानुरूपमाह मनुः (३।१)—

" षट्त्रिंशदाब्दिकं चर्यं गुरौ त्रैवेदिकं व्रतम् । तदर्धिकं पादिकं वा ग्रहणांतिकमेव च " ॥ षट्त्रिंशतोऽब्दानां समाहारः षट्त्रिंशदब्दी । तत्र भवं षट्त्रिंशदाब्दिकम् । एवं त्रैवेदिकम् । तदर्धमष्टादशाब्दाः । तद्युक्तं तदधिकं एवं पादिकं ग्रहणान्तिकं च । यमोऽपि—

"वसेत् द्वादश वर्षाणि चतुर्विंशतिमेव वा । षट्त्रिंशतं वा वर्षाणि प्रतिवेदं व्रतं चरेत्" ॥

याज्ञवल्क्यः (अ. ३६)—

---

१ क्ष–मर्हति । २ ख-म–मनीषिभ्यः । ३ क्ष–व्रती ।

" प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानि पंच वा । ग्रहणांतकमित्येके केशांतश्चैव षोडशे "॥ केशांतो नाम गोदानाख्यं कर्म । तत्तु षोडशे वर्षे कार्यमित्यर्थः । **बोधायनोऽपि** (१।२।१-६)—
" अष्टाचत्वारिंशद्वर्षाणि वेदब्रह्मचर्यं चरेच्चतुर्विंशतिं वा द्वादश वा प्रतिवेदम् । संवत्सरावमं वा । प्रतिकांडं ग्रहणांतं वा । जीवितस्यास्थिरत्वात् 'कृष्णकेशोऽग्नीनादधीतेति' श्रुतिरपि" । प्रतिकांडं प्राजापत्यादीनां पंचानां कांडानामेकैकस्मिन्कांडे संवत्सरावममित्यर्थः । ग्रहणांतपक्ष एव युक्त इत्यत्र हेतुः । जीवितस्येति । **आपस्तंबः** (१।२।११-१६)– "उपेतस्याचार्यकुले ब्रह्मचारिवासो अष्टाचत्वारिंशद्वर्षाणि पादूनम् अर्धेन त्रिभिर्वा द्वादशावरार्ध्यम्" इति । एतदशक्तविषयम् । तथा च **देवलः**—
" अतः परमष्टाचत्वारिंशद्वार्षिकं वेदव्रतचर्यामातिष्ठेदशक्तश्चेच्चतुर्विंशतिवार्षिकीं वा " इति । **गौतमः** (३।५१-५३)—
" द्वादशवर्षाण्येकवेदे ब्रह्मचर्यं चरेत् । प्रतिद्वादश वा । सर्वेषु ग्रहणांतं वा " इति । **भारद्वाजः**–
" अष्टाचत्वारिंशद्वर्षाणि पुराणं वेद ब्रह्मचर्यं संप्रतिशक्त्या वेदाध्ययनादित्येक आहुरागोदानकर्मण इत्येके " इति । **दक्षः**—
" स्वीकरोति यदा वेदं चरेद्वेदव्रतानि च । ब्रह्मचारी भवेत्तावदूर्ध्वं स्नातो गृही भवेत् " ॥ **व्यासः**—

" अधीत्य विधिवद्वेदं वेदार्थमधिगम्य च । व्रतानि क्रमशः कृत्वा समावर्तनमाचरेत् ॥
" वेदमेकं समभ्यस्य कृत्वा वेदव्रतानि च । गुरवे दक्षिणां दत्त्वाऽप्यशक्तस्तदनुज्ञया ॥
" समावृत्योद्वहेत्कन्यां संन्यासमथवा व्रजेत् " ॥ **अथ गोदाननिरूपणम्** । **गर्गः**—

" जन्मनः षोडशे वर्षे पूर्णमास्यामुदग्रवौ । चौलोक्तविधिवारेषु गोदानाख्यव्रतं चरेत् ॥
"यदि चेत्षोडशादर्वाग्वेदपारंगतो भवेत् । गौदानिकव्रतं कृत्वा समावर्त्तनमाचरेत्" ॥ **प्रचेताः**–
"गोदानं षोडशे वर्षे अर्वाग्वा काश्चिदिष्यते । यस्मिन् कस्मिन् वासरे वा गोदानं स्नानतः पुरा"॥ **भरद्वाजः**– " षोडशे वर्षेऽस्य गोदानं कुर्वन्ति संवत्सरं कृतगोदानो ब्रह्मचर्यं चरत्यग्निगोदानो वा भवति " इति ॥ **आपस्तंबः**–" एवं गोदानमन्यस्मिन्नपि नक्षत्रे षोडशे वर्षेऽग्निगोदानो वा स्यात् " इति । अस्मिन्नग्निरेव देवतेत्यर्थः । **लघुव्यासः**—

"ऋगादिकमधीत्यातो न्यायतस्तु तदर्थवित् । सम्यग्व्रतानि संसेव्य समावर्त्तनमर्हति"॥

एतत्सर्वं समुच्चयसंपादनसमर्थविषयम् । अन्यथा तु व्रतमात्रसमाप्तावपि स्नानं भवत्येव । तथा च **याज्ञवल्क्यः** (आ. ५१)—
" गुरवे तु वरं दत्वा स्नायीत तदनुज्ञया । वेदव्रतानि वा पारं नीत्वाऽप्युभयमेव वा "॥ इति । एतेन स्नातकत्रैविध्यं प्रतिपादितं भवति । यथाह **हारीतः**– " त्रयः स्नातका भवंति । विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातकः " इति । " यः समाप्य वेदमसमाप्य वेदव्रतानि समावर्त्तते स **विद्यास्नातकः** । यस्तु समाप्य व्रतानि असमाप्य वेदं स **व्रतस्नातकः** । यः पुनरुभयं स **विद्याव्रतस्नातकः** " इति । एवं च व्रतस्नातकस्य परिणयनोत्तरकालमध्ययनं समापनं तदर्थज्ञानं चेति मंतव्यमिति **स्मृतिचंद्रिकायाम्** । अत्र **गर्गः**—
" षट्त्रिंशदाब्दिकं वाऽपि गुरोस्त्रैवेदिकं व्रजेत् । यद्वा द्वादशवर्षाणि षड्वाऽथ त्रीणि वा भवेत् ॥

---

१ क्ष–ख्या । २ क्ष–त्रैविद्यमित्यर्थं ।

"संवत्सरं[1] वत्सरार्धं त्रिमासमथ वा भवेत् । मौंजीबंधाद्द्वादशाहं त्रिरात्रं वा चरेद्व्रतम् ॥
"गो[2]दानिकव्रतं कृत्वा समावर्तनमाचरेत्" इति ॥ **अथ स्नातकविधिः । व्यासः—**
"गुरुशुश्रूषया विद्यां संप्राप्य विधिवद्द्विजः । स्नायीत तदनुज्ञातो दत्वाऽस्मै दक्षिणां हि गाम्" ॥ इति ।
एतत् गोदानं प्रीतिसाधनद्रव्योपलक्षणार्थम् । अत एव **मनुः** (२।२४६)—
" क्षेत्रं हिरण्यं गामश्वं छत्रं चोपानहं ततः । धान्यं वासांसि शाकं वा गुरवे प्रीतिमाहरेत् ॥
"न पूर्वं गुरवे किंचिदुपकुर्वीत धर्मवित् । स्नास्यंस्तु गुरुणाऽऽज्ञप्तः शक्त्या गुर्वर्थमाहरेत्" ॥ (२४५)
लघुहारितः—
" एकमप्यक्षरं यस्तु गुरुः शिष्यं निवेदयेत् । पृथिव्यां नास्ति तद्द्रव्यं यद्दत्वा त्वनृणो भवेत्" ॥
एतच्च दक्षिणादानमाश्रमांतरप्रवेशेऽपि वेदितव्यम् । "गुरवे दक्षिणां दत्वा स यमिच्छेत्तमावसेत्"
इति **स्मरणात्** । दक्षिणादानसामर्थ्याभावे तदनुज्ञया स्नानमाह **गौतमः** (३।५४–५५)—
"विद्यांते गुरुरर्थेन निमंत्र्यः । ततः कृते[3]ऽनुज्ञातस्य स्नानम्" इति । **इति ब्रह्मचर्यकालनिरूपणम्** ।
अथ नैष्ठिकधर्माः । तत्र दक्षः—
" द्विविधो ब्रह्मचारी तु दक्षशास्त्रे प्रपद्यते । उपकुर्वाणकः पूर्वो द्वितीयो नैष्ठिकः स्मृतः" ॥
तत्रोपकुर्वाणधर्मोऽभिहितः । नैष्ठिकस्य धर्ममाह **याज्ञवल्क्यः** (आ. ४९–५०)—
" नैष्ठिको ब्रह्मचारी तु वसेदाचार्यसंनिधौ । तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि वा ॥
" अनेन विधिना देहं साधयन्विजितेंद्रियः । ब्रह्मलोकमवाप्नोति न चेहा जायते पुनः" ॥
एवमुक्तप्रकारेणात्मानं निष्ठामुत्क्रांतिकालं नयतीति नैष्ठिकः । स यावज्जीवं स्वातंत्र्यं विना आचार्यादिसमीपे वसेत् । अनेनोक्तविधिना देहं साधयन्क्षपयन्जितेंद्रियः ब्रह्मचारी ब्रह्मलोकममृत्वमाप्नोतीत्यर्थः । तथा च **मनुः** (२।२४३–२४४)—
" यदि त्वात्यंतिकं वासं रोचयेत गुरोः कुले । युक्तः परिचरेदेनमा शरीरविमोक्षणात् ॥
" आ समाप्तेः शरीरस्य यस्तु शुश्रूषते गुरुम् । स गच्छत्यंजसा विप्रो ब्रह्मणः सद्म शाश्वतम्" ॥
" आचार्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते । गुरुदारे सपिंडे वा गुरुवद्वृत्तिमाचरेत् ॥ (२४७)
" एषु त्वविद्यमानेषु स्थानासनविहारवान् । प्रयुंजानोऽग्निशुश्रूषां साधयेद्देहमात्मनः" ॥ (२४८)–
"एवं चरति यो विप्रो ब्रह्मचर्यमविप्लुतः । स गच्छत्युत्तमं स्थानं न चेहाजायते पुनः" ॥ (२४९) इति ।
हारीतः—
" यस्यैतानि सुगुप्तानि जिव्होपस्थोदरं करः । संन्याससमयं कृत्वा ब्राह्मणो ब्रह्मचर्यया ॥
" तस्मिन्नेव नयेत्कालमाचार्ये यावदायुषम् । तदभावे च तत्पुत्रे तच्छिष्ये वाऽथवा कुले ॥
" न विवाहो न संन्यासो नैष्ठिकस्य विधीयते ॥
" इमं यो विधिमास्थाय त्यजेद्देहमतंद्रितः । नेह भूयोऽभिजायेत ब्रह्मचारी दृढव्रतः ॥
" यो ब्रह्मचारी विधिना समाहितश्चरेत्पृथिव्यां गुरुसेवने रतः ॥
" संप्राप्य विद्यामतिदुर्लभां शुभां फलं च तस्याः सुलभं तु विंदति " ॥ **बृहस्पतिः—**
"संध्याऽग्निकार्यं स्वाध्यायं भैक्षाधःशयनं तथा । आ मृत्योर्नैष्ठिकः कुर्वन्ब्रह्मलोकमवाप्नुयात्" ॥ इति ।
वसिष्ठः (७।७-१७)–" संयतवाक् । चतुर्थषष्ठाष्टकाले भैक्ष्यभोजी । गुर्वधीनः । जटिलः । शिखाजटो वा । गुरुं गच्छंतमनुगच्छेदासीनं च तिष्ठेच्छयानं चासीन उपासीत । आहूतस्वाध्यायी ।

---

१ क्ष–वत्सरं वत्सरादूर्ध्वं । २ क–गौ । ३ क्ष–कृत्वा ।

सर्वं लब्धं निवेद्य तदनुज्ञया भुंजीत। खट्वाशयनदंतप्रक्षालनांजनाभ्यंजनच्छत्रवर्जी। स्थानासनशीलस्त्रिरन्होऽभ्युपेयादप इति"। त्रिरन्ह इति त्रिषवणस्नायी स्यादित्यर्थः। **यमः**—
"आ निपाताच्छरीरस्य ये चरंत्यूर्ध्वरेतसः। ते यान्ति ब्रह्मणः स्थानं जायंते न पुनर्भुवि"॥
हारीतः—

"मृत्योः परस्तादमृतो भवंति ये ब्रह्मणा ब्रह्मचर्यं चरंति" इति। एतद्ब्रह्मनिष्ठविषयम्। "सर्व एते पुण्यश्लोका भवंति ब्रह्मसंस्थोऽमृतत्वमेति" इति **श्रुतेः**। सर्व एते चत्वारो ह्याश्रमिणः पुण्यश्लोका भवंति पुण्यलोकभाजो भवन्ति। यः पुनरेषां मध्ये ब्रह्मसंस्थो ब्रह्मनिष्ठः सोऽमृतत्वमपुनरावृत्तिलक्षणं फलमेतीत्यर्थः। एतच्च नैष्ठिकत्वं कुब्जादीनां नित्यमित्याह **विष्णुः**—

"कुब्जवामनजात्यंधक्लीबपंग्वार्त्तरोगिणाम्। व्रतचर्या भवेत्तेषां यावज्जीवं न संशयः"॥

चंद्रिकायाम्—
"पंग्वादीनामनंगत्वादसामर्थ्याच्च शाश्वतः। नियतं नैष्ठिकत्वं स्यात्कर्मस्वनधिकारतः"॥ इति। नन्वेवं कुब्जादीनामेवं नैष्ठिकत्वमस्तु नेतरेषाम्। मैवम्।
"गार्हस्थमिच्छन्व्रतिकः कुर्याद्दारपरिग्रहम्। ब्रह्मचर्येण वा कालं नयेत्संकल्पपूर्वकम्॥
"वैखानसो वाऽपि भवेत्परिव्राडथवेच्छया" इति पाक्षिकत्वप्रतिपादक**व्यासादि**वचनविरोधात्। न हि कुब्जादीनां नैष्ठिकत्वं पाक्षिकमस्ति। न च यदितरेषां नैष्ठिकत्वं तर्हि 'यावज्जीवमग्निहोत्रं जुहोतीति' गृहस्थधर्मविधायक**श्रुति**र्बाध्येतेति वाच्यम्। नष्ठिकत्वस्य पाक्षिकत्वेन विषयांतरसंभवात्। ये हि भार्यादिरागवशाद्गार्हस्थ्यं कामयंते तद्विषया यावज्जीव**श्रुति**रित्यविरोधः। तथा च **जाबालिः**—"यदि गृहमेव कामयेत तदा यावज्जीवमग्निहोत्रं जुहुयात्" इति। ननु स्मार्त्तनैष्ठिकत्वस्य श्रौताग्निहोत्रादीनां बाध एवास्तु। मैवम्। तस्यापि "ब्रह्मचार्याचार्यकुलवासी द्वितीयोऽत्यंतमात्मानमाचार्यकुलेव सादयेत्" इति**श्रुति**मूलत्वाविशेषात्। न च ब्रह्मचारिद्वैविध्ये 'चत्वार आश्रमा' **इत्यापस्तंबादि**वचनं बाध्येतेति शङ्कनीयम्। संकल्पभेदमात्रेण नित्यकाम्याग्निहोत्रवदनयोर्भेदोपपत्तेः। अत एव तु तद्धर्मातिदेशमाह **आपस्तंबः** (२।२१।६)—
"यथा विद्यार्थस्य नियम एतेनैवांतमनूपसीदत आचार्यकुले शरीरन्यासो ब्रह्मचारिणः"। यथा विद्यार्थस्यौपकुर्वाणस्याग्नीन्धनादिनियम उक्तः। अनेन नियमेन शरीरन्यासः परित्यागः। ब्रह्मचारिणो नैष्ठिकस्येत्यर्थः। **गौतमः** (३।४–८)—"तत्रोक्तं ब्रह्मचारिणः। आचार्याधीनत्वमान्तम्। गुरोः कर्मशेषेण जपेत्। गुर्वभावे तत्पत्न्यै वृत्तिः। तदभावे तदपत्यवृत्तिस्तदभावे वृद्धे सब्रह्मचारिण्यग्नौ वा। एवंवृत्तो ब्रह्मलोकमवाप्नोति जितेंद्रियः" इति। तत्रोपकुर्वाणप्रकरणे यदुक्तमग्नींधनभैक्षाचरणादि तन्नैष्ठिकस्यापि भवतीत्यर्थः। कर्मशेषेण गुरुशुश्रूषातिरिक्ते काले वेदं जपेत्। एवं वृत्तं यस्य सः एवंवृत्तो। ब्रह्मलोकमवाप्नोति स चेज्जितेंद्रियः। स च **मनुना** दर्शितः (२।९८)—
"हुत्वा स्पृष्ट्वा च दृष्ट्वा च श्रुत्वा घ्रात्वा च यो नरः। न हृष्यति ग्लायति वा स विज्ञेयो जितेंद्रियः"॥ इति।
स एव (२।१८१)—
"स्वप्ने सिक्त्वा[1] ब्रह्मचारी द्विजः शुक्रमकामतः। स्नात्वाऽर्कमर्चयित्वा त्रिःपुनर्मामित्यृचं जपेत्॥
"एकः शयीत सर्वत्र न रेतः स्कंदयेत्क्वचित्[2]। कामाद्धि स्कंदयन्रेतो हिनस्ति व्रतमेव तत्॥ (१८०)
"एकादशेंद्रियाण्याहुर्यानि पूर्वे मनीषिणः। तानि सम्यक्प्रवक्ष्यामि यथावदनुपूर्वशः[3]॥ (८९)

१ ख–सिक्त्वा। २ क्ष–क्ल। ३ क्ष–येद्रें।

"श्रोत्रं त्वक् चक्षुषी जिव्हा नासिका चैव पंचमी। पायूपस्थौ हस्तपादौ वाक्चैव दशमी स्मृता॥(९०)
"बुद्धींद्रियाणि पंचैषां श्रोत्रादीन्यनुपूर्वशः। कर्मेंद्रियाणि पंचैव पाय्वादीनि प्रचक्षते॥ (९१)
"एकादशं मनो ज्ञेयं स्वगुणेनोभयात्मकम्। यस्मिन् जिते जितावेतौ भवतः पंचकौ गणौ॥(९२)
"इंद्रियाणां [1]हि चरतां विषयेष्वपहारिषु। संयमे यत्नमातिष्ठेद्विद्वान्यंतेव वाजिनाम्॥ (८८)
"इंद्रियाणां प्रसंगेन दोषमृच्छत्यसंशयम्। संनियम्य तु तान्येव ततः सिद्धिं निगच्छति"॥(९३)इति।

संवर्त्तः—
"ब्रह्मचारी तु यः स्कंदेत्कामतः शुक्रमात्मनः। अवकीर्णिव्रतं कुर्यात्स्नात्वा शुद्ध्येदकामतः" ॥

कामतः बुद्धिपूर्वकमित्यर्थः। **बौधायनः** (२।२।२९–३२)—"यो ब्रह्मचारी स्त्रियमुपेयात्सोऽवकीर्णी। स गर्दभं पशुमालभेत। नैर्ऋतः पशुः पुरोडाशश्च रक्षोदेवतो यमदेवतो वा। शिश्नात्प्राशित्रमप्स्ववदानैश्चरतीति विज्ञायते" इति। नैर्ऋत इति पशुः पुरोडाशश्च निर्ऋतिदेवतः रक्षोदेवतः। यमदेवतो वा। यद्देवत्यः पशुस्तद्देवत्यः पुरोडाश इति परिभाषासिद्धस्यानुवादः। प्राशित्रं शिश्नावयवाद्ग्राह्यं [2]हृदयाद्यवयवमप्सु प्रचरितव्यं अन्यल्लौकिकेऽग्नौ कर्तव्यमित्यर्थः। **वसिष्ठस्तु**—(२३।१–२) "ब्रह्मचारी चेत्स्त्रियमुपेयादरण्ये चतुष्पथे लौकिकेऽग्नौ रक्षोदैवत्यं गर्दभमालभेत्। तेन नैर्ऋतं वा चरुं निर्वपेत्" इति। **आपस्तंबः** (१।२६।८–९)—"गर्दभेनावकीर्णी निर्ऋतिं पाकयज्ञेन यजेत। तस्य शूद्रः प्राश्नीयात्" इति। पाकयज्ञेन स्थालीपाकविधानेन। तस्य गर्दभस्य। [3]सर्पिषं हविरुच्छिष्टं शूद्रः प्राश्नीयात्तेन सर्पिष्मता ब्राह्मणं भोजयेदित्यस्यापवादः। अत्र **मनुः** (११।११८)—
"अवकीर्णी तु काणेन गर्दभेन चतुष्पथे। पाकयज्ञविधानेन यजेत निर्ऋतिं निशि" ॥ इति।

हारीतः—अवकीर्णी निर्ऋत्यै चतुष्पथे गर्दभं पशुमालभेत पाकयज्ञेन धर्मेण भूमौ पशुपुरोडाशश्रपणमवदानैः प्रचर्याज्यस्य जुहोति कामावकीर्णोऽस्मि कामकामाय स्वाहेति"। **गौतमस्तु** (२३।१७–१९)–"गर्दभेनावकीर्णी निर्ऋतिं चतुष्पथे यजेत। तस्याजिनमूर्ध्ववालं परिधाय लोहितपात्रः सप्त गृहान्भैक्षं चरेत्कर्माऽऽचक्षाणः। संवत्सरेण शुध्येत्" इति। तस्यैव गर्दभस्याजिनमूर्ध्ववालमुपरिलोम वसित्वा पांकेन लोहितं मृन्मयं पात्रं हस्ते गृहीत्वा अवकीर्णिने मह्यं भिक्षां देहीति स्वकर्माऽऽचक्षाणः सप्तसु गृहेषु भैक्षं चरेत्संवत्सरमेतद्व्रतं चरञ्छुद्धो भवतीत्यर्थः। तथा च **मनुः** (११।१२३)—
"तेभ्यो लब्धेन भैक्षेण वर्तयन्नेककालिकम्। उपस्पृशं स्त्रिषवणमब्देनैकेन शुध्यति" ॥

संवर्त्तोऽपि—
"ब्रह्मचारी तु यो गच्छेत्स्त्रियं कामप्रपीडितः। प्राजापत्यं चरेत्कृच्छ्रमेकमब्दं समाहितः॥
"निर्वपेच्च पुरोडाशं ब्रह्मचारी तु पर्वणि। मंत्रैः शाकलहोमीयैरग्नावाज्यं च होमयेत्"॥ इति।

शांडिल्यः—
"अवकीर्णी द्विजो राजा वैश्यश्चापि [4]खरेण तु। इष्ट्वा भैक्षाशनो नित्यं शुध्यत्यब्दात्समाहितः"॥इति।

इदं च वार्षिकं वेश्यागमनविषयम्। यदाहतुः **शंखलिखितौ**—"गुप्तायां वेश्यायामवकीर्णः संवत्सरं त्रिषवणमनुतिष्ठेत्क्षत्रियायां द्वे वर्षे ब्रह्मण्यां त्रीणि वर्षाणि" इति। शिष्टं ब्रह्मचारिनियमातिक्रमप्रायश्चित्तं तत्प्रकरणे वक्ष्यते। इति **नैष्ठिकधर्मादिनिरूपणम्**॥

अथ स्नातकधर्माः। तत्र **मनुः** (४।३३–३६)—

---

१ विचरतामिति मुद्रितपाठः। २ **क्ष**–दवनं। ३ **खग**–सर्वं मिश्रितं। ४ **क्ष**–सिका। ५ **ख**–यावके। ६ **ख**–वै।

"राजतो धनमन्विच्छेत्संसीदन्स्नातकः क्षुधा । याज्यांतेवासिनोर्वाऽपि न त्वन्यत इति स्थितिः॥
"न सीदेत्स्नातको विप्रः क्षुधा शक्तः कथंचन । न जीर्णमलवद्वासा भवेच्च विभवे सति ॥
"कृत्तकेशनखश्मश्रुर्धौतशुक्लांबरः शुचिः । स्वाध्याये चैव युक्तः स्यान्नित्यमात्महितेषु च ॥
"वैणवीं धारयेद्यष्टिं सोदकं च कमंडलुम् । यज्ञोपवीतं वेदं च शुभे रौक्मे च कुंडले"॥ इति ।
वेदो दर्भपुंजः । **व्यासः**—
"वैणवीं धारयेद्यष्टिमंतर्वासस्तथोत्तरम् । यज्ञोपवीतद्वितयं सोदकं च कमंडलुम् ॥
"छत्रं चोष्णीषममलं पादुके चाप्युपानहौ । रौक्मे च कुंडले वेदं कृत्तकेशनखः शुचिः ॥
"स्वाध्याये नित्ययुक्तः स्याद्बहिर्माल्यं च धारयेत् । शुक्लांबरधरो नित्यं सुगंधः प्रियदर्शनः"॥
स्मृतिरत्ने—
"धौतवस्त्रैर्गंधपुष्पैः क्षालनैर्दंतधावनैः । श्रीकामी भूषणाद्यैश्च स्वशक्त्या भूषयेत्तनुम्" ॥
बोधायनः (१।३।२–६)—"अंतर्वास्युत्तरीयं वैणवं दंडं धारयेत्सोदकं च कमंडलुं द्वियज्ञोपवीत्युष्णीषमजिनं कृतोपानहौ छत्रं च" इति । **गौतमः** (९।२–३)—"स्नातकः । नित्यं शुचिः सुगंधिः स्नानशीलः" इति । सुगंधत्वविधानादेव निर्गंधमाल्यनिषेधः । तथा च **गोभिलः**—"नागंधां स्रजं धारयेदन्यत्र हिरण्यस्रजः" इति । **वृद्धवसिष्ठः**—
"चौलवत्सकलं ग्राह्यं स्नातकर्मणि भूपते । शुभे षष्ठे वासरं च चरेत्तु स्नातकव्रतम् ॥
"समिद्भिर्यज्ञवृक्षोत्थैर्यद्वा व्रीहियवादिभिः । अग्निं यजेद्व्याहृतिभिर्यद्वा मंत्रैस्तु शाकलैः ॥
"तीर्थसेवी मिताहारी त्यजेदष्टांगमैथुनम् । स्मरणं कीर्तनं केलिप्रेक्षणं गुह्यभाषणम् ॥
"संकल्पोऽध्यवसायश्च क्रिया निर्वृत्तिरेव च । एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः" ॥ इति ।
काठकगृह्ये—
"विवाहदिवसात्पूर्वं तद्दिने स्नानमाचरेत् । विवाहदिवसाधस्ताद्भवेत्तु स्नातकव्रतम् ॥
"विवाहदिवसे कुर्वन्न कुर्यात्तीर्थसेवनम् । न च शाकलहोमोऽस्ति तदा नक्षत्रदर्शनात् ॥
"रात्रावेवोद्वहेत्कन्यां न स्नानं दिवसे दिवा" इति । **संग्रहे**—
"स्नातस्तूपयमादर्वाङ्मृतो याति न सद्गतिम् । तस्मादासन्नवैवाह्यः स्नातकर्म समाचरेत्" ॥
दक्षः-"अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः । आश्रमेण विना तिष्ठन्प्रायश्चित्तीयते हि सः"॥
इति । **स्नातकधर्माः** ॥

अथ विवाहः । अत्र **विष्णुः**—

"वेदानधीत्य यत्नेन पाठतो ज्ञानतस्तथा । समावर्तनपूर्वं तु लक्षण्यां स्त्रियमुद्वहेत्" ॥
मनुः (३।४)—
"गुरुणाऽनुमतः स्नात्वा समावृत्तो यथाविधि । उद्वहेत द्विजो भार्यां सवर्णां लक्षणान्विताम्" ॥
अथ कन्यालक्षणम् ।
"नोद्वहेत्कपिलां कन्यां नाधिकांगीं न रोगिणीम्।नालोमिकां नातिलोमां न वाचालां न पिंगलाम्॥(८)
कपिलां केशाक्षिभ्यां पिंगलां त्वचा ।
"नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकाम् । न पक्ष्यहिप्रेष्यनाम्नीं न बिभीषणनामिकाम् ॥ (९)
"अव्यंगांगीं सौम्यनाम्नीं हंसवारणगामिनीम् । तनुरोमकेशदशनां मृद्वंगीमुद्वहेत्स्त्रियम् (१०)"॥
यमः—

---

१ क्ष–र्या । २ कग–क्षणमात्र ।

"ह्रस्वा दीर्घा कृशा स्थूला पिंगाक्षी गौरपांडरा । न पूज्या न च सेव्या सा पतिमृत्युकरी यतः" ॥
नारदः—
" दीर्घकुत्सितरोगार्त्ता व्यंगा संस्पृष्टमैथुना । धृष्टाऽन्यगतभावा च कन्यादोषाः प्रकीर्तिताः" ॥
व्यासः—
"न श्मश्रुव्यंजनवतीं न चैव पुरुषाकृतिम् । न घर्घरस्वरां क्षामां तथा काकस्वरां न च ॥
" नानिबद्धेक्षणां तद्वद्वृत्ताक्षीं नोद्वहेद्बुधः ॥
" यस्याश्च रोमशे जंघे गुल्फौ यस्यास्तथोन्नता । गंडयोः कूपकौ यस्या हसंत्यास्तां च नोद्वहेत्॥
" नातिरूक्षच्छविं पांडुकरजामरुणेक्षणाम् । आ पीनहस्तपादां च न कन्यामुद्वहेद्बुधः ॥
" न वामनां नातिदीर्घां नोद्वहेत्संहतभ्रुवम् । न चातिच्छिद्रदशनां न करालमुखीं नरः ॥
" पार्ष्णिस्थूलां रोमशीलां यमलां श्यावदंतिनीम् । सन्नतभ्रूलतां चैव पिंगलाक्षीं च नोद्वहेत् ॥
"बंधुहीना च या कन्या या कन्या चैव जन्मतः । रोगिणी वंशहीना च तां कन्यां परिवर्जयेत् ॥
"नातिकेशामकेशां वा नातिकृष्णां च पिंगलाम् । निसर्गतोऽधिकांगां वा न्यूनांगां वाऽपि नोद्वहेत् ॥
"नाविशुद्धां सरोमां वा कुब्जां वाऽपि न रोगिणीम् । न दुष्टां दुष्टवाक्यां वा विहीनां पितृमातृतः" ॥ इति
शातातपः—
" हंसस्वरां मेघवर्णां मधुपिंगललोचनाम् । तादृशीं वरयेत्कन्यां गृहस्थः स्वयमेधते" ॥
सवर्णोद्वाहे नियममाह **मनुः** (३।५)—
" असपिण्डा च या मातुरसगोत्रा च या पितुः । सा द्विजानां प्रशस्ता स्त्री दारकर्मण्यमैथुनी " ॥
अमैथुनी अक्षतयोनिः । असपिण्डा समानः एकः पिण्डो देहो यस्याः सा सपिण्डा । न सपिण्डा असपिण्डा । सपिण्डता च एकशरीरावयवान्वयेन भवति । तथाहि । पुत्रस्य पितृशरीरावयवान्वयेन पित्रा सह सपिण्डता । एवं पितामहादिभिरपि पित्रादिद्वारेण एकशरीरावयवान्वयात् । एवं मातृशरीरावयवान्वयेन मात्रा । एवं मातामहादिभिरपि मात्रादिद्वारेण । तथा मातृष्वसृमातुलादिभिः पितृव्यपितृष्वस्रादिभिरपि एकशरीरावयवान्वयात् । तथा पत्युः सह पत्न्या एकशरीरारम्भकतया । एवं भ्रातृभार्याणामपि परस्परमेकशरीरारब्धैःसहैकशरीरारम्भकत्वेन । एवं यत्र यत्र सपिण्डशब्दस्तत्रतत्र साक्षात्परंपरया वा एकशरीरान्वयो वेदितव्यः । एकशरीरान्वयश्च श्रुतितोऽवगम्यते " आत्मा हि जज्ञ आत्मन " इति " प्रजामनुप्रजायसे " इति च । तथा गर्भोपनिषदि-"एतत्षाट्कौशिकं शरीरं । त्रीणि पितृतस्त्रीणि मातृतः । अस्थिस्नायुमज्जानः पितृतः । एवं त्वङ्मांसरुधिराणि मातृतः" इति । " अङ्गादङ्गात्संभवसि प्रजायस्व प्रजया । तत्रायं जायते स्वयम्" इति च । **आपस्तम्बः** (२।२४।२)—"स एवायं विरूढः पृथक्प्रत्यक्षेणोपलभ्यते" इति ।

निर्वाप्य पिण्डान्वयेन तु सापिण्ड्ये मातृसंताने भ्रातृपितृव्यादिषु च सापिण्ड्यं न स्यात् । समुदायशक्त्यङ्गीकारेण रूढिपरिग्रहे अवयवशक्तिस्तत्र तत्रावगम्यमाना परित्यक्ता स्यात्" इति । **विज्ञानेश्वरीये** (पृ. १२ पं २१–३०; पृ १३; पं १–५) । **स्मृतिचंद्रिकायां तु** (पृ. ६७ प. ११)"एकस्यां पिण्डदानाक्रियायां दातृत्वेन पिण्डभाक्त्वेन लेपभाक्त्वेन वाऽनुप्रविष्टानां भवति सापिण्ड्यम्
"लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः । पिण्डदः सप्तमस्तेषां सापिण्ड्यं साप्तपौरुषम्" ॥ इति

१ क्ष–शुष्क ।

स्मृतेः। न च निर्वाप्य पिण्डापेक्षया सापिण्ड्यवर्णने भ्रातृपितृव्यादिषु सापिण्ड्यं न स्यादिति शङ्कनीयम्। एकोद्देश्यावच्छेदेनैकक्रियान्वयित्वसंभवात्" इत्यभिहितम्। अत्र **सार्वभौमः**—

"एकोद्देश्यावच्छेदेन एकक्रियान्वयिनःसपिण्डा इत्यभिधानेन भ्रातृपितृव्यादिसापिण्ड्यसिद्धावपि स्वसृदुहितृमातृष्वसृमातुलदुहितॄणामेकक्रियान्वयित्वाभावेन सापिण्ड्यं न स्यात्। ततश्च पञ्चमात्सप्तमादित्यादिवचननिचयस्य वैयर्थ्यं स्यात्। अतो लेपभाजश्चतुर्थाद्या इत्युक्तं सापिण्ड्यम्।

"अनन्तरः सपिंडो यस्तस्य तस्य धनं भवेत्" "पुत्राभावे सपिण्डा मातृसपिण्डाः शिष्याश्च दद्युः"। इति **मनुगौतमाद्युक्त**दायभाक्त्वौर्ध्वदैहिककर्तृत्वविषयमिति एकशरीरावयवान्वयद्वारेण साक्षात्पारंपर्येण वा सापिंड्यवर्णने सर्वत्र सर्वस्य यथाकथंचिदनादौ संसारे तत्संभवादिति योऽतिप्रसंगः संभवति स दोषो **मन्वादिवचनैः** परिहर्तव्यः। तथा च **मनुः** (५।६०)—

"सपिण्डता तु पुरुषे सप्तमे विनिवर्तते"। **गौतमः** (४।१।३)—"गृहस्थः सदृशीं भार्यां विंदेतानन्यपूर्वां यवीयसीम्। असमानप्रवरैर्विवाहः। ऊर्ध्वं सप्तमात्पितृबंधुभ्यो बीजिनश्च मातृबन्धुभ्यः पञ्चमात्" इति।

शङ्खश्च—"दारानाहरेत्सदृशानसमानार्षेयानसंबंधान्सप्तमात्पितृमातृबन्धुभ्यः" इति॥

वसिष्ठश्च (८।१-२)- "असमानार्षेयामस्पृष्टमैथुनामवरवयसीं भार्यां विंदेत। पञ्चमीं मातृबन्धुभ्यः सप्तमीं पितृबंधुभ्यः" इति। अतीत्येति शेषः।

यदाह **पैठीनसिः**—"असमानार्षेयीं कन्यां पंच मातृतः परिहरेत्सप्त पितृतः" इति।

विष्णुरपि (२४।९-१०)"असगोत्रामसमानप्रवरां भार्यां विन्देत। मातृतः पञ्चमादूर्ध्वं पितृतः सप्तमात्" इति। **याज्ञवल्क्यः** (आ. ५२-५३)—

"अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत्। अनन्यपूर्विकां कान्तामसपिंडो यवीयसीम्॥

"अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम्। पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा"॥इति।

अनन्यपूर्विकां पुरुषान्तरापरिगृहीताम्। कान्तां कमनीयाम्। वोढुः मनोनयनेष्टकारिणीम्। "यस्यां मनश्चक्षुषोर्निबन्धस्तस्यामृद्धिः" इति **आपस्तंबस्मरणात्** (गृ. सू. १।३।२०)। यवीयसीं वयसा प्रमाणतश्च न्यूनाम्। **इति कन्यालक्षणम्।**

अथ **वधूवरयोर्वयःप्रमाणम्**। अत्र **बृहस्पतिः**—

"त्रिंशद्वर्षो दशाब्दां तु भार्यां विंदेत मानवः। एकविंशतिवर्षो वा सप्तवर्षामवाप्नुयात्"॥

अङ्गिराः—

"वयोधिकां नोपयच्छेद्दीर्घां कन्यां स्वदेहतः। स्ववर्षाद्द्वित्रिपञ्चादिन्यूनां कन्यां समुद्वहेत्"॥

विष्णुः—

"वर्षैरेकगुणां भार्यामुद्वहेत् त्रिगुणो वरः। त्र्यष्टवर्षोऽष्टवर्षां वा वयोमात्रावरा च या"॥

वयोमात्रावरा च येत्युक्तेर्द्वित्र्यादिकतिपयमासैरूना नोद्वाह्या। **नारदः**—

"हीनाङ्गामधिकाङ्गां च वराद्दीर्घां वयोधिकाम्। नोपेयाद्रोगिणीं नारीं दीर्घमायुर्जिजीविषुः"॥ इति।

अरोगिणीं "वातगुल्माश्मरीकुष्ठमहोदरभगंदराः। अर्शांसि ग्रहिणीत्यष्टौ महारोगाः प्रकीर्तिताः" इत्युक्तमहारोगरहिताम्। भ्रातृमतीं पुत्रिकाकरणभयात्। यदाह **मनुः** (३।११)—

---

१ अ. ९ श्लो. १८७। २ अ. १५ सू. ११। ३ क—व्यासः। ४ क्ष—गर्भिणी।

"यस्यास्तु न भवेद्भ्राता न विज्ञायेत वा पिता। नोपयच्छेत तां कन्यां पुत्रिकाधर्मशंकया"॥ अनेन न पितुः संकल्पमात्रादपि पुत्रिका भवतीति गम्यते। अत एव **गौतमः** (२८।१७)— "अभिसन्धिमात्रात्पुत्रिकेत्येके" इति। सा च कथं पुत्रिका भवतीत्यपेक्षिते **मनुराह** (९।१२७)— "अपुत्रोऽनेन विधिना सुतां कुर्वीत पुत्रिकाम्। यदपत्यं भवेदस्यां तन्मम स्यात्स्वधाकरम्"॥इति। **वसिष्ठोपि** (१७।१७)—

"अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम्। अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति"॥ इयमेव मे पुत्र इति वा। एतच्चाग्रे वक्ष्यते। असमानार्षगोत्रजाम्। आर्षः प्रवरः गोत्रं प्रसिद्धम्। समानता नामतो वेदितव्या। गोत्रप्रवरौ पृथक्पृथक्पर्युदासे निमित्तम्। समानार्षजामसमानगोत्रजामिति। "परिणीय सगोत्रां तु समानप्रवरां तथेति" च भेदेन स्मरणात्। **बोधायनः**—

"एक एव ऋषिर्यावत्प्रवरेष्वनुवर्त्तते। तावत्समानगोत्रत्वमन्यत्राङ्गिरसो भृगोः"॥ समानगोत्रत्वं समानप्रवरत्वम्। भृग्वंगिरोगणेषु विशेषमाह **स एव**—

"त्र्यार्षेयसंनिपाते अविवाहस्त्र्यार्षेयाणां द्व्यार्षेयसंनिपाते पञ्चार्षेयाणाम्" इति।

"अत्र चासपिण्डामित्यनेन पितृष्वसृमातृष्वसृमातुलादिदुहितृनिषेधः। असगोत्रामित्यनेनासपिंडाया अपि भिन्नसन्तानजायाः समानगोत्राया निषेधः। असमानप्रवरामित्यनेन असपिंडजाया असगोत्राया अपि समानप्रवराया निषेधः। यथा यास्कवाधूलमौनमोकानां गोत्रभेदेऽपि तेषां भार्गववीतहव्यसावेदसेति समानप्रवरत्वम्।

"पंचमात्सप्तमादूर्ध्वमिति मातृतः मातृसंताने पंचमादूर्ध्वं पितृतः पितृसंताने सप्तमादूर्ध्वं सापिण्ड्यं निवर्त्तते" इति शेषः। अतश्चायं सपिण्डशब्दोऽवयवशक्त्या वर्त्तमानः पङ्कजादिशब्दवन्नियतविषय एव। तथा च पित्रादयः षट् सपिण्डाः। पुत्रादयश्च षट् आत्मा च सप्तमः। संतानभेदेऽपि यतः संतानभेदस्तमादाय गणयेत्। यावत्सप्तम इति सर्वत्र योजनीयम्। सपिण्डसमानगोत्रसमानप्रवरासु सुभार्यात्वमेव नोत्पद्यते। रोगिण्यादिषु तु उत्पन्नेऽपि भार्यात्वे दृष्टविरोध एवेति **विज्ञानेश्वरेणोक्तम्** (पृ. १३ पं. २५–२६)। "अप्रत्तानां तु स्त्रीणां सापिण्ड्यं त्रिपुरुषं विज्ञायत" इति (४।१८) **वसिष्ठवचनमाशौचे** विषयमिति **विज्ञानेश्वरादिभिर्निर्णीतम्** (प्रा. पृ. १८१) मातृगोत्रजामपि अपरिणेयां केचिदिच्छान्ति

"मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च। समानप्रवरां चैव गत्वा चान्द्रायणं चरेत्"॥ इति शातातपस्मरणात्। "सगोत्रां मातुरप्येके नेच्छन्त्युद्वाहकर्मणि" इति **व्याससमरणाच्चेति**। मातृगोत्रामिति गोत्रग्रहणं सपिण्डपरमित्यन्ये। **अखण्डादर्शे**— "कूटस्थमंतराले स्थाप्य तमादायान्योन्यगणने सति पितृपक्षे सप्तपुरुषानतीत्य या कन्या विवाहेच्छोः पुरुषस्याष्टमी भवति सा विवाह्या। तथा मातृपक्षे कूटस्थमारभ्यान्योन्यगणने सति पञ्चपुरुषानतीत्य विवाहेच्छोः पुरुषस्य षष्ठी भवति सैव विवाह्याऽस्य" इति। एवं च बहुस्मृतिसंमतत्त्वात्पञ्चमात्सप्तादूर्ध्वमेव विवाहः न ततोऽर्वागिति स्थितम्। तथा च **नारदः** (१२।७)—

"पञ्चमात्सप्तमादर्वाक् बन्धुभ्यः पितृमातृतः। अविवाह्या सगोत्रा च समानप्रवरा तथा"॥ **विष्णुः**— "पञ्चमात्सप्तमाद्धीनां यः कन्यामुद्वहेद् द्विजः। गुरुतल्पी स विज्ञेयः सगोत्रां चैवमुद्वहन्"॥इति। **यत्तु**— "पञ्चमीं मातृपक्षात्तु पितृपक्षात्तु सप्तमीम्। गृहस्थ उद्वहेत्कन्यां न्याय्येन विधिनोत्तमाम्"॥

इति **व्यास**वचनं तत् पञ्चमीं सप्तमीमतीत्योपरितनामुद्वहेदित्येवं परम् । अत एव **मरीचिः**—
"पञ्चमे सप्तमे चैव येषां वैवाहिकी क्रिया । क्रियापरा अपि हि ते पतिताः शूद्रतां गताः"॥इति।
मनुः (११।१७१-१७२)—
" पैतृष्वसेयीं भगिनीं स्वस्रीयां मातुरेव च । मातुश्च भ्रातुरास्तस्य गत्वा चान्द्रायणं चरेत् ॥
"एतास्तिस्रस्तु भार्यार्थे नोपयच्छेत बुद्धिमान् । ज्ञातित्वेनानुपेयास्ता पतितो ह्युपयन्नधः "॥
व्यासः (   )—
" जन्मनाम्नोरविज्ञान उद्वहेदविशंकितः । मातुः सपिण्डा यत्नेन वर्जनीया द्विजातिभिः ॥
"तृतीयां मातृतः कन्यां तृतीयां पितृतस्तथा । शुल्केन चोद्वहिष्यन्ति विप्राः पापविमोहिताः"॥इति ।
मातृतः मातृपक्षे तृतीयां मातुलसुतां पितृतः पितृपक्षे तृतीयां पैतृष्वसेयीमित्यर्थः । **शातातपः**—
" समानप्रवरां कन्यामेकगोत्रामथापि वा । विवाहयति यो मूढस्तस्य वक्ष्यामि निष्कृतिम् ॥
"उत्सृज्य तां ततो भार्यां मातृवत्परिपालयेत् । कृत्वा तस्याः समुत्सर्गमतिकृच्छ्रं विशोधनम्"॥इति।
"गायत्रीं यस्य यो दद्याद्यो वा दद्यादिमां द्विजः । तद्गोत्रे तत्कुले वाऽपि विवाहं नैव कारयेत्"॥
आपस्तंबः—
" समानप्रवरां कन्यां सगोत्रामुपगम्य च । तस्यामुत्पाद्य चण्डालं ब्राह्मण्यादेव हीयते"॥ इति ।
कल्पसारे—
"अमत्योढा सगोत्रा चेन्मातृवद्विभृयात्तु ताम् । चान्द्रायणं चरित्वाऽन्यामुपयच्छेत कन्यकाम् ॥
" कृच्छ्राब्दपादं कुर्वीत प्रजाता यदि सा भवेत् । मिन्दाहुती द्वे जुहुयात्तस्यान्ते चरितव्रतः ॥
" तस्यां प्रसूते निर्दोषः काश्यपो गोत्रतः स्मृतः । ऊढा चेत् बुद्धिपूर्वं स्याद्गुरुतल्पसमं चरेत् ॥
" तस्यां प्रसूतश्चण्डालः सर्वकर्मबहिष्कृतः ॥ " इति । **स्मृत्यर्थसारे**—
" यदि कश्चित् ज्ञानतस्तां कन्यामूढ्वोपगच्छति । गुरुतल्पव्रताच्छुद्धो गर्भस्तज्जोऽन्त्यतां व्रजेत् ॥
" भोगतस्तां परित्यज्य पालयेज्जननीमिव । अज्ञानाच्चेदैन्दवेन शुध्येद्गर्भस्तु काश्यपः"॥ इति ।
आपस्तंबः (२।११।१५-१६)-"सगोत्राय दुहितरं न प्रयच्छेन्मातुश्च योनिसंबन्धेभ्यः"॥ इति ।
कात्यायनः " प्रवरैरेषामविवाहः " इति । **माधवीये पराशरोऽपि**—
" पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः । पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबान्धवाः ॥
" मातुः पितृष्वसुः पुत्राः मातुर्मातृष्वसुः सुताः । मातुर्मातुलपुत्राश्च विज्ञेया मातृबान्धवाः ॥
" विवाहो नैष्यते तत्र पितुर्मातुश्च बन्धुषु "॥

सुमन्तुः—" पितृष्वसृसुतां मातृष्वसृसुतां मातुलसुतां मातृसगोत्रामुद्वाह्य चान्द्रायणं चरेत् । परिष्वज्यैनां बिभृयात् " इति ।

पैठीनसिः— "पितृमातृष्वसृदुहितरो मातुलसुता धर्मतो भगिन्यस्तां वर्जयेत् " । **स एव**—
"उद्वहेत सगोत्रां तु तनयां मातुलस्य च । ऋषिभिश्चैव तुल्योऽपि स तु चान्द्रायणं चरेत्"॥ इति ।

गौतमः (२१।१-२)-"ब्रह्महा सुरापी गुरुतल्पगो मातृपितृयोनिसंबन्धागस्तेननास्तिकनिंदितकर्माभ्यासिपतितात्याग्यपतितत्यागिनः पतिताः । पातकीसंयोजकाश्च " इति ।

चान्द्रिकायाम् (आ. ६७२ पं. १८)—
"स्त्रीसंततिस्तथा पुंसां न विवाह्ये उभे मते । स्त्रीपुंसोस्तु विवाह्या स्यात्पञ्चमात्सप्तमात्परम् ॥" इति ।

---

१ स- शंखः ।

'चतुर्थीमुद्वहेत्' इत्यादीनि अर्वाग्विवाहपराणि वचनानि विजातीयविषयाणि। यथाह **शङ्खः**—

"यद्येकजाता बहवः पृथक्क्षेत्राः पृथक्जनाः। एकपिण्डाः पृथक्शौचाः पिण्डस्त्वावर्त्तते त्रिषु॥" इति। एकस्माद्ब्राह्मणादेर्जाताः पृथक्क्षेत्राः भिन्नजातीयासु स्त्रीषु जाता ते पृथक्जनाः। समानजातीयासु भिन्नासु स्त्रीषु जातास्ते एकपिण्डाः सपिंडाः। किंतु पृथक् शौचाः शौचप्रकरणे वक्ष्यते। पिण्डस्त्वावर्त्तते त्रिष्विति त्रिपुरुषमेव सापिण्ड्यमित्यर्थः। तथैव चतुर्थीविवाहः क्षत्रियविषय इति व्यक्तमुक्तवान्। **अखण्डादर्शकारः**—

"त्रीनतीत्य मातृतः पंचातीत्य पितृतः" इति **पैठनसिवचनं** क्षत्रियाविषयमिति व्याख्येयम् इति।

"तृतीयात्क्षत्रियो मातुः पञ्चमात्पितृतः पराम्। समुद्वहेत्सवर्णां तु पञ्चमात्सप्तमात्पराम्"॥ इति **कण्ववचनबलात्** 'त्रीनतीत्य मातृतः' इति **पैठीनसिवचनं** क्षत्रियादिविषयमिति **वरदराजीये** निर्णीतम्। **विज्ञानेश्वरीयेऽ**पि (पृ. १४ पं. ७५) यदपि **वसिष्ठेनोक्तम्**—

"पञ्चमीं सप्तमीं चैव मातृतः पितृतस्तथेति" यदपि "त्रीनतीत्य मातृतः पञ्चातीत्य पितृतः" इति **पैठीनसिनाऽ**पि अर्वाङ्निषेधार्थं न पुनस्तत्प्राप्त्यर्थमिति सर्वस्मृतीनामविरोधः। एतच्च पंचमात्सप्तमादूर्ध्वं मातृतःपितृतस्तथेति वचनं समानजातीये द्रष्टव्यम्। विजातीये तु "यद्येकजाता बहव" इति **शङ्खवचनात्** त्रिपूरुषमेव सापिण्ड्यमिति **सार्वभौमीये**। चतुर्थ्यादिविवाहे प्रवर्त्तमानस्य लोकस्य भ्रान्तिरेव मूलम्। विजातीयविषयस्य चतुर्थीमुद्वहेदित्यादेः सजातीयविषयत्वावगमात्। अन्धपरंपरा वा नान्यत्किंचित्मूलम्। यदि कथंचित्किंचिद्वचनं कृच्छ्रलब्धं तथापि "मन्वर्थविपरीता तु या स्मृतिः सा न शस्यते। एकतः सर्वमुनयो **याज्ञवल्क्यस्तथैकतः**॥ "यदुक्तवान्धर्मशास्त्रं तत्प्रमाणं प्रमीयताम्" इति **मनुयाज्ञवल्क्या**दिप्रबलस्मृतिविरोधेन तदेव त्याज्यम्। एवं शास्त्रविरोधे लोकाचारश्च त्याज्यः। तथा **कात्यायनः**—

"स्मृतेर्वेदविरोधे तु परित्यागो यथा भवेत्। तथैव लौकिकाचारं स्मृतिबाधात्परित्यजेत्॥" **वसिष्ठोऽपि** (१४-५)—"श्रुतिस्मृतिविहितो धर्मस्तदलाभे शिष्टाचारः प्रमाणम्" इति। शास्त्रविरोधे शिष्टाचारो न प्रमाणमित्यर्थः। तथा **गौतमः** (११।२०)—

"देशजातिकुलधर्मा आम्नायैरविरुद्धाः प्रमाणम्" इति। तदेवमुसवर्णासु नारीषु विवाहश्च द्विजातिभिरिति कलावसवर्णाविवाहनिषेधान्**मनुयाज्ञवल्क्या**दिभिः पञ्चमात्सप्तमादूर्ध्वमेव विवाहविधानात्तदर्वाक्पातित्यादिप्रत्यवायस्मरणाच्च पञ्चमात्सप्तमादर्वाग्विवाहो निन्दितः। **सपत्नीमातुः मातृत्वनिरूपणम्**। एवमाऽपञ्चमात्सपत्नीमातृबन्धुवर्गोऽपि परिहार्यः। तत्रैकशरीरावयवान्वयलक्षणसापिंड्याभावेऽपि अतिदेशे न सापिण्ड्यसिद्धेः। तथा **सुमन्तुः**—"पितृपत्न्यः सर्वा मातरस्तद्भ्रातरो मातुलास्तत्सुता मातुलसुतास्तत्स्वसारश्च मातृष्वसारस्तत्सुता मातृस्वसृसुतास्तद्दुहितरश्च भगिन्यस्तदपत्यानि भागिनेयानि तस्मात्ता नोपयन्तव्याः। अन्यथा संकरकारिकाः स्युः" इति। स्मर्यते चापि सापिण्ड्यम्। "एकत्वं सा गता भर्त्तुः पिंडे गोत्रे च सूतके" इति।

"भर्त्तुः पत्न्या सहैकशरीरोत्पादकलक्षणसापिण्ड्यसद्भावाच्च पुत्रादीनां पितृ**शरीरावयावान्वयद्वारेण सपत्नीमातृतत्सपिण्डैः सह भवति सापिण्ड्यम्। अत एव हि 'मातृतः**

पितृतस्तथा मातृबन्धुभ्यः पञ्चमीं मातृपक्षाच्च' इत्यादिषु सामान्येन मातृशब्दाः प्रयुक्तास्तस्माज्जननीबन्धुवर्गवत्सपत्नीमातृयोनिसंबन्धो बन्धुवर्गश्च परिहार्य एव । **स्मृत्यन्तरे**—

"भ्रातुस्तु पत्नीभगिनीं तत्सुतां चैव वर्जयेत् । पितुस्तु पत्नी भगिनीं तत्सुतां चैव वर्जयेत्"॥इति ।

एवं सामान्येन पितृशब्दप्रयोगाज्जनकव्यतिरिक्तपितृकुलमपि सप्तमावधि परिहार्यम् । तथा **गौतमः** (४।२-३)—"असमानप्रवरैर्विवाह ऊर्ध्वं सप्तमात्पितृबन्धुभ्यो बीजिनश्च" ॥ इति । परक्षेत्रे नियोगादुत्पन्नः पुत्र उभयोरपि भवति ।

"अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः । उभयोरप्यसौ रिक्थी पिण्डदाता च संमतः" ॥ इति **याज्ञवल्क्य** (व्य. ११७) स्मरणात् । "बीजिनः क्षेत्रिणश्चैव ह्यामुष्यायणको हि सः" इति **स्मृत्यन्तराच्च** । तथा दत्तादीनां ह्यामुष्यायणत्वेन गोत्रद्वयं परिहार्यम् ।

"गोत्ररिक्थे जनयितुर्न भजेद्दत्रिमः सुतः । जनकस्य तु गोत्रेण ह्युपनीतो द्विगोत्रकः ॥

"उपनेतुर्भजेद्गोत्रमसंप्रज्ञातगोत्रवान् । प्रज्ञातगोत्रस्तु भवेदुभयं दत्तपुत्रवत्" ॥ इति स्मरणात् **स एव** उपनयनानन्तरमिति **पूर्णसंग्रहे** । एतच्चोपनयनानन्तरं दत्तपुत्रविषयम् । तथा **पैठीनसिः** "अथ दत्तक्रीतकृत्रिमपुत्रिकापुत्राः परिग्रहेणार्षेण जातास्ते संहता गोत्राद्यामुष्यायणा भवन्ति" इति । अत उभयत्र पञ्चमात्सप्तमादूर्ध्वमेव विवाह इति **विज्ञानेश्वरीय**—(पृ. १४१) **अखण्डादर्शवरदराजीयादिषु** निर्णीतम् । **अपरे** तु **चन्द्रिकाकारादय** आहुरेकोद्देशावच्छेदेनैकक्रियान्वयिन एव सपिण्डता । तथा च **मार्कण्डेयः**—

"पिता पितामहश्चैव तथैव प्रपितामहः । पिण्डसंबन्धिनो ह्येते विज्ञेयाः पुरुषास्त्रयः ॥
"लेपसंबन्धिनश्चान्ये पितामहपितामहात् । प्रभृत्युक्तास्त्रयस्तेषां यजमानस्तु सप्तमः ॥
"इत्येष मुनिभिः प्रोक्तः संबंधः साप्तपूरुषः" इति । एवं च सति मातुलसुतादीनामेकपिंडक्रियानुप्रवेशाभावेनासपिंडत्वात्तद्विवाहोऽभिमतः । एव 'पंचमान्मातृतः' 'सगोत्रान्मातुरप्येके नेच्छंति' इत्यादिवचनजातं पुत्रिकाकरणविषयम् । आसुरादिविवाहोढासंततिविषयं च । अन्यथा मातुः पतिगोत्रत्वेन गोत्रांतराभावान्न च भूतपूर्वगत्या मातृसगोत्रत्वं वर्त्तमाने संभवति भूतपूर्वगतेरन्याय्यत्वात् । पतिगोत्रत्वं च

"स्वगोत्राद्भ्रश्यते नारी विवाहात्सप्तमे पदे । एकत्वं सा गता भर्तुः पिंडे गोत्रेऽथ सूतके" ॥
इत्यादिस्मृतिभ्योऽवगम्यते । पुत्रिकापुत्रस्य मातृगोत्रत्वमाह **लौगाक्षिः**—

"मातामहस्य गोत्रेण मातुः पिंडोदकक्रिया । कुर्वीत पुत्रिकापुत्र एवमाह प्रजापतिः" ॥ इति ।
आसुरादिविवाहविषये **मार्कंडेयः**—

"ब्राह्मादिषु विवाहेषु याऽनूढा कन्यका भवेत् । भर्तृगोत्रेण कर्तव्या तस्याः पिंडोदकक्रियाः ॥
"आसुरादिविवाहेषु पितृगोत्रेण धर्मवित्" ॥ मातृपितृगोत्रेणेत्यर्थः । एवं च पुत्रिकाकरणे आसुरादिविवाहेषु "होमपूर्वं तु यो दत्तः स एव जनकस्य च । गोत्रेण विवहेत्तस्य पुत्रादौ न निषेधकृत् ॥

"दातृगोत्रसमुद्भूतां गृहीतृकुलगोत्रजः । उद्वहेद्दशमादूर्ध्वं नोद्वहेद्वेति **गौतमः** ॥

"गायत्रीं यस्य यो दद्याद्यो वा दद्यादिमां द्विजः" । तद्गोत्रे तत्कुले वाऽपि च उदकपूर्वदानाभावेन स्वपितृसापिंड्यस्य सगोत्रत्वस्य च निवृत्तेर्मातुः स्वपित्रादिसापिंड्यसद्भावात् । "असपिंडा च या मातुरसगोत्रा च या पितुः" इत्यादीनि वचनानि तद्विषयाणि वेदित-

व्यानि । न तु पुत्रस्य मातृसपिंडत्वाद्या मातुः सपिंडा सा पुत्रस्यापीति । किमर्थं मातृग्रहणम् । उच्यते । यदा तु पुत्रिकासुतस्यैव मातामहाभ्यां परित्यागस्तदा तत्सापिंड्यनिवृत्त्या तत्सपिंडाया विवाहप्राप्तौ तन्मा भूदिति मातृग्रहणम् । एवं दत्तपुत्रादेस्त्यागेनैव पितृगोत्रनिवृत्त्या तत्सगोत्राया विवाहप्राप्तौ तन्मा प्रसांक्षीदिति पितृग्रहणमिति ब्राह्मादिभिर्विवाहो निवृत्तपितृसापिंड्यायाः पुत्रस्य मातुलसुतादीनां पञ्चमात्सप्तमादर्वाचीनानामपि परिणयन अभिमतमेव । मातुलसुतादिविवाहनिषेधवचनानि सर्वाणि आसुरादिविवाहोढापुत्रविषयाणि पुत्रिकापुत्रविषयाणि च । मातुलसुताविवाहानुग्रहकराणि तु ब्राह्मादिविवाहोढाविषयाणीति व्यवस्था ।

मातुलसुतोद्वाहविषयः । तत्र **नारदः**—

" तृतीयां मातृपक्षाच्च पंचमीं पितृतस्तथा । विवाहं तु क्वचिद्देशे संकोच्याऽपि सपिंडताम् ॥
" चतुर्थीमुद्वहेत्कन्यां चतुर्थः पंचमीमपि । षष्ठीं तु नोद्वहेत्कन्यां पंचमो न तु पंचमीम् ॥
" तृतीयो वरयेत्कन्यां चतुर्थीं पंचमीं तथा " ॥

षट्त्रिंशन्मते—

" तृतीयां मातृतः कन्यां तृतीयां पितृतस्तथा । विवाहयेन्मनुः प्राह पाराशर्योऽगिरा यमः " ॥

चतुर्विंशतिमते—

" तृतीयां वा चतुर्थीं वा पक्षयोरुभयोरपि । विवाहयेन्मनुः प्राह पाराशर्योऽगिरा यमः" ॥

स्मृतिसारे—

" मातुलस्य सुतां केचित्पैतृष्वसृसुतादिकम् । विरहंति क्वचिद्देशे संकोच्याऽपि सपिंडता ॥
"चतुर्थः पंचमीं कन्यां पंचमीं षष्ठ उद्वहेत् । चतुर्थीमुद्वहेत्कन्यां पंचमो न तु पंचमीम् ॥
" पंचमः पंचमीं कन्यां नोद्वहेदिति यत्स्मृतम् । पितृपक्षे निषेधोऽयं मातृपक्षे न तद्भवेत् " ॥

स्मृतिरत्ने—

" अब्रह्मचारिदाराद्यैः सार्धभोजनकर्म च । मातुलादिसुतायां च विवाहः शिष्टसंमतः ॥
" इत्येते दाक्षिणात्यानामपि गीता उदाहृताः ।
" समुद्रयानं मांसस्य भक्षणं शस्त्रजीविका ।
" शीधुपानमुदीच्यानामविगीतानि धर्मतः " ॥

बृहस्पतिः—

" उद्वाह्यते दाक्षिणात्यैर्मातुलस्य सुता द्विजैः । मध्यदेशे कर्मकराः शिल्पिनश्च गवाशिनः ॥
" मत्स्यादाश्च नराः सर्वे व्यभिचाररताः स्त्रियः । उत्तरे मद्यपा नार्यः स्पृश्या नृणां रजस्वलाः ॥
" अग्रजातां प्रगृह्णंति भ्रातृभार्यामभर्तृकाम् ॥
" देशजातिकुलाचारधर्माः सत्त्वप्रवर्तिताः । तथैव ते पालनीयाः प्रजाः प्रक्षुभ्यतेऽन्यथा ॥
" विरुद्धाः प्रतिदृश्यंते दाक्षिणात्येषु संप्रति । स्वमातुलसुतोद्वाहो मातृबंधुत्वदूषिताः ॥
" अभर्तृकभ्रातृभार्याग्रहणं चातिदूषिते । कुले कन्याप्रदानं च देशेष्वन्येषु दृश्यते ॥
" इत्थं विरुद्धानाचारान्प्रभूतान्न निवर्तयेत् । तथा भ्रात्रीविवाहोऽपि पारसीकेषु दृश्यते ॥
" तथैकादशरात्रादौ श्राद्धे भुक्तं तयोर्द्विजैः । तेभ्यः श्राद्धे पुनर्दानं केचिन्नेच्छंति देहिनः ॥
" दत्वा धान्यं वसंतेऽन्यैः शरदि द्विगुणं पुनः । भुज्यते बंधकक्षेत्रं प्रविष्टे द्विगुणे धने ॥
" भज्यतेऽन्यैरप्रविष्टमूल्यं तच्च विरुध्यते ॥

" देशजात्यादिधर्मस्य प्रामाण्यादविरोधिनः। शास्त्रेणातो नृपः सर्वं शास्त्रं दृष्ट्वा प्रवर्त्तयेत्"॥ इति। अतो ब्राह्मादिविवाहेषु निवृत्तसपिंडभावाया मातुरसपिंडत्वान्मातुलसुता परिणेया। एवं पैतृष्वसीय्यपि च। न च तथाविधा मातृष्वसा तद्दुहिता च किमिति न परिणेयेति वाच्यम्। शास्त्राविरोधेऽपि लोकविरुद्धत्वात् धर्म्यमपि लोकविद्विष्टं तन्नानुष्ठेयम्। तदुक्तं **मनुना**—

" अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न तु " इति। **वराहमिहिरोऽपि**—

" देशाचारस्तावदादौ विचिंत्यो देशे देशे या स्थितिः सैव कार्या।

" लोकविद्विष्टं पंडिता वर्जयंति दैवज्ञोऽतो लोकमार्गेण यायात् "॥ इति। दाक्षिणात्यानां मध्ये आंध्रेषु त्रैविद्यवृद्धा वेदार्थानुष्ठातारः शिष्टा अपि मातुलादिदुहितृपरिणयनमाचरंति। द्रविडेषु तथाविधाः शिष्टाः चतुर्थ्यादिविवाहमाचरंति। मातृष्वसृदुहित्रादिविवाहं सर्वत्र वर्जयंति। उक्तं च तथाचारस्य प्रामाण्यं **मनुना** "शिष्टाचारस्मृतिर्वेदास्त्रिविधं धर्मलक्षणम्" इति। " सद्भिराचरितं यस्माद्धार्मिकैस्तु द्विजातिभिः। तद्देशकुलजातीनामविरुद्धं प्रकल्पयेत्"॥ इति।

आपस्तंबः—

" येषां परंपराप्राप्ताः पूर्वजैरप्यनुष्ठिताः। त एव तैर्न दुष्येयुराचारा नेतरे पुनः "॥

देवलः—

"यस्मिन्देशे य आचारो न्यायदृष्टस्तु कल्पितः। स तस्मिन्नेव कर्त्तव्यो देशाचारः स्मृतो भृगोः"॥

" येषु देशेषु ये देवा येषु देशेषु ये द्विजाः। येषु देशेषु यत्तोयं या च यत्रैव मृत्तिका॥

" येषु देशेषु यच्छौचं धर्माचारश्च यादृशः। तत्र तान्नावमन्येत धर्मस्तत्रैव तादृशः॥

" यस्मिन्देशे पुरे ग्रामे त्रैविद्ये नगरेऽपि वा। यो यत्र विहितो धर्मस्तद्धर्मं न विचालयेत् "॥

बोधायनः (१।५।१७–२२)– पंचधा विप्रतिपत्तिर्दक्षिणतस्तथोत्तरतः। यानि दक्षिणतस्तानि व्याख्यास्यामः। यथैतदनुपेतेन सह भोजनं स्त्रिया सह भोजनं पर्युषितभोजनं मातुलपितृष्वसृदुहितृगमनमिति। अथोत्तरत ऊर्णाविक्रयः शीधुपानमुभयतोदद्भिर्व्यवहार आयुधीयकं। समुद्रसंयानमिति। इतरदितरस्मिन् कुर्वन् दुष्यति इतरदितरस्मिंस्तत्र तत्र देशे प्रामाण्यमेव स्यात् " इति। अयमर्थः। दक्षिणतः। दक्षिणेन नर्मदामुत्तरेण कन्यातीर्थम्। अथोत्तरतः। दक्षिणेन हिमवंतमुत्तरेण विंध्यम्। एतद्देशे प्रसूतानां शिष्टानां परस्परं पंचधा विप्रतिपत्तिः विसंवादः। मातुलपितृष्वसृदुहितृगमनं परिणयनं उर्णायास्तद्विकारस्य च कंबलादेर्विक्रयः। उभयतोदतः अश्वादयः। व्यवहारो विक्रयादि। आयुधीयकं शस्त्रधारणम्। समुद्रसंयानं नावा द्वीपांतरगमनम्। इतरदनुपेतसहभोजनादि इतरस्मिन्नुत्तरापथे कुर्वन् दुष्यति। एवमूर्णाविक्रयादीनि इतरत्र दक्षिणापथे कुर्वन् दुष्यति। तत्र देशप्रामाण्यमेव स्यादिति। एवं व्यवस्थितविषयैव मूलश्रुतिः कल्पते। तस्माद्व्यवस्थितमेवानुष्ठानं तद्वर्जनं चेति। यत्तु अनन्तरमेव **बोधायनोक्तं** (१।१।२३-२४)– " मिथ्यैतादिति गौतमः। उभयं चैतन्नाद्रियेत। दृष्टस्मृतिविरोधदर्शनादिति " तन्न। पूर्वोक्तनिराकरणार्थं **गौतम**ग्रहणात्। किंतु दृष्टस्मृतिविरोधदर्शनाद्**गौतमस्य** मातृसपिंडापरिणयनमभिप्रेतमिति दर्शयितुमिति **चंद्रिकायां** व्याख्यातम्। **यद्याप्यापस्तंबवचनम्** (१।१२।१०–१२) "यत्र तु प्रीत्युपलब्धितः प्रवृत्तिर्न तत्र शास्त्रमस्ति। तदनुवर्तमानो नरकाय राध्यति " इति। तदपि मातृसपिंडामातुलसुतापरिणयनादिविषयं वेदितव्यम्। यदिदमपि **वसिष्ठस्मरणम्**(१।१७) " देशकुलधर्मा आम्नायैरविरुद्धाः प्रमाणम् " इति।

---

१ **क्षकख**–संधनिकमिति।

तदप्यत्राम्नायविरोधाभावादनुकूलमेवानुकूल एव चाम्नाये श्रूयते " आयाहीन्द्र पथिभिरीलितेभिर्यज्ञमिमं नो भागधेयं जुषस्व । तृप्तां जुहुर्मातुलस्येव योषा भागस्ते पैतृष्वसेयीवपाम् " इति । एहींद्र पथिभिर्मार्गैरीलितेभिः प्रशस्तैर्नः अस्माकं इमं यज्ञमायाहि आगच्छ । आगत्य च इदमस्माभिः दीयमानं भागधेयं जुषस्व सेवस्व । अतः एते यजमानाः तृप्तामाज्यादिना संस्कृतां पक्वां वपां त्वामुद्दिश्य जुहुः त्यक्तवंतः । अत्र दृष्टांतद्वयम् । यथा मातुलस्य योषा दुहिता दौहित्रस्य भागः भजनीया परिणेतुं योग्या यथा च पैतृष्वसेयी पौत्रस्य तथाऽयं तव भागो वपाख्य इति मंत्रार्थः । तेन श्रुतितः स्मृतितः आचारादपि सिद्धं मातुलसुतादिपरिणयनमिति **स्मृतिचंद्रिकाकारेण देवणभट्टो**पाध्यायैरन्यैरपि स्वदेशाचारानुसारिभिर्बुद्धिमद्भिः समर्थितं मातुलसुतादिपरिणयनम्" । इति । इति मातुलसुता**विवाहविषयकनिरूपणम्** ।

अथ विवाहे वर्जनीयानि कुलान्याह मनुः (३।६-७)—

" महांत्यपि समृद्धानि गोजाविधनधान्यतः । स्त्रीसंबंधे दशैतानि कुलानि परिवर्जयेत् ॥

" हीनक्रियं निष्पुरुषं निश्छंदोरोमशार्शसम् । क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च " ॥

हीनक्रियं श्रौतस्मार्ताचारहीनम् । निष्पुरुषं स्त्रीशेषं । तद्वर्जयेत् । कुतः संतत्यभावानुसारिभयात् । निश्छंदो निरध्ययनम् । रोमशं रोमबहुलं निर्ऋतिरूपत्वात् । तथा हि **श्रुतिः**—

"निर्ऋत्यै विकृतरूपं देहं रोमशमालभेत । सा ह्यस्या स्वः तनुः" इति । अर्शोऽस्यास्तीत्यर्शसः क्षयी । क्षयरोग उक्त आमयो महोदरादि । तद्युक्तमामयाविव्याधिसंक्रातिभयादेतानि वर्जयेत् ।

याज्ञवल्क्योऽपि (आ. ५७)—

"दशपूरुषविख्याता श्रोत्रियाणां महाकुलात् । स्फीतादपि न संचारिरोगदोषसमन्वितात्" ॥

पुरुष एव पूरुषः । दशभिः पुरुषैः मातृतः पितृतश्च पंचभिर्विख्यातं यत्कुलं महत्कुलं पुत्रपौत्रपशुदासीग्रामादिसमृद्धं तस्मात्कन्या आहर्त्तव्या । तत्रापवादः । स्फीतादपीति संचारिरोगाः कुष्ठापस्मारादयः । एतैः समन्वितात्पूर्वोक्तान्महाकुलादपि नाहर्त्तव्येत्यर्थः । **यमः**—

" कुलानीमान्यपि सदा अविवाह्यानि निर्दिशेत् । अनार्षेयं ब्राह्मणानामृत्विजां चैव वर्जयेत् ॥

" हीनांगमतिरिक्तांगमामयाविकुलानि च । तथाश्वित्रिकुलादीनां कुर्याद्विपरिवर्जनम् ॥

" सदा कामीकुलं वर्ज्यं रोमशानां च यत्कुलम् । अपस्मारिकुलं यच्च यच्च पांडुकुलं भवेत् ॥

" अत्युच्चमतिनीचं च अतिवर्णं च वर्जयेत् " । अनार्षेयमविज्ञातप्रवरम् । **मनुः** (४।२४७)—

" उत्तमैरुत्तमैर्नित्यं संबंधानाचरेत्सह । निनीषुः कुलमुत्कर्षमधमानधमांस्त्यजेत् ॥

" विशुद्धाः कर्मभिश्चैव श्रुतिस्मृतिनिदर्शिताः । अविप्लुतब्रह्मचर्या महाकुलसमन्विताः ॥

" महाकुले च संबंधो महत्वे च व्यवस्थिताः । संतुष्टाः सज्जनहिताः साधवः समदर्शिनः ॥

" अक्रोधनाः सुप्रसादाः कार्याः संबंधिनः सदा । ये स्तेनाः पिशुनाः क्लीबा ये च नास्तिकवृत्तयः ॥

" विकर्मणा च जीवंतो विकृताकृतयस्तथा । प्रवृद्धवैराः शूरैर्ये राजकिल्बिषिणस्तथा ॥

" ब्रह्मस्वादाननित्याश्च कदर्याश्च विगर्हिताः । अप्रवाचेषु वंशेषु स्त्रीप्रजाप्रसवांस्तथा ॥

" पतिर्यत्र स चाऽन्यत्र तांश्च यत्नेन वर्जयेत् ॥

" पितुर्वा भजते रूपं[1] मातुर्वोभयमेव वा । न कथंचन दुर्योनिः प्रकृतिं स्वां विमुंचति " ॥

हारीतः—

" मातुलान्भजते पुत्रः कन्यका भजते पितॄन् । यथाशीला भवेन्माता तथाशीलो भवेन्नरः " ॥

---

१ **कख**-शीलं ।

विष्णुः—

"अश्वं पित्रा परीक्षेत मात्रा कन्यां परीक्षयेत्। तृणाद्भूमिं परीक्षेत आचारेण कुलं तथा"॥इति।

विवाहे वर्ज्यकुलनिरूपणम्। अथासवर्णोद्वाहः। सवर्णोद्वाहनियमेन प्रतिषिद्धमसवर्णोद्वाहम धिकारिविशेषोऽनुजानाति **मनुः** (३।१२–१३)—

"सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि। कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोऽवराः॥
"शूद्रैव भार्या शूद्रस्य सा च स्वा च विशः स्मृते। ते च स्वा चैव राज्ञः स्युस्ताश्च स्वा चाग्रजन्मनः"॥

प्रथमतः सवर्णैव वोढव्या। तदनुभोगेच्छायां असवर्णा अपि क्रमेण वोढव्याः। ब्राह्मणस्य चतस्रः क्षत्रियस्य तिस्रः वैश्यस्य द्वे शूद्रस्य सवर्णैकेवेत्यर्थः। अथ ब्राह्मणक्षत्रियाभ्यां सवर्णायां प्रथममुद्वोढुमशक्तायामसवर्णाऽपि वोढव्या। न कदाचिदपि प्रथमं शूद्रेत्याह **स एव** (३।१४)—

"न ब्राह्मणक्षत्रिययोरापद्यपि हि तिष्ठतोः। न कस्मिंश्चित्तु वृत्तांते शूद्रा भार्योपदिश्यते"॥

वृत्तं धर्मः। अंतो निर्णयः। धर्मशास्त्रमित्यर्थः। भार्या नोपादिश्यते भार्यात्वेन नोपदिश्यते। किं तु काम्यत्वेनेत्यर्थः। शूद्रां प्रथमं भार्यात्वेन उद्वहतः प्रत्यवायमाह **स एव** (३।१५)—

"हीनजातिं स्त्रियं मोहादुद्वहंतो द्विजातयः। कुलान्येव नयंत्याशु ससंतानानि शूद्रताम्"॥

केवलशूद्रभार्यात्वं तदपत्यत्वं च ब्राह्मणस्य दोषावहमित्याह **स एव** (३।१७–१८)—

"शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिम्। जनयित्वा सुतं तस्यां ब्राह्मण्यादेव हीयते॥
"दैवपित्रातिथेयानि तत्प्रधानानि तस्य तु। निन्दन्ति पितृदेवास्तं न च स्वर्गं स गच्छति"॥

मतांतराण्युपन्यस्य स्वमतं सिद्धांतयति (३।१६)—

"शूद्रावेदी पतत्यत्रेरुचथ्यतनयस्य च। शौनकस्य सुतोत्पत्त्या तदपत्यतया भृगोः"॥

शूद्रावेदी शूद्रां भार्यात्वेन विंदतीति शूद्रावेदी। अत्रेः उचथ्यतनयस्य गौतमस्य शूद्रायां सुतोत्पादनेन न पुनस्तस्यागमनेनेति शौनकस्य मतम्। शूद्रामूढवानपि तस्यां सुतोत्पत्तिभयादृतौ तां नोपेयादित्यर्थः। तदपत्यतया तस्यां शूद्रायामेवापत्यं यस्य तदपत्यतया पततीति भृगोर्मतम्। भृगुमुखेन मन्वादिशास्त्रस्य प्रोच्यमानत्वादिति मानवानीमानि वचनानि टीकाकृतैवं व्याख्यातानि। **याज्ञवल्क्यः** (आ. ५७)—

"तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रमम्। ब्राह्मणक्षत्रियविशां भार्या स्वा शूद्रजन्मनः॥
"यदुच्यते द्विजातीनां शूद्राद्दारोपसंग्रहः। न तन्मम मतं यस्मात्तत्राऽयं जायते स्वयम्"॥इति(५६)

मानवेन समानार्थमिति **चंद्रिकायाम्। पैठीनसिः**—

"अलाभे विप्रकन्यायाःस्त्रियोऽन्यास्तिस्र एव तु। शूद्रायाः प्रतिलोम्येन तथान्ये पतयस्त्रयः"॥इति।

जातूकर्णिः—

"अलाभे कन्यायाः स्नातकव्रतं चरेदपि वा क्षत्रियायां पुत्रानुत्पादयीत वैश्यायां वा"॥इति।

नारदः (१२।५–६)—

"ब्राह्मणस्यानुलोम्येन स्त्रियोऽन्यास्तिस्र एव तु। शूद्रायाः प्रतिलोम्येन तथाऽन्यपतयस्त्रयः॥
"द्वे भार्ये क्षत्रियस्यान्ये वैश्यस्यैका प्रकीर्तिता। वैश्याया द्वौ पती ज्ञेयावेकोऽन्यः क्षत्रियापतिः"॥

विष्णुः (२६।५)—

"द्विजस्य भार्या शूद्रा तु धर्मार्थे न भवेत्क्वचित्। रत्यर्थमेव सा तस्य रागांधस्य प्रकीर्तिता"॥

व्यासः—
" शूद्रायोनौ पतद्वीजं हाहाशब्दं द्विजन्मनः । कृत्वा पुरीषगर्त्तेषु पतितोऽस्मीति दुःखितः ॥
" मामधः पातयेदेष पापात्मा काममोहितः । अधोगतिं व्रजेत्क्षिप्रमिति शप्त्वा पतेत्तु तत् " ॥
वसिष्ठोपि (१.२५–२७)– " शूद्रामप्येके मंत्रवर्ज्जं तद्वत् । तया न कुर्यात् । अतो हि ध्रुवः कुलापकर्षः प्रेत्य चास्वर्गः " इति । **मनुः** (३।१९)—
" वृषलीफेनपीतस्य निःश्वासोपहतस्य च । तस्यां चैव प्रसूतस्य निष्कृतिर्न विधीयते ॥
" शिल्पेन व्यवहारेण शूद्रापत्यैश्च केवलैः । गोभिरश्वैश्च यानैश्च कृष्या राजोपसेवया ॥ (६४)
"अयाज्ययाजनैश्चैव नास्तिक्येन च कर्मणा । कुलान्यकुलतां यांति यानि हीनानि मंत्रतः"॥(६६)
इति । गोभिरश्वैर्विक्रीयमाणैरित्यर्थः । अयं चासवर्णाविवाहः युगांतरविषयः । " असवर्णासु कन्यासु विवाहश्च द्विजातिभिः " इति कलौ निषेधत्वात् ।

इत्यसवर्णाविवाहनिरूपणम् । अथ वरलक्षणम् । मनुः (९।८८)—
"उत्कृष्टायाभिरूपाय वराय सदृशाय च । अप्राप्तसमयां तस्मै कन्यां दद्याद्विचक्षणः " ॥
यमोऽपि—
" कुलं च शीलं च वपुर्वयश्च विद्यां च वित्तं च सनाथतां च ॥
" एतान्गुणान्सप्त परीक्ष्य देया कन्या बुधैः शेषमचिंतनीयम्" ॥ यत्तु **विष्णुनोक्तम्**—
"ब्राह्मणस्य कुलं ग्राह्यं न वेदाः संपदः क्रमात् । कन्यादाने तथा श्राद्धे न विद्यात्तत्र कारणम्" ॥
इति तत्कुलस्य प्राधान्यप्रतिपादनपरम् । न पुनर्विद्यानिराकरणार्थम् । अत एवाश्वलायनः— " कुलमग्रे परीक्षेत " इति । **आपस्तंबः** (२।११।१७) " वपुशीललक्षणसंपन्नश्रुतवानरोग इति वरसंपत् " इति । **गौतमः** (४।४)–"विद्याचारित्रबंधुशीलसंपन्नाय दद्यात्" इति । **शातातपः**–
"वरो वरयितव्योऽर्थी कुलशीलसमन्वितः । रूपवान्पंडितः प्राज्ञो युवा शीलसमन्वितः"॥
याज्ञवल्क्यः (आ. ५५)—
"एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियो वरः । यत्नात्परीक्षितः पुंस्त्वे युवा धीमान् जनप्रियः"॥ इति।
कात्यायनोऽपि—
"अपत्यार्थं स्त्रियः सृष्टा स्त्री क्षेत्रं बीजिनो नराः । क्षेत्रं बीजवते देयमतो बीजं परीक्षयेत्"॥इति।
बीजं वीर्यमित्यर्थः । तत्परीक्षोपायमाह **नारदः** (१३।१०–१२)—
" यस्याप्सु प्लवते बीजं ह्रादि मूत्रं च फेनिलम् । पुमान् स्याल्लक्षणैरेतैर्विपरीतस्तु षंढकः " ॥
ह्रादि शब्दवत् ।
"चतुर्दशविधः शास्त्रे षंढो दृष्टो मनीषिभिः । चिकित्स्यश्चाचिकित्स्यश्च तेषामुक्तो विधिः क्रमात्॥
" निसर्गषंढो[2]ऽमुष्कश्च पक्षषंढस्तथैव च । अभिशापाद्गुरो रोगाद्देवक्रोधात्तथैव च ॥
" ईर्ष्याषंढश्च सेव्यश्च वातरेता मुखेभगः । आक्षिप्तो मोघबीजश्च शालीनोऽन्यापतिस्तथा " ॥
एतेषां लक्षणानि । निसर्गषंढः स्वभावतो लिंगवृषणहीनः । अमुष्कः भिन्नवृषणः[3] । पंचदशदिनानि स्त्रियमनासेव्य सकृद्भोगक्षमः पक्षषंढः । गुरुशापषंढादयस्त्रयः स्पष्टाः । ईर्ष्यया पुंस्त्वमुत्पाद्यते यस्य स ईर्ष्याषंढः । स्त्र्युपचारविशेषणपुंस्त्वशक्तिर्यस्य स सेव्यषंढः । वातोपहतरेतस्को वातरेताः । मुख एव पुंस्त्वशक्तिर्न योनौ यस्य स मुखेभगः । रेतोनिरोधात्षंढीभूतः आक्षिप्तषंढः । गर्भाधानासमर्थबीजः मोघबीजः । अप्रगल्भतया क्षोभाद्वा नष्टपुंस्त्वः शालीनः । यस्य भार्याव्यतिरेकेणान्यासु पुरुषभावः सोऽन्यापतिः ।

---

१ क्ष—धान्यैश्च । २ क्ष–बद्धश्च । ३ क्ष–बद्धः छिन्नमुष्कः ।

“तत्राद्यावप्रतिकारो पक्षषंढं च वर्जयेत् । अनुक्रमात्तु यस्यास्य कालः संवत्सरः स्मृतः ॥ (१४)
“ईर्ष्याषंढादयो येऽन्ये चत्वारः समुदाहृताः। त्यक्तव्यास्ते पतितवत्क्षतयोन्या अपि च स्त्रियः॥(१५)
“आक्षिप्तमोघबीजाभ्यां कृतेऽपि पतिकर्मणि। पतिरन्यः स्मृतो नार्या वत्सरार्धं प्रतीक्ष्य तु॥(१६)
“शालीनस्यापि दृष्टस्त्रीसंयोगाद्दृश्यते ध्वजः । तं हीनवेषमंतः स्त्रीबाला रहसि बोधयेत्॥ (१७)
“अन्यस्यां यो मनुष्यः स्यादमनुष्यः स्वयोषिति । लभते साऽन्यभर्तारमेतद्वाक्यं प्रजापतेः” इति।१८

भर्त्रंतरपरिग्रहोऽयं युगांतरविषयः । “ ऊढायाः पुनरुद्वाहः ” इति कलौ निषेधस्मरणात् । परंतु कलावपि बालयावाक्यमिदं परं प्रयोक्तव्यमाक्षिप्तवीर्यस्य तत्कालं धैर्यादयाद्वा रागविशेषाद्वा स्यादपि वीर्योत्पत्तिः । **कात्यायनः**—

“ उन्मत्तः पतितः कुष्ठी तथा षंढः स्वगोत्रजः । चक्षुश्रोत्रविहीनश्च तथाऽपस्मारदूषितः ॥
“ वरदोषाः स्मृतास्त्वेते कन्यादोषाश्च कीर्तिताः । दूरस्थानामविद्यानां मोक्षमार्गानुसारिणाम् ॥
“ शूराणां निर्हृतानां च न देया कन्यका बुधैः ”॥ इति । **अपरार्के**—
“ अनार्यता निष्ठुरता क्रूरता निष्क्रियात्मता । पुरुषं व्यंजयंतीह लोके कलुषयोनिजम् ” ॥

इति **वरलक्षणनिरूपणम्** । **अथ कन्यकादानकालः** । तत्र **बोधायनः** (४।१।१२)—

“ दद्याद्गुणवते कन्यां नग्निकां ब्रह्मचारिणे । अपि वा गुणहीनाय नोपरुंध्याद्रजस्वलाम् ”॥

नग्निका अनागतार्त्तवा । **वसिष्ठः** (१७।७०)—

“प्रयच्छेन्नग्निकां कन्यामृतुकालभयात्पिता । ऋतुमत्यां हि तिष्ठंत्या दोषः पितरमृच्छति”॥

नग्निकालक्षणं **स एवाह**—

“ यावन्न लज्जयांऽगानि कन्या पुरुषसंनिधौ । योन्यादीन्युपगूहेत तावद्भवति नग्निका ॥
“ यावच्चेलं न गृह्णाति यावत्क्रीडति पांसुभिः । यावद्दोषं न जानाति तावद्भवति नग्निका ” ॥

संवर्त्तः—

“ यावन्न लज्जते कन्या यावत्क्रीडति पांसुषु । यावत्तिष्ठति गोमार्गे तावत्कन्यां विवाहयेत् ॥
“ अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी । दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ” ॥

अत ऊर्ध्वं रजस्वलेत्येतत्क्वाचित्काभिप्रायं तदा रजसो नियमेनासंभवात् । यतः **स एवाह**—

“ प्राप्ते तु द्वादशे वर्षे यः कन्यां न प्रयच्छति । मासि मासि रजस्तस्याः पिता पिबति शोणितम् ॥
“ माता चैव पिता चैव ज्येष्ठो भ्राता तथैव च । त्रयस्ते नरकं यांति दृष्ट्वा कन्यां रजस्वलाम् ॥
“ गौरीं ददन्नाकपृष्ठं वैकुंठं याति रोहिणीम् । कन्यां ददद्ब्रह्मलोकं रौरवं तु रजस्वलाम् ॥
“ तस्माद्विवाहयेत्कन्यां यावन्नर्तुमती भवेत् । विवाहस्त्वष्टवर्षायाः कन्यायास्तु प्रशस्यते ॥
“ रोमकाले तु संप्राप्ते सोमो भुंक्ते तु कन्यकाम् । रजो दृष्ट्वा तु गंधर्वः कुचौ दृष्ट्वा तु पावकः”॥ इति

यमः—

“ अष्टमे तु भवेद्गौरी नवमे नग्निका भवेत् । दशमे कन्यका प्रोक्ता द्वादशे वृषली तथा ” ॥

वृषली रजस्वला ।

“ वंध्या तु वृषली ज्ञेया वृषली च मृतप्रजा । अपरा वृषली ज्ञेया कुमारी या रजस्वला ”॥

इति **देवलस्मरणात्** । **आपस्तंबः**—

“ अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी । दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ॥

"संप्राप्ते द्वादशे वर्षे रजः स्त्रीणां प्रवर्तते" ॥ इति । एतच्च प्रायिकाभिप्रायं न पुनर्द्वादश एव रजस्वला भवतीति कासांचिद्दशमेऽपि रजोदर्शनसंभवात् । अत एव यमसंवर्त्तौ—

"दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला" इति । एवं च यावत् रजोदर्शनं न भवति तावत्कन्यात्वमुक्तं भवति । अत एव यमः—" तस्मादुद्वाहयेत्कन्यां यावन्नर्तुमती भवेत् " ॥ मनुरपि (९।९४)—

" त्रिंशद्वर्षो वहेत् कन्यां हृद्यां द्वादशवार्षिकीम् " इति । एतद्रजोदर्शनाभावे वेदितव्यम् । अत एव बृहस्पतिः—

" पितुर्गृहे तु या कन्या रजः पश्यत्यसंस्कृता । भ्रूणहत्या पितुस्तस्याः सा नारी वृषली स्मृता ॥
" यस्तां विवाहयेत्कन्यां ब्राह्मणो मदमोहितः । असंभाष्यो ह्यपांक्तेयः स विप्रो वृषलीपतिः ॥
" वृषलीसंग्रहीता यो ब्राह्मणो मदमोहितः । सततं सूतकं तस्य ब्रह्महत्या दिने दिने ॥
" यः करोत्येकरात्रेण वृषलीसेवनं द्विजः । तद्भैक्षभुग्जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहति ॥
"वृषलीगमनं चैव मासमेकं निरंतरम् । इह जन्मनि शूद्रत्वं मृतः श्वा चैव जायते"॥ नारदः (१२।२६)—
"यावंतश्चर्त्तवस्तस्याः समतीयुः पतिं विना । तावत्यो भ्रूणहत्यास्युस्तस्य यो न ददाति ताम्" ॥

याज्ञवल्क्योऽपि (आ. ६४)—" अप्रयच्छन्समाप्नोति भ्रूणहत्यामृतावृतौ " ॥ इति । व्याघ्रपादः—

" उपायनोदितः कालः स्त्रीणामुद्वाहकर्मणि । स्त्रीणामुपनयस्थाने विवाहं मनुरब्रवीत् " ॥

यमः—

" विवाहं चोपनयनं स्त्रीणामाह पितामहः । तस्माद्गर्भाष्टमः श्रेष्ठो जन्मतो वाऽष्टवत्सरः ॥
" देशकालादिवैषम्याद्धर्मोद्वाहसंशये । सदृशे संभवे कन्यां नग्निकामपि दापयेत् ॥
"बालिशा या भवेत्कन्या गुणाढ्यो यदि लभ्यते । दद्यादप्राप्तकालेऽपि देशकालभयान्नरः "॥ इति ।

बालिशाविवाहमंगीकृत्य संस्कारविशेषमाह प्रजापतिः—

" द्विवर्षात्प्राग्विवाहश्चेत्कन्यकामरणं यदि । खननं नैव कर्तव्यं मंत्रसंस्कारमाचरेत् " ॥ इति ।

यत्तु मनुनोक्तम् (९।८९)—

" काममा मरणात्तिष्ठेद्गृहे कन्यर्तुमत्यपि । न त्वेवैनां प्रयच्छेत्तु गुणहीनाय कर्हिचित् " ॥

इति तद्गुणवति संभवति गुणहीनाय न दद्यादित्येवंपरं न पुनर्गुणहीननिषेधार्थम् । यदाह तु यमबोधायनौ (४।१।१२)—

" दद्याद्गुणवते कन्यां नग्निकामेव शंकितः । अपि वा गुणहीनाय नोपरुंध्याद्रजस्वलाम् "॥ इति ।

यदा प्रौढामपि पितादिः तां न प्रयच्छति तदा कन्यैव सदृशं भर्तारं वरयेदित्याह यमः—

"कन्या द्वादशमे वर्षे या त्वदत्ता गृहे वसेत् । भ्रूणहत्या पितुस्तस्याः सा कन्या वरयेत्स्वयम्"॥ इति ।

एतच्च वरणं ऋतुप्रभृतिवर्षत्रयादूर्ध्वं वेदितव्यम् । बोधायनः (४।१।१३–१६)—

" त्रीणि वर्षाण्यृतुमतीं यः कन्यां न यच्छति । स तुल्यं भ्रूणहत्याया दोषमृच्छत्यसंशयम् ॥
" न याचते चेदेवं स्याद्याचते चेत्पृथक्पृथक् । एकैकस्मिन्नृतौ दोषं पातकं मनुरब्रवीत् ॥
" त्रीणि वर्षाण्यृतुमती कांक्षेत पितृशासनम् । ततश्चतुर्थे वर्षे तु विंदेत सदृशं पतिम् ॥
" अविद्यमाने सदृशे गुणहीनमपि श्रयेत् " ॥ इति । मनुरपि (९।९०)—
" त्रीणि वर्षाण्युदीक्षेत कुमार्यृतुमती सती । ऊर्ध्वं तु कालादेतस्माद्विन्देत सदृशं पतिम् ॥

" अदीयमाना भर्तारमधिगच्छेद्यदि स्वयम् । नैनः किंचिदवाप्नोति न च यं साऽधिगच्छति ॥
" अलंकारं नाददीत पित्र्यं कन्या स्वयं वरा । मातृकं भ्रातृदत्तं वा स्तेयं स्याद्यदि तं हरेत् ॥
" पित्रे न दद्याच्छुल्कं तु कन्यामृतुमतीं हरन् । स च स्वाम्यादतिक्रामेदृतूनां प्रतिरोधकः"॥इति।
इति कन्यादानकालः। विवाहमध्ये रजोदर्शने । विवाहकाले रजोदर्शने कर्तव्यमाह **अत्रिः**–
" विवाहे वितते यज्ञे होमकाल उपस्थिते । कन्यामृतुमतीं दृष्ट्वा कथं कुर्वंति याज्ञिकाः ॥
" स्नापयित्वा तु तां कन्यामर्चयित्वा हुताशनम् । युंजानमाहुतिं हुत्वा ततः कर्म प्रयोजयेत् ॥
" प्रधानहोमे निर्वृत्ते कुमारी यदि सार्तवा । त्रिरात्रेऽपगते पश्चाच्छेषं कार्यं समापयेत् " ॥
स्मृतिभास्करेऽपि—
" विवाहहोमे प्रक्रांते यदि कन्या रजस्वला । त्रिरात्रं दंपती स्यातां पृथक् शय्यासनाशनौ ॥
"चतुर्थेऽहनि संस्नातौ तस्मिन्नग्नौ यथाविधि । विवाहहोमं कुर्यातामित्यादि स्मृतिसंग्रहे"॥ इति।
यस्तु कन्यां प्रदाय पुनस्तामपहरति स राज्ञा दंड्य इत्याह **याज्ञवल्क्यः** (आ. ६५)—
" सकृत्प्रदीयते कन्या हरंस्तां चोरदंडभाक् " ॥ **मनुरपि** (९।४७)—
" सकृदंशो निपतति सकृत्कन्या प्रदीयते । सकृदाह ददानीति त्रीण्येतानि सकृत्सकृत् ॥
"न दत्वा कस्यचित्कन्यां पुनर्दद्याद्विचक्षणः। दत्वा पुनः प्रयच्छेद्यः प्राप्नोति पुरुषानृतम्"॥७१इति।
" शतमश्वानृते हंति सहस्रं पुरुषानृतः" इत्युक्तदोषमाप्नोतीत्यर्थः । **काश्यपः**—
" सप्त पौनर्भवाः कन्या वर्जनीयाः कुलाधमाः । वाचा दत्ता मनोदत्ता कृतकौतुकमंगला ॥
" उदकं स्पर्शिता या च या च पाणिगृहीतिका । अग्निं परिगता या च पुनर्भूः प्रसवा च या ॥
" इत्येताः काश्यपेनोक्ता दहंति कुलमग्निवत् ॥

" प्ररोहत्यग्निना दग्धः पादपः सुचिरादपि । न च पौनर्भवा दग्धं कुलं क्वापि प्ररोहति "॥
मनुः (९।९९)—

" एतत्तु न परे चक्रुर्नापरे जातु साधवः । यदन्यस्मै प्रतिश्रुत्य यदन्यस्मै प्रदीयते "॥
बोधायनः– " वाग्दत्ता मनोदत्ताऽग्निं परिगता सप्तमपदं नीता भुक्ता गृहीतगर्भा प्रसूता चेति सप्तविधा पुनर्भूः । तां गृहीत्वा न प्रजां न धर्मं विंदेत " इति । **आपस्तंबः**—(१।३।१२)–

" दत्तां गुप्तां द्योतामृषभां शरभां विनतां विकटां मुंडां मंडूषिकां सांकारिकां रातां पालीं मित्रां स्वनुजां वर्षकारीं च वर्जयेत् " । इति । दत्ता अन्यस्मै वाचा प्रतिश्रुता उदकपूर्वं वा प्रतिपादिता। गुप्ता कंचुकाद्यावृता। द्योता बभ्रुकेशी। ऋषभा वृषगतिः। शरभा शीर्णदीप्तिः। विनता कुब्जा। विकटा विकटजंघा। मुंडा अपगतकेशा। मंडूषिका अल्पकाया। सांकारिका कुलांतरस्य दुहितृत्वं गता। राता ऋतुस्नाता। पाली क्षेत्रादिपालिका। मित्रा सखी। शोभनोऽनुजा यस्याः सा स्वनुजा। वरजन्मसंवत्सर एव पश्चाज्जाता वर्षकारी । अधिकवयस्केत्यर्थः । सर्वाण्येतानि दत्तादिविषयाणि वचनानि अदुष्टवराभिप्रायाणि। यदाह **नारदः** (१३।३२)–
" दत्वा न्यायेन यः कन्यां वराय न ददाति ताम्। अदुष्टश्चेद्वरो राज्ञा स दंड्यस्तत्र चोरवत्"॥
गौतमोऽपि (५।२१)– " प्रतिश्रुत्याप्यधर्मसंयुक्ताय न दद्यात् " ॥ इति ।
याज्ञवल्क्योऽपि (आ. ६५)—

" दत्तामपि हरेत्कन्यां श्रेयांश्चेद्वर आव्रजेत् " ॥ इति । आव्रजेत् आगच्छेदित्यर्थः ।
काश्यपः—

"कुलशीलविहीनस्य षंढादेः पतितस्य च। अपस्मारिविकर्मस्थरोगिणां वेषधारिणाम्॥
"दत्तामपि हरेत्कन्यां सगोत्रोढां तथैव च। मंत्रसंस्काररहिता देयाऽन्यस्मै वराय तु॥
"अन्यथा तु हरन् दंड्यो व्ययं दद्याच्च सोदयम्"॥ **शातातपः**—
"वरश्चेत्कुलशीलाभ्यां न युज्येत कथंचन। पुनर्गुणवते दद्यादिति शातातपोऽब्रवीत्॥
"हीनस्य कुलशीलाभ्यां हरन्कन्यां न दोषभाक्"॥ **कात्यायनः**—
"स तु यद्यन्यजातीयः पतितः क्लीब एव वा। विकर्मस्थः सगोत्रो वा दासो दीर्घामयोऽपि वा॥
"दत्तापि देया साऽन्यस्मै सप्रावरणभूषणाम्।
"विधिवत्प्रतिगृह्यापि त्यजेत्कन्यां विगर्हिताम्। व्याधितां विप्रकुष्टां वा छद्मना चोपपादिताम्"॥
नारदः (१३।३१)—
"नादुष्टां दूषयेत्कन्यां नादुष्टं दूषयेद्वरम्। दोषे सति न दोषः स्यादन्योन्यं त्यजतो द्वयोः"॥इति।
एतानि सप्तमपदादर्वाग्वेदितव्यानि। अत्र **चंद्रिकायां** वाग्दानप्रभृति सप्तमपदादर्वाग्दोषदर्शने मरणादौ वा कन्यामन्यस्मै दद्यान्नोर्ध्वमिति। तथा च **मनुः** (८।२२८)—
"पाणिग्रहणिका मंत्रा नियतं दारलक्षणम्। तेषां निष्ठा तु विज्ञेया विद्वद्भिः सप्तमे पदे"॥
निष्ठा परमावधिः। कन्यावरयोर्दोषदर्शनेऽपि सप्तमपदादूर्ध्वं न परित्याग इत्यर्थः॥ अत्र **यमः**—
"नोदकेन न वाचा वा कन्यायाः पतिरुच्यते। पाणिग्रहणसंस्कारात्पतित्वं सप्तमे पदे"॥
वसिष्ठः—
"स्त्रीपुंसयोस्तु संबंधे वरणं प्राग्विधीयते। वरणाद्ग्रहणं पाणेः संस्कारो हि विलक्षणः॥
"तयोरनियतं प्राहुर्वरणं दोषदर्शनात्" इति। स्त्रीपुंससंबंधे विवाहे पूर्वं वरणम्। तदनु तद्विलक्षणः पाणिग्रहणाख्यः संस्कारः। तयोर्मध्ये दोषदर्शने सति वरणमनियतम्। दानमात्रेण पतित्वानुत्पत्तेरित्यर्थः। तथा **व्यासः**—
"कन्याऽन्यस्मै प्रदातव्या वाग्दाने तु कृते वरे। मृतेऽन्यस्मै प्रदातव्या मृते सप्तपदात्पुरा॥
"दत्तामपि हरेत्कन्यां सगोत्रोढां तथैव च। मंत्रसंस्काररहिता देयाऽन्यस्मै वराय तु"॥
एवं च सप्तमपदादर्वाक्परिणेतुर्मरणेऽपि न विधवात्वमित्युक्तं भवति। तथा च **वसिष्ठः** (१७।७२)—
"अद्भिर्वाचा च दत्ता या म्रियेतादौ वरो यदि। न च मंत्रोपनीता स्यात्कुमारी पितुरेव सा"॥
सा पितुरेव न प्रतिग्रहीतुरित्यर्थः। **कात्यायनोऽपि**—
"वरयित्वा तु यः कश्चित्प्रणश्येत्पुरुषो यदा। रक्तागमांस्त्रीनतीत्य कन्याऽन्यं वरयेद्वरम्"॥
रक्तागमो रजोदर्शनम्। **नारदः** (१३।२४)—
"प्रतिगृह्य तु यः कन्यां वरो देशांतरं व्रजेत्। त्रीनृतून्समतिक्रम्य कन्याऽन्यं वरयेद्वरम्"॥
शुल्कदाने विशेषमाह मनुः (९।९७)—
"कन्यायां दत्तशुल्कायां म्रियते यदि शुल्कदः। देवराय प्रदातव्या यदि कन्याऽनुमन्यते॥
"प्रदाय शुल्कं गच्छेद्यः कन्यायाः स्त्रीधनं तथा। धार्या सा वर्षमेकं तु देयाऽन्यस्मै विधानतः॥
"यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः। तामनेन विधानेन निजो विंदेत देवरः"॥(६९) इति।
कात्यायनः—
"पूर्वदत्ता तु या कन्या वृताऽन्येन यदा भवेत्। असंस्कृता प्रदेया स्याद्यस्मै पूर्वं प्रतिश्रुता"॥
चेद्गुणवत्तर इति शेषः।

"अनेकेभ्यो हि दत्तायामनूढायां तु तत्र वै । वरागमश्च सर्वेषां वहते चान्तिमस्तु ताम् ॥ " अथागच्छेयुरूढायां दत्तं पूर्वं धनं हरेत्" ॥ यत्तु पाणिग्रहणादुपर्यन्यस्मै दानमाह **वसिष्ठः** (१७।७४)—

" पाणिग्राहे कृते कन्या केवलं मंत्रसंस्कृता । सा चेदक्षतयोनिः स्यात्पुनः संस्कारमर्हति " ॥ यदपि **स्मृत्यंतरम्**—

" कन्याऽन्यस्मै प्रदातव्या मृते सप्तपदात्पुरा । पुरा पुरुषसंयोगान्मृते देयेति केचन ॥
" ऋतौ च दृष्टे कन्यैव मृतौ देयेति चापरे । आ गर्भधारणात्कन्या पुनर्देयेति केचन"॥ इति ।

नारदः—

"उद्वाहिताऽपि या कन्या न चेत्संप्राप्तमैथुना । पुनः संस्कारमर्हेत यथा कन्या तथैव सा"॥ इति ।

यदपि **बोधायनः** (४।१।१८३)—

"निसृष्टायां हुते वाऽपि यस्या भर्ता म्रियेत सः । सा चेदक्षतयोनिः स्याद्गतप्रत्यागता सति ॥
" पौनर्भवेन विधिना पुनः संस्कारमर्हति " ॥ इति यदपि **मनुराह** (नारदः १२।९७)—

" नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ । पंचस्वापत्सु नारीणां पतिरन्यो विधीयते "॥ इति । सप्तपदादूर्ध्वमपि पुनर्विवाहपराण्येतानि वचनानि युगांतरविषयाणि । यदाह **व्यासः**—

" ऊढायाः पुनरुद्वाहं ज्येष्ठांशं गोवधं तथा । कलौ पंच न कुर्वीत भ्रातृजायां कमंडलुम् "॥ इति ।

क्रतुः—

" देवराच्च सुतोत्पत्तिः दत्ता कन्या न दीयते । न यज्ञे गोवधः कार्यः कलौ न च कमंडलुः " ॥

बोधायनः—

"विधिर्योऽनुष्ठितः पूर्वं क्रियते नैव सांप्रतम् । पुराकल्पः स यद्वच्च विधवाया नियोजनम्"॥ इति ।

चंद्रिकायामपि—

"देवरेण सुतोत्पत्तिं गोमेधं च कमंडलुम् । अक्षतां पौरुषं मेधं कलौ पंच विवर्जयेत् " ॥ इति ।
" अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया । सपिंडो वाऽसगोत्रो वा घृताभ्यक्तो ऋतावियात् ॥
"आ गर्भसंभवं गच्छेत्पतितस्त्वन्यथा भवेत् । अनेन विधिना जातः क्षेत्रजः स भवेत्सुतः"॥ इति । **याज्ञवल्क्यादिभिरुक्ता** देवरसुतोत्पत्तिः कलौ वर्जनीया । गोमेधो गवालंभनम् । कमंडलुं मृन्मयकमंडलुधारणम् ।

"कमंडलुर्द्विजातीनां शौचार्थं विहितः पुरा । ब्राह्मणैः मुनिमुख्यैश्च तस्मात्तं धारयेत्सदा" ॥ इति **बोधायनादिभिरुक्तम्** । अक्षता अक्षतयोनिः । पुरुषमेधः क्रतुविशेषः । एतानि कलौ वर्जयेदित्यर्थः । अक्षताया वर्ज्यत्वमाह **नारदोऽपि** (१२।४६)—

" कन्या चाक्षतयोनिर्या पाणिग्रहणदूषिता । पुनर्भूः प्रथमा प्रोक्ता पुनःसंस्कारकर्मणि " ॥ **याज्ञवल्क्योऽपि** (आ. ६७)— "अक्षता च क्षता चैव पुनर्भूः संस्कृता पुनः " इति । यस्तु कन्या दोषमनभिधाय प्रयच्छति स राज्ञा दंड्य इत्याह **नारदः** (१२।३३)—

" यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति । तस्य कुर्यान्नृपो दंडं पूर्वसाहसचोदितम् "॥ पणशतद्वयं सप्तत्यधिकं पूर्वसाहसम् । यत्तु **याज्ञवल्क्येनोक्तं** (आ. ६६)—

"अनाख्याय ददद्दोषं दंड्य उत्तमसाहसम् । अदुष्टां तु त्यजन् दंड्यो दूषयंस्तु मृषा शतम्"॥ इति । तद्दोषभूयस्त्वाभिप्रायमिति **चंद्रिकायाम्** ।

---

१ क्ष—ब्रह्मणा ।

“ साशीतिपणसाहस्रं भवेदुत्तमसाहसम् ” **नारदः** (१२।३५)—
“ प्रतिगृह्य तु यः कन्यामदुष्टामुत्सृजेन्नरः । विनेयः सोऽप्यकामोऽपि कन्यां तामेव चोद्वहेत् ”॥
विनेयो दण्ड्य इत्यर्थः । **इति विवाहकाले रजोदर्शनादिप्रायश्चित्तम्** ॥

अथ कन्यादातृनिर्णयः । **तत्र याज्ञवल्क्यः** (आ. ६३–६४)—
“ पिता पितामहो भ्राता सकुल्यो जननी तथा । कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः ॥
“ अप्रयच्छन्नवाप्नोति भ्रूणहत्यामृतावृतौ । गम्यं त्वभावे दातॄणां कन्या कुर्यात्स्वयंवरम् ॥”इति ।
पित्रादीनां पूर्वपूर्वाभावे परः परः कन्याप्रदः । पूर्वनाशे प्रकृतिस्थश्चेत्यनुन्मादादिदोषवान्न भवति यस्याधिकारः सोऽप्रयच्छन्भ्रूणहत्यामृतावृतावाप्नोतीति यदा पुनर्दातॄणामभावस्तदा कन्यैव गम्यं गमनार्हमुक्तलक्षणं स्वयमेव वरयेदित्यर्थः । **नारदः** (१२।२०–२३)—
“ पिता दद्यात्स्वयं कन्यां भ्राता वाऽनुमतः पितुः । मातामहो मातुलश्च सकुल्यो बांधवस्तथा ॥
“ माता त्वभावे सर्वेषां प्रकृतौ यदि वर्तते । तस्यामप्रकृतिस्थायां कन्यां दद्युः स्वजातयः ॥
“यदा तु नैव कश्चित्स्यात्कन्या राजानमाव्रजेत् । अनुज्ञया तस्य वरं प्रतीतं वरयेत्स्वयम् ॥
“ सवर्णमनुरूपं च कुलशीलबलश्रुतैः । सहधर्मं चरेत्तेन पुत्रांश्चोत्पादयेत्ततः ॥
“स्वतंत्रोऽपि हि यत्कार्यं कुर्यादप्रकृतिं गतः । तदप्यकृतमेव स्यादस्वतंत्रत्वहेतुतः ” ॥ **इति** ।
मनुः (५।१५०)—
“ यस्मै दद्यात्पिता कन्यां भ्राता वाऽनुमतो पितुः । तं शुश्रूषेत जीवंतं स्वर्यातं च न लंघयेत्”॥ **इति** ।
एतयोः प्राधान्यप्रतिपादनार्थं न पुनरन्यनिषेधाय । इति **कन्यादातृनिर्णयः** ॥

अथ **विवाहभेदाः** । तत्र **मनुः** (३।२०–२१)—
“ चतुर्णामपि वर्णानां प्रेत्येह च हिताहितान् । अष्टाविमान्समासेन स्त्रीविवाहान्निबोधत ॥
“ ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः । गांधर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः” ॥
आर्षात्प्राजापत्यस्य श्रैष्ठ्येऽपि वृत्तभंगभयादत्र क्रमभंगः । ब्राह्मादीनां लक्षणमष्टभिः श्लोकैराह **स एव** (३।२७)
“ आच्छाद्य चार्चयित्वा च श्रुतशीलवते स्वयम् । आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः”॥
धर्मसाधनत्वाद्विवाह एव धर्मशब्देन प्रतिपाद्यते । ब्रह्मशब्दो धर्मवचनः । धर्मातिशययुक्तत्वाद्ब्राह्मत्वम् ।
“ यज्ञे तु वितते सम्यगृत्विजे कर्म कुर्वते । अलंकृत्य सुतादानं दैवं धर्मं प्रचक्षते ” ॥ (२८)
दैवकार्याधिकृताय दानाद्दैवत्वम् ।
“ एकं गोमिथुनं द्वे वा वरादादाय धर्मतः । कन्याप्रदानं विधिवदार्षो धर्मः स उच्यते ॥ (२९)
धर्मत आदाय धर्मार्थमादाय न धनार्थं यत्कन्याप्रदानं स आर्षो धर्मः । विक्रयदोषभयादृषिभिरनुक्तवेतनैरेव विद्या दीयते । शुश्रूषादिकं शिष्यतः किंचिदादीयते च । आर्षेऽपि कन्या दीयते वरात्किंचिदादीयते च । तेन दानादानसामान्येनार्षत्वम्—
“सहोभौ चरतां धर्ममिति वाचाऽनुभाष्य तु । कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः”॥(३०)
उभौ युवां सह धर्मं चरतं न पृथगिति वाचानुभाष्य अहं गृहाश्रमस्थ एव धर्मं चरिष्यामि नान्याश्रमस्थ इति वरं प्रतिश्राव्येत्यर्थः । प्राजापत्यो विधीयत इति विधिः विवाहः । गार्हस्थ्यप्राधान्यनिबंधनं प्राजापत्यत्वं गार्हस्थप्रधानो हि प्रजापतिः ।

"ज्ञातिभ्यो द्रविणं दत्वा कन्यायै वाऽपि शक्तितः। कन्याप्रदानं स्वाच्छंद्यादासुरो धर्म उच्यते॥(३१) कन्याया ज्ञातिभ्यः स्वशक्तितः वरस्य शक्तितोऽधिकं दत्वा दापयित्वा स्वाच्छंद्याल्लोकशास्त्रमर्यादातिलंघनेन यत्कन्यादानं स आसुरः। परस्वापहारस्वाच्छंद्यनिबंधनमासुरत्वम्। असुरा हि स्वाच्छंद्येन परवित्तमपहरंति इति।

"इच्छयाऽन्योन्यसंयोगः कन्यायाश्च वरस्य च। गांधर्वः स विधिर्ज्ञेयो मैथुन्यः कामसंभवः"॥ (३२) मैथुन्यः मैथुनपर्यंत अन्योन्यसंयोगः कामसंभवो गांधर्वः। गंधर्वत्वं कामपरत्वनिबंधनम्। गंधर्वा हि कामपराः। "स्त्रीकामा वै गंधर्वा" इति श्रुतेः। स्मरति च भगवान्वाल्मीकिः "तीक्ष्णकामास्तु गंधर्वास्तीक्ष्णकोपा भुजंगमाः" इति।

"हत्वा छित्वा च भित्वा च क्रोशंतीं रुदतीं गृहात्। प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते"॥(३३) विवाहविरोधकान्हत्वा च्छित्वा भित्वा च कन्यां परिभूय यद्धरणं स राक्षसः। हिंसाप्राधान्याद्राक्षसत्वम्। हिंसाप्रधाना हि राक्षसाः।

"सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति। स पापिष्ठो विवाहानां पैशाचः प्रथितोऽष्टमः"॥ (३४) सुप्तमत्तप्रमत्तकन्याभोगनिबंधनं पैशाचत्वम्। पिशाचा हि सुप्तमत्तप्रमात्तानाविशंति।

ब्राह्मादीनां फलमाह **स एव** (३।३७–३८)—

"दश पूर्वापरान्वंश्यानात्मानं चैकविंशकम्। ब्राह्मीपुत्रः सुकृतकृन्मोचयेदेनसः पितॄन्॥
"दैवोढायाः सुतश्चैव सप्तसप्तपरावरान्। आर्षोढायाः सुतस्त्रींस्त्रीन्षट् षट् कायोढजः सुतः"॥

प्राजापत्येनोढायाः सुतः विभक्तिव्यत्ययः। चतुर्षु विवाहेष्वामुष्मिकं फलं प्रत्येकमुक्त्वा ऐहिकं च समुदाये फलं श्लोकद्वयेनाह (३।३९–४२)—

"ब्राह्मादिषु विवाहेषु चतुर्ष्वेवानुपूर्वशः। ब्रह्मवर्चस्विनः पुत्रा जायंते शिष्टसंमताः॥
"रूपसत्वगुणोपेता धनवंतो यशस्विनः। पर्याप्तभोगा धर्मिष्ठा जीवंति च शतं समाः"॥

आसुरादिषु चतुर्षु जातपुत्रगुणमाह—

"इतरेषु तु शिष्टेषु नृशंसानृतवादिनः। जायंते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः"॥
"अनिंदितैः स्त्रीविवाहैरनिंद्या भवति प्रजा। निंदितैर्निंदिता नृणां तस्मान्निंद्यानि वर्जयेत्"॥

अननुज्ञातविवाहविषयेयं निंदा इतरथा हि क्षत्रियादिषु गांधर्वराक्षसाद्युपदेशानर्थक्यप्रसंगात्।

याज्ञवल्क्योऽपि (आ. ५८–६१)—

"ब्राह्मो विवाह आहूय दीयते शक्त्यलंकृता। तज्जः पुनात्युभयतः पुरुषानेकविंशतिम्॥
"यज्ञस्थ ऋत्विजे दैव आदायार्षस्तु गोयुगम्। चतुर्दश प्रथमजः पुनात्युत्तरजस्तु षट्॥
"इत्युक्त्वा चरतां धर्मं सह या दीयतेऽर्थिने। स कायः पावयेत्तज्जः षट्षड्वंश्यान् सहात्मनाम्॥
"आसुरो द्रविणादानात् गांधर्वः समयान्मिथः। राक्षसो युद्धहरणात्पैशाचः कन्यकाछलात्"॥

मनुः (३।२३–२४)—

"षडानुपूर्व्या विप्रस्य क्षत्रस्य चतुरो वरान्। विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यानराक्षसान्॥
"चतुरो ब्राह्मणस्याद्यान्प्रशस्तान्कवयो विदुः। राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः"॥

मतांतरमाह **स एव** (३।२५)—

"पंचानां तु त्रयो धर्म्या द्वावधर्म्यौ स्मृताविह। पैशाचश्चासुरश्चैव न कर्तव्यौ कथंचन"॥

पाश्चात्यानां पंचानां प्राजापत्यादीनां मध्ये त्रयो धर्म्याः । पैशाचश्चासुरश्च द्वावधर्म्यौ न कर्त्तव्यौ । कर्तृविशेषानिर्देशादस्य मतस्य सर्वसाधारणत्वं गम्यते । **चंद्रिकायाम्**—
" चत्वारो ब्राह्मणस्याद्याः शस्ता गांधर्वराक्षसौ । राज्ञस्तथासुरो वैश्ये शूद्रे चान्त्यस्तु गर्हितः"॥
गर्हितः न कस्यापि प्रशस्त इत्यर्थः । विवाहांतरालाभे पैशाचमाह **वत्सः**—

" सर्वोपायैरसाध्यः स्यात्सुकन्या पुरुषस्य वा । चौर्येणापि विवाहेन सा विवाह्या रहः स्थिता"॥
आपस्तंबः (२।५।१२।३-४)— " तेषां त्रय आद्याः प्रशस्ताः । पूर्वः पूर्वः श्रेयान् । यथा युक्तो विवाहस्तथा युक्ता प्रजा भवति " इति । **बोधायनो**ऽपि (१।११।१-१७)— " अष्टौ विवाहाः । श्रुतशीले विज्ञाय ब्रह्मचारिणेऽर्थिने दीयते स ब्राह्मः । आच्छाद्यालंकृत्यैषा सह धर्मश्चर्यतामिति प्राजापत्यः । पूर्वां लाजाहुतिं हुत्वा गोमिथुनं कन्यावते दद्यात्स आर्षः । दक्षिणासु नीयमानास्वंतर्वेदि ऋत्विजे स दैवः । सकामेन सकामायां मिथः संयोगः स गांधर्वो धनेनोपतोष्यासुरः । प्रसह्य हरणाद्राक्षसः । सुप्तां मत्तां प्रमत्तां वोपयच्छेदिति पैशाचः । तेषां चत्वारः पूर्वे ब्राह्मणस्य । तेष्वपि पूर्वः पूर्वः श्रेयान् । उत्तरेषामुत्तरोत्तरः पापीयान् । तत्रापि षष्ठसप्तमौ क्षत्रधर्मानुगतौ तत्प्रत्ययत्वात्क्षत्रस्य पंचमाष्टमौ वैश्यशूद्राणाम् । अयन्त्रितकलत्रा हि वैश्यशूद्रा भवंति । कर्षणशुश्रूषाधिकृतत्वात् गांधर्वमप्येके प्रशंसंति । सर्वेषां स्नेहानुगतत्वात् यथा युक्तो विवाहस्तथा युक्ता प्रजा भवतीति विज्ञायते" इति । पूर्वां लाजाहुतिमिति वैवाहिकीनां लाजाहुतीनां प्रथमाहुत्यनंतरं कन्यास्वामिने गोमिथुनं वरः कन्यावते प्रदाय तस्या एव पुनर्ग्रहणमार्षो नाम विवाहः । दक्षिणास्विति ऋत्विग्वरणवेलायामेव वरसंप्रयुक्तम् । कंचिद्दृत्विक्तेन वृत्वा दक्षिणाकाले तदीयभागेन सह कन्यां तस्मै दद्यात्स च तां प्रतिगृह्य समाप्ते यज्ञे शुभनक्षत्रे विवाहं कुर्यात्स दैवः । उत्तरेषां क्षत्रियादीनां वर्णानां तत्प्रत्ययत्वाद्धनबलप्रधानत्वात्क्षात्रियस्य । अयंन्त्रितकलत्राः । अयंत्रितमनियतं कलत्रं येषां ते तथा दारेष्वत्यंतानियमस्तेषां भवति । निकृष्टकृषिशुश्रूषाद्यधिकृतत्वात्तयोर्विवाहोऽपि तादृश एवेत्यर्थः । इति **गोविंदस्वामी । गौतमोऽपि** (४।४—१२)—

" ब्राह्मो विद्याचारित्रबंधुशीलसंपन्नाय दद्यादाच्छाद्यालंकृताम् । संयोगमंत्रः प्राजापत्ये सह धर्मश्चर्यतामित्यार्षे गोमिथुनंकन्यावते दद्यादंतर्वेद्यृत्विजे दानं दैवोऽलंकृत्येच्छन्त्या स्वयं संयोगो गांधर्वो वित्तेनानतिः स्त्रीमतामासुरः । प्रसह्यादानाद्राक्षसोऽसंविज्ञातोपसंगमात्पैशाचश्चत्वारो धर्म्याः प्रथमाः षडित्येके" इति । प्राजापत्ये विवाहे सह धर्मश्चर्यतामिति एष संयोगमंत्रः प्रदानमंत्र इत्यर्थः । आर्षमपि केचित् प्रशस्तं नेच्छंति । तत्रादिशुल्कग्रहणात् । तथा च **मनुः** (३।५३)—
"आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृषैव तत् । अल्पो वाऽपि महान्वाऽपि विक्रयस्तावतैःसह" ।
गोमिथुनं शुल्कमाहुः । अनुजानते तन्मृषा तदयुक्तम् । अल्पो वा महान्वा द्रव्यलोभाद्दादीयमानं शुल्कं विक्रय एवेत्यर्थः । केचिदेवं व्याचक्षते । आर्षे विवाहे गोमिथुनं शुल्कमिति वदंति । तन्मिथ्या । विक्रयः क्रयसाधनं मूल्यदेशकालाद्यपेक्षयाऽल्पं महद्वा भवति । आर्षे तु गोमिथुनं परिमाणस्य नियतत्वान्न क्रयक्रीतेत्यर्थ इति । तथा च **देवलः**—

"पूर्वे विवाहाश्चत्वारो धर्म्यास्तोयप्रदानकाः । अशुल्का ब्राह्मणार्हाश्च तारयंति द्वयोः कुलम्"॥ इति ।
तथा **चापस्तंबः** (२।१३।११)—"विवाहे दुहितृमते दानं काम्यं धर्मार्थं" **श्रूयते**— "तस्माद्दुहितृमतेऽधिरथं शतं देयं तन्मिथुयाकुर्यादिति तस्यां क्रयशब्दः संस्तुतिमात्रं धर्माद्धिसंबंधः" **इति । आर्षे विवाहे दुहितृमते दानं क्वचिद्वेदे श्रूयते । तामेव श्रुतिमुदाहरति**

तस्माद्दुहितृमत इति दुहितृमते रथेनाधिकां गवां शतं देयम् । तच्च शतं दुहितृमान् मिथुयाकुर्यान्मिथ्याकुर्यादित्यर्थः । कन्यायै वराय च क्षेत्रालंकरादिप्रत्यर्पणेन तद्द्रव्यादानसाम्यगतक्रयवृत्तिं वितथीकुर्यादित्यर्थः । यद्वा मिथुया मिथुनं वरदत्तद्रव्यं मिथुनस्य कुर्यादित्यर्थः । मिथ्यार्थत्वं मिथुनार्थत्वं च मिथुया शब्दस्य **श्रूयते** (आथर्व सं. ४।३९।९) । " मा देवानां मिथुया कर्मभागधेयं आपो वा अग्नेर्मिथुयाः मिथुनवान्भवतीति " । तदिदं दानं काम्यं कामनिमित्तं यथा युक्तो विवाह स्तथायुक्ता प्रजा भवंतीति (१।१२।८) ऋषितुल्याः पुत्रा यथा स्युरिति ततश्च धर्मार्थं न क्रयार्थम् । अयज्ञो वा एष योऽपत्नीक " इत्यादिक**श्रुतेः** पाणिग्रहणादधिग्रहमेधि नोर्व्रतमिति सपत्नीकस्यैव धर्माधिकारस्मरणाच्च विवाहस्य धर्मार्थत्वेन तदर्थं दानमपि धर्मार्थमेव यस्तस्यां विवाहक्रियायां क्रयशब्दः क्वचित्स्मृतौ दृश्यते स संस्तुतिमात्रं द्रव्यप्रदानसाम्यात् । न मुख्यकर्मत्वप्रतिपादनार्थं । कुतः । हि यस्माद्धर्मादेव हेतोः संबंधो दंपत्योरित्यर्थः । एवं च धर्मार्थं दानविधानात् " सर्वाण्युदकपूर्वाणि दानानि अदृष्टार्थानि " इति **स्मरणात्** " दुहितृमते च स्वदेयमुदकपूर्वमेव दद्याद्दुहितृमांश्च कन्याम् अद्भिरेव द्विजातीनां विवाहस्तु प्रशस्यते " इति **स्मरणात्** उदकपूर्वमेव दद्यात् " दुहितृमतेऽधिरथं शतं देयं तन्मिथुयाकुर्यादिति " **श्रुत्या** गोमिथुनादधिकमप्यादाय वरयोषिभ्यां गृहक्षेत्रभूषणादिद्वारप्रत्यर्पणे सति स विवाहो धर्म्य एवेति गम्यते । न चैवम् "आसुरो द्रविणादानात्" इति **स्मरणादा**सुरत्वं शंकनीयं कन्यावतो भोगार्थं द्रव्यादाने तथोक्तत्वात् । तथा **च गौतमः** (४।९) " वित्तेनानतिः स्त्रीमतामासुरः" इति । आनतिः कन्यादानं "प्रत्यानुगुण्यं स्त्रीमतम् " इति **वचनात्**कन्यायै गृहक्षेत्रादि दत्वा विवाहेऽपि नासुरत्वमिति **हरदत्तः** । कन्याया भूषणाद्यर्थं छादनाद्यर्थं वराद्धनादानं न दोषावहमित्याह **मनुरपि** (३।५४)—

" यासां न ददते शुल्कं ज्ञातयो न स विक्रयः । अर्हणं तत्कुमारीणामानृशंस्यं च केवलम् " ॥

यासां कन्यानां न ददते नोपजीवंति केवलं निश्चितम् । एतदेवाष्टभिः श्लोकैः समर्थयति **स एव** (३।५५–६२)

" पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा । पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः ॥
" यत्र नार्यस्तु पूज्यंते रमंते तत्र देवताः । यत्रैतास्तु न पूज्यंते सर्वास्तत्राफलाः क्रियाः ॥
" शोचंति जामयो यत्र विनश्यत्याशु तत्कुलम् । न शोचंति तु यत्रैता वर्धते तद्धि सर्वदा ॥
" जामयो यानि गेहानि शपंत्यप्रतिपूजिताः । तानि कृत्याहतानीव विनश्यंति समंततः " ॥

जामयः स्वसारः । कृत्या अभिचारक्रियाः ।

" तस्मादेताः समभ्यर्च्या भूषणाच्छादनाशनैः । भूतिकामैर्नरैर्नित्यं सत्कारेणोत्सवेषु च ॥
" संतुष्टो भार्यया भर्त्ता भर्त्रा भार्या तथैव च । यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् ॥
" यदि हि स्त्री न रोचेत पुमांसं न प्रमोदयेत् । अप्रमोदात्पुनः पुंसः प्रजनं न प्रवर्त्तते ॥
" स्त्रियां तु रोचमानायां सर्वं तद्रोचते कुलम् । अस्यां त्वरोचमानायां सर्वमेव न रोचते " ॥

यत एवं कन्या भूषयितव्या । अतो ज्ञातिभिर्वराद्भूषणार्थं धनादानं न दोषावहमित्यर्थः । स्वोपभोगार्थद्रव्यग्रहणे पित्रादीनां दोषमाह **स एव** (३।५१–५२)—

"न कन्यायाः पिता विद्वान्गृह्णीयात् शुल्कमण्वपि । गृह्णन् हि शुल्कं लोभेन स्यान्नरोऽपत्यविक्रयी ॥
" स्त्रीधनानि तु ये मोहादुपजीवंति बांधवाः । नारीयानानि वस्त्रं वा ते पापा यांत्यधोगतिम्"॥

नारी शुल्कगृहीता पापीत्याह **स एव** (९।९८–१००)—

---

१ क्ष-प्रशंसंति ।

" आददीत न शूद्रोऽपि शुल्कं दुहितरं ददत् । शुल्कं हि गृह्णन्कुरुते च्छन्नं दुहितृविक्रयम् ॥
" नानुशुश्रुम जात्वेतत्पूर्वेष्वपि हि जन्मसु । शुल्कसंज्ञेन मूल्येन च्छन्नं दुहितृविक्रयम्" ॥

संवर्त्तः—

" कन्याविक्रयिणो मूर्खा महापापस्य कारकाः । पतंति नरके घोरे यावद्वा भूतसंप्लवम् ॥
" क्रयक्रीता तु या कन्या न सा पत्नी विधीयते । सा तु दैवे च पित्र्ये च दासी स्यान्न च साश्रिता ॥
" यस्तां विवाहयेत्कन्यां ब्राह्मणो मदमोहितः । असंभाष्यस्त्वपांक्तेयः स विप्रो वृषलीपतिः"॥ इति ।

यमः—

" यो मनुष्यां हि विक्रीय यत्किंचिद्धनमृच्छति । तस्या मूत्रं पुरीषं च स परत्रोपजीवति ॥
" कन्याविक्रयिणो मूर्खा इह किल्बिषकारकाः । पतंति नरके घोरे दहंत्या सप्तमम् कुलम् ॥
" कन्यां तु जीवनार्थाय यः शुल्केन प्रयच्छति । उपभुंक्ते पुरीषं च मूत्रं तस्याः परस्य च"॥ इति ।

ननु च

" शुल्कं प्रदाय कन्यायाः प्रत्यादानविधानतः । वित्तहेतुर्विवाहोऽयमासुरः षष्ठ उच्यते"

इति देवलस्मरणेन शुल्कनिबंधन आसुरो विवाहः । ननु आसुरविवाहः कथं धर्म्यत्वेन मन्वादिभिराश्रित इति चेन्न । पूर्वतनविवाहाऽसंभवे आपद्धर्मत्वेन तस्याप्याश्रयणात् । तथा च **नारदः**—

" विवाहास्त्वष्टधा भिन्ना ब्राह्माद्या मुनिसत्तमाः । पूर्वः पूर्वः परो ज्ञेयः पूर्वाभावे परः परः"॥ इति।

चंद्रिकायामपि—

"क्रीता द्रव्येण या नारी न सा पत्नी विधीयते।तथा दैवे च पित्र्ये च दासीं तां काश्यपोऽब्रवीत्"॥इति।

यत्काश्यपवचनम्—

" कुविवाहैः क्रियालोपैर्वेदानध्ययनेन च । कुलान्यकुलतां यांति ब्राह्मणातिक्रमेण च" ॥ इति।

यदपि **मनु**वचनं तत्प्रशस्तविवाहसंभवविषयमिति । अत्र **केचिदाहुः**—

" भूमिव्रीहियवाजाश्ववृषभधेन्वनडुहश्चेति स्थावरे विक्रयो नास्ति " इति । च **गौतमादिभिः** (अ. ८ सू. १५)—प्रतिषिद्धेऽपि भूमिविक्रये

" भूमिं यः प्रतिगृह्णाति यश्च भूमिं प्रयच्छति । तावुभौ पुण्यकर्माणौ नियतं स्वर्गकामिनौ ॥ "

इति भूदानप्रशंसादर्शनाच्च विक्रयोऽपि कर्त्तव्यो "हिरण्योदकदानेन षड्भिर्गच्छति मेदिनी " इति स्मरणात् सहिरण्योदकं दत्वा दानरूपेण स्थावरविक्रयं कुर्यादिति **विज्ञानेश्वरेणोक्तम्** । तद्रीत्याऽत्रापि— " कन्याविक्रयिणो मूर्खाः । पैशाचश्चासुरश्चैव न कर्त्तव्यौ कथंचन " इति कन्याविक्रयनिषेधात् ।

" नाग्निचिन्नरकं याति न कन्यादो यतः स्मृतः । विश्वजित्संमितो यज्ञः कन्यादानं महाफलम् ॥
" ज्योतिष्टोमातिरात्राणां शतं शतगुणं कृतम् । प्राप्नोति कन्यकां दत्वा होममंत्रैस्तु संस्कृताम् ॥
" कनकाश्च तिला नागा दासीगृहमहीरथाः । कन्यका कपिला चैव महादानानि वै दश ॥
"दशानां तु सहस्राणां युक्तानां धुर्यवाहिनाम् । सुपात्रे विनियुक्तानां कन्यां विद्याच्च तत्समम्॥
"अन्नविद्यावधूत्राणगोभूरुक्माश्वहस्तिनाम् । दानान्युत्तमदानानि ह्युत्तमद्रव्यदानतः"॥ इत्यादिभिः

कन्यादानप्रशंसादर्शनाच्च द्रव्यदानमन्तरेण 'कन्यानधिगमे पाणिग्रहणाद्धि सहत्वं कर्मसु' इति पाणिग्रहणमारभ्यैव विवाहसिध्याग्निहोत्रादिश्रौतस्मार्तकर्माधिकारस्मरणात्तदनुष्ठानाथावश्य-

कर्तव्ये च विवाहे "अद्भिरेव द्विजातीनां विवाहस्तु प्रशस्यते" इति स्मरणादुदकपूर्वमेव द्रव्यं दातव्यं दत्वा सहिरण्योदकपूर्वमेव कन्याऽप्यादातव्येति न चासुरादिविवाहेषु सप्तमपदातिक्रमणाभावेन पतित्वभार्यात्वयोरनुत्पत्तिरिति शंकनीयम् । तत्रापि स्वीकारानंतरमेव संस्कारविधानात् । **देवलः**—

"गांधर्वादिविवाहेषु पुनर्वैवाहिको विधिः । कर्तव्यश्च त्रिभिर्वर्णैः समयेनाग्निसाक्षिकम्"॥

गृह्यपरिशिष्टेऽपि—

" गांधर्वासुरपैशाचविवाहो राक्षसश्च यः । पूर्वं परिश्रयस्तेषां पश्चाद्धोमो विधीयते " ॥

परिश्रयः स्वीकारः । अत एव न बलादपहारमात्रेण भार्यात्वमित्याह **वसिष्ठः** (१७।७३)—
" बलतश्चेद्धृता कन्या मंत्रैर्यदि न संस्कृता । अन्यस्मै विधिवद्देया यथा कन्या तथैव सा " ॥ इति ।

अथ **विवाहांगविशेषमाह मनुः** (३।४३–४४)—

" पाणिग्रहणसंस्कारः सवर्णासूपदिश्यते । असवर्णास्वयं ज्ञेयो विधिरुद्वाहकर्मणि ॥

"शरः क्षत्रियया धार्यः प्रतोदो वैश्यकन्यया । वासोदशा शूद्रया तु वर्णोत्कृष्टस्य वेदने"॥

करेण करस्य ग्रहणं पाणिग्रहणमेव संस्कारः पाणिग्रहणसंस्कारः । उत्कृष्टवेदने सवर्णादुत्तरस्य वर्णस्य लाभे विवाह इति यावत् ।

अथ शोभनद्वयसंनिपाते संग्रहकारः—

" एकोदराणां पुंसां स्याद्विवाहो नैकवत्सरे । भिन्नोदराणां कुर्वीत स्त्रीणां चैव न संशयः " ॥

वराहमिहिरः—

" एकोदरप्रसूतानामेकस्मिन्नेव वत्सरे । विवाहो नैव कर्तव्यो गर्गस्य वचनं यथा " ॥

एतदृतुत्रयादर्वाग्विषयम् । यथाह **गर्गः**—

" एकमातृप्रसूतानामेकस्मिन्वत्सरे यदि । विवाहो नैव कर्तव्यो निर्गते तु ऋतुत्रये ॥
" ग्रामांतरे तु कर्तव्यः कर्तव्यो नैकवेश्मनि " ॥ **अंगिराः**—

" एकमातृप्रसूतानां शुभद्वयमृतुत्रये । न कुर्याद्वर्षभेदे तु त्रिमासादूर्ध्वमाचरेत् ॥

" फाल्गुने चैत्रमासे च पुत्रोद्वाहोपनायने । भेदे त्वब्दस्य कुर्वीत नर्तुत्रयविलंबनम् ॥

" न पुंविवाहोर्ध्वमृतुत्रयेण विवाहकार्यं दुहितुः प्रकल्पयेत् ।

" न मंडनाच्चापि हि मुंडनं च स्यान्मुंडनान्मंडनमन्वगेव"॥ मंडनं विवाहः । मुंडनमुपनयनम् । **शातातपः**—

" मंडनं मुंडनं चैव न कुर्यादेकवत्सरे । मुंडनं प्रथमं कुर्यान्मंडनं तु ततः परम्" ॥ **श्रीधरीये**–

" पुत्रस्य पाणिग्रहणात्परस्तान्न मासषट्कात्तनयाविवाहः ।

" तद्वद्विवाहादपि नोपनीतिस्तथोपनीतेः परतश्च चौलम्" ॥ **गर्गः**—

" एकमातृप्रसूनां कन्यकापुत्रयोर्द्वयोः । सहोद्वाहो न कर्तव्यः तथा नैवोपनायनम् " ॥

स्मृतिरत्ने—

" एकस्मिन्शोभने वृत्ते द्विशुभं न तु कारयेत् । यदि कुर्यात्प्रमादेन तत्र स्यादशुभं ध्रुवम् " ॥

पुत्रीविषये **विशेषमाहांगिराः**—

" उद्वाह्य पुत्रीं न पिता विदध्यात्पुत्र्यंतरस्योद्वहनं न जातु ।

" यावच्चतुर्थीदिनमंगलस्य समापनं तावदतो विदध्यात्" ॥ **गर्गः**—

" पुत्रीपरिणयादूर्ध्वं यावद्दिनचतुष्टयम् । पुत्र्यंतरस्य कुर्वीत नोद्वाहमिति सूरयः ॥
" एकस्मिंस्तु गृहे कुर्यादेकामेव शुभक्रियाम् । अनेकांस्तु प्रकुर्वाणः स नाशमधिगच्छति ॥
" द्विशोभनं त्वेकगृहेषु नेष्टं शुभं तु कुर्यान्नवतो पुरस्तात् ।
" आवश्यके शोभन उत्सुकश्चेदाचार्यभेदेन तथैव कुर्यात् " ॥ नारदः—
" शुभकृत्पुत्रिकोद्वाहात्पश्चात्पुत्रकरग्रहः । एकतिथ्यामपि प्राह भार्गवो भिन्नवेलया ॥
" एकोदरोद्भवसुतासुतयोर्विवाहं मासांतरे मनुवशिष्ठपराशराद्याः ।
" इच्छंति मंगलमथाशु वदंति गर्गाः केचित्तथैकदिवसेऽप्युनयप्रभेदे ॥
"एकलग्नेऽपि भिन्नांशे वसिष्ठात्रिपराशराः । द्वयोर्विवाहमिच्छंति पृथग्ग्रामेऽथ मण्डपे"॥

बृहस्पतिः—

" एकस्मिन्दिवसे त्वेकलग्ने भिन्नांशके तथा । एकगर्भोत्थयोर्वाथो विवाहः शुभकृद्भवेत् ॥
" देशभेदात्कुलाचारादिमे धर्माः प्रकीर्तिताः । एकलग्ने द्विलग्ने वा गृहे यत्र द्विशोभनम् " ॥
" द्वयोरन्यद्दिनष्टे स्याद्वर्ततेऽन्यदिति स्थितिः ॥
" एकमातृप्रसूतानामेकस्मिन्नेव वत्सरे । एक एव न कुर्वीत विवाहं व्रतबंधनम् ॥
"एकः कर्ता शुभं कुर्यान्न पुत्र्योः पुत्रयोरपि । षण्मासे वा चतुर्मासे पूर्णे वर्षे शुभावहम्"॥

शातातपः—

" एकमातृप्रसूतानां नाग्निकार्यद्वयं भवेत् । भिन्नोदरप्रसूतानां नेति शातातपोऽब्रवीत्" ॥
"यत्रोपयमनादूर्ध्वं षण्मासाभ्यंतरेऽपि वा । पुत्र्युद्वाहं न कुर्वीत विवाहाद्व्रतबंधनम् " । उपयमनं विवाहः । विवाहाद्व्रतबंधनं विवाहादूर्ध्वं षण्मासाभ्यंतरे व्रतबंधनमुपनयनं न कुर्वीत । एतानि वचनानि यमलव्यतिरिक्तविषयाणि । कालदीपे यमलविषये विशेषो दर्शितः—
" भ्रातृद्वये स्वसृयुगे स्वसृभ्रातृयुगे तथा । समानाऽपि क्रिया कार्या मातृभेदे तथैव च " ॥
भ्रातृद्वये यमल इत्यर्थः । अत्र प्रथमज एव ज्येष्ठः ।

यमलयोर्ज्यैष्ठ्यनिरूपणम् । तथा च मनुः (९।१२५-१२६)—

" सदृशस्त्रीषु जातानां पुत्राणामविशेषतः । न मातृतो ज्यैष्ठ्यमस्ति जन्मतो ज्यैष्ठ्यमुच्यते ॥
" जन्मज्येष्ठ्येन चाव्हानं सुब्रह्मण्यास्वपि स्मृतम् । यमयोश्चैकगर्भेऽपि जन्मतो ज्येष्ठता स्मृता"॥

संग्रहेऽपि—

" यमयोर्जातयोर्ज्यैष्ठ्यं जन्मतः प्रोच्यते बुधैः । गर्भस्य कस्यचिल्लोके चिराज्जननदर्शनात् ॥
" यमयोर्जननाज्ज्यैष्ठ्यमाधानं चेष्यते बुधैः " इति । यत्तु
"यमलौ चैकगर्भे तु स्त्री वाऽपि पुरुषोऽपि वा । कनिष्ठ आद्यजातः स्यात्पश्चाज्जातोऽग्रजः स्मृतः"॥
इति स्मरणं तत्समभागस्थगर्भव्यतिरिक्तोपर्यधोभागस्थविषयम् ।
" पार्श्वयोः संस्थितौ गर्भौ तयोर्यः पूर्वजः स तु । ज्येष्ठ इत्युच्यते सद्भिर्जातकादिषु कर्मसु" ॥
इति बादरायणीयस्मरणात् । दत्तविषये विशेषः स्मृत्यंतरेऽभिहितः—

" औरसे तु समुत्पन्ने दत्तो ज्येष्ठो न चेष्यते । " औरसः कनिष्ठोऽपि दत्तविवाहात्पूर्वं विवहेदित्यर्थः ।

" होमपूर्वं तु यो दत्तः स एव जनकस्य च । गोत्रेण विवहेत्कन्यां पुत्रादौ न निषेधकृत् ॥
"दातृगोत्रसमुद्भूतां गृहीतृकुलसंभवः । उद्वहेद्दशमादूर्ध्वं नोद्वहेदिति गौतमः " ॥ इति सपत्नी-

पुत्रयोस्तु पितुर्जीवनदशायां जन्मज्येष्ठक्रमेण विवाहः पितृमरणानंतरं तु विवाहे न क्रमनियम इति केचित्। अथ पुंसवनसंस्कृतस्य जन्ममासज्येष्ठमासयोरुत्सवनिषेधमाहांगिराः—

" मौंजीनिबंधव्रतकर्मणी च चूडाकृतिश्च प्रथमो विवाहः।

" स्नानं च पुंसः प्रथमस्य नेष्टं ज्येष्ठाख्यमासेऽपि च जन्ममासे" ॥ कालादर्शेऽपि— आद्यगर्भोऽस्थयोर्ज्येष्ठमासीनोद्वाहमाचरेत् । प्रथमगर्भप्रसूतयोर्स्त्रीपुंसयोर्ज्येष्ठमासि उद्वाहकर्म नाचरेदित्यर्थः। रत्नमालायामपि—

" जन्ममासि न च जन्मभे तथा नैव जन्मदिवसे च कारयेत्।

" आद्यगर्भदुहितुः सुतस्य वा ज्येष्ठमासि न तु पाणिपीडनम् " ॥ अत्रिः—

" जन्मभे जन्मदिवसे जन्ममासे शुभं त्यजेत्। ज्येष्ठमासाद्य गर्भस्य शुभं वर्ज्यं स्त्रिया अपि " ॥ मौञ्ज्युद्वाहप्रतिष्ठादीन्केचित्तत्रापि कुर्वते। नारदः—

" जन्ममासे च जन्मर्क्षे न च जन्मदिने तथा। आद्यगर्भसु तस्याथ दुहितुर्वा करग्रहः॥

" नैवोद्वाहो ज्येष्ठमासे दंपत्योस्तु परस्परम्। ज्येष्ठमासे तयोरेकज्येष्ठः श्रेष्ठस्तु नान्यथा" ॥ गर्गः— ज्येष्ठस्य ज्येष्ठकन्यया विवाहो न प्रशस्यते। द्वौ ज्येष्ठौ मध्यमौ प्रोक्तौ ज्येष्ठमेकं शुभावहम् ॥

" ज्येष्ठत्रयं न कुर्वीत विवाहं बहुसंमतम्। आषाढः प्रौष्ठपन्माघो मार्गशीर्षस्तथैव च ॥

" चत्वारो दूषिता मासा वर्णसंस्कारकर्मणि"। सिंहस्थे गुरौ गुरुशुक्रमौढ्यादौ च विवाहनिषेधः।[1] मत्स्यः—

" सिंहस्थिते सुरगुरावधिमासके च ज्येष्ठे तथाऽद्यतनयस्य तु शुक्रगुर्वोः।

" मौढ्ये तथा स्थविरबालकयोश्च कुर्याज्जन्मस्थिते सुरगुरौ न हि मंगलानि" ॥ गर्गः—

" गुरौ सिंहस्थिते चैव सूर्ये च धनुषि स्थिते। विवाहमपि नेच्छंति मुनयः काश्यपादयः " ॥ धनुर्गतेर्के विवाहनिषेधः द्वितीयविवाहनिषेधपरः। यतः प्रथमस्य तत्र दक्षिणायनत्वेन निषेधो विहितः। गुरौ सिंहस्थित इत्यत्राप्ययमेव न्यायः। नारदः—

" गुरौ तु सिंहराशिस्थे भागे भाग्यवती भवेत्। पैत्रेर्यमर्क्षे सा नारी विवाहे विधवा भवेत् " ॥ एतन्नर्मदोत्तरविषयम्। यदाह व्यासः—

" नर्मदोत्तरदेशे तु सिंहस्थे देवमंत्रिणि। विवाहं नैव कुर्वीत निषेधो नास्ति दक्षिणे" ॥ एवं च द्वितीयविवाहकर्तुर्न दोष इतिपर्यवसन्नम्। श्रीधरीये—

" नर्मदोत्तरभागेषु सिंहस्थेऽमरपूजिते। विवाहादि न कुर्वीत नायं दोषोऽस्ति दक्षिणे ॥

" सिंहराशौ सिंहभागे यावत्तिष्ठति वाक्पतिः। नर्मदायाम्यकोणेषु न दोषो दक्षिणापथे " ॥ अर्णले—

" अन्नप्राशनवैवाहे पुंसो जन्मर्क्ष एव च। जन्ममासे च वर्ज्यं स्यान्नर्मदातीर उत्तरे ॥

" नर्मदादक्षिणे भागे विवाहादिषु मंगलम्। जन्ममासे शुभं प्रोक्तं बहूनां संमतं कृतम्"॥ इति ॥ व्यासः—

" अन्नप्राशनमातिथ्यं विवाहो वास्तुकर्म च। रात्रावहनि वा कुर्याच्छेषाण्यहनि कारयेत् ॥

" आषाढः प्रौष्ठपन्माघौ मार्गशीर्षस्तथैव च। चत्वारो दूषिता मासा वर्णसंस्कारकर्मणि ॥

" मीने धनुषि सिंहे च स्थिते सप्ततुरंगमे। क्षौरमन्नं न कुर्वीत विवाहं मौंजिबंधनम् ॥

" माघफाल्गुनवैशाखज्येष्ठमासाः शुभावहाः। मध्यमाः कार्तिको मार्गशीर्षको निंदिताः परे ॥

---

१ क ग–सिंहस्थे गुरौ विवाहनिषेधः।

" न कदाचिद्दशर्क्षेषु भानोरार्द्राप्रवेशनात्। पौषे चैत्रे शुचौ मार्गे नेति प्राह बृहस्पतिः॥
"श्रावणं केचिदिच्छंति नेच्छंत्यन्ये महर्षयः। कन्याकुंभकुलीरस्थे रवौ क्षौरं विवर्जयेत्॥
"आषाढादिचतुर्मासांश्चान्द्रान्पौषं च वर्जयेत्। सार्वकालिकमिच्छंति विवाहं गौतमादयः"॥

आपस्तंबः (१।२।१२)—" सर्वर्तवो विवाहस्य शैशिरौ मासौ परिहाप्योत्तमं च नैदाघम्" इति। शैशिरौ माघफाल्गुनौ निदाघस्य ग्रीष्मस्य यश्चोत्तमोऽत्य आषाढस्तानेतांस्त्रीन्मासान्परिहाप्य वर्जयित्वा सर्वर्तवो विवाहस्य काल इत्यर्थः। **आश्वलायनश्च**—"सार्वकालिकमेके विवाहमिच्छंति" इति। **संग्रहे**—

" कार्तिकाश्वयुजौ मासावुद्वाहे दक्षिणायने। शंसंति श्रवणं चान्ये मासास्त्वन्ये विगर्हिताः "॥

अत्र व्यवस्थामाह। **व्यासः**—"अधर्म्या ये विवाहास्ते संमताः सार्वकालिकाः" इति। **दक्षः**—

" राक्षसासुरगांधर्वपैशाचा ब्राह्मणस्य तु। निषिद्धे तिथिमासेऽपि संमता इति निश्चयः"॥

गृह्यपरिशिष्टे "धर्म्येष्वेव विवाहेषु कालप्रतीक्षणं नाधर्म्येषु" इति॥

बोधायनः—

"यस्मिन्काले विरोधोऽस्ति ज्योतिषोक्तागमोक्तयोः। ज्योतिषोक्तं विहायैव स्मृतिचोदितमाचरेत्"॥

व्यासः—

" विष्णोः प्रस्थापनोत्थानमध्येनैवोपनायनम्। विवाहं नैव कुर्वीत नैव कुर्यान्महोत्सवम्"॥

स्मृत्यर्थसारे—

"अंधः श्वित्री च कुनखी हीनांगः पंगुरेव च। कालप्रदो भवेद्यत्र कुलक्षयकरं हि तत्"॥

कालप्रदः मुहूर्तविधाता। **देवलः**—

" देवोत्सवे प्रवृत्ते तु न मनुष्योत्सवो मतः। तस्मिन्ग्रामे न कुर्वीत कुर्याच्चेत् स विनश्यति "॥

इति गोचरशुद्ध्यसंनिपातादिनिरूपणम्॥ ऋद्धिपरीक्षामाह आपस्तंबः–(गृ. सू. १।३।१५-१८)

" शक्तिविषये द्रव्याणि प्रतिच्छन्नान्युपनिधाय ब्रूयादुपस्पृशेति। नानाबीजानि संसृष्टानि वेद्याः पांसून्क्षेत्राल्लोष्टं शकृच्छ्मशानलोष्टमिति। पूर्वेषामुपस्पर्शने यथालिंगमृद्धिरुत्तमं परिचक्षते"॥ इति। नानाबीजानि व्रीहियवादिबीजानि संसृष्टान्येकस्मिन्मृत्पिंडे क्षिप्तानि प्रतिच्छन्नानि कृत्वा स्थापयित्वा वेद्याहृतान् पांसून् क्षेत्रात्सस्यसंपन्नादाहृतं लोष्टं शकृच्छ्मशानलोष्टं च पृथक्-पिंडेषु निक्षिप्य प्रतिच्छन्नानि एकस्मिन्भाजने निधाय कन्यां ब्रूयात् एषां पिंडानामेकमुपस्पृशेति पूर्वेषां चतुर्णामुपस्पर्शने यथायोग्यमृद्धिः। नानाबीजानामुपस्पर्शने प्रजासमृद्धिः वेद्याः पांसूनां यज्ञसमृद्धिः। क्षेत्रलोष्टस्य सस्यसमृद्धिः। शकृतश्च पशुवृद्धिः। उत्तमं श्मशानलोष्टं परिचक्षते गर्हन्ते शिष्टा इत्यर्थः। **आश्वलायनः** (१।५।४–६) "अष्टौ पिंडान्गृहीत्वा ऋतमग्रे प्रथमं जज्ञ ऋते सत्यं प्रतिष्ठितं यदियं कुमार्यभिजाता तदियमिह प्रतिपद्यतां यत्सत्यं तद्दृश्यतामिति पिंडानभिमंत्र्य कुमारीं ब्रूयादेषामेकं गृहाणेति। क्षेत्राच्चेदुभयतः सस्याद्गृह्णीयात्अन्नवत्यस्याः प्रजा भविष्यतीति विद्यात्। गोष्ठात्पशुमती वेदिपुरीषाद्ब्रह्मवर्चस्विन्यविदासिनो ह्रदात्सर्वसंपन्ना देवनात्कितवी चतुष्पथाद्विप्रवाजिनीरिणादधन्या श्मशानात्पतिघ्नी "॥ इति श्मशानपिंडस्पर्शने तस्या एव वैधव्यं भविष्यतीत्यर्थः। **हारीतः**—

"प्रत्युद्वाहो नैव कार्यो नैकस्मै दुहितृद्वयम्। न चैकजातयोः पुंसोः प्रयच्छेद्दुहितृद्वयम्"॥ इति।

" पितुः स्वसारं मातुश्च मातुलानीं स्नुषामपि। मातुः सपत्नीं भगिनीमाचार्यतनयां तथा॥

आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पगः "। इति दोषस्मरणात्साक्षात्परंपरया वा "श्वश्रूः पूर्वजपत्नी च मातृतुल्याः प्रकीर्तिताः" "पितृपत्न्यः सर्वा मातरः" इत्यतिदेशेन वा तादृशी नोद्वाह्येत्यर्थः। **कन्यादानकालनियमक्रमः संग्रहकारः**—

"भुक्तां समुद्वहेत्कन्यां सावित्रीग्रहणं तथा। उपोषितः स वै दद्यादर्चिताय द्विजातयः"॥

इति भुक्तोद्वाहस्मरणमधर्मविवाहविषयम्। तदाह **व्यासः**—

"गांधर्वासुरयोरेव भुक्ता तु परिणीयते। ब्राह्मादिषु विवाहेषु भोजनं नेति काश्यपः॥

"ब्राह्मादिषु विवाहेषु पूर्वं होमः प्रशस्यते। कन्यास्वीकरणं पश्चात् अत्ययस्त्वासुरादिषु॥

"स्वगृह्योक्तविधानेन पौर्वापर्येऽव्यवस्थितिः"॥ **व्यासः**—

"दद्यात्पूर्वमुखः कन्यां गृह्णीयादुत्तरामुखः। दंपत्योर्वर्धते चायुर्दातुश्चैव विवर्धते"॥

स्कंदोऽपि—

"नामगोत्रे समुच्चार्य प्राङ्मुखो वारिपूर्वकम्। उदङ्मुखाय व दद्यात्कन्यां चैव यवीयसीम्"॥

वसिष्ठस्तु विशेषमाह

"प्राक्प्रत्यङ्मुखयोश्चैव दातृग्राहकयोः स्थितिः। उद्वाहे चैव गोदानादानयोरेवमेव हि॥

आग्नेयपुराणे—

"दद्यात्तु प्राङ्मुखस्तस्मै वरः प्रत्यङ्मुखो वधूम्। गृहीत्वा शोभने लग्ने ईक्षेदापादमस्तकम्"॥

आश्वलायनः—

"वरस्योदक्स्थितां कन्यां प्राङ्मुखीं प्राङ्मुखायताम्। समभ्यर्च्य पिता दद्यात्तत्पाणौ मंत्रवज्जले॥

"दद्यात्प्रत्यङ्मुखः स्थित्वा गृहीत्वा प्राङ्मुखोंजलिम्"॥ **बोधायनगृह्ये**– अत्र स्मृतीनां विरोधे विकल्पो द्रष्टव्यः। **व्यासः**—

"आच्छाद्यालंकृतां कन्यां गृह्णन् वामकरेण तु। गोत्रमादौ तु संकीर्त्य प्रपितामहपूर्वकम्॥

"प्रपितामहपूर्वाय फलमुद्दिश्य दापयेत्। नांदीमुखे विवाहे च प्रपितामहपूर्वकम्॥

"नामसंकीर्तयेद्विद्वानन्यत्र पितृपूर्वकम्"॥ **दक्षः**– "नामगोत्रे समुच्चार्य प्रपितामहपूर्वकम्" इति। **जमदग्निः**– "कन्यां वामकरे धृत्वा प्रपितामहपूर्वकम्" इति॥ **देवीपुराणेऽपि**—

"गोत्रं नाम तु संकीर्त्य कीर्तयेत्प्रपितामहम्। पितामहं च पितरं कन्यामेवं वराय च॥

"आसीनायाः स्त्रियास्तिष्ठन् गृह्णामीत्यद्भिरंततः। गृह्णीयात्पाणिमुत्तानं सांगुष्ठांगुलिदक्षिणाम्"॥इति।

औपासनात्पूर्वमग्निनाशे पुनर्विवाहः। **संग्रहे**—

"पूर्वमौपासनारंभादग्निनाशो यदा भवेत्। पुनर्विवाहः कर्तव्यः परतस्तु न विद्यते"॥"ऋग्वेदिनां प्रवेशहोमात्पूर्वं यजुर्वेदिनामौपासनारंभात्सामवेदिनां लेखाहोमात्पूर्वमग्निनाशे पुनर्विवाहः" इति **बोधायनः**– "अथ चेदौपासनारंभात्प्राक् ज्वलनस्य नाशः पुनर्विवाहं कुर्वीत" इति। पुनर्विवाहकल्पोऽपि **तेनैव** व्याख्यातः—

"अङ्कुरं च प्रतिसरं वरणं च प्रतिग्रहम्। वाससा परिधानं च कर्माण्येतानि वर्जयेत्"॥ इति। उपनयनविवाहजातकर्मश्मशानाग्निनाशे प्रायश्चित्तमाह **बोधायनः**– "अथ यद्युपनयनाग्निर्विवाहाग्निर्जातकर्माग्निः श्मशानाग्निरा चतुर्थादा द्वादशाहादा संचयाद्वा तस्मात्सर्वं तत्पक्वतेति प्रोक्ष्य स्थंडिलमन्यत्राग्निमपसमाधाय संपरिस्तीर्य प्रायश्चित्तं जुहोत्ययाश्चाग्ने पंच

होता ब्राह्मण एक होता मनस्वतीमिंदाहुतीं महाव्याहृतिर्व्याहृतयश्च प्रायश्चित्तं जुहुयात्" इति **बोधायनगृह्ये**—

" औपासनारंभकालमाह आपस्तंबः (गृ. सू. ३।७।१९)—

" सायं प्रातरत ऊर्ध्वं हस्तेनैते आहुती तंडुलैर्यवैर्वा जुहुयात्" इति । अत ऊर्ध्वमाग्नेयस्थालीपाकांताद्विवाहादूर्ध्वं रात्रावौपासनस्यारंभः । यदि नव नाड्यो नातीताः । अतीताश्चेदपरेद्युः सायमेवाग्निहोत्रवेलायामिति गृह्यतात्पर्यदर्शने । **स्मृतिरत्ने**—

" त्रेधा कृत्वा यामिनीं पूर्वभागे स्थालीपाको नित्ययुक्तो द्वितीये—

"स्थालीपाको नैव युक्तस्तृतीये नैव स्थाली नैव नित्यो विवाहे" ॥ नित्य औपासनहोमः ।

व्यासः—

" रात्रौ विवाह उत्पन्ने वन्हिं परिचरेत्तदा । रात्रावतीतकालश्चेत् श्वः सायं तदुपक्रमेत् ॥

" प्रातर्होमः संगवांते काले त्वनुदिते तथा । सायमस्तमिते होमकालस्तु नवनाडिका " ॥ इति ।

अथ स्थालीपाकोपक्रमः । **तत्रापस्तंबः** (३।७।१७–१८)–" एवमत ऊर्ध्वं दक्षिणावर्जमुपोषिताभ्यां पर्वसु कार्यः । पूर्णपात्रस्तु दक्षिणेत्येके " इति । अत ऊर्ध्वमाग्नेयस्थालीपाकात् परमित्येवं वदताग्नेयस्थालीपाकानंतरं शेषहोमात्पूर्वं पर्वसंभवेऽपि आग्नेयस्थालीपाकः कार्य इत्युक्तं भवति । **यथाहुः**—

" विवाहशेषमध्ये तु पर्वण्युत्पातिते सति । तस्मिन्नपि च कर्त्तव्यः स्थालीपाको यथाविधि ॥

"तत्र यद्यप्यमावास्या विवाहात्स्यादनंतरम् । यदि वा पौर्णमासी स्यात् स्थालीपाकक्रियामिति" ॥

इति । अत्रामावास्यायामपि स्थालीपाकस्मरणमागामिपौर्णिमास्यां मौढ्यादिदोषदुष्टत्वे द्रष्टव्यम् । तदाह **गौतमः**—

" पाकयज्ञस्य चारंभमन्वारंभणमेव च । पौर्णमास्यां यजेत्पूर्वं दर्शेनैव कथंचन ॥

" मौढ्यादि दोषमासे तु पौर्णमास्यां यजेत्कथम् । दर्शे वाऽपि यजेत्पूर्वं पौर्णमासीममामपि ॥

"अतिकालांतरारंभो यजमानस्य पापकृत् । आयुः श्रियं यशो हन्यात् तस्मात्तौ न व्यतिक्रमेत्" ॥

यावद्दर्शं पौर्णमासस्य कालत्वाद्दर्शात् पूर्वमेव पंचम्यादौ द्वितीयां चतुर्दशीं सप्तदशीं विनैव त्विति निषेधात् पौर्णमासस्थालीपाकं कृत्वा स्वकाले त्वमामपि यजेत् । न तु प्रतिपदि पौर्णमासमपि सह यजेदित्यर्थः । यत्तु

" मौढ्ये वाऽप्यधिमासे वा ग्रहणे चंद्रसूर्ययोः । अन्वारंभं प्रकुर्वीत समनंतरपर्वणि " ॥

इति स्मरणम् । यदपि—

" आषाढेऽप्यधिमासे वा संक्रांतौ ग्रहणेऽपि वा । अन्वारंभं प्रकुर्वीत समनंतरपर्वणि " ॥

इति तत्समनंतरपर्वण्यवश्यकर्तव्यताप्रतिपादनपरम् । मौढ्यादौ तु दोषस्मरणात् । **यथाहुः**—

" आधानानंतरा पौर्णमासी चेन्मलमासगा । तत्रारंभणीया स्यादिति वृद्धेन भाषितम्" ॥

स्मृत्यर्थसारे च–" वसंतकालेऽपि मलमासादिकं चेत् कर्मान्वारंभो नास्ति अन्वारंभणादिकं न कर्त्तव्यम्" इति । अत्रान्वारंभणं स्थालीपाकः ।

" उपरागोऽधिमासो वा यदि प्रथमपर्वणि । नाहरेत्प्रथमामिष्टिं मौढ्ये च गुरुशुक्रयोः ॥

" स्थालीपाकक्रिया कुर्याद्विवाहादुत्तरायणे । पितृमासचतुष्केषु यदि कुर्याद्विनश्यति ॥

" आरंभं दर्शपूर्णध्योरग्निहोत्रस्य चादिमम् । प्रतिष्ठामपि कर्माद्यं मलमासे विवर्जयेत् ॥

---

१ क्ष–तदा । २ खग–सित ।

“ प्रारब्धे तु तृतीयादौ प्रोक्तदोषो न विद्यते। ऋतुत्रयमतिक्रम्य स्थालीपाकं विना कृतम्॥ “ अजस्रं लौकिकं विद्यान्मासत्रयमथापि वा ” ॥ इदं देशांतरगमनविषयम् ।
“ ऋतुमेकमतिक्रम्य स्थालीपाकं विना कृतम् । अजस्रं लौकिकं विद्यादिति वेदविदो विदुः ” ॥ इति स्मरणात्। इति **स्थालीपाकोपक्रमनिरूपणम्** । **अथाधिवेधनम्**। तत्र **मनुः** (९।८०-८३)
“ मद्य[1]पाऽसद्वृत्ता च प्रतिकूला च या भवेत् । व्याधिता चाधिवेत्तव्या हिंस्राऽर्थघ्नी च सर्वदा ॥
“ वंध्याऽष्टमेधिवेद्याब्दे दशमे तु मृतप्रजा । एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी ॥
“ या रोगिणी स्यात्तु हिता संपन्ना चैव शीलतः । सानुज्ञाप्याऽधिवेत्तव्या नावमान्या च कर्हिचित् ॥
“अधिविन्ना तु या नारी निर्गच्छेद्रोषिता गृहात् । सा सद्यः संनिरोद्धव्या त्याज्या वा कुलसन्निधौ ”॥
त्यागः जनककुले प्रेषणम् । **याज्ञवल्क्यः** (आ. ७३)—
“ सुरापी व्याधिता धूर्ता वंध्याऽर्थघ्न्यप्रियंवदा । स्त्री प्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा ” ॥
यस्यां हि विद्यमानायां भार्यांतरपरिग्रहः साऽधिवेत्तव्येत्यर्थः ।
“ अधिविन्ना तु भर्त्तव्या महदेनोऽन्यथा भवेत् । यत्रानुकूल्यं दंपत्योस्त्रिवर्गस्तत्र वर्धते (७४)॥
“आज्ञासंपादिनीं दक्षां वीरसूं प्रियवादिनीम्। त्यजन्दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रियाः”॥(७६)
“ त्यजन्नधिविन्दन् स्वस्य धनस्य तृतीयांशं दाप्यः । निर्धनस्तु स्त्रिया भरणं ग्रासाच्छादनादि दाप्य इत्यर्थः । **पराशरमाधवीये**—
“ धर्मविघ्नकरीं भार्यामसतीं चातिकोपिनीम् । त्यजेद्धर्मस्य रक्षार्थं तथैवाप्रियवादिनीम् ” ॥
त्यजेदधिविन्देत् । **दक्षः**—
“ प्रथमा धर्मपत्नी स्याद्द्वितीया रतिवर्धिनी । दृष्टमात्रफलं तस्यामदृष्टं नोपलभ्यते ॥
“ धर्मपत्नी समाख्याता निर्दोषा यदि सा भवेत्। दोषेष्वपि न दोषः स्यादन्योद्वाहे विजानतः ”॥
स्मृतिरत्ने—
“ एकामुत्क्रम्य कामार्थमन्यां लब्धुं य इच्छति । समर्थस्तोषयित्वार्थैः पूर्वोढामपरां वहेत् ” ॥
बोधायनः (२।२।५९)—

“ अप्रजां दशमे वर्षे स्त्रीप्रजां द्वादशे त्यजेत्। मृतप्रजां पंचदशे सद्यस्त्वप्रियवादिनीम् ”॥
दशम इत्याद्यार्तवानंतरं वेदितव्यं न तु पाणिग्रहणात् । **आपस्तंबः** (२।५।११।१२-१३)—
“ धर्मप्रजासंपन्ने दारे नान्यां कुर्वीतान्यतराभावे कार्या। प्रागग्न्याधेयात्” इति। श्रौतेषु स्मार्तेषु च कर्मसु श्रद्धाभक्तिश्च धर्मसंपत्तिः पुत्रवत्त्वं प्रजासंपत्तिः एतद्युक्ते दारे सति अन्यां भार्यां नोद्वहेत् । धर्मप्रजयोरन्यतरस्याभावे कार्या उद्वाह्या । अत्र दारे सतीति वचनान्मृते तस्मिन्प्रागूर्ध्वं चाधानात्सत्यामपि पुत्रसंपत्तौ धर्मसंपत्त्यर्थं दारग्रहणं भवत्येव ।

“ दारशब्दस्यैकवचनस्यौगश्छांदसः । **शातातपः**—
“ मद्यपानप्रवृत्ता च दीर्घरोगा च या भवेत् । प्रतारिकाऽनपत्या स्त्री प्रसूः परुषभाषिणी ॥
“ अर्थघ्नी च पतिद्वेषी स्त्री तिष्ठत्यपि चोद्वहेत् ” । पादेन वाऽक्षरप्रयोगो भवत्यार्षः । रामायणदेवीमहात्म्ययोस्तथादर्शनात् । **स्मृत्यंतरे**—
“ व्याधितां स्त्रीप्रजां वन्ध्यामुन्मत्तां विगतार्त्तवाम् । अदुष्टाऽर्हति इत्युक्तं तीर्थतो न तु धर्मतः” ।
तीर्थं योनिः । **गर्गः**—

१ श्व-स्नुषु ।

“ गृही स्यादेकपत्नीकः सकामी चेद्वहेत्पराम् । तृतीयां नोद्वहेत्कन्यां चतुर्थीमपि चोद्वहेत् ” ॥

अर्कविवाहः ।

“ तृतीयामुद्वहेत्कन्यां मोहादज्ञानतोऽपि यः । धनधान्यायुषां हानिः रोगी स्याद्यदि जीवति ॥
“ तृतीयोद्वाहसिध्यर्थमर्कवृक्षं समुद्वहेत् । ग्रामात्प्राचीमुदीचीं वा गच्छेद्यत्रैव तिष्ठति ॥
“ यथार्हं शोभनं कृत्वा कृत्वा भूमिं च शोभिताम् । वस्त्रेण तंतुना वेष्ट्य ब्राह्मणस्तं परिश्रयेत् ॥
“ स्वशाखोक्तविधानेन होमान्तेऽग्निं स्व आत्मनि । आरोप्यैव वरो धीरो ब्रह्मचर्यं चरेत् त्र्यहम् ॥
“ एकाहमपि वा कन्यामुद्वहेदविशंकितः ” । अयं च द्वितीयादिविवाहः प्रजासंपत्त्यभावे मृतायां वा द्रष्टव्यः । **श्रुतिः**—“जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः । तस्मादेको द्वे जाये विंदते तस्मादेको बव्हीर्जाया विंदत ” इत्यादि श्रुतितो धर्मप्रजार्थमनेकभार्यापरिग्रहावगमात् ।

द्वितीयविवाहकालः । गार्ग्यः—

“ भार्यांतरविवाहः स्याद्युग्मे वत्सरे शुभः । युग्मे भर्तृविनाशाय गार्ग्यस्य वचनं यथा ” ॥

वसिष्ठः

“ भार्याहीनस्तु वैवाहं कुर्यात्तस्मिंस्तु वत्सरे । वत्सरांतरिते कुर्यादयनांतरितेऽपि वा ” ॥
युग्मेऽप्ययुग्ममासे वा शौनको मुनिरब्रवीत् ” ॥

अथ परिवेदनम् । गर्गः—

“सोदर्ये तिष्ठति ज्येष्ठे न कुर्याद्दारसंग्रहः । आवसथ्यं तथाऽऽधानं पतितस्त्वन्यथा भवेत् ” ॥

आवसथ्यमावसथ्याधानम् । आधानं गार्हपत्याद्याधानम् । **यमः**—

“ पितृव्यपुत्रान्सापत्नान्परपुत्रांस्तथैव च । दाराग्निहोत्रधर्म्येषु नाधर्मः परिविंदतः ” ॥

परपुत्रा दत्तक्रीतादयः । **शातातपः**—

“क्लीबे देशांतरस्थे च पतिते भिक्षुकेऽपि वा । योगशास्त्राभियुक्ते च न दोषः परिवेदने ” ॥

कात्यायनः—

“ देशांतरस्थक्लीबैकवृषणानसहोदरान् । वेश्यातिसक्तपतितशूद्रतुल्यातिरोगिणः ॥
“ जडमूकांधबधिरकुब्जवामनखेटकान् । अतिवृद्धानभार्यांश्च कृषिसक्तांश्च कामतः ॥
“ धनवृद्धिप्रसक्तांश्च कामतःकारिणस्तथा । कुहकोन्मत्तचोरांश्च परिविन्दन्न दुष्यति ” ॥

खेटकः भग्नपादद्वयः । अभार्या नैष्ठिकब्रह्मचारिणः । कामतः कारिणः स्वेच्छयैव विवाहान्निवृत्ताः । तेषामपि परिविन्नत्वं नास्तीति प्रतिभाति । यद्यपि जडमूकादीनामपि विवाहोऽस्ति तथापि परिविंदन्न दुष्यति । **पराशरः**

“ द्वादशैव तु वर्षाणि ज्यायां धर्मार्थयोगतः । न्याय्यः प्रतीक्षितुं भ्रात्रा श्रूयमाणः पुनः पुनः ॥

धर्मार्थयोः धर्मार्थमर्थार्थं च देशांतरं गतः । जीवतीति पुनः पुनः श्रूयमाणः द्वादशवर्षाणि प्रतीक्ष्य इत्यर्थः । **वसिष्ठोऽपि**— “ अष्टौ दशद्वादशवर्षाणि ज्येष्ठभ्रातरमनिविष्टमप्रतीक्षमाणः प्रायश्चित्तीभवति ” इति । अनिविष्टमकृतविवाहाग्निहोत्रम् । कार्यान्तरार्थं देशांतरगतविषये अष्टौ दश वेति पक्षद्वयम् । धर्मार्थमर्थार्थं वा गतविषये द्वादशवर्षाणीति विवेकः । विद्याग्रहणार्थं गतविषयेऽपि **गौतमः** (अ. १८ सू. १७–१८)—“ विद्यासंबन्धे भ्रातरि चैवं ज्यायसि यदीयान् कन्याग्न्युपयमेष्विति ” । **शंखः**—

---

१ स्व–स्थ ।

" ज्येष्ठे तिष्ठत्यनूढे वा अग्निहोत्राधिकारिणि । अनुज्ञया विनाऽधानं विवाहं नैव कारयेत् "॥

संग्रहे—

" देशांतरगते ज्येष्ठे द्वादशाब्दं निरीक्ष्य तु । पश्चात्कनिष्ठो विधिवत्कुर्याद्वै दारसंग्रहम् " ॥

एवं प्रतीक्षणमुन्मत्तादिव्यतिरिक्तविषयम् ।

उन्मत्तादीनां विवाहनिराकरणम् । तथा चंद्रिकायाम्–

" उन्मत्तः किल्बिषी कुष्ठी पतितः क्लीब एव वा । राजयक्ष्मामयावी च न न्याय्यः स्यात्प्रतीक्षितुम् ॥

"मत्तोन्मत्तजडक्लीबपतितानां द्विजन्मनाम् । नोद्वाहो नैव संस्कारो नाशौचं नोदकक्रिया ॥

" रंभाविवाहः कर्त्तव्यस्तदलाभेऽर्कशाखया । विवाहं मनुजाः कुर्युरित्येतन्मनुरब्रवीत् " ॥

मनुशातातपौ (३।१७१)—

" दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते । परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः "॥

पराशरः (४।२०)—

" परिवित्तिः परिवेत्ता यया च परिविद्यते । सर्वे ते नरकं यांति दातृयाजकपंचमाः ॥

" कुब्जवामनषंढेषु गद्गदेषु जडेषु च । जात्यंधे बधिरे मूके न दोषः परिवेदने (२३) ॥

" पितृव्यपुत्रः सापत्नः परनारीसुतस्तथा । दाराग्निहोत्रसंयोगे न दोषः परिवेदने (२४)॥

"परिवेत्तुर्न चाग्निस्तु न वेदा न तपांसि च । न च श्राद्धं कनिष्ठस्य या च काऽन्या विरूपिता" ॥

विवाहाधिकारण्यां ज्येष्ठायां सत्यां कनिष्ठाया उद्वाहो न कार्यः । विरूपितायां तु ज्येष्ठायामनूढायामपि कनिष्ठायां उद्वाहो न दोषायेति ।

" ज्येष्ठायां यद्यनूढायामुह्यते त्वनुजा भवेत् । सैवाग्रेदिधिषूर्ज्ञेया पूर्वा तु दिधिषूः स्मृता " ॥

बोधायनोऽपि (२।१।३९)—

" परिवित्तिः परिवेत्ता च या चैनं परिविंदति । सर्वे ते नरकं यांति दातृयाजकपंचमाः "॥

कन्यायाः पातित्ये सति कृतप्रायश्चित्ताया एव विवाह इत्याह यमः—

" स्त्री यदा बालभावेन महापापं करोति हि । प्रायश्चित्तव्रतस्यार्थे पित्रा तु व्रतचारिणीम् ॥

" उद्वहेदभिरूपां तामन्यथा पतितस्तु सः " ॥

पतितादीनां धर्मनिरूपणम् पतितैः सह योनिसंबंधे पातित्यमाह व्यासः—

" संवत्सरेण पतति संसर्गं कुरुते तु यः । यानशय्यासनैर्नित्यं जानन्वै पतितो भवेत् ॥

" याजनं योनिसंबंधं तथैवाध्यापनं द्विजः । कृत्वा सद्यः पतेत् ज्ञानात्सहभोजनमेव वा " ॥

देवलः—"याजनं योनिसंबंधं स्वाध्यायं सह भोजनम् । कृत्वा सद्यः पतत्येव पतितेन न संशयः ॥

आपस्तंबः (१।२१।५)–

" न पतितैः संव्यवहारो विद्यते " इति । कृतप्रायश्चित्तैरपि पतितैरुत्पादितानां पुत्राणामपि पातित्यमस्तीति पूर्वपक्षपूर्वकं प्रतिपादयति **स एव** (१।२९।८–१८)–" अथाभिशस्ताः समवसाय चरेयुर्धर्म्यमिति सांशित्येतरेतरयाजका इतरेतराध्यापका मिथो विवहमानाः । पुत्रान्संनिष्पाद्य ब्रूयुर्विप्रव्रजतास्मदेवं ह्यस्मत्स्वार्याः संप्रत्यपत्स्यन्तेत्यथापि न सेंद्रियः पताति । तदेतेन वेदितव्यमंगहीनो हि सांगं जनयति । मिथ्यैतदिति हारीतः । दधिधानीसधर्मा स्त्री भवति । यो हि दधिधान्यामप्रयतं पय आतच्य मंथति न तेन धर्मकृत्यं क्रियते । एवमशुचि शुक्लं यन्निवर्त्तते न तेन सह संप्रयोगो विद्यते" इति । अभिशस्ताः पतिताः समवसाय चरेयुः । अवसानं गृहम् समित्येकीभावे । ग्रामाद्बहिरेकस्मिन्प्रदेशे गृहाणि कृत्वा चरेयुः । धार्म्यं धर्म्यं वक्ष्यमाणं

वृत्तमिति सांशित्य संशितां तीक्ष्णां बुद्धिं कृत्वा निश्चित्येत्यर्थः । इतरेतरं याजयंत इतरेतरमध्यापयंतः परस्परं विवाहसंबंधं कुर्वंतश्चरेयुर्वर्तेरन्निति । अथ ते पुत्रान् संनिष्पाद्य ब्रूयुः । हे पुत्राः अस्मदस्मत्तः विप्रव्रजत विनयं प्रकर्षेण च क्रोडमुत्सृज्यार्यसमीपं गच्छत । एवं ह्यस्मत्सु अस्मासु आर्याः शिष्टाः संप्रतिपत्स्यते संप्रतिपत्तिं करिष्यंति । आर्याणामप्येतदभिप्रेतं भविष्यति यस्मादस्माभिरेव पतनीयं कर्मानुष्ठितं न च भवद्भिर्न च पतितेनोत्पादितस्य पातित्ये मन्यत्वात् । एतदेवोपपादयति । अथापि न सेंद्रियः पतति । न हि पतितो भवन्निंद्रियेण सह पतति । पुरुष एव पतति नेंद्रियं शुक्लमिति । तदनंतरोक्तमर्थरूपमेतेन वक्ष्यमाणेन निदर्शनेन वेदितव्यं । पातित्यम् । चक्षुराद्यंगहीनोऽपि सांगं चक्षुरादिमंतं जनयति । एवमधिकारविकलः साधिकारं जनयिष्यति । स्त्रिया अपि कारणत्वात्तस्याश्च दोषाभावात् । दूषयति मिथ्यैतदिति । एतदनंतरोक्तं मिथ्या न युक्तमिति हारीतो मन्यते । हारीतग्रहणं पूजार्थम् । दधि धीयते यस्यां सा दधिधानी । स्थाली । तया सधर्मा सदृशी स्त्री भवति । ततः किं । यो हि पुरुषो दधिधान्यां स्थाल्यामप्रयतं श्वाद्युपहतं पय आतच्य तक्रायातंच तेन संकृत्य । मंथति न तेन तदुत्पन्नमघृतादिना धर्मकृत्यं यागादिकं क्रियते । एवं पतितसंबद्धेनाशुचि शुक्लं स्त्रियां निषिक्तं शोणितेनाक्तं यन्निर्वर्तते येन रूपेण निष्पद्यते न तेन सह संप्रयोगो विद्यते शिष्टानामित्यर्थः ।

बोधायनः (२।१।६२)—"संवत्सरेण पतति पतितेन समाचरन् । याजनाध्यापनाद्यौनात्सद्यः" इति । **स एव** (२।१।४९-५१)-" अथ पतिताः समवसाय धर्मांश्चरेयुरितरेतरयाजका इतरेतराध्यापका मिथो विवाहमानाः पुत्रान्संनिष्पाद्य ब्रूयुर्विप्रव्रजतास्मत्त एवमार्यानपि । संप्रतिपत्स्यथेत्थापि न सेंद्रियः पतति तदेतेन वेदितव्यमंगहीनोऽपि सांगं जनयेन्मिथ्यैतदिति **हारीतः** । दधिधानीसधर्माः स्त्रियः स्युर्यो हि दधिधान्यामप्रयतं पय आतच्य मंथति न तच्छिष्टा धर्मकृत्येषूपयोजयत्येवमशुचिशुक्लं यन्निर्वर्त्तते न तेन सहसंप्रयोगो विद्यते अशुचिशुक्लोत्पन्नानां तेषामिच्छतां प्रायश्चित्तिः । पतनीयानां तृतीयोंऽशस्त्रीणामंशस्तृतीयः इति ॥ समानायामप्युत्पत्तौ पुत्र एव पतति न दुहिता । तथा च । **वसिष्ठः** (१७।५१-५२)-"पतितोत्पन्नाः पतिता भवंत्यन्यत्र स्त्रियाः । सा हि परगामिनी । तामशुक्लामुपेयात्" इति । अशुक्लां कृतप्रायश्चित्तामुपेयादित्यर्थः । तथा च **याज्ञवल्क्यः** (प्रा. २६१)-" कन्यां समुद्वहेदेषां सोपवासामकिंचनाम्" इति । एषां ब्रह्महादीनामकिंचनामशुक्लाम् । **हारीतोऽपि**-" तस्य तु कुमारीमहोरात्रोषितां प्रातः शुक्लामहतेन वाससाऽऽच्छादितां नाहमेतेषां मम नेते इति त्रिरुच्चैरभिधानां तीर्थे स्वगृहे वोद्वहेत् " इति ।

दारसंग्रहस्य फलमाह । याज्ञवल्क्यः (आ. ७८)—

" लोकानंत्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः । यस्मात्तस्मात्स्त्रियः सेव्याः कर्त्तव्याश्च सुरक्षिताः"॥

पुत्रादिभिः लोक आनंत्यं वंशस्याविच्छेदः अग्निहोत्रादिभिश्च स्वर्गप्राप्तिरेतद्द्वयं यस्मात् स्त्रीभ्य एव भवति तस्मात्स्त्रियः सेव्याः उपभोग्याः प्रजार्थं रक्षितव्याश्च धर्मार्थमित्यर्थः ।

स्त्रीरक्षणक्रमः । मनुः (९।२-१७)—

" अस्वतन्त्राः स्त्रियः कार्याः पुरुषैः स्वैर्दिवानिशम् । विषये सज्जमानाश्च संस्थाप्या ह्यात्मनो वशे ॥

"पिता रक्षति कौमारे भर्त्ता रक्षति यौवने । पुत्रस्तु स्थविरे भावे न स्त्री स्वातंत्र्यमर्हति"॥ इति ।

'पुत्रस्तु स्थविरीभाव' इत्यनेन सत्यपि भर्त्तरि पुत्रेणैव पालनं कार्यमिति प्रतीयते । " वृद्धौ च मातापितरौ " इत्यादिना तस्यैव पालनाधिकारविधानात्स्वातंत्र्यं च स्वरक्षणयोग्यकारविधायिनीत्वम् ।

" सूक्ष्मेभ्योऽपि प्रसंगेभ्यः स्त्रियो रक्ष्या विशेषतः । द्वयोर्हि कुलयोः शोकमावहेयुररक्षिताः ॥ (५)
" इमं हि सर्ववर्णानां पश्यंतो धर्ममुत्तमम् । यतंते रक्षितुं भार्यां भर्त्तारो दुर्बला अपि ॥ (६)
" स्वां प्रसूतिं चरित्रं च कुलमात्मानमेव च । स्वं च धर्मं प्रजाश्चैव जायां रक्षन्हि रक्षति ॥ (७)
" पतिर्भार्यां प्रविश्य स्वां गर्भो भूत्वेह जायते । जायायास्तद्धि जायात्वं यदस्यां जायते पुनः ॥
" यादृशं भजते हि स्त्री सुतं सूते तथाविधम् । तस्मात्प्रजाविशुध्यर्थं स्त्रियो रक्षेत्प्रयत्नतः ॥
" न कश्चिद्योषितः शक्तः प्रसह्य परिरक्षितुम् । एतैरुपाययोगैस्तु शक्याः स्युः परिरक्षितुम् ॥
" अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत् । शौचे धर्मेऽन्नपक्त्यां च पारिणाह्यस्य चेक्षणे ॥
" अरक्षिता गृहे रुद्धाः पुरुषैराप्तकारिभिः । आत्मानमात्मना यास्तु रक्षेयुस्ताः सुरक्षिताः ॥
" पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम् । स्वप्नोऽन्यगेहवासश्च नारीणां दूषणानि षट् ॥
" नैता रूपं प्रतीक्षंते[१] नासां वयसि संस्थितिः । विरूपं रूपवंतं वा पुमानित्येव भुंजते ॥
" पौंश्चल्याच्चालचित्त्याच्च नैस्नेह्याच्च स्वभावतः । रक्षिता यत्नतोऽपीह भर्तृष्वेता विकुर्वते ॥
" एवं स्वभावं ज्ञात्वाऽऽसां प्रजापतिनिसर्गजम् । परमं यत्नमातिष्ठेत्पुरुषो रक्षणं प्रति ॥
" शय्यासनमलंकारं कामं क्रोधमनार्जवम् । द्रोहभावं कुचर्यां च स्त्रिभ्यो मनुरकल्पयत् " ॥
" यादृग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि । तादृग्गुणा सा भवति समुद्रेणेव निम्नगाः ॥ (२२)
" प्रजनार्थां महाभागाः पूजार्हा ग्रहदीप्तयः । स्त्रियाश्च यस्य गेहेषु न विशेषोऽस्ति कश्चन ॥ (२६)
"प्रजनार्थं स्त्रियः सृष्टा संतानार्थं च मानवाः । तस्मात्साधारणो धर्मः श्रुतौ पत्न्या सहोदितः ॥ (९६)
" उत्पादनमपत्यस्य जातस्य परिपालनम् । प्रत्यहं लोकयात्रायाः प्रत्यक्षं स्त्रीनिबंधनम् ॥ (२५)
" अपत्यं धर्मकार्याणि शुश्रूषा रतिरुत्तमा । दाराधीनस्तथा स्वर्गः पितॄणामात्मनश्च हि ॥ (२८)
"विधाय वृत्तिं भार्यायाः प्रवसेत्कार्यवान्नरः । अवृत्तिकर्शिता हि स्त्री प्रदुष्येत्स्थितिमत्यपि ॥ (७४)
" विधाय प्रोषिते वृत्तिं जीवेन्नियममास्थिता । प्रोषिते त्वविधायैव जीवेच्छिल्पैरगर्हितैः ॥ (७५)
"यदि स्वाश्चापराश्चैव विंदेरन्योषितो द्विजाः । तासां वर्णक्रमेण स्याज्ज्यैष्ठं पूजा च वेश्मनि ॥ (८५)
"भर्तुः शरीरशुश्रूषा धर्मकार्यं च नैत्यकम् । स्वा चैव कुर्यात्सर्वेषां नास्वजातिः कथंचन ॥ (८६)
"यस्तु तत्कारयेन्मोहात्स्वजात्या स्थितयाऽन्यया । यथा ब्राह्मणचंडालः पूर्वदृष्टस्तथैव सः ॥ (८७)
" तथा नित्यं यतेयातां स्त्रीपुंसौ तु कृतक्रियौ । यथा नातिचरेतां तौ नियुक्ताविरेतरम् ॥ (१०२)

दक्षः—

" ग्रहाश्रमात्परो नास्ति यदि भार्या वशानुगा । तथा धर्मार्थकामाख्यं त्रिवर्गफलमश्नुते ॥
" आनुकूल्यं कलत्रस्य स्वर्गो भवति निश्चितम् । प्रातिकूल्यं कलत्रस्य नरको नात्र संशयः ॥
" स्वर्गेऽपि दुर्लभं ह्येतदनुरागः परस्परम् । नक्तमेकं विरक्तं चेत्तस्मात्कष्टतरं तु किम् ॥
" ग्रहाश्रमः सुखस्तस्य पत्नीमूलं हि तत्सुखम् । सा पत्नी या विधिज्ञा तु चित्तज्ञा वशवर्तिनी ॥
" दुःखांतिकः कलिर्भेदश्चित्तपीडापरस्परम् । प्रतिकूलकलत्रस्य द्विदारस्य विशेषतः ॥
" जलूकावत्स्त्रियः सर्वा भूषणाच्छादनाशनैः । सुपूजिता सुखाद्वाऽपि पुरुषं ह्यपकर्षति ॥
" जलूका रक्तमादत्ते केवलं सा तपस्विनी । इतरा तु धनं चित्तं मांसं वीर्यं तथा सुखम् ॥
" साशंका बालभावे तु यौवने विषयोन्मुखी । तृणवन्मन्यते पश्चाद्वृद्धभावे स्वकं पतिम् ॥
"अकार्ये वर्तमाना सा स्नेहेन न निवारिता । आवार्या तु भवेत्पश्चाद्यथाव्याधिरुपेक्षितः ॥
" अनुकूला सदा हृष्टा दक्षा साध्वी प्रजापतिः । एभिरेव गुणैर्युक्ता श्रीरेव स्त्री न संशयः ॥

१ [illegible]—परीक्षंते ।

" प्रहृष्टमानसा नित्यं स्थानमानविचक्षणा । भर्तुः प्रियकरी या तु सा भार्या इतरा जरा ॥
" अदुष्टां विनतां भार्यां यौवने यः परित्यजेत् । स्त्रजन्म भवेत्स्त्रीत्वं वैधव्यं च पुनः पुनः ॥
" दरिद्रं व्याधितं मूर्खं भर्तारं याऽवमन्यते । सा मृता जायते स्त्री श्वा सूकरी च पुनः पुनः ॥
"जीवे भर्तरि या नारी उपोष्य व्रतचारिणी । आयुष्यं हरते भर्तुः सा नारी नरकं व्रजेत् ॥
" जीवभार्या शिशुभ्रातृमित्रदाससमाश्रिता । यस्यैतानि विनीतानि तस्य लोकेऽपि गौरवम् " ॥

याज्ञवल्क्यः (आ. ७५)—
" मृते जीवति वा पत्यौ या नान्यमुपगच्छति । सेह कीर्तिमवाप्नोति मोदते चोमया सह ॥
" स्त्रिभिर्भर्तृवचः कार्यमेष धर्मः परः स्त्रियाः । आ शुद्धेः संप्रतीक्ष्यो हि महापातकदूषितः ॥ (७७)
" भर्तृभ्रातृपितृज्ञातिश्वश्रूश्वशुरदेवरैः । बंधुभिश्च स्त्रियः पूज्या भूषणाच्छादनाशनैः ॥ (८२)
" संयतोपस्करा दक्षा हृष्टा व्ययपराङ्मुखी । कुर्याच्छ्वशुरयोः पादवंदनं भर्तृतत्परा" ॥ (८३)

संयतोपस्कराः स्वस्थानावस्थापितदृषदुपलोलूखलादिगृहोपकरणवर्गाः ।

प्रोषितभर्तृकस्त्रीधर्मः । प्रोषिते भर्तरि तया कर्तव्यमाह स एव (अ. ८४–८८)—
" क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनम् । हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृका ॥
" रक्षेत्कन्यां पिता विन्नां पतिः पुत्रस्तु वार्धके । अभावे ज्ञातयस्तेषां स्वातंत्र्यं न क्वचित्स्त्रियाः ॥
" पतिप्रियहिते युक्ता स्वाचारा विजितेंद्रिया । इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमां गतिम् ॥
" सत्यामन्यां सवर्णायां धर्मकार्यं न कारयेत् । सवर्णासु विधौ धर्म्ये ज्येष्ठया न विनेतरा " ॥

सत्यां सवर्णायामसवर्णां नैव धर्मकार्यं कारयेत् । सवर्णास्वपि बह्वीषु धर्म्ये विधौ धर्मानुष्ठाने ज्येष्ठया विना ज्येष्ठां मुक्त्वा इतरा मध्यमा कनिष्ठा वा न नियोक्तव्येत्यर्थः । **शंखः**—

" नानुक्ता गृहान्निर्गच्छेन्नानुत्तरीया न त्वरिता व्रजेन्न परपुरुषमभिभाषेतान्यत्र वणिक्प्रव्रजितवृद्धवैद्येभ्यो[1] न नाभिं दर्शयेदा गुल्फाद्वासः[2] परिदध्यान्न स्तनौ विवृतौ कुर्यान्न हसेदपावृतं भर्तारं तद्बंधून्वा न द्विष्यान्न गणिकाधूर्ताऽभिसारिणीप्रव्रजिताप्रेक्षणिकामायामूलकुहककारिकादुःशीलादिभिः सहैकत्र तिष्ठेत्संसर्गेण हि चारित्र्यं दुष्यति" इति । **पराशरः**

" दरिद्रं व्याधितं मूर्खं भर्तारं याऽवमन्यते । सा शुनी जायते मृत्वा सूकरी च पुनः पुनः ॥
" पत्यौ जीवति या नारी उपोष्य व्रतमाचरेत् । आयुष्यं हरते भर्तुः सा नारी नरकं व्रजेत् ॥
" अपृष्ट्वा चैव भर्तारं या नारी कुरुते व्रतम् । सर्वं तद्राक्षसान् गच्छेदित्येवं मनुरब्रवीत् ॥
" नास्या जपतपोहोमदानव्रतमखादयः । स्त्रीणां पतिपराणां तु पत्यौ जीवति किंचन ॥
" तदाज्ञया तु कर्तव्यमकार्यमपि चेत्तया । भर्तुरप्यव्यवस्थितस्य कार्याकार्यमजानतः ॥
" पत्न्याप्याज्ञा तु कर्तव्या पतितस्य तु सर्वदा " ॥ इति । **आश्वलायनः**—
" बांधवानां स्वजातीनां दुर्वृत्तं कुरुते तु या । गर्भपातं च या कुर्यान्न तां संभाषयेत् क्वचित् ॥
" यत्पापं ब्रह्महत्यायां द्विगुणं गर्भपातने । प्रायश्चित्तं न तस्यास्ति तस्यास्त्यागो विधीयते ॥ "

पतिव्रताधर्मः । **मार्कंडेयः**—

"नारी खल्वननुज्ञाता पित्रा भ्रात्रा सुतेन वा । निष्फलं तु भवेत्तस्या यत्करोति व्रतादिकम्"इति ।

कात्यायनः– " भार्या भर्तुर्मतेनैव व्रतादीनाचरेत् " इति । **महाभारतेऽपि** पतिशुश्रूषापराया उत्तमां गतिमुक्त्वा व्रतादिपराया अन्यस्या भार्यायास्तदभावं ज्ञापयितुमुदाहृतम्—

" यमोऽथ लोकपालांस्तु बभाषे पुष्कलं वचः । मा शुचस्त्वं निवर्तस्व न लोकाः संति तेऽनघे ॥

---

१ ख–वृत्तानां । २ क्ष–शुल्का ।

" स्वधर्मविधुरा नित्यं कथं लोकान् गमिष्यसि । दैवतं हि पतिर्नार्याः स्थापितः सर्वदैवतः ॥
" मोहेन त्वं वरारोहे न जानीषे स्वदैवतम् । पतिमत्या स्त्रिया लोके धर्मः पत्यर्पितास्त्विति " ॥

मनुरपि (५।१५४)—

" नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम् । पतिं शुश्रूषते यत्तु तेन स्वर्गे महीयते ॥
" अनृतावृतुकाले च मंत्रसंस्कारकृत्पतिः । सुखस्य नित्यदातेह परलोके च योषितः ॥(१५२)
" अशनादि पयः पथ्यं भर्त्रा यच्च विवर्जितम् । आत्मनश्च तया तत्स्याच्छयनं चासनं तथा॥
"अशीलः कामवृत्तो वा गुणैर्वा परिवर्जितः । न स्त्रिया परिवर्ज्यः स्यात्सततं देववत्पतिः ॥(१५३)
"पाणिग्राहस्य साध्वी स्त्री जीवतो वा मृतस्य वा । पतिलोकमभीप्सन्ती नाचरेत्किंचिदप्रियम्॥(१५५)
बालया वा युवत्या वा वृद्धया वापि योषिता । न स्वातंत्र्येण कर्तव्यं कार्यं किंचिद्गृहेष्वपि ॥(१४६)
"बाल्ये पितुर्वशे तिष्ठेत्पाणिग्राहस्य यौवने । पुत्राणां भर्तरि प्रेते न भजेत स्वतंत्रता ॥ (१४७)
"पित्रा भर्त्रा सुतैर्वाऽपि नेच्छेद्विरहमात्मनः । एषां हि विरहेण स्त्री हीने कुर्यादुभे कुले ॥ (१४८)
"सदा प्रहृष्टया भाव्यं गृहकार्ये च दक्षया । सुसंस्कृतोपस्करया व्यये चामुक्तहस्तया"॥ (१४९)

कात्यायनः—

" अग्निहोत्रादिशुश्रूषां बहुभार्यः सवर्णया । कारयेत्तद्बहुत्वे च ज्येष्ठया गर्हिता न चेत् ॥
" तथा वीरसुवामासामाज्ञासंपादिनी च या । दक्षा प्रियंवदा शुद्धा तामत्र विनियोजयेत् ॥
" दिनक्रमेण वा कर्म यथाज्येष्ठमशक्तितः । विभज्य सहसा कुर्युर्यथाज्ञानमशक्तितः "॥

धर्मसारे—

"यद्गृहे कलहो नास्ति पूज्यंते यद्गृहे स्थिताः । तद्गृहे वसते लक्ष्मीर्नित्यं पूर्णकलान्विता"॥

व्यासः—

"कुरूपो वा कुवृत्तो वा दुःस्वभावोऽथ वा पतिः । रोगान्वितः पिशाचो वा मद्यपः क्रोधनोऽथ वा ॥
"वृद्धो वाऽथ विदग्धो वा मूकोऽन्धो बधिरोऽपि वा । रौद्रो वाऽथ दरिद्रो वा कदर्यः कुत्सितोऽथ वा॥
"कातरः कितवो वाऽपि ललनालंपटोऽपि वा । सततं देववत्पूज्यः साध्व्या वाक्कायकर्मभिः ॥
"अहंकारं विहायार्थं कामक्रोधौ च सर्वदा । मनसो रंजनं पत्युः कार्यमन्यस्य वर्जनम् " ॥

रत्नावल्याम्—

"न पिता नात्मजो नात्मा न माता न सुहृज्जनाः । गतिर्भवति सत्स्त्रीणां पतिस्त्वेकः परा गतिः"॥

व्यासः—

" द्वारोपवेशनं नित्यं गवाक्षावेक्षणं तथा । असत्प्रलापो हास्यं च दूषणं कुलयोषिताम् ॥
" सकामं वीक्षिताऽप्यन्यैः प्रियैर्वाक्यैः प्रलोभिता । स्पृष्टा वा जनसंमर्दे न विकारमुपैति या ॥
" पुरुषं सेवते नान्यं मनोवाक्कायकर्मभिः । लोभिताऽपि परेणार्थैः सा सती लोकभूषणम् ॥
" दैन्येन प्रार्थिता वाऽपि बलेन विधृताऽपि वा । वस्त्राद्यैर्वासिता वाऽपि नैवान्यं भजते सती ॥
" वीक्षिता वीक्षते नान्यं हसिता न हसत्यपि । भाषिता भाषिते नैव सा साध्वी साधुलक्षणा ॥
" रूपयौवनयुक्ताऽपि गीतनृत्येऽपि कोविदा । स्वानुरूपं नरं दृष्ट्वा न याति विकृतिं सती ॥
" सुरूपं तरुणं रम्यं कामिनीनां च वल्लभम् । या नेच्छति परं कांतं विज्ञेया सा महासती ॥
" भुंक्ते भुक्तेऽथ या पत्यौ दुःखिते दुःखिता च या । मुदिते मुदिताऽत्यर्थं प्रोषिते मलिनांबरा ॥
" सुप्ते पश्चाच्च या शेते पूर्वमेव प्रबुध्यते । [illegible]

" भक्तिं श्वशुरयोः कुर्यात्पत्युश्चापि विशेषतः । धर्मकार्येऽनुकूलत्वमर्थकार्येषु संयमम् ॥
" प्रागल्भ्यं कामकार्येषु शुचित्वं निजविग्रहे । मंगलं संमतं पत्युः सततं प्रियभाषणम् ॥
" भाव्यं मंगलकारिण्या गृहमंडनशीलया । गृहोपस्करसंस्कारतज्ज्ञया प्रतिवासरम् ॥
" क्षेत्राद्वनाद्वा ग्रामाद्वा गृहं भर्तारमागतम् । प्रत्युत्थायाभिनंदेच्च स्वासनेनोदकेन च ॥
" प्रसन्नभांडमृष्टान्ना काले भोजनदायिनी । संयता गुप्तयाऽन्या च सुसंमृष्टनिवेशना ॥
" गुरूणां पुत्रमित्राणां बंधूनां कर्मकारिणाम् । आहूतानां च भृत्यानां दासीदासजनस्य च ॥
" अतिथ्यभ्यागतानां च भिक्षुकाणां च लिंगिनाम् । आसने भोजने दाने संमाने प्रियभाषणे ॥
" तत्तद्गुणानुसारेण प्राप्ते काले यथोचितम् । दक्षया सर्वदा भाव्यं भार्यया गृहमुख्यया ॥
"गृहव्ययाय यद् द्रव्यं दिशेत्पत्न्याः करे पतिः । निर्वर्त्य गृहकार्यं सा किंचिद्बुध्याऽवशेषयेत् ॥
" दानार्थमर्पिते द्रव्ये लोभात्किंचिन्न धारयेत् । भर्तुराज्ञां विना नैव स्वबंधुभ्यो दिशेद्धनम् ॥
" अत्यालापमसंतोषं परव्यापारसंगताम् । अतिहासातिरोषौ च क्रोधस्थानं च वर्जयेत् ॥
" यच्च भर्ता न पिबति यच्च भर्ता न खादति । यच्च भर्ता न चाश्नाति सर्वं तद्वर्जयेत्सती ॥
" तैलाभ्यंगं तथा स्नानं शरीरोद्वर्तनक्रियाम् । मार्जनं चैव दंतानामलकानां च कर्त्तनम् ॥
" भोजनं वमनं निद्रां परिधानं च वाससाम् । प्रारंभं मंडनानां च न कुर्यात्पश्यति प्रिये ॥
" आहूता या तु वै भर्त्रा स्त्री न याति त्वरान्विता । सा ध्वांक्षी जायते नूनं दशजन्मानि पंच च ॥
" कामाद्दोषान्मत्सराद्वा भर्तारं याऽवमन्यते । सा सप्तजन्मकं यावन्नारकी स्यान्न संशयः " ॥

अत्रिः—

" न व्रतेनोपवासेन धर्मेण विधिना न च । नारी स्वर्गमवाप्नोति प्राप्नोति पतिपूजनात् ॥
" जीवितेनाथ वित्तेन भर्तारं वंचयेत्तु या । क्रिमियोनिशतं गत्वा पुल्कसी जायते ततः ॥
" जपस्तपस्तीर्थसेवा प्रव्रज्या मंत्रसाधनम् । देवताराधनं चैव स्त्री शूद्रपतनानि षट् " ॥ **व्यासः—**
" हरिद्रां कुंकुमं चैव सिंदूरं कज्जलं तथा । कूर्पासकं च तांबूलं मंगल्याभरणं शुभम् ॥
" केशसंस्कारकबरीकरकण्ठविभूषणम् । भर्तुरायुष्यमिच्छंती दूषयेन्न पतिव्रता ॥
" प्रातःकाले तु या नारी दद्यादर्घ्यं विवस्वते । सप्त जन्मनि वैधव्यं सा नारी नैव पश्यति ॥
" कृत्वा मंडलकं बाह्ये तूष्णीमेवाक्षतादिभिः । पूजयेत्सततं यावत्तस्यास्तुष्यंति देवताः ॥
" यद्गृहं राजते नित्यं मंगल्यैरनुलेपनैः । तद्गृहे वसते लक्ष्मीः नित्यं पूर्णकलान्विता ॥
" न ददाति तु या नारी ज्येष्ठायै प्रत्यहं बलिम् । भोज्याद्न्नाद्यथाशक्ति सा प्रेत्य नरकं व्रजेत् ॥
" अवश्यमेव नारीभिः ज्येष्ठायै बलिकर्मणा । प्रीणनं प्रत्यहं कार्यं पुत्रपौत्रधनेप्सुभिः " ॥

वाल्मीकिः—

" न पिता नात्मजो नात्मा न माता न सखीजनः । इह प्रेत्य च नारीणां पतिरेको गतिः सदा ॥
" न कृतं न कुलं विद्यां न दत्तं नापि संग्रहम् । स्त्रीणां गृह्णाति हृदयमनित्यहृदया हि ताः ॥
" साध्वीनां तु स्थितानां हि शिले सत्ये श्रुते शमे । स्त्रीणां पवित्रं परमं पतिरेको विशिष्यते ॥
" नातंत्री वाद्यते वीणा नाचक्रो वर्तते रथः । नापतिः सुखमेधेत या स्यादपि शतात्मजा ॥
" नगरस्थो वनस्थो वा पापी वा यदि वा शुभः । यासां स्त्रीणां प्रियो भर्ता तासां लोका महोदयाः ॥
" दुःशीलः कामवृत्तो वा धनवान्यदि वाऽधनः । स्त्रीणामार्यस्वभावानां परमं दैवतं पतिः ॥
" पतिशुश्रूषणं नार्यास्तपो नान्यद्विधीयते " ॥ **व्यासः—**

"पतिव्रता तु या नारी भर्तृशुश्रूषणोत्सुका । न तस्या विद्यते पापमिह लोके परत्र च ॥
"पतिव्रता धर्मरता रुद्राण्येव न संशयः । तस्याः पराभवं कर्तुं शक्नोति न जनः क्वचित्" ॥

बोधायनः—"भर्तृहिते यतमानाः स्वर्गलोकं जयेरन्" इति । इति । अथ **गर्भिणीधर्माः**—

याज्ञवल्क्यः (आ.७९)—"षोडशर्तुनिशाः स्त्रीणां तस्मिन्युग्मासु संविशेत्" इति ।

पराशरः (४।१३–१४)—

"ऋतुस्नाता तु या नारी भर्तारं नोपसर्पति । सा मृता नरकं याति विधवा च पुनः पुनः ॥
"ऋतुस्नातां तु यो भार्यां संनिधौ नोपगच्छति । घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः" ॥ इति ।

पूर्वमेव गर्भाधानं सविस्तरमभिहितम् । **स्मृतिचंद्रिकायाम्** ( )—

"नावस्करेषूपविशेन्मुसलोलूखलादिषु । जलं च नावगाहेत शून्यागारं च वर्जयेत् ॥
"वल्मीके नाधितिष्ठेत न चोद्विग्नमना भवेत् । विलिखेन्न नखैर्भूमिं नांगारेण न भस्मना ॥
"न शयालुः सदा तिष्ठेद्व्यायामं च विवर्जयेत् । न तुषांगारभस्मास्थिकपालेषु समाविशेत् ॥
"वर्जयेत्कलहं लोके गात्रभंगं तथैव च । न मुक्तकेशी तिष्ठेत्तु नाशुचिः स्यात्कदाचन ॥
"न शयीतोत्तरशिरा न चैवाधःशिरा क्वचित् । न वस्त्रहीना नोद्विग्ना न चार्द्रचरणा सती ॥
"नामंगल्यं वदेद्वाक्यं न च हास्यादि किंचन । कुर्याच्छ्वशुरयोर्नित्यं पूजां मंगलतत्परा ॥
"तिष्ठेत्प्रसन्नवदना भर्तुः प्रियहिते रता" ॥ **स्मृतिरत्ने**—
"संध्ययोर्नैव भोक्तव्यं गर्भिण्या तु प्रयत्नतः । न स्नातव्यं न गंतव्यं वृक्षमूलेषु सर्वदा ॥
"न शयालुः सदा तिष्ठेत्खट्वाछायां विवर्जयेत् । सर्वौषधीभिः कोष्णेन वारिणा स्नानमाचरेत् ॥
"कृतरक्षा सुभूषा च वास्तुपूजनतत्परा । दानशीला तृतीया या पार्वत्या नक्तमाचरेत् ॥
"इतिव्रता भवेन्नारी विशेषेण तु गर्भिणी । यस्तु तस्या भवेत्पुत्रः स्थिरायुर्वृद्धिसंयुतः ॥
"अन्यथा गर्भपतनमवाप्नोति न संशयः" ॥ **याज्ञवल्क्यः** (आ. ७९)—
"दौहृदस्याप्रदानेन गर्भो दोषमवाप्नुयात् । वैरूप्यं मरणं वाऽपि तस्मात्कार्यं प्रियं स्त्रियाः" ॥

सुश्रुतेऽपि—"ततः प्रभृति व्यायामव्यवसायातितर्पणदिवास्वप्नरात्रिजागरणशोकभयारोहणवेगधारणकुक्कुटासनशोणितमोक्षणानि परिहरेत् । अभिलषितं दत्वा वीर्यवंतं चिरायुषं पुत्रं जनयति" इति । ततः प्रभृति गर्भग्रहणप्रभृतीत्यर्थः । तद्ग्रहणं च श्रमादिलिंगैरवगंतव्यम् । अन्यान्यपि तत्रैवोक्तानि—"सद्यो गृहीतगर्भायां श्रमोऽग्लानिपिपासासक्थिस्पंदनं पुत्रं जनयति शुक्रशोणितयोः संबंधे स्फुरणं च योन्याः" इति । **बृहस्पतिरपि**—

"सद्यो गृहीतगर्भायां श्रमः स्याद्योऽभिजायते । पिपासा च ततो ग्लानिर्योन्यां तु स्फुरणं भवेत्" ॥

काश्यपः—

"गर्भधारणमारभ्य व्यायामव्यसनानि च । तत्क्षणं च दिवा स्वप्नं रात्रौ जागरणं तथा ॥
"गजाश्वारोहणं शोकं वेगं धारणमेव च । विरेचनं नैव कुर्यात्क्षाराद्यन्नं च वर्जयेत्" ॥

गर्भोपनिषदि—"ऋतुकाले प्रयोग एकरात्रोषितं कलिलं भवति सप्तरात्रोषितं बुद्बुदं भवत्यर्धमासाभ्यंतरेण पिंडो भवति मासाभ्यंतरेण कठिनो भवति मासद्वयेन शिरः कुरुते मासत्रयेण पादप्रदेशो भवत्यथ चतुर्थे मासेऽगुलजठरकटिप्रदेशो भवति पंचमे मासे पृष्ठवंशो भवति षष्ठे मासे नासाक्षिश्रोत्राणि भवंति सप्तमे मासे जीवेन संयुक्तो भवत्यष्टमे मासे सर्वसंपूर्णो भवति पितूरेतोतिरिक्तात्पुरुषो भवति मातूरेतोतिरिक्तात्स्त्रियो भवत्युभयोर्वीर्यतुल्यत्वान्नपुंसको भवति

व्याकुलितमनसाऽन्धाः खंजाः कुब्जा वामना भवंत्यन्योन्यवायुपीडितानां शुक्रद्वैधे स्त्रियो योन्या युग्माः प्रजायंतेऽथ नवमे मासि सर्वलक्षणसंपूर्णो भवति। पूर्वजातिस्मरो भवति कृताकृतं च कर्म भवति शुभाशुभं च कर्म विन्दति ।

" नानायोनिसहस्राणि दृष्ट्वा चैव ततो मया । आहारा विविधा भुक्ताः पीताश्च विविधाः स्तनाः ॥
" जातस्यैव मृतस्यैव जन्म चैव पुनः पुनः । अहो दुःखोदधौ मग्नो न पश्यामि प्रतिक्रियाम् "॥
" यदि योन्याः प्रमुंचामि सांख्ययोगं समाश्रये । अशुभक्षयकर्तारं फलमुक्तिप्रदायिनम्॥
" यदि योन्याः प्रमुंचामि तं प्रपद्ये महेश्वरम् । अशुभक्षयकर्तारं फलशक्तिप्रदायिनम् ॥
" यदि योन्याः प्रमुंचामि भजेन्नारायणं विभुम् ॥
" यन्मया परिजनस्यार्थे कृतं कर्म शुभाशुभम् । एकाकी तेन दह्यामि गतास्ते फलभोगिनः ॥

" एवं जंतुस्त्रियोनिशतं प्राप्य योनिद्वारियंत्रेणैव पीड्यमानो महता दुःखेन जातमात्रस्तु वैष्णवेन वायुना संस्पृष्टस्तदानीं स्मरति जन्मभरेण न च कर्म शुभाशुभम् " इति ।

याज्ञवल्क्यः (प्रा. ७५)

" प्रथमे मासि संक्लेदभूताया तु विमूर्च्छितः । मासे द्वितीये बुद्बुदस्तृतीये चेंद्रियैर्युत : ॥
" आत्मा गृह्णात्यजः सर्वं तृतीये स्यंदते ततः । स्थैर्यं चतुर्थे त्वंगानां पंचमे शोणितोद्भवः ॥
" षष्ठे बलस्य वर्णस्य नखरोम्णां च संभवः । मनश्चैतन्ययुक्तोऽसौ नाडीस्नायुशिरायुतः ॥
" सप्तमे चाष्टमे चैव त्वङ्मांसस्मृतिमानपि । पुनर्धात्रीं पुनर्गर्भमोजस्तस्य प्रधावति ॥
" अष्टमे मास्यतो गर्भो जातः प्राणैर्विमुच्यते । नवमे दशमे वाऽपि प्रबलैः सूतिमारुतैः ॥
" निःसार्थनेबाण इव यंत्रछिद्रेण सत्वरः " । इति । संक्लेदभूतः द्रवभूतः । बुद्बुदमीषत्कठिनम् ।
" हृदि तिष्ठति यच्छुद्धमीषद्रक्तं सपित्तकम् । ओजः शरीरे संख्यातं तन्नाशान्नाशमृच्छति " ॥

इति लक्षितमोजः । अष्टमे मासि चंचलतया मातरं गर्भं च पुनः पुनर्व्रजंति अतस्तत्र जातो म्रियत इत्यर्थः ।

अथ विधवाधर्माः । तत्र **याज्ञवल्क्यः** (आ. ८६)—

"पितृमातृसुतभ्रातृश्वश्रूश्वशुरमातुलैः । हीना न स्याद्विना भर्त्रा गर्हणीयाऽन्यथा भवेत्"॥

भर्त्रा विना भर्तृरहिता पित्रादिरहिता न स्याद्यस्मात्तद्रहिता गर्हणीया निंद्या भवेत् ।

आश्वलायनः—

" मृते भर्तर्यपुत्रा तु बालपुत्रा च यांऽगना । बंधूनाश्रित्य सा जीवत्संयता जनकादिकान् " ॥

एतच्च ब्रह्मचर्यपक्षे । "भर्तरि प्रेते ब्रह्मचर्यं तदन्वारोहणम्" इति **विष्णुस्मरणात्** ।

व्यासः (अ. २५ सू. १५)—

" पत्यौ मृते या योषिद्वैधव्यं पालयेत्क्वचित् । सा पुनः प्राप्य भर्तारं स्वर्गभोगान्समश्नुते ॥
" विधवाकवरीबंधो भर्तृबंधाय कल्पते । शिरसो वपनं तस्मात्कार्यं विधवया तथा ॥
" एकाहारः सदा कार्यो न द्वितीयः कदाचन । त्रिरात्रं पंचरात्रं वा पक्षव्रतमथापि वा ॥
" मासोपवासं वा कुर्याच्चांद्रायणमथापि वा । कुर्यात्कृच्छ्रं पराकं वा तप्तकृच्छ्रमथापि वा ॥
" यवान्नैर्वा फलाहारैः शाकहारैः पयोव्रतैः । प्राणयात्रां प्रकुर्वीत यावत्प्राणः स्वयं व्रजेत् ॥
" पर्यंकशायिनी नारी विधवा पातयेत्पतिम् । तस्माद्भूशयनं कार्यं पतिसौख्यसमीहया ॥
" न चांगोद्वर्तनं कार्यं स्त्रिया विधवया क्वचित् । गंधद्रव्यस्य संभोगो नैव कार्यस्तथा क्वचित् ॥

" तर्पणं प्रत्यहं कार्यं भर्तुः कुशतिलोदकैः। तत्पितुस्तत्पितुश्चापि नामगोत्राभिपूर्वकम् ॥
" विष्णोस्तु पूजनं कार्यं पतिबुद्ध्या न चान्यथा। पतिमेव सदा ध्यायेद्विष्णुरूपधरं परम् ॥
" एवं चर्यापरा नित्यं विधवाऽपि शुभा मता। एवं धर्मपरा युक्ता विधवाऽपि पतिव्रता ॥

आश्वलायनः—

" जपेच्च रुद्रवत्सा तु नमेत्त्रविमथावनौ। दीपं च भर्तृचिंता स्यान्नान्यस्या वा विधीयते ॥
" जपश्च प्रणवस्तस्य वैदिकस्तु विधीयते " ॥ **पराशरः**—
" मृते भर्तरि या नारी ब्रह्मचर्ये व्यवस्थिता। सा मृता लभते स्वर्गं यथा ते ब्रह्मचारिणः " ॥
ब्रह्मचारिणः ते प्रसिद्धाः। **मनुः** (५।१५६)—
" कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः। न च नामापि गृह्णीयात्पत्यौ प्रेते परस्य तु ॥
"मृते भर्तरि साध्वी स्त्री ब्रह्मचर्ये व्यवस्थिता। स्वर्गं गच्छत्यपुत्रा ऽपि यथा ते ब्रह्मचारिणः"॥ इति।
" तांबूलोऽभर्तृकस्त्रीणां यतीनां ब्रह्मचारिणाम्। एकैकं मांसतुल्यं स्यात् मिलितं तु सुरासमम्" ॥
आपस्तंबः " यावज्जीवं प्रेतपत्न्युदकोपस्पर्शनमेकभुक्तमधःशय्या ब्रह्मचर्यं क्षारलवणमधु-मांसवर्जनं च " इति। **इति विधवाधर्माः** ॥

अथानुगमनम्। तत्र विष्णुः (२५।१४)—

" भर्तरि प्रेते ब्रह्मचर्यं तदन्वारोहणमेव वा " इति। पैतृकं वा यत्र सैषा प्रदीयते। कुलत्रयं पुनात्येषा भर्तारं याऽनुगच्छति " ॥ तत्र **पराशरः**—
"तिस्रः कोट्यर्धकोटी च यानि रोमाणि मानुषे। तावत्कालं वसेत्स्वर्गे भर्तारं याऽनुगच्छति"॥
तावत्कालं तावत्सहस्रं संवत्सरम्। तथा च **हारीतः**—
" मृते भर्तरि या नारी धर्मशीला पतिव्रता। अनुगच्छति भर्तारं शृणु तस्यास्तु यत्फलम् ॥
" तिस्रः कोट्यर्धकोटी च यानि रोमाणि मानुषे। तावंत्यब्दसहस्राणि स्वर्गलोके महीयते ॥
" मातृकं पैतृकं चैव यत्र कन्या प्रदीयते। कुलत्रयं पुनात्येषा भर्तारं याऽनुगच्छति " ॥
न केवलं स्वयमेवानुगमने स्वर्गे वसति किंतु स्वभर्तारं पापफलभोगाय नरकमार्गाभिमुख-मपि स्वकीयेन प्रबलसुकृतेनोद्धरतीत्याह **पराशरः**—
" व्यालग्राही यथा व्यालं बिलादुद्धरते बिलात्। एवं स्त्री पतिमुद्धृत्य तेनैव सह मोदते"॥

त्रिकांडी—

"अपि दुष्कृतकर्माणं समुद्धृत्य च तत्पतिम्। यावत्स्वलोमसंख्याऽस्ति तावत्कोट्ययुतानि च ॥
" भर्त्रा स्वर्गे सुखं भुंक्ते रममाणा पतिव्रता। यमदूताः पलायंते पतिमालोक्य दूरतः" ॥ इति।
तथा च **शंखांगिरसौ**—
" तिस्रः कोट्यर्धकोटी च यानि रोमाणि मानुषे। तावत्कालं वसेत्स्वर्गे भर्तारं याऽनुगच्छति ॥
" व्यालग्राही यथा व्यालं बलादुद्धरते बिलात्। तद्वदुद्धृत्य सा नारी सह तेनैव मोदते ॥
" तत्र सा भर्तृपरमा स्तूयमानाऽप्सरोगणैः। क्रीडते पतिना सार्धं यावदिंद्राश्चतुर्दश ॥
" ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नो वा भवेत्पतिः। पुनात्यविधवा नारी तमादाय मृता तु या ॥
" मृते भर्तरि या नारी समारोहेद्धुताशनम्। साऽरुंधतीसमाचारा स्वर्गलोके[1] महीयते ॥

---

१ स्वग-दढ।

"यावच्चाग्नौ मृते पत्यौ स्त्री नात्मानं प्रदाहयेत् । तावन्न मुच्यते सा हि स्त्रीशरीरात्कथंचन"॥ इति।

अंगिराः—

" साध्वीनामेव नारीणामग्निप्रपतनादृते । नान्यो धर्मो हि विज्ञेयो मृते भर्तरि कर्हिचित् ॥

" आर्त्तार्त्ते मुदिते हृष्टा प्रोषिते मलिना कृशा । मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता"॥

उपमन्युः—

" अनपत्या च या नारी ब्राह्मणी यदि वेतरा । तस्या नान्या गतिः प्रोक्ता सहानुगमनादृते"॥

अत्र विज्ञानेश्वरीये (पृ. २३ पं. २७–२८) " अयं च सर्वासां स्त्रीणामबालापत्यानामाचांडालं साधारणो धर्मः । भर्तारं याऽनुगच्छति इत्यविशेषेणोपादानात्" इति । स्मृतिरत्नेऽपि—

"धर्मोऽयं सर्वनारीणां पत्युश्चित्यधिरोहणम् । अन्यत्र गर्भिणीबालाऽपत्ययुक्ताभ्य एव च"॥ इति ।

और्वः—

" बालापत्याश्च गर्भिण्यो ह्यदृष्टार्त्तव एव च । रजस्वला राजसुता नारोहंति चितां शुभे" ॥

स्मृत्यंतरे—

"बालापत्या तु या नारी भर्त्रा सह न संव्रजेत् । रजस्वला तु गच्छेत्तु गत्रिकक्षे तु गर्भिणी"॥ अन्यत्र तु—

" सार्त्तवा सूतिका वाऽपि भर्त्रानुगमनोत्सुका । सद्यः शुद्धिमवाप्नोति भर्तुः पापापहारिणी ॥

" बालापत्या तु या नारी सूतिका वा रजस्वला । सर्वासामपि च स्त्रीणामेष साधारणो विधिः॥"

इति गर्भिण्या निषेध एव । बालापत्यादीनां विकल्प इत्याहुः । पृथक्चितिविषयमित्यन्ये । तत् कपोताख्यानव्याजेन दर्शयति व्यासः

" पतिव्रता संप्रदीप्तं प्रविवेश हुताशनम् । ततश्चित्रांगधरं भर्तारं साऽन्वपद्यत" ॥

"ततः स्वर्गं गतः पक्षी भार्यया सह संगतः । कर्मणा पूजितस्तत्र रमे च सह भार्यया"॥ इति ।

ननु ब्राह्मण्या अनुगमननिषेधोऽपि स्मर्यते । तत्र पैठीनसिः—

" मृतानुगमनं नास्ति ब्राह्मण्या ब्रह्मशासनात् । इतरेषां तु वर्णानां स्त्रीधर्मोऽयं परः स्मृतः" ॥

विराट्—

" अनुवर्तेत जीवंतं नानुयायान्मृतं पतिम् । जीवद्भर्तुर्हितं कुर्यान्मरणादात्मघातकी"॥

अंगिराः—

" या स्त्री ब्राह्मणजातीया मृतं पतिमनुव्रजेत् । सा स्वर्गमात्मघातेन नात्मानं न पतिं नयेत्" ॥

व्याघ्रपात्—

" न म्रियेत समं भर्त्रा ब्राह्मणी शोकमोहिता । प्रव्रज्यागतिमाप्नोति मरणादात्मघातकी"॥ इति ॥

एवमादीनि वचनानि पृथक्चित्यधिरोहणविषयाणि इति विज्ञानेश्वरीये (पृ. २४ पं. १८–२०) माधवीयस्मृतिरत्नादिषु व्यवस्थापितानि । अत एवोशनाः—

"पृथक्चितिं समारुह्य न विप्रां गंतुमर्हति । अन्यासां चैव नारीणां स्त्रीधर्मोऽयं परः स्मृतः"॥ इति ।

यत्त्वपरार्के—

" देशांतरमृते पत्यौ साध्वी तत्पादुकाद्वयम् । निधायोरसि सश्रद्धा प्रविशेज्जातवेदसम् ॥

" दयितं याऽन्यदेशस्थं मृतं श्रुत्वा पतिव्रता । समारोहति दीप्तेऽग्नौ तस्याः शक्तिं निबोधत ॥

" यदि प्रविष्टो नरकं बद्धः पाशैः सुदारुणैः । संप्राप्तो यातनास्थानं गृहीतो यमकिंकरैः ।

" तिष्ठते विवशो दीनो वेष्ट्यमानः स्वकर्मभिः ॥

" व्यालग्राही यथा सर्पं बिलादुद्धरते बलात् । एवमुद्धृत्य भर्तारं तेनैव सह मोदते ॥ (?)

" व्यालग्राही यथा सर्पं बिलादुद्गृह्णात्यशंकितः । सा तं भर्तारमादाय दिवं याति सती च या ॥
"सा भर्तृपरमा स्वर्गे स्तूयमानाऽप्सरोगणैः । क्रीडते पतिना सार्धं यावदिंद्राश्चतुर्दश" ॥
एतत्पृथक्चितिमरणं ब्राह्मणव्यतिरिक्तविषयम् । यत्तु " तस्मादुह न पुरायुषः स्वर्गकामी प्रेयादिति " श्रुतिविरोधादनुगमनमयुक्तमिति तन्न " न स्वर्गकाम्यायुषः प्राङ् न प्रेयादिति " स्वर्गफलोद्देशेनायुषः प्रागायुर्व्ययो न कर्त्तव्यः मोक्षार्थिना । यस्मादायुषः शेषे सति नित्यनैमित्तिककर्मानुष्ठानेन क्षपितांतःकरणकलंकस्य श्रवणमननिदिध्यासनसंपत्तौ सत्यामात्मज्ञानेन नित्यनिरतिशयानंदब्रह्मप्राप्तिलक्षणमोक्षसंभवस्तस्मादनित्याल्पस्वर्गार्थमायुर्व्ययो न कर्त्तव्यमित्यर्थः । अतश्च मोक्षमनिच्छंत्या स्वर्गार्थिन्या अनुगमनं युक्तं इतीतरकाम्यानुष्ठानवदिति " **विज्ञानेश्वरः** (पृ. २४) । इदं चानुमरणं पतिव्रतयाऽनुष्ठितमुक्तरीत्या दंपत्योरुभयोः श्रेयो हेतुः । पापीयस्यानुष्ठितं चेत्पापक्षयहेतुर्भवति । तथा च **व्यासशातातपौ**—
" अवमत्य च या पूर्वं पतिं दुष्टेन चेतसा । वर्तते याश्च सततं भर्तॄणां प्रतिकूलतः ॥
" भर्त्रानुमरणं काले याः कुर्वंति तथाविधाः । कामात्क्रोधाद्भयान्मोहात्सर्वाः पूता भवंत्युत ॥
" आदिप्रभृति या साध्वी भर्तुः प्रियपरायणा । ऊर्ध्वं गच्छति सा तत्र भर्त्रानुमरणं गता"॥ इति ।
पुराणसारे— ब्राह्मणीं प्रति नारदः—

" पापं यदि कृतं भद्रे परपूरुषसेवनात् । तथाऽन्यस्यापि पापस्य नाशो वन्हिप्रवेशनात् ॥
" पतिव्रता धर्मपत्नी भर्तृशुश्रूषणे रता । याऽनुगच्छति भर्त्रा सा स्वर्गं यात उभौ ध्रुवम् " ॥ इति ।
गूढव्यभिचारिणीं **प्रत्याह याज्ञवल्क्यः** (आ. ७०)—
" हृताधिकारां मलिनां पिंडमात्रोपजीविनीम् । परिभूतामधःशय्यां वासयेद्व्यभिचारिणीम् " ॥
पिंडमात्रजीविनीं प्राणयात्रामात्रभोजनमधःशय्यामास्तरणादिविहीनस्थलशायिनीं परिभूतां धिक्कारभर्त्सनकुत्सना वेश्मन्येव वासयेत् । **मनुः** (५।१६०)—
" अपत्यलोभाद्या तु स्त्री भर्तारमतिलंघयेत् । सेह निंदामवाप्नोति परलोकाद्धिहीयते ॥
"व्यभिचारात्तु भर्तुः स्त्री लोके प्राप्नोति निंद्यताम् । सृगालयोनिं प्राप्नोति प परोगैश्च पीड्यते॥(१६३)
" पतिं हित्वाऽपकृष्टं स्वमुत्कृष्टं योपसेवते । निंद्यैव लोके भवति परपूर्वेति चोच्यते ॥ (१६२)
"नान्योत्पन्ना प्रजा स्त्रीह नान्यस्यान्यपरिग्रहः। नाद्वितीयश्च साध्वीनां क्वचिद्भर्तोपदिश्यते"॥(१६१)
श्रुतिरपि— "तस्मान्नैका द्वौ पती विंदते " इति । **याज्ञवल्क्यः** (आ. ७२)—

" व्यभिचारादृतौ शुद्धिर्गर्भे त्यागो विधीयते । गर्भभर्तृवधादौ च तथा महति पातके " ॥
ऋतावृतौ शुद्धिरित्येतन्मानसव्यभिचाराभिप्रायम् । " रजसा स्त्री मनोदुष्टा " इत्युक्तत्वात् 'गर्भे त्याग ' इति शूद्रकृते गर्भे त्यागः ।

" ब्राह्मणक्षत्रियविशां भार्याः शूद्रेण संगताः । अप्रजाता विशुध्यंति प्रायश्चित्तेन नेतराः" ॥
इति **मनुस्मरणात्** । तथा गर्भवधे भर्तृवधे महापातके च आदिग्रहणाच्छिष्यादिगमने च त्यागः ।

" चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या । पतिघ्नीं च विशेषेण जुंगितोपगता च या॥" इति ।
जुंगितः प्रतिलोमजः । प्रतिलोमसांकर्ये त्यागश्च उपभोगधर्मकार्ययोः । न तु सर्वथा तस्या 'विप्रदुष्टां स्त्रियं भर्ता निरुंध्यादेकवेश्मनि " इति नियमात् । **उशनाः**— " व्यभिचारिणीं भार्यां कुचेलपिंडपरिभूतां निवृत्ताधिकारां चांद्रायणप्रायश्चित्तं प्राजापत्यं चाचारयेत् " इति ।

याज्ञवल्क्यः—" यत्पुंसां परदारेषु तच्चैनां चारयेद् व्रतम् " इति । **भृगुः**—
" अशीतिर्यस्य वर्षाणि बालो वाऽप्यूनषोडशः। प्रायश्चित्तार्धमर्हति स्त्रियो व्याधित एव च॥ " इति।
मनुः (११।१८९)— " कृतनिर्णेजनां चैतां न जुगुप्सेत कर्हिचित् ।
"सोमः शौचं ददौ स्त्रीणां गंधर्वाश्च शुभां गिरम्।" "पावकः सर्वमेध्यत्वं मेध्या वै योषितो ह्यतः॥" इति।
कृतनिर्णेजनां चैतां कृतप्रायश्चित्तां परिणयनात्पूर्वं सोमगंधर्वाग्नयः स्त्रियो यथाक्रमं तासां शौचमधुरवचनसर्वमेध्यत्वादीनि दत्तवंतस्तस्मात्स्त्रियः सर्वत्र स्पर्शनालिंगनादिषु मेध्यकरा इत्यर्थः। यस्त्वंतरेणैव निमित्तं दारान्परित्यजति या च भर्तारं परित्यजति। तयोर्निष्कृतिमाहापस्तंबः (१।२८।१९-२)— " दारव्यतिक्रमी खराजिनं बहिर्लोम परिधाय " दारव्यतिक्रमिणे भिक्षाम् इति सप्तागाराणि चरेत्सा वृत्तिः षण्मासान्। स्त्रियास्तु भर्तृव्यतिक्रमे कृच्छ्रद्वादशरात्राभ्यासस्तावंतं कालम् इति । **इति स्त्रीधर्मः** ॥

गृहस्थधर्मानाह दक्षः— (३।१-१९)

" विधा नव गृहस्थस्य ईषद्दानानि वै नव । नव कर्माणि तस्यैव विकर्माणि तथा नव ॥
" प्रच्छन्नानि नवान्यानि प्रकाशानि पुनर्नव । सफलानि नवान्यानि निष्फलानि तथा नव ॥
" अदेयानि नवान्यानि वस्तुजातानि सर्वदा । नवका नवनिर्दिष्टा गृहस्थोन्नतिकारकाः ॥
" विधावस्तूनि वक्ष्यामि विशिष्टे गृहमागते । मनश्चक्षुर्मुखं वाक्यं सौम्यं दद्याच्चतुष्टयम् ॥
" अभ्युत्थानमिहागच्छ पूर्ववादः प्रियंवदः । उपासनमनुव्रज्या कार्याण्येतानि यत्नतः ॥
" ईषद्दानानि चान्यानि भूम्युदकं तृणानि च। पादशौचं तथा स्नानमासनं शयनं तथा॥
" किंचिद्देयं यथाशक्त्या नास्यानश्नन्गृहे वसेत् । सजलं चार्थिने देयमेतान्यपि सदा गृहे॥
" संध्या स्नानं जपो होमः स्वाध्यायो देवतार्चनम्। वैश्वदेवे क्षणातिथ्यमुद्धृत्यापि स्वशक्तितः॥
" पितृदेवमनुष्याणां दीनानाथतपस्विनाम् । गुरुमातृपितॄणां च संविभागो यथार्थतः ॥
" एतानि नव कर्माणि विकर्माणि तथा पुनः । अनृतं परदाराश्च तथा भक्ष्यस्य भक्षणम्॥
" अगम्यागमनापेयपानं स्तेयं च हिंसनम्। अश्रौतकर्माचरणं मैत्रधर्मबहिष्कृतम् ॥
" नवैतानि विकर्माणि तानि सर्वाणि वर्जयेत् ॥
" पैशून्यमनृतं मायां कामं क्रोधं तथाऽप्रियम् । द्वेषं संगं परद्रोहं विकर्माणि विवर्जयेत्॥
" नृत्यं गीतं कृषिः-सेवा वाणिज्यं लवणं क्रयः । मृतकर्मायुधीयं च न प्रशस्तानि कर्मसु॥
" आयुर्वित्तं गृहच्छिद्रं मंत्रमैथुनभेषजम्। आयं दानावमानं च नव गोप्यानि सर्वदा ॥
" प्रायोग्यमृणशुद्धिश्च दायभागश्च विक्रयः। कन्यादानं वृषोत्सर्गो रहः पापमकुत्सनम् ॥
" मातापित्रोर्गुरोर्मित्रे विनीते चोपकारिणि । दीनानाथविशिष्टेभ्यो दत्तं तु सफलं भवेत् ॥
" धूर्ते बंदिनि मल्ले च कुवैद्ये कितवे शठे । चाटुचारणचोरेभ्यो दत्तं भवति निष्फलम् ॥
" सामान्यं याचितं न्यासमाधिर्दाराश्च तद्धनम्। भयदानं च निक्षेपः सर्वस्वं चान्वये सति॥
" आपत्स्वपि न देयानि नव वस्तूनि सर्वदा। यो ददाति स मूढात्मा प्रायश्चित्तीयते द्विजः ॥
" नवकस्य च वेत्तारमनुष्ठानः परं द्विजम् । इह लोके परत्रापि श्रीश्चैनं न विमुंचति " ॥

अथ गार्हस्थ्यप्रशंसा ।

तत्र **मनुः** (६।८९)—

१ क्ष–सभ्यतानि नवैव च । २ सुधा इति मुद्रितपाठः । ३ क्ष–ध्ययानि । ४ क्ष–दुर्धनम् । ५ क्ष–परम् ।

" सर्वेषामेव चैतेषां वेदश्रुतिविधानतः । गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान्बिभर्ति हि " ॥ वेदश्रुतिविधानतः वेदश्रुत्या प्रत्यक्षेण विधानतः । वैदिकानामाधानादीनां कर्मणां गृहस्थमधिकृत्य विधानस्य प्रत्यक्षश्रुतिमूलत्वादित्यर्थः । **स एव** (३।९०)—

" यथा नदीनदाः सर्वे सागरे यांति संस्थितिम् । तथैवाश्रमिणः सर्वे गृहस्थे यांति संस्थितिम् ॥

" संन्यस्य सर्वकर्माणि कर्मदोषानपानुदन् । नियतो वेदमभ्यस्यन्पुत्रैश्वर्ये सुखं वसेत् ॥ (९५)

" पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते तु सः । तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवा ॥

" एवं संन्यस्य कर्माणि स्वकार्ये परमोऽस्पृहः । संन्यासेनापहत्यैनः प्राप्नोति परमां गतिम् "॥(९६)

अत्र संन्यासः काम्यकर्मत्यागः । तथा चोक्तं **भगवद्गीतासु** (१८।२)—

"काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः । नियतस्य तु संन्यासः कर्मणो नोपपद्यते॥(१८।७)

" यज्ञो दानं तपश्चैव न त्याज्यं कार्यमेव तत् । यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥ (१८।५)

"एतान्यपि तु कर्माणि संगं त्यक्त्वा फलानि च । कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ॥ (६)

"ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः । लिप्यते न स पापेन पद्मपत्रमिवांभसा ॥ (५।१०)

"कायेन मनसा बुध्या केवलैरिंद्रियैरपि । योगिनः कर्म कुर्वंति संगं त्यक्त्वाऽऽत्मशुद्धये ॥ (५।११)

"युक्तः कर्मफलं त्यक्त्वा शांतिमाप्नोति नैष्ठिकीम् । अयुक्तः कामकारेण फले सक्तो निबध्यते "॥इति। **दक्षः** (५।१२)--

" गृहस्थो हि क्रियायुक्तो न गृहेण गृही भवेत् । न चापि पुत्रदाराद्यैः स्वकर्मपरिवर्जितः ॥

" देवैश्चैव मनुष्यैश्च तिर्यग्भिश्चोपजीव्यते । गृहस्थः प्रत्यहं यस्मात्तस्माच्छ्रेयान्गृहाश्रमी ॥

" यथा मातरमाश्रित्य सर्वे जीवंति जंतवः । तथा गृहस्थमाश्रित्य सर्वे जीवंति भिक्षवः ॥

" चतुर्णामाश्रमाणां तु गृहस्थो योनिरुच्यते । सीदमानेन तेनेह सीदंत्यन्येऽपि ते त्रयः ॥

" मूलप्राणो भवेत्स्कंधः स्कंधाच्छाखाः सपल्लवाः । मूलेनैवं विनष्टेन सर्वमेतद्विनश्यति ॥

"तस्मात्सर्वप्रयत्नेन रक्षणीयो गृहाश्रमी " ॥ राज्ञेति शेषः

" राजा चान्यैस्त्रिभिः पूज्यो रक्षणीयश्च सर्वदा ।

" दया लज्जा क्षमा श्रद्धा प्रज्ञा त्यागः कृतज्ञता । एते यस्य गुणाः संति गृहस्थो मुख्य उच्यते " ॥

व्यासः —

" नित्यं स्वाध्यायशीलः स्यान्नित्यं यज्ञोपवीतवान् । सत्यवादी जितक्रोधो ब्रह्मभूयाय कल्पते ॥

" संध्यास्नानरतो नित्यं ब्रह्मयज्ञपरायणः । अनसूयुर्मृदुर्दांतो गृहस्थः प्रत्यवर्धते ॥

" वीतरागभयक्रोधो लोभमोहविवर्जितः । सावित्रीजप्यनिरतः श्राद्धकृन्मुच्यते गृही ॥

" मातापित्रोर्हिते युक्तो गोब्राह्मणहिते रतः । यज्वा च देवभक्तश्च ब्रह्मलोके महीयते ॥

" त्रिवर्गसेवी सततं देवतानां च पूजनम् । कुर्यादहरहर्नित्यं नमस्येत्सततं सुरान् ॥

" विभागशीलः सततं क्षमायुक्तो दयालुकः । गृहस्थस्तु समाख्यातो न गृहेण गृही भवेत् ॥

" यथाशक्ति चरेत्कर्म निंदितानि च वर्जयेत् । विधूय मोहकलिलं लब्ध्वा योगमनुत्तमम् ॥

" गृहस्थो मुच्यते बंधान्नात्र कार्या विचारणा " । इति । **पराशरः**—

" निवापेन पितॄनर्चन्यज्ञैर्देवांस्तथातिथीन् । अन्नैर्मुनींश्च स्वाध्यायैरपत्येन प्रजापतिम् ॥

" बलिकर्मणा[3] च भूतानि वात्सल्येनाखिलं जगत् । प्राप्नोति लोकान्पुरुषो निजकर्मसमार्जितान् ॥

" भिक्षाभुजस्तु ये केचित्परिव्राड्ब्रह्मचारिणः । तेऽप्यत्रैव प्रतिष्ठंते गार्हस्थ्यं तेन वै परम् ॥

---

१ क—नच । २ क—अन्यै । ३ खग—ना चैव ।

"यस्तु सम्यक्करोत्येतं गृहस्थः परमं विधिम्। स्वकर्मबंधमुक्तोऽसौ लोकानाप्नोत्यनुत्तमान्"॥इति।

याज्ञवल्क्यः (प्रा. १९०–१९३)—

" वेदानुवचनं यज्ञो ब्रह्मचर्यं तपो दमः । श्रद्धोपवासस्वातंत्र्यमात्मनो ज्ञानहेतवः ॥
" स ह्याश्रमैर्विजिज्ञास्यः समस्तैरेवमेव तु । द्रष्टव्यस्त्वथ मंतव्यः श्रोतव्यश्च द्विजातिभिः ॥
" न एवमेनं विंदंति ये चारण्यकमाश्रिताः । उपासते द्विजाः सत्यं श्रद्धया परया युताः ॥
" क्रमात्ते संभवंत्यर्चिरहः शुक्लं तथोत्तरम् । अयनं देवलोकं च सवितारं सवैद्युतम् ॥
" ततस्तान् पुरुषोऽभ्येत्य मानसो ब्रह्मलौकिकान् । करोति पुनरावृत्तिस्तेषामिह न विद्यते ॥
"यज्ञेन तपसा दानैर्ये हि स्वर्गजितो नराः । धूमं निशां कृष्णपक्षं दक्षिणायनमेव च ॥ (१९५)
" पितृलोकं चंद्रमसं वायुं वृष्टिं जलं महीम् । क्रमात्ते संभवंतीह पुनरेव व्रजंति च ॥ (१९६)
"न्यायागतधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः।श्राद्धकृत्सत्यवादी च गृहस्थोऽपि विमुच्यते॥(२०५)"

इति । सर्वेषामाश्रमिणामात्मसाक्षात्कारे सति तत्प्राप्तिरूपासकानामार्चिरादिगमनद्वारा तत्प्राप्तिः । काम्यकर्मानुष्ठायिनां तु धूमादिमार्गेण स्वर्गावाप्तिः । कर्मक्षये पुनरावृत्तिः । न केवलं परिव्राज एव मुक्तिः किंतु कर्मिणस्तत्त्वज्ञाननिष्ठस्य गृहस्थस्यापीत्यर्थः । **श्रूयते च**–" ब्रह्मवेद ब्रह्मैव भवति तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धातप इत्युपासते तेऽर्चिषमभिसंभवंत्यर्चिषो हरेत आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षडुदङ्ङेति मासास्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चंद्रमसं चंद्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयत्येष देवयानः पंथा इत्यथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवंति धूमाद्रात्रीं रात्रेरपरपक्षमपरपक्षाद्यान् षड्दक्षिणैति मासांस्तान्नैते संवत्सरमभिप्राप्नुवंति मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चंद्रमसमेष सोमो राजा तद्देवानामन्नं तद्देवा भक्षयंति तस्मिन्यावत्संपातमुषित्वाऽथैतमेवाध्वानं पुनर्निवर्तंते यथैतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्रं भवत्यभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते इतो वै खलु तन्निष्प्रपतनं[1] यो यो ह्यन्नमत्ति यो यो रेतः सिंचति तद्भूय एव भवति तद्य इह रमणीयचरणाभ्याशो ह यत्ते रमणीयां योनिमापद्येरन्ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वाऽथ य इह कपूयचरणाभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चण्डालयोनिं वेति । उपासकाः क्रमादग्न्याद्यभिमानिदेवतास्थानेषु मुक्तिमार्गभूतेषु विश्रम्य तैः प्रस्थापिताः परं पदं प्राप्नुवंति" । आर्चिर्वह्निर्विद्युत्तेजः । ये पुनर्विहितैर्यज्ञादिभिः स्वर्गफलभोक्तारः क्रमाद्धूमादिचंद्रपर्यंतपदार्थाभिमानिनीर्देवताः प्राप्य पुनरेवाकाशादिद्वारेण शुक्रत्वमवाप्य संसारिणो योनिं व्रजंतीत्यर्थः । **मनुः** (२।९)—

"श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन्हि मानवः । इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमां गतिम्" ॥ इति ।

भगवानपि—

"वर्णाश्रमविधिं कृत्स्नं कुर्वाणो मत्परायणः । तेनैव जन्मना ज्ञानं लब्ध्वा याति शिवं पदम्"॥इति।

बोधायनः (२।२।१)–" नित्योदकी नित्ययज्ञोपवीती नित्यस्वाध्यायी वृषलान्नवर्जी ॥
" ऋतौ च गच्छन्विधिवच्च जुह्वन्न ब्राह्मणश्च्यवते ब्रह्मलोकात् ॥

"आयुषा तपसा युक्तः स्वाध्यायेज्यापरायणः।प्रजामुत्पादयन्युक्तः स्वे स्वे वर्णे जितेंद्रियः॥(२।९।३)

१ क्ष–दुर्निष्प्रपतनं ।

"स्वाध्यायेन ऋषीन् पूज्या सोमेन च पुरंदरम् । प्रजया च पितॄन्पूर्वाननृणो दिवि मोदते ॥ (२।९।५)
"पुत्रेण लोकान्जयति पौत्रेणानंत्यमश्नुते । अथ पुत्रस्य पौत्रेण नाकमेवाधिरोहयेत्"॥इति । (२।९।६)
विज्ञायते च (२।९।७-११)- "जायमनो वै ब्राह्मणः त्रिभिः ऋणवा जायते पितृभ्य' इत्येव-मृणसंयोगवेदो दर्शयति । बंधमृणमोक्षं च प्रजायां चायत्तं पितॄणां चानुकर्षणं प्रजायां दर्शयति । अनुत्सन्नः प्रजावान्भवति यावदेनं प्रजासुगृह्णीते तावदेवाक्षय्यान् लोकाञ्जनयति सत्पुत्रमुत्पाद्य आत्मानं तारयति सप्तावरान् सप्तपूर्वान् षडन्यानात् सप्तमान् सत्पुत्रमधिगच्छानस्तारयत्येनसः भयात् तस्मात्प्रजासंतानमुत्पाद्य फलमवाप्नोति तस्माद्यत्नेनान्प्रजामुत्पादयेदात्मना फललाभाय तस्मात्पुत्रं चोत्पाद्यात्मानमेवोत्पादयेत्" इति ॥
विज्ञायते-"आत्मा वै पुत्र नामासीत्येवं द्वितीय आत्मा जीवता द्रष्टव्यो यः पुत्रमुत्पादयति" इति॥
बौधायनः (२।३।२९)-" ऐकाश्रम्यं त्वाचार्या अप्रजनत्वादितरेषाम्" इति ।

गौतमोऽपि (३।३)-" तेषां गृहस्थो यो निरप्रजनत्वादितरेषाम्" इति । "ऐकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानाद्गार्हस्थ्यस्येतिच" (४।३५) । तेषां चतुर्णामाश्रमाणां गृहस्थो योनिरुत्पत्तिस्थानम् गृहस्थेनैवोत्पादिताश्चतुर्भिराश्रमैरधिक्रियंते नेतरैस्तेषामप्रजनत्वात् । शास्त्रेण प्रजोत्पादनस्य निषिद्धत्वादतस्तैरतिक्रांतनिषेधैरुत्पादिता अपि आश्रमेष्वनाधिकारिण-श्चंडालाः प्रत्यवसिताः परिव्राजकतापसास्तेषां जातापत्यानि चंडालैः सह वासयेत् इति शातातपस्मरणात् । ऐकाश्रममिति सर्वेषु वेदेषु धर्मशास्त्रेषु पुराणेष्वितिहासेषु गृहस्था एवाग्नि-होत्रिणः प्राचुर्येण विधीयन्ते स्तूयंते च । ततो गार्हस्थ्यस्य प्रत्यक्षविधानात्स एवैक आश्रमः । इतरे तु तत्राशक्तानां विधीयंत इति बहव आचार्या मन्यंते । तथा च गीता (३।२०)

" कर्मणैव हि संसिद्धिमास्थिता जनकादयः " इति ।

आपस्तंबोऽपि (२।९।२३।१०-१२;२।९।२४।१-८)- "त्रैविद्यवृद्धानां तु वेदाः प्रमाणमिति निष्ठा । तत्र यानि श्रूयंते व्रीहियवपश्वाज्यपयःकपालपत्नीसंबंधान्युच्चैर्नीचैः कार्यमिति तैर्विरुद्ध आचारोऽप्रमाणमिति मन्यंते । यत्तु स्मशानमुच्यते नानाकर्मणामेषोऽन्ते पुरुषसंस्कारो विधीयते । ततः परमनन्त्यं फलं स्वर्गशब्दः श्रूयते । अथाप्यस्य प्रजातिममृतमाम्नाय आह । प्रजामनु प्रजायसे तदु ते मर्त्यामृतामिति । अथापि स एवायं विरूढः पृथक्प्रत्यक्षेणोपलभ्यते दृश्यते-ऽपि च सारूप्यं देहत्वमेवान्यत् । शिष्टेषु कर्मसु वर्तमानाः पूर्वेषां सांपरायेणाकीर्तिं स्वर्गं च वर्धयंत्येवमवरोवरः परेषामा भूतसंप्लवात्ते स्वर्गजितः पुनः सर्गे बीजार्था भवंतीति भविष्यत्पुराणे-" अथापि प्रजापतेर्वचनम् त्रयीं विद्यां ब्रह्मचर्यं प्रजातिं श्रद्धां तपो यज्ञमनुप्रदानम् । एतानि कुर्वते तैरित्सह स्मो रजो भूत्वा ध्वंसतेऽन्यत् प्रशंसन्निति" ।

अयमर्थः । त्र्यवयवा विद्या त्रयो वेदाः । तान्येव पाठतश्चार्थतश्च विंदति ते त्रैविद्यास्ते पक्वज्ञानास्त्रैविद्यवृद्धास्तेषां वेदा एव प्रमाणमतींद्रियेऽर्थ इति निष्ठा निर्णयः । यथाह भगवान् जैमिनिः-(१।१) "चोदनालक्षणोऽर्थो धर्मः" इति । ततश्च तत्र वेदेषु यानि कर्माणि श्रूयंते व्रीह्यादिसंबंधान्युच्चैर्चर्चा क्रियते उपांशुयजुषेत्येवंप्रकाराणि तैर्विरुद्ध आचारः प्रमाणं न भवतीति ते[२] मन्यंते । एतदुक्तं भवति । सर्वेषु वेदेषु सर्वासु शाखासु चाग्निहोत्रादीनि कर्माण्येव तात्पर्यतो विधीयंते । अतो गार्हस्थ्यमेव श्रेष्ठं यदि वेदाः प्रमाणमिति । यत्तु गृहस्थानां श्मशानं

१ क्ष-दामत्वा । २ क्ष-केचित्तु ।

श्रूयते'श्मशानानि भेजिर' इति स एष नानाकर्मणामग्निहोत्रादीनामंते पितृमेधाख्यपुरुषसंस्कारो विधीयते। न तु पिशाचा भूत्वा श्मशानमेव सेवंत इति। कुत इत्यत आह ततः परम् इति। श्मशानकर्मणोऽनंतरमपरिमितं स्वर्गशब्दवाच्यं फलं श्रूयते 'स एष यज्ञायुधी यजमानोंऽजसा स्वर्गं लोकमेति'। अथापि अपि चास्य गृहस्थस्य प्रजातिप्रजासंतानममृतममरणमाम्नायो वेद आह 'प्रजामनुप्रजायस' इति। हे मर्त्य मरणधर्मन्प्रजां जायमानामनु त्वं प्रजायसे प्रजारूपेण जायते तदेव ते अमृतममरणमिति न त्वं म्रियसे यतस्त्वं प्रजारूपेण वर्तसे। उपपन्नं चैतदित्याह 'अथापि स एवायम्' इति। अपि च स एवायं पृथग्विरूढः प्रत्यक्षेणोपलभ्यते। स एव द्विधा भूत इति लक्ष्यते। दृश्यते हि सारूप्यं च द्वयोर्देहमात्रं तु भिन्नदेहत्वमिति। स्वार्थिकस्त्वप्रत्ययः। ते पुत्राः शिष्टेषु चोदितेषु कर्मस्ववस्थिताः पूर्वेषां पितृपितामहादीनां सांपरायेण परलोकेन संबद्धानां कीर्तिं स्वर्गं च वर्धयंति। एवमवरोवरः परेषां कीर्तिं स्वर्गं च वर्धयति। भूतसंप्लवो महाभूतप्रलयः। अतस्मात्ते पुत्रिणः स्वर्गजितो भवंति। प्रलयानंतरः सर्गः पुनः सर्गस्तत्र संसारबीजार्थाः प्रजा भवंतीति भविष्यत्पुराणे पठ्यते। अथापि अपि च गार्हस्थ्यमेव वरिष्ठमित्यत्र प्रजापतेर्वाक्यमपि भवति। त्रयीं विद्यां वेदानामध्ययनं ब्रह्मचर्यमनिषिद्धकाले स्त्रीसंगमनं प्रजाति प्रजोत्पादनं श्रद्धामास्तिक्यं तप उपवासादि यज्ञमग्निहोत्रादीनि सोमयागांतानि कर्माण्यनुप्रदानमंतर्वेदिदानमेतानि ये कुर्वते तैरित्सह स्मः। त एवास्माकं सहायाः अन्यदाश्रमांतरं प्रशंसन्पुरुषो रजः पांसुर्भूत्वा ध्वंसते नश्यतीति यथैवैते हि शिष्टेषु कर्मसु वर्तमानाः पुत्राः पूर्वेषां कीर्तिं स्वर्गं च वर्धयंति तथा प्रतिषिद्धेषु वर्तमाना अकीर्तिनरकं च वर्धयेथ।

तत्रापि स एव (२।२४।९–)–"तत्र ये पापकृतस्त एव ध्वंसंति यथा पर्णं वनस्पतेर्न परान्हिंसंति। नास्यास्मिन्लोके कर्मभिः संबद्धो विद्यते। तथा परस्मिन्कर्मफलैस्तदेतेन वेदितव्यम्। प्रजापतेर्ऋषीणामिति सर्गोऽयम्। तत्र ये पुण्यकृतस्तेषां प्रकृतयः परा ज्वलन्त्य उपलभ्यंते स्यात्तु कर्मावयवेन तपसा वा कश्चित्सशरीरोऽतवंतं लोकं जयति संकल्पसिद्धिश्च स्यात् न तु तज्ज्यैष्ठ्यमाश्रमाणाम्" इति।

"तत्र प्रजासंताने ये पापस्य कर्तारस्त एव ध्वंसंति न परान्पित्रादीन्हिंसंति यथा पर्णं वनस्पतेः कीटादिभिर्दूषितं तदेव पतति न वनस्पतिं शाखां वा पातयति। तद्वदस्य पित्रादेः पूर्वपुरुषस्यास्मिन्लोके पुत्रकृतैः कर्मभिः संबंधो न विद्यते। यथा पुत्रकृतेषु कर्मसु पित्रादेः कर्तृत्वं नास्ति तथा परस्मिन्लोके कर्मफलैरपि संबंधो नास्तीत्यर्थः। तत्पापकृत एव ध्वंसन्तीत्येतदर्थरूपमेतेन वक्ष्यमाणहेतुना वेदितव्यम्। प्रजापतेर्हिरण्यगर्भस्य ऋषीणां च मरीच्यादीनामयं सर्गः देवतादिस्तिर्यगतस्ते चाव्यस्ता एव स्वे स्वे पदे वर्तंते। अत्रोदाहरणमाह। तत्र ये पुण्यकृतो वसिष्ठादयस्तेषां प्रकृतयः शरीराणि परा उत्कृष्टा ज्वलंत उपलभ्यंते दिवि यथा सप्तर्षिमंडलम्। श्रूयते च "सुकृतां वा एतानि ज्योतिंषि यन्नक्षत्राणि" इति। इदं प्रमाणं न पुत्राणां ध्वंसे पूर्वेषां ध्वंस इति कर्मावयवेन पुण्यकर्मणामेकदेशेन भुक्तशेषेण तपसा वा तीव्रेण कश्चिदाश्रमांतरवर्ती सह शरीरेणांतवंतं लोकं जयतीति यत्तत्स्यात्संभवेदपि संकल्पादेव सिद्धिश्च स्यान्न तत्राश्रमांतरस्य ज्यैष्ठ्यं कारणमित्यर्थः। अनेन गार्हस्थ्यप्रशंसा कृतेति द्रष्टव्यम्। यतः स एवाह " [illegible] " —

तेष्वाश्रमेषु सर्वेषु यथाशास्त्रमव्यग्रः समाहितमना वर्तमानः क्षेममभयं पदं गच्छतीत्यर्थः ॥

वसिष्ठः—

" गृहस्थ एव यजते गृहस्थस्तप्यते तपः । चतुर्णामाश्रमाणां तु गृहस्थस्तु विशिष्यते "॥ इति ।

इति गृहस्थधर्माः । अथ वानप्रस्थधर्माः । मनुः (६।१)—

" एवं गृहाश्रमे स्थित्वा विधिवत्स्नातको द्विजः । वने वसेत्तु नियतो यथावद्विजितेंद्रियः ॥

" संत्यज्य ग्राम्यमाहारं सर्वं चैव परिच्छदम् । पुत्रेषु भार्यां निक्षिप्य वनं गच्छेत्सहैव वा ॥ (३)

" द्वितीयमायुषो भागमुषित्वा तु गृहे द्विजः । तृतीयमायुषो भागं गृहमेधी वने वसेत् ॥

" उत्पाद्य धर्मतः पुत्रानिष्ट्वा यज्ञैश्च शक्तितः । दृष्ट्वापत्यस्य चापत्यं ब्राह्मणोऽरण्यमाविशेत् " ॥

याज्ञवल्क्यः (प्रा. ४५)—

" सुतविन्यस्तपत्नीकस्तया वाऽनुगतो वनम् । वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेत् "।

संवर्त्तः—

" गच्छेदेवं वनं प्राज्ञः सभार्यो ह्येक एव वा । गृहीत्वा चाग्निहोत्रं तु होमं तत्र न हापयेत् ॥

" कुर्याच्चरुपुरोडाशा वन्यैर्वा मेध्यसेविभिः । भिक्षां तु भिक्षवे दद्याच्छाकमूलफलादिभिः ॥

" वेदविद्याव्रतस्थांश्च श्रोत्रियान्वेदपारगान् । योजयेद्धव्यकव्येषु विपरीतांस्तु वर्जयेत् ॥

" गायत्रीमात्रसारोऽपि वरो विप्रः सुयंत्रितः । नायंत्रितश्चतुर्वेदी सर्वाशी सर्वविक्रयी ॥

" कुर्यादध्ययनं नित्यमग्निहोत्रपरायणः । इष्टीः पर्वाग्रायणीयाः प्रकुर्यात्प्रतिपर्वसु " ॥

हारीतः—

" गृहस्थः पुत्रपौत्रादि दृष्ट्वा पलितमात्मनः । भार्यां पुत्रेषु संस्थाप्य सह वा प्रविशेद्वनम् ॥

" जटाश्च बिभृयान्नित्यं नखरोमाणि धारयेत् । अग्निहोत्रं च जुहुयात्पंचयज्ञान् समाचरेत् ॥

" वन्यान्नैर्विविधैर्मेध्यैः शाकमूलफलेन वा । वीतरागो भवेन्नित्यं स्नात्वा त्रिषवणं शुचिः ॥

" सर्वभूतानुकंपी स्यात्प्रतिग्रहविवर्जितः " ॥

मनुः (६।६–२३)—

" वसीत चर्मचीरं वा सायं स्नायात्प्रगे तथा । जटाश्च बिभृयान्नित्यं श्मश्रुलोमनखानि च ॥

" यद्भक्षः स्यात्ततो दद्याद्बलिं भिक्षां च शक्तितः । अम्मूलफलभिक्षाभिरर्चयेदाश्रमागतम् ॥

" स्वाध्याये नित्ययुक्तः स्याद्दांतो मैत्रः समाहितः । दाता नित्यमनादाता सर्वभूतानुकंपनः ॥

" वैतानिकं च जुहुयादग्निहोत्रं यथाविधि । दर्शमस्कन्दयन्पर्व पौर्णमासं च योगतः ॥

" ऋक्षेष्ट्याग्रयणे चैव चातुर्मास्यानि चाहरेत् । तुरायणं च क्रमशो दक्षस्यायनमेव च "॥

ऋक्षेष्टिः नक्षत्रेष्टिः । तुरायणं संवत्सरसाध्यः क्रतुविशेषः । दाक्षायणं दश विकृतिः । क्रमशस्तत्र तत्र काले ।

" वासंतशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः । पुरोडाशांश्चरुं चैव विधिवन्निर्वपेत्पृथक् ॥

" देवताभ्यश्च तद्धुत्वा वन्यं मेध्यतरं हविः । शेषमात्मनि युंजीत लवणं च स्वयं कृतम् ॥

" स्थलजोदकशाकानि पुष्पमूलफलानि च । मेध्यवृक्षोद्भवानन्यान् स्नेहांश्च फलसंभवान् ॥

" त्यजेदाश्वयुजे मासे मुन्यन्नं पूर्वसंचितम् । जीर्णानि चैव वासांसि शाकमूलफलानि च ॥

" न फालकृष्टमश्नीयादुत्कृष्टमपि केनचित् । न ग्रामजातान्यार्त्तोऽपि पुष्पाणि च फलानि च ॥

---

१ ख ग–चीरवासा

" अग्निपक्काशनो वा स्यात्कालपक्कभुगेव वा । अश्मकुट्टो भवेद्वाऽपि दंतोलूखलिकोऽपि वा " ॥
फलादीन्यश्मनि निपीड्य ये भक्षयंति ते अश्मकुट्टाः । दंतैरेवोलूखलकार्यं ये कुर्वंति ते दंतोलूखलिकाः ।
" सद्यः प्रक्षालिको वा स्यान्मासंसंचयिकोऽपि वा । षण्मासनिचयो वा स्यात्समानिचय एव वा"॥
प्रतिदिनं जीवनं संपाद्य भुक्त्वा अश्वस्तनिको हस्तप्रक्षालनं यः करोति स सद्यः प्रक्षालिकः ।
" नक्तं चाऽन्नं समश्नीयाद्दिवा वाऽऽहृत्य शक्तितः । चतुर्थकालिको वा स्यात् स्याद्वा षष्ठाष्टमाशनः॥
" चांद्रायणविधानैर्वा शुक्ले कृष्णे च वर्त्तयेत् । पक्षांतयोर्वाऽप्यश्नीयाद्यवागूं कथितां सकृत् ॥
" पुष्पमूलफलैर्वाऽपि केवलैर्वर्त्तयेत्सदा । कालपक्वैः स्वयं शीर्णैर्वैखानसमते स्थितः ॥
विखनसा प्रोक्तं तंत्रं वैखानसमतम् । तत्र हि वानप्रस्थधर्मस्य पूर्ण उपदेशः ।
" भूमौ विपरिवर्त्तेत तिष्ठेद्वा प्रपदैर्दिनम् । स्थानासनाभ्यां विहरेत्सवनेषूपयन्नपः ॥
विपरिवर्त्तेत शयीत । प्रपदैः पादांगुल्याग्रैः । अप उपयन् त्रिषवणस्नायी ।
" ग्रीष्मे पंचतपास्तु स्याद्वर्षास्वभ्रावकाशकः । आर्द्रवासास्तु हेमंते क्रमशो वर्धयंस्तपः " ॥
व्यासः—
" एकपादेन तिष्ठेत्तमरीचीः प्रपिबेत्तदा । पंचाग्निर्धूमपो वा स्यादूष्मपः सोमपोऽथ वा " ॥
" पयः पिबेच्छुक्लपक्षे कृष्णे पक्षे च गोमयम् । शीर्णपर्णाशनो वा स्यात्कृच्छ्रैर्वा वर्त्तयेत्सदा ॥
" जितेंद्रियो जितक्रोधस्तत्त्वज्ञानविचिंतकः । ब्रह्मचारी भवेन्नित्यं स्वपत्नीं प्रति संश्रयेत् ॥
"यस्तु पत्न्या समं गत्वा मैथुनं कामतश्चरेत् । तद्व्रतं तस्य लुप्येत प्रायश्चित्तीयते द्विजः ॥
"तस्यां यो जायते गर्भो न संस्पृश्यो द्विजातिभिः । न वेदेऽप्यधिकारोऽस्ति तद्वंशे योऽप्यजायते"॥
विष्णुः (३।३६)—
" त्रिविधं नरकस्येह द्वारं नाशनमात्मनः । कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत्" ॥
एवं गृहस्थसमस्य धर्मा उक्ताः ।
अथ भिक्षुसमस्य वानप्रस्थस्य धर्मानाह **मनुः** (६।२५–३०)—
" अग्नीन्स्वात्मनि वैतानान्समारोप्य यथाविधि । अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशनः ॥
" अप्रयत्नः सुखार्थेषु ब्रह्मचारी धराशयः । शरणे त्वममश्चैव वृक्षमूलनिकेतनः ॥
" तापसेष्वेव विप्रेषु यात्रार्थं भैक्षमाचरेत् । गृहमेधिषु चान्येषु द्विजेषु वनवासिषु ॥
"ग्रामादाहृत्य वाऽश्नीयादष्टौ ग्रासान्वने वसन् । प्रतिगृह्य पुटेनैव पाणिना शकलेन वा" ॥
शकलेन भिन्नभांडशकलेन ।
"एतांश्चान्यांश्च सेवेत दीक्षा विप्रो वने वसन् । विविधाश्चौपनिषदीरभ्यसेच्छुद्धये द्विजः"॥
प्रकारांतरमाह स एव (६।३१–३२)
"अपराजितां वाऽप्यास्थाय व्रजेद्दिशमजिम्हगः । आ निपाताच्छरीरस्य युक्तो वार्यनिलाशनः"॥
अपराजितां प्रागुदीचीम् ।
" आसां महर्षिचर्याणां त्यक्त्वाऽन्यतमया तनुम् । वीतशोकोऽभयो विप्रो ब्रह्मलोके महीयते" ॥
याज्ञवल्क्यः (प्रा. ५५)—" वायुभक्षः प्रागुदीचीं गच्छेदा वर्ष्मसंक्षयात् "
व्यासः—

---

१ कखग–सूत्रं

“महाप्रस्थानिकं वाऽयं कुर्यादनशनं तु वा । अग्निप्रवेशमन्यद्वा ब्रह्मार्पणविधौ स्मृतः”॥
“ यस्तु सम्यगिममाश्रमं शिवं संश्रयत्यशिवपुंजनाशनम् ॥
“ तापहंत्रमलमैश्वरं पदं याति यत्र जगतोऽस्य संस्थितिः ” ॥

हारीतः—

“ अग्निं स्वात्मनि कृत्वा तु प्रव्रजेदुत्तरां दिशम् । आ देहपातं वनगो मौनमास्थाय तापसः ॥
“ स्मरन्नतींद्रियं ब्रह्म ब्रह्मलोके महीयते ॥
“ तपो हि योऽसावकरोद्वनस्थो वने वसन्सत्वसमाधियुक्तः ।
“ विमुक्तपापो विमलः प्रशांतः स याति दिव्यं पुरुषं पुराणम् ” ॥ इति ।

अयं च वानप्रस्थाश्रमः “ देवरेण सुतोत्पत्तिर्वानप्रस्थाश्रमग्रहः ” इति कलौ निषिद्धः ।

इति वानप्रस्थधर्मनिरूपणम् ।

अथ यतिधर्मः ।

तत्र **मनुः** (६।३३।३४)—

“ वनेषु तु विहृत्यैवं तृतीयं भागमायुषः । चतुर्थमायुषो भागं त्यक्त्वा संगान् परिव्रजेत् ॥
“ आश्रमादाश्रमं गत्वा हुतहोमो जितेंद्रियः । भिक्षाबलिपरिश्रांतः प्रव्रजन्प्रेत्य वर्धते ”॥

हुतहोमः कृतसमिदाधानाग्निहोत्रहोमः । भिक्षाबलिपरिश्रांतः । भिक्षाचरणवैश्वदेवबलिहरणाभ्यां परिश्रांतः। आश्रमादाश्रमं गत्वा ब्रह्मचर्याश्रमाद्गार्हस्थ्यं ततो वानप्रस्थाश्रमं गत्वेत्यर्थः । ब्रह्मचर्यां गार्हस्थ्ये कृत्वा वानप्रस्थमकृत्वाऽपि संन्यासः कर्तव्यः । नान्यथेत्याह **स एव** (६।३५–३७)

“ ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् । अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥
“ अधीत्य विधिवद्वेदान्पुत्रांश्चोत्पाद्य धर्मतः । इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत् ॥
“अनधीत्य द्विजो वेदाननुत्पाद्य तथाऽऽत्मजान्। अनिष्ट्वा चैव यज्ञैस्तु मोक्षमिच्छन्व्रजत्यधः” ॥

मोक्षं मोक्षसाधनं संन्यासाश्रमम्। अनेन पूर्वोक्तश्चतुराश्रमसमुच्चयपक्षः पाक्षिक इति द्योतयति ।
तथा च **याज्ञवल्क्यः** (प्रा. ५६–५७)—

“ वनाद्गृहाद्वा कृत्वेष्टिं सार्ववेदसदक्षिणाम् । प्राजापत्यां तदंते तानग्नीनारोप्य चात्मनि ॥
“ अधीतवेदो जपकृत्पुत्रवानन्नदोऽग्निमान्। शक्त्या च यज्ञकृन्मोक्षे मनः कुर्यात्तु नान्यथा ” ॥

व्यासः—

“ एवं वनाश्रमे स्थित्वा तृतीयं भागमायुषः । चतुर्थमायुषो भागं संन्यासेन नयेत्क्रमात् ॥
“ प्राजापत्यां निरूप्येष्टिमाग्नेयीमथ वा पुनः । दांतः पक्वकषायोऽसौ ब्रह्माश्रममुपाश्रयेत्”॥

संवर्त्तः—

“उषित्वैवं वने सम्यग्वितृष्णः सर्ववस्तुषु । चतुर्थमाश्रमं गच्छेद्धुतहोमो जितेंद्रियः ॥
“ संसेव्य चाश्रमान्सर्वान्जितक्रोधो जितेंद्रियः । ब्रह्मलोकमवाप्नोति वेदशास्त्रार्थवित् द्विजः ” ॥

हारीतः —

“ एवं वनाश्रमे तिष्ठंस्तपसा दग्धकिल्बिषः । चतुर्थमाश्रमं गच्छेत्संन्यासविधिना द्विजः ॥
“ इष्टिं वैश्वानरीं कृत्वा प्राङ्मुखोदङ्मुखोऽपि वा । अग्निं स्वात्मनि संरोप्य मंत्रवत्प्रव्रजेत्पुनः” ॥

दक्षः—

“ सर्वेऽपि क्रमशस्त्वेते यथाशास्त्रनिषेविताः। यथोक्तकारिणं विप्रं नयंति परमां गतिम्॥

" त्रयाणामानुलोम्यं स्यात्प्रातिलोम्ये न विद्यते । प्रातिलोम्येन यो याति न तस्मात्पापकृत्तमः"॥

आपस्तंबोपि (२।२१।२)—" तेषु सर्वेषु यथोपदेशमव्यग्रो वर्त्तमानः क्षेमं गच्छति " इति।

बोधायनस्तु विकल्पमाह (२।१०।२–७)—" अत एव ब्रह्मचार्यवान्प्रव्रजतीत्येकेषामथ शालीनयायावराणामनपत्यानां विधुरो वा प्रजां स्वधर्मे प्रतिष्ठाप्य वा सत्पत्या ऊर्ध्वं संन्यासमुपदिशंति वानप्रस्थस्य वा कर्मविरामे " इति।

गौतमोऽपि (३।१)– " तस्याश्रमविकल्पमेके ब्रुवते " इति। **वसिष्ठः**—" चीर्णब्रह्मचर्यो यमिच्छेत्तमावसेदत् " इति। चतुर्णामाश्रमाणां मध्ये यमिच्छेत्तत्रैव निष्ठां यायादित्यर्थः।

उशनाः—

" आचार्येणाभ्यनुज्ञातश्चतुर्णामेकमाश्रमम् । आविमोक्षाच्छरीरस्य सोऽनुतिष्ठेद्यथाविधि"॥ इति।

अंगिराः—

" संन्यसेद्ब्रह्मप्रचर्येण संन्यसेद्वा गृहादपि । वनाद्वा संन्यसेद्विद्वानातुरो वा तु दुःखितः " ॥

यमः—

" चीर्णवेदव्रतो विद्वान्ब्राह्मणो मोक्षमाश्रयेत् । समः सर्वेषु भूतेषु चरेषु स्थावरेषु च "॥

" उत्पन्नज्ञानविज्ञानो वैराग्यं परमं गतः । प्रव्रजेद्ब्रह्मचर्यात्तु यदिच्छेत्परमां गतिम् ॥

" जातपुत्रो गृहस्थो वा विदितात्मा जितेंद्रियः " ॥

कात्यायनः—

" ब्रह्मचर्याद्गृहाद्वाऽपि वनाद्वा संन्यसेद्द्विजः । पुत्रेषु भार्यां निक्षिप्य मृतपत्नीक एव वा ॥

" ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथ वा पुनः। विरक्तः सर्वकामेभ्यः परिव्रज्यां समाश्रयेत् " ॥

विष्णुपुराणेऽभविष्यत्पुराणेऽपि—

" गृहीतविद्यो गुरवे दत्वा च गुरुदक्षिणाम् । गार्हस्थ्यमिच्छन्भूपाले कुर्याद्दारपरिग्रहम् ॥

" ब्रह्मचर्येण वा कालं कुर्यात्संकल्पपूर्वकम्। वैखानसो वाऽपि भवेत्परिव्राडथवेच्छया"॥

महाभारतेऽपि—

" गृहस्थो ब्रह्मचारी वा वानप्रस्थोऽपि वा पुनः। य इच्छेन्मोक्षमादातुमुत्तमां वृत्तिमाश्रयेत्"॥ इति।

आरण्यकोपनिषदि— " गृहस्थो ब्रह्मचारी वा वानप्रस्थो वा लोकाग्निमुदराग्नौ समारोपयेत् " इति। **जाबालिश्रुतिस्तु** चतुर्णां त्रयाणां द्वयोर्वा समुच्चयमाह—" ब्रह्मचर्यं समाप्य गृही भवेत । गृही भूत्वा वनी भवेद्वनी भूत्वा प्रव्रजेयदि वेतरथा ब्रह्मचर्यादेव गृहाद्वा वनाद्वा" इति। गार्हस्थेनेतराश्रमबाधश्च **गौतमबोधायनाभ्यां** दर्शितः (३।३५)–" ऐकाश्रम्यं त्वाचार्याः प्रत्यक्षविधानात् गार्हस्थ्यस्य " इति।

अत्र **विज्ञानेश्वरः** (प्रा. पृ. १९९–२००)—" एषां च समुच्चयविकल्पबाधपक्षाणां सर्वेषां श्रुतिस्मृतिमूलत्वादिच्छया विकल्पः। अतो यत्कैश्चित्पंडितंमन्यैरुक्तं यावज्जीवमग्निहोत्रं जुहोतीत्यादिप्रत्यक्षश्रुतिसिद्धगार्हस्थ्येनेतराश्रमबाधः गार्हस्थ्यानधिकृतपंग्वंधादिविषयमाश्रमांतरमिति तत्स्वाध्यायाध्ययनवैधुर्यनिबंधनमित्युपेक्षणीयम्। किं च यथा विष्णुक्रमाज्यावेक्षणाद्यक्षमतयाऽधपंग्वादीनां श्रौतेष्वनधिकारः तथोदकुंभाहरणभिक्षाचर्याद्यक्षमत्वात्कथमंधपंग्वादिविषयतयाऽश्रमांतरनिर्वाहः।

ऋणानि त्रीण्यपकृष्येत्यादीनि वचनानि अनपाकृतऋणत्रयस्वगृहस्थस्य प्रव्रज्यायामनधिकार इत्येवंपराणि । यदा तु ब्रह्मचर्यादिव्रजति तदा न प्रजोत्पादनादिनियमः । अकृतदारपरिग्रहणस्य तत्रानधिकाराद्रागप्रयुक्तत्वाच्च विवाहस्य ।

"ननु जायमानो वै ब्राह्मणस्त्रिभि० प्रजया पितृभ्य इति । जातमात्रस्यैव प्रजोत्पादनादीनि दर्शयति नैवं न हि जातमात्रोऽकृतदारपरिग्रहो यज्ञादिषु अधिक्रियते तस्मादधिकारी जायमानो ब्राह्मणादिर्यज्ञादीननुतिष्ठेदिति तस्यार्थः । अतश्चोपनीतस्य वेदाध्ययनमेवावश्यकंकर्मकृतदारपरिग्रहस्य प्रजोत्पादनादीति निरवद्यमिति यस्य समुच्चयानुष्ठानसामर्थ्यं नास्ति तस्यायमाश्रमविकल्पः" इति ॥ स्मृतिचंद्रिकायाम्—

"अधीत्य विधिवद्वेदान्पुत्रानुत्पाद्य धर्मतः" इत्यादीनि वचनानि यस्य ऐहिकामुष्मिकभोगेष्वादावेव वैराग्यं न जायते तद्विषयाणीति स्मृतिरत्नाकराभिहितम् । अन्ये त्वध्ययननियोगनिवृत्त्युत्तरकालं यस्य पुरुषस्य यदा वैराग्यं जायते तस्याश्रमिणोऽनाश्रमिणो वा तदैव संन्यास इति वदंति । तथा च **जाबालश्रुतिः**—"अथ पुनरव्रती व्रती वा स्नातको वोत्सन्नाग्निरग्निरनग्निको[1] वा यदहरेव विरजेत्तदहरेव प्रव्रजेत्तथायद्यातुरः स्यान्मनसा वाचा वा संन्यसेत्" इति ।

बृहस्पतिः—

"संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया । प्रव्रजेदकृतोद्वाहः परं वैराग्यमाश्रितः" ॥

पराशरः

"परिव्रज्या तु वैराग्यात्कर्तव्या विधुरादिभिः । विधिनैव च कुर्वीत संन्यासमिह बुद्धिमान्" ॥

अंगिराः—

"विरक्तः संन्यसेद्विद्वाननिष्ट्वाऽपि द्विजोत्तमः । प्रकर्तुमथ शक्तोऽपि जुहोतियजतिक्रियाः ॥
"अंधः पंगुर्दरिद्रो वा विरक्तः संन्यसेद्द्विजः । सर्वेषामेव वैराग्यं संन्यासे तु विधीयते ॥
"पतेदेवाविरक्तो यः संन्यासं कर्तुमिच्छति । पुनर्दारक्रियाभावे मृतभार्यः परिव्रजेत्" ॥ इति ।

अंधपंग्वोः संन्यासविधानं विरक्तिप्रशंसार्थं न पुनस्तत्प्राप्त्यर्थम् ।

"आरूढपतितो व्रात्यः कुनखी श्यावदंतकः । क्षयी तथांऽगविकलो न तु संन्यासमर्हति" ॥

दक्षस्मरणात् अंगिराः—

"यदा मनसि संजातं वैतृष्ण्यं सर्ववस्तुषु । तदा संन्यासमिच्छंति पतितः स्याद्विपर्यये" ॥

हारीतः—

"विरक्तः प्रव्रजेद्धीमान्संरक्तस्तु गृहे वसेत् । सरागो नरकं याति प्रव्रजन्हि द्विजाधमः" ॥

व्यासः—

"यस्यैतानि सुगुप्तानि जिह्वोपस्थोदरं करः । संन्यसेदकृतोद्वाहो ब्राह्मणो ब्रह्मचर्यवान् ॥
"परमात्मनि यो रक्तो विरक्तोऽपरमात्मनि । सर्वेषणाविनिर्मुक्तः स भैक्षं भोक्तुमर्हति ॥
"पूजितो वंदितश्चैव सुप्रसन्नो यथा भवेत् । तथा चेत्ताड्यमानस्तु तदा भवति भैक्षभुक्" ॥

क्रतुः—

"अहमेवाक्षरं ब्रह्म वासुदेवाख्यमव्ययम् । इति भावो भवेद्यस्य तदा भवति भैक्षभुक् ॥

---

१ **खग**—रनुत्सन्नाग्निर्वा को ।

“ यस्मिन्क्षांतिः शमः शौचं सत्यं संतोष आर्जवम् । आकिंचिन्यमदंभश्च स कैवल्याश्रमे वसेत् ॥
“ यदा न कुरुते भावं सर्वभूतेषु पापकम् । कर्मणा मनसा वाचा तदा भवति भैक्षभुक्” ॥

माधवीये पराशरे—

“ परिभोगात्परिच्छेदात्परिपूर्णावलोकनात् । परिपूर्णफलत्वाच्च परिव्राजक उच्यते ॥
“ परितो व्रजते नित्यं परं वा व्रजते पुनः । हित्वा चैवं परं जन्म परिव्राजक उच्यते ” ॥

व्यासः

“ प्रवृत्तिलक्षणं कर्म ज्ञानं संन्यासलक्षणम् । तस्माज्ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धिमान् ” ॥

मनुः (६।९४)—

“ दशलक्षणकं धर्ममनुतिष्ठन्समाहितः । वेदांतान्विधिवच्छ्रुत्वा संन्यसेदनृणो द्विजः ॥
“धृतिः क्षमा दमोऽस्तेयं शौचमिंद्रियनिग्रहः । धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्”॥(९२)
धृतिः स्वधर्मापरित्यागः । क्षमा अवमानसहत्वम् ॥

दक्षः—“ तस्मात्त्यक्तकषायेण कर्तव्यं दंडधारणम् । इतरस्तु न शक्नोति विषयैश्चाभिभूयते ” ॥

जाबालिः—

“ संन्यासनिश्चयं कृत्वा पुनर्न च करोति यः । स कुर्यात्कृच्छ्रमश्रांतः षण्मासान्वृत्यनंतरम् ॥
“ सन्यासं पातयेद्यस्तु पतितं न्यासयेत्तु यः । संन्यासविघ्नकर्ता च त्रीनेतान्पतितान्विदुः ॥
“ संप्रत्यवसितानां च महापातकिनां तथा । व्रात्यानामभिशस्तानां संन्यासं नैव कारयेत् ॥
“ व्रतयज्ञतपोदानहोमस्वाध्यायवर्जितम् । सत्यशौचपरिभ्रष्टं संन्यासं नैव कारयेत् ” ॥

बृहस्पतिः—

“ अतीतान्न स्मरेद्भोगान्न तथाऽनागतानपि । प्राप्तांश्च नाभिनंदेद्यः स कैवल्याश्रमे वसेत् ॥
“अन्तस्थानीन्द्रियाण्यन्तर्बहिष्ठान्विषयान्बहिः । शक्नोति यः सदा कर्तुं स कैवल्याश्रमे वसेत्” ॥

आतुरसंन्यासविधिः । अंगिराः—

“ उत्पन्ने संकटे घोरे चोरव्याघ्रादिगोचरे । भयभीतस्य संन्यासमंगिरा मुनिरब्रवीत् ” ॥

सुमंतुः—

“आपत्काले तु संन्यासं कर्तव्य इति शिष्यते । जरयाऽभिपरीतेन शत्रुभिर्व्यथितेन च ॥
“आतुराणां च संन्यासे न विधिर्नैव च क्रिया । प्रैषमात्रं समुच्चार्य संन्यासं तत्र पूरयेत् ॥
“ संन्यस्तोऽहमिति ब्रूयात् सवनेषु त्रिषु क्रमात् । त्रीन्वारांस्तु त्रिलोकात्मा शुभाशुभविशुद्धये ॥
“ यत्किंचिद्बन्धकं कर्म कृतमज्ञानतो मया । प्रमादालस्यदोषाद्यत् तत्सर्वं संत्यजाम्यहम् ॥
“ एवं संचिन्त्य भूतेभ्यो दद्यादभयदक्षिणाम् ।
“ पद्भ्यां कराभ्यां विरहन्नाहं वाक्कायमानसैः । करिष्ये प्राणिनां हिंसां प्राणिनः संतु निर्भयाः” ॥

संग्रहे—

“आतुराणां संन्यासे संकल्पसावित्रीप्रवेशनपाणिहोमप्रैषोच्चारणाभयदानानि विहितानि॥” इति ।

विष्णुः

“संन्यस्तमिति यो ब्रूयात्प्राणैः कण्ठगतैरपि । न तत्क्रतुशतेनापि प्राप्तुं शक्नोति मानवः”॥ इति।

---

१ क्ष-पि । २ खग-मोहा ।

अंगिराः—

" आतुराणां विशेषोऽस्ति न विधिर्नैव च क्रिया । प्रैषमात्रस्तु संन्यास आतुराणां विधीयते " ॥

श्रुतिरपि— " यद्यातुरः स्यान्मनसा वाचा वा संन्यसेत् " इति ॥

संन्यासफलनिरूपणम् । संन्यासफलमाह यमः—

"ये च संतानजा दोषा ये च स्युः कर्मसंभवाः । संन्यासस्तान्दहेत्सर्वांस्तुषाग्निरिव कांचनम्" ॥

मनुः (५।१०७)—

" मृत्तोयैः शुध्यते शोध्यं नदी वेगेन शुध्यति । रजसा स्त्री मनो दुष्टा संन्यासेन द्विजोत्तमः ॥

"यो दत्त्वा सर्वभूतेभ्यः प्रव्रजत्यभयं गृहात् । तस्य तेजोमया लोका भवंति ब्रह्मवादिनः ॥(६.३९)

" यस्मादपीह भूतानां भयं नोत्पद्यते क्वचित् । तस्य देहाद्विमुक्तस्य भयं नास्ति कुतश्चन ॥(४०)

" यदा भावेन भवति सर्वभावेन निःस्पृहः । तदा सुखमवाप्नोति प्रेत्य चेह च शाश्वतम् " ॥ (८३)

याज्ञवल्क्योऽपि (प्रा. ३२)—

"अकार्यकारिणां दानं वेगो नद्याश्च शुद्धिकृत् । शोध्यस्य मृच्च तोयं च संन्यासोऽथ द्विजन्मनाम्" ॥

पराशरः—

" द्वाविमौ पुरुषौ लोके सूर्यमंडलभेदिनौ । परिव्राट् योगयुक्तश्च रणे चाभिमुखो हतः ॥

" संन्यस्तं ब्राह्मणं दृष्ट्वा स्थानाच्चलति भास्करः । एष मे मंडलं भित्वा परं स्थानं प्रयास्यति " ॥

व्यासः—

" द्वे रूपे वासुदेवस्य चरं चाचरमेव च । चरं संन्यासिनां रूपमचरं प्रतिमादिकम् " ॥

विष्णुः—

" एकरात्रोषितस्यापि यतेर्या गतिरुच्यते । न सा शक्या गृहस्थेन प्राप्तुं क्रतुशतैरपि " ॥

दक्षः—

" त्रिंशत्परान् त्रिंशदपरान् त्रिंशच्च परतः परान् । सद्यः संन्यसनादेव नरकात्त्रायते पितॄन् " ॥

अंगिराः—

" षष्टिं कुलान्यतीतानि षष्टिमागामिकानि च । कुलान्युद्धरते प्राज्ञः संन्यस्तमिति यो वदेत् " ॥

यमः—

" ज्ञानेन मुच्यते भिक्षुस्तपसा स्वर्गमाप्नुयात् । नरकं विषयासंगात्त्रयो मार्गास्तपस्विनाम् " ॥

व्यासः—

" दिव्यतेजोमयः श्रीमान्सूर्यचंद्राग्निमंडलम् । भित्वा प्रयाति संन्यासी स्वधर्मपरिपालनात् " ॥ इति ।

तथा च श्रुतिः—

"त्याग एव हि सर्वेषां मोक्षसाधनमुत्तमम् । त्यजतैव हि तत् ज्ञेयं त्यक्तुः प्रत्यक्परं पदम्" ॥ इति ।

"संन्यस्य सर्वकर्माणि सर्वमात्मावबोधनः । हत्वा विद्यां धियैवेयात्तद्विष्णोः परमं पदम्" ॥ इति । च

तैत्तिरीयके श्रूयते (**नारायणोपनिषदि**)

" न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः " इति । आधानादिकर्मणा प्रजया धनेन च अमृतत्वमपवर्गं नानशुर्नाश्नुवते किंतु त्यागेनैव एक इति अधिकारिदौर्लभ्यं दर्शयति । पूर्वमधीतवेदा अधिगतसांगवेदार्था अनुष्ठितयथोदितसकलधर्माणो विशुद्धांतःकरणा जितेंद्रिया

अनंतरं संत्यक्तकर्माणो वेदांतवाक्यश्रवणादिजनितब्रह्मात्मैकत्वविज्ञानाः केचिदेवामृतत्वमश्नुवंत इत्यर्थः । तथा च **तत्रैव श्रूयते**—

“ वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्वाः ।
ते ब्रह्मलोके तु परांतकाले परामृतात्परिमुच्यन्तिसर्वे ” ॥ इति ।

ब्रह्मणो लोके दर्शने सति परांतकाले पश्चिमजन्मसमाप्तिकाले परामृतात्परमुत्कृष्टं तदेवामृतममरणधर्मं ब्रह्म तस्मादनुभवगोचराद्ब्रह्मणो हेतोः परिमुच्यंत इत्यर्थः ।

बृहदारण्यकेऽपि– “ एतमेव प्रव्राजिनो लोकमिच्छंतः प्रव्रजंति ” । इति । प्रकृतमात्मानमेव लोकमिच्छंतः प्रव्रजेयुरित्यर्थः ।

जाबालश्रुतौ–

“ अथ परिव्राड्विवर्णवासो मुंडोऽपरिग्रहः शुचिरद्रोही भैक्षमाणो ब्रह्मभूयाय भवति ” इति ।

“ शतं कुलानां पुरतो बभूव तथा पराणां च शतं समग्रम् ।
एते भवंति सुकृतस्य लोके येषां कुले संन्यसतीह विप्राः ॥

“संन्यासाद्ब्रह्मणः स्थानं वैराग्यात्प्रकृतौ लयः। ज्ञानात्कैवल्यमाप्नोति तिस्रस्ता गतयः स्मृताः”॥इति।

अस्मिंश्चाश्रमे ब्राह्मणस्यैवाधिकारः ।

‘ आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजेद्गृहात् ’ । ‘एष वोऽभिहितो धर्मो ब्राह्मणस्य चतुर्विधः’ ॥ इति उपक्रमोपसंहाराभ्यां **मनुना** ब्रह्मणस्यैवाधिकारप्रतिपादनात् । “ब्राह्मणाः प्रव्रजन्ति” ॥ इति श्रुतेश्चाग्रजन्मन एवाधिकारो न द्विजातिमात्रस्येति **विज्ञानेश्वरः** (पृ. १९९ पं. २४–२६)

अत्रिरपि—

“ न तावन्मुच्यते दुःखाज्जन्ममृत्योश्च बंधनात् । यावन्न धारयेद्विप्रो विष्णवं लिंगमादरात् ॥

“ मुखजानामयं धर्मो वैष्णवं लिंगधारिणम् । बाहुजातोरुजातानां नायं धर्मो विधीयते”॥ इति ।

वैष्णवलिंगधारणं संन्यासः । **व्यासः**—

“ चत्वार आश्रमाश्चैते ब्राह्मणस्य प्रकीर्तिताः । गार्हस्थं ब्रह्मचर्यं च वानप्रस्थत्रयस्मृताः ॥

“ क्षत्रियस्यापि कथिता य आचारा द्विजस्य हि । ब्रह्मचर्यं च गार्हस्थ्यमाश्रमद्वितयं विशः ॥

“गार्हस्थ्यमुदितं चैकं शूद्रस्य परिकीर्तितम्”॥ इति । अन्ये तु “त्रयाणां वर्णानां चत्वार आश्रमा इति ” **सूत्रकारादि**वचनाद्द्विजातिमात्रस्याधिकारमाहुः । **व्यासोऽपि**—

“ऋणत्रयमपाकृत्य निर्ममो निरहंकृतिः। ब्राह्मणः क्षत्रियो वाऽथ वैश्यो वाऽथ व्रजेद्गृहात्”॥इति।

द्विजातिमात्रस्याधिकारमाहुः। क्षत्रियवैश्ययोः प्रव्रज्यानिषेधवचनानि काषायदंडनिषेधपराणीति **स्मृतिरत्ने**ऽप्यभिहितम् । **व्यासः** –

“ अश्वाधेयं गवालंभं संन्यासं पलपैतृकम् । देवरेण सुतोत्पत्तिं कलौ पंच विवर्जयेत् ” ॥ इति ।

तस्यापवादमाह स एव

“यावद्वर्णविभागोऽस्ति यावद्वेदः प्रवर्तते । तावन्न्यासोऽग्निहोत्रं च कर्त्तव्यं तु कलौ युगे”॥ इति ।

कात्यायनः—

“ कृच्छ्रांस्तु चतुरः कृत्वा पावनार्थमनाश्रमी । आश्रमी चेत्तप्तकृच्छ्रं तेनासौ योग्यतां व्रजेत्”॥

बह्वृचपरिशिष्टेऽपि— “ मुमुक्षुरात्मविशुद्धये एकं तप्तकृच्छ्रं कृत्वा अनाश्रमी चतुरः प्राजापत्यान्” इति ।

---

१ अ–६ श्वे ३८ । २ अ-६।९७

बोधायनः—"अनाश्रमी चतुरः कृच्छ्रानात्मशुध्यर्थं विदध्यादाश्रमी तप्तकृच्छ्रमेकम्" इति ।
स्मृतिसारे—
"कुर्याच्चत्वारि कृच्छ्राणि संन्यासेप्सुरनाश्रमी । आश्रमी कृच्छ्रमेकं तु कृत्वा संन्यासमर्हति"॥इति ।
जीवश्राद्धादिनिरूपणम् । व्यासः—
"देयं पितृभ्यो देवेभ्यः स्वपितृभ्योऽपि यत्नतः । दत्वा श्राद्धमृषिभ्यश्च मनुजेभ्यस्तथाश्रमे ॥
"इष्टिं वैश्वानरीं कृत्वा प्राजापत्यमथापि वा । अग्नीन् स्वात्मनि संरोप्य मंत्रवत्प्रव्रजेत्पुनः" ॥
बोधायनः—
"दैवं चैवार्षकं दिव्यं पित्र्यं मातृकमानुषम् । भौक्तिकं चात्मनश्चांते अष्टौ श्राद्धानि निर्वपेत्"॥
अत्रिः—
"दैवमार्षं ततो दिव्यं मानुषं भौतिकं तथा । पितृणां दिव्यमातृणामात्मनो वृद्धितत्परः" ॥
शौनकः—
"दैवं च वार्षिकं चैव दिव्यं मानुषमेव च । भूतश्राद्धं पितृश्राद्धं मातृणामात्मनस्तथा॥
"एकैकस्मिन्दिने कुर्यादेकैकं श्राद्धमर्थवत् । नांदीमुखविधानेन विधिरेषां प्रकीर्तितः ॥
"वसवोऽष्टौ स्मृतास्तत्र रुद्रा एकादशापि च । तथैव द्वादशादित्या दैवश्राद्धे तु देवताः॥
"मरीचिरत्र्यंगिरसौ पुलस्त्यः पुलहः क्रतुः । प्रचेताश्च वसिष्ठश्च आर्षे सभृगुनारदः ॥
"दिव्ये हिरण्यगर्भोऽपि विराट् प्रजापतिरेव च । सनकश्च सनंदश्च तृतीयश्च सनातनः॥
"कपिलश्चासुरिश्चैव वोढुः पंचशिखस्तथा । एते मानुष्यके श्राद्धे मनुष्याः सप्त देवताः ॥
"पृथिव्यापस्तथा तेजो वायुराकाशमेव च । एतानि पंच भूतानि भूतश्राद्धे तु देवताः॥
"पितृश्राद्धे कव्यवाडनलः सोमोऽर्यमा तथा । अग्निष्वात्ता बर्हिषदः सोमपाश्चैव देवताः॥
"गौरी पद्मा शची मेधा सावित्री विजया जया । देवसेना स्वधा स्वाहा मातृश्राद्धे तु देवताः ॥
"आत्मश्राद्धे देवता तु परमात्मा प्रकीर्तितः" ॥ इति ॥ **अत्रिः**—
"पार्वणं च यथा वृद्धिश्राद्धं कुर्याद्यथाविधि । एकैको मंत्रवात्पिंडो देयस्तूष्णीमथापरः ॥
"सर्वमंत्रेषु कर्त्तव्यं नांदीमुखविशेषणम् । उत्थाय च ततो विद्वान्हृष्टपुष्टेन चेतसा ॥
"प्रदक्षिणं ततः कृत्वा नमस्कृत्य द्विजोत्तमान् । क्षंतव्यमिति तान्ब्रूयात्प्रणम्य शिरसा नतः ॥
"संन्यासार्थं मया श्राद्धं कृतमेतद्विजोत्तमाः । अनुज्ञां प्राप्य युष्माकं सिद्धिं यास्यामि शाश्वतीम्"॥
ततः परेद्युः पुण्याहवाचनपूर्वकं वपनं कुर्यात् । **संन्यासक्रमः** । तदाह **शौनकः**—

"पूर्वेद्युर्नांदीमुखं कृत्वा ब्राह्मणान्भोजयित्वा पुण्याहं वाचयित्वा केशश्मश्रुलोमनखानि वापयित्वा यथाविधि स्नात्वा होमादिद्रव्यव्यतिरिक्तद्रव्यजातं पुत्रादिभ्यो दत्वा दंडादीनि संनिधाय देवायतने ग्रामे वा पुलिने वाऽरण्ये[1] वा स्थित्वा ब्रह्मणे नमः इंद्राय नमः आत्मने नमः अंतरात्मने नमः परमात्मने नम इति ब्रह्मांजलिं कृत्वा मानसं जपित्वाऽप उपस्पृश्य दर्भांजलिं कृत्वा वेदादीञपित्वा सक्तुमुष्टिं प्राश्याप आचम्य 'ओं भूः सावित्रीं प्रविशामि तत्सवितुर्वरेण्यम् । ॐ भुवः सावित्रीं प्रविशामि भर्गो देवस्य धीमहि । ॐ सुवः सावित्रीं प्रविशामि धियो यो नः प्रचोदयात् । ॐ भूर्भुवः सुवः सावित्रीं प्रविशामि तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नःप्रचोदयात्' इति जपित्वा किंचनाप्राश्य पुरस्तादादित्यस्या-

---

१ क-ष्य । २ क-ष्ये । ३ खग-प्रवेशयामि ।

स्तमयादाज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा समिद्धेऽग्नौ ॐ भूर्भुवः सुवः स्वाहेति पूर्णाहुतिं हुत्वा सायमग्निकार्यं कृत्वाऽग्न्युत्तरदेशेषु पात्राणि सादयित्वा दक्षिणदेशे दर्भान्संस्तीर्य कृष्णाजिनं चांतर्धाय तस्यां रात्र्यां जागरणं कृत्वेति " आपो हि ष्ठा मयो भुवः " इति द्वाभ्यां श्मश्रुरोमनखानि च गौदानिकविधानेन सर्वमंत्रान्नियोजयेत् ॥

" शेषस्य कर्मणः सिध्यै केशान्सप्ताष्ट वा पुनः। संरक्ष्य वापयेत्सर्वं केशश्मश्रुनखानि च" ॥ इति **कात्यायन**स्मरणात्। सप्ताष्ट वा केशान् स्थापयित्वा वापयेत्। दक्षिणजानुनि उत्तानं वामहस्तं कृत्वा तदुपरि सपवित्रानुत्तानदक्षिणहस्तनिधानं ब्रह्मांजलिः " संहत्य हस्तावध्येयः स हि ब्रह्मांजलिः स्मृतः " इति **मनु**स्मरणात् (२।७१)। तथा कृत्वा ' ब्रह्मणे नम ' इत्यादि मनसा जपेदित्यर्थः। सक्तुमुष्टिप्राशनं प्रणवेन कृत्वाऽऽचम्य नाभिमभिमंत्रयेत्। **तथा बव्हृचपरिशिष्टे** " अथ सक्तून्प्राश्याचम्य नाभिमभिमंत्रयेत्। " आत्मने स्वाहा अंतरात्मने स्वाहा प्रजापतये स्वाहा " इति। ततः पयोदधिघृतानि त्रिवृत्कृतानि ' त्रिवृदसि ' इति मंत्रेण प्रथमं प्राश्नीयात्। ' प्रवृदसि ' इति द्वितीयं ' संवृदसि ' इति तृतीयं ' आपः पुनंतु ' इत्युदकं प्राश्नीयात्तदलाभ इति।

अत्र **बोधायनः** (२।१०।१४–२१)–" पुण्याहं स्वस्त्यृद्धिमिति " वाचयित्वा केशश्मश्रुलोमनखानि वापयित्वा उपकल्पयते यष्टयः शिक्यं जलपवित्रं कमंडलुं पात्रमित्येतत्समादाय ग्रामांते ग्रामसीमांतेऽग्न्यगारे वाऽऽज्यं पयोदधीति त्रिवृत्प्राश्योपवसेदपो। वा ओं भूः सावित्रीं प्रविशामि तत्सवितुर्वरेण्यमों भुवः सावित्रीं प्रविशामि भर्गो देवस्य धीमहि ॐसुवः सावित्रीं प्रविशामि धियो यो नः प्रचोदयादिति पच्छोऽर्धर्चशस्ततः समस्ताव्यस्ताश्चाश्रमादाश्रममुपनीय ब्रह्मभूयो ब्रह्मभूतो भवतीति विज्ञायते पुरादित्यस्यास्तमयाद्गार्हपत्यमुपसमाधायान्वाहार्यपचनमाहृत्य ज्वलंतमाहवनीयमुद्धृत्य गार्हपत्ये आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा समिद्वत्याहवनीये पूर्णाहुतिं हुत्वा ओं स्वाहेत्येतद्ब्रह्मान्वाधानमितिविज्ञायतेऽथ सायं हुतेऽग्निहोत्रे उत्तरेण गार्हपत्यं तृणानि संस्तीर्य तेषु द्वंद्वं न्यंचि पात्राणि सादयित्वा दक्षिणेनाहवनीयं ब्रह्मायतने दर्भान्संस्तीर्य तेषु कृष्णाजिनं चान्तर्धायैतां रात्रिं जागर्ति य एवं विद्वान्ब्रह्मरात्रमुपोष्य ब्राह्मणोऽग्नीन्समारोप्य वा प्रमीयते सर्वं पाप्मानं तरति तरति ब्रह्महत्यामिति "। अयमर्थः। पूर्वाह्णे वपनं कृत्वा अपराह्णे उपकल्पयते आर्जयति यष्ट्यादीन्यष्टयः दंडाः शिक्यं रज्जुनिर्मितं भिक्षापात्रधारणम्।

" कुशकार्पासमूत्रैर्वा क्षौमसूत्रैरथापि वा। कुशलैर्ग्रथितं शिक्यं पद्माकारसमन्वितम् ॥
" षट्पादं पंचपादं वा बंधद्वयविशोभितम् " ॥ इति **स्मरणात्**।

जलपवित्रमुदकशोधनार्थं वस्त्रं विकेशं सितमस्पृष्टं सर्वतो द्वादशांगुलम्।
"द्विगुणं त्रिगुणं वाऽपि सर्वतोऽष्टांगुलं तु वा। प्रादेशमात्रं वा सूक्ष्मकार्पासैः कृतमव्रणम्"॥
" चंडालाद्यकृतं चैतत्स्मृतं जलपवित्रकम् " ॥ इति **स्मरणात्**।

पात्रं भैक्षाचरणार्थं अलाबुमृन्मयादि। आदिशब्द आसनाद्युपलक्षणार्थम् ॥

" चतुरस्रं वर्तुलं वाऽप्यासनं दारवं शुभम्। कौपीनाच्छादनं वासः कन्थां शीतनिवारणाम् " इति **स्मरणात्**। त्रिवृत्प्राशनमंत्रः ॥ " ॐ भूः सावित्रीम् " इति " आश्रमादाश्रमम् " इति वचनात्त्रिवृत्प्राशनादूर्ध्वं प्रत्यापत्तिर्नास्तीति दर्शयति। ब्रह्म सावित्री। तया पूतः ब्रह्मभूयो

भवति। त्रिवृत्प्राशनेनैव संन्यास इत्यर्थः। ब्रह्मान्वाधानमिति यथा दर्शपूर्णमासयोरन्वाधानं तद्वदेतदपि ब्रह्मप्रवेशस्येति।

दिनांतरकृत्यमाह शौनकः—"ब्राह्मे मुहूर्ते उत्थाय यथाविधि स्नात्वा प्रातरग्निकार्यं कृत्वा व्याहृतीः जपित्वा 'तरत्समन्दीधावति' इति सूक्तमप्सु जपेत्" इति।

दत्तात्रेयः—

"ब्रह्मरात्रीं ततो नीत्वा पौर्णमास्यां द्विजोत्तमः। प्रातर्हुत्वा स्वकल्पेन कृत्वा स्नानादिकाः क्रियाः॥

"प्राजापत्यां प्रतिपदि त्विष्टिं कुर्याद्यथाविधि। ततो विप्राय दद्यात्तु सर्ववेदसदक्षिणाम्"॥

शौनकः—"प्राजापत्ययेष्ट्वा पुनराहवनीयमुद्धृत्य प्राणापानौ समौ कृत्वा सर्वं निदधाति। यच्च पूर्तौ यच्च प्रजापतौ तन्मनसि जुहोमि विमुक्तोऽहं देवकिल्बिषात्स्वाहा। अयं ते योनिर्ऋत्विय इत्यात्मन्यग्नीन्समारोपयति प्राणेन गार्हपत्यमपानेन दक्षिणाग्निं व्यानेनाहवनीयमुदानेनावसथ्यं समाने सभ्यं पुनराहवनीयं गत्वा 'अभ्वः संभूत' इत्यादित्यमुपस्थायोत्तरेण गृहान्निष्क्रमेत्" इति।

आत्रेयः—"मृन्मयान्यश्ममयानि चाप्सु जुहुयाद्गुरवे तैजसानि दद्यात्"। इति।

बोधायनः—"अथ ब्राह्मे मुहूर्ते उत्थाय काल एव प्रातरग्निहोत्रं जुहोत्यथ पृष्ठ्यांस्तीर्त्वाऽपः प्रणीय वैश्वानरं द्वादशकपालं निर्वपति सा प्रसिद्धेष्टिः संपद्यतेथाऽऽहवनीयेऽग्निहोत्रद्रव्याणि प्रक्षिपत्यमृन्मयान्यश्ममयानि गार्हपत्येरणिभवतो न तन्मनसावित्यथात्मन्यग्नीन्समारोपयते "या ते अग्ने यज्ञिया तनूः" इति त्रिस्त्रिरेकैकं समाजिघ्रतीति **शौनकः**। अथ पुत्रं दृष्ट्वा जपति 'त्वं ब्रह्म त्वं यज्ञस्त्वं लोक' इति। स पुत्रः प्रत्याह "अहम् ब्रह्माहं यज्ञोऽहं लोक" इति।

बव्हृचपरिशिष्टे—अथ पुत्रान्सुहृदो बधून्प्रत्याह न मे कश्चिन्नाहं कस्यचित् इति जलाशयं गत्वा "एतस्मादाश्रमात्संन्यासाश्रमं गच्छामि" इति संकल्पयेत्ततः अप्सु चोदकाहुतिद्वयमाह **कपिलः**—"अद्भः स्वाहा पुत्रेषणाया वित्तेषणाया लोकेषणायाश्च व्युत्थितोहं स्वाहेत्यभ्य एवापः पाणिना हुत्वा" इति।

बोधायनः—"अथ यज्ञोपवीतं विसृज्याद्भिः संस्पृश्याप्सु जुहोति। वेदांतविज्ञान" इति।

आरण्यकोपनिषदि च 'उपवीतं भूमावप्सु वा विसृजेत्' इति।

काठकश्रुतिः "सशिखान्केशान्निष्कृत्य विसृज्य यज्ञोपवीतं भूः स्वाहा" इति।

अत्राथर्वणी **श्रुतिः** "ब्रह्मसूत्रमहमेवेति विद्वानत्रिवृत्सूत्रं त्यजेत्। विद्वान्यं एवं वेदसंन्यस्तं मयेति त्रिः कृत्वा 'अभयं सर्वभूतेभ्यो मत्तः सर्वं प्रवर्तते" इति।

बव्हृचपरिशिष्टे तु "प्राङ्मुखस्तिष्ठन्नूर्ध्वबाहुर्ब्रूयात्। ॐ भूः संन्यस्तं मया। ॐ भुवः संन्यस्तं मया। ॐ सुवः संन्यस्तं मया। ॐ भूर्भुवःसुवः संन्यस्तं मया" इति।

"त्रिरुपांशुत्रिर्मध्यमं त्रिरुच्चैः" इति।

प्रकारांतरमाह **शौनकः**—"ॐ भूर्भुवः सुवः संन्यस्तं मया"। इति 'मंद्रमध्यमोत्तमस्वरेणोक्त्वा-अभयं सर्वभूतेभ्यो मत्त' इति प्राङ्मुख उदङ्मुखः पूर्णांजलिं निनयनं कृत्वा यथाधिकारं यथाविधि दंडादि गृहीत्वा स्वधर्मनिष्ठो भवेत्" इति।

---

१ **कखग**—उत्तर नारायणे।

बोधायनस्त्वाह " अथांतर्वेदितिष्ठन्नों भूर्भुवः सुवः संन्यस्तं मया संन्यस्तं मयेति त्रिरुपांशूक्त्वा-निर्मध्यमं त्रिरुच्चैः 'त्रिषत्या हि देवा:' इति विज्ञायते ' अभयं सर्वे भूतेभ्यो मत्त ' इति चापां पूर्णमंजलिं निनयति " ॥ इति । अत्र **यमः**—

" दत्वा तोयांजलिं विप्रो भक्त्या संप्रार्थयेद्धरिम् । सर्ववेदात्मके तोये तोयाहुतिमहं हरे ॥
" दत्वा सर्वेषणां त्यक्त्वा युष्मच्चरणमागतम् । त्राहि मां सर्वलोकेश गतिरन्या न विद्यते ॥
" संन्यस्तं मे जगन्नाथ पाहि मां मधुसूदन । पाहि मां सर्वसर्वेश वासुदेव सनातन ॥
" संन्यस्तं मे जगद्योने पुंडरीकाक्ष मोक्षद । अहं सर्वाभयं दत्वा भूतानां परमेश्वर ॥
" युष्मच्चरणमापन्नस्त्राहि मां पुरुषोत्तम " ॥ इति ।

"ततो दिगंबरो भूत्वा गच्छेत्किंचिदुदङ्मुखः । जिज्ञासुश्चेत्परावृत्या तिष्ठेदाचार्यदर्शने" ॥ ततो दारकपात्रं कौपीनं बहिर्वासः कंथां दंडं च क्रमेणैकैकं प्रणवेनैव दद्यात् । ततः इंद्रस्य वज्रोऽसि वार्चघ्नः शर्म यच्छ यत्पापं तन्निवारय, इति दंडं संप्रार्थ्य, सखा मा गोपाय । इति दंडं धारयेत् ॥ **आथर्वणी श्रुतिः**— " सखा मा गोपाय नः सखायोऽसींद्रस्य वज्रोऽसि " इत्यन्येन मंत्रेण कृत्वोर्ध्वं वैणवं दंडं कौपीनं प्रतिग्रहेत् " इति ।

मैत्रायणी श्रुतिरपि "इंद्रस्य वज्रोऽसीति त्रीन्वैणवान्दंडान्दक्षिणे पाणौ धारयेदेकं वा" इति। **आरुणिश्रुतिरपि** " काममेकं वैणवं दंडं धारयेत् " ॥ इति ।

बोधायनः (३।२।६)– " सखा मा गोपायेतिदंडमादत्ते, " यदस्य पारेरजस " इति शिक्यं गृह्णाति, ' येन देवा: पवित्रेण " इति जलपवित्रं गृह्णाति, ' येन देवा ज्योतिषोर्ध्वा उदायन् ' इति कमंडलुं गृह्णाति, सप्तव्याहृतिभिः पात्रे गृह्णाति इति " ।

अन्ये तु प्रकारांतरं वर्णयंति । नांदीश्राद्धं कृत्वा परेद्युरुपोष्य सप्ताह वा केशान्परिहृत्य कण्ठादुपरि वापयित्वा नखनिकृंतनं च कारयित्वा स्नात्वाऽऽचम्य पुण्याहं वाचयित्वा पुत्रादिदायातिरिक्तं स्वद्रव्यं होमार्थं दक्षिणार्थं च स्थापयित्वा ब्राह्मणेभ्यः सर्वस्वं दत्वा ततो दोरकौपीनाच्छादनानि प्रक्षाल्य सलक्षणं मुद्रासहितं वैणवं दंडं जलपात्रं च सन्निधाप्य देवायतनादौ स्थित्वा ब्रह्मांजलिं कृत्वा ॐ नमो ब्रह्मणे० बृहते करोमि इति त्रिर्जपित्वा ब्रह्मयज्ञवत् वेदादि जपित्वा "ॐ नमो ब्रह्मणे नमः ॐ इंद्राय० ॐ सोमाय:० ॐ प्रजापतये० ॐ आत्मने० ॐ अंतरात्मने० ॐ परमात्मने नमः " इति सक्तुमुष्टित्रयं प्रणवेन प्राश्याचम्य " ॐ आत्मने स्वाहा ॐ अंतरात्मने स्वाहा ॐ ज्ञानात्मने स्वाहा ॐ परमात्मने स्वाहा ॐ प्रजापतये स्वाहो " इति नाभिं स्पृष्ट्वा जपेत् । ततः पयो दधि सर्पिः प्रत्येकं त्रिवारं प्रणवेन प्राश्याचम्य प्राङ्मुख उपविश्य प्राणायामत्रयं कृत्वा यथाशक्ति जपं कुर्यात्तत आदित्यास्तमयात्पूर्वमेव वक्ष्यमाणं ' पुरुषसूक्तहोमार्थमग्निं प्रतिष्ठापयेत् । पुरुषसूक्तहोमविरजाहोमो तंत्रेण करिष्य ' इति संकल्प्य स्वे स्वेऽग्नावाज्यभागांतं कृत्वा " भूः स्वाहा " इति । पूर्णाहुतिं जुहुयात्ततः सायंसंध्यामुपास्य सायमग्निकार्यं कृत्वा अग्नेर्दक्षिणतो दर्भान्संस्तीर्य कृष्णाजिनं च वस्त्रेणाच्छाद्य तत्रासीनो गायत्रीं जपन्जागरणं कुर्यात् । ततो ब्राह्मे मुहूर्ते उत्थाय स्नात्वाऽचम्य स्वाग्नौ चरुं श्रपयित्वाऽऽभिघार्य बर्हिर्ष्यासाद्य व्याहृतिं पुरुषसूक्तं च जपेत्। प्रजापतये स्वाहा इंद्राय स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा ब्रह्मणे स्वाहा इति जपित्वा पुण्याहं

---

१ ख–शासने ।

वाचयित्वा स्रुवेणाज्यं गृहीत्वा अग्नये स्वाहा सोमाय स्वाहा अग्नये स्वाहा इति हुत्वा प्रयासाय स्वाहा इति द्वादशाज्याहुतीः प्राणाय स्वाहा इति पंचाज्याहुतीर्हुत्वा स्वशाखापुरुषसूक्तेन प्रत्यृचं समिदन्नाज्याहुतिं क्रमेण जुहुयात्ततो विरजाहोममाज्येन चरुणा च कुर्यात्। स्विष्टकृतं हुत्वा उपरिष्टात्तंत्रं कृत्वा ॐ स्वाहा इति पूर्णाहुतिं हुत्वा सर्पिर्मिश्रं चरुं प्राश्याचम्य ब्रह्मोद्वासनं कृत्वा आचार्याय दक्षिणां दत्वा प्रातः संध्यामुपास्य प्रातर्होमं हुत्वा समासिंचंतु मरुतः समिंद्रः सं बृहस्पतिः । समाऽयमाग्निः सिंचत्वायुषा च बलेन चायुष्मंतं वर्चस्वंतं करोतु मा इत्युपस्थाय आयंते योनिर्ऋत्विय इति त्रिरग्निमाजिघ्रेत्ततो दोरकौपीनकाषायवस्त्रदंडादिकं गृहीत्वा जलाशयं गत्वा स्नात्वा 'अस्मदाश्रमात्परमहंसाश्रमं प्रविशामि' इति संकल्प्य नाभिमात्रोदके प्राङ्मुखस्तिष्ठन्-सावित्रीं व्याहृतौ प्रवेशयामि इति संकल्प्य सावित्रीप्रवेशनं कुर्यात्। "ॐ भूः सावित्रीं प्रवेशयामि तत्सवितुर्वरेण्यं । ॐ भुवः सावित्रीं प्रवेशयामि भर्गो देवस्य धीमहि । ॐ सुवः सावित्रीं प्रवेशयामि धियो यो नः प्रचोदयात् । ॐ भूः सावित्रीं प्रवेशयामि तत्सवितुरेण्यं भर्गो देवस्य धीमहि। ॐ सुवः सावित्रीं प्रवेयशामि धियो यो नः प्रचोदयात्। ॐ सुवः सावित्री० मि तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्" इति व्याहृतौ सावित्रीं प्रवेशयेत् । ततः व्याहृतीः प्रणवे प्रवेशयामि इति संकल्प्य "ॐ भूः प्रणवे प्रवेशयामि ॐ भुवः प्रणवे प्रवेशयामि ॐ सुवः प्रणवे प्रवेशयामि ॐ भूर्भुवःसुवः प्रणवे प्रवेशयामि" इति व्याहृतीः प्रणवे समारोपयेत्। ततः अहं वृक्षस्य रेरिवा०' इति त्रिशंकोर्वेदानुवचनं। 'यश्छंदसामृषभो विश्वरूपः०' 'श्रुतं मे गोपाय' इति जपित्वा पुत्रेषणायाश्च वित्तेषणायाश्च लोकेषणायाश्च व्युत्थितोऽहमित्युक्त्वा ऊर्ध्वबाहुः सूर्याभिमुखस्तिष्ठन् ।' ' ॐ भूः संन्यस्तं मया । ॐ भुवः संन्यस्तं मया । ॐ सुवः संन्यस्तं मया । ॐ भूर्भुवः सुवः संन्यस्तं मया" इति मंद्रमध्यमोत्तमस्वरेण त्रिवारं प्रैषमंत्रमुच्चार्य ' अभयं सर्वभूतेभ्यो मत्तः स्वाहा ' इति प्राच्यां दिश्युदकांजलिं प्रक्षिप्य शिखां छित्वा यज्ञोपवीतं निकृत्य उदकांजलिना गृहीत्वा ' ॐ भूः स्वाहा ' इत्यप्सु हुत्वा प्रैषमंत्रेण त्रिवारमभिमंत्रितमुदकं प्राश्य तीरं गत्वा वासः कटिसूत्रादिकं भूमौ विसृज्य जातरूपधरः सप्तपदं प्राचीमुदीचीं वा दिशं व्रजेत् । आचार्योऽन्यो वा भो भगवन् तिष्ठ तिष्ठ लोकानुग्रहार्थं दंडादि गृहाण इति निवार्य कौपीनं काषायवस्त्रं च दद्यात्। प्रणवेन स्वीकृत्य परिधायाचम्य मस्तकप्रमाणं परशुशंखमुद्रान्विताग्रं सुरभिपद्मजमुद्रान्वितं मध्यं नागमुद्रान्वितं मूलमुक्तलक्षणयुक्तमेकं वैणवं दंडं "इंद्रस्य वज्रोऽसि वार्त्रघ्नः० रय" इति मंत्रेण तं प्रार्थयन् ' सखा मां गोपाय ' इति दक्षिणहस्तेन गृह्णीयात्। ' ॐ मिति ' कमंडलुं च गृह्णीयात् इति ।

" एवं संन्यासकल्पस्य नानात्वमृषिभिः स्मृतम् । तत्र व्यवस्था द्रष्टव्या संप्रदायानुसारतः "॥ अथ **संन्यासोपदेशक्रम** उक्तविधिना संन्यासं विधायात्मज्ञानाय गुरुसमीपं गच्छेत् ॥ तथा च **मुंडके श्रूयते** " तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् "इति । ततो विनीतो गुरुमुपगम्य दक्षिणं जानुं भूमिं नीत्वा पादग्रहणं च कृत्वा

" यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै ।

" तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये " ॥

इति मंत्रेण गुरुमीश्वरबुध्योपस्थायाधीमहि भगवो ब्रह्मेति ब्रूयात् । तस्मै साधनचतुष्टयसंपन्नायाधिकारिणे गुरुर्ब्रह्मोपदिशेत् । तथा च **श्रूयते**—" तस्मै स विद्वानुप-

संपन्नाय सम्यक्प्रशांतचित्ताय शमान्विताय येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्यां। तदेतत्सत्यमिति। ततो गुरुरात्मानमनुसंधाय जलपूर्णशंखं पुष्पादिभिरभ्यर्च्य द्वादशप्रणवैरभिमंत्र्य प्रणवेन शिष्यशिरोऽभिषिंचेत्। ततः शं नो मित्र इति शांतिं पठित्वा शिष्यशिरसि हस्तं दत्वा पुरुषसूक्तं जपेत्।

तथा च **बह्वृचपरिशिष्टे**—"अथास्य शिरसि पुरुषसूक्तेन पाणिमुपदधाति मम हृदये हृदयं ते ददामि मम चित्तमनुचित्तं तेऽस्तु मम वाचमेकव्रते जुषस्व बृहस्पतिस्त्वा नियुनक्तु मह्यमिति हृदयदेश" इति। ततः प्रणवमुपदिश्य तदर्थं बोधयेत्॥ महावाक्योपदेशपूर्वकं धर्मं बोधयित्वा नाम दद्यात्। **यतिनामानि**—

"तत्त्वं पदार्थयोरैक्यं यत्पदं प्रतिपादयेत्। तन्नाम यतये कुर्याद्वाक्यनाम तदिष्यते॥
"यतीनां ख्यातयशसामाचार्यः पूर्वभाविनाम्। नाम कुर्यान्न शिष्यस्य बुद्धिपूर्वं कदाचन"॥

इति संप्रदायविदः॥

बह्वृचपरिशिष्टेऽपि "अथास्मै नाम दद्याद्वैष्णवं नामाथवा यद्रोचत इति संप्रदायविद्वचनम्

"योगपट्टं च दातव्यं वेदांताभ्यासतः परम्। ततो नाम प्रकर्तव्यं गुरुणा सर्वसंमतम्।
"तीर्थाश्रमवनारण्यगिरिपर्वतसागराः। सरस्वती भारती च पुरी नाम यतेर्दश॥
"श्रीपादसंज्ञया वाक्यं नाम तस्य यथातथम्" इति।

अथातुरसंन्यासक्रमः।

"यद्यातुरः स्यान्मनसा वाचा वा संन्यसेत्तदा। आतुराणां च संन्यासं न विधिर्नैव च क्रिया॥
"प्रैषमात्रं समुच्चार्य संन्यासं तत्र पूरयेत्" इत्यादिश्रुतिस्मृतिभ्यः स्वशक्त्यनुसारेण मनसा वाचा वा प्रैषोच्चारणादि कुर्वत आतुरस्य कृच्छ्रनांदीश्राद्धादि निखिलांगलोपेऽपि स संन्यासपूर्तिः। विलंबातुरस्य तु प्रैषमात्रमिति मात्रचोदनसंभवादंगकलापव्यावर्त्तकत्वेनाप्युपपत्तौ शक्त्यांऽगकलापव्यावर्त्तकत्वानुपपत्तेर्नांदीश्राद्धेष्टिविरजाहोमाद्यशक्तस्य इष्टदेवतायै पूर्णाहुतिरग्निसमारोपणगायत्रीप्रवेशनप्रैषोच्चारणाभयदानानीत्याहुः। अत्र **याज्ञवल्क्यः**—

"अशक्ताविष्टदैवतायै पूर्णाहुतिं हुत्वा असौ स्वर्गाय लोकाय स्वाहेति आहवनीये दारुमयाणि पात्राणि प्रज्वाल्य मृन्मयान्यप्सु प्रक्षिप्य 'संमासिंचंतु मरुत' इत्यग्निमुपस्थाय 'या ते अग्न्य' इत्यनेन हस्तं प्रताप्यात्मन्यग्नीन्समारोप्य सर्वप्रायश्चित्तपूर्वकं सप्त पंच वा केशान्विसृज्य वापयित्वा यथाविधि स्नात्वाऽऽचम्य पात्रेण तोयमादायाप उपसृज्य दक्षिणेन पाणिनाऽप्सु जुहोति एष वा अग्नेर्योनिर्यः प्राणः प्राणं गच्छ स्वां योनिमभिगच्छ स्वाहा इति प्रथमाहुतिः। आपो वै सर्वा देवताः सर्वाभ्य एवैनं देवताभ्यो जुहोतीति इति द्वितीयाहुतिः। ततो हुतशेषं 'आशुः शिशान' इत्यनुवाकेनाभिमंत्र्य पुत्रैषणा वित्तैषणा लोकैषणा मया त्यक्ता स्वाहा इति प्रथमं पिबेत्। 'ओं भूर्भुवः सुवः ब्रह्मा ओं भूर्भुवः सुवरों मया संन्यस्तं स्वाहा' इति द्वितीयं पिबेत्। 'अभयं सर्वभूतेभ्यो मत्तः स्वाहा' इति तृतीयं पिबेत्। ततोऽन्यतोयमंजलिपूर्णमानीय प्रागादिदिक्षु प्रत्येकं निनयेत्। 'ॐ भूः सावित्रीं प्रवेशयामि ॐ भुवः सावित्रीं प्रवेशयामि ॐ सुवः सावित्रीं प्रवेशयामि ॐ भूर्भुवः सुवः सावित्रीं प्रवेशयामि' इति सावित्रीप्रवेशनं कृत्वा अथोर्ध्वबाहुः सूर्याभिमुखो भूत्वा "ॐ भूः संन्यस्तं मया ॐ भुवः संन्यस्तं मया ॐ सुवः संन्यस्तं मया

ॐ भूर्भुवः सुवः संन्यस्तं" मया इति प्रैषमुच्चारयेत् । तूष्णीं शिखां निकृत्य स्नात्वाऽचम्य यज्ञोपवीतमुद्धृत्योदकांजलिना गृहीत्वा 'ॐ भूः स्वाहा' इत्यप्सु हुत्वा दिगंबरो भूत्वा पुत्रैषणातो मुक्तो वित्तैषणातो मुक्तोऽहम् लोकैषणातो मुक्तोहं इति ब्रुवन्मंत्रतो दंडाद्यादाय गच्छेत् । अत ऊर्ध्वं न पुत्रगृहं गच्छेत् मृते पुरुषसूक्तेन विष्णुबुध्याभिषिच्य यतिसंस्कारमेव कुर्यात् । इति आतुरस्य प्रेषमात्रेण संन्यासपूर्तिश्रवणात्तदुत्तरकालमेव मृतस्योपदेशविकलस्यापि खननमेव संस्कारः । जीवतश्चेच्छिखां यज्ञोपवीतं च निकृत्य दंडकाषायवस्त्रादीनि चादाय सद्गुरुमन्विष्य तस्मादुपदेशं गृहीत्वा यतिधर्माननुतिष्ठेत् ॥

अथ संन्यासभेदाः । तत्र **संवर्त्तः**—

" चतुर्विधा भिक्षवस्तु कुटीचकबहूदकाः । हंसः परमहंसश्च यो यः पश्चात्स उत्तमः "

दक्षः—

" वृत्तिभेदेन भिन्नाश्च नैव लिंगेन ते द्विजाः । लिंगं तु वैष्णवं तेषां त्रिदंडं सपवित्रकम्" ॥

एतत्त्रिदंडधारणं कुटीचकविषयम् । **व्यासः**—

" विरक्तिश्च द्विधा प्रोक्ता तीव्रा तीव्रतरेति च । सत्यामेव तु तीव्रायां न्यसेद्योगी कुटीचके ॥

" शक्तो बहूदके तीव्रतरायां हंसं[1]ज्ञिते । मुमुक्षुः परमे हंसे साक्षाद्विज्ञानसाधने ॥

" कुटीचकः परिव्रज्यः ज्येष्ठवेश्मनि नित्यशः । भिक्षां बंधुभ्य आदाय भुंजीरन् शक्तिसंक्षये" ॥

श्रुतिः—" कुटीचको ब्रह्मचारी कुटुंबं विसृजेत् " इति । **बोधायनः**

" कुटीचकस्तु संन्यस्य स्वीयवेश्मनि नित्यशः । भिक्षामादाय भुंजीत स्वबंन्धूनां गृहेऽथ वा ॥

" शिखायज्ञोपवीती स्यात्त्रिदंडी सकमंडलुः । सावित्रीं सहस्रकृत्व आवर्त्तयेच्छतकृत्वोऽपरिमितकृत्वो वा " इति । **हारीतः**—

" त्रिदंडं वैणवं सौम्यं सततं समपर्वकम् । वेष्टितं कृष्णगोवालरज्जुवच्चतुरंगुलम् ॥

" ग्रंथिकाराङ्गिभिर्युक्तं सुशुभं शिक्यलक्षणम् । गृह्णीयात्सततं विद्वान्पात्रं चैव कमंडलुम् ॥

" आसनं दारवं प्रोक्तं स्वहस्तचतुरंगुलम् । कौपीनाच्छादनं वासः कन्थां शीतनिवारिणीम् ॥

"जलपात्रं पवित्रं च खनित्रं च कृपाणिकाम् । पादुके चापि गृह्णीयात् कुर्यान्नान्यस्य संग्रहम् ॥

" शिखायज्ञोपवीती स्याद्देवताराधनं चरेत् । तर्पयित्वा तु देवांश्च मंत्रवद्भास्करं नमेत् ॥

"आसीनः प्राङ्मुखो मौनी प्राणायामत्रयं चरेत् । गायत्रीं च यथाशक्ति जप्त्वा ध्यायेत्परं पदम् ॥

" स्थित्यर्थमात्मनो नित्यं भिक्षाटनमथाचरेत् । जपध्यानेतिहासैश्च दिनशेषं नयेद् बुधः ॥

" कृतसंध्यस्ततो रात्रिं नयेद्देवगृहादिषु । हृत्पुंडरीकनिलयं ध्यायेदात्मानमव्ययम् ॥

" यतिधर्मरतः शान्तः सर्वभूतसमो वशी । प्राप्नोति परमं स्थानं यत्प्राप्य न निवर्तते ॥

" त्रिदंडधृग्यो हि पृथक्समाचरेच्छनैः शनैस्त्यक्तबहिर्मुखाक्षः ।
संमुच्य संसारसमस्तबंधनं स याति विष्णोरमृतात्मनः पदम् " ॥ इति ।—

व्यासोपि—

" स्वाध्यायं चान्वहं कुर्यात् सावित्रीं सन्ध्ययोर्जपेत् ।

" यज्ञोपवीती सततं कुशपाणिः समाहितः । धौतकाषायवसनश्मश्रुछन्ननखरुहः ॥

" आध्यात्मिकं च सततं वेदांताभिहितं चरेत् । पुत्रेषु वाऽथ निवसेद्ब्रह्मचारी यतिर्मुनिः ॥

---

१ **खग**–तीव्रसंज्ञके ।

"वेदमेवाभ्यसेन्नित्यं स याति परमां गतिम्। स्वाध्यायं चान्वहं कुर्यात्सावित्रीं संध्ययोजर्पन्॥
"ध्यायीत सततं देवमेकांते परमेश्वरम्। एकान्नं वर्जयेन्नित्यं कामक्रोधं परिग्रहम्॥
"एकवासा द्विवासा वा शिखायज्ञोपवीतवान्। कमंडलुधरो विद्वान्याति तत्परमं पदम्"॥ इति।
मेधातिथिः—"यावन्न स्युस्त्रयो दंडास्तावदेकेन पर्यटेत्"। **हारीतः**—
"नष्टे जलपवित्रे वा त्रिदंडे वा प्रमादतः। एकं तु वैणवं दंडं पालाशं बैल्वमेव वा॥
"गृहीत्वाऽपि चरेत्तावद्यावल्लभ्येत् त्रिदंडकं" इति। यत्तु
"शिखिनस्तु श्रुतः केचित्केचिन्मुंडाश्च भिक्षुकाः। चतुर्धा भिक्षवो विप्राः सर्वे चैव त्रिदंडिनः"॥
इत्यत्रिवचनं तद्वाग्दंडाद्यभिप्रायम्। तथा च **मनुः** (१२।१०)—
"वाग्दंडश्च मनोदंडो कर्मदंडस्तथैव च। यस्यैते नियता बुद्धौ स त्रिदंडीति चोच्यते"॥
दक्षः—
"वाग्दंडो मौनमेव स्यात्कर्मदंडस्त्वनीहता। मानसस्य तु दंडस्य स्वरूपं प्राणसंयमः॥
"त्रिदंडिव्यपदेशेन जीवंति बहवो नराः। यो हि ब्रह्म न जानाति न त्रिदंड्यर्भको हि सः"॥
व्यासः—
"वैणवा ये स्मृता दंडा लिंगमात्रप्रबोधकाः। लिंगाभिव्यक्तये धार्या न पुनर्धर्महेतवे॥
"जितेंद्रियैर्जितक्रोधैर्धार्यास्ते तत्त्वदर्शिभिः। त्रिदंडस्य परित्यागे एकदंडस्य धारणम्"॥ इति।
कुटीचकबहूदकयोर्हंसपरमहंससंन्यासं विदधाति श्रुतिः। त्रिदंडं कमंडलुं शिक्यं पात्रं जलपवित्रं शिखां यज्ञोपवीतं चेत्येतत्सर्वं भूः स्वाहेत्यप्सु परित्यज्यात्मानमन्विच्छेत्" इति।
बोधायनः—"मुंडः काषायवासा वाङ्मनकर्मदंडैर्भूतानामद्रोही यज्ञोपवीतं त्रिदंडं कमंडलुं पात्रं परित्यज्य विमृज्य सर्वकर्माणि सर्वसहः सर्वसंगनिवृत्त" इति। **स्मृतिरपि**—
"त्रिदंडं कुंडिकां चैव सूत्रं वाऽथ कपालिकम्। जंतूनां वारणं वस्त्रं सर्वं भिक्षुः परित्यजेत्"॥ इति।
बहूदकधर्मानाह पितामहः—
"बहूदकः स विज्ञेयः सर्वसंगविवर्जितः। बंधुवर्गे न भिक्षेत स्वभूमौ नैव संविशेत्॥
"निश्चलः स्थाणुभूतश्च सदा मोक्षपरायणः। न कुड्यां नोदके संगं कुर्यात् वस्त्रे च चेतसा॥
"नागारे नासने नान्नेनास्तरे न त्रिदंडके॥" **माधवीये पराशरे च**—
"बहूदकश्च संन्यस्य बंधुपुत्रादिवर्जितः। सप्तागारश्चरेद्भैक्षमेकान्नं च परित्यजेत्॥
"गोवालरज्जुसंबंधं त्रिदंडं शिक्यमुद्धृतम्। जलपात्रं पवित्रं च खनित्रं च कृपाणिकम्॥
"शिखां यज्ञोपवीतं च देवताराधानं चरेत्"॥ इति।
अथ हंसधर्मानाह पितामहः—
"हंसस्तृतीयो विज्ञेयो भिक्षुर्मोक्षपरायणः। नित्यं त्रिषवणस्नायी त्वार्द्रवासा भवेत्सदा॥
"चांद्रायणेन वर्तेत यतिधर्मानुशासनात्। वृक्षमूले वसेन्नित्यं गुहायां वा सरित्तटे॥
"हंसः कमंडलुं शिक्यं भिक्षापात्रं तथैव च। कंथां कौपीनमाच्छाद्यमंसवस्त्रं बहिःपटम्॥
"एकं तु वैणवं दंडं धारयेन्नित्यमादरात्। दैवतानामभेदेन कुर्यात् ध्यानं समर्चयेत्"॥
बोधायनः—
"हंसः कमंडलुं शिक्यं दंडपात्राणि बिभ्रतः। ग्रामतीर्थैकरात्रश्च नगरे[1] पंचरात्रकाः॥

---

१ क्ष-पंचरात्रकाः।

" त्रिषड्रात्रोपवासाश्च पक्षमासोपवासिनः । कृच्छ्रसांतपनाद्यैश्च यमैः कृशवपुर्धराः " ॥

विष्णुः—

" यज्ञोपवीतं दंडं च वस्त्रं जंतुनिवारणम् । तावान्प्रतिग्रहः प्रोक्तो नान्यो हंसपरिग्रहः " ॥

व्यासः—

" कौपीनाच्छादनं वासः कंथां शीतनिवारणीम् । अक्षमालां च गृह्णीयाद्वैणवं दंडमव्रणम् " ॥

स्मृतिरत्ने—

" कौपीनयुगुलं वासः कंथां शीतनिवारिणीम् । पादुके च प्रगृह्णीयात् कुर्यान्नान्यस्य संग्रहम् ॥

" आसनोपानहच्छत्रं भाजनाजिनमौषधम् । यतिश्च प्रतिगृह्णीयाद्दंडवस्त्रकमंडलून् " ॥

अथ परमहंसधर्माः । अत्रिः—

" कौपीनयुगुलं कंथा दंड एक परिग्रहः । यतेः परमहंसस्य नाधिकं तु विधीयते ॥

" यदि वा कुरुते रागादधिकस्य परिग्रहम् । रौरवं नरकं गत्वा तिर्यग्योनिषु जायते ॥

" विशीर्णान्यमलान्येव चेलानि ग्रथितानि च । कृत्वा कंथां बहिर्वासो धारयेद्धातुरंजितम् ॥

"काषायं ब्राह्मणस्योक्तं नान्यवर्णस्य कस्यचित् । मोक्षाश्रमे सदा प्रोक्तं धातुरक्तं तु योगिनाम् ॥

" परः परमहंसस्तु तुर्याख्यः श्रुतिशासनात् । शांतो दांतः सत्वसमः प्रणवाभ्यासतत्परः ॥

" श्रवणादिरतः शुद्धो निदिध्यासनतत्परः । ब्रह्मभावेन संपूज्य ब्रह्मांडमखिलं स्थितः ॥

"आत्मतृप्तश्चात्मरतिः समलोष्टाश्मकांचनः । तत्त्वंपदार्थबोधाच्च विष्णुरूपः स्वयं सदा ॥

" निवसेत्परमो हंसो यत्र क्वापि कथंचन " ॥

व्यासः—

" परमहंसास्त्रिदंडं च रज्जुं गोवालनिर्मितम् । शिखां यज्ञोपवीतं च नित्यं कर्म परित्यजेत् ॥

"यथायं मेखलादीनि गृहस्थाश्रमवांछया । पत्नी योक्त्रं यथेष्ट्यं ते सोमांते च यथा गृहान् ॥

" तद्वद्यज्ञोपवीतस्य त्यागमिच्छंति योगिनः " ॥

माधवीये—

" यदा तु विदितं तत्स्यात् परं ब्रह्म सनातनम् । तदैकदंडं संगृह्य उपवीतं शिखां त्यजेत् " ॥ यत्त्वेकदंडी त्रिदंडी वेति **बोधायनादिभि**र्दंडविकल्पः स्मर्यते । यदपि ' मुंडः शिखी वेति ' **गौतमादि**भिः(३।२१)"शिखाविकल्पः स्मर्यते तत्सर्वं व्यवस्थितविषयं द्रष्टव्यम् । कुटीचकबहूदकयोस्त्रिदंडधारणं शिखाधारणं च । इतरयोस्तु एकदंडधारणं मुंडनं चेति उपवीतविकल्पोऽपि व्यवस्थितविषय एव । त्रयाणामुपवीतधारणं परमहंसस्य नेति । **विष्णुः**—

"कौपीनाच्छादनार्थं तु वासोऽर्धस्य परिग्रहः । कुर्यात्परमहंसस्तु दंडमेकं तथैव च " ॥

पराशरः— " तत्र परमहंसा एकदंडधरा मुंडाः अममा अपरिग्रहा अपयज्ञोपवीतिनो ज्ञानाग्निखा ज्ञानयज्ञोपवीतिनः ब्रह्मनिष्ठा आत्मरता आत्मतृप्ता आत्मानं सर्वं पश्यंत " इति ।

पिप्पलादशाखायाम्—

" सशिखं वपनं कृत्वा बहिःसूत्रं त्यजेद्बुधः । यदक्षरं परं ब्रह्म तत्सूत्रमिति धारयेत् ॥

" सूचनात्सूत्रमित्याहुः सूत्रं नाम परं पदम् । तत्सूत्रं विदितं येन स विप्रो वेदपारगः ॥

" येन सर्वमिदं प्रोतं सूत्रे मणिगणा इव । तत्सूत्रं धारयेद्योगी योगवित्तत्वदर्शिवान् ॥

---

१ [illegible] ।

"बहिःसूत्रं त्यजेद्विद्वान्योगमुत्तममास्थितः। ब्रह्मभावमिदं सूत्रं क्रियांगं तद्धि वै स्मृतम्॥
"शिखाज्ञानमयी यस्य ह्युपवीतं तु तन्मयम्। ब्राह्मण्यं सकलं तस्य चेति ब्रह्मविदो विदुः"॥

आरण्युपनिषदि— "अरणि प्राजापत्यः प्रजापतेर्लोकं जगाम तं गत्वोवाच। केन भगवान्कर्माण्यशेषतो विसृजानीत। तं होवाच प्रजापतिस्तव पुत्रान् भ्रातृन्बंध्वादीन्शिखां यज्ञोपवीतं यागं सूत्रं स्वाध्यायं च भूर्लोक भुवर्लोक सुवर्लोक महर्लोक जनलोकतपोलोकसत्यलोकं च अतलपातालवितलसुतलरसातलतलातलमहातलब्रह्मांडं च विसृजेत् दंडमाच्छादनकौपीनं परिग्रहेच्छेषं विसृजेत्" इति। विसर्गस्य चाशायाः दंडादिग्रहे च ग्रहणमात्रं कायिकं तत्र चाशाया विसर्गस्तुल्य एवेत्यभियुक्ताः। **काठके**—"यज्ञोपवीतं वेदांश्च सर्वं तद्वर्जयेत्" इति। **परमहंसोपनिषदि**— "असौ स्वपुत्रमित्रकलत्रबंध्वादीन् शिखायज्ञोपवीतं च स्वाध्यायं च सर्वकर्माणि च संन्यस्यायं ब्रह्मांडं च हित्वा कौपीनं दंडमाच्छादनं च स्वशरीरोपभोगार्थाय लोकस्योपकारार्थाय च परिग्रहेत्"। इति।

"ज्ञानदंडो धृतो येन एकदंडी स उच्यते। काष्ठदंडो धृतो येन सर्वाशी ज्ञानवर्जितः॥
"स याति नरकान्घोरान्महारौरवसंज्ञितान्॥
"एकदंडं समाश्रित्य जीवंति बहवो नराः। नरके रौरवे घोरे कर्मत्यागात्पतंति ते"॥

मनुः—

"नियतो विचरेद्धर्मं यत्र तत्राश्रमे वसन्। समः सर्वेषु भूतेषु न लिंगं धर्मकारणम्॥
"फलं कतकवृक्षस्य यद्यप्यंबुप्रसादकम्। न नामग्रहणादेव तस्य वारि प्रसीदति"॥

यथा कतकफलनामग्रहणादेव न वारि प्रसीदति तथाऽऽत्मज्ञानमंतरेण दंडादिलिंगग्रहणादेव न प्रसीदतीत्यर्थः। स एव (४।२००)

"अलिंगी लिङ्गिवेषेण यो वृत्तिमुपजीवति। स लिंगीनां हरत्येनः तिर्यग्योन्यां च जायते"॥ इति। **कात्यायनः**—"एकदंडधरा मुंडाः" इति। **जमदग्निः**—

"दंडात्मनोस्तु संयोगः सर्वदैव विधीयते। न दंडेन विना गच्छेदिषुक्षेपत्रयं बुधः॥
"जलांबरादिषु क्षिप्ते न किंचिद्दोषभाग्भवेत्॥
"शिष्यादिभिर्विनीतोऽपि नीत एव स आत्मना। हस्तपादादिवच्छिष्य इति शिष्टानुशासनम्"॥इति।

दण्डादिलक्षणम्। दंडलक्षणं **भविष्यत्पुराणे** दर्शितम्—

"दंडं तु वैणवं दंडं सत्वचं समपर्वकम्। पुण्यस्थानसमुत्पन्नं नानाकल्माषशोभितम्॥
"अदग्धमहतं कीटैः पर्वग्रंथिविराजितम्। स्वयंभूतं तु मेदिन्यां शाखावर्जमृजुं शुभम्॥
"नासादघ्नं शिरोघघ्नं भ्रुवोर्वा बिभृयाद्यतिः"॥

देवलः—"आददीत प्रवृत्तेभ्यः साधुभ्यो धर्मसाधनम्। नाददीत निवृत्तेभ्यः प्रमादेनापि किंचन॥
"रथ्यायां बहु वस्त्राणि भिक्षा सर्वत्र लभ्यते। भूमिशय्याऽस्ति विस्तीर्णा यतयः केन दुःखिताः"॥

यतिधर्मसमुच्चये—

"क्षौमं शाणमयं वाऽपि वासः कांक्षेत कौशिकम्। अजिनं वाऽपि धर्मज्ञः साधुभ्यस्तानपीडयन्॥
"सचेलः स्यादचेलो वा कंथाप्रावरणोऽपि वा। एकेन वस्त्रेण वा विद्वान्व्रतं भिक्षुश्चरेद्यथा॥
"नात्यर्थं सुखदुःखाभ्यां शरीरमुपतापयेत्। स्तूयमानो न हृष्येत निंदितो न शपेत्परम्"॥

वृद्धयाज्ञवल्क्यः—

" अध्यात्मपुस्तकं विप्रैर्दत्तं गृह्णीत भिक्षुकः । न तावद्द्रव्यमादाय लेखयेद्दोषदर्शनात् " ॥

अथ यत्याह्निकधर्माः । बोधायनः—

" उषःकाले समुत्थाय शौचं कृत्वा यथाविधि । दन्तान्विशोध्य चाचम्य पर्वर्वर्जं यथाविधि ॥
" स्नात्वा चाचम्य विधिवत्तिष्ठन्नासीन एव वा । उदये विधिवत्संध्यामुपास्य प्रणवं जपन् ॥
"अनग्निरनिकेतः स्याद्ग्राममन्नार्थमाश्रयेत् । उपेक्षको संचयको मुनिर्भावसमन्वितः" ॥

अथेमानि व्रतानि भवंति ।

" अहिंसा सत्यमस्तेयं मैथुनस्य च वर्जनम् । त्याग इत्यैव पंचैवोपव्रतानि भवंति ॥
" अक्रोधो गुरुशुश्रूषा अप्रमादः शौचमाहारशुद्धिश्च " इति । पराशरः—
" कामं क्रोधं तथा दर्पं लोभमोहादयश्च ये । तांस्तु दोषान्परित्यज्य परिव्राण्णिर्ममो भवेत् " ॥

व्यासः—

"रागद्वेषविमुक्तात्मा समलोष्ठाश्मकांचनः । प्राणिहिंसानिवृत्तश्च मुनिः स्यात्सर्वनिस्पृहः ।
" मोक्षशास्त्रेषु निरतो ब्रह्मसूत्री जितेंद्रियः । दंभाहंकारनिर्मुक्तो निंदापैशुन्यवर्जितः ॥
" आत्मज्ञानगुणोपेतो यतिर्मोक्षमवाप्नुयात् । अभ्यसेत्सततं वेदं प्रणवाख्यं सनातनम् ॥
" स्नात्वाऽऽचम्य विधानेन शुद्धिर्देवालयादिषु । प्राग्रात्रेऽपररात्रे च मध्यरात्रे तथैव च ॥
" संध्यास्वह्निविशेषेण चिंतयेन्नित्यमीश्वरम् ॥
" कृत्वा हृत्पद्मनिलये विष्ण्वाख्यं विश्वसंभवम् । आत्मानं सर्वभूतानां परस्तात्तमसः[1] स्थितम् ।
" सर्वस्याधारमव्यक्तमानंदं ज्योतिरव्ययम् । प्रधानपुरुषातीतमाकाशमजरं शिवम् ॥
"तस्मात् ध्यानरतो नित्यमात्मविद्यापरायणः । ज्ञानं समभ्यसेद्ब्रह्म येन मुच्येत बंधनात् " ॥

मनुः (२।१००)

" वशे कृत्वेंद्रियग्रामं संयम्य च मनस्तथा । सर्वान्संसाधयेदर्थानक्षिण्वन्योगतस्तनुम्"॥

अर्थान्श्रवणादीन् ।

"इंद्रियाणां प्रसंगेन दोषमृच्छत्यसंशयम् । संनियम्य तु तान्येव ततः सिद्धिं निगच्छति॥(२।९३)
" न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ (९४)
"यच्चैतान्प्राप्नुयात्सर्वान्यच्चैतान्केवलांस्त्यजेत्।प्रापणात्सर्वकामानां परित्यागो विशिष्यते॥ ९५
" न तथैतानि शक्यंते संनियंतुमसेवया । विषयेषु प्रदुष्टानि यथा ज्ञानेन नित्यशः ॥ (९६)
"श्रुत्वा स्पृष्ट्वा च दृष्ट्वा च भुक्त्वा घ्रात्वा च यो नरः।न हृष्यति ग्लायति वा स विज्ञेयो जितेंद्रियः॥(९८)
"यस्य वाङ्मनसे शुद्धे सम्यग्गुप्ते च सर्वदा । स वै सर्वमवाप्नोति वेदांतोपगतं फलम् ॥(२।१६०)
"नारुंतुदः स्यादार्तोऽपि न परद्रोहकर्मधीः। यथा चोद्विजते वाचा नालोक्यं तामुदीरयेत्"॥(१६१)

अरुंतुदः परमर्मप्रकाशनः ।

" संमानाद्ब्राह्मणो नित्यमुद्विजेत विषादिव । अमृतस्येव चाकांक्षेदवमानस्य सर्वदा ॥ (१६२)
" सुखं ह्यवमतः शेते सुखं च प्रतिबुध्यते । सुखं चरति लोकेऽस्मिन्नवमंता विनश्यति ॥ (१६३)
" अतिवादांस्तितिक्षेत नावमन्येत कंचन । न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ॥ (६।४७)
"क्रुध्यंतं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत् । सप्तद्वारावकीर्णां च न वाचमनृतां वदेत्"॥ (४८)

धर्मोऽर्थः कामः धर्मकामौ अर्थकामौ धर्मार्थौ धर्मार्थकामश्चेति सप्तद्वाराणि । तदवकीर्णा तत्संबंधां मोक्षाश्रितामेव वाचं वदेत् । न त्रिवर्गाश्रितामित्यर्थः । मनुरेव (६।४९)—

[1] क्ष- मम

"अध्यात्मरतिरासीनो निरपेक्षो निरामिषः । आत्मनैव सहायेन सुखार्थी विचरेदिह" ॥ निरामिषः रसवद्भोज्यरहितः । सुखार्थी मोक्षार्थी

" इंद्रियाणां निरोधेन रागद्वेषक्षयेण च । अहिंसया च भूतानाममृतत्वाय कल्पते ॥ (६।६०)–

" उपेक्षेत गतिं नृणां कर्मदोषसमुद्भवाः । निरये चैव पतनं यातनाश्च यमक्षये ॥ (६१)

" विप्रयोगं प्रियैश्चैव संप्रयोगं तथा प्रियैः । जरसा च त्रिभवनं व्याधिभिश्चोपपीडितम् ॥ (६२)

"देहादुत्क्रमणं चास्मात्पुनर्गर्भे च संभवम् । योनिकोटिसहस्रेषु सृतिश्चास्यांतरात्मनः"॥ (६३)

देहेषु चैवोपसृतिः । संसृतिः अंतरात्मनो जीवस्य ।

" अधर्मप्रभवं चैव दुःखयोगं शरीरिणाम् । धर्मार्थप्रभवं चैव सुखसंयोगमक्षयम् ॥ (६४)

" सूक्ष्मतां चान्ववेक्षेत योगेन परमात्मनः । देहेषु चैवोपपत्तिमुत्तमेष्वधमेषु च ॥ (६५)

" अस्थिस्थूणास्नायुयुतं मांसशोणितलेपितम् । चर्मावनुद्धं दुर्गंधिपूर्णं मूत्रपुरीषयोः ॥ (७६)

" जराशोकसमाविष्टं रोगायतनमातुरम् । रजस्वलमनित्यं भूतवासमिमं त्यजेत् ॥ (७७)

भूतावासं शरीरग्रहं तस्मिन्नहंतां न कुर्यात् । यथा गृहे तिष्ठन्गृही गृहंमन्यो न भवति एवं देहे तिष्ठन्देही देहंमन्यो न स्यादित्यभिप्रायः । उक्तमेवार्थं दृष्टांताभ्यां प्रपंचयति ।

" नदीकूलं यथा वृक्षो वृक्षं वा शकुनिर्यथा । तथात्यजन्निमं देहं कृच्छ्राग्राहाद्विमुच्यते ॥ (७८)

" प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतम् । विसृज्य ध्यानयोगेन ब्रह्माप्येति सनातनम्॥ (७९)

"अनेन विधिना सर्वान् त्यक्त्वा संगान्शनैः शनैः । सर्वद्वंद्वैर्विप्रमुक्तो ब्रह्मण्येवावतिष्ठते॥ (८१)

" सम्यग्दर्शनसंपन्नः कर्मभिर्न निबध्यते । दर्शनेन विहीनस्तु संसारं प्रतिपद्यते ॥ (७४)

"एक एव चरेन्नित्यं सिध्यर्थमसहायकः । सिद्धिमेकस्य पश्यन्हि न जहाति न हीयते ॥ (६।४२)

एकस्य सिद्धिं पश्यन्नसहायस्य सिद्धिर्भवतीति जानन् सिद्धिं न जहाति । स एव–(६।४५)

" कपालं वृक्षमूलानि कुचेलमसहायता । समता चेति सर्वस्मिन्नेतन्मुक्तस्य लक्षणम्" ॥ कपालं भिक्षार्थमलाबुपात्रं वृक्षमूले निवास इति यावत् । कुचेलं शीर्णवस्त्रधारित्वं मुक्तस्य संन्यासिनः ॥ **याज्ञवल्क्यः** (प्रा. ५८)

" सर्वभूतहितः शांतस्त्रिदंडी सकमंडलुः । एकारामः परिव्रज्य भिक्षार्थं गृहमाविशेत्" ॥ एकारामः परिव्राजकांतरेणासहायः संन्यासिनीभिस्त्रिभिश्च 'स्त्रीणां चैकः' इति **बोधायनेन** स्त्रीणामपि प्रव्रज्यास्मरणादिति **विज्ञानेश्वरः** । **दक्षः**—

"नगरं हि न कर्त्तव्यं ग्रामोऽपि मिथुनं तथा । एतत्त्रयं प्रकुर्वाणः स्वधर्माच्च्यवते यतिः॥

"एको भिक्षुर्यथोक्तस्तु द्वावेव मिथुनं स्मृतम् । त्रयो ग्रामः समाख्यातं ऊर्ध्वं तु नगरायते॥

"राजवार्तादि तेषां च भिक्षावार्ता परस्परम् । स्नेहपैशून्यमात्सर्यसंनिकर्षान्न संशयः "॥ इति ।

" एकाकी निस्पृहस्तिष्ठेन्न केनापि सहावसेत् । दद्यान्नारायणेत्येव प्रतिवाक्यं सदा यतिः " ॥

मेधातिथिः—

" भिक्षाटनं जपो ध्यानं स्नानं शौचं सुरार्चनम् । कर्तव्यानि षडेतानि यतीनां नृपदंडवत् ॥

"ध्यानं शौचं तथा भिक्षा नित्यमेकांतशीलता । भिक्षोः कर्माणि चत्वारि पंचमं नोपलभ्यते"॥

व्यासः—

---

१ क्ष–भोगा । २ ख–सम्यक् ।

"कन्थाकौपीनवासा यो दंडधृग्ध्यानतत्परः। एकाकी रमते नित्यं तं देवा ब्राह्मणं विदुः"॥

भगवद्गीतायाम् (१३।१०-११)

" विविक्तदेशसेवित्वपरातिर्जनसंसदि । अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ॥

" एतत् ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥

"असक्तबुद्धिः सर्वत्र जितात्मा विगतस्पृहः।नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति॥ (१८।४९)

" बुध्या विशुद्धया युक्तो धृत्याऽऽत्मानं नियम्य च । शब्दादीन् विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥ (५१)

" विविक्तसेवी लध्वाशी यतवाक्कायमानसः । ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥ (५२)

"अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम् । विमुच्य निर्ममः शांतो ब्रह्मभूयाय कल्पते "॥ (५३)

संवर्त्तः—

" एकाकी चिंतयेद्ब्रह्म मनोवाक्कायकर्मभिः। मृत्युं च नाभिनंदेत जीवितं वा कदाचन॥

" कालमेव प्रतीक्षेत यावदायुः समाप्यते " ॥

मनुः (६।४४)—

" नाभिनंदेत मरणं नाभिनंदेत जीवनम् । कालमेव प्रतीक्षेत निर्वेशं भृतको यथा " ॥

निर्वेशं भृतिः ।

"दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत्। सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् " ॥

संवर्त्तः—

" अजिह्वः पंडकः पंगुरंधो बधिर एव च। मुग्धश्च मुच्यते भिक्षुः षड्भिरेतैर्न संशयः ॥

" इदमिष्टमिदं नेति योऽश्नन्नपि न सज्जति। इदं सत्यमिदं मिथ्या तमजिव्हं प्रचक्षते ॥

" अद्यजातां तथा नारीं तथा षोडशवार्षिकीम् । शतवर्षां च यो दृष्ट्वा निर्विकारः स पंडकः ॥

" भिक्षार्थमटनं यस्य विण्मूत्रकरणाय च । योजनान्न परं गच्छेत् सर्वथा पंगुरेव च ॥

" तिष्ठतो व्रजतो वाऽपि मनश्चक्षुश्च न त्यजेत्। चतुर्युगात्परं सम्यक् परिव्राट् सोंऽध उच्यते ॥

" श्रुत्वा यो न शृणोतीह बधिरः स प्रकीर्तितः ॥

" सांनिध्ये विषयाणां यः समर्थो विकलेन्द्रियः। सुप्तवद्वर्तते नित्यं स भिक्षुर्मुक्त उच्यते " ॥

दक्षः—

" बुधो ह्याभरणं भारं मलमालेपनं तथा। मानयन्तं च निंदन्तं सममेव तु मन्यते ॥

" परमश्रेयसोपेतः परमात्मपरायणः। स्थूलसूक्ष्मशरीराभ्यां मुच्यते दशषट्कवित् ॥

" त्रिदंडं कुंडिकाकन्थां भैक्षभाजनमासनम्। कौपीनाच्छादनं वासः षडेतानि परिग्रहेत्॥

" स्थावरं जंगमं बीजं तैजसं विषमायुधम् । षडेतानि न गृह्णीयाद्यतिर्मूत्रपुरीषवत् ॥

" रसायनक्रियावादं ज्योतिषं क्रयविक्रयम् । विविधानि च शिल्पानि वर्जयेत्परदारवत् ॥

" भिक्षाशनं जपस्नानं ध्यानं शौचं सुरार्चनम्। कर्त्तव्यानि षडेतानि सर्वथा नृपदंडवत् ॥

" नटादिप्रेक्षणं द्यूतं प्रमदां सुहृदं तथा। भक्ष्यं भोज्यमुदक्यां च षण्ण पश्येत्कदाचन ॥

" स्कंधावारे खले सार्थे पुरे ग्रामे असद्गृहे। न वसेत्तु यतिः षट्सु स्थानेष्वेतेषु कर्हिचित् ॥

" रागं द्वेषं मदं मायां द्रोहं मोहं परात्मसु। षडेतानि यतिर्नित्यं मनसाऽपि न चिंतयेत् ॥

---

१ क्ष-मर्वंच ।

"आसनं पात्रलोपश्च संचयः शिष्यसंग्रहः। दिवास्वापो वृथाजल्पो यतेर्बंधकराणि षट्"॥
आसनादीनां लक्षणमाह। **स एव**—
"एकाहात्परतो ग्रामे पंचाहात्परतः पुरे। वर्षेभ्योऽन्यत्र संस्थानमासनं तदुदाहृतम्॥
"उक्तानां यतिपात्राणामेकस्यापि न संग्रहः। भिक्षोर्भैक्षभुजश्चापि पात्रलोपः स उच्यते॥
"गृहीतस्य त्रिदंडादेर्द्वितीयस्य परिग्रहः। कालांतरोपभोगार्थः संचयः परिकीर्तितः॥
"शुश्रूषा लाभपूजार्थं यशोर्थं वा परिग्रहः। शिष्याणां न तु कारुण्यात् स ज्ञेयः शिष्यसंग्रहः॥
"विद्यादीनां प्रकाशत्वादविद्या रात्रिरुच्यते। विद्याभ्यासे प्रमादो यः स दिवा स्वाप उच्यते॥
"अध्यात्मिकीं कथामुक्त्वा भैक्षचर्यां पुरस्कृतिः। अनुग्रहः परप्रश्नो वृथाजल्पः स उच्यते॥
"नाध्येतव्यं न वक्तव्यं न श्रोतव्यं कथंचन। एतैः सर्वैः सुनिष्पन्नो यतिर्भवति नेतरः"।
नाध्येतव्यमित्यादि कर्मकांडविषयम्॥ 'उपनिषदमावर्त्तयेत्' इति श्रुतेः।

बृहस्पतिः—
"न तीर्थवासी नित्यं स्यान्नोपवासपरो यतिः। न चाध्यायनशीलः स्यान्न व्याख्यानपरो भवेत्"॥

अत्रिः—
"अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहः। भावशुद्धिर्हरेर्भक्तिः संतोषः शौचमार्जवम्॥
"आस्तिक्यं ब्रह्मसंस्पर्शः स्वाध्यायः समदर्शनम्। अनौद्धत्यमदीनत्वं प्रसादः स्थैर्यमार्दवे॥
"अस्नेहो गुरुशुश्रूषा श्रद्धा क्षांतिर्दमः शमः। उपेक्षा धैर्यमाधुर्ये तितिक्षा करुणा तथा॥
"ह्रीस्तथा ज्ञानविज्ञाने योगो लघ्वाशनं धृतिः॥
"स्नानं सुरार्चनं ध्यानं प्राणायामो हरिस्तुतिः। भिक्षाटनं जपः संध्या त्यागः कर्मफलस्य च॥
"एष स्वधर्मो विख्यातो यतीनां नियतात्मनाम्॥
"निर्द्वंद्वो नित्यसत्वस्थः सर्वत्र समदर्शनः। तुरीयः परमो हंसः साक्षान्नारायणो यतिः॥
"प्रपंचमखिलं यस्तु ज्ञानाग्नौ जुहुयाद्यतिः। आत्मन्यग्नीन्समारोप्य सोऽग्निहोत्री न चेतरः॥
"आश्रमत्रयमुत्सृज्य प्राप्येव परमाश्रमम्। ततः संवत्सरस्यांते प्राप्य ज्ञानमनुत्तमम्॥
"अनुज्ञाप्य गुरुं चैव चरेद्धि पृथिवीमिमाम्। संरक्षणार्थं जंतूनां रात्रावहनि संध्ययोः॥
"शरीरत्याज्यं चैव समीक्ष्य वसुधां चरेत्"॥

कण्वः—
"एकरात्रं वसेद्ग्रामे नगरे पंचरात्रकम्। वर्षाभ्योऽन्यत्र वर्षासु मासांश्च चतुरो वसेत्"॥
चातुर्मास्यविधिः। **मेधातिथिः**—
"संरक्षणार्थं जंतूनां वसुधातलचारिणाम्। आषाढादींश्च चतुरो मासानां कार्तिकाद्यतिः॥
"धर्माढ्ये जलसंपन्ने ग्रामांते निवसेच्छुचिः"॥

व्यासः—"अविमुक्तेऽप्रविष्टानां विहारस्तु न विद्यते। न देहो भविता तत्र दृष्टं शास्त्रं पुरातनम्"॥
शंखः— "ऊर्ध्वं वार्षिकाभ्यां मासाभ्यां नैकस्थानवासी" इति। अशक्तौ पुनर्मासचतुष्टयमपि स्थातव्यम्। "न चिरमेकत्र वसेदन्यत्र वर्षाकालाच्छ्रावणादयश्चत्वारो मासा वार्षिकाः"॥ इति स्मरणात् इति **विज्ञानेश्वरः**

विष्णुः—"ग्रामांते निर्जने देशे नित्यकालनिकेतनः। पर्यटेत्कीटवद्भूमिं वर्षास्वेकत्र संवसेत॥

"वृद्धानामातुराणां च भिक्षूणां संगवर्जिनाम् । ग्रामे वाऽथ पुरे वाऽपि वासो नैकत्र दुष्यति"॥

आश्वलायनः—

"एकरात्रं वसेद्ग्रामे नगरे पंचरात्रकम् । नदीतीर्थेषु पुण्येषु संवसेद्वावहं यतिः" ॥

यमः—

"एकवासा अवासा वा एकदृष्टिरलोलुपः । आदूषयन्सतां मार्गं ध्यानसक्तो महीं चरेत् ॥
"जलेजीवा स्थलेजीवा आकाशेजीवमालिनि । जीवमालाकुले लोके वर्षा त्वेकत्र संवसेत्" ॥

अत्रिः—

"शुचौ देशे तथा भिक्षुः स्वधर्ममनुपालयन् । पर्यटेत सदा योगी वीक्षयन्वसुधातलम् ॥
"न रात्रौ न च मध्यान्हे संध्ययोर्नैव पर्यटेत् । न शून्ये न च दुर्गे वा प्राणबाधाकरे न च ॥
"यत्र प्रभुर्जगन्नाथस्तत्र योगी वसेत्सदा । भिक्षार्थं प्रविशेद्ग्रामं वासार्थं वा दिनत्रयम् ॥
"एकरात्रं वसेद्ग्रामे पत्तने तु दिनत्रयम् । पुरे दिनद्वयं भिक्षुर्नगरे पंचरात्रकम् ॥
"वर्षास्वेकत्र तिष्ठेत स्थाने पुण्ये जलावृते । आत्मवत्सर्वभूतानि पश्यन्भिक्षुश्चरेन्महीम् ॥
"अंधवत्कुब्जवच्चैव बधिरोन्मत्तमूकवत् ॥
"नामगोत्रादि चरणं देशं वासं श्रुतं कुलम् । वयोवृत्तं बलं शीलं ख्यापयन्न वसेद्यतिः"॥

अरुणी श्रुतिः— "वर्षासु ध्रुवशीलोऽष्टसु मासेषु एकाकी यतिश्चरेद्द्वावेवाचरेत्" इति ॥

गौतमः (३।१०–१२; २०)—

"अनिचयो भिक्षुरूर्ध्वरेता ध्रुवशीलो वर्षासु" इति "नद्वितीयामपर्तौ रात्रिं ग्रामे वसेत्" इति । वर्षासु वर्षतोर्ध्रुवशीलः स्यान्न देशांतरं गच्छेत् पर्तौ तद्वर्जयित्वा ऋत्वंतरेषु यत्र ग्रामे एकरात्रिमुषितं न तत्र द्वितीयां रात्रिं वसेत्प्रतिदिनं ग्रामाद्ग्रामं गच्छेदित्यर्थः । **स एव**— (३।१७–२४) "कौपिनाच्छादनार्थं वासो बिभृयात् । प्रहिणमेके निर्णिज्य नाविप्रयुक्तमौषधिवनस्पतीनामङ्गमुपाददीत वर्जयेत् बीजवधं समो भूतेषु हिंसानुग्रहयोरनारंभी" इति । प्रहिणं जीर्णतया अन्यैस्त्यक्तम् निर्णिज्य प्रक्षाल्य बिभृयात् । कुतश्चित् न कौपीनाच्छादनार्थं प्रतिगृह्णीतेति एके मन्यंते । औषधिवनस्पतीनामंगफलपत्राद्यप्रवृत्तं ततः अप्रच्युतं न गृह्णीयात् । स्वयं शीर्णं तु गृह्णीयाद्वीजानि व्रीह्यादीनि तेषां वधं मुसलादिना अवघातं वर्जयेन्न कुर्यान्न कारयेच्च हिंसायामनुग्रहे च भूतेषु समः यो हिनस्ति योऽनुगृह्णाति तत्र समो निर्विकारः अनारंभी किंचिदप्यारंभं कुर्यात् ऐहलौकिकं पारलौकिकम् चेत्यर्थः । **आपस्तंबोऽपि** (२।२१।१०–१७)–" अनग्निरनिकेतस्याशर्मा अशरणो मुनिः स्वाध्याय एवोत्सृजमानोवाचं ग्रामे प्राणवृत्तिं प्रतिलभ्यानीहोनामुत्रश्चरेत्तस्य मुक्तमाच्छादनं विहितं सर्वतः परिमोक्षमेके सत्यानृते सुखदुःखे वेदानिमं लोकममुं च परित्यज्यात्मनात्मानमन्विच्छेद्बुद्धेक्षेमप्रापणम् तच्छास्त्रैर्विप्रतिषिद्धम् बुद्धे चेत्क्षेमप्रापणमिहैव न दुःखमुपलभेत एतेन परं व्याख्यातम्" इति ॥ अनग्निः अग्निकार्यारहित इत्यर्थः । अनिकेतः स्म भूतवासस्थानरहितः । शर्मजन्यसुखं तदस्य नास्तीत्यशर्मा । कंचिदपि शरणत्वेन न प्रपन्नः न वा कस्यचिच्छरणभूत इत्यशरणः । स्वाध्यायः प्रणवोपनिषज्जपः तत्रैव वाचं विसृजेदन्यत्र मौनव्रतः । स्याद्यावता प्राणा ध्रियंते सा प्राणवृत्तिः । अनीहो नामुत्रः ऐहिकामुष्मिककर्मरहितः मुक्त अयोग्यतया परैरपि त्यक्तकामाच्छादनं कौपीना-

सत्यानृते इति । सत्यं वक्तव्यमिति यो नियमः तं परित्यज्य तथा तत्र वक्तव्यमनृतं तद्धि सत्यात् विशिष्यते इत्यादिके विषये अनृतं वक्तव्यमिति यो नियमः तं च परित्यज्य इमं लोकं ऐहलौकिकं कर्म अमुं च पारलौकिकं च परित्यज्यात्मानमन्विच्छेत् । ज्ञानबलाबलं बलोनानादृत्य विधिनिषेधानां स्वैरचारिणामेषां कित्राण तत्र हि बुद्धेक्षेमप्रापणम्" इति आत्मनि बुद्धे अवगते सति तदेव ज्ञानं सर्वमशुभं प्रक्षाल्य क्षेमं प्रापयति तदेतत् निराकरोति तच्छास्त्रैर्विप्रतिषिद्धं "क्रुध्यन्त न प्रतिक्रुध्येदाकुष्टः कुशलं वदेत्" इत्यादिभिर्यतेरेव कर्तव्यकर्मप्रतिपादनपरैर्मन्वादिवचनैर्विरुद्धम् । बुद्धे क्षेमप्रापणम् इत्येतच्च प्रत्यक्षविरुद्धमित्याह । बुद्धे चेदिति इहैव शरीरे दुःखं नोपालभेत ज्ञानी तच्चैतदस्ति नहि ज्ञानिनां मूर्धाभिषिक्तं मन्योक्षुदुःखमेव सोढुं प्रभवति । तस्माच्छ्रवणमननिदिध्यानासनैः साक्षात्कृतात्मास्वरूपः स्वाश्रमं प्रकृत्य विहितानि कर्माणि कुर्वन् प्रतिषिद्धेषु कटाक्षमप्यनिक्षिपन्यतिर्मुच्येत इति **हरदत्तेन** व्याख्यातम् ।

याज्ञवल्क्यः (प्रा. ६५–६६)—

"नाश्रमः कारणं धर्मे क्रियमाणो भवेद्धि सः । अतो यदात्मनोऽपथ्यं परेषां न तदाचरेत् ॥
"सत्यमस्तेयमक्रोधो ह्रीः शौचं धीर्धृतिर्दमः । संयतेंद्रियता विद्या धर्मः सर्व उदाहृतः॥
"अवेक्ष्या गर्भवासाश्च कर्मजा गतयस्तथा । आधयो व्याधयः क्लेशा जरा रूपविपर्ययः॥ (६३)
"भवो जातिसहस्रेषु प्रियाप्रियविपर्ययः। ध्यानयोगेन संपश्येत्सूक्ष्म आत्मात्मनि स्थितः॥ (६४)
"संनिरुध्येंद्रियग्रामं रागद्वेषौ प्रहाय च । भयं हित्वा च भूतानाममृती भवती द्विजः"॥(६१) इति ।

आरुण्युपनिषदि—"ब्रह्मचर्यमहिंसां चापरिग्रहं च सत्यं च यत्नेन हि रक्षेत" इति । कामक्रोधलोभमोहदंभदर्पासुयाममताहंकारानृतादीनपि त्यजेदिति च । **जाबालिः**—

"न भाषेत स्त्रियं कांचित्पूर्वदृष्टां न च स्मरेत् । कथां च वर्जयेत्तासां न पश्य लिखितामपि" ॥

विष्णुपुराणे (३।९।२५–२८)

" पुत्रद्रव्यकलत्रेषु त्यक्तस्नेहो नराधिप । चतुर्थमाश्रमं स्थानं गच्छेन्निर्धूतमत्सरः ॥
" त्रैवर्गिकांस्त्यजेत्सर्वानारम्भानवनीपते । मित्रादिषु समो मैत्रः समस्तेष्वेव जंतुषु ॥
"जरायुजांडजादीनां वाङ्मनःकायकर्मभिः । युक्तः कुर्वीत न द्रोहं सर्वसंगं च वर्जयेत् ॥
"एकरात्रस्थितिर्ग्रामे पंचरात्रस्थितिः पुरे । तथा तिष्ठेयथा प्रीतिर्द्वेषो वा नास्य जायते ॥
" कामं क्रोधं तथा दर्पं लोभमोहादयश्च ये । तांस्तु दोषान्परित्यज्य परिव्राण्णिर्ममो भवेत् ॥
"मांसासृक्पूयविण्मूत्रस्नायुमज्जास्थिसंहतौ । देहे चेत्प्रीतिमान्मूढो नरके भविता हि सः"॥

व्यासः—

" रागांधो हि जनः सर्वान पश्यति हिताहितम् । रागं तस्मान्न कुर्वीत यदिच्छेदात्मनो हितम् ॥
" अपकारिणि कोपश्चेत्कोपे कोपः कथं न ते । धर्मार्थकाममोक्षाणां प्रसह्य परिपंथिनीम् ।
"क्षमातीर्थं तपस्तीर्थं तीर्थमिंद्रियनिग्रहः । सर्वभूतदयातीर्थं ध्यानं तीर्थमनुत्तमम् ।
"एतानि पंच तीर्थानि सत्यषष्ठानि सर्वदा । देहे तिष्ठंति सर्वत्र तेषु स्नानं समाचरेत् ।

भगवद्गीतासु (६।२४–२६)

" संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः । मनसैवेंद्रियग्रामं विनियम्य समं ततः ।
" शनैः शनैरुपरमेद्बुध्या धृतिगृहीतया । आत्मसंस्थं मनः कृत्वा न किंचिदपि चिंतयेत् ॥

"वृत्तिहीनं मनः कृत्वा क्षेत्रज्ञं परमात्मनि। एकीकृत्य विमुच्येत योगोऽयं मुख्य उच्यते"

अत्रिः—

"स्नानं त्रिषवणं पात्रनियमाः स्युस्त्रिदंडिनाम्। नैतत्परमहंसानां युक्तानामात्मदर्शिनाम्॥

"मौनं योगासनं योगस्तितिक्षैकांतशीलता। निस्पृहत्वं समत्वं च सप्तैतान्येकदंडिनाम्"॥

व्यासः—

"गुरुमूलाः क्रियाः सर्वा भुक्तिमुक्तिफलप्रदाः। तस्मात् सेव्यो गुरुर्नित्यं मुक्त्यर्थं सुसमाहितैः।

"न कुर्यान्नियमारंभमनि मनिवेद्यत्वकं गुरुम्। छायाभूतोऽपरित्यागी नित्यमेव वसेत् गुरौ॥

"श्रद्धया परया युक्तः सदा द्वादशसंध्ययोः। दंडप्रणामान्कुर्वीत देवतागुरुसंनिधौ"॥

मन्वाद्युक्ता ब्रह्मचारीधर्मा गुरुशुश्रूषादयो यतिभिः कर्तव्याः।

"ब्रह्मचारिणो ये धर्मा गुरुशुश्रूषणादयः। तेऽपि सर्वे यतीनां स्युः" इति॥

बह्वृचपरिशिष्ट अतिदेशात्। ते च धर्माः ब्रह्मचर्यप्रकरणेऽभिहिताः। **शंखः**— "पर्यटनशीलः स्यादात्मज्ञानार्थं तदवाप्योर्ध्वमेकस्थानरतिस्तदभ्यासपरो नैकत्र देशे मूत्रपुरीषाविति"॥

विष्णुः—

"वृद्धानामातुराणां च भिक्षूणां संगवर्जिनाम्। ग्रामे वाऽथ पुरे वाऽपि वासो नैकत्र दुष्यति"॥

परमहंसोपनिषदि—"सौवर्णादीनां न परिग्रहेद्यस्माद्भिक्षुर्हिरण्यं रसेन दृष्टं चेत् स ब्रह्महा भवेत्। यस्माद्धिरण्यं रसेन स्पृष्टं चेत्स पौल्कसो भवेत्। यस्माद्भिक्षुर्हिरण्यं रसेन ग्राह्यं चेत्स आत्महा भवेत्तस्माद्भिक्षुर्हिरण्यं रसेन दृष्टं न स्पृष्टं च न ग्राह्यं च सर्वे कामा मनोगता व्यावर्तते। दुःखेनोद्विग्नः सुखे निस्पृहस्त्यागो रागे सर्वत्र शुभाशुभयोरनभिस्नेहो न द्वेष्टि न मोदं च सर्वेषामिंद्रियाणां गतिरुपरमते य आत्मन्येव वा स्थीयते यत्पूर्णानंदैकबोधस्तद्ब्रह्माहमस्तीति कृतकृत्यो भवति कृतकृत्यो भवति इति। **अमृतबिंदूपनिषदि**—

"मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च। अशुद्धं कामसंकल्पं शुद्धं कामविवर्जितम्॥

मन एव मनुष्याणां कारणं बंधमोक्षयोः। बंधाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम्"॥ इति।

व्यासः—

"ग्रामांते वृक्षमूले वा वने देवालयेऽपि वा। नद्यास्तीरे पुण्यदेशे अग्निहोत्रगृहेऽपि वा॥

"सुशुभे विजने देशे वसेज्जंतुविवर्जिते"॥

अथ दिगम्बरलक्षणम्। आचार्यमाह स एव—

"न तस्य विद्यते कार्यं न लिंगं वा विपश्चितः। निर्ममो निर्भयः शांतो निर्द्वंद्वः पर्णभोजनः॥

"नीवीकौपीनवासाः स्यान्नग्नो वा ध्यानतत्परः। एवं ज्ञानपरो योगी ब्रह्मभूयाय कल्पते॥

"लिंगे सत्यपि खल्वस्मिन्ज्ञानमेव हि कारणम्। न मोक्षायेह भूतानां लिंगग्रामो निरर्थकः॥

"तस्मादलिंगो धर्मज्ञो ब्रह्मव्रतमनुव्रतः। गूढधर्माश्रितो विद्वानज्ञातचरितं चरेत्॥

"संदिग्धः सर्वभूतानां वर्णाश्रमविवर्जितः। अंधवज्जडवच्चापि मूकवच्च महीं चरेत्॥

"तं दृष्ट्वा शांतमनसं स्पृहयंति दिवौकसः। लिंगाभावात्तु कैवल्यमिति ब्रह्मानुशासनम्"॥

कात्यायनः—"अव्यक्तलिंगा अव्यक्ताचारा अनुन्मत्ता उन्मत्तवदाचरंतः शिखायज्ञोपवीतत्रिदंडकमंडलुकपालानां च त्यागिनः शून्यागारा देवगृहवासिनो न तेषां धर्मो नाधर्मो न सत्यं नापि चानृतम्। सर्वसहाः सर्वसमाः समलोष्ठाश्मकांचनाः। उपपन्नमात्राहाराश्चातुर्वर्ण्यं

व्यासः—
" अयाचितं यथालाभं भोजनाच्छादनं भवेत् । परेच्छया च दिग्वासाः स्नानं कुर्यात्परेच्छया ॥
"स्वप्नेऽपि योगयुक्तः स्याज्जाग्रतीव विशेषतः । ईदृक्चेष्टः स्मृतः श्रेष्ठो वरिष्ठो ब्रह्मवादिनाम्॥
"येनकेनचिदाच्छन्नो येनकेनचिदाशितः । यत्रक्कचनशायी स्यात्तं देवा ब्राह्मणं विदुः " ॥
याज्ञवल्क्यः (आचारे ८)— " अयं तु परमो धर्मो यद्योगेनात्मदर्शनम् " इति ।
भागवते—
" स लिंगानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः । बुधो बालकवत्क्रीडेत् कुशलो जडवच्चरेत् ॥
" वदेदुन्मत्तवद्विद्वान् गोचर्यां नैगमश्चरेत् । यदृच्छयोपपन्नान्नमद्याच्छ्रेष्ठमुतापरम् ॥
" तथासनस्तथाशय्यां यथा प्राप्तं भजेन्मुनिः । शौचमाचमनं स्नानं न तु चोदनया चरेत् ॥
" अन्यांश्च नियमान्ज्ञात्वा यथाहं लीलयेश्वरः " ॥ **वासिष्ठे**—
" धर्माधर्मौ सुखं दुःखं तथा मरणजन्मनी । धिया येनेति संत्यक्तं महात्यागी स उच्यते ॥
" सर्वेच्छाः सकलां शंकाः सर्वेहाः सर्वनिश्चयाः । धिया येन परित्यक्ता महात्यागी स उच्यते ॥
" यावती दृश्यकलना सकलेयं विलोक्यते । सा येन सुष्ठु संत्यक्ता महात्यागी स उच्यते ॥
" देहेऽहमिति या बुद्धिः सा संसारनिबंधिनी । न कदाचिदियं बुद्धिरादेयाऽत्र मुमुक्षुणा ॥
" पदार्थमात्रतानिष्ठा सा संसारनिबंधिनी । न किंचिन्मात्रचिन्मात्ररूपोऽस्मि गगनादणुः ॥
" इति या शाश्वती बुद्धिः सा संसारविमोचिनी " ॥ **मनुः**—
" शास्त्रसज्जनसंपर्कैः प्रज्ञामादौ प्रवर्द्धयेत् । प्रथमा भूमिकैवोक्ता योगस्य न च योगिनः ॥
" विचारणा द्वितीया स्यात्तृतीया संगनामिका । विलासिनी चतुर्थी स्याद्वासना विलयात्मिका ॥
" विशुद्धचिन्मयानंदरूपा भवति पंचमी । अर्धसुप्तप्रबुद्धाभो जीवन्मुक्तोऽत्र तिष्ठति ॥
" असंवेदनरूपा च षष्ठी भवति भूमिका । आनंदैकघनाकारा सुषुप्तिसदृशी स्थितिः ॥
" तुर्यावस्थोपशांता च मुक्तिरेव हि केवलम् । समता स्वस्थता सौम्या सप्तमी भूमिका भवेत् ॥
" तुर्यातीता तु याऽवस्था परा निर्वाणरूपिणी । सप्तमी सा परिप्रोक्ता विषयत्यागजीविता ॥
" अंतःप्रत्याहृतिवशाच्चैत्यं चेति विभावितम् । मुक्त एव न संदेहो महासमतया तया ॥
" यद्भोगसुखदुःखांशैरपरामृष्टपूर्णधीः । आत्मारामो नरस्तिष्ठेत्तन्मुक्तत्वमिहोदितम् ॥
" भावनां सर्वभावेभ्यः समुत्सृज्य समुत्थितः । शशांकशीतलः पूर्णो भाति भासेव भास्करः ॥
" क्रियमाणं कृतं कर्म कुलश्रीदेहशल्मलैः । ज्ञानानिलसमुद्धूता प्रोड्डीय क्वापि गच्छति ॥
" सर्वैव हि कला जंतोरनभ्यासेन नश्यति । इयं ज्ञानकला त्वतः सकृज्जाता विवर्धते ॥
" वृद्धिमेति बलादेव सुक्षेत्रव्युप्तशालिवत् । यावद्विषयभोगाशा जीवाख्या तावदात्मनः ॥
" अविवेकेन संपन्ना साऽप्याशाऽत्र न तु स्वतः । विवेकवशतो याता क्षयमाशा यदा तदा ॥
" आत्मा जीवत्वमुत्सृज्य ब्रह्मतामेत्य नाम यः । चिन्मात्रत्वं प्रयातस्य तीर्णमृत्योरचेतसः ॥
" यो भवेत्परमानंदः केनासावुपमीयते ॥
" प्रशांतशास्त्रार्थविचारचापलो निवृत्तनानारसकाव्यकौतुकः ॥
" निरस्तनिःशेषविकल्पविप्लवः समः सुखं तिष्ठति शाश्वतात्मकः ॥
" वर्णधर्माश्रमाचारशास्त्रयंत्रेण बोधितः । निर्गच्छति जगज्जालात्पंजरादिव केसरी ॥
" वाचामतीतविषयो विषयाशामयोज्झिताः । कामभ्युपगतः शोभां शरदीव नभस्थलाम् ॥

---
१ क्ष–येनेतिसंत्यक्तं ।

" गंभीरश्च प्रसन्नश्च गिराविव महाह्रदः । परानंदरसात् स्तब्धो रमते स्वात्मनात्मनि ॥
" सर्वकर्मफलत्यागी नित्यतृप्तो निराश्रयः । न पुण्येन न पापेन नेतरेण विलिप्यते ॥
" स्फटिकं प्रतिबिंबेन यथा नायाति रंजनम् । तज्ज्ञः कर्मफलेनांतस्तथा नायाति रंजनम् ॥
" विहरन् जनतावृंदे देहकर्ता न पूजनैः । खेदाल्हादौ न जानाति प्रतिबिंबगतैरिव" ॥ इति ।

अथ ज्ञानस्य मोक्षहेतुत्वम्--

" तत्वमस्यादिवाक्यार्थं यज्जीवपरमात्मनोः । तदात्मविषयज्ञानं तादिदं मुक्तिसाधनम्" ॥
ज्ञानान्मोक्ष इत्यत्र **तैत्तिर्यकश्रुतिः** (आरण्यके ब्रह्मवल्याम्) । " ब्रह्मविदाप्नोति परम् । तदेषाभ्युक्ता । ब्रह्मणा विपश्चितेति " । **कठवल्ल्याम्--**

" अशरीरं शरीरेष्वनवस्थेष्ववस्थितम् । महांतं विभुमात्मानं मत्वा धीरो न शोचति ॥
" नाविरतो दुश्चरितान्नाशांतो नासमाहितः । नाशांतमानसो वापि प्रज्ञानेनैवमाप्नुयात् ॥
" एके बहूनां यो विद्धाति कामन् तमात्मस्थं येनुपश्यंति धीराः ॥
" तेषां शांतिः शाश्वती नेतरेषाम्" ।

मुंडकोपनिषदि—

" तमेवैकं जानथात्मानमन्या वाचो विमुंचथ । अमृतस्यैषसेतुरिति" ॥
" भिद्यते हृदयग्रंथिश्छिद्यन्ते सर्वसंशयाः । क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे ॥
" यथा नद्यः स्यंदमानाः समुद्रे संगच्छते नामरूपे विहाय ।
" तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥
" स यो ह वै तत् परं ब्रह्म वेद ब्रह्मैव भवति" इति ।

अमृतबिंदूपनिषदि—

" तदेव निष्फलं ब्रह्म निर्विकारं निरंजनम् । तद्ब्रह्माहमिति ज्ञात्वा ब्रह्म संपद्यते ध्रुवम्"

कैवल्यश्रुतौ--

" उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकंठं प्रशांतम् ॥
" ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षी तमसः परस्तात् ॥
" सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि । संपश्यन्ब्रह्म परमं याति नान्येन हेतुना " ॥

सुबालोपनिषदि--

" शांतो दांत उपरतास्तितिक्षुः समाहितो भूत्वा आत्मन्येवात्मानं पश्यति स सर्वस्यात्मा भवति" ॥

श्रुत्यंतरेऽपि--

" आत्मानं चेद्विजानीयादयमस्मीति पूरुषः । किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् ॥
" अशब्दमस्पर्शमरूपमव्ययम् तथाऽरसं नित्यमगंधवच्च यत् ॥
"अनाद्यनंतं महतः परं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यते । ज्ञानाग्निः शुभाशुभे दहति" इति च ।

मनुरपि (६।७४)—

" सम्यग्दर्शनसंपन्नः कर्मभिर्न निबध्यते । दर्शनेन विहीनस्तु संसारं प्रतिपद्यते ॥
"बीजान्यग्न्युपदग्धानि न रोहंति यथा पुनः । ज्ञानदग्धैस्तथा क्लेशैर्नात्मा संबध्यते तथा" ॥

भगवद्गीतायाम् (४।३७)

"यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन। ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा"॥

अथ शौचविधिः। बह्वृचपरिशिष्टे—

" अंतर्धाय तृणैर्भूमिं शिरः प्रावृत्य वाससा। वाचं नियम्य यत्नेन निष्ठीवोच्छ्वासवर्जितः॥

" कुर्यान्मूत्रपुरीषे तु शुचौ देशे समाहितः॥

" उभे मूत्रपुरीषे तु दिवा कुर्यादुदङ्मुखः। रात्रौ तु दक्षिणे कुर्यादुभे संध्येऽथ वा दिवा॥

" शतहस्तं परित्यज्य मूत्रं कुर्याज्जलाशयात्। शतद्वयं पुरीषे तु तीर्थे चैव चतुर्गुणम्" ॥

यमः—" उभे मूत्रपुरीषे तु पूर्वं गृह्णीत मृत्तिकाम्। पश्चाद्गृह्णाति यो विप्रः सचैलो जलमाविशेत्॥

" तीर्थे शौचं न कुर्वीत कुर्वीतोद्धृतवारिणाम्"॥

पैठीनसिः—" अनुदकमूत्रपुरीषकरणे सचैलस्नानम्" इति।

शातातपः—" शुचिदेशात्तु संग्राह्या मृत्तिकाऽश्मादिवर्जिता"॥ इति

" अपकृष्य च विण्मूत्रं काष्ठलोष्ठतृणादिना। उद्स्तवासा उत्तिष्ठेत् दृढविधृतमेहनः"॥

याज्ञवल्क्यः (आचारे–९)—

" गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः। गंधलेपक्षयकरं शौचं कुर्यादतंद्रितः"॥

जलपात्राभावे **व्यासः**—

" अरत्निमात्रं जलं त्यक्त्वा कुर्याच्छौचमनुद्धृतैः। पश्चात्तु शोचयेत्तीरमन्यथा त्वशुचिर्भवेत्"॥

रत्निः अरत्निः। **शातातपः**—

" एका लिंगे करे तिस्रः सव्ये द्वे हस्तयोर्द्वयोः। मूत्रशौचं समाख्यातं शुक्रे मूत्रवदिष्यते॥

" पंचापाने दशैकस्मिन्नुभयोः सप्त मृत्तिकाः। पुरीषशौचनिर्दिष्टा देयास्तिस्रः पदद्वये॥

" दातव्यमुदकं तावन्मृदभावो यथा भवेत्। एतच्छौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणः॥

" वानप्रस्थस्य त्रिगुणं यतीनां च चतुर्गुणं। मूत्रशौचं पुरस्कृत्य बृहच्छौचं समाचरेत्॥

" पश्चाच्च पादशौचं तु शौचविद्भिरुदाहृतम्। न्यूनाधिकं न कर्तव्यं शौचं शुद्धिमभीप्सिता"॥

' अधिकं नैव दुष्यतीति ' **न्यायान्न्यूनं** नकर्तव्यमित्यभिप्रायः॥

दक्षः—" यद्दिवा विहितं शौचं तदर्धं निशि कीर्तितम्। तदर्धमातुरे प्रोक्तमातुरस्यार्धमध्वनि"॥

देवलः—

" धर्म्यं वै दक्षिणं हस्तमधःशौचेन योजयेत्। तथैव वामहस्तेन नाभेरूर्ध्वं न शोधयेत्"॥ इति।

" कटिशौचं ततः कुर्यान्मूत्रादिस्पर्शशंकया। धृत्वा च धौतं कौपीनं गंडूषान्द्वादशाचरेत्॥

" आचम्य प्रयतो भूत्वा प्राणायामान्षडाचरेत्"॥

अथ दन्तधावनम्। वृद्धशातातपः—

" मुखे पर्युषिते नित्यं भवत्यप्रयतो नरः। तस्मात्सर्वप्रयत्नेन कुर्याद्वै दंतधावनम्"॥

विष्णुः—

" कंटकीक्षीरवृक्षोत्थं द्वादशांगुलमव्रणम्। कनिष्ठिकाग्रवत् स्थूलं कूर्चाग्रं समपर्वकम्॥

" सत्वचं दंतकाष्ठं स्यात्तदग्रेण प्रधावयेत्। प्राङ्मुखश्चोपविष्टस्तु भक्षयेद्वाग्यतो नरः॥

" प्रक्षाल्य च शुचौ देशे दंतधावनमुत्सृजेत्॥

" अलाभे दंतकाष्ठस्य प्रतिषिद्धदिने तथा। अपां द्वादशगंडूषैर्मुखशुद्धिर्भविष्यति"॥

" प्रातर्मध्यान्हयोः स्नानं वानप्रस्थगृहस्थयोः । यतीनां त्रिषवणस्नानमेकं तु ब्रह्मचारिणः " ॥
स्कांदे—
" अयमेव परो धर्मस्त्विदमेव परं तपः । इदमेव परं तीर्थं विष्णुपादांबु यः पिबेत् ॥
" स चैवावभृथस्नातः स च गंगाजलाप्लुतः । विष्णुपादोदकं कृत्वा शंखे यः स्नाति मानवः ॥
" यतिपादोदकं राजन्हन्ति पापं पुराकृतम् । सप्तजन्मार्जितं सम्यक् श्रद्धया शिरसा धृतम् ॥
" गुरूपदिष्टमार्गेण स्नानं कुर्याद्यथाविधि " ॥

अत्र संप्रदायविदः दंडं दक्षिणकरे गृहीत्वा वामांसे वस्त्रं कृत्वा गुरोर्दक्षिणभागे स्थित्वा गुरुमभिवंद्य जलाशयं गत्वा शुचिदेशे कमंडलुमुपसंस्थाप्य विष्णुं जले स्मरेत्

"ततो दंडस्य मूलेन तथाऽग्रेण स्पृशेज्जलम् । कुर्याज्जलस्य च दिशां देवानां वंदनं क्रमात् ॥
" ततो गुरूणां ज्येष्ठानां यतीनां वंदनं तथा । ततः संस्थापयेद्दंडमूर्ध्वाग्रं जलमध्यतः ॥
" अथवा शुचिवस्त्रादौ स्थापयेत्प्रागुदङ्मुखम् । ततो मृदं समादाय प्रक्षाल्य विभजेत् त्रिधा ॥
" तत एकेन भागेन पादशौचं समाचरेत् । आचम्यान्येन भागेन कटिशौचं समाचरेत् ॥
" जलांतस्तिसृभिर्मृद्भिः कटिं प्रक्षालयेत्ततः । कौपीनं तिसृभिर्मृद्भिः पुटं प्रत्येकमेव तु ॥
" आचम्य विधिना पश्चात्प्राणायामत्रयं चरेत् । ततस्तु क्षालयेत्सम्यक् मृज्जलाभ्यां कमंडलुम् ॥
" वामहस्तस्य पृष्ठे तु संस्थाप्य स्नानमृत्तिकाम् । दंडं कमंडलुं चैव स्पृष्ट्वाऽऽचामेद्यथाविधि ॥
" दक्षिणोरौ स्नानमृदं संस्थाप्य विभजेत्त्रिधा । चुलुके जलमादाय तद्वामेन पिधाय च ॥
" प्रणवेन द्विषड्वारमभिमंत्र्य च तेन ताम् । संप्रोक्ष्य प्रणवेनैव द्विषट्केनाभिमंत्रयेत् ॥
" ततः प्रथमभागात्तु गृहीत्वा स्वल्पिका मृदम् । करावालिप्य सूर्याय प्रदर्श्य क्षालयेत्करौ ॥
" पुनः किंचित्समादाय हस्तयोरुपलिप्य च । सूर्याय च प्रदर्श्योर्ध्वं मुखं कक्षं विलेपयेत् ॥
" जलेनाधोमुखं कक्षे समालिप्य जलं स्पृशेत् । एवं वारत्रयं कुर्यात् कक्षयोरुपलेपनम् ॥
" द्वितीयां किंचिदादाय हस्तयोरुपलिप्य च । सूर्याय तु दर्शयित्वा लिंपत्कालभुजौ हृदि ॥
" जलं स्पृशेत्ततश्चैव किंचिदादाय मृत्तिकाम् । हृदमारभ्य चा नाभेरालिप्य सलिलं स्पृशेत् ॥
" पुनश्चैवं समादाय पृष्ठमारभ्य लेपयेत् । आ पादात्तु जलं स्पृष्ट्वा दक्षिणेन करेण तु ॥
" तृतीयं भागमादाय वामेनोरुं विशोधयेत् । 'यस्य प्रसादात्' इत्यादिमंत्र्येण त्रिर्गुरुं नमेत् ॥
" प्रवाहाभिमुखो नद्यामन्यत्र रविसंमुखः । त्रिर्निमज्ज मृदं स्कंधे संस्थाप्य प्रागुदङ्मुखः ॥
" तथैव द्विस्त्रिराचम्य प्राणान् प्रोक्ष्याभिमंत्र्य च । मृत्तिकां पूर्वदत्तां च स्कंधादादाय हस्तयोः ॥
" उपलिप्य ललाटं च बाहुं हृदयमेव च । एवं वारत्रयः कृत्वा गृहीत्वा शेषमृत्तिकाम् ॥
" प्रणवेनाप आलोड्य कुर्यात्षड्वारमज्जनम् । द्विराचम्य त्रिराचम्य प्राणानष्टोत्तरं शतम् ॥
" जपित्वा प्रणवं ब्रह्म चिंतयत् स्नानमाचरेत् । नाम्नां तु केशवादीनामेकैकं नाम संस्मरन् ॥
" मंङ्क्त्वा द्वादशवारं तु शिरोवदनबाहुषु । हृदयेषु निषिंचेत्तु तिस्रः शंखाख्यमुद्रया ॥
" गुरुपादोदकं सिंचेच्छिर आदौ तु पूर्ववत् । ततस्तु त्रिः पिबेदेवं विष्णोः पादोदकेन च ॥
" ततः प्रक्षाल्य कौपीनं निपीड्य परिधाय च । ऊरू प्रक्षाल्य मृत्तोयैर्हस्तौ प्रक्षालयेन्मृदा ॥
" एकपादं स्थले कृत्वा द्विराचम्य यथाविधि । प्राणायामत्रयं कृत्वा द्विषड्वाराभिमंत्रितैः ॥

" जलैः संप्रोक्ष्य वस्त्रादिनांगवस्त्रेण मार्जयेत्। कौपीनसहितं दोरमादौ बध्नीत वाग्यतः ॥
" कौपीनमंगवस्त्रं च जलैरासिच्य निक्षिपेत्। कौपीने मृज्जले क्षिप्त्वा पादौ प्रक्षालयेन्मृदा ॥
" तत आचम्य विधिवत्प्राणायामान्षडाचरेत्। अज्ञानकृतहिंसादिप्रत्यवायनिवृत्तये ॥
" पुंड्रं धृत्वा ततः प्राणानायम्य न्यासपूर्वकम्। प्रणवार्थानुसंधानं पंचीकरणपूर्वकम् ॥
" प्रणवं तु जपेदष्टशतमष्टोत्तरं तु वा। सहस्रं वा लिखेदप्सु पद्ममष्टदलं तथा ॥
" संचिंत्य सगुणं विष्णुं तत्र पंचोपचारतः। संपूज्य तर्पयेत्तत्र नीरेणाष्टोत्तरं शतम् ॥
" ततो दक्षिणहस्तस्थं तोयं द्वादशवारतः। अभिमंत्र्य शिरः प्रोक्ष्य तथाऽन्यदभिमंत्रितम्॥
" जलं पिबेदथाचम्य दोरं प्रक्षालयेन्मृदा। कर्णयोस्तच्च संस्थाप्य कौपीनं क्षालयेन्मृदा॥
" आचम्य दंडमूले तु प्रणवेनाथ तर्पयेत्। द्विषड्वारं तथाऽग्रे तु तर्पयित्वा समुत्थितः ॥
" मूलाग्राभ्यां तु दंडस्य जलं स्पृष्ट्वा गुरुं नमेत्। कृत्वाऽभिषेकं देवस्य ततो यायान्मठं प्रति ॥
" गुर्वादिवन्दनं कृत्वा दंडं नभसि धारयेत्। प्रक्षाल्य पादावाचम्य देवपूजां प्रकल्पयेत्॥
" गुरूपदिष्टमार्गेण न्यासध्यानादिपूर्वकम् " ॥
" स्वयं पतिततुलसीपत्राद्यैः स्वयमाहृतैः। पूजयेन्मोक्षदं विष्णुं ज्ञानदं च महेश्वरम् " ॥

विष्णुपूजाक्रमः। तथा च **शौनकः**—
" ज्ञानं महेश्वरादिच्छेन्मोक्षमिच्छेज्जनार्दनात्। प्रणम्य दंडवद्भूमौ नमस्कारेण चार्चयेत्"॥

कात्यायनः—" त्रिकालमेककालं वा पूजयेत्पुरुषोत्तमम् " ॥

व्यासः—" अन्यानीतैश्च कुसुमैरर्चयेज्जगदीश्वरम् ॥
" पक्कं च तुलसीपत्रं पुष्पं पर्युषितं च यत्। आनीय तत्प्रयत्नेन पूजयेज्जगदीश्वरम् ॥
"भावपुष्पैर्यजेद्योगी ब्राह्मैर्वा श्रद्धया शिवम्। विष्णोः पादोदकं जुष्टं नैवेद्यस्य च भक्षणम्॥
" निर्माल्यधारणं चैव महापातकनाशनम् ॥
" यः पूजयेद्धरिं चक्रे सालग्रामसमुद्भवे। राजसूयसहस्रेण तेनेष्टं प्रतिवासरम् ॥
"विना तीर्थैर्विना दानैर्विना यज्ञैर्विना मतिम्। मुक्तिं याति नरोऽवश्यं सालग्रामशिलार्चनात्॥
" यजेदामरणं लिंगं विरक्तः परमेश्वरम्। अग्नौ क्रियावतामप्सु व्योम्नि सूर्ये मनीषिणाम् ॥
" काष्ठादिष्वेव मूर्खाणां हृदि लिंगेषु योगिनाम्। जपमालां गृहीत्वा तु प्रणवार्थमनुस्मरन् ॥
" जपेद्द्वादशसाहस्रं प्रणवस्य प्रयत्नतः। सहस्रं श्रवणार्थी तु योगाभ्यासी शतं जपेत् ॥
" निर्विकल्पसमाधिस्थो न जपेत्किंचिदद्वयात् " ॥

बोधायनः—" वृक्षमूलिको भवेत्संन्यासी " इति। वृक्षो वेदः। तस्य मूलं प्रणवः। प्रणवात्मको वेदः प्रणवं ध्यायन्ब्रह्मभूयाय कल्पते " इति। **व्यासः**—
" वेदो वृक्षस्तथा मूलं प्रणवो यस्य सोऽस्ति सः। वृक्षमूलो यतिः प्रोक्तस्त्यक्तवेदोऽपरिग्रहः॥
" अभ्यसेत्सततं वेदं प्रणवाख्यं सनातनम्। आध्यात्मिकं च सततं वेदांताभिहितं च यत्॥
" यद्यनुत्पन्नविज्ञानो विरक्तः प्रीतिसंयुतः। यावज्जीवं जपेद्युक्तः प्रणवं ब्रह्मणो वपुः " ॥

मनुः (१२।९२)—" आत्मज्ञाने शमे च स्याद्वेदाभ्यासे च यत्नवान् "।

अत्र वेदाभ्यासः प्रणवाभ्यासः **श्रूयते**—
" आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम्। ध्याननिर्मनथाभ्यासात्पाशं दहति पंडितः ॥

ओमितिब्रह्म ओमितीद्ꣳसर्वं । एतदक्षरं परं ब्रह्म अस्य पादाश्चत्वारो वेदाः । चतुष्पादिदमक्षरं परं ब्रह्म ।

"सर्वे वेदा यत्पदमामनंति तपांसि सर्वाणि च यद्वदंति ।

"यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं संग्रहेण ब्रवीमि" ।

"ओमित्येतदालंबनं श्रेष्ठमेतदालंबनं परम् । एतदालंबनं ज्ञात्वा ब्रह्मलोके महीयते ॥

"यस्तु द्वादशसाहस्रं नित्यं प्रणवमभ्यसेत् । तस्य द्वादशभिर्मासैः परं ब्रह्म प्रकाशते ॥

"श्रवणान्मननाच्चैव निदिध्यासनतस्तथा । आराध्यं सर्वथा ब्रह्म पुरुषेण हितैषिणा ॥

"ब्रह्मचर्यममानित्वमहिंसा सत्यमार्जवम् । वेदांतश्रवणं ध्यानं भिक्षोः कर्माणि नित्यशः ॥

"त्वंपदार्थविवेकाय संन्यासः सर्वकर्मणाम् । श्रुत्या विधीयते यस्मात्तत्त्यागी पतितो भवेत्" ॥

संवर्तः—

"योगाभ्यासपरो नित्यमात्मविद्यापरायणः । स ह्याश्रमैर्विजिज्ञास्यः समस्तैरेवमेव तु ॥

"द्रष्टव्यस्त्वथ मंतव्यः श्रोतव्यश्च द्विजातिभिः । श्रवणादिक्रिया तावत्कर्तव्येह प्रयत्नतः ॥

"यावद्यथोक्तविज्ञानमाविर्भवति भास्वरम्" इति । **पुराणे**—

"दिने दिने तु वेदांतश्रवणाद्भक्तिसंयुतात् । गुरुशुश्रूषया लब्धात्कृच्छ्राशीति फलं लभेत् ॥

"वेदांतश्रवणादेव नश्यत्येवोपपातकम् । तथा पातकसंघाश्च नित्यं वेदांतसेवनात्" ॥ इति ।

व्यासः— "काम एव मनुष्याणां विरोधो ब्रह्मबोधने ॥

"तस्मात्कामं त्यजन् धीरो ज्ञानमाप्नोति मोक्षदम् । ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः" ॥ इति ।

अथ भिक्षाचर्या । तत्र **मनुः** (६।५५–५७)—

"एककालं चरेद्भैक्षं न प्रसज्येत विस्तरे । भैक्षप्रसक्तो भिक्षुर्हि विषयेऽतीव सज्जति ॥

"विधूमे सन्नमुसले व्यंगारे भुक्तवज्जने । वृत्ते शरावसंपाते भिक्षां नित्यं यतिश्चरेत् ॥

"अलाभे न विषादी स्यात् लाभे चैव न हर्षयेत् । प्राणयात्रिकमात्रः स्यान्मात्रासंगाद्विनिर्गतः" ॥

उदरपूरणावधिः मात्रा । तत्र संगो मात्रासंगः ततो निवृत्त इत्यर्थः । **स एव** (६।५८–६०)—

"अभिपूजितलाभांश्च जुगुप्सेतैव सर्वशः । अभिपूजितलाभैस्तु यतिर्मुक्तोऽपि बध्यते" ॥

मुक्तः असक्तः । अभिपूजितलाभः आत्मने परैरतिबहुमानपूर्वकं यद्दीयते तदभिपूजितं तस्य लाभः प्राप्तिः । तदभोज्यम् । तस्मिन्भुक्ते कचिदनभिपूजितग्रहणे वैमनस्यं स्यात् । अथवा अभिपूजिताः धनादिना प्रतीताः । तैर्दत्तमपि न भोक्तव्यम्—

"अल्पान्नाभ्यवहारेण रहस्थानासनेन च । ह्रीयमाणानि विषयैरिंद्रियाणि निवर्तयेत् ॥

"इंद्रियाणां निरोधेन रागद्वेषक्षयेण च । अहिंसया च भूतानाममृतत्वाय कल्पते ॥

"न चोत्पातनिमित्ताभ्यां न नक्षत्रांगविद्यया । नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित्" ॥(५०)

उत्पातो भूकंपादिः । निमित्तं अधरस्पन्दादिः । नक्षत्रविद्या ज्योतिःशास्त्रम् । अंगविद्या चिकित्सा । अनुशासनं शिष्यपरिग्रहः । वादस्तर्कः । **स एव** (६।५१)

"न तापसैर्ब्राह्मणैर्वा वयोभिरपि वा श्वभिः । आकीर्णं भिक्षुकैर्वाऽन्यैरगारमुपसंव्रजेत्" ॥ इति ।

याज्ञवल्क्यः (प्रा. ५९)—

" अप्रमत्तश्चरेद्भैक्षं सायान्हेऽनभिलक्षितः । रहितैर्भिक्षुकैर्ग्रामे यात्रामात्रमलोलुपः " ॥
अनभिलक्षितः ज्योतिःशास्त्रादिज्ञानेनाचिन्हितः । **व्यासः**—
" प्राणयात्रानिमित्तं च व्यंगारे भुक्तवर्जिते । काले प्रशस्तवर्णानां भिक्षार्थं पर्यटेद्गृहान् ॥
" भैक्षेण वर्तयेन्नित्यं नैकान्नादी वै क्वचित् ।
"यस्तु मोहेन वाऽऽलस्यादेकान्नादी भवेद्यतिः । न तस्य निष्कृतिः काचित् धर्मशास्त्रेषु कुत्रचित् ।
" एकान्नं वर्जयेन्नित्यं कामं क्रोधं प्रतिग्रहम् ॥
" सप्तागारं चरेद्भैक्षमलाभे तु पुनश्चरेत् । गोदोहमात्रं तिष्ठेत्तु कालं भिक्षुरधोमुखः " ॥
हारीतः:—
" सायंकाले तु विप्राणां गृहाण्यभ्यवपद्य तु । स्थित्यर्थमात्मनो नित्यं भिक्षाटनमथाचरेत् " ॥
बोधायनः—(ध. सू. २।१०।४२,४४,५०) " ब्राह्मणानां शालीनयायावराणामप्रवृत्ते वैश्वदेवे भिक्षां लिप्सेत । गोदोहमात्रमाकांक्षेदद्भिः संस्पृश्यौषधवत्प्राश्नीयात् ।
" अयाचितमसंक्लृप्तमुपपन्नं यदृच्छया । आहारमात्रं भुंजीत केवलं प्राणयात्रिकम्" ॥ (५२) इति ।
अथाप्युदाहरंति ।
" अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनः । द्वात्रिंशतं गृहस्थास्यापरिमितं ब्रह्मचारिणः ॥
"भैक्षं वा सर्ववर्णेभ्य एकान्नं वा द्विजातिषु । अपि वा सर्ववर्णेभ्यो न चैकान्नं द्विजातिषु" ॥ इति ।
स एव (५४)
" ऊर्ध्वं नाभेरधोनाभेः परिधायैकमंबरम् । द्वितीयमुत्तरं वासः पात्री दंडे च वाग्यतः ॥
" सव्येनादाय पात्रं तु त्रिदंडं दक्षिणे करे । योऽसौ विष्ण्वाख्य आदित्यः पुरुषोत्तरवस्थितः ॥
" सोयं नारायणो देव इति ध्यात्वा प्रणम्य तम् । ततो ग्रामं व्रजेन्मंदं युगामात्रावलोककः[1] ॥
" ध्यायन्हरिं च तच्चित्त इमं मंत्रमुदीरयेत् ॥
" विष्णुस्तिर्यगधोर्ध्वं मे वैकुंठो विदिशं दिशम् । पातु मां सर्वतो रामो धन्वी चक्री च केशवः ॥
" प्राणयात्रिकमन्नं तु भिक्षेत विगतस्पृहः । गोदोहमात्रं तिष्ठेच्च वाग्यतोऽधोमुखस्तथा" ॥
स्मृतिरत्ने—
" स्नात्वा शुचिः शुचौ देशे कृतजप्यः समाहितः । भिक्षार्थं प्रविशेद्ग्रामे यतिर्म्लेच्छकुलान्यपि ॥
" एकान्नं तु न भुंजीत बृहस्पतिसमोऽपि सन् । मेध्यं भैक्षं चरेन्नित्यं सायान्हे वाग्यतः शुचिः" ॥
माधुकरभेदाः । उशनाः—
" माधूकरमसंक्लृप्तं प्राक्प्रणीतमयाचितम् । तात्कालिकोपपन्नं च भैक्षं पंचविधं स्मृतम् ॥
" मनः संकल्परहितान्गृहान्त्रिः सप्त पंच वा । मधुवदाहरणं यत्तु **माधूकर**मिति स्मृतम् ॥
" शयनोत्थापनात्प्राग्यत् प्रार्थितं भक्तिसंयुतैः । **तत्प्राक्प्रणीत**मित्याह भगवानुशना मुनिः ॥
"भिक्षाटनसमुद्योगात्प्राक्केनापि निमंत्रितम् । **अयाचितं** तु तद्भैक्ष्यं भोक्तव्यं मनुरब्रवीत् ॥
" उपस्थाने च यत्प्रोक्तं भिक्षार्थं ब्राह्मणेन हि । **तात्कालिक**मिति ख्यातं तदत्तव्यं मुमुक्षुणा ॥
" सिद्धमन्नं भक्तजनैरानीतं यन्मठं प्रति । उपपन्नं तदित्याहुर्मुनयो मोक्षकाङ्क्षिणः " ॥
" भिक्षाः पञ्चविधा ह्येताः सोमपानसमाः स्मृताः " । **पितामहः**—
" अयाचितमसंक्लृप्तमुपपन्नं यदृच्छया । जोषयीत सदाभिज्यं ग्रासमागतमस्पृहः " ॥
क्रतुः—

---

१ क्ष—युगामत्राविलोककः ।

“ संप्रार्थितमुपस्थानादसंक्लृप्तमयाचितम् । तत्सदैकान्नमापद्याद्भैक्षान्माधूकराद्वरम् ॥
“ अयाचितं यथालाभं भोजनाच्छादनं भवेत् । निमंत्रितोऽथवाऽश्नीयात्स्वगुणं न प्रकाशयेत् ”॥

पराशरः—

“ यतीनामातुराणां तु वृद्धानां दीर्घरोगिणाम् । एकान्ने नैव दोषोस्ति एकस्यैव दिनेदिने ॥
“ सुजीर्णोऽति कृशो रोगी दशांतो विकलेंद्रियः । पुत्रमित्रगुरुभ्रातृपत्नीभ्यो भैक्षमाहरेत् ॥
“ नापोमूत्रपुरीषाभ्यां नाग्निर्दहनकर्मणा । न वायुस्पर्शदोषेण नान्नदोषेण मस्करी ”॥

वसिष्ठः—“ सप्तागाराण्यसंकल्पितानि चरेद्भैक्ष्यम् ” इति ॥ **संवर्तः**—
“ अष्टौ भिक्षाः समादाय स मुनिः सप्त पंच वा । अद्भिः प्रक्षाल्य ताः सर्वास्ततोऽश्नीयाच्च वाग्यतः ”॥
इति । **यत्पुनर्वसिष्ठवचनम्** (१०।२४)—“ब्राह्मणकुले यल्लभेत तद्भुंजीत सायंप्रातर्मांसवर्जितम्” इति तदशक्तविषयम् । ‘ एककालं चरेद्भैक्ष्यम् ’ इति**मन्वादिस्मरणात्** ॥

यमः—

“ यश्चरेत्सर्ववर्णेषु भैक्ष्यमभ्यवहारकः । न स किंचिदुपाश्नीयात् यावद्भैक्ष्यमिति स्थितिः ”॥

काठकब्राह्मणे—“ चतुर्वर्णेषु भैक्ष्यचर्यं चरेत् पाणिपात्रेणाशनं कुर्यादौषधवत्प्राश्नीयात्प्राणधारणार्थं यथा मेदोवृद्धिर्न जायते” इति ॥ **मैत्रावरुणिश्रुतिः**—“भिक्षार्थं ग्रामंप्रविशेदा सायं प्रदक्षिणेनाविकित्सन्सार्ववर्ण्यं भैक्षाचरणमभिशस्तपतितवर्जम् ” इति । **आरुणीश्रुतिः**—“ यतयो भिक्षार्थं ग्रामं प्रविशंति पाणिपात्रमुदरपात्रं वा ओं हि ॐ हि ॐ हि एतदुपनिषदं विन्यसेद्विद्वान्य एवं वेद औषधवदशनमाचरेत् ” इति ॥ **पराशरः**—

“ ग्रामैकरात्रवासिनो नगरतीर्थावसयेयुः पंचरात्रवासिनं उदरादिपात्रिण अभिशस्तपतितवर्जं चातुर्वर्ण्यं भैक्ष्यं चरंतः आत्मत्वेनावतिष्ठंत ” इति ॥ सर्ववर्णेषु भैक्षचरणमापद्विषयम् । यदाह **बोधायनः**—

“ ब्राह्मणक्षत्रियविशां मेध्यानामन्नमाहरेत् । असंभवे तु पूर्वस्या आददीतोत्तरोत्तरम् ॥
“ सर्वेषामप्यभावे तु भक्तद्वयमनश्नता । भैक्षं शूद्रादपि ग्राह्यं रक्ष्याः प्राणा विजानता ”॥

वसिष्ठोऽपि (१०।२४) “ ब्राह्मणकुले यल्लभते तत् भुंजीत ” इति । **मैत्रावरुणीश्रुतिः**—
“ त्रिषु वर्णेष्वेकागारं भैक्ष्यमश्नीयान्माधूकरी वो ” इति **कलौ सर्ववर्णभैक्षाचरणनिषेधः** । आपदि सर्ववर्णेषु भैक्ष्यचरणमपि कलौ निषिद्धम् ।

“ यतेस्तु सर्ववर्णेषु न भिक्षाचरणं कलौ ” इति **स्मरणात्** ॥ **गौतमः**—
“ हविः प्राश्य यथाऽऽचम्य निराहारो भवेद्गृही । प्राश्याचम्य तथा भिक्षुर्निराहारो गृहे गृहे ॥
“ पात्रमस्य भवेत्पाणिस्तेन नित्यं गृहानटेत् ” ॥ **मुंडकोपनिषदि**—“ पाणिपात्रमुदरपात्र वा गेहे गेहे विशेत् कवलमात्रेण नापरं गृह्णीयात्पदे पदे भुंजन् गच्छेत्कुलान्कुलेषु सर्वाशी ” इति । उदरपात्रस्वरूपं दर्शितं **यतिधर्मसमुच्चये**

“ आस्येन तु यदाहारं गोवन्मृगयते मुनिः ” इति ॥ **शौनकः**—

“ पाणिपात्रं चरन्योगी नासकृद्भैक्षमाचरेत् । तिष्ठन् भुंजन् चरन्भुंजन्मध्ये नाचमनं तथा ” ॥
गोमुखप्रतिकरपात्रवृत्त्येत्थं समाक्रान्तमनुपानहौ । सर्वदोपानहौ भिक्षुर्न त्यजेदशक्तौ पात्रांतरेण भिक्षाचरणमाह **विष्णुः**—

" संस्कृत्य प्रणवेनाथ भिक्षापात्रं यथाविधि । भास्कराभिमुखो भूत्वा संस्मरन्मनसा हरिम् ॥
" सव्येनादाय पात्रं तु दण्डं वै दक्षिणेन तु " ॥ **कण्वः**—
" नमस्कृत्य तथाऽऽदित्यं समाक्रामन्नुपानहौ । सर्वदौपानहौ भिक्षुर्न त्यजेत्तु कदाचन ॥
" उदपात्रं च भिक्षा च दूष्येद्व्रत उपानहौ " ॥
बोधायनः—"भिक्षापात्रविशुध्यर्थमुपमुच्याप्युपानहौ । ततो ग्रामं व्रजेन्मंदं युगमात्रावलोककः" ॥
अत्रिः—" अनित्यं[१] वै वृजेद्गेहं नित्यं गेहं विवर्जयेत् । अनावृते विशेद्द्वारि गेहे नैवावृते व्रजेत् ॥
" न वीक्षेद्द्वाररंध्रेण भिक्षां लिप्सेत्कचिद्यतिः । न कुर्याद्वै क्वचिद् घोषं न द्वारं ताडयेत्कचित् ॥
" नैव सव्यापसव्येन भिक्षाकाले व्रजेद्गृहान् । अनिंद्यातिक्रमे योगी प्राणायामशतं जपेत् ॥
" अदृष्टापतितं साधुं यतिर्यः परिवर्जयेत् । स तस्य सुकृतं दत्वा दुष्कृतं प्रतिपद्यते ॥
" तथैव च गृहस्थस्य निराशो भिक्षुको गतः । हुतं दत्तं तपोधीतं सर्वमादाय गच्छति ॥
" असंस्कृता तु या कन्या उदक्या चोदिता तु या । तया दत्तं न गृह्णीयात्प्राण्यंगेनायसेन वा" ॥
शौनकः—
"पीडयित्वा य आत्मानं भिक्षां चेत्संप्रयच्छति । सा भिक्षा हिंसिता ज्ञेया नाद्यात्तादृशीं यतिः" ॥
अत्रिः—
" हितं मितं सदाऽश्नीयाद्यत्सुखेनैव जीर्यति । धातुः प्रकुप्यते येन तदन्नं वर्जयेद्यतिः ॥
" उदक्या चोदितं चान्नं द्विजानां शूद्रचोदितम् । प्राण्यंगे वायसे कूपं तदन्नं वर्जयेद्यतिः ॥
" पित्रर्थं कल्पितं पूर्वमन्नं देवादिकारणात् । वर्जयेत्तादृशीं भिक्षां परबाधाकरीं तथा " ॥
बोधायनः—
" भिक्षां न दद्युः पंचाहं सप्ताहं वा कदाचन । यस्मिन्गृहे जना मौर्ख्यात्त्यजेच्चांडालवेश्मवत् ॥
" एकत्र लोभाद्यो भिक्षुः पात्रपूरणमिच्छति । दाता स्वर्गमवाप्नोति भोक्ता भुंजीत किल्मिषम् ॥
" या तु पर्युषिता भिक्षा नैवेद्ये कल्पिता तु या । तामभोज्यां विजानीयाद्दाता तु नरकं व्रजेत् ॥
" आयसेन तु पात्रेण यदन्नमुपदीयते । भोक्ता विष्ठासमं भुंक्ते दाता तु नरकं व्रजेत् ॥
" स्वयमाहृतपर्णेषु स्वयं शीर्णेषु वा पुनः । भुंजीत न वटाश्वत्थकरंजानां च पर्णके ॥
" कुंभितिन्दुकयोर्वाऽपि कोविदारार्कयोस्तथा । आपद्यपि न कांस्ये तु मलाशी कांस्यभोजनः ॥
" सौवर्णे राजते ताम्रमये वा त्रपुसीसयोः " ॥

भिक्षापात्राण्याह मनुः (६।५४–५३)—
" अलाबुं दारुपात्रं वा मृण्मयं वैणवं तथा । एतानि यतिपात्राणि मनुः स्वायंभुवोऽब्रवीत् ॥
"अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च । तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे" ॥
याज्ञवल्क्यः (प्रा. ६०)—
" यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च । सलिलं शुद्धिरेतेषां गोवालैश्चापि घर्षणम्" ॥

शुद्धिः तत्र भोजने कृते मृज्जलगोवालघर्षणैः शुद्धिरित्यर्थः । यदाह **देवलः**—" तद्भैक्षं गृहीत्वा एकांते तेन पात्रेण वा अन्येन वा तूष्णीं मात्रया भुंजीत " ॥ इति

कलौ भिक्षापात्रभोजनं निषेधति पितामहः—

---

१ क्ष–अनिंद्यं ।

"द्वापरादियुगेष्वेव पात्रभोजी भवेद्यतिः । कलौ नैव तु भुंजीत स्वपात्रे योगवित्तमः" इति । कण्वः—"ताम्रपर्णं च पाषाणम्" इति । अत्रिः—

"क्षमं पात्रं च पाषाणं ताम्रपर्णं पुटं तथा । उक्तानि यतिपात्राणि ब्रह्मणा विश्वयोनिना"॥

व्यासः—

"प्रक्षाल्य पात्रे भुंजीयादद्भिः प्रक्षालयेत्तु तत् । अथवाऽन्यदुपादाय पात्रे भुंजीत नित्यशः ॥
"भुक्त्वा तु संत्यजेत्पात्रं यात्रामात्रमलोलुपः । प्रक्षाल्य पाणिपादौ च समाचम्य यथाविधि ॥
"आदित्यं दर्शयित्वाऽन्नं भुंजीत प्राङ्मुखोत्तरः । भुक्त्वा प्राणाहुतीः पंच ग्रासानष्टौ समाहितः ॥
"आचम्य देवं ब्रह्माणं ध्यायीत परमेश्वरम्" ॥

बोधायनः (२।१०।४६-५०)—"तस्य प्राणो गार्हपत्योऽपानोऽन्वाहार्यपचनो व्यान आहवनीय उदानापानौ सभ्यावसथ्यौ पंच वा एते अग्नय आत्मस्थाः आत्मन्येव जुहोति स एष आत्मयज्ञ आत्मनिष्ठ आत्मप्रतिष्ठ आत्मानं क्षेमं नयतीति विज्ञायते भूतेभ्यो दयापूर्वं संविभज्य शेषमद्भिः संस्पृश्यौषधवत्प्राश्नीयात्" ॥

आश्वलायनः—

"उपावृतस्ततो भैक्ष्यं गत्वा तीर्थमकर्दमम् । प्रक्षाल्यांतर्हिते देशे भिक्षापात्रं विधाय तु ॥
"मृत्तोयेन पृथक् पादौ हस्तौ प्रक्षालयेत्तथा । आचम्याथ त्रिराचम्य प्राणास्तु पुनराचरेत् ॥
"आपोशनं विधिं कृत्वा पंचप्राणाहुतीश्चरेत्" ॥ **महाभारते**—

"उक्तान्यकालपक्वानि काषायकटुकानि च । नास्वादयेत भुञ्जानो रसांश्च मधुरांस्तथा" ॥

आश्वलायनः—"लाक्षां लशुनं हिंगुं ताबूलं पुष्पभंजनम् । मधुमांसमपूपादि तैलं चापि विवर्जयेत्"॥

यमः—"प्रोक्षितं प्रणवेनैव हुतमध्यात्मकादिषु । शरीरं प्राणवत्पश्येदन्नं तु प्राणलेपवत् ॥
"गंगातोयाभिषिक्तां तु भिक्षामश्नाति योगवित् । तत्र क्रतुशतैरिष्ट्वा फलं प्राप्नोति मानवः ॥
"सांतपनं सहस्रं तु चांद्रायणशतानि च । अश्वमेधाष्टकं चैव तद्विष्णोः शेषमुत्तमम्" ॥

छांदोग्यश्रुतिः—

"आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः । स्मृतिलंभे सर्वग्रंथीनां विप्रमोक्षः" इति ॥

विष्णुः—

"भैक्षं यवागुं तक्रं वा पयो यावकमेव वा । फलं मूलं विपक्वं वा कणपिण्याकसक्तवः ॥
"इत्येते वै शुभाहारा योगिनां सिद्धिकारकाः" ॥

यमः—

"आहारस्य चतुर्भागमर्धं वाऽप्याहरेद्यतिः । युवा चैवारुजः शक्तः प्रसंगं तत्र वर्जयेत् ॥
"अन्नसंगाद्बलं दर्पो विषयासक्तिरेव च । कामक्रोधस्तथा लोभः पतनं नरके तथा ॥
"अष्टौ ग्रासा मुनेः प्रोक्ताः षोडशारण्यवासिनः । द्वात्रिंशत्तु गृहस्थस्य यथेष्टं ब्रह्मचारिणः"॥

तत्र ग्रासप्रमाणं **व्याघ्र** आह—

"चतुरंगुलमुत्सेधं चतुरंगुलमायतम् । एतद्ग्रासप्रमाणं तु व्याघ्रेण परिभाषितम्"॥

जाबालिः—

"निमंत्रितस्तु संन्यासी यदि भैक्षं समाचरेत् । लोभात्तत्र प्रवर्तेत पतते च न संशयः ॥
" यत्किंचिद्दीयमानं तु गृहिणीकरसंस्थितम् । भिक्षां भिक्षुर्न गृह्णीयात् कङ्कयोनिषु जायते " ॥
भिक्षां प्रशंसति **यमः**—
" अब्बिन्दुर्यः कुशाग्रेण मासि मासि समश्नुते । न्यायतो यस्तु भिक्षाशी पूर्वोक्ता तु विशिष्यते ॥
" तप्तकांचनवर्णेन गवां मूत्रेण यावकम् । पिबेद्द्वादशवर्षाणि न तद्भैक्षसमं भवेत् ॥
" शाकभक्षश्च यो भक्षेत् योऽन्यो यावकभक्षकः । सर्वे भिक्षाभुजस्तस्य कलां नार्हति षोडशीम् ॥
" न भैक्षं परपाकान्नं न च भैक्षं प्रतिग्रहः । सोमपानसमं भैक्ष्यं तस्माद्भैक्षेण वर्तयेत् " ॥

शातातपः—

" भिक्षा माधूकरी नाम सर्वपापप्रणाशिनी । भिक्षाहारो निराहारो भिक्षा नैव प्रतिग्रहः ॥
" श्रोत्रियान्नं च भैक्ष्यं च हुतशेषं च यद्धविः । आ नखाच्छोधयेत्पापं तुषाग्निरिव कांचनम् ॥
" गंगायाः सलिलं पुण्यं शालग्रामशिला तथा । भिक्षान्नं पंचगव्यं च पवित्राणि युगे युगे ॥
" भक्तात्परे चोपवास उपवासाद्याचितम् । अयाचितात्परं भैक्षं तस्माद्भैक्षेण वर्तयेत्" ॥

मेधातिथिः—

" बव्हन्नं पच्यते यत्र मन्यंते यतिमानवाः । अनुद्विग्नाः प्रयच्छंति तं ग्रामं यत्नतो व्रजेत्"॥

क्रतुः—

" पंचसप्तगृहाणां तु भिक्षामिच्छेत्क्रियावताम् । गोदोहमात्रमाकांक्षेन्निष्क्रांतो न पुनर्व्रजेत् ॥
" विना दंडोदपात्रं तु न गच्छेद्यतिसत्तमः । भिक्षाकाले दंडमेव नोदपात्रं कदाचन " ॥

दत्तात्रेयः—

" भैक्षादन्यं न याचेत न चैवोपविशेत्क्वचित् । उद्यतां नावमन्येत न चैनां श्रावयेत्पुनः ॥
" आत्मसंमितमाहारमाहरेदात्मवान्यतिः । अत्यंतक्षुधितस्यापि समाधिर्नैव जायते ॥
" मिताशनो भवेन्नित्यं भिक्षुर्मोक्षपरायणः । कामदर्पादयो दोषा न भवंति मिताशिनः" ॥

विष्णुः—

" यदि भैक्षं समादाय पर्युषेद्योगवित्तमः । स पर्युषितदोषेण भिक्षुर्भवति वै क्रिमिः ॥
" सुवृत्तस्य गृहे भिक्षेन्न दुष्टेष्वेव नित्यशः । अभावे बहुगेहानां तेषु भिक्षेदलोलुपः ॥
" अन्यपात्रे हविर्भुक्ते हव्यकव्येष्वनुज्ञया । राजते ताम्रसौवर्णे तत्रायं नास्ति वै विधिः ॥
" सौवर्णेषु च पात्रेषु ताम्ररौप्यमयेषु च । भुंजन्भिक्षुर्न दुष्येत दुष्यते तत्परिग्रहात् ॥
"भुंजीत पर्णपुटके पात्रे वा वाग्यतो मुनिः । भुक्त्वा पात्रं यतिर्नित्यं क्षालयेन्मन्त्रपूर्वकम् ॥
"न दुष्येत्तस्य तत्पात्रं यज्ञेषु चमसा इव । अथाचम्य निरुद्धासुरुपतिष्ठेत भास्करम् ॥
" जपध्यानविशेषेषु दिनशेषं नयेद् बुधः । कृतसंध्यस्ततो रात्रिं नयेद्देवगृहादिषु " ॥

दक्षः—" इतिहासपुराणाभ्यां षष्ठसप्तमकौ नयेत् " ॥

अंगिराः—

" पुराणश्रवणाद्भक्तिर्मूर्खस्यापि प्रवर्तते । भक्त्या विनिश्चिता मुक्तिस्तस्मात्पौराणमभ्यसेत् " ॥
" तदभ्यासात्परं ब्रह्मभावमापद्यते मुनिः " ॥

बृहस्पतिः—

" बंधान्मोक्षविभागज्ञो बंधाश्चेन्मोक्षणेच्छया । उपायान्वेषणे युक्तः को न मुच्येत बंधनात् ॥
" यथा चित्तं समासक्तं जंतोर्विषयगोचरे । यदि नारायणेऽप्येवं को न मुच्येत बंधनात् ॥
" तत्कर्म यन्न बंधाय सा विद्या या विमुक्तये । आयासाय परं कर्म विद्यान्या शिल्पनैपुणम् ॥
" लोहितार्कमुपासीत संध्यामा तारकोदयात् । हृत्पद्मकोटरावासं चिन्मात्रं ज्योतिषं हरिम् ॥
" ध्यायेन्नारायणं ह्यादौ त्रीन्कृत्वा प्राणसंयमान् । तावत् ध्यायेत्पुनर्यावन्निद्रावशमुपागतः ॥
" सुप्तोत्थितः पुनर्ध्यायेत् तिष्ठन् ध्यायेज्जपन् बुधः । प्रागरात्रेऽपररात्रे च मध्यरात्रे समाहितः ।
" संध्यास्वन्हिविशेषेण चिंतयेन्नित्यमीश्वरम् । कृत्वा हृत्पद्मनिलये विष्ण्वाख्यं विश्वसंभवम् ॥
"आत्मानं सर्वभूतानां परस्तात्तमसि स्थितम् । सर्वस्याधारमव्यक्तमानंदं ज्योतिरव्ययम् ॥
" पुराणं पुरुषं शंभुं ध्यायेन्मुच्येत बंधनात् । मत्वा पृथक् स्वमात्मानं सर्वस्मादेव केवलम् ॥
" आनन्दमक्षरं ज्ञानं ध्यायीत च पुनः पुनः । तस्मात् ध्यानरतो नित्यमात्मविद्यापरायणः ॥
" ज्ञानं समभ्यसेद्ब्रह्म येन मुच्येत बन्धनात् " ।

अथ चातुर्मास्यविधिः । तत्र **श्रूयते**– "वर्षासु ध्रुवशीलः" इति ॥

अत्रिः—

" चतुरोऽयं वसेन्मासान्वार्षिकान् द्वावथापि वा । वृद्धाननुक्रमेणैव नमस्कृत्य विधानतः ॥
" अनेन विधिना भिक्षुराषाढ्यां सुसमाहितः । स्थानाभावं व्रजेत्तावद्यावद्भवति पंचमी ॥
" प्रायश्चित्ते नियुज्येत पंचमोर्ध्वं व्रजेद्यदि । कक्षोपस्थशिखावर्जमृतुसंधिषु वापयेत् ॥
" चातुर्मास्यस्य मध्ये तु वर्जयेद्वपनं यतिः । आषाढ्यां पूर्णमास्यां तु कारयेद्वपनं यतिः॥
" तेषु मासेषु केशादीन् ऋतुसंधौ न वापयेत् । नदीं च न तरेत्तेषु क्रोशादूर्ध्वं न च व्रजेत् ॥
" वापयेद्यदि केशादीनुत्तरेद्यदि वा नदीम् । प्राणायामान् त्रिंशत्कृत्वा जपेत्त्रिकशतत्रयम्॥
" वर्षाभेदे यतिः कुर्याद्यदि कश्चिदनापदि । प्राजापत्येन कृच्छ्रेण मुच्यते नात्र संशयः"॥

अत्र **संप्रदायविद्वद्वचनम्—**

" गुरून्नत्वा शिरस्यंतःक्षालनं तदनंतरम् । आचम्य वाग्यतो यत्नात् सवासा क्षौरमाचरेत् ॥
" अंतर्धाय तृणं किंचित् तत्र निक्षेपयेद्यतिः । क्षुरं संदंशनं चैव तथा नखनिकृंतनम् ॥
" अभिमंत्र्य द्विषड्वारं प्रणवैः प्रोक्षयेज्जलम् । क्षुरमादाय तारेण श्मश्रुकेशान्निकृत्य च ॥
" नासा स्थितांस्तथा लोमान् यत्नेन प्रयतो यतिः । कारयेत् करपादस्य नखानां च निकृंतनम्॥
" द्विषड्वारं निमज्ज्याप्सु तीरं गत्वोपविश्य च । प्रतिस्थानं द्विषड्वारं करावारभ्य पादयोः ॥
" मृदं दद्यान्मुखे चैव प्रतिवारं जलं तथा । ततो जलं प्रविश्याथ शिर आलिप्य सन्मृदा ॥
" द्विषड्वारं निमज्ज्याथ प्रतिवारं मृदं तथा । पुनरुत्प्लुत्य तत्तीरं गत्वा गंडूषमाचरेत् ॥
" पंचैकादशवारांश्च सम्यगाचम्य यत्नतः । प्राणायामांस्तथा कुर्यात्पंचैकादशसंख्यया ॥
" क्षौरस्नानं यतीनां तु व्यासाद्यैश्च प्रकीर्तितम् " ॥ इति

अत्रिः—" वपनानंतरं स्नात्वा पूजयेत्पुरुषोत्तम्" इति ।

यतिधर्मसमुच्चये—

"देवं कृष्णं मुनिं व्यासं भाष्यकारं गुरोर्गुरुम् । गुरुं देवं गणाध्यक्षौ दुर्गां देवीं सरस्वतीम्" ॥

गणो गणेशः । अध्यक्षः क्षेत्रपालः । तत्र मध्ये कृष्णसनत्कुमारसनकसनंदनसनत्सुजातान् । तद्दक्षिणतो व्याससुमंतुजैमिनिवैशंपायनपैलान् । वामतो भाष्यकारपद्मपादविश्वरूपतोटकहस्तामलकाचार्यांश्च पूजयेत् । भगवतः पुरतः गुरुपरमगुरुपरमेष्ठिगुरूनन्यांश्चाचार्यान्पूजयेत् । यथादिशं लोकपालान्भगवत्पार्श्वयोर्ब्रह्मशंकरौ च प्रणवादिनमोन्तैस्तत्तन्नामभिः पूजयेत् । ततो गोपीचंदनमृत्तिकादंतकाष्ठदोरकादि दद्यात् । मासचतुष्टयपर्याप्तं मृत्तिकादंतकाष्ठादि संगृह्णीयात् ।

***अत्रिः**—

" असतिप्रतिबन्धे तु मासान्वै वार्षिकानिह । निवत्स्यामीति सङ्कल्प्य मनसा बुद्धिपूर्वकम् ॥
" प्रायेण प्रावृषि प्राणिसङ्कुलं वर्त्म दृश्यते । आषाढ्यादिचतुर्मासं कार्तिकान्तं तु संवसेत् ॥
" माधवश्चतुरो मासान् सर्वभूतहिताय वै । स्वापं यास्यति शेषाङ्के लक्ष्म्या सह जगत्पतिः ॥
" सुप्तश्चैवोत्थितो यावन्न भवेत्स सनातनः । अहं तावन्निवत्स्यामि सर्वभूतहिताय वै" ॥ इति ।

शातातपः—

" निगृहीतेन्द्रियग्रामो यत्र यत्र भवेद्यतिः । तत्र तत्र कुरुक्षेत्रं नैमिषं पुष्करं तथा " ॥ इति ।

अत्रिः—

" पिता भ्राता स्वसा माता स्नुषा ज्याया सुतस्तथा । ज्ञातिबन्धुसुहृद्वर्गो दुहितातत्सुतादयः ॥
" यस्मिन् देशे वसन्त्येते न तत्र दिवसं वसेत् । मुहूर्तमपि नासीत देशे सोपद्रवे यतिः ॥
" उपद्रवे तु मनसि समाधिर्नोपजायते । चातुर्मास्ये च कार्तिक्यां क्षौरं कुर्यान्न चान्तरा ॥
" देशकालविरोधे तु भाद्रपद्यामपि क्वचित् ।
" चतुःक्रोशान्तरा यत्र नदी भवति कुत्रचित् । पक्षान्ते तत्र गन्तव्यमापस्तंस्बवचो यथा ॥
" सर्वदा वन्दनं कुर्याद्गुरोर्ज्येष्ठयतेस्तथा । आ पञ्चमी नमस्कुर्यादतिक्रान्ते च पर्वणि ॥
" त्रिमुहूर्ताधिकं ग्राह्यं पर्वक्षौरप्रमाणयोः । प्रणतं न यतिर्ब्रूयादाशिषं व्यासशासनात् ॥
" नारायणोति च ब्रूयात्प्रणताय विवृद्धये " ॥ इति

व्या अभ्यागताचारादिकं संप्रदायमूलं यथासंप्रदायं वेदितव्यम् ।

हारीतः—

" सर्वेषामाश्रमाणां तु संन्यासी ह्युत्तमाऽश्रमी । स एवात्र नमस्यः स्याद्भक्त्या सन्मार्गवर्तिभिः ॥
" ब्रह्मिष्ठः परमो हंसः साक्षान्नारायणः स्मृतः । यतिं यः पूजयेन्नित्यं विष्णुस्तेन प्रपूजितः ॥
" अष्टाक्षरेण मन्त्रेण यतिर्यत्र नमस्कृतः । स्मृतं नारायणो हन्ति प्राणिनां पापपञ्जरम् ॥
" अष्टाक्षरेण मन्त्रेण नमो नारायणात्मना । नमस्यो भक्तिभावेन विष्णुरूपी यतिर्यतः ॥
" स्वधर्मस्थान् यतीन्वृद्धान् देवांश्च प्रणमेद्यतिः । नान्यमाश्रमिणं किञ्चित्प्रशस्तमपि तन्नमेत् ॥
" अपि शास्त्रसमायुक्तं सदाचारसमान्वितम् । साधुवृत्तं गृहस्थाद्यं न नमस्येत् क्वचिद्यतिः" ॥ इति ।

प्राणायामविधिः । मनुः (६।७२)

"प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषम् । प्रत्याहारेण संसर्गात् ध्यानेनानीश्वरान् गुणान्" ॥

इति ॥ **वसिष्ठः**—

*एतत्परः [illegible] पाठः ।

" प्रणवेनैव कुर्याच्च प्राणायामान्यतिर्मुहुः । रेचकं नाममार्गेण पूरकं दक्षिणे तथा ॥
" कुंभकं तु तयोर्हीनं मध्यमं हृदि तिष्ठति । चतुर्विंशतिमावृत्तिं षट्त्रिंशत्द्वादशाथ वा ॥
" प्रणवस्य स्मरेत्स स्यात् प्राणायमोऽतिनिर्मलः " ॥ इति ।

वैवस्वतः—

"द्वादशावर्तितं यत्तु प्रणवस्य मनो हृदि । प्राणायामो यतेः प्रोक्तः प्राणानायम्य चोमिति"॥इति ।

कूर्मपुराणे—

" प्राणस्तु देहजो वायुरायामस्तन्निरोधनम् । मात्रात् द्वादशको मन्दश्चतुर्विंशतिमात्रकः ॥
" मध्यमः प्राणसंरोधः षट्त्रिंशन्मात्रको मतः । सगर्भमाहुः सजपमगर्भमजपं बुधाः ॥
" रेचकः पूरकश्चैव प्राणायामोऽथ कुंभकः । रेचकोऽजस्रनिश्वासात्पूरकस्तन्निरोधकः ॥
" साम्येन संस्थितिर्या सा कुंभकः परिगीयते " इति ॥

शौनकपरिशिष्टे—सूत्रम् " यावत्यो रेचकमात्रास्तावत् द्विगुणान् पूरके विद्यात्कुंभके चातुर्गुण्यमष्टमात्रो रेचकः षोडशमात्रः पूरको द्वात्रिंशन्मात्रः कुंभक इति शिशुप्राणायामः । द्वादशमात्रको रेचकः चतुर्विंशतिमात्रः पूरक अष्टाचत्वारिंशन्मात्रः कुंभक इति मध्यमः । षोडशमात्रो रेचको द्वात्रिंशन्मात्रः पूरकोऽष्टषष्टिमात्रः कुंभक इति प्राणायामः । अकारकालो मात्राप्रायश्चित्तं चैतत्सर्वेषु दुष्कृतेष्विति " । श्लोकः—

" रेचकं दक्षिणे न्यस्येत्पूरकं वामनासिके । अङ्गुष्ठाङ्गुलिभिश्चैवं प्राणायामं समाचरेत्" ॥

अथ यतेर्निषिद्धानि ।

" प्राणायामैकनिष्ठस्य न किञ्चिदपि दुर्लभम् " । इति ॥

तत्र व्यासः—

" द्वावेतौ समवीर्यौ तौ सुरा तांबूलमेव च । तस्मात्सर्वप्रयत्नेन तांबूलं वर्जयेद्यतिः ॥
" माद्यति प्रमदां दृष्ट्वा सुरां पीत्वाऽपि माद्यति । तस्माद्दृष्टमदां नारीं दूरतः परिवर्जयेत् ॥
" शिल्पं व्याख्यानियोगश्च कामो रागः परिग्रहः । अहङ्कारो ममत्वं च चिकित्साकर्म साहसम् ॥
" एकान्नं मदमात्सर्ये गन्धपुष्पविभूषणम् । तांबूलाभ्यञ्जने क्रीडा भोगे कांक्षा रसायनम् ॥
" सन्धिश्च विग्रहो यानं मञ्चकं शुक्लवस्त्रकम् । शुल्कोत्सर्गो दिवास्वापो भिक्षाधारस्तु तैजसः ॥
" एतानि वर्जयेन्नित्यं यतिर्मूत्रपुरीषवत् । न स्नानमाचरेद्भिक्षुः पुत्रादिनिधने श्रुते ॥
" पितृमातृक्षयं श्रुत्वा स्नात्वा शुध्यति साम्बरः ।
" अन्नदानपरो भिक्षुः भिक्षादानपरो गृही । उभौ तौ मन्दबुद्धित्वात्पूतीनरकशायिनौ ॥
" यस्तु प्रव्रजितो भूत्वा पुनः सेवेत मैथुनम् । षष्टिर्वर्षसहस्राणि विष्ठायां जायते कृमिः ॥
" न किञ्चिद्भैक्षजादन्यदपानादन्तधावनम् । विना भोजनकाले न जातुचिद्भक्षयेद्यतिः " ॥ इति ।

अङ्गिराः—

"संन्यासं चैव यः कृत्वा पुनरुत्तिष्ठते द्विजः । न तस्य निष्कृतिः कार्या स्वधर्मात् प्रच्युतस्य च ॥
" आरूढो नैष्ठिकं कर्म पुनरावर्तयेद्यतिः । आरूढपतितो ज्ञेयः सर्वधर्मबहिष्कृतः ॥
"चण्डालाः प्रत्यवसिताः परिव्राजकतापसाः । तेषां जातान्यपत्यानि चण्डालैः सह वासयेत्"॥इति ।

"नैष्ठिकानां वनस्थानां यतीनामवकीर्णिनाम्। शुद्धानामपि लोकेऽस्मिन् प्रत्यासत्तिर्न विद्यते"॥इति।

दक्षः—

" परिव्रज्यां गृहीत्वा तु यः स्वधर्मे न तिष्ठति। श्वपादेनाङ्कयित्वा तं राजा शीघ्रं प्रवासयेत्" ॥ इति ॥

यमः—

"यस्तु प्रव्रजिताज्जातः प्रव्रज्यावसितश्च यः। तावुभौ ब्रह्मचण्डालौ प्राह वैवस्वतो यमः "॥ इति।

संवर्तः—

"संन्यस्य दुर्मतिः कश्चित् प्रत्यापत्तिं व्रजेद्यतिः। स कुर्यात् कृच्छ्रमश्रान्तः षण्मासात् प्रत्यनन्तरम्"॥ इति।

बह्वृचपरिशिष्टे—

" पतत्यसौ ध्रुवं भिक्षुर्यस्यं भिक्षोर्द्वयं भवेत्। धीपूर्वरेत उत्सर्गो द्रव्यसङ्ग्रह एव च "॥ इति

" अत्रानुक्त आचमनादिसाधारणो धर्मः तत्तदवसरे वक्ष्यते।

व्यासः—

" मोक्षाश्रमं यश्चरते यथोक्तं शुचिः सुसङ्कल्पितबुद्धियुक्तः।

" अनिन्धनं ज्योतिरिव प्रशान्तं स ब्रह्मभावं व्रजते द्विजातिः ॥ इति।

॥ इति यतिधर्माः ॥

इति श्रीवैद्यनाथदीक्षितविरचिते **स्मृतिमुक्ताफले**

वर्णाश्रमधर्मनिरूपणं नाम प्रथमः परिच्छेदः॥

समाप्तोऽयं वर्णाश्रमधर्मकाण्डः॥

COLLECTION OF HINDU LAW TEXTS No. 25 (2)

Śri VAIDYANÂTHA DIXITA'S

SMṚTIMUKTĀPHALAM

ÂNHIKA KÂṆḌA

PART II

EDITED BY

J. R. GHARPURE, B. A., LL. B., Honours-in-Law
Principal, Law College Poona, Advocate, High Court,
Fellow of the University of Bombay.

BOMBAY.

First Edition

1938

3a33
Vai/Gha

Digitized and Uploaded by:
Hari Parshad Das (HPD)
on 06 July 2013.

CENTRAL ARCHAEOLOGICAL
LIBRARY, NEW DELHI.
No. 15014.
Date 15/1/58.
Call No. Sa 3S/Vai/Gha.

Printed at the Aryabhushan Press, 915/1 Bhamburda Peth,
Poona City, by A. V. Patvardhan and
Published by V. J. Gharpure, at the Office of
the Collection of Hindu Law Texts,
Angrewadi, Girgaum, Back Road, Bombay 4.

धर्मशास्त्रग्रन्थमाला [ग्रन्थाङ्कः २५ (२)]

श्री

वैद्यनाथदीक्षितीय-

स्मृतिमुक्ताफलम्

आन्हिककाण्डम्

(द्वितीयः खण्डः)

जगन्नाथ रघुनाथ घारपुरे
बी. ए., एलएल्. बी., ऑनर्स–इन्–लॉ.

पुण्यपत्तनस्थव्यवहारधर्मशालायां मुख्याध्यापकः
मुंबई विश्वविद्यालयसदस्यः

इत्यनेन संपादितः।

प्रथमावृत्तिः

शाकाब्दाः १८५९ क्रिस्ताब्दाः १९३८.

पुण्यपत्तने ' आर्यभूषण ' मुद्रणालये ' अनंत विनायक पटवर्धन ' इत्यनेन मुद्रितः,
मोहमय्यां ' विश्वनाथ जगन्नाथ घारपुरे,' इत्यनेन प्रकाशितश्च ।

श्री

श्री वैद्यनाथदीक्षितीयस्मृतिमुक्ताफलस्थ-आन्हिककाण्डे

विषयानुक्रमणिका

विषयः	पृष्ठम्
ब्राह्मे मुहूर्ते बुध्येत	२०९
ततः किं कर्तव्यम्	,,
ब्राह्ममुहूर्तः	,,
संध्यायां वर्जनीयानि	,,
अप उपस्पृश्य प्राणायामः... ...	२१०
कुलकरिष्यमाणकार्यचिंतनम् ...	,,
तत्र जप्यान्	,,
,, दर्शनीयानि, अदर्शनीयानि ...	२११
बहिर्विहारः	,,
मूत्रपुरीषोच्चारादि	२१२
तत्र दिग्विचारः	,,
सूत्रस्य कर्णे धारणम्	,,
उच्चारे वर्जनीयस्थलादीनि	२१३,२१४
शौचविधिः	२१५
ग्राह्याग्राह्यमृत्तिकाः; तत्संख्याश्च	२१६,२१७
मृत्परिमाणम्	२१८
अनुपनीतानां शौचम्	२१९
बाह्याभ्यंतरशौचे	२२०
गण्डूषाः	,,
आचमनम्	२२१
दिङ्नियमः	,,
उदकनियमः	२२२
आचमने दिङ्नियमाः; निषेधाश्च ...	२२३
,, पात्रादीनि	२२४
ब्राह्म-काय-दैव-पित्र्यतीर्थानि ...	२२५
जलस्पर्शनविधिः	२२६
आचमनविधिः	२२७
आचमनतर्पणयोर्जलस्थलादिसापेक्ष्यम्	२२८
शुष्काद्रवाससः	२२९
कुशपाणिर्वर्तेत	२३०
काम्यपवित्रकम्	,,
नित्यपवित्रम्	,,
वर्णभेदेन दर्भसंख्या	२३१
कुशाभावे सौवर्णादिपवित्राणि ...	२३२
गोबालपवित्रम्	२३३
पवित्रनिर्माणम्	,,
उत्तवनादौ पवित्रम्	,,
कुशाहरणम्, तत्प्रकारश्च	२३४
कुशभेदाः	,,
ग्राह्या वर्ज्याः	,,
दर्भसंख्या	२३५
आचमननिमित्तानि	,,
द्विराचमननिमित्तानि	२३६
आचमनापवादाः ...	२३६, २३७
दंतच्युतेषु	२३८
मधुपर्कादिषु नोच्छिष्टदोषः ...	२३९
आचमनप्रशंसा	२४०
अकरणे प्रत्यवायः	,,
दंतधावनविधिः ... ,,	२४०
काष्ठानि, तत्परिमाणं च	२४२
वर्जनीयानि	२४३
कालनियमः दिङ्नियमः	,,
दन्तधावने वर्ज्यकालः	२४४
स्नानविधिः	२४५
स्नानकालः	,,
स्नानप्रशंसा	,,
प्रातःस्नानकालम्	२४६
तत्प्रकारः	,,

विषयः	पृष्ठम्
कालनियमाः	२४७
स्नानांगतर्पणम्	”
देवर्षिपितृतर्पणम्	२४८
यक्षतर्पणम्	२४९
जलोत्तरणानंतरकृत्यम्	”
वस्त्रनिष्पीडनम्	२५०
आर्द्रवस्त्रविसर्जनम्; वासःपरिधानम् ...	२५१
अत्र विशेषः	२५२
अहतम्	”
उत्तरीयवस्त्रम्	२५३
यज्ञोपवीतानि	”
वस्त्रनिपीडने विशेषः	
स्नानम्	
स्नानभेदाः	”
स्नानार्हजलानि	२५४
गर्तलक्षणम्	२५५
परकीयजलादिषु	२५६
समुद्रस्नानम्	२५७
वर्ज्योदकानि	२५८
उष्णोदकस्नानम्	”
तत्र विशेषः	२५९
मृदाद्याहरणम्	”
मृद्गोमयादिमंत्राः	२६०
स्नानविधिः	”
स्नानफलम्	२६१
बोधायनोक्तो विधिः	२६२
तीर्थपरिकल्पनम्	२६३
नैमित्तिकस्नानम्	२६४
प्रमादस्पर्शे	२६५
चंडालादीनां व्यवधाने	२६६
स्नानाय निमित्तांतराणि	२६७
उच्छिष्टादिस्पर्शे	२६८
अरुणोदयात् पूर्वं निषेधः	२७०
रात्रिस्नाने विशेषः	२७१
ग्रहणस्नानम्	”
चंद्रसूर्योपरागयोः	२७२
संक्रांत्यादिषु	२७३
अकरणे प्रत्यवायः	२७४
पुण्यकालः	”
रात्र्यादिषु	२७५
रजस्वलायाः	२७७
प्रसूतिकायाः	२७८
रजस्वलान्योन्यसंस्पर्शे	२७८
ज्वरादिभिरातुराणाम्	२७९
काम्यस्नानानि	
माघस्नानविधिः	२८१
मलापकर्षणस्नानम्	२८१
तिथिविशेषे	२८२
वारविशेषे	२८४
आश्विनकृष्णचतुर्दश्याम् ...	२८५
क्रियास्नानम्	२८६
नदीनां रजोदोषः	२८७
महानद्यः	२८८
गौणस्नानानि	२८९
सप्तस्नानानि	२९०
वायव्यसारस्वते	२९१
ऊर्ध्वपुण्ड्रधारणम्	२९२
तत्फलम्	२९३
तन्माहात्म्यम्	२९४
क्वचित्तन्निषेधः ...	२९५, ९६
पांचरात्राद्यागमोत्पत्तिः ...	२९७
तंत्राधिकारी	२९८
तप्तमुद्रानिषेधः	२९९
ऊर्ध्वपुण्ड्रनिषेधः	३००
त्रिपुण्ड्रविधिः	३०१
विभूतिधारणं, तत्फलं च	३०२, ३०३, ३०४
ब्रह्मचारिणाम्	३०५
तिर्यक्पुंड्रनिषेधः	३०६
द्विजबंधूनां तंत्रेऽधिकारः	३०७
श्राद्धे ऊर्ध्वपुंड्रधारणम्	३०८

विषयः	पृष्ठम्
संध्याविधिः; तत्कालः	३१०,३११
अकरणे प्रत्यवायः	३१२
कालभेदेन नामभेदाः	,,
संध्यावंदनकालः	३१३,३१४
संध्यावंदनदेशादिविशेषाः	३१५
प्रोक्षणमार्जनादि	३१६,३१७
मार्जनप्रोक्षणमन्त्राः	३१७,३१९
अर्घ्यदाने मन्त्राः	३२०
जपदेशः	३२१
आसनलक्षणम्	,,
न्यासस्थलानि	३२२
प्राणायामविधिः	३२३
,, लक्षणम्	,,
,, भेदाः ऋष्यादिकम्	३२४
,, फलम्	३२५
गायत्रीध्यानम्	,,
,, आवाहनम्	३२६
,, मन्त्रार्थः	३२७
,, शिरः	३२८
,, ऋष्यादि	,,
,, अक्षरदेवता शक्तयः न्यासः	३२९
,, वर्णध्यानम्	३२९,३३०
न्यासप्रकारः	३३१
,, मुद्राः	३३१,३३२
,, ध्यानम्	३३३
,, महिमा	३३४
तत्फलम्	३३५
जपविधिः	३३६।३३७
जपसंख्या	३३८
जपयज्ञभेदाः लक्षणानि च	३३९
,, नियमः	३४०
अक्षमाला, रुद्राक्षाः	३४२,३४३
उपस्थानम्, मंत्राश्च	३४४,३४५,३४६
अन्यानि जप्यानि	३४७
जपयज्ञः	३४८

विषयः	पृष्ठम्
रुद्रजपः	३४९
काम्यजप्यानि	३५०
हरि–राम–विष्णुजप्यानि	३५१
त्रयोदशपंचदशाक्षरजपः	३५२
जपयज्ञप्रशंसा	,,
अभ्युक्षाहरणविधिः	३५३
प्रोक्षणपात्राणि	३५४
होमविधिः	,,
तत्राधिकारिणः	३५५
अनग्निकस्य प्रायश्चित्तम्	३५६
होमे कालाः	३५७
कालातिक्रमे	३५८
आपन्नस्याहिताग्नेः	३५९
समिधः	३६०
हविर्द्रव्याणि	३६१
आहुतिपरिमाणम्	३६२
होमप्रकाराः	३६३
अनुगतेऽग्नौ पुनःसन्धानम्	३६४,३६५
मंगलद्रव्यावलोकनम्	३६६
ब्रह्मयज्ञः	३६७
देवादीतिकर्तव्यम्	३६८
नित्यपठनीयानि	३६९
मध्यान्हे विशेषः	३७०
आपत्कल्पः	३७१
ब्रह्मयज्ञप्रशंसा	३७२
काम्यब्रह्मयज्ञाध्ययनफलम्	३७३
द्वितीयभागकृत्यम्	३७४
तृतीयभागकृत्यम	३७५
चतुर्थभागकृत्यम्	३७६
तर्पणादि	३७७
बौधायनोक्तम्	३७९
असामर्थ्ये संक्षेपः	३८०
यमतर्पणम्; भीष्मतर्पणम्	३८१
महालयादौ परेद्युस्तिलतर्पणम्	३८२
वस्त्रनिष्पीडनम्	३८३

विषयः	पृष्ठम्
सूर्याञ्जलिः...	,,
देवपूजनम्	,,
विष्णुपूजाप्रकारः	३८४
षोडर्चने पूजाप्रकारः	३८५
बौधायनोक्ता पूजा	३८६
उपचारफलम्	३८७
पुष्पपत्रफलादीनि, नैवेद्यादि	३८८,३८९
स्त्रीशूद्राणाम्	३९०
मार्गशीर्षार्चनम्	३९१
शिवपूजा	३९२
पंचामृतादिपूजाफलम्	३९३
बोधायनोक्ता हरिहरपूजा	३९४
पंचमभागकृत्यम्	३९५
पंचमहायज्ञाः	३९५,३९६
सायंप्रातर्वैश्वदेवः	३९७
वैश्वदेवे वर्ज्यानि ग्राह्यानि च	३९८
अन्नसंस्कर्तारः	३९९
बलिहरणम्	,,
बलिदेशसंस्कारः	४००
भूतादिभ्यो बलिविसर्जनम्	४०१
पितृयज्ञः	४०२
बलिहरणांते	४०३
अतिथिभ्योऽन्नदानम्	४०४
पंचमहायज्ञप्रशंसा	४०५
अकरणे प्रत्यवायः	४०६
श्राद्धे वैश्वदेवकालः	४०७
आतिथ्यम्	४०८
अतिथिभ्योऽन्नदानम्	४०९
यतिब्रह्मचारिणोः	४१०
विद्यातपःसमृद्धेषु	४११
अतिथिलक्षणम्, तदागमे...	४१२,४१३
श्रोत्रियादौ	४१४
मधुपर्कार्हाः	४१५
भोजनम्	४१६,४१७
मंडलम्; दिङ्नियमाः	४१८,४१९
भोजनपात्राणि, ग्राह्यवर्ज्याणि	४२२
भोजनविधिः	४२१
आपोशनम्	,, ४२२
पंचप्राणाहुतयः	४२३
वामहस्तेन पात्रस्पर्शः	४२४
आहारप्रमाणम्	,,
भोजननियमाः	४२५
वर्ज्यस्थलादीनि	४२६
पंक्तिभेदः	४२७
अन्योन्यस्पर्शे, उदक्यादिस्पर्शे	४२८
श्राद्धे ,, ,,	४२९
,, उच्छिष्टान्ने ,,	,,
अंजलिना न पिबेत्	४३०
उच्छिष्टदाने भक्षणे च दोषः	४३१
श्वकाकाद्योपहते	४३२
भक्ष्याभक्ष्याणि	४३३,४३५,४३९
मत्याऽमत्या भक्षणे	४३४
प्रायश्चित्तानि	४३६
शुक्तादीन्यभक्ष्याणि	४३७
अपेयक्षीराणि	४३८
देवतार्पितनैवेद्यभक्षणे	४४०
श्राद्धीयान्नभक्षणे	४४२
भोज्याभोज्यान्नाः	४४२
भक्षणे प्रायश्चित्तानि	४४३
भुंजानस्य फलम्	४४४
अभ्यासानभ्यासे	४४५
शूद्राद्यन्नभोजने	४४६
शूद्रेषु भोज्यान्नाः	४४७
विण्मूत्रादिभक्षणे	४४८
श्राद्धे भुंजानस्य नियमाः	४४९
ग्रहणे भोजननिषेधः	४५०
भक्ष्यमांसानि	४५१
मांसवर्जने फलम्	४५२
भोजनानतरं विरामः	४५३,४५४
तांबूलसेवनम्	४५५

विषयः	पृष्ठम्
सायंसंध्याविधिः	
शयनपूर्वं पठनीयानि	४५७
दिग्विचारः	४५७
साधारणधर्माः	४५८
सत्यं प्रियं भद्रं ब्रुयात्	४५९
सर्वं परवशं कर्म वर्जयेत्	४६०
परशय्यादि "	४६१
दीपच्छायादि "	४६२
शुक्ता रूक्षा परुषा वाचो न ब्रूयात्	४६३,४६४
परकीयरहस्यानि न शृणुयात् ...	४६५
रक्तमाल्यवस्त्रादि न धार्यम् ...	४६६

विषयः	पृष्ठम्
द्रव्यशुद्धिः	४६७
अशुद्धिहेतवः	४६७
गवाघ्रातादीनाम्	४६८
सौवर्णराजतताम्रादीनाम्	४६९
अल्पोपघाते	४७०
मृण्मयपात्रादीनाम्	४७१
भूम्यादीनां शुद्धिः	४७२
चण्डालादीनां गृहप्रवेशे	४७३
क्षेत्रारामादौ सहवासे	४७४
वापीकूपतटाकादीनाम्	४७५
स्त्रीनद्यादीनाम्	४७६

एतत्पुस्तकसंशोधने यानि पुस्तकानि यैश्च सुमनस्कतया
प्रेषितानि तेषां नामानि संज्ञाश्च : यथा

क—भारतमंत्रिसंग्रहात् आंग्लदेशतः प्रेषितानि ग्रन्थलिप्यां लिखितानि—

ख—मद्रपुरसंग्रहात्प्राप्तानि ग्रंथलिप्याम्.

क्ष { सप्तपुरस्थ श्रीद्राविडमहाशयसंग्रहात् रावबहादुर भिकाजी व्यंकटेश द्रवीड इत्यैतेः प्राप्तम् ।

ग—मुद्रितानि—

परमुपकृतं नो यैरिमानि प्रेषितानि—

जगन्नाथ रघुनाथ घारपुरे

श्री

स्मृतिमुक्ताफलम् । आन्हिककाण्डम् (२) ।

श्रीगणेशाय नमः । श्रीगुरुचरणारविंदाभ्यां नमः । अथेदानीं **आन्हिकं** प्रस्तूयते । तत्र **मनुः** (४।९२)—

" ब्राह्मे मुहूर्ते बुध्येत धर्मार्थावनुचिंतयन् । कायक्लेशांश्च तन्मूलान् वेदतत्त्वार्थमेव च " ॥

वेदतत्त्वार्थः परमात्मा । तथा च **व्यासः**—

" ब्राह्मे मुहूर्ते उत्थाय धर्ममर्थं च चिंतयेत् । कायक्लेशं तदुद्भूतं ध्यायीत मनसेश्वरम् " ॥

याज्ञवल्क्यः (आ. ११५)—

"ब्राह्मे मुहूर्ते उत्थाय चिंतयेदात्मनो हितम् । धर्मार्थकामान्स्वे काले यथाशक्ति न हापयेत्"॥ इति ।

ब्राह्मे मुहूर्ते पश्चिमार्धप्रहरे प्रबुद्धः आत्मनो हितं कृतं करिष्यमाणं च वेदार्थरूपं चिंतयेत् । ततो धर्मार्थकामान् स्वोचितकाले यथासंभवं सेवेत इत्यर्थ इति **विज्ञानेश्वरे** (पृ. ३२ पं. २४)।

माधवीये पराशरेऽपि ' सूर्योदयात्प्रागर्धप्रहरे द्वौ मुहूर्तौ तत्राद्यो ब्राह्मः । द्वितीये रौद्र ' इति ।

स्मृत्यर्थसारेऽपि ' प्रभात उत्थाय इष्टं दैवतं मनसा नत्वा तदहःकृत्यं स्मरेत् ' इति ।

स्मृतिभास्करे—" रात्रेस्तु पश्चिमे यामे मुहूर्तो ब्राह्म उच्यते " इति ।

शौनकः—

"ब्राह्मे मुहूर्ते उत्थाय चिंतयेदात्मनो हितम् । गुरुं विष्णुं नमस्कृत्य मातापित्रोस्तथैव च " ॥ इति ।

विष्णुपुराणे (३।११।५) —

" ब्राह्मे मुहूर्ते उत्थाय मनसा मतिमान्नृप । विबुध्य[१] चिंतयेद्धर्ममर्थं चाप्यविरोधिनम् ॥

" अपीडया तयोः काममुभयोरपि चिंतयेत् " ॥ इति ।

स्मृत्यंतरेऽपि—

" षोढा विभज्य रजनीं चरमांशे प्रबोधितः । पत्न्या सह हरिं ध्यात्वा धर्ममर्थं च चिंतयेत्"॥इति ।

स्मृतिरत्नावल्याम्—

" गृहमेधिनि यत्प्रोक्तं स्वर्गभावनमुत्तमम् । ब्राह्मे मुहूर्ते उत्थाय सर्वं सम्यग्विचारयेत् ॥

" ब्राह्मे मुहूर्ते देवानां पितृणां च समागमः । जागरस्तत्र कर्तव्यः पितृसंमाननं हि तत् ॥

" य इच्छेच्छाश्वतीं सिद्धिं यमस्यादर्शनं तथा । सततं तेन कर्तव्यो ब्राह्मे काले प्रजागरः ॥

" ब्राह्मे मुहूर्ते सेवेतां शयनं यत्र दंपती । श्मशानतुल्यं तद्वेश्म पितृभिः परिवर्ज्यते ॥

" प्रत्यूषकाले निद्रां च कुरुते सर्वदा तु यः । अशुचिं तं विजानीयादनर्हः[२] सर्वकर्मसु ॥

"ब्राह्मे मुहूर्ते या निद्रा सा पुण्यक्षयकारिणी । तां करोति तु यो मोहात्पादकृच्छ्रेण शुध्यति"॥ इति ।

बृहन्मनुः—

" चत्वारीमानि कर्माणि संध्यायां परिवर्जयेत् । आहारं मैथुनं निद्रां स्वाध्यायं च तथैव च ॥

---

१ ख–द्धः । २ ग–दापन ।

" आहाराज्जायते व्याधिर्गर्भस्त्रेधश्च मैथुनात् । निद्रातो जायतेऽलक्ष्मीः स्वाध्यायाद्दायुषः क्षयः " ॥

मनुरपि (२।२२०-२२१)—

" तं चेदभ्युदियात्सूर्यः शयानं कामकारतः । निम्लोचेद्वाऽप्यनुज्ञानाज्जपन्नुपवसेद्दिनम् ॥

" सूर्येण ह्यभिनिम्लुक्तः शयानोऽभ्युदितश्च यः । प्रायश्चित्तमकुर्वाणो युक्तः स्यान्महतेनसा " ॥

तस्मिन्यस्मिन्कस्मिन्नाश्रमिणि शयाने सति सूर्योऽभिनिम्लोचेदस्तमियादभ्यन्युज्ञानात् ज्ञात्वोपोषणात् । एवं वचनादशक्यज्ञानादिषु प्रायश्चित्ताभावः सूचितः । अन्यथा तु प्रायश्चित्ताकरणे महान्प्रत्यवाय इत्यर्थः ।

आपस्तंबः (२।१२।१३-१५) " स्वपन्नभिनिम्रुक्तोनाश्वान्वाग्यतो रात्रिमासीत । श्वोभूते उदकमुपस्पृश्य वाचं विसृजेत् । स्वपन्नभ्युदितोनाश्वान् वाग्यतोहः तिष्ठेत् । आ तमितोः प्राणमायच्छेदित्येके " इति ।

" सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च । अंशुमानभिनिम्रुक्ताभ्युदितौ तु यथाक्रमम् " ॥

स्वपन्नभिनिम्रुक्तोनाश्वानभुंजानस्तूष्णीं भूतो रात्रिं सर्वां आसीत न शयीत । अथापरेद्युः प्रातः स्नात्वा वाचं विसृजेत् । अयमस्य निर्वेषः । आतमितोः यावदंगानां ग्लानिर्भवति तावत्प्राणायामं कुर्यादित्येके मन्यन्ते इत्यर्थः । शक्त्यपेक्षया विधिकल्प्यः ।

विष्णुः—

"उत्थायोत्थाय बोद्धव्यं किमद्य सुकृतं कृतम् । दत्तं वा दापितं वाऽपि वाक् सत्या वाऽभिभाषिता ॥

" उत्थायोत्थाय बोद्धव्यं महद्भयमुपस्थितम् । मरणव्याधिशोकानां किमद्य निपतिष्यति " ॥

व्यासः—

"किं नु मे स्यादिदं कृत्वा किं नु मे स्यादकुर्वतः । इति संचिन्त्य कार्याणि धीरः कुर्वीत वा न वा" ॥

स्मृतिप्रदीपिकायाम्—

"यस्यां राज्यां व्यतीतायां न किंचिच्छुभमाचरेत् । तमेव वन्ध्यं दिवसमिति विद्याद्विचक्षणः" ॥

तत्र जप्यान्याह **दक्षः**—

" ब्रह्मा मुरारिस्त्रिपुरांतकश्च भानुः शशी भूमिसुतो बुधश्च ।

" गुरुश्च शुक्रः शनिराहुकेतवः कुर्वंतु सर्वे मम सुप्रभातम् ॥

"भृगुर्वसिष्ठः क्रतुरंगिराश्च मनुः पुलस्त्यः पुलहश्च गौतमः । रैभ्यो मरीचिश्च्यवनोऽथ दक्षः कुर्वंतु० ॥

" सनत्कुमारश्च सनंदनश्च सनातनोऽप्यासुरि सिंहलौ च । सप्तस्वराः सप्तरसातलानि कुर्वंतु० ॥

" सप्तार्णवाः सप्तकुलाचलाश्च सप्तर्षयो द्वीपवनानि सप्त । भूरादिलोका भुवनानि सप्त कुर्वंतु० ॥

"पृथ्वी सगंधाः सरसास्तथापः स्पर्शश्च वायुर्ज्वलितं च तेजः । नमः सशब्दं महता सहैव कुर्वंतु० ॥

" इत्थं प्रभाते परमं पवित्रं पठेत् स्मरेद्वा शृणुयाच्च भक्त्या ।

" दुःस्वप्ननाशो विजयश्च भूयात् दोषग्रहाः शान्तिकरा भवन्ति " ॥

स्मृतिरत्ने—

" महाभारतमाख्यानं क्षितिं गां च सरस्वतीम् । ब्राह्मणान् केशवं चैव प्रातरुत्थाय कीर्तयेत् ॥

" ब्रह्माणं शंकरं विष्णुं धर्मराजं दनुं बलिम् । सप्तैतान् संस्मरेन्नित्यं महापातकनाशनम् ॥

" पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः । पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्दनः ॥

१-चा । २ क्ष-सहभानुजेन । ३ क्ष-दुःस्वप्नं तस्य नश्यति ।

" पुण्यश्लोको हरिश्चन्द्रः पुण्यश्लोकः पुरूरवाः ।
" कर्कोटकस्य नागस्य दमयंत्या नलस्य च । ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनम् " ॥

शांडिल्यः—
" उच्चैः स्वरेण यः प्रातः स्तोतुमिच्छेदनन्यधीः । वासुदेवादिदेवानां नामसंकीर्तनं चरेत् " ॥

अथ **दर्शनीयान्यदर्शनीयानि च दर्शयति कात्यायनः**—
" श्रोत्रियं सुभगं गां च ह्यग्निमग्निचितं तथा । प्रातरुथाय यः पश्येदापभ्यः स विमुच्यते ॥
" पापिष्टं दुर्भगं मर्त्यं नग्नमुत्कृत्तनासिकम् । प्रातरुत्थाय यः पश्येत् तत्कलेरुपलक्षणम् " ॥
नग्नपदं बालव्यतिरिक्तविषयम् । अथवा छन्दांसि ग्नाः । न विद्यन्ते ग्नाः यस्य सः नग्नः ॥

अथ **बहिर्विहारः** । तत्र **व्यासः**—
" नक्षत्रज्योतिरारभ्य त्वा सूर्योदयदर्शनात् । प्रातःसंध्येति तां प्राहुः श्रुतयो मुनिसत्तमाः ॥
" ततः पूर्वं समुत्थाय प्राचीमेवोपनिष्क्रमेत् । उदीचीं प्रागुदीचीं वा शौचाचारक्षमां दिशम् ॥
" यत्रोदकं प्रभूतं तु तद्गत्वा शौचमाचरेत् " ॥

माधवीये—
" नैर्ऋत्यामिषुविक्षेपमतीत्याभ्यधिकं भुवः । दूरादावसथान्मूत्रं पुरीषं च समाचरेत् " ॥

तथा **चापस्तंबः** (१।३१।२):—" आराच्चावसथान्मूत्रपुरीषे कुर्यात् दक्षिणां दिशं दक्षिणापरां वा " इति । गत्वेति शेषः । आरात् दूरादित्यर्थः ।

व्यासः—" प्रतिश्रयाद्दक्षिणपश्चिमेन क्षिप्रं गत्वा क्षेपमात्रं शरस्य ॥
" कुर्यात् पुरीषं हि शिरोऽवकुण्ठ्य न तु स्पृशेज्जातु शिरः करेण " ॥ प्रतिश्रयो गृहम् ।

मनुः (४।१५१):—
"दूरादावसथान्मूत्रं दूरात्पादावनेजनम् । उच्छिष्टं च निषेकं च दूरादेव समाचरेत् " ॥
एतद्दिवाविषयम् । " अस्तमिते च बहिर्ग्रामादारादादावसथाद्वा मूत्रपुरीषयोः कर्म वर्जयेत् ।
" रात्रौ मूत्रपुरीषे तु गृहाभ्याशे समाचरेत् " इति **स्मरणात्** ।

अंगिराः—
" उत्थाय पश्चिमे यामे रात्रेराचम्य चोदकम् । अंतर्धाय तृणैर्भूमिं शिरः प्रावृत्य वाससा ॥
"वाचं नियम्य यत्नेन ष्ठीवनोच्छ्वासवर्जितः । कुर्यान्मूत्रपुरीषे तु शुचौ देशे समाहितः" ॥ इति ।
अनेन यत्र स्वापादिना निमित्तेनाचमनप्राप्तिः तत्राचम्यैव मूत्रपुरीषे कुर्यादित्युक्तं भवति ।
तृणान्ययज्ञियानि । तथा च **कात्यायनः**—
" शिरः प्रावृत्य कुर्वीत शकृन्मूत्रविसर्जनम् । अयज्ञियैरनार्द्रैश्च तृणैः संछाद्य मेदिनीम्" ॥
तृणग्रहणं काष्ठादेरपि प्रदर्शनार्थम् । अत एव **मनुः** (४।४९)—
" तिरस्कृत्योच्चरेत्काष्ठलोष्ठपर्णतृणादिना[3] । नियम्य प्रयतो वाचं संवीतांगोऽवगुंठितः "
तिरस्करणं अंतर्धानम् । उच्चारः पुरीषोत्सर्गः । मूत्रस्याप्युपलक्षणमेतत् ।
" अयज्ञियैरनार्द्रैश्च तृणैः संछाद्य मेदिनीम् । घ्राणास्ये वाससावेष्ट्य मलमूत्रं त्यजेद् बुधः " ॥
इति **स्मरणात्** । संवीतांगः आच्छादितदेहः । अवकुंठितः प्रावृतशिराः । अत्र **विष्णुः**—
" ब्राह्मणः अनार्द्रेण स्ववाससा वेष्टयित्वा मूर्धानं ग्रीवायां अवसज्योच्चरेत् " इति ।

---

१ ग–पाठ । २ आपस्तंब–सू. १।३।३१ । ३ ग–तृणानि च ।

हारीतः—

"अप्रावृतशिरा यस्तु विण्मूत्रं सृजति द्विजः । तच्छिरः शतधा भूयादिति देवाः शपंति तम्" ॥

बोधायनः (१।५।६८)–" शुष्कं तृणमयाज्ञिकं काष्ठं लोष्ठं वा तिरस्कृत्याहोरात्रयोरुदक्दक्षिणामुखः प्रावृत्य शिर उच्चरेन्मेहेच्चेति "। **मनुः** (४।५०–५१):—

" मूत्रोच्चारसमुत्सर्गं दिवा कुर्यादुदङ्मुखः । दक्षिणाभिमुखो रात्रौ सन्ध्ययोश्च यथा दिवा ॥
" छायायामंधकारे च रात्रावहनि वा द्विजः । यथासुखमुखः कुर्यात्प्राणबाधाभयेषु च " ॥

" छायायां मूत्रपुरीषयोः कर्म वर्जयेदिति " **स्मरणात्** । अत्र छायाशब्देनावर्जनीयो मेघपर्वतादिना महता व्यवधाने सति सूर्यस्य तिरोभावो विवक्षितः । अंधकारशब्देन रात्रौ ज्योतिषामभावः । यत्तु **देवलेनोक्तं** " सदैवोदङ्मुखः प्रातः सायाह्ने दक्षिणामुखः " इति " विण्मूत्रे आचरेन्नित्यं सन्ध्यासूपरिवर्जयेत् " इति तन्निरुद्धेतरविषयम् । ' नोपरुद्धः क्रियां कुर्यात् ' इति **स्मरणात्** । **स्मृतिरत्ने**–

" आगम्य राक्षसीमाशां...वाग्यतो दिवा । विण्मूत्रोत्सर्जनं कुर्यात् धृतशिश्न उदङ्मुखः "।
" सन्ध्ययोश्च तथा रात्रौ दक्षिणाभिमुखो द्विजः '। यत्तु–
" प्रत्यङ्मुखस्तु पूर्वाह्णेऽपराह्णे प्राङ्मुखस्तथा । उदङ्मुखस्तु मध्याह्ने निशायां दक्षिणामुखः"॥

यमवचनं तत्सूर्याभिमुख्यनिषेधपरमिति **माधवीये** । **याज्ञवल्क्यः** (आ. १६):—

" दिवा संध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः । कुर्यान्मूत्रपुरीषे तु रात्रौ चेद्दक्षिणामुखः " ॥

आपस्तंबः । (१।३१।१)– " प्राङ्मुखोऽन्नानि भुंजीतोच्चरेद्दक्षिणामुख उदङ्मुखो मूत्रं कुर्यात्प्रत्यक्पादावनेजनमिति "। अत्र विकल्पो वेदितव्यः । **अंगिराः**—

" कृत्वा यज्ञोपवीतं तु पृष्ठतः कंठलंबितम् । विण्मूत्रं तु गृही कुर्याद्यद्वा कर्णे समाहितः " ॥

आपस्तंबोऽपि—

"नोर्ध्वं नाधो न तिर्यक्च किंचिद्वीक्षेत बुद्धिमान् । नभोभूम्यंतरं पश्येत् कृत्वा मूर्ध्न्युपवीतकम्"॥

इति । **स्मृत्यंतरे**—" सूत्रं तु दक्षिणे कर्णे कृत्वा विण्मूत्रमुत्सृजेत् " इति । **अंगिराः**—

" यज्ञोपवीतं कर्णे च दक्षिणे तु निधाय च । कुर्यान्मूत्रपुरीषे तु शुचौ देशे समाहितः" ॥

दक्षिणकर्णनिधानमेकवस्त्रविषयम् । यथाह **सुमंतुः**—

"यद्येकवस्त्रः स्याद्विप्रः कर्णे कृत्वोपवीतकम् । मूत्रोत्सर्गं गृही कुर्यादिति सांख्यायनोऽब्रवीत्" ॥

सांख्यायनगृह्येऽपि–" यद्येकवस्त्रो यज्ञोपवीतं कर्णे कृत्वा मूत्रपुरीषोत्सर्गं कुर्यात् " इति ।

स्मृतिसारे—

" कृत्वाऽवकुंठनं चात्र उत्तरीयेण वाससा । पवित्रं दक्षिणे कर्णे कृत्वा विण्मूत्रमुत्सृजेत् " ॥

पवित्रं यज्ञोपवीतम् । तथा **भरद्वाजः**—

"चंडालैरंत्यजैरुक्तौ मलमूत्रविमोचने । दक्षिणे श्रवणे विप्रो ब्रह्मसूत्रं विनिक्षिपेत्"॥ मूत्रपुरीषादिकरणे **शंखः**–" नानुदको नामृत्तिको नापरिवेष्टिताशिराः" इति । **स्मृतिप्रदीपिकायाम्**—

" उत्धृतोदकमादाय मृत्तिकां चैव वाग्यतः । उदङ्मुखो दिवा कुर्यात् रात्रौ चेद्दक्षिणामुखः ॥
" त्यागान्मूत्रपुरीषस्य पूर्वं गृह्णीत मृत्तिकाम् । पश्चाद्गृह्णाति यो विप्रः सचैलो जलमाविशेत् "॥

पैठीनसिः–" अनूदकमूत्रपुरीषकरणे सचैलस्नानम् " इति । **स एव**

" उत्धृत्यैव जलं पूर्वं कुर्यान्मूत्रपुरीषके । गृहीतोदकपात्रश्चेत्कुर्यान्मूत्रपुरीषके ॥
" तत्तोयं मूत्रतुल्यं स्यात्पीत्वा चांद्रायणं चरेत् ॥
" करस्थोदकपात्रश्चेत्कुर्यान्मूत्रपुरीषके । तज्जलं मूत्रसदृशं सुरापानेन तत्समम् " ॥

भरद्वाजः—
"मलमूत्रं त्यजेद्यस्तु विस्मृत्यैवोपवीतधृक् । तत्सूत्रं तु परित्यज्य दध्यादन्यत्पुनर्नवम्" ॥

अंगिराः—
"कृत्वा मूत्रपुरीषं वा यदा नैवोदकं भवेत् । स्नात्वा लब्धोदकः पश्चात्सचैलं तु विशुध्यति" ॥
" स्नानं कृत्वाऽर्द्रवासास्तु विण्मूत्रं कुरुते यदि । प्राणायामत्रयं कृत्वा पुनः स्नानेन शुध्यति ॥
" तैलाभ्यंगे तथा वांते क्षुरकर्मणि मैथुने । अनाचम्योच्चरन्विप्रः त्रिरात्रमशुचिर्भवेत् " ॥ इति ।

आपस्तंबः—" शिरःपरिवेष्टनं प्रथमं निवीतं द्वितीयं दिशावलोकनं तृतीयमन्तर्धानं चतुर्थं मौनं पञ्चमं पुरीषं षष्ठं मृत्तिकाग्रहणं सप्तममुदकमष्टमम् " इति । पुरीषकरणानन्तरं मृत्तिकोदकग्रहणमनुद्धृतशौचविषयम् ।
"सजलं भाजनं स्थाप्य मृत्तिकां च परीक्षिताम् । कुर्यान्मूत्रं पुरीषं च नान्यथा शुद्धिमाप्नुयात् " इति **व्यासस्मरणात्** ।

मनुः (४।४५)—" न मूत्रं पथि कुर्वीत न भस्मनि न गोव्रजे ।
" वाय्वग्निं विप्रमादित्यमपः पश्यंस्तथैव गाम् । न कदाचन कुर्वीत विण्मूत्रस्य विसर्जनम् ॥ (४८)
"न फालकृष्टे न जले न चित्यां न च पर्वते । न जीर्णदेवायतने न वल्मीके कदाचन ॥ (४६)
" न ससत्वेषु गर्त्तेषु न गच्छन्नापि च स्थितः । न नदीतीरमासाद्य न च पर्वतमस्तके ॥ (४७)
"प्रत्यग्निं प्रतिसूर्यं च प्रतिसोमोदकद्विजम् । प्रतिगां प्रतिसन्ध्यां च प्रज्ञा नश्यति मेहतः" ॥ (५२) इति ।

यमः—
"प्रत्यादित्यं न मेहेत न पश्येदात्मनः शकृत् । दृष्ट्वा सूर्यं निरीक्षेत गामग्निं ब्राह्मणं तथा" ॥

विष्णुः (६०।२२)—" न प्रत्यनिलानलेन्द्वर्कस्त्रीगुरुब्राह्मणानां च " इति ।

बोधायनः—"फालकृष्टे जले चित्यां वल्मीके गिरिमस्तके । देवालये नदीतीरे दर्भपृष्ठे तु शाद्वले ॥
"छायायां वृक्षमूले वा विण्मूत्रे न त्यजेद् बुधः । नान्यचित्तश्चिरं तिष्ठेत् न स्पृशेत्पाणिना शिरः ॥
" न ब्रूयान्न दिशः पश्येद्विण्मूत्रोत्सर्जने बुधः ॥ " ॥

पारिजाते—
" अग्नौ च गच्छन् तिष्ठन्वै रथ्यातीर्थे श्मशानके । अंगारे गोमये नद्यां यज्ञभूमिषु सर्वदा ॥
" बिले जले चितायां च वल्मीके गिरिमस्तके । देवालये नदीतीरे दर्भपुष्पकुशस्थले ॥
" सेव्यछायासु वृक्षेषु मार्गगोष्ठांबुभस्मसु । स्थानेष्वेतेषु वै कुर्यान्न तु मूत्रादि किंचन ॥
" तिष्ठेन्नातिचिरं तत्र नैव किंचिदुदीरयेत्" ॥

यमः—" तुषांगारकपालाग्निदेवतायतनानि च । राजमार्गश्मशानादि क्षेत्राणि च खलानि च ॥
" उपरुद्धो न सेवेत छायादृश्यं चतुष्पथे । उदकं चोदपानं च पन्थानं च विवर्जयेत् ॥
" वृक्षमूलानि सर्वाणि चैत्यश्वभ्रबिलानि च " ॥

---

१ क्ष—श्मश्रु । २ ग—अपि ।

हारीतः—"चत्वरोपद्वारयोर्न मूत्रपुरीषे कुर्यान्न गोमये न गोष्ठे न तीर्थे न यज्ञभूमौ न यज्ञियानां वृक्षाणामधस्तात्" इति । उपद्वारं द्वारसमीपम् । **विष्णुरपि** (६०।३,७,१६,१७)—

"ना प्रच्छादितायां भूमौ नोषरे न शाड्वले नोद्यानोद्यकसमीपयोर्नाकाश" इति ।

व्यासः—

"पुरीषं यदि वा मूत्रं ये न कुर्वंति मानवाः । राजमार्गे सभामध्ये धान्यमध्ये च ते शुभाः ॥
"वाय्वग्न्यर्काम्बुगोविप्रान् पश्यन्नोच्चारमुत्सृजेत् । नाश्ममूलफलांगारैरुन्मृज्यान्नाथ बर्हिषा" ॥

स्मृतिरत्ने—

"न सोपानत्पादुको वा छत्री वानंतरिक्षके । तथैवाभिमुखः स्त्रीणां गुरुब्राह्मणयोर्गवाम्" ॥

याज्ञवल्क्यः (आ. १३४–१३५)—

"न तु मेहेन्नदीछायावर्त्मगोष्ठांबुभस्मसु । न प्रत्यगन्य्यर्कगोसोमसंध्यांबुस्त्रीद्विजन्मनाम्[1] ॥
"नेक्षेतार्कं न नग्नां स्त्रीं न च संसृष्टमैथुनाम् । न च मूत्रं पुरीषं वा नाशुची राहुतारकाः" ॥

उदयास्तमययोरादित्यं नेक्षेत न सर्वदा । यथोक्तं **मनुना** (४।३७)—

"नेक्षोतोद्यंतमादित्यं नास्तं यंतं कदाचन । नोपरक्तं[2] न वारिस्थं न मध्यं नभसो गतम्" ॥ इति ।

"उपभोगादन्यत्र न नग्नां स्त्रियमीक्षेत अन्यत्र मैथुनात्" **इत्याश्वलायनस्मरणात्** । मूत्रपुरीषे च न पश्येत् । तथा अशुची राहुताकाश्च न पश्येदित्यर्थः ।

आपस्तंबः (१।३०।१५–२०)–"शिरस्तु प्रावृत्य मूत्रपुरीषे कुर्याद्भूम्यां किंचिदन्तर्धाय । छायायां मूत्रपुरीषयोः कर्म वर्जयेत् । स्वां तु छायामवमेहेत् । न सोपानन्मूत्रपुरीषे कुर्यात् । कृष्टे पथ्यप्सु च । तथा ष्ठेवनमैथुनयोः कर्माप्सु वर्जयेत् । अग्निमादित्यमपो ब्राह्मणं गा देवताश्च अभिमुखो मूत्रपुरीषयोः कर्म वर्जयेत्" । छायायामुपजीव्यछायायाम् । 'न चोपजीव्यच्छायासु' इति **स्मरणात्** । ष्ठीवनं श्लेष्मनिरसनम् । **स्मृत्यर्थसारे** "मूत्रं पुरीषं समुत्सृजन्न यज्ञियकाष्ठलोष्ठतृणपर्णादिकं गृहीत्वा शिरः प्रावृत्य निवीतं कंठलंबितं कृत्वा एकवस्त्रश्चेद्दक्षिणे कर्णे निधाय भुवं काष्ठाद्यंतर्हितां कुर्यान्मौनी घ्राणस्य पिधानं कृत्वा दिवासंध्ययोरुदङ्मुखो रात्रौ दाक्षिणामुखो मूत्रपुरीषे कुर्यात् ।

"फालकृष्टे जले चित्यां वल्मीके गिरिमस्तके । देवालये नदीतीरे दर्भपुष्पेषु शाड्वले ॥
"सेव्यछायासु वृक्षेषु मार्गगोष्ठाम्बुभस्मसु । अग्नौ च गच्छंस्तिष्ठंश्च विष्ठां मूत्रं च नोत्सृजेत् ॥
"रथ्याचत्वरतीर्थेषु श्मशाने गोमये जले । न सस्यमध्ये मेहेत जनसंसदि वर्त्मनि ॥
"अंगारोद्यानसप्राणियज्ञभूमिषु नोत्सृजत् । मारुताग्न्यर्कगोसोमसंध्याम्बुस्त्रीद्विजन्मनः ॥
"पश्यन्नभिमुखश्चैव विष्ठां मूत्रं च नोत्सृजेत् । सर्वे निषेधा नैव स्युः प्राणबाधाभयेषु तु ॥
"काष्ठादिना त्वपानस्थममेध्यं निमृजीत च । कंदमूलफलांगारैर्नामेध्यं निमृजीत च ॥
"अन्यासक्तमना नैव तिष्ठेदतिचिरं बुधः" ॥ इति ।

पुराणे—

"देवालये तु परितः शतदंडाद्बहिर्मुने । विण्मूत्रकरणं कुर्यात् कोशाद्बहिरथापि वा" ॥

भरद्वाजः—

---

१ ग–त्रवानन्त्यजन्मनाम् । २ ग–सृष्टं ।

"अथापकृष्य विण्मूत्रं लोष्ठकाष्ठतृणादिना । उदस्तवासा उत्तिष्ठेत् दृढं विधृतमेहनः" ॥ मेहनं लिंगम् ।

हारीतः—" लोष्ठेन परिमृंजीत शुष्ककाष्ठेन वा गुदम् " ॥ इति ।

व्यासः—

" मार्जनं वामहस्तेन वीरणाद्यैरयज्ञियैः । कुर्यान्मूत्रपुरीषाणामेवमायुर्न हीयते " ॥

आपस्तंबः(१।३०।२१)—"अश्मानं लोष्ठमार्द्रानोषधिवनस्पतीनूर्ध्वानाच्छिद्य मूत्रपुरीषयोः शुंधने वर्जयेत् " इति । फलपाकावसाना ओषधयः । पुष्पैर्विना ये फलन्ति ते वनस्पतयः । आर्द्रानिति वचनात् शुष्केषु न दोषः । ऊर्ध्वानितिवचनाद्वातादिनिमित्तेन भग्नेषु न दोषः । एतैरश्मादिभिः मूत्रपुरीषयोः शोधनं कुर्यादित्यर्थः ।

गौतमोऽपि (९।१५)—" न पर्णलोष्ठाश्मभिः मूत्रपुरीषापकर्षणं कुर्यात् " इति । अत्र लोष्ठप्रतिषेध उक्तकाष्ठादिसंभवे वेदितव्यः । **हारीतः**—

"आहारं च रहः कुर्याद्विहारं चैव सर्वदा । गुप्ताभ्यां लक्ष्मीयुक्तः स्यात् प्रकाशे हीयते श्रियः"॥इति।

अथ शौचविधिः । तत्र **देवलः**—

" आशौचान्नोत्सृजेच्छिश्नं प्रस्रावोच्चारयोरपि । गुदं हस्तं च निर्मृज्य मृदम्भोभिर्मुहुर्मुहुः " ॥

स्मृत्यंतरे—

" उत्थाय वामहस्तेन गृहीत्वाऽध्वनि मेहनम् । शौचदेशं समभ्येत्य कुर्याच्छौचं मृदंबुभिः " ॥

याज्ञवल्क्यः (आ. १७)—

" गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः । गंधलेपक्षयकरं शौचं कुर्यादतंद्रितः " ॥ अभ्युद्धृतैः कमंडल्वादिना उद्धृतैः । तथा च **देवलः**—

" मूत्रोच्चारे कृते शौचं न स्यादंतर्जलाशये । अन्यत्रोद्धृत्य तत्कुर्यात्सर्वदैव समाहितः" ॥

दक्षोऽपि—

" तीर्थे शौचं न कुर्वीत कुर्वीतोद्धृतवारिणा । मृत्तिकावारिदौ चास्य शौचज्ञौ परिचारकौ " ॥

बोधायनः (१।५।९)—" प्राङ्मुखोदङ्मुखो वोपासीनः शौचमारभेत " ॥ इति । **गौतमोऽपि** (१।३४)—"प्राङ्मुखोदङ्मुखो वा शौचमारभेत" इति । शौचग्रहणं मूत्रपुरीषादिशौचेऽपि यथा स्यादाचमनं एवं मा भूदिति **हरदत्तेन** व्याख्यातम् ।

तथा **स्मृतिरत्ने**—

" उद्धृतोदकमादाय मृत्तिकां चैव वाग्यतः । उदङ्मुखो दिवा कुर्याद्रात्रौ चेद्दक्षिणामुखः " ॥

यमः—

" आहरेन्मृत्तिकां प्राज्ञः कूलात्ससिकता तु या । शुचौ देशे तु सा ग्राह्या शर्कराश्मविवर्जिता ॥

" नाखुकृष्टान्न वल्मीकात् पांसुतो न च कर्दमात् । न मार्गान्नोषराच्चैव शौचशिष्टात्परस्य च ॥

" एतास्तु वर्जयेन्नित्यं वृथाशौचं हि तत्स्मृतम्" ॥

आश्वलायनः—

" त्यागान्मूत्रपुरीषस्य पूर्वं गृह्णीत मृत्तिकाम् । न च प्रह्वो न चोत्तिष्ठन्नाशुचिर्नालपन् द्विजः ॥

" कमादग्न्यादिवाय्वंतदिङ्मुखो नाहरेन्मृदम् । क्षेत्राच्छ्मशानाद्वल्मीकान्मार्गाद्देहाज्जलात्खलात् ॥

" ऊषरोद्भवतास्थानान्न द्विजो मृदमाहरेत् । नाशुद्धभूमेश्चैत्याद्वा न वेद्या गोव्रजान्मृदम् ॥
" आहरेल्लेपभूतांश्च जंतुमिश्रान्न कर्दमम् " ॥

देवलः—

" अंगारतुषकीटास्थिसिकताशर्करान्विताम् । वल्मीकोषरतोयांतः कुड्योद्धृतां श्मशानजाम् ॥ " आहृतामन्यशौचार्थं आददीत न मृत्तिकाम् " । तोयान्तः जलमध्यात् । एतच्च वाप्यादिव्यतिरिक्तविषयम् । अत एव **मनुः**—

" वापीकूपतटाकेषु बाह्यतो नाहरेन्मृदम् । आहरेज्जलमध्यात्तु परतो मणिबंधनात् " ॥

एतदारण्यविषयम् । **स्मृतिरत्ने तु**—

" अंतर्जलगता ग्राह्या परतो मणिबंधनात् । आरण्यकेषु त्वेवं स्यादग्राम्येष्वाहरणं न तु " ॥ इति स्मरणादित्यभिहितम् । **मरीचिः**—

" विप्रे शुक्ला तु मृच्छौचे रक्ता क्षत्रे विधीयते । हरिद्रवर्णा वैश्ये तु कृष्णा स्त्रीशूद्रयोस्तथा "॥
यत्र पुनरुक्तलक्षणा मृत् न लभ्यते तत्र कथं शौचमित्यपेक्षिते **मनुराह**—

"यस्मिन् देशे तु यत्तोयं या च यत्रैव मृत्तिका । सैव तत्र प्रशस्ता स्यात्तया शौचं विधीयते"॥
यदा कथमप्युदकोद्धरणं न संभवति तदा विशेषमाह **विवस्वान्**—

" अरत्निमात्रं जलं त्यक्त्वा कुर्याच्छौचमनुद्धृते । पश्चात्तच्छोधयेत्तीर्थं अन्यथा ह्यशुचिर्भवेत् "॥
जलाद्बहिररत्निमात्रप्रदेशं तीरे त्यक्त्वा जलपात्राभावेन उद्धरणासंभवे दक्षिणहस्तेनोत्धृत्य वामेन प्रक्षालयेदित्यर्थः । तीर्थमत्र शौचस्थलम् । तथा **ऋश्यशृंगः**—

"यस्मिन् स्थाने कृतं शौचं वारिणा तत्तु शोधयेत् । न शुद्धिस्तु भवेत्तस्य मृत्तिकां यो न शोधयेत्"॥

स्मृतिरत्ने—

" देशांतरगतो विप्रः क्षालयेच्छौचभूतलम् । शौचशेषमृदं तोयैर्न विप्रक्षालयेद्यदि ॥
" अशेषास्तस्य पितरो भक्षयेयुर्न संशयः " ॥ देशांतरगतः प्रदेशांतरगतः । **देवलः**—
" धर्मविद्दक्षिणं हस्तं अधःशौचे न योजयेत् । तथा च वामहस्तेन नाभेरूर्ध्वं न शोधयेत् " ॥

संग्रहे—

" नाभेरधस्तात्सकलं क्षालयेत्सव्यपाणिना । कुर्यादाचमनादीनि सर्वाणीतरपाणिना " ॥

ऋष्यशृंगः—

" धाराशौचं न कर्त्तव्यं शौचसिद्धिमभीप्सता । चुलकैरेव कर्त्तव्यं हस्तशुद्धिविधानतः"॥
दक्षः—" न शौचं वर्षधाराभिराचरेत्तु कदाचन " । मृत्संख्यामाह **वसिष्ठः** (६।१८)—
" पंचापाने दशैकस्मिन्नुभयोः सप्त मृत्तिकाः । उभयोः पादयोः सप्त लिंगे द्वे परिकीर्तिताः " ॥

यमः—

" द्वे लिंगे मृत्तिके देये गुदे पंच कर दश । उभयोः सप्त दातव्याः पुनरेका तथा गुदे " ॥ इति ।
मनुः (५।१३५-१३६)—

" एका लिंगे गुदे तिस्रः तथैकस्मिन्करे दश । उभयोः सप्त दातव्या मृदः शुद्धिमभीप्सिता ॥
" एतच्छौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणः । त्रिगुणं तु वनस्थस्य यतीनां तु चतुर्गुणम् " ॥

दक्षः—
" पंचापाने दशैकस्मिन्नुभयोः सप्त मृत्तिकाः । गृहस्थशौचमाख्यातं त्रिष्वन्येषु यथाक्रमम् ॥
" द्विगुणं त्रिगुणं चैव चतुर्थस्य चतुर्गुणम् " ॥
हारीतः—" एका लिंगे तिस्रोऽपाने दद्यात् दश सव्ये षट् पृष्ठे सप्तोभाभ्याम् "॥ इति । पृष्ठे सव्यस्य पश्चात् भागे । तस्यैव प्रकृतत्वात् ।
मरीचिः—
"तिसृभिश्चा तलात्पादौ शोध्यौ गुल्फात्तथैव च । हस्तौ त्वा मणिबंधाच्च लेपगंधापकर्षणम्"॥इति।
शंखः (१६।२०-२१)—
" मेहने मृत्तिकाः सप्त लिंगे द्वे परिकीर्तिते । एकस्मिन्विंशतिर्हस्ते द्वयोर्दोष्णोश्चतुर्दश ॥
" षडन्या नखशुद्धौ तु देयाः शौचेप्सुना मृदः । तिस्रस्तु मृत्तिका देयाः कृत्वा तु नखशोधनम् ॥
" तिस्रस्तु पादयोर्देयाः शौचकामस्य नित्यशः " ॥ **विष्णुपुराणे** (३।११।१७)—
" एका लिंगे गुदे तिस्रो दश वामकरे नृप । हस्तद्वये च सप्तान्या मृदः शौचोपपादिकाः " ॥
स्मृतिसारे—
" कराग्रे करपृष्ठे च बहिर्विष्ठाविशुद्धये । षट् संख्यया प्रदातव्या मृत्तिकाश्च पृथक् पृथक् " ॥
यमः—
" पूर्वं जलेन प्रक्षाल्य मृदा पश्चात्ततोऽम्बुभिः । एवं द्वादशकृत्वस्तु गुदशौचं समाचरेत् ॥
" दशकृत्वः करौ क्षाल्य मृदाऽऽमलकमात्रया । त्रिःकृत्वा लिंगशौचं च हस्तं क्षाल्य पदद्वयम् ॥
" संयोज्य त्रिर्मृदा क्षाल्य क्षालयेच्छौचभूतलम् " ॥
स्मृतिचंद्रिकायाम् (पृ. ९२ पं १०)—
" आद्यन्तयोस्तु शौचानां अद्भिः प्रक्षालनं स्मृतम् । सुनिर्णिक्ते मृदं दद्यान्मृदंते जलमेव च ॥
" अंतरा चांतरा वामहस्तप्रक्षालनं चरेत् " इति । अत्र न्यूनाधिकमृत्संख्याप्रतिपादकवचनानां लेपतारतम्याभिप्रायो विकल्पो वेदितव्यः ।

एवमुक्तशौचेऽपि यत्र गंधो लेपश्च नापैति तत्र उक्तसंख्याया अधिकसंख्यायामपि न विरोध इत्याह **मनुः** (५।१३३)– " विण्मूत्रयोः समुत्सर्गे मृद्वार्या देयमर्थवत् ॥
"यावन्नापैत्यमेध्याक्तो गंधो लेपश्च तत्कृतः । तावन्मृद्वारि चादेयं सर्वासु द्रव्यशुद्धिषु"(१२५)॥
देवलोऽपि—
" यावत्तु शुद्धिं मन्येत तावच्छुद्धिर्विधीयते । प्रमाणं शौचसंख्याया न शिष्टैरुपदिश्यते " ॥
आपस्तंबोऽपि (१।१५।२३)— " मूत्रं कृत्वा पुरीषं वा मूत्रपुरीषलेपानन्नलेपानुच्छिष्टलेपान् रेतसश्च ये लेपास्तानद्भिर्मृदा च प्रक्षाल्य पादौ चाचम्य प्रयतो भवति " इति । यत्तु **दक्षेणोक्तम्** (५।१३)—
" न्यूनाधिकं न कर्तव्यं शौचशुद्धिमभीप्सिता । प्रायश्चित्तेन युज्येत विहितातिक्रमे कृते ॥
" गायत्र्यष्टशतं चैव प्राणायामत्रयं तथा । प्रायश्चित्तमिदं प्रोक्तं नियमातिक्रमे सति " ॥ इति तत्संकल्पितसंख्यायाः प्रागेव गंधलेपक्षये वेदितव्यम् । एवं चोक्तसंख्याया अर्वागेव यत्र गंधाद्यपगमः तत्र संख्यानियमो अदृष्टार्थ इति **स्मृतिचंद्रिकादौ** (पृ. ९२ पं १७–२५)। **विज्ञानेश्वरस्तु** (पृ. ५ पं ३०) "गंधलेपक्षयकरं शौचं कुर्यात्" इत्येतत्सर्वाश्रमिणां साधारणं मृत्संख्यानियमस्तु अदृष्टार्थ इत्यवोचत् ।

---
१ क्ष–दश । २ ग–पश्च ।

अत्र मृत्परिमाणमाह अंगिराः—

" प्रथमा प्रसृतिर्ज्ञेया द्वितीया च तदर्धिका । तृतीया मृत्तिका ज्ञेया त्रिभागकरपूरणाम् " ॥

दक्षः (५।७)—

" अर्धप्रसृतिमात्रा तु प्रथमा मृत्तिका स्मृता । द्वितीया च तृतीया च तदर्धेन प्रकीर्तिता ॥ " चतुर्थी पंचमी वाऽपि तृतीया मृत्तिका समा " इति ॥ वसिष्ठः (   )

" अर्धप्रसृतिमात्रा तु प्रथमा मृत्तिका भवेत् । पूर्वा पूर्वार्धमात्रा तु द्वितीयाद्याः प्रकीर्तिताः " ॥

यत्तु शातातपेनोक्तम्—

"आर्द्रामलकमात्रास्तु ग्रासा इंदुव्रते स्मृताः । तथैवाहुतयः सर्वाः शौचार्थे याश्च मृत्तिकाः"॥ इति तद्धस्तशौचाभिप्रायं गुदलिंगयोः परिमाणांतरविधानादिति स्मृतिचंद्रिकायाम् (पृ. ९२)

मूत्रशौचे मृत्संख्यामाह दक्षः– (५।५) "एका लिंगे गुदे तिस्रः उभयोर्मृद्द्वयं समम् " इति ।

शातातपोऽपि—

"एका लिंगे करे सव्ये तिस्रे द्वे हस्तयोर्द्वयोः। मूत्रशौचं समाख्यातं शुक्रे तु द्विगुणं भवेत् "॥ इति ।

यत्तु "तिस्रो मृदो लिंगशौचमाद्याः स्युर्मूत्रशुद्धये। वामपाणौ मृदः पंच तिस्रः पाण्योर्द्वयोरपि "॥ इत्यादि तल्लेपभूयस्त्वाभिप्रायम् ।

" एकां लिंगे मृदं दद्याद्वामहस्ते तु मृद्द्वयम् । उभयोर्हस्तयोर्द्वे तु मूत्रशौचं प्रचक्षते " ॥ इत्यादि तल्लेपस्मरणात् । मूत्रशौचे मृत्परिमाणमाह दक्षः (५–८)—

" लिंगे तु मृत्समाख्याता त्रिपर्वा पूर्यते यया । दातव्यमुदकं तावन्मृदभावो यदा भवेत् " ॥

विवस्वान्—

"पर्वमात्रप्रमाणास्तु लिंगशौचे मृदः स्मृताः। आर्द्रामलकमात्रा वा यदि वाऽक्षप्रमाणिकाः"॥ इति।

शौनकः—

" तत उद्धृततोयेन प्राङ्मुखो वाऽप्युदङ्मुखः । आर्द्रामलकमात्रां वै लिंगे प्रक्षिप्य शोधयेत्"॥

व्यासः—

" विट्शौचं प्रथमं कुर्यान्मूत्रशौचमतः परम्। पादशौचं ततः कुर्यात्करशौचमतः परम्"॥

आपस्तंबः—

"अन्हि शौचं तु यत्प्रोक्तं निश्यर्धं तत उच्यते । पथि पादं तु विज्ञेयमार्तः कुर्याद्यथाबलम्" ॥ इति । वालुकाभिर्यदा शौचं कुर्यात् तत् द्विगुणं कुर्यादिति ।

चतुर्विंशतिमते—

" यद्दिवा विहितं शौचं तदर्धं निशि कीर्तितम्। तदर्धमातुरे प्रोक्तमातुरस्यार्धमध्वनि " ॥ इति। एतत्सामर्थ्ययुक्तातुरविषयम् । अन्यथा तु यथासामर्थ्यमेव शौचम् ।

तथा चंद्रिकायाम् (पृ. ९४ पं. २१)—

" दिवा शौचस्य निश्यर्धं पथि पादो विधीयते। आर्तः कुर्याद्यथाशक्ति स्वस्थः कुर्याद्यथोदितम्"॥

बोधायनोऽपि (१।५।४७)—

"देशं कालं तथाऽऽत्मानं द्रव्यं द्रव्यप्रयोजनम्। उपपत्तिमवस्थां च ज्ञात्वा शौचं प्रकल्पयेत्" ॥ इति।

---

१ क्ष–मूत्र । २ ग–जश्च

अनुपनीतानां शौचमाह शातातपः—

"न यावदुपनीयंते द्विजाः शूद्रास्तथांऽगनाः । गंधलेपक्षयकरं शौचमेषां विधीयते ॥ "यावच्छुद्धिं न मन्येत तावच्छौचं विधीयते। प्रमाणं शौचसंख्याया न शिष्टैरुपदिश्यते" ॥ इति । स्त्रीशूद्रयोस्तु **आदित्यपुराणे** विशेषो दर्शितः—"स्त्रीशूद्रयोरर्धमानं प्रोक्तं शौचं मनीषिभिः"॥इति । **व्यासः**—" कुर्वीतैवं दिवा शौचं रात्रौ चेदर्धमुच्यते। अशक्तस्य यथाशक्ति शौचमुक्तं तथाऽध्वनि ॥

" योषितामुक्तशौचार्धं शूद्राणाप्युदाहृतम् " ॥ इति । यस्तु विण्मूत्रोत्सर्जनायोपविष्टः तन्न करोति तस्याप्यर्धशौचमाह **वृद्धशातातपः**—

"उपविष्टस्तु विण्मूत्रं कर्तुं यस्तु न विंदति । स कुर्यादर्धशौचं तु स्वस्य शौचस्य सर्वदा" ॥ इति ।

भोजने तु गुदस्रावे विशेषमाह **बृहस्पतिः**—

" भुंजानस्य तु विप्रस्य कदाचित्स्रवते गुदम् । उच्छिष्टमशुचित्वं च तस्य शौचं कथं भवेत् ॥

" पूर्वं कृत्वा च शौचं च पश्चात् स्नानं समाचरेत् । ततः कृत्वोपवासं च पंचगव्येन शुध्यति"॥

शरीरमलशौचं वक्तुं शरीरमलानाह **मनुः** (५।१३१, १३४)—

" उर्ध्वं नाभेर्यानि खानि तानि मेध्यानि सर्वशः । यान्यधस्तादमेध्यानि देहाच्चैव मलाश्च्युताः॥

" वसाशुक्रमसृङ्मज्जामूत्रविट्कर्णविण्णखाः । श्लेष्माश्रुपूयिकास्वेदो द्वादशैते नृणां मलाः " ॥

श्रुतिरपि (तै. सं. ६।१।३)—" ऊर्ध्वं वै पुरुषस्य नाभ्यै मेध्यमवाचीनममेध्यम् " ॥ इति । पुरुषस्य नाभेरूर्ध्वं मेध्यं शुद्धम् । अवाचीनं नाभेरधोभागो अमेध्यम् । अशुद्धमित्यर्थः ॥ त्रयाणामेतेषां मलानां स्पर्शे सति यथायोग्यं मृज्जलाभ्यां शुद्धिरित्याह **मनुः** (५।१३३)—

" विण्मूत्रोत्सर्गशुध्यर्थं मृद्वार्यादेयमर्थवत् । दैहिकानां मलानां च शुद्धिषु द्वादशस्वपि " ॥ इति ।

अत्र विशेषमाह **बोधायनः**—

" आददीत मृदोऽपश्च षट्सु पूर्वेषु शुद्धये । उत्तरेषु तु षट्स्वद्भिः केवलाभिर्विशुध्यति" ॥ इति ।

परकीयमलस्पर्शने शुद्धिमाह **देवलः**—

" मानुषास्थिवसां विष्ठां आर्तवं मूत्ररेतसी । मज्जानं शोणितं वाऽपि परस्य यदि संस्पृशेत् ॥

"स्नात्वाऽपमृज्य लेपादीनाचम्य स शुचिर्भवेत्। तान्येव खानि संस्पृश्य पूतः स्यात्परिमार्जनात्"॥

परिमार्जनं प्रक्षालनम् । अत्र विशेषामाह **विष्णुः** (२२।७६–७७)—

" नाभेरधस्तात्कायिकैर्मलैः सुराभिर्मद्यैर्वोपहतो मृत्तोयैस्तदंगं प्रक्षाल्य चांतः शुध्येत् । अन्यत्रोपहतो मृत्तोयैस्तदंगं प्रक्षाल्य स्नानेन इंद्रियेषूपहतस्तूपोष्य स्नात्वा पंचगव्येन दशनच्छदोपहतश्च " इति ॥ अत्र **यमः**—

" मूत्रे तिस्रः पादयोस्तु हस्तयोस्तिस्र एव तु । मृदः पंचदशामेध्ये हस्तादीनां विशेषतः ॥

" एतदात्मीयमूत्रादिस्पर्शे शौचमुदाहृतम् । उत्सर्गकालादन्यत्र परकीयेषु पठ्यते ॥

"परस्य शोणितस्पर्शे रेतोविण्मूत्रजे तथा। चतुर्णामपि वर्णानां द्वात्रिंशन्मृत्तिकाः स्मृताः"॥ इति ।

स्मृतिरत्ने—

" सकर्दमं तु वर्षांबु प्रविश्य ग्रामसंकटे । जंघयोर्मृत्तिकास्तिस्रः पादयोर्द्विगुणं न्यसेत् " ॥ इति ।

स्मृत्यर्थसारे—

"एका तु मृत्तिका लिंगे तिस्रः सव्यकरे मृदः । करद्वये मृद्द्वयं स्यान्मृत्प्रमाणमनेकधा ॥

"त्रिपर्वा पर्वमात्रा वा मृत्तिकाक्षप्रमाणिका। आर्द्रामलकमात्रा वा मूत्रशौचे तु मृत्तिका ॥

---

१ क्ष–पितामहः । २ क्ष–वृद्धपराशरः । ३ क्ष–मृदः पंच । ४ क्ष–तिस्रः पर्व ।

" मूत्रात्तु द्विगुणं शुक्रे मैथुने त्रिगुणं स्मृतम् । पुरीषे पञ्च मृत्क्षेपः करे वामे दश स्मृताः ॥
" करयोः सप्त दातव्याः पुरीषे मृत्प्रमाणकम् । अर्धप्रसृतिमात्राद्याः तत्तदर्धास्ततः पराः ॥
"यद्वा पाने मृदस्तिस्रः प्रसृत्यर्धत्रिभागकाः ।यद्वा प्रसृतिमात्रास्त्रिः पादयोः पाण्योः पृथक् पृथक्॥
" एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम् । त्रिगुणं तु वनस्थानां यतीनां तु चतुर्गुणम् ॥
" दिवा यद्विहितं शौचं तदर्धं निशि कीर्तितम् । तदर्धमातुरे प्रोक्तं आतुरस्यार्धमध्वनि ॥
" स्त्रीशूद्रादेरशक्तानां बलानां चोपनीतिनाम् । गंधलेपक्षयकरं शौचं कार्यमसंख्यया ॥
" एकैकया मृदा पादहस्तप्रक्षालनं ततः । अमेध्यांगमलस्पर्शे मृत्तिकाषट्कमिष्यते ॥
"अमेध्यांगमलस्पर्शे शौचं प्रक्षालनं स्मृतम् । परविण्मूत्रसंस्पर्शे द्वात्रिंशन्मृत्तिकाः स्मृताः" ॥ इति ।
एवमुक्तशौचकरणेऽपि यस्य भावशुद्धिर्नास्ति तस्याशुद्धिरेवेत्याह **दक्षः**—
" शौचं तु द्विविधं प्रोक्तं बाह्यमभ्यंतरं तथा । मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथान्तरम् ॥
" शौचं तु परमं बाह्यं तस्मादाभ्यंतरं परम् । उभयेन शुचिर्यस्तु स शुचिर्नेतरः स्मृतः " ॥
व्याघ्रपादोऽपि—
" गंगातोयेन कृत्स्नेन मृद्भारैश्च नगोपमैः । आ मृत्योराचरेच्छौचं भावदुष्टो न शुध्यति " ॥
बोधायनः (१।५।४६)
" कालोऽग्निर्मनसः शुद्धिरुदकाद्युपलेनम् । अविज्ञातं च भूतानां षड्विधं शौचमुच्यते " इति ॥
शौचाकरणे प्रत्यवायो **हारीतेन** दर्शितः—
" भ्रष्टशौचं नरं दृष्ट्वा प्रहरन्तीह राक्षसाः । यक्षाः पिशाचा भूतानि ये चान्ये दुष्टचारिणः ॥
"स्नानं दानं तथा ध्यानं मन्त्रकर्मविधिः क्रिया । मंगलाचारनियमः शौचभ्रष्टस्य निष्फलाः " ॥
बोधायनः—
"शौचे यत्नः सदा कार्यः शौचमूलो द्विजः स्मृतः। शौचाचारविहीनस्य समस्ता निष्फलाः क्रियाः॥
" यस्य शौचे तु शैथिल्यं व्रतं तस्य परिक्षतम् " ॥ **अपरार्के**—
" शुचिं देवाश्च रक्षंति रक्षंति पितरः शुचिम् । शुचेर्बिभ्यति रक्षांसि ये चान्ये दुष्टचारिणः "॥
व्यासः—
" अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा । यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यन्तरः शुचिः"॥
इति **शौचविधिः** ।
अथ गंडूषाः । **पराशरः**—
"कृत्वा तु शौचं प्रक्षाल्य पादौ हस्तौ च मृज्जलैः। निबद्धशिखकच्छस्तु गंडूषाचमनं चरेत्"॥ इति ।
स्मृतिसारे—
" विप्रस्य दक्षिणे भागे देवास्तिष्ठंति नित्यशः । आसीन एव गंडूषान् वामभागे विसर्जयेत् ॥
" मूत्रे पुरीषे भुक्त्यंते तथैवान्यस्य भक्षणे । चतुरष्टौ च षष्ठाष्टगंडूषैस्तु विशुध्यति " ॥ इति ।
तथा च **व्यासः**—
" अपां द्वादशगंडूषान् पुरीषोत्सर्जने बुधः । मूत्रे तु चतुरः कुर्यात् भोजनांते तु षोडश " ॥
स्मृत्यंतरे—
" अपूपभक्षणे भुक्तौ विण्मूत्रोत्सर्जनादिके । आसीन एव गंडूषान्वामपार्श्वे विसर्जयेत् ॥

---

१ ग-पदोः । २ क्ष-सन्तीह । ३ ग-रतिः । ४ क्ष-मुक्त्यंते ।

" मूत्रे पुरीषे भुक्त्यंते तथैव द्विजधावने । चतुरष्टद्विषड्ष्टगंडूषैः शुद्धिरिष्यते " ॥

गौतमः—

" गंडूषस्याथ समये तर्जन्या वक्त्रचालनम् । करोति यदि मूढात्मा रौरवे नरके पतेत् " ॥

अथाचमनविधिः ।

आपस्तंबस्मृतौ—" अथ वक्ष्ये ह्याचमनं शृणुध्वं मुनिपुंगवाः ।
" प्रक्षाल्य पादौ हस्तौ च मुखे चाद्भिः समाहितः । बाह्यचूडः सोत्तरीयस्ततस्त्वाचमनं चरेत् ।
" उदङ्मुखो वा प्राङ्मुखो वा जान्वंतरकरं ततः । ब्राह्मतीर्थेन विप्रेभ्यो ह्याचामेन्मंत्रपूर्वकम् ॥
" आदौ पौराणिकं प्रोक्तं स्मार्तमागममेव च । श्रौतं चतुर्विधं प्राहुराचामं ब्रह्मवादिनः ॥
" अच्युताद्यैः समाचामेत्केशवाद्यैस्तु नामभिः । अंगानां स्पर्शनं कुर्यादितत्पौराणिकं स्मृतम् ॥
" अंगुष्ठानामिकाभ्यां तु चक्षुषी समुपस्पृशेत् । केवलांगुष्ठतो नाभिं तलेन हृदयं स्पृशेत् ॥
" सर्वांगुली न्यसेन्मूर्ध्नि जलं स्पृष्ट्वांऽतरांतराम् " । **वृद्धपराशरः**—
" कृत्वाऽथ शौचं प्रक्षाल्य पादौ हस्तौ च मृज्जलैः । कृत्वोपवीतं सव्यांसे वाङ्मनःकायसंयतः ॥
" निबद्धशिखकच्छस्तु द्विज आचमनं चरेत् ॥ " इति ।

देवलः—

" इत्येवमद्भिरा जानु प्रक्षाल्य चरणौ पृथक् । हस्तौ चा मणिबंधाभ्यां कुर्यादाचमनं ततः ॥
" केशान्नीवीमधःकायं स्नानार्द्रधरणीमपि । यदि स्पृशति चैतानि भूयः प्रक्षालयेत् करम् " ॥

व्यासः—

" प्रक्षाल्य पादौ हस्तौ च मुखमद्भिः समाहितैः । दक्षिणं बाहुमुद्धृत्य कृत्वा जान्वंतरे करौ ॥
" आचम्य प्राङ्मुखः पश्चाद्दंतधावनमाचरेत् " ॥

स्मृत्यर्थसारे—" पादौ हस्तौ प्रक्षाल्य यज्ञोपवीती पादौ भूमौ प्रतिष्ठाप्य बद्धकच्छशिखः पुंडरीकाक्षमिष्टदेवतां स्मृत्वा आचामेत् " इति ।

दिङ्नियमाह **हारीतः**—"ऐशान्यभिमुखो भूत्वोपस्पृशेत्तु यथाविधि " । उपस्पृशेदाचामेदित्यर्थः ॥

याज्ञवल्क्यः (आ. १८)—

" अंतर्जानुः शुचौ देशे उपविष्ट उदङ्मुखः । प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्" ॥

अंतर्जानु जान्वोन्तरा अरत्नी कृत्वेत्यर्थः । " अंतरूर्वोररत्नी कृत्वा त्रिरपो हार्दाः पिबेत् " इति **हारीतस्मरणात्** । उपविष्ट इति गमनादिनिषेधः ।

" न गच्छन्न शयानश्च न तिष्ठन्नापरं स्पृशन् । न हसन्नेव संजल्पन्नात्मानमवलोकयन् "॥

इति स्मरणात् ।

भरद्वाजः—

" जंघांतं जानुपर्यंतमपि वा चरणद्वयम् । कूर्परांतकरं सम्यक् क्षालयेत्प्रथमं बुधः ॥
" उपविश्य शुचौ देशे प्राङ्मुखो ब्रह्मसूत्रधृक् । बद्धचूडः कुशकरो द्विजः शुचिरुपस्पृशेत् " ॥

स्मृतिभास्करे—

" दक्षिणं तु करं कृत्वा गोकर्णाकृतिवत्पुनः । त्रिः पिबेद्दक्षिणेनांबु द्विरास्यं परिमार्जयेत् " ॥

प्रदीपिकायाम्—

" संहतांगुलिना तोयं गृहीत्वा पाणिना द्विजः । मुक्त्वाऽङ्गुष्ठकनिष्ठे तु शेषेणाचमनं चरेत्" ॥

व्यासः—"गोकर्णाकृतिहस्तेन माषमग्नं जलं पिबेत्। तन्न्यूनमधिकं पीत्वा सुरापानसमं भवेत्" ॥
भरद्वाजः—

"आयतं दक्षिणं कृत्वा गोकर्णाकृतिवत्करम्। माषमज्जनमात्रास्तु संगृह्य त्रिः पिबेदपः" ॥

देवलः—

"अप्स्वीक्षितासु हृदयं प्राप्तासु ब्राह्मणः शुचिः। राजन्यः कंठमास्यं वै विट्छूद्रस्पर्शनाच्छुचिः" ॥इति। स्पर्शनात्तालुनेति शेषः। शूद्रग्रहणं स्त्रीणामपि प्रदर्शनार्थम्। तथा च **याज्ञवल्क्यः** (आ. २१)
" हृत्कंठतालुगाभिस्तु यथासंख्यं द्विजातयः। शुध्येरन्स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरंततः" ॥
सकृदेव ताल्वन्तेन स्पृष्टाभिरद्भिरित्यर्थः।

" अप्सु प्राप्तासु हृदयं ब्राह्मणः शुद्धिमाप्नुयात्। राजन्यः कंठं तालु विट् स्त्रीशूद्रौ तु तदंततः" ॥
इति स्मरणात्। **मनुरपि** (२।६२)—
"हृद्गाभिः पूयते विप्रः कंठगाभिस्तु भूमिपः। वैश्योऽद्भिः प्राशिताभिस्तु शूद्रस्पृष्टाभिरंततः" ॥ इति।
स्मृत्यर्थसारे—"हृत्कंठतालुगाभिस्तु अद्भिः शुद्धाः क्रमात् द्विजः स्त्रीशूद्रानुपनीता अंततस्तालौ सकृत्स्पृष्टाभिः शुद्धाः" ॥ इति।

बोधायनः (१।५।१८)—
"गताभिर्हृदयं विप्रःकंठ्याभिःक्षत्रियःशुचिः। वैश्योऽद्भिःप्राशिताभिःस्यात् स्त्रीशूद्रौ स्पृश्यचांततः" ॥
हृदयंगमानामपां परिमाणमाह **उशनाः**—"माषमज्जनमात्रा आपो हृदयंगमा भवंति" इति।
अत्रोदकनियममाह **शङ्खः**

"अद्भिः समुद्धृताभिस्तु हीनाभिः फेनबुद्बुदैः। वन्हिना च न तप्ताभिर्न क्षाराभिरुपस्पृशेत्" ॥ इति।
भरद्वाजः—"पंकं सफेनं कलुषं सदुर्गंधं सबुद्बुदम्। उष्णं समृत्तिकं क्षारं त्यजेदाचमने जलम् ॥
"तिष्ठन्नमन् हसन् जल्पन्शृण्वन्नन्त्यजभाषणम्। अन्यं स्पृश्यन् दिशः पश्यन्न कदाचिदुपस्पृशेत् ॥
" काकाश्वखरविट्क्रोडताम्रचूडरजस्वलाः। व्रात्यांत्यजातिपतितान्पश्यन्नोपस्पृशेत् द्विजः" ॥
मनुः (२।६१)—

" अनुष्णाभिरफेनाभिरद्भिस्तीर्थेन धर्मवित्। शौचेऽप्सुः सर्वदाचामेदेकांते प्रागुदङ्मुखः" ॥
वसिष्ठोपि—(३।३६) "न पर्णरसदुष्टाभिर्याश्च स्युरशुभागमाः" ॥ **हारीतः**—"विवर्णगंधवत्तोयं फेनिलं च विवर्जयेत्"। **याज्ञवल्क्यः**—(आ. २०) "अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः" ॥
स्मृतिसारे—

" एलालवंगकर्पूरगंधाद्यैर्वासितैर्जलैः। नाचामेदद्भिरुष्णाभिस्तथा शौचावशेषितैः ॥

" पात्राशिष्टं तु यच्छौचे पाने पादावनेजने। भूमौ तदंबु निस्राव्य शेषमाचमनं चरेत् ॥

" न चाग्न्युदकशेषेण कुर्यादाचमनं बुधः। यदि कुर्याज्जलं भूमौ स्रावयित्वा समाचरेत्" ॥
अग्न्युदकशेषेण अग्निपरिषेचनावशिष्टेनेत्यर्थः।

स्मृत्यर्थसारे—"नान्योदग्न्युदकशेषमाचामेद्याचामेद्भूमौ जलं स्रावयित्वाऽऽचामेत् न पाद-प्रक्षालनाचमनाग्न्युदकशेषैराचमनं कुर्यात्। अन्यकर्मापि न कुर्यात्। यदि कुर्यात् जलं स्राव-

---

१ क्ष-भि।

यित्वा तत्रांबुपात्रं स्थापयित्वा तत्र उद्धृत्य कुर्यात्" इति । **बोधायनः**–(१।५।९,१०,१४,१५) "प्राङ्मुख उदङ्मुखो वाऽऽसीनः शौचमारभेत। शुचौ देशे दक्षिणं बाहुं जान्वंतरा कृत्वा प्रक्षाल्य पादौ पाणी चा मणिबंधात्। पादप्रक्षालनोच्छेषणेन नाचामेद्यद्याचाद्भूमौ स्रावयित्वाऽऽचामेत् । नांगुलीभिर्न सबुद्बुदाभिर्न फेनाभिर्न चोष्णाभिर्न क्षाराभिर्न लवणाभिर्न कलुषाभिर्न कटुभिर्न दुर्गंधरसाभिर्न हसन्न जल्पन्न तिष्ठन्नावलोकयन्न प्रह्वो न प्रणतो न विमुक्तशिखो न प्रावृतकण्ठो न वेष्टितशिरा न त्वरमाणो नायज्ञोपवीती प्रसारितपादो न बद्धकक्ष्यो न बहिर्जानुर्न शब्दं कुर्वन्" इति । **प्रचेता अपि**—

"अनुष्णाभिरफेनाभिः पूताभिर्वस्त्रचक्षुषा । हृद्गताभिरशब्दाभिः त्रिचतुर्वाऽद्भिराचमेत्" ॥

अनुष्णाभिरित्यनातुरविषयम् । अत एव **यमः**—

"रात्राववीक्षितेनापि शुद्धिरुक्ता मनीषिणाम्। उदकेनातुराणां च तथोष्णेनोष्णपायिनाम्"॥इति। उष्णपायिनामिति आतुराणां न पुनरातुरमात्राणामित्यर्थः। उष्णपायिनो दिक्षिता इति केचित् । **स्मृत्यर्थसारे**— "नात्मानं पश्यन्नाचामेन्नासीनस्त्रियायान्नान्यार्थ आसने भुक्त्वाऽऽचामेन्नान्यासने न शयानः पादुकोपानत्स्थः न दुर्देशे न पदाग्रस्थो न प्रह्वो नान्यमना न नग्नो नैकवस्त्रो न वामहस्तेन न प्रसारितपादो नाबद्धासनो यज्ञोपवीतमुत्तरीयं वाऽन्यथा धृत्वा नाचामेत्" ॥

भृगुः—

"सोष्णीषो बद्धपर्यंकः प्रौढपादश्च यानगः । दुर्देशे प्रपदश्चैव नाचामन्शुद्धिमाप्नुयात् ॥

"आसनारूढपादो वा जान्वोर्वा जंघयोस्तथा। कृताऽवसक्थिको यश्च प्रौढपादः स उच्यते" ॥

संवर्त्तः—

"अकृत्वा पादशौचं तु तिष्ठन्मुक्तशिखोऽपि वा। विना यज्ञोपवीतेन आचान्तोऽप्यशुचिर्भवेत्"॥

माधवीये—

"कण्ठं शिरोग्रं प्रावृत्य रथ्यापणगतोऽपि वा। अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचिर्भवेत्"॥

कलहः—

"शिरः प्रावृत्य कण्ठं वा मुक्तकच्छशिखोऽपि वा। अकृत्वा पादयोः शौचमाचान्तोऽप्यशुचिर्भवेत्"॥ इति।

अत्रिः–"अपः पाणिनखाग्रेभ्यः आचामेत् ब्राह्मणस्तु यः। सुरापानेन तत्तुल्यमित्येवं मनुरब्रवीत्" ॥

यमः–"अपः परनखं स्पृष्टा य आचामति वै द्विजः। सुरां पिबति सुव्यक्तं यमस्य वचनं तथा"॥

मरीचिः—

"न बहिर्जानुराचामेन्नासनस्थो न चोत्थितः । मुक्तासनस्थोऽप्याचामेन्नान्यकाले कदाचन ॥

"नांतरीयैकदेशस्य कृत्वा चैवोत्तरीयकम् । आच्छन्नदक्षिणांसस्तु नाचामेत्तु कदाचन ॥

"विना यज्ञोपवीतेन तथा धौतेन वाससा। मुक्त्वा शिखां वाऽऽचांतेन कृतस्यैव पुनः क्रिया ॥

"याम्यप्रत्यङ्मुखत्वेन कृतमाचमनं यदि । प्रायश्चित्यै तदा कुर्यात्स्नानमाचमनं क्रमात्" ॥

प्रचेताः—"नांतर्वाससा बहिर्वासः कुर्वन्नाचामेत्" इति । **देवलः**—

"शिखां बध्वा वसित्वा द्वे निर्णिक्ते वाससी उभे। तूष्णीं भूत्वा समाधाय न क्रुध्यन्नावलोकयन्"॥

उदकं यावद्वामेन स्पृशति तावन्नाचामेदित्याह **यमः**—

"तावन्नोपस्पृशेद्विद्वान्यावद्वामेन न स्पृशेत् । वामे हि द्वादशादित्या वरुणश्च जलेश्वरः"॥ इति ।

स्मृत्यर्थसारे—

"वामेन पात्रमुद्धृत्य न पिबेद्दक्षिणेन तु । सौवर्णरौप्यताम्रैश्च वेणुबिल्वाश्वचर्मभिः ॥

"अलाबुदारुपर्णैश्च नालिकेरैः कपित्थकैः । तृणकाष्ठैर्जलाधारैरन्यांतरितमृन्मयैः ॥

"वामेनोद्धृत्य वाऽऽचामेदन्यदातुरसंभवे । तत्र मृन्मयपात्रस्थं जलं नैवोपहन्यते ॥

"तीर्थे तोयं च शुध्येत करकादिस्थितं सदा" ॥ इति । **प्रचेता माधवीये**—

"अलाबुताम्रपात्रं च करकं च कमंडलुम् । गृहीत्वा स्वयमाचामेन्न तेनाप्रयतो भवेत्" ॥

संवर्त्तः–"शूद्राशुद्धैकहस्तैश्च दत्ताभिर्न कदाचन । आरूढपादुको वापि न शुध्येत द्विजोत्तमः"॥ आचम्येति शेषः ।

पराशरः—"शूद्राहृतैस्तु नाचामेदेकपाण्यात्हृतैरपि । न चैवावृतहस्तेन नापरिज्ञातहस्ततः" ॥

यमः—

"उद्धृत्य वामहस्तेन यत्पिबेद्ब्राह्मणो जलम् । सुरापानेन तत्तुल्यं मनुः स्वायंभुवोऽब्रवीत् ॥

"कांस्यपात्रे च यत्तोयं यत्तोयं ताम्रभाजने । सौवर्णे राजते चैव नैवाशुद्धं तु कर्हिचित्" ॥

चंद्रिकायाम्—

"करकालाबुकांस्येन ताम्रचर्मपुटेन च । स्वहस्ताचमनं कार्यं स्नेहलिप्तानि वर्जयेत्" ॥

भरद्वाजः—

"ताम्रपात्राश्ववालैश्च नारिकेलाश्मपत्रकैः । उपस्पृशेत् स्वहस्तस्थैरेतैरपि विचक्षणः" ॥

आपस्तंबः (१।४।२०–२१)– "नाग्न्युदकशेषेण वृथाकर्माणि कुर्वीताचामेद्वा । पाणिसंक्षुब्धेनोदकेनैकपाण्यावर्जितेन च नाचामेत्"। पाणिसंक्षुब्धेन तत् तटाकादिषु स्वयमाचमने यदाप्र आचमयति तदा एकेन पाणिना यदावर्जितमुदकं तेन नाचामेत् । किंतु उभाभ्यां हस्ताभ्यां करकादि गृहीत्वा यदावर्जितमुदकं तेनाचामेत् । एवं च स्वयं वामहस्तवर्जितेनापि नाचामेत् । अलाबुपात्रेण नालिकेरजेन च वैणवेन चर्ममयेन ताम्रमयेन वा पात्रेण स्वयमाचरंति शिष्टाः" इति **हरदत्तः** । **आपस्तंबः**– (१।५।१५।२–६) "भूमिगतास्वप्स्वाचम्य प्रयतो भवति । यं वा प्रयत आचामयेत् । न वर्षधारास्वाचामेत् । तथा प्रदरोदके । तप्ताभिश्चाकारणात्" इति । प्रायत्यार्थमाचमनं भूमिगतास्वप्सु कुर्यात्। यं वा प्रयतोऽन्य आचामयेत् सोऽपि प्रयतो भवति । सर्वथा स्वयं वामहस्तावर्जिताभिरद्भिराचमनं न भवति । ताम्रपात्रादिना तु वामहस्तावर्जिताभिरद्भिः स्वयं आचमनं भवति । **स्मृत्यंतरे** विधानात् । न वर्षधारास्विति प्रतिषेधात् । करकादिधारायां प्रायत्यार्थमाचमनं भवत्येव प्रदरोदके गर्त्तोदके भूमिगतेऽपि नाचामेत् । यत्तु

"आपः शुद्धा भूमिगता वैतृष्ण्यं यासु गोर्भवेत् । अव्याप्ताश्चेदमेध्येन गंधवर्णरसान्विताः"॥ इति **मनु**वचनं (५।१२७), यदपि "शुचि गोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतम्" इति **याज्ञवल्क्य**वचनं (आ. १९२), यदपि "प्रदरादपि या गोस्तर्पणाय स्युः" इति **वसिष्ठ**वचनं (३।३५), तत्सर्वं "गोतृप्तिशिष्टे पयसि शिष्टैराचमनक्रिया" इति कलिसमयनिषिद्धं तप्ताभिश्चाकरणात् 'तप्ताभिः' इति वचनात् शृतशीताभिरदोषः । तथा चोष्णानामेव प्रतिषेधः स्मृतिषु प्रायेण भवति । ज्वरादौ च कारणे उष्णाभिरपि न दोषः इत्यर्थः ।

मनुः (२।५८)—

"ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत् । कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन" ॥ ब्राह्मं हिरण्यगर्भदैवत्यम् । कायं प्राजापत्यम् । त्रैदशिकं दैवम् । अत्र देवतातारतम्यवत्तीर्थतारतम्यं द्रष्टव्यम् । तानि पुनस्तीर्थानि कुत्रत्यानीत्यपेक्षायामाह **स एव** (२।५९)—

" अंगुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते । कायमंगुलिमूलेऽग्रे दैवं पित्र्यं तयोरधः " ॥ हस्ततलमध्ये या रेखा तस्या मूले ब्राह्मं तीर्थं अङ्गुलिमूलं कनिष्ठामूलं तलं मध्यप्रदेशः । तत्र हि मूलमङ्गुल्याः तत्र कायं तीर्थमग्रे चतसृणामङ्गुलीनामग्रे दैवं तीर्थं तयोरंगुष्ठांगुल्योरधः प्रदेशिन्यंगुष्ठयोर्मध्य इत्यर्थः । तत्र पित्र्यं तीर्थम् । तथा च **याज्ञवल्क्यः** (आचारे १९)—

" कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रं करस्य च । प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्" ॥ कनिष्ठिकायास्तर्जन्यांगुष्ठस्य च मूलानि करस्याग्रे च यथाक्रमं प्रजापतिपितृब्रह्मदेवतीर्थानीत्यर्थः । **शंखः**— " अंगुष्ठमूलस्यानंतरतः प्रागग्रायां रेखायां ब्रह्मतीर्थं प्रदेशिन्यंगुष्ठयोरन्तरा पित्र्यं कनिष्ठातलयोरंतरा प्राजापत्यं कराग्रे दैवतम् " इति । **भरद्वाजः**—

" तर्पणं देवतादिभ्यः स्वस्वतीर्थेन तर्पयेत् । पिबेदाचमने वारि वीक्षितं ब्रह्मतीर्थतः " ॥

स्मृतिरत्ने—

" अंगुष्ठमूलेनाचामेदापोषणनिमज्जनैः । त्रिश्चतुर्वाऽऽप आचामेत् ध्यायन्वेदाननुक्रमात् " ॥
व्यासः—" अंगुष्ठमूलांतरतो रेखायां ब्राह्ममुच्यते । अंतरांगुष्ठदेशिन्योः पितृणां तीर्थमुत्तमम् ॥
" कनिष्ठामूलतः पश्चात्प्राजापत्यं प्रचक्षते । अंगुल्यग्रे स्मृतं दैवं तथैवार्षं प्रकीर्तितम् ॥
" मूले वा दैवमार्षं स्यादाग्नेयं मध्यमं स्मृतम् । तदेव सौमिकं तीर्थं एतत् ज्ञात्वा न मुह्यति ॥
"ब्राह्मेणैव तु तीर्थेन द्विजो नित्यमुपस्पृशेत् । कायेन वाऽथ पित्र्येण न तु दैवेन च द्विजः"॥इति।

स्मृत्यर्थसारे—"कनिष्ठादेशिन्यंगुष्ठमूलतलेषु कायपित्र्यब्रह्मतीर्थानि । कराग्रे दैवं तीर्थं करमध्ये सौम्यं तीर्थं अग्नितीर्थं च । निर्वपणसंश्रपणलाजाहोमान्कायेन कुर्यात् । अर्चनबलिप्रक्षेपपर्युक्षणमार्जनभोजननित्यहोमान् दैवेन । पैतृकं पित्र्येण । कमंडलुना पानं दधिप्राशनं नवान्नप्राशनं सृक्ग्रहणं च सौम्येन । आग्नेयेन प्रतिग्रहणं कुर्यात् " ॥ इति ।

बोधायनोऽपि (१।५।११-१२)– " ब्राह्मेण तीर्थेनाचामेदंगुष्ठमूलं ब्राह्मं तीर्थम् " इति ।

मनुः (२।६०)–

" त्रिराचामेदपः पूर्वं द्विः प्रमृज्यात्ततो मुखम् । खानि चोपस्पृशेदद्भिरात्मानं शिर एव वा" ॥ मुखं सलोमकावोष्ठौ अंगुष्ठमूलेन द्विः परिमृज्यात् । ततः शीर्षण्यानि खानि आस्यं चक्षुषी नासिके श्रोत्रे च पृथक्पृथगद्भिः सहोपस्पृशेत् । आत्मानं हृदयं शिरश्च जलेन सहोपस्पृशेदित्यर्थः ॥ **याज्ञवल्क्यः**—(आचारे २०) " त्रिः प्राश्यापो द्विरुन्मृज्य खान्यद्भिः समुपस्पृशेत् " ।

व्यासः—

" त्रिः पिबेद्दक्षिणेनांबु द्विरोष्ठौ परिमार्जयेत् । अंगुष्ठमूलेन ततो मुखं वै समुपस्पृशेत् ॥
" अंगुष्ठानामिकाभ्यां तु स्पृशेन्नेत्रद्वयं ततः । तर्जन्यंगुष्ठयोगेन स्पृशेन्नासापुटं द्वयम् ॥
" कनिष्ठांगुष्ठयोगेन श्रवणे समुपस्पृशेत् । मध्यमांगुष्ठयोगेन अंसे द्वे समुपस्पृशेत् ॥
" सर्वासामेव योगेन हृदयं तु तलेन वा । संस्पृशेद्वै शिरस्तद्वदंगुष्ठेनाथ वा द्वयम् ॥

१ ग–व्यासः । २ ग–अन्म ।

" त्रिः प्राश्नीयादपो यत्तु प्रीतास्तेनास्य देवताः। ब्रह्मा विष्णुर्महेशश्च भवंतीत्यनुशुश्रुमः॥
" गंगा च यमुना चैव प्रीयेते परिमार्जनात्। संस्पृष्टयोर्लोचनयोः प्रीयेते शशिभास्करौ॥
" नासत्यसंज्ञौ प्रीयेते स्पृष्टे नासापुटे द्वये। कर्णयोः स्पृष्टयोस्तद्वत् प्रीयेते चानलानिलौ॥
" संस्पृष्टे हृदये चास्य प्रीयंते सर्वदेवताः। मूर्ध्नि संस्पर्शनाद्देवः प्रीतस्तु पुरुषो भवेत्॥
" य एवं ब्राह्मणो नित्यमुपस्पर्शनमाचरेत्। ब्रह्मादिस्तंबपर्यंतं जगत्स परितर्पयेत् "॥

गौतमः (१।३५-३९)— " वाग्यतो हृदयं स्पृशास्त्रिश्चतुर्वाऽऽचामेद्विः परिमृज्यात्पादौ चाभ्युक्षेत्। खानि चोपस्पृशेच्छीर्षण्यानि मूर्ध्नि च दद्यात् " इति।

आपस्तंबः(१।५।१६।२-८)–"आसीनस्त्रिराचामेद्धृदयंगमाभिरद्भिस्त्रिरोष्ठौ परिमृजेत्। द्विरित्येके। सकृदुपस्पृशेत्। द्विरित्येके। दक्षिणेन पाणिना सव्यं प्रोक्ष्य पादौ शिरश्चेंद्रियाण्युपस्पृशेत्। चक्षुषी नासिके श्रोत्रे चाथाप उपस्पृशेत्" इति। सकृदुपस्पृशेदिति मध्यमाभिः तिसृभिरंगुलीभिः ओष्ठावुपस्पृशेत्। द्विरित्येके इति तुल्यविकल्पः। ओष्ठौ चात्र सलोमकौ। यदाह **कण्वः**—
"अथ वेदेतिहासपुराणानानि ध्यायन्ब्राह्मेण तीर्थेन त्रिरपः पीत्वा सलोमकावोष्ठावुन्मृजेत्" इति। **दक्षः**–"संहृत्यांगुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखम्। संहताभिश्चतसृभिः पूर्वमास्यं सकृत्स्पृशेत्॥
"अंगुष्ठेन प्रदेशिन्या घ्राणं स्पृश्यादनंतरम्। अंगुष्ठानामिकाभ्यां तु चक्षुषी समुपस्पृशेत्॥
"श्रोत्रे कनिष्ठांगुष्ठाभ्यां नाभिमंगुष्ठकेन वै। सर्वाभिस्तु शिरः पश्चात् बाहू चाग्रेण संस्पृशेत्"॥ इति। संवृत्य अलोमकदेशमिति शेषः। "तिसृभिर्मध्यमाभिर्मध्यमाभिर्मुखं पूर्वं तिसृभिः समुपस्पृशेत्"॥ इति **योगयाज्ञवल्क्यस्मरणात्**। अग्रेण कराग्रेण। **व्याघ्रपादः**—
"अंसौ स्पृष्ट्वा कराग्रेण तोयं स्पृष्ट्वा समाहितः। संस्मृत्य पद्मनाभं च विप्रः सम्यग्विशुध्यति "॥ इति। अत्र " ओंकारेण सह यज्ञपुरुषं मनसा स्मरेत् " इति **नारायणीये** विशेषः। **पैठीनसिः**—
" सव्ये पाणौ शेषा अपो निनयेत् " इति। शेषा आचमनशिष्टाः। **भृगुः**—
"त्रिः पीत्वापो द्विरुन्मृज्य मुखं दक्षिणपाणिना। प्रोक्षयेद्वामहस्तं च पादौ मस्तकमेव च॥
" स्रोतस्थानानि सर्वाणि स्पृष्ट्वांते तु जलं स्पृशेत्"। **आपस्तंबोऽपि** (१।५।१६।८)—
'अथाप उपस्पृशेत्' इति। आचमनानंतरं हस्तौ प्रक्षालयेदित्यर्थः। प्रकारांतरमाह **शंखः**—
" अंगुलीनां चतुष्कोणं स्पृशेन्मूर्धानमादितः। तर्जन्यंगुष्ठयोगेन स्पृशेन्नेत्रद्वयं पृथक्॥
"मध्यमानामिकाभ्यां तु स्पृशेन्नासापुटे क्रमात्। अंगुष्ठेन कनीयस्या कर्णौ संयोगतः स्पृशेत्"।
वृद्धशंखः —" तर्जन्यंगुष्ठयोगेन स्पृशेन्नासापुटद्वयम्। मध्यमाङ्गुष्ठयोगेन स्पृशेन्नेत्रद्वयं ततः॥
" अङ्गुष्ठस्यानामिकाया योगेन श्रवणे स्पृशेत्। कनिष्ठाङ्गुष्ठयोगेन स्पृशेदंसद्वयं ततः॥
" नाभिं च हृदयं तद्वत्स्पृशेत्पाणितलेन तु। संस्पृशेत्तु ततः शीर्षं अयमाचमने विधिः "॥ इति।
पैठीनसिः—" अग्निरंगुष्ठतस्तस्मात्तेनैव सर्वाणि स्थानानि संस्पृशेत् " इति।

संवर्त्तः—

"हृद्गामाभिरफेनाभिस्त्रिचतुर्वाभिराचमेत्। परिमृज्य द्विरास्यं तु द्वादशांगानि चालभेत्
" सोदकेन च हस्तेन खान्यास्यादीनि सप्त च। नाभिं तथा हृन्मूर्धानमंते बाहू तथैव च॥

आत्मतुष्ट्यभिप्रायेण त्रिश्चतुर्वेति विकल्पः। यत्र मंत्रवदाचमनं तत्र तेन स चतुः। अन्यत्री इति केचिद्व्यवस्थामाहुः।

---

१ ख-नद्वय।

हारीतः—

" त्रिः पिबेद्वीक्षितं तोयं आस्यं द्विः परिमार्जयेत् । पादौ शिरस्तथाऽभ्युक्ष्य त्रिभिरास्यमुपस्पृशेत् ॥
" अङ्गुष्ठानामिकाभ्यां च चक्षुषी समुपस्पृशेत् । अङ्गुष्ठेन प्रदेशिन्या नासिके समुपस्पृशेत् ॥
" तथाङ्गुष्ठकनिष्ठाभ्यां कर्णौ तु समुपस्पृशेत् । अंगुष्ठेन प्रदेशिन्या नाभिं च समुपस्पृशेत् ॥
" तथैव पंचभिर्मूर्ध्नि स्पृशेदेवं समाहितः ॥
" अंगुष्ठोऽग्निरिति ख्यातः प्रोक्ता वायुः प्रदेशिनी । अनामिका तथा सूर्यः कनिष्ठा मघवान् स्मृता ॥
" प्रजापतिर्मध्यमा तु ज्ञेयाः शुद्धिमभीप्सता" इति । **बोधायनः** (१।५।१५।१६-२१)—
" शब्दं अकुर्वंस्त्रिरपो हृदयंगमाः पिबेत् । त्रिः परिमृजेत् । द्विरित्येके । सकृदुभयं शूद्रस्य स्त्रियाश्च । खान्यद्भिः संस्पृश्य पादौ नाभिं शिरः सव्यं पाणिमंततः " इति । प्रायश्चित्तप्रकरणे **स एव** (४।३।२-५)— " ओंपूर्वाभिर्व्याहृतीभिः सर्वपापेष्वाचामेत् । यत्प्रथममाचामति तेन ऋग्वेदं प्रीणाति । यद्द्वितीयं तेन यजुर्वेदं प्रीणाति । यत्तृतीयं तेन सामवेदं यत्प्रथमं परिमार्ष्टि तेनाथर्ववेदं यद्द्वितीयं तेनेतिहासपुराणम् । यत्सव्यं पाणिं प्रोक्षति पादौ शिरो हृदयं नासिके चक्षुषी श्रोत्रे नाभिं चोपस्पृशति तेनौषधिवनस्पतयः सर्वाश्च देवताः प्रीणाति चाचमनादेव सर्वस्मात्पापात्प्रमुच्यते " इति । तथा ब्रह्मयज्ञाधिकारे श्रूयते (तै. आरण्य. प्र. २।११)—" दक्षिणत उपवीयोपविश्य हस्ताववनिज्य त्रिराचामेत् द्विः परिमृज्य सकृदुपस्पृश्य शिरश्चक्षुषी नासिके श्रोत्रे हृदयमालभ्य यत्त्रिराचामति तेन ऋचः प्रीणाति यद्द्विः परिमृजति तेन यजूꣳषि यत्सकृदुपस्पृशति तेन सामानि यत्सव्यं पाणिं पादौ प्रोक्षति यच्छिरश्चक्षुषी नासिके श्रोत्रे हृदयमालभते तेनाथर्वांगिरसो ब्राह्मणानीतिहासान्पुराणानि कल्पान्गाथानाराशꣳसीः प्रीणाति " इति । दक्षिण उपवीयेति " दक्षिणं बाहुमुद्धरतेऽवधत्ते सव्यमिति यज्ञोपवीतं " (तै. आ. प्र. २।१) इत्येतत्स्मार्यते । हस्तावनिज्य मणिबंधनात्प्रक्षाल्य पादयोरप्युपलक्षणम् । द्विः परिमृज्य ओष्ठाविति शेषः । सकृदुपस्पर्शनमोष्ठयोरेव । सुबोधमन्यत् । **भरद्वाजः—**

" ब्रह्मयज्ञे विशेषोऽस्ति किंचिदाचमनक्रमे । पानत्रयं तथा कुर्यात्तथा द्विः परिमार्जनम् ॥
" उपस्पृश्य शिरश्चक्षुः नासिकाद्वितयं ततः । श्रोत्रद्वयं च हृदयं पूर्वोक्तविधिना लभेत् " ॥ इति ।

शौनकः—

" प्रक्षाल्य पादौ हस्तौ च त्रिः पिबेदंबुवीक्षितम् । माषमग्नं तु सद्वारि हृद्गतं तु विशुध्यति ॥
" संवृत्यांगुष्ठमूलेन द्विः प्रमृज्यात्तदोष्ठकौ । संहतांगुलिभिः सम्यगवाचीनं स्पृशेन्मुखम् ॥
" अंगुष्ठानामिकाभ्यां तु चक्षुषी समुपस्पृशेत् । अंगुष्ठेन प्रदेशिन्या घ्राणं स्पृश्यादनंतरम् ॥
" कनिष्ठया चांगुष्ठेन श्रोत्रे: सम्यगुपस्पृशेत् । अंगुष्ठमध्यमाभ्यां तु बाहू सम्यक् स्पृशेत्ततः ॥
" अंगुष्ठाग्रेण नाभिं तु हृदयं तिसृभिस्ततः । सर्वाभिस्तु शिरः पश्चादेवमाचमनं चरेत्" ॥ इति ।

स्मृत्यर्थसारे— " ब्राह्मतीर्थेन त्रिश्चतुर्वा पीत्वा हस्तौ प्रक्षाल्य ओष्ठौ संकोच्यांगुष्ठमूलेन द्विः परिमृज्य संहतांगुलिभिरास्यं सलोमप्रदेशे स्पृष्ट्वा घ्राणादीनींद्रियाणि स्पृशेत्सर्वत्र मध्ये मध्ये अप उपस्पृशेत् । अशक्तौ त्रिः पीत्वा मुखं प्रमृज्य खानि स्पृशेदत्यंताशक्तौ पीत्वा श्रोत्रं स्पृशेत् । "तदोंकारेणाचमनं यद्वा व्याहृतिभिर्भवेत् । सावित्र्या वाऽपि कर्तव्यं यद्वा कार्यममंत्रकम्" ॥ इति ।

स्मृत्यन्तरे—

"अच्युताद्यैः समाचामेत्केशवाद्यैस्तु नामभिः। अंगानां स्पर्शनं कुर्यादेतत्पौराणिकं स्मृतम्"॥ इति। अत्र यथास्वशाखं व्यवस्था। येषां तु स्वशाखायां अंगोपस्पर्शनमाम्नातं तेषां विकल्पः। यत्र पुनः कतिपयांगस्पर्शनमुक्तं तत्राविरुद्धवचनांतरानुसारादंगांतरस्पर्शनमस्तीति **स्मृतिचंद्रिकादौ** व्यवस्थापितम् (पृ. ९५)। जलमध्ये तिष्ठन्नप्याचामेदित्याह **विष्णुः**—

"जानोरूर्ध्वं जले तिष्ठन्नाचांतः शुचितामियात्। अधस्ताच्छतकृत्वोऽपि समाचांतो न शुध्यति"॥इति। न तिष्ठन्नाचामेदित्येतत्स्थलविषयम्। अत एव **गौतमः** (५९।११)— "न तिष्ठन्नुद्धृतोदकेनाचामेत्" इति विशिनष्टि। **व्यासोऽपि**—"नाचामेद्वर्षधाराभिर्न तिष्ठन्नुद्धृतोदकैः"॥ इति। **स्मृतिरत्नेऽपि**—

"जानुभ्यामूर्ध्वमाचम्य जले तिष्ठन्न दुष्यति। ताभ्यामधस्तात्तिष्ठन्वै नाचामेच्च विचक्षणः॥"

अध इत्येतेन जानुमात्रेऽप्यविरुद्धमित्युक्तम्। तथा **चंद्रिकायाम्**—

"जानुमात्रजले तिष्ठन्नासीनः प्राङ्मुखस्थले। सर्वतः शुचिराचांतस्तयोस्तु युगपत् स्थितः"॥ इति। यदा जानुमात्रजले स्थित्वाचामेत्तदा जले क्रियमाणे कर्मण्यधिकृतो भवति। यदा तु स्थल एवासीन आचामेत्तदा स्थल एव क्रियमाणे कर्मणि। यदा पुनरुभयस्थस्तदोभययोरपि क्रियमाणेषु कर्मस्वधिकृतो भवतीत्यर्थः। तथा च **पैठीनसिः**— "अंतरुदकमाचांतोऽतरेव शुध्यति। बहिरुदकमाचांतो बहिरेव शुध्यति। तस्मादंतरेकं च बहिरेकं च कृत्वा पादमाचामेत्। सर्वतः शुद्धो भवति"॥ इति। **शौनकः**—

"पुष्करिण्यां ह्रदे वाऽपि जानुदघ्ने जलं पिबन्। शुचिः स्याज्जानुनोऽधस्तादशुचिः स्यान्न संशयः॥
"तत्तोयं यः पिबेद्विप्रः कामतो वाऽप्यकामतः। अकामं नक्तभोजी स्यादहोरात्रं तु कामतः"॥

भरद्वाजः—

"जानोरूर्ध्वमथाचामञ्जले तिष्ठञ्शुचिर्भवेत्। अधस्ताच्छतकृत्वोऽपि समाचांतो न शुध्यति॥
"उदके तूदकस्थस्तु स्थलस्थस्तु[1] स्थले शुचिः। पादौ कृत्वोभयत्रापि ह्याचम्योभयतः शुचिः"॥

यत्तु **आपस्तंब** आह (१।५।१५।१०)—"नाप्सु सतः प्रयमणं विद्यते" इति। जान्वोरूर्ध्वे जले सतः[2] आसीनस्य प्रयमणं येन प्रयतो भवति तत्प्रयमणं आचमनं नास्तीति तस्यार्थः। तथा च **शौनकः**—

"जान्वोरूर्ध्वजले तिष्ठन्यदाचामेच्छुचिर्भवेत्। आसीनस्तु शयानो वा शतकृत्वो न शुध्यति"॥ इति। **स्मृत्यर्थसारेऽपि**—

"जानुमात्रे जले तिष्ठन्नाचामन्न हि दुष्यति। उपविश्य सदाचामेज्जानुमात्रादधो[3] जले॥
"जलाचांतो जले शुध्येद्बहिराचमनो बहिः। बहिरंतश्च आचामेत्सर्वत्र शुचिरेव सः॥
"जलस्थो जलकार्येषु स्थलस्थः स्थलकर्मसु। उभयेषूभयस्थस्त्वाचांतः शुचितामियात्॥
"वामपादं स्थले न्यस्य दक्षिणं तु जले न्यसेत्। वामहस्तेन कं स्पृष्ट्वाऽप्याचामेद्दक्षिणेन तु"॥ इति।

हारीतः—

"आर्द्रवासा जले कुर्यात्तर्पणाचमनं जपम्। शुष्कवासाः स्थले कुर्यात्तर्पणाचमनं जपम्॥
"आर्द्रवासाः स्थलस्थस्तु यद्याचामेन्नराधमः। वस्त्रनिश्च्योतनं तस्य प्रेतास्तस्य पिबंति हि॥
"शुष्केणांतर्जले चैव बहिरप्यार्द्रवाससा। स्नानं दानं जपो होमः सर्वं भवति निष्फलम्"॥

---

१ क्ष- स्थस्य २। ख- स्थः। ३ क्ष- पो।

संवर्त्तोऽपि—

" जानुभ्यामुपरिष्टात्तु शुष्कवासा स्थितो जले । संध्यामाचमनं कुर्वन्न दुष्यति कदाचन "॥

विष्णुः (६८।१६)—

"न जले शुष्कवस्त्रेण स्थले चैवार्द्रवाससा । सर्वं तद्राक्षसं विद्यात् बहिर्जानु च यत्कृतम्"॥इति । आर्द्रवासाः स्नानव्यतिरिक्तकाले स्थले न कुर्यादेव । शुष्कवासास्तु जानुनोऽधस्ताज्जले स्थित्वा न कुर्यादित्यर्थः । **स्मृत्यर्थसारे**—

" न जले शुष्कवस्त्रेण न स्थले चार्द्रवाससा । आचामादिक्रिया कुर्यादधोजानु न कुत्रचित् "॥

विष्णुरपि—

"जानुभ्यामुपरिष्टात्तु शुष्कवासाः स्थितो जले । सन्ध्यामाचमनं कुर्वन्न दुष्यति कदाचन"॥

स्मृतिरत्ने—

" ब्राह्मे स्नानेन सूर्यार्घ्ये जलोत्सर्जनतर्पणे । जलेष्टिहोमे शुष्केण जले कुर्वन्न दुष्यति " ॥ इति ।

यत्तु **संवर्त्त**वचनम्

" जलं जलस्थो नाचामेज्जलाचांतो जले शुचिः । बहिरंतस्थ आचामेदेवं शुद्धिमवाप्नुयात् "॥

यदपि **पराशर**वचनं

"अवधूनोति यः केशान् स्नात्वा प्रस्रवते द्विजः । आचामेद्वा जलस्थोऽपि स बाह्यः पितृदैवतैः"॥ प्रस्रवते आर्द्रवस्त्रो मलमूत्रे विसृजति । बाह्यः पैतृकं दैविकं चानुष्ठानं कर्तुं अनर्ह इत्यर्थः ॥ यदपि **व्यास**वचनं—"सोपानात्को जलस्थो वा नोष्णीषी वाऽऽचमेत् बुधः" तत्सर्वं स्नानोत्तरकालाचमनविषयम् । यदाह **दक्षः**—

"स्नात्वाऽऽचामेद्यदा विप्रः पादौ कृत्वा जले स्थले।उभयोरप्यसौ शुद्धः ततः कर्मक्षमो भवेत्"॥इति।

पराशरोऽपि (१२।१६)—

"जले स्थलस्थो नाचामेज्जलस्थश्च बहिःस्थले । उभे स्पृष्ट्वा समाचांत उभयत्र शुचिर्भवेत्"॥ इति । एतत्स्नात्वा य आर्द्रवासास्तद्विषयमिति **माधवीये** । **व्यासः**—

" कुशैः पूतं भवेत् स्नानं कुशेनोपस्पृशेत् द्विजः । कुशेन चोद्धृतं तोयं सोमपानेन संमितम् "॥

भरद्वाजः— " बद्धचूडः कुशकरो द्विजः शुचिरुपस्पृशेत् " । कुशप्रशंसामाह **गोभिलः**—

" कुशमूले स्थितो ब्रह्मा कुशमध्ये तु केशवः । कुशाग्रे शंकरं विद्यात्सर्वे देवाः समंततः" ॥

हारीतः—

" कुशहस्तेन यज्जप्तं दानं चैव कुशैः सह । कुशहस्तस्तु यो भुंक्ते तस्य संख्या न विद्यते ॥

" कुशमालां तु यः कंठे समावहति सर्वदा । लिप्यते न स पापेन पद्मपत्रमिवांभसा ॥

" करे कंठे शिखायां च कर्णयोरुभयोरपि । पवित्रधारको यश्च न स पापेन लिप्यते ॥

" जपहोमहरा एते असुरा व्यक्तरूपिणः । पवित्रकृतहस्तस्य विद्रवंति दिशो दश " ॥

गोभिलः—

" वज्रो यथा सुरेंद्रस्य शूलं हस्ते हरस्य च । यथा चक्रायुधं विष्णोरेवं विप्रकरे कुशः ॥

" भूतप्रेतपिशाचाश्च ये चान्ये ब्रह्मराक्षसाः । विप्रांगुलिकुशान् दृष्ट्वा दूरं गच्छन्त्यधोमुखाः "॥

मार्कण्डेयः—

" कुशपाणिः सदा तिष्ठेत् ब्राह्मणो डंभवर्जितः । स नित्यं हांति पापानि तूलराशिमिवानलः " ॥

कौशिकः—

" कुशासनं परं पूतं यतीनां तु विशेषतः । कुशासनोपविष्टस्य सिध्यते योग उत्तमः ॥
" यथा पुष्करपर्णेषु अपां लेपो न विद्यते । एवं पवित्रहस्तस्य पापलेपो न विद्यते ॥
" अपवित्रकरः कश्चित् ब्राह्मणो य उपस्पृशेत् । अपूतं तस्य तत्सर्वं भवत्याचमनं तथा"॥

व्यासः—

" अंगुष्ठानामिकाभ्यां तु च्छिन्नं पैतामहं शिरः । रुद्रेण तु ततः कालात्समारभ्यकरोऽशुचिः ॥
" पावनार्थं ततो हस्ते कुशकांचनधारणम् "॥ इति । **शातातपः**—
" जपे होमे तथा दाने स्वाध्याये पितृतर्पणे । अन्यूनं तु करं कुर्यात्सुवर्णरजतैः कुशैः ॥
" कौशेयं बिभृयान्नित्यं पवित्रं दक्षिणे करे । भुंजानस्तु विशेषेण नान्नदोषेण लिप्यते " ॥

अत्रिः—" उभाभ्यामेव पाणिभ्यां विप्रैर्दर्भपवित्रके । धारणीये प्रयत्नेन ब्रह्मग्रंथिसमन्विते ॥
" यज्ञोपवीते मौंज्यां च तथा कुशपवित्रके । ब्रह्मग्रंथिं विजानीयादन्यत्र तु यथारुचि ॥
" ब्रह्मयज्ञे जपे चैव ब्रह्मग्रंथिर्विधीयते । भोजने वर्तुलः प्रोक्तः एवं धर्मो न हीयते "॥ इति

अत्र अंगुलीनियमो दर्शितः **चंद्रिकायाम्**—(मत्स्यपुराणोक्तः पृ. १०८ पं. ११)
"धार्योऽनामिकया दर्भो ज्येष्ठानामिकयाऽपि वा । उभाभ्यामनामिकाभ्यां तु धार्यं दर्भपवित्रकम्"॥ इति । **संवर्तः**—

" उभाभ्यामपि हस्ताभ्यां पवित्रं धारयेत् द्विजः । दैवे कर्मणि पित्र्ये च ब्रह्मग्रंथिसमन्वितम् ॥
" अग्रं तु ब्रह्मदैवत्यं ग्रंथिर्वैष्णव उच्यते । रज्जुराशीनदैवत्यानामिकायां तु योजयेत् "॥

अत्रिः—" उभाभ्यामेव हस्ताभ्यां विप्रो दर्भपवित्रके । ब्रह्मग्रंथिसमायुक्ते पवित्रे मध्यपर्वणि ॥
" पाणिभ्यां सर्वथा धार्ये कर्मकाले विशेषतः ॥
" प्रथमं लंघयेत्पर्व द्वितीयं तु न लंघयेत् । द्वयोस्तु पर्वणोर्मध्ये पवित्रं धारयेद् बुधः ॥
" अग्रपर्वस्थितो दर्भस्तपोवृद्धिकरो हि सः । मध्ये चैव प्रजाकामो मूले सर्वार्थसाधकः "॥

एतत्काम्यविषयम् । वर्णभेदेन पर्वनियममाह **स एव**—

"अंगुलीमूलदेशे तु पवित्रं धारयेद्विजः । राज्ञां द्विपर्वके चैव विशामग्रे करस्य च"॥ इति ।

स्मृतिभास्करे—

" सप्तभिर्दर्भपुंजीलैर्ब्राह्मणस्य पवित्रकम् । पंचभिः क्षत्रियस्यैव चतुर्भिश्च तथा विशः ॥
" उभाभ्यामेव शूद्रस्य ह्यांतराणां तथैव च" । आंतराणामनुलोमानाम् । **स्मृत्यर्थसारे**—
" सर्वेषां वा भवेत् द्वाभ्यां वा पवित्रं ग्रथितं तथा । सप्तपत्राः कुशाः शस्ताः दैवे पित्र्ये च कर्मणि ॥
" अन्ततस्तरुणौ साग्रौ प्रादेशे तु पवित्रके " । काम्यपवित्रमुक्तं **तत्रैव**—
"त्रिभिर्दर्भैः शांतिकर्म पंचभिः पौष्टिकं तथा । चतुर्भिश्चाभिचाराख्यं कुर्यात्तत्र पवित्रकम्"॥ इति

नित्यपवित्रं प्रकारांतरेणाह **मार्कंडेयः**—

" चतुर्भिर्दर्भपुंजीलैर्ब्राह्मणस्य पवित्रकम् । एकैकन्यूनमुद्दिष्टं वर्णतस्तु यथाक्रमम् " ॥

शूद्रस्य ग्रंथियुक्तपवित्रं निषेधति **यमः**—

" कुतूहलेन वा शूद्रं पवित्रं धारयेद्यदि । स तप्यते महाघोरैः सुचिरं नरकाग्निभिः ॥
" तस्मात्पवित्रं सततं द्विजैर्वेदपरायणैः । कर्मानुष्ठाननिरतैर्धार्यं मेतरजातिभिः " ॥

कात्यायनः—

" सप्त दर्भाः शुभा कार्यास्तिलक्षेत्रसमुद्भवाः । ते प्रशस्ता द्विजातीनां दैवे पित्र्ये च कर्मणि ॥
"अप्रसूताः स्मृता दर्भाः प्रसूतास्तु कुशाः स्मृताः । समूलाः कुतपा ज्ञेयाः च्छिन्नाग्रास्तृणसंज्ञिताः॥
"अच्छिन्नाग्रा ह्यशुष्काग्रा ह्रस्वाश्चैव प्रमाणतः । कुतपा इति विज्ञेयास्तैस्तु श्राद्धं समाचरेत्"॥इति।
" च्छिन्नाग्रानपि वै दर्भान् अमूलान्कोमलाञ्छुभान् । पितृदेवजपार्थं तु समादद्यात्कुशान्द्विजः॥
" च्छिन्नमूला ग्रहीतव्याः प्रस्तरार्थं कुशोत्तमाः । अग्निकार्ये च यागे च समूलान्परिवर्जयेत् " ॥

कात्यायनः—

"हरिता यज्ञिया दर्भाः पीताः पावकसंज्ञकाः । समूलाः पितृदैवत्याः कल्माषा वैश्वदेविकाः"॥
पितृदेवत्याः पित्रर्थाः । तथा च **यमः**—
" समूलस्तु भवेत् दर्भः पितॄणां श्राद्धकर्मणि । मूलेन लोकाञ्जयति शक्रस्य सुमहात्मनः " ॥
एतैत् एकोद्दिष्टश्राद्धविषयम् । यतः स एवमाह—
"एकोद्दिष्टे कुशाः कार्याः समूला यज्ञकर्मणि । बहिर्लूनाः सकृल्लूनाः सर्वत्र पितृकर्मसु "॥ इति ।
बहिर्लूनाः उपमूलं लूनाः । तथा च **गोभिलः**—" उपमूलं लूनाः पितृकार्येषु " ॥ इति ।
चन्द्रिकायाम्—(ब्रह्माण्डपुराणे पृ. १७९ पं. १०)
" उपमूलं तथा लूनाः श्राद्धार्थं तु कुशाः स्मृताः । तथा श्यामाकनीवारौ दूर्वा च समुदाहृता"॥इति ।
एकोद्दिष्टेतरश्राद्धार्थमित्यर्थः ।

" सपिंडीकरणं यावदृजुदर्भैः पितृक्रिया । सपिंडीकरणादूर्ध्वं द्विगुणैर्विधिवद्भवेत् ॥
" तर्पणादीनि कार्याणि पितॄणां यानि कानि च । तानि स्युर्द्विगुणैर्दर्भैः पवित्रैर्वा विशेषतः ॥
" तिलक्षेत्रोद्भवैर्दर्भैः प्रयत्नात् द्विगुणीकृतैः । पितॄणां तर्पणं कुर्याद्देवानां तु यदृच्छया ॥
"पित्र्यं मूलेन मध्येन स्नानं दानं प्रयत्नतः । दैवं कर्म कुशाग्रेण कर्तव्यं भूतिमिच्छताम्"॥इति।
यदृच्छया तिलक्षेत्रोद्भवत्वादिनियमराहित्येनेत्यर्थः । **शालंकायनः**—

"कुशाग्रैस्तर्पयेद्देवान्मनुष्यान्कुशमध्यतः । द्विगुणीकृत्य मूलाग्रैः पितॄन् संतर्पयेत् द्विजः"॥
मनुष्यतर्पणे मध्यस्य प्राजापत्यतीर्थसंबंधः । द्विगुणीकृत्य मूलाग्राभ्यां पितृतीर्थगताभ्यामित्यर्थः ॥

स्मृत्यर्थसारे—

" पवित्रकर आचामेत् शुचिः कर्मादरात् द्विजः । कुशमात्रकरो वाऽपि दर्भमात्रकरोऽपि वा ॥
"तं कुशं विधिवल्लूनं न त्यजेदन्यथा त्यजेत् । अन्ये दर्भास्तु संत्याज्याः त्यजेद्दूर्वा पुरैव तत्"॥

मार्कंडेयः—

"सपवित्रेण हस्तेन कुर्यादाचमनक्रियाम् । नोच्छिष्टं तत्पवित्रं तु भुक्तोच्छिष्टं तु वर्जयेत्"॥इति ।
एतद्ग्रंथिविहीनदर्भाभिप्रायम् । तथा च **हारीतः**—"ग्रंथिर्यस्य पवित्रस्य न तेनाचमनं चरेत्"॥
कौशिकोऽपि—" न ब्रह्मग्रंथिनाऽऽचामेन्न दूर्वाभिः कदाचन " । **स्मृतिसारे**—

" ग्रंथीकृतपवित्रेण न भुंजीयान्न चाचमेत् । न पिबेद्यदि कुर्वीत तदा तच्छोणितं भवेत् "॥

भरद्वाजः—

"ग्रंथियुक्तपवित्रेण कुर्यादाचमनं यदि । तत्पवित्रं परित्यज्य पुनराचम्य शुध्यति"॥इति ।
केचित्तु एतानि वचनानि केवलाचमनविषयाणि । कर्मांगाचमने न दोषः

---

१ क-पीतकाः पाकयज्ञकाः । २ ख-ग-कुशस्य । ३ क-स्पृष्टेन ।

"सद्दर्भः सपवित्रो वा कर्मांगाचमनं चरेत् । नोच्छिष्टं तत्सदर्भं च भुक्तोच्छिष्टं तु वर्जयेत्॥
" पवित्रं ग्रंथिमुत्सृज्य मंडले निक्षिपेद्द्विजः । पात्रे च निक्षिपेद्यस्तु स विप्रः पंक्तिदूषकः ॥
" मुक्तदर्भैर्न भोक्तव्यं भुक्त्वा देव्याः शतं जपेत् " ॥ इति स्मरणात् । **कौशिकः**—
" वामहस्ते स्थिते दर्भे दक्षिणेनाचमेद्यदि । रक्तं तु तद्भवेत्तोयं पीत्वा चांद्रायणं चरेत् " ॥

हारीतोऽपि—
" वामहस्ते कुशान् कृत्वा समाचामति यो द्विजः । उपस्पृष्टं भवेत्तेन रुधिरेण मलेन च "॥ इति ।

व्यासः—
" गृहीत्वा वामहस्तेन कुशमुष्टिं प्रमादतः । उपस्पृशन्ति तु ये विप्रा रुधिरेणाचमन्ति ते "॥

नंदिसूरिः—
" वामहस्तस्थदर्भो वा हसन्पश्यन् दिशोऽथ वा । वामपादस्थहस्तो वा नैवाचमनमाचरेत् " ॥

स्मृतिरत्ने—
" वामहस्ते स्थिते दर्भे न पिबेद्दक्षिणेन तु । वस्त्रादिनोपग्रहणे न दोषः पिबतो भवेत् "॥ इति ।
एतानि केवलवामहस्तविषयाणि । तथा च **गोभिलः**—
"उभयत्र स्थितैर्दर्भैः समाचामति यो द्विजः । सोमपानफलं तस्य भुक्त्वा यज्ञफलं लभेत्"॥ इति ।

सारसमुच्चये—
" यो दर्भपाणिस्तोयेन सोमपानफलं लभेत् । सपवित्रेण हस्तेन भुक्त्वा यज्ञफलं लभेत् ॥
" अथवाऽनामिकाभ्यां तु ग्रंथिहीनं कुशादिकम् । हेमादीन्वाऽथ बिभृयात् सर्वकर्मस्वपि द्विजः ॥
" पवित्रं सर्वदुःखघ्नं तथैवानंददायकम् । हेम्ना रूप्येण वा धीमान् पवित्रं धारयेत्सदा" ॥

कात्यायनः—
" तर्जन्या बिभृयाद्रौप्यं स्वर्णं चोपकनिष्ठया । गृहस्थः श्रवणाभ्यां तु शुभे रौक्मे च कुंडले " ॥

याज्ञवल्क्यः—
" गोवालं दर्भसूत्रं च रत्नं कनकसंयुतम् । कायेन धारयन् विप्रो न स पापेन लिप्यते " ॥

स्मृतिरत्ने—
" कुशं पवित्रं ताम्रं वा रजतं हैममेव वा । बिभृयात् दक्षिणे पाणौ पवित्रं चोत्तरोत्तरम् ॥
" अनामिकाधृतं हेम तर्जन्यां रूप्यमेव च । कनिष्ठिकाधृतं खड्गं तेन पूतो भवेन्नरः "॥

हारीतः—
"न रूप्यं केवलं धार्यं दैवे पित्र्ये च कर्मणि । अनामिकाधृतं हेम तर्जन्या धारयेच्च तत् " ॥ इति ।

व्यासोऽपि—
" हैमेन सर्वदा सर्वं कुर्याद्देवाविचारयन् । रौप्यं दक्षप्रदेशिन्या बिभृयात्सर्वदा द्विजः ॥
" दक्षानामिकया विप्रो बिभृयाद्ग्रंथिसंयुतम् । अग्रंथिकं च हेमं च तथा लोहत्रयोद्भवम् ॥
" गायत्र्यक्षरसंख्यातं गृह्णीयात्ताम्रमुत्तमम् । अनुष्टुभस्तथा रौप्यं त्रिष्टुभः कनकोत्तमम् " ॥
ताम्ररूप्यसुवर्णैर्यथाक्रमं अष्टैकादशद्वादशपरिमितैर्निर्मितमित्यर्थः ।
" एवं लोहत्रयेणैव कृतं रक्षोघ्नमुत्तमम् । अवघ्नं च पवित्रं स्याद्रक्षाकरमनुत्तमम् ॥
" आयुष्करमनाधृष्यमभेद्यं रोगनाशनम् "।

१ गभ-काशं । २ -अष्टद्वादशैकादशांश ।

जीवत्पितृकस्य जीवज्ज्येष्ठस्य रौप्यांगुलीयकनिषेधमाह **स एव**—
" योगपट्टोत्तरीयं च तर्जन्यां रजतं तथा । न जीवत्पितृकैर्धार्यं ज्येष्ठो वा विद्यते यदि"॥ इति ।
पादस्पर्शे विशेषमाह **स एव**—
"विप्राणां चरणस्पृष्टं पादप्रक्षालने यदि । त्यजेत्प्रारब्धकर्मांते पवित्रं दर्भनिर्मितम्"॥ इति।

भरद्वाजः—
" कूर्चेन वा पवित्रेण येन कर्माणि कारयेत् । तस्य ग्रंथिं विसृज्यैव कर्मान्ते तु ततस्त्यजेत् ॥
" पवित्रकूर्चयोस्त्यागे सग्रंथ्योस्तु प्रमादतः । उपवासं चरेदेकं उपवासत्रयं तु वा " ॥
दर्भपवित्रस्य त्यागाभिधानात् रूप्यादिनिर्मितस्य पवित्रस्य न त्यागः ।
गोवालपवित्रं प्रकृत्याह **कौशिकः**—
" गवां वालपवित्रेण धार्यमाणेन नित्यशः । न स्पृशंतीह पापानि श्रीश्च[1] गात्रेषु तिष्ठति ॥
" गवां वालपवित्रेण वन्ह्युपास्तिं करोति यः । पंचाग्नयो हुतास्तेन यावज्जीवं न संशयः॥
" गवां वालपवित्रेण संध्योपास्तिं करोति यः । स वै द्वादश वर्षाणि कृतसंध्यो भवेन्नरः॥
" गवां वालपवित्रस्य सुवर्णस्य तथैव च । न ब्रह्मग्रंथिनियमो धारयेत्तु यथाविधि "॥
पवित्रनिर्माणमुक्तं **पारिजाते**—
" तर्जन्यंगुष्ठयोरग्रं योजितं तु तथा भवेत् । ज्ञानमुद्रां तया कुर्यात्कूर्चवद् ग्रंथिबंधनम् "॥

स्मृतिरत्ने—
"अंगुष्ठं घर्षयेदूर्ध्वं तर्जन्या तु पुनः पुनः । ज्ञानमुद्रामधः कृत्वा कूर्चवद्ग्रंथिबंधनम्"॥ इति ।

आश्वलायनः—
" साग्राभ्यामृजुदर्भाभ्यां प्रादक्षिण्येन मध्यतः । मूलाग्रावुद्धृतौ कृत्वा कुर्याद्ग ग्रंथिं च मंत्रवत् ॥
" तारेण कुर्यात्तां ग्रंथिं पवित्रस्य द्विजोत्तमः । ग्रंथिरेकांगुला तस्य तदूर्ध्वं चतुरंगुलम्" ॥

स्मृतिभास्करे—
" चतुरंगुलमग्रं च ग्रंथिरेकांगुला तथा । वलयं द्व्यंगुलं चैव पवित्रस्य तु लक्षणम्" ॥ इति।
उत्पवनादौ पवित्रमाह **कात्यायनः**—
" अनन्तर्गर्भितं साग्रं कौशं द्विदलमेव च । प्रादेशमात्रं विज्ञेयं पवित्रं यत्रकुत्रचित्" ॥
सूत्रकारोऽपि– " समावप्रछिन्नाग्रौ दर्भौ प्रादेशमात्रौ पवित्रे कुरुत " इति ।
दर्भाहरणकालनियममाह **हारीतः**–
"माघे नभस्यमा या स्यात्तस्यां दर्भोच्चयो मतः । अयातयामास्ते दर्भा नियोज्याः स्युः पुनः पुनः "॥
नभः श्रावणमासः । कालांतरोत्पादितास्तु नायातयामाः । अतः पुनःपुनर्विनियोगयोग्या न भवंतीत्यर्थः । अनेनैवाभिप्रायेण **शंखोऽपि**–
"दर्भाः कृष्णाजिना मंत्राः ब्राह्मणा हविरग्नयः । अयातयामान्येतानि संयोज्यानि पुनः पुनः"॥ इति।

स्मृतिचिंतामणौ—
" मासिमास्युद्धृतकुशा मासिमास्येव चोदिताः । नोत्तरोत्तरमासेषु धर्मविद्भिरुदाहृताः ॥
" सप्तरात्रं शुभा दर्भास्तिलक्षेत्रसमुद्भवाः । ते द्विजेन नियोक्तव्या दैवे पित्र्ये च कर्मणि ॥

१ क्ष–श्च विशेषतः ।

"अहन्यहनि कर्मार्थं कुशोद्धारः प्रशस्यते। न पूर्वेधूद्धृतकुशा योग्याश्चैवोत्तरेषु तु"॥इति।
जाबालिः—
"कुशान्काशांश्च पुष्पाणि गवार्थं च तृणादिकम्।निषिद्धे चापि गृह्णीयात् अमायामहनि द्विजः"॥इति।
"अमावास्यासु न छिंद्यात् कुशांश्च समिधस्तथा। सवित्रावस्थिते सोमे हिंसायां ब्रह्महा भवेत्"॥
इति **विष्णुपुराणवचनं** अशास्त्रीयकुशादिग्रहणविषयम्। आहरणप्रकारमाह **गोभिलः**—
"शुचौ देशे शुचिर्भूत्वा स्थित्वा पूर्वोत्तरामुखः।हुंकारेणैव मंत्रेण कुशान् स्पृश्यात् द्विजोत्तमः"॥
उत्पाटनमंत्रमाह **स एव**—
"विरिंचेन सहोत्पन्न परमेष्ठिनिसर्गद। नुद पापानि सर्वाणि दर्भ स्वस्तिकरो मम"॥ इति।
कुशालाभे तु **शंखः**—
"कुशालाभे द्विजः श्रेष्ठः काशैः कुर्वीत यत्नतः। तर्पणादीनि कर्माणि काशाः कुशसमाः स्मृताः"॥
विष्णुरपि—"कुशाभावे कुशस्थाने काशान् दूर्वा वा दद्यात्" इति।
वृद्धवसिष्ठः—
"कुशाभावेऽश्ववालो वा विश्वामित्रोऽथ वा यवाः। दूर्वाश्चैतेषु ये लब्धास्तेन कर्माणि कारयेत्॥
"श्रुतिस्मृतिषु भिन्नत्वाद्विप्राणां विश्वकर्मणाम्। विश्वासाच्चैव मित्रत्वाद्विश्वामित्र उदाहृतः॥
"कुशकाशाद्यभावे तु अन्ये दर्भा यथोचितम्"॥ इति। **स्मृतिसारेऽपि**—
"कुशाः काशा यवा दूर्वा गोधूमाश्चाथ कुंदराः। उशीरा व्रीहयो मौंजा दश दर्भाश्च बल्वजाः"॥
वृद्धवसिष्ठः—
"कुशं तु रौद्रं विज्ञेयं कौशं ब्राह्मं तथा स्मृतम्। आर्षं तु दौर्वमाख्यातं वैश्वामित्रं तु वैष्णवम्॥
"विश्वामित्राः कुशाः काशा दूर्वा व्रीहय एव च। बल्वजाश्च यवाश्चैव सप्तदर्भाः प्रकीर्तिताः॥
"नार्द्रं लुनीयाद्रात्रौ तु लुनीयान्नापि संध्ययोः"॥ **शंखः**—
"काशहस्तस्तु नाचामेत्कदाचिद्विधिशंकया। प्रायश्चित्तेन युज्येत दूर्वाहस्तस्तथैव च"॥ इति।
प्रायश्चित्तं गायत्र्यष्टशतामिति **स्मृतिरत्नेऽ**भिहितम्। बर्हिषि तु **यमः**—
"कुशाः काशास्तथा दूर्वा यवा व्रीहय एव च। बल्वजाः पुंडरीकाणि सप्तधा बर्हिरुच्यते"॥
स्मृत्यर्थसारे—
"बर्हिः काशमयं ग्राह्यं न लभ्यंते कुशा यदि। शैरेरकांसूकलाश्ववालमौंजार्जुनेक्षवः॥
"सुगंधितेजनादाराद्दूर्वाक्षीरद्रुमा अपि। यद्वा सर्वतृणैर्वाऽपि ग्राह्यं बर्हिर्यथोचितम्॥
"शुष्कंशुंडं कुष्ठमूलं दुर्गंधि तृणवर्जितम्। सूकलानेरकांश्चापि वर्जयंत्यपरे बुधाः"॥ इति।
वर्ज्यानाह **हारीतः**—
"पथि दर्भाश्चितौ दर्भा ये दर्भा यज्ञभूमिषु। स्तरणासनपिंडेषु षट् कुशान् परिवर्जयेत्॥
"ब्रह्मयज्ञे च ये दर्भा ये दर्भाः पितृतर्पणे। हता मूत्रपुरीषाभ्यां तेषां त्यागो विधीयते॥
"अपूता गर्हिता दर्भा ये च छिन्ना नखैस्तथा। क्वथितानग्निदग्धांश्च कुशान्यत्नेन वर्जयेत्"॥
चंद्रिकायाम् (पृ. १०९ पं. २४)—
"नीवीमध्ये तु ये दर्भा ब्रह्मसूत्रे च ये कृताः। पवित्रांस्तान्विजानीयाद्यथा काशास्तथा कुशाः॥
"पवित्रं करशाखास्थं दक्षिणश्रवणे न्यसेत्। नान्यत्र निक्षिपेद्देहे निक्षिप्तं यदि तत्त्यजेत्"॥

---

१ क्ष-कांसुकलाश्च...क्षमः। २ क्ष-र। ३ क्ष-दूर्वाक्षीरभ्रमा; ग-क्षीरार्द्रया। ४ ग-शुष्णतुण्डी रुष्णतूल।

दर्भसंख्योक्ता **स्मृतिरत्ने**—

" हस्तयोरुभयोर्द्वौ द्वावासने च तथैव च । समे द्वे स्थैल्यदैर्घ्याभ्यां पवित्रे द्वे तथा स्मृते ॥
" प्रणीतासनमाच्छाद्यं त्रिभिर्दर्भैरुदीरितम् । पर्यग्निकरणे चैकं द्योतने वोक्षणे तथा ॥
" लेखने च तथा द्वे द्वे स्तरणे षोडशाः स्मृताः । अष्टाविंशतिदर्भेषु ब्रह्मार्थं ब्राह्मणाय वा ॥
" देवकार्येषु दर्भौ द्वौ पित्र्ये चैकं त्रयोऽपि वा " ॥ इति ।

अथाचमननिमित्तानि । तत्र **मनुः** (५।१३७)—

"कृत्वा मूत्रपुरीषं वा खान्याचान्त उपस्पृशेत् । वेदमध्येष्यमाणश्च अन्नमश्नंश्च सर्वदा" ॥
आचांतः त्रिरपः पीत्वेत्यर्थः । **मार्कंडेयः**—

"देवार्चनादिकार्याणि तथा गुर्वभिवादनम् । कुर्वीत सम्यगाचम्य तद्वदेव भुजि क्रियाम्" ॥
संवर्तः—

"स्नात्वा पीत्वा तथा भुक्त्वा क्षुत्वा सुप्त्वा द्विजोत्तमः । अनेन विधिना सम्यगाचांतःशुचिमामियात्" ॥
हारीतोऽपि– ' सुषुप्सुर्भोक्ष्यन्नाचामेत् ' इति । **नंदिसूरिः**—

" नूत्नोपवीतविन्यासे सस्नेहौषधभक्षणे । पैतृके कर्मणि स्नेहभक्ष्ये चाद्यंतयोः सकृत् ॥
" स्वाध्याये देवपूजायां जपे च सकृदादितः । पितृकार्ये तथा स्त्रीणां संभोगे चांततः सकृत्" ॥
प्रजापतिरपि—

" उपक्रम्यावशिष्टस्य कर्मणः प्रयतोऽपि सन् । कृत्वा च पितृकार्याणि सकृदाचम्य शुध्यति ॥
" वर्णत्रयस्य संस्पर्शेऽप्याचम्य प्रयतो भवेत् । संस्पर्शे प्रतिलोमानां क्रियात्यागो विधीयते ॥
" विप्रो विप्रेण संस्पृष्ट उच्छिष्टेन कथंचन । आचम्यैव च शुद्धः स्यादापस्तंबोऽब्रवीन्मुनिः ॥
" जपहोमप्रदानेषु पितृपिंडोदकेषु च । विप्रः समाप्तेष्वाचामेत्सर्ववस्तुषु चर्वणे " ॥
मनुः (४।१४,१४४)—

"न स्पृशेत्पाणिनोच्छिष्टो विप्रो गोब्राह्मणानलान् । न चापि पश्येदशुचिः स्वस्थो ज्योतिर्गणान् दिवि ॥
"स्पृष्ट्वैतानशुचिर्नित्यं अद्भिः प्राणानुपस्पृशेत् । गात्राणि चैव सर्वाणि नाभिं पाणितलेन तु" ॥ इति ।
चंद्रिकायाम् (पृ. ९८ पं. ३०, पृ. ९९ पं. १)—

" चंडालम्लेच्छसंभाषे स्त्रीशूद्रोच्छिष्टभाषणे । उच्छिष्टं पुरुषं दृष्ट्वा अभोज्यं च तथाविधम् ॥
" आचामेदश्रुपाते वा लोहितप्रस्रवे तथा । अग्नेर्गवामथालंभे स्पृष्ट्वा प्रयतमेव च ॥
"स्त्रीणामथात्मनः स्पर्शे नीवीं वा परिधाय च । कृत्वा चावश्यकार्याणि त्वाचामेच्छौचतत्परः" ॥
अवश्यकार्याणि नित्यानि । **तत्रैव**—

" संदेहेषु च सर्वेषु शिखामोक्षे तथैव च । विना यज्ञोपवीतेन नित्यमेवमुपस्पृशेत् " ॥
आपस्तंबः (१।५।१६।१४)— " स्वप्नेक्षवथौ शृंखाणिकाश्वालंभे लोहितस्य केशानामग्नेर्गवां ब्राह्मणस्य स्त्रियाश्चालंभे महापथं च गत्वामेध्यं चोपस्पृश्याप्रयतं च मानुष्यं नीवीं च परिधायाप उपस्पृशेत् " इति । क्षवथुः क्षुतं । शंखाणिका नासामलम् । अश्रु नेत्रजलम् । आलंभे स्पर्शे । **स एव** (१।५।१५।११) " उत्तीर्य त्वाचामेत् " इति । **यमोऽपि**—

" उत्तीर्योदकमाचामेदवतीर्य तथैव च । एवं स्याच्छ्रेयसा युक्तो वारुणाश्चैव पूजिताः " ॥
हारीतः– " नोत्तरेदनुपस्पृश्येत् देवतामभिगंतुकाम आचामेत् " ॥ इति । **बृहस्पतिः**—

---

१ ख–नक्तो । ग–यज्ञो ।

" अधोवायुसमुत्सर्गे आक्रंदे क्रोधसंभवे । मार्जारमूषिकस्पर्शे प्रहासेऽनृतभाषणे ॥
" निमित्तेष्वेषु सर्वेषु कर्म कुर्वन्नुपस्पृशेत् " ॥
मनुः(५।८५)-- "आचाम्य प्रयतो नित्यं जपेदशुचिदर्शने " ॥ **बृहस्पतिः**---
" श्वशूद्रपतितांश्चैव रासभं च रजस्वलाम् । दृष्ट्वा तोयमुपस्पृश्य भाष्य स्नात्वा पुनर्जपेत्" ॥
चंद्रिकायाम् (पृ. ९९ पं. २२)--
"चंडालादीन्जपे होमे दृष्ट्वाऽऽचामेत् द्विजोत्तमः । श्वादीन् दृष्ट्वा तथैवापि कर्णं वा दक्षिणं स्पृशेत्" ॥
वसिष्ठोऽपि—
"क्षुते निष्ठीविते सुप्ते परिधानेऽश्रुपातने । पंचस्वेतेषु चाचामेच्छ्रोत्रं वा दक्षिणं स्पृशेत्" ॥ इति ।
संवर्त्तः—
" क्षुते निष्ठीविते चैव दंतश्लिष्टे तथाऽनृते । पतितानां च संभाषे दक्षिणं श्रवणं स्पृशेत् ॥
" अग्निरापश्च देवाश्च चंद्रसूर्यानिलास्तथा । सर्वे ते खलु विप्राणां कर्णे तिष्ठंति दक्षिणे " ॥
पराशरः (७।४०)—
" प्रभासादीनि तीर्थानि गंगाद्याः सरितस्तथा । विप्रस्य दक्षिणे कर्णे संतीति मनुरब्रवीत् ॥
"आदित्यो वरुणः सोमो वन्हिर्वायुस्तथैव च । विप्रस्य दक्षिणे कर्णे नित्यं तिष्ठंति देवताः"॥
स्मृत्यर्थसारे—
"अग्निस्तीर्थानि वेदाश्च वरुणार्केंदुवायवः । विप्रस्य दक्षिणे कर्णे नित्यं तिष्ठंति पूजिताः " ॥ इति ।
एतच्च दक्षिणकर्णस्पर्शनमाचमासंभवे वेदितव्यम् । तथा **मार्कंडेयपुराणे**—
" सम्यगाचम्य तोयेन क्रियाः कुर्वीत वै शुचिः । देवतानामृषीणां च पितॄणां चैव यत्नतः ॥
" कुर्वीतालंभनां चापि दक्षिणश्रवणस्य वा । यथाविभवतो ह्येतत्पूर्वाभावे ततः परम् ॥
" अविद्यमाने पूर्वोक्त उत्तरप्राप्तिरिष्यते " इति । अथवा **बोधायनोक्तं** (१।५।७४) द्रष्टव्यम्- " नीवीं विसृज्य परिधायोपस्पृशेदार्द्रं तृणं भूमिं गोमयं वा सकृदुपस्पृशेत् " इति । **आपस्तंबोऽपि** (१।५।१६।८-१५)—"अप उपस्पृशेदार्द्रं वा शकृदोषधीर्भूमिं वा " इति । आर्द्रं वा शकृत् आर्द्रा वा ओषधीः आर्द्रा वा भूमिमित्यर्थः । **स्मृतिरत्ने**—
"सत्यामाचमनाशक्तावभावे सलिलस्य वा । पूर्वोक्तेषु निमित्तेषु दक्षिणं श्रवणं स्पृशेत् "॥ इति ।
व्यासः—" उपस्पृशेत्तृणं वाऽऽर्द्रं जलं वा भूमिमेव वा " ॥ **अर्णवे**—
" अशक्तौ वा जलाभावे पूर्वोद्दिष्टनिमित्तके । ओषधीगोशकृद्भूमीः स्पृशेत्प्रयतमानसः " ॥ इति ।

अथ **द्विराचमननिमित्तानि**—

तत्र **याज्ञवल्क्यः** (आ. १९६)—
" स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे । आचान्तः पुनराचामेद्वासो विपरिधाय च " ॥
वसिष्ठः(३।३८)–"सुप्त्वा भुक्त्वा क्षुतं कृत्वा स्नात्वा पीत्वा रुदित्वा चाचांतः पुनराचामेत्" इति ।
मनुरपि (५।१४५)— " सुप्त्वा क्षुप्त्वा तथा भुक्त्वा ष्ठीवित्वोक्त्वाऽनृतं वचः ।
" पीत्वाऽपोऽध्येष्यमाणश्चाप्याचामेत्प्रयतोऽपि सन् " ॥

भोजने त्वादावपि द्विराचमनम् । " भोक्ष्यमाणस्तु प्रयतोऽपि द्विराचमेत् " **इत्यापस्तंबस्मरणात्** (१।५।१६।९) । स्नानपानयोरादौ सकृत् द्विरंततः "स्नानखादनपानेषु सकृदादौ द्विरंततः " इति **नंदिसूरिस्मृतेः** ।

स्मृतिरत्ने—
" भोक्ष्यमाणो द्विराचामेद् भुक्त्वा च मतिमान्द्विजः । दाने प्रतिग्रहे होमे संध्यात्रितयवंदने ॥
" बलिकर्मणि चाचामेद्रादौ द्विर्नांततो द्विजः । वासोंतरपरीधाने स्नाने रथ्योपसर्पणे ॥
"चंडालोऽपि ग्रहाक्रामे स्वानुष्ठानांतरा क्षुते । अलोमकोष्ठसंस्पर्शे श्मशानाक्रमणेऽपि च ॥
" हविःशेषप्राशने च द्विराचमनमन्ततः " ॥ **बोधायनः**—
" भोजने हवने दाने उपहारे प्रतिग्रहे । हविर्भक्षणकाले च द्विराचमनमिष्यते " ॥
व्यासोऽपि—
" होमे भोजनकाले च सन्ध्ययोरुभयोरपि । आचान्तः पुनराचामेज्जपदानार्चनेषु च" ॥
विष्णुरपि—(२२।७४,७५)– " रथ्यामाक्रम्य कृतमूत्रपुरीषः पंचनखास्थ्यस्नेहं स्पृष्ट्वाऽऽचांतः पुनराचामेत् । चण्डालम्लेच्छभाषणे च " इति । **शङ्खः**—
" स्नाने भोजनकाले च सन्ध्ययोरुभयोरपि । आचान्तः पुनराचामेत् जपदानार्चनेषु च"॥इति ।
कूर्मपुराणे—
"प्रक्षाल्य पाणी पादौ च भुंजानो द्विरुपस्पृशेत् । शुचौ देशे समासीनो भुक्त्वा च द्विरुपस्पृशेत् ॥
" ओष्ठौ विलोमकौ स्पृष्ट्वा वासो विपरिधाय च । रेतोमूत्रपुरीषाणां उत्सर्गे शुक्तभाषणे ॥
"ष्ठीवित्वाध्ययनारंभे कासश्वासागमे तथा । चत्वरं वा श्मशानं वा समागम्य द्विजोत्तमः ॥
"संध्ययोरुभयोस्तद्वदाचांतोऽप्याचमेत्तथा" इति । शुक्तभाषणं निष्ठुरभाषणम् । **भरद्वाजः**–
" स्नानपानक्षुतस्वापहोमभोजनकर्मसु । रथ्योपसर्पणे मूत्रविड्डुत्सृष्टौ द्विराचमेत् ॥
" जपे श्मशानाक्रमणे परिधाने च वाससः । चत्वराक्रमणे चैव द्विजातिर्द्विरुपस्पृशेत्" ॥
हारीतो विशेषमाह—
"श्रौतस्मार्तेषु गार्ह्येषु कृत्येषु विधिवद् बुधः । द्विराचमेत्तु सर्वत्र विण्मूत्रोत्सर्जने त्रयम् "॥ इति ।
स्मृत्यर्थसारे–" आस्यगतश्मश्रुस्पर्शे अलोमकोष्टस्पर्शे दंतसक्तस्य जिव्हया स्पर्शे रथ्योपसर्पणे अस्नेहपंचनखास्थिस्पर्शने रोदने विण्मूत्रशौचांते पीत्वा चालीढे दंतसक्तं निष्ठीव्य देवताभिगमने च द्विराचामेत् । स्नात्वा पीत्वा सुप्त्वा वासो विपरीधायाभ्यंगे कृते हविर्भक्षणे द्विराचामेत् " इति ।
आपस्तंबः (१।५।१६।१०)–" श्यावांतपर्यन्तावोष्ठावुपस्पृश्याचामेत्" इति । अत्र द्विरित्यनुवर्तते । अलोमकप्रदेशः श्यावः । तस्यांतः सलोमकः । तत्पर्यंतावोष्ठावुपस्पृश्य द्विराचामेदित्यर्थः ।
अत्र **षट्त्रिंशन्मते**—
" अपेयं हि सदा तोयं रात्रौ मध्यमयामयोः । स्नानं तत्र न कुर्वीत तथैवाचमनक्रियाम् ॥
" मूत्रोच्चारे महारात्रौ कुर्यान्नाचमनं तु यः । प्रायश्चित्तीयते तत्र प्राजापत्यार्धमर्हति "॥ इति ।
अथ आचमानापवादाः । तत्र **याज्ञवल्क्यः** (आ. १९५)
" मुखजा विप्रुषो मेध्यास्तथाचमनबिंदवः । श्मश्रु चास्यगतं दंतसक्तं त्यक्त्वा ततः शुचिः " ॥ इति ।
अस्यार्थः । मुखनिःसृता लालाबिंदवो मेध्याः नोच्छिष्टं कुर्वंति । अंगे अनिपतिताश्चेत् । तथाचमने ये बिंदवः पादौ स्पृशंति ते मेध्याः । श्मश्रु चास्य प्रविष्टं उच्छिष्टं न करोति । दंतसक्तं चान्नादिकं स्वयमेव च्युतं दंतात् त्यक्त्वा शुचिर्भवति । अच्युतं तु दंतसममिति ।

अत्र **गौतमः** (१।४४)–"न मुख्या विप्रुष उच्छिष्टं कुर्वंति न चेदंगे निपतंति " **इति** । अतो नात्राचामेदिति भावः । अङ्गस्पर्शे तु मलस्पर्शनिमित्ताचमनं भवत्येव ।

आपस्तंबस्तु (१।५।१६।१२-१३) "य आस्याद्बिंदवः पतंत उपलभ्यंते तेष्वाचमनं विहितं भूमौ[1] न तेष्वाचामेदित्येके" इति। अस्यार्थः। भाषमाणस्यास्याद् बिंदवः पतंतो ये लालाबिंदव उपलभ्यंते चक्षुषा स्पर्शनेन वा तेष्वाचमनं विहितम्। ये भूमौ बिन्दवो निपतन्ति न शरीरे तेषु नाचामेदित्येके मन्यन्त इति। वेदोच्चारणे तु **गौतमः** —"मन्त्रब्राह्मणमुच्चारयतो ये बिन्दवः शरीरे उपलभ्यंते तेष्वाचमनम्" इति। **मनुः** (५।१४०):—

"नोच्छिष्टं कुर्वते मुख्याः विप्रुषोऽगं न यांति याः। न श्मश्रूणि गतान्यास्यं न दंतांतरविष्टितम्"॥ इति।

स्मृत्यर्थसारे—

"मुखजा[2] विप्रुषः सूक्ष्माः शुद्धाः स्वाश्च पराश्च याः। स्थूलाश्च विप्रुषः शुद्धाः यद्यंगे न पतंति ताः॥
"अंगपाते तु प्रक्षाल्य आचामेच्च परस्य च। वेदाभ्यासे मुखाज्जाताः शुद्धा एव तु सर्वदा"॥इति।

आचमनबिंदवस्त्वंगस्पृष्टा अपि मेध्याः। तथा च **मनुः** (५।१४१)—

"स्पृशंति बिंदवः पादौ य आचामयतः परान्। भूमिगैस्ते समा ज्ञेया न तैरप्रयतो भवेत्"॥ इति।

अत्र परानाचामयतः पादाविति संबंधः। **बोधायनोऽपि** (१।५।८९)—

"स्पृशंति बिंदवः पादौ य आचामयतः[3] परान्। न तैरुच्छिष्टभावः स्यात्तुल्यास्ते भूमिगैः सह"॥ इति।

पादग्रहणमवयवांतरस्याप्युपलक्षणार्थम्। तथा च **यमः**—

"प्रयांत्याचामतो याश्च शरीरे विप्रुषो नृणाम्। उच्छिष्टदोषो नास्त्यत्र भूमिगैस्ते तु ताः स्मृताः"॥इति।

श्मश्रुविषये विशेषमाह **आपस्तंबः** (१।५।१६।११)— "न श्मश्रुभिरुच्छिष्टो भवत्यंतरास्ये सद्भिर्यावन्न हस्तेनोपस्पृशंति" इति। अस्मादेव प्रतिषेधात् ज्ञायते यत्किंचिदपि द्रव्यमन्तरास्ये सदुच्छिष्टताया निमित्तमिति। दंतलग्नविषये **बोधायनः** (१।५।१९)—

"दंतवद्दंतलग्नेषु दंतसक्तेषु धारणम्। स्रस्तेषु[4] तेषु नाचामेत्तेषां संस्थानवच्छुचिः"॥ इति।

दंतलग्नदंतसक्तयोर्निर्हार्यानिहार्यरूपेण भेदः। अत एव **देवलः**—

"भोजने दन्तलग्नानि निर्हृत्याचमनं चरेत्। न तत्र बहुशः कुर्याद्यत्नमुद्धरणे पुनः॥
"भवेदाशौचमत्यथ तृणवेधावणे कृते"॥ इति। स्रस्तेषु स्वस्थानाच्च्युतेष्वित्यर्थः।

तत्र **मनुः**—

"दंतवद्दंतलग्नेषु जिव्हास्पर्शे शुचिर्न तु। परिच्युतेष्ववस्थानान्निगिरन्नेव तच्छुचिः"॥ इति।

निगिरन् न प्रवेशयन्नित्यर्थः। एवकारस्त्वाचमननिवृत्त्यर्थः। एतच्च निगरणं **याज्ञवल्क्येनो**क्तेन त्यागेन विकल्पते। केचित् जिव्हाभिमर्शनेऽपि यावच्च्युतिर्न भवति तावच्छुचिरित्याहुः। यथाह **गौतमः** (१।४१–४३)—"दंतश्लिष्टेषु दंतवदन्यत्र जिव्हाभिमर्शनात्प्राक्च्युतेरित्येके च्युतेष्वास्रावविद्यान्निगिरन्नेव तच्छुचिः" इति। च्युतेषु स्वस्थानान्निर्गतेषु आस्राव आस्यजलं तद्वन्निगरन्नेव शुचिरित्यर्थः। 'दंतश्लिष्टेषु दंतवत्' इत्येतच्च रसानुपलब्धौ वेदितव्यम्। यदाह **शंखः**—"दंतवद्दंतलग्नेषु रसवर्जमन्यत्र जिव्हाभिमर्शनात्" इति। एवं च यद्रसहीनजिव्हास्पष्टमनिर्हार्यं च तद्दंतवन्निर्हरणे आचमनम्। स्वयं च्युतेषु त्यागो निगरणं वा नाचमनमित्युक्तं भवति। **स्मृत्यर्थसारे** तु "दंतवद्दंतलग्नं रसाज्ञानेन[5] शुद्धं जिव्हया स्पर्शे अशुद्धम्। तत्र स्पर्शस्थानाच्च्युते च निगरन् संत्यजन्वा कर्णं स्पृशेत्। यद्वा निगीर्य कर्णं स्पृशेत्। त्यक्त्वाचामेत्।

"रसज्ञाने तु निर्हृत्य द्विराचमनमिष्यते। आस्यं संशोधयेद्यत्नाद्दंतांश्च मृदुयत्नतः॥
"दंतवेधे महत्पापं रक्तं मद्यसमं स्मृतम्। एवं कृते यत्स्थितं तन्न च दोषाय सर्वदा॥

---

१ क्ष-भूमिगतेष्वा। २ ख-मुखजा। ३ ग-चमयतो। ४ क्ष-स्रस्ते सक्तेषु। ५ खग-रसज्ञानेन।

" अन्यच्चास्यगतं चैवमाचांतेत्यवशिष्टकम् " ॥ इति । अत्र **बोधायनः** (१।५।२०)—
" दंतवद्दंतलग्नेषु यच्चाप्यंतर्मुखे भवेत् । आचांतस्यावशिष्टं स्यान्निगिरन्नेव तच्छुचिः " ॥
अत्र **शातातपः**—
"दंतलग्ने फले मूले भुक्तस्नेहे तथैव च । तांबूले चेक्षुखंडे च नोच्छिष्टो भवति द्विजः" ॥ इति ।
षट्त्रिंशन्मते—
" ताम्बूले चैव सोमे च भुक्तस्नेहावशिष्टके । दन्तलग्नस्य संस्पर्शे नोच्छिष्टस्तु भवेन्नरः ॥
"त्वग्भिः पत्रैर्मूलपुष्पैः तृणकाष्ठमयैस्तथा । सुगन्धिभिस्तथा द्रव्यैर्नोच्छिष्टो भवति द्विजः"॥ इति ।
'दंतलग्नसंस्पर्शे' इति अनिर्हार्यस्य दंतलग्नस्य जिव्हया संस्पर्शे सतीत्यर्थः ।
अत्यंतानिर्हार्यस्य भुक्तस्नेहविषये **देवलः**—

"भुक्त्वाचामेद्यथोक्तेन विधानेन समाहितः । शोधयेन्मुखहस्तौ च मृदद्भिर्घर्षणैरपि"॥ इति ।

अत्रिः—

"मधुपर्के च सोमे च अप्सु प्राणाहुतीषु च । नोच्छिष्टदोषस्तु भवेदत्रेस्तु वचनं यथा" ॥
अप्सु अमृतापिधानमसीत्यादिषु उच्छिष्टस्य मंत्रोच्चारणे दोषो नास्तीत्यर्थः। **वसिष्ठोऽपि** (   )
" प्राणाहुतीषु सोमे च मधुपर्के तथैव च । आस्यहोमेषु सर्वेषु नोच्छिष्टो भवति द्विजः" ॥ इति ।
मार्कंडेयः—
" आम्रेक्षुखंडतांबूलचर्वणे सोमपानके । विष्ण्वंघ्रितोयपाने च नाद्यन्ताचमनं स्मृतम् ॥
" विष्णुपादोद्भवं तीर्थं पीत्वा न क्षालयेत् करम् " ॥ इति । **व्यासोऽपि**—

" मधुपर्के च सोमे च तांबूलस्य च भक्षणे । फलमूलेक्षुदंडेषु न दोषं प्राह वै मनुः " ॥

स्मृत्यर्थसारेऽपि—

" अस्नेहौषधे जग्धे तथैवांगोपलेपने । तांबूले क्रमुके चैव भुक्तस्नेहानुलेपने ॥

" इक्षुदंडे तिले मूले पत्रपुष्पफलेषु च । तथा त्वक्तृणकाष्ठेषु नाचामेदामभक्षणे ॥

" मधुपर्के च सोमे च प्राणाहुतिषु चाप्सु च । आस्यहोमेषु सर्वेषु नोच्छिष्टो भवति द्विजः " ॥
द्रव्यहस्तोच्छिष्टविषये **मनुः** (५।१४२)—

" उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथंचन । अनिधायैव तद्द्रव्यमाचांतः शुचितामियात्"॥

द्रव्यमत्रानभ्यवहार्यं वस्त्रादिः । **मार्कंडेयोऽत्र** विकल्पमाह—

"उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथंचन । आचम्य द्रव्यमभ्युक्ष्य पुनरादातुमर्हति "॥

व्यासोऽपि—

" यद्यमत्रं समादाय भवेदुच्छेषणान्वितः । अनिधायैव तद्द्रव्यमाचांतः शुचितामियात् ॥
"तैजसं द्रव्यमादाय यदुच्छिष्टो भवेत् द्विजः। भूमौ निक्षिप्य तत् द्रव्यमाचम्याभ्युक्षयेत्तु तत् ॥
" वस्त्रादिषु विकल्पः स्यात्तत्स्पृष्टावेवमेव हि " ॥ वस्त्रादिसहितस्योच्छिष्टस्पृष्टौ निधानमनिधानं वा कार्यमित्यर्थः । **बोधायनोऽपि** (१।५।२२–२४)—" तैजसं चेदादायोच्छिष्टः स्यात्तदुदस्याचम्यादास्यन्नद्भिः प्रोक्षेदथ चेदन्नेनोच्छिष्टः स्यात्तदुदस्याचम्यादास्यन्नद्भिः प्रोक्षेदथ चेदद्भिरुच्छिष्टी स्यात्तदुदस्याचम्यादास्यन्नद्भिः प्रोक्षेदेतदेव विपरीतममत्रे " इति ।
उदस्यानिधायेत्यर्थः । विपरीतमनुदस्येति यावत् । अभ्यवहार्ये **वशिष्ठः**—

१ खग–अस्निग्ध

" प्रचरन्नभ्यवहार्येषु उच्छिष्टं यदि संस्पृशेत् । भूमौ निक्षिप्य तद्द्रव्यमाचम्य प्रचरेत्पुनः " ॥

अभ्यवहार्येष्वन्नपानादिषु प्रचरन् परिवेषणं कुर्वन्नित्यर्थः । **बृहस्पतिरपि**—

" प्रचरन्नन्नपानेषु यद्योच्छिष्टमुपस्पृशेत् । भूमौ निधाय तद्द्रव्यं आचांतः प्रचरेत्पुनः" ॥ इति । **गौतमोऽपि**—(५।२७) " द्रव्यहस्त उच्छिष्टो निधायाचामेत् " इति । द्रव्यमभ्यवहार्यम् । अत्र विशेषमाहतुः **शंखलिखितौ**—"द्रव्यहस्त उच्छिष्टो निधायाचम्याभ्युक्षेत् द्रव्यम्"॥ इति । **हारीतोऽपि**—

"उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथंचन । भूमौ निधाय तद्द्रव्यमाचम्याभ्युक्षणाच्छुचिः"॥ इति।

द्रव्यस्यैव साक्षादुच्छिष्टत्वे तत्परित्यागमाह **वसिष्ठः** (४१।२०)—"उच्छिष्टमगुरोरभोज्यं स्वयमुच्छिष्टोपहतं च " इति । पक्वान्नमादाय मूत्रादिकरणे श्लोका**पस्तंबः**—

"भूमौ निक्षिप्य तद्द्रव्यं शौचं कृत्वा यथाविधि । उत्संगोपात्तपक्वान्न उपस्पृश्य ततः शुचिः"॥इति ।

एतदापद्यशक्यनिधानद्रव्यविषयम् ।

" अरण्येऽनुदके रात्रौ चौरव्याघ्राकुले पथि । कृत्वा मूत्रं पुरीषं वा द्रव्यहस्तो न दुष्यति " ॥

इति **बृहस्पतिस्मरणात्** । **मार्कंडेयस्तु** शौचमप्यनिधायैव कार्यमित्याह—

" पक्वान्नं तु समादाय मूत्रोच्चारं करोति यः । अनिधायैव तद्द्रव्यमंगे कृत्वा समाश्रितम् ॥
" शौचं कृत्वा यथान्यायं उपस्पृश्य यथाविधि । अन्नमभ्युक्षयेच्चैवमुद्धृत्यार्कस्य दर्शयेत् ॥
" त्यक्त्वा तद्ग्रासमात्रं वा शेषशुद्धिमवाप्नुयात् " ॥ इति ।

स्मृत्यर्थसारे— " वस्त्रादिसहित उच्छिष्टश्चेत्तदालभ्यांगे निधाय तत्सहित आचांतः शुध्येत् । निधाय वाचम्य वस्त्रादि प्रोक्षेत् । अन्नपानादिहस्त उच्छिष्टश्चेत् निधायाचम्य प्रोक्षेत् । अन्नादिरक्षाशक्तौ तदालभ्यांगे निधाय वाऽऽशौचाचमने कुर्यात्परिवेषणं कुर्वन्नुच्छिष्टान्नस्पृष्टौ अन्नं निधायाचम्य परिविष्यात् । परिवेषणं कुर्वन्मूत्राद्युच्छिष्टश्चेदन्नादि निधाय शौचाचमने कृत्वाऽन्नादि प्रोक्ष्य अग्निमर्कं वा संस्पृश्य परिविष्यात् । परिवेषणे रजो दृष्टौ तत्स्पृष्टान्नत्यागः" इति । एवं उक्तलक्षणस्य आचमनस्य प्रशंसामाह **व्याघ्रपादः**—

" य एवं ब्राह्मणो नित्यमुपस्पर्शं समाचरेत् । ब्रह्मादिस्तंबपर्यंतं जगत्स परितर्पयेत् " ॥

आचमनाकरणे प्रत्यवायो दर्शितः **स्मृतिचंद्रिकायाम्** (पृ. ९९ पं. २१)—

"यः क्रियाः कुरुते मोहात् अनाचम्यैव नास्तिकः । भवंति हि वृथा तस्य क्रियाः सर्वा न संशयः"॥इति।

इत्याचमनप्रकरणम् ॥

अथ **दंतधावनविधिः** । तत्र **अत्रिः**

" मुखे पर्युषिते नित्यं भवत्यप्रयतो नरः । तदार्द्रकाष्ठं शुष्कं वा भक्षयेद्दंतधावने " ॥

भरद्वाजः—

" प्रक्षाल्य चरणौ हस्तौ मुखं चाथ यथाविधि । आचम्य प्राङ्मुखः स्थित्वा दंतधावनमाचरेत् ॥
" आयुरित्यादिमंत्रोऽयमुक्तः शाखाभिमंत्रणे । विनाऽभिमंत्रणं तूष्णीं वृथा स्याद्दंतधावनम् ॥
" अस्य प्रजापतिर्ऋषिः छंदोऽनुष्टुप् वनस्पतिः । देवतेति हृदि स्मृत्वा मंत्रारंभे वदेद् बुधः " ॥

बोधायनोपि—

" उत्थाय नेत्रे प्रक्षाल्य शुचिर्भूत्वा समाहितः । परिजप्य च मंत्रेण भक्षयेद्दंतधावनम्" ॥

मंत्रोऽपि—

"आयुर्बलं यशो वर्चः प्रजां पशुवसूनि च । ब्रह्म प्रज्ञां च मेधां च त्वं नो देहि वनस्पते" ॥ इति ।
" अभिमंत्र्य हृतां शाखां मंत्रेणानेन वै द्विजः । अथ ऊर्ध्वक्रमेणैव धावयेच्छाखया तया ॥
" वामभागं समारभ्य प्रादक्षिण्यक्रमेण तु " ॥

व्यासः— " प्रक्षाल्य पादौ हस्तौ च मुखं चाद्भिः समाहितः ।
" दक्षिणं बाहुमुद्धृत्य कृत्वा जान्वन्तरं ततः । आचम्य प्राङ्मुखः पश्चाद्दंतधावनमाचरेत् " ॥

शांडिल्यः—

" बाहू जान्वंतरा कृत्वा कुक्कुटासनसंस्थितः । तर्पणाचामनोल्लेख्य दंतशुद्धिं समाचरेत् " ॥

याज्ञवल्क्यः (आ. ९८)—

" शरीरचिंतां निर्वर्त्य कृतशौचविधिर्द्विजः । प्रातःसंध्यामुपासीत दंतधावनपूर्विकाम् ॥
" कंटकीक्षीरवृक्षोत्थद्वादशांगुलमव्रणम् । कनिष्ठिकाग्रवत्स्थूलं पूर्वार्धकृतकूर्चकम् ॥
" दंतधावनमुद्दिष्टं जिव्हालेखनिका तथा " ॥ **विष्णुः**—
" वितस्तिमात्रमृजु च कीटाग्निभिरदूषितम् । प्राङ्मुखस्तूपविष्टस्तु भक्षयेत् वाग्यतोऽत्वरः " ॥

स्मृत्यन्तरे—

"शाखां विदार्य तस्यास्तु भागेनैकेन वर्जयेत् । जिव्हां ततो द्वितीयेन गृहस्थश्च यतिस्तथा" ॥ इति ।

हारीतः—

" सर्वे कंटकिनः पुण्याः क्षीरिणश्च यशस्कराः । अष्टांगुलेन मानेन दंतकाष्ठमिहोच्यते ॥
" प्रादेशमात्रमथ वा तेन दंतान्विशोधयेत् । खादिरश्च कदंबश्च करञ्जः कुरवस्तथा[1] ॥
" त्रसिनी[2] वेणुपृश्नी च जंबुर्निंबस्तथैव च । अपामार्गश्च बिल्वश्च अर्कश्चोदुंबरस्तथा ॥
" एते प्रशस्ताः कथिता दंतधावनकर्माणि " ॥ **शौनकः**—
" विज्ञातवृक्षं क्षुण्णाग्रमृजु दुर्गंधवर्जितम् । सत्वक्तु दंतकाष्ठं स्यात्तदग्रेण प्रधावयेत् " ॥

अंगिराः—

" आम्रपुंनागबिल्वानामपामार्गशिरीषयोः । भक्षयेत्प्रातरुत्थाय वाग्यतो दंतधावनम् " ॥ इति ।

व्यासः—

" प्रक्षाल्य दंतकाष्ठं वा भक्षयेत्तु विधानतः । मध्यांगुलिसमस्थैल्यं द्वादशांगुलिसंमितम् ॥
" सत्वचं दंतकाष्ठं स्यात्तस्याग्रेण तु धावयेत् ।
" क्षीरवृक्षसमुद्भूतं मालतीसंभवं शुभम् । अपामार्गं च बिल्वं च करवीरं विशेषतः ॥
" तिक्तं कषायं कटुकं सुगंधं कटुकान्वितम् । क्षीरिणो वृक्षगुल्मादीन्भक्षयेद्दंतधावनम् ॥
" वर्जयित्वा निषिद्धानि गृहीत्वैकं यथोदितम् । परिहृत्य दिनं पापं धावयेत्तु विधानतः ॥
"नोत्पाटयेद्दंतकाष्ठं नांगुल्या धावयेत्क्वचित् । प्रक्षाल्य भुक्त्वा तज्जह्याच्छुचौ देशे समाहितः" ॥

अत्रिः—

" अंगुल्या दंतकाष्ठं च प्रत्यक्षलवणं तथा । मृत्तिकाभक्षणं चैव तुल्यं गोमांसभक्षणे " ॥

उशनाः—" नांगुलीभिर्दंतान्प्रक्षालयेत् " इति । **विष्णुः**—
" सुसूक्ष्मं सूक्ष्मदंतस्य मध्यदंतस्य मध्यमम् । स्थूलं विषमदंतस्य त्रिविधं दंतधावनम् ॥
" द्वादशांगुलिको विप्रे काष्ठमाहुर्मनीषिणः । क्षत्रविट्शूद्रजातीनां नवषट्चतुरंगुलम्[3] " ॥

---

१ ख–करज । २ क्ष–त्रसरी । ३ क्ष–सम ।

गर्गः—
" दशांगुलं तु विप्राणां क्षत्रियाणां नवांगुलम्। अष्टांगुलं तु वैश्यानां शूद्राणां सप्तसंमितम् ॥
" चतुरंगुलमानं तु नारीणां नात्र संशयः " ॥ **मार्कंडेयः**—
" वटासनार्कखदिरकरवीरांकरंजकम्। दाडिमापार्गमालतीककुभबिल्वानामन्यतमम् " ॥ इति।
भक्षयेदिति शेषः। एतेषु फलमाह **गर्गः**—
" सर्जे धैर्यं वटे दीप्तिः करंजे विजयो रणे। प्लक्षे चैवार्थसंपत्तिः बदर्यां मधुरस्वनः ॥
" खदिरे चैव सौगंध्यं बिल्वे तु विपुलं धनम्। औदुंबरे वाक्यसिद्धिर्वधूके च दृढा श्रुतिः ॥
" पौण्ड्रे च कीर्तिसौभाग्यं पालाशे सिद्धिरुत्तमा। कदंबे च तथा लक्ष्मीराम्रे चारोग्यमेव च ॥
" अपामार्गे धृतिर्मेधा प्रज्ञा शक्तिर्वपुः श्रुतिः। आयुः शीलं यशो लक्ष्मीः सौभाग्यं चोपजायते ॥
" अर्केण हंति रोगांस्तु बीजपूरेण तु व्यथाम्। ककुभेन तथाऽयुष्मान् भवेत्पलितवर्जितः ॥
" दाडिमे सिंदुवारे च कुब्जके ककुभे तथा। जाती च करमर्दी च दुःस्वप्नं चैव नाशयेत् " ॥
मार्कंडेयः—
" सर्वे कंटकिनः पुण्याः क्षीरिणश्च यशस्विनः। उदुंबरेण वाक्सिद्धिर्भवेत्प्लक्षेण वै धनम् ॥
" अर्जुनेन निरोगत्वं वटेन महतीं श्रियम्। अपामार्गेण सर्वर्द्धिः स्त्रीवश्यं च प्रियंगुभिः।
" वेणुना चाप्नुयाद्भावः राजवृक्षाज्जयं लभेत्। चूतेन नृपपूजा स्यात् सौभाग्यं पनसेन तु ॥
" दीर्घायुर्जंबुना चेष्टे सिद्धिः स्यादणुजंबुना। जयं कंटकवृक्षात्तु फलं वै कंकताल्लभेत् ॥
" आरोग्यं कर्णिकारेण पारंत्या शौर्यमुत्तमम्। अशोकेन विशोकः स्यात् लवंकाब्रह्मवर्चसम् ॥
" खदिरादखिलान्कामान् लभेदतिशयो महान्। वाग्यतो निमृजेद्दंतान् दंतमासमपीडयन् ॥
" जिव्हामलं समुदितं दन्तांतरितमेव च। राक्षस्यामुत्सृजेत्काष्ठं दिशि निर्मृज्य तच्छुचौ ॥
" दंतधावनकाष्ठं तु येनोत्सृष्टं तदंततः। स मृष्टाहारमाप्नोति पतत्यभिमुखं यदि " ॥ इति।
व्यासोऽपि—
" प्रक्षाल्य च शुचौ देशे दंतधावनमुत्सृजेत्। पतितेऽभिमुखे सम्यक् भोज्यमाप्नोत्यभीप्सितम् " ॥ इति।
स एव—
" वर्जयेद्दंतकाष्ठानि वर्जनीयानि नित्यशः। वर्जयेत् शास्त्रदुष्टानि पर्वस्वपि च वर्जयेत् " ॥ इति।
वर्जनीयान्याह **मार्कंडेयः**—
" शाल्मल्यश्वत्थभव्यानां धवकिंशुकयोरपि। कोविदारशमीपीलुश्लेष्मातकबिभीतकान् ॥
" वर्जयेद्दंतकाष्ठेषु गुग्गुलं क्रमुकं तथा " ॥ **उशनाः**—
" दक्षिणाभिमुखो नाद्यान्नीलबंधुकदंबकम्[1]। तिंदुकेंगुदबंधूकमोचामरजबल्वजम्[2] ॥
" कार्पासं दंतकाष्ठं च विष्णोरपि हरेच्छ्रियम् ॥
" न भक्षयेत पालाशं कार्पासं शाकमेव च। एतानि भक्षयेद्यस्तु क्षीणपुण्यः स वै नरः " ॥
हारीतोऽपि— " कालेयपालाशकोविदारश्लेष्मातकबिल्वकाशार्कनिर्गुंडिशिखाण्डिशिरीषमालती-करवीरबदरीकरंजवेणुवर्जम् " इति। **गर्गः**—
" कुशं काशं पलाशं च शिंशुपान्यस्तु भक्षयेत्। तावद्भवति चंडालो यावद्गां नैव पश्यति " ॥
वसिष्ठः— " अज्ञातपूर्वाणि न दन्तकाष्ठान्यद्यान्न पत्रैश्च समन्वितानि।
" न युग्मपर्णानि न पाटितानि न चार्द्रशुष्काणि न चात्वचानि " ॥ इति।

---

१ क्ष-बिका। २ ग-के दुष्ट।

चंद्रिकायाम् (पृ. १०६ पं. १९)—
"त्याज्यं सपत्रमज्ञातमूर्ध्वशुष्कं च पाटितम् । त्वग्घीनं ग्रंथिसंयुक्तं तथा पालाशशिंशुपम्"॥ इति ।
स्मृत्यर्थसारे— "शाल्मल्यरिष्टभव्यकिंशुकपीलुकबिभीतकगुग्गुलून्[1]पाकांबष्ठतिंदुद्कमधूकेंगुद्धुत्तूरपारिभद्राम्लिकाश्च वर्ज्याः ॥
" आसने शयने याने पादुके दंतधावने । पालाशाश्वत्थकौ वर्ज्यौ सर्वकुत्सितकर्मसु "॥ इति ।
देवलः—
"आसनानि न कुर्वीत मृत्तिकाश्वत्थगोमयैः । पालाशेन विशेषेण दंतधावनमेव च"॥ इति ।
आपस्तंबोऽपि (१।१।१।३२।९)— " पालाशमासनं पादुके दंतप्रक्षालनं वर्जयेत् " इति । एतेषु केषुचिद्विहितत्वात् प्रतिषिद्धत्वाच्च विकल्पो वेदितव्यः । तथा च **स्मृत्यर्थसारे**—
" कोविदारशमीक्षारश्लेष्मातकपलाशकाः । निर्गुंडीशिंशुपाः शाकाः कदंबककुभा वटाः ॥
" विहिताः प्रतिषिद्धाः स्युरिमे तस्माद्विकल्पिताः " ॥ इति । **पारिजाते**—
" तृणराजसमुत्पन्नैर्न कुर्याद्दंतधावनम् । नरश्चंडालयोनिः स्याद्यावद्गां नैव पश्यति ॥
" गुडाकतालहिंतालकेतक्यश्च महावटः । खर्जूरो नारिकेरश्च सप्तैते तृणराजकाः " ॥ **स्मृत्यंतरे**—
" तृणराजाव्हयस्तालो नारिकेरस्तु लांगली । खर्जूरः केतकी पूगो हिंतालश्च महावटः "॥ इति ।
अत्र दिङ्नियममाह **मार्कंडेयः**—" उदङ्मुखः प्राङ्मुखो वा कषायं तिक्तकं तथा "॥ इति । दंतकाष्ठं भक्षयेदिति शेषः । **आश्वलायनः**– "प्राग्वोदङ्मुख आसीनः प्रागुदङ्मुख एव वा"॥
शौनकः—
"दंतानां धावनं कुर्यात् वाग्यतः सोमदिङ्मुखः । प्रक्षाल्य भङ्क्त्वा तज्जह्यात् शुचौ देशे समाहितः"॥ इति । **मार्कंडेयः**– " प्रतीची दक्षिणाशां च वर्जयेद्दंतधावने " ॥ **कात्यायनः**–
" पूर्वामुखो धृतिं विद्यात् शरीरारोग्यमेव च । दक्षिणेन तथा क्रौर्यं पश्चिमेन पराजयम् ॥
"उत्तरेण गवां नाशं स्त्रीणां परिजनस्य च । पूर्वोत्तरे तु दिग्भागे सर्वान्कामानवाप्नुयात्"॥ इति ।
कालनियममाह **मार्कंडेयः**–
" प्रातर्भुक्त्वा च यतवाक् भक्षयेद्दंतधावनम् । प्रक्षाल्य भक्षयेत्पूर्वं प्रक्षाल्यैव च संत्यजेत् " ॥
यत्तु **व्यासेनोक्तम्**—
"यो मोहात्स्नानवेलायां भक्षयेद्दंतधावनम् । निराशास्तस्य गच्छंति देवताः पितृभिः सह " ॥ इति तन्मध्यान्हस्नानविषयम् । "प्रातस्नानं तु कुर्वीत दंतधावनपूर्वकम्" इति **दक्षस्मरणात्** (२।१०)।
अत्र दंतधावनवर्ज्यकालमाह **विष्णुः**—
" प्रतिपत्पर्वषष्ठीषु चतुर्दश्यष्टमीषु च । नवम्यां भानुवारे च दंतकाष्ठं विवर्जयेत्"॥ इति ।
यमोऽपि—
"चतुर्दश्यष्टमी दर्शः पूर्णिमा संक्रमो रवेः । एषु स्त्रीतैलमांसानि दंतकाष्ठं च वर्जयेत्"॥ इति।
चंद्रिकायाम् (पृ १०५ पं ७)—
" प्रतिपत्पर्वषष्ठीषु नवम्यामष्टमीतिथौ । दंतानां काष्ठसंयोगो दहत्या सप्तमं कुलम् ॥
" श्राद्धे जन्मदिने चैव विवाहे जीर्णदूषिते । व्रते चैवोपवासे च वर्जयेद्दंतधावनम् "॥ इति।
व्यासोऽपि—
"श्राद्धे यज्ञे च नियमे पत्यौ च प्रोषिते रवेः । वारे पाते च संक्रांतिनंदभूताष्टपर्वसु ॥

---

१ क्ष–रुवा ।

" तैलाभ्यंगं रतिं मांसं दंतकाष्ठं च वर्जयेत् " ॥

स्मृत्यंतरे—"अष्टम्यां च चतुर्दश्यां पंचदश्यां त्रिजन्मसु तैलमांसं व्यवायं च दंतकाष्ठं च वर्जयेत्" ॥

माधवीये—

" श्राद्धे यज्ञे च नियमे नाद्यात्प्रोषितभर्तृका । श्राद्धे कर्तुर्निषेधोऽत्र न तु भोक्तुः कदाचन " ॥ इति ।

स्मृत्यंतरे—

" उपवासदिने यो वै दंतधावनकृन्नरः । स घोरं नरकं याति व्याघ्रभक्षश्चतुर्युगम् " ॥

स्त्रिया विशेषमाह **मनुः**—

"पुष्पालंकारवस्त्राणि स्त्रिया धूपानुलेपनम् । उपवासेन दुष्यंति दंतधावनवर्जनम्" ॥ इति ।

वसिष्ठः—

"उपवासे तथा श्राद्धे न खादेत् दंतधावनम् । दंतानां काष्ठसंयोगो हंति सप्तकुलानि च" ॥ इति ।

दंतधावने प्रायश्चित्तमुक्तं **विष्णुपुराणे**[२]—

" श्राद्धोपवासदिवसे खादित्वा दंतधावनम् । गायत्र्या शतसंपूतमंबु प्राश्य विशुध्यति " ॥ इति ।

गार्ग्यः—

"दंतकाष्ठे त्वमावास्या तैलाभ्यंगे चतुर्दशी । अष्टमी ग्राम्यधर्मे च ज्वलंतमपि पातयेत्" ॥

ग्राम्यधर्मो मैथुनम् ।

" स्त्रीसंगं खादनं पानं स्वाध्यायं क्षौरकर्म च । न कुर्यात् दंतकाष्ठं च तैले तु शिरसि स्थिते" ॥

व्यासः—

" नद्यां देवालये गोष्ठे श्मशाने जलमध्यके । यागस्थाने शुचौ देशे न कुर्याद्दन्तधावनम् " ॥

शौनकः—

" अमायां तु न चाश्नीयात् दन्तकाष्ठं कथंचन । दन्तान् प्रक्षाल्य विसृजेत् गृहे चेत् तदमन्त्रकम् ॥

" अलाभे दंतकाष्ठानां प्रतिषिद्धदिनेष्वपि । अपां द्वादशगंडूषैः मुखे शुद्धिर्भविष्यति " ॥

व्यासः–" प्रतिपद्दर्शषष्ठीषु नवम्यां दंतधावनम् । पर्णैरन्यत्र काष्ठैस्तु जिव्होल्लेखं सदैव तु " ॥

अन्यत्रानिषिद्धदिनेषु सदा निषिद्धेष्वनिषिद्धेष्वपि काष्ठेनैव जिव्होल्लेखः कार्य इत्यर्थः ।

पैठीनसीः—" तृणपर्णोदकेनांगुल्या वा दंतान्धावयेत्प्रदेशिनीवर्जम् " इति । अङ्गुल्या अंगुष्ठानामिकाभ्याम् । तथा च **वृद्धयाज्ञवल्क्यः**—

" इष्टकालोष्टपाषाणैरितरांगुलिभिस्तथा । मुक्त्वा चानामिकांगुष्ठौ वर्जयेद्दंतधावनम् " ॥ इति ।

एवं च "नाङ्गुलिभिः दंतान्प्रक्षालयेत्" इत्यादीनि वचनानि अनामिकांगुष्ठव्यतिरिक्तविषयानि । " अंगुल्या दंतधावयेत् प्रदेशिनीवर्जम् " इति प्रदेशिनीग्रहणं निषिद्धांगुल्युपलक्षणार्थमित्यविरोध इति **स्मृतिचंद्रिकायाम्** (पृ. १०६ पं. २५) व्यवस्थापितम् । **स्मृत्यर्थसारे**—

" अंगुल्या धावयेद्दंतान् वर्जयेत्तु प्रदेशिनीम् । मध्यमानामिकांगुष्ठैर्दंतधावो भवत्यपि" ॥ इति ।

कालादर्शे—

"अलाभे वा निषिद्धे वा काष्ठानां दंतधावनम् । पर्णेनैव विशुद्धेन जिव्होल्लेखं च कारयेत्" ॥ इति ।

स्मृत्यंतरे—

" तृणपर्णैः सदा कुर्यादमामेकादशीं विना । तयोरपि च कुर्वीत जंबुप्लक्षाम्रपर्णकैः ॥

" विधवाकन्यकाब्रह्मचारिणामास्यशोधनम् " ॥

---

१ क्ष–मा । २ ग–विष्णुरहस्ये ।

भरद्वाजः"–यावंतो नियमाः प्रोक्ताः द्विजश्रेष्ठस्य भुंजतः । तावंतः प्रेक्ष्य कर्तव्या दंतधावनकर्मणि ॥ "मुखशुद्धिं प्रयत्नेन कृत्वैवाहरहर्द्विजः । प्रातः संध्यामुपासीत तां विना न शुचिर्भवेत्" ॥इति ।

अथ स्नानविधिः । तत्र **शौनकः**—

"प्रातराचमनं कृत्वा शौचं कृत्वा यथार्थवत् । दंतशौचं तथा कृत्वा प्रातस्नानं समाचरेत्" ॥इति । अत्राचमनं कृत्वेति दंतशौचेऽपि संबध्यते । तथा च **कूर्मपुराणे**—

"प्रातस्तु दंतकाष्ठं वै भक्षयित्वा विधानतः । आचम्य प्रयतो नित्यं प्रातः स्नानं समाचरेत्" ॥इति ।

व्यासोऽपि—

"प्रातःकाले तु संप्राप्ते कृत्वा चावश्यकं बुधः । स्नायान्नदीषु शुद्धासु शौचं कृत्वा यथाविधि" ॥ इति ।

जाबालिः—

"सततं प्रातरुत्थाय दंतधावनपूर्वकम् । आचरेदुषसि स्नानं तर्पयेद्देवमानुषान्" ॥ इति ।

स्नानं प्रशंसति **योगयाज्ञवल्क्यः**—

"अगम्यागमनात्स्तेयात्पापेभ्यश्च प्रतिग्रहात् । रहस्याचरितात् पापान्मुच्यते स्नानमाचरन्" ॥इति ।
"मनः प्रासादजनकं रूपसौभाग्यवर्धनम् । शोकदुःस्वप्नहं स्नानं मोक्षदं ल्हादनं तथा ॥
"स्नानमूलाः क्रियाः सर्वाः श्रुतिस्मृत्युदिता नृणाम् । तस्मात्स्नानं निषेवेत श्रीपुष्ट्यारोग्यवर्धनम् ॥
"याम्यं हि यातनादुःखं प्रातःस्नायी न पश्यति" ॥ इति । **सत्यव्रतोऽपि**—
"बलं रूपो यशो धर्मो ज्ञानमायुः सुखं धृतिम् । आरोग्यं परमाप्नोति सम्यक्स्नानेन मानवः" ॥इति ।

दक्षः— (अ. २)

"क्षुभ्यंति हि सुषुप्तस्य इंद्रियाणि स्रवंति च । अंगानि समतां यांति ह्युत्तमान्यधमैः सह ॥
"अत्यंतमलिनः कायो नवच्छिद्रसमन्वितः । स्रवत्येव दिवारात्रं प्रातःस्नानं विशोधनम् ॥
"प्रातःस्नानं प्रशंसंति दृष्टादृष्टकरं हि तत् । अस्नात्वा नाचरेत्कर्म जपहोमादि किंचन ॥
"सर्वमर्हति शुद्धात्मा प्रातःस्नायी जपादिकम् ॥
"प्रातरुत्थाय यो विप्रः संध्यास्नानं समाचरेत् । सप्तजन्मकृतं पापं त्रिभिर्वर्षैर्व्यपोहति ॥
"गुणा दश स्नानपरस्य साधोः रूपं च तेजं च बलं च शौचम् ।
"आयुष्यमारोग्यमलोलुपत्वं दुःस्वप्ननाशश्च धृतिश्च मेधा ॥
"उपव्युषुसि यत्स्नानं संध्यायामुदितेऽपि वा । प्राजापत्येन तत्तुल्यं महापातकनाशनम्" ॥

अत्रिः—

"अस्नाताशी मलं भुंक्ते ह्यजपी पूयशोणितम् । अहुताशी कृमिं भुंक्ते अदाताऽश्नाति किल्बिषम्" ॥

व्यासोऽपि—

"प्रातः स्नानेन संशुद्धा येऽपि पापकृता जनाः । तस्मात्सर्वप्रयत्नेन प्रातःस्नानं समाचरेत् ॥
"ऋषीणामृषिता नित्यं प्रातःस्नानान्न संशयः ।
"मुखे सुप्तस्य सततं लालायाः संस्रवंति हि । ततो वै नाचरेत्कर्माण्यकृत्वा स्नानमादितः ॥
"अलक्ष्मी कालकंटी च दुःस्वप्नं दुर्विचिंतनम् । प्रातःस्नानेन पापानि पूयंते नात्र संशयः ॥
"न हि स्नानं विना पुंसां प्रायत्यं कर्मसु स्मृतम् । होमे जप्ये विशेषेण ततः स्नानं समाचरेत्" ॥ इति ।

स्मृत्यर्थसारेऽपि—

"संशोध्य दंतानाचम्य विधिवत्स्नानमाचरेत् । स्नानमूलाः क्रियाः सर्वाः श्रुतिस्मृत्युदिता नृणाम् ॥

---

१ क्ष–प्रोक्ष्य । २ क्ष–विषमश्रुते ।

" अस्नातस्तु पुमान्नार्हो जपहोमादिकर्मसु । प्रातर्मध्यान्हयोः स्नानं वानप्रस्थगृहस्थयोः ॥
" यतेस्त्रिषवणस्नानं सकृच्च ब्रह्मचारिणाम् । सर्वे वाऽपि सकृत्कुर्युरशक्तौ चोदकं विना ॥
"सामर्थ्ये चांबुसद्भावे यथाशास्त्रं हि तद्भवेत् । स्नानं च सर्ववर्णानां कार्यं शौचपुरःसरम्"॥ इति ।
वैयाघ्रपादोऽपि– " प्रातःस्नायी भवेन्नित्यं मध्यस्नायी भवेदिति " । **शौनकः**—
"उभयोः संध्ययोः स्नानं ब्राह्मणैश्च गृहाश्रितैः । तिसृष्वपि च संध्यासु स्नातव्यं तु तपस्विनाम्"॥
कात्यायनोऽपि—
" यथाहनि तथा प्रातर्नित्यं स्नायादतंद्रितः । दंतान्प्रक्षाल्य नद्यादौ गृहे चेत्तदमंत्रकम् "॥ इति ।
अमन्त्रकमिति मंत्रसंक्षेपोऽभिप्रेतः । यतः **स एवाह**—
" अल्पत्वाद्धोमकालस्य बहुत्वात् स्नानकर्मणः । प्रातः संक्षेपतः स्नानं होमलोपो विगर्हितः " ॥
व्याघ्रपादः—
" प्रातः संक्षेपतः स्नानं शौचार्थं तु तदिष्यते । मन्त्रैस्तु विधिवत्कार्यं मध्याह्ने तु सविस्तरम् "॥
स्नानप्रकारश्च चतुर्विंशतिमते दर्शितः—
" स्नानमब्दैवतैर्मंत्रैर्वारुणैश्च मृदा सह । कुर्याद्व्याहृतिभिर्वाऽथ यत्किंचेदमृचाऽपि च ॥
"द्रुपदादिवेति वा स्नायात् त्र्यम्बकायेति वा पुनः । पुण्यानि च स्मरेत्तीर्थान्युशना मुनिरब्रवीत्"॥
शौनकः—
" जलमध्ये स्थितो विप्रः शुद्धभावो हरिं स्मरेत् । स्नात्वाऽऽचांतो वारिमग्नस्त्रिपठेदघमर्षणम् ॥
" ध्यायेन्नारायणं देवं स्नानादिषु च कर्मसु । प्रायश्चित्तेषु सर्वेषु मुच्यते दुष्कृतात्पुमान् " ॥
दक्षोऽपि—
" ध्यायेन्नारायणं देवं स्नानादिषु च कर्मसु । ब्रह्मलोकमवाप्नोति न चेहाजायते पुनः"॥
हारीतोऽपि—
"सोंऽतर्जलं प्रविश्याथ वाग्यतो नियमेन हि । हरिं संस्मृत्य मनसा मज्जयेच्चोरवज्जले " ॥ इति ।
मज्जयेच्छरीरामिति शेषः । **व्यासोपि**—
" आपो नारा इति प्रोक्तास्ता यदस्यायनं पुनः । तस्मान्नारायणं देवं स्नानकाले स्मरेद् बुधः"॥ इति ।
अखंडादर्शे—
"अप्रायत्यं निहन्त्येव स्नानेनैकेन मानवः । द्वितीयेन निमज्जेन निर्मलत्वं भजेद् ध्रुवम् ॥
" तृतीयेनातितृप्तिः स्यान्निमज्जनफलं त्विति " ॥ **आचारसारे**—"प्रातस्तीर्थोवगाहनमल्पेन वाक्येन मार्जनं व्याहृतिभिरेव प्राणायामो द्रुपदया वा " इति ।
स्मृत्यन्तरे—
" संकल्पः सूक्तपठनं मार्जनं चाघमर्षणम् । देवतातर्पणं चैव स्नानं पंचांगमुच्यते " ॥
' इदमापः प्रवहतेति ' व्याहृतिभिर्जलाभिमंत्रणम् । ' आपो हि ष्ठेति ' मार्जनम् । ' द्रुपदादिवेद्गायत्री तद्विष्णोः प्रणवैरघमर्षणेन ' स्नानत्रयम् " । इति **स्मृत्यर्थसारे**—
" प्रातःस्नानं सदा कुर्यात्कृष्णेनैवातुरः सदा । पादौ मुखं च प्रक्षाल्य सावित्रीं प्रणवं स्मरेत् ॥
" शिखां बध्वाऽऽचम्य तटं प्रक्षाल्य दर्भान्निधाय दर्भपाणिर्जलं दत्वा प्रयतांजलिः प्राङ्मुखोऽवगाह्य कक्षादि निमृज्य स्नात्वा द्विराचम्य दर्भपाणिरापोहिष्ठाद्यैरब्दैवतैर्मार्जनं कृत्वाऽघमर्षणं कुर्यात् । पुनः स्नात्वा द्विराचम्य तर्पणं कुर्यात् " ॥ इति ।

"अप्रवाहोदकस्नानं विप्रपादावनेजनम् । गायत्र्या जपमर्घ्यं च आदित्याभिमुखं चरेत् ॥
"स्रोतसोभिमुखः स्नायान्मार्जने चाघमर्षणे । अन्यत्रार्कमुखो रात्रौ प्रागुदङ्मुख एव वा ॥
"संध्यामुखस्तु संध्यायां दैवे देवोन्मुखस्तथा" ॥ इति च ।

कालनियममाह **जाबालिः**—" आचरेदुषसि स्नानं तर्पयेद्देवमानुषान् " ॥ इति । **विष्णुरपि** (६४।९)— "प्रातःस्नायादरुणकरग्रस्तां प्राचीमवलोक्य" इति । अरुणोदयलक्षणमाह **नारदः**—" चतस्रो घटिकाः प्रातः अरुणोदयनिश्चयः " इति । **स्कांदे**ऽपि—
"उदयात्प्राक्चतस्रस्तु नाडिका अरुणोदयः। तत्र स्नानं प्रशस्तं स्यात् स हि पुण्यतमः स्मृतः"॥इति ।
यत्तु **चतुर्विंशतिमते**ऽभिहितम्—
" उपष्युषसि यत्स्नानं संध्यायामुदितेऽपि वा । प्राजापत्येन तत्तुल्यं सर्वपापप्रणाशनम्" ॥ इति ।
तस्यार्थः **स्मृतिचंद्रिकामाधवीय**योर्वर्णितः (पृ. १११पं.१४) । यत्संध्यायां स्नानं तदुपष्युषसि यदि वोदिते उदयाभिमुख इत्यर्थः। उदयस्याप्युपरि स्नानं चेत् संध्याप्युत्कृष्येत स्नानपूर्वकत्वात् संध्यायाः । यदाह **विष्णुः** (६४।४०)—
"स्नातोऽधिकारी भवति दैवे पित्र्ये च कर्मणि । पवित्राणां तथा जप्ये दाने च विधिचोदिते " ॥
योगयाज्ञवल्क्यः— " प्रातः सह गोमयेन कुर्यान्मृदा मध्यंदिने सायं शुद्धाभिरद्भिर्न प्रातःस्नानात्प्राक् संध्यामुपासीत " इति । **दक्षो**ऽपि—
"स्नानमूलाः क्रियाः सर्वाः संध्योपासनमेव च । तस्मात्सर्वप्रयत्नेन स्नानं कुर्यात्समाहितः"॥इति ।
यद्येवं तर्ह्येतद्वचनबलादेव संध्याऽप्युत्कृष्यताम् । एवम् " संधौ संध्यामुपासीत नास्तगे नोद्गते रवौ " इति **योगयाज्ञवल्क्येन** तन्निषेधस्मरणात् । तथा
"रात्र्यंतयामनाडी द्वे संध्यादिः काल उच्यते । दर्शनाद्रविरेखायाः तदंतो मुनिभिः स्मृतः"॥इति
दक्षेण कालनियमाच्च । रविरेखाया दर्शनादुपलक्षितः कालः संध्यान्त इत्यर्थः । अत 'उदितेऽपि वा' इत्यस्य उदयाभिमुख इत्येवार्थो युक्त इति । **दक्षः**—
" स्नात्वाऽऽचमेद्यदा विप्रः पादौ कृत्वा जले स्थले । उभयोरप्यसौ शुद्धस्ततः कर्मक्षमो भवेत् ॥
" विन्यस्य दक्षिणं पादं जले वामपदं बहिः । उपवीती समाचामेद्विधिरेष सनातनः " ॥ इति ।

स्नानाङ्गतर्पणमुक्तं **माधवीये**—
" नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते । तर्पणं तु भवेत्तस्य अङ्गत्वेन प्रकीर्तितम्"॥
चतुर्विंशतिमतेऽपि—" स्नानादनंतरं तावत्तर्पयेत् पितृदेवताः " इति । **व्याघ्रो**ऽपि—
" स्नाने चैव तु सर्वत्र तर्पयेत्पितृदेवताः । काम्ये नित्ये विशेषेण तत्प्रकुर्यात्प्रयत्नतः " ॥
अकरणे दोषोऽपि **वसिष्ठेन** दर्शितः—
" नास्तिक्यभावाद्यस्तांस्तु न तर्पयति वै पितॄन् । पिबंति देहनिस्रावं पितरोऽस्य जलार्थिनः "॥
देहनिस्रावो[1] रुधिरम् । यत्तु **आपस्तंबेनोक्तम्**—
"अस्पृश्यस्पर्शने वांतावश्रुपाते क्षुरे तथा । स्नानं नैमित्तकं ज्ञेयं देवर्षिपितृवर्जितम्" ॥ इति। यदपि **स्मृत्यर्थसार**वचनम्—"अस्पृश्यस्पर्शनस्नाने नाघमर्षणतर्पणे"। इति तदस्पृश्यस्पर्शनादिनिमित्तप्राथमिकस्नाने तर्पणानिषेधपरम् । " शवानुगमने क्षौरे पुनःस्नानं विधीयत " इत्युक्तपुनःस्नाने ।
" स्नानार्हस्तु पुनस्तेन[2] त्रयोदश निमज्ज्य च । आचम्य प्रयतः पश्चात्स्नानं विधिवदाचरेत्"॥

---

१ 'स्नायी' इति मुद्रितपाठः । २ **खग**–निमित्तेन ।

इत्युक्तत्रयोदशनिमज्जनानंतरस्नाने च तर्पणं भवत्येव । "स्नाने चैव हि सर्वत्र तर्पयेत्" इति **स्मरणात्** । **यमः**—

"द्वौ हस्तौ युग्मतः कृत्वा पूरयेदुदकांजलिम् । गोशृंगमात्रमुद्धृत्य जलमध्ये जलं क्षिपेत्" ॥

यत्तु **व्याघ्रेणोक्तम्**—

"उभाभ्यामपि हस्ताभ्यामुदकं यः प्रयच्छति । स मूढो नरकं याति कालसूत्रमवाक्शिराः ॥" इति । तत् श्राद्धादावुदकदानविषयम् । यदाह **कार्ष्णाजिनिः**—

"श्राद्धे विवाहकाले च पाणिनैकेन दीयते । तर्पयेत्तूभयेनैव विधिरेष पुरातनः" ॥ इति ।

स्नातश्चार्द्रवासा जलस्थ एव देवर्षिपितृतर्पणं कुर्यात् । तथा च **नारायणः**—

"उपवीती बद्धशिखः समाचम्य यथाविधि । देवर्षीस्तर्पयेदप्सु पितृंश्चैव समाहितः" ॥ इति । अप्सु स्थित्वा तर्पयेदित्यर्थः । **विष्णुः** (६४।२४)–"स्नातश्चार्द्रवासा देवर्षिपितृतर्पणं अंभस्थ एव कुर्वीत" इति । **कार्ष्णाजिनः**—

"नाभिमात्रजले स्थित्वा चिंतयन्नूर्ध्वमानसः । देवान् देवगणांश्चापि ऋषीनृषिगणानपि ॥

"अथ कांडऋषीनेतानुदकांजलिभिः शुचिः । अव्यग्रस्तर्पयेन्नित्यं मंत्रैरेव स्वनामभिः ॥

"पितॄन् पितृगणांश्चापि नित्यं संतर्पयेत्ततः" ॥ इति । **भरद्वाजः**—

"तर्पणं देवतादिभ्यः स्वस्वतीर्थेन तर्पयेत् । गोशृंगमात्रमुद्धृत्य तर्पणे जलमुत्सृजेत् ॥

"येन तीर्थेन गृह्णीयात्तेन दद्याज्जलांजलिम् । अन्यतीर्थेन गृह्णीयात्तत्तोयं रुधिरं भवेत् ॥

"पूर्वाशाभिमुखो देवानुत्तराभिमुखस्त्वृषीन् । पितृंश्च दक्षिणास्यस्तु जलमध्ये तु तर्पयेत्" ॥

व्यासोऽपि—

"तर्पणं तु शुचिः कुर्यात्प्रत्यहं स्नातकस्त्विह । देवेभ्योऽथ ऋषिभ्योऽथ पितृभ्यश्च यथाक्रमम् ॥

"आदावोंकारमुच्चार्य नाम्नोंऽते तर्पयामि च । देवान्ब्रह्मर्षींश्चैव तर्पयेदक्षतोदकैः ॥

"पितृंस्तिलोदकैः स्वोक्तविधिना तर्पयेद्बुधः । यज्ञोपवीती देवानां निवीती ऋषितर्पणे ॥

"प्राचीनावीती पित्र्येषु स्वेन तीर्थेन तर्पयेत्" ॥ इति । **विष्णुपुराणे**—

"शुचिवस्त्रधरः स्नातो देवर्षिपितृतर्पणम् । तेषामेव हि तीर्थेन कुर्वीत सुसमाहितः ॥

"त्रिरपः प्रीणनार्थाय देवानामपवर्जयेत् । तथर्षीणां यथान्यायं सकृच्चापि प्रजापतेः ॥

"पितॄणां प्रीणनार्थाय त्रिरपः पृथिवीपते ॥

"पितामहेभ्यश्च तथा प्रीणयेत् प्रपितामहान् । मातामहाय तत्पित्रे तत्पित्रेच च समाहितः" ॥ इति ।

वृद्धमनुः—

"मनुष्यतर्पणे स्नानवस्त्रनिष्पीडने तथा । निवीती तु भवेद्विप्रस्तथा मूत्रपुरीषयोः ॥

"मानुषेष्वंसयोः सक्तं मैथुने पृष्ठभागिकम् । तर्पणेऽगुष्ठयोः सक्तं निवीतं त्रिविधं स्मृतम्" ॥ इति ।

प्रयोगपारिजाते— "प्राङ्मुख उपवीती ब्रह्मादीन् देवान्सकृत् सकृत्तर्पयित्वा अथोदङ्मुखो निवीती सयवाभिरद्भिः प्राजापत्येन तीर्थेन ऋषीन् द्विर्द्विःतर्पयित्वा अथ दक्षिणामुखः प्राचीनावीती पितृतीर्थेन सतिलाभिरद्भिस्त्रिस्त्रिस्तर्पयित्वा सोमः पितृमान्यमोंगिरस्वानग्निकव्यवाहनादय इति त्रिस्तर्पयेत् । एतत्स्नानांगतर्पणम्" ॥ इति । पितृतर्पणं प्रकृत्य **कृष्णाजिनिः**—

"नाभिमात्रे जले स्थित्वा चिंतयेदूर्ध्वमानसः । आगच्छंतु मे पितरो गृह्णन्त्वेतान् जलांजलीन् ॥

"पितृणामंबरस्थानामम्भस्थो दक्षिणामुखः। त्रींस्त्रीन् जलांजलीन् दद्यादुच्चैरुच्चरतान्बुधः"॥ इति। गृह्णन्त्वेतान् जलांजलीनिति चिंतयेदिति संबंधः। **सुमंतुः**—

"आकाशे निक्षिपेद्वारि जलस्थो दक्षिणामुखः। पितृणां स्थानमाकाशं दक्षिणा दिक् तथैव च"॥इति। **स्मृत्यर्थसारे**— "शुक्लैस्तिलैर्देवानुपवीती देवतीर्थेन प्राङ्मुखस्तर्पयेत्। शबलैस्तिलैः ऋषीन् निवीती कायेनोदकेनोदङ्मुखस्तर्पयेत्। आचार्यान्पितॄन्प्राचीनावीती पित्र्येण कृष्णतिलैः दक्षिणामुखस्तर्पयेत्। यद्वा शुद्धोदकैर्देवानृषींश्च पितॄंस्तिलैः सर्वान्वा सर्वतिलैस्तर्पयेत्। यद्वा देवानक्षतैस्तंडुलैः ऋषींस्तिलैः पितॄन्। देवानामेकैकमंजलिं दद्यात्। ऋषीणां द्वौ द्वौ। पितृणां त्रीन् त्रीन् स्वाचारप्राप्तैर्मंत्रैः।

"तिलाभावे स्वर्णरूप्यताम्रदर्भयुतोदकैः। खड्गमौक्तिकहस्तेन कार्यं वा पितृतर्पणम्॥

"न जीवत्पितृकः कृष्णैस्तिलैस्तर्पणमाचरेत्।

"हस्ताभ्यां रविवारे च जन्मर्क्षदिवसेषु च। गृहे निषिद्धं सतिलं तर्पणं तद्बहिर्भवेत्"॥ शोभनग्रहे शोभनदिने न तिलतर्पणं विवाहोपनयनचौलदिनेषु यथाक्रमं वर्षमर्धं तदर्धं च नैमित्तिकं न तिलतर्पणमिति। अत्र विशेषमाह **कौशिकः**—

"प्रातःस्नाने विशेषो यत्तद्धि नैव तिलैर्युतम्। नैमित्तिकं च काम्यं च तिलैरेव विधीयते"॥ इति। 'ऊर्जं वहन्तीरमृतम्' इति तर्पणं तीरे कुर्वन् पितृहन्ता भवेत्। देवर्षिपितृतर्पणानंतरं तीरे यक्ष्मतर्पणं विहितं **स्मृत्यंतरे**— "देवर्षितर्पणं कृत्वा यक्ष्माणं तर्पयेत्तटे॥

"यन्मया दूषितं तोयं शरीरमलसंचयात्। तद्दोषपरिहाराय यक्ष्माणं तर्पयाम्यहम्"॥ इति। **दक्षोऽपि**—

"स्नानांगतर्पणं कृत्वा यक्ष्माणो जलमाहरेत्। अन्यथा कुरुते यस्तु स्नानं तस्याफलं भवेत्"॥ इति। **योगयाज्ञवल्क्यः**—

"यावद्देवानृषींश्चैव पितॄन्वै यो न तर्पयेत्। तावन्न पीडयेद्वस्त्रं येन स्नातो भवेन्नरः॥

"निराशाः पितरो यांति स्नानवस्त्रे निपीडिते। तस्मान्न पीडयेद्वस्त्रमकृत्वा पितृतर्पणम्"॥

वृद्धवसिष्ठः—

"स्नानार्थमभिगच्छंतं देवाः पितृगणैः सह। वायुभूतास्तु गच्छंति तृषार्ताः सलिलार्थिनः॥

"निराशास्ते निवर्तंते वस्त्रनिष्पीडने कृते"॥ **शौनकः**—

"देवादींस्तर्पयेत्पूर्वं वस्त्रं संपीडयेत्परम्। उदकस्याप्रदानाद्धि स्नानवस्त्रं न पीडयेत्॥

"निष्पीडयति यः पूर्वं स्नानवस्त्रं तु तर्पणात्। निराशाः पितरस्तस्य यांति देवैः सहर्षिभिः"॥ इति। जलोत्तरणानंतरकृत्यमाह **भरद्वाजः**—

"वस्त्रोदकमपेक्षन्ते ये मृता दासकर्मिणः। तस्मात्सर्वप्रयत्नेन जलं भूमौ निपातयेत्"॥ इति उत्तीर्य कंचित्कालं तटे तिष्ठेदित्यर्थः। तथा च **संग्रहे**—

"स्नात्वा दूराज्जले तिष्ठेत्प्राचीनावीतवान् द्विजः। यावत्स्रवति देहांबुतूष्णीं भूतादितृप्तये॥

"स्नात्वानाच्छाद्य यस्तिष्ठेत्तस्याकंपयतस्तदा। ब्रह्महत्यादिपापानि कंपयंति न संशयः"॥ अत्रावस्थाने च विशेष उक्तः

"सुराबिंदुसमाः प्रोक्ताः पृष्ठतः केशबिंदवः। त एव पुरतः प्रोक्ताः सर्वतीर्थोपमा बुधैः"॥

चंद्रिकायाम्—(पृ. ११२ पं. ४)
" अवमृज्यान्न च स्नातो गात्राण्यंबरपाणिभिः। न च निर्धुनुयात्केशान् वासश्चैव न निर्धुनेत् " ॥
अत्र हेतुमाह **व्यासः**–
"तिस्रः कोट्यर्धकोटी च यावत्यङ्गरुहाणि वै। स्रवंति सर्वतीर्थानि तस्मान्न परिमार्जयेत्" ॥
गोभिलः—
" पिबंति शिरसो देवाः पिबंति पितरो मुखात् । मध्यतः सर्वगंधर्वा अधस्तात्सर्वजंतवः ॥
" सुराबिंदुसमं चांभः शिखायाः पृष्ठपातितम् । तदेव पुरतोवर्त्ति गंगाबिंदुसमं भवेत् " ॥
स्मृत्यंतरे—
"शिरोवारि शरीरांबु वस्त्रतोयं यथाक्रमात् । पिबंति देवा मुनयः पितरो ब्राह्मणस्य तु " ॥
जाबालिः—
"स्नानं कृत्वाऽर्द्रवासास्तु विण्मूत्रं कुरुते यदि। प्राणायामत्रयं कृत्वा पुनःस्नानेन शुध्यति"॥इति ।
ततः स्नानवस्त्रं निष्पीडयेत् । तथा च **पुलस्त्यः**—
" कृत्वा तर्पणमेवं तु समुत्तीर्य जलाशयात् । पीडयेत्स्नानशाटीं तु तट एव विचक्षणः"॥
चतुर्विंशतिमते—
" स्नानादनंतरं तावत्तर्पयेत्पितृदेवताः । उत्तीर्य पीडयेद्वस्त्रं संध्याकर्म ततःपरम् " ॥ इति ।
अत्र **स्मृत्यर्थसारे विशेषोऽभिहितः**–" जलादुत्तीर्य वस्त्रप्रांतं निष्पीड्यापः परिधानीयोत्तरीये धृत्वा स्नानवस्त्रं निष्पीड्याचम्य संध्यामुपासीत " इति । **स्मृत्यंतरे**—
"चतुःसंवेष्ट्य वासोंतं स्नातो निष्पीडयेत् स्थले। 'ये के चास्मत्कुले जाता' इति मन्त्रेण मानवः"॥
मन्त्रश्च **कार्ष्णाजिनिनोक्तः**—
" ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः । ते गृह्णंतु मया दत्तं वस्त्रनिष्पीडनोदकम्"॥
संवर्तः–" उत्तीर्य पीडयेद्वस्त्रं अपसव्यं यथाविधि " ॥ इति । **वृद्धमनुः**–
" वस्त्रं त्रिगुणितं यस्तु निष्पीडयति मूढधीः । वृथास्नानं भवेत्तस्य यश्चैवादशमंबुभिः" ॥ इति ।
यच्च वस्त्रमदशं यथा भवति तथा निष्पीडयति अंबुनि च निष्पीडयति तस्य स्नानं वृथेत्यर्थः ।
तथा च **प्रदीपिकायाम्**—
" जले मध्ये यदा कश्चित् ब्राह्मणो ज्ञानदुर्बलः । निष्पीडयति वस्त्राणि स्नानं तस्य वृथा भवेत् ॥
" वस्त्रं चतुर्गुणीकृत्य निष्पीड्य च जलाद्बहिः । वामप्रकोष्ठे निक्षिप्य द्विराचम्य विशुध्यति" ॥
जाबालिः—
" निष्पीडितं धौतवस्त्रं यदा स्कंधे विनिक्षिपेत् । तदासुरं भवेत्कर्म पुनः स्नानं विशोधनम् ॥
" अमंगलानि सर्वाणि आर्द्रवस्त्राणि यानि च । तस्मात्स्कन्धे क्वचिद्धीमानार्द्रवस्त्रं न धारयेत्" ॥
स्मृत्यंतरेऽपि—
"पादेन स्थापयेद्वस्त्रं स्कंधेन स्थापयेत्तथा । ब्राह्मणो द्वितयं चैव वर्जयेद्वस्त्रपीडने"॥ इति
वसिष्ठः—
"स्नानशाट्यां च दातव्या मृदस्तिस्रो विशुद्धये । उत्तीर्य तां च निष्पीड्य ततः शेषं समापयेत्"॥

---

१ ग-घ ।

स्मृतिसंग्रहे—

" निमज्ज्य देवर्षिपितॄन्संतर्प्याचम्य वाससः । खंडद्वयेन क्रमशो शिरोऽगं परिमार्जयेत् ॥
"स्नातो नांगानि संमृज्यात् स्नानशाट्या न पाणिना । न च निर्धुनुयात्केशान्न तिष्ठन्परिमार्जयेत्"॥

व्यासः—

" मार्जयेद्वस्त्रशेषेण नोत्तरीयेण वा शिरः । यदि प्रमादान्मृज्येत स पितॄन्पातयत्यधः" ॥ इति ।

शौनकः—

" स्नानवस्त्रेण यो विप्रः शरीरं परिमार्जयेत् । स्नानं वृथैव भवति पुनःस्नानेन शुध्यति"॥ इति ।

संवर्त्तः—

"स्नानवस्त्रेण हस्तेन यो द्विजोऽङ्गं प्रमार्जयेत् । वृथा भवति तत्स्नानं पुनःस्नानेन शुध्यति" ॥इति ।

इति **स्नानम्** । स्नानानंतरं वासः परिदध्यात् । तथा च **मत्स्यपुराणम्**—

" एवं स्नात्वा ततः पश्चादाचम्य तु विधानतः । उत्थाय वाससी शुक्ले शुद्धे तु परिधाय वै " द्विराचामेदिति शेषः । तथा च **व्याघ्रपादः**—"ततो वस्त्रद्वयं शुद्धं गृहीत्वा द्विरुपस्पृशेत्"॥ इति । अत्र विशेषमाह **व्यासः**—

" नोत्तरीयमधः कुर्यान्नोपर्यधस्त्यमंबरम् । नांतर्वासो विना जातु निवसेद्वसनं बुधः " ॥

चंद्रिकायाम् (पृ. ११२ पं.)—

"न चानुलिंपेदस्नात्वा स्नातो वासो न निर्धुनेत् । आर्द्र एव तु वासांसि स्नात्वा सेवेत मानवः"॥

अत्र **जाबालिः**—

"स्नात्वा निरस्य वस्त्रं तु जंघे शोध्ये मृदंभसा । अपवित्रीकृते ते हि कौपीनास्रावधारिणे" ॥इति।

अत्र हेत्वभिधानाज्जंघाग्रहणमपवित्रीकृतांगोपलक्षणार्थम् । अत एव **योगयाज्ञवल्क्यः**—

" स्नात्वैवं वाससी धौते अच्छिन्ने परिधाय च । प्रक्षाल्योरू मृदाऽद्भिश्च हस्तौ प्रक्षालयेत्ततः "॥

हारीतोऽपि—

" जलात्तीरं समासाद्य तत्र शुक्ले च वाससी । परिधायोत्तरीयं च कुर्यात्केशान् न धूनयेत् ॥
" ततः प्रक्षालयेत्पादौ मृत्तोयेन विचक्षणः " ॥ इति ।

आर्द्रवस्त्रविसर्जने विशेष उक्तः **संग्रहे**—

"स्नानं कृत्वाऽऽर्द्रवस्त्रं तु ऊर्ध्वमुद्धृत्य विक्षिपेत् । स्नानवस्त्रमधस्ताच्चेत् पुनः स्नानेन शुध्यति"॥इति।

एतद्वाप्यादिविषयम् । **स्मृत्यंतरे**—

" नद्यादिदेवखातेषु स्नानवस्त्रमधस्त्यजेत् । अन्यत्र तु त्यजेदूर्ध्वं स्नानवस्त्रं द्विजोत्तमः" ॥ इति ।

वस्त्रविषये विशेषमाह **भृगुः**—

"ब्राह्मणस्य सितं वस्त्रं नृपते रक्तमुल्बणम् । पीतं वैश्यस्य शूद्रस्य नीलं मलवदिष्यते" ॥

याज्ञवल्क्यः (आ. १३१)— " शुक्लांबरधरो नीचकेशश्मश्रुनखः शुचिः" इति । भवेदिति शेषः ॥

हारीतः—

" न रक्तमुल्बणं वासो न नीलं च प्रशस्यते । मलाक्तं गंधहीनं च वर्जयेदंबरं बुधः " ॥

आपस्तंबः (१।११।३०।१०)—"सर्वान् रागान्वाससि वर्जयेत् । कृष्णं च स्वाभाविकम् । अनूद्भासिवासोवसीता अप्रतिकृष्टं च शक्तिविषये " इति । अस्यार्थः । कुसुंभादयः सर्वे रागा वाससि वर्जनीयाः । न केनचिद्रक्तं वासो बिभृयात् । यच्च स्वभावतः कंबलादि कृष्णं तदपि न वसीत ।

१ क्ष—यो वस्त्रः शरीरं परिमार्जनी । २ क्ष—ष्टितं ।

15014

उद्भासनशीलं उद्भासि उल्बणं तदन्यदनूद्भासि। छांदसो दीर्घः। एवंभूतं वासो वसीत आच्छादयेत्। प्रतिकृष्टं निकृष्टं जीर्णं मलवत्स्थूलं च तद्विपरीतमप्रतिकृष्टं तादृशं च वासो वसीत। शक्तौ सत्यामिति। **गौतमोऽपि** (अ. ९ पं. ५)–" न रक्तमुल्बणं अन्यधृतं वासो बिभृयात् " इति। **मनुः** (४।३४)–" न जीर्णमलवद्वासा भवेच्च विभवे सति " ॥ इति। **प्रजापतिः**—

"क्षौमं वासः प्रशंसंति तर्पणे सदृशं यथा। काषायं धातुरक्तं च नोल्बणं तत्र कर्हिचित्" ॥

उशनाः–"न वेष्टितशिराः कृष्णकाषायवासा वा देवपितृकार्याणि कुर्यात्" इति। यत्तु " अहतं धातुरक्तं च तत्पवित्रमिति स्मृतम् " इति स्मर्यते तत् अनुद्व्रणरक्ताभिप्रायम्। **देवलः**—

" स्वयं धौतेन कर्तव्या क्रिया धर्म्या विपश्चिता। न तु नेजकधौतेन नाहतेन न कुत्रचित् "॥

अहतेनेति समस्तपदम्। अहतस्य लक्षणमाह **पुलस्त्यः**—

" ईषद्धौतं नवं श्वेतं सदशं यन्न धारितम्। अहतं तद्विजानीयात्सर्वकर्मसु पावनम् " ॥ इति। धौतं प्रक्षालितम्। अहतस्य विषयविशेषं दर्शयति **सत्यतपाः**—

" अहतं यंत्रनिर्मुक्तमुक्तं वासः स्वयंभुवा। शस्तं तन्मांगलिक्येषु तावत्कालं न सर्वदा "॥ इति। मांगलिक्यं विवाहादि।

" अधौतं कारुधौतं च कर्मकाले विवर्जयेत्। चंडालनिर्मितं वस्त्रं सर्वदा परिवर्जयेत् " ॥ इति।

उशनाः—

" स्नात्वाऽनुपहतं वस्त्रं परिदध्याद्यथाविधि। अभावे पूर्ववस्त्रं च संप्रोक्ष्य प्रणवेन तु" ॥

अत्रानुकल्पमाह **योगयाज्ञवल्क्यः**—

"अलाभे धौतवस्त्रस्य शाणक्षौमाविकानि च। कुतपं योगपट्टं च विवासास्तु न वै भवेत् "॥इति। कुतपं योगपट्टं च न धारयेदिति शेषः। **चंद्रिकायाम्**—(पृ. ११३ पं. २९)

" अन्यदेव भवेद्वासः शयनाय नराधिप। अन्यद्रथ्यासु देवानामर्चायामन्यदेव हि ॥
" अन्यच्च लोकयात्रायामन्यदीश्वरदर्शने " ॥ **जातूकर्णिः**—

" काषायं कृष्णवस्त्रं वा मलिनं केशदूषितम्। छिन्नाग्रं चापवित्रं च कुत्सितं धर्मतो विदुः " ॥

भृगुः–" न रक्तमुल्बणं वासो न नीलं च प्रशस्यते। दशाहीनं जलार्द्रं च वर्जयेदंबरं बुधः ॥
" अकच्छः पुच्छकच्छश्च तिर्यक्कच्छोर्ध्वकच्छकः। कटिसूत्रे च कच्छश्च नग्नः पंचविधः स्मृतः ॥
" कटिसूत्रं विना श्रौतं स्मार्तं कर्म करोति यः। सर्वं तन्निष्फलं विद्यात्सोऽपि नग्न इति स्मृतः ॥
" नग्नो मलिनवस्त्रः स्यान्नग्नश्चार्द्रपटः स्मृतः। नग्नस्तु दग्धवस्त्रः स्यान्नग्नः स्यूतपटस्तथा ॥
" विकच्छोनुत्तरीयश्च नग्नश्चावस्त्र एव च। श्रौतं स्मार्तं तथा कर्म न नग्नश्चिंतयेदपि।
" मोहात्कुर्वन्नधो गच्छेत्तद्भवेदासुरं कृतम् " ॥ इति। **स्मृतिरत्नावल्याम्**—

" सप्तवाताहतं वस्त्रं शुष्कवत्प्रतिपादितम्। आर्द्रं वाऽपि द्विजातीनामाहतं गौतमादिभिः ॥
" जप्ये होमे तथा स्नाने दैवे पित्र्ये च कर्मणि। बध्नीयान्नासुरीं कक्ष्यां शेषकालं यथेच्छया ॥
"परिधानाद्बहिः कक्ष्या निबद्धा ह्यासुरी भवेत्। धर्म्ये कर्मणि विद्वद्भिर्वर्जनीयाः प्रयत्नतः" ॥ इति।

गौतमः (९।४) " सति विभवे न जीर्णमलवद्वासाः स्यात् " इति।

स्मृत्यर्थसारे—

"न सर्वरक्तं कृष्णं वा परिदध्यात्कदाचन। यज्ञोपवीतमन्यद्वा द्वितीयं तु भवेदिह" ॥

स्मृत्यन्तरे–'शुची वो हव्या मरुत' इत्युक्त्वा शुद्धमंबरं संप्रोक्ष्य 'देवस्य त्वा' इति गृहीत्वाऽ-

१ क्ष–चोपवस्त्रम्। २ ख–चि।

वधूनयेत् । 'अवधूतꣳरक्ष' इत्यादित्यस्य प्रदर्शयेत् । 'तरणिरुदुत्यम्' इति वा 'अवंहति' इति चाच्छादयेत्" इति । तथा च **बोधायनः**—(गृ.सू.५।४)– "देवानृषीन्पितॄंस्तर्पयित्वा शुची वो हव्येति वस्त्रमद्भिः प्रोक्ष्य देवस्य त्वेति वस्त्रमादायावधूतꣳरक्ष इत्यवधूय उदुत्यं जातवेदसम् इति वस्त्रमादित्यं दर्शयित्वा अवहंति इति वासः परिधाय द्विराचामेत् " इति । पूर्वमनिवेशितवासोविषयो मंत्र इत्याह **पारस्करः**–(गृ. सू. २।६।३२) "वासच्छत्रोपानहश्चापूर्वाश्चेन्मंत्रः " इति । **बोधायनः** (३।३।५९)—
"उत्तरं वासः कर्तव्यं पंचस्वेतेषु कर्मसु । स्वाध्यायोत्सर्गदानेषु भुक्त्वाचमनयोस्तथा "॥ इति । उत्सर्गो मूत्रादेः । एतत्सर्वकर्मोपलक्षणार्थम् । अनूत्तरीयस्य **भृगुणा** 'विकच्छोनुत्तरीय' इति कर्ममात्रस्य निषिद्धत्वात् । **योगयाज्ञवल्क्योऽपि**—
"स्नानं दानं जपं होमं स्वाध्यायं पितृतर्पणम् । नैकवस्त्रो द्विजः कुर्यात् श्राद्धभोजनसत्क्रियाः"॥इति। **गोभिलोऽपि**—

"एकवस्त्रो न भुञ्जीत न कुर्यात् देवतार्चनम् । न चार्चयेद्द्विजानग्नौ कुर्यादेवंविधो नरः" ॥

पराशरः—

" होमदेवार्चनाद्यासु क्रियासु पठने तथा । नैकवस्त्रः प्रवर्तेत द्विज आचमने जपे " ॥

एकवस्त्रस्य लक्षणमाह **स** एव—
" सव्यादंसाद्भ्रष्टपटं कटिदेशभृतांबरम् । एकवस्त्रं तु तं विद्यात् दैवे पित्र्ये च वर्जयेत् "॥ इति । सव्येंऽसे पटहीनं कटिदेश एव भृतमंबरं येन स तथोक्तः । **आपस्तंबः** (२।२।४।२१-२२)—

" नित्यमुत्तरं वासः कार्यमपि वा सूत्रमेवोपवीतार्थे " इति । **जातुकर्णिः**–"वस्त्रोत्तरीयाभावे द्व्यङ्गुलं त्र्यङ्गुलं चतुरङ्गुलं वा सूत्रैर्वस्त्राकृतिपरिमंडलं तदुत्तरीयं कुर्यात् " इति ।
तथा च **चंद्रिकायाम्**—(पृ. ११४ पं. २८)
" यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि । तृतीयमुत्तरीयार्थं वस्त्राभावे तदिष्यते " ॥ इति।
वृद्धमनुः—
"निष्पीड्य स्नानवस्त्रं तु पश्चात्संध्यां समाचरेत् । अन्यथा कुरुते यस्तु स्नानं तस्याफलं भवेत्॥
" प्रातःसंध्यामुपासीत वस्त्रसंशोधनात्परम् । उपास्य मध्यमां संध्यां वस्त्रसंशोधनं भवेत् ॥
" वस्त्रं चतुर्गुणीकृत्य निष्पीड्य च जलाद्बहिः । वामप्रकोष्ठे निक्षिप्य द्विराचम्य विशुध्यति " ॥
त्यक्तवस्त्रनिष्पीडने विशेषमाह **हारीतः**—
" वस्त्रनिष्पीडनं तोयं श्राद्धे तूच्छिष्टभागिनाम् । भागधेयं श्रुतिः प्राह तस्मान्निष्पीडयेत्स्थले ॥
"उच्छिष्टभागिनो दासा ये मृतास्ते त्वमंत्रकाः । तृप्यंतु तरुतां प्राप्ता मम संबंधिनो मृताः " ॥
इति स्नात्वाऽर्द्रवसनं शुचौ देशे प्रपीडयेत् । **भरद्वाजोऽपि**—
" वस्त्रोदकमपेक्षंते श्राद्धे तूच्छिष्टभोजिनः । तस्मात्सर्वप्रयत्नेन जलं भूमौ निपातयेत् "॥ इति ।
इति वस्त्रपरिधानप्रकरणम् । स्नानभेदाः । प्रातःस्नानप्रसंगेन स्नानांतराण्युच्यंते ।
तत्र **शंखः**—

" स्नानं तु द्विविधं प्रोक्तं गौणमुख्यप्रभेदतः । तयोस्तु वारुणं मुख्यं तत्पुनः षड्विधं भवेत् ॥
"नित्यं नैमित्तिकं काम्यं क्रियांगं मलकर्षणम् । क्रियास्नानं तथा षष्ठं षोढा स्नानं प्रकीर्तितम्"॥इति।
एतेषां लक्षणमाह **स** एव—

" अस्नातस्तु पुमान्नार्हो जप्याग्निहवनादिषु । प्रातःस्नानं तदर्थं तु नित्यस्नानं प्रकीर्तितम् ॥
" चंडालशवधूपादि स्पृष्ट्वा स्नातां रजस्वलाम् । स्नानार्हस्तु यदा स्नाति स्नानं नैमित्तिकं हि तत् ॥
" पुष्यस्नानादिकं यत्तु दैवज्ञविधिचोदितम् । तद्धि काम्यं समुद्दिष्टं नाकामस्तत्प्रयोजयेत् " ॥
दैवज्ञो ज्योतिर्वित् ।
" जप्तुकामः पवित्राणि ह्यर्चिष्यन् देवतापितॄन् । स्नानं समाचरेद्यत्तु क्रियांगं तत्प्रकीर्तितम् ॥
" मलापकर्षणं नाम स्नानमभ्यंगपूर्वकम् । मलापकर्षणार्थाय प्रवृत्तिस्तस्य नान्यथा ॥
" सरस्सु देवखातेषु तीर्थेषु च नदीषु च । क्रियास्नानं समुद्दिष्टं स्नानं तत्र मता क्रिया" ॥ इति ।
स्नानमेव तत्र क्रिया कार्यतया विहितेत्यर्थः । **गोभिलोऽपि**—
"नित्यं सततनिर्वर्त्यं काम्यं कामाय यद्धितम् । निमित्तादुपजातं तु स्नानं नैमित्तिकं स्मृतम्" ॥ इति ।
अनेन माध्यंदिनस्नानस्यापि नित्यत्वमुक्तम् । तस्यापि सततं निर्वर्त्यत्वात्तदिदानीं प्रसंगेनाभिधीयते ।
तत्र **बोधायनः**—
" ततो मध्यान्हसमये पुनः स्नानं समाचरेत् । सूर्यस्य चाप्युपस्थानं जपहोमादिकं तथा " ॥
वसिष्ठः—
" पवित्रकर एकाग्रः पार्श्वाननवलोकयन् । अरुग्दिवाचरेत्स्नानं मध्यान्हात् प्राग्विशेषतः " ॥
अरुक् रोगहीनः । **व्यासः**—
"स्नानं मध्यंदिने कुर्यात् सुजीर्णेऽन्ने निरामयः । न भुक्त्वालंकृतो रोगी स्नायादंभसि नाकुलः " ॥
विष्णुः—
"प्रातः स्नातोऽपि विधिवत्स्नानं मध्यंदिने चरेत् । शक्तश्चेदन्यथा रोगी श्राद्धासंमार्जनां चरेत्" ॥ इति ।
अनेन प्रातःस्नातस्य मध्यान्हस्नानाशक्तौ कापिलस्नानमनुज्ञायते ।
व्यासः—
" मंत्रपूतैर्जलैः स्नानं प्राहुः स्नानफलप्रदम् । न वृथा वारिमग्नानां यादसामिव तत्समम्" ॥
याज्ञवल्क्यः—
" मत्स्यकच्छपमंडूकास्तोये मग्ना दिवानिशम् । न तेषां हि स्नानफलं तथैव विधिवर्जितम् " ॥
कौशिकः —
" विधिदृष्टं तु यत्कर्म करोत्यविधिना तु यः । फलं न किंचिदाप्नोति क्लेशमात्रं हि तस्य तत् " ॥
विवस्वान्—
" अविदित्वैव यः स्मार्तं विधानं स्नानमाचरेत् । स याति नरकं घोरं इति धर्मस्य शासनम्" ॥ इति ।
विष्णुः—
" ब्रह्मक्षत्रविशां चैव मंत्रवत्स्नानमिष्यते । तूष्णीमेव हि शूद्रस्य स्त्रीणां च कुरुनंदन " ॥ इति ।
बोधायनः—
"अपोवगाहनं स्नानं विहितं सार्ववर्णिकम् । मंत्रवत्प्रोक्षणं चापि द्विजातीनां विशिष्यते" ॥ इति ।
अथ स्नानार्हजलानि । तत्र **मनुः** (४।२०३)—
" नदीषु देवखातेषु तटाकेषु सरःसु च । स्नानं समाचरेन्नित्यं गर्तप्रस्रवणेषु च " ॥
मनुष्यैरखातो जलाशयो देवखातः । मनुष्यखातः तटाकः । ऋषिसेवितं सरः । कुल्या गर्तः । प्रस्रवणं निर्झरः ।

गर्तलक्षणमुक्तं **शौनककात्यायनाभ्याम्**—
"धनुःसहस्राण्यष्टौ तु गतिर्यासां न विद्यते । न ता नदीशब्दवहा गर्तास्ताः परिकीर्तिताः"॥ इति। अनेनार्थान्नदीलक्षणमप्युक्तं भवति । **विष्णुपुराणे**—

"नदीनदतटाकेषु देवखातजलेषु च । नित्यक्रियार्थं स्नायीत गिरिप्रस्रवणेषु च ॥
"कूपेषूद्धृततोयेन स्नानं कुर्वीत वा भुवि" ॥ **मार्कंडेयोऽपि**—
"पुराणानां नरेंद्राणामृषीणां च महात्मनाम् । स्नानं कूपतटाकेषु देवतानां समाचरेत् ॥
"भूमिष्ठमुद्धृतात्पुण्यं ततः प्रस्रवणोदकम् । ततोऽपि सारसं पुण्यं तस्मान्नादेयमुच्यते ॥
"तीर्थतोयं ततः पुण्यं गांगं पुण्यं तु सर्वतः" । तीर्थतोयं साधुजुष्टं जलम् ।

उद्धृतात्पुण्यभूमिष्ठमुदकम् । तस्मान्नादेयं तस्मादपि साधुपरिगृहीतं सर्वत एव गांगमिति ॥
विवस्वानपि—

"एकतः सर्वतीर्थानि जान्हव्येकैव चान्यतः । ब्रह्मलोके शशिसरःपतिता या महीतले"॥

मरीचिरपि—

"भूमिष्ठमुद्धृतं वाऽपि शीतमुष्णमथापि वा । गांगं पयः पुनात्याशु पापमा मरणांतिकम्"॥

योगयाज्ञवल्क्योऽपि—

"त्रिरात्रफलदा नद्यो याः काश्चिदसमुद्रगाः । समुद्रगास्तु पक्षस्य मासस्य सरितां पतिः"॥ इति ।

भरद्वाजः—

"महानदीनदस्रोतस्सरस्त्रिदशखातकाः । नालस्तटाकः कुंडश्च धाराकूपास्त्वमी दश ॥
"चांद्रायणत्रयं कृच्छ्रा गायत्र्या अयुतत्रयम् । आप्लावनं महानद्यां तुल्यमेतच्चतुष्टयम् ॥
"उद्धृता भूधरैऽभोधिं प्रविशत्यंबुसंततिः । या सा महानदी ज्ञेया सर्वपापप्रणाशिनी ॥
"उद्धृता पूर्वदिग्भागे शैले सलिलसंततिः । या प्रत्यक् सागरं याति सो नदस्त्विति गद्यते ॥
"भूदरे भुवि वोद्धृता या मेघरससंततिः । नदीं विशति सा स्रोतः स्वयं वा यत्र लीयते ॥
"पर्वतस्य तटे वाऽग्रे वृत्ताकारजलास्पदम् । अशोध्यं यत्सरस्तत् स्यात् प्रविशालं सुपंकजम् ॥
"भुव्यद्रौ वा तटस्पर्शमशोष्यं यज्जलाशयम् । विशालमविशालं वा देवखात इति स्मृतः ॥
"ग्रामार्थं वाऽथ सस्यार्थं नृभिः स्पष्टांबुपद्धतिः । या नद्यांबुधामभ्यः स नालाख्यमिति स्मृतम् ॥
"अर्धचंद्राकृतिर्यस्य संस्थानस्य तु वारिणः । ग्रामे वनेऽपि वा शैले तत्तटाक इति स्मृतम् ॥
"चतुरश्रं शिलाबद्धं ससोपानमधोजलम् । विशालमविशालं वा यत्तत् कुंडमिति स्मृतम् ॥
"गिरिरंध्राद्विनिर्गत्य यां पतत्यंबुसंततिः । अप्रधारमधोभूमौ सा धारेत्यभिधीयते ॥
"पंचहस्तविशालं यत् खातं वृत्तमधोचलम् । दार्विष्टकादिघटितं यत्तत्कूप इति स्मृतः"॥

व्यासः—

"न मेहेत जलद्रोण्यां स्नातुं च न नदीं तरेत् । नातिक्रमेत् वृथा सिंधुं नानुष्ठातुं नदीं तरेत्"॥
सिंधुं नदीमनाचम्य न लंघयेदित्यर्थः। **मनुः** (४।२०१–२०२)—

"परकीयनिपानेषु न स्नायाद्धि कदाचन। निपानकर्तुः स्नात्वा हि दुष्कृतांशेन लिप्यते ॥
"यानशय्यासनान्यस्य कूपोद्यानगृहाणि च। अदत्तान्युपयुंजाना एनसः स्यात्तुरीयभाक्"॥

अस्य परस्य तुरीयभाक् चतुर्थांशभाक् । नद्यालाभविषये **स एवाह**—
"अलाभे देवखातानां सरसां सरितां तथा। उद्धृत्य चतुरः पिंडान्पारक्यास्नानमाचरेत् "॥ इति।
अनेनैवाभिप्रायेण **शौनकोऽपि**—

---

१ क्ष- + विष्णुः ।

" वापिकूपतटाकेषु यदि स्नायात्कदाचन । उद्धृत्य मृत्तिकापिंडान् दशपंचाथ वा क्षिपेत् " ॥

जाबालिः—

" न पारक्ये जले स्नायान्न भुंजीत महानिशि। नार्द्रमेकं च वसनं परिदध्यात्कदाचन ॥

" पंच पिंडान् समुद्धृत्य पारक्ये स्नानमाचरेत् " ॥ **याज्ञवल्क्यः**—(आचारे ३५९)

" पंच पिंडाननुद्धृत्य न स्नायात्परवारिषु । स्नायान्नदीदेवखातह्रदप्रस्रवणेषु च " ॥

उदकप्रवाहान्निघातकृतः कुलं मध्ययोः सजलो महानिम्नप्रदेशे ह्रदः ।

"नदीमहानदीस्रोतः कूलमध्यप्रदेशयोः। सर्वदा यो जलप्रायो ह्रदः स परिकीर्तितः " ॥ इति **भरद्वाजस्मरणात्** । **योगयाज्ञवल्क्योऽपि**—

"परकीयनिपानेषु यदि स्नायात् कदाचन । सप्तपिंडांस्तदोद्धृत्य ततः स्नानं समाचरेत् "॥ इति ।

शौनकः—

" निरुद्धासु न कुर्वीरन् अंशभाक् तत्र सेतुकृत् । तस्मात्परकृतान्सेतून्कूपांश्च परिवर्जयेत् ॥

"उद्धृत्य वापि त्रीन्पिंडान्कुर्यादापत्सु नो सदा। निरुद्धासु तु त्रीन्पिंडान् कूपात्तु त्रीन्घटांस्तथा॥

" अनुद्धृत्य तु यत्स्नानं परकीयजलाशये । वृथा भवति तत्स्नानं कर्तुः पापेन लिप्यते॥

" कूपतोयैरपि स्नायात्सर्वालाभे समुद्धृतैः । स्नानं तु न घटैः कार्यं नासाच्छिद्रविवर्जितैः" ॥ इति।

कूपात्त्रीन्घटानुद्धृत्य मृन्मयपात्रावर्जितैर्जलैः स्नायादित्यर्थः । **तथाऽखंडादर्शे**—

" शूर्पवायुर्नखाग्रांबुस्नानवस्त्रं घटोदकम् । मार्जनीरेणुकेशांबु हंति पुण्यं पुरातनम् " ॥ इति ।

उत्सृष्टेषु सर्वार्थत्वादनुद्धरणेऽपि न दोषः । यदाह **व्यासः**—

" अनुत्सृष्टे तु न स्नायात्तथैवासंस्कृतेष्वपि । आत्मीयेष्वपि न स्नायात्तथैवाल्पजलेषु तु "॥

सर्वसत्वोद्देशेनाकृतमनुत्सृष्टम्। असंस्कृततमप्रतिष्ठितम्। अत्र **विज्ञानेश्वरोऽपि** (पृ.४४पं.२३-२४)

" सर्वसत्वोद्देशेनात्यक्तेषु तटाकादिषु पंच पिंडाननुद्धृत्य स्नायात् । आत्मीयोत्सृष्टाभ्यनुज्ञातेषु पिंडोद्धरणमंतरेणापि स्नानमभ्यनुज्ञातम् " ॥ इति । अत्र स्वशक्त्यनुसारेण पिंडसंख्याव्यवस्था द्रष्टव्या । **वृद्धमनुः**—

" अन्यायोपात्तवित्तस्य पतितस्य च वार्धुषेः । न स्नायादुदपानेषु स्नात्वा कृच्छ्रं समाचरेत् " ॥

शौनकः—

"अंत्यजैः खानिताः कूपास्तटाका वाप्य एव वा। तेषु स्नात्वा च पीत्वा च प्राजापत्येन शुध्यति ॥

"अकामात् ब्राह्मणः शुध्येद्ब्रह्मकूर्चोपवासतः " ॥ इति । यत्तु **शातातपवचनम्**—

"अंत्यैरपि कृते कूपे सेतौ वाप्यादिके तथा। तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं न विद्यते"॥ इति।

तदत्यंतापद्विषयम् । **चंद्रिकायाम्**—(पृ. १२९ पं. १२)

" नद्यां तु विद्यमानायां न स्नायादन्यवारिषु । न स्नायादल्पतोयेषु विद्यमाने बहूदके "॥

शौनकोऽपि—

" प्रभूते विद्यमाने च उदके तु मनोहरे। नाल्पोदके द्विजः स्नायान्नदीं चोत्सृज्य कृत्रिमे " ॥

यत्त्वा**पस्तंबेनोक्तम्**—(१।११।३२।७) " सशिरावज्जनमप्सु वर्जयेत् " इति तत् तटाकादि-स्थावरविषयं अल्पजलविषयं समुद्रविषयम् । तथा च **चंद्रिकायाम्**— (पृ. १२९ पं. ३०)

"स्रवन्नदीषु च स्नायात् प्रविश्यांतःस्थितो द्विजः। तटाकादिषु तोयेषु प्रत्यर्कः स्नानमाचरेत्"॥इति।

शंखोऽपि—" नाल्पोदके निमज्जेन्न समुद्रोदकमवगाहेत " इति ।

---

१ क्ष—प्रत्यूष, खग—प्रत्यक्ष ।

स्मृत्यंतरे—
" गृहस्थस्तु स्रवंतीषु निमज्ज्य स्नानमाचरेत् । अन्यत्रासिच्य हस्ताभ्यामितरेषां तु मज्जनम् ॥
"नाल्पांभसि सिरो मज्जन्नावगाहेन्महोद्धौ । क्रियास्नाने शिरो मज्जेदन्यत्रापि सरित्सु च"॥ इति ।
अन्यत्र स्थावरोदके । समुद्रस्नानं तु पर्वकाले विहितं **भारते—**
" अश्वत्थसागरौ सेव्यौ न स्प्रष्टव्यौ कदाचन । अश्वत्थं मंदवारे तु सागरं पर्वणि स्पृशेत् ॥
" अन्यदा तु कुरुश्रेष्ठ देवयोनिरपांपतिः । कुशाग्रेणापि कौंतेय न स्प्रष्टव्यो महोदधिः ॥
" आजन्मशतसाहस्रे यत्पापं कुरुते क्वचित् । मुच्यते सर्वपापेभ्यः स्नात्वैव लवणांभसि ॥
" गर्भिणी गृहिणी यस्य दूरयात्रां स वर्जयेत् । वपनं सागरस्नानं शववाहं च वर्जयेत् "॥ इति ।
भरद्वाजः—
" क्षौरं च सागरस्नानं न कुर्याद्गर्भिणीपतिः । कृतवान्यदि चेत्तस्याः प्रजा न भवति ध्रुवम् ॥
" सौरारवारयोरब्धौ पर्वणोरुभयोरपि । संतानकामी न स्नायात्कुर्यात्तु ग्रहणे तयोः " ॥
एतच्छुद्धपर्वविषयम् । विद्धायां तु स **एवाह—**
" विद्धे पर्वणि न स्नायाच्चतुर्दश्यां महोदधौ । सा चेद्भौमयुता स्नायात्तामतिक्रम्य पर्वणि ॥
" चतुर्दश्यंशकं त्यक्त्वा तत्र पर्वांश एव तु । सिंधुस्नानं प्रकुर्वीत गंगास्नानफलं भवेत् " ॥
संग्रहेऽपि—" सभूमिजा कृष्णचतुर्दशी या तस्यां तु पर्वांशक एव युक्तः ।
" स्नात्वा समुद्रे तु तदेव पापं निहंति जन्मांतरसंचितं यत् "॥ **भरद्वाजः—**
" कृष्णांगारचतुर्दश्यां योऽब्धौ स्नानं समाचरेत् । तस्य जन्मसहस्रेषु सर्वपापं प्रणश्यति"॥इति ।
एतत्पर्वसंबंधरहितचतुर्दशीविषयम् । **पुराणे—**
" सेतौ कवेरकन्याया गंगायाश्चापि संगमे । न वारदोषमीक्षेत पर्वसु स्नानमाचरेत् " ॥ इति ।
जैमिनिः—
" सेतुर्नापेक्षते कालं नित्यं स्नानं प्रशस्यते । निषेधः कालभेदस्य सेतोरन्यत्र कर्हिचित्"॥ इति ।
पराशरः—(१२।४१)
" अग्निचित्कपिला सत्री राजा भिक्षुर्महोदधिः । दृष्टमात्राः पुनंत्येते तस्मात्पश्येत्तु नित्यशः " ॥
अत्रोदकांतरेणैवाचमनं कार्यम् । न समुद्रोदकेन ' अक्षाराभिराचामेत् ' इति **स्मरणात्** ।
"उक्तं च **तैत्तिरीयश्रुतौ** (*तै. ब्रा. २।२।९।३)—'तस्मात्समुद्रस्य न पिबंति' । तर्पणादिकं
तेनैव कार्यं निषेधाभावात्" इति **चंद्रिकायाम्** (पृ. १३२ पं. २९) । **योगयाज्ञवल्क्यः—**
" नद्यामस्तमिते स्नानं वर्जयेत्तु सदा बुधः । नद्यां स्नात्वा नदीमन्यां न प्रशंसेत धर्मवित् " ॥
शौनकोऽपि—
" न नदीषु नदीं ब्रूयात् पर्वतेषु न पर्वतम् । नान्यत्प्रशंसेत्तत्रस्थः तीर्थेष्वायतनेषु च" ॥
देवलः—
" एकां नदीं समासाद्य नान्यां स्नाने नदीं स्मरेत् । यदि स्मरेत्तदा सम्यक्तस्य पुण्यं विनश्यति"॥
व्यासः—
" कुरुक्षेत्रं गयां गंगां प्रभासं नैमिषं तथा । तीर्थान्येतानि सर्वाणि स्नानकाले स्मरेद्बुधः " ॥

* आनन्दाश्रमीयमुद्रिते पृ. ४२१

संग्रहेऽपि—

"गयां गंगां कुरुक्षेत्रं प्रयागोदधिसंगमान् । तीर्थान्येतानि संस्मृत्य ततो मज्जेज्जलाशये" ।।

वर्ज्योदकमाह **व्यासः—**

"नद्या यच्च परिभ्रष्टं नद्या यच्च विनिःसृतम् । गतप्रत्यागतं यच्च तत्तोयं परिवर्जयेत्"॥ इति । परिभ्रष्टं विच्छिन्नम् । विनिःसृतं अविच्छिन्नम् ।

गर्गः—" प्रत्यावृत्तेऽभसि स्नानं वर्जनीयं द्विजातिभिः " ॥ **बोधायनोऽपि**—

" अयोवर्णोदके स्नानं वर्ज्यं नद्यां द्विजातिभिः । नद्यां रजकतीर्थे तु दशहस्तेन वर्जयेत् ॥

" स्नानं रजकतीर्थे तु भोजनं गणिकागृहे । पश्चिमोत्तरशायित्वं शक्रादपि हरेच्छ्रियम् " ॥

शांडिल्यः—

" ग्राहादिसेविते रूक्षे नीचावाससमीपगे । श्मशानपार्श्वगेऽज्ञाते न स्नायान्नोपरोधिते ॥

" न स्नायात्सह शूद्रेण न स्त्रीभिर्न च नास्तिकैः । न पाषंडैश्च बालैश्च न रोग्यशुचिभिर्नरैः" ॥

योगयाज्ञवल्क्यः—

" अग्राह्यास्त्वधमा आपो नद्याः प्रथमवेगिकाः । विक्षोभिता वा केनापि याश्च तीर्थं विना कृताः"॥

कात्यायनः—

" याः शोषमुपगच्छंति ग्रीष्मे कुसरितो भुवि । तासु प्रावृषि न स्नायादपूर्णे दशवासरे ॥

" दशरात्रेण शुध्यंति भूमिष्ठं च नवोदकम् " ॥ इति । उष्णोदकं निषेधति **शंखः—**

" स्नातस्य वन्हितप्तेन तथैव परवारिणा । शरीरशुद्धिर्विज्ञेया न तु स्नानफलं भवेत्" ॥

याज्ञवल्क्यः—

"वृथा तूष्णोदकस्नानं वृथा जप्यमवैदिकम् । वृथा त्वश्रोत्रिये दानं वृथा भुक्तमसाक्षिकम्"॥ इति।

यत्तूष्णोदकविधानं

" आप एव सदा पूतास्तासां वन्हिर्विशोधकः । तस्मात्सर्वेषु कालेषु उष्णांभः पावनं स्मृतम्"॥ इति।

यदपि च **षट्त्रिंशन्मते—**

"आपः स्वभावतो मेध्याः किंपुनर्वन्हिसंयुताः । तेन संतः प्रशंसंति स्नानमुष्णेन वारिणा" ॥ इति ।

यदपि **स्मृत्यंतरे—**

"आदित्यकिरणैः पूतं पुनःपूतं तु वन्हिना । स्नानं संतः प्रशंसंति तस्मादुष्णेन वारिणा" ॥ इति । तदातुरस्नानविषयम् । तथा च **यमः—**

" आदित्यस्य करैः पूतं पुनःपूतं च वन्हिना । आम्नातमातुरस्नाने प्रशस्तं तूद्धृतोदकम् "॥

यदा तु नद्यादिकं न लभ्यते तदा अनातुरस्याप्युष्णोदकस्नानमनिषिद्धमित्याह **यमः—**

" नित्यं नैमित्तिकं चैव क्रियांगं मलकर्षणम् । तीर्थाभावे तु कर्तव्यमुष्णोदकपरोदकैः" ॥ इति ।

यत्तु **वृद्धमनुनोक्तम्—**

" मृते जन्मनि संक्रांतौ श्राद्धे जन्मदिने तथा । अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा ॥

" संक्रान्त्यां भानुवारे च सप्तम्यां राहुदर्शने । आरोग्यपुत्रवित्तार्थी न स्नायादुष्णवारिणा ॥

"पौर्णमास्यां तथा दर्शे यः स्नायादुष्णवारिणा । स गोहत्याकृतं पापं प्राप्नोत्येव न संशयः"॥ इति ।

---

१ क्ष-भासो ।

एतेन उक्तेषु मरणादिषु तीर्थाभावेऽपि नोष्णोदकैः स्नायात् । अपि तु परकीयैरुद्धृतैः कूपोदकैर्वा स्नायादित्युक्तमविरोध इति **चंद्रिकामाधवीययोः** (पृ. १२९ प. २) ।

उष्णोदकस्नाने विशेषमाह **व्यासः**—

"शीतास्वप्सु निषिच्योष्णा मंत्रसंभारसंभृताः । गेहेऽपि शस्यते स्नानं तद्धीनमफलं बहिः" ॥ इति ।

संभारा मृदादयः । बहिः तटाकादौ । **विवस्वान्**—

" मंत्रसंभारसंयुक्तमुपस्पर्शनमुच्यते । स्नानेऽवगाहने चैव प्लवनं विधिवर्जितम्" ॥ इति ।

स्मृत्यर्थसारे—

" सर्वदा नित्यकामार्थं स्नायादेव कथंचन । विना मृत्तिकया वाऽपि सकृदुष्णेन वांऽबुना " ॥

गौतमः—

" शिवलिंगसमीपे तु यत्तोयं पुरतः स्थितम् । शिवगंगेति विज्ञेया तत्र स्नात्वा शिवं व्रजेत् ॥
" जलं शुद्धमशुद्धं वा विष्णुवास्तुसमीपतः । विष्णुगंगासमं तोयं महापातकनाशनम्" ॥ इति ।

इति **स्नानार्हजलानि** । **मृदाद्याहरणम्** । **दक्षः**—

" चतुर्थे तु तथा भागे स्नानार्थं मृदमाहरेत् । तिलपुष्पकुशादीनि स्नानं चाकृत्रिमे जले " ॥

याज्ञवल्क्यः—

" मृत्तिका गोमयं दर्भान् पुष्पाणि सुरभीणि च । आहरेत्स्नानकाले तु स्नानार्थं प्रयतः शुचिः" ॥

शातातपः—

" शुचिदेशात्तु संग्राह्या शर्कराश्मादिवर्जिता । रक्ता गौरा तथा श्वेता मृत्तिका त्रिविधा स्मृता ॥
" वल्मीकाखूत्कराल्लोपात् जलाच्च पथि वृक्षयोः । कृतशौचावशिष्टाच्च न ग्राह्याः सप्तमृत्तिकाः ॥
" मृत्तिकां गोमयं चापि न निशायां समाहरेत् । न गोमूत्रं प्रदोषे तु गृह्णीयाद्बुद्धिमान्नरः ॥
" न प्रातर्मृत्तिकास्नानं न च भौमार्कवारयोः । मध्यंदिने तु कर्तव्यं नातिमध्यंदिने रवौ " ॥

व्यासः—

"ततो मध्यान्हसमये स्नानार्थं मृदमाहरेत् । पुष्पाक्षतान्तिलकुशान्गोमयं गंधमेव च "॥ इति ।

गृह्यपरिशिष्टे (१।१०)—"शुचौ देशे खनित्रेन भुवं गायत्र्यस्त्रेण खात्वोपरि मृदं चतुरंगुलमुदस्याधस्तान्मृदं तथा खात्वा गायत्र्यादाय मृदमुपात्तां शुचौ देशे निधाय गायत्र्या प्रोक्षेत्"॥इति ।

योगयाज्ञवल्क्यः—

" गत्वोदकांतं विधिवत्स्थापयेत्तत्पृथक्क्षितौ । त्रिधा कुर्यान्मृदं तां तु गोमयं च विचक्षणः ॥
" अधमोत्तममध्यानामंगानां मृदसंकरः " ॥ **शौनकः**—

"प्रयतो मृदमादाय दूर्वापामार्गगोमयम् । गत्वोदकांतं विधिवत्स्थापयेत्तत्पृथक् क्षितौ" ॥

माधवीये—

" दशाहीनेन वस्त्रेण स्नायात्कौपीनकादृते । नान्यदीयेन नार्द्रेण न सूच्या ग्रथितेन च ॥
" जलं देवगृहं चैव शयनं च द्विजालयम् । निर्णिक्तपादः प्रविशेन्नानिर्णिक्तः कथंचन " ॥ इति ।

वसिष्ठः—

" मृदैकया शिरः क्षाल्य द्वाभ्यां नाभेस्तथोपरि । अधश्चतसृभिः क्षाल्य षड्भिः पादौ तथैव च ॥
" प्रक्षाल्य सर्वकायं तु द्विराचामेद्यथाविधि " ॥ इति । —

व्यासः—"षड्भिःपादौ चतुर्भिश्च जंघे नाभिं कटिं त्रिभिःमृदेकया शिरःक्षाल्य ततः कुर्यात्प्रमार्जनम्।
"मृत्तिका च समादिष्टा त्वार्द्रामलकमात्रतः । गोमयस्य प्रमाणं तत्तेनांगं लेपयेत्ततः ॥
" प्रक्षाल्याचम्य विधिवत्ततः स्नायात्समाहितः " ॥ इति ।

दक्षः—"मृद्गोमयादिभिर्देहो मलादिग्धो विशुध्यति । स्नानकाले तथा विप्रः स्निग्धं लेपं विवर्जयेत् ॥
" प्रक्षाल्य यज्ञसूत्रं तु मृद्भिरद्भिः शनैः शनैः । आपादमस्तकं देहं तथैव क्षालयेद्बुधः "॥ इति ।

कायक्षालनादनंतरकृत्यमाह **शौनकः**—" गायत्र्या वाऽऽदायाभ्युक्ष्य ' अतो देवा ' इति । मृदमभिमंत्रयेत् । ततः 'यत इंद्र' 'स्वस्तिदा विशस्पतिः' 'वि रक्षो' 'वि मृध' 'इदं सुभेजनितरि' इति प्रतिमंत्रं प्रतिदिशं क्षिपेत् पूर्वादिक्रमेण । " ततः संमार्जनं कुर्यान्मृदा पूर्वं तु मंत्रवित् "। ' अश्वक्रांत ' इत्यादया मृद्ग्रहणमंत्राः याजुर्वेदप्रसिद्धाः ।
" पुनश्च गोमयेनैवम् 'अग्रमग्रम्' इति ब्रुवन् ।
" अग्रमग्रं चरंतीनां औषधीनां वने वने । तासामृषभपत्नीनां सुरभीणां शरीरतः ॥
"उत्पन्नं लोकसौख्यार्थं पवित्रं कायशोधनम् । त्वं मे शोकांश्च रोगांश्च पापानि नुद गोमय " ॥
इति गोमयमंत्रः । 'कांडात्कांडात्प्ररोहंति' इति द्वाभ्यां अंगमंगमुपस्पृशेत् । दूर्वयेति शेषः ।

"अपपापमपकिल्बिषमपकृत्यामपोरपः । अपामार्ग त्वमस्माकं मम आ दुष्टं भयं नुद स्वाहा" इत्यंगमंगमपामार्गेणोपस्पृशेत् । अथ ' हिरण्यशृंगं ' ' आपोदेवी ' इति अप उपस्थाय 'सुमित्रा न आप' इत्यप उपस्पृश्य 'दुर्मित्रा' इति बहिः क्षिपेत् । तत 'इंद्रशुद्ध' इत्यृचा अपः प्रविश्य मनसा जपेत् । तत्र गायेत सामानि अपि वा व्याहृतीर्जपेत् " ॥ इति ।

वसिष्ठः—' येते शतम् ' इति द्वाभ्यां तीर्थान्यावाहयेद्बुधः ।
"कुरुक्षेत्रं गयां गंगां प्रभासं नैमिषं तथा । देवांश्च वरदान् सर्वान् सर्वानप्सुषदस्तथा" ॥ इति ।

शंखः—

" प्रपद्ये वरुणं देवं अंभसां पतिमीश्वरम् । याचितं देहि मे तीर्थं सर्वपापाधनुत्तये ॥
" तीर्थमावाहयिष्यामि सर्वाघविनिषूदनम् । सांनिध्यमस्मिंश्चित्तोये क्रियतां मदनुग्रहात् ॥
" रुद्रान्प्रपद्ये वरदान् सर्वानप्सुषदस्तथा । आपः पुण्याः पवित्राश्च प्रपद्ये वरुणं तथा ॥
" शमयंत्वाशु मे पापं रक्षंतु च सदैव माम् "॥ इति । **वसिष्ठः**—

" आपोहिष्ठेदमापश्च द्रुपदादिव इत्यपि । तथा हिरण्यवर्णाभिः पावमानीभिरंततः ॥
" ततोऽर्कमीक्ष्य सोंकारं निमज्ज्यांतर्जले बुधः । प्राणायामांश्च कुर्वीत गायत्रीं चाघमर्षणम् ॥
" प्रद्यान्मूर्ध्नि च तथा महाव्याहृतिभिर्जले " ॥ इति ।

संग्रहे— संकल्प्य ' सहस्रपरमा देवि ' इति दूर्वां शिरसि निधाय ' अश्वक्रांते रथक्रांते ' इति मृदं गृहीत्वा ' उद्धृतासि वराहेण ' इति हस्तस्थं मृदमभिमंत्र्य ' मृत्तिके हन मे पापम् ' इत्यादिना ' त्वयि सर्वं प्रतिष्ठितम् ' इत्यंतेन मृत्तिकामंगेष्वालिप्य ' गंधद्वाराम् ' इति गोमयेनांगमालिप्य प्रक्षाल्य सलिलमनुप्रविश्य तदधिष्ठातारं वरुणं तीर्थं याचेत् । 'हिरण्यशृंगम्' इति द्वाभ्यां ततः 'सुमित्रा न आप ओषधयः संतु' इत्युदकांजलिं शिरसि निधाय 'दुर्मित्रास्तस्मै' इत्युदकांजलिं नैर्ऋत्यां दिशि निरस्य जलस्थ एव ' नमोऽग्नय । इति तीर्थं नमस्कृत्योपस्थाय

'यदपां क्रूरम्' इत्यमेध्यांशं दक्षिणतो निरस्य 'अत्याशनादतीपानात्' इति द्वाभ्यां पाणिना प्रदक्षिणमुदकमावृत्य 'इमं मे गंगे' इति गंगाद्या दश नदीः स्वस्नानजले आवाहयेत् । अथ जले पिहितश्रोत्रदृङ्नासिकामुखो निमज्ज्य 'ऋतं च सत्यं चेति' चाघमर्षणसूक्तं च प्राणायामेन त्रिर्जपेत् । अस्य सूक्तस्य माधुछंदसा अघमर्षण ऋषिः । अनुष्टप् छंदः । भाववृत्तः परमात्मा देवता । भावस्य सत्तामात्रस्य ब्राह्मणो वृत्तं जगत्सृष्टिः सूक्तस्य प्रतिपादितम् । तत उत्तराभिस्तिसृभिः 'यत्पृथिव्याम्' इत्यादिभिः स्नात्वा 'आर्द्रं ज्वलति' इत्याचम्य 'अकार्यकार्यवकीर्णी' इति पुनः स्नात्वा रहस्यकृतपापक्षयार्थं 'रजोभूमिः' इति पुनः स्नात्वा "आक्रान्तसमुद्र" इति जपेत् ।—"एष स्नानविधिः प्रोक्तः सर्वाघौघनिषूदनः" इति ॥ **व्यासः**—

" अंगुष्ठांगुलिभिश्चैव श्रोत्रादिङ्नासिकामुखम् । पीड्य मग्नः प्रतिस्रोतास्त्रिर्जपेदघमर्षणम् ॥
" द्रुपदा नाम गायत्री वेदे वाजसनेयिके । सकृदंतर्जले जप्त्वा ब्रह्महत्यां व्यपोहति "॥

योगयाज्ञवल्क्योऽपि—

" हत्वा लोकानपीमांस्त्रिः पठेदघमर्षणम् । अथाश्वमेधावभृथः एवं तं मनुरब्रवीत् ॥
" द्रुपदा नाम गायत्री यजुर्वेदप्रतिष्ठिता । अंतर्जले त्रिरावृत्य मुच्यते ब्रह्महत्यया ॥
" सव्याहृतिकां गायत्रीं प्रणवं वा जले जपेत् । ध्यायेन्नारायणं देवं सर्वपापप्रशांतये ॥
" अपः प्राणौ समादाय त्रिः पठेद् द्रुपदामृचम् । तत्तोयं मूर्ध्नि विन्यस्य सर्वपापैः प्रमुच्यते "॥

गौतमः—" गायत्रीं पच्छोर्धर्चशः समस्तामपि त्रिरंतर्जले जपन्सर्वस्मात्पापात्प्रमुच्यते अपि वा प्रणवं त्रिरन्तर्जले जपन् सर्वस्मात्पापात्प्रमुच्यते " इति ।

सुमन्तुरपि—'हंसःशुचिषत्' इत्येतामृचं त्रिरन्तर्जले जपन् सर्वस्मात् पापात्प्रमुच्यते । अपि वा व्याहृतीः त्रिरन्तर्जले जपन् सर्वस्मात्पापात् प्रमुच्यते " इति ॥ **यमः**—

" अंतर्जले जपेन्मग्नः त्रिः कृत्वस्त्वघमर्षणम् । द्रुपदां वा वर्तयेत्त्रिः आयंगौरिति वा ऋचम् ॥
" सव्याहृतिकां सप्रणवां गायत्रीं त्रिर्जपेत्तथा । आवर्त्तयेद्वा प्रणवं स्मरेद्वा विष्णुमव्ययम् ॥
" ध्यायेन्नारायणं देवं स्नानादिषु च कर्मसु । प्रायश्चित्तं हि सर्वस्य दुष्कृतस्येति वै श्रुतिः "॥

याज्ञवल्क्यः—

"जलमध्ये स्थितो विप्रः शुद्धभावे हरिं स्मरेत् । 'तद्विष्णो' इति मंत्रेण मज्जेदप्सु पुनः पुनः ॥
" गायत्री वैष्णवी ह्येषा विष्णोः संस्मरणाय वै "॥ **चंद्रिकायाम्**—

" विष्णोरायतनं ह्यापः स ह्यपांपतिरुच्यते । तस्यैव सूनवस्त्वेताः तस्मात्तं ह्यप्सु संस्मरेत् ॥
" आपो हिष्ठेति तिसृभिः यथावदनुपूर्वशः । हिरण्यवर्णा इति च ऋग्भिश्च तिसृभिस्तथा ॥
" शं नो देवीरिति तथा शं न आपस्तथैव च । इदमापः प्रवहतेत्येवं च समुदीरयेत् ॥
" एवं संमार्जनं कृत्वा छंद आर्षं च दैवतम् । अघमर्षणसूक्तस्य संस्मरेत् प्रयतः सदा ॥
"ततोऽभसि निमग्नस्तु त्रिः पठेदघमर्षणम् । प्रदद्यान्मूर्धनि तथा महाव्याहृतिभिर्जलम्"॥ इति ।

वसिष्ठः—

" आपोहिष्ठेदमापश्च द्रुपदादिव इत्यपि । तथा हिरण्यवर्णाभिः पावमानीभिरंततः ॥
" ततोऽर्कमीक्ष्य सोंकारं निमज्यांतर्जले बुधः । प्राणायामांश्च कुर्वीत गायत्रीं चाघमर्षणम् ॥
"योऽनेन विधिना स्नाति यत्रकुत्रांभसि द्विजः । स तीर्थफलमाप्नोति तीर्थे तु द्विगुणं फलम्"॥ इति ।

विष्णुरपि (६४।१९)–"ततोऽप्सु मग्नस्त्रिरघमर्षणं तद्विष्णोः परमं पदम्" इति सावित्रीं वायुं 'जत्ते मन' इत्यनुवाकं वा पुरुषसूक्तं वा स्नात्वाऽऽर्द्रवासा देवर्षिपितृतर्पणं अंभस्थ एव कुर्यात्"॥इति।

व्यासः—

"मृद्गोमयाभ्यामालिप्य तल्लिंगादेव मंत्रतः। प्रक्षाल्याचम्य विधिवत्ततः स्नायात्समाहितः॥
"प्रोक्ष्य सोंकारमादित्यं त्रिर्निमज्जेज्जलाशये। आचांतः पुनराचामेन्मंत्रेणानेन मंत्रवित्॥
"अंतश्चरति भूतेषु गुहायां विश्वतो मुखः। त्वं यज्ञस्त्वं वषट्कारः आपोज्योतिरसोऽमृतम्॥
"ततः संमार्जनं कुर्यादापोहिष्ठामयो भुवः। इदमापः प्रवहत व्याहृतीभिस्तथैव च॥
"ततोऽभिमंत्र्य तत्तीर्थं आपोहिष्ठादिमंत्रकैः। अंतर्जलगतो मग्नो जपेत्त्रिरघर्षणम्॥
"द्रुपदां वा त्रिरभ्यस्य व्याहृतिं प्रणवादिकाम्। सावित्रीं वा जपेद्विद्वान् तद्विष्णोः परमं पदम्॥
"आवर्त्तयेद्वा प्रणवं देवं वा संस्मरेद्धरिम्। द्रुपदा हि परो मंत्रो यजुर्वेदे प्रतिष्ठितः॥

"अंतर्जले त्रिरावृत्य सर्वपापैः प्रमुच्यते।
"यथाऽश्वमेधः क्रतुराट् सर्वपापप्रणोदनः। तथाघमर्षणं सूक्तं सर्वपापापनोदनम्।
"द्रुपदा नाम गायत्री वेदे वाजसनेयके। सकृदन्तर्जले जप्त्वा ब्रह्महत्यां व्यपोहति"॥

बोधायनः (९।५।१०)—"अथ हस्तौ प्रक्षाल्य कमंडलुं मृत्पिंडं च संगृह्य तीर्थं गत्वा त्रिः पादौ प्रक्षाल्य स्पर्शयते त्रिरात्मानमथ हैके ब्रुवते श्मशानमपो देवगृहं गोष्ठे यत्र च ब्राह्मणा अप्रक्षाल्य तु पादौ तान्न प्रवेष्टव्यमित्यथापोऽभिप्रपद्यते 'हिरण्यशृंगं वरुणं प्रपद्य' इति व्याभ्यामथाञ्जलिनाप उपहरंति 'सुमित्रा न आप ओषधयः संतु' इति तां दिशं निरीक्षते यस्यां दिशि द्वेष्यो भवति 'दुर्मित्रास्तस्मै भूयासुर्योऽस्मान् द्वेष्टि यं च वयं द्विष्म' इति अथ उपस्पृश्य 'नमोऽग्नयेऽप्सुमत' इत्युपस्थाय त्रिः प्रदक्षिणमुदकमावर्त्तयाति 'यदपां क्रूरम्' इति 'इमं मे गंगे' इति तीर्थमावाह्याद्भिर्मार्जयति 'आपो हिष्ठामयो भुव' इति तिसृभिः 'हिरण्यवर्णाः शुचयः पावका' इति चतसृभिः 'पवमानः सुवर्जन' इत्येतेनानुवाकेन मार्जयित्वांऽतर्जलगतोऽघमर्षणेन त्रीन्प्राणायामान् धारयेत्। 'ऋतं च सत्यं च' इत्येतदघमर्षणं त्रिरंतर्जले पठेत्सर्वस्मात्पापात्प्रमुच्यते। 'आयंगौः पृश्निरक्रमीत्' इत्येतामृचं त्रिरंतर्जले पठेत्सर्वस्मात्पापात्प्रमुच्यते। 'द्रुपदादिवेन्मुमुचान' इत्येतामृचं त्रिरन्तर्जले पठन् सर्वस्मात्पापात्प्रमुच्यते। 'हंसः शुचिषत्' इत्येतामृचमुच्यते। 'अपि वा सावित्रीं गायत्रीं पच्छोर्धर्चशः समस्ताम् इति त्रिरंत...च्येत। अपि वा व्याहृतीः समस्ता व्यस्ताश्च त्रिरंत...च्यते। अपि वा प्रणवमेव त्रिरंतर्जले पठन्सर्वस्मात्पापात्प्रमुच्यते" इति।

मृत्तिकास्नानविधिरुक्तो बोधायनेन (बौ. गृह्यशेषसू. ५।४)–"अथातो मृत्तिकास्नानविधिं व्याख्यास्यामः। ब्रह्मचारिगृहस्थवानप्रस्थपरिव्राजकानाम् 'अश्वक्रांते' सहस्रपरमा देवी' इति भूमिं दूर्वेत्यभिमंत्र्य 'उद्धृतासि' इति नदीतटाल्लोष्ठमादाय 'कांडात्कांडात्प्ररोहंती' इति द्वाभ्यां दूर्वामादाय 'मृत्तिके हन मे पापम्' इति दूर्वां लोष्ठे प्रतिष्ठाप्य 'यत इन्द्र भयामहे' 'स्वस्तिदा विशस्पतिः' 'स्वस्ति न इन्द्रो वृद्धश्रवास्त्रातारमापांतमन्युः परं मृत्यो अनुपरे हि' इति षड्भिः प्रतिमंत्रं प्रतिदिशं लोष्ठमुत्सृज्य 'गंधद्वाराम्' इति लोष्ठमादाय 'उदुत्यं जातवेदसम्' इति लोष्ठमादित्यं दर्शयित्वा 'श्रीर्मे भजत्वलक्ष्मीर्मे नश्यतु' इति शिरः प्रदक्षिणीकृत्य 'सहस्रशीर्षम्' इति शिर आलिप्य 'विष्णुमुखा' इति मुखम् 'ओजो ग्रीवाभिः' इति ग्रीवां 'महां इंद्रो वज्रबाहुः' इति

बाहू ‘ सोमानं स्वरणम् ’ इति कक्षौ ‘शरीरं यज्ञशमलम्’ इति शरीरं ‘नाभिर्मे चित्तं विज्ञानम्’ इति नाभिं ‘ आपांतमन्युः ’ इति कटिं ‘ विष्णोरराटमसि ’ इति पृष्ठं ‘ वरुणस्य स्कंभनम् ’ इति मेढ्रम् ‘आनंदनंदौ’ इत्यण्डौ ‘ऊरुवोरोज’ इत्यूरू ‘ऊरू अरत्नी’ इति जानुनी ‘जंघाभ्याम्’ इति जंघयोः ‘ चरणं पवित्रम् ’ इति चरणयोः ‘ इदं विष्णुः ’ ‘ त्रीणि पदा ’ इति द्वाभ्यां पादौ ‘ सजोषा इंद्र ’ इति शेषं दूर्वासहितं लोष्ठं शिरसि निधाय ‘ हिरण्यशृंगम् ’ इति तीर्थं गत्वा ‘ सुमित्रा न आप ओषधयः ’ इत्यात्मानमभिषिंचेत् । उदकांजलिमादाय लोष्ठदेशे निनीय ‘ दुर्मित्रास्तस्मै भूयासुः ’ इति प्रथमं ‘ योऽस्मान् द्वेष्टि ’ इति द्वितीयं ‘ यं च वयं द्विष्म ’ इति तृतीयम् । ‘ आपो हिष्ठामयो भुवः ’ इति तिसृभिः ‘ हिरण्यवर्णाः शुचयः पावका ’ इति चतसृभिः ‘ पवमानःसुवर्जन ’ इत्यनुवाकेन मार्जयित्वा ‘ नमोग्नयेऽप्सुमत ’ इति नमस्कृत्य ‘ यदपां क्रूरम् ’ अत्यद्भिस्त्रिरावृत्य ‘ इमं मे गंग ’ इत्यपोऽभिमंत्र्य ‘ ऋतं च सत्यं च ’ इत्यघमर्षणसूक्तेनापोऽवगाहेत । देवानृषीन् पितॄन्स्तर्पयित्वा ‘ शुचीं वो हव्याम् ’ इति वस्त्रमद्भिः प्रोक्ष्य ‘ देवस्य त्वा ’ इति वस्त्रमादाय ‘ अवधूतꣳ रक्ष ’ इत्यवधूय ‘ उदुत्यं जातवेदसम् ’ इत्यादित्यं दर्शयित्वा ‘ आवहंती ’ इति वासः परिधाय द्विराचम्योत्क्रामतः ।

“ भूतप्रेतपिशाचा ये ये भूता ये निशाचराः । सर्वेषामविरोधेन ब्रह्मकर्म समारभे ” ॥ इति दर्भासनं प्रतिष्ठाप्य त्रीन् प्राणायामान् धारयित्वाऽष्टोत्तरशतं गायत्रीं जपेत् । ब्राह्मणः पूतो भवति । ब्रह्महत्यागोवधगुरुतल्पगमनस्वर्णस्तेयसुरापानादिसर्वपापप्रणाशनमिति विज्ञायते । ध्यात्वा नारायणं देवं प्रपद्यत इत्याह भगवान्बोधायनः ” । अनुकल्पमाह **याज्ञवल्क्यः**—

“ य एष विस्तरः प्रोक्तः स्नानस्य विधिरुत्तमः । असामर्थ्यान्न कुर्याद्यस्तस्यायं विधिरुच्यते ॥
“ स्नानमंतर्जले चैव मार्जनाचमने तथा । जलाभिमंत्रणं चैव तीर्थस्य परिकल्पनम् ॥
“ अघमर्षणसूक्तेन त्रिरावृत्तेन नित्यशः । स्नानाचरणमित्येतदुपदिष्टं महात्मभिः ” ॥ इति ।

तीर्थपरिकल्पनमाह **वसिष्ठः**—

“ चतुर्हस्तसमायुक्तं चतुरश्रं समं ततः । प्रकल्प्यावाहयेद्गंगां मंत्रेणानेन मंत्रवित् ॥
“ विष्णोः पादप्रसूताऽसि वैष्णवी विष्णुदेवता । त्राहि नस्त्वेनसस्तस्माद् जन्ममरणांतिकात् ॥
“ तिस्रः कोट्यर्धकोटी च तीर्थानां वायुरब्रवीत् । दिवि भुव्यंतरीक्षे च तानि मे संतु जान्हवी”॥इति ।

स्मृत्यंतरे—

“ चतुरश्रं तीर्थपीठं पाणिनोल्लिख्य वारिषु । आवाहयामि त्वां देवीत्यावाह्यात्रैव जान्हवीम् ॥
“ इमं मे गंग इत्युक्त्वा पुण्यतीर्थानि च स्मरेत् । स्नानं प्लवंगमस्येव कृतं विधिविना कृतम् ॥
“ वृथा द्विजन्मनस्तस्माद्विधिना स्नानमाचरेत् ” ॥ इति । **स्मृत्यर्थसारे**—

“ नान्योन्यं पृष्ठतो मृज्यान्न लिंपेत्पृष्ठतो मिथः । स्नात्वा न धावयेद्दंतान्न मृज्याद्वाससा मुखम् ॥
“ अवगाह्य जले नग्नो वस्त्रं यः परिशोधयेत् । क्रुद्धास्तत्र निवर्तंते देवताः पितृभिः सह ” ॥

रत्नावल्याम्—

“ दर्शे स्नानं न कुर्वीत मातापित्रोस्तु जीवतोः । कुर्वंस्तत्र निराचष्टे पित्रोरुन्नतिजीविते ॥
“ न रात्रौ मृत्तिकास्नानं नैव भौमार्कवारयोः । संध्ययोर्नैव गोमूत्रं न शुध्यै गोमयं निशि ॥
“ दिवांबुगोशकृन्मूत्रैः शुद्धिर्निश्यंबुभस्मभिः । नांबु हन्यान्न निंदेन्न तीर्थे तीर्थान्तरं स्मरेत् ॥

---

१ क्ष–मग्ने ।

"संकल्प्यैव तथा कुर्यात्स्नानदानव्रतादिकम्। अन्यथा पुण्यकर्माणि निष्फलानि भवन्ति वै"॥

भरद्वाजः—

"संकल्परहितं कर्म यच्छ्रुतिस्मृतिचोदितम्। यत्तो यद्यत्फलं तत्स्यात्संकल्प्यातः समाचरेत् ॥
"पादौ करौ च प्रक्षाल्य समुपस्पृश्य वाग्यतः। प्राङ्मुखोदङ्मुखो वाऽपि स्थित्वा दर्भासने शुचिः॥
"सदर्भहस्तौ जानूर्ध्वे दक्षिणे दक्षिणोत्तरैः। कृत्वा वारादि संस्मृत्य एतत् कर्म करोमि यत् ॥
"स्वमानसे संस्मरणं तत्संकल्प इतीरितः।
"स्नानमर्दितनेत्रस्य कर्णरोगातिसारिषु। आध्मानपीनसा जीर्णभुक्तवत्सु च गर्हितम्।
"अनार्तश्चोत्सृजेद्यस्तु स विप्रः शूद्रसंमितः। प्रायश्चित्ती भवेदेव लोके भवति निंदितः"॥ इति।

भृगुः—

"नैकवासा न च द्वीपे नांतराले कदाचन। श्रुतिस्मृत्युदितं कर्म न कुर्यादशुचिः क्वचित्"॥

तत्र ग्राह्यद्वीपमाह स एव—

"वृषभैकशतं यत्र गवां तिष्ठत्यसंशयम्। न तद्धर्महतद्वीपमिति ब्रह्मविदो विदुः"॥ इति

मनुः—"नित्यं स्नात्वा शुचिः कुर्याद्देवर्षिपितृतर्पणम्" इति।

जाबालिः "देवान्ब्रह्मऋषींश्चैव तर्पयेदक्षतोदकैः। तर्पयेत्तु पितॄन्भक्त्या सतिलोदकचंदनैः"॥

यमः—"तिलदर्भसमायुक्तं स्वधया यत्प्रदीयते। तत्सर्वममृतं भूत्वा पितॄणामुपतिष्ठते"॥

इति माध्यान्हिकस्नानम्। अथ नैमित्तिकस्नानम्। स्मृत्यर्थसारे—

"उच्छिष्टाद्युपघातेषु अस्पृश्यस्पर्शनेषु च। ग्रहसंक्रमणादौ च स्नानं नैमित्तिकं स्मृतम् ॥
"चंडालादिस्पर्शने तु कार्यं वारुणमेव तु। काम्यं मलापकर्षं च क्रियास्नानं च वारुणम्।
"इतराणि यथायोग्यदेशकालाद्यपेक्षया" ॥ इति। गार्ग्यः—

"कुर्यान्नैमित्तिकं स्नानं शीताद्भिः काम्यमेव च। नित्यं याहच्छिकं चैव यथारुचि समाचरेत्"॥इति।

मनुः (५।८४)—

"दिवाकीर्तिमुदक्यां च सूतिकां पतितं तथा। शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुध्यति"॥ इति।

दिवाकीर्तिः चंडालः। उदक्या रजस्वला। अंगिराः—

"शवस्पर्शमथोदक्यां सूतिकां पतितं तथा। स्पृष्ट्वा स्नानेन शुद्धिः स्यात्सचैलेन न संशयः"॥

गौतमोऽपि—(अ. १४ सू. २७, ३४) "पतितचांडालसूतिकोदक्याशवस्पृष्टितत्स्पृष्ट्यनुपस्पर्शने सचैलोदकोस्पर्शनाच्छुध्येत" इति। अनेन पतितादिस्पृष्टिनमारभ्य तृतीयस्यापि सचैलं स्नानमित्युक्तं भवति। स्मृत्यंतरेऽपि "शवचंडालपतितसूतिकोदक्यास्पृष्टितत्स्पृष्टिस्पर्शे सचैलस्नानम्" इति।

चंद्रिकायाम्—(पृ. ११६ पं. ७)

"चंडालसूतिकोदक्यापतितः शव एव च। एतेषामेव संस्पर्शे तत्स्पृष्टिन्याय इष्यते"॥ इति।

एवकारः कटधूमादिस्पृशि तन्न्यायनिवृत्त्यर्थः। तथा च तत्रैव—(पृ. ११६ पं. ९)

"कटधूमस्पृशं वांतं विरक्तं क्षुरकर्मणि। मैथुनाचरितारं च स्पृष्ट्वा स्नानं न विद्यते"॥ इति।

यत्तु संवर्त्त आह—

"तत्स्पृष्टिनं स्पृशेद्यस्तु स्नानं तस्य विधीयते। ऊर्ध्वमाचमनं प्रोक्तं द्रव्याणां प्रोक्षणं तथा"॥इति।

यदपि **व्यासः**—
"ससूतकं समृतकं प्रसूतां वा रजस्वलाम्। स्पृष्ट्वा स्नायाच्च तत्स्पृष्टं तत्स्पर्शादाचमेत् बुधः" ॥ इति।
तत् अबुद्धिपूर्वस्पर्शविषयम् । तथा **चंद्रिकामाधवीययोः**—(चंद्रिका पृ. ११६ पं. १३)
"अबुद्धिपूर्वसंस्पर्शे द्वयोः स्नानं विधीयते । त्रयाणां बुद्धिपूर्वे तु तत्स्पृष्टिन्यायकल्पना" ॥ इति ।
चतुर्थस्य तु आचमनमेव । " उपस्पर्शेच्चतुर्थस्तु तदूर्ध्वं प्रोक्षणं मतम्" इति **मरीचिस्मरणात्**।
यत्तु **कूर्मपुराणे**—
" चंडालसूतिकाशावैः संस्पृष्टः संस्पृशेद्यदि । प्रमादात्तत आचम्य जपं कुर्यात्समाहितः ॥
" तत्स्पृष्टिस्पृष्टिनं स्पृष्ट्वा बुद्धिपूर्वं द्विजोत्तमः । आचमेत्तु विशुध्यर्थं प्राह देवः पितामहः" ॥ इति ।
तत् दुर्बलद्वितीयादिविषयम्। अन्यथा **गौतमा**दिवचनविरोधात् । यत्तु **याज्ञवल्क्येनो**क्तम् (प्रा.३०)
"उदक्याशुचिभिः स्नायात् संस्पृष्टस्तैरुपस्पृशेत्। अब्लिंगानि जपेच्चैव गायत्रीं मनसा सकृत्"॥इति।
यदपि **देवलेनोक्तम्**—
"संस्पृश्याशुचिसंस्पृष्टं द्वितीयं वापि मानवः । हस्तौ पादौ च तोयेन प्रक्षाल्याचम्य शुध्यति" ॥ इति ।
यदपि **वृद्धशातातपेनोक्तम्**—
"अशुचिं यः स्पृशेदन्यं एक एव स दुष्यति । तत्स्पृष्टोऽन्यो न दुष्येत सर्वद्रव्येष्वयं विधिः " ॥ इति ।
एतत्सर्वं दण्डादिस्पर्शविषयमिति **माधवीये**—चंडालादिव्यतिरिक्ताशुचिस्पर्शविषयमित्यन्ये । तदेव चंडालादिस्पर्शे तृतीयस्याचमनपरं वचनमकामविषयं स्नानपरं वचनं सकामविषयम् । द्वितीयस्याचमनवचनं दंडादिस्पर्शविषयं चंडालादिव्यतिरिक्तशवधूमाद्यशुचिस्पर्शे अशुचिस्पृश एव स्नानं द्वितीयस्य त्वाचमनमेवेति व्यवस्था । अत्र **पराशरः** (१२।१)—
" दुःस्वप्नं यदि पश्येत्तु वांते च क्षुरकर्मणि । मिथुने प्रेतधूमे च स्नानमेव विधीयते " इति ।
मैथुने स्नानं ऋतुकालविषयम् । तदाह **पराशरः**[1]—
"ऋतौ तु गर्भं शंकित्वात् स्नानं मैथुनिनः स्मृतम् । अनृतौ तु यदा गच्छेच्छौचं मूत्रपुरीषवत्"॥ इति।
अनृतौ च स्नानं क्वचित्स्मर्यते
" अष्टम्यां च चतुर्दश्यां दिवा पर्वणि मैथुनम् । कृत्वा सचैलं स्नात्वा तु वारुणीभिश्च मार्जयेत्"॥
कात्यायनः—
"चंडालसूतिकोदक्यापतिताशौचकृच्छ्रवान् । स्पृष्ट्वा स्नात्वा शुचिः प्रेतमनुगम्यानलं स्पृशेत्"॥इति।
एतत्प्रमादसंस्पर्शविषयम् ।
"पतितं सूतिकामंत्यं शवं स्पृष्ट्वा च कामतः । स्नात्वा सचैलं स्पृष्ट्वाऽग्निं घृतं प्राश्य विशुध्यति ॥
"शवस्पृशं दिवाकीर्त्यं चितिं यूपं रजस्वलाम् । स्पृष्ट्वा प्रमादतो विप्रः स्नानं कृत्वा विशुध्यति"॥ इति
स्मरणात् । **पराशरोऽपि** (१२।२५)—
" चैत्यवृक्षश्चितेर्धूमश्चंडालः[3] सोमविक्रयी । एतांस्तु ब्राह्मणः स्पृष्ट्वा सवासा जलमाविशेत्" ॥ इति ।
चितेर्योग्यं श्मशानं चैत्यम् । तत्र समारोपितवृक्षः चैत्यवृक्षः । **संवर्तोऽपि**—
"चंडालं पतितं स्पृष्ट्वा शवमंत्यजमेव च । उदक्यां सूतिकां नारीं सवासाः स्नानमाचरेत्" ॥ इति ।
आपस्तंबः (२।२।८-९)—" चंडालोपस्पर्शने संभाषायां दर्शने च दोषस्तत्र प्रायश्चित्तम् । अवगाहनमपामुपस्पर्शने संभाषायां ब्राह्मणसंभाषादर्शने ज्योतिषो दर्शनम् " इति । उपस्पर्शने सत्यपामवगाहनं प्रायश्चित्तं इत्यर्थः ।

---

१ क्ष-स्मृतम् । २ खग-शातातपः । ३ ग-चितिर्यूपः ।

व्यासः—

"चंडालपतितौ दृष्ट्वा नरः पश्येत्तु भास्करम्। स्नातस्त्वेतौ समालोक्य पुनः स्नानेन शुध्यति"॥इति।

चंडालादीनां व्यवधाने देशपरिमाणमाह **पराशरः** (१२।४७)—

"युगं युगद्वयं चैव त्रियुगं च चतुर्युगम्। चंडालसूतिकादक्यापतितानामधःक्रमात्॥

"ततः संनिधिमात्रेण सचैलं स्नानमाचरेत्। स्नात्वाऽवलोकयेत्सूर्यं अज्ञानात् स्पृशते यदि"॥ इति।

अधःक्रमात् विपरीतक्रमात्। युगपरिमाणं लोकव्यवहारादौ अवगंतव्यमिति **माधवीये**। नवपदं रथयुगं अष्टपदं अनोयुगमिति **लौकिकाः** प्रतीयन्ति। उक्तव्यवधानाभावे सचैलं स्नानम्। अज्ञानात् गात्रस्पर्शे सूर्यावलोकनमधिकमित्यर्थः। बुद्धिपूर्वांगस्पर्शे तु सचैलं स्नानमग्निस्पर्शनं घृतप्राशनं च पूर्वोक्तद्रष्टव्यम्। अंगस्पर्शे मज्जनसंख्याऽपि **स्मर्यते**—

"वृषलं चांत्यजातिं च चंडालं पतितं तथा। आर्त्तवाभिप्लुतां नारीं स्पृष्ट्वा स्नानं समाचरेत्॥

"एकं च दशकं[1] चैव द्वाविंशं त्रिंशकं तथा। द्वात्रिंशच्च क्रमेणैव मज्जनं तु विधीयते"॥ इति।

स्मृत्यंतरे—

"चंडालस्य चतुःषष्टिपदं श्रेण्याः शतद्वयम्। द्वात्रिंशदथवा तस्य मनःशुद्धिदमाचरेत्॥

"अविज्ञाते रजःस्रावे मलवद्वस्त्रया गृहे। स्पृष्टं यद्वस्तु तद्दुष्टं न दुष्टं संनिकर्षतः"॥ इति।

"अस्पृश्यस्पर्शने चैव त्रयोदश निमज्ज्य च। आचम्य प्रयतः पश्चात्स्नानं विधिवदाचरेत्"॥ इति

भरद्वाजवचनं अंगस्पर्शनाभावविषयं चंडालादिव्यतिरिक्तास्पृश्यस्पर्शविषयम्।

व्यासः—

"सूतिकापतितोदक्याचंडालश्च चतुर्थकः। यथाक्रमं परिहरेदेकद्वित्रिचतुर्युगम्"॥ इति।

अत्र **व्यासपराशरवचनयोः** विरोधे विकल्पो द्रष्टव्यः। यत्तु

"चंडालं पतितं चैव दूरतः परिवर्जयेत्। गोवालव्यजनादर्वाक् सवासा जलमाविशेत्"॥ इति

वैयाघ्रपादवचनं तत् संकटादिविषयम्। यदाह **संवर्त्तः**—

"संकटे विषमे चैव दुर्गे चैव विशेषतः। अट्टपत्तनमार्गे च यथासंभवमिष्यते॥

"तृणकाष्ठादिघातेन कुड्येनांतरिते तथा। गोवालव्यजने चापि स्नानं तत्र न विद्यते"॥ इति।

प्रचेताः—

"वस्त्रांतरितसंस्पर्शः साक्षात्स्पर्शो विधीयते। साक्षात्स्पर्शे तु यत्प्रोक्तं तद्वस्त्रांतरितेऽपि च"॥ इति।

अंगिराः—

"यस्तु छायां श्वपाकस्य ब्राह्मणो ह्यधिरोहति। तत्र स्नानं प्रकुर्वीत घृतं प्राश्य विशुध्यति॥

"चंडालपतितच्छायां स्पृष्ट्वा स्नानं समाचरेत्"॥ इति। **स्मृतिरत्ने**—

"छायामंत्यश्वपाकादेः स्पृष्ट्वा स्नानं समाचरेत्। चत्वारिंशत्पदादूर्ध्वं छायादोषो न विद्यते"॥ इति।

आपस्तंबः—

"एकशाखां समारूढश्चंडालादिर्यदा[2] भवेत्। ब्राह्मणस्तत्र निवसन् स्नानेन शुचितामियात्"॥ इति।

शाखाग्रहणमेवंजातीयद्रव्योपलक्षणार्थम्। अत एव **चंद्रिकायाम्** (पृ. ११७, पं. २०)—

"तार्णे संस्तर एकस्मिन्नस्पृश्यैः सह तिष्ठति। अस्पृष्टस्तैरदुष्टोऽस्मीत्येवं मूढस्तु मन्यते"॥ इति।

तार्णे तृणनिर्मिते। **आपस्तंबः** (१।५।१५।१३-१४)—"मूढस्वस्तरे चासंस्पृशन्नन्यानप्रयतान्प्रयतो

---

१ क्ष—नवकं चैव, क्षग—द्वात्रिंश। २ क्ष—यथा।

मन्येत। तथा तृणकाष्ठेषु निखातेषु" इति। **गौतमः** (१४।२७)—"पतितचांडालसूतिकोदक्याशवस्पृष्टितत्स्पृष्ट्युपस्पर्शने सचैलोदकोपस्पर्शनाच्छुध्येत्" इति। अत्र **हरदत्तः**—"तस्मिन्विषय इदमुच्यते। शयनतया आसनतया वा सुष्ठु आस्तीर्णः पलाशादिसंघातः स्वस्तरः। पृषोदरादित्वात्साधुः। यत्रातिश्लक्ष्णतया पलाशादेर्मूलाग्रविभागो न ज्ञायते स मूढः। मूढश्चासौ स्वस्तरश्चेति मूढस्वस्तरः। तस्मिन्पतितादिष्वप्रयतेष्वासीनेषु यदाकदाचित्प्रयत उपविशेन्न च तान्स्पृशेत्तत्र यथाप्रयत आत्मानं मन्यते प्रयतोऽस्मीति तथैव मन्येत। नैवंविधे विषये तत्स्पृष्टिन्यायः प्रवर्तते। तथा तृणकाष्ठेषु भूमौ निखातेषु तत्स्पृष्टिन्यायो न भवतीति।

स्नानस्य निमित्तांतरमुक्तं **चतुर्विंशतिमते**—

"बौद्धान्पाशुपतान्जैनान्लोकायतिककापिलान्। विकर्मस्थान्द्विजान् स्पृष्ट्वा सचैलो जलमाविशेत्॥
"कापालिकांस्तु संस्पृश्य प्राणायामोऽधिको मतः"॥ इति।

चन्द्रिकायाम् (ब्रह्मांडपुराणे पृ. ११८ पं. २०)—

'जैनान्[1]पाशुपतान् स्पृष्ट्वा लोकायतिकनास्तिकान्। विकर्मस्थान् द्विजान् शूद्रान् सवासा जलमाविशेत्।
"अवकीर्णिनमंत्यं च स्पृष्ट्वा स्नानेन शुध्यति। स्पृष्ट्वा देवलकं चैव सवासा जलमाविशेत्॥
"देवार्चनपरो यस्तु वित्तार्थी वत्सरत्रयम्। स वै देवलको नाम हव्यकव्येषु गर्हितः"॥

यमः—"शुना चैव श्वपाकेन मृतनिर्हरणेन वा। स्पृष्टमात्रस्तु कुर्वीत सचैलं प्लावनं द्विजः॥
"दुःस्वप्ने दुर्जनस्पर्शेऽभ्युदिते स्नानमाचरेत्"॥ अभ्युदिते शयानस्य आदित्योदये।

स्मृत्यंतरे—"स्पृष्ट्वा रुद्रस्य निर्माल्यं सवासा आप्लुतः शुचिः"॥

संवर्त्तः—"श्ववराहखरानुष्ट्रान्वृकगोमायुवानरान्। काककुक्कुटगृध्रांश्च स्पृष्ट्वा स्नानं समाचरेत्"॥

हारीतः—

"चाटकं कुक्कुटं काकं श्वशृगालशिवावृकान्। चितिधूमश्मशानानि विड्वराहखराशुचीन्।
"अवकीर्णिनमंत्यं च स्पृष्ट्वा स्नानं विधीयते"॥ **पैठीनसिः**—"काकोलूकस्पर्शने स्नानमनुदकमूत्रपुरीषकरणे सचैलं स्नानं महाव्याहृतिभिर्होमश्च"॥ इति। **अंगिराः**—
"कृत्वा मूत्रं पुरीषं वा यदा नैवोदकं भवेत्। स्नात्वा लब्धोदकः पश्चात् सचैलस्तु विशुध्यति"॥ इति।

संग्रहे—

"गोध्याश्चै स्पर्शमात्रे तु सँरटीकृकलासयोः। शुभे वाऽप्यशुभे वाऽपि सचैलं स्नानमाचरेत्"॥

मनुः (५।८६)—

"नारं स्पृष्ट्वाऽस्थि सस्नेहं सवासा जलमाविशेत्। आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्षेयत्"॥ इति।

विष्णुः (२२।६९)—"भक्ष्यवर्ज्यं पंचनखं तद[4]स्थिसस्नेहं च स्पृष्ट्वा स्नायात्" इति। श्वस्पर्शे विशेषमाह **आपस्तंबः** (१।५।१५।१६-१७)"शुनोपहतः सचैलोऽवगाहेत। प्रक्षाल्य वा तं देशं अग्निना संस्पृश्य पुनः प्रक्षाल्य पादौ च आचम्य प्रयतो भवति" इति। व्यवस्थितविकल्पोऽयम्।

तथा च **मनुः**—

"ऊर्ध्वं नाभेः करौ मुक्त्वा यदंगमुपहन्यते। तत्र स्नानविधिः प्रोक्तो ह्यधः प्रक्षालनं स्मृतम्" इति

विष्णुरपि—"नाभेरधः कराग्रं वा शुना यद्युपहन्यते। प्रक्षाल्य तदभिज्वाल्य पुनराचम्य शुध्यति॥
"नाभेरूर्ध्वं शुना स्पृष्टो लिप्तो मध्येन वा पुनः। प्रक्षाल्य मृद्भिरंगानि सचैलं स्नानमर्हति"॥

---

१ ब्रह्माण्डपुराणे शैवानिति। २ क्ष—व्या। ३ ख—टा। ४ ग—नखास्थि।

शातातपः—
" रजकश्चर्मकृच्चैव व्याधजालोपजीविनौ । निर्णेजकः सौनिकश्च नटः शैलूषकस्तथा ॥
" मुखेभगस्तथा श्वा च ग्राम्यकुक्कुटसूकरौ । एतैर्यदंगं स्पृष्टं स्यात् शिरोवर्जं द्विजातिषु ॥
"तोयेन क्षालनं कृत्वा आचांतः प्रयतो मतः "॥
अत्रापि शुना साहचर्यात् शिरोग्रहणं नाभेरुर्ध्वांगोपलक्षणार्थम् । **जातुकर्ण्योऽपि**—
"उर्ध्वं नाभेः करौ मुक्त्वा यदंगं स्पृशते खगः। स्नानं तत्र प्रकुर्वीत शेषं प्रक्षाल्य शुध्यति"॥इति । खगः पक्षी । **शंखः**—
" रथ्याकर्दमतोयेन ष्ठीवनाद्येन वा तथा । नाभेरूर्ध्वं नरः स्पृष्टः सद्यः स्नानेन शुध्यति " ॥

व्यासः—
" भासवानरमार्जारखरोष्ट्रानां शुनां तथा । सूकराणाममेध्यं वै स्पृष्ट्वा स्नायात्सचैलकम् " ॥
विष्णुः—
"आ जानुभ्यां भवेत्स्नानं अनाभ्युपवसेदहः। ऊर्ध्वं नाभेस्त्रिरात्रं स्यादमेध्यस्पर्शने विधिः "॥इति ।
मनुः—
" पुच्छे बिडालकं स्पृष्ट्वा स्नात्वा विप्रो विशुध्यति । भोजने कर्मकाले च विधिरेष उदाहृतः ॥
इतरांगस्पर्शे तु आचमनमेव " मार्जालमूषिकस्पर्शे कर्म कुर्वन्नुपस्पृशेत् " इति **बृहस्पति-स्मरणात्** । अन्यकाले मार्जारस्पर्शने नाशुद्धिः । **मनुः**—" मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिः " इति । **पराशरोऽपि** (७।३३)—
" मार्जारमक्षिकाकीटपतंगकृमिदर्दुराः । मेध्यामेध्यं स्पृशंतोऽपि नोच्छिष्टं मनुरब्रवीत् " ॥
यदा पुनरशुद्ध एव श्वादीन् स्पृशति तदा विशेषो **देवलेन** दर्शितः
" श्वपाकं पतितं चांत्यं उन्मत्तं शवदाहकम् । सूतिकां साविकां नारीं रजसा च परिप्लुताम् ॥
"श्वकुक्कुटवराहांश्च ग्राम्यान्संस्पृश्य मानवः । सचैलः सशिराः स्नात्वा तदानीमेव शुध्यति॥
" अशुद्धान्स्वयमेवैतान् अशुद्धस्तु[3] यदि स्पृशेत् । विशुद्धत्युपवासेन तथा कृच्छ्रेण वा पुनः " ॥
साविका प्रसवस्य कारयित्री । एतद् बुद्धिपूर्वस्पर्शविषयम् । तथा च **कूर्मपुराणे**—
"उच्छिष्टोऽद्भिरनाचांतश्चंडालादीन्स्पृशेत् द्विजः । प्रमादाद्वै जपेत्स्नात्वा गायत्र्यष्टसहस्रकम् ॥
"चंडालपतितार्द्यांस्तु कामाद्यः संस्पृशेत् द्विजः । उच्छिष्टस्तत्र कुर्वीत प्राजापत्यं विशुद्धये" ॥
अनेनैवाभिप्रायेण **विष्णुरपि**—
" अनुच्छिष्टेन संस्पृष्टे स्नानं येन विधीयते । तेनैवोच्छिष्टसंस्पृष्टः प्राजापत्येन शुध्यति "॥ इति ।
संवर्तोऽपि—
" कृते मूत्रे पुरीषे वा भुक्तोच्छिष्टे तथैव च । श्वादिस्पृष्टो जपेद्देव्या सहस्रं स्नानपूर्वकम् ॥
" चंडालाद्यैस्तु संस्पृष्ट उच्छिष्टस्तु जपोत्तमः । गोमूत्रयावकाहारः षड्रात्रेण विशुध्यति "॥ इति ।
पराशरः (७।२२-२१)—
" अनुच्छिष्टेन शूद्रेण स्पर्शे स्नानं विधीयते । तेनोच्छिष्टेन संस्पृष्टः प्राजापत्यं समाचरेत् ॥
"उच्छिष्टोच्छिष्टसंस्पृष्टः शुना शूद्रेण वा द्विजः । उपोष्य रजनीमेकां पंचगव्येन शुध्यति"॥इति ।
अनुच्छिष्टस्य विप्रस्य अनुच्छिष्टशूद्रस्पर्शे स्नानमात्रं उच्छिष्टशूद्रस्पर्शे कृच्छ्रम् । उच्छिष्टस्य

---

१ क्ष–शुनो । २ क्ष–वा नरः । ३ ग–शुद्धस्तु यदि संस्पृशेत् ।

द्विजस्यान्येनोच्छिष्टेन द्विजेन शुना वा अनुच्छिष्टशूद्रेण वा संस्पर्शे एकदिनोपवासः पंचगव्यप्राशनं चेत्यर्थः । **स्मृत्यंतरे**—

"चंडालं पतितं श्वानं उदक्यां सूतिकां तथा । दृष्ट्वा भुक्त्यंतरे स्नात्वा मानस्तोकेत्यृचं जपेत् ॥
" उच्छिष्टवदनो विप्रः शूद्रादींन्नावलोकयेत् । अवलोकेत् प्रमादाच्चेत् सह तैर्भुक्तवान्भवेत् " ॥

भरद्वाजः—

"शावे शवगृहं गत्वा श्मशाने वांऽतरेऽपि वा । आतुरव्यंजनं कृत्वा दूरस्थोऽप्यशुचिर्भवेत् " ॥

आतुरव्यंजनं मृतविषयविलापादि । **पराशरः** (१२।२६)—

" अस्थिसंचयनादूर्ध्वं रुदित्वा स्नानमाचरेत् । अंतर्दशाहे विप्रस्य ह्यूर्ध्वमाचमनं भवेत् ॥
" शिशोरभ्युक्षणं प्रोक्तं बालस्याचमनं स्मृतम् । रजस्वलादिसंस्पर्शे स्नानमेव कुमारके ॥
" शिशुरा दंतजननादा चौलाद्बालकः स्मृतः । कुमारः स तु विज्ञेयो बुधैरा मौंजिबंधनात् "

निमित्तान्तरमाह **स एव**—

" तस्मिन्नाचमनं कुर्याद्यत्र भांडेऽथ भुक्तवान् । यद्युत्तिष्ठन्न नाचांतो भुक्तवानासनात्ततः ॥
" स्नानं सद्यः प्रकुर्वीत सोऽन्यथा प्रयतो भवेत् " ॥ इति । **स एव**—

" वृकश्वानशृगालाद्यैर्दष्टो यस्तु द्विजोत्तमः । स्नात्वा जपेत्स गायत्रीं पवित्रां वेदमातरम् ॥
" गवां शृंगोदकस्नानं महानद्योस्तु संगमे । समुद्रदर्शनाद्वाऽपि शुना दष्टः शुचिर्भवेत् ॥ (५।२)
"वेदविद्याव्रतस्नातः शुना दष्टो द्विजो यदि । स हिरण्योदके स्नात्वा घृतं प्राश्य विशुध्यति ॥(५।३)
" सव्रतस्तु शुना दष्टो यस्त्रिरात्रमुपावसन् । घृतं कुशोदकं पीत्वा व्रतशेषं समापयेत् ॥
"अव्रतः सव्रतो वाऽपि शुना दष्टो भवेत् द्विजः । प्रणिपातात् भवेत्पूतो विप्रैश्चक्षुर्निरीक्षितः ॥ (५।५)
"शुना घ्रातावलीढस्य नखैर्विलिखितस्य च । अद्भिः प्रक्षालनं पोक्तं अग्निना चोपचूलनम्[1] ॥ (५।६)
" शुना तु ब्राह्मणी दष्टा जंबुकेन वृकेण वा । उदितं ग्रहनक्षत्रं दृष्ट्वा सद्यः शुचिर्भवेत् ॥ (५।७)
"कृष्णपक्षे यदा सोमो न दृश्येत कदाचन । यां दिशं व्रजते सोमः तां दिशं चावलोकयेत् ॥(५।८)
'असद्ब्राह्मणके ग्रामे शुना दष्टो द्विजोत्तमः।वृषं प्रदक्षिणीकृत्य सद्यः स्नात्वा विशुध्यति"॥(५।९)इति।

वृकः आरण्यकश्वा । आदिशब्देन वराहादयो गृह्यंते । तैर्दष्टः स्नात्वा गायत्र्यष्टशतं जपेत् । एतच्चासमर्थविषयम् । समर्थस्तु गोशृंगोदकस्नानादिकं समाचरेत् । तत्र शृंगोदकस्नानं नाम शृङ्गपूरितेनोदकेन गायत्र्या शतवारमभिमन्त्रितेन सेचनम् । शृङ्गोदकस्नानसंगमस्नानसमुद्रदर्शनानामधममध्यमोत्तमभेदेन वा देशतारतम्येन वा व्यवस्था । सव्रताव्रतावुभावपि विप्रान्प्रणिपत्य तैर्निरीक्षितौ यथोक्तप्रायश्चित्ताचरणेन पूतौ भवतः । यस्मिन्ग्रामे ब्राह्मणा न संति तत्र ब्राह्मणप्रणिपातनिरीक्षणयोः स्थाने वृषभप्रदक्षिणस्नाने द्रष्टव्ये । यस्तु शुना न दष्टः किंतु नासिकया घ्रातः जिव्हयाऽवलीढः नखैर्वा विलिखितः एते त्रयोऽपि तं देशं प्रक्षाल्य वन्हिना संताप्य शुद्धा स्युरिति **माधवीये** व्याख्यातम् । **शातातपो**ऽपि—

" गवां शृंगोदकस्नानात् महानद्युपसंगमात् । समुद्रदर्शनाद्वापि शुना दष्टः शुचिर्भवेत् ॥
"अव्रतः सव्रतो वाऽपि शुना दष्टस्तु यो द्विजः । हिरण्योदकमिश्रं तु घृतं प्राश्य विशुध्यति"॥ इति ।

वसिष्ठः (२३।३१)—

"ब्राह्मणस्तु शुना दष्टो नदीं गत्वा समुद्रगाम् । प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यति"॥

---

१ ख–धूपनम् ।

अंगिराः—

" ब्रह्मचारी शुना दष्टस्त्रिरात्रेणैव शुध्यति। गृहस्थस्तु द्विरात्रेण एकरात्रेऽग्निहोत्रिणः ॥
" नाभेरूर्ध्वं तु दष्टस्य तदेव द्विगुणं भवेत्। तदेव द्विगुणं वक्त्रे मूर्ध्नि चेत्स्याच्चतुर्गुणम् ॥
" क्षत्रविट्शूद्रयोनिस्तु स्नानेनैव शुचिर्भवेत्। द्विगुणं तु वनस्थस्य तथा प्रव्रजितस्य च ॥
"ब्राह्मणी तु शुना दष्टा सोमे दृष्टिं निपातयेत्। यदा न दृश्यते सोमः प्रायश्चित्तं तदा कथम् ॥
" यां दिशं तु गतः सोमस्तां दिशं ह्यवलोकयन्। सोममार्गेण सा पूता पंचगव्येन शुध्यति "॥

अरुणोदयात् पूर्वभावि स्नानं निषेधति **पराशरः**—

" भास्करस्य करैः पूतं दिवा स्नानं प्रशस्यते। अप्रशस्तं निशि स्नानं राहोरन्यत्र दर्शनात् ॥
" स्नानं दानं जपो होमः कर्तव्यं राहुदर्शने। अन्यदा त्वशुची रात्रिस्तस्मात्तां परिवर्जयेत्" ॥

मनुः (४।१२९)—

" न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि। न वासोभिः सहाजस्रं नाविज्ञाते जलाशये " ॥

स्नानमाचरेद्भुक्त्वेति दृष्टार्थस्य स्नानस्य निषेधः। नातुर इत्यदृष्टार्थस्य च। न वासोभिरिति सवासा जलामाविशेदित्युक्तविषये प्रातः मध्यंदिनयोश्च सोत्तरीयस्नानम्। अन्यत्र याहच्छिकादौ अंतर्वाससैव सह स्नानमित्यर्थः। **पराशरः** (१२।२४)—

"महानिशा तु विज्ञेया मध्यस्थप्रहरद्वयम्। प्रदोषपश्चिमौ यामौ दिनवत् स्नानमाचरेत्"॥ इति। एतच्चापद्विषयम्। अन्यथा भास्करस्य करैरित्यनेन विरुध्येत। **षट्त्रिंशन्मते**—

" अपेयं हि सदा तोयं रात्रौ मध्यमयामयोः। स्नानं तत्र न कुर्वीत तथैवाचमनक्रियाम् ॥
" मूत्रोच्चारे महारात्रौ कुर्यान्नाचमनं तु यः। प्रायश्चित्तीयते विप्रः प्राजापत्यार्धमर्हति "॥ इति।

वृद्धमनुः—

"आराध्यं देवमाराध्य बंधूनप्यनुसृत्य च। भुक्त्वा व्याधौ च न स्नायात्तैलेनापि निशास्वपि"॥

मेधातिथिरपि—

" न स्नायादुत्सवेऽतीते मंगल्यं विनिवर्त्य च। अनुव्रज्य सुहृद्बंधून् अर्चयित्वेष्टदेवताः॥
" न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि " ॥ **कालादर्शेऽपि**—

"अनुव्रज्य च बंधूंश्च व्याधौ भुक्त्यंतरं निशि। इष्टदेवं समभ्यर्च्य विधाय च महोत्सवम् ॥
"विना निमित्तं न स्नायान्निमित्तेऽपि रुगातुरः" ॥ इति। काम्यनैमित्तिके तु स्नाने महानिश्यपि अनिषिद्धे। तथा च **स्मृत्यर्थसारे**—

"न महानिशि नित्यार्थं काम्ये नैमित्तिकं भवेत्। स्नायात्तु पूर्वमस्नातो निश्युष्णेन जलेन न ॥
"अस्पृश्यस्पर्शने स्नानं निश्युष्णेन जलेन च। नद्यान्नास्तमिते स्नायात् विशेषान्मध्ययामयोः॥
"अग्निं प्रज्वाल्य च स्नायात् वाप्यादिषु महाजले। ब्राह्मणाग्निगवामग्रे स्नानं विज्ञाप्य बुद्धिमान् ॥
"निशि स्नानं च दानं च कुर्यादग्निं समिध्य हि " ॥ इति। **मनुः**—

" राहुदर्शनसंक्रांतिविवाहात्ययवृद्धिषु। स्नानदानादिकं कुर्यात् निशि काम्यव्रतेषु च"॥

अत्ययो मरणम्। वृद्धिर्जननम्। **योगयाज्ञवल्क्योऽपि**—

" ग्रहणोद्वाहसंक्रांतियात्रार्तिप्रसवेषु च। स्नानं नैमित्तिकं ज्ञेयं रात्रावपि तदिष्यते " ॥

आर्तिः मरणम्।

---

१ **खग**—एकाह्नेनाग्नि।

पराशरः (१२।२३)—

"पुत्रजन्मनि यज्ञे च तथा संक्रमणे रवेः। राहोश्च दर्शने स्नानं प्रशस्तं नान्यथा निशि"॥

यज्ञोऽवभृथः। रात्रौ चंडालादिस्पर्शे शुद्धिमाह **स एव** (७।११)—

" अस्तंगते यदा सूर्ये चंडालं पतितं स्त्रियम्। सूतिकां स्पृशतश्चैव कथं शुद्धिर्विधीयते॥

"जातवेदः सुवर्णं च सोममार्गं विलोक्य च। ब्राह्मणानुमतश्चैव स्नानं कृत्वा विशुध्यति"॥

शुक्लपक्षे सोमोऽवलोकनीयः। तदभावे वह्निः। तदभावे सुवर्णम्। तस्याप्यभावे सोममार्गः। एतेषामन्यतमं विलोक्य विप्रैरनुज्ञातः स्नायादित्यर्थः। रात्रिस्नाने तु विशेषमाह **यमः**—

"विप्रः स्पृष्टो निशायां तु उदक्या पतितेन वा। दिवानीतेन तोयेन स्नापयेदग्निसन्निधौ"॥

तोयेन स्वर्णसहितेनेति शेषः। तथा च **पराशरः** (१२।२०)—

"दिवाहृतं तु यत्तोयं कृत्वा स्वर्णयुतं तु तत्। रात्रौ स्नाने तु संप्राप्ते स्नायादनलसन्निधौ"॥

देवलोऽपि—

"दिवाहृतैर्जलैः स्नानं निशि कुर्यान्निमित्ततः। निक्षिप्य च सुवर्णं वै सन्निधाप्य च पावकम्"॥ इति।

कात्यायनः—

"प्रवेशाद्वरुणस्याप्सु न रात्रौ जलमुद्धरेत्। अन्यत्र धाम्न इत्येवं तत्रस्थे स्नानमिष्यते"॥

'धाम्नो धाम्न' इति समंत्रकोद्धारणादन्यत्र रात्रौ जलं नोद्धरेत्। तत्रस्थे जले[1] स्नायादित्यर्थः। अत्रापि विशेषमाह **पराशरः**—

"यदि गेहे न तोयं स्यात् तावच्छुद्धिः कथं भवेत्। धाम्नो धाम्न इति मंत्रेण गृह्णीयादग्निसंनिधौ॥

" रात्रौ ग्रहांशुभिः पूतं दिवा पूतं तु भानुना। अनेनैव विशुध्येन तथा रात्रौ यथा दिवा "॥

संवर्तः—

"अपो निशि न गृह्णीयात् गृह्णन्नपि कदाचन। उद्धृत्याग्निमुपर्यासां धाम्नो धाम्न इतीरयेत्"॥

मरीचिः—

"दिवाहृतं तु यत्तोयं गृहे यस्य न विद्यते। प्रज्वाल्याग्निं ततः स्नायान्नदीपुष्करणीषु च"॥ इति।

कालादर्शे—

"निमित्ततोऽपि यैः स्नायात् रात्रौ नद्यां दिवाहृतैः। तज्जलैस्तदभावे तु स्वर्णं क्षिप्त्वा तदंभसि॥

"प्रज्वाल्य वह्निमभ्यर्णे तदभावे समंत्रकम्। निशाहृतैर्जलैः स्नायादिति शास्त्रीयनिश्चयः"॥ इति।

ग्रहणस्नानमुक्तं **महाभारते**—

"गंगास्नानं प्रकुर्वीत ग्रहणे चंद्रसूर्ययोः। महानदीषु चान्यासु स्नानं कुर्याद्यथाविधि"॥

शंखः—

" वापीकूपतटाकेषु गिरिप्रस्रवणेऽपि वा। नद्यां नदे देवखाते सरसीषूद्धृतांबुभिः॥

" उष्णोदकेऽपि वा स्नायात् ग्रहणे चंद्रसूर्ययोः " इति। उष्णोदकस्नानमातुरविषयम्। "आदित्यकिरणैः पूतं पुनःपूतं च वन्हिना। आर्तो व्याध्यातुरः स्नायात् ग्रहणेऽप्युष्णवारिणा"॥ इति **व्याघ्रस्मरणात्**। **पराशरः** (१२।२७)—

" सर्वं गंगासमं[2] तोयं राहुग्रस्ते दिवाकरे। सोमग्रहे तथैवोक्तं स्नानदानादिकर्मसु "॥

व्यासोऽपि—

" सर्वं गंगासमं[3] तोयं सर्वे ब्रह्मसमा द्विजाः। सर्वं भूमिसमं दानं ग्रहणे चंद्रसूर्ययोः "॥ इति।

१ ग—जलस्थे। २ क्ष—न। ३ क्ष—मय।

शौनकः—
"स्वर्धुन्या तु समानि स्युः सर्वाण्यंभांसि भूतले। कूपस्थान्यपि सोमार्कग्रहणे नात्र संशयः"॥ इति
मार्कंडेयः—
" शीतमुष्णोदकात्पुण्यं पारक्यमपरोदकात् । भूमिष्ठमुद्धृतात्पुण्यं ततः प्रस्रवणोदकम् ॥
" ततोऽपि सारसं पुण्यं ततः पुण्यं नदीजलम् । तीर्थतोयं ततः पुण्यं महानद्यम्बुपावनम् ॥
" ततस्ततोऽपि गङ्गाम्बु पुण्यं पुण्यस्ततोऽम्बुधिः " ॥ इति । **वृद्धवसिष्ठः**—
" गवां कोटिप्रदानेन सम्यग्दत्तेन यत्फलम् । गङ्गास्नाने तत्फलं स्याद्राहुग्रस्ते निशाकरे ॥
" दिवाकरे पुनस्तत्र दशसंख्यमुदाहृतम् ॥
" चंद्रसूर्यग्रहे चैव योऽवगाहेत जाह्नवीम् । स स्नातः सर्वतीर्थेषु किमर्थमटते महीम् "॥ इति ।
यत्र क्वापि जले स्नानाकरणे प्रत्यवायमाह **वसिष्ठः**—
"ग्रहणे संक्रमे वाऽपि न स्नायाद्यदि मानवः। सप्तजन्मनि कुष्ठी स्याद्दुःखभागी च जायते"॥ इति।
शातातपः— " स्नानं दानं तथा श्राद्धं अनंतं राहुदर्शने " ।
अत्र हिरण्येनामेन वा श्राद्धं कुर्यात्तदाह **बोधायनः**—
"अन्नाभावे द्विजाभावे प्रवासे पुत्रजन्मनि । हेमश्राद्धं संक्रमे च कुर्याच्छूद्रः सदैव हि"॥
व्यासः—
"आपद्यनग्नौ तीर्थे च ग्रहणे चंद्रसूर्ययोः। आमश्राद्धं द्विजो दद्याच्छूद्रो दद्यात्सदैव हि" ॥ इति ।
देवलः—
" यथा स्नानं च दानं च सूर्यस्य ग्रहणे दिवा । सोमस्यापि तथा रात्रौ स्नानं दानं विधीयते" ॥
यद्ग्रहणनिमित्ताशौचं तत्स्नानेन निवृत्तमित्युक्तम् **ब्रह्मांडपुराणे**—
" अशौचं जायते नृणां ग्रहणे चंद्रसूर्ययोः । राहुस्पर्शे तथा स्नात्वा दानादौ कल्पते नरः ॥
" सर्वेषामेव वर्णानां सूतकं राहुदर्शने। स्नात्वा कर्माणि कुर्वीत पक्वमन्नं विवर्जयेत् " ॥
ग्रहणकाले ततः पूर्वं वा यत्पक्वमन्नं तत्सूतकान्नं तत् पश्चादपि न भुंजीत इत्यर्थः ।
वृद्धवसिष्ठः—
" सर्वेषामपि वर्णानां निमित्तं राहुदर्शने । सचैलं तु भवेत्स्नानं सूतकान्नं च वर्जयेत् "॥
व्याघ्रपादः—
"स्मार्तकर्मपरित्यागो राहोरन्यत्र सूतके । श्रौते कर्माणि तत्कालं स्नानतः शुद्धिमाप्नुयात्"॥ इति ।
जन्ममरणनिमित्ताशौचवानपि स्नानं कुर्यादित्याह **वसिष्ठः**—
"चन्द्रसूर्यग्रहे स्नायान्मृतके सूतकेऽपि वा । अस्नायी मृत्युमाप्नोति स्नायी मृत्युं न विंदति " ॥
अत्र स्नानं श्राद्धादेरुपलक्षणम् । **अत एवांगिराः**—
" सर्वे वर्णाः सूतकेऽपि मृतके राहुदर्शने । स्नात्वा श्राद्धं प्रकुर्वीरन्दानं शाठ्यविवर्जितम् ॥
"सूर्येंदुग्रहणे यावत् तावत्कुर्याज्जपादिकम्। न स्वपेन्न च भुंजीत स्नात्वा भुंजीत मुक्तयोः"॥ इति।
कालनिर्णयेऽपि—
" नैमित्तिकं तु कर्तव्यं ग्रहणे चंद्रसूर्ययोः । यच्छ्राद्धं बांधवानां तु नारकी स्यात्ततोऽन्यथा ॥
" काम्यानि चैव श्राद्धानि शस्यंते ग्रहणादिषु " ॥ इति ।

---

१ ख—वर्त्यं ।

ब्रह्मसिद्धान्ते—

"यावान्कालः पर्वणोंऽते यावत्प्रतिपदादिमः । रवींदुग्रहणानेहा स पुण्यो मिश्रणाद्भवेत्" ॥
ग्रहणानेहा ग्रस्तकालः । आद्यन्तयोः स्नानं विहितं **कालनिर्णये**—
"ग्रस्यमाने भवेत्स्नानं ग्रस्ते होमो विधीयते । मुच्यमाने भवेद्दानं मुक्ते स्नानं विधीयते" ॥
स्मृत्यंतरे—"ग्रस्यमाने रवौ स्नायान्मुच्यमाने निशाकरे" ॥ **ब्रह्मवैवर्ते**—
"स्नानं स्यादुपरागादौ मध्ये होमः सुरार्चनम् । दानं जपश्च मुक्ते तु पुनः स्नानं विधीयते" ॥
आदिमध्यावसानेषु यद्यद्विहितं तस्य तस्य फलातिशय उक्तो **ब्रह्मपुराणे**—

"उपमर्दे लक्षगुणं ग्रहणे चंद्रसूर्ययोः । पुण्यं कोटिगुणं मध्ये मुक्तिकाले त्वनन्तकम्" ॥

स्मृत्यन्तरे—

"नाड्यः षोडश पूर्वेण संक्रांतेस्तु परेण च । राहोस्तु दर्शनं यावत्पुण्यकाल उदाहृतः" ॥ इति ।

व्यासः—

"प्राक्पश्चात्संक्रमेषूक्तः पुण्यकालो विभागशः । चंद्रसूर्योपरागे तु यावद्दर्शनगोचरः" ॥ इति ।
यत्तु **स्मर्यते**—
"त्रिदशाः स्पर्शसमये तृप्यंति पितरस्तथा । मनुष्या मध्यकाले तु मोक्षकाले तु राक्षसाः" ॥ इति ।
तद्ग्रहणे स्नानादिना सर्वेषां तृप्तिरित्येवंपरम् । न तु मोक्षकालनिषेधपरं "मुक्तिकाले त्वनंतकम्" इति **स्मरणात्** । वारविशेषयोगे फलातिशयमाह **व्यासः**
"रविग्रहे सूर्यवारे सोमे सोमग्रहे तथा । चूडामणिरिति ख्यातस्तत्रानंतफलं भवेत् ॥
"वारेष्वन्येषु यत्पुण्यं ग्रहणे चंद्रसूर्ययोः । तत्पुण्यं कोटिगुणितं ग्रासे चूडामणौ स्मृतम्" ॥ इति ।

जाबालिरपि—

"संक्रांतौ पुण्यकालस्तु षोडशोभयतः कलाः । चंद्रसूर्योपरागे तु यावद्दर्शनमोचनम्" ॥
ग्रस्तास्तमये अस्तमयपर्यंतं दर्शनगोचरत्वात्तावत्पुण्यकालो भवति ।
तत्र भोजनस्नानमाह **भृगुः**—
"ग्रस्तावेवास्तमानं तु रवीन्दू प्राप्नुतो यदि । ततः परेद्युरुदये स्नात्वाऽभ्यवहरेन्नरः" ॥ इति ।
अन्हि सूर्यग्रहणं रात्रौ चंद्रग्रहणं चेत्येवं प्रसिद्धिः सार्वजनीनां तादृशे ग्रहणे स्नानादिकमुक्तम् । यत्तु कालविपर्ययेण प्राप्यमाणं ज्योतिःशास्त्रमात्रप्रसिद्धं ग्रहणं तत्र स्नानादिकं न कर्तव्यम् ॥
तदुक्तं **कालनिर्णये**—

"सूर्यग्रहो यदा रात्रौ दिवा चंद्रग्रहस्तथा । तत्र स्नानं न कुर्वीत दद्याद्दानं न च क्वचित्" ॥ इति ।
इति **ग्रहणस्नानम्** । **संक्रांतिस्नानाकरणे प्रत्यवायमाह शातातपः**—
"सूर्यसंक्रमणे पुण्ये न स्नायाद्यदि मानवः । सप्तजन्मसु रोगी स्यात् दुःखभागी च जायते" ॥
स एव—

"संक्रांत्यां यानि दत्तानि हव्यकव्यानि मानवैः । तानि तस्य ददात्यर्कः सप्तजन्मसु निश्चितम्" ॥ इति ।
मेषादिषु द्वादशराशिषु क्रमेण संचरतः सूर्यस्य पूर्वस्माद्राशेरुत्तरराशौ प्रवेशः संक्रमणम् । तत्र स्नानाद्यंगभूतसंक्रांतिकालस्य मुख्यस्यासंभवात् तत्संबधिनैः पूर्वोत्तरकालौ गृहीतव्यौ ।
तदाह **देवलः**—

"संक्रांतिसमयः सूक्ष्मो दुर्ज्ञेयः पिशितेक्षणैः । तद्योगादप्यधश्चोर्ध्वं त्रिंशन्नाड्यः पवित्रिताः" ॥ इति ।

संक्रांतेः पूर्वोत्तरे काले एकैकस्मिन् त्रिंशत् घटिकाः पुण्या इति सामान्येनोक्तम् । तत्र विशेषं दर्शयति **वृद्धवसिष्ठः**—

"अयने द्वे विषुवे द्वे चतस्रः षडशीतयः । चतस्रो विष्णुपद्यश्च संक्रांत्योर्द्वादश स्मृताः ॥
" मृगकर्कटसंक्रांती द्वे तूदग्दक्षिणायने । विषुवे तु तुलामेषौ गोलमध्ये ततोऽपराः ॥
"कन्यायां मिथुने मीने धनुष्यपि रवेर्गतिः । षडशीतिमुखाः प्रोक्ताः षडशीतिगुणैः फलैः ॥
" वृषवृश्चिककुंभेषु सिंहे चैव रवेर्गतिः । एतत् विष्णुपदं नाम विषुवादधिकं फलैः ॥
"अतीतानागते पुण्ये द्वे उदग्दक्षिणायने । त्रिंशत्कर्कटके नाड्यो मकरे विंशतिः स्मृताः ॥
" वर्तमाने तुलामेषे नाड्यस्तूभयतो दश । षडशीत्यामतीतायां षष्टिरुक्तास्तु नाडिकाः ॥
"पुण्यायां विष्णुपद्यां च प्राक् पश्चादपि षोडश"॥ मृगो मकरः । गोलमध्ये अयनविषुव-

गोलमध्ये । गोलं वलनम् । अतीतानागत इति उदगयनमतीतं सत्पुण्यं भवति । दक्षिणायनमनागतं पुण्यं त्रिंशदित्यादिना तदेव स्पष्टीक्रियते । कर्कटसंक्रांतेः प्राचीनाः त्रिंशद्घटिकाः पुण्याः । मकर-संक्रांतेरूर्ध्वकालीना विंशतिघटिकाः पुण्या इत्यर्थः ।

गालवोऽपि—"स्थिरभे विष्णुपदं षडशीतिमुखं द्वितनुभे तुलामेषे विषुवं तु कर्कटके दक्षिणायनं मृगे सौम्यकं सूर्ये " इति । भशब्दवाच्योऽत्र राशिः । सूर्ये स्थिरराशौ स्थिते सति विष्णुपदं भवति । द्विस्वभावराशौ सूर्ये स्थिते सति षडशीतिमुखं भवति । तूलामेषद्वये स्थिते विषुवं भवति । सूर्ये कर्कटस्थे दक्षिणायनं मृगे मकरे सौम्यकं सोमदिङ्नामकमुत्तरायणम् । तैरेतैः संज्ञाभेदै राशयो व्यवह्रियंत इत्यर्थः । **बृहस्पतिः**—

" अयने विंशतिः पूर्वा मकरे विंशतिः पराः । वर्तमाने तुलामेषे नाड्यस्तूभयतो दश"॥

नात्र त्रिंशत् घटिका वा दिनवचनेन विरोधः शंकनीयः । सामान्यवचनस्याभ्यनुज्ञानपरत्वा-द्विशेषवचनोक्तो घटिकासंकोच एव प्रशस्तः । "या याः संनिहिता नाड्यस्तास्ताः पुण्यतमाः स्मृताः" इतिः **देवलस्मरणात्** । केनापि निमित्तेन सन्निहितघटिकास्वनुष्ठानासंभवे त्रिंशद्घटिकाः परमावधित्वेनाभ्यनुज्ञायंते । षडशीतीषु ततोऽपि दीर्घोऽवधिरभ्यनुज्ञायते । **भविष्योत्तरेऽपि**—

" दशार्वाङ्नाडिकाः पुण्याः पश्चादपि विषूवति । षष्टिनाड्यो व्यतीतासु षडशीतिषु पुण्यदाः ॥
" विष्णुपद्यां प्रशस्तायां प्राक् पश्चादपि षोडश " ॥ इति ।

संक्रांतीनां पूर्वोत्तरौ पुंण्यकालौ निर्णीतौ । ताश्च संक्रांतयश्च कदाचिदन्हि भवंति कदाचिद्रात्रौ तद्भेदेनानुष्ठानभेदमाह **वृद्धवसिष्ठः**—

" अन्हि संक्रमणे पुण्यमहः कृत्स्नं प्रकीर्तितम् । रात्रौ संक्रमणे भानोः दिनार्धं स्नानदानयोः ॥
" अर्धरात्रादधस्तस्मिन्मध्याह्नस्योपरि क्रिया । ऊर्ध्वं संक्रमणे चोर्ध्वं उदयात्प्रहरद्वयम् ॥
" पूर्णे चेदर्धरात्रे तु यदा संक्रमते रविः । प्राहुर्दिनद्वयं पुण्यं मुक्त्वा मकरकर्कटौ " ॥ इति ।

अन्हि यदि संक्रांतिर्भवति तदा कृत्स्नमहःपुण्यमिति वदता अर्थात् रात्रौ स्नानादिकं प्रति-षिध्यते । एवं सत्युदयोत्तरकालभाविनि दक्षिणायने पूर्वभागप्राशस्त्यं बाधित्वोत्तरभागेऽनुष्ठानं भवति । अस्तमयप्राचीनक्षणभाविन्युत्तरायणे उत्तरभागप्राशस्त्यं परित्यज्य पूर्वभागेऽनुष्ठातव्यम् । पूर्वोत्तरभागप्राशस्त्यवचनं तु मध्याह्नादिसंक्रमणविषयम् । तत्राहन्येव हेयोपादेयभागद्वयसंभवात् ।

स्मर्यते च—

" अहःसंक्रमणे रात्रौ अनुष्ठाननिषेधतः। उक्तकालौ व्यवस्थाप्यौ तद्वयात्पूर्वपश्चिमौ "॥ इति। मकरन्यायेनैव अस्तमयप्राचीनभविषु षडशीतिमुखेष्वपि पूर्वभागप्राशस्त्यं द्रष्टव्यम्। उभयभागप्राशस्त्योपेतेषु विषुवविष्णुपदेषु मध्याह्नभाविषु पूर्वत्रोत्तरत्र वा स्वेच्छयाऽनुष्ठातव्यम्। उदयानंतरभाविषु तेषु पूर्वभागे प्राशस्त्यबाधः। अस्तमयप्राचीनेषु तेषु उत्तरभागप्राशस्त्येषु बाध इति विवेकः। यदा रात्रौ संक्रमणं भवति तदा रात्रेः पूर्वस्य दिनस्योत्तरस्य वा अर्धे प्रहरद्वयं स्नानादौ पुण्यम्। कुत्र पूर्वदिनं कुत्रोत्तरमिति विवक्षायां तदुभयमर्धरात्रादित्यनेन वचनेन व्यवस्थाप्यते। द्वितीयप्रहरस्य चरमघटिका तृतीयप्रहरस्य प्रथमघटिकेत्येतत् घटिकाद्वयात्मकः कालोऽर्धरात्रः। तस्मादर्धरात्रादधः संक्रमणे सति पूर्वदिने मध्याह्नस्योपरि प्रहरद्वये क्रिया कार्या। अर्धरात्रादूर्ध्वं संक्रमणे सत्युत्तरकालीनाडुद्‌याद्र्ध्वं प्रहरद्वयं पुण्यम्। 'पूर्णे चेदर्धरात्र' इति यथोक्तघटिकाद्वये संक्रांतौ पूर्वोत्तरदिनद्वयं कृत्स्नं पुण्यम्। तदुक्तं **भविष्योत्तरे—**
"संक्रमस्तु निशीथे स्यात् षड्यामाः पूर्वपश्चिमाः। संक्रांतिकाले विज्ञेयस्तत्र स्नानादिकं चरेत्"॥ अत्रेयं व्यवस्था। अर्धरात्रे यदा षडशीतिः स्यादेतद्वचनानुसारेण पूर्वोत्तरदिनद्वयस्य पुण्यत्वाद्यद्यप्यौत्सर्गिको विकल्पः प्राप्नोति तथाऽप्युत्तरदिने षष्टि घटिका प्राशस्त्यप्रतिपादकप्रातिस्विकवचनानुग्रहबलात्तत्रैवानुष्ठातव्यम्। विषुवयोर्विष्णुपदेषु च प्रातिस्विकवचनस्य पूर्वोत्तरभागयोः साम्येन प्राशस्त्यप्रतिपादकत्वात् पूर्वस्मिन्नुत्तरस्मिन्वा स्वेच्छयाऽनुष्ठानमिति विकल्प्यते। अयनयोस्तु प्रकारांतरं वक्ष्यते। अयनव्यतिरिक्तासु दशसु संक्रांतिषु मध्यरात्रादूर्ध्वं प्रवृत्तासु परेद्युरनुष्ठानमित्यत्र न कोऽपि संशयः। अर्धरात्रात्पूर्वं प्रवृत्तासु तासु दशसु मध्ये षडशीतिव्यतिरिक्तानां षण्णां पूर्वदिनेऽनुष्ठानमित्यत्रापि नास्ति संदेहः। षडशीत्यां तु सामान्यवचनेन पूर्वेद्युरनुष्ठानं प्राप्तं षष्टिघटिकाप्राशस्त्यप्रतिपादकप्रातिस्विकवचनेन परेद्युः प्राप्नोति। अत्र पूर्वेद्युरनुष्ठानमिति निर्णयः।

" विष्णुपद्यां धनुर्मीनयुग्मकन्यासु वै यदा। पूर्वोत्तरगतं रात्रौ भानोः संक्रमणं भवेत्॥
"पूर्वाह्णे पंचनाड्यस्तु पुण्याः प्रोक्ता मनीषिभिः। अपराह्णे तु पंचैव श्रौते स्मार्ते च कर्मणि"॥ इति **स्मृतेः—** धनुर्मीनयुग्मकन्यासु। युग्मं मिथुनम्। यदा रात्रौ पूर्वभागगतं विष्णुपदीषडशीतिसंक्रमणं तदा पूर्वेद्युरपराह्णे पंचनाड्यः पुण्याः। उत्तरभागगते संक्रमणे परेद्युः पूर्वाह्णे पंचनाड्यः पुण्याः। न चैवं सति प्रहरद्वयपुण्यत्वविरोध इति वाच्यम्। पंचनाडिकावचने पुण्यातिशयस्य वाच्यत्वात्। प्रहरद्वयवाक्यं तु पुण्यमात्राभिप्रायमिति **देवीपुराणे—**

" अर्धरात्रे त्वसंपूर्णे दिवा पुण्यमनागतम्। संपूर्णे उभयोर्ज्ञेयमतिरिक्ते परेऽहनि" ॥ इति।

देवलोऽपि—

"आसन्नसंक्रमं पुण्यं दिनार्धं स्नानदानयोः। रात्रौ संक्रमणे भानोः विषुवत्ययने दिने"॥ रात्रौ भानोः संक्रमणे विषुवन्नामके जाते सति संक्रमणप्रत्यासन्नदिनार्धं पुण्यम्। अयननामकसंक्रमणे दिवा जाते सति यथायोगं कर्कटके पूर्वं दिनार्धं मकरे तूत्तरार्धं पुण्यम्। एतच्च मध्यंदिनायनविषयम्। उदयास्तमयप्रत्यासन्ने त्वयने कृत्स्नदिवसपुण्यत्वनिर्णयः पूर्वमेवोक्तः। अयनव्यतिरिक्तेषु दशसु संक्रमणेषु रात्रिभागेषु यो निर्णयः तं सर्वं पर्युदस्यति **वृद्धवसिष्ठः—**
"मुक्त्वा मकरकर्कटौ" इति। "या याः संनिहिता नाड्याः तास्ताः पुण्यतमाः स्मृताः" इति।

सामान्यवचनेन सर्वेषु रात्रिसंक्रमणेषु रात्रावेवानुष्ठानं प्रसक्तं तदपोद्य दशसंक्रांतिषु दिवानुष्ठानं विधाय मकरकर्कटयोः तत्पर्युदासे सति पूर्वप्रसक्तं रात्र्यनुष्ठानमेव पर्यवस्यति।

एवं सति रात्रौ संक्रांतिस्नानमभ्युपगच्छतो **मनु**वचनस्यापि कश्चिद्विषयविशेषः संपद्यते। तथा च **मनुः**—

" राहुदर्शनसंक्रांतिविवाहात्ययवृद्धिषु। स्नानदानादिकं कार्यं निशि काम्यव्रतेषु च "॥ इति।

सुमंतुरपि—

"रात्रौ स्नानं न कुर्वीत दानं चैव विशेषतः। नैमित्तिकं तु कुर्वीत स्नानं दानं च रात्रिषु॥

"यज्ञे विवाहे यात्रायां तथा पुस्तकवाचने। श्रवणे चेतिहासस्य रात्रौ दानं प्रशस्यते"॥ इति।

ननु यथोक्तपर्युदासानुगृहीतैः मन्वादिवचनैर्मकरकर्कटयोर्निश्यनुष्ठानप्रापणं शास्त्रांतरविरुद्धम्। तथा **भविष्योत्तरे**—

" मिथुनात्कर्कसंक्रांतिर्यदि स्यादंशुमालिनः। प्रभाते वा निशीथे वा कुर्यादहनि पूर्वतः॥

" कार्मुकं तु परित्यज्य मकरं क्रमते रविः। प्रदोषे वाऽर्धरात्रे वा स्नानं दानं परेऽहनि "॥ इति।

वृद्धगार्ग्योऽपि—

"यदास्तमयवेलायां मकरं याति भास्करः। प्रदोषे वार्धऽरात्रे वा स्नानं दानं परेऽहनि"॥ इति।

" अर्धरात्रे तदूर्ध्वं वा संक्रांतौ दक्षिणायने। पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविः॥

"प्रत्यूषे कर्कटं भानुः प्रदोषे मकरं यदि। संक्रमत् षष्ठिनाड्यस्तु पुण्याः पूर्वोत्तराः स्मृताः"॥ इति।

मैवम्। एतेषु वचनेषु रात्र्यनुष्ठानप्रतिषेधाप्रतीतेः। दिवसानुष्ठानविधानेनैवार्थात् रात्र्यनुष्ठानप्रतिषेधकल्पने पर्युदासानुगृहीतरात्रिस्नानविधायकवचनानामानर्थक्यं प्राप्नोति। तस्माच्छास्त्रद्वयेन विकल्पप्राप्तौ तत्तद्देशप्रसिद्धशिष्टाचारेण व्यवस्थेति **कालनिर्णये** निर्णीतम्। केचित्तु

" रात्रौ संक्रमणे पुण्यं दिनार्धं स्नानदानयोः। पूर्णे चेदर्धरात्रे तु यदा संक्रमते रविः॥

" प्राहुर्दिनद्वयं पुण्यं मुक्त्वा मकरकर्कटौ" ॥ इत्येवं मकरकर्कटयोरपि प्रसक्तौ इति पर्युदासात् " रात्रौ मकरकर्कटसंक्रांतौ स्नानं दानं परेहनि। पूर्वमेव दिनं ग्राह्यम् " इति तयोर्विशिष्य निश्चितत्वात् रात्रौ स्नानादिकं कार्यं रात्रौ संक्रमणं पुण्यं राहुदर्शनसंक्रान्तीत्यादीनि रात्रौ स्नानविधायीनि वचनानि मकरकर्कटान्यसंक्रमविषयाणि। अतस्तयोः पूर्वापरदिन एव स्नानम्। तदितरसंक्रमेषु तु "रात्रौ संक्रमणे पुण्यं दिनार्धं स्नानदानयोः" इति विधानाद्विकल्प इति **कालादर्शानुसारिण** आहुः। उक्तस्य स्नानदानादेरुक्तेष्वपि कालेषु विशेषमाह **शातातपः**—

"कुर्यात्सदायने मध्ये विष्णुपद्यां विषूवति। षडशीत्यामंत्यभागे स्नानादिविधिमादृतः"॥ इति।

अयनादिषु यत्र यावान् पुण्यकाल उक्तः तावंतं कालं त्रेधा विभज्य मध्ये विष्णुपद्यामित्याद्यवगंतव्यम्। अयने सदा यावान् पुण्यकाल उक्तः तत्तस्मिन्सर्वत्र कुर्यादित्यर्थः। तस्मिन्नपि मध्यादिभागे याः सन्निहिता नाड्यस्तासां पूर्वोदाहृतवचनेन पुण्यतमत्वं द्रष्टव्यम्। **गालवस्तु**—"मध्ये विषुवतिदानं विष्णुपदे दक्षिणायने चादौ षडशीतिमुखेऽतीते तथोदगयने च भूरि फलम् "। इति। संक्रांतिषु फलमाह **वृद्धवसिष्ठः**—

" अयने कोटिपुण्यं च सहस्रं विषुवे फलम्। षडशीत्यां सहस्रं तु फलं विष्णुपदेऽपि च"॥ इति।

रजस्वलास्नानमाह अंगिराः—

" स्नानं रजस्वलायास्तु चतुर्थेऽहनि निर्दिशेत्। कुर्याद्रजसि निर्वृत्ते शौचार्थं तु ततः पुनः" ॥

योगयाज्ञवल्क्यः—

"हस्तेऽश्नीयान्मृन्मये वा हविर्भुक् क्षितिशायिनी।रजस्वला चतुर्थेऽन्हि स्नात्वा शुद्धिमवाप्नुयात्"॥ **पद्धतौ**—

" त्रिरात्रं च व्रतं कृत्वा श्रुतिस्मृतिसमीरितम् । चतुर्थे संगवे स्नात्वा स्त्रीधर्मं तु समाचरेत् " ॥ **संग्रहे**—

" मृते च सूतके चांते संगवे स्नानमाचरेत् । संगवात्परतः स्नानमार्तवे तु विशिष्यते" ॥ इति। **कात्यायनः**–" रजस्वला चतुर्थेऽन्हि स्नात्वा शुद्धिमवाप्नुयात् " ॥ **मनुरपि** (५।६५)—

" रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला " ॥ इति । रजोनिवृत्त्यनंतरं पुनः स्नानेन साध्वी दैवादिकर्मार्हा स्यादित्यर्थः । यत्पुनः **अंगिरोवचनम्**—

"शुद्धा भर्तुश्चतुर्थेऽन्हि स्नात्वा नारी रजस्वला। दैवे कर्मणि पित्र्ये च पंचमेऽहनि शुध्यति"॥ इति। तद्रजोनिवृत्तिकालोपलक्षणार्थम् । यतः **स एवाह**—

"साध्वाचारा न तावत् सा स्नातापि स्त्री रजस्वला।यावत् प्रवर्तमानं हि रजोऽस्या न निवर्तते"॥इति। साध्वाचारा दैवादिकर्मयोग्येत्यर्थः । स्पर्शयोग्या तु स्नानादनंतरं भवत्येव ।

"स्नाता रजस्वला या तु चतुर्थेऽहनि शुध्यति। कुर्याद्रजोनिवृत्तौ तु दैवपित्र्यादि कर्म च "॥ इति **पराशर** स्मरणात् (७।१७) । रोगजन्यरजोऽनुवृत्तौ तु नास्त्यशुद्धिः । यदाह **अंगिराः**—

" रजश्चतुर्विधं ज्ञेयं रोगजं रागजं तथा । धातुजं कालजं चेति योषितां तु बुधोत्तमैः ॥

" एकादशात् द्वादशाद्वा वर्षादूर्ध्वं भवेद्रजः । पंचाशद्वत्सरादूर्ध्वं स्त्रीणां तत्तु निवर्तते ॥

" रोगेण यद्रजः स्त्रीणामत्यर्थं तु प्रवर्तते । अशुद्धा नैव सा तेन यस्माद्वैकारिकं हि तत्"॥

एवमकाले रागादिजनितरजोदर्शने द्रष्टव्यम् । तथा **चंद्रिकायाम्**—(पृ. ११८ पं. १)

"अकाले यद्भवेत् स्त्रीणां रक्तमाहुर्मनीषिणः । काले तु यद्रजः प्रोक्तं तस्मात्तत्रैव सा शुचिः"॥ **अंगिराः**—

'आ द्वादशाहान्नारीणां मूत्रवच्छौचमिष्यते।आऽष्टादशाहात्स्नानं स्यात् त्रिरात्रात्परतः शुचिः'॥इति। **विज्ञानेश्वरः** (प्रा. पृ. १७६ पं. ३२)—" यदा रजोदर्शनादारभ्य पुनः सप्तदशदिनाभ्यंतरे रजोदर्शनं तदा अशुद्धिर्नास्त्येव । अष्टादशे त्वेकाहाच्छुद्धिः । एकोनविंशे त्र्यहात् । तत उत्तरेषु त्र्यहाच्छुद्धिः । यस्या विंशतिदिनोत्तरं प्रायशो रजोदर्शनं तस्या विंशतिदिनप्रभृति त्रिरात्रम् । यस्याः पुनः प्रागेवाष्टादशदिनात्प्राचुर्येण रजोनिर्गमस्तस्याः त्रिरात्रम् । तथा **अत्रिः**—

" रजस्वलायां स्नातायां पुनरेव रजस्वला । अष्टादशदिनादर्वाक् अशुचित्वं न विद्यते॥

"उनविंशदिनादर्वाक् एकाहमशुचिर्भवेत्" । इति । **स्मृत्यर्थसारे** " रजस्वला चतुर्थेन्हि षष्टिमृत्तिकाभिः शौचं कृत्वा विधवा चेत् द्विगुणमृत्तिकाभिः शौचं कृत्वा दंतधावनपूर्वं संगवे सचैलं स्नायात् । स्नातायाः पुनरपि रजो दृष्टावष्टादशदिनादर्वाक् अशुचित्वं नास्ति । अष्टादशदिने रजोदृष्टौ एकरात्रमशुचिः । एकोनविंशे द्विरात्रम् विंशे त्रिरात्रमेव । प्रायो विंशतिदिनादूर्ध्वं रजःस्राविणीनामेवम् " इति । प्रसूतिकाविषये **प्रजापतिः**—

"प्रसूतिका तु या नारी स्नानतो विंशतेः परम् । आर्तवी रजसा प्रोक्ता प्राक् तु नैमित्तिकं रजः॥

" रजस्युपरते तत्र स्नानेनैव शुचिर्भवेत् " ॥

संग्रहे—
“ प्रथमेऽहनि चंडाली द्वितीये सूतिका भवेत्। तृतीयेऽन्हि स्वधर्मस्था चतुर्थे पतिता यथा ॥
“ संगवांते चतुर्थेऽन्हि स्नानाच्छुद्धिमवाप्नुयात् ॥
“ एकविंशतिधा लिप्य सर्वांगं शुद्धया मृदा। कृत्वा स्नानशतं पश्चात् शुचिर्भवति नान्यथा ॥
“ स्नानांते भास्करं दृष्ट्वा पुत्रं प्रार्थ्य सुमंगली। त्रिवारं प्राशयेदन्नं न चेद्दोषवती भवेत्”॥ इति।
बोधायनः—
“रजस्वला तु संस्पृष्टा चंडालान्त्यश्ववायसैः। तावत्तिष्ठेन्निराहारा यावत् कालेन शुध्यति”॥ इति।
भोजनकालस्पर्शे **स एव**—
“ रजस्वला तु भुंजाना श्वान्त्यजादीन् स्पृशेद्यदि। गोमूत्रयावकाहारा षड्रात्रेण विशुध्यति ॥
“ अशक्तौ कांचनं दद्यात् विप्रेभ्यो वाऽपि भोजनम्” ॥ इति। **बृहस्पतिः**—
“ पतितांत्यश्वपाकैश्च संस्पृष्टा चेद्रजस्वला। तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाचरेत् ॥
“ प्रथमेऽन्हि त्रिरात्रं स्यात् द्वितीये त्र्यहमेव च। अहोरात्रं तृतीयेऽन्हि चतुर्थे नक्तमाचरेत् ॥
“ रजसा भुंजते नार्यो मोहात् स्पृष्टाः शवादिभिः। त्र्यहे परिसमाप्ते तु कृच्छ्रं चांद्रायणोत्तरम्” ॥
अखंडादर्शे—
“उच्छिष्टेन तु संयुक्ता चंडालादीन्यदि स्पृशेत्। कृच्छ्रं सांतपनं कुर्यात् चांद्रायणमथापि वा”॥इति।
विण्मूत्रोत्सर्गे भुक्त्वा वा अकृतशौचाया रजस्वलायाश्चंडालादिस्पर्शे अकामतश्चांद्रायणं कामतः सांतपनमिति व्यवस्था। **संग्रहे**—
“ आर्तवाभिप्लुता नारी शवं स्पृष्ट्वा विमोहिता। आ स्नानकालान्नाश्नीयादासीना वाग्यता बहिः”॥
भृगुः—
“ सूतकं प्रेतकं स्पृष्ट्वा श्रुत्वा बंधुषु मारणम्। आ स्नानकालान्नाश्नीयात्पञ्चगव्येन शुध्यति ॥
“आर्तवाभिप्लुतायास्तु शावाशौचं भवेद्यदि। सूतकं वा भवेन्मध्ये स्नात्वा भोजनमिष्यते”॥ इति।
स्नात्वा वेत्रादिनिर्मितपात्रोद्धृततोयैरिति शेषः। **पराशरः**—
“ स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला। पात्रांतरिततोयेन स्नानं कृत्वा व्रतं चरेत् ॥
“ सिक्तगात्रा भवेदद्भिः सांगोपांगं कथंचन। न वस्त्रपीडनं कुर्यान्नान्यद्वासश्च धारयेत् ॥
“ शावे च सूतके चैव ह्यंतरा चेदृतुर्भवेत्। नास्नात्वा भोजनं कुर्यात् भुक्त्वा चोपवसेदहः”॥
अत्र स्नानप्रकारमाह **स एव**—
“ मृतसूतकमध्ये तु रजोदृष्टौ कथं भवेत्। ब्राह्मणानां करैर्मुक्तं तोयं शिरसि धारयेत् ॥
“सर्वतीर्थजलाच्छ्रेष्ठं तोयं विप्रकरच्युतम्। दद्याच्छक्त्या ततो दानं पुण्याहेन विशुध्यति”॥ इति।
रजस्वलयोरन्योन्यसंस्पर्शे वर्णक्रमेण शुद्धिमाह **पराशरः** (७।१३–१६)—
“ स्पृष्ट्वा रजस्वलाऽन्योन्यं ब्राह्मणी ब्राह्मणी तथा। तावत्तिष्ठेन्निराहारा त्रिरात्रेणैव शुध्यति ॥
“ स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी क्षत्रिया तथा। अर्धकृच्छ्रं चरेत्पूर्वा पादमेकं त्वनंतरम् ॥
“ स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी वैश्यजा तथा। पादहीनं चरेत्पूर्वा पादमेकं त्वनंतरा ॥
“स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी शूद्रजा तथा। कृच्छ्रेण शुध्यते पूर्वा शूद्रा दानेन शुध्यति”॥ इति।
ब्राह्मण्योः स्पर्शे तत आरभ्य स्नानपर्यंतमुभयोराहारत्यागः त्रिरात्रकृच्छ्रं च। एतच्च सहशयनादिचिरस्पर्शविषयम्। सकृत् स्पर्शे तु एकरात्रोपवासेन पंचगव्येन शुद्धिः स्नानपर्यंतमाहारत्यागश्च।

" आर्तवाभिप्लुता नारी त्वार्तवाभिप्लुतां स्पृशेत् । स्नात्वोपवासं कुर्यातां पंचगव्येन शुध्यतः ॥
" आ स्नानकालान्नाश्नीतो भुक्त्वा चांद्रायणं भवेत् " ॥ इति **स्मरणात्** । **स्मृत्यर्थसारे**—
"कृच्छ्रं तस्या यया स्पृष्टमन्यस्यास्तु तदर्धकम्। दांडाद्यंतर्हिते नो चेत् अन्यस्या अपि कृच्छ्रकम्"॥ इति । कृच्छ्रमत्र त्रिरात्रादि । **तत्रैव**—
" स्पृष्टे रजस्वलेऽन्योन्यं सगोत्रे चैकभर्तृके । कामतोऽकामतो वाऽपि त्रिरात्रेणैव शुध्यतः "॥ त्रिरात्रेण त्रिरात्रोपवासेन ।
"शुना पुष्पवती स्पृष्टा पुष्पवत्यान्यया तथा। शेषाण्यहान्युपवसेत् स्नात्वा शुध्येद् घृताशनात्"॥ इति **संवर्त**वचनम् अकामकृतस्पर्शविषयम्। **वृद्धविष्णुरपि** " रजस्वलां हीनवर्णां रजस्वलां स्पृष्ट्वा न तावदश्नीयाद्यावन्न शुद्धिः स्यात्। सवर्णामधिकवर्णां स्पृष्ट्वा सद्यः स्नात्वा शुध्यति"॥इति।
विष्णुः (२२।७२)—
"रजस्वला हीनवर्णां सार्तवामुत्तमां यदि। स्पृशेत् स्पृष्ट्वा न भुंजीत स्नानादूर्ध्वं तु भोजनम्"॥इति।
" उपवासं ततः कुर्याद् ब्राह्मणान् भोजयेत्ततः " ॥ स्पर्शे सत्युद्धृतैः स्नात्वा उपोष्य चतुर्थाहे स्नानादूर्ध्वं ब्राह्मणान् भोजयित्वा भुंजीतेत्यर्थः । **स एव**—" रजस्वलासंस्पृष्टोऽस्नात्वा भुंजन्नुपवासत्रयं चरेत् । तच्छायां भुक्तिपात्रं वा स्पृष्ट्वा अस्नात्वा भुंजन्नुपवासेन शुध्येन्मलिनं तद्वासस्तदन्नं स्पृष्ट्वा अस्नात्वा भुंजन्नुपवासत्रयं चरेत् । उदक्यापात्रे अज्ञानात् भुंजन् प्राजापत्यमभ्यस्येत् । उदक्योच्छिष्टं भुंजन् कृच्छ्रं सांतपनं चरेत् । भोजनकाले रजस्वलांतरदर्शने "आ स्नानकालं नाश्नीयात् ब्रह्मकूर्चं ततः पिबेत्"। चंडालदर्शने उपवासत्रयम्। कामतस्तु प्राजापत्यम्। रजस्वला श्वादिभिर्दष्टा यदि पंचरात्रं निराहारा पंचगव्येन शुध्यति " ॥ इति ।
अखंडादर्शे—"रजस्वलाया भोजनं पाने वा प्रतिलोमप्रसूतानामन्यतमनिरीक्षणे स्नानांतमनशनं तदशक्तौ प्रतिनिधिरेकस्य दिनस्य पंच वा त्रीन्वा विप्रान्भोजयेत्" ॥ इति । **अत्रिः**—
"आर्तवा यदि चंडालमुच्छिष्टा संप्रपश्यति । आ स्नानकालात् नाश्नीयादासीना वाग्यता बहिः ॥
"पादकृच्छ्रं ततः कुर्यात् ब्रह्मकूर्चं पिबेत्पुनः । ब्राह्मणान्भोजयेद्द्याद्विप्राणामनुशासनात्"॥ इति।
ज्वरादिभिरातुरस्य स्नाननिमित्ते प्राप्ते कर्तव्यमाह **पराशरः** (७।२०)—
"आतुरस्नान उत्पन्ने दशकृत्वो ह्यनातुरः । स्नात्वा स्नात्वा स्पृशेदेनं ततः शुध्येत्स आतुरः "॥ इति । अत्र प्रतिस्नानमातुरस्य वासो विपरिवर्तनीयम् । **उशनाः**—
" ज्वराभिभूता या नारी रजसा च परिप्लुता। कथं तस्या भवेच्छौचं शुद्धिः स्यात्केन कर्मणा ॥
"चतुर्थेऽहनि संप्राप्ते स्पृशेदन्या तु तां स्त्रियम्। सा सचैलावगाह्याऽपः स्नात्वा स्नात्वा पुनः स्पृशेत्"॥
" दश द्वादशकृत्वो वा ह्याचामेच्च पुनः पुनः । अन्यान्यानि च वासांसि ततः शुद्धा भवेत्तु सा ॥
" दद्याच्छक्त्या ततो दानं पुण्याहेन विशुध्यति " ॥ इति । **योगयाज्ञवल्क्यः**—
" तूष्णीमेवावगाहेत यदा स्यादशुचिर्नरः । आचम्य प्रयतः पश्चात् स्नानं विधिवदाचरेत् " ॥
विष्णुरपि
"स्नानार्हस्तु निमित्तेन कृत्वा तोयावगाहनम्। आचम्य प्रयतः पश्चात् स्नानं विधिवदाचरेत्"॥ इति।
शातातपः—
" मार्गे तु यत्र संस्पृष्टिर्यात्रायां कलहादिषु । ग्रामसंदूषणे चैव स्पृष्टिदोषो न विद्यते " ॥

---

१ ख—दृष्टा ।

षट्त्रिंशन्मतेऽपि—

" देवयात्राविवाहेषु यज्ञेषु प्रकृतेषु च। उत्सवेषु च सर्वेषु स्पृष्टात् स्पृष्टिर्न दुष्यति "॥

बृहस्पतिरपि—

"तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे। नगरे ग्रामदाहे च स्पृष्टात् स्पृष्टिर्न दुष्यति"॥

पाद्मेऽपि—

" देवालयसमीपस्थान् देवसेवार्थमागतान्। चंडालान्पतितान्वाऽपि स्पृष्ट्वा[1] न स्नानमाचरेत् "॥

आपस्तंबः (१।५।१५।८) " शक्तिविषये न मुहूर्तमप्यप्रयतः स्यात् " इति॥

इति **नैमित्तिकस्नानानि**। अथ **काम्यस्नानानि। पुलस्त्यः**—

" पुष्ये च जन्मनक्षत्रे व्यतीपाते च वैधृतौ। अमायां च नदीस्नानं पुनात्या सप्तमं कुलम्॥

" रव्यंगारशनेर्वारे स्नानं कुर्वंति ये नराः। व्याधिभिस्ते न पीड्यंते मृगैः केसरिणो यथा॥

" चैत्रकृष्णचतुर्दश्यां यः स्नायाच्छिवसन्निधौ। न प्रेतत्वमवाप्नोति गंगायां च विशेषतः "॥

यमः—

" कार्तिक्यां पुष्करे स्नातः सर्वपापैः प्रमुच्यते। माघ्यां स्नातः प्रयागे तु मुच्यते सर्वकिल्बिषैः॥

" सूर्यग्रहणतुल्या तु शुक्लमाघस्य सप्तमी। अरुणोदयवेळायां तस्यां स्नानं महाफलम्॥

" पुनर्वसुबुधोपेता चैत्रमाससिताष्टमी। स्रोतःसु विधिवत्स्नात्वा वाजपेयफलं लभेत् "॥

शातातपोऽपि—

" अमावास्या भवेद्वारे यदा भूमिसुतस्य वै। जान्हवी स्नानमात्रेण गोसहस्रफलं लभेत्॥

" कार्तिकं सकलं मासं नित्यस्नायी जितेंद्रियः। जपन्हविष्यभुक् स्नातः सर्वपापैः प्रमुच्यते॥

" तुलायां मकरे मेषे प्रातःस्नायी सदा भवेत्। हविष्यं ब्रह्मचर्यं च महापातकनाशनम् "॥

चंद्रिकायाम् (पृ. १२३ पं. ७)—" आषाढादिचतुर्मासं प्रातःस्नायी भवेन्नरः।

"विप्रेभ्यो भोजनं दत्वा कार्तिक्यां गोप्रदो भवेत्। स वैष्णवपदं याति विष्णुव्रतमिदं स्मृतम् "॥

मार्कंडेयः—

" सर्वकालं तिलैः स्नानं पुण्यं व्यासोऽब्रवीन्मुनिः। तुष्यत्यामलके विष्णुरेकादश्यां विशेषतः॥

" श्रीकामः सर्वदा स्नानं कुर्वीतामलकैर्नरः। सप्तमीं नवमीं चैव पर्वकालं च वर्जयेत्"॥ इति।

योगयाज्ञवल्क्योऽपि—

" धात्रीफलैरमावास्यासप्तमीनवमीषु च। न स्नायात्तस्य हीयंते तेज आयुर्धनं सुतः "॥

धात्री आमलकी। **चंद्रिकायाम्** (पृ. १२६ प. २)—

"षष्ठी च सप्तमी चैव नवमी च त्रयोदशी। संक्रांतौ रविवारे च स्नानमामलकैः त्यजेत्"॥ इति।

शौनकोऽपि—

" कल्केनामलकेनासु न विप्रः स्नानमाचरेत्। संपत्कामस्तु सप्तम्यां नवम्यां नष्टशीतगौ॥

" अर्थकामी त्रयोदश्यां दशम्यां पुत्रवत्सलः। पुत्रार्थकामो यो विप्रो द्वितीयायां कदाचन "॥

माधवीये—

"गुरुवारेऽप्यमायां च ह्यश्वत्थच्छायवारिणा। स्नानं प्रयागस्नानेन समं पातकनाशनम्॥

" शल्मलीतिंतिणीनिंबकरंजौ द्वौ हरीतकी। कोविदारकपित्थार्का बदरी च विभीतकः॥

" शेलुश्च खादिरश्चैषां स्नानं छायासु वर्जयेत् "॥ इति।

---

१ क्षग-र्की।

अथ माघस्नानविधिः । तत्र **विष्णुः**—

“ बालाश्च तरुणा वृद्धा नरनारीनपुंसकाः । स्नात्वा माघे शुभे तीर्थे प्राप्नुवंतीप्सितं फलम् ॥
“ माघमास्युषसि स्नात्वा विष्णुलोकं स गच्छति ॥
“मकरस्थे रवौ यो हि न स्नात्यनुदिते रवौ । कथं पापैः प्रमुच्येत कथं स त्रिदिवं व्रजेत्”॥ इति।

अनेन माघस्नानं उदयात्पूर्वमेव कर्तव्यमिति सिद्धम् । यत्तु **महाभारते**—

“ माघे ह्यर्धोदिते सूर्ये स्नानं विधिवदाचरेत् । नियतो नियताहारः सर्वपापैः प्रमुच्यते ॥
“ किंचिदभ्युदिते सूर्ये स्नानं माघे समाचरेत् । यस्तस्य सर्वपापानि विनश्यंति न संशयः ।
“ माघमासे रटंत्यापः किंचिदभ्युदिते रवौ । ब्रह्मघ्नं वा सुरापं वा कं पतंतं पुनीमहे ”॥ इति ।

तत्संध्योपासनाद्यनधिकृतस्त्रीशूद्रादिविषयम् ।

“उषस्युपोदये माघे स्नानमाहुर्द्विजन्मनाम् । स्त्रीशूद्राणां तथाऽन्येषामर्धोदय उपोदये”॥ इति **स्मरणात्** । ब्राह्मणादिविषयत्वे संध्यातिक्रमदोषोऽपि दुर्वारः स्यात् । स्नानपूर्वकत्वात्संध्यावंदनादिः । न ह्युदयात्पूर्वं किंचिदुदये च कालद्वये स्नानमिति युक्तम् । मार्जनाद्युपस्थानांतस्यैककर्मत्वेन कर्मांतरानुष्ठानायोगात् । उदयसमये उपस्थानविधानाच्च । न च माघे किंचिदुदयस्नानानन्तरमनुष्ठानम् । “ संधौ संध्यामुपासीत नास्तगे नोद्गते रवौ ” इति । **योगयाज्ञवल्क्येन** संध्योत्कर्षस्य निषेधात्संध्यातिक्रमे शूद्रत्वादिप्राप्तिस्मरणाच्च । यद्वा ‘ उषस्युषसि यत्स्नानं संध्यायामुदितेऽपि वा ’ इतिवत्स्नानं प्रशंसापरं कैमुत्तिकन्यायप्रदर्शनपरं वेत्याहुः । केचित्तु

“ विचेयतारके काले नित्यस्नानं विधाय च । पुनरभ्युदिते सूर्ये माघे स्नानं समाचरेत् ॥
“ अध्यर्धघटिकापूर्वं परं सूर्योदयात्तथा । स एवाभ्युदितो नाम धर्मशास्त्रे प्रकीर्तितः ”॥ इति ।

वचनमाचक्षाणा उदयानंतरं सार्धघटिकामध्ये द्वितीयस्नानं कर्तव्यमिति वदंति । **विष्णुः**—

“पौषफाल्गुनयोर्मध्ये प्रातःस्नायी सदा भवेत् । दर्शं वा पौर्णमासीं वा प्रारभ्य स्नानमाचरेत् ॥
“ पुण्यान्यहानि त्रिंशत्तु मकरस्थे दिवाकरे । तत्र चोत्थाय नियमं गृह्णीयाद्विधिपूर्वकम् ॥
“ माघमासमिमं पुण्यं स्नास्येऽहं देवमाधव । तीर्थस्यास्य जलैर्नित्यमिति संकल्प्य चेतसि ॥
“ततः स्नात्वा शुभे तीर्थे दत्वा शिरसि वै मृदम् । स्नात्वा पितॄंस्तर्पयित्वा उत्तीर्य तु ततो जलात् ॥
“ काष्ठमौनी नमस्कृत्य पूजयेत्पुरुषोत्तमम् । शंखचक्रधरं देवं माधवं पूजयेत्तथा ॥
“ वन्हौ हुत्वा विधानेन ततस्त्वेकाशनो भवेत् । भूशय्यो ब्रह्मचर्येण शक्तः स्नानं समाचरेत् ॥
“ अशक्तस्याधनाढ्यस्य स्वेच्छा सर्वत्र कथ्यते । अवश्यमेव कर्तव्यं माघस्नानमिति श्रुतिः ॥
“ तिलस्नायी तिलोद्वर्ती तिलहोमी तिलोदकी । तिलदस्तिलभोक्ता च षट्तिलो नावसीदति ॥
“ तिला आमलकाश्चैव तीर्थे देयास्तु नित्यशः । तथा प्रज्वालयेद्वन्हिमिंधनाद्यैर्द्विजन्मनाम् ॥
“ एवं स्नानस्यावसाने भोजयेत् द्विजदंपती । विविधानि च देयानि प्रच्छादनपटास्तथा ॥
“ अनेन विधिना दद्यान्माधवः प्रीयतामिति ।
“ पित्रा पितामहैः सार्धं तथैव प्रपितामहैः । मात्रा मातामहैः सार्धं वृद्धमातामहैस्तथा ।
“एकविंशकुलैः सार्धं भोगान्भुक्त्वा यथेप्सितान् । माघमास्युषसि स्नात्वा विष्णुलोकं स गच्छति”॥

नारदीयपुराणे—
" संप्राप्ते माघमासे तु तपस्विजनवल्लभे । क्रोशंति सर्ववारीणि समुद्गच्छति भास्वति ॥
" पुनीमः सर्वपापानि त्रिविधानि न संशयः " ॥ **पाद्मे**—
" आपो नारायणो देवः सर्ववेदेषु पठ्यते । मकरस्थे रवौ माघे गोविंदाच्युतमाधव ॥
" स्नानेनानेन मे देव यथोक्तफलदो भव। इति मंत्रं समुच्चार्य स्नायान्मौनं समाश्रितः ॥
"बहिः स्नात्वा तु वाप्यादौ द्वादशाब्दफलं लभेत् । तटाके द्विगुणं राजन् नद्यादौ तु चतुर्गुणम् ॥
" दशधा देवखातेषु शतधा च महानदी । शतं चतुर्गुणं राजन्महानद्योस्तु संगमे ॥
" सहस्रगुणितं सर्वं तत्फलं मकरे रवौ । गंगायां स्नानमात्रेण लभते मानुषो नृप ॥
" पापानां भूरिभारस्य दाहदेशं प्रजापतिः। प्रयागं विदधे भूप प्रजानां च हिते स्थितः ॥
" दुर्जया वैष्णवी माया देवैरपि सुदुस्त्यजा। प्रयागे दह्यते साऽपि माघमासि नराधिप ॥
"मकरस्थे रवौ माघे यत्र क्वापि बहिर्जले। निष्कामैर्वा सकामैर्वा स्नातव्यं हरितुष्टये" ॥ इति ।
प्रकरणपर्यालोचनया माघस्नानं नित्यं काम्यं चेत्याहुः। **चंद्रिकायाम्** (पृ. १११, पं. २६)—
"नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते। तर्पणं तु भवेत्तस्य अङ्गत्वेन प्रकीर्तितम्" इति ॥
इति **काम्यस्नानम्** । अथ **मलापकर्षणस्नानम्** । तत्र **भरद्वाजः**—
" अभ्यंगस्नपने योग्या वारा ये तिथिभिः सह । कथ्यंते तेऽधुना स्पष्टं पुष्टये बलवृद्धये ॥
" इंदोर्बुधस्य सौरश्च वारेऽभ्यंगः प्रशस्यते। कांतिं श्रियं तथा दद्युर्भोगान् वाराधिपाः क्रमात् ॥
" द्वितीयाद्याश्चतस्रश्च प्रशस्ताः सप्तमी तथा। नवमी दशमी चैव त्रयोदश्यपि च स्मृताः॥
" भानुभौमामराचार्यशुक्रवारेषु संक्रमे । व्यतीपाते च जन्मर्क्षे नाभ्यंगस्नानमाचरेत् ॥
"एकादश्यां चतुर्दश्यां अष्टम्यां प्रतिपद्यपि। षष्ठ्यां पर्वणि चाभ्यंगस्नानं नैव समाचरेत् ॥
" उत्तराफल्गुनी ज्येष्ठा श्रवणार्द्रासु रात्रिषु । अभ्यंगस्नपनं धीमान् सुखार्थी वर्जयेत्तथा॥
"शिशुरोगार्तवृद्धानां यथाकालं शरीरिणाम्। अभ्यंगोष्णोदकस्नानं नैव दोषावहं स्मृतम्"॥ इति।
व्यासः—" पंचमीं दशमीं चैव तृतीयां च त्रयोदशीम् ।
"अभ्यंगात्स्पर्शनात्पानात् यश्च तैलं निषेवते।चतुर्णां तस्य वृद्धिः स्यात् धनापत्यबलायुषाम्"॥इति।
यत्तु **गर्ग** आह
"न च स्पृश्या त्रयोदश्यां तृतीयायां तिथौ तथा।शाश्वतीं भूतिमन्विच्छन्दशम्यामपि पंडितः"॥इति।
यदपि **गार्ग्यः**—
" त्रयोदश्यां तृतीयायां प्रतिपद्दशमीद्वये । तैलाभ्यंगं न कुर्वीत पिबेत्तु द्वादशीं विना " ॥ इति ।
यदपि **वृद्धगार्ग्यः**—
" दशमी पुत्रनाशाय धनहान्यै त्रयोदशी । तृतीयोभयनाशाय स्नाने ता वर्जयेदतः " ॥ इति ।
एतानि वचनानि क्षत्रियादिविषयाणि ।
"त्रयोदश्यां तृतीयायां दशम्यां चैव सर्वदा। शूद्रविट्क्षत्रियाः स्नानं न कुर्युस्तैलसंस्कृतम्"॥इति
जाबालिस्मरणादिति केचित्।अपरे तु सर्वेषामपि द्विजानां दशम्यादावभ्यंगस्नाननिषेधपराण्येव **गार्ग्यादिवचनानि** । **जाबालिवचनं** तु क्षत्रियादीनां दोषाधिक्यप्रतिपादनार्थम् ।
" सामान्येन निषेधेऽपि दोषाधिक्यान्निषेधनम् । तद्दोषभेदहेतुत्वादिति शास्त्रविदो विदुः"॥ इति।
मरीचिस्मरणादित्याहुः ।

तथा **चापस्तंबः**—
"याहच्छिकं तु यत्स्नानं भोगार्थं क्रियते द्विजैः । तन्निषिद्धं दशम्यादेर्नित्यं नैमित्तिकं न तु"॥
जाबालिरपि—
"नित्यं न हापयेत्स्नानं काम्यं नैमित्तिकं च यत्।दशम्यामपि कर्तव्यं न तु याहच्छिकं क्वचित्"॥इति
याहच्छिकं मलापकर्षणार्थम्। "मलव्यपोहनफलं स्नानं याहच्छिकं तु तत्" इति। **गर्गस्मरणात्**।
एवं च नित्यनैमित्तिककाम्यस्नानानां दशम्यादावप्रतिषेधः । याहच्छिकस्यैव निषेधः । यदुक्तं
आपस्तंबेन—"विना तु सततस्नानं न स्नायाद्दशमीषु च" इति । यदपि **गर्गेणोक्तम्**—
"पुत्रजन्मनि संक्रांतौ श्राद्धे जन्मदिने तथा। नित्यस्नाने च कर्तव्ये तिथिदोषो न विद्यते"॥ इति।
तत्काम्यनैमित्तिकयोरपि प्रदर्शनार्थमिति **स्मृतिचंद्रिकायाम्** (पृ. १२५ पं. २६) ।
व्यासः—"षष्ठ्यष्टमी पंचदशी पक्षद्वयचतुर्दशी । अत्र संनिहितं पापं तैले मांसे क्षुरे भगे" ॥
मनुरपि—
" पक्षादौ च रवौ षष्ठ्यां रिक्तायां च तथा तिथौ । तैलेनाभ्यज्यमानस्तु धनायुर्भ्यां प्रहीयते" ॥
गर्गः— **चंद्रिकायाम्** (पृ. १२५ पं. १०)—
" पंचदश्यां चतुर्दश्यामष्टम्यां रविसंक्रमे । द्वादश्यां सप्तमीषष्ठ्योस्तैलस्पर्शं विवर्जयेत् " ॥
" कुहूपूर्णेंदुसंक्रांतिचतुर्दश्यष्टमीषु च । नरश्चंडालयोनिः स्यात्तैलस्त्रीमांससेवनात् ॥
"उत्पत्तौ च विपत्तौ च दंतकाष्ठेषु मैथुने । अभ्यंगेऽभ्युदयस्नाने तिथिस्तात्कालिकी स्मृता"॥ इति।
पुराणेऽपि—"चतुर्दश्यष्टमी षष्ठी अमावास्या च पूर्णिमा। पर्वाण्येतानि राजेंद्र रविसंक्रांतिरेव च॥
" तैलस्त्रीमांससंभोगी पर्वस्वेतेषु यः पुमान् । विण्मूत्रभाजनं नाम प्रयाति नरकं नरः"॥
बोधायनोऽपि—
" अष्टम्यां च चतुर्दश्यां पंचदश्यां विशेषतः। शिरोभ्यंगं वर्जयेत्तु पर्वसंधौ तथैव च " ॥ इति।
वृद्धगार्ग्योऽपि—
"एकादश्यां दशम्यां च द्वादश्यां पंचपर्वसु । श्राद्धाहे च व्रताहे च स्त्रियं तैलं च वर्जयेत्"॥ इति।
मरीचिरपि—
" पंचपर्वसु नंदासु व्यतीपाते च संक्रमे । स्त्रियं तैलं च मांसं च दंतकाष्ठं च वर्जयेत्"॥ इति ।
गर्गः—
" तैलस्नानं सदा पुण्यं कुर्यादामलकैः श्रियै । सप्तमीनवमीदर्शरविसंक्रमणादृते " ॥
शातातपोऽपि—
"अमायां च नवम्यां च सप्तम्यां च विशेषतः । धात्रीकल्केन यत्स्नानं तत्स्नानं च विवर्जयेत्"॥
कालादर्शे—
'सप्तमी नवमी दर्शसंक्रांतिग्रहणेषु च । धात्रीफलस्य कल्केन तैलस्नानं च नाचरेत् "॥ इति ।
वृद्धवसिष्ठः—
" दंतकाष्ठे त्वमावास्या मैथुने च चतुर्दशी । हंति सप्तकुलं पुंसां तैलग्रहणतोऽष्टमी ॥
" दिवा कपित्थछायायां रात्रौ दधिषु सक्तुषु। धात्रीकल्के तु सप्तम्यामलक्ष्मीर्वसते सदा"॥
एवं वारनिषेधोऽपि **ज्योतिःशास्त्रे** च दर्शितः—
"संतापः कांतिरल्पायुर्धनं निर्धनता तथा। अनारोग्यं सर्वकामा अभ्यंगाद्भास्करादिषु"॥
वामनपुराणे— **चंद्रिकायाम्** (पृ. १२५ प. १४)

" नाभ्यंगमर्के न च भूमिपुत्रे क्षौरं च शुक्रे च कुजे च मांसम्।
" बुधे च योषित्परिवर्जनीया शेषेषु सर्वाणि सदैव कुर्यात् "॥
" तैलाभ्यंगो नार्कवारे न भौमे न संक्रांतौ वैधृतौ नापि षष्ठ्याम्।
" पर्वण्यष्टम्यां च नेष्टश्चतुर्थ्यां प्रोक्तो मुक्त्वा वासरं सूर्यसूनोः "॥ सूर्यसूनुः शनैश्चरः।
स्मृत्यंतरेऽपि "पाते पर्वणि संक्रांत्यां ग्रहणे चंद्रसूर्ययोः। तैलाभ्यंगो न दोषाय यदि स्याद्रविनंदनः"॥
कालादर्शे—
" भौमार्कशुक्रवारेषु नाभ्यंगस्नानमाचरेत्। तापकांतिमृतिद्रव्यारोग्यालक्ष्म्यखिलेप्सितम्।
" क्रमाद्रव्यादिवारेषु तैलेन स्नास्यतः फलम् " इति। षट्त्रिंशन्मते—
" हृत्तापकान्ती मरणं धनमारोग्यमेव च। दारिद्र्यं सर्वकामाप्तिरभ्यंगे भास्करादिषु "॥
वृद्धवसिष्ठोऽपि—
" सूर्यादिसौर्यंतदिने नराणां तैलोपभोगात् क्रमशः फलानि।
"हृत्तापकांती मरणं धनं च रोगप्रहाणं विधनत्वमिष्टम्" इति॥ चंद्रिकायाम् (पृ.१२५ पं.१०)।
" चित्रासु हस्ते श्रवणे च तैलं क्षौरं विशाखासु भिषक्षु वर्ज्यं॥
" मूले मृगे भाद्रपदे तु मांसं योषिन्मघासूत्तरकृत्तिकासु "॥
कालादर्शे—" तिथिवारसमायोगे बलीयान्वार इष्यते "॥ ब्रह्मसिद्धांते—
" तिथिरेकगुणा प्रोक्ता नक्षत्रं च चतुर्गुणम्। करणं षड्गुणं चैव वारश्चाष्टगुणः स्मृतः "॥ इति।
स्मृत्यर्थसारे—
" तैलाभ्यंगनिषेधेषु तिलतैलं निषिध्यते। अभ्यंगस्य निषेधे तु सार्षपादिर्विशिष्यते[1]॥
" स्नेहेनाभ्यंगो भवति सस्नेहः सार्षपादिकः। न भोजनादौ तैलस्य निषेधोऽभ्यंग एव सः॥
" तैलशब्दस्तिलस्नेहे सुरूढो नैव यौगिकः। अतस्तिलविकारेषु पिण्याकतिलमोदके॥
" शष्कुलीकृसरादौ च निषेधो नैव जायते। सार्षपादौ तैलशब्दस्तत्कार्यसदृशत्वतः"॥ इति।
संग्रहे—
" श्राद्धाहे जन्मदिवसे विवाहे सुखदुःखयोः। व्रते चैवोपवासे च तैलाभ्यंगं विवर्जयेत्॥
" उपोषितस्य व्रतिनः कृत्तकेशस्य नापितैः। तावत्तिष्ठति वै लक्ष्मीर्यावत्तैलं न संस्पृशेत् "॥
स्मृतिरत्नावल्याम्—
" सुरया लिप्तदेहस्य प्रायश्चित्तं विधीयते। प्रातरभ्यक्तदेहस्य निष्कृतिर्न विधीयते"॥
अयं निषेधो नरकचतुर्दशीव्यतिरिक्तविषयः।
" प्रत्यूष आश्वयुक् कृष्णचतुर्दश्यामिनोदये। स्नानमभ्यज्य[2] कर्तव्यं नरैर्नरकभीरुभिः "॥ इति
स्मरणात्। स्मृतिरत्ने—
" आश्वयुक् कृष्णपक्षे तु चतुर्दश्यामिनोदये। तैलाभ्यङ्गेन कर्तव्यं स्नानमुष्णेन वारिणा "॥
स्मृत्यर्थसारे—
" यस्यां हतश्चतुर्दश्यां नरको विष्णुना निशि। तस्यामभ्यंजनं कार्यं नरैर्नरकभीरुभिः"॥ इति।
कालादर्शे—
" प्रत्यूष आश्वयुक्दर्शे कृताभ्यंगादिमंगलः। भक्त्या संपूजयेल्लक्ष्मीमलक्ष्मीविनिवृत्तये "॥

---

१ खग–सार्षपादेरपीष्यते। २ क्ष–स्नानमभ्यज्य।

सारसंग्रहे—" चतुर्दशी याऽश्वयुजस्य कृष्णा स्वात्यर्कयुक्ता तु भवेत्प्रभाते ।
" स्नानं समभ्यज्य नरैस्तु कार्यं सुगंधितैलेन विभूतिकामैः " ॥ इति ।
" तैले लक्ष्मीर्जले गंगा दीपावलिदिने वसेत् । अलक्ष्मीपरिहारार्थमभ्यंगस्नानमाचरेत् " ॥ इति ।
" तत आभरणं वस्त्रं धारयेत्सर्वसंपदः " इति । **विष्णुपुराणे**—
" स्वातिस्थिते रवाविंदुर्यदि स्वातिगतो भवेत् । पंचत्वगुदकस्नायी कृताभ्यंगविधिर्नरः ॥
" नीराजितो महालक्ष्मीमर्चयंश्छ्रियमश्नुते । दीपैर्नीराजनादत्र सैषा दीपावली स्मृता "॥ इति ।
स्मृत्यर्थसारे—
"तैलाभ्यंगे निषिद्धाः स्युः सर्वाश्च तिथयः सदा । द्वितीयां वर्जयित्वैव दृष्टादृष्टद्विदोषतः"॥इति।
प्रायशः सर्वासु तिथिषु अभ्यंगस्य निषेधे प्राप्ते तैलविशेषमभ्यनुजानाति **प्रचेताः**—
" सार्षपं गंधतैलं च यत्तैलं पुष्पवासितम् । अन्यद्रव्ययुतं तैलं न दुष्यति कदाचन "॥
यमोऽपि—
" घृतं च सार्षपं तैलं यत्तैलं पुष्पवासितम् । न दोषः पक्वतैलेषु स्नानाभ्यंगेषु नित्यशः"॥
संग्रहे—
" पक्वतैलं गंधतैलं सार्षपं पुष्पवासितम् । वर्ज्येष्विष्वप्यदुष्टं स्यात् द्रव्यांतरयुतं तथा"॥
स्मृत्यर्थसारे—
" निषिद्धदिवसे वारे रात्रौ च व्याधितस्य च । द्रव्यांतरयुतं तैलं न दुष्यति कदाचन॥
" शवानुगमनं क्षौरं कृत्वा नाभ्यंगमाचरेत् । स्नानीयं च तथा विप्रो न शुध्यति कदाचन" ॥ इति ।
सत्यव्रतः—" पिष्टपक्वारनालेन घृतेनाथ जलेन वा ।
" आमं वाऽपि युतं तैलं न कदाचन दुष्यति । रोगातुरस्यापि तथा तैलं जातु न दुष्यति "॥
पुराणे—"तिथिनक्षत्रवारेषु निषिद्धेष्वपि रात्रिषु । तैलमाज्येन संयुक्तमद्भिर्वा शुद्धिमाप्नुयात् "॥
स्मृत्यंतरे—
" रवौ पुष्पं गुरौ दूर्वां भृगौ गोमयमेव च । भौमे भूमिं विनिक्षिप्य तैलाभ्यंगं समाचरेत् ।
" द्रव्यांतरयुतं तैलं न दुष्येद्ग्रहणं विना । तुलसीदलसंयुक्तं ग्रहणेऽपि न दुष्यति ॥
" शिरोभ्यक्तेन तैलेन नांगं किंचिदुपस्पृशेत् । तिलपिष्टं च नाश्नीयात्तस्य चायुर्न रिष्यति "॥
गार्ग्यः—
"कुर्यान्नैमित्तिकं स्नानं शीताद्भिः काम्यमेव च । नित्यं याहच्छिकं चैव यथारुचि समाचरेत्"॥
सत्यव्रतः—" मंत्रवन्मंत्रहीनं च स्नानं द्विविधमीरितम् ।
" मंत्रैर्यत्क्रियते स्नानं मंत्रवत्तत्प्रकीर्तितम् । मलापनुत्यै तैलाद्यैर्मंत्रहीनं मलापहम् " ॥ इति ।
स्मृतिप्रदीपिकायाम्—" अनुद्धृतैरुद्धृतैर्वा जलैः स्नानं समाचरेत् " ॥ **देवलः**—
"उद्धृताश्चापि शुध्यंति शुद्धैः पात्रैः समुद्धृताः । एकरात्रोषिता आपस्त्याज्याः शुद्धा अपि स्वयम्"॥
इति । **महाभारते**—
"पादाभ्यंगं शिरोभ्यंगं द्विजोच्छिष्टावमार्जनम् । एकैकं पांडवश्रेष्ठ राजसूयाद्विशिष्यते" ॥
नारदीये—
"तैलाभ्यंगं महाराज ब्राह्मणानां करोति यः । स स्नातोऽब्दशतं साग्रं गंगायां नात्र संशयः"॥ इति ।

इति **मलापकर्षणस्नानम्** ।

अथ क्रियास्नानम् । तत्र **शंख**:—"क्रियास्नानं प्रवक्ष्यामि यथावद्विधिपूर्वकम् ॥
" सर:सु देवखातेषु तीर्थेषु च नदीषु च । क्रियास्नानं समुद्दिष्टं स्नानं तत्र क्रिया मता ॥
" मृद्भिरद्भिश्च कर्तव्यं शौचमादौ यथाविधि । जले निमग्न उन्मज्य उपस्पृश्य यथाविधि ॥
" तीर्थस्यावाहनं कुर्यात्तत्प्रवक्ष्याम्यत: परम् । प्रपद्य वरुणं देवमंभसां पतिमूर्जितम् ।
" याचितं देहि मे तीर्थं सर्वपापापनुत्तये ॥
" तीर्थमावाहयिष्यामि सर्वाघविनिषूदनम् । सांनिध्यमस्मिन्स्वे तोये स्थीयतां मदनुग्रहात् ॥
" रुद्रान्प्रपद्ये वरदान् सर्वानप्सुषदस्त्वहम् । देवमप्सुषदं वन्हिं प्रपद्येऽघनिषूदनम् ॥
" अप: पुण्या: पवित्राश्च प्रपद्ये शरणं तथा । रुद्राश्चाग्निश्च सर्वश्च वरुणश्चाप एव च ॥
" शमयंत्वाशु मे पापं रक्षंतु च सदैव माम् । इत्येवमुक्त्वा कर्तव्यं तत: संमार्जनं कुशै: ॥
" आपोहिष्ठेति तिसृभिर्यथावदनुपूर्वश: । हिरण्यवर्णा इति च ऋग्भिश्च तिसृभिस्तथा ॥
" शं नो देवीरिति तथा शं न आपस्तथैव च । इदमाप: प्रवहतेत्येवं च समुदीरयेत् ॥
" एवं संमार्जनं कृत्वा छंद आर्षं च दैवतम् । अघमर्षणसूक्तस्य संस्मरेत्प्रयत: सदा ॥
" ततोऽभसि निमग्नस्तु त्रि: पठेदघमर्षणम् । प्रदद्यान्मूर्धनि तथा महाव्याहृतिभिर्जलम्"॥

तीर्थयात्रायां वर्जनीयमाह **व्यास**:—
" छत्रं च हरते पादं अर्धं हरति पादुका । यानं हरेत्रिपादं तु सर्वं हरति डोलिका ॥
" ऐश्वर्याल्लोभमोहाद्वा गच्छेद्यानादिभिस्तु य: । निष्फलं तस्य तत्तीर्थं तस्माद्यानादि वर्जयेत्"॥

विष्णु:—
" गोभिर्युक्तेन यानेन तीर्थयात्रां करोति य: । स याति नरकं घोरं यावद्गोरोमसंख्यया "॥ इति।

पैठीनसि:—
"षोडशांशं स लभते य: परार्थेन गच्छति । अर्धतीर्थफलं तस्य यं प्रसंगेन गच्छति ॥
" तीर्थं प्राप्यानुषंगेण यस्तत्र स्नानमाचरेत् । स्नानार्धफलमाप्नोति तीर्थयात्राश्रुतं न तु॥
" नृणां पापकृतां तीर्थे पापस्य शमनं भवेत् । यथोक्तफलदं तीर्थं भवेच्छुद्धात्मनां नृणाम् " ॥

व्यासोऽपि—
"यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् । विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते"॥

वृद्धवसिष्ठोऽपि—
" पितरं मातरं वाऽपि भ्रातरं सुहृदं गुरुम् । निमज्जेत्तु यमुद्दिश्य द्वादशांशं लभेत स: ॥
" तत्प्रार्थिते त्वष्टमांशं लभेत् स्नानफलं नर: "॥ **पैठीनसि**:—
" प्रतिकृतिं कुशमयीं तीर्थवारिणि मज्जयेत् । मज्जयेत्तु यमुद्दिश्य अष्टभागं लभेत स: "॥

अत्रायं मंत्र:—
"कुशोऽसि त्वं पवित्रोऽसि ब्रह्मणा निर्मित: पुरा। त्वयि स्नाते स च स्नातो यस्येतद्ग्रंथिबंधनम्"॥इति। तीर्थफलं न विक्रीणीयात् । तथा **चापस्तंब**: (१।२०।१२–१३) । " मांसमायुधं सुकृताशां च तिलतंडुलास्त्वेव धान्यस्य विशेषेण न विक्रीणीयात्" इति। सुकृताशां तीर्थस्नानादिसुकृतफलम् । धर्मदानं तु विषयविशेषे स्मर्यते ।
"देवतानां गुरूणां च मातापित्रोस्तथैव च । पुण्यं देयं प्रयत्नेन नापुण्यं चोदितं क्वचित्"॥इति।

शाण्डिल्यः—
" जीवनार्थं हतं तीर्थं जीवनार्थं हतं व्रतम्। संदिग्धोऽपि हतो मन्त्रो व्यग्रचित्तो हतो द्विजः॥
"पृथिव्यां यानि तीर्थानि तानि सर्वाणि सागरे। सागरे यानि तानि स्युः पादे विप्रस्य दक्षिणे"॥ इति। **आश्वमेधिके भारते**—"हरिरचिन्त्यात्मा यत्रैव मधुसूदनः।तत्तीर्थं तत्परं ब्रह्म तत्पुण्यं तत्तपोवनम्॥
" आचारवस्त्रान्न विशोधितेन सत्यप्रसन्नक्षमशीतलेन।
" ज्ञानांबुना स्नाति हि यश्च नित्यं किं तस्य भूयः सलिलेन कृत्यम् "॥ **शांडिल्यः**—
" कुटुंबिनो विनाऽन्येषां दृष्टं तीर्थादिसेवनम्। कुटुंबिनां गृहे सर्वं विकलो निर्गतो गृहात्॥ विकलः शून्यानित्यक्रमः।

अथ **नदीनां रजोदोषनिर्णयः**। तत्र **कात्यायनः**—
"संप्राप्ते श्रावणे मासि सर्वा नद्यो रजस्वलाः। तासु स्नानं न कुर्वीत वर्जयित्वा तु जान्हवीम्"।
योगयाज्ञवल्क्यः—
"यावन्नोदेति भगवान् दक्षिणाशाविभूषणम्। तावद्रेतो महानद्यो वर्जयित्वा तु जान्हवीम्"॥ इति। यावन्नोदेत्यगस्त्यः तावद्रेतोवहा रजस्वला इत्यर्थः। उदयोऽपि तस्य शरद्येव ज्योतिःशास्त्रे दर्शितः। एवं च वर्षाकाले रजस्वला इत्युक्तं भवति। **मरीचिः**—
"कर्कटे सरितः सर्वा भवंतीह रजस्वलाः। अप्रशस्तं तदा स्नानं वर्षादौ नववारिणा"॥
वृद्धगार्ग्योऽपि—
"वर्षादौ सरितः सर्वा भवंतीह रजस्वलाः। तासु स्नानं न कुर्वीत वर्जयित्वा तु जान्हवीम्"॥इति।
मार्कंडेयः—
" द्विमासं सरितः सर्वा भवंतीह रजस्वलाः। अप्रशस्तं ततः स्नानं वर्षादौ नववारिणि "॥
कात्यायनोऽपि—
" नभोनभस्ययोर्मध्ये सर्वा नद्यो रजस्वलाः। तासु स्नानं न कुर्वीत देवर्षिपितृतर्पणम् "॥ इति। एतत्सर्वं कर्कटादिमासद्वयाभिप्रायम्। **यदाहात्रिः**—
" सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः। न स्नानादीनि कर्माणि तासु कुर्वीत मानवः "॥ सिंहकर्कटमासद्वयमध्ये सर्वा नद्यो रजस्वला इत्यर्थः। **योगयाज्ञवल्क्यः**—
"रजोदुष्टेंभसि स्नानं वर्ज्यं नद्यादिषु द्विजैः। कदर्थितं रजस्तेषां संध्योपास्तिश्च तर्पणम्"॥ इति। कदर्थितं कुत्सितम्। **व्याघ्रपादः**—
" सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः। तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः "॥ इति। समुद्रगाः महानदीः। तत्र विशेषो दर्शितो **भविष्यत्पुराणे**—
"आदौ कर्कटके सर्वा महानद्यो रजस्वलाः। त्रिदिनं तु चतुर्थेऽन्हि शुद्धाः स्युर्जान्हवी यथा"॥
महाभारतेऽपि—
"महानद्यो देविका च कावेरी नर्मदा तथा। रजसा तु प्रदुष्टाः स्युः कर्कटात्तु त्र्यहं नृप"॥
महानद्यो दर्शिता **ब्रह्मपुराणे**—
" गोदावरी भीमरथी तुंगभद्रा च वेणिका। तापी पयोष्णिका विंध्यदक्षिणे तु प्रकीर्तिताः॥

" भागीरथी नर्मदा च यमुना च सरस्वती । विशोका च वितस्ता च विंध्यस्योत्तरसंज्ञिताः॥
" द्वादशैता महानद्यो देवर्षिक्षेत्रसंभवाः "॥ **वामनपुराणे**—
" गोदावरी भीमरथी कृष्णवेणी सरस्वती । तुंगभद्रा सुप्रयोगा वेण्णा[1] कावेरिकेति च ॥
"दुग्धोदा नलिनी रेवा वारिगीता कलस्वना । एता अपि महानद्यः सह्यमूलाद्विनिःसृताः"॥ इति ।
नृसिंहपुराणेऽपि—
"गंगा च यमुना गोदावरी स्यात्तुंगभद्रका । कावेरी च महापुण्या महानद्यः प्रकीर्तिताः"॥ इति ।
भरद्वाजः—
" उद्भूत्वा भूधरेंऽभोधिं प्रविशत्यंबुसंततिः । या सा महीनदी ज्ञेया सर्वपापप्रणाशिनी"॥ इति ।
एवं महानदीत्वेन परिगणितानामेव दिनत्रयं रजोदोषः । अन्यासां तु समुद्रगानामपि मासद्वयं रजोदोष इत्यभिप्रेत्याह **कात्यायनः**—
"प्रावृट्काले महानद्यः संति नित्यं रजस्वलाः । तासु स्नानं न कुर्वीत वर्जयित्वा तु जान्हवीम्"॥इति।
स एव—
" कर्कटादौ रजोदुष्टा गोमती वासरत्रयम् । चंद्रभागा सती सिंधुः सरयूर्नर्मदा तथा "॥ इति ।
अत्रापवादमाह **मरीचिः**—
" आदित्यदुहिता गंगा प्लक्षजाता सरस्वती । रजसा नाभिभूयंते ये चान्ये नदसंज्ञिताः "॥
मार्कंडेयः—
" कालिंदी गौतमी गंगा वेणिका च सरस्वती । सामर्थ्यादाभिजात्याच्च रजो नाभिभवंत्यमूः" ॥
आभिजात्यं देवसंभूतत्वम् । **कात्यायनोऽपि**—
" जान्हव्यादित्यसंभूता प्लक्षजाता सरस्वती । रजसा नैव दुष्यंति नदाः कृष्णा च वेणिका" ॥
वामनपुराणे—
" सरस्वती नदी पुण्या तथा वैतरणी नदी । आपगा च महापुण्या गंगा मंदाकिनी तथा ॥
" मधुप्रवाहांशुमती कौशिकी पापनाशिनी । दृषद्वती महापुण्या तथा वैतरणी नदी ॥
" एतासामुदकं पुण्यं वर्षाकाले प्रवर्धितम् । रजस्वलात्वमेतासां विद्यते न कदाचन "॥
यमः—
" गंगा धर्मोद्भवा पुण्या यमुना च सरस्वती । अंतर्गतरजोयोगाः सर्वाहःस्वपि चामलाः"॥
कालादर्शे—" सिंहकर्कटयोर्नद्यः सर्वा एवा रजस्वलाः ।
"त्रिदिनं स्युर्महानद्यो गोदां वेण्यां सरस्वतीम् । भागिरथीं च कालिन्दीं नदान् शोणादिकान्विना"॥
कात्यायनस्तु गंगाया अपि रजोदोषमाह
" प्रवृत्ते श्रावणे मासि त्र्यहं गंगा रजस्वला । चतुर्थेऽहनि संप्राप्ते शुद्धा भवति जान्हवी "॥ इति ।
योगयाज्ञवल्क्योऽपि— " प्रथमं कर्कटादौ तु त्र्यहं गंगा रजस्वला " इति । अत्र जान्हव्या रजोयोगाभाववचनानां भूयस्त्वात् रजोदोषो नास्तीत्येव युक्तम् । केचित्तु
"या निःसृता नदाः प्रोक्ताः याश्च गंगेति कीर्तिताः । एतासां कर्कटे भानौ रजोदोषो न विद्यते ॥
"कावेरी तुंगभद्रा च कृष्णवेणी च गौतमी । भागीरथी च विख्याता पंचगंगाः प्रकीर्तिताः"॥ इति वचनमुदाहरंतः कावेर्या रजोदोषो नास्तीत्याहुः ।

---

१ ख-वेणी ।

अपरे पुनः
"कालिंदी गौतमी गंगा वेणिका च सरस्वती । सामर्थ्यादाभिजात्याच्च रजो नाभिभवंत्यमूः" ॥
इत्यविद्यमानरजोदोषासु गौतमीभागीरथीकृष्णवेणीषु गंगाभिधानासु "याश्च गंगेति कीर्तिता" इति वचनस्य सावकाशत्वात्
"महानद्यो देविका च कावेरी नर्मदा तथा । रजसा तु प्रदुष्टाः स्युः कर्कटादौ त्र्यहं नृप" ॥ इति ।
प्रातिस्विक**महाभारत**वचनाच्च दिनत्रयं रजोदोषोऽस्तीत्याहुः ।
" एवमुक्तरजोदोषस्य क्वचित्क्वचिदपवादमाह **कात्यायनः**—

" उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च । चंद्रसूर्यग्रहे चैव रजोदोषो न विद्यते ॥
" महदंबुसमं वाऽपि यदि तिष्ठेत्पुरातनम् । नवांबुमिश्रितं तेन न दुष्टमिति सूरयः " ॥

व्याघ्रपादः—
"अभावे कूपवापीनां अनपायिपयोभृताम् । रजोदुष्टेऽपि पयसि ग्रामभोगो न दुष्यति" ॥ इति ।

इति **नदीरजोनिर्णयः** ॥ अथ **गौणस्नानानि** । तत्र **दक्षः**—

" अशिरस्कं भवेत् स्नानं कटीमात्रमशक्तितः । आर्द्रेण वाससा वांऽपि सर्वांगपरिमार्जनम् " ॥
जाबालिः—" अशिरस्कं भवेत्स्नानं स्नानाशक्तौ तु कर्मिणः ।
"नाभिमात्रं निमज्ज्याप्सु कटिं वा क्षालयेज्जलैः । आर्द्रेण वाससा वाऽपि मार्जनं कापिलं विदुः" ॥

पराशरः (१२।९-११)—
" स्नानानि पंच पुण्यानि कीर्तितानि महर्षिभिः । आग्नेयं वारुणं ब्राह्मं वायव्यं दिव्यमेव च ॥
" आग्नेयं भस्मना स्नानं अवगाह्य तु वारुणम् । आपोहिष्ठेति च ब्राह्मं वायव्यं गोरजः स्मृतम् ॥
" यत्तु सातपवर्षेण तत्स्नानं दिव्यमुच्यते । तत्र स्नात्वा तु गंगायां स्नातो भवति मानवः " ॥

दक्षोऽपि—
"आग्नेयं वारुणं ब्राह्मं वायव्यं दिव्यमेव च । पंच स्नानानि पुण्यानि मनुः स्वायंभुवोऽब्रवीत्" ॥
व्यासः—" अशक्तावशिरस्कं वा स्नानमस्य विधीयते ।
"आर्द्रेण वाससा वांऽगमार्जनं कापिलं स्मृतम् । ब्राह्मादीन्यथवाऽशक्तौ स्नानान्याहुर्मनीषिणः ॥
" ब्राह्ममाग्नेयमुद्दिष्टं वायव्यं दिव्यमेव च । वारुणं यौगिकं चैव षोढा स्नानं प्रकीर्तितम् ॥
" ब्राह्मं तु मार्जनं मंत्रैः कुशैः सोदकबिंदुभिः । आग्नेयं भस्मना पादमस्तकाद्देहधूलनम् ॥
" गवां हि रजसा प्रोक्तं वायव्यं स्नानमुत्तमम् । यत्तु सातपवर्षेण दिव्यं तत्स्नानमुच्यते ॥
" वारुणं चावगाहस्तु मानसं चात्मवेदनम् । यौगिकं स्नानमाख्यातं यद्योगो विष्णुचिंतनम् ॥
" आत्मतीर्थमिति ख्यातं सेवितं ब्रह्मवादिभिः । मनःशुद्धिकरं पुंसां नित्यं तत्स्नानमाचरेत् ।
" शक्तश्चेद्वारुणं विद्वानप्रायत्ये तथैव च " ॥ इति ।

गर्गः—
"दिव्यं वायव्यमाग्नेयं ब्राह्मं सारस्वतं तथा । मानसं चेति विज्ञेयं गौणस्नानं तु षड्विधम्" ॥ इति ।

योगयाज्ञवल्क्यः—
" असामर्थ्याच्छरीरस्य कालशक्त्याद्यपेक्षया । मंत्रस्नानादिकान्सप्त केचिदिच्छन्ति सूरयः ॥
" मांत्रं भौमं तथाऽग्नेयं वायव्यं दिव्यमेव च । वारुणं मानसं चेति सप्त स्नानान्यनुक्रमात् ॥

---

१ क्ष–प्रवरा । २ क्ष–वांऽग । ३ ख–गौणं

" आपोहीत्यादिभिर्मांत्रं मृदालंभस्तु पार्थिवम् । वारुणं चावगाहस्तु मानसं विष्णुचिंतनम् ॥
" मानसं प्रवरं स्नानं सर्वे शंसन्ति सूरयः । आत्मतीर्थप्रशंसायां व्यासेन पठितं यतः " ॥

स्मृतिरत्नेऽपि—

" चतुर्भुजं महादेवं शंखचक्रगदाधरम् । मनसा ध्यायते विष्णुं स्नानं मानसमुच्यते ॥
" गायत्र्या जलमादाय दशकृत्वोभिमंत्र्य च । शिरस्यंगानि सर्वाणि प्रोक्षयेत्तेन वारिणा॥
" स्नानं गायत्रिकं नाम सर्वपापप्रणाशनम् " ॥ **विष्णुः**—

" तृचाभिमंत्रितं तोयं प्रोक्षयेत् मूर्ध्नि सर्वतः । अनुकल्पमिदं स्नानं सर्वपापहरं नृणाम् "॥ इति ।
दक्षः— " आग्नेयं वारुणं ब्राह्मं वायव्यं दिव्यमेव च ॥
"मानसं पार्थिवं चैव त्वष्टमं कापिलं स्मृतम् । सारस्वतं तथा प्रोक्तं नवमं स्नानमुत्तमम्" ॥ इति ।
तत्र आग्नेयस्नानप्रकारमाह **भरद्वाजः**—

" प्राङ्मुखश्चरणौ हस्तौ प्रक्षाल्याचम्य पूर्ववत् । प्राणानायम्य संकल्प्य भस्मस्नानं समाचरेत् ॥
" आदाय भसितं श्वेतं अग्निहोत्रसमुद्भवम् । ईशानेन तु मंत्रेण स्वमूर्धनि विनिक्षिपेत् ॥
" तत आदाय तद्भस्म मुखे तत्पुरुषेण तु । अघोराख्येन हृदये गुह्ये वामाह्वयेन च ॥
" सद्योजाताभिधानेन भस्म पादद्वये क्षिपेत् । सर्वांगं प्रणवेनैव मंत्रेणोद्धूनयेत्ततः ॥
" एतदाग्नेयकं स्नानं उदितं परमर्षिभिः । सर्वकामसमृध्द्यर्थं कुर्यादादाविदं बुधः " ॥ इति ।

आपस्तंबोऽपि—

" भस्म स्यादग्निहोत्राग्नेरावसथ्यादथापि वा । अभावे चानयोर्विप्रः स्वगृह्याग्नेरथापि वा ॥
"भस्म त्वादाय विधिवत् स्नानमाग्नेयमाचरेत् । भस्म स्थाप्य करे वामे विध्युक्तं प्राग्यथोदितम् ॥
" सौवर्णे राजते वाऽपि ताम्रे पात्रांतरेऽपि वा । अग्निरित्यादिभिर्मंत्रैः प्रणवेन तथैव च ॥
" षड्भिर्मंत्रैः प्रजप्तेन कास्यहृद्गुह्यपद्द्वये । ईशाद्यैः पंचभिर्मंत्रैः क्रमादुद्धूलयेत्ततः " ॥ इति ।
अग्निरित्यादयो मंत्रा अथर्वशिरस्यभिहिताः । " अग्निरिति भस्म । वायुरिति भस्म । जलमिति भस्म । स्थलमिति भस्म । व्योमेति भस्म । सर्वं ह वा इदं भस्म " इति । कं शिरः ।
लिंगपुराणे—" ईशानेन शिरोदेशं मुखं तत्पुरुषेण तु ।
" उरोदेशमघोरेण गुह्यं वामेन सुव्रतः । सद्येन पादौ सर्वांगं प्रणवेन विशोधयेत् ॥
"कृत्वापि चातुलं पापं मृत्युकालेऽपि यो द्विजः।भस्मस्नायी भवेत्कश्चित्क्षिप्रं पापैः प्रमुच्यते"॥इति।

स्मृतिसारसमुच्चये—

" त्र्यायुषैश्चैव मंत्रैस्तु लिप्तमा पादमस्तकम् । गोशकृद्भस्म यत्पुण्यं भस्मस्नानं तदुच्यते"॥ इति।
वारुणस्नानप्रकारमाह **व्यासः**—

"स्नानमब्दैवतैर्मंत्रैर्जले मज्जनगाहनैः। तर्पणं पितृदेवानां स्नानं वारुणमुच्यते" ॥

बोधायनः—

"जलावगाहनं स्नानं वारुणं सार्ववर्णिकम् । मंत्रवत्प्रोक्षणं चापि द्विजातीनां विशिष्यते" ॥ इति ।
ब्राह्मस्नानप्रकारमाह **कात्यायनः**—

" आपोहिष्ठादिभिर्ब्राह्मं मंत्रस्नानं हि तत्स्मृतम् । कुशाग्रैर्मार्जनं कुर्याद्दैवतीर्थेन वा द्विजः ॥
" ऋगंते मार्जनं कुर्यात्पादांते वा समाहितः । तृचस्यांतेऽथ वा कुर्यात् शिष्टानां मतमीरितम् " ॥

---

१ क्ष-शस्तायां । २ ख-कर्म ।

पदांतमार्जनप्रकारमाह **ब्रह्मा**—
"भुवि मूर्ध्नि तथाकाशे मूर्ध्न्याकाशे तथा भुवि।आकाशे भुवि मूर्ध्नि स्यान्मंत्रस्नानं विधीयते"॥इति। भुवि पादयोः । आकाशे हृदि । प्रकारांतरमुक्तं **स्मृत्यंतरे**—
" पच्छोप्यर्धर्चशोऽप्यृक्शः आपोहिष्ठेत्यृचेन च । कुशाग्रैर्मार्जनं कुर्याद्द्वितीर्थेन वा द्विजः ॥
" पादादिप्रणवं कुर्यादर्धर्चादि तथैव च । ऋगादिप्रणवं कुर्यान्मंत्रस्नाने विशेषतः " ॥ इति । **गृह्यपरिशिष्टे** (१।२१) "अथाशक्तस्य मंत्रस्नानम् । शुचौ देशे शुचिराचांतः प्राणानायम्य दर्भपाणिस्तिसृभिरापोहिष्ठाभिः पच्छः प्रणवपूर्वं दर्भोदकैर्मार्जयेत् । पादयोर्मूर्ध्नि हृदये पादयोर्हृदये पादयोर्मूर्ध्नि चाथार्धर्चशो मूर्ध्नि हृदये पादयोर्हृदये पादयोर्मूर्ध्नि चाथ ऋक्शो हृदये पादयोर्मूर्ध्नि च । अथ तृचेन मूर्ध्नि मार्जयित्वा गायत्र्या दशधाभिमंत्रिता आपः प्रणवेन पीत्वा द्विराचामेदित्येतन्मंत्रस्नानम् " ॥ इति । **योगयाज्ञवल्क्यस्तु**—
" शं न आपस्तु द्रुपदा आपोहिष्ठाघमर्षणम् । एतैश्च पंचभिर्मंत्रैर्मंत्रस्नानमुदाहृतम् " ॥ इति ।
वायव्यसारस्वते दर्शयति **बृहस्पतिः**—
"वायव्यं गोरजः प्रोक्तं अस्तं गच्छति गोपतौ । विद्वत्सरस्वतीप्राप्तं स्नानं सारस्वतं विदुः"॥ इति। गोपतौ सूर्ये । विदुषां सरस्वती वाणी । तया प्राप्तं सारस्वतमित्यर्थः । तत्स्वरूपमाह **व्यासः**—
" स्वयमेवोपसन्नाय विनयेन द्विजातये । तज्ज्ञः संपादयेत्स्नानं शिष्याय च सुताय च ॥
" दाक्षायणमयैः कुंभैर्मंत्रवज्जान्हवीजलैः । कृतमंगलपुण्याहैः स्नानमस्तु तदर्थिनाम् ॥

" आदौ तावत्प्रभासे बहुगुणसलिले मध्यमे पुष्करे च ।
"गंगाद्वारे प्रयागे कनखलसहिते गव्यकर्णे गयायाम् ।
" राहुग्रस्ते तु सोमे दिनकरसहिते सत्यपत्याविशेषात् ।
" एतैर्विख्यातरूपैस्त्रिभुवनविदितैः स्नानमच्छिद्रमस्तु ॥

"प्राप्य सारस्वतं तीर्थं भवेन्मुदितमानसः । सर्वतीर्थाभिषेकाद्धि पवित्रं विदुषां हि तत्"॥ इति ।
स एव—
" शुचौ देशे मृदं गृह्य कुर्याद्गात्रोपलंभनम् । मंत्रैः पार्थिवसंयुक्तैः भौमस्नानं तदुच्यते " ॥
मृत्तिके हन मे पापमित्यादयः पार्थिवसंयुक्ता मंत्राः ।
" गोखुराद्रज आदाय गोसावित्रीं जपेद्बुधः । गात्रेष्वधि तदालिप्य स्नानं वायव्यमुच्यते ॥
" उत्तरायणमध्ये तु यदा वर्षति वासवः । आतपेन सह स्नानं दिव्यं स्नानं तदुच्यते ॥
" हृत्स्थितं सर्वभूतानां रविमंडलसंस्थितम् । नीलजीमूतसंकाशं वासुदेवं चतुर्भुजम् ॥
" शंखचक्रगदापद्मधारिणं वनमालिनम् । तत्पादोदकजां गङ्गां[१] निपतंतीं स्वमूर्धनि ॥
" चिंतयेत् ब्रह्मरंध्रेण प्रविशंतीं स्विकां तनूम् । तया प्रक्षालितं सर्वं स्वदेहं परिचिंतयेत् ॥
" इदं स्नानवरं मंत्रात्सहस्रादधिकं मतम् । एवं स्नात्वा विशेषेण सर्वपापैः प्रमुच्यते"॥
कूर्मपुराणे—
" अप्रायत्ये समुत्पन्ने स्नानमेव सदाचरेत् । ब्राह्मादीन्यन्यथाशक्तौ स्नानान्याहुर्मनीषिणः "॥
जाबालिः—
"अशिरस्कं भवेत्स्नानं स्नानाशक्तौ तु कर्मिणः । तस्याप्यसामर्थ्यविधौ मंत्रस्नानोदिकं चरेत्"॥
स्मृत्यंतरे—
" असामर्थ्याच्छरीरस्य वैषम्याद्देशकालयोः । स्नानान्येतानि तुल्यानि वारुणेन भवंति हि "॥

१ क्ष–धारां ।

मनुः (११।३०)—
" प्रभुः प्रथमकल्पेऽपि योऽनुकल्पे प्रवर्तते । न सांपरायिकं तस्य दुर्मतेर्वर्तते फलम् " ॥ इति । सांपारायिकमामुष्मिकम् । इति **गौणस्नानानि** । अथोर्ध्वपुण्ड्रधारणविधिः ॥

तत्र **वासुदेवोपनिषत्**—अथ गोपीचंदनं नमस्कृत्योद्धृत्य

" गोपीचंदन पापघ्न विष्णुदेहसमुद्भव । चक्रांकित नमस्तुभ्यं धारणान्मुक्तिदो भव " ॥ इमं मे गंगेति जलमादाय विष्णोर्नुकमिति मर्दयेत् । अतो देवा अवंतु न इत्येताभिः विष्णुगायत्र्या च त्रिवारमभिमंत्र्य

"शंखचक्रगदापाणे द्वारकानिलयाच्युत । गोविंद पुंडरीकाक्ष रक्ष मां शरणागतम्" ॥ इति मां ध्यात्वा गृहस्थो ललाटादिषु द्वादशस्थानेष्वनामिकांगुल्याद्विष्णुगायत्र्या केशवादिद्वादशनामभिर्वा धारयेत् । ब्रह्मचारी वानप्रस्थो वा ललाटकंठहृदयबाहुमूलेषु वैष्णव्या गायत्र्या कृष्णादिनामपंचभिर्वा धारयेत् । यतिस्तर्जन्या शिरोललाटहृदयेषु प्रणवेन धारयेत् । परमहंसो ललाटे प्रणवेनैकमूर्ध्वपुंड्रं धारयेत् । तत्र दीपप्रकाशं स्वात्मानं पश्यन् ब्रह्माहमस्मीति भावयन्योगी मत्सायुज्यमाप्नोति । ऊर्ध्वदण्डयूर्ध्वरेता य ऊर्ध्वपुण्ड्री ऊर्ध्वयोगवान्स ऊर्ध्वं पदमवाप्नोति यतिरूर्ध्वचतुष्कवान् ।

" ब्राह्मणानां तु सर्वेषां वैदिकानामनुत्तमम् । गोपीचंदनवारिभ्यां ऊर्ध्वपुंड्रं विधीयते ॥
" यो गोपीचंदनाभावे तुलसीमूलमृत्तिकाम् । मुमुक्षुर्धारयेन्नित्यं अपरोक्षात्मसिद्धये " ॥ इति ।

महोपनिषदि—" धृतोर्ध्वपुंड्रः परमेशितारं नारायणं सांख्ययोगाधिगम्यम् ॥
" ज्ञात्वा विमुच्येत नरः समस्तैः संसारभारैरिह चैति विष्णुम् " ॥

कठशाखायाम् " धृतोर्ध्वपुंड्रो धृतचक्रमीशं विष्णुं परं ध्यायति यो महात्मा ।
" स्वरेण मंत्रेण सदा हृदि स्थितं परात्परं यो महतो महन्तम् " ॥ इति ॥

आथर्वणे च " हरेः पादाकृतिमात्मनो हिताय मध्येच्छिद्रमूर्ध्वपुंड्रं यो धारयति स परस्य प्रियो भवति स पुण्यभाक् भवति स मुक्तिभाक् भवति " इति । अत्रोपबृंहणानि स्मृतिपुराणवचनानि लिख्यंते । उपबृंहणत्वं च तेषां **महाभारते**ऽभिहितम्—
" इतिहासपुराणाभ्यां वेदार्थमुपबृंहयेत् " इति । **स्कांदे**ऽपि—
" पुराणैरेव विस्पष्टो वेदार्थो ज्ञायते खलु । बिभेति मानवाद्वेदः पुराणाभ्यां सजीवितात् " ॥

सुदर्शनाचार्योऽपि "वेदार्थनिर्णयविधौ हि पुराणमङ्गं निर्णीतवेदविषयाः स्मृतयो भवन्ति"॥ इति ।

सूतसंहितायामपि—

" अनंतशाखासापेक्षे वैदिकार्थविनिर्णये । स्वबुद्धिकल्पितान्यायाद्गरीयो ह्युपबृंहणम्" ॥

विष्णुस्मृतौ—

" उपवीतं शिखाबंधं ऊर्ध्वपुंड्रं विनाकृतम् । अपवित्रकृतं कर्म विप्रस्य विफलं भवेत् ॥
" यागो दानं जपो होमं स्वाध्यायः पितृतर्पणम् । भस्मीभवति तत्सर्वं ऊर्ध्वपुंड्रं विना कृतम् ॥
"अशुचिश्चाप्यनाचारो मनसा पापमाचरन् । शुचिरेव भवेन्नित्यमूर्ध्वपुण्ड्रस्य धारणात् " ॥

भृगुः—

" उपवीतविहीनेन पवित्ररहितेन च । तथोर्ध्वपुण्ड्रहीनेन यत्कृतं तन्निरर्थकम् " ॥

---

१ ग-परोमोक्षार्थसिद्धये । २ क्ष-मुक्तीभवती ।

मार्कण्डेयः—" अमंत्रेण कृतं कर्म ह्यपवित्रेण वा कृतम् ।
"ऊर्ध्वपुंड्रं विना वाऽपि कर्म यद्धि द्विजैः कृतम् । तत्सर्वमासुरं विद्यात् कर्तापि नरकं व्रजेत्" ॥
दक्षः—
"कुशपाणिः सदा कुर्यात् सोत्तरीयोर्ध्वपुंड्रधृक् । वेदोक्तमखिलं विद्वानन्यथा स्यान्निरर्थकम्" ॥
मरीचिः—
" सपवित्रकरः स्वस्थः सोत्तरीयोर्ध्वपुंड्रधृक् । कुर्यादहरहः कर्म वेदोक्तं विप्रसत्तमः ॥
" सर्पं दृष्ट्वा यथा लोके दर्दुरा भयविव्हलाः । ऊर्ध्वपुंड्रांकितं तद्वत् कंपंते यमकिंकराः " ॥
व्यासः—
" जान्हवीतीरसंभूतां मृदं मूर्ध्ना बिभर्ति यः । बिभर्ति रूपं सोऽर्कस्य तमोनाशाय वै स्मृतः ॥
" ऊर्ध्वपुंड्रो मृदा शुद्धो ललाटे यस्य दृश्यते । स चंडालोऽपि शुद्धात्मा पूज्य एव न संशयः" ॥
स्मृतिसारे—"स्वाध्याये भोजने चैव होमे मंगलकर्मणि । ऊर्ध्वपुंड्रधरो भूयाद्रक्षसां चापनुत्तये" ॥
आत्रेये—"ऊर्ध्वपुंड्रविहीनं यत् शरीरं शवसन्निभम् । ऊर्ध्वपुंड्रविहीनं तु श्वपाकमिव संत्यजेत् ॥
"ऊर्ध्वं नयति यत्पुंड्रं प्राणिनः पापकारिणः । तस्याख्या ह्यूर्ध्वपुंड्रेति तस्मात्तद्धारयेत् द्विजः" ॥ इति ।
स्मृत्यंतरे—"विष्णवर्पणविहीनं यत् पवित्ररहितं तथा । उत्तरीयोर्ध्वपुंड्राभ्यां रहितं तन्निरर्थकम् ॥
" होमपूजादिसमये सायं प्रातः समाहितः । ऊर्ध्वपुंड्रधरो विप्रो भवेच्छुद्धो न चान्यथा ॥
" निरूर्ध्वपुंड्रस्तु भवेन्न कदाचिदपि द्विजः । वैष्णवश्चोद्विशेषेण सर्वकर्माणि सोऽर्हति ॥
"ऊर्ध्वपुंड्रं ललाटे तु कुर्वीत चतुरंगुलम् । उदरे हृदि कण्ठे च दशाष्टचतुरंगुलान्" ॥ इति ।
अग्निवैश्वायनिः—
"त्रिपुंड्रं ब्राह्मणो विद्वान् लीलयाऽपि न धारयेत् । धारयेद्ब्राह्मणः सम्यगूर्ध्वपुंड्रं प्रयत्नतः" ॥
संग्रहे—
"श्रौतस्मार्तक्रियाः सर्वाः ऊर्ध्वपुंड्रमकुर्वतः । जायंते विफलाश्चैव बाधिताश्च भवंति ताः" ॥ इति ।
पुराणेषु । ब्रह्मांडपुराणे ब्रह्माणं भगवानाह—
" ऊर्ध्वपुंड्रप्रमाणानि द्रव्याण्यंगुलिभेदतः । वर्णानि मंत्रदेशांश्च प्रवक्ष्यामि फलानि च ॥
" पर्वताग्रे नदीतीरे मम क्षेत्रे विशेषतः । सिंधुतीरे च वल्मीके तुलसीमूलमाश्रिते ॥
" मृद एतास्तु संग्राह्या वर्जयेदन्यमृत्तिकाः ॥
" श्यामं शांतिकरं प्रोक्तं रक्तं वश्यकरं भवेत् । श्रीकरं पीतमित्याहुर्वैष्णवं श्वेतमुच्यते ॥
" अंगुष्ठः पुष्टिदः प्रोक्तो मध्यमाऽऽयुष्करी भवेत् । अनामिकाऽन्नदा नित्यं मुक्तिदा च प्रदेशिनी ॥
" एतैरंगुलिभेदैस्तु कारयेन्न नखैः स्पृशेत् । वर्तिदीपाकृतिं चापि वेणुपत्राकृतिं तथा ॥
" पद्मस्य मुकुलाकारं तथैव कुमुदस्य च । मत्स्यकूर्माकृतिं वापि शंखाकारमथापि वा ॥
" दशांगुलप्रमाणं तदुत्तमोत्तममुच्यते । नवांगुलं मध्यमं स्यादष्टांगुलमतःपरम् ॥
" सप्तषट्पंचभिः पुंड्रं मध्यमं त्रिविधं स्मृतम् । चतुस्त्रिद्व्यंगुलैः पुंड्रं कनिष्टं त्रिविधं भवेत् ॥
" ललाटे केशवं विद्यात् नारायणमथोदरे । माधवं हृदि विन्यस्य गोविंदं कंठकूपरे[1] ॥
" उदरे दक्षिणे पार्श्वे विष्णुं विद्याद्विजस्तथा । तत्पार्श्वे बाहुमध्ये तु स्मरेत्तु मधुसूदनम् ॥
" त्रिविक्रमं कंठदेशे वामे कुक्षौ तु वामनम् । श्रीधरं बाहुके वामे हृषीकेशं तु कंठके ॥

१ **ख**–कूपके; **ग**–कूबरे ।

" पृष्ठे तु पद्मनाभं तु ककुद्दामोदरं स्मरेत्। द्वादशैतानि नामानि वासुदेवेति मूर्धनि ॥
" पूजाकाले च होमे च सायं प्रातः समाहितः। नामान्युच्चार्य विधिवद्धारयेदूर्ध्वपुंड्रकम् ॥
" ऊर्ध्वपुंड्रधरो मर्त्यो म्रियते यत्रकुत्रचित्। श्वपाकोऽपि विमानस्थो मम लोके महीयते " ॥

वामनपुराणेऽपि नारदं प्रति भगवानाह—

" श्रुतिस्मृत्युक्तमार्गेण मृदो धारणमुच्यते। शृणु वत्स विधानेन मृत्साधारणमुत्तमम्॥
" मम क्षेत्रे कुरुक्षेत्रे पुण्यक्षेत्रे तथैव च। पर्वताग्रे नदीतीरे तुलसीमूलमाश्रिते ॥
" अश्वत्थबिल्ववल्मीकबकुलाः पनसास्तथा। एतेषु मृत्तिकाः प्रोक्ता यथाविधि समाहरेत् " ॥

इत्यादि। **पाद्मेऽपि**—

" ऊर्ध्वपुंड्रस्य माहात्म्यं वक्ष्यामि तव पार्वति। धारणादेव मुच्येत भवबंधात् द्विजोत्तमः ॥
" ऊर्ध्वपुंड्रस्य मध्ये तु विशाले सुमनोहरे। लक्ष्म्या सार्धं समासीनो देवदेवो जनार्दनः ॥
" तस्माद्यस्य शरीरे तु ऊर्ध्वपुंड्रं धृतं भवेत्। तस्य देहं भगवतो विशालं मंदिरं शुभम् ॥
" धारयेदूर्ध्वपुंड्रं तु त्रिसंध्यासु द्विजोत्तमः। सर्वपापविशुध्यर्थमिष्टापूर्तफलाप्तये ॥
" यज्ञदानतपश्चर्याजपहोमादिकं च यत्। ऊर्ध्वपुंड्रधरः कुर्यात् तस्य पुण्यमनंतकम् ॥
"ऊर्ध्वपुंड्रविहीनस्तु किंचित्कर्म करोति यः। इष्टापूर्तादिकं सर्वं निष्फलं स्यान्न संशयः॥
" यच्छरीरं मनुष्याणामूर्ध्वपुंड्रविवर्जितम्। द्रष्टव्यं नैव तद्यस्मात् श्मशानसंदृशं भवेत्॥
" ऊर्ध्वपुंड्रविहीनो यः संध्याकर्मादिकं चरेत्। तत्सर्वं राक्षसैर्नीतं नरकं चाधिगच्छति ॥
"ऊर्ध्वपुंड्रं द्विजैः कार्यं श्यामया पीतया मृदा। श्वेतमृत्तिकया धार्यं वैष्णवैश्च विशेषतः"॥ इति।

नारदीये—

" ऊर्ध्वपुंड्रं यः करोति तुलसीमूलमृत्स्नया। तत्रैव नेत्रं तस्य स्यान्मूर्ध्नि दोर्बिभृयात्कलाम् ॥
" ब्राह्मणस्योर्ध्वपुंड्रं स्यात् क्षत्रियस्यार्धचंद्रकम्। वैश्यस्य वर्तुलाकारं शूद्रस्यैव त्रिपुंड्रकम् ॥
" ऊर्ध्वपुंड्रं द्विजः कुर्याद्वारिमृद्भस्मचंदनैः। जपकाले मृदा कुर्यात्संध्याकाले तु वारिणा ॥
" भस्मना होमकाले तु चंदनं सार्वकालिकम् " ॥ इति

विष्णुधर्मोत्तरे—

" बिभर्ति निटिले मूर्ध्नि जान्हवीतीरमृत्तिकाम्। बिभृयाच्चक्षुरेकत्र मूर्ध्नीन्दोर्बिभृयात्कलाम् ॥
" गंगामृदोर्ध्वपुंड्रं तु यो बिभर्ति नरो यदा। तदैव तस्य पितरो ब्रह्मलोकमवाप्नुयुः ॥
" गंगाकूलमृदा यस्तु बिभृयादूर्ध्वपुंड्रकम्। तदंगं ये निरीक्षंते ते यांति त्रिदिवं नराः " ॥

वासिष्ठे—

" ऊर्ध्वपुंड्रं तु विप्राणां सततं श्रुतिचोदितम्। मुमुक्षुभिर्वीतरागैरप्रमत्तैः समाहितैः ॥
" ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथ वा यतिः। अवश्यं धारयेत्पुण्यमूर्ध्वपुंड्रं सुशोभनम्॥
" ऊर्ध्वपुंड्रं द्विजः कुर्याद्दंडाकारं सुशोभनम्। मध्ये छिद्रं वैष्णवस्तु नमोंतैः केशवादिभिः " ॥

पाद्मे ब्रह्मगरुडसंवादे—

"गृहे यस्य सदा तिष्ठेत् गोपीचंदनमृत्तिका। द्वारका विहिता तत्र कृष्णेन सहिता कलौ॥
" यो मृत्तिकां द्वारवती समुद्भवां करे समादाय ललाटपट्टके।
" करोति नित्यं तनुशुद्धिहेतोः क्रियाफलं कोटिगुणं सदा भवेत्॥
" क्रियाविहीनं यदि मंत्रहीनं श्रद्धाविहीनं यदि भक्तिवर्जितम्।

---

१ गक्ष-सहिता।

" कृतं ललाटे यदि गोपिचंदनं प्राप्नोति तत्पुण्यफलं सदाऽक्षयम् ॥
" यस्यांतकाले खग गोपीचंदनं बाह्वोर्ललाटे यदि मस्तको वा ।
" प्रयाति लोकं कमलासनस्य गोबालघाती यदि ब्रह्महा भवेत् ॥
" अस्नातो यः क्रियां कुर्यादशुचिः पापशंकितः । पूतः सद्यो भवेन्नित्यं गोपीचंदनधारणात् ॥
" द्वारवत्युद्भवं गोपीचंदनं चोर्ध्वपुंड्रकम् । धारयेन्नित्यमेवं हि पापं हंति दिने दिने ॥
"गोपीचंदनलिप्तांगो यं यं पश्यति चक्षुषा । तं तं पूतं विजानीयान्नात्र कार्या विचारणा"॥ इति ।

पाराशरेऽपि—

" मृदं मंत्रेणाभिमंत्र्य चोर्ध्वपुंड्राणि धारयेत् । ललाटादिषु चांगेषु धरेत्पुंड्रं शुभावहम् ॥
" आरभ्य नासिकामूलं ललाटान्तं लिखेन्मृदम् " ॥

ब्रह्मांडपुराणे—

" मृत्तिकाचंदनं भस्म तोयं चैव चतुर्थकम् । एभिर्द्रव्यैर्यथाकालं ऊर्ध्वपुंड्रं भवेत्सदा ॥
"स्नात्वा पुंड्रं मृदा कुर्याद्धुत्वा चैव तु भस्मना । देवानभ्यर्च्य गंधेन सर्वपापापनुत्तये "॥

वैखानससूत्रे—

" समिद्भिर्गोमयैः स्वेन हवने विहिते सति । तद्भस्म संगृह्य करे मंत्रेणैवाभिमंत्र्य च ॥
" यदूर्ध्वपुंड्रकरणमाग्नेयं स्नानमेव तत्" । भूति भस्मेति भस्म गृहीत्वा ललाटबाहुहृदय-कंठादिनादित्यः सोमो नम इत्यूर्ध्वांगलिप्यापोहिष्ठेति प्रोक्षयते अग्ने तेजस्तेनेत्यग्निमुद्वयमित्यादिभि-रादित्यं चोपतिष्ठेत भूतिमालभते नित्यं सर्वयज्ञं कृतं भवेत् " इति । **पाद्मेऽपि—**
" समिदादिहुतानां च होमीयस्य हुतस्य च । सितेन भस्मनांऽगेषु ललाटादिषु च क्रमात् ॥
" यदूर्ध्वपुंड्रकरणं मंत्रोच्चारणपूर्वकम् । तदाग्नेयं भवेत् स्नानं शोधनं परमं स्मृतम् " ॥ इति ।

पाद्मोत्तरे—

"श्रौतं वैखानसं प्रोक्तं स्मार्तं वासिष्ठमुच्यते । पांचरात्राद्यागमोक्तमागमोक्तं तदिष्यते " ॥ इति ।

स्मृतिसंग्रहे तु—

" त्रिपुंड्रं भस्मना तिर्यगूर्ध्वपुंड्रं मृदा न्यसेत् । उभयं चंदनेनैवं वर्तुलं न कदाचन ॥
"न कदाचिन्मृदा तिर्यक् न्यसेदूर्ध्वं न भस्मना । तुषादिभस्मपाषाणरजो धार्यं च न क्वचित्"॥ इति ।

गरुडपुराणे—

" भस्मना तूर्ध्वपुंड्रं च तिर्यक्पुंड्रं तथा मृदा । ब्रह्महत्यासमं प्रोक्तं मुनिभिर्वेदपारगैः " ॥
एवं च भस्मोर्ध्वपुंड्रस्य विधिप्रतिषेधाभ्यां यथाकुलाचारं व्यवस्थितो विकल्प इत्याहुः ।
ननु क्वचित् क्वचित् ऊर्ध्वपुंड्रं निषिध्यते । [१]तथाहि **पाराशरोपपुराणे—**[२]
" श्रौतं लिंगं च विज्ञेयं त्रिपुंड्रोद्धूलनात्मकम् । अश्रौतमूर्ध्वपुंड्रादि नैव तिर्यक् त्रिपुंड्रकम् ॥
" नराणामुत्थिता जातिः येषां तंत्रोक्तवर्त्मना । ललाटे तैः सदा धार्यं मृदा पुंड्रान्तरं द्विज ॥
" जन्मना लब्धजातिस्तु वेदपंथानमाश्रितः । पुंड्रांतरं भ्रमाद्वाऽपि ललाटे नैव धारयेत्" ॥ इति ।

मानवोपपुराणे च—

" ऊर्ध्वपुंड्रं च शूलं च वर्तुलं चार्धचंद्रकम् । तंत्रनिष्ठेन धार्यं स्यान्न धार्यं वैदिकैर्जनैः ॥
" सोर्ध्वपुंड्रमुखं दृष्ट्वा व्रतं चांद्रायणं चरेत् " ॥ इति ।

---

१ क्ष-मि । २ क्ष-पराशरपुराणे ।

कूर्मपुराणेऽपि—

"गोपीचन्दनधारी तु शिवं स्पृशति यो द्विजः। सस्वैकविंशतिकुलः सोऽक्षयं नरकं व्रजेत्"॥ इति।

सूतसंहितायामपि—" स्वमातुः सोदरायांश्च गमनं तद्वदेव तु।

" मातृष्वसुर्मातृसख्यादुहितुर्गमनं तथा। मातुलानीस्नुषाश्वश्रूगमनं च तथैव च॥

" त्रिपुंड्रधारणाभावो भूत्यानुद्धूलनं तथा। पुंड्रांतरस्य विप्रेंद्र धारणं तद्वदेव तु"॥

पुराणांतरेऽपि—

" ऊर्ध्वपुंड्रं त्रिशूलं च श्रद्धया श्रुत्यचोदितम्। धारयंति ललाटे तु मनुष्याः पापकर्मिणः"॥ इति।

लैंगेऽपि—

" त्रिपुंड्रं सुरविप्राणां वर्तुलं नृपवैश्ययोः। अर्धचंद्रं तु शूद्राणां अन्येषामूर्ध्वपुंड्रकम्॥

" अश्रौतमूर्ध्वपुंड्रादि ललाटे श्रद्धया सह। धारयिष्यंति मोहेन युगान्ते समुपस्थिते"॥ इति।

सत्यम् एतादृशानि बहूनि वचनानि श्रूयन्ते। तेषु कानिचिद्वचनानि पाशुपतादिशैवतंत्रपतितस्योर्ध्वपुंड्रनिषेधपराणि कानिचित्तु वैदिकस्य श्रौतपांचरात्राद्यागमोक्तशूलादिरूपोर्ध्वपुंड्रशंखचक्रादिधारणसहितोर्ध्वपुंड्रधारणनिषेधपराणि। तथा च **पाराशरे**—

" तंत्रनिष्ठः शिवे भक्तः तंत्रसिद्धेन वर्त्मना। त्रिपुंड्रं धारयेन्नित्यं ललाटे भस्मनैव तु॥

" तंत्रनिष्ठस्तथा विष्णौ भक्तस्तंत्रैकवर्त्मना। त्रिशूलं चतुरस्रं वा धारयेदूर्ध्वपुंड्रकम्॥

" तंत्रनिष्ठो महादेवे भक्तस्तिर्यक् त्रिपुंड्रकम्। विना पुंड्रांतरं मोहात् धारयन्नरकी भवेत्"॥

सूतसंहितायामपि—" शैवागमोक्ताश्रमनिष्ठमानवः त्रिपुंड्रलिंगं तु सदैव धारयेत्।

" तदुक्तमंत्रेण ललाटमध्यके तत्तंत्रसिद्धेन सितेन भस्मना॥

" विष्ण्वागमोक्ताश्रमनिष्ठमानवस्तथैव पुंड्रांतरमूर्ध्वरूपतः।

" त्रिशूलरूपं चतुरश्रमेव मृदा ललाटे तु सदैव धारयेत्॥

" ब्रह्मागमोक्ताश्रमनिष्ठमानवो ललाटमध्येऽपि च वर्तुलाकृति।

" तदुक्तमंत्रेण सितेन भस्मना मृदाऽथ वा चंदनतस्तु धारयेत्"॥

कौर्मेऽपि—

" सर्वागमेषु निष्ठानां शंभोर्लिंगमनुत्तमम्। सितेन भस्मना कार्यं ललाटे च त्रिपुंड्रकम्॥

" यस्तु नारायणं देवं प्रपन्नः परमं पदम्। धारयेत्सर्वदा शूलं ललाटे गंधवारिणा॥

" प्रपन्ना ये जगद्बीजं ब्रह्माणं परमेष्ठिनम्। तेषां ललाटे तिलकं धारणीयं तु सर्वदा॥

"ऊर्ध्वपुंड्रं त्रिशूलं च वर्तुलं चार्धचंद्रकम्। तंत्रनिष्ठेन धार्यं स्यान्न धार्यं वैदिकैर्जनैः"॥इति।

त्रिशूलरूपमूर्ध्वपुंड्रमित्यर्थः। **पांचरात्रे** भगवतोक्तम्—

" एकांतिनो महाभागा मत्स्वरूपविदोऽमलाः। सांतरालान्प्रकुर्वीरन्पुंड्रान्मम पदाकृतीन्॥

" परमैकांतिनोऽप्येवं मत्पादैकपरायणाः। हरिद्राचूर्णसंयुक्तान्छूलाकारांस्तु निर्मलान्॥

" अन्ये तु वैदिकाः पुंड्रानच्छिद्रानपि भक्तितः। प्रकुर्वीरन्दीपलिगवेणुपत्रोपमाकृतीन्॥

"अच्छिद्रान्वाऽथ सच्छिद्रान्कुर्युः केवलवैष्णवाः। अच्छिद्रकरणे तेषां प्रत्यवायो न विद्यते॥

" एकांतिनां प्रपन्नानां परमैकांतिनामपि। अच्छिद्रकरणे तेषां प्रत्यवायो महान्भवेत्॥

" पवित्राणि गदाब्दादिशंखचक्रादिकं तथा। धारयेन्नोपहन्येत कदाचित्किंकरादिभिः॥

" ब्राह्मणः क्षत्रियो वैश्यः शूद्रो नारी तथेतरः। चक्राद्यैरंकयेद्गात्रमात्मनः परया मुदा॥

---

१ क्ष–दिगजाब्दा।

" अनिष्टानां निवृत्त्यर्थमैकांत्याय जगत्पतौ । सिध्यर्थं कर्मणां चैव धार्यं चक्रादिलांछनम् ॥
" विष्णोरायतनाग्नौ वा गुरोरात्मन एव वा । हुते होमे ततस्तैः स्वरूपारचितैः क्रमात् ॥
" चक्रांबुजगदाशार्ङ्गखड्गैर्मंत्रेण दाहयेत् । अंकितः शंखचक्राभ्यां सर्वैरंकित एव वा ॥
" शंखचक्रप्रधानं हि सर्वमन्यद्गदादिकम् । अग्नीषोमौ हि चक्राब्जे सर्व एव तदात्मकाः ॥
" दक्षिणे तु भुजे विप्रो बिभृयाद्वै सुदर्शनम् । सव्ये तु शंखं बिभृयादिति ब्रह्मविदो विदुः "॥ इति ।
एवं च पांचरात्राद्यागमविहितं शंखचक्रगदाद्यंकनसहितमूर्ध्वपुंड्रवेदानधिकृतस्त्रीशूद्रद्विजबंधुविषयं वेदितव्यम् । तेषामेव ह्यवैदिककर्मस्वधिकारः । तथा च **भारते** " स्त्रीशूद्रद्विजबंधूनां त्रयी न श्रुतिगोचरा " इति । **मनुरपि**
" वेदश्च वेदमूलानि स्मृत्यादीन्यखिलानि च । स्वतः प्राप्तानि मर्त्यानां प्रमादन्यानि सर्वशः ॥
"मार्गो वेदविरुद्धो यः स तु सत्यं तपोधनाः । वेदप्रस्खलितस्यैव न प्रोक्तो वैदिकस्य तु"॥ इति । न च
" ब्राह्मणः क्षत्रियो वैश्यः शूद्रो नारी तथेतरः । चक्राद्यैरंकयेद्गात्रं आत्मनः परया मुदा" ॥ इति

ब्राह्मणादीनधिकृत्य भगवतोक्तं शंखचक्रगदादिधारणं कथं स्त्रीशूद्रादिविषयमिति वाच्यम् । मोहनायैव तंत्रस्य प्रवर्तितत्वात्[1] । तथा च **पाद्मे** हरिः—
" एष मोहं सृजाम्याशु यो जनान् मोहयिष्यति । त्वं च रुद्र महाबाहो मोहशास्त्राणि कारय ॥
" अतथ्यानि च तथ्यानि दर्शयित्वा फलानि तु " ॥ **कूर्मपुराणे** च—
" तस्मात्तु वेदबाह्यानां रक्षणार्थाय पापिनाम् । विमोहनानि शास्त्राणि करिष्यावो वृषध्वज ॥
" एवं संचोदितो रुद्रो माधवेन मुरारिणा । चकार मोहशास्त्राणि केशवोऽपि शिवेरितः ॥
" कापालं काकुलं[2] वामं भैरवं पूर्वपश्चिमम् । पांचरात्रं च कौलं च अथान्यानि सहस्रशः " ॥
भागवतेऽपि—
" त्रिवक्राया उपश्लोकः पुत्रः कृष्णमनुव्रतः । शिष्यः साक्षान्नारदस्य दधौ व्रतमखंडितम् ॥
"तेनोक्तं सात्वतं तंत्रं यज्ज्ञात्वा भक्तिमान्भवेत् । यत्र स्त्रीशूद्रदासानां संस्कारो वैष्णवः स्मृतः"॥इति ।
वसिष्ठलैंगेऽपि— " ततो विष्णोः प्रसादेन वेदमार्गातिवर्तिनाम् ।
"शांडिल्यः संहितां चक्रे वैष्णवीं महतीं मुने । तस्यां चक्रुर्मने दीक्षां पाषंडाः पापयोनयः"॥इति ।
कौर्मे शिवः—
" अन्यानि चैव शास्त्राणि लोकेऽस्मिन्मोहनाय वै । वेदवादविरुद्धानि मयैव कथितानि तु ॥
" वामं पाशुपतं घोरं लांगुलं चैव भैरवम् । न सेव्यमेतत्कथितं वेदबाह्यं तथेतरत् " ॥
तत्रैव—
" अथैव सात्वतो नाम विष्णुभक्तः प्रतापवान् । महात्मा दाननिरतो धनुर्वेदविदां वरः ॥
" स नारदस्य वचनात् वासुदेवार्चने रतः । शास्त्रं प्रवर्तयामास कुंडगोलादिभिः श्रुतम् ॥
"तस्य नाम्ना तु विख्यातं सात्वतं नाम शोभनम् । प्रवर्तते महाशास्त्रं कुंडादीनां हितावहम्"॥
सूतसंहितायाम्—" श्रेयान्वेदोदितो धर्मः परधर्मो भयावहः ।
" वेदं वेदेतरं मार्गं समं पश्यन्भवोदधौ । निमग्नः सर्वदा मर्त्यो भवेन्नात्र विचारणा " ॥
मानवे च—
" अतश्च वेदा वेदांतास्तन्मूलान्यखिलानि च । धारणीयानि संशुध्यै त्याज्यान्येवापराणि च ॥

---

१ क्ष-प्रवृत्तित्वात् । २ ख-काळं ।

"इतोऽन्यानि तु शास्त्राणि लोकेऽस्मिन्यानिकानि च। न तेषु रमते धीरः पाषंडो रमते यदि"॥इति।

तत्रैव—

"ब्राह्मणैश्च पुरा सर्वैर्गौतमेन सुरक्षितैः। विचार्य कार्यं संभूय स्वदेशगमनोद्यतैः॥
"गौर्हता गौतमेनेति निर्घृणैः पुरुषाधमैः। कृतो मिथ्याभिशापस्तु महामोहवशेन तु॥
"तच्छ्रुत्वा स मुनिः श्रीमान् गौतमो मुनिसत्तमः। महाक्रोधेन संयुक्तः शशाप ब्राह्मणाधमान्॥
"यद्यत्तु रुद्रसंबंधि तत्र तत्रापि दुर्जनाः। भवतानुन्मुखा यूयं सर्वथा ब्राह्मणाधमाः॥
"स्वाध्याये च जपे चैव तथा प्रवचनेऽपि च। भवतानुन्मुखा यूयं सर्वथा ब्राह्मणाधमाः॥
"श्रुतिस्मृतिपुराणोक्तेष्वर्थेषु सकलेषु च। शंखचक्रगदापद्मदंडपाशांकुशादिभिः॥
"अंकिताः श्रद्धया यूयं भवतो ब्राह्मणाधमाः॥
"बौद्धे चाप्यार्हते चैव तथा पाशुपतेऽपि च। शांभवे दीक्षिता यूयं......धमाः॥
"पाषंडेषु तथाऽन्येषु मार्गेष्वश्रौतकेषु च। श्रद्धया दीक्षिता यूयं......धमाः॥
"वर्तुलाश्वत्थपत्रार्धचंद्रशूलादिलिंगिनः। भवत श्रद्धया सार्धं ललाटे ब्राह्मणाधमाः॥
अश्वत्थपत्रलिंगी बौद्धः।
"पंचरात्रे च कापाले तथा कालामुखेऽपि च। शाक्ते च दीक्षिता यूयं भवत ब्राह्मणाधमाः"॥ इति।

तंत्राधिकारी निरूपितः **पाराशर्ये—**

"श्रुतिभ्रष्टः स्मृतिप्रोक्तप्रायश्चित्तेऽभयं गतः। क्रमेण श्रुतिसिद्ध्यर्थं मनुष्यस्तंत्रमाश्रयेत्॥
"तंत्राणि तंत्रनिष्ठानां रक्षकाण्यपि च क्रमात्। बाधकानि विशेषेण वेदमार्गैकवर्तिनाम्"॥

मानवे च—

"वेदप्रस्खलितो मर्त्यो वेदोक्तेनैव वर्त्मना। प्रायश्चित्तोऽबुधो भीतो विरुद्धं मार्गमाश्रयेत्॥
"मार्गो वेदविरुद्धो यः सोऽपि कालेन देहिनाम्। तत्तन्मार्गाभिमानिन्या देवतायाः प्रसादतः॥
"हेतुः स्याद्वेदमार्गस्य प्राप्तये न निरर्थकः"॥ इति। **कौर्मेऽपि—**

"सृष्ट्वा तानूचतुर्देवौ कुर्वाणांस्तंत्रचोदितम्। पतंतो निरये घोरे बहून्कालान्पुनः पुनः॥
"जायंते मानुषे लोके क्षीणपापचयास्ततः। ईश्वराराधनबलात् गमिष्यथ सतां गतिम्"॥ इति।

स्कांदे—

"अत्यंतस्खलितानां तु प्राणिनां वेदमार्गतः। पांचरात्रादयो मार्गाः कालेनैवोपकारकाः॥
"शंखचक्रगदापूर्वैरंकनं नान्यदेहिनाम्। दीक्षितानां तु तंत्रेषु नराणामंकनं प्रजाः॥
"उपकारकमेवोक्तं क्रमेण मुनिपुंगवाः। बाधकं तु विशेषेण वेदमार्गैकवर्तिनाम्॥" इति।

विष्णुस्मृतौ—

"शंखचक्राद्यंकनं च नृत्यगीतादिकं तथा। एकजातेरयं धर्मो न द्विजातेः कथंचन॥
"यस्तु संततशंखादिलिंगाचिन्हततनुर्द्विजः। स सर्वयातनाभोगी चंडालः कोटिजन्मसु॥
"चक्रांकिततनुर्वाऽपि तथा लिंगांकितोऽपि वा। नाधिकारी स विज्ञेयः श्रौतस्मार्तेषु कर्मसु"॥इति।

गोभिलोऽपि—

"श्रौतस्मार्तक्रियो विप्रो नांकयेदंगमंककैः। अपि विष्णवादिसंबंधैस्तप्तैर्वा पतितो भवेत्॥
"अज्ञानादथवा लोभाद्रागतो वा सुदर्शनम्। धत्ते कुलघ्नं तं दृष्ट्वा सवासा जलमाविशेत्॥

---

१ क्ष–इत्येतानि। २ क्ष–विचार। ३ ख–ब्रह्मवित्तमः।

" भुजाग्रे सलिलेनैव विलिखेद्यः सुदर्शनम् । वेदाग्निज्ञानवान् सोऽपि दहत्या सप्तमं कुलम् ॥
" शंखं चक्रं च पद्मं च यो मूढो धारयेत्तनौ । पाषंडः स हि विज्ञेयः सर्वकर्मबहिष्कृतः "॥ इति ।

शातातपः—

" अंगेषु नांकयेद्विप्रो देवतायुधलांछनैः । अंकयेद्यदि वा मोहात् पतत्येव न संशयः" ॥इति ।

यमोऽपि—

" नांकयेन्न दहेद्गात्रं देवतायुधलांछनैः । दहनाल्लेखनाद्विप्रः पातित्यं याति तत्क्षणात् " ॥

बोधायनोऽपि—

" नांकयेन्न दहेद्देहं दहेच्चेत्कामकारतः । नाधिक्रियेत दग्धांगः श्रौतस्मार्तेषु कर्मसु"॥ इति ।

चक्रोपनिषदि " तस्माच्छूद्राणामेव शंखं चक्रं द्विभुजे धारयेत् " इति । **स्मृतिरत्ने—**

" भूदेवस्तप्तमुद्राभिश्चिह्नं कृत्वा विमूढधीः । इह जन्मनि शूद्रः स्यात् प्रेत्य च श्वा भविष्यति " ॥

स्मृत्यंतरे—

" यानि शास्त्राणि दृश्यंते लोकेऽस्मिन्विविधानि तु । श्रुतिस्मृतिविरुद्धानि निष्ठा तेषां हि तामसी ॥
" शंखं चक्रं मृदा यस्तु कुर्यात्तप्तायसेन वा । स शूद्रवद्बहिष्कार्यः सर्वस्मात् द्विजकर्मणः ॥
" यथा स्मशानगं काष्ठमनर्हं सर्वकर्मसु । तथा चक्रांकितो विप्रो ह्यनर्हः सर्वकर्मसु " ॥ इति ।

ब्राह्मपुराणे—

" तप्तमुद्रा त्वंत्यजाय हरिणा निर्मिता पुरा । गोपीचंदनसंलिप्तफालकाश्चान्त्यजाय ते " ॥ इति ।

मानवे च—

" आयुधैः शंखचक्राद्यैर्न दहेच्च कदाचन । मनुष्याणां तु नाम्नैव न लिखेच्चोरसि भ्रमात् ॥
" दग्धांगश्चायुधैर्दिव्यैर्लिख्यते नरनामतः । श्रौतस्मार्तसमाचारे नाधिकारी कदाचन ॥
"दग्धांगा लिखितांगाश्च न संभाष्या द्विजातिभिः । न द्रष्टव्याश्च तान् राजा देशाच्छीघ्रं प्रवासयेत्"॥

नारदीये—

" स्वकर्मत्यागिनो राजन् वेदमार्गबहिष्कृताः । आगमान् पांचरात्रादीन् विशंते नारका नराः ॥
" शैवान् पाशुपतान् चैव पांचरात्रान् जनेश्वर । स्पृष्ट्वा स्नाप्य जपेत्सूक्तं दृष्ट्वा सूर्यं तु पश्यति "॥

सूक्तं पौरुषम् ।

" ब्राह्मणस्य तनुर्ज्ञेया सर्वदेवसमाश्रया । सा चेत्संतापिता राजन् किं वक्ष्यामि महैनसः ॥
" अनिमित्तं दहेद्देहं यः पुमान् व्याधिवर्जितः । हव्यकव्यादिदानेषु तं त्यजेदंत्यजं यथा " ॥

कौर्मेऽपि—

" बुद्धश्रावकनिर्ग्रंथाः पांचरात्रविदो जनाः । कापालिकाः पाशुपताः पाषंडा ये च तद्विधाः ॥
" यस्याश्नन्ति हवींष्येते दुरात्मानस्तु तापसाः । न तस्य तद्भवेच्छ्राद्धं प्रेत्य चेह फलप्रदम् ॥
" सर्वे पुनरभोज्यान्ना अदानार्हाश्च कर्मसु । ब्रह्मभावान्निरस्ताश्च वर्जनीयाः प्रयत्नतः ॥
" पाषंडिनो विकर्मस्था निर्मर्यादास्तथैव च । पांचरात्रान् पाशुपतान् वाङ्मात्रेणापि नार्चयेत्" ॥

श्रावकाः[1] जैनाः । निर्ग्रंथा दिगंबराः । श्रावका गुरवः ।

तत्रैव–" अंकितो यः स्वदेशात्तं राजा शीघ्रं प्रवासयेत् ॥
" अतीव पतितानां हि श्वपदाद्यंकनं नृणाम् । विधीयते न शुद्धानां ततः शुद्धं न चांकयेत् ॥

---

१ ख–बुद्धाः ।

" अध्यापने चाध्ययने श्रौतस्मार्तेषु कर्मसु । संभाषणेषु संबंधे नाधिकारी च लांछितः"॥ इति ।
पुराणांतरे—
" वेदमूलतया नित्यं प्रवृत्ता अपि सत्तमाः । क्वचित्कदाचित्स्मर्तारस्तंत्रार्थं च ब्रुवंति वै ॥
" क्वचित्तंत्रानुसारेण धर्मं पौराणिका अपि । वदंति तादृशोंऽशस्तु ग्राह्यस्तंत्रावलंबिना ॥
" पुराणे धर्मशास्त्रे वा योंऽशः श्रुत्या विरुध्यते । स तंत्रार्थ इति ज्ञेयः समासेन महर्षिभिः ॥
" यश्च वेदविरुद्धोऽर्थः पुराणेष्वखिलेषु च । तदंशस्तु परित्याज्यः सर्वथा सकलैरपि "॥ इति ।
तस्मात्तंत्रसिद्धतप्तमुद्रादिसहितोर्ध्वपुंड्रं वैदिकैर्न धार्यम् । केवलोर्ध्वपुंड्रं तु उक्तानेकश्रुतिस्मृतिपुराणसिद्धत्वाद्धार्यमेव । न च तासां श्रुतीनां अप्रामाण्यशंका
" ऊर्ध्वपुंड्रं तु विप्राणां सततं श्रुतिचोदितम् । श्रुतिस्मृत्युक्तमार्गेण मृदो धारणमुच्यते ॥
" श्रौतं वैखानसं प्रोक्तम् " इति च **वासिष्ठवामनपद्मपुराणादिषु** तदुपबृंहणादूर्ध्वपुंड्रमात्रस्य च तांत्रिकत्वाभिधाने उक्तानां बहुश्रुतिस्मृतिपुराणवचनानां वैदिकाधिकारप्रवृत्तानां अनन्यगतिकानां व्याकोपप्रसंगः । ' अश्रौतमूर्ध्वपुंड्रादि ' इत्युदाहृतानि तु वचनानि तप्तमुद्रासहितोर्ध्वपुंड्रविषयतया सावकाशानि ।

ननु तांत्रिकैस्तप्तमुद्राविषयापि **श्रुतिरुदाह्रियते** (तै. आरण्यके १।११) "पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः। अतप्ततनूर्न तदामो अश्नुते शृतास इद्वहंतस्तत्समाशत" इति नास्यास्तप्तमुद्राविषयत्वम् ॥ "तस्मिन्नुदीचीनदशं पवित्रं वितत्यमानमभिमंत्रयते यजमान" इति **कल्पसूत्रकारैर्द**शापवित्रास्तरणाभिमंत्रणे विनियोगप्रदर्शनात् । तथा च विद्यारण्यभाष्यम्—
" पवित्रं त इति दशापवित्रास्तरणाभिमंत्रणे चेयं विनियुज्यते पवित्रं सर्वपावनम्। ते तवात्मभूतं तेजः परमात्माख्यम् । विततं विस्तृतम् । सर्वत्र हे ब्रह्मणस्पते ब्राह्मणानां स्वामिन् ।एष वो भरता राजा सोमोऽस्माकं ब्राह्मणानांराजा 'तस्मात्सोमराजानो ब्राह्मणा' इति **दर्शनात्**। प्रभुस्त्वं गात्राणि अंगाणि पात्राणां पर्येषि गच्छसि विश्वतस्त्वया व्याप्तेनातप्ततनूः अशोधितशरीरः अत एवामः न तद्विततं पवित्रमश्नुते। असोमपस्य शुद्धभावात् ज्ञानद्वारा परमात्मप्राप्तिर्नास्तीति। शृतास इत् पक्वा एव त्वया वहंतो यज्ञं जनाः समाशत समश्नुवते तत्पवित्रमिति। यापि चमूषच्छ्येनः शकुनो विभृत्वा गोविंदुर्द्रप्स[1] आयुधानि बिभृत् " (ऋ. सं. ७।४।९) इति सापि **श्रुतिः** सोमविषयेति भाष्ये भाषितम् ।

ननु सोमविषयत्वेऽपि तयोस्तप्तशंखचक्रांकनविषयत्वमप्यस्त्विति चेन्न। तथात्वे तन्निषेध। पराणां श्रुतिस्मृतिपुराणानां निर्विषयत्वप्रसंगात् । किंच
" पवित्रमितिमंत्रेण यदि चक्रांकनं भवेत् । शूलांकनं वा किं न स्याद्यत्ते गात्रादिति श्रुतेः "॥
इति प्रसंजितं शूलांकनमपि श्रौतं स्यात् । अन्यपरस्य श्रुतिभागस्यान्यविषयत्वकल्पनामात्रेणार्थांतरपरत्वनिर्णये । ' यऽईंवहंतऽआशुभिः पिबंतो मदिरं मधु। अत्र श्रवांसि दधिरे ' (ऋ. सं. ४।३।२८) इति पीतसोममरुत्प्रशंसापरस्यास्य शाक्तैः स्वीयतंत्रविषयत्वेन कल्पितार्थस्यापि तदर्थपरत्वेन शाक्ततंत्रस्यापि वैदिकत्वापत्तिः ।
ननु 'विष्णोरराटमंत्रेण विन्यसेत्केशवाय च' इत्यादिना वेदोक्तमन्त्रैर्ललाटादिस्थानेषु त्रिशूलादिरूपोर्ध्वपुण्ड्रस्याभिहितत्वेनास्य वैदिकत्वमिति शाक्तवैषम्यमिति चेन्न । **शक्तितन्त्रे**ऽपि 'आर्द्रं ज्वलति ज्योतिरहमस्मि' इत्यनेन मन्त्रेण मद्यपानस्याभिहितत्वेन तत्तंत्रस्यापि वैदिकत्वापत्तेः।

---

१ **खग**–गोविन्द ।

तथा च

"पांचरात्रे च कापाले तथा कालामुखेऽपि च । शाक्ते च दीक्षिता यूयं भवत ब्राह्मणाधमाः"॥

इति **गौतमा**दिकृतशापोऽप्यनुग्रहाय स्यात् । अतस्तप्तमुद्रादिसहितमूर्ध्वपुंड्रं तांत्रिकमेव । तद्रहितमूर्ध्वपुंड्रं श्रुतिपुराणशिष्टाचारत्वेन वैदिकैर्धार्यमेवेति निर्णयः ।

अथ **त्रिपुंड्रविधिः** । **कालाग्निरुद्रोपनिषदि**–"आग्नेयं भस्म 'सद्यो जातमिति' पंचब्रह्ममंत्रैः परिगृह्य अग्निरित्यनेन चाभिमंत्र्य मानस्तोक इति समुद्धृत्य जलेन संमृज्य शिरोललाटवक्षस्कंधेषु त्र्यायुषैस्त्र्यंबकैस्तिर्यक् तिस्रो रेखाः प्रकुर्वीत व्रतमेतच्छाम्भवं सर्ववेदेषु वेदवादिभिरुक्तं भवति । तस्मात्तत्समाचरेत् मुमुक्षुरपुनर्भवाय त्रिविधा रेखा त्रिपुंड्रप्रमाणं त्रिधा ललाटादा चक्षुषोरा भ्रुवोरिति । तत्रैवं प्रशंसा च **श्रूयते**– "त्रिपुंड्रं भस्मना करोति यो विद्वान् ब्रह्मचारी गृहस्थो वानप्रस्थो यतिर्वा समस्तमहापातकोपपातकेभ्यः पूतो भवति स सर्वान् देवान् ध्यातो भवति स सर्वेषु तीर्थेषु स्नातो भवति सर्वसंपत्समृद्धो भवति सततं सर्वरुद्रमंत्रजापी भवति सकलभोगभुग्देहं त्यक्त्वा शिवसायुज्यमाप्नोति न च पुनरावर्तते न च पुनरावर्तते इत्याह भगवान्कालाग्निरुद्रः"॥ इति ।

अथर्वशिरसि जाबालोपनिषदि च— "अग्निरिति भस्म । वायुरिति भस्म । जलमिति भस्म । स्थलमिति भस्म । व्योमेति भस्म । सर्वꣳ ह वा इदं भस्म । मन इत्येतानि चक्षूंषि भस्मानि । अग्निरित्यादिना भस्म गृहीत्वा विमृज्यांगानि संस्पृशेत् तस्माद्व्रतमेतत् पाशुपतं पशुपाशविमोक्षाय"॥ इति । **स्मृत्यंतरे**—

"मानस्तोकेतिमंत्रेण मंत्रितं भस्म धारयेत् । ऊर्ध्वपुंड्रं भवेत्साम मध्यपुंड्रं यजूंषि च ॥
"अधःपुंड्रमृचः साक्षात्तस्मात्पुंड्रं त्र्यायुषम् । त्र्यायुषेण कुरुते ललाटे च भुजद्वये ॥
"नाभौ शिरसि हृत्पार्श्वे ब्राह्मणो वैदिकः सदा"॥ इति । त्र्यायुषं त्र्यायुषसंज्ञितम् । तथा च **वायुपुराणे**–"ततस्त्रिपुंड्रं रचयेत् त्र्यायुषसमाह्वयम्"॥ इति । तैत्तिरीयश्रुतौ च (प्र. ७ अनु. ११ शीक्षोपनिषदि) शिष्यानुशासने "सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् । देवपितृकार्याभ्यां न प्रमदितव्यम् । मातृदेवो भव" इत्यादि । अत्र भूतिशब्दस्य भस्मार्थत्वं **बौधायनेनोक्तम्**—

"अथातो द्विजातीनां त्रिपुंड्रधारणविधिं व्याख्यास्यामो भूत्यै न प्रमदितव्यमिति विज्ञायते । तथाप्युदाहरंति

"मध्यमानामिकांगुष्ठैस्त्रिपुंड्रं भस्मना कृतम् । तत्त्रिपुंड्रं भवेद्ध्वस्तं महापातकनाशनम्"॥ इति । अथ त्र्यंबकमिति सर्वांगं संमृजेत्पूतो भवति दशपूर्वान् दशपरानात्मानं चैकविंशतिं पङ्क्तिं च पुनाति । ब्रह्मणः सायुज्यं सलोकतामाप्नोतीत्याह भगवान् बोधायन इति"।

वामनपुराणे श्रुत्युपबृंहणं दृश्यते—

"सत्यात्प्रमदितव्यं वै धर्माच्च कुशलाच्च न । भूत्या अग्निसमुत्थायास्ततो देहावकुंठनात् ॥
"ललाटे हृदि दोर्द्वंद्वे त्रिपुंड्रस्य च धारणात् । नैव प्रमदितव्यं वै प्रमादाद्वाऽपि कदाचन ॥
"स्वाध्यायाध्ययनं नित्यं कुरु प्रवचनं तथा"॥ इति । **भाष्यकारेण** यद्यपि भूतिशब्द ऐश्वर्यपरतया व्याख्यातः तथापि **बोधायनेन** 'भूत्यै न प्रमदितव्यम्' इत्यस्याः श्रुतेः भस्मत्रिपुंड्रप्रमाणतयोदाहृतत्वात् तदुपबृंहण**पुराणवाक्यानां** च सत्त्वात् भूतिशब्दस्य भस्मपरत्वमेव

युक्तम् । भूतिशब्दस्य नानार्थत्वेन ऐश्वर्यपरतया व्याख्यानेऽपि नेह कश्चित् विरोधः । उपबृंहणस्य सत्वे तदपि व्याख्यानांतरमस्तु । **बोधायनः**–" अथातो विभूतिसंपादनधारणविधिं व्याख्यास्यामो शुचिर्भूत्वा विकटांगामुन्मत्तामशिवां हीनातिरिक्तां गां वंध्यामस्थिबहुलामशुद्धभक्षणीं विहाय सुलक्षणाया गोर्गोमयमादाय पिंडं कृत्वा संशोष्य श्वेतपचनीयैः संभारैः प्रच्छाद्य गृह्याग्नौ वैताने वा पचनेवोपोषयेत् बिल्वफलपात्रे मृन्मये वा स्थापयेत् । अथ तद्भस्म समादायाभिमंत्रयते । ईशानः सर्व...शिवो । तत्पुरुषाय...चोदयात् । अघोरेभ्यो...रूपेभ्यः । वामदेवाय...मनोन्मनायनमः । सद्योजातं...भवोद्भवाय नमः...पुनरेवाभिमृशति । सद्योजातमिति पंचभिः मानस्तोक इति मध्यमानामिकांगुष्ठैः समादाय तूष्णीमद्भिः समुदायुत्य[1] त्र्यायुषमिति त्रिपुंड्रं धारयेत् । अथाप्युदाहरंति

"ललाटे हृदि दोर्द्वंद्वे गले कुक्षौ शिरस्यथ । धारयेच्च सितं भस्म द्विजो नित्यमतंद्रितः" ॥ इति ।

बोधायनस्मृतौ च—

" सद्येन गोशकृद्गृह्य वामेन त्वभिमंत्रयेत् । अघोरेण दहेत्पिंडं पुरुषेण तु शोधयेत् ॥
"स्नानमीशानमंत्रेण कुर्यान्मूर्धादिपादतः । आचम्य कूर्च आसीनः शिवो भूत्वा शिवं जपेत्॥" इति

भरद्वाजः—

" प्राङ्मुखश्चरणौ हस्तौ प्रक्षाल्याचम्य पूर्ववत् । प्राणानायम्य संकल्प्य भस्मस्नानं समाचरेत् ॥
" आदाय भसितं श्वेतं अग्निहोत्रसमुद्भवम् । ईशानेन तु मंत्रेण स्वमूर्धनि विनिक्षिपेत् ॥
" तत आदाय तद्भस्म मुखे तत्पुरुषेण तु । अघोराख्येन हृदये गुह्ये वामाव्हयेन च ॥
" सद्योजाताभिधानेन भस्मपादद्वये क्षिपेत् । सर्वांगं प्रणवेनैव मंत्रेणोद्धूलयेत्ततः ॥
" एतदाग्नेयकं स्नानं मुदितं परमर्षिभिः । सर्वकर्मसमृद्ध्यर्थं कुर्यादादाविदं बुधः ॥
" ततः प्रक्षाल्यहस्तादीनुपस्पृश्य यथाविधि । तिर्यक् त्रिपुंड्रं विधिना ललाटे हृदये गले ॥
" धृत्वाऽग्निहोत्रजेनैव भस्मना तु प्रसन्नधीः । पंचभिर्ब्रह्मभिर्वाऽपि कृतेन भसितेन च ॥
" धृतमेतत्त्रिपुंड्रं स्यात्सर्वकर्मसु पावनम् । त्रिपुंड्रं धारयेन्नित्यं सर्वपापविशुद्धये ॥
" शूद्रहस्तस्थितं भस्म न हि धार्यं द्विजातिभिः । शूद्रैरंत्यजहस्तस्थं न धार्यं भस्म जातुजित् ॥
" अतोऽग्निहोत्रजेनैव भस्मना तु त्रिपुंड्रकम् । नित्यं द्विजैः प्रमोदेन धार्यं कर्मविवृद्धये ॥
" अन्यथा सर्वकर्माणि न फलंति कदाचन " इति ॥ **कात्यायनोऽपि**—

" श्राद्धे यज्ञे जपे होमे वैश्वदेवे सुरार्चने । धृतत्रिपुंड्रः पूतात्मा मृत्युं जयति मानवः ॥
" त्रिपुंड्रं यद्यधृत्वा तु कुर्याद्यत्कर्म तद्वृथा " ॥ इति । **स्मृत्यंतरे च**—

" अग्निरित्यादिभिर्मंत्रैः भस्मनोद्धूलनं तथा । त्रिपुंड्रधारणं कृत्वा संध्यावंदनमाचरेत् ॥
" त्रिपुंड्रं परमं पुण्यं ब्रह्मविष्णुशिवात्मकम् । ये घोरा राक्षसाः प्रेता ये चान्ये क्षुद्रजंतवः ।
" त्रिपुंड्रधारिणं दृष्ट्वा पलायंते न संशयः " ॥ इति । **लोकाक्षिरपि**—

" मध्यमानामिकांगुष्ठैर्ललाटे भस्मना कृतः । स त्रिपुंड्रो भवेच्छस्तो महापातकनाशनः ॥
" त्रिपुंड्रं धारयेद्यस्तु शिवप्रवणमानसः । भूर्भुवस्वस्त्रयो लोका धृतास्तेन महात्मना ॥
" त्रिपुंड्रधृग्विप्रवरो यो रुद्राक्षधरः शुचिः । स हंति रोगदुरितव्याधिदुर्भिक्षतस्करान् ॥
" स प्राप्नोति परं ब्रह्म यतो नावर्तते पुनः ॥

---

१ क्ष–त्या ।

" स पंक्तिपावनः श्राद्धे पूज्यो विप्रैः सुरैरपि " ॥ इति । **शातातपः**—
" सत्यं शौचं तपो होमस्तीर्थं देवादिपूजनम् । तस्य व्यर्थमिदं सर्वं यस्त्रिपुंड्रं न धारयेत् " ॥

स्मृतिरत्नावल्याम्—
" मध्यमानामिकांगुष्ठैर्ललाटे यत् त्रिपुंड्रकम् । तत् त्रिपुंड्रं भवेच्छस्तं महापातकनाशनम् "॥इति ।

स्मृतिसारसमुच्चये—
" अशक्तः समयाचारे मनसा पापमाचरन् । शुचिरेव भवेन्नित्यं त्रिपुंड्रस्य तु धारणात् "॥ इति ।

स्मृतिभास्करे—
" वनस्पतिगते सोमे भस्मोद्धूलितविग्रहः । अर्चितं शंकरं दृष्ट्वा सर्वपापैः प्रमुच्यते ॥
"भासनाद्भसितं प्रोक्तं भस्म कल्मषभक्षणात् । भूतिर्भूतिकरी पुंसां रक्षा रक्षाकरी पराम् "॥ इति ।

धर्मसारसुधानिधौ—
" त्रिपुंड्रकं सदा कुर्यान्मंत्रपूतेन भस्मना । वेदोक्तेन विधानेन शिवसायुज्यमाप्नुयात् " ॥ इति ।

महाभारतेऽपि
"आयुष्कामोऽथ वा राजन् भूतिकामोऽथवा नरः।नित्यं वै धारयेत् भस्म मोक्षकामी च वै द्विजः"।इति।

क्रियासारे—
" मध्यांगुलित्रयेणैव स्वदक्षिणकरस्य तु । षडंगुलायतं मानमथवाऽधिकमानकम् " ॥
" नेत्रयुग्मप्रमाणं वा फालेदीप्तं त्रिपुंड्रिकम् । कदाचिद्भस्मना कुर्यात्स रुद्रो नात्र संशयः ॥
"अकारोऽनामिका प्रोक्ता ह्युकारो मध्यमांगुलिः।मकारस्तर्जनी तस्मात् त्रिभिःकुर्यात्त्रिपुंड्रकम्"।इति।

सांख्यायनगृह्ये—"त्र्यायुषमिति पंचभिर्मंत्रैर्ललाटे हृदये च दक्षिणस्कंधे वामे च ततः पृष्ठे च पंचसु भस्मना त्रिपुंड्रं करोति स एषां वेदानां एकं द्वौ त्रीन्सर्वानधीते " ॥ इति ।
माध्यंदिनगृह्ये—"भस्मना ललाटे ग्रीवायां दक्षिणेंऽसे हृदि च त्र्यायुषमिति प्रतिमंत्रम्"॥ इति ।

स्कांदे—
" भस्मना वै त्रिसंध्यं च तांत्रिकाणां जलैर्युतम् । धार्यं त्रिपुंड्रं स्त्रीणां च यतीनां जलवर्जितम् ॥
" वनस्थव्रतिकन्यानां दीक्षाहीननृणां तथा । मध्याह्नात् प्राक्जलैर्युक्तं परतो जलवर्जितम् "॥ इति ।

आदित्यपुराणे—
" त्रिपुंड्रधारी सततं ब्राह्मणः सर्वकर्मसु । भस्मनैवाग्निहोत्रस्य शिवाग्निजनितेन वा " ॥ इति ।

वासिष्ठलैंगेऽपि वासिष्ठं प्रति महादेवः—
" भस्म विद्धि परं ब्रह्म सत्यबोधसुखावहम् । भस्म तद्वेदनाल्लभ्यं मुख्यं तदपरं बुधैः ॥
" आग्नेयं गौणमज्ञानध्वंसकं ज्ञानसाधकम् । गौणं नानाविधं विद्धि ब्रह्मन्ब्रह्मविदां वर ॥
" अग्निहोत्राग्निजं तद्वद्विरजानलजं मुने । औपासनसमुत्पन्नं समिदग्निसमुद्भवम् ॥
" त्रैवर्णिकानां सर्वेषामग्निहोत्रसमुद्भवम् । विरजानलजं चैव धार्यं भस्म महामुने ॥
" औपासनसमुत्पन्नं गृहस्थानां विशेषतः । समिदग्निसमुत्पन्नं धार्यं वै ब्रह्मचारिणाम् ॥
" शूद्राणां श्रोत्रियागारे पचनाग्निसमुद्भवम् । अन्येषामपि सर्वेषां दावानलसमुद्भवम् ॥
" अग्निरित्यादिभिर्मंत्रैः षड्भिराथर्वणैस्तथा । जाबालैः सप्तभिर्वाऽपि गौणेनैव तु भस्मना ॥
" उद्धूलयेत् स्वकं देहं पापपुंजभयापहम् । त्र्यायुषेण मंत्रेण मेधावीत्यादिनाऽथ वा ॥

" गौणेन भस्मना धार्यं त्रिपुण्ड्रं ब्रह्मचारिणाम्। त्र्यम्बकेण मन्त्रेण सतारेण तथैव च ॥
" पञ्चाक्षरेण मन्त्रेण प्रणवेन युतेन च। ललाटे हृदये चैव दोर्द्वंद्वे च महामुने ॥
" त्रिपुंड्रं धारयेन्नित्यं गृहस्थश्च वनाश्रमी। आत्ममंत्रेण हंसेन प्रणवेन समाहितः ॥
" त्रिपुंड्रं धारयेन्नित्यं संन्यासाश्रममाश्रितः। नमोंतेन शिवेनैवं शूद्रः शुश्रूषणप्रियः ॥
" उद्धूलनं त्रिपुंड्रं च नित्यं भक्त्या समाचरेत् ॥
" अन्येषामपि सर्वेषां विना मंत्रेण सुव्रत। उद्धूलनं त्रिपुंड्रं च कर्तव्यं भक्तितो मुने " ॥ इति।

ब्रह्मचारिणां धारणप्रकारमाह **बोधायनः**— " यस्मिन्नग्नौ कर्म कृत्वोपतिष्ठते तस्मात्तूष्णीं भस्मादाय तूष्णीमभिमृश्य ' मा नस्तोक ' इति मंत्रेणादाय धारयेत्। ' मेधावीति ' ललाटे। ' तेजस्वीति ' दक्षिणे बाहौ। ' वर्चस्वीति ' सव्ये। ' ब्रह्मवर्चसीति ' हृद्ये। ' आयुष्मानिति ' कंठे। ' भूयासं स्वस्तीति ' सर्वत्रानुषजति " ॥ **गारुडे**—

" श्रुतयः स्मृतयः सर्वाः पुराणान्यखिलानि च। वदंति भूतिमहात्म्यं ततस्तां धारयेत् द्विजः ॥
"उद्धूलनं त्रिपुंड्रं च मनसाऽपि न संत्यजेत्। श्रुत्या विधीयते यस्मात्तत्यागी पतितो भवेत्"॥ इति।

पाराशरे—

" भस्मना वेदमंत्रेण त्रिपुंड्रं चावकुंठनम्। यस्य सिध्येत्प्रयत्नेन ब्राह्मण्यं तस्य पुष्कलम् ॥
" भस्मना वेदमंत्रेण त्रिपुंड्रस्य तु धारणम्। आश्रमाणां च सर्वेषां धर्मत्वेनाहुरास्तिकाः ॥
" शिवस्य विष्णोर्देवानां ब्रह्मणस्तृप्तिकारणम्। पार्वत्याश्च महालक्ष्म्याः भारत्यास्तृप्तिकारणम् ॥
" भस्मना वेदमंत्रेण त्रिपुंड्रस्य तु धारणम्। भस्मसंछन्नसर्वांगं त्रिपुंड्रांकितमस्तकम् ॥
" ये निंदंति नरा राजा हन्यात्तानविचारतः ॥
" वैष्णवीं धारयेद्यष्टिं सोदकं च कमंडलुं। पवित्रमुपवीतं च त्रिपुंड्रोद्धूलनं द्विजः ॥
" यथा विशिष्टे मानुष्ये ब्राह्मणे पशुविग्रहे। यज्ञदानाद्यनुष्ठानं दुर्लभं सर्वदेहिनाम् ॥
" तथा श्रौतेषु धर्मेषु त्रिपुंड्रं भस्मकुंठनम्। रुद्रलिंगार्चनं चापि दुर्लभं हि शरीरिणाम् ॥
" त्रिपुंड्रधारणं तिर्यक् भस्मनैवावकुंठनम्। सुदुर्लभमिति ज्ञात्वा खलु सर्वेश्वरोऽकरोत् ॥
" अनिष्पन्नस्य कर्तव्यं त्रिपुंड्रादेस्तु धारणम्। विशेषेण स्वलाभाय नान्यलाभाय सत्तम ॥
" स्वलाभमंतरेणापि पराचारार्थमास्तिकः। निष्पन्नेनापि कर्तव्यं यथा सर्वेश्वरेण तत्"॥ इति।

मानवोपपुराणे—

" त्रिपुंड्रधारिणं दृष्ट्वा भूतप्रेतपुरःसराः। भीताः प्रकंपिताः शीघ्रं गछंत्येव न संशयः ॥
" त्रिपुंड्रधारणं भूत्या तथा देहावकुंठनम्। यो न कुर्यात्तु मंत्रेण स साक्षात्पतितो भवेत्"॥ इति।

कूर्मपुराणेऽपि—

" सृष्टासृष्टिच्छलेनाह त्रिपुंड्रस्य प्रशस्तताम्। ससर्ज स ललाटं हि तिर्यगूर्ध्वं न वर्तुलम् ॥
" तीर्यग्रेखाः प्रकाशंते ललाटे सर्वदेहिनाम्। तथापि मानवा मूर्खा न कुर्वंति त्रिपुंड्रकम् ॥
" वेदस्याध्ययने शूद्रो नाधिकारी यथा भवेत्। त्रिपुंड्रेण विना विप्रो नाधिकारी स्वकर्मसु ॥
" यथा राजा स्वचिन्हांकं स्वजनं मन्यते सदा। तथा शिवस्त्रिपुंड्रांकं नरं स्वामिति मन्यते ॥
"द्विजातिर्वाऽन्त्यजातिर्वा सितशुद्धेन भस्मना। धारयेद्यस्त्रिपुंड्रांकं रुद्रस्तेन वशीकृतः"॥ इति।

लैंगे—

" त्रिपुंड्रं सुरविप्राणां वर्तुलं नृपवैश्ययोः। अर्धचन्द्रं तु शूद्राणामन्येषामूर्ध्वपुण्ड्रकम् " ॥ इति।

ब्रह्मकैवर्ते—
"धार्यं भस्म सदाग्निहोत्रजनितं यद्वैदिकं वैदिकैस्तिर्यक् पुंड्रतया ललाटफलके वक्षस्स्थले मस्तके॥
"बाह्वोर्मंत्रपुरःसरं क्रतुशतं तैरेव सम्यक्कृतं स्नातं तीर्थसहस्रकोटिषु धरा दत्ता नवद्येखिला"॥ इति।
शंकरसंहितायाम्—
" यत्र भुंजीत भस्मांगी मूर्खो वा पंडितोऽपि वा । तत्र भुंक्ते महादेवः सपत्नीको वृषध्वजः ॥
" भूतिरेवौषधं पुंसां मुक्तिस्त्रीवश्यकर्मणि " ॥ इति । **सौरसंहितायाम्**—
" भस्मना छन्नसर्वांगमनुगच्छति यः पुमान् । सर्वपातकयुक्तोऽपि स सद्यः पूयते नरः ॥
" यथा पुरेषु सर्वेषु पुरी वाराणसी शुभा । तथा शुभ्रं त्रिपुंड्रं च सर्वपुंड्रेषु कथ्यते " ॥
मानवीयसंहितायाम्—
" प्रातःकाले च मध्यान्हे सायान्हे च त्रिपुंड्रकम् । सितेन भस्मना कुर्यात्स रुद्रो नात्र संशयः"॥इति।
सूतसंहितायाम्—
" ललाटे चैव दोर्द्वंद्वे तथैवोरसि बुद्धिमान् । त्रिपुंड्रं धारयेन्नित्यं भुक्तिमुक्तिफलप्रदम् ॥
"भस्मनोद्धूलनं चैव तथा तिर्यक् त्रिपुंड्रकम्। प्रमादादपि मोक्षार्थी न त्यजेदिति हि श्रुतिः"॥इत्यादि।
पुरुषार्थबोधेऽपि—" विभूतिधारणविधिं प्रवक्ष्यामि समासतः ॥
" भस्माग्निहोत्रजं वाऽथ विरजाग्निसमुद्भवम् । आदरेण समादाय शुद्धे पात्रे निधाय तत् ॥
" प्रक्षाल्य हस्तौ पादौ च द्विराचम्य समाहितः । गृहीत्वा भस्म तत्तं च ब्रह्ममंत्रैः शनैः करे ॥
" प्राणायामत्रयं कृत्वाऽग्निरित्यादिमंत्रतः । तैरेव सप्तभिर्मंत्रैस्त्रिवारमभिमंत्र्य तत् ॥
ओमापोज्योतिरित्युक्त्वा ध्यात्वा विष्णुं जलाधिपम्।संयोज्य भस्मना तोयं अग्निरित्यादिभिःक्रमात्॥
" निमृज्ज्य सांबं ध्यात्वा समुद्धूल्यापादमस्तकम् । तेन भावनया ब्रह्मभूतेन सितभस्मना ॥
" ललाटवक्षः स्कंधेषु स्वाश्रमोचितमंत्रतः । मध्यमानामिकांगुष्ठैः अनुलोमविलोमतः ॥
" त्रिपुंड्रं धारयेन्नित्यं त्रिकालेष्वपि भक्तितः । उद्धूलनस्य स्नानत्वाद्धस्तौ प्रक्षाल्य तत्परम् ॥
" द्विराचामेत् त्रिपुंड्रस्य धारणांते तथैव च " ॥ इति । **क्रियासारे**—
" शूद्रहस्तस्थितं भस्म द्विजातिर्नैव धारयेत् । तथैवांत्यजहस्तस्थं शूद्रैर्धार्यं न जातुचित् ॥
" यावन्तः पतिता भूमौ भस्मनः परमाणवः । तावद्वर्षसहस्राणि रौरवं नरकं व्रजेत् " ॥ इति ।
पाराशरे—
" श्रौतधर्मैकनिष्ठानां लिंगं तु श्रौतमेव हि । अश्रौतधर्मनिष्ठानां लिंगं त्वश्रौतमेव हि ॥
" श्रौतं लिंगं च विज्ञेयं त्रिपुंड्रोद्धूलनात्मकम् । अश्रौतमूर्ध्वपुंड्रादि नैव तिर्यक् त्रिपुंड्रकम् ॥
" वेदसिद्धो महादेवः साक्षात्संसारमोचकः । उमार्धविग्रहः शुक्लश्चंद्रार्धकृतशेखरः ॥
" लोकानामुपकाराय श्रौतं लिंगं दधाति च । वेदसिद्धस्य विष्णोश्च श्रौतं लिंगं न चेतरत् ॥
" प्रादुर्भावविशेषाणामपि तस्य तदेव हि " ॥ इति । **भविष्यत्पुराणे**—
" पापानामपि बाहुल्यात् दधीचस्य च शापतः । गौतमस्य मुनेः शापात् श्रौतं लिंगं न रोचते" ॥
आदित्यपुराणेऽपि—
" दूर्वाससो मुनेः शापात् कुपितस्य महात्मनः । कण्वशापाद्भृगोः शापादुपमन्योश्च शापतः ॥
" दधीचस्य मुनेः शापात् गौतमस्य च शापतः ॥

---

१ ग–पुनः ।

"विप्राणां दाक्षिणात्यानां पापोपहतचेतसाम् । शिवे भस्मनि रुद्राक्षे किंचिच्छ्रद्धा न विद्यते" ॥ इति ।
" त्रिपुंड्रोद्धूलनार्थानि वचनानि सहस्रशः । संति तानि न लिख्यंते ग्रंथविस्तरभीतितः " ॥

यत्तु **ब्रह्मरातनवचनम्**—

"ब्राह्मणस्योर्ध्वपुंड्रं स्यात्क्षत्रियस्यार्धचंद्रकम् । वैश्यस्य वर्तुलाकारं शूद्रस्यैव त्रिपुंड्रकम्" ॥ इति ।

यदपि **पाद्मवचनम्**—

" कपालकेशभस्मास्थिशुक्तिपाषाणधारिणम् । त्रिपुंड्रधारिणं विप्रं चंडालमिव संत्यजेत् ॥
" बालेंदुवत्क्षत्रियाणां वैश्यानां वर्तुलाकृतिः । त्रिपुंड्रं शूद्रजातीनां विधिरेष सनातनः ॥
" कुलीनो ब्राह्मणो विद्वान् भस्मग्राही भवेद्यदि । वर्जयेत्तादृशं देवि मद्योच्छिष्टघटं यथा ॥
" त्रिपुंड्रं ब्राह्मणो विद्वान् लीलयाऽपि न धारयेत् । त्रिपुंड्रधारणाद्विप्रः पतत्येव न संशयः ॥
" तामसेषु पुराणेषु मोहनार्थं सुरद्विषाम् । त्रिपुंड्रधारणं प्रोक्तं तामसैर्मुनिसत्तमैः ॥
" तामसानि पुराणानि दृष्ट्वा मोहाच्च यो द्विजः । त्रिपुंड्रधारणं कृत्वा तमस्यंधे निमज्जति ॥
" तिर्यक्पुंड्रं न कुर्वीत संप्राप्ते मरणेऽपि च । तिर्यक्पुंड्राद्गतिस्तिर्यक् ऊर्ध्वपुंड्रात्तथोर्ध्वगा ॥
" शस्त्रधार्यसिधारी च धनुर्धारी धनापहः । तिर्यक्पुंड्रधरो विप्रः चंडालसदृशो भवेत् ॥
" ब्राह्मणः कुलजो विद्वान् तिर्यक्पुंड्रधरो यदि । तं गर्दभं समारोप्य राजा राष्ट्रात्प्रवासयेत्" ॥ इति ।

यदपि **वसिष्ठसंहितायाम्**—

" यत्तु रुद्रार्चनं प्रोक्तं त्रिपुंड्रं वापि सत्तमाः । तद्ब्राह्मण्यविषयं न तु विप्रस्य कर्हिचित् ॥
"न त्रिपुंड्रं द्विजैर्धार्यं पट्टिकाकारमेव च । न चान्यदेवताभक्तिरापद्यपि कदाचन" ॥ इति ।

यदपि **ब्रह्मांडपुराणवचनम्**— " त्रिपुंड्रं शूद्रकल्पानां शूद्राणां च विधीयते " ॥ इति ।

एवमादीनि त्रिपुंड्रनिषेधवचनानि पाशुपतादितंत्रदीक्षाप्रविष्टब्राह्मणनिंदापराणि । अत एव **वाराहे गौतमः**—" शशाप तान् जटाभस्मदीक्षाव्रतधरांस्तथा ॥

" त्रिपुंड्रधारिणो नित्यं भस्मोद्धूलनतत्पराः । भविष्यथ त्रयीबाह्या मिथ्याज्ञानप्रलापिनः ॥
" बौद्धे चाप्यार्हते चैव तथा पाशुपतेऽपि च । शांभवे दीक्षिता यूयं भवत ब्राह्मणाधमाः " ॥

चतुर्विंशतिमते—

"बौद्धान्पाशुपतान्जैनान्लोकायतिककापिलान् । विकर्मस्थान्द्विजान् दृष्ट्वा सचैलो जलमाविशेत्" ॥ इति

चंद्रिकायामपि—

"जैनान्पाशुपतान्स्पृष्ट्वा लोकायतिकनास्तिकान् । स्पृष्ट्वा देवलकं चैव सवासा जलमाविशेत्" ॥ इति ।

नारदीये पुराणे—

'शैवान्पाशुपतांश्चैव पांचरात्रान् जनेश्वराः । स्पृष्ट्वा स्नायाज्जपेत्सूक्तं यतो निन्दन्ति वैदिकान्" ॥ इति ।

कौर्मे—

" कापालिकाः पाशुपताः पाषंडा ये च तद्विधाः । ब्रह्मभावान्निरस्तास्ते वर्जनीयाः प्रयत्नतः" ॥

वासिष्ठलैंगेऽपि—

" केचित्कापालमिच्छंति केचित्पाशुपतं मुने । केचिद्बौद्धं प्रशंसंति केचिद्दिगंबरं मुने ॥
" केचिल्लोकायतं ब्रह्मन्केचिद्वामं महामुने । केचिद्भैरवमिच्छंति केचिच्छाक्तं तथैव च ॥
" शांभवं केचिदिच्छंति यामलं भुवि केचन ॥

“ अन्यानि यानि शास्त्राणि विरुद्धानि महामुने । स्वतः प्रमाणभूतेन वेदेन मुनिसत्तम ॥
“ तान्येव श्रद्धया युक्ताः परिगृह्य द्विजातयः । आचरंति महामूढा युगांते समुपस्थिते” ॥ इति ।
विष्णुपुराणेऽपि—
“ येन केनापि योगेन द्विजातिर्दीक्षितः कलौ । यैव सैव च मैत्रेय प्रायश्चित्तं कलौ क्रिया ॥
“ यदा यदा हि पाषंडवृद्धिर्मैत्रेय लक्ष्यते । तदा तदा कलेर्वृद्धिरनुमेया विचक्षणैः ” ॥ इति ।
द्विजबंधूनां तंत्रे अधिकार उक्तो **जातिनिर्णयसंग्रहे**—
“ ब्राह्मणात् द्विजकन्यायां जातो नाम शिवद्विजः । महादेवस्य पूजार्थं उपनेयः समंत्रकम् ॥
“ शिवागमं पठेन्नित्यं शिवशेषान्नभुक्तिमान् । दीक्षाधर्मविधानं च द्विजो धर्ममिवाचरेत् ॥
“ ब्राह्मण्यां सधवायां तु विप्राज्जातस्तु कुंडकः । विधवायां तु गोलः स्यादेतौ श्राद्धबहिष्कृतौ ॥
“ तौ च देवस्यं पूजार्हावुपनेयौ च मंत्रतः । आरामपोषणः कुंडो गोलको हिंगुविक्रयी ॥
“ सवर्णेष्वधमावेतौ कानीनत्वाच्छिवद्विजः ”॥ इति । यत्तु **शंखवचनम्**—
“दीपाग्निं दीपतैलं च भस्म चास्थि रजस्वलाम्। एतानि ब्राह्मणः स्पृष्ट्वा सवासा जलमाविशेत्”॥इति।
तद्दीपाग्निपदसान्निधानात्तदग्निजवर्तिभस्मविषयम् । भस्ममात्रपरत्वे तु पूर्वोक्तभस्मधारणविधायकश्रुतिस्मृतीतिहासपुराणविरोधः स्यात् । तस्माद्धूलनं त्रिपुंड्रं च वैदिकैर्धार्यमिति स्थितम् ॥
अत्र विकल्पमाह **व्यासः**— “ ऊर्ध्वपुंड्रं त्रिपुंड्रं वा धारयेत्सर्वकर्मसु ” ॥ इति ।
शैवेऽपि—
“ऊर्ध्वपुंड्रं त्रिपुण्ड्रं वा धृत्वा कर्माणि वै द्विजः। इष्टापूर्तानि कुर्वीत नान्यथा तत्फलं लभेत्”॥इति
अन्यत्रापि—“ आचम्य धारयेदूर्ध्वपुण्ड्रं पुण्यस्थलीमृदा ।
“अथवा धारयेद्विप्रो भस्मना तु त्रिपुंड्रकम् । यज्वा तु धारयेन्नित्यं भस्मनैव त्रिपुंड्रकम्”॥ इति
अत्र व्यवस्था **माधवीये** दर्शिता—“ ऊर्ध्वपुंड्रं त्रिपुंड्रं वा धारयेत्तु यथाकुलम् ” ॥ इति ।
पारिजाते—
“ अपवित्रेण यज्जप्तमस्नानेन कृतं हुतम् । यच्च शून्यललाटेन तदत्यल्पफलं भवेत् ॥
“ ऊर्ध्वपुंड्रं त्रिपुण्ड्रं वा धारयेत्तु यथाकुलम् ” ॥ इति । **पाद्मेऽपि**—
“ आचम्य भस्मना धार्यं त्रिपुंड्रं गोपिचंदनात् । ऊर्ध्वपुंड्रं यथापूर्वमनुष्ठानं समाचरेत्” ॥ इति ।
तत्रैव समुच्चयोऽप्यभिहितः
“ ऊर्ध्वपुंड्रं मृदा पूर्वमनुष्ठाय समाचरेत् । अग्निहोत्रसमुद्भूतभस्मनाऽपि त्रिपुंड्रकम् ॥
“ ऊर्ध्वपुंड्रं त्रिपुंड्रं च द्वावेतौ धारयेत् द्विजः । तयोरेकं परित्यज्य रौरवं नरकं व्रजेत्”॥ इति ।
यत्तु **वचनम्**—
“ गोपीचंदनसंयुक्तं भूत्या तिर्यक् त्रिपुंड्रकम् । षष्टिवर्षसहस्राणि नरकं तं प्रवेशयेत् ” ॥ इति
तत् त्रिपुंड्रोपरि ऊर्ध्वपुंड्रधारणनिषेधपरम् । “ऊर्ध्वपुंड्रे त्रिपुंड्रं स्यात् त्रिपुंड्रे नोर्ध्वपुंड्रकम्” ॥ इति
स्मरणात् । तथा च **ब्रह्मकैवर्ते वृद्धगिरिमाहात्म्ये**—
“तिर्यग्भस्ममृदं तथोर्ध्वमुदितां धत्तेऽनयोर्व्यत्यययोर्विप्रध्वंसनमन्यधारणकृता भस्मापि धार्यं ततः ॥
“अन्यत्रोपरि भस्मधारणकृतां मोहाद्धरन्निष्यतेद्यत्तच्चंदनकुंकुमाद्यपि च मृत्स्याल्लौकिकी केवलम्”॥
भस्म तिर्यगेव धारयेत् । तथा ग्राह्यत्वेनोदितां उक्तां गोपीचंदनादिकां मृदमूर्ध्वाग्रामेव धारयेत् ।

अनयोर्व्यत्ययः व्यत्यासः । भस्मना ऊर्ध्वपुंड्रकरणं मृदा तिर्यक्पुंड्रकरणं च विप्रध्वंसनकरं ब्राह्मण्यहानिकरम् । अन्यधारणकृता गोपीचंदनादिमृद्धारणकृता तत उपरि भस्माभिधार्यं भस्मधारयता तदुपरि अन्यत् गोपीचंदनादि न धार्यम् । मोहाद्धारयन्पतितः स्यात् । एवं लौकिकी केवलमलंकारार्थं मृच्चंदनकुंकुमकस्तूरिकादिकं च भस्मोपरि न धार्यमित्यर्थः ।

स्मृत्यंतरे—

" वैदिकैर्मंत्ररहितं चंदनागरुकुंकुमम् । तिर्यक्पुंड्रात्मना धार्यं कांतिसौख्याभिलाषिभिः ॥
" पुंड्रोद्भूतं[1] चंदनाद्यैरिति भस्म न संत्यजेत् ॥
" दह्येत भस्मसंत्यागी श्रुतिचक्रोत्थ[2]वन्हिना। चंदनादुपरि प्राज्ञो धारयेद्भस्म वैदिकम् ॥
" लौकिकं चंदनाद्यं तु भस्मोपरि न धारयेत् "॥ इति ।
" प्रातःकाले जलैर्युक्ता मध्यान्हे चंदनैर्युता । सायमंभोविरहिता भूतिरंहोविनाशिनी " ॥ इति

स्मरणात् । भस्मोपरि भस्ममिश्रं चंदनं धार्यमित्याहुः । तथा च **स्मृतिरत्ने**—

" ब्राह्मणानां नृपाणां च भस्ममिश्रं च चंदनम् । नेत्रै[3]युगमप्रमाणं तु त्रिपुंड्रोपरि चेष्यते "॥ इति ।

एवं च

" ऊर्ध्वपुंड्रं त्रिपुंड्रं वा धारयेत्तु यथाकुलम् । उभयं वा यथाचारं धारयेद्वैदिको द्विजः ॥
" तंत्रनिष्ठस्तु तत्तंत्रसिद्धमेवेति निर्णयः " । श्राद्धे ऊर्ध्वपुंड्रधारणमुक्तं **हेमाद्रौ**—
" जपे होमे तथा दाने स्वाध्याये पितृकर्मणि । तत्सर्वं नश्यति क्षिप्रं ऊर्ध्वपुंड्रं विना कृतम् " ॥

श्राद्धे वर्तुलपुंड्रनिषेधः स्मर्यते **तत्रैव**

" वामहस्ते तु दर्भाश्च रंगवल्ली तथा गृहे । ललाटे तिलकं दृष्ट्वा निराशाः पितरो गताः " ॥

संग्रहे—

" वर्जयेत्तिलकं फाले श्राद्धकर्मणि सर्वदा । तिर्यग्वाऽप्यूर्ध्वपुण्ड्रं वा धारयेच्छ्राद्धकर्मणि " ॥

विष्णुपुराणे—

"यागो दानं जपो होमः स्वाध्यायः पितृतर्पणम्। भस्मीभवति तत्सर्वं ऊर्ध्वपुंड्रं विना कृतम्"॥ इति।

चंद्रिकायाम्—

"श्रौतस्मार्तक्रियाः सर्वा ह्यूर्ध्वपुंड्रमकुर्वतः । जायन्ते विफला ब्रह्मन् बाधिताश्च भवंति ताः ॥
"संध्याकाले जपे होमे स्वाध्याये पितृतर्पणे । श्राद्धकाले विशेषेण कर्त्ता भोक्ता च न त्यजेत्"॥

स्मृत्यंतरे—

"श्वोभूते नित्यकर्माणि नद्यादौ विमले जले। कृत्वा श्राद्धं मृदा शुभ्रमूर्ध्वपुंड्रं तु धारयेत्"॥ इति ।

पाद्मे—

" ऊर्ध्वपुंड्रविहीनं तु यः श्राद्धे भोजयेत् द्विजः । अश्नंति पितरस्तस्य विण्मूत्रं नात्र संशयः ॥
" ऊर्ध्वपुंड्रविहीनस्तु यः श्राद्धं कुरुते द्विजः । सर्वं तद्राक्षसैर्नीतं नरकं च स गच्छति " ॥

त्रिपुंड्रधारणमाह **लौगाक्षिः**—

" त्रिपुंड्रधृग्विप्रवरो यो रुद्राक्षधरः शुचिः । स पंक्तिपावनः श्राद्धे पूज्यो विप्रैः सुरैरपि ॥
" श्राद्धे यज्ञे जपे होमे वैश्वदेवे सुरार्चने । धृतत्रिपुंड्रः पूतात्मा मृत्युं जयति मानवः ॥
" त्रिपुंड्रं यद्यधृत्वा तु कुर्याद्यत्कर्म तद्वृथा "॥ इति ।

---

१ ग-पुंड्रं धृतं । २ ग-रुद्रकोधोत्थ । ३ ग-त्रित्रि ।

त्रिपुंड्रनिषेधः **हेमाद्रौ**—

"तिर्यक्पुंड्रं तथा दृष्ट्वा स्कंधे मालां तथैव च। निराशाः पितरो यांति दृष्ट्वा च वृषलीपतिम्"॥इति।

वसिष्ठः—

" कांस्यपात्रे हविर्दृष्ट्वा कंठे चव तु मालिकाम्। ललाटे तिलकं दृष्ट्वा निराशाः पितरो गताः"॥इति।

तिलकं वर्तुलम् । मालिकामिति पुष्पमालानिषेधः । तथा च **पद्धतौ**—

"ऊर्ध्वपुंड्रं त्रिपुंड्रं वा नित्यमेव तु धारयेत्। श्राद्धकाले च संप्राप्ते कर्ता भोक्ता च वर्जयेत्"॥ इति।

" आयसं घंटनादं च त्रिपुंड्रं च विशेषतः । पुष्पमालां च मुद्रां च निराशाः पितरो गताः ॥

" मृत्पात्रगतमर्घ्यं च मृत्तिकागंधलेपनम् । आज्येन धूपं दृष्ट्वाऽथ निराशाः पितरो गताः ॥

" रुद्राक्षधारिणं श्राद्धे भोजयित्वा तथा द्विजम् । पितृलोकमवाप्नोति नात्र कार्या विचारणा ॥

" त्रिपुंड्रेण तु संयुक्तो यं श्राद्धं कुरुते द्विजः । राक्षसास्तद्विलुंपंतीत्याह वैवस्वतो मनुः ॥

" त्रिपुंड्रं वर्तुलाकारं ऊर्ध्वपुंड्रं च धारयन्। श्राद्धं कुर्वन्स पापी स्यात् रौरवं नरकं व्रजेत् ॥

" विप्रान्निमंत्रयित्वा तु त्रिपुंड्रं यस्तु धारयेत्। स कर्ता नरके घोरे पितृभिः सह मज्जति ॥

" त्रिपुंड्रं चैव सर्वेषां अग्निहोत्रसमो विधिः। श्राद्धकाले तु संप्राप्ते कर्त्ता भोक्ता च तत्त्यजेत् "॥

अत्र विधिप्रतिषेधाभ्यां यथाकुलाचारं व्यवस्थितो विकल्पो द्रष्टव्यः । केचित्तु श्राद्धे त्रिपुंड्रोर्ध्वपुंड्रविधिः शैववैष्णवतंत्रावलंबिद्विजविषयः तन्निषेधो वैदिकविषय इत्याहुः । अन्ये तु निषेधः प्रेतश्राद्धविषयः

" त्रिपुंड्रधारिणं दृष्ट्वा भूतप्रेतपुरःसराः । भीताः प्रकंपिताः शीघ्रं गच्छंत्येव न संशयः ॥

" ये घोरा राक्षासाः प्रेता ये चान्ये क्षुद्रजंतवः । त्रिपुंड्रधारिणं दृष्ट्वा पलायंते न संशयः " ॥

इत्यादि**पुराण**वचनात् । 'निराशाः पितरो गता' इति तु वचनं पितृत्वं प्राप्तस्यापि अब्दपूर्तिपर्यंतं प्रेतभावस्यानिवृत्तेः सपिंडानंतरभाविनि मासिकश्राद्धे पुंड्रं न धार्यमित्येवंपरम्

" सपिंडीकरणादूर्ध्वं प्रेतत्वस्यानिवृत्तितः । तावद्भस्म न धार्यं स्याद्यावदब्दो न पूर्यते" ॥

इति **स्मरणा**दित्याहुः । शिष्टाचारानुसारेण यथोचितमत्र ग्राह्यम् ।

ननु देवतोत्कर्षनिकर्षप्रतिपादकानि पुंड्रस्तुतिनिंदापराणि च वचनानि परस्परविरुद्धानि बहूनीतिहासपुराणेषु दृश्यंते । अतः परस्परविरुद्धार्थाभिधायकत्वादितिहासपुराणान्यप्रमाणानीति चेद्भवेदयं दोषो भेदवादीनां शैवानां वैष्णवानां च शिवादन्यो विष्णुः विष्णोरन्यः शिव इति अवगच्छताम् । अभेदवादिनां तु सिद्धांतिनां नायं दोषः । ईश्वरस्यैकत्वाभ्युपगमात् । तथा ह्येक एवेश्वरो जगत्सृष्ट्यादिकरणाय मायया ब्रह्मविष्णुरुद्रेन्द्रादिविग्रहान् स्वीकृत्य तत्तद्विग्रहे भक्तान् तेन तेन रूपेणानुगृह्णन् वर्तते । अष्टादशपुराणानां कर्ता व्यासोऽपि तत्तद्विग्रहभक्तानां तत्र तत्र भक्त्यतिशयोत्पादनाय तत्तद्रूपं स्तौति । अयमेव सर्वज्ञः सर्वेश्वरः सर्वात्मा नान्ये अतोऽयमेक एव सेव्य इति। सा तु निंदा तेषां न निंदापरा भवति । किंतु प्रकृतविग्रहस्तुतिपरा यथा अनुदितहोमनिंदा उदितहोमस्तुतिपरा । " न हि निंदा निन्द्यान्निंदितुं अपि तु स्तुत्यान् स्तोतुम् " इति **न्यायात्**। अन्यथा प्रकृतविग्रहस्य स्तुत्यस्य वचनांतरेण निंदितत्वेन तेन वचनांतरेणास्य विरोधात् । तस्माद्रूपांतरनिंदया एकैकं रूपं स्तुवन् तद्द्वारा स्वरूपमेकमेव सर्वेश्वरं दर्शयति । तस्य च स्वरूपस्यैकत्वात्सर्वेषां इतिहासपुराणानां तत्रैव पर्यवसानादेकार्थत्वेनाविरोधात् । पुराणानामद्वैतपरत्वेन वेदांतानुसारित्वेन च तन्मूलत्वात्प्रामाण्यम् ।

---

१ क्ष–भव इति।

भेदवादिपक्षे तु परस्परविरुद्धार्थत्वाभिधानात् पौरुषेयत्वेन मूलप्रमाणापेक्षायां तदनिरूपणादप्रामाण्यम् । तस्मादेकस्यैवेश्वरस्य सर्वदेवमयत्वात् देवतांतरनिंदावर्जितैरेवेश्वर आराध्यः शिवो विष्णुरन्यो वा देवः । पुंड्रमपि तत्तद्देवताप्रीतिकरं पुंड्रांतरनिंदावर्जितैरेव धार्यम् । तथा च **पाद्मे कौर्मे** च विष्णुशंकरादिवचनानि—

" मद्भक्तः शंकरद्वेषी मद्द्वेषी शंकरप्रियः । तावुभौ नरकं यातो यावदाभूतसंप्लवम् ॥
" परात्परतरं यांति नारायणपरायणाः । न ते तत्र गमिष्यंति ये द्विषंति महेश्वरम् ॥
" अयं नारायणो योऽहं ईश्वरो नात्र संशयः । नांतरं ये प्रपश्यंति तेषां देयमिदं परम् ॥
" ममैव परमा मूर्तिर्नारायणसमाह्वया । सर्वभूतात्मभूतस्था शांता चाक्षरसंज्ञिता ॥
" ये त्वन्यथा प्रपश्यंति लोके भेदद्दशो जनाः । न ते मां संप्रपश्यंति जायन्ते च पुनः पुनः ॥
" ये त्विमं विष्णुमव्यक्तं वामदेवं महेश्वरम् । एकीभावेन पश्यंति न तेषां पुनरुद्भवः ॥
" तस्मादनादिनिधनं विष्णुमात्मानमव्ययम् । मामेव संप्रपश्यध्वं पूजयध्वं तथैव च ॥
" येऽन्यथा मां प्रपश्यंति मत्वेमं देवतांतरम् । ते यांति नरकान् घोरान् नाहं तेषु व्यवस्थितः ॥
" मूर्खं वा पण्डितं वाऽपि ब्राह्मणं वा मदाश्रयम् । मोचयामि श्वपाकं वा न नारायणनिंदकम् ॥
" तस्मादेव महायोगी मद्भक्तैः पुरुषोत्तमः । अर्चनीयो नमस्कार्यो मत्प्रीतिजननाय हि ॥
" अहंतामात्रशरणाः केचिद्वैदिकमानिनः । भेदद्दष्ट्याऽपि निंदंति युगशक्तिकृतं तु तत् " ॥

तथा च कूर्मपुराणे—

" विनिन्दन्ति महादेवं ब्राह्मणं पुरुषोत्तमम् । आम्नायं धर्मशास्त्राणि पुराणानि कलौ युगे ॥
" कुर्वंति चावताराणि ब्राह्मणानां कुलेषु वै । दधीचशापनिर्दग्धाः पुरा दक्षाध्वरे द्विजाः ॥
" निंदंति च महादेवं तमसाविष्टचेतसः । ये चान्ये शापनिर्दग्धाः गौतमस्य महात्मनः ॥
" सर्वे तेऽवतरिष्यंति ब्राह्मणाद्यासु योनिषु । विनिंदंति हृषीकेशं ब्राह्मणान्ब्रह्मवादिनः" ॥ इति ।

इति पुंड्रधारणम् । सन्ध्याविधिः—

" अहोरात्रस्य यः संधिः सूर्यनक्षत्रवर्जितः । सा तु संध्या समाख्याता मुनिभिस्तत्त्वदर्शिभिः ॥

इति **दक्षवचनम्** । **पितामहः**—

" नक्षत्रज्योतिरारभ्य सूर्यस्योदयदर्शनात् । प्रातःसंध्येति तां प्राहुः श्रुतयो मुनिसत्तमाः " ॥

अत्र व्यवस्थामाह **दक्षः**—

"रात्र्यंत्ययामनाडी द्वे संध्यादिः काल उच्यते । दर्शनाद्रविरेखायाः तदंतो मुनिभिः स्मृतः" ॥इति । यद्यपि कालत्वेन अत्र संध्याशब्दः प्रतीयते तथापि तस्मिन् काले उपास्या देवता संध्याशब्देनोपलक्ष्यते । अत एव **योगयाज्ञवल्क्यः**— " संधौ संध्यामुपासीत नास्तगे नोद्गते रवौ ।
" ब्रह्मणोपास्यते संध्या विष्णुना शंकरेण च । कस्मान्नोपासयेद्देवीं श्रेयस्कामो द्विजोत्तमः" ॥ इति ।

शंखः—

"प्रातःसंध्यां सनक्षत्रां मध्यमां स्नानकर्मणि । सादित्यां पश्चिमां संध्यां उपासीत यथाविधि" ॥इति । स्नानकर्मणि मध्याह्नस्नानान्तरमित्यर्थः । **संवर्तोऽपि**—

" प्रातःसंध्यां सनक्षत्रामुपासीत यथाविधि । सादित्यां पश्चिमां संध्यामर्धास्तमितभास्करम् " ॥

काश्यपः—

"ब्रह्मणो हृदयं विष्णुः विष्णोश्च[3] हृदयं शिवः । शिवस्य हृदयं संध्या तेनोपास्या द्विजोत्तमैः" ॥इति ।

---

१ **क्ष**—पतितं २ **क्ष**—सन्ध्याविधिनिर्णयप्रारंभः । ३ **क्ष**—रपि शिवस्मृतः ।

व्यासोऽपि—

" उपासते तु यां संधौ निशाया दिवसस्य च । तामेव संध्यां तस्मात्तु प्रवदंति मनीषिणः ॥
" अनागतां तु ये पूर्वामनातीतां तु पश्चिमाम् । संध्यां नोपासते विप्राः कथं ते ब्राह्मणाः स्मृताः॥
" योऽन्यत्र कुरुते यत्नं धर्मकार्येऽपि वै द्विजः । विहाय संध्याप्रणतिं स याति नरकायुतम् ॥
" अतिक्रामति यो मोहात् संध्यामन्यपरायणः । स साधुभिर्बहिष्कार्यः सर्वस्मात् द्विजकर्मणः ॥
" उत्तमा तु सनक्षत्रा मध्यमा लुप्ततारका । अधमा सूर्यसहिता प्रातःसंध्या त्रिधा मता " ॥
सूर्यसहितेति गौणकालाभिप्रायेण स एव—

" यः सूर्यसहितां सन्ध्यां सदा कुर्वीत मोहतः । न तस्य विद्यते संध्या सर्वकर्मबहिष्कृतः ॥
" विधिनाऽपि कृता संध्या कालातीताऽफला भवेत् । अयमेव हि दृष्टांतो वंध्यास्त्रीमैथुनं यथा ॥
" अकाले चेत् कृतं कर्म कालं प्राप्य पुनः क्रिया । कालातीतं तु यः कुर्यादकृतं तद्विनिर्दिशेत्"॥
अकाले स्वकालात्पूर्वस्मिन्काले ।

" यः संध्यां कालतः प्राप्तां आलस्यादतिवर्तते । सूर्यहत्यामवाप्नोति उलूकत्वमियात्ततः ॥
" सायं प्रातः सदा संध्यां ये विप्रा नो उपासते । कामं तान् धार्मिको राजा शूद्रकर्मसु योजयेत्॥
" संध्याहीनोऽशुचिर्नित्यं अनर्हः सर्वकर्मसु । यदन्यत्कुरुते कर्म न तस्य फलभाग् भवेत् ॥
" अनन्यचेतसः शांता ब्राह्मणा वेदपारगाः । उपास्य विधिवत्संध्यां प्राप्ता पूर्वे परां गतिम् ॥
" या संध्या सा जगत्सूतिर्मायातीता तु निष्फला । ऐश्वरी केवला शक्तिस्तत्वत्रयसमुद्भवा ॥
" तस्मात्सर्वप्रयत्नेन संध्योपासनमाचरेत् । उपासितो भवेत्तेन देवो योगतनुः परः "॥ इति ।

यमः—

" संध्यामुपासते ये तु सततं संशितव्रताः । विधूतपापास्ते यांति ब्रह्मलोकं सनातनम् ॥
" यदन्हा कुरुते पापं कर्मणा मनसा गिरा । आसीनः पश्चिमां संध्यां प्राणायामैस्तु हंति तत् ॥
" यद्रात्र्या कुरुते पापं कर्मणा मनसा गिरा । पूर्वां संध्यामुपासीनः प्राणायामैर्व्यपोहति " ॥

मनुः (४।९४)—

" ऋषयो दीर्घसंध्यत्वात् दीर्घमायुरवाप्नुयुः । प्रज्ञां यशश्च कीर्तिं च ब्रह्मवर्चसमेव च " ॥
यागादिकर्मकृता ख्यातिर्यशः । त्यागादिकृता कीर्तिः । **गोभिलः—**

" संध्या येन न विज्ञाता संध्या येनानुपासिता । जीवमानो भवेच्छूद्रो मृतः श्वा चाभिजायते"॥

चंद्रिकायाम्—

" उपास्य पश्चिमां संध्यां सादित्यां वै यथाविधि । गायत्रीमभ्यसेत्तावद्यावदृक्षाणि पश्यति ॥
" पूर्वां संध्यां सनक्षत्रां उपक्रम्य यथाविधि । गायत्रीमभ्यसेत्तावत् यावदादित्यदर्शनम्"॥ इति ।

छंदोगश्रुतिरपि— " ब्रह्मवादिनो वदंति कस्माद्ब्राह्मणः सायमासीनः संध्यां उपास्ते कस्मात् प्रातस्तिष्ठन् का च संध्या कश्च संध्यायाः कालः किं च संध्यायाः संध्यात्वं देवाश्च वा असुराश्चास्पर्धंत ते असुरा आदित्यमभिद्रवन् स आदित्योऽबिभेत् तस्य हृदयं कूर्मरूपेणातिष्ठन् । स प्रजापतिमुपाधावन् तस्य प्रजापतिरेतत् भेषजमपश्यद्दतं च सत्यं च ब्रह्म चोंकारं च त्रिपदां च गायत्रीं ब्रह्मणो मुखमपश्यत् । तस्मात् ब्राह्मणोऽहोरात्रस्य संयोगे संध्यामुपास्ते सज्योतिष्याज्योतिषो दर्शनात् । सोऽस्य संध्याकालः सा संध्या तत्संध्यायाः संध्यात्वं

यत्सायमासीनः संध्यामुपास्ते तया वीरस्थान जयत्यथ यदपः प्रयुङ्क्ते ता विप्रुषो वज्रीभूत्वा असुरानपघ्नंति ” ॥ इति ।

तैत्तिरीयकेऽपि (तै. आ. प्र. २।२।२ सहवै.) “रक्षाꣳसि ह वा पुरोनुवाके तपोग्रमतिष्ठंत तान् प्रजापतिर्वरेणोपामंत्रयत तानि वरमवृणीतादित्यो नो योद्धा इति । तान्प्रजापतिरब्रवीद्योधयध्व-मिति । तस्मादुत्तिष्ठंतं ह वा तानि रक्षांस्यादित्यं योधयंति यावदस्तमन्वगात्तानि ह वा एतानि रक्षांसि गायत्रियाभिमंत्रितेनांभसा शाम्यंति तदुह वा एते ब्रह्मवादिनः पूर्वाभिमुखाः संध्यायां गायत्रियाऽभिमंत्रिता आप ऊर्ध्वं विक्षिपंति ता एता आपो वज्रीभूत्वा तानि रक्षांसि मंदेहारुणे द्विपे प्रक्षिपंति यत्प्रदक्षिणं प्रक्रमंति तेन पाप्मानमवधून्वन्ति ” ॥ इति ।

अत्र **हारीतः**—

“ आदित्येन सह प्रातर्मंदेहा नाम राक्षसाः । युध्यंति वरदानेन ब्रह्मणोऽव्यक्तजन्मनः ॥
“उदकांजलिनिक्षेपा गायत्र्या चाभिमंत्रिताः । निघ्नंति राक्षसान् सर्वान् मंदेहाख्यान् द्विजेरिताः ॥
“ ततः प्रयाति सविता ब्राह्मणैरभिरक्षितः । मरीच्याद्यैर्महाभागैः सनकाद्यैश्च योगिभिः ॥
“तस्मान्न लंघयेत्संध्यां सायंप्रातः समाहितः । उल्लंघयति यो मोहात्स याति नरकं ध्रुवम्”॥ इति ।

योगयाज्ञवल्क्योऽपि—

“ त्रिंशत्कोट्यस्तु विख्याता मंदेहा नाम राक्षसाः । प्रद्रवंति सहस्रांशुमुदयंतं दिने दिने ॥
“ अहन्यहनि ते सर्वे सूर्यमिच्छंति खादितुम् । अथ सूर्यस्य तेषां च युद्धमासीत्सुदारुणम् ॥
“ ततो देवगणाः सर्वे ऋषयश्च तपोधनाः । संधौ सध्यामुपासीना यत्क्षिपंत्यन्वहं जलम् ॥
“ ब्रह्मव्याहृतिसंयुक्तं गायत्र्या चाभिमंत्रितम् । तेनादह्यंत ते दैत्या वज्रीभूतेन वारिणा ॥
“ एतद्विदित्वा यः संध्यामुपास्ते संशितव्रतः । दीर्घमायुः स विंदेत सर्वपापैः प्रमुच्यते ॥
“ यस्तु तां केवलां संध्यां उपासीत स पुण्यभाक् । तां परित्यज्य कर्माणि कुर्वन्नाप्नोति किल्बिषम् ॥
“ स हन्ति सूर्यं संध्याया नोपास्तिं कुरुते तु यः ॥
“ ये हिंसंति सदा सूर्यं मोक्षद्वारमनुत्तमम् । कथं मोक्षस्य संप्राप्तिर्भवेत्तेषां द्विजन्मनाम् ॥
“कामान्मोहाद्भयाल्लोभात् संध्यां नातिक्रमेत् द्विजः।संध्यातिक्रमणाद्विप्रो ब्राह्मण्यात्पतितो यतः”॥इति।

संध्यात्रयमाह **अत्रिः**—“ संध्यात्रयं तु कर्तव्यं द्विजेनात्मविदा सदा ” ॥ इति ।

अत्र संध्याशब्देन संध्योपासनरूपं कर्मोपलक्ष्यते । अन्यथा देवतायाः कर्तव्यतायोगात् । एतदभिप्रेत्य **पाराशरोऽ**प्याह—

“संध्या स्नानं जपो होमो देवतानां च पूजनम् । आतिथ्यं वैश्वदेवं च षट्कर्माणि दिनेदिने”॥इति।

तत्र कालभेदेन देवताया नामादिभेदमाह **व्यासः**—

“ गायत्री नाम पूर्वाह्णे सावित्री मध्यमे दिने । सरस्वती च सायान्हे सैवं संध्या त्रिषु स्मृता ॥
“ प्रतिग्रहादन्नदोषात् पातकादुपपातकात् । गायत्री प्रोच्यते तस्मात् गायंतं त्रायते यतः ॥
“ सवितृद्योतनाच्चैव सावित्री परिकीर्तिता । जगतः प्रसवित्री वा वाग्रूपत्वात् सरस्वती ॥
“ गायत्री तु भवेद्रक्ता सावित्री शुक्लवर्णिका । सरस्वती तथा कृष्णा उपास्या वर्णभेदतः ॥
“ गायत्री ब्रह्मरूपा तु सावित्री रुद्ररूपिणी । सरस्वती विष्णुरूपा उपास्या रूपभेदतः ॥

---

१ क्ष–घातितुम् ।

" उदये ब्रह्मरूपं तु मध्यान्हे तु महेश्वरम् । सायान्हे विष्णुरूपं तु त्रिरूपं वै दिवाकरम् ॥
" अनुसंध्यमुपासीत संध्यारूपं रविं द्विजः " ॥ **याज्ञवल्क्यः**—
"या संध्या सा तु गायत्री त्रयीरूपा प्रतिष्ठिता । संध्या ह्युपासिता येन विष्णुस्तेन ह्युपासितः"॥इति।

उपासनमभिध्यानम् । अत एव **तैत्तिरीये ब्राह्मणम्** (तै. आरण्यके २।२ पृ. १२१) " उद्यन्तमस्तं यंतमादित्यमभिध्यायन् कुर्वन् ब्राह्मणो विद्वान् सकलं भद्रमश्नुतेऽसावादित्यो ब्रह्मेति ब्रह्मैव सन् ब्रह्माप्येति य एवं वेद " इति । अयमर्थः । कुर्वन् प्राणायामं कुर्वन् । यथो यथोक्तनामवर्णरूपोपेतसंध्याशब्दवाच्यः । असौ आदित्यः ब्रह्मेति संध्याभिन्नमादित्यं ब्रह्मत्वेन ध्यायन् ऐहिकामुष्मिकं सकलं भद्रमश्नुते । य एवमुक्तध्यानेन शुद्धांतःकरणो वेदब्रह्म साक्षात्कुरुते स पूर्वमपि ब्रह्मैव सन् अज्ञानाज्जीवभावं प्राप्तो यथोक्तज्ञानेन ततोऽज्ञानापगमे ब्रह्मैव प्राप्नोतीति । अत एव **व्यासः**—

" प्राक्कूलेषु ततः स्थित्वा दर्भेषु सुसमाहितः । प्राणायामत्रयं कृत्वा ध्यायेत्संध्यामिति श्रुतिः ॥
"न भिन्नां प्रतिपद्येत गायत्रीं ब्रह्मणा सह । साऽहमस्मीत्युपासीत विधिनाऽनेन वै द्विजः " ॥

ध्यानदेशोऽपि **चंद्रिकायां** दर्शितः—

" गायत्रीं चिंतयेद्यस्तु हृत्पद्मे समुपस्थितम् । धर्माधर्मविनिर्मुक्तः स याति परमां गतिम् "॥इति।

एवं च संध्यामुपासीतेत्यनेन संध्यामुक्तरूपां अर्कमंडलान्तर्गतामादित्याख्यां ब्रह्मात्मिकां देवतां हृदि साऽहमस्मीत्युपासीत ध्यायेदित्युक्तं भवति । तेनात्रोपासनमेव प्रधानमन्यत्सर्वं मार्जनाद्यंगमित्यनुसंधेयमिति **चंद्रिकामाधवीयादौ** । अत एव **व्यासः**—

" देशक्षोभे महापत्तौ मार्जनार्घ्याद्यसंभवे । संध्यागतं सहस्रांशुमंत्रैः कुर्यादुपस्थितम्" ॥ इति ।

अत एव च युधिष्ठिरादिभिर्युद्धोद्यतैः सांगानुष्ठानासमर्थैः सकलांगपरित्यागेन आदित्योपस्थानमात्रमनुष्ठितम् । तदुक्तं **महाभारते**—

" ते तथैव महाराज दंशिता रणमूर्धनि । संध्यागतं सहस्रांशुमादित्यमुपतस्थिरे " ॥

संध्यागतं संधिमागतम् । अपरे तु अर्घ्यदानं संध्याध्यानं गायत्रीजप उपस्थानं च प्रधानमिति वदंति। तदेवं गायत्र्यादिनामोपेतसंध्याशब्दप्रतिपाद्यः सवितैवोपास्यः । संध्योपासनकालश्च प्रागुदयाद् घटिकाद्वयात्मकः

" रात्र्यंतयामनाडी द्वे संध्याकाल उदीरितः । उदयात्प्राक्तनी संध्याघटिकाद्वयमीरिता ॥
" संध्यामुहूर्तमात्रैव ह्रासवृद्धौ समा स्मृता " ॥ इति **दक्षगर्गबोधयन**स्मरणात् ।

यत्तु " प्रातःसंध्या त्रिनाडी स्यात् सायंसंध्या तथाविधा " इति **स्मरणा**त्संध्याकालविहितकर्मांतराभिप्रायमित्याहुः । यत्तु

"द्विघटी तूदयादर्वाक् प्रहरार्धं तथोपरि । संध्याकालः स विज्ञेयो ह्यन्यथा लंघनं स्मृतम्"॥ इति ।

तद्राष्ट्रक्षोभजलालाभाशक्त्याद्यापत्सु अनुकल्पाभ्यनुज्ञापरम् । यदाह **वृद्धमनुः**—

"न प्रातर्न प्रदोषं च संध्याकालोऽतिपद्यते । मुख्यकल्पोऽनुकल्पश्च सर्वस्मिन् कर्मणि स्मृतः"॥ इति।

माध्यान्हसंध्याया गौणकालमाह **दक्षः** "अध्यर्धयामादा सायं संध्या माध्यान्हिकीष्यते"॥इति। **याज्ञवल्क्यः**—

" अनार्तश्चोत्सृजेद्यस्तु स विप्रः शूद्रसंमितः । प्रायश्चित्ती भवेच्चैव लोके भवति निंदितः " ॥

---

१ क्ष–तु सावित्रित्रिधाभूतानुतिष्ठत । २ ख–रूपभेदतः । ३ ग–दृज्ञा । ४ क्ष–येनकेनचित् । ५ ख–पासितं । ६ खग–द्विनाडिका भवेत्सन्धा । ७ ख–व्रतं ।

अत्रिरपि—

"नोपतिष्ठंति ये संध्यां स्वस्थावस्थास्तु ये द्विजाः। हिंसंति ते सदा पापा भगवंतं दिवाकरम्"॥ इति।

विष्णुपुराणे—

" उपतिष्ठंति वै संध्यां ये न पूर्वां न पश्चिमाम्। व्रजंतीह दुरात्मानस्तामिस्रं नरकं नृप॥
" तस्मान्न लंघनं कार्यं संध्योपासनकर्मणः। स हंति सूर्यं संध्याया नोपास्तिं कुरुते तु यः॥
" सर्वकालमुपस्थानं संध्ययोः पार्थिवेष्यते। अन्यत्र सूतकाशौचविभ्रमातुरभीतितः"॥ इति।

सूतकादौ तु सत्यपि सामर्थ्ये संध्योपासनं न कार्यमित्याह **मरीचिः**—

" सूतके कर्मणां त्यागः संध्यादीनां विधीयते"॥ इति।

संग्रहेऽपि—"राष्ट्रक्षोभे नृपाक्षिप्ते रोगार्तौ शावसूतके। संध्यावंदनविच्छित्तिर्न दोषाय कदाचन"॥

यत्तु **पुलस्त्येनोक्तम्**—

"संध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत्। न त्यजेत्सूतके वाऽपि त्यजन् गच्छेदधो द्विजः"॥ इति।

तत् मानससंध्याभिप्रायम्। यतस्तेनैवोक्तम्

" सूतके मृतके चैव संध्याकर्म न संत्यजेत्। मनसोच्चारयेन्मंत्रान् प्राणायाममृते[2] द्विजः"॥ इति।

एवं च यानि सूतकादौ संध्याकर्मनिषेधप्रतिपादकानि तानि वचनानि मंत्रप्रयोगनिषेधपराणीति मंतव्यम्। अत्र विशेषमाह **व्यासः**—

"प्रक्षिपेत्सूतके त्वर्घ्यं गायत्रीं तु समुच्चरन्। दत्वा प्रदक्षिणं कुर्यात् सूर्यं ध्यायेत्ततो द्विजः"॥ इति।

पैठीनसिरपि—

" सूतके सावित्र्या चांजलिं प्रक्षिप्य प्रदक्षिणं कृत्वा सूर्यं ध्यायन् नमस्कुर्यात्"॥ इति।

एतन्मार्जनादिसकलसंध्याकर्मोपलक्षणार्थमिति केचित्। यदत्र संध्याकर्माणि श्रौतं जलांजलिदानादि तदेवानुष्ठेयं नान्यादित्येवंपरमित्यपरे। यथाशिष्टाचारं व्यवस्था।

शक्तस्य मुख्यकालातिक्रमे प्रायश्चित्तमाह **संग्रहकारः**—

"आचांतो विधिवत् प्राणानायम्यार्घ्यं चतुर्थकम्। कालात्ययविशुध्यर्थं दत्वा संध्यां समाचरेत्"॥

स्मृत्यन्तरे—

" चतुर्थमर्घ्यं गायत्र्या दद्याद्व्याहृतिसंपुटम्। कालात्ययविशुध्यर्थं त्रिसंध्यासु समाचरेत्॥
" प्राणायामत्रयं कृत्वा संध्याकर्म समाचरेत्। प्रातःकालं त्रयं कुर्यात् संगवे द्वौ दशोपरि॥
" षट्त्रिंशन्मध्यमे काले ततो न प्राणसंयमः। कालात्यये त्वकृत्वैवं कृता संध्या तु निष्फला"॥ इति।

संवर्तः—

"अर्घ्यप्रदानतः पूर्वं उदयेऽस्तमयेऽपि वा। गायत्र्यष्टशतं जप्यं प्रायश्चित्तं द्विजातिभिः"॥

गौणकालातिक्रमेऽपि **स एवाह**—

" उपासिता न चेत्संध्या अग्निकार्यं न चेत्कृतम्। गायत्र्यष्टसहस्रं तु जपं कृत्वा विशुध्यति"॥ इति।

ऋग्विधाने—

"यदादीध्ये जपेन्मंत्रं दशवारं दिनेदिने। अकाले नित्यकर्माणि काले काले कृतानि वा"॥इति।

मंत्रश्च (ऋ.मं.७।८।३)– " यदादीध्येनदविषाण्येभिः परायद्भ्योवहीये सखिभ्यः। न्युप्ताश्च बभ्रवोवाचमक्रतंऽएमीदेषांनिष्कृतंजारिणीव "॥ इति। **बोधायनस्तु** (२।४।१६)–

१ ख–सो। २ ख–त्रये। ३ क्ष–निषेध। ४ क्ष–कृत्वा। ५ ग–तु।

“ सायमतिक्रमे रात्र्युपवासः । प्रातरतिक्रमेऽहरुपवासः” । इतीदमबुद्धिपूर्वविषयम् । बुद्धिपूर्वे तु “ वेदोदितानां नित्यानां कर्मणां समतिक्रमे । स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम् ” ॥ इति (११।२०) **मनूक्तादिनोपवासः** कार्यः । **शङ्खोऽपि**—

“ सन्ध्यादिनित्यलोपे तु दिनमेकमभोजनम् । दिनद्वये त्रिरात्रं स्यात् कृच्छ्रार्धं तु दिनत्रये ॥
“ दशाहे कृच्छ्रमेकं स्यादूर्ध्वं चान्द्रायणं चरेत् । चांद्रायणं पराकं च मासादूर्ध्वं विधीयते ” ॥
“ ततोऽप्येवं प्रकल्प्यं स्याद्व्यासस्य वचनं तथा ” ॥ इति ।

संध्यात्रयस्य तारतम्येन देशविशेषमाह **व्यासः**—

“ गृहे त्वेकगुणा संध्या गोष्ठे दशगुणा स्मृता । शतसाहस्रिका नद्यां अनंता विष्णुसन्निधौ ॥
“ बहिः संध्या दशगुणा गर्तप्रस्रवणेषु च । ख्याततीर्थे शतगुणा सहस्रं जान्हवीजले ” ॥ इति ।

शातातपः—

“ अनृतं मद्यगंधं च दिवा मैथुनमेव च । पुनाति वृषलस्यान्नं बहिः संध्या उपासिता ” ॥

हारीतोऽपि—“ततः संध्यामुपासीत बहिर्गत्वा विधानतः” । इति बहिःसंध्यायामुपासीतायामाहिताग्नेर्यदा विहरणाद्यंगलोपः तदा विहरणादिदेश एव संध्याद्वयं कर्तव्यम् । एतदेवाभिप्रेत्योक्तं **अत्रिणा**—

“ संध्यात्रयं तु कर्तव्यं द्विजेनात्मविदा सदा । उभे संध्ये तु कर्तव्ये ब्राह्मणैश्च गृहेष्वपि”॥ इति ।

आपस्तंबोऽपि (१।११।३०।८-९)—“संध्ययोश्च बहिर्ग्रामादासनं वाग्यतश्च । विप्रतिषेधे श्रुतिलक्षणं बलीय”इति। अहोरात्रयोः संधानं संधिः । तौ च द्वौ सायंप्रातश्च तयोः संध्योर्ग्रामात् बहिः संध्यामुपासीत वाग्यतश्च भवेत् । लौकिकीं वाचं न वदेत् । आहिताग्निविषये अस्यापवादः । विप्रतिषेधे इति । श्रुतिविरोधे विप्रतिषेधः । अग्निहोत्रिणो बहिरासनमग्निहोत्रहोमाश्च विरुध्येते । तत्र श्रुतिलक्षणमग्निहोत्रमेव कर्तव्यम् । न स्मार्तं बहिरुपासनम् । तस्य कल्पमूलत्वादितरत्र कृतमूलत्वादित्यर्थः । **इति संध्यानिर्णयः** । अथ **प्रातःसंध्या** । तत्र **याज्ञवल्क्यः** (आ.९८)—

“ शरीरचिंतां निर्वर्त्य कृतशौचविधिर्द्विजः । प्रातःसंध्यामुपासीत दंतधावनपूर्वकम् ” ॥ इति ।
“ प्राणानायम्य संप्रोक्ष्य तृचेनाब्दैवतेन तु ” ॥ इति । **व्यासः**—

“ आपोहिष्ठेस्तृचैः कुर्यात् मार्जनं तु कुशोदकैः । प्रणवेन तु संयुक्तं क्षिपेद्वारि पदे पदे ॥
“ विप्रुषोऽष्टौ क्षिपेदूर्ध्वं अधो यस्य क्षयाय च । रजस्तमोमोहजातान् जाग्रत्स्वप्नसुषुप्तिजान् ॥
“ वाङ्मनःकायजान् दोषान्नवैतान्नवभिर्दहेत् ” ॥ **योगयाज्ञवल्क्यः**—

“ नवप्रणवयुक्ताभिः जलं शिरसि निक्षिपेत् । आपोहिष्ठेति तिसृभिः ऋग्भिः संप्रयतः शुचिः ” ॥

नारायणः—

“ प्राङ्मुखोदङ्मुखो वाऽपि संध्योपासनमाचरेत् । नवप्रणवसंयुक्तमापो हि ष्ठस्तृचेन तु ॥
“शिरस्यष्टभिरभ्युक्षेत् भूमौ यस्य क्षयाय च । संध्यात्रयेऽपि कर्तव्यं आपो हि ष्ठे तु मार्जनम्” ॥

भूमौ पादयोः । अत एव **योगयाज्ञवल्क्यः**—“ आचमनं स्वकीयमार्गेण कृत्वा ऋषिछंदोदेवतास्मरणपूर्वकं आपोहिष्ठादितृचस्यादितः सप्तभिः पादैरूर्ध्वं सप्तविप्रुष उत्क्षिप्य अष्टमेनैकां विप्रुषमधःशरीरे निक्षिप्य नवमेनैकां विप्रुषमूर्ध्वं उत्क्षिपेत् ” इति ।

प्रणवयुक्तेन मंत्रेण प्रोक्षणे फलविशेषमाह **शौनकः**—

---

१ ख-वि ।

"नवप्रणवयुक्तेन आपोहिष्ठेतृचेन तु। संवत्सरकृतं पापं मार्जनांते विनश्यति"॥ इति।

ब्रह्मा—

"ऋगंते मार्जनं कुर्यात्पादान्ते वा समाहितः। तृचस्यांतेऽथ वा कुर्याच्छिष्टानां मतमीदृशम्"॥ इति।

बहुप्रमाणानुगुण्यात् शिष्टाचाराच्च पादांतमार्जनमेव कार्यम्। **स्मृत्यर्थसारे**—

"आपो हिष्ठे त्यृचा सम्यगुल्लेख्यं नं तु वेत्ति यः। न तस्य विद्यते संध्या यथा शूद्रस्तथैव सः॥

"आपोहिष्ठेत्यृचामेकमुल्लेख्यं त्रिषु कारयेत्। चतुर्थं कारयेद्यस्तु ब्रह्महत्यां स विंदति"॥

प्रतिपादमेवोल्लेख्यं कार्यम्। एवं च प्रत्यृचं मार्जनत्रयमेव न चतुर्थमित्यर्थः। उल्लेख्यं मार्जनम्। तथा **तत्रैव**—

"उत्तानदेवतीर्थेन दर्भाग्रे मूर्ध्नि विप्रुषाम्। स्पृष्ट्वाऽप ऊर्ध्वं विक्षेपमुल्लेख्यमिति सूरयः॥

"भूमिष्ठमुदकं स्पृष्ट्वा प्रसव्येन करेण तु। मार्जनान्याचरेद्विद्वान् संध्याकर्मसु सर्वदा"॥ इति।

हारीतः—"मार्जनार्चनबलिकर्मभोजनानि देवतीर्थेन कुर्यात्"। इति।

तच्च मार्जनं धाराच्युतेन न कार्यम्। तथा च **ब्रह्मा**—

"धाराच्युतेन तोयेन संध्योपास्तिर्विगर्हिता। न प्रशंसन्ति पितरो न प्रशंसंति देवताः"॥ इति। अत्र हेतुमाह **स एव**—

"मंत्रपूतं जलं यस्मात् आपोहिष्ठाभिमंत्रितम्। पतत्यशुचिदेशेषु तस्मात्तत् परिवर्जयेत्"॥ इति।

अनेन मार्जनजलबिंदुः क्षितितले यथा न च्युतो भवति तथा शिरस्येव मार्जनं यत्नतः कुर्यादिति च गम्यते। कथं तर्हि मार्जनमिति चेत् तत्राह **स एव**—

"नद्यां तीर्थे ह्रदे वापि भाजने मृन्मयेऽपि वा। औदुंबरेऽथ सौवर्णे राजते दारुसंभवे॥

"कृत्वा तु वामहस्ते वा संध्योपास्तिं समाचरेत्"॥ इति। औदुंबरे ताम्रमये कृत्वा उदकमिति शेषः। यत्त्विदं वचनं

"वामहस्ते जलं कृत्वा ये तु संध्यामुपासते। सा संध्या वृषली ज्ञेया असुरास्तेन तर्पिताः"॥ इति।

तत् मृन्मयादिपात्रसंभवविषयम्। मृन्मयाद्यभावे तु 'कृत्वा तु वामहस्ते वा' इति वामहस्तविधानमिति **माधवीये**। **व्यासः**—

"उपवीती बद्धशिखः स्वाचांतो द्विरनाकुलः। प्राङ्मुखः सततं विप्रः संध्योपासनमाचरेत्॥

"आपोहिष्ठादितिसृभिः मार्जयेत्तु कुशोदकैः॥

"सिंधुद्वीपऋषिश्छंदो गायत्र्यापो हि देवता। मार्जने विनियोगश्च अब्दैवत्ये प्रकीर्तितः॥

"अविदित्वा ऋषिच्छंदो दैवतं योगमेव च। नाध्यापयेज्जपेद्वाऽपि पापीयान् जायते तु सः"॥ इति।

योगो विनियोगः। **याज्ञवल्क्योऽपि**—

"ब्राह्मणं विनियोगं च छंद आर्षं च दैवतम्। अज्ञात्वा पंच यः कुर्यान्न स तत्फलमश्नुते"॥ इति।

मंत्रार्थश्च प्रतिपत्तव्यः। यतः अविदितार्था मन्त्रा नानुष्ठेयार्थप्रकाशनसमर्थाः अतः प्रतिपन्नमंत्रार्थानुष्ठातैव कर्मफलानि प्राप्नोति। न च प्रत्यक्षेतीति न्यायसिद्धम्। **मनुरपि**—

"यदधीतमविज्ञातं निगदे नैव शब्यते। अनग्नाविव शुष्कंधो न तज्ज्वलति कर्हिचित्"॥

व्यासोऽपि—"पाठमात्रावसानस्तु पंके गौरिव सीदति"॥ इति। **श्रूयते च**

"यदेव विद्यया करोति तदेव वीर्यवत्तरं भवति" इति। "अर्थज्ञ इत्सकलं भद्रमश्नुते स

१ क्ष—जपान्ते। २ ग—ख्यं तत्तु। ३ क्ष—म।

नाकमेति ज्ञानविधूतपाप्मा" (निरुक्ते ११।१८) इति च। अत्र हरदत्तेन मंत्रार्थोऽभिहितः। 'आपो हि ष्ठामयो भुवः' हे आपः यूयं मयोभुवः स्थ। मय इति सुखं नाम। तस्य भावयिव्यः स्थ। हि शब्दः प्रसिद्धौ। 'ता न उर्जे दधातन'। ताः यूयं नः अस्मान् उर्जे अन्नाय दधातन धत्त। अन्नमस्मभ्यं दत्तेत्यर्थः। 'महे रणाय चक्षसे' महे महते रणाय रमणीयाय चक्षसे दर्शनाय दधातन महप्रमणीयं ज्ञानमस्मभ्यं दत्तेत्यर्थः। 'यो वः शिवतमो रसः'। वः युष्माकं संबंधी यः शिवतमो रसः सुखातिशयहेतुः रसनेंद्रियग्राह्यः। 'तस्य भाजयतेह नः'। तस्येति द्वितीयार्थे षष्ठी। रसं भाजयत। इह लोके। नः अस्मान्। किमिव 'उशतीरिव मातरः' उशतीरुशत्यः कामयमाना मातरः पुत्रान् यथा क्षीरादिरसेन भाजयंति तथा युष्मदीयं रसमस्मभ्यं दत्तेत्यर्थः। अपि च 'तस्मा अरं गमाम वः' तस्मै द्वितीयार्थे चतुर्थी। तं रसं अरं अलं पर्याप्तं गमाम प्राप्नुयामेत्यर्थः। छांदसं रूपम्। वः युष्माकं। 'यस्य क्षयाय जिन्वथ'। यस्य तृतीयार्थे षष्ठी। येन रसेन क्षयाय निवासाय निवासवचनोऽयमाद्युदात्तत्वात् द्वितीयार्थे चतुर्थी। क्षयं निवासमस्मदीयं जिन्वथ प्रीणयथ। 'आपो जनयथा च नः'। हे आपः येन च पुत्रपौत्रादिप्रजा नः अस्माकं जनयथा संपादयथेति"। **व्यासः**—

"आपो हि ष्ठाः सुप्रसिद्धा नवपादा भवंति ते। पादे पादे क्षिपेद्वारि ब्रह्महत्यां व्यपोहति"॥ इति। श्रूयते च (तै. ब्रा. ३।९।७५ पृ. १२६९) "आपोहिष्ठामयो भुव इत्यद्भिर्मार्जयन्ते। आपो वै सर्वा देवताः। देवताभिरेवात्मानं पवयंते"। इत्येवमुक्तिविधिना मार्जयित्वा सूर्यश्चेत्यपः पिबेत्। तथा च **शौनकः**—

"अग्निश्चेत्यनुवाकेन सायंकाले अपः पिबेत्। सूर्यश्चेत्यनुवाकेन प्रातःकाले पिबेदपः"॥

"आपः पुनंत्वित्येतेन मध्यान्हे च जलं पिबेत्। अब्लिंगाभिः पवित्राभिः प्रोक्षयेत्कुशवारिणा"॥इति।

व्यासोऽपि—

"सायमग्निश्च मेत्युक्त्वा प्रातः सूर्येत्यपः पिबेत्। आपः पुनंतु मध्यान्हे ततस्त्वद्भिर्द्विराचमेत्"॥

"ततः सुरभिमत्या च मार्जनं तु कुशोदकैः। कुर्याद्धिरण्यवर्णाभिः यथाशाखं तु मार्जनम्"॥

बोधायनोऽपि (ध. सू. २।४।१-२)—

"अथातः संध्योपासनविधिं व्याख्यास्यामः। तीर्थं गत्वा प्रयतोऽभिषिक्तः प्रक्षालितपाणिपादोऽप आचम्याब्लिंगाभिः प्रोक्ष्य अग्निश्च मा मन्युश्चेति सायमपः पीत्वा सूर्यश्च मा मन्युश्चेति प्रातः सपवित्रेण पाणिना सुरभिमत्याऽब्लिंगाभिर्वारुणीभिः हिरण्यवर्णाः पावमानीभिर्व्याहृतिभिरन्यैश्च पवित्रैरात्मानं प्रोक्ष्य प्रयतो भवति"॥ इति

पितामहोऽपि—

"सूर्यश्चेत्यनुवाकेन अपः पीत्वा समाहितः। आत्मानं प्रोक्षयेत्पश्चात्सपवित्रकरौ द्विजः॥

"प्रोक्षेत्सुरभिमत्या च आपोहिष्ठादिभिस्तथा। प्रदक्षिणं परिषिच्य त्वारभेच्छ्रुतिचोदितः"॥ इति।

सुरभिमती दाधिक्राव्ण इति ऋक्। 'दधि क्राव्णो अकारिषम्' इति सुरभिमतीमृचं वदंति। "प्राणा वै सुरभयः प्राणानेवात्मं दधत"॥ इति श्रुतेः (तै. ब्रा. ३।९।७ पृ. १२६८)—

भरद्वाजः—

"सूर्यानुवाकस्याग्नि ऋषिः छंदो गायत्र्यमंशुमान्। देवता विनियोगोऽपां प्राशने स उपस्पृशेत्।

" ऋषिरग्निश्च मेत्यस्य सूर्यो वा वामनोऽपि वा । छंदो गायत्रमित्युक्तं देवताग्निं समीरितः ॥
" आपः पुनंतु मंत्रस्य विश्वेदेवास्तथर्षयः । छंदोऽनुष्टुप् देवतापो बृहस्पतिरथापि वा ॥
" आत्मानं प्रोक्षयेत्पश्चाद्दधिक्राव्ण इत्यृचा । आपोहिष्ठादितिसृभिः ऋग्भिश्च सकुशैर्जलैः ॥
" दधिक्राव्ण इत्यस्य वामदेव ऋषिः स्मृतः । छंदोऽनुष्टुप् देवता विश्वेदेवाः प्रोक्षणे स्मृताः ॥
" व्याहृत्या तत आत्मानं परिषिंचेत्समस्तया " । इति । **चर्यापादे**—

"पादौ हस्तौ च संक्षाल्याचम्य बद्धशिखः शुचिः । प्राणानायम्य संकल्प्य संध्योपास्तिं समाचरेत् ॥
"प्रोक्ष्याब्लिंगैर्व्याहृतिभिः परिषिच्य समंत्रकम् आपीत्वाऽऽचम्य दधिक्राद्यैःप्रोक्ष्यद्भिःपरिषिच्य च"॥

इति । **स्मृत्यंतरे**—

" सूर्यश्चेत्यनुवाकस्य छंदो गायत्रमुच्यते । सविता देवता त्वस्य ऋषिरग्निरिति स्मृतः ॥
"दधिक्राव ऋचोऽनुष्टुप् वामदेव ऋषिः स्मृतः । विश्वेदेवा देवता स्याद्दधिक्रावेति वा स्मृतः"॥इति ।

छंदोगानां त्वाचमनमंत्रौ **गौतमेनोक्तौ** (ध. सू. २५।९)—

" अहश्च माऽऽदित्यश्च पुनात्विति प्रातः । रात्रिश्च मा वरुणश्च पुनात्विति सायम् " इति ।

मंत्रार्थस्तु—सूर्यश्च मा मन्युश्च मन्युपतयश्च । सूर्यो नाम अन्होऽधिपतिर्मंडलांतर्वर्ती देवः । अन्हि करिष्यमाणानां कर्मणां तदधीनत्वात् तत्प्रार्थना । मन्युः क्रोधः । तदधीनत्वात् पापप्रवृत्तेरिति तत्प्रार्थना । मन्युपतयश्च । मन्युः क्रोधः पतिः नियोजको येषामिंद्रियाणां तानींद्रियाणि मन्युपतयः । तैश्चक्षुरादींद्रियबलिशैर्विषयदुरंतसूनास्थानेषु स्वस्याकर्षणाभावाय तद्विषयप्रार्थना । सर्वत्र चकारः समुच्चयार्थः । मन्युकृतेभ्यः पापेभ्यो रक्षंताम् ।

"काम एष क्रोध एष रजो गुणसमुद्भवः । महाशनो महापाप्मा विध्येनमिह वैरिणम्" (भ.गी. ३।३७)॥

इत्यादिशास्त्रप्रसिद्धक्रोधाख्यमन्युकृतेभ्यः । तन्निमित्तेभ्यः पापेभ्यः सर्वेभ्यो रक्षंतां माम् । यथाऽहं मन्युवशो भूत्वा पापं न करिष्यामि तथा सूर्यादयो रक्षंत्वित्यर्थः । किंच । यद्रात्र्या पापमकार्षम् । रात्र्या सप्तम्यर्थे तृतीया । रात्रावित्यर्थः। यद्वा रात्रिशब्देन तदभिमानिनी देवतोच्यते । रात्र्याऽभिमानिन्या देवतया प्रेरितः सन् यत्पापं रात्रौ कृतवानस्मि तदेव साधनतो विशिनष्टि । मनसा वाचा हस्ताभ्याम् । पद्भ्यामुदरेण शिश्नेति । मनसा परहिंसादिचिंतनेन । वाचा अनृतभाषणादिभिः । हस्ताभ्याम् ब्राह्मणापगुरणादिभिः । पद्भ्यामनाक्रमितव्यकलिंगदेशाद्याक्रमणादिभिः । उदरेणाभक्ष्यभक्षणादिभिः । शिश्ना शिश्नेन । 'सुपां सुलुक्' (व्या. सू. ७।१।३९) इत्याकारः । अगम्यागमनादिभिः । उपलक्षणत्वादन्यैरिंद्रियैश्च यच्च पापमकार्षम् रात्रिस्तदवलुंपतु । रात्र्यभिमानिनी देवताग्निश्चंद्रमा वा तत्सर्वमवलुंपतु छिनत्तु विनाशयतु । किंच यत्किंच दुरितं मयि । इदमहं माऽमृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा । इह जन्मनि जन्मांतरे वा कृतं यत्किंचनापि दुरितं पापराशिर्मयि वर्तते । इदं पापजातं सर्वं मां चास्य पापस्य कर्तारं लिंगशरीराभिमानिनं अमृतयोनौ । अमृतं तदेव योनिश्चेति अमृतयोनिः । तास्मिन्नमृते अमरणधर्मके नित्ययोनौ सर्वकारणे सूर्ये सुष्ठु इरयति प्रेरयतीति सूर्यः । तस्मिन्नादित्यात्मके ज्योतिषि स्वयंप्रकाशबोधैकताने आत्मनि अहं जुहोमि प्रक्षिपामि आत्मवन्हौ प्रक्षिप्य तेनाग्निना पूर्वोक्तं पापं सर्वं भस्मीकरोमीति यावत् । अग्निश्चेत्यस्य सूर्यश्चेत्यनेन समानोऽर्थः । इयांस्तु विशेषः । अग्निः रात्र्यधिपतिः । यदन्हा अहस्तदवलुंपतु । इत्यत्र च अन्हः पतिरादित्योऽहरित्युच्यते । सत्ये ज्योतिषीति । अवितथस्वभावे ज्योतिषीति । आपः पुनंत्विति । आपः अभिमंत्रिताः । पुनंतु शोधयंतु

पृथिवीं पृथिव्यंशस्य बहुलत्वात् पृथिवीशब्देन स्थूलशरीरमुच्यते । पृथिवी पूता पूतं शरीरं लिंगशरीराभिमानिनं मां पुनातु । तद्गतरागद्वेषपापादिमलनिरासेन शोधयतु । पुनंतु ब्रह्मणस्पतिः । एकवचनस्य बहुवचनं ब्रह्मणस्पतिश्च भगवान् मां पुनातु । परं ब्रह्म विश्वतः पूतं प्रथमैकवचनस्याकारः । वेदो वा ब्रह्म यदुच्छिष्टं अप्रायत्यकरं मूत्रलेपनादि यच्चाभोज्यं पतिताद्यन्नं यच्च मम संबंधि दुश्चरितं परदारगमनादिकं तन्निमित्तं सर्वमघजातं पुनन्तु आपः । असतां च द्रव्यप्रतिग्रहनिमित्तं पापं शोधयन्तु नाशयन्तु अपास्ताशेषपापं मां स्वाहा प्रक्षिपामि निरस्तसमस्तोपप्लवे परमात्मनि एकीकरोमीत्यर्थः । अत्र **विष्णुः**—

"जानुभ्यानुपरिष्टात्तु शुष्कवासा स्थितो जले।संध्यामाचमनं कुर्वन् शुचिः स्यादशुचिः स्वयम्॥" इति।

मंत्राचमनानंतरं **नारायणस्तु** विशेषमाह—

" स्पृष्ट्वा चाभिष्टुता तोयं मूर्ध्नि ब्रह्ममुखेन तु। आपो हि ष्ठेति सूक्तेन दर्भैर्मार्जनमाचरेत् "॥ इति।

अभिष्टुत् ॐकारः । ब्रह्ममुखमपि **मनुनोक्तम्** (२।८१)—

"ॐकारपूर्विकास्तिस्रो महाव्याहृतयस्तथा। त्रिपदा चैव गायत्री विज्ञेया ब्रह्मणो मुखम्" ॥ इति। तेन तोयं स्पृष्ट्वा तेन तोयेन आपो हि ष्ठेति सूक्तेन दर्भैर्मूर्ध्नि मार्जनमाचरेत् ॥ इत्यर्थः

कात्यायनस्तु—

" शिरसो मार्जनं कुर्यात्कुशैः सोदकबिंदुभिः। प्रणवो भूर्भुवस्वश्च गायत्री च तृतीयका ॥

" अब्दैवतं तृचं चैव चतुर्थमिति मार्जनम् " ॥ इति । मंत्राचमनानंतरं प्रोक्षणं बहुस्मृत्यनुरोधात् शिष्टाचाराच्च सुरभिमत्याब्लिंगाभिश्च तिसृभिरवश्यं कर्तव्यमधिकं तु यथा स्वाचारं ग्राह्यम् । अर्थस्तु । दधिक्राव्णो अकारिषम् । दधि क्रामति प्राप्नोतीति दधिक्रावा । एतन्नामको दधिप्रियः कश्चिद्देवताविशेषः । अग्निरित्यन्ये । तस्य देवस्य अकारिषं अहं कर्म कृतवानस्मि। कीदृशस्य जिष्णोर्जयशीलस्य अश्वस्य व्यापिनः वाजिनोऽन्नवतः । स देवः नः अस्माकं मुखा मुखं सुरभि करत् कर्पूरादिद्रव्यसमृद्धिप्रदानेन सुगंधोपेतं करोतु । नः अस्माकं आयूंषि च प्रतारिषत् प्रवर्धयत्विति शुद्धिहेतुत्वं च **श्रूयते** । " दधिक्राव्णा पुनातीति " ।

मार्जनानंतरं । **प्रजापतिः**—

"जलपूर्णं तथा हस्ते नासिकाग्रे समर्पयेत्।ऋतं चेति पठित्वा तु तज्जलं तु क्षितौ क्षिपेत्"॥ ततः सूर्यायार्घ्यं निवेदयेत्। **तत्र शौनकः**–"व्याहृत्या सह सावित्र्या संध्यां प्रत्यंजलिं क्षिपेत्"॥ इति।

व्यासोऽपि—

"कराभ्यां तोयमादाय गायत्र्या चाभिमंत्रितम्। आदित्याभिमुखस्तिष्ठन् त्रिरूर्ध्वमथ चोत्क्षिपेत्"॥ इति। अत्र विशेषमाह **हारीतः**–"सावित्र्याभिमंत्रितमुदकं पुष्पमिश्रमञ्जलिना क्षिपेत्"॥ इति।

पितामहः—

" उभाभ्यां तोयमादाय हस्ताभ्यां सुसमाहितः । गायत्र्या मंत्रिता आपः प्रणवव्याहृतिपूर्वया ॥

" रवेरभिमुखस्तिष्ठन् ऊर्ध्वं त्रिःसंध्ययोः क्षिपेत् " ॥ **शंखोऽपि**—

" सूर्यायैव तु गायत्र्या त्रिसंध्यास्वांजलिं क्षिपेत् । प्रातर्मध्यान्हयोस्तिष्ठन् सायमासीन एव वा॥

" मंदेहानां वधार्थाय प्रक्षिपेदुदकांजलिम् । प्रायश्चित्तार्थमाचम्य मुच्यते दैत्यहत्यया ॥

"प्रणवव्याहृतिभिश्च कृत्वाऽत्मानं प्रदक्षिणम्।आचम्यैव च ततस्तिष्ठन् ध्यायेत्संध्यां समाहितः"॥इति।

पारिजाते—

१ ख–मलादि ।

" ईषन्नम्रः प्रभाते तु मध्यान्हे तु ऋजुः स्थितः । गायत्र्या प्रक्षिपेदर्घ्यं सायं तूपविशन्भुवि ॥
"गोशृंगमात्रमुद्धृत्य रविं दृष्ट्वा जलांजलिम् । द्वौ पादौ तु समौ कृत्वा पार्ष्णी उद्धृत्य उत्क्षिपेत्"॥

संग्रहेऽपि—" द्वौ हस्तौ युग्मतः कृत्वा पूरयेदुदकांजलिम् ।
" गोशृंगमात्रमुद्धृत्य जलमध्ये जलं क्षिपेत् । जलेष्वर्घ्यं प्रदातव्यं जलाभावे शुचिस्थलम् ॥
" संप्रोक्ष्य वारिणा सम्यक् ततोऽर्घ्याणि प्रदापयेत् । मुक्तहस्तेन दातव्यं मुद्रां तत्र न कारयेत् ॥
" तर्जन्यंगुष्ठयोर्योगे राक्षसी मुद्रिका स्मृता । राक्षसीमुद्रिकादत्तं तत्तोयं रुधिरं भवेत् " ॥

भरद्वाजः—

" ततः प्रदक्षिणीकृत्य त्वद्भिः संप्रोक्षते शुचौ । देशे च दर्भसंक्लृप्ते वाग्यतः प्राङ्मुखः स्थितः ॥
" दर्भान्धारयमाणः सन् आत्मनो ध्यानमाचरेत् । उपविश्य द्विराचम्य ग्रहादींस्तर्पयेत्ततः" ॥ इति ।

योगयाज्ञवल्क्यः—" बाह्यानि करणानि प्रत्याहृत्यान्तःकरणं चात्मनि प्रतिष्ठाप्य स्फटिकमणिकल्पे चित्तदर्पणे प्रतिबिंबमात्मनमुपाधेर्निष्कृष्य स्वे महिम्नि स्थितं सच्चिदानंदमहमस्मीति किंचित्कालं ध्यायेत् " ॥ इति । **पितामहः**—

" पाणिना जलमादय सकृत्कुर्यात्प्रदक्षिणम् । आदित्यादीन् ग्रहांस्तत्र तर्पयेत्सुसमाहितः" ॥ इति ।

जाबालियोगयाज्ञवल्क्यौ—

"संध्ययोरुभयोः काले ध्यात्वा विष्णुं सनातनम् । निर्मलात्मा स्थितो दर्भे गायत्रीमारभेत्ततः"॥ इति।

अर्घ्यदाने मन्त्रातरमुक्तं **विष्णुना**—" कराभ्यामंजलिं कृत्वा जलपूर्णं समाहितः ।
" उदुत्यमिति मंत्रेण तत्तोयं च क्षिपेद्भुवि । ततः प्रदक्षिणं कृत्वा जलं स्पृष्ट्वा विशुध्यति ॥
" जलाभावे महामार्गे बंधने त्वशुचावपि । उभयोः संध्ययोः काले रजसा वाऽर्घ्यमुक्षिपेत् ॥
" तदभावेऽपि सूर्यस्य ध्यानमेव समाचरेत् " ॥ **कात्यायनस्तु**—
" उत्थायार्कं प्रतिप्राप्य त्रिकमंजलिमंभसः । उच्चित्रमित्यनेनैवमुपतिष्ठेदनंतरम् " ॥

स्मृत्यंतरे—

" उदुत्यं चित्रं तच्चक्षुरुपस्थाय त्रिभिः सदा । संध्ययोरुभयोः सूर्यं गायत्रीजपमारभेत् " ॥

शातातपः—

" दर्भहीना तु या संध्या यच्च दानं विनोदकम् । असंख्यातं तु यज्जप्तं तत्सर्वं स्यान्निरर्थकम् ॥
"संध्यातिक्रमणे यस्य सप्तरात्रं गमिष्यति । उन्माददोषयुक्तोऽपि पुनः संस्कारमर्हति "॥ इति। अत्र **प्रयोगक्रमः**—"पादौ हस्तौ च प्रक्षाल्य द्विराचम्य दर्भपाणिः प्राणानायम्य प्रातःसंध्यामुपासिष्य इति संकल्प्य वारिणा पुंड्रं धृत्वा आपो हि ष्ठेति मंत्रस्य सिंधुद्वीप ऋषिः गायत्री छंदः । आपो देवता इति शिरोमुखहृदयदेशेषु विन्यस्य प्रोक्षणे विनियोगः-इति विनियोगं स्मृत्वा मंत्रार्थस्मरणपूर्वकं आपो हि ष्ठेति तृचस्यादितः सप्तभिः पादैः सप्रणवैस्तद्रहितैर्वा सप्तविप्रुषः शिरस्युत्क्षिप्य अष्टमेनैकां विप्रुषं पादयोर्निक्षिप्य नवमेनैकां शिरस्युत्क्षिप्य सप्रणवव्याहृत्या आत्मानं परिषिंचेत् । ततः सूर्यस्येत्यनुवाकस्य अग्निर्ऋषिः । गायत्रं छंदः । सूर्यो देवता । आचमने विनियोग इति पूर्ववद्विन्यस्य विनियोगं च स्मृत्वा अर्थस्मरणपूर्वकं सूर्यश्चेत्यनेनाभिमंत्रिता अपः पीत्वा द्विराचामेत् । दधिक्राव्ण इत्यस्य मंत्रस्य वामदेव ऋषिः अनुष्टुप् छंदः विश्वेदेवा देवता

दधिक्रावा वा देवता मार्जने विनियोग इति पूर्ववद्विन्यस्य एतया सुरभिमत्या आपो हि ष्ठादिभिस्तिसृभिश्च पादशो मार्जयित्वा पूर्ववदात्मानं परिषिंचेत् । तत अर्घ्यप्रदानं करिष्य इति संकल्प्य गायत्र्याश्च वक्ष्यमाणऋष्यादिकं विन्यस्य तदर्थं च स्मृत्वा अभिमंत्रितं जलांजलिं सूर्यायार्घ्यं त्रिरुत्क्षिपेत् । तत आचम्य सजलेन पाणिना सकृदात्मप्रदक्षिणं कृत्वा असावादित्यो ब्रह्मेत्यात्मानं ध्यात्वा हृदयमभिमृश्याचम्य यथाचारं ग्रहादींस्तर्पयेत् ” ॥ इति ।

जपदेशमाह **योगयाज्ञवल्क्यः**—

“ अग्न्यगा[1]रे जलांते वा जपेद्देवालयेऽपि वा । पुण्यतीर्थे गवां गोष्ठे सिंधुक्षेत्रेऽथ वा गृहे ” ॥

स्मृतिरत्ने—

“ सूर्याग्निरुद्रदेवानां गुरूणामपि सन्निधौ । अन्येषां च प्रशस्तानां मंत्रानभिमुखो जपेत् ॥

“ अश्वत्थबिल्वतुलसीवने पुष्पान्तरावृते ” ॥ **स्मृतिसारे**—

“ सूर्यस्याग्नेर्गुरोरिंदोर्दीपस्य च जलस्य च । विप्राणां च गवां चैव सन्निधौ शस्यते जपः ” ॥

शंखः—

“ गृहे त्वेकगुणं प्रोक्तं नद्यादौ द्विगुणं स्मृतम् । गवां गोष्ठे दशगुणं अग्न्यागारे शताधिकम् ॥

“ सिंधुक्षेत्रेषु तीर्थेषु देवतायाश्च संनिधौ । सहस्रं शतकोटीनां अनंतं विष्णुसन्निधौ ” ॥

व्यासोऽपि—

“ गुह्यका राक्षसाः सिद्धा हरंति प्रसभं यतः । एकांते गुह्यदेशे तु तस्माज्जप्यं समाचरेत् ” ॥

अंगिरा अपि—

“ प्रच्छन्नानि च दानानि ज्ञानं च निरहंकृतम् । जप्यानि च सुगुप्तानि तेषां फलमनंतकम् ” ॥इति ।

शौनकः—

“आ ब्रह्मलोकादा शेषादा लोकालोकपर्वतात् । येऽपसंति द्विजा देवास्तेभ्यो नित्यं नमो नमः ॥

“ इति मंत्रं समुच्चार्य नमस्कुर्यात् सुरान् द्विजान् ॥

“ अपसर्पंतु ते भूता ये भूता भुवि संस्थिताः । ये भूता विघ्नकर्तारस्ते न[2]श्यंतु शिवाज्ञया ॥

“ तै[3]लेन वामपादस्य भूमौ घातत्रयं चरेत् ।

“ उग्रभूतपिशाचाद्याः ये[4] च वै भूमिभारका[5]ः । एतेषामविरोधेन ब्रह्मकर्म समारभे ।

“ संकल्प्यैवं जपेत्सम्यक् मंत्रार्थगतमानसः ।

“ कुशाजिनांबरेणाढ्यं कल्पयेदासनं बुधः । वंशेष्टकाश्मधरणीतृणपल्लवनिर्मितम् ॥

“ वर्जयेदासनं धीमान् दारिद्र्यव्याधिदुःखदम् । सर्वसिध्द्यै व्याघ्रचर्म ज्ञानसिध्द्यै मृगाजिनम् ॥

“ नादीक्षितस्य गृहिणः कृष्णसाराजिनं स्मृतम् । विशेषयतिर्वनस्थस्य ब्रह्मचारी मृगाजिने ॥

“ वस्त्रासनं रोगहरं कंबलं दुःखमोचनम् । स्वस्तिकाद्यासनेनाथ विशेत्तत्र निराकुलः ॥

“ वीरासनं स्वस्तिकं वा बध्वाऽन्यतरदासनम् । पद्मं वा मुक्तकं वाऽपि बध्वा जपमथाचरेत् ”॥

आसनलक्षणमुक्तं तत्रैव[6]—

“ एकं पादमथैकस्मिन् विन्यस्योरुणि संस्थितः । पादेऽन्यस्मिंस्तथा चोरुं वीरासनमुदाहृतम् ॥

“ जानूर्वोरंतरे सम्यक् कृत्वा पादतले उभे । ऋजुकायः समासीनः स्वस्तिकं तत्प्रचक्षते ॥

“ उर्वोरुपरि विप्रेंद्र कृत्वा पादतले उभे । पद्मासनं वदेदेतत्सर्वेषामपि पूजितम् ॥

---

१ **क्ष**–ग्न्या । २ **खगघ**–गच्छत्वाज्ञया हरेः । ३ **क्ष**–तेन । ४ **खक्ष**–पृते वै । ५ **क्ष**–पा । ६ **क्ष**– + शारासनविशेषः ।

" संपीड्य सीवनीं सूक्ष्मां गुल्फेनैव तु सव्यतः । सव्यं दक्षिणगुल्फेन मुक्तासनमुदीरितम् ॥
" एवमासनयुक्तः सन् भूतशुद्धिं समाचरेत् " ॥ इति । **मंत्रदेवताप्रकाशिकायाम्**—
" आसनमन्त्रस्य पृथिव्या मेरुपृष्ठऋषिः सुतलं छंदः । श्रीकूर्मो देवता । आसने विनियोगः ।
"पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता। त्वं च धारय मां देवि पवित्रं कुरु चासनम्"॥

इत्यासनं परिकल्प्य उरसि गुरुभ्यो नम इत्यंजलिं कृत्वा ज्ञाननालैश्वर्याष्टदलवैराग्यकर्णिकाहृदयांबुजमुकुलं प्रणवेन विकसितं ध्यात्वा कर्णिकास्थं चैतन्यात्मकं जीवं प्लुतप्रणवोच्चारणेन सुषुम्नानाडीमार्गतो निःसार्य तं जीवं द्वादशांतःस्थितसहस्रदलकमलनिष्ठपरमात्मना सह हंस इति मंत्रेणैकीकृत्य स्वशरीरस्थकल्मषजातं पुरुषाकारेण विचिंत्य शोषणदाहनप्लावनानीत्थं कुर्यात्

" ब्रह्महत्याशिरस्कं च स्वर्णस्तेयभुजद्वयम् । सुरापानहृदा युक्तं गुरुतल्पकटिद्वयम् ॥
" तत्संयोगपदद्वंद्वं प्रत्यंगसमपातकम् । उपपातकरोमाणं नखश्मश्रुविलोचनम् ॥
"खड्गचर्मधरं कृष्णं कुक्षौ पापं विचिंतयेत्" ॥ तं पापपुरुषं नाभिदेशस्थितषट्कोणांतर्गतं यं इति वायुबीजोत्थवायुना शोषयित्वा पुनस्तं हृदयदेशस्थितत्रिकोणगत—रं इत्यग्निबीजोत्थवह्निना दाहयित्वा तद्भस्म दक्षिणानासापुटान्निःसार्य भ्रूमध्यस्थार्धचंद्राकारामृतमंडलान्तस्थ—वं इत्यमृतबीजोत्थितामृतधारया निष्कलंकं सशरीरमाप्लाव्य शुद्धिं कृत्वा द्वादशांतर्हितमात्मनं सुषुम्नानाडिमार्गेण हृदयकमले ओं सोहमिति मंत्रेण स्थापयेत् । एवंभूतशुद्धिं कृत्वा प्राणप्रतिष्ठां कुर्यात् । प्राणप्रतिष्ठामंत्रस्य ब्रह्माविष्णुमहेश्वरा ऋषयः । ऋग्यजुःसामाथर्वाणि छंदांसि । प्राणशक्तिः परा देवता प्राणप्रतिष्ठार्थे जपे विनियोगः ।

" रक्तांभोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः
" पाशं कोदंडमिक्षूद्भवमलिगुणमप्यंकुशं पंचबाणान् ।
" बिभ्राणासृक्कपालं त्रिनयनविलसिता पीनवक्षोरुहाढ्या
" देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः " ॥

इति ध्यात्वा प्राणप्रतिष्ठामंत्रं जपेत् । आं ह्रीं क्रों यरलवशषसहों हंसः सोहं सोहं हंसः अमुष्य प्राणा इह प्राणा अमुष्य जीव इह स्थितः । अमुष्य सर्वेंद्रियाणि अमुष्य वाङ्मनश्चक्षुःश्रोत्रत्वक्चक्षुजिव्हाघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहेति अमुष्य स्थाने ममेत्युच्चारयन् प्राणप्रतिष्ठां कुर्यात् । ततो मातृकान्यासं कुर्यात्। मातृकासरस्वतीमंत्रस्य ब्रह्मा ऋषिः गायत्री छंदः । मातृकासरस्वती देवता । मातृकान्यासे विनियोगः

" पंचाशद्वर्णभेदैर्विहितवदनदोः पादहृत्कुक्षिवक्षो
" देशांभास्वत्कपर्दाकलितशशिकलामिंदुकुंदावदाताम् ।
" अक्षस्रक्कुंभचिंतालिखितवरकरामब्जसंस्थां त्रिनेत्राम्
" अच्छाकल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि " ॥ इति ध्यात्वा

बिंदुसहितां मातृकां न्यसेत् । **प्रपंचसारे** न्यासस्थलमभिहितम्—
" काननवृत्तंब्यक्षिश्रुतिनासिकगंडोष्ठदंतमूर्धास्ये । दोःपत्सन्ध्यग्रेषु च पार्श्वद्वयपृष्ठनाभिजठरेषु ॥
"हृद्दोर्मूलावरगलकक्षेषु हृदादिपाणिपादयुगे। जठराननयोर्व्यापकसंख्यातानक्षरान् न्यसेत्क्रमतः"॥

इति । केति कं शिरः । द्विशब्दः अक्षिश्रोत्रनासिकागण्डोष्ठदन्तेषु प्रत्येकं संबध्यते । दोःपत्संध्यग्राणि विंशति दोर्मूलं दक्षिणं या दीक्षांता व्यापकसंज्ञाः तैर्व्यापकन्यासमपि कुर्यादित्यर्थः॥

---

१ क्ष–दक्षां । ख–संयतः । ३ खगघ–युक्कु । ४ क्ष–त्ति ।

अथ **प्राणायामविधिः** । तत्र **योगयाज्ञवल्क्यः**—

"एवं संमार्जनं कृत्वा बाह्यशुद्ध्यर्थमादरात् । तथाभ्यंतरशुद्ध्यर्थं प्राणायामं समाचरेत्" ॥ **बृहस्पतिः**—

"बध्वासनं नियम्यासून् स्मृत्वा चर्ष्यादिकं तथा। संनिमीलितदृङ्मौनी प्राणायामं समभ्यसेत्"॥ इति। आसनं त्वत्र स्वस्तिकादि । यत्तु **दक्षवचनम्**

" संध्यात्रयेऽपि कर्तव्यं प्राणायामत्रयं द्विजैः । आसीनस्तु भवेत्सायं मध्यान्हे स्थित एव वा। " तिष्ठन्नेव तथा कुर्यात्प्रातःकाले समाहितः " ॥ इति । तत् 'असावादित्यो ब्रह्मेति' ध्यानात् पूर्वकालिकविषयम् ।

"प्राक्कूलेषु ततः स्थित्वा दर्भेषु सुसमाहितः। प्राणायामत्रयं कृत्वा ध्यायेत्संध्यामिति श्रुतिः"॥ इति **व्याससमरणादिति** केचित् । अन्ये तु बध्वासनमिति सायंकालविषयम् । 'प्रातस्तिष्ठन् प्राणायामेन शुध्यति' इति 'सायमासीनः प्राणायामेन शुध्यति' इति **अखंडादर्श**वचनात् प्रातस्तिष्ठतैव प्राणायामाः कर्त्तव्या इत्याहुः । **संवर्तः**— " प्राणायामैस्त्रिभिः पूतो गायत्रीं तु जपेत्ततः " ॥ इति । **कर्मप्रदीपे**—

" देवार्चने जपे होमे स्वाध्याये श्राद्धकर्मणि । स्नाने दाने तथा ध्याने प्राणायामास्त्रयस्त्रयः ॥ " आदावंते च गायत्र्याः प्राणायामास्त्रयः स्मृताः । संध्यायामर्घ्यदाने च स्मृत एकोऽसुसंयमः ॥ " अंगुष्ठानामिकाभ्यां तु तथैव च कनिष्ठया । प्राणायामस्तु कर्तव्यो मध्यमां तर्जनीं विना ॥ " तर्जनीमध्यमायोगं प्राणायामे तु वर्जयेत् । तर्जनीमध्यमां स्पृष्ट्वा कुर्वन्शूद्रसमो भवेत्" ॥ इति । **तत्रैव**—

"वामहस्तेन गणयन् प्राणायामं जपेद् द्विजः । कुर्याद्धोमे च सर्वत्र तथा कुत्सितकर्मकृत्"॥ इति । **प्राणायामलक्षणमाह मनुः**—

" सव्याहृतिकां सप्रणवां गायत्रीं शिरसा सह । त्रिः पठेदायतप्राणः प्राणायामः स उच्यते"॥ पठेन्मनसेति शेषः । तथा च **संवर्त्तः**—

"प्रणवेन तु संयुक्ता व्याहृतीः सप्त नित्यशः । सावित्रीं शिरसा सार्धं मनसा त्रिः पठेद्द्विजः"॥ इति । **याज्ञवल्क्योऽपि** (आ. २३)—

" गायत्रीं शिरसा सार्धं जपेद्व्याहृतिपूर्विकाम् । प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः "॥ इति । 'प्रतिव्याहृतिप्रणवेन संयुक्तां गायत्रीं मुखनासिकां संचारिणं वायुं निरुंधन् मनसा त्रीन्वारान् जपेदित्ययं सर्वत्र प्राणायामः' इति **विज्ञानेश्वरः** (पृ. ७ पं. १–३) । **योगयाज्ञवल्क्योऽपि**—

" भूर्भुवस्स्वर्महर्जनस्तपः सत्यं तथैव च । प्रत्योंकारसमायुक्तं तथा तत्सवितुः परम् ॥ "ओमापोज्योतिरित्येतत् शिरः पश्चात्प्रयोजयेत् । ओमापोज्योतिरित्येष मंत्रो वै तैत्तिरीयकः ॥ " त्रिरावर्तनयोगात्तु प्राणायामस्तु शब्दितः " ॥ इति । **यमोऽपि**—

" ओंकारपूर्विकाः सप्त जपेत्तु व्याहृतीस्तथा । शिरसा सह गायत्रीं प्राणायामः परं ततः "॥ इति । अशक्तस्य जपमाह **भरद्वाजः**—

"अशक्यः स्याद्यदि प्रोक्तः प्राणायामे[1] द्विजन्मनः । बालस्य चेतरेषां च दशकृत्वो जपः स्मृतः" ॥ अत्यंताशक्तौ **स एव**—

---

१ **गघ**—मात् ।

" सप्तैव व्याहृतीरेताः केवला वा द्विजो जपेत् । जपक्रमोऽयमेवं स्यात् सर्वपापप्रणाशनः"॥ इति ।
स च प्राणायामः पूरककुंभकरेचकभेदेन त्रिविधः । तथा च **योगयाज्ञवल्क्यः**—
" पूरकः कुंभको रेच्यः प्राणायामस्त्रिलक्षणः ॥
" नासिकाकृष्ट उच्छ्वासो ध्मातः पूरक उच्यते । कुंभको निश्चलः श्वासो रिच्यमानस्तु रेचकः ॥
" बाह्यस्थितं घ्राणपुटेन वायुमाकृष्य यत्नेन शनैः समस्तम् ॥
" नाड्यश्च सर्वाः परिपूरणीयाः स पूरको नाम महान्निरोधः " ॥
कुंभकरेचकयोर्विशेषमाह **अत्रिः**—" आ केशाग्रान्नखाग्राच्च निरोधः शस्यते बुधैः ।
" निरोधाज्जायते वायुः वायोरग्निश्च जायते । अग्नेरापश्च जायंते ततोऽतः शुध्यते त्रिभिः ॥
" शनैर्नासापुटे वायुमुत्सृजेन्न तु वेगतः । न कंपयेच्छरीरं तु स योगो परमो मतः " ॥ इति ।
व्यासः—" नाभिमध्ये स्थितं ध्यायेत्कं रक्तं पूरकेण तु ॥
" नीलोत्पलाभं हृत्पद्मे कुंभकेन जनार्दनम् । ललाटस्थं शिवं श्वेतं रेचकेनाभिचिंतयेत् ।
" शुद्धस्फटिकसंकाशं निर्मलं पापनाशनम् । शंकरं त्र्यम्बकं श्वेतं ध्यायन्मुच्येत बंधनात् " ॥
योगयाज्ञवल्क्यः—
" पूरके विष्णुसायुज्यं कुंभके ब्रह्मणोऽतिकम् । रेचकेन तृतीयेन प्राप्नुयादैश्वरं पदम् ॥
" इडया वायुमारोप्य बाह्यं द्वादशमात्रकम् । पूरयित्वोदरं तेन नासाग्रनयनद्वयम् ॥
" ध्यायन्विरेचयेत्पश्चान्मंदं पिंगलया पुनः " । इडा वामनाडी । पिंगला दक्षिणनाडी । कुंभको मानसजपः । **स्मृतिरत्ने**—
" दक्षिणे रेचकं कुर्याद्वामेनापूरितोदरः । कुंभकेन जपं कुर्यात् प्राणायामस्य लक्षणम्" ॥ इति ।
नारदः—
" प्राणो वायुः शरीरस्थ आयामस्तस्य निग्रहः । प्राणायाम इति प्रोक्तो द्विविधः प्रोच्यते हि सः॥
" अगर्भश्च सगर्भश्च द्वितीयस्तु तयोर्वरः । अपि ध्यानं विना गर्भः सगर्भस्तत्समन्वितः "॥ इति ।
भरद्वाजः—
" समाहितमनाः प्राणानायम्यैव तदाकृतिम् । दशकृत्वो जपित्वैवं प्राग्गायत्रीं ततो जपेत् ॥
" जपक्रमोऽयमेवं स्यात्सर्वपापप्रणाशनः " ॥ इति । तदाकृतिं कुंभकजपोक्तरूपाम् ।
स्मृत्यंतरे—
" सप्तव्याहृतिसंयुक्तां गायत्रीं शिरसा सह । दशवारं जपित्वैव गायत्रीं तु ततो जपेत्" ॥ इति ।
ऋष्यादिकमाह **भरद्वाजः**—
" प्रणवस्य ऋषिर्ब्रह्मा परमात्मा च देवता । छंदस्तु देवी गायत्री विनियोगः क्रियावशः " ॥
पितामहः—
" प्रणवस्य ऋषिर्ब्रह्मा देवताग्निस्त्रयी च सा । छंदस्तु देवी गायत्री वेदादौ विनियुज्यते ॥
" जपकालत्रयी देवो होमकाले हुताशनः । ध्यानकाले परं ब्रह्म विश्वेदेवास्ततोऽन्यदा"॥
व्याहृतीनामृष्यादिकमाह **स एव**—
" अत्रिर्भृगुश्च कुत्सश्च वसिष्ठो गौतमस्तथा । काश्यपश्चांगिराश्चैव ऋषयः स्युर्यथाक्रमम् ॥
" गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च । त्रिष्टुप् च जगती चैव छंदांस्येतानि सप्त वै ॥
" अग्निर्वायुस्तथाऽर्कश्च वागीशो वरुणस्तथा । इंद्रश्च विश्वेदेवाश्च देवताः समुदाहृताः ॥
" ब्राह्मी स्वाहा वाहिनी च तथा नित्या विलासिनी । प्रभावती च लोला च सप्तव्याहृतिशक्तयः॥

" श्वेतं शामं च पीतं च पिशंगं नीललोहितम् । नीलं कनकवर्णं च वर्णान्येतान्यनुक्रमात् ॥
" विश्वामित्रस्तु गायत्र्या ऋषिश्छंदः स्वयं स्मृतम् । सविता देवता चैव ब्रह्मा शिरऋषिः स्मृतः ॥
" अनुष्टुबेव छंदः स्यात् परमात्मा च देवता " । **योगज्ञावल्क्यस्तु**—
" व्याहृतीनां तु सर्वासां ऋषिश्चैव प्रजापतिः । अग्निर्वायुस्तथादित्यो बृहस्पत्याप एव च ॥
' इंद्रश्च विश्वेदेवाश्च देवताः समुदाहृताः । शिरसः प्रजापतिऋषिर्यजुश्छंदो विवक्षितम् ॥
" ब्रह्माग्निर्वायुसूर्याश्च देवताः समुदाहृताः । प्राणायामप्रयोगे तु विनियोग उदाहृतः " ॥
न्यासमाह **स एव**—
" पादयोर्जंघयोर्जान्वोस्तथैव जठरेऽपि च । कंठे मुखे तथा मूर्ध्नि क्रमेण व्याहृतीर्न्यसेत् ॥
" भूरंगुष्ठद्वये न्यस्य भुवस्तर्जनिकाद्वये । ज्येष्ठांगुलिद्वये धीमान् स्वः पदं विनियोजयेत् ॥
" अनामिकाद्वये धीमान् न्यसेत्तत्पदमग्रतः । कनिष्ठिकाद्वये भर्गः पाण्योर्मध्ये धियः पदम् ॥
"भूःपदं हृदि विन्यस्य भुवः शिरसि विन्यसेत् । शिखायां स्वःपदं न्यस्य कवचे तत्पदं न्यसेत् ॥
" अक्ष्णोर्भर्गःपदं न्यस्य न्यसेद्दिक्षु धियः पदम् । शिरस्तस्यास्तु सर्वांगे प्राणायामपरो न्यसेत् ।
" विन्यस्यैवं ततः कृत्वा मुद्रां ध्यात्वा क्रमेण तु । पूरकादिक्रमेणैव प्राणायामान्समाचरेत् ॥
" पद्ममुद्रा सौरभेयी शंखमुद्रा वराहकौ । वासुदेवात्मसंविच्च सप्तव्याहृतिमुद्रिकाः " ॥ इति ।
प्रणवध्यानमुक्तं **मंत्रदेवताप्रकाशिकायाम्**—

" विष्णुं भास्वत्किरीटांगदवलयगलाकल्पहारोदराङ्घ्रि-
" श्रोणीभूषं सुवक्षो मणिमुकुटमहाकुंडलामंडितांगम् ।
" हस्तोद्यच्छंखचक्रांबुजगदममलं पीतकौशेयमा[1]शा-
विद्योतद्भासमुद्यादिनकरसदृशं पद्मसंस्थं नमामि " ॥

व्यासः—
" स्वस्वोक्तवर्णतनवो रूपयौवनसंयुताः । क्षौमवस्त्रपरीधानाः सर्वाभरणभूषिताः ॥
" दिव्यचंदनलिप्तांगा दिव्यमाल्यैरलंकृता । सितोपवीतहृदयाः सपवित्रचतुष्कराः ॥
" उन्निद्रवदनांभोजप्रभामंडलमंडिताः । जटाकलापपूर्णेंदुप्रभापूरितदिङ्मुखाः ॥
" अभयाक्षस्रगप्यात्र वरहस्तसरोरुहाः । एवं होमजपारंभे ध्येया व्याहृतयो द्विजैः " ॥
गायत्रीध्यानम्
" मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिंदुकलानिबद्धमुकुटां तत्वार्थवर्णात्मिकाम् ॥
" गायत्रीं वरदाभयांकुशकशाः शुभ्रं कपालं गुणं शंखं चक्रमथारविंदयुगलं हस्तैर्वहंतीं भजे " ॥
इत्येवं कुर्वतः फलमाह **संवर्तः**—
" मानसं वाचिकं पापं कायेनैव तु यत्कृतम् । तत्सर्वं नश्यति क्षिप्रं प्राणायामत्रये कृते " ॥
योगयाज्ञवल्क्योऽपि—
" प्राणायामत्रयं कृत्वा सूर्यस्योदयनं प्रति । निर्मलः स्वर्गमायांति संतः सुकृतिनो यथा" ॥ इति ।
मनुः—(६।७०–७१;११।२४८)
" प्राणायामा ब्राह्मणस्य त्रयोऽपि विधिवत्कृताः । व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः ॥
" दह्यंते ध्मायमानानां धातूनां हि यथा मलाः । तथेंद्रियाणां दह्यंते दोषाः प्राणस्य निग्रहात् ॥
"सव्याहृतिकाः सप्रणवाः प्राणायामास्तु षोडश । अपि भ्रूणहणं मासात् पुनंत्यहरहः कृताः"॥इति ।

१ ख–वीतं । २ गघ–स्वय ।

शौनकोऽपि— "प्राणायामान्धारयेत् त्रीन्यथाविधि समाहितः ।
" अहोरात्रकृतं पापं तत्क्षणादेव नश्यति । आत्मा शुध्येद् द्वादशभिश्चतुर्विंशात्परंतप" ॥ इति ।
यमोऽपि—
" दशप्रणवसंयुक्तैः प्राणायामैश्चतुर्दशैः । मुच्यते ब्रह्महत्याया मासाच्चैवोपपातकैः " ॥
व्यासः—"सव्याहृतिकां सप्रणवां गायत्रीं शिरसा सह । ये जपंति सदा तेषां न भयं विद्यते क्वचित्"॥
योगयाज्ञवल्क्योऽपि—
" य एता व्याहृतीः सप्त संस्मरेत् प्राणसंयमे । उपासितं भवेत्तेन विश्वं भुवनसप्तकम् ॥
" सर्वेषु चैव लोकेषु कामचारश्च जायते । षोडशाक्षरकं ब्रह्म गायत्र्यास्तु शिरः स्मृतम् ॥
" सकृदावर्त्तयन् विप्रः संसारादपि मुच्यते" इति ॥ इति **प्राणायामविधिः** ॥

गायत्र्यावाहनम् । **भरद्वाजः**—
" आयात्वित्यनुवाकेन हृदये वाऽर्कमंडले । देवीमावाह्य गायत्रीं ततो ध्यायेत् द्विजोत्तमः" ॥
पितामहः—
" आयात्वित्यनुवाकेन देवीमावाहयेत्ततः । आयात्वित्यनुवाकस्य वामदेव ऋषिः स्मृतः ॥
" छंदोऽनुष्टुप् भवेदस्य गायत्री देवता स्मृता । अनेन चानुवाकेन देवीमावाहयेत्ततः ॥
" गायत्रीं विमलां देवीं हृदि वा सूर्यमंडले । ध्यानयोगेन संपश्येद्वर्णरूपसमन्विताम् ॥
" प्राणानायम्य चावाह्य स्मृत्वर्ष्यादि ततो न्यसेत् । मुद्राः प्रदर्श्य ध्यात्वाऽथ जपेन्मंत्रमयं क्रमः"॥
शौनकः—" आवाहनं तैत्तिरीये उक्तं चापि विसर्जनम् " ॥ इति । मंत्रांतरमाह **गोभिलः**—
" आयातु वरदा देवी अक्षरं ब्रह्मवादिनि । गायत्रि छंदसां माता ब्रह्मयोने नमोऽस्तु ते " ॥
व्यासोपि—" आवाहयेत्तु गायत्रीं सर्वपापप्रणाशिनीम् ॥
" आगच्छ वरदे देवि जप्ये मे संनिधौ भवेः । गायंतं त्रायसे यस्मात् गायत्री त्वं ततः स्मृता"॥इति।
बृहस्पतिः—" ऋषिं छंदो देवता च ध्यात्वा मंत्रार्थमेव च ॥
"गायत्र्यास्तु समस्ताया ऋषिछंदोधिदेवताः । स्मृत्वा प्रत्यक्षरं पश्चाद्व्याद्यादीनथ संस्मरेत्"॥ इति।
पितामहः—
" सविता देवता यस्या मुखमग्निस्त्रिपाच्च या । विश्वामित्रऋषिछंदो गायत्री सा विशिष्यते"।
व्यासः—" विश्वामित्रऋषिछंदो निचृद्गायत्रमुच्यते ।
"देवता परमात्मा च सविता वा प्रकीर्तितः । प्राणायामे जपेत्त्वर्घ्यदाने च विनियुज्यते " ॥ इति ।

ॐ भूरित्यादीनामयमर्थः । अकारोकारमकारात्मकस्य प्रणवस्य ब्रह्मविष्णुमहेश्वरात्मकः परमात्मा प्रतिपाद्योऽर्थः । तेन सह सप्तव्याहृतिप्रतिपाद्यार्थस्यैकत्वमुच्यते । ओं भूः सत्तास्वभावः प्रणवार्थः । एवं ॐ भुवः स्थितिकाले सर्वमस्मिन्भवतीति भुवः सर्वस्थितिकारणमपि प्रणवार्थः । ॐ सुवः सुपूर्वस्य वृञ् वरण इत्यस्य रूपं शोभनैः सनकादिभिर्वृतं सुष्ठु सर्वं वृणोति व्याप्नोतीति वा सुवः ब्रह्म । ॐ महः महतेः पूजाकर्मणो रूपं मुमुक्षुभिः पूजनीयत्वाद्ब्रह्मैव मह इत्युच्यते । ओं जनः जनेरन्तर्भावितण्यर्थस्य रूपम् सर्वस्य जगतो जनकं ब्रह्मेत्यर्थः । ॐ तपः तपतेरंतर्भाविण्यर्थस्य रूपं सूर्यात्मना स्थित्वा जगत्तापयति प्रकाशयतीति वा तपः । तदपि प्रणवार्थ एव । ओं सत्यं क्वचिदपि देशे काले वस्तुनि केनापि प्रमाणेनाबाधितं 'सच्चत्यच्चेति' वा सत्यं कारणं कार्यमप्यदः प्रत्यक्षं च परोक्षं च यद्वा सत्यमितीरितम् । तदपि प्रणवार्थ एव ।

यद्वा भूरित्यधोलोकानां उपलक्षणम् । भूप्रभृतयश्च सप्तोपरि लोकाः पातालाद्याश्चाधो लोकाः सप्त चतुर्दशलोका अपि ब्रह्मकार्यत्वात्तदुपादानभूतब्रह्मात्मका इत्यर्थः ।

अथ **गायत्र्यर्थः** । सवितुः सर्वजगतः प्रसवितुः जगत्कारणस्य देवस्य द्योतनस्वभावस्य स्वयं प्रकाशचिदेकरसस्य वरेण्यं वरणीयं सर्वैः प्रार्थनीयं सुखैकतानरूपं सर्वैः सुखस्यैव प्रार्थनीयत्वात् । भर्गः भ्रस्जदाहे प्रकृतिप्राकृतलक्षणसंसारस्य दाहकं यः धियः धी वृत्तीः प्रचोदयात् सदा प्रेरयति । तस्य बुध्यादिप्रेरकस्य सवितुः देवस्य वरेण्यं परमानंदैकरसं भर्गः सकारान्तः संसारदाहकं निर्गुणं ब्रह्म धीमहि ध्यायाम । इति ।

स्मृतिभास्करे—

" तदित्येतत्परं ब्रह्म ध्येयं तत्सूर्यमंडले । सवितुः सकलोत्पत्तिस्थितिसंहारकारिणः ॥
" वरेण्यमाश्रयणीयं यदाधारमिदं जगत् । भर्गः स्वसाक्षात्कारेणाविद्या तत्कार्यदाहकम् ॥
" देवस्य ज्ञानरूपस्य स्वानंदात् क्रीडतोऽपि वा । धीमह्यहं स एवेति तेनैवाभेदसिद्धये ॥ ।
" धियोऽन्तःकरणे वृत्तीः प्रत्यक् प्रवणकारिणीः । य इत्यरूपमव्यक्तं सत्यज्ञानादिलक्षणम् ॥
" नोऽस्माकं बहुधाध्यस्तभेदेनानेकदेहिनाम् । प्रचोदयात्प्रेरयतुः सत्यज्ञानादिलक्षणम्"॥ इति ।

विश्वामित्रः—

" देवस्य सवितुस्तस्य धियो यो नः प्रचोदयात् । भर्गो वरेण्यं तद्ब्रह्म धीमहीत्यर्थ उच्यते "॥

अगस्त्यः—

" यो देवः सविताऽस्माकं धियो धर्मादिगोचरः । प्रेरयेत्तस्य यद्भर्गस्तद्वरेण्यमुपास्महे " ॥

मंत्रदीपिकायाम्—

" देवस्य सवितुस्तेजो वरेण्यं भर्गसंज्ञितम् । ध्यायेमहीति शब्दोक्तौ धीमहीत्यर्थ उच्यते ॥
" यःशब्दश्च यदित्यर्थे लिंगव्यत्ययतो भवेत् " ॥

वरदराजीये नित्यमंत्रव्याख्याने—तच्छब्दश्रुतेर्यच्छब्दोऽध्याहार्यः । सवितुः जगतां प्रसवितुः 'सविता वै प्रसवानामीशे उतेशिषे प्रसवस्य त्वमेक ' इत्यादिश्रुतेः (   ) वरेण्यं वृङ् संभक्तौ एण्यप्रत्ययः । सर्वेषां भजनीयं भर्गः प्रकाशप्रदानेन जगतो बाह्यांतरतमोभञ्जनाद्वा कालात्मकतया सकलकर्मफलपाकहेतुत्वेन भर्जनाद्वा वृष्टिप्रदानेन भूतानां भरणाद्वा भर्गः देवस्य द्योतमानस्य धीमहि । ध्यै चिंतायां । देवस्य सवितुर्वरेण्यं यद्भर्गस्तत् ध्यायामि । तच्छब्दो ब्रह्मवाचकत्वेन प्रसिद्धः " ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः " इति **भगवद्गीतास्मरणात्** (१७।२३) । आदित्यमंडलांतर्वर्तिनं पुरुषमनुचिंतयामः । " य एषोऽतरादित्ये हिरण्मयः पुरुषः । अथ य एष एतस्मिन् मंडलेर्चिषि पुरुषः" इत्यादि **तैत्तिरीयश्रुतेः** (तै. आ. १०।१४ पृ. ८३५–३६) यः सविता नोऽस्माकं धियः हानोपादानादिविषयाणि ज्ञानानि प्रचोदयात् प्रचोदयति प्रवर्तयति तस्य सवितुस्तत् भर्ग चिंतयाम इति ।

मार्कंडेयोऽपि—

"कुशबृस्यां निविष्टस्तु कुशपाणिर्जितेंद्रियः । अर्कमध्यगतं ध्यायेत् पुरुषं तु महाद्युतिम्"॥ इति ॥

निरुक्तभाष्येऽपि—

" यद्ब्रह्म नित्यं हृदि संनिविष्टं मां प्रेरयत्तिष्ठति नः सुबुद्धिः ।
भर्गस्तदाख्यं भजनीयमेतत् ध्यायामि नित्यं रविमंडलस्थम् ॥

" देवस्य सवितुर्मध्ये यो भर्गो नो धियः स्वयम् । प्रचोदयात् तत् वरेण्यं धीमहीत्यन्वयक्रमः ॥
" द्युस्थानात् द्योतनाद्वाऽपि भानुर्देव उदाहृतः । जगत्प्रसवहेतुत्वात् स एव सविता भवेत् ॥
" तत्संबंधी च यो भर्गः पापानां भंजकत्वतः । अस्माकं कार्यविषये बुद्धीः प्रेरयतीह यः ॥
" तद्ब्रह्म प्रार्थनीयं स्याद्वरणीयमुपास्महे ।
" ध्येयः सदा सवितृमंडलमध्यवर्ती नारायणः सरसिजासनसंनिविष्टः ॥
" केयूरवान्मकरकुंडलवान् किरीटी हारी हिरण्मयवपुर्धृतशंखचक्रः " ॥ इति ।

अथ **गायत्रीशिरसोऽर्थः**— ओमित्युक्तार्थः । आप्नोतीत्यापः । अखंडसत्तास्वरूपेण सर्वव्यापकः स एव ज्योतिः स्वयंप्रकाशचैतन्यज्योतिः रसः स एवानंदस्वभावः तदेवामृतं अमरणधर्मकं तदेव ब्रह्म देशाद्यनवच्छिन्नम् । एवंभूतस्यार्थस्य व्याहृतित्रयार्थेनैक्यमुच्यते भूरित्यादिना । भूः सत्तास्वभावः सृष्टिकाले सर्वस्मिन् भवतीति स्थितिकाले सर्वस्मिन् भवतीति च । भुवः सर्वोपादानं सर्वस्थितिकारणं चेति यावत् । सुवः सर्वसंहर्तृ अयं शिरसोऽर्थः प्रणवार्थ एव । प्रणवसहितसप्तव्याहृतिभिः प्रणवसहितगायत्र्या प्रणवसहितशिरसा च प्रतिपादितमखंडैकरसं ब्रह्मप्रत्यगात्मतयाऽनुजानामि । ॐ इति ।

आयात्वित्यनुवाकस्यार्थः—आयातु आगच्छतु । वरमीप्सितं भक्तेभ्यो ददातीति वरदा । देवी द्योतनस्वभावा । न क्षरति सर्वमश्नुत इति वाऽक्षरम् ब्रह्म अपरिछिन्नम् संमितं सम्यङ्मितमगवतं भावे निष्ठा । ज्ञानस्वभावं यदेवंभूतं तदायात्वित्यर्थः । गायत्री प्रथमार्थे द्वितीया । गायत्री छंदसां माता छंदसां वेदानामुष्णिगादीनां च माता । गायत्री त्वं इदमपरोक्षैकरसं पूर्वोक्तं ब्रह्म नः अस्माकं जुषस्व अंतर्भावितण्यर्थः । सेवया गायत्र्यात्मकं परं ब्रह्म स्तूयते ओजोसि इत्यादिना । ओजस्तेजः । तदसि । सहः पराभिभवशक्तिः । तदसि । महाप्रलयादौ सर्वाभिभवसामर्थ्यस्य सत्त्वात् । बलं प्राणाः । भ्राजो दीप्तिः । देवानां वस्वादीनां धाम स्थानमसि नामाख्यनिखिलशब्दराशिरपि त्वमेवासि । किंबहुना । विश्वमसि । विश्वं परिदृश्यमानं प्रपंचजातम् । विश्वायुः विश्वस्य जीवनहेतुत्वात् । सर्वमसि सर्वं सर्गांतरादिकार्यम् । तदसि सर्वायुः असीति संबंधः । विश्वायुः इत्येन व्याख्यातः । अभिभूः । सर्वं सर्गजातं अभिभवतीत्यभिभूः । ओं प्रणवार्थश्चासि । अथवा ओं गायत्रीमावाहयामि गायत्र्यात्मकं परं ब्रह्मावाहयामि सोहमिति ममात्मतया प्रापयामीति ।

अथ **ऋष्यादिन्यासः** । **स्मृतिरत्ने**—

" छंदो गायत्री गायत्र्याः सविता चैव देवता । मुखमग्निस्त्रिपाच्चैव विश्वामित्र ऋषिस्तथा ॥
" त्रयी शिरः शिखा रुद्रो विष्णुर्हृदयमेव च । उपनयने विनियोगः सांख्यायनसगोत्रिका ॥
" त्रैलोक्यं चरणं ज्ञेयं पृथिवी कुक्षिरेव च । एवं ध्यात्वा तु गायत्रीं जपेत् द्वादशलक्षणाम् " ॥

अथ **द्वादशाक्षरर्षयः**—

" विश्वामित्रो भरद्वाजो गौतमः कुत्स एव च । भृगुः शांडिल्यकश्चैव लोहितो गर्ग एव च ॥
" शातातपः सनत्कुमारस्तथा सत्यतपः स्मृतः । भार्गवः पराशरश्च पुंडरीकः क्रतुस्तथा ॥
" दक्षश्च काश्यपश्चैव जमदग्निश्च वत्सकः । विमलश्चांगिराश्चैव अत्रिः कुंडैस्तथैव च ॥

---

१ **गघ**–अक्षरऋषयः । २ **ख**–कण्व; **गघ**–कण्डु ।

" कुंभयोनिश्चतुर्विंशी ऋषयः परिकीर्तिताः " ॥ अथ **छंदांसि**—
" गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च । त्रिष्टुप् च जगती चैव अनुष्टुप् पङ्क्तिरेव च ॥
" जगती विष्टरा पंक्तिरनुष्टुप् पंक्तिरेव च ॥
" अक्षरपंक्तिरनुष्टुप् जगती त्रिष्टुभौ तथा । जगत्यनुष्टुभे चैव अनुष्टुप् त्रिष्टुभे तथा ॥
"त्रिष्टुप् च जगती चैव देवी गायत्रमुच्यते । गायत्र्याश्च चतुर्विंशश्छंदांस्यक्षरशः क्रमात्"॥ इति ।

अथाक्षरदेवताः—
" अग्निः प्रजापतिश्चैव सोम ईशान एव च । आदित्योऽथ गुरुश्चैव इंद्रश्चैव भगस्तथा ॥
" अर्यमा चैव सविता त्वष्टा पूषा च देवता । इंद्राग्नी चैव वायुश्च वामदेवस्तथैव च ॥
" मित्रश्च वरुणश्चैव क्रमशो देवताः स्मृताः । वैश्वदेवं ततश्चैव वैष्णवं वासवं तथा ॥
" मारुतं चैव कौबेरं आश्विनं ब्राह्ममेव च । साविञ्यास्तु चतुर्विंशद्देवताः समुदाहृताः " ॥

चंद्रिकायाम् (पृ. १४४ पं. २०)—
"अक्षराणां च सर्वेषां प्रजापतिऋषिः स्मृतः । छंदो गायत्रमेव स्याद्देवो ब्रह्मैव कीर्तितः"॥ इति ।

विश्वामित्रः—
" अथ तत्वानि वक्ष्यामि अक्षराणां विभागशः । पृथिवी चोदकं तेजो वायुरंबरमेव च ॥
" गंधो रसश्च रूपं च स्पर्शः शब्दोऽथ वागिति । हस्तावुपस्थं पायुश्च पच्छ्रोत्रे त्वक् च चक्षुसी ॥
" जिव्हा घ्राणं मनस्तत्त्वमहंकारो महत्तथा । गुणत्रयं च क्रमशो वर्णतत्त्वविनिश्चयः" ॥

अथाक्षरशक्तयः—
" प्रल्हादिनी प्रभा नित्या विश्वा भद्रा विलासिनी । ईश्वरी च जया शांता कांतिर्दुर्गा सरस्वती ॥
" विरूपा विशदा चेशा व्यापिनी विमला तथा । तमोपहारिणी सूक्ष्मा विश्वयोनिर्जयावहा ॥
" पद्मालया परा शोभा गदा रूपेतिशक्तयः " ॥

अथाक्षरन्यासः । विश्वामित्रः—
" आदावस्त्रेण संशोध्य करौ न्यासं ततश्चरेत् । दक्षिणां तर्जनीमादिं कृत्वा पर्वसु विन्यसेत् ॥
" क्रमाद्वामकनिष्ठांतं अक्षराणि करद्वये । तत्कारं विन्यसेत्स्वांगपादांगुष्ठद्वये द्विजः ॥
" सकारं गुल्फदेशे तु विकारं जंघयोर्न्यसेत् । जान्वोस्तु विद्धि तुःकारं वकारं चोरुदेशतः ॥
"रेकारं विन्यसेद्गुह्ये णिकारं वृषणे न्यसेत् । कटिदेशे तु यंकारं भकारं नाभिमंडले ॥
" गोंकारं जठरे योगी देकारं स्तनयोर्न्यसेत् । वकारं ह्यदि विन्यस्य स्यकारं कंठ एव तु ॥
" धीकारमास्ये विन्यस्य मकारं तालुमध्यतः । हिकारं नासिकाग्रे तु धिकारं नयनद्वये ॥
" भ्रुवोर्मध्ये तु योकारं ललाटे तु द्वितीयकम् । पूर्वानने तु नःकारं प्रकारं दक्षिणानने ॥
" उत्तरास्ये तु चोकारं दकारं पश्चिमानने । विन्यसेन्मूर्ध्नि यात्कारं सर्वव्यापिनमीश्वरम् ।
" ओंकारमादावुच्चार्य नमोंऽतं चाक्षरं न्यसेत् " ॥ इति ।

अथ **वर्णध्यानम् । ब्रह्मा**—
" कृत्वा चैवाक्षरन्यासं अशेषाघविनाशनम् । पश्चात्समाचरेत् ध्यानं वर्णरूपसमन्वितम् ॥
" तत्कारं चम्पकापीतं ब्रह्माविष्णुशिवात्मकम् । शांतं पद्मासनारूढं ध्यात्वा दहति पातकम् ॥
" सकारं चिंतयेच्छाममतसीपुष्पसंनिभम् । पद्ममध्यस्थितं सौम्यमुपपातकनाशनम् ॥
" विकारं पिंगलं नित्यं कमलासनसंस्थितम् । ध्यायेच्छांतं द्विजश्रेष्ठो महापातकनाशनम् ॥

---

१ ख–शत् ।

" तुःकारं चिंतयेत्प्राज्ञः इंद्रनीलसमप्रभम् । निर्दहेत्सर्वदुःखं तु ग्रहरोगसमुद्भवम् ॥
" वकारं वन्हिदीप्त्याभं चिंतयेत्तु विचक्षणः । भ्रूणहत्त्याकृतं पापं तत्क्षणादेव नश्यति ॥
" रेकारं विमलं ध्यायेत् शुद्धस्फटिकसंनिभम् । अभक्ष्यभक्षजं पापं तत्क्षणादेव नश्यति ॥
" णिकारं चिन्तयेद्योगी विद्युत्स्फुरितसप्रभम् । गुरुतल्पकृतं पापं तत्क्षणादेव नश्यति ॥
" यकारं तारकावर्णं इंदुशेखरभूषणम् । योगिनां वरदं ध्यायेद्ब्रह्महत्याविनाशनम् ॥
" भकारं कृष्णवर्णं तु नीलमेघसमप्रभम् । ध्यात्वा पुरुषहत्यादिपापं नाशयति द्विजः ॥
" र्गोकारं रक्तवर्णं तु कमलासनसंस्थितम् । गोहत्यया कृतं पापं नाशयंतं विचिंतयेत् ॥
" देकारं मरकतश्यामं कमलासनसंस्थितम् । सततं चिंतयेद्योगी स्त्रीहत्यादहनं परम् ॥
" वकारं शुक्लवर्णं तु जातिपुष्पसमप्रभम् । गुरुहत्याकृतं पापं ध्यात्वा दहति तत्क्षणात् ॥
" स्यकारं चिंतयेत्पीतं सुवर्णद्युतिसंनिभम् । मनसा यत्कृतं पापं तत्क्षणादेव नश्यति ॥
" धीकारं चिंतयेदिन्दुकुंदपुष्पसमप्रभम् । पितृमातृवधात्पापान्मुच्यते नात्र संशयः ॥
" मकारं पद्मरागाभं चिंतयेद्दीप्ततेजसम् । पूर्वजन्मार्जितं पापं तत्क्ष० ॥
" हिकारं शंखवर्णं तु पूर्णचंद्रसमप्रभम् । अशेषपापदहनं ध्यायेन्नित्यं विचक्षणः ॥
" धिकारं पांडरं ध्यायेत् पद्मस्योपरि संस्थितम् । प्राणिहत्याकृतं पापं तत्क्षणादेव नश्यति ॥
" योकारं रक्तवर्णं तु इंद्रकोपकसंनिभम् । प्रतिग्रहकृतं पापं तत्क्षणादेव नश्यति ॥
" द्वितीयश्चैव यः प्रोक्तो योकारो रुक्मसंनिभः । निर्दहेत्सर्वपापानि नान्यैः पापैश्च लिप्यते ॥
" नःकारं तु मुखं पूर्वं आदित्योदयसंनिभम् । सकृत् ध्यात्वा द्विजश्रेष्ठः स गच्छेद्दैवतं पदम् ॥
" नीलोत्पलदलश्यामं प्रकारं दक्षिणामुखम् । सकृत् ध्यात्वा द्विजश्रेष्ठः स गच्छेद्ब्रह्मणः पदम् ॥
" सौम्यं गोरोचनापीतं चोकरं चोत्तराननम् । सकृत् ध्यात्वा द्विजश्रेष्ठः स गच्छेद्वैष्णवं पदम् ॥
" शंखकुंदेंदुसंकाशं दकारं पश्चिमाननम् । सकृत् ध्यात्वा द्विजश्रेष्ठः स गच्छेदैश्वरं पदम् ॥
" यात्कारस्तु शिरः प्रोक्तः चतुर्वदनसंभवः । प्रत्यक्षफलदो ब्रह्माविष्णुरुद्र इति स्थितिः ॥
" इति ध्यात्वा तु मेधावी जपं होमं करोति यः । न भवेत्सूतकं तस्य मृतकं च न विद्यते ॥
" साक्षाद्भवत्यसौ ब्रह्मा स्वयंभूः परमेश्वरः ॥
" यस्त्वेतां न विजानाति गायत्रीं तु यथाविधि । कथितं सूतकं तस्य मृतकं च सदैव हि ॥
" नैव दानफलं तस्य नैव यज्ञफलं भवेत् । नैव तीर्थफलं प्रोक्तं तस्यैवं सूतके सति ॥
" पादादिकुक्षिपर्यंतं शिरःप्रभृतिवक्षसि । कर्तव्यः कामिभिर्न्यासो गृहस्थैरिति निर्णयः"॥ इति ।

पादन्यासमाह **स एव**—
" दक्षिणांगुष्ठमारभ्य यावद्वामकनिष्ठिका । दशैतानि पदन्यासान् क्रमेणैव न्यसेत्सुधीः ॥
"शिरोभ्रूमध्यनयनवक्त्रकंठेषु वै क्रमात् । हृन्नाभिगुह्यदेशेषु जानुपादद्वये न्यसेत्" ॥

चंद्रिकायाम् (पृ. १४४) प्रतिपादमृष्यादिकमुक्तम् । तत्सवितुः इत्यस्य विश्वामित्र ऋषिः गायत्री छंदः ब्रह्मा देवता । 'भर्गो देवस्य' इत्यस्य विश्वामित्र ऋषिः गायत्री छंदः विष्णुर्देवता । 'धियोयो न' इत्यस्य विश्वामित्र ऋषिः गायत्रीछन्दः रुद्रोदेवता इति ।

पादन्यासमाह **विश्वामित्र ऋषिः**—" एतैस्त्रिभिः पदैः कुर्यात् करशुद्धिं द्विजोत्तमः ।
" अनामिकाद्वये धीमान् न्यसेत्तत्पदमग्रतः । कनिष्ठिकाद्वये भर्गः पाण्योर्मध्ये धियः पदम् ॥

“शिरसि प्रथमं पादं द्वितीयं नाभिमध्यतः । तृतीयं पादयोर्न्यस्य सर्वं[1] सर्वांगके न्यसेत् ” ॥ इति चन्द्रिकायाम् (पृ. १४५) । गायत्र्या व्यापकं कृत्वा करन्यासपूर्वकं षडंगन्यासं कुर्यात् । तत्र **व्यासः**—

“हृदि तत्सवितुर्न्यस्य न्यसेन्मूर्ध्नि वरेणियम् । भर्गो देवस्येति खंडं शिखायां तु ततो न्यसेत्”॥इति ।
“ धीमहीति न्यसेद्वर्म धियो योनश्च नेत्रयोः । प्रचोदयादिति पदमस्त्रार्थे विनियोजयेत् ॥
“ अंगन्यासस्तु यैर्मंत्रैः करन्यासोऽपि तैः स्मृतः ” ॥

गायत्रीसारे तु विशेषोऽभिहितः–“ तत्सवितुर्ब्रह्मात्मने हृदयाय नमः । वरेणियं विष्ण्वात्मने शिरसे स्वाहा । भर्गोदेवस्य रुद्रात्मने शिखायै वषट् । धीमहीश्वरात्मने कवचाय हूं । धियो यो नः सदाशिवात्मने नेत्रत्रयाय वौषट् । प्रचोदयात्परमात्मने अस्त्राय फट् ” ॥

पितामहः—

“ॐ भूर्विन्यस्य हृदये ॐ भुवः शिरसि न्यसेत् । ॐ सुवः शिखायां विन्यस्य गायत्र्या प्रथमं पदम्॥
“ विन्यसेत्कवचे धीमान् द्वितीयं नेत्रयोर्न्यसेत् । तृतीयेनास्त्रविन्यासः चतुर्थं सर्वतो न्यसेत् ॥

‘ परो रजसि सावदोम् ’ इति गायत्र्याश्चतुर्थं पादम् । सर्वतः मूर्धादिपादपर्यंतं न्यसेदित्यर्थः । न्यासप्रकारमाह **भरद्वाजः**—

“ अंगुष्ठादिकनिष्ठांतमंगुलीषु न्यसेत्ततः । प्रकोष्ठांतर्बहिः पाण्योस्तलयोस्तलपृष्ठयोः ॥
“ हृन्मस्तकशिखाबाहुनेत्रप्रहरणानि षट् । अंगान्यमून्युक्तानि पल्लवानि षडेव हि ॥
“ अंगुलीभिश्च तिसृभिर्द्वयोर्हृदयशीर्षयोः । मुष्टेरंगुष्ठशिरसा पश्चिमे तस्य वर्मणः ॥
“ [3]बहिः कराभ्यां दृक्फालमध्ये मध्यांगुलैस्त्रिभिः । अंगुष्ठतर्जन्यग्राभ्यां सशब्दं दिक्षु पार्श्वयोः॥
“ षडंगन्यासमित्युक्तं इदमेतत्प्रकारतः ।
“ एवं विन्यस्य गायत्रीमावाह्य च यथाविधि । ध्यात्वोपचारं सकलं कृत्वाऽथो जपमाचरेत् ”॥

एवं **भरद्वाजेन** षडंगन्यासमुक्त्वाऽनंतरं जपविधानात् नित्यजपे ऋष्यादिषडंगन्यासमावश्यकं फलाधिक्यापेक्षायां तु शक्तस्याक्षरन्यासादयः कार्या इत्याहुः । अत एव **गृह्यपरिशिष्टे** (१।५ पृ. २६८)— “एषोंऽगन्यासः एवंविधिमप्येके नेच्छंति स हि विधिरवैदिकः ” ॥ इति । **चंद्रिकायाम्**—“ अंगुष्ठे चैव गोविंदं तर्जन्यां तु महीश्वरम् ।
“ मध्यमायां हृषीकेशमनामिक्यां त्रिविक्रमम् । कनिष्ठिक्यां न्यसेद्विष्णुं करमध्ये तु माधवम्॥
“ यत्कृतं च हुतं जप्तं दत्तमिष्टं विशेषतः । हस्तन्यासप्रभावेन सर्वं भवति चाक्षयम् ।

हृदये भूरिति मुखे भुव इति शिरसि सुवरिति सर्वांगे न्यसेदेतद्गायत्रीकवचं ततो यथाविधि गायत्रीमभ्यसेदिति । एवं कुर्वतः फलमाह **व्यासः**—

“ विन्यस्यैवं जपेद्यस्तु गायत्रीं वेदमातरम् । ब्रह्मलोकमवाप्नोति व्यासस्य वचनं तथा ॥
“ स्वरूपं यः पुनस्तस्या ज्ञात्वोपास्ते यथाविधि । गृह्णन् दोषैर्न लिप्येत रत्नपूर्णां वसुंधराम् ॥
“ यथाकथंचिज्जप्ता सा देवी परमपावनी । सर्वकामप्रदा प्रोक्ता किंपुनर्विधिना नृप ” ॥ इति ।

अथ **मुद्राः** । तत्र **ब्रह्मा**—

“ अथातो दर्शयेन्मुद्राः संमुखं संपुटं तथा । ततो विततविस्तीर्णे द्विमुखत्रिमुखे ततः ॥
“ चतुर्मुखं पंचमुखं षण्मुखाधोमुखे ततः । व्यापकांजलिकाख्यं च शकटं तदनंतरम् ॥
“ यमपाशं च ग्रथितं ततः स्यात्संमुखोन्मुखम् । विलंबो मुष्टिको मीनः ततः कूर्मवराहकौ ॥

१ **खगघ**–सर्वां । २ **क्ष**–अंगु । ३ **ख**–द्वाभ्यां ।

" सिंहाक्रांतं महाक्रांतं ततो मुद्गरपल्लवौ " ॥ इति ।

एतासां लक्षणमाह स एव—" संमुखं संहतौ हस्तावुत्तानौ कुंचितांगुली "। कुंचिता वक्रा अंगुलयः ययोरुक्तलक्षणयोर्हस्तयोस्तौ संमुखं नाम मुद्रा ।

" संपुटं पद्मकोशाभौ करावन्योन्यसंहतौ " । पद्ममुकुलाभौ करौ संपुटं नाम मुद्रा । " विततं संहतौ हस्तावुत्तानावायतांगुली " । आयताः प्रसारिता अंगुलयोर्ययोः उक्तलक्षणयोस्तौ विततं नाम मुद्रा ।

" विस्तीर्णसंहितौ पाणी मिथौ मुक्तांगुलिद्वयौ "। मुक्तमंगुलिद्वयं याभ्यां पाणिभ्यां तौ मिथः संहतौ विस्तीर्णं नाम मुद्रा ।

" संमुखासक्तयोः पाण्योः कनिष्ठाद्वययोगतः । शेषांगुलीनां वैरल्ये द्विमुखत्रिमुखादयः" ॥ मिथः संमुखासक्तयोः पाण्योः कनिष्ठाद्वययोगतः शेषांगुलीनां वैरल्ये अंगुष्ठद्वयमारभ्यानामिकांतं यावत् द्विमुखं त्रिमुखं चतुर्मुखं पंचमुखं नाम मुद्रा भवंति । तत्र वकारे द्विमुखं रेकारे त्रिमुखं णिकारे चतुर्मुखं यंकारे पंचमुखं

' शेषांगुलीनां संयोगात् पूर्वयोगविनाशतः । तिर्यक्संयुज्यमानाग्रौ संयुक्तांगुलिमंडलौ ॥

"हस्तौ षण्मुखमित्युक्ता मुद्रा मुद्राविशारदैः"। पूर्वयोगकनिष्ठाद्वयसंयोगः । तद्विनाशेनोत्तरांगुलीनां संयोगात्तिर्यक्संयुज्यमानमग्रं ययोस्तथा संयुक्तमंडलं ययोस्तौ षण्मुखं नाम मुद्रा ।

"आकुंचिताग्रौ संयुक्तौ न्युब्जौ हस्तावधोमुखम् "। ईषद्वक्रावधःकृतौ हस्तावधोमुखं नाम मुद्रा । " उत्तानौ तादृशावेव व्यापकौ कुंचितौ करौ "। तादृशौ संयुक्ताद्युक्तलक्षणौ करौ व्यापकांजलिकं नाम मुद्रा ।

" अधोमुखो बद्धमुष्टी मुक्ताग्रांगुष्ठकौ करौ " । शकटं नाम कथितम् । मुक्ताग्रावंगुष्ठौ ययोरुक्तलक्षणयोः करयोः तौ शकटं नाम मुद्रा ।

यमपाशमतः परं बद्धमुष्टिकयोः पाण्योरुत्ताना वामतर्जनी अकुंचिताग्रान्यया युक्ता तर्जन्या न्युब्जवक्रया बद्धमुष्टिकरूपयोः पाण्योर्या उत्ताना कुञ्चिताग्रा वामतर्जनी अन्यया दक्षिणतर्जन्यान्युब्जवक्रया युक्ता यमपाशं नाम मुद्रा ।

" उत्तानसंधिसंलीनबद्धांगुलितलौ करे संमुखा घटितौ दीर्घांगुष्ठौ ग्रथितमुच्यते " ॥ उत्तानानि संधिसंलीनानि बद्धान्यंगुलितलानि ययोस्तथोक्तौ तावन्योन्यमुखघटितौ दीर्घावक्रौ अंगुष्ठौ ययोस्तौ ग्रथितं नाम मुद्रा ।

"संचितोर्ध्वांगुलिर्वामस्तादृशा दक्षिणेन तु । अधोमुखेन संयुक्तः संमुखोन्मुख उच्यते"। संचिताः संबद्धा ऊर्ध्वाङ्गुलयो यस्य स तथोक्तः। तादृशा दक्षिणेनाधोमुखेन संयुक्तः संमुखोन्मुखं नाम मुद्रा ।

" उत्तानोन्नतकोटी तु विलम्बः कथितौ करौ " । उत्तानोन्नते कोटी ययोः करयोस्तौ विलम्बो नाम मुद्रा । मुष्टी चान्योन्यसंयुक्तावुत्तानौ मुष्टिको भवेत् " । अन्योन्यसंयुक्तावुत्तानौ मुष्टी मुष्टिको नाम मुद्रा ।

" मीनस्तु संमुखीभूतौ युक्तानामकनिष्ठकौ । ऊर्ध्वसंयुक्तवक्राग्रशेषांगुलिदलौ करौ " ॥

---

१ ख–संयुक्तमङ्गुलिमंडलं । २ ख–वक्राग्रावध ।

युक्ते संबद्धे अनामिकाकनिष्ठिके ययोः करयोस्तौ तथोक्तौ। तावन्योन्यसंमुखीभूतौ तथा ऊर्ध्वसंयुक्तानि वक्राणि शेषांगुलिदलानि ययोस्तौ मीनो नाम मुद्रा।

" अधोमुखः करो वामस्तादृशा दक्षिणेन तु। पृष्ठदेशे समाक्रांतः कूर्मनामाभिधीयते "। अधोमुखो न्युब्जो वामहस्तस्तादृशा दक्षिणेन पाणिना पृष्ठदेशे युक्तः कूर्मो नाम मुद्रा।

" ऊर्ध्वमध्यो वामभुजः कक्षाभ्याशाश्रये करे। वाराहः कथ्यते। कक्षसमीपाश्रये करे सत्युक्तलक्षणो वामभुजो वाराहो नाम मुद्रा।

" सिंहाक्रांतं कर्णाश्रितौ करौ कर्णद्वयाश्रितावायतांगुलीभूय ततः परमिहोच्यते "। कर्णाश्रितावायताङ्गुली करौ सिंहाक्रांतं नाम मुद्रा।

" किंचिदाकुंचिताग्रौ चेन्महाक्रांतं ततः परम्। तावेवाकुंचिताग्रौ महाक्रांतं नाम मुद्रा।

" ऊर्ध्वं किंचिद्गतौ पाणी मुद्गरौ वामतर्जनी। ग्रस्ता दक्षिणहस्तेन किंचिदूर्ध्वं गतयोः पाण्योर्या वामतर्जनी दक्षिणहस्तेन गृहीता सा मुद्गरो नाम मुद्रा।

" ग्रस्ता दक्षिणहस्तेन पल्लवो दक्षिणकरः। अधोमुखः स्थितो मूर्ध्नि मुद्राणामिति लक्षणम् "॥ उक्तलक्षणो मूर्ध्नि निहितः करः पल्लवो नाम मुद्रा। **पितामहः**—

" पद्ममुद्रा सौरभेयी शंखमुद्रा वराहकौ। वासुदेवात्मसंविच्च सप्तव्या[1]इतिमुद्रिकाः॥

" तथांऽगुष्ठद्वयं मध्ये दत्वाऽथ परितः करौ। मंडलीकरणं सम्यगंगुलीनां च सर्वशः॥

" **पद्ममुद्रा** भवेदेषा **सौरभेयी** ततः परम्।

" अनामिके कनिष्ठाभ्यां तर्जनीभ्यां च मध्यमे। अन्योन्याभिमुखे श्लिष्टे **शंखमुद्रा ततः** परम्॥

" वामांगुष्ठं तु संगृह्य दक्षिणेन तु मुष्टिना। कृत्वोत्तानं तथा मुष्टिमंगुष्ठे तु प्रसारयेत्॥

" वामांगुल्यस्तथा शि[2]ष्टाः संयुक्ताः संप्रसारिताः। दक्षिणांगुष्ठसंस्पृष्टा मुद्रा **शंखस्य** चोदिता॥

" दक्षहस्तं चोर्ध्वमुखं वामहस्तमधोमुखम्। अंगुल्यग्रं तु संयुक्त**मुद्रा वाराहसंज्ञिता**॥

" अंजल्या चात्ममुद्रा स्याद्वासुदेवाभिधा च सा। दक्षिणांगुष्ठतर्जन्यौ संयुक्ताग्रे हृदि स्थिते॥

" प्रसारितास्तथांगुल्यसंविन्मुद्रा स्मृता बुधैः। मुद्रा तु मोदयेद्देवीं द्रावयेद्दु[3]रितं तथा॥

" न जातु दर्शयेन्मुद्रां महाजनसमागमे। क्षुभ्यंति देवतास्तस्य फलं च न कृतं भवेत्॥

" अर्चने जपकाले तु ध्याने काम्ये च कर्मणि। तत्तन्मुद्राः प्रयोक्तव्या देवसान्निध्यकारिकाः "॥इति।

अथ **ध्यानम्**। तत्र **गोभिलः**— " प्रातर्गायत्री रविमध्ये स्थिता रक्तवर्णा कुमारी अक्षमालाहस्ता हंसासनमारूढा ब्रह्मदेवत्या ऋग्वेदमुदाहरंती। मध्यंदिने सावित्री रविमध्ये स्थिता श्वेतवर्णा यौवनस्था त्रिनेत्रा शूलहस्ता वृषभासनमारूढा रुद्रदेवत्या यजुर्वेदमुदाहरंती। सायं सरस्वती रविमध्ये स्थिता श्यामवर्णा वृद्धा चतुर्भुजा चक्रहस्ता सुपर्णासनमारूढा विष्णुदेवत्या सामवेदमुदाहरंती "। **गृह्यपरिशिष्टे**—(१।९) " अथ देवताध्यानम्। या संध्योक्ता सैव मंत्रदेवता खलूपास्यते तां सर्वदैकरूपां ध्यायेदनुसंध्यमन्योन्यं भिन्नरूपां वा यदैकरूपामृग्यजुःसामात्रिपदां त्रिर्यगूर्ध्वाधरां षट्कुक्षिं पंचशीर्षामग्निमुखीं विष्णुहृदयां ब्रह्मशिरसं रुद्रशिखां दंडकमंडल्वक्षसूत्राभयांकचतुर्भुजां शुभ्रवर्णां शुभ्रांबरानुलेपनस्रगाभरणां शरच्चंद्रसहस्रप्रभां सर्वदेवमयीमिमां देवीं गायत्रीमेकामिव तिसृषु संध्यासु ध्यायेत्। अथ यदि भिन्नरूपां प्रातर्बालां बालादित्यमंडलस्थां रक्तवर्णां रक्तांबरानुलेपनस्रगाभरणां चतुर्वक्त्रां दंडकमंडल्वक्षसूत्राभयांक-

---

१ ख–दृष्टाः, गघ–श्लिष्टाः। २ गघ–ततरां। ३ क्ष–मुद्रये।

चतुर्भुजां हंसवाहनारूढां ब्रह्मदेवत्यामृग्वेदमुदाहरंतीं भूलोकाधिष्ठात्रीं गायत्रीं नाम देवतां ध्यायेत् । अथ मध्यंदिने तां युवतिं युवादित्यमंडलस्थां श्वेतवर्णां श्वेतांबरानुलेपनस्रगाभरणां पंचवक्त्रां प्रतिवक्त्रं त्रिनेत्रां पंचरेखां त्रिशूलखट्वांगडमरुकांकचतुर्भुजां वृषभासनारूढां रुद्र-देवत्यां यजुर्वेदमुदाहरंतीं भुवोलोकाधिष्ठात्रीं सावित्रीं नाम देवतां ध्यायेत् । अथ सायं वृद्धां वृद्धादित्यमंडलस्थां श्यामवर्णां श्यामांबरानुलेपनस्रगाभरणामेकवक्त्रां शंखचक्रगदापद्मांकचतुर्भुजां गरुडासनारूढां विष्णुदेवत्यां सामवेदमुदाहरंती स्वर्लोकाधिष्ठात्रीं सरस्वतीं नाम देवतां ध्यायेत् " इति । **व्यासः**—

"न भिन्नां प्रतिपद्येत गायत्रीं ब्रह्मणा सह। साऽहमस्मीत्युपासीत विधिना येनकेनचित्" ॥ इति। एतत्सर्वं संध्यानिरूपणे दर्शितम् । ततः गायत्र्यास्तुरीयपादं जपित्वा तेन गायत्रीमभिमुखीकृत्य जपेत् । तदुक्तं **व्यासेन**—

" तुरीयं तु पदं तस्याः परे ब्रह्मणि संस्थितम् । उपस्थाय तुरीयेण जपेत्तां तु समाहितः" ॥ इति।

पितामहः—

"गायत्र्यास्तु त्रयः पादाश्चतुष्पादपि सा स्मृता। जपे तु त्रिपदैवोक्ता ह्यर्चने तु चतुष्पदा"॥ इति। तुरीयपादस्वरूपं **चंद्रिकायाम्** (पृ. १४३ पं. २३) तुरीयपादं 'परो रजसेऽसावदोम्' इत्यष्टाक्षरं तस्य विमल ऋषिः तुरीयं छंदः परमात्मा देवता मोक्षे विनियोगः" इति ॥

अथ **गायत्रीमहिमा** तत्र **मनुः** । (२।७६।७८)—

" अकारं चाप्युकारं च मकारं च प्रजापतिः । वेदत्रयान्निरदुहत् भूर्भुवः स्वरितीति च " ॥ निरदुहत् निश्चकर्ष ।

" तदित्यृचोऽस्याः सावित्र्याः परमेष्ठी प्रजापतिः । त्रिभ्य एव तु देवेभ्यः पादं पादमदूदुहत् ॥

" एतदक्षरमेतां च जपन्व्याहृतिपूर्विकाम् । संध्ययोर्वेदविद्विप्रो वेदपुण्येन युज्यते "॥ अक्षरं प्रणवम् एतां सावित्रीं वेदत्रयार्थविदो वेदत्रयजापिनो यत्फलं तल्लभत इत्यर्थः ॥

स एव(२।८०)—

"एतयर्चाऽपि संयुक्ताः काले च क्रियया स्वया । विप्रक्षत्रियविड्योनिर्गर्हणां याति साधुषु ॥

" सहस्रकृत्वस्त्वभ्यस्य बहिरेतत्त्रिकं द्विजः । महतोऽप्येनसो मासात् त्वचेवाहिर्विमुच्यते॥ (७९)

" योऽधीतेऽहन्यहन्येतां त्रीणि वर्षाण्यतंद्रितः । स ब्रह्म परमभ्येति वायुभूतः खमूर्तिमान्" ॥ अतंद्रितः शक्तौ सत्यां न कदाचिदप्यनन्यपरः । वायुभूतः सर्वव्यापी खमूर्तिमान् लेपरहितः । शास्त्रांतरेषु ब्रह्मप्राप्तेरुपायः समाधिरित्युक्तम् । तस्मादपि प्रणवादित्रिकजपो विशिष्टतर इत्याह

सएव (२।८३)—

" एकाक्षरं परं ब्रह्म प्राणायामः परंतपः । सावित्र्यास्तु परं नास्ति मौनात्सत्यं विशिष्यते " । प्राणायामशब्देन व्याहृतयो लक्ष्यन्ते । मौनं समाधिः । सत्यं जपः । प्रणवः परब्रह्मस्वरूपम् । व्याहृतयः परमतपःसाधनभूताः । सावित्र्याविशिष्टं न किंचिदस्ति । तस्मात्तेषां जपः समाधेरपि विशिष्यत इत्यर्थः ।

यमोऽपि–" गायत्रीं चैव वेदांश्च तुलयाऽतोलयत्प्रभुः ।

"एकतश्चतुरो वेदान् सांगांश्च सपदक्रमान्। एकतश्चैव गायत्रीं तुल्यरूपा तु सा स्मृता" ॥ इति।

शंखोऽपि—“नाघमर्षणात्परमंतर्जलेन व्याहृतिभ्यः परं हुतं न सावित्र्याः परं जप्यम्”॥ इति ।
ब्रह्मापि—
“ गायत्र्या न परं जप्यं गायत्र्या न परं तपः । गायत्र्या न परं ध्येयं गायत्र्या न परं हुतम्”॥
व्यासः—
“ दशकृत्वः प्रजप्ता सा त्रिहआद्यत्कृतं लघु । तत्पापं प्रणुदत्याशु नात्र कार्या विचारणा ॥
“ शतजप्ता तु सा देवी पापौघशमना स्मृता । सहस्रजप्ता सा देवी उपपातकनाशिनी ॥
“ कोटिजापेन गायत्र्या यदिच्छति तदाप्नुयात् ।
“ यक्षविद्याधरत्वं वा गंधर्वत्वमथापि वा । देवत्वमथवा राज्यं भूलोके वाऽप्यंकटकम् ” ॥ इति ।
संवर्त्तः—
“ ऐहिकामुष्मिकं पापं सर्वं निरवशेषतः । पंचरात्रेण गायत्री जप्यमाना व्यपोहति ॥
“ गायत्र्यास्तु परं नास्ति शोधनं पापकर्मणाम् । गायत्रीमात्रसारोऽपि वरो विप्रः सुयंत्रितः ॥
“ नायंत्रितश्चतुर्वेदी सर्वाशी सर्वविक्रयी । ब्रह्मचारी मिताहारः सर्वभूतानुकंपनः ॥
“ गायत्र्या लक्षजापेन सर्वपापैः प्रमुच्यते ।
“ अयाज्ययाजनं कृत्वा भुक्त्वा चान्नं विगर्हितम् । गायत्र्यष्टसहस्रं तु जपं कृत्वा विशुध्यति”॥
विश्वामित्रः—
“ प्रणवे नित्ययुक्तस्य व्याहृतीषु च सप्तसु । त्रिपदायां च गायत्र्यां न भयं विद्यते क्वचित् ॥
“ तदित्यृचा समो नास्ति मंत्रो वेदचतुष्टये ।
“ सर्वे वेदाश्च यज्ञाश्च दानानि च तपांसि च । समानि कलया प्राहुर्मुनयो न तदित्यृचः ॥
“ परिहाप्यापि वेदांस्त्रीन् कर्माणि विविधानि च । सावित्रीमात्रमाश्रित्य द्विजो भवति निर्भयः” ॥
योगयाज्ञवल्क्यः—
“ वायुभक्षो दिनं स्थित्वा रात्रिं नीत्वा तु सूर्यदृक् । जप्त्वा सहस्रं गायत्र्याः शुचिर्ब्रह्मवधाद्दृते ॥
“ सायंप्रातस्तु यः संध्यामस्कन्नामुपतिष्ठते । जपन्वै पावनीं देवीं पवित्रां वेदमातरम् ॥
“ स तया पावितो देव्या ब्राह्मणो धूतकल्मषः । न सीदेत्प्रतिगृह्णानः पृथिवीं च ससागराम् ॥
“ गायत्र्या लक्षजापेन पातकेभ्यो विमुच्यते ॥
“ स्नायाच्छतेन गायत्र्याः शतमन्तर्जले जपेत् । अपः शतेन पीत्वा च सर्वपापैः प्रमुच्यते ॥
“ चतुर्णामपि वेदानां गायत्री जननी भवेत् । तामुपास्ते तु नित्यं स विप्रः पंक्तिपावनः ” ॥
मार्कंडेयः—
“ सर्वेषामपि पापानां संकरे समुपस्थिते । दशसाहस्रमभ्यस्ता गायत्री शोधयेत्ततः ” ॥
चतुर्विंशतिमते—
“ सावित्र्यास्तु जपन्कोटिब्रह्महत्त्यां व्यपोहति । लक्षाशीतिं जपेद्यस्तु सुरापानात्प्रमुच्यते ॥
“ पुनाति हेमहर्तारं गायत्र्या लक्षसप्ततिः । गायत्र्या षष्टिभिर्लक्षैः मुच्यते गुरुतल्पगः ॥
“ सावित्र्यष्टसहस्रं तु जपं कृत्वोत्थिते रवौ । मुच्यते सर्वपापेभ्यो यदि न ब्रह्महा भवेत्”॥ इति ।
याज्ञवल्क्यः(प्रा. ३१०)—
“ यत्र यत्र चं संकीर्णं आत्मानं मन्यते द्विजः । तत्र तत्र तिलैर्होमो गायत्र्या वचनं तथा ” ॥

योगयाज्ञवल्क्योऽपि—

" घृतयुक्तैस्तिलैर्वन्हौ हुत्वा तु सुसमाहितः । गायत्र्याः प्रयतः शुद्धः सर्वपापैः प्रमुच्यते " ॥

वसिष्ठः—

"यदा यदा तु संकीर्णमात्मानं मन्यते द्विजः । तदा तदा तिलैर्होमो गायत्र्या जप एव वा"॥ इति ।

स्मृतिरत्ने—

"गायत्री मूल्यमादाय परस्मै यः प्रयच्छति । स जीवन्नंत्यजातित्वं प्राप्नोतीह न संशयः"॥ इति ।

अथ जपविधिः । मनुः (२।८६)—

" आचम्य प्रयतो नित्यं उभे संध्ये समाहितः । शुचौ देशे जपन् जप्यमुपासीत यथाविधि "॥

शंखः—" कुशबृस्यां समासीनः कुशोत्तरायां वा कुशपवित्रपाणिरुदङ्मुखः सूर्याभिमुखो वाऽक्षमालामादाय देवतां ध्यायन् मंत्रजपं कुर्यात् " इति । मंत्रजपशब्दयोर्निर्वचनमुक्तं **स्मृतिरत्ने**—

" मकारं मन इत्याहुस्त्रकारं त्राणमेव च । मनस्त्राणसमायुक्तो मंत्र इत्यभिधीयते ॥

"जकारो जन्मविच्छेदः पकारः पापनाशनः । जन्मकर्महरो यस्मात् तस्माज्जप इति स्मृतः"॥इति।

आसीन इति वचनं सायंमध्यंदिनजपविषयम् । तथा च **मनुः**—(२।१०१)

"पूर्वां संध्यां जपंस्तिष्ठेत्सावित्रीमाऽर्कदर्शनात् । पश्चिमां तु समासीनः सम्यगाऽर्क्षविभावनात्"॥

आ ऋक्षविभावनादिति पदच्छेदः । आ नक्षत्रदर्शनादित्यर्थः । **स एव** (२।१०२)—

"पूर्वां संध्यां जपंस्तिष्ठन् नैशमेनो व्यपोहति । पश्चिमां तु समासीनो मलं हंति दिवा कृतम् "॥

स्थानासनयोरकरणे प्रत्यवायमाह **स एव** (२।१०३)—

" न तिष्ठति तु यः पूर्वामुपास्ते न तु पाश्चिमाम् । स शूद्रवद्बहिष्कार्यः सर्वस्मात् द्विजकर्मणः"॥ इति ।

माधवीये—

"तथा मध्यमसंध्यायामासीनःप्राङ्मुखो जपेत्।स्थितो जपेत्सदा कालमादित्याभिमुखो द्विजः"॥इति।

आदित्याभिमुखश्चेत्सदा प्रातर्मध्यान्हे च स्थित एव जपेत् इत्यर्थः ।

याज्ञवल्क्यः (आचारे २४-२५)—

"जपन्नासीत सावित्रीं प्रत्यगा तारकोदयात् । संध्यां प्राक् प्रातरेवं हि तिष्ठेदा सूर्यदर्शनात्" ॥

शौनकोऽपि—

"ऋष्यादीनि च संस्मृत्य सायमासीत वाग्यतः । प्रातस्तु प्राङ्मुखस्तिष्ठेन्मध्याह्ने सूर्यदिक्स्थितः"॥

गौतमः—(२।१७)" तिष्ठेत्पूर्वामासीतोत्तरां सज्योतिष्याज्योतिषो दर्शनाद्वाग्यतः" ॥ इति । यत्तु **आपस्तंबेनोक्तं**—(१।११।३०।८) " संध्ययोश्च बहिर्ग्रामादासनं वाग्यतः " ॥ इति । तत्रासनं स्थितेरप्युपलक्षणम् । वाग्यमनं च लौकिकवाङ्निवर्तनम् अन्यथा मन्वादिबहुस्मृतिव्याकोपप्रसंगात् । मन्वादिस्मृतिषु विहितस्य स्थानस्य प्रकरणात् ब्रह्मचारिविषयत्वकल्पने ब्रह्मचारिणमनधिकृत्य द्विजमात्रमधिकृत्य प्रवृत्तानां स्थानासनविशिष्टजपविधायकश्रुतिस्मृतीनामनन्वयप्रसंगः ।

तथा **छांदोग्ये श्रूयते**— "कस्माद्ब्राह्मणः सायमासीनः संध्यामुपास्ते कस्मात् प्रातस्तिष्ठन् यत्सायमासीनः संध्यामुपास्ते तयौ वीरस्थानं जयति यत्प्रातस्तिष्ठंस्तयौ स्वर्गलोकं जयति" ॥ इति ।

अखण्डादर्शे—"वाग्यतः प्राङ्मुखस्तिष्ठेत् गायत्र्या जपमाचरन्" ॥ इति ।

योगयाज्ञवल्क्योऽपि—"प्रातस्तिष्ठन् द्विजः सन्ध्याजपं कुर्यात्" ॥ इति ।

मनुरपि—(४।९३)

"उत्थायावश्यकं कृत्वा कृतशौचःसमाहितः।पूर्वां संध्यां जपंस्तिष्ठेत् स्वकाले चापराण्हिकम्"॥इति। अत्र सर्वत्र तिष्ठन् जपेदिति व्यत्ययेनान्वयः। जपस्यैव प्रधानत्वात्तदंगत्वात्स्थानासनयोरिति **चंद्रिकायां** व्याख्यातम्। अत एव **शङ्खः**—"पूर्वां सन्ध्यां जपेत्तिष्ठन् आसीनः पश्चिमां तथा"॥इति।

गृह्यपरिशिष्टे—(१।५) "देवीमावाह्य तिष्ठन्नर्धनक्षत्रेष्वामंडलदर्शनान्मंत्रार्थमनुसंदधानः प्रणवव्याहृतिपूर्विकां सावित्रीं जपेत्" ॥ इति । **स्मृत्यर्थसारेऽपि**—

"आसूर्यदर्शनात्तिष्ठन् प्राङ्मुखो गायत्रीं जपेत्।आनक्षत्रदर्शनात्सायमासीनः प्रत्यङ्मुखो जपेत्"॥इति।

चंद्रिकायाम् (पृ. १३५ पं. १०)—

"पूर्वां संध्यां सनक्षत्रामुपक्रम्य यथाविधि। गायत्रीमभ्यसेत्तिष्ठन्यावदादित्यदर्शनम्" ॥ इति ।

व्यासोऽपि—"तिष्ठन् प्रातर्जपेद्देवीमासीनः पश्चिमां जपेत्"॥ इति । एवं च गायत्रीजपस्य प्रधानत्वात् तदनुवर्तित्वाङ्गस्योदयानन्तरं गौणकाले 'जपं कुर्वन्नपि तिष्ठन्नेव कुर्यात्' 'तिष्ठेदा सूर्यदर्शनात्' इत्यादिवचनं तु गायत्रीजपस्य मुख्यकालविधिपरं न तु उदयानन्तरमासनविधिपरम्। 'अग्निकार्यं ततः कुर्यात्' इति उदयानन्तरं होमविधानादुदयानंतरमासीतेतिवचनाभावाच्च । न च 'तिष्ठेदा सूर्यदर्शनात्' इति वचनादुदयानंतरमर्थसिद्धमासनमिति वाच्यम्। 'आसीनः पाश्चिमां संध्याम्' इति पश्चिमायामेव आसनविधानादन्यत्र स्थितेरर्थसिद्धेः । न च प्रातः सूर्यदर्शनपर्यन्तं स्थानस्य सायं नक्षत्रोदयपर्यन्तमासनस्य विधानात् तदन्तरालकाले स्थानमासनं वा वैकल्पिकमिति वाच्यम्। कालविशेषाभिधायिवचननिचयेन व्यवस्थासिद्धेः ।

तथा च **भारद्वाजसंवर्तव्यासाः**—

"सहस्रपरमां देवीं शतमध्यां दशावराम्। गायत्रीं वै जपेत्प्रातः प्राङ्मुखः प्रयतः स्थितः" ॥इति।

योगयाज्ञवल्क्योऽपि—"प्रातस्तिष्ठन् जपेत्" ॥ इति ।

मनुरपि—(२।१०१) "पूर्वां सन्ध्यां जपंस्तिष्ठन्नैशमेनो व्यपोहति" इति । एतेषु वचनेषु उदयात्पूर्वापरभावविवेकविरहात् प्रातःकालस्थितिपरत्वात् असति विशेषोपस्थापके सामान्यसङ्कोचस्य अयुक्तत्वात् सूर्योदयानन्तरमासनस्य कल्पने सायं नक्षत्रोदयानन्तरं गौणकालजपे स्थितेरपि कल्पनाप्रसङ्गात् । तस्मात् 'प्रातस्तिष्ठन् सायमासीनः' इत्याहुः । **यमः**—

"सहस्रपरमां देवीं शतमध्यां दशावराम्। गायत्रीं तु जपेन्नित्यं सर्वपापप्रणाशिनीम्"॥ इति ।

बोधायनस्तु विशेषमाह (२।४।५–१०)—

"दर्भेष्वासीनो दर्भान् धारयमाणः सोदकेन पाणिना प्रत्युङ्मुखः सावित्रीं सहस्रकृत्व आवर्तयेत् । प्राणायामसहस्रशो वा शतकृत्व उभयतः प्रणवां सप्तव्याहृतिपूर्विकां मनसा वा दशकृत्वस्त्रिभिश्च प्राणायामैस्तान्तो एवं प्रातः प्राङ्मुखस्तिष्ठन्" ॥ इति ।

---

१ क्ष–था ।

योगयाज्ञवल्क्योऽपि—

"सहस्रकृत्वः सावित्रीं जपेदव्यग्रमानसः। शतकृत्वोऽपि वा सम्यक्प्राणायामपरो यदि ॥

" सप्तव्याहृतिपूर्वां चेदाद्यन्तप्रणवान्विताम् । मनसा वा जपेच्चैव दशकृत्वो वरः स्मृतः"॥ इति ।

व्यासः—

" सहस्रपरमां नित्यं शतमध्यां दशावराम् । सावित्रीं वै जपेद्विद्वान् प्राङ्मुखः प्रयतः शुचिः "॥

अत्र **चंद्रिकायां** व्यवस्था कृता (पृ. १५१ पं. ४)—दशावरामित्यापद्विषयं आशौचविषयं च । "आपन्नश्चाशुचिः काले तिष्ठन्नपि जपेद्दश" इत्याश्वलायनेनोक्तत्वात् । 'सहस्रपरमाम्' इति 'सहस्रकृत्व' इति वचनं वानप्रस्थादिविषयम् । 'शतमष्टोत्तरम्' इत्यनुदितहोमिगृहस्थब्रह्मचारिविषयम् । ब्रह्मचारिणोऽपि 'सन्ध्ययोरग्निकर्म च' इति प्रागुदयादग्निकार्य**स्मरणात्** । उदितहोमिनस्तु 'सावित्रीमार्कदर्शनात्' इति **मन्वाद्युक्तं** द्रष्टव्यम् । **योगयाज्ञवल्क्यः**—

" ब्रह्मचार्याहिताग्निश्च शतमष्टोत्तरं जपेत् । वानप्रस्थो यतिश्चैव सहस्रादधिकं जपेत् "॥

तयोरनग्नित्वेन होमकालानतिपत्तेरिति भावः । आहिताग्निग्रहणमेकाग्नेरप्युपलक्षणम् ।

तथा च **संवर्तः**—

" गृहस्थो ब्रह्मचारी च शतमष्टोत्तरं जपेत् । वानप्रस्थो यतिश्चैव जपेदष्टसहस्रकम् " ॥

स्मृत्यर्थसारे—

" ब्रह्मचारी गृहस्थश्च शतमष्टोत्तरं जपेत् । वानप्रस्थो यतिश्चैव सहस्रादधिकं जपेत् ॥

" दशापत्सु जपेद्देवीमष्टाविंशतिमेवं वा " ॥ इति । ननु 'सावित्रीमार्कदर्शनात्' इत्युदयपर्यंतं जपविधानात् "न चान्तरान्याहरेत्तु विरमेद्वा कथंचन" "नान्तरा विरमेत्कश्चित्" इति । **व्यासशौनकाभ्यां** जपमध्ये विरमणस्य प्रतिषिद्धत्वादुदितहोमिन आहिताग्नेर्विरमणलोपप्रसंगः । मैवम् । श्रुतिविरोधे सति मध्ये विरमणे अविरोधात् । अत **एवापस्तंबः** (१।११।३०।९)— " विप्रतिषेधे श्रुतिलक्षणं बलीयः " ॥ इति । **शंखः**—

"स्वरवर्णपदैर्वाक्यं शुद्धमावर्तयन् जपेत् । न कंपयेच्छिरो ग्रीवा दंतान्नैव प्रघट्टयेत्" ॥

तच्च वाक्यं **मनुनोक्तम्**—(२।७८)

" एतदक्षरमेतां च जपन्व्याहृतिपूर्विकाम् । संध्ययोर्वेदविद्विप्रो वेदपुण्येन युज्यते " ॥

एतदक्षरं प्रणवम् । एतां गायत्रीम् । **व्यासोऽपि**—

" प्रणवव्याहृतियुतां गायत्रीं तु ततो जपेत् । समाहितमनास्तूष्णीं मनसाऽपि[3] विचिंतयेत् " ॥

पितामहः—

" प्रणवव्याहृतीस्तिस्रो गायत्रीं च जपेत्क्रमात् । प्रणवव्याहृतियुता स्वाहांता होमकर्मणि " ॥

" शुद्धा वाऽत्र प्रयोक्तव्या प्रणवव्याहृतीर्विना " ॥ **स्मृतिरत्ने**—

" शुद्धयैव तु होतव्यं गायत्र्या होमकर्मणि । त्रिकेणैव जपः कार्यो जपयज्ञप्रसिद्धये " ॥

प्रणवो व्याहृतयो गायत्री चेति त्रिकम् । **बोधायनः** (२।५।१४)—"प्रणवो व्याहृतयस्तिस्रः सावित्री चेत्येते पंचब्रह्मयज्ञा अहरहर्ब्राह्मणं किल्बिषात् पावयंत " इति ॥

यत्तु **योगयाज्ञवल्क्य** आह

" ओंकारं पूर्वमुच्चार्य भूर्भुवस्वस्तथैव च । गायत्रीं प्रणवं चांते जप एवमुदाहृतः ॥

---

१ **खग**—मष्ट । २ **गघक्ष**—हरण । ३ **गघ**—वापि ।

" एषा संपुटगायत्री सर्वपापप्रणाशिनी " । यद्यपि **बोधायनः** (ध. सू. २।४।७) " उभयतः प्रणवां सव्याहृतिकां जपेत् " इति । यद्यपि **वृद्धमनुः**—

" षडोंकारान् जपेद्विप्रो गायत्रीं मनसा शुचिः । अनेकजन्मजैः पापैर्मुच्यते नात्र संशयः ॥
" तिस्रो व्याहृतयः पूर्वं पृथगोंकारसंयुताः । पुनः संहृत्य चोंकारं मंत्रस्याद्यंतयोस्तथा " ॥ इति

तत्सर्वं गृहस्थब्रह्मचारिव्यतिरिक्तविषयम् । तथा च **स्मृतिरत्नावल्याम्**—

" संपुटैकषडोंकारा गायत्री त्रिविधा मता । तत्रैकप्रणवा ग्राह्या गृहस्थैर्जपकर्मणि ॥
" गृहस्थवत्तु जप्तव्या सदैव ब्रह्मचारिभिः । संपुटा च षडोंकारा भवेतामूर्ध्वरेतसाम् " ॥

स्मृतिसारसमुच्चये—

"गृहस्थो ब्रह्मचारी च प्रणवाद्यामिमां जपेत् ।अंते यः प्रणवं कुर्यात् नासौ वृद्धिमवाप्नुयात्"॥ इति।

वृद्धमनुः—

" सोंकारा चतुरावृत्या विज्ञेया सा शताक्षरा । शताक्षरां समावृत्य सर्ववेदफलं लभेत् ॥
"एतया ज्ञातया नित्यं वाङ्मयं विदितं भवेत् । उपासितं भवेत्तेन विश्वं भुवनसप्तकम्" ॥ इति ।

अस्यार्थश्चंद्रिकायामभिहितः (पृ. १४९ पं. २०)– " सोंकारेत्यनेन व्याहृतीनां संख्यानानुप्रवेश उच्यते । एवं च ओंकारेण सह पंचविंशत्यक्षरा संपद्यते । मंत्रे तु व्याहृतित्रयस्यानुप्रवेशोऽस्त्येव " । इति । अत एव **विश्वामित्रः**—

" प्रणवोऽप्यत्र मंत्रादौ व्याहृतित्रितयं ततः । जपे प्रशस्ता सावित्री प्रणवेन समन्विता ॥
" अतिप्रशस्ता तेनापि व्याहृतित्रितयेन च " ॥ इति ।

संवर्तोऽपि—" प्रणवाद्यां तु संध्यायां जपेत् व्याहृतिभिः सह " ॥ इति । **व्यासः**—

" त्रिसंध्यासु जपेद्देवीं विच्छिद्यैव पदत्रयम् । अविच्छिन्नां जपेद्यस्तु रौरवं नरकं व्रजेत् " ॥

विष्णुः—

" अछिन्नपादा गायत्री ब्रह्महत्यां प्रयच्छति । छिन्नपादा तु गायत्री ब्रह्महत्यां व्यपोहति ॥
" तस्मात्पादत्रयं छित्वा जपयज्ञं समाचरेत् " ॥ **स्मृतिरत्नावल्याम्**—

"अछिन्नपादं गायत्र्या जपं कुर्वंति ये द्विजाः। अधोमुखास्ते तिष्ठन्ति कल्पकोटिशतान्यपि"॥इति।

जपयज्ञस्य भेदोऽभिहितो **माधवीये**—

" वाचिकाख्य उपांशुश्च मानसश्च त्रयः स्मृताः । त्रयाणां जपयज्ञानां श्रेयान् स्यादुत्तरोत्तरः "॥

एतेषां लक्षणं **तत्रै**वोक्तम्

" यदुच्चनीचस्वरितैः स्पष्टैः स्पष्टपदाक्षरैः । मंत्रमुच्चारयेद्वाचा जपयज्ञः स वाचिकः ॥
" शनैरुदीरयेन्मंत्रं ईषदोष्ठौ प्रचालयेत् । किंचिच्छब्दं स्वयं विद्यादुपांशुः स जपः स्मृतः " ॥

विश्वामित्रः—

" धिया यदक्षरश्रेण्या वर्णाद्वर्णं पदात्पदम् । मंत्रार्थचिंतनं भूयः कथ्यते मानसो जपः ॥
" उत्तमं मानसं जप्यं उपांशुर्मध्यमः स्मृतः । अधमं वाचिकं प्राहुः सर्वमंत्रेषु वै द्विजाः ॥
" वाचिकस्यैकमेकं स्यादुपांशुः शतमुच्यते । सहस्रं मानसं प्रोक्तं मन्वत्रिभृगुनारदैः " ॥

हारीतः—" मंत्रमुच्चारयेद्वाचा जपयज्ञः स वाचिकः ।
" स उपांशुजपो शब्दश्चलजिव्हादशच्छदः । मानसस्त्वचलज्जिव्हादशनच्छद ईरितः ॥

“ उच्चैस्त्वेकगुणः प्रोक्तो ध्वानो दशगुणः स्मृतः । उपांशुः स्याच्छतगुणः सहस्रो मानसः स्मृतः॥
“मुक्तिदो मानसो ज्ञेय उपांशुः सर्वसिद्धिदः। त्रिविधो जपयज्ञः स्याद्वाचिकः क्षुद्रकर्माणि”॥इति।

वैयाघ्रपादः—

“ त्रिविधो जपयज्ञः स्यान्मानसोपांशु वाचिकैः।
“ परश्रवणयोग्यः स वाचिकं उदीरितः । उपांशुश्रेष्ठसंस्पर्शमात्रः स्वश्रुतिगोचरः ॥
“ यो भवेद्चलज्जिव्हादशनावरणो जपः । स मानसः समाख्यातो जपः श्रुतिविभूषणैः ॥
“ उच्चैर्जपात् विशिष्टः स्यादुपांशुर्दशभिर्गुणैः । जिव्हाजपः शतगुणः सहस्रो मानसः स्मृतः ॥
“ मानसः सिद्धिकामानां पुष्टिकामैरुपांशुकः । वाचिको मारणे चैव प्रशस्तो जप ईरितः”॥

यत्तु **व्यासेनोक्तम्**—“मनसैव जपं कुर्यात् साविञ्यास्तु विशेषतः ” इति तन्मानसजपप्रशंसाभिप्रायं न पुनरुपांशुत्वनिषेधार्थं तथात्वे “उपांशुजपयुक्तस्य शंसाच्छतगुणो भवेत्” इत्यादवचनविरोधः स्यात् । शंस उच्चैर्जपः । **जपनियममाह शौनकः**—

“ कृत्वोत्तानौ करौ प्रातः सायं चाधोमुखौ तथा। मध्ये स्तब्धकराभ्यां तु जप एवमुदाहृतः ” ॥

व्यासोऽपि—

“ प्रातरुत्तानपाणिभ्यां स्तब्धाभ्यां दिनमध्यमे । अधोमुखाभ्यां पाणिभ्यां सायं संलक्षितो जपेत् ॥
“ प्रातर्नासा समौ कुर्यात् मध्यान्हे तूरसा समौ । सायंकाले नाभिसमौ करौ कुर्यादतंद्रितः ॥
“अपवित्रकरो शुद्धः प्रलपन्न जपेत्क्वचित् । अप्रावृतकरो वाऽपि शिरसि प्रावृतोऽपि वा”॥ इति ।

शौनकः—

“ मनःसंतोषणं शौचं मौनं मंत्रार्थचिंतनम् । अव्यग्रत्वमानिर्वेदो जपसंपत्तिहेतवः” ॥

व्यासः—“न प्रकोशं न च हसन्न पार्श्वमवलोकयन्। नापाश्रितो न जल्पंश्च न प्रावृतशिरास्तथा ॥
“ न पदा पदमाक्रम्य न चैव हि तथा करौ । न चासमाहितमना न च संश्रावयन्जपेत् ” ॥

अपाश्रितः स्तंभादिश्रितः । “ जपकाले न भाषेत व्रतहोमादिकेषु च ।
“ एतेष्वेवावसक्तस्तु यद्यागच्छेद्विजोत्तमः । अभिवाद्य ततो विप्रं योगक्षेमं च कीर्तयेत् ” ॥

बोधायनः—

“ विरमेद्ब्राह्मणे प्राप्ते कामं तेन च संवदेत् । शूद्रं दृष्ट्वा तु संप्राप्तं नाधीयीत कथंचन ” ॥

शूद्रं दृष्ट्वा विरमेदेव न संवदेदित्यर्थः । **संवर्तः**—

“ लोकवार्तादिकं श्रुत्वा स्पृष्ट्वा दृष्ट्वा प्रभाषिणम्। संख्या विना च यज्जप्तं तत्सर्वं निष्फलं भवेत् ”॥

प्रभाषिणं बहुभाषिणम् ।

“ प्रभाषणं च तन्द्रां च परुषं बहुभाषणम् । क्रोधं मांद्यं क्षुतं निद्रां निष्ठीवनविजूंभणे ॥
“ दर्शनं च श्वनीचानां वर्जयेज्जपकर्मणि । आचामेत्संभवे चैषां स्मरेद्विष्णुसुरार्चितम् ॥
“ ज्योतींषि च प्रपश्येद्वा कुर्याद्वा प्राणसंयमम् । ज्वलनं गाश्च विप्रांश्च यतीन्वापि विशुद्धये”॥

रत्नावल्याम्—

“ चंडालाशुचिपतितान् दृष्ट्वाचम्य पुनर्जपेत् । तैरेव भाषणं कृत्वा स्नात्वाऽऽचम्य जपेत्पुनः॥
“ असत्यभाषणं जिम्हभाषणं वर्जयेत्सदा । सत्यैरपि न भाषेत जपहोमार्चनादिषु ” ॥

नारदः—“श्वशूद्रपतितांश्चैव रासभं च रजस्वलाम् । दृष्ट्वा तोयमुपस्पृश्याभाष्य स्नात्वा पुनर्जपेत् ॥

१ **खगघ**—भाविक । २ **गघ**—प्रकामत् ।

"मार्जारं कुक्कुटं क्रौंचं श्वानं गृध्रं खरं कपिम् । दृष्ट्वाचम्याचरेत्कर्म स्पृष्ट्वा स्नानं विधीयते"॥ इति।
बोधायनः—
" संध्ययोरुभयोर्जप्ये भोजने दंतधावने । पितृकार्ये च दैवे च तथा मूत्रपुरीषयोः ॥
" गुरूणां सन्निधौ दाने यागे चैव विशेषतः । एतेषु मौनमातिष्ठन् स्वर्गं प्राप्नोति मानवः " ॥
योगयाज्ञवल्क्यः—
" यदि वाग्यमलोपः स्यात् जपादिषु कदाचन । व्याहरेद्वैष्णवं मंत्रं स्मरेद्वा विष्णुमव्ययम् ॥
" तद्विष्णोरिति मंत्रोऽयं स्मर्तव्यं सर्वकर्मसु । गायत्री वैष्णवी ह्येषा प्रोक्तेदं विष्णुरित्यपि "॥
प्रजापतिः—
" प्रमादात्कुर्वतां कर्म प्रच्यवत्यध्वरेषु यत् । स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः " ॥
अध्वरेषु जपादियज्ञेषु । **बोधायनः** (१।५।७५)— " नाभेरधः संस्पर्शं कर्मयुक्तो वर्जयेत् " इति ।
यमोऽपि—
" नाभेरधः स्वकायं तु स्पृष्ट्वा प्रक्षालयेत्करौ । दक्षिणं वा स्पृशेत्कर्णं स्मरेद्वा विष्णुमव्ययम्" ॥
सुमंतुः—
" नान्यैर्थोक्तिर्नान्यमना न च व्यत्यस्तपत्करः । न जपेत्प्रलपन्वाऽपि कृतं निष्फलमुच्यते" ॥
व्यासः—
" होमः प्रतिग्रहो दानं भोजनाचमने जपः । न बहिर्जानु कार्याणि सांगुष्ठानि समाचरेत् ॥
" उष्णीषी कंचुकी नग्नो मुक्तकेशो गलावृतः । चिंताव्याकुलचित्तो वा श्रांतः क्रुद्धो बुभुक्षितः॥
" अनासनः शयानो वा गच्छन्नुत्थित एव वा । रथ्यायामशिवस्थाने न जपेत्तिमिरावृते ॥
" उपानद्गूढपादो वा यानशय्यागतस्तथा । प्रसार्य न जपेत्पादावुत्कटासन एव वा ॥
"जपेन्न प्रौढपादश्च नावष्टब्धोऽलसोऽशुचिः । नासंख्यानो ह्यदर्भश्च नाशिखाकच्छबंधनः"॥ इति ।
भरद्वाजः—
" निष्ठीवजृंभणे क्रोधनिद्रालस्यक्षुधो मंदः । पतितश्वान्त्यजा लोका दर्शते जपवैरिणः " ॥
शांडिल्यः—
" प्रदक्षिणे प्रणामे च पूजायां हवने जपे । न कंठावृतवस्त्रः स्यात् दर्शने गुरुदेवयोः ॥
" आचार्यं भगवद्भक्तं भगवन्मंदिरं जलम् । अश्वत्थमग्निमर्कं च पृष्ठीकृत्य जपेन्न तु ॥
" आर्द्रवासास्तु यः कुर्याज्जपं होमं प्रतिग्रहम् । सर्वं तद्राक्षसं विद्याद्बहिर्जानु च यत्कृतम्"॥ इति।
आर्द्रवासा इति स्थलविषयम् । यदाह **व्यासः**—
" यदि स्यात्क्लिन्नवासा वै वारिमध्यगतो जपेत् । अन्यथा तु शुचौ भूम्यां दर्भेषु सुसमाहितः ॥
" न क्लिन्नवासा स्थलगो जपादीनाचरेद्बुधः । व्रतार्हते नार्द्रवासा आचरेन्नैकवाससा ॥
" न जीर्णेन न नीलेन परिक्लिष्टेन वा जपेत् " ॥ इति । ' यदि स्यात्क्लिन्नवासा ' इति च आपद्विषयं गायत्रीजपव्यतिरिक्तविषयं वा ।
"मतिमान्न कदाचित्तु गायत्रीमुदके जपेत् । गायत्र्यग्निमुखी प्रोक्ता तस्मादुत्तीर्य तां जपेत् "॥ इति **गोभिलस्मरणात्** । **सुमंतुः**—
" खंडवस्त्रावृतस्यैव वस्त्रार्धालंबिनस्तथा । उत्तरीयव्यपेतस्य समस्ता निष्फलाः क्रियाः ॥

---

१ **क्ष**–पी । २ **क्ष**–नाधोरात्नि; **गघ**–नाधोरात्नि । ३ **क्ष**–विव । ४ **ख**–द्व । ५ **क्ष**–न्तरे ।
६ **ख**–व्या; **गघ**–(सं)ख्यो । ७ **क्ष**–दमः । ८ **ख**–दिकं ।

" संख्या चैवोपवीतेन जपहोमादि निष्फलम् " ॥ इति । **गौतमः**—
"गच्छतस्तिष्ठतो वाऽपि स्वेच्छया कर्म कुर्वतः। अशुचेर्वा विना संख्यां तत्सर्वं निष्फलं भवेत्"॥ इति।
तिष्ठत इति वचनं गायत्रीव्यतिरिक्तमंत्रविषयम् । जपांगभूतामक्षमालामाह **हारीतः**—
" शंखरूप्यमयी माला कांचनी निंबजैः फलैः । पद्माक्षकैश्च रुद्राक्षैः विद्रुमैर्मणिमौक्तिकैः ॥
" रजतेंद्राक्षकैर्माला तथैवांगुलिपर्वभिः । पुत्रजीवमयी माला शस्ता वै जपकर्मणि " ॥ इति ।
योगयाज्ञवल्क्यः—
" स्फटिकेंद्राक्षरुद्राक्षैः पुत्रजीवसमुद्भवैः । अक्षमाला तु कर्तव्या ह्युत्तमा ह्युत्तरोत्तरा " ॥ इति ।
चंद्रिकायाम् (पृ. १५२ पं. १९)—
"अक्षसूत्रं तु कर्तव्यं मुक्तामणिमयं शुभम्। सौवर्णं राजतं ताम्रं स्फाटिकं वाऽथ कारयेत्"॥ इति।
स्मृत्यर्थसारेऽपि—
" हस्तेनावर्तयेद्देवीमक्षसूत्रैरथापि वा । सौवर्णै राजतैस्ताम्रैः स्फाटिकै रत्नजैस्तथा ॥
" अरिष्टैः पुत्रजीवोत्थैरिंद्राक्षैः शंखसंभवैः । रुद्राक्षैरपि पद्माक्षैः कुशग्रंथिभिरेव वा ॥
" मणिभिस्त्वक्षसूत्रं स्यात्तदष्टशतसंख्यया । चतुःपंचाशता वाऽपि सप्तविंशतिरेव वा " ॥ इति ।
प्रजापतिः—
" अष्टोत्तरशतं कुर्यात् चतुःपंचाशतं तथा। सप्तविंशतिका कार्या ततो न्यूनं न कारयेत्"॥ इति।
स्मृत्यन्तरेऽपि—
" अष्टोत्तरशतैर्माला पञ्चाशच्चतुरुत्तरैः । सप्तविंशतिभिः कार्या सर्वसाधारणे जपे ॥
" अष्टोत्तरशतैर्माला ह्युत्तमा परिकीर्तिता । चतुःपंचाशता माला मध्यमा परिकीर्तिता ॥
" अधमा प्रोच्यते माला सप्तविंशतिसंख्यया " ॥ इति ।
गौतमः "अंगुल्या जपसंख्यानमेकमेकमुदाहृतम् । रेखयाऽष्टगुणं पुत्रजीवैर्दशगुणाधिकम् ॥
" शतं स्याच्छङ्खमणिभिः प्रवालैश्च सहस्रकम् । स्फटिकैर्दशसाहस्रं मौक्तिकैर्लक्षमुच्यते ॥
" पद्माक्षैर्दशलक्षं तु सौवर्णैः कोटिरुच्यते । कुशग्रंथ्या च रुद्राक्षैरनंतं फलमुच्यते ॥
" तुलसीकाष्ठघटितैर्मणिभिर्जपमालिका । सर्वकर्मणि सर्वेषां ईप्सितार्थफलप्रदा ॥
" तत्रांगुलिजपं कुर्वन् सांगुष्ठांगुलिभिर्जपेत् । अंगुष्ठेन विना कर्म कृतं तदफलं यतः ॥
" अंगुलीर्न नियुंजीत किंचिदाकुंचिते तले । अंगुलीनां नियोगात्तु छिद्रेषु स्रवते जपः " ॥
हारीतोऽपि—
" शङ्खैः शतगुणं जप्यं रौप्यैश्चैव सहस्रकम् । जप्यं शतगुणं प्रोक्तं निम्बारिष्टकमालया ॥
" इन्द्राक्षैर्लक्षगुणितं विद्रुमैर्दशलक्षकम् । मौक्तिकैः स्फटिकैश्चैव कोटिकोटिगुणोत्तरम् ॥
" परिसंख्या न विज्ञेया रुद्राक्षाङ्गुलिपर्वभिः । पद्मजैः पुत्रजीवैश्च परिसंख्या न विद्यते ॥
" मणिमेकैकमादाय श्वेतसूत्रे प्रयोजयेत् । मुखं मुखेन संयोज्य पृष्ठं पृष्ठेन योजयेत् ॥
" प्रोक्तसंख्यान्यमेकाक्षं मेरुत्वेनाग्रतो न्यसेत् । एकैकमणिमध्ये तु ग्रंथिबन्धं प्रकल्पयेत् ॥
" जपमालां विधायेत्थं ततः संस्कारमारभेत् । क्षालयेत्पंचगव्यैस्तां सद्योजातादिकैर्जलैः ॥
" चंदनागरुगंधाद्यैर्वामदेवेन घर्षयेत् । धूपयेत्तामघोरेण लिंपेत्तत्पुरुषेण तु ॥
" मंत्रेण शतवारं तु पंचमेनाभिमंत्रयेत् । मेरुं च पंचमेनैव तथा मंत्रेण मंत्रयेत् ॥

---

१ गघ–तेन वै ।

" जप्यमंत्रेण तां मालामभिमंत्र्य सुगोपयेत् । मध्यमायां न्यस्तमालां ज्येष्ठया वर्तयेत्क्रमात् ॥
" अपि वांऽगुष्ठमध्यस्थां चालयेन्मध्यमाग्रतः । न स्पृशेत् वामहस्तेन करभ्रष्टां न कारयेत् ॥
" तर्जन्या न स्पृशेत्सूत्रं कंपयेन्न विधूनयेत् । प्रमादात्पतिते हस्ताच्छतमष्टोत्तरं जपेत् ॥
"जीर्णे सूत्रे पुनः सूत्रं ग्रंथयित्वा शतं जपेत् । भुक्तिमुक्तिप्रदः सोऽयं मालिकागणनक्रमः"॥ इति।

गौतमः—

" अंगुष्ठं मोक्षदं विद्यात्तर्जनी शत्रुनाशिनी । मध्यमा धनकामायानामिका पौष्टिकी तथा ॥
" कनिष्ठा रक्षिणी प्रोक्ता जपकर्मणि शोभना । अंगुष्ठेन विना जप्यं कृतं तदफलं भवेत् ॥
" उल्लंघिते तथा मेरौ पतिते चाक्षसूत्रके । प्राणायामत्रयं कृत्वा घृतप्राशनमाचरेत् " ॥ इति ।

रुद्राक्षं प्रकृत्य **स्कंदपुराणे**—

" लक्षकोटिसहस्रस्य लक्षकोटिशतस्य च । जपे च लभते पुण्यं नात्र कार्या विचारणा ॥
" उच्छिष्टो वाऽपि कर्मस्थः संयुक्तः सर्वपातकैः । लिप्यते न स पापेन रुद्राक्षस्य तु धारणात् ॥
" कंठे रुद्राक्षमाधाय यश्चापि म्रियते यदि । सोऽपि रुद्रत्वमाप्नोति किंपुनर्मानुषादयः"॥ इति।
" यः कुर्यात्तुलसीकाष्ठैरक्षमालां सुरूपिणीम् । कंठमालां च यत्नेन कृतं तस्याक्षयं भवेत् " ॥

इत्यादिवचनं भाक्तमित्याहुः । अत एव **स्मृतिरत्नावल्यां स्मृतिरत्ने च** धारणनिषेध उक्तः—

" तुलसीकाष्ठसंभूतां स्कंधे मालां बिभर्ति यः । स शूद्रवद्बहिष्कार्यः सर्वस्मात् द्विजकर्मणः ॥
"स्कंधे कंठे शिखायां वा यस्तु धारयते मणीन्। दैवे कर्मणि पित्र्ये च तं विप्रं दूरतस्त्यजेत्"॥इति।

विष्णुः—

" आवृत्य गणयेन्मंत्रं जपेच्चांगुलिपर्वभिः । जपस्यावृत्तिगणने पुण्यसंख्या न विद्यते " ॥

रत्नावल्याम्—

" पर्वभिश्च जपः कार्यो नांगुलीनां निपातनैः । तन्निपातैस्तु यज्जप्तं सर्वं विद्यात्तदासुरम् " ॥

रेखागणनप्रकारमाह **शंखः**— " अथांगुलीनां रेखाभिः जपमन्वहमाचरेत् ॥
" प्रारभ्यानामिकायास्तु मध्यमे पर्वणि क्रमात् । तर्जनीमूलपर्यंतं जपेद्दशसु पर्वसु ॥
" मध्यमांगुलिमूले तु यत्पर्वद्वितयं भवेत् । तं वै मेरुं विजानीयाज्जपेत्तं नातिलंघयेत् ॥
" अनामिकामूलपर्व प्रारभ्यापि क्रमेण तु । मध्यमामूलपर्यंतं जपेद्दशसु पर्वसु ॥
" मध्यांगुलेर्मध्यरेखां समारभ्य प्रदक्षिणम् । मध्यमामूलपर्यंतमंगुष्ठेन यथाक्रमम् ॥
" स्पृष्ट्वा द्वादशसंख्या स्यादेकवारेण तत्रव । वामहस्तेन संख्यातं शतमष्टोत्तरं स्मृतम् " ॥ इति ।

अत्र पक्षत्रये यथोपदेशं विकल्प इत्याहुः । **रत्नावल्याम्**—

" पर्वभिस्तु जपेद्देवीमन्यत्रानियमः स्मृतः । गायत्र्या वेदमूलत्वात् वेदः पर्वसु गीयते "॥ इति ।

तदेतद्रुद्राक्षकुशग्रंथ्योरप्युपलक्षणम् । यदाह **प्रजापतिः**—

" ब्राह्मैरानंत्यमाप्नोति रौद्रैश्च मणिभिर्बुधः । ब्राह्मः कुशमयो रौद्रो रुद्राक्षः पापनाशनः ॥
"सावित्र्यास्तु जपस्ताभ्यामेकोऽप्यानंत्यमृच्छति।गायत्र्या वेदबीजत्वात्पर्वभिश्च जपःस्मृतः"॥इति।

गौतमः—

"अनेन विधिना नित्यं जपं कुर्यात्प्रयत्नतः। प्रपन्नो विपुलान् भोगान्[१] भुक्तिं मुक्तिं च विंदति"॥इति।

पितामहः—

" एवं जप्त्वा यथाशक्ति ह्युदिते तु दिवाकरे । उत्तमेत्यनुवाकेन उद्वास्य तु यथागतम् ॥

---

१ ख–लोकान् ।

" उत्तमेत्यनुवाकस्य वामदेव ऋषिः स्मृतः। अनुष्टुप् च तथा छंदो गायत्री देवता स्मृता "॥

अथोपस्थानम्। व्यासः—

" अथोपतिष्ठेदादित्यमुदयंतं समाहितः। मंत्रैस्तु विविधैः सौरै ऋग्यजुःसामसंभवैः" ॥ इति। उपस्थानं तु स्वशाखाधीतैः मंत्रैः कार्यम्। " उपस्थानं स्वकैर्मंत्रैरादित्यस्य तु कारयेत् " इति **वसिष्ठस्मरणात्। चंद्रिकायाम्** (पृ. १३९ पं. ८) " यजुःशाखिनां 'मित्रस्य' 'मित्रो जनान्' 'प्रसमित्र' इति तिसृभिरुपस्थानम्। तासां प्रथमा गायत्री उत्तमे त्रिष्टुभौ विश्वेदेवा ऋषयः। मित्रो देवता सूर्योपस्थाने विनियोगः" इति। **पितामहः—**

" मित्रस्येति तृचस्येह विश्वामित्र ऋषिः स्मृतः। हिरुग्गायत्रमादिस्तु त्रिष्टुभावथ पश्चिमौ॥

" देवता चैव मित्रः स्यादित्युवाच बृहस्पतिः॥

"एताभिः प्रांजलिः सम्यग्विस्पष्टोदितमंडलम्। सहस्रांशुं भगवंतमुपतिष्ठेत भास्करम्" ॥ इति। सायंसंध्यायामुपस्थाने मंत्रविशेषमाह **नारायणः**— " वारुणीभिः आदित्यमुपस्थाय प्रदक्षिणं कुर्वन् दिशो नमस्कुर्यात्" इति। वारुण्यश्च 'इमं मे वरुणः श्रुधी' इत्यादयः यद्यपि वारुणीभिः वरुणस्यैवोपस्थानं लिंगवशात् प्राप्तं तथापि श्रुतेः प्राबल्यात् तथा लिंगं बाधित्वादित्योपस्थान एव मंत्रो विनियुज्यते।

पितामहः—' इमं मे ' इति गायत्रीं ' तत्वायामीति' त्रैष्टुभम्।

" 'यच्चिद्धिते' इति 'गायत्रं यत्किंच' त्रैष्टुभं विदुः। 'कितवास' इति त्रिष्टुब्देवता वरुणः स्मृतः॥

" तिसृणां तु शुनःशेपश्चतुर्थ्यां वसिष्ठ उच्यते। पंचम्यां अत्रिरित्येवमृषयःपरिकीर्तिताः"॥इति।

बोधायनः (२।४।९-१०; १९-२४)—"वारुणीभ्यां रात्रिमुपतिष्ठते 'इमं मे वरुण तत्त्वायामीति' द्वाभ्याम्। एवमेव प्रातः प्राङ्मुखः तिष्ठन्। मैत्रीभ्यामहरुपतिष्ठते 'मित्रस्य चर्षणी धृतः' 'मित्रो जनान्' इति द्वाभ्याम्।

"यदुपस्थं कृतं पापं पद्भ्यां वा यत्कृतं भवेत्। बाहुभ्यां मनसा वाऽपि वाचा वा यत्कृतं भवेत्॥

" सायंसंध्यामुपस्थाय तेन तस्मात्प्रमुच्यते। रात्र्या चाभिसंधीयते तेन चैनं वरुणो गृह्णात्येवमेव प्रातरुपस्थाय रात्रिकृतात् पापात्प्रमुच्यते। अन्हा चाभिसंधीयते मित्रश्चैनं गोपायेत्यादित्यश्चैनं स्वर्गं लोकं गमयत्युन्नयति। स एवमेवाहरहरहोरात्रयोः संधिषूपतिष्ठमानो ब्रह्मभूतो ब्रह्मलोकमभिजयति " ॥ इति।

मध्यंदिनोपस्थानमाह **स एव**—(२।४।५) " दर्भेष्वासीनो दर्भान्धारयमाणः प्राङ्मुखः सावित्रीं सहस्रकृत्व आवर्तयेच्छतकृत्वोऽपरिमितकृत्वो वा दशावरामथादित्यमुपतिष्ठते। आसत्येनोद्वयंतमसस्पर्युदुत्यं चित्रं तच्चक्षुर्देवहितं य उदगादिति " ॥

नारायणोऽपि—" आसत्येनोद्वयंतमुदुत्यं चित्रमित्यपि॥

" तच्चक्षुर्देव इति हंसःशुचिषदित्यपि। एतज्जपेदूर्ध्वबाहुः सूर्यं पश्यन् समाहितः" ॥ इति।

शौनकस्तु विशेषमाह—

" उत्तमेत्यनुवाकेन उद्वास्य परमां शुभाम्। सायंप्रातरुपस्थाय जातवेदस इत्यृचा॥

" इमं मे वरुण तत्त्वेति सायंकाले विशेषतः। मित्रस्य चर्षणीधृतद्वाभ्यां प्रातः समाहितः॥

" पिशंगभृष्टिमित्यृचा मुखं स्पृष्ट्वा प्रदक्षिणम्। भद्रंकर्णेत्यृचैकया कर्णं स्पृष्ट्वा प्रदक्षिणम्॥

---

१ **क्ष**—सैः। २ **गघ**—भीरुद्; **क्ष**—हिरुड।

'केइयाग्निमित्यृचा पश्चात् शिखां स्पृष्ट्वा प्रदक्षिणम्।संध्याकाले च सावित्रीं सर्वान् देवान्प्रणम्य च॥
" दिशश्च साधिपा नत्वा गुरूनप्यभिवादयेत् । मध्यान्हे मंडलं पश्यन् उपतिष्ठेत्तु भास्करम् ॥
" कृतांजलिः पठेत्सूक्तं उदुत्यं जातवेदसम् । एवमादीनि सौर्याणि जपन्नीक्षेत भास्करम् " ॥

स्मृत्यर्थसारे—" जपांते प्रातः सौरैर्मंत्रैः सूर्यमुपतिष्ठेत । सायं वारुणैर्यद्वोभयत्र जातवेदसेन वैष्णवैः रौद्रैर्वोपतिष्ठेत । दिग्भ्यो देवताभ्यो नमस्कृत्य संध्यायै सावित्र्यै गायत्र्यै सरस्वत्यै सर्वाभ्यो देवताभ्यो नमो नम इत्यादि यथास्वाचारं कुर्यात् " ॥ इति ।

भरद्वाजः—" उपस्थाय नमस्कुर्याच्चतुःसंध्यादिदेवताः ॥
" संध्या पुरस्तात् सावित्री गायत्री च सरस्वती । एताः संध्यादयः प्रोक्ताश्चतस्रो देवताः क्रमात् ।
" स्वस्वनाम चतुर्थ्यंतं प्रणवादि नमोंतकम् । मंत्रमासामिह प्रोक्तं प्रणमेत्स्वस्वमंत्रतः ॥
" केचित्तु मुनयः प्राहुः प्रतिमंत्रं प्रदक्षिणम् । सर्वाभ्यो देवताभ्यश्चेत्येतत्प्रणवसंपुटम् ॥
" उक्त्वा नमो नम इति प्रणमेत्सर्वदेवताः । कामोऽकार्षीन्मन्युरकार्षीन्नमो नम इत्यपि ॥
" उक्त्वा प्रदक्षिणेनैव देवीं विप्रोऽभिवादयेत् । कर्णयुग्मं स्वहस्ताभ्यां स्पृष्ट्वा जानुद्वयादिकम् ॥
" चरणांगुष्ठपर्यंतं संमृज्य तु शनैः शनैः । अभिवाद्य तु गायत्रीं नमस्कुर्याद्दिशस्तथा ॥
" प्राची च दक्षिणा चैव प्रतीची चोत्तरोर्ध्वका । अधरं चांतरिक्षं च भूमिश्चाष्टोदिता दिशः ॥
" एताः प्रदक्षिणेनैव प्रणमेत् स्वस्वमंत्रतः ।
" यमविष्णुविरूपाक्षसवितॄणामुपस्थितम् । कुर्यात्तल्लिंगकैर्मंत्रैर्द्विजो याम्यादिदिङ्मुखः ॥
"एवं संध्यामुपास्याथ पितरावग्रजान्गुरून् । त्रिवर्षपूर्वान् शिष्टांश्च पार्श्वस्थानभिवादयेत्" ॥इति।

चंद्रिकायाम्—(पृ. १३९ पं. १२)
"आत्मपादौ तथा भूमिं संध्याकालेऽभिवादयेत् । आयुर्विद्यां धनारोग्ये प्राप्नोति पुरुषः सदा"॥ इति।

स्मृत्यर्थसारे—
" सावित्र्यादिक्रियाः सर्वा आदित्याभिमुखश्चरेत् । देवालयसमीपे तु तमेवाभिमुखश्चरेत् ॥
" जपस्थानान्न निर्गच्छेद्देवतासंनिधौ क्वचित् । प्रदक्षिणं नमस्कारं न कुर्याद्देवतालये " ॥

हारीतः—
" आर्द्रवासा जले कुर्यात्तर्पणाचमनं जपम् । उपस्थातुं न निर्गच्छेत् वर्जयेच्च प्रदक्षिणम्"॥ इति।

मंत्रार्थस्तु–'उत्तमे शिखरे देवि' देवनशीलविभक्तिव्यत्ययः । देवनशीले हे देवि भूम्यामागत्य ब्राह्मणेभ्योऽस्मभ्यमनुज्ञानं कृत्वा उत्तमे उत्कृष्टतमे शिखरे सर्वस्मादुच्छ्रिते पर्वतमूर्धनि सुमेरोर्मूर्ध्नि ब्रह्मलोके स्वस्थाने यथासुखं गच्छ । ' मित्रस्य ' इत्यादि मित्रस्य सूर्यस्य चर्षणयो मनुष्याः तां धारयति वृष्टिप्रदानद्वारेणेति चर्षणीधृत् । तस्य श्रव इति दीप्तिनाम । तादिहोपचारात्तद्वति मंडले वर्तते । देवस्य प्रकाशमानस्य सानसिं मंडलविशेषणमेतत् । 'षण संभक्तौ' इत्यस्यासून्प्रत्ययांतस्य छांदसमेतद्रूपं योगिभिः संभजनीयमित्यर्थः । सत्यं परमार्थभूतं चित्रश्रवस्तमं चित्राणि श्रवांसि तेजांसि येषामग्न्यादीनां त इमे चित्रश्रवसः तेषां मध्ये उत्कृष्टं एवंभूतं वयं वंदामहे इति वाक्यशेषः । मित्रो जनान् सर्वमिदं करतलामलकवत् प्रजानन् पश्यन् मित्रः सूर्यः जनान् यातयति व्यापारवतः करोति । मित्रो दाधार मित्र एव वृष्टिप्रदानेन धारयति । पृथिवीं पृथिवीस्थं प्राणिजातम् । उत द्यां दिवमपि । उपलक्षणं चैतत् सकलभुवनानाम् । किंच मित्रः कृष्टीः ।

१–ऋ. सं. ८।७।२४। २–ऋ. सं. १।४।७। ३–ऋ. सं. ३।४।७। ४ क्ष–संभक्तावित्यस्य । ५ क्ष–बिंदा

कृष्टयो मनुष्याः। तान् पुण्यपापयोः प्रवर्तमानान्। अनिमिषां 'सुपां सुलुक्' (व्या. सू. ७।१।३९) इत्याकारः। अनिमिषेण दिव्येन चक्षुषा अभिचष्टे आभिमुख्येन पश्यति यः तस्मै सत्याय नित्यरूपाय मित्राय हव्यं चरुपुरुडोशादिघृतवत् घृतसिक्तं विधेम दद्म इत्यर्थः। प्रसमित्र मर्तो अस्तु हे मित्र स मर्त मर्त्यः प्रास्तु भवतु। कीदृशाः प्रयस्वान्। प्रय इत्यन्ननाम तद्वान्। भूम्नि मतुप्प्रत्ययः। बह्वन्नो भवतु। कोऽसौ यो यजमानः ते तुभ्यं आदित्य आदितेः पुत्र शिक्षति ददाति। व्रतामिति कर्मनाम। व्रतेन यागाख्यकर्मणा प्रकृतत्वात् घृतवत् हविरिति संबध्यते। कर्मणि यो हविर्ददाति सः प्रयस्वान् भवत्विति यावत्। न केवलमन्नवानेव भवत्विति किंतर्हि न हन्यते मृत्युना न जीयते ज्यावयोहानौ। शतवत्सरलक्षणादायुषो न जीयते। त्वोतः उत इति वेञो रक्षणार्थस्यैतद्रूपं त्वया रक्षित इत्यर्थः। नैनं एनं त्वदाराधनपरं अहः पापं नाश्नोति न संबध्नाति। अंतितः समीपे इह जन्मनि दूरात्पूर्वजन्मानि कृतमित्यर्थः।

शुनःशेपो वरुणं प्रार्थयते। 'इमं मे वरुण' इति। हे वरुण इमं अस्मदीयं हवस्तोत्रं श्रुधि शृणु। श्रुत्वा च अद्यैव मां मृडय सुखय। यस्मादहं त्वां अवस्युः रक्षणमात्मन इच्छुः सन् आचके आभिमुख्येन प्रार्थयामि। कैगैशब्दे। 'तत्वायामि' हे वरुण ब्रह्मणा मंत्रेण वन्द्मानस्तुवन्नहं तत् तदर्थ-चतुर्थ्यालुक्-तदर्थमेव त्वां यामि भजे। यजमानोऽपि सर्वस्तदेवाशास्ते हविर्भिः चरुपुरोडाशादिभिः। हे उरुशंस बहुभिः यजमानैः स्तूयमान इह अस्मिन्काले अस्मदीयां विज्ञापनां अहेडमानः अक्रुध्यन्बोधि बुध्यस्व। छांदसं रूपम्। किंपुनस्तत्प्रार्थनीयमित्यत आह। मा नः इति। नः अस्माकं आयुः जीवितं मा प्रमोषीः माऽपहार्षीः। यच्चिद्धिते चित् हि इति द्वावपि निपातावनर्थकौ। ते तव व्रतमित्यनेन संबध्यते। हे देव वरुण विशो मनुष्याः विवेकशून्याः विहितं कर्म लुंपति तथा वयमपि ते व्रतं परिचर्यां कर्म प्रमिनीमसि हतवंतः स्म। द्यवि द्यवि दिने दिने। 'यत्किंचेदं' यत्किंच यत्किंचित् इदमीदृशं हे वरुण दैव्ये देवसमूहे जने अभिद्रोहं अपचारं पापरूपं मनुष्या वयं चरामसि कृतवन्तः। अचित्तिप्रथमाबहुवचनस्य ईकारः। अचित्ता अज्ञानिनो वयं तव धर्माधर्मपरिचर्यारूपं युयोपिम नाशितवंतः। मेति प्रतिषेधार्थः। नः अस्मान् तस्मादेनसः पापात् मा रीरिषः मा हिंसीरित्यर्थः। कितवासः यदस्मद्विषये कितवासः कितवाः रिरिपुः पापमारोपयंति नदीवि देवनस्थाने इव। यद्वाघेति पादपूरणे एवकारार्थे वर्तते। सत्यमेव उतयन्न विद्म यदपि वयं न जानीयः। यथा कितवा देवनस्थाने परस्परं सत्यमसत्यं च वदंति तद्वत्। सर्वा ता सर्वाणि तानि विष्य अपनय शिथिरेव शिथिलानीव अथानंतरं ते तव प्रियासः स्यामेत्यर्थः।

'आ सत्येन' इत्यादि सत्येन सत्सु स्तंभकुंभादिषु तायमानेन रजसा ज्योतिषा आवर्तमानः अमृतं मर्त्यं च अमरणधर्माणो देवान् मरणधर्माणो मनुष्यांश्च निवेशयन् व्यापारयन् आदित्यो हि स्वेन तेजसा सर्वं व्यापारयति। हिरण्ययेन स्वर्णमयेन रथेन सविता कर्म प्रसविता अभ्यनुज्ञाता देव आयाति भुवना विपश्यन् भुवनानि साक्षिरूपेण विविधं पश्यन् सन्नित्यर्थः। 'उद्वयं तमसस्परि'। उत् उत्थितं तमसस्परि परिवर्जने तमोविनाश्योदितमिति यावत्। ज्योतिः तेजोमयं उत्तरं उत्कृष्टं देवं देवत्रा देवानामपि त्रातारं सूर्यं पश्यंतो वयं उत्तमे ज्योतिः अगन्म गमिष्याम इत्यर्थः। 'उदुत्यम्' इति। उ इति निपातोऽवधारणार्थः। उदुत्यं तं जातानि भूतानि वेत्ति

१–ऋ. सं. ३।८।५। २–ऋ. सं. १।२।१९। ३–ऋ. सं. १।२।१५। ४–क्ष मित्याह। ५– ऋ, सं. ५।६।११। ६ ख–सतां समूहेषु। ७ गघ–उदुत्यन्तं।

इति जातवेदाः। तं देवं केतवः सहस्रसंख्यादीधितयः उद्वहंति उन्नमयंति। किमर्थं दृशे दर्शनाय। विश्वाय विश्वस्य सूर्यं सरणशीलम् चित्रं देवानां देवानामग्न्यादीनां मध्ये चित्रमद्भुतं पूज्यं वा। अनीकशब्दः सेनावचनः। उदगात् देवद्विषामपनोदक इत्यर्थः। मित्रस्य वरुणस्याग्नेश्चक्षुर्देवानां किमुत मनुष्याणामिति श्रुतेः। आ प्राः प्रथमपुरुषस्य स्थाने मध्यमपुरुषः। द्यावापृथिवी अंतरिक्षं सर्वांल्लोकान्स्वेन महिम्ना पूरयति । 'परीत्य लोकान्परीत्य भूतानि परीत्य सर्वाः प्रदिशो दिशश्च' इति श्रुतेः (तै. आ. १०।१)। सूर्य आत्मा जगतः जंगमस्य मनुष्यादेस्तस्थुषः स्थावरस्य वृक्षादेः सर्वस्यायमेवात्मरूपेणावस्थितः। तच्चक्षुः तत् आदित्याख्यं ज्योतिः चक्षुः सर्वस्य साक्षिभूतं देवहितं अग्निहोत्रादि हविःप्रदानार्थमहोरात्रादिकालस्य विभजकतया देवानां हितकरं पुरस्तात् पूर्वस्यां दिशि शुक्रं शुक्लं दीप्तिः सा यस्यास्तीति मत्वर्थीयोऽच्प्रत्ययः। उच्चरत् उद्गच्छत् ज्योतिरादित्याख्यं पश्येम। कियंतं कालं शरदः शतं संवत्सरं शतं जीवेमेति सर्वसंपद्भिः सह जीवनमाशास्यते। न प्राणधारणमात्रम्। नंदाम समृद्धाः स्याम। मोदाम हृष्टाः स्याम। भवाम ऐश्वर्यपात्रं स्याम। शृणवाम प्रियं शृणवाम। प्रब्रवाम प्रवक्तारः स्याम। अजीता स्याम शत्रुभिरजिताः स्याम। ज्योक्च सूर्यं दृशे दीर्घकालमुक्तलक्षणं सूर्यं दृशे पश्येम। य उदगान्महतोऽर्णवात् समुद्रात् विभ्राजमानः विराजमानः सरिरस्य सलिलस्य मध्यात् स मा वृषभः श्रेष्ठः लोहिताक्षः पंकजाक्षः सूर्यो विपश्चित् विशुद्धदृष्टिः। मनसा मां पुनातु शोधयतु। स्वपरिग्रहयोग्यं स्वयमेव करोत्वित्यर्थः।

अन्यान्यपि पापक्षयार्थानि जप्यान्याह **यमः**—

" जपेद्वाऽप्यस्य वामीयं पावमानीरथापि वा। कुन्तापं वालखिल्यांश्च निवित्प्रैषं वृषाकपिम् ॥

" होतॄन् रुद्रान्पितॄन् जप्त्वा मुच्यते सर्वपातकैः " ॥

अस्य वामीयं 'अस्य वामस्य पलितस्येति' (ऋ. सं. २।३।१४) द्विपञ्चाशदृचः। पावमानीः 'पवमानस्सुवर्जन' इत्याद्याः। होतॄन् चित्तिःस्रुगित्यादीन्। पितॄन् 'परेयिवांसम्' (७।६।१४) इत्यादीनि ॥

वसिष्ठः—

" सर्ववेदपवित्राणि वक्ष्याम्यहमतःपरम्। येषां जपैस्तु पापौघात् मुच्यते नात्र संशयः ॥

" अघमर्षणं देवकृतः शुद्धवत्यस्तरत्समाः। कूश्माण्ड्यः पावमान्यश्च दुर्गा सावित्र्यथैव च ॥

" अभिषङ्गाः पदस्तोत्राः सामानि व्याहृतीस्तथा। वारुणानि च सामानि गायत्रं रैवतं तथा ॥

" अब्लिङ्गा बार्हस्पत्यं च वाक्सूक्तं मध्वृचस्तथा। शतरुद्रीयमथर्वशिरस्त्रिसुपर्णं महाव्रतम् ॥

" गोसूक्तमश्वसूक्तं च इन्द्रशुद्धी च सामनी।

" त्रीण्याज्यदोहाग्निरथन्तराश्च अग्नीव्रतं वामदेव्यं बृहच्च।

" एतानि जप्यानि पुनन्ति जन्तून् जातिस्मरत्वं लभते य इच्छेत् " ॥ इति ॥ अघमर्षणं ऋतं चेत्याद्यास्तिस्रः। देवकृतः देवकृतस्यैनसोऽवयजनमित्यादयः। शुद्धवत्यः एतोन्विन्द्रं स्तवामेत्यादयास्तिस्रः। तरत्समाः तरत्समंदीधावतीत्याद्याश्चतस्रः। कूश्माण्ड्यः यद्देवा देवहेलनमित्यनुवाकत्रयम्। पावमान्यः स्वादिष्ठया मदिष्ठया पवमानः सुवर्जन इत्येवमाद्याः। दुर्गा जातवेदसे सुनवाम सोममित्येका ऋक्। सावित्रीः तत्सवितुरिति। अभिषङ्गादयो रैवतान्ताः सामविशेषाः। अब्लिङ्गाः आपोहिष्ठेत्याद्याः। बार्हस्पत्यं यस्तस्तंभ सहसेत्येकादशर्चम्।

वाक्सूक्तं अहं रुद्रेभिर्वसुभिरिति त्र्यर्चम् । मध्वृचः मधु वाता ऋतायत इत्याद्यास्तिस्रः । शतरुद्रीयं नमस्ते रुद्रमन्यव इत्येकादशानुवाकाः । त्रिसुपर्णं ब्रह्ममेतु मामित्याद्यनुवाकत्रयम् । महाव्रतं राजनं नाम साम । गोसूक्तं आ गावो अग्मन्नित्यष्टर्चम् । अश्वसूक्तं मा नो मित्रो वरुण इति द्वाविंशर्चम् । इन्द्रशुद्धादयो बृहदन्ताः सामविशेषाः ।

चतुर्विंशतिमते—

" अग्नेर्मन्वेनुवाकं तु जपेदेनमनुत्तमम् । सिंहेमे मन्युरित्येतमनुवाकं जपेत् द्विजः ॥

" जप्त्वा पापैः प्रमुच्येत **बौधायन**वचो यथा ।

" त्रिमधु त्रिसुपर्णश्च नाचिकेतत्रयं तथा । नारायणं जपेत्सर्वं मुच्यते ब्रह्महत्यया ।

" यत्किंचित्पातकं कुर्यात् यत्किञ्चेदमृचं जपेत् । हंसः शुचिषदित्येतां जपेद्वाऽपि त्रियंबकम् ॥

"ब्राह्मणानि च कल्पांश्च षडङ्गानि तथैव च । आख्यातानि तथाऽन्यानि जप्त्वा पापैः प्रमुच्यते ॥

" इतिहासपुराणानि देवतास्तवनानि च । देवव्रताज्यदोहानि आज्यानि च रथन्तरम् ॥

" घर्मसामानि रौद्राणि जप्त्वा पापैः प्रमुच्यते ॥

"यज्ञायज्ञियमादित्यं ज्येष्ठसाम च राजनम्।गारुडानि च सामानि जप्त्वा मुच्येत किल्बिषात्"॥इति।

याज्ञवल्क्यः—

" जपयज्ञो हि कर्तव्यः सर्ववेदप्रणीतकैः । पवित्रैर्विविधैश्चान्यैर्गुह्योपनिषदां तथा ॥

" अध्यात्मविद्या विविधा जप्यास्तु जपसिद्धये । अन्यैश्च विविधैर्मन्त्रैः देवतास्तवनादिभिः ॥

"शुक्रियारण्यकजपो गायत्र्याश्च विशेषतः । सर्वपापहरा ह्येते रुद्रैकादशिनी तथा"।प्रा. ३०९॥ इति।

बोधायनः (३।१०।११)—"उपनिषदो वेदादयो वेदान्ताः सर्वछंदस्सु संहिता मधून्यघमर्षणमथर्वशिरो रुद्राः पुरुषसूक्तं राजनरौहिणे सामनी बृहद्रथन्तरे परुषगतिर्महानाम्न्यो महावैराजं महादिवाकीर्त्यज्येष्ठसाम्नामन्यतमं बहिष्पवमानानि कूश्मांड्यः पावमान्यः सावित्री चेति पावनानि " इति ॥

स एव (४।४।७)—" अघमर्षणं देवकृतं शुध्यवत्यस्तरत्समाः ।

"कूश्माण्ड्यः पावमान्यश्च विरजामृत्युलाङ्गलम्। दुर्गाव्याहृतयो रुद्रा महापातकनाशनाः"॥ इति।

गौतमः (१५।२९)— "पङ्क्तिपावनाः षडङ्गविज्ज्येष्ठसामिकस्त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णः पञ्चाग्निः स्नातको मन्त्रब्राह्मणविद्धर्मज्ञो ब्रह्मदेयानुसन्तानः " इति ।

ब्रह्मदेयानुसन्तानः ब्राह्मविवाहोढापुत्रः ।

आपस्तंबः—

"अपाङ्क्तेयैर्हता पङ्क्तिः पाव्यते यैर्द्विजोत्तमैः। तान्निबोधत कार्त्स्न्येन द्विजाग्र्यान् पङ्क्तिपावनान् ॥

" त्रिनाचिकेतः पञ्चाग्निः त्रिसुपर्णषडङ्गवित् । ब्रह्मदेयानुसन्तानः छन्दोगो ज्येष्ठसामगः ॥

"वेदार्थवित्प्रवक्ता च ब्रह्मचारी सहस्रदः । शतायुश्चैव यज्वा च विज्ञेयाः पङ्क्तिपावनाः" ॥इति।

आश्वलायनः—

" कुन्तापं वालखिल्यं च जप्त्वा पापैः प्रमुच्यते । ब्रह्महत्यादिपापेभ्यः पावमानात्प्रमुच्यते ॥

" उपपातकसंघाता लीयन्ते नात्र संशयः । तस्मात्सर्वप्रयत्नेन पावमानं जपेद् बुधः "॥ इति ।

शौनकः— " अप नः शोशुचादिति जपन्मुच्येत चांहसः ।

"विष्णोर्नुकं जपेत्सूक्तं विष्णुभक्तिर्भविष्यति । ज्ञानोदये ततः पश्चात् विष्णुसायुज्यमाप्नुयात् ॥
"अस्य वामस्य सूक्तं वै जले नान्यत्र वा जपेत् । ब्रह्महत्यादिकं दग्ध्वा विष्णुलोकं च गच्छति ॥
" कयेतिवामदेव्येन कुर्यात् स्वस्त्ययनं निशि । जपेद्वा संधिवेलायां ब्रह्मैतत्पापनाशनम् ॥
" तमुष्टुहीतिमन्त्रश्च एकादशदिनेदिने । शतरुद्रस्य तु यत्पुण्यं तत्पुण्यं विन्दते जपात् ॥
" स्वस्त्यात्रेयं जपेन्नित्यं प्रातः प्रातर्दिने दिने । एतत्स्वत्ययनं पुण्यं सर्वकल्मषनाशनम् ॥
"सोमारौद्रं जपेत्सूक्तं कृत्स्नमेनो व्यपोहति । तच्छंयोरावृणीमह इत्येतत् स्वस्त्ययनं भवेत्"॥ इति।

बोधायनः (४।६।४, ३)—
" पवित्रैर्मार्जनं कुर्वन् रुद्रैकादशिनीं जपन् । मुच्यते सर्वपापेभ्यो महतः पातकादृते "॥ इति।

अत्र्यङ्गिरसौ—
" एकादशगुणान्वाऽपि रुद्रानावर्त्य धर्मवित् । महापापैरपि स्पृष्टो मुच्यते नात्र संशयः"॥ इति ।

व्यासः—
" पृथ्वीं ससागरां यो हि कृत्स्नां शैलवनान्विताम् । दद्यात्काञ्चनसंपूर्णां हैमीमोषधिसंयुताम् ॥
" तस्याधिकफलं नूनं रुद्रजापी सकृद्द्विजः " ॥ लभत इति शेषः ।
" तपस्तप्स्यति वाऽत्यर्थं सहस्राब्दानि संयमी । न स तत्फलमाप्नोति यत्सकृद्रुद्रजापकः ॥
" गवां कोटिप्रदानं यः करोति विधिवद्गुरौ । न स तत्फलमाप्नोति यत्सकृद्रुद्रजापकः ॥
"यज्ञास्तपांसि दानानि तीर्थानि विविधानि चाऽएतानि रुद्रजापस्य कलां नार्हन्ति षोडशीम्"॥इति।

याज्ञवल्क्यः—
" सुरापः स्वर्णहारी च रुद्रजापी जले स्थितः । सहस्रशीर्षाजापी च मुच्यते सर्वकिल्बिषैः ॥
" वेदमेकगुणं जप्त्वा यथाऽह्नैव विशुध्यति ॥ " इति ।

शातातपः—
" सुरां पीत्वा ब्रह्महत्यां च कृत्वा स्तेयं कृत्वा गुरुदारां च गत्वा ॥
" भस्मच्छन्नो भस्मशय्याशयानो रुद्राध्यायी मुच्यते सर्वपापैः ॥
" ममभावं समुत्सृज्य यश्च रुद्रं जपेत्सदा । स तेनैव च देहेन रुद्रः सञ्जायते ध्रुवम् ॥
" नमकं चमकं चैव पुरुषसूक्तं तथैव च । नित्यं त्रयं प्रयुञ्जानो ब्रह्मलोके महीयते ॥
" चमकं नमकं चैव जपन्तं पुरुषं सदा । प्रविशेत्स महादेवो गृहं गृहपतिर्यथा " ॥ इति ।

कैवल्यश्रुतौ (२४)—" यः शतरुद्रीयमधीते सोऽग्निपूतो भवति सुरापानात्पूतो भवति ब्रह्महत्यायाः पूतो भवति कृत्याकृत्यात्पूतो भवति तस्माद्विमुक्तमाश्रितो भवति अत्याश्रमी स सर्वदा सकृद्वा जपेदनेन ज्ञानमाप्नोति संसारार्णवनाशनम् " इति ।

जाबालश्रुतौ च (३)—
" अथ हैनं ब्रह्मचारिण ऊचुः किञ्जप्येनामृतत्वं ब्रूहीति । स होवाच याज्ञवल्क्यः शतरुद्रीयेणेत्येतानि ह वा अमृतनामधेयान्येतैर्ह वा अमृतो भवतीति " ॥

शौनकः—
" श्रुतिषु प्रबला मन्त्रास्तेष्वप्यध्यात्मवादिनः । तत्रापि पौरुषं सूक्तं न तस्माद्विद्यते परम् ॥
" प्रायश्चित्ते जपे चैव विष्णोराराधनेऽपि च । मोक्षे वश्येऽग्न्युपस्थाने सुपुत्रप्रापणे तथा ॥
" सर्वकर्मफलावाप्तावारोग्ये मृत्युनाशने । एतेष्वर्थेष्विदं सूक्तं मुनयो विनियुञ्जते " ॥ इति ।

वाधूलः—" यत्र यत्र कर्मभ्रेषो यज्ञभ्रेषो वा तत्र तत्र पुरुषं ध्यायन् पुरुषसूक्तमुच्चरेत्पूर्णत्वात्पुरुष इति विज्ञायते " ॥ इति ।

रहस्यप्रायश्चित्ते **व्यासः**—

" योऽनूचानं द्विजं मर्त्यो हतवानर्थलोभतः । स जपेत्पौरुषं सूक्तं जलस्थश्चिन्तयन् हरिम् ॥
" तदेव ब्रह्महत्यायामुच्यते नात्र संशयः " ॥ इति ।

मनुरपि—(११।२५०-२५१) " सकृज्जप्त्वाऽस्य वामीयं शिवसङ्कल्पमेव च ।
" हविर्धानीयमभ्यस्य न तमहं इतीति च । जप्त्वा तु पौरुषं सूक्तं मुच्यते गुरुतल्पगः ॥
"ब्रह्मयज्ञे जपन् सूक्तं पौरुषं चिन्तयन् हरिम्।स सर्वास्तु जपेद्वेदान् साङ्गोपाङ्गान् द्विजोत्तमः॥"इति।

बोधायनोऽपि " मातृदुहितृस्नुषास्वसृसवर्णाविधवागमनं कृत्वा यः पुरुषसूक्तं त्रिरुच्चारयेत् तदानीमेव पूतो भवति " इति ॥ **विष्णुरपि**—(६४।३६-३९)
"स्नातः पवित्रपाणिर्यथाशक्ति जपेत्। विशेषतः सावित्रीं पुरुषसूक्तञ्च। नैताभ्यां सदृशमस्ति"इति॥

यमः—

" विरजाद्विगुणं जप्त्वा तदह्नैव विशुध्यति। पौरुषं सूक्तमावर्त्य मुच्यते सर्वकिल्बिषात्" ॥ इति।

संवर्तः—

" षण्मासं पञ्चमासं वा नियतो नियताशनः। जप्त्वा तु पौरुषं सूक्तं मुच्यते सर्वपातकैः " ॥ इति ।

चतुर्विंशतिमते—

" पावमानीस्तथा रौद्रं पौरुषं सूक्तमेव च। जप्त्वा पापैः प्रमुच्येत माधुच्छन्दसमेव च " । इति ॥

योगवासिष्ठे—

" संसारान्मोक्षमिच्छन् यः स सन्त्यज्येषणात्रयम्। सर्वदा पौरुषं सूक्तं मनसैव जपेच्छुचिः "॥ इति।

शौनकः— " पुरुषस्य हरेः सूक्तं सर्वपापप्रणाशनम् ।
" यस्तु पौरुषसूक्तस्य जानात्यर्थं यथातथम् । स जन्मनीह मुक्तः स्यात्पुरुषेषु च दर्शनात् ॥
" विष्णुः पुरुषसूक्तार्थः पुरुषोऽध्यवसीयते " ॥ इति ।

अथ **काम्यानि जप्यानि** । **तत्र पुलस्त्यः**—

" कामः कामप्रदः कान्तः कामपालस्तथा हरिः । आनन्दो माधवश्चैव कामसंसिद्धये जपेत् "॥
एतानि नामानीत्यर्थः ।
" रामः परशुरामश्च नृसिंहो विष्णुरेव च । त्रिविक्रमश्चेत्येतानि जप्यान्यरिजिगीषुभिः ॥
" विद्यामभ्यस्यता नित्यं जप्तव्यः पुरुषोत्तमः । दामोदरं बन्धगतो नित्यमेव जपेन्नरः ॥
" केशवं पुण्डरीकाक्षमनिशं हि तथा जपेत् । नेत्रबाधासु सर्वासु हृषीकेशं भयेषु च ॥
" अच्युतं चामृतं चैव स्मरेदौषधकर्मणि । सङ्ग्रामाभिमुखो नित्यं संस्मरेदपराजितम् ॥
" चक्रिणं गदिनं चैव शार्ङ्गिणं खड्गिनं तथा । क्षेमार्थी प्रवसन्नित्यं दिक्षु प्राच्यादिषु स्मरेत् ॥
" अजितं चाधिपं चैव सर्वं सर्वेश्वरं तथा । संस्मरेत्पुरुषो भक्त्या व्यवहारेषु सर्वदा ॥
" नारायणं सर्वकालं क्षुतप्रस्खलनादिषु । ग्रहनक्षत्रपीडासु देवबाधासु सर्वदा ॥
" दस्युवैर्यादिरोधेषु व्याघ्रसिंहादिसङ्कटे । अंधकारे महाघोरे नरसिंहमनुस्मरेत् ॥
" तरत्यखिलदुर्गाणि तापार्तो जलशायिनम् । गरुडध्वजानुस्मरणात् विषवीर्यं प्रशाम्यति ॥

" स्नाने देवार्चने होमे प्रणिपाते प्रदक्षिणे । कीर्तयेद्भगवन्नाम वासुदेवेति तत्परः ॥
" स्थापने वित्तधान्यादेरपध्याने च दुष्टिजे । कुर्वीत तन्मना भूत्वा अनन्ताच्युतकीर्तनम् ॥
" नारायणं शार्ङ्गधरं श्रीधरं पुरुषोत्तमम् । वामनं खड्गिनं चैव दुःस्वप्नेषु सदा स्मरेत् ॥
" एकार्णवादौ पर्यंकशायिनं च सदा स्मरेत् । बलभद्रं समृध्यर्थी सीरकर्मणि कीर्तयेत् ॥
" जगत्पतिं त्वपत्यार्थी स्तुवन् भक्त्या न सीदति । श्रीशं सर्वाभ्युदयिके कर्मण्याशु प्रकीर्तयेत् ॥
" अरिष्टेष्वप्यशेषेषु विशोकं च सदा जपेत् । मरुत्प्रवाताग्निजलबन्धनादिषु मृत्युषु ॥
" स्वतन्त्रापरतन्त्रेषु वासुदेवं जपेद्बुधः । सर्वार्थे शक्तियुक्तस्य देवदेवस्य चाक्रिणः ॥
"यद्वाऽभिरोचते नाम तत्सर्वार्थेषु कीर्तयेत् । सर्वार्थसिद्धिमाप्नोति नाम्ना सर्वार्थदायिनः "॥ इति ।

जाबालिः—

" हरेर्नाम परं जप्यं ध्येयं गेयं निरन्तरम् । कीर्तनीयं च सततं निर्वृतिं बहुधेच्छता" ॥ इति ।

विश्वामित्रः—

" विश्रुतानि बहून्येव तीर्थानि विविधानि च । कोट्यंशेनापि तुल्यानि हरिनामजपेन वै ॥
" श्रीरामनामनियतं परिचिन्तनीयं वृत्तं हि निष्ठितमिदं सततं द्विजेषु ॥
" जन्मार्जितानि विविधान्यपहाय दुःखान्यत्यन्तधर्मनिचयं हरिलोकमेति " ॥ इति ।

बोधायनः—

" इष्टापूर्तानि कर्माणि सुबहूनि कृतान्यपि । भवहेतूनि तान्येव हरेर्नाम तु मुक्तिदम् " ॥ इति ।

कात्यायनः—

" अर्थवादं हरेर्नाम्नि संभावयति यो नरः । स पापिष्ठो मनुष्याणां नरके पतति ध्रुवम् "॥ इति ।

वसिष्ठः—

" हित्वा सकलपापानि लब्ध्वा सुकृतसञ्चयम् । सुपूतो जायते धीमान् मुरजिन्नामकीर्तनात् ॥
" कृष्णकृष्णेति रामेति सञ्जपन् हरितत्परः । राजसूयसहस्राणां फलं प्राप्नोति मानवः ॥
" नित्यकर्माविरुद्धेषु कालेषु जप इष्यते " ॥ इति ।

भृगुः—

"कोटिशो मनुजानां वै भीतिदं समुपस्थितम् । रामरामेति सङ्कीर्त्य तन्नाशयति मानवः "॥ इति ।

गालवः—" सर्वक्लेशयुतो वापि सर्वरोगादिसंयुतः ।
"सर्वपापयुतो यस्तु नृहरेर्नामकीर्तनम् । कृत्वा विमुच्य दुःखानि याति ब्रह्मसनातनम्" ॥ इति ।

च्यवनः—

" श्रुतिस्मृतिपुराणेषु रामनामसमीरितम् । तन्नामकीर्तनं भूयस्तापत्रयविनाशनम् ॥
" सर्वेषामेव पापानां प्रायश्चित्तमिदं स्मृतम् । नातः परतरं पुण्यं त्रिषु लोकेषु विद्यते " ॥ इति ।

माण्डव्यः—" सुरापो ब्रह्महा स्तेयी रोगी भग्नव्रतोऽशुचिः ।
"स्वाध्यायवर्जितः पापो लुब्धो नैकृतिकःशठः।सोऽपि मुक्तिमवाप्नोति विष्णुनामजपाद्ध्रुवम्"॥इति।

योगयाज्ञवल्क्यः—

" न तावत्पापमेधीत यन्नाम्ना न हतं हरेः । अतिरेकभयादाहुः प्रायश्चित्तान्तरं वृथा" ॥ इति ।

वसिष्ठः—

“ हरिपूजापरो यस्तु हरिनामपरायणः । स स्नातः सर्वतीर्थेषु सर्वयज्ञेषु दीक्षितः ॥

“ श्रीशब्दपूर्वं जयशब्दमध्यं जयद्वयादुत्तरतस्तथैव ।

“ त्रिसप्तकृत्वो रघुनाथनाम जप्तं विहन्याद्विजकोटिहत्याम् ” ॥ इति ।

श्रीशब्दः पूर्वः यस्य रघुनाथनाम्नः रामशब्दस्य संबुध्यन्तस्य स श्रीशब्दपूर्वः श्रीरामेति शब्दः । ततः मध्ये जयशब्दः यस्य रामशब्दस्य स जयरामशब्दः । ततो जयजयेति शब्दः । ततो रामेति । श्रीरामजयरामजयजयराम इति त्रयोदशाक्षरः ।

पैठीनसिः—

“ सर्वपापप्रसक्तोऽपि ध्यायन्निमिषमच्युतम् । पुनस्तपस्वी भवति पङ्क्तिपावनपावनः ॥

“ यस्येदं जन्म पाश्चात्यं यो भवेच्छङ्करः स्वयम् । तेनैषा लभ्यते विद्या श्रीमत्पञ्चदशाक्षरी ॥

“ आदौ तु शिवरामेति गोविन्देति ततः परम् । नारायणमहादेवेत्येषा पञ्चदशाक्षरी ॥

“ महादेव महादेव महादेवेति यो वदेत् । एकेनैव लभेन्मुक्तिं द्वाभ्यां शंभुर्ऋणी भवेत्” ॥ इति ।

नारदः—

“ महादेव विरूपाक्ष गङ्गाधर मृडाव्यय । इति रयन्ति ये नित्यं ते कृतार्था न संशयः ॥

“ गोसहस्रप्रदानस्य त्वश्वमेधक्रतोरपि । फलं यद्विद्यते तद्धि प्रोक्तं रुद्रेतिकीर्तनात् ” ॥ इति ।

ब्रह्मवैवर्ते—

“ महापातकयुक्तोऽपि कीर्तयन्ननिशं हरम् । शुद्धान्तःकरणो भूत्वा जायते पङ्क्तिपावनः ” ॥

इत्यादीनि वचनानि हरिहरनामवैभवप्रतिपादकानि स्मृतिपुराणेषु सहस्रशः सन्ति । तानीह ग्रन्थविस्तरभीत्या न लिख्यन्ते । इति **काम्यजपानि** ॥

जपयज्ञप्रसंशा

जपयज्ञप्रशंसामाह **वसिष्ठः** (ध. सू. २६।१०)—

“ ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विताः । सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम् ” ॥

पाकयज्ञाः देवयज्ञादयः । विधियज्ञः ज्योतिष्टोमादिः ।

“ यथाऽग्निर्वायुना धूतो हविषा चैव दीप्यते । एवं जप्यपरो नित्यं मन्त्रयुक्तः सदा द्विजः”॥ इति ।

मनुरपि— (२।८५, ८७)

“ विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः । उपांशुः स्याच्छतगुणः सहस्रो मानसः स्मृतः ॥

“ जप्येनैव तु संसिद्ध्येत् ब्राह्मणो नात्र संशयः । कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते ”॥ इति ।

सर्वानुकूल्यं मैत्री । तस्मान्मैत्रत्वेन हिंसानुबन्धिनो विधियज्ञाज्जपयज्ञो ब्राह्मणस्य विशिष्टतर इत्यर्थः ॥

हारीतः—

“ जपेन देवता नित्यं स्तूयमाना प्रसीदति । प्रसन्ने विपुलान्भोगान् प्राप्नुवन्ति मनीषिणः ॥

“ यक्षरक्षःपिशाचाश्च ग्रहाः सर्वे विभीषणाः । जापिनं नोपसर्पन्ति दुरादेवापयान्ति ते” ॥ इति ।

॥ इति **संध्याजपप्रकरणम्** ॥

अथाभ्युक्षणाहरणविधिः । तत्र शाट्यायनिः—
" ततः सूर्यमुपस्थाय सम्यगाचम्य च स्वयम् । अभ्युक्षणं समादाय संयतात्मा गृहं व्रजेत् " ॥
आचम्य द्विरिति शेषः । तथा च **वृद्धमनुः**—
" ततः सम्यग्द्विराचम्य ह्यभ्युक्षणमुदाहरेत् । न विनाभ्युक्षणं जातु विधिज्ञः किंचिदाचरेत् "॥
अभ्युक्षणं प्रोक्षणार्थं जलम् । तद्विना अप्रोक्षिते गृहे न किंचित्कर्माचरेदिति यावत् । **स एव**—
" नाहरेदेकवस्त्रस्तु नाव्रतो न च कन्यका । न पाणिना न वस्त्रेण तोयमभ्युक्षणाय वै ॥
" प्रोक्षणग्रहणं पात्रं निदधद् गृहमागतः । अकृताचमनं भूमावाचांतः प्रयतो भवेत् " ॥
पुलस्त्यः—
"तेन द्रव्याण्यशेषाणि प्रोक्ष्याचम्य पुनर्गृहे । ततः कर्माणि कुर्वीत सत्क्रियाश्च द्विजोत्तमः"॥ इति ।
प्रचेताः—
" संगृह्याभ्युक्षणं यायात्सोपानत्को गृहं प्रति । तदत्यक्त्वा गृहं प्राप्य आचामेत्परिचारकात् "॥
गार्ग्यायणिः—" सोपानत्कः सदर्भश्च पात्रस्थं सदशोत्तरः " । जलमाहरेदिति शेषः ।
सदशमुत्तरीयं यस्य तथोक्तः । **प्रचेताः**—
" नाहरेदेकजातिस्तु न शिशुर्न च कन्यका । नानुपेतो नैकवस्त्रस्तोयमभ्युक्षणाय वै " ॥
यमः—"पात्राद्विरहितं तोयमुद्धृतं सव्यपाणिना । न तेन प्रोक्षणं कुर्यात् वस्त्रनिष्पीडितेन च "।
शाट्यायनिः—
" आब्जं हिरण्मयं रौप्यं दारवं मृन्मयं दृढम् । ताम्रपत्रपुटं पात्रं ग्राह्यमभ्युक्षणाय वै " ॥
योगयाज्ञवल्क्यः—
" सौवर्णं राजतं ताम्रं मुख्यं पात्रं प्रकीर्तितम् । तदलाभे स्मृतं पात्रं स्रवते यन्न दारितम् " ॥
शातातपः—
" गोवालतृणपर्णाद्यैरसंस्कारांबुभाजनैः । सिकतावस्त्रलेपेन न कुर्यात्प्रोक्षणं बुधः"॥ **आपस्तंबः**—
" नालिकाभिर्न पात्रेण कांस्यपात्रेण चैव हि । प्राण्यङ्गफलजेनापि कुर्यान्नाभ्युक्षणं द्विजः ॥
" शैवालवालुकादूर्वातृणपर्णायसैरपि । अभ्युक्षणं न गृह्णीयादापस्तंबोऽब्रवीन्मुनिः " ॥
नालिका वेणुमयी । प्राण्यङ्गं शंखशुक्त्यादि । फलजं नालिकेरादि । **गर्गः**—
'त्रिसंध्यं वाग्यतो वारि गुप्तमाहृत्य शोधयेत्। आहृत्य वारिणा प्रोक्ष्य द्रव्यं शोध्यं च शोधयेत्"॥इति।
उशनाः—
"तेनोदकेन द्रव्याणि प्रोक्ष्याचम्य पुनर्गृहे । ततः कर्माणि कुर्वीत नित्यं वैतानिकानि च"॥ इति ।
अभ्युक्षणाहरणे असमर्थं प्रत्याह **शाट्यायनिः**—
" नद्यादौ सम्यगाचांतः संयतो गृहमागतः । उद्धृत्य मणिकातोयं तथाभ्युक्षणमाचरेत् ॥
" आत्मीयं प्रथमं प्रोक्तं विप्रहस्तात् द्वितीयकम् । तृतीयमुदकस्थानाच्चतुर्थं मणिकात्स्मृतम् ॥
" मणिके सर्वतीर्थानि वन्हौ वै सर्वदेवताः । मंत्राश्च प्रणवे सर्वे सर्वं सत्ये प्रतिष्ठितम् "॥
बृहज्जलभाण्डं मणिकम् ।
" गृहे वा समुपस्पृश्य कृत्वा स्वर्णकुशोदकम् । कृत्वाचमनमाचांतः पुनः प्रोक्षणमाचरेत् " ॥
प्रचेताः—
" वैश्वानरेण यत्किंचित्कुरुते प्रोक्षणं द्विजः । गङ्गातोयसमं सर्वं वदन्ति ब्रह्मवादिनः " ॥

---

१ गघ–पूर्वं । २ क्ष–त । ३ क्ष–आमं । ४ खगघ–शै । ५ क्ष–द्वारि ।

वैश्वानरेण 'वैश्वानरोजीजनत' इति **मन्त्रेण । स्मृत्यर्थसारे**– " गुप्तमर्घ्यांबु नीत्वाथ होमं कुर्याद्यथाविधि " इति ।

अथ होमविधिः । तत्र **व्यासः**—

" अथागम्य गृहं विप्रः समाचम्य यथाविधि । प्रज्वाल्य वन्हिं विधिवज्जुहुयाज्जातवेदसम् "॥

दक्षः—(२।२०)

" संध्याकर्मावसाने तु स्वयं होमो विधीयते । स्वयं होमे फलं यत्स्यात्तदन्येन न लभ्यते " ॥

हारीतः—

" उपास्य विधिवत्संध्यामुपस्थाय दिवाकरम् । सायं प्रातरुपासीत विवाहाग्निं द्विजोत्तमः "॥

आपस्तंबः (३।७।१९–२२)– "सायंप्रातरत ऊर्ध्वं हस्तेनैते आहुतीः तंडुलैर्यवैर्वा जुहुयात् । स्थालीपाकवद्दैवतम् । सौरी पूर्वाहुतिः प्रातरित्येके । उभयतः परिषेचनं यथापुरस्तात् " इति । **स एव** (२।१।१।१३–१४)

"यत्र क्वचाग्निमुपसमाधास्यन्त्स्यात्तत्र प्राचीरुदीचीश्च तिस्रस्तिस्रो रेखा लिखित्वाऽद्भिरवोक्ष्याग्निमुपसमिन्ध्याद्(ु)त्सिच्यैतदुदकमुत्तरेण पूर्वेण वाऽन्यदुपदध्यात् " । इति । **स्मृत्यंतरे च**—

" प्राचीः पूर्वमुदक्संस्थं दक्षिणारंभमालिखेत् । अथोदीचीः पुरःसंस्थं पश्चिमारंभमालिखेत् ॥

" अवोक्ष्याग्निं प्रतिष्ठाप्य ज्वलयेदग्निमिंधनैः । उत्सिच्यावोक्षणाच्छिष्टं पूर्वत्रोत्तरतोऽपि वा ॥

" पात्रस्थमन्यदुदकं अग्नेः पूर्वत्र निक्षिपेत् "॥ इति । **बोधायनः** (गृ. सू. २।६।१७–२१)–

" यस्मिन्नग्नावुपनयनं तस्मिन्ब्रह्मचर्यं तस्मिन्व्रतचर्या तस्मिन्समावर्तनं तस्मिन् पाणिग्रहणं तस्मिन् गार्ह्याणि कर्माणि क्रियंते । तस्मिन्काम्यानि तस्मिन्प्रजासंस्कारा इत्येके । स एष उपनयनप्रभृतिव्याहृतिभिः समिद्भिर्हूयत आ समावर्तनात् । समावर्तनप्रभृति आज्येन व्याहृतिभिरेव हूयत आ पाणिग्रहणात् । पाणिग्रहणप्रभृतिव्रीहिभिर्यवैर्वा हस्तेनैते आहुतीर्जुहोति "॥ इति । **हिरण्यकेशी**—"पाणिग्रहणादिरग्निस्तमौपासनमित्याचक्षते । तस्मिन्ग्राह्याणि कर्माणि"॥ इति । **गौतमस्तु** (५।६–७)—" भार्यादिरग्निर्दायादिर्वा तस्मिन् गार्ह्याणि " ॥ इति । भार्याशब्देन विवाहो लक्ष्यते । तदाग्निपरिगृहः यदा पित्रा भ्रातृभिर्वा विभक्तस्तदा वाऽग्निपरिग्रह इत्यर्थः । **याज्ञवल्क्योऽपि** (आ. ९७)—

" कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही । दायकालाहृते वाऽपि श्रौतं वैतानिकाग्निषु " ॥

स्मार्तं औपासनादि । "अपिशब्दात् प्रेते वा गृहपतावाहृते संस्कृत एव । ततश्च कालत्रयव्यतिक्रमे प्रायश्चित्तीयत" इति **विज्ञानेश्वरः** (पृ. २८ पं २१) । **शौनकः**—

" स्मार्तोऽग्निर्विविधो ज्ञेयो गृह्यः पौरुष इत्यपि । यस्मिन्विवाहः क्रियते सोऽपि गृह्यो हुताशनः ॥

" जातकर्मादिसिध्यर्थं यश्चाहुतिभिराहुतः । सोऽग्निः पौरुष इत्युक्तः शालाग्निर्लौकिकः स्मृतः ॥

" केचिद्वैश्यस्य भवनादाहृतो जातकः स्मृतः " ॥ **संग्रहे**—

" आत्मार्थमपि दारार्थमुभयार्थं सुतार्थकम् । इत्येषां कर्मणां होमचातुर्विध्यं प्रचक्षते ॥

" आत्मार्थं सांध्यकर्मादिसीमंतादिक्रियास्त्रियाः । पार्वणाद्युभयार्थं स्याज्जातकादिसुतार्थकम् ॥

" सुतार्थकर्मणां होमो लौकिकाग्नौ विधीयते । इतरेषां त्रयाणां तु नित्याग्नाविति निश्चयः ॥

" भार्याद्वयं यस्य भवेत्तु तस्य संसृष्टवन्हौ सवनं तु कुर्यात् ।

" तत्रैव सीमंतमपि प्रशस्तं वदंति वन्हेर्न विभाग इष्टः " ॥ इति । **विष्णुः**—

" स्मार्तमौपासने कुर्याच्छ्रौतं वैतानिके गृही । लौकिके विधुराणां तु विधिरेष पुरातनः ॥

१ क्ष–पि स्तु ।

" बहवो यत्र होतारः शांतिके पौष्टिके तथा । लौकिकेऽग्नौ तदा कुर्याद्गृह्याग्नौ न कदाचन ॥
" चौलजातकगोदानस्नानोपनयनादिषु । लाजहोमे समित्कार्ये लौकिकोऽग्निर्विधीयते ॥
" होमं वैतानिकं कृत्वा स्मार्तं कुर्याद्विचक्षणः । स्मृतीनां वेदमूलत्वात्स्मार्तं केचित्पुरा विदुः"॥
सत्यां वैदिकानुष्ठानशक्तौ न स्मार्तमात्रेण परितुष्येत्तदाह **गर्गः**—
" यो वैदिकमनादृत्य कर्म स्मार्तैतिहासिकम् । मोहात् समाचरेद्विप्रो न स पुण्येन युज्यते ॥
"श्रौतं कर्म न चेच्छक्तः कर्तुं स्मार्तं समाचरेत् । अत्राप्यशक्तः करणे समाचारं लभेद्बुधः" ॥ इति **मनुः** (४।१४, २५)—
" वेदोदितं स्वकं कर्म नित्यं कुर्यादतंद्रितः । तद्धि कुर्वन्यथाशक्ति प्राप्नोति परमां गतिम् ॥
" अग्निहोत्रं च जुहुयादाद्यंते द्युनिशोः सदा । दर्शेन चार्धमासांते पौर्णमासेन चैव हि " ॥ इति ।
दक्षः—
" होमे च फलमुद्दिष्टं जुव्हतः स्वयमेव तु । हूयमानं तदन्येन फलमर्धं प्रपद्यते ॥
" ऋत्विक् पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः । एतैरपि हुतं यत्स्यात्तद्धुतं स्वयमेव तु" ॥
विट्पतिः जामाता । स्वयं होम एव मुख्यः । तदभावे ऋत्विगादिहोमः । तत्र विशेषो **व्यासेन** दर्शितः—
"ऋत्विक्पुत्रोऽथ वा पत्नी शिष्यो वाऽपि सहोदरः । प्राप्यानुज्ञां विशेषेण जुहुयाद्वा यथाविधि " ॥
" पवित्रपाणिः पूतात्मा शुक्लांबरधरो नरः । अनन्यमानसो वन्हिं जुहुयात्संयतेंद्रियः " ॥ इति ।
शौनकः—" पाणिग्रहणादधिगृह्यं परिचरेत्स्वयं पत्न्यपि वा पुत्रः कुर्यादंतेवासी वा" ॥ इति ।
ऋत्विगाद्यभावे **गोभिलः** (१।३।१६)—" गृह्याग्नौ जुहुयात्पत्नी सायं प्रातश्च होमयोः " ॥
मनुः—
" अग्निहोत्रस्य शुश्रूषा संध्योपासनमेव च । कार्यं पत्न्या प्रतिदिनं बलिकर्म च नैत्यिकम् " ॥
संध्योपासनं सायंप्रातर्होमः । **स्मृत्यर्थसारे**—
"होमे मुख्यो यजमानः पत्नी पुत्रश्च कन्यका । ऋत्विक् शिष्यो गुरुर्भ्राता भागिनेयः सुतापतिः ॥
" एतैरेव हुतं यत्तु तद्धुतं स्वयमेव तु । पर्युक्षणं विना पत्नी जुहुयात्कन्यकाऽपि वा " ॥ इति ।
भरद्वाजः—" अपि वा स्त्री जुहुयान्मंत्रवत् " ॥ इति । **गौतमः**—
" पत्नी जुहुयादित्येके " इति । **मनुः** (११।३६–३७)—
" न वै कन्या न युवतिर्नाल्पविद्यो न बालिशः । होता स्यादग्निहोत्रस्य नार्तो नासंस्कृतस्तथा ॥
" नरके हि पतंत्येते जुव्हतः स च यस्य तत् । तस्माद्वैतानकुशलो होता स्याद्वेदपारगः" ॥ इति ।
शातातपः—
"श्रौतं यत्तत्स्वयं कुर्यादन्योऽपि स्मार्तमाचरेत् । अशक्तौ श्रौतमप्यन्यः कुर्यादाचमनं ततः" ॥ इति ।
यज्ञपार्श्वः—
" दुहित्रा स्नुषया वाऽपि विहारो न विरुध्यते । निर्णेजनं च पात्राणामुपलेपनमर्चनम्" ॥ इति ।
आपस्तंबः—" अहरहर्यजमानः स्वयमग्निहोत्रं जुहुयात्पर्वणि वा ब्रह्मचारी वा जुहुयाद्ब्रह्मणा हि स परिक्रीतो भवति क्षीरहोता वा जुहुयाद्धनेन हि स परिक्रीतो भवति " इति ।
बह्वृचब्राह्मणम्—" पर्वण्यपीत्यपरमिति ब्रह्मचार्यत्रांतेवासी ब्रह्मणा हि स परिक्रीत इति लिंगात् योऽग्न्याधेये ऋत्विक्त्वेन परिगृहीतः स क्षीरहोता धनेन हि सपरिक्रीत इति लिंगात् " ।

१ ख–दा ।

"योऽस्याग्नीनाधत्ते स क्षीरहोता" इति हारीतस्मरणाच्च। आश्वलायनोऽपि ( ) "स्वयं पर्वणि जुहुयादृत्विजामेक इतरं कालमंतेवासी वा" इति। ऋत्विजामेक इति यः कर्मणि कर्मणि व्रियते यश्च कुले परंपराप्राप्तः यश्चैकस्य पुरुषस्य सर्वकर्माणि कर्तुं व्रियते तेषां त्रिविधानामृत्विजा मध्ये एक इत्यर्थः। बोधायनः "पुत्रोन्तेवासी वा" इति होतृतारतम्यं दर्शयति।

[1]छांदोग्यश्रुतिः—

"अन्यैः शतहुताद्धोमादेकः शिष्यहुतो वरम्। शिष्यैः शतहुताद्धोमादेकः पुत्रहुतो वरम्॥

"पुत्रैः शतहुताद्धोमादेको ह्यात्महुतो वरम्। स्वयं होता स्वयं दोही स्वयमेवोपतिष्ठेताग्निहोत्रं होम्यशेषं दक्षिणा सर्वैर्ह वा एतस्य यज्ञक्रतुभिरिष्टं भवति य एवं विद्वानग्निहोत्रं जुहोति" इति॥

ऋत्विगादिहोमे विशेषमाह कात्यायनः—

"असमक्षं तु दंपत्योर्होतव्यं नर्त्विगादिना। द्वयोरप्यसमक्षे तु भवेद्धुतमनर्थकम्"॥ इति।

उभयोः संनिधानं मुख्यम्। तदभावे त्वन्यतरसंनिधानेनापि होतुं शक्यम्। तथा च स एवाह—

"निक्षिप्याग्निं स्वदारेषु परिकल्प्यर्त्विजं तथा। प्रवसेत्कार्यवान्विप्रो वृथैव न चिरं वसेत्"॥ इति।

पैठीनसिः—

"प्रबलीकृतधर्मस्य पीड्यमानस्य शत्रुभिः। मासद्वयं प्रवासोऽस्ति परतोऽनाहिताग्निवत्"॥ इति।

विष्णुः—

"श्रौतं स्मार्तं च यत्किंचिद्विधानं सर्वमादरात्। गृहे निवसता कार्यमन्यथा दोषमृच्छति"॥

अग्नेरपरित्यागमाह गर्गः—

"कृतदारो न वै तिष्ठेत्क्षणमप्यग्निना विना। तिष्ठेत चेत् द्विजो व्रात्यस्तथा च पतितो भवेत्॥

"यथा स्नानं यथा भार्या वेदस्याध्ययनं यथा। तथैवौपासनं दृष्टं न तिष्ठेत्तद्वियोगतः"॥

व्यासः—

"यो हि हित्वा विवाहाग्निं गृहस्थ इति मन्यते। अन्नं तस्य न भोक्तव्यं वृथा पाको हि स स्मृतः"॥

याज्ञवल्क्यः—

"द्वादशाहमनग्निस्तु संध्याहीनस्तथैव च। शूद्र एव भवेद्विप्रश्चतुर्वेदेषु पारगः"॥

स्मृतिरत्ने—"हतं वित्तमदानेन हता नारी निरंकुशा। ब्रह्मस्वेन हतो राजा निरग्निर्ब्राह्मणो हतः॥

"देशांतरगतो वाऽपि मृतपत्नीक एव वा। वैवाहिकाग्नौ जुहुयात् सायंप्रातर्यथाविधि"॥ इति।

बृहस्पतिः—

"सूतके मृतके चैव अशक्तौ श्राद्धभोजने। प्रवासादिनिमित्तेषु हावयेन्न तु हापयेत्"॥

शाट्यायनिः—

"यावत्कालमहोमी स्यात्तावद्द्रव्यं त्वशेषतः। तद्दानं चैव विप्रेभ्यो यथा होमस्तथैव तत्॥

"यावंत्यब्दान्यतीतानि निरग्नेर्विप्रजन्मनः। तावंति कृच्छ्राणि चरेद्धोम्यं दद्यात्तथैव च"॥ इति।

व्यासः—"यदि मासमहोमी स्याद्विप्राय गुणशालिने। पंचप्रस्थं प्रदद्यात्तु यावत्तंडुलमेव च"॥

कात्यायनः—

"षष्टिप्रस्थमितं धान्यं त्रिप्रस्थप्रमितं घृतम्। औपासनाग्नौ नष्टे तु वत्सरस्य विधीयते"॥ इति।

मनुः—

"अग्निहोत्र्यपविध्याग्नीन्ब्राह्मणः कामकारतः। चांद्रायणं चरेन्मासं वीरहत्यासमं हि तत्"॥ इति।

---

१ खगघ-स्स।

शातातपः । " अग्न्युत्सादी कृच्छ्राब्देन विशुध्यति " इति । **स्मृत्यर्थसारे**—
" संनिधौ यजमानः स्यादुद्देशत्यागकारकः । असंनिधौ तत्पत्नी स्यात् पुत्रादिस्तदनुज्ञया ॥
" उन्मादे प्रसवे चार्तौ कुर्वीतानुज्ञया विना । सर्वथा यजमानो वा त्यजेत्तद्दिङ्मुखः शुचिः ॥
" प्रवासी नोपवासी स्यात् पत्नी धारयते व्रतम् " ॥ इति ।

अथ होमकालः । तत्र विहरणकालमाहापस्तंबः –"अपि वृक्षसूर्य आविः सूर्यो वा " इति । समुच्चयार्थो वाशब्दः । सूर्यशब्देनोभयत्रापि रश्मिलक्षणा । सायंभूमेरुत्थिता रश्मयोऽधिवृक्षमेव निविशंते यस्मिन्काले सोऽधिवृक्षः सूर्यः । तथा प्रातः प्राच्यां दिशि रश्मय आविर्भूता यस्मिन्काले स आविर्यः तस्मिन् काले प्रणयनमित्यर्थः । **कात्यायनोऽपि**—
" सूर्येऽस्तशैलमप्राप्ते षट्त्रिंशद्भिरिवांगुलैः । प्रादुष्करणमग्नीनां प्रातर्भासां च दर्शने " ॥
आश्वलायनस्तु " अपराण्हे प्रातर्व्युष्टायाम् " इति । सायं होमार्थमपराण्ह अन्हश्चतुर्थभागे प्रातरुदयात्पूर्वं विहरेदिति **वृत्तौ** । **गृह्यपरिशिष्टे** " अनस्तमित आदित्ये सायमग्नेः प्रादुष्करणमनुदिते प्रातः " ॥ इति ।

संवर्तः—" कपालैर्भिन्नपात्रैर्वा आयसैर्गोमयेन वा । नाग्निप्रणयनं कुर्याद्यजमानभयावहम् " ॥

स्मृतिरत्ने—
" शरावे भिन्नपात्रे च कपाले चोल्मुके च वा । नाग्निप्रणयनं कुर्याद्व्याधिहानिभयावहम् ॥
" अग्नौ न प्रक्षिपेदग्निमद्भिर्न शमयेत्तथा " इति । होमकालमाहापस्तंबः—
" समुद्रो वा एष यदहोरात्रस्तस्यैतेऽगाधे तीर्थे यत्संधी तस्मात्संधौ होतव्यमिति । शैलालिब्राह्मणं भवति । नक्षत्रं दृष्ट्वा प्रदोषे निशायां वा सायमिति । समुद्रत्वेन निरूपितस्याहोरात्रस्य संधिद्वयं सुप्रवेशं तीर्थद्वयं तस्मात्संधौ होमो मुख्यः । नक्षत्रदर्शनादयस्त्रयः कालाः संधिना सह विकल्प्यंते । एकनक्षत्रोदयो नक्षत्रदर्शनं प्रदोषः प्रथमयामः निशा निद्राकालः । प्रातर्होमकालोऽपि चतुर्विधस्तेनैव दर्शितः–"उषस्युपोदयं समयाध्युषितउदिते वा प्रातः " इति । उषसि प्राच्यां प्राप्तप्रकाशायामुपोदयं उदयात्पूर्वस्मिन्समये समयाध्युषिते ईषदाविर्मंडले उदिते वा सूर्य इत्यर्थः ।

मनुस्तु प्रथमद्वितीयावेकीकृत्य कालत्रयमाह (२।१५)—
" उदिते नुदिते चैव समयाध्युषिते तथा । सर्वथा वर्तते यज्ञ इतीयं वैदिकी श्रुतिः " ॥ इति ।
एतेषां लक्षणमाह **व्यासः**—
" रात्रेः षोडशके भागे ग्रहनक्षत्रभूषिते । काले त्वनुदितं प्राहुर्होमं कुर्याद्विचक्षणः ॥
" तथा प्रभातसमये नष्टे नक्षत्रमंडले । रविर्यावन्न दृश्येत समयाध्युषितस्तु सः ॥
" रेखामात्रस्तु दृश्येत रश्मिभिस्तु समन्वितः । उदितं तं विजानीयात्तत्र होमं प्रकल्पयेत्" ॥ इति ।

संग्रहेऽपि—
" ग्रहर्क्षयुक्तोऽनुदितो नक्षत्रार्कविवर्जितः । समयाध्युषितः सार्के उदितस्त्रिषु होमयेत् "॥ इति ।

मरीचिः—
" द्विरश्मिमत्यां संध्यायां सूर्यनक्षत्ररश्मिभिः । होमकालः स विज्ञेयो ह्यग्निगर्भा तदा मही " ॥ इति ।

कात्यायनः—
" यावत्सम्यङ्न भाव्यन्ते नभस्यृक्षाणि सर्वतः । लोहितत्वं च नापैति तावत्सायं तु हूयते ॥

"हस्तादूर्ध्वं रविर्यावद्ध्रुवं हित्वा न गच्छति। तावद्धोमविधिः पूज्यो नान्यो ह्युदितहोमिनाम्"॥

उशनाः—

"अर्धमंडलसंप्राप्ते भानावनुदिते हुतम्। तस्मिन्नस्तगते होमो भवेदुदितहोमिनः"॥ हुतं होमः। **आश्वलायनः**—"प्रदोषान्तो होमकालः संगवान्तः प्रातः" इति। **स्मृत्यर्थसारे**—

"प्रातर्होमे संगवान्तः कालस्तूदितहोमिनः। सायमस्तमिते होमकालस्तु नवनाडिका"॥ इति। **स्मृतिसारसमुच्चये**—

"मुहूर्ते चतुरर्धे तु प्रातर्होमो विधीयते। सायंकाले तथैव स्याद्भानोरस्तमयात्परम्"॥ इति। **प्रदीपिकायाम्**—

"निशायां तु व्यतीतायां सायं होमोऽतिपद्यते। तथैव संगवेऽतीते प्रातर्होमोऽप्यनापदि"॥ **संग्रहेऽपि**—"निशा व्यतीयाद्यदि संगवे वा संकाल्पितो वा समयो न चापदि" इति। यद्यनापदि नवनाड्यंतरे सायं होमो न क्रियते द्वादशनाडिकाभ्यंतरे यदि प्रातर्होमो न क्रियते संकल्पिते वा संध्यादिकाले यद्युभयत्र न क्रियते तदा कालातिपत्तिप्रायश्चित्तं कर्तव्यम्। आपदि तु वक्ष्यमाणगौणकालेऽपि न प्रायश्चित्तमित्यर्थः।

भास्करः—"कालातिपत्तिर्नवनाडिकोर्ध्वं संकल्पिते वा समये व्यतीते॥

"कालात्ययः संगवतः परस्तात्संकल्पिते वा समये व्यतीते"। सर्व एवैते कालविशेषाः संध्यादयो यथाशास्त्रं मुख्यतया व्यवतिष्ठन्ते। यदा तु कथंचिन्मुख्यकालातिक्रमः तदा **गोभिलोक्तं** द्रष्टव्यम् (१।९।१२-१३)—

"अथ यदि गृह्येऽग्नौ सायंप्रातर्होमयोर्दर्शपूर्णमासयोर्वा हव्यं होतारं नाधिगच्छेत् कथं कुर्यादित्या सायमाहुतेः प्रातराहुतिर्नात्येत्या प्रातराहुतेः सायमाहुतिरामावास्यायाः पौर्णमासी नात्येत्या पौर्णमास्या आमावास्या" इति॥ **बोधायनोऽपि**—

"उक्तयोः कालयोः कर्तुमशक्तौ सायमाहुतिं। रात्रौ कुर्वीत कृत्स्नायां कृत्स्नेऽन्हि प्रातराहुतिम्॥

"आ सायंकर्मणः प्रातरा प्रातः सायंकर्मणः। आहुतीर्नातिपद्येत पार्वणं पार्वणान्तरात्"॥ इति।

भरद्वाजोऽपि—"आ सायमाहुतिकालात्प्रातराहुतिकालो नातीयादा प्रातराहुतिकालात्सायमाहुतिकालः" इति। आपदि गौणकालस्याप्यनुग्राहकं ब्राह्मणं दर्शयत्यापस्तंबः—

"यदुदिते जुहोत्यग्निष्टोमं तेनावरुन्धे यन्मध्यंदिने जुहोत्युक्थ्यं तेनावरुन्धे यदपराह्णे जुहोति षोडशिनं तेनावरुन्धे यत्पूर्वरात्रे जुहोति प्रथमं तेन रात्रिपर्यायमाप्नोति यन्मध्यरात्रे जुहोति मध्यमं तेन रात्रिपर्यायमाप्नोति यदपररात्रे जुहोति जघन्यं तेन रात्रिपर्यायमाप्नोति" इति। उदिते पूर्वाह्ण इत्यर्थः। रात्रिपर्यायैः क्रत्वधिकारादतिरात्रो लक्ष्यते। एतेषु कालेषु जुव्हदेतैर्यज्ञैरिष्टवान्भवति। एवं च सर्वमहः सर्वा रात्रिश्च होमकाल इत्युक्तं भवति। न चैवं पूर्वोक्तैः संध्यादिकालैः सहैषां तुल्यविकल्पताभ्रमितव्येत्याह **स एव**—

"स न मन्येत सर्वेष्वेतेषु कालेषु होतव्यमापदि हुतमित्येव प्रतीयादिति विज्ञायते" इति। सोऽयं प्रतिपत्ता नैवं मन्येत सर्वे अमी होमकाला इति किंत्वापदि अगत्या अमीषु कालेषु हुतमपि हुतं भवतीत्येतावदेव प्रतीयादित्यर्थः। **स्मृत्यर्थसारे**—

"**दिवोदितानि कर्माणि प्रमादादकृतानि तु। शर्वर्याः प्रथमे याम तानि कुर्यादतंद्रितः॥**

" रात्रावुक्तानि कर्माणि प्रमादादकृतानि वै । दिनस्य प्रथमे यामे तानि कुर्यादतंद्रितः ॥
" कालातीतेषु होमेषु ह्युत्तरेष्वागतेषु च । कालातीतानि हुत्वैव ह्युत्तराणि समापयेत् ॥
" यस्त्वतीतान्यतिक्रम्य उत्तराणि समारभेत् । न देवान्नैव च पितॄन्हविस्तदुपतिष्ठते" ॥ इति ।

स्मृत्यंतरे—

" रात्रौ प्रहरपर्यंतं दिवाकृत्यानि कारयेत् । ब्रह्मयज्ञं च सौरं च वर्जयित्वा विशेषतः " ॥ इति ।

स्मृतिरत्ने—

" एकेऽभ्युदितहोमाः स्युरन्येऽनुदितहोमिनः । अन्येऽभोजनहोमाश्च पक्षहोमस्तथैव च"॥ इति ।

बृहस्पतिः—

" सायंप्रातस्तनौ होमावुभौ सायं समस्य तु । आपन्नो जुहुयात्तस्य समिदेकाथ वा द्वयम् ॥
" सायंहोमस्य मुख्यत्वात्तदीयं तंत्रमिष्यते । चतस्र आहुतीः कुर्यात्तत्र द्वे सायमाहुती ॥
" द्वे प्रातराहुती चैव उपस्थानं सकृत्तथा" ॥ इति । आपन्नस्याहिताग्नेः पक्षहोममाह **मरीचिः**—
" शरीरापद्भवेद्यत्र भयाद्वार्तिः प्रजायते । तथाऽन्यास्वपि चापत्सु पक्षहोमो विधीयते " ॥

रत्नावल्याम्—

" प्रवासिनोऽग्निहोत्रस्य त्रिपंचाहादिसप्त च । दातव्यो होम एकाहे सायं प्रातः पृथक् पृथक् " ॥

आपस्तंबः—" यायावरा ह वै पुरा नामर्षय आसंस्तेऽध्वन्यश्राम्यंस्तेऽर्धमासायार्धमासायाग्निहोत्रं जुहुवुस्तस्माद्यायावरधर्मेणामयाव्यार्तो वा जननमरणयोरध्वन्यापत्सु वाऽर्धमासायाग्निहोत्रं जुहुयात् । प्रतिपदि सायं चतुर्दशचतुर्गृहीतानि उन्नयत्येका समित्सकृद्धोमः । सकृत्पाणिर्निर्मार्जनं सकृदुपस्थानमेवं प्रातरेतावान्विकारः । शेषं प्रकृतिवत्पक्षत्रये पुनराधेयमग्नीन् । समारोपयते धारयते वौपवसथादौपवसथ्येऽहनि निर्मथ्यौपवसथ्यादि कर्म प्रतिपद्यते"॥ इति ।

भारद्वाजोऽपि—" जननमरणयोरापत्सु वा अर्धमासायाग्निहोत्रं जुहुयात् ऊर्ध्वं द्वादशाहान्निर्मथ्ये " इति । पक्षहोमिनस्तत्पक्षमध्ये आपन्निवृत्तौ तदा प्रभृति पुनर्होमः कर्तव्यः । तदाह **मरीचिः**—

"पक्षहोमानतो हुत्वा मध्येऽकस्मान्निवर्तितः । होमं पुनः प्रकुर्यात्तु न चासौ दोषभाग्भवेत्"॥इति।

स्मृत्यर्थसारेऽपि—

" समस्येदग्निहोत्राणि यथासंभवमापदि । प्रतिपद्युन्नयेत्सायमापद्यन्यत्र वा दिने ॥
" यावन्त्यौपवसथ्याहात्प्राग्दिनानि भवंति हि । तावंति परिगृह्णीयाच्चतुरुन्नयनानि तु ॥
" प्रातर्होमान्समस्यैव जुहुयाच्च परेऽहनि । सर्वथौपवसथ्याहे सायं होमः पृथक् भवेत् ॥
" तथैव यजनीयाहे प्रातर्होमो भवेत्पृथक् ॥
" उपवासेन शून्ये चेदौपवसथ्यमहर्यदा । तदा तत्सायं होमोऽपि पूर्वैः सह समस्यते ॥
" एवं प्रतिपदोऽन्यत्र यत्रापदुपजायते । तन्नाशेऽपि पुनर्होमः प्रागौपवसथादपि " ॥

होमयोग्यसमिधः **स्मृत्यर्थसारे** दर्शिताः

" पालाशखदिराश्वत्थशम्युदुंबरजा समित् । अपामार्गार्कदूर्वाश्च कुशाश्चेत्यपरे विदुः ॥
"सत्वचः समिधः कार्या ऋज्वो श्लक्ष्णाः समास्तथा । शस्ता दशांगुलास्तास्तु द्वादशांगुलिकास्तथा॥
" आर्द्राः शुष्काः समच्छेदास्तर्जन्यंगुलवर्तुलाः । अपाटिताश्चाद्विशिखाः क्रिमिदोषविवर्जिताः ॥

" समित्पवित्रं वेदश्च त्रयं प्रादेशसंमितम्। इध्मस्तु द्विगुणः कार्यस्त्रिगुणः परिधिः स्मृतः ॥
" स्मार्ते प्रादेश इध्मो वा द्विगुणः परिधिः स्मृतः "॥ **कात्यायनः**—
" पालाशः समिधः कार्या खादिर्यस्तदलाभतः। शमीरोहितकाश्वत्थास्तदलाभेऽर्कवेतसौ ॥
" प्रादेशिन्यधिका नात्र समित्स्थूलतया क्वचित्। न सपर्णा न निर्वीर्या न सकीटा न पाटिता "॥
स्मृतिरत्ने—
" कोविदारं करंजं च शिरीषं व्याधिघातकम्। श्लेष्मातकमकर्मण्यं वर्जयेदिंधनं बुधः ॥
" समित्पुष्पकुशादीनि श्रोत्रियः स्वयमाहरेत्। शूद्राहृतैः क्रयक्रीतैः कर्म कुर्वन्व्रजत्यधः " ॥ इति।
स्मृत्यर्थसारे—
" पालाशः खादिरो वेध्मो मुख्यः स्यात्तदलाभतः। शमी वटोदुंबरजा अश्वत्थास्तदलाभतः ॥
" वनस्पतीनां सर्वेषामिध्मः कार्यो विशेषतः ॥
" तत्रैतान्वर्जयेद्वृक्षान् कोविदारबिभीतकौ। कपित्थामलकौ राजवृक्षं शाकद्रुमं तथा ॥
" नीपं निंबं करंजं च तिलकं शल्मलीमपि। श्लेष्मातकमपि त्यक्त्वा ग्राह्योऽन्यः सकलद्रुमः ॥
" तुलसीकाष्ठयुक्तेऽग्नौ जुह्वतामक्षयं फलम् " इति। **दक्षः**—
"पूर्वं प्रादेशिकां दत्वा ततो होमो विधीयते। द्वितीया पृष्ठतो देयो ततोऽग्निमुपतिष्ठते"॥ पृष्ठतः होमांते। प्रादेशिका समित्। **आपस्तंबः** (१।५।१५-१२)—"नाप्रोक्षितमिंधनमग्नावादध्या" इति। अयोग्यसमिधो होमे दोषमाह **व्यासः**—
" विशीर्णायुःक्षयं कुर्याद्विदला व्याधिसंभवा। ऱ्हस्वया मृत्युमाप्नोति वक्रा विघ्नकरी तथा ॥
" स्थूला च हरते लक्ष्मीं कृशा वै बांधवक्षयम्। द्विशाखा नेत्ररोगं च कीटजुष्टाऽर्थनाशनम्।
" द्वेष्यं प्रकुरुते दीर्घा प्राणघ्ना वित्वचः स्मृता " ॥ इति। हविर्लक्षणमुक्तं **कात्यायनेन**—
" हविस्तु त्रिविधं ज्ञेयं कृतं चैवकृताकृतम्। अकृतं च क्रमादेषां लक्षणं सम्यगुच्यते ॥
" कृतमोदनसक्त्वादि तंडुलादि कृताकृतम्। व्रीह्यादि चाकृतं प्रोक्तमिति हव्यं त्रिधा बुधैः " ॥
आपस्तंबः— " पयसा पशुकामस्य जुहुयाद्दध्नेंद्रियकामस्य यवाग्वा ग्रामकामस्य ओदनेनान्नाद्यकामस्य तंडुलैरोजस्कामस्य बलकामस्येत्येके। मांसेन यशस्कामस्य सोमेन ब्रह्मवर्चसकामस्याज्येन तेजस्कामस्येति पयसो नित्यस्यैव सति कामे फलवचनम् "।
तथा **चाश्वलायनः**—" पयसा नित्यहोमो यवागुरोदनो दधिसर्पिर्ग्रामकामान्नाद्यकामेंद्रियकामतेजस्कामानाम् " इति।
व्यासः—
" कपिलायास्तु पयसा येऽग्निहोत्रा ह्युपासते। आदित्यमंडलं भित्वा यांति ब्रह्म सनातनम् "॥
गृह्यपरिशिष्टे—"येन सायं जुहुयात्तेन प्रातः" इति॥ **चंद्रिकायाम्** (पृ. १६३ पं १)
" तैलं दधि पयः सोमो यवागुरोदनं घृतम्। तंडुला मांसमापश्च दश द्रव्या ह्यकामतः " ॥
पयोहोमप्रशंसामाह **श्रुतिः**—
" तद्यदिदमाहुः संवत्सरं पयसा जुह्वदपपुनर्मृत्युं जयति " इति। न तथा विद्यावदहरेव जुहोति तदहः पुनर्मृत्युमपजयत्येवं विद्वानिति पुनर्मृत्युं पुनर्मरणं पुनर्मरणाय परिच्छिन्नं शरीरं न गृह्णातीत्यर्थः।

स्मृत्यर्थसारे—
“ शालिः श्यामाकनीवारा व्रीहिगोधूमयावकाः । एतेषां तंडुला होम्या यावनालाः प्रियंगवाः ॥
“ नीवाराः शालयश्चैव गोधूमा व्रीहयो यवाः । स्वरूपेणैव होम्याः स्युः स्वरूपेणैव वै तिलाः ॥
“ द्रवं स्रुवेण होतव्यं पाणिना कठिनं हविः । पयोदधियवागूश्च सर्पिरोदनतंडुलाः ॥
“ सोमो मांसं तैलमापो दशैतान्यग्निहोत्रके ॥
“ स्यादग्निहोत्रवद् ग्राह्यः संस्कारो मंत्रवर्जितः । यद्वा त्रिः प्रोक्षणं तेषां मांसमौपासनेन च ॥
“ यद्यग्निहोत्रहोमार्थं पयो न स्यात्कदाचन । तदा व्रीहियवौ ग्राह्यावोषध्यंतरमेव वा ॥
“ यद्वा यज्ञियवृक्षस्य कंदं मूलं फलं जलम् । सत्यं वा हविरेतेषु यथासंभवमाचरेत् ॥
“ प्रतिनिध्यंतरं सत्यं विज्ञेयं हविरत्यये । न ग्राह्यं सर्वथा माषवरकोदारकोद्रवम् ” ॥[1]
कात्यायनः—
“ हविष्येषु यवा मुख्यास्तदनुव्रीहयः स्मृताः । अभावे व्रीहियवयोर्दध्ना च पयसाऽपि वा ॥
“ तदभावे यवाग्वा वा जुहुयादुदकेन वा । यथोक्तवस्त्वसंप्राप्तौ ग्राह्यं तदनुसारि च ॥
“ यवानामिव गोधूमा व्रीहीणामिव शालयः । यवाभावे तु गोधूमास्ततो वेणुयवादयः ॥
“ फलं वा यज्ञवृक्षस्य तत्पत्रमथवा भवेत् । आज्यं हव्यमनादेशे जुहोतिषु विधीयते ॥
“ मंत्रस्य देवतायास्तु प्रजापतिरिति स्थितिः ”॥ **व्यासः**—
“ हव्यार्थे गोघृतं ग्राह्यं तदलाभे तु माहिषम् । आजं वा तदभावे तु साक्षात्तैलं ग्रहीष्यते ॥
“ तैलाभावे ग्रहीतव्यं तैलं जार्तिलसंभवम् । तदभावेऽतसीस्नेहः कौसुंभः सर्षपोद्भवः ॥
“ वृक्षस्नेहोऽथ वा ग्राह्यः पूर्वाभावे परः परः । तदभावे यवव्रीहिश्यामाकान्यतरोद्भवम् ॥
“ पिष्टमालोड्य तोयेन घृतार्थे योजयेत्सुधीः । वृक्षतैलेषु पुन्नागनिंबैरंडोद्भवं त्यजेत् ॥
“ यद्वाऽलाभे गोघृतादेः क्रमात्क्षीरं विधीयते । तदलाभे दधि ग्राह्यमलाभे तैलमिष्यते ॥
“ येषांकेषांचिदन्येषां हविषामप्यसंभवे । सर्वत्राज्यमुपादेयं भारद्वाजमुनेर्मतात्” ॥ इति ।
स्मृतिभास्करे—
“ शिष्टस्याभावतस्तुल्यं द्रव्यं प्रतिनिधीयते । कंदैः पुष्पैः फलैर्मूलै रूपैः सादृश्यमिष्यते”॥
शिष्टस्य विहितस्य । **स्मृतिरत्ने**—
“ कार्यै रूपैस्तथा वर्णैः क्षीरैः पुष्पैः फलैरपि । गंधै रसैः सदृग्ग्राह्यः पूर्वाभावे परः परः ॥
“ नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित् ।
“ श्रोत्रियाणामभोज्यं यद्द्रव्यं हि तदशेषतः । ग्राह्यं प्रतिनिधित्वेन होमकार्येषु न क्वचित् ॥
“ काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके हि सः । काम्ये तूपक्रमादूर्ध्वमन्ये प्रतिनिधिं विदुः ॥
“ न च प्रतिनिधिर्मंत्रस्वामिदैवाग्निकर्मसु । स देशकालयोर्नास्ति ह्यरण्यामग्निरेव सा ॥
“ समारूढां च समिधमरणिं ब्रूवते बुधाः ।
“ नाभावस्य प्रतिनिधिरभावांतरमिष्यते । नापि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित् ॥
“ द्रव्यं वैकल्पितं किंचिद्यत्र संकल्पितं भवेत् । तदभावे सति ग्राह्यं न तु वैकल्पिकान्तरम् ”॥
स्मृत्यर्थसारे—
“ संस्काराणामयोग्योऽपि मुख्य एव हि गृह्यते । न हि संस्कारयोग्योऽन्यो गृह्यते प्रतिरूपकः ॥
“ कार्यनिर्वृत्तिपर्याप्तमुख्यद्रव्यस्य संभवे । पुरोडाशमहत्त्वार्थं न नीवारपरिग्रहः ॥

---

१ **गघ**–रौद्रव । २ **गघ**–नैव च ।

" कृष्णव्रीह्यादिके द्रव्ये शिष्टे प्रचरिते सति । ग्राह्योऽकृष्णोऽपि सव्रीहिर्नव्रीहिः कृष्ण इत्यपि ॥
" अथ व्रीहियवाभावे तुषतंडुलयोगिनः । ओषधीः परिगृह्णीयात् कोद्रवादिविवर्जिताः ॥
" उपात्ते तु प्रतिनिधौ मुख्यार्थो लभ्यते यदि । तदा मुख्यमनादृत्य गौणे नैव समापयेत् ॥
" मुख्यालाभे तु सदृशद्रव्यलाभो विधीयते । यावद्यावत्सुसदृशं तत्तदेव हि गृह्यते ॥
" उपात्ते यस्मिन्कस्मिन्वा मुख्ये प्रचरिते सति । अन्यत् द्रव्यं सजातीयं विजातीयमथापि वा ॥
" उपादाय प्रयुंजानो यदि पूर्वमवाप्नुयात् । उपात्तत्वाद्विशेषेण पूर्वं त्यक्त्वा परं श्रयेत् ॥
" मुख्यालाभे यदा गौणमुपात्तं सद्विनश्यति । तत्र मुख्योपमं गौणं ग्राह्यं गौणोपमं न तु ॥
" प्रभुः प्रथमकल्पस्य योऽनुकल्पेन वर्तते । स नाप्नोति फलं तस्य परत्रेति श्रुतिस्मृतिः"॥ इति ।

आहुतिपरिमाणमाह **बृहस्पतिः**—

" प्रस्थधान्यं चतुःषष्टेराहुतेः परिकीर्तितम् । तिलानां तु तदर्धं स्यात्तदर्धं स्यात् घृतस्य तु "॥

बोधायनः—

" व्रीहिणां वा यवानां वा शतमाहुतिरिष्यते । ओदनो द्विगुणो ग्राह्यो मयूराण्डाकृतिस्तथा ॥
" कुक्कुटांडप्रमाणस्तु पिंड इत्यभिधीयते । अंगुष्ठपर्वमात्रं स्यादवदानं ततोऽपि च ॥
" ज्यायः स्विष्टकृदाद्यं तु चतुरंगुलसंमितम् "॥ **चंद्रिकायाम्** (पृ. १६३)—
" तीर्थायतनसंपूर्णं प्रातरुत्तानपाणिना । द्व्यंगुलं समिधोऽतीत्य वाग्यतो जुहुयाद्धविः "॥
" पाण्याहुतिर्द्वादशपर्वपूरिता स्रुवाहुतिश्चेत्स्रुवमात्रपूरिता ॥
" स्वंगारिणि स्वर्चिषि चैव पावके दैवेन तीर्थेन च हूयते हविः "॥ **वृद्धहारीतः**—
" देवानां तर्पणं होमं बलिकर्म च भोजनम् । अर्चनं मार्जनं कुर्याद्देवतीर्थेन सर्वदा "॥

स्मृतिरत्ने तु—

" अंगुल्यग्रैर्न होतव्यं न कुर्वांऽगुलिभेदनम् । अंगुल्युत्तरपार्श्वे तु होतव्यमिति हि स्मृतिः "॥

गृह्यपरिशिष्टे—

" उत्तानेन तु हस्तेनाथांगुष्ठाग्रनिपीडितम् । संहतांगुलिपाणिस्तु वाग्यतो जुहुयाद्धविः "॥

कात्यायनः—

"जुहूषुश्च हुते चैव पाणिशूर्पास्यदारुभिः । न कुर्यादग्निधमनं न कुर्याद्व्यजनादिना"॥
देवलः—"वस्त्रेण वाऽथ पर्णेन पाणिशूर्पास्यदारुभिः । व्यजनेनाग्निधमनं न कुर्यादिति हि श्रुतिः ॥
" पर्णेन वै भवेद्व्याधिः शूर्पेण धननाशनम् । पाणिना मृत्युमाप्नोति चायुः क्षीणं मुखाद्धमे "॥
यत्तु **मनुराह** (४।५३–५४)—
" नाग्निं मुखेनोपधमेन्नग्नां नेक्षेत च स्त्रियम् । नामेध्यं प्रक्षिपेदग्नौ न च पादौ प्रतापयेत् ॥
" अधस्तान्नोपदध्याच्च न चैनमतिलंघयेत् । न चैनं पादतः कुर्यान्न प्राणाबाधमाचरेत्"॥ इति ।
तद्धमन्यादिरहितधमनविषयम् । तथा च **देवलः**—
" धमनीमंतरे कृत्वा तृणं वा काष्ठमेव वा । मुखेनाग्निं समिंधीत मुखादग्निरजायत "॥

विष्णुः—

" अप्रबुद्धेऽविधूमे वा जुहुयाद्यो हुताशने । यजमानो भवेदंधः सोऽमुत्रेति हि नः श्रुतम् ॥
" योऽनार्चिषि जुहोत्यग्नौ व्यंगारिणि च मानवः । मन्दाग्निरामयावी च दरिद्रश्चोपजायते ॥

" बहुशुष्केंऽधनें चाग्नौ सुसमिद्धे हुताशने । विधूमे लेलिहाने च होतव्यं कर्मसिद्धये ॥
" अग्निकर्णे हुतं रोगं नासिकायां धनक्षयम् । चक्षुषोर्निन्दनं कुर्यात्केशे दारिद्र्यकृद्भवेत् ॥
" हुतं शिरसि पापं स्यात्तस्माज्जिव्हासु होमयेत् । यत्र काष्ठं तु तच्छ्रोत्रं यत्र धूमस्तु नासिका ॥
" यत्राल्पज्वलनं नेत्रं यत्र भस्मनि तच्छिरः । यत्रैव ज्वलितो वन्हिर्जिव्हा तत्रैव कीर्तिता " ॥

आपस्तंबः—"शरोंगारा अध्यूहंते ततो नीलो प्रकाशार्चिरुदेति ब्रह्मणि हुतं भवति" ॥ इति । शरः भस्म । अंगारा भस्मना सूक्ष्मेण संयोगमापद्यंते । ततस्तेभ्यः नीलप्रकाशोऽर्चिरुदेति । तस्यामवस्थायां हुतं ब्रह्मणि हुतं भवतीत्यर्थः । **स** एव—

" यदंगारेषु व्यवशांतेषु लेलायतीव भाति तद्देवानामास्यं तस्मात्तथा होतव्यं यथास्ये विदधात्येवं तदिति विज्ञायते " इति । **श्रुतिरपि** (तै. ब्रा. २।१।१०)–" सर्व एव सर्वश इध्म आदीप्तो भवति । विश्वेदेवास्तर्ह्यग्निः । तस्मिन्यस्य तथाविधे जुव्हति । विश्वेष्वेवास्य देवेष्वग्निहोत्र[१] हुतं भवति । नितरामार्चिरुपावैति । लोहिनीकेव भवति । इंद्रस्तर्ह्यग्निः । तस्मिन्यस्य तथाविधे जुह्वति । इंद्र एवास्याग्निहोत्रं हुतं भवति । अंगारा भवंति । तेभ्योंऽगारेभ्योऽर्चिरुदेति । प्रजापतिस्तर्ह्यग्निः । तस्मिन्यस्य तथाविधे जुह्वति । प्रजापताविवास्याग्निहोत्रं हुतं भवति । शरोंऽगारा अध्यूहंते । ब्रह्म तर्ह्यग्निः । तस्मिन्यस्य तथाविधे जुह्वति । ब्रह्मन्नेवास्याग्निहोत्रं हुतं भवति । वसुषु रुद्रेष्वादित्येषु विश्वेषु देवेषु । इंद्रे प्रजापतौ ब्रह्मन् । अपरिवर्गमेवास्यैतासु देवतासु हुतं भवति " ॥ इति । इध्मः सर्वशः सर्वप्रदेशे आदीप्तो भवति यदा तर्हि तस्मिन्काले विश्वेदेवा अग्निः विश्वैर्देवैरेकीभूतस्तिष्ठति । तस्मिन् तथाविधे ताद्दक्प्रकारेऽग्नौ यस्य जुह्वति विश्वेषु देवेष्वेवास्यहुतं भवति । विश्वेदेवास्तर्पिता अनेन भवंति । नितरां नीचैस्तरामार्चिरुपा वैति स्वल्पा भवति । लौहिनीकेव रक्तेव भवति । वर्णादनुदात्तादिति ङीप् । संज्ञायां कन् । अंगारभूतेषु काष्ठेषु यदर्चिरुदेति तदग्न्यास्यस्य जिव्हास्थानीयं शृणातेरसुनि शरः भस्म । तदंगारा अध्यूहंते उपरि वहंति अपरिवर्ग्यं काश्चिदपि देवता अवर्जयित्वा एतासु देवतासु हुतं भवतीत्यर्थः । **स्मृतिरत्ने**—

" सुवर्णा कनका रक्ता कृष्णा चैव तु सुप्रभा । अतिरक्ता बहुरूपा च सप्त जिव्हाः प्रकीर्तिताः ॥
" सुवर्णा वारुणी जिव्हा मध्यमा कनका स्मृता । रक्ता चैवोत्तरा जिव्हा कृष्णा याम्यदिशि स्मृता ॥
" सुप्रभा पूर्वदिग्जिव्हा अतिरक्ताऽग्निगोचरा । ऐशान्ये बहुरूपा च जिव्हास्थानान्यनुक्रमात् ॥
" विवाहे वारुणी जिव्हा मध्यमा यज्ञकर्मसु । उत्तरा चोपनयने दक्षिणा पितृकर्मसु ॥
" पूर्वदिक्सर्वकामेषु आग्नेयी शांतिकर्मसु । ऐशानी चोग्रकार्येषु ह्येतद्धोमस्य लक्षणम् ॥
"अज्ञात्वा सप्तजिव्हास्तु होमं यः कुरुते द्विजः । होमो निष्फलतां याति होमी च नरकं व्रजेत्"॥इति ।

होमप्रकारास्तु स्वगृह्योक्तविधिना द्रष्टव्याः । तदुक्तं **गृह्यपरिशिष्टे**—

" स्वगृह्योक्तेन विधिना होमं कुर्याद्यथाविधि " ॥ इति **स्मृतिरत्नेऽपि**—

" उपावरोहणं कृत्वा प्राणायाममनंतरम् । स्वगृह्योक्तप्रकारेण वन्हेरर्चनमाचरेत् ॥
" अदितेन्वादिमंत्रैस्तु चतुर्भिः परिषेचयेत् । अदितेनुमन्यस्वेति वामदेवऋषिः स्मृतः ॥
" देवीति जगती छंदो ह्यदितिर्देवता स्मृता ।
" अनुमतेनुमन्यस्व वामदेव ऋषिः स्मृतः । प्राजापत्या तु गायत्री देवतानुमतिस्तथा ॥

---

१ क्ष–र्चिदनं ।

" सरस्वतेनुमन्यस्व वामदेव ऋषिः स्मृतः। प्राजापत्या तु गायत्री मंत्रोक्ता देवता स्मृता ॥
" देवसवितः प्रसुव वामदेव ऋषिः स्मृतः। प्राजापत्या तु गायत्री सविता देवता स्मृता ॥
" विनियोगश्चतुर्णां तु सेचने परिकीर्तितः "।

संवर्त्तः—"होमे पर्युक्षणे श्राद्धे संध्याकर्मसु मार्जने। आचामे भोजने पात्रं तोयं वामेन संस्पृशेत्"॥ होमादिषु पात्रं संध्यामार्जने तोयं वामहस्तेन स्पृशेदित्यर्थः।

संग्रहे—" गृह्योक्तविधिना हुत्वा पूर्ववत्परिषेचयेत्। अन्वमंस्थाः प्रासावीरिति मंत्रं संनमयेद्बुधः ॥
" अथाग्निमुपतिष्ठेत मंत्रेणाग्नेनयादिना"॥ इति। एतच्च ज्ञात्वैवानुष्ठेयम्। अन्यथा दोषश्रवणात्। तदाहांगिराः—

" स्वाभिप्रायकृतं कर्म यत्किंचित् ज्ञानवर्जितम्। क्रीडाकर्मेव बालानां तत्सर्वं निष्प्रयोजनम्।
"हतं ज्ञानं क्रियाहीनं हतास्त्वज्ञानिनः क्रियाः। अपश्यन्नंधको दग्धः पश्यन्नपि च पंगुकः"॥ इति।

मंत्रार्थस्तु—अदितेनुमन्यस्व अदितिर्देवमाता।हे अदिते अनुमन्यस्व मया क्रियमाणं कर्मानुजानीहि। अनुमतिः अनुमन्त्री ऊनचंद्रा पौर्णमासी। सरस्वती वाग्देवता छांदसो गुणः। हे देवसवितः सर्वस्याप्यनुज्ञातः अस्मानपि प्रसुव अनुजानीहि। अन्वमंस्थाः अनुज्ञातवती प्रासावीः अनुज्ञातवान्। अग्ने नय हे अग्ने सुपथा शोभनेन शास्त्राविरुद्धेन मार्गेण अस्मान् राये नय श्रियं प्रापय। विश्वानि वयुनानि पापानि विद्वान् जानानः त्वं एनः पापं अस्मत् अस्मतः युयोधि अपनय। यौतिः पृथग्भावे लोटि बहुलं छंदसीति शपः श्लुः। वाच्छसीत्यपि त्वाभावे गुणः। कीदृशमेनः। जुहुराणं कुटिलस्वभावं तदर्थं वयमपि ते तुभ्यं भूयिष्ठां बहुतमां नम उक्तिं विधेम क्रिया स्म विदधाति विधाने आशिषि लिङ्। **व्यासः**—

"स्नास्यतो वरुणःशोभां जुह्वतोऽग्निःश्रियं हरेत्।भोजने मृत्युमाप्नोति तस्मान्मौनं त्रिषु स्मृतम्"॥इति।

अनुगतेऽग्नौ संधानमाह **आपस्तंबः** (गृ.सू.२।५।१५-१८)—"नित्यो धार्योऽनुगतो मंथ्यःश्रोत्रियागाराद्वाऽऽहार्यः " इति। नित्य इति सिद्धे धार्य इत्यारंभात् उखादौ धारणमेवास्य मुख्यं न त्वारण्योरात्मनि वा समारोपणम्। स च ध्रियमाणोऽग्निरनुगतश्चेत्तदैव संधातव्य इति **व्याख्यातारः**। ध्रियमाणे त्वग्नौ विशेषमाह **स** एव—" चतूरात्रमहुतोऽग्निर्लौकिकः संपद्यते " ॥ इति। **शौनकः**—

" अग्नावनुगते यत्र होमकालद्वयं व्रजेत्। उभयोर्विप्रवासे च लौकिकोऽग्निर्विधीयते "॥ इति।

भरद्वाजः—"एकाग्निर्द्वादशाहं विच्छिन्नः पुनराधेयः " इति।

बोधायनोऽपि—" आऽर्वाक्त्रिरात्रादयसेऽग्नये स्यात्ततः परं तन्तुमती च कार्या।
" आ सप्तरात्रं मनसे च हुत्वा आ द्वादशाहात्पुनराद्धीत "॥ इति। द्वादशदिनपर्यंतं अग्न्यनुगतिप्रायश्चित्तमेवोक्तं नाग्निसंधानम्। अत्र यथास्वगृह्यव्यवस्था।

शौनकः—"विच्छिन्नवन्हिमाधाय कर्मांगं विधिवत् द्विजः। सायमारभ्य जुहुयादाहुतीनां चतुष्टयम् ॥
" यदा संधीयते वन्हिः प्रायश्चित्तपुरस्सरम्। तदा सायं विजानीयात्प्रातर्होमं ततः परम् ॥
" प्रतिपत्पर्वसंधानं यतः कर्मविनाशनम्। संधाय त्रिदिनं हुत्वा स्थालीपाकं समाचरेत् "॥ इति।

प्रतिपत्पर्वसंधानमिति चतुर्दश्या अप्युपलक्षणम्। नो चेत् संधाय त्रिदिनं हुत्वेति विरोधः। कथंचिद्धारणाशक्तौ **बोधायनः**—"एकाग्नेस्त्रिविधं समारोपणमात्मन्यरण्योर्वा समित्सु " इति।

---

१ खगघ-कर्मकर्तु।

समिधश्च **स्मृत्यर्थसारे** दर्शिताः । “ पालाशाश्वत्थखदिरबिल्वोदुंबरजा समित् ” इति । आत्मसमारोपणं यजमानकर्तृकमेव । समिदादिसमारोपणं त्वध्वर्युकर्तृकमपि भवति । तथा **चापस्तंबः**—“उपर्यग्नावरणी धारयन् जपत्ययं ते योनिर्ऋत्विय इत्यपि वा यजमान एवात्मन् समारोपयते या ते अग्ने० एहीति हस्तं प्रताप्य मुखायाहरत ” इति । यजमानासंनिधानेऽपि पत्नीसंनिधौ अध्वर्युणा अरण्यादौ समारोप्यावरोप्य च होतुं शक्यते । यजमानकर्तृकमपि उपावरोहमन्त्रजपं यजमानासंनिधौ अन्यः कुर्यात् । पत्नी न कुर्यात् । श्रौतमंत्रोर्ध्वक्रिया-मंत्रव्यतिरिक्तमंत्रेषु स्त्रिया अनधिकारादिति **न्यायविदः** । तथा च **शातातपः**—“ श्रौतं यत्तत्स्वयं कुर्यादन्योऽपि स्मार्त्तमाचरेत् ” इति । **बोधायनः**—

“ आत्मारूढो निमज्जेद्वा पतेद्वा पतितादिभिः । अनृतौ च स्त्रियं गच्छेदथवा काममोहितः ॥
“ वदंत्येषु निमित्तेषु केचिदग्निविनाशनम् । आपस्तंबस्य तन्नेष्टमात्मारूढः सदा शुचिः ” ॥

पुनःसंधाननिमित्तमाह **स एव**—“ अथाग्नेर्विपत्तिं व्याख्यास्यामः । अमेध्याशुचिचंडाल-शूद्रवायसपतितरजस्वलाश्वभिश्च संस्पृष्टेऽरण्योर्विनाश इति पुनरग्निमुपसमिंध्यात् ” इति । **संग्रहे**—

“ स्पर्शे तु धार्यमाणं वा समिदारूढमेव वा । त्यक्त्वा तु पुनराधानमात्मारूढं त्यजेद्बुधः ॥
“ शवानुगमनाशौचाद्युपघातेऽग्निमात्मगम् । विसृज्य हावयेच्चित्तं हावयेच्च न तु त्यजेत् ”॥ इति ।

अहुतेष्वग्निषु यजमानो नाश्नीयात् । यत्ते वयं यथाह तत् इत्याहुतीर्जुहुयात्सामिधौ वाद्ध्या-ज्जपेदित्येके । अनाज्ञातम् इति तिस्रोऽनाज्ञाते जुहुयाज्जपेदित्येके । त्वं नो अग्ने स त्वं नो अग्न इति सर्वत्रांतराये देवताविपर्यासे चैते आहुतीर्जुहोति । तदिदं सर्वप्रायश्चित्तं सर्वत्र क्रियेतेत्यादि-प्रायश्चित्तमापस्तंबोक्तं स्मार्तेऽपि कर्तव्यमविरोधात् ।

स्मृत्यंतरे—“ औपासनाग्निद्वयसंगतिश्चेदग्निं समारोपणतो विभाज्य ।

“ पूर्वस्य होतुर्विविचिं च हुत्वा पश्चाच्च होतुः पथिकृच्च सोऽपि ”॥ द्वयोरौपासनाग्न्योः संसर्गे संसृष्टाग्निं समारोपणार्थं विभज्य ममायमंशो ममायमंश इति प्रत्येकमभिमानीकृत्य स्वांशे पूर्वहोताऽग्नये विविचये स्वाहेति हुत्वा सर्वप्रायश्चित्तं च जुहुयात् । पश्चाद्धोता तु अग्नये पथि-कृते स्वाहा अग्नये विविचये स्वाहेति हुत्वा सर्वप्रायश्चित्तं च जुहुयात् । ततस्तावुभौ सहैव समारोपयेतामित्यर्थः । लौकिकाग्निसंपर्के विविचिपाहिपञ्चकं च जुहुयादिति बोधायनोक्तं द्रष्ट-व्यम् । विधुराग्न्युत्पत्तिः **संग्रहे** दर्शिता—

“ उद्धृत्य वन्हिं प्रणवेन पूर्वमन्वग्निमंत्रेण हरेत्पुरस्तात् ।
“ निधाय पृष्ठो दिवि मंत्रकेण ततस्तु होमैः शकलैश्चतुर्भिः ॥
“ लेखादयो नैव च तत्सतां स विश्वानि चाद्या न इमे च मंत्राः[1] ।
“ आरोपणं नाप्यवरोपणं स्यादुत्पत्तिरेवं विधुरानलस्य ॥
“ नित्यानि नैमित्तिककाम्यकर्माण्यत्रैव कुर्यात् विधुरः सदैव ” ॥ इति । तत्सवितुः तां सवितुः विश्वानि देव सवितः अद्यानो देवसवितः इति इमे शकलहोममंत्रा इत्यर्थः ।

चंद्रिकायाम् (पृ. १६४ पं. १, ४, ६)—

“ ब्रह्मण्याधाय कर्माणि निःसंगः कामवर्जितः । प्रसन्नेनैव मनसा कुर्वाणो याति तत्पदम् ॥

---

१ ख—दे ।

" नाहं कर्ता सर्वमेतद्ब्रह्मैव कुरुते तथा । एतद्ब्रह्मार्पणं प्रोक्तं ऋषिभिस्तत्त्वदर्शिभिः ॥
" यद्वा फलानां संन्यासं प्रकुर्यात्परमेश्वरे । कर्मणामेतदप्याहुर्ब्रह्मार्पणमनुत्तमम् " ॥ इति ।

मनुरपि (६।९५; ४।१४६)—
" संन्यस्य सर्वकर्माणि कर्मदोषानपानुदन् । नियतो वेदमभ्यस्यन्पुत्रैश्वर्यैः सुखं वसेत् ॥
" मंगलाचारयुक्तानां नित्यं च प्रयतात्मनाम् । जपतां जुव्हतां चैव विनिपातो न विद्यते"॥ इति ।

श्रीभगवान् (भ. गी. ४।२४)—
" ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् । ब्रह्मैव तेन गतव्यं ब्रह्मकर्म समाधिना " ॥ इति ।

स्मृत्यर्थसारे—
" स्वकर्महानौ पतनमब्देनैव त्वनापदि । स्वकर्महानौ नास्तिक्यान्मासेन पतनं स्मृतम् ॥
" द्वादशाब्दव्रतेनैव तस्य शुद्धिस्तु नान्यथा । तं निरीक्ष्यार्कमीक्षेत स्पर्शे स्नायात्सचैलकम् ॥
" तेन संभाषणं हास्यं कुर्वन्नब्देन तत्समः । तदन्नभुक्तौ सद्यस्तु सहशय्यासनेषु च " ॥ इति ।

होमं प्रशंसति **वसिष्ठः**—
"त्रिर्वित्तपूर्णां पृथिवीं यो ददाति ससागराम् । तत्सायमग्निहोत्रस्य कलां नार्हति षोडशीम् "॥ इति ।
" आद्या व्याहृतयस्तिस्रः स्वधा स्वाहा नमो वषट् । यस्य ते वेश्मनि सदा ब्रह्मलोकस्थ एव सः "॥

अंगिराः—
" यो दद्यात्कांचनं मेरुं पृथिवीं च ससागराम् । तत्सायंप्रातर्होमस्य तुल्यं भवति वा न वा"॥ इति॥

मनुरपि (३।७६)—" अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते ।
" आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः । दैवे कर्मणि युक्तो हि बिभर्तीदं चराचरम्"॥ इति ।

इति **होमप्रकरणम्** ॥

अथ मङ्गलद्रव्यावलोकनम् ।

होमादनंतरकृत्यमाह **दक्षः** (२।२२)—"देवकार्यं ततः कृत्वा कुर्यान्मंगलवीक्षणम् " ॥ इति ।

माधवीये—" होमं च कृत्वा लभनं शुभानां ततो बहिर्निर्गमनं प्रशस्तम् ।
" दूर्वां च सर्पिर्दधि चोदकुंभं धेनुं सवत्सां वृषभं सुवर्णम् ॥
" मृद्गोमयं स्वतिकमक्षतांश्च तैलं मधु ब्राह्मणकन्यकां च ।
" श्वेतानि पुष्पाणि तथा शमीं च हुताशनं चंदनमर्कबिंबम् ॥
"अश्वत्थवृक्षं च समालभेत ततश्च कुर्यान्निजजातिधर्मम् " इति ।

चंद्रिकायाम् (पृ. १६८ पं. १५)–
" रोचनां चंदनं हेम मृदं गां दर्पणं मणिम् । गुरुमग्निं च सूर्यं च प्रातः पश्येत्सदा बुधः " ॥

नारदः—
" लोकेऽस्मिन्मंगलान्यष्टौ ब्राह्मणो गौर्हुताशनः । हिरण्यं सर्पिरादित्य आपो राजा तथाऽष्टमः ॥
" एतानि सततं पश्येन्नमस्येदर्चयेच्च यः । प्रदक्षिणं च कुर्वीत तथास्यायुर्न हीयते ॥
" स्वात्मानं च घृते पश्येद्यदीच्छेच्चिरजीवितम् " ॥ **मनुः**—
" सुवर्णं चंदनं रत्नं पंचगव्यानि रोचनाम् । प्रियंगुं सर्षपं क्षौद्रं मंगलानि प्रचक्षते ॥
"अग्निचित्कपिला सत्री राजा भिक्षुर्महोदधिः । दृष्टमात्राः पुनंत्येते तस्मात्पश्येत्तु नित्यशः" ॥ इति ।

स्मृत्यर्थसारे—
" विप्राग्न्यर्काबुगोहेम नृपाज्यं मंगलं स्मृतम् । अग्निचित्कपिला सत्री यज्वा मृष्टान्नदोऽम्बुधिः ॥

" ज्ञानसिद्धस्तपःशांतो दीर्घायुर्धार्मिकः शुचिः । एते पापहराश्चैनान्सदा पश्येन्नमेदपि " ॥
भरद्वाजः—
" विष्णुक्रांतां शमीं दूर्वां चंदनं शंखपुष्पिकाम् । सिद्धार्थकान्प्रियंगुं च प्रातः शिरसि धारयेत् ॥
" पापिष्ठं दुर्भगां चांधं नग्नमुत्कृतनासिकम् । प्रातर्न पश्येदेतांस्तु दृष्ट्वा पश्येद्दिवाकरम् " ॥
स्मृतिरत्ने—
" गोमूत्रं गोमयं सर्पिः क्षीरं दधि च रोचना । षडंगमेतत्परमं मंगल्यं सर्वतो नृणाम् ॥
" हरिद्रा लवणं धाना राजमाषास्तथा गुडम् । जीरकं[1] फलपुष्पं च मंगलाष्टकमुच्यते ॥
" इक्षवः सूपराजश्च निष्पावश्चाथ[2] धान्यकम् । विकारवच्च गोक्षीरं कौसुम्भं कुसुमं तथा ॥
" लवणं चाष्टमं तद्वत्सौभाग्याष्टकमुच्यते " ॥ **रत्नावल्याम्**—
" धार्याणि शिरसा नित्यं पुष्पाणि श्रियमिच्छता । द्रोणेक्षुपुष्पं श्रीवृक्षपत्रं मूर्धनि निक्षिपेत् " ॥
बोधायनः—
" अरणिं कृष्णमार्जारं चंदनं सुमणिं घृतम् । तिलान्कृष्णाजिनं छागं गृहेष्वेतानि धारयेत् ॥
"गृहे पारावता धार्याः शारिका वै शुकास्तथा । घ्नंति वै धारिता ह्येते भूतबाधां गृहे ध्रुवम्" ॥
स्मृतिप्रदीपिकायाम्—
" चित्रभानुमनड्वाहं देवं गोष्ठं चतुष्पथम् । ब्राह्मणान्धार्मिकांश्चैव नित्यं कुर्यात्प्रदक्षिणम् " ॥
भरद्वाजः—
" कंडूय पृष्ठतो गां तु कृत्वा चाश्वत्थवंदनम् । उपगम्य गुरून्सर्वान्विप्रांश्चैवाभिवादयेत्" ॥ इति।
अभिवादनविधिस्तु पूर्वमेव निरूपितः । इति **मंगलद्रव्यावेक्षणम्** । अथ **ब्रह्मयज्ञविधिः** । तत्र देशकालानाह **श्रुतिः**—(तै. आरण्यके सहवै २।११) " ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यां दिशि ग्रामादच्छदिर्दर्श उदीच्यां प्रागुदीच्यां वोदित आदित्ये " इति । अच्छदिर्दर्शशब्देन देशविशेषो लक्षितः । छदिर्गृहाच्छादनं तृणकटादि । तद्यत्र न दृश्यते तत्र इत्यर्थः । उदित आदित्य इत्यनेन उदयात्प्राक् भावीकर्मकालो निषिध्यते । उदयानंतरं होमकालत्वात्तदनंतर-कालो विधीयते । एतच्चाग्निविहितकालोपलक्षणम् । तथा च **बृहस्पतिः**—
" स चार्वाक्तर्पणात्कार्यः पश्चाद्वा पुनराहुतेः । वैश्वदेवावसाने वा नान्यदर्ते निमित्ततः" ॥ इति ।
अत्र वैश्वदेवशब्देन मनुष्ययज्ञांतकर्म विवक्षितम् । यदाह **व्यासः**—
"यदि स्यात्तर्पणादर्वाक् ब्रह्मयज्ञः कृतो न हि । कृत्वा मानुषयज्ञं तु ततः स्वाध्यायमारभेत्" ॥ इति।
तर्पणं च माध्यान्हिकसावित्रीजपानंतरं विहितं **स्मृतिचंद्रिकामाधवीयस्मृत्यर्थसारादौ** । तथा च **बोधायनः** "अथादित्यमुपतिष्ठते उद्वयंतमसस्परि उदुत्यं चित्रं तच्चक्षुर्देवहितं य उदगादिति अथोत्तरं देवतास्तर्पयति । अथ निवीती भूत्वा ऋषींस्तर्पयत्यथ प्राचीनावीती पितॄन्" ॥ इति ।
व्यासोपि—
"मध्यान्हसमये स्नात्वा सावित्रीं वै जपेत् द्विजः । आचम्य च यथाशास्त्रं शक्त्या स्वाध्यायमाचरेत् ॥
" ततः संतर्पयेद्देवानृषीन्पितृगणांस्तथा " ॥ इति ।
जमदग्निः—"मध्यंदिनकृतोपस्थानः प्राङासीनः कुशासनः" इति । **गौतमोऽपि** (५।४–५)— " नित्यस्वाध्यायः पितृभ्यश्चोदकदानम् " इति । एतदेवाभिप्रेत्य ब्रह्मयज्ञांते **आश्वलायन** आह (३।४।१)—'देवतास्तपर्यति' इत्यादि ।

---

१ क्ष–क्षीरकं । २ ख–वा यव । ३ गघ–ग्राह्यः ।

कालादर्शे—
" प्रातर्मध्यंदिनं वाऽपि ब्रह्मयज्ञो विधीयते। प्रातर्यदि तदा प्रातराहुत्याः परतो भवेत् ॥
" मध्यान्हे चेत्तर्पणात् प्राक् वैश्वदेवात्परत्र वा "॥ एवं च प्रातराहुत्यनंतरं वा मध्यान्हिकसावित्रीजपानंतरं तर्पणात्पूर्वं वा मनुष्ययज्ञानतरं वा ब्रह्मयज्ञः कर्तव्यः ।

देशादीतिकर्तव्यमाह **मनुः** (२।१०४)—
" अपां समीपे नियतो नैत्यिकं विधिमास्थितः । सावित्रीमप्यधीयीत गत्वाऽरण्यं समाहितः" ॥
आपस्तंबोऽपि (ध. सू. १।३।११।२३)—" अकृतप्रातराश उदकांतं गत्वा प्रयतः शुचौ देशेऽधीयीत " इति । उपवीतादीतिकर्तव्यं **श्रुतिराह** (सहवै २।११ पृ. १४५)—" दक्षिणत उपवीयोपविश्य हस्ताववनिज्य त्रिराचामेत् । द्विः परिमृज्य सकृदुपस्पृश्य शिरश्चक्षुषी नासिके श्रोत्रे हृदयमालभ्य " इति । यज्ञोपवीती उपविश्य ब्रह्मयज्ञेन यक्ष्य इति संकल्प्य विद्युदसि इत्युदकमुपस्पृशेत् ' यक्ष्यमाणो वेष्ट्वा ' इति **श्रुतेः** । ततः हस्ताववनिज्य आ मणिबंधनात् प्रक्षाल्य पादयोरप्युलक्षणमेतत् । कर्मांगं क्षालनांतरं हस्तपादस्य ततस्त्रिरपः पिबेत् द्विरौष्ठौ परिमृज्य सकृदुपस्पृश्य सव्यं पाणिं पादौ च प्रोक्ष्य शिरश्चक्षुषी नासिके श्रोत्रे हृदयं चालभ्य प्रत्येकं सजलं स्पृष्ट्वेत्यर्थ इति **हरदत्तेन** व्याख्यातम् ।

त्रिराचामेदित्यादि यदुक्तं तस्य फलमाह **श्रुतिः** (सहवै २।२१ पृ. १४६) " यत्त्रिराचामति तेन ऋचः प्रीणाति यद्विः परिमृजति तेन यजूꣳषि यत् सकृदुपस्पृशति तेन सामानि यच्छिरश्चक्षुषी नासिके श्रोत्रे हृदयमालभते तेनाथर्वांगिरसो ब्राह्मणानितिहासान्पुराणानि कल्पान् गाथानाराशꣳसीः प्रीणाति " इति । आन्ध्रादयस्तु केचिद्यत्सकृदुपस्पृशति तेन सामानीत्यस्यानंतरं यत्सव्यं पाणिं पादौ प्रोक्षति यच्छिरश्चक्षुषी इति फलवाक्यमधीयते ।

इतिकर्तव्यान्तरमाह **श्रुतिः** (सहवै २।११)—" दर्भाणां महदुपस्तीर्योपस्थं कृत्वा प्राङासीनः स्वाध्यायमधीयीत " इति । महत्प्रभूतं यथातथा आसनत्वेन दर्भानुपस्तीर्य द्वितीयार्थे षष्ठी उपस्थमिति दक्षिणोत्तरीणमासनविशेषं कृत्वा प्राङ्मुख आसीनः । तत्रापि द्यावापृथिव्योः संभिमीक्षमाणः समाहितः स्वाध्यायमधीयीत । आत्मीयं वेदं पठेदित्यर्थः ।

दर्भासनस्यावश्यकर्तव्यतार्थं दर्भाः स्तूयंते **श्रुत्यैव** (सहवै २।२१) " अपां वा एष ओषधीनाꣳ रसो यद्दर्भः सरसमेव ब्रह्म कुरुते" इति । अपामोषधीनां च रसो दर्भानाम् तस्मात्तत्रासित्वाधीयानः सरसं सवीर्यं ब्रह्म वेद कुरुते इत्यर्थः ।

प्राङासीन इत्यस्य विशेषमाह **श्रुतिः** (सहवै २।२१)—" दक्षिणोत्तरौ पाणी कृत्वा सपवित्रौ " इति । दक्षिणो हस्त उत्तरः उपरिभूतो ययोः तौ दक्षिणोत्तरौ एवंभूतौ सपवित्रौ पाणी उत्संगवर्तिनौ कृत्वा समावप्रच्छिन्नाग्रौ दर्भौ प्रादेशमात्रौ पवित्रे। अथ यदुक्तं स्वाध्यायमधीयीतेति तत्र विशेषमाह ' ओमिति प्रतिपद्यत ' इति । प्रतिपद्यते आरभते ।

अथोंकारः स्तूयते एतदित्यादिना । ओमिति प्रतिपत्यनंतर कर्तव्यमाह **श्रुतिः** (सहवै २।२१)—"त्रीनेव प्रायुङ्क्त भूर्भुवः सुवरित्याहैतद्वै वाचः सत्यं यदेव वाचः सत्यं तत्प्रायुङ्क्त अथ सावित्रीं गायत्रीं त्रिरन्वाह पच्छोऽर्धर्चशो नवानꣳ सविता श्रियः प्रसविता श्रियमेवाप्नोत्यथो प्रज्ञातयैव प्रतिपदा छंदांसि प्रतिपद्यत" इति । भूर्भुवः स्वरित्याह व्याहृतित्रयं पठति । किंकृतं भवति । त्रीनेव वेदान् प्रयुक्तवान् भवति। तद्वै व्याहृतित्रयं वाचः सत्यं वेदात्मिकाया वाचः संबंधि

सत्यं सारभूतं त्रिभ्यः सारत्वेन प्रभूतत्वाद्दध्नो नवनीतमिव तस्मात्तदेव पठन् त्रयीसारमेव पृथगवस्थितं प्रयुक्तवान् भवति । अथ व्याहृत्यनंतरं सावित्रीं सवितृदैवत्यां गायत्रीं तत्सवितुरिति तृचं त्रिरन्वाह अनुक्रमेण पठति पच्छः पादं पादं अथार्धर्चश अर्धर्चमर्धर्चं संख्यैकवचनादिति शसः । अथानवानमनुच्छ्वासमर्धर्चेप्यनुपरमन् । अत्र केचिद्व्याहृतीर्विहृतास्त्रिष्वनुवचनेषु कुर्वंति । अन्ये तु व्याहृतीर्विहृताः पादादिष्वंतेषु वा तथार्धर्चयोरुत्तमां कृत्स्नायामिति ब्रह्मोपदेशक्रमेण कुर्वंति । सविता खलु सर्वस्याः श्रियः प्रसविता उत्पादयिता । अतस्तद्दैवतां गायत्रीमधीयानः श्रियं प्राप्नोति । अथ सावित्र्यंते स्वाध्यायमधीयीतेति विधिः । एवमेकस्मिन्नहनि विधानमुक्तमथोनन्तरादिषु दिवसेषु प्रज्ञातयैव प्रतिपदानुपक्रमेण छंदांसि छंदोवयवान् प्रतिपद्यते आरभते अव्यवधानेनावस्थितत्वं प्रज्ञातत्त्वं पूर्वेद्युर्यावदधीतं तत एवारभ्य उत्तरेद्युरधीयीत । न तु यं कंचिद्वेदभागमिति स्वशाखाध्ययनं ब्रह्मयज्ञस्तथा च ब्राह्मणम् । "यत्स्वाध्यायमधीयीतैकामप्यृचं यजुः- साम वा तद्ब्रह्मयज्ञः संतिष्ठते" (तै. आ. २१० पृ. १४४) इति ।

शौनकः—" यश्च श्रुतिजपः प्रोक्तो ब्रह्मयज्ञः स उच्यते " इति । **पैठीनसिरपि**—

" स्वशाखाध्ययनं यत्तद्ब्रह्मयज्ञं प्रचक्षते । ब्रह्मयज्ञपरो विप्रो ब्रह्मलोके महीयते " ॥ इति ।

आश्वमेधिकेऽपि (अध्याये १०४)—

" वेदमादौ समारभ्य तथोपर्युपरिक्रमात् । यदधीतेऽन्वहं शक्त्या तत्स्वाध्यायं प्रचक्षते ॥
" ऋचं वाऽथ यजुर्वाऽपि सामगाथामथापि वा । इतिहासपुराणानि यथाशक्ति न हापयेत्" ॥ इति ।

योगयाज्ञवल्क्यः—

" प्रदक्षिणं समावृत्य नमस्कृत्योपविश्य च । दर्भेषु दर्भपाणिभ्यां संहताभ्यां कृतांजलिः ॥
" स्वाध्यायं तु यथाशक्ति ब्रह्मयज्ञार्थमाचरेत् " ॥ इति ।

हारीतः—

"दर्भासीनो दर्भपाणिर्ब्रह्मयज्ञविधानतः । प्राङ्मुखो ब्रह्मयज्ञं तु कुर्याच्छ्रद्धासमन्वितः" ॥ इति ।

शौनकः—"प्राणायामैर्दग्धदोषः शुक्लांबरधरः शुचिः । यथाविध्यप आचम्य आहरेद्दर्भसंस्तरम् ॥
" पवित्रपाणिः कृत्वा तु उपस्थं दक्षिणोत्तरम् " ॥ इति । **स एव**—" प्राग्वोदग्वा ग्रामान्निष्क्रम्याप आप्लुत्य शुचौ देशे यज्ञोपवीत्याचम्याक्लिन्नवासा दर्भाणां महदुपस्तीर्य प्राक्कूलानां तेषु प्राङ्मुख उपविश्योपस्थं कृत्वा दक्षिणोत्तरौ पाणी संधाय पवित्रवंतौ द्यावापृथिव्योः संधिमीक्षमाणः संमील्य वा यत्र वा युक्तमात्मानं मन्यते तथा युक्तोऽधीयीत स्वाध्यायं ओंपूर्वा व्याहृतीः सावित्रीमन्वाहपच्छोर्धर्चशः सर्वाम् " ॥ इति । **स्मृतिरत्नावल्याम्**—

" स्नात्वा यज्ञोपवीती च भूत्वाऽचम्योदकं तथा । पवित्रे लक्षणैर्युक्ते कृत्वा छिन्नाग्रतादिकैः ॥
" तयोरेकैकमेकैकपाणिना धारयेत्पृथक् । सव्यस्य पाणेरंगुष्ठप्रदेशिन्योस्तु मध्यतः ॥
" दक्षिणस्यांगुलीर्न्यस्य चतस्रोंगुष्ठवर्जिताः । तथा सव्यकरांगुष्ठं दक्षिणांगुष्ठवेष्टितम् ॥
" निधाय चैवं संबद्धौ पाणी दक्षिणसक्थिनि ।
" प्रणवं व्याहृतीश्चैव गायत्रीं च जपेत्क्रमात् । पच्छोर्धर्चश उच्छ्वासाद्वेदादींश्चतुरो जपेत् ॥
" नित्यं प्रश्नमधीयीत यथाशक्त्यथवा पठेत् । तत्र त्रयं काठकं च वैश्वदेवमनून्पठेत् ॥
" मन्त्रप्रश्नौ पुनश्चैवं ब्रह्मयज्ञे क्रमं विदुः ।
" यावंतं मंत्रमध्ये तु शक्यं स्वाध्यायमात्मनः । तावंतमनुवाकं वा सूक्तं प्रश्नमथापि वा ॥
" तथा यावत्प्रतिज्ञातमध्यायं सूक्तमेव वा । ऋचं वाप्यंततोऽवश्यमधीयीत स्वशक्तितः ॥

" ओं नमो ब्रह्मण इति जपित्वा प्रणवं जपेत्। यद्द्यादतिथिभ्यस्तु ब्रह्मयज्ञस्य दक्षिणा॥
" न कुर्यादासनस्थस्तु ब्रह्मयज्ञं कदाचन " ॥ इति। आसनस्थः कंबलाद्यासनस्थः॥

स्मृत्यंतरे—

" नमो ब्रह्मण इत्येतां त्रिरुक्त्वा प्रणवं वदेत्। ग्रामाद्बहिरधीयीत मध्यमेन स्वरेण तु॥
"अधीते मनसा ग्रामे ब्रह्मयज्ञं करोति चेत्। अयं तु ब्रह्मयज्ञोऽस्य भिक्षादानादिदक्षिणा"॥ इति।

आपस्तंबः (१।३।११।२३–२४) " शुचौ देशेऽधीयीत यथाध्यायमुत्सृजन्वाचा मनसा चानध्याये " इति। यथाध्यायं यथा पाठमनेन पदक्रमाद्यनुषंगो निषिध्यते। वाचेति मानसस्य व्युदासः। उत्सृजन्नादित आरभ्य प्रथमादिष्वहःस्वधीतं द्वितीयादिष्वहःसूत्सृज्य ततः परमधीयीतेत्यर्थः। मध्यंदिने विशेषमाह **श्रुतिः** (सहवै २।१२ पृ. १५०)—"मध्यंदिने प्रबलमधीयीतासौ खलु वावैष आदित्यो यद्ब्राह्मणस्तस्मात्तर्हि तीक्ष्णिष्ठं तपति " इति। प्रबलं प्रभूतं योऽयं ब्राह्मणो नाम एषः। असावादित्यः स्वयमादित्य एवायं तयोरेकत्वात्। " स यश्चायं पुरुषे। यश्चासावादित्ये। स एकः " (तै. आ. भृगूपनि. ९।१।४ पृ. ६८४) इति **श्रुतेः**। यस्माद्ब्राह्मणाख्य आदित्यो मध्यंदिने अध्ययनं तपःस्थानीयं प्रबलं करोति तस्मात्तर्हि तस्मिन् काले मध्यंदिने मुख्यादित्यस्तीक्ष्णिष्ठं तीक्ष्णतरं तपतीत्यर्थः। **तत्रैव** (२।१३।१)—"नमो ब्रह्मण इति परिधानीयां त्रिरन्वाहाप उपस्पृश्य गृहानेति ततो यत्किंच ददाति सा दक्षिणा " इति। परिधानीयां परिसमापनीयामृचं त्रिरन्वाहाप उपस्पृश्य आदावंते चेति वेदितव्यम्। तत्रादौ विद्युदसीति अंते वृष्टिरसीति ततो गृहं गत्वा यत्किंचिदपि गृहस्थो दद्यात्। सा दक्षिणा तस्य यज्ञस्यांगं तस्माद्यत्किंचिद्द्यादिति विधिः।

एवं मुख्यविधिमुक्त्वा आपत्कल्पमाह **श्रुतिः** (सहवै २।१२ पृ. १४९)—"ग्रामे मनसा स्वाध्यायमधीयीत दिवा नक्तं वेति। ह स्माऽऽह शौच आन्हेय उतारण्येऽबल उत वाचोत तिष्ठन्नुत व्रजन्नुतासीन उत शयानोऽधीयीतैव स्वाध्यायं तपस्वी पुण्यो भवति य एवं विद्वान्स्वाध्यायमधीते"इति। यदुक्तमच्छदिर्दर्श इति तत्रोच्यते। ग्रामे मनसेति। यदुक्तमुदित आदित्य इति तत्रोच्यते। दिवा नक्तं वेति। मनसेत्येव शौचः शुचेः पुत्रः। आन्हेयः एवं नामक ऋषिरित्याह स्म। उतारण्ये अरण्येऽपि अबल अशक्तश्चेन्मनसाधीयीत उत वाचा। आसनाशक्तौ स्थानाद्यनुज्ञायते उत तिष्ठन्नित्यादिना। अधीतैव अशक्तश्चेद्यथाकथंचिदध्ययनमेव कुर्यात्। न त्वंगाशक्त्या प्रधानं परित्याज्यमित्यर्थः। य एवं स्वाध्यायमाहात्म्यं विद्वान्विजानन्स्वाध्यायमधीते स एव तपस्वी भवति। अध्ययनफलं प्राप्नोति पुण्यः पंक्तिपावनश्च भवतीत्यर्थः। नक्तं वेत्येतत् ब्रह्मयज्ञस्यावश्यकत्वप्रतिपादनपरं न तु रात्रावनुष्ठानपरम्। तथा च **श्रूयते** (सहवै २।१३ पृ. १५१)— " स वा एष यज्ञः सद्यः प्रतायते सद्यः संतिष्ठते तस्य प्राक्सायमवभृथः " इति। स एष ब्रह्मयज्ञः सद्यः अहन्येव प्रतायते आरभ्यते अहन्येव संतिष्ठते समाप्यते तस्य सायंकालात्पूर्वमेवावभृथः समाप्तिरित्यर्थः।

स्मर्यते च—

" रात्रौ प्रहरपर्यंतं दिवा कृत्यानि कारयेत्। ब्रह्मयज्ञं च सौरं च वर्जयित्वा विशेषतः "॥इति।

अतो दिवा ब्रह्मयज्ञाकरणे स्नातकव्रतलोपे च "प्रायश्चित्तमभोजनम्" इति (११।२०३) **मनूक्तं** द्रष्टव्यम्। **आपस्तंबः** (१।४।१२।१–२)—"तपः स्वाध्याय इति ब्राह्मणम्। तत्र **श्रूयते** "स यदि तिष्ठन्नासीनः शयानो वा स्वाध्यायमधीते तप एव तत्तप्यते तपो हि स्वाध्याय इति "। अनधीतवेदस्य ब्रह्मयज्ञे गायत्रीजपमाह **मनुः** (२।१२४)—

" अपां समीपे नियतो नैत्यिकं विधिमास्थितः। गायत्रीमप्यधीयत गत्वाऽरण्यं समाहितः "

संग्रहे—"ब्रह्मयज्ञे जपेत्सूक्तं पौरुषं चिंतयन्हरिम्। स सर्वान्जपते वेदान्सांगोपांगान्विधानतः"॥इति।

याज्ञवल्क्यः (आ. १०१)—

"वेदवाक्यपुराणानि सेतिहासानि शक्तितः। ब्रह्मयज्ञप्रसिध्यर्थं विद्यां चाध्यात्मिकीं जपेत्"॥ इति।

स्मृत्यर्थसारे—" प्रणवव्याहृतीरुक्त्वा सावित्रीं पच्छोऽर्धर्चशोऽनवानमुक्त्वा अध्यायं सूक्तमृचं वा प्रश्नमनुवाकं वा यजुर्वा साम वा सावित्रीं वा इतिहासपुराणं वा मंद्रेण मध्यमेन वा स्वरेण वाऽधीत्य नमो ब्रह्मण इति त्रिरुक्त्वा ओं तत्सदिति समापयेत् " इति ।

ग्रहणाध्ययनवद्ब्रह्मयज्ञाध्ययनस्यानध्यायदिवसे परित्यागप्राप्तौ **मनुराह** (२।१०५–१०६)—
" वेदोपकरणे चैव स्वाध्याये चैव नैत्यिके । न निरोधोऽस्त्यनध्याये होममंत्रेषु चैव हि ॥
" नैत्यिके नास्त्यनध्यायो ब्रह्मसत्रं हि तत्स्मृतम् । ब्रह्माहुतिहुतं पुण्यं यदध्यायवषट्कृतम्"॥इति। ब्रह्मैवाहुतिर्द्रव्यं तेन हुतं अधीयत इत्यध्यायो याज्यादिमंत्रसमूहः। तेन वषट्कारेणापि हुतमित्यर्थः। यतो नास्त्यनध्यायः। अत एवानध्यायविशेषाननूद्य तेषु जपं प्रशंसति" **श्रुतिः** (सहवै २।१४ पृ.१५२)-
" तस्य वा एतस्य यज्ञस्य मेघो हविर्धानं विद्युदग्निर्वर्ष[1] हविस्तनयित्नुर्वषट्कारो यदवस्फूर्जति सोऽनुवषट्कारो वायुरात्माऽमावास्या स्विष्टकृद्य एवं विद्वान् मेघे वर्षति विद्योतमाने स्तनयत्यवस्फूर्जति पवमाने वायावमावास्याया[1] स्वाध्यायमधीते तप एव तत्तप्यते" इति। अस्य यज्ञरूपत्वात्कर्मणि चानध्यायाभावात्तदेव च कर्मत्वं स्पष्टयितुं मेघादयो हविर्धानादिरूपेण रूप्यंते। तस्यैतस्य ब्रह्मयज्ञस्याध्ययनात्मनो मेघादयो हविर्धानादिस्थानीयाः। उदकाधारत्वेन मेघो हविर्धानस्थानीयः। उदकस्य च हविष्ट्वमाह वर्षं हविरिति। हविर्धाने हि सोमादीनि हवींषि निधीयंते। विद्युदग्निस्थानीयाप्रकाशवत्वाद्वृष्टिहेतुत्वाच्च वर्षं हविस्थानीयं सस्याद्युत्पत्तिहेतुत्वात्स्तनयित्नुः स्तनितं कुर्वन्मेघो वषट्कारस्थानीयः। तदनंतरं वर्षलक्षणस्य हविषः प्रपतनात् अवस्फूर्जोऽशनिशब्दः सोऽनुवषट्कारस्थानीयः। पश्चाद्भावसाम्याद्वायुरात्मस्थानीयः। प्राणत्वादमावास्यास्विष्टकृत्स्थानीया। यजमानसंपत्तिहेतुत्वाद्य एवं मेघादीनामध्ययनांगत्वं विद्वान्मेघादिसद्भावेऽपि वायौ च पवमाने अमावास्यायां चाधीते तत्तप एव तप्यतीति नित्यस्वाध्यायाध्ययनलक्षणं तपः। अविगुणमेव चरति तदेवाह 'तपो हि स्वाध्याय' इति ।

आपस्तंबः (१।४।१२।३-७)—" अथापि वाजसनेयिब्राह्मणम् । ब्रह्मयज्ञो ह वा एष यत्स्वाध्यायस्तस्यैते वषट्कारा यत्स्तनयति यद्विद्योतते यदवस्फूर्जति यद्वातो वायति । तस्मात् स्तनयति विद्योतमानेऽवस्फूर्जति वाते वा वायत्यधीयीतैव वषट्काराणामच्छम्बट्कारायेति । तस्य शाखांतरे वाक्यसमाप्तिरथ यदि वातो वायात्स्तनयेद्वा विद्योतेत वावस्फूर्जेद्वैकां वर्चमेकं वा यजुरेकं वा सामाभिव्याहरेत् भूर्भुवस्वः सत्यं तपः श्रद्धायां जुहोमीति वैतत्तेनोहैवास्यैतदहः स्वाध्याय उपात्तो भवत्येवं सत्यार्यसमयेनाविप्रतिषिद्धमध्यायानध्यायं ह्युपदिशंति । तदनर्थकं स्याद्वाजसनेयिब्राह्मणं चेदवेक्षेत " इति ।

अस्यार्थः (पृ.२९)—स्वाध्यायो नाम य एष ब्रह्मयज्ञः। ब्रह्म वेदः। तत्साधनो यागस्तस्य यज्ञस्य एते स्तनयित्वादयो वषट्काराः । बहुवचननिर्देशाद्वषट्कारानुवषट्कारस्वाहाकाराः प्रदानार्था गृह्यंते। यस्मादेते वषट्कारास्तस्मात् स्तननादिष्वनध्यायनिमित्तेषु सत्स्वपि अधीयीतैव। न पुनरनध्याय इति नाधीयीत। किमर्थं वषट्काराणामेतेषामच्छम्बट्काराय अव्यर्थत्वाय। तस्य वाजसनेयि-

१ क्ष–पि

ब्राह्मणस्य शाखांतरे पर्यवसानं तदेव शाखांतरं पठति। अथ यदीति। वातादिषु सत्सु एकामृच-मधीयीत प्राप्ते प्रदेशे यजुर्वेदाध्ययने एकं यजुः सामवेदाध्ययने एकं साम सर्वेषु वा वेदेषु भूर्भुवः सुवः सत्यं तप इति यजुरभिव्याहरेन्न पुनर्यथापूर्वं प्रश्नमात्रम् तेनैव तावतैवास्याध्येतुस्तस्मिन्नहनि स्वाध्याय उपात्तो भवति। अधीतो भवतीति यावदेवं सति वाजसनेयिब्राह्मणस्य शाखांतरे वाक्यसमाप्तावाश्रीयमाणायामार्यसमयेन आर्याः विशिष्टा मन्वादयः तेषां समयो व्यवस्था तेना-विप्रतिषिद्धं भवति। इतरथा विप्रतिषिद्धं स्यात्। कथम्। आर्या ह्यध्यायनमध्यायं चोपदिशन्ति। तदुपदेशनमनर्थकं स्याद्यदि वाजसनेयिब्राह्मणं यथाश्रुतमवेक्षेताध्येता अतो। वाक्यपरिसमाप्ति-रेव युक्ता। एवं हि वाजसनेयिब्राह्मणस्यापि नात्यंतबाधः। अनध्यायोपदेशस्यापि प्रभूताध्ययन-विषयतया अर्थवत्त्वमिति।

केचित्तु नित्यप्रश्नाध्ययिनोऽनध्यायो नास्ति अमावास्यायां स्वाध्यायमधीत इति नित्यानध्यायेऽप्यध्ययनविधानात्। एकां वर्चमेकं वा यजुरल्पं जपेदनध्याये पर्वण्यल्पतरं जपेदित्यादिकं त्वनियतप्रश्नाध्यायिविषयम्।

अत एवोज्वलायाम् (पृ.२७८)—"का पुनरसौ स्मृतिर्या ब्रह्मयज्ञेऽप्यनध्यायमुपदिशति। **मानवे** तावद्विपर्ययः श्रूयते 'नैत्यिके नास्त्यनध्याय' (२।१०६) इति। सामान्येनानध्यायोपदेशस्तु ब्रह्मयज्ञादन्यत्र चरितार्थः। तस्मात्तादृशी श्रुतिर्मृग्या" इति।

तथा **स्मृतिरत्नावल्याम्**—

"देवतार्चनमंत्राणां नानध्यायः सदा स्मृतः। संकल्पितानां मंत्राणां वैदिकानां तथैव च॥

"नानध्यायनिरोधोऽस्ति जपकर्मणि सर्वदा। नित्ये जपे च काम्ये च क्रतौ पारायणे तथा॥

"नानध्यायोऽस्ति वेदानामंगाभ्यासे तथैव च"॥ इति। संकल्पितानां रुद्रैकादशिनीं पुरुषसूक्त-महं नित्यं जपिष्यामीति संकल्पितवैदिकमंत्राणां जपे ब्रह्मयज्ञादौ च नास्त्यनध्याय इत्यर्थः।

आपस्तंबोऽपि (१।४।१२।९)—"विद्यां प्रत्यनध्यायः **श्रूयते**। न कर्मयोगे मन्त्राणाम्" इति। विद्यां प्रत्येव ग्रहणधारणाध्ययनं प्रत्येवानध्यायः। न पुनर्ब्रह्मयज्ञाग्निहोत्रादिकर्मयोगे मन्त्राणा-मित्यर्थः। न च कर्मयोगेऽनध्यायनिषेध एकदेशविषयतया चरितार्थ इति वाच्यम्। अग्नि-होत्रमंत्राणामप्येकदेशाध्ययनप्रसक्तेः। अतो नित्यप्रश्नाध्यायिनो नानध्याये निवृत्तिः। अनियता-ध्यायिनस्तु एकदेशाध्ययनमित्याहुः। आत्मदेशयोरशुचित्वे ब्रह्मयज्ञो वर्जनीयः। तथा च श्रुतिः (सहवै २।१५ पृ. १५३)—"तस्य वा एतस्य यज्ञस्य द्वावनध्यायौ यदात्माऽ-शुचिर्यद्देशः" इति। ब्रह्मयज्ञोऽयं नित्यः।

"अग्निकार्यपरिभ्रष्टः पतितः परिकीर्तितः। ब्रह्मयज्ञविहीनश्च ब्रह्महा कीर्तितो बुधैः"॥ इति प्रत्य-वायस्मृतेः। "एतत्तं योऽनूत्सृजत्यभागो वाचि भवत्यभागो नाके" इति **श्रुतेश्च** (सहवै २।१५ पृ. १५४)। तमेतं स्वाध्यायमारभ्य योऽनुत्सृजति पश्चात् त्यजति तस्य वाचि अभागो भवति फलं न भवति। अत एव नाकेऽपि अभागो भवतीत्यर्थः।

ब्रह्मयज्ञं प्रशंसति श्रुतिः (सहवै २।१४, १५ पृ. १५२; १५३)—"उत्तमं नाकꣳ रोहत्युत्तमः समानानां भवति यावंतꣳह वा इमां वित्तस्य पूर्णां ददत्स्वर्गं लोकं जयति तावंतं लोकं जयति भूयाꣳसं चाक्षय्यं चापपुनर्मृत्युं जयति ब्रह्मणः सायुज्यं गच्छति"॥ "अरण्ये ग्रामे वा यावंतं रसꣳस्वाध्यायमधीते सर्वान् लोकान् जयति सर्वान् लोकाननृणोऽनुसंचरति इति च। "यं यं क्रतुमधीते तेन तेनास्येष्टं भवत्यग्नेर्वायोरादित्यस्य सायुज्यं गच्छति" इति (पृ.१५६) च।

काम्यब्रह्मयज्ञाध्ययनफलमाह **याज्ञवल्क्यः** (आचारे ४१–४८)—

" मधुना पयसा चैव स देवांस्तर्पयेत् द्विजः । पितॄन्मधुघृताभ्यां च ऋचोऽधीते हि योऽन्वहम् ॥
" यजूंषि शक्तितोऽधीते योऽन्वहं स घृतामृतैः । प्रीणाति देवानाज्येन मधुना च पितॄंस्तथा ॥
" स तु सोमघृतैर्देवांस्तर्पयेद्योऽन्वहं पठेत् । सामानि तृप्तिं कुर्याच्च पितॄणां मधुसर्पिषा ॥
" मेदसा तर्पयेद्देवानथर्वांगिरसः पठन् । पितॄंश्च मधुसर्पिर्भ्यां अन्वहं शक्तितो द्विजः ॥
" वाकोवाक्यं पुराणं च नाराशंसीश्च गाथिकाः । इतिहासांस्तथा विद्याः शक्त्याधीते हि योऽन्वहम् ॥
" मांसक्षीरौदनमधुतर्पणं सदिवौकसाम् । करोति तृप्तिं कुर्याच्च पितॄणां मधुसर्पिषा ॥
" ते तृप्तास्तर्पयंत्येनं सर्वकामफलैः शुभैः । यं यं क्रतुमधीतेऽसौ तस्य तस्याप्नुयात्फलम् ॥
" त्रिर्वित्तपूर्णापृथिवीदानस्य फलमश्नुते । तपसो यत् परस्येह नित्यं स्वाध्यायवान् द्विजः "॥ इति ।

वाकोवाक्यं प्रश्नोत्तररूपं वेदवाक्यम् । पुराणं ब्राह्मादि । चकारान्मानवादिधर्मशास्त्रम् । नाराशंसी रुद्रदैवत्यान्मंत्रान् । गाथा यज्ञगार्थेंद्रगाथाद्याः । इतिहासान्भारतरामायणादीन् । विद्याः वारुण्याद्याः ।

श्रुतिरपि (सहवै २।१० पृ. १४४)–" यदृचोऽधीते पयसः कूल्या अस्य पितॄन्स्वधा अभिवहंति यद्यजूंषि घृतस्य कूल्या यत्सामानि सोम एभ्यः पवते यदथर्वाङ्गिरसो मधोः कूल्या यद्ब्राह्मणानीतिहासान् पुराणानि कल्पान् गाथा नारांशसीर्मेदसः कूल्या अस्य पितॄन्स्वधा-अभिवहंति "। " यदृचोऽधीते पय आहुतिभिरेव तद्देवाꣳस्तर्पयति यद्यजूꣳषि घृताहुतिभिर्यत्सामानि सोमाहुतिभिर्यदथर्वांगिरसो मध्वाहुतिभिर्यद्ब्राह्मणानीतिहासान्पुराणानि कल्पान्गाथा नारशꣳसीर्मेदाहुतिभिरेव तद्देवाꣳस्तर्पयति त एवं[1] तृप्ता आयुषा तेजसा वर्चसा श्रिया यशसा ब्रह्मवर्चसेनान्नाद्येन च तर्पयंति " इति च । पयसः कूल्याः पयः । परिपूर्णाः कूल्याः अस्याध्येतुः । पितॄन्स्वधारूपा आभिमुख्येन वहंति प्रवहन्ति । सुगममन्यत् । अत्र केचित् ब्रह्मयज्ञे नित्ये काम्ये चाथर्वांगिरसादिमंत्रजपं कुर्वंति । तत्र "ये यज्ञेन दक्षिणया समता" इति वर्गद्वयमथर्वांगिरसमंत्रः । "चित्तिः... । पृथिवी होता । अग्निर्होता" इत्यनुवाका **ब्राह्मणमंत्रः** (चित्ति उ. नि १–३ पृ. १६८, १६९) । " घृतं पिबंति मधु ते पिबंति सोमं पिबंत्यमृतेन सार्धं मृत्योः परस्तादमृता भवंति ये ब्राह्मणा ब्रह्मचर्यं चरंति " इति **इतिहासमंत्रः** ।

" परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय संभवामि युगे[2] युगे "॥ इति श्लोकः **पुराणम्** । "अथातो दर्शपूर्णमासौ व्याख्यास्याम" इति **कल्पः** । तदेषा हि यज्ञगाथा गीयते ।

" वैश्वानरीं व्रातवतीं पवित्रेष्टिं तथैव च । ऋतावृतौ प्रयुंजानः पुनाति दश पूरुषम् " ॥

इति **गाथामंत्रः** ॥ 'इदं जना उपश्रुत नाराशंसीः श्रवस्यते । षष्टिं सहस्रा नवतिं च गौरव आ दशमेषु दध्नै[3]होमी ' इति **नाराशंसमंत्रः** । ततः ' तच्छंयोरावृणीमहे ' इति शांतिं पठंति । अयज्ञो वा एषः योऽपत्नीकः ।

" पंच क्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम् । पंचसूना गृहस्थस्य वर्ततेहरहः सदा ॥
" एतासां पावनार्थाय पंचयज्ञाः प्रकल्पिताः "॥ इत्यादिभिः पंचमहायज्ञांतःपातिनो ब्रह्मयज्ञस्य गृहस्थाधिकारित्वावगमेऽपि ब्रह्मचारिभिरपि कर्तव्यः ।

---

१ खक्ष–नं । २ भ. गी. ३।८ । ३ गय–चरु ।

"सायंप्रातश्चाग्निकार्यं यथाशक्ति जितेंद्रियः । कुर्यात्प्रतिदिनं वर्णी ब्रह्मयज्ञं च तर्पणम् ॥" इति विशेषस्मरणात् । **वसिष्ठः**—

" ऋक्सामाथर्ववेदोक्तान् जपेन् मंत्रान्यजूंषि च । जपित्वैवं ततः कुर्याद्देवर्षिपितृतर्पणम् "॥ इति । तर्पणं तु यथास्वशाखं द्रष्टव्यम् । तच्चाग्रे वक्ष्यते । इति **ब्रह्मयज्ञविधिः** ।

अथ द्वितीयभागकृत्यम् । अथाष्टधा विभक्तस्य दिवसस्य प्रथमभागकृत्यमुक्त्वा द्वितीयभागकृत्यमाह **दक्षः** (२।२५)—" द्वितीये तु यथाभागे वेदाभ्यासो विधीयते" ॥ इति । **कूर्मपुराणेऽपि** (उ. १८।५२–५४)–" वेदाभ्यासं ततः कुर्यात्प्रयत्नाच्छक्तितो द्विजः ॥ ५२॥

"जपेदध्यापयेच्छिष्यान् धारयेद्वै विचारयेत् । अवेक्षेत च शास्त्राणि मन्वादीनि द्विजोत्तमः ॥५३॥

" वैदिकांश्चापि नियमान्वेदांगानि च सर्वशः " ॥ ५४ ॥ इति ।

व्यासः—

" नान्यतो ज्ञायते धर्मो वेदादेवैष निर्बभौ । तस्मात्सर्वप्रयत्नेन धर्मार्थं वेदमाश्रयेत् " ॥

याज्ञवल्क्यः (आ. ९९)—

"हुत्वाऽग्निं सूर्यदैवत्यान् जपेन्मंत्रान्समाहितः। वेदार्थानधिगच्छेच्च शास्त्राणि विविधानि च"॥इति। तस्मिन्नेव भागे कृत्यांतरमाह **दक्षः** (२।२८)–"समित्पुष्पकुशादीनां स कालः समुदाहृतः"इति।

चंद्रिकायाम्—

"संध्या सावित्री होमाश्च पूर्वस्मिन्भाग एव तु । वेदाभ्यासो द्वितीयांशे समित्पुष्पकुशाहृतिः" ॥

स्मृत्यंतरे—

" तथायुष्यहितार्थाय स्वाध्यायं किंचिदाचरेत् । कुशपुष्पेंधनादीनि गत्वा दूरं समाहरेत् " ॥

संवर्त्तः—" समित्पुष्पकुशादीनि श्रोत्रियः स्वयमाहरेत् " इति ।

संग्रहे—

" शूद्राहृतानि पुष्पाणि क्रयक्रीतानि यानि च । पारक्याणि च पुष्पाणि लब्धान्यर्हाणि नार्चने ॥

" उत्तमं स्वार्जितं पुष्पं मध्यमं वन्यमुच्यते । अधमं तु क्रयक्रीतं पारक्यं त्वधमाधमम् ॥

" त्याज्यं पर्युषितं जन्तुदूषितं पादलंघितम् । म्लानं स्पृष्टं तथास्पृश्यैर्नीतं च प्रतिलोमजैः ॥

" हस्तानीतं पटानीतं स्वयंपतितमेव वा । देवारामोद्भवं पुष्पं गृहदेवाय नार्चयेत् " ॥

आश्वमेधिके—

" अर्कपुष्पाणि चान्यानि अर्कपत्रस्थितानि च । निर्गंधानि च पुष्पाणि सर्वाण्येतानि वर्जयेत् ॥

" कीटकै शापविद्धानि शीर्णपर्युषितानि च । स्वयंपतितपुष्पाणि त्यजेदुपहतानि च " ॥

स्मृतिरत्ने—

" जलजानां च सर्वेषां पात्राणामहतस्य च । कुशपुष्पस्य रजतसुवर्णकृतयोरपि ॥

" न पर्युषितदोषोऽस्ति तीर्थतोयस्य चैव हि " ॥

मौद्गल्यः—"अवालुकायुतं तोयमस्नेहाक्तं तथौदनम् । असूत्रग्रथितं पुष्पं सर्वं पर्युषितं भवेत् ॥

" वर्ज्यं पर्युषितं चान्नं वर्ज्यं पर्युषितं जलम् । न वर्ज्यं जान्हवीतोयं न वर्ज्यं तुलसीदलम् ॥

" आरवारे च शुक्रे च मन्वादिषु युगादिषु । नाहरेत्तुलसीपत्रं मध्यान्हात् परतोऽहनि ॥

"संक्रांत्यां पक्षयोरंते द्वादश्यां निशि संध्ययोः । तुलसीं ये विचिन्वंति ते कृंतंति हरेः शिरः " ॥

---

१ गघक्ष–ततः शिष्य । २ क्ष–रात्र ।

भारते—

“ तुलसीपत्रमादाय मद्भक्तो गतवान्यतः। तमेवानुगमिष्यामि यथा गौर्वत्सला तथा ”॥

तुलस्याहरणमंत्रः

“ तुलस्यमृतसंभूते सदा त्वं केशवप्रिये। केशवार्थं लुनामि त्वां वरदा भव शोभने॥

“ मोक्षैकहेतोर्धरणिप्रसूते विष्णोः समस्तस्य गुरोः प्रियं ते॥

“ आराधनार्थं पुरुषोत्तमस्य लुनामि पत्रं तुलसि क्षमस्व॥

“ प्रसीद मम देवेशि प्रसीद हरिवल्लभे। क्षीरोदमथनोद्भूते तुलसि त्वं प्रसीद मे ”॥

कुशोत्पाटनविधिः प्रसंगात्पूर्वमेवोक्तः। इति **द्वितीयभागकृत्यम्**।

अथ तृतीयभागकृत्यम्। तृतीयभागकृत्यमाह **दक्षः** (२।२८)—“ तृतीये च तथा भागे पोष्यवर्गार्थसाधनम् ” इति। **व्यासोऽपि** (३।३६–३७)—

“ उपेयादीश्वरं चाथ योगक्षेमार्थसिद्धये। साधयेद्विततानर्थान् कुटुंबार्थं द्विजोत्तमः ”॥

ईश्वरं राजानम्। अलब्धलाभो योगः। लब्धपरिपालनं क्षेमः। **हारीतः**—

“ संचिंत्य पोष्यवर्गस्य भरणार्थं विचक्षणः। ईश्वरं चैव कार्यार्थमभिगच्छेत् द्विजोत्तमः”॥ इति। **गौतमोऽपि** (९।६३-६४)“योगक्षेमार्थमीश्वरमधिगच्छेत्। नान्यमन्यत्र देवगुरुधार्मिकेभ्यः”॥इति। **मनुः** (४।३)—

“ यात्रामात्रप्रसिध्यर्थं स्वैः कर्मभिरगर्हितैः। अक्लेशेन शरीरस्य कुर्वीत धनसंचयम् ”॥ इति।

स्मृतिरत्ने—

“ अन्होऽष्टधा विभक्तस्य भागे चैव तृतीयके। पोष्यवर्गार्थसिद्ध्यर्थं धनमिच्छेत्तु बुद्धिमान्”॥ इति।

पोष्यवर्गो **दक्षेण** दर्शितः (२।२९–३२)—

“ माता पिता गुरुर्भार्या प्रजा दासः स्वमाश्रितः। अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्ग उदाहृतः॥

“ ज्ञातिर्बंधुजनः क्षीणस्तथानाथः समाश्रितः। अन्योऽपि धनहीनस्तु पोष्यवर्ग उदाहृतः॥

“ भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम्। नारकं पीडनं तस्य तस्माद्यत्नेन तान्भरेत्॥

“ स जीवति य एवैको बंधुभिश्चोपभुज्यते। जीवंतोऽपि मृतास्त्वन्ये पुरुषाः स्वोदरंभराः”॥ इति।

अथ चतुर्थभागकृत्यम्। **दक्षः**—

“चतुर्थे तु तथा भागे स्नानार्थं मृदमाहरेत्। तिलपुष्पकुशादीनि स्नानं चाकृत्रिमे जले”॥ इति।

मध्यान्हस्नानविधिस्तु प्रसंगात्पूर्वमेव निरूपितः। मध्यान्हसंध्याविधीनाह **शंखः**—

“ प्रातःसंध्यां सनक्षत्रां मध्यमां स्नानकर्मणि। सादित्यां पश्चिमां संध्यामुपासीत यथाविधि॥

“ आपोहिष्ठेति संप्रोक्ष्य तृचेनाब्दैवतेन तु। आपः पुनंतु मंत्रेण पीत्वापो मार्जयेत्पुनः॥

“ दधिक्राव्णण इति च आपो हिष्ठादिभिस्तथा। प्रदक्षणं परिषिच्य त्वारभेच्छ्रुतिचोदितम्॥

“ अर्घ्यमेकं प्रदातव्यं मध्यान्हे भास्करं प्रति। पाणिना जलमादाय सकृत्कुर्यात् प्रदक्षिणम्॥

“ दर्भान् धारयमाणः सन्नात्मनो ध्यानमाचरेत्। आदित्यादीन् ग्रहांस्तत्र तर्पयेत्सुसमाहितः॥

“ अथ मध्यमसंध्यायामासीनः प्राङ्मुखो जपेत्। स्थितो जपेत्सदाकालमादित्याभिमुखो द्विजः॥

“ यदि स्यात्क्लिन्नवासा वै वारिमध्यस्थितो जपेत्। सहस्रपरमां देवीं शतमध्यां दशावराम्॥

“ गायत्रीं तु यथाशक्ति जपेदव्यग्रमानसः। स्वशाखाविहितैर्मंत्रैरादित्यमुपतिष्ठते॥

“ प्रदर्शयन्योगमुद्रामासत्येनेतिमंत्रकम्। स्थितो जपेदूर्ध्वबाहुः सूर्यं पश्यन्समाहितः ”॥

योगयाज्ञवल्क्यः—

" आसत्यर्ंषु च पूर्वे द्वे त्रिष्टुभौ कवयो विदुः। गायत्री तु तृतीया स्याच्चतुर्थी जगती तथा॥
" उष्णिक् तच्चक्षुराद्यस्य छंद इत्युच्यते बुधैः। हिरण्यस्तूप इत्येष ऋषिर्देवोऽत्र भास्करः "॥

भरद्वाजः—

" उपस्थाय नमस्कुर्याच्चतुःसंध्यादिदेवताः। दिशश्च साधिपा नत्वा गुरूनप्यभिवादयेत्"॥ इति। प्रातर्होमानंतरं ब्रह्मयज्ञाकरणे माध्यान्हिकजपानंतरं तर्पणात्प्राक् ब्रह्मयज्ञः कार्यः। "स चार्वाक्तर्पणात्कार्यः " इति **स्मृतेः**।

मध्यान्हे ब्रह्मयज्ञानंतरं तर्पणं कार्यम्। तथा च **व्यासः—**

" आचम्य च यथाशास्त्रं शक्त्या स्वाध्यायमाचरेत्। ततः संतर्पयेद्देवान्पितॄनृषिगणांस्तथा॥
" आदावोंकारमुच्चार्य नामांते तर्पयामि च। देवान्ब्रह्मऋषींश्चैव तर्पयेदक्षतोदकैः[1]॥
" तिलोदकैः पितॄन्भक्त्या स्वसूत्रोक्तविधानतः। यज्ञोपवीती देवानां निवीती ऋषितर्पणे॥
" प्राचीनावीती पित्र्ये तु स्वेन तीर्थेन भावितः "॥

चंद्रिकायाम्—" सार्धयामादूर्ध्वं मध्यान्हः तत्र माध्यान्हिकानंतरं नित्यतर्पणं कुर्यात्। तच्च देवर्षिपितृतर्पणामिति "। **माधवीये—**

"प्रागग्रेषु सुरांस्तर्पयेन्मनुष्यांश्चैव मध्यतः। पितॄंस्तु दक्षिणाग्रेषु चैकद्वित्रिजलांजलीन्" ॥ इति।

व्यासः—

" एकैकमंजलिं देवा द्वौ द्वौ तु सनकादयः। अश्नंति पितरस्त्रींस्त्रीन्स्त्रियश्चैकैकमंजलिम् " ॥ इति।

विष्णुपुराणे (३।११।२७–२८)—

" त्रिरपः प्रीणनार्थाय देवानामपवर्जयेत्। तथर्षीणां यथान्यायं सकृच्चापि प्रजापतेः॥
" पितॄणां प्रीणनार्थाय त्रिरपः पृथिवीपते"॥ इति। अत्रांजलिसंख्या यथाशाखं व्यवतिष्ठते। यत्र शाखायां न संख्यानियमः श्रुतः तत्र विकल्प इति **माधवीये**। **शंखलिखितौ—**

" उभाभ्यामपि हस्ताभ्यां प्राङ्मुखो यज्ञोपवीती प्रागग्रैः कुशैर्देवतातर्पणं देवतीर्थेन कुर्यात् " इति।

विष्णुरपि—" ततः कृत्वा निवीतं तु यज्ञसूत्रमतंद्रितः।
"प्राजापत्येन तीर्थेन मनुष्यांस्तर्पयेद्व्रती। प्राचीनावीती पित्र्येण पितॄंस्तीर्थेन तर्पयेत्"॥ इति।

पैठीनसिः—

"अपसव्यं ततः कृत्वा स्थित्वा च पितृदिङ्मुखः।पितॄन् दिव्यानदिव्यांश्च पितृतीर्थेन तर्पयेत्"॥इति। दिव्या वसुरुद्रादित्याः। अदिव्याः पित्रादयः। **हारीतः—**

" वसित्वा वसनं शुष्कं स्थले चास्तीर्णबर्हिषि। विधिज्ञस्तर्पणं कुर्यान्न पात्रेषु कदाचन॥
" पात्राद्वा जलमादाय शुभे पात्रांतरे क्षिपेत्। जलपर्णेऽथ वा गर्ते न स्थले हीनबर्हिषि॥
" केशभस्मतुषांगारकटकास्थिसमाकुलम्। भवेन्महीतलं यस्माद्बर्हिषास्तरणं ततः " ॥ इति।

स्थलस्थो नोदके कुर्यात्। तदाह **गोभिलः—**

" नोदकेषु न पात्रेषु न क्रुद्धो नैकपाणिना। नोपातिष्ठति तत्तोयं यन्न भूमौ प्रदीयते "॥ इति।

---

१ क्ष–त्येषु।

विष्णुः—
"स्थले स्थित्वा जले यस्तु प्रयच्छेदुदकं नरः । नोपतिष्ठति तत्तोयं यन्न भूमौ प्रदीयते"॥ इति
यत्तु **कार्ष्णाजिनिनोक्तम्**— "देवानां च पितॄणां च जले दद्याज्जलांजलिम्" इति ।
तदशुद्धस्थलविषयं स्नानांगतर्पणविषयं च । तदाह **विष्णुः**—
" यत्राशुचि स्थलं वा स्यादुदके देवताः पितॄन् । तर्पयेत्तु यथाकामं अप्सु सर्वं प्रतिष्ठितम् ॥
" स्नातश्चासावार्द्रवासा देवर्षिपितृतर्पणम् । अंभस्थ एव कुर्वीत" ॥ इति ।
पितामहः—" पात्राद्वा जलमादाय शुभे पात्रांतरे क्षिपेत् ।
" हेमरूप्यमयं पात्रं ताम्रं कांस्यसमुद्भवम् । पितॄणां तर्पणे पात्रं मृन्मयं तु परित्यजेत्" ॥
मरीचिः—
" सौवर्णेन च पात्रेण ताम्ररूप्यमयेन वा । औदुंबरेण खड्गेण पितॄणां दत्तमक्षयम्" ॥
माधवीये—
" खड्गमौक्तिकहस्तेन कर्तव्यं पितृतर्पणम् । मणिकांचनदर्भैर्वा नाशुद्धेन कदाचन" ॥ इति ।
मरीचिः—
" विना रूप्यसुवर्णेन विना ताम्रतिलैस्तथा । विना मंत्रैश्च दर्भैश्च पितॄणां नोपतिष्ठते ॥
" तिलानामप्यभावे तु सुवर्णरजतानि तु । तदभावे निषिंचेत्तु दर्भैर्मंत्रेण वा पुनः" ॥ इति ।
तिलग्रहणे विशेषमाह **योगयाज्ञवल्क्यः**—
" यद्युद्धृतान्निषिंचेत्तु तिलान्संमिश्रयेज्जये । अतोऽन्यथा तु सव्येन तिला ग्राह्या विचक्षणैः"॥ इति ।
एतदलोमकप्रदेशाभिप्रायम् । तथा च **देवल**—
" अंगुष्ठमूलदेशे तु वामहस्तस्य निक्षिपेत् । तत्तिलं पूतपुण्यं स्यात्तत्तोयममृतं भवेत् ॥
" शिलातले पटे पात्रे रोमस्थानेषु कुत्रचित् । तत्तिलं क्रिमितुल्यं स्यात्तत्तोयं रुधिरं भवेत् ॥
" रोमसंस्थांस्तिलान्न कृत्वा यस्तु तर्पयते पितॄन् । पितरस्तर्पितास्तेन रुधिरेण मलेन च"॥ इति ।
तिलग्रहणे तर्जन्यंगुष्ठयोगं वर्जयेत् । दक्षिणांगुष्ठेनैवांजलौ तिलान्प्रक्षिपेत् । तथा **स एव**—
" तर्जन्यंगुष्ठसंयोगो राक्षसीमुद्रिकास्तथा । तया तिलान्न गृह्णीयाद्दक्षांगुष्ठेन निक्षिपेत्" ॥
स एव—"शुक्लैस्तु तर्पयेद्देवान्मनुष्यान् शबलैस्तिलैः । पितॄन्संतर्पयेत्कृष्णैर्देवर्षीनपि वाऽक्षतैः" ॥
तिथ्यादिविशेषे तिलतर्पणं निषेधति **स एव**—
" सप्तम्यां रविवारे च गृहे जन्मदिने तथा । भृत्यपुत्रकलत्रार्थी न कुर्यात्तिलतर्पणम्" ॥ इति ।
संग्रहे—
" अर्कशुक्रत्रयोदश्यामष्टम्यां च त्रिजन्मसु । तर्पयेद्यस्तिलैर्मिश्रं तत्तोयं रुधिरं भवेत् ॥
" पक्षयोरुभयोश्चैव सप्तम्यां निशि संध्ययोः । विद्यापुत्रकलत्रार्थी तिलान्पंचसु वर्जयेत्" ॥
बोधायनः—
" सप्तम्यां रविवारे च जन्मर्क्षदिवसेषु च । गृहे निषिद्धं सतिलं तर्पणं तद्बहिर्भवेत् ॥
" यद्यशक्तो गृहे कुर्यात्तर्पणं सतिलं तदा । तिलान्प्रक्षिप्य पात्रस्थे जले व्यामिश्रितैस्तिलैः ॥
" पात्रांतरे क्षिपेदत्र मृन्मयं तु विवर्जयेत् । विवाहे चोपनयने चौले सति यथाक्रमम् ॥
" वर्षमर्धं तदर्धं च नैत्यिके तिलतर्पणम् । तिथितीर्थविशेषेषु कार्यं प्रेतेषु सर्वथा ॥
" तीर्थे तिथिविशेषे च प्रेतस्नाने तथैव च । निषिद्धेऽपि तथा कुर्यात्तंडुलैः सह तर्पणम्" ॥ इति ।

स एव—“ न जीवपितृकः कृष्णैस्तिलैस्तर्पणमाचरेत् ” ॥ **सत्यव्रतः**—
“ कृतोपवीती देवेभ्यो निवीती च भवेत्ततः । मनुष्यांस्तर्पयेद्भक्त्या ब्रह्मपुत्रानृषींस्तथा ॥
“ अपसव्यं ततः कृत्वा सव्यं जान्वाच्य भूतले । दर्भपाणिस्तु विधिना पितॄन्संतर्पयेत्ततः” ॥ इति ।
योगयाज्ञवल्क्योऽपि—
“ ब्रह्माणं तर्पयेत्पूर्वं विष्णुं रुद्रं प्रजापतिम् । वेदान् छंदांसि देवांश्च ऋषींश्चैव तपोधनान् ॥
“ आचार्यांश्चैव गंधर्वानाचार्यतनयांस्तथा । संवत्सरं सावयवं देवीरप्सरसस्तथा ॥
“ देवानुगानपि तथा सनागान्पर्वतानपि । सरितोऽथ मनुष्यांश्च यक्षान् रक्षांसि चैव हि ॥
“ पिशाचांश्च सुपर्णांश्च भूतान्यथ पशूंस्तथा । वनस्पतीनोषधींश्च भूतग्रामांश्चतुर्विधान् ॥
“ सव्यं जानु ततोन्वाच्य पाणिभ्यां दक्षिणामुखः । तल्लिंगैस्तर्पयेन्मंत्रैः सर्वान्पितृगणांस्तथा ॥
“ मातामहांश्च सततं श्रद्धया तर्पयेत् द्विजः ” ॥ इति । यजुःशाखिनां कांडऋषितर्पणमुक्तम्—
“ अथ कांडऋषीनेतानुदकांजलिभिः शुचिः । अव्यग्रस्तर्पयेन्नित्यं मंत्रैरेव स्वनामभिः” ॥ इति ।
गृह्यवृत्तौ—“पवित्रपाणिर्नव ऋषींस्तर्पयति । प्रजापतिं कांडऋषिं तर्पयामि । सोमं कां० अग्निं कांड० विश्वान् देवान्कांड० सांहितीर्देवता उपनिषदस्तर्पयामि । याज्ञिकीर्देव० वारुणीर्देवता० ब्रह्माणं स्वयंभुवं तर्पयामि । सदसस्पतिं तर्पयामि ” । **शौनकोऽपि**—“अग्निर्विष्णुः प्रजापतिरित्यादि ” ।
योगयाज्ञवल्क्यः— “ वसून् रुद्रांस्तथादित्यान्नमोंकारसमन्वितम् ” ॥ इति ।तर्पयेदिति शेषः ।
वस्वादीनां नामानि **पैठीनसिना** दर्शितानि—
“ ध्रुवो धर्मश्च सोमश्च आपश्चैवानिलोऽनलः । प्रत्यूषश्च प्रभासश्च **वसवोऽष्टौ** प्रकीर्तिताः ॥
“ अजैकपादहिर्बुध्न्यो विरूपाक्षोऽथ भैरवः । हरश्च **बहुरूपश्च** त्र्यंबकश्च सुरेश्वरः ॥
“ सावित्रश्च जयंतश्च पिनाकी चापराजितः । एते **रुद्रा** समाख्याता एकादश सुरोत्तमाः ॥
“ इंद्रो धाता भगः पूषा मित्रोऽथ वरुणोऽर्यमा । अर्चिर्विवस्वांस्त्वष्टा च सविता विष्णुरेव च ॥
“ एते वै **द्वादशादित्या** देवानां प्रवरास्तथा । एते च दिव्याः पितरः पूज्याः सर्वे प्रयत्नतः ”॥इति ।
योगयाज्ञवल्क्यः—
“ सवर्णेभ्यो जलं देयं नासवर्णेभ्य एव च । गोत्रनामस्वधाकारैस्तर्पयेदनुपूर्वशः ” ॥
नामग्रहणे विशेषमाह **बोधायनः** (गृह्यशेषसू. १।११।९)
“ शर्मांतं ब्राह्मणस्योक्तं वर्मांतं क्षत्रियस्य तु । गुप्तांतं चैव वैश्यस्य दासांतं शूद्रजन्मनः” ॥ इति ।
सत्यव्रतः—
“ पितृभ्यः प्रत्यहं दद्यात्ततो मातृभ्य एव च । ततो मातामहानां च पितृव्यस्य सुतस्य च”॥ इति ।
हारीतोऽपि—
“ पित्रादीन् मात्रादीन् मातामहादीन्पितृव्यांस्तत्पत्नीर्ज्येष्ठभ्रातॄन् तत्पत्नीर्मातुलं तत्पत्नीर्गुर्वाचार्योपाध्यायान्सुहृत्संबंधिबांधवान् द्रव्यान्नदातृपोषकनिर्धनांस्तत्पत्नीश्च तर्पयेत् ” इति ।
बोधायनः (ध. सू. २।५।१६–३१)—“ अग्निः प्रजापतिः सोमो रुद्रोदिती बृहस्पती सर्पा इत्येतानि प्राग्द्वाराणि दैवतानि सनक्षत्राणि सग्रहाणि साहोरात्राणि समुहूर्तानि तर्पयामि । ओंवसूंस्तर्पयामि । पितरोऽर्यमा भगः सविता त्वष्टा वायुरिंद्राग्नि इत्येतानि दक्षिणद्वाराणि दैवतानि सनक्षत्राणि सग्रहाणि साहोरात्राणि समुहूर्तानि तर्पयामि । रुद्रांश्च तर्पयामि । मित्र इन्द्रो महापितर आपो विश्वेदेवा ब्रह्मा विष्णुरित्येतानि

१ खगघ-मस्का ।

प्रत्यग्द्वाराणि दैवतानि सनक्षत्राणि सग्रहाणि साहोरात्राणि समुहूर्तानि तर्पयामि । आदित्यांश्च तर्पयामि । वसवो वरुण। अज एकपादहिर्बुध्न्यः पूषा अश्विनौ यम इत्येतानि उदग्द्वाराणि देवतानि सनक्षत्राणि सग्रहाणि साहोरात्राणि समुहूर्तानि तर्पयामि । साध्यांश्च तर्पयामि । ब्रह्माणं तर्पयामि । प्रजापतिं तर्पयामि । परमेष्ठिनं हिरण्यगर्भं चतुर्मुखं स्वयंभुवं ब्रह्मपारिषदान् ब्रह्मपारिषदीं-स्तर्पयामि । अग्निं वायुं वरुणं सोमं सूर्यं चंद्रमसं नक्षत्राणि सद्योजातमोंभूःपुरुषमों भुवः पुरुषमों सुवः पुरुषमों भूर्भुवः स्वः पुरुषमों भूस्तर्पयामि । ॐभूः ॐभुवः ॐसुवः ॐमहः ॐजनः ॐतपः ॐसत्यम् । ॐभवं देवं शिवं देवमीशानं देवं पशुपतिं देवं रुद्रं देवं उग्रं देवं भीमं देवं महांतं देवं भवस्य देवस्य पत्नीं शर्वस्य देवस्य पत्नीं ईशानस्य देवस्य पत्नीं पशुपतेर्देवस्य पत्नीं रुद्रस्य देवस्य पत्नीं उग्रस्य देवस्य पत्नीं भीमस्य देवस्य पत्नीं महतो देवस्य पत्नीं भवस्य देवस्य सुतं शर्वस्य देवस्य सुतमीशानस्य देवस्य सुतं पशुपतेर्देवस्य सुतं रुद्रस्य देवस्य सुतं उग्रस्य देवस्य सुतं भीमस्य देवस्य सुतं महतो देवस्य सुतं तर्पयामि । रुद्रांस्तर्पयामि । रुद्रपारिषदान् रुद्रपारिषदींस्तर्पयामि । सनत्कुमारं स्कन्दमिंद्रं जयंतं षण्मुखं विशाखं महासेनं स्कंदपारिषदांस्कंदपारिषदींस्तर्पयामि । विघ्नं तर्पयामि । विनायकं वीरं शूरं वरदं हस्तिमुखं वक्रतुंडं लंबोदरमेकदंतं विघ्नपारिषदान्विघ्नपारिषदींस्तर्पयामि । केशवं नारायणं माधवं गोविंदं विष्णुं मधुसूदनं त्रिविक्रमं वामनं श्रीधरं हृषीकेशं पद्मनाभं दामोदरं श्रियं देवीं पुष्टिं देवीं तुष्टिं देवीं सरस्वतीं देवीं विष्णुपारिषदान्विष्णुपारिषदींस्तर्पयामि । वैनतेयं कालं नीलं मृत्युमंतकं यमं धर्मराजं चित्रगुप्तं वैवस्वतं वैवस्वतपारिषदान्वैवस्वत-पारिषदींस्तर्पयामि । भरद्वाजं गौतमं विद्यामत्रिमांगिरसं दुर्गाज्येष्ठां धन्वंतरिं धन्वन्तरिपारिषदान् धन्वंतरिपारिषदींस्तर्पयामि ।

अथ निवीती भूत्वा ऋषींस्तर्पयामि । महर्षीन्परमर्षीन् ब्रह्मर्षीन् देवर्षीन्राजर्षीन्वैश्यऋषीन्सुतर्षीन्श्रुतर्षीन्जनर्षीन्तपर्षीन्सत्यऋषीन्सप्तर्षीन्कांडऋषीन्ऋषीन् ऋषिपत्नीः ऋषिपुत्रानृषिपौत्रान्कण्वं बोधायनमापस्तंबं सूत्रकारं सत्याषाढं हिरण्यकेशिनं वाजसनेयिनं याज्ञवल्क्यं आश्वलायनं शौनकं व्यासं वसिष्ठं प्रणवं व्याहृतीः सावित्रीं गायत्रीं छंदांसि ऋग्वेदं यजुर्वेदं सामवेदमथर्ववेदमथर्वांगिरस इतिहासपुराणानि सर्वदेवजनान् सर्वभूतानि तर्पयामि ।

अथ प्राचीनावीती—पितॄन्स्वधा नमस्तर्पयामि पिताम० प्रपितामहान्स्व०मातॄः स्व० पितामहीः स्व०मि प्रपितामहीः स्व०मि मातामहान्स्व०मि मातुः पितामहान्स्व०मातुः प्रपितामहान्स्व०मि मातामहीः मातुःपितामहीः मातुःप्रपितामहीः स्व०मि । आचार्यान्स्व०मि आचार्यपत्नीः स्व०मि गुरून्गुरुपत्नीः स्व०मि सखीन्स्व०मि सखिपत्नीःस्व०मि ज्ञातीन्स्व० ज्ञातिपत्नीः स्व०मि अमात्याःस्व०मि अमात्यपत्नीः स्व०मि सर्वान्स्व०मि सर्वाः०मि । इति । पितृतर्पणम् । अनुतीर्थमप उत्सिंचति “ऊर्जं वहंतीरमृतं घृतं पयः कीलालं परिस्रुतं स्वधा स्थ तर्पयत मे पितॄन् तृप्यत तृप्यत तृप्यत ” इति । नार्द्रवासा नैकवस्त्रो दैवानि कर्माण्यनुसंचरेत् पितॄन्संयुक्तानिवेत्येकेषाम् ” इति ।

जीवत्पितृकतर्पणे विशेषमाह **योगयाज्ञवल्क्यः**—

“ कव्यवाहोऽनलः सोमो यमश्चैवार्यमा तथा । अग्निष्वात्ताः सोमपाश्च तथा बर्हिषदोऽपि च ॥

“यदि स्याज्जीवपितृकस्तान्विद्याच्च तथा पितॄन् । एतांश्चैव प्रमीतांश्च प्रमीतपितृको द्विजः”॥ इति।

विष्णुपुराणे (३।११।२९-३७)—
" दद्यात्पित्र्येण तीर्थेन काम्यं चान्यच्छृणुष्व मे। मात्रे प्रमात्रे तन्मात्रे गुरुपत्न्यै तथा नृप ॥
" गुरूणां मातुलादीनां स्निग्धमित्राय भूभुजे। इदं चापि जपन्नंबु दद्यादात्मेच्छया नृप ॥
" उपकाराय भूतानां कृतं देवादितर्पणम्। देवासुरास्तथा यक्षा नागा गंधर्वराक्षसाः ॥
" पिशाचा गुह्यकाः सिद्धाः कूश्मांडाः पशवः खगाः। जलेचरा भूनिलया वाय्वाहाराश्च जंतवः॥
" तृप्तिमेतेन यांत्वाशु मद्दत्तेनांबुनाखिलाः।
" नरकेषु समस्तेषु यातनासु च संस्थिताः। तेषामाप्यायनायैतद्दीयते सलिलं मया ॥
" ये बांधवाबांधवा वा ये येऽन्यजन्मनि बांधवाः । ते तृप्तिमखिला यांतु यश्चास्मत्तोऽभिवांछति॥
" दत्वा काम्योदकं सम्यगेतेभ्यः श्रद्धयान्वितः। जगदाप्यायनाद्भूतं पुण्यमाप्नोति मानवः"॥इति।
माधवीये—
" यत्रक्वचनसंस्थानां क्षुत्तृष्णोपहतात्मनाम् । तेषां तु दत्तमक्षय्यमिदमस्तु तिलोदकम् ॥
" ये मे कुले लुप्तपिण्डाः पुत्रदारविवर्जिताः। तेषां तु दत्तमक्षय्यमिदमस्तु तिलोदकम् "॥ इति।
अवसनांजलिमाह **कात्यायनः**—" पितृवंश्या मातृवंश्या ये चान्ये मत्त उदकमर्हंति तांस्तर्पयामि " इति । विस्तरेण कर्तुमसमर्थस्य संक्षेपेण तर्पणमुक्तं **माधवीये**—
" आब्रह्मस्तंबपर्यंतं जगत्तृप्यत्विति ब्रुवन्। क्षिपेत्पयोंजलींस्त्रींस्तु कुर्यात्संक्षेपतर्पणम् " ॥ इति ।
तर्पणप्रशंसा दर्शिता **तत्रैव**—
" एवं यः सर्वभूतानि तर्पयेदन्वहं द्विजः। स गच्छेत्परमं स्थानं तेजोमूर्तिरनामयम् " ॥ इति ।
अकरणे प्रत्यवायोऽपि **तत्रैव** दर्शितः—
" देवांश्चैव पितृंश्चैव मुनीन्यो वै न तर्पयेत्। देवादीनामृणी भूत्वा नरकं स व्रजत्यधः "॥ इति ।
कात्यायनः—" छायां यथेच्छेच्छरदातपार्तः पयः पिपासुः क्षुधितोऽलमन्नम् ।
" बालो जनित्रीं जननीं च बालं योषित्पुमांसं पुरुषश्च योषाम् ॥
" तथा सर्वाणि भूतानि चराणि स्थावराणि च। विप्रादुदकमिच्छंति सर्वेऽप्युदककांक्षिणः ॥
" तस्मात्सदैव कर्तव्यमकुर्वन्महतैनसा। युज्यते ब्राह्मणः कुर्वन्विश्वमेतद्विभर्ति हि " ॥
हारीतोपि—
" देवता पितरश्चैव कांक्षंति सलिलांजलिम्। अदत्ते तु निराशास्ते प्रतियांति यथागतम्"॥ इति ।
अत्र **पितृगाथा**—
" अपि नः स कुले भूयाद्यो नो दद्यांज्जलाञ्जलिम्। नदीषु बहुतोयासु शीतलासु विशेषतः"॥ इति।
योगयाज्ञवल्क्योऽपि—
"नास्तिक्यभावाद्यस्तांस्तु न तर्पयति वै पितॄन्। पिबंति देहनिःस्रावं पितरोऽस्य जलार्थिनः"॥ इति।
तर्पणातिक्रमे प्रायश्चित्तमुक्तं **स्मृतिरत्ने**—
" अकृत्वा तर्पणं विप्रो यो भुंक्ते निरपत्रपः। स्नात्वा संतर्पयेद्विप्रान् इति शातातपोऽब्रवीत् " ॥
यमतर्पणं वृद्धमनुनोक्तम्—
" दीपोत्सवचतुर्दश्यां कार्यं तु यमतर्पणम्। कृष्णांगारचतुर्दश्यामपि कार्यं सदैव वा ॥
" यमाय धर्मराजाय मृत्यवे चांतकाय च। वैवस्वताय कालाय सर्वभूतक्षयाय च ॥
" औदुंबराय दध्नाय नीलाय परमेष्ठिने। वृकोदराय चित्राय चित्रगुप्ताय वै नमः "॥ इति।

मनुः—
"चतुर्दशैते मंत्राः स्युः प्रत्येकं तु नमोऽन्विताः । एकैकस्य तिलैर्मिश्रांस्त्रींस्त्रीन्कृत्वा जलांजलीन् ॥
" यावज्जीवकृतं पापं तत्क्षणादेव नाशयेत् " इति ॥ **चंद्रिकायाम्** (पृ. १९७ पं. २४)—
" कृष्णपक्षे चतुर्दश्यामंगारकदिनं यदा । तदा स्नात्वा शुभे तोये कुर्वीत यमतर्पणम् " ॥
दक्षः—
" कृष्णपक्षे चतुर्दश्यां यां कांचित्सरितं प्रति । यमुनायां विशेषेण नियतस्तर्पयेद्यमम्"॥ इति ।
नियमस्तु **स्कंदपुराणे** दर्शितः—
"दक्षिणाभिमुखो भूत्वा तिलैः सह समाहितः । देवतीर्थेन देवत्वात्तिलैः प्रेताधिपो यतः"॥ इति ।
स्मृतिसारे—
" यज्ञोपवीतिना कार्यं प्राचीनावीतिनाऽथ वा । देवत्वं च पितृत्वं च यमस्यास्ति द्विरूपता "॥
तर्पणानंतरं **जाप्यमंत्रो**ऽप्युक्तः—"यमो निहंता पितृधर्मराजो वैवस्वतो दंडधरश्च कालः ।
" प्रेताधिपो दत्तकृतानुसारी कृतांत एतद्दशकृज्जपंति ॥
" नीलपर्वतसंकाशो रुद्रकोपसमुद्भवः । कालो दंडधरो देवो वैवस्वत नमोऽस्तु ते "॥ इति ।
एवं कुर्वतः फलमाह **यमः**—
" यत्रक्वचन नद्यां हि स्नात्वा कृष्णचतुर्दशीम् । संतर्प्य धर्मराजानं मुच्यते सर्वकिल्बिषैः"॥ इति
माघशुक्लाष्टम्यां **भीष्मतर्पणमाह व्यासः**—
" शुक्लाष्टम्यां तु माघस्य दद्याद्भीष्माय योंऽजलिम् । संवत्सरकृतं पापं तत्क्षणादेव नश्यति ॥
" वैयाघ्रपादगोत्राय सांकृतिप्रवराय च । गंगापुत्राय भीष्माय प्रदास्येऽहं तिलोदकम् ॥
" अपुत्राय ददाम्येतत्सलिलं भीष्मवर्मणे " इति । **मन्वादौ** तर्पणमुक्तं **कालादर्शे**—
" मन्वाद्यासु युगाद्यासु प्रदत्तः सलिलांजलिः । सहस्रवार्षिकीं तृप्तिं पितॄणामावहेत्पराम् " ॥ इति ।
मत्स्यपुराणेऽपि—" पानीयमप्यत्र तिलैर्विमिश्रं दद्यात् पितॄणां प्रयतो मनुष्यः ॥
" श्राद्धं कृतं तेन समाः सहस्रं रहस्यमेतत्पितरो वदन्ति " इति ॥
बृहन्मनुः—
" आषाढीमवधिं कृत्वा पंचमं पक्षमाश्रिताः । कांक्षंति पितरः क्लिष्टा अन्नमप्यन्वहं जलम् ॥
" तस्मात्तत्रैव दातव्यं दत्तमन्यत्र निष्फलम् ।
" अमाष्टकासु संक्रांतौ पातादिग्रहणेषु च । स्नात्वोदकांजलीन् दत्वा ततः श्राद्धं समाचरेत् ॥
" यस्तर्पयेत्पितॄन्प्रातः श्राद्धं कृत्वा परेऽहनि । पितरस्तस्य तृप्यंति न चेत्कुप्यंति वै भृशम् ॥
"एको वा बहवो वाऽपि पुत्राः पित्रोर्यथाविधि । कृत्वाब्दिकं तु तैः कार्यं परेऽहनि तिलोदकम् ॥
आब्दिकं प्रत्याब्दिकम् ।
" ब्राह्मे परेद्युरुत्थाय स्नात्वा दत्त्वोदकांजलीन् । पुनः स्नात्वाब्दिकं सकृत्कर्माणि कुरुते द्विजः ॥
" वृद्धिश्राद्धे तु सापिंड्ये प्रेतश्राद्धेऽनुमासिके । संवत्सरविमोके तु न कुर्यात्तिलतर्पणम् "॥
संवत्सरविमोकं प्रथमाब्दिकम् । **स्मृत्यंतरे**—
" एकोद्दिष्टेषु सर्वेषु सपिंडीकरणे तथा । मासिकेष्वाब्दिके चैव न कुर्यात्तिलतर्पणम् ।
" दर्शे तिलोदकं पूर्वं पश्चात्कुर्यान्महालये । प्रत्यब्दे प्रतिमासं च परेऽहनि तिलोदकम् "॥
संग्रहे—" प्रत्यब्दं प्रतिमासं च परेऽहनि तिलोदकम् " ॥ प्रतिमासं मासिश्राद्धे ।
" पक्षे महालये श्राद्धे तर्पणं तु दिने दिने । सकृन्महालये श्राद्धे परेऽहनि तिलोदकम् ॥

" पूर्वेद्युः श्राद्धकृद्विप्रः प्रातः स्नात्वा परेऽहनि । संतर्पयेदार्द्रवासास्तिलैरात्मपितॄंस्तथा " ॥

स्मृत्यंतरे—

" महालयं चाब्दिकं च यद्दिने तु समापयेत् । तद्दिने तिलतोयं तु कुर्याच्चेत्पितृघातकः ॥

" तस्मात्परेद्युः कर्तव्यं तिलदानं तथोदकैः ।

" स्नात्वा तीरं समागम्य उपविश्य कुशासने । श्राद्धांगतर्पणं कृत्वा पश्चात्संध्यामुपाचरेत् ॥

" परेद्युः श्राद्धकृन्मर्त्यो यो न तर्पयते पितॄन् । पितृहंता स विज्ञेयः कल्पांतं नरकं व्रजेत् ॥

" क्षेत्रेष्वपि तथा दत्वा हिरण्येन तिलैश्च वा । श्राद्धांते पिंडदानं च कृत्वा दद्यात्तिलाञ्जलीन् " ॥

स्मृत्यंतरे—" हिरण्ये तूदकं पश्चान्मृतेऽहनि परेऽहनि " ॥ **अन्यत्रापि**—

" सपिंडीकरणादूर्ध्वं अमासंक्रमणादिषु । पुत्रस्तिलोदकं दद्यात् क्षेत्रपिंडांस्तथाचरेत् ॥

" सपिंडीकरणादूर्ध्वं वर्षं वर्षार्धमेव वा । दर्शादिकं न कुर्वीत हृष्टकानाविहन्यता " ॥ इति दर्शादिश्राद्धनिषेधस्मरणं भोजनपर्यंतश्राद्धविषयम् । द्वादशाहादौ सपिंडीकरणे कृते तत आरभ्य दर्शादौ तिलोदकमात्रं कर्तव्यम् । 'पुत्रस्तिलोदकं दद्यात्' इति विशिष्य विधानात् ॥

" सपिंडीकरणादर्वाक् आमश्राद्धं न कारयेत् । तिलोदकं च नो दद्यात्परतश्चेद्यथाविधि " ॥ इति **स्मृतेश्च । स्मृतिसारे—**

" आब्दिके समनुप्राप्ते दर्शश्चेत्तर्पणं न हि । ब्राह्मणान् भोजयेत्पूर्वं पिंडान्पूर्वं तु तर्पणम् ॥

" अमापातश्च संक्रांतिस्तथा वैधृतिरेव च । अष्टका चैव मन्वादिर्युगादिश्च महालयः ॥

" एषूदकांजलिं दद्यादन्नं च पितृतृप्तये । श्राद्धं त्वहरहः कुर्यादन्नाद्येनोदकेन वा ॥

" भृग्वादित्यादिवारेषु पितृतृप्त्यै जलांजलिम् । साक्षतान्संदिशेद्धीमांस्तत्तद्दर्शादिके दिने " ॥

कवषः—

" पित्रोः प्रत्याब्दिकं श्राद्धं कृत्वा चैव परेऽहनि । निषिद्धेऽपि तिलैः कृष्णैर्विधिना तर्पयेत् द्विजः " ॥

वसिष्ठः—

" संतर्पयेन्निषिद्धेऽपि श्राद्धं कृत्वा परेऽहनि । सतिलांजलिभिः शीतैः पितृणामनृणो भवेत् " ॥

शंखः—

" अमाश्राद्धं प्रकुर्वीत पूर्वं दद्यात्तिलोदकम् । प्रत्याब्दिके तथा मासि श्राद्धे दद्यात्परेऽहनि " ॥

स्मृत्यंतरे—

" प्रथमाब्दिकमारभ्य तर्पणं तु विधीयते । तस्मात्पूर्वं न कर्तव्यमिति शातातपोऽब्रवीत् ॥

" नांदीश्राद्धे च दर्शे च तद्दिने तर्पणं भवेत् । अनेनैव हि तृप्तिः स्यादिति हारीतभाषितम् ॥

" तर्पणं तिलसंमिश्रं पितॄनुद्दिश्य वाग्यतः । आसीनः प्राङ्मुखः कुर्याद्दक्षिणाभिमुखः करः " ॥

चंद्रिकायाम् (पृ. १९४ प. ६)—

"सव्यं जानु ततोऽन्वाच्य पाणिभ्यां दक्षिणामुखः । तल्लिङ्गैस्तर्पयेन्मन्त्रैः सर्वान् पितृगणांस्तथा" ॥

षट्त्रिंशन्मते—

" उदिते विमले सूर्ये तत्क्षणादेव तर्पयेत् । नोदयात्पितृतृप्तिः स्यादित्याह भगवान्मनुः " ॥

शातातपः—

" श्राद्धे कृते तु पूर्वेद्युः परेद्युरुदिते रवौ । उपस्थानस्य परतो होमात्पूर्वं तु तर्पणम् " ॥ **इति ।**

विज्ञानेश्वरीये—
"आब्दिके स्वस्ववर्गस्य तृप्तिरेकस्य शाश्वती । तृप्तिर्वर्गद्वयस्यापि परेह्नि स्यात्तिलोदकैः" ॥ इति ।
स्मृत्यंतरे—
"प्रत्याब्दिके तिलं दद्यान्निषिद्धेऽपि परेऽहनि । यस्यैकवर्गस्योद्देश इतरेषां तु वर्जयेत्" ॥ इति ।
अत्र परस्परविरुद्धानां वचनानां शिष्टाचाराद्व्यवस्थाऽवगंतव्या ।
तर्पणानंतरं दर्भत्याग उक्तो **रत्नावल्याम्**—
"विकिरे पिंडदाने च तर्पणे स्नानकर्मणि । आचम्यैव प्रकुर्वीत दर्भसंत्यजनं बुधः" ॥
दर्भत्यागे मंत्रस्तत्रैवोक्तः—
"येषां न पिता न भ्राता न पुत्रो नान्यगोत्रिणः । ते सर्वे तृप्तिमायांतु मयोत्सृष्टैः कुशैस्तथा" ॥ इति ।
तर्पणानंतरं वस्त्रनिष्पीडनं कर्तव्यम् । तदाह **योगयाज्ञवल्क्यः**—
"यावद्देवानृषींश्चैव पितॄंश्चापि न तर्पयेत् । तावन्न पीडयेद्वस्त्रं यो हि स्नातो भवेत् द्विजः ॥
"निष्पीडयति यो वस्त्रं अकृत्वा पितृतर्पणम् । निराशाः पितरो यांति शापं दत्वा सुदारुणम्" ॥ इति ।
"वस्त्रनिष्पीडितं तोयं श्राद्धे तूच्छिष्टभोजनम्[1] । भागधेयं श्रुतिः प्राह तस्मान्निष्पीडयेत् स्थले" ॥ इति ।
भरद्वाजः—
"वस्त्रनिष्पीडनं प्रातःकर्मणः प्राग्विशिष्यते । माध्यान्हे ब्रह्मयज्ञांते वस्त्रनिष्पीडनं भवेत् ॥
"'ये के चास्मत्कुलेषु' इति वस्त्रं निष्पीडयेत्स्थले । वस्त्रं चतुर्गुणीकृत्य पीडयित्वा जलाद्बहिः ॥
"वामप्रकोष्ठे निक्षिप्य द्विराचम्य विशुध्यति" ॥ इति ।
माधवीये—"आचम्य च ततो दद्यात्सूर्याय सलिलांजलिम् ॥
"नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेजसे । जगत्सवित्रे शुचये सवित्रे कर्मदायिने" ॥
इति **तर्पणम्** । **अथ देवपूजनम्** । तच्च प्रातर्होमानंतरमिति केचित्—
"विधेया देवतापूजा प्रातर्होमादनन्तरम्" इति **मरीचिस्मरणात्** । तथा **चंद्रिकायाम्**—
"स्वशाखोक्तक्रियां कृत्वा हुत्वा चैवाग्निहोत्रकम् । कुर्यादाराधनं विष्णोर्देवदेवस्य चक्रिणः" ॥ इति ।
ब्रह्मयज्ञजपतर्पणानंतरमित्यन्ये । तथा च **हारीतः**—"कुर्वीत देवतापूजां जपयज्ञादनंतरम्" इति ।
व्यासोऽपि—
"जलदेवान्नमस्कृत्य ततो गच्छेद् गृहं बुधः । पौरुषेण च सूक्तेन ततो विष्णुं समर्चयेत्" ॥ इति । २५
याज्ञवल्क्योऽपि (आचारे १२०)—"स्नात्वा देवान्पितॄंश्चैव तर्पयेदर्चयेत्तथा" ॥ इति ।
मध्याह्ने तर्पणानंतरं गंधकुसुमाक्षतैर्हरिहरहिरण्यगर्भप्रभृतीनामन्यतमं यथावासनमृग्यजुःसाममंत्रैस्तत्प्रकाशकैः स्वनामभिर्वा चतुर्थ्यंतैर्नमस्कारयुक्तैराराधयेत्" ॥ इति **विज्ञानेश्वरः** (पृ. २९ पं. १६–१७) ।
यमः—"गायत्रीं तु जपेत्पूर्वं ब्रह्मयज्ञजपस्ततः । देवादींस्तर्पयेत्पश्चादिष्टं देवं ततोऽर्चयेत्" ॥
कूर्मपुराणे (उ. १८।८८–८९)—
"निष्पीड्य स्नानवस्त्रं वै समाचम्य च वाग्यतः । स्वैर्मंत्रैरर्चयेद्देवान् पत्रैः पुष्पैस्तथांबुभिः ॥
"ब्रह्माणं शंकर सूर्यं तथैव मधुसूदनम् । अन्यान् स्वाभिमतान्देवान्भक्त्या चाराधयेन्नरः" ॥ इति ।
हारीतोऽपि—
"ततो देवान्नमस्कृत्य गृहं गच्छेत्ततः पुनः । विधिना पुरुषसूक्तस्य भक्त्या विष्णुं समर्चयेत्" ॥

---

१ **खगघ**–भोजिनाम् ।

विष्णुपुराणेऽपि (३।११।३९)—
" ततो गृहार्चनं कुर्यादभीष्टसुरपूजनम् । जलाभिषेकं पुष्पाणां धूपादेश्च निवेदनम् " ॥
योगयाज्ञवल्क्यः—" देवानामर्चनं कुर्याद्ब्रह्मादीनाममत्सरः ॥
" ब्राह्मवैष्णवरौद्रैश्च सावित्रैरथ वारुणैः । तल्लिंगैरर्चयेन्मंत्रैः सर्वान् देवान् समाहितः " ॥
मनुः—
" आदित्यमथ वा विष्णुमीशं ब्रह्माणमेव च । अर्चयेद्वैदिकैर्मंत्रैर्गृहस्थः प्रयतो भवेत् " ॥
अन्यत्र च—
"आरोग्यं भास्करादिच्छेच्छ्रियमिच्छेद्धुताशनात्। ईश्वरात् ज्ञानमन्विछेन्मोक्षमिच्छेज्जनार्दनात्"॥
गृह्यपरिशिष्टे—" अथ गृहस्थोऽहरहः इष्टां देवतामिष्टाऽभीष्टानर्थांश्चिनोति । ते च देवा गणपतिर्वा स्कंदो वा सूर्यो वा सरस्वतिर्वा गौरीर्वा गौरीपतिर्वा श्रीर्वा श्रीपतिर्वाऽन्यो वाऽभिमतः । स एते यथारुचि समस्ता व्यस्ता वा इज्यन्ते " इति ॥ **संग्रहे**—
" आदित्यमंबिकां विष्णुं गणनाथं महेश्वरम् । पंचयज्ञपरो नित्यं गृहस्थः पंच पूजयेत् " ॥
स्मृत्यर्थसारे—
" ब्रह्माणमीशं विष्णुं वा सूर्यमग्निं गणाधिपम् । दुर्गां सरस्वतीं लक्ष्मीं गौरीं वा नित्यमर्चयेत् ॥
" पौरुषेणैव सूक्तेन देवार्चाप्रणवेन वा । तल्लिंगैरेव वा मंत्रैरर्चयेद्गुर्वनुज्ञया ॥
" स्त्रीशूद्राणां च भवति नाम्ना वै देवतार्चनम् । सर्वे चागममंत्रेण कुर्युर्वेदानुसारिणः ॥
" गुरूक्तेन प्रकारेण वेदबाह्येन नार्चयेत् " ॥ **स्मृतिरत्ने**—
" मंत्रैर्वैष्णवरौद्रैश्च सावित्रैः शांभवैस्तथा । विष्णुं प्रजापतिं वाऽपि शिवं वा भास्करं तथा ॥
" अन्यांश्चाभिमतान् देवान् भक्त्या चाक्रोधनोऽत्वरः ॥
" अप्स्वग्नौ हृदये सूर्ये स्थंडिले प्रतिमासु च । षट्स्वेतेषु हरेः सम्यगर्चनं मुनिभिः स्मृतम् ॥
" हविषाग्नौ जले पुष्पैः ध्यानेन हृदये हरिम् । अर्चंति सूरयो नित्यं जपेन रविमंडले ॥
" शालग्रामे च चक्रांके पटे मुद्रासु देवताः । पूजनीया हिरण्येषु रत्नगोब्राह्मणेषु च ॥
" यां कांचित् देवतां कश्चित् आराधयितुमिच्छति । स सर्वोपाययत्नेन ब्राह्मणान्गाश्च तोषयेत्"॥
नारदः—
" विप्राणां वपुराश्रित्य सर्वास्तिष्ठंति देवताः । अतस्तत्रैव ताः पूज्या अलाभे प्रतिमादिषु ॥
" प्रतिमापटयन्त्राणां नित्यं स्नानं न कारयेत् । कारयेत्पर्वदिवसे यथा मलनिवारणम् ॥
" अग्नौ क्रियावतां देवो दिविदेवो मनीषिणाम् । प्रतिमा स्वल्पबुद्धीनां योगिनां हृदये हरिः ॥
" तस्य सर्वगतत्वाच्च स्थंडिले भावितात्मनाम् ।
" शालग्रामशिला यत्र यत्र द्वारवती शिला । उभयोः संगमो यत्र तत्र मुक्तिर्न संशयः ॥
" शालग्रामशिला यत्र पूज्यते भगवन्मयैः । तद्देशे योजनादर्वाङ्मृतो निर्वाणमश्नुते ॥
"शालग्रामशिलायास्तु न च संप्रोक्षणं स्मृतम् । न प्रतिष्ठा विधातव्या न चैवावाहनादिकम्"॥
विष्णुपूजाप्रकारमाह **नारदः**—
" वेदे तु पौरुषं सूक्तं जपितं गृह्यमुत्तमम् । आनुष्टुभस्य सूक्तस्य त्रिष्टुभं तस्य देवता ॥
" पुरुषो यो जगद्बीजं ऋषिर्नारायणः स्मृतः । छंदोऽनुष्टुप् पंचदशर्चां तिसृणां त्रैष्टुभं ततः "॥

१ ख-मार्गेण । २ क्ष-अर्चित । ३ ख-च भवति ।

प्रत्यृचमृषिभेदमाह स एव—
“ बृहस्पतिर्मनुर्दक्षः शौनकोऽत्रिश्च मुद्गलः । शातातपो वसिष्ठश्च याज्ञवल्क्यश्च नारदः ॥
“ गौतमोऽथ भरद्वाजः शुको गर्गोशनांगिराः । व्यासः पराशरश्चैव ऋषयोऽष्टादश स्मृताः ॥
“ मत्स्यः कूर्मो वराहश्च नारसिंहोऽथ वामनः । रामो रामश्च रामश्च कृष्णः कल्कीति ते दश ॥
“ श्रीवल्लभो हरिः शौरिरच्युतो धरणीधरः । जनार्दनो हृषीकेशो माधवश्च तथैव च ॥
“ देवा अष्टदश प्रोक्ताः पूजां वक्ष्ये यथाक्रमम् । आवाहनासनं पाद्यं अर्घ्यमाचमनीयकम् ॥
“ मधुपर्कं तथा स्नानं वस्त्रं चैवोपवीतकम् । गन्धं पुष्पं च धूपं च तथा दीपं प्रकल्पयेत् ॥
“ नैवेद्यं चैव तांबूलं प्रदक्षिणनमस्कृतीः । उद्वासनं च क्रमशः कुर्यात्पूजापरायणः ”॥ इति ।
षोडशर्चने पूजाप्रकार उक्तश्चंद्रिकामाधवीयादौ (स्मृ. चं. पृ. १९९)
“ पौरुषेण तु सूक्तेन ततो विष्णुं समर्चयेत् । ऋग्वेदे पौरुषं सूक्तं षोडशर्चमुदीरितम् ॥
“ आनुष्टुभस्य सूक्तस्य त्रिष्टुभं तस्य देवता । पुरुषो यो जगद्वीजमृषिर्नारायणः स्मृतः ॥
“ प्रथमां विन्यसेद्वामे द्वितीयां दक्षिणे करे । तृतीयां वामपादे तु चतुर्थीं दक्षिणे पदे ॥
“ पंचमीं वामजंघायां दक्षिणस्यां तथोत्तराम् । सप्तमीं वामकट्यां तु दक्षिणस्यां तथाऽष्टमीम् ॥
“ नवमीं नाभिमध्ये तु दशमीं हृदये न्यसेत् । एकादशीं कंठदेशे द्वादशीं वामबाहुके ॥
“ त्रयोदशीं दक्षिणे तु आस्यदेशे चतुर्दशीम् ।अक्ष्णोः पंचदशीं न्यस्य षोडशीं मूर्ध्नि विन्यसेत्॥
“ यथात्मनि तथा देवे न्यासकर्म समाचरेत् ।
“ एवं न्यासं तु कृत्वादौ पश्चाद्देवस्य पूजनम् । गंधमाल्यैरथात्मानं अर्चयेत्पीठमेव च ॥
“ पूर्वयावाहयेद्देवमासनं तु द्वितीयया । पाद्यं तृतीयया चैव चतुर्थ्याऽर्घ्यं प्रदापयेत् ॥
“पंचम्याऽऽचमनं दद्यात्षष्ठ्या स्नानं समाचरेत्। सप्तम्यां तु ततो वासोऽप्यष्टम्यां चोपवीतकम्॥
“ नवम्यां गंधतोयं तु दशम्यां पुष्पकं तथा। एकादश्यां तथा धूपं द्वादश्यां दीपमेव हि ॥
“ नैवेद्यं तु त्रयोदश्यां नमस्कारे चतुर्दशी । प्रदक्षिणे पंचदशी वर्जने षोडशी तथा ॥
“ स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनं तथा । हुत्वा षोडशभिर्मंत्रैः षोडशान्नस्य चाहुतिः ॥
“ पुनः षोडशभिर्मंत्रैर्दद्यात्पुष्पाणि षोडश । तच्च सर्वं जपेद्भूयः पौरुषं सूक्तमुत्तमम् ॥
“ षण्मासात्सिद्धिमाप्नोति ह्येवमेव समर्चयेत् । संवत्सरेण तेनैव सायुज्यमधिगच्छति ॥
“ ध्येयः सदा सवितृमंडलमध्यवर्ती । नारायणः सरसिजासनसंनिविष्टः ॥
“ केयूरवान्मकरकुंडलवान्किरीटी हारी हिरण्मयवपुर्धृतशंखचक्रः ”॥ इति ।
शौनकः—
“ वक्ष्ये पुरुषसूक्तस्य विधानं त्वर्चनं प्रति । स्नात्वा यथोक्तविधिना प्राङ्मुखः शुद्धमानसः ॥
“ देवस्याभिमुखो भूत्वा विष्णवाराधनमारभेत् ।
“ नारायण ऋषिः प्रोक्तो ह्यनुष्टुप् छंद उच्यते । पुरुषो भगवान् देवो विनियोगः स्मृतोऽर्चने ॥
“ वामाद्यंगे करचरणजानूरुयुग्मेषु नाभौ हृत्कर्णांसद्वितयवदनाक्ष्युत्तमांगेषु मंत्री ।
“ पुंसः सूक्तैर्न्यसतुमनुभिः संहृतौ शीर्षपूर्वं सृष्टौ नाभिप्रभृतिहृदयांतस्थितौ च क्रमेण ॥
“ एवं न्यासविधिं कृत्वा पश्चाद्यागं समाचरेत् । प्रथमेनावाहयेद्देवं द्वितीयेनासनं तथा ॥
“ तृतीयेनासने देवमास्यतामिति च ब्रुवन् । चतुर्थ्या पाद्यदानं च आचामं पंचमेन तु ॥
“ षष्ठेन चार्घ्यमादद्यादाचामं पूर्ववत्तथा । समस्तैः स्नापयेद्देवमाचामं पूर्ववत्तथा ॥

१ ख–मेव । २ खगघ–ण्ठां ।

" दद्याद्गंधं सप्तमेन पुष्पदानं तथाऽष्टमे । नवमे वस्त्रदानं तु दशमेनोत्तरीयकम् ॥
" एकादशेनोपवीतं पाद्याचामं तु पूर्ववत् । धूपं तु द्वादशेनैव दीपदानं त्रयोदशे ॥
" चतुर्दशेनाभरणं पाद्याचामं तु पूर्ववत् । पात्रशुद्धिं चाभिघारमोदनादिनिवेदनम् ॥
" कुर्यात्पंचदशेनैव आचामं पूर्ववत्तथा । दक्षिणां तु यथाशक्ति षोडशेन विसर्जयेत् ॥
" दद्यात्पुरुषसूक्तेन यः पुष्पाण्यप एव वा । अर्चितं तेन वै सर्वं त्रैलोक्यं सचराचरम् " ॥
" ततः प्रदक्षिणं कृत्वा जपं कुर्यात्समाहितः ।
" जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन । नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज ॥
" इत्येवमनया स्तुत्या स्तुत्वा देवं दिने दिने । किं करोस्मीति चात्मानं देवायैव निवेदयेत् " ॥

बोधायनोऽपि (२।१४)—

" अथातो महापुरुषस्याहरहः परिचर्याविधिं व्याख्यास्यामः । स्नातः शुचौ समे देशे गोमयेनोपलिप्य प्रतिकृतिं कृत्वा अक्षतपुष्पैर्यथालाभमर्चयेत्सह पुष्पोदकेन महापुरुषमावाहयेत्—ॐभूः पुरुषमावाहयामि ॐभुवः पुरुषमावाहयामि ॐसुवः पुरु० मि ॐभूर्भुवः सुवः पु० मि आयातु भगवान्महापुरुष इति । अथ स्वागतेनाभिनंदति । स्वागतं भगवते महापुरुषायैतदासनमुपक्लृप्तमत्रास्यतां भगवान्महापुरुष इत्यत्र कूर्चं ददाति । भगवतोऽयं कूर्चो दर्भमयस्त्रिवृद्धरितस्तं जुषस्वेत्यत्र स्थानानि कल्पयत्यग्रतः शंखाय कल्पायामि दक्षिणतो गदायै कल्पयामि वनमालायै कल्पयामि पश्चिमतः श्रीवत्साय कल्पयामि गरुत्मते कल्पयामि सरस्वत्यै कल्पयामि तुष्ट्यै कल्पयामि अथ सावित्र्या पात्रमभिमंत्र्य प्रक्षाल्य त्रिरपः परिषिच्य त्रिः पवित्रमप आनीय पुनस्तेनैवाप्स्वभिमंत्र्य सह पवित्रेणादित्यं दर्शयेदोमित्यातमितोः प्राणमायच्छेत् । त्रीणि पदा विचक्रम इति पाद्यं दद्यादथ व्याहृतिभिर्निर्माल्यमपोह्योत्तरतो विष्वक्सेनाय नमः इति । इदं विष्णुर्विचक्रम इति अर्घ्यं दद्यादथैनं स्नापयतिआपोहिष्ठामयो भुव इति ब्रह्मजज्ञानं वामदेव्यर्चा यजुःपवित्रेण इत्येताभिः षड्भिः स्नापयित्वाऽथाद्भिस्तर्पयति । केशवं नारायणं माधवं गोविंदं विष्णुं मधुसूदनं त्रिविक्रमं वामनं श्रीधरं हृषीकेशं पद्मनाभं दामोदरं तर्पयित्वा व्याहृतिभिः प्रदक्षिणमुदकुंभं परिषिच्य प्रणवेन वासो ददाति सावित्र्या यज्ञोपवीतमाचमनीयमुदकेनेदं विष्णुर्विचक्रम इति गंधं दद्यात् । तद्विष्णोः परमं पदम् इति पुष्पम् । इरावती इत्यक्षतं सावित्र्या धूपं उद्दीप्यस्व इति दीपं देवस्य त्वा इति महापुरुषाय जुष्टं निवेदयामीति नैवेद्यमथ केशवादिनामभिर्द्वादशपुष्पाणि दद्यात् । शंखाय नमश्चक्राय नमो गदायै नमो वनमालायै नमः श्रीवत्साय नमो गुरुत्मते नमः श्रियै नमः सरस्वत्यै नमः पुष्ट्यै नमस्तुष्ट्यै नम इत्यवशिष्टैर्गन्धमाल्यैर्ब्राह्मणानलंकृत्याथैनमृग्यजुःसामाथर्वभिः स्तुवन्विष्णुसूक्तं जपित्वा पुरुषसूक्तं चान्यांश्च वैष्णवमंत्रानित्येके । ओं भूर्भुवः सुवरों भगवते महापुरुषाय चरुमुद्वासयामीति च समुद्वास्य व्याहृतीभिः पुरुषमुद्वासयेदों पुरुषमुद्वास० मि ॐभूः पुरुषमुद्वास०मि ॐभुवः पुरु०मि ॐसुवः पुरुषमुद्वासयामि० ॐ भूर्भुवः सुवः पुरुषमुद्वासयामि इत्युद्वास्य प्रयातु भगवान्महापुरुषोऽनेन हविषा तृप्तो हरिः पुनरागमनाय पुनः संदर्शनाय चेति प्रतिमास्थानेष्वावाहनोद्वासनवर्जं सर्वं समानं महत्स्वस्त्ययनमित्याचक्षते महत्स्वस्त्ययनमित्याचक्षते इत्याह भगवान्बोधायनः " इति ॥

आश्वमेधिके—" शृणु पांडव मत्सर्वमर्चनाक्रममात्मनः ॥
" स्थंडिले पद्मकं कृत्वा चाष्टपत्रं सकर्णिकम् । मल्लिंगैर्वैदिकैर्मंत्रैर्मम सूक्तेन वा पुनः ॥

" अष्टाक्षरविधानेन अथवा द्वादशाक्षरैः । स्थापितं मां ततस्तास्मिन्नर्चयेत्तु विचक्षणः ॥
" पुरुषं च ततः सत्यमच्युतं च युधिष्ठिरः । अनिरुद्धं च मां प्राहुर्वैखानसविदो जनाः ॥
" अन्ये त्वेवं विजानंति मां राजन्पांचरात्रिकाः । वासुदेवं च राजेंद्र संकर्षणमथापि वा ॥
" प्रद्युम्नं चानिरुद्धं च चतुर्मूर्तिं प्रचक्षते । स्वाधिकारानुरूपेण मामेवं चार्चयेत् बुधः "॥ इति ।

अपरार्के—

" अष्टाक्षरेण देवेशं नरसिंहमनामयम् । गंधपुष्पादिभिर्नित्यं अर्चयेदच्युतं नरः ॥
" अष्टाक्षरस्य मंत्रस्य ऋषिर्नारायणः स्मृतः । छंदश्च देवी गायत्री परमात्मा च देवता ॥
" गंधपुष्पादिसकलमनेनैव निवेदयेत् । अनेनैवार्चितो विष्णुः प्रीतो भवति तत्क्षणात् ॥
" किं तस्य बहुभिर्मंत्रैः किं तस्य बहुभिर्मखैः । ॐ नमो नारायणेति मंत्रः सर्वार्थसाधकः"॥ इति।

उपचारफलमाह **पुलस्त्यः**—

" दध्यादीनां विकाराणां क्षीरतः संभवो यथा । तथैवाशेषकामानां क्षीरस्नापनतो हरेः ॥
" स्नाप्य दध्या सकृद्विष्णुं निर्मलं प्रियदर्शनम् । विष्णुलोकमवाप्नोति सेव्यमानः सुरोत्तमैः ॥
" गवां शतस्य विप्राणां यद्दत्तस्य फलं भवेत् । घृतप्रस्थेन तद्विष्णोर्भवेत्स्नानं न संशयः ॥
" अयने चोत्तरे प्राप्ते यः स्नापयति केशवम् । घृतप्रस्थेन पापानि सकलानि व्यपोहति " ॥

यमः—

" कपिलां विप्रमुख्याय ददात्यनुदिनं हि यः । घृतस्नानं च देवस्य विष्णोः काले समं हि तत्॥
" देवे मलापनयनं देवागारसमूहनम् । स्नापनं सर्वदेवानां गोप्रदानसमं स्मृतम् "॥ इति ।

स्मृतिरत्ने—

" कुंकुमागुरुश्रीकंठकर्दमैरच्युताकृतिम् । आलिप्य भक्त्या देवेशं कल्पकोटिं वसेद्दिवि ॥
" गंधेभ्यश्चंदनं पुण्यं चंदनादगुरुर्वरः । कृष्णागरुस्ततः श्रेष्ठः कुंकुमं तु ततो वरम् " ॥

आचारसारे—

" मालती मल्लिका चैव यूथिका जातिमुक्तकम्[१] । पाटलीं करवीरं च जपामावंतिमेव च ॥
" कुटजं तगरं[२] चैव कर्णिकारं कुरंडकम् । पुन्नागं चंपकं कुंदं बाणं षड्स्वरमल्लिका[३] ।
" अशोकं तिलकं चैव नंद्यावर्त्तं तथैव च । अमी पुष्पप्रकाराश्च कल्पताः केशवपूजने ॥
" बिल्वपत्रं शमीपत्रं पत्रं भृंगारजस्य च । तुलसी कृष्णतुलसीपत्रं वासवमेव च ॥
" केतकीपुष्पपत्रं च सद्यस्तुष्टिकरं हरेः। श्वेतरक्तसरोजानि नीलरक्ते तथोत्पले ॥
" सितोत्पलं च कृष्णस्य दयितानि सदा हरेः । नीपार्जुनकदम्बैश्च बकुलैश्च सुगंधिभिः ॥
" कल्हारैर्विष्णुमभ्यर्च्य विष्णुलोके महीयते ।
" काञ्चनैः कुसुमैर्विष्णुं मणिविद्रुमनिर्मितैः । पूजयन्वस्त्रपुष्पाद्यैर्नरो मुक्तिमवप्नुयात् " ॥

पुलस्त्यः—

"पुष्पजातिषु सर्वासु सौवर्णं पुष्पमुत्तमम् । त्रुटिमात्रप्रदानात्तु शक्रार्धासनमाप्नुयात् " ॥

मौद्गल्यः—

" सकृदभ्यर्च्य गोविंदं बिल्वपत्रेण मानवः । मुक्तिगामी निरातंकः कृष्णस्यानुचरो भवेत् ॥
" सुगंधितुलसीपत्रैः प्रतिमायाः समंततः । निश्छिद्रमाचरेद्यस्तु सोऽनंतफलमाप्नुयात् " ॥

धर्मसारे[४]—

१ क्ष–त्तमम् । २ खगघ–शावन्तिकेतिच । ३ खगघ–श्रीकंठं । ४ ख–सर ।

" सालग्रामशिलामूर्ध्नि तुलसीपत्रपातनम् । कर्मनिर्मूलनायालं एकादश्यामभोजनम् ॥
" न विप्रसदृशं पात्रं न दानं सुरभीसमम् । गंगाया न समं तीर्थं न पत्रं तुलसीसमम् " ॥

चंद्रिकायाम् (पृ. २०१ पं. २६)—
" दश दत्वा सुवर्णानि यत्फलं लभते नरः । तत्फलं लभते विष्णोर्द्रोणपुष्पप्रदानतः ॥
" बिल्वपत्रसहस्राद्धि बकुलं पुष्पमुत्तमम् । तस्माद्बकुलपुष्पाद्धि नंद्यावर्तं विशिष्यते ॥
" नंद्यावर्तसहस्राद्धि करवीरं विशिष्यते । सर्वैर्मनोरमैः पुष्पैर्जातिपुष्पं विशिष्यते ॥
" वर्णानां तु यथा विप्रस्तीर्थानां जान्हवी यथा । सुराणां च यथा विष्णुः कल्हारकुसुमं तथा ॥
" सितरक्तैर्महापुण्यैः कुसुमैः करवीरजैः । अर्चयित्वाऽच्युतं याति यत्रास्ते गरुडध्वजः ॥
" गंधाढ्यैर्विमलै रम्यैः कुसुमैः कुंदकोद्भवैः । भक्त्याऽभ्यर्च्य हृषीकेशं कुसुमैः केतकोद्भवैः ॥
" शुभ्राशुभ्रैर्महागन्धैः कुसुमैः पङ्कजोद्भवैः । अधोक्षजं समभ्यर्च्य नरो याति हरेः पदम् ॥
" अभ्यर्च्य केशवं पुष्पैः किंशुकैः सुमनोहरैः । समभ्यर्च्य हृषीकेशं जन्मदुःखाद्विमुच्यते ॥
" भक्त्या दत्तं फलं पत्रं पुष्पं दूर्वांकुरं जलम् । अचिरात्प्रतिगृह्णाति भक्तिग्राह्यो हि केशवः ॥
"तुलसी कृष्णगौराख्या तथाऽभ्यर्च्य जनार्दनम् । नरो याति तनुं त्यक्त्वा वैष्णवीं शाश्वतीं गतिम् ॥
" एवं शुभैः सदा पुष्पैः पूजनीयो जनार्दनः । निषिद्धैर्दुःखदैर्देवं नार्चयेत कदाचन ॥
" न शुष्कैः पूजयेद्देवं कुसुमैर्न महीगतैः । न विशीर्णदलैः शुष्कैर्नाशुभैर्नाविकासिभिः " ॥

रत्नावल्याम्—
" मुकुलैर्नार्चयेद्देवं चंपकैर्जलजैर्विना । न कंटकिभवं पुष्पं दद्याच्छुक्लं मृते सदा ॥
" येऽर्कपुष्पैस्त्रिलोकेशमर्चयंति जनार्दनम् । तेभ्यः क्रुद्धोऽक्षयं दुःखं क्रोधाद्विष्णुः प्रयच्छति ॥
" उन्मत्तकेन ये मूढाः पूजयंति त्रिविक्रमम् । उन्मादं दारुणं तेषां ददाति गरुडध्वजः " ॥

विष्णुः (६६।१–९.)—"न नक्तं गृहीतोदकेन देवतार्चनं कुर्याच्चंदनकुंकुमकर्पूरमृगमदजातीफलवर्जमनुलेपनं न दद्यान्मणिसुवर्णमुक्ताफलविद्रुमरजतवर्जप्रतिरूपकस्यालंकारम् । न कुर्यात् न चासौ नीलं रक्तं नागंधिपुष्पं नोग्रगंधि न कंटकिजं दद्यात् । कंटकिजमपि शुक्लं सुगंधि रक्तमपि कुंकुमजं दद्यात् " इति । **सारसमुच्चये**—
" गिरिकर्णिकया विष्णुं येऽर्चयंत्यबुधा नराः । तेषां कुलक्षयं घोरं कुरुते मधुसूदनः ॥
" गुग्गुलं कंदकं चैव देवदारुं सरूषकम् । सर्ज्जरसं जातिफलं धूपयेद्गोघृतं हरेः ॥
" न धूपयेज्जीवजातैर्नाहविष्यं निवेदयेत् । घृततैलैर्विना किंचिद्दीपार्थं न समाहरेत् ॥
" प्रज्वाल्य देवदेवस्य कर्पूरेण सुदीपकम् । अश्वमेधमवाप्नोति कुलं चैव समुद्धरेत् " ॥

संवर्तः—
" देवागारे द्विजानां च दीपं दत्वा चतुष्पथे । मेधाविज्ञानसंपन्नः चक्षुष्मान् जायते नरः " ॥

पाद्मे—" नैवेद्यपात्रं वक्ष्यामि केशवाय महात्मने ।
" हैरण्यं राजतं कांस्यं ताम्रं मृन्मयमेव वा । पालाशं पद्मपत्रं वा पात्रं विष्णोरतिप्रियम् ॥
" हविः शाल्योदनं दिव्यमाज्ययुक्तं सशर्करम् । नैवेद्यं देवदेवाय यावकं पायसं तथा ॥
" संस्कृतं चान्नमाज्याढ्यं दधिक्षीरमधूनि च । फलमूलव्यंजनानि मोदकं च निवेदयेत् ॥
" अर्घ्यमाचमनं चैव हविस्तांबूलमेव च । दक्षिणे देवदेवस्य हस्ते दद्याद्विचक्षणः ॥

---

१ गव–ज्जा ।

" हविर्दानं त्रिकालं तु उत्तमोत्तममुच्यते । द्वयोश्च मध्यमं प्रोक्तमेककालेऽधमं हविः " ॥

रत्नावल्याम्—

" नैवेद्यस्य त्वलाभे तु फलानि तु निवेदयेत् । फलानामप्यलाभे तु तृणगुल्मौषधीरपि ॥
" औषधीनामलाभे तु तोयान्यपि निवेदयेत् । तदलाभे तु सर्वत्र मानसं प्रवरं स्मृतम् " ॥

व्यासः—

" गांडूषिकं जलं दद्याद्द्यादाचमनं ततः । हस्तवासं सकर्पूरं मुकुटं भूषणानि च ॥
" आदर्शयेत्तथा दर्शे कल्पयेच्छत्रचामरे । महानीराजनं श्रीमन् मंगलेशाय कल्पयेत् ॥
" कर्पूरं तुलसीपत्रं तांबूलं यो निवेदयेत् । विष्णवे भक्तियुक्तः स विष्णुलोके महीयते ॥
" विष्णोर्विमानं यः कुर्यात्सकृद्भक्त्या प्रदक्षिणम् । अश्वमेधसहस्रस्य फलमाप्नोति मानवः ॥
" प्रणम्य दंडवद्भूमौ नमस्कारेण योऽर्चयेत् । स यां गतिमवाप्नोति न तां क्रतुशतैरपि ॥
" दोर्भ्यां च पभ्द्यां जानुभ्यामुरसा शिरसा दृशा । मनसा वचसा चेति प्रणामोऽष्टांग ईरितः ॥
" जानुभ्यां चैव बाहुभ्यां शिरसा वचसा धिया । पंचांगकः प्रणामः स्यात् पूजासु प्रवराविमौ" ॥

चंद्रिकायाम्—

" उरसा मनसा चैव शिरसा च कपोलयोः । पभ्द्यां कराभ्यां जानुभ्यां प्रणामोऽष्टांग उच्यते ॥
" कूर्मवच्चतुरः पादान् शिरश्चाद्धृत्य पंचमम् । मनोबुध्याभिमानेन पंचांगः परिकीर्तितः ॥
" स्तुवन् देवं नमस्कुर्यात्प्रसीद भगवन्निति ।
" एकहस्तप्रणामश्च एकं चापि प्रदक्षिणम् । अकाले दर्शनं विष्णोर्हंति पुण्यं पुरातनम् ॥
" एकोऽपि कृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः ।
" दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय ॥
" शंखमध्ये स्थितं तोयं भ्रामितं केशवोपरि । अंगलग्नं मनुष्याणां ब्रह्महत्यायुतं दहेत् ॥
" शंखस्थं प्रोक्षयेद्देहं पुत्रमित्रपरिग्रहम् " इति ॥

व्यासः—" देवदेव जगन्नाथ शंखचक्रगदाधर । देहि देव ममानुज्ञां भवत्तीर्थनिषेवणे ॥
" इत्यनुज्ञां ततो लब्ध्वा पिबेत्तीर्थमघापहम् ।
" अकालमृत्युहरणं सर्वव्याधिविनाशनम् । विष्णोः पादोदकं तीर्थं शिरसा धारयाम्यहम् ॥
" इति मंत्रं समुच्चार्य सर्वदुष्टग्रहापहम् । तुलसीमिश्रितं तीर्थं पिबेन्मूर्ध्ना च धारयेत् ॥
" सालग्रामशिलातोयमपीत्वा यस्तु मस्तके । प्रक्षेपणं प्रकुर्वीत ब्रह्महा स निगद्यते ॥
" विष्णोः पादोदकं पीतं कोटिहत्याघनाशनम् । तदेवाष्टगुणं पापं भूमौ बिंदुनिपातनात्" ॥

मार्कंडेयः—"आम्रेक्षुखंडतांबूलचर्वणे सोमपानके । विष्ण्वंघ्रितोयपाने च नाद्यन्ताचमनं स्मृतम् ॥
" विष्णुपादोद्भवं तीर्थं पीत्वा न क्षालयेत्करम् । क्षालयेद्यदि मोहेन पंचपातकमाप्नुयात् " ॥

श्रुतिरपि—

" भगवान्पवित्रं भगवत्पादोदकं पवित्रं तत्पानेनाचमनं यथाहि सोमेषु " ॥ इति ।

चंद्रिकायाम्—

" हृदि रूपं मुखे नाम नैवेद्यमुदरे हरेः । पादोदकं च पुष्पं च मस्तके यस्य सोऽच्युतः ॥
" अग्निष्टोमसहस्रैस्तु वाजपेयशतैरपि । यत्फलं लभते भक्त्या विष्णोर्नैवेद्यभक्षणात् " ॥

बह्वृचपरिशिष्टे—

" पवित्रं विष्णुनैवेद्यं सुरसिद्धर्षिभिः स्मृतम् । अन्यदेवस्य नैवेद्यं भुक्त्वा चांद्रायणं चरेत् ॥
"ग्राह्यं हरेस्तु निर्माल्यं पत्रं पुष्पं फलं जलम् । सालग्रामशिलासंगात्सर्वं याति पवित्रताम्"॥ इति।

व्यासः—" नैवद्यमन्नं तुलसीविमिश्रं विशेषतस्तीर्थजलेन सिक्तम् ॥
" योऽश्नाति नित्यं पुरतो मुरारेः प्राप्नोति यज्ञायुतकोटिपुण्यम् " ॥ इति ।

पितामहः–"नैवेद्यं तुलसीमिश्रं स्वयं भुंजीत वाग्यतः । गृही तस्मादयत्नेन स गच्छेद्वैष्णवं पदम्"॥

श्रुतिरपि–(ऋ. सं. २।२।२४) " तदस्य प्रियमभिपाथो अश्यां नरो यत्र देवयवो मदंति । ऊरुक्रमस्य स हि बंधुरित्था विष्णोः पदे परमेमध्व उत्स " इति । अस्य विष्णोः प्रियं तत्पाथः निवेदित मन्नमभ्यश्यां यत्र देवाराधका नरा हृष्यंति इत्था इत्थं वर्तमानः तस्य बंधुः मध्वे मधुवद्भोग्ये उत्स उत्सुक इत्यर्थः । **स्मृतिरत्ने—**

" शुभमिच्छन्नरः प्राज्ञः स्कंधे मालां न धारयेत् । धारयेत्तां शिरस्येव सुगंधां प्रियदर्शनाम् ॥
" ततः स्तुत्वा तु देवेशमपराधान् क्षमापयेत् ॥
" अपराधसहस्राणि क्रियंतेऽहर्निशं मया । दासोऽयमिति मां मत्वा क्षमस्व पुरुषोत्तम ॥
" भगवन् देवदेवेश पुरुषोऽसि सनातनः । क्षमस्व सर्वलोकेश भक्तस्य तु विशेषतः ॥
" ज्ञानादज्ञानतो वाऽपि यन्न्यूनादिकृतं मया । तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादाज्जनार्दन " ॥ इति ।

संग्रहे—

" साधु वाऽसाधु वा कर्म यद्यदाचरितं मया । तत्सर्वं भगवन्विष्णो गृहाणाराधनं मम ॥
" इति कर्मार्पणं कृत्वा स्वात्मानं च निवेदयेत् " ॥ इति ।

योगयाज्ञवल्क्यः—

" एवं संपूज्य देवेशं क्षणं ध्यात्वा निरंजनम् । ततोऽवलोकयेदर्कं हंसः शुचिषदित्यृचा " ॥

महाभारते—

"ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च कृतलक्षणैः । अर्चनीयश्च सेव्यश्च भक्तियुक्तैः सदा हरिः" ॥ इति ।

यत्तु स्मर्यते—

"जपस्तपस्तीर्थसेवा प्रव्रज्या मंत्रसाधनम् । देवताराधनं चैव स्त्रीशूद्रपतनानि षट् " ॥ इति ।
तद्वैदिकार्चनाभिप्रायम् ।
"वैदिकं ब्राह्मणानां स्याद्राज्ञां वैदिकतांत्रिकम् । तांत्रिकं वैश्यशूद्राणां स्त्रीणामपि च तांत्रिकम्"॥इति।
स्त्रीशूद्रयोस्तांत्रिकत्वाभ्यनुज्ञानात् । **नारदः—**
" स्त्रीशूद्रपूजितं लिंगं विष्णुं वापि नमेत्तु यः । त्रिःसप्तकुलसंयुक्तो नरकं प्रतिपद्यते " ॥ इति ।

हारीतः—

" यो मोहादथवालस्यादकृत्वा देवतार्चनम् । भुंक्ते स याति नरकं तिर्यग्योनौ प्रजायते ॥
" येऽर्चयंति सदा विष्णुं निष्कलेनांतरात्मना । न ते भूयो हि जायंते श्वेतदीपनिवासिनः ॥
" शंखचक्रगदाशार्ङ्गधरा विष्णुपराक्रमाः । श्वेतांबरधराश्चैव गंधमाल्योपशोभिताः " ॥ इति ।

शांडिल्यः—

" न हुंकुर्यान्न वा जल्पेद्वशी मौन्यर्चयेद्धरिम् । यन्नोपपद्यते किंचित् ध्यायेत्तन्मनसैव तु ॥
" संपद्यते तु तत्सर्वं देवदेवस्य शार्ङ्गिणः " ।

भागवते—" गृहं श्मशानं तव बिंबवर्जितम् कथाविहीनाश्च गिरः शिवारुताः ।
"श्वसंञ्छवोदास्य विना कृतं वपुर्वदंति हि त्वय्यनिवेदितं विषम्" ॥ ऋग्वेदे **श्रूयते** (२।२।२५)–
" प्र वः पांतमंधसोऽधियायते । महे शूराय विष्णवे चार्चत " ॥
यजुषि च (२।४।८–९ पृ. ५००–५०१)—
"भवा मित्रो न शेव्यो घृतासुतिः। विभूतद्युम्न ए वया उ सप्रथाः। अधा ते विष्णो विदुषाचिद्दध्यः॥ स्तोमो यज्ञस्य राज्ञो हविष्मतः। यः पूर्व्याय वेधसे नवीयसे। सुमज्जानये विष्णवे ददाशति। यो जातमस्य महतो महि ब्रवात्। सेदु श्रवोभिर्युज्यं चिदभ्यसत्। तमु स्तोतारः पूर्व्यं यथा विद ऋतस्य। गर्भं हविषा पिपर्तन। आस्य जानंतो नामचिद्विवक्तन। बृहतो विष्णो सुमतिं भजामहे"॥ इति ।
पुराणे—
" विष्णुपूजाविहीनस्य दत्तं चेष्टं हतं श्रुतम् । तपश्च व्यर्थतां याति प्रेतालंकारवत् द्विजः ॥
" मातृवत्परिरक्षंतं सृष्टिसंहारकारकम् । यो नार्चयति वै विष्णुं सोऽक्षयं नरकं व्रजेत्"॥ इति ।
मार्गशीर्षार्चनमुक्तं **भास्करीये**—
" अयनं दक्षिणं रात्रिरुत्तरं तु दिवा भवेत् । दैवतं तदहोरात्रं तत्रिंशन्मास उच्यते ।
" तद्दिनस्य उषःकालं चापमासं विदुर्बुधाः । तस्मात्सर्वप्रयत्नेन चापमासे दिने दिने ॥
" उषःकाले तु संप्राप्ते बोधयित्वा जगत्पतिम् । समभ्यर्च्य भजेद्विष्णुं जनानां दोषशांतये " ॥
ब्रह्मांडे—" चापं गते दिवानाथे उत्थाप्य शयनाद्धरिम् ।
" उषःकाले तु संप्राप्ते अर्चयित्वा जनार्दनम् । उपचारैः षोडशभिर्मुद्गान्नं च निवेदयेत् " ॥
आदित्यपुराणे—
" चापं गते ततः सूर्ये प्रत्यूषे स्नानमाचरेत् । अर्चयेच्च जगन्नाथं यावत्सूर्योदयात्पुरा ॥
" ततः प्रभातसमये अर्घ्यं प्रक्षिप्य वै द्विजः । गायत्रीं च ततो जप्त्वा उपतिष्ठेत भास्करम् "॥
भागवतेऽपि—
" कोदंडस्थे सवितरि प्रत्यूषे पूजनाद्धरेः । सहस्राब्दार्चनफलं दिनेनैकेन लभ्यते " ॥
शैवेऽपि—
" चापराशौ स्थिते सूर्ये उषःकाले दिनेदिने । अभिषेकं ततः कुर्याद्रौद्रमंत्रेण मंत्रवित् ॥
" अर्कपुष्पैश्च बिल्वैश्च पूजयित्वा महेश्वरम् । नैवेद्यं च ततः कुर्याल्लोकसंहारशांतये " ॥
शांडिल्यः—
" एकादश्यां सिते पक्षे चापे तिष्ठति भास्करे । उत्सवं कारयेद्धीमान्वेदपारायणैः सह ॥
" संक्रांतिर्जन्मनक्षत्रं श्रवणं द्वादशीद्वयम् । पर्वद्वयं समुद्दिष्टं सविशेषक्रियाविधौ ॥
" चंद्रसूर्योपरागे च प्रादुर्भावदिने हरेः । मासर्क्षेषु च पुण्येषु विशेषाराधनं विदुः ॥
" दुर्निमित्तेषु दुःस्वप्ने संजाते च महाभये । आगतेषु च भक्तेषु कुर्याद्वैशेषिकक्रियाम् " ॥ इति ।
कूर्मपुराणे (उ. अ. १८)—
" न विष्ण्वाराधनात्पुण्यं विद्यते कर्म वैदिकम् । तस्मादनादिमध्यांतं नित्यमाराधयेद्धरिम् ॥
" तद्विष्णोरिति मंत्रेण सूक्तेन पुरुषेन तु । नैताभ्यां सदृशो मंत्रो वेदेषूक्तश्चतुर्ष्वपि " ॥
शिवपूजापि **तत्रोक्ता**—
" अथवा देवमीशानं भगवंतं सनातनम् । आराधयेन्महादेवं भावपूतो महेश्वरम् ॥

" मंत्रेण रुद्रगायत्र्या प्रणवेनाथ वा पुनः । ईशानेनाथवा रुद्रैस्त्र्यंबकेन समाहितः ॥

" पुष्पैः पत्रैरथाद्भिर्वा चंदनाद्यैर्महेश्वरम् । तथोंनमः शिवायेति मन्त्रेणानेन वा यजेत् ॥

" नमस्कुर्यान्महादेवमृतं सत्यमितीश्वरम् । निवेदयीत चात्मानं यो ब्रह्माणमितीश्वरम् ॥

"प्रदक्षिणं द्विजः कुर्यात्पंच ब्रह्माणि वा जपेत् । ध्यायीत देवमीशानं व्योममध्ये गतं शिवम्"॥ इति **बोधायनोऽपि** (२।१७)—"अथातो महादेवस्याहरहः परिचर्याविधिं व्याख्यास्यामः । स्नात्वा शुचौ समे देशे गोमयेनोपलिप्य प्रतिकृतिं कृत्वाऽक्षतपुष्पैर्यथालाभमर्चयेत् । सह पुष्पोदकेन महादेवमावाहयेत् । ॐ भूः महादेवमावाहयामि ओं भुवर्महा०यामि ओं सुवर्महादे०मि ओंभूर्भुवः सुवर्महादेवमावाहयामीत्यावाह्य आयातु भगवान्महादेव इत्यथ स्वागतेनाभिनंदति स्वागतं भगवते महादेवायैतत् स्वासनं क्लृप्तमास्यतां भगवान्महादेव इत्यत्र कूर्चं ददाति भगवतोऽयं कूर्चो दर्भमयः त्रिवृद्धरितः सुवर्णस्तं जुषस्वेत्यत्र स्थानानि कल्पयत्यग्रतो ब्रह्मणे कल्पयामि विष्णवे कल्पयामि दक्षिणतः स्कन्दाय कल्पयामि विनायकाय कल्पयामि पश्चिमतः शूलाय कल्पयामि महाकालाय कल्पायामि उत्तरतः उग्राय कल्पायामि नंदिकेश्वराय कल्पयामि इत्यथ सावित्र्या पात्रमभिमंत्र्य प्रक्षाल्य तिरःपवित्रमप आनीय सह पवित्रेणादित्यं दर्शयेदोमित्यातमितोः प्राणमायच्छेत् । रुद्रेण पाद्यं दद्यात् । प्रणवेनार्घ्यम् । अथ व्याहृतिभिर्निर्माल्यं व्यपोह्योत्तरतश्चंडेशाय नम इत्यथैनं स्नापयत्यापोहिष्ठामयो भुव इति तिसृभिर्हिरण्यवर्णाः शुचयः पावका इति चतसृभिः पवमानः सुवर्जन इत्येतेनानुवाकेन स्नापयित्वाऽद्भिस्तर्पयति भवं देवं तर्पयामि शर्वं० ईशानं दे० पशुपतिं दे० रुद्रं देवं० उग्रं दे० भीमं दे० महांतं देवं तर्पयामीति तर्पयित्वा अथैतानि वस्त्रयज्ञोपवीताचमनीयानि उदकेन व्याहृतिभिर्दत्वा व्याहृतिभिः प्रदक्षिणमुदकं परिषिच्य नमस्ते रुद्र मन्यव इति गंधं दद्यात् । सहस्राणि सहस्रश इति पुष्पं दद्यात् । ईशानं त्वा भुवनानामभिश्रियम् इत्यक्षतं दद्यात्सावित्र्या धूपमुद्दीप्यस्वेति दीपं देवस्य त्वा सवितुः प्रसवे इति भगवते महादेवाय जुष्टं चरुं निवेदयामीति नैवेद्यं अथाष्टभिर्नामधेयैरष्टौ पुष्पाणि दद्यात् । भवाय देवाय नमः । शर्वाय० ईशानाय० पशुपतये०रुद्राय०उग्राय दे० भीमाय०महते देवाय नमः। ब्रह्मणे० विष्णवे० स्कंदाय० विनायकाय० शूलाय० महाकालाय० नंदिकेश्वराय नम इति चरुशेषेणाष्टभिर्नामधेयैरष्टाहुतीर्जुहोति भवाय स्वाहेत्यादिभिर्हुत्वा शिष्टैर्माल्यैर्ब्राह्मणानलंकृत्याथैनमृग्यजुःसामभिः स्तौति सहस्राणि सहस्रश इत्यानुवाकं जपित्वाऽन्यांश्च रौद्रमंत्रान्यथाशक्तीत्येके । ॐभूर्भुवः सुवर्महरों भगवते महादेवाय च रुद्रमुद्वासयामीत्युद्वास्य उद्वासनकाले ॐभूर्महादेवमुद्वासमीत्याभिरुद्वास्य "प्रयातु भगवानीशः सर्वलोकनमस्कृतः। अनेन हविषा तृप्तः पुनरागमनाय च॥पुनःसंदर्शनाय चेति" प्रतिमास्थानेष्वावाहनोद्वासनवर्जं समानम् । महत्स्वस्त्ययनमित्याचक्षत इत्याह भगवान्बोधायनः " इति । शिवार्चनं प्रशंसति **नंदिकेश्वरः**

" यः प्रयच्छेद्गवां लक्षं दोग्ध्रीणां वेदपारगे । एकाहमर्चयेल्लिंगं तस्य पुण्यं ततोऽधिकम् ॥

" सकृत्पूजयते यस्तु भगवंतमुमापतिम् । तस्याश्वमेधादधिकं फलं भवति भूसुराः " ॥ इति ।

चंद्रिकायाम्—

" लिंगस्य दर्शनं पुण्यं दर्शनात्स्पर्शनं वरम् । स्पर्शनादर्चनं श्रेष्ठमर्चनात् ध्यानवंदने ॥

" मासे मासे तु योऽश्नीयाद्यावज्जीवं द्विजोत्तमः । यस्त्वर्चयेत्सकृल्लिंगं सममेतन्न संशयः " ॥

स्मृतिरत्ने—
" अयुतं यो गवां दद्यात् दोग्ध्रीणां वेदपारगे । वस्त्रहोमादियुक्तानां क्षीरस्नानस्य तत्फलम् ॥
" दध्ना यः स्नापयेल्लिङ्गं कृष्णाष्टम्यामुपोषितः । कुलसप्तकमुद्धृत्य शिवलोके महीयते ॥
" दध्ना तु स्नापयेल्लिंगं सकृद्भक्त्या तु यो नरः । पापकंचुकमुत्सृज्य ब्रह्मलोके महीयते ॥
" कल्पकोटीसहस्रैस्तु यत्पापं समुपार्जितम् । घृतस्नानेन तत्सर्वं दहत्यग्निरिवेंधनम् ॥
" नैरन्तर्येण यो मासं घृतस्नानं समाचरेत् । त्रिसप्ततिकुलोपेतो लभते पद्मैश्वरम् ॥
" मधुना स्नापयित्वा तु सकृद्भक्त्याऽर्चयेत् द्विजः । पापकंचुकमुत्सृज्य वन्हिलोके महीयते ॥
" स्नानमिक्षुरसेनापि यो लिंगे सकृदर्चयेत् । लभेद्वै[1]द्याधरं लोकं सर्वकामसमन्वितम् ॥
" पयोदधिघृतक्षौद्रशर्करायैरनुक्रमात् । ईशादिमंत्रैः संस्नाप्य शिवमुक्तिमवाप्नुयात् ॥
" कपिलापंचगव्येन विधिना सकृदाचरेत् । स्नानं शतगुणं ज्ञेयमितरेभ्यो न संशयः ॥
" यः पुमांस्तिलतैलेन करयंत्रोद्भवेन च । शिवाभिषेकं कुरुते स शैवं पदमाप्नुयात् ॥
"स्नानं शतगुणं ज्ञेयमभ्यंगं पंचविंशतिः । पलानां च सहस्रे तु महास्नानं प्रकीर्तितम् ॥
" वस्त्रपूतेन तोयेन यो लिंगं स्नापयेत्सकृत् । सर्वकामसुतृप्तात्मा शिवलोकमवाप्नुयात् ॥
" गंधचंदनतोयेन स्नापयेत्सकृदीश्वरम् । गंधर्वलोकमाप्नोति स गन्धर्वैश्च पूज्यते ॥
" कुशोदकेन यो लिंगं सकृत्स्नापयते नरः । कांचनेन विमानेन ब्रह्मलोके महीयते " ॥

रत्नावल्याम्—
" कर्पूरागरुतोयेन यो लिंगं स्नापयेत्सकृत् । स सर्वपापनिर्मुक्तः शिवसारू[2]प्यमाप्नुयात् ॥
" हिमांभसा शिवं स्नाप्य कौबेरं पदमाप्नुयात् । श्रियं प्राप्नोति स स्नाप्य शिवं कुंकुमवारिणा ॥
" फलतोयैः शिवं स्नाप्य शिवलोके स मोदते ।
" वासांसि सुविचित्राणि सारवंति मृदूनि च । धूपितानि शिवे दद्याद्विकेशानि नवानि च ॥
" त्रिवृतं शुक्लचित्रं वा पद्मसूत्रादिनिर्मितम् । दत्वोपवीतं रुद्राय भवेद्वेदांतपारगः ॥
" लिंगस्य लेपनं कुर्याद्यदि गंधैः सुगंधिभिः । वर्षकोटिशतं दिव्यं शिवलोके महीयते ॥
" पुष्पैररण्यसंभूतैः पत्रैर्वा गिरिसंभवैः । आत्मारामोद्भवैर्वापि पुष्पैः संपूजयेच्छिवम् ॥
" केतकीमाधवीकुन्दचूतयूथिकजालकैः । शिवे शिरीषबन्धूकैः कुसुमानि विवर्जयेत् ॥
" यः साज्यगुग्गुलुं दध्वा घृतदीपं प्रकाशयेत् । स यामीं यातनां हित्वा शिवलोके महीयते ॥
" यावंतस्तंडुलास्तस्मिन्नैवेद्यपरिसंख्यया । तावद्युगसहस्राणि स्वर्गलोके महीयते ॥
" गुडखंडघृतानां च भक्ष्याणां च निवेदने । घृतेन पाचितानां च दानाच्छतगुणं फलम् ॥
" आढकक्षीरसंयुक्तमाढकार्धजलैर्युतम् । गुडं फलं च निक्षिप्य तंडुलैराढकैर्युतम् ॥
" पायसं पाचितं कुर्यात् देवयोग्यमिदं शुभम् " ॥ इति ।
निवेदनमाह **भृगुः**— " अत उर्ध्वं प्रवक्ष्यामि हविष्पाकविधिक्रमम् ।
" वाराककोद्रवादीनि वर्जयेत्तु विचक्षणः । कुलुत्थजातिभेदं च प्रियंगुं चैव वर्जयेत् ॥
" धान्यानामपि सर्वेषां कृष्णधान्यं विवर्जयेत् । अथवान्यदलब्धं चेद्धान्यं शुद्धं समाहरेत् ॥
" त्रिवर्षातीतधान्यानि न प्रशस्तानि दैविके । तंडुलानपि सर्वांश्च मासादूर्ध्वं विवर्जयेत् ॥
" आजकं जीरकं चैव मरीचं सर्षपं तथा । राजमाषं महामाषं श्यामाकं कृष्णमाषकम् ॥
" माषं मुद्गं महामुद्गं निष्पावं तिलतिल्वकौ । फलानि चूतकदलीपनसानां समाहरेत् ॥

१ क्ष-न । २ क्ष-सामुज्य ।

" भेदैस्तु कारवल्यादि सर्वं ग्राह्यमितीरितम् । क्षुद्रकंदं महाकंदमाहरेत्तु विचक्षणः ॥
" सहकारप्रभेदैश्च तथैव पनसद्वयम् । कदल्यादिषु भेदैस्तु गृह्णीयात्तु प्रयत्नतः ॥
" कूश्मांडोर्वारुके चैव सिंही व्याघ्री तथैव च । कर्कोटकादिसंग्राह्यं कलंजादीनि वर्जयेत् ॥
" बिंबालकफलादीनि वर्जयेदिति केचन । भेदैश्च बृहती सर्वा संग्राह्येत्युच्यते बुधैः " ॥

मरीचिरपि— " अथ हविर्विधिं वक्ष्ये । वेणुकान्यवान्षाष्टिकान्नीवारान्प्रियंगून्शालिभेदान् अन्यान्व्रीहीन्वाऽप्येकजातीयांश्चतुर्वर्णैरेवानयेदेतेषां पूर्वं पूर्वं श्रेष्ठं तस्माद्वरककोद्रवादीनि कुधान्यानि प्रतिलोमानीतानि च वर्जयेत् । कदलीचूतपनसनालीकेरतिंतिणिकारवल्लीव्याघ्रीशिंबभेदबृहतीभेदासिंहीव्याघ्रनखं कर्कन्धूर्वारुककूष्मांडकार्कोटकानि सूरणकंदक्षुद्रकंदमहाकंदवल्लीकंदशृंगिबेरोत्पलकंदान्यन्यानि च भक्ष्याणि यथालाभमाहरेत् । कोशातकीमलाबूं च विशेषेण विवर्जयेत् " ॥ इति ।

हरिहरयोः पूजामाह **बोधायनः** (गृ. सू. २।२२।१-२)—"अथातो देवयोः पूजाकरणे सर्वत्र ' त्रीणि पदा विचक्रमे ' ' त्र्यंबकं यजामहे ' इति एताभ्यां यथालिंगं आसनपाद्याचमनीयादीनि एतयोश्च त्रैवर्णिकधर्मत्वात्सर्वत्रपुरस्ताल्लोकप्रसिद्धात्प्रतिषेधाभावान्नियतेति स्माह भगवान्बोधायनः " ॥ इति । **स एव** (२।२२।८)—" देवयोर्यथाकामी स्यात् । यस्यां कस्यांचिदवस्थायां जले वा स्थले वा प्रतिमासु वा सर्वं कृत्वाऽभ्यर्चयेत् " इति । **शौनकः**—" केचिद्गणपतिमादित्यं शक्तिमच्युतं शिवं च पंच क्रमेणाहरहर्यजंते । तानप्सु वाऽग्नौ वा सूर्ये वा हृदये वा स्थंडिले वा प्रतिमासु वा यजेत प्रतिमास्वक्षणिकासु नावाहनविसर्जने भवतः । स्वाकृतिषु हितासु नित्यं संनिहिताः " इति । प्रतिमाः प्राङ्मुखीरुदङ्मुखो यजेतान्यत्र प्राङ्मुखः संभृतसंभारं यजनभवनमेत्य विधिनोपविश्य यतप्राणः कर्म संकल्प्य शुचिः शंखादिपात्रं सपवित्रमद्भिः पूरयित्वा गंधाक्षतपुष्पाणि वा प्रक्षिप्य साविञ्याऽभिमंत्र्य तीर्थान्यावाह्याभ्युक्ष्य पवित्रपुष्पाणि तदुदकेनापोहिष्ठेति आत्मानमायतनं यजनांगानि चाभ्युक्ष्य क्रियांगोदकुंभं गंधादिभिरभ्यर्च्य तेनोदकेन नमोंतनाम्ना तल्लिंगमंत्रेण वा क्रमेणोपचारान्दद्यात् । पुष्पोदकेन पाद्यमर्घ्यं च पात्रांतरेण सगंधाक्षतं कुसुमं दद्यात् । आवाहनमासनं पाद्यमर्घ्यमाचमनं तथा स्नानमाचमनीयं वस्त्रमाचमनीयमुपवीतमाचमनीयं गंधपुष्पाणि धूपं दीपं नैवेद्यमाचमनमुपचारं मुखवासं स्तोत्रं प्रणामं दक्षिणां प्रदक्षिणं विसर्जनं च कुर्यात्। असंपन्नं मनसा संपादयेत् । **मंत्राः** "गणानां त्वा गणपतिꣳ हवामहे" इति **गणपतेः** । "आसत्येन रजसा" इत्या**दित्यस्य** । 'जातवेदसे सुनवाम' इति **शक्तेः** । 'इदं विष्णुर्विचक्रमे' इति **विष्णोः** । ' त्र्यंबकं यजामहे ' इति **रुद्रस्ये**त्यभ्यर्च्य साविञ्या वा जातवेद्या वा प्राजापत्यया वा व्याहृतिभिर्वा प्रणवेन वा कुर्वंत्येष देवयज्ञोऽहरहर्गोदानसंमितः सर्वाभीष्टदः स्वर्ग्योपवर्ग्यश्च । तस्मादेनमहरहः कुर्वीति तमेनं हुतशेषेण वा पृथगन्नेन वा कुर्यात् । नास्य शेषेण वैश्वदेवं कुर्यात् " इति । अन्यानपि पूजार्हानाह **व्यासः**—

" शिवो वह्निर्गुरुश्चैव ब्राह्मणश्च विशेषतः । चतुष्टयं समं पूज्यं सदाशिवपदार्थिभिः " ॥

माधवीये—

" शिवविद्यागुरूणां च भेदो नास्ति कथंचन । शिवे मंत्रगुरौ यस्य भावना सदृशी भवेत् ॥

---

१ गद्य-पुण्यो ।

" भोगो मोक्षश्च सिद्धिश्च शीघ्रं तस्य भवेद् ध्रुवम् " ॥

पराशरः—

" मर्त्यबुद्धिर्गुरौ यस्य शिवलिंगे शिवा मतिः । शब्दबुद्धिस्तु मंत्रेषु स खलु ब्रह्महा भवेत् " ॥

वसिष्ठः—" गुरोरवज्ञया मृत्युः मंत्रत्यागाद्दरिद्रता । गुरुमंत्रपरित्यागाद्रौरवं नरकं व्रजेत् " ॥

इति **देवपूजाकरणम्** । इति **चतुर्थभागकृत्यम्** ।

अथ पञ्चमभागकृत्यम् । अथ पंचमहायज्ञाः ॥

तत्र **दक्षः**—

" पंचमे च तथा भागे संविभागो यथार्हतः । पितृदेवमनुष्याणां कीटानां चोपदिश्यते " ॥

वैश्वदेवस्य देवपूजानंतरभावित्वमुक्तं **नरसिंहपुराणे**—

" पौरुषेण च सूक्तेन ततो विष्णुं समर्चयेत् । वैश्वदेवं ततः कुर्याद्बलिकर्म तथैव च "॥ इति ।

व्यासोऽपि—

" नैवेद्यार्थं पृथग् भांडे पत्नी स्नात्वा पचेद्गृहे । वैश्वदेवार्थमन्यस्मिन्व्यंजनानि पृथक् पृथक् ॥
" एकस्मिन्वा पचेद्भांडे पूर्वं विष्णुनिवेदनम् । वैश्वदेवं ततः शिष्टान् व्यासस्य वचनं यथा ॥
" वैश्वदेवं प्रकुर्वीत स्वशाखाभिहितं ततः । संस्कृतान्नैस्तु विविधैर्हविष्यव्यंजनान्वितैः ॥
"तैरेवान्नैर्बलिं दद्यात् शेषमाप्लाव्य वारिणा । कृत्वाऽपसव्यं स्वधया पित्र्यं दक्षिणतो हरेत्"॥ इति ।

हारीतोऽपि—

" द्विजः पुरुषसूक्तस्य विधिना विष्णुमर्चयेत् । वैश्वदेवं ततः कुर्याद्बलिकर्म विधानतः "॥ इति । यत्तु **शौनकवचनं** " हुतशेषेण पृथगन्नेन वा कुर्यान्नास्य शेषेण वैश्वदेवं कुर्यात् " इति तद्वैश्वदेवार्थमुद्धृत्य तच्छेषेण निवेदनं कुर्यादित्येवंपरम् । " उद्धृत्य वैश्वदेवार्थं देवस्य प्राङ्निवेदयेत् " इति **स्मरणात्** । वैश्वदेवहोमात्पूर्वं शकलहोमं कुर्वीत शिष्टाः ।

तत्र **बोधायनः** (४।३।६) "आऽष्टौ समिध आदध्यात् देवकृतस्यैनसोवयजनमसि स्वाहा । मनुष्यकृ० पितृकृ० आत्मकृ० यद्दिवा च नक्तं चैनश्चकृम० तस्यावयजनमसि स्वाहा । यत्स्वपंतश्च जाग्रतश्चैनश्चकृम० यद्विद्वा᳚ᳫंसश्चाविद्वा᳚ᳫंसश्चैनश्चकृम० एनस एनसोवयजनमसि स्वाहेत्येतैरष्टभिर्हुत्वा सर्वस्मात्पापात्प्रमुच्यते " इति ।

पंचमहायज्ञस्वरूपमाह **श्रुतिः** (तै. आ. सहवै. २।१०)—"देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञ इति । यदग्नौ जुहोत्यपि समिधं तद्देवयज्ञः संतिष्ठते । यत्पितृभ्यः स्वधाकरोत्यप्यपस्तत्पितृयज्ञः संतिष्ठते । यद्भूतेभ्यो बलिᳫं हरति तद्भूतयज्ञः संतिष्ठते । यद्ब्राह्मणेभ्योऽन्नं ददाति तन्मनुष्ययज्ञः संतिष्ठते । यत्स्वाध्यायमधीयीतैकामपृचं यजुः साम वा तद्ब्रह्मयज्ञः संतिष्ठते "॥ इति ।

व्यासः—" देवयज्ञं पितृयज्ञं भूतयज्ञं तथैव च । मनुष्यब्रह्मयज्ञौ च पंचयज्ञान्प्रचक्षते ॥
" यदि स्यात्तर्पणादर्वाक् ब्रह्मयज्ञः कृतो न हि । कृत्वा मनुष्ययज्ञं वै ततः स्वाध्यायमारभेत् ॥
" अग्नेः पश्चिमतो देशे भूतयज्ञांतरेऽथ वा " ॥ इति ।

यमः—" पंचसूना गृहस्थस्य वर्ततेऽहरहः सदा । खंडनी पेषणी चुल्ली जलकुंभ उपस्करः ॥
" एताभिर्वाहयान्विप्रो बध्यते वै मुहुर्मुहुः । एतासां पावनार्थाय पंचयज्ञाः प्रकल्पिताः "॥ इति ।

सूना हिंसास्थानानि । खंडनी मुसलोलूखलादिः । पेषणी दृषदुपलादिः । चुल्ली पाकस्थानम् । जलकुंभ उदधानम् । उपस्करः शूर्पादिः । एताभिः सूनाभिः स्वकार्यं प्रापयन्पापेन युज्यते इत्यर्थः ।

---

१ क्ष–कड ।

मनुः (३।६८–७१)—

" पंचसूना गृहस्थस्य चुल्ली पेषण्युपस्करः । खंडनी चोदकुंभश्च बध्यते यास्तु वाहयन् ॥
" तासां क्रमेण सर्वासां निष्कृत्यर्थं महर्षिभिः । पंच क्लप्ता महायज्ञाः प्रत्यहं गृहमेधिनाम् ॥
" अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भूतो नृयज्ञोऽतिथिपूजनम् ॥
" पंचैतान्यो महायज्ञान्न हापयति शक्तितः । स गृहेऽपि वसान्नित्यं सूनादोषैर्न लिप्यते " ॥

नामांतराण्याह **स एव** (३।७३–७४–८१)—

" अहुतं च हुतं चैव तथा प्रहुतमेव च । ब्राह्मं हुतं प्राशितं च पंचयज्ञान्प्रचक्षते ॥
" जपोऽहुतो हुतो होमः प्रहुतो भौतिको बलिः । ब्राह्मं हुतं द्विजाग्र्यार्चा प्राशितं पितृतर्पणम् ॥
" स्वाध्यायेणार्चयेतर्षीन्होमैर्देवान् यथाविधि । पितृन्श्राद्धेन नृनन्नैर्भूतानि बलिकर्मणा "॥ इति ।

याज्ञवल्क्योऽपि (आचारे १०२)—

" बलिकर्म स्वधा होमस्वाध्यायोऽतिथिसत्क्रिया । भूतपित्रमरब्रह्ममनुष्याणां महामखाः " ॥

नारायणः—

"सभार्यस्तु शुचिः स्नातो विधिनाऽऽचम्य वाग्यतः । उपविश्य समिद्धेऽग्नौ वैश्वदेवं समाचरेत्"॥

वसिष्ठः (११।३)—" वैश्वदेवं सायंप्रातर्गृह्येऽग्नौ जुहुयात् " इति । **मनुः** (३।६७)—

"वैवाहिकेऽग्नौ कुर्वीत गार्ह्यं कर्म यथाविधि । पंचयज्ञविधानं च पक्तिं चान्वाहिकीं गृही"॥ इति ।

गार्ह्यं कर्म पाकयज्ञादिकम् । पितृभूतमनुष्यब्रह्मयज्ञानामग्नौ करणमग्निसमीपे करणं होमाभावाद्ब्रह्मयज्ञो हि मनुष्ययज्ञानंतरं चेत्क्रियते तदाग्निसमीपे कर्तव्यः । "अग्नेःपश्चिमतो देशे भूतयज्ञांतरेऽथ वा " इति **व्यासस्मरणात्** । तथा च **कण्वः**—" अग्निमतोपि वचनेन निषिद्धाः पंचयज्ञाः आहिताग्नेरपि " इति । ब्रह्मयज्ञस्याग्निसम्बधः **उशनसा**ऽपि पक्षे दर्शितः–" अग्निसमीप इत्येकेषाम् " इति ।

अंगिराः–"लौकिके वैदिके वाऽपि हुतोत्सृष्टे जले क्षितौ । वैश्वदेवस्तु कर्तव्यः पंचसूनापनुत्तये"॥

व्यासोपि—

"शालाग्नौ लौकिके वाऽपि जले भूम्यामथापि वा । वैश्वदेवस्तु कर्तव्यो देवयज्ञः स वै स्मृतः"॥ इति ।

गृह्यपरिशिष्टेऽपि (१।१२)–" वैश्वदेवस्य प्रातरारंभः अग्निमौपासनं पचनं वा परिसमुह्येति विश्वेदेवाः सर्वे देवास्तद्दैवत्यमिदं वैश्वदेवम् " इति । अत्र व्यवस्थामाहांगिराः—

" शालाग्नौ तु पचेदन्नं लौकिके वाऽपि नित्यशः । यस्मिन्नेव पचेदन्नं तस्मिन्होमो विधीयते " ।

संग्रहे—

" यदि स्याल्लौकिके पाकः ततोऽन्नं तत्र हूयते । गृह्याग्नौ चेत्पचेदन्नं गृह्याग्नौ होम एव च ॥
" प्रातर्होमं तु निर्वर्त्य समुद्धृत्य हुताशनात् । शेषं महानसे कृत्वा तत्र पाकं समाचरेत् ॥
" तमग्निं पुनराहृत्य शालाग्नावेव निक्षिपेत् । ततोऽस्मिन्वैश्वदेवादि कर्म कुर्यादतंद्रितः " ॥ इति ।

चन्द्रिकायामपि—

" यस्मिन्नग्नौ भवेत्पाकः वैश्वदेवस्तु तत्र वै । तत्राहुत्वा तु यो भुंक्ते स भुंक्ते किल्बिषं नरः"॥ इति ।

व्यासोऽपि—

" यदि स्याल्लौकिके पाकः ततोऽन्नं तत्र हूयते । शालाग्नौ तत्र चेदन्नं विधिरेष सनातनः ॥
" देवेभ्यस्तु हुतादन्नात् शेषाद्भूतबलिं हरेत् । भूतयज्ञः स विज्ञेयो भूतिदः सर्वदेहिनाम् "॥ इति ।

तच्च कालद्वयेऽपि कर्तव्यमित्याह **कात्यायनः**—
" सायंप्रातर्वैश्वदेवः कर्तव्यो बलिकर्म च । अनश्नताऽपि सततमन्यथा किल्बिषी भवेत् " ॥
प्रजापतिरपि—
" वैश्वदेवं बलिहृतिं प्रत्यहं गृहमेधिनः । सायंप्रातश्च कुर्वीत सूनादोषापनुत्तये " ॥ इति ।
तात्पर्यदर्शने—" ऋते महायज्ञेभ्यः सायं रौद्रांतं कृत्वा वैहायसमाकाशे भूतबलिं कुर्वीत । अन्यत्र आहुः । "नक्तमेवोत्तमेन वैहायसम्"(२।२।४।८) इत्यापस्तंबवचने एवकारस्य व्यवहितान्वयाद्वैहायसमेव सायमिति । तथा च **त्रिकांडी**—" वैश्वदेवं दिवा रात्रौ कुर्याद्बलिहृतिं तथा ।
" रात्रौ होमं प्रकुर्वीत ये भूता मंत्रतो बलिम् । नान्यद्बलिहृतिं रात्रौ यद्वा कुर्यादमंत्रतः " ॥
मनुः (३।१२१)—" सायं त्वन्नस्य सिद्धस्य पत्न्यमंत्रं बलिं हरेत् " ॥ इति ।
तत्र वैश्वदेवहोमप्रकारमाहाश्वलायनः (१।२।१-२)—" सायं प्रातः सिद्धस्य हविष्यस्य जुहुयादग्निहोत्रदेवताभ्यः सोमाय वनस्पतयेऽग्नीषोमाभ्यामिन्द्राग्निभ्यां द्यावापृथिवीभ्यां धन्वंतरये इंद्राय विश्वेभ्यो देवेभ्यो ब्रह्मणे स्वाहा " । इति हविष्यस्येति हविर्योग्यस्येत्यर्थः । अग्निहोत्रदेवताभ्यः सूर्याग्निप्रजापतिभ्य इत्यर्थः ।

आपस्तंबः (२।२।३।१६-१७) " औपासने पचने वा षड्भिराद्यैः प्रतिमंत्रं हस्तेन जुहुयादुभयतः परिषेचनं यथापुरस्तात् " इति । षड्भिराद्यैः अग्नये स्वाहा सोमाय स्वाहा विश्वेभ्यो देवेभ्यः स्वाहा ध्रुवाय भौमाय० ध्रुवक्षितये० अच्युतक्षितये स्वाहेत्येतैः । केचित् सौविष्टकृतमपि सप्तमं जुव्हति अग्नये स्विष्टकृते स्वाहेति । औषधिहविष्केषु सर्वत्र तस्य प्रवृत्तिरिति वदंतः । अन्ये तु सोमाय स्वाहेति न पठंति सौविष्टकृतं षष्ठं पठंतीति **हरदत्तः** । **गौतमः** (५।९) " अग्नावग्निर्धन्वंतरिर्विश्वेदेवाः प्रजापतिः स्विष्टकृदिति होमाः " इति । अग्न्यादिभ्यः स्विष्टकृदंतेभ्योऽग्नौ होमाः कर्तव्या इत्यर्थः ॥

मनुरपि (३।८४-८६)—
"वैश्वदेवस्य सिद्धस्य गृह्येऽग्नौ विधिपूर्वकम् । आभ्यः कुर्याद्देवताभ्यो ब्राह्मणो होममन्वहम् ॥
" अग्नेः सोमस्य चैवादौ तयोश्चैव समस्तयोः । विश्वेषां चैव देवानां धन्वंतरय एव च ॥
" कुह्वै चैवानुमत्यै च प्रजापतय एव च । सह द्यावापृथिव्योश्च तथा स्विष्टकृते ततः " ॥
चतुर्थ्यर्थे षष्ठी । सह द्यावापृथिव्योः समस्ताभ्यां द्यावापृथ्वीवीभ्यामित्यर्थः ॥
कात्यायनोऽपि—" स्वाहाकारैर्जुहुयाद् ब्रह्मणे प्रजापतये गृह्येभ्यः काश्यपायानुमतये" इति।
अत्र यथास्वशाखं व्यवस्था । " वैश्वदेवं प्रकुर्वीत स्वशाखाभिहितं तथा ॥
"यस्य यावत्स्वगृह्योक्तं स्वल्पं वा यदि वा बहु । तस्य तावति शास्त्रार्थे कृते सर्वं कृतं भवेत्"॥ इति
व्यासस्मरणात् । **स्मृतिसारे**—
" अप्रबुद्धे तु होमाग्नौ वैश्वदेवं न कारयेत् । यजमानो भवेदंध इत्येवं मनुरब्रवीत् " ॥ इति ।
होतव्यान्नस्य संस्कारमाह **व्यासः**—
"जुहुयात् सर्पिषाऽभ्यक्तं तैलक्षारविवर्जितम् । दध्यक्तं पयसाऽक्तं वा तदभावेऽम्बुनाऽपि वा" ॥
गृह्यपरिशिष्टेऽपि (१।१२)—
" अग्नेः प्रत्यक् दर्भेषु निधाय सर्पिषाऽभ्यज्य सकृदवदानेन पाणिना जुहुयात् " इति ॥

स्मृत्यर्थसारे—

" कोद्रवं वरकं माषं मसूरं च कुलुत्थकम् । क्षारं च लवणं सर्वं वैश्वदेवे विवर्जयेत् "॥ इति ।

आपस्तंबोऽपि (२।१५।१४-१८)—"न क्षारलवणहोमो विद्यते।तथा अवरान्नसंसृष्टस्य अहविष्यस्य होम उदीचीनमुष्णं भस्मापोह्य तस्मिन्भस्मनि तद्धुतं जुहुयात् अहुतं चाग्नौ भवति। न स्त्री जुहुयान्नानुपेतः" इति। "यस्याग्नौ न क्रियते यस्य चाग्रं न दीयते न तद्भोक्तव्यम्"(१३) इति च ।

बोधायनः—

"अंगारान् भस्ममिश्रांस्तु निरुह्योत्तरतोऽत्र तु। जुहुयाद्वैश्वदेवं तु यदि क्षारादिमिश्रितम्"॥ इति ।

भरद्वाजः—

" सर्वेषु पाकयज्ञेषु तथा वैदिककर्मसु । स्त्रियाश्चानुपनीतस्य बलिमंत्रो न विद्यते "॥ इति ।

द्रव्यानुकल्पश्चतुर्विंशतिमते दर्शितः—"अलाभे येनकेनापि फलशाकोदकादिभिः ॥

" पयोदधिघृतैः कुर्यात् वैश्वदेवं स्रुवेण तु। हस्तेनान्नादिभिः कुर्यादद्भिरंजलिना जलम्"॥इति।

व्यासोऽपि—

" पक्वाभावे प्रवासे च तण्डुलानोषधीश्च वा। पयोदधिघृतं वाऽपि कंदमूलफलानि वा "॥

जुहुयादिति शेषः। **स एव**—" अथवा मंत्रतः कुर्याद्भवेन्नावैश्वदेविकः " इति ।

यदद्यते तेनैव होतव्यम्। तदुक्तं **गृह्यपरिशिष्टे**—

" शाकं वा यदि वा पत्रं मूलं वा यदि वा फलम् । संकल्पयेद्यदाहारस्तेनैव जुहुयादपि ॥

" उत्तानेन तु हस्तेन ह्यंगुष्ठाग्रेण पीडितम् । संहतांगुलिपाणिस्तु वाग्यतो जुहुयाद्धविः ॥

" अंगुष्ठपर्वमात्रं स्यादवदानमिति स्मृतम् । द्रवं स्रुवेण होतव्यं पाणिना काठिनं हविः " ॥ इति ।

जैमिनिः—

" अवश्यं तु त्यजेदन्नं मनसा वचसाऽपि च । ततश्च प्रक्षिपेदग्नाविति धर्मः सनातनः "॥

उशनाः—

" अत्यक्त्वा जुहुयाद्यस्तु मोहेनान्वितमानसः । देवानां नोपतिष्ठेत नरकं प्रतिपद्यते ॥

" यत्किंचिज्जुहुयादग्नौ तत्सर्वं त्यागपूर्वकम् । अन्यथा कुरुते यस्तु नरके स विपद्यते"॥इति।

अनग्निकस्य वैश्वदेवे विशेषमाह **वृद्धवसिष्ठः**—

"अनग्निकस्तु यो विप्रः सोऽन्नं व्याहृतिभिः स्वयम्। हुत्वा शाकलमंत्रैश्च शिष्टं काकबलिं हरेत्"॥इति।

विष्णुरपि—

" अन्नं व्याहृतिभिर्हुत्वा हुत्वा मंत्रैश्च शाकलैः । प्रजापतेर्हविर्हुत्वा पूजयेदतिथिं तथा" ॥इति।

तिसृभिर्व्याहृतिभिरन्नाहुतीर्हुत्वा प्रजापतये स्वाहेति च ततो देवकृतस्यैनस इत्याद्यैः शकलहोमं च कृत्वा काकबलिं हृत्वाऽतिथिं पूजयेदित्यर्थः । तथा **चात्रिः**—

" साग्निकः पितृयज्ञांतं बलिकर्म समाचरेत् । अनग्निर्हुतशेषं तु बलिं काकबलिं हरेत् ॥

" पुरुषयज्ञादृते नास्ति निरग्नेस्तु महामखः " इति । व्याहृत्यादिहोमान्काकबलिमातिथ्यं च विनाऽन्यन्नास्तीत्यर्थः । मंत्रोपयोगनियममाहा**पस्तंबः** (२।२।३।१२–१४) " गृहमेधिनो यदशनीयस्य होमा बलयश्च स्वर्गपुष्टियुक्तास्तेषां मंत्राणामुपयोगे द्वादशाहमधःशय्या ब्रह्मचर्यं क्षारलवणवर्जनं चोत्तमस्यैकरात्रमुपवासः " इति । गृहमेधिनो यदशनीयं पक्वमपक्वं वोपस्थितं

---

१ क्ष–लिप्तः ।

तस्यैकदेशेन होमा बलयश्च कर्तव्याः । स्वर्गः पुष्टिश्च तेषां फलम् । तेषां होमबलिमंत्राणामुपयोगे उपयोगो नियमपूर्वकं विद्याग्रहणम् । तथा च **बोधायनः**—“ तेषां ग्रहणे द्वादशरात्रमित्यादि तत्रोपयोक्तुरेव व्रतम् । अन्ये तु पत्न्या अपीच्छन्ति ” इति । उपयोगः प्रथम प्रयोगः । तत्र पत्न्या अपि सहाधिकार इति वर्द्दतः । उत्तमस्य ये भूताः प्रचरन्त्यस्या एकरात्रमुपवासः कर्तव्यः इति **हरदत्तः** । अन्नसंस्कर्तॄनाहापस्तंबः (२।२।३।१)— “ आर्याः प्रयता वैश्वदेवोऽन्नसंकर्तारः स्युः ” इति । आर्यास्त्रैवर्णिकाः । **स एव** (२।२।३।१०।१३–१४)— “सिद्धेऽन्ने तिष्ठन्भूतमिति स्वामिने प्रब्रूयात्तत्सुभूतं विराडन्नं तन्मा क्षायीति प्रतिप्रवचनः” इति। सिद्धे पक्केन्ने तिष्ठन्पाचकः भूतमिति अन्नस्वामिने प्रब्रूयात्तत्सुभूतमित्यादिः प्रतिवचने मंत्र इत्यर्थः । यत्तु **तेनोक्तं** (२।२।३।४)—“ आर्याधिष्ठिता वा शूद्राः संस्कर्तारः स्युः ” इति तत् युगांतरविषयम् । “ ब्राह्मणादिषु शूद्रस्य पचनादिक्रियाऽपि च ” इति **कलियुगनिषिद्धधर्मेषु** मध्ये स्मरणात् ।

अथ **बलिहरणम्** । तत्र **कात्यायनः**—

“ उद्धृत्य हविरासिच्य हविष्येण घृतादिना । स्वशाखाविधिना हुत्वा तच्छेषं बलिमाहरेत् ॥
“ यावद्गृहे वसेत्तावत्स्वयमेव बलिं हरेत् । सायं त्वन्नस्य सिद्धस्य पत्न्यमंत्रं बलिं हरेत्”॥ इति।

चंद्रिकायाम् (पृ. २१३)—

“ स्वशाखोक्तेन विधिना बलिकर्म विधीयते । न जातु परशाखोक्तं बुधः कर्म समाचरेत्”॥इति।

हारीतः—“ वास्तुपालनभूतेभ्यो बलिहरणं भूतयज्ञः ” इति ।

बलिहरणे गौणकर्तॄनाहात्रिः—

“पुत्रो भ्राताऽथ वा ऋत्विक् शिष्यश्वशुरमातुलाः । पत्नीश्रोत्रिययाज्याश्च दृष्टास्ते बलिकर्मणि ॥
“ गृहे कर्त्रंतराभावे प्रवासेऽप्याचरेत्स्वयम् ” इति । बलिहरणप्रकारमाह **शौनकः**—“ अथ बलिहरणमेताभ्यश्चवै ह्योषधिभ्यो गृहाय गृहदेवताभ्यो वास्तुदेवताभ्य इंद्रायेंद्रपुरुषेभ्यो यमाय यमपुरुषेभ्यो वरुणाय वरुणपुरुषेभ्यः सोमाय सोमपुरुषेभ्य इति । प्रतिदिशं ब्रह्मणे ब्रह्मपुरुषेभ्य इति मध्ये विश्वेभ्यो देवेभ्यः सर्वेभ्यो भूतेभ्यो दिवाचारिभ्य इति दिवानक्तंचारिभ्य इति नक्तं रक्षोभ्य इत्युत्तरतः स्वधापितृभ्य इति प्राचीनावीती शेषं दक्षिणा निनयेत् ” इति । **आपस्तंबोऽपि** (२।२।३।२०–२३, २।२।४।१–९)— “ अपरेणाग्निं सप्तमाष्टमाभ्यामुदगपवर्गमुदधानसंनिधौ नवमेन । मध्येऽगारस्य दशमैकादशाभ्यां प्रागपवर्गमुत्तरपूर्वदेशेऽगारस्योत्तरैः चतुर्भिः । शय्यादेशे कामलिंगेन देहल्यामंतरिक्षलिंगेनोत्तरेणापिधान्यामुत्तरैर्ब्रह्मसदने दक्षिणतः पितृलिंगेन प्राचीनावीत्यवाचीनपाणिः कुर्याद्रौद्र उत्तरो यथा देवताभ्यस्तयोर्नानापरिषेचनं धर्मभेदान्नक्तमेवोत्तमेन वैहायसं य एतानव्यग्रो यथोपदेशं कुरुते नित्यः स्वर्गः पुष्टिश्च ” इति । अस्यार्थः । अग्नेः पश्चात्सप्तमाष्टमाभ्यां धर्माय स्वाहा अधर्माय स्वाहा इत्येताभ्यामुदगपवर्गं बलिहरणं कर्तव्यम् । उदकं यत्र धीयते तदुधानं मणिकाख्यं तस्य संनिधौ नवमेन अद्भ्यः स्वाहेत्यनेन अगारमध्ये दशमैकादशाभ्यां ओषधिवनस्पतिभ्यः स्वाहा रक्षोदेवजनेभ्यः स्वाहेत्येताभ्यां प्रागपवर्गम् । अगारस्योत्तरपूर्वदेशे उत्तरैश्चतुर्भिर्गृह्याभ्यः स्वाहा अवसानेभ्यः स्वाहा अवसानपतिभ्यः स्वाहा सर्वभूतेभ्यः स्वाहेत्येतैः प्रागपवर्गम् ।

एवं शय्यादेशे कामाय स्वाहेत्यनेन देहली अंतर्द्वारस्याऽधस्ताद्दारु। तत्रांतरिक्षाय स्वाहेत्यनेन येनापिधीयते द्वारं सापिधानी कवाटं तदर्गलमित्यन्ये। तत्रोत्तरेण मंत्रेण यदेजति जगति यच्च चेष्टति नाम्नो भागो यं नाम्ने स्वाहेत्यनेन ब्रह्मसदनं मध्येगारं वास्तुविद्याप्रसिद्धं अग्नेर्दक्षिणत इत्यन्ये। तत्रोत्तरैर्दशभिः पृथिव्यैः स्वाहा अंतरिक्षाय० दिवे० सूर्याय० चंद्रमसे० नक्षत्रेभ्य० इंद्राय० बृहस्पतये० प्रजापतये० ब्रह्मणे स्वाहेत्येतैः प्रागपवर्गमेव। दाक्षिणतः अनंतराणां बलीनां दाक्षिणतः स्वधा पितृभ्य इत्यनेन प्राचीनावीती अवाचीनपाणिः दक्षिणं पाणिमुत्तानं कृत्वा अंगुष्ठतर्जन्योरंतरालेन कुर्यात्। पितृबलेरुत्तरतो रौद्रबलिः कर्तव्यः। यथा देवताभ्यः उपवीतीत्यर्थः। नमो रुद्राय पशुपतये स्वाहेतिमंत्रः बलीनां देशे देशे समवेतानं सकृत्सकृदंते परिषेचनमिति स्वोक्तस्यापवादः। तयोर्नानापरिषेचनमिति तयोरनंतरोक्तयोर्बल्योरेकस्मिन्देशे समवेतयोरपि पृथक् परिषेचनं कर्तव्यम्। कुतः धर्मभेदात्। पित्र्यस्याप्रदक्षिणं इतरस्य देवत्वात्प्रदक्षिण-मिति उत्तमेन "ये भूताः प्रचरंति नक्तं बलिमिच्छंतो वितुदस्य प्रेष्याः। तेभ्यो बलिं पुष्टिकामो हरामि मयि पुष्टिं पुष्टिपतिर्ददातु स्वाहा" इत्यनेन वैहायसबलिं दद्यात्तच्च 'नक्तमेव वैहायसमिति' वचनात् आकाश एव बलिरुत्क्षेप्यः। न छदिः परिष्कृते देशे। तथा च **बोधायनः** (२।८)—" अथाकाशे उत्क्षिपति ये भूता" इति। अपर आह एवकारो भिन्नक्रमः। नक्तमुत्तमेनैव बलि-रिति तत्र बल्यंतराणां रात्रौ निवृत्तिः। अन्ये तु दिवा बलिमिच्छंत इत्यूहेन दिवापि बलिं हरति। तथा चाश्वलायनः (१।२।८–९) "दिवा चारिभ्य इति दिवा। नक्तं चारिभ्य इति नक्तम्" इति।

मनुरपि (३।९०)—

"विश्वेभ्यश्चैव देवेभ्यो बलिमाकाश उत्क्षिपेत्। दिवाचरेभ्यो भूतेभ्यो नक्तंचारिभ्य एव च"॥ इति।

बलिदेशसंस्कारोऽप्यापस्तंबेनोक्तः (२।२।३।१५)—" बलीनां तस्य तस्य देशे संस्कारो हस्तेन परिमृज्यावोक्ष्य न्युप्य पश्चात्परिषेचनम् " इति। बलीनां मध्ये तस्य तस्य बलेर्देशे संस्कारः कर्तव्यः। कः पुनरसौ हस्तेन परिमार्जनमवोक्षणं च। तत्कृत्वा बलिं निवपति न्युप्य पश्चादेकैकस्मिन् देशे समवेतानां बलीनां सकृत्सकृत्परिषेचनमित्यर्थः। **स एव** (२।२।३।१९)—" सति सूपसंसृष्टेन कार्याः " इति। व्यंजनैः सूपेन च संसृष्टेनान्नेन बलयः कार्याः। सति संभव इत्यर्थः। तथा च **बोधायनः**—" एष एव व्यंजनानां संस्कारः सूपस्यापि "॥ इति।

गौतमः (५।१०–१५)—

" दिग्देवताभ्यश्च यथास्थानगृहस्य द्वार्षु महभ्यो गृहदेवताभ्यः प्रविश्य ब्रह्मणे मध्येऽभ्य उदकुंभ आकाशायेत्यंतरिक्षे नक्तंचरेभ्यश्च सायम् " इति। दिग्देवताभ्य इंद्रादिभ्योऽष्टभ्यः प्रागादिदिक्षु प्रदक्षिणं बलिर्हर्तव्यः। यावंति गृहस्य द्वाराणि तेषु सर्वेषु मरुभ्यः स्वाहेति बहिः स्थितो बलिं हृत्वा ततोंऽतः प्रविश्य गृहदेवताभ्यो बलिं हरेत। अत्रैके गृहदेवताभ्यः स्वाहेति मंत्रं मन्यंते॥ **आश्वलायने** तथा दर्शनात्। अन्ये गृहे या देवतास्ताभ्यस्तेन तेन शब्देन बलिं हर्तव्यं इत्याहुः। ताश्चोशनसा दर्शिताः—" शयनस्य शिरस्थाने श्रियैर्नम " इति दद्यात्। पादस्थाने भद्रकाल्यै नम इति। गोष्ठागारे धनपतये नम इति। स्तम्भानिलये रुद्राय नम इति। गोष्ठे मित्राय नम इति। उलूखलमुसलयोर्वरुणाय नम इति। कूपे अहये बुध्नियाय नम इति। पेषण्यामग्निसमीपे चैताभ्यो देवताभ्यो नम इति ददाति इति।

गृहमध्ये ब्रह्मणे स्वाहेति उदकुंभसमीपे अद्भ्यः स्वाहेति। अंतरिक्षे आकाशाय स्वाहेति। नक्तंचरेभ्यः स्वाहेति सायमाकाशे बलिरुत्क्षेप्य इति **गौतमवचनार्थः**।

मनुरपि (३।८७–९१)—

" एवं सम्यग्घविर्हुत्वा सर्वदिक्षु प्रदक्षिणम् । इंद्रांतकाप्पतींदुभ्यः सानुगेभ्यो बलिं हरेत् ॥
" मरुद्भ्य इति तु द्वारि हरेदप्स्वभ्य इत्यपि । वनस्पतिभ्य इत्येवं मुसलोलूखले हरेत् ॥
" उच्छीर्षके श्रियै दद्यात् भद्रकाल्यै तु पादतः । ब्रह्मवास्तोष्पतिभ्यां तु वास्तुमध्ये बलिं हरेत् ॥
" विश्वेभ्यश्चैव देवेभ्यो बलिमाकाश उत्क्षिपेत् । दिवाचरेभ्यो भूतेभ्यो नक्तंचारिभ्य एव च ॥
" षष्ठं वास्तुनि कुर्वीत बलिं सर्वात्मभूतये । पितृभ्यो बलिशेषं तु सर्वं दक्षिणतो हरेत् "॥ इति ।

इदं बलिहरणं व्यजनाकारमग्निसमीपे शिष्टाः कुर्वंति । अत्र **कात्यायनः**—

" ध्वजाकारं नराकारं तथा वल्मिकरूपकम् । चक्राकारं च काम्यानां बलीनां लक्षणं विदुः ॥
" चतुर्ष्वेतेषु विप्राणां नित्या चक्राकृतिर्भवेत् । चक्राकारमथाष्टारं कुर्यादग्निसमीपतः "॥ इति ।

शौनकोऽपि—

" आयुष्कामो दिवारात्रौ स्रुवाकारं बलिं हरेत् । आयुरारोग्यकामस्तु ध्वजाकारं बलिं हरेत् ॥
" मृत्युरोगविनाशार्थी नराकारं बलिं हरेत् । जनवश्यं कर्तुकामो वल्मीकाख्यं बलिं हरेत् ॥
" आयुरारोग्यसौभाग्यपुत्रविद्यापशून्प्रति । कामश्चेद्धनमोक्षादौ चक्राकारं बलिं हरेत् ॥
" बदरीफलमात्रान्नमंगुल्यग्रैर्भुवि क्षिपेत् " ॥ इति ।

व्यासः—

" श्वभ्यश्च श्वपचेभ्यश्च पतितादिभ्य एव च । दद्याद्भूमौ बहिस्त्वन्नं पक्षिभ्योऽथ द्विजोत्तमः"॥

मार्कण्डेयोऽपि—

"एवं गृहबलिं कृत्वा गृहे गृहपतिः शुचिः । आप्यायनाय भूतानां कुर्यादुत्सर्गमादरात्"॥ इति ।

याज्ञवल्क्यः (आ. १०३)

" देवेभ्यस्तु हुतादन्नात् शेषाद्भूतबलिं हरेत् । अन्नं भूमौ श्वचांडालवायसेभ्यश्च निक्षिपेत् ॥
" संक्षालनमथान्नेन निनयेत्प्रागुदग्दिशि " ॥ इति ।

मनुरपि (३।९२)—

"शुनां च पतितानां च श्वपचां पापरोगिणाम् । वायसानां क्रिमीणां च शनकैर्निर्वपेद्भुवि"॥ इति ।

स्मृत्यर्थसारेऽपि—" भूतयज्ञबलिशेषं सोदकं स्वधापितृभ्य इति प्राचीनावीती पितृभ्यो दद्यात् । ततस्तथैव बहिर्निवेशनांते सोदकमन्नं श्वचंडालपतितवायसेभ्यश्च निक्षिपेत् "। इति

तत्र मंत्रो **विष्णुपुराणे** दर्शितः (३।११।४८–५३)

" देवा मनुष्याः पशवो वयांसि सिद्धाः सदैत्योरगयक्षसंघाः ।
" प्रेताः पिशाचास्तरवः समस्ता ये चान्नमिच्छंति मयाऽत्र दत्तम् ॥
" पिपीलिकाः कीटपतंगकाद्या बुभुक्षिताः कर्मनिबन्धबद्धाः ।
" प्रयांतु ते तृप्तिमिदं मयाऽन्नं तेभ्यो निसृष्टं सुखिनो भवंतु ॥
" येषां न माता न पिता न बंधुर्नैवास्ति सिद्धिर्न तथान्नमस्ति ।
" तत्तृप्तयेऽन्नं भुवि दत्तमेतत्ते यांतु तृप्तिं मुदिता भवन्तु ॥
" भूतानि सर्वाणि तथान्नमेतदहं च विष्णुर्न यतोऽन्यदस्ति ॥
" तस्मादहं भूतहिताय भूमावन्नं प्रयच्छामि भवाय तेषाम् ॥

---

१ प्रदत्तम् । २ न्न । (मुद्रितपाठः)

" चतुर्दिशो लोकगणो य एष तत्र स्थिता येऽखिलभूतसंघाः ॥
" तृप्त्यर्थमन्नं हि मया निसृष्टं तेषामिदं ते मुदिता भवंतु ॥
" इत्युच्चार्य नरो दद्यादन्नं श्रद्धासमन्वितः । भुवि सर्वोपकाराय गृही सर्वाश्रयो यतः"॥ इति।
मार्कंडेयः—" ततः शनैर्बलिं दद्याद्बहिः काकशुनां तथा " । तत्र **मंत्रः**—
" ऐंद्रवारुणवायव्याः सौम्या याम्याश्च नैर्ऋताः । वायसाः प्रतिगृह्णन्तु भूमौ पिंडं मयाऽर्पितम् ॥
" श्वानौ हि श्यामशबलौ वैवस्वतकुलोद्भवौ । ताभ्यां पिंडं प्रदास्यामि स्यातामेतावहिंसकौ ॥
"मंत्राभ्यामेव चैताभ्यां स्वकाकबलिमुत्सृजेत् । दत्वाऽनेन विधानेन बलिं पश्चादुपस्पृशेत्"॥ इति।

अथ पितृयज्ञः । मुख्यानुकल्पभेदेन पितृयज्ञस्वरूपमाह **कात्यायनः**—
" श्राद्धं वा पितृयज्ञः स्यात्पित्र्यो बलिरथापि वा । एकमप्याशयेन्नित्यं पितृयज्ञार्थसिद्धये ॥
"अदैवं नास्ति चेदन्यो भोक्ता भोज्यमथापि वा । अप्युद्धृत्य यथाशक्ति किंचिदन्नं यथाविधि ॥
" पितृभ्य इदमित्युक्त्वा स्वधाकारमथाहरेत् " ॥ इति ।
व्यासः—"एकं तु भोजयेद्विप्रं पितृनुद्दिश्य सादरम् । नित्यश्राद्धं समुद्दिष्टं पितृयज्ञो गतिप्रदः ॥
" उद्धृत्य वा यथाशक्ति किंचिदन्नं समाहितः । वेदतत्त्वार्थविदुषे द्विजायैव प्रदापयेत् ॥
" विप्राभावे तु पिंडं वा दद्याद्दक्षिणतो भुवि । कुक्कुटांडप्रमाणस्तु पिंड इत्यभिधीयते "॥ इति ।
मनुः (३।८२)—
" दद्यादहरहः श्राद्धं अन्नाद्येनोदकेन वा । पयोमूलफलैर्वाऽपि पितृभ्यः प्रीतिमावहन् ॥
" एकमप्याशयेद्विप्रं पित्रर्थे पांचयज्ञिके । न चैवात्राशयेत्कंचिद्वैश्वदेवं प्रतिद्विजम् " ॥ इति ।
मार्कंडेयोऽपि—"पितॄनुद्दिश्य विप्रांस्तु भोजयेद्विप्रमेव वा" इति । तत्प्रकारमाह **प्रचेताः**—
" नावाहनाग्नौकरणे न पिंडो न विसर्जनम् । दत्वा तु दक्षिणां शक्त्या नमस्कारैर्विसर्जयेत् ॥
" एकमप्याशयेन्नित्यं षण्णामप्यन्वहं गृही " ॥ **स्मृत्यर्थसारे**—
" नित्यश्राद्धमदैवं षट्पुरुषं च भवेदिह । न देशकालनियमः कर्त्रादिनियमा अपि " ॥
सारसमुच्चये—
" नित्यश्राद्धं तु यन्नाम दैवहीनं तदुच्यते । तत्तु त्रिपुरुषं ज्ञेयं दक्षिणापिंडवार्जितम् "॥ इति ।
व्यासोऽपि—
" नित्यश्राद्धे तु गंधाद्यैर्द्विजानभ्यर्च्य शक्तितः । सर्वान्पितृगणान्सम्यक्सहैवोद्दिश्य भोजयेत् ॥
" आवाहनं स्वधाकारं पिंडाग्नौकरणादिकम् । ब्रह्मचर्यादिनियमो विश्वेदेवास्तथैव च ॥
" नित्यश्राद्धे त्यजेदेतान्भोज्यमन्नं प्रकल्पयेत् " ॥
शातातपः—" नित्यश्राद्धमदैवं स्यादर्घ्यपिंडादिवर्जितम् " इति । **मत्स्यपुराणेऽपि**—
"नित्यं तावत्प्रवक्ष्यामि अर्घ्यावाहनवर्जितम् । अदैवतं विजानीयात्पार्वणे तद्धि कीर्तितम्"॥ इति ।
रत्नावल्यं पितृगाथा—
"अपि स्यात्सकुलेऽस्माकं यः श्राद्धं नित्यमाचरेत् । पुष्पमूलफलैर्वाऽपि तिलतोयेन वा पुनः"॥ इति।
अत्र केचिद्वैश्वदेवबलिहरणयोर्देवयज्ञपितृयज्ञभूतयज्ञानामंतर्भावमाचक्षते ।
तथा च **व्यासः**—
" वैश्वदेवस्तु कर्तव्यो देवयज्ञः स वै स्मृतः । देवेभ्यस्तु हुतादन्नाच्छेषाद्भूतबलिं हरेत् ॥

---

१ निकाय ।

" भूतयज्ञस्तु विज्ञेयो भूतिदः सर्वदेहिनाम्। श्राद्धं वा पितृयज्ञः स्यात्पित्र्यो बलिरथापि वा"॥ इति। **हारीतोऽपि**—" वैश्वदेवो देवयज्ञो वास्तुपालनभूतेभ्यो बलिहरणं भूतयज्ञः " इति । **आपस्तंबः** (१।४।१२।१५-१३।१) "अहरहर्भूतबलिर्मनुष्येभ्यो यथाशक्ति दानं देवेभ्यः स्वाहाकार आ काष्ठात्पितृभ्यः स्वधाकार ओदपात्रात्स्वाध्याय इति "। **अत्रोज्वला**– अपरेणाग्निं सप्तमाष्टमाभ्यामुदगपवर्गमिति बलिहरणप्रकारेण भूतेभ्योऽहरहर्बलिर्देयः। एष भूतयज्ञः। मनुष्येभ्यश्च यथाशक्ति दानं कर्तव्यम् ।एष मनुष्ययज्ञः । देवेभ्यः स्वाहाकारेण प्रदानमा काष्ठादशनीयाभावे षड्भिराद्यैः प्रतिमंत्रमिति वैश्वदेवोक्तप्रकारेण काष्ठमपि तावद्देयम्। एष देवयज्ञः। केचिद्वैश्वदेवाहुतिभ्यः पृथग्भूतां देवताभ्यः स्वाहेति एकामाहुतिं मन्यंते । देवयज्ञेन यक्ष्ये इति संकल्पमिच्छन्ति। वयं तु न तथा इति गृह्य एवावोचाम। केचिदाहुः आ काष्ठादिति वचनात् अशनीयाभवेन भोजनलोपेऽपि यथाकथंचित् वैश्वदेवं कर्तव्यम्। पुरुषसंस्कारत्वादिति । अपरे तु अशनीयसंस्कार इति । वदन्तः भोजनलोपे वैश्वदेवं न कर्तव्यमिति स्थिताः। पितृभ्यः स्वधाकार ओदपात्रादन्नाद्यभावे उदपात्रमपि स्वधाकारेण देयं पात्रग्रहणात् सह पात्रेण देयम्। एष पितृयज्ञ इति स्वाध्यायः। तस्य विधिरित्यारभ्योक्तो नित्यस्वाध्यायः। एष ब्रह्मयज्ञः। एते महायज्ञा" इति।

माधवीये—" त एते देवयज्ञपितृयज्ञभूतयज्ञास्त्रयोऽपि वैश्वदेवशब्देनोच्यन्त " इति । **स्मृत्यर्थसारे**—" देवयज्ञो वैश्वदेवाख्यं कर्म देवयज्ञहुतशेषेण शुद्धं देशमभ्युक्ष्य बलिहरणं कुर्यात्। एष भूतयज्ञः। बलिशेषं सोदकं स्वधा पितृभ्य इति प्राचीनावीती पितृभ्यो दद्यात्। एष पितृयज्ञः । एते देवयज्ञभूतयज्ञपितृयज्ञा वैश्वदेवमित्युच्यंते " इति । **मनुरपि**—

" विधाय पितृयज्ञांतं वैश्वदेवं ततो बहिः। श्वपाकपतिताद्यर्थं अन्नमल्पं क्षिपेद्बहिः "॥ इति । बलिहरणस्य वैश्वदेवशब्देनाभिधानमाश्रयाश्रयिणोरभेदमाश्रित्येति द्रष्टव्यम्। आश्रयाश्रयिभावश्च **कालादर्शे** दर्शितः—" बलीनां वैश्वदेवस्य वदंत्याश्रयिता बुधाः " इति । एवं च देवयज्ञपितृयज्ञभूतयज्ञानां वैश्वदेवबलिहरणात्मकत्वात्पृथक् न कर्तव्या इति। अन्ये तु पंचयज्ञानां पृथक्त्वेन विधानात्तेषां वैश्वदेवबलिहरणयोरनंतर्भावमाहुः । तथा च **जमदग्निः**—

" वैश्वदेवं दिवारात्रौ कुर्याद्बलिहृतिं तथा । महतः पञ्चयज्ञांस्तु दिवैवेत्याह गौतमः "॥ इति। **बोधायनः**—" अग्नये स्वाहेत्यादि षडाहुतीर्जुहोति एष वैश्वदेवः संतिष्ठते। धर्माय स्वाहेत्यादि नमो रुद्राय पशुपतये इत्यंतं बलीन्हरन्ति एतद्बलिहरणं संतिष्ठते । देवेभ्यः स्वाहेत्यग्नौ जुहोत्येष देवयज्ञः संतिष्ठते। पितॄनुद्दिश्य एकं ब्राह्मणं भोजयेदपि वा दक्षिणेनाग्निं दर्भान्दक्षिणाग्रान् संस्तीर्य तेषु पिंडं ददाति पितृभ्यः स्वधाऽस्त्वित्यपि वापस्तत्पितृयज्ञः संतिष्ठते। उत्तरेणाग्निं शुचौ देशे प्रागग्रान्दर्भान्संस्तीर्य गंधपुष्पधूपदीपैरलंकृत्य बलिमुपहरति भूतेभ्यो नम इति अपः पुष्पाणि तद्भूतयज्ञः संतिष्ठते। मनुष्ययज्ञार्थमतिथिं भोजयेदपि वा हंतकारं ब्राह्मणेभ्यो दद्यात् " इति ।

आपस्तंबपरिशिष्टे—" वैश्वदेवबलिहरणानंतरमग्रं दत्वा देवयज्ञार्थमुद्धृतादन्नाद् देवेभ्यः स्वाहेत्येकामग्नौ जुहुयुः। पितृयज्ञार्थमपि वैश्वदेवबलिहरणशिष्टादन्नात्प्राचीनावीतिना दक्षिणतोऽग्नेः पितृतीर्थेन पितृभ्यः स्वधास्त्विति बलिं हरेयुः। भूतयज्ञार्थमपि वैश्वदेवशिष्टादन्नादेवमुत्तरतोऽग्नेः देवतीर्थेन बलिमुपहरेयुर्भूतेभ्यः स्वाहेति मनुष्ययज्ञार्थमतिथिं भोजयेदतिथ्य-

---

१ **खगघ**–देवेभ्यः। २ ख–ति।

भावे संकल्पितं दद्युः ” । इति । तात्पर्यदर्शनेऽपि—“ पंचमहायज्ञेभ्यः पृथग्वैश्वदेवप्रकरणांतरात्संज्ञाभेदाच्च कर्मभेदावगतेः । अत एव भाष्ये वैश्वदेवस्य तेषां च प्रयोगः पृथगेवोपपादित इति । प्रयोगोऽपि दर्शितः तत्रैव । गृहमेधिनो यदशनीयमन्नं ततो होमार्थं हविष्यमन्नं पात्रे कल्पयति अहविष्यं क्षारलवणादिसंसृष्टं द्वितीये हविष्यमन्नं देवयज्ञार्थं तृतीये सर्वतः समवदायाग्रार्थं चतुर्थे सर्वत एव समवदाय मनुष्ययज्ञार्थं पंचमे ततः परिषेचनं कृत्वा प्रथमकल्पितादन्नादग्नये स्वाहेत्याभिः षडाहुतीर्हुत्वा उत्तरपरिषेचनं अथोदीचीनमुष्णं भस्मापोह्य तस्मिन्नहविष्यं स्वाहाकारेण जुहुयात् । अथ षडाहुतिशेषहविष्यशेषेण संसृष्टेन तेनान्नेन रौद्रांतं बलिं हृत्वाऽग्रं च देयमिति विहितं ग्रासचतुष्टयपर्याप्तमन्नं भिक्षवे दद्यात् । अथ देवयज्ञेन यक्ष्य इत्यागूर्य विद्युदसीत्यपः स्पृष्ट्वा मंत्रतः परिषिच्य देवेभ्यः स्वाहेत्यग्नौ हविष्यं हुत्वा परिषिच्य वृष्टिरसीत्यपं स्पृशेत् । एवमितरेष्वपि महायज्ञेषु विद्युद्वृष्टीर्भवतः । “ नावषट्कारहोमेषु विद्युद्वृष्टी ” इत्युपदेशः । अथ प्राचीनावीती पितृयज्ञेन यक्ष्ये इत्युक्त्वा शुचौ भूमौ हस्तेनांगुष्ठप्रदेशिन्यावन्तरेण पितृभ्यः स्वधास्त्विति दद्यात् । अथ यज्ञोपवीती भूतयज्ञेन यक्ष्य इत्युक्त्वा शुचौ भूमौ हस्तेन इदं भूतेभ्योऽस्त्विति वा भूतेभ्यः स्वाहेति वा दद्यात् । अथ मनुष्ययज्ञेन यक्ष्य इत्युक्त्वा ब्राह्मणतर्पणं संकल्पितस्य वा दानमिति सर्वमेतत्संगृह्योक्तं **कालादर्शे**—

“ वैश्वदेवे बलिहृतावंतर्भावं प्रचक्षते । ब्रह्मयज्ञान्ययज्ञानां बह्वृचाः केचनर्षयः ॥
“ बोधायनापस्तंबौ च बह्वृचा अपि केचन । अनंतर्भावमप्याहुः पृथक्त्वेनोपदेशतः ” ॥ इति ।

अत्र मनुष्ययज्ञस्यापि बलिहरणरूपत्वमाश्रित्य चतुर्णामंतर्भाव उक्तः ।

तथा च **स्मृत्यर्थसारे**—

“ निवीती सनकादिभ्यो मनुष्येभ्यो हंतेति दद्यात् । यद्वा हंतकारं हंतेति त्यजेत् ” ॥ इति ।

चंद्रिकायामपि (पृ. २०९ पं. २१६)—

“ अतिथिभ्योऽन्नदानं यन्नृयज्ञः[1] सर्वपंचमः । अशक्तावन्नमुद्धृत्य हंतेत्येवं प्रकल्पयेत् ” ॥ इति ।

कात्यायनः—

“ स्वाहाकारवषट्कारनमस्कारा दिवौकसाम् । स्वधाकारः पितॄणां तु हंतकारो नृणां तथा ”॥ इति ।

कार्ष्णाजिनिः—

“ भिक्षां वा पुष्कलं वापि हंताकारमथापि वा । असंभवे सदा दद्यादुदपात्रमथापि वा ” ॥

व्यासोऽपि—

“ हंतकारमथाग्रं वा भिक्षां वा शक्तितो द्विजः । दद्यादतिथये नित्यं बुध्येत्त परमेश्वरम् ”॥ इति ।

मनुः (३।१०८)—

“ वैश्वदेवे तु निर्वृत्ते यद्यन्योऽतिथिराव्रजेत् । तस्मादन्नं यथाशक्ति प्रदद्यान्न बलिं हरेत् ” ॥ इति ।

शातातपः—

“ ग्रासमात्रं भवेद्भिक्षा पुष्कलं तच्चतुर्गुणम् । पुष्कलानि च चत्वारि हंतकारं विदुर्बुधाः ” ॥

स्मृतिरत्ने—

“ यवानां व्रीहिशालीनां द्वे शते ग्रासमुच्यते । ग्रासमात्रं तु भिक्षा स्यादग्रं ग्रासचतुष्टयम् ” ॥

---

१ गघ–ज्ञेयो यज्ञः स पंचमः ।

प्रजापतिः—

“ ग्रासमात्रं भवेद्भिक्षा अग्रं ग्रासचतुष्टयम् । अग्रं चतुर्गुणीकृत्य हंतकारं विधीयते ” ॥ इति । इह केचिद्वैश्वदेवाख्यस्य कर्मणः अन्नसंस्कारार्थत्वमिच्छंति ।

तत्रा**श्वलायनः** (१।२।१)–“ सायंप्रातः सिद्धस्य हविष्यस्य जुहुयात् ” इति ।

आपस्तंबश्च (२।६।१५।१३)–“यस्याग्नौ न क्रियते यस्य चाग्रं न दीयते न तद्भोक्तव्यम्” इति ।

यमोऽपि—“ होमाग्रदानरहितं न भोक्तव्यं कथंचन ।

“अविभक्तेषु संसृष्टेष्वेकेनापि कृतं च यत् । न सर्वैरपि कर्तव्यं लौकिकाग्नौ कृतं यदि”॥ इति । अन्ये वैश्वदेवस्यात्मसंस्कारार्थत्वमिच्छंति । तथा चा**श्वलायनः** (३।१।४)—“ तानेतानहरहः कुर्वीत ” इति । **आपस्तंबः** (१।४।१३।१)—“देवेभ्यः स्वाहाकारः आकाष्ठात् ” इति ।

बोधायनः—

“ प्रवासं गच्छतो यस्य गृहे कर्त्ता न विद्यते । पंचानां महतामेषां स यज्ञैः सह गच्छति ॥

“ प्रवासे कुरुते चैतान्यद्यन्नमुपपद्यते । न चेदुत्पद्यते चान्नमद्भिरेतान्समापयेत् ” ॥ इति ।

मनुरपि (२।२८)—“ महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ” इति ।

कात्यायनोऽपि—

“सायंप्रातर्वैश्वदेवः कर्तव्यो बलिकर्म च । अनश्नताऽपि सततमन्यथा किल्बिषी भवेत्”॥ इति । वचनद्वयबलादुभयार्थं वैश्वदेवकर्मेत्यपरे । तथा च **स्मृत्यर्थसारे**—“ वैश्वदेवाख्यं कर्मान्नस्य चात्मनश्च संस्कारार्थं ” इति । **व्यासोऽपि**—

“ गृहस्थो वैश्वदेवाख्यं कर्म प्रारभते दिवा । अन्नस्य चात्मनश्चैव संस्कारार्थं तदिष्यते”॥इति । तदेत**द्विज्ञानेश्वरीयमाधवीया**दौ पुरुषार्थत्वेन व्यवस्थापितम् । तथाहि केचिद्वैश्वदेवस्य पुरुषार्थत्वमन्नसंस्कारत्वं चेच्छंति तदयुक्तम् । परस्परविरोधात् । अन्नसंस्कारत्वे ह्यन्नस्य प्राधान्यं वैश्वदेवस्य गुणता पुरुषार्थत्वे तु तद्विपर्ययः । एकस्यैव युगपत्प्राधान्यं गुणत्वं च विरुध्येयातां तर्ह्यस्त्वन्नसंस्कारतैवेति न वाच्यम् । तत्र हि “ प्रतिपाकमावृत्तिप्रसंगप्रतिप्रधानं गुणावृत्तिः” इति **न्यायात्** तस्मात्पुरुषार्थत्वमेव न्याय्यमिति। अत एव **गृह्यपरिशिष्टे**ऽ**भिहितम्**—“ प्रोषितोऽप्यात्मसंस्कारं कुर्यादेव विचारयन् ” इति ।

गोभिलोऽपि (१।४।२२-२४)—“ यद्येकस्मिन्काले व्रीहियवौ पच्येयातामन्यतरस्य हुत्वा कृतं मन्येत यद्येकस्मिन्काले पुनः पुनरन्नं पच्येत सकृदेव बलिं कुर्वीत। यद्येकस्मिन्काले बहुधान्नं पच्येत गृहपतिमाहानसादेवेनं बलिं कुर्वीत ” इति । अयमर्थः । नानाद्रव्यकान्नपाकेऽपि पुनः पुनः पाकेऽपि बहूनामविभक्तानां भ्रात्रादीनां पृथक्पृथक्पाकेऽप्येकस्मादेव गृहपतिपाकादेव होतव्यमिति । **स्मृतिसंग्रहे**—

“ एकपाकेन वसतां पितृदेवद्विजार्चनम् । एकं भवेद्विभक्तानां तदेव स्याद्गृहे गृहे ” ॥ इति । “ सायंप्रातः सिद्धस्य ” इत्यादिवचनजातं उत्पत्तिप्रयोगप्रदर्शनपरम् । “ तानेतान्यज्ञानहरहः कुर्वीत ” इत्यादिरधिकारविधिरिति **माधवीये** । पंचमहायज्ञान्प्रशंसति **भृगुः**—

“ यत्फलं सोमयागेन प्राप्नोति धनवान्द्विजः । सम्यक्पंचमहायज्ञैः दरिद्रस्तावदाप्नुयात् ” ॥

अकरणे प्रत्यवायमाह **स एव**—
" पंचयज्ञांस्तु यो माहान्न करोति गृहाश्रमी । तस्य नास्ति परो लोको लोके भवति निंदितः ॥
" अकृत्वा वैश्वदेवं तु भुंजते ये द्विजोत्तमाः । सर्वे ते निष्फला ज्ञेयाः पतंति नरकेऽशुचौ " ॥
द्विजोत्तमा ब्राह्मणाः । **वसिष्ठः**—
" अकृत्वा वैश्वदेवं तु भुंजते ये द्विजाधमाः । स्वप्रधानान्नपाकेन काकयोनिं व्रजंति ते " ॥
व्यासोऽपि—
" ऋषीन्देवान्पितृंश्चैव भूतानि ब्राह्मणांस्तथा । तर्पयन्विधिना विप्रो ब्रह्मभूयाय कल्पते ॥
" वैश्वदेवेन ये हीना आतिथ्येन बहिष्कृताः । सर्वे ते वृषला ज्ञेयाः प्राप्तवेदा अपि द्विजाः ॥
" अकृत्वा पंचयज्ञांस्तु भुक्त्वा चांद्रायणं चरेत् ।
" अकृत्वा वैश्वदेवं तु यो भुंक्तेऽनापदि द्विजः । स मूढो नरकं याति कालसूत्रपवाक्शिराः " ॥
मनुः (३।८०,९३,७२)—
" ऋषयः पितरो देवा भूतान्यतिथयस्तथा । आशंसंते कुटुम्बिभ्यस्तेभ्यः कार्यं विजानता (८०)॥
" एवं यः सर्वभूतानि ब्राह्मणो नित्यमर्चति । स गच्छति परं स्थानं तेजोमूर्तिः पथर्जुना (९३) ॥
" देवतातिथिभूतानां पितृणामात्मनश्च यः । न निर्वपति पंचानामुच्छ्वसन्न स जीवति" (७२)॥
आत्मा ब्रह्म । निर्वापः पृथक्करणं यजनमिति यावत् । **हारीतः**—" यद्देवेभ्यो जुहोति देवलोकं तेन जयति यत्पितृभ्यः पितृलोकं तेन यत्स्वाध्यायमधीते ऋषिलोकं तेन यद्भूतेभ्यो बलिं हरति भूतलोकं तेन यद्ब्राह्मणांस्तर्पयति मनुष्यलोकं तेनाभिजयति " ॥ इति ।
कूर्मपुराणे (उ. १८ पृ. ५८८)—
" अकृत्वा तु द्विजः पंचमहायज्ञान्द्विजोत्तमः । भुंजीत चेत्स मूढात्मा तिर्यग्योनिषु जायते"॥इति ।
संवर्तः—
" पंचयज्ञविधानं च कुर्यादहरहर्द्विजः । न हापयेच्च तच्छक्तः श्रेयस्कामो द्विजोत्तमः ॥
" हापनं तस्य कुर्वीत सदा मरणजन्मनोः " ॥ **स्मृत्यंतरे**—
" होमस्तत्र न कर्तव्यः शुष्कान्नेन फलेन वा । पंचयज्ञविधानं तु न कुर्यान्मृतिजन्मनोः"॥ इति ।
श्राद्धे वैश्वदेवकालमाह **मनुः** (३।२६५)—
" उच्छेषणं तु तत्तिष्ठेद्यावद्विप्रा विसर्जिताः । ततो गृहबलिं कुर्यादिति धर्मो व्यवस्थितः" ॥ इति ।
ततः विप्रविसर्जनानंतरं गृहबलिं वैश्वदेवं कुर्यादिति तद्व्याख्याने । **भविष्यपुराणे**—
" कृत्वा श्राद्धं महाबाहो ब्राह्मणांश्च विसृज्य च । वैश्वदेवादिकं कर्म ततः कुर्यान्नराधिप"॥ इति ।
मार्कंडेयः—
" ततो नित्यक्रियां कुर्याद्भोजयेच्च तथाऽतिथीन् । ततस्तदन्नं भुंजीत सह भृत्यादिभिर्नरः " ॥
नित्यक्रियां श्राद्धारंभात् पूर्वमकृतां देवार्चनवैश्वदेवादिकां ब्राह्मणविसर्जनानंतरं कुर्यादिति **चंद्रिकायाम्** (पृ. ४८७ पं. २२) व्याख्यातम् । **तत्रैव** (पृ. ४८८ पं. ८-११)—
" यदा श्राद्धं पितृभ्यस्तु दातुमिच्छति मानवः । वैश्वदेवं तदा कुर्यान्निर्वृत्ते श्राद्धकर्मणि ॥
" प्रतिवासरिको होमः श्राद्धादौ क्रियते यदि । देवा हव्यं न गृह्णंति कव्यं च पितरस्तथा" ॥
मत्स्यपुराणे—
" ततश्च वैश्वदेवांते सभृत्यसुतबांधवः । भुंजीतातिथिसंयुक्तः सर्वं पितृनिषेवितम् " ॥ इति ।

मध्येऽपि वैश्वदेवादिकमुक्तं । **आदित्यपुराणे**—

“ पितॄन्संतर्प्य विधिवद्बलिं दद्याद्विधानतः । वैश्वदेवं ततः कुर्यात्पश्चाद्ब्राह्मणवाचनम् ” ॥ इति ।

अस्यार्थश्चंद्रिकायामुक्तः (पृ. ४८७पं. २५)—“ब्राह्मणभोजनेन पितॄन्संतर्प्य विकिररूपं बलिं प्रदायानंतरं वैश्वदेवं कृत्वा पश्चात्स्वस्तिवाचनादिविसर्जनांतं कुर्यात् । “ वैश्वदेवं प्रकुर्वीत नैत्यकं बलिमेव च ” इति द्वयोरानंतर्येण विधानाद्वैश्वदेवानंतरमेव बलिहरणं कर्तव्यमिति । प्रकारांतरमुक्तं **स्मृत्यंतरे**—

“ वैश्वदेवाहुतीरग्नावर्वाग्ब्राह्मणभोजनात् । जुहुयाद्भूतयज्ञादि श्राद्धं कृत्वा ततः स्मृतम् ” ॥ इति ।

अर्वाग्ब्राह्मणभोजनादित्यनेनाग्नौकरणानंतरं वैश्वदेवाहुतीर्जुहुयादित्युक्तम् । एवं च श्राद्धसमाप्त्यनंतरं श्राद्धमध्येऽपि विकिररूपबलिदानानंतरमग्नौकरणानंतरं वा वैश्वदेवानुष्ठानं बलिहरणं च कर्तव्यम् । न श्राद्धादौ कर्तव्यम् । अग्नौकरणानंतरकरणपक्षे तु श्राद्धसमाप्त्यनंतरं भूतयज्ञादिकं कर्तव्यमित्युक्तं भवति । एतच्च वैश्वदेवादिकं पृथक्पाकादेव कर्तव्यम् । तथा च **सूत्रकारः**—“ ब्राह्मणभोजनार्थादन्येनान्नेन वैश्वदेवादीन्कुर्यात्समाप्ते वा ” ॥ इति ।

लोकाक्षिरपि—

“गृहाग्निद्विजदेवानां यतीनां ब्रह्मचारिणाम् । श्राद्धपाको न दातव्यो यावत्पिंडान्न निर्वपेत्” ॥ इति ।

पैठीनसिः—

“ पितृपाकात्समुद्धृत्य वैश्वदेवं करोति यः । आसुरं तत् भवेच्छ्राद्धं पितॄणां नोपतिष्ठते” ॥ इति ।

लोकाक्षिः—

“ पित्रर्थं निर्वपेत्पाकं वैश्वदेवार्थमेव च । वैश्वदेवं न पित्रर्थं न दार्शं वैश्वदेविकम् ” ॥

दार्शं दर्शश्राद्धम् । अमावास्याश्राद्धार्थं निरुप्तमन्नं न वैश्वदेवार्थं भवतीत्यर्थः ॥

आहिताग्नेर्विशेषमाह **स एव**—

“ पक्षांतं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः । पिंडयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः”॥ इति ।

पक्षांतं कर्म अग्न्यन्वाधानं अन्वाहार्यकं अमावास्याश्राद्धम् । “न दार्शं वैश्वदेविकम्” इत्येतत्तु आहिताग्न्यनाहिताग्निसाधारणम् ।

चंद्रिकायां प्रकारांतरमुक्तम्—“ अग्नौकरणानंतरं विकिरानंतरं वा पृथक्पाकादेव कार्यम् । श्राद्धांते तु पितृपाकात्समुद्धृत्य वैश्वदेवादिकं कुर्यात् ” । तथा च **पैठीनसिः**—

“ श्राद्धं निर्वर्त्य विधिवद्वैश्वदेवादिकं ततः । कुर्याद्भिक्षां ततो दद्याद्धन्तकारादिकं तथा ” ॥

ततः पितृपाकसमुद्धृतादन्नादित्यर्थः । साग्निकदर्शश्राद्धे वैश्वदेवार्थं पृथक्पाकः अनाहिताग्निदर्शश्राद्धे न पृथक्पाकनियम इति । अन्ये तु **पैठीनसिवचनस्य** तथा व्याख्याने प्रमाणाभावाच्छ्राद्धे सर्वत्र वैश्वदेवार्थं पृथक्पाक एवेत्याहुः । एवमेव शिष्टा आचरंति ।

संग्रहे तु—

“ वृद्धावादौ क्षये चांते दर्शे मध्ये महालये । अन्त एव तु कुर्वीत वैश्वदेवं चतुर्विधम् ”॥ इति ।

वृद्धौ वृद्धिश्राद्धे । क्षये मृताहश्राद्ध इत्यर्थः ।

वृध्यादिचतुष्टयव्यतिरिक्तश्राद्धेषु विशेषो दर्शितः **संग्रहे**—

“ याजुषाः सामगाः पूर्वं मध्ये कुर्वंति बह्वृचाः । अथर्वणास्तृतीयांशे वैश्वदेवं त्रिधा मतम्” ॥ इति ।

एतदेवाभिप्रेत्य **गृह्यपरिशिष्टे**ऽभिहितम्—

‘ संप्राप्ते पार्वणश्राद्धे एकोद्दिष्टे तथैव च । अग्रतो वैश्वदेवं स्यात् पश्चादेकादशेऽहनि”॥ इति ।

अथातिथ्यम्— तत्र व्यासः—

" आचम्य च ततः कुर्यात्प्राज्ञो द्वारावलोकनम् । मुहूर्तस्याष्टमं भागमुदीक्ष्यो ह्यतिथिर्भवेत् " ॥

शंखः—" गोदोहमात्रमंगणेऽतिथीन् प्रतीक्षमाणं आसीत " इति । **माधवीये**—

" ततो गोदोहमात्रं वै कालं तिष्ठेद्गृहांगणे । अतिथिग्रहणार्थाय तदूर्ध्वं वा यथेच्छया ॥

" नाडिकायाश्चतुर्भागं गोदोहं ब्रुवते बुधाः " ॥

चंद्रिकायाम्—

" गोदोहकालं कांक्षेत कृत्वा भूतबलिं द्विजः । अतिथिं तत्र संप्राप्तं पूजयेत्स्वागतादिना " ॥

मनुः (३।९४)—

" कृत्वैतद्बलिकर्मैवमतिथिं पूर्वमाशयेत् । भिक्षां च भिक्षवे दद्याद्विधिवद्ब्रह्मचारिणे " ॥

कूर्मपुराणे (उ. १८ पृ. ५८८)—

" गोदोहमात्रकालं वै प्रतीक्ष्यो ह्यतिथिः स्वयम् । अभ्यागतान्यथाशक्ति पूजयेदतिथीन् यथा ॥

" भिक्षां वै भिक्षवे दद्यात् विधिवत् ब्रह्मचारिणे । दद्यादन्नं यथाशक्ति ह्यर्थिभ्यो लोभवर्जितः ॥

" सर्वेषामप्यलाभे तदन्नं गोभ्यो निवेदयेत् " ॥ **व्यासः**—

" गवाह्निकं परगवे दद्यादपि तृणादिकम् । अकृत्वा स्वयमाहारं स्वर्गलोकं स गच्छति " ॥

गवान्हिकमंत्रो **मार्कंडेयेन** दर्शितः—

" सौरभेय्यः सर्वहिताः सर्वपापप्रणाशनाः । प्रतिगृह्णंतु मे ग्रासं गावस्त्रैलोक्यमातरः " ॥ इति ।

भारतेऽपि—

" दिने द्विरभिषेकश्च पितृदैवतपूजनम् । गवान्हिकप्रदानं च संविभागोऽतिथिष्वपि ॥

" ग्रासमप्येकमन्नस्य यो ददाति च गोर्दिने । स्वर्गलोकमवाप्नोति नरकं च न पश्यति " ॥

मनुः (३।२८९, ११८)—

" विघसाशी भवेन्नित्यं नित्यं चामृतभोजनः । विघसो भुक्तशिष्टं स्याद्यज्ञशिष्टं तथामृतम् ॥

"अघं स केवलं भुंक्ते यः पचत्यात्मकारणात् । यज्ञशिष्टाशनं ह्येतत्सतामन्नं विधीयते" ॥ (११८)

इति । **गीतायामपि** (३।१३)—

" यज्ञशिष्टाशिनः संतो मुच्यंते सर्वकिल्बिषैः । भुंजते ते त्वघंपापा ये पंचत्यात्मकारणात्" ॥

देवलः—

" देवार्थे ब्राह्मणार्थे च पचमानो न लिप्यते । अघं स केवलं भुंक्ते यः पचत्यात्मकारणात् ॥

"नात्मार्थं पाचयेदन्नं नात्मार्थं घातयेत्पशून्" । **श्रुतिरपि**[1] (तै. ब्रा. २।८।८,३ ऋ. सं. १०।११७-६)—

" केवलाघो भवति केवलादी " ॥ इति । **हारीतः**—

'अतिथीनागतान् शक्त्या पूजयेदविचारतः।अन्यानभ्यागतान् विप्रान् पूजयेच्छक्तितो गृही" ॥इति।

आपस्तम्बः (२।२।४।११।१२) "अतिथीनेवाग्रे भोजयेत् । बालान्वृद्धान्रोगसंबद्धान् स्त्रीश्चांतर्वत्नीः " ॥ इति । " शेषभोज्यतिथीनां स्यात् । न सारान्[2] गृहे भुंजीतानवशेषमतिथिभ्यो नात्मार्थमभिरूपमन्नं पाचयेत् " इति । आगामिभ्योऽतिथिभ्यो गृहे गव्यादिरसानवशेष्य स्वयंभुजीतेत्यर्थः ॥ **गौतमोऽपि**[3] (५।२३)—" भोजयेत्पूर्वमतिथिकुमारव्याधितगर्भिणीसुवासिनीस्थविरान् जघन्यांश्च " ॥ इति ।

सुवासिन्यो दुहितरो भगिन्यश्च । स्थविरा वृद्धाः । जघन्याः परिचारकाः ।

---

१ आप. ध. सू. २।७।८।२-४ । २ ' न रसान् ' इति मुद्रितपाठः । ३ निरुक्ते ७।३ ।

बोधायनोऽपि (२।३।११-१८)—"सायंप्रातर्यदन्नं स्यात्तेन वैश्वदेवं बलिमुपहृत्य ब्राह्मणक्षत्रियविट्शूद्रानभ्यागतान्यथाशक्ति पूजयेद्यदि बहूनां न शक्नुयादेकस्मै गुणवते दद्याद्यो वा प्रथममुपागतः स्याच्छूद्रश्चेदागतस्तं कर्मणि नियुंज्याच्छ्रोत्रियाय वाऽग्रं दद्याद्ये नित्यभाक्तिका; स्युस्तेषामनुपरोधेन संविभागो विहितो न त्वेव कदाचिददत्वा भुंजीताथाप्यत्रा**न्नगीतौ** श्लोकावुदाहरंति

" यो मामदत्वा पितृदेवताभ्यो भृत्यातिथिभ्यश्च सुहृज्जनाय[१] ।
" संपन्नमश्नन्विषमत्ति मोहात्तमप्यहं तस्य च मृत्युरस्मि ॥
" हुताग्निहोत्रः कृतवैश्वदेवः पूज्यातिथीन्भृत्यजनावशिष्टम् ।
" तुष्टः शुचिः श्रद्धधदत्ति यो मां तस्यामृतं स्यां स च मां भुनक्ति " ॥

स एव (२।७।१९;२।३।६१-६२)-
" अग्रे तु भोजयेदतिथीन् अंतर्वत्नीरनंतरम् । बालवृद्धांस्तथा दीनान्व्याधितांश्च विशेषतः ॥
" अन्ने श्रितानि भूतानि ' अन्नं प्राणमिति ' श्रुतिः । तस्मादन्नं प्रदातव्यमन्नं हि परमं हविः॥
" हुतेन शाम्यते पापं हुतमन्नेन शाम्यति । अन्नं दक्षिणया शांतिमुपयातीति नः श्रुतिः"॥ इति।

याज्ञवल्क्योऽपि (आ. १०४-१०५; १०७-१०८)—
" अन्नं पितृमनुष्येभ्यो देयमप्यन्वहं जलम् । स्वाध्यायं चान्वहं कुर्यान्न पचेदन्नमात्मने ॥
" बालः सुवासिनीवृद्धगर्भिण्यातुरकन्यकाः । संभोज्यातिथिभृत्यांश्च दंपत्योः शेषभोजनम् ।
" अतिथित्वे तु वर्णानां देयं शक्त्याऽनुपूर्वशः ।
"सत्कृत्य भिक्षवे भिक्षा दातव्या सुव्रताय च । भोजयेच्चागतान्काले सखिसंबंधिबांधवान् " ॥ इति।

मनुः (४।३२)—
" शक्तितोऽपचमानेभ्यो दातव्यं गृहमेधिना । संविभागश्च भूतानां कर्तव्योऽनुपरोधतः " ॥
अपचमानेभ्यः ब्रह्मचारिसंन्यासिभ्यः। **स एव** (३।९५-९६; १११-११६)—
" यत्पुण्यफलमाप्नोति गां दत्वा विधिवद्गुरोः। तत्पुण्यफलमाप्नोति भिक्षां दत्वा द्विजो गृही ॥
" भिक्षां वाऽप्युदपात्रं वा सत्कृत्य विधिपूर्वकम्[२] । वेदतत्वार्थविदुषे ब्राह्मणायोपपादयेत् ॥
"सुवासिनीः कुमारीश्च रोगिणो गर्भिणीस्तथा। अतिथिभ्योन्वगे वैतान्भोजयेदविचारयन्[३]॥११४॥
" भुक्तवत्सु तु विप्रेषु स्वेषु भृत्येषु चैव हि । भुंजीयातां ततः पश्चादवशिष्टं तु दंपती ॥११६॥
" अदत्वा तु य एतेभ्यः पूर्वं भुंक्ते विचक्षणः। संभुंजानो न जानाति श्वगृध्रैर्जग्धिमात्मनः॥११५॥
"इतरानपि सख्यादीन् संप्रीतया गृहमागतान्। सत्कृत्यान्नं यथाशक्ति भोजयेद्भार्यया स्वयम्॥११३॥
" यदि त्वतिथिधर्मेण क्षत्रियो गृहमाव्रजेत् । भुक्तवत्सु तु विप्रेषु कामं तमपि भोजयेत् ॥१११॥
"वैश्यशूद्रावपि प्राप्तौ कुटुंबेऽतिथिधर्मिणौ। भोजयेत्सह भृत्यैस्तावानृशंस्यं प्रकल्पयन्"॥११२॥इति।
सह भृत्यैः स्वभृत्यैः सह स्वभृत्यभोजनकाल इत्यर्थः । **स एव** (३।११०)—
" न ब्राह्मणस्य त्वतिथिर्गृहे राजन्य उच्यते। वैश्यशूद्रौ सखा चैव ज्ञातयो गुरुरेव च"॥ इति।
न क्षत्रियादयो ब्राह्मणेनातिथिसत्कारमर्हंति । किं तु भोजनमात्रमित्यर्थः ॥

तथा च **स्मृतिरत्ने**—
" ब्राह्मणं त्वनधीयानमधीयानं नृपं विषम् । पूर्वं च भोजयेत्तुल्यान्प्रत्युत्थानविवर्जितम् ॥
" शूद्रमभ्यागतं कर्म कारयित्वाऽथ भोजयेत् । मातृजातीयसदृशं पूजयेदनुलोमजम् " ॥ इति।

आपस्तंबोऽपि (२।२।४।१६-१९)–" ब्राह्मणानधीयानायासनमुदकमन्नमितिदेयं न प्रत्युत्तिष्ठे-

१ स्योति मुद्रितपाठः। २ क्ष–गोर्यथाविधि । ३ ख–सहभार्यया; गघ–दविचारयन् ।

द्राजन्यवैश्यशूद्रमभ्यागतं कर्मणि नियुंज्यादथास्मै दद्यात् " इति । राज्यन्यवैश्यावधीयानावपि न प्रत्युत्तिष्ठेदित्यर्थः । **विष्णुपुराणे** (३।११।६८–६९)—

" ततः सुवासिनी दुःखिगर्भिणी वृद्धबालकान् । भोजयेत्सत्कृतान्नेन प्रथमं तु परं गृही ॥
" अभुक्तवत्सु चैतेषु भुंजन् भुंक्ते सुदुष्कृतम् । मृतश्च गत्वा नरकं श्लेष्मभुक् जायते नृप "॥ इति।

मार्कंडेयोऽपि—

" पूजयित्वाऽतिथीन् स्वांश्च ज्ञातीन्बंधूंस्तथाऽर्थिनः । विकलान्बालवृद्धांश्च भोजयेदातुरांस्ततः ॥
" वांछेत्क्षुत्तृट्परीतात्मा यश्चान्नं रससंयुतम् । श्रीमंतं ज्ञातिमासाद्य यो ज्ञातिरवसीदति ॥
" सीदता यत्कृतं पापं तत्सर्वं प्रतिपद्यते " इति ॥ **पराशरः** (१।४३–४५,४६)—

" अपूर्वः सुव्रती विप्रो ह्यपूर्वश्चातिथिस्तथा । वेदाभ्यासरतो नित्यं त्रयोऽपूर्वा दिनेदिने ॥ ४३॥
" यतिश्च ब्रह्मचारी च पक्वान्नं स्वामिनावुभौ । तयोरन्नमदत्वा तु भुक्त्वा चांद्रायणं चरेत् ॥४५॥
" दद्याच्च भिक्षात्रितयं परिव्राड्ब्रह्मचारिणाम् । इच्छया च ततो दद्याद्विभवे सत्यवारितम् ॥
"यतिहस्ते जलं दद्याद्भैक्ष्यं दद्यात्पुनर्जलम् । तद्भैक्ष्यं मेरुणा तुल्यं तज्जलं सागरोपमम्"॥४६॥ इति।

नृसिंहपुराणे—

"भिक्षां च भिक्षवे दद्यात् परिव्राड्ब्रह्मचारिणोः । अकल्पितान्नादुद्धृत्य सर्वव्यंजनसंयुताम्"॥ इति।

यमः—

"सत्कृत्य भिक्षवे भिक्षां यः प्रयच्छति मानवः । गोप्रदानसमं पुण्यं तस्याह भगवान्यमः"॥इति।

ब्रह्मचारिणं स्वस्तीति वाचयित्वा तद्धस्ते जलं प्रदाय भिक्षां दद्यादित्याह **गौतमः** (५।१६)—

" स्वस्ति वाच्य भिक्षादानमप्पूर्वम् " इति ॥ **हारीतः**—

"भक्त्या च शक्तितो नित्यं विष्णुमभ्यर्च्य सादरम् । भिक्षां च भिक्षवे दद्यात्परिव्राड्ब्रह्मचारिणोः॥
" विष्णुरेव यतिश्चायमिति निश्चित्य भावयेत् । यतिर्यस्य गृहे भुंक्ते तस्य भुंक्ते हरिः स्वयम् ॥
" हरिर्यस्य गृहे भुंक्ते तस्य भुंक्ते जगत्त्रयम् " । **व्यासः**—

" यः पात्रपूर्णांभिक्षां यतिभ्यः संप्रयच्छति । विमुक्तः सर्वपापेभ्यो नासौ दुर्गतिमाप्नुयात् " ॥ इति ।

वैश्वदेवात्पूर्वं भिक्षौ गृहमागते सति कर्तव्यमाह **पराशरः** (१।४४–४७)—

" वैश्वदेवे तु संप्राप्ते भिक्षुके गृहमागते । उद्धृत्य वैश्वदेवार्थं भिक्षुकं तु विसर्जयेत् ॥ ४४ ॥
"वैश्वदेवकृतं पापं शक्तो भिक्षुर्व्यपोहतुम् । न हि भिक्षुकृतान् दोषान्वैश्वदेवो व्यपोहति"॥४७॥इति।

संप्राप्ते प्रसक्ते अननुष्ठिते सतीति यावत् । वैश्वदेवकृतं इति वैश्वदेवस्य पश्चात्करणेन प्रसक्ते यो दोषः स भिक्षादानेन निवर्त्यते । भिक्षापरिहारेण तु यो दोषः नासौ पूर्वकृतेनापि वैश्वदेवेन निवर्त्यंत इत्यर्थः । तथा च **हारीतः**—

" अकृते वैश्वदेवे तु भिक्षुके गृहमागते । उद्धृत्य वैश्वदेवार्थं भिक्षां दत्वा विसर्जयेत् ॥
" पश्चात्कृते वैश्वदेवे दोषं भिक्षुर्व्यपोहति । न भिक्षुवर्जनोत्थं तु वैश्वदेवो व्यपोहति ॥
" तस्मात्समाहितो भिक्षां दद्यात्प्राप्ताय भिक्षवे " ॥ इति । **व्यासेन** भिक्षवो दर्शिताः—

" यतिश्च ब्रह्मचारी च विद्यार्थी गुरुपोषकः । अध्वगः क्षीणवृत्तिश्च षडेते भिक्षुकाः स्मृताः"॥ इति।

मनुरपि—

"व्याधितस्यार्थहीनस्य कुटुंबात्प्रच्युतस्य च । अध्वानं वा प्रपन्नस्य भिक्षाचर्या विधीयते"॥ इति

---

१ गद्य–पुराणे ।

एवं च

" न दद्याद्यतये स्वर्णं तंडुलं ब्रह्मचारिणे । पक्वान्नं तु गृहस्थाय दाता दुर्गाणि गच्छति" ॥ इति वचनं भिक्षुकव्यतिरिक्तगृहस्थविषयं वेदितव्यम् । **यमः**—

" आहारमात्राद्धिकं न कश्चिद्भैक्षमाहरेत् । युज्यते स्तेयदोषेण कामतोऽधिकमाहरन् ॥

" तस्मान्नोपहरेद्भैक्ष्यं अतिरिक्तं यतिर्व्रती " ॥ इति । **चंद्रिकायाम्**—

" माधूकरं य आदाय ब्राह्मणेभ्यः प्रयच्छति । दाता तु नरकं याति भोक्ता भुंजीत किल्बिषम् ॥

" हस्तदत्ता तु या भिक्षा लवणव्यंजनानि च । भोक्ता ह्यशुचितां याति दाता स्वर्गं न गच्छति "॥

यमः—"अपचन्तमतिक्रम्य पचंतं यस्तु भोजयेत् । क्रिमीणां तु भजेद्योनिं वर्षाणामधिकं शतम् ॥

"अहुत्वाऽग्निमसंतर्प्य तपस्विनमुपागतम् । अशित्वा तु परे लोके स्वानि मांसानि खादति "॥ इति ।

आपस्तंबः (१।१।३।२६) । " स्त्रीणां प्रत्याचक्षाणानां समाहितो ब्रह्मचारीष्टं दत्तं हुतं प्रजां पशून्ब्रह्मवर्चसमन्नाद्यं वृंक्ते । तस्मादुह वै ब्रह्मचारिसंघं चरंतं न प्रत्याचक्षीत" इति । समाहितः व्रताध्ययननिष्ठ इत्यर्थः । अत एव **वसिष्ठपराशरौ** (वासिष्ठ ध. सू. ३।४)—

"अव्रता ह्यनधीयाना यत्र भैक्षचरा द्विजाः । तं ग्रामं दंडयेद्राजा चोरभक्तप्रदो हि सः"॥ इति । ब्रह्मचारिकर्तृकं मध्वादिवर्जनं स्वगृह्यप्रसिद्धानि चत्वारि प्राजापत्यादीनि चात्र व्रतशब्दाभिधेयानि तदुभयविधव्रतरहिताः स्वाध्यायमप्यनधीयाना ब्रह्मचारिणो यत्र ग्रामे भैक्षमाचरंति तं ग्रामं राजा दंडयेत् । यतश्चौरसदृशेभ्यो भक्तमन्नं प्रयच्छतीत्यर्थः । **व्यासः**—

" द्वाविमौ पुरुषौ लोके सूर्यस्योपरि तिष्ठितः । अन्नप्रदाता दुर्भिक्षे सुभिक्षे हेमवस्त्रदः " ॥

मनुः (३।९८,९७)—

" विद्यातपःसमृद्धेषु हुतं विप्रमुखाग्निषु । निस्तारयति दुर्गाच्च महतश्चैव किल्बिषात् ॥ ९८ ॥

"नश्यंति हव्यकव्यानि नराणामविजानताम् । भस्मीभूतेषु विप्रेषु मोहाद्दत्तानि दातृभिः" ॥९७॥

अविजानतां अपात्रदाने दोषमजानतां दातॄणां हव्यकव्यानि नश्यंति । हव्यं दैवं कव्यं पित्र्यम् । भस्मीभूतेषु निस्तेजस्केषु । **स एव** (३।१४४;१३४–१३५)—

" काममभ्यर्चयेन्मित्रं नाभिरूपमपि त्वरिम् । द्विषता हि हविर्भुक्तं भवति प्रेत्य निष्फलम् ॥

" देयानि श्रोत्रियायैव हव्यकव्यानि दातृभिः । अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम् ॥

" सहस्राणि सहस्राणामनृचां यत्र भुंजते । एकस्तान् मंत्रविद्विप्रः सर्वानर्हति धर्मतः ॥

"ज्ञाननिष्ठा द्विजाः केचित्तपोनिष्ठास्तथापरे । स्वाध्यायज्ञाननिष्ठाश्च कर्मनिष्ठास्तथैव च ॥१३४॥

"ज्ञाननिष्ठेषु कव्यानि प्रतिष्ठाप्यानि यत्नतः । हव्यानि तु यथान्यायं सर्वेष्वेव चतुर्ष्वपि" ॥ इति ।

बृहस्पतिरपि—

" नष्टे शौचे व्रतभ्रष्टे विप्रे वेदविवर्जिते । दीयमानं रुदत्यन्नं यन्मया दुष्कृतं कृतम् ॥

" वेदविद्याव्रतस्नाते श्रोत्रिये गृहमागते । क्रीडंत्योषधयः सर्वा यास्यामः परमां गतिम्" ॥ इति ।

अयं च गुणदोषविवेको वैश्वदेवांते न कर्तव्य इत्यभिप्रेत्यातिथिलक्षणमाह

पराशरः (१।३९-४०,४६)—

" इष्टो वा यदि वा द्वेष्यो मूर्खः पंडित एव वा । संप्राप्तो वैश्वदेवांते सोऽतिथिः स्वर्गसंक्रमः ॥

" दूराध्वोपगतं श्रांतं वैश्वदेव उपस्थितं । अतिथिं तं विजानीयान्नातिथिः पूर्वमागतः ॥

" नैकग्रामीणमतिथिं संगृह्णीत कदाचन । अनित्यमागतो यस्मात्तस्मादतिथिरुच्यते" ॥ इति ।

---

१ खग–री । २ खगघ–तपःस्वाध्यायनिष्ठाश्च । ३ क्ष–वेदार्थवित्सुहव्यानि ।

वैश्वदेवान्ते वैश्वदेवस्योपरि घटिकापादपरिमिते काले समागतमेवातिथिलक्षणं नान्यद्विद्यादि- स्वर्गसंक्रमः स्वर्गप्राप्तिहेतुः। 'नातिथिः पूर्वमागतः' इति वैश्वदेवे समागतः तस्मिन्नेवातिथिः नोत्तरेद्यु- रित्यर्थः । तथा च **मनुः** (३।१०२–१०३)—

" एकरात्रं हि निवसन् अतिथिर्ब्राह्मणः स्मृतः । अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते ॥
" नैकग्रामीणमतिथिं विप्रं सांगतिकं तथा । उपस्थितं गृहे विद्याद्भार्या यत्राग्नयोऽपि वा " ॥

सांगतिकं संगतेन चरंतं कचित्कचिदतिथित्वेन संगतपूर्वमिति यावत् । तं नातिथिं विद्यादत्र स्वकीये परकीये वा गृहे भार्याग्नयो वसंति तत्रोपस्थितमतिथिं विद्यात् । नान्यं विप्रोषित- भार्यस्य स्वस्याभ्याशमागतमित्यर्थः । **आपस्तंबः** (२।३।६।५)—" स्वधर्मयुक्तं कुटुंबिन- मभ्यागच्छति धर्मपुरस्कारो नान्यप्रयोजनः सोऽतिथिर्भवति " इति । आदितो यच्छब्दो द्रष्टव्यः । अंते स इति दर्शनात् । **स एव** (२।३।६।३)—" अग्निरिव ज्वलन्नतिथिरभ्या- गच्छति " ॥ इति । तस्मादसौ भोजनादिभिस्तर्पयितव्यः । निरा शस्तु गतो गृहान् दहेदित्यर्थः। **स एव** (२।४।९।५-६,१०–१३)—"सर्वान् वैश्वदेवे भागिनः कुर्वीताश्वचांडालेभ्यो नानर्हभ्यो दद्यादित्येके । ये नित्या भाक्तिकास्तेषामनुपरोधेन संविभागो विहितः । काममात्मानं भार्यां पुत्रं वोपरुंध्यान्न त्वेव दासकर्मकरं तथा चात्मनोऽनुपरोधं कुर्याद्यथा कर्मसु समर्थः स्यात् " ॥ इति। **बोधायनः**—" श्रान्तोऽदृष्टपूर्वः अश्रुतः केवलमन्नार्थी नान्यप्रयोजनो य एति सोऽतिथि- र्भवति । अपि वा सर्ववर्णानामन्यतमः काले यथोपपन्नः सर्वेषामतिथीनां श्रेष्ठतमोऽतिथि- र्भवति " ॥ इति । **गौतमोऽपि** (५।३६,३९–४२)—" असमानग्रामोऽतिथिरैकरात्रिको- ऽधिवृक्षसूर्योपस्थायी । ब्राह्मणस्यानतिथिरब्राह्मणो यज्ञे संवृतश्चेत् । भोजनं तु क्षत्रियस्योर्ध्वं ब्राह्मणेभ्योऽन्यान् भृत्यैः सहानृशंस्यार्थम् " ॥ इति । अब्राह्मणः क्षत्रियादिः अनतिथिः । न तत्रातिथिधर्मा अनुष्ठेयाः । अयज्ञे यज्ञादन्यत्र । यज्ञे त्वागतस्य कर्तव्याः । स चेद्ब्राह्मणः संवृतः अप्रकाशो दरिद्रः । प्रभूतस्य तु भवत्येव। आनृशंस्यार्थं नृशंसोऽयमिति लोको माऽऽक्रु- शदित्यर्थः । **संवर्त्तः**—

" तिथिपर्वोत्सवाः सर्वे त्यक्ता येन महात्मना । सोऽतिथिः सर्वभूतानां शेषानभ्यागतान्विदुः " ॥

व्यासः—

" सुदूरादाशया प्राप्तः क्षुत्तृष्णाश्रमकर्शितः । यः पूज्यतेऽतिथिः सम्यगयूपः क्रतुरेव सः ॥
" पापो वा यदि चांडालो विप्रघ्नः पितृघातकः । वैश्वदेवे तु संप्राप्तः सोऽतिथिः स्वर्गसंक्रमः ॥
" अज्ञातकुलनामानं याचमानमकिंचनम् । ब्राह्मणं प्राहुरतिथिं स पूज्यः शक्तितो द्विजैः ॥
" अकिंचनमसंबंधमन्यदेशादुपागतम् । असंपूज्यातिथिं भुंजन्भुक्त्वा कामं व्रजत्यधः " ॥

सुमंतुः—" अभ्यागतो ज्ञातपूर्वस्त्वज्ञातोऽतिथिरुच्यते ॥
" यस्याध्वखिन्नाः पथिका गृहमायांति कर्शिताः । पूज्यन्ते तृणभूम्याद्यैः पितरस्तेन पुत्रिणः "॥

याज्ञवल्क्यः—(आ. १११)

" अध्वनीनोऽतिथिर्ज्ञेयः श्रोत्रियो वेदपारगः । मान्यावेतौ गृहस्थस्य ब्रह्मलोकमभीप्सुभिः " ॥

आश्वमेधिके—" दूराध्वगं श्रांतमनुव्रजन्ति देवाश्च सर्वे पितरोऽग्नयश्च ॥
" तस्मिन् द्विजे तुष्यति पूजिताः स्युर्दिते निराशा अपि ते प्रयान्ति " । दिते खंडिते निरा- कृते इति यावत् ।

" बुभुक्षितं पिपासार्तमतिथिं श्रांतमागतम् । तदा तं भावयेदत्र व्यासोऽयं समुपस्थितः " ॥ इति । **आपस्तंबः** (२।३।७।१७) । " असमुदेतश्चेदतिथिर्ब्रुवाण आगच्छेदासनमुदकमन्नं श्रोत्रियाय ददामीत्येव दद्यादेवमस्य समृद्धं भवति " इति । विद्यादिरहितोऽसमुदेतः । **स्मृतिरत्नसारे**—

"अज्ञातकुलगोत्रस्तु अध्वश्रांतो बुभुक्षितः । संप्राप्तो वैश्वदेवान्ते सोऽतिथिः स्वर्गसंक्रमः"॥ इति । वैश्वदेवांत इति दिवसाभिप्रायम् । सायं तु वैश्वदेवकाले कालांतरे च प्राप्तोऽतिथिरेव च । तथा च **मनुः** (३।१०५)—

"अप्रणोद्योऽतिथिः सायं सूर्योढो गृहमेधिना । काले प्राप्तस्त्वकाले वा नास्यानश्नन् गृहे वसेत्"॥इति। **सूर्योढ** इति अस्तंगच्छता सूर्येण देशांतरगमनाशक्तिमुत्पाद्य गृहं प्रापित इत्यर्थः ।

प्रचेता अपि—

" यः सायं वैश्वदेवांते सायं वा गृहमागतः । देववत्पूजनीयोऽसौ सूर्योढः सोऽतिथिः स्मृतः"॥ इति

याज्ञवल्क्यः (आ. १०७)– "अप्रणोद्योऽतिथिः सायमपि वाग्भूतृणोदकैः " इति ॥ **संग्रहे**–

" सायं प्राप्तायातिथये प्रदद्यादासनोदके । अन्नं चैव यथाशक्ति सत्कृत्य विधिपूर्वकम्"॥ इति।

स्मृतिरत्ने–"दिवा तिथौ तु विमुखे गते यत्पातकं भवेत् । तदेवाष्टगुणं पुंसां सूर्योढे विमुखे गते ॥

"तस्माच्छक्त्या च भक्त्या च सूर्योढमतिथिं नरः । पूजयेत्पूजिते तस्मिन्पूजिताः सर्वदेवताः ॥

"धाता प्रजापतिः शक्रो वन्हिर्वसुगणोऽर्यमा । प्रविश्यातिथिमेनं वै भुंजते नात्र संशयः"॥ इति ।

उक्तलक्षणेऽतिथावागते सति यत्कर्तव्यं तदाह **पराशरः**—

" अतिथिं तत्र संप्राप्तं पूजयेत्स्वागतादिना । तथासनप्रदानेन पादप्रक्षालनेन च ॥

" श्रद्धया चान्नदानेन प्रियप्रश्नोत्तरेण च । गच्छतश्चानुयानेन प्रीतिमुत्पादयेद्गृही ॥

" न पृच्छेद्गोत्रचरणे न स्वाध्यायं श्रुतं तथा । हृदये कल्पयेद्देवं सर्वदेवमयो हि सः "॥ इति । चरणमाचरः । श्रुतं व्याकरणमीमांसादि । **यमोऽपि**—

" न पृच्छेद्गोत्रचरणे देशं नाम कुलं श्रुतम् । अध्वनोऽभ्यागतं विप्रं भोजनार्थमुपस्थितम् ॥

" देशं नाम कुलं विद्यां पृष्ट्वा योऽन्नं प्रयच्छति । न स तत्फलमाप्नोति दत्वा स्वर्गं न गच्छति"॥

विष्णुपुराणे (३।११।६०)—

" स्वाध्यायगोत्रचरणमपृष्ट्वा च तथा कुलम् । हिरण्यगर्भबुध्या तं मन्येताभ्यागतं गृही " ॥

शातातपोऽपि—" चित्ते विभावयेत्तस्मिन्व्यासः स्वयमुपागतः " इति । **व्यासोऽपि**—

" न पृच्छेद्गोत्रचरणं न स्वाध्यायं न च श्रुतम् । शोभनाशोभनाकारं तं मन्येत प्रजापतिम् ॥

" अन्नशाकांबुदानेन स्वशक्त्या पूजयेत्पुमान् । शयनप्रस्तरमहीप्रदानैर्मृदुभाषणैः " ॥

यमः—

" चक्षुर्दद्यान्मनोदद्याद्वाचं दद्याच्च सूनृताम् । उत्थाय चासनं दद्यात्स्वधर्मः पंचलक्षणः ॥

" संमुखे तुष्ट आदित्यः संभाषेण सरस्वती । स्वागतेनाग्नयः प्रीता आसनेन शतक्रतुः ॥

" पितरः पादशौचेन अन्नाद्येन प्रजापतिः । शयनेन च तुष्टाः स्युर्ब्रह्मविष्णुमहेश्वराः " ॥

हारीतः—

" अदृष्टपूर्वमज्ञातमतिथिं प्राप्तमर्चयेत् । स्वागतासनदानेन प्रत्युत्थानेन चांबुना ॥

" स्वागतेनाग्नयस्तुष्टा भवंति गृहमेधिनः । आसनेन तु दत्तेन प्रीतो भवति देवराट् ॥

१ क्ष–सु । २ गघ–भाषणेन । ३ ख–संवर्तः ।

" पादशौचेन पितरः प्रीतिमायांति दुर्लभाम् । अन्नदानेन युक्तेन तृप्यते हि प्रजापतिः ॥
" आसनादिप्रदानेन सर्वास्तुष्यंति देवताः "॥ अत्र विशेषमाह **मनुः** (३।१०७)—
" आसनावसथे शय्यामनुव्रज्यामुपासनम् । उत्तमेषूत्तमं कुर्याद्धीने हीनं समे समम् " ॥ इति ।

गौतमोऽपि (५।३४–३५)–शय्यासनावसथानुव्रज्योपासनानि सदृक्श्रेयसोः समान्यल्पशोऽपि हीने " इति । सदृक् आत्मना तुल्यः । श्रेयानधिको विद्यावृत्तादिना । तयोरात्मना तुल्यानि शय्यादीनि देयानि । हीनेऽप्यल्पशो देयानीत्यर्थः । **स एव** (५।३०–३३)—
" श्रोत्रियस्य तु पाद्यमर्घ्यमन्नविशेषांश्च प्रकारयेत् । नित्यं वा संस्कारविशिष्टम् । मध्यतोऽन्नदानं अवैद्ये साधुवृत्ते । विपरीते तु तृणोदकभूमीः स्वागतमंततः पूजा अनत्याशश्च " ॥ इति । अन्नविशेषाः पायसादयः । नित्यं वा यदेवास्य गृहे नित्यं तदेव मरीचिभर्जनादिसंस्कारविशिष्टं साधयेत् । अवैद्ये विद्यारहिते साधुवृत्ते उपस्थिते मध्यतः मध्यमेन संस्कारेणान्नं देयम् । यश्चवैद्यः साधुवृत्तश्च न भवति स विपरीतः । तस्मै तृणादि दद्यात् । अनत्याशः यदतिथये न दत्तं न तदश्नीयादित्यर्थः । तथा च **वसिष्ठः**—

" मांसमन्नं तथा शाकं गृहे यच्चोपपादितम् । न वै स्वयं तदश्नीयादतिथिं यन्न भोजयेत् ॥
" यद्येकपंक्तौ विषमं ददाति स्नेहाद्भयाद्वा यदि वाऽर्थहेतोः ।
" वेदेषु दृष्टामृषिभिश्च गीतां तां ब्रह्महत्यां मुनयो वदंति "॥ इति ।

देवलोऽपि–" अघृतं भोजयेद्विप्रं यो गृहे सति सर्पिषि । परत्र निरयं घोरं गृहस्थः प्रतिपद्यते ॥
" मृष्टमन्नं स्वयं भुक्त्वा पश्चात्कदशनं नरः । ब्राह्मणान्भोजयेन्मूर्खो नरके चिरमावसेत् " ॥

मनुरपि (३।१०६)—
"नैव स्वयं तदश्नीयादतिथिं यन्न भोजयेत् । धन्यं[1] यशस्यमायुष्यं स्वर्ग्यं चातिथिपूजनम्"॥ इति ।

आपस्तंबः (२।३।६।७–८)— " तमभिमुखोऽभिगम्य यथावयः समेत्य तस्यासनमाहारयेत् । शक्तिविषयेनाबहुपादमासनं भवतीत्येके । तस्य पादौ प्रक्षालयेत्" ॥ इति ।
स एव (२।३।६।१४–१५)—"सान्त्वयित्वा तर्पयेद्रसैर्भक्ष्यैरद्भिरवरार्घ्येनेत्यावसथं दद्यादुपरि शय्यामुपस्तरणमुपधानं सावस्तरणमभ्यंजनं चेति " । सावस्तरणमुपरि पटसहितमुपधानम् । अभ्यंजनं पादयोस्तैलं घृतं वा । एतत्सर्वं भोजनात्प्रागूर्ध्वं वाऽपेक्षिते काले दद्यादित्यर्थः ॥

आश्वमेधिके भगवान्—
" पादाभ्यंगांबुपानैस्तु योऽतिथिं पूजयेन्नरः । पूजितस्तेन राजेंद्र भवामीह न संशयः ।
"क्षुत्पिपासागदार्ताय देशकालागताय च । सत्कृत्यान्नं प्रदातव्यं यज्ञस्य फलमिच्छता"॥ इति ।
ऐश्वर्योपेतस्य गृहे समागतस्याप्यातिथ्यं कर्तव्यमभ्युदयकामिनेत्याह **पराशरः**—
" यस्य छत्रं हयश्चैव कुंजरारोहमृद्धिमत् । ऐंद्रं स्थानमुपासीत तस्मात्तं न विचारयेत्" ॥इति ।
यस्य छत्रहयौ विद्येते तस्यातिथ्यं कुर्वन्नैंद्रं पदमवाप्नुयात् । कुंजरस्यारोहो यस्मिन्नैंद्रपदे तत्कुंजरारोहं ऋद्धिरमृतपानाप्सरःसेवादिरस्मिन्नस्तीति ऋद्धिमत् । छत्रादिमन्तं जातिकुलाचारैर्हीनमपि न विचारयेत् । पूज्योऽयं न वेति न संदिह्यात्किंत्वीश्वरबुध्या पूजयेत् ।
अत एवाह भगवान् (अ. १०।४१)—
" यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा । तत्तदेवावगच्छ त्वं मम तेजोंशसंभवम् " ॥ इति

---

१ **क्ष**–सत्कार ।

याज्ञवल्क्यः (आ. १०९)—

" महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत् । सत्क्रियान्वासनं स्वादु भोजनं सूनृतं वचः" ॥

अत्र **विज्ञानेश्वरः** (पृ. ३१ पं. १४)—"महांतमुक्षाणं धौरेयं महाजं वा श्रोत्रियायोपकल्पयेत्। भवदर्थमस्माभिः परिकल्पितमिति तत्प्रीत्यर्थं न तु दानाय व्यापादनाय वा प्रतिश्रोत्रियमुक्षासंभवात्तस्मात्सत्क्रियाद्येव कर्तव्यमिति " । मधुपर्कार्हानाहापस्तंबः (२।४।८।५–९)— "गोमधुपर्कार्हो वेदाध्याय आचार्यऋत्विक्स्नातको राजा वा धर्मयुक्तः आचार्यायर्त्विजे श्वसुराय राज्ञ इति परिसंवत्सरादुपतिष्ठभ्द्यो गौर्मधुपर्कश्च । दधिमधुसंसृष्टं मधुपर्कः पयो वा मधुसंसृष्टमभाव उदकम् " इति। सांगस्य वेदस्याध्येता वेदाध्यायः । सोऽतिथिर्मधुपर्कमर्हति । गां च दक्षिणाम् । धर्मयुक्त इति राज्ञो विशेषणम्। वाशब्दः समुच्चये। परिसंवत्सरात् संवत्सरं वर्जयित्वा तदुपर्यागतेभ्यो मधुपर्को गौर्दक्षिणेत्यर्थः । **गौतमोऽपि** (५।२५-२९)—" ऋत्विगाचार्यश्वशुरपितृव्यमातुलानामुपस्थाने मधुपर्कः संवत्सरे पुनर्यज्ञविवाहयोर्वार्ग्राज्ञः श्रोत्रियस्याश्रोत्रियस्यासनोदके "॥ इति ।

मनुरपि (३।११९–१२०)—

" राजर्त्विक्स्नातकगुरून् प्रियश्वशुरमातुलान् । अर्हयेन्मधुपर्केण परिसंवत्सरागतान् ॥

"राजा च श्रोत्रियश्चैव यज्ञकर्मण्युपस्थितौ । मधुपर्केण संपूज्यौ न त्वन्यत इति स्थितिः"॥ इति।

उपस्थितौ संवत्सरादर्वागप्यागतौ । अन्यतः अन्यदा स्थितिः सिद्धान्त इत्यर्थः ।

याज्ञवल्क्यश्च (आ. ११०)—

" प्रतिसंवत्सरं त्वर्घ्याः स्नातकाचार्यपार्थिवाः । प्रियो विवाह्यश्च तथा यज्ञं प्रत्यर्त्विजः पुनः" ॥इति।

अर्घ्याः मधुपर्केण संपूज्या इत्यर्थः । आतिथिं प्रत्याह **मनुः** (३।१०९)—

" न भोजनार्थं स्वे विप्रः कुलगोत्रे निवेदयेत् । भोजनार्थं हि ते शंसन्वांताशीत्युच्यते बुधैः"॥ इति ।

विप्रः आतिथिभूतः । वांताशी उद्गीर्णाशी । स हि कुलगोत्रे उद्गीर्यान्नरूपेणाश्नातीत्यर्थः ।

याज्ञवल्क्यः (आ. ११२)—

" परपाकरुचिर्न स्यादनिंद्यामंत्रणाद्दते । वाक्पाणिपादचापल्यं वर्जयेच्चातिभोजनम् " ॥ इति।

अनिन्द्यामंत्रणं "विना अनिंद्येनामंत्रितो नातिक्रामेदिति " **स्मरणात्** । अतिथिरूपेण परपाकभोजनप्रसक्तिप्रतिषेधार्थनिंदार्थवादमाह **मनुः** (३।१०४)—

" उपासते ये गृहस्थाः परपाकमबुद्धयः । तेन ते प्रेत्य पशुतां व्रजंत्यन्नाद्यदायिनाम् "॥ इति।

परपाकः परेषां पक्वान्नं तेन परपाकोपासनेन ।

याज्ञवल्क्यः (आ. ११३)— " अतिथिं श्रोत्रियं तृप्तं आसीमांतमनुव्रजेत् " ॥ इति । मुख्यकल्पाभावेऽनुकल्पमाहापस्तंबः (२।२।४–१४)—"अभावे भूमिरुदकं तृणानि कल्याणी वागित्येतानि वै सतोऽगारे न क्षीयंते कदाचनेति "। **मनुरपि** (३।१०१)—

"तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता । एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन"॥ इति।

तृणान्यासनाभावे । भूमिः शय्याभावे । उदकं पादाभ्यञ्जनाभावे । सूनृता कल्याणी वाक् अन्नाभावे इत्यर्थः । आतिथिसत्कारं प्रशंसति **व्यासः**—

" सुक्षेत्रे वापयेद्बीजं सुपात्रे निक्षिपेद्धनम् । सुक्षेत्र इव सत्पात्रे दत्तमन्नं न नश्यति " ॥ इति ।

शातातपः—

" स्वाध्यायेनाग्निहोत्रेण यज्ञेन तपसा तथा । नावाप्नोति गृही लोकान्यथा त्वातिथिपूजनात् " ॥

अकरणे प्रत्यवायमाह **स एव**—

" अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते । तस्मात्सुकृतमादाय दुष्कृतं तु प्रयच्छति " ॥

विष्णुरपि (६७।३३)—

" अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते । पितरस्तस्य नाश्नंति दशवर्षाणि पंच च ॥
" काष्ठभारसहस्रेण घृतकुंभशतेन च । अतिथिर्यस्य भग्नाशस्तस्य होमो निरर्थकः "॥ इति ।

मनुरपि (३।१००)—

" सिलानप्युंछतो नित्यं पंचाग्नीनपि जुव्हतः । सर्वं सुकृतमादत्ते ब्राह्मणोऽनर्चितो व्रजन् " ॥

आश्वमेधिके—

" सांगोपांगांस्तथा वेदान् पठतीह दिने दिने । न चातिथिं पूजयति वृथा स पठति द्विजः ॥
" पाकयज्ञैर्महायज्ञैः सोमसंस्थाभिरेव च । ये यजंति न चार्चंति गृहेष्वतिथिमागतम् ॥
" तेषां यशोऽभिकामानां दत्तमिष्टं च यद्भवेत् । वृथा भवति तत्सर्वमाशया हतया हतम् " ॥

विष्णुः—

" वैश्वदेवांतिके प्राप्तमतिथिं यो न पूजयेत् । स चांडालत्वमाप्नोति सद्य एव न संशयः ॥
" निर्वासयति यो विप्रं देशकालातिथिं गृहात् । पतितस्तत्क्षणादेव जायते नात्र संशयः"॥ इति ।

व्यासः—

" अतिथिं पूजयेद्यस्तु श्रांतं चादृष्टमागतम् । सवृषं गोशतं तेन दत्तं स्यादिति मे मतिः ॥
" पथि श्रांतमविज्ञातमतिथिं क्षुत्पिपासितम् । यो न पूजयते भक्त्या तमाहुर्ब्रह्मघातकम् ॥
" अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिर्वतते । स दत्वा दुष्कृतं तस्य पुण्यमादाय गच्छति"॥ इति ।

आनुशासनिके—

" गृहानाश्रयमाणस्य अग्निहोत्रं च जुव्हतः । सर्वं सुकृतमादत्ते यः सायं नार्चितोऽतिथिः"॥ इति ।

आपस्तंबः (२।३।७।१-३)—" स एष प्राजापत्यः कुटुंबिनो यज्ञो नित्यप्रततो योऽतिथीनामग्निः स आहवनीयो यः कुटुंबे स गार्हपत्यो यस्मिन्पच्यते सोऽन्वाहार्हपचन ऊर्जं पुष्टिं प्रजां पशून् इष्टापूर्तमिति गृहाणामश्नाति यः पूर्वोतिथेरश्नाति " इति ।

श्रुतिरपि (तै. आ. भृगूपनिषदि ९।१।१०)—" न कंचन वसतौ प्रत्याचक्षीत । तद्व्रतम् । तस्माद्यया च कया च विधया बव्हन्नं प्राप्नुयात् । अराध्यस्मा अन्नमित्याचक्षते " इति । वसत्यर्थमागतं न निवारयेत् । वासे चान्नं दातव्यम् । तस्माद्येनकेन च प्रकारेण बव्हन्नसंग्रहं कुर्यात् । यस्मादन्नवंतो गृहिणोऽभ्यागतायतिथये अराधि संसिद्धमस्मै अन्नमित्याचक्षत इत्यर्थः ।

व्यासः—

" वेदाभ्यासोऽन्वहं शक्त्या महायज्ञक्रिया क्षमा । नाशयंत्याशु पापानि देवानामर्चनं तथा ॥
"तस्मात्सर्वप्रयत्नेन कृत्वा कर्माणि वै द्विजः । भुंजीत स्वजनैः सार्धं स याति परमां गतिम् "॥ इति ।

इति मनुष्ययज्ञः । इति **पञ्चमहायज्ञाः** ॥ अथ **भोजनं निरूप्यते** । तत्र **व्यासः**

" यज्ञोपवीती भुंजीत सुगंधालंकृतः शुचिः । सायं प्रातर्नांतरा वै संध्यायां तु विशेषतः ॥
" नायज्ञशिष्टमश्नीयान्न क्रुद्धो नान्यमानसः " ॥ इति ।

धर्मोऽद्योते—
" अस्नाताशी मलं भुंक्ते अजपः पूयशोणितम् । अहुताशी कृमिं भुंक्ते अदाता विषमश्नुते ॥
" एकः संपन्नमश्नाति वस्ते वासश्च शोभनम् । योऽसंविभज्य भृत्यानां को नृशंसतरस्ततः ॥
" पितृदैवतभृत्यानां मातापित्रोर्गुरोस्तथा । विघसं वाग्यतोऽश्नीयादेवं धर्मो न हीयते " ॥
अपरार्के—
" आचार्यो ब्रह्मलोकेशो देवलोकस्य चर्त्विजः । जामयोऽप्सरसां लोके वैश्वदेवस्य बांधवाः ॥
"संबंधिनः स्वर्लोकस्य पृथिव्या मातृमातुलौ । आकाशेशास्तु विज्ञेया बालवृद्धकृशातुराः" ॥
मनुः (४।६२)—" सायंप्रातर्द्विजातीनामशनं श्रुतिचोदितम् ।
" नांतरा भोजनं कुर्यादग्निहोत्रसमो विधिः । नातिप्रगे नातिसायं न सायंप्रातराशितः " इति ।
अतिप्रगे अपरात्रे । अतिसायमर्धरात्रे । न सायंप्रातराशितः । रात्रावहनि वाऽद्विर्न भुंजीतेत्यर्थः ।
श्रुतिरपि (तै. सं. १।४।९)—" तस्मात् द्विरन्हो मनुष्येभ्य उपह्रियते " इति ।
हारीतोऽपि— " कृतहोमस्तु भुंजीत सायंप्रातरुदारधीः " ॥ **गौतमः** (९।५९)—" सायंप्रातस्त्वन्नमभिपूजितमनिंदन् भुंजीत" ॥ इति । **आपस्तंबोऽपि** (२।१।१।२)—" कालयोर्भोजनमन्यत्र प्रायश्चित्तात् "॥ इति । अत्र **हरदत्तः**—"परिसंख्येयं भोजनस्य रागप्राप्तत्वात् अन्ये तु नियमं मन्यंते । शक्तौ सत्यां कालयोर्भोजनमवश्यं कर्तव्यम् । प्राणाग्निहोत्रस्यालोपाय" ॥ इति ।
तथा च **बोधायनः** (२।७।२४)—
" गृहस्थो ब्रह्मचारी वाऽयोनश्नंस्तु तपश्चरेत् । प्राणाग्निहोत्रलोपेन अवकीर्णी भवेत्तु सः " ॥
अन्यत्र प्रायश्चित्तान्प्रायश्चित्ते तु तदेव विधानम् । अथाप्युदाहरंति—
" अंतरा प्रातराशं च सायमाशं तथैव च । सदोपवासी भवति यो न भुंक्ते कदाचन" ॥ इति ।
" प्राणाग्निहोत्रमंत्रांस्तु निषिद्धे भोजने जपेत् । त्रेताग्निहोत्रमंत्रांस्तु द्रव्यालाभे यथा जपेत् ॥
" इत्येवमाचरन्यस्तु ब्रह्मभूयाय कल्पते " ॥ इति ।
व्यासः—
" सायंप्रातर्मनुष्यानां अशनं वेदनिर्मितम् । नांतरा भोजनं कुर्यादुपवासविधिर्हि सः ॥
" न संध्ययोर्न प्रभाते नार्धरात्रे कदाचन " ॥ इति ।
शंखः—
" उपलिप्ते शुचौ देशे पादौ प्रक्षाल्य वै करौ । आचम्यार्द्राननोऽक्रोधः पंचार्द्रो भोजनं चरेत्" ॥
व्यासोऽपि—
"पंचार्द्रो भोजनं कुर्यात्प्राङ्मुखो मौनमास्थितः।हस्तौ पादौ तथा चास्यमेषु पंचार्द्रता मता"॥ इति ।
देवलः—
" पादौ प्रक्षाल्य हस्तौ च द्विराचम्य च वाग्यतः । प्राङ्मुखोऽन्नानि भुंजीत शुचिः पीठमधिष्ठितः"॥
मनुः (४।७६)—
" आर्द्रपादस्तु भुंजीत नार्द्रपादस्तु संविशेत् । पंचार्द्रो भोजनं कुर्वन् मुच्यते सर्वकिल्बिषैः" ॥
विष्णुपुराणे (३।११।७३, ७५–७६)—" प्रशस्तरत्नपाणिस्तु भुंजीत प्रयतो गृही ।
" पुण्यगंधधरः शस्तमाल्यधारी नरेश्वर । नैकवस्त्रधरोऽथार्द्रपाणिपादो नरेश्वर ।
" विशुद्धवदनः प्रीतो भुंजीत न विदिङ्मुखः " ॥ इति ।

---

१ खगघ-विप्रो ।

देवलः—
" सम्यक् कृतोपलेपस्तु बहिराचम्य वाग्यतः। प्राङ्मुखोऽन्नं समश्नीयात्सम्यग्विधृतभाजनः॥
" यस्तु भोजनशालायां भोक्तुकाम उपस्पृशेत्। आसनस्थो न चान्यत्र स विप्रः पंक्तिदूषकः"॥
स्मृतिरत्नावल्याम्—
" भोक्तुकामे यदा विप्रे ह्याचांते त्वासनास्थिते। अभिवादं करोत्यन्य आचामेत्स पुनस्ततः"॥
आपस्तंबः (१।५।१६।९)—" भोक्ष्यमाणस्तु प्रयतोऽपि द्विराचमेत्"॥ इति। **संवर्तः—**
" आचम्यैव तु भुंजीत भुक्त्वा चोपस्पृशेद्पः। अनाचांतस्तु योऽश्नीयात् प्रायश्चित्तीयते हि सः॥
" अनाचांतः पिबेद्यस्तु अपि वा भक्षयेत् द्विजः। गायत्र्यष्टसहस्रं तु जपं कृत्वा विशुध्यति"॥ इति।
बोधायनः—" उपलिप्ते समस्थाने[1] शुचौ श्लक्ष्णासनान्विते।
" चतुरश्रं त्रिकोणं च वर्तुलं चार्धचंद्रकम्। कर्तव्यमानुपूर्वेण ब्राह्मणादिषु मंडलम्"॥
शंखः—" आदित्या वसवो रुद्रा ब्रह्मा चैव पितामहः। मंडलान्युपजीवंति तस्मात्कुर्वीत मंडलम्"॥
वृद्धात्रेयः—
" यातुधानाः पिशाचाश्च असुराश्चाथ राक्षसाः। घ्नंति वै बलमन्नस्य मंडलेन विवर्जितम्॥
" ब्रह्मा विष्णुश्च रुद्रश्च श्रीर्हुताशन एव च। मंडलान्युपजीवंति तस्मात्कुर्वीत मंडलम्॥
" उपलिप्ते शुचौ देशे निच्छिद्रं चतुरश्रकम्। गोमयं मंडलं कृत्वा भोक्तव्यमिति निश्चितम्॥
" पात्रावस्थानतो न्यूनमधिकं वा न कारयेत्"॥ **पितामहः—**
" चतुरश्रं ब्राह्मणस्य त्रिकोणं क्षत्रियस्य तु। वर्तुलं चैव वैश्यस्य शूद्रस्याभ्युक्षणं स्मृतम्"॥
बोधायनः—
"मंत्रेणैव द्विराचम्य गोमयेनोपलेपिते। भस्मना वारिणा वाऽपि मंडलं कारयेत्ततः"॥ इति
मन्त्रः प्रणव इति **स्मृतिरत्ने**। **आश्वमेधिके**—"स्नातः शुचिः शुचौ देशे निर्जने हुतपावकः॥
" मंडलं कारयित्वाऽथ चतुरश्रं द्विजोत्तमः। क्षत्रियश्चेत्ततो वृत्तं वैश्योऽर्धेन्दुसमाकृति॥
"आर्द्रपादस्तु भुंजीयात्प्राङ्मुखः स्वासने शुचौ। पादाभ्यां धरणीं स्पृष्ट्वा पादेनैकेन वा पुनः"॥ इति।
अत्रिः—"भूम्यां पादौ प्रतिष्ठाप्य यो भुंक्ते वाग्यतः शुचिः। भोजने भोजने विप्रास्त्रिरात्रफलमश्नुते॥
" आसनारूढपादास्तु ब्राह्मणा यत्तु भुंजते। मुखेन धमितं[2] चान्नं तुल्यं गोमांसभक्षणे"॥
चंद्रिकायां (पृ. २२१ पं. १८)—
" गुप्ते चैव प्रदेशे तु प्राङ्मुखो वाऽप्युदङ्मुखः। सुखासने समासीनः पादौ कृत्वा महीतले"॥
शांडिल्यः—
" भुवं स्पृष्ट्वा तु पादाभ्यां पात्रं सव्येन पाणिना। इज्याप्रदेशाभिमुखः समश्नीयात्प्रसन्नधीः॥
" आहारं तु रहः कुर्यात् विहारं चैव सर्वदा। गुप्ताभ्यां लक्ष्म्युपेतः स्यात्प्रकाशे हीयते श्रिया"॥
भारते—" महाशनानामेकांते भोजनं हि सुखायते"॥ **व्यासः—**
"प्राङ्मुखोऽन्नानि भुंजीत सूर्याभिमुख एव वा। आसीनस्त्वासने शुद्धे भूम्यां पादौ निधाय च"॥ इति।
गोभिलः—
" प्राङ्मुखावस्थितो विप्रः प्रतीच्यां वा यथा सुखम्। उत्तरं पितृकार्ये च दक्षिणं तु विवर्जयेत्॥

---

१ ख-शुचिस्थाने समे। २ ख-मते।

आपस्तंबः (१।११।३१।१)—“ प्राङ्मुखोऽन्नानि भुंजीत ” इति । **मनुः** (२।५२)—
“आयुष्यं प्राङ्मुखो भुंक्ते यशस्यं दक्षिणामुखः । श्रियः प्रत्यङ्मुखो भुंक्ते ऋतं भुंक्ते उदङ्मुखः” ॥ इति ।
एतत्काम्यविषयम् । वर्ज्यासनमाह **प्रचेताः**—
“ गोशकृन्मृन्मयं भिन्नं तथा पालाशमेव च । लोहबद्धं सदैवार्कं वर्जयेदासनं बुधः ” ॥
कौशिकः—
“ भिन्नासनं योगपदं तथैव मृगचर्म च । कृष्णाजिनं च यत्नेन वर्जयेत्पुत्रवान् सदा” ॥ इति ।
आपस्तंबः—
“ यत्नेन धारयेद्विप्रः पवित्रं दक्षिणे करे । भुंजानस्तु विशेषेण चान्नदोषैर्न लिप्यते ” ॥
बोधायनः (२।३।६०)—
“ भोजनं हवनं दानमुपहारः प्रतिग्रहः । न बहिर्जानु कार्याणि तद्वदाचमनं स्मृतम् ” ॥ इति ।
व्यासः-“स्वयं प्रक्षाल्य पात्राणि दत्तमन्नं तु भार्यया । भोक्तव्यं सघृतं सोष्णं हितं पथ्यं मितं तथा”॥
विष्णुपुराणे (३।११।७७)—
“ अन्नं प्रशस्तं पथ्यं च प्रोक्षितं प्रोक्षणोदकैः । न कुत्सिताहृतं नैवं जुगुप्सितमसंस्कृतम् ” ॥
भोजनपात्राण्याह **याज्ञवल्क्यः**—
“ अमत्रं वाथ कांस्यं वा राजतं वा हिरण्मयम् । तानि पात्राणि सर्वेषां यथाविभवमाचरेत् ” ॥
पैठीनसिः—“ प्रशस्तशुद्धपात्रेषु भुंजीताकुपितो द्विजः ।
“ सौवर्णे राजते ताम्रे पद्मपत्रपलाशयोः । भोजनेऽभोजने चैव त्रिरात्रफलमश्नुते ॥
“ एक एव तु यो भुंक्ते विमले कांस्यभाजने । चत्वारि तस्य वर्धंते ह्यायुः प्रज्ञा यशो बलम्” ॥
पद्मपत्रपलाशपत्रभोजनं गृहिव्यतिरिक्तविषयम् ।
“ पलाशपद्मपत्रेषु गृही भुक्त्वैन्दवं चरेत् । ब्रह्मचारियतीनां तु चांद्रायणफलं भवेत् ” ॥ इति
व्यासस्मरणात् **रत्नावल्यां** तु—
“ वल्लीपलाशपत्रेषु स्थलजे पौष्करे तथा । गृहस्थश्चेत्समश्नीयाच्छुध्द्यै चांद्रायणं चरेत् ” ॥
स्मृतिरत्ने तु—
“ कदलीगर्भपत्रे च पद्मपत्रे जलास्पृशि । वल्लीपलाशपत्रे च भुक्त्वा चांद्रायणं चरेत्”॥ इति ।
“ पालाशेषु तु पत्रेषु मध्यमेषु तु भारते । यस्तु भुंक्ते स लभते प्राजापत्य दिनेदिने ” ॥
इति **भारतवचनं**
“ य इच्छत्यूर्ध्वगामित्वं परं स्थानं च शाश्वतम् । पद्मपत्रेषु भोक्तव्यं मासमेकं निरंतरम्”॥ इति
पैठीनसीवचनं च यतिब्रह्मचारिविषयम् । काम्यविषयमिति **स्मृतिरत्ने** । **स्मृतिचिंतामणौ**—
“ एक एव तु भुंजीत विमले कांस्यभाजने । पलाद्विंशतिकादर्वागत उर्ध्वं यथेच्छया ” ॥ इति ।
कांस्यपात्रं गृहस्थैकविषयम् । यत्यादीनां निषेधात् । तदाह **प्रचेताः**—
“तांबूलाभ्यञ्जने चैव कांस्यपात्रे च भोजनम् । यतिश्च ब्रह्मचारी च विधवा च विवर्जयेत्”॥इति
अपरार्के—
“कांसिकस्य तु यत्पापं गृहस्थस्य तथैव च । कांसिभोजी यतिः सर्वं प्राप्नुयात्किल्बिषं ततः ”॥

१ **ख**–हवनं; **गघ**–भजनं । २ **गघक्ष**–चैव ।

संवर्त्तः—

"शूद्राणां भाजने भुक्त्वा भुक्त्वा वा भिन्नभाजने। अहोरात्रोषितो भूत्वा घृतं प्राश्य विशुध्यति"॥

मनुः (४।६५)—

" न पादौ धावयेत्कांस्ये कदाचिदपि भाजने। न भिन्नपात्रे भुंजीत न भावप्रतिदूषिते "॥

पैठीनसिः—

" सौवर्णे राजतं वाऽपि शूद्रपात्रं न तु स्पृशेत्। इतरेषां तु शुद्धिः स्यात्तापघर्षणतस्तथा॥

"ब्रह्मपत्रे तु यो भुंक्ते मासमेकं निरंतरम्। त्रिभिश्चांद्रायणैस्तुल्यं महापातकनाशनम् "॥

ब्रह्मपत्रं पिशाचौदुम्बरपत्रम्। द्रविडभाषायां पेयत्ति।

" पनसाग्रे नालिकेरकदलीबिल्वपात्रके। उहीने काञ्चिपत्रे च चांद्रायणफलं भवेत् "॥

मनुः—

" वटार्काश्वत्थपत्रेषु कुंभीतिंदुकपत्रयोः। कोविदारकरंजेषु भुक्त्वा चांद्रायणं चरेत्"॥

व्यासः—

" करे कर्पटके चैव ह्यायसे ताम्रभाजने। वटार्काश्वत्थपत्रेषु भुक्त्वा चांद्रायणं चरेत्"॥

शांडिल्यः—

" नातिदोषावहं कांस्यं भोजनेऽश्वत्थमेव च। कुटुंबिनामकामानामपीच्छन्तीह केचन "॥ इति।

प्रचेताः—

" मृन्मये पर्णपृष्ठे वा कार्पासे तान्तवेऽश्मनि। नाश्नीयान्न पिबेच्चैव न करेण तथांजलौ "॥

कार्पासे पत्रे तांतवे वस्त्रे। **संग्रहे—**

" करे कर्पटके चैव शिलायां च प्रमादतः। औदुंबरे पालाशे च भुक्त्वा चांद्रायणं चरेत्"॥ इति।

हारीतः—" न कार्ष्णायसे मृन्मये वा पात्रेऽश्नीयान्न भिन्नपात्रे न भूमौ ताम्ररजतसुवर्णशंखशुक्तिस्फटिकानां भिन्नेऽभिन्ने वा न दोषः "॥ इति।

ताम्रपात्रभोजनं ब्रह्मचारिविधवाविषयमिति **स्मृतिरत्ने—**

आपस्तंबः विशेषमाह (२।८।१९।३–४)—औदुंबरश्चमसः सुवर्णनाभः प्रशस्तो न चान्येन भोक्तव्यः" इति। औदुंबरस्ताम्रमयश्चमसः। भोजनपात्रं सुवर्णनाभः स्वर्णेन मध्येऽलंकृतः। एक एव तत्र भुंजीतेत्यर्थः। तच्च पात्रं भूमौ स्थापनीयम्॥

तदाह **व्यासः**—"पंचार्द्रो भोजनं कुर्याद्भूमौ पात्रं निधाय च। उपवासेन तत्तुल्यं मनुराह प्रजापतिः॥

"भूमौ पात्रं प्रतिष्ठाप्य यो भुंक्ते वाग्यतः शुचिः। भोजने भोजने चैव त्रिरात्रफलमश्नुते "॥

तच्च स्थापनं प्राणाहुतिपर्यंतं पश्चात्तु यंत्रिकामारोप्य भोक्तव्यम्। तदाह **व्यासः**—

" न्यस्तपात्रे तु भुंजीत पंचग्रासान् महामुने। शेषमुद्धृत्य भोक्तव्यं श्रूयतामत्र कारणम्॥

" विप्रुषां दोषसंस्पर्शः पादचेलरजस्तथा। सुखेन भुंक्ते विप्रोऽपि पित्रर्थं तु न लुप्यते "॥ इति।

पैतृकभोजने भूमिपात्रप्रतिष्ठापनं न लोपनीयमित्यर्थः।

स्मृतिरत्ने—" प्राणाहुत्यूर्ध्वमुद्धृत्य पात्रं यंत्रे विनिक्षिपेत्॥

एतत्सर्वं संगृह्योक्तं **स्मृत्यर्थसारे—**" पादौ प्रक्षाल्य द्विराचम्य प्राङ्मुख उदङ्मुखो वा यज्ञोपवीती सोत्तरवासाः विभवे सति रत्नहिरण्यपाणिर्गंधाक्षतमाल्यान्वितः प्रशस्तश्लक्ष्णचतुष्पात्पीठे सुखासीनो भूमौ पादौ पादं वा प्रतिष्ठाप्यान्तर्जानुकरो वाग्यतस्तच्चित्तः चतुरश्र-

गोमयमंडले ब्रह्मग्रंथिरहितपवित्रदक्षिणपाणिः प्रक्षाल्य तत्पात्रं भूमौ निधाय प्राणाहुत्यनंतरं यंत्रिकादौ पात्रं निधाय पंचयज्ञावशिष्टं संस्कृतं मितं घृताद्युपस्कृतं मातृभार्यादिदत्तमतिथ्यभ्यागतपुत्रभृत्यादिपरिवृत एकांते भुंजीत " ॥ इति ।

बोधायनोऽपि (२।७।२-४,६)—" सर्वावश्यकावसाने प्रक्षालितपाणिपादोऽप आचम्य सुसंमृष्टोपलिप्ते शुचौ संवृते देशे प्राङ्मुख उपविश्योद्धृतमाह्रियमाणं भूर्भुवःसुरोमित्युपस्थाय वाचं यच्छेत् । न्यस्तमन्नं महाव्याहृतिभिः प्रदक्षिणमुदकं परिषिच्य सव्येन पाणिना अविमुंचन्नमृतोपस्तरणमसीति पुरस्तादपः पीत्वा पंचान्नेन प्राणाहुतीर्जुहोति " प्राणे निविष्टोऽमृतं जुहोमि शिवो माऽविशाप्रदाहाय प्राणाय स्वाहा " ॥ इति । पंचभिः पर्यायैर्हुत्वा तूष्णीं भूयो वृतयेत् प्रजापतिं मनसा ध्यायन् नान्तरा वाचं विसृजेद्यदि विसृजेत् । भूर्भुवःसुवरोमिति जपित्वा पुनरेव भुंजीत अथाप्युदाहरन्ति ।

'आसीनः प्राङ्मुखोऽश्नीयाद्वाग्यतोऽन्नमकुत्सयन्।अस्कंदयंस्तन्मनाश्च भुक्त्वाऽन्नं समुपस्पृशेत्'॥इति।

सुमंतुः—

" अन्नं निधाप्य दर्व्या तु न हस्तेन कदाचन । पूजयित्वा तदन्नं चापोशनं तु समंत्रकम् " ॥

व्यासः—

" अन्नं दृष्ट्वा प्रणम्यादौ प्रांजलिः कथयेत्ततः। अस्माकं नित्यमस्त्वेतादिति भक्त्याऽथ वंदयेत्" ॥

मनुः (२।५४-५५)—" पूजयेदशनं नित्यमद्याच्चैतदकुत्सयन् ।

" पूजितं ह्यशनं नित्यं बलमूर्जं प्रयच्छाति। अपूजितं तु यद्भुक्तमुभयं तु हिनस्ति तत् " ॥

भारतेऽपि—

" अन्नं पूर्वं नमस्कुर्यात्प्रहृष्टेतान्तरात्मना । नान्यदालोकयेदन्नं न जुगुप्सेत तत्परः "॥ इति ।

माधवीये—

" ततो महाव्याहृतिभिः पात्रं तत्परिषिच्य च । ऋतेन सायं सत्येन प्रातश्च परिषेचयेत् ॥

" सोदकं दक्षिणं पाणिं कुर्यादन्नं प्रदक्षिणम् । अपेयं तद्भवेत्तोयं पीत्वा चांद्रायणं चरेत् " ॥

परिषेचनावशिष्टं जलमपेयमित्यर्थः । **आश्वमेधिकेऽपि**—

" पाणिना जलमुद्धृत्य कुर्यादन्नं प्रदक्षिणम् । अपेयं तद्विजानीयात्पीत्वा चांद्रायणं चरेत् ॥

"परिषेकजलादन्यत्पेयमेतत्तु मंत्रवत्"।**गोभिलः** (   )—"व्याहृतीभिर्गायत्र्या अभिमंत्र्य ऋतं त्वा सत्येन परिषिंचामीति सायं सत्यं त्वर्त्तेन परिषिंचामीति प्रातः परिषिंचति"। **संग्रहे**—

" आपोशनमकृत्वा तु यदन्नं विस्तृतं भवेत् । तदन्नं मांसतुल्यं स्याद्भुक्त्वा चांद्रायणं चरेत् ॥

" अकृत्वा परिषेकं च यस्त्वन्नं परिमर्दयेत् । अभोज्यं तद्भवेदन्नं भुक्त्वा चांद्रायणं चरेत् ॥

" परिषेचनतः पश्चात्पूर्वं प्राणाहुतेस्तथा । पुनरन्नं न गृह्णीयादिति वेदविदो विदुः " ॥ इति ।

परिषेचनानन्तरभावी विशेषो **भविष्यपुराणे** दर्शितः—

" भोजनात्किंचिदन्नाग्रधर्मराजाय वै बलिम् । दत्वाऽथ चित्रगुप्ताय प्रेतेभ्यश्चेदमुच्चरेत् " ॥

मंत्रः "यत्रक्वचनसंस्थानां क्षुत्तृष्णोपहतात्मनाम्। प्रेतानां तृप्तयेऽक्षय्यमिदमस्तु यथासुखम्"॥इति।

हारीतस्तु—

" अन्नपतये नमः । भुवनपतये नमः । भूतानां पतये नमः । इति बलित्रयं भूमौ दद्यात् " इति ।

स्मृत्यर्थसारे— गायत्र्यान्नमभ्युक्ष्य ॐभूरित्यादि दशहोत्रा चाभिमंत्र्य धर्माय नमः । चित्रगुप्ताय नमः । सर्वभूतेभ्यो नम इति च भूमौ बलिं दद्यात् ”॥ इति ।

पराशरः—“ ततः प्रक्षाल्य हस्तं च ध्यात्वा चान्नाधिदैवतम् ।
“समंत्राचमनं कृत्वा प्राणाद्याहुतिपंचकम् । दशनस्पृष्टिरहितं कृत्वा भुंजीत वाग्यतः”॥ इति ।

गोभिलः—

“ अंतश्चरसि भूतेषु गुहायं विश्वतो मुखः । त्वं यज्ञस्त्वं हि विष्णुस्त्वं हि वषट्कार आपोज्यातीरसोमृतं त्वं ब्रह्मत्वं प्रजापतिर्ब्रह्म भूर्भुवः सुवरोममृतोऽस्तरणमसि ” इत्यपः पीत्वा दशहोतारं मनसाऽनुद्रुत्यात्वरन्पंच ग्रासान्गृह्णीयात् । प्राणाय स्वाहेति गार्हपत्यमेव तेन जुहोति । अपानाय स्वाहेत्यन्वाहार्यपचनमेव तेन जुहोति । व्यानाय स्वाहेत्याहवनीयमेव तेन जुहोति । उदानाय स्वाहेति सभ्यमेव तेन जुहोति । समानाय स्वाहेत्यावसथ्यमेव तेन जुहोति ” इति ।

एते मंत्राः प्रणवाद्याः कर्तव्याः । तथा च **शौनकः**—

“स्वाहांताः प्रणवाद्याश्च नाम्ना मंत्रास्तु वायवः । जिव्हयैव ग्रसेदन्नं दशनैस्तु न संस्पृशेत्”॥ इति ।

स्मृतिरत्ने—

“ हस्तं प्रक्षालयेच्चैव पश्चात्प्रयतमानसः । धारयेत्सव्यहस्तेन पात्रं तद्वाग्यतो द्विजः ॥
“ अमृतोऽपस्तरणमसीत्यापोशनक्रियां चरेत् । अंगुष्ठस्तर्जनी चैव मध्यमा च तृतीयका ॥
“ तिस्रो द्वे वांगुली चैव प्रशस्ता पात्रधारणे । प्राणाय प्रणवोपेतं प्राणायान्नाहुतिस्ततः ॥
“ अपानाय ततो हुत्वा व्यानाय तदनंतरम् । उदानाय ततः कुर्यात्समानाय तु पंचमीम् ॥
“ विज्ञाय तत्त्वमेतेषां जुहुयादात्मविद् द्विजः ॥
“यथा रसं न जानाति जिव्हाप्राणाहुतौ द्विजः । तथा समाहितः कुर्यात् प्राणाहुतिमतंद्रितः”॥इति।

याज्ञवल्क्यः (आ. १०६)—

“ आपोशनेनोपरिष्टादधस्ताच्चैवं भुंजता । अनग्नममृतं चैव कार्यमन्नं द्विजन्मनः ” ॥

वृद्धशातातपः—

“ आपोशनं परीधानं पूर्वमाच्छादनं परम् । भवत्यन्नमनग्नं हि सोत्तरीयं तथामृतम् ” ॥

स्मृत्यर्थसारे—“आपोशनं वामभागे सुरापानसमं भवेत् । तदेव दक्षिणे भागे सोमपानसमं भवेत्”॥

स्मृतिरत्ने—“आपोशनं तु यः कुर्याद्वामभागे तथैव च । सद्यः पिबेत् सुरापानमित्येतन्मनुरब्रवीत्॥
“ आपोशनं करे कृत्वा कृत्वा पात्रे तिलोदकम् । श्वानमूत्रेण तत्तुल्यं पुनः पूरयते यदि ” ॥

संग्रहे—“गृहीत्वाऽपोशनं हस्ते पात्रे चैव तिलोदकम् । पूरणं चेत्पुनः कुर्यात्सुरापानसमं भवेत् ॥
“ आपोशनं करे कृत्वा पात्रस्थान्नं न लंघयेत् । हस्तेन लंघितं चान्नं भुक्त्वा चांद्रायणं चरेत्॥
“ आपोशनं करे विप्रो य आशीर्वचनं वदेत् । अभोज्यं तद्भवेदन्नं दाता भवति निष्फलः ॥
“ आपोशनं गृहीत्वा तु स्वस्ति कुर्वंति ये द्विजाः । न देवास्तृप्तिमायांति निराशाः पितरो गताः ॥
“ भुंजानोऽभिवदेद्यस्तु तदन्नं परिवर्जयेत् ॥
“ आपोशनं चासनं च तैलाभ्यंगं तथैव च । स्वयंकरकृतं प्रोक्तमायुः श्रीपुत्रहानिदम् ” ॥

वसिष्ठः—“आपोशनं सर्वतीर्थं तेनान्नं तु न लंघयेत् । बाहुना लंघितं चान्नमभोज्यं मनुरब्रवीत्”॥

अत्रिः—“शब्देनापः पयः पीत्वा शब्देन घृतपायसम् । शब्देनापोशनं कृत्वा सुरापानसमं भवेत् ॥
“ आपोशनमकृत्वा तु यस्तु भुंजीत मूढधीः । श्वसूकरसमो भुक्त्वा नरकं प्रतिपद्यते ” ॥

---

१ **खमघ**–यमाय । २ **घ**–दश्नता तथा ।

श्रुतिरत्ने—
" आपोशनमकृत्वा तु यो भुंक्तेऽनापदि द्विजः । भुंजानो यदि वा ब्रूयाद्गायत्र्यष्टशतं जपेत्" ॥
हारीतः—
" पंचप्राणाहुतीः कुर्याच्छुद्धान्नैरभिघारितैः । उच्छिष्टेन घृतं दद्यात् प्राग्घृतेर्लवणान्वितम् " ॥
व्यासः—
" प्राणाग्निहोत्रं शुद्धान्नैर्लवणव्यंजनान्वितैः[1] । कुर्यात् प्राणाहुतीरन्तर्निगिरेन्न तु चर्वयेत् " ॥
स्मृतिसारे—" मध्यमानामिकांगुष्ठैर्गृहीत्वाऽन्नं मितं पुनः ॥
"प्राणाय चेत्यपानाय व्यानाय च यथाक्रमम् । उदानाय समानाय स्वाहेति जुहुयात्क्रमात्"॥
स्मृत्यर्थसारे–" आपोशनं गृहीत्वा सर्वांगुलिभिर्ग्रसन्प्राणायापानाय व्यानायोदानाय समानाय स्वाहेति पंचाहुतीः सघृताः सक्षीरा वा हुत्वा कृत्स्नमन्नं सांगुष्ठं ग्रसेत् " ॥ इति ।
शौनकः[2]—" तर्जनीमध्यमांगुष्ठलग्ना प्राणाहुतिर्भवेत् । मध्यमानामिकांगुष्ठैरपाने जुहुयात्ततः ॥
" कनिष्ठानामिकांगुष्ठैर्व्याने च जुहुयाद्धविः । तर्जनीं तु बहिः कृत्वा उदाने जुहुयात्ततः ॥
" समाने सर्वहस्तेन समुदायाहुतिर्भवेत् " ॥ उदाने स्मृत्यंतरे विशेषो दृश्यते
" कनिष्ठातर्जन्यंगुष्ठैरुदाने जुहुयाद्बुधः " ॥ इति । वाग्यमनमाह मनुः—
"स्नास्यतो वरुणः शक्तिंजुह्वतोऽग्निः श्रियं हरेत्।भुंजतो मृत्युरायुष्यं तस्मान्मौनं त्रिषु स्मृतम्"॥इति।
व्यासः—
"मौनं वाचो निवृत्तिः स्यान्नात्र भाषा न संस्कृतम्।नान्यदेवेरणं विष्णुं सदा ध्यायेच्च कीर्तयेत्॥
" कवले कवले चैव कुर्याद्गोविंदकीर्तनम् । नाशौचं कीर्तने तस्य पवित्रं भगवान हरिः " ॥
" देवताभिधानं चाप्रयतः " इत्यापस्तंबवचनं (१।११।३१।४) देवतान्तरविषयं इत्याहुः ।
तथा स्मृत्यन्तरे—
" देवतान्तरनामानि नाशुचिः परिकीर्तयेत् । नारायणस्य नामानि सदा सर्वत्र कीर्तयेत् ॥ "
अत्रिः—
"मौनव्रतं महाकष्टं हुंकारेणापि नश्यति । तथा सति महान् दोषः तस्मात्तं नियतश्चरेत्" ॥ इति ।
एतच्च काष्ठमौनं पंचग्रासविषयम् । तथा च मनुः—
" अनिंदन्भक्षयेन्नित्यं वाग्यतोऽन्नमकुत्सयन् । पंचग्रासान् महामौनं प्राणाद्याप्यायनं महत् "॥
स्मृत्यर्थसारे—
" आस्ये चान्नस्य निक्षेपो मंत्रैः प्राणादिपंचकैः । तदेव भोजनं ज्ञेयं तत्रैव नियमः स्मृतः ॥
" प्राणाहुतिषु सर्वासु हतास्वेव त्यजेत् गृही । पात्रस्य धारणं मौनं तावात्सिद्धिर्भवेद्भुजेः ॥
" अन्नस्य वा निषेधार्थमुपदंशस्य वा पुनः । धर्मार्थं विसृजेद्वाचं नासद्वाचं कदाचन " ॥
शांडिल्यः—
" नावश्यं भोजने मौनं कुटुंबाश्रमवासिनाम् । वाचोपचारः कर्तव्यो भुंजतां सह भोजने " ॥
स्मृतिरत्नावल्याम्[3]—" प्राणाग्निहोत्रादन्यत्र नासौ मौनं समाचरेत् ॥
"यदि भुंजीत तूष्णीं तु सर्वत्रैव तु भोजने।स पापो भ्रातरं हंति संततिं चाचिराच्छ्रियम्"॥ इति।
एतदेवाभिप्रेत्याह व्यासः—
"मौनी वाऽप्यथवाऽमौनी प्रहृष्टः संयतेंद्रियः।भुंजीत विधिवद्विप्रो न चोच्छिष्टानि चाहरेत्"॥इति।

---

१ गघ–व्यञ्जनोज्झितैः । २ क्ष–गौतमः । ३ ख–स्मृतिरत्ने ।

वामेन पात्रस्पर्शः कर्तव्यः । तत्र **यमः**—

"समुत्थितस्तु यो भुंक्ते यो भुंक्ते मुक्तभाजने । एवं वैवस्वतः प्राह भुक्त्वा सांतपनं चरेत्"॥ इति ।

मुक्तभाजने वामहस्तेनास्पृष्टभाजने इत्यर्थः । **बोधायनोऽपि** (२।७।३)— "सव्येन पाणिना अविमुंचन्नमृतोपस्तरणमसीत्यपः पीत्वा प्राणाहुतीर्जुहोति" ॥ इति । एतच्च प्राणाहुत्यनंतरं वैकल्पिकम् । "प्राणाहुतौ हुतायां वा त्यजेत्पात्रस्य धारणम्" ॥ इति **गोभिलस्मरणात्** । **आपस्तंबोऽपि** (२।८।१९।७–८)—"नापजहीतापजहीत वा" इति । भोजनपात्रं सव्येन पाणिना न विमुंचेत् । प्राणाहुत्यूर्ध्वं मुंचेद्वेत्यर्थः **बोधायनः** । (२।७।१२–१४)—"ब्रह्मणि म आत्माऽमृत्त्वायेत्यक्षरेणात्मानं योजयेत् । सर्वक्रतुयाजिनामात्मयाजी विशिष्यते" इति ॥

चंद्रिकायाम् (पृ. २२३ पं. २१)—

"यथा हि तूलमैषीकमग्नौ प्रोतं प्रदीप्यते । तद्वत्सर्वाणि पापानि दह्यंते ह्यात्मयाजिनः"॥ इति ।

मार्कंडेयः—

"अश्नीयात्तन्मना भूत्वा पूर्वं तु मधुरं रसम् । लवणाम्लौ तथा मध्ये कटुतिक्तादिकं ततः ॥
"प्राक् द्रवं पुरुषोऽश्नीयात् मध्ये तु कठिनाशनम् । अंते पुनर्द्रवाशी तु बलारोग्ये न मुंचति"॥

मनुः (४।३४)—

"न सीदेत्स्नातको विप्रः क्षुधा शक्तः कथंचन । न जीर्णमलवद्वासा भवेच्च विभवे सति" ॥

धर्मोद्योते—

"काले साम्यं लघु स्निग्धमुष्णं क्षिप्रं द्रवोत्तरम् । बुभुक्षुरन्नमश्नीयात् मात्रा तावद्धितागमः ॥
"काले प्राणायते भुक्तं साम्यमन्नं न बाधते । लघु प्रजीर्यते क्षिप्रं स्निग्धोष्णं बलवर्धनम् ॥
"स्निग्[1]धभुक्तं तथा चान्नं धातुसाम्यं करोति हि । मात्राशी सर्वकालं स्यात् मात्रा ह्यग्नेः प्रवर्तिका"॥

भारते—"गुणास्तु षण्मितभुक्तं भजंते आरोग्यमायुः प्रतिभा बलं च ।
"अनाविलं चास्य भवेदपत्यं न चैनमत्याश इति क्षिपंति" ॥

व्यासः—"नाजीर्णे भोजनं कुर्यात्कुर्यान्नातिबुभुक्षितः ।
"आहारकाले संप्राप्ते यो न भुंक्ते बुभुक्षितः । तस्य सीदति कार्याग्निर्निरिन्धन इवानलः ॥
"पात्रेष्वर्थानुरूपेषु पुत्रभृत्यादिभिर्वृतः । सुसंस्कृतं हितमितं भुंजीतान्नमकुत्सयन् ॥
"यवगोधूमशाल्याढ्यं मांसशाकादिसंयुतम् । तिक्ताम्ललवणोपेतं व्यंजनैश्च सुगंधिभिः ॥
"भक्ष्यप्रकारान्विविधान् कंदमूलफलानि च । अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनम् ॥
"अपुण्यं लोकविद्विष्टं तस्मात्तत्परिवर्जयेत् । न निंदेदन्नभक्ष्यांस्तु स्वाद्वस्वादूनकुत्सयन् ॥
"आर्द्रपाणिपदास्यंस्तु प्राङ्मुखो ब्रह्मसूत्रधृक् । द्वात्रिंशद्ग्रासमश्नीयाद्दीर्घमायुर्जजीविषुः"॥

आपस्तंबः (२।४।९।१३)—

"अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनः । द्वात्रिंशतं गृहस्थस्यापरिमितं ब्रह्मचारिणः"॥ इति।

द्वात्रिंशतं प्रथमार्थे द्वितीया । आहिताग्निविषये कालयोर्भोजनमित्ययमपि नियमो नास्तीत्याहुः ।

स एव (२।४।९।१३)—

"आहिताग्निरनड्वांश्च ब्रह्मचारी च ते त्रयः । अश्नंत एव सिध्यंति नैषां सिद्धिरनश्नताम्"॥ इति ।

अनडुद्ग्रहणं दृष्टान्तार्थम् । सिध्यंति स्वकार्यक्षमा भवंतीत्यर्थः । **स एव** (२।८।१९।५-६,९-११)—"यावद्ग्रासं सन्नयन्नस्कंदयन्कृत्स्नं ग्रासं ग्रसीत सहांगुष्ठं न च मुखशब्दं कुर्यात् पाणिं च नावधुनूयात्" इति ।

---

१ खगघ-क्षिप्र ।

यावदेव ग्रसितुं शक्यं तावदेव संनयन् पिंडीकुर्वन् अस्कंदयन् भूमावन्नलेपानपातयन् । सहांगुष्ठमास्ये ग्रासप्रवेशे यथांगुष्ठोऽप्यनुप्रविशति तथा सर्वानेव ग्रासान्ग्रसीतेत्यर्थः ।
स एव (२।८।१९।१६) "सोत्तराच्छदनश्चैव यज्ञोपवीती भुंजीत" इति । उत्तराच्छादनमुपरिवासः । **व्यासः**—
"वक्त्रप्रमाणं पिंडांश्च ग्रसेदेकैकशः पुनः । वक्त्राधिकस्तु यः पिंड आत्मोच्छिष्टः स उच्यते ॥
"पिंडावशिष्टमन्यच्च वक्त्रान्निःसृतमेव च । अभोज्यं तद्विजानीयात् भुक्त्वा चांद्रायणं चरेत् ॥
"सदा चात्यशनं नाद्यान्नातिहीनं च कर्हिचित् । यथान्नेन व्यथा न स्यात्तथा भुंजीत नित्यशः"॥इति ।
अथ भोजननियमाः । तत्र पराशरः (६।६३, ६४)—
"यो वेष्टितशिरा भुंक्ते यो भुंक्ते दक्षिणामुखः । वामपादकरः स्थित्वा तद्वै रक्षांसि भुंजते ॥
"भुंजानश्चैव यो विप्रः पादं हस्तेन संस्पृशेत् । स्वमुच्छिष्टमसौ भुंक्ते यो भुंक्ते मुक्तभाजने ॥
"पादुकास्थो न भुंजीत न पर्यंकस्थितोऽपि वा । श्वानचंडालदृक् चैव भोजनं परिवर्जयेत्" ॥६४॥ इति ।
वसिष्ठः (१२।२०)—"न मुखशब्दं कुर्यात्सर्वाभिरंगुलीभिरश्नीयात्पाणिं च नावधूनुयात्"॥इति ।
व्यासः—
"यस्तु पाणितले भुंक्ते यस्तु फूत्कारसंयुतम् । प्रसृतांगुलिभिर्यश्च तस्य गोमांसवच्च तत् ॥
"हस्त्यश्वरथयानोष्ट्रमास्थितो नैव भक्षयेत् । श्मशानाभ्यंतरस्थो वा देवालयगतोऽपि वा ॥
"शयनस्थो न भुंजीत न पाणिस्थं न चासने । नार्द्रवासा नार्द्रशिरा न चायज्ञोपवीतवान् ॥
"न प्रसारितपादस्तु पादारोपितपाणिमान् । न बाहुसव्यसंस्थश्च न च पर्यंकमास्थितः ॥
"न वेष्टितशिराश्चापि नोत्संगकृतभाजनः । नैकवस्त्रो दुष्टमध्ये सोपानत्कः सपादुकः ॥
"न चर्मोपरिसंस्थश्च चर्मवेष्टितपार्श्ववान् । ग्रासशेषं च नाश्नीयात् पीतशेषं पिबेन्न च ॥
"शाकमूलफलेक्षूणां दंतच्छेदैर्न भक्षयेत् । बहूनां भुंजतां मध्ये न चाश्नीयात् त्वरान्वितः ॥
"वृथा न विकिरेदन्नं नोच्छिष्टः कुत्रचिद्व्रजेत् । यत्त्यक्तं भुवि तच्चान्नं भुक्त्वा चांद्रायणं चरेत्"॥
कूर्मपुराणे (उत्त० १९।१९)—
"यो भुंक्ते वेष्टितशिरा यश्च भुंक्त उदङ्मुखः । सोपानत्कश्च यो भुंक्ते सर्वं विद्यात्तदासुरम्"॥ इति ।
मनुः (४।६२)—
"न कुर्वीत वृथा चेष्टां न वार्यंजलिना पिबेत् । नोत्संगे भक्षयेद्भक्ष्यं न जातु स्यात्कुतूहली" ॥
चंद्रिकायाम् (पृ. २२६ पं. १९)—
"नोच्छिष्टो भक्षयेत्किंचिन्न गच्छन्वा कदाचन । खट्वारूढो न भुंजीत न पाणिस्थं कदाचन ॥
"नास्नातो न च संविष्टो न चैवान्यमना नरः । न चैव शयने नोर्व्यामुपविष्टो न शब्दवत् ॥
"न चैकवस्त्रो न वदन्प्रेक्षतामप्रदाय च । पादप्रसरणं कृत्वा न च वेष्टितमस्तकः" ॥ इति ।
बोधायनः (२।७।७-८)—"सर्वभक्षापूपकंदमूलमांसानि दन्तैर्न वधेन्नातिसुहितः स्यात्" इति ॥
बृहस्पतिः—
"खादितार्धं पुनः खात्वा मोदकादिफलादि च । दंपत्योर्भुक्तशिष्टं च भुक्त्वा चांद्रायणं चरेत् ॥
"न स्पृशेत् वामहस्तेन भुंजानोऽन्नं कदाचन । न पादौ न शिरो बस्तिं न पदा भाजनं स्पृशेत्"॥
याज्ञवल्क्यः (आ. १६५)—"गोब्राह्मणानलान्नानि नोच्छिष्टो न पदा स्पृशेत्" ॥ इति ।
एतानि अशुचिर्न स्पृशेत् । पादेन त्वनुच्छिष्टोपि न स्पृशेदित्यर्थः ।

१ क्ष-ष्टं ।

यमः—
" अंके नारोपयेत्पादं पाणिना नाक्रमेद्ध्रुवम्। अंगं वा न स्पृशेत्पद्भ्यां पादं पादांतरेण च ॥
" न भिन्नभाजनेऽश्नीयान्न भूम्यां न च पाणिषु। नांधकारे न चाकाशे न च देवालयादिषु "॥
आश्वमेधिके—" उत्थाय च पुनः स्पृष्टं पादस्पृष्टं च लंघितम्।
" केशकीटातिपन्नं च मुख्यमाज्यविवर्जितम्। अन्नं तद्राक्षसं ज्ञेयं तस्माद्यत्नेन वर्जयेत्।
"राक्षसोच्छिष्टभुग्विप्रः सप्तपूर्वान्परानपि। रौरवे नरके घोरे स्वपितॄन्पातयिष्यति"॥ **हारीतः**—
" एकवस्त्रो न भुंजीत कपाटमपिधाय च। यानस्थः शयनस्थो वा पादुकास्थोऽपि वा पुनः ॥
"ज्योत्स्नोल्कालोकमार्गेषु प्रदोषे च महानिशि। कोणे चामार्जिते नाद्यात्संधे शय्यासु हर्म्यके"॥
संग्रहे—"शय्यायां वेत्रासने चंद्रिकायामुल्कालोके द्वारि मार्गप्रदेशे गेहे धूलिधुसरे भित्तिसंधौ
लक्ष्मीकामो वर्जयेदन्नभुक्तिम्" इति। **बृहस्पतिः**—
" अग्न्यगारे गवां गोष्ठे देवब्राह्मणसंन्निधौ। जप्ये भोजनकाले च पादुके परिवर्जयेत् ॥
" उत्संगे न च भुंजीत न च पाणितलेऽपि च। शून्यागारे च नाश्नीयान्न च पाण्यासनस्थितः"॥
कूर्मपुराणे (३।१८।२०–२२)—
" नार्धरात्रे न मध्यान्हे नाजीर्णे नार्द्रवस्त्रधृक्। न भिन्नभाजने चैव न भूम्यां न च पाणिषु ॥
" नोच्छिष्टो घृतमादद्यान्न मूर्धानं स्पृशन्नपि। न ब्रह्म कीर्तयन्वाऽपि न निःशेषं न भार्यया" ॥
याज्ञवल्क्यः (आ. १३१)—" न भार्यादर्शनेऽश्नीयान्नैकवासा न संस्थितः " इति।
भार्यायामात्मपुरतः स्थितायां नाश्नीयादवीर्यवदपत्योत्पत्तिभयात्। तथा च **श्रुतिः**—
"जायाया अन्ते नाश्नीयादवीर्यवदपत्यं भवति" इति। अतस्तया सह भोजनं दूरादेव निरस्त-
मिति **विज्ञानेश्वरः** (पृ. ३८ पं. ६९)। तथा च **बृहद्यमः**—
'माता वा भागिनी वाऽपि भार्या वाऽन्याश्च योषितः।न ताभिः सह भोक्तव्यं भुक्त्वा चांद्रायणं चरेत्'॥
इति। तथा **चंद्रिकायाम्**—
" नासनारूढपादस्तु न च सार्धं तु भार्यया। शून्यालये तु नाश्नीयान्न च देवाग्निवेश्मसु " ॥
विष्णुः (६८।४६)—
"नाश्नीयाद्भार्यया सार्धं नाकाशे न तटे स्थितः। शयानः प्रौढपादश्च कृत्वा नैवावसक्थिकाम्"॥
मनुः (४।४३)—
"नाश्नीयाद्भार्यया सार्धं नैनां वीक्षेत चाश्नतीम्। क्षुवंतीं जृंभमाणां वा न चासीनां यथासुखम्"॥ यत्तु
" ब्राह्मण्या सह योऽश्नीयादुच्छिष्टं वा कदाचन। न तस्य दोषमिच्छंति नित्यमेव मनीषिणः ॥
" उच्छिष्टमितरस्त्रीणां योऽश्नीयाद्ब्राह्मणः क्वचित्। प्रायश्चित्ती स विज्ञेयः संकीर्णो मूढचेतनः"॥
इति न तत्सर्वदा दोषाभावप्रतिपादनपरम् ' कदाचनेति ' वचनात्। अत **एवादित्यपुराणम्**—
"ब्राह्मण्या भार्यया सार्धं क्वचिद्भुंजीत चाध्वनि।अधोवर्णस्त्रिया सार्धं भुक्त्वा पतति तत्क्षणात्॥"इति।
यदपि **बोधायनेनोक्तम्** (१।१।१८-१९)—" यानि दाक्षिणतस्तानि व्याख्यास्यामो यथैत-
दनुपेतेन सह भोजनं स्त्रिया सह भोजनं पर्युषितभोजनम् " इति तदपि तस्य दुराचारत्वप्रति-
पादनपरम्। तथा च **स एव** (१।१।२३-२४)—"मिथ्यैतदिति गौतमः। उभयं चैव नाद्रियेत।
शिष्टस्मृतिविरोधदर्शनात्" इति। उच्छिष्टे घृतसेचने विशेषः। **आपस्तंबः** (२।४।९।७)—
"उपेतः स्त्रीणामनुपेतस्योच्छिष्टं वर्जयेत् इति। "धर्मविप्रतिपत्तावभोज्यम्"(१।१।४।१२) इति च ॥

बृहस्पतिः—
“ नोच्छिष्टं ग्राहयेदाज्यं जग्धशिष्टं च संत्यजेत् । न भिन्नकांस्ये संध्यायां पतितानां च संनिधौ ॥
“ शूद्रशेषं न भुंजीयात् श्राद्धान्नं शिशुभिः सह । शूद्रभुक्तावशिष्टं तु नाद्यात्भांडस्थितं त्वपि ॥
“ पात्रांतरे निधायास्माद्द्यान्निरवशेषतः ”॥ इति । पाकभांडात् पात्रांतरे निधाय तत आदाय शूद्रादिभ्यो निरवशेषं देयम् । एवं सति पाकभांडस्थं भोज्यमित्यर्थः । **अत्रिः**—
“ क्षीरं लवणसंयुक्तमुच्छिष्टे घृतसेचनम् । रजस्वलामुखास्वादः सुरापानसमं त्रयम् ” ॥ इति ।
उच्छिष्टघृतसेचने विशेषमाह **स एव**—
“प्राणाहुतौ घृताभावे पश्चात् भुंजीत नो घृतम् । प्राग्घुतेर्घृतसद्भावे भुक्तिमध्ये न दुष्यति”॥ इति ।
शातातपः—
“ अग्रासनोपविष्टस्तु यो भुंक्ते प्रथमं द्विजः । बहूनां पश्यतां सोऽज्ञः पंक्त्या हरति किल्विषम्”॥
उशनाः–“ नादत्वा मृष्टमश्नीयाद्बहूनां चैव पश्यताम् । नाश्नीयुर्बहवश्चैव तथा चैकस्य पश्यतः॥
“ अश्नाति यो भृत्यजनस्य मध्ये मृष्टान्नमेको रसगृध्नुबुद्धिः ॥
“ दीनैः कटाक्षैरभिवीक्ष्यमाणो व्यक्तं विषं हालहलं स भुंक्ते ” ॥
यमः— “ यस्त्वेकपंक्तौ विषमं ददाति स्नेहाद्भयाद्वा यदि वाऽर्थहेतोः ॥
“ वेदेषु दृष्टामृषिभिश्च गीतां तां ब्रह्महत्यां मुनयो वदंति ” ॥
व्यासः—“ एकपंक्त्युपविष्टानां विषमं यः प्रयच्छति । यश्चैवाश्नाति विषमं स कुर्याद्ब्रह्महाव्रतम्॥
“ पंक्तिभेदी पृथक्पाकी नित्यं ब्राह्मणनिंदकः । आदेशी वेदविक्रेता पंचैते ब्रह्मघातकाः ” ॥
गोभिलः—
“ एकपंक्त्युपविष्टानां विप्राणां सह भोजने । यद्येकोऽपि त्यजेत्पात्रं नाश्नीयुरिति रेप्यनु ॥
“ मोहाद्भुंक्ते तु यस्तत्र स सांतपनमाचरेत् ।
“ भुंजानेषु तु विप्रेषु यस्तु पात्रं परित्यजेत् । भोजने विघ्नकर्त्ताऽसौ ब्रह्महापि तथोच्यते ।
‘एकपंक्त्युपविष्टानां विप्राणां भोक्तुकामिनाम्।यो विघ्नं कुरुते मर्त्यस्ततोऽन्यो नास्ति पापकृत्’॥इति।
पराशरः (११।८–९)—
“ एकपंक्त्युपविष्टानां विप्राणां सह भोजने । यद्येकोऽपि त्यजेत्पात्रं शेषमन्नं न भोजयेत् ॥
“ मोहाद्भुंजीत यस्तत्र पंक्त्या उच्छिष्टभाजने । प्रायश्चित्तं चरेद्विप्रः कृच्छ्रं सांतपनं तथा ॥
“ भुंजानेषु तु विप्रेषु योऽग्रे पात्रं परित्यजेत् । स चोरः स च पापिष्ठो ब्रह्मघ्नः स खलूच्यते ॥
“ अप्येकपंक्तौ नाश्नीयाद्ब्राह्मणः स्वजनैरपि । को हि जानाति किं कास्य प्रच्छन्नं पातकं भवेत् ॥
“ एकपंक्त्युपविष्टानां दुष्कृतं यद्दुरात्मनाम् । सर्वेषां तत्समं तावद्यावत् पंक्तिर्न भिद्यते ” ॥ इति ।
पंक्तिभेदप्रकारमाह **स एव**
“ अग्निना भस्मना चैव स्तंभेन सलिलेन च । द्वारेण चैव मार्गेण पंक्तिभेदो बुधैः स्मृतः ” ॥
यमोऽपि—
“ उदकं च तृणं भस्म द्वारं पंथास्तथैव च । एभिरंतरितं कृत्वा पंक्तिदोषो न विद्यते ”॥ इति ।
स्मृत्यंतरे—
“ अग्निना भस्मना चैव स्तंभेन सलिलेन च । द्वारेण निम्नभूम्या वा षड्भिः पंक्तिर्विभिद्यते ”॥

---

१ खगघ- ब्रह्मणो ।

स्मृत्यर्थसारे—" नाशुष्कपाणिपादो भुंजीत न तिष्ठन्न गच्छन्न प्रव्हो न शयानो नार्द्रवस्त्रो न प्रौढपादो नासनारूढपादो न विदिङ्मुखो न शयने न खट्वायां नासंद्यां न जानुनि नोत्संगे वा पादतले वा भाजनं निधाय भुंजीत न शयनादिस्थो न शिशुभिः सह न पश्यतामप्रदाय न भार्यया सहाश्नीयाद्विवाहवर्जम् न दुष्टपंक्तौ जलतृणाग्निभस्मपाथिस्तंभादिभिः पंक्तिर्भिद्यते "। इति ।

स्मृतिरत्ने—

" शयनस्थो न भुंजीत न पाणिस्थं न चासने । न कुर्यात्स्कंदनं शब्दं क्रोधमन्यत्र चिंतनम् ॥
" शिशूनां भर्त्सनं चापि श्वचंडालादिदर्शनम् । अशुचीनां तथा मध्ये प्रेक्षतामप्यनश्नताम् ॥
" नाकाले विषयुक्तं च नाश्नीयादहुतं तथा " ॥ **व्यासः**—
" उदक्यामपि चंडालं श्वानं कुक्कुटमेव च । भुंजानो यदि पश्येत्तु तदन्नं तु परित्यजेत् ॥
" रजस्वलादृष्टमन्नं भुक्त्वा वमनमिष्यते । चंडालदृष्टमन्नं च सूतिकादृष्टमेव च ॥
" चंडालं पतितं प्रेतं श्वशूद्रादीन् रजस्वलाम् । एतान्निरीक्ष्य भुंजानो वमित्वोपवसेत् त्र्यहम् " ॥

संवर्त्तः—

" उदक्यामपि चंडालं ग्रामसूकरकुक्कुटौ । भुक्त्यंतरे समीक्ष्यैतान् जपेत् पूर्वोदितामृचम् " ॥

मानस्तोक इत्यृचम् । **स्मृतिरत्ने**[1] **च**—

" चंडालं पतितं श्वानमुदक्यां सूतिकां तथा । दृष्ट्वा भुक्त्यंतरे स्नात्वा मानस्तोके ऋचं जपेत् "॥

आश्वमेधिके—

" उदक्यामपि चंडालं श्वानं वा काकमेव वा । भुंजानो यदि पश्येत्तु तदन्नं तु परित्यजेत् ॥
" भुंजानो यदि तन्मोहात् द्विजश्चांद्रायणं चरेत् " । **कात्यायनः**—
" चंडालपतितोदक्यावाक्यं श्रुत्वा द्विजोत्तमः । भुंजीत ग्रासमात्रं तु दिनमेकमभोजनम् " ॥ इति ।

प्रजापतिः—

" उदक्यायाः करेणान्नं भुक्त्वा चांद्रायणं चरेत् । प्राजापत्यमशक्तश्चेत् त्रिरात्रं स्पृष्टभोजने ॥
" अशक्तौ तु तदर्धं स्यात्त्रिगुणं सहभोजने । चतुर्गुणं तदुच्छिष्टे पानीयेऽर्धार्धमेव च " ॥ इति ।

भोजनपात्रस्य उच्छिष्टस्पर्शे सति कर्तव्यमुक्तं **स्मृत्यर्थसारे**—

" उच्छिष्टस्पर्शनं ज्ञात्वा तत्पात्रं परिहृत्य च । ततः पश्चाद्गोमयेन भूमिं समनुलिप्य च ॥
" अन्नं पात्रे निधायैव तदन्नं परिवेष्टयेत् । परिषिच्याथ भुंजीत भोजने न च दोषभाक् " ॥ इति ।

पात्रस्पर्शाभावे अन्योन्यस्पर्शे **तत्रैवोक्तम्**—

"एकपंक्तिषु भुंजानो ब्राह्मणो ब्राह्मणं स्पृशेत् । तदन्नमत्यजन् भुक्त्वा गायत्र्यष्टशतं जपेत् "॥ इति ।

तदन्नं त्यजेत् । अत्यक्त्वा भुंजीत चेत् गायत्र्याष्टशतं जपेदित्यर्थः । इदं चापद्विषयम् ॥ अत एवाह **पराशरः**—

"उच्छिष्टोच्छिष्टसंस्पृष्टः शुना शूद्रेण वा द्विजः । उपोष्य रजनीमेकां पंचगव्येन शुध्यति "॥ इति ।

शूद्रेणानुच्छिष्टशूद्रेणेत्यर्थः । **स्मृत्यंतरे**—

" एकपंक्तौ तु भुंजान उच्छिष्टं संस्पृशेद्यदि । विसृज्यान्नं ततः स्नायाद्भुक्त्वा चांद्रायणं चरेत् " ॥

उच्छिष्टान्नस्पर्शे **अत्रिः**—

" अशुद्धः स्वयमप्यन्नमशुद्धं तु यदि स्पृशेत् । विशुध्यत्युपवासेन भुक्ते कृच्छ्रेण शुध्यति " ॥

---

१ **खगघ**–स्मृत्यन्तरे । **गघ**–षेच ।

श्राद्धे अन्योन्यस्पर्शने कर्तव्यमाह **शंखः**—

" श्राद्धपंक्तौ तु भुंजानो ब्राह्मणो ब्राह्मणं स्पृशेत् । तदन्नमत्यजन्भुक्त्वा गायत्र्यष्टशतं जपेत्" ॥

उच्छिष्टस्पर्शेऽप्याह—

" उच्छिष्टलेपनस्पर्शे प्रक्षाल्यान्येन वारिणा । भोजनांते नरः स्नात्वा गायत्रीं त्रिशतं जपेत् " ॥

पात्रयोरन्योन्यस्पर्शेऽप्याह—

" उच्छिष्टोच्छिष्टसंस्पर्शे स्पृष्टपात्रं विसृज्य च । सर्वान्नं पूर्ववद्दत्वा भोजयेत्तु द्विजोत्तमः " ॥

संवर्त्तः—

" कृते मूत्रे पुरीषे वा भुक्तोच्छिष्टे तथैव च । श्वादिस्पृष्टो जपेद्देव्याः सहस्रं स्नानपूर्वकम् ॥

" चंडालाद्यैस्तु संस्पृष्ट उच्छिष्टस्तु द्विजोत्तमः । गोमूत्रयावकाहारः षड्रात्रेण विशुध्यति " ॥

व्यासोऽपि—

" उच्छिष्टोऽद्भिरनाचांतश्चंडालादीन्स्पृशेत् द्विजः । प्रमादाद्वै जपेत्स्नात्वा गायत्र्यष्टसहस्रकम् ॥

" चंडालपतितादींस्तु कामाद्यः संस्पृशेत् द्विजः । उच्छिष्टस्तत्र कुर्वीत प्राजापत्यं विशुद्धये ॥

"अशुद्धान्स्वयमेवैतान् अशुद्धस्तु यदि स्पृशेत् । विशुध्यत्युपवासेन तथा कृच्छ्रेण वा पुनः"॥ इति ।

मनुः—

"पुच्छे बिडालकं स्पृष्ट्वा स्नात्वा विप्रो विशुध्यति । भोजने कर्मकाले च विधिरेष उदाहृतः"॥इति ।

इतरांगस्पर्शे त्वाचमनमेव । " मार्जारमूषकस्पर्शे कर्म कुर्वन्नुपस्पृशेत् " इति **बृहस्पतिस्मरणात्** ।

वृद्धमनुः—

" न पिबेन्न च भुंजीत द्विजः सव्येन पाणिना । नैकहस्तेन च जलं शूद्रेणावर्जितं पिबेत् ॥

" पिबतो यत्पतेत् तोयं भाजने मुखनिःसृतम् । अभोज्यं तद्भवेदन्नं भोक्ता भुंजीत किल्बिषम् ॥

"पीतावशेषितं तोयं ब्राह्मणो न पुनः पिबेत् । पिबेद्यदि हि तन्मोहात् द्विजश्चांद्रायणं चरेत् "॥ इति ।

शातातपः—

" उद्धृत्य वामहस्तेन यत्तोयं पिबति द्विजः । सुरापानेन तत्तुल्यं मनुराह प्रजापतिः " ॥

पराशरः—

" अर्धभुंक्ते तु यो विप्रस्तस्मिन्पात्रे जलं पिबेत् । हतं दैवं च पित्र्यं च आत्मानं चोपघातयेत् ॥

" पिबतः पतितं तोयं भाजने मुखनिःसृतम् । अभोज्यं तद्विजानीयाद्भुक्त्वा चांद्रायणं चरेत्" ॥

शंखः—

" पीतावशेषितं पीत्वा पानीयं ब्राह्मणः क्वचित् । त्रिरात्रं तु व्रतं कुर्यात् वामहस्तेन वा पुनः " ॥ इति ।

व्यासः—

" हस्ते च विद्यमाने तु ब्राह्मणो ज्ञानदुर्बलः । तोयं पिबति वक्त्रेण श्वानयोनिं व्रजत्यधः " ॥

अत्रिः—

" आस्येन न पिबेत्तोयं तिष्ठन्नांजलिना पिबेत् । वामहस्तेन शय्यायां तथैवान्यकरेण वा ॥

" तोयं पाणिनखस्पृष्टं ब्राह्मणो न पिबेत्क्वचित् । सुरापानेन तत्तुल्यं मनुः स्वायंभुवोऽब्रवीत् ॥

" वामहस्तेन यो भुंक्ते योऽपः पिबति वा द्विजः । सुरापानेन तुल्यं स्यादित्येवं मनुरब्रवीत् ॥

" भुंजानो दक्षिणं बाहुं न संयुज्यात् कदाचन । उद्धृत्य वामहस्तेन तृषार्तः सलिलं पिबेत् ॥

" वामेनैव पिबेत्तोयं भोजने पात्रमत्यजन् । त्यजन्पिबेत्तु रुधिरमत्यजन्नमृतं पिबेत् " ॥

यमः—

" न हस्तेन पिबेत्तोयं भुक्तौ तु द्विजसत्तमः। अन्येन कांस्यपात्रेण पिबेदन्यैश्च साधनैः " ॥

हस्तेन दक्षिणेन भुक्तिग्रहणादन्यत्र पाणिना पाने न दोषः। अंजलिना तन्निषेधात्।

तथा च **याज्ञवल्क्यः** (आ. १३८)—

"जलं पिबेन्नांजालिना शयानं न प्रबोधयेत्। नाक्षैः क्रीडेन्न धर्मघ्नैर्व्याधितैर्वा न संविशेत् " ॥ इति।

शांडिल्योऽपि—

" पिबेत् भोजनपात्रेण पाणिना वा न भोजने। प्रभूतं न पिबेत्तोयं नापिबन्नशनं चरेत् ॥

" पीताऽवाशिष्टं चषके पुनस्तन्न पिबेज्जलम् " ॥

व्यासः—"पानीयानि पिबेद्येन तत्पात्रं द्विजसत्तमः। अनुच्छिष्टं भवेत्तावद्यावद्भूमौ न निक्षिपेत् ॥

" पात्रशिष्टं तु यत्तोयं पाने पादावनेजने। भूमौ तदंबु निःस्राव्य शिष्टं तत्पानमर्हति " ॥ इति।

बृहस्पतिः—" पर्णपृष्ठे न भुंजीयाद्रात्रौ दीपं विना तथा "। **कात्यायनः**—

" नृणां भोजनकाले तु यदा दीपो विनश्यति। पाणिभ्यां पात्रमादाय भास्करं मनसा स्मरेत्॥

" पुनश्च दीपितं कृत्वा तच्छेषं भोजयेन्नरः। पुनरन्नं न भोक्तव्यं मुक्त्वा पापैर्विलिप्यते " ॥

शातातपः—

" हस्तदत्तानि चान्नानि प्रत्यक्षलवणं तथा। मृत्तिकाभक्षणं चैव गोमांसाभ्यशनं स्मृतम् ॥

" लवणं व्यंजनं चैव घृतं तैलं तथैव च। लेह्यं पेयं च विविधं हस्तदत्तं न भक्षयेत् " ॥

यमः—

" हस्तदत्ता तु या भिक्षा लवणव्यंजनानि च। भोक्ता ह्यशुचितां याति दाता स्वर्गं न गच्छति ॥

"हस्तदत्तास्तु ये स्नेहा लवणव्यंजनानि च। दातारं नोपतिष्ठंते भोक्ता भुंजीत किल्बिषम्" ॥

अत्रिः—

"घृतं वा यदि वा तैलं ब्राह्मण्या नखनिःसृतम्। अभोज्यं तद्द्विजातीनां भुक्त्वा चांद्रायणं चरेत् ॥

" यत्त्यक्तं भुवि तच्चान्नं भुक्त्वा चांद्रायणं चरेत् " ॥ इति। **आपस्तंबः**—

" घृतं तैलं च लवणं पानीयं पायसं तथा। भिक्षा च हस्तदत्ता तु न ग्राह्या यत्रकुत्रचित् ॥

" तस्मादन्तर्हितं चान्नं पर्णेन च तृणेन वा। प्रदद्यान्न तु हस्तेन नायसेन कदाचन ॥

" उदकं यच्च पक्वान्नं यो दर्व्या दातुमिच्छति। स भ्रूणहा सुरापश्च स स्तेनो गुरुतल्पगः"॥

यमः—

" दर्व्या देयं शृतान्नं च समस्तव्यंजनानि च। तैलपक्वमपक्वं च न तु दर्व्या कदाचन " ॥

रत्नावल्याम्—

" अपक्वं स्नेहपक्वं च हस्तेनैव प्रदापयेत्। यत्किंचिदितरद्भक्ष्य दद्याद्दर्व्यैव नान्यथा " ॥

पराशरः—

" आयसेन तु पात्रेण तदन्नमुपदीयते। शुनोच्छिष्टमसौ भुंक्ते दाता तु नरकं व्रजेत् ॥

" अयःपात्रमयोग्यं स्यात्स्नानाचमनकर्मसु। तत्र स्थितं घनरसं नोपयोग्यं द्विजातिभिः ॥

"हस्ते ददाति यः स्नेहं लवणव्यंजनानि च। दाता तु नरकं याति भोक्ता भुंजीत किल्बिषम्"॥इति।

संग्रहे—

" वेत्रचर्मकृतं चैव तालपत्रकुशैः कृतम्। आयसं वर्जयेद्भुक्तौ वर्ज्यं यागोपयोगि यत् " ॥

गौतमः—
" काहलभ्रामणग्राव्णां चक्रस्योलूखलस्य च। एतेषां निनदो यावत् तावत्कालमभोजनम् " ॥
स्मृतिरत्ने—
" तैलयंत्रेक्षुयंत्रादेः शब्दो यावत् प्रवर्तते। तावत्कालं न भोक्तव्यं शूद्रस्य पतितस्य च" ॥ इति।
व्यासः—
" श्लेष्म शृंघाणिको सर्गो नान्नकाले प्रशस्यते। बलिमांगल्यजप्यादौ न होमे न महाजने " ॥
रत्नावल्याम्—
" भक्ष्यं चेच्छिशुमारभ्य देयं भोज्यं फलादि वा। नोच्छिष्टं कस्यचिद्द्यान्नाद्यादुच्छिष्टमेव च ॥
" मातापितृगुरूच्छिष्टं बालोऽश्नंस्तु सुखी भवेत्। भुक्त्वा दध्नानुपानं तु न कर्तव्यं सुखार्थिना ॥
" भुक्त्वा क्षीरोदनं पश्चान्नातितृप्त उपस्पृशेत् " ॥ **मनुः**—
" पीत्वाऽपोशनमश्नीयात्पात्रदत्तमगर्हितम्। भार्याभृतकदासेभ्य उच्छिष्टं शेषयेत्ततः ॥
" न शूद्राय मतिं दद्यादुच्छिष्टं न हविष्कृतम् " (४।८०) ॥ इति। **आपस्तंबः** (१।११।३१–३२)–
" नाब्राह्मणायोच्छिष्टं प्रयच्छेद्यदि प्रयच्छेद्दंतान्स्कुप्त्वा तस्मिन्नवधाय प्रयच्छेत् " ॥ इति। यदि प्रयच्छेदिति दासादिविषयम्। दंतान्नखेन स्कुप्त्वा दंतमलमुच्छिष्टे निधाय प्रयच्छेदित्यर्थः ॥
पुलस्त्यः—
" भोजनं तु न निःशेषं कुर्यात्प्राज्ञः कथंचन। अन्यत्र दधिसक्त्वाज्यं फलं क्षीरं मधूदकात् ॥
व्यासः—
" पानीयं पायसं सर्पिर्दधिसक्तुमधून्यपि। एतेषां परिशिष्टं तु न प्रदेयं कदाचन " ॥
वसिष्ठः—" न निःशेषकृत्स्यादन्यत्र दधिमधुसर्पिःपयःसक्तुभ्यः " ॥ इति।
विष्णुपुराणेऽपि (३।११।८२)—
" नाशेषं पुरुषोऽश्नीयादन्यत्र जगतीपते। मध्वंबुदधिसर्पिर्भ्यः सक्तुभ्यश्च विवेकवान् " ॥ इति।
बृहद्विष्णुः—" ब्राह्मणो ब्राह्मणोच्छिष्टभोजने एकाहमुपवसेत् " ॥ इति।
शंखः—" ब्राह्मणोच्छिष्टाशने महाव्याहृतिभिरभिमंत्र्यापः पिबेत्। पितुर्ज्येष्ठस्य भ्रातुरुच्छिष्टं भोक्तव्यं धर्मविप्रतिपत्तावभोज्यम् " ॥ इति। **मनुः** (११।१५२)—
"अभोज्यानां च भुक्त्वाऽन्नं स्त्रीशूद्रोच्छिष्टमेव च। जग्ध्वा मांसमभक्ष्यं च सप्तरात्रमभोजनम्" ॥ इति।
आपस्तंबोऽपि (१।९।२६।४-५)—शूद्रोच्छिष्टभोजने तु "सप्तरात्रमभोजनं स्त्रीणां च" ॥ इति।
बृहस्पतिः—
" नवश्राद्धस्य यच्छिष्टं शूद्रशिष्टं तथैव च। दंपत्योर्भुक्तशिष्टं च भुक्त्वा चांद्रायणं चरेत् " ॥
इदमभ्यासविषयम्।
देवलः—"अवलीढं श्वमार्जारध्वांक्षकुक्कुटमूषकैः। भोजने नोपयुंजीत तदमेध्यं हि सर्वतः" ॥
याज्ञवल्क्यः (आचारे १६७–१६८)—
" अनिर्चितं वृथामांसं केशकीटसमन्वितम्। शुक्तं पर्युषितोच्छिष्टं श्वस्पृष्टं पतितेक्षितम् ॥
"गोघ्रातं शकुनोच्छिष्टं पदास्पृष्टं च कामतः। उदक्यास्पृष्टसंघुष्टं पर्यायान्नं च वर्जयेत् " ॥

---

१ क्ष–श्वस्पृष्टं पतितेक्षितम्।

पराशरः (६।६६–६७)—
" शृतं द्रोणाढकस्यान्नं काकश्वानोपघातितम् । केनेदं शुध्यते चान्नं ब्राह्मणेभ्यो निवेदयेत्" ॥
" काकश्वानोपलीढं तु द्रोणान्नं न परित्यजेत् " । अन्नं संगृह्य स्वयं शास्त्रज्ञोऽपि केनेदं शुध्यतीति ब्राह्मणान् पृच्छेदित्यर्थः । **स एव** (६।६९)—
" काकश्वानावलीढं तु गवाघ्रातं खरेण वा । स्वल्पमन्नं त्यजेद्विप्रः शुद्धिर्द्रोणाढके भवेत् " ॥
द्रोणाढकप्रमाणमाह **स** एव (६।६७–६८)—
" वेदवेदाङ्गविद्विप्रैर्धर्मशास्त्रानुपालकैः । प्रस्थद्वात्रिंशतिर्द्रोणः स्मृतो द्विप्रस्थ आढकः" ॥ इति ।
भविष्यत्पुराणे तु
" पलद्वयं तु प्रसृतिः द्विगुणं कुडुवं मतम् । चतुर्भिः कुडुवैः प्रस्थः प्रस्थाश्चत्वार आढकः ॥
"आढकैस्तैश्चतुर्भिस्तु द्रोणस्तु कथितो बुधैः । कुम्भो द्रोणद्वयं प्रोक्तः खारी द्रोणस्तु षोडश" ॥
अनयोर्देशभेदेन व्यवस्था । लालाहतान्नशुद्धिप्रकारमाह **पराशरः** (६।७)—
" अन्नस्योद्धृत्य तन्मात्रं यच्च लालाहतं भवेत् । सुवर्णोदकमभ्युक्ष्य हुताशेनोपतापयेत् ॥
" विप्राणां ब्रह्मघोषेण भोज्यं भवति तत्क्षणात् " ॥ इति ।
संवर्त्तः—
" श्वकाकोच्छिष्टगोशिष्टभक्षणे तु त्र्यहं क्षिपेत् । बिडालमूषकोच्छिष्टे पंचगव्यं पिबेत् द्विजः " ॥
यत्तु **चतुर्विंशतिमते**ऽभिहितम्
" श्वकाकोच्छिष्टगोशिष्टक्रिमिकीटादिभक्षणे । अमेध्यानां च सर्वेषां चरेच्चांद्रायणत्रयम्" ॥ इति ।
तदेतदभ्यासविषयमिति **माधवीये** ।
अंगिराः—
" चंडालपतितादीनामुच्छिष्टान्नस्य भक्षणे । चांद्रायणं चरेद्विप्रः क्षत्रः सांतपनं चरेत् " ॥ इति ।
बालाद्युच्छिष्टस्य स्वल्पशुध्या भोज्यत्वमाह **पराशरः**—
" बालैर्नकुलमार्जारैरन्नमुच्छेषितं यदा । तिलदर्भोदकैः प्रोक्ष्य शुध्यते नात्र संशयः " ॥ इति ।
प्रोक्षणमकृत्वा भुक्ते सति पंचगव्यं **संवर्त्तोक्तं** द्रष्टव्यम् । स्त्र्युच्छिष्टजलपाने **हारीतः**—
"स्त्र्युच्छिष्टस्थिता आपो यदि कश्चित्पिबेत् द्विजः।शङ्खपुष्प्याविपक्वेन त्र्यहं क्षीरेण शुध्यति"॥इति।
मनुः (११।१४८)—" शूद्रोच्छिष्टाश्च पीत्वाऽपः कुशवारि पिबेत् त्र्यहम् " ॥ इति ।
संवर्त्तः—" शूद्रोच्छिष्टं जलं पीत्वा त्रिरात्रं यावकं पिबेत् " ॥ इति ।
देवलः—"निशुद्धमपि चाहारं मक्षिकाकृमिजन्तुभिः । केशरोमनखैर्वाऽपि दूषितं परिवर्जयेत्"॥
वसिष्ठः (१४।२३)—
" कामं तु केशकीटादीनुद्धृत्याद्भिः प्रोक्ष्य भस्मनाऽवकीर्य वाऽचम्य प्रशस्तमुपयुंजीत" ॥ इति ।
बोधायनः (२।७५)—" केशकीटनखरोमाखुपुरीषाणि दृष्ट्वा तावन्मात्रमन्नमुद्धृत्य प्रोक्ष्य शेषं भोज्यम् " ॥ इति ।
संवर्तः—"केशैः पिपीलिकाभिर्वा कीटैर्वाऽमेध्यसेविभिः । यदन्नमुपहन्येत ततस्तन्मात्रमुद्धरेत् ॥
" मृद्भस्मताम्रवैडूर्यहिरण्यरजतादिभिः । गोवालदर्भैर्युक्तेन वारिणा शेषमुक्षयेत् ॥
" पात्रस्थमतिहर्तव्यं हस्तस्थं तु परित्यजेत् । मुखस्थमभिनिष्कास्य घृतप्राशनमाचरेत् ॥
" केशकीटनखान्प्राश्य अस्थिकंटकमेव च । होमतप्तं घृतं पीत्वा तत्क्षणादेव शुध्यति " ॥

१ गघ–स्त्रिया तूच्छेषिता । २ गघ–ष्पीस्तु ।

स्मृत्यर्थसारे—" भोजने केशकीटादिदूषिते तावन्मात्रं समुद्धृत्य जलं भस्म मृदं वा क्षिप्त्वा भुंज्यान्मुखे दृष्टौ निष्ठीव्य जलं प्राश्य निष्ठीव्य घृतं प्राश्यात्पाके कीटादिस्थितौ त्यागः तस्य भुक्तावुपवासः " ॥ इति । **पराशरः** (६।६२)—

" अन्नाद्ये कीटसंयुक्ते मक्षिकाकेशदूषिते । तदंतरा स्पृशेच्चापस्तदन्नं भस्मना स्पृशेत् " ॥ इति ।

मनुः (५।१२४)—

" पक्षिजग्धं गवाघ्रातं अवधूतमवक्षुतम् । दूषितं केशकीटैश्च मृत्प्रक्षेपेण शुध्यति " ॥

अवधूतं संमार्जनरजःपक्षवातादिदूषितम् । अवाङ्मुखेन यत्र क्षवथुः कृतः तदवक्षुतमित्यर्थः ।

याज्ञवल्क्यः (आ. १८९)—

" गोघ्रातेऽन्ने तथा केशमक्षिकाकीटदूषिते । सलिलं भस्म मृद्वाऽपि प्रक्षेप्तव्यं विशुद्धये " ॥

यत्तु **गौतमेनोक्तम्** (१७।८–९)—" नित्यमभोज्यं केशकीटावपन्नम् " । इति तत्केशकीटादिभिः सह यत्पक्कं तद्विषयमिति **माधवीये विज्ञानेश्वरीयादौ** (पृ. ५४ पं. २५)—

अथ भक्ष्याभक्ष्यविवेकः । व्यासः—

" अभक्ष्यस्य निवृत्त्या तु विशुद्धं हृदयं भवेत् । आहारशुद्धौ चित्तस्य विशुद्धिर्भवति स्वतः ॥

" अभक्ष्यभक्षणाच्चित्तमशुद्धं भवति स्वतः । तस्मादभक्ष्यं यत्नेन दूरतः परिवर्जयेत् " ॥

मनुः (५।४)—

" अनभ्यासेन वेदानामाचारस्य च वर्जनात् । आलस्यादन्नदोषाच्च मृत्युर्विप्रान् जिघांसति" ॥

अंगिराः—

" द्विविधं गर्हितं प्रोक्तं नित्यमन्नं मनीषिभिः । जातितो गर्हितं चैव तथैवाश्रयगर्हितम् ॥

" लशुनादिकमन्नं यत्तज्ज्ञेयं जातिगर्हितम् । अभोज्यानां विजानीयादन्नमाश्रयगर्हितम् " ॥

अपरार्के—

" जातिदुष्टं क्रियादुष्टं कालाश्रयविदूषितम् । संसर्गाश्रयदुष्टं वा सहृल्लेखं स्वभावतः " ॥

जातिदुष्टादीनामुदाहरणमुक्तं **स्मृतिरत्ने**—

" लशुनं गृजरं चैव पलंडुकवकादि च । वार्ताकनालिकालाबु ह्यवेयाज्जातिदूषितम् " ॥

" न भक्षयेत्क्रियादुष्टं यद्दृष्टं पतितादिभिः ॥

" कालदुष्टं तु विज्ञेयमस्नेहाक्तं चिरस्थितम् । दधिभक्ष्यविकाराज्यमधुवर्ज्यं तदिष्यते ॥

" सुरालशुनसंसृष्टं पीयूषादिसमान्वितम् । संसर्गाद्दुष्यते तद्धि शूद्रोच्छिष्टवदाचरेत् ॥

" विचिकित्सा तु हृदये यस्मिन्नन्ने प्रजायते । सहृल्लेखं तु विज्ञेयं पीयूषादि स्वभावतः ॥

" रसदुष्टं विकाराद्धि रसस्येति निदर्शितम् " । उदाहृतमित्यर्थः । **मनुः** (५।५)—

" लशुनं गृंजनं चैव पलंडुकवकादि च । अभक्ष्याणि द्विजातीनाममेध्यप्रभवानि च ॥

" लोहितान्वृक्षनिर्यासान् व्रश्चनप्रभवांस्तथा । शेलुं गव्यं च पीयूषं प्रयत्नेन विवर्जयेत् "॥ इति ।

लशुनं सूक्ष्मं श्वेतकंदनालम् । गृंजनं शाकविशेषः । पलांडुः स्थूलकंदो लशुनविशेषः । कवकं भूमौ छत्राद्याकारेणोत्पन्नम् । लोहिता वृक्षनिर्यासाः लाक्षादयः । लोहितग्रहणान्निर्यासत्वेऽप्यपाटलश्वेतवर्णहिंगुकर्पूरादेरप्रतिषेधः । शेलुः श्लेष्मातकः । पीयूषोऽभिनवं पयः ।

---

१ ख–कु । २ गघ–पिष्ट । ३ क्ष–षं तु ।

धर्मसारसुधानिधौ—
" अलाबुं गृंजनं चैव पलाण्डुं पिंडमूलकम् । गांधारककरंभाणि लवणान्यौषराणि च ॥
" आरक्तानपि निर्यासान् प्रत्यक्षलवणानि च । व्रश्चनप्रभवं सर्वं हिंगुद्रव्यं विनैव तु ॥
" भूतृणं शिग्रुकं चैव ब्राह्मणो नैव भक्षयेत् "॥ इति । पलांडुः पलण्डुविशेषः ॥
" लशुनं दीर्घपत्रं च कटुगन्धं महौषधम् । पलंडुश्च पलांडुश्च लतार्कश्च परारिकः ॥
" गृंजनं यवनेष्टं च पलण्डोर्दश जातयः " ॥ इति **स्मरणात्** ।

पराशरः (११।१०-११)—"पीयूषं श्वेतलशुनवृंताकफलगृंजनम् । पलांडुवृक्षनिर्यासदेवस्वकवकानि च॥
" उष्ट्रीक्षीरमवीक्षीरमज्ञानाद्भुंजते द्विजः । त्रिरात्रमुपवासेन पंचगव्येन शुद्ध्यति "॥ इति । श्वेतशब्दो लशुनवृंताकाभ्यां संबध्यते । तेन रक्तलशुनवार्ताकादौ नेदं व्रतमित्युक्तं भवति । त्रिरात्रमुपोष्य चतुर्थे दिवसे पंचगव्यं पिबेत् । एतच्चाबुद्धिपूर्वभक्षितोद्गारितविषयम् । बुद्धिपूर्वे सप्तरात्रं सांतपनम् । आवृत्तौ चांद्रायणम् ।

तथा च **मनुः** (५।१९) —
" छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटम् । पलांडुं गृंजनं चैव मत्या जग्ध्वा पतेत् द्विजः ॥
" अमत्यैतानि षड् जग्ध्वा कृच्छ्रं सांतपनं चरेत् । यतिचांद्रायणं वाऽपि शेषेषूपवसेदहः" ॥ इति।
पतेत् द्विज इति मतिपूर्वचिरकालाभ्यासविषयम् । आवृत्तौ चांद्रायणमाह **याज्ञवल्क्यः** (आ.१७६)—
" पलांडुं विड्वराहं च छत्राकं ग्रामकुक्कुटम् । लशुनं गृंजनं चैव जग्ध्वा चांद्रायणं चरेत् "॥
अमतिपूर्वाभ्यासे **शंखेनोक्तम्**—" लशुनपलण्डुगृंजनविड्वराहग्रामकुक्कुटकुंभकिभक्षणे द्वादशरात्रं पयः पिबेत् " इति ।

शातातपः—" पलांडुलशुनगृंजनकुसुंभामेध्यभक्षणे द्विजस्तप्तकृच्छ्रं चरेत् " ॥ इति ।
पैठीनसिः—" वृंताकनालिकापोतकुसुंभाश्मंतकानि च " इति । वर्ज्यानीति शेषः । नालिका शिरुकांजेरि । पूतिका उपोतकि पशळै । **उशनाः**—
" कुसुंभं नालिकाशाकं वृंताकं पौतिकं तथा । भक्षयन् पतितस्तु स्यादपि वेदांतगो द्विजः "॥
पौतिकः सोमप्रतिनिधिः ।

" न बीजान्युपयुंजीत रोगापत्तिमृते द्विजः । फलान्येषामनंतानि बीजानां हि विनाशयेत् " ।

व्यासः—
" खट्वासंज्ञे च वार्ताकं तथैवोद्भिरजं तृणम् । लवणं भौमिकं विप्रो मोहेनापि न भक्षयेत् " ॥
विष्णुः—"वर्जयेच्छ्वेतवृंताकमलाबुं वर्तुळं तथा । छत्राकं लशुनं चैव गृंजनं चासुरिं तथा ॥
देवलः—"कंडूरं श्वेतवृंताकं कुभांडं च विवर्जयेत्" । कंडूरा प्रावृषायणी । तस्याः फलं कंडूरम् । अत्यंतकंडूतिजनकं बहुरोमयुक्तम् । वर्षाकालोद्भवं वृत्तालाबुसदृशं कुभांडम् । स एव—
" वल्लीमुपोतकीं चैव रक्तशिग्रुं परित्यजेत् ॥
" कालिङ्गालाबुबीजानि येषां कुक्षौ विशांति तु । ये भक्षयंति पिण्याकं ते वै निरयगामिनः "॥
कालिङ्गं पुच्चकायि कोम्मट्टिकायि ।
" वार्ताककतकालिंगबिंबोदुंबरभिस्सटाः । एतांस्तु सेवते यस्तु तस्य दूरतराः श्रियः "॥
दूरतरो हरिरिति पाठांतरम् ।

" चर्मकोशातकी शेलुः पिण्याकं शिग्रुमूलकम् । उपोतकीरक्तलतापूतिगंधाशुचीनि वै ॥
" एतानि भुंक्ते यस्तस्य मंत्रसिद्धिः कथं भवेत् । सकंटकं तु कूष्मांडं वृंताकं तु सकंटकम् ॥
" वर्जयेत्सर्वनिर्यासान् वृक्षवल्लीसमुद्भवान् । निर्यासमपि वा हिंगुं धूपं न परिवर्जयेत् ॥
" बिंबवार्ताककालिंगमधूकबिसकान्यदन् । अंत्यकाले जगन्नाथं गोविंदं न स्मरिष्यति " ॥
सारसमुच्चये—
" बिंबं च श्वेतवृंताकं अलाबुं वर्तुलं तथा । छत्राकं लशुनं चैव मधुकं सुरसं त्यजेत् ॥
" कुंभीकं[1]दुकवृंताककोविदारांश्च वर्जयेत् " ॥ सुरसं नोच्चिलू । कुंभी । कंचुकं वर्तुलालाबु ॥
विज्ञानेश्वरीये—
" नालिकाशणछत्राककुसुंभालाबुविड्भवान् । कुंभीककं[2]बुवृंताककोविदारांश्च वर्जयेत् ॥
" तथा कालप्ररूढानि पुष्पाणि च फलानि च विकारवच्च यत्किंचित्तद्यत्नेन विवर्जयेत् ॥
तथा वटवृक्षाश्वत्थदधित्थनीपमातुलंगफलानि च वर्जयेदिति । **संग्रहे—**
" तिलपिष्टं गृंजनं च मूलकं शिग्रुगृंजनम् । छत्राकं विड्वराहं च बिंबं कोशातकीफलम् ॥
" अलाबुं श्रीफलं ये वै खादयंति नराधमाः । तेषां गेहेऽशुभा ज्येष्ठा वसेद्दारिद्र्यसौहृदा " ॥
गृंजनं[3] रक्तशिग्लम् । तिलपिष्टं पिण्याकम् । कोशातकी पेरुमशाक् ।
" उत्पलत्रयकंदं च कंदं च कुमुदद्वयम् । सूरणद्वयकंदं च वर्जयेत्तु विचक्षणः " ॥
आंबलू । आल्लि । उत्पलत्रयं । कुमुदद्वयं । नैलकू । सुरणद्वयं । काटकर्णे । अंमणंदाळू ।
भृगुः—"आरनालद्वयं चैव कोशातक्यादि वर्जयेत् । कुलत्थजातिभेदं च प्रियंगु चैव वर्जयेत्" ॥
गृंजनादिकशाकांश्च रक्तबाष्पां वर्जयेत् । आरनालद्वयं त्रिफलै । कुटिनकां रक्तबाष्पां । शंकीरै
" अंकुराण्यपवित्राणि वंशादीनां विवर्जयेत् ॥
" शृंगाटं लशुनं शिग्रुं नालिकासुनिषंणकम् । सौभांजनं रक्तबाष्पं ग्रामपुष्पं त्रिकंटकम् ॥
"द्रोणपत्रं लिलिंगा[4] च तंडुलीयं तपस्विनी । कोशातकीयं वर्ज्यानि फलेषु त्याज्यमुच्यते" ॥ छाकं च लशुनं तालफलमूले पटोलिकाबिंबकं भांडनारादफलानि परिवर्जयेत् । शृंगाटं । नैरीजिलूयले ॥ नाळिका । शरुकांजेरि । सुनिषण्णं । आरै । सौभाजनं शिग्लुविशेषः । ग्रामपुष्पं त्रिकर्णिकम् । तंडुलीयं । शरूकिरै । छागं । तालिपनै । पटोलिका । पेपोडल् ।
" तंडुलांभःकणं तद्वदन्ननिःस्रावमेव च । दग्धशाकोदनादीनि सर्वथा परिवर्जयेत् " ॥
अन्ननिःस्रावो यवागुः । **विज्ञानेश्वरीये—**
"यस्यामंतः कुंडिकायां त्रिफला निहिता भवेत् । तस्यास्तु कंजिका ग्राह्या नेतरस्याः कदाचन" ॥ इति
बृहद्यमः—
" उत्पलत्रयकंदं च शणशाकं तथैव च । उदुंबरं न खादेच्च भव्यार्थी पुरुषः क्वचित् ॥
" नालिकां नालिकेरं च श्लेष्मातकफलानि च । भूतृणं शिग्लुकं चैव खट्वाकं कवकं तथा ॥
" एतेषां भक्षणं कृत्वा प्राजापत्यं चरेत् द्विजः । अलाबुं शिग्रुकं चैव भुक्त्वाऽप्येतद्व्रतं चरेत् ॥
"औदुंबरं च कामेन तप्तकृच्छ्रेण शुध्यति" ॥ इति । नाळिकेरं पोनवेल्लं । अवशिष्टनिषिद्धफलादिषु " शेषेषूपवसेदहः " इति **मनूक्तं** (५।२०) द्रष्टव्यम् । तथा च **चतुर्विंशतिमते—**
" कंदमूलफलादीनि अज्ञानाद्भक्षयेत्तु यः । उपवासो भवेत्तस्य पराशरवचो यथा " ॥ इति ।

---
१ ख–चु; क्ष–न । २ ख–केबु, गघ–कन्दुक । ३ गघ–कुञ्जनं रतुशिग्रु । ४ ख–का ।

शंखः—" अलाबुशिग्रुश्लेष्मातककोविदारवनछत्राकवृंताकभक्षणे पंचगव्यं च पिबेत् " ॥ इति । **सुमंतुः**—"एतान्यातुरस्य भिषक्क्रियायां प्रतिषिद्धानि न भवंति। यानि चान्यान्येवं प्रकाराणि तेष्वप्यदोषः " इति । तदेकसाध्यव्याध्युपशमनार्थं लशुनादिभक्षणे त्वाह **स** एव—" लशुन-पलंडुगृंजनभक्षणे सावित्र्यष्टसहस्रेण मूर्धनि संपातान्नयेत् " ॥ इति ।

आपस्तंबः (२।८।१८।१–२)—

"विलयनं मथितं पिण्याकं मधुमासं च वर्जयेत्।कृष्णधान्यं शूद्रान्नं ये चान्ये अनश्यसंमताः" इति । विलयनं नवनीतमलम् । यस्य दध्नो मथनमात्रं जलमिश्रणं नास्ति तत् मथितम् ।

गौतमः—" उद्धृतस्नेहाविलयनपिण्याकमथिप्रभृतीनि चात्तवीर्याणि नाश्नीयात् " इति ।

मनुः (४।६२)—

" न भुंजीतोद्धृतस्नेहं नाति सौहित्यमाचरेत् । वृथाकृसरसंयावं पायसापूपमेव च ॥
" अनुपाकृतमांसानि देवान्नानि हवींषि च " ॥ उद्धृतस्नेहं पिण्याकादि । अतिसौहित्यं अतितृप्ति । वृथा देवादिभ्यो नार्पितम् । कृसरं तिलमिश्रमोदनम् । अनुपाकृतं यज्ञशिष्टम् ॥ देवस्वामिकं व्रीह्यादिदेवतान्नम् । हविस्तु देवतायै निवेदयिष्यमाणं स्थापितं वर्जयेदित्यर्थः ।

" शुक्तं पर्युषितं चैव शूद्रस्योच्छिष्टमेव च । अनिर्दशाया गोः क्षीरमौष्ट्रमैकशफं तथा ॥
" आविकं संधिनीक्षीरं विवत्सायाश्च गोः पयः । आरण्यानां च सर्वासां मृगीणां महिषीर्विना॥
" स्त्रीक्षीरं चैव वर्ज्यानि सर्वशुक्तानि चैव हि । दधिभक्ष्यं च शुक्तेषु सर्वं च दधिसंभवम् ॥
" यानि चैवाभिषूयंते पुष्पमूलफलैः शुभैः "। कालातिपत्त्या स्वरसंविहाय रसांतरमापन्नं शुक्तम् । "अत्यम्लं शुक्तमाख्यातं निन्दितं ब्रह्मवादिभिः"॥ इति **स्मरणात्** । तत्र दध्यादि भक्ष्यमित्यर्थः ।

" यत्किंचित्स्नेहसंयुक्तं भक्ष्यं भोज्यमगर्हितम् । तत्पर्युषितमप्याद्यं हविःशेषं च यद्भवेत् ।
" चिरस्थितमपि त्वाद्यमस्नेहाक्तं द्विजातिभिः । यवगोधूमजं सर्वं पयसश्चैव विक्रिया " ॥
पर्युषितमेकाहांतरितम् वर्ज्यम् । स्नेहयुक्तं तु भक्ष्यमपूपादि भोज्यम् । स्नेहायुक्तमपि हविःशेषं यवादिकमदनीयमित्यर्थः । **याज्ञवल्क्यः** (आ. १६९–१७०)—

" अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसंस्थितम् । अस्नेहा अपि गोधूमयवगोरसविक्रियाः ॥
" संधिन्यनिर्दशावत्सगोपयः परिवर्जयेत् । औष्ट्रमैकशफं स्त्रैणमारण्यकमथाविकम् " ॥ इति । अस्नेहा अपि चिरसंस्थिता अपि गोधूमादयो भोज्याः । यदि न विकारांतरमापन्नाः । " अपूपधानाकरंभसक्तुयावकतैलपायसशाकानि शुक्तानि परिवर्जयेत् " (१४।३७) इति **वसिष्ठ**स्मरणात् । या वृषेण संधीयते सा संधिनी । " वशां वंध्यां विजानीयात् वृषाक्रांतां च संधिनीम् " इति **त्रिकांडी**स्मरणात् (२।९।६९) । या चैका वेलामतिक्रम्य दुह्यते या च वत्सांतरेण संधीयते सा च संधिनी । संधिनी चानिर्दशावत्सा च संधिन्यनिर्दशावत्साः । ताश्च गावः । तासां पय इत्यर्थः । **गौतमः** (१७।२५)— " स्यंदिनीयमसूसंधिनीनां च " ॥ इति । स्रवत्पयस्तनी स्यंदिनी । यमसूः यमलप्रसवित्री ।

शंखः—" सर्वासां द्विस्तनीनां क्षीरमभोज्यमजावर्ज्यम् " इति ।

देवलः—" अभोज्यं प्राहुराहारं शुक्तं पर्युषितं च यत् " ॥ **मनुः**—

" शुक्तानि हि द्विजोऽन्नानि न भुंजीत कदाचन।प्रक्षालितानि निर्दोषाण्यापद्धर्मो यथा भवेत्"॥

यमः—

" मसूरमाषसंयुक्तं तथा पर्युषितं च यत् । तत्तत्प्रक्षालनं कृत्वा भुंजीत ह्यभिघारितम् " ॥ इति ।

गौतमः (१७।१२-१४; १८-२१)—"भावदुष्टं शुक्तं केवलं दधि पुनःसिद्धं पर्युषितं अशाकभक्षस्नेहमांसमधु" ॥ इति । **आपस्तंबः** (१।५।१७।२०)—"शुक्तं चापरयोगम्" ॥ इति । परेण द्रव्येण योगो यस्य न तदपरयोगं तदेव शुक्तं वर्ज्यम् । अदध्यादिसंसृष्टमभोज्यमित्यर्थः ।
शंखः—"दधि भक्ष्यं च शक्तेषु सर्वं च दधिसंभवम् । ऋजीषपक्वं भक्ष्यं स्यात्सर्पिर्युक्तमिति स्थितिः॥
" अपूपाश्च करंभाश्च धानावटकसक्तवः । शाकं स्निग्धमपूपं च सूपं कृसरमेव च ॥
" यवागूः पायसं चैव यच्चान्यत्स्नेहसंयुतम् । सर्वं पर्युषितं भोज्यं शुक्तं चेत्परिवर्जयेत्" ॥
ऋजीषपक्वमूष्मपक्वम् । करंभाः दधिमिश्रसक्तवः । वटका माषविकारः । **स एव**—
" अपूपाः सक्तवो धानास्तक्रं दधि घृतं मधु । एतत्पण्येषु भोक्तव्यं भांडलेपो न चेद्भवेत्" ॥
व्यासः—
" भोज्यमन्नं पर्युषितं स्नेहाक्तं चिरसंभृतम् । अस्नेहा व्रीहयश्चोष्णा विकाराः पयसस्तथा" ॥
स्मृतिरत्ने—
" घृतात्फेनं घृतान्मंडं पीयूषमथवार्द्रगोः । सगुडं मरिचाक्तं तु तथा पर्युषितं दधि" ॥
चतुर्विंशतिमते—"दीर्घं तक्रमपेयं च नष्टं स्वादु च फेनवत्"। घृताद्उद्धृतं फेनमात्रं न पेयमित्यर्थः ।
आपस्तंबः (१।५।१७।१४–१९)—" नापणीयमन्नमश्नीयात्तथा रसानामाममांसमधुलवणानि परिहाप्य तैलसर्पिषी तूपयोजयेत् उदकेऽवधाय । कृतान्नं पर्युषितमखाद्यपेयानाद्यं शुक्तं च फाणितपृथुकतंडुलकरंभभरुजसक्तुशाकमांसपिष्टक्षीरविकारौषधिवनस्पतिमूलफलवर्जम्" इति । अस्यार्थः । आपणः पण्यवीथिः । तत्र क्रीतं लब्धं वा आपणीयं तच्च कृतान्नं नाश्नीयात् । व्रीह्यादिषु न दोषः । रसानां मध्ये मांसादिग्राह्यं तैलसर्पिषी तूदकेन संसृज्योपयोजयेत् । कृतान्नं पर्युषितं पूर्वेद्युः पक्वं खरविशदं द्रवं मृदुविशदं चाखाद्यमपेयमनाद्यं च शुक्तमपर्युषितमपि तथा अखाद्यं फाणिदादीन्वर्जयित्वा । फाणितमिक्षुरसः । पृथुकतंडुलाः । पक्वधान्यतंडुलाः ।
"हरिद्रा गोरसश्चूर्णं लवणं धान्यमौषधम् । न त्वेषां पाकदोषोऽस्ति क्रमुकस्य गुडस्य च" इति स्मृतेः॥
भरुजाः भ्रष्टयवाः। अन्यत्प्रसिद्धम् अत्र केचित्पर्युषितमभोज्यमुदके रात्रौ निक्षिप्य तदुपयोजयेत् । जले निक्षिप्तस्य पर्युषितत्वदोषो नास्तीति व्याचक्षते । तथा च **स्मर्यते**—
"शाकं पुनः श्रितं वन्हौ जले क्षिप्तं तथौदनम् । तीर्थं पर्युषितं भोज्यं यच्चान्यत्स्नेहसंयुतम्"॥ इति।
वसिष्ठस्तु ॥ (१४।२८–२९)—"अन्नं पर्युषितं कामं तु दध्ना घृतेन वाऽभिघारितमुपयुंजीत" इति ।
चंद्रिकायाम्—" दध्यादियुक्तं पर्युषितं कृसरवद्भोज्यम्" इति ॥
विष्णुः (५१।२९–४२)—" गोधूमजं पयोविकारं स्नेहाक्तं शुष्कषाडवं वर्जयित्वा पर्युषितं प्राश्योपवसेत् । व्रश्चनामेध्यप्रभावांश्च लोहितान्वृक्षनिर्यासान्वृथाकृसरसंयावपायसापूपशष्कुलीश्च देवान्नानि हवींषि च गोजामहिषीवर्जं सर्वपयांसि अनिर्दशाहेतान्यपि च स्यंदिनीसंधीनीविवत्साक्षीरं चामेध्यभुजश्च दधिवर्जं केवलं सर्वशुक्तानि च" इति । **आपस्तंबः** (१।५।१७।२१-२५)—" सर्वं मद्यमपेयं तथैलकं पय उष्ट्रीक्षीरमृगीक्षीरसंधिनीक्षीरयमसूक्षीराणीति धेनोश्चानिर्दशायास्तथा कीलालौषधीनां च" इति । एलका अविः । तस्याः पयः ऐलकम् । सुरार्था ओषधयः कीलालौषधयः ।
शातातपः—"संधिन्या अंतर्दशाया अवत्सायाश्च गोःक्षीरप्राशने वृथामांसे प्राजापत्यम्" ॥ इति।

स एव—“उष्ट्रीक्षीरं मृगीक्षीरं मृतसूतकयोस्तथा। चोरस्यान्नं नवश्राद्धं भुक्त्वा चांद्रायणं चरेत्”॥
“ उष्ट्रीखरीमानुषीक्षीरप्राशनं पुरुषस्य पुनरुपनयनं च ”॥ इति।
शंखः—“ क्षीराणि यान्यपेयानि तद्विकाराशने बुधः। सप्तरात्रव्रतं कुर्यात्प्रयत्नेन समाहितः”॥
एतानि कामतोऽभ्यासविषयाणि। अकामतः सकृत्पाने विष्णुः (५१।३९)—
“ गोजामहिषीवर्जं सर्वपयांसि प्राश्योपवसेत् ”॥ इति। अत्रिरपि—
“अविकोष्ट्र्योश्च यत्क्षीरं मृगाणां वनचारिणाम्। छागजं गार्दभं क्षीरं भुक्त्वा दिनमभोजनम्”॥इति।
चतुर्विंशतिमते—
“ स्त्रीक्षीरं च द्विजः पीत्वा कथंचित्काममोहितः। पुनःसंस्कृत्य चात्मानं प्राजापत्यं समाचरेत्॥
“ अजोष्ट्रीसन्धिनीक्षीरं मृगाणां वनचारिणाम्। अनिर्दशाया गोश्चैव पीत्वा दिनमभोजनम्”॥ इति।
सुमंतुः—
“ कूष्मांडं बृहतीं चैव तरुणीमूलकं तथा। श्रीफलं च कलिंगं च धात्रीं प्रतिपदादिषु॥
“ शिरः कपालमात्रं च नखचर्मतिलानि च। आम्लमामलकं चैव अष्टम्यादिषु वर्जयेत्”॥ इति।
तरुणीपुव्व (पुष्प)। मूलकं मुल्लंगि (मुळा)। श्रीफलं बिल्वकायि (बेलफळ)। कलिंगं कोम्मटिकायि (कलिंगडें)। शिरः टेंकायि (नारळ)। कपालं सोरकायि (भोपळा)। आत्रं पोच्चकायि (करटुली)। अम्लं चिन्तकायि (चिंच)। अत्र निषिद्धानामपि तिथिनिबंधनत्वेन निषेध आहिताग्न्यनृतानिषेधवद्दोषाधिक्यप्रदर्शनपरः। बोधायनः—
“ ओदनं तु पुनःपक्वं नालिकेररसं तथा। तथा तोयमभूमिष्ठं ब्राह्मणो नैव भक्षयेत् ”॥
स्मृतिसारे—
“ क्षीरे तु लवणं दत्वा उच्छिष्टेऽपि च यद्घृतं। स्नानं रजकतीर्थेषु ताम्रे गव्यं सुरासमम्॥
“ भानुवारे दिवारात्रं सप्तम्यां च तथैव च। धात्रीफलं नरः खादन्नलक्ष्मीको भवेत्सदा ”॥
अपरार्के—
“ दिवा कपित्थछायायां रात्रौ दधिशमीषु च। धात्रीफलेषु सप्तम्यामलक्ष्मीर्वसते सदा ”॥
मनुः—
“ वीर्यहानिर्यशोहानिः प्रज्ञाहानिस्तथैव च। भवेद्यस्मात्ततो रात्रौ धात्रीं यत्नेन वर्जयेत्॥
“ धानाः खादेन्न च दिवा दधिसक्तूंस्तथा निशि। सर्वं च तिलसंबन्द्धं नाद्यादस्तमये व्रती॥
“तिक्तार्द्रकदधिश्राणातिलशाकादिनिश्यदन्। त्यज्यते रूपवाक् श्रीभिः पुष्पितस्त्री रताद्यथा”॥
तिक्तं। त...। आर्द्रकं। इ...। श्राणा। तत। स्मृत्यंतरे—
“ आमलक्याः फलं चैव जंबीरं तिन्तिणीफलम्। प्रज्ञाप्रतापलक्ष्मीवान् सदैतद्वर्जयेन्निशि॥
“ नालिकेरोदकं कांस्ये ताम्रपात्रस्थितं मधु। ताम्रपात्रास्थितं गव्यं मद्यतुल्यं घृतं विना॥
“ अपि प्रस्थानसमये रात्रौ दधि न भक्षयेत्। मधुपर्कप्रधानं तु वर्जयित्वा विशेषतः”॥ इति।
शातातपः—
“ रात्रौ धानादधिसक्तूञ्श्रेयस्कामो विवर्जयेत्। भोजनं तिलसंबन्द्धं स्नानं चैव विशेषतः ”॥
वृद्धहारीतः—
“ सकांस्यं नालिकेरांबुकांस्ये च रसमैक्षवम्। ताम्रपात्रयुतं गव्यं क्षीरं च लवणान्वितम्॥

" घृतं लवणसंयुक्तं सुराकल्पं विवर्जयेत् । प्रत्यक्षलवणं नाद्यात् पक्वं परगृहागतम् " ॥ इति । प्रत्यक्षलवणं चक्षुर्ग्राह्यमेव दत्तं नाद्यम् । ओदनार्थंतर्हितं दत्तमदनीयमित्यर्थः ।

भक्ष्याण्याह **भृगुः**—

" भेदैस्तु कारवल्यानि सर्वं ग्राह्यमितीरितम् ।
" कंदं पिंडीकृतं चैव क्षुद्रकंदं तथैव च । महाकंदादिकन्दं च आहरेत विचक्षणः ॥
" सहकारप्रभेदं च तथैव पनसद्वयम् । कदल्यादिषु भेदं च गृह्णीयात्तु प्रयत्नतः ॥
" कूश्मांडोर्वारुकं चैव सिंही व्याघ्री तथैव च । कार्कोटकादिसंग्राह्यं कलंजादीनि वर्जयेत् "॥ इति ।

कारवल्ली ... पिंडीकृतं । ... क्षुद्रकंदं... महाकंदं ... सहकारभेदश्चूतादिः । पनसद्वयं । ... उर्वारुकं । वौ ... सिंहि ... व्याघ्रीकार्कोटं । ...कळंजं । ...आदिशब्देन पलांड्वादयो वर्ज्या गृह्यंते । **मरीचिः**—" कदलीचूतपनसनारीकेलतिंतिणीकारवल्लीव्याघ्रीशिंबभेदबृहतीभेदसिंहव्याघ्रनखी कर्कंधूर्वारुककूश्मांडकार्कोडकानि सूरणकंदक्षुद्रकंदमहाकंदवल्लीकंदशृंगिबेरोत्पलकंदपिंडीकृतशकुटकंदानि च मरीचिसर्षपाणुमुद्गाढककुलुत्थतिल्वमाषमसूरकादीनि शाकेषु जीवंतीरक्तबाष्पाणि चान्यानि च भक्ष्याणि यथालाभमाहरेत्" इति । शिंबअव । व्याघ्रनखी ... कल्कंड । ... सुरणं । ... वाल्लिकंदं । वौ ... पिंडीकृतं । ... शकूटं ... तिल्वं ... मसूरं । जीवंति । ... झरसी । ... बाष्पं ... रक्तबाष्पं तु वर्ज्यम् । **स एव**—

" तुंबीदलं च भंजी च शिंबुमुद्गफलानि च । शाकिनीं शत पर्वाणामभ्रं चाश्वासनंदिनीम् ॥
" अगस्त्यं शकुटं शाकं विहितं ब्राह्मणस्य च । एकमूलानि चान्यानि गृह्णीयादनिषेधितान् "॥

तुंबीदळं । ... भंजी । ... मुद्गळं...शतपर्वा...अभ्रं ...अगस्त्यं । चूति ।

एकमूलानिमाह ... **बोधायनः**—

" आम्रं च शृंगिबेरं च कर्करीफलमेव च । नाळिकेरफलं चाभ्रं कपित्थं बदरीफलम् ॥
" द्राक्षाराजादनं जंबुफलं ताटङ्कमप्यथ । खर्जूरं वेत्रकं चैव मातुलुङ्गं च दाडिमम् ॥
" फलान्येतानि पक्वानि कालपक्वानि चाहरेत् ।
" आजकं जरिकं चैव मरीचं सर्षपं तथा । राजमाषं महामाषं श्यामाकं कृष्णमाषकम् ।
" माषं मुद्गं महामुद्गं निष्पावं तिलतिल्वकौ । काळायमुद्गनिष्पावशिंबमाषकुलुत्थकाः ।
" सयूषा वा वियूषा वा पचनीया गुणान्विताः । धान्यानामपि सर्वेषां कृष्णधान्यं विवर्जयेत् ॥
" अथवान्यदलब्धं चेच्छुद्धं तदपि चाहरेत् । माहिषं क्षीरमाजं च गव्यं भक्ष्यं विनिर्दिशेत् ॥
"अमेध्येषु च ये वृक्षा उप्ताः पुष्पफलोपगाः । तेषामपि न दुष्यंति पुष्पाणि च फलानि चेत् "॥ इति ।

कर्करी ... राजादनं । ... दाढमं ... गौली भांजीचमत्स्याक्षीमुद्गशिंबाभ्रतुंबिकाः । निर्लनो पोतकीचैवकारं गाळर्कशाकिनी । गौळी...मत्स्याक्षी...नील्यतोपोतकी...कारंगं ॥

" मंडूकपर्णी जीवंती कुबेराक्षी च पिप्पली । आगस्ती वैष्णवी शाकी विष्णुभक्तिविवर्धिनी ॥

मंडूकपर्णी । वल्ला ... जीवंति । ... कुबेराक्षी ...

व्याघ्रः—"धात्रीफलं सदा यस्तु भक्षयेदप्रमादतः । तस्य नारायणो देवः परमात्मा प्रसीदति"॥

पुराणे । "अतसी तुलसी चैव धात्रीफलमथाच्युतम् । यस्योदरे प्रवर्तंते तस्य सन्निहितो हरिः"॥ इति। अच्युतं तळकायि । **चंद्रिकायाम्**—

"भक्ष्यं भोज्यं च लेह्यं च नमो नारायणेति यः । अभिमंत्र्य स्पृशन्भुंक्ते स याति परमां गतिम्"॥इति ।

श्रुतिः " विष्णुनात्तमश्नंति विष्णुना पीतं पिबंति विष्णुना घ्रातं जिघ्रंति " इति । **शांडिल्यः**—

" वासोभूषणमाल्यादि गंधं तैलं तथौषधम् । सर्वं भगवते दत्वा उपभुंज्यान्निवेदितम् "॥ इति । **जाबालशाखायां श्रूयते**–" रुद्रेणात्तमश्नंति रुद्रेण पीतं पिबंति रुद्रेण घ्रातं जिघ्रंति " ॥ **कठश्रुतावपि**–" त्रिगुप्सातमश्नीयाद्यदि पाप्मन् शिवानर्पितं भुंक्ष्व तदैनो भुङ्क्ष्व मलं भुंक्ष्व विषं भुंक्ष्व क्रिमिं भुंक्ष्व अघं भुंक्ष्व अधो गच्छ गच्छ " इति । अस्यार्थः । त्रिगुः त्रिनेत्रः । तेनप्सातं भक्षितमश्नीयात् । हे पाप्मन् शिवानर्पितं यदि भुंक्ष्व अश्नीयाः तदा एनः पातकं अघमुपपातकं तत् शिवानर्पितभोजने भवतीति । **व्यासः**—

" देवासुरनरैः स्थाप्ये लिंगे चंडाय शंभुना । दत्तस्तस्मै न सर्वत्र प्रसादः शिवशासनात् ॥

" नाश्नीयात्स्थावरे लिंगे चंडाय विनिवेदितम् " ॥ इति । **आदित्यपुराणे**—

" लिंगे स्वायंभुवे बाणे रत्नजे रौप्यनिर्मिते । सिद्धप्रतिष्ठिते लिंगे चंडभागो न विद्यते " ॥

पाद्मे—

" बाणलिंगे स्वयंभूते चंद्रकांते हृदि स्थिते । चांद्रायणसमं ज्ञेयं शंभोर्निर्माल्यभक्षणम्" ॥ इति । एतत्सर्वं वैदिकमार्गपूजितगृहदेवतानिर्माल्यविषयम् ।

" स्वस्य देवस्य यद्दत्तं चरुकं तु न संशयः । तत्प्राशयेत्स्वयं प्राज्ञो नैवान्यस्मै प्रदापयेत् " ॥ इति वचनात् । चरुकं हविः । अन्यस्मै पुत्रादिभ्योऽन्यस्मै । तथा च **पाद्मे**—

" ततः स्वयं तु भुंजीत शुद्धं पुत्रादिभिः सहः । निवेदितं च देवाय तच्छेषं चात्मशुद्धये" ॥ इति । गृहदेवताव्यतिरिक्तदेवतानिवेदितभक्षणं निषेधति **दत्तात्रेयः**—

" निर्माल्यं भक्षयित्वैवमुच्छिष्टमगुरोरपि । मासं पयोव्रतो भुक्त्वा जपन्नष्टाक्षरं सदा ॥

" ब्रह्मकूर्चं ततः पीत्वा शुद्धो भवति मानवः ॥

" निर्माल्यं नैव संरक्षेत्कूपे सर्वं च निक्षिपेत् । स्वीकुर्याद्यदि तन्मोहाद्रौरवे नरके पतेत् ॥

"मक्षिकापादमात्रं तु निर्माल्यं न स्पृशेत्क्वचित् । यदि स्पृशेत्स मोहाद्वै नरकेषु निमज्जति "॥ इति ।

संग्रहेऽपि—" निर्माल्यं च निवेद्यं च भुक्त्वा चांद्रायणं चरेत् " ॥ यत्तु **पुराणवचनम्**—

" प्रापणेन महाविष्णोर्वैश्वदेवं करोति यः । प्राणाग्निहवनं चैव तेन लोका जितास्त्रयः " ॥ इति । तत्तांत्रिकविषयम् । अत एव **महाभारते**—

" पांचरात्रविदो मुख्यास्तस्य गेहे महात्मनः । प्रापणं भगवद्भुक्तं भुंजते चाग्रभोजनम् ॥

" प्राणाग्निहोत्रं यच्चान्यत्सर्वं कुर्वंति तेन तु " ॥ इति ।

पार्वणश्राद्धशिष्टभोजनमाह **मनुः**—

" एवं निर्वपणं कृत्वा पिंडांस्तांस्तदनंतरम् । प्रक्षाल्य हस्तावाचम्य ज्ञातिप्रायं प्रकल्पयेत् ॥

'ज्ञातिभ्यः सत्कृतिं दत्वा ब्राह्मणानपि भोजयेत् '' ॥ ज्ञातिप्रायं ज्ञातिबाहुल्यम् प्रकल्पयेत् । ज्ञातीन् संघातयेदित्यर्थः । बांधवान् संबंध्यादीन् । **चंद्रिकायाम्**—

" एवं देवान् पितॄंश्चैव तर्पयित्वा द्विजोत्तमः । पुत्रमित्रादिसहितो गृहस्थो भोक्तुमर्हति " ॥ इति

आदित्यपुराणे—

" भगिन्यो बांधवाः पूज्याः श्राद्धेऽपि च सदैव हि । दारिद्र्योपहता दीनाः छिन्नांगाश्चाधिकांगुलिः ॥

" वृथाजाता विरेकाश्च व्याधिभारप्रपीडिताः । एते भोजनमर्हंति भोक्तुः सर्वत्र सर्वदा ॥
" बंदिमागधसूताश्च तौर्यत्रिकविदस्तथा । अलब्धलाभाः श्राद्धेषु नाशयंति महद्यशः ॥
" तस्मात्तेऽपि विभर्त्तव्याः स्वकलत्रं विभज्य च " इति ॥ अत्राहुः—
" नवश्राद्धेषु यच्छिष्टं गृहे पर्युषितं च यत् । दंपत्योर्भुक्तशेषं च न भुंजीत कदाचन " ॥ इति **विज्ञानेश्वरेण** नवश्राद्धशेषं वा भोज्यत्वप्रतिपादनादापस्तंबेन च न चातद्गुणायोच्छिष्टं प्रयच्छेदितिश्राद्धविशेषेऽपि निमंत्रितेत विसदृशगुणेभ्य एव पितृशेषदाननिषेधाद्दिष्टैः सह भुज्यतामिति इष्टानां च शिष्टान्नभोजनानुज्ञानात् शेषं चैवानुमान्य च प्रदक्षिणीकृत्य शेषमनुज्ञाप्य अनुज्ञातो गृह्यान् बालवृद्धांश्च परितोष्य भुंजतीतेति **याज्ञवल्क्यबोधायना**दिभिरभ्यनुज्ञानविधानात् **मन्वादि**वचनेषु तथादर्शनाच्च ।
" एकोद्दिष्टे च यद्धोक्तुरभोज्यं शिष्टमोदनम् । चंद्रसूर्योपरागे च शिष्टमन्नं विवर्जयेत् " ॥
इति विशेषनिषेधाच्च
" स्त्रीशूद्रानुपानीतानां श्राद्धोच्छिष्टं न दापयेत् । यो दद्याद्रागसंमोहान्न तद्गच्छति वै पितॄन् " ॥
इत्यादिभुक्तिपात्रस्थोच्छिष्टविषयत्वात्पितृशेषभोजने न दोष इति । अन्ये त्वाहुः—
" श्राद्धीयमन्नं पितृभुक्तशेषं ये भुंजते ते नरकानशेषान् ।
" प्रयान्ति कर्ता पितरश्च सर्वे भुंजीत कर्त्ता सह तत्सपिंडैः ॥
" श्राद्धशेषं तु यो भुंक्ते तत्कर्ता ज्ञातिभिर्विना । तस्य वैवस्वतो भोक्तुर्मलं प्राशयते पितॄन् " ॥ इति ।
इत्यादिना सपिंडव्यतिरिक्तानां निषेधान्नपार्वणेषु अन्येषां पितृशेषं भोज्यमिति ।
अथ भोज्याभोज्यान्नाः । तत्रापस्तंबः—
" द्वावेवाश्रमिणौ भोज्यौ ब्रह्मचारी गृही तथा । मुनेरन्नं न भोज्यं स्यात्सर्वेषां लिंगिनां तथा " ॥
लिंगिनः पाशुपतादयः ।
" यत्यन्नं यतिपात्रस्थं यतिना प्रेषितं च यत् । अन्नत्रयं न भोक्तव्यं भुक्त्वा चांद्रायणं चरेत् " ॥
प्रजापतिः—
" श्रद्दधानस्य भोक्तव्यं चोरस्यापि विशेषतः । न त्वेव बहुयाज्यस्य यश्चोपनयते बहून् ॥
" अवलिप्तस्य मूर्खस्य दुष्टवृत्तस्य दुर्मतेः । अन्नमश्रद्दधानस्य यो भुंक्ते भ्रूणहा स वै " ॥
मनुः (४।२२४–२२६)—
" श्रोत्रियस्य कदर्यस्य वदान्यस्य च वार्धुषेः । मीमांसित्वोभयं देवाः सममन्नमकल्पयन् ॥
" तान्प्रजापतिरित्याह मा कृद्ध्वं विषमं समम् । श्रद्धापूतं वदान्यस्य हतमश्रद्धयेतरत् ॥
" श्रद्धयेष्टं च पूर्तं च नित्यं कुर्यादतंद्रितः । श्रद्धाकृते ह्यक्षये ते भवतः स्वागतैर्धनैः " ॥ इति ।
कदर्यो लुब्धः ।
" आत्मानं धर्मकृत्यं च पुत्रदारांश्च पीडयेत् । लोभाद्यः पितरौ भृत्यान् स कदर्य इति स्मृतः " ॥
इत्युक्तः । वार्धुषिः निषिद्धवृत्त्युपजीवी आत्मस्तुतिपरनिंदाकर्ता च ।
" द्विजो निषिद्धया वृत्त्या जीवन्वार्धुषिकः स्मृतः ॥
" यस्तु निंदेत्परगुणान्प्रशंसत्यात्मनो गुणान् । स वै वार्धुषिको नाम हव्यकव्येषु गर्हितः " ।
इति विष्णुस्मरणात्—

१ खग–विभक्तव्याः ।

आपस्तंबः (१।६।१९।२-१०)–"क आश्यान्नः यं ईप्सेदिति कण्वः । पुण्य इति कौत्सः । यः कश्चिद्दद्यादिति वार्ष्यायणिः । यदि ह रजः स्थावरं पुरुषे भोक्तव्यम् । अथ चेच्चलं दानेन निर्दोषो भवति शुद्धा भिक्षा भोक्तव्या । एककुणिका काण्वकुत्सौ तथा पुष्करसादिः । सर्वतोपेतं वार्ष्यायणीयम् । पुण्यस्येप्सतो भोक्तव्यम् । पुण्यस्याप्यनीप्सतो न भोक्तव्यम्" इति ।

गौतमः (१७।१)– "प्रशस्तानां स्वकर्मसु द्विजातीनां ब्राह्मणो भुंजीत" ॥ पराशरः (६।१८)– "क्षत्रियश्चापि वैश्यश्च क्रियावंतौ शुचिव्रतौ । तद्गृहेषु द्विजैर्भोज्यं हव्यकव्येषु नित्यशः" ॥ इति ।

स्मृतिरत्ने—

"ब्राह्मणस्य सदाऽश्नीयात् क्षत्रियस्य तु पर्वसु । उत्सवेषु तु वैश्यस्य शूद्रस्य न कदाचन" ॥ इति ।

मनुः (४।२०५–२०६)—

"नाश्रोत्रियतते यज्ञे ग्रामयाजहुते तथा । स्त्रिया क्लीबेन च हुते भुंजीत ब्राह्मणः क्वचित् ॥

"अश्रीकमेतत् साधूनां यत्र जुह्वत्यमी हविः । प्रतीपमेतद्देवानां तस्मात्तत्परिवर्जयेत्" ॥

ग्रामयाजो बहूनां याजकः । एतद्भोजनं साधूनामश्रीकममंगलम् । प्रतीपं प्रतिकूलमित्यर्थः ।

स एव (४।२०७,२०९–२२३)—"मत्तक्रुद्धातुराणां च न भुंजीत कदाचन ॥ (२०७)

"गणान्नं गणिकान्नं च विदुषां यज्जुगुप्सितम् ॥ (२०९)

"स्तेनगायकयोश्चान्नं तक्ष्णो वार्धुषिकस्य च । दीक्षितस्य कदर्यस्य बद्धस्य निगळेन च ॥ (२१०)

"अभिशस्तस्य षण्ढस्य पुंश्चल्या दांभिकस्य च ॥ (२११)

"चिकित्सकस्य मृगयोः क्रूरस्योच्छिष्टभोजिनः । उग्रान्नं सूतिकान्नं च पर्याचान्तमनिर्दशम्" ॥ (२१२)

अनिर्दशं सूतिकान्नमित्यन्वयः ।

"अनर्चितं वृथामांसमवीरायाश्च योषितः । द्विषदन्नं नगर्यन्नं पतितान्नमवक्षुतम् ॥ (२१३)

अनर्चितमवज्ञया दत्तमवीरायाः पतिपुत्रहीनायाः । नगर्यन्नमितिदेशसंबंधेनान्नस्य निषेधः ।

"पिशुनानृतिनोश्चान्नं क्रतुविक्रयकस्य च । शैलूषतंतुवायान्नं कृतघ्नस्यान्नमेव च ॥ (२१४)

शैलूषः नटः ।

"कर्मारस्य निषादस्य रंगावतरकस्य च (२१५) । श्ववतां शौंडिकानां च चेलनिर्णेजकस्य च ॥ (२१६) ।

कर्मारः अयस्कारः । श्ववतां श्वपोषकाणाम् । शौंडिकानां सुराविक्रयिणाम् । चेलनिर्णेजकस्य वस्त्रशोधकस्य ।

"सुवर्णकर्तुर्वेनस्य शस्त्रविक्रयिणस्तथा (२१६) ॥ रंजकस्य नृशंसस्य यस्य चोपपतिर्गृहे ॥

वैदेहकेनांबष्ठ्यामुत्पन्नो वेनः । रंजकस्य वस्त्रादीनां नीलादिरागकारस्य । नृशंसस्य निर्दयस्य । यस्य गृहे उपपतिर्जारो वर्तते तस्य चान्नं न भुंजीतेत्यर्थः ।

"मृष्यंति ये चोपपतिं स्त्रीजातीनां च सर्वशः । अनिर्दशं च प्रेतान्नमतुष्टिकरमेव च ॥ (२१७)

"राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसम् । आयुः सुवर्णकारान्नं यशश्चर्मावकर्तिनः ॥ (२१८)

"कारुकान्नं प्रजा हंति बलं निर्णेजकस्य च" ॥ कारुकान्नं कर्मकारान्नम् ।

"गणान्नं गणिकान्नं च लोकेभ्यः परिकृंतति । (२१९)

"पूयं चिकित्सकस्यान्नं पुंश्चल्यास्त्वन्नमिन्द्रियम् । विष्ठा वार्धुषिकस्यान्नं शस्त्रविक्रयिणो मलम् ॥ (२२०)

इन्द्रियं रेतः ।

"य एतेऽन्ये[1] त्वभोज्यान्नाः क्रमशः परिकीर्तिताः । तेषां त्वगस्थिरोमाणि वदन्त्यन्नं मनीषिणः ॥ (२२१)

---

1 ख–भ्यो ।

"भुक्त्वाऽतोन्यतमस्यान्नममत्या तु त्र्यहं क्षिपेत्। मत्या भुक्त्वाचरेत्कृच्छ्रं रेतोविण्मूत्रमेव च॥ (२२२)
"नाद्याच्छूद्रस्य पक्वान्नं विद्वानश्राद्धिनो द्विजः। आममेवाददीतास्मादावृत्तावैकरात्रिकम्"॥ (२२३)
इति। अत्रामस्याभ्यनुज्ञानात्पूर्वोक्तेषु मत्तक्रुद्धादिषु पक्वामयोरुभयोरपि निषेधः।

याज्ञवल्क्यः (आ. १६१)—

"कदर्यबद्धचोराणां क्लीबरंगावतारिणाम्। वैणाभिशस्तवार्धुष्यगणिकागणदीक्षिणाम्"॥
वीणावादनजीवी वेणुच्छेदजीवी च वैणः। गणदीक्षी बहुयाजकः। अन्नं नाद्यादित्यनुवर्तते।

स एव (आ. १६२)—

" चिकित्सकातुरक्रुद्धपुंश्चलीमत्तविद्विषाम्। क्रूरोग्रपतितव्रात्यडांभिकोच्छिष्टभोजिनाम्"॥
क्रूरो दृढाभ्यंतरकोपः। उग्रः वाक्कायव्यापारेण उद्वेजकः।
" अवीरस्त्रीस्वर्णकारस्त्रीजितग्रामयाजिनाम्। शस्त्रविक्रयिकर्मारतुन्नवायश्ववृत्तिनाम्" ॥(१६३)
ग्रामयाजी ग्रामस्य शांत्यादिकर्ता बहूनां वोपनेता।

स एव (१६४–१६५)—

" नृशंसराजरजककृतघ्नवधजीविनाम्। चेलधावसुराजीवसहोपपतिवेश्मनाम्॥
" पिशुनानृतिनोश्चैव तथा चाक्रिकबंदिनाम्। एषामन्नं न भोक्तव्यं सोमविक्रयिणां तथा"॥
चाक्रिकस्तैलिकः। द्विजानामेवैतेषामन्नं न भोक्तव्यम्। शूद्रस्य प्राप्त्यभावात्।
संग्रहे—" त्यजेदनुपनीतान्नमंधस्य पतितस्य च। वेदाध्ययनहीनस्य कन्याविक्रयिणस्तथा॥
" दरिद्रस्य च मूर्खस्य यतिनिंदापरस्य च। अयाज्ययाजकस्यान्नं निर्मर्यादस्य कर्मिणः॥
"देवद्रोहपरस्यान्नं तथा विज्ञानदूषिणः। दग्धांगस्यायसैर्दिव्यैः सोमविक्रयिणस्तथा"॥ इति।
यमः—"चक्रोपजीवी गांधर्वः कितवस्तस्करस्तथा। ध्वजी दारोपजीवी च शूद्राध्यापकयाजकौ॥
" कुलालश्चित्रकर्मा च वार्धुषिश्चर्मविक्रयी। अभोज्यान्ना इमे षंडमार्जारावाखुकुक्कुटौ॥
" पतिताश्चापविद्धाश्च चंडाला अधमाश्च ये।
" न जुहोत्युचिते काले नास्नाति न ददाति च। पितृदेवार्चनाद्धीनः स षंढः परिकीर्तितः।
" डंभार्थं यजते यश्च तप्यते च तपस्तथा। न परत्रार्थ इत्युक्तः स मार्जारः प्रकीर्तितः॥
" विभवे सति नैवार्थं ददाति न जुहोति च। तमाहुराखुं तस्यान्नं भुक्त्वा कृच्छ्रेण शुध्यति॥
" सभागतानां यः सभ्यः पक्षपातं समाश्रयेत्। तमाहुः कुक्कुटं देवास्तस्याप्यन्नं विगर्हितम्॥
" स्वधर्मं यः समुत्सृज्य परधर्मं समाचरेत्। अनापदि तु विद्वाद्भिः पतितः परिकीर्त्यते॥
" देवत्यागी पितृत्यागी गुरूणामप्यपूजकः। गोब्राह्मणस्त्रीवधकृत् अपविद्धः प्रकीर्तितः॥
" आशाकरस्त्वदाता च दातुश्च प्रतिषेधकः। शरणागतं यस्त्यजति स चंडालः प्रकीर्तितः"॥
स्मृतिरत्ने—"अवलिप्तस्य मूर्खस्य दुष्टवृत्तस्य दुर्मतेः। अन्नमश्रद्दधानस्य यो भुंक्ते भ्रूणहा स वै"॥
अपरार्के—" विभवे चाग्निहीनस्य न चाश्नीयादनापदि। स्मार्ताग्नेर्वैदिकस्याग्नेः परिग्रहमकुर्वतः॥
" विष्णुं जामातरं मन्ये तस्य मन्युं न कारयेत्। अप्रजायां तु कन्यायां नाश्नीयात्तस्य वै गृहे॥
" भुंजीयाद्यदि मोहात्मा श्वशुरो नरकं व्रजेत्"॥ इति।

आपस्तंबः (१।६।१८।१०–१३)—" त्रयाणां वर्णानां क्षत्रियप्रभृतीनां समावृत्तेन न भोक्तव्यम्। प्रकृत्या ब्राह्मणस्य भोक्तव्यं कारणादभोज्यम्। यत्राप्रायश्चित्तं कर्मासेवते प्रायश्चित्त-

---

१ गध–तन्तु। २ गघ–भिषजो। ३ गघ–नांधस्य। ४ ख–र्षि। ५ खग–जपते।

वति चरितनिर्वेषस्य भोक्तव्यम्। सर्ववर्णानां स्वधर्मे वर्तमानानां भोक्तव्यं शूद्रवर्जमित्येके" इति। अस्यार्थः। समावृत्तः क्षत्रियादीनां गृहे न भुंजीत। ब्राह्मणस्य त्वन्नं स्वभावेनैव भोक्तव्यम्। यदा प्रायश्चित्तवत्यात्मनि चोदितं प्रायश्चित्तं मुक्त्वा कर्मान्तरमासेवते तदैतस्मात्कारणादभोज्यम्। चरितनिर्वेषस्य कृतप्रायश्चित्तस्य भोक्तव्यम्। एतन्महापातकप्रायश्चित्तव्यतिरिक्तविषयम्। "नास्यास्मिन्लोके प्रत्यापत्तिर्विद्यते कल्मषं तु निर्हण्यते" इति **स्मरणात्**। "शूद्रवर्जिनां सर्ववर्णानामन्नं भोज्यमित्येके मन्यन्त" इति।

स एव (१।६।१८–२३;१९।१)—

" संघान्नमभोज्यम्। परिक्रुष्टं च। सर्वेषां च शिल्पाजीविनाम्। ये च शस्त्रमाजीवंति। ये चाधिम्। भिषग्वार्धुषिको दीक्षितो क्रीतराजकोऽग्नीषोमीयसंस्थायामेव। हुतायां वा वपायां दीक्षितस्य भोक्तव्यम्। यज्ञार्थे वा निर्दिष्टे शेषात्। भुंजीरन्निति हि ब्राह्मणम्। क्लीबो। राज्ञां प्रेषकरः। अहविर्याजी। चारी। आविधिना च प्रव्राजितो यश्चाग्नीनपास्यति। यश्च सर्वान्वर्जयते सर्वान्नी च श्रोत्रियो निराकृतिर्वृषलीपतिः। मत्त उन्मत्तो बद्धोऽणिकः प्रत्युपविष्टो यश्च प्रत्युपवेशयते तावंतं कालम्" इति। आभिचारादौ अहविषा रुधिरादिना यो जुहोति स अहविर्याजी। चारी अविधिना प्रव्रजितः शाक्यादिः। यश्च सर्वान्भोजने वर्जयति यश्च सर्वेषामन्नं भुंक्ते तावप्यभोज्यान्नौ। निराकृतिः निःस्वाध्यायः। अणिकः पुत्रात् श्रुतग्राही। प्रत्युपविष्टः ऋणादिना कारणेनाऽधमर्णादिकं निरुध्य तत्पार्श्वे उपविष्टः। तस्य परिहारमकुर्वंस्तेन सहासीनः प्रत्युपवेशयिता। एते मत्तादयः यावन्मदाद्यनुवृत्तिस्तावंतं कालमभोज्यान्ना इत्यर्थः। **स एव** (१।६।१९।१४–१५)—

" चिकित्सकस्य मृगयोः शल्यकृंतस्य पाशिनः। कुलटायाः षंडकस्य च तेषामन्नमनाद्यम्। अथाप्युदाहरंति। अन्नादेर्भ्रूणहा मार्ष्टयेनेनाभिशंसति। स्तेनः प्रमुक्तो राजनि याचन्ननृतसंकरः"॥ इति। भ्रूणहा स्वीयं पापमन्नादेर्मार्ष्टि लिंपति। अनेनाः निष्पापः मिथ्यावादिनि मार्ष्टि। याचन्नसत्यप्रतिज्ञे मार्ष्टीत्यर्थः। **व्यासः**—

" निहन्त्यन्नं मनः प्राणान् चक्षुः श्रोत्रे तथैव च। स्मृतिं मेधां धृतिं शुक्रं पारक्यं योऽन्नमश्नुते॥
" परपाकान्नपुष्टस्य सततं गृहमेधिनः। इष्टं दत्तं तपोधीतं यस्यान्नं तस्य तद्भवेत्॥
" यस्यान्नेन तु भुंक्तेन भार्या समधिगच्छति। यस्यान्नं तस्य ते पुत्रा अन्नाद्रेतः प्रजायते "॥

यमः—

" किल्बिषं हि मनुष्याणामन्नमाश्रित्य तिष्ठति। यो हि यस्यान्नमश्नोति स तस्याश्नाति किल्बिषम्॥
" स्वपाके वर्तमाने यः परपाकं निषेवते। स श्वत्वं सूकरत्वं च गर्दभत्वं च गच्छति॥
" परपाकं परगृहे नाद्याद्विप्रो विचक्षणः। गृहस्थपतनं ह्येतत् परपाकोपजीवनम् "॥ इति।

मनुः (३–१०४)

" उपासते ये गृहस्थाः परपाकमबुद्धयः। तेन ते प्रेत्य पशुतां व्रजंत्यन्नादिदायिनाम् "॥

जमदग्निः—

" पितृदेवक्रियां कृत्वा परपाकरतिस्तु यः। दातुः कर्मफलं याति भोक्ता भुंजीत किल्बिषम्"॥

यमः—

" परपाकं सदा नाद्याद्धुत्वाऽप्यग्निं यथाविधि। न हि हित्वा स्वकार्याणि परकार्यरतो भवेत्॥
" परान्नेनोदरस्थेन यः करोति शुभाशुभम्। अन्नदस्य त्रयो भागाः कर्ता भागेन लिप्यते॥

“ भूमिं गां च सुवर्णं च रत्नानि विविधानि च । सर्वतः प्रतिगृह्णीयात् भोजनं तु विसर्जयेत्” ॥
उशनाः—
“ परान्नं परवस्त्रं च परांबु परयोषितः । परवेश्मनिवासश्च हरन्त्येतानि संपदम् ” ॥
रत्नावल्याम्—
“ सर्वं तु तरितुं शक्यमन्नलोपो हि दुस्तरः । दुष्कृतं हि मनुष्याणामन्नमाश्रित्य तिष्ठति ” ॥
लिखितपराशरौ—
“ परपाकनिवृत्तस्य परपाकरतस्य च । अपचस्य च भुक्त्वाऽन्नं द्विजश्चान्द्रायणं चरेत् ॥
“ गृहीत्वाऽग्निं समारोप्य पंचयज्ञान् न निर्वपेत् । परपाकनिवृत्तोऽसौ मुनिभिः परिकीर्तितः ॥
“ पंचयज्ञान् स्वयं कृत्वा परान्नेनोपजीवति । सततं प्रातरुत्थाय परपाकरतस्तु सः ॥
“ गृहस्थधर्मा यो विप्रो ददाति परिवर्जितः । ऋषिभिर्धर्मतत्त्वज्ञैरपचः परिकीर्तितः ॥
“ अपचाय च यद्दानं दातुश्चास्य कुतः फलम् । दाता प्रतिगृहीता च द्वौ तौ निरयगामिनौ ॥
“ परिवित्तेस्तु यच्चान्नं परिवेत्रन्नमेव च । कुंडान्नं गोलकान्नं च देवलान्नं तथैव च ॥
“ पुरोहितस्य यच्चान्नं भुक्त्वा चांद्रायणं चरेत्” ॥ इति । अभ्यासाभिप्रायेणेदं चांद्रायणव्रतम् ।
अनभ्यासे त्वीदृशान्नभोजने **भरद्वाज** आह—
“ निराचारस्य विप्रस्य निषिद्धाचरणस्य च । अन्नं भुक्त्वा द्विजः कुर्याद्दिनमेकमभोजनम्”॥ इति ।
पराशरः—
“ सदाचारस्य विप्रस्य तथा वेदांतवेदिनः । भुक्त्वाऽन्नं मुच्यते पापादहोरात्रांतरान्नरः” ॥ इति ।
शातातपः—
“ यो हि हित्वा विवाहाग्निं गृहस्थ इति मन्यते । अन्नं तस्य न भोक्तव्यं वृथापाको हि स स्मृतः ॥
‘वृथापाकस्य भुक्त्वाऽन्नं प्रायश्चित्तं चरेत् द्विजः।प्राणायामांस्त्रिरभ्यस्य घृतं प्राश्य विशुध्यति’॥ इति।
अपरार्के—
“ अभोज्यं ब्राह्मणस्यान्नं वृषलेन निमंत्रितम् । तथैव वृषलस्यान्नं ब्राह्मणेन निमंत्रितम् ” ॥
गौतमः—
“ ब्राह्मणान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददत् । अभोज्यं तु तयोरन्नं भुक्त्वा चांद्रायणं चरेत्”॥
पराशरः—
“ आमं वा यदि वा पक्वं शूद्रान्नमुपभोजयेत् । किल्बिषं भजते भोक्ता यश्च विप्रः पुरोहितः ॥
“ आमं शूद्रस्य विप्रार्थं यस्तु पाचयते द्विजः । त्रयस्ते नरकं यांति दाता भोक्ता च पाचकः ॥
“ गुर्वर्थमतिथीनां च भृत्यानां च विशेषतः । प्रतिगृह्य तु दातव्यं न भुंजीत स्वयं ततः ॥
“ अकृत्वैव निवृत्तिं यः शूद्रान्नान्म्रियते द्विजः । आहिताग्निर्विशेषेण स शूद्रगतिभाग्भवेत् ॥
“शूद्रान्नरसपुष्टस्य ह्यधीयानस्य नित्यशः । जपतो जुह्वतो वाऽपि गतिरूर्ध्वा न विद्यते॥ (१२।३१)
“ शूद्रान्नं शूद्रसंपर्कः शूद्रेण तु सहासनम् । शूद्रात् ज्ञानागमश्चापि ज्वलंतमपि पातयेत् ॥
“ मृतसूतकपुष्टान्नं द्विजं शूद्रान्नभोजिनम् । अहं तन्न विजानामि कां कां योनिं गमिष्यति ॥ (३३)
“गृध्रो द्वादशजन्मानि दश जन्मानि सूकरः।श्वयोनौ सप्तजन्म स्यादित्येवं मनुरब्रवीत्”॥(३४)इति।
वसिष्ठः (२१।२९)—
“ शूद्रान्नेन तु भुक्तेन जठरस्थेन यो मृतः । स वै खरत्वमुष्ट्रत्वं शूद्रत्वं चोपगच्छति ” ॥

स्मृतिभास्करे—
" आमं शूद्रस्य पक्वान्नं पक्वमुच्छिष्टभोजनम् । तस्मादामं च पक्वं च दूरतः परिवर्जयेत् ॥
"षण्मासान् यो द्विजो भुङ्क्ते शूद्रस्यान्नं विगर्हितम्। स तु जीवन् भवेच्छूद्रो मृतः श्वा चाभिजायते॥
"सूतके मृतके भुक्त्वा गृहीते शशिभास्करे। जलाशौ हस्ततो भुक्त्वा न भूयः पुरुषो भवेत् "॥ इति ।
शूद्राद्यन्नभोजने प्रायश्चित्तमाह **पराशरः** (११।४–५)—
" शूद्रान्नं सूतकान्नं च अभोज्यस्यान्नमेव च । शंकितं प्रतिषिद्धान्नं शूद्रोच्छिष्टं तथैव च ॥
" यदि भुक्तं तु विप्रेण अज्ञानादापदापि वा । ज्ञात्वा समाचरेत्कृच्छ्रं ब्रह्मकूर्चं तु पावनम् "॥ इति ।
अज्ञाने आपदि च ब्रह्मकूर्चं ज्ञात्वा भोजने प्राजापत्यमित्यर्थः । एतच्च ब्रह्मकूर्चमविद्वद्विषयम् ।
विद्वांसं प्रत्याह **स एव** (११।१९, १८)—
" आपत्काले तु विप्रेण भुक्तं शूद्रगृहे यदि । मनस्तापेन शुध्येत द्रुपदां वा शतं जपेत् ॥ (१९)
" शुष्कान्नं गोरसं स्नेहं शूद्रगेहाद्यदागतम् । पक्वं विप्रगृहे भुक्तं भोज्यं तन्मनुरब्रवीत्" ॥ (१८)
शुष्कान्नं व्रीहितंडुलादि । **स एव** (११।१४)—
" घृतं क्षीरं तथा तैलं गुडं स्नेहेन पाचितम्। गत्वा नदीतटे विप्रो भुंजीयाच्छूद्रभोजनम्" ॥ इति।
एतच्च मार्गशांत्यादौ पूर्ववर्णासंभवे वेदितव्यमिति **माधवीये** । **चतुर्विंशतिमते**—
" आरनालं तथा क्षीरं कांदुकं दधिसक्तवः। स्नेहपक्वमपक्वं च शूद्रस्यापि न दुष्यति "॥ इति ।
अंगिराः—
" स्वपात्रे यत्तु विन्यस्तं द्रव्यं तच्छुचि नित्यशः । पात्रांतरगतं ग्राह्यं शूद्राद्यद्गृहमागतम् ॥
" शूद्रवेश्मनि विप्रेण क्षीरं वा यदि वा दधि । निवृत्तेन न भोक्तव्यमित्युक्तं स्मृतिवेदिभिः "॥
निवृत्तेन शूद्रान्नभोज्यन्नान्निवृत्तेनेत्यर्थः ।
मनुः–" गोरसं चैव सक्तूंश्च तैलं पिण्याकमेव च। अपूपान्भक्षयेच्छूद्राद्यच्चान्यत्पयसा कृतम् "॥
हारीतः–"कंदुपक्वं स्नेहपक्वं पायसं दधि सक्तवः।एतानि शूद्रानीतानि भोज्यानि मनुरब्रवीत्"॥इति।
अपूपादिपचनार्थं परिमंडलतया कृतमयोमयं पात्रं कंदुः । तत्र पक्वं कंदुपक्वमित्यर्थः ।
शंखः–"गृहाश्वरथभूम्यर्थे गवार्थे तु विशेषतः। श्रोत्रियेण तु भोक्तव्यं शूद्राणां तु यमोऽब्रवीत् "॥
शातातपः—
" तैलं घृतं दधि क्षीरं तथैवेक्षुरसं गुडम् । शूद्रभांडस्थितं तक्रं तथा मधु न दुष्यति "॥
संग्रहे—
" हैयंगवीनं गोक्षीरं पिण्याकं दधि सक्तवः। स्नेहपक्वं च तक्रं च शूद्रादपि न दुष्यति "॥इति।
घृतादिभोजने हेयोपादेयौ शूद्रौ विविनक्ति **पराशरः**—
" मद्यमांसरतं नित्यं नीचकर्मप्रवर्तकम् । तं शूद्रं वर्जयेद्विप्रः श्वपाकमिव दूरतः ॥
"द्विजशुश्रूषणरतान् मद्यमांसविवर्जितान्। स्वकर्मनिरतान्नित्यं तान् शूद्रान्न त्यजेत् द्विजः" ॥ इति।
एतत्सर्वमापद्विषयम् । तथा च **मनुः** (१०।१०४)—
" आममेवाददीतास्मादवृत्तावैकरात्रिकम् । जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः ॥
" लिप्यते न स पापेन पद्मपत्रमिवांभसा " ॥ इति । **याज्ञवल्क्यः** (आ. १६६)—
" शूद्रेषु दासगोपालकुलमित्रार्धसीरिणः । भोज्यान्ना नापिताश्चैव यश्चात्मानं निवेदयेत् " ॥

१ क्ष–शूद्रान्नभुजो ।

देवलः—
" स्वदासो नापितो गोपः कुंभकारः कृषीवलः । ब्राह्मणेनापि भोज्यान्नाः पंचैते शूद्रयोनयः " ॥
पराशरः (११।२०–२३)—
" दासा नापितगोपालकुलमित्रार्धसीरिणः । एते शूद्रेषु भोज्यान्ना यश्चात्मानं निवेदयेत् ॥
" शूद्रकन्यासमुत्पन्नो ब्राह्मणेन तु संस्कृतः । संस्कारात्तु भवेद्दासो ह्यसंस्कारात्तु नापितः ॥
" क्षत्रियात् शूद्रकन्यायां सूतो जायेत नामतः । स गोपाल इति ज्ञेयो भोज्यो विप्रैर्न संशयः ॥
" वैश्यकन्यासमुद्भूतो ब्राह्मणेन तु संस्कृतः । स ह्यर्धसीरी विज्ञेयो भोज्यो विप्रैर्न संशयः " ॥ इति ।
एतानि **याज्ञवल्क्या**दिवचनानि युगांतरविषयाणि ।
" शूद्रेषु दासगोपालकुलमित्रार्धसीरिणाम् । भोज्यान्नता कलौ नास्ति तीर्थसेवा च दूरतः " ॥ इति
निषेधस्मरणात् । अभोज्यान्नानां नटादीनां जलादौ पीते प्रायश्चित्तमाह **पराशरः** (११।२४-३६)–
" भांडस्थितमभोज्येषु जलं दधि घृतं पयः । अकामतस्तु यो भुंक्ते प्रायश्चित्तं कथं भवेत् ॥
" ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा उपसर्पति । ब्रह्मकूर्चोपवासेन याज्यवर्णस्य निष्कृतिः ॥
"शूद्राणां नोपवासः स्यात् शूद्रो दानेन शुध्यति । भाण्डस्थमन्त्यजानां तु जलं दधि पयः पिबेत् ।
" ब्रह्मकूर्चोपवासेन द्विजातीनां तु निष्कृतिः ॥ (६।२९)
" चंडालघटसंस्थं तु यत्तोयं पिबति द्विजः । तत्क्षणात्क्षिपते यस्तु प्राजापत्यं समाचरेत् ॥ (२४)
"यदि न क्षिप्यते तोयं शरीरे यस्य जीर्यते । प्राजापत्यं न दातव्यं कृच्छ्रं सांतपनं चरेत्"॥ (२६)इति।
श्वशृगालादिमरणोपहतकूपादिजलपाने वर्णविशेषेण प्रायश्चित्तमाह **स एव** (११।३८–४२)—
" कूपे च पतितं दृष्ट्वा श्वशृगालादिमर्कटम् । अस्थिचर्मादिपतितं पीत्वा मेध्या अपो द्विजः ॥
" नारं तु कुणपं काकं विड्वराहं खरोष्ट्रकम् । गवयं सौप्रतीकं च मायूरं खाङ्गकं तथा ॥
" वैयाघ्रमार्क्षं सैंहं वा कूपे यदि निमज्जति ।
" तटाकस्याथ दुष्टस्य पीतं स्यादुदकं यदि । प्रायश्चित्तं भवेत्पुंसः क्रमेणैतेन सर्वशः ॥
" विप्रः शुध्येत्त्रिरात्रेण क्षत्रियस्तु दिनद्वयम् । एकाहेन तु वैश्यस्तु शूद्रो नक्तेन शुध्यति ॥
" चंडालखातवापीषु पीत्वा सलिलमग्रजः । अज्ञानाच्चैकभक्तेन त्वहोरात्रेण शुध्यति ॥ (६।२३)
"चंडालभाण्डसंस्पृष्टं पीत्वा कूपगतं जलम्।गोमूत्रयावकाहारः त्रिरात्राच्छुद्धिमाप्नुयात्"॥(२४)इति।
महातटाकादिषु चंडालादिसंबंधे न कश्चिद्दोषः । अल्पेषु कूपवन्न्यायः ॥ इति । **माधवीये**—
यमः—" अल्पानामेव पयसां महत्सु न तु दूषणम् ।
" अक्षोभ्याणामपां नास्ति प्रसूतानां च धावताम् । स्तोकानामुद्धृतानां च दोषदुष्टत्वमिष्यते ॥
" तथाक्षोभ्यतटाकादिनदीवापीसरांसि च । चंडालाद्यशुचिस्पर्शे तीर्थतः परिवर्जयेत् " ॥
तीर्थं जलावतरणप्रदेशः ।
हारीतः–"क्लिन्ने भिन्ने शवे तोये तत्रस्थं यदि तत्पिबेत् । शुध्यै चांद्रायणं कुर्यात्तप्तकृच्छ्रमथापि वा॥
" सीरखातप्रपातोयं पीत्वा चांद्रायणं चरेत् । अज्ञानादापदावापि पंचगव्येन शुध्यति "॥ इति।
पराशरः—(२१।१५।१)
" भुंक्तेऽज्ञानात् द्विजश्रेष्ठश्चंडालान्नं कथंचन । गोमूत्रयावकाहारो दशरात्रेण शुध्यति ॥
" अमेध्यरेतो गोमांसं चंडालान्नमथापि वा । यदि भुक्तं तु विप्रेण कृच्छ्रं चांद्रायणं चरेत् " ॥
अमेध्यं विण्मूत्रादि । तदुपदुष्टस्यान्नस्य भोजनं अमेध्यभोजनम् ॥

---

१ गक–स्पष्ट ।

यत्तु **चतुर्विंशतिमते**ऽभिहितम्—

" विण्मूत्रभक्षणे विप्रश्चरेच्चांद्रायणद्वयम् । श्वादीनां चैव विण्मूत्रे चरेच्चांद्रायणत्रयम् " ॥ इति एतदभ्यासविषयम् । अत्र **विष्णुः**—(५१।४) " सर्वेष्वेतेषु द्विजानां प्रायश्चित्तांते पुनःसंस्कारं कुर्यात् " ॥ इति । **हारीतः**—"हस्तदत्तभोजने दुष्टपंक्तिभोजने व्यक्तमूत्रपुरीषकरणे मृतसूतकान्नभोजने शूद्रैः सह संसुप्ते त्रिरात्रमभोजनम् " ॥ इति । इदं कामकृतविषयम् । अकामतस्तु "दिनमेकमभोजनम् " **विज्ञानेश्वरेणो**क्तं द्रष्टव्यम् (प्रा. पृ. ३१४ पं. २३) । यत्तु **मार्कंडेयः**—"भुक्त्वा तु ब्राह्मणाशौचे चरेत्सांतपनं द्विजः । शूद्रस्य च तथा भुक्त्वा द्विजश्चांद्रायणं चरेत्" ॥ इति । एतत्कामकृताभ्यासविषयम् । यच्च **शखेनो**क्तम्—

" शूद्रस्य सूतके भुक्त्वा षण्मासान्व्रतमाचरेत् । ब्राह्मणस्य तथा शौचे भुक्त्वा मासं व्रती भवेत्" ॥ इति तदत्यंताभ्यासविषयम् । **पराशरः** । (११।१५–१७)—

" अज्ञानाद् भुंजते विप्राः सूतके मृतकेऽपि वा । प्रायश्चित्तं कथं तेषां वर्णे वर्णे विनिर्दिशेत् ॥

" गायत्र्यष्टसहस्रेण शुद्धिः स्याच्छूद्रसूतके । वैश्ये पंचसहस्रेण त्रिसहस्रेण क्षत्रिये ॥

" ब्राह्मणश्च यदा भुंक्ते द्वेसहस्रे तु जापयेत् । अथवा वामदेव्येन साम्ना चैकेन शुध्यति " ॥ इति । अत्र विकल्पः । सर्वशौचोत्तरकालमेव प्रायश्चित्तं द्रष्टव्यम् । तथा च **विष्णुः** (२२।७)—

" ब्राह्मणादीनामाशौचे यः सकृदेवान्नमश्नाति तस्य तावदेवाशौचं यावत्तेषाम् । अज्ञानेनापदाद्वा भोजने अहःस्वाशौचापगमे प्रायश्चित्तं कुर्यात् " ॥ इति । **संग्रहे**ऽपि—

" अघेभोक्तुर्धियाशौचं शिष्टाहं चैंदवं ततः । मोहात्तावदघं यावद्भुक्तं जीर्णं पतत्यधः ॥

" आपत्स्वहरघे भोक्तुरिदं ज्ञातेर्न दोषकृत् " ॥ इति । अघे धीपूर्वं भुक्तवतः शिष्टाहमघं भवति । अघानंतरं चांद्रायणादि । अज्ञानात्तत्र भोक्तुस्तदहरेवाघं यावद्भुक्तं जीर्णं सदधो व्रजति । आपत्काले धीपूर्वमेव भुक्तवतोऽपि दिनमेवाघम् । एतत्सर्वं सपिंडस्य न दोषकृदित्यर्थः । **अत्रिः**— " शूद्रान्नं सूतकान्नं च श्राद्धान्नं चैव वर्जयेत् ।

" नग्नप्रच्छादने श्राद्धे नवश्राद्धे तथैव च । एकोद्दिष्टे महत्यामे न भूयः पुरुषो भवेत् " ॥

विष्णुः—"प्राजापत्यं नवश्राद्धे पादोनं त्वाद्यमासिके । त्रैपक्षिके तदर्धं तु पंचगव्यं द्विमासिके ॥

" भुक्तं चेत्पार्वणश्राद्धे प्राणायामान् षडाचरेत् । उपवासस्त्रिमासादि वत्सरांतं प्रकीर्तितम् ॥

" प्राणायामत्रयं वृद्धावहोरात्रं सपिंडने । आमरूपे स्मृतं नक्तं व्रतपारणिके तथा " ॥ इति । इदमापद्विषयम् । अनापदि तु **हारीतः**—

" चांद्रायणं नवश्राद्धे प्राजापत्यं तु मिश्रके । एकाहस्तु पुराणेषु प्रायश्चित्तं विधीयते " ॥ इति । मिश्रके आद्यमासिके । **चतुर्विंशतिमते**—

" प्राजापत्यं नवश्राद्धे पादोनं तूनमासिके । त्रैपक्षिके तदर्धं स्यात्पादौ द्वैमासिके ततः ॥

" पादोनं कृच्छ्रमुद्दिष्टं षाण्मासे चान्द्रिके तथा । त्रिरात्रं चाद्यमासेषु प्रत्यब्दं चेदहः स्मृतम्" ॥ इति ।

तत्रैव—

" शूद्रस्य तु नवश्राद्धे चरेच्चांद्रायणद्वयम् । सार्धचांद्रायणं मासे त्रिपक्षे त्वैंदवं स्मृतम् ॥

" मासद्वये पराकः स्याद्रूर्ध्वं सांतपनं स्मृतम् " ॥ इति । यत्तु **शंखवचनम्**—

" **चांद्रायणं नवश्राद्धे पराको मासिके स्मृतः । पक्षत्रयेऽतिकृच्छ्रः स्यात् षाण्मासे कृच्छ्र एव तु ॥**

"आब्दिके पादकृच्छ्रः स्यादेकाहं पुनराब्दिके। अत उर्ध्वं न दोषः स्यात् शङ्खस्य वचनं यथा"॥इति। इदं दुर्वृतपतितादिश्राद्धविषयम्। **भरद्वाजः**—

" अपांक्तेयान्यदुद्दिश्य श्राद्धमेकादशेऽहनि । ब्राह्मणस्तत्र भुक्त्वाऽन्नं शिशुचांद्रायणं चरेत् ॥
"आमश्राद्धे तथा भुक्त्वा तप्तकृच्छ्रेण शुध्यति। संकल्पिते तथा भुक्त्वा त्रिरात्रं क्षपणं भवेत्"॥इति।

ब्रह्मचारिणस्तु **बृहद्यम** आह—

" मासिकादिषु योऽश्नीयादसमाप्तव्रतो द्विजः । त्रिरात्रमुपवासोऽस्य प्रायश्चित्तं विधीयते ॥
" प्राणायामत्रयं कृत्वा घृतं प्राश्य विशुध्यति " ॥ इति । कामतस्तु **स एवाह**—
" मधुमांसं च योऽश्नीयाच्छ्राद्धं सूतिक एव वा । प्राजापत्यं चरेत्कृच्छ्रं व्रतशेषं समापयेत् " ॥

अभ्यासे पुनरुपनयनं **बोधायनोक्तं** द्रष्टव्यम्। "आमश्राद्धे तु सर्वत्रार्धं आमश्राद्धे भवेदर्धम्" इति **षट्त्रिंशन्मते**ऽभिधानात्। यत्तूशनसोक्तम् —

"दशकृत्वः पिबेदापो गायत्र्याः श्राद्धभुक् द्विजः। ततः संध्यामुपासीत शुध्येत्तु तदनंतरम्"॥इति

तदनुक्तप्रायश्चित्तश्राद्धविषयमिति **माधवीये** । संस्काराङ्गश्राद्धभोजने तु **व्यासः**—

" निर्वृत्ते चूडहोमे तु प्राङ्नामकरणात्तथा । चरेत्सांतपनं भुक्त्वा जातकर्मणि चैव हि ॥
"अतोऽन्येषु तु भुक्त्वाऽन्नं संस्कारेषु द्विजोत्तमः । नियोगादुपवासेन शुध्यते निंद्यभोजने"॥ इति ।

धौम्यः—

" ब्रह्मौदने च सोमे च सीमंतोन्नयने तथा। जातश्राद्धे नवश्राद्धे भुक्त्वा चांद्रायणं चरेत्" ॥ इति ।

शातातपः—

" वनस्पतिगते सोमे परान्नं ये तु भुंजते। तेषां मासकृतं पुण्यं दातारमधिगच्छति " ॥

सनत्कुमारः—

" एकादश्यां मुनिश्रेष्ठ यो भुंक्ते मूढचेतनः। प्रतिग्रासमसौ भुंक्ते किल्बिषं श्वानविट्समम् ॥
"निष्कृतिर्मद्यपस्योक्ता धर्मशास्त्रे मनीषिभिः। एकादश्यन्नकामस्य निष्कृतिः क्वापि नोदिता"॥इति।

कात्यायनः—"अष्टवर्षाधिको मर्त्यो ह्यपूर्णाशीतिवत्सरः । एकादश्यामुपवसेत्पक्षयोरुभयोरपि" ॥ **कण्वः**—" एकादशीमुपवसेन्न कदाचिदतिक्रमेत् " इति । **विष्णुः**—" एकादश्यां न भुंजीत कदाचिदपि मानवः " इति । **आपस्तंबः** (२।१।४-६)–" पर्वसु चोभयोरुपवासः औपस्तमेव कालांतरे भोजनम् तृप्तिश्चान्नस्य " इति । उभयोर्दंपत्योः यत्कालांतरे भोजनं तदप्यौपवस्त्रमेव उपवास एव तदपि " दिवा न रात्रौ न तस्य सायमश्नीयात् " इति **श्रौते** दर्शनात् ।

स्मृत्यंतरे—

"अर्कद्विपर्वरात्रौ च चतुर्दश्यष्टमी दिवा । एकादश्यामहोरात्रं भुक्त्वा चांद्रायणं चरेत्" ॥ इति ।

शौनकः—

" अष्टम्यां च चतुर्दश्यां न कुर्याद्भोजनं दिवा । आदित्यपर्वसंक्रांतौ व्यतीपाते पितुर्दिने ॥
" अभितश्चोपवासस्य न कुर्यान्निशि भोजनम् "॥ इति । अत्र प्रायश्चित्तमाह **स एव**—
" त्र्यं सुमेषं जपेन्मन्त्रं दशवारं जलेऽष्ट वा । अष्टम्यां वा चतुर्दश्यां दिवा भुक्तेरकल्मषम् ॥
" सपर्वतो जपेन्मंत्रं पर्वांते दश चेज्जले। पर्वद्वये भानुवारे रात्रौ भुक्तेरकल्मषम् ॥
" स इद्वरी जपेन्मन्त्रं शतं वै विष्णुमंदिरे । एकादश्यामहोरात्रं भुंक्ते यदि न पापकृत्॥

" आयं पृणन्ति मन्त्रं च दशवारं न किल्बिषम् । रात्रौ भुंक्ते वत्सरांते मन्वादिषु युगादिषु "॥
ग्रहणे भोजननिषेधमाह व्यासः—
" नाद्यात्सूर्यग्रहात्पूर्वमन्हि सायं शशिग्रहात् । ग्रहकाले च नाश्नीयात्स्नात्वाऽश्नीयाच्च मुक्तयोः॥
" मुक्ते शशिनि भुंजीत यदि न स्यान्महानिशा । अमुक्तयोरस्तगयोरद्याद् दृष्ट्वा परेऽहनि ॥
" सूर्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्टयम् । चंद्रग्रहे तु यामांस्त्रीन्बालवृद्धातुरैर्विना" ॥
बालादिविषये **स एवाह**—
" अपराण्हे न मध्यान्हे मध्यान्हे न तु संगवे । भुंजीत संगवे चेत्स्यान्न पूर्वं भुजिमाचरेत् " ॥
मार्कंडेयः—"ग्रहणं तु भवेदिंदोः प्रथमादधियामतः । भुंजीतावर्तनात्पूर्वं प्रथमे प्रथमादधः" ॥
रात्रौ प्रथमयामे ग्रहणे दिवा प्रथमयामे भुंजीत । अन्यत्रावर्तनादध इत्यर्थः ।
स एव—" रवेरावर्तनादूर्ध्वमर्वागेव निशीथतः । चतुर्थे प्रहरे चेत्स्याच्चतुर्थप्रहरादधः " ॥ इति ।
वृद्धगौतमः—
" चंद्रसूर्यग्रहे नाद्यात्तस्मिन्नहनि पूर्वतः । राहोर्विमुक्तिं विज्ञाय स्नात्वा कुर्वीत भोजनम् ॥
" संध्याकाले यदा राहुर्ग्रसते शशिभास्करौ । तदहर्नैव भुंजीत रात्रावपि कदाचन " ॥ इति ।
चंद्रस्य ग्रस्तोदये तदहर्न भुंजीत । रवेर्ग्रस्तोदये पूर्वरात्रौ न भुंजीतेत्यर्थः । चंद्रस्य ग्रस्तास्तमये अहर्न भुंजीत भास्करे ग्रस्तास्तमिते रात्रावित्यपि व्याचक्षते । तथा च **वसिष्ठः**—
" ग्रस्तोदये विधोः पूर्वं नाहर्भोजनमाचरेत् । ग्रस्तोदिते तथा सूर्ये न रात्रौ भोजनं चरेत् " ॥
भृगुः—
" ग्रस्तावेवास्तमानं तु रवींदू प्राप्नुतो यदि । तयोः परेद्युरुदये स्नात्वाऽभ्यवहरेन्नरः " ॥
मार्कंडेयः—
" चंद्रस्य यदि वा भानोर्यस्मिन्नहनि भार्गव । ग्रहणं तु भवेत्तस्मिंस्तत्पूर्वं भोजनं नरः ॥
" नाचरेत्संग्रहं चैव तथैवास्तमुपागते । यावत्तयोर्नोदयः स्यात् नाश्नीयात्तावदेव तु ॥
" मुक्तिं दृष्ट्वा तु भुंजीत स्नानं कृत्वा ततः परम् " ॥ इति । **मनुरपि**—
" अमुक्तयोरस्तगयोर्दृष्ट्वा स्नात्वापरेऽहनि " ॥ **विष्णुधर्मे**—
"अहोरात्रं न भुंजीत चंद्रसूर्यौ ग्रहेऽस्तगौ । मुक्तिं बुद्ध्वा तु भोक्तव्यं स्नानं कृत्वा ततः परम्"॥इति।
ग्रहे गृहणे । ग्रस्तास्तगे शशिनि ग्रहणात् पूर्वस्यां रात्रौ परस्मिन्नह्नि च न भुंजीत । ग्रस्तास्तगे सूर्ये ग्रहणात् पूर्वस्मिन्नह्नि परस्यां रात्रौ च न भुंजीतेत्यर्थः । **दक्षः**—
" अयने विषुवे चैव चंद्रसूर्यग्रहे तथा । अहोरात्रोषितः स्नात्वा सर्वपापैः प्रमुच्यते " ॥
इदं पुत्रिव्यतिरिक्तविषयम् ।
" संक्रान्त्यामुपवासं च कृष्णैकादशिवासरे । चंद्रसूर्यग्रहे चैव न कुर्यात्पुत्रवान्गृही " ॥ इति **स्मरणात्**—
षट्त्रिंशन्मते—"सर्वेषामेव वर्णानां सूतकं राहुदर्शने । सचैलं तु भवेत्स्नानं सूतकान्नं च वर्जयेत्"॥
सूतकान्नं राहुसूतकान्नम् । **वृद्धमनुः**—
" आरनाळं च तक्रं च पाथेयं घृतपाचितम् । उदकं च कुशच्छन्नं न दुष्येद्राहुसूतके " ॥
स्मृतिरत्ने—
" आरनाळं तथा क्षीरं कंदुकं दधि सक्तवः । स्नेहपक्वं च तैलं च न कदाचित्प्रदुष्यति" ॥ इति ।

व्यासः—
" संवत्सरस्यैकमपि चरेत्कृच्छ्रं द्विजोत्तमः । अज्ञातभुक्तशुद्ध्यर्थं ज्ञातस्य तु विशेषतः " ॥ इति ।
भक्ष्यमांसमाह याज्ञवल्क्यः (आ. १७७)—
" भक्ष्याः पंचनखाः सेधागोधाकच्छपशल्यकाः । शशश्च मत्स्येष्वपि हि सिंहतुंडकरोहिताः ॥
" तथा पाठीनराजीवसशल्काश्च द्विजातिभिः " ॥ **मनुरपि** (५।१८)—
" श्वाविधं शल्यकं गोधां खड्गकूर्मशशांस्तथा । भक्ष्यान्पंचनखेष्वाहुरनुष्ट्रांश्चैकतोदतः " ॥ इति ।
गौतमः (१७।२७)—" पंचनखाश्चाशल्यकशशश्वाविड्गोधाखड्गकच्छपाः " ॥ इति ।
याज्ञवल्क्यः (आ. १७९)—
" प्राणात्यये तथा श्राद्धे प्रोक्षितं द्विजकाम्यया । देवान्पितॄन्समभ्यर्च्य खादन् मांसं न दोषभाक् "॥
प्रोक्षितं यागशिष्टम् । **स्मृतिरत्ने**—
" प्रोक्षितं भक्षयेन्मांसं ब्राह्मणस्य च काम्यया । यथाविधिनियुक्तं च प्राणानामेव चात्यये "॥इति ।
मनुः (५।३५)—
" नियुक्तस्तु यथान्यायं पललं यः परित्यजेत् । स प्रेत्य पशुतां याति संभवानेकविंशतम् " ॥ इति ।
मनुः (५।४१)—
" मधुपर्के च यज्ञे च पितृदेवत्यकर्मणि । अत्रैव पशवो हिंस्या नान्यत्रेत्यब्रवीन्मनुः " ॥
यज्ञव्यतिरिक्ते सर्वत्र कर्मणि कलौ प्राणिवधो मांसभक्षणं च निषिद्धम् ।
" वरातिथिपितृभ्यस्तु न पशूपाकृतिः कलौ " इति **स्मरणात्** ।
यज्ञार्थे पशुवधे मांसभक्षणे च न दोषोऽस्तीत्याह **मनुः** (५।३९–४०)—
" यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयंभुवा । यज्ञो हि भूत्यै सर्वस्य तस्माद्यज्ञे वधोऽवधः ॥
" ओषध्यः पशवो वृक्षास्तिर्यंचः पक्षिणस्तथा । यज्ञार्थं निधनं प्राप्ताः प्राप्नुवन्त्युच्छ्रितिं[1] पुनः ॥
"यज्ञाय जग्धि मांसस्येत्येष दैवो विधिः स्मृतः । अतोन्यथाप्रवृत्तिस्तु राक्षसो विधिरुच्यते (३१)॥
" नाद्यादविधिना मांसं विधिज्ञोऽनापदि द्विजः । जग्ध्वा ह्यविधिना मांसं प्रेतस्तैरद्यतेऽवशः (३३)॥
" असंस्कृतान्पशून्मंत्रैर्नाद्याद्विप्रः कथंचन । मंत्रैस्तु संस्कृतानद्याच्छाश्वतं धर्ममास्थितः (३६) ॥
" या वेदविहिता हिंसा नियताऽस्मिंश्चराचरे । अहिंसामेव तां विद्याद्वेदाद्धर्मो हि निर्बभौ (४४)॥
" यावंति पशुरोमाणि तावत्कृत्वो हि मारणम् । वृथा पशुघ्नः प्राप्नोति प्रेत्य जन्मनि जन्मनि ॥
" यो हिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया । स जीवंश्च मृतश्चैव न क्वचित्सुखमेधते(४५)॥
"नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित् । न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं विवर्जयेत्(४८)॥
"स्वमांसं परमांसेन यो वर्धयितुमिच्छति । अनभ्यर्च्य पितॄन्देवांस्ततोऽन्यो नास्त्यपुण्यकृत् (५२)॥
"मां संभक्षयिताऽमुत्र यस्य मांसमिहाद्म्यहम् । एतन्मांसस्य मांसत्वं प्रवदंति मनीषिणः (५५)॥
"अनुमंता विशसिता निहंता क्रयविक्रयी । संस्कर्ता चोपहर्ता च खादकश्चेति घातुकः (५१)॥
खादके हि सत्यनुमंत्रादयो भवंति ते न वधमकुर्वतोऽपि खादकस्य दोषो भवति । तस्मान्न खादकः स्यादित्यर्थः । मांसवर्जने फलमाह **स एव** (५।५३–५४)—
" वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः । मांसानि च न खादेद्यस्तयोः पुण्यफलं समम् ॥
" फलमूलाशनैर्मेध्यैर्मुन्यन्नानां च भोजनैः । न तत्फलमवाप्नोति यन्मांसपरिवर्जनात् "॥ इति ।

---

१ **ख**–स्सृतीः ।

" न मांसभक्षणे दोषो न मद्ये न च मैथुने । प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला " ॥ मद्ये मदकरद्रव्ये अविहिताप्रतिषिद्धे तांबूलादिके । मैथुने अविहिताप्रतिषिद्धे अनृतौ स्वदारगमन इत्यर्थः । मांसभक्षणे दोषाभाववचनं प्राणात्ययविषयम् । " नात्ता दुष्यत्यदन्नाद्यान् प्राणानामेव चात्यये " इति च तेनैव (५।३०) स्मरणात् ।

देशविशेषविषयं युगांतरविषयं वेति **स्मृतिरत्नादौ** । तथा च **व्यासः**—

" समुद्रयानं मांसस्य भक्षणं शस्त्रजीविका । शीधुपानमुदीच्यानां अविगीतानि धर्मतः ॥
" मंत्रेणासंस्कृतं मांसं नाद्याद्विप्रः कलौ युगे । यज्ञे तु प्राकृतं मांसमश्नीयाद्विधिचोदितम्"॥ इति।

बोधायनः (२।७।९–१४)–"अमृतापिधानमसीत्युपरिष्टादपः पीत्वा चान्तो हृदयमभिमृशति प्राणानां ग्रंथिरसि रुद्रो मा विशांतकस्तेनान्नेनाप्यायस्व इति । पुनराचम्य दक्षिणपादांगुष्ठे पाणिं निःस्रावयति अंगुष्ठमात्रः पुरुषोऽगुष्ठं च समाश्रितः । ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुगिति । हुतानुमंत्रणमूर्ध्वहस्तः समाचरेत् । श्रद्धायां प्राणे निविश्यामृतं हुतं प्राणमन्नेनाप्यायस्व श्रद्धायामपाने० श्रद्धायां व्याने० श्रद्धायामुदाने० श्रद्धायां समाने निविश्येति यथालिंगमनुषंगः ब्रह्माणि म आत्माऽमृतत्वायेत्यक्षरेणात्मानं योजयेत् । सर्वक्रतुयाजिनामात्मयाजी विशिष्यते " इति । **गद्यव्यासोऽपि**—

"ततस्तृप्तः सन्नमृतापिधानमसीत्यपः प्राश्य तस्माद्देशान्मनागपसृत्य विधिवदाचामेत् " इति ।

भरद्वाजः—

" भुक्त्वा अमृतापिधानमसीति च निपीयकम् । आचांतः पुनराचामेद्यावन्मंडलशोधनम्"॥ इति ।

देवलः—

" भुक्तोच्छिष्टं समादाय सर्वस्मात्किंचिदाचमम् । उच्छिष्टभागधेयेभ्यः सोदकं निर्वपेद्भुवि " ॥

विष्णुः (२८।३२)—" न हस्तौ प्रक्षाल्य चुलकं गृह्णीयात् " इति ।

संग्रहे—

" अमृतापिधानमसीत्यवशिष्टजलं पिबेत् । तच्छेषं रौरवेत्युक्त्वा बलिप्रांते विसर्जयेत्"॥ इति ।

शातातपः—

" अर्धं पीत्वा तु गंडूषं अर्धं त्याज्यं महीतले । रसातलगता नागास्तेन प्रीणन्ति नित्यशः ॥
" हस्तं प्रक्षाल्य गंडूषं यः पिबेत्पापमोहितः । स देवांश्च पितॄंश्चैव आत्मानं चैव घातयेत्॥" इति ।

गंडूषमत्र उत्तरापोशनम् ।

तथा च **मार्कंडेयः**—" उत्तरापोशनात्पूर्वं न हस्तं क्षालयेत् द्विजः ॥
" अर्धं पिबंति गंडूषमर्धं त्यजति भूतले । प्रीणंति पितरः सर्वे याश्चान्या भूमिदेवताः ॥
" हस्तं निर्लिह्य संक्षाल्य विधूयोद्धूय पात्रतः । गंडूषं धारयेद्यस्तु सुरामित्र स धारयेत्" ॥ इति ।

गंडूषार्धत्यागमाह **स एव**—

" रौरवेऽपुण्यनिलये पद्मार्बुदनिवासिनाम् । अर्थिनामुदकं दत्तमक्षय्यमुपतिष्ठतु ॥
" उत्तरापोशनात्पश्चात्पात्रं हस्तेन न स्पृशेत् । यदि स्पृशेत्तु मोहेन सचैलः स्नानमाचरेत् ॥
" पीत्वा भुक्त्वा च यो मर्त्यः शून्यपात्रं परित्यजेत् । स भूयः क्षुत्पिपासार्तो भवेज्जन्मनि जन्मनि ॥
" अपसृत्य ततः पश्चाद्गंडूषान्षोडशाचरेत् । विप्रस्य दक्षिणे भागे देवास्तिष्ठंति नित्यशः ॥

आसीन एव गंडूषान्वामभागे विसर्जयेत् ” । **शांडिल्यः**—
“ माषादिचूर्णैर्मृद्भिर्वा प्रक्षाल्य करयोर्द्वयम् । प्रक्षाल्य जानू पादौ च काष्ठैर्दंतान् विशोधयेत् ” ॥
और्वः—
“ आस्यं प्रक्षाल्य गंडूषं पिबेद्भुक्त्वा च यो द्विजः । दैवं श्राद्धमसौ हन्यात्पित्र्यमात्मानमेव च ” ॥
गंडूषकाले आस्यस्थं जलं न पिबेदित्यर्थः । **देवलः**—
“ भुक्त्वाऽऽचामेद्यथोक्तेन विधानेन समाहितः । शोधयेत् मुखहस्तौ च मृदाद्भिर्घर्षणैरपि ॥
“ तस्मिन्नाचमनं कुर्याद्यत्र भांडेऽथ भुक्तवान् । यद्युत्तिष्ठत्यनाचांतो भुक्तवानासनात्ततः ॥
“ स्नानं सद्यः प्रकुर्वीत सोऽन्यथा प्रयतो भवेत् ” ॥ इति । **गौतमः**—
“ गंडूषस्याथ समये तर्जन्या वक्त्रचालनम् । कुर्वीत यदि मूढात्मा रौरवे नरके पतेत् ॥
“ गंडूषं पादशौचं च कृत्वा वै कांस्यभाजने । षण्मासान्भुवि निक्षिप्य उद्धृत्य पुनराहरेत् ”॥ इति ।
स्मृत्यंतरे—
“ भुक्त्वोच्छिष्टस्त्वनाचांतः शूद्रादीन्यदि पश्यति । ज्ञानतोऽज्ञानतो वाऽपि तैः साकं भुक्तवानसौ ” ॥
रत्नावल्याम्—
“ दंतानां शोधनं कृत्वा पवित्रं तु विसर्जयेत् । विसृज्य भूमौ पात्रे वा पश्चाद्वा दंतशोधनम् ”॥
स्मृत्यर्थसारे—“ ‘अमृतापिधानमसीति’ गंडूषमर्धं पीत्वाऽर्धं भूमौ बहिर्निनीय वर्तुलपवित्रं विस्रस्य भूमौ पात्रे वा क्षिप्त्वा सम्यगुच्छिष्टं प्रक्षाल्य द्विराचामेत्ततो हस्तौ संमृज्य परिस्राव्यांगुष्ठाभ्यां चक्षुषोर्निषिच्य चक्षुषी स्पृष्ट्वाऽग्निमुपस्पृश्य इष्टदेवतां स्मरेत् ” ॥ इति ।
स्मृतिरत्ने—“ दंतशोधनकाष्ठं तु भूमावेव समुत्सृजेत् । भुक्त्वा तत्र प्रयत्नेन किंचित्प्रक्षाल्य वारिणा ॥
“ अनूढस्तु न कुर्वीत भुक्त्वा वै दंतधावनम् । पादुकारोहणं चैव तिलैश्च पितृतर्पणम् ” ॥ इति ।
गौतमः—
“ आचांतः पुनराचामेदायंगौरिति मंत्रतः । द्रुपदां वा त्रिरावृत्य सर्वपापप्रणाशिनीम् ॥
“ हस्तौ निघृष्यांगुष्ठाभ्यामक्ष्णोरंबु विनिक्षिपेत् ” ॥
मंत्रः—“ शर्य्यातिं च सुकन्यां च च्यवनं शक्रमश्विनौ । भुक्तमात्रः स्मरेद्यस्तु चक्षुस्तस्य न हीयते ” ॥
स एव—
“ प्राणानां ग्रंथिरसीत्यालभेद्धृदयं ततः । अक्षरेण स्वमात्मानं योजयेद्ब्राह्मणीति हि ” ॥
कुत्सः—“ आचांतो नाभिदेशं तु प्राणानां ग्रंथिरसीति । विमृश्यादित्यमीक्षेत रात्रौ दीपमुखं ततः ” ॥
व्यासः—“ आचम्यांगुष्ठमात्रेति पादांगुष्ठेति तु दक्षिणे ।
“ निःस्रावयेद्धस्तजलमूर्ध्वहस्तः समाहितः । हुतानुमंत्रणं कुर्याच्छ्रद्धायामिति मंत्रतः ” ॥
अत्रिः—“ आचांतोऽप्यशुचिस्तावद्यावत्पात्रमनुद्धृतम् । उद्धृतेऽप्यशुचिस्तावद्यावन्मंडलशोधनम् ॥
“ भूमावपि हि लिप्तायां तावत्स्यादशुचिः पुमान् । आसनादुत्थितस्तस्माद्यावन्न स्पृशते महीम् ” ॥ इति ।
एतद्ब्रह्मचारिविषयम् । “ भार्याभृतकदासेभ्य उच्छिष्टं शेषयेत्ततः ” इति गृहस्थस्योक्तत्वादिति
स्मृतिरत्ने । **शातातपः**—
“ आचम्य पात्रमुत्सृज्य किंचिदार्द्रेण पाणिना । मुख्यान्प्राणान् समालभ्य नाभिं पाणितलेन च ॥
“ भुक्त्वा नैव प्रतिष्ठेत नैव चार्द्रेण पाणिना । पाणिं मूर्ध्नि समाधाय स्पृष्ट्वाऽग्निं च समाहितः ”॥

आपस्तम्बः—(२।२।४।२३) "यत्र भुज्यते तत्समूह्य निर्हृत्यावोक्ष्य तं देशमत्रेभ्यो लेपान्संकृष्याद्भिः संसृज्योत्तरतः शुचौ देशे रुद्राय निनयेदेवं वास्तु शुभं भवति" इति । यत्र स्थाने भुज्यते तत्रत्यमुच्छिष्टं समूह्य राशीकृत्यान्यतो निर्हृत्य तं देशमवोक्षेत् । येषु पाकः कृतः तान्यमत्राणि तेभ्योऽन्नलेपान् व्यञ्जनलेपांश्च संकृष्य काष्ठादिनाऽपकृष्याऽद्भिः संसृज्य गृहस्योत्तरतः शुचौ देशे रुद्राय निनयेत्। रुद्रायेदमस्त्विति निनयेत्। एवं कृते वास्तुगृहं शिवं समृद्धं भवतीत्यर्थः।

विष्णुपुराणे (३।११।८६–९५)—"भुक्त्वा सम्यक् द्विराचम्य प्राङ्मुखोदङ्मुखोऽपि वा ।
"स्वच्छः प्रशांतचित्तस्तु कृतासनपरिग्रहः । अभीष्टदेवतानां तु कुर्वीत स्मरणं नरः ।
"अग्निराप्याययेद्धातुं पार्थिवं पवनेरितः । दत्तावकाशो नभसा जरयेदस्तु मे सुखम् ।
"अन्नं बलाय मे भूमेरपामग्न्यानिलस्य च । भवत्वेतत्परिणतं ममोस्त्वव्याहतं सुखम् ।
"प्राणापानसमानानामुदानव्यानयोस्तथा । अन्नं पुष्टिकरं चास्तु ममास्त्वव्याहतं सुखम् ॥
"अगस्तिरग्निर्वडवानलश्च भुक्तं मयाऽन्नं जरयत्वशेषम् ।
"सुखं च मे तत्परिणामसंभवं यच्छत्त्वरोगो मम चास्तु देहे ॥
"विष्णुः समस्तेंद्रियदेहदेही प्रधानभूतो भगवान्यथैकः ।
"सत्येन तेनान्नमशेषमेतदारोग्यदं मे परिणाममेतु ॥
"विष्णुरत्ता यथैवान्नं परिणामश्च वै यतः । सत्येन तेन मे भुक्तं जीर्यत्वन्नमिदं तथा ॥
"इत्युच्चार्य स्वहस्तेन परिमृज्य तथोदरम् । अनायासप्रदायीनि कुर्यात्कर्माण्यतंद्रितः ॥
"सच्छास्त्रादिविनोदेन सन्मार्गाद्यविरोधिना । दिनं नयेत्ततः संध्यामुपतिष्ठेत्समाहितः"॥ इति।

बाहटः—"भुक्त्वोपविशतस्तुंदमोजो भवति तिष्ठतः ।
"आयुश्चक्रामतो मृत्युः धावतः स्वपतो वपुः। भुक्त्वा राजवदासीत गत्वा शतपदं शनैः"॥ इति।

व्यासः—
"भुक्त्वा वै सुखमास्थाय तदन्नं परिणामयेत् । इतिहासपुराणाभ्यां वेदार्थानुपबृंहयेत्" ॥

विष्णुः—"भुक्त्वोपविष्टो विश्रांतो ब्रह्म किंचिद्विचारयेत्" ॥

दक्षः—"इतिहासपुराणाभ्यां षष्ठसप्तमकौ नयेत्। अष्टमे लोकयात्रा तु बहिः संध्या ततः परम्"॥ इति।

मार्कंडेयः—
"भूयोऽप्याचम्य कर्तव्यं तांबूलस्य च भक्षणम्। श्रवणं चेतिहासस्य ततः कुर्यात्समाहितः"॥ इति।

याज्ञवल्क्यः (११३)—
"अतिथिं श्रोत्रियं तृप्तमा सीमांतमनुव्रजेत् । अहःशेषं समासीत शिष्टैरिष्टैश्च बन्धुभिः" ॥

शंखः—
"विचार्य च पुराणार्थान्वेदार्थान्भक्तिमास्थितः। विष्णुं सदा हृदि ध्यायेत्सकलं निष्कलं तु वा"॥

लिखितः—
"भुक्त्वोपस्थाय मार्त्तांडं पुराणानि सदा पठेत्। भावशुद्ध्या हरौ भक्तिः पुराणश्रवणाद्भवेत्" ॥

अत्रिः—
"दिवा स्वापं न कुर्वीत गच्छेन्नैव दिवा स्त्रियम्। आयुःक्षयकरी निद्रा दिवा स्त्री पुण्यनाशिनी ॥
"इतिहासपुराणानि धर्मशास्त्राणि चाभ्यसेत्। वृथा त्रिविधवाक्यानि परिवादांश्च वर्जयेत्" ॥

अखंडादर्शे—
" भुक्त्वा तु सुखमासीनः तांबूलेनास्यशोधनम् । शुंठ्यामलकधातूनामेकेनाथ विशोधनम् ॥
" सुपूगं च सुपत्रं च चूर्णेन च समन्वितम् । प्रदद्यात् द्विजदेवेभ्यः तांबूलं चर्वयेद्बुधः ॥
" एकपूगं सुखारोग्यं द्विपुगं निष्फलं भवेत् । अतिश्रेष्ठं त्रिपूगं तु अधिकं नैव दुष्यति ॥
" पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसंभवः । चूर्णपर्णं हरत्यायुः सिरा बुद्धिविनाशिनी ॥
" तस्मादग्रं च मूलं च सीरां चैव विशेषतः । चूर्णपर्णं वर्जयित्वा तांबूलं खादयेन्नरः ॥
" अखंडितं च क्रमुकं पर्णमक्षालितं तथा । अशोधितं तथा चूर्णं भक्षयन् सर्वदोषभाक् ॥
" अनिधाय मुखे पर्णं पूगं खादति यो नरः । सप्तजन्मदरिद्रः स्यान्नरकेषु निमज्जति ॥
" चूर्णमंतर्न कुर्वीत न बहिश्चावकुंचनम् । प्रातःकाले फलाधिक्यं चूर्णं मध्यंदिनेऽधिकम् ॥
" सायं पर्णस्य चाधिक्यं त्रिधा तांबूलभक्षणम् " ॥ **वाहटः**—
" तांबूलं कटुतिक्तमुष्णमधुरं क्षारं कषायान्वितं वातघ्नं क्रिमिनाशनं कफहरं कायाग्निसंदीपनम्॥
"स्त्रीसंभाषणभूषणं रुचिकरं शोकस्य विच्छेदनं तांबूलस्य तु ये त्रयोदशगुणाः स्वर्गेऽपि ते दुर्लभाः॥
"प्रत्युषसि भुक्तिसमये वरयुवतीनां च संगमेऽभिमते।राजसु विद्वन्मध्ये तांबूलं यो न खादयेत्स पशुः॥
"दंतावलीदुर्बलताक्षिरोगं जडत्वमंगे नयनादिकेषु।बलक्षयं वक्त्रगतं करोति तांबूलमत्यंतनिषेवणेन ॥
" आयुः प्रज्ञां बलं बुद्धी रेतः शक्तिर्विनश्यति । जिव्हा रसं न गृह्णाति सदा तांबूलचवर्णात्" ॥ इति ।
" **अथ सायंसन्ध्याविधिः** ।
व्यासः—"सूर्येऽस्तशिखरं प्राप्ते पादशौचक्रियान्वितः। बहिः संध्यामुपासीत कुशपाणिः समाहितः ॥
" अनृतं मद्यगंधं च दिवा मैथुनमेव च । पुनाति वृषलस्यान्नं बहिःसंध्या ह्युपासिता ॥
"आचम्य संध्यां संकल्प्य मार्जयित्वा च पूर्ववत् । अग्निश्च मेत्यपः पीत्वा गृह्योक्तैश्चैव मार्जयेत् ॥
"गायत्र्यापस्त्रिरुत्क्षिप्य प्रदक्षिणमथाचरेत् । संध्यां ध्यात्वोपविष्टस्तु वाग्यतः सुसमाहितः ॥
" प्रणवव्याहृतियुतां गायत्रीं पूर्ववज्जपेत् । कृत्वा स्वशाखाविहितमादित्यमुपतिष्ठते ॥
" वारुणीभिरुपस्थाय दिशश्चैवोपतिष्ठते " ॥ इति । **याज्ञवल्क्यः** (आ. ११४)—
" उपास्य पश्चिमां संध्यां हुत्वाऽग्नींस्तानुपास्य च । भृत्यैः परिवृतो भुक्त्वा नातितृप्तोऽथ संविशेत्"॥
स्मृतिरत्ने—
"हुताग्निर्वेदितगुरुः कृतातिथ्यश्च शक्तितः । वैश्वदेवं बलिं चापि कृत्वाऽश्नीयाद्यथाविधि " ॥ इति ।
व्यासः—
" हुत्वाऽग्निं विधिवन्मंत्रैर्भुक्त्वा यज्ञावशिष्टकम् । सभृत्यबांधवजनः स्वपेच्छुष्कपदो निशि " ॥
बोधायनः—
" मेरुकांचनदानानि वाजपेयशतानि च । कन्याकोटिप्रदानं च न समं सायमाहुतेः " ॥
शांडिल्यः—
" अन्नैः प्रभूतैर्देवेशं विविधैः पृथगर्चयेत् । संध्ययोरुभयोः कुर्यात्पूजां सर्वोपचारकैः ॥
"नक्तं कुटुंबिकोऽश्नीयाद्धितं पथ्यं सुतृप्तिमत् । नोत्तराभिमुखः स्वप्यात् पश्चिमाभिमुखो न च॥
"न वाऽऽकाशे न नग्नो वा नाशुचिर्नासने क्वचित् । न शीर्णायां तु खट्वायां शून्यागारे न चैव हि"॥
विष्णुपुराणे (३।११।१०१–१०९)—
" पुनः पाकमुपादाय सायमप्यवनीपते । वैश्वदेवनिमित्तं वै पत्न्या सार्धं बलिं हरेत् ॥

१ खग–दिवा ।

" तत्रापि श्वपचादिभ्यः तथैवान्नविसर्जनम् । अतिथिं चागतं तत्र स्वशक्त्या भोजयेद्बुधः ॥
" पादशौचासनः प्रव्हः स्वागतोक्त्या च पूजयेत् । ततश्चान्नं प्रदानेन शयनेन च पार्थिव ॥
" दिवातिथौ तु विमुखे गते यत्पातकं नृप । तदेवाष्टगुणं पुंसां सूर्योढे विमुखे गते ॥
" कृतपादादिशौचश्च भुक्त्वा सायं ततो गृही । गच्छेच्छय्यामस्फुटितामपि दारुमयीं नृप ॥
" नाविशालां न वै भग्नां नासमां मलिनां न च । न च जंतुमयीं शय्यामधितिष्ठेद्नास्तृताम् ॥
"प्राच्यां दिशि शिरः शस्तं याम्यायामथवा नृप । सदैव स्वपतः पुंसो विपरीतं तु रोगदम्"॥ इति।

शौनकः—

" निशायाः प्रथमे यामे जपयज्ञार्चनादिकम् । स्वाध्यायो भोजनं प्रोक्तं वर्जयित्वा महानिशा ॥
" पश्चात्तेन तथा यामे जपयज्ञार्चनादिकम् । ब्रह्माभ्यासोऽपि तत्रैव वर्जयित्वा तु भोजनम्"॥ इति।

अनध्याये प्रदोषेषु च सायं गायत्रीजपे संकोचमाचरंति शिष्टाः । **आहुश्च**—

" चतुर्थ्यां सप्रदोषायां शतार्धं सचतुष्टयम् । सप्तत्रिंशच्च सप्तम्यामष्टाविंशत्त्रयोदशे ॥
" अष्टाविंशदनध्याये इतरेषु यथोदितम् । शस्ता प्रदोषे दर्शे च गायत्री दशसंख्यया ॥
"अष्टम्यां च चतुर्दश्यां नित्यादर्धं जपेद् बुधः । प्रतिपत्सु तृतीयांशं पर्वण्यल्पतरं जपेत्" ॥ इति।

संग्रहांतरे—

" नित्यादर्धं चतुर्थीवसुमनुतिथिषु स्याज्जपः सप्तमी या ।
" सप्तत्रिंशच्च तस्यां प्रतिपदि च पुनः षडच्युता त्रिंशदेव ॥
" तद्वत्पर्वद्वयेऽपि त्रियुतदशतिथावष्टभिर्विंशतिं स्यात् ॥
" देवं विश्वादिकालेष्वखिलमतमिदं सायमेवं न कल्ये " । प्रदोषोऽपि दर्शितः—

"विघ्नार्ककामरात्र्यादौ ब्येकार्धघटिका क्रमात्रंध्रद्वियामोदयात्प्राक् प्रदोषःस्यात्कलादिभिः"॥इति।

विघ्नः चतुर्थी । अर्कः सप्तमी । कामस्त्रयोदशी । रंध्रो नव । रात्र्यादौ चतुर्थी सप्तमी त्रयोदश्यः क्रमेण ब्येकार्धघटिकाः संति चेत्प्रदोषः । तथा रात्र्यादौ तृतीया नवघटिका चेत् प्रदोषः । अधिका चेन्नास्ति रात्रादौ । षष्ठी यामद्वयाधिका चेन्न प्रदोषः । द्वादश्यामुदयात्प्राक् कलामात्रत्रयोदशीसत्वे प्रदोष इत्यर्थः । **स्मृतिरत्ने**[१]—

" षष्ठी च द्वादशी चैव अर्धरात्रोननाडिका । प्रदोषं तु प्रकुर्वीत तृतीया नवनाडिका "॥ इति ॥

गायत्रीजपसंकोचे मूलस्मृतिर्गवेषणीया **स्मृतिरत्ने**[२]—

" प्रणवव्याहृतीनां च गायत्र्याः शिरसस्तथा । नित्ये नैमित्तिके काम्ये[३] व्रते यज्ञे क्रतौ तथा ॥
" देवतार्चनमंत्राणां नानध्यायः स्मृतः सदा " ॥ इति । **धर्मोद्योतेऽपि**—
"सौराणां रौद्रमंत्राणां पैतृकाणां च नैत्यिके । जपहोमादिकार्येषु नानध्यायो न काम्यके"॥ इति।

स्मृत्यर्थसारे—" सायंसंध्यामुपास्य होमं वैश्वदेवमातिथ्यं च कृत्वा भूत्यै परिवृतो लघु भुक्त्वा स्त्रिया सह सुगंधानुलेपनमाल्यतांबूलादि सेवमानं स्वपेत् । न संध्यायां शून्यालये श्मशाने एकवृक्षे चतुष्पथे शिवमातृकाय क्षयमस्कंदभैरवाद्युपेतदेवगृहेषु देवकुले च न स्वपेत् । न धान्ये न भोगिदेवविप्राग्रे गुरूणां चोपजीविनां नाशुचिरार्द्रवस्त्रपादो न नग्नः स्वपेत् । प्राक्-शिरा वा दक्षिणशिरा वा इष्टां देवतां नत्वा स्वपेत् । वैणवं दंडं शयनीयसमीपे निधाय प्रक्षालित-पादः कृतरक्षं स्वपेत् । प्रदोषापरयामौ विद्यया नयेत् " इति ।

---

१ खग-पू । २ खगघ-स्मृत्यन्तरे । ३ खगघ-र्ये ।

आचारसारे—
" शुचिं देशं विविक्तं तु गोमयेनोपलेपयेत् । प्रागुदक्प्रवणे चैव संविशेत्तु सदा बुधः ॥
" प्राक्शिरास्तु स्वपेन्नित्यं तथा वै दक्षिणाशिराः । उदक्शिरा न स्वपेत्तु तथा प्रत्यक्शिरा न च ॥
" महादेवगृहे वाऽपि मातृवेश्मनि न स्वपेत् । न यक्षनागायतने स्कंदस्यायतने तथा ॥
" तरुच्छायासु च तथा शर्करास्थिषु पांसुषु । न स्वपेच्च तथा दर्भे विना दीक्षां कथंचन ॥
" धान्यगोदेवविप्राणां गुरूणां च तथोपरि । न चापि भिन्नशयने नाशुचौ नाशुचिस्तथा ॥
" नार्द्रवासा न नग्नश्च नोत्तराधरमस्तकः । नाकाशे पर्वते शून्ये न च चैत्यद्रुमे तथा " ॥
आकाशे निरावणप्रदेशे । **स्मृतिरत्ने**—
" अक्षिरोगी ह्यपस्मारी ज्वरी कुष्ठी क्षयी तथा । श्वासकासीति तैर्युक्तामेकशय्यां तु वर्जयेत् ।
" दंतिदंतमये विद्युद्दग्धे दग्धे पलाशजे । न शयीत नरो धान्ये शयने पंचदारुजे ॥
" अश्मपीठस्थिते चैव करिभग्नकृते तथा " ॥ पंचदारूणि उदुंबरवटाश्वत्थप्लक्षजंबूद्रुमाः ।
गार्ग्यः—
" सुखानुकूले शयने वामपार्श्वे न संविशेत् । आयुर्वामकरे प्रोक्तमुत्तानं बलवर्धनम् ॥
"स्वगृहे प्राक्शिराः शेते श्वाशुरे दक्षिणाशिराः । प्रत्यक्शिराः प्रवासे तु न कदाचिदुदक्शिराः"॥
विष्णुः—" सुप्रक्षालितचरणतलो रक्षां कृत्वोदकपूर्णघटादिमंगलोपेतामात्माभिरुचितापनुपहतां सुत्रामाणमिति पठन् शय्यामधिष्ठाय रात्रिसूक्तं जपित्वा विष्णुं नमस्कृत्य " अपसर्प सर्प भद्रं ते" इति श्लोकं जपित्वा इष्टदेवतां नमस्कृत्य—समाधिमास्थायान्यांश्च वैदिकान् मंत्रान्सावित्रीं जपित्वा मंगलश्रुतं शंखं च शृण्वन् दक्षिणाशिराः स्वपेत्" । नार्द्रवासाः स्वपेत् । न पलाशशयने न पंचदारुकृते न गजभग्नकृते न विद्युद्दग्धे नाग्निप्लुष्टे न बालमध्ये न नारीमध्ये न धान्ये न गोगुरुहुताशनदेवविप्राणामुपरि नोच्छिष्टो न दिवा न तैलाभ्यक्तशिराः स्पपेन्नादीक्षितः कृष्णचर्मणि" इति ।
श्लोकः—
" अपसर्प सर्प भद्रं ते दूरं गच्छ महायशाः । जनमेजयस्य यज्ञांते आस्तीकवचनं स्मरन् " ॥
रत्नावल्याम्—
" मंगल्यं पूर्णकुंभं तु शिरःस्थाने निधाय तु । वैदिकैर्गारुडैर्मंत्रैः रक्षां कृत्वा स्वपेन्निशि ॥
"रात्रिसूक्तं जपेत्स्मृत्वा सर्वांश्च सुखशायिनः । नमस्कृत्वाऽव्ययं विष्णुं समाधिस्थः स्वपेन्निशि" ॥
सुखशायिनोऽपि **गोभिलेन** दर्शिताः—
" अगस्तिर्माधवश्चैव मुचकुंदो महाबलः । कपिलो मुनिरास्तीकः पंचैते सुखशायिनः ॥
"पादौ प्रक्षाल्य संमृज्य द्विराचम्य शुचिस्ततः। शुष्यत्पादास्यपाणिस्तु संविशेन्माधवं स्मरन्"॥इति।
पाठ्यश्लोकौ दर्शितौ—
" जरत्कारोर्जरत्कार्यां समुत्पन्नो महायशाः । आस्तीकः सत्यसंधो मां पन्नगेभ्योऽभिरक्षतु ॥
" नर्मदायै नमः प्रातः नर्मदायै नमो निशि । नमोऽस्तु नर्मदे तुभ्यं पाहि मां विषसर्पतः " ॥
दक्षः—
" प्रदोषपश्चिमौ यामौ वेदाभ्यासेन योजयेत् । यामद्वयं शयानस्तु ब्रह्मभूयाय कल्पते " ॥ इति ।
मनुः (४।१४)—
"वेदोदितं स्वकं कर्म नित्यं कुर्यादतंद्रितः । तद्धि कुर्वन्यथाशक्ति प्राप्नोति परमां गतिम् " ॥

---

१ खगघ—स्मृत्वा । २ क्ष—यथा ।

" ऋतुकालाभिगामी स्यात्स्वदारनिरतः सदा। पर्ववर्जं व्रजेच्चैनामनृतौ रतिकाम्यया (३।४५)॥
" उपवीती स्त्रियं गच्छेदृतुकाले तु वै बुधः। निवीतमनृतौ कुर्यात्तद्दोषविनिवृत्तये॥
" अमुक्तवसना योषिद्विमुक्तवसनः पुमान्। संविशेतामुभौ मुक्तवसनौ कलिराविशेत्॥
" दारप्रियैरलंकारैरलंकृत्य प्रसन्नधीः। प्रियासमीपे शयने संविशेत्प्रहरद्वयम् "॥

बोधायनः–" जघन्ये रात्रिपर्याये सर्वर्तुगमनमुपादिशंति "। इति। **वृद्धहारीतः**–" सुपुत्रकामो यः सोऽपररात्रे स्वदारमैथुनं कुर्यात्। ऋतुगमने यज्ञोपवीतमनृतुंगमने निवीतम् "॥ इति। **व्यासः**—" इत्येतदखिलेनोक्तमहमन्यहनि वै मया। ब्राह्मणानां कृत्यजातमपवर्गफलप्रदम्॥
" नास्तिक्यादथवालस्यात् ब्राह्मणो न करोति यः। स याति नरकान्घोरान्काकयोनिषु जायते॥
" नान्यो विमुक्तये पंथा मुक्त्वाश्रमविधिं स्वकम्। तस्मात्कर्माणि कुर्वीत तुष्टये परमेष्ठिनः"॥ इति।

इति **वैद्यनाथदीक्षितविरचिते स्मृतिमुक्ताफले**
आन्हिकधर्मनिरूपणं नाम **द्वितियः** परिच्छेदः॥

अथावशिष्टसकलधर्माः। तत्र **मनुः** (४।३५–३६)—
" कृत्तकेशनखश्मश्रूर्दान्तः शुक्लांबरः शुचिः। स्वाध्याये चैव युक्तः स्यान्नित्यमात्महितेषु च॥
" वैणवीं धारयेद्यष्टिं सोदकं च कमंडलुम्। यज्ञोपवीतं वेदं च शुभे रौक्मे च कुंडले "॥

कमंडलुस्ताम्रादिमयः। " कलौ पंच न कुर्वीत भातृजायां कंमडलुम् "। इति मृन्मयनारिकेलकमंडलुनिषेधात्। वेदो धर्मपुंजः। **स एव** (४।३७)—
" नेक्षेतोद्यंतमादित्यं नास्तं यंतं कदाचन। नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम् "॥
उपसृष्टं राहुग्रस्तम्। इदं चन्द्रस्याप्युपलक्षणमिति वदन्ति।
" मृदं गां दैवतं विप्रं घृतं मधु चतुष्पथम्। प्रदक्षिणानि कुर्वीत प्रज्ञानं च वनस्पतिम्"॥ (३९)
मृदं मृत्कूटम्। प्रज्ञातं प्रसिद्धम्।
"नाग्निं मुखेनोपधमेन्नग्नां नेक्षेत च स्त्रियम्। नामेध्यं प्रक्षिपेदग्नौ न च पादौ प्रतापयेत्"॥ (५३)
अमेध्यं अशुद्धं वस्तु।
" अधस्तान्नोपदध्याच्च न चैनमतिलंघयेत्। न चैनं पादतः कुर्यान्न प्राणाबाधमाचरेत्॥ (५४)
प्राणाबाधमात्मनः परस्य वा पीडनम्।
"नाश्नीयात्संधिवेलायां न गच्छेन्नापि संविशेत्। न चैव विलिखेद्भूमिं नात्मनोऽभिहरेत्स्रजम्"॥(५५)
आत्मनोर्थे स्रजं स्वयं नाहरेत्।
"नाप्सु मूत्रं पुरीषं वा निष्ठीवं वा समुत्सृजेत्। अमेध्यलिप्तमन्यद्वा लोहितं वा विषाणि वा॥ (५६)
"नैकः स्वपेच्छून्यगृहे न शयानं प्रबोधयेत्। नोदक्ययाऽभिभाषेत न यज्ञमवृतो व्रजेत्॥ (५७)
न शयानं श्रेयांसं सुप्तम्। " न श्रेयांसं प्रबोधयेत् " इति विशेषस्मरणात्। ' न यज्ञमवृतः ' आर्त्विज्यं करिष्यन्।
"न वारयेत् गां धयंती न चाचक्षीत कस्यचित्। न दिवीन्द्रायुधं दृष्ट्वा कस्यचिद्दर्शयेद्बुधः॥ (५९)
" नैकः प्रपद्येताध्वानं न चिरं पर्वते वसेत्। (६०) न कुर्वीत वृथा चेष्टां न वार्यंजलिना पिबेत्॥(६१)
" न नृत्येदथवा गायेन्न वादित्राणि वादयेत्। नास्फोटयेन्न च क्ष्वेडेत्संरक्तोपि न रावयेत् "॥ (६४)
स्फोटोंऽगुलिभंगजातः शब्दः। क्ष्वेडोंऽगुल्यास्यसंयोगजातः शब्दः। संरक्तोऽपि कामपरवशोऽपि मैथुनादिषु न रावयेन्न शब्दं कुर्यात्।

---

१ ख–नृतौ तु।

वृत्तादिविधायकं वचनं प्रतिलोमशूद्रादिविषयमिति स्मृतिरत्ने—
" न पादौ धावयेत् कांस्ये कदाचिदपि भाजने । (६५)
" उपानहौ च वासश्च धृतमन्यैर्न धारयेत् । उपवीतमलंकारं स्रजं करकमेव च ॥ (६६)
" नाविनीतैर्व्रजेद्धुर्यैर्न च क्षुद्व्याधिपीडितैः । न भिन्नशृङ्गाक्षिखुरैर्न वालधिविरूपितैः ॥ (६७)
धुर्यैः अश्वादिभिः ।
" विनीतैस्तु व्रजेन्नित्यमाशुगैर्लक्षणान्वितैः । वर्णरूपोपसंपन्नैः प्रतोदेनातुदन्भृशम् ॥ (६८)
" बालातपं प्रेतधूम्रं वर्जयेद्भिन्नमासनम् । न छिंद्यान्नखरोमाणि दंतैर्नोत्पाटयेन्नखान् ॥ (६९)
"न मृल्लोष्ठानि मृद्नीयान्न छिन्द्यात्करजैस्तृणम् । न कर्म निष्फलं कुर्यादायत्यामसुखोदयम् ॥ (७०)
आयत्यां कालांतरे ।
" लोष्ठमर्दी तृणच्छेदी नखखादी च यो नरः । स विनाशं व्रजत्याशु सूचकोऽशुचिरेव च ॥ (७१)
" न विग्रहकथां कुर्याद्बहिर्माल्यं न धारयेत् । गवां च यानं पृष्ठेन सर्वथैव विगर्हितम् ॥ (७२)
" अद्वारेण तु नातीयात् ग्रामं वा वेश्म वा वृतम् । रात्रौ तु वृक्षमूलानि दूरतः परिवर्जयेत् ॥ (७३)
" नाक्षैः क्रीडेत्कदाचिच्च स्वयं नोपानहौ हरेत् । अचक्षुर्विषयं दुर्गं न प्रपद्येत कर्हिचित् ॥ (७४)
" न विण्मूत्रमुदीक्षेत न बाहुभ्यां नदीं तरेत् । (७७)
"अधितिष्ठेन्न केशांस्तु न भस्मास्थिकपालिकाः । न कार्पासास्थि न तुषान् दीर्घमायुर्जिजीविषुः ॥ (७८)
अधितिष्ठेत्पदा । कपालिकाः भिन्नभाण्डशकलान् ।
" न संवसेच्च पतितैर्न चंडालैर्न पुल्कसैः । न मूर्खैर्नावलिप्तैश्च नान्त्यैर्नान्त्यावसायिभिः" ॥(७९)
अंत्याः प्रतिलोमाः । अंत्यावसायिनः श्वपाकादयः ।
"न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविष्कृतम् । न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशेत् ॥(८०)
" यस्तस्य धर्ममाचष्टे यश्चैवादिशति व्रतम् । सोऽसंवृतं नाम तमः सह तनैव गच्छति ॥ (८१)
"न संहताभ्यां पाणिभ्यां कंडूयेतात्मनः शिरः । न स्पृशेच्चैतदुच्छिष्टो न च स्नायाद्विना ततः" ॥(८२)
ततः शिरसो विना । अदृष्टार्थस्नानविषयमेतत् ।
" केशग्रहप्रहारांश्च शिरस्येतानि वर्जयेत् । शिरःस्नातस्तु तैलेन नांगं किंचिदुपस्पृशेत् ॥ (८३)
"देवतानां गुरो राज्ञः स्नातकाचार्ययोस्तथा । नाक्रामेत्कामतश्छायां बभ्रुणो दीक्षितस्य च ॥ (१३०)
बभ्रुः कपिला गौः । छाग इत्यन्ये ।
"मध्यंदिने वाऽर्धरात्रे श्राद्धं भुक्त्वा च सामिषम् । संध्ययोरुभयोश्चैव न सेवेत चतुष्पथम् ॥ (१३१)
" उद्वर्तनमपस्नानं विण्मूत्रं रक्तमेव च । श्लेष्मनिष्ठ्यूतवांतानि नाधितिष्ठेच्च कामतः ॥ (१३२)
उद्वर्तनं शरीरात्त्यक्तं मलम् । अपस्नानं मृतस्नानजलम् ।
"वैरिणं नोपसेवेत सहायं चैव वैरिणः । अधार्मिकं तस्करं च परस्यैव च योषितम् ॥ (१३३)
" क्षत्रियं चैव सर्पं च ब्राह्मणं च बहुश्रुतम् । नावमन्येत वै भूष्णुः कृशानपि कदाचन ॥ (१३५)
" एतत्त्रयं हि पुरुषं निर्दहेदवमानितम् । नात्मानमवमन्येत पूर्वाभिरसमृद्धिभिः ॥ (१३६)
" आ मृत्योः श्रियमाकांक्षेन्नैनां मन्येत दुर्लभाम् ॥ (१३७)
"सत्यं ब्रूयात्प्रियं ब्रूयान्न ब्रूयात्सत्यमप्रियम् । प्रियं च नानृतं ब्रूयात् एष धर्मः सनातनः ॥ (१३८)
"भद्रं भद्रमिति ब्रूयाद्भद्रमित्येव वादयेत् । शुष्कवैरं विवादं च न कुर्यात्केनचित्सह ॥ (१३९)

१ ख–पद्द ।

शुभाशुभेषु सर्वत्र भद्रं भद्रमितीरयेत् ।

"नातिकल्यन्नातिसायं नातिमध्यंदिने तथा । नाज्ञातेन समं गच्छेन्नैको न वृषलैः सह ॥ (१४०)

"हीनांगानतिरिक्तांगान्विद्याहीनान्वयोधिकान्।रूपद्रवीणहीनांश्च जातिहीनांश्च नाक्षिपेत्॥ (१४१)

"न स्पृशेत्पाणिनोच्छिष्टो विप्रो गोब्राह्मणानलान्।न चापि पश्येदशुचिः स्वच्छो ज्योतिर्गणान्।दिवि॥ (१४२)

"अनातुरः स्वानि स्वानि न स्पृशेदनिमित्ततः। रोमाणि च रहस्यानि सर्वाण्येतानि वर्जयेत्॥ (१४४)

" मैत्रं प्रसाधनं स्नानमञ्जनं दन्तधावनम् । पूर्वाह्ण एव कुर्वीत देवतानां च पूजनम् ॥ (१५२)

मैत्रमुच्चारः ।

"देवतान्यभिगच्छेत्तु धार्मिकांश्च द्विजोत्तमान् । ईश्वरं चैव रक्षार्थं गुरूनेव च पर्वसु ॥ (१५३)

ईश्वरं राजानम् ।

" यद्यत्परवशं कर्म तत्तद्यत्नेन वर्जयेत् । यद्यदात्मवशं तु स्यात्तत्तत्सेवेत यत्नतः ॥ (१५९)

" सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् । एतद्विद्यात्समासेन लक्षणं सुखदुःखयोः ॥ (१६०)

"आचार्यं च प्रवक्तारं पितरं मातरं गुरुम् । न हिंस्याद्ब्राह्मणं गां च सर्वांश्चैव तपस्विनः ॥ (१६२)

न हिंस्यात्प्रतिकूलं न कुर्यात् ।

"नास्तिक्यं वेदनिंदां च देवतानां च कुत्सनम् । द्वेषं दंभं च मानं च क्रोधं तैक्ष्ण्यं च वर्जयेत् ॥ (१६३)

"परस्य दंडं नोद्यच्छेत् क्रुद्धो नैनं निपातयेत्। अन्यत्र पुत्राच्छिष्याद्वा शिष्ट्यर्थं ताडयेत्तु तौ॥(१६४)

" ब्राह्मणायावगूर्यैव द्विजातिर्वधकांक्षया । शतं वर्षाणि तामिस्रे नरके परिवर्तते ॥ (१६५)

अवगूर्य दंडमुद्यम्य ।

"ताडयित्वा तृणेनापि संरम्भान्मतिपूर्वकम् । एकविंशतिमा जातीः पापयोनिषु जायते ॥ (१६६)

"अयुध्यमानस्योत्पाद्य ब्राह्मणस्यासृगङ्गतः । दुःखं सुमहदाप्नोति प्रेत्याप्राज्ञतया नरः ॥ (१६७)

"यावतः शोणितं पांसून्संगृह्णाति द्विजन्मनः । तावतोब्दानमुत्रान्यैः शोणितोत्पादकोद्यते (१६८)

अन्यैः इहलोके हिंसितैः ।

" न पादपाणिचपलो न नेत्राचपलोऽनृजुः । न स्याद्वाक्चपलश्चैव न परद्रोहकर्मधीः ॥ (१७७)

" ऋत्विक्पुरोहिताचार्यमातुलातिथिसंश्रितैः । बालवृद्धातुरैर्वैद्यैर्ज्ञातिसंबंधिबांधवैः ॥ (१७९)

" मातापितृभ्यां जामीभिर्भ्रात्रा पुत्रेण भार्यया । दुहित्रा दासवर्गेण न विवादं समाचरेत् ॥ (१८०)

" एतैर्विवादं संत्यज्य सर्वपापैः प्रमुच्यते " (१८१) । जामीभिः भगिनीभिः ।

" तस्मादेतैरधिक्षिप्तः सहेतासंज्वरः सदा " ॥ (१८५)

याज्ञवल्क्यः (आ. १५२–१५३)—

" देवर्त्विक्स्नातकाचार्यराज्ञां छायां परस्त्रियः । नाक्रामेद्रक्तविण्मूत्रष्ठीवनोद्वर्तनानि च ॥

"विप्राहिक्षत्रियात्मानो नावज्ञेयाः कथंचन । आ मृत्योःश्रियमन्विच्छेन्न कंचिन्मर्माणि स्पृशेत्" ॥

विप्रो बहुश्रुतः । अहिः सर्पः ।

"गोब्राह्मणानलान्नानि नोच्छिष्टो न पदा स्पृशेत्।न निंदाताडने कुर्यात्पुत्रं शिष्यं च ताडयेत्"॥(१५५)

पादेन त्वनुच्छिष्टोऽपि ।

" मातापित्रतिथिभ्रातृजामिसंबंधिमातुलैः । वृद्धबालातुराचार्यवैद्यसंश्रितबांधवैः ॥ (१५७)

"ऋत्विक्पुरोहितामात्यभार्यादाससनाभिभिः । विवादं वर्जयित्वा तु सर्वाँल्लोकाञ्जयेद् गृही॥(१५८)

---

१ क्ष–न्ये । २ क्ष–प ।

" परशय्यासनोद्यानगृहयानानि वर्जयेत् । अदत्तान्यग्निहीनस्य नान्नमद्यादनापदि ॥ (१६०)
शांडिल्यः—" शुद्धिं कुर्यात्तथा विद्वान्मलानां देहजन्मनाम् ॥
" कृतकेशनखश्मश्रुस्त्रिपक्षेषु गृही भवेत् । नाप्सु स्वप्रतिबिंबं तु तेजस्कामो निरीक्षयेत् ॥
" निष्फलं[1] वर्जयेत्कर्म प्रेतधूमं नदीतरम् । नांतरागमनं कुर्याद्देवताबलिपीठयोः " ॥

व्यासः—
" न कुर्याद्बहुभिः सार्धं विरोधं ब्राह्मणैस्तथा । आत्मनः प्रतिकूलानि परेषां न समाचरेत् ॥
" तिथिपक्षांश्च न ब्रूयान्न नक्षत्राणि निर्दिशेत् । न चात्मानं प्रशंसेत परनिंदां च वर्जयेत् ॥
" यस्तु देवानृषीन् विप्रान् वेदान् वा निंदति द्विजः । न तस्य निष्कृतिर्दृष्टा शास्त्रेषु च मुनीश्वरैः ॥
" निन्दयेद्यो गुरुं देवान्न वेदांश्चोपबृंहयेत् । कल्पकोटिशतं साग्रं रौरवे पच्यते नरः ॥
" तूष्णीमासीत निंदायां न ब्रूयात्किंचिदुत्तरम् । कर्णौ पिधाय वस्तव्यं न चैतानवलोकयेत् ॥
" विवादं स्वजनैः सार्धं न कुर्याद्वै कदाचन ॥
"न पापं पापिनं ब्रूयात् अपापं वा द्विजोत्तमः । सत्येन तुल्यदोषः स्यान्मिथ्या द्विर्दोषवान्भवेत् ॥
" नेक्षेतोद्यंतमादित्यं शशिनं चानिमित्ततः । नास्तं यंतं न वारिस्थं नोपसृष्टं न मध्यमम् ॥
" तिरोहितं वाससा वा नादर्शान्यनुगामिनम् । न नग्नां स्त्रियमीक्षेत पुरुषं वा कदाचन ॥
" न पश्येत्प्रेतसंस्पर्शं न क्रुद्धस्य गुरोर्मुखम् । न तैलोदकयोश्छायां न पत्नीं भोजने सतीम् ।
" नोदके चात्मनो रूपं न कूपे श्वभ्र एव वा । न लंघयीत मतिमान् नाधितिष्ठेत् कथंचन ॥
" न हीनानुपसेवेत न च तीक्ष्णमतिर्भवेत् । नात्मानं चावमन्येत दैन्यं यत्नेन वर्जयेत् ॥
"न सर्पशस्त्रैः क्रीडेत स्वानि खानि न च स्पृशेत् । नाभिहन्याज्जलं पद्भ्यां पाणिना वा कदाचन ॥
" न शातयेदिष्टकाभिः फलानि न फलेन च । न म्लेच्छभाषां शिक्षेत न कर्षेच्च पदासनम् ॥
" न दंतैर्नखरोमाणि छिंद्यात्सुप्तं न बोधयेत् । न बालातपमासेवेत्प्रेतधूमं विवर्जयेत् ॥
" नाकारणाद्वा निष्ठीवेत्स्वयं नोपानहौ हरेत् । न पादक्षालनं कुर्यात्पादेनैव कदाचन ॥
" नाग्नौ प्रतापयेत्पादौ न कांस्ये धावयेद्बुधः । नातिप्रसारयेद्देवं ब्राह्मणं गामथापि वा ॥
" वार्यग्निगुरुविप्रान्वा सूर्यं वा शशिनं प्रति । नाशुद्धोऽग्निं परिचरेन्न देवप्रतिमां स्पृशेत् ॥
" नावगाहेदगाधांबु नाप्सु रेतः समुत्सृजेत् । व्यतिक्रामेन्न प्रपन्नान्नाप्सु मैथुनमाचरेत् ॥
" चैत्यवृक्षं न वै छिंद्यान्नाप्सु ष्ठीवनमुत्सृजेत् । न चाग्निं लंघयेद्धीमान्नोपदध्यादधः क्वचित् ॥
" न कूपमवरोहेत न वीक्षेताशुचिः क्वचित् । अग्नौ न प्रक्षिपेदग्निं नाग्निं प्रशमयेत्तथा ॥
" सुहृन्मरणमार्तिं वा न स्वयं श्रावयेत्परान् । न भिंद्यात्पूर्वसमयमभ्युपेतं कदाचन ॥
" परस्परं पशून्बालान्पक्षिणो नावबोधयेत् । सायं प्रातर्गृहद्वारं भिक्षार्थं नावघाटयेत् ॥
" स्वयमग्निं न हस्तेन स्पृशेन्नाप्सु चिरं वसेत् । न वीजयेच्च वस्त्रेण समवायं च वर्जयेत् ॥
" नोपानद्वर्जितो यायान्न विना च कमंडलुम् । नाग्नेर्गोब्राह्मणादीनामंतरेण व्रजेत्क्वचित् ॥
" वर्जयेन्मार्जनीरेणुं स्नानवस्त्रघटोदकम् " ॥ **विष्णुपुराणे** (३।१२।८–१०)—
" नावगाहेज्जलौघस्य वेगमध्ये नरेश्वर । प्रदीप्तं वेश्म न विशेन्नारोहेच्छिखरं तरोः ॥
" न कुर्याद्दंतसंघर्षं न कुर्यान्नासिकारवम्[3] । नासंवृतमुखो जृंभेच्छ्वासकासौ विवर्जयेत् ॥

---

१ खगघ–विरुद्धं । २ गघ–ऋक्षांश्च । ३ कुष्णीयाच्च नासिकाम् । ४ च ।

" नोच्चैर्हसेत्सशब्दं च श्मश्रूणि च न भक्षयेत् । दुष्टस्त्रीसंनिकर्षं च वर्जयेन्निशि सर्वदा ॥
" नैकः शून्याटवीं गच्छेन्न च शून्यगृहे वसेत् । स्नानार्द्रधारणीं चैव दूरतः परिवर्जयेत् ॥
" उपसर्पेन्न च व्यालांश्चिरं तिष्ठेन्न चोत्थितः । अतीव जागरस्वप्ने तद्वत्स्नानासने बुधः ॥
" न सेवेत तथा शय्यां व्यायामं च नरेश्वर । दंष्ट्रिणः शृंगिणश्चैव प्राज्ञो दूरेण वर्जयेत् ॥
" बालातपमवश्यायं पुरोवातं च वर्जयेत् ।
" विरोधं नोत्तमैर्गच्छेन्नाधमैश्च सदा बुधः । विवादश्च विवाहश्च तुल्यशीलैस्तथेष्यते ॥
" अप्यल्पहानिः सोढव्या वैरादर्थागमं त्यजेत् । योषितो नावमन्येत न चासां विश्वसेद्बुधः ।
" नोर्ध्वं न तिर्यक् दूरं वा निरीक्षन् पर्यटेद्बुधः । युगमात्रं महीपृष्ठं नरो गच्छेद्विलोकयन् " ॥

स्मृत्यंतरे—"दिगंबरं मुक्तकच्छं तथा कौपीनधारिणम् । गृहस्थं भजते तावदलक्ष्मीः कलहोत्सुकम् ॥
" दीपच्छाया नरच्छाया वस्त्रकेशनखोदकम् । अजारजः खररजस्तथा संमार्जनीरजः ।
" स्त्रीणां पादरजश्चापि शक्रस्यापि श्रियं हरेत् ॥
" हविर्गंधो गवां रेणुर्वेदानां ध्वनिरेव च । अपि गोदोहमात्रेण सर्वपापं व्यपोहति ॥
" द्रव्याणामुत्तमानां च लंघने श्रीर्विनश्यति । तथाधमानां गृह्णाति तमलक्ष्मीश्च सत्वरम् ॥
" यद्गृहे लक्ष्यते नित्यं रंगवल्ल्यनुलेपनम् । तद्गृहे वसते लक्ष्मीर्नित्यं पुण्यफलान्विता " ॥

संग्रहे—
" अजखरकरभाश्वपादपांसुस्तुषकणिकागृहमार्जनीरजश्च ॥
" परमुखपरवस्त्रशूर्पजातो मरुदपि देहभृतां करोत्यलक्ष्मीम् ॥
" अनवधानतया गृहमार्जनी स्पृशति यद्यपि गात्रमथ क्षणात् ॥
" शिरसि दीपशिखा च यदा भवेत्कनकयुक्तजलेन विशोधयेत् ॥
" अच्छिद्रकुंभस्रुततोयधारास्नानं नखश्मश्रुशिरोरुहांभः ।
" स्नानांबुदेहांबुपरस्य पुंसां दारिद्र्यदुःखाजयमृत्युदं स्यात् " ॥

आपस्तंबः (१।११।३०।७; १०–१४; ३१।९–१७)—" पूर्वेण ग्रामान्निष्क्रमणप्रवेशनानि शीलयेदुत्तरेण वा । सर्वान् रागान्वासासि वर्जयेत् (१०)। कृष्णं च स्वाभाविकम् (११)। दिवा च शिरसः प्रावरणं वर्जयेन्मूत्रपुरीषयोः कर्म परिहाप्य (१४)। स्तृहतीं च गां नाचक्षीत । संसृष्टां च वत्सेनानिमित्ते । नाधेनुमधेनुरिति ब्रूयात् । धेनुं भव्येत्येव ब्रूयात् । न भद्रं भद्रमिति ब्रूयात्पुण्यं प्रशास्तमित्येव ब्रूयात् । वत्सतंत्रीं च नोपरि गच्छेत् । प्लेखावंतरेण च नातीयात् । नासौ मे सपत्न इति ब्रूयात् । यद्यसौ मे सपत्न इति ब्रूयात् द्विषंतं भातृव्यं जनयेत् । नेंद्रधनुरिति परस्मै ब्रूयात् । न पततः संचक्षीत " इति । स्तृहतीं सस्यधान्यादिकं भक्षयन्तीं गां स्वामिने न ब्रूयात् । भविष्यन्ती धेनुः धेनुं भव्या । वत्सानां बंधनी रज्जुः वत्सतंत्री । प्लेङ्खौ डोलास्तम्भौ तयोर्मध्ये न गच्छेत् । पततः पक्षिणः संघीभूय स्थितान् न संजक्षीत । इयन्त एत इति न गणयेदित्यर्थः ।

स एव (२।१।१५)—"नित्यमुदधानान्यद्भिररिक्तानि स्युर्गृहमेधिनोर्व्रतम्" इति । गृहे यावंति उदधानानि उदपात्राणि घटकरकादीनि तानि सदा अद्भिररिक्तानि स्युरित्यर्थः ।

स एव (१।११।३२।२१–२७)–"नगरप्रवेशनानि च वर्जयेत् । प्रश्नं च न विब्रूयात् । अथाप्युदाहरंति ।
" मूलं तूलं वृहति दुर्विवक्तुः प्रजां पशूनायतनं हिनस्ति ।
" धर्मप्रल्हाद न कुमालनाय रुदन्ह मृत्युर्व्युवाच प्रश्नमिति " ।

---

१ ख–स्पृ ।

"गार्दभं यानमारोहणे विषमारोहणावरोहणानि च वर्जयेत् । बाहुभ्यां च नदीतरम् । नावं च सांशयिकीम्"। इति। प्रश्नं पृष्टं दुर्निरूपमर्थमिदमित्थमिति विविच्य न ब्रूयात् । अपि चास्मिन्नर्थे श्लोकमुदाहरंति । दुर्विवक्तुस्तदेव दुर्वचनं मूलं तूलं च वृहति । मूलं पित्रादयः । तूलमागामिनी-संपत्तदुभयमप्युत्पाटयति । प्रजादिकं च हिनास्ति । अतो दुर्विवचनसंभवात् प्रश्नमात्रमेव न विब्रूयात् । इतिहासोऽत्र । कस्यचिद्दृषेर्धर्मप्रल्हादः कुमालनश्च द्वौ शिष्यावास्ताम् । तौ कदाचिदरण्यान्महान्तौ समिद्भारावाहृत्य श्रमादाचार्यगृहे प्राक्षिपताम् । तयोरेकेनाचार्यपुत्रः शिशुराक्रान्तो मृतः। ततः शिष्यावाहूयाचार्यः पप्रछ केनायं मारित इति । तावुभावपि न मयेत्यूचतुः। ततो मुनिर्मृत्युमाहूय पप्रच्छ । केनायं व्यापादित इति । ततो मृत्युः रुदन्नेव प्रश्नं व्युवाच विविच्य कथितवान् । हे धर्मप्रल्हाद् न कुमालनाय । कुमालनस्य नेदं पतनीयमिति तवास्तीत्यर्थाद्गम्यत इति रुदन् व्युवाचेत्यर्थः ।

स एव (१।११।३१।१९–२१)—" दिवादित्यः सत्वानि गोपायति नक्तं चंद्रमास्तस्मादमावास्यायां निशायां स्वाधीय आत्मनो गुप्तिमिच्छेत्प्रायत्यब्रह्मचर्याभ्यां कालेचर्यया च । सह ह्येतां रात्रिं सूर्याचंद्रमसौ वसतो न कुसृत्या ग्रामं प्रविशेद्यदि प्रविशेत् नमोरुद्राय वास्तोष्पतय इत्येतामृचं जपेदन्यां वा रौद्रीम्" इति। स्वाधीयः भृशतरमात्मनो गुप्तिं रक्षामिच्छेत्केन प्रकारेण प्रायत्येन ब्रह्मचर्येण काले चर्चया कालकृतदेवार्चनजपादिकया च । कुसृत्या कुमार्गेण । अन्यां वा रौद्रीं इमां रुद्राय तव स इत्यादिकामित्यर्थः ।

अत्र **वाजसनेयिनां गृह्ये**—" वनं प्रवेक्ष्यन्ननुमंत्रयते नमो रुद्राय वनसदे स्वस्ति मा संपारयेति । पंथानमारोक्ष्यन्ननुमंत्रयते नमो रुद्राय पथिषदे स्वस्तिमा संपारयेत्यपः प्रवेक्ष्यन्ननुमंत्रयते । नमोरुद्रायाप्सुषदे स्वस्ति मा संपारयेति । तस्माद्यत्किंचन कर्म कुर्वन् स्यात्तत्सर्वं नमोरुद्रायेत्येव कुर्यात् ।'सर्वो ह्येष रुद्र' इति श्रुतेरिति"। **गौतमः** (९।८,९,१५–२५, ३२–३७)—" न रूढश्मश्रुरकस्मात् । नाग्निमपश्च युगपद्धारयेत् । न भस्मकेशतुषकरीषकपालामेध्यान्यधितिष्ठेन्नन् (१५) । न म्लेच्छाशुच्यधार्मिकैः सह संभाषेत (१६) । संभाष्य पुण्यकृतो मनसा ध्यायेत् (१७) । ब्राह्मणेन वा सह संभाषेत (१८) । अधेनुं धेनुभव्येति ब्रूयात् । अभद्रं भद्रमिति । कपालं भगालमिति । मणिधेनुरिति इंद्रधेनुर्गां धयन्तीं परस्मै नाचक्षीत । न चैनां वारयेत् (२५) । विगृह्यवादबहिर्गंधमाल्यधारणपापीयसावलेखनभार्यया सह भोजनांजन्त्यवेक्षणकुद्वारप्रवेशनपादपादधावनासन्दीस्थभोजननदीबाहुतरणवृक्षविषमारोहणावरोहणप्राणव्यायच्छनानि च वर्जयेत् । न सन्दिग्धां नावमधिरोहेत् । सर्वत एवात्मानं गोपायेत् । न प्रावृत्य शिरोऽहनि पर्यटेत् । प्रावृत्य तु रात्रौ । मूत्रोच्चारे च " इति । पापीयसावलेखनं अशुचिना काष्ठादिना शिरःप्रभृतेः कंडूयनम् । अत्र तृतीयाया अलुक् छांदसः । अञ्जल्यवेक्षणं तैलाभ्यंगं कुर्वन्त्या अवेक्षणम् । पादपादधावनं पादेन पादस्य प्रक्षालनम् । आसन्दीपीठकादिः । प्राणव्यायच्छनं प्राणोपरोध्युल्लंघनम् । सर्वतः सर्वेभ्योऽप्यपायेभ्यः । प्रावृत्य तु रात्राविति । प्रावृत्यैव पर्यटेदित्यर्थः ।

स एव (९-४५-५५; ६५)—" सोपानत्कश्चासनाभिवादननमस्कारान् वर्जयेत् । न पूर्वाह्णमध्यंदिनापराह्णानफलान्कुर्याद्यथाशक्ति धर्मार्थकामेभ्यस्तेषु तु धर्मोत्तरः स्यान्न नग्नां परयोषितमीक्षेत । न पदासनमाकर्षेन्न शिश्नोदरपाणिपादवाक्चक्षुश्चापलानि कुर्यात् । छेदन-

भेदनविलेखनविमर्दनावस्फोटनानि नाकस्मात् कुर्यान्नोपरिवत्सतंतीं गच्छेन्न कुलं कुलः स्यात्। न यज्ञमवृतो गच्छेत्। दर्शनाय तु कामम्। प्रशस्तमङ्गल्यदेवायतनचतुष्पथान् प्रदक्षिणमावर्तेत (६७)। मनसा वा तत्समग्रमाचारमनुपालयेदापत्कल्पो यच्चात्मवन्तो वृद्धाः सम्यग्विनीता दंभलोभमोहवियुक्ता वेदविद् आचक्षते तत्समाचरेत्" इति।

बोधायनः (२।३।२८–३१; ४०)—"वेणवं दंडं धारयेद्रुक्मकुंडले च पदा पादस्य प्रक्षालनमाधिष्ठानं च वर्जयेत्"। "शुक्ता रुक्षाः परुषा वाचो न ब्रूयात् (४०)। न कूपमवेक्षेत (४७)। न गर्तमवेक्षेत (४८)। न तत्रोपविशेद्यत एनमन्य उत्थापयेत् (४९)। पुरेणुकुण्ठितशरीरस्तत्परिपूर्णनेत्रवदनस्तु नगरे वसन् सुनियतात्मा सिद्धिमवाप्स्यती न तदास्ति (५३)। "रथाश्वगजधान्यानां गवां चैव रजः शुभम्। अप्रशस्तं समूहन्याः श्वाजाविखरवाससाम्"॥ पूज्यान् पूजयेदिति॥ (५५)।

देवलः—

"आत्मानं न शपेद्दोषान् न व्रजेन्न स्वपेद्दिवा। न नक्तं विलिखेद्भूमिं गाश्च रात्रौ तु न स्पृशेत्॥

"ब्राह्मणान्नृपतीन् वृद्धान् स्वांश्च ज्ञातीन्यतीनपि। नाक्रोशेन्नावमन्येत पूजयेद्दैवतं यथा॥

"यः काष्ठपादुकारूढो गृहात्परगृहं व्रजेत्। तं दृष्ट्वा तु दुराचारं सूर्यश्चैव निमीलति"॥

अपरार्के—

"छाया स्याद्दासवर्गस्तु दुहिता कृपणस्तथा। तस्मादेतैरधिक्षिप्तः सहेतासंज्वरः सदा"॥

मार्कंडेयः—

"असत्प्रलापमनृतं वाक्पारुष्यं च वर्जयेत्। असच्छास्त्रमसद्वादमसत्सेवां च वै नरः"॥

चतुर्विंशतिमते—

"कृष्णसर्पं द्विजं दृष्टं शूद्रं च प्रतिवादकम्। गर्दभं जारजातं च दूरतः परिवर्जयेत्॥

"नोद्यानादावकालेषु प्राज्ञस्तिष्ठेत्कदाचन"॥ **स्मृतिरत्ने**—

"वासस्तिरोहितं सूर्यमादर्शेम्बुनि बिंबितम्। आयुष्कामो न वीक्षेत न च्छायामात्मनो जले॥

"नांजयन्तीं स्त्रियं नेत्रे न चाभ्यक्तामनावृताम्। न पश्येत्प्रस्वपंतीं च तेजस्कामो द्विजोत्तमः॥

"नासहायो व्रजेद्रात्रावुत्पथे न चतुष्पथे। न यज्ञमवृतो गच्छेदार्त्विज्यार्थं क्वचित् द्विजः॥

"नमस्कृत्य व्रजेत्कामं दिदृक्षुर्यज्ञमेव वा। दिवा स्वप्नं तथालस्यं पैशुन्यं च तथा मदम्॥

"अभियोगमयोगं च श्रेयोर्थी परिवर्जयेत्"॥

अपरार्के—"निंदा मृत्युपदं ज्ञेयं निकृतिस्तमसः पदम्। सर्वभूतात्मभूतत्वादार्जवं ब्रह्मणः पदम्॥

"द्वौ मासौ पाययेद्वत्सं तृतीये द्विस्तनं दुहेत्। चतुर्थे त्रिस्तनं शेषं यथान्यायं यथाबलम्॥

"अंतःपुरं वित्तगृहं परद्रोहिगतं तथा। न गच्छेद्इंधनागारं वध्यभूमिं च गर्हिताम्॥

"गोपयेज्जन्मनक्षत्रं धनमायुर्गृहे बलम्। वेगरोधो न कर्तव्यस्त्वन्यत्र क्रोधवेगतः॥

"नोपेक्षितव्यो व्याधिः स्यान्मृदुरल्पोपि वा नृणाम्। बिभीतककपित्थार्कस्नुहिच्छायां न चाश्रयेत्॥

"स्तंभदीपमनुष्याणामन्येषां प्राणिनां तथा। गोगजाश्वाजपुच्छेषु मुखेषु च विशेषतः॥

"यल्लग्नमुदकं तस्य विप्रुषो दूरतस्त्यजेत्"॥

धर्मसारे—"खगवाताः शूर्पवातो वातो प्राणिमुखोत्थितः। सुकृतानि निहंत्येते संस्पृष्टाः पुरुषस्य च"॥

---

१ कगघ–स्कर्तुं।

शातातपः—
" रेणवः शुचयः सर्वे वायुना समुदीरिताः। अन्यत्र रासभाजाविसमुहाजिनवाससाम् ॥
" अजाविरेणुसंस्पर्शादायुर्मर्त्यस्य हीयते। श्वकाकोष्ट्रखरोलूकसूकरग्रामपक्षिणाम् " ॥
धर्मसारे—
" गोविप्रयोर्ब्राह्मणाग्न्योर्दंपत्योर्गुरुशिष्ययोः। अंतरेण न गच्छेत्तु हरस्य वृषभस्य च " ॥ **देवलः**—
" विद्या वित्तं तपश्चेति त्रीणि तेजांसि देहिनः। इह चामुत्र च श्रेयः सर्वैतैः साध्यते त्रिभिः ॥
" विद्यया विमलं ज्योतिर्वित्तत्यागात्सुखोद्यम्। तपसा विमलां भूतिं प्राप्नुयान्मानवास्त्रिभिः "॥
शंखलिखितौ—
" आपत्स्वपि च कष्टासु परस्वं कामयेत न। नाभक्ष्यं भक्षयेत्किंचिन्नापूर्वचरितं चरेत् ॥
" अकर्तव्यं न कर्तव्यं प्राणैः कंठगतैरपि। कर्तव्यमेव कर्तव्यं प्राणैः कंठगतैरपि " ॥
बृहस्पतिः—
" यथा विद्या यथा कर्म यथा वित्तं यथा वयः। जानंस्तथैव कुर्वीत न वेषादिभिरुद्धतः ॥
" यद्यपि स्यात्त्रिलोकज्ञः त्रैलोक्याकर्षणक्षमः। तथापि लौकिकाचारं मनसाऽपि न लंघयेत्"॥
यमः—" परकीयरहस्यानि नैवोपशृणुयात्क्वचित् ॥
" दुष्टवाक्यं न च ब्रूयाद्ब्राह्मणानां विशेषतः। तूष्णीमासीत निंदायां न ब्रूयात् किंचिदुत्तरम् ॥
" यानि मिथ्याभिशस्तानां पतंत्यश्रूणि रोदनात्। तानि मित्रपशून् घ्नंति तेषां मिथ्याभिशंसिनाम् ॥
" शपता यत्कृतं पुण्यं शप्यमानं तु गच्छति। शप्यमानस्य यत्पापं शपन्तमनुगच्छति " ॥
बृहस्पतिः—
" उपकाराय यो ब्रूयाद् ब्राह्मणार्थे गवामपि। ब्रह्मयोनिशतं प्राप्य देवत्वमधिगच्छति " ॥
व्यासः—
" वेदशास्त्रविनोदेन कालो गच्छति धीमताम्। व्यसनेनैव मूर्खाणां निद्रया कलहेन वा " ॥
याज्ञवल्क्यः (आ. १२३)—
" वयोबुद्ध्यर्थवाग्वेषश्रुताभिजनकर्मणाम्। आचरेत्सदृशीं वृत्तिमजिह्मामशठां तथा " ॥
स्मृत्यर्णवे—
" सर्वेषां ब्राह्मणो विद्यावृत्याचारान् यथाविधि। प्रब्रूयादितरेभ्यश्च स्वयं चैव तथा भवेत् ॥
" अहिंसयैव भूतानां कार्यं श्रेयोऽनुशासनम्। वागेव मधुरा श्लक्ष्णा प्रयोज्या धर्ममीप्सता ॥
" सन्मानाद्ब्राह्मणो नित्यमुद्विजेत भयादिव। अमृतस्येव चाकांक्षेदवमानस्य सर्वतः ॥
" अवमानात्तपोवृद्धिः संमानाच्च तपःक्षयः। अर्चितः पूजितो विप्रो दुग्धा गौरिव गच्छति " ॥
व्यासः—
" प्रथमा गतिरात्मैव द्वितीया गतिरात्मजः। संतो गतिस्तृतीयोक्ता चतुर्थी धर्मसंग्रहः " ॥
दक्षः—
" पैशून्यमनृतं मायां कामं क्रोधं तथाप्रियम्। द्वेषं संगं परद्रोहं विकर्माणि विवर्जयेत् ॥
" आयुर्वित्तं गृहच्छिद्रं मंत्रो मैथुनमौषधम्। आयौ दानावमानौ च नव गोप्यानि सर्वदा " ॥
स्मृतिसारे—" रक्तमाल्यं न धार्यं स्याच्छुक्लं धार्यं तु पंडितैः ॥

" वर्जयित्वा तु कमलं तथा कुवलयं विभो । रक्तं शिरस्यधार्यं तु तथा नाग्नेयमित्यपि " ॥
वामनपुराणे—" देशानुशिष्टं कुलधर्ममग्र्यं स्वगोत्रधर्मं च न संत्यजेत ।
" नानर्थसिद्धिं समुपाचरेत नासत्प्रलापं न च सत्यहीनम् ॥
" न निष्ठुरं नाम न शास्त्रहीनं वाक्यं वदेत्साधुजनेन येन ॥
" निंद्यो भवेन्नैव च धर्मवेदी संगं न चासत्सु जनेषु कुर्यात् ॥
" वृथाटनं वृथादानं वृथा च पशुमारणम् । न कर्तव्यं गृहस्थेन वृथा दारपरिग्रहः " ॥
बोधायनः (१।५।८७)—" यद्यौवने च रतिविभ्रमेण सद्वाऽसद्वा यादृशं वा यथा वा ।
" उत्तरे चेद्वयसि साधुवृत्तस्तदेवास्य भवति नेतराणि " ॥
देवलः—"अग्नेर्वृषलभुक्तस्य ग्रहणं नास्त्यनापदि । श्वपाको वृषलो भोक्तुं ब्राह्मणाग्निं च नार्हतः ॥
" चंडालाग्नेरमेध्याग्नेः सूतकाग्नेश्च कर्हिचित् । पतिताग्नेश्चिताग्नेश्च न शिष्टैर्ग्रहणं स्मृतम्" ॥ इति ।
आश्वमेधिके—" पचनाग्निं न गृह्णीयात् परवेश्मनि जातुचित् ॥
" तेन पक्वेन चान्नेन यत्कर्म कुरुते शुभम् । तच्छुभस्य फलस्यार्धं अग्निदस्य भवेद्ध्रुवम् " ॥
दक्षः—
" मेखलाजिनदंडेन ब्रह्मचारीति लक्ष्यते । गृहस्थो यष्टिवेदाद्यैर्नखरोम्णा वनाश्रितः ॥
" त्रिदंडेन यतिश्चात्र लक्षणानि पृथक् पृथक् । यस्यैतल्लक्षणं नास्ति प्रायश्चित्ती न चाश्रमी ॥
" कुटुंबी वर्जयेद्बिंबं दार्वं शैलं च मृन्मयम् । गृहभित्तिषु संस्थं च योगनिद्रारसोत्सुकम् ॥
" कुटुंबिनो विनाऽन्येषां तीर्थयात्रा विशिष्यते । कुटुंबिनो गृहे सर्वं निर्गतो विकलो भवेत्" ॥
सायणीये—
" पुंसां दीपप्रशमनात्स्त्रीणां कूष्मांडखंडनात् । अचिरेणैव कालेन वंशच्छेदो भविष्यति ॥
" क्षुतस्खलितजृंभेषु नृणामायुः प्रहीयते । तत्क्षणात्परिहर्तव्यं जीवधूल्यंगुलिस्वनैः " ॥
क्षुते ' शतं जीव ' इति स्खलिते पांसूनादाय ललाटे निधाय परिहार्यम् । जृंभणे अंगुलिस्फोटनेन परिहर्तव्यमित्यर्थः ।
" अयोबीजजलान्नाग्निक्षीरधान्यौषधादिकम् । रात्रौ दातुर्गृहं शून्यं प्रतिसंग्रहणं शुभम् " ॥
किंचिद्द्रव्यादानेन क्षीरादिदाने नक्तं न दोष इत्यर्थः ।
स्मृत्यंतरे—" तृतीयमासादारभ्य न कुर्याद्गर्भिणीपतिः ।
" क्षौरं शवानुगमनं दूरयात्रां प्रतिग्रहम् । श्राद्धं च सागरस्नानं प्रेतनिर्हरणं तथा ॥
" गृहारंभप्रवेशौ च देवतास्थापनं तथा । केशश्मश्रुनखादींस्तु धारयेद्गर्भिणीपतिः " ॥ इति ।
पुराणे—
" धर्मो मित्रं प्रमीतस्य विद्या मित्रं प्रवासिनः । भार्या मित्रं गृहस्थस्य दानं मित्रं मरिष्यतः ॥
" केशान्मासत्रयादूर्ध्वं गर्भवान्वापयेद्यदि । गर्भध्वंसेन तत्तुल्यं ब्रह्महत्यासमं भवेत् ॥
" क्षौरं शवानुगमनं नखकृंतनं च श्राद्धं च वास्तुकरणं ह्यतिदूरयानम् ॥
" उद्वाहवारिधिजलस्नपनोपयोगं आयुःक्षयं भवति गर्भिणिकापतीनाम् " ॥
सारसमुच्चये—
" बीजानां वापनं क्षौरं वास्तुकर्म कृषिं तथा । रात्रौ विप्रो न कुर्वीत कुर्वन्क्षिप्रं विनश्यति ॥

" चौलाब्दे च विवाहाब्दे ह्यौपनायनिके तथा। मात्रापित्रोर्मृताब्दे च क्षौरं नैव समाचरेत् "॥
चंद्रिकायाम्—
" नोदन्वदंभसि स्नायान्नखश्मश्रुनिकृंतनम्। अंतर्वत्न्याः पतिः कुर्वन्व्रजते नरकं ध्रुवम्॥
" वापयेन्न कृतोद्वाहो वर्षं वर्षार्धमेव वा। भुंजीत पार्वणं नैव श्राद्धं तत्र विशेषतः॥
" एकोदराणां पुत्राणां पितुश्चैकदिने तथा। श्राद्धे तु भोजनं नैव क्षौरकर्म न चैव हि॥
" पितुः पुत्रस्य चैकस्मिन्दिने क्षौरं कृतं यदि। पुत्रस्य चायुर्हीयेत पितुश्च तदनंतरम्॥
"नित्यं नैमित्तिकं चैव कर्म कुर्वन्नतंद्रितः। निषिद्धं वर्जयन् धीमानिहामुत्र सुखी भवेत्"॥ इति।
इत्यवशिष्टधर्मप्रकरणम्। **अथ द्रव्यशुद्धिः**। तत्र शुद्धिहेतूनाह **पराशरः**—
" कालोऽग्निः कर्ममृद्वायुर्मनो ज्ञानं तपो बलम्। पश्चात्तापो निराहारः सर्वेऽमी शुद्धिहेतवः॥
" त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन्। अदृष्टमद्भिर्निर्णीतं यच्च वाचा प्रशस्यते॥
" ब्राह्मणा जंगमं तीर्थं तीर्थभूता हि साधवः। तेषां वाक्योदकेनैव शुध्यंति मलिना जनाः"॥
बोधायनः (१।५।४६।४८)—
" कालोऽग्निर्मनसः शुद्धिरुदकाद्युपलेपनम्। अविज्ञानं च भूतानां षड्विधं शौचमुच्यते॥
" कालं देशं तथाऽऽत्मानं द्रव्यं द्रव्यप्रयोजनम्। उपपत्तिमवस्थां च ज्ञात्वा शौचं समाचरेत्॥
" पंचेंद्रियस्य देहस्य बुद्धेश्च मनसस्तथा। द्रव्यदेशक्रियाणां च शुद्धिराचार्य उच्यते "॥
मनुः (५।१०४)—
" ज्ञानं तपोऽग्निराहारो मृन्मनो वार्युपांजनम्। वायुः कर्मार्ककालौ च शुद्धेः कर्तॄणि देहिनाम्"॥
आहारः पंचगव्यादिः। उपांजनं गोमयादिकम्। **स एव** (५।१०६, १०८)—
" क्षांत्या शुध्यंति विद्वांसो दानेनाकार्यकारिणः। प्रच्छन्नपापा जप्येन तपसा वेदवित्तमाः॥
" अद्भिर्गात्राणि शुध्यंति मनः सत्येन शुध्यति। विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति॥
अशुद्धिहेतवो दर्शिताः **स्मृत्यर्थसारे**—" विण्मूत्रशुक्ररक्तवसासुरामद्यादीन्यत्यंतोपहतिकारणानि नखश्लेष्माश्रुस्वेदादीन्यल्पोपहतिकारणानि "। अल्पकालेऽल्पस्पर्शे अल्पोपहतिः। बहुकालेऽधिकस्पर्शेऽत्यंतोपहतिरिति।

मनुः (५।११०–१११)—
" तैजसानां मणीनां च सर्वस्याश्ममयस्य च। भस्मनाऽद्भिर्मृदा चैव शुद्धिरुक्ता मनीषिभिः॥
" निर्लेपं कांचनं भांडमद्भिरेव विशुध्यति। अब्जमश्ममयं चैव राजतं चानुपस्कृतम् "॥
अब्जं शंखमुक्तादिकम्। अनुपस्कृतं निर्लेपम्। एवं विशेषणात्सलेपविषयः पूर्वश्लोकः॥
"ताम्रायःकांस्यरौप्याणां त्रपुणः सीसकस्य च। शौचं यथार्हं कर्तव्यं क्षाराम्लोदकवारिभिः"॥(११०)
उशनाः —" मूत्रपुरीषरेतःकुणपोपहतानामावर्तनमुल्लेखनं भस्मना त्रिःसप्तकृत्वः परिमार्जनं अतैजसानामेवंभूतानामुत्सर्गः " इति।
कण्वः—"श्लेष्माद्युपहतानां प्रतिलोमस्पर्शोपहतानामेकविंशतिकृत्वो मार्जनं रजस्वलोच्छिष्टानामेकदिनं पंचगव्यं प्रक्षिप्यैकविंशतिकृत्वो मार्जनं अस्पृश्योपहतानामावर्तनम् " इति।
पराशरः (७।२३)—" भस्मना शुध्यते कांस्यं ताम्रमम्लेन शुध्यति।
" भस्मना शुध्यते कांस्यं सुरया यन्न लिप्यते। सुरामात्रेण संस्पृष्टं शुध्यतेऽग्न्युपलेखनैः "॥

उपलेखनं शस्त्रेणोपरिभागस्य तक्षणम् । मूत्रपुरीषलेपेप्येषैव शुद्धिः । गवाघ्रातादीनां दशकृत्वो भस्मकर्षणेन शुद्धिरित्याह **स एव** (७।२४-२५।२७)—

" गवाघ्रातानि कांस्यानि श्वकाकोपहतानि च । शुध्यंति दशभिः क्षारैः शूद्रोच्छिष्टानि यानि च ॥
" गंडूषं पादशौचं च कृत्वा वै कांस्यभाजने । षण्मासान्भुवि निक्षिप्य उद्धृत्य पुनराहरेत् ॥
" दंतमस्थि तथा शृंगं रूप्यसौवर्णभाजनम् । मणिपात्राणि शंखं चेत्येतान्प्रक्षालयेज्जलैः ॥
"आयसेष्वायसानां च सीसस्याग्न्यौ विशोधनम् स्नेहो वा गोरसो वाऽपि तत्र शुद्धिः कथं भवेत् ॥(२६)
" अल्पं परित्यजेत्तत्र स्नेहस्य पचनेन च । अनलज्वालया शुद्धिर्गोरसस्य विधीयते "॥ इति ।

याज्ञवल्क्यः (आ. १९०)—

" त्रपुसीसकताम्राणां क्षाराम्लोदकवारिभिः । भस्माद्भिः कांस्यलोहानां शुद्धिः प्लावो द्रवस्य तु "॥

एतच्चाम्लोदकादिभिः शुद्धिविधानं नियमार्थम् ।

" मलसंयोगजं तज्जं यस्य येनोपहन्यते । तस्य तच्छोधनं प्रोक्तं सामान्यं सर्वशुद्धिषु " ॥
इत्याविशेषेण **स्मरणात्** । शुद्धिः प्लावो द्रवस्य तु द्रवद्रव्यस्य घृतादेः प्रस्थप्रमाणाधिकस्य श्वकाकाद्युपहतस्यामेध्यसंमृष्टस्य च प्लावः प्लावनं शक्तिविषये ततोऽल्पस्य त्याग इत्यर्थः । तथा **शंखः**—"अभ्यवहार्याणां घृतेनाभिघारितानां पुनः पचनम् । एवं प्रस्थाधिकानां स्नेहानां स्नेहद्रवरसानाम् " इति । कीटाद्युपहतस्योत्पवनमेव । यथाह **मनुः** (५।११४)—
"द्रवाणां चैव सर्वेषां शुद्धिरुत्पवनं स्मृतम्" इति । उत्पवनं वस्त्राद्यन्तरितपात्रे प्रक्षेपः । मधूदकादेः पात्रान्तरानयनाच्छुद्धिः । " मधूदके पयस्तद्विकाराश्च पात्रात्पात्रांतरानयनाच्छुद्धा " इति **बोधायनस्मरणात्** (ध.सू.१।६।४७) । पर्णापशदहस्ताप्राप्तस्य मधुघृतादेः पात्रान्तरानयनं पुनः पचनं च कार्यम् । **बोधायनः** (१।६।३४-३८)—" तैजसानामुच्छिष्टानां गोशकृन्मृद्भस्माभिः परिमार्जनमन्यतमेन वा ताम्ररजतसुवर्णानामम्लैः मूत्रपुरीषलोहितरेतःप्रभृत्युपहतानां तैजसानां पात्राणां पुनःकरणं गोमूत्रे वा सप्तरात्रं परिशयनं महानद्यां वा" इति । **याज्ञवल्क्यः** (आ. १९१)॥

" अमेध्याक्तस्य मृत्तोयैः शुद्धिर्गंधादिकर्षणात् " इति । आदिग्रहणाल्लेपस्यापि ग्रहणम् । यथाह **गौतमः** (१।४५) " लेपगंधापकर्षणे शौचममेध्यलिप्तस्य " इति । सर्वशुद्धिषु च प्रथमं मृत्तोयैरेव लेपगंधापकर्षणं कार्यम् । अशक्तावन्येनापि । "अद्भिः पूर्वं मृदा च" इति (१।४६) **गौतमवचनात्** । **आपस्तंबः** (१।५।१७।११-१३)—" परिमृष्टं लौहं प्रयतम् । निर्लिखितं दारुमयम् । यथागमं यज्ञे " इति । लौहं कांस्यादि भस्मादिभिः परिमृष्टं प्रयतं भवति दारुमयं निर्लिखितं नष्टं प्रयतं यथागमं शोधितं प्रयतं भवति तद्यथा अग्निहोत्रहवणीदर्भैरद्भिः प्रक्षालित-सोमपात्राणि मार्जालिये प्रक्षालितानि आज्यपात्राण्युष्णेन वारिणा " इति ।

स्मृत्यर्थसारे—"सौवर्णं राजतं लौहं विण्मूत्रादि स्पृष्टमात्रं निर्लेपं जलप्रक्षालनाच्छुध्येत् । सलेपं भस्मजलाभ्यां शुध्येत् । अत्यंतोपहतं वन्हितप्तं जलप्रक्षालनाच्छुध्येत् । सौवर्णं राजतं ताम्रं चंडालोदक्याद्युच्छिष्टं त्रिःसप्तभस्माभिरम्लोदकेन शुध्यति कांस्यादेरावर्त्तनं बहूपघाते सर्वेषामावर्त्तनं तैजसानां गोमूत्रपरिवासने लेपापगमेऽप्यावर्त्तनं ताम्रस्य विण्मूत्रादिचंडालदूषितस्याम्लोदकाभ्यां शुद्धिः कांस्यपित्तलयोर्विण्मूत्रादिगंडूषपादप्रक्षालनादिचंडालादिस्पर्शेऽपि त्रिः सप्तकृत्वोऽपि भस्मना परिमृज्य प्रक्षालनाच्छुद्धिः । अल्पकालोपहतौ तापनपरिलेखनाभ्यां शुद्धिः । बहुकालोपहतौ **आवर्तनम् । यद्वा भूमौ निखाय षण्मासे गते परिमार्जनम् । कांस्यपित्तलयोः श्वकाकस्पर्शे**

शूद्रस्पर्शे च दशकृत्वो भस्मभिः प्रक्षालनं अल्पकालोपहतौ लवणतैलापघर्षणैः शुद्धिः। बहुकाले त्वावर्तनम्। त्रपुसीसायसानां भस्मजलाभ्यां शुद्धिः। सर्वं तैजसं स्वल्पोपहतं गोमूत्रगोमयमृद्रसाम्लोदकैः शुचि यथार्हं स्यात् शुक्तिशंखपाषाणमणीनामब्जानां विण्मूत्रचंडालाद्युच्छिष्टस्पर्शनमात्रे जलप्रक्षालनाच्छुचिः। सलेपानां भस्मजलाभ्यामत्यंतोपहतानां सप्ताहं भूमौ निखाय प्रक्षालनाच्छुद्धिः। घृतस्य नवनीतस्य वा आढकप्रमाणस्य श्वकाकपिपीलिकादिदुष्टस्य दुष्टांशं समुद्धृत्य वस्त्रेण परिशोध्य तज्जातीयेन तद्भांडं पूरयित्वा तत्सर्वमग्नौ प्रताप्य गायत्र्यभिमंत्रणजलाभ्युक्षणाच्छुद्धिः। तक्रतैलक्षीरदध्नां द्रोणप्रमाणानां काकाद्युपहतौ घृतवच्छुद्धिः। दधिक्षीराणि शूद्रभांडस्थानि द्विजभांडप्रक्षेपाच्छुद्धानि भवंति। नवनीतं घृतं तैलं क्षौद्रं दासादिभांडस्थं विप्रभांडे क्षिप्तं शुध्येत्। चंडालेन प्रमादतः स्पृष्टं नवनीतादिजले क्षिप्त्वा उद्धृतं शुध्येत्। आढकप्रमाणान्यूनघृतादीनां द्रोणप्रमाणान्यूनतक्रादीनां च पूर्वोक्तोपहतौ परित्यागोऽनापदि। आपदि तु पूर्वोक्तविधिभिः शुद्धिः। गुडलवणादीनामिति पर्यग्निकरणमिति। **मनुः** (५।११४)—" प्रोक्षणं संहतानां तु दारवाणां तु तक्षणम्" ॥ इति। संहतानां पृथक्द्रव्यसमवायरूपाणाम्॥ तथा **चांगिराः**—

" शयनासनयानानि रोमबद्धानि यानि च। वस्त्राणि तानि सर्वाणि संहतानि प्रचक्षते"॥ इति॥
मनुः (५।११७)—

" अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम्। प्रक्षालनेन त्वल्पानामद्भिः शौचं विधीयते "॥
संहतानां धान्यवाससां मध्ये बहूनां चंडालादिस्पर्शे प्रोक्षणं स्पृष्टानामल्पत्वे तेषां स्पृष्टानां प्रक्षालनमित्यर्थः। **स्मृत्यंतरे**—

" वस्त्रधान्यादिराशीनामेकदेशस्य दूषणे। तावन्मात्रं समुद्धृत्य शेषं प्रोक्षणमर्हति ॥
"स्पृष्टास्पृष्टसमत्वे च सर्वं प्रोक्षणमर्हति " ॥ इति। इयत्स्पृष्टमियदस्पृष्टमित्यविवेके तु प्रक्षालनमेव। स्पृष्टानां बहुत्वे सर्वेषां क्षालनमुक्तं **विज्ञानेश्वरेण** (पृ. ५२ पं. १९–२०)— अनेकपुरुषैर्धार्याणां द्रोणाधिकानां धान्यानां दशाधिकानां वाससां स्पृष्टानामस्पृष्टानां च प्रोक्षणमेवेति निबंधकृतः। **याज्ञवल्क्यः** (आ. १८४–८५)—

" प्रोक्षणं संहतानां च बहूनां धान्यवाससाम्। तक्षणं दारुशृंगास्थ्नां गोवालैः फलसंभवाम् ॥
" मार्जनं यज्ञपात्राणां पाणिना यज्ञकर्मणि "॥ दारूणां मूत्रपुरीषादीनां दृढवासितौ गंधलेपौ यदि मृज्जलप्रक्षालनेनापगच्छेतां तदा वास्यादीनां तक्षणं तक्षणेनाप्यनपगमे परित्यागः। यज्ञपात्राणां स्रुगादीनां दक्षिणेन हस्तेन दर्भादिना वा यथाशास्त्रं मार्जनमित्यर्थः। सलेपानामेव केषांचिल्लेपापकर्षणे विशेषहेतूनाह **स एव** (आ. १८६–१८७)—

" सोषैरुदकगोमूत्रैः शुद्ध्यत्याविककौशिकम्। सश्रीफलैरंशुपट्टं सारिष्टैः कुतपं तथा ॥
" सगौरसर्षपैः क्षौमं पुनः पाकेन मृन्मयम्" ॥ इति। सोषैः ऊषमृत्तिकासहितेन गोमूत्रेण उदकेन वा लेपापेक्षया आविकमूर्णामयं कौशिकं कोशप्रभवं पट्टादि प्रक्षालितं शुध्यति। अंशुपट्टं वल्कलतंतुकृतं सश्रीफलैर्बिल्वफलसहितैः। कुतपः पार्वतीयछागरोमनिर्मितः कंबलः सारिष्टैः अरिष्टफलसहितैः उदकगोमूत्रैः शुध्यतीत्यर्थः। अल्पोपघाते प्रोक्षणादिना शुद्धिमाह **देवलः**—
" और्णकौशेयकुतपपट्टक्षौमदुकूलजाः। अल्पशौचा भवंत्येते शोषणप्रोक्षणादिभिः ॥

" तान्येवामेध्ययुक्तानि क्षालयेच्छोधनैः स्वकैः । धान्यकल्कैस्तु फलजै रसैः क्षारानुगैरपि ॥
" तूलिकामुपधानं च पुष्परक्तांबरं तथा । शोषयित्वातपे किंचित्करैः संमार्जयेन्मुहुः ॥
"पश्चाच्च वारिणा प्रोक्ष्य विनियुंजीत कर्मणि । तान्यप्यतिमलिष्ठानि यथावत्परिशोधयेत्" ॥ इति ॥

पुष्परक्तानि कुंकुमकुसुंभादिरक्तानि । शंखः " रागद्रव्याणि प्रोक्षितानि शुचीनि " ॥ इति । पराशरः (७।३०)—

"वेणुवल्कलचीराणां क्षौमकार्पासवाससाम् । और्णनेत्रपटानां च प्रोक्षणाच्छुद्धिरिष्यते" ।

वेणुशब्देन तत्कार्याणि कटव्यजनादीनि गृह्यंते । नेत्रपटाः भूर्जत्वगादयः । स एव (७।३१)—

" तुलिकाद्युपधानानि रक्तवस्त्रादिकानि च । शोषयित्वाऽर्कवातेन प्रोक्षणाच्छुचितामियुः" ॥ इति ।

तूलेन निर्मिता शय्या तूलिका । आदिशब्देनासनोपाश्रयादीनि गृह्यंते । उपधानमुच्छीर्षकं तूलिकादीनि च उपधानानि च तूलिकाद्युपधानानीत्यर्थः । स एव (७।३२)—

" मुञ्जोपस्करशूर्पाणां शणस्य फलचर्मणाम् । तृणकाष्ठस्य रज्जूनामुदकाभ्युक्षणं मतम् ॥
"मृन्मये दहनाच्छुधिर्धान्यानां मार्जनादपि " ॥ इति ।

' मृन्मये दहनात् ' इत्येतदुच्छिष्टाद्युपहतिविषयम् । चंडालादिस्पर्शे त्याग एव । यथाह पराशरः (६।२४)—

"चंडालाद्यैस्तु संस्पृष्टं धान्यं वस्त्रमथापि वा । प्रक्षालनेन शुध्येत परित्यागान्महीमयम् " ॥ इति ।

स्मृत्यन्तरेऽपि—

"अंगारेण भवेच्छुद्धिस्ताम्राणां कांचनस्य च । जलशौचं च वस्त्राणां परित्यागेन मृन्मयम्" ॥ इति ।
" मार्जनं यज्ञपात्राणां पाणिना यज्ञकर्मणि । चमसानां ग्रहाणां च शुद्धिः प्रक्षालनेन तु ॥
" चरूणां स्रुक्स्रुवाणां च शुद्धिरुष्णेन वारिणा । स्फ्यशूर्पशकटानां च मुसलोलूखलस्य च ॥
" चेलवच्चर्मणां शुद्धिर्वैदलानां तथैव च । शाकमूलफलानां च धान्यवच्छुद्धिरिष्यते " ॥

वैदलानां वेणुदलनिर्मितानाम् ॥

" कौशेयाविकयोरूषैः कुतपानामरिष्टकैः । श्रीफलैरंशुपट्टानां क्षौमानां गौरसर्षपैः ॥
" क्षौमवच्छंखशृंगाणामस्थिदंतमयस्य च । शुद्धिर्विजानता कार्या गोमूत्रेणोदकेन वा ॥
" प्रोक्षणात्तृणकाष्ठानि पलालं च विशुध्यति । मार्जनोपांजनैर्वेश्म परित्यागेन मृन्मयम्" ॥

उपांजनं उपलेपनम् । बोधायनः (१।६।३३–३४)—" मृन्मयानां पात्राणामुच्छिष्टसमन्वारब्धानामवकूलनमुच्छिष्टलेपोपहतानां पुनर्दहनम् । मूत्रपुरीषलोहितरेतःप्रभृत्युपहतानामुत्सर्गः । फलमयानामलाबुबिल्वनालिकेराणां गोवालैः परिमार्जनम् । नलवेणुशरकुशव्यूतानां गोमयेनाद्भिः प्रक्षालनम् व्रीहीणामुपघाते प्रक्षालनं बहूनां तु प्रोक्षणं तंडुलानामुत्सर्गः " ॥ (१।६।२१–२२) " असंस्कृतायां भूमौ न्यस्तानां तृणानां प्रक्षालनं परोक्षोपहतानामभ्युक्षणमेवं क्षुद्रसमिधां महतां काष्ठानामुपघाते प्रक्षाल्यावशोषणं दारुमयाणां पात्राणामुच्छिष्टसमन्वारब्धानां अवलेखनमुच्छिष्टलेपोपहतानामवतक्षणम् । मूत्रपुरीषलोहितरेतःप्रभृत्युपहतानामुत्सर्गस्तदेतदन्यत्र निर्देशाद्यथैतदग्निहोत्रे धर्मोच्छिष्टे ब्रह्मौदनेषु च तेषु सर्वेषु दर्भैरद्भिः प्रक्षालनम् सर्वेष्वेव सोमभक्षेष्वद्भिरेव मार्जालीये प्रक्षालनम् मूत्रपुरीषलोहितरेतःप्रभृत्युपहतानामुत्सर्गः " इति ।

गौतमः (१।२८–३३)—"परिमार्जनप्रदाहतक्षणनिर्णेजनानि तैजसमार्त्तिकदारवतांतवानाम् ।

तैजसवदुपलमणिशंखशुक्तीनाम् । दारुवदस्थिभूम्योरावपनं च भूमेश्चेलवद्रज्जुविदलत्वचर्मणा-मुत्सर्गो वाऽत्यंतोपहतानाम् ” इति । आवपनमन्यदानीय पूरणम् ।

स्मृत्यर्थसारे—“ मृन्मयानां पात्राणामीषदुपहतौ पुनर्दाहाच्छुद्धिः विण्मूत्राद्युपहतानां चंडालसूतिकाशवोदक्यास्पृष्टानां त्याग एव । आविककंबलस्याल्पदोषे सूर्यरश्मिभिः शुद्धिः । विण्मूत्रादिदोषे वाल्मीकमृत्तिकया प्रक्षालनाच्छुद्धिः । नीलीसंघयुक्तवस्त्र स्वरूपेण त्याज्यम् । कुसुंभादिरंजितवस्त्रमुपहतं चेच्छोषणाच्छुध्यति । विण्मूत्रादिसंस्पृष्टौ तदंशं संशोध्य संशोषणाच्छुध्यति । ऊर्णाकार्पासतूलकुसुंभकुंकुमकर्पूरनिर्यासादीनां चैवम् । श्वेतवस्त्रं चंडालादिस्पृष्टं प्रक्षालनाच्छुध्येत् । धान्यमशुद्धं मृत्तिकायुक्तं तंडुलीकरणाच्छुध्येत् । धान्यराशौ मूत्रादियुक्ते तमंशमपास्य शिष्टमभ्युक्षणाच्छुध्येत् । धान्ये गृहस्थिते गृहदाहे सति तत्र पशुमरणे तत् धान्यं त्याज्यमेव । भूमिगर्भस्थं कुसूलस्थं च धान्यमभ्युक्षणाच्छुध्येत् । मुद्गमाषादिधान्यानामल्पोपहतौ प्रोक्षणाच्छुद्धिः । अत्युपहतौ त्यागः । चंडालपतितादिसंस्पृष्टं पुस्तकं प्रोक्षयेत् ” इति ॥

विष्णुः (   )—

“ मृत्पिडतृणकाष्ठानां श्वभिश्चंडालवायसैः । स्पर्शने विहितं शौचं सोमसूर्यांशुमारुतैः ” ॥

भूमिशुद्धिमाह **याज्ञवल्क्यः** (आ. १७८)—

“ भूशुद्धिर्मार्जनाद्दाहात्कालाद्गोक्रमणात्तथा । सेकादुल्लेखनाल्लेपाद्गृहं मार्जनलेपनात् ” ॥

मार्जन्या पांसुतृणादीनां प्रोत्सारणं मार्जनम् । दाहस्तृणकाष्ठाद्यैः कालो यावता कालेन लेपादिक्षयो भवति तावान् । गोक्रमणं गवां पादपरिघट्टनम् । सेकः गोमूत्रादिभिः क्षीरगोमूत्रगोमयवारिभिः प्रवर्षणाद्वा । उल्लेखनं तक्षणं खननं वा । लेपो गोमयादिभिः । गृहं मार्जनानुलेपाभ्यां शुध्यति । गृहस्य पृथगुपादानं संमार्जनानुलेपयोः प्रतिदिवसप्राप्त्यर्थम् । **स्मृत्यंतरे**—

“ प्रातः प्रतिदिनं गेहं सिंचेद्गोमयवारिभिः । मार्जयेच्च तथा सायं दीपैरुज्वालयेद्गृहम् ”॥ इति ।

मनुरपि (५।१२२)—

“ संमार्जनेनांजनेन सेकेनोल्लेखनेन च । गवां च परिवासेन भूमिः शुध्यति पंचभिः ” ॥

बोधायनः (१।५।५८–५९)— “ भूमेस्तु संमार्जनप्रोक्षणोपलेपनावस्तरणोल्लेखनैर्यथास्थानं दोषविशेषात्प्रायत्यम् । अथाप्युदाहरंति

“ गोचर्ममात्राबिंदुर्भूमेः शुध्यति पातितः । समूढमसमूढं वा यत्रामेध्यं न लक्ष्यते” ॥ इति ।

वसिष्ठः* (३।५७)—

“ खननाद्दहनाद्वृद्धिर्घर्षणात् गोभिराक्रमात् । चतुर्भिः शुध्यते भूमिः पञ्चमाच्चोपलेपनात् ” ॥

नाभिहितैर्मार्जनादिभिः समस्तैर्व्यस्तैर्वा अमेध्या दुष्टा मलिना च भूमिः शुध्यति । **तथा च** मेध्यभूमेः शोध्याभूमेस्त्रैविध्याध्याभिधानपूर्वकं शुचित्वभागं दर्शयति । तथा च **देवलः**—

“ यत्र प्रसूयते नारी म्रियते दह्यतेऽपि वा । चंडालाध्युषितं यत्र यत्र विष्ठादिसंगतिः ॥
“ एवं कश्मलभूयिष्ठा भूरमेध्या प्रकीर्तिता । श्वसूकरखरोष्ट्रादिसंसृष्टा दुष्टतां व्रजेत् ॥
“ अंगारतुषकेशास्थिभस्माद्यैर्मलिना भवेत् । पंचधा वा चतुर्धा वा भूरमेध्या विशुध्यति ॥
“ दुष्टान्विता त्रिधा द्वेधा शुध्यते मलिनैकधा” ॥ अत्र **विज्ञानेश्वरः** (पृ. ५४ पं. १५–१९)

* याज्ञवल्क्यः ।

"यत्र मनुष्या दह्यंते यत्र चंडालाद्यैरध्युषितं तयोः पंचभिः दाहकालगोक्रमणसेकोल्लेखनैः शुद्धिः। यत्र मनुष्या जायंते यत्र वा म्रियंते यत्र चात्यंतं विष्ठादिसंगतिः तासां दाहवर्जितैस्तैरेव चतुर्भिः। श्वसूकरखरैश्चिरकालमध्युषितायाः गोक्रमणसेकोल्लेखनैस्त्रिभिः। उष्ट्रग्रामकुक्कुटादिभिश्चिरकालमधिवासितायाः सेकोल्लेखनाभ्यां शुद्धिः। अंगारतुषादिभिश्चिरकालमधिवासिताया मलिनाया उल्लेखनेन शुद्धिः। मार्जनानुलेपने तु सर्वत्र समुच्चीयेते" इति। **वृद्धगौतमः**—

"सेचनान्मार्जनाद्वेश्म शुध्येत्सूतिगृहं पुनः। खननोल्लेखमृल्लेपपुण्याहैस्त्रिंशतेः परम्" ॥ इति। **स्मृत्यर्थसारे**–"भूतलं नारीप्रसवदूषितं चेत्तत्स्थानान्मृत्तिकामुद्धृत्यान्यां मृत्तिकामापूर्य गवाक्रमणमार्जनाभ्युक्षणैः पुण्याहवाचनाच्च शुध्यति। अत्यंतोपहतौ तृणाग्निना दाहश्च। भूतलस्य चिरकालं विण्मूत्रादिवासितस्य श्मशानत्वं गतस्यातिवृष्टिप्रक्षालनात्पश्चात्पूर्वोक्तविधिना शुद्धिः। आरामे क्षेत्रे वा श्मशानत्वं गते अत्यंतवृष्टेरूर्ध्वं हलकर्षणाच्छुद्धिः। गृहे विप्रक्षत्रियविशां मरणे तत्रत्यं मृन्मयं भांडं पक्वमन्नं च संत्यजेत्। मृतदेशं गोमयेनोपलिप्याजाघृतेन वा पुण्याहवाचनैर्वा कुशसुवर्णमिश्रोदकैः प्रोक्षणाद्वा शोधयेत्। गृहे जनने मरणे वा जाते आशौचादूर्ध्वं मेध्यमृत्तिकाप्रक्षेपात्पुण्याहवाचनाच्छुद्धिः। गृहे दग्धे तत्र मार्जारादिमृतौ तद्गृहस्य कर्षणात्प्रोक्षणाच्छुद्धिः" इति।

चंडालस्य सकृद्गृहप्रवेशे कर्त्तव्यां शुद्धिमाह **पराशरः** (६।४३।४५)—

"गृहस्याभ्यंतरं गच्छेच्चंडालो यदि कस्यचित्। तमगारादिनिर्वास्य मृद्भांडं तु विसर्जयेत् ॥
"रसपूर्णं गृहे भांडं न त्यजेत्तु कदाचन। गोमयेन तु संमिश्रैर्जलैः प्रोक्षेद्गृहं तथा ॥
"प्रवेशयेत्ततः पश्चाद्गृहे गां चाप्यजामपि" ॥

किंचित्काल एकस्मिन्सहवासेऽपि **स एव** (६।३२)—

"अविज्ञातस्तु चंडालो यत्र वेश्मनि तिष्ठति। विज्ञाते तूपसंन्नस्य द्विजाः कुर्वंत्यनुग्रहम्" ॥

परिषदा विधेयं व्रतविशेषं दर्शयति **स एव** (६।३४–३५)—

"दध्ना च सर्पिषा चैव क्षीरगोमूत्रयावकम्। भुंजीत सह भृत्यैश्च त्रिसंध्यमवगाहनम् ॥
"त्र्यहं भुंजीत दध्ना च त्र्यहं भुंजीत सर्पिषा। त्र्यहं क्षीरेण भुंजीत एकैकेन दिनत्रयम्"।

दध्ना संयुक्तं गोमूत्रं यावकं च दिनत्रयम्। घृतक्षीरयोरप्येवं पुनरप्येकैकेन युक्तमेकस्मिन्दिने मिलित्वा द्वादशरात्रम्। दध्यादीनां परिमाणमाह **स एव**—

"दधिक्षीरस्य त्रिपलं पलमेकं घृतस्य तु। यावकस्य परीमाणं ग्रासमात्रमिति स्मृतम्" ॥

एवं चेतनानां शुद्धिमभिधायाचेतनानामप्याह **स एव** (६।३७–४०)—

"भस्मना तु भवेच्छुद्धिरुभयोस्ताम्रकांस्ययोः। जलशौचेन वस्त्राणां परित्यागेन मृन्मयम् ॥
"कुसुंभगुडकार्पासलवणं तैलसर्पिषी। द्वारे कृत्वा तु धान्यानि दद्याद्वेश्मनि पावकम् ॥
"एवं शुद्धस्ततः पश्चात्कुर्याद्ब्राह्मणतर्पणम्। त्रिंशतं गोवृषं चैकं दद्याद्विप्रेषु दक्षिणाम् ॥
"पुनर्लेपनखाताभ्यां होमजप्येन शुध्यति। आधारेण च विप्राणां भूमिदोषो न विद्यते" ॥ इति।

रजक्यादिभिः सह संवासेऽप्याह **स एव** (६।४१–४२)—

"रजकी चर्मकारी च लुब्धकी वेणुजीविनी। चातुर्वर्ण्यस्य तु गृहे ह्यविज्ञाता तु तिष्ठति ॥

“ ज्ञात्वा तु निष्कृतिं कुर्यात्पूर्वोक्तस्यार्धमेव च । गृहदाहं न कुर्वीत शेषं सर्वं च कारयेत् ” ॥ क्षेत्रारामादावज्ञानेन चंडालं सहवासेऽप्याह **स एव** (१०।१८)—

“ चंडालैः सह संपर्कं मासं मासार्धमेव वा । गोमूत्रयावकाहारो मासार्धेन विशुध्यति ” ॥ इति । मासं च अर्धमासं च मासार्धम् । माससंकरे मासव्रतेन शुद्धिः । अर्धमाससंकरे अर्धमासेन शुद्धिरित्यर्थः । **माधवीये**—

“ ग्रामाद्दंडशतं त्यक्त्वा नगराच्च चतुर्गुणम् । भूमिः सर्वत्र शुद्धा स्याद्यत्र लेपो न दृश्यते” ॥ इति ।

मनुः (५।१२७)—

“आपः शुद्धा भमिगता वैतृष्ण्यं यासु गोर्भवेत् । अव्याप्ताश्चेदमेध्येन गंधवर्णरसान्विताः” ॥ इति ।

याज्ञवल्क्यः (आ. १९२)—

“ शुचि गोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतम् । तथा मांसश्वचंडालक्रव्यादादिनिपातितम्”॥ इति । प्रकृतिस्थं रूपरसगंधांतरमनापन्नमुच्छिष्टाद्यनुपहतं शुचि आचमनादियोग्यं भवति । एतच्च यगांतरविषयम् । “ गोतृप्तिशिष्टे पयसि कलौ नाचमनक्रिया ” इति कलौ निषेधस्मरणात् ।

यमः—

“ तथा क्षोभ्यतटाकादिनदीवापीसरांसि च । चंडालाद्यशुचिस्पर्शे तीर्थतः परिवर्जयेत् ॥

“ अंत्यजैः स्वीकृते तीर्थे तटाकेषु नदीषु च । शुध्यते पंचगव्येन पीत्वा तोयमकामतः ” ॥ तीर्थमत्रावतरणप्रदेशः ।

“ अक्षोभ्यानामपां नास्ति प्रसृतानां च धावताम् । स्तोकानामुद्धृतानां च दोषदुष्टत्वमिष्यते ” ॥

देवलः—

“उद्धृताश्चापि शुध्यंति शुद्धैः पात्रैः समुद्धृताः । एकरात्रोषिता आपस्त्याज्याः शुद्धा अपि स्वयम्”॥

पराशरः—

“ नदी वेगेन शुध्येत लेपो यदि न दृश्यते । वापीकूपतटाकेषु दूषितेषु कथंचन ॥

“ उद्धृत्य वै कुंभशतं पंचगव्येन शुध्यति ” ॥ इति । श्वमार्जारादीनां तत्र पतितानां मरणमात्रे इयं शुद्धिः । मृतशरीरक्षरणकृतायामत्यंतोपहतौ **विष्णुराह** (५४।२)—

“ मृतपंचनखात्कूपादत्यंतोपहतात्तथा । अपः समुद्धरेत्सर्वाः शेषं शास्त्रेण शोधयेत् ॥

“ वन्हिप्रज्वालनं कृत्वा कूपे पक्वेष्टकाचिते । पंचगव्यं न्यसेत्तत्र नवतोयसमुद्भवे ” ॥ इति मनुष्यशरीरक्षरणेऽप्येषैव शुद्धिर्महत्सु तटाकादिषु नास्ति दोषः ।

“ वापीकूपतटाकानामेवं शुद्धिर्विधीयते । अल्पानामेव पयसां महत्सु न तु दूषणम् ” ॥ इति स्मरणात् । **जातुकर्णिः**—“ मूत्रपुरीषाद्युपहता आपः सोमसूर्यांशुस्पर्शे शुध्यन्ति ” इति ।

देवलः—

"क्लिन्नं भिन्नं शवं चैव कूपस्थं यदि दृश्यते। पयः पिबेत्त्रिरात्रं तु मानुषं त्रिगुणं पिबेत्"॥ इति। एतद् पाद्विषयम्।

"क्लिन्ने भिन्ने शवे तोये तत्रस्थं यदि तत्पिबेत्। शुध्यै चांद्रायणं कुर्यात्तप्तकृच्छ्रमथापि वा"॥ इति हारीतस्मरणात्। **शातातपः**—

"अंत्यैरपि कृते कूपे सरो वाप्यादिके तथा। तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं न विद्यते"॥ इति एतदापद्विषयम्।

"चंडालखातवापीषु पीत्वा सलिलमग्रजः। अज्ञानाच्चैकभक्तेन त्वहोरात्रेण शुध्यति"॥ इति **पराशरस्मरणात्** (६।२३)। **विज्ञानेश्वरः**—

"प्रपासरण्ये घटके च सैरे द्रोण्यां जलं केशविनिःसृतं च।

"श्वपाकचंडालपरिग्रहेषु पीत्वा जलं पंचगव्येन शुध्येत्"॥ इति।

संवर्त्तः—

"सीरखातप्रपातोयं पीत्वा नावगतं जलम्। अहोरात्रोपवासेन पंचगव्येन शुध्यति"॥ इति। सीरखातप्रपातोयपाने प्रायश्चित्तमेतदापद्विषयम्। अनापदि तु चांद्रायणम्। "सीरखातप्रपातोयं चांद्रायणं चरेत्" इति **पराशरस्मृतेः**।

संवर्त्तः—

"वापीकूपतटाकानां दूषितानां विशुद्धये। अपां घटशतोद्धारः पंचगव्यं च निक्षिपेत्"॥ इति। क्रिम्युपहतदेहस्य शुद्धिमाह **पराशरः** (६।४५–४६)—

"ब्राह्मणस्य व्रणद्वारे पूयशोणितसंभवे। क्रिमिरुत्पद्यते यस्य प्रायश्चित्तं कथं भवेत्॥

"गवां मूत्रपुरीषेण दधिक्षीरेण सर्पिषा। त्र्यहं स्नात्वा च पीत्वा च क्रिमिदुष्टः शुचिर्भवेत्"॥ इति। एतच्च नाभेरधोभागे द्रष्टव्यम्। उपरिभागे तु **भानुराह**—

"नाभिकण्ठान्तरोद्भूते व्रणे चोत्पद्यते क्रिमिः। षड्रात्रं तु तदा प्रोक्तं प्राजापत्यं शिरोव्रणे"॥ इति। **बोधायनः** (१।४।२३)—

"यथैव सोमसंयोगाच्चमसो मेध्य इष्यते। अपां तथैव संयोगान्नित्यं मेध्यः कमंडलुः॥

"ततः शौचं ततः पानं संध्योपासनमेव च। निर्विशंकेन कर्तव्यं यदीच्छेच्छ्रेय आत्मनः"॥ (१९) इति। अत्र कमंडलुशब्देन ताम्रादिपात्रमुच्यते। न तु नालिकेरफलादि।

"दीर्घकालं ब्रह्मचर्यं धारणं च कमंडलोः" इति कलौ तस्य निषेधात्। "यतिपात्राणि मृद्वेणुदार्वलाबुमयानि च" इति संन्यासिविषयत्वस्मरणाच्च। **स एव**—

"प्रायश्चित्तैरपैत्येनो याजनाध्यापनैः कृतम्। प्रतिग्रहनिमित्तं तु त्यागेन तपसाऽपि च"॥ इति। तन्न केवलं तपसा शुध्यति, किंतु

"षष्ठांशं कर्षको दद्यात् पंचमांशं तथा वणिक्। प्रतिगृह्य चतुर्थांशं दत्वा पापैः प्रमुच्यते"॥ इत्युक्ततुरीयांशदानेन तपसा कृच्छ्रचांद्रायणादिना च शुध्यति।

तथा च **मनुः** (११।१९२)—"यद्गर्हितेनार्जयंति कर्मणा ब्राह्मणा धनम् । तस्योत्सर्गेण शुध्यंति जप्येन तपसैव च"॥ इति ।

याज्ञवल्क्यः (आ. ७१)—
"सोमः शौचं ददौ स्त्रीणां गंधर्वस्तु शुभां गिरम् । पावकः सर्वमेध्यत्वं मेध्या वै योषितो ह्यतः॥
"विप्रस्तु पादतो मेध्यो गावो मेध्यास्तु पृष्ठतः। अजाश्वा मुखतो मेध्याः स्त्रियो मेध्यास्तु सर्वशः"॥

शातातपः—
"गोकुले यज्ञशालायां तिलयंत्रेक्षुयंत्रयोः।न मीमांस्यानि शौचानि स्त्रीषु बालातुरेष्वपि"॥ इति ।

पराशरः (७।३६–३७)—
"रथ्याकर्दमतोयानि नावः पंथास्तृणानि च । मारुतार्केण शुध्यंति पक्वेष्टकाचितानि च ॥
"अदुष्टाः संतता धारा वातोद्धूताश्च रेणवः। स्त्रियो वृद्धाश्च बालाश्च न दुष्यंति कदाचन"॥ इति । उदकपानगतधाराः शुद्धाः। अशुद्धिप्रदेशाद्वायुनोत्थापिता अपि रेणवः स्पर्शार्हाः। पुरुषवत्प्रातःस्नानाद्यभावेऽपि योषिदादयः शुद्धा इत्यर्थः ।

वैखानसे "आतुरे बाले महानसे स्त्रीषु शौचं न विचारणीयम्"॥ इति ।

बृहस्पतिः—
'पादौ शुची ब्राह्मणानां अजाश्वस्य मुखं शुचिः।गवां पृष्ठानि मेध्यानि सर्वगात्राणि योषिताम्'॥इति।

मनुः (५।१२९–१३०)—
"नित्यं शुद्धः कारुहस्तः पण्यं यच्च प्रसारितम्। ब्रह्मचारिगतं भैक्ष्यं नित्यं मेध्यमिति स्थितिः॥
"नित्यमास्यं शुचि स्त्रीणां शकुनिः फलपातने । प्रस्नवे च शुचिर्वत्सः श्वा मृगग्रहणे शुचिः"॥
याज्ञवल्क्यः (आ. १८७)—"कारुहस्तः शुचिः पण्यं भैक्ष्यं योषिन्मुखं तथा"॥ इति । योषिन्मुखं संभोगकाले शुचिः । तथा **पैठीनसिः**—"स्त्रीमुखं रतिसंसर्गे" इति ।
वसिष्ठात्रिबोधायनशातातपाः—
"वत्सः प्रस्नवने मेध्यः शकुनिः फलपातने । स्त्रियश्च रतिसंसर्गे श्वा मृगग्रहणे शुचिः"॥ इति।

मनुः (५।१०७)—
"मृत्तोयैः शुध्यते शोध्यं नदी वेगेन शुध्यति । रजसा स्त्री मनोदुष्टा संन्यासेन द्विजोत्तमः"॥ इति।
पराशरः—"रजसा शुध्यते नारी विकलं या न गच्छति"॥ इति । विकलं गर्भधारणम्।
चतुर्विंशन्मते—"रजसा शुध्यते नारी परपुंसाभिगामिनी ।
"तथापि मुनिना प्रोक्तं प्रायश्चित्तं समाचरेत्। कृच्छ्रार्धं ब्राह्मणी कुर्याद्विप्रस्य गमने सति"॥ इति ।
एतदनभ्यासविषयम् । **स्मृत्यंतरे**—
"स्त्रीशुद्धिरर्थशुद्धिश्च यस्य नास्त्यपि कर्मवान्। स एव नरकं याति शिरच्छेदे कुतो भिषक्"॥इति।

मनुः (५।१३२)—
" मक्षिकाविप्रुषः छाया गौरश्वः सूर्यरश्मयः । रजोभूर्वायुरग्निश्च स्पर्शे मेध्यानि सर्वदा ॥
" मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिः " ॥ इति ।

बोधायनः—
" आसनं शयनं यानं नावः पंथास्तृणानि च । चंडालपतितस्पृष्टं मारुतेनैव शुध्यति " ॥ इति । **स्मृत्यर्थसारे** —"प्रतिमा लोहजा अल्पोपहतिदूषिता भस्मनोद्धर्षणात्पंचगव्येन शुध्येत् । प्रतिमा पाषाणजाऽल्पोपहतिदूषिता वल्मीकमृत्तिकाजलैः प्रक्षालिता पंचगव्येन शुध्येत् । प्रतिमा विण्मूत्रश्वादिदूषिता चेत्पंचगव्यैः पंचाहमधिवास्याप्लाव्य गोमूत्रगोमयवल्मीकमृत्तिकादिभिः सम्यक् प्रक्षाल्य पुनः प्रतिष्ठया शुध्येत् । रत्नजानां पंचगव्यैः प्रक्षाल्य पुनः प्रक्षालनं कुर्यात् " इति । **तत्रैव**—"बाल उपनयनादर्वाक् सदा शुद्धः स्त्री च विवाहादर्वाक् मूषिकः शुकपतंगमक्षिकाधान्यकीटा गोहस्त्यश्वच्छागशुका जलस्थाः सर्वे जीवाः स्वभावशुद्धा " इति ।

इति द्रव्यशुद्धिनिरूपणम् । हरिः ओम् । **करकृतमपराधं क्षंतुमर्हंति संतः ।**

इति श्रीवैद्यनाथदीक्षितविरचिते स्मृतिमुक्ताफले द्वितीयः परिच्छेदः ॥

आह्निककाण्डं समाप्तम् । श्रीयवतेश्वरार्पणमस्तु ।

ARCHAEOLOGICAL LIBRARY New Delhi

क्ष—" यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया । यदि शुद्धमशुद्धं वा मम दोषो न विद्यते ॥ शके १७६८ पराभवनामसंवत्सरे दक्षिणायने वर्षाऋतौ भाद्रपदे मासे शुक्लपक्षे चतुर्थ्यां भौमवासरे तद्दिने इदं पुस्तकं **यवतेश्वरस्थशंकरनारायणेन** लिखितं समाप्तम् ॥ ॥ स्वार्थे परार्थे च ॥ ॥ श्रीकालभैरवप्रसन्न ॥ श्री ॥ छ ॥

CENTRAL ARCHAEOLOGICAL LIBRARY,
NEW DELHI

Borrower's Record.

Catalogue No.
Sa3S/Vai/Gha-15014

Author— Vaidyanātha Dixita.

Title— Smṛtimuktāphalam.
pt. 2- Āṅhika kāṇḍa.

Borrower No.	Date of Issue	Date of Return
A. Banerjee	8/5/85	10585

P. T. O.

/

COLLECTION OF HINDU LAW TEXTS
No. 25 (3)

Śrî VAIDYANÂTHA DĪKSHITA'S

SMṚTIMUKTĀPHALAM

PART III

ÂŚAUCHA KÂṆḌAM

EDITED BY

J. R. GHARPURE, B. A., LL. B. (Honours-in-Law),
'incipal Law College, Poona; Fellow of the University of Bombay; Senior Advocate, Federal Court of India.

BOMBAY.

First Edition

Digitized and Uploaded by:
Hari Parshad Das (HPD)
on 06 July 2013.

1939

Printed at the Aryabhushan Press, 915/1 Bhamburda Peth,
Poona City, by Mr. V. H. Barve and
Published by Mr. V. J. Gharpure, B. A., LL. B. at the Office
of the Collection of Hindu Law Texts,
Angrewadi, Girgaum, Back Road, Bombay 4.

धर्मशास्त्रग्रन्थमाला.

[ग्रन्थाङ्कः २५ (३)]

श्री

वैद्यनाथदीक्षितीय

स्मृतिमुक्ताफलम्

(तृतीयः खण्डः)

आशौचकाण्डम्

जगन्नाथ रघुनाथ घारपुरे,

बी. ए., एलएल. बी.,

पुण्यपत्तनस्थव्यवहारशालाया आचार्यः, मुम्बईविश्वविद्यालयसदस्यः

भारतसङ्घन्यायसभासदस्यः

इत्यनेन संशोधितं, मुद्रापितं, प्रकाशितं च ।

प्रथमावृत्तिः

शाकाब्दाः १८६०]   [क्रिस्ताब्दाः १९३९.

पुण्यपत्तने ‘ आर्यभूषण ’ मुद्रणालये ‘ विठ्ठल हरी बर्वे ’ इत्यनेन मुद्रितः,
मोहमय्यां ‘ विश्वनाथ जगन्नाथ घारपुरे, ’ इत्यनेन प्रकाशितश्च ।

श्री

श्री वैद्यनाथदीक्षितीयस्मृतिमुक्ताफलस्थ-आशौचकाण्ड विषयानुक्रमणिका

विषयः	पृष्ठम्
आशौचशब्दार्थः	४७७
स्मृतिचंद्रिकोक्तः	,,
भट्टाचार्योक्तः	,,
विज्ञानेश्वरोक्तः	,,
आशौचद्वैविध्यं	,,
आशौचे सन्ध्योपासनम्	
,, त्याज्यकर्माणि ...	४७८
,, पंचयज्ञादि	४७९
,, अभक्ष्याणि	४८०
पुत्रजन्मनि दानादि	,,
अनेकविधाशौचम्	४८१
श्राद्धादिमध्ये अघसंभवे ...	,,
देवताप्रतिष्ठादिमध्ये ,, ...	४८२
विवाहमध्ये ,, ...	४८३
सद्यःशौचानि	४८४
भृगुपातादिना मृतौ	४८५
आशौचिनां ग्रहणस्नानविधिः ...	,,
जामातृदौहित्रभागिनेयादिमृतौ ...	,,
राष्ट्रक्षोभादिना मृतौ	४८६
युद्धमरणादौ	४८७
बुद्धिपूर्वमरणे	,,
पापकर्मणां मृतौ	४८८
आहिताग्निदुर्मरणे	४८९
दुर्मृतौ प्रायश्चित्तं संस्कारक्रमश्च ...	४९०
गर्भस्रावादिनिमित्ताशौचम् ...	४९१
गर्भनाशत्रैविध्ये आशौचनियमः ...	४९२
सूतिकाशौचम्	४९३
प्रसवाशौचम्	४९४
वर्णविशेषाशौचम्	,,
अनुलोमप्रतिलोमाशौचम् ...	४९५
समानोदकाशौचम्	४९६
सपिण्डाशौचम्	४९७
स्त्रीषु सापिण्ड्यम्	४९८
जननाशौचम्	४९९
मातापित्रोः	५००
सूतिकायाः	५०१
आशौचिनामन्योन्यस्पर्शनिषेधः ...	५०२
दशाहान्तर्गतशिशुमरणाशौचम् ...	५०३
सूतकाद्याशौचेषु तारतम्यम् ...	५०४
मृतजाते	५०५
नाभिच्छेदोत्तरमृतौ	५०६
दशाहोपरितनशिशुमरणे ...	५०७
खननादिसंस्कारभेदेनाशौचभेदः ...	,,
ऊनद्विवर्षे	५०९
खननप्रभृत्याशौचम्	,,
सोदरासोदराणाम्	५१०
अनुपनीतमरणाशौचे	५११
नामकरणादिनिबन्धनशौचक्रमः ...	,,
खननादिसंस्कारव्यवस्था	५१२
लौकिकेष्वनादेयाग्नयः ...	,,
त्रिवत्सरादूर्ध्वम्	५१३
बालमरणे नारायणबलिः ...	५१४
कन्यामरणाशौचम् ...	५१५
ऊनद्विवर्षाया ऊढायाः	५१६
स्वगृहे पुत्रीप्रसवादिनिमित्ताशौचम् ...	,,
पितृगृहे कन्यामृतौ	५१७
उपनीताशौचम्	५१८
कृतसमावर्तनस्याशौचम् ...	५१९

विषयः	पृष्ठम्
अनौरसपुत्रजननाद्याशौचम् ...	५२०
भिन्नपितृकसोदराणाम्	५२१
दत्तविषये	५२२
देशांतरविषये	५२३
देशान्तरम्	”
महानद्यः	”
मातापित्रोः	५२४
विवाहितस्त्रीविषये पित्राद्याशौचम् ...	”
दौहित्रमातामहाचार्यमातृष्वस्रादिविषये	”
मातामहादीनाम्	५२५
पक्षिण्याशौचम्	५२६
पक्षिणीजुषः	५२७
भिन्नमातृस्वस्रादिविषये	५२८
उपाध्यायाचार्यादीनाम्	५२९
अनेकाशौचसन्निपाते	५३०
स्रावाशौचमृताशौचसंपाते ...	५३१
मातापित्रोर्मरणे जननाशौचे ...	५३२
अज्ञातिदाहाशौचम्	५३३
असन्निहितदेशभवसपिण्डमरणाशौचम्	५३४
अतिक्रान्ताशौचम्	”
भर्तृमरणे	५३५
मातापित्रोः	५३६
गौणमातृमरणे	”
प्रोषितभ्रातृमरणे	”
पुनःसंस्कारे विशेषः	”
अस्थ्यभावे	५३७
आहिताग्नेः	५३८
अनग्निमतः	५३९
रात्रौ जन्ममृतिसंभवे दिननिर्णयः ...	”
संपर्काशौचम्	५४०
अन्तःशवे ग्रामे	५४१
अनुगमनाशौचम्	”
पुनःस्नानम्	५४२
रोदने स्नानम्	५४३
असपिंडस्वजातीयप्रेतानिर्हरणे ...	५४४
समानोदकप्रेतवहनादौ ...	५४४,५४५
अर्थलोभेन सवर्णशववहनादौ ...	५४५
अनाथब्राह्मणवहनादौ	५४६
बंधुमित्ररहितब्राह्मणवहनस्पर्शनदहनादौ	५४७
अबुद्धिपूर्वविषये	”
अभिवादनस्य निषेधः	”
शावाशौचिनां नियमविशेषः ...	”

स्मृतिमुक्ताफलम् ।

आशौचकाण्डम् ३

श्रीगणेशाय नमः । अथाशौचप्रकरणम् । तत्र शंखः—

"दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म च । प्रेतकर्मक्रिया यज्ञमाशौचे विनिवर्त्तयेत्" ॥ इति । आशौचशब्दार्थः स्मृतिचंद्रिकायामभिहितः—" सपिंडादिजनने मरणे वा सति यदप्रायत्यं दानादिकर्म स्वयोग्यतापादकं पापविशेषात्मकं वा तदाशौचशब्देन बोध्यते " इति । तथा भट्टाचार्यैः—" पापक्षयो हि शुद्धिः कर्मयोग्यत्वमेव वा " इति । शुद्धिपदार्थं ब्रुवद्भिस्तद्विपरीतस्य जननमरणनिमित्तपापविशेषस्य दानादिधर्मानुष्ठानायोग्यत्वस्य वा मतभेदेनाशौचशब्दाभिधेयत्वं ज्ञापितम् । विज्ञानेश्वरोऽपि (प्रा. पृ. १६१ पं. ५–७)—"आशौचशब्देन कालः स्नानापनोद्यः पिंडोदकदानविधेरध्ययनादिपर्युदासस्य निमित्तभूतः पुरुषगतः कश्चनातिशयः प्रतिपाद्यते " इति । कालापनोद्यमंतःशवनिमित्तग्रामाद्याशौचं स्नानापनोद्यं, ज्ञायमानसंबंधबंधुमरणाद्यघं कालस्नानाभ्यामपनोद्यं सपिंडादिजननमरणाशौचम् इत्यर्थः । संग्रहेऽपि—

" निमित्तं पिण्डदानादेः पुरुषस्थमशुद्धिकृत् । कालस्नानापनोद्यं यत् तदाशौचमितीर्यते " ॥ इति ।

आशौचं द्विविधं कर्मानधिकारलक्षणं अस्पृश्यत्वलक्षणं च ।

"अशौचे वर्जयेत्कर्म नित्यनैमित्तिकादिकम् । आशौचिभिस्तथा स्पर्शे स्पृष्ट्वा स्नानेन शुध्यति "॥ इति स्मृतेः ।

आशौचे सन्ध्योपासनम् ।

तथा च कर्माधिकारपरिपन्थित्वादाशौचस्य संध्याद्युपासनस्यापि निवृत्तिप्राप्तावपवादमाह पराशरः (३।३)—" उपासने च विप्राणामंगशुद्धिस्तु जायते ।

" ब्रह्मचारी गृहे येषां हूयते च हुताशनः । संपर्कं चेन्न कुर्वंति न तेषां सूतकं भवेत्" ॥ (३।२५) इति । उपासनं संध्यावंदनं तस्मिन्प्रसक्ते तात्कालिकशुद्धिर्भवति । विप्रग्रहणं क्षत्रियादीनामुपलक्षणम् । ब्रह्मचारी उपकुर्वाणो नैष्ठिकश्च । येषां गृहे अग्निहोत्रमनुष्ठीयते तेषामग्निहोत्रानुष्ठानकाले नास्त्याशौचं यदि ते आशौचिभिः संसर्गं न कुर्युरित्यर्थः ।

अत्र मरीचिः—" सूतके कर्मणां त्यागः संध्यादीनां विधीयते " ॥

कात्यायनश्च—"सूतके प्रेतके च संध्योपासनादिनित्यकर्माणि स्वाध्यायदानप्रतिग्रहांश्च वर्जयेत्"इति॥

स्मृत्यंतरेऽपि—

" राष्ट्रक्षोभे नृपाक्षिते रोगार्त्ते शावसूतके । संध्यावंदनविच्छित्तिर्न दोषाय कदाचन "॥ इति।

विष्णुपुराणेऽपि—

" सर्वकालमुपस्थानं संध्ययोः पार्थिवेष्यते । अन्यत्र सूतकाशौचविभ्रमातुरभीतितः" ॥ इति ।

जाबालिः—

" संध्या पंचमहायज्ञान् नैत्यिकं स्मृतिकर्म च । तन्मध्ये हापयेदेतमाशौचांते पुनः क्रिया "॥ इति ।

---

१ क्षगक-मशुद्धिः पुनरेवस ।

नैत्यिकं नित्यश्राद्धम् । स्मृतिकर्म स्मृत्युक्तकर्म देवतार्चनादिकम् । तन्मध्ये आशौचमध्ये । हापयेत् त्यजेदित्यर्थः । आशौचे संध्याकर्मनिषेधप्रतिपादकानि **मरीच्यादि**वचनानि वाचनिकमंत्रप्रयोगनिषेधाभिप्रायाणि । यदाह **पुलस्त्यः**—

" संध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत् । न त्यजेत्सूतके वाऽपि त्यजन्गच्छेदधो द्विजः ॥
" सूतके मृतके चैव संध्याकर्म समाचरेत् । मनसोच्चारयेन्मंत्रान्प्राणायाममृते द्विजः " ॥ इति । प्राणायामव्यतिरिक्तमंत्रान्मनसोच्चारयेत् । प्राणायाममंत्रांस्तु मनसाऽपि नोच्चारयेत् । अमंत्रकमेव प्राणायामं कुर्यादिति यावत् ।

" सूतके मृतके कुर्यात्प्राणायाममममंत्रकम् । मनसोच्चारयेन्मंत्रान्मार्जनादिषु कर्मसु " ॥ इति **स्मरणात्** । मनसोच्चारयेन्मंत्रानित्येतदंजलिप्रक्षेपव्यतिरिक्तविषयम् । यथाह **पैठीनसिः**— " सूतके साविव्यांजलिं प्रक्षिप्य प्रदक्षिणीकृत्य सूर्यं ध्यायन्नमस्कुर्यात् " इति । संध्याविधावुक्तसावित्रीमंत्रस्येह पुनर्वचनं मनसोच्चारणनिवृत्त्यर्थम् । तेन सावित्रीमंत्रस्योच्चारणं वाचा कर्तव्यमिति **चंद्रिकायाम्** (पृ. १४० पं. १–१२) । **व्यासोऽपि**—

" प्रक्षिपेत्सूतके त्वर्घ्यं गायत्रीं तु समुच्चरन् । दत्वा प्रदक्षिणं कुर्यात्सूर्यं ध्यायेत् द्विजोत्तमः ॥
" दशकृत्वस्तु गायत्रीं मनसैवाशुचिः स्मरेत् " ॥ इति ।

आश्वलायनः—" आपन्नश्चाशुचिः काले तिष्ठन्नपि जपेद् दश " इति ।

आशौचे त्याज्यकर्माणि । त्याज्यानि कर्माण्याह **विष्णुरपि** (५२।५–८)—" आशौचे होमदानप्रतिग्रहस्वाध्याया निवर्तंते । नाशौचे कस्यचिदन्नमश्नीयात् । ब्राह्मणादीनामाशौचे यस्तदेदन्नमश्नाति तस्य तावदाशौचं यावत्तेषामाशौचव्यपगमः । आशौचव्यपगमे प्रायश्चित्तं कुर्यात्" इति । प्रायश्चित्तं चांद्रायणम् । तच्च भोजनप्रकरणेऽभिहितम् ।

होमश्चात्र वैश्वदेवोऽभिप्रेतः । " विप्रो दशाहमासीत वैश्वदेवविवर्जितः " इति **संवर्तेन** विशेषतोऽभिधानात् । वैश्वदेवाभिप्रायेण **मार्कंडेयोऽपि**—" दशाहं ब्राह्मणस्तिष्ठेद्दानहोमादिवर्जितः " इति ।

मनुरपि—

" उभयत्र दशाहानि कुलस्यान्नं न भुज्यते । दानं प्रतिग्रहो होमः स्वाध्यायश्च निवर्तते " ॥

स्मृत्यंतरे च—

" अशौचे तु दशाहान्तं न कुर्याद्देवतार्चनम् । न कुर्यात्पितृकार्याणि दानं होमं जपं तथा" ॥ इति । जपमिति सामान्योक्तेः सर्वमंत्रजपनिषेधः । **आपस्तंबोऽपि** (१।११।३१।१४)—" दैवताभिधानं चाप्रयतः " इति । ध्याने तु न दोषः । न ह्यस्ति मनस उपघातः । 'अंतरेण मलवद्वासिनीं सूतिकां शवस्पृष्टिं च' इति **श्रुतेः** । न च होम इति सामान्योक्तिबलादग्निहोत्रौपासनादिकमपि निवर्तनीयमिति वाच्यम् । यत आह **याज्ञवल्क्यः** (प्रा. १७) " वैतानौपासनाः कार्याः क्रियाश्च श्रुतिचोदिताः " इति । वैताना गार्हपत्याद्यग्निसाध्या " यावज्जीवमग्निहोत्रं जुहोति । यावज्जीवं दर्शपूर्णमासाभ्यां यजेत " इत्यादि**श्रुति**चोदिताः । तथा एकाग्निसाध्या औपासनाः कार्याः । अग्निहोत्रादिकं स्वयं कुर्यात् । औपासनहोममसगोत्रेण कारयेदित्यर्थः । तथा च **गोभिलः**—

"अग्निहोत्रे तु होमार्थं शुद्धिस्तात्कालिकी स्मृता । पंचयज्ञान्न कुर्वीत अशुद्धः पुनरेव सः " ॥

वैय्याघ्रपादः—

"स्मार्त्तकर्मपरित्यागो राहोरन्यत्रसूतके । श्रौतकर्मणि तत्कालस्नातः शुद्धिमवाप्नुयात् "॥ इति ।

शंखः—" अग्निहोत्रार्थं स्नानोपस्पर्शनान्तं तत्कालं शौचम् " । इति । **कण्वः**—

"अग्निहोत्रहवं कुर्यादन्याभावे स्वयं द्विजः । कुर्यात्स्नात्वाऽऽर्द्रवासास्तु तस्मात्कालादृतेऽशुचिः"॥ इति ।

मनुः—

"दर्शं च पौर्णमासं च कर्म वैतानिकं च यत् । सूतकेऽपि त्यजन्मोहात्प्रायश्चित्तीयते हि सः "॥ इति । अत्र **चंद्रिकायाम्**—" श्रौतानामप्यग्निहोत्रादीनां प्रथमारंभात्प्रागाशौचे त्याग एव । प्रतिप्रसवविधीनां प्रथमारंभोत्तरकालानुष्ठेयाग्निहोत्रादिविषयत्वात् " इति । दर्शपूर्णमासयोरनुष्ठानप्रतिपादनमघागमात्प्रागारब्धविषयं तथैव शिष्टाचारादिति केचित् । **जातूकर्णिः**—

" सूतके तु समुत्पन्ने स्मार्त्तं कर्म कथं भवेत् । पिंडयज्ञं चरुं होममसगोत्रेण कारयेत् " ॥ इति । पिंडयज्ञः पिंडपितृयज्ञः । चरुः पार्वणस्थालीपाकः । होमः औपासनहोमः । एतान् अघागमात्प्राग्घोमार्थं संकल्पितैर्द्रव्यैः तदभावे अघरहितश्रोत्रियगृहादाहृतैराशौचरहितेन कारयेदित्यर्थः । **बृहस्पतिरपि**—

" सूतके मृतके चैव अशक्तौ श्राद्धभोजने । प्रवासादिनिमित्ते तु हावयेन्न तु हापयेत् " ॥ इति । न हापयेत् न त्यजेदित्यर्थः । **जाबालिः**—

"वैतानाग्नौ स्वयं कुर्यात्कर्मत्यागो न विद्यते । शालाग्नौ केवलो होमः कार्य एवान्यगोत्रजैः" ॥ इति ।

स्मृतिरत्ने—

" सूतके होमवत्कर्म तदन्येनैव कारयेत् । अग्निहोत्रं स्वयं कुर्यात्स्नात्वैव नियमोदितम् "॥ इति । अनेनैवाभिप्रायेण **पैठीनसिरपि**—" नित्यानि तु निवर्तेरन्वैतानवर्जं शालाग्नौ चैके " इति ।

संवर्त्तः—

"पंचयज्ञविधानं तु न कुर्यान्मृतिजन्मनोः । हावयेदन्यगोत्रेण नित्यहोममतंद्रितः " ॥ इति ।

स्मृतिरत्ने—

" नित्यं नैमित्तिकं कुर्यात्काम्यकर्म न किंचन । आधानं पुनराधानं पशुः सौत्रामणी तथा ॥
" चातुर्मास्यानि सोमश्च तथैवाग्रयणक्रिया । अकाम्यत्वेऽप्यनेनैषां सूतकादावनुष्ठितिः " ॥

संग्रहे—

" शावे च सूतकेऽघाख्ये कर्मणां त्याग इष्यते । द्रव्याण्यपि प्रदुष्यन्ति स्वाध्यायश्च निवर्तते ॥
" अस्पृष्टानां च भाण्डानां दशाहे शुद्धिरिष्यते । द्रव्याणां चापि संस्पर्शो विना मांसं समुत्सृजेत् ॥
" साध्यं कर्माग्निहोत्रं च प्रेतकार्याणि चाप्लुतः । कुर्यादन्येन होमं तु कारयेन्नान्यदाचरेत् " ॥ इति ।

स्मृत्यर्थसारे—"जाताशौचे मृताशौचे त्रेताग्निसाध्याग्निहोत्रदर्शपूर्णमासाद्या नित्या नैमित्तिकाः क्रियाः कार्याः । औपासनाग्निसाध्यास्तु सायंप्रातर्होमपार्वणस्थालीपाकाद्या नित्यनैमित्तिका हावनीयाः सर्वथा न त्यक्तव्याः । यजमानः स्नात्वाऽऽचम्य उद्देशत्यागं कुर्यात्सर्वं काम्यं वर्ज्यं दानप्रतिग्रहपंचमहायज्ञनित्यश्राद्धस्वाध्यायादीनां स्मार्त्तानां त्याग एव नित्यस्नानशौचाचमनभोजननियमास्पृश्यस्पर्शस्नानं च कुर्यादेव " । तथा च **कण्वः**—

" शौचमाचमनं स्नानं नियमं भोजनादिषु । अस्पृश्यस्पर्शनस्नानं कुर्यादाशौचवान् द्विजः " ॥ सूतकान्नभोजने स्वकुल्यानां न दोषः । अन्येषां दातृभोक्त्रोरन्यतरेण ज्ञाते दोष उभाभ्यामपरिज्ञाने न दोषः । तथा च **षट्त्रिंशन्मते**—

---

१ **क**–न्मोहात्; **खग**–त्यजेन्मोहात् ।

" उभाभ्यामपरिज्ञातमाशौचं नैव दोषकृत् । एकेनापि परिज्ञाते भोक्तुर्दोषमुपावहेत् " ॥ इति ।
"द्रव्याणि स्वामिसंबन्धात्तद्वे त्वशुचीनि वै । स्वामिशुध्यैव शुध्यंति वारिणा प्रोक्षितान्यपि"॥ इति **स्मृत्या** स्वामिसंबंधद्वारा दुष्टत्वेन सर्वद्रव्याणां प्रतिग्रहनिषेधे प्राप्ते केषुचिद्द्रव्येष्वनुग्रहमाह **मरीचिः**—
" लवणे मधुमांसे च पुष्पमूलफलेषु च । शाककाष्ठतृणेष्वप्सु दधिसर्पिःपयःसु च ॥
" तिलौषधाजिने चैव पक्वापक्वे स्वयं गृहः । पण्येषु चैव सर्वेषु नाशौचं मृतसूतके " ॥ इति ।
पक्वं भक्ष्यजातमपूपादि । अपक्वं तंडुलादि । पक्वान्ने दोषस्मरणात् । तथा **चांगिराः**—
" अन्नसत्रप्रवृत्तानामाममन्नमगर्हितम् । भुक्त्वा पक्वान्नमेतेषां त्रिरात्रे तु पयः पिबेत् ॥
" नाद्याच्छूद्रस्य पक्वान्नं विद्वानाशौचिनोऽपि च । आददीताममेवास्मादवृत्तावेकरात्रिकम् " ॥ इति ।
अन्नसत्ररतादेवामं ग्राह्यम् । आपदि तु अन्यस्मादप्याशौचिनः दिनमात्रपर्याप्ततंडुलादि ग्राह्यम् । पक्वान्नं तु सर्वथा न ग्राह्यमित्यर्थः । अपक्वतंडुलादिवत् पक्वापूपाद्यपि अन्नसत्ररतादेव ग्राह्यमित्युक्तं **संग्रहे**—
" भक्ष्यजातं तथा पक्वमपक्वं तंडुलादिकम् । अन्नसत्ररतस्यैव ग्राह्यमित्यंगिरा मुनिः " ॥ इति ।
तत्रैव—
" दधि क्षीरं घृतं शाकं पटु[1] पुष्पं तिलौषधम् । काष्ठं मूलं फलं मांसं मधु कूपाम्बु चाजिनम् ।
" पण्यान्यघेऽपि गृह्णीयात्स्वयं तु स्वाम्यनुज्ञया " ॥ पटु लवणम् । **अंगिराः**—
" यत्तु क्षेत्रगतं धान्यं कूपवापीषु यज्जलम् । अभोज्यादपि तद्भोज्यं यच्च गोष्ठगतं पयः ॥
" आमं मांसं मधु घृतं दधि क्षीरमथौषधम् । गुडं तक्रं[2] तथोदश्विद्भोज्यान्येतानि नित्यशः ॥
" तदहर्मात्रवृत्त्यर्थमामं ग्राह्यं सदापदि । आमं पूयति संस्कारैः सम्यक् तेभ्यः प्रतीप्सितम् ॥
" तस्मादामं ग्रहीतव्यमन्नं सूतमृतांतरे " । इति । **दक्षः** (६।१९)—
" स्वस्थकाले त्विदं सर्वं सूतकं[3] समुदाहृतम् । आपद्गतस्य सर्वस्य सूतकेऽपि न सूतकम् "॥
याज्ञवल्क्यः (प्र. ४१)—
" आपद्गतः प्रगृह्णन्यो भुंजानो वा यतस्ततः । न लिप्येतैनसा विप्रो ज्वलनार्कसमो हि सः " ॥
विज्ञानेश्वरीये—
" सूतके मृतके चापि दुर्भिक्षे [4]भिक्षितं द्विजैः । उपप्लवे च देशस्य तेषामल्पेन निष्कृतिः " ॥ इति ।
चंद्रिकायाम्—
"दाने विशिष्ट आर्त्तस्य व्याधिना शुचितोच्यते । अनिच्छतोऽपि यो वस्तु दातुं हेमादि[5] वाञ्छति"॥ इति ।
ब्राह्मे—"अकालमृत्योः शांत्यर्थं महादाने च रोगिणाम् "॥ इति । अशौचं न विद्यत इत्यनुवर्त्तते ।
संग्रहे—" न देयं न प्रतिग्राह्यमघे देयं सदापदि " इति ।

पुत्रजन्मनि दानम् । पुत्रजन्मनि दानमाह **पराशरः** (१२।२२)—
" खलयज्ञे विवाहे च संक्रांतौ ग्रहणे मृतौ । पुत्रजाते व्यतीपाते दत्तं भवति चाक्षयम् ।
" शर्वर्यां दानमस्तीति नान्यत्र तु विधीयते " ॥ **वृद्धमनुरपि**—
"जाते कुमारे तदहः कामं कुर्यात्प्रतिग्रहम् । हिरण्यधान्यगोवासतिलान्नगुडसर्पिषाम् "॥ इति ।
गौतमोऽपि—" प्राङ्नाभिवर्धनात्पुण्यं तदहरित्येके " इति ।

---

१ क्ष-पुट । २ क्ष-शुक्रं । ३ क्ष-भूतकं; अशौचं । ४ ख-भिक्षितं । ५ क्ष-होमादि ।

आशौचदीपिकायाम्–
" दाने सुतोदये शुद्धिर्दिनाद्यौ पितृसंनिधौ । अहोरात्रं तु दूरस्थे पितर्यल्पं गते त्वहः "॥ इति ।
एतच्च **जातकर्मप्रकरणे** सविस्तरं प्रतिपादितम् (पृ. ७९–८०) ।

अनेकविधाशौचम् । अनेकविधमाशौचमाह **दक्षः** (६।२)—
" सद्यःशौचं तथैकाहस्त्र्यहश्च चतुरस्तथा । षड्दशद्वादशाहाश्च पक्षो मासस्तथैव च ॥
" मरणांतं तथा चान्यत्पक्षाश्च **दश** सूतके " ॥ इति । दशपक्षा इत्युपलक्षणम् ।
" गर्भस्रावे मासतुल्या निशाः शुद्धेस्तु कारणम् " इत्यादिना पंचाहादिपक्षाणामपि **स्मरणात्** ।
सद्यःशौचम् । तत्र सद्यःशौचमाह **याज्ञवल्क्यः** (प्रा. २८–२९)—
" ऋत्विजां दीक्षितानां च याज्ञिकं कर्म कुर्वताम् । सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदां तथा ॥
" दाने विवाहे यज्ञे च संग्रामे देशविप्लवे । आपद्यपि च कष्टायां सद्यःशौचं विधीयते "॥ इति ।
सद्यःशौचं नाम स्नानांतमघम् ।
"सद्यःशौचे तु तावत्स्यादाशौचं संस्थितस्य तु । यावत्स्नानं न कुर्वंति सचैलं बांधवा बहिः" ॥
इत्यंगिरःस्मरणात् । अत्र ऋत्विक्शब्दो **मनुना** विवृतः (२।१४३)—
"अग्न्याधेयं पाकयज्ञमग्निष्टोमादिकान्मखान् । यः करोति वृतो यस्य स तस्यर्त्विगिहोच्यते " ॥
वृतो वरणेन संस्कृत इत्यर्थः । स च वरणजन्यसंस्कारोऽग्न्याधेयादौ प्रवरणप्रभृतिप्रयोगपरिसमाप्ति-पर्यंतमनुवर्त्तत इति तदनुवृत्तिपर्यंतमृत्विजां दीर्घकालाशौचमध्येऽपि " सद्यःशौचं विधीयते " इति संबंधः । दीक्षणीयादिना संस्कृता दीक्षिताः । तेषां याज्ञिकं यज्ञे भवं कर्म कुर्वतां सद्यःशौचम् । अत्र **विज्ञानेश्वरः** (पृ. १८५ पं. १९)–" दीक्षितस्य 'वैतानोपासनाः कार्या' इत्यनेन सिद्धेऽपि पुनर्वचनं सद्यःस्नानविशुध्यर्थम् " इति । सत्रिव्रतिदातृशब्दानामर्थाः **संग्रहकारेण** दर्शिताः—
" सत्री गृहीतनियमो यज्ञे दाने च दीक्षितः । चांद्रायणाद्यनुष्ठाता व्रती तु ब्रह्मचार्यपि ॥
"श्राद्धे गृहीतसंकल्पो व्रती भोक्ता च कीर्तितः । दाता नित्यान्नदाता च वानप्रस्थश्च कीर्तितः"॥ इति ।
दाने सततान्नदाने गृहीतनियमः कृतसंकल्पः । यज्ञे दीक्षितः सत्रीत्यनेनोक्तः । ब्रह्मविद्यतिः । दाने पूर्वसंकल्पितद्रव्यदाने विवाहे कृतकौतुकबंधने सद्यःशौचमित्यर्थः । **अंगिराः**—
" जनने मरणे चैव त्रिष्वाशौचं न विद्यते । यज्ञे विवाहकाले च देवयागे तथैव च ॥
" ऋत्विजां यजमानानां परिकर्मादि कुर्वताम् " । यज्ञः सोमयागादिर्वैदिकः । देवयागो मातृकादि-देवत्यो लौकिको यागः । **बृहस्पतिः**—
" नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणाम् । नाशौचं सूतके प्रोक्तं शावे वाऽपि तथैव च"॥इति ।
चंद्रिकायाम् " यद्यपि नाशौचमिति सामान्यशब्दात्सद्यःशौचस्याप्यपवादः प्रतिभाति तथापि स्मृत्यंतराविरोधार्थं तद्व्यतिरिक्तस्याशौचस्यापवाद इत्यवगंतव्यम् " ॥ इति ।
पैठीनसिः—
" विवाहकाले यज्ञेषु यात्रायां तीर्थकर्मणि । न तत्र सूतकं तद्वत्कर्म यज्ञादि कारयेत् " ॥
श्राद्धादिमध्ये अघसंभवे । चंद्रिकायाम्—
" अथ देवप्रतिष्ठायां गणयागादिकर्मणि । श्राद्धादौ पितृयज्ञे च कन्यादाने च नो भवेत् ॥
" विवाहे कन्यकायाश्च लाजहोमादिकर्मणि " ॥ इति । **विज्ञानेश्वरीये**—
" नित्यमन्नप्रदस्यापि कृच्छ्रचांद्रायणादिषु । निर्वृत्ते कृच्छ्रहोमादौ ब्राह्मणादिषु भोजने ॥

---
१ खग-दुर्ग

" गृहीतनियमस्यापि न स्यादन्यस्य कस्यचित् " ॥ इति । **षडशीतौ**—

" सूतकात्प्राक्समारब्धमनेकाहं तु यद्व्रतम् । कायिकं कर्म कुर्वीत न तु दानार्चनं व्रतम् ॥

" सूतकानंतरे त्वाह्नि तत्कर्तव्यमतंद्रितैः " ॥ इति । **विष्णुः** (२२।५२)—" न देवप्रतिष्ठोत्सवविवाहेषु न देशविभ्रमे नापद्यपि च कष्टायामाशौचं न व्रतिनां व्रते न सत्रिणां सत्रे " इति । **दक्षः** (६।५)—

"राजर्त्विग्दीक्षितानां च बाले देशांतरे तथा । यतीनां सत्रिणां चैव सद्यःशौचं विधीयते" ॥ इति । **चंद्रिकायाम्**—

" नरेंद्रसत्रिव्रतिनां विवाहोपप्लवादिषु । सद्यःशौचं समाख्यातं कांतारापदि संपति " ॥ **संग्रहेऽपि**—

" कृच्छ्रदेवोत्सवश्राद्धदानहोमतपोध्वरे । प्रारब्धे तत्प्रवृत्तानां सद्यःशौचमघागमे " ॥ इति । अत्र स्नानं शावविषयम् । न तु प्रसवविषयम् । तत्र पितृव्यतिरिक्तानां स्नानस्याविधानात् । अत्र प्रारंभशब्दार्थः **स्मृत्यर्थसारे** दर्शितः—

" आरंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः । नांदीमुखं विवाहादौ श्राद्धे पाकपरिक्रिया ॥

"निमंत्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्मणि । पाकारंभात्परं कर्तॄन् दातॄन्भोक्तॄंश्च न स्पृशेत्" ॥ इति ।

'श्राद्धे पाकपरिक्रिया ' इति एतत्कृतपकालसंकल्पात्परमारब्धपाकक्रियाविषयम् । तत्पूर्वं सिद्धपाकविषयेऽपि **यमः**—

"पाकोपकल्पनादूर्ध्वं सूतके मृतकेऽपि वा । कारयेच्छ्राद्धमन्येन पक्वान्नं परिवेषयेत्" ॥ इति । कारयेत्कुर्यादित्यर्थः । अत्र **केचिदाहुः**—"संकल्पात्पूर्वमघागमे प्राक्कृप्तार्थैः संकल्पविधिना श्राद्धमन्यैः कारयेत् " इति एतत्स्मृतिचंद्रिकादिविरोधादुपेक्ष्यम् । **यत्तु**—

" ऋत्विगादिर्यदा कुर्याद्धोमं श्राद्धक्रियां क्वचित् । उपवीत्येव कुर्वीत कर्तुः स्यादपसव्यकम् " ॥ इति तत्पिंडपितृयज्ञहोमविषयं स्त्रीबालादिकर्तृकश्राद्धक्रियाविषयं च । " अध्वर्युरुपवीती दक्षिणं जान्वाच्य मेक्षण उपस्तीर्य " इत्यापस्तंबादिस्मरणात् । अत आशौचेऽन्येन श्राद्धं न कारयितव्यम् । **ब्राह्मे**—

" तावद्गृहीतदीक्षस्य त्रैविद्यस्य महामखे । स्नानं त्ववभृथो यावत्तावत्तस्य न विद्यते ॥

" गृहीतमधुपर्कस्य यजमानस्य चर्त्विजाम् । पश्चात्पतितमाशौचं न भवेदिति निश्चयः ॥

" कुर्वतां याज्ञियं कर्म याजकानां तथैव च । निमंत्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्मणि ॥

" निमंत्रितस्य विप्रस्य स्वाध्यायनिरतस्य च । देहे पितृषु तिष्ठत्सु नाशौचं विद्यते क्वचित् " ॥ इति ।

अत्र **चंद्रिकायाम्**—" दीक्षितस्य यज्ञसंकल्पानंतरं ऋत्विजां मधुपर्कग्रहणानंतरमागतमाशौचं न विद्यते । संभृतसंभारस्य तु पूर्वक्षणेऽपि नाशौचम् । ' यज्ञार्थं बहुसंभारसंभृतस्यापि नो भवेत् ' इति **स्मृतेः** । अयमर्थः । यज्ञार्थं संभृतसंभारस्य कल्पितसमस्तयज्ञसाधनपदार्थस्य अकृतयागसंकल्पस्यापि आशौचापगमादूर्ध्वं वसंतांतर्गतकर्मकालासंभवे तस्मिन्वत्सरे करिष्यमाणयज्ञातिक्रमविषये यज्ञसंकल्पात्पूर्वक्षणे शुद्धिर्भवति " ॥ इति । यज्ञग्रहणं प्रतिष्ठादेरुपलक्षणार्थम् । अत एव **विष्णुः** (२२।५२)—" देवताप्रतिष्ठाविवाहयोः पुनः संभृतयोः " इति । एतदुक्तं भवति । यावति काले संभृतबहुसंभारधारणं कर्तुं शक्यते तावत्कालमध्ये प्रतिष्ठाविवाहांगभूतकालांतरं यत्र न लभ्यते तद्विषये तत्संकल्पात्प्रागपि कर्तुराशौचं न भवति " इति ।

स्मृत्यंतरे–"यज्ञे संभृतसंभारे विवाहे श्राद्धकर्मणि" ॥ इति । अत्र **चंद्रिकायाम्**— संभृतसंभार इति सर्वत्र संबध्यते । इदमपि **विष्णु**वचनसमानविषयम् । 'श्राद्धे संभृतसंभार' इत्येतत्तु पक्वद्रव्याभिप्रायम् । पक्वद्रव्योपकल्पनसंकल्पनसंकल्पयोर्मध्ये सूतके मृतके वा समुत्पन्ने अनंतरोक्तसद्यःशौचविधिबलात्तस्मिन्नेव काले श्राद्धं कर्तव्यम् । आमद्रव्योपकल्पनसंकल्पयोर्मध्ये सूतके मृतके वा जाते अमावास्यायामाशौचापगमाद्नन्तरं वा कर्तव्यम् ।

" श्राद्धविघ्ने समुत्पन्ने त्वन्तरा मृतसूतके । अमायां तु प्रकुर्वीत शुद्धाविके मनीषिणः ॥
" देये पितॄणां श्राद्धे तु अंतरा मृतसूतके । आशौचानंतरं कार्यं तन्मासीन्दुक्षयेऽपि वा ॥
" कार्ये प्रत्याब्दिके श्राद्धे अंतरा मृतसूतके । आशौचानंतरं कार्यमिति वासिष्ठभाषितम् "॥

इति **गोभिलवसिष्ठादि**स्मरणात् । यत्तु **स्मृत्यंतरे**—

" वर्षश्राद्धे तु संप्राप्ते पित्रोराशौचसंभवे । तदानीमशुचिर्न स्यात्कुर्याच्छ्राद्धं मृतेऽहनि " ॥ इति ।

यदपि—

"मासिकान्याब्दिकं पित्रोरशुद्धोऽप्यौरसः सुतः । कुर्यादेव तिथिप्राप्तमिति **शातातपो**ऽब्रवीत्" ॥ इति तत्संकल्पितश्राद्धविषयम् । श्राद्धदिने पाके निर्वृत्ते कुतपकाले 'अद्य पार्वणविधानेन श्राद्धं करिष्ये' इत्यारंभात्परमागते आशौचे कर्ता कुर्यादेवेत्यर्थः । तथा **चंद्रिकायाम्**—

" अद्य श्राद्धं करिष्य इति संकल्पात् परं तत्पूर्वक्षणे चारब्धे पाके कर्तुः शुद्धिः । अद्य श्राद्धं तत्र भवता भोक्तव्यम् इति निमंत्रिते ओं तथेति प्रतिश्रुते निमंत्रितस्य निमंत्रणादूर्ध्वमाशौचे प्राप्ते तस्य शुद्धिः । निमंत्रणात्प्राग्विप्रस्याशौचे प्राप्ते पूर्वदिने निश्चितमपि परित्यज्य विप्रांतरमामंत्र्य श्राद्धं कर्तव्यमिति सद्यःशौचविधानाद्भोजनात् पूर्वं स्नात्वैव भुंजीत कर्तापि स्नात्वैव कर्म कुर्यात् "।

तथा **विज्ञानेश्वरीये**—

" यज्ञे संभृतसंभारे विवाहे श्राद्धकर्मणि । तथा चौलादिसंस्कारे सद्यःशौचं विधीयते " ॥ इति ।

स्मृत्यंतरे च—

" आशौचं कर्ममध्ये तु शावं सूतकमेव वा । आपतेद्यदि सर्वेषां सद्यःशौचं विधीयते ॥
मातापित्रोश्च मरणे पुत्रस्य मरणे तथा " ॥ इति ।

एवं च श्राद्धे पाकसंकल्पाभ्यां पूर्वमघागमे आशौचानंतरदिने तदसंभवे अमायां वा कुर्यात् । पाकानंतरं संकल्पात् पूर्वपरं वा अघागमे तस्मिन्नेव काले कुर्यात् । द्वितीयवरणानंतरं भोक्तुराशौचं नास्ति । कुतपकालवरणात्पूर्वमघागमे अन्यं वरयेत् । ततः परमघागमे तमेव भोजयेत् । **यत्तु**—

" भोजनार्धे तु संभुक्ते विप्रैर्दातुरघागमः । यदा कश्चित्तदोच्छिष्टशेषं त्यक्त्वा समाहितः ॥
" आचम्य परकीयेन जलेन शुचयो द्विजाः " ॥ इति । एतत् श्राद्धव्यतिरिक्तविषयम् । यागमध्ये अघागमे अवभृथांतरमनुष्ठेयम् ।

विवाहमध्ये आशौचसंभवे । विवाहे नांदीमुखात्परमघागमे शेषहोमान्तस्य कर्मणा विवाहशब्दवाच्यत्वेन कर्मैक्याच्छेषहोमांतं साङ्गं कर्मानुष्ठेयम् । तथा च **दक्षः** (६–१८)—

" यज्ञकाले विवाहेषु देवयागे च निष्कृतौ । हूयमाने तथैवाग्नौ नाशौचं न च सूतकम् " ॥ इति ।

विवाहेष्विति बहुवचनं शेषहोमांतकर्माभिप्रायम् । **ब्राह्मे**—

" विवाहकाले कन्याया लाजहोमादिकर्मणि । प्रायश्चित्तपरस्यापि स्वाध्यायनिरतस्य च " ॥

सद्यःशौचमिति प्रकृतम्। लाजहोमादीत्यादिशब्देन शेषहोमांतं कर्मजातमुच्यते। स्वाध्यायोऽत्र वेदपारायणम्। तथा च वेदपारायणं प्रकृत्य **बोधायनः**—" प्रणवव्याहृतिपूर्वकं वेदादिमारभ्य सततमधीयीत नांतरा विरमेत्। व्याहरेद्वा नास्यांतरा जननमरणाशौचम् " ॥ इति। विवाहमध्ये पित्रोर्दम्पत्योर्मरणे **स्मृत्यंतरे**—

" उद्वाहांकुर आरब्धे मातापित्रोर्मृतिर्यदि। तत्काले सकलं कृत्वा शेषहोमं समाचरेत् ॥

" विवाहशेषमध्ये तु दंपत्योर्मरणं यदि। कर्मशेषं ततः कृत्वा पश्चाद्दहनमाचरेत् "॥ इति।

शेषहोमांतं कर्म तदानीमेव परिसमाप्य दहनं कुर्यादित्यर्थः।

दीक्षितस्य दीक्षामध्ये मातापितृमृतौ।

दीक्षितस्य दीक्षामध्ये मातापितृमृतिविषये संस्कारमात्रं कृत्वा यज्ञं समापयेदित्याह **वृद्धगार्ग्यः**—

" ज्येष्ठस्य तु क्रतोर्मध्ये मातापित्रोर्मृतिर्यदि। संस्कृत्य शालामागत्य यज्ञशेषं समापयेत् "॥

शांडिल्यः—

" दीक्षितोऽप्येकपुत्रस्तु मातापुत्रोर्मृतिर्यदि। दीक्षारूपं निधायात्र संस्कुर्यान्नोदकाप्लुतः ॥

" संस्कृत्य शालामागत्य यज्ञशेषं समापयेत्। पावयेद्दर्भपुंजीलैर्दीक्षारूपं यथाविधि"॥ इति।

पावयेत्। दीक्षाविध्युक्तमंत्रैरिति शेषः। एकपुत्र इति विशेषस्मरणात् पुत्रांतरसद्भावे तेनैव कारयेत्। " ज्येष्ठस्य तु क्रतोर्मध्ये " इति स्मरणात्। ज्येष्ठेनैव कार्यमित्यपि प्रतीयते। अत्र यथाशिष्टाचारं व्यवस्था। विवाहमध्ये अघागमे भोक्तादिनियमः **षट्त्रिंशन्मते** विशेष उक्तः—

" विवाहोत्सवयज्ञेषु अंतरा मृतसूतके। परैरन्नं प्रदातव्यं भोक्तव्यं च द्विजोत्तमैः " ॥

परैः आशौचरहितैर्दातव्यं न त्वाशौचिजनैः। भोजनार्थं वृत्तैर्ब्राह्मणैर्भोक्तव्यं चेत्यर्थः। **तत्रैव**—

"भुंजानेषु तु विप्रेषु अंतरा मृतसूतके। अन्यगेहोदकाचान्ताः सर्वे ते शुचयः स्मृताः"॥ इति।

संग्रहेऽपि—

"श्राद्धोत्सवादौ भुक्त्यंते पाकादौ चाघसंभवे। परैर्देयं च भोक्तव्यं न दोष इति निश्चयः"॥ इति।

क्रतुरपि—

" विवाहोत्सवयज्ञादिष्वंतरा मृतसूतके। शेषमन्नं परैर्देयं दातॄन् भोक्तॄंश्च न स्पृशेत् " ॥ इति।

आशौचिजनैर्दातृभोक्तृभांडादिस्पर्शो न कर्तव्य इत्यर्थः। तथा च **विष्णुः**—

"अस्पृष्टानां च भांडानां दशाहे शुद्धिरिष्यते। द्रव्याणां चाविसंस्पर्शे विना मांसं समुत्सृजेत् ॥

" भुक्त्वा स्पृश्यैस्तथाशौचिकेशकीटैश्च दूषितम्। कुशोदुंबरबिल्वाद्यैः पनसाम्बुजपत्रकैः ॥

" शंखपुष्पीसुवर्चादिक्काथं पीत्वा विशुध्यति " ॥ इति।

आशौचिदर्शनं वर्ज्यमित्युक्तं **विष्णुपुराणे** (३।१६-१३)—

" उदक्यासूतिकाशौचिमृताहारैश्च वीक्षिते। श्राद्धे सुरा न पितरो भुंजते पुरुषर्षभ "॥ इति।

अघागमात्प्राक्संकल्पितद्रव्याणां दोषाभावः। विशेषमाह **बृहस्पतिः**—

" विवाहोत्सवयज्ञादिष्वंतराम्रृतसूतके। पूर्वसंकल्पितार्थेषु न दोषः परिकीर्तितः " ॥

इदं देवार्थं इदं पित्रर्थं इदं ब्राह्मणार्थमित्यघागमात् प्रागेवोद्दिष्टपदार्थेष्वघं नास्तीत्यर्थः।

क्रतुरपि–" पूर्वसंकल्पितद्रव्यं दीयमानं न दुष्यति " इति। **दक्षोऽपि** —

"यज्ञोत्सवे व्रते श्राद्धे सूतके समुपागते। पूर्वसंकल्पितार्थेषु न दोषः परिकीर्तितः"॥ इति।

एतेन श्राद्धादौ आरंभात्परमघसंभवे पूर्वसंकल्पितामद्रव्यदाने न दोषः। तदर्थमेव पक्वस्य दाने च न दोषः।

यज्ञादौ प्रागुद्दिष्टमामद्रव्यं परैः पाचयित्वा दातव्यम् । 'परैरन्नं दातव्यम्' इति वचनात् । प्रारब्धे भोजने अघागमे दातुः सद्यःशुद्धिविधानेऽपि शेषमन्नं परैर्देयमिति वचनात् अन्नं परैर्देयमिति सिद्धम् ।

भृगुपातादिना मृतौ **पराशरः** (३।१२)—

" भृग्वग्निमरणे चैव देशांतरमृते तथा । बाले प्रेते च संन्यस्ते सद्यःशौचं विधीयते " ॥ इति ।

भृगुः प्रपातः । अग्निः प्रसिद्धः । भृग्वग्निमरणं प्रमादादिना दुर्मरणमात्रोपलक्षणम् । तन्निमित्तमरणे सति तत्संबंधिनां सद्यःशौचम् । असपिंडे च देशांतरमृते सद्यःशौचम् । बालोऽनाकृतनामा । तस्मिन्मृते सति तत्संबन्धिनां मरणनिमित्तं सद्यःशौचमित्यर्थः । जननिमित्तमस्त्येव ।

" सूतिमध्ये मृते बाले न शावं सूतकं भवेत् " इति **स्मृतेः** ॥ **मनुरपि** (५।७७)—

" बाले देशांतरस्थे च पृथक्पिंडे तु संस्थिते । सवासा जलमाप्लुत्य सद्य एव विशुध्यति " ॥ इति ।

देशांतरस्थ इत्यसपिंडविशेषणम् ।

संन्यस्तादिमृतौ । संन्यस्ते मृते सति तत्सपिंडानां सद्यःशौचम् । अत्र **व्यासः**—

" नैष्ठिकानां वनस्थानां यतीनां ब्रह्मचारिणाम् । नाशौचं कीर्तितं सद्भिः पतिते च तथा मृते" ॥

याज्ञवल्क्यः—

" देशांतरमृतिं श्रुत्वा क्लीबे वैखानसे यतौ । मृते स्नानेन शुध्यंति गर्भस्रावे च गोत्रिणः " ॥

वैखानसाः वानप्रस्थाः । **संग्रहेऽपि**—

" आद्योराश्रमिणोर्नाशे वर्णोक्तं त्वन्ययोर्मृतौ । सद्यःशौचं गृहिण्येव सद्योऽन्येषु सदा मिथः" ॥ इति ।

आद्योर्ब्रह्मचारिगृहस्थयोर्मृतौ स्वस्वजात्युक्तमघं भवति । अन्ययोर्वानप्रस्थसंन्यासिनोर्मृतौ सद्यःशौचम् । इत्येवं प्रकारेणाशौचं गृहिणि गृहस्थविषये । अन्येषु ब्रह्मचारिवानप्रस्थयतिषु परस्परं सर्वदा सद्यःशौचम् । गृहस्थमृतौ ब्रह्मचारिवानप्रस्थयतीनां, ब्रह्मचारिमृतौ ब्रह्मचारिवानप्रस्थयतीनां, वानप्रस्थमृतौ वानप्रस्थब्रह्मचारियतीनां, यतिमृतौ यतिब्रह्मचारिवानप्रस्थानां सपिंडानां परस्परं सद्यःशौचं भवतीत्यर्थः ।

यत्तु **स्मृत्यंतरम्**—

" सर्वसंगनिवृत्तस्य ध्यानयोगरतस्य च । न तस्य दहनं कार्यं नाशौचं नोदकक्रिया " ॥ इति

तत्र नाशौचमिति दशाहाद्यभिप्रायम् । स्नानमात्रमस्त्येव । सद्यःशौचस्य विहितत्वादिति **चंद्रिकायाम्** ।

विष्णुः—

" दानादौ ग्रहणे सद्यः पुत्रजन्मनि चापदि । निष्कृतौ तीर्थयात्रायां वेदपारायणे व्रते ॥

"नामकर्मादिसंस्कारे प्रारब्धे सद्य इष्यते" ॥ नामकर्मादित्यादिशब्देन स्मशानांताः संस्कारा गृह्यंते ।

आशौचिनां ग्रहणस्नानविधिः । वृद्धवसिष्ठः

" मृते च सूतके चैव न दोषो राहुदर्शने । तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते" ॥ **अंगिराः**—

" सर्वे वर्णाः सूतके च मृतके राहुदर्शने । स्नात्वा श्राद्धं प्रकुर्वीरन् दानं शाठ्यविवर्जिताः" ॥ इति ।

जामातृदौहित्रभागिनेयादिमृतौ संग्रहे—

" श्वश्रूश्वशुरतत्पुत्रयाज्याचार्यसुतर्त्विजाम् । उपाध्यायस्य सद्यः स्यान्मृतौ तत्प्रतियोगिनाम्" ॥ इति ।

श्वश्र्वादिप्रतियोगिनां मृतौ श्वश्र्वादीनां सद्यःशौचमित्यर्थः ।

वृद्धयाज्ञवल्क्यः—

" मित्रे जामातरि प्रेते दौहित्रे भगिनीसुते । स्याले च तत्सुते वाऽपि सद्यःस्नानेन शुध्यति " ॥

मित्रविषये सद्यःशौचमसन्निधौ । सन्निधौ तु दिनं वक्ष्यते । दौहित्रभागिनेयमृतौ सद्यःशौचं विदेशस्थानुपनीतविषयम् । प्रत्यक्षे व्रतात्प्रागपि पक्षिणीविधानात् । स्याले च स्नानं परोक्षे ।

राष्ट्रक्षोभादिना मृतौ पराशरः—

" दुर्भिक्षे राष्ट्रसंभ्रांतावापदां च समुद्भवे । उपसर्गमृतौ चैव सद्यःशौचं विधीयते " ॥

उपसर्गमृतौ क्षामक्षोभाद्युपप्लवमृतौ सपिंडानां सद्यःशौचमित्यर्थः । **ब्रह्मपुराणे—**

" दुर्भिक्षे प्राणरक्षार्थं कृतयत्नस्य देहिनः । राष्ट्रभ्रंशस्थितस्यापि पुत्रदारांश्च रक्षितुम् ॥
" विभ्रष्टस्य स्वदेशाच्च अन्यदेशपरिग्रहे । ग्रहोपतापे घोरे च दारुणायामथापदि ॥
" ग्रहोपतापशांत्यर्थं क्रियमाणे च कर्मणि । शीतवातातपैर्यत्र ह्यथैव मरणं भवेत् ॥
" तत्रोपसर्गात्स्वं देहं रक्षमाणस्य किं भवेत् " ॥ अघमिति प्रकृतम् ।

शिल्पिदासवैद्यराजादीनां सद्यःशौचम् । **बृहस्पतिः—**

" शिल्पिनः कारवो वैद्या दासीदासाश्च नापिताः । राजानः श्रोत्रियाश्चैव सद्यःशौचाः प्रकीर्तिताः ॥
" सव्रतः सत्रपूतश्च आहिताग्निश्च यो द्विजः । राज्ञश्च सूतकं नास्ति यस्य चेच्छति पार्थिवः ॥
" उद्यतो निधने दाने आर्तो विप्रो निमंत्रितः । तथैव ऋषिभिर्दृष्टं यथाकालेन शुध्यति " ॥ इति ।

शिल्पिनश्चित्रकाराद्याः । कारवः सूपकारप्रभृतयः । वैद्याश्चिकित्सकाः । यस्य च पुरोहितादेरनन्यसाध्यमंत्राभिचारादिकर्मार्थमाशौचाभावमिच्छति तस्य तत्कर्मण्याशौचाभावः । निधने संग्रामे । दाने अन्नादिदाने । चोद्यतः कृतोपक्रमः । आर्तः आपदं प्राप्तः । निमंत्रितः श्राद्धादौ । यथाकालेन दशरात्रादिना । तथा स्नानेनैव शुध्यतीत्यर्थः । अत्र **व्यासः—**

" शिल्पिनश्चित्रकाराद्याः कर्म यत्साधयंत्यलम् । तत्कर्म नान्यो जानाति तस्माच्छुद्धा स्वकर्मणि ॥
" सूपकारेण यत्कर्म करणीयं नरेष्वपि । तदन्यो नैव जानाति तस्माच्छुद्धः स सूपकृत् ॥
" चिकित्सको यत्कुरुते तदन्येन न शक्यते । तस्माच्चिकित्सकः स्पर्शे शुद्धो भवति नित्यशः ॥
" दास्यो दासाश्च यत्किंचित् कर्म कुर्वंति लीलया । तदन्ये न क्षमाः कर्तुं तस्मात्ते शुचयः सदा ॥
" राजा करोति यत्कर्म स्वप्नेऽप्यन्यस्य तत्कथम् । एवं सति नृपः शुद्धः संस्पर्शे मृतसूतके ॥
" यत्कर्म राजभृत्यानां हस्त्यश्वगमनादिकम् । तन्नास्ति यस्मादन्यस्य तस्मात्ते शुचयः स्मृताः" ॥ इति ।

दास्यादीनां स्वामिकर्मण्येव सद्यःशौचं स्वकर्माधिकारस्तु मासावधिक एव । स्वामिशौचे न स्पृश्यत्वम् ।

" दासी दासश्च सर्वे वै यस्य वर्णस्य यो भवेत् । तद्वर्णस्य भवेच्छौचं दास्या मासस्तु सूतकम् " ॥

इत्यंगिरःस्मरणात् । **शातातपः—**

" मूल्यकर्मकराः शूद्रा दासीदासास्तथैव च । स्नाने शरीरसंस्कारे गृहकर्मण्यदूषिताः " ॥ इति ।

स्मृत्यंतरे तु—"सद्यःस्पृश्यो गर्भदासो भक्तस्तु स्यात् त्र्यहाच्छुचिः" इति । **मनुः** (५।९२–९३)–

" न राज्ञामघदोषोऽस्ति व्रतिनां न च सत्रिणाम् । ऐंद्रस्थानमुपासीना ब्रह्मभूता हि ते सदा ॥
" राज्ञो माहात्मिके स्थाने सद्यःशौचं विधीयते । प्रजानां परिरक्षार्थमासनं चात्र कारणम् " ॥ इति ।

सत्रिणां प्रारब्धयज्ञानाम् । तेऽपि खल्वैंद्रस्थानमुपासीनाः देवतायजनपरत्वात् । तथा च **श्रुतिः—** " एष वा एतर्हींद्रो यो यजते " इति । ब्रह्मभूताः धर्मस्वरूपिणः । माहात्मिके महात्मा इंद्रः । तस्येदं माहात्मिकम् । तस्मिन् स्थाने आसीनस्येति शेषः ।

राज्ञ आशौचाभावमुपपादयति **स एव** (५।९५–९६)—

" सोमाग्न्यर्कानिलेंद्राणां वित्ताप्पत्यर्यमस्य च । अष्टानां लोकपालानां वपुर्धारयते नृपः ॥
" लोकेशाधिष्ठितो राजा नास्याशौचं विधीयते । शौचाशौचं हि मर्त्यानां लोकेशप्रभवेऽप्ययम् " ॥ इति ।

युद्धमरणादौ स एव (५।९७, ९४)—

" उद्यतैराहवे शस्त्रैः क्षत्रधर्महतस्य च । सद्यः संतिष्ठते धर्मस्तथाशौचमपि स्मृतम् ॥ ९७ ॥
" डिंभाहवहतानां च विद्युता पार्थिवेन च । गोब्राह्मणस्य चैवार्थे यस्य चेच्छति पार्थिवः " ॥ ९४ ॥

ब्राह्मणगवाद्यर्थे मृतो इति । डिम्भो बालः । **बृहस्पतिः**—

" शस्त्रेणाभिमुखो यस्तु वध्यते क्षत्रकर्मणा । यज्ञः संतिष्ठते तस्य सद्यःशौचं विधीयते " ॥ इति ।

ब्रह्मपुराणे—

" ब्राह्मणार्थे गवार्थे वा भूम्यर्थे वा वियुज्यते । राज्ञो वा राजभृत्यस्य सत्वोद्रिक्तस्य संगरे ॥
" संमुखस्य हतस्यापि सद्यःश्राद्धक्रिया भवेत् " । यत्तु **स्मर्यते**—

" ब्राह्मणार्थे विपन्ना ये योषिता गोग्रहेऽपि वा । आहवेऽभिहतानां च एकरात्रमशौचकम् " ॥
इति तत्कालांतरमृतिविषयम् । तथा च **संग्रहे**—

" गोविप्रस्त्रीकृते प्रेते राज्यार्थे वा हते युधि । शौचं चोर्ध्वक्रियाः सद्यो यद्यनिच्छास्त्यघं मृतौ ॥
" एकरात्रं भवेद्युद्धे क्षतैः कालांतरे मृते " ॥ इति " यद्यनिच्छास्त्यघं मृतात् " इति मृतौ यदीच्छाभावः तदापि दुर्मृतत्वात्सद्यःशौचमित्यर्थः । **याज्ञवल्क्यः** (प्रा. २७)—

" महीपतीनां नाशौचं हतानां विद्युता तथा । गोब्राह्मणार्थे संग्रामे यस्य चेच्छति भूमिपः" ॥ इति ।

गौतमः (१४।८–११)—"गोब्राह्मणहतानामन्वक्षम् । राजक्रोधाच्च । युद्धे । प्रायानाशकशस्त्राग्निविषोदकोद्बंधनप्रपतनैश्चेच्छताम्" इति । गवार्थे ब्राह्मणार्थे वा हतानां ये सपिंडाः तेषामाशौचमन्वक्षं यावदन्वीक्ष्यते शवस्तावदेव । संस्कारानंतरं स्नात्वा शुध्येयुः । एवं गोब्राह्मणयोरन्यतरेण यो हतः तत् ज्ञातीनामन्वक्षमाशौचम् " गवार्थे ब्राह्मणार्थे वा हतानां गोभिर्हतानां ब्राह्मणैर्वा सद्यःशौचम् " इति **स्मरणात्** । आयुद्धमायोधनम् । प्रायो महाप्रस्थानं अशनमाशः स एवाशकः । सत्येव भोज्ये क्रोधादिना भोजननिवृत्तिरनाशकः इत्यर्थः । इच्छतामित्युक्तत्वात् प्रमादमृतानामाशौचोदकसद्भवः । तथा **चांगिराः**—

" यदि कश्चित्प्रमादेन म्रियेताग्न्युदकादिभिः । तस्याशौचं विधातव्यं कर्त्तव्या चोदकक्रिया " ॥ इति

बुद्धिपूर्वमरणे वैधे प्रायादिमरणे च । बुद्धिपूर्वमरणे **पराशरः**—

" बाले देशांतरस्थे च पतिते च यतौ मृतौ । सद्यःशौचं तथेच्छातो जलाग्न्युद्बंधनादिषु " ॥

ब्रह्मपुराणे—

" शृंगिदंष्ट्रिनखिव्यालविषवान्हिमहाजलैः । सुदूरात्परिहर्तव्यैः कुर्वन् क्रीडां मृतस्तु यः ॥
" नागानां विप्रियं कुर्वन् दग्धश्चाप्यथ विद्युता । गृहीता ये च राज्ञा वै चौर्यदोषेण कुत्रचित् ॥
" परदारान्हरंतश्च रोषात्तत्पतिभिर्हताः ।
" असमानैश्च संकीर्णैश्चंडालाद्यैश्च विग्रहम् । कृत्वा तैर्निहतास्तद्वच्चंडालादीन्समाश्रिताः ॥
" क्रोधात् प्रायं विषं वान्हिं शस्त्रमुद्बंधनं जलम् । गिरिवृक्षप्रपातं वा ये कुर्वंति नराधमाः ॥
" ब्रह्मदंडहता ये च ये चैव ब्राह्मणैर्हताः । महापातकिनो ये च पतितास्ते प्रकीर्तिताः ॥
"पतितानां न दाहः स्यान्नाशौचं नास्थिसंचयः । न चाश्रुपातः कर्तव्यो ह्युदकस्य क्रिया न च" ॥ इति ।

हारीतः—" पाषंडानाश्रितात्मत्यागिनां नास्त्याशौचम् " इति । पाषंडाः वेदबाह्याः । अनाश्रिताः अनाश्रमिणः । **स्मृत्यंतरे**—

" चंडालादुदकात्सर्पाद्ब्राह्मणाद्वैद्युतानलात् । दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मणाम् ॥

" ये वेश्यापतयो विप्रा ये वै शूद्रान्नभोजनाः । ये चान्ये पापकर्माणस्तेषां भस्मांतसूतकम् " ॥

दक्षः (६।९)—

" व्याधितस्य कदर्यस्य ऋणग्रस्तस्य सर्वदा । क्रियाहीनस्य मूर्खस्य नास्तिकस्य विशेषतः ॥

" व्यसनासक्तचित्तस्य पराधीनस्य सर्वदा । नित्यस्नानविहीनस्य भस्मांतं सूतकं भवेत् " ॥ इति । दाहपर्यंतं सूतकमित्यर्थः । **संवर्त्तः**—

" क्रियाहीनस्य मूर्खस्य कदर्यस्य तथैव च । ऋणग्रस्तस्य दंभस्य भस्मांतं सूतकं भवेत् " ॥

अत्र **विज्ञानेश्वरः**—"दर्पादिना चंडालादीन्हंतुं गतो यस्तैर्मारितस्तस्य 'सर्वत एवात्मानं गोपायेत्' इति विध्यतिक्रमनिमित्तपिंडोदकाशौचादिनिषेधः । न तु प्रमादामृतस्य " इति ।

ब्राह्मे—" प्रमादादेव निःशङ्कस्त्वकस्मादपि यो नरः । शृंगिदंष्ट्रिनखिव्यालविषविद्युज्जलाग्निभिः ॥

" चंडालैर्वाऽथ चोरैर्वा निहतो यत्रकुत्रचित् । तस्य दाहादिकं कुर्याद्यस्मान्न पतितस्तु सः " ॥ इति ।

संग्रहे—

" अन्वक्षं शृंगिचोरांत्यविद्युच्छस्त्रविषाग्निभिः । प्रायानशनतोयाद्यैर्मृते कामात्प्रवृत्तितः ॥

" प्रमादाद्दुर्मृतौ सद्यः क्रियाशौचे समाचरेत् । वैधे प्रायादिमरणे त्र्यहं सद्यश्च तत्क्रियाम् " ॥ इति । शृंगिचोरादिभिः कामात्प्रवृत्तितः बुद्धिपूर्वप्रवृत्त्या मृते सति तत्सपिंडानामन्वक्षं भस्मांतमाशौचम् । प्रमादाद्दुर्मृतौ अबुद्धिपूर्वमरणे सद्यः अविलंबेन क्रियाशौचे कुर्यात् । दाहादिसपिंड्यंताः प्रेतक्रियाश्च आशौचं चानुतिष्ठेदिति यावत् । वैधे शास्त्रचोदिते प्रायादिति मरणे त्र्यहमाशौचं तत्क्रियाः प्रेतक्रियाश्च सद्यस्तदैव कुर्यात् । एतदुक्तं भवति—" अत्यंतानुष्ठानाशक्तजीर्णागाचिकित्स्यरोगाणां वृथाजीविनां अग्निजलप्रवेशभृगुपतनानि महापथगमनं वा गच्छेत् । न वृथाजीवितुमिच्छेत् " इति **वृद्धगार्ग्या**दिवचनविहिते बुद्धिपूर्वाग्निप्रवेशादिमरणे त्र्यहम् । तदानीमेव प्रेतकृत्यं च कुर्यादिति ।

गार्ग्यः—

" दुश्चिकित्सैर्महारोगैः पीडितस्तु पुमान्यदि । प्रविशेज्ज्वलनं दीप्तं कुर्यादनशनं तथा ॥

" अगाधतोयराशिं वा भृगोः पतनमेव वा । गच्छेन्महापथं वाऽपि तुषारगिरिमादरात् ॥

" उत्तमानाप्नुयाल्लोकानात्मघाती भवेत्क्वचित् ॥

" वृद्धः शौचक्रियालुप्तः प्रत्याख्यातभिषक्क्रियः । आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः ॥

" तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसंचयः । तृतीये सूतकं दत्वा चतुर्थे श्राद्धमाचरेत् " ॥ इति ।

वसिष्ठः—

" वाराणस्यां मृतो यस्तु प्रत्याख्यातभिषक्क्रियः । काष्ठपाषाणमध्यस्थो जान्हवीजलमध्यगः ॥

" अविमुक्तस्थितस्तस्य कर्णमूलगतो हरः । प्रणवं तारकं ब्रूते नान्यथा कस्यचित्क्वचित् ॥

" प्रयागवटशाखायां देहत्यागं करोति वा" ॥ **मनुः**—

" यः कामतो महापापं नरः कुर्यात्कथंचन । न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते " ॥

इत्याद्यात्महननं यत्र शास्त्रतोऽनुज्ञायते तत्र त्र्यहमाशौचम् । एतच्चात्महननाभ्यनुज्ञानं युगांतरविषयम् ।
" प्रायश्चित्तविधानं च विप्राणां मरणांतिकम् । भृग्वग्निपतनं चैव वृद्धादिमरणं तथा ॥
" कलौ युगे त्विमान् धर्मान्वर्ज्यानाहुर्मनीषिणः " ॥ इति कलौ निषेधस्मरणात् । **संग्रहे—**

" षंडपाषंडपतितप्रव्रज्यावासिमोघजाः । स्वैरिण्यनाश्रमिस्तेना गर्भभर्त्रात्मघातिनः ॥
" नाशौचार्हास्तदा तूष्णीं दाह्याः पश्चात्तु मंत्रितः । दुर्मृतौ वत्सरांते वा षण्मासांते त्र्यहाः क्रियाः ॥
" त्र्यहं चाघमिहावश्यं नारायणबलिर्भवेत् " ॥ इति । प्रव्रज्यावासी सन्यस्य तद्धर्महीनः । मोघजः वृथाजातः क्रियागुणाद्यैः कस्यचिदर्थस्यासंपादकः । स्वैरिणी कुलटा । एतच्च कुलटायाः सद्यःशौचं स्वैराचारे । अनाश्रमिणः अधिकारे सत्यकृताश्रमविशेषपरिग्रहाः । गर्भघातिनः भर्तृघातिनः आत्मघातिनः । अत्र लिंगमविवक्षितम् । एतेषां मरणे सपिंडैराशौचं नानुष्ठेयम् । तदानीं तूष्णीं दाह्याः । पश्चाद्वत्सरेऽतीते षण्मासानंतरं वा नारायणबलिं कृत्वा मंत्रवद्दाहादिक्रियाः कार्याः । अत्राघं त्र्यहमित्यर्थः ।
अत्र **बृहस्पतिः—**

" विषोद्बंधनशस्त्रेण यः स्वात्मानं प्रमापयेत् । मृतोऽमेध्येन लेप्तव्यो नाग्निसंस्कारमर्हति " ॥

अंगिराश्च—

" कामतो मरणं प्राप्ते आस्ये मत्स्यं निवेशयेत् । ब्रह्मघ्नसममित्याहुः काष्ठवद्दहनं भवेत् " ॥

जाबालिः—

" पतितेऽनशने प्रेते विदेशस्थे शिशौ च न । पाषंडानाश्रितास्तेनभर्तृघ्न्यः कामगादिकाः ।
" सुरापा आत्मत्यागिन्यो नाशौचोदकभाजिनः " ॥ **मनुरपि** (५।८९)—

" पाषंडमाश्रितानां च चरंतीनां च कामतः । गर्भभर्तृद्रुहां चैव सुरापीनां च योषिताम् " ॥

आपस्तंबः—

" व्यापादयेद्य आत्मानं स्वयमग्न्युदकादिभिः । विहितं तस्य नाशौचं नापि कार्योदकक्रिया " ॥

यमः—

" नाशौचं नोदकं नाश्रु न कुर्यात्प्रेतकर्म च । ब्रह्मदंडहतानां च न कुर्यात्कटधारणम् " ॥

ब्रह्मदंडः ब्रह्मशापः । कटधारणं प्रेतधारणम् ।

आहिताग्निदुर्मरणे । आहिताग्नेर्दुर्मरणे **पराशरः—**

" वैतानं प्रक्षिपेदप्सु आवसथ्यं चतुष्पथे । पात्राणि तु दहेदग्नौ यजमाने वृथा हते ॥
" आत्मनस्त्यागिनां नास्ति पतितानां तथा क्रिया । तेषामपि तथा गंगा तोयेऽवस्थापनं हितम् ॥
" कृत्वाग्निमुदकं स्थानं दर्शनं वाहनं कथाम् । रज्जुच्छेदाश्रुपातं च तप्तकृच्छ्रेण शुध्यति " ॥

स्नाननिषेधः प्रेतस्यैव । ज्ञातीनां सद्यःशौचविधानात् । अयं च संस्कारनिषेधो यावद्वत्सरम् ।
तथा च **षट्त्रिंशन्मते—**

" गोब्राह्मणहतानां च पतितानां तथैव च । ऊर्ध्वं संवत्सरात्कुर्यात्सर्वमेवौर्ध्वदेहिकम् " ॥ इति ।
संवत्सरादूर्ध्वमपि नारायणबलिं कृत्वा कुर्यादित्याह **व्यासः—**

" ये मृताः पापमार्गेण तेषां संवत्सरात्परम् । नारायणबलिं कृत्वा कुर्यादूर्ध्वक्रियां द्विजः ॥
" तत्र त्रिरात्रमाशौचं द्वितीये त्वस्थिसंचयः । तृतीये तूदकं दत्वा चतुर्थे श्राद्धमाचरेत् " ॥

अखंडादर्शे—

" अब्दांते वाऽथ षण्मासे पुनः कृत्वा तु संस्कृतिम् । त्रिरात्रमशुचिर्भूत्वा पिंडं कुर्यात्क्रियादिकम् " ॥

अंगिरा:—

" नारायणबलिः कार्यो दुर्मृतौ दुर्मृतस्य तु। संवत्सरे व्यतीते वा तदर्धे पाद एव वा "॥ इति।

बादरायणः—

" चंडालोदकसर्पाद्यैर्ये मृताः पापकर्मभिः। तेषामब्दात्परं कुर्यान्नारायणबलिं बुधः ॥
" षण्मासात्परतस्तत्र मुनयः केचिदूचिरे। अन्ये मासत्रयात्पश्चान्नारायणबलिं जगुः ॥
" सार्धान्मासाच्च परतः केचिदाहुर्महर्षयः। चतुर्विंशाद्दिनात्पश्चादिति रोमशभाषितम् " ॥

रोमशः—

" निर्घातोद्बंधनाग्न्याद्यैर्ये मृताः पापकर्मणः। नारायणबलिस्तेषां चतुर्विंशद्दिनात्परम् ॥
" कुलोचितानां धर्माणामानन्त्यपरिकल्पनात्। कर्त्तुः शरीरानित्यत्वाच्चतुर्विंशतिवासरात् ॥
"पश्चान्नारायणबलिः कर्त्तव्यः स्यान्मनीषिभिः। तदंतः शुभकर्माणि न कर्त्तव्यानि सूरिभिः "॥ इति।
" दुर्मृतस्य क्रियाहीनकाले पुंसवनं चरेत्। पित्रोराब्दिककालस्तु यदि तत्र तदा यदा ॥
" तयोस्तदैव कुर्वीत नान्येषां परतो भवेत् " ॥ इति।

दुर्मृतौ प्रायश्चित्तं संस्कारक्रमश्च। अत्र **स्मृत्यंतरे** विशेषः—

" यावत्षण्मासमित्यन्ये यावन्मासत्रयं परे। नास्ति प्रेतक्रियेत्येके प्रायश्चित्तं विदुः परे ॥
" प्राजापत्यातिकृच्छ्रं च तप्तकृच्छ्रत्रयं तथा। चांद्रायणं ततः कुर्यान्नारायणबलिं तथा ॥
" कृत्वैतद्वत्सरस्यांते विदधीतौर्ध्वदेहिकम्। षण्मासात् द्विगुणं कार्यं त्रिमासात् त्रिगुणं भवेत् ॥
" चतुर्गुणं त्रिपक्षे स्यात्सद्यः पंचगुणं भवेत् " ॥ **षट्त्रिंशन्मते**—
" पापमार्गमृतौ नृणां संस्कारः परतोऽब्दतः। सामान्योऽयं विधिस्तत्र विशेषविधिरुच्यते ॥
" मासत्रयाद्ब्राह्मणानां नृपाणां मासषट्कतः। वैश्यानां वत्सरात्पश्चाच्छूद्राणां वत्सरद्वयात् ॥
" प्रायश्चित्तं परं कार्यमिति सूक्ष्मविदां मतम् " ॥ इति।

सुमतिः—" सार्धमासात् द्विजानां तु क्षत्रियाणां त्रिमासतः " इति।

अत्र विषयभेदेन कालव्यवस्थामाह **सुमंतुः**—

" अग्निविद्युत्पयःपातचंडालब्राह्मणैर्हताः। एकद्वित्रिचतुःपंचषडब्दैः शुद्धिमाप्नुयात् " ॥ इति।

एतत्पूर्वोक्तप्रायश्चित्ताकरणविषयम्। तत्कृतौ तु सद्य एव। तथा **चापरार्के**—

"दुर्मृतौ सद्य एव स्यात् संस्कारो हि द्विजन्मनाम्। लब्ध्वा कृच्छ्राणि विप्रेभ्य इति वेदविदां मतम्"॥इति।

सद्यःसंस्कारप्रकारमाह **हारीतः**—

" ब्राह्मणेन वधे प्राप्ते चंडालस्य करेण वा। आत्मना शस्त्रनिर्घाते शूद्रवद्दाहयेत् द्विजम् ॥
" भस्मास्थीनि गृहीत्वा तु विप्राणामनुशासनात्। क्षीरप्रक्षालनं कृत्वा तदस्थि प्रेतवद्दहेत् ॥
" पुनर्विधानमंत्रेण यथाविधि समाचरेत्। एवमेव विधिं कुर्यान्मरणे गर्हिते तथा "॥ इति।

चेतोवद्भिर्हतानां सद्यःसंस्कारं प्रतिषिध्य अचेतोभिर्हतानां नियमेन सद्यःसंस्कारमाह **कात्यायनः**—

"चेतोवद्भिर्हते सद्यःसंस्कारो नोपपद्यते। अन्यत्र सद्य एव स्यात् संस्कारो द्विजशासनात् "॥

कवषोऽपि—

" मनुष्यवर्ज्यं विप्राणां गर्हिते मरणे सति। सद्य एव क्रिया कार्या विप्राणामनुशासनात् "॥ इति।

देशांतरगतस्य सपिंडस्य स्वाशौचकालादूर्ध्वं मरणश्रवणे तत्सपिंडानां सद्यःशौचं विदधाति **पराशरः** (३।१४)—

" देशांतरमृतः कश्चित्सगोत्रः श्रूयते यदि। न त्रिरात्रमहोरात्रं सद्यः स्नात्वा शुचिर्भवेत् "॥

सगोत्रः सपिंडः । असंनिहितदेशस्थसपिंडमरणेऽपि वत्सरादूर्ध्वं सद्यःशौचमुक्तं **दीपिकायाम्—**

"पुरुषाणां सपिंडानां वर्षात् प्राक्तु मृते सति । वर्षाद्रुपर्यवगते स्नानमाचमनं भवेत्" ॥ इति । बालमरणे विशेषः **स्मर्यते—**

"अपर्याप्ते तु बालस्य मरणे समुपस्थिते । न स्नानमाचरेच्छ्रुत्वा पर्याप्ते तत्समाचरेत्"॥ इति ।

गर्भस्रावादिनिमित्ताशौचम् । मातुर्गर्भस्रावादिनिमित्तमाशौचमाह **पराशरः—**

"यदि गर्भो विपद्येत स्रवते चापि योषितः । यावन्मासस्थितो गर्भो दिनं तावत्तु सूतकम्"॥ इति । यदि गर्भस्रावपातौ स्यातां तदा यावत्सु मासेषु गर्भः स्थितस्तावन्माससंख्यासमदिनं मातुः सूत्याशौचमित्यर्थः । इदं चतुर्थमासप्रभृत्या सप्तमात् । अर्वाक्तु त्रिरात्रं स्रावपातौ विविनक्ति **स एव**—

"आ चतुर्थाद् भवेत्स्रावः पातः पंचमषष्ठयोः । अत ऊर्ध्वं प्रसूतिः स्याद्दशाहं सूतकं भवेत्" ॥ इति । सप्तममासप्रभृति मातुः प्रसवनिमित्तमाशौचं दशाहं भवतीत्यर्थः । **याज्ञवल्क्यः** (प्रा. २०)—

"गर्भस्रावे मासतुल्या निशाः शुद्धेस्तु कारणम्" ॥ इति । मासतुल्या निशा इति चतुर्थमासमारभ्या सप्तमाद्वेदितव्यम् । **मनुरपि** (५।६५)—"रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति" इति । स्रवतिर्यद्यपि द्रवद्रव्यकर्तृके परिस्पंदने प्रयुज्यते तथाप्यत्र द्रवाद्रवसाधारणरूपेऽधःपतने वर्त्तते ।

चतुर्थमासादर्वाक्तु यथावर्णाशौचमाह **मरीचिः—**

"गर्भस्रुत्यां यथामासमूचिरे तूत्तमे त्र्यहः । राजन्ये तु चतू रात्रं वैश्ये पंचाहमेव तु ॥

"अष्टाहेन तु शूद्रस्य शुद्धिरेषां प्रकीर्त्तिता" ॥ इति । **अयमर्थः**—अचिरे चतुर्थमासादर्वाचीने काले गर्भस्रुत्यां यथामासं नाशौचं किंतूत्तमे ब्राह्मणवर्णे त्रयो दिवसा मातुः शुद्धिहेतवः क्षत्रियवर्णे चतूरात्रं मातुः शुद्धिकारणं वैश्यवर्णे पंचाहो मातुः शुद्धिहेतुः शूद्रवर्णस्याष्टाहेन शुद्धिरिति । **स्मृतिरत्ने**—"यावन्मासत्रयं तावत्त्र्यहाशौचं विधीयते ॥

"षण्मासाभ्यंतरं यावद्गर्भस्रावो भवेद्यदि । तदा माससमैस्तासां दिवसैः शुद्धिरिष्यते ॥

"अत ऊर्ध्वं स्वजात्युक्तमाशौचं तासु विद्यते"॥ इति षण्मासाभ्यन्तरं यावच्चतुर्थमासमारभ्येत्यर्थः ।

दीपिकायाम्—

"स्रावपातावप्रसवो गर्भनाशास्त्रिधा स्मृताः । मातुर्मासत्रये स्रावे त्रिरात्रमशुचिर्भवेत् ॥

"चतुर्थादिषु मासेषु मासतुल्यमघं भवेत् । सप्तमादित्रिमासेषु सूतिकातुल्यता भवेत्" ॥ इति ।

दशकेऽपि—

"मातुर्गर्भविपत्स्वघं त्रिदिवसं मासत्रयेऽतो यथामासाहं त्रिषुसूतिकाविधिरतः स्नानं पितुः सर्वदा ।

"ज्ञातीनां पतनादिजातमरणे पित्रोर्दशाहं सदा" इति । मासत्रये प्रथमे द्वितीये तृतीये वा मासि गर्भस्रावे मातुः त्रिरात्रमघं स्यात् । अतःपरं मासत्रये चतुर्थपञ्चमषष्ठेषु मासेषु यथामासाहं माससमसंख्याकान्यहोरात्राणि अघं भवति । अतः परं मासषट्कादूर्ध्वं मातुः सूतिकाविधिः । ब्राह्मण्या दशरात्रमघं भवति । सर्वदा स्रावपातयोः पितुः स्नानान्तमघम् । ज्ञातीनां पतने स्नानान्तमघमित्यर्थः" ॥

दीपिकायाम्—"गर्भनाशादिसर्वेषु स्नानमेव पितुर्भवेत् ॥

"चतुर्थादित्रिमासेषु ज्ञातीनामाप्लवो भवेत् । पित्रोश्च भ्रातृबन्धूनां दशाहं स्यात्सुतोदये" ॥ इति ।

संग्रहेऽपि—

" त्र्यहं मासत्रये मातुर्गर्भस्रावे ततः परम् । मासतुल्यान्यहान्यूर्ध्वं षण्मासात्सूतिकाविधिः ॥

" स्रावाद्येव पितुः स्नानमन्येषां पतनादि तत् । गर्भनाशश्चतुर्मासे स्रावः पातस्ततो द्वयोः " ॥

स्रावादि पितुरेव स्नानं नान्यस्य । अन्येषां पितृव्यतिरिक्तानां तत्स्नानं पतनादीत्यर्थः ॥

वरदराजीये संग्रहेऽपि—

"संपातात्पितुराप्लवस्त्रिदिवसं तस्मिन्कठोरस्य चेत्।ज्ञातेरप्यथ सप्तमादिषु पितृज्ञात्योर्दशाहं भवेत्"॥इति। अत्र **चन्द्रिकायां** विशेषः—अचिरगर्भस्रावे मातुरेवाशौचं न पित्रादिसपिण्डानाम् । तथा च **मरीचिः**—"स्रावे मातुस्त्रिरात्रं स्यात्सापिण्डाशौचवर्णनम्" ॥ इति । यत्तु **सुमन्तुनोक्तम्**— " गर्भमासतुल्या दिवसा गर्भस्रंसने सद्यःशौचं च " इति अस्यार्थः—गर्भस्रंसने चतुर्थे मासि गर्भस्रावे मातुश्चतूरात्रमाशौचं सपिण्डपुरुषस्य सद्यःशौचमिति ।

याज्ञवल्क्यश्च—" मृते स्नानेन शुध्यन्ति गर्भस्रावे च गोत्रिणः " । इति ।

वृद्धवसिष्ठोऽपि "गर्भस्रावे मासतुल्या दिवसा स्त्रीणाम् । स्नानमात्रमेव पुरुषस्य ईषत्कठिनगर्भस्रावेतु त्रिरात्रम् " इति । एतत्तु चतुर्थमासजातगर्भस्रावविषयमिति व्यक्तम् । मासान्तरे ईषत्कठिनस्यैवासंभवात् । अस्य वचनस्य तात्पर्यार्थः—चतुर्थे मृदुतया ईषत्कठिनतया वा गर्भस्रावे मातुश्चतूरात्रमाशौचम् । सपिण्डपुरुषस्य मृदुतया स्रावे सद्यःशौचम् । ईषत्कठिनतया स्रावे त्रिरात्रमाशौचमिति । पुरुषग्रहदत्तसपिण्डस्त्रीणां नाशौचम् । यत्तु **मरीचिना** सपिण्डस्त्रीपुंससाधारण्येन त्रिरात्रमुक्तम् । "पाते मातुर्यथामासं पित्रादीनां दिनत्रयम्" इति तत्पञ्चमषष्ठमासविषयं मासान्तरे गर्भपातासंभवात् । यत्तूक्तम् "सद्यःशौचं सपिण्डानां गर्भस्य पतने सति" इति तच्चतुर्थमासान्तर्गतमृदुरूपगर्भस्रावविषयम् । तत्रैव **वृद्धवसिष्ठेन** सपिण्डपुरुषस्य सद्यःशौचविधानात् । स्रावे पातशब्दो मातुर्जठराद्बहिर्निर्गमनगुणेन स्रावेण साम्याद्वर्तते । मुख्यार्थपरत्वे पूर्वोक्तवचनविरोधापत्तेरिति । एवं चतुर्थे मृदुतया स्रावे सपिण्डानां सद्यःशौचं ईषत्कठिनतया स्रावे त्रिरात्रमाशौचं सपिण्डपुरुषाणाम् । स्त्रीणां तु नास्ति । पञ्चमे षष्ठे च मासे स्त्रीपुंससाधारण्येन सपिण्डानां त्रिरात्रमाशौचमिति **चन्द्रिकायां** निर्णीतम् । **विज्ञानेश्वरीये तु**—" सद्यःशौचं सपिण्डानां गर्भस्य पतने सति " इति सपिंडानां सद्यःशौचविधानं मृदुगर्भपतनविषयम् । यत्पुनर्वसिष्ठवचनम् (४।३४)—" ऊनद्विवर्षके प्रेते गर्भपतने संपिंडानां त्रिरात्रम् " इति तत्पंचमषष्ठयोः कठिनगर्भपतनविषयमिति । एतदेवाभिप्रेत्योक्तं **शतके**—" पाते सद्यस्तु कठिने त्र्यहं पित्रादिषु स्मृतम् " इति । पाते द्रवात्मके ज्ञातीनां सद्यःस्नानं कठिनपाते त्र्यहमित्यर्थः । **स्मृतिरत्ने**—

"स्रावे मातुस्त्रिरात्रं स्यात्सपिंडाशौचवर्जनम् । पाते मातुर्यथामासं पित्रादीनां दिनत्रयम् "॥ इति ।

स्मृत्यर्थसारे—"चतुर्मासाभ्यंतरे गर्भनाशः स्राव उच्यते । तत्र स्रावे आद्यमासत्रये मातुस्त्रिरात्रमाशौचं । चतुर्थे चतूरात्रम् । सगोत्रसपिंडानां सद्यःस्नानेन सद्यःशुद्धिः । पञ्चमषष्ठयोर्गर्भनाशः पात उच्यते। पाते मातुर्गर्भमाससंख्यासमदिनमाशौचम्। सपिण्डानां त्रिरात्रं सप्तममासप्रभृतिप्रसव उच्यते। प्रसवे जननिमित्तमाशौचं पूर्णं दशाहादिकं सर्वेषां यथावर्णं भवति। समानोदकानां त्रिरात्रम्" इति॥

षडशीतौ तु—

" त्रिदिनं त्रिषु मासेषु चतुर्थेषु चतुर्दिनम् । स्रावे तु मातुरेव स्यान्न ज्ञातीनां न वै पितुः ॥

" पंचमे पंचषष्ठे षड् दिवसाः पातसूतकम् । मातुरित्थमथान्येषां पितुश्च त्रिदिनं समम् " ॥ इति ।

स्मृत्यंतरे—
" स्रावे चैव पितुः स्नानं सपिंडानां न विद्यते। चतुर्थे तु सपिंडानां शुद्धिः सद्यो जलाप्लवात्॥ " पाते तेषां त्रिरात्रं स्यात्पितुश्च भ्रातुरेव हि। प्रसवे जननाशौचं सपिंडानां तु विद्यते॥ " सोदकानां तृतीयांशं बांधवानां न चैव हि " इति। यत्तु **यमेनोक्तम्**—
" अदंतजाते तनये शिशौ गर्भच्युते तथा। सपिंडानां तु सर्वेषामहोरात्रमशौचकम् "॥ इति तत्परोक्षविषयम्। **सूतिकाशौचम्**। सप्तममासप्रभृति सर्ववर्णस्त्रीणां स्वजात्युक्तमाशौचम्—

" अत ऊर्ध्वं प्रसूतौ तु दशाहं सूतकं भवेत्।
" क्षत्रियो द्वादशाहेन वैश्यः पंचदशेन तु। शुध्येत् शूद्रस्तु मासेन वर्णाशौचमिदं स्मृतम् "॥

इति **स्मरणात्**। एतच्च मातापित्रादिसाधारणाशौचाभिप्रायम्। यत्तु **प्रचेतसोक्तम्**—
" सूतिका सर्ववर्णानां दशाहेन विशुध्यति। ऋतौ तु न पृथक्स्त्रीणां सर्ववर्णेष्वयं विधिः "॥ इति स्त्रीणां रजोदर्शने यस्त्रिरात्राशौचविधिः स सर्ववर्णेष्वविशिष्ट इत्यर्थः। अत्र सर्ववर्णानां " सूतिका दशाहेन शुध्यति " इत्येतत्प्रसवमयासृङ्निःसरणप्रायत्यप्रयुक्तयुगत्रयपरिहरणनिमित्तभूताशौचाभिप्रायम्। ऋतुमत्याशौचसाहचर्यात्। अत्र सर्वशब्दः शूद्रेतरवर्णेषु संकोचनीयः। यदाह **पारस्करः**—
"द्विजातिः सूतिका या स्यात्सा दशाहेन शुध्यति। त्रयोदशेऽन्हि संप्राप्ते शूद्रा शुध्यत्यसंशयः"॥

संवर्त्तश्च—
" अजा गावो महिष्यश्च ब्राह्मण्यश्च प्रसूतिकाः। दशरात्रेण शुध्यंति भूमिष्ठं च नवोदकम् "॥ इति दशाहात्परं सत्यपि सूतके दशाहे शुध्यभिधानं वाक्यश्रवणदर्शनादिनिषेधविषयम्। " दशाहदर्शनं वाक्यं सूतिकायास्त्यजेत्ततः " इति **स्मरणात्**। दशाहात्परं सूतिकायाः कर्मानर्हत्वलक्षणमात्रमेव सूतकं न तु दशाहवदनिरीक्ष्यत्वादिलक्षणम्। तथा **पैठीनसिः**—" सूतिकां पुत्रजननीं विंशतिरात्रेण कर्माणि कारयेन्मासेन स्त्रीजननीम् " इति।

अत्र **चंद्रिकायाम्**—" कर्माण्यत्रादृष्टार्थानि दानादीनि विवक्षितानि। विंशतिरात्रेण गतेनेत्यर्थः। प्रसवदिनमारभ्य विंशतिदिनेष्वतीतेषु दानादिधर्मा भवन्तीत्यर्थः। एवं च सूतिकायां असृङ्निःसरणनिबन्धनमप्रायत्यं युगत्रयपरिहरणादिहेतुभूतं द्विजातिषु दशरात्रपर्यंतं अस्पृश्यत्वादिहेतुभूतं स्वजात्युक्तदशद्वादशपंचदशाहपर्यंतदानादिधर्मानधिकारलक्षणं तु द्विजातिषु पुत्रजनन्यां विंशतिदिनपर्यंतं स्त्रीजनन्यां मासपर्यंतमित्यवगंतव्यम् " इति। **विज्ञानेश्वरोऽपि**—"माता शुध्येद्दशाहेन " इत्येतत्संव्यवहारयोग्यतामात्रम्। अदृष्टार्थेषु पुनः कर्मसु **पैठीनसिना** विशेष उक्तः—
" सूतिकां पुत्रजननीं विंशतिरात्रेण कर्माणि कारयेन्मासेन स्त्रीजननीम् " इति।

वसिष्ठः—

" सूतकांते भवेन्नारी व्यवहारार्हतां गता। श्रौतस्मार्तादिकार्येषु स्त्रीप्रसूर्मासतः शुचिः॥
" तथा विंशतिरात्रेण योग्या पुंप्रसवा तु वै "॥ इति।

स्मृत्यर्थसारेऽपि— " सूतिकास्ववर्णाशौचे गते व्यवहारयोग्यैव। अदृष्टार्थेषु कर्मसु तु पुत्रप्रसूर्विंशतिरात्रेण स्त्रीप्रसूर्मासेन शुध्यति। मासोऽत्र सावनो ज्ञेयः " इति।

एवं च **विज्ञानेश्वरादिषु** प्रसवदिनमारभ्य विंशतिरात्रादिकं मातुराशौचं प्रतीयते। **स्मृतिचन्द्रिकायां** तु प्रसवदिनमारभ्येति कण्ठरवेणोक्तम्। **आशौचशतककारेण** सूतिकाया

दशमदिनविहितस्नानानन्तरदिनमारभ्य विंशतिदिनानि संभूय मासमिति एवं स्त्रीजनने चत्वारिंशद्दिनानीत्युक्तं शिष्टाचारानुसारेण।

"चत्वारिंशद्दिनानि स्युर्जनन्याः स्त्रीप्रसूतके। त्रिंशत्पुंप्रसवे ज्ञातेर्दशाहमुभयोरपि"॥ इति। अयमेवार्थो **दशके**ऽपि प्रतिपादितः।

प्रसवाशौचम्। यत्तु **चतुर्विंशतिमते** उक्तम्—

"अधस्तान्नवमान्मासाच्छुद्धिः स्यात्प्रसवे सदा। मृते जीवे पिता तस्मिन्नहोभिर्माससंख्यया"॥ इति एतच्चं**द्रिकायां** व्याकृतम्—अधः नवममासात्सप्तममासादारभ्येति शेषः। तदेतत्सूतिकाव्यतिरिक्तसपिंडविषयम्। सूतिकादिसर्वसपिंडविषयत्वे अत ऊर्ध्वं स्वजात्युक्तमाशौचं तासु विद्यत इति पूर्वोक्तवचनविरोधापत्तेः। एवं च यदुक्तं **विष्णुना**—"ब्राह्मणस्य सपिंडानां जननमरणयोर्दशाहमाशौचं द्वादशाहं राजन्यस्य पंचदशाहं वैश्यस्य मासं शूद्रस्य" इति तदेत**द्विष्णु**वचनं "नवमे दशमे वाऽपि प्रबलैः सूतिमारुतैः। निःसार्यते बाण इव यंत्रच्छिद्रेण सज्वरे" (प्रा. ८३) इति **याज्ञवल्क्योक्त**नवमदशममासप्रसवविषयं वेदितव्यमिति **स्मृतिरत्ने**ऽपि। यत्तु **चतुर्विंशन्मते** 'अधस्तान्नवमान्मासात्' इति अस्यार्थः सप्तममासादारभ्य नवममासादर्वाक् प्रसवे सति पित्रादीनां माससंख्यया तैरहोभिः शुद्धिः। सूतिकाया दशरात्रं नवममासादारभ्य सपिंडानां दशाहेन शुद्धिरिति। एवं च सप्तमे अष्टमे वा मासि प्रसवरूपे गर्भनाशे सति पितृभ्रातृज्ञातीनां यथाक्रमं सप्ताहमष्टाहमाशौचं भवति। नवमे दशमे वा प्रसवे सति दशाहमाशौचमिति **चंद्रिकास्मृतिरत्नमाधवीयादौ** स्थापितम्। **अन्ये** तु "अधस्तान्नवमान्मासात्" इत्येतत् मातृपितृभ्रातृव्यतिरिक्तज्ञातिविषयम्।

"सप्तमे वाऽष्टमे वाऽपि नारीणां गर्भपातने। मातापित्रोर्दशाहं स्यात्सोदराणां तथैव च"॥ इति **स्मरणा**दित्याहुः। अपरे तु "जातमृते मृतजाते वा सपिंडानां दशाहम्" इति **हारीत**स्मरणात् सप्तममासप्रभृति मृतजाते जातमृते वा सपिंडानां जननानिमित्तं पूर्णमाशौचमिति **विज्ञानेश्वरे**णाभिधानात् "सप्तमादिषु पितृज्ञात्योर्दशाहं भवेत्" इति **वरदराजीये**ऽभिधानात्

"मृतजातेऽपि वा जातमृते वा पतनात्परं ज्ञातीनां सूतकं पूर्णम्" इति **हारीत**शासनमिति **शतके**ऽभिहितत्वाच्च सप्तमाष्टमयोरपि ज्ञातीनां पूर्णमाशौचमित्याहुः।

अत्र व्यवस्थामाहुः—संनिहितानां पितृभ्रातृरूपसपिंडानां सप्तमाष्टमयोः पूर्णमाशौचम्। "मातापित्रोर्दशाहं स्यात्सोदराणां तथैव च" इति **मनुना** विशिष्य स्मरणात् पितृभ्रातृव्यतिरिक्तं व्यवहितसपिंडविषयम्। अधस्तान्नवमान्मासादिति नवममासमारभ्य प्रसवनिमित्तदशाहादिसूतकं सर्वसपिंडानामविशेषेण भवति। तत्र हि प्रसवो मुख्यः। तथा च **श्रूयते** "दशमे मासि सूतवे" इति। **उपनिषदि** च "दश वा नव वा मासानन्तःशयित्वा यावद्वाऽथ जायते" इति।

वर्णविशेषाशौचम्। तत्र यथावर्णमाशौचमाह **दक्षः**—

"शुध्येद्विप्रो दशाहेन द्वादशाहेन भूपतिः। वैश्यः पंचदशाहेन शूद्रो मासेन शुध्यति"॥

याज्ञवल्क्यश्च (प्रा. २२)—

"क्षत्रस्य द्वादशाहानि विशः पंचदशैव तु। त्रिंशद्दिनानि शूद्रस्य तदर्धं न्यायवर्तिनः"॥ इति। न्यायवर्तिनः द्विजशूद्रशुश्रूषादिनिरतस्य। **मनुरपि** (५।५८)— "अशुद्धा बांधवाः सर्वे सूतकेऽपि तथैव च" इति। बांधवाः सपिंडाः। तथैव दशाहमित्यर्थः। **बोधायनो**ऽपि (१।५।९०) "सपिंडेष्वा दशाहमाशौचम्" इति।

संवर्तोऽपि—
"जातस्यापि विधिर्दृष्ट एष एव मनीषिभिः । दशरात्रेण शुध्येत वैश्वदेवविवर्जितः"॥ इति ।
व्यासोऽपि—
"दशाहं शावमाशौचं सपिंडेषु विधीयते। जननेऽप्येवमेव स्यान्निपुणां शुद्धिमिच्छताम्"॥ इति ।
स्मृत्यंतरेऽपि–"शावमाशौचं दशरात्रं जननेऽप्येवम्;" इति । एतद्दशरात्राशौचं ब्राह्मणविषयम् ।
संग्रहेऽपि—
"दशाहं द्वादशाहं च पक्षं मासमिति क्रमात् । ब्रह्मक्षत्रियविट्शूद्रवर्णानां पूर्णसूतकम्" ॥ इति ।
मुख्यकर्तुरघं तावदितिवचनं शुभकर्मानर्हत्वपरम् । "एकोद्दिष्टान्त एव स्यात् संस्कर्तुः शुद्धता त्वघात्" इति वचनात् । **स्मृत्यंतरे तु** क्षत्रियादीनां दशाहादयोऽप्याशौचकल्पा दर्शिताः ।
यथाह **पराशरः**—
"क्षत्रियस्तु दशाहेन स्वकर्मनिरतः शुचिः । तथैव द्वादशाहेन वैश्यः शुद्धिमवाप्नुयात्" ॥
तथा च **शातातपः**—
"एकादशाहाद्राजन्यो वैश्यो द्वादशभिस्तथा । शूद्रो विंशतिरात्रेण शुध्यते मृतसूतके" ॥ इति ।
वसिष्ठस्तु (४।२८-२९)— "पंचदशरात्रेण राजन्यो विंशतिरात्रेण वैश्यः" ॥ इति ।
अंगिरास्त्वाह—
"सर्वेषामेव वर्णानां सूतके मृतके तथा । दशाहाच्छुद्धिरथ वा इति शातातपोऽब्रवीत्" ॥ इति ।
अत्र **विज्ञानेश्वरः** (पृ. १८० पं. ६-७)—"एवमनेकोच्चावचाशौचकल्पाः स्मृतिषु दर्शिताः । तेषां लोकसमाचाराभावान्नातीव व्यवस्थादर्शनमुपयोगीति नात्र व्यवस्था प्रदर्श्यते" इति ।

अनुलोमप्रतिलोमाशौचम् ।

यदा पुनर्ब्राह्मणादीनां क्षत्रियादयः सपिंडा भवंति तत्राह **हारीतः**—
"दशाहाच्छुध्यते विप्रो जन्महानिषु योनिषु । षड्भिस्त्रिभिरथैकेन क्षत्रविट्शूद्रयोनिषु ॥
"शूद्रविट्क्षत्रियाणां तु ब्राह्मणे संस्थिते सति । दशरात्रेण शुद्धिः स्यादित्याह कमलोद्भवः"॥ इति।
एतदविभक्तविषयम् ।

"क्षत्रविट्शूद्रजातीनां यदि स्तो मृतसूतके । तेषां तु पैतृकाशौचं विभक्तानां तु मातृकम्" ॥
इत्यापस्तंबस्मरणात् । **विष्णुरप्याह** (२२।२२-२६)—" क्षत्रियस्य विट्शूद्रेषु सपिंडेषु षड्रात्रत्रिरात्राभ्यां वैश्यस्य शूद्रे सपिंडे षड्रात्रेण शुद्धिः । हीनवर्णानां तूत्कृष्टेषु सपिंडेषु जातेषु मृतेषु वा तदाशौचव्यपगमे शुद्धिः" इति । **पराशरः**—
"एकपिंडास्तु दायादाः पृथग्दारनिकेतनाः । जन्मन्यपि विपत्तौ च तेषां तत्सूतकं भवेत्" ॥ इति ।
एकपिंडाः उत्तमवर्ण उत्पादको येषां ते तथा पृथग्दारनिकेतनाः हीनवर्णाः स्त्रियः निकेतनान्युत्पत्तिस्थानानि येषां ते दायादाः पुत्राः तत्सूतकमुत्तमवर्णसंबंध्याशौचमित्यर्थः ।
बोधायनेनाविशेषेण दशाह इत्युक्तम्—
"क्षत्रविट्शूद्रजातीया ये स्युर्विप्रस्य बांधवाः। तेषामाशौचे विप्रस्य दशाहाच्छुद्धिरिष्यते"॥ इति।
पाराशरे तु विशेषेणोक्तम्—" षड्रात्रं स्यात् त्रिरात्रं स्यादेकरात्रं क्रमेण तु" इति ।

अनयोश्च पक्षयोरापदनापद्विषयत्वेन व्यवस्था । संकरजातीनां शूद्रेष्वंतर्भावात्तेषां शूद्रवदाशौचम् । तथा **मनुः** (१०।४१)—" शूद्राणां तु सधर्माणः सर्वे तद्वंशजाः स्मृताः" इति ।

ब्राह्मेऽपि "शौचाशौचं प्रकुर्वीत शूद्रवद्वर्णसंकराः" इति। अनुलोमप्रतिलोमानामाशौचविशेषमाहापस्तंबः—

"सर्वेषामनुलोमानामाशौचं मातृवर्गवत्। पैतृकं प्रतिलोमानामाशौचं सद्भिरिष्यते"॥ इति। शूद्रप्रतिलोमानां त्वाशौचाभाव एव। यदाह **हारीतः**—"न शूद्रप्रतिलोमानामाशौचं वाऽस्ति किंचन"। **जाबालिः**—

"मासं शूद्रस्य शेषाणां सदाशौचमिति स्थितिः। तथापि मरणे तेषां स्नानमात्रं विधीयते"॥ **विज्ञानेश्वरे** च "प्रतिलोमा धर्महीनाः" (गौतम सू. ४।२०) इति।

समानोदकाशौचम्। समानोदकाशौचमाह **मनुः** (५।७०)— "जन्मन्येकोदकानां तु त्रिरात्राच्छुद्धिरिष्यते"। **पराशरः** —"दिनत्रयेण शुध्यंति ब्राह्मणाः प्रेतसूतके"। ब्राह्मणाः समानोदका इति शेषः। तथा च **जाबालिः**—

"दशाहेन सपिंडानां शुद्धिः स्यात्तु त्रिरात्रतः। समानोदकानामपि गोत्रजानामहः स्मृतम्"॥ **देवलः**—"समानोदकानां त्र्यहं गोत्रजानामहः स्मृतम्" इति। **बृहस्पतिरपि**—

"दशाहेन सपिंडास्तु शुध्यंति प्रेतसूतके। त्रिरात्रेण सकुल्यास्तु स्नात्वा शुध्यंति गोत्रजाः"॥ इति। सकुल्याः समानोदकाः। स्नानं तु मरणविषयम्। जन्मनि सगोत्रस्य स्नानाभावात्। **संग्रहे**— "जाते च सूतके प्रेते त्र्यहं सद्योत्रदादयः" इति। उपनयनात्पूर्वं मरणे सद्यःशुद्धिरित्यर्थः।

सजातीयसापिण्ड्यम्। सजातीयेषु सापिंड्यावधिमाहतुः **शंखलिखितौ**—

"सपिंडता तु सर्वेषां गोत्रतः साप्तपौरुषी" इति। यतः प्रभृति संतानविश्लेषः स कूटस्थः। तत्संतानेषु तमादिं कृत्वा गणिताः पुत्रपौत्रादयः सप्तपुरुषपर्यंताः सपिंडाः। तेषां सर्वेषां कूटस्थसंततिजातानां गोत्राः। एकगोत्रलक्षणोपाधिसद्भावे सति सपिंडता भवतीत्यर्थः। एवं च कूटस्थादूर्ध्वस्थस्वस्त्रीपुंससंततिजातानां दौहित्रपौत्राणां गोत्रभेदाद्न्योन्यमसपिंडता मंतव्या। **माधवीये**—

"लेपभाजश्चतुर्थाद्याः पित्राद्याः पिंडभागिनः। पिंडदः सप्तमस्तेषां सापिंड्यं साप्तपौरुषम्"॥ इति। **स्मृत्यंतरेऽपि**—

"ऊर्ध्वं पंचसु पित्रादिष्वधः पुत्रादिपंचसु। स्मृतं सजातिसापिंड्यमेतत्संततिजेष्वपि"॥ अत्र दातृकूटस्थव्यतिरेकेण पंचसु सापिण्ड्यस्मरणं वेदितव्यम्। ततश्च ताभ्यां सह सप्तपुरुषमित्यर्थः। **बौधायनः** (१।५।९१) "सपिण्डता त्वा सप्तमात्" इति। **स्मृत्यन्तरे**—

"सर्वेषामेव वर्णानां विज्ञेया साप्तपूरुषी। सपिण्डता ततः पश्चात्समानोदकधर्मता"॥ **मनुरपि** (५।६०)—

"सपिंडता तु पुरुषे सप्तमे विनिवर्तते। समानोदकभावस्तु जन्मनाम्नोरवेदने"॥ सप्तमे पुरुषे अतिक्रांते तदूर्ध्वं सपिंडता निवर्तते इत्यर्थः। **स्मृत्यंतरेऽपि**—"समानोदकभावस्य निवृत्तिः स्यादवेदने" इति। **व्याघ्रः**—

"समानोदकभावस्त्वनुवर्तेता चतुर्दशात्। जन्मनाम्नोः स्मृतेरेके तत्परं गोत्रमुच्यते"॥ इति। जन्म च नाम च जन्मनामनी। तयोः स्मरणं यावत्तावत्समानोदकभाव इत्यन्ये मन्यंते। ततः परं निवर्तत इत्यर्थादुक्तम्। **पारस्करः** (३।१०।१६)—"आ सप्तमात्सापिंड्यमा दशमात्समानोदकत्वम्" इति।

दीपिकायाम्—

"अष्टमात्प्राक्सपिंडाः स्युर्द्विविधा अष्टमादयः। त्रयः समानोदकाः स्युस्ततोऽन्ये गोत्रजाः स्मृताः"॥ इति। इदं दशमपर्यंतं समानोदकत्वस्मरणं विदेशस्थविषयम्। आ चतुर्दशात्समानोदकत्वस्मरणं संनिहितदेशवर्तिषु चतुर्दशपुरुषादूर्ध्वमपि स्नेहोपलालनादिद्वारा जन्मनामवेदनेऽपि समानोदकत्वे निवृत्तिपरम्। " जन्मनाम्नोरवेदने " इति **मनु**वचनं संनिहितदेशवर्तिषु बंधुत्वपरिपालनाद्यभावेन जन्मनामवेदनाभावे चतुर्दशपुरुषादर्वागपि समानोदकत्वनिवृत्तिपरम्। " आ सप्तमाद्दशमाद्वा समानग्रामवासे यावत् संबंधमनुस्मरेयुः " इति **वसिष्ठ**स्मरणात्। सगोत्रेषु व्यवस्था **चंद्रिकायां** दर्शिता—" जन्मनाम्नोरस्मरणेन समानोदकभावो येषां निवृत्तस्ते गोत्रजाः स्नात्वा शुध्यंति। येषां जन्मनाम्नोः स्मरणे सत्यपि चतुर्दशपुरुषातिक्रमात् सगोत्रत्वं तेषां न स्नानमात्राच्छुद्धिः ' समानोदकानां त्र्यहं गोत्रजानामहं स्मृतम् ' इति **जाबालि**वचनस्यैवंविधगोत्रजविषयत्वात् " इति। सप्तपौरुषसपिंडता ब्राह्मणादिसवर्णेषु समाना। विजातीयसापिण्ड्यं कन्यायाः सापिण्ड्यम्। विजातीयेषु त्रिपुरुषमेव सापिंड्यम्। यदाह **पाराशरः**—

" सपिण्डता तु पुरुषे सप्तमे विनिवर्तते। सजातीयेषु वर्णेषु चतुर्थे भिन्नजातिषु"॥ कूटस्थसजातीयेषु सपिण्डता सप्तमादूर्ध्वं विनिवर्तते। विजातीयेषु त्रिपुरुषादूर्ध्वं विनिवर्तते इत्यर्थः। तथा च **शातातपः**—

" पुत्राणामसपिंडानामप्रत्तानां च योषिताम्। सपिंडता तु निर्दिष्टा पितृपक्षे त्रिपूरुषी " ॥ इति। असपिंडानां विजातीयानां अप्रत्तानां अदत्तानामनूढानामित्यर्थः। **स एव**—

" यद्येकजाता बहवः पृथक्क्षेत्राः पृथग्जनाः। एकपिंडाः पृथक्शौचाः पिंडस्त्वावर्तते त्रिषु"॥ एकस्माद्ब्राह्मणादेर्जाताः एकजाताः। पृथक्क्षेत्राः भिन्नजातीयासु स्त्रीषु जाताः। अत एव पृथक्जनाः। एकपिंडाः सपिंडाः। पिंडस्त्वावर्तते त्रिषु। तेषां त्रिपुरुषमेव सापिंड्यमित्यर्थः। **व्यासोऽपि**—

" ये त्वेकजाता बहवो भिन्नयोनय एव च। भिन्नवर्णाश्च सापिण्ड्यं भवेत् तेषां त्रिपूरुषम्"॥ इति। **वृद्धपराशरोऽपि**—" तावत्तत्सूतकं गोत्रे चतुर्थपुरुषेण तु"। तत्सूतकं भिन्नजातियसंततिविषयोक्तं सूतकं तावद्यावत्त्रिपुरुषं चतुर्थपुरुषेण तु निवर्तत इत्यर्थः। यत्तु **पराशरेण** (३।१०–११)—सजातीयेषु पंचमादिषु सापिंड्यनिवृत्तिपूर्वकं आशौचतारतम्यमुक्तं

" दायाद्विच्छेदमाप्नोति पंचमो वाऽऽत्मवंशजः। चतुर्थे दशरात्रं स्यात्षड्दिनाः पुंसि पंचमे ॥

" षष्ठे चतुरहाच्छुद्धिः सप्तमे तु दिनत्रयात् "॥ इति। आत्मवंशजः पंचमः। वाशब्दात्षष्ठः सप्तमो वा दायात्पिंडाद्विच्छेदमवाप्नोति। पितृपक्षे कूटस्थमारभ्य गणनायां चतुर्थे दशरात्रमाशौचं पंचमे षड्रात्रमित्यादि। यदपि **मनुनोक्तं** (९।१८६)—

" त्रयाणामुदकं कार्यं त्रिषु पिंडः प्रवर्तते। चतुर्थः पिंडदातैषां पंचमो नोपपद्यते"॥ इति। यदपि **गौतमेनोक्तम्** (१४।१२)—" पिंडनिवृत्तिः पंचमे त्रयाणामेकमुदकं कार्यं सप्तमे वा " इति " सापिंड्यं सप्तपुरुषम् ' इत्यादि **स्मृत्यंतरे**—वचनस्यास्य च **पराशर**द्विवचनस्य विकल्पो द्रष्टव्यः इति। **माधवीये**—एतच्छिष्टाचारविरुद्धत्वाद्युगांतरविषयत्वेन योजनीयमिति। **स्मृतिरत्न-विज्ञानेश्वरी**यादावभिहितम्। यत्तु **याज्ञवल्क्येनोक्तम्** (आ. ५३)— " पंचमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा " इति। एतच्च कन्याविषये पंचमपर्यंतं सापिंड्यप्रतिपादनं विवाहनिषेधार्थम्। आशौचविषये तु त्रिपुरुषमेव कन्यासापिंड्यम्।

तथा च **वसिष्ठः** (४।१८)–" अप्रत्तानां तु स्त्रीणां सापिंड्यं त्रिपुरुषं विज्ञायते " **शंखश्च**–
" पुत्राणामसवर्णानामप्रत्तानां च योषिताम्। सपिण्डता विनिर्दिष्टा पितृपक्षे त्रिपूरुषी " ॥ इति।
अग्निस्मृतौ—" स्त्रीषु त्रिपुरुषं ज्ञेयं सपिंडत्वं द्विजोत्तमाः" इति। **ब्रह्मपुराणे** च—
" सपिंडता तु कन्यानां सवर्णानां त्रिपूरुषी। एकोदकास्ततश्चोर्ध्वं निर्दिष्टास्तु त्रिपूरुषाः "॥ इति।
स्मृत्यर्थसारे—" स्त्रीषु सापिंड्यं त्रिपुरुषमेवाप्रत्तासु " इति। प्रत्तानां तु स्त्रीणां सप्तपुरुषमेव सापिंड्यम्। यदाह **व्यासः**—
" प्रत्तानां तु तथा स्त्रीणां सापिंड्यं सप्तपूरुषम्। नारीणां भर्तृसापिंड्यं प्राह देवः प्रजापतिः"॥ इति।
स्मृत्यंतरेऽपि—
" स्वगोत्राद्भ्रश्यते नारी विवाहात्सप्तमे पदे। एकत्वं सा गता भर्त्तुः पिण्डे गोत्रेऽथ सूतके "॥ इति।
अप्रत्तस्त्रिया जन्मनि मरणे चाशौचव्यवस्था कृता **शतके**—

"आ त्रिपूरुषमेवाघं कन्याया मृतिजन्मनोः। आ सप्तपुरुषं पुंसः सापिंड्यं च तथा द्वयोः"॥ कन्याया मृतिजन्मनोः सतोर्यावत्त्रयः पुरुषा अनुक्रांता भवंति तावदघं भवति। पुंसः पुरुषस्य मृतिजन्मनोरा सप्तपूरुषमघं भवति। उभयत्राङ् अभिविधौ। ततश्चावधिभूतानां पुरुषाणां तत्तत्पुत्राणां चावधिमतां सर्वेषामघं भवति। तथा द्वयोः स्त्रीपुंसयोः कन्याविषये त्रिपुरुषं सापिंड्यम्। पुरुषविषये सप्तपुरुषमित्यर्थः। अत्र कूटस्थानीयत्वात् कूटस्थभ्रातुरप्याशौचं भवति। तथा **स्मृत्यंतरे**—

" आत्मपुत्रपितृभ्रातृभ्रातृव्यस्त्रीप्रसूतके। दशरात्रेण शुध्यंति नान्येषां सूतकं भवेत् "॥ आत्मशब्देन जनक उच्यते। तेन पुत्रादयः प्रत्येकमभिसंबध्यंते।

दीपिकायाम्—
" पुत्री पौत्री तथा भ्रात्री तथा सहजपुत्र्यपि। पितुः सहजपुत्री च पंचानां सूतिकाविधिः "॥
संग्रहे च—
" कन्यकाजनने भ्रातृपितृतद्भ्रातृतत्सुताः। पितामहश्च तद्भ्राता शुध्यंति दशरात्रतः " ॥ इति।
संग्रहान्तरे च—
"पुंसि जाते सपिंडानां स्त्रियां पित्रोः पितुः पितुः। सोदराणां पितृव्याणां तत्सुतानामघं भवेत्"॥ इति।
सोदराणां भ्रातृणामित्यर्थः। सोदरशब्दो भिन्नोदरस्याप्युपलक्षकः। त्रिपुरुषान्तर्वर्तिभिन्नोदराणां सर्वेषामिदं सूतकं समानम्। तत्र विशेषः **स्मर्यते**—

"भिन्नोदरस्य भार्या तु स्त्रीप्रसूता भवेद्यदि। भ्रातुर्दशाहमाशौचं तत्पुत्रस्य न विद्यते"॥ इति।
भिन्नोदरभ्रातृपत्न्याः पुत्र्यां जातायां भिन्नोदरभ्रातुरेवाघं न तत्पुत्रस्येत्यर्थः। यत्तूक्तम**ग्निस्मृतौ**—
" पुंजन्मनि सपिंडानां दशाहाच्छुद्धिरिष्यते। स्त्रीजन्मनि सपिंडानां त्र्यहाच्छुद्धिरिष्यते "॥ इति।
अत्र त्र्यहादित्यापद्विषयं त्रिपुरुषव्यतिरिक्तसमानोदकविषयं वा। यत**स्तत्रैवोक्तम्**—

" त्र्यहादेकोदकानां च एकाहं सोदके क्वचित् " इति। एकाहमिति सगोत्रविषयम्। अत्र कन्यासपिण्डानां भ्रातृपितृपितामहानां तत्सुतानां पितामहभ्रातुश्च दशाहं सूतकम्। कन्यासोदकानां चतुर्थपंचमषष्ठानां त्र्यहं सूतकम्। सप्तमस्य एकाहमिति केचित्। अन्ये तु कन्यासपिंडानां त्रिपुरुषांतर्वर्तिनामेव दशाहं सूतकं सोदकानां नास्ति त्र्यहादेकोदकानामित्येतत्पुंप्रसवविषयमित्याहुः। अत्र यथास्वदेशाचारं व्यवस्था।

अपरे स्त्रीपुंससाधारण्येन मूलस्मृतिषु प्रसवाशौचविधानाच्चंद्रिकास्मृतिरत्नमाधवीय-**विज्ञानेश्वरादिषु** प्रौढनिबंधनेषु चाविशेषेण स्रावादिप्रसवांताशौचविधानादाधुनिकसंग्रहकारोक्त-त्रिपुरुषाशौचे प्रमाणाभावाद्वा त्रिपुरुषं कन्यासापिंड्यनिरूपणस्य कन्यामरणाशौच उपयोगात् स्त्रीप्रसवेऽपि आ सप्तपुरुषसपिंडानां दशाहं सूतकमस्तीत्याहुः। अत्र यथास्वदेशाचारं व्यवस्था।

जननाशौचं द्विविधम्। अस्पृश्यत्वलक्षणं धर्मानधिकारलक्षणं चेति। तत्रास्पृश्यत्वलक्षणं मातुरेव पूर्णमाशौचं पितुरपि स्नानात्पूर्वं नान्येषां सपिंडानाम्। स्नानादूर्ध्वं पितुरस्पृश्यत्वलक्षणं नास्ति। किंतु धर्मानधिकारलक्षणमेव। तथा **पैठीनसिः**—

"जनौ सपिंडाः शुचयो मातापित्रोस्तु सूतकम्। सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिः"॥ इति। अस्यार्थश्चंद्रिकायामुक्तः—"सपिंडस्य जनने पितृमातृव्यतिरिक्ताः सपिंडाः शुचयः। सपिंड-जननिबंधनाशौचे धर्मानधिकारलक्षणे विद्यमानेऽप्यघरूपाभावात् स्पर्शयोग्याः। तत्सद्भावा-न्मातापित्रोरस्पृश्यत्वलक्षणं सूतकं भवति। तत्सद्भावश्च मातापित्रोर्जायमानप्राणिपिण्डहेतुत्वात् तद्धेतुत्वं तज्जनकतया पितुः कथंचित्परंपरया मातुर्गर्भान्निर्गमनानुकूलप्रेरणया साक्षात्। ततश्च गुरुतया स्नानमात्रानपनोद्यं सूतकं मातुरेव स्यात्। न पितुः। स्नानमात्रेण पिता शुचिः। अघनाशात् स्पर्शयोग्यो भवति" इति। तथा च **स्मृत्यंतरम्**—जननेऽप्येतन्मातापित्रोर्मातुरेवास्पर्शनात्मकं नान्येषां ज्ञातीनामिति। मरणे सापिण्डानामस्पृश्यत्वं यथा जननेऽप्येतदस्पृश्यत्वं तथा मातापित्रोरेव भवति। नान्येषां सपिंडानां जायमानप्राणिपिण्डकर्तृत्वरहितानां मातापित्रोर्मध्येऽपि स्नानमात्रानप-नोद्यमस्पर्शी न हेतुभूतमाशौचं मातुरेवेत्यर्थः। **अंगिराः**—"प्राक् स्नानाज्जनने अस्पृश्यः कर्महानि-राशौचवत्" इति। स्नानात्प्राक् पिता अस्पृश्यः। ऊर्ध्वं तु स्पृश्य एव। किं तु कर्महानिः तस्य शाववद्भवतीत्यर्थः। **संवर्त्तः**—

"सचैलं तु पितुः स्नानं जाते पुत्रे विधीयते। माता शुध्येत् दशाहेन स्नातस्य स्पर्शनं पितुः"॥ न दोषावहमित्यर्थः। **आदिपुराणेऽपि**—

"सूतके तु मुखं दृष्ट्वा जातस्य जनकस्ततः। कृत्वा सचैलस्नानं तु स्पृश्यो भवति तत्क्षणात्"॥ इति। **अंगिराः**—

"सूतके सूतिकावर्जं संस्पर्शो न निषिध्यते। संस्पर्शे सूतिकायास्तु स्नानमेव विधीयते"॥ इति। एतद्दशाहांतसूतिकास्पर्शे स्नानमात्रविधानमकामकृतविषयम्। बुद्धिपूर्वस्पर्शे तु स्नानं अग्निस्पर्शो घृतप्राशनं च कर्तव्यम्।

"पतितं सूतिकामंत्यं शवं स्पृष्ट्वा च कामतः। स्नात्वा सचैलं स्पृष्ट्वाऽग्निं घृतं प्राश्य विशुध्यति"॥ इति **स्मरणात्**। यत्तु **बोधायनेनोक्तं** (१।५।१०५-१०६)—"जनने तावन्मातापित्रोर्दशाह-माशौचं मातुरित्येके" इति **एतच्चंद्रिकायां** व्याख्यातम्—अस्पृश्यत्वलक्षणं मातापित्रोर्दशाह-माशौचमित्येतत्पूर्वपक्षत्वेनोक्तमिति तावद् ग्रहणादवगम्यते। तेन मातुरित्येक इत्ययमेव सम्यक्पक्ष इति न पूर्वोक्तविरोध इति **अखंडादर्शे तु विवृतम्**। युगपत्स्त्रीपुंसप्रसवे अस्पृश्यत्वलक्षणमाशौचं मातापित्रोः। अन्यतरप्रसवे मातुरेवास्पृश्यत्वलक्षणमाशौचम्। अथवा मातापित्रोरिति पितुः संसर्ग-विषयम्। पितुरिति पितुरसंसर्गविषयमिति। तथा च **वसिष्ठः** (१६।२३)—

"नाशौचं विद्यते पुंसः संसर्गं चेन्न गच्छति। रजस्तत्राशुचि ज्ञेयं तच्च पुंसि न विद्यते"॥

बृहस्पतिः—

" शावाशौचं तु सर्वेषां सूतकं मातुरेव च । स्नानं प्रकुर्यात्तु पिता स्पृश्यो भवति तत्क्षणात् ॥

" यस्तया सह संसर्गं प्रकुर्याच्छयनासनम् । बांधवो वा परो वापि स दशाहेन शुध्यति " ॥ इति ।

सुमंतुः—"मातुरेव सूतकं तां स्पृशतां च नेतरेषाम्" इति । मातुः सूतिकां स्पृशतां च जनानामस्पृश्यत्वलक्षणं भवति नेतरेषाम् । अस्पृशतां जनानां न भवतीत्यर्थः । **अत्रिः**—

" संपर्काज्जायते दोषः पारक्ये चैव जन्मनि । तद्वर्जनात्पितुरपि सद्यःशौचं विधीयते " ॥ इति । पारक्ये परसंबंधिजनने ।

पराशरः—" ब्राह्मणानां प्रसूतौ तु देहस्पर्शो विधीयते ।

" सर्वेषां शावमाशौचं मातापित्रोस्तु सूतकम् । सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिः" ॥ इति । अस्पृश्यत्वलक्षणं सूतकं मातापित्रोः । तत्रापि दशाहमस्पृश्यत्वं मातुरेव पितुः स्नानपर्यन्तमेवेत्यर्थः । सूतक्या सह संसर्गकरणे तन्निमित्तमस्पृश्यत्वं दशाहमस्तीत्याह **स एव**—

"यदि पत्न्यां प्रसूतायां संपर्कं कुरुते द्विजः । सूतकं तु भवेत्तस्य यदि विप्रः षडंगवित् ॥

" संपर्काज्जायते दोषो नान्यो दोषोऽस्ति वै द्विजे । तस्मात्सर्वप्रयत्नेन संपर्कं वर्जयेद् बुधः ॥

" प्रसवे गृहमेधी तु न कुर्यात्संकरं यदि । दशाहाच्छुध्यते माता त्ववगाह्य पिता शुचिः " ॥ इति । भर्तुः स्नानानंतरसंसर्गनिमित्त एक एव दोषोऽस्पृश्यत्वापादको जायते न तु जननिमित्तको दोषोऽस्ति तस्मात्संपर्कं वर्जयेत् । गृहस्थः सूतिकया सह यदि सहशयनासनभोजनादिकं न कुर्यात् तदा स्नानेनैव स्पृश्यो भवति । माता तु दशाहेन शुद्धा भवतीत्यर्थः । **मनुरपि** (५।६१-६२)—

"सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिः । निरस्य तु पुमांच्छुक्रमुपस्पृश्यैव शुध्यति " ॥ इति । 'उपस्पृश्य पिता शुचिः' इत्येतदुत्तरार्धेनोपपादयति । शुक्रं निरस्य गर्भाधानं कृत्वेति यावदुपस्पृश्य स्नात्वा पिता शुचिः गर्भाधानं कृत्वा तदानीं स्नातस्य पितुरस्पृश्यत्वापादकं जननाशौचमिदानीं तत्स्नानादूर्ध्वं न भवतीत्यर्थः । **याज्ञवल्क्योऽपि** (प्रा. १९)

"पित्रोस्तु सूतकं मातुस्तदसृग्दर्शनात् ध्रुवम् । तदहर्न प्रदुष्येत पूर्वेषां जन्मकारणात् " ॥ इति । अत्र **विज्ञानेश्वरः** (पृ.१७३ पं.२८)—"सूतकं जनननिमित्तमस्पृश्यत्वलक्षणं पित्रोः मातापित्रोरेव । न सर्वेषां सापिंडानां तच्चास्पृश्यत्वं मातुर्ध्रुवं दशाहपर्यंतं स्थिरमित्यर्थः । कुतः तदसृग्दर्शनात्तस्याः संबंधित्वेनासृजो दर्शनात्पितुर्ध्रुवं न भवति स्नानमात्रेणास्पृश्यत्वं न विद्यते । यस्मिन्दिने कुमारजननं तदहर्न दुष्येत तन्निमित्तदानाद्यधिकारापहं न भवतीत्यर्थः । यस्मात्तस्मिन्नहनि पूर्वेषां पित्रादीनां पुत्ररूपेण जन्म उत्पत्तिः तस्मात्तदहर्न प्रदुष्येत" इति । **स्मृत्यर्थसारे**—जनननिमित्तमस्पृश्यत्वं मातुरेव । पितुः स्नानानंतरमस्पृश्यत्वं नास्ति । जनने सपिंडानामस्पृश्यत्वं सर्वदा नास्त्येवेति । **षडशीतौ**—

" यावत्सूतकमस्पृश्या माता प्राक् स्नानतः पिता । अन्येषां तु सपिंडानामस्पृशत्वं न सूतके" ॥ इति ।

यत्तु **संग्रहे**—

"आन्तं शावेऽङ्गसंस्पर्शं त्यजेत्सूतौ चतुर्दिनम् । स्पर्शनाघस्य तु स्नानं कृच्छ्रोऽन्याशौचिनः स्मृतः" ॥ इति

प्रसवे चतुर्दिनमंगस्पर्शवर्जनमुक्तम् । तत्स्नानान्तरक्षणमारभ्य पितुः सर्वदा च सर्वसपिंडानामस्पृश्यत्वलक्षणाशौचाभावं प्रतिपादयन्तीभिः पूर्वोक्तसर्वस्मृतिभिर्विरुद्धत्वादुपेक्ष्यम् ।

यच्चात्र **स्मृत्यंतरमुक्तम्**—

" स्पृष्टस्पृष्टिं भाषणं च सहवासं च वर्जयेत् । अन्याशौचवतां पुंसां न स्पृशेच्च कदाचन ॥

" न स्पृशेयुरनासन्नाः प्रेतस्यासन्नबान्धवान् । जन्मन्यपि विपत्तौ च यावच्चतुरहं भवेत् " ॥ इति तच्चाशौचिनामेवान्योन्यस्पर्शविषयं शब्दतः प्रतीयते । यथा विपत्तौ चतुरहादूर्ध्वमंगस्पर्शस्य कलौ निषिद्धत्वेन चतुरहमित्येतद्युगांतरविषयत्वेन व्यवतिष्ठते तथा जन्मन्यंगस्पर्शस्य विहितत्वेन जन्मनि चतुरहमित्येतदर्थांतरपरमस्तु । कर्तृस्मरणरहितमेतादृशं वचनं प्रसिद्धसकलस्मृतिविरोधादप्रमाणं वा भवतु । यच्च **संवर्त्तेनोक्तम्**—

" सूतके तु यदा विप्रो ब्रह्मचारी विशेषतः । पिबेत्पानीयमज्ञानाद्भुंक्ते वाऽथ स्पृशेत वा ॥

" पानीयपाने कुर्वीत पंचगव्यस्य प्राशनम् । त्रिरात्रोपोषणं भुक्तौ स्पृष्टौ स्नानेन शुध्यति " ॥ इति तत् सूतिकास्पर्शविषयं अस्नातपितृस्पर्शविषयं च ।

"सूतके सूतिकावर्जं संस्पर्शो न निषिध्यते । संस्पर्शे सूतिकायास्तु स्नानमेव विधीयते"॥ इत्यादिना तत्रैव स्नानविधानात् । न च 'संस्पर्शो न निषिध्यते' इत्येतच्चतुरहादूर्ध्वं सपिंडानां स्पर्शनिषेधाभावपरमिति वाच्यम् । सूतिकाव्यतिरिक्तस्पर्शे निषेधाभावमात्रस्य प्रतीतेश्चतुरहादूर्ध्वमित्यत्र विनिगमनाभावात् ' स्पृश्यो भवति तत्क्षणात् ' इत्यादिस्मृतिविरोधापत्तेश्च । ' संस्पर्शे सूतिकायास्तु ' इति स्नानवचनं दशाहानंतरमपि सूतिकास्पर्शे स्नानविधिपरमित्याभिप्रेत्य **संग्रहकारेणो**क्तम्—

" दशाहं दर्शनं वाक्यं सूतिकायास्त्यजेत्ततः । अघान्तं स्पर्शमेवेत्थं पितुस्तं यमलोद्भवे " ॥ इति । दशाहं सूतिकाया दर्शनं वाक्यश्रवणं च वर्जयेत्ततः दशाहानंतरं यावत् सूतकं तावत्स्पर्शमेव त्यजेत् । न तु दर्शनादि । इत्थमघांतं स्वाशौचपर्यंतं दशाहपर्यंतमिति यावद्यमलोद्भवे अपत्यद्वयजनने पितुर्जनकस्य तं स्पर्शं त्यजेत् । पितुः पुत्रजननोत्तरकालस्नानानंतरमस्पृश्यत्वलक्षणाशौचाभावेऽपि यमलोद्भवे दशाहपर्यंतं तदस्तीत्यर्थः । ' सूतकं मातुरेव स्यान्मातापित्रोस्तु सूतकम् ' इति **बोधायन**वचनमेवं व्याकृतम**खंडादर्शे** । युगपत्स्त्रीपुंसप्रसवे मातापित्रोरस्पृश्यत्वलक्षणं दशाहमाशौचमिति । एवं शिष्टाचारानुसारेण मातुर्दशाहानंतरमपि यावदाशौचमस्पृशत्वमुक्तं **संग्रहे**— ' अघांतं स्पर्शमेव ' इति । **स्मृतिरत्ने** तु—' जनौ सपिंडाः शुचयः ' इति **पैठीनसि**वचनं व्याख्यातम् । जन्मनि सर्वे सपिंडाः स्पृश्याः पिता स्नानेन स्पृश्यः । माता तु दशाहांते स्पृश्या भवतीति । ' माता शुध्येद्दशाहेन स्नातस्य स्पर्शनं पितुः ' इति **संवर्त्त**वचनम् । **चंद्रिकायां** माता दशाहेन स्पर्शनादियोग्या भवतीत्यर्थ इति ।

तत्रैव—" द्विजाते सूतिकाया स्यात् स दशाहेन शुध्यति " इति **पारस्कर**वचनं व्याख्यातम् । अस्पृश्यत्वादिहेतुभूतं दशाहपर्यंतं दानादिधर्मानाधिकारलक्षणं तु पुत्रजनन्यां विंशतिरात्रपर्यंतं स्त्रीजनन्यां मासपर्यंतमिति ।

" सूतकं मातुरेव स्यादुपस्पृश्य पिता शुचिः । माता शुध्येद्दशाहेन " इति **पराशर**वचं **माधवीये** व्याख्यातम् । दशाहमस्पृश्यत्वं मातुः पितुः स्नानपर्यंतमेवेति ।

"पित्रोस्तु सूतकं मातुस्तदसृक्दर्शनात् ध्रुवम्" इति (प्रा. १८) **याज्ञवल्क्य**वचनं व्याख्यातं **विज्ञानेश्वरेण**—"सूतकं जन्मनिमित्तमस्पृशत्वलक्षणं मातापित्रोरेव न सर्वेषां सपिंडानां तच्चास्पृश्यत्वं मातुर्दशाहपर्यंतं स्थिरमिति" । स्पष्टमेवाह **व्यासः**—

" सूतके तु सपिंडानां संस्पर्शो नैव दुष्यति । स्पृश्याः स्युः सर्व एवैते स्नानान्मातुर्दशाहतः " ॥ इति **ब्राह्मे**ऽपि—

" ब्राह्मणी क्षत्रिया वैश्या प्रसूता दशभिर्दिनैः । दिनैः शूद्रा च संस्पृश्या त्रयोदशभिरेव च " ॥ इति ।

---

१ क्ष–अत्र ।

यत्तु कैश्चिदुक्तम् "सूतके सूतिकावर्ज्यं संस्पर्शो न निषिध्यते" इति **स्मरणात्** दशाहात्परमपि सूतिकायाः स्पर्शो न कर्तव्य इति तन्न। उक्तानेकस्मृत्यनुसारेणास्य वचनस्य दशाहाभ्यंतरे सूतिकास्पर्शनिषेधविषयत्वे नोपपत्तेः। 'अघांतं स्पर्शमेव' इति **शतकक्रुद्वचनं** देशाचारमूलमिति सिद्धम्।

आशौचिनामन्योन्यस्पर्शनिषेधः। आशौचिनामन्योन्यस्पर्शं निषेधति **भृगुः**—

"शावाशौचे समुत्पन्ने सूतके च द्विजातिभिः। अन्याशौचवतां स्पर्शो न कर्तव्यो द्विजन्मनाम्॥
"आशौचेऽप्यन्यदाशौचं स्पृशेद्यदि च कामतः। चरेत्सांतपनं कृच्छ्रं प्राजापत्यमकामतः॥
"सूतके शावसंस्पर्शे मत्या कृच्छ्रद्वयं चरेत्। अमत्या कृच्छ्रमेकं स्यादित्युवाच बृहस्पतिः"॥

स्मृत्यंतरे तु—

"परस्याशौचिनः स्पर्शे शावाशौचं कथं भवेत्। मत्या सांतपनं कुर्यादमत्या तु तदर्धकम्॥
"अस्थिसंचयनादर्वागेवं शुद्धिर्विधीयते। ऊर्ध्वं त्रिरात्रं विज्ञेयममत्या तु दिनं भवेत्"॥ इति।

शावाशौचे तु आशौचरहितेन यावदाशौचं आशौचिस्पर्शो न कर्तव्यः "मरणे यावदाशौचं तत्संस्पर्शो निषिध्यते" इति **स्मरणात्**।

एकाशौचवतामपि चतुर्दिनपर्यन्तं परस्परस्पर्शं निषेधत्याश्व**लायनः**—

"अस्थ्नां संचयनादर्वाक् तत्सपिण्डाः परस्परम्। न संस्पृशेयुरङ्गानि पुत्राश्च प्रागदशाहतः॥
"अक्षतेऽपि चतुर्थेऽह्नि सति संचयने यदि। परस्परं सपिण्डानामङ्गस्पर्शो विधीयते॥
"सपिण्डाः पञ्चमाहादि स्पृशेयुस्तु परस्परम्। स्वाशौचकालाद्विज्ञेयं स्पर्शनं तु त्रिभागतः॥
"दशाहादित्रिभागेन कृते संचयने क्रमात्। अंगस्पर्शनमिच्छंति वर्णानां तत्त्ववेदिनः॥
"चतुर्थे पंचमे वाऽन्हि संस्पर्शः कथितो बुधैः"॥ इत्यादीनि **व्यासदेवलादि**वचनानि युगांतरविषयाणि। "अस्थिसंचयानदूर्ध्वमंगस्पर्शनमेव च" इति कलियुगनिषिद्धधर्मेषु **स्मरणात्**।

यत्त्वं**गिरसोक्तम्**— "नाशौचं सूतके प्रोक्तं सपिंडानां क्रियावताम्" इति अस्यार्थः—क्रियावतां जन्मदाख्यदेवताप्रीत्यर्थं पूजादिक्रियावतां पित्रादिसपिंडानां जन्मदाख्यदेवतायागानुष्ठानसमये कर्मानधिकारलक्षणमाशौचं नास्तीति। तथा च **व्यासः**—

"सूतिकावासनिलया जन्मदा नाम देवताः। तासां यागनिमित्तं तु शुद्धिर्जन्मनि कीर्तिताः॥
"प्रथमे दिवसे षष्ठे दशमे चैव सर्वदा। रात्रिष्वेतेषु कुर्वीत पुत्रजन्मनि सूतके॥
"षष्ठेऽह्नि यागं दानं च जन्मदानां तु कारयेत्"॥ पूजादानार्थं तेषु दिनेषु तत्समये शुद्धिरित्यर्थः।

मार्कंडेयः—

"रक्षणीया तथा षष्ठ्यां निशायां तु विशेषतः। रात्रौ जागरणं कार्यं जन्मदानां तथा बलिः॥
"पुरुषाः शस्त्रहस्ताश्च तत्र गीतैश्च योषितः। रात्रौ जागरणं कुर्युर्दशम्यां चैव सूतके"॥ इति।

बृहस्पतिः—

"जन्मतः पंचमं तारं याते चंद्रे शिशुं पिता। भूषयेद्भूषणैः सर्वैः पंचायुधसमन्वितैः॥
"विशेषात्कन्यकायाश्च कर्तव्यं मंगलं तथा। तत्र सायुधमा कल्पमायुः श्रीकांतिदं शिशोः"॥ इति।

नारदश्च—

"जननात्सप्तमे चाह्नि मृत्युरायाति घातुकः। तद्दिने चैव रक्षेयं कर्तव्यायुर्विवृद्धये॥
"सायान्हे पूज्यविघ्नेशमपूपैश्च पृथग्विधैः"॥ **मार्कण्डेयः**—

"अग्न्यंबुहीने च तथा निर्धूमे सूतिकागृहे। अदीपशस्त्रमुसले भूतिसर्षपवर्जिते॥

" क्षणप्रध्वंसिनी बालमपहंत्यात्मसंभवम् । सा जातहारिणी नाम तद्रक्षेत्सूतिकागृहम् " ॥ इति । **प्रथमदिने** जातकर्मादिनिमित्ता शुद्धिर्भवति । तथा च **वृद्धयाज्ञवल्क्यः**—

" कुमारजन्मदिवसे विप्रैः कार्यः प्रतिग्रहः । हिरण्यभूगवाश्वाजवासोधान्यधनादिषु ॥
"तत्र सर्वं प्रतिग्राह्यं कृतान्नं तु न भक्षयेत् । भक्षयित्वा तु तन्मोहात् द्विजश्चांद्रायणं चरेत्" ॥

इति **प्रसवाशौचम् ।**

दशाहान्तर्गतशिशुमरणाशौचम् ।

अंतर्दशाहं जातमृतौ मृतजनने च सपिंडानां सद्यःशौचमाह **बृहद्विष्णुः**—" जाते मृते मृते जाते कुलस्य सद्यःशौचम् " इति ॥

शंखोऽपि—" प्राङ्नामकरणात्सद्यःशौचम् " इति । **पारस्करः**—" जीवन् जातो यदि प्रेयात्सद्य एव विशुध्यति " इति । **कात्यायनोऽपि**—

" अनिवृत्ते दशाहे तु पंचत्वं यदि गच्छति । सद्य एव विशुद्धिः स्यान्न प्रेतं नोदकक्रिया"॥ इति ।

'न प्रेतं नैव सूतकम्' इति पाठांतरम् । तदग्रे वक्ष्यते । मातापित्रोस्तु दशाहमुक्तं **वरदराजीये**—

" मृतजाते जातमरणे वा सर्वास्ववस्थासु मातापित्रोर्दशाहमाशौचम् " । तथा च **बृहस्पतिः**—

" जातमात्रे मृते वाऽपि दशाहात्पितरौ शुची । कृते नाम्नि सनाभीनां दशरात्रमघं भवेत् ॥
" भिन्नोदराणां भ्रातॄणां जातदंते मृते त्वघम् । दशाहं कृतचौले तु दत्तादीनां विधीयते "॥ इति ।

पिंगलोऽपि[१]—"जात उभयोः कृते नाम्नि सोदराणां भ्रातॄणाम् " इति । पितृव्यतिरिक्तज्ञातीनां सद्यःशौचविधानं शिशुमरणनिमित्तस्याशौचस्य स्नानाच्छुद्धिप्रतिपादनपरम् । न प्रसवनिमित्तस्य । तत्तु दशाहमस्ति । तथा च **बृहन्मनुः**—

" दशाहाभ्यंतरे बाले प्रमीते तस्य बांधवैः । शावाशौचं न कर्तव्यं सूत्याशौचं विधीयते" ॥इति ।

बांधवैः सपिंडैः शावाशौचं न कर्तव्यं पितृवद्दीर्घकालं न कर्तव्यं किं तु सद्य एव । सूत्याशौचं तु दशाहं विधीयते इत्यर्थः । **विज्ञानेश्वरोऽपि**—मृतजनने जातमृतौ च सपिंडानां जनननिमित्तमाशौचं परिपूर्णम् । जातमृते मृतजाते वा सपिंडानां दशाहमिति **हारीतस्मरणा**दिति । **पारस्करोऽपि** (   )—" अंतःसूतके चेदोत्थानादाशौचं सूतकवत् " इति । आ उत्थानात् आ सूतिकाया उत्थानाद्दशाहमिति यावत्सूतकवदिति । शिशूपरतिनिमित्तोदकदानवर्ज्यमित्यर्थः । **आपस्तंबोऽपि** (१।५।१६।१९-२०)—"अंतःसूतिके चोत्थानाशौचं सूतकवन्मृते तस्मिन्नेव बाले तु सद्यःशौचं नात्रोदकम्" इति । अस्यार्थः । यस्मिन् जाते सूतकं प्रवृत्तं तत्सूतकमध्ये तस्मिन्नेव बाले मृते मातापित्रोः सूतकवत् ओत्थानादाशौचं सपिंडानां जनननिमित्तमोत्थानान्मरणनिमित्तं पित्रादीनां न प्रेतायोदकदानमित्यर्थः । **व्याघ्रोऽपि**—

" अंतर्दशाहे जातस्य मरणं यदि संभवेत् । सद्यःशौचं सपिंडानां सूतकं तु प्रवर्तते ॥
" गर्भे यदि विपत्तिः स्याद्दशाहं सूतकं भवेत् । मृतके स्नानतः शुद्धिः सपिंडानां च सर्वशः "॥ इति ।

अत्र **विज्ञानेश्वरः** (पृ. १७६ पं. ९)—" एवमादिवचनपर्यालोचनया जननिमित्ताशौचसंकोचो नास्तीत्यवगम्यते " इति ।

नन्वेवं दशाहं जनननिमित्ताशौचस्य सत्त्वे मरणनिमित्ताशौचस्य निषेधे कोऽतिशयः । उच्यते " सद्यःशौचे तु तावत्स्यादाशौचं संस्थितस्य तु । यावत्स्नानं न कुर्वन्ति " इति शिशूपरमनिमित्तं तत्कालस्नानं एकोतिशयः । दशाहपर्यंतमस्पृश्यत्वाभावोऽपरः । तारतम्यं च **स्मर्यते**—

---

१ खग-पैङ्गलेऽपि ।

"सूतकात् द्विगुणं शावं शावात् द्विगुणमार्तवम्। आर्तवात् द्विगुणं सूतिस्ततोऽपि शवदाहकम्" ॥ इति। किं च सपिंडानां जननिमित्ताशौचवन्मरणनिमित्तस्यापि दशाहमभ्युपगमे दशमदिनमृतौ तदूर्ध्वमपि शावाशौचप्रसंगः। तथाहि—

"अनिर्दशाहे जनने पश्चात्स्यान्मरणं यदि। प्रेतमुद्दिश्य कर्तव्यं तत्राशौचं स्वबंधुभिः" ॥ इति **अंगिरःस्मरणेन** जन्मदिनादूर्ध्वं द्वितीयादिदिने शिशुमरणे दशाहादूर्ध्वमपि प्राप्तस्य मरणाशौचस्य

"अंतर्दशाहे जातस्य शिशोर्निष्क्रमणं यदि। सूतकेनैव शुद्धिः स्यात्पित्रोः शातातपोऽब्रवीत्॥

"दशाहाभ्यंतरे बालः कदाचिन्म्रियते यदि। शावाशौचं न कर्तव्यं सूत्याशौचेन शुध्यति॥

"दशाहांतर्गते बाले शुद्धिः स्याज्जन्मना सह"। "अंतर्दशाहोपरतस्य सूतिकाहोभिरेवाशौचम्" इति **व्याघ्रयमशंखस्मृ**तिवचनैर्यद्यपि बाधः सिध्यति तथापि "तच्चेदंतःपुनरापतेत्तच्छेषेण शुध्येरन्। रात्रिशेषे द्वाभ्याम्। प्रभाते तिसृभिः" इति **गौतमस्मरणात्** (१४।५–७) सूतकांतिमदिने शिशुमृतौ तत्परं द्व्यहमाशौचम्। प्रभातमरणे त्र्यहं च पित्रोरिव पूर्णाधित्वे सपिंडानामपि प्रसज्येत। तस्माज्जननिमित्तपूर्णाशौचस्य मरणनिमित्तस्य सद्यःशौचस्य च महान्फलभेदः।

अत एव **संग्रहे**—

"सूतकांतस्तु जातस्य मृतौ शिष्टाहमिष्यते। पितुस्तु द्व्यहमंत्याहे तत्प्रभाते त्र्यहं भवेत्" ॥ इति। अयमर्थः। सूतकमध्ये जातस्य मृतौ सपिंडानां जननिमित्तमघं शिष्टाहं भवति। मरणनिमित्तं तु सद्यः। "जात उभयोः" इति **स्मरणा**त्। जातशिशुमृतौ तु पित्रोः सदा पूर्णाधित्वेऽपि "सूतकेनैव शुद्धिः स्यत्पित्रोः शातातपोऽब्रवीत्" इति वचनबलात्सूतकशेषेणैव मरणाशौचस्यापि निवृत्तिः। सूतकांतिमदिने तन्मृतौ तत्परं पितुर्द्व्यहमाशौचं प्रभाते अरुणोदयकाले त्र्यहम्। यद्यपि मातुरप्येवं तथापि तस्याः दशाहात्परमपि सूतकस्य सत्त्वात्पितृमात्रद्व्यहत्र्यहविधानम्। अत्र तुशब्दो ज्ञातीनां द्व्यहत्र्यहविधिनिवर्तकः। पितृग्रहणाद्भ्रातृव्युदासः। 'कृते नाम्नि सोदराणाम्' इति दशाहात्परमेव भ्रातुः मरणाशौचविधानादिति। यत्तु सोदराणामपि दशाहाशौचमुक्तं **व्याघ्रेण**—

"बाले मृते सपिंडानां सद्यःशौचं विधीयते। दशाहेनैव दंपत्योः सोदराणां तथैव च"॥ इति तद्दशाहानंतरबालमरणविषयम्। **चंद्रिकायां** तु दशाहेनेति जन्मदिनमृतबालमरणविषयम्। जन्मदिनादूर्ध्वं मृतबालविषयेऽपि **व्याघ्रः**—

"अंतर्दशाहे जातस्य शिशोर्निष्क्रमणं यदि। सूतकेनैव शुद्धिः स्यात् पित्रोः शातातपोऽब्रवीत्" ॥इति। पित्रोरिति सोदरभ्रातॄणामुपलक्षणार्थम्। यत्तु **पैंगव**ऋषिवचनम्—"जात उभयोः कृते नाम्नि सोदरभ्रातॄणां च" इति तत्र कृते नाम्नीति नामकरणदिनस्य दशमस्योपलक्षणार्थम्। एवं चायमर्थः— जाते शिशौ जन्मदिने प्रेते मातापित्रोः सोदरभ्रातॄणां च दशाहमाशौचम्। कृते नाम्नि नामकरणदिने दशमे वा मृते सति पूर्वोक्तानामेवाहोरात्रमाशौचमिति।

तथा च **शंखः**—"दशमान्तर्गते बाले शुद्धिः स्याज्जन्मना सह"। अयमर्थः—दशमांतर्दशाहमध्ये बाले गते प्रेते जन्माशौचशुध्या सह मातापित्रोः सोदरभ्रातॄणां च शुद्धिः स्यादिति ओत्थानादाशौचमिति वदन् **आपस्तंबोऽपि** अंतःसूतके दशमदिनेऽपि शिशुमरणे तद्दिन एवाशौचं न पुनरहःशेषे द्वाभ्यां प्रभाते त्र्यहमित्यादिको विशेषोऽत्रेति दर्शयतीति। एवं च जन्मदिने शिशुमरणे पित्रोः सोदरभ्रातॄणां च मरणनिमित्तमाशौचं दशाहं द्वितीयादिदिनेषु दशमदिनेऽपि मरणे शिष्टाहमेवाशौचम्। प्रसवाशौचेनैव सर्वदा शुद्धिरिति **चंद्रिकोक्तनिष्कर्षः**।

स्मृतिरत्नमाधवीयादौ भ्रातॄणां **व्याघ्र**वचनानुसारेणाशौचमुक्तम् । यथादेशाचारमत्र व्यवस्था । तदेवं मरणाशौचं सपिण्डानां सद्यः पित्रोर्दशाहं जननाशौचं सर्वेषां दशाहमिति स्थितम् । अत्र **विज्ञानेश्वरः** । (पृ. १७६ पं. १९–२५) यत्तु **बृहन्मनु**वचनम्—

" जीवन् जातो यदि ततो मृतः सूतक एव तु । सूतकं सकलं मातुः पित्रादीनां दिनत्रयम्"॥ इति यच्च **बृहत्प्रचेतो**वचनम्—

"मुहूर्तं जीवितो बालः पंचत्वं यदि गच्छति । मातुः शुद्धिर्दशाहेन सद्यःशौचास्तु गोत्रिणः "॥ इति तत्रैवं व्यवस्था । जननानन्तरं नाभिकर्तनात्प्राङ्मृतौ पित्रादीनां जनननिमित्तमाशौचं दिनत्रयम् । सद्यःशौचं अग्निहोत्रार्थं स्नानोपस्पर्शनात्तत्कालं शौचमिति **शंख**वचनात् । नाभिवर्धनोत्तरकालं तु शिशुप्रायणे जनननिमित्तमाशौचं संपूर्णं सपिंडानाम् ।

"यावन्न च्छिद्यते नालं तावन्नाप्नोति किल्बिषम् । छिन्ने नाले ततः पश्चात्सूतकं तु विधीयते "॥ इति **जैमिनि**स्मरणात् ।

चंद्रिकायामपि जन्मनि पित्रादिसपिंडानामपि त्रिरात्रमाह **वृद्धमनुः**—"जीवन् जातो यदि ततः"इति । **अयमर्थः**—जीवन् जातः शिशुर्यदि नाभिच्छेदात्पूर्वं मृतस्तदा स्वजात्युक्तं सूतकं मातुः पूर्णमेव पित्रादिसपिंडानां त्रिरात्रमिति । **यद्बृहत्प्रचेतसो** वचनम्—"मुहूर्तं जीवितो बालः पंचत्वं यदि " इति तत्सद्यःशौचमग्निहोत्रानुष्ठातृविषयम् । " अग्निहोत्रार्थं ० स्नानोपस्पर्शनात्तत्कालं शौचम् " इति **शंख**स्मरणात् । यत्तु **हारीतेनोक्तम्**—" जातमृते मृतजाते वा सपिंडानां दशाहम् " इति । सूतकमिति शेषः । अत्र जातमृते यद्दशाहमुक्तं तज्जातस्य शिशोर्नाभिच्छेदादूर्ध्वं मरणे वेदितव्यम् । **बृहन्मनु**वचनसमानविषयत्वेऽन्योन्यविरोधापत्तेः । मृतजातविषये तु दशाहमेव सूतकं **पारस्करेणाप्युक्तम्**—

" गर्भे यदि विपत्तिः स्यात् दशाहं सूतकं भवेत् " इति । सपिंडानामिति शेषः । यत्तु

"पुत्रो जातो यत्र मृतो मृतो वा सूयते यदि । सूतकं मातुरेव स्यात् पित्रादीनां दिनत्रयम्" ॥ इति तदेतन्मृतजातस्य त्रिरात्रसूतकं वृत्तस्वाध्यायोपेतपित्रादिविषयम् । एतच्च वृत्तस्वाध्यायोपेतपित्रादेरपि कलौ न कार्यम् " वृत्तस्वाध्यायसापेक्षमघसंकोचनं तथा " इति **कलौ** निषेध**स्मरणा**दिति ।

एवं च नाभिच्छेदात्पूर्वं जातमरणे त्रिरात्रं नाभिच्छेदादूर्ध्वं जातमरणे मृतजाते च दशरात्रमिति निर्णयः । तथा च **स्मृत्यर्थसारे**—"नाभिच्छेदादूर्ध्वं शिशुमरणे निष्प्राणशिशुनिर्गमे च जनननिमित्ताशौचं कृत्स्नं यथावर्णं सर्वेषां सपिंडानामस्त्येव । मरणनिमित्ते सद्यःशुद्धिः । " नाभिच्छेदात्पूर्वं शिशुमरणे तु जनननिमित्ताशौचं सपिंडानां त्रिरात्रम् । मरणनिमित्ते सद्यःशुद्धिः " इति **स्मृतिरत्नेऽपि** ।

बृहन्मनुः—

" दशाहाभ्यंतरे बाले प्रमीते तस्य बांधवैः । शावाशौचं न कर्तव्यं सूत्याशौचं विधीयते " ॥ एतत् नाभिच्छेदादूर्ध्वं वेदितव्यम् । तथा च **जैमिनिः**—

"यावन्न छिद्यते नालं तावन्नाप्नोति किल्बिषम् । छिन्ने नाले ततः पश्चात् सूतकं तु विधीयते"॥ इति । नाभिच्छेदात्प्राक्तु **बृहन्मनुराह**—"जीवन् जातो यदि ततः ० त्रिरात्रकम्" इति । यत्तु **बृहत्प्रचेताः**—" मुहूर्तं जीविते बालः ० गोत्रिणः" इति । अत्र सद्यःशौचविधानमग्निहोत्राद्यनुष्ठानार्थं तात्कालिकशुद्धिप्रतिपादनपरम् । 'अग्निहोत्रार्थमिति' **शंख**स्मरणात् । यद्वा 'मुहूर्तं जीवित' इति

सद्यःशौचविधानं पित्रादीनां सपिंडानां नाभिच्छेदात्पूर्वं शिशुमरणे मरणनिमित्तकं जनननिमित्तं तु दिनत्रयमस्त्येवेति। तथा च **पारस्करः**—

"नाभिकृन्तनतः पूर्वं शिशोर्निष्क्रमणं यदि। जाताशौचं सपिंडानां त्रिरात्रमिति निश्चयः॥

"पित्रोस्तु मरणाशौचं सद्य एव सपिंडवत्। नाभिकृंतनतः पश्चाद्दशाहं सूतकं भवेत्"॥ इति।

षडशीतौ—

"नाभिकृंतनतः पूर्वं शिशौ प्रेते तु सूतकम्। मातुः पूर्णमतोऽन्येषां पितुश्च त्रिदिनं समम्॥

"छिन्ननाभेः शिशोर्मृत्यौ मृतस्य प्रसवेऽपि च। मातुश्च गोत्रिणां चैव सर्वेषां पूर्णसूतकम्"॥ इति।

माधवीयेऽप्ययमेवार्थः प्रपंचितः।

यत्तु केश्चिदुक्तम्। त्र्यहविधेर्नाभिच्छेदात्पूर्वविषयत्वाप्रतीतेर्वचनांतराभावादनुदाहृतत्वाच्च बहुस्मृतिविरोधाच्च नेयं व्यवस्थोपपद्यते। अतो नेदं त्र्यहविधिवचनमादरणीयमिति। तन्न।

"यावन्न छिद्यते नालं तावन्नाप्नोति सूतकम्। छिन्ने नाले ततः पश्चात्सूतकं तु विधीयते"॥ इति

"छिन्नायामाशौचम्" इति **जैमिनिहारीता**दिवचनैर्नाभिच्छेदादूर्ध्वं सूतकप्राप्तिविधानाज्जातमृते दशाहाशौचविधायकवचनस्य च नाभिच्छेदोत्तरकालमरणविषयत्वोपपत्तेः। त्र्यहविधायक**वृद्धमनु**वचनस्य चाबाधेन नाभिच्छेदात्पूर्वकालमरणविषयत्वेनोपपत्तेः। न च नाभिच्छेदात्प्राक् सूतकप्रायसंभवे न त्र्यहविध्यनुपपत्तिः। वचनप्राप्तस्य बाधायोगात्। अतः परस्पराविरोधेन विषयव्यवस्थैव प्रदर्शनीया। सा च प्रदर्शिता **विज्ञानेश्वरा**दिभिः। वचनांतराभावोऽप्यसिद्धः। "नाभिकृंतनतः पूर्वं शिशोर्निष्क्रमणं यदि" इत्यादिवचनजातस्य सुगमत्वात्।

'यच्चोक्तं पित्रादीनां दिनत्रयम्' इत्यनेन **वृद्धमनु**वचनेन जातमरणे त्र्यहमस्पृश्यत्वं विधीयते इति तदपि न। "पित्रोस्तु मरणाशौचं सद्य एव सपिंडवत्" इति नाभिच्छेदात्पूर्वमरणे तन्निमित्तस्य सद्यःशौचस्य विधानात् तदुत्तरमरणे च सपिंडानां सद्यःशौचविधानाज्जनननिमित्तास्पृश्यत्वलक्षणाशौचस्य च निरस्तत्वान्नाभिकृंतनतः पूर्वमित्यादिवचनानुग्रहाच्च त्र्यहविधानस्यास्पृश्यतामात्रविषयत्वानुपपत्तेः। अतो नाभिच्छेदात्पूर्वं शिशुमरणे जनननिमित्ताशौचं पित्रादीनां सपिंडानां त्रिरात्रमरणनिमित्तं सद्यःशौचम्। नाभिच्छेदादूर्ध्वं शिशुमरणे निष्प्राणशिशुनिर्गमने च जनननिमित्ताशौचं पूर्णं मरणनिमित्तं पितृव्यतिरिक्तानां सद्यःशौचम्। पित्रोस्तु दशाहमिति युक्तम्। यत्तु **कात्यायनोक्तम्**—

"अनिवृत्ते दशाहे तु पंचत्वं यदि गच्छति। सद्य एव विशुद्धिः स्यान्न प्रेतं नैव सूतकम्"॥ इति

एतत् **विज्ञानेश्वरेण** व्याख्यातम् (पृ. १७६ पं. १६)—"सूतकमस्पृश्यत्वं नैव पित्रादीनां भवतीत्यर्थः। अथवा अयमर्थः—अंतर्दशाहे यदि शिशूपरमस्तदा न प्रेताशौचम् यदि तत्र सापिंडजननं तदा सूतकमपि नैव कार्यं किंतु पूर्वाशौचेनैव शुद्धिरिति"॥

चंद्रिकायां तु—"यत्तु **शाकटायनेनोक्तः**—

"बालस्त्वन्तर्दशाहे तु प्रेतत्वं यदि गच्छति। सद्य एव विशुद्धिः स्यान्नाशौचं नैव सूतकम्"॥ इति तन्मातुलादिविषयम्। ततश्चायमर्थः। न मातुलादिबंधूनामिह कालापनोयशावाशौचं सूतकं वा किंतु तन्निमित्तमप्रायत्यं स्नानमात्रेण नश्यति" इति। एवं च यदुक्त**मखण्डादर्शे**—'निमित्ताभावान्नैमित्तिकस्याप्यभावः' इति **न्यायेन** निमित्तभूतस्यायुषि सति सपिंडानामाशौचं स्यात्तस्मिन्नष्टायुषि सति कस्य केन निमित्तेनाशौचं भवति तस्मात्तस्मिन्नष्टे सत्याशौचमपि नष्टं स्यात्। अतो नास्त्याशौचं

सपिंडानामिति। तद्दशाहाभ्यंतरे बाल इत्यादिपूर्वोक्तवचननिचयबलादुपेक्षणीयमेव इति। **इति दशाहांतर्गतशिशुमरणाशौचम्।**

अथ **दशाहोपरितनशिशुमरणाशौचम्**। तत्र **मनुः** (५।७७, ६६)—

"बाले देशांतरस्थे च पृथक् पिंडे च संस्थिते। सवासा जलमाप्लुत्य सद्य एव विशुध्यति॥

"नृणामकृतचौलानामशुद्धिर्नैशिकी स्मृता। निवृत्तचौलकानां तु त्रिरात्राच्छुद्धिरिष्यते"॥ (६६)

अनयोरयमर्थः—बाले अजातदंते षाण्मासिक इति यावत्संस्थिते मृते सपिंडः सद्य एव विशुध्यति। देशांतरस्थे च पृथक्पिंडे समानोदके संस्थिते स्वाशौचकालादूर्ध्वं श्रुत्वा सद्यः शुध्यति। अकृतचौलानामप्राप्ततृतीयवर्षाणां षष्ठमासादूर्ध्वं मरणे ज्ञातीनामशुद्धिर्नैशिकी। आशौचमेकरात्रम्। निर्वृत्तचौलानां प्राप्ततृतीयवर्षाणां सप्तमवर्षात्प्राङ्मरणे त्रिरात्रमाशौचमिति। तथा च **याज्ञवल्क्यः** (प्रा. २३)—

"आ दंतजन्मनः सद्यः आ चौलान्नैशिकी स्मृता। त्रिरात्रमा व्रतादेशाद्दशरात्रमतः परम्"॥

खननेऽहस्त्र्यहं दाहे त्यागे च चौलं चूडाकर्मव्रतादेश उपनयनम्।

शंखोऽपि—"अजातदंते तनये सद्यःशौचं विधीयते। अहोरात्रात्तथा शुद्धिर्बाले त्वकृतचूडके॥

"तथैवानुपनीते तु त्र्यहाच्छुध्यन्ति बांधवाः"॥ इति। **व्यासोऽपि**—

"आ दंतजन्मनः सद्यः आ चौलादेकरात्रकम्। त्रिरात्रमोपनयनाद्दशरात्रं ततः परम्"॥ इति।

खननादिसंस्कारभेदेनाशौचभेदः। अत्र खननादिसंस्कारभेदेनाशौचव्यवस्था दर्शिता **संग्रहे**—

"चौलात्परं भवेद्दाहो नाम्नः प्राक् खननं परम्। दाहो वा खननं दन्तात्परं त्यागः स वा स तत्॥

"दाहेऽहः खनने सद्यो दंतोत्पत्तेरधःपरम्। खननेहस्त्र्यहं दाहे त्यागे च त्र्यहमिष्यते"॥ इति।

चौलात् त्र्यब्दाद्वा परं मृतस्य दाह एव संस्कारः। नाम्न एकादशाहाद्वा प्राङ्मृतस्य खननमेव संस्कारः। एकादशाहात्पश्चाद्दंतजननात्पूर्वं खननं वा दाहो वा विकल्पेन स्यात्। दंतजननात्षष्ठमासाद्वा परं मृतस्य खननं दाहः त्यागो वा संस्कारः। तत्र दंतोत्पत्तेरर्वाङ्मृतस्य दाहे सपिंडानामाहः अहोरात्रमाशौचम्। अत्र खनने सद्यःशौचम्। दंतोत्पत्तेः परं तु खननपक्षे अहोरात्रम्। दाहपक्षे त्यागपक्षे च त्र्यहमघं भवतीत्यर्थः।

अत्र **विष्णुः** (२२।२६–२८)—"अदन्तजाते बाले प्रेते सद्य एव। नास्याग्निसंस्कारो नोदकक्रिया च। दंतजाते त्वकृतचौले त्वहोरात्रेण" इति।

चंद्रिकायाम्—

"स्त्रीणां तु पतितो गर्भः सद्यो जातो मृतोऽथ वा। अजातदंतो मासैर्वा मृतः षड्भिर्गतैस्तथा॥

"वस्त्राद्भिर्भूषितं कृत्वा न्युप्तव्यः स तु काष्ठवत्। खनित्वा तु शनैर्भूमौ सद्यःशौचं विधीयते॥

"जातदंतं मृतं खात्वा चरेदेकाहमेव तु"॥ **अंगिराः**—

"अनुजातस्य तावत्स्यादाशौचं संस्थितस्य तु। यावत्स्नानं न कुर्वन्ति सचेलं बांधवा बहिः"॥ इति।

अनुजातो जातदंताद्बालतरः। अनुत्पन्नदंत इत्यर्थः। **जमदग्निः**—

"यो नामकरणात्पूर्वं पंचत्वमुपगच्छति। गर्त एवोपगुह्यैनं स्नानाच्छुध्यन्ति गोत्रिणः॥

"नामक्रियाया ऊर्ध्वं तु बालो यदि भवेन्मृतः। सद्यःशौचं सपिंडानां भूमौ निखनने कृते॥

"दहेद्वा काष्ठवद्बालं क्षिपेदेकाहमेव तु।

"चूडीकृतेऽकृते वाऽपि जातदंतो मृतो यदि। आ त्रिवर्षात्तु दहने त्रिरात्रेणैव शुध्यति॥

" खनने नैशिकी शुद्धिः सपिंडानां विधीयते " ॥ इति।

यत्तु **यमवचनम्**—

" अदंतजाते तनये शिशौ गर्भच्युते तथा। सपिंडानां तु सर्वेषामहोरात्रमशौचकम् " ॥ इति। यदप्याश्वलायनवचनम्-"अदंतजाते पर्यति चैकरात्रम्" इति। पर्याते मृते। यदपि **देवरातवचनम्**- " नाम्नो दंतोद्गमाच्चौलाद्उपनीतेरधः क्रमात्। सद्यःशौचमहस्त्र्यहो नियताग्न्युदकः परः " ॥ इति

यदपि **संग्रहवचनम्**—" प्राङ्नामकरणात्सद्य एकाहो दंतजन्मनः " इति। दंतोत्पत्तेः पूर्वमेकाहाशौचविधायकमेतादृशं वचनं दाहनविषयमिति **स्मृतिरत्ने**ऽभिहितम्।

नन्वत्राग्निसंस्कारं निषेधति **पराशरः** (३।१६)

" अजातदंता ये बाला ये च गर्भाद्विनिसृताः। न तेषामग्निसंस्कारो नाशौचं नोदकक्रिया " ॥ इति। **मनुरपि** (५।६७–६९)—

" ऊनद्विवार्षिकं प्रेतं निदध्युर्बांधवा बहिः। अलंकृत्य शुचौ भूमौ अस्थिसंचयनादृते ॥

" नास्य कार्योऽग्निसंस्कारो नापि कार्योदकक्रिया[1]। अरण्ये काष्ठवत् त्यक्त्वा क्षपयेत्र्यहमेव तु ॥

" नात्रिवर्षस्य कर्तव्या बांधवैरुदकक्रिया " इति। ऊनद्विवार्षिकं अप्राप्ततृतीयवयसं निदध्युः निखनेयुः। अलंकृत्य शवं प्रक्षाल्य वस्त्रादिभिरलंकृत्य बहिर्ग्रामादस्थिसंचयनादृते अस्थिसमूहवर्जितायां भूमौ। न केवलमूनद्विवार्षिकस्य निखननमेव संस्कारः किंतु त्यागोऽपीत्याह—'अरण्ये काष्ठवत्' इति। त्यागपक्षे त्र्यहं क्षपयेत्। त्र्यहमाशौचवान्भवेदिति यावत्। त्यागे उदकक्रियाऽपि न कर्तव्येत्यर्थः। **याज्ञवल्क्योऽपि** (प्रा. १–२)—

" ऊनद्विवार्षिकं प्रेतं निखनेन्नोदकं ततः। आ श्मशानादनुव्रज्य इतरो ज्ञातिभिर्वृतः ॥

" यमसूक्तं तथा गाथां जपद्भिर्लौकिकाग्निना। स दग्धव्य उपेतश्चेदाहिताग्न्यावृतार्थवत् " ॥ इति। ऊने अपरिपूर्णे द्वे वर्षे यस्यासावूनद्विवार्षिकः। प्रेतं निखनेद्भूमाववटं खात्वा दक्षिणाशिरसं निक्षिप्य पांसुलोष्टादिभिः प्रच्छादयेत्। नोदकं ततः। न दहेदित्यर्थः। अग्निसंस्कारोदकक्रिययोः समनियतत्वेन उदकनिषेधे दाहस्यापि निषेधः। स च प्रेतो घृतेनाभ्यज्य यमगाथां गायद्भिर्निधातव्यः।

" ऊनद्विवार्षिकं प्रेतं घृताक्तं निखनेद्भुवि। यमगाथां गायमानो यमसूक्तमनुस्मरन् " ॥ इति **यमस्मरणात्**। ऊनद्विवार्षिकादितरः पूर्णद्विवर्षे यो मृतः असौ श्मशानपर्यंतं ज्ञातिभिः सपिंडैः समनोदकैश्चानुव्रज्यः अनुगंतव्यः। अस्मादेव वचनादूनद्विवार्षिकस्यानुगमनमनियतमिति गम्यते। अनुगम्य च 'परेयुवांसम्' इत्यादि षडृचं यमसूक्तं यमगाथां 'योऽस्य कौष्ठ्य जगत' इति तिस्रः ऋचस्य जपद्भिर्लौकिकाग्निना संस्कृताग्निना दग्धव्यः। उपेतश्चेत्तस्यहिताग्नेरावृता दाहप्रक्रियया पात्रयोजनादिरहितया स्वगृह्यादिप्रसिद्धया लौकिकाग्निनैव दग्धव्य इत्यर्थः। **कर्मप्रदीपिकायाम्**—

" कन्याबालकयोरूर्ध्वं त्रयोविंशतिमासतः। उपोषणं तु कर्तव्यं तत्पूर्वं खननं तयोः " ॥ उपोषणं दहनमित्यर्थः। एवं चाग्निसंस्कारस्योनद्विवर्षमरणे निषिद्धत्वात् कथं दहननिबन्धनमेकाहाद्याशौचमिति चेन्न। उक्त**पराशरा**दिवचनानां नियताग्निसंस्कारनिषेधपरत्वात्। अतः अग्निसंस्कारोदकदाननिषेधो नामकरणात्प्रागेव नित्यः। नोर्ध्वम्। यतो निषेधानंतरमेव नामकरणाद्दंतजननाद्वा ऊर्ध्वमग्निसंस्कारमुदकदानं चानुजानाति **मनुः** (५–६९)—" जातदंतस्य वा कुर्यान्नाम्नि वाऽपि कृते सति " इति।

---

[1] ख–नापिकार्योदकक्रिया।

लोकाक्षिरपीति—

" तूष्णीमेवोदकं कुर्यात्तूष्णीं संस्कारमेव च । सर्वेषां कृतचौलानामन्यत्रापीच्छया द्वयम् " ॥ इति ।

"चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः । प्रथमाब्दे तृतीये वा कर्तव्यं श्रुतिचोदनात्"॥ (२।३५) इति **मन्वा**दिविहितकाले कृतचौलस्य सर्वस्य मरणे नियमेनाग्न्युदकदानं तूष्णीं कार्यम् । अन्यत्रापि नामकरणादूर्ध्वमकृतचोलेपीच्छया प्रेताभ्युदयकामनया द्वयमग्न्युदकात्मकं तूष्णीं कार्यं न नियमेनेति **चंद्रिकादौ** व्याख्यातम् । अन्ये तु प्रथमेऽब्दे कृतचूडस्योनद्विवार्षिकस्य मृतस्याग्निदानमुदकदानं च तूष्णीममंत्रकं कुर्यात् । अन्यत्रापि तृतीयादिवर्षेऽप्यकृतचूडेच्छया द्वयं तूष्णीं कुर्यादित्याचक्षते । एवं च त्रिवर्षादिकृतचौलस्य एकर्चविधिना संस्कारः । स च वक्ष्यते । अजातदंतस्यापि चूडाकरणे त्रिरात्राशौचमाह **पराशरः**—

"जातदंतेऽनुजाते वा कृतचूडे च संस्थिते । अग्निसंस्करणे तेषां त्रिरात्रमशुचिर्भवेत्"॥ इति

जाता दंता यस्यासौ दंतजातः । अनुजातः अनुत्पन्नदंत इत्यर्थः । **षट्त्रिंशन्मते**—

" यद्यप्यजातदंतः स्यात्कृतचूडस्तु संस्थितः । तथापि दाहयेदेनं त्र्यहं चाशौचमिष्यते " ॥

प्रथमसंवत्सरचूडाभिप्रायेण **काश्यपो**ऽपि—" बालानामदंतजातानां त्रिरात्रम् " इति ।

अंगिराः—

"विप्रे न्यूने त्रिभिर्वर्षैर्मृते शुद्धिस्तु नैशिकी । निर्वृत्तचूडके तस्मिन् त्रिरात्राच्छुद्धिरिष्यते"॥ इति ।

वसिष्ठः (४।३४) " ऊनद्विवर्षे प्रेते गर्भपतने वा सपिंडानां त्रिरात्रम् " इति । **षडशीतौ**—

" द्वितीये प्रथमे वाऽब्दे चौलं यदि कृतं तदा । चौलप्रभृति सर्वेषां गोत्रिणां त्रिदिनं मतम्"॥ इति ।

माधवीये—

" अनतीतद्विवर्षस्तु प्रेतो यत्रापि दह्यते । आशौचं ब्राह्मणानां तु त्रिरात्रं तत्र विद्यते " ॥

चंद्रिकायाम्—" अनतीतद्विवर्षस्तु प्रेतो यत्रापि दह्यते । अतिमोहाभिभूतैस्तु देशसाधनमाचरन्॥ " आशौचं ब्राह्मणानां तु त्रिरात्रं तत्र विद्यते"॥ देशसाधनमाचरन् स्वदेशाचारमाचरद्भिरित्यर्थः । विभक्तिव्यत्ययः । मोहः स्नेहः । जातदंतस्याकृतचूडस्य दाहपक्षे **अंगिरसा**ऽपि विशेषो दर्शितः—

" यद्यप्यकृतचूडो वै जातदंतस्तु संस्थितः । दाहयित्वा तथाप्येनमाशौचं त्र्यहमाचरेत् " ॥

वसिष्ठोऽपि (४।३४)—" ऊनद्विवर्षगर्भपतने सपिंडानां त्रिरात्रमाशौचं सद्यःशौचमिति **गौतमः** " इति । अग्निसंस्कारे सद्यःशौचमग्निहोत्रानुष्ठातृविषयम् ॥

खननप्रभृत्याशौचम् । मृतस्य शिशोः यदा दिनान्तरे खननं दाहः त्यागो वा क्रियते तदा मृताहाद्येव सद्योहस्त्र्यहकल्पना खननादिसंस्कारोत्तरकालं वेति संदेहे निर्णय उक्तः **संग्रहे**—

" मृतस्य तु यदा दाहस्त्यागो वा खननं शिशोः । तदा तद्दिवसाद्येव सद्योहस्त्र्यहकल्पना "॥ इति ।

एतच्च खनित्वा शनकैर्भूमौ अरण्ये काष्ठवत्त्यक्त्वा दाहयित्वा तथाप्येनमिति **लोकाक्षिमन्वंगिरसां** वचनैः त्वाप्रत्ययेन खननाद्यनंतरमेव सद्यःशौचादिविधानादवगम्यते ।

इदं खननदिवसाद्याशौचं उपनयनपर्यंतं बालमरणे वेदितव्यमित्येके । **अन्ये तु**—चौलात्पूर्वकालसंस्कारविषयं तत्रैव त्वाप्रत्ययश्रवणादित्याहुः ।

ननु दिनांतरे बालसंस्कारे पूर्वेद्युराशौचाभावे कर्मानुष्ठानप्रसंगः इति चेन्नैवम् । " सूतकं तु प्रवक्ष्यामि मृतिजन्मनिमित्तकम् " इति आशौचस्य मरणोत्पत्तिशिष्टत्वादेवं च मरणाद्याशौचस्य सत्त्वेऽपि खननाद्युत्तरकालमेव सद्यःशौचाद्यनुष्ठानमिति न विरोधः । 'स्नात्वा सद्यः शुचिर्भवेत्' इति

समानकर्तृत्वस्मरणात्। खननसंस्कारकर्तुः पितृभ्रातृव्यतिरिक्तज्ञातेर्मातुलादेरपि सद्यःशौचमेव। अग्निसंस्कारे त्यागेऽपि कर्तुः पितृभ्रातृज्ञात्यादेस्तत्तदाशौचमेव। प्रेतक्रियाकरणे असपिंडस्य सद्यःशुद्धिः। अत्र सर्वत्र सूतके दशाहात्परं बालमृतौ पित्रोर्भ्रातॄणां च सदा दशाहमघं भवति। "बाले मृते सपिंडानां सद्यःशौचं विधीयते। दशाहेनैव दंपत्योः सोदराणां तथैव च"॥ इति **व्याघ्रपाद**स्मरणात्। अत्र सोदरशब्दोऽसोदरस्याप्युपलक्षकः। तथा **पैंगगृह्ये**—"गर्भस्थे प्रेते मातुरेव स्यादाशौचं जात उभयोः। कृते नाम्नि सोदराणां भिन्नोदराणामप्येवम्" इति। **अखंडादर्शे च**—"ज्ञातीनां स्नानमेव बालमरणे मातापितृसोदरभिन्नोदराणामपि दशाहमघं भवति" इति। **दशकेऽपि**—"जातमरणे पित्रोर्दशाहं सदा भ्रातुर्दशाहं परम्"। इति तद्व्याख्याने विशेषः। भ्राताऽत्र सोदरः। स एव मुख्यः। तस्य नामकरणात्परं बालमृतौ दशाहमघं भवतीति। **बृहस्पतिस्तु**—

"जातमात्रे मृते चापि दशाहात्पितरौ शुची। कृते नाम्नि सनाभीनां दशरात्रमघं भवेत्॥
"भिन्नोदराणां भ्रातॄणां जातदंते मृते त्वघम्। दशाहं कृतचौले तु दत्तादीनां विधीयते"॥ इति।

याज्ञवल्क्यः (प्रा. ३८)—

"त्रिरात्रं दशरात्रं वा शावमाशौचमुच्यते। ऊनद्विवर्ष उभयोः सूतकं मातुरेव हि"॥ इति। ऊनद्विवर्षे संस्थिते उभयोरेव मातापित्रोर्दशाहमाशौचं न सर्वेषां सपिंडानाम्। तेषां तु "आ दंतजन्मनः सद्यः" इत्युक्ताशौचमित्यर्थः। **स्मृत्यंतरे**—

"कृतचौडस्य विप्रस्य आ त्रिवर्षोपनायनात्। आशौचं तु त्रिरात्रं स्यात्पित्रोश्चैव तु सर्वदा"॥ सर्वदेति यावद्दशाहमित्यर्थः। **केचित्तु**—

"बाले मृते सपिंडानां सद्यःशौचं विधीयते। दशाहेनैव दंपत्योः सोदराणां तथैव च"॥ इति **व्याघ्र**वचनं नाभिच्छेदनादूर्ध्वं मृतबालविषयम्। सूतकानंतरमृतस्य बालस्य मातृपितृसोदराणां त्रिरात्रमाशौचमिति वदन्ति। यथा **विज्ञानेश्वरः**—"यत्तु **काश्यपवचनम्**—"बालानामदंतजातानां त्रिरात्रेण शुद्धिः" इति तन्मातापितृविषयम्। "बैजिकादपि संबंधादनुरुंध्यादघं त्र्यहम्" इति जनकोपाधिकतया त्रिरात्र**स्मरणात्**" इति। **आश्वलायनोऽपि**—"आ दंतजाते च" इति। त्रिरात्रमित्यनुवर्तते **चंद्रिकायाम्**॥ यत्तु **पैठीनसिनो**क्तम् "अकृतचूडानां त्रिरात्रम्" इति तन्मातापितृविषयम्। "ऊनद्विवर्षे प्रेते मातापित्रोरेव नेतरेषाम्" इति **स्मरणात्**। अस्यायमर्थः ऊनद्विवर्षे प्रेते निखनने च कृते मातापित्रोरेव त्रिरात्रमाशौचम्। नेतरेषां सपिंडानां तेषामेकरात्राभिधानादिति। **स्मृतिरत्नेऽपि**—"बालानामदंतजातानां त्रिरात्रेण शुद्धिः" इति **कात्यायनवचनं** मातापितृविषयम्। अत एव **मनुः** (५।६२)—

"बैजिकादभिसंबंधादनुरुन्ध्यादघं त्र्यहम्" इति॥ **षडशीतौ**—

"यत्रोपनयनात्पूर्वं पुत्रं प्रेतत्वमृच्छति। आशौचं त्रिदिनं तत्र मातापित्रोः समं तदा"॥

स्मृत्यर्थसारेऽपि—

"अनुपनीतमरणे मातापित्रोर्दशाहमाशौचपक्षो न दृश्यते" इति। अत्र यथास्वदेशाचारं व्यवस्था।

अनुपनीतमरणाशौचम्। अनुपनीतमरणाशौचे त्रिभागादूर्ध्वं स्पर्शमाह **देवलः**—

"स्वाशौचकालाद्विज्ञेयं स्पर्शनं तु त्रिभागशः। शूद्रविट्क्षत्रविप्राणां यथाशास्त्रं प्रचोदितम्"॥ इति।

---

१ खग-माता। २ क्ष-अ। ३ क्ष-नादत।

एतच्चानुपनीतप्रयाणनिमित्तकांताशौचे वेदितव्यमिति **विज्ञानेश्वरे**णोक्तम् (पृ. १७३ पं. २०)। **स्मृत्यर्थसारे**ऽपि—"अनुपनीतमरणाशौचे वर्णाः स्वाशौचकाले त्रिभागादूर्ध्वं स्पृश्याः। अनुपनीतमरणश्रुतावतीताशौचं नास्ति। स्नानमेव। अनुपनीतमरणे समानोदकानामाशौचं नास्ति। इदं वयःप्रयुक्ताशौचं सर्ववर्णसमम्" इति। तथा **चांगिराः**—

"अविशेषेण वर्णानामर्वाक् संसारकर्मणः। त्रिरात्रं तु भवेच्छुद्धिः कन्यास्वह्नो विधीयते"॥

व्याघ्रोऽपि—"तुल्यं वयसि सर्वेषाम्" इति। वयसि षण्मासादिरूपे यत् सद्यःशौचादिविहितं तत्सर्वेषां ब्राह्मणादिवर्णानां तुल्यमविशिष्टमित्यर्थः। अत्र **विज्ञानेश्वरः** (पृ. १८२ पं. १२)—

"यथा पिंडोदकदानविधिः सर्ववर्णसाधारणः यथा बालसमानोदकशौचविधिः "अंतराजन्ममरण' इति सन्निपाताशौचविधिश्च यद्वच्च "गर्भस्रावे मासतुल्या" इति स्रावाशौचविधिः "प्रोषिते कालशेषः स्यादशेषे त्र्यहमेव तु" इति विदेशस्थाशौचविधिश्च सर्ववर्णसाधारणः तथा वयोवस्थानिमित्तमप्याशौचं साधारणमेव भवितुमर्हति। अत एव "क्षत्रे षड्भिः कृते चौले वैश्ये नवभिरुच्यते। ऊर्ध्वं त्रिवर्षाच्छूद्रे तु द्वादशाहो विधीयते"॥ तथा "यत्र त्रिरात्रं विप्राणामाशौचं संप्रदृश्यते। तत्र शूद्रे द्वादशाहं षण्णव क्षत्रवैश्ययोः"॥ इति **ऋष्यशृंगा**दिवचनानि विगीतबुध्या अनाद्रियमाणै**र्धारेश्वरविश्वरूपमेधातिथि**प्रभृतिराचार्यैरयमेव साधारणपक्षोंऽगीकृतः"। इति।

नामकरणादिनिबन्धनाशौचक्रमः। एतच्च बालमरणाशौचं नामकरणादिसंस्कारनिबंधनं कालनिबंधनं च संस्कारावलंबेन कालावलंबेन च सद्यःशौचादि**स्मरणात्**। उक्तं च **संग्रहे**—

"कृते नामादिसंस्कारे प्राप्तकालेऽपि चाकृते। स्वकाले संस्कृते प्रेते यथा तद्वदिहाप्यघम्"॥ इति।

"दशम्यामुत्थितायां स्नातायां पुत्रस्य नाम दधाति। जन्मनोऽधि षष्ठे मासि जन्मनोऽधि तृतीये वर्षे चौलं गर्भाष्टमेषु ब्राह्मणमुपनयीत" इत्यादि **स्वस्वगृह्योक्त**कालेषु नामकरणान्नप्राशनचौलोपनयनेषु कृतेषु दशम्यां नामकरणं षष्ठेऽन्नप्राशनं जातेषु दंतेषु वा॥

"चूडाकर्म द्विजातीनां सर्वेषामेव धर्मतः। प्रथमेऽब्दे तृतीये वा कर्तव्यं श्रुतिचोदनात्"॥ पंचमे वा व्रतक्षमे इत्यादिवैकल्पिकवचनानुरोधेन स्वगृह्योक्तकालात्पूर्वमेव नामादिषु कृतेषु च स्वगृह्यप्राप्तकाले दैवान्नामादिसंस्कारे अकृते च सति स्वकाले स्वगृह्यविहितकाले एकादशाहादौ नामादिभिः संस्कृते बाले प्रेते यथा ज्ञातीनामघं भवति तथैव स्वकालात्पूर्वकालकृतसंस्कारे प्राप्तकालाकृतसंस्कारे च बाले मृतेऽपि ज्ञातीनामघमित्यर्थः।

खननादिसंस्कारव्यवस्था। अत्रेयं व्यवस्था—नामकरणात्पूर्वं शिशुमरणे निखननमेव नानुगमनाग्न्युदकदानादि। ज्ञातीनां सचैलस्नानाच्छुद्धिः। तत ऊर्ध्वं दंतजननात्पूर्वं मरणे निखननं तूष्णीं दहनं वा खननपक्षे सद्यःशुद्धिः। दहनपक्षे उदकदानादितूष्णीं पित्रा दर्भवर्जं कार्यम्। "अग्निना संस्कृतस्योक्ता पिंडदानोदकक्रिया" इति **वचनात्**। 'अकृतचौलस्य दर्भमंत्रवर्जम्' इत्य**खंडादर्श**वचनाच्च। अनुगमनं कृताकृतं सपिंडानामेकाहः दहनं च शवं संस्नाप्यालंकृत्य ज्येष्ठपूर्वं श्मशानं नीत्वा लौकिकाग्निना तूष्णीं कुर्यात्।

लौकिकेष्वनादेयाग्नयः। स च चंडालाद्यग्निव्यतिरिक्तो ग्राह्यः

"चंडालाग्निरमेध्याग्निः सूतिकाग्निश्च कर्हिचित्। पतिताग्निश्चिताग्निश्च न शिष्टग्रहणोचितः"॥ इति **देवलस्मरणात्**। अजातदंतस्य चूडाकरणे दहनं त्रिरात्राशौचं च तूष्णीमुदकदानादि।

१ ख-हः।

दंतजननात्षष्ठमासाद्वा परं मृतस्य खननं दाहस्त्यागो वा संस्कारः। खननं तु शवं प्रक्षाल्य गोघृतेनाभ्यज्यालंकृत्य ग्रामाद्बहिः श्मशानादन्यत्र नीत्वा अस्थिरहितशुद्धभूम्यामवटं कृत्वा यमगाथां यमसूक्तं च जपद्भिः प्रणवेन कार्यम्

" शुचौ देशेऽवटं खात्वा दर्भैः प्रच्छाद्य सर्वशः। घृताभ्यक्तं मृतं तत्र प्रणवेन विनिक्षिपेत् ॥

"मृतजाते तु निखनेद्भूमौ प्रणववर्जितम्" इति **स्मरणात्**। अत्रानुगमनं कृताकृतं नोदकदानादि। अत्रैकरात्रमाशौचम्। दाहश्च लौकिकाग्निना तूष्णीं कार्यः। उदकं पिंडदानं च दिनत्रयं दर्भवर्ज्यं तूष्णीं कार्यम्। त्यागपक्षे पूर्ववदलंकृत्य ग्रामाद्बहिः शुद्धदेशे अरण्यादौ त्यक्त्वा स्नातव्यं नात्रोदकदानादि। " नात्रिवर्षस्य कर्तव्या बान्धवैरुदकक्रिया " इति त्यागे खनने च तन्निषेधात्। अत्र दाहे त्यागे च दिनत्रयमाशौचम्। जातदंतस्याकृतचूडस्य मरणे तूष्णीं दाह एव संस्कारः। तूष्णीमेव त्रिरात्रमुदकं पिंडदानम्। " पितुस्त्रिरात्रमाशौचं सपिंडाना आचौलात्खननसंस्कार एव शिष्टाचारानुगुणः। चौलात् त्रिवर्षाद्वा परं पंचमवर्षपर्यंतं कृतचौलस्याकृतचौलस्य वा मरणे यमगाथां यमसूक्तं च जपद्भिस्तूष्णीमग्निसंस्कारः कार्यः। लौकिक एव तुषाग्निरत्र ग्राह्यः। " ब्रह्मचारी कपालाग्निस्तुषाग्निर्बालकन्ययोः" इति **स्मरणात्**। ज्ञातिभिरनुगमनं कार्यम्। नात्र घृतप्राशनाग्निस्पर्शादीतरेषामपि।

" अनूचानं क्रतुश्रेष्ठमनुपेतमनायकम्। अनुगम्य विनाज्याग्नी द्विजः स्नानेन शुध्यति "॥ इति **स्मरणात्**—कृतचूडस्याकृतचूडस्य वा तृतीयवर्षे ज्ञातिभिरप्युदकं दातव्यम्। "उदकदानं सपिण्डैः कृतजटस्य " इति (१४।३१) **गौतमस्मरणात्**—चतुर्थवर्षमारभ्य कृतचौलस्याकृतचौलस्य वा ज्ञातिभिर्मंत्रवर्ज्यं त्र्यहमुदकं दातव्यं दर्भमंत्रवर्जनं पिंडं च दद्यात्।

" उदकं पिंडदानं च त्र्यहं स्यात्तु त्रिवर्षतः । दशाहं पिंडदानं स्यादष्टमाब्दात्परं स्मृतम् ॥

" प्रेतपिंडं बहिर्दद्याद्दर्भमंत्रं विवर्जितम् " ॥ इति **स्मरणात्**—" पंचमवर्षमारभ्यास्थिसंचयनं अमन्त्रकं कार्यम्। " दाहाद्येवोदकं पिण्डं पञ्चमादस्थिसंचयः " इति **स्मृतेः**।

" मृतं दग्ध्वा त्रिरात्रेण त्रिवर्षादुदकं बलिम्। पञ्चमाद्यस्थिचयनं श्राद्धं कुर्याच्चतुर्दिनम् " ॥ इति **कात्यायनस्मृतेश्च। गौतमस्य** विशेषमाह—

" पंचमाद्वत्सरादर्वाक् मृतयोर्बालकन्ययोः। आस्थिसंचयनं तूष्णीं कुर्यादित्याह गौतमः " । इति । पंचमवर्षपर्यंतममंत्रक एवाग्निसंस्कारः ।

" तूष्णीमथोदकं कुर्यात्तूष्णीं संस्कारमेव च। सर्वेषां कृतचूडानामन्यत्रापीच्छया द्वयम् " ॥ इति **लोकाक्षिस्मरणात्**। षष्ठवर्षमारभ्य उपनयनपर्यंतमेकर्चविधिना संस्कृत्य तिलोदकपिंडदाननवश्राद्धषोडशश्राद्धानि मंत्रवर्ज्यं तंत्रत एव कुर्यात् । उपनयनात्पितृमेधविधिना संस्कृत्य मंत्रवत्कुर्यात्। अष्टमात्परं शांतिकर्म च कुर्यात्।

" अष्टमात्परमेवास्य दृषत्स्थापनपूर्वकम्। उदकं पिंडदानं च कुर्यात्प्रेतस्य शान्तये ॥
" दर्भस्तंबे ततः पूर्वं सर्वं कर्म समाचरेत्। त्रिवर्षादुदकं पिंडं श्राद्धं तं पंचमात्परम् ॥
" अष्टमात्सकलं ग्राह्यं सपिंडीकरणं विना ॥

" सप्तमात् द्वादशादूर्ध्वं गृहस्थब्रह्मचारिणोः। सपिंडीकरणं कुर्यान्न प्रागिति यमोदितम् ॥
" त्रिवत्सरात्परं नग्नच्छादनश्राद्धमाचरेत्। अष्टमाद्वत्सरादूर्ध्वं नवश्राद्धानि षोडश ॥
" मृतं दग्ध्वा त्रिरात्रेण त्रिवर्षादुदकं बलिम्। अब्दादेवाष्टमादूर्ध्वमेकोद्दिष्टानि षोडश ॥

" सप्तमाद्वत्सरादर्वाग्मृतयोर्बालकन्ययोः । पिंडोदकं त्रिरात्रेण ह्येकरात्रेण संकटे ॥

" त्रीन् पिंडान्प्रथमे दद्यात् द्वितीये चतुरस्तथा । त्रींस्तु दद्यात्तृतीयेऽन्हि बालानां पिंडकल्पना ॥

" शिशोस्त्रिवत्सरादूर्ध्वमुदकं पंचसप्ततिः । त्रिवर्षादुदकं पिंडं सर्वेषां तर्पणं भवेत् ॥

" त्रिरात्रं पिंडदशकं त्रिंशद्दद्यात्तिलोदकम् । आदितस्त्रिदिने कार्यं बालानां क्षुद्गरीयसी ॥

" द्वादशाद्वत्सरादर्वाक्पौगंडमरणे सति । सपिंडीकरणं न स्यादेकोद्दिष्टादि कारयेत् " ॥

इत्यादीनि वचनानि द्रष्टव्यानि । पौगंडः पंचमवर्षाधिको बालः । अत्र विशेषमाहा**पस्तंबः**—

" अनुपेतान्कन्याश्च पुनर्दहनमंत्रेणैव दहेयुः " इति । पूर्णद्विवर्षमारभ्य उपनयनपर्यंतं बालमरणे एकर्चविधिना संस्कुर्युरित्यर्थः । संचयनेऽपि विशेषमाह **स एव**—

" तृतीयेऽन्हि नवं कुंभमादाय दहनं व्रजेत् । जलेन पयसा चैव संप्रोक्ष्यास्थीन्यमंत्रतः ॥

" तानि कुंभे समोऽप्याथ पयसा पूरयेद्घटम् । 'इदं त' इति मंत्रेण घटं कुर्यात्सुरक्षितम्" ॥ इति ।

'इदं त एकम्' इत्येकर्चा । **मंजर्यामपि**—

" त्रिवर्षादि दहेदेनमेकर्चाव्रतबंधनात् । 'अस्मात्त्वम्' इति मंत्रेण स्नात्वा दद्याज्जलाञ्जलिम् " ॥

शौनकोऽपि—

" एकर्चविधिना कुर्याद्भगवांच्छौनकोऽब्रवीत् । अस्मात्त्वमिति मंत्रेण सर्वमंत्रो न विद्यते "॥

स्मृत्यंतरेऽपि—

" त्रयोविंशतिमासात्तु मृतयोर्बालकन्ययोः । एकर्चा दहनं त्वस्थिपंचमात्परमव्रतात् ॥

" तुषाग्निना दहेत्प्रेतमस्मात्त्वमितिमंत्रतः । कुर्यात्संचयनं त्वस्थि चैकर्चाव्रतबन्धनात् " ॥

अन्यत्रापि—

" पुंसां व्रतविधेः पूर्वं दानात्पूर्वं स्त्रिया अपि । अज्ञातगोत्रनाम्नां च पौगंडानां व्रतात्परम् ॥

" राष्ट्रक्षोभे च सर्वेषां पुनर्दाहनिवृत्तये । एकर्चविधिसंस्कारं भगवांच्छौनकोऽब्रवीत् " ॥ इति ।

बोधायनोऽपि—" बालान् मृतान्द्वित्रिवर्षाद्यतीतान्यज्ञोपवीतस्य विधेः पुरस्तात् ॥

" अमंत्रकं चौलविधिं विधाय मंत्रेण संस्कारविधिं प्रदद्यात् " ॥ इति ।

चौलप्रभृत्युपनयनपर्यंतं सपिंडानामाशौचं त्रिरात्रम् ।

" द्विजन्मनामयं कालस्त्रयाणां तु षडाब्दिकः । आशौचं त्र्यहमेव स्यात्स्वजात्युक्तमतः परम्" ॥ इति **स्मरणात्** । नामकरणप्रभृत्युपनयनपर्यंतं बालमरणे मातापित्रोर्भ्रातॄणां च दशाहमाशौचम् । त्रिरात्रं वा देशाचारानुसारेण द्रष्टव्यम् । दशाहाशौचपक्षे अष्टमादिदिनत्रये पिंडोदकसमापनम् ।

" कन्याबालकुमारेभ्यस्त्र्यहं पिंडोदकक्रियाः । कुर्याद्दशाहमाशौचं वर्तते नात्र संशयः ॥

" कन्याबालकुमाराणामष्टमादिदिनत्रये । पिंडोदके च निर्वर्त्य द्वादशे बलिमाचरेत् " ॥ इति **स्मरणात्** । बलिं नारायणं बलिम् ।

"तथा बालस्य कन्यायाः षंढस्य पतितस्य च । नारायणबलिः कार्यो ह्यन्येषां मोक्षकांक्षिणाम् " ॥ इति **व्यासस्मृतेः** । अयं च नारायणबलिश्चतुर्थवर्षमारभ्य कर्तव्यः । यदाह **बोधायनः**—"त्रिवर्षाद्युदकं पिंडं चतुर्थाद्युदकं बलिम् " इति ।

यत्तु **गौतमवचनं**—" मृतं दग्ध्वा त्रिरात्रेण त्रिवर्षाद्युदकं बलिम् " इति अत्र बलिशब्देन पिंडबलिरुच्यते । अन्ये तु बालमरणे सर्वत्र नारायणबलिमाचरंति । ' मृतं दग्ध्वा त्रिरात्रेण ' इति

दाहसमनंतरं यत् त्रिरात्रेण समापनमुक्तं तत्पितृभ्रातृव्यतिरिक्तसंस्कर्तृज्ञातिविषयम् । पितृभ्रातृणां दशाहमाशौचिनामष्टमादिदिनत्रयेण समापनस्योक्तवात् ।

" दाहयित्वा तथाप्येनमाशौचं त्र्यहमाचरेत् । त्रिरात्रमाव्रतादेशाद्दाहादित्र्यहमाशौचम् " इत्यादंगिरोयाज्ञवल्क्यादिवचनैर्ज्ञातीनां त्रिरात्राशौचविधानात् । यावदाशौचं प्रेतस्योदकं पिंडं च दद्युः । " पूर्वाह्णे वाऽपराह्णे वा तोयमाशौचगामिभिः । संस्कर्त्रैव बलिर्देयः स हि प्रेतस्य बांधवः " ॥ इति **विष्णुसंवर्त्तादिभिः** यावदाशौचं पिंडोदकविधानात् । दाहकर्तुर्ज्ञातेस्त्रिरात्रेण समापनं दाहादित्रिरात्रमेवाशौचम् । यत्तु कैश्चिदुक्तम्

" दशाहं सोदकज्ञात्योः त्रिरात्रं योनिबंधुषु । विजातिषु शवोक्तं स्यात्प्रेतनिर्हरणे कृते "॥

इत्यत्र प्रेतनिर्हरणाभावेऽपि पिंडदानां दशाहसिद्धेः पुनरपि ज्ञातिग्रहणमनुपनीतनिर्हरणे दशाहसिद्ध्यर्थमिति न तत्र **संग्रहकार**वचने प्रमाणमस्ति । यदपि तेन प्रमाणमुपन्यस्तं **मनुवचनम्** (५।६३)—

" रजन्याऽन्हैव चैकेन त्रिरात्रैरेव च त्रिभिः । शवस्पर्शे विशुध्यंति त्र्यहात्तूदकदायिनः " ॥ इति नात्रानुपनीताशौचं प्रकृतम् । किंतर्हि (५।५९)—

" दशाहं शावमाशौचं सपिंडेषु विधीयते । अर्वाक् संचयनादस्थ्नां त्र्याहमेकाहमेव वा " ॥ इति गुणाशौचमेव प्रकृतम् । **मानवे** च विवरणे श्लोकद्वयं च व्याख्यातम्—"दशाहं निर्गुणेऽप्यसपिंडेषु अस्थ्नामा संचयनाच्च इति चतुरहोपलक्षणम् । ' चतुर्थेऽन्हि संचयनम् ' इति वचनात् । चतुरहं गुणवत्सु इत्यर्थः । त्र्यहं गुणवत्तरेषु एकाहं गुणवत्तमेषु ' रजन्याऽन्हैव चैकेन ' इत्यहोरात्रस्य निर्देशः । ' त्रिरात्रैरेव च त्रिभिः ' इति नवरात्रस्य दशभिरहोरात्रैरिति यावत् । शवस्य स्पर्शश्चेत् गुणवत्तमा अपि सपिंडा दशाहेन शुध्यंति । उदकदायिनः समानोदकास्त्रिरात्रेण शुध्यंति इत्यर्थ" इति। एवं चानुपनीतदाहे कर्तुर्ज्ञातेस्त्रिरात्रमाशौचम् । असपिंडस्य तु उदकपिंडादिप्रेतक्रियाया अकरणे सद्यःशुद्धिः । "असपिंडद्विजं प्रेतं विप्रो निर्हृत्य बंधुवत् । अनदन्नन्नमन्हैव न च तस्मिन्गृहे वसेत्" ॥ इति प्रेतगृहवासतदन्नभोजनाभावे उपनीतासपिंडनिर्हारेऽपि **मनुना** दिनमात्रविधानात् (५।१०१-२) ।

इत्यनुपनीतमरणाशौचम् ॥

अथ कन्यामरणाशौचम् । **तत्रापस्तंबः**—

"अचूडायां तु कन्यायां सद्यःशौचं विधीयते । एकाहं चूडितायां तु दत्तायां त्र्यहमिष्यते"॥ इति । **मरीचिः**—" चूडायाः करणे सद्यःशौचं प्राक् दानादेकाहं दत्तानां प्राक्परिणयात् त्र्यहम् " ॥ इति । **व्यासोऽपि**—

" आजन्मनस्तु चौलांतं कन्या यदि विपद्यते । सद्यःशौचं भवेत्तत्र सर्ववर्णेषु नित्यशः ॥

" ततो वाग्दानपर्यंतं यावदेकाहमेव हि । ततःपरं प्रवृत्तायां त्रिरात्रमिति निश्चयः ॥

" वाक्प्रदाने कृते त्वत्र ज्ञेयं चोभयतस्त्र्यहम् । पितुर्वरस्य च ततो दत्तानां भर्तुरेव हि ॥

" स्यात्स्वजात्युक्तमाशौचं सूतके मृतके तथा " ॥ इति । ततो वाग्दानपर्यंतमित्यादेरर्थश्चंद्रिकायामुक्तः—"ततः तस्माच्चौलाद्वाग्दानपर्यंतं कन्याविपत्तौ यावदेकाहं अहोरात्रं यावत्तावदाशौचम् । ततः परं वाग्दानादूर्ध्वं विवाहोत्कर्षविषये वाग्दत्तावस्थयैव प्रवृद्धायां अधिकवयस्यपि

---

१ खग-स्पृशो । २ क्ष-त्रिगुणा । ३ क-त्रय ।

त्रिरात्रमेवेति निश्चयः । वाग्दाने कृते विवाहे चाकृते यत्र कन्या विपद्यते तत्र उभयतः पक्षत्रयस्य दिनत्रयं ततो विवाहादूर्ध्वं दत्तानां सम्यक्प्रतिपादितानां मरणे अपत्यजनने वा केवलं भर्तृपक्षस्य स्वजात्युक्तं दशाहमाशौचं स्यात् । विवाहोत्कर्षवच्चूडाकरणवाग्दानयोरुत्कर्षे आ चौलात्सद्यः आ वाग्दानादेकाहमेवेति निश्चयः न्यायसाम्यादिति ।

अन्ये तु—चौलस्य कालोपलक्षणत्वादप्राप्ततृतीयवर्षायाः कन्याया मरणे सद्यःशौचम् । तृतीयवर्षमारभ्य कृतचूडाया अकृतचूडाया वा मरणे आ वाग्दानादेकाहम् । अकृतेऽपि वाग्दाने गर्भाष्टमाब्दात्प्रागेकाहम् । ततोऽप्यकृते दाने अष्टमवर्षप्रभृति कन्यासपिंडानां त्रिरात्रमाशौचं भवति । दानशब्दस्य कालोपलक्षणत्वात् । ‘अष्टवर्षा भवेद्गौरी’ ।

“गौरीं वा वरयेत्कन्यां ह्यष्टवर्षोष्टवर्षा वा । विवाहस्त्वष्टवर्षायाः कन्यायास्तु प्रशस्यते”॥ इत्यादिवचनैः प्रदानं प्रत्यष्टमवर्षस्यैव मुख्यकालत्वावगमात् । यद्यप्यत्र दानमुपलक्षणं तथापि साक्षात् दानक्रियायां निर्वृत्तायामेव वरपक्षस्यैतदघं भवति । अन्यथा वरपक्षस्यासंभवात् । अतोऽष्टमवर्षप्रभृत्यकृते दाने पितृपक्षस्य कन्यासपिंडस्य त्रिरात्राशौचमित्याहुः ।

त्रिरात्रमित्यस्य दृष्टे रजस्यपवादमाह **शंखः**—

“पितृवेश्मनि या नारी रजः पश्यत्यसंस्कृता । तस्यां मृतायां नाशौचं कदाचिदपि शाम्यति”॥ इति स्वजात्युक्तदशाहादिकालादर्वाक् कदाचिदपि न शाम्यतीत्यर्थः । वाग्दत्ताया रजोदर्शने पितृवेश्मनि या नारी रजः पश्यतीत्यादिवचनोक्तं द्रष्टव्यमिति **चंद्रिकायामुक्तम्** । **संग्रहे**—

“आ चौलात्सद्य आ दानान्निशोर्ध्वं त्वा विवाहतः । त्र्यहं कन्यामृतौ जातिष्वघं पूर्णमृतूद्भवेत् ॥

“त्रिरात्रं वरतद्ज्ञात्योर्दत्तानूढामृतावघम् । पूर्णं भ्रातुश्च पित्रोश्च कन्याबालमृतौ सदा” ॥ इति ।

स्मृत्यर्थसारे—“कन्यामरणे त्रिपुरुषविषयज्ञातीनामाचौलकरणाद्वा चौलकालाद्वा स्नानेन शुद्धिः । स्त्रीषु सापिंड्यं त्रिपुरुषमेव । अप्रत्तासु ततो वाग्दानादर्वागेकाहमाशौचं ततो विवाहादर्वाक्प्रतिपक्षेऽपि त्रिपुरुषपर्यंत त्रिरात्रं वाग्दानाभावे विवाहनिश्चयावधिरित्येके” इति । **स्मृत्यंतरे** च—

“दत्ताऽनूढा च कन्या या संस्कार्या भर्तृगोत्रतः । उभयोर्वंशयोश्चैव त्रिरात्रमघमिष्यते”॥ वारिपूर्वं वाचा दत्ता अनूढा च या कन्या तस्या मृतौ वंशद्वयस्य त्रिरात्राशौचमित्यर्थः । तथा **मरीचिः**—

“वारिपूर्वं प्रदत्ता या या नैव प्रतिपादिता । असंस्कृता सा विज्ञेया त्रिरात्रमुभयोः समम्”॥ इति ।

मनुः—(५।७१)

“स्त्रीणामसंस्कृतानां तु त्र्यहाच्छुध्यंति बांधवाः । यथोक्तेनैव कल्पेन शुध्यंति च सनाभयः”॥ इति । बांधवा वरसपिंडाःपितृपक्षीयास्त्रिपुरुषपर्यंताः कन्यासपिंडाश्च त्रिरात्रेण शुध्यंति । सनाभयः सोदराः । ते मातापित्रोरप्युपलक्षणार्थाः । अतो मातापितृसोदरास्तु यथोक्तेन कालेन शुध्यंतीत्यर्थः ।

“कन्याबालकुमारेभ्यस्त्र्यहं पिंडोदकक्रियाः । कुर्याद्दशाहमाशौचं वर्तते नात्र संशयः”॥ इति **स्मृतेः** । पितृभ्रातॄणां कन्यामृतौ दशाहमाशौचमित्याहुः । **अपरे तु**—

“प्रत्ता[1]प्रत्तासु योषित्सु संस्कृतासंस्कृतासु च । मातापित्रोस्त्रिरात्रं स्यादितरेषां यथाविधि” ॥ इति ।

कार्ष्णाजिनिस्मरणात् ॥

“अप्रत्तायां मृतायां तु कन्यायां च त्रिरात्रकम् । आशौचं बांधवानां तु पित्रादीनां प्रकीर्तितम्”॥ इति **मार्कंडेयस्मरणाच्च** त्रिरात्रमित्याहुः । यथादेशाचारमत्र व्यवस्था ।

---

१ क्ष-पृक्तापृक्तासु ।

कन्यायाः खननादिसंस्कारो बालवदेव द्रष्टव्यः । उदकादिकमपि तद्वदेव । अत्र **गौतमः** (१४।३१-३३)—"उदकदानं सपिंडैः कृतचूडस्य । तत्स्त्रीणां चैके प्रत्तानाम् " इति । अस्यार्थः तदुदकदानं स्त्रीणां कृतचौलानां च कर्तव्यम् । एके मन्यन्ते प्रत्तानामेव स्त्रीणामुदकदानं भर्तृपक्षे अप्रत्तानां तु नैवोदकदानमिति ।

बोधायनोऽपि—

" अप्रत्तासु च कन्यासु प्रत्तास्वेकेह कुर्वते । लोकसंग्रहणार्थं हि तदमंत्राः स्त्रियो मताः " ॥ इति ।

ऊनद्विवर्षीया ऊढायाः संस्कारक्रमः । खननादिविकल्पोऽनूढाविषय एव । ऊढासु तृतीयवर्षात्प्रागपि दाह एव

" त्रिवर्षात्प्राग्विवाहेऽपि मरणं याति कन्यका । निखनेद्वा क्षिपेद्वाऽपि पुनःसंस्कारमर्हति " ॥ इति **स्मरणात्** । खननत्यागयोः संस्कारत्वेऽपि पुनर्विधानाद्दाह एव संस्कार इति केचिद्व्याचक्षते । **अपरे तु** खनित्वा पुनरुत्थाप्य दहेदिति । तथा च **स्मर्यते**—

" ऊनद्विवर्षाद्वार्क्तु ऊढायाः खननं भवेत् । उत्थाप्य संदहेत्पश्चात्सापिंड्यं तं समाचरेत् ॥

" ऊनद्विवर्षकन्यायाः पाणिग्रहणकर्मणि । खनित्वा निक्षिपेद्ग्रामं पुनः संस्कर्तुमर्हति "॥ इति च । सपिंडीकरणांतं च कर्म कर्तव्यम् । तदुक्तं **गृह्यपरिशिष्टे**

" अष्टमाद्वत्सरादूर्ध्वं गृहस्थब्रह्मचारिणोः । सपिंडीकरणं कुर्यान्न प्रागिति यमोदितम् ॥

"द्वादशाब्दादथाप्यर्वाक् गृहस्थस्य सपिंडनम् । तथोढायाश्च कर्तव्यं द्वादशात्परमन्यथा" ॥

अन्यथा अनूढाया इति द्वादशाब्दात्परं सपिंडनमित्यर्थः । **मार्कंडेयः**—

" स्त्रीणामुपनयनस्थाने विवाहः परिकीर्तितः । सर्वा एव क्रियाः कार्यास्तत ऊर्ध्वं समंत्रकाः ॥

" उद्वाहितानां नाशौचं पितृपक्षे विधीयते " । पितृगोत्रतः पिंडाशौचनिवृत्तौ हेतुमाह **पैठिनसिः**—

" दत्ता कन्या परैव भवति " इति । ऊढा कन्या भर्तृगोत्रैव भवतीत्यर्थः ।

" एकत्वं सा गता भर्तुः पिंडे गोत्रे च सूतके " इति **स्मरणात्** ।

स्वगृहे पुत्रीप्रसवादिनिमित्ताशौचम् । अत्र विशेषमाह **विष्णुः** (२२।३१-३३)—"स्त्रीणां विवाहः संस्कारः संस्कृतासु स्त्रीषु नाशौचं पितृपक्षे । तत्प्रसवमरणे चेत्पितृपक्षगेहे भवेतां तदैकरात्रं त्रिरात्रं वा " इति । स्वगृहे प्रसवे मरणे वा पितृव्यादिबांधवानामेकरात्रं पित्रोस्त्रिरात्रमित्यर्थः । तथा च **व्यासः**—

" दत्ता नारी पितुर्गेहे सूयेताथ म्रियेत वा । तद्बंधुवर्गस्त्वेकेन शुचिस्तज्जनकस्त्रिभिः " ॥ इति । अत्र जनकग्रहणं जनन्याः सोदरभ्रातॄणां च प्रदर्शनार्थं तेन पितृगृहे प्रसवे मातापितृसोदरभ्रातॄणां त्रिरात्रं तत्रैव प्रसवे पितृव्यमातुलादिबंधूनामेकरात्रमिति च **चंद्रिकायां** व्याख्यातम् ॥

भारद्वाजोऽपि—

" बंधूनां मातुलादीनां प्रसूतिर्मरणं गृहे । तेषामेकाहमाशौचं पितुस्तु त्र्यहमेव च"॥ इति ।

दीपिकायाम्—

" पितृगेहे मृतायां तु प्रत्तायां दुहितर्यपि । सूतिकायां च त्र्यहं पित्रोस्तत्सुतानां दिनं भवेत् ॥

" पितृगेहे भवेदेवं दिनमन्यत्र नेष्यते । स्ववेश्मनि मृतायां तु तत्पित्रोस्तु त्र्यहं भवेत् ॥

" तदभावे तत्सुतानामेकस्मिन्भवने यदि " । इति ।

षडशीतौ—"यत्र तूद्वाहिता कन्या पितृगेहे प्रमीयते । पित्रोस्त्रिदिनमन्येषां चाहरित्येक ऊचिरे ॥

" पितुर्गेहाद्दतोऽन्यत्र यदि पुत्री प्रमीयते । पक्षिणी तत्र पित्रोस्तु नान्येषामिति निश्चयः ॥

"एवं भ्रातृगृहे यत्र भगिनी वा विपद्यते । भ्रातुस्त्रिदिनमाशौचं भ्रातृव्याणां तु नैव हि"॥ इति ।

संग्रहे—

" बंधुष्वहस्त्र्यहं पित्रोरूढा तत्तद्गृहे यदि । प्रसूताऽन्यगृहे सूता मृता वा तस्य नास्त्यघम् " ॥ इति । अन्यगृह इति अन्यस्य गृहे अन्या यदि सूता मृता वा तस्यान्यस्याघं नास्तीत्यर्थः ।

शंखः—" गृहे मृतासु दत्तासु प्रसूतासु त्र्यहं तथा " इति । **स्मृत्यंतरे** विशेषः—

" यदि कन्या पितुर्गेहे पुमांसं जनयेत्तदा । त्रिरात्रं सूतकं पित्रोः कन्यासूतौ तु पक्षिणी" ॥ इति ।

अत्र **चंद्रिकायाम्**—" मातापित्रोः स्वगृहे जनने मरणे वा त्रिरात्रं गृहांतरेऽपि मरणे त्रिरात्रं प्रसवे तु पित्रोरपि नास्त्याशौचं कारणाभावात्स्वगृहप्रसूतिनिबंधनत्वात् त्रिरात्राशौचस्य " ॥ इति । अत्र केचित्प्रसवार्थमर्थदाने सति अन्यगृहे पुत्रीप्रसवेऽपि पितुस्त्र्यहमनुष्ठेयमिति लोकाचारानुसारेण वदंति । बंधुव्यतिरिक्तस्यान्यस्य गृहे कस्याश्चित्प्रसवे मरणे वा तस्यान्यस्य तद्गृहस्यापि नाशौचम् ।

" श्रोत्रिये तूपसंपन्ने त्रिरात्रमशुचिर्भवेत् । अश्रोत्रिये त्वहः कृत्स्नमनूचाने तथा गुरौ " ॥ इति **मनुना** (५।८०) श्रोत्रियाश्रोत्रियपुरुषोल्लेखेनैव गृहवासिजननमरणाशौचस्मरणात् । न[1] स्त्री-मृताविदं[2] किंचिदिति च स्त्रीमरणे उपसंपन्नाशौचस्य निषेधात् ।

" द्रव्याणि स्वामिसंबंधात्तदघे त्वशुचीनि वै । स्वामिशुध्यैव शुध्यंति वारिणा प्रोक्षितान्यपि "॥ इति **स्मृत्या** पुरुषस्याशौचसंभवे स्वामिसंबंधद्वारा तद्गृहद्रव्यकर्मणां दुष्टत्वात् । अतः स्वामिन आशौचाभावे तद्गृहस्यापि नाशौचम् । यत्तु **स्मर्यते**—

" न तावच्छुध्यते भूमिः यावत्तत्स्याद्दनिर्दिशम् । न तत्र कर्म कुर्वीत पितृदैवादिकं क्वचित् "॥ इति तत्प्रेतक्रियाकरणे वेदितव्यम् ।

" दहनांतं गृहाशौचं यत्र पिंडोदकक्रिया । दशरात्रमिति ज्ञेयं प्रेतस्तत्रैव तिष्ठति "॥ इति **स्मरणात्** । अस्त्वेवं मृतिविषये । प्रसवे अन्यस्य गृहस्य वा कथं सूतकाभाव इति चेन्नैवम् । गरीयसोऽपि शावाशौचस्याभावोक्त्या सूतकाभावस्य कैमुत्यसिद्धेः । तत्सद्भावे प्रमाणाभावाच्च । न हि क्वचिदपि बंधुव्यतिरिक्तान्यस्य गृहस्य वा शौचप्रतिपादकं प्रमाणं दृश्यते । अतः स्वामिन आशौचे सति तद्गृहे दैवपित्र्यादिकं कर्म न कार्यम् । गृहस्वामिन आशौचाभावेऽपि तत्र प्रेत-क्रियाकरणे दैवपित्र्यादि कर्म न कर्तव्यम् । गृहस्वामिन आशौचाभावे तत्र प्रेतकार्यस्याकरणेन प्रसवमरणनिमित्तमाशौचं गृहस्येति निर्णयः ।

अथोपनीताशौचम् । तत्र **याज्ञवल्क्यः** (प्रा. २३)—

" त्रिरात्रमा व्रतादेशाद्दशरात्रमतः परम् " ॥ इति । व्रतादेश उपनयनम् । ततः गर्भसप्तमा-दब्दाद्वा परं बाल्ये यौवने वार्धके वा मरणे दशरात्रमाशौचं भवतीत्यर्थः । तथा **दीपिकायाम्**—

" अनुपेत उपेते वा मृते गर्भाष्टमे समे । ब्राह्मणानां सपिंडानां दशरात्रमघं भवेत् " ॥ अस्मिन्विषये **मनुरपि** (५।५९)—"दशाहं शावमाशौचं सपिंडेषु विधीयते" इति । एतच्च ब्राह्मणविषयम् ।

---

१ क्ष–न्नपवने । २ क्ष–नस्मृताविदे ।

"शुध्येद्विप्रो दशाहेन द्वादशाहेन भूपतिः। वैश्यः पंचदशाहेन शूद्रो मासेन शुध्यति" ॥ (५।८२) इति तेनैवोक्तत्वात् । **पारस्करश्च**—" उपनीतस्य पूर्णाघम् " ॥ इति । यत्तु **याज्ञवल्क्येनो**क्तम् (प्रा. १८)—" त्रिरात्रं दशरात्रं वा शावमाशौचमिष्यते " इति तत्र त्रिरात्रमित्येतत्समानोदकविषयम् ।

एवमेव **बृहस्पतिः**—

"दशाहेन सपिंडास्तु शुध्यंति प्रेतसूतके । त्रिरात्रेण सकुल्याश्च स्नात्वा शुध्यंति गोत्रजाः " ॥ इति सकुल्याः समानोदकाः। सपिंडादीनां भेदः पूर्वमेवोक्तः। **जाबालिरपि** "त्र्यहं समानोदकानां गोत्रजानामहः स्मृतम्" इति । अतः सपिंडानां सप्तमपुरुषावधिकानामविशेषेण दशरात्रं समानोदकानां तु त्रिरात्रम् । यत्पुनः **शंखवचनम्**—

" चतुर्थे दशरात्रं स्यात्षण्णिशाः पुंसि पंचमे । षष्ठे चतुरहाच्छुद्धिः सप्तमे त्वहरेव तु " ॥ इति तद्विगीतत्वादनादरणीयम् । यद्यप्यविगीतं तथापि मधुपर्कांगपश्वालंभवल्लोकविद्विष्टत्वान्नानुष्ठेयम् ॥ " अस्वर्ग्यं लोकविद्विष्टं धर्म्यमप्याचरेन्न तु " इति **मनुस्मरणात्** । न च सप्तमे प्रत्यासन्ने सपिंडे एकाहो विप्रकृष्टाष्टमादिषु समानोदकेषु त्र्यह इति युक्तम् " इति **विज्ञानेश्वरेणोक्तम्** (पृ. १७३ पं. ५–१०)—यदपि **मनुनोक्तम्** (५।५९)—

" दशाहं शावमाशौचं सपिंडेषु विधीयते । अर्वाक् संचयनादस्थ्नां त्र्यहमेकाहमेव वा " ॥ इति । तत् "कुसूलधान्यको वा स्यात्कुंभीधान्यक एव वा। त्र्यहैहिको वापि भवेदश्वस्तनिक एव वा"॥ इति । तत्प्रतिपादितचतुर्विधगृहस्थाभिप्रायमिति **विज्ञानेश्वरेणोक्तम्**—**पराशरोऽपि** (३।५–६)—

" एकाहाच्छुध्यते विप्रो योऽग्निवेदसमन्वितः । त्र्यहात्केवलवेदस्तु निर्गुणो दशभिर्दिनैः ॥

" जन्मकर्मपरिभ्रष्टः संध्योपासनवर्जितः । नामधारकविप्रस्तु दशाहं सूतकी भवेत् " ॥ इति ।

अग्निशब्देनाहवनीयादयो गृह्यंते । अयमाशौचसंकोचो बहुतरसपिण्डस्य संकुचितवृत्तेः प्रतिग्रहादौ द्रष्टव्यः । एवं च सत्येकाहविधानमश्वस्तनिकविषयं त्र्यहविधानं त्र्याहिकविषयम् । असंकुचितवृत्तेस्तु दशाहमिति व्यवस्था । अग्निवेदसमन्वितत्वमश्वस्तानिकस्यैकाहाशौचविधिः स्तुत्यर्थः । जन्मकर्मपरिभ्रष्टः गर्भाधानादिसंस्काररहितः संध्योपासनादिनित्यनैमित्तिकान्यकुर्वाणः। अत एवासौ नामधारकविप्रो भवति। तस्यापि दशाहमेवाशौचमिति **माधवीये** व्याख्यातम् ।

उक्तार्थाभिप्रायेणैव **बृहस्पतिरपि**—

" त्रिरात्रेण विशुध्येत विप्रो वेदाग्निसंयुतः । पंचाहेनाग्निहीनास्तु दशाहात् ब्राह्मणब्रुवः " ॥

पितामहोऽपि—

" एतत् ज्ञात्वा तु मेधावी जपं होमं करोति यः । न भवेत्सूतकं तस्य मृतकं च न [1]विद्यते " ॥ एतद्गायत्रीयाथार्थ्यम् । **दक्षोऽपि**—

" ग्रंथार्थतो विजानाति वेदमंगैः समन्वितम् । सकल्पं सरहस्यं च क्रियावांश्चेन्न सूतकम् " ॥

देवलोऽपि—

" चत्वार्यधीतवेदानामहान्याशौचमिष्यते । वेदाग्नियुक्तविप्रस्य त्र्यहमाशौचमिष्यते ॥

" एताभ्यां श्रुतयुक्तस्य दिनमेकं विधीयते । एतैः साकं कर्मयुक्तः सद्यः शुचिरसंशयः ॥

---

१ याज्ञवल्कीय आचारे १५६

"अस्नात्वा चाप्यहुत्वा च अदत्वा च तथा द्विजः। एवंविधस्य विप्रस्य सर्वदा सूतकं भवेत्" ॥ इति । **स्मृत्यर्थसारे**—"दशाहस्थाने त्रिरात्रपक्षिण्येकाहसद्यःशौचपराणि वाक्यान्यापद्विषयाणि योज्यानि। समानोदकविषयाश्च सकुंचिताशौचकल्पाः पक्षिण्येकाहसद्यःशौचरूपा आपद्विषयाः" इति । एवमादिकोऽघसंकोचो युगांतरविषय इति **स्मृतिरत्ने** । तथा च **हारीतः**—

" दशाह एव विप्रस्य सपिंडमरणे सति। कल्पांतराणि कुर्वाणः कलौ व्यामोहकिल्बिषी " ॥ इति।

चंद्रिकायामपि—

" वानप्रस्थाश्रमस्यापि प्रवेशो विधिचोदितः । वृत्तः स्वाध्यायसापेक्षमघसंकोचनं तथा ॥

" एतानि लोकगुप्त्यर्थं कलेरादौ महात्मभिः । निवर्तितानि सर्वाणि व्यवस्थापूर्वकं बुधैः " ॥ इति ।

अतो गुणवतो निर्गुणस्यापि सपिंडस्य दशाहमेवाशौचं समानोदकस्य त्र्यहमिति विवेकः । **ब्रह्मचारिणः सद्यःशौचम्** । ब्रह्मचर्योत्तरकालं **कृतसमावर्तनस्या**शौचमाह **मनुः** (५।८७)—

"आदिष्टी नोदकं कुर्यादा व्रतस्य समापनात् । समाप्ते तूदकं कृत्वा त्रिरात्रमशुचिर्भवेत्" ॥ इति ।

आदिष्टं व्रतं समावर्तनं तद्वानादिष्टी ब्रह्मचारी व्रतस्थब्रह्मचर्यस्य आ समापनात् पित्रादिव्यतिरिक्तस्य नोदकं कुर्यात्पित्रादिनिर्हारे कुर्यादेव ।

" आचार्यं स्वमुपाध्यायं पितरं मातरं गुरुम् । निर्हृत्य तु व्रती प्रेतं न प्रेतेन विमुज्यते ॥

" मातामहं मातुलं च तत्पत्न्यौ चानपत्यके । प्रतिसंस्कुरुते यस्तु व्रतलोपो न तस्य हि ॥

" ब्रह्मचारी यदा कुर्यात्पिंडनिर्वापणं पितुः । तावत्कालं तदाशौचं ततः स्नात्वा विशुध्यति ॥

" आचार्यपित्रुपाध्यायान् निर्हृत्यापि व्रती व्रती । संकटान्नं च नाश्नीयान्न च तैः सह संवसेत् ॥

" दहनादिसपिंडयंतं ब्रह्मचारी करोति चेत् । अन्यत्र मातापित्रोः स्यादुपनीय पुनर्व्रती ॥

" आचार्यं स्वमुपाध्यायं गुरुं वा पितरं च वा । मातरं वा स्वयं दग्ध्वा व्रतस्थस्तत्र भोजनम् ॥

" कृत्वा पतति यत्तस्मात्प्रेतान्नं नात्र भक्षयेत् । अन्यत्र भोजनं कुर्यान्न च तैः सह संविशेत् ॥

" एकाहमशुचिर्भूत्वा द्वितीयेऽहनि शुध्यति " ॥ इति **मनुभृगुयाज्ञवल्क्या**दिस्मरणात् । 'समाप्ते तूदकं कृत्वा' इति समाप्ते ब्रह्मचर्ये कृतसमावर्तनस्य सपिंडमरणे सति त्रिरात्रमाशौचं भवेदित्यर्थः । तथा **मानवे** व्याख्याने **स्मृतिरत्ने** च समाप्ते ब्रह्मचर्ये कृतसमावर्तनस्याकृतविवाहस्यायं त्रिरात्रविधिरिति । एवं च " अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः " इति वचने सत्यपि " त्रिरात्राशौचविधायकविशेषवचनेन त्रिरात्राशौचोदकदानानंतरमेवोद्वाह " इति युक्तम् । **विज्ञानेश्वरीये** विशेषः । ब्रह्मचर्योत्तरकालं पूर्वमृतानां सपिंडानामुदकदानमाशौचं कुर्यादेव । यथा **मनुः** (५।८७)—

" आदिष्टी नोदकं कुर्यादा व्रतस्य समापनात् । समाप्ते तूदकं दत्वा त्रिरात्रमशुचिर्भवेत् " ॥

आदिष्टीति ब्रह्मचर्यस्य " अपोशानकर्म कुरु मा दिवा स्वाप्सीः " इत्यादि व्रतादेशयोग्यो ब्रह्मचार्युच्यते । आचार्यः पुनरेव मन्यते आदिष्टीति प्रक्रांतप्रायश्चित्तः कथ्यते तस्यैवायमुदकदानादिनिषेधः प्रायश्चित्तरूपव्रतसमाप्त्युत्तरकालमुदकदानाद्याशौचविधिरिति । **दशकटीकायां** तु कृच्छ्रचांद्रायणवेदपारायणब्रह्मचार्यविवाहयज्ञादिपरिसमाप्तिर्यदा आशौचकालमध्ये स्यात्तदा शेषाशौचमनुष्ठेयम् । यस्याशौचकालादूर्ध्वं परिसमाप्तिः स्यात्तदा मरणविषये अतिक्रान्ताशौचमनुष्ठेयम् । अत्र **मनुः** 'आदिष्टी नोदकं कुर्यात्' इत्यादि व्रतमस्यादिष्टमित्यादिष्टी व्रती ब्रह्मचारी । स

ऋत्विक्दीक्षितानामप्युपलक्षणार्थः । अत्र 'समाप्ते तूदकं कृत्वा' इत्येतत् "अतिक्रांते दशाहे च त्रिरात्रमशुचिर्भवेत्" इत्यस्यानुवादकम् । अतो व्रतिनां जातिमरणे सति संवत्सरादूर्ध्वं व्रतसमाप्तिश्चेत्सद्यः शौचमेवेति । शातकेऽपि—

"कृच्छ्रादीनां समाप्तिश्चेदघे शिष्टाहमिष्यते । तद्बहिश्चेत्त्र्यहादि स्यादित्याह भगवान्मनुः" ॥ इति । तद्व्याख्याने आदिशब्देन वेदपारायणप्रायश्चित्तव्रतादीनामुपसंग्रहः । एतेषां समाप्तिर्यद्यघमध्ये स्यात्तदा शिष्टाहविधिर्भवति । तत्परं चेत्समाप्तिः तदा "त्रिरात्रं त्रिषु मासेषु" इत्युक्तविधिः स्यात् । तथाह **मनुः** (५।८७)—

"आदिष्टी नोदकं कुर्यादा व्रतस्य समापनात् । समाप्ते तूदकं कृत्वा त्रिरात्रमशुचिर्भवेत्" ॥ इति । त्रिरात्रमिति पाक्षिण्यादेरप्युपलक्षणम् । कृच्छ्रव्रतादिकमस्यादिष्टमित्यादिष्टी व्रती ब्रह्मचारी च । ब्रह्मचर्यव्रतस्याप्यादिष्टत्वात् । अतः व्रतसमाप्तिपर्यंतमादिष्टी उदकमाशौचं च न कुर्याद्वत्सरमध्ये तत्समाप्तौ त्र्यहाद्याशौचमुदकदानं च कुर्यात्तत्परं उदकमात्रमेव ।

"सर्वेषां वत्सरे पूर्णे प्रेते दत्वोदकं शुचिः" इति **याज्ञवल्क्य**स्मरणादिति । एवं च अघमध्ये ब्रह्मचर्यसमाप्तौ शिष्टाहविधिः । अघात्परं वत्सरमध्ये ब्रह्मचर्यसमाप्तौ त्र्यहपाक्षिण्यहोरात्रविधिरुदकं च वत्सरात्परं तत्समाप्तौ उदकमात्रमेवेति **विज्ञानेश्वरा**दिभिरुक्तम् । एतच्च शिष्टाचारविरुद्धम् । न हि विवाहात्पूर्वं त्र्यहमाशौचमुदकं चानुतिष्ठन्ति । अतः "समाप्ते तूदकं कृत्वा त्रिरात्रमशुचिर्भवेत्" इति कृतसमावर्तनस्याकृतविवाहस्यायमपूर्वस्त्रिरात्रविधिरिति यदुक्तं तदेव युक्तमित्याहुः ।

अनौरसपुत्रजननाद्याशौचम् । अनौरसपुत्रजननाद्याशौचमाह **विष्णुः**—(२२।४२)

"अनौरसेषु पुत्रेषु जातेषु च मृतेषु च । त्रिरात्रेण भवेच्छुद्धिरेकाहं तु सपिंडतः ॥

"परपूर्वासु भार्यासु प्रसूतासु मृतासु च" ॥ इति । अनौरसाः क्षेत्रजादयः ।

तानाह **मनुः** (९।१५९-१६०)—

"औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च । गूढोत्पन्नोऽपविद्धश्च दायादा बांधवास्तु षट् ॥

"कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा । स्वयंजातश्च शूद्रश्च षडदायादबांधवाः" ॥ इति ।

एतेषु क्षेत्रजादिषु जातेषु मृतेषु च दत्तादिषु मृतेषु द्विविधयोरपि पित्रोस्त्रिरात्रेण शुद्धिः । उभयविधज्ञात्योरेकाहाच्छुद्धिः । परो वर्तमानभर्तुरन्यः पूर्वो भर्ता यस्याः सा परपूर्वा पुनर्भूरिति यावत् । परपूर्वभार्यामरणे पूर्वपरयोर्भर्त्रोस्त्रिरात्रं उभयविधसपिंडानामहोरात्रमाशौचमित्यर्थः । तथा च **हारीतः**—

"परपूर्वासु भार्यासु पुत्रेषु कृतकेषु च । मातामहे त्रिरात्रं स्यादेकाहस्तु सपिंडतः" इति । कृतकः पुत्रो जन्मव्यतिरिक्तैः कारणैर्जातो दत्तादिः । वाक्यार्थस्तु मातामहे मृते दौहित्रस्य त्रिरात्रं परपूर्वामरणे भर्त्रोस्त्रिरात्रं कृतकपुत्रमरणे प्रतिग्रहीत्रादिरूपपितुस्त्रिरात्रं तत्सपिंडानामहोरात्राशौचमिति । स्वैरिणीभर्तॄणामपि त्रिरात्रमाह **व्यासः**—

"परपूर्वासु भार्यासु पुत्रेषु कृतकेषु च । त्रिरात्रं स्यात्तथाचार्ये स्वभार्यास्वन्यगासु च" ॥ इति ।

शंखोऽपि—

"अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च । परपूर्वासु च स्वासु त्रिरात्राच्छुद्धिरिष्यते" ॥ इति ।

मरीचिः—"सूतके मृतके चैव त्रिरात्रं परपूर्वयोः । एकाहस्तु सपिंडानां त्रिरात्रं यत्र वै पितुः" ॥ इति ।

जनकपितुरपि त्रिरात्रमाह **मनुः** (५।६२)—

" बैजिकादपि संबंधादनुरुंध्यादघं त्र्यहम् " । इति । अनुपनीतक्षेत्रजादिविषये **प्रजापतिः**—

" अत्याहृतेषु दारेषु परनारीसु तेषु च । गोत्रिणः स्नानशुद्धाः स्युः त्रिरात्रेणैव तत्पिता " ॥ इति ।

भिन्नपितृकसोदरविषये **मरीचिः**—

" मात्रैकया द्विपितृकौ भ्रातरावन्यगोचरौ । एकाहं सूतके प्रोक्तं त्रिरात्रं मृतके तयोः " ॥

संग्रहे—

"जनने क्षेत्रजादीनां तत्पित्रोस्त्र्यहमिष्यते । तत् ज्ञात्योर्दिनमेवेत्थमुपेतानां मृतौ न चेत् ॥

"पित्रोस्त्र्यहं तयोः सद्यस्त्र्यहं तेषां पितृक्षये" इति । क्षेत्रजादीनामुपेतानां मृतावित्थमेव पित्रोस्त्र्यहं तत् ज्ञात्योर्दिनमित्युक्तमेव चेदनुपनीतानां मृतौ पित्रोस्त्र्यहं तयोः तत् ज्ञात्याः सद्यःशौचं । पित्रोः क्षये क्षेत्रजदत्तादीनामपि त्र्यहमित्यर्थः । **तत्रैव**—

"पराश्रिताया भार्याया मृतौ पत्योस्त्रिरात्रकम् । तत्पक्षयोर्दिनं तस्यास्त्र्यहं भर्त्रोश्च संस्थितौ" ॥ इति ।

याज्ञवल्क्यस्तु (प्रा. २५)—" अनौरसेषु पुत्रेषु भार्यास्वन्यागतासु च" इति ।

अत्र **विज्ञानेश्वरः** (पृ. १८३ पं. २४)—"अहरित्यनुवर्तते । अनौरसाः क्षेत्रजदत्तादयः । तेषु जातेषु उपरतेषु वा पित्रोरहोरात्रमाशौचम् । भार्यास्वन्यगतासु अन्यं प्रतिलोमव्यतिरिक्तमाश्रितासु अतीतासु चाहोरात्रमेव । न पुनः सत्यपि सापिंड्ये दशरात्रम् । प्रतिलोमाश्रितासु त्वाशौचाभाव एव । " पाखण्ड्यनाश्रितस्तेन भर्तृघ्न्यः कामगाश्च याः " इत्यनेन प्रतिषेधात् " ।

विष्णवाद्युक्तत्रिरात्रस्य **याज्ञवल्क्यो**क्तैकरात्रस्य च संनिधिविदेशस्थापेक्षया व्यवस्था। यदा पितुस्त्रिरात्रं तदा सपिंडानामेकरात्रम् । अन्यथा सद्यःशौचम् । "एकाहस्तु सपिंडानां त्रिरात्रं यत्र वै पितुः " इति **मरीचिस्मरणात्** " इति ।

दत्तविषये । एवं च दत्तस्य मरणे जनयितृप्रतिग्रहीतृरूपापित्रोस्त्रिरात्रमाशौचं द्वयोरपि ज्ञात्योरेकरात्रम् । पित्रोर्द्विविधयोर्मरणे दत्तस्य त्रिरात्रम् । उभयविधज्ञातिमरणे चैकरात्रमिति स्थितम् । एतत् द्विगोत्रकदत्तविषयमित्येके । उपनयनानंतरं दत्तो द्विगोत्रकः । तथा च **स्मर्यते**—

" जनकस्य तु गोत्रेण उपनीतो द्विगोत्रकः " । **स्मृत्यंतरेऽपि**—

" उपनेतुर्भजेत् गोत्रमसंप्रज्ञातगोत्रवान् । संप्रतिज्ञातगोत्रश्चेदुभयं दत्तपुत्रवत्" ॥ इति ।

पैठीनसिरपि—" दत्तक्रीतकृत्रिमपुत्रिकापुत्राः परिग्रहेणार्षेण जातास्ते संहतगोत्रा द्व्यामुष्यायणा भवंति " इति । उपनयनात्पूर्वं दत्तस्य जनयितृगोत्राशौचसंबंधो नास्ति ।

तथा च **मनुः** (९।१४२)—

" गोत्ररिक्थे जनयितुर्न हरेत् दत्रिमः सुतः । गोत्ररिक्थानुगः पिंडो व्यपैति ददतः स्वधा " ॥

मरीचिरपि—

" गोत्रांतरप्रविष्टानां दाय आशौचमेव च । ज्ञातित्वं च निवर्तेत तत्कूले सर्वमिष्यते " ॥ इति ।

स्मृत्यंतरे—

" गोत्रांतरप्रविष्टास्तु संस्कार्यास्तत्कुलेन तु । जननेनैव पितरो दानेनैव निवर्तिताः ॥

" दत्तस्य परिवेत्तृत्वमाशौचं दाय एव च । गृहीतृगोत्रात् संग्राह्यं श्रौतं स्मार्तं तथैव च" ॥ इति ।

एवं च उपनयनात्पूर्वं दत्तस्य पितृभ्रातृज्ञातिमरणे दशाहमाशौचम् । दत्तमरणेऽपि तेषां दशाह-मस्ति । अत एव प्रतिग्रहीतृमरणे दशाहमध्ये दर्शागमे दशाहेनैव दत्तकर्तृकपिंडोदकसमापनं

स्मर्यते—

" दशाहमध्ये यदि दर्श आपतेत् दद्युर्दशाहं तिलवारिपिंडम्।

" पुत्रीसुतो दत्तक औरसश्च शेषाः सुतास्तत्र समापयेयुः " ॥ **गालवोऽपि**—

" दौहित्रः पुत्रिकापुत्रो दत्तको ह्यौरसस्तथा। उदकं पिंडदानं च यथाकालं समाचरेत् "॥ इति।

स्मृत्यंतरेऽपि—

" यद्यमान्तर्दशाहे स्यादौरसो दत्तकृत्रिमौ। पिंडोदकं दशाहेऽन्हि दद्युरन्ये त्वमातिथौ " ॥ इति। अन्यथा दशाहाशौचाभावे 'यावदाशौचमुदकम्' (१९।१३) इति **विष्णुस्मरणेन** त्रिरात्रेणैव सर्वदा समापनप्रसंगः। तथा कृतचौलभिन्नोदरभ्रातृमरणे दत्तस्य दशाहशौचमुक्तं **बृहस्पतिना**—

" भिन्नोदराणां भ्रातॄणां जातदंते मृते त्वघम्। दशाहं कृतचौले तु दत्तादीनां विधीयते " ॥ इत्याहुः। **अपरे तु** " दशाहमध्ये दर्शागमे दशाहेन समापनं। कृतचौलभ्रातृमरणे दत्तकस्य दशाशौचं च संस्कर्तृविषयं अन्यथा त्र्यहम्।

" मातापित्रोः क्रियाः कुर्यादौरसो यदि पुत्रकः। कुलान्तरप्रविष्टानामाशौचं त्र्यहमेव तु " ॥ इति **स्मरणात्**—अत्र सपिंडानामेकरात्रं " एकाहस्तु सपिंडानां त्रिरात्रं यत्र वै पितुः " ॥ इति **स्मरणादिति**—जनयितुः पुत्रपौत्रप्रपौत्राभावे दत्त एव मातापित्रोर्मरणे दशाहमाशौचं दाहादि सर्वं प्रेतपितृकृत्यं प्रत्यब्दं तन्मृताहे प्रावर्णं च कुर्यात्। पुत्रादिरहितसोदरभ्रातृमरणेऽपि स एव सर्वं कुर्यात्। "पूर्वभ्रातुश्च पित्रोश्चार्तौ कृत्यं स्वल्पं च दत्तके" इति **स्मरणात्**—

"दत्तस्य जनकापत्ये मृतेऽथ जनकेऽपि वा। संस्काराद्यखिलं कृत्वा दत्तो रिक्थमवाप्नुयात्" ॥ इति **स्मरणात्**। जनयितुः पुत्रांतरसद्भावे तन्मरणे दत्तस्य त्र्यहमाशौचं दत्तमरणेऽपि त्रिरात्रमाशौचं "बैजिकादपि संबंधादनुरुंध्यादघं त्र्यहम्" इति **स्मरणात्**॥ "न ज्येष्ठं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा" इति निषेधोल्लंघनेन मोहवशाज्ज्येष्ठपुत्रस्य दाने पुत्रांतरसद्भावेऽपि ज्येष्ठ एव दत्तो जनयितुर्दशाहादि सर्वं कुर्यादिति **त्रिकांड्यामुक्तम्**। तथा च **पारस्करः**—

" दत्तोऽपि न त्यजेत्पित्र्यं धनं गोत्रं च सर्वदा। दत्तस्य तूभयत्रापि संबंधं मनुरब्रवीत् " ॥ इति अयमेवोभयधनग्राही द्व्यामुष्यायण इति केचिदाहुः। पूर्वोक्तरीत्या उपनयनान्तरं दत्त इत्यन्ये इति। तदन्येषां पितृव्यतिरिक्तानां सपिंडानां च तत्स्नानमपि नास्तीत्यर्थः। **स्मृत्यर्थसारे** तु—

"देशांतरादर्वाग्देशमृतौ स्वाशौचकालादूर्ध्वं श्रुतायां तद्देशं विंशतियोजनादिकं त्रेधा विभज्याद्ये च स्वामिसमीपे भागे त्रिरात्रम्। ततो दूरभागे पक्षिणी ततो दूरभागे त्वेकाहम्। एवं देशं पर्यालोच्य यत्राल्पाशौचं तदेव ग्राह्यम्। अत्राघाहानि न वर्धयेत्

" न वर्धयेदघाहानि प्रत्यूहेन्नाग्निषु क्रियाः " इति (५।८३) **मनुस्मरणात्**। लघुकल्पसंभवे गुरुकल्पाश्रयेणाघवानघानि न वर्द्धयेत्। लघुकल्पमाश्रितोऽपि वैतानाग्निषु क्रियाः प्रत्यूहेन्न विहन्यादिति **मनुवचनार्थः**। देशांतरलक्षणमुक्तम्। " देशांतरस्थे मृते स्वाशौचकालादूर्ध्वं श्रुते सपिंडानां सचेलस्नानं न त्रिरात्रात् " इति। तथा च **पराशरः** (३।१४)—

" देशांतरे मृतः कश्चित्सगोत्रः श्रूयते यदि। न त्रिरात्रमहोरात्रं सद्यः स्नात्वा शुचिर्भवेत् "॥ इति।

याज्ञवल्क्योऽपि—

" **देशांतरमृतिं श्रुत्वा क्लीबे वैखानसे यतौ। मृतौ स्नानेन शुध्यंति गर्भस्रावे च गोत्रिणः** "॥ इति।

अत्र **विज्ञानेश्वरः**—"यस्तु नद्यादिव्यवहिते देशांतरे मृतः तत्सपिंडानां दशाहादूर्ध्वं मासत्रयादर्वागपि सद्यःशौचम्" इति । **षडशीतौ**—

"ज्ञातेर्मृतौ यदाशौचं दशाहात्तु बहिः श्रुतौ । एकदेश इदं प्रोक्तं स्नात्वा देशांतरे शुचिः "॥ इति ।

देशांतरलक्षणमाह बृहस्पतिः—

"महानद्यंतरं यत्र गिरिर्वा व्यवधायकः । वाचो यत्र विभिद्यंते तद्देशांतरमुच्यते ॥

"देशांतरं वदंत्यन्ये षष्टियोजनमायतम् । चत्वारिंशद्वदंत्यन्ये त्रिंशदन्ये तथैव च "॥ इति ।

योजनलक्षणं माधवीयेऽभिहितम्—

"तिर्यग्यवोदरा ह्यष्टावूर्ध्वा वा व्रीहयस्त्रयः । प्रमाणमंगुलस्योक्तं वितस्तिर्द्वादशांगुला ॥

"वितस्तेर्द्विगुणोऽरत्निस्तस्मात्किष्कुस्ततो धनुः । धनुःसहस्रे द्वे क्रोशश्चतुःक्रोशं तु योजनम्"॥ इति ।

स्मृत्यंतरे—

"भाषाभेदो महानद्या व्यवधानमथाद्रिणा । त्रिंशद्योजनभेदो वा प्रत्येकं देशभेदनम्" ॥ इति । महानद्य उक्ता **नृसिंहपुराणे**—"गंगा यमुना गोदावरी तुंगभद्रा कावेरी चैता महानद्यः" इति ।

वामनपुराणेऽपि—

"गोदावरी भीमरथी कृष्णवेणी सरस्वती । तुंगभद्रा सुप्रयोगा सिंहा कावेरी रेविका ॥

"दुग्धोदा नलिनी रेवा वारिसीता बलस्वना । महा अपि महानद्यः सह्यमूलाद्विनिर्गताः" ॥

महा अपीति परिगणिताभ्योऽन्या याः काश्चिद्विस्तारवत्यः ता अपि महानद्य इत्यर्थः

एवं च महानद्या दक्षिणकूलमुत्तरकूलं च परस्परापेक्षया देशांतरं भवति । यथोक्तं **बृहन्मनुना**—

"देशनामनदीभेदो निकटे यत्र वै भवेत् । तेन देशांतरं प्रोक्तं स्वयमेव स्वयंभुवा" ॥ इति । देशनामानि अंगवंगकलिंगादीनि । नदीविशेषः महानदीति यावत् । एवमुक्तमतिक्रांताशौचं मातापितृव्यतिरिक्तसपिंडविषयम् । मातापितृविषये तु सन्निहितदेशे देशांतरे च दशरात्रमेव । तत्र **पैठिनसिः**—

"पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः । श्रुत्वा तद्दिनमारभ्य दशाहं सूतकं भवेत्"॥ इति । **चंद्रिकायामिदं** व्याख्यातम्—"श्रुत्वेत्यत्र तु उर्ध्वमिति शेषो द्रष्टव्यः । ततश्च दशरात्रमध्ये तु वार्ताश्रवणे पुत्रस्यापि तच्छेषेणैव न सपिंडांतरवच्छुद्धिः" इति । **षडशीतौ**—

"देशकालादिभेदेऽपि मातापित्रोर्मृतिश्रुतौ । श्रवणादिदशाहं स्यान्निर्दशत्वमिति स्थितिः" ॥

स्मृत्यर्थसारे—"मातापितृमरणे दशाहादूर्ध्वं वत्सरादूर्ध्वमपि पुत्रः श्रुतदिवसमारभ्य दशाहमाशौचं कुर्यादुदकपिंडादि च । पत्न्या अपि दशाहम् । "दशाहं पुत्रभार्ययोः" इति **पैठीनसि**वचनात् । महागुरुमरणे 'दूरदेशेऽप्यतीतेऽब्देऽप्यार्द्रवस्त्रोपवासिना' तथैवाशौचादि कार्यम् । वत्सरेऽतीते मातुः सपत्न्या मरणे पुत्रस्य त्रिरात्रम् । "सपत्न्योः परस्परं चैवम्" इति । **स्मृत्यंतरे** च—

"यत्रकुत्रास्थितः पुत्रः श्रुत्वा पितृविपर्ययम् । श्रुत्वा तद्दिनमारभ्य दशाहं सूतकं भवेत्" ॥

अन्यत्रापि—

"मुख्यकर्ता विदेशस्थो मातापित्रोर्मृतौ यदि । संवत्सरे व्यतीतेऽपि कुर्यात् प्रेतक्रियां पुनः" ॥ इति ।

दक्षः—

"महागुरुनिपाते तु आर्द्रवस्त्रोपवासिना । अतीतेऽब्देऽपि कर्त्तव्यं प्रेतकार्यं यथाविधि" ॥ इति ।

संवत्सरादूर्ध्वमपि प्रेतकार्यमाशौचोदकदानादि कार्यमित्यर्थः । **चंद्रिकायाम्**—महागुरुनिपातः इत्यत्र महागुरुशब्देन माता चोच्यते । न पुनः पितैव ।

" द्वौ गुरू पुरुषस्येह पिता माता च धर्मतः । तयोर्गुरुः पिता तावन्माता गुरुतरा स्मृता " ॥ इति मातुरपि गौरवातिशयस्मरणादिति । **विज्ञानेश्वरः** (पृ.१८२ पं.२७-२८)—"यस्तु पिता पुत्रानुत्पाद्य वेदार्थं ग्राहयित्वा वृत्तिं च विदधाति तस्य महागुरुत्वाद्धुपरमे द्वादशाहम् " इति । यत्तु **स्मृत्यंतरम्**—

"पिता पितामहश्चैव ज्येष्ठश्च प्रपितामहः । यश्चोपनीय सकलं वेदमध्यापयेत् स च ॥

"महागुरव इत्येते पञ्च प्रोक्ता मनीषिभिः" ॥ इति तत् पुत्रादीनां पञ्चानां अब्दादूर्ध्वमपि यथाविधि प्रेतकार्यं कर्त्तव्यमित्येवंपरं न पुनस्तेषामुपरमे द्वादशाहाशौचप्राप्त्यर्थम् । " दशमं पिंडमुत्सृज्य रात्रिशेषे शुचिर्भवेत्" इति **स्मरणात्** ।

" पितरि प्रोषिते प्रेते पुत्रो देशांतरे गतः । कृतक्रिये त्रिरात्रं स्याद्दशाहमकृतक्रिये " ॥ इति । यत्कृतक्रिये त्रिरात्रविधानं तत्कनिष्ठपुत्रविषयम् । ज्येष्ठस्य तु

' कृतक्रियेऽपि पितरि दशाहं सूतकं भवेत् । दद्यात्तिलोदकं पिंडं सपिंडीकरणं पितुः " ॥ इति दशाहविधानात् कृतस्यापि सपिंडीकरणस्य पुनःकरणविधानात् ज्येष्ठविषयत्वमस्यावगम्यते । मातृव्यतिरिक्त**पितृपत्नी**विषये **विशेषमाह**—

" पितृपत्न्यामतीतायां मातृवर्जं द्विजोत्तमः । संवत्सरे व्यतीतेऽपि त्रिरात्रमशुचिर्भवेत् " ॥ इति । **वरदराजीये**—"प्रागब्दाज्जननीसमं दिशतु तत्प्रेतोदकादिक्रियाम्" । उक्तमात्रस्य द्व्यामुष्यायणत्वाभिधानं "गोत्रांतरप्रविष्टानां दाय आशौचमेव च । ज्ञातित्वं च निवर्तन्ते" इत्यादिपूर्वोक्त**मन्वा**दिवचनविरोधादुपेक्ष्यम् । **स्मृत्यंतरे**—

" दत्तस्य पुत्रजनने मरणे पूर्वगोत्रिणाम् । स्नानमात्रं सचेलं स्यान्नाशौचं विद्यते क्वचित् " ॥ इति । पुत्रपरिग्रहानंतरमौरसपुत्रजनने कनिष्ठोऽप्यौरस एव पित्रादेर्दाहादिकं कुर्यात् ।

"औरसे तु समुत्पन्ने दत्तो ज्येष्ठो न चेष्यते । न्यूनोऽपि वयसा पित्रोः कुर्यादेवौरसः सुतः " ॥ इति **स्मरणात्** ।

विवाहितस्त्रीविषये पित्राद्याशौचम् ।

पित्रोर्मरणे संस्कृतानां स्त्रीणामाशौचमाह **मनुः**—

" पित्रोरुपरमे स्त्रीणामूढानां तु कथं भवेत् । त्रिरात्रेणैव शुद्धिः स्यादित्याह भगवान्यमः " ॥ इति । पित्रोर्मृतौ पुत्रीणामूढानां त्रिरात्रेण शुद्धिः । तासां च मृतौ पित्रोस्त्रिरात्रेणैव शुद्धिरित्येवकारार्थः । "त्रिरात्रेणैव तत्पिता" इति **प्रजापति**स्मरणात् । "पुत्र्यास्त्रिरात्रमाशौचं तत्र भोजने च कृते दशाहं भवति" इति **भरद्वाज**स्मरणाच्च त्र्यहविधानं संनिधावेव । "पित्रोः स्वसरि तद्वच्च पक्षिणीं[1] क्षपयेत् निशाम्" । परोक्षे पक्षिणीविधानात् । **संग्रहे**—

"परोक्षे पक्षिणी नो चेत्त्र्यहं प्रेतान्नभोजने । दशरात्रं मृतौ पुत्र्याः पित्रोश्चान्योन्यमित्यघम्" ॥ इति ।

दौहित्रमातामहाचार्यमातृष्वस्रादिविषयाशौचम् ।

दौहित्रादिमरणे **वृद्धमनुः**—

"संस्थिते पक्षिणीं रात्रिं दौहित्रे भागिने सुते । संस्कृते तु त्रिरात्रं स्यादिति धर्मो व्यवस्थितः" ॥ इति । दौहित्रे भगिनीसुते वा उपनयनसंस्कृते मृते मातामहमातामह्योर्मातृष्वसृमातुलयोश्च त्रिरात्रमाशौचं भवति

१ क्ष—नानंतरं दत्तजत्यन्ये ।

उपनयनासंस्कृते कृतचौले पक्षिणी । चौलात्पूर्वं तु भागिनेयादिमरणे मातुलादेः सद्यःशौचस्य **चंद्रिकाया**मुक्तत्वात् । पक्षिणीं रात्रिं आगामिवर्त्तमानाहर्युक्तां रात्रिं मातामहादिः क्षपयेदित्यर्थः । एवं स्वस्रीयस्य मृतावपि व्रतात्प्राक् मातृष्वसृमातुलयोः पक्षिणीविधानात् अनुपनीतयोस्तयोर्मृतौ तस्य सद्यःशौचमेवेति ज्ञेयम् । मातामहादीनां मरणे दौहित्रादीनां त्रिरात्रम् ।

तथा च **बृहस्पतिः**—" त्र्यहं मातामहाचार्यश्रोत्रियेष्वशुचिर्भवेत् "। आचार्योऽत्रासपिंडः सन्नुपनयादिकर्ता ।

" उपनीय तु यः शिष्यं वेदमध्यापयेत् द्विजः । सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते"॥ इत्युक्तलक्षणः । श्रोत्रियस्त्वेकशाखाध्यायी मैत्रीप्रातिवेश्यत्वादिनोपसंपन्नः ।

" श्रोत्रियेतूपसंपन्ने त्रिरात्रमशुचिर्भवेत् " इति (५।८०) **मनु**स्मरणात् ।

" गृहे यस्य मृतः कश्चिदसपिंडः कथंचन । तस्याप्याशौचं विज्ञेयं त्रिरात्रं नात्र संशयः " ॥ इत्यं**गिरः**स्मरणात् । **विष्णुः** (२२।४१)—" आचार्यमातामहयोर्व्यतीतौ त्रिरात्रम् " ॥ इति । **आश्वलायनो**ऽपि (४४।१९)—" गुरौ चासपिंडे त्रिरात्रम् " ॥ इति । गुरुरत्राचार्यः । सपिंडो गुरुः पिता । तदुपरमे दशाह एव । यस्तु पिता पुत्रानुत्पाद्य संस्कृत्य वेदार्थं ग्राहयित्वा वृत्तिं च विदधाति तस्य महागुरुत्वात्तदुपरमे द्वादशरात्रं " महागुरौ दानाध्ययने वर्जयेरन् " **इत्याश्वलायनोक्तं** द्रष्टव्यम् । **मनुः** (५।७९)—

" त्रिरात्रमाहुराशौचमाचार्ये संस्थिते सति । तस्य पुत्रे च पत्न्यां च दिवारात्रमिति स्थितिः " ॥ एतच्च त्रिरात्राशौचं परकर्तृकदाहादौ द्रष्टव्यम् । स्वकर्तृके तु **मनुरेवाह** (५।६४)—

" गुरोः प्रेतस्य शिष्यस्तु पितृमेधं समाचरन् । प्रेताहारैः समं तत्र दशरात्रेण शुध्यति " ॥ प्रेताहारैः प्रेतान्नभोजिभिः सपिंडैरिति यावत् । अत्र **चंद्रिकायाम्**—" शिष्ये दशरात्राशौचस्य पितृमेधकर्तृत्वप्रयुक्तत्वात् दौहित्रादावपि पितृमेधकर्तृत्वे दशरात्रं वेदितव्यम् " इति । मातृष्वस्रादौ त्रिरात्रमाह **प्रचेताः**—

" मातृष्वसामातुलयोः श्वश्रूश्वशुरयोर्गुरौ । मृते चर्त्विजि याज्ये च त्रिरात्रेण विशुध्यति " ॥ अत्र **चंद्रिकायाम्**-"मातृष्वस्रादिषु वक्ष्यमाणपक्षिण्याशौचविरोधपरिहाराय कश्चिद्विशेषणं कल्प्यम् । तत्र मातृष्वसामातुलयोर्भगिनीसुतसन्निधात्रोः श्वश्रूश्वशुरयोर्जामातृपोषकयोर्गुरौ उपनयनादिकर्तरि ऋत्विजि यजमानकुलक्रमायाते याज्ये च ऋत्विक्कुलक्रमायाते मृते भागिनेयादिस्त्रिरात्रेण शुध्यति" इति । **गौतमः** (१४।२५)—" आचार्यतत्पुत्रस्त्रियाज्येषु चैवम् " इति । एवमिति त्रिरात्रातिदेशः। अत्राचार्यपुत्रस्त्रियोर्मरणे त्रिरात्रं तयोरुपकर्तृत्वे सति द्रष्टव्यम् । **बोधायनो**ऽपि—(१।५।११६)—" शिष्यसतीर्थ्यसब्रह्मचारिषु त्रिरात्रमहोरात्रमेकाहामिति कुर्वीत " ॥ इति । उपनीयाध्यापितः शिष्यः । तस्य मरणे त्रिरात्रमाचार्यः कुर्वीत । एकस्मादुपाध्यायात्सहाधीतकृत्स्नवेदः सतीर्थ्यः । तस्य मरणे तदितरः सतीर्थ्यः अहोरात्रं कुर्यात् । सहैकदेशाध्यायी सुहृत्सब्रह्मचारी तस्मिन्मृते तदितरः अहोरात्रमेव कुर्यादित्यर्थः । **स्मृत्यंतरे**—

" मातृष्वसामातुलयोः श्वश्रूश्वशुरयोर्गुरौ । तत्पुत्रस्त्रीषु याज्ये च मृते मातामहं त्र्यहम् " ॥ इति । **व्यासो** विशेषमाह—

"आशौचं तु त्रिरात्रं स्याच्छ्वश्रूश्वशुरयोर्मृतौ । जीवत्यामेव भार्यायां मृतायां दिवसाच्छुचिः "॥ इति ।

गौतमस्तु—

" श्वश्रूश्वशुरनाशात्तु पूर्वं भार्या मृता यदि । तत्संततेः स्यात्क्षपणं त्र्यहमित्याह गौतमः "॥ इति ।

संग्रहे—

" श्वश्रूश्वशुरस्वाचार्यतत्पत्नीतत्सुतर्त्विजाम् । याज्यांतेवासिनोर्नाशे त्र्यहमित्याह गौतमः ॥

" मातृष्वसृपितृभ्रातृमृतौ तत्प्रतियोगिनः । पुंसस्त्र्यहं मातुलानीमातामह्योर्मृतौ तथा " ॥ इति । **अंगिराः**—"मातामहमातुलमातामहीमातुलान्यादीनां त्रिरात्रेण श्वशुरस्य च" इति ॥ **दशकेऽपि**—

" उत्पन्ने त्रिदिनं मृतेऽप्युपनयनादूर्ध्वं समानोदके पुत्रे चैवमनौरसेऽन्यपितृके प्रेते तथा सोदके ॥

"मातृभ्रातृपितृष्वसृश्वशुरतत्पत्न्यर्त्विगाचार्यतद्भार्यातत्सुतयाज्यशिष्यगृहसंप्राप्तेषु च ज्ञातिषु"॥ इति ।

यत्तु **वृद्धमनुवचनम्**—

"श्वशुरयोश्च भगिन्यां च मातुलान्यां च मातुले । पित्रोः स्वसरि तद्वच्च पक्षिणीं क्षपयेन्निशाम् " ॥ इति एतत् मातुलान्यादिमृतौ पक्षिणीविधानं स्त्रीविषयम् ।

" मातामहीमातुलानीमातुलानां मृतौ स्त्रियाः । पक्षिणी पुरुषाणां तु त्रिरात्रमघमिष्यते " ॥ इति **स्मृतेः** । यत्तु **चंद्रिकायामुक्तम्**—

" मातुले श्वशुरे मित्रे गुरौ गुर्वंगनासु च । आशौचं पक्षिणीं रात्रिं मृता मातामही यदि "॥ इति ।

यदपि **वृद्धवसिष्ठवचनम्**—

" भगिन्यां संस्थितायां तु भ्रातर्यपि च संस्थिते । मित्रे जामातरि प्रेते दौहित्रे भगिनीसुते ॥

"स्यालके तत्सुते चैव सद्यःस्नानेन शुध्यति" इति । अत्र **विज्ञानेश्वरः** (पृ. १८३ पं. २०-२१)—

" तेषु एकविषयगुरुलाघवाशौचप्रतिपादकतया परस्परविरुद्धेषु वचनेषु संनिधिविदेशस्थापेक्षया व्यवस्थानुसंधातव्या " इति । उपकारतारतम्यानुरोधेन व्यवस्था **चंद्रिकायां** प्रदर्शिता ।

राजपुरोहितयोः परस्परं त्रिरात्रमाह **गालवः**—

" पुरोहिते मृते राज्ञस्त्रिदिनाच्छुद्धिरिष्यते । पुरोहितो मृते राज्ञि त्रिदिनादेव शुध्यति " ॥ इति ।

पक्षिण्याशौचम् । पक्षिण्याशौचमाह **मनुः** (५।८०)—

" मातुले पक्षिणीं रात्रीं शिष्यर्त्विग्बांधवेषु च " इति । उभयतोहःपक्षवती रात्रिः पक्षिणी । तथा **चामरः** (१।४।५)—" आगामिवर्तमानाहर्युक्तायां निशि पक्षिणी " इति । सा च कालत्रयोपलक्षणार्था । तेन अहर्द्वयमध्यगता रात्रिर्वा रात्रिद्वयमध्यगतमहर्वा पक्षिणी । तथा **दीपिकायाम्**—

"पक्षिण्यामुभयाहोभ्यां युक्ता सा पक्षिणी निशा । उपलक्षणमेतत्तु तथा कालत्रयस्य च" ॥ इति । बांधवा इत्यात्मबंधवो मातृबंधवः पितृबंधवश्चोच्यंते । ते **चंद्रिकायां** दर्शिताः—

" आत्मपितृष्वसुः पुत्रा आत्ममातृष्वसुः सुताः । आत्ममातुलपुत्राश्च विज्ञेया आत्मबान्धवाः ।

" पितुः पितृष्वसुः पुत्राः पितुर्मातृष्वसुः सुताः । पितुर्मातुलपुत्राश्च विज्ञेयाः पितृबांधवाः ॥

" मातुः पितृष्वसुः पुत्रा मातुर्मातृष्वसुः सुताः । मातुर्मातुलपुत्राश्च विज्ञेया मातृबांधवाः " ॥ इति ।

षडशीतावपि—

" एवं पित्रोर्भगिन्यौ ये ये पितामहयोस्तथा । ये मातामहयोश्चैव भगिन्यौ तत्प्रजाश्च याः "॥

एवं **चंद्रिकायां विज्ञानेश्वरादिषु**

आत्मबंधुषु पितृबंधुषु मातृबंधुषु च पक्षिण्याशौचमुक्तम् । पितृमातृबंधुषु शिष्टाः पक्षिणीं नाचरंति ।

व्यासः—“ पक्षिणीं योनिसंबंधबांधवेषु त्रिपूरुषम् ” इति । **गौतमोऽपि** (१४।१७–१८)—

“ पक्षिणीमसपिंडयोनिसंबंधे सहाध्यायिनि च ” इति । योनिसंबंधोऽत्र त्रिपुरुषविषय एव विवक्षितः । एकयोनिसंबद्धाः कूटस्थैकमिथुनोत्पन्नास्तदुत्पन्नाश्च मातुलमातृष्वसृमातुलेयमातृष्वस्रीय-पितृष्वसृपैतृष्वस्रीयभगिनीभागिनेयादयः कूटस्थसहिताः कूटस्थस्थानीयत्वात्तद्भ्रातृसहिताश्च । तेष्वेकस्मिन्नसपिंडे मृते अन्येषां सर्वेषां पक्षिणी भवतीत्यर्थः । अत्र मातुलमातृष्वसृमातामहीषु पक्षिणीविधानं स्त्रीणामेव । पुरुषाणां तु पूर्वोक्तं त्रिरात्रमेव । **पैठीनसिः**–“ मातृष्वसृतत्सुतदुहित्रोः पक्षिणी परस्परम् ” इति । **हारीतश्च**—“पित्रोस्तत्सहजयोस्तु पक्षिणी ” इति । पित्रोश्च तत्सहजो मातापितृसहजो मातुलमातृष्वसृपितृव्यपितृष्वसृसंज्ञो यो जनस्तस्य य तत्प्रतियोगिनां च मिथः पक्षिणीत्यर्थः । **विज्ञानेश्वरीये**—

“भगिन्यां संस्थितायां तु भ्रातर्यपि च संस्थिते । स्वस्रीये भ्रातृपुत्रे च पक्षिणीं क्षपयेन्निशाम्” ॥ इति । **स्मृत्यंतरे च**—“ सोदर्याश्च सुतायाश्च व्यूढायाः पक्षिणी भवेत् ” । **अन्यत्रापि**—“ पक्षिणी योनिसंबंधेनातिकालेन सूतके ” । **मांडव्यः**—

“ योनिसंबंधजातानां शृणुध्वमृषिसत्तमाः । मातापित्रोः सोदराणां गुरूणां तत्सुताश्च ये ॥

“ पक्षिण्याशौचमेषां तु परस्परमृतिर्यदि । श्वश्रूश्वशुरयोश्चैतत्सूरयः परिचक्षते ” ॥

संग्रहे—

‘ मातुष्वसृसुतापुत्रौ पितृष्वसृसुतस्त्रियौ । स्वसा पितृव्यपुत्री च स्वसृपुत्री पितृष्वसा ॥

“भ्रातृपुत्री च दौहित्री पौत्री तत्प्रतियोगिनौ । स्त्रीपुंसौ च क्वचित्प्रेते पक्षिण्याशौचिनौ मिथः”॥ इति ।

संग्रहांतरे—

“ मातामह्यौ पिता माता पितृव्यो मातुलस्तथा । मातृष्वसा मातुलानी पितृव्यस्त्री पितृष्वसा ॥

“ मातृष्वसुर्मातुलस्य पितृव्यस्य पितृष्वसुः । पुत्री पुत्रस्नुषा स्वस्य स्वसा भ्राता तदंगना ॥

“ स्वसुर्भ्रातुः स्नुषा पुत्रीपुत्रा स्वदुहितापि च । स्वपौत्री च स्वदौहित्री स्वदौहित्रस्तदंगनाः ॥

“ अष्टात्रिंशज्जना एते स्त्रीमृतौ पाक्षिणीजुषः । सपिंडान् द्वादशैतेषु मुक्तान्ये पुंमृतौ तथा” ॥ इति ।

अन्यत्र—

“ मातृष्वसा मातुलश्च स्वसा भ्राता पितृष्वसा । पंच तत्तत्सुतापुत्रा दश पौत्रिपितामहाः ॥

“ मातामहश्च दौहित्री पितृव्यस्तत्सुतात्मजौ । द्वाविंशतिजनाश्चैते परोक्षे दुहितापिता ॥

“ दौहित्रश्च त्रयश्चैते तत्तत्पत्न्यस्त्रयोदश । स्त्रीमृतौ पाक्षिणभाजे ह्यष्टात्रिंशादिति स्थितिः ॥

“ मातृष्वसृपितृष्वस्रोः पुत्रीपुत्राश्च तत्स्त्रियौ । पितृष्वसा स्वसा पुत्री भ्रातृपुत्री स्वसुः सुता ॥

“ पितृव्यपुत्री दौहित्री मातुलस्य सुतासुतौ । तत्स्त्री चासंनिधौ पुत्री स्वस्रोः पुत्रौ च तत्स्त्रियौ ॥

“क्वचिच्च मातुः पितरौ स्वसा च भ्रातृतत्स्त्रियौ । पक्षिण्याशौचिनस्त्वेते पुंमृतौ पंचविंशतिः ”॥ इति ।

तत्तत्पत्न्यः मातृष्वसृपुत्रमातुलतत्पुत्रस्वस्रीयभ्रातृतत्पुत्रपैतृष्वसेयपितामहमातामहपितृव्यतत्पुत्रपितृ-दौहित्रपत्न्य इत्यर्थः । मातृष्वसृपुत्रादीनां पत्नीग्रहणं स्वस्वभर्तरि मृतेऽपि भर्तृप्रतियोगिमरणे तासां पक्षिणीप्राप्त्यर्थम् ‘ पाक्षिणीमसपिंडे योनिसंबंधे ’ (१४।१७-१८) इति आ त्रिपुरुषं योनिसंबंध एव **गौतमादिभिः** पक्षिण्याशौचस्योक्तत्वान्मातृष्वस्रादिभर्तृमरणे पाक्षिणी नास्त्येव । बंधुत्वात्स्नानमास्ति । एवं मातृष्वस्रेयादिपत्नीमरणेऽपि नास्ति पक्षिणी । अत एव मातामहीमातुलान्योः पृथग्ग्रहणम् ।

---

१ क्ष–स्वं ।

तथा **चोक्तम्**—

"मातृतः पितृतो येषु विहिता पुंसु पक्षिणी। न तत्पत्नीमृतौ सा स्यात् स्नानमात्रं विधीयते"॥ इति। भर्तृसमानयोगक्षेमत्वात् योनिबन्धुपत्नीनां तु पक्षिणी भवति।

"एकत्वं सा गता भर्तुः पिण्डे गोत्रेऽथ सूतके" इति **स्मरणात्**। तथा च **संग्रहे**—"भर्तुर्यद्यदघं तत्तत्पत्न्याः स्यान्नास्य पत्न्यघम्" इति। श्वशुरस्यालविषये जामातुर्विशेषस्याभिधानात् तद्व्यतिरिक्तपत्नीबंधुमरणाशौचं भर्तुर्न स्यादित्यर्थः। सांपर्किकं तु भर्तुराशौचं स्त्रीणां नास्ति। "आशौचं यस्य संपर्कादापतेद् गृहमेधिनः। क्रियास्तस्य प्रलुप्यंति गृह्याणां च न तद्भवेत्"॥ इति **स्मरणात्**। गृहे भवा गृह्याः। "द्रव्याणि स्त्रीपुत्रादयश्चेति" **विज्ञानेश्वरेण** व्याख्यातम्।

भिन्नमातृष्वस्रादिविषयाशौचम्।

भिन्नमातृष्वस्रादिविषये अहोरात्रमाशौचमाह **अत्रिः**—

"भिन्नमातृष्वसुर्भिन्नपितृष्वसुरहः स्मृतम्। सत्सुतानामथाहश्च मरणे **भृगुर**ब्रवीत्" ॥ इति। अत्र भिन्नमातापित्रोरप्यहरिति ग्राह्यम्। तेन भिन्नमातृष्वसृभिन्नपितृष्वसृतत्तत्सुतदुहितृभिन्नमातापितृतत्सुतदुहितॄणामहोरात्रं भवतीत्यर्थः। तथा च **संग्रहे**—

"भिन्नपित्रोः पितृभ्रातृस्वस्रपत्यानि तत्प्रजाः। शुध्यंत्यन्हा मिथः शावे जनास्तत्प्रतियोगिनः"॥ इति। भिन्नपित्रोः जारपितृतत्पत्न्योर्माता पितृभ्रातृस्वसृपुत्रीपुत्राः तत्प्रजाः। तच्छब्देन पित्राद्यपत्यपर्यंता जनाः परामृश्यंते। प्रजाशब्दः सुतदुहितृवाची। एतेष्वन्यतरस्य मरणे अन्यः दिनेन शुध्यतीत्यर्थः। **अन्योऽप्यर्थः**। भिन्नपितृशब्देन सपत्नीमातृभिन्नोदरपितृव्यावुच्येते। पितृव्येऽपि पितृत्वप्रसिद्धेः। तेन तत्पितृभ्रातृष्वसृपुत्रीपुत्राः तत्प्रजाश्च दिनेन शुध्यन्तीति। तथा **पारस्करः**—

"या सपत्नीसुता मातृसपत्नी या च ते मिथः। अहोरात्रेण शुध्येतामाह पारस्करो मुनिः"॥ **अत्रात्रेयमपि** योजनीयं "भिन्नमातृष्वसुः" इति। अत्र मातृष्वसुः सपत्नी पितृष्वसुः सपत्नी च भिन्नमातृष्वसा भिन्नभिन्नपितृष्वसा च भवतीति तयोस्तत्सुतानां चाहरित्यत्रिवचनार्थमन्ये मन्यंते। तथा च **संग्रहे**—

"पुत्र्याः सापत्नकौ चैव स्वसुः सापत्नकौ तथा। मातृष्वसुश्च सापत्नौ सापत्नौ च पितृष्वसुः॥

"भिन्नमातुश्च पितरौ स्वसा भ्राता तयोर्भवौ। भिन्नमह्योः स्वसापुत्रौ भिन्नमातुः सुतासुतौ॥

"तयोर्भवौ च स्त्रीमृत्यां षड्विंशतिदिनाघिनः। सपिंडांस्त्रीन् विमुच्यैषु पुंमृतौ च तथा भवेत्"॥ इति। एवं च सपत्न्याः सपत्नीमातृवर्गाशौचं नास्त्येव। बंधुत्वात्स्नानं भवति। भिन्नपित्रोरिति वचनस्यार्थान्तरमपि वर्णयन्ति। दत्तस्य प्रतिग्रहीता भिन्नपिता। तत्पत्नी भिन्नमाता। तस्याः पिता भ्राता स्वसा पुत्री तत्प्रजाश्च प्रतिग्रहीतुः स्वसा तत्प्रजाश्च मिथः दिनेन शुध्यंतीति। दत्तस्य जन्यजनकरूपपित्रोः पितृभ्रातृस्वसृपत्न्यानां तत्प्रजानां च पक्षिण्याशौचमेव। "पक्षिणीमसपिंडयोनिसंबंधे" इति योनिसंबंधनिबंधनेन पक्षिणीविधानात्।

तथा च **स्मृत्यन्तरे**—"दत्तस्वसरि स्वस्रीये दत्तभ्रातृसुतास्वपि॥

"पितृष्वस्रोश्च तत्पुत्रदुहित्रोः पक्षिणीमृतौ। पितृव्ये तद्दुहितरि तत्पुत्रेषु च **पक्षिणी**"॥ इति।

याज्ञवल्क्यः (प्रा. २४)—

"अहस्त्वदत्तकन्यासु बालेषु च विशोधनम्। गुर्वंतेवास्यनूचानमातुलश्रोत्रियेषु च"॥ इति। गुरुरुपाध्यायः।

"अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः।तमपीह गुरुं विद्यात् श्रुतोपक्रियया तथा"॥इत्युक्तलक्षणः। अंतेवासी शिष्यः।अनूचानो योऽङ्गानां प्रवक्ता। मातुलोऽसंनिहितः। भिन्नोदरमातुलो वा। श्रोत्रिय इह समानग्रामवासी विवक्षितः। "एकाहं सब्रह्मचारिणि समानग्रामीये च" (४।४।२६–२७) इत्याश्वलायनस्मरणात्। एकगृहवासिनि तु "श्रोत्रिये तूपसंपन्ने" इति पूर्वोक्तं त्रिरात्रं द्रष्टव्यम्। अश्रोत्रिये स्ववेश्मनि मृते सत्येकरात्रमाह **विष्णुः** (२२।४५) "असपिंडे स्ववेश्मनि मृते एकरात्रम्" इति। **स एव** (२२।४३) "आचार्यपत्नीपुत्रोपाध्यायमातुलश्वशुरश्वश्रूसहाध्यायि-शिष्येष्वेकरात्रेण शुद्धिः" इति। उपाध्यायशब्दार्थः **चंद्रिकायां** दर्शितः—

"एकदेशं तु वेदस्य वेदांगान्यथ वा पुनः। योऽध्यापयति वृत्त्यर्थं स उपाध्याय उच्यते"॥ इति। **वैष्णवे**ऽप्युपाध्यायग्रहणं शास्त्रोपदेष्टॄणां जप्यमंत्रोपदेष्टॄणामाचार्याणामुपलक्षणार्थम्। अत **एव आश्वलायनेन** 'गुरौ चासपिंडे त्रिरात्रम्" इत्यत्रोक्तम्। इतरेष्वाचार्येष्वेकाहमिति॥

"उपनीय तु यः शिष्यं वेदमध्यापयेत् द्विजः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते"॥

इति निरूपिताचार्यादितरेष्वाचार्येष्वित्यर्थः। **स्मृत्यंतरे**—

"सब्रह्मचारिणि प्रेत उपाध्याये तथैव च। श्वशुरस्य सुते चैव अहोरात्रेण शुध्यति"॥ इति।

आश्वलायनः (४।४।२६)—"एकाहं सब्रह्मचारिणि" इति। **मनुरपि** (५।७०)

"सब्रह्मचारिण्येकाहमतीते क्षपणं स्मृतम्। मातृबंधौ गुरौ मित्रे मंडलाधिपतौ तथा"॥ इति।

एतदेकरात्राशौचं महामंडलाधिपतिविषयम्। स्वल्पदेशाधिपतिविषये तु **याज्ञवल्क्यः** (प्रा.२५)–

"निवासराजनि प्रेते तदहः शुद्धिकारणम्" इति। निवासः स्वदेशः। तस्य यो राजा स्वामी स यस्मिन्नहन्यतीतः तदहर्मात्रं शुद्धिकारणम्। रात्रौ चेदतीतः तदा रात्रिमात्रम्। अत एव **मनुः** (५।८२)—"प्रेते राजनि सज्योतिर्यस्य स्याद्विषये स्थितः" इति। ज्योतिषा सह वर्तत इति सज्योतिः। अत्र आशौचम्। अन्हि चेत् यावत् सूर्यदर्शनं रात्रौ चेद्यावन्नक्षत्रदर्शनमित्यर्थः। **वृद्धमनुरपि**—

"ग्रामेश्वरे कुलपतौ श्रोत्रिये च तपस्विनि। शिष्ये पंचत्वमापन्ने शुद्धिर्नक्षत्रदर्शनात्"॥ इति।

कुलपतिः समूहपतिः। श्रोत्रियादावेककालविधानं असंनिधिविषयम्। **संग्रहे**—

"सब्रह्मचारिण्येकाहं सहाध्यायिनि पक्षिणी। उपाध्यायसुहृत्स्यालभूभृत्सु च मृतेष्वहः॥

"बंधौ स्नानं सगोत्रेऽहर्ज्ञेयं संबंधके मृते"। इति। एकाचार्योपनीतः सब्रह्मचारी। स्यालः पत्नीभ्राता। मातृपक्षे पितृपक्षे च ज्ञायमानसंबंधके बंधुजने मृते स्नानं भवति। सगोत्रे तु तादृग्विधे मृते अहोरात्रमित्यर्थः। **आपस्तंबः** (२।६।१५।२) "मातुश्च योनिसंबंधेभ्यः पितुश्चा सप्तमात्पुरुषात्। यावता वा संबंधो ज्ञायते तेषां प्रेतेषूदकोपस्पर्शनं गर्भान्परिहाप्या परिसंवत्सरान्" इति। अपरिपूर्णसंवत्सरानसपिंडबालान्परिहाप्य वर्जयित्वा ज्ञायमानसंबंधे बंधौ मृते स्नानमित्यर्थः।

संग्रहे—

"श्वश्रूश्वशुरतत्पुत्रयाज्याचार्यसुतर्त्विजाम्। उपाध्यायस्य सद्यः स्यात् मृतौ तत्प्रतियोगिनाम्"॥ इति।

श्वश्र्वादिप्रतियोगिनां मृतौ श्वश्र्वादीनां सद्यःशौचं स्नानाच्छुद्धिरित्यर्थः। उत्तमसपिंडे त्रिरात्राद्याशौचं सर्ववर्णेषु समानम्। तथा **चंद्रिकायाम्**—

"आशौचमसपिंडेषु प्रोषिते श्रोत्रिये गुरौ। अतीते नृपतौ तद्वदृतुकाले च योषिताम्॥

"अप्रजासु तथा स्त्रीषु मातुले बांधवेषु च। एवमादावाशौचस्य चतुर्णामपि तुल्यता"॥ इति।

अप्रजासु गर्भास्रावादिना नष्टप्रजासु।

अनेकाशौचसंनिपाते आशौचम् ।

अनेकाशौचसंनिपाते प्रतिनिमित्तं नैमित्तिकावृत्तौ तां निवारयति **पराशरः** (३।३५)—

" अंतरा तु दशाहस्य पुनर्मरणजन्मनी । तावत्स्यादशुचिर्विप्रो यावत्तत्स्यादनिर्दशम् " ॥ इति । यदा दशाहाशौचकालमध्ये तत्तुल्यस्य ततोऽल्पस्य वा निमित्ते जननमरणे स्यातां तदा पूर्वप्रवृत्तमाशौचं यावदनिर्दशं अनिर्गतदशाहं स्याद्विप्रस्तावदेवाशुचिर्भवति न पुनर्मध्योत्पन्नमरणादिनिमित्तदशाहाद्याशौचवानित्यर्थः। **शंखलिखितावपि**—"अथ चेदंतरा प्रमीयेत जायेत वा शिष्टैरेव दिवसैः शुध्येदहःशेषे द्वाभ्यां प्रभाते तिसृभिः " ॥ इति । **याज्ञवल्क्यः** (प्रा. २०)—

" अंतरा जन्ममरणे शेषाहोभिर्विशुध्यति " ॥ इति । **विष्णुरपि** (२२।३४)—"जननाशौचमध्ये यद्यपरं जननं स्यात्तत्र पूर्वाशौचव्यपगमे शुद्धिः। मरणाशौचमध्ये ज्ञातिमरणेऽप्येवम्"॥ इति । **गौतमेऽपि** (१४।५।६)—"तच्चेदंतःपुनरापतेत् । शेषेण शुध्येरन् । रात्रिशेषे द्वाभ्यां प्रभाते तिसृभिः" । इति । **चंद्रिकायामिदं** व्याख्यातम्—संपूर्णाशौचस्यान्त्याहोरात्रमध्ये संपूर्णाशौचान्तरस्य यदा संनिपातः तदा द्वितीयाशौचस्य प्रथमाशौचकालशेषेण न शुद्धिः । किंतु तच्छेषादूर्ध्वं द्वाभ्यां रात्रिभ्याम् शुद्धिः । यदा तु पुनरष्टमे यामे संपूर्णाशौचांतरसन्निपातस्तदाष्टमयामादूर्ध्वं तिसृभी रात्रिभिः" इति । **स्मृत्यंतरेऽपि**—"निशावशेषे द्विदिनात्तदूर्ध्वं यामावशेषे त्रिदिनात्प्रयाति " ॥ इति । **शातातपोऽप्याह**—" रात्रिशेषे द्व्यहाच्छुद्धिर्यामशेषे त्र्यहादिति " । अयं च विशेषः संपूर्णाशौचसंनिपातविषयो द्रष्टव्यः । **यदाह बोधायनः** (१।५।१०४)—

" अथ यदि दश रात्राः संनिपतेयुराद्यं दशरात्रमाशौचमा नवमाद्दिवसात् " इति । आङत्राभिविधौ । यावन्नवमदिवससमाप्तिस्तावत्पूर्वाशौचकालेन उत्तराशौचां समाप्तिरित्यर्थः । एवं च पूर्वाशौचांत्यदिनेऽपि संनिपतितस्यासंपूर्णस्य द्वितीयाशौचस्य पूर्वाशौचशेषेणैव शुद्धिर्बोद्धव्या । तथा च **धर्मदीपे**—"ब्राह्मणस्य पूर्वाशौचदशमेऽन्हि यदा संपूर्णद्वितीयाशौचप्रक्रमः तदा 'रात्रिशेषे द्वाभ्याम् ' इत्ययं विशेष " इति । **देवलोऽपि**—

"पुनः प्राप्तं दशाहात्प्राक् पूर्वेण सह गच्छति । दशमेऽह्न्यापतेद्यस्य द्व्यहात्स तु विशुध्यति "॥ इति।

" प्रभाते तु त्रिरात्रेण दशरात्रेष्वयं विधिः " इति । यदि जननाशौचमध्ये मरणमापतति तदा मरणदिनमारभ्य दशाहाशौचमाहांगिराः—

" सूतके मृतकं चेत्स्यान्मृतके त्वथ सूतकम् । तत्राधिकृत्य मृतकं शौचं कुर्यान्न सूतकम् "॥

चतुर्विंशतिमतेऽपि—

" मृतजातकयोर्योगे या शुद्धिः सा तु कथ्यते । मृतेन शुध्यते जातं न मृतं जातकेन तु "॥

षट्त्रिंशन्मते—

" शावाशौचे समुत्पन्ने सूतकं तु यदा भवेत् । शावेन शुध्यते सूतिर्न सूतिः शावशोधनी"॥ इति ।

देवलः—

" मरणोत्पत्तियोगे तु गरीयो मरणं भवेत् । अघानां सन्निपाते हि शुद्धिर्ज्ञेया गरीयसी " ॥ इति । गरीयस्त्वाच्छावेन समकालस्यापि सूत्याशौचस्य स्वरूपतो लघीयसः शुद्धिरित्यर्थः ।

कालतो गुरुणा आशौचेन लघ्वाशौचशुद्धिमाह—

" शावांते शाव आयाते पूर्वाशौचेन शुध्यति । गुरुणा लघु शुध्येत्तु लघुना नैव तद्गुरु " ॥

अल्पकालाशौचमध्ये दीर्घकालाशौचप्राप्तौ दीर्घकालाशौचेन शुद्धिमाह **उशना** अपि—

" स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि । न पूर्वेण विशुद्धिः स्यात्स्वकालेनैव शुध्यति " ॥

शंखः—

" समानाशौचसंपाते प्रथमेन समापयेत् । असमानं द्वितीयेन धर्मराजवचो यथा" ॥ द्वितीयमाशौचं प्रथमाशौचकालापेक्षया दीर्घकालत्वेनासमानकालं द्वितीयेन द्वितीयाशौचकालेनैव समापयेदित्यर्थः ॥

यमोऽपि—" अघवृद्धिमदाशौचं पश्चिमेन समापयेत् ।

" यदा त्रिरात्रे प्रक्रांते दशाहं प्रविशेद्यदि । आशौचं पुनरागच्छेत्तत्समाप्य विशुध्यति " ॥ इति । अत्र विशेषो **देवलेनोक्तः**—

" परतः परतोऽशुद्धिरघवृद्धौ विधीयते । स्याच्चेत् पंचमतादन्हः पूर्वेणैव विशिष्यते " ॥

अस्यार्थः—"परभूतस्य पूर्वसजातीयस्य विजातीयस्य वा दिनाधिक्येन वृद्धौ परतः शुद्धिः । पराशौचस्य यावान् कालः तस्य सर्वस्यापगमपर्यंतमशुद्धिः । पूर्वाशौचं पराशौचापेक्षया स्वल्पकालमपि यदि पंचमादन्हः पंचमदिनात्परतोऽपि कतिपयदिनोपेतं स्यात्तदा पूर्वेण पूर्वाशौचकालशेषेण पराशौचस्यापि शुद्धिर्विशिष्यते विधीयत" इति । **चंद्रिकायाम**प्यस्यार्थोऽभिहितः—उत्तराशौचस्य दीर्घकालत्वेऽपि यदि पूर्वाशौचमुत्तराशौचकालादर्धाधिककालं स्यात्तदा पूर्वेणैवोत्तरस्यापि शुद्धिर्भवति । अत्रोदाहरणम्—

"अधस्तान्नवमान्मासाच्छुद्धिः स्यात्प्रसवे सदा । मृते जीवेऽपि वा तस्मिन्नहोभिर्माससंख्यया" ॥

इति वचनेन सप्तममासप्रसवे सप्तरात्रं अष्टममासप्रसवे अष्टरात्रमुक्तम् । तत्र यदा सप्तरात्राद्याशौचमध्ये दशरात्राशौचं तदार्धाधिकत्वात्पूर्वाशौचशेषेणोत्तराशौचस्य शुद्धिर्भवति । एवमन्यत्राप्युत्तराशौचकालार्धाधिककाले पूर्वाशौचे द्वितीयाशौचस्य तच्छेषेणैव शुद्धिरिति ।

अयमेवार्थः **स्मृतिरत्नमाधवीयादा**वभिहितः । तत्र चेदमुदाहृतम् । यदा गर्भपातनिमित्ते षडहाशौचे यदि दशाहाशौचमापतेत् तदा षडहाशौचशेषेणैव दशाहाशौचस्यापि निवृत्तिरिति । एतदेवाभिप्रेत्य **दशके**ऽप्युक्तम्—"अल्पात्पंचदिनाधिकाद्दशदिनं गच्छेत् " इति । यत्तु कैश्चिदुक्तं कलौ निषिद्धस्य क्रमाशौचस्य प्रतिपादनाद्दुरुक्तिरिति तदविचारितरमणीयम् । क्रमाशौचव्यतिरिक्तस्य पंचदिनाधिकाशौचस्य **चंद्रिकादा**वुक्तत्वात् । **हारीतः**—

"स्वल्पकाले मृताशौचे दीर्घं चेज्जातकं भवेत् । स्वल्पकालेन शुद्धिः स्यान्न दीर्घेण विशुध्यति" ॥ इति ।

व्यासोऽपि—

"त्रिरात्रमृतमध्ये तु दशाहं जातकं भवेत् । मृताशौचेन शुद्धिः स्यादित्याह भगवान्**यमः**" ॥ इति ।

मत्स्यपुराणे—

"जाताशौचस्य मध्ये तु ततो न्यूना मृतिः पतेत् । न तत्र जननाशौचं मृतकेनैव शुध्यति" ॥ इति ।

षडशीतौ विशेष उक्तः—

" शावादल्पा समा वाऽपि सूतिः शावेन शुध्यति । स्वभावबहुसूतिस्तु न्यूनशावविशोधनी ॥

" बहुसंख्यदिनं यत्तु तत्स्वभावबहूच्यते " इति । यथास्वदेशाचारं अत्र व्यवस्था । **संग्रहे**—

" सूतके तत्पुनः स्याच्चेच्छावे यद्वाऽथ सूतकम् । पूर्वेणैवोत्तरं गच्छेन्न शावं सूतकात्क्वचित् ॥

" पूर्वस्यांत्यदिने तच्चेद्‌द्व्यहं पूर्वाघतः परम् । त्र्यहं पूर्वांत्ययामे च तत्प्रभातेऽथ वा यदि ॥

" दीर्घादल्पं व्रजेन्नाल्पाद्दीर्घमित्यवसंगतौ । प्रभातेंऽत्यदिने वाप्तमपैत्यल्पं हि दीर्घतः " ॥ इति ।

अत्र केचिदाहुः—" पूर्वेणैवोत्तरं गच्छेत् " इति वचनेन पूर्वमृतिनिमित्ताशौचमध्ये उत्तरमृतिनिमित्ताशौचस्य संनिपाते देशांतरीयस्य वा तस्य श्रवणे पूर्वशेषेण शुद्धिः । न तूत्तरमृतिनिमित्ताशौचमध्ये पूर्वाशौचश्रवणे उत्तराशौचशेषेण शुद्धिः । किंतु अवशिष्टमतिक्रांताशौचमनुष्ठेयमेव । उत्तराघशेषेण पूर्वाघस्य शुध्यभावात् । उत्तरमृतिनिमित्ताशौचमध्ये पूर्वाशौचस्यानतिक्रान्तस्य श्रवणे पूर्वशेषेणोत्तरस्यापि शुद्धिः । पूर्वस्यातिक्रान्तस्य तु दीर्घादल्पमिति वचनेनोत्तराशौचशेषेण शुद्धिः । आशौचमध्ये आपतितस्याशौचस्य निर्गमानन्तरं श्रवणेन पुनराशौचमनुष्ठेयम् । संनिपाताशौचवचनेषु पुनराशौचपाते शिष्टाहात् शुद्धिविधानात् । यथा स्नानानन्तरस्पृश्यस्पर्शावगमेऽपि तेनैव स्नानेन पूर्वस्यापि शुद्धिरिति । मातापितृमरणाशौचयोरंतिमदिनात्पूर्वमेव मिथः संनिपातेऽपि न प्रथमाशौचशेषेणैव शुद्धिः । यदाह **शंखः**—

" मातर्यग्रे प्रमीतायामशुद्धौ म्रियते पिता । पितुःशेषेण शुद्धिः स्यान्मातुः कुर्याच्च पक्षिणीम् " ॥ इति । मात्राशौचमध्ये पित्राशौचसंनिपाते पितृशावेनैव शुद्धिः । पित्राशौचस्य मध्ये मातृशावसंनिपाते तु पूर्वाशौचानन्तरमातृशावाशौचं पक्षिणीमात्रमनुवर्तत इत्यर्थः । **षडशीतौ**—

" पूर्वेण चापरेणापि पित्रोः शावेन हीतरत् । आशौचं शुद्धिमायाति न पित्रोः शावमन्यतः ॥
" मातुराशौचमध्ये तु पिता च म्रियते यदि । पितुर्मरणमारभ्य पुत्राणां दशरात्रकम् ॥
" पितुराशौचमध्ये तु यदि माता प्रमीयते । दशाहात्पैतृकादूर्ध्वं मातृकं पक्षिणी भवेत् " ॥

देवलो विशेषमाह—

" मृतं पतिमनुव्रज्य पत्नी चेज्ज्वलनं गता । न तत्र पाक्षिणी कार्या पैतृकादेव शुध्यति ॥
" पुत्रोऽन्यो वाऽग्निदस्तस्यास्तावदेवाशुचिस्तयोः । नवश्राद्धं सपिंडं च युगपच्च समाप्नुयात् ॥
"भर्तुः पित्रादिभिः कुर्यात् भर्त्रा पत्न्यास्तु नैव हि। सापत्न्या वाऽनपत्न्या वा न भेद इति गोभिलः"॥इति।

तथा च **गोभिलः**—

" एकचित्यां समारूढौ दंपती निधनं गतौ । एकोद्दिष्टं षोडशं च भर्तुरेकादशेऽहनि ॥
" द्वादशेऽहनि संप्राप्ते पिंडमेकं द्वयोः क्षिपेत् । पितामहादिपिंडेषु तं पितुर्विनियोजयेत्" ॥ इति ।

यमः—

" पत्न्या चैकेन कर्तव्यं सपिंडीकरणं स्त्रियाः । सा मृतापि हि तेनैक्यं गता मंत्राहुतिव्रतैः " ॥

संग्रहे—" पत्युर्मृताहान्यदिनेऽनुगच्छेद्या स्त्री पतिं चित्यधिरोहणेन ।
" दशाहतो भर्तुरघस्य शुद्धिः श्राद्धद्वयं स्यात्पृथगेव काले " ॥ **अन्यत्रापि**—
" पूर्वेद्युर्वाऽपरेद्युर्वा भर्तारमनुगच्छति । भर्त्रा सहैव शुद्धिः स्याच्छ्राद्धं चैकदिने भवेत् " ॥ इति ।

वसिष्ठो विशेषमाह—

" अनुयाने तु पतिना सपिंडीकरणं सह । अंतर्धाय तृणं मध्ये भर्तृश्वशुरयोरपि " । इति ।

अस्यार्थः—पूर्वं भर्तुः पिंडे पित्रादिभिः संयोजिते प्रथमपिंडो भर्तृपिंडो भवति । द्वितीयः श्वशुरपिंडो भवति । तत्र भर्तृश्वशुरपिंडयोर्मध्ये तृणमन्तर्धाय भर्तृपिंडेन स्त्रीपिण्डं योजयेदिति । **स्मृत्यंतरे**—"मातापित्रोर्मृतौ चैव जनने त्वौरसस्य च । स्वाशौचापगमे नैव शुद्धिः स्यान्नान्यकालतः " । इति सपिंडाघमध्ये पित्रोर्मृतावौरसपुत्रजनने च न सपिंडाघशेषेण शुद्धिः किंतु मातापितृमरणनिमित्तं पुत्रजननिमित्तं च दशाहमाशौचमनुष्ठेयमित्यर्थः ।

अंगिराः—"दाहकस्तु दशाहांतः शवदाहं चरेद्यदि। पूर्वेणैव विशुद्धिः स्यात्पित्रोस्तद्दिवसाद्भवेत्"॥
नारदः—
"अंतर्दशाहे चेत्कर्तुः पुनः प्रेतस्य संस्कृतिः। तस्माच्छुद्धिः पूर्वशेषादेकोद्दिष्टं यथोदितम्॥ "पितरौ चेत् दहेत्तत्र दशाहाच्छुद्धिरग्निदे" इति "एकादशेन्हि मध्यान्हे एकोद्दिष्टं विधीयते"॥ इतिवचनात् तत्तदेकादशाह एवैकोद्दिष्टं भवतीत्यर्थः। **हारीतश्च**—
"दाहकार्यद्वयं स्याच्चेत्कर्तुरैक्ये विशेषतः। पूर्वेणैव समाप्येत तोयपिंडद्वितीयकम्"॥
तोयपिंडमिति स्वाविनाभूताशौचोपलक्षणम्। **दक्षः**—
"मृताशौचनिमित्ते द्वे दहनं मरणं तथा। ज्ञातीनां मरणादेव दहनाद्दाहकस्य तु॥
"अन्नं दग्ध्वा दशाहान्तः शुद्धिः पूर्वाघशेषतः" इति॥ **संग्रहे**—
"पित्रन्यानन्तरानेकान् दग्ध्वा पूर्वाघतः शुचि। पितरौ चेद्दहेत्तत्र दशाहाच्छुद्धिरग्निदे"॥ इति।
अखंडादर्शे—"जननमरणयोरन्यतरस्मिन्वर्तमाने यदि कश्चिज्जायेत ततस्तु मातापित्रोर्दशाहमेवाशौचं न सपिंडांतरवत्पूर्वकालेनैव शुद्धिः नापि गुरुणा" इति।
तथा **बोधायनः**—"जननमरणयोः संनिपाते जनने मातापित्रोर्दशाहमाशौचम्" इति।
संग्रहे—"स्वाशौचकालतस्त्वेव सूतिकाजनकोऽग्निदः। शुध्येरन्नघयोगेऽपि न पूर्वाशौचशेषतः"॥
षडशीतावपि—
"पूर्वाशौचेन या शुद्धिः सूतीनां मृतिनां च सा। सूतिकामग्निदं हित्वा प्रेतस्य च सुतानपि"॥ इति। एतदुक्तं भवति। ज्ञात्यघे वर्तमाने यदि प्रसवः स्यात्तदा मातुः सूतिकावधित एव शुद्धिः। पितुर्दशाहेनैव। तत्र ज्ञात्यघमध्ये ज्ञातिदाहे कृते सति दाहकस्य दाहादिदशाहेनैव शुद्धिः। न पूर्वाशौचशेषेण पुनर्ज्ञात्यंतर्दाहे पूर्वदाहादिदशाहशेषेण। पित्रोस्तु दाहे दाहकस्यान्येषामपि पुत्राणां पितृमरणादिदशाहेनैव शुद्धिः। न पूर्वदाहदशाहशेषेणेति।
अज्ञातिदाहाशौचम्—पक्षिण्याशौचिनां अज्ञातिदाहे विशेषः **स्मर्यते**—
"अज्ञातिं तु नरं दग्ध्वा त्रिरात्रमशुचिर्भवेत्। ज्ञातीनां दर्शनाच्छुद्धिः संचिते दशरात्रकम्"॥ इति। अज्ञातिदाहे मुख्यकर्तृदर्शनाभावे उदकदाने सति त्र्यहमाशौचमस्ति। त्र्यहात्परं संचयनात्पूर्वं कर्तृदर्शनानंतरं दाहकर्तुराशौचमुदकमपि नास्ति। संचयनात्परं कर्तृदर्शने तु प्रेतान्नभोजने दशाहपर्यंतमाशौचम्। दशमदिने उदकमप्यस्तीत्यर्थः। **दीपिकायां** तु—
"जनकस्य जनन्याश्च भार्याया भर्तुरेव च। पुत्रस्य दुहितुश्चैव जनने मरणेऽपि च॥
"स्वकालेनैव शुद्धिः स्याच्छेषन्यायो[3] न विद्यते"॥ ज्ञात्यघमध्ये पुत्रजनने पित्रोर्दशाहत एव शुद्धिः। भार्यादिमरणे तत्प्रतियोगिनामपि स्वकालत एव शुद्धिः। न पूर्वशेषेणेत्यर्थः। आशौचमध्ये पुत्रजनने जातकर्मादिकमपि कार्यमेव। यदाह **प्रजापतिः**—
"आशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत्। कर्तुस्तात्कालिकी शुद्धिः पूर्वाशौचेन शुध्यति"॥ इति। पित्रघमध्ये पुत्रजनने पितृमरणाशौचशेषेण पुत्रजन्मनिमित्ताशौचमपि शुध्यतीत्यर्थः।
तथा च **रत्नावल्याम्**—
"पित्रोर्मृतान्तराले तु स्वभार्या चेत्प्रसूयते। पित्रोः शेषेण शुद्धिः स्यात्पत्न्याः शुद्धिः स्वकालतः"॥ इति। मातापितृमरणाशौचमध्ये भार्यायाः प्रसवे सति जनकस्य पितृमरणाघशेषेण शुद्धिः। पत्न्यास्तु स्वकालेनैवेत्यर्थः।

---

१ क्ष—दशाहक। २ ध. सू. १।५।९०। ३ क्ष—न्यायेन।

असंनिहितदेशभवसपिण्डमरणाशौचम् ।

असंनिहितदेशभवसपिंडमरणाशौचमाह **मनुः** (५।७४)—

" विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशम् । यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत् " ॥

विगतं मृतं विदेशस्थं असंनिहितदेशस्थं अनिर्दशं अनिर्गतदशाहं दशरात्रस्यांतः स्वजात्युक्तकालाशौचमध्ये इति यावत् । एतज्जन्माशौचस्यापि प्रदर्शनार्थम् । तथा च **बृहस्पतिः**—

"अन्यदेशे मृतं ज्ञातिं श्रुत्वा पुत्रस्य जन्म वा । अनिर्गतदशाहं तु शेषाहोभिर्विशुध्यति"॥

अन्यदेशे असंनिहितदेशे । पुत्रस्य जन्म ज्ञातेः स्वस्य वाऽपत्यस्य जन्म । **शंखोऽपि**—

"देशांतरगतं श्रुत्वा कल्याणं मरणं तथा । यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत्" ॥ देशांतरगतं असंनिहितदेशभवं कल्याणं अपत्यजन्मेति यावत् । दशरात्रस्येत्येतत्कालांतरस्याप्युपलक्षणार्थम् । " यस्य वर्णस्य यः कालो विहितो गुणवत्तया । श्रुत्वा तदंतरेवासौ तच्छेषेणैव शुध्यति " ॥ इति **स्मरणात्** ! **याज्ञवल्क्योऽपि** (प्रा. २१)— "प्रोषिते कालशेषः स्यात्" ॥ इति । **संग्रहे**—

" शिष्टाहमेव सर्वेषामपि ज्ञातेंऽतरा त्वघे । प्राक्संचयात्सुतस्येत्थं तदूर्ध्वं दशरात्रकम् " ॥ इति । शावे च सूतके चांतरा मध्ये अवगते सति पुत्रव्यरितिक्तानां सर्वेषामपि सपिंडानां शिष्टाहमेवाघं भवति । पुत्रस्य तु मुख्यकर्तुरपि अस्थिसंचयनात्प्राक् पित्रोर्मृतिश्रुतौ शिष्टाहमेवाशौचं तदूर्ध्वं श्रवणदिनादिदशाहमेवेत्यर्थः । तथा च **स्मृत्यंतरे**—

"पित्रोर्मृतौ चेद्दूरस्थः श्रुत्वा तद्दिवसात्परम् । पुत्रः शुध्येत् दशाहेन संचयात्प्राक्तु शेषतः" ॥ इति । " चतुर्थेऽहनि विप्राणामस्थिसंचयनं स्मृतम् " इत्यस्थिसंचयनस्य चतुर्थदिने कर्तव्यत्वविधानात् । 'संचयनात्प्राक्तु शेषत' इति संचयेन चतुर्थदिवसस्यैवोपलक्षितत्वाच्च चतुर्थदिनात्पूर्वं पितृमरणस्मृतौ शिष्टाहं चतुर्थदिवसादि तच्छ्रुतौ दशाहमिति केचित् ।

अतिक्रान्ताशौचम् । उक्तस्य दशरात्रादिशावाशौचस्यापगमादूर्ध्वं असंनिहितदेशे मृतसापिंडस्यं मरणवार्ताश्रवणे त्वाह **मनुः** (५।७५)—

" अतिक्रांते दशाहे तु त्रिरात्रमशुचिर्भवेत् । संवत्सरे व्यतीते तु स्पृष्ट्वैवापो विशुध्यति " ॥

शंखोऽपि—

" अतीते दशरात्रे तु त्रिरात्रमशुचिर्भवेत् । तथा संवत्सरेऽतीते स्नात एव विशुध्यति " ॥

देवलः—

" आशौचाहःस्वतीतेषु बंधुश्चेच्छ्रूयते मृतः । तत्र त्रिरात्रमाशौचं भवेत्संवत्सरांतरे " ॥

संवत्सरांतरे प्रथमसंवत्सरमध्ये । **चंद्रिकायाम्**—

" अतीते सूतके स्वे स्वे त्रिरात्रं स्यादशौचकम् । संवत्सरे व्यतीते तु सद्यःशौचं विधीयते " ॥

अत्र सूतकशब्दः शावाशौचपरः । **याज्ञवल्क्योऽपि**[१]—

" प्रोषिते कालशेषः स्यादशेषे त्र्यहमेव तु । सर्वेषां वत्सरे पूर्णे प्रेते दत्वोदकं शुचिः " ॥ अशेषे अतिक्रांते दशाहादावित्यर्थः । अत्र **विज्ञानेश्वरः** (पृ.१७९ पं.६-७)—" अयं च त्र्यहो दशाहादूर्ध्वं मासत्रयादर्वाक् द्रष्टव्यः । पूर्वोक्तं तु सद्यःशौचं नवममासादूर्ध्वमर्वाक्संवत्सराद्द्रष्टव्यम् । यत्पुनः " ऊर्ध्वं दशाहाच्छ्रुत्वा एकरात्रम् " इति **वसिष्ठस्मरणं** तदूर्ध्वं षण्मासेभ्यः यावन्नवमम् । यच्च श्रुत्वा चोर्ध्वं दशम्याः पाक्षिणीमिति तन्मासत्रयादूर्ध्वमर्वाक् षष्ठात् । तथा च **वृद्धवसिष्ठः**—

१ याज्ञवल्कीये न दृश्यते । २१ श्लो. टीकायां मिताक्षरोद्धृतं कस्यचिद्वचनम् (पृ.१७९ पं.१–२)

"मासत्रये त्रिरात्रं स्यात् षण्मासे पक्षिणी तथा । अहस्तु नवमादर्वागूर्ध्वं स्नानेन शुध्यति" ॥ इति । **स्मृत्यर्थसारे**— " अतीताशौचं तु स्वाशौचकालादूर्ध्वं ब्राह्मणादीनां सर्वेषां वर्णानामुपनयनादूर्ध्वं स्त्रीणां विवाहादूर्ध्वं भवति । तत्र मासत्रये त्रिरात्रं षण्मासे पक्षिणी नवममासे त्वेकाहं ततः परं सचैलं स्नात्वोदकदानाच्छुद्धिः । अतीताशौचे स्वाशौचकालत्रिभागादूर्ध्वं स्पृश्याः । जन्मन्यतिक्रांताशौचं सपिंडानां नास्त्येव । पुत्रजन्मनि तु पितुः स्नानमस्त्येव " इति ।

स्मृतिरत्नमाधवीयादिषु तु दशाहादूर्ध्वमर्वाक् त्रिपक्षात्त्रिरात्रं षण्मासादर्वाक्पक्षिणी । अर्वाक्संवत्सरादेकाहम् । यदाह **विष्णुः**—

" अर्वाक् त्रिपक्षात् त्रिदिनं षण्मासाच्च दिवानिशम् । अहः संवत्सरादर्वाक् देशांतरमृतेष्वपि " ॥ अत्र दिवाशब्देन अहर्द्वयमुच्यते । दिवानिशं पक्षिणीति यावत् । तथा च **देवलः**—

"आ त्रिपक्षात् त्रिरात्रं स्यात्षण्मासात्पक्षिणी ततः । परमेकाहमा वर्षादूर्ध्वं स्नानेन शुध्यति " ॥ इति । " नीते त्वाशौचे वत्सरांतस्त्वेकरात्रेण " इति **विष्णु**वचनमपि **देवल**समानविषयम् । षण्मासादूर्ध्वं संवत्सरमध्ये एकरात्रेण शुद्धिरिति यावत् । एवं च " मासत्रये त्रिरात्रं स्यात् " इति **वृद्धवसिष्ठ**वचनस्य " अर्वाक् त्रिपक्षात् त्रिदिनं आत्रिपक्षात् त्रिरात्रं स्यात् " इति **विष्णुदेवल**वचनयोश्च निकटदेशतारतम्यापेक्षो विकल्पो द्रष्टव्यः । यत्तु **संग्रहकार**वचनम्—

" त्रिरात्रं त्रिषु मासेषु पक्षिण्येव ततस्त्रिषु । ततोहःषट्स्वथ स्नानं दशरात्रात्ययं श्रुतौ " ॥ इति । तत्र प्रमाणं मृग्यम् । न तत्र **देवल**वचनं प्रमाणम् । "आत्रिपक्षात्त्रिरात्रं स्यात्" इति पठित्वा **स्मृतिरत्नमाधवीया**दिषु व्याख्यातत्वात् । न च " मासत्रये त्रिरात्रं स्यात् " इति **वृद्धवसिष्ठ**वचनं प्रमाणम् । 'अहस्तु नवमादर्वाक्' इत्यस्यांशस्याप्याश्रयणप्रसंगात् । न च ततस्तत एकदेशाश्रयणमुचितम् । अतो विकल्प एव **चंद्रिकायामुक्तः** । भर्तृमरणे पत्न्या दशाहात्परमपि दशाहम् । "दशाहं पुत्रभार्ययोः " इति **वचनात्** । दशाहादूर्ध्वं सोदकमरणश्रवणे त्वाह **मनुः** (५।७७)—

"बाले देशांतरस्थे च पृथक्पिण्डे च संस्थिते । सवासा जलमाप्लुत्य सद्य एव विशुध्यति" ॥ इति । देशांतरस्थे असंनिहितदेशस्थे बाले षाण्मासिके पृथक्पिंडे सोदके इति यावत् । **गौतमोऽपि** (१४।४१)
" बालदेशांतरितप्रव्रजितासपिंडानां सद्यः शौचम् " इति । **संग्रहे**—

" अत्याशौचं दिनं सद्यस्त्र्यहैकाहरशौचिनोः । पक्षिण्यघिष्वघं तच्छुत्वैककालोऽन्यथाप्लवः " ॥ इति । स्वस्वाशौचकालेऽतिक्रांते अवगते सति त्र्यहैकाहाशौचिनोः क्रमेण दिनं सद्यःस्नानं पक्षिण्याशौचिनः एककालः रात्रौ श्रवणे रात्रिर्दिवा श्रवणे दिवा अन्यथा दशाहाद्बहिः श्रवणे स्नानमेवेत्यर्थः । अत्र त्र्यहैकाहाशौचिनोरत्याशौचं दिनं सद्य इत्यत्र मूलभूतं प्रमाणं मृग्यम् । यत्तु " ऊर्ध्वं दशाहाच्छ्रुत्वैकरात्रम् " इति **शंख**वचनं प्रमाणमुपन्यस्तं न तत्र त्रिरात्रात्ययाशौचं प्रकृतम् । **विज्ञानेश्वरादि**भिश्चान्यथा व्याख्यातम्—"इदमेकरात्राशौचं सपिंडानामूर्ध्वं षण्मासेभ्यो यावन्नवमं पूर्वोक्तं तु सद्यःशौचं नवममासादूर्ध्वं द्रष्टव्यम् " इति । **चंद्रिकादावपि** " त्रिरात्राद्याशौचिनां कालशेषेण शुद्धिः कालशेषाभावे सद्यःशौचम् " इति । यत्तु पक्षिणीविषये

"अतीते पक्षिणीकाले दशाहाभ्यंतरश्रुतौ । दिवा वा यदि वा रात्रावेककालेन शुध्यति" ॥ इति **स्मृत्यंतर**वचनं **संग्रहकारेण** प्रमाणमुक्तं तदपि **चांद्रिकास्मृतिरत्नमाधवीयविज्ञानेश्वरीयादि**निबंधनेषु **मन्वादिषु** चादर्शनाद्विचारणीयम् ।

तथा **दीपिकायाम्**—

" मातापित्रोरघेऽतीते श्रुत्वाऽघं दशवासरम् । त्रिरात्रपक्षिण्येकाहेष्वतीतेष्वाप्लवो भवेत् " ॥ इति । **मनुः** (५।७६)—

" निर्देशं[1] ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च । सवासा जलमाप्लुत्य शुद्धो भवति मानवः " ॥ इति ज्ञातिशब्देनात्रानुपतीत एवोच्यते । उपनीतमरणे " उपेते विषमं वृत्ते तस्मिन्नेवातिकालजम् " इति **व्याघ्रेणा**तिक्रांताशौचविधानाद्दशाहादूर्ध्वं पुत्रजन्मश्रवणे पितुरेव स्नानं जन्मनि सपिंडानामत्याशौचं नास्ति । " नाशौचं प्रसवस्यास्ति व्यतीतेषु दिनेष्वपि " इति **देवलस्मरणात्** । तथा **संग्रहे**—

"पित्रोर्भ्रातुर्भवेन्नान्येष्वनुपेतात्यये त्वघम् । पितुः स्नानं तदन्येषां न च तत्सूतकात्यये"॥ तस्माच्चोपरि " गौणमातृमरणं श्रुत्वा सद्यो त्र्यहम् " इति । गौणमाता सपत्नीमाता ।

भ्रातृविषये **स्मृत्यंतरम्**—

" भ्रातुर्देशांतरमृतौ षण्मासाद्वत्सरादयः । दशरात्रं त्रिरात्रं स्याद्दशाहं दाहकस्य तु " ॥ इति । दाहकस्य भ्रातुः । तथा–

" देशांतरमृतिर्यत्र त्वनुजाग्रजयोर्यदि । षण्मासाद्वत्सरादर्वाक् दशाहं त्र्यहमाचरेत् "॥ इति। एतदकृतक्रियभ्रातृविषयम् । यदाह **पैठीनसिः**—

" प्रोषितभ्रातृमरणे दत्तपिंडोदककिये । त्रिरात्रं सूतकं तत्र दशाहं पुत्रभार्ययोः " ॥ इति । एतच्च त्रिरात्रविधानं षण्मासात्पूर्वं वेदितव्यम् । तथा च **गालवः**—

" कृतोदके तु षण्मासात्पक्षिणी त्वघमिष्यते । अधश्चेत् त्रिदिनं ग्राह्यमकृते तु दशान्हिकम्"॥ इति । षण्मासादूर्ध्वं भ्रातुरघं पक्षिणीत्यर्थः । **संग्रहे**—

" दशरात्रं सदा पित्रोः परोक्षमरणे श्रुतौ । त्र्यहं मातृसपत्न्यास्तु दशाहं वत्सरादधः ॥

" कृतौर्ध्वदैहिकेऽत्यब्दे दिनं तस्यास्त्र्यहं तयोः " ॥ इति । वत्सरमध्ये तत्परं वा मातापितृमरणश्रवणे सर्वेषामपि पुत्राणां दशाहमेव । सपत्नीमातुरसमक्षमृतिश्रवणे वर्षात्परं त्र्यहमेव । तत्पूर्वं तु दशाहम् । अत्र विशेषः । ज्येष्ठेन कृते और्ध्वदेहिके अब्दे चातिक्रांते तस्याः सपत्नीमातुः परोक्षमरणश्रवणे दिनं तयोर्मातापित्रोस्तच्छ्रुतौ कनिष्ठस्य त्र्यहामित्यर्थः ।

पुनःसंस्कारे विशेषः **स्मृत्यर्थसारे** दर्शितः । आहिताग्नौ विदेशस्थे मृते यावद्विधिना न संस्कारस्तावत्तत्पुत्रादीनां मुख्यकर्तॄणां संध्यादिकर्मलोपो नास्ति । शुभकर्म न कर्तव्यम् । अनाहिताग्नेर्विधिवद्दहनाभावे तदानीमाशौचग्रहणं कृताकृतम् । दशाहानंतरं मरणश्रवणे दाहात्पूर्वं त्र्यहाद्याशौचं नास्ति । मुख्यकर्तृसंभवे तदितरज्ञातीनां शुभकर्म च कर्तव्यम् । आहिताग्नेर्विधिवद्दहनाभावे आशौचग्रहणं नास्त्येव । पुनःसंस्कारे दाहाद्याशौचमपि संपूर्णम् । अनाहिताग्नेः पुनःसंस्कारः सूतकमध्ये चेत् शेषदिनात् शुद्धिः । अतीते सूतके पुनः संस्कारश्चेत्पूर्वमगृहीताशौचस्य पुत्रस्य पत्न्याश्च दशाहमाशौचम् । गृहीताशौचयोः पुत्रपत्न्योस्त्रिरात्रम् । पत्न्याः पुनःसंस्कारे पत्युश्चैवं सपत्न्योर्मिथश्चैवम् । गृहीताशौचानां कृतोदकानां पुनराशौचं नास्ति । अकृतोदकानां पुनरेकाहमिति । **बृहस्पतिः**—

" आशौचे वर्तमाने तु पुनर्दाहक्रिया यदि । तच्छेषेणैव शुद्धिः स्यादतीते सूतकं भवेत् ॥

" दशाहादि यथावर्णं पित्रोराशौचमाचरेत् । पत्नीनामपि विज्ञेयं दंपत्योश्च परस्परम् ॥

" सपिंडानां त्रिरात्रं स्यादित्युवाच प्रजापतिः " ॥ इति ।

---

१ क्ष-अनिर्दशं ।

स्मृत्यंतरेऽपि—

" आशौचांतः कीकसादेः प्रदाहे शेषाच्छुद्धिस्तद्बहिश्चेत् त्रिरात्रम्।
" पुत्रस्यापि प्रागघस्य ग्रहश्चेन्नो चेत्तस्याप्यत्र संपूर्णमाहुः " ॥ इति। कीकसं अस्थि।

पारस्करः—"आशौचे वर्तमाने तु तच्छेषेण विशुध्यति। गते त्वाशौचसमये पुनर्दाहो यदा भवेत्।
" मरणादि गृहीतस्य त्रिरात्राच्छुद्धिरिष्यते। अगृहीतस्य पुत्रस्य संपूर्णाशौचमेव हि " ॥ इति।
अगृहीताशौचविषये **देवलः**—

"दग्ध्वास्थि पित्रोः पुत्रस्तु दशाहमशुचिर्भवेत्। तयोः प्रतिकृतिं दग्ध्वा शाववच्छौचमिष्यते " ॥ इति।
शाववद्दशाहमित्यर्थः। **स्मृत्यंतरेऽपि**—

" अस्थ्ना पलाशवृंतैर्वा दग्ध्वा तु प्रतिरूपकम्। पित्रोर्दशाहमाशौचमन्येषां तु त्रिरात्रकम् " ॥ इति।

तथा—

" संस्कृताग्नौ दहेत्पश्चाद्दशरात्रं तु सूतकम्। इतरेषां त्रिरात्रं स्याद् ज्ञातीनामपि सूतकम् " ॥ इति।

यत्तु **स्मृत्यंतरवचनम्**—

"दग्ध्वास्थि पित्रोः पुत्रस्तु दशाहं सूतकी भवेत्। तयोः प्रतिकृतिं कृत्वा त्रिरात्रमशुचिर्भवेत्"॥ इति।
अत्रास्थिदाहे पुत्रस्य दशाहविधानं अगृहीताशौचविषयम्। प्रतिकृतिदाहे त्रिरात्रविधानं गृहीताशौचविषयम्। अन्ये तु पुत्रस्य गृहीताशौचस्यास्थिदाहे दशाहं प्रतिकृतिदाहे त्रिरात्रमिति व्याचक्षते। अगृहीताशौचविषये चोदाहरंति **स्मृत्यंतरम्**—

" नरं पर्णमयं दग्ध्वा त्रिरात्रमशुचिर्भवेत्। मातापित्रोर्दशाहं स्यादास्थिदाहे तथैव च " ॥
प्रागघग्रहणाभावे पर्णनरदाहे सपिंडानां त्र्यहं मातापित्रोस्तादृग्विधदाहे अस्थिदाहे सपिंडानां च दशाहमिति च ते व्याकुर्वंत। तथा च **संग्रहकारः**—

" यज्वायज्वपुनर्दाहे शिष्टाहं यद्यघाद्बहिः। दशाहं त्र्यहमाशौचं पूर्णं प्राक् चेदघाग्रहः ॥
" अस्थिदाहे प्रतिकृतेर्दाहे तु त्र्यहमित्यघम्। सपिंडानां सुतानां तु दशरात्रमिहेष्यते " ॥ इति।
दशाहमध्ये आहिताग्न्यनाहिताग्न्योः पुनःसंस्कारे कृते सति संस्कारदिनादूर्ध्वं दशरात्रावशिष्टमेवाघं भवति। न पुनर्दाहादिदशाहं। यदि दशाहाद्बहिर्यज्वायज्वपुनर्दाहः स्यात्तत्र दशाहं त्र्यहमिति क्रमेणाघं स्यात्प्रागघग्रहणाभावे अस्थिदाहे पूर्णम्। प्रतिकृतिदाहे तु सपिण्डानां त्र्यहमेव। पुत्राणां तु प्रतिकृतिदाहेऽपि प्रागाशौचग्रहणाभावे दशाहमेव। तद्ग्रहणेऽपि पितृविषयेऽस्थिदाहे सदा दशाहमिति संग्रहकारवचनं तैर्व्याख्यातम्। अपरे तु ज्ञातीनामगृहीताशौचानां पर्णदाहवदस्थिदाहेऽपि त्रिरात्रमेव। गृहीताशौचस्य पुत्रस्य पर्णदाहेऽस्थिदाहेऽपि त्रिरात्रमेव। "आशौचांतः कीकसादेः प्रदाहे" इत्यादीनां पूर्वोक्तानां वचनानां पुनर्दाहमात्रविषयत्वेन प्रवृत्तत्वात्। "मातापित्रोर्दशाहं स्यादास्थिदाहे तथैव च" इत्यस्य च मातापितृविषये अगृहीताशौचस्य पुत्रस्य पर्णदाहवदस्थिदाहेऽपि दशाहाशौचप्रतिपादकत्वात्तत्र सपिंडविषयत्वाप्रतीतेरित्याहुः। तथा च **संग्रहे**—

" अंतर्दशाहदाहे तु शेषतः शुचयोऽखिलाः। बहिर्दशाहदाहे तु दाहादित्रिदिनं मतम् ॥
" प्रागाशौचग्रहाभावे ज्ञातीनां त्रिदिनं समम्। प्राग्ग्रहे तु त्र्यहं कर्तुरन्येषां तु न विद्यते।
" कर्ता च तनयः पूर्वग्रहे पूर्णं तथा दिनम् " ॥ इति। **पुराणमपि**—

" अस्थ्यभावे पलाशोत्थैः पर्णैः कार्यं शरीरकम्। तथा पर्णमयं दग्ध्वा त्रिरात्रमशुचिर्भवेत् " ॥
इत्येतत् गृहीताशौचपुत्रविषयम्। गृहीताशौचज्ञातीनां तु नाशौचम्। तथा च **स्मृत्यंतरे**—

" पुत्रः पित्रोस्तु संस्कारं प्रमादान्न करोति चेत् । ज्ञातीनां दशरात्रं स्यात्तदूर्ध्वं सूतकं न हि ॥
" नित्यकर्माणि कुर्वीत स्मृत्युक्तानि तथैव च " ॥ इति । **अन्यत्रापि**—
" वंशजानामसंस्कारे सूतकं तु कथं भवेत् । दशाहात्परतः शुद्धिर्ज्ञातीनां च विशेषतः " ॥ इति ।
एतेन दहनमन्तरेणाप्याशौचमुदकदानं चानुष्ठेयमित्युक्तं भवति ।

पुत्रस्यापि पुनर्दहनात्पूर्वमाशौचानुष्ठानमाह **वसिष्ठः**—
" प्रमीतपितृकः पित्रोरोर्ध्वदैहिकमाचरेत् । यदि कर्तुमशक्तः स्यादाशौचं नियमान्वितः ॥
" आ दशाहादयोर्ध्वं तु यदा कार्यक्षमस्तदा । त्रिरात्रं समतिक्रम्य श्राद्धं कुर्याद्यथाविधि ॥
" दाहकस्य तदा शौचमितरेषां न विद्यते " ॥ इति । इतरेषां दत्तोदकसपिंडानामित्यर्थः ।
गृहीताशौचानामदत्तोदकानां तु सपिंडानामुदकनिमित्तमाशौचमुक्तं **स्मृत्यंतरे**—
" पूर्वं गृहीताशौचानां न पुनर्दहने त्वघम् । तस्मिन्नुदकदातॄणामाशौचं मनुरब्रवीत् " ॥ इति ।
" मरणादिगृहीतस्य त्रिरात्राच्छुद्धिरिष्यते " इति पुत्रस्य त्रिरात्राशौचविधानात् ज्ञातीनामेकरात्रं न्यायसिद्धमिति **व्याख्यातारः** । आहिताग्नेर्मंत्रवद्दहनाभावे पुत्रादीनामाशौचं नास्ति । किंतु पुनर्दाहसमय एवाशौचमित्युक्तं **चंद्रिकायाम्**—
" आहिताग्नेस्तु विधिवद्दाहांतं नास्ति चेत्तदा । आशौचग्रहणं नास्ति दाहाद्याशौचमिष्यते " ॥ इति ।
दाहाद्याशौचम् पुनर्दाहाद्याशौचम् । तच्च दशाहम् । तथा **पारस्करः**—
" आहिताग्नेस्तु दहनात् दशाहाशौचमिष्यते " इति । आहिताग्नेरपि—
" विदेशस्थो गृही यावद्विधिना नैव संस्कृतः । पुत्रादीनां तु सन्ध्यादि कर्मलोपो न विद्यते " ॥
पैठीनसिरपि— " आहिताग्निश्चेत्प्रवसन्म्रियेत पुनःसंस्कारं कृत्वा शावमाशौचमिष्यते " इति ।
स्मृत्यंतरेऽपि—
" दशाहांतं सपिंडानां मृतौ प्रेतक्रिया भवेत् । पुनः संस्कारे त्रिरात्रं स्याद्यष्टुः पित्रोर्दशाहतः " ॥ इति ।
अनाहिताग्नेः पुनःसंस्कारे सपिंडानां त्रिरात्रम् । यष्टुः आहिताग्नेः पुनःसंस्कारे सपिंडानां दशाहं ।
पित्रोश्च पुनःसंस्कारे पुत्राणां दशाहमित्यर्थः । अनेकसपिंडपुनर्दाहे **संग्रहकारः**—
" मृतानां तु सपिंडानां काले बहुतिथे गते । तान्सर्वान्सह संस्कुर्यात् त्रिरात्रेण यथाविधि ॥
"एकोद्दिष्टं चतुर्थेऽन्हि तेषां पिंडं पृथक् पृथक् । सपिंडीकरणं तेषां सहैव पृथगेव वा " ॥ इति ।
अब्दात्परं दुर्मृतसपिंडादिपुनर्दाहविषये **गर्गः**—
"अतीतेऽब्दे तु संस्कारे एकाहात्पिंडमर्पयेत् । श्राद्धं दद्यात् द्वितीयेऽन्हि तृतीयेऽह्नि सपिंडनम्" ॥ इति ।
मातापितृविषये तु त्रिरात्रम् ।
" अब्दांते वाऽथ षण्मासे पुनः कृत्वा तु संस्कृतिम् । त्रिरात्रमशुचिर्भूत्वा श्राद्धं कुर्याच्चतुर्दिने" ॥ इति **स्मरणात्**—अयमत्र निष्कर्षः । आहिताग्नेः पुनर्दाहाद्येव पुत्रादीनामाशौचं न ततः पूर्वम् । अनाहिताग्नेस्तु पुनर्दाहात्पूर्वमाशौचग्रहणं विकल्पितम् । आहिताग्न्यनाहिताग्न्योर्दशाहमध्ये पुनर्दाहेऽपि[1] शिष्टाहमेवाघम् । दशाहात्परमाहिताग्नेः पुनर्दाहे पुत्रस्य सपिंडानां च दशाहम् । अनाहिताग्नेः पुनरस्थिदाहे प्रतिकृतिदाहे च पूर्वमगृहीताशौचस्य पुत्रस्य दशाहम् । गृहीताशौचस्य तु त्रिरात्रम् । अस्थिदाहे प्रतिकृतिदाहे चागृहीताशौचानां ज्ञातीनां त्रिरात्रं गृहीताशौचानामदत्तोदकानामुदकदाननिमित्तमेकरात्रम् । दत्तोदकानां तु न किंचित् ।

---

१ खग-वि ।

अन्ये तु अस्थिदाहे पुत्राणां गृहीताशौचानामपि दशाहम् । प्रतिकृतिदशाहे त्रिरात्रम् । सपिंडानामप्यगृहीताशौचानामस्थिदाहे दशाहम् । गृहीताशौचानां तु त्रिरात्रमित्याहुः । अनेकसपिंडपुनर्दाहे त्रिरात्रमब्दानंतरमेकस्यानेकस्य वा पुनर्दाहे एकरात्रम् । मातापितृविषये तु त्रिरात्रमिति । सपिंडसमानोदकादीनामुक्तमिदं दशरात्रं त्रिरात्राद्याशौचमाहिताग्नेस्तत्पत्न्याश्चोपरमे संस्कारदिवसप्रभृति अनाहिताग्नेर्मरणदिवसप्रभृति । उभयोरपि संचयनं दाहादिद्वितीयादिदिवसे कार्यम् । यथाहांगिराः—

“अनग्निमत उत्क्रांते साग्नेः संस्कारकर्मणः । शुद्धिः संचयनं दाहान्मृताहस्तु यथातिथिम्” ॥ इति । अत्र **विज्ञानेश्वरः** (पृ. १७८ पं. ४–५) “साग्नेः संस्कारकर्मण” इति श्रवणादाहिताग्नौ पितरि देशांतरमृते तत्पुत्राणामा संस्कारात्संध्यादिकर्मलोपो नास्तीत्यनुसंध्येयम् । यथाह **पैठीनसिः**—

“ अनग्निमत उत्क्रांतेराशौचं हि द्विजातिषु । दशाहादग्निमतो विद्याद्विदेशस्थे मृते सति ”॥ इति । **स एव**—“ आहिताग्निश्चेत्प्रवसन्म्रियेत पुनःसंस्कारं कृत्वा शाववच्छौचम् ” इति । संनिहितदेशमरणे तु दाहादिदशाहसत्त्वेऽपि मरणाद्याशौचमस्ति । “सूतकं तु प्रवक्ष्यामि मृतजन्मनिमित्तकम्” इति **दक्षस्मरणात्** । **स्मृत्यंतरे**—

“ अनग्नेर्मरणात्साग्नेराशौचं दाहतः परम् । तयोः संचयनं दाहान्मृताहस्तु तिथिः स्मृता ” ॥ इति । अनाहिताग्नेर्मरणाद्यपि संचयनमुक्तं **ब्रह्मपुराणे**—

“ अनाहिताग्नेर्मरणादाहिताग्नेस्तु दाहतः । अस्थिसंचयनं कुर्यात् स्वशाखोक्तविधानतः ” ॥ इत्यत्राचारतो व्यवस्था । **तत्रैव**—

“दाहाद्यशौचं विज्ञेयं सर्वेषामग्निहोत्रिणाम् । मरणाद्येव कार्यं स्यात्संयोगो यस्य नाग्निभिः” ॥ इति । **व्याघ्रोऽपि**—“ दहनाद्येव कार्यं स्याद्यस्य वैतानिको विधिः ” इति ।

अत्र **केचिदाहुः**—‘ यस्य वैतानिको विधिः ’ इति स्मरणात् आहिताग्नेस्तत्पत्न्याश्च वैताग्निना संस्कारे सति दाहाद्याशौचम् । तदभावे “ संयोगो यस्य नाग्निभिः ” इति वचनात् मरणाद्येवानाहिताग्निमरणवदाशौचमिति ।

अन्ये तु उक्तयोर्वचनयोराहिताग्न्यनाहिताग्न्युपलक्षणत्वेन वैतानिकाग्निसंस्काराभावेऽप्याहिताग्नेस्तत्पत्न्याश्च मरणे दहनाद्येवानाहिताग्निमरणवदाशौचमित्याहुः । शिष्टाचारादिह व्यवस्था ।

रात्रौ जन्मर्तुमृतिसंभवे दिननिर्णयः । रात्रौ जन्मादिसंभवे अर्धरात्रात्परं जन्मादौ सति परदिनं पूर्वे तदुत्पत्तौ पूर्वदिनमित्येकः कल्पः । रात्रिं त्रेधा विभज्याद्ये भागद्वये जननादौ जाते पूर्वदिनं ग्राह्यम् । उत्तरभागे परदिनमिति द्वितीयः । प्रागुदयादित्यपरः कल्पः ॥

तथा **विज्ञानेश्वरीये** (पृ. १४४ पं. ३१–३३)—

“ अर्धरात्रावधिः कालः सूतकादौ विधीयते ॥

“ रात्रिं कुर्यात् त्रिभागं तु द्वौ भागौ पूर्व एव तु । उत्तरांशः प्रभातेन युज्यते मृतसूतके ॥

“ ऋतौ च सूतके शावे तृतीयांशः परान्वितः । आद्यौ द्वावंशकौ युक्तौ पूर्वेणाह्नेति निश्चयः॥

“ उदिते तु यदा सूर्ये नारीणां दृश्यते रजः । जननं वा विपत्तिर्वा यस्याहस्तस्य शर्वरी ॥

“ रात्रावेव समुत्पन्ने मृते रजसि सूतके । पूर्वमेव दिनं ग्राह्यं यावन्नाभ्युदितो रविः ” ॥

एतेषां च कल्पानां देशाचारेण व्यवस्था इति ।

अत एव स्वदेशाचारानुसारिणा **तुण्डीरमंडलीयेन संगृहीतम्**—

" त्रियामायास्तृतीयांशे यदि जन्मर्तुमृत्यवः । प्रभातादि यदि ब्यंशे पूर्वाहाद्यघमिष्यते "॥ इति । पादोनचतुर्नाडिकारूपसंध्याकालरहिता रात्रिस्त्रियामा । **अत्राहुः**—

" तृतीयभागे संप्राप्ते मलं स्यान्निशि चेत्त्रियाः । प्रभातादित्रिरात्रेण शुद्धिं तस्या विनिर्दिशेत् ॥ " प्रत्यूषे जन्ममरणे स्यातां यदि परं दिनम् "॥ इति **वृद्धपराशरस्मरणात्** ।

"रात्रिं कुर्यात् त्रिभागं तु" इत्यादिवचनानि रजोमात्रविषयतया संकोचनीयानि । जन्ममरणयोस्तु अरुणोदयाद्येव दिनं ग्राह्यमिति । केचित्तु—

" सूतके मृतके चैव यदघं परिकीर्तितम् । ते चेत् सूर्योदयादर्वाग् दिनमेकं तु तद्भवेत् "॥ इति । **वचनात्**—जन्ममरणयोरुदयाद्येव दिनं ग्राह्यमित्याहुः ।

संपर्काशौचमुक्तं स्मृतिरत्ने—

" संपर्कमशनं पानं दशरात्रं विवर्जयेत् । तत्संपर्काद्भवेदेनः शुद्धस्यापि न संशयः "॥ इति । एनः आशौचम् । संपर्कशब्दार्थ उक्तः **स्मृत्यंतरे**—

" प्रेतकर्मोपदेशित्वं तत्कृतिश्चाधिभिः सह । सहवासः सपत्न्यादिसंपर्कार्थं प्रचक्षते "॥ इति । अत्र **बृहस्पतिः**—

" यस्तैः सह सपिंडोऽपि प्रकुर्याच्छयनादिकम् । बांधवोऽबांधवो वाऽपि स दशाहेन शुध्यति"॥ इति । दशाहोपन्यासो दशाहसंपर्कविषयः । यस्मिन् यस्मिन्दिने संपर्कस्तद्दिनमात्रमघं भवति ॥ कादाचित्कस्पर्शे स्नानमात्रेण शुद्धिः । **स्मृत्यंतरे**—

" प्रेतकर्मणि वक्तॄणामाशौचं कर्तृवद्भवेत् । अन्यकर्मणि वक्तॄणां स्वाहाकारं विनोच्यते "॥ इति ।

संपर्कनिमित्ताशौचे विशेष उक्तः **संग्रहे**—

"अधिसंपर्कतोऽशौचं भवेत्तद्दिनसंख्यकम् । न तत् द्रव्यक्रिया स्त्रीणां सांपर्किकमघं भवेत्" ॥इति । अतीताशौचविषयेऽपि क्रियाद्रव्येष्वाशौचाभावोऽतिदिष्ट**स्तत्रैव**—

" तथा नैव क्रिया द्रव्येष्वतीतं त्रिदिनाद्यघम् " इति । **अत्रांगिराः**—

"अतिक्रांते दशाहे तु पश्चाज्जानाति चेद् गृही । त्रिरात्रं सूतकं तस्य न तत् द्रव्यस्य कर्हिचित्" ॥ अत्र द्रव्यमात्राशौचाभावोक्त्या स्त्रीणां क्रियायाश्चातीताशौचमस्तीत्यवगम्यते । यत्तु क्रियासाधनाभूतद्रव्यस्याशौचाभावोक्त्या तत्साध्यक्रियाणामप्याशौचाभावः सिध्यतीति तन्न । कर्तुराशौचित्वेन कर्मानविकारत्वात्स्वद्रव्यसाध्यान्यकर्तृकक्रियाया आशौचाभावप्रतिपादनं आशौचिद्रव्यस्याशौचाभावोक्त्यैव गतार्थत्वात् अन्यदीयक्रियाया आशौचभाववचनं मुधैव स्यात् ।

अत एव **विज्ञानेश्वरा**दिभिर्गृहे भवानां भार्यादीनां द्रव्याणां च संपर्काशौचाभावः द्रवस्य त्रिरात्राद्यतिक्रांताशौचाभावश्चोक्तः । **अंगिराश्च**—

" आशौचं यस्य संसर्गादापतेद्गृहमेधिनः । क्रियास्तस्य विलुप्यंते श्राद्धाणां च न तद्भवेत् "॥ इति । गृहमेधिनः क्रियालोपस्तद्गृहे भवानां भार्यादीनां द्रव्याणामप्याशौचाभावश्च कण्ठरवेणोक्तः । एवं च संपर्काशौचविषये अतीताशौचविषये च क्रियायामाशौचाभावप्रतिपादक**संग्रह**कारवचने प्रमाणं चिन्त्यम् ।

अन्तःशवग्रामविषये मनुः—

"नाद्यादंतःशवे ग्रामे नाधीयान्न जुहोति च । तानि विध्यंतरे कुर्याद्धनुरेकादशांतरे"॥ इति ।

१ ग–सपीत्यादि ।

वितस्तिर्द्विगुणारत्निस्तस्मात्किष्कुस्ततो धनुः इति उक्तलक्षणैरेकादशभिर्धनुर्भिर्व्यवहिते विध्यंतरे कुर्यादित्यर्थः । **आपस्तंबः** (१।३।९।१४-१५)— " अंतःशवमंतश्चांडालम् " इति ।

स्मृत्यंतरे—

" ग्रामस्थे शवचंडाले शूद्राद्यशुचिसन्निधौ । नाध्येतव्यं न भोक्तव्यं न होतव्यं कदाचन " ॥इति ।

आत्रेयोऽपि—

" अंतःशवो यदा ग्रामस्तस्मिन् ग्रामे तदालये । नित्यं नैमित्तिकं काम्यं न कुर्यादिति शासनम् ॥
" श्रुतिस्मृत्योर्विरोधे तु श्रुतिरेव बलीयसी । तस्मादंतःशवे ग्रामे जुहुयाच्छ्रौतपावकम् " ॥ इति ।

स्मृत्यंतरे विशेषो दर्शितः—

" चतुःशताधिकैर्विप्रैः संपूर्णे ग्राममध्यके । विशेषं संप्रवक्ष्यामि जपहोमार्चनं प्रति ॥
" अंतःशवस्य दोषस्तु नास्ति तत्र समाचरेत् । ग्रामे नाराचविच्छिन्ने कुर्याद्भिन्नोऽथवा पथा ॥
" वीथ्यंतरे वा मृतके हरेरर्चा समाचरेत् ।
" अनाथानुपनीतानां प्रेतायाश्च तथा स्त्रियाः । अंतःशवस्य दोषस्तु ग्रामादौ तु न लिप्यते ॥
" मुनीनां च यतीनां च परकायप्रवेशिनाम् । मरणं यत्र संभूतं तत्र दोषो न लिप्यते ॥
" शूद्रादीनां च मरणं संभवेद्यत्रकुत्रचित् । आशौचं गृहमात्रस्य ग्रामाशौचं न विद्यते ॥
" कुटिके पतने चैव खर्वटे राजधानिषु । क्रमेणैवार्चनं कुर्यादुक्तदोषो न विद्यते " ॥ इति ।

संग्रहे—

" अंतःशवोऽशुचिर्ग्रामस्तत्र होमादि नाचरेत्[1] । वीथ्यंतरे सदा कुर्यादेकादशधनुष्परे ॥
" ग्रामे चतुःशतब्रह्मयुक्तेऽप्यंतःशवे क्रियाः । कुर्यात्स्त्रीवृषलानाथबालार्तौ चेत्यथापरे " ॥ इति ।

चतुःशतब्राह्मणयुक्ते ग्रामे एकादशधनुर्व्यवहितत्वाभावेऽपि कुर्यादेव ।

" सहस्रविप्रसंपूर्णे ग्रामे तदधिकेऽपि वा । आलयस्य समीपे तु त्रिंशद्दंडांतरे मृतौ ॥
" अर्चनस्थापनादीनि न कुर्यादेव तत्र तु ॥
" एकवीथ्यां समारूढे एकविंशद्गृहे स्थिते । त्रिंशद्धनुषि चाधस्त्ये दैवं पित्र्यं च वर्जयेत् ॥
" पंचाशच्चापि सीमांते वैकवीथ्यां शवे सति । अर्चनं च हरेर्दानं जपहोमादि वर्जयेत् " ॥ इति

स्मरणात् । **स्मृत्यंतरे**—

" प्रतिष्ठादिषु कालेषु यस्मिन्ग्रामे मृतिर्भवेत् । शीघ्रं बहिः शवं नीत्वा कर्मशेषं समापयेत् ॥
" अग्रहारे हरेः पूजा वर्तते यत्र कुत्रचित् । अंतःशवं यदि भवेत्तदा नीत्वा ततो बहिः ।
" तच्छवं भस्मसाद्यावत्तावत्तंत्रेण पूजयेत् " ॥ इति

संवर्तः—" पाकयज्ञं तथा भुक्तिं जलाहरणमेव च । न कुर्यात्तावता विप्रो यावत्तिष्ठेच्छवोत्तरा ॥
" अज्ञानाद्यदि भुंजीत प्रायश्चित्तं समाचरेत् " ॥ इति ।

अनुगमनाशौचम् । अनुगमनाशौचमाह **पराशरः** (३।४८)—

" अनुगम्येच्छया प्रेतमज्ञातिं बंधुमेव वा । स्नात्वा सचैलं स्पृष्ट्वाऽग्निं घृतं प्राश्य विशुध्यति "॥ इति ।

ज्ञातयो मातृसपिंडाः । इतरेषां तु विहितत्वान्न दोषः ।

---

१ क्ष–नाचारन् ।

याज्ञवल्क्योऽपि (प्रा. २६)—

"ब्राह्मणेनानुगंतव्यो न शूद्रो न द्विजः क्वचित्।अनुगम्यांभसि स्नात्वा स्पृष्ट्वाऽग्निं घृतभुक् शुचिः"॥इति । द्विजः विप्रादिः । । शूद्रो वा नानुगंतव्यः । यदि स्नेहादिना ब्राह्मणः समानोत्कृष्टजातिं प्रेतमनुगच्छति तदा स्नानाग्निस्पर्शघृतप्राशनानि कुर्यादित्यर्थः । **कवषो** विशेषमाह—

"अनुगम्य शवं बुध्या स्नात्वा स्पृष्ट्वा हुताशनम्। सर्पिः प्राश्य पुनः स्नात्वा प्राणायामैर्विशुध्यति."॥ इति । प्राणायामाश्च त्रयः ।

पुनःस्नानम् । पुनःस्नानस्वरूपमाह **हारीतः**—

" आर्द्रवस्त्रं परित्यज्य शुष्कवस्त्रेण मज्जनम् । शवानुगमने क्षौरे पुनःस्नानं विधीयते "॥ इति । अनुगमने एवेदं प्रायश्चित्तं नाग्रे पार्श्वयोर्वा गमने ।

" प्रेतस्य पार्श्वयोरग्रे न गंतव्यं कदाचन । तस्मादग्रे तु गंतृणामायुः क्षीणं पदेपदे ॥

"मृतस्य पश्चाद्गमने प्रायश्चित्तं विधीयते । किल्बिषादग्रगमने निष्कृतिर्नोपपद्यते"॥ इति **स्मरणात्** । घृताद्यसंभवे विशेषः **स्मृत्यंतरे** दर्शितः—

" अग्न्यभावे घृताभावे सचैलं स्नानमाचरेत् । सव्याहृत्या च गायत्र्या दश कृत्वोऽभिमंत्रिताः ॥

" अर्घांजलिमपः पीत्वा शुद्धिमाप्नोति वै द्विजः " ॥ इति । बालादिविषये **जाबालिः**—

"मृतं बालं च वृद्धं चानाथं विप्रमनुव्रजेत् । द्विजः स्नानेन शुध्येत घृतप्राशाग्निना विना ॥ "इति ।

स्मृत्यंतरे—

"अनाथमनुपेतं च प्रेतं कन्यामनुव्रजन् । सर्ववेदं क्रतुश्रेष्ठमाचामेन्न घृतं पिबेत्" ॥ इति । क्षत्रियादिशवानुगमने ब्राह्मणस्य विशेषमाह **पराशरः** (३।४९–५२)—

" क्षत्रियं मृतमज्ञानाद्ब्राह्मणो योऽनुगच्छति । एकाहमशुचिर्भूत्वा पंचगव्येन शुध्यति ॥

" शवं च वैश्यमज्ञानाद्ब्राह्मणो योऽनुगच्छति । कृत्वाशौचं द्विरात्रं च प्राणायामान्षडाचरेत् ॥

" प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः । अनुगच्छेन्नीयमानं त्रिरात्रमशुचिर्भवेत् ॥

" त्रिरात्रे तु ततः पूर्णे नदीं गत्वा समुद्रगाम् । प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यति"॥ इति । अज्ञानान्मोह्याद्याद्यदृच्छिकानुगमने **त्वङ्गिराः**–"शूद्रस्य प्रेतस्य यदृच्छयानुगमने ब्राह्मणः स्रवन्तीमासाद्य गायत्र्या अष्टसहस्रं जपित्वा शुध्यति । क्षत्रियानुगमने तु अर्धसहस्रम् । वैश्यानुगमने पादोनम् " इति । **स्मृतिरत्ने** —

" एकाहात् क्षत्रिये शुद्धिर्वैश्ये शुद्धिर्द्व्यहेन तु । शूद्रे दिनत्रयं प्रोक्तं प्राणायामशतं पुनः "॥ एवं च सति क्षत्रियस्य वैश्यशवानुगमने एकाहं शूद्रशवानुगमने द्व्यहं वैश्यस्य शूद्रशवानुगमने एकाहमिति । **विज्ञानेश्वरीये** तु अनंतरानुगमने एकाहमेकांतरानुगमने पक्षिणीति । **स्मृत्यर्थसारे** च

" स्नेहादिना जातिषूत्कृष्टजातिषु चानुगमने सचैलं स्नात्वाऽग्निं स्पृष्ट्वा घृतं प्राश्य पुनः स्नात्वा शुध्येत् " । घृतप्राशनं शुध्यर्थमेव न भोजनस्थाने सपिंडेष्वनुगमनं विहितमेव हीनजातिषु ब्राह्मणस्य क्षत्रियानुगमने एकाहमाशौचं वैश्यानुगमने पाक्षिणी शूद्रानुगमने त्रिरात्रं समुद्रगामिन्यां महानद्यां स्नात्वा प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्येत् । क्षत्रियस्य वैश्यानुगमने त्वेकाहं शूद्रानुगमने पक्षिणी वैशस्य शूद्रानुगमने त्वेकाहमिति ।

द्विजानां शूद्रशवानुगमननिषेधे कदा तैः शूद्रानुसर्तव्या इत्याकांक्षायामाह **पाराशरः**— " विनिर्वर्त्य यदा शूद्रा उदकांतमुपस्थिताः । द्विजैस्तदानुगंतव्या एष धर्मः सनातनः " ॥ इति । उदकशब्देन उदकक्रिया उच्यते। तस्या अंतः समाप्तिः । तां निर्वर्त्याशौचं परिसमाप्य यदा स्थिताः तदा द्विजैरनुगंतव्याः अनुसर्तव्याः इत्यर्थः । **स्मृत्यंतरे**—

"तृतीयमासादारभ्य न कुर्याद्गर्भिणीपतिः । क्षौरं शवानुगमनं दूरयात्रां प्रतिग्रहम् "॥ इति ।

अन्यत्र—

"अस्नात्वा चेद्विशेद्ग्रामं श्मशानाद्बुद्धिपूर्वकम् । त्रिरात्रेण विशुद्धिः स्यादमत्र्यौहास्तथैव च" ॥इति ।

तथा—

"संस्कारोपक्रमात्पूर्वं कामं स्नात्वा विशुध्यति । आरब्धे तु हि संस्कारे समाप्ते स्नानमाचरेत्"॥ इति । एतदसपिंडविषयम् ।

"आरंभात्प्राक् परः स्नायात्तस्य शुद्धिर्भविष्यति" इति । "सर्वेषां च सपिंडानां दहनाच्चैव योषिताम्"॥ **इति स्मरणात्** । विप्रस्य सर्ववर्णविषये संचितेऽस्थ्नि स्नानं संचिते त्वाचमनम् ।

अत्र पारस्करः—

"अस्थिसंचयनादर्वाग्रुदित्वा स्नानमाचरेत् । अंतर्दशाहे[1] विप्रस्य तूर्ध्वमाचमनं स्मृतम् " ॥ इति ।

स्मृतिरत्ने—

"मृतस्य यावदस्थीनि ब्राह्मणस्याहृतानि तु । तावद्यो बान्धवस्तत्र रौति तत् बांधवैः सह ॥
" तस्य स्नानात् भवेच्छुद्धिस्ततस्त्वाचमनं स्मृतम् " ॥ इति ।

" सचैलं स्नानमन्येषामकृते त्वस्थिसंचये । कृते तु केवलं स्नानं क्षत्रविट्शूद्रजन्मनाम् "॥ इति । ब्राह्मणस्य क्षत्रियवैश्यमरणरोदने अस्थिसंचयनादर्वागेकाहाशौचं सचैलं स्नानं च तदूर्ध्वं सचैलस्नानमात्रम् । तथा च **माधवीये**—

" अनस्थिसंचये विप्रो रौति चेत्क्षत्रवैश्ययोः । तदा स्नात्वा सचैलं तु द्वितीयेऽहनि शुध्यति"॥ इति ।
" कृते तु संचये विप्रः स्नानेनैव शुचिर्भवेत् ।
" मृतमुद्दिश्य यो गच्छेत्स घृतप्राशनं चरेत् । वर्जयेत् तदहोरात्रं जपहोमार्चनादिकम् " ॥ इति ।

विज्ञानेश्वरोऽपि—

" मृतस्य बांधवैः सार्धं कृत्वा तु परिदेवनम् । वर्जयेत्तदहोरात्रं दानं श्राद्धादिकर्म च " ॥ इति । शूद्रमरणे विप्रादीनामस्थिसंचयनात्प्राक् तदूर्ध्वं चाशौचतारतम्यमाह **पारस्करः**—

" अस्थिसंचयनादर्वाग्यदि विप्रोऽश्रुवान् भवेत् । मृते शूद्रे गृहं गत्वा त्रिरात्रेण विशुध्यति ॥
" अस्थिसंचयनादूर्ध्वमश्रुपाते द्विजातयः । अहोरात्रेण शुध्यंति सवासःक्षालनेन च ॥
" सजातेर्दिवसादेव त्र्यहात्क्षत्रियवैश्ययोः । स्पर्शे विनानुगमने शूद्रे नक्तेन शुध्यति " ॥ इति ।

क्षत्रियवैश्ययोः शूद्रमरणे रोदने त्र्यहं शूद्रस्य स्वजातिशवस्पर्शे आतुरव्यंजने अनुगमने च दिनमन्यथासंचयात् प्रागेककालः । ऊर्ध्वं स्नानमेवेत्यर्थः ।

---

१ क्ष-स्यांहृ ।

असपिंडस्सजातीयप्रेतनिर्हरणाशौचमाह **मनुः** (५।१००-१०१)—

" असपिंडद्विजं प्रेतं विप्रो निर्हृत्य बंधुवत् । विशुध्यति त्रिरात्रेण मातुराप्तांश्च बांधवान् ॥

" यद्यन्नमत्ति तेषां तु दशाहादेव शुध्यति । अनदन्नन्नमन्हैव न चेत्तस्मिन् गृहे वसेत् " ॥ इति । यः स्नेहादिना शवनिर्हरणं कृत्वा तस्यैवान्नमश्नाति तद्गृहे च वसति तस्य दशाहेनैव शुद्धिः । यस्तु केवलं तद्गृहे वसति न पुनस्तदन्नमश्नाति तस्य त्रिरात्रं यः पुनर्निर्हरणमात्रं न तद्गृहे वसति न चाश्नाति तस्यैकाह इत्यर्थः । निर्हारशब्दार्थः **स्मृत्यंतरे** दर्शितः—

" प्रेतस्य वासः स्रग्गन्धभूषणाद्यैरलंक्रिया । वहनं दहनं चेति निर्हारार्थो निरुच्यते " ॥ इति ।

संग्रहेऽपि—

" यः प्रमीतमलंकुर्याद्वहेद्वाथ दहेत् द्विजम् । स शुद्धस्त्वेककालेन कालशेषं बहिर्वसेत् ॥

"ग्रामे वसन् दिनाच्छुध्येत्र्यहात्प्रेतगृहे वसेत् । निर्हृत्य यो मृतान्नं च भुंक्ते स तु दशाहतः"॥ इति । कालशेषं बहिर्वसन् दिवा निर्हरणे आनक्षत्रोदयं रात्रावार्कोदयं ग्रामाद्बहिर्वसन्नेककालेन तत्कालशेषेण दिवामात्रेण रात्रिमात्रेण वा शुध्यति । ग्राम एव वसन् दिनेन प्रेतगृहे वसन् त्रिरात्रेण यस्तु निर्हृत्य प्रेतान्नं भुंक्ते स प्रेतगृहे अन्यत्र वा वसन् दशाहतः शुध्यतीत्यर्थः । **हारीतः**—

" प्रेतनिर्हरणं कृत्वा ग्रामं न विशेद्दा नक्षत्रदर्शनाद्रात्रौ चेद्दा रविदर्शनात्ततः शुद्धः " इति ।

अखंडादर्शे—

" दाहं विनालंकरणं वाहं कृत्वा दिनस्य तु । शेषेण शुद्धिरुक्तैव रात्रावप्युषसि प्लवः "॥ इति ।

विज्ञानेश्वरीये—

" कृच्छ्रपादोऽसपिंडस्य प्रेतालंकरणे कृते । अज्ञानादुपवासः स्यादशक्तौ नक्तमिष्यते " ॥ इति ।

स्मृत्यंतरे विशेषः—

"सज्योतिस्तु बहिर्वासो रात्रौ नक्षत्रदर्शनात् । प्राशयेत्पंचगव्यं च ब्राह्मणैः स्वस्ति वाचयेत्"॥ इति ।

भरद्वाजश्च— "असपिंडशवस्य स्नानालंकरणे कृते दिवसं वहने कृते स्नात्वा दश प्राणायामान् कृत्वा नक्षत्रदर्शनात्पूर्वं ग्रामाद्बहिरासीत तावदेवाशौचं रात्रौ सूर्योदयात्पूर्वं ग्रामाद्बहिरासीत । अन्यथा तद्ग्रामं प्रविष्टे शवहर्तुरेकाहं तद्गृहं प्रविष्टे त्र्यहं तत्र भोजने कृते दशाहं भवति"॥ इति । पर्युषितशवादिनिर्हारे समानोदकशवनिर्हारे चाशौचम् । पर्युषितशवरजस्वलासूतिकागर्भिणीवहने प्रायश्चित्तमुक्तं **बोधायनेन**—

" कृत्वा तु पञ्चगव्यस्य प्राशनं च तथा गराम् । ग्रासं दत्वा यथाशक्ति गायत्रीजपमाचरेत् ॥

" ब्राह्मणानां च वाक्येन घृताग्निस्पर्शनेन च । पुण्याहेन विशुध्येत सूत्रमन्यत्तु धारयेत् " ॥ इति । सपिंडानां प्रेतनिर्हरणस्य विहितत्वादाशौचाधिक्यमग्निस्पर्शादिकं च नास्तीत्याह **देवलः**—

" विहितं तु सपिंडानां प्रेतनिर्हरणादिकम् । तेषां करोति यः कश्चित् तस्याधिक्यं न विद्यते" ॥ इति ।

समानोदकप्रेतवहनादौ दशाहाशौचमाह **मांडव्यः**—

" शावे च सूतके चैव त्र्यहात्तूदकदायिनः । शववाहं तु कुर्याच्चेद्दशाहांतं भवेत्क्रिया " ॥ इति । आशौचमुदकदानं च क्रिया । **अखंडादर्शे** च—

“ समानोदकाः प्रकुर्वीरन्संस्कारं वहनं यदि । दशाहांतेन शुद्धिः स्यादित्याह भगवान्भृगुः”॥ इति ।

भारद्वाजः—

“ यः समानोदकं प्रेतं वहेद्वाथ दहेत वा । तस्याशौचं दशाहं स्यादन्येषां तु त्र्यहं विदुः ” ॥ इति । अन्येषां योनिबंधूनाम् । तथा च **शंखः**–“त्र्यहं च योनिबंधूनामाशौचं वहनादिषु” । **स्मृत्यंतरेऽपि**–

“ शाखाशौचे दहेत्प्रेतं पक्षिण्याशौचवान्यदि । त्र्यहं मत्या त्र्यहं तु स्यादमत्या शुद्धिसाधनम्”॥ इति ।

अन्यत्रापि—

“ पक्षिण्याशौचसंमिश्रे दहने मतिपूर्वके । आशौचिनां त्रिरात्रं स्यादिति स्मृतिविदो विदुः ” ॥ इति । असवर्णशवनिर्हारे **गौतमेन** विशेषो दर्शितः (१४।२६)—“ अवरश्चेद्वर्णः पूर्वं वर्णमुपस्पृशेत् । पूर्वो वा अवरं तत्र शावोक्तमाशौचम् ” इति । उपस्पर्शनं निर्हरणम् । **वृद्धपराशरः—**

“ योऽसवर्णं तु मूल्येन नीत्वा प्रेतं दहेन्नरः । आशौचं तु भवेत्तस्य प्रेतजातिसमं सदा ” ॥ इति । एतदापदि द्रष्टव्यम् । अनापदि तु **व्याघ्रः—**

“ अवरश्चेत्परं वर्णं परो वाप्यवरं यदि । वहेच्च शावमाशौचं दृष्टार्थे द्विगुणं भवेत् ” ॥ इति । स्नेहादिना विजातीयशवनिर्हारे शवजात्युक्तमाशौचम् । भृतिग्रहणे द्विगुणमित्यर्थः ।

हारीतश्च—“ दृष्टार्थे द्विगुणं भवेत् ” ॥ इति ।

अर्थलोभेन सवर्णशववाहनादावपि तद्वर्णाशौचमाह **व्यासः—**

“ यदि निर्हरति प्रेतं प्रलोभाक्रांतमानसः । दशाहेन द्विजः शुध्येत् द्वादशाहेन भूमिपः ॥

“ अर्धमासेन वैश्यस्तु शूद्रो मासेन शुध्यति ” ॥ इति ।

शूद्रेण विप्रशवनिर्हरणं न कारयेदित्याह **मनुः** (५।१०४)—

“न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण हारयेत् । अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रसंस्पर्शदूषिता,” ॥ इति । आहूतिः शवाहुतिः । अत्र स्वेषु तिष्ठत्स्वित्यविवक्षितम् । अस्वर्गत्वदोषश्रवणात् । **यमोऽपि—**

“ न शूद्रो यजमानं वै प्रेतीभूतं समुद्वहेत् । यस्यानयति शूद्रोऽग्निं तृणं काष्ठं हवींषि च ॥

“ प्रेतत्वं हि सदा तस्य स चाधर्मेण लिप्यते ” ॥ इति ।

गर्भवतः ब्रह्मचारिणश्च पित्राद्यन्यशवनिर्हरणनिषेधः । **मनुः—**

“ दहनं वहनं वापि प्रेतस्यान्यस्य गर्भवान् । न कुर्यादुभयं तत्र कुर्यादेव पितुः सदा ॥

“ ज्येष्ठस्य चानपत्यस्य मातुलस्यासुतस्य च ” ॥ इति ।

देवलः—

“ब्रह्मचारी न कुर्वीत शवदाहादिकाः क्रियाः । यदि कुर्यात्ततः कृच्छ्रं पुनःसंस्कारमेव च ” ॥ इति । तस्यैव पित्रादिवहनादौ व्रतलोपो नास्तीत्याहतुः **मनुदेवलौ—**

“ आचार्यं स्वमुपाध्यायं पितरं मातरं गुरुम् । निर्हृत्य तु व्रती प्रेतं न व्रतेन वियुज्यते” ॥

भृगुः–“मातामहं मातुलं च तत्पत्न्यौ चानपत्यके । व्रती संस्कुरुते यत्र व्रतलोपो न विद्यते”॥ **इति** ।

माधवीये—

“ आचार्यं स्वमुपाध्यायं गुरुं वा पितरं च वा । मातरं वा स्वयं दग्ध्वा व्रतस्थस्तत्र भोजनम् ॥

" कृत्वा पतति यत्तस्मात्प्रेतान्नं तु न भक्षयेत् ।

"अन्यत्र भोजनं कुर्यान्न च तैः सह संवसेत् । एकाहमशुचिर्भूत्वा द्वितीयेऽहनि शुध्यति"॥

निर्हारदिनमात्रमेवाशुचिर्द्वितीयादिदिवसेषु प्रेतकृत्योत्तरकालं स्नानाच्छुध्यतीत्यर्थः ॥

वसिष्ठः (२३।७–८)—" ब्रह्मचारिणः शवकर्मिणो व्रतान्निवृत्तिरन्यत्र मातापित्रोः" ॥ इति । **अनाथब्राह्मणवहनादौ** सद्यःशौचं विदधाति **पराशरः** (३।४५–४७)—

" अनाथं ब्राह्मणं प्रेतं ये वहन्ति द्विजातयः । पदे पदे यज्ञफलमानुपूर्व्याल्लभंति ते ॥

" न तेषामशुभं किंचित्पापं वा शुभकर्मणाम् । जलावगाहनं तेषां सद्यःशौचं विधियते " ॥ इति ।

" असगोत्रमबंधुं च प्रेतीभूतं द्विजोत्तमम् । वहित्वा च दहित्वा च प्राणायामेन शुध्यति " ॥ इति ।

बंधुमित्रादिरहितब्राह्मणवहनस्पर्शनदहनादौ स्नानप्राणायामाभ्यां शुद्धिरित्यर्थः । अग्निस्पर्शोऽपि कर्तव्यः । तदुक्त**मंगिरसा**—

" यः कश्चिन्निर्हरेत् प्रेतमसपिंडः कथंचन । स्नात्वा सचैलं स्पृष्ट्वाऽग्निं तस्मिन्नेव क्षणे शुचिः" ॥ इति ।

याज्ञवल्क्यः (प्रा. १४)—

" प्रवेशनादिकं कर्म प्रेतसंस्पर्शिनामपि । इच्छतां तत्क्षणाच्छुद्धिः परेषां स्नानसंयमात् " ॥ इति ।

निंबपत्रदंशनादिवेश्मप्रवेशनांतं कर्म न केवलं ज्ञातीनामपि तु स्नेहादिना प्रेतनिर्हरणं कुर्वतामपि भवति । आशौचं च यथोक्तं भवति । धर्मार्थं प्रेतनिर्हरणं कुर्वतां परेषां तु तत्क्षणात् स्नानप्राणायामाभ्यामेव शुद्धिरित्यर्थः । **वृद्धपराशरः**—

" प्रेतस्पर्शनसंस्कारैर्ब्राह्मणो नैव दुष्यति । वोढा चैवाग्निदाता च सद्यः स्नात्वा विशुध्यति" ॥ इति ।

ब्राह्मे—

" अनाथं ब्राह्मणं दग्ध्वा क्षत्रियं वैश्यमेव वा । पितृमेधान्महायज्ञफलमाप्नोति मानवः ॥

" संन्यासिनां तु संस्कर्तुर्नाशौचं नोदकक्रिया । अश्वमेधफलं तत्र भवेन्नास्त्यत्र संशयः " ॥ इति ।

बोधायनश्च—

" सर्वसंगनिवृत्तस्य ध्यानयोगरतस्य च । न तस्य दहनं कुर्यान्नाशौचं नोदकक्रिया ॥

" ये वहंति महात्मानं दृष्ट्वा स्पृष्ट्वा द्विजातयः । हयमेधफलं तेषामस्तीत्येवं विदुर्बुधाः " ॥

संग्रहे—"यतीन्द्रानाथनिर्हारे सद्यःशुद्धिर्महाफलम् " इति । **स्मृत्यर्थसारे** तु धर्मार्थशवनिर्हरणे स्नानालंकारवहनदहनादिके कृते द्विजानां सचैलस्नानात् सद्यःशुद्धिः । महापुण्यं शुभं चायुश्च भवति । तत्राप्यनाथप्रेतनिर्हरणे अनंतं पुण्यं शुभं चायुश्च वर्धते । धर्मार्थमुत्कृष्टजातिप्रेतनिर्हरणे सर्वेषां सचैलस्नानाच्छुद्धिः । धर्मार्थं स्वजातिप्रेतनिर्हरणे सचेलस्नानप्राणायामैः शुद्धिः । धर्मार्थं हीनजातिप्रेतनिर्हरणे सर्वेषां सचैलं स्नात्वा निम्बपत्रभक्षणादिगृहप्रवेशनांते कृते शुद्धिः " इति ।

स्मृत्यंतरे—

" ऊह्यमानं शवं दृष्ट्वा सवासा जलमाविशेत् । अलंकृतं शवं दृष्ट्वा सचैलः स्नानमाचरेत् ॥

" आचम्य केवलं प्रेतं दृष्ट्वा काष्ठवदाचरेत् " । इति । **काष्ठवदाचरणं** जलावगाहनम् ।

वसिष्ठः (२३।२५-२६)—

" मानुषास्थि स्निग्धं स्पृष्ट्वा त्रिरात्रमाशौचं अस्निग्धे त्वहोरात्रमित्येतदबुद्धिपूर्वविषयम्" । अबुद्धिपूर्वविषये **मनुः**—" नारं स्पृष्ट्वास्थिसस्नेहं स्नात्वा विप्रो विशुध्यति " इति ।

" आचम्यैव तु निःस्नेहं गां स्पृष्ट्वा वीक्ष्य वा रविम् " इति । **चंद्रिकायाम्**—

" जनने मरणे चैव वपनं दशमेऽहनि । आतस्मान्नाधिकारी स्यादाशौचं सर्वदा भवेत् ॥

" तैलाभ्यंगे तथा वांते श्मश्रुकर्मणि मैथुनं । अनाचम्योच्चरन्विप्रस्त्रिरात्रमशुचिर्भवेत् " ॥ उच्चरन्पुरीषोत्सर्गं कुर्वन्नित्यर्थः । एवमादीन्यन्यान्यपि आशौचनिमित्तानि द्रष्टव्यानि ॥

आशौचिनो वर्जनीयमुक्तं । **संग्रहे**—

" न विशेद्देवतागारं न कुर्याद्वंदनाद्यपि । मंदिरं न प्रवेष्टव्यं प्रविष्टस्य फलं शृणु ॥

"चंडालयोनिमासाद्य जन्मानि नव पंच च । भविष्यति वरारोहे व्याधिक्रूरोऽतिनिष्ठुरः " ॥ इति । आशौचिस्पर्शे बिंबस्य संप्रोक्षणमाह **शौनकः**—

" चंडालसूतिकोदक्याशावसूतकदूषिते । निमित्ते समनुप्राप्य सद्यः कृत्वा समर्चयेत् " ॥

अभिवादनस्य निषेधमाह **आपस्तंबः** (१।४।१४।१८-२०)—" अप्रयतेन नाभिवाद्यम् । तथा प्रयताय । अप्रयतश्च न प्रत्यभिवदेत् " ॥ इति । एकादश्युपवासस्यावर्जनीयत्वमुक्तं **पुराणे**—

" सूतके तु नरः स्नात्वा प्रणम्य शिरसा हरिम् । एकादश्यां न भुंजीत व्रतमेतन्न लुप्यते ॥

" मृतकेऽपि न भुञ्जीत एकादश्यां सदा नरः " ॥ इति । **विष्णुरहस्ये** च—

"सूतके मृतके वाऽपि न त्याज्यं द्वादशीव्रतम् । एकादशीव्रतं कुर्यान्नित्यं काम्यं तु वर्जयेत्" ॥ इति । **शावाशौचिनां नियमविशेषमाह मनुः** (५।७२)—

" अक्षारलवणान्नाः स्युः निमज्जेयुश्च तेऽन्वहम् । मांसाशनं च नाश्नीयुः शयीरंश्च पृथक्क्षितौ " ॥ **याज्ञवल्क्योऽपि** (प्रा. १६)—

" क्रीतलब्धाशना भूमौ स्वपेयुस्ते पृथक्क्षितौ । पिंडयज्ञावृता देयं प्रेतायान्नं दिनत्रयम् " ॥ इति । क्रीतमयाचितलब्धं वा अशनं येषां ते क्रीतलब्धाशना भवेयुरिति वाक्यशेषः । क्रीतलब्धाशननियमात्तदलाभे अशनमर्थात्सिद्धम् । अत एव **वसिष्ठः** (४।१४-१५)—"अधप्रस्तरे त्र्यहमनश्नन्त आसीरन् । क्रीतोत्पन्नेन वा वर्तेरन् " इति । अघप्रस्तरः आशौचिनां शयनार्थं तृणप्रस्तरः ॥ **गौतमोऽपि** (१४।३४)—" अधःशय्यासनिनो ब्रह्मचारिणः सर्वे " इति ।

अघांतकृत्यमाह **मनुः** (५।९८)—

"विप्रः शुध्यत्यपः स्पृष्ट्वा क्षत्रियो वाहनायुधम् । वैश्यः प्रतोदं रश्मिं वा यष्टिं शूद्रः कृतक्रियः"॥ इति। अस्यार्थोऽभिहितो **विज्ञानेश्वरेण** (पृ. १८७ पं. ८-१०)—"विप्रोऽनुभूताशौचकालः कृतक्रियः कृतस्नानः हस्तेनापः स्पृष्ट्वैव शुध्यति । स्पृष्ट्वेति स्पर्शनक्रियेवोच्यते। न स्नानमाचमनं वा। वाहनादिषु तस्यैवानुषंगात् " । **श्रुतिरपि**—" अघांते अघभाजः संभवे स्नात्वा ग्रामं प्रविशेयुः " ॥ इति । जननमरणाशौचांते आशौचिनः संगवे स्नात्वा गृहं प्रविशेयुरित्यर्थः । तथा च **स्मृत्यंतरे**—

" मृते च सूतके चांते संगवे स्नानमाचरेत् । संगवात्परतः स्नानमार्तवेषु विशिष्यते " ॥ इति ।

संवर्तः—

" आशौचे निर्गते कुर्याद्गृहसंमार्गलेपने । सवासा जलमाप्लुत्य शुद्धिः पुण्याहवाचनैः" ॥

संग्रहे च

" आशौचांते कृतस्नानः स्वस्तिवचनपूर्वकम् । ब्राह्मणान् भोजयेत्तत्र शुद्धये विष्णुतुष्टये " ॥ इति ।

इति **वैद्यनाथदीक्षितविरचिते स्मृतिमुक्ताफले "आशौचनिरूपणं" नाम तृतीयः परिच्छेदः**॥

हरिः ओम् ॥

शके १७६५ शोभकृन्नामसंवत्सरे ज्येष्ठकृष्णपंचम्यां भृगुवासरे तद्दिने इदं पुस्तकं समाप्तम् ॥ श्रीयवतेश्वरार्पणमस्तु ॥

COLLECTION OF HINDU LAW TEXTS
No. 25 (4)

Śrî VAIDYANÂTHA DĪKSHITA'S

SMṚTIMUKTĀPHALAM

(PART IV)

ŚRÂDDHA KĀṆḌA

EDITED BY

J. R. GHARPURE, B. A., LL. B. (Honours-in-Law), F. R. S. A.
Principal, Law College, Poona; Senior Advocate, Federal Court of India, Fellow of the University of Bombay.

BOMBAY.

First Edition

Digitized and Uploaded by:
Hari Parshad Das (HPD)
on 06 July 2013.

1940

Printed at the Aryabhushan Press, 915/1 Bhamburda Peth,
Poona City, by Mr. V. H. Barve and
Published by Mr. V. J. Gharpure, B. A., LL. B. at the Office
of the Collection of Hindu Law Texts,
Angre's Wadi, Vithalbhai Patel Road, Bombay 4.

धर्मशास्त्रग्रन्थमाला.

[ग्रन्थाङ्कः २५ (४)]

श्री

वैद्यनाथदीक्षितीय-

स्मृतिमुक्ताफलम्

(चतुर्थः खण्डः)

श्राद्धकाण्डम्

जगन्नाथ रघुनाथ घारपुरे,

बी. ए., एलूएलू. बी., (ऑनर्स-इन्-लॉ)

पण्यपत्तनस्थव्यवहारशालाया आचार्यः, मुम्बईविश्वविद्यालयसदस्यः

भारतसङ्घन्यायसभासदस्यः, लंदन राजकलासंधसदस्यः

इत्यनेन संशोधितं, मुद्रापितं, प्रकाशितं च ।

प्रथमावृत्तिः

शकाब्दा १८६१ क्रिस्ताब्दा १९४०

पुण्यपत्तने ‘ आर्यभूषण ’ मुद्रणालये ‘ विठ्ठल हरि बर्वे ’ इत्यनेन मुद्रितः,
मोहमय्यां ‘ विश्वनाथ जगन्नाथ घारपुरे, ’ इत्यनेन प्रकाशितश्च ।

श्री

श्री वैद्यनाथदीक्षितीयस्मृतिमुक्ताफलस्थ-श्राद्धकाण्डस्य विषयानुक्रमणिका

विषयः	पृष्ठम्
स्नात्वा कर्म कुर्वीत	५४९
ऊर्ध्वपुण्ड्रादिधारणम्	"
भस्मरुद्राक्षादि	"
भगवत्तीर्थनिषेवणम्	"
सर्वप्रायश्चित्तम्	"
कृच्छ्रादिस्वरूपम्	५५०
आपदि कर्त्रन्तरवरणादि	५५१
अन्त्यकाले भगवन्नामस्मरणादि ...	"
दानविधिः	"
दानविशेषाः	"
दशदानानि	५५२
तत्र मंत्राः	"
मरणदिनगुणदोषौ	५५३
दानविशेषाः	"
ऊर्ध्वोच्छिष्टादिप्रायश्चित्तम् ...	५५४
अस्पृश्यस्पृष्टमरणे	"
खट्वादौ	"
पर्युषितप्रायश्चित्तम्	५५५
शवस्योपहतौ	५५६
निशादिमरणे	"
सर्पहतस्य	"
दाहादिप्रेतकर्तारः	५५६
तेषां क्रमः	"
ज्येष्ठता	५५७
यमलयोर्ज्यैष्ठ्यनिर्णयः	"
औरसाभावे दत्तादयः	५५८
ब्रह्मचारिणः संस्काराधिकारः ...	"
अनुपनीतस्य "	५५९
अकृतचूडस्य "	५६०
दीक्षितस्य संस्काराधिकारः ...	५६०
प्रेतकार्यकर्तृक्रमः	"
औरसादिलक्षणम्	५६१
पौत्रदौहित्रयोः	५६२
पत्नी	५६३
रजोमध्ये पतिमृतौ	५६४
पत्नीदुहितृदौहित्रसमवाये	५६५
भ्रातृपुत्रः	"
पिंडदक्रमः	५६६
अनाथप्रेते	५६७
अग्निनिर्णयः	५६८
आहिताग्न्यनाहिताग्न्योः ...	५६८, ५७०
द्विभार्याविषये	५६९
बहुपत्नीकस्य पत्नीमरणे ...	५७१
युगपन्मरणे	५७२
अग्न्याधानात्पूर्वं यजमानमृतौ ...	५७३
आहिताग्नेर्देशांतरमरणे ...	५७३, ५७४
विच्छिन्नाग्नेः	५७५
प्रेताग्निसंधानविधिः	५७६
आश्वलायनकारिकायाम्	५७७
रजस्वलाद्यग्निसंधानम्	"
असन्निधाने विशेषः	५७८
संकल्पप्रकारः	५७९
प्रेतालंकरणम्	५८०
प्रेतनिर्हरणप्रकारः	"
आतुरव्यंजनम्	५८१
पथिबलिविधिः	५८२
दहनदेशनिरूपणम्	"
दहनदेशाः	५८३

विषयः	पृष्ठम्
चिताग्निनाशे	... ५८४
„ प्रायश्चित्तम् ...	... „
दहनानन्तरकृत्यम् ...	... „
वपनविधिः	
ज्ञातिवपनविधिः ...	... ५८५
रात्रौ वपनविचारः ...	... ५८६
पुत्रस्य „ ...	... ५८७
विवाहदीक्षादिमध्ये पितृमरणे	... ५८८
गर्भिणीपतिविषये ...	... ५८९
दशाहवपनविधिः ...	... ५९०
सर्वांगवपनम्	... ५९१
गर्भिण्योर्भार्ययोः एकस्याः प्रसवे	... ५९२
मातृपितृदीक्षामध्ये पत्नीप्रसवे	... „
पितृमरणाब्दे केशधारणादि	... „
सपिण्डीकरणादूर्ध्वम् ...	... „
आहिताग्निविषये ...	... ५९४
सपिण्डीकरणनिमित्तक्षौरम्	... „
नग्नप्रच्छादनश्राद्धम् ...	... „
उदकदानविधिः ...	... ५९६
तोयाञ्जलिदानम् ...	... ५९७
दशमदिनपर्यन्तम् ...	... ५९८
उदकसंख्या	... ५९९
पिण्डदानविधिः ...	... „
जलदानमंत्राः	... ६०१
पिण्डद्रव्यादिनियमाः ...	... ६०२
शिलादिविपर्यासे ...	... ६०३
प्रेतशरीरोत्पत्तिक्रमः ...	... ६०४
आतुराधानविधिः ...	... „
तदनंतरकृत्यम् ...	... „
एकोत्तरवृद्धिनवश्राद्धानि ...	... ६०५
आशौचिनां नियमाः ...	... ६०६
अस्थिसंचयनम् ...	... ६०७
पुनःसंस्कारः	... ६०८
„ तत्र संचयो न स्यात्	... „
अस्थिनिक्षेपः ...	... ६०९

विषयः	पृष्ठम्
अस्थिसंचयने वारादिदोषः	... ६१०
श्मशानाग्न्यनुगतौ प्रायश्चित्तम्	... ६११
प्रभूतबलिः ...	... ६११
अन्तर्दशाहे दर्शादिसम्भवे	६१२,६१४
दर्शसंक्रमे	... ६१३
मातापितृविषये ...	... ६१४
पुत्रव्यतिरिक्तकर्तृविषये ...	... ६१५
पाषाणोत्थापनम् ...	६१५,६१६
अन्तर्दशाहागतपुत्रविषये	... ६१७
असपिण्डादिदाहकानां मुख्यकर्तृसमागमे	„
दशमदिनागतमुख्यकर्तृविषये	... ६१८
एकादशेऽह्नि अपराण्हात्	... ६१९
कनिष्ठादिकृतसपिण्डस्य ज्येष्ठेन पुनःकरणम् ...	... ६२०
वत्सरान्ते मृतिश्रवणे ...	... ६२१
„ मातृपितृ „ ...	... „
सपत्नीमातरि ...	... ६२२
प्रोषितभ्रातरि ...	... ६२३
अपुत्रसपिण्डमृतौ ...	... „
कृतप्रेतकृत्यविषये ...	... „
ज्येष्ठे आगते ...	... ६२४
दयाभागागते ...	... ६२५
पुनर्दाहविधिः ...	.. ६२६
तंत्रप्रविष्टस्य तंत्रमार्गेण संस्कारः	... ६२७
आहितानाहिताग्न्योः ...	... ६२८
दाहमन्तरेणाप्यशौचम् ...	... „
अस्थ्यभावे	... ६२९
अनेकसपिण्डपुनर्दाहविधिः	... ६२९
दुर्मृतस्य पुनःसंस्कारः ...	... ६३०
प्रोषितस्य द्वादशाब्दादूर्ध्वं संस्कारविधिः	„
मासाद्यज्ञाने विधिः ...	... ६३१
कृतौर्ध्वदेहिकस्य पुनरागमने	... ६३२
पुनःसंस्कारकालः ...	... ६३३
अतीतपिंडादेकास्थिसंचयनादौ	... ६३४

विषयः	पृष्ठम्
दशाहमध्ये ज्ञातिमरणे संस्कर्तुर्विशेषः	... ६३५
अन्तर्दशाहे मातापितृमरणसंनिपाते	... ६३६
अनुमरणे	... ६३७
„ सापिण्ड्यकालः ...	... „
„ „ „ क्रमः ...	... „
संघातमरणे दाहादिक्रमः ...	... ६३८
पितृव्यतिरिक्तानां ...	... „
मरणानुक्रमापरिज्ञाने ...	... ६३९
पित्रोः संघातमरणे ...	... ६४०
अनुमरणविधिः ...	... ६४१
एकचित्यारोहणक्रमः ...	... ६४२
अन्येद्युः	... ६४३
गर्भिणीसंस्कारः ...	... ६४४
दशाहांतरकृत्यम् ...	... ६४५
वृषोत्सर्गः	... ६४६
एकोद्दिष्टम्	... ६४७
तत्स्वरूपम्	... ६४८
अग्नौकरणादि	... ६४९
अकृताद्यमासिकम् ...	... ६५०
अर्वाक्संवत्सरात्सपिण्डीकृते	... ६५१
षोडशश्राद्धानि ...	... ६५२
अपकृष्य कार्याणि ...	... ६५३
अन्तरितमासिकानि ...	... ६५४
ऊनमासिककालः ...	... ६५५
ऊनमासिकवर्ज्यकालः ...	... ६५५
वत्सरान्तसापिण्ड्ये ...	... ६५६
अत्यब्द „ „ ...	... „
शुभागमे मासिकापकर्षः ...	... „
„ कार्याणि ...	... ६५७
मासिकानां पार्वणैकोद्दिष्टव्यवस्था	... ६५८
प्रत्याब्दिके पार्वणविधिः ...	६५८,६५९
पितामहादीनाम् „ ...	... ६६०
संबंधिबांधवादीनाम् „ ...	... ६६१
शस्त्रादिहतानामेकोद्दिष्टम् ...	... ६६२
संन्यासिविषये पार्वणव्यवस्था	... ६६३
सपिण्डीकरणविधिः ...	... ६६४
नक्षत्रवारादिदोषः ...	... ६६५
वत्सरान्ते सपिण्डीकरणप्रकारः	... ६६६
वर्णभेदेन सापिण्ड्यकालनियमः	... ६६७
दर्शपाते एकादशाहे आहिताग्निकर्तृकसापिण्ड्यम्	... ६६७
साग्निमत्वानग्निमत्वभेदे ...	... ६६८
सापिण्ड्याकरणे शुभानधिकारः	... ६६९
सापिण्ड्याधिकारिणः ...	... „
विवाहाद्यनन्तरम् ...	... ६७०
गृहस्थब्रह्मचारिणोः ...	... „
पतितादीनां सापिण्ड्यनिषेधः	... ६७१
व्युत्क्रममृतसापिण्ड्यविधिः	... ६७२
क्रमसापिण्ड्यम् ...	... ६७३
पतितैःसापिण्ड्यानिषेधः ...	... ६७४
सपिण्डीकरणप्रकारः ...	६७५,६७६
तृप्तिप्रश्नादि ...	... ६७६
संसर्जनविधिः ...	... ६७७
मातृसापिण्ड्यविधिः ...	... ६७८
बहुपत्नीकपक्षे	... ६७९
पक्षान्तराणि	... ६८०
मातुःसापिण्ड्ये गोत्रनियमः	... ६८१
राजविशोः ...	... ६८२
अनेकभर्तृकायाः ...	... ६८२
अपुत्रायाः	... „
बहुपुत्रसद्भावे पुनःसपिण्डीकरणप्रकारः	६८३
सपिण्डीकरणादौ अग्निनिर्णयः	६८३,६८४
अग्न्यभावे	... ६८५
आहितानाहिताग्न्योः ...	... ६८६
सर्वाधानार्धाधानयोः ...	... ६८७
पत्न्यां रजस्वलायाम् ...	... ६८८
सपिण्डीकरणनिर्णयः ...	... ६८९
सोदकुंभश्राद्धम् ...	... ६९०

विषयः	पृष्ठम्
उत्तरकाले प्रेतकार्यम् ...	६९१,६९२
पित्रोर्मरणाब्दे दर्शश्राद्धादिनिषेधः ...	६९३
एकस्मिन्दिने एककर्तृकैकोद्देश्ये श्राद्धद्वयनिषेधः ...	६९३,६९४
देवताभेदे एकस्मिन्दिने श्राद्धद्वये ...	६९४
नित्यनैमित्तिकयोः मातृपित्रोः संनिपाते	६९५
अनेकश्राद्धसन्निपाते ...	६९६,६९८
सपिण्डानां " "	"
संपाते मरणक्रमेण	६९७
आब्दिकनिरूपणम्	६९८
" श्राद्धम्	६९९
मासनिरूपणम्	"
ऋतुनिर्णयः	७००
अयननिरूपणम्	७०१
संवत्सर " " ...	७०१,७०२
चांद्रसौरमासौ	७०३
तिथिद्वैधे	७०४
संक्रमणदोषनिर्णयः	"
सौरतिथ्यलाभे चान्द्रतिथिग्रहणम् ...	७०५
आब्दिकप्रत्यवाये परित्यागः ...	७०६
श्राद्धीयतिथ्यादिनिरूपणम् ...	७०७
आरंभसमाप्तिकालाः	७०८
पार्वणश्राद्धकालनिर्णयः ...	७०९
सायंप्रातर्माध्यंदिनादि	७१०
मुहूर्ताः पूर्वाण्हादि	७११
कुतपः	"
पूर्वार्धव्यापित्वे	७१२
अपराह्ण "	७१३
विभक्तादीनाम्	७१४
विभक्तैः पृथगनुष्ठानम्	"
आमश्राद्धम्	७१५
आशौचांतरिते	७१६
ग्रहणादिसंभवे सांवत्सरिकश्राद्धविधिः "	७१७
श्राद्धे उद्देश्याः ...	७१७,७१८
स्त्रीणां पृथक्श्राद्धविचारः ...	७१९
मातुर्मृताहे	७२०
जीवपितृकस्य मातृश्राद्धे विशेषः ...	७२१
अनुमरणाब्दिके	७२२
मलमासः	७२३,७२४,२५
क्षयमासः	७२५
मलमासे कर्तव्यानि	७२७
" वर्ज्याणि	७२८
" देयानि	७२९
प्रथमाब्दिकं तु कर्तव्यमेव ...	७३०
अन्यानि वर्ज्यावर्ज्याणि	७३१
नित्यादिक्रियाः	७३२
अनन्यगतिकानि कर्तव्यानि ...	७३३
सावकाशं तु न कार्यम्	७३४
दर्शश्राद्धनिर्णयः	७३५
व्यतीपातः	७३६
श्राद्धात्पूर्वं तिलोदकम्	७३७
अष्टकासु	७३७
दर्शश्राद्धकालनिर्णयः	७३८
सिनीवाली कुहूः	७३९
दिनद्वयव्यापिन्यामावास्यायाम् ...	७४०
आहिताग्नेर्दर्शश्राद्धमेव	७४१
पिंडपितृयज्ञः	७४२
अमायां योगविशेषः	७४३
अर्धोदयमहोदयौ	७४४
अष्टकाः	७४४
महालयश्राद्धम्...	७४५
कन्यागते सवितरि	७४६
यावद्वृश्चिकदर्शनम्	"
महालयकालः	७४७
वर्ज्यनक्षत्राणि	७४८
वर्ज्यतिथयः	"
मघात्रयोदश्याम्	७४९

विषयः	पृष्ठम्
विषशस्त्रादिहतानाम्	७५०
मासिश्राद्धे उद्देश्याः	७५१
अपुत्रादयः	७५२
वृद्धिश्राद्धम्	७५३
श्राद्धत्रयकालभेदाः	७५४
श्राद्धे ब्राह्मणाः	७५५
अशक्तौ आमश्राद्धम्	७५६
श्राद्धभेदाः	७५७
श्राद्धदेशाः	७५७,७५८
अस्वामिकस्थलानि	७५८
पुण्यक्षेत्राणि	७५९
श्राद्धकालाः	७६०
युगादिश्राद्धानि	७६१
मन्वन्तरादयः	,,
,, श्राद्धानि	७६२
काम्यश्राद्धक्रमः	७६३
कालान्तराणि	७६४
श्राद्धे ब्राह्मणाः	७६५
तेषां परीक्षा	,,
पंक्तिपावना नियोज्याः	,,
पित्र्यब्राह्मणान्सम्यक्परीक्षेत ...	७६६
सावित्रीजाप्यनिरताः	७६७
यतीन्, योगिनो वा भोजयेत् ...	७६८
मुख्यकल्पाः अनुकल्पाः	७६९
विद्वांसमेव निमन्त्रयीत	७७०
वर्ज्या ब्राह्मणाः	७७१
निन्दिताचाराः ...	७७१,७७२
देवलकः परिवित्तिः परिवेत्ता ...	७७३
उपपतिः, माहिषिकः	,,७७४
पुत्राचार्यः ,, ...	,,
नग्नाः	७७५
निमंत्रणप्रकारः	७७६
ब्राह्मणसंख्या	७७७
श्राद्धे मित्रसंग्रहो न कार्यः ...	,,
न प्रसज्येत विस्तरः	७७७
निमन्त्रितब्राह्मणकृत्यम्	७७८
अंगीकृतश्राद्धातिक्रमे दोषः ...	७७९
निमंत्रितब्राह्मणपरित्यागे	७८०
श्राद्धदिनकृत्यम्	,,
श्राद्धकर्ता दंतधावनादि न कुर्यात् ...	७८१
श्राद्धकर्त्रा भोक्त्रा च वर्ज्याणि ...	७८१
भूशुद्धिः	,,
श्राद्धद्रव्याणि	,,
धान्यानि, शाकफलादीनि	७८२
श्राद्धे वर्ज्यद्रव्याणि	७८३,७८४,७८५
पाकस्थानात् बहिष्कार्याः ...	७८६
श्राद्धे अनवेक्षणीयाः	७८६
नग्नादयः	,,
एतद्दर्शनदोषापगमे संस्करः कर्तव्यः ...	,,
शुद्धवत्यः	७८७
निमंत्रितेभ्यो देयद्रव्याणि	,,
श्राद्धदेशे प्रकल्प्यद्रव्याणि ...	७८८
आसनदानम्	७८८
राजतताम्रादिपात्राणि	७८८
पुष्पादि, धूपाः	७९०
वस्त्राणि	,,
श्राद्धप्रकारः	७९१
मण्डलकरणम्	,,
पादप्रक्षालनम्	७९२
अर्घ्यादि	७९३
आचमनविधिः	७९४
तदनन्तरकर्तव्यम्	,,
उपवेशनम् । उपवेशनक्रमः ...	७९५
आसनदानानन्तरम्	७९६
विश्वेदेवावाहनम्	७९७
पित्राद्यावाहनम्	,,
अर्घ्यपरिकल्पनम्	,,
पवित्रकरणम्	७९८
अर्घ्यदानम्	७९९

विषयः	पृष्ठम्
कुशगन्धपुष्पादिपूजा	८००
भूशुद्धिः	८०१
अग्नौकरणम् । विधिः	”
” तत्र आहुतयः	८०२
परिवेषणादिकम्	८०३
पात्राभिमन्त्रणम्	८०४
पात्रालम्भनम्	८०५
आपोशनम्	८०६
अन्नेऽङ्गुष्ठनिवेशनम्	”
अभिश्रवणम्	८०७
दातृभोक्तृनियमाः	८०७
अपेक्षितदानम्	८०८
दातृनियमाः	८०८
भोक्तृनियमाः	८०९
अदत्तमन्नं न स्पर्श्येत्	८०८
हस्तपानं वर्ज्यम्	८१०
उच्छिष्टभागदानम्	”
उच्छिष्टस्पर्शे	”
विण्मूत्रोत्सर्जने	”
वमने	”
छर्दितब्राह्मणभोजने	८११
पितृस्थानीयस्य तु वमने पुनःश्राद्धम्	”
दीपनाशे	”
विकिरणविधिः	८१२
तृप्तिप्रश्नः	”
अनन्तरकर्तव्यम्	”
विकिरदानम्	८१३
गंडूषकरणम्	”
हस्तप्रक्षालनविशेषः	”
स्वस्तिवाचनं, दक्षिणादिदानम् ...	८१४

विषयः	पृष्ठम्
वित्तशाठ्यं न कर्तव्यम्	८१४
आशीर्ग्रहणम्	८१५
पिण्डदानविधिः	”
कात्यायनादीनां विधिः	८१६
पिण्डदानस्थलम्	८१७
पिण्डप्राशनविधिः	”
प्रतिपत्तन्तरम्	”
उच्छिष्टसंमार्जनादि	८१८
पिण्डप्रक्षेपः	”
पात्रचालनादि	”
तत्र विशेषः	”
वैश्वदेवकरणे	८१९
पितृशेषभोजनम्	”
अभोजने दोषः	”
अतिथ्यादीनां भोजने न दोषः ...	”
क्षुद्भावेऽप्यवश्यं भोक्तव्यमेव ...	८२०
एकादश्यादौ प्रत्याम्नायः	”
श्राद्धदिने दातृभोक्तृनियमाः ...	”
ब्रह्मचर्यम्	”
यथाशक्तिश्राद्धानुष्ठानम्	”
संकल्पश्राद्धविधिः	८२१
अत्यक्ताग्नेरेव श्राद्धाधिकारः ...	”
आमश्राद्धविधिः	”
तदधिकारिणः	”
आमश्राद्धे विशेषः	”
हिरण्यश्राद्धादिविधिः	८२२
श्राद्धप्रशंसा	”
कृतेफलम्	”
अकरणे दोषः	”
श्राद्धं पितॄणां फलप्रापकम् ...	८२३

स्मृतिमुक्ताफलम्

अथ श्राद्धकाण्डम् (४)

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे । यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥१॥
विशुद्धविज्ञानघनस्वरूपं विज्ञानविश्राणनबद्धदीक्षम् ।
दयानिधिं देहभृतां शरण्यं देवं हयग्रीवमहं प्रपद्ये ॥ २ ॥
श्रितरामपदाब्जेन **वैद्यनाथविपश्चिता** । स्मृतीनां सारमालोच्य **श्राद्धकांडं** वितन्यते ॥३॥

"स्नात्वा कर्माणि कुर्वीत" इति **स्मरणात्** स्नातस्यैव प्रायश्चित्तादिकर्मण्यधिकारात् वारुणे स्नाने अशक्तो मुमूर्षुः ब्राह्मादिस्नानमाचरेत् । तदाह **योगयाज्ञवल्क्यः**—
"असामर्थ्याच्छरीरस्य वैषम्याद्देशकालयोः । स्नानान्येतानि तुल्यानि मंत्रादीनि यथाबलम्" ॥ इति ॥

स एव—
"मांत्रं भौमं तथाऽऽग्नेयं वायव्यं दिव्यमेव च । मानसं यौगिकं चेति सप्त स्नानान्यनुक्रमात् ॥
" आपोहिष्ठादिभिर्मांत्रं मृदालंभस्तु पार्थिवम् । आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतम् ।
" यत्तु सातपवर्षेण दिव्यं तत्स्नानमुच्यते । मानसं ह्यात्मचिंता तु यौगिकं विष्णुचिंतनम्" ॥ इति ।

तत ऊर्ध्वपुंड्रं त्रिपुंड्रं वा यथास्वाचारं बिभृयात् । यथाह **मरीचिः**—
" सर्पं दृष्ट्वा यथा लोके दर्दुरा भयविह्वलाः । ऊर्ध्वपुंड्रांकितं तद्वत् कंपन्ते यमकिंकराः"॥

विष्णुरपि—
" ऊर्ध्वपुंड्रधरो मर्त्यो म्रियते यत्रकुत्रचित् । श्वपाकोऽपि विमानस्थो यमलोके महीयते " ॥

तथा **पाद्मे ब्रह्मगरूडसंवादे**—
" यस्यांतकाले खग गोपिचंदनं बाह्वोर्ललाटे हृदि मस्तके वा ।
" प्रयाति लोकं कमलासखस्य गोबालघाती यदि ब्रह्महा भवेत्[१] "॥

स्कांदे—"भस्मरुद्राक्षधारी तु पश्वपि[२] म्रियते यदि । सोऽपि रुद्रत्वमाप्नोति किं पुनर्मानुषादयः ॥
" तुलसीधारणान्मर्त्यो विष्णुलोके महीयते " ॥ इति ।

भगवत्तीर्थनिषेवणम् ।

तुलसीदलसंमिश्रतीर्थपानं च कुर्यात् । तथा च **स्मृतिचंद्रिकायाम्**—
"अंत्यकालेऽपि यस्यास्ये दीयते पादयोर्जलम् । सोऽपि सद्गतिमाप्नोति यश्चाचारबहिष्कृतः"॥ इति।
विष्णुपादयोरित्यर्थः । **नारदीये**—
"हरिपादोदकं यस्मान्मयि त्वं सिक्तवान्मुने[३] । प्रापितोऽस्मि त्वया तस्मात् तद्विष्णोः परमं पदम् ॥
" तुलसीदलसंमिश्रमपि सर्षपमात्रकम् । गंगाजलं पुनात्येव कुलानामेकविंशतिम् " ॥ इति।
एकविंशतिमिति वचनात् शरीरे तीर्थसेचनमपि पावनमित्यवगम्यते ।

सर्वप्रायश्चित्तम् । ततः परिषदनुज्ञापूर्वकम् द्वादशाब्दकृच्छ्ररूपं षडब्दकृच्छ्ररूपं त्र्यब्दकृच्छ्ररूपं त्र्यब्द-कृच्छ्ररूपं वा सर्वप्रायश्चित्तं यथाशक्ति स्वपापानुसारेण कुर्यात् ।
" सर्वजन्मार्जितानीह भ्रूणहत्यादिकान्यपि । सर्वपापानि नश्यंति कृच्छ्रैर्द्वादशवार्षिकैः ॥
" जन्मप्रभृति यत्किंचित्पातकं चोपपातकम् । अर्वाक् तु भ्रूणहत्यायाः षडब्दान्नश्यति ध्रुवम् ॥

---

१ क–यदि वा ब्रह्महा स्यात् । २ क्ष–यथा विक्रियते । ३ क–सिक्तवानिति ।

" अद्याप्यसकृदभ्यस्तं बुद्धिपूर्वमघं महत् । तच्छुध्यत्यब्दकृच्छ्रेण महतः पातकादृते " ॥ इति ।

त्रिंशत्कृच्छ्रा अब्दकृच्छ्रः ।

कृच्छ्रतत्प्रतिनिधिस्वरूपम् । कृच्छ्रोऽत्र प्राजापत्यः । तत्स्वरूपं **मनुनोक्तम्** (११।२११)—

" त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम् । त्र्यहं न किंचिदश्नीयात् प्राजापत्यं चरन् द्विजः "॥

तस्य स्वरूपतोऽनुष्ठानाशक्तैः प्रतिनिधिरेवानुष्ठेयः ।

" कृच्छ्रप्रतिनिधिं कुर्याद्गोभिरेव सवत्सकैः । गवामभावे निष्कं स्यात्तदर्धं पादमेव वा ॥

"पादहीनं न कर्तव्यमिति शातातपोऽब्रवीत्" ॥ इति स्मरणात् । **विज्ञानेश्वरोऽपि** (पृ.३४२पं.५)

" प्राजापत्यक्रियाशक्तौ धेनुं दद्याद्विचक्षणः । धेनोरभावे दातव्यं तन्मूल्यं नात्र संशयः ॥

" धेनोरभावे निष्कं स्यात्तदर्धं पादमेव वा । पादहीनं न कर्तव्यमिति वेदविदो विदुः " ॥ इति ।

प्रतिनिध्यन्तरमुक्तं **हेमाद्रौ**—

" कृच्छ्रोऽयुतं तु गायत्र्या विप्रद्वादशभोजनम् । तिलहोमसहस्रं वा सममेतच्चतुष्टयम् " ॥ इति ।

स्मृत्यंतरे च—

" कृच्छ्रो देव्ययुतं चैव प्राणायामशतद्वयम् । तिलहोमसहस्रं च वेदपारायणं तथा ॥

" षष्टिश्चतुर्विंशतिर्वा भोज्या द्वादश वा द्विजाः । तावद्भोजनपर्याप्तं धान्यं तन्मूल्यमेव वा ॥

" तत्समृध्द्यसमृद्धिभ्यां संख्यावैषम्यभाषणम् " ॥ इति ।

तथा **विज्ञानेश्वरीये** (पृ. ३४३ पं. २०–२५)—

" कृच्छ्रे पंचातिकृच्छ्रे त्रिगुणमहरहस्त्रिंशदेवं तृतीये ।

" चत्वारिंशच्च तप्ते त्रिगुणनगुणिता विंशतिः स्यात्पराके ॥

" कृच्छ्रे सांतापनाख्ये भवति षडधिका विंशतिः सैव हीना ।

" द्वाभ्यां चांद्रायणे स्यात्तपसि कृशबलो भोजयेद्विप्रमुख्यान् " ॥ इति ।

अहरहरिति सर्वत्र संबध्यते । तृतीयः कृच्छ्रातिकृच्छ्रः । अत्र प्राजापत्यादिसंकलनया विप्राणां षष्टिभोजनानि भवंति । एवं अतिकृच्छ्रादावूहनीयम् । **स्मृत्यंतरे**—

" कृच्छ्रादिकरणाशक्तौ प्रत्याम्नायान् समाचरेत् । प्राजापत्ये तु गामेकां दद्यात्सांतपने द्वयम् ॥

" कृच्छ्रोऽयुतं तु गायत्र्या उपवासस्तथैव च । समुद्रगानदीस्नानं सममेतच्चतुष्टयम् " ॥ इति ।

नदीस्नानं मृत्तिकास्नानं विधिपूर्वकम् ।

पराशरः—

" पुण्यतीर्थेनार्द्रशिरः स्नानं द्वादशसंख्यया । द्वियोजनं तीर्थयात्रा प्राजापत्यसमं स्मृतम् " ॥ इति ।

आपदि कर्त्रन्तरवरणादि ।

दुर्बलस्यापत्काले स्वयं व्रतं कर्तुमशक्तश्चेत् ब्राह्मणैः कारयेदित्याह **पराशरः** (६।५०)—

"व्याधिव्यसनिनि श्रान्ते दुर्भिक्षे डामरे तथा । उपवासो व्रतं होमो द्विजैः संपादितानि वै " ॥ इति ।

व्याधिव्यसनी रोगग्रस्तः । डामरं परराजाद्युद्रवः । अत्यंतापदमभिप्रेत्य पक्षांतरमाह **स एव** (६।५१)–

" अथवा ब्राह्मणास्तुष्टाः सर्वं कुर्वन्त्यनुग्रहम् । सर्वान्कामानवाप्नोति द्विजसंपादितैरिह " ॥ इति ।

महापुरुषवचनमात्रसंपादितैराशीर्विशेषैरशेषकामप्राप्तिर्भवति । अत्र पापक्षयो भवतीति कोऽयं विस्मयः । महापुरुषसंकल्पमात्रादेव कामप्राप्तिरथ **श्रूयते** (मुण्डकोपनिषद् ३-१-१०)—

" यं यं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्च कामान् ।
तं तं लोकं जयते तांश्च कामान् तस्मादात्मज्ञं ह्यर्चयेत् भूतिकामः " ॥ इति ।

---

१ क्ष–संज्ञाः । २ ख–दिवसकल्पनया । ३ क्ष–कोऽपि समयः । ४ आनंदाश्रमीयग्रन्थांक ६ पृ.६० । ५ क्ष–दात्मज्ञं ह्यर्चयेत् ।

महदनुग्रहविशेषं दर्शयति देवलः—

" प्रायश्चित्तं यथोद्दिष्टमशक्यं दुर्बलादिषु। इष्यतेऽनुग्रहस्तेषां लोकसंग्रहकारणात् "॥ इति। **पराशरोऽपि** (६।५२)।

" दुर्बलेऽनुग्रहः प्रोक्तस्तथा वै बालवृद्धयोः। ततोऽन्यथा भवेद्दोषस्तस्मान्नानुग्रहः स्मृतः "॥ इति।

ततोऽन्यथा प्रबलानुग्रह इत्यर्थः। दुर्बलस्य महदनुग्रहात् शुद्धिं दर्शयति[1] **स एव** (६।६०-६१)—

" ब्राह्मणा जंगमं तीर्थं तीर्थभूता हि साधवः। तेषां वाक्योदकेनैव शुध्यंति मलिना जनाः[2]॥

" ब्राह्मणा यानि भाषंते मन्यंते तानि देवताः। सर्वदेवमयो विप्रो न तद्वचनमन्यथा "॥ इति।

अनुग्रहयोग्यस्य दुर्बलस्य नियमविधानेऽपि प्रत्यवाय इत्याह **स एव** (६।६४)—

" शरीरस्यात्यये प्राप्ते वदंति नियमांस्तु ये। महत्कार्योपरोधेन तत्पापं तेषु गच्छति "॥ इति।

शरीरस्यात्ययो मुमूर्षोर्भूम्यां शयनं तस्मिन्प्राप्ते सति तेन कर्तुमशक्यं प्राजापत्यादिनियमं कर्तव्यत्वेन ये वदंति तेषु तत्पापं गच्छति। तत्र हेतुः—' महत्कार्योपरोधेन ' इति महतां देवतोपासकानां कार्यं महत्कार्यम्। अन्तकाले देवतास्मरणकीर्तनादि। तस्योपरोधः प्रतिबंधः। मुमूर्षुर्हि परिसरवर्तिभिराप्तैर्बोधितो देवतां स्मर्तुमुद्युंक्ते तदानीमितद्व्रतकर्तव्यतां श्रुत्वा कर्तुमशक्नुवन्व्याकुलचित्तः पूर्वमुद्युक्तां देवतास्मृतिमपि परित्यजति सोऽयं पुरुषार्थप्रतिबंधः। स्वस्थशरीरस्य पूर्वोक्तः कार्योपरोधः कदाचिदपि नास्ति

"स्वस्थस्य मूढाः कुर्वंति वदन्त्यनियमं तु ये। ते तस्य विघ्नकर्तारः पतंति नरकेऽशुचौ[3]"॥ इति **स्मरणात्**।

अंत्यकाले भगवन्नामकीर्तनम्। अन्त्यकाले हरिहरनामकीर्तनादिफलं **स्मर्यते**—

" यथाकथंचिद्गोविंदे कीर्तिते वा श्रुतेऽपि वा। पापिनोऽपि विशुद्धाः स्युः शुद्धा मोक्षमवाप्नुयुः॥

" शिवशिवशिव चेति व्याहरन्वै त्रिवारं त्यजति निजतनुं यः स्वायुषोऽन्त्यक्षणेऽस्मिन्।

" भवति भवभयानां छेदकः पूर्वशब्दो न भवत इतरौ तौ कल्पितात्मोपकारौ॥

" यं यं वापि स्मरन् भावं त्यजत्यंते कलेवरम्। तं तमेवैति कौन्तेय सदा तद्भावभावितः[4]"॥ इति।

महदवलोकनं च कार्यम्

" महापातकयुक्तो वा युक्तो वा सर्वपातकैः। परं पदं प्रयात्येव महद्भिरवलोकितः "॥ इति **स्मरणात्**।

दानविधिः। मुमूर्षुः परलोकार्थं यथाशक्ति दानं कुर्यात्।

"इतः प्रदानं ह्यमुष्मिन् लोके प्रजा उपजीवंति" इति **श्रुतेः** (तै.सं.*३।२।९)। तथा **महाभारते**—

" विद्या प्रवसतो मित्रं भार्या मित्रं गृहे सतः। आतुरस्य भिषङ् मित्रं दानं मित्रं मरिष्यतः॥

" षडशीतिसहस्राणि योजनानां युधिष्ठिर। मानुषस्य च लोकस्य यमलोकस्य चांतरम्॥

" न तत्र वृक्षछाया वा न वाप्यो न च दीर्घिकाः। न ग्रामो नाश्रमो वापि नोद्यानं काननानि वा॥

" न किंचिद्विश्रमस्थानं पथि तस्मिन्युधिष्ठिर। कंटकाकीर्णमार्गेण तप्तवालुकपांसुना॥

" दह्यमानास्तु गच्छंति नरा दानविवर्जिताः। तस्माद्दानं तु कर्तव्यं मृतिकाले कथंचन "॥ इति।

दानविशेषमाह **शातातपः**—

" अन्नपानाश्वगोवस्त्रभूमिशय्यासनानि च। प्रेतलोके[5] प्रशस्तानि दानान्यष्टौ विशेषतः॥

" तिलाः पापहरा नित्यं तद्दानं तु प्रशस्यते। यो[6] हिरण्यं ददात्यंते ह्यमृतत्वं भजेत सः "॥ इति।

---

१ **खग**–विशदयति। २ **ख**–द्विजाः। ३ क्ष–न स्वस्थस्य कदाचन। ४ भ. गी. अ. ८।६। ५ क्ष–काले। ६ क्ष–गो। * (आनंदाश्रम पृ. २७४)

मुमुक्षूणां ब्रह्मविदामपि गृहस्थानामीश्वरप्रीत्यर्थं देयमेव "दानक्रियाश्च विविधाः क्रियंते मोक्षकांक्षिभिः" इति **स्मरणात्** (भ. गी. अ. १७।२५(२))। संज्ञाहानौ मरणेऽपि वा हितैषी पुत्रादिर्दद्यात् "आतुरो वाऽथ पुत्रो वा दद्युरासन्नबांधवाः" इति **व्याससमरणात्** । **स्मृतिरत्नेऽपि**—

" उत्क्रांतिवैतरण्यौ च दश दानानि चैव हि । प्रेतेऽपि कृत्वा तं प्रेतं शवधर्मे नियोजयेत् "॥ इति।

प्रचेताः—

" गोभूतिलहिरण्याज्यवस्त्रधान्यगुडानि च । रौप्यं लवणमित्याहुः दश दानानि पंडिताः ॥

" एतानि दश दानानि नराणां मृतजन्मनोः । कुर्यादभ्युदयार्थं च प्रेतेऽपि हि परत्र च ॥

" भूमिर्भोजनपर्याप्ता द्रोणद्वयमितास्तिलाः । निष्कत्रयं सुवर्णं स्यादाज्यं प्रस्थचतुष्टयम् ॥

" सूक्ष्मंवस्त्रद्वयं धान्यं सार्धखारीकमुच्यते । गुडं षष्टिपलं चैव रौप्यं निष्कचतुष्टयम् ॥

" लवणं सार्धखारीकं दशदानं प्रमाणतः "॥ इति । **भारते**—

" यो मृत्युकाले संप्राप्ते गां ददाति पयस्विनीम् । गवा दर्शितमार्गस्तु ब्रह्मलोके महीयते ॥

" चतुःसागरपर्यंतां सशैलवनकाननाम् । दत्वा यत्फलमाप्नोति सालग्रामात्तदश्नुते ॥

" ब्रह्मांडकोटिदानेन यत्फलं भवति प्रभो । तत्फलं समवाप्नोति शिवलिंगप्रदानतः ॥

" हिरण्यं भूमिदानं च तिलान्शक्त्या च दापयेत् । कुटुंबिने दरिद्राय श्रोत्रियाय तपस्विने ॥

" यद्दानं दीयते तस्मै तद्दानं स्वर्गसाधनम् । गृहीतदानपाथेयाः प्रयांति त्रिदिवं नराः ॥

" भ्रातरो वाऽथ पुत्रो वा दद्युरासन्नबांधवाः" ॥ इति ।

दश**दानमंत्रा दानप्रकरणे**ऽभिहिताः । **उत्क्रांतिगोदाने** तु मंत्रः

" अत्युत्क्रांतौ प्रवृत्तस्य सुखोत्क्रमणसिद्धये । तुभ्यं संप्रददे धेनुमिमामुत्क्रांतिसंज्ञिकाम् " ॥ इति ।

अन्त्यकाले जप्यमन्त्राः । अंत्यकाले जप्यमंत्रमाह **शौनकः**—

" नातानमिति सूक्तं तु ह्यंत्यकाले जपेत्सकृत् । लब्ध्वा चैव परं स्थानममृतत्त्वं च गच्छति"॥

विष्णुः—

" श्रावयेत्पुण्यसूक्तानि पुण्यमंत्राक्षराणि च । द्विजस्य दक्षिणे कर्णे पुत्रादिः प्राणसंशये"॥

स्मृत्यंतरे—"कर्णे जपेदीशवाक्यं शास्त्रादिभिरुदीरितम् " ॥ इति । **शुद्धिनिर्णये** च तद्व्याख्यातम् " ईशवाक्यं पंचाक्षरी अष्टाक्षरी रामषडक्षरी प्रणव उपनिषद्वाक्यानि च " इति ।

आपस्तंबः—

" 'ब्रह्मविदाप्नोति परं' 'भृगुर्वै वारुणिः' इत्येतावनुवाकौ ब्रह्मविदो दक्षिणे कर्णे जपति । इतरेषां 'आयुषः प्राणम्' इति । मरणसमीपकाले शुद्धभूमौ दक्षिणाग्रेषु दर्भेषु दक्षिणाशिरसं संवेश्य मुमूर्षो ब्रह्मविदो दक्षिणे कर्णे 'ब्रह्मविदाप्नोति' 'भृगुर्वै वारुणिः' इत्यनुवाकद्वयं इतरस्य कर्णे 'आयुषः प्राणम्' इत्यनुवाकं संनिहितः पुत्रादिः कश्चिज्जपेदित्यर्थः ।

तथा **बोधायनीये**—

" भूमौ दर्भास्तृतायां तं शाययेन्मृतिसंशये । जपेत्तद्दक्षिणे कर्णे आयुषः प्राणमित्यपि " ॥

१ ख-भ्रात । २ क्ष-शुद्ध । ३ क्ष-विप्रस्य ।

कात्यायनः—
" दुर्बलं स्नापयित्वा च शुद्धचेलाभिसंवृतम् । दक्षिणाशिरसं भूमौ बर्हिष्मत्यां निवेशयेत् ॥
" मुमूर्षोर्दक्षिणे कर्णे ब्रह्ममंत्रान् जपेत्सुतः " इति । **वसिष्ठो** विशेषमाह—
" पितुर्मरणकाले तु पुत्रस्तु ऋणमोचनात् । मस्तकं तु समाधाय दक्षिणेऽस्य तु जानुनि ॥
" श्रावयेत्पुण्यसूक्तानि पुण्यमंत्राक्षराणि च । ततस्तु निर्गते वायौ कुशाग्रेषु विनिक्षिपेत् "॥ इति ।
मरणदिनगुणदोषौ गौतमः— " दिवोत्तरायणे शुक्लपक्षे च मरणं शुभम् ।
" भद्रे त्रिपदनक्षत्रे भृग्वंगारबृहस्पतौ । मरणं दहनं चास्थिसंचयं त्रिगुणं भवेत् ॥
" भद्रे तु भूमिदानं स्यात् त्रिपदर्क्षे हिरण्यकम् । वारे वाराधिदेवानां पूजनं मृत्युनाशनम् ॥
" तिलैः प्रतिकृतिं कृत्वा दहेत् दोषोपशांतये " ॥ इति । **मार्कंडेयः**—
" उत्तरायणगे सूर्ये उत्तमा मृतिरुच्यते । शुक्लपक्षे मृतिस्तत्र श्रेष्ठा वह्निमृतिः शुभा ॥
"श्रेष्ठा तत्रापि मध्यान्हे उभयोः पक्षयोरपि । एकादश्यां मृतिः श्रेष्ठा मोक्षदा सर्वकामदा"॥
वह्निमृतिः तृतीयायां मरणम् । **भारतेऽपि**—
" स्यादुत्तरायणे यस्य मृतिस्तत्रोत्तमा गतिः । शुक्लपक्षे हि मध्यान्हे कृष्णेऽप्येकादशीदिने " ॥
गार्ग्यः—
" भद्रे भूमिप्रदानं स्यात् त्रिपदे तु हिरण्यकम् । अंगारके त्वनड्वाहौ[3] गुरौ वस्त्रं तु दक्षिणा ॥
" शुक्रे रजतदानं स्यात्तत्तद्द्रव्यप्रदः सुखी । वारे वाराधिदैवत्यं द्रव्यं दत्वा न दोषभाक् " ॥ इति ।
एवं स्मृतिषूक्तो वारादिनिषेधः कालातिक्रमविषयः । प्रत्यक्षमरणे तु न दोष इत्याह **लोकाक्षिः**—
" प्रत्यक्षे तु न किंचित् परोक्षे तु सूक्ष्मतः पश्येत् " इति । **स्मृत्यंतरेऽपि**—
" प्रत्यक्षमरणे पित्रोर्न पश्येत्तिथिवारभम् । नैव दोषावहं प्रोक्तमन्येषामपि सर्वदा ॥
" परोक्षे सूक्ष्मतः पश्येन्मृतौ तु तिथिवारभम् " ॥ इति । **बृहस्पतिः**—
" मातापित्रोर्मृतिप्राप्तौ पुत्रैर्दाहादिकर्म च । प्राप्तकाले तु कर्तव्यं तिथ्यादिर्न तु दोषकृत् "॥ इति ।
वसिष्ठः—
" वैधे कर्मणि तु प्राप्ते कालदोषं न चिन्तयेत् । सद्यः क्षौरं प्रकुर्वीत सद्यः श्राद्धादि कर्म च"॥ इति ।
एवं च प्रत्यक्षमरणे यद्यपि वारादिदोषो नास्ति तथापि शंकाकाले शापानुत्तये मनःप्रीतये च ब्राह्मणेभ्यः शक्तितः किंचित् दत्वाऽनुज्ञाप्य शंकितदोषान्नाशयेत् । तदाह **हारीतः**—
" कुर्वीत सर्वकर्माणि ब्राह्मणानामनुज्ञया । ब्राह्मणैरप्यनुज्ञानाद्दोषो नश्यत्यसंशयः " ॥
स्मृत्यंतरेऽपि—
"ब्राह्मणानां विना वाक्यैः क्रियाः स्युर्निष्फलाः स्मृताः । कर्तव्या ब्राह्मणानुज्ञाकर्मणां परिपूर्तये"॥ इति ।
महदनुग्रहश्च यथाशक्ति द्रव्यदानेन कारयितव्यः "दाने सर्वं प्रतिष्ठितम्" इति **श्रुतेः** (तै. आरण्यके)।
" दानेन निर्दोषा भवंति " इत्यापस्तंबस्मरणात् (१।१९।६) । " ब्राह्मणान्सम्यगभ्यर्च्य पृच्छेत्कनकभूषणैः " इति **भरद्वाजस्मरणाच्च** । एतच्च स्नात्वार्द्रवासाः कुर्यात् ।
"स्नात्वा स्वशक्त्या द्रविणं दत्वा सभ्यान्प्रदक्षिणम् । परीत्यैतैरनुज्ञातः कर्म संकल्पयेत्ततः "॥ इति **स्मरणात्** ।

---

१ क्ष–पुण्य । २ ख–शुक्रे । ३ ख–हं; ग–न् स्यात् । ४ खग–स्ततः ।

स्मृत्यंतरे—

"आर्द्रवस्त्रो बहिः स्नातो नियतो वाग्यतः शुचिः। शक्त्या दत्वाऽभ्यनुज्ञातः कुर्यात्संकल्पमादितः"॥ इति।

कर्तुः संस्कारयोग्यतासिध्यर्थं प्रायश्चित्तमुक्तं चंद्रिकायाम्—

"कार्ताधिकारसिध्यर्थं त्रीन् कृच्छ्रान् पंच सप्त वा। चरेद्दत्वा तु दानाद्यैः पैतृमेधिकमाचरेत्"॥ इति। अत्र कृच्छ्रप्रतिनिधिर्गवादिदानम्। तथा च **स्मृत्यंतरे**—

"गवामभावे निष्कं स्यात् तदर्धं पादमेव वा। पादहीनं न कर्तव्यं ब्रह्मदंडं मनीषिभिः"॥ इति।

मृताहदाने वैशिष्ट्यमुक्तं **चंद्रिकायाम्**—

"उपरागसहस्राणि व्यतीपातायुतानि च। अमालक्षं तु द्वादश्याः कलां नार्हति षोडशीम्॥
"एवंविधाया द्वादश्याः तिस्रः कोट्यर्धकोटयः। मातापित्रोर्मृताहस्य कलां नार्हति षोडशीम्"॥ इति।

ऊर्ध्वोच्छिष्टादिप्रायश्चित्तम्। मरणकालोपहतेः प्रायश्चित्तमाह **पराशरः** (१२।५५)—

"ऊर्ध्वोच्छिष्टमधोच्छिष्टमन्तरिक्षमृतौ तथा। कृच्छ्रत्रयं प्रकुर्वीत स्वाशौचमरणे तथा"॥ इति। मरणकाले वान्तादिकमूर्ध्वोच्छिष्टं मूत्रादिकमधस्तनोच्छिष्टं तयोरन्यतरत् यदा संपद्यते तदा संस्कर्ता पुत्रादिः दानादिना प्रत्याम्नायेन प्राजापत्यत्रयं कुर्यात्। मंचकादिमरणं अंतरिक्षमृतिः। रजस्वलासूतिकादिमरणमाशौचमरणम्।

गौतमः—

"सूत्वा नारी मृता पश्चाद्दशाहाभ्यन्तरे यदि। न तस्या यमलोकाद्वै निष्कृतिर्बहुवत्सरे॥
"तद्दोषपरिहारार्थं चत्वार ऋत्विजः पृथक्। एक एव द्विजो वापि वारुणान् कलशान् क्षिपेत्॥
"पूर्वादिदिक्षु सर्वत्र जलेनापूर्य यत्नतः। वरुणं पूजयेत्तत्र ऋत्विगेकश्चतुर्ष्वपि॥
"कलशान् पाणिभिः स्पृष्ट्वा मन्त्रानेतानुदीरयेत्। नमकं चमकं चैव पुरुषसूक्तं च वैष्णवम्॥
"पवमानानुवाकश्च हिरण्यशृंगमिति क्रमात्। शान्तिभिर्दशभिश्चैव कलशानभिमन्त्रयेत्॥
"अन्येन वाससाच्छाद्य सूतिकां कृतशौचिकाम्। मार्जयेदृत्विजस्तोयैः कलशस्थैः पवित्रजैः॥
"आपोहिष्ठादिभिर्मंत्रैर्देवस्य त्वेति मार्जयेत्। ततः शवं बहिर्देशे स्थापयित्वाऽथ देशिकः॥
"शातकुंभोदकैः प्रोक्ष्य नूतनेनैव वाससा। आच्छाद्य कुणपं पश्चाद्दहेदौपासनाग्निना"॥

रजस्वलामरणेऽप्येवमिति **हेमाद्रौ**—

"यथा पुष्पवती नारी दैवाद्यदि विपद्यते। तस्यास्तु निष्कृतिर्नास्ति रक्तकुण्डाद्भयंकरात्"॥ इति।

तथा **त्रिकांडी चंद्रिकायाम्**—

"प्रत्यक्षे चाप्रतिहतौ संस्कारेण च शोधनम्। कुर्यात्तत्राधरोच्छिष्टे प्राजापत्यत्रयं चरेत्॥
"ऊर्ध्वोच्छिष्टेऽपि च तथा प्राजापत्यत्रयं चरेत्"॥ **चंद्रिकायाम्**—

"अस्पृश्यस्पृष्टमरणे कृच्छ्रान्षड्**गौतमो**ऽब्रवीत्। **पराशरस्तु** त्रीन्प्राह **भृगुः** पंच षडंगिराः"॥

अस्पृश्याश्चंडालसूतिकोदक्यादयः। तैः स्पृष्टस्यास्नातस्य मरणे शक्त्यनुसारेण षट्कृच्छ्रादिकमित्यर्थः। देवालयादिमरणे प्रायश्चित्तमाह **विष्णुः**—

"मंटपे गोपुरे खट्वाप्रासादे हर्म्यभित्तिषु। अकामतो मृतानां तु दापयेदैन्दवद्वयम्॥
"प्राजापत्यं चरेत्कृच्छ्रं पराकेण विशुध्यति"॥ खट्वादावकाममरणे चांद्रायणद्वयं कामतस्तु प्राजापत्यं पराकं च कुर्यादित्यर्थः।

---

१ ग-ध। २ खग-खट्वादि।

तत्प्रातिनिधिश्चतुर्विंशतिमते दर्शितः—
" प्राजापत्ये तु गामेकां दद्यात् सांतपने द्वयम् । पराकतप्तकृच्छ्रातिकृच्छ्रे तिस्रस्तु गाः स्मृताः ॥
" अष्टौ चांद्रायणे देयाः तिस्रो वा शक्त्यपेक्षया " ॥ इति । स्मृत्यन्तरे—
" चांद्रायणं त्रयः कृच्छ्रा गायत्र्या अयुतत्रयम् । आप्लावनं महानद्यां सममेतच्चतुष्टयम्" ॥ इति ।
चतुर्विंशतिमते—" यस्य धान्यसमृद्धिः स कृच्छ्राग्निव्रतानि विप्रभोजनेन संपादयेत् " ॥ इति । ब्राह्मणभोजनसंख्या चोक्ता—" कृच्छ्रे पञ्चाग्निकृच्छ्रे त्रिगुणमहरहः " इति । शुद्धिनिर्णये—
" ऊर्ध्वोच्छिष्टाधोच्छिष्ट खट्वादिमरणाशुचिस्पर्शनियमलोपाख्यपञ्चनिमित्तप्रायश्चित्तान्येकैक-निमित्तस्य त्रीणि कृच्छ्राण्येकैकं वा कृत्वा संस्कुर्यात् " इति ।

पर्युषितप्रायश्चित्तम् । पर्युषितशवप्रायश्चित्तमाह गार्ग्यः—
" पंचविंशघटीपूर्वं दिवा प्रेतेऽप्यसंस्कृतिः । दिवा वा यदि वा रात्रौ शवस्तिष्ठति कर्हिचित् ॥
" तत्पर्युषितमित्याहुः दहने तस्य का गतिः ॥
" ब्राह्मणेभ्यो विधिं लब्ध्वा कृच्छ्रत्रयमथाचरेत् । पंचगव्येन संस्नाप्य पावमान्याभिमंत्र्य तु ।
" जलेन स्नापयित्वा च विधिवद्दहनं चरेत् । अन्यथा दहने तस्य सर्वं तन्निष्फलं भवेत्" ॥ इति ।

कात्यायनस्तु—
" प्रत्यक्षशवसंस्कारे दिनं नैव विशोधयेत् । निर्दिष्टकालवीक्षायां शवः पर्युषितो भवेत् ॥
" दग्धः पर्युषितो यैस्तु पुत्रमित्रैश्च बंधुभिः । महाभयप्रदस्तेषां तिथ्यादींस्तन्न शोधयेत् ॥
" पंचगव्येन संस्नाप्य प्राजापत्यं समाचरेत् ॥
" पूतिगंधे तथा क्लिन्ने स्नाप्य गोमयवारिणा । ब्राह्मणैरभ्यनुज्ञातः तप्तकृच्छ्रं समाचरेत् ॥
" कृमिरुत्पद्यते यस्य श्वकाकैश्च विदूषिते । कृत्वा तु पूर्ववत्स्नानं सर्पिषा मधुना ततः ॥
"पुण्याद्भिरभिषिच्याथ सेचयेद्गंधवारिणा । गां दत्वा द्विजमुख्याय तप्तकृच्छ्रं समाचरेत् " ॥ इति । तप्तकृच्छ्रप्रतिनिधिः तिस्रो गावः "पराकतप्तकृच्छ्रातिकृच्छ्रे तिस्रस्तु गाः स्मृताः " इति स्मरणात् ।

वसिष्ठः—
" नासाग्रवर्तनादोषैः वायुना मृतवत्स्थितम् । अज्ञानाद्यदि वा ज्ञानात् पितृमेधमुपक्रमेत् " ॥ इति ।
" गृहकर्मावसाने तु जीवन्नायुष्मतीं जपेत् ॥
" पथि कर्मावसानाद्वा श्मशाने यदि जीवति । घृतकुंभे निमज्ज्यैनं जातकर्मादि कारयेत् ॥
" यामं यामद्वयं यस्य मृतिं निश्चित्य नान्यथा । ब्रह्महत्यामवाप्नोति कर्ता भवति निंदितः"॥

स्मृत्यंतरे—
" ब्राह्मान्मुहूर्ताद्यः पूर्वः मृतः पर्युषितो भवेत् । वैखानसोदितं कार्यं प्रायश्चित्तं विशुद्धये ॥
"याम्यपैतृकमंत्राभ्यां वैश्वदेवेन वै तिलान् । व्यस्ताभिश्च समस्ताभिः हुत्वा व्याहृतिभिर्दहेत्"॥ इति वैखानसोदितमंत्राः 'यमो दाधार पृथिवीं०' 'उशंतस्त्वा हवामहे०' 'विश्वेदेवस्य नेतुर्मर्तो वृणीद्वे' इति । व्यासस्तु—
" रवेरस्तमयात्प्राक् तु योग्यकाले तु दुर्लभे । श्वः प्रातरिष्टं दाहादि न हविस्तेन दूष्यति " ॥
अत्र व्यवस्थामाह बौधायनः—
" रात्रौ यदि मृतः कश्चित् प्रमादात्कालपर्ययात् । नवनाडीष्वधस्तात् चेद्वह्नौ तु जुहुयाच्छवम् ॥
" ऊर्ध्वे श्वः प्रातरेव स्यात् न रात्रौ तु कदाचन " ॥ इति ।

---

१ ग-वेदा । २ क्ष-मर्त्यं; क्ष-मार्तो ।

शवस्योपहतौ प्रायश्चित्तमुक्तं **वैखानससूत्रे**—“ शवेऽन्याशौचयुक्ते च कुक्कुटसूतिकारजस्वलाद्यस्पृश्यस्पर्शने च मृतं पंचगव्यैः कुशोदकैश्च[1] स्नापयित्वा प्रोक्षणैः प्रोक्ष्य विधिवद्दहनं करोति” इति ।
स्मृत्यंतरे तु—

“ श्वसूकरसृगालाद्यैः ग्रामसूकरकुक्कुटैः । शवास्थिभस्मदेहानां स्पर्शनं चेत्प्रमादतः ॥
“ गव्यैः प्रक्षाल्य कृच्छ्राणां त्रितयं च समाचरेत् ” ॥ इति ।

निशादिमरणप्रायश्चित्तम् । निशादिमरणे प्रायश्चित्तमुक्तं **बोधायनीये—**
“ निशि कृष्णे च पक्षे च मरणे दक्षिणायने । ता सूर्या इति वै षड्भिर्हुत्वा स्यात्संस्क्रिया ततः ॥
“ जले मृतस्य जुहुयादिमं मे वरुणेत्यृचा । सर्पेण चेन्नमो अस्तु त्रिभिर्हुत्वा च संस्क्रिया ”॥ इति ।
स्मृत्यंतरे—
“ निशायां कृष्णपक्षे वा दक्षिणे चायने मृतः । ता सूर्येत्यादिषड्मंत्रैर्जुहुयात्तु पृथक् पृथक् ॥
“ चतुर्गृहीतेनाज्येन दाहकस्तु समाहितः । पितृमेधविधानेन दह्यते च सुतादिभिः ” ॥
“ ता सूर्येत्यादि तस्यैव प्रायश्चित्तमुदीरितम् । एकत्र विधिना दाहे प्रायश्चित्तं तु नेष्यते ” ॥ इति ।
सर्पहतस्य विज्ञानेश्वरीये विशेषः (पृ. १६७ पं. १२)—
“ सुवर्णभार[2]निष्पन्नं नागं कृत्वा तथैव गाम् । व्यासाय दत्वा विधिवत्पैतृमेधं समाचरेत् ” ॥ इति ।
व्यासाय वेदविद् इति यावत् । अशन्यादि दुर्मरणे प्रायश्चित्तमाह **आपस्तंबः**—“ यद्याहिताग्निरशनिहतो म्रियेत तस्य प्रायश्चित्तं ‘ मूर्धानं दिवो अरतिं पृथिव्या ’ इति चतुर्गृहीतेनाज्येन जुहुयात् । एतदेवास्य प्रायश्चित्तं भवतीति विज्ञायते । यद्याहिताग्निर्विषहतो म्रियेत तस्य प्रायश्चित्तं ‘ नमो अस्तु सर्पेभ्य ’ इति तिसृभिः चतुर्गृहीताज्याहुतिभिर्जुहुयात् । यद्याहिताग्निः अप्सु म्रियेत तस्य प्रायश्चित्तं ‘ इमं मे वरुण ’ ‘ तत्त्वायामि ’ इति द्वे चतुर्गृहीते जुहुयात् । यद्याहिताग्निः दंष्ट्रिभ्यो म्रियेत तस्य प्रायश्चित्तं ‘ दंष्ट्राभ्यो मंत्रिम्लुचानीति ’ द्वे चतुर्गृहीते जुहुयात् । तदेवास्य प्रायश्चित्तं भवतीति विज्ञायते । यद्याहिताग्निः पशुभ्यो म्रियेत तस्य प्रायश्चित्तं ‘ आ गावो अग्मन्निंद्राय ’ इति द्वे चतुर्गृहीते जुहुयात् ” । अत्र निमित्तस्य तुल्यत्वादेकाग्नेरपि तदुक्तं प्रायश्चित्तं भवत्येव । **कर्तृक्रमः**—दाहादिप्रेतकार्यकर्तारमाह **सुमन्तुः—**

“ मातुः पितुश्च कुर्वीत मृतयोरौरसः सुतः । पैतृमेधिकसंस्कारं मंत्रपूर्वकमादृतः ” ॥ इति ।

पुत्रस्य प्रेतकार्यकरणाशक्तौ तत्प्रकारमाह **जमदग्निः—**
“पितुः पुत्रेण कर्तव्याः पिंडदानोदकक्रियाः । अशक्तोऽप्यग्निदः पुत्रः शेषमन्यः समापयेत्”॥ इति ।
औरसपुत्राणां समवाये ज्येष्ठ एव पितुरौर्ध्वदेहिकं कुर्यात् ।
“सर्वैरनुमतिं कृत्वा ज्येष्ठेनैव तु यत्कृतम् । द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेत्” ॥ इति वचनात् ।
स्मृत्यंतरेऽपि—
“ नवश्राद्धं सपिंडत्वं श्राद्धान्यपि च षोडश । एकेनैव तु कार्याणि संविभक्तधनेष्वपि ” ॥ इति ।
चंद्रिकायाम्—

“ प्रेतस्य पुत्रो दाहादि दद्यादेवौरसः सुतः । बहुत्वे तु गुणी दद्यात्समत्वे ज्येष्ठ एव तु ” ॥

ऋष्यशृंगस्तु—
“ पुत्राणां मध्यमो वाऽपि कनिष्ठो ज्येष्ठ एव वा । पितुर्यस्तु प्रियतमः सर्वं तेनैव कारयेत् ॥

---

१ क्ष–कुशतोयैश्च । २ क्ष–र्णाकार, ग–र्णतार ।

"पुत्राः सर्वे पितुः प्रेष्ठाः पत्नी भ्राता सखाऽपि वा । अग्निदानादिकर्माणि कुर्युः पुत्र्यादयः पितुः"॥ इति ।

जमदग्निः—

"ज्येष्ठपुत्रेण कर्तव्या दाहपिंडोदकक्रियाः । यदि कर्तुमशक्तः स्यात् सर्वमन्येन कारयेत्"॥ इति । सर्वज्येष्ठस्याशक्तावसंनिधाने वा अवस्थितेषु पुत्रेषु मध्ये जन्मज्येष्ठेनैव कारयेत् । "जन्मज्येष्ठः पितुः कुर्यात्" इति **स्मरणात्** । जन्मज्येष्ठ इत्यस्यार्थांतरमप्याहुः—भिन्नमातृकाणां पुत्राणां समवाये यो जन्मतो ज्येष्ठः स एव पितुः कुर्यात् । न मातृतो ज्येष्ठः । सर्वत्र जन्मज्येष्ठस्यैव ग्रहणादिति स्मरणात् । तथा च **मनुः** (९।१२५)—

" सदृशस्त्रीषु जातानां पुत्राणां च विशेषतः । न मातृतो ज्यैष्ठ्यमस्ति जन्मतो ज्यैष्ठ्यमुच्यते ॥

"जन्मज्यैष्ठ्येन चाह्वानं सुब्रह्मण्यास्वपि स्मृतम्" ॥ इति । यत्तु **स्मृत्यंतरे**—

"ज्येष्ठो वाऽपि कनिष्ठो वा ज्येष्ठभार्यासुतो दहेत् । अग्निकार्यं प्रधानत्वाज्ज्येष्ठभार्यासुतोऽग्रजः"॥ इति ।

अन्यच्च—

" एककर्ता द्विभार्यश्चेदुभयोः पुत्रसंभवे । पितुर्मरणकाले तु ज्येष्ठपत्नीसुतोऽग्रजः" ॥ इति । अत्र 'ज्येष्ठपत्नीसुत' इति श्रेष्ठभार्यासुत इत्यर्थः । सवर्णस्त्रीजात इति यावत् । अन्यथा 'सदृशस्त्रीषु जातानाम्' इति वचनविरोधापत्तेः ।

तथा च सवर्णभार्योत्पन्नस्यैव पितृऋणमोचनत्वमुक्तं **बोधायनेन**—

"प्रजामुत्पादयेद्युक्तः स्वे स्वे वर्णे जितेंद्रियः । स्वाध्यायेन ऋषीन् पूज्य सोमेन च पुरंदरम् ॥

" प्रजया च पितॄन् पूर्वान् अनृणो दिवि मोदते" ॥ इति । ज्येष्ठपत्न्यन्तरपुत्रः पितुरेव कुर्यात् । औरसत्वात् न सपत्नीमातुः भिन्नोदरोत्पन्नत्वात् कनिष्ठोऽपि स्वमातुः स्वयमेव कुर्यात् ।

" विदध्यादौरसः क्षेत्रे जनन्या और्ध्वदेहिकम् । तदभावे सपत्नीज" इति **स्मरणात्** ।

यमलयोर्ज्यैष्ठ्यनिर्णयः ।

यमलविषयेऽपि मनुः (९।१२६)—" यमयोश्चैकगर्भे तु जन्मतो ज्येष्ठता स्मृता" ॥ इति ।

स्मृत्यंतरे—

"यमयोर्जातयोर्ज्येष्ठो जन्मना प्रोच्यते बुधैः । गर्भस्य कस्यचिल्लोके चिराज्जननदर्शनात्"॥ इति । अन्यत्रापि—" यमयोर्जातयोर्ज्यैष्ठ्यमाधानं चेष्यते बुधैः" इत्येतत् समभागस्थगर्भविषयम् ।

"पार्श्वयोः संस्थितौ गर्भौ तयोर्यः पूर्वजः स तु । ज्येष्ठ इत्युच्यते सद्भिर्जातकादिषु कर्मसु"॥ इति **बादरायणस्मरणात्** । अत एव उपर्यधोभागस्थगर्भविषये **स्मृत्यंतरम्**—

"यमला चैकगर्भे तु स्त्री वा पुरुष एव वा । कनिष्ठ आद्यजातः स्यात् पश्चाज्जातोऽग्रजः स्मृतः"॥ इति । स्थलविशेषापरिज्ञाने तु शिष्टाचारात् 'कनिष्ठ आद्यजातःस्यात्' इति वचनार्थो ग्राह्यः तथा च **भागवते**-

" प्रजापतिर्नाम तयोरकार्षीद्यः प्राक् स्वदेहाद्यमयोरजायत ।

" तं वै हिरण्यकशिपुं विदुः प्रजा यं तं हिरण्याक्षमसूत सोऽग्रतः"॥ -**श्रीधरीये** व्याख्यातमिदं- 'यदा गर्भाधानसमये योनिपुष्पं विशद्वीर्यं द्वेधा विभक्तं सत् प्राक् पश्चाद्भावेन योनिं प्रविशति तदा यमौ भवतः । तयोश्च पितृतः प्रवेशक्रमविपर्ययेण मातृतः प्रसूतिः

"यदाविशत् द्विधा भूतं वीर्यं पुष्पं परिक्षरत् । द्वौ तदा भवतो गर्भौ सूतिर्वेशविपर्ययात्" ॥ इति

---

१ क्ष—र्द्वैष्ठाः । २ ग—हा । ३ क्ष—ज्येष्ठ । ४ ग—स । ५ ग—ज्येष्ठः पत्युत्तरपुत्रः । ६ गक्ष—जनना ।

पिंडसिद्धिस्मरणात् । स्वदेहात् पूर्वं यो जातः तस्य हिरण्यकशिपुरिति दितेः प्रथमं प्रसूतस्य हिरण्याक्ष इति नाम कृतवानिति ।

अथ पुत्रप्रतिग्रहानंतरमौरसजनने कनिष्ठोऽप्यौरस एव पितुर्दाहादि सर्वं कुर्यात्

"औरसे तु समुत्पन्ने पुत्रस्य ग्रहणादनु । औरसस्तु पितुः कुर्यात् तदा दत्तो विसर्जयेत् ॥

"औरसे तु समुत्पन्ने दत्तो ज्येष्ठो न चेष्यते" ॥ इति **स्मरणात्** । जनयितुः पुत्रपौत्रप्रपौत्राभावे दत्त एव कुर्यात् ।

" पूर्वं भ्रातुः पितुश्चार्तौ कृत्यं रिक्थं च दत्तके । आब्दिकाद्यखिलं श्राद्धं कृत्वा रिक्थमवाप्नुयात् ॥

"दत्तस्य जनकापत्ये मृतेऽथ जनकेऽपि वा । संस्काराद्यखिलं कृत्वा दत्तो रिक्थमवाप्नुयात्" ॥ इति **स्मरणात्** । **ऋष्यशृंगः**—

" पुत्रेषु विद्यमानेषु नान्यं वै कारयेत् स्वधाम् । पितरो हिंसितास्तेन यस्त्वेवं कुरुते नरः" ॥ इति । स्वधा प्रेतकर्म । गर्भवानपि पित्रादीन् संस्कुर्यात् अन्यत्र न कुर्यादिति । तथा च **वृद्धमनुः**—

" वपनं दहनं वाऽपि प्रेतस्यान्यस्य गर्भवान् । न कुर्यादुभयं तत्र कुर्यादेव पितुः सदा ॥

" ज्येष्ठस्य चानपत्यस्य मातुलस्यासुतस्य च " ॥ इति ।

वृद्धवसिष्ठश्च—" गर्भवता ज्येष्ठेन दाह्यः पिता माता चानपत्यो मातुलश्च " इति । अत्र मातुलग्रहणं मातामहादेरप्युपलक्षणम् । अत एव मातामहादेः संस्कारे गर्भवतो वपनं विहितम् ।

" मातामहपितृव्याणां मातुलाग्रजयोर्मृतौ । श्वशुराचार्ययोरेषां पत्नीनां च पितृष्वसुः ॥

"मातृष्वसृभगिन्याश्च गर्भवानपि वापयेत् । सपिंडो वाऽसपिंडो वा संस्कर्ता वापयेत् द्विजः" ॥ इत्यादि ।

गौतमोऽपि—

" ज्येष्ठस्य चानपत्यस्य मातुलस्यासुतस्य च । अग्निदाहं तु यः कुर्यात् स केशान्वापयेद् बुधः " ॥ इति ।

स एव—

"अपुत्रस्य पितृव्यस्य ज्येष्ठस्याप्यसुतस्य च । अंतर्वान् दहनं कुर्यात् केशश्मश्रूणि वापयेत्" ॥ इति ।

ब्रह्मचारिणः संस्काराधिकारः । ब्रह्मचार्यपि पित्रादीन्संस्कुर्यात् । **सुमंतुः**—

"मातुः पितुश्च कुर्वीत संस्थितस्यौरसः सुतः । व्रतस्थो वाऽव्रतस्थो वा एक एव भवेद्यदि " ॥ इति । व्रतस्थ उपनीतः । **स्मृत्यंतरेऽपि**—

"पित्रोश्चैव पितुः पित्रोरौरसस्याग्रजन्मनः । संस्कारादि क्रियाः कुर्यात् ब्रह्मचारी गुरोरपि " ॥ इति ।

अन्यत्रापि—

" दहनादि सपिंड्यन्तं ब्रह्मचारी करोति चेत् । अन्यत्र मातापित्रोः स्यादुपनीयं पुनर्व्रती " ॥ इति । अतः प्रेतकृत्यैकदेशकरणे न ब्रह्मचर्यहानिः कृच्छ्राचरणमेव । सपिंडीकरणमात्रकरणे न पुनरुपनयनदाहादिसापिण्ड्यान्तकरणे पुनरुपनयनमित्यर्थः । अत्र मातापितृग्रहणमाचार्यादेरुपलक्षणम् । तथा च **वसिष्ठबोधायनौ** (२३।७–८)—" ब्रह्मचारिणः शवकर्मणो व्रतान्निवृत्तिरन्यत्र मातापित्रोराचार्याच्च " इति । **याज्ञवल्क्यश्च** (प्रा. १५)

"आचार्यपितृुपाध्यायान् निर्हृत्यापि व्रती व्रती । संकटान्नं च नाश्नीयात् न च तैः सह संवसेत् " ॥ संकटान्नमाशौचान्नं तैः आशौचिभिः । **मनुरपि** (५।९०)—

" आचार्यं स्वमुपाध्यायं पितरं मातरं गुरुम् । निर्हृत्य तु व्रती प्रेतं न व्रतेन वियुज्यते " ॥

भृगुः—"मातामहं मातुलं च तत्पत्न्यौ चानपत्यके । व्रती संस्कुरुते यस्तु व्रतलोपो न तस्य हि" ॥ इति ।

स्मृत्यंतरे—

" मातापित्रोर्व्रती कुर्यात् पितृमेधं सदैव हि। ज्येष्ठभ्रातुस्तथैव स्यादन्येषां न कदाचन "॥ इति।

अन्यत्रापि—

"मातापित्रोरुपाध्यायाचार्ययोरौर्ध्वदेहिकम्। कुर्वन् मातामहस्यापि व्रती न भ्रश्यते व्रतात् "॥ इति।

पुराणेऽपि—

"यथा व्रतस्थोऽपि सुतः पितुः कुर्यात्क्रिया नृप। उदकाद्या महाबाहो दौहित्रोऽपि तथाऽर्हति "॥ इति उदाहृतेषु वचनेषु पितृव्यादेः कण्ठोक्त्यभावेऽपि गुरुत्वात् तत्संस्कारेऽपि न व्रतिनो व्रतहानिरित्याहुः।

अनुपनीतस्यापि पितृसंस्काराधिकारः

अनुपनीतोऽपि पुत्रः पित्रोः संस्कारादि मंत्रवदेव कुर्यात्। तथा च **मनुः** (२।१७१)—

" न ह्यस्मिन्विद्यते कर्म किंचिदा मौंजिबंधनात्। नाभिव्याहारयेद्ब्रह्म स्वधानिनयनादृते "॥ इति। स्वधानिनयशब्देन दाहादिसपिंडीकरणांतं प्रेतकर्म लक्ष्यते। ब्रह्म वेदः। अन्यत्र न वाचयेत्। पितृकृत्ये तु उच्चारयेत्। नात्र दोष इति व्याख्यातम्। **स्मृत्यंतरेऽपि**—

" पुत्रस्त्वनुपनीतोऽपि पित्रोः संस्कारमर्हति। अन्योऽप्युच्चारयेन्मंत्रान्सर्वांस्तेनैव कारयेत् "॥ अन्य उपाध्यायादिरनुपनीतं वाचयेत्। तेन कर्माणि कारयेत्। न स्वयं कुर्यादित्यर्थः। **सुमन्तुरपि**—

" नाभिव्याहारयेद्ब्रह्म यावन्मौंजी निबध्यते। मंत्राननुपनीतोऽपि प्रेतकृत्ये वदेत्पितुः "॥ इति। वेदेदेवैक इति पाठांतरम्। तत्र प्रेतकृत्य इत्यध्याहर्तव्यम्। **वृद्धमनुरपि**—

" कुर्यादनुपनीतोऽपि श्राद्धमेको हि यः सुतः। पितृयज्ञाहुतिं पाणौ जुहुयान्मंत्रपूर्वकम् "॥ इति। श्राद्धं सापिंडीकरणादि। **विश्वामित्रः**—

" पित्रोरनुपनीतोऽपि विदध्यान्मंत्रवत्सुतः। और्ध्वदेहिकमन्ये तु संस्कृताः श्राद्धकारिणः "॥ इति। अन्ये भ्रात्रादयः उपनीताः श्राद्धकारिणः स्युः।

" कर्मशूद्रः स्मृतो विप्रो यावन्मौंजी निबध्यते। तदूर्ध्वं मंत्रपूतेषु कर्मस्वप्यधिकार्यसौ "॥ इति **सुमंतु**स्मरणात्। यत्तु

"असंस्कृतोऽनपत्यश्च ह्यग्निदानं समंत्रकम्। कर्तव्यमितरत् सर्वं कारयेदन्यमेव तु "॥ इति **कात्यायन**वचनं तन्मंत्रोच्चारणाशक्तविषयम्। एतदेवाभिप्रेत्य **व्याघ्रपादः**—

"नवश्राद्धे मासिके च सापिंडीकरणे तथा। ऋत्विक्शिष्यादिभिः कार्यं ब्राह्मणं वा नियोजयेत्"॥ इति। शक्तः सर्वं प्रेतकर्म मंत्रवदेव कुर्यात्। अशक्तस्तु दाहमात्रं मंत्रवदेव कुर्यात्। अन्यत् सर्वं प्रत्यासन्नेन कर्त्रन्तरेण दर्भप्रदानानुज्ञया कारयेत्। अयं च मंत्रोच्चारणाधिकारः त्रिवर्षकृतचूडस्य त्रिवर्षस्य वा। तथा च **सुमंतुः**—

"अनुपेतोऽपि कुर्वीत मंत्रवत्पैतृमेधिकम्। यद्यसौ कृतचूडः स्याद्यदि वा स्यात् त्रिवत्सरः"॥ इति।

स्मृत्यंतरे—

"पुत्रस्त्वकृतचौलोऽपि पित्रोः संस्कारमर्हति। चौलं ह्यविधिना कुर्यात् पश्चाच्चौलं यथाविधि"॥ इति। पश्चात् सपिंडीकरणानंतरम्।

---

१ ख–पठेदेवैक एव हि।

यत्तु **व्याघ्रपादवचनं**

"कृतचौलस्तु कुर्वीत उदकं पिंडमेव च । स्वधाकारं प्रयुञ्जीत वेदोच्चारं न कारयेत्" ॥ इति

यद्यपि **स्मृत्यंतरवचनं**

"कृतचौलोऽनुपेतस्तु पित्रोः श्राद्धं समाचरेत् । उदाहरेत्स्वधाकारं न तु वेदाक्षराण्यसौ" ॥ इति

एतयोः पूर्वोक्तमन्वादिवचनानां च विकल्प इति **चंद्रिकायामुक्तम्** । एतत् वचनद्वयं प्रथमवर्षकृतचूडविषयम् इति । **कालादर्शदीपिकादौ** अत्रिवर्षस्याकृतचौलस्य वपननिषेधोऽपि **स्मर्यते**—

"पुत्रस्त्वकृतचौलोऽपि पित्रोः संस्कारमर्हति । न तस्य वपनं कुर्यात्तेन कर्माणि कारयेत्" ॥ इति

प्रथमवत्सरे तु संस्काराधिकारी न भवतीत्याह **सुमंतुः**—

"पुत्रस्योत्पत्तिमात्रेण संस्कुर्याद्दृणमोचनात् । पितरावाब्दिकाच्चौलात् पैतृमेधेन कर्मणा ॥
"चौलं यद्याब्दिकादर्वाक् न कुर्यात्पैतृमेधिकम् । तृतीयवत्सरादूर्ध्वं मंत्रवत्तत्समापयेत्" ॥

प्रथमवत्सरात् प्रथमवर्षचौलाद्वा परं ऋणमोचनाद्धेतोः पितरौ संस्कुर्यात् । अब्दपरिसमाप्तेः प्रथमवर्षचौलाद्वा पूर्वं पैतृमेधिकं न कुर्यात् । दर्भादिनेनान्य एव कुर्यात् । तृतीयवत्सराच्चौलाद्वा परं मंत्रवदेव पैतृमेधिकं समापयेदित्यर्थः ।

दीक्षामध्ये मातापितृसंस्काराधिकारः । दीक्षितस्य दीक्षामध्ये मातृपितृमरणविषये **कुण्डिन्यः**—

"दीक्षितोऽप्येकपुत्रश्चेन्मातापित्रोर्मृतिर्यदि । संस्कृत्य शालामागत्य यज्ञशेषं समापयेत्" ॥

शांडिल्योऽपि-'दीक्षितोऽप्येकपुत्रश्चेत् माता पित्रोर्मृतिर्यदि।दीक्षारूपं निधायात्र संस्कुर्यान्नोदकाप्लवः॥
"पावयेद्दर्भपुञ्जैर्दीक्षारूपं यथाविधि" ॥ इति । एकपुत्र इति विशेषोपादानात् पुत्रान्तरसंभवे स एव कुर्यात् । नोदकाप्लवः उदकदानमपि नास्ति । स्नानमात्रमस्ति । स्नानतः सद्यःशौचस्योक्तत्वात् ।

स्मृत्यंतरे—

"ज्येष्ठस्य तु क्रतोर्मध्ये मातापित्रोर्मृतिर्यदि । संस्कृत्य शालामागत्य यज्ञशेषं समापयेत्" ॥ इति ।
अन्यथा "दीक्षितोऽप्येकपुत्रश्चेत्" इति वचनविरोधापत्तेः ।

विवाहादिकर्ममध्ये पित्रोर्मृतौ तु विशेषः **स्मर्यते**—

"मातापित्रोर्मृतिप्राप्तौ विवाहादिषु कर्मसु । तिलपिंडं तु कर्तव्यमन्यश्राद्धं तु वर्जयेत्" ॥ इति ।
दहनं तिलमिश्रपिंडदानं च कर्तव्यम् । अन्यत् नवश्राद्धादिकं वर्जयेदित्यर्थः ।

क्रमेण प्रेतकार्यकर्तृनाह **मरीचिः**—

"पुत्रः पौत्रश्च तज्जश्च पुत्रिकापुत्र एव च । पत्नी भ्राता च तज्जश्च पिता माता स्नुषा तथा ॥
"भगिनी भागिनेयश्च सपिंडो धनहार्यपि । पूर्वपूर्वविनाशे स्युरुत्तरोत्तरपिंडदाः" ॥ इति ।

पराशरोऽपि—"पुत्रः पौत्रः प्रपौत्रो वा तद्वद्वा भ्रातृसंततिः" ॥ इति । **कालादर्शेऽपि**—

"दाहादिमंत्रवत् पित्रोर्विदध्यादौरसः सुतः । तदभावे तु पौत्रश्च प्रपौत्रः पुत्रिकासुतः" ॥ इति ।
"क्षेत्रजो दत्तकः क्रीतः कृत्रिमो दत्त एव वा । अपविद्धश्च पत्नी च गूढजः कन्यकासुतः ॥
"पौनर्भवः सहोढोऽन्यो नंदनश्च सुतीकृतः । दौहित्रो धनहारी च भ्राता तत्पुत्र एव वा ॥
"पिता माता स्नुषा चैव स्वसा तत्पुत्र एव च । सपिंडः सोदको मातुः सपिंडश्च सहोदरः ॥
"स्त्री च शिष्यर्त्विगाचार्या जामाता च सखापि वा । उत्सन्नबंधो रिक्थेन कारयेदवनीपतिः" ॥ इति ।

गर्भिण्यां परिणीतायां ततो जातः सहोढोत्थः । सुतीकृतः मातामहेन पुत्रत्वेन स्वीकृतः ।

---

१ क्ष-ज्येष्ठस्य तु क्रतोर्मध्ये । २ क्ष-असुतीकृतः ।

औरसादिलक्षणम्। औरसादीनां क्रमेण लक्षणं चाह **याज्ञवल्क्यः** (व्य. १२८–१३२)—

" औरसो धर्मपत्नीजः तत्समः पुत्रिकासुतः। क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा ॥
" गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः स्मृतः। कानीनः कन्यकाजातो मातामहसुतो मतः ॥
" अक्षतायां क्षतायां वा जातः पौनर्भवः स्मृतः। दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत् ॥
" क्रीतस्तु ताभ्यां विक्रीतः कृत्रिमः स्यात् स्वयंकृतः। दत्त्रिमस्तु स्वयंदत्तो गर्भेविन्नः सहोढजः ॥
" उत्सृष्टो गृह्यते यस्तु सोऽपविद्धो भवेत्सुतः। पिंडदोंऽशहरश्चैषां पूर्वाभावे परः परः " ॥ इति।

बृहस्पतिरपि—

" प्रमीतस्य पितुः पुत्रैः श्राद्धं देयं प्रयत्नतः। जातिबंधुसुहृच्छिष्यै ऋत्विग्भृत्यपुरोहितैः"॥ इति।

अत्र पुत्रैरिति बहुवचनादुक्ता औरसादिद्वादशविधपुत्रा गृह्यंते। तदाह **मनुः** (९।१८०)—

" क्षेत्रजादिसुतानेतानेकादश यथोदितान्। पुत्रप्रतिनिधीनाहुः क्रियालोपान्मनीषिणः " ॥ इति।

एतत् गौणपुत्रपरिग्रहवचनं युगांतरविषयम्। **चंद्रिकास्मृत्यर्थसारादौ** " दत्तौरसेतरेषां च पुत्रत्वेन परिग्रहः " **कलियुगवर्ज्य**धर्ममध्ये परिग्रहणनात्। पुत्रिकापुत्रस्तु न निषिध्यते—

" पुत्रिकायां कृतायां तु यदि पुत्रोऽनुजायते। समस्तत्र विभागः स्यात् ज्यैष्ठ्यं तत्र न विद्यते ॥
" रिक्थे च पिंडदाने च समौ तौ परिकीर्तितौ। औरसो धर्मपत्नीजः तत्समः पुत्रिकासुतः॥
" पुत्रास्तु द्वादश प्रोक्ता मनुना येऽनुपूर्वशः। संतानकारणं तेषां औरसः पुत्रिकासुतः॥
"आज्यं विना यथा तैलं सर्पिः प्रतिनिधिः स्मृतम्। तथैकादशपुत्रास्तु पुत्रिकौरसयोर्विना " ॥ इति

मनुयाज्ञवल्क्यादिभिरौरससाम्यस्मरणादित्याहुः। एवं च पुत्रपौत्रप्रपौत्राभावे पुत्रिकापुत्रस्य सत्वे स एव संस्काराधिकारी भवति। " यश्चार्थहरः स पिण्डदायी " इति (१५।३९) **विष्णुस्मरणात्**। पौत्रादेः सत्वे तु तस्यैव प्राथम्यं न पुत्रिकापुत्रादेः " पुत्रेषु सत्सु पौत्रेषु नान्यं वै कारयेत्स्वधाम् " इति निषेधात्। तथा च क्रमं दर्शयति **मरीचिः**—" पुत्रः पौत्रश्च तज्जश्च पुत्रिकापुत्र एव च " इति। तथैव **स्मृतिरत्नकालादर्शादौ** निर्णीतम्। अत एव पुत्रिकापुत्रस्य पौत्रसाम्यमुक्तं **बृहस्पतिना**—

" पौत्रश्च पुत्रिकापुत्रः स्वर्गप्राप्तिकरावुभौ। रिक्थे च पिंडदाने च समानौ परिकीर्तितौ "॥ इति।

" तत्समः पुत्रिकासुतः " इति औरससाम्यवचनमौरससंतत्यभावे पुत्रिकासुतस्य समनंतराधिकारित्वप्रतिपादनपरम् "न तत् पौत्रेण कर्तव्यं पुत्रवांश्चेत् पितामहः" इति वचनं मुख्यसंतानविषयम्। अतः पुत्रिकापुत्रदत्तापेक्षया पौत्र एव मुख्यः। पुत्रिकापुत्रस्योभयसंबंधोऽपि स्मर्यते **देवलेन**—

" द्व्यामुष्यायणका दद्युर्द्वाभ्यां पिंडोदके पृथक् " इति। **स्मृत्यंतरेऽपि**—

" तस्मादुभयसंबद्धः पुत्रिकायाः सुतो ह्यसौ। पूर्वं मातामहश्राद्धं पश्चात्पैतृकमाचरेत् " ॥
" अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम्। अस्यां यो जायते पुत्रः स नौ पुत्रो भवेदिति "॥

प्रदानसमयेऽभिधानेन मातामहस्य जनकस्य च संस्काराधिकारी। 'स मे पुत्र' इत्युक्त्वा प्रदाने तु मातामहेनैव संबंधः। स उभयोरपि। पुत्रिकापुत्राभावे दत्तः कर्ता। तथा **चन्द्रिकायां**–(पृ. ३३८ पं. ३) " द्विविधो हि पुत्रिकापुत्रः। एको मातामहेन संबद्धः। अपरः पितृमातामहाभ्यां ततः प्रथमं मातामहस्य कुर्यात्। पितुरिच्छया य उभयसंबद्धः स उभयोरपि पुत्रिकापुत्राभावे धनहारी दौहित्रः कर्ता।

"तस्मिंश्चित् प्रतिगृहीते यद्यौरस उत्पद्येत स चतुर्थांशभाक् " इति **वसिष्ठस्मरणेन** (अ १५।९)

१ वसिष्ठस्मृ.

औरसचतुर्थांशभाजो दत्तस्य व्यवहितत्वेन समांशभाजः पुत्रिकापुत्रस्यैव प्राथम्यम्। दत्ताभावे धनहारी दौहित्रः कर्ता। तत्र **विष्णुः**

" अपुत्रपौत्रसंताने दौहित्रा धनमाप्नुयुः। सर्वेषां तु स्वधाकारे पौत्रा दौहित्रका मताः "॥ इति। अपुत्रपौत्रसंताने गौणमुख्यरूपोभयविधपुत्रपौत्रतत्संतत्यभावे इत्यर्थः। **स्मृत्यन्तरेऽपि—**

" पुत्रश्च दुहिता चैव तुल्यसंतानकारकौ " इति। **मनुरपि** (९।१३९)—

" पौत्रदौहित्रयोर्लोके विशेषो नास्ति धर्मतः। दौहित्रोऽखिलं रिक्थमपुत्रस्य पितुर्हरेत् ॥

" स एव दद्यात् द्वौ पिंडौ पित्रे मातामहाय च " इति। **स्मृत्यंतरे—**

" श्राद्धं मातामहानां च अवश्यं धनहारिणा। दौहित्रेण विधिज्ञेन कर्तव्यं पूर्वमुत्तरम् " ॥

धनग्रहणाभावेऽपि दौहित्रोऽधिकारी। तथा **भविष्यत्पुराणे—**

"यथा व्रतस्थोऽपि सुतः कुर्यात् प्रेतक्रियां नृप। मातामहस्य दाहाद्यान् दौहित्रोऽपि तथार्हति"॥ इति। **गृह्यपरिशिष्टे—**

"पितामहस्य तत्पत्न्या मातामह्योस्तथैव च। पिंडदानादिकं सर्वं मातापित्रोः समं विदुः"॥ इति। **पराशरः** (विष्णुपुराणे ३।१३।३४-३७)—

"पूर्वाः क्रिया मध्यमाश्च तथा चैवोत्तराः क्रियाः।आद्याहा द्वादशाहाच्च मध्ये याः स्युः क्रिया मताः'॥इति।

" पूर्वा[2] च मध्यमा मासि मास्यैकोद्दिष्टसंज्ञिताः ॥

" प्रेते पितृत्वमापन्ने सपिंडीकरणादनु। क्रियन्ते याः क्रियाः पित्रोः प्रोच्यंते तास्तथोत्तराः ॥

" पितृमातृसपिंडैस्तु समानसलिलैस्तथा। तत्संघातगतैश्चापि राज्ञा च धनहारिणा ॥

"आद्या मध्याः क्रियाः कार्याः पुत्राद्यैरपि चोत्तराः।दौहित्रैर्वा तथा कार्याः सर्वास्तत्तनयैस्तथा"॥ इति।

एकोद्दिष्टान्ताः सपिण्ड्यन्तास्तदुत्तराश्च त्रिविधा इत्यर्थः। अह्नां दशानां मध्ये याः क्रियाः दाहादिकाः स्मृताः ताः पूर्वा मध्यमा मासीति पाठमाश्रित्य **कालादर्शकारेण** संगृहीतम्—

"दाहात् दशाहपर्यंताः सपिंड्यंतादधः क्रियाः। तदूर्ध्वाश्च क्रमात् पूर्वा मध्यमाश्चोत्तराः स्मृताः ॥

"पुत्रैश्च भ्रातृतत्पुत्रैः पत्न्या शिष्येण वाऽखिलाः।क्रियाः कार्याः समादिष्टाः ज्येष्ठैः[3] पुत्राश्च मध्यमाः'॥इति।

अपुत्रस्य मातामहस्य मरणे धनहारिणा दौहित्रेण त्रिविधा अपि क्रियाः कर्तव्याः।

" मलमेतन्मनुष्याणां द्रविणं यत् प्रकीर्तितम्। तत् गृह्णन्मलमादत्ते दुर्जरं ज्ञानिनामपि ॥

"ऋषिभिस्तस्य निर्दिष्टा निष्कृतिः पावनी परा। आ देहपतनात्तस्य कुर्यात् पिंडोदकक्रियाम्"॥ इति **स्मरणात्**। धनग्रहणाभावेऽपि कर्त्रन्तराभावे त्रिविधा अपि क्रियाः कार्याः

" अप्यदायहरोऽपुत्रीकृतोऽपि दुहितुः सुतः। मातामहस्य विधिवत्कुर्याद्देवोत्तराः क्रियाः " ॥ इति **स्मरणात्**। पूर्वमध्यक्रियाकरणाभावे अवश्यकर्तव्याया उत्तरक्रियायाः कर्तुमयुक्तत्वात् कर्त्रन्तरसद्भावे तु धनहरणयोग्यताराहितेन दौहित्रेणाद्याः क्रिया न कार्याः। तत्राब्दिकव्यतिरिक्त-महालयपूर्वमध्यक्रियादयस्तु कर्तव्याः।

" पितॄन् मातामहांश्चैव द्विजः श्राद्धेन तर्पयेत्। अनृणः स्यात् पितॄणां तु ब्रह्मलोकं च गच्छति ॥

"पार्वणं कुरुते यस्तु केवलं पितृहेतुतः।मातामहे न कुरुते पितृहा स प्रजायते"॥ इति **व्यासस्मरणात्**।

" कर्षूसमन्वितं मुक्त्वा तथाद्यश्राद्धषोडशम्। प्रत्याब्दिकं च शेषेषु पिंडेषु[6] षडिति स्थितिः " ॥ इति **कात्यायनस्मरणाच्च**। कर्षूसमन्वितं कुण्डान्वितसपिंडीकरणमिति यावत्। शेषेषु महालयमन्वादिषु

---

१ **क्ष**-पू। २ **कखग**-ताः पूर्वा मध्यमा मासि। ३ **कखग**-शेषैः पूर्वाश्च। ४ **क**-ति। ५ **क्ष**-पुत्रांतर। ६ **खग**-डाः स्युः षडिति स्मृतिः।

वर्गद्वयपितृनुद्दिश्य भोजनं षट् पिंडाश्च भवन्तीत्यर्थः । मातामहस्य भ्रात्रादिसद्भावे संसृष्टस्य तस्य धनग्रहणरहितो दौहित्रोऽनधिकारी 'योंऽशहरः स पिंडदायी' इति **स्मरणात्** । पुत्रसमत्वेन अविभक्तभ्रात्रादिरेवाधिकारी इति **केचिदाहुः**—

"तथा व्रतस्थोऽपि सुतः कुर्यात् प्रेतक्रियां अपि । मातामहस्य दाहाद्यान् दौहित्रोऽपि तथाऽर्हति"॥ इति **भविष्य**त्पुराणवचनात् । पुत्रसमत्वेनाविभक्तभ्रात्रादेः सत्वेऽपि धनग्रहणरहितोऽपि दौहित्र एव प्रेतक्रियायामधिकारी**त्यन्ये** । यथोचितमत्र ग्राह्यम् ।

दौहित्राभावे अधिकारः पत्न्याः । अत्र **वृद्धमनुः**—

"अपुत्रा शयनं भर्तुः पालयंती व्रते स्थिता । पत्न्येव दद्यात् तत्पिंडं कृत्स्नमंशं लभेत च"॥ इति ।

सुमन्तुरपि—

"अपुत्रे संस्थिते कर्ता न भवेच्छ्राद्धकर्मणि । तत्र पत्न्यपि कुर्वीत सापिंड्यं पार्वणं तथा"॥ इति । कर्ता न भवेत् । पौत्रादिः दौहित्रांतकर्ता न भवेदित्यर्थः ।

दौहित्रापेक्षया पत्न्याः प्राथम्यमाह **संग्रहकारः**—

"पुत्रः कुर्यात्पितुः श्राद्धं पत्नी च तदसंनिधौ । धनहार्यथ दौहित्रः ततो भ्राता च तत्सुतः"॥ इति ।

तथाह **शंखः**—

"पितुः पुत्रेण कर्तव्याः पिंडदानोदकक्रियाः । पुत्राभावे तु पत्नी स्यात्पत्न्यभावे तु सोदरः"॥ इति । **चंद्रिकायामिदं** व्याख्यातम् । पुत्रग्रहणेनात्र गौणा मुख्याश्च गृह्यन्ते । तदपि पौत्राभावविषयम् । तदपि दायहरत्वाभावविषयम् । अन्यथा तु यो दायहरः स एव दद्यात् । अत एव **विष्णवापस्तंबौ** (१५।३९)—"यश्चार्थहरः स पिंडदायी । पुत्रः पितृवित्ताभावे पिंडं दद्यात्"॥ इति । **अत एव याज्ञवल्क्येन** (व्य. १३२) "पिंडदोंऽशहरश्चैषां पूर्वाभावे परः परः" इति । पिंडदत्वांशहरत्वयोरैकाधिकारण्यमुक्तम् । एवं सोदरेऽपि द्रष्टव्यमिति । अनेनैवाभिप्रायेण **गौतमः** (१५।१३-१४)—"पुत्राभावेऽस्य बान्धवाः सपिंडा मातृसपिंडाः शिष्याश्च दद्युस्तदभावे ऋत्विगाचार्यौ"॥ इति । अंशहरत्वे भ्रात्रादिसपिंडानां पत्न्याद्यपेक्षया अव्यवहितत्वमाह **मार्कंडेयोऽपि**—(मा. पुराणे. २७।१९–२४)

"पुत्राभावे सपिंडास्तु तदभावे तु सोदकाः । मातुः सपिंडा ये वा स्युः ये वा मातुश्च सोदकाः"॥ इति । मातुः सपिंडा मातुलादयः । **मार्कंडेयपुराणेऽपि**—

"पुत्रो भ्राता च तत्पुत्रः पत्नी माता तथा पिता । वित्ताभावेऽपि शिष्याश्च कुर्वीरन्नौर्ध्वदेहिकम्"॥ इति । अंशहरत्वे तु पत्न्याः प्राथम्यमाह **कात्यायनः**—

"अपुत्रस्याथ कुलजा पत्नी दुहितरोऽपि वा । तदभावे पिता माता भ्राता तत्पुत्र एव वा"॥ इति । एतच्च ब्राह्मादिविवाहोढाविषयम् । तस्या यज्ञान्वितत्वेन तत्रैव पत्नीशब्दप्रयोगात् । इतरत्र तु

"क्रयक्रीता तु या नारी न सा पत्न्यभिधीयते । न सा दैवे न सा पित्र्ये दासीं तां कवयो विदुः"॥ इति पत्नीत्वाभावात् । अत एव आसुरादिविवाहोढाविषये **विष्णुपुराणे पराशरः** (३।१३।३०-३३)

"पुत्रः पौत्रः प्रपौत्रो वा तद्वद्वा भ्रातृसंततिः । सपिंडसंततिर्वाऽपि क्रियार्हा नृप जायते ॥

"तेषामभावे सर्वेषां समानोदकसंततिः । मातृपक्षसपिंडेन संबद्धा ये जलेन वा ॥

१ क–त्रांशधनं । २ खग–म्यर्हित । ३ क–न प्र । ४ खग–स्य ।

"कुलद्वयेऽपि चोत्सन्ने स्त्रीभिः कार्या क्रिया नृप। उत्सन्नबंधो रिक्थेन कारयेदवनीपतिः"॥ इति। **मार्कंडेयोऽपि** (मा. पुराणे २७।२३-२४)—

"सर्वाभावे स्त्रियः कुर्युः स्वभर्तृणाममंत्रकम्। तदभावे च नृपतिः कारयेत् सकुटुम्बिनाम्॥

"तज्जातीयैर्नरैः सम्यक् दाहाद्याः सकलाः क्रियाः। सर्वेषामेव वर्णानां बांधवो नृपतिर्यतः"॥ इति। स्वभर्तृणाममंत्रकमिति चाधर्मविवाहोढाविषयम्। ब्राह्मादिविवाहोढा तु मंत्रवदेव कुर्यात्।

"यज्ञेषु मंत्रवत्कर्म पत्नी कुर्याद्यथाविधि। तदौर्ध्वदेहिके सा हि मंत्रार्हा धर्मसंस्कृता"॥ इति **स्मरणात्**।

अथ रजोमध्ये पतिमरणे। संग्रहकारः—

"रजोमध्ये तु भार्याया दैवात् भर्तृमृतिर्यदि। पुत्रहीनस्य कर्तव्यं न तया दहनादिकम्॥

"अन्यैस्तदनुमत्या च न कार्यं प्रेतकर्म हि। तूष्णीं दग्ध्वा चतुर्थेऽन्हि पुनः स्नानं विधाय च।

"प्रेतकर्म तथा कार्यमथवा पंचमेऽहनि॥

"रजोमध्ये तु यः कश्चित् द्रव्याशापरिमोहितः। कुर्याच्चेत् प्रेतकृत्यं तु कर्ता चैव प्रमीयते॥

"अधोगतिं प्रयात्येव कुलहानिर्भवेत् ध्रुवम्"॥ इति।

मरणदिने तूष्णीं दाहयित्वा चतुर्थे पंचमे वाऽह्नि तथा पुनर्दहनं कार्यमित्यर्थः।

संग्रहांतरे—"प्राजापत्यं तीर्थकृच्छ्रं वारुणं च समाचरेत्।

"ब्राह्मणानां च वाक्येन गृहीत्वा तत्करात् कुशम्। विधिवद्दहनं कुर्यात् पिता भ्राताऽथवाऽपरः"॥ इति। रजस्वलास्नानप्रकारेण उद्धृततोयेन स्नापयित्वा तद्धस्तात्कुशमादाय कुर्यादित्यर्थः। पुत्रादिदौहित्रान्ताभावे पत्न्याः पतिः कुर्यात्। तथा च **कात्यायनः**—

"तेषामभावे तु पतिस्तदभावे सपिण्डकाः। अपुत्रायाः पतिर्दद्यात्सपुत्राया न तु क्वचित्"॥ **संग्रहे**—"भार्यापिण्डं पतिर्दद्यात् भर्तृभार्ये परस्परम्" इति। तथा **स्मृतिरत्ने**—

"अप्रजायामतीतायां भर्तुरेव तदिष्यते। पतिरेव क्रियां कुर्यात् अपुत्राया मृतस्त्रियाः"॥ इति। तत् पत्नीधनम्। सपत्नीपुत्रसद्भावेऽपि भर्तैव दाहादिकं कुर्यादित्युक्तं **तत्रैव**—

"एकभर्तृकपत्नीनामपुत्रा निधनं गता। अन्यस्याः पुत्रवत्त्वेऽपि कर्ता भर्तैव तत्र तु॥

"पत्यभावे तु सापत्न्यः पुत्र एव नियुज्यते। तदभावे तु तत्पुत्रः आसन्नोऽन्यस्ततः परः"॥ इति। एतच्च सपत्नीपुत्रापेक्षया भर्तुरभ्यर्हितत्त्ववचनं स्त्रीधनग्रहणविषयम्। अन्यथा सपत्नीपुत्र एव कर्तेत्याहुः। धनग्रहणविषये **मनुराह** (९।१९६)—

"ब्राह्मदैवार्षगांधर्वप्राजापत्येषु यद्धनम्। अप्रजायामतीतायां भर्तुरेव तदिष्यते"॥ इति। **याज्ञवल्क्योऽपि** (व्य. १४५)—

"अप्रजस्त्रीधनं भर्तुः ब्राह्मादिषु चतुर्ष्वपि। दुहितॄणां प्रसूता चेच्छेषेषु पितृगामि तत्"॥ इति। शेषेषु आसुरादिषु। धनग्रहणाभावे तु सपत्नीपुत्रस्य प्राथम्यमाह **कात्यायनः**—

"विदध्यादौरसः क्षेत्र्यो जनन्या और्ध्वदेहिकम्। तदभावे सपत्नीजः क्षेत्रजाद्यास्तथा मताः॥

"तेषामभावे तु पतिः तदभावे सपिंडकाः" इति। औरसः क्षेत्र्यः स्वीयसन्तानः॥

स्मृत्यंतरेऽपि—

"अपुत्रायाः सपत्नीजः क्षेत्रजाद्याः पतिस्तथा। पूर्वाभावे परः कुर्यात् विधिवत् पैतृमेधिकम्"॥ इति।

---

१ क्ष–म।

मनुरपि (९।१८३)—

" बह्वीनामेकपत्नीनामेका चेत्पुत्रिणी भवेत्। सर्वास्तास्तेन पुत्रेण प्राह पुत्रवतीर्मनुः " ॥ इति ।

बृहस्पतिश्च—

"बह्वीनामेकपत्नीनामेष एव विधिः स्मृतः। एका चेत्पुत्रिणी तासां सर्वासां पिंडदस्तु सः "॥ इति । **गौतमोऽपि**—" पितृपत्न्याः सर्वा मातरः " इति । **केचिदाहुः**—" अन्यस्याः पुत्रवत्त्वेऽपि कर्ता भर्तैव तत्र तु " इत्यादिवचनं असवर्णस्त्रीविषयम् इति । ' विद्ध्यादौरसः क्षेत्र्य ' इत्यादिवचनं सपत्नीपुत्रस्य प्राथम्यप्रतिपादकसवर्णस्त्रीविषयमिति । **अन्ये** तु अत्र प्रमाणाभावात् ' योंऽशहर ' इति वचनेनांशग्रहणाग्रहणप्रयुक्ता व्यवस्था युक्तेत्याहुः । अत्र केचित् पुत्रदौहित्राद्यपेक्षया सपत्नीपुत्रस्य प्राथम्यमाहुः । **अपरे** तु, अपुत्रायाः सपत्नीज इत्यादेः स्वसंतानाभावविषयाभावविषयत्वात् 'योंऽशहरः स पिंडदायी' इति वचनात् अंशहरेषु पौत्रादिषु सत्सु कथं तस्य प्राथम्यमिति वदंतस्तन्न क्षमंते । तदुक्तं **स्मृत्यंतरे**—

"सपत्न्याः पुत्रवत्वेऽपि अपुत्रायाः क्रियां पतिः। दौहित्रः पत्यभावे तु सपत्नीपुत्र इष्यते " ॥ इति । धनग्राहिणोः पतिदौहित्रयोरभावे सपत्नीपुत्रः कर्तेत्यर्थः । एतच्च विभक्तविषयम् । अविभागे तु दौहित्राद्यपेक्षया सपत्नीपुत्र एव प्रथमः। पुत्रादेरपत्यं तस्याभावे दुहिता कर्त्री । अत्र **शंखः**—

" पुत्राभावे तु कुर्यातां भर्तृभार्ये परस्परम् । अपुत्रस्य तु या पुत्री सैव पिंडप्रदा भवेत् " ॥ इति । पत्युरभावे दुहिता मातुः कुर्यात् । पत्न्यभावे पितुश्च इत्यर्थः । पितृधनभाक्त्वं च तस्याः **स्मर्यते देवलेन**—" अपुत्रकस्य स्वं कन्या धर्मजा पुत्रवद्धरेत् " इति । कन्या ऊढा अनूढा च ।

स्मृत्यंतरेऽपि—

" यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा । तस्यामात्मनि तिष्ठंत्यां कथमन्यो धनं हरेत् " ॥ इति । अत्र **केचित्**—

"पुत्रः कुर्यात्पितुः श्राद्धं पत्नी च तदसंनिधौ। धनहार्यथ दौहित्रस्ततो भ्राता च तत्सुतः "॥ इति **स्मरणात्** " पत्नीदुहितरश्चैव पितरौ भ्रातरस्तथा " इति (याज्ञवल्क्य. व्यव. १३५) धनग्रहणे क्रम**स्मरणाच्च** पत्न्या दुहितुश्च दौहित्रात्पूर्वभावित्वमाहुः । " पौत्रा दौहित्रका मताः " इति **विष्णुस्मरणात्** शिष्टाचाराच्च पत्नीदुहित्रपेक्षया दौहित्रस्यैव प्राथम्यं परे वदंति । दुहित्रभावे भ्रात्रादिः कर्ता ।

"भ्रातुः सहोदरो भ्राता कुर्याद्दाहादि तत्सुतः।ततस्तु सोदरो भ्राता तदभावे च तत्सुतः"॥इति **स्मरणात्**।

स्मृत्यंतरेऽपि—

" पत्नी भ्राता च तज्जश्च पिता माता स्नुषा तथा । भगिनी भागिनेयश्च सपिंडः सोदकस्तथा ॥

" असंनिधाने पूर्वेषामुत्तरे पिंडदाः स्मृताः " ॥ **विष्णुपुराणे**—

" पुत्रो भ्राता च तत्पुत्रः पत्नी माता तथा पिता । वित्ताभावेऽपि शिष्यश्च कुर्वीरन्नौर्ध्वदेहिकम्" ॥ इति।

यत्तु **मनुवचनम्** (९।१८२)—

" भ्रातॄणामेकजातानामेकश्चेत्पुत्रवान् भवेत् । सर्वे तेनैव पुत्रेण पुत्रिणो मनुरब्रवीत् " ॥ इति तत् भ्रात्रपेक्षया भ्रातृपुत्रस्य नाभ्यर्हितत्वप्रतिपादनपरं किंतु भ्रातृपुत्रपरिग्रहसंभवेऽन्यं न परिगृह्णीयादित्येवंपरामिति **विज्ञानेश्वरादिभिर्व्याख्यातम्** (पृ. ९० पं. १७।१८)।

---

१ क्ष-सवर्ण । २ खग-पौत्र । ३ खक-यात् । ४ क्ष-भ्रातु । ५ ग-दौहित्रा ।

अत्र **केचिदाहुः**—

"अपुत्रस्याथ कुलजा पत्नी दुहितरोऽपि वा। तदभावे पिता माता भ्राता पुत्राश्च कीर्तिताः"॥ इति **कात्यायन**स्मरणात्—"पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथेति" धनग्रहणे क्रमस्मरणाच्च पित्रोः प्राथम्यं भ्रात्रादेस्तु ततो विप्रकर्ष इति। **अन्ये** तु 'पत्नी भ्राता च तत्पुत्रः पिता माता' इति पूर्वोक्तवचननिश्चयबलात् भ्रात्रादेः प्राथम्यमिति वदंति। यत्तु **बौधायनवचनम्**—

"न च माता न च पिता कुर्यात्पुत्रस्य पैतृकम्। नाग्रजश्च तथा भ्राता भ्रातृणां च कनीयसाम्"॥ इति यदपि **कात्यायनवचनम्**—

"पित्रा श्राद्धं न कर्तव्यं पुत्राणां च कथंचन। भ्रात्राऽग्रजेन कर्तव्यं न भ्रातृणां यवीयसाम्"॥ इति। यदपि **स्मृत्यंतरम्**—"न पुत्रस्य पिता कुर्यान्नानुजस्य तथाऽग्रजः"॥ इति तत्सर्वं मुख्याधिकारिपुत्रकनिष्ठभ्रात्रादिसद्भावविषयं स्नेहविहीनविषयं वा। तथा च **देवलबौधायनौ**—

"संस्कार्यश्च पिता पुत्रैर्भ्रातरश्च कनीयसा। मातुलस्याप्यपुत्रस्य स्वस्रीया अपि वा मताः॥

"न पुत्रस्य पिता कुर्यान्नानुजस्य तथाऽग्रजः। यदि स्नेहेन कुर्यातां सपिंडीकरणं विना"॥ इति। कर्त्रन्तराभावे तदपि कार्यमित्याह **संग्रहकारः**—

"अन्याभावे पिता माता ज्येष्ठो वाऽपि सपिंडनम्। कुर्याज्जीवंतमाक्रम्य पिंडभागं नियोजयेत्"॥ इति। आक्रम्यातिक्रम्येत्यर्थः। **स्मृत्यंतरे**—

"सर्वाभावे पिता वाऽपि कुर्याद्भ्राताऽपि वाऽग्रजः। गयायां च विशेषेण ज्यायानपि समाचरेत्"॥ इति। अकरणे प्रत्यवायश्च **स्मृतिसारसमुच्चये** दर्शितः—

"उत्सन्नबान्धवं प्रेतं पिता भ्राता तथाऽग्रजः। जननी वाऽपि संस्कुर्यान्महदेनोऽन्यथा भवेत्"॥ इति। पित्रग्रजयोः समवाये प्रत्यासन्नत्वात् पितैव कुर्यात्। तदभावे ज्येष्ठ इति क्रमो विवक्ष्यते। कनिष्ठभ्रातृसमवाये अनंतर एव कनिष्ठो ज्येष्ठस्य कुर्यात्। न व्यवहितोऽनुजः "अनंतरः सपिंडो यः क्रमेण तनयस्तयोः" इति **मन्वादि**स्मरणात्। जीवति पितरि भ्रातादेरन्येन कारयितव्यमित्युक्तं **स्मृतिरत्ने**—

"प्रेतश्राद्धं सपिण्डचन्तं प्रत्यब्दं श्राद्धमेव च। भ्रात्रादेः कार्यमन्येन स पिता यदि जीवति"॥ इति। एवं भ्रातृतत्पुत्रयोरभावे पिता मातापित्रोरभावे स्नुषा तदभावे स्वसा अनुजा अग्रजा वा तदभावे तत्सुतः स्वोदरस्वस्रभावे असोदरस्वसा ततस्तत्सुतः। ततः सपिंडः ततः समानोदकस्ततो मातृसपिंडः ततो मातृसमानोदकः तदभावे सगोत्रः ततः शिष्यः तदभावे ऋत्विक् तत आचार्यः तदभावे जामाता तदभावे सखा इति क्रमः। तथा च **स्मृतिसारे**—

"पत्नी भ्राता च तज्जश्च पिता माता स्नुषा तथा। भगिनी भागिनेयश्च सपिंडः सोदकस्तथा।

"असंनिधाने पूर्वेषामुत्तरे पिंडदाः स्मृताः"॥ इति। **कात्यायनः**—

"अनुजा वाऽग्रजा वाऽपि भ्रातुः कुर्याच्च संस्क्रियाम्। ततस्तु सोदरास्तद्वत्क्रमेण तनयस्तयोः"॥ इति। **चंद्रिकायाम्**—

"पुत्राभावे सपिंडास्तु तदभावे तु सोदकाः। मातुः सपिंडा ये वा स्युर्ये वा मातुश्च सोदकाः॥

"कुर्युरेनं विधिं सम्यक् अपुत्रस्य सुताः स्मृताः"॥ इति। मातुः सपिंडः मातामहः तत्सुतादिः पंचपुरुषपर्यंतः पञ्चपुरुषादूर्ध्वं त्रिपुरुषपर्यंता मातृसमानोदकाः। **पराशरः**—

"अभावे तु सपिंडानां समानोदकसंततिः। मातृपक्षस्य पिंडेन संबद्धा ये जलेन वा"॥ इति।

बृहस्पतिः—

" प्रमीतस्य पितुः पुत्रैः श्राद्धं देयं प्रयत्नतः । ज्ञातिबंधुसुहृच्छिष्यैर्ऋत्विक्भृत्यपुरोहितैः "॥

कात्यायनोऽपि—

"पुत्रः शिष्योऽथ वा पत्नी पिता माता तथा गुरुः । स्त्रीहारी धनहारी च कुर्युः पिंडोदकक्रियाम्"॥ इति । स्त्रीहारी रागतः कलत्रहारी । धनहारी तु **मनुना** दर्शितः (९।१८७–१८९) ।

" अनंतरः सपिंडो यस्तस्य तस्य धनं हरेत् । अत ऊर्ध्वं सकुल्यः स्यादाचार्यः शिष्य एव वा ॥

" सर्वेषामप्यभावे तु ब्राह्मणा रिक्थभागिनः । त्रैविद्याः शुचयो दान्ता तथा धर्मो न हीयते ॥

" अहार्यं ब्राह्मणद्रव्यं राज्ञा नित्यमिति स्थितिः " ॥ इति । **मार्कंडेयः**—

" सख्युरुत्सन्नबंधोश्च सखापि श्वशुरस्य च । जामाता स्नेहतः कुर्यादखिलं पैतृमेधिकम् ॥

"सर्वाभावे तु नृपतिः कारयेत्तस्य रिक्थतः । तज्जातीयैर्नरैः सम्यक् दाहाद्याः सकलाः क्रियाः"॥ इति ।

वृद्धशातातपोऽपि—

" मातुलो भागिनेयस्य स्वस्रीयो मातुलस्य च । श्वशुरस्य गुरोश्चैव सख्युर्मातामहस्य च ॥

"एतेषां चैव भार्याणां स्वसुर्मातुः पितृष्वसुः । मृतौ दाहादिकं कार्यमिति वेदविदां स्थितिः "॥ इति ।

स्मृत्यंतरेऽपि—

" मातुः पित्रोर्मातुलस्य मातुलान्या मृतावपि । दौहित्रः प्रथमः कर्ता ज्ञातिः स्यात्तदनंतरम् " ॥ इति ।

विष्णुरपि—"श्वश्वादीनां तथा पिंडं पत्नी दद्यात् सुसंयता " । इति ॥

धनहारित्वादिनिमित्ताभावेऽपि दाहादिके कृतेऽभ्युदय इत्याह **वृद्धशातातपः**—

"प्रीत्या श्राद्धं तु कर्तव्यं सर्वेषां वर्णलिंगिनाम् । एवं कुर्वन्नरः सम्यक् महतीं श्रियमाप्नुयात्"॥इति । लिंगिनः आश्रमिणः । **ब्राह्मेऽपि**—

" अनाथं ब्राह्मणं दग्ध्वा क्षत्रियं वैश्यमेव च । पितृमेधमहायज्ञफलं प्राप्नोति मानवः " ॥ इति । एतच्च सवर्णाभिप्रायम् । अन्यथा दोषश्रवणात् । तथा **मरीचिः**—

" ब्राह्मणो ह्यन्यवर्णस्य यः कुर्यादौर्ध्वदेहिकम् । तद्वर्णत्वमसौ याति इहलोके परत्र च " ॥

पारस्करोऽपि—

" न ब्राह्मणेन कर्तव्यं शूद्रस्य त्वौर्ध्वदेहिकम् । शूद्रेण वा ब्राह्मणस्य विना पारशवादिति"॥ ब्राह्मणेन शूद्रायामुत्पादितः पारशवः । **कालादर्शेऽपि**—

" स्नेहाद्विप्रादिकैः सर्वैः वर्णालिंग्यौर्ध्वदेहिकम् । कर्तव्यं नैव विप्रेण शूद्रस्यानेन तस्य च "॥ इति । विप्रादिना शूद्रादेरित्यर्थः । सपिंडानां मध्ये केषांचिद्दाहादिनिषेधमाह **वृद्धमनुः**—

" क्लीबाद्या नोदकं दद्युः स्तेना व्रात्या विधर्मिणः । गर्भभर्तृद्रुहश्चैव सुराप्यश्चैव योषितः ॥

"न ब्रह्मचारिणः कुर्युरुदकं पतिता न च"॥ इति । क्लीबो मोघवीर्यः । आदिशब्दात् कुंडगोलकादयः । स्तेनाः परस्वहारिणः । व्रात्याः संस्काररहिताः । विधर्मिणः प्रच्युतस्वधर्माः । गर्भद्रुहः गर्भघातिन्यः । भर्तृद्रुहः भर्तृघ्न्यः । उदकग्रहणमन्येन दाहे कृतेऽपि उदकदाननिषेधार्थम् । अतो दाहादिनिषेधः कैमुत्यसिद्धः । स्वसपिंडमरणे क्लीबाद्या दाहादिकं न कुर्युरित्यर्थः । ब्रह्मचारिणस्तु दाहादिनिषेधः पित्रादिव्यतिरिक्तविषयः । तथा प्रतिपादितमधस्तात् ।

---

१ क्ष–दा । २ क्ष–पूर्व । ३ क्ष– + ह्यधिकारनिषेध । ४ क्ष–ग्रह ।

अत्रायं क्रमः—औरसः पुत्रः पौत्रः तत्पुत्रसंततिः । पुत्रिकापुत्रः तत्संततिः । दत्तः तत्संततिः । धनहारी दौहित्रः पत्नी पतिः सपत्नीपुत्रः दुहिता भ्राता तत्पुत्रः असोदरः भ्राता तत्पुत्रः पिता माता स्नुषा पौत्री दौहित्री पौत्रस्य पत्नी तत्पुत्री दत्तस्य पत्नी भगिनी भागिनेयः सपिंडः सोदकः मातृसंपिंडः तत्समानोदकः सगोत्रः शिष्यः ऋत्विग्भृत्यः गुरुः श्वशुरः आचार्यः सहाध्यायी उपाध्यायः जामाता सखा स्त्रीहारी धनहारी राजेति । इति संस्कर्तृनिरूपणम् ।

अग्निनिर्णयः । तत्र **मनुवृद्धयाज्ञवल्क्यौ**—

" आहिताग्निर्यथान्यायं दग्धव्यस्त्रिभिरग्निभिः । अनाहिताग्निरेकेन लौकिकेनेतरे जनाः " ॥ इति । एकेन औपासनेन । तथा **त्रिकांडी**—" अनाहिताग्निस्त्वेकेन यः पूर्वं पतिभार्ययोः " ॥ इति । **वसिष्ठः**—

" अनाहिताग्निर्यः पूर्वं पत्नीभ्यः प्रमितिं गतः । औपासनाग्निना तस्य संस्कारः पैतृमेधिकः ॥
" पश्चान्मृतस्य कुर्वंति केचिदुत्तपनाग्निना । पश्चान्मृतानां पत्नीनां पतिवच्चाग्निसंग्रहः " ॥ इति ।

यमः—"अस्थिसंचयनादर्वाक् भर्तुः पत्नी मृता यदि । तस्मिन्नेवानले दाह्या यदि चाग्निर्न शाम्यति ।
" शांतेऽग्नौ पुनरेवास्याः पृथक् चित्यादि कारयेत् " ॥ **स्मृत्यंतरे**—

" पूर्वमेव मृता माता घटिकानंतरं पिता । गृह्याग्निः पूर्वतो गच्छेत् अपरो विधुरानलः " ॥ इति । मातृदहनानंतरं पितृमरण इत्यर्थः । एकेनौपासनाग्निना । **जमदग्निरपि**—

" दीक्षितस्याहिताग्नेश्च दाहः स्वैस्त्रिभिरग्निभिः । अनाहिताग्नेः संस्कारस्तेनौपासनवन्हिना ॥
" इतरेषां लौकिकेन दाह उत्तपनाग्निना । चंडालाग्निरमेध्याग्निः सूतिकाग्निश्च कर्हिचित् ॥
" पतिताग्निश्चिताग्निश्च न शिष्टग्रहणोचितः । शूद्रविट्क्षत्रविप्राग्निः श्रोत्रियस्य गृहानलः ॥
" पर्वताग्निररण्याग्निर्दारुनिर्मथनानलः । उपर्युपरिजः श्रेष्ठो लौकिकाग्निपरिग्रहे ॥
" व्रतियत्योः कपालाग्निस्तुषाग्निर्बालकन्ययोः । विधुरं विधवा चैव दहेदुत्तपनाग्निना " ॥ इति ।

यतिः परमहंसव्यतिरिक्तः । **स्मृत्यंतरे**—

" कन्यामनुपनीतं च अस्मात्त्वम् इति मंत्रतः । लौकिकेन दहेदेतावुत्तप्तेनाथ वन्हिना " ॥

वृद्धवसिष्ठः—

" तुषाग्निना दहेत् कन्यां व्रीहिभिर्वा यवेन वा । अथवोत्तपनीयेन कापालेनानलेन वा ॥
" यतिं च वर्णिनं चैव दहेत्कापालवन्हिना । अथवोत्तपनीयेन तुषेणैवापरे विदुः " ॥ इति ।
" दर्भेष्वग्निः समारोप्य पुनर्दर्भेषु संस्थितः । पुनर्दर्भतृतीयेषु वन्हिरुत्तपनः स्मृतः ॥
" कपालमग्नौ निक्षिप्य तप्तं चैव तु निक्षिपेत् । करीषं वा समुद्भूतस्तुषेषु तुषपावकः ॥
"यावत्तप्तकपालेन केवलेनाग्निसंभवः । तावत्कपालसंभूतः पावकः परिकीर्तितः" ॥ इति ।

जमदग्निरपि "दर्भमुष्टिं प्रदीप्याग्नौ लौकिके तत्र चापरम् । तत्राप्यन्यत्तृतीयस्थो वह्निरुत्तपनः स्मृतः ॥
" कपालमग्नौ निक्षिप्य तामादाय तुषे क्षिपेत् । तुषेण दर्भैः संभूतः कपालज इति स्मृतः " ॥

स्मृत्यंतरे च—

" कपालोऽन्यः कपालाग्निः तुषाग्निस्तु तुषोद्भवः । दर्भमुष्टितृतीयोत्थो भवेदुत्तपनाव्हयः " ॥ इति ।

बोधायनः " आहिताग्निमग्निभिर्दहति यज्ञपात्रैश्च गृहस्थमौपासनाग्निना ब्रह्मचारिणं

---

१ ग–पुं । २ क्ष–यदि शांतिर्न । ३ क्ष–यतिव्रत्योः । ४ क्ष–उ । ५ क–न ।

कपालाग्निनान्यानुत्तपनेन " इति । **आपस्तबः**—" औपासनेनाहिताग्निं दहति निर्मंथ्येन पत्नीमुत्तपनेनेतरान् " इति। अत्र यथास्वगृह्यं यथाचारं व्यवस्था । कृतसमावर्तनस्याकृतविवाहस्य ब्रह्मचारित्वाभावात् गृहस्थत्वाभावाच्च कपालाग्न्यौपासनाग्न्योः प्रसक्त्यभावादन्यानुत्तपनेनेति **बोधायन**वचनात् उत्तपनेनेतरानित्या**पस्तंब**वचनाच्च उत्तपनाग्निरेव कृतविवाहस्यौपासनोपक्रमात् पूर्वं मरणे तदानीमेव शेषहोमांतं कर्म समाप्य औपासनेन दहेत् ।

" विवाहशेषमध्ये तु दंपत्योर्मरणं यदि । कर्मशेषं समाप्यैव दहेदौपासनाग्निना "॥ इति **स्मरणात्**।

द्विभार्याविषयः । अनाहिताग्नेर्भार्याद्वयसंबन्धे अग्निद्वयसंसर्गात्पूर्वं मरणे तदैवाग्निद्वयसंसर्गं कृत्वा तेनैव दहेत् । संसर्गानंतरं मरणे संसृष्टाग्निनैव दहेत् । यतः पूर्वाश्रमभार्यामरणेऽपि उत्तपनाग्निरेव अन्यानुत्तपनाग्निनेति **बोधायनापस्तंब**स्मरणात् इति केचित् ।

अन्ये तु प्रेताग्निसंधानं कृत्वा तेनैव दाहः

" प्रमीतायां तु भार्यायां साग्नौ दूरंगतेऽथ वा[2]। संधायाग्निं दहेदेनां पुत्रो वा यदि वेतरः " ॥ इति **स्मरणात्** । यतिरूपस्य भर्तुः समारोपिताग्नेर्दूरतोऽवस्थानादित्याहुः । तथा च **पारिजाते**—

" परिव्राजकपत्नी चेन्मृता तस्मात्तु पूर्वतः । औपासनाग्निं संधाय दहेत्तु विधिवत्सुतः " ॥ इति । तस्मात्पूर्वतः परिव्राजकमरणात्पूर्वमित्यर्थः । उत्तपनाग्नेः संस्कारमाह **शौनकः**—

" अग्निमुत्तपनं कृत्वा पार्श्वे प्रेतस्य दक्षिणे । समूह्य संपरिस्तीर्य पर्युक्ष्य च यथाक्रमम् ॥

" आज्यं संस्कृत्य मंत्रेण स्रुवेण जुहुयात्ततः। अयाश्चेत्येकया हुत्वा व्याहृतीभिस्ततः परम्" ॥ इति।

बौधायनस्तु—

" विधवौ[3]विधुराग्नौ तु स्मरन्पुरुषसूक्तकम्। जुहुयाद् द्वादशाज्येन[4] विधवायास्त्वयं क्रमः " ॥ इति। अयमुत्तपनाग्निना संस्कारः तुषकपालमथिताग्नीनामपि समानः । पूर्वमृतां पत्नीमाहिताग्निरग्निहोत्रेण दहेत् । अनाहिताग्निः स्मार्तार्धेन[5] दहेदिति । **आश्वलायन** आह—

" स्मार्तार्धेनाग्निभिर्दग्ध्वा मृतां पत्नीं च तांस्त्रिभिः । शिष्टार्धेनोद्वहेदन्यां पुनश्चैवाग्निमान्यजेत् ॥

" प्रागुद्वाहाच्च शिष्टार्धं स्मार्तस्याग्नेर्यथाविधि। शुश्रूषेदप्यपत्नीक इष्टिं कुर्याच्च वा न वा " ॥

सायंप्रातर्होममर्धाग्नावपि संचरेदिति । अत्र त्रिभिरग्निभिरग्निमान्यजेदित्येतदाहिताग्निविषयम् । अनाहिताग्निरौपासनार्धेन दग्ध्वा शिष्टार्धेन सायंप्रातर्जुहुयात्[6] स्थालीपाकं च कुर्वन्नुद्वहेत् । अशक्तोऽपि यावज्जीवं होमं कुर्यात् । **याज्ञवल्क्यः** (आ. ८९)—

" दाहयित्वाऽग्निहोत्रेण स्त्रियं व्रतवतीं पतिः । आहरेद्विधिवद्दारान् अग्नींश्चैवाविलंबयन् " ॥

इत्येतत् शक्यविवाहविषयम् । अशक्यविवाहस्तु निर्मंथ्येन दाहयित्वा यावज्जीवमग्निहोत्रं जुहुयात् । अत्र **कपर्दी**—

"आहिताग्निः पूर्वमृतां स्वाग्निभिर्दाहयेत्स्त्रियम्। शक्ये विवाहेऽथाशक्ये निर्मंथ्येनैव दाहयेत्"॥ इति । तथा **चापस्तंबभरद्वाजौ**— ' निर्मंथ्येन पत्नीमुत्तपनेनेतरान् ' इति । **स्मृत्यंतरेऽपि**—

" दारकर्मण्यशक्तश्चेत्पत्नी च निधनं गता । श्रौतस्मार्ताग्निना दाहः पत्न्या नैव तदा भवेत् ॥

" निर्मंथ्येनैव तां दग्ध्वा निदध्यादग्निमात्मनि ।

" अग्निहोत्रं पौर्णमासं दर्शं चाग्रयणं तथा । अपत्नीकोऽपि कुर्वीत तस्मिन्नान्यत्कथंचन ॥

---

१ **क**–परिव्राजक । २ **ग**–वै । ३ **क**–विधस्तु **विधायाग्निं**; **ग**–स्य नि । ४ **ग**–क्ते । ५ **खग**–स्मार्ताग्न्यार्धेन । ६ **ग**–जुहूत् ।

"विच्छिन्नवह्नेः संधानं पुनरेव विधीयते । दारकर्मण्यशक्तश्चेद्दहेदौपासनाग्निना"॥ इति । पूर्वं पत्नीमरणे दारकर्मण्यशक्तौ अनाहिताग्निरौपासनेन दहेत् । आहिताग्निरग्निहोत्रेणेत्यर्थः । सर्वाधाने पूर्वं यजमानस्य मरणे अग्निहोत्रेण त्रेतायां पितृमेधः। पत्न्यास्तु पश्चान्मरणे प्रेताधानमिति **चंद्रिकायाम्** । अत्र **कात्यायनोऽपि**—"पूर्वं मृतस्य दंपत्योः प्रेताधानं परस्य तु"। पूर्वं मृतस्याग्निसंस्कारः पश्चान्मृतस्य दंपत्योरन्यतरस्य प्रेताधानमित्यर्थः। **कल्पपरिशिष्टे**—

"मृताहिताग्नेर्भार्यायाः प्रेताया विधिरुच्यते। संस्करिष्य इमां पत्नीं निर्मथ्येन कुशाग्निना॥

"इति संकल्प्य संपाद्य निर्मथ्याग्निमसुं त्रिधा। विभज्य दक्षिणाग्नौ[3] तु यदि पाकोवरानले॥

"आमिक्षा स्रुक्स्रुवावत्र वारुणौ भवतस्ततः। वपनं पात्रचयनं विनान्यत्सर्वमाचरेत्"॥ इति । पुनर्दारग्रहणासमर्थस्य पत्नीदाहविनियुक्ताग्निहोत्रस्य विधुरस्योत्सृष्टाग्नेर्विच्छिन्नाग्नेर्वा मरणे प्रेताधानमेव । तथा **चापस्तम्बः**—"यद्याहिताग्निरुत्सृष्टाग्निर्विच्छिन्नाग्निः प्रमीयेत न तमन्येन त्रेताग्निभ्यो दहन्निति विज्ञायते । आधानप्रभृति यजमान एवाग्नयो भवन्ति । अथापि ब्राह्मणम्—'तमसो वा एष तमः प्रविशति सह तेन य आहिताग्निमन्येन त्रेताग्निभ्यो दहन्तीति'। **भाष्यकारः**—यद्याहिताग्निरुत्सृष्टाग्निर्विच्छिन्नाग्निर्विधुराग्निर्वा प्रमीयेत न तमन्येन त्रेताग्निभ्यो दहन्ति । तस्य प्राचीनावीत्यग्न्यायतनमुद्धृत्यावोक्ष्य यजमानायतने प्रेतं निधाय गार्हपत्यायतने अरणिं निधाय मंथति यस्याग्नयो जुह्वता मां सकामाः संकल्पयंते यजमानं मां संजानंतु ते हविषे सादिताय स्वर्गं लोकमिमं न प्रेतं यं त्विति तूष्णीं विहृत्य द्वादशगृहीतेन स्रुचं पूरयित्वा तूष्णीं हुत्वा प्रेतमा त्वा इत्यादि कर्म प्रतिपद्यत इति । स्मृत्यंतरेऽपि—

"अथानुगतवन्हिस्तु यजमानो मृतो यदि। प्रेताधानं तथा कुर्यादित्यापस्तंबभाषितम्"॥ इति । एवं चाहिताग्नेर्विधुरस्याग्नित्रयमुत्पाद्य तेनैव विधिवद्दाहः कार्यः । अनाहिताग्नेस्तु उत्तपनेनेति भेदः। प्रेतमा त्वा इत्यादि समानमुभयोः । ननु आहिताग्नेः अग्नित्रयोत्पादनवदनाहिताग्नेरपि विधुरस्यौपासनाग्निमुत्पाद्य तेनैव दाहः कार्य इति चेन्न। आधानप्रभृति यजमान एवाग्नयो भवंतीत्या**पस्तंबेन** हेतूपन्यासान्न तमन्येन त्रेताग्निभ्यो दहंतीति इतराग्निना दाहनिषेधाच्च यथा योगिनः स्वान्देहान्परित्यज्य परकायमनुप्रविश्य पुनः स्वान् देहान् प्रविशंति न च तेन दुष्यंत्येवमग्नयोऽपि 'पत्नीं संस्कृत्य यजमानमेवाभ्यावर्तंत' इति **भारद्वाज**वचनाच्च तस्य प्रेताधानं युक्तम्। विधुरस्यानाहिताग्नेस्तु तथाविध्यभावात् उत्तपनाग्निविधानाच्च न प्रेतौपासनसंधानम्। तथा विधवाया अनाहिताग्नेर्भार्याया मृतावुत्तपनाग्निनैव दाहः । आहिताग्निपत्न्यास्तु पश्चान्मरणे प्रागुक्त**कात्यायन**वचनानुसारेण प्रेताधानं निर्मन्थ्येनेति **भाष्यकारः** । पूर्वं मरणे व्रतवत्यास्तस्या दारकर्मण्यशक्तश्चेदग्नित्रयेण दाहं कुर्यात्। तस्याः सद्वृत्त्यभावे स्वस्य दारग्रहणशक्त्यभावे च निर्मथ्येनैव तां दहेत्। अत्रैव विषये **विष्णुः**—

"मृतायामपि भार्यायां वैदिकाग्निं न तु त्यजेत्। उपाधिनाऽपि तत्कर्म यावज्जीवं समाचरेत्"॥ इति। उपाधिः प्रतिकृतिः । एतदेवाभिप्रेत्य **भारद्वाजः**— "यजमानस्यैवाग्नित्रयम्" इति ।

मैत्रायणीयश्रुतिरपि—

"यस्तु स्वैरग्निभिर्भार्यां संस्करोति कथंचन। असौ मृतः स्त्री भवति स्त्री चैवास्य पुमान्भवेत्"॥ इति।

---

१ क्ष–णि। २ ग–मंत्रितं। ३ **कखग**–ग्निं तु चरु। ४ ग–स्या।

स्वैरिति श्रवणात् पत्न्या अंगतापक्षेऽयं निषेधः । न सहाधिकारपक्षे इति केचिद्विच्छिन्नाग्नेरुत्सृष्टाग्नेर्वा यजमानस्य मृतेः पूर्वं पत्नीमरणे पुनर्दारग्रहणशक्तावशक्तौ च निर्मथ्याग्निनैव दाहः । न तु प्रेताधानाहितत्रेताग्निभिः । तथा च कपर्दी—

" नष्टोत्सृष्टानलसहचरीं दाहकृत्येन कुर्यात् प्रेताधानं मथितदहनस्तत्क्रियायां प्रकल्प्यः ।
" कन्योपेतानुपनयनको पोषणे लौकिको वा कापालो वा भवति दहनश्चाथ संतापनो वा "॥ इति ।

विदेशस्थाग्नेः पत्नीमरणे प्रेताधानमुक्तं स्मृत्यंतरे—

" दूरे पिताऽनग्निरितः स्वमाता मृता यदि स्यात्सुत औरसश्चेत् ।

" आधाय सर्वं विदधीत सर्वामन्त्येष्टिमात्मा स इति श्रुतिर्हि ॥ " अनग्निरनाहिताग्निः । एवं विच्छिन्नौपासनस्य पत्नीमरणे प्रेताग्निसंधानं पूर्वोक्तकपर्दिवचनेन न्यायसाम्यात् मथिताग्निरित्येके ।

बहुपत्नीकस्य पत्नीमरणे अग्निनिर्णयः । बहुपत्नीकस्य पत्नीमरणे **वृद्धमनुः**—

" बहुपत्नीकपक्षे तु ज्येष्ठा चेत्पूर्वमारिणी । तां दहेदग्निहोत्रेण पुनराधानमन्यया "॥ इति । 'निर्मथ्येन तथेतराम्' इति पाठांतरम् । अयं न्यायो द्विपत्नीकपक्षेऽपि समानः । तथा **स्मृत्यंतरे**—

" ज्येष्ठा भार्या मृता पूर्वं पुत्रस्त्रेताग्निना दहेत् । आधानं च पुनः कुर्यात्सह पत्न्या द्वितीयया॥

"द्वितीया यदि चेद्भार्या पूर्वं मरणमाप्नुयात् । जीवंत्यां प्रथमायां तु दहेन्निर्मन्थिताग्निना"॥ इति ।

द्वितीयाया अग्निहोत्रदाहादिनिषेधमाह **देवलः**—

"द्वितीयां वै तु यो भार्यां दहेद्वैतानिकाग्निभिः । तिष्ठन्त्यां प्रथमायां तु सुरापानसमं हि तत्"॥ इति ।

तिष्ठंत्यां प्रथमायामिति विशेषणात्तन्मरणादूर्ध्वं विद्यमानासु ज्येष्ठाया मरणेऽप्यग्निदानमनुमतमेव । एतदेवाभिप्रेत्य **स्मृत्यंतरम्**—

"मृतायां तु द्वितीयायां योऽग्निहोत्रं समुत्सृजेत् । ब्रह्मोज्झं तं विजानीयाद्यश्च कामात्समुत्सृजेत्"॥ इति।

'एतदाधानाधिकृतस्त्रीविषयमिति' **विज्ञानेश्वरेणोक्तम्** । (पृ. २५१ पं. १५) तद्विषयत्वाप्रतीतेस्तदुक्तमयुक्तमित्यन्ये । द्विभार्यानाहिताग्निविषये **स्मृत्यंतरम्**—

" पत्न्योरेका यदि मृता तां दहेत्स्मार्तवन्हिना । आदधीतान्यया सार्धमाधानविधिना गृही " ॥ इति ।

पत्न्योर्मध्ये एका मुख्या ज्येष्ठेति यावत् । सा मृता यदि तां संसृष्टस्मार्तवन्हिना दाहयित्वा पुनरन्यया कनिष्ठया सह पुनःसंधानविधिना संदधीतेत्यर्थः । तथा **शौनकः**—

"अथाग्न्योर्गृह्ययोर्योगमहं वक्ष्यामि शौनकः । सहाधिकारसिद्ध्यर्थं सपत्नीभेदजातयोः" । इत्यादिना अग्निद्वयसंसर्गमुक्त्वा ज्येष्ठायाः संसृष्टाग्निना दाहमाह—

"तयोरेका यदि मृता तां दग्ध्वा तेन वन्हिना । आदधीतान्यया सार्धमाधानं विधिना गृही " ॥ इति ।

यत्तु **भाष्यकारवचनं**—

" यदि त्वनेकभार्यस्य काचित्पत्नी मृता तदा । निर्मथ्येनैव सा दाह्या तमग्निं धारयेत्पतिः " ॥ इति **तच्छौनकादि**वचनविरुद्धत्वादुपेक्षणीयम् । पत्न्या अंगत्वपक्षे वा समर्थनीयम् ।

कनिष्ठाविषये तु स्मृत्यंतरे—

"कनिष्ठायां मृतायां तु विभज्याग्निं प्रदाहयेत् । शमयित्वान्यभागं तु समादध्यात्पुनः शुचिः"॥ इति ।

---

१ क—संन्यः सयोषित्पत्नीक । २ क्ष—र्याहिताग्नि ।

अत्र विशेषः संग्रहे स्मृत्यंतरे निरूपितः—
" ज्येष्ठा विवाहवन्हौ चेत्कनीयस्याः करग्रहः । होमस्तयोर्मृतैका चेत्सर्वेणौपासनाग्निना ॥
" दग्ध्वा तामन्यया साकं पुनःसंधानमाचरेत् । कनीयस्या विवाहे तु होमश्चेल्लौकिकानले ॥
" मृतां दहेत्तदंशेन शिष्टैर्होमं समाचरेत् । तत्तदंशेन दाहः स्याद्युगपन्मरणे तयोः " ॥ इति ।
स्मृतिरत्नकल्पकारिकयोरुक्तः—
" लोकाग्नावितरौद्वाहं कृत्वा संसृष्टवन्हिमान् । तस्यैकस्यां मृतायां तु विभागोऽग्नेर्मुनीरितः ॥
" विभज्य वन्हिं प्रत्यक्षं भागयोस्तु पृथक् पृथक् । पूर्णाहुत्या विविच्याग्निमिष्ट्वा भागौ विनिर्दिशेत् ॥
" पूर्वस्यां दक्षिणं भागमितरस्यां तथेतरम् । या तु तस्य मृता भार्या तद्भागं विनियोजयेत् ॥
" पूर्वौपासनवन्हौ तु यस्योद्वाहः पुराकृतः । तस्यैकपत्नीमरणे कृत्स्नाग्निर्विनियुज्यते ॥
" ततस्तस्याः क्रियांते तु स्थितया सह भार्यया । प्रधानोद्वाहहोमं तु कृत्वा पूर्ववदाचरेत् ॥
"एवं विज्ञाय यः कुर्यात्तरतीह स संसृतिम् । अन्यथा त्वग्निसंत्कुर्यात् पतत्येवेति निश्चयः"॥ इति ।
पत्नीनां युगपन्मरणे संसृष्टस्य गृह्याग्नेर्विभागमाह संग्रहकारः—
" औपासनाग्नौ संसृष्टे समिधौ द्वे प्रतापयेत् । 'अयं ते योनिर्ऋत्विय' इत्येवं युगपत्ततः ॥
" 'सप्त ते अग्ने' इति तु हुत्वा पूर्णाहुतिं ततः । 'अच्छागिरोमतय' इति विभज्याग्निं ततः पुनः ॥
" आजुव्हानेति समिधं प्रतिष्ठाप्य ततो हुनेत् । अयाश्च व्याहृतिश्चैव घृतं हुत्वा ततः पुनः ॥
"एवं विभज्य चैकेन स्मार्तकर्म समाचरेत् " ॥ इति ।

अर्धाधाने त्वेकभार्यस्य यजमानस्य पूर्वं मरणे तस्याग्निस्त्रेतायां पितृमेधः । पत्न्यास्त्वौपासनेन । तदाहापस्तंबः—"तयोर्यः पूर्वं म्रियेत तस्याग्निस्त्रेतायां पितृमेधः संपद्यते यः पश्चात्तस्यौपासन" इति। 'स्त्री चैवं भर्तरि प्रमीत' इति भारद्वाजवचनानुसारेण भर्तृमरणादूर्ध्वमपि औपासनाग्निपरिचर्यायां सत्यां औपासनेन दाहः। अन्यथा प्रेताग्निसंधानं निर्मंथ्याग्निरिति केचित् । एकभार्यस्य पूर्वं पत्नीमरणे अग्निहोत्रेण औपासनेन च दग्ध्वा पुनः परिणीय तया सहाधानमथैनमुपोषतीत्यारभ्य पुरस्तात् सभ्यावसथ्याभ्यामौपासनेन चेत्यापस्तम्बेन औपासनस्य पत्नीविधानात् विवाहमर्थ्यांनिश्चये पत्न्यास्त्रेतायां पितृमेधः । यजमानस्य त्वौपासनेन यः पश्चात्तस्यौपासने इति स्मरणात् । अर्धाधाने तु अनेकभार्यस्य यजमानस्य पूर्वं मरणे तस्याग्निस्त्रेतायां पितृमेधः । पत्नीनां तु स्वैः स्वैरौपासनस्यांशैः । उक्तं च भाष्ये—
" अथ चेद्बहुपत्नीको ह्यर्धाधानी विपद्यते । त्रेताग्निभिस्तु दाह्यः स्यात्पत्न्यास्त्वौपासनानलैः ॥
"प्रत्यक्षाग्निं विभज्यैव यथावदनुपूर्वशः"॥ इति ।

अत्र केचित् पूर्वं मृतपत्न्यास्त्रेताग्निभिर्दहनविधानं पश्चान्मृतायाः औपासनाग्निना दहनविधानं च सहाधिकारितापक्षे। न त्वंगतापक्षे । अत एवोक्तं भाष्यकारेण सूत्रे हि पूर्वं मृतस्य यजमानस्य वैतानिकैरौपासनेन च दहनमनुक्रांतं पत्न्यास्तु निर्मंथ्येन दहनं वक्ष्यते । निर्मन्थ्येन पत्नीमिति । तत्र कथं पश्चान्मृतायाः पत्न्या औपासनसद्भावः । तस्मादौपासनवतः आहिताग्नेर्वैतानिकैरोपासनेन च दहनं पत्न्या निर्मथ्येन तत्रांगतापक्षे सर्वाधाने अर्धाधाने वा पूर्वमृतां पत्नीं निर्मथ्येन दाहयित्वा विधिवदग्नीनुत्सृज्य दारसंग्रहणं कृत्वा ब्रह्मौदनपचनानंतरं औपासनाग्निमरण्योः समारोप्य मथित्वा विधिवदग्न्याधानं कुर्यात् इत्यंगत्वपक्षानुसारिण आहुः । यच्चात्र वेत्तव्यं तत्सर्वं यजमानप्रकरणे निरूपितम् ।

---

१ ग--स्या ।

दारसंग्रहणानंतरं अग्न्याधानात्पूर्वं यजमानमरणे **संग्रहकारः**—
" यज्वा मृतस्त्रीक उद्वह्य भार्यामग्नीननाधाय मृतो यदि स्यात् ।
" औपासने तंतुमतीमयाश्च हुत्वा समारोप्य कृतारणौ तम् ॥
" प्रेताधानं तु कर्तव्यं तत्पश्चात्पैतृमेधिकम् " ॥ इति । अत्रारण्याहरणमाह **त्रिकांडी**—
" नष्टेष्वग्निष्वथारण्योर्नाशे स्वामी म्रियेत चेत् । आहरेदरणिद्वन्द्वमाधानोक्तविधानतः ॥
" ततोऽग्निशून्यप्रेतोक्तमंथनादि प्रपद्यते " ॥ इति ।

आत्मारूढानलमृतिविषये **आपस्तंबः**—" आत्मारूढेष्वग्निषु यजमानो म्रियेत लौकिकाग्निमुत्पाद्य समाधाय प्रेतस्य दक्षिणं पाणिमभिनिधाय तत्पुत्रो भ्राता वाऽन्यो वा प्रत्यासन्नबंधुरुपावरोहेत्युपावरोहयेत् । पुनस्त्वादित्या इत्यग्निमभिसमिंध्यादेवं सर्वेष्वग्न्युपघातेष्विति भूर्भुवः सुवरिति सर्वप्रायश्चित्तानि च " इति ।

अनेनैव न्यायेनात्मसमारूढौपासनाग्नेः कालद्वयौ उपासनातिक्रमात्पूर्वं मृतस्य दक्षिणहस्ते अग्निमवस्थाप्य उपावरोह्य व्याहृत्यानाज्ञातत्रयेण च चतुर्गृहीतमाज्यं जुहुयात् । एवं चौपासनोत्पत्तिः कालद्वयातिक्रमे प्रेताग्निसंधानमेव ।

अरणिसमारोपिताग्निमृतिविषये **भरद्वाजः**—" यद्यात्मन्यरण्योर्वा समारूढेषु यजमानो म्रियेतायतनानि कल्पयित्वा यजमानायतने प्रेतं निधाय गार्हपत्यायतने लौकिकाग्निमुपसमाधाय प्रेतस्य दक्षिणं पाणिमभिसंगृह्य तत्पुत्रो वा भ्राता वाऽन्यो वा प्रत्यासन्नबंधुरुपावरोहजातवेद इमं तं स्वर्गाय लोकाय वहन अजानन्नायुः प्रजां रयिमस्मासु धेह्यजस्रो दीदिहिनो दुरोण इति लौकिकाग्नावुपावरोहयति । अरण्योर्वोपावरोह्य मंथेत् । यद्यरण्योः समारूढः स्यान्निर्वर्तमाने प्रेतमन्वारंभयित्वा इमं मंत्रं जपेत् ' विहरणादिसमानम् ' " इति ।

तत्रारण्योर्वोपावरोह्य मंथेदित्यंतमात्मसमारोपणविषयम् । शेषमरणिसमारोपणविषयम् । आदित्यसूक्तं प्रेतनिधानात्तमुभयत्र तुल्यम् । एवमनाहिताग्नेः समित्समारोपणे सति तन्मरणे मृतस्य दक्षिणं पाणिमन्वारभ्य लौकिकाग्नावुपावरोह्य द्वादशगृहीतेनाज्येन तूष्णीं हुत्वा तत्कालहोमं च कृत्वा संस्कुर्यात् । कालद्वयानतिक्रमेण द्वादशगृहीतेन होमः । किंतु व्याहृत्या अनाज्ञातत्रयेण च पूर्ववत् जुहुयात् । समारूढौपासनाग्नेर्भार्यामरणे लौकिकाग्नावुपावरोह्य दाहयेत् ।

आहिताग्नेर्देशांतरमरणे । आहिताग्नेर्देशांतरमरणे **चंद्रिकायामुक्तम्**—
"यस्मिन्देशे स्थितो वह्निः ततोऽन्यत्र मृतो यदि । वैतानौपाधिका कार्या पूर्णाहुतिरथापि वा"॥ इति ।
अग्निहोत्रार्थं ऋत्विजं परिकल्प्य कार्यवशाद्देशांतरं ग्रामांतरं वा गतस्य तत्र दैवान्मृतस्य लौकिकाग्निदग्धस्यास्थीनि त्रेताग्निसमीपं नीत्वा तस्मिन्वैतानिके पाथिकृतीमिष्टिं पूर्णाहुतिं वा कृत्वा प्रेतास्थिसंकारं कुर्यादित्यर्थः । केचिदत्र " चरुः पथिकृतः कार्यः पूर्णाहुतिरथापि वा " इति पठित्वा व्याचक्षते । औपासने गृहे विद्यमाने देशांतरे लौकिकाग्निना दग्धस्यानाहिताग्नेरस्थीन्यादाय औपासने शृतेन चरुणा "अग्नये पथिकृते स्वाहा" इति जुहुयात् पूर्णाहुतिं वेति । पुनःसंस्कारपर्यंतं अग्निहोत्रं जुहुयात् ।

" अथ यद्याहिताग्निरन्यत्र प्रेयाद् दीप्यमानैर्हूयमानैरग्निभिरासीरन् यावदेवास्याग्निभिः समागमयेरन् आसंस्कारादग्निं जुहुयात् । अग्निसंरक्षणार्थम् " इति **बोधायनापस्तंबस्मरणात्** ।

तत्र होमद्रव्यमुक्तं **स्मृत्यंतरे**—

"अन्यदीयेन वत्सेन पेया गौस्तु न पयोधरा । आ शरीराहृतेस्तस्याः पयसा होम इष्यते ।

"अन्यस्या अपि होतव्यं पयसा तदभावतः" ॥ इति । **पारिजाते तु**—

"दूरे साग्निः पतिः पत्नी मृता स्याद्वुत साग्निका । दूरे पतिर्मृतस्तत्राप्युत्कर्षः सति चात्मजाः" ॥ इति । साग्निरौपासनसहितः पिता दूरस्थः माता मृता अथवा साग्निकामा ता स्थिता दूरे पिता मृतः तदौरसपुत्रः अग्न्यानयनपर्यंतं संस्कारं न कुर्यात् । तदसंभवेऽस्थ्यानयनहृतिपर्यंतं न कुर्यादित्यर्थः । अस्थ्याहरणासंभवे गृहे विद्यमानेनाग्निहोत्रेण प्रतिकृतिदाहमाह **बोधायनः**—

"अस्थीनि यद्यलब्धानि पर्णैस्तत्पुरुषाकृतिम् । कृत्वा तद्वतदिग्भागे दहेयुः पितृमेधतः" ॥ इति ।

स्मृत्यंतरेऽपि—

"देशांतरे प्रमीतस्य नरस्यास्थि पुनर्दहेत् । अस्थ्यभावे पलाशोत्थैः वृंतैः प्रतिकृतिं दहेत् ॥

"तदभावे कुशैस्तेषां षष्ट्या च त्रिशतैरपि । चत्वारिंशच्छिरकृषौ दशकंठेऽथ वक्षसि ॥

"विंशतिस्त्रिंशदुदरे शतार्धं भुजयोः पृथक् । ऊरुद्वये सप्ततिश्च पृथक् पृथगुदीरिताः ॥

"बाह्वंगुलीषु च तथा दश पादांगुलीषु च । मेढ्रे द्वादश शिश्नेऽष्टावूर्णासूत्रेण बंधनम्" ॥ इति ।

आपस्तंबः—"यद्याहिताग्निः प्रोषितः प्रमीतो न ज्ञायेत यां दिशमभिप्रस्थितः स्यात्तामस्याग्निभिः कक्षं दहेयुरपि वा त्रीणि षष्टिशतानि पलाशवृंतानां तैः कृष्णाजिने पुरुषाकृतिं कुर्वंति । पलाशवल्कलैः कुशैर्वा संधिषु संवेष्ट्य पूर्ववत् शरीरवत्प्रतिश्च । एवं **शौनकादयः** चत्वारिंशता शिरः कल्पयते दशभिर्ग्रीवां विंशत्योरस्त्रिंशतोदरं पंचाशता पंचाशतैकैकं बाहुं ताभ्यामेव पंचभिरंगुलीरुपकल्पयते । सप्तत्या सप्तत्यैकैकं पादम् । ताभ्यामेव पंचभिः पंचभिरंगुलीरुपकल्पयते अष्टाभिः शिश्नं द्वादशभिर्वृषणम्" इति । **जयंतकारिकायाम्**—

"शरीराणि न विंदेरन्देशांतरमृतस्य चेत् । दद्याच्छिरस्यशीत्यर्धं ग्रीवायां तु दशैव तु ॥

"उरसि त्रिशतिं दद्याद्विंशतं जठरे तथा । बाह्वोर्द्वयोः शतं दद्याद्दश बाह्वंगुलीषु च ॥

"द्वादशार्धं वृषणयोरष्टार्धं शिश्न एव तु । ऊर्वोर्द्वयोः शतं दद्यात्षष्ट्यर्धं जानुजंघयोः ॥

"दश पादांगुलीषु स्युरूर्णासूत्रेण बंधयेत् । स्नाप्यालंकृत्य तद्रूपं कुर्यात्तस्याभिमर्षणम्" ॥ इति ।

शौनकः—"कृष्णाजिने तु पालाशवृंतैः कृत्वा नराकृतिम् । चत्वारिंशच्छिरो ग्रीव दशविंशत्युरस्यपि ॥

"पंचचत्वारिंशद्बाह्वोः पंचपंचभिरंगुलौ । त्रिंशत्संख्योदरे शिश्ने बीजेऽष्टौ द्वादशक्रमात् ॥

"पंचषष्टीद्विपदयोर्ध्यंगुलौ पंचपंचभिः । त्रिंशतानि च षष्टिश्च पालाशं वृंतमाहरेत् ॥

"अलाभे यज्ञवृक्षाणां वृंतान्यपि समाहरेत्" ॥ इति ।

स्मृत्यन्तरेऽपि—"तावद्भिः पलाशपर्णैः शरीराकृतिरित्येके । कुशैरित्यन्ये । पर्णशरैरित्यपरे" इति ।

पराशरोऽपि—

"आहिताग्निर्द्विजः कश्चित्प्रवसन् कालचोदितः । देहनाशमनुप्राप्तस्तस्याग्निर्वर्तते गृहे ॥

"प्रेताग्निहोत्रसंस्कारः श्रूयतामृषिपुंगवाः । कृष्णाजिनं समस्तीर्य कुशैस्तु पुरुषाकृतिम् ॥

"षट् शतानि शतं चैव पालाशानां च वृंततः । चत्वारिंशच्छिरो दद्याच्छतं कंठे तु विन्यसेत् ॥

"बाहुभ्यां दशकं दद्यादंगुलीषु दशैव च । शतं तु जघने दद्याद्विंशतीरुदरे तथा ॥

" दद्यादष्टौ वृषणयोः पंच मेढ्रे तु विन्यसेत् । एकविंशतिमूरुभ्यां द्विशतं जानुजंघयोः ॥
" पादांगुलीषु षड् दद्याद्यज्ञपात्रं ततो न्यसेत् । शम्यां शिश्ने विनिक्षिप्य अरणीमुष्कयोरपि ।
" जुहूं तु दक्षिणे हस्ते वामे तूपभृतं न्यसेत् । पृष्ठे तूलूखलं दद्यात्पृष्ठे च मुसलं न्यसेत् ॥
" उरसि क्षिप्य दृषदं तंडुलाज्यतिलान् मुखे । श्रोत्रे च प्रोक्षणीं दद्यादाज्यस्थालीं च चक्षुषोः ॥
" कर्णे नेत्रे मुखे घ्राणे हिरण्यशकलं न्यसेत् । अग्निहोत्रोपकरणमशेषं तत्र निक्षिपेत् ॥
" असौ स्वर्गाय लोकाय स्वाहेत्येकाहुतिं सकृत् । दद्यात्पुत्रोऽथ वा भ्राताऽप्यन्यो वाऽपि च बांधवः ॥
" यथा दहनसंस्कारं तथा कार्यं विचक्षणैः । ईदृशं तु विधिं कुर्याद्ब्रह्मलोकगतिर्ध्रुवा ॥
" दहंति ये द्विजास्तं तु ते यांति परमां गतिम् ।
" अन्यथा कुरुते कर्म त्वात्मबुद्ध्या प्रचोदितः । भवंत्यल्पायुषस्ते वै पतंति नरकेऽशुचौ" ॥ इति ।

यदा प्रोषित आहिताग्निः देशांतरे म्रियते अग्निश्च स्वगृहे वसति तदानीमास्तीर्णे कृष्णाजिने पलाशवृंतैर्देहाकृतिं कुशबंधान्निर्माय तदवयवेषु यज्ञपात्राणि निक्षिप्य 'असौ स्वर्गाय लोकाय स्वाहा' इत्याहुतिं जुहुयात् । ततः कल्पसूत्रोक्तप्रकारेण कृत्स्नं संस्कारं समापयेत् । तत्र संस्कार्यस्याहिताग्नेर्ब्रह्मलोकप्राप्तिः संस्कर्तुः परमा गतिः । अयथोक्तकारिणः पंडितंमन्यस्य नरकप्राप्तिरित्यर्थः । **आपस्तंबस्तु**—"आहिताग्निं विजने प्रमीतं तैलद्रोण्यामवधाय शकटेनाहरंति तानि ग्राममर्यादायां प्रतिष्ठाप्याग्नीन्पितृमेधभांडं च निर्हरंति" इति । गृहे अग्न्यभावे देशांतरे आहिताग्निमरणे प्रेताधानं कृत्वा दहेत् । प्रेताधानासंभवे लौकिकानलदग्धस्याहिताग्नेः प्रेताधानाहिताग्नित्रयेण पुनर्दहनं न तमन्येन त्रेताग्निभ्यो दहंतीति नियमात् । एवं विच्छिन्नौपासनस्यानाहिताग्नेर्मरणे प्रेताग्निसंधानं देशांतरे तस्य मरणे लौकिकाग्निना विधिवद्दग्धस्यापि प्रेताग्निसंधानेन पुनर्दाहः । औपासनेनाहिताग्निं दहंतीति नियमात् । औपासनेन विना कृतस्याकिंचित्करत्वात् गृहे सति असति वौपासने प्रेताग्निसंधानेन औपासनमुत्पाद्य तेन दाहे कृते सति न पुनर्दाहः ।

" अग्नेर्देशांतरप्राप्तिर्दूरस्थोऽपि च पुत्रकः । अग्निमुत्पाद्य कर्तव्यं दाहकर्म स्वबंधुभिः " ॥ इति **स्मरणात्**। गृहे अग्नौ विद्यमाने देशांतरे मृतस्य लौकिकाग्निना दग्धस्य अस्थीन्याहृत्य पुनरौपासनेन दाहः। अस्थ्यसंभवे प्रतिकृतिदाहः। निकटदेशे मृतस्य गृहे विद्यमानमौपासनं नीत्वा तेन दाहः कार्यः। औपासनानयनासंभवे लौकिकाग्निना दग्ध्वा औपासनेन पुनर्दहेत् । अस्थिसंस्कारपर्यंतं अन्यदीयेन द्रव्येणौपासने हावयेत् । विच्छिन्नौपासनस्य देशांतरमरणे पुत्रासंनिधानविषये लौकिकाग्निं केचिदिच्छंति । तथा च **पारिजाते**—

" पुत्रो दूरगतः पित्रोः मृतिरत्र भवेद्यदि । लौकिकाग्निं भवेत्तत्र केचिदाहुर्मनीषिणः " ॥ इति । पूर्वमौपासनाग्निना दाहे केनापि निमित्तेन पुनर्दाहप्राप्तौ प्रेताग्निसंधानं पुनर्दाहनिमित्तमग्रे वक्ष्यते । यत्तूच्यते— " अग्नौ सति स्यादथ देहकृतिरस्थ्यस्ति चेदग्निरपेक्षणीयः ।
" अनस्थिकस्याप्यशरीरकस्य विनष्टवन्हेरुदकक्रियैव " ॥ इति । अस्यार्थः **केचिदाहुः**—अग्नौ गृहे विद्यमाने सति देशांतरे मृतस्य लौकिकाग्निना दग्धस्यास्थिसंभवे गृहे विद्यमानेनौपासनेन पुनरस्थिदाहः । अस्थ्यसंभवे प्रतिकृतिकल्पनेन पुनर्दाहः । विनष्टवन्हेर्विच्छिन्नाग्नेस्तु देशांतरे मृतस्य प्रेताग्निसंधानाहितौपासनेन दग्धस्यात एवानस्थिकस्य अस्थिसंस्काररहितस्याशरीरकस्य प्रतिकृतिसंस्काररहितस्य केवलमुदकक्रियैव इति ।

अन्ये तु इमं श्लोकमन्यथा व्याचक्षते । प्रोषितस्यानग्नेरलब्धास्थिकस्य केवलमुदकदानमात्रं न प्रतिकृतिदाहः । अस्थ्यस्थिशरीराणामन्यतमस्य सद्भाव एव दाह इति तत् " अस्थीनि यद्यलब्धानि पर्णैस्तत्पुरुषाकृतिम् । कृत्वा तद्गतदिग्भागे दहेयुः पितृमेधतः " ॥ इति **पूर्वोक्तबोधायनादि**बहुस्मृतिविरोधात् 'अनाकर्णितवार्तस्य पित्रादेः प्रोषितस्य च' पंचदशद्वादशवर्षानंतरमग्न्यस्थिशरीरासंभवेऽपि 'कृत्वा तत्प्रतिरूपकम्' इति प्रतिकृतिदाहविधानात् । पुरुषाहुतिर्यस्य प्रियतमामृतसंस्कारेणामुं लोकमभिजयतीति दहनस्यावश्यकत्वस्मरणाच्चोपेक्ष्यमित्याहुः । यथोचितमत्र ग्राह्यम् ।

अतो विच्छिन्नत्रेताग्नेरस्थ्यलाभे प्रेताधानेन प्रतिकृतिदाहः । अनाहिताग्नेः प्रेताग्निसंधानेन तद्दाहः ।

प्रेताग्निसंधानविधिः । तत्र प्रेताधानस्वरूपमाह **गृह्यसंग्रहकारः**—" अथातः प्रेताधानविधिं व्याख्यास्यामो विच्छिन्नाग्न्यादिमरणे प्राचीनावीत्यग्न्यायतनान्युद्धृत्यावोक्ष्य विहारं कल्पयित्वा प्रेतस्य दक्षिणं हस्तमरण्योरन्वारंभयित्वा यस्याग्नयो जुव्हतो मां सकामाः संक्रम्पयंते यजमानं मां संजानंतु ते हविषे सादिताय स्वर्गं लोकं प्रेतं नयंत्विति मथित्वा गार्हपत्यायतने निधाय तूष्णीं विहृत्य दक्षिणाग्निं तत आहवनीयं प्रणीय द्वादशगृहीतेन स्रुचं पूरयित्वा प्रजापतिं मनसा ध्यायन्नाहवनीये जुहुयात्ततः संस्कारोपक्रमः । आत्मारूढेष्वग्निषु दक्षिणं पाणिं लौकिकेऽग्नौ विधायाध्वर्युरुपावरोहेत्यवरोहयेत् । तंत्रेधाकृत्वा दाहयेत् । अरण्यारूढेषु तु मृतस्य दक्षिणेन पाणिना अरणिं स्पर्शयित्वा मथित्वाऽवरोहयेत् । आत्मसमारूढेष्वग्निषु पत्नीमरणे स्वयमेवावरोहयेत् । तंत्रेधा कृत्वा दाहयेत् । शरीरनाशे पलाशपर्णैः समूलैः कृष्णाजिने पुरुषाकृतिं कुशैर्वेष्टयित्वा विधिवद्दहेत् । देशांतरमरणश्रवणे आसंस्कारादग्निसंरक्षणार्थमग्निहोत्रं जुहुयात् । मृतिश्रवणानंतरं पाथिकृतीमिष्टिं पूर्णाहुतिं वा जुहुयात्तदर्थं विहृत्याजस्रान्कुर्यात् । या गौर्मृतवत्सा वत्सांतरेण दुह्यते तां दोहयित्वा प्राचीनावीती परिस्तरणदर्भान्प्रागग्रान्दक्षिणाग्रांस्तृणीयात् । गार्हपत्यस्य दक्षिणार्धे शीते भस्मन्यधिश्रित्य दक्षिणत उद्वास्य सकृदेव सर्वं परिषेचनादिवर्ज्यं तूष्णीं जुहुयात् । प्रेतं तैलद्रोण्यामवधाय शकटेन ग्राममर्यादामानयेन्निर्मथ्येन वा दग्ध्वाऽस्थीनि कृष्णाजिने संनह्य ब्रह्मचारी नियतभोज्यधःशायी नयेत् । त्रेताग्निं नीत्वा दहेत् " इति ।

प्रेताग्निसंधानमाहा**पस्तंबः**—" द्वादशगृहीतेन स्रुचं पूरयित्वा तूष्णीं हुत्वा प्रेतमात्या इत्यादि कर्म प्रतिपद्यत " इति । तद्व्याख्याने तु द्वादशगृहीतेनाज्येन व्याहृतिभिः अग्नयश्च इति मंत्रेण अनाज्ञातत्रयेण चाग्निसिद्धिः भूर्भुवः सुवरिति सर्वप्रायश्चित्तमिदं सर्वप्रायश्चित्तं सर्वत्र क्रियत इत्याश्मरथ्य इति च अनुगतेऽपि वोत्तरया जुहुयादिति च । अनाज्ञातमिति तिस्रोऽनाज्ञातेति जुहुयादिति **चापस्तंबेनोक्तत्वा**दिति । " अग्नौ नष्टे त्रयः कृच्छ्राः कर्तव्या वत्सरं प्रति " । उक्तकृच्छ्राचरणं च तत्तदतीतकालानुगुणं कार्यम् । **बौधायनस्तु**—"अथ यदि यदि गृहस्थस्यौपासनाग्निर्विच्छिद्येत प्राणेषूत्क्रांतेषु श्रोत्रियवचनादुद्धरेत् । श्रोत्रियागारादाहृत्याग्निमुपसमाधाय संपरिस्तीर्याज्यं विलाप्योत्पूय स्रुक्स्रुवं निष्टप्य संमृज्य स्रुचि चतुर्गृहीतं गृहीत्वा 'सप्त ते अग्न' इति सप्त व्याहृतिभिश्च हुत्वा पूर्वं देवा अपरेण प्राणापानाविति द्वाभ्यां " मा त्वा वृक्षौ संबाधिष्टां मा त्वा वृक्षौ संबाधेयाम् " इति च द्वाभ्याम् अग्नेभ्यावर्तिन्नग्ने अंगिरः इति द्वाभ्यामेकैकं प्रति चतुर्गृहीतं गृहीत्वा जुहोति । न ब्रह्मा न प्रणीता न चरुः न स्विष्टकृत् । अत ऊर्ध्वं पैतृमेधिकं कर्म प्रतिपद्यते " इति ।

आश्वलायनानां तु **शौनकोक्त**प्रकारेण अयाश्चाग्नेरतो देवा इति द्वाभ्यां मनोज्योतिरिति व्याहृतीभिश्चतसृभिः पृथक् हुत्वाग्निसिद्धिः पंचभिर्मंत्रैरग्निसिद्धिः ।

आश्वलायनीयकारिकायां तु अनाहिताग्नेः प्रेतस्य संस्कारविधिरुच्यते—

“ स्नातः पवित्रपाणिः सन्नुपलिप्य यथाविधि । प्राणानायम्य संस्कर्ता प्राचीनावीत्यनंतरः ॥
“ प्रेतनाम तु षष्ठ्योक्त्वा विच्छिन्नौपासनेन तु । करोमि संधानमिति होमद्रव्यं विधाय च ॥
“ आग्नयोंलिख्य याम्यांतमवोक्ष्याग्निं निधाय च । विपरीतं परिस्तीर्य दक्षिणे पात्रसादनम् ॥
“ दर्भेषु दक्षिणाग्रेषु सादयेदेकशः क्रमात् । प्रोक्षणीं स्रुक्स्रुवौ चैवमाज्यस्थालीं यथाक्रमम् ॥
“ उत्पूय प्रोक्षणीं प्रोक्ष्य पात्राणि च ततः परम् । संस्कृत्य तूष्णीमाज्यं च संमृज्य स्रुक्स्रुवौ ततः ॥
“ प्रसव्यं परिषिच्याथ जुहुयाज्जातवेदसि । चतुर्गृहीतेनाज्येन ह्ययाश्चेत्यनया ऋचा ॥
“ अतो देवा इति द्वाभ्यां मनोज्योति ऋचा ततः । स्रुवेणाथ व्याहृतिभिर्जुहुयाच्च पृथक् पृथक् ॥
“ ततोऽपसव्यं पर्युक्ष्य नमस्कृत्य हुताशनम् । औपासनाहुतिः सायं प्रातश्च जुहुयाद्वतैः ॥
“ प्रेतस्य नामगोत्रादि द्वितीयांतमुदीर्य तु । पितृमेधेन विधिना तथैवौपासनवन्हिना ॥
“ संकल्प्य संस्करिष्यामीत्यथैनं स्नापयेच्छवम् ।
“ केवलं विद्यमानाग्ने स्नात्वा संकल्पयेद् बुधः । अस्ति चेद्हुतः काले तं हुत्वैव गुरुं वदेत् ”॥ इति ।

अत्र पत्न्यसंनिधाने प्रतिकृतिमाह **त्रिकांडी**—

‘यस्य भार्या विदूरस्था पतिता व्याधिताऽपि वा। अनिच्छुः प्रतिकूला वा तस्याः प्रतिनिधौ क्रिया’॥इति। दर्भादिना भार्याप्रतिनिधिं कृत्वा अग्निसंधानं कुर्यादिति । व्याहृतयः पूर्वं देवा अपरेण प्राणापानौ मा त्वा वृक्षाविति द्वाभ्यामग्नेवभ्यावर्तिन्निति चतस्र इत्येतैः षोडशाज्याहुतीर्जुहुयादिति ।

रजस्वलाद्यग्निसंधानमाह **बोधायनः**—

“ म्रियमाणस्य चेद्भार्या सूतिकर्तुमती तु वा । दुर्गां मनस्विनीं हुत्वा ततस्तंतुमतीमृचम् ॥
“ उद्बुध्यस्व त्रयस्त्रिंशद्याहुत्या च समस्तया । व्याहृत्या त्रिरनाज्ञातं महाव्याहृतिभिस्तथा ।
“ हुत्वा चतुर्गृहीतेन सर्पिषा यास्य संस्क्रिया ” ॥ इति । दुर्गा जातवेदसे सुनवामेत्यृक् । मनस्वती मनो ज्योतिर्जुषताम् इत्यृक् । तंतुमती तंतुं तन्वन्निति त्रयस्त्रिंशत्तंतव इति । महाव्याहृतयः भूरग्नये च पृथिव्यै च इत्याद्याश्चतस्रः। अत्र ‘जुहुयात्तद्यमो द्वाभ्यां वरं दत्वाऽथ संस्क्रियेति ’ केचित्पठंति । तत्पक्षे तद्यमो राजा भगवान्यस्मिन्नेनमिति द्वाभ्यां हुत्वा वरं धेनुं दत्वा संस्क्रिया कार्या । पूर्वोक्तमन्त्रेणाग्निं संधाय प्रेतमा त्वा इत्यादि कुर्यात् ।

असंनिधाने विशेष उक्तः **पितृमेधसारे**—“दूरभार्ये प्रेते प्रोषितभर्तृकायां चतुर्गृहीतेनाज्येन सप्त ते अग्ने सप्त व्याहृतयः ।

ननु “बव्हल्पं वापि यत्कर्म स्वगृह्ये प्रतिपादितम् । तावन्मात्रे कृते सर्वः शास्त्रस्यार्थः कृतो भवेत्”॥ इति **स्मरणात्** स्वगृह्ये यावदुक्तं तावदेवानुष्ठेयं अतो **बोधायनी**यानामेव एतदेवानुष्ठानं न सर्वेषामिति चेन्न । स्वगृह्यानुक्तौ गृह्यांतरोक्तमपेक्षितमविरुद्धमनुष्ठेयमेव । सर्वशाखाप्रत्ययन्यायेन साकांक्षाणामाकांक्षापूरणस्य कर्तुमुचितत्वात्सर्वश्रुत्युपसंहारात् श्रौतेषूक्ते यथाविधिः सर्वस्मृत्युपसंहारात्स्मार्तेषूक्तेस्तथा विधिरिति **कात्यायनस्मरणात्**—

अतो ‘ न जातु परशाखोक्तं बुधः कर्म समाचरेत् ’ इत्यादिनिषेधः स्वसूत्राननुष्ठानेन परसूत्रोक्तानुष्ठानविषयः । यदाह **कात्यायनः**—

“ स्वशाखाविधिमुत्सृज्य परशाखाश्रयं च यत् । कर्तुमिच्छति दुर्मेधाः मोघं तस्य तु तत्फलम् ॥

“ यन्नाम्नातं स्वशाखायां यथोक्तमविरोधि च । विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत् ” ॥ इति ।

अत एवोपनिष्क्रमणमुपनीतानामुपवीतधारणानुपाकर्मणि ब्रह्मचारिणां क्षौरं उपवीतधारणं संध्यावंदनगायत्रीजपादीनि **आपस्तंबा**द्यनुक्तानि **बोधायना**दिभिरुक्तानि सर्वे शिष्टा आचरंति । स्वसूत्राभावे परसूत्रेण दाहादिस्वसूत्रोक्ता अपि दाहाद्येकोद्दिष्टपर्यंताः पूर्वक्रियानुष्ठापकस्वसूत्रविदलाभे परसूत्रेणापि कर्तव्याः । तदाह **भरद्वाजः**—

“ अलब्ध्वात्मीयसूत्रस्य श्राद्धान्तं परसूत्रतः । कुर्यात् सपिंडीकरणं स्वसूत्रेणैव नान्यतः ” ॥ इति । **अंगिरा** अपि—

“ सूत्रांतरेण यद्दग्धं प्रेतं तस्योत्तराः क्रियाः । स्वसूत्रेणैव कर्तव्याः सापिंडी तु विशेषतः”॥ इति । उत्तरा दाहाद्येकोद्दिष्टपर्यंताभ्यः क्रियाभ्यः परा इत्यर्थः । याजुषिकाणां स्वशाखाविषय**बोधायन**सूत्रसद्भावे तदेव ग्राह्यम् । **तथाहांगिराः**—

“ स्वसूत्रे विद्यमाने तु परसूत्रेण वर्तते । बोधायनमतं कृत्वा स्वसूत्रफलभाग्भवेत् ” ॥ इति । एवं स्वस्वशाखाविषयसूत्रांतरसंभवे तदेव ग्राह्यम् । अन्यथा ‘यः स्वशाखां परित्यज्य’ इति पूर्वोक्तदोषप्रसंगात् । स्वशाखाविषयसूत्रालाभे ‘ धर्मिलोपाद्वरं धर्मलोपः ’ इति **न्यायात्** शाखान्तरेणापि दहनं कर्तव्यम् । तत्र विशेषमाह **भरद्वाजः**—

“ यस्मिन्सूत्रे विवाहः स्यात्तेन प्रेतस्य च क्रिया । पिंडसंसर्जनादर्वाक्सपिंडी तु स्वसूत्रतः”॥ इति । विवाहसमये स्वसूत्रालाभे येन सूत्रेण विवाहः कृतः तेनैव सूत्रेण स्वसूत्रालाभेऽपि सपिण्डीकरणादर्वाक् तेन प्रेतक्रिया कार्येति कैश्चित् व्याख्यातम् । स्वसूत्रेण दाहादिश्राद्धकर्माणि कार्याणीति **पितृमेधसारे** व्याख्यातम् । यथोचितमत्र ग्राह्यम् ।

“ उपात्ते तु प्रतिनिधौ मुख्यार्थो यदि लभ्यते । तत्र मुख्यमनादृत्य गौणेनैव समापयेत् ” ॥ इति **स्मृत्यर्थसार**वचनस्यात्रापि तुल्यत्वेनान्यसूत्रेण दाहे कृते न मध्ये स्वसूत्रप्रक्रियावकाशः । यत्तु **कात्यायनवचनम्**—

“ अक्रिया त्रिविधा प्रोक्ता विद्वद्भिः कार्यकारिभिः । अक्रिया च परोक्ता च तृतीया च यथाक्रिया ॥

“प्रधानस्याक्रियायां तु सांगं तत्क्रियते पुनः । तदंगाकरणे कुर्यात्प्रायश्चित्तं न कर्मतः ” ॥ इति तत्प्रतिपदविहितव्यतिरिक्तविषयम् । यत्तु **चंद्रिकायां** परसूत्रेण दाहे पुनर्दहनमुक्तम् “अनात्मीयेन शास्त्रेण यो दग्धस्तं च शास्त्रतः” इति तत्पूर्वोक्तानेकस्मृतिविरोधाच्छिष्टाचारविरोधाच्चोपेक्षणीयम् । यत्तु **चंद्रिकायां** “ कर्तुरन्येषां च संध्याकर्माणि दहनसंकल्पात्प्राक् स्नानाच्छुद्धिः

“आरंभात्प्राग्यदि स्नायात्तस्य शुद्धिर्भविष्यति । आरब्धे तु च संस्कारे शुद्धिस्तु दहनात्परम् ” ॥ इति **स्मरणात्** संकल्पात् प्राक् शुद्धिः उपवीतादिनियमश्च । स्नानाचमनप्रदक्षिणनमस्कारप्राणायामानुपवीती कुर्यात् ।

“ प्राणायामे नमस्कारे स्नाने चैव प्रदक्षिणे । पैतृके प्रेतकृत्येऽपि ह्युपवीतं विधीयते ” ॥ इति **स्मरणात्** ।

प्रेतकर्मादौ शुध्यर्थाचमनप्राणायामावश्यककार्यौ

"कर्मावसाने कर्मादौ मृतावाचमनं पुनः । कुर्यात्स्वकर्मसिध्यर्थं सर्वदा सर्वकर्मसु ॥

"ततोऽभ्यंतरशुध्यर्थं प्राणायामान्समाचरेत्" ॥ इति **भरद्वाजस्मरणात्** । संकल्पप्रभृति दशाहहोमात्प्राचीनेषु कर्मसु कर्ता प्राचीनावीती दक्षिणामुखश्च भवेत् । तथा **शुनःपुच्छः**—

"पैतृके प्रेतकृत्येषु प्राचीनावीतमिष्यते । दक्षिणाग्राश्च दर्भाः स्युः स च वै दक्षिणामुखः" ॥ **मनुरपि** (३।२७९)—

"प्राचीनावीतिना सर्वमपसव्यमतंद्रिणा । पित्र्यमा निधनात्कार्यं विधिवद्दर्भपाणिना"॥ आ निधनात् मरणमारभ्येत्यर्थः । तथा च **बोधायनेन** श्रुत्यर्थोऽभिहितः "प्राचीनावीतं पितॄणामिति" । मृतानामेवेदमुक्तं भवतीति **बोधायनीये**—

"प्राचीनावीतिना कार्यं प्रेतकर्म च पैतृकम् । निवीतिनो वहेयुस्ते ज्ञातिनोऽन्ये च वाहकाः"॥ इति । संकल्पप्रभृति प्राचीनावीतं कार्यमिति तद्व्याख्यानेऽभिहितम् । संकल्पादौ नियमः **स्मृत्यंतरेऽभिहितः**-

"आवाहनेऽर्घ्ये संकल्पे पिंडदाने तिलोदके । अक्षतासनयोः पाद्ये गोत्रं नाम च कीर्तयेत्"॥ इति । **स्मृत्यंतरे**—

"स्नात्वा स्वशक्त्या द्रविणं दत्वा सभ्यान्प्रदक्षिणम् । परीत्य तैरनुज्ञातः कर्म संकल्पयेत्ततः"॥ इति । **पितृमेधसारे** संकल्पप्रकारोऽभिहितः— अमुकगोत्रममुकशर्माणं प्रेतं अमुकगोत्रममुं प्रेतमिति वा अमुनाग्निना पैतृमेधिकेन विधिना संस्करिष्यामीति । ब्रह्ममेधे तु ब्रह्ममेधविधिनेति । ब्रह्ममेधसंस्कारो मोक्षकांक्षिणां श्रोत्रियाणामेव । तथा **चापस्तंबः**–"उत्तरं पितृमेधं व्याख्यास्यामो यं ब्रह्ममेध" इत्याचक्षते । अथाप्युदाहरंति

"द्विजातीनामपवर्गार्थोऽर्थतस्तत्त्वदर्शिभिः । ऋषिभिस्तपसो योगाद्वेष्टितं पुरुषोत्तमम् ॥

"होतॄंश्च पितृमेधं च संसृज्य विधिरुत्तरः । विहितस्तु समासेन क्रतूनामुत्तमः क्रतुः"॥ इति । अत्र **कपर्दिभाष्यम्**–ब्रह्मविद्भ्यः कर्तव्यो ब्रह्ममेध इत्याचक्षते । अथवा ब्रह्मनिष्ठानामिति केचित् । ब्रह्म पिधीयत इति । अथाप्युदाहरंति श्रुतिं द्विजातीनामित्यारभ्य क्रतूनामुत्तमः क्रतुरित्यंता श्रुतिरानीयते । द्विजातयो ब्राह्मणा एव । इह तेषामपवर्गो मोक्षः । न पुनर्जन्म । एतद्विधानं एभ्यः प्रयुज्यते । केचिदपवर्गं स्वर्गं इति वदंति तद्युक्तं पूर्वेणैव स्वर्गसिद्धेः । कैर्दृष्टम् इति संदिग्धे उच्यते । अर्थतस्तत्त्वदर्शिभिरिति । केनोपयेनेति केचित् तपसो योगात् । किमर्थं एतद्विधानमिति चेद्वेष्टितुं वेष्टनं प्रवेशनं प्राप्तिः सायुज्यं इत्यर्थांतरं किं वेष्टितुमिति चेत् पुरुषोत्तमं पुरुषाणामुत्तमं नारायणं तत्प्राप्त्यर्थं तत्र पिण्डितार्थं उच्यते । द्विजातीनां मोक्षार्थं वेदशास्त्रतत्त्वज्ञैः ऋषिभिस्तपसः प्राधान्यादेतत् विधीयत इति । किं तदिति चेत् होतॄन्पितृमेधं च संसृज्य विधीयत इति ।

भाष्यांतरे तु–ब्रह्मशब्देन चतुर्होतार उच्यंते । 'ब्रह्म वै चतुर्होतारः एतद्वै देवानां परमं गुह्यं ब्रह्म यच्चतुर्होतार' इत्यादि **श्रुतेः** । (तै. २।२।१) मेधो यज्ञः । ब्रह्मसंयुक्तो मेधः चतुर्होतृसंयुक्तो दहनकल्प इति यावत् । तत्र "अपूर्वमंते स्यात्" इति **न्यायेन** होतृपितृमेधसमावेशो होतृकांडेऽन्ततो भवति । स एष विधिः क्रतूनां मध्ये श्रेष्ठः । उत्तमः क्रतुरिति गौणनिर्देशः अश्वमेधादिवत् । विशिष्टपारलौकिकफलसाधन इत्यर्थः । पितृमेधेनापि प्रेतस्य पारलौकिकसुखावाप्तिमाहापस्तंबः (ध. सू. २।९।२३।११)–

"यत्तु श्मशानमुच्यते ननु कर्मणामेषोऽते पुरुषसंस्कारो विधीयते ततः परमनंतफलं स्वर्गशब्दः श्रूयते" इति ।

श्रुतिरपि (तै. ५।२-३)—" स एष यज्ञायुधीयजमानोंजसा स्वर्गं लोकमेति " इति । **बोधायनोऽपि**—' मृतसंस्कारेणामुं लोकम् ' इति । **संग्रहे**—

" खननं दहनं त्याग इति या त्रिविधोच्यते । शरीरसंस्क्रिया सा स्यात् परलोकजयावहा ॥
" विधिः श्मशानसंयुक्तो योऽन्यः संचयनादिकः । कर्मोपयुक्तं देहस्य प्रतिपत्त्यर्थ एव सः " ॥ इति ।

मनुरपि (२।२६)—

" वैदिकैः कर्मभिः पुण्यैर्निषेकाद्यैर्द्विजन्मनाम् । कार्यः शरीरसंस्कारः फलवान्प्रेत्य चेह च" ॥ इति ।
निषेकाद्यैः श्मशानपर्यंतैरित्यर्थः ।

हारीतोऽपि—"द्विविध एव संस्कारो भवति । ब्राह्मो दैवश्च । गर्भाधानादि स्मार्तो ब्राह्मः । पाकयज्ञाः हविर्यज्ञाः सोमयज्ञाश्चेति दैवः । ब्राह्मसंस्कारसंस्कृतः ऋषीणां समानतां सायुज्यं गच्छति । दैवेनोत्तरेण संस्कृतो देवानां समानतां सालोक्यं सायुज्यं गच्छति " इति ।

एवं च संस्कारस्य मृतातिशयाधायतकतया संस्कारफलस्य संस्कर्तृगामित्वाभावात् संस्करिष्यामीति परस्मैपदप्रयोग एवात्र साधुरित्याहुः ।

प्रेतालंकरणम्—पुत्रादयः प्रेतं संस्नाप्य वस्त्रगंधमाल्याद्यैरलंकुर्युः । तथा च **कात्यायनः**—

" घृतेनाभ्यक्तमाप्लुत्य सवस्त्रं चोपवीतिनम् । चंदनोक्षितसर्वांगं सुमनोभिश्च भूषयेत् " ॥

प्रचेताः—

" स्नानं प्रेतस्य पुत्राद्यैर्वस्त्राद्यैः पूजनं तथा । प्रेतं दहेच्छुभैर्गंधैश्चर्चितस्रग्विभूषितम् " ॥ इति ।

स्मृत्यंतरे—"पुष्पैस्तु गंधमाल्याद्यैर्माधवांघ्रिसमर्पितैः । यदि प्रेतमलंकुर्यात्स याति परमां गतिम्" ॥ इति ।

गौतमः—"स्नापयित्वाऽलंकृत्य च दक्षिणाग्रान्दर्भान्संस्तीर्य तेषु यज्ञियैः काष्ठैर्दक्षिणाग्रैर्दारुचितिं चित्वा प्रेतस्य केशश्मश्रुलोमनखानि वापयित्वा स्नापयित्वा च " ॥ इति ।

आपस्तंबः—"अथास्य दक्षिणेन विहारं परिश्रिते केशश्मश्रुलोमनखानि वापयित्वाऽलंकृत्य " इति । **बोधायनेनापि**—" प्रेताहुत्यनंतरं वपनमुक्तम् । अत्र केचिदाहुः । आहिताग्निसंस्कारस्योपक्रमा दाहिताग्नेरेव वपनं अनाहिताग्नेः प्रेतस्य वपनं न विद्यते " अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रस्पर्शनदूषिता " इति शूद्रस्पृष्टस्य शवहविषो दुष्टत्वस्मरणादिति । अपरे तु सोऽयमेवं विहित एवानाहिताग्नेः पात्रचयेनेष्टकावर्जमित्यापस्तंबादिभिरनाहिताग्नेः प्रेतस्य पात्रचयनेष्टकावर्जितस्य संभावितस्यातिदेशात् शूद्रस्पृष्टशरीरहविषो दुष्टत्वस्मरणस्य विहितव्यतिरिक्तविषयत्वात् वपनानंतरं स्नानेन तच्छुद्धेश्चानाहिताग्नेरपि प्रेतस्य वपनमावश्यकमिति वदन्ति । तथा च **गोपालभाष्ये**—"औपासनं हि सर्वस्यानाहिताग्नेर्गृहमेधिनो भवति । दक्षिणतोऽग्नेः परिश्रिते देशे पात्रचयनेष्टकावर्जितस्य संभावितस्य कर्मज्ञानातिदेशाच्छूद्रस्पृष्टहविषो दुष्टत्वस्मरणस्याविहितव्यतिरिक्तविषयत्वाद्वपनानां केशश्मश्रुवापनादिसमानामिति । अत्र शिष्टानुचारानुसारेण यथोचितं ग्राह्यम् ।

प्रेतनिर्हरणप्रकारः । अहतेन वाससा मुखाच्छादनमाह **कात्यायनः**—" मुखे वस्त्रं पिधायैनं निःसरेयुः सुतादयः " इति । शाखाभेदेन शवाच्छादनवस्त्रभेदमाह **मनुः**—

" बह्वृचः खंडवस्त्रेण शवं प्रच्छादयेन्नरः । अखंडितेन वस्त्रेण यजुःशाखाशवं तथा " ॥ इति ।

स्मृत्यंतरे तु—

" पादमात्रमवच्छाद्य मूलतोऽहतवाससा । कर्ता तदेकदेशं तु कुर्याद्वासस्तथोत्तरम् " ॥ इति ।

---

१ क्ष-स्त्र । २ क्ष-शे ।

आपस्तंबः—" औदुंबर्यामासंद्यां कृष्णाजिनं दक्षिणाग्रीवमधरलोममास्तीर्य तस्मिन्नेनमुत्तानं निपात्य पत्तोदशेनाहतेन वाससा प्रोर्णोति" इति। पत्तोदशेन पत्तः पादप्रदेशे दशावसानं समाप्तिर्देशो यस्य वाससः तत् पत्तोदशं तेनेत्यर्थः। अत्र कृष्णाजिनमाहिताग्निविषयम्। अन्यस्यासंदीमात्रमेव "औदुंबर्यामासंद्यां दक्षिणाशिरसमुत्तानं संवेश्योदग्दशेन वाससा प्रच्छाद्य" इति **स्मरणा**दाचाराच्च। आसंद्यलाभे **बोधायनः**—"आसंद्या तल्पेन शकटेन वा संवेष्टच्य वाससा प्रवयसो वा वहेयुः" इति। ते च निवीतिनो वहेयुः। तथा च स **एव**—

" अथ निवीतिकार्याणि व्यवायः स्त्रीप्रजासंस्कारः प्रेतोद्वहनानि मनुष्यकार्याणि " इति । **आश्वलायनोऽपि** (४।२।९-१०)—" अन्वंचोऽमात्या अधोनिवीताः प्रवृत्तशिखाः ज्येष्ठप्रथमाः कनिष्ठजघन्याः प्राप्यैकं भूमिभागं कर्तोदकेन शमीशाखया त्रिः प्रसव्यमायतनं परिव्रजन् प्रोक्षत्यपेत-वीत इति " । **स्मृत्यंतरे**—" निवीतिनो वहेयुस्ते ज्ञातयोऽन्ये च वाहकाः " ॥

वसिष्ठः—" औदुंबर्यामथासंद्यां वहेदूर्ध्वमुखं शवम्। न ग्रामाभिमुखं नाधो नयेयुर्याम्यशीर्षकम् ॥
" वृद्धाः प्रेतस्य पुरतः स्त्रियो बालाश्च पृष्ठतः । अधः कृतोत्तरीयाः स्युः प्रविमुक्तशिरोरुहाः ॥
"गच्छेयुर्बांधवाः पश्चात्त्वग्नेः प्रेतस्य चान्तराम्" इति । **बोधायनविधौ** तु क्षीरं दधीत्युपक्रम्य पुरस्तादग्निसंस्कर्ता मुक्तशिखो मध्यतः शवमिति अग्निशवयोर्मध्ये कर्ता गच्छेदित्यर्थः। **स्मृत्यंतरे**—
" प्रेतस्य पार्श्वयोरग्रे न गच्छेयुः कदाचन । यस्मादग्रे तु गंतॄणामायुः क्षीणं पदेपदे " ॥ इति ।

अग्रे तु संभारा नेतव्याः । तथा चा**पस्तंबः** " अग्नीनग्निभांडमग्निहोत्रोच्छेषणं येन चान्येनार्थी भवति न हीनमन्वाहरेयुरथ तमाददते " इति । हीनं कर्मण्यनुपयुक्तं न किंचिदपि अन्वाहरेयुः । किं तु येन साधनेन कर्मण्यर्थी भवति तदेवान्वाहरेयुरित्यर्थः । **बोधायनोऽपि** " अथाग्रयोऽर्थं पात्राणि दध्याज्यं दर्भान् राजगवीयं चान्यदप्येवं युक्तम् " इति । **आश्वलायनीये** (४।२।१–३) "अथैतां दिशमग्निं नयंति यज्ञपात्राणि चान्वंचं प्रेतमयुजो मिथुनाः प्रवयसः पीठचक्रेऽण गोयुक्तेनेत्येके " इति । **पितृमेधसारे** " अग्रेग्निमथसंभारांस्तिलांस्तंडुलांश्चरुं पलाशशाखां हिरण्यशकलान्याज्यं पात्राणि दर्भाश्मसिकताश्च प्रस्थाप्याथ प्रेतं निर्हरेयुः" इति।
" न ग्रामाभिमुखं प्रेतं निर्हरेयुः " इति । अत्र **हारीतः**—
" न ग्रामाभिमुखं प्रेतं निर्हरेयुः कथंचन। निर्हारे शवदृष्ट्या तु ग्रामे नश्यति वीक्षितः " ॥ इति।

मनुः (५।९१)—

" दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत् । पश्चिमोत्तरपूर्वैस्तु यथासायं द्विजातयः " ॥

पुरःश्रवणान्न ग्रामे नियमः। निर्हरणे शूद्रनिषेधः **स्मर्यते**—
"न विप्रं स्वेषु तिष्ठत्सु मृतं शूद्रेण हारयेत्। अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रसंस्पर्शदूषिता "॥इति।

विज्ञानेश्वरः—
" यस्यानयति शूद्रोऽग्निं तृणं काष्ठं हवींषि च । प्रेतत्वं हि सदा तस्य स चाधर्मेण लिप्यते " ॥ इति ।

आतुरव्यञ्जनम्। आतुरव्यञ्जनप्रकारमाह **बोधायनः**—" अथास्य भार्याः कनिष्ठप्रथमाः प्रकीर्णकेश्यो व्रजेयुः पांसूनावपमानाः" ॥ इति । **स एव**—" एतस्मिन् कालेऽस्यामात्याः तिसृभिरङ्गुलीभिरुपहत्य पांसूनंसेष्वावपन्त " । इति । अमात्याः ज्ञातयः । **आपस्तम्बश्च**—
"हवींषि च । प्रेतत्वं हि सदा तस्य स चाधर्मेण लिप्यत " इति ।

---

१ क्षग-मुक्त । २ क्ष-पि । ३ क्ष-नं । ४ क्ष-चोचकेण ।

आतुरव्यंजनप्रकारमाह **बोधायनः**—"सर्वत एव सहसा प्रज्वालयेत् । ब्रह्मलोकमजैषीदित्येनं जनयात् " इति । वृष्ट्यादिना चिताग्निनाशे **यमः**—
" यजमाने चितारूढे पात्रणासे तथा कृते । वृष्ट्याद्यभिहते चाग्नौ ततं प्रच्छिन्नयानिकाः ॥
यदि प्रैति प्रेतेऽमात्याः प्राचीनावीतिनः केशान्प्रकीर्य पांसूनावपंत" इति ।
पांसूनामावपनस्थानमुक्तं **भाष्यकारेण** " स्वमूर्धं स्वं सेषुव " इति ।

पथि बलिविधिः । अनंतरं कर्तव्यमाह **कात्यायनः**—
" आमपात्रेऽन्नमादाय प्रेतमग्निपुरःसरम् । एकोऽनुगच्छन् तस्यार्धमर्धं पर्युत्सृजेद्भुवि ॥
"अर्धमा दहनं प्राप्तमासीनो दक्षिणामुखः। सव्यंजान् वाच्य शनैः सतिलं पिंडदानवत्" ॥इति ।
पिंडदानविधिना आदहनं श्मशानपर्यंतं स्वगृह्योक्तविधिना अग्नौ प्रक्षिपेदित्यर्थः ।
शवाग्निपतनप्रायश्चित्तम् । अत्र शवाग्निपतने प्रायश्चित्तमुक्तं **संग्रहे**—
" ग्रामश्मशानयोर्मध्ये पतिते तु शवानले । पुनः कर्म प्रकुर्वीत प्रेताहुतिपुरःसरम् "॥ प्रायश्चित्तपुरःसरमिति पाठांतरम् । तदा प्रायश्चित्तं कृच्छ्रद्रव्यं दत्वा प्रेताहुतिपूर्वकं कर्म कुर्यात् । इदं च कृत्स्नाग्निपतने । प्रणीतार्घ्यसोमस्कन्नादौ दृष्टन्यायस्यात्रापि तुल्यत्वात् । एकदेशपतने तु तदुद्धृत्य योजयेत् ।

दहनदेशनिरूपणम् । दहनदेशमाह **गौतमः**—
"आग्नेय्यां वाऽथ नैर्ऋत्यां दाहदेशं प्रकल्पयेत् । उद्वास्य कण्टकान् वृक्षान्वनस्पत्यौषधीरपि ॥
" ऊर्ध्वबाहुमितं याम्यं घातं प्राक् दक्षिणायनम् । पंचारत्निमितं कुर्युरधस्तात् द्वादशांगुलम् ॥
"दक्षिणाग्रान्कुशांस्तीर्त्वा तिलान्क्षिप्त्वा यथा[1]ग्निकः। काष्ठैरूर्ध्वमुखं दद्यान्न नग्नं तु यथा हविः"॥इति ।
आग्नेयां नैर्ऋत्यामिति ग्रामापेक्षयाऽभिहितम् । **आश्वलायनः** (४।१।६)—" भूमिभागं खानयेत् ।
दक्षि[2]णपूर्वस्यां दिशि दक्षिणापरस्यां वा दक्षिणाप्रवणं प्राक्दक्षिणाप्रवणं दक्षिणाप्रत्यक्प्रवणमित्येके यावानुद्वाहुकः पुरुषस्तावदायामं व्याममात्रं तिर्यग्वितास्त्यर्वा[3]गभिहित आकाशं श्मशानम् " इति । **आपस्तंबः**—" दहनदेशं जोषयते दक्षिणाप्रत्यक्प्रवणमनिरिणमसुषिरमनूषरमभंगुरमनुपहतमविसृद्वार्यनवछिन्नप्रवणं यस्माद्दक्षिणाप्रतीच्य आपो निःसृत्य उदीच्य एत्य महानदीमेत्य प्राच्यः संपद्यंते समं वा सुभूमिं बहुलौषधिं यस्मादारात्क्षीरिणो वृक्षाः कण्टकिनश्च " इति । यत्र तृणानि नोत्पद्यंते तत् इरिणं ततोऽन्यदनिरिणम् । यत्र मूषिकादिकृतसुषिरं न विद्यते तदसुषिरम् । ऊषराः मृद्विशेषाः । ते यत्र न विद्यंते तदनूषरम् । शैथिल्यरहितमभंगुरम् । यत् पुरुषांतरदहनचंडालनिवासादिभिरुपहतं न भवति तदनुपहतम् । यत्र विविधं द्रणं प्रदरादिकं न विद्यते तदविसृद्वारि । एवं लक्षणं देशं दहनाय परिगृह्णीयात् । यस्माद्देशादापो दक्षिणाप्रतीच्यो निःसरंति दक्षिणाप्रत्यक्प्रवणत्वाद्देशस्य तास्तथा निःसृत्य उदग् गत्वा महानदीमनुप्रविश्य तदुदकेन सह प्राग्गामिन्यो भवंति तथाभूतं वा देशं गृह्णीयात् । समं वा देशं जोषयते । शोभना भूमिर्यस्य स सुभूमिः । समं वेत्यत्रापरं विशेषणम् । बहुलौषधिमिति आरादिति दूरार्थमव्ययं यतो देशाद्दूरे क्षीरिणः वटोदुंबरादयो वृक्षाः कंटकिनश्च खादिरादयः क्षीरिणः कंटकिनश्च समीपे यस्य न संति तं देशं परिगृह्णीयादित्यर्थः । **आश्वलायनस्तु** तद्रहितदेशालाभे तेषां समूलोद्धारेण देशक्लृप्तिमाह ' कंटकिक्षिरिणस्तु ' (४।१।१३) इत्यादिना । **पितृमेधसारे**—" उद्धत्यावोक्ष्य हिरण्यशकलमवधाय

१ क्ष–कौ । २ क्ष–दक्षिणस्य । ३ कखगक्ष–वितस्तिखागभिहित ।

दर्भान्संस्तीर्य दक्षिणाग्रैर्याज्ञिकैः काष्ठैरवंशकैर्यैस्तृणैर्यैर्वेति ज्ञापनात् शकैर्यैर्वा ब्राह्मणानीतैः तुलसीकाष्ठयुक्तां दक्षिणाप्राचीं चितिं कुर्यात्” । **बोधायनः**–“दारुचितिं कुर्वंति दक्षिणाप्राचीमेषा हि पितॄणां प्राची दिगिति विज्ञायते वायव्यमौपासनं पुरस्ताद्वा ” इति ।

तुलसीकाष्ठप्रशंसा कृता **प्रल्हादसंहितायाम्**—

“ शरीरं दह्यते यस्य तुलसीकाष्ठवन्हिना । नरो यत्कुरते पापं तस्मात्पापात्प्रमुच्यते ॥

“ तीर्थे यदि न संप्राप्तं स्मरणं कीर्तनं हरेः । तुलसीकाष्ठदग्धस्य नरस्य न पुनर्जनिः ॥

“ यदेतत्तुलसीकाष्ठं मध्ये वाऽपि चितौ कृतम् । दाहकाले भवेन्मुक्तिः पापकोटिकृतस्तथा ।

“ तुलसीकाष्ठमिश्रा तु यावत्प्रज्वलिता चितिः । दह्यंते तस्य पापानि कल्पकोटिकृतान्यपि ”॥

तंत्रप्रोक्तत्वादेतत्तांत्रिकविषयम् । न तु वैदिकविषयम् ।

“ न दह्यात्कुणपं विप्रस्तुलसीकाष्ठवन्हिना । यदि दह्याद्विमोहेन स विष्णोर्दाहको भवेत् ” ॥ इति **विष्णुधर्मोत्तरे** निषिद्धत्वादित्याहुः । **व्याघ्रपादः**—

“ नाधोमुखं न नग्नं च दहेरन्मूलदूषितैः । अयज्ञीयसमिद्भिश्च चंडालपतिताहृतैः ॥

“ क्रिमिकीटादिदुष्टैश्च न दहेत्तु चिरंतनैः । वस्त्रं परित्यजेदर्धमर्धं तु परिधापयेत् ” ॥ इति ।

प्रचेताश्च—“न नग्नं तु दहेद्वस्त्रं किंचिद्देयं परित्यजेत् ” इति । अत्र **चंद्रिकाकारः**—‘अर्धं तु श्मशानवासिने देयं परित्यजेदित्यर्थः’ इति । एवमेव **विज्ञानेश्वरः** । **स्मृतिरत्ने** तु व्याख्यातं ‘किंचिद्देयमिति प्रेताच्छादनवस्त्रादुत्कृत्तं किंचिद्वस्त्रखंडनं म्लेंछचंडालादिभ्यो दद्यादित्यर्थः’ इति । **आपस्तंबः**—“ अथैनं चितावुपर्यध्यूहत्यथास्य प्राणायतनेषु हिरण्यशकलान्प्रत्यस्यत्याज्यबिंदून्वा ”। इति **गौतमोऽपि**—“आस्ये चक्षुषोर्नासिकयोः श्रोत्रयोश्च सप्त हिरण्यशकलानाज्यबिंदून्वा सप्तव्याहृतीर्मनसा ध्यायन्निरस्यति” इति । **कात्यायनः**—

“दक्षिणाशिरसं चित्यामुत्तानं तं निवेशयेत् । हिरण्यशकलान्न्यस्य क्षिपेच्छिद्रेषु सप्तसु ” इति ।

बौधायनीये—“ दध्याज्यतंडुलतिलान्प्रेतस्यास्ये विनिक्षिपेत् ” इति । **आश्वलायनीये** च—“सतिलं तंडुलं चास्ये वक्षस्यग्निं निधाय च” इति । **पितृमेधसारे**—“आदित्याभिमुखः स्थित्वा ज्वलदुल्केनोरासि दहेत् ” इति । **वैखानससूत्रे**—“ अग्निर्यजुर्भिः सेनेंद्रस्येति द्वाभ्यामुज्ज्वलितं प्राङ्मुखस्तस्य वक्षसि निक्षिपेत् ” इति । **स्मृत्यंतरे**—

“ पश्चिमाभिमुखो भूत्वा गृहीत्वा त्वनलं बुधः । तत्तन्मन्त्रं समुच्चार्य शववक्षसि विन्यसेत् ”॥ इति

आपस्तंबः—“ अथैनमुपोषति मैनमग्ने विदह इति पुरस्तादाहवनीयेन शृतं यदेति पश्चाद्गार्हपत्येन तूष्णीं दक्षिणतोन्वाहार्यपचनेन पुरस्तात्सभ्यावसथ्याभ्यामौपासनेन च ” इति । अत्र **कपर्दिभाष्यम्**—अथैनमुपोषति दहाति चितेः पुरस्तादाहवनीयेन पश्चान्मैनमग्नेविदह इति पश्चाद्गार्हपत्येन शृतं यदेति तूष्णीं दक्षिणतोन्वाहार्यपचनेन पुरस्तात्सभ्यावसथ्याभ्यामौपासनेन चेति । **गोपालभाष्येऽपि**—उपोषणं दहनं दारुचितेरेवात्र साक्षादग्निसंयोगः कार्य इति ।

स्मृतिसारसुधानिधौ—

“ अग्निभिर्वाऽग्निना वाऽपि शववत्यां चितौ दहेत् । शावं चोद्वाहनं तस्य गतिर्नैत्यब्रवीन्मनुः ” ॥

वसिष्ठः—

“ अग्निक्षेपो नातिशवं श्रुतावाहुतिदर्शनात् । आहुत्य परिविक्षेपात्तत्कर्म विफलं भवेत् ” ॥

शातातपोऽपि—

---

१ क्ष–दमलदूषितं । २ क्ष–इति ।

" चितौ दहनमेतेषां द्विजानां सर्वसूत्रिणाम् । तद्वशाद्दहनं लब्ध्वा मृता ब्रह्म समाप्नुयुः " ॥ इति । अत्र शिष्टाचाराद्व्यवस्था । आदित्याभिमुख एव स्थित्वा दहेत् "सावित्र्यादिक्रियाः सर्वा आदित्याभिमुखश्चरेत् " इति सर्वकर्मसाधारण्येनादित्याभिमुखत्वस्मृतेः । स्थितिराचारसिध्द्यर्थसिद्धा च । सूर्यं ते चक्षुः इत्युपस्थानं प्रेताभिमुखः कुर्यात् । अपरेण चितिं प्राङ्मुखः स्थित्वा य एतस्य पथ इत्यादिभिर्जुहुयात् । प्रेतस्यापरे स्थित्वेति**बोधायनी**यादौ दर्शनादेवं मंत्रवद्दग्ध्वा निरवशेषमग्निं चितौ प्रागादिक्रमेण प्रक्षिपेत् । तथा **बोधायनः**—" सर्वत एव सहसा प्रज्वलयेत् । ब्रह्मलोकमजैषीदित्येवं जानीयात् " इति ।

चिताग्निनाशप्रायश्चित्तम् । वृष्ट्यादिना चिताग्निनाशे **यमः**—

" यजमाने चितारूढे पात्राण्यासे तथाकृते । वृष्ट्याद्यभिहते चाग्नौ ततः पृच्छंति याज्ञिकाः ॥
" शेषं दग्ध्वार्धदग्धेन निर्मथ्यं तत्र कारयेत् । शेषालाभे तदा कुर्याद्दग्धशेषस्य वा पुनः ॥
"अप्सु प्रास्यन्ति शेषं तदाग्नेयास्ताः स्मृता बुधैः " ॥ इति । आग्नेयत्वमपां 'वायोरग्निरग्नेराप' इति *श्रुत्यावगम्यते । **स्मृत्यंतरेऽपि**—

" दह्यमाने शवे वन्हिर्नष्टो वर्षात् भवेद्यदि । चितिकाष्ठं तु निर्मथ्य तेन प्रेतं पुनर्दहेत् ॥
" अभावे चितिकाष्ठानां शेषमप्सु विनिक्षिपेत् " । प्रायश्चित्ते कृतेऽग्निनेति पाठांतरम् ।

प्रायश्चित्तमनुगतप्रायश्चित्तम् । तच्च द्वादशगृहीतेन स्रुचं पूरयित्वेत्याप**स्तंबो**क्तमित्याहुः ।

दहनानन्तरकृत्यमाह कात्यायनः—

" वस्त्रं संशोधयेदादौ ततः स्नानं समाचरेत् । सचैलं तु पुनः स्नात्वा शुचिः प्रयतमानसः "॥ इति ।

ज्ञात्यादिविषयेऽपि **स एव**—

" अथानवेक्षमेत्यापः सर्व एव शवस्पृशः । स्नात्वा सचैलमाचम्य दद्युरस्योदकं स्थले " ॥ इति ।

आश्वलायनः—" अनवेक्षमाणा यत्रोदकमवहं भवति तत्प्राप्य " इति । अवहं प्रवाहरहितं स्थिरमिति यावत् । **आपस्तंबोऽपि**—" अनवेक्षमाणा अपोऽवगाहंते धाता पुनातु सविता पुनातु इति केशान्प्रकीर्य पांसूनोप्य " इति । अत्र क्रममाह **बोधायनः**—" यवीयान्यवीयान्पूर्वं पूर्वं संगाहते " इति । **आपस्तंबः**—" धून्वने अन्वारंभणे संगाहने संसर्पण उदकोस्पर्शन इति सर्वत्र कनिष्ठप्रथमा अनुपूर्वा इतरे स्त्रियोऽग्रे " इति । धून्वनं सिग्भिरवधूननं अन्वारभणं राजगव्याः संगाहनं कर्तॄणां संसर्पणं शाखाद्वयमध्येन उदकोपस्पर्शनं धाता पुनात्विति स्नानं एतेषु पंचसु कर्मसु कनिष्ठप्रथमाः स्युः कनिष्ठः सर्वेभ्योऽवरवयाः स प्रथमो एषां ते तथोक्ताः । इतरे अस्मादन्ये सकुल्याः आनुपूर्व्याः तत आनुपूर्व्यतः स्युः प्रथमापेक्षया वृद्धवृद्धतरवृद्धतमानुपूर्वेण स्युरित्यर्थः । स्त्रियोऽग्र इति मृतस्य कुल्यानां च भार्या गृह्यंते । मृतस्यैव भार्या इत्यपरे । तासामपि कनिष्ठप्राथम्यं वेदितव्यम् । " अथास्य भार्याः कनिष्ठप्रथमा " इति**बोधायन**स्मरणात् । **पितृमेधसारे तु** " आनुपूर्व्यात् यथावृद्धम् " इति **भाष्यानुसरेण** व्याख्यातम् । धून्वनादिषु सर्वत्र कनिष्ठप्रथमा इतरे कनिष्ठव्यतिरिक्ता यथावृद्धकर्ता पश्चादिति । अस्यार्थः । कनिष्ठः प्रथमं ज्येष्ठो वा कनिष्ठो वा कर्ता सर्वेषां पश्चात्तयोर्मध्ये ज्येष्ठानुक्रमेण ज्ञातयः कल्प्या इति ।

आश्वलायनस्तु (४।२।९)

'ज्येष्ठप्रथमाः कनिष्ठजघन्या' इति सर्वतुरीयाध्वगमने तथा प्रविशेयुः 'कनिष्ठप्रथमा ज्येष्ठजघन्या' इति। ग्रामप्रवेश इति ।

---

१ क्ष-स्मृति । * तैत्तिरीयारण्यके ब्रह्मवल्याम् ।

बृहद्विष्णुः—
"संस्कृत्य वन्हौ पितरं दृष्ट्वा ज्योतिस्ततो रविम् । स्त्रीबालान् स्वपुरः कृत्वा वृद्धो गच्छेज्जलाशयम्" ॥
स्मृत्यन्तरे—
"शवं दग्ध्वा यथान्यायं दृष्ट्वा ज्योतिर्दिशः क्रमात् । बालान् दारान् पुरस्कृत्य गच्छेत् प्रेतमनीक्षकः[1] ॥" इति । यथास्वगृह्यं यथाचारमत्र व्यवस्था । अत्र सपिंडाश्च वस्त्रसंशोधनपूर्वकं त्रयोदशनिमज्जनं कुर्युः ।
"अस्पृश्यस्पर्शने चैव त्रयोदश निमज्ज्य च । आचम्य प्रयतः पश्चात् स्नानं विधिवदाचरेत्" ॥ इति **भरद्वाजस्मरणात्** । **उशनाः**—
" अनुगम्य मृतं प्रेतं ज्ञातीनप्यनुसृत्य च । स्नात्वा घृतं च भक्षित्वा पुनः स्नानं समाचरेत् " ॥ इति ।
स्मृत्यन्तरे—"शवानुगमने क्षौरे पुनः स्नानं विधीयते । आर्द्रवस्त्रं परित्यज्य शुष्कवस्त्रेण मार्जनम् ॥
" सप्तवाताहतं वस्त्रं शुष्कवत्प्रतिपादितम् । आर्द्रं वाऽपि द्विजातीनामादृतं गौतमादिभिः ॥
" नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते । तर्पणं त्रिविधस्यापि ह्यंगत्वेन प्रकीर्तितम् "॥ इति ।
अत्र क्वचिदपवादश्चंद्रिकायामुक्तः—
" अजीर्णेऽभ्युदिते वांते त्वश्रुपाते क्षुरे भवेत् । स्नानं नैमित्तिकं ज्ञेयं देवर्षिपितृवर्जितम्" ॥ इति ।
पुनःस्नाने तु तर्पणमुक्तं **स्मृत्यर्थसारे**—
" अस्पृश्यस्पर्शनस्नाने नाघमर्षणतर्पणे । अजीर्णेऽभ्युदिते क्षौरे पुनःस्नाने तु ते स्मृताः " ॥ इति ।
पितृमेधसारे—" योषित्सु स्नात्वा ग्रामं प्रविष्टासु ज्ञातयोऽन्ये च त्रयोदशवारं निमज्ज्याग्निं स्पृष्ट्वा घृतं प्राश्य पुनः स्नायुः " ॥ इति । अत्र **कवषः**—
" प्रवेशनादिकं कार्यं दाहकेनैव न क्वचित् । अनुगंता च वोढा च पुनः स्नात्वा च योषिताम् ॥
"अनुगम्य शवं बुध्द्या[2] स्नात्वा स्पृष्ट्वा हुताशनम् । सर्पिः प्राश्य पुनः स्नात्वा प्राणायामैर्विशुध्यति"॥ इति ।
कथंचिद्घृताद्यभावे
" अग्न्यभावे घृताभावे सचैलं स्नानमाचरेत् । अभिमंता तु गायत्र्या दशकृत्वो यथाविधि ॥
" अर्धांजलिमपः पीत्वा सर्वपापैः प्रमुच्यते । वर्जनीयं त्वहोरात्रं जपहोमार्चनादिकम् " ॥ इति **स्मृत्यंतरे** प्रतिपादितं द्रष्टव्यम् । अस्नात्वा ग्रामं न प्रविशेयुः
"अस्नात्वा चेद्विशेद्ग्रामं श्मशानाद्बुद्धिपूर्वकम् । त्रिरात्रेण विशुद्धिः स्याद्मत्याऽन्हाद्विशुध्यति" ॥ इति **स्मरणात्** ।

ज्ञातिवपनविधिः—

शुध्द्यर्थं स्नानानंतरं ज्ञातीनां वपनं विदधाति **बोधायनः**—
"सचैला दक्षिणाभिमुखाः समृतिका आप्लवंते । एकस्मिन्कालेऽस्यामात्याः केशश्मश्रूणि वापयेयुः" इति । अत्र स्नानानंतरं वपनविधानात्
"अशुद्धान्स्वयमप्यैतान् अशुद्धस्तु यदि स्पृशेत् । विशुध्यत्युपवासेन तथा कृच्छ्रेण वा पुनः" ॥ इति अशुद्धस्य शूद्रादिस्पर्शे प्रायश्चित्तस्मरणाच्च न स्नानात्पूर्वं वपनं कुर्युः ।
आपस्तंबः (१।३।१०।५)—"तेषु चोदकोपस्पर्शनं तावंतं कालमनुभाविना च परिवापनम्" ॥ इति ।
काश्यपः—"संत्यज्य[3] विधिवत्प्रेतं यज्ञेषु तु हविर्यथा । केशश्माश्वादि वपनं कुर्युरत्रानुभाविनः" ॥ इति **स्मृतिरत्नमाधवीयादौ** व्याख्यातम् । अनु पश्चाद्भवंति जायंत इति पुत्राः कनिष्ठभ्रातरश्च ।

---

१ क्ष—क्षित । २ क्ष—शियं । ३ क्ष—ध्वा ।

अथवा अनुभाविन इति पुत्रा एव निर्दिश्यंते

" गयायां भास्करक्षेत्रे मातापित्रोर्गुरोर्मृतौ। आधानकाले सोमे च वपनं सप्तसु स्मृतम् " ॥

इति स्मरणादिति। गृह्यपरिशिष्टेऽपि—"एतद्वपनं संस्कर्तृव्यतिरिक्तज्ञात्यादीनामनित्यम्" ॥ इति। विज्ञानेश्वरस्तु अनुभाविशब्दार्थमाह—"अनु पश्चाज्जायंते शावदुःखमनुभवंतीति वा। अनुभाविनः कनिष्ठभ्रातरः सपिंडाश्च " इति। तथा स्मृत्यंतरे—

" ज्येष्ठानां तु सपिंडानां श्वश्रूश्वशुरयोस्तथा। ज्येष्ठस्वसुश्च तद्भर्तुः वपनं मरणे भवेत् "॥

प्रथमगर्भजाता स्वसा तच्छेब्देनोच्यते। तद्भर्तृमरणे वपनमितरत्र नेति व्याख्यातारः। अन्यत्रापि—

" कनिष्ठो ज्ञातिराद्याहे केशश्मश्रूणि वापयेत्। सनखानि सरोमाणि दशमेऽहनि वापयेत् " ॥ इति।

संग्रहेऽपि—

" भ्रातरस्त्वनुजाः पुत्रा ज्ञातयश्च सपिंडकाः। विधया सह जाताश्च वापयेयुः परस्परम् " ॥ इति

अत्र केचिदाहुः। वपनं द्विविधं दहनांगं शुध्यर्थं च। दहनांगं दाहकस्यैव प्रथमदिने भवति। दाहदिने वपनविधानं च संस्कर्तृज्ञात्यादिविषयम्। शुध्यर्थं तु सर्वसाधारणं दशमदिने एव ज्ञातीनां कर्तुश्च भवति। तथा च ' नापितकर्माणि च कारयंत एष प्रथमोऽलंकार ' इति दशमेऽहन्येव आपस्तंबेन ज्ञातीनां वपनमुक्तमिति। अन्ये तु "यावदशौचमुदकम्" इति विष्णुस्मरणात् (१९।१४) " क्षुरकर्मपूर्वकत्वाच्चोदकक्रियायाः " एतस्मिन्काले़ऽमात्या अस्य केशश्मश्रूणि वापयंत " इति बोधायनेन दहनकालोत्तरं स्नानानंतरमेव मृतज्ञातीनां वपनविधानात् प्रथमदिनेऽपि सर्वज्ञातीनां क्षुरकर्मेत्याहुः। अत्र यथास्वगृह्यं यथादेशाचारं व्यवस्था। चंद्रिकायाम्—

" पौत्राभावे प्रपौत्रो वा तत्पुत्रः पुत्रिकासुतः। केशानां वपनं कृत्वा पैतृमेधिकमाचरेत् " ॥ इति।

एतदुदकक्रियाद्यौर्ध्वदेहिकोपलक्षणम्

" अकृत्वा वपनं मूढः प्रेतकर्म प्रवर्तते। उदकं पिंडदानं च श्राद्धं चैव हि निष्फलम् ॥

" पवनं दहनात्पूर्वं कुर्याच्चेत् पितृघातकः। तस्मात्सर्वप्रयत्नेन वपनं दहनात्परम् " ॥ इति स्मरणात्। श्रीधरीये च—

"रात्रावपि च दाहांतं कृत्वा चैवोदकक्रियाम्। श्वोभूते वपनं कार्यमेष धर्मः सनातनः" ॥ इति।

गार्ग्योऽपि—" शौके वारे निशायां च प्रेतक्षौरं विवर्जयेत् " ॥ इति।

स्मृत्यंतरेऽपि—

" बीजानां वापनं क्षौरं वास्तुकर्म कृषिं तथा। रात्रौ तु न प्रकुर्वीत कुर्वन्क्षिप्रं विनश्यति ॥

" वपनं नेष्यते रात्रौ श्वः कार्या वपनक्रिया " ॥ इति। चंद्रिकायाम्—

" दग्ध्वा रात्रौ तु पिंडांतं कुर्याद्वपनवर्जितम्। अदाहकानामन्येषां श्वोभूते वपनं भवेत् " ॥

संग्रहेऽपि—

" भ्राता वा भ्रातृपुत्रो वा सपिंडाः शिष्य एव वा। कनिष्ठो दहनं कुर्वन्केशश्मश्रूणि वापयेत् ॥

" रात्रावपि च दग्धानां कार्या चैवोदकक्रिया। वपनं नेष्यते रात्रौ श्वस्तथा वपनक्रिया "।

---

१ क्ष—यो। २ क्ष—त्रिरात्रेपि।

बृहस्पतिः—

"शुक्रवर्गा विवर्ज्याः स्युः तस्य[1] लग्नग्रहेक्षणाः। कालहोरादिशुक्रस्य शावेऽवश्यं विवर्जयेत्"॥ इति।

पद्धतौ—

"श्राद्धे च शावक्षौरे च शुभाः काला अशोभनाः। वर्जयेच्छौक्रजन्मानि श्राद्धे स्त्रीसुतयोरपि"॥ इत्यादीनि शुक्रवारे रात्रौ च वपननिषेधपराणि वचनानि पुत्रव्यतिरिक्तसंस्कर्तृविषयाणि ज्ञातिविषयाणि च।

"मातापित्रोर्गुरोश्चैव दाहकस्य विशेषतः। तदैव वपनं कार्यं रात्रावपि विधेर्बलात्"॥ इति **स्मरणात्।**

पुत्रस्य रात्रौ वपनविधिः स्मृत्यंतरे—

"शुक्रवारे च रात्रौ च शावे च दशमे दिने। रात्रिदाहे तदा कुर्यात् क्षौरं पिंडोदकक्रियाम्॥

"मातापित्रोरथान्येषां श्वोभूते वपनं भवेत्" ॥ इति। **अन्यत्रापि—**

"रात्रौ दग्ध्वा प्रमीतानां वपनं न कदाचन। रात्रावपि च कर्तव्यं मातापित्रोर्गुरोर्मृतौ"॥ तथा "शुक्रवारे च रात्रौ च दर्शे संक्रमणे तथा। क्षौरं कुर्वीत पुत्रस्तु ज्ञातीनामपरेऽहनि"॥ इति।

तथा—"शौक्रे च वारे निशि वा मृतिः स्यात् क्षौरं न कुर्यात्तनयस्तु कुर्यात्।

"कुर्युः सपिंडाश्च तथा परेद्युर्यद्वा तृतीयेऽप्यथ सप्तमे वा"॥ **अन्यत्रापि—**

"शौक्रे वा निशि वा दाहे पुत्रस्यैव तु वापनम्। सपिंडानां परेद्युर्वा तृतीये सप्तमेऽन्हि वा"॥ इति।

तथा—"प्रथमेऽहनि कर्तव्यं क्षुरकर्म प्रयत्नतः। तृतीये पंचमे वाऽपि सप्तमे वाऽप्रदानतः"॥ आ प्रदानतः एकोद्दिष्टात्प्रागित्यर्थः। **गौतमश्च** (१४।३७)—"प्रथमतृतीयपंचमसप्तमनवमेषूदकक्रिया" इति। क्षुरकर्म पूर्वं कृत्वा उदकक्रियाया अमुंषु दिनेषु वपनानंतरमुदकक्रिया कार्येत्यर्थः।

अखण्डादर्शे च—

"अनुप्तकेशो यः पूर्वं स द्वितीयतृतीययोः। पंचमे सप्तमे वाऽन्हि दशाहे वाऽपि वापयेत्"॥ इति। एवं च पुत्रस्य शुक्रवारे रात्रावपि वपनं इतरेषां तु संस्कर्तॄणां पूर्वदिनस्य दुष्टत्वे तत्रालस्यादिना असंभवे वा द्वितीयाद्युक्तदिनेषु वपनपूर्वकमुदकदानं संस्कर्तृव्यतिरिक्तज्ञातीनां दशमदिनात्पूर्वं वपनमुदकदानं च वैकल्पिकं सर्वेषां दशमदिने नित्यमिति विवेकः। रात्रौ यामद्वयानन्तरं पुत्रस्यापि वपननिषेधः। पुत्रस्य रात्रौ वपनं यामद्वयमध्य एव न तु यामद्वयात्परम्।

तदुक्तं श्रीधरीये—

"रात्रौ यामद्वयादर्वाक्कर्तुर्वै वपनं भवेत्। अन्येषां तु सपिंडानां श्वोभूते वपनक्रिया"॥ इति। अत्र कर्तृग्रहणं पुत्रव्यतिरिक्तस्यापि दाहकस्य वपनप्राप्त्यर्थं न पुत्रांतरव्यावृत्त्यर्थमिति **पितृमेधसारकृता** व्याख्यातं **तदुक्तम्**—"शौक्रे च वारे निशि वा मृतिः स्यात् क्षौरं न कुर्यात्तनयस्तु कुर्यात्" इत्यादिपूर्वोक्तवचननिचयेन तनयव्यतिरिक्तस्य संस्कर्तुः निशि वपनस्य कंठरवेण निषिद्धत्वाद्रात्रावपि विधेर्बलादिति निशि पुत्रस्य वपनविधानवदितरस्यापि तद्विधानाभावाच्च यामद्वयमध्ये सर्वपुत्राणां गर्भवतामपि वपनं समानम्। तत ऊर्ध्वं निषेधोऽपि **स्मर्यते**—"रात्रौ यामद्वयादूर्ध्वं पुत्रोऽपि न वपेत्ततः" इति। शुक्रवारे निशि वा प्रोषितपितृमृतिः श्रवणे यामद्वयमध्येऽपि पुत्रोऽपि वपनमतिक्रांतप्रेतकृत्यं च न कुर्यात्। तथा **वृद्धहारीतः**—

"शुक्रवारेऽप्यतिक्रांते मातापित्रोस्तथैव च। संध्यारात्र्योस्तथा क्षौरं प्रेतकार्यं च नाचरेत्"॥ इति।

---

१ क्ष—सा। २ क्ष—अयगेषु।

स्मृत्यंतरेऽपि—

" प्रत्यक्षमरणे पित्रोर्न पश्येत्तिथिवारभम् । परोक्षे सूक्ष्मतः पश्येन्मृतौ तु तिथिवारभम् " ॥ इति । ज्ञातीनां सन्निधाने वपनमितरत्र विकल्पः । संनिधाने सपिंडमरणे वपनं इतरत्र विकल्प इत्याह **बोधायनः**—" एतस्मिन्कालेऽस्यामात्याः केशश्मश्रूणि वापयंते ये संनिधाने भवंति । विकल्प इतरेषु । वापयेरन्निवर्तयेरन्वा " इति । **स्मृत्यंतरे**—

" संनिधाने सपिंडानां वपनं स्याद्गुरोर्मृतौ । महागुरूणां सर्वत्र दाहकस्यागुरोरपि " ॥

असंनिधाने निषेधः **स्मर्यते**—

" संनिधाने सपिंडानां वपनं तु विधीयते । असंनिधाने सर्वत्र वपनं न विधीयते " ॥ इति । असंनिधाने यदाकदाचिद्दूरस्थज्ञातिमृतिश्रवणे वपनं न कुर्यात् । किंतु तिलोदकमेव कुर्यादिति केचिद्व्याचक्षते । अन्ये तु असंनिधाने निषेधवचनं ज्ञातीनां प्रथमदिनक्षौरविषयम् । दशमदिने क्षौरमस्त्येव । दशमदिनादूर्ध्वं श्रवणेऽपि वपनं तर्पणं चास्त्येवेति । अपरे तु संन्निधाने दशमदिनक्षौरे वारादिदोषो नास्ति । असन्निधाने तु अनिषिद्धदिने पूर्वं कर्तव्यं न तु दुष्टे दशमदिन इत्याहुः । शिष्टाचारादिह व्यवस्था । मातृपितृविषये तु **स्मृत्यंतरम्**—

" देशांतरे स्थितः पुत्रः श्रुत्वा पितृविपर्ययम् । कृत्वा तु वपनं दत्वा दशाहांतं तिलोदकम् ॥ " सपिंडीकरणश्राद्धं कुर्यादेकादशेऽहनि " । **संग्रहे**—

" दारकर्मणि मृतौ च सूतके यागदीक्षितविधौ नृपेष्टतः ।

" कन्यकाकटककुंभधन्वगे भास्करे च वपनं विधीयते ॥

" विवाहदीक्षामध्ये तु ज्ञातीनां मरणे सति । त्रिंशत्तिलोदकं कार्यं क्षुरकर्म न विद्यते " ॥

विवाहदीक्षामध्ये मातृपितृमरणे तु संस्कर्तुर्वपनमस्ति । "मातुर्दशाहमध्ये पितृमरणे संस्कर्तुर्वपनं न" इत्युक्तम् । **स्मृत्यंतरे**—

" पितुर्दशाहमध्ये तु माता च निधनं गता । तत्रैव वपनं कार्यं विपरीते न कारयेत् " ॥

संग्रहे—

" पितुर्दीक्षांतरे सूनोर्माता यदि विपद्यते । वपनं चापि कुर्वीत मातुः कुर्यात्क्रियां ततः ॥

" मातुर्दीक्षांतरे चैव पिता मरणमाप्नुयात् । दहनादिक्रियाः कुर्याद्वपनं नैव कारयेत् " ॥

अत्र दीक्षांतर इत्युक्तत्वाद्दशाहानंतरमपि पितृमरणे संस्कर्तुर्वपनं न मातृमरणे तु वपनमस्तीत्युक्तं भवति । अन्यविषयेऽपि **तत्रैवोक्तम्**—

" मातापित्रोर्मृताब्दे तु यद्न्योऽपि विपद्यते । वपनं नैव कुर्वीत तस्य दाहादिकं चरेत् " ॥ इति ।

स्मृत्यंतरे—

" पितृदीक्षांतराले तु मात्रर्थे वपनं भवेत् । मात्रंतरे तु पित्रर्थे अन्यार्थमपि नाचरेत् " ॥ इति ।

पितृमेधसारे—"पित्रोर्मृताब्दे पितृव्यादिमरणे न वपेत्" इति । यत्तु **कैश्चिदुक्तम्**—

" स्वपुत्रमरणे चैव स्वभार्यामरणे तथा । स्वयं यदि दहेत्तत्र केशश्मश्रूणि वापयेत् " ॥ इति तद्बहुस्मृतिविरुद्धत्वात् शिष्टाचारविरोधाच्चोपेक्षणीयम् । यदाह **वृद्धमनुः**—

" भार्यापुत्रकनिष्ठानां शिष्याणां च यवीयसाम् । संस्कर्तुर्वपनं नैव यदि कुर्यात् कुलक्षयः " ॥

कात्यायनश्च " मृतावनुपनीतानां वपनं न कदाचन । मृतावपि कनिष्ठानां वपनं न विधीयते " ॥ अनुपनीतानां पितृव्यादीनामिति शेषः ।

---

१ क्ष-द्धि ।

उपनीतानां तेषां मृतौ वपनं **स्मर्यते**—
" यवीयसां पितृव्याणां संस्कर्तुर्वपनं भवेत् " इति ।
पितृव्यग्रहणं मातुलश्वशुरतत्पत्नीनामप्युपलक्षणम् । एतच्च पितृव्यादीनां संस्कर्तुरेव वपनम् । संस्काराभावे तु वयोऽधिकपितृव्यादिमरणे वपनं तेषां पत्नीनां यवीयसीनामपि मरणे वपनम् । वयोऽधिकज्ञातीनां याः पत्न्यः तासां कनीयसीनामपि मरणे वपनम्—
" पतिवयसः स्त्रियः स्युः पतीनामिव वापनम् । पूर्वजावरजा वापि क्षौरं साधारणं स्मृतम् " ॥ इति वपनविधानात् **आपस्तंबेन** च "पतिवयसास्त्रिय" इति (१।१४।२१) । नमस्कारादौ विधानादिति केचिदाहुः । अन्ये तु पितृव्यादिमरणे वयोधिकानां वपनं नास्ति । न्यूनवयस्कतत्पत्नीमरणेऽपि वपनं नास्तीत्याहुः । तदुक्तं **प्रयोगसारे**—
" मातुलस्य पितृव्यस्य श्वशुरस्यावरायुषः । वपनं नैव कर्तव्यमाशौचं तु विधीयते " ॥ इति ।
बार्हस्पत्येऽपि—
" मातुलानां पितृव्याणां श्वशुराणां पितृष्वसुः । मातॄणामनुजातानां तथैव ज्येष्ठयोषिताम् ॥
" वपनं नैव कर्तव्यमाह **पाराशरो** मुनिः " इति । **स्मृत्यंतरेऽपि**—
"यवीयसां पितृव्याणां श्वशुराणां च तत्स्त्रियाम् । न कुर्यात्क्षुरकर्माणि कुर्याच्चेत्कुलनाशनम्"॥ इति।
एतानि वपननिषेधवचनानि संस्कर्तृव्यतिरिक्तविषयाणि
" ज्यायानपि पितुः पत्न्या यदि संस्कारमाचरेत् । क्षुरकर्म तथा कार्यं ह्यथान्य ह्युदकक्रियाम् ॥
"यवीयसां पितृव्याणा संस्कर्तुर्वपनं भवेत्"॥ इति विशेष**स्मरणात्**। यथाशिष्टाचारमत्र व्यवस्था ।
गर्भिणीपतिविषये वपनविधिः । अंतर्वत्निविषये यमः—
" अंतर्वताऽपि कर्तव्यं पित्रोर्मरण एव तु । नान्येषां वपनं कार्यं भ्रूणहत्यासमं भवेत् "॥ इति ।
पित्रोर्मरणे संस्कर्तुर्व्यतिरिक्तेनापि अंतर्वताऽपि पुत्रेण वपनं कर्तव्यम् । अन्येषां मरणे अंतर्वता वपनं न कार्यमित्यर्थः । ' पित्रोर्मरण एव तु ' इत्युपलक्षणम्
" गयायां भास्करक्षेत्रे मातापित्रोर्गुरोर्मृतौ । आधाने सोमयागे च गर्भवानपि वापयेत् " ॥ इति
स्मरणात् । **स्मृत्यन्तरे**—
" आधाने यज्ञदीक्षायां मातापित्रोर्गुरोर्मृतौ । गर्भवान्वपनं कुर्यान्नान्यत्रेति व्यवस्थितिः " ॥ इति ।
गर्भवतो मातामहादीनां संस्कर्तृत्वे वपनमाहात्रिः—
" मातामहपितृव्याणां मातुलाग्रजयोर्मृतौ । श्वशुराचार्ययोरेषां पत्नीनां च पितृष्वसुः ॥
" मातृष्वसुर्भगिन्याश्च गर्भवानपि वापयेत् " ॥ इति । **गौतमः**—
" मातामहे च तत्पत्न्याः मातुले पूर्वजे मृते । गुरौ च गुरुपत्नीषु गर्भवानपि वापयेत् ॥
" दाहको वपनं कुर्यान्नान्यथेति व्यवस्थितिः "॥ इति । **स एव**—
"अपुत्रस्य पितृव्यस्य ज्येष्ठस्याप्यसुतस्य च । अंतर्वान् दहनं कुर्वन्केशश्मश्रूणि वापयेत्" ॥ इति ।
स्मृत्यंतरेऽपि—
" मातामहस्य तत्पत्न्याः मातॄणां मरणे सति । पितृष्वसुर्भगिन्याश्च दहने गर्भवान्वपेत् ॥
" मातरं पितरं ज्येष्ठमाचार्यं श्वशुरं विना । न कुर्याद्वपनं तत्र गर्भवान्संस्थितस्य तु " ॥ इति ।
वृद्धमनुः—
" दहनं वपनं वाऽपि प्रेतस्यान्यस्य गर्भवान् । न कुर्यादुभयं तत्र कुर्यादेव पितुः सदा ॥

---

१ क्ष-तुं ।

" ज्येष्ठस्य चानपत्यस्य मातुलस्यासुतस्य च " ॥ इति । मातुलग्रहणं मातामहादेरुपलक्षणम् । एवं च मातापितृमरणे अंतर्वेतामनंतर्वेतामपि संस्कर्तॄणामसंस्कर्तॄणां च वपनं समानम् । मातामहादिदहने गर्भवतो दौहित्रादेर्वपनं संस्काराद्यकरणे तु गर्भवतो वपनं नास्ति । आशौचमात्रमेव भवति अनंतर्वेतो दौहित्रादेर्मातामहादिसंस्काराकरणेऽपि वपनमस्तीति निर्णयः । अत्र **स्मृत्यंतरम्**—" ज्येष्ठस्वसॄणां जनकस्वसॄणां मातृस्वसॄणामपि तत्पतीनाम् ।

" मातामहस्यैव पितामहस्य तदीयपत्न्योर्वपनं हि वैधम्"॥ इति । अत्र तत्पतीनामित्येतत् शिष्टसमाचाराभावात् उपेक्ष्यमित्याहुः । **अन्यत्रापि**—

" ज्येष्ठानां तु सपिंडानां श्वश्रूश्वशुरयोस्तथा । ज्येष्ठस्वसुश्च तद्भर्तुर्मरणे वपनं भवेत् ॥

" श्वश्रूश्वशुरयोर्नाशे पूर्वं भार्या मृता यदि । आशौचं दिनमात्रं स्याद्वपनं नैव विद्यते ॥

" तत्संततेः स्यात्त्र्यहं वपनं च विधीयते " ॥ इति । **तथा**—

" मातामहपितुः पित्रोस्तत्पत्न्या ऋत्विजस्तथा । एतेषां वपनं कुर्यान्न चेत्स ब्रह्मघातकः" ॥ इति ।

स्मृत्यंतरे—

" भ्रातरः पितरः पुत्राः ज्ञातयश्च सपिंडकाः । विद्यया सह जाताश्च वापयेयुः परस्परम् " ॥ इति ।

दशाहवपनविधिः । प्रसंगाद्दशाहवपनमुच्यते । तत्र **वसिष्ठः**—

" ज्ञातयः सप्तमादर्वाक् कनिष्ठा दशमेऽहनि । वापयेयुश्च ते सर्वे कर्ता तु सह सर्वदा " ॥ इति । सप्तमादर्वागित्युक्तत्वात्तदूर्ध्वभाविनां समानोदकानां वपनाभावोऽर्थसिद्धः । समानोदकानां संस्कर्तृत्वे तु वपनमस्त्येव । "सपिंडो वाऽसपिंडो वा संस्कर्ता वापयेत् द्विजः" इति **स्मरणात्** । **देवलः**—

" दशमेऽहनि संप्राप्ते स्नानं ग्रामाद्बहिर्भवेत् । तत्र त्याज्यानि वासांसि केशश्मश्रुनखानि च"॥ इति।

वृद्धशातातपः—

" शावे च सूतके चैव द्वितीये दशमे दिने । क्षौरं चेन्न प्रकुर्वीत तस्मात्केशेषु लीयते " ॥

चंद्रिकायाम्—

" जनने मरणे चैव वपनं दशमेऽहनि । आ[१]र्तस्मान्नाधिकारी स्यादाशौचं सर्वदा भवेत् " ॥ जनने दशमदिने पितुरेव नान्येषां वपनम्

"प्रथमेऽहनि कर्तव्यं वपनं मृतबंधुभिः । दशाहे वपनं कार्यं सूतके च तथा पितुः"॥ इति **स्मरणात्** ।

अखंडादर्शे—

" दंपती शिशुना सार्धं सूतके दशमेऽहनि । क्षौरं कुर्युस्ततः पूताः स्नानदानादिकर्मसु ॥" अत्र लोके समाचाराभावान्न मातुर्वपनं नापि शिशोः किंतु पितुरेव वपनं कैमुतिकन्यायेन प्रतिपादितम् ।

व्याघ्रपादः—

" वपनं यो न कुरुते सूतके दशमेऽहनि । मृतौ वा पितरस्तस्य मज्जंति नरकेऽशुचौ " ॥

श्रीपतिः—" आज्ञया नरपतेर्द्विजन्मनां दारकर्म मृतसूतकेषु च ।

" बंधमोक्षमखदीक्षणष्वेपि क्षौरमिष्टमखिलेषु चोडुषु " ॥

स्मृत्यंतरे—"केशानाश्रित्य तिष्ठंति मृतौ सूतौ च किल्बिषाः । तस्मात्सर्वप्रयत्नेन दशाहे वपनं स्मृतम् ॥

" सूतके मृतके चैव वपनं दशमेऽहनि । यो न कारयते मोहादनर्हः सर्वकर्मसु ॥

" कूले चतुष्पथो वापि महावृक्षस्य संनिधौ । केशश्मश्र्वादिवपनं कुर्युरत्रानुभाविनः " ॥ इति ।

---

१ क्ष-दशमा ।

दशमेऽहन्यानंदहोममभिधायाहापस्तंबः—"नापितकर्माणि च कारयंत एष प्रथमोऽलंकारः" इति। अत्र शांतिकर्मानंतरं वपनविधानेऽपि क्रमस्याविवक्षितत्वात् पूर्वमेव कर्तव्यमित्युक्तं पितृमेधसारे। वपनस्य शुध्यर्थत्वाच्छुद्धस्यैव शांतिकर्मण्यधिकारात् शांतिकर्मानंतर भोजनखट्वाशयनोपदेशाद्भुक्तस्य वपननिषेधाद्बोधायनाश्वलायनादिषु तथा दर्शनाच्च शांतिकर्मणः प्रागेव वपनं कर्तव्यमित्युक्तम्। अन्ये तु अभिधानक्रमेणापस्तंबिनां[1] शांतिहोमकर्मानंतरमेव वपनमित्याहुः। भाष्यकारेण कपर्दिना व्याख्यातम् "अधोभागस्य वपनमलंकारः" इति। तथा श्रीधरीये—

"मृताहे केशवपनं दशाहे शेषवापनम्। अशोभनमनायुष्यं मृताहे शेषवापनम्" ॥ इति।

अत्र शुद्धिनिर्णयकारः—"इह केचिदनभिज्ञा दशाहे अशेषवापनमिति पदच्छेदं कृत्वा सर्वांगक्षौरं दशमदिने वदंति तन्न युक्तम्। भाष्यकारेण 'अधोभागस्य वपनमलंकार' इत्युक्तत्वात्" ॥ इति। तथा च स्मृत्यंतरम्—

"प्रथमेऽहनि यः कुर्याच्छिरोवपनमेव तु। अतीते दशरात्रे तु ह्यधोवपनमाचरेत्" ॥ इति।

दशरात्रे दशरात्रकर्मण्यतीत इत्यर्थः। अन्यत्रापि—

"शावे क्षौरं सपिंडानामुदकाप्लुतिपूर्वकम्। कर्तव्यं केशवपनं शेषं स्याद्दशमेऽहनि" ॥

दशमेऽहन्येव शेषवपनस्य विधानात् ततः पूर्वं विषमदिनेषु केशश्मश्रुमात्रवपनं कर्तव्यम्। यैस्तु ज्ञातिभिः प्रथमाहादिषु नवमदिनपर्यंतेषु आलस्यादिना वपनं न कृतं तैर्दशमाहे सर्वांगवपनं कर्तव्यमिति केचित्। अन्ये तु प्रथमं केशवपनं कृत्वा स्नात्वा तिलोदकं दत्वा पश्चात्कर्त्रा सह शेषवपनं कर्तव्यमिति व्याचक्षते। वर्णविशेषे तु अङ्गविशेषवपनं स्मर्यते—

"आ कंठाद्वापयेद्विप्र आ नाभे राजवैश्ययोः। श्मश्रुमात्रं हि शूद्रस्य वपनं प्रथमेऽहनि" ॥ इति।

स्मृत्यंतरे—"कंठादूर्ध्वं वपेदाद्ये शेषं तु दशमेऽहनि" ॥ इति। तथा—

"रात्रौ दग्ध्वा तु पिंडांतं कुर्याद्वपनवर्जितम्। श्वस्तदा केशवपनं शेषस्य दशमेऽहनि" ॥ इति।

सर्वांगवपनं दशमदिन उक्तं स्मृत्यंतरे—

"आशौचान्ते तु सर्वांगवपनं श्रुतिचोदितम्। ब्रह्मचारिकुमाराणां कंठादूर्ध्वेण शुध्यति ॥

"यस्य केशाः शिरोजाता दशमेहऽन्यवापिताः। आशौचं तस्य केशेषु लीयते नात्र संशयः" ॥

अन्यत्रापि—

"दशाहेऽश्मानमुत्थाप्य शांतिहोमं समाचरेत्। सर्वांगवपनं चात्र कर्तव्यं स्नानतः परम्" ॥ इति।

पुत्रविषयेऽविशेषोऽपि स्मर्यते—

"कारयेद्वपनं पित्रोर्मृतौ पुत्रः समस्तकम्। दशमेऽहनि सर्वांगमधोवपनमेव वा ॥

"कनिष्ठो ज्ञातिराद्याहे केशश्मश्रूणि वापयेत्। सनखानि सरोमाणि दशमेऽहनि वापयेत्" ॥ इति।

तथा—

"कुर्युः पुत्राः सपिंडाश्च सर्वांगं दशमे दिने। अशुचित्वान्न पूर्वेद्युर्नापरेद्युः कथंचन" ॥ इति।

एवं च प्रथमदिने केशश्मश्रुमात्रवपनं दशमदिने तु सर्वांगं वपनं अधोवपनं वा विकल्पेन भवतीति दशमदिने वपने कालादिदोषो न विचारणीयः

"दशाहे वपनं कुर्याच्छुद्ध्यर्थं मृतसूतके। मासर्क्षतिथिवाराणां दोषो नास्तीति शाकलः" ॥ इति स्मरणात्। व्याघ्रपादोऽपि—

"शावे च सूतके चैव दशाहे वपनं स्मृतम्। तिथिवारर्क्षदोषाणामनवेक्षेति गौतमः" ॥ इति।

---

१ क्ष-चिनां तु।

वसिष्ठोऽपि—

"वैधे कर्मणि तु प्राप्ते कालदोषं न चिंतयेत् । सद्यः क्षौरं प्रकुर्वीत मातापित्रोर्मृतौ तथा ॥

"जाते सोमे तथा तीर्थे व्रते चांद्रायणेष्विति" ॥ **पितृमेधसारे**—"मृतिजन्मनोर्दशाहे ज्ञातीनां पुत्रस्य वपने तत्कालमासर्क्षतिथिवारादि न किंचिच्चिंत्यम्" ॥ इति । अत्र **केचिदाहुः**—दशमदिने क्षौरे ज्ञातीनां शुक्रवारमात्रं वर्ज्यं तदा नवमदिने कर्तव्यम् ॥

"शुक्रस्य वासरे क्षौरं शावे चेद्दशमे दिने । कुलक्षयकरं ज्ञेयं ततः पूर्वं समाचरेत्" ॥ इति **स्मरणात्** । पुत्रस्य शुक्रवारेऽप्यस्ति वपनम्

"शुक्रवारे च वपनं कर्तव्यं दशमेऽहनि । मातापित्रोरथान्येषां वपनं स्याद्दिनांतरे ॥

"शुक्रवारे च रात्रौ च दर्शे संक्रमणे यदि । क्षौरं कुर्वीत पुत्रस्तु ज्ञातीनामपरेऽहनि" ॥ इत्यादि **स्मरणात्** । असंनिधाने दशाहानंतरश्रवणे तु "अतिक्रांते दशाहे तु विषमाहः प्रशस्यते" इत्याद्युक्ते अनिषिद्धे काले कर्तव्यम् । "परोक्षे सूक्ष्मतः पश्येन्मृतौ तु तिथिवारभम्" ॥ इति । **स्मरणात्**—

पुत्रजनने पित्रा दशाहात्प्राक् न कार्यं तदूर्ध्वं चनघार्थम् ।

"अशुचित्वान्न पूर्वेद्युर्नापरेद्युः कदाचन । दशमेऽहनि वै क्षौरं कुर्याद्देवाविचारयन्" ॥ इति मासतिथिवाराद्यविचारेण दशमाह एव वपनविधानात् ।

यत्तु "पितृमासेषु चतुर्षु स्त्री प्रसूता भवेद्यदि । वपनं नैव कुर्वीत पुंसि जाते तु वापनम्" ॥ इति तत् "जनने मरणे चैव वपनं दशमेऽहनि" इत्यादिपूर्वोक्तवचनजातेन जननमात्रावलंबनेन दशाहे वपनविधानाच्छिष्टाचाराभावाच्चोपेक्ष्यमित्याहुः ।

गर्भिण्योर्भार्ययोरेकस्याः प्रसवे ।

"गर्भिण्योः पत्न्योः यद्येका प्रासविष्ट भर्ता क्षौरं न कुर्यात् जातकर्मादि तु कुर्यात् ।

"भार्ये यस्य तु गर्भिण्यौ एका भार्या प्रसूयते । वपनं नैव कुर्वीत जातकर्मादि कारयेत्" ॥ इति **स्मरणात्** । सवर्णज्येष्ठभार्याप्रसवे तु वपनमुक्तं **षड्धर्मीये**—

गर्भिणीष्वसवर्णासु सवर्णा चेत्प्रसूयते । तदा तु वपनं कार्यं न कुर्याच्चेत्पतत्यधः ॥

"द्वे यस्य भार्ये गर्भिण्यौ ज्येष्ठा भार्या प्रसूयते । तदा तु वपनं कार्यमन्यथा भ्रूणहा भवेत्" ॥ इति ।

अपरार्केऽपि—

"गर्भिण्यौ यस्य भार्ये द्वे एका चेत्संप्रसूयते । वपनं नैव कुर्वीत कुर्याच्चेद्भ्रूणहा भवेत्" ॥ इत्येतदसवर्णासु प्रसूतासु विधीयते । "सवर्णविषये कुर्यादन्तर्वानपि वापनम्" इति ।

मातृपितृदीक्षामध्ये पत्नीप्रसवे । मातापितृदीक्षामध्ये पत्न्योः प्रसवे वपनम् । ततो वत्सरशेषं केशधारणं च **स्मर्यते**—

"मध्ये तु पितृदीक्षाया गर्भिणी स्त्री प्रसूयते । क्षुरकर्म तदा कुर्यात्तच्छेषं केशधारणम्" ॥ इति ।

पद्धतौ—

"मातापित्रोर्द्विजः कुर्याद्गर्भवानपि वापनम् । पश्चात्प्रसूतौ पत्न्याश्च तच्छेषं केशधारणम्" ॥ इति ।

स्मृत्यंतरे—

"स्वमातृपितृदीक्षायां मध्ये भार्या प्रसूयते । दशाहे वपनं कुत्वा पुनर्दीक्षां च कारयेत्" ॥ इति ।

---

१ क्ष-पितुश्च ।

अत्र **केचिदाहुः**–सपिंडीकरणानंतरं दीक्षामध्ये पत्न्याः प्रसवे वपनं ततः पूर्वं प्रसवे वपनं नास्ति ॥ "सपिंडीकरणादूर्ध्वं पित्रोः संवत्सरादधः । कर्तव्यं वपनं पुत्रे जाते संवत्सरेऽपि वा" ॥ इति **स्मरणात्** । **पितृमरणाब्दे केशधारणादिनियमः**—"पत्नीप्रसवाभावे प्रथमाब्दिकपर्यंतं पुत्रस्य केशधारणं कर्तव्यम्" । यदाह **व्यासः**—

"षण्मासान्वर्जयेत्क्षौरं तैलतांबूलयोषितः । ज्येष्ठादीनां मृतिप्राप्तौ मातापित्रोस्तु वत्सरम्"॥ इति । अत्रादिशब्देन पितृव्यमातामहादयो गुरवो गृह्यंते । **अत्रिः**–"षोडशोद्वाहगर्भाब्दे[1] पित्रन्त्याब्दे क्षुरं त्यजेत्" ॥ इति । **श्रीधरीये**—

"षष्ठाब्दे द्वादशाब्दे च विवाहाब्दे तथैव । च मातापित्रोर्मृताब्दे च वपनं नैव कारयेत्" ॥

स्मृत्यंतरेपि—

"चौलाब्दे च विवाहाब्दे ह्यौपनायनिके तथा । मातापित्रोर्मृताब्दे च क्षौरं नैव समाचरेत्"॥ इति ।

अन्यत्रापि—

"मातापित्रोर्मृति प्राप्तौ वत्सरं केशधारणम् । वापयेद्यदि मूढात्मा रौरवं नरकं व्रजेत्" ॥ इति ।

संग्रहेऽपि—

"मातापित्रोर्मृताब्दे च विवाहाब्दे तथैव च । न केशवपनं कार्यं गर्भिण्यां च कुलस्त्रियाम्"॥ इति ।

अत्र केचिदाहुः–एतानि मातापितृमृताब्दे वपननिषेधवचनानि संवत्सरसापिंडीकरणाभिप्रायाणि । तच्च केशधारणं ब्रह्मचर्यादिनियमेन सह कर्तव्यम् । द्वादशाहादिसापिंड्ये तदूर्ध्वं न केशधारणनियमः । अभ्युदयेच्छायां तु नियमेन सह कर्तव्यम् । तथा च **बृहस्पतिः**—

"पित्रोर्मृतौ तदारभ्य सपिंडीकरणात्पुरा । योषितं तैलतांबूलं क्षौरं च लवणं मधु ॥
"कांस्यं परान्नमध्वानं वर्जयेद्दंतधावनम् । कालभेजी च दर्भेषु अधःशाय्यप्रतिग्रहः ॥
"गंधपुष्पादिहीनश्च अल्पाशी च व्रतं चरेत् । प्राक्सपिंडीकृतेर्गच्छेत् स्त्रियं प्रेतस्य दाहकः ॥
"रेतसः कर्दमाब्धौ तु पितॄन्प्रेतं च मज्जयेत्"॥ इति । **शुद्धिनिर्णयेऽपि** "महागुरुमरणे संवत्सरांत नित्यं तिलोदकं नियमेन मासिकं च कुत्वा व्रती केशधारणं च संवत्सरांते सपिंडीकरणं कुर्यात्"। इति।

स्मृत्यंतरेऽपि—

"सपिंडीकरणादूर्ध्वं न केशं धारयेत् द्विजः । यदि धारयते विद्वान्ब्रह्मचर्येण धारयेत्" ॥ इति ।
"अन्यथा हृदये तेषां तत्केशः शंकुवद्भवेत् । रेतांसि तस्य पित्रादीन् पितॄन्प्राशयते यमः"॥ इति ।

अत्र ब्रह्मचर्यं ऋतावप्यगमनम्

"मातापित्रोर्मृतौ सूनुरर्वाक् संवत्सराद्यदि । मैथुनं तु समासाद्य प्राजापत्यं समाचरेत् ॥
"यदि शुक्रांतसंयोगः कृच्छ्रं चांद्रायणं चरेत् । आहितो यदि गर्भः स्याद्ब्रह्महत्याव्रतं चरेत्" ॥ इति **स्मरणात्** । **स्मृत्यंतरेऽपि**—

"अवर्जयित्वा तैलादीन्केशमात्रं तु धारयेत् । तस्य वैवस्वतो राजा केशान्प्राशयते पितॄन् ॥
"केशधारणमध्ये तु पत्नीगर्भं दधाति चेत् । रेतसा तत्पितॄणां तु तृप्तिर्भवति सर्वदा" ॥

शुद्धिनिर्णये—

"व्रतांते विधिवत्पित्रोः कृत्वाऽब्दिकमथो द्विजः । क्षौरं कुर्याच्छुभे तारे कृत ऊनाब्दिकेऽपि वा" ॥

---

१ ग–षोडषाब्दे ।

अत्रिः—

"यदि कर्ता व्रतस्थः स्यादब्दांते चाब्दिके कृते। अनुकूले दिने क्षौरं कृत्वा तत्तु विसर्जयेत्"॥ इति स्मृत्यंतरे च—"ततः समाप्ते व्रतबंधकल्पे कृत्वा तु सांवत्सरिकं यथावत्।

" ततः सुपुण्ये शुभदे मुहूर्ते क्षौरं यथावद्विदधीत विद्वान् " ॥ इति । ब्रह्मचर्यादिनियमेन सह केशधारणं कृत्वा वत्सरांते सपिंडीकरणानंतरमाब्दिकं कृत्वा अनिषिद्धकाले वापयेत्। द्वादशाहादिसापिंड्येऽपि सत्यामभ्युदयेच्छायां नियमेन सह केशधारणं कुर्वन् सांवत्सरिकमाब्दिकं यथावत्कृत्वा " पित्रोर्मृत्यब्ददीक्षांते त्याज्यं मासचतुष्टयम्।

" कन्याकर्कटकुंभेषु चापमासि चतुष्टये । केशखंडं गृहस्थस्य पितॄन्प्राशयते यमः " ॥ इत्युक्तप्रत्यवायरहिते शुभे काले क्षौरं कुर्यादिति व्याचक्षते । अन्ये तु संवत्सरसपिंडीकरणे ब्रह्मचर्यादिनियमेन सहैव केशधारणमवश्यं कर्तव्यम् । ततः पूर्वं सापिंड्ये सपिंडीकरणानंतरं न ब्रह्मचर्यादिनियम आवश्यकः । सति तु ब्रह्मचर्यादौ अभ्युदयः । केशमात्रधारणं तु आब्दिकपर्यंतमित्याहुः । तथा च स्मृत्यंतरे—

" वत्सरांतेऽथ मध्ये वा सपिंडीकरणं यदा। क्षौरं कृत्वा ततः कुर्यात्तच्छेषं धारयेत् द्विजः "॥ इति । द्वादशाहव्यतिरिक्तकालेषु क्षौरपूर्वकं सपिंडीकरणं कृत्वा ततो वत्सरशेषं केशं धारयेदित्यर्थः॥

तत्रैव—" कृते सपिंडीकरणे तु पित्रोर्न ब्रह्मचर्यं परिरक्षणीयम् ।

" तद्रक्षणे चापि महत्फलं स्यान्निवर्तने च स्खलनेऽपि न दोषः" ॥ इति ब्रह्मचर्यनिवर्तने स्खलनेऽपि न दोषः । 'मातापित्रोस्तु वत्सरम्' इत्यादिवचनानुसारेण केशमात्रधारणमिति व्याचक्षते । अत्र पितृमेधसारकृता मातापित्रोरित्यविशेषस्मरणात् पुत्रत्वाविशेषात्संकोचस्याभावाच्च सर्वेषामपि पुत्राणां पित्रोर्मरणे संवत्सरं केशधारणादिव्रतं भवतीत्युक्तम् । अपरे तु—

" सर्वैरनुमतिं कृत्वा ज्येष्ठेनैव तु यत्कृतम् । द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेत् ॥

" नवश्राद्धं सपिंडत्वं श्राद्धान्यपि च षोडश । एकेनैव तु कार्याणि संविभक्तधनेष्वपि "॥ इत्यादिवचनैर्नवश्राद्धादिसोदकुंभश्राद्धांतप्रथमाब्दिकपूर्वकदिनावसानकृत्येषु ज्येष्ठस्यैव कर्तृत्वविधानात् तन्न्यायेन वत्सरांतकेशधारणादिनियमेष्वपि तथैवोचितत्वात्

" यदि कर्ता व्रतस्थः स्यात् कृत्वाब्दिकमधो द्विजः । कृत्वा तु सांवत्सरिकं यथावत् " इत्यादिभिः मुख्यकर्तुरेव वत्सरांते वपनविधानाच्च केशधारणनियमोऽपि तस्यैवेत्याहुः ।

आहिताग्निविषये। आहिताग्नेर्विशेषमाहापस्तंबः—"पर्वणि केशश्मश्रूणि वापयतेऽप्यल्पशो लोमानि वापयत इति वाजसनेयकम् " ॥ इति । स्मृत्यंतरेऽपि—

" पित्रोर्मृताब्दे गर्भाब्दे सदा पर्वणि पर्वणि । आहिताग्निर्वपेत्केशान्न वपेदितरस्तयोः " ॥ आहिताग्निः पर्वणि पर्वणि वपेत्। इतरः अनाहिताग्निः तयोः पितृमृताब्दगर्भाब्दयोर्न वपेदित्यर्थः।

श्रीधरीयेऽपि—

" केशान् मासत्रयादूर्ध्वं गर्भवान्धारयेत् द्विजः। यज्वा तु पर्वणि क्षौरं कारयेदाहिताद्दते "॥ इति। आहिताद्दते आधानाद्दते । आधाने तु पर्वव्यतिरिक्तकालेऽपि गर्भवान्क्षौरं कारयेदित्यर्थः । केचित्तु 'कारयेद्विहिताद्दते' इति पठित्वा व्याचक्षते—विहितं गर्भनिमित्तकेशधारणं मातृपितृमृतिनिमित्तकेशधारणं च। तन्निमित्तद्वयं विना यज्वा पर्वणि क्षौरं कारयेदिति। एवं व्याख्याने पूर्वोक्तवचनविरोधः स्यात् । यथोचितमत्र ग्राह्यम् ।

---

१ ग–धारणमात्र।

सपिण्डीकरणनिमित्तक्षौरम् । सपिण्डीकरणनिमित्तक्षौरमुक्तं **स्मृत्यंतरे**—

" द्वादशाहे यत्र पित्रोः सपिण्डीकरणं भवेत् । तत्र क्षौरं न कर्तव्यं त्रिपक्षादिषु कारयेत् " ॥

त्रिकाण्ड्यामपि—

" सापिंडीकरणार्थं च क्षुरकर्म विधीयते । क्षुरकर्म न कर्तव्यं द्वादशाहसपिंडने ॥
" द्वादशाहात्परं क्षौरं शुभकाले समाचरेत् । वत्सरांतेऽथ मध्ये वा सापिंडीकरणं यदि ॥
" क्षौरं कृत्वा तु तत्कुर्यात्तच्छेषं धारयेत् द्विजः " ॥ इति । **पितामहश्च**—
" अकृत्वा वपनं यस्तु वत्सरांते सपिंडनम् । कुर्याद्यदि पुनः कार्यमित्युवाच पितामहः " ॥ इति ।

अत्र गर्भवतो वपननिषेधः **स्मर्यते**—

" पित्रोः संवत्सरादर्वाक् सपिंडीकरणं यदि । गर्भिण्यां न तु भार्यायां तच्छेषं धारयेद्विजः " ॥ इति । भार्यायां गर्भिण्यां सापिण्ड्यनिमित्तं क्षौरं न कुर्यात् । किंतु सापिंड्यं कृत्वा वत्सरशेषं धारयेदित्यर्थः । प्रसंगात् **क्षौरविषयमन्यदप्युच्यते** । **पद्धतौ**—

" षष्ठ्यष्टमीप्रतिपदस्तिथयश्च रिक्ता वर्ज्याः शशांकगुरुसोमजभार्गवाणाम् ॥
" वारांशकोदयविलोकनमिष्टमाहुः क्षौरे तु कर्मणि न शौक्रमुशंति शावे " ॥ इति ।

स्मृत्यन्तरे—" श्राद्धे च भान्वर्कसुतारवारे मासाधिके शुक्रगुरोश्च मौढ्ये ।
" चन्द्रक्षये विष्टिविषोर्दिनान्ते क्षौरं यदि स्यात् कुलनाशहेतुः " ॥ इति ।
" प्रातर्मुहूर्तादर्वाग्यः क्षुरकर्म समाचरेत् । स पितॄन् पातयत्याशु नरके रोमदण्डके ॥
" आद्यन्तयोराश्रमिणोर्वपने सर्वदा विधिः । मध्यमाश्रमिणोर्हेतोर्विना कर्तनमुच्यते ॥
" यन्मास्येवाब्दिकश्राद्धं यदि पित्रोर्भवेदिह । प्राक्पिंडदानात्तन्मासि वपनं न समाचरेत् " ॥

इत्याश्वलायनः । **संग्रहेऽपि**—

" मासेषु कन्याकटककुंभचापेषु वर्जयेत् । अशुभर्क्षे कृते क्षौरे क्षिप्रं कुर्यात्पुनः शुभे ॥
" दग्धान् केशान्पंचगव्यक्षालितानथ वापयेत् । तथैव वपनं मूर्ध्नि कृकलासः पतेद्यदि ॥
" यस्मिन्मासि मृताहः स्यात्तन्मासं पक्षमेव वा । क्षौरकर्म न कुर्वीत परान्नं च रतिं त्यजेत् ॥
" वापयेन्न कृतोद्वाहो वर्षं वर्षार्धमेव वा । भुंजीत पार्वणं नैव दर्शश्राद्धं च वर्जयेत् ॥
" न विवाहदिने क्षौरं प्रशस्तं निशि काम्यया । अन्तर्वता न कर्तव्यं पूर्वे वा पंचमेऽन्हि वा ॥
" एकोदराणां पुत्राणां पितुश्चैकदिने तथा । क्षुरकर्म न कर्तव्यं तथैवं श्राद्धभोजनम् ॥
" क्षुरकर्म न कुर्वीत चौलादूर्ध्वमृतुत्रयम् । तथैवोपनयादूर्ध्वमुपाकर्म विना क्वचित् ॥
" केशान्मासत्रायदूर्ध्वं गर्भवान्वापयेद्यदि । गर्भध्वंसेन तत्तुल्यं ब्रह्महत्यासमं भवेत् ॥
" आहिताग्नेर्द्वयं पर्व द्वादशी च प्रशस्यते । भ्रूप्रकोष्ठौ विना सर्वकेशलोमानि वापयेत् ॥
" द्विमुंडने तु संप्राप्ते कथं क्षौरं विधीयते । मंत्रेण विधिवत्कुर्यात्पश्चात्क्षौरं समाचरेत् " ॥ इति ।

इति वपनविधिः ।

नग्नप्रच्छादनश्राद्धम् । मृतदिने वपनस्नानानंतरं ग्रामं प्रविश्य गृहद्वारे संकल्प्य नग्नप्रच्छादनश्राद्धं दद्यात् । **तथा च स्मृत्यंतरे**—

" ज्ञातिभिश्चार्द्रवासोभिः सह बालपुरःसरे । नग्नप्रच्छादनं कृत्वा सप्रदीपं विशेद्गृहम्[1] " ॥ इति ।

---

१ कखग-सदैव ।

अ[illegible]—" सोदकवाससो ग्रामं प्रविश्य नग्नप्रच्छादनार्थं कांस्यपात्रं वस्त्रं घृततंडुलपर्णपात्राणि ब्राह्मणाय दद्यात् " इति । **चंद्रिकायाम्**—

" नग्नप्रच्छादनश्राद्धं स्नानान्ते तु मृतेऽहनि । घटे तंडुलसंपूर्णे वाससा परिवेष्टिते ॥
" विधाय कांस्यपात्रेण तस्मिन्नाज्यं विनिक्षिपेत् । हिरण्यं तत्र निक्षिप्य यथाविभवसारतः ॥
" कुलीनाय दरिद्राय विष्णुं च मनसा स्मरन् । प्रेतमुद्दिश्य संपूज्य ब्राह्मणं तु विसर्जयेत्"॥ इति ।

व्यासः—

"वासस्तंडुलमप्पात्रं प्रदीपं कांस्यभाजनम् । दहनानंतरं दद्यान्नग्नप्रच्छादनं हि तत्"॥ इति । **शुद्धिनिर्णये**—" दशदिनपर्याप्ततंडुलपूरितं कुम्भं कांस्यपात्रेण पिधाय तण्डुलार्धपरिमाणतिलमाषमुद्गलवणघृतव्यञ्जनसहितं दीपपात्रं हिरण्यनववस्त्रसहितं प्रेतमुद्दिश्य नवश्राद्धविधिना सोदकुंभं कार्यम् " ॥ इति । **स्मृत्यर्थसारे**—

"वासस्तंडुलमप्पात्रं कांस्यमुद्दीपनं घृतम् । दहनानंतरं दद्यात्स तु नग्नपरिच्छदः" ॥ इति । अत्र दहनानंतरमेव नग्नप्रच्छादनविधानात् तदनंतरमुदकदानमिति गम्यते । तथा च **स्मृत्यंतरे**—
" नग्नप्रच्छादनं कर्म कृत्वैवमथ वेश्मनः । प्रवेशनादि कुर्याच्च ततो गर्तं गृहाद्बहिः " ॥ इति । गर्तं जलाशयमुदकदानार्थं गच्छेदित्यर्थः । यत्तु **नारदेन** कर्मवैपरीत्यमुक्तम्
"स्नात्वा दग्ध्वा पुनः स्नात्वा तोयं दद्याद्यथोचितम् । नग्नप्रच्छादनं दद्याद्भोजनेन सह द्विजः"॥ इति न तथेह शिष्टाचारोऽस्ति । देशविशेषे तथैव चरंति । **श्रीधरीये**—
" नग्नप्रच्छादनं दद्याद्भोजनेन सह द्विजः । सुवर्णं सोदकुंभं च सवस्त्रं वेदपारगे ॥
" तदैव देयं तद्विप्रे न द्वितीयेऽह्नि कारयेत् " । भोजनेन सह तंडुलैः सहेत्यर्थः । रात्रिशेषमाह **जातुकर्णिः**—
" तिलोदकं तथा पिंडं नग्नप्रच्छादनं नवम् । रात्रौ न कुर्यात्संध्यायां यदि कुर्यान्निरर्थकम्" ॥ इति नवं नवश्राद्धम् । रात्रौ दहनानंतरं नग्नप्रच्छादनादिकं न कार्यं किंतु परेऽहनि कर्तव्यमित्यर्थः । यत्तु **कात्यायनवचनम्**—
" रात्रौ दग्ध्वा तु पिंडांतं कुर्याद्वपनवर्जितम् । श्वो भूते वपनं तत्र केशमात्रं विधीयते " ॥ इति एतच्च दिवारब्धसंस्क्रियाविषयम् । "यदि वा स्याद्दिवारंभः शेषं संसाधयेन्निशि" इति **स्मरणात्** । पुत्राणां तु राज्यारब्धसंस्कारेऽपि तदैव कर्तव्यम् ।
" रात्रिदाहे तदा कुर्यात्क्षौरं पिंडोदकक्रियाम् । मातापित्रोरथान्येषां श्वोभूते वपनं भवेत् " ॥ इति **स्मरणात्**—

उदकदानविधिः । नग्नप्रच्छादनश्राद्धानंतरकृत्यमुक्तं **पितृमेधसारे**—

" नवं वासस्तिलान्दर्भानुदकुंभमिति संभृत्य तीर्थं गत्वा स्नात्वा तीरकृते कुंडे कर्ता संकल्प्य प्रेतमावाह्य आयाहि प्रेत इति शिलां स्थापयेत् । अथ ज्ञातयो दक्षिणामुखाः स्नात्वोक्तक्रमेण संकल्प्य सव्यं जान्वाच्यामुकगोत्रायामुकशर्मणे प्रेतायैतद्वास उदकं ददामीति त्रिगुणभुग्नं नवं वासः सदशं सकृत्पीडयेयुः । एवं स्नात्वा स्नात्वा त्रिः पीडयेयुः । अशक्तौ त्रिर्निमज्ज्य संकल्प्य त्रिर्वासोदकं तिलोदकांजलींश्च दद्यात्" इति ।

---

१ क्ष—मृत्पात्रं ।

अत्रापस्तंबः—" केशान्प्रकीर्य पांसूनोप्य एकवाससो दक्षिणामुखाः सकृदुन्मज्ज्योत्तीर्य सव्यं जान्वाच्य वाससः पीडयित्वोपविशंत्येवं त्रिस्तत्प्रत्ययं तिलमिश्रमुदकमुत्सृज्य तूष्णीमेत्याकालमभोजनं कर्तुः " इति। उपविशंति उपविश्य पीडयेयुः। न प्रव्हीभूय स्थित्वा वा तत्प्रत्ययं गोत्रनामग्रहणपूर्वमित्यर्थः। **आश्वलायनः** " सकृन्निमज्ज्य त्रीनुदकाञ्जलीन् दद्यात् " इति। **बोधायनः**—

" केशानोप्य ततः स्नात्वा त्रिर्दद्युरुदकाञ्जलिम्। दर्भेषु तिलसंमिश्रं एतत्ते उदकं त्विति "॥

व्यासोऽपि--

" शवं दग्ध्वा यथान्यायं दृष्ट्वा ज्योतिर्दिशस्तथा। बालान् दारान्पुरस्कृत्य गच्छेत्प्रेतमनीक्षकः।
" शुद्धमस्फुटितं श्लक्ष्णं श्यामं लोहितमेव वा। पाषाणं तत आदाय गत्वा तत्र महाजलम्॥
" सचैलं दंडवत्स्नात्वा मलं प्रक्षाल्य वर्ष्मजम्। पुनः सचैलं स्नात्वाऽथ वाग्यताः सुसमाहिताः॥
" वृद्धपूर्वाः सगोत्राश्च बांधवाश्च सहोदकाः। सपिंडाश्च क्रमात्पूर्वाः प्राचीनावीतिनस्तथा॥
" दक्षिणाभिमुखा भूत्वा दक्षिणाग्रकुशेषु हि। पाषाणं तत्र निक्षिप्य कृत्वा तु पुरतोऽवटम्॥
" नामगोत्रे समुच्चार्य प्रेतस्तृप्यत्विति ब्रुवन्। गर्ते सकृत्प्रसिंचेयुस्तिलपूर्णजलाञ्जलिम्।
" पित्रोस्तु यावदाशौचं तावत्कुर्याज्जलाञ्जलिम् "॥ इति। **कात्यायनोऽपि**—
" तथानवेक्षमेत्यापः सर्व एव शवस्पृशः। स्नात्वा सचैलमाचम्य दद्युरस्योदकं स्थले॥
"गोत्रनामपदांते च तर्पयामीत्यनन्तरम्। दक्षिणाग्रान् कुशान् कृत्वा सलिलं तु पृथक् पृथक्"॥ इति॥

पैठीनसिरपि—" प्रेतं मनसा ध्यायन्दक्षिणामुखस्त्रीनञ्जलीन्निनयेत् " इति।

प्रचेताः—"नदीकूलं ततो गत्वा शौचं कृत्वा यथार्थवत्। वस्त्रं संशोधयेदादौ ततः स्नानं समाचरेत्॥
" सचैलं तु पुनः स्नात्वा शुचिः प्रयतमानसः। पाषाणं तत आधाय विप्रो दद्याज्जलाञ्जलीन्॥
" द्वादश क्षत्रिये दद्याद्वैश्ये पंचदश स्मृताः। त्रिंशच्छूद्राय दातव्याः ततः संप्रविशेद् गृहम्॥
" ततः स्नानं पुनः कार्यं गृहशौचं च कारयेत् "॥ इति।

स्मृतिरत्ने—"अपसव्ये ततः कृत्वा वस्त्रयज्ञोपवीतके। दक्षिणाभिमुखैर्विप्रैर्देयं तोयाञ्जलित्रयम्"॥इति। वस्त्रं निष्पीडनवस्त्रमिति व्याचक्षते। **वसिष्ठः**—"सव्योत्तराभ्यां पाणिभ्यामुदकक्रियां कुर्वीरन्"इति। **प्रचेताश्च**—"प्रेतस्य बांधवा यथावृद्धमुदकमवतीर्य नोत्कर्षेयुरुदकांते प्रसिञ्चेयुः। अपसव्ययज्ञोपवीतवाससो दक्षिणामुखा ब्राह्मणस्योदङ्मुखाः प्राङ्मुखाश्च राजवैश्ययोः " इति। ज्ञातिभिर्वपनपूर्वकमेवोदकं देयम्। "प्रदद्युर्ज्ञातयः सर्वे क्षौरं कृत्वा तिलोदकम् " इति **स्मरणात्**। **प्रचेताश्च**—" वपनं कृत्वा स्नात्वैकवस्त्राः प्राचीनावीतिनो दक्षिणामुखाः अवटे संदर्भे जलाञ्जलीन्दद्युः " इति। **अंगिराः**—"सतिलं दर्भेष्वसावेतत् इति जलाञ्जलीन् दद्युर्बालपुरःसराः सपिंडाः" इति। यथावृद्धं बालपुरःसरा इत्येतयोर्यथास्वगृह्यं यथाशिष्टाचारं व्यवस्था।

एतच्चोदकदानं यावदाशौचं कार्यम्। तथा च **व्यासः**—

"प्राचीनावीतिनो नामगोत्राभ्यां दक्षिणामुखाः। जलं प्रेताय मध्याह्ने दद्युर्यावदशुद्धता"॥

यावदाशौचमित्यर्थः। **विष्णुश्च** (१९।१३)—"यावदाशौचं तावत्प्रेतस्य उदकं पिंडं च दद्युः" इति। अत्र विशेषमाहापस्तंबः—" एवमहरहरञ्जलिनैकोत्तरवृद्धिरैकादशाहात् " इति। कर्ता ज्ञातयश्च

प्रथमदिने त्रीनञ्जलीन् दद्युर्द्वितीये चतुस्तृतीये पंच एवं दशमदिनपर्यंतमेकोत्तरवृध्या दद्युः । संभूय पंचसप्तत्यञ्जलयो भवन्ति । अञ्जलेरेव एकोत्तरवृध्यभिधानात् वास उदके नास्त्येकोत्तरवृद्धिः । तत्तु प्रत्यहमा दशाहात् त्रिरेव दद्युः । **प्रचेताश्च**—

"दिने दिनेऽञ्जलीन् पूर्णान् प्रदद्यात्प्रेतकारणात् । तावद् वृद्धिश्च कर्तव्या यावत् पिण्डः समाप्यते"॥इति। यावत् दशमपिण्डः समाप्यते तावदञ्जलिवृद्धिः कार्येत्यर्थः । यत्तु "प्रथमतृतीयपंचमसप्तमनवमेषूदकक्रिया" इति **गौतमस्मरणात्** (१४।३६) तद्वापद्विषयमित्युक्तं **पितृमेधसारे** "संकटेष्वयुग्माहेषु दशमाहे वा दद्युः" इति **स्मृतिरत्नमाधवीयादिषु** व्यवस्थांतरं दर्शितम् अयुग्मेषु दिनेषु त्रींस्त्रीनञ्जलीन् दद्यात् । "प्रथमतृतीयपंचमसप्तमनवमेषु उदकक्रियेति" **गौतमस्मरणात्**—

"प्रथमेऽह्नि तृतीये पंचमे सप्तमेऽपि वा । नवमे चांबुनि स्नानं कृत्वा दद्यात्तिलोदकम्" ॥ इति **विष्णुपुराणे** वचनाच्च—प्रेतस्य तापोपशांतिविशेषापेक्षया तु प्रतिदिनमप्येकोत्तरवृध्या उदकदानं कार्यम् । "दिने दिनेऽञ्जलीन्पूर्णान्" इति **प्रचेतः**स्मरणादिति । एकोत्तरवृद्ध्या श्राद्धमपि कर्तव्यमित्युक्तं **श्रीधरीये**—

"श्राद्धमेकोत्तरं वृध्या कर्तव्यं तु दिने दिने । अवसानाद्बलीनां तु द्विगुणं प्रत्यहं परे" ॥ इति । एकोत्तरं यथा भवति तथा बलीनामवसानपर्यंतं दशमदिनपर्यंतं श्राद्धं कर्तव्यम् । परे अन्ये प्रत्यहं द्विगुणं जलाञ्जलिभ्यो देयमित्याहुरिति शेषः । **स्मृत्यंतरे** च—

"एकोत्तरं यथाशक्ति भुक्तिं दद्याद्दिने दिने । दशकं वा शतं वापि सहस्रं वासहेमकम् ॥

"देयं विप्रस्य तत्पुत्रैर्यथालाभं यथाविधि:" ॥ इति । अत्र पुत्रैरिति संस्कर्तॄणामुपलक्षणम् । यः संस्कर्ता स एवैकोत्तरवृद्धिश्राद्धं कुर्यात् । अशक्तौ स्मृत्यंतरोक्तं पक्षांतरं द्रष्टव्यम् । एतच्च एकोत्तरवृद्धिश्राद्धं पिंडबलिप्रदानानंतरं कर्तव्यम् ।

यावदाशौचं प्रत्यहमेकमेव तिलाञ्जलिं दद्यादित्याह **याज्ञवल्क्यः** (प्रा. ३-४)—

"सप्तमाद्दशमाद्वाऽपि ज्ञातयोभ्युपयन्त्यपः । अप नः शोशुचदघमनेन पितृदिङ्मुखाः ॥

"सकृत्प्रसिञ्चत्युदकं नामगोत्रेण वाग्यताः" इति **ब्राह्मपुराणेऽपि**—

"नामगोत्रे समुच्चार्य प्रेतस्तृप्यत्विति ब्रुवन् । गर्ते सकृत्प्रसिंचेयुस्तिलपूर्णं जलाञ्जलिम्" ॥ इति । पक्षांतरमप्युक्तं **तत्रैव**—

"यद्वा शताञ्जलीन् दद्यात्प्रथमे ह्येकमञ्जलिम् । द्वितीये त्र्यञ्जलींश्चैव तृतीये पंच सप्त च ॥

"चतुर्थे पंचमदिने नव दद्याच्च षष्ठके । सप्तमे चाऽष्टमे चापि दद्यादेकादशाञ्जलीन् ॥

"त्रयोदशाञ्जलिं दद्यान्नवमे तु तथा दिने । दद्याच्च सप्तदशकान्दशमे ह्येकविंशकान् ॥

"सातत्यञ्जलयः केचित्त्रीणि सप्त च पंच च" ॥इति । **आश्वलायनः** (४।४।९)—"सकृदुन्मज्ज्य तिलोदकाञ्जलीन्दत्वा तस्य गोत्रनाम गृहीत्वोत्तीर्य" इति । **संग्रहेऽपि**—

"सपिंडा ज्ञातयस्त्रिस्त्रिरेकैकोत्तरमग्निदः । समानोदास्तत्पर्यंति नित्यमेकैकमञ्जलिम्" ॥ इति । **पैठीनसिः**—

"दक्षिणामुखस्त्रीनुदकाञ्जलीन्निनयेत् । शवदाहाहःप्रभृत्येकादशेऽह्नि विरमेत्" इति । अत्र तिलोदकसंख्या यथास्वगृह्यं यथाकुलाचारं व्यवस्थापनीया । सपिंडानां त्र्यहात्तिलोदकसमा-

पने प्रथमदिनाद्यष्टमदिनपर्यन्तोदकमष्टमे दिने कृत्वा नवमदशमदिनयोस्तत्तद्दिनोदकं दद्यात् । तथैवाष्टमदिनपर्यन्तं वासोदकं पिण्डं चाष्टमदिने कृत्वा नवमदशमयोस्तत्तद्दिनवासउदकं पिंडं च दद्यात् । **पितृमेधसारे**—"दशाहांतस्त्र्यहतर्पणेऽष्टमे द्विपंचाशत् नवमेऽह्न्येकादश दशमे द्वादशाञ्जली-नष्टमेऽष्टौ पिंडान् नवमदशमयोरेकैकं दद्यात् " इति । अतिक्रांते दशाहे ज्ञातीनां त्र्यहादुदकदाने व्यवस्था दर्शिता **तत्रैव**—"द्वादशाद्यदिवसे द्वितीये त्रिंशत् तृतीये त्रयस्त्रिंशदुदकाञ्जलीन् दद्यात् । आद्येऽह्नि कर्ता त्रीन्पिंडान्द्वितीये चतुरः तृतीये त्रीन्द्वयोर्द्वे द्वे नव श्राद्धे तृतीयेऽह्नि एकोद्दिष्टाहे चैकैकं नवश्राद्धं दद्यात् " इति । **श्रीधरीयेऽपि**—

" दशाहांतः सपिंडानां त्र्यहात्तु तिलतर्पणे । अष्टमादिद्विपंचाशत् एकादशद्वादशाञ्जलीन् ॥

" द्वादशप्रथमेऽह्न्येव द्वितीये त्रिंशदुच्यते । त्रयस्त्रिंशत्तृतीयेऽन्हि निर्गते दशमेऽहनि "॥ इति ।

संग्रहेऽपि—

"अग्निवेदास्त्रयः पिंडास्तथा वासोदकं दश । आदित्यस्त्रिंशदित्येवं त्रयस्त्रिंशत्तिलोदकम्" ॥ इति ।

पारस्करः—

" प्रथमे दिवसे देयास्त्रयः पिंडाः समाहितैः । द्वितीये चतुरो दद्यादस्थिसंचयनं ततः ॥

"तृतीये तूदकं दत्वा चतुर्थे श्राद्धमाचरेत् । एकोद्दिष्टं चतुर्थेऽह्नि सापिण्ड्यं च ततः परम्"॥ इति।

अखण्डादर्शेऽपि—

" असपिण्डो यदि दहेत् द्वितीये त्वस्थिसंचयः । तृतीये तूदकं दत्वा चतुर्थे श्राद्धमाचरेत् ॥

" एकोद्दिष्टं चतुर्थेऽह्नि मरणात्तु विधीयते ।

" सपिंडीकरणं यत्तु द्वादशेऽह्नि विधीयते । तत्पंचमदिने कुर्यादसपिंड इति स्थितिः " ॥ इति । एतच्च पक्षिण्याशौचिकर्तृकसंस्कारे वेदितव्यम् । त्र्यहं योनिबंधूनामाशौचं दहनादिष्विति । एतेषां संस्कर्तृत्वे त्रिरात्रशौच**स्मरणात्** । " यावदाशौचं तावत्प्रेतस्योदकं पिंडं च दद्युः " इति **विष्णु-स्मरणाच्च** । अत्र चोदकसंख्या आदितस्त्रिंशदित्येवं त्रयस्त्रिंशत्तिलोदकमित्युक्तप्रकारेणैव कर्तव्यः । यत्तु—

"असपिंडो यदि दहेत् द्वितीये त्वस्थिसंचयम् । एकोद्दिष्टं तृतीयेऽन्हि मरणात्तु विधीयते"॥ इत्येतत् बंधुकर्तृकसंस्कारविषयम् । संचयनमुदकस्याप्युपलक्षणम् । तच्च द्वितीये दिने पंच-सप्तत्यात्मकम् । मातामहादिसंस्कारे दौहित्रादीनां दशाहमाशौचं क्रिया च ।

" पौत्रदौहित्रयोर्लोके विशेषो नास्ति धर्मतः " इत्यादि**स्मरणाद्**संस्कर्तॄणां समानोदकानां त्रिरात्राशौचिनां त्र्यहादेव उदकसमापनम् । तच्च स्वाशौचकाल एव कर्तव्यम् । स्वाशौचकाल अकृतोदकस्य समानोदकस्य पश्चादुदकदानेऽपि आशौचमनुष्ठेयमित्याहुः । उदकसंख्या च आदितस्त्रिंशदित्युक्तप्रकारेण सपिंडवदेवेति केचित् ।

स्मृत्यंतरे—" सकृत्प्रसिञ्चत्युदकं सप्तत्यञ्जलयः क्वचित् । यद्वा शताञ्जलीन् दद्यात् " ॥ इति । पक्षत्रयमाश्रित्य सोदकानामुदकदानमुक्तम्—

"त्रिरात्राशौचिनो दद्युः प्रथमेऽह्न्यञ्जलित्रयम् । द्वितीये चतुरो दद्यात्तृतीये त्र्यञ्जलींस्तथा"॥

" सप्तत्यञ्जलिपक्षे तु प्रथमे च द्वितीयके । एकैकविंशतिं दद्यात्तृतीये शेषतः शुचिः ॥

"त्रिरात्राशौचिनः कुर्युः प्रथमे त्रिंशदञ्जलीन्। चत्वारिंशत् द्वितीयेऽह्नि त्रिंशद्व्युस्ततः शुचिः"॥ इति। समानोदकानां प्रेतनिर्हारे विशेष उक्तो **भृगुणा**—

" शावे च सूतके शुद्धिस्त्र्यहादुदकदायिनाम्। शववाहं च कुर्याच्चेद्दशाहांता भवेत्क्रिया" ॥ इति।

स्मृत्यंतरेऽपि—

"समानोदका कुर्वीरन्संस्कारं दशरात्रतः । दशाहांतेन शुद्धिः स्यादित्याह भगवान् भृगुः"॥ इति ।

मांडव्यः—

" सपिंडो वाऽसपिंडो वा कर्ता चेद्वपनं स्मृतम् । आशौचं दशरात्रं स्यात्पंचसप्तति तर्पणम् ॥

" आशौचं तु त्रिरात्रं स्यादन्यथा वपनं न हि " ॥ इति ।

"त्रिंशत्तिलोदकं कुर्यात्समानोदकसंस्थितौ" इति । असपिंडः समानोदकः । अन्यथा संस्काराकरण इत्यर्थः । तिलपरिमाणमुक्तं **विष्णुपुराणे**—

"तिलैः सप्ताष्टभिर्वाऽपि समवेतं जलाञ्जलिम् । भक्तिनम्रः समुद्दिश्य भूत्यस्माकं प्रदास्यति"॥ इति । अज्ञातिभिरपि क्वचिदुदकदानकर्तव्यम् । तदाह **याज्ञवल्क्यः** (प्रा. ४)—

" एवं मातामहाचार्यप्रेतानामुदकक्रिया । काम्योदकं सखिप्रत्तास्वस्रीयश्वशुरर्त्विजाम् " ॥ इति । प्रत्ता परिणीता दुहितृभगिन्यादिः । अपुत्राणां मातामहादीनां सापिंडवदुदकदानं नित्यं कार्यं सख्यादीनां तु कामतः । न नित्यतया । अकरणे प्रत्यवायाभावात् । **स्मृत्यन्तरेऽपि**—"पतितस्योदकं कार्यं सपिंडैर्बांधवैर्बहिः" इति ग्रामाद्बहिरेकदिने कार्यम् ।

पिण्डदानविधिः । संकटविषये तीरकुंडतर्पणानंतरकृत्यमुक्तं **पितृमेधसारे** " अथोदकुंभमाहृत्य कर्ता गृहद्वारे कुंडेऽश्मानं विधाय प्रेतमावाह्य संकल्प्य सव्यं जान्वाच्य दक्षिणामुखस्त्रिर्वास उदकं दत्वा दीपं प्रज्वाल्य संकल्प्य कुंडसन्निधौ दर्भेषु मार्जयतां मम प्रेते इति सकृदपो मार्जयित्वा कुक्कुटांडप्रमाणं मुष्टिप्रमाणं वा फलमूलशाकयुक्तं तिलमिश्रं पिंडं ' अमुकगोत्रामुकशर्मन्प्रेत इदं पिंडमुपतिष्ठस्व' इति प्रेताय पिंडबलिं च दत्वा पूर्ववन्मार्जयित्वा पात्रसंक्षालनतोयेन त्रिः प्रसव्यं परिषिच्य तमप्सु विसर्जयेत् । अपि वा संकटेषु तीरकुंडतर्पणांते पिंडं दद्यादेवमन्वहं पिंडमेकैकं दद्यादाश्राद्धतीरकुंडपाषाणे वा पिंडं दद्यादिति केचित् । अत्र **सांख्यायनः** " गृहद्वारे वामपार्श्वे कुंडं तदुपर्यश्मानं च निधाय कनिष्ठपूर्वाः स्त्रीप्रथमा वास उदकं पिंडयेयुरिति । अत्र त्रिर्वास उदकं देयं न तिलोदकं विध्यभावात्तथा शिष्टाचाराच्च ।

यद्यपि 'नित्यं मृतस्य पुत्रैस्तु भार्यया च यथाविधि । दशाहान्तं द्विरावृत्त्या कर्तव्या चोदकक्रिया'। **इत्याश्वलायनस्मृतिः**रस्ति तथापि शिष्टाचाराभावादुपेक्ष्यम् । **अखंडादर्शे**—

" ततो गृहं समागम्य चरुं कुर्यात्स्वयं ततः । द्विः प्रक्षाल्य तु तद्द्रव्यं कर्तव्यं श्रपणं ततः ॥

" आदाय दक्षिणानाग्रांस्तु दर्भान् संस्तीर्य विन्यसेत् "

शंखः—"दूर्वां प्रवालमग्निं वृषभं चालभ्य गृहद्वारे प्रेताय पिंडं दत्वा पश्चात्प्रविशेयुः" ॥ इति ।

श्रीधरीये—

" वामपार्श्वे गृहद्वारे शिलास्तिस्रो निधाय च । तासु वस्त्राणि संपीड्य सायं प्रातर्बलिं हरेत् "॥ इति । वामपार्श्वे गृहामुखंगतस्येति केश्चिद्व्याख्यातम् । तथा च **स्मृत्यंतरे**—

" द्वारस्य दक्षिणे पार्श्वे बहिः कुर्याद्यथावटम्। एकमश्मानमादध्यादिष्टकां वाऽग्रजन्मनाम् ॥" इति ।

गृहाद्बहिः अंकण इति यावत् । गृहद्वारवामपार्श्वदक्षिणपार्श्वयोर्विकल्प इत्यन्ये । शिलात्रयस्थापनं बोधायनानां नियतम् । तेषां शिलात्रयस्थापनस्य सायंप्रातर्बलिदानस्य च विधानादितरेषां "एकमश्मानमादध्यात् शिलास्तिस्रो निधाय च" इत्यनयोर्विकल्पः । **अंगिराः**—

"बहिः पिंडप्रदानं स्यात्कर्षू खात्वा विधानतः । गंधमाल्योदकेनार्च्य दद्याद्दर्भेष्ववाङ्मुखः" ॥

ब्रह्मपुराणेऽपि—

"ग्रामाद्बहिः शुचौ देशे गोमयेनोपलेपिते । लौकिकाग्निं प्रतिष्ठाप्य स्नात्वा पात्रेण तैजसा ॥
"मृन्मयेनापि कर्तव्यं श्रपणं पितृयज्ञवत् । अभिघार्य तदुद्वास्य पुनरप्यभिघार्य च ॥
"पाषाणं पुरतः स्थाप्य वाग्यतो दक्षिणामुखः । दक्षिणाग्रान्कुशांस्तीर्य दद्यात्तेषूदकं सकृत् ॥
"नामगोत्रे समुच्चार्य पिंडं दद्यादमंत्रकम् । पुनस्तत्रोदकं दद्याद्गंधपुष्पैरथार्चयेत् ॥
"धूपदीपौ तथा दद्यादेवं दशदिनेषु तु । अशक्तौ प्रथमेऽह्नि स्यात्पंचमे दशमेऽपि वा ॥
"त्रिरात्राशौच उत्पन्ने त्रयः पिंडा दशैव तु । उदकं पिंडदानं च पुनरप्युदकं नयेत् ॥
"वायसेभ्यो बलिं दद्याद्वैवस्वतवरं स्मरन् । अग्नौ जले वा निक्षिप्य स्नात्वा शश्वद् गृहं व्रजेत्" ॥ इति ।

प्रेतपिंडव्यतिरिक्तं बलिं वायसेभ्यो दत्वा तं प्रेतपिंडं च रूपाकाग्नौ जले वा निक्षिप्य स्नायादित्यर्थः। वैवस्वतवरश्च **उत्तररामायणे महाभारते** चोक्तः—

"ये च मद्विषया नाम मानवाः क्षुधिता भृशम् । त्वयि भुक्ते तु तृप्तास्ते भविष्यन्ति सबांधवाः" ॥ इति ।

विष्णुः (१९।७)—"प्रेतस्योदकनिर्वापं कृत्वा एकं पिंडं च कुशेषु दद्युः । यावदाशौचं तावत्प्रेतस्य उदकं पिंडं च दद्युः" इति । **विज्ञानेश्वरीये**—

"नवभिर्दिवसैर्दद्यान्नव पिंडान्समाहितः । दशमं पिंडमुत्सृज्य रात्रिशेषे शुचिर्भवेत्" ॥ इति ।

प्रत्यहमेकैकपिंडाभिप्रायेण **पारस्करो**ऽपि—

"ब्राह्मणे दशपिंडास्तु क्षत्रिये द्वादश स्मृताः । वैश्ये पंचदश प्रोक्ता शूद्रे त्रिंशत् प्रकीर्तिताः" ॥ इति ।

स्मृतिरत्ने—"प्रेतेभ्यस्तु स्वर्णेभ्यः पिंडान् दद्युर्दशैव तु" इति दशपिंडस्मरणात्प्रत्यहमेकपिंडविधानाच्च एकस्मिन्नेव काले पिंडदानं 'सायंप्रातर्बलिं हरेत्' इति वचनेन सायंबल्यर्थं द्वितीयमपि पिंडं शिष्टा आचारान्ति । **प्रचेताः**—

"दक्षिणाग्राश्च दर्भाः स्युः स च वै दक्षिणामुखः । द्वारदेशे प्रदातव्यो न देवायतने क्वचित् ॥
'वाग्यतः प्रयतश्चैव संतिष्ठेत्पिंडसंनिधौ । ततोऽवशिष्टं पिंडस्य नद्यां तु प्रक्षिपेच्च तत्" ॥ इति ।

शंखश्च—"भूमौ माल्यं पिंडं पानीयमुपले वा दद्युः" इति । यत्तु—"प्रेतपिंडं बहिर्दद्याद्दर्भमंत्रविवर्जितम्" इति तदनुपनीतविषयम् । "असंस्कृतानां भूमौ पिंडं दद्यात्संस्कृतानां कुशेषु" इति **प्रचेतः**स्मरणात् । **स्मृत्यर्थसारे**—

"कुक्कुटांडप्रमाणं तु पिंड इत्यभिधीयते । अंगुष्ठपर्वमात्रं स्यादवदानमिति स्थितिः" ॥ इति ।

आश्वलायनः—

"यत्र स्युर्बहवः पिंडास्तत्र बिल्वफलोपमाः । यत्र चैको भवेत्पिंडस्तत्राश्वखुरसंमितः" ॥

स्मृत्यंतरे—

"प्रायः पित्र्येषु पिंडाः स्युर्मानेन बदरोपमाः । सर्वत्र सुदृढा हि स्युर्वर्तुलाः श्राद्धकर्मसु ॥

"प्रेतपिंडस्तु दैर्घ्येण द्वादशांगुल उच्यते। स्थौल्येन चैकपिंडस्य सदृशः स्याद् दृढः शुभः" ॥ इति। एकपिंडस्य सदृशः अश्वखुरसदृश इत्यर्थः।

पराशरः—"पिंडं प्रदीयते साग्रदर्भेषु तु गुडेन वा। पयसा फलमूलैश्च मिश्रितं दक्षिणामुखः॥
"प्रेताय नामगोत्राभ्यां प्रदद्यान्मुष्टिसंमितम्। तूष्णीं प्रसेकं पुष्पं च धूपदीपं तथैव च"॥ इति।

स्मृत्यंतरेऽपि—

"कपित्थफलवच्चाब्दे पिंडं दद्याच्च पार्वणे। धात्रीफलप्रमाणेन गयाश्राद्धे महालये॥
"नारिकेलप्रमाणेन एकोद्दिष्टे सपिंडने। अन्यश्राद्धेषु सर्वेषु कुक्कुटांडप्रमाणतः"॥ इति।

व्यासः—

"द्विहायनस्य वत्सस्य विशत्यास्ये यथा सुखम्। तथा कुर्यात्प्रमाणं तु पिंडानां व्यासभाषितम्"॥ इति

बोधायनश्च—"कुक्कुटांडप्रमाणं मुष्टिप्रमाणं वा तिलमिश्रपिंडं प्रदाय गंधपुष्पधूपदीपान् दत्वा संक्षालनेनापसव्यं परिषिच्य प्रेतपिंडमप्सु विसर्जयेत्"॥ इति। विसर्जनप्रकार-

माहापस्तंबः—

"आकाशं गमयेत्पिंडं जलस्थो दक्षिणामुखः। पितॄणां स्थानमाकाशं दक्षिणादिक् तथैव च"॥ इति।

अशौचह्रासेऽपि दश पिंडानाह **शातातपः**—

"आशौचस्यापि च ह्रासे पिंडान् दद्याद्दशैव तु। प्रथमे त्रीन्द्वितीयेऽह्नि चतुरस्त्रींस्तृतीयके"॥ इति।

उदकदानवत्पिंडदानं न सर्वैः कार्यं अपि तु संस्कर्त्रैव। तदाह **संवर्तः**—

"पूर्वाह्णे वाऽपराह्णे वा तोयमाशौचगामिभिः। संस्कर्त्रैव बलिर्देयः स हि प्रेतस्य बांधवः"॥ इति।

पिण्डद्रव्यादिनियमः। पिंडद्रव्यनियममाह **शुनःपुच्छः**—

"शालिना सक्तुभिर्वाऽपि शाकेनाप्यथ निर्वपेत्। प्रथमेऽहनि यद् द्रव्यं तदेव स्याद्दशाह्निकम्"॥ इति।

कर्तृनियमो गृह्यपरिशिष्टेऽभिहितः—

"असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्। प्रथमेऽहनि यः कुर्यात्स दशाहं समापयेत्"॥ इति।

स्थाननियम उक्तः **स्मृत्यंतरे**—

"एकत्र निक्षिपेत् कर्ता दश पिंडान्समाहितः। स्थानभेदे महान् दोषः पिंडभुक् नरकं व्रजेत्"॥ पिंडभुक्प्रेतः। **अन्यत्रापि**—

"द्रव्यभेदे महान् हानिः कर्तृभेदे त्वनर्थता। स्थानभेदे महादोषस्त्रिभेदं न तु कारयेत्"॥ इति।

शिलादिविपर्यासे स्मृत्यंतरे—

"वस्त्रपाषाणकुंभानां स्थाल्याः कर्तुर्विपर्यये। पूर्वदत्तोदकं कुर्यात्पुनरित्याह देवलः"॥ इति।

स्मृत्यर्थसारे—

"उत्तरीयशिलापात्रकर्तृद्रव्यविपर्यये। पूर्वदत्ताजलान्पिंडान्पुनरित्याह गौतमः"॥ उत्तरीय-वास उदकार्थं नववस्त्रं पात्रं वा स उदकादिदानाय जलाहरणार्थं नवघटश्चरुस्थाली वा॥

तत्रैव—

"आद्यदेशादन्यदेशे प्रेतपिंडं क्षिपेद्यदि। पूर्वदत्तान्प्रेतपिंडान्पुनरित्याह शाकलः"॥

स्मृत्यन्तरे—

"आशौचमध्ये पाषाणं यदि नश्येच्छिलान्तरे। पूर्वदत्ताञ्जलीन् पिण्डान् पुनरित्याह कुंडिनः"॥ इति।

अन्यत्रापि—" स्थापितं प्रेतपाषाणं आ दशाहान्न चालयेत् ।
" देशक्षोभे महापत्तौ स्थापितं चोद्धरेद्यदि । प्राणायामत्रयं कृत्वा संस्पृश्य व्याहृतीर्जपेत् ॥
" यदि नष्टं हृतं वापि पाषाणं प्रथमाह्निकम् । पाषाणमन्यमादाय पूर्वदत्तांबु निक्षिपेत् " ॥ इति ।
संग्रहेऽपि—" शिलाविनाशे सति वा ततोऽन्यामायातु मंत्रेण निधाय कुंडे ॥
" यमाय सोमं सुनुतेति मंत्रादाज्याहुतिर्लौकिक एव वन्हौ " ॥

शिलाविनाशे अन्यां शिलाम् ' आयातु देवः सुमनोभिः ' इति वाक्यद्वयात्मकमंत्रेण स्थापयित्वा ' यमाय सोमम् ' इति लौकिकाग्नौ जुहुयादित्यर्थः ।

तत्रैव--
"शिलान्तरे स्थापिते तु दृष्टा नष्टशिला यदि । यमे इवेति मंत्रेण तां च न्यस्याथ तर्पयेत् " ॥ इति ।

अगस्त्यः—
" राजकार्यनियुक्तानां वैश्यानां चातिपात्तिषु । पाषाणमुद्धरेन्मध्ये बलिकर्म समापयेत् " ॥ इति ।

पारस्करः—
" गृहीत्वा प्रेतपाषाणं गच्छेत् देशविपर्यये । अपकृष्यापि कुर्वीत न त्वेतदवशेषयेत् ॥
" उदकं पिंडदानं च दशाहाभ्यंतरं तु यत् । समापयेद्दशाहे तत्सर्वं पूर्ववदाचरेत् ॥
"अस्थिसंचयनादूर्ध्वं विच्छिन्ने तर्पणादिके । आरब्धे यदि पित्रोश्च पुनः संक्षिप्यते त्र्यहात्" ॥ इति ।

स्मृत्यंतरे—
" यदि नष्टो मृतो वापि कर्ता ह्यन्यं समाश्रयेत् । तेनैव कारयेत्सर्वं उदकाद्याः सपिंडनम् ॥
"प्रथमेऽहनि यः कर्त्ता नारी वा पुरुषोऽथ वा । आ दशाहं प्रकुर्वीत पिंडदानोदकक्रियाम् " इति ॥

स्मृत्यर्थसारे—
"वायसैः सेविते पिंडे शुना शूद्रेण दूषितः । पुनः कर्म प्रकुर्वीत तस्यावृत्तिं विपर्ययेत् " ॥ इति । विपर्यये उत्तरीयादिविपर्यये । **अंगिरास्तु**--
"पिंडं काकादिपक्षिभ्यो जंतुरन्यः स्पृशेद्यदि । कृच्छ्रत्रयं चरित्वाथ पुनः पिंडं च निर्वपेत्" ॥ इति । जंतुः श्वादिः । काकादिस्पर्शने कृच्छ्राभावः । पुनः पिंडनिर्वाणमेवेत्यर्थः । **स्मृतिरत्ने**—
" श्वचंडालादिभिः स्पृष्टः पिंडो यद्युपहन्यते । प्राजापत्यत्रयं कृत्वा पुनः पिंडं समाचरेत् ॥
" मार्जारमूषकस्पृष्टे पिंडे च विद्लीकृते । पुनः पिंडः प्रदातव्यस्तेन पाको न तत्क्षणात्" ॥ इति ।

गृहद्वारपार्श्वे कुंडविदलादिभिः प्रावृत्य प्रत्यक्द्वारां दक्षिणद्वारां वा कुटीरां कृत्वा माल्याद्यैरलंकृत्य पृथक्पृथक् मृन्मये पात्रे प्रेतात्र स्नाहीति जलं पिबेति क्षीरं कुंडोपरि शिक्ये स्थापयेत् । तथा **चाश्वलायनकारिका**— "आधायाश्मानमेकं तु भूषयेदथ वेष्टयेत् ।
" तस्योपरि निधातव्यं क्षीरं नीरं च पात्रयोः । यावद्दशाहमाकाशे पथि श्रमनिवृत्तये " ॥ इति ।
पारस्करश्च (३।१०) "प्रेतात्र स्नाहीत्युदकं पिबेति क्षीरमिति" । **याज्ञवल्क्योऽपि** (प्रा.१७)– " जलमेकाहमाकाशे स्थाप्यं क्षीरं च मृन्मये " इति अत्र **विज्ञानेश्वरः** (पृ. १७० पं. १८-१९) 'जलं क्षीरं च पात्रद्वये पृथक् पृथक् आकाशे शिक्यादावेकाहं स्थापनीयम् । विशेषानुपादानात् प्रथमेऽहनि कार्यम्" इति । **माधवीयेऽपि**—प्रथमेऽहनि प्रेतमुद्दिश्य जलं क्षीरं चाकाशे शिक्यादौ पात्रद्वये स्थापनीयमिति । अन्ये तु प्रथमदिनमारभ्य क्षीरं जलं चैकैकाहमेवावस्थितं यथा भवति

तथा प्रत्यहं नवं नवं जलं क्षीरं च स्थापनीयम्। शिष्टाचारश्चैवमिति व्याचक्षते। एवमेतस्मिन्कुंडे आ दशाहं वास उदकत्रयमेतत्समीपे दर्भास्तृते पिंडबलिप्रदानं च कार्यम्।

प्रेतशरीरोत्पत्तिक्रमः। दशाहपिंडदानेन प्रेतस्य शरीरोत्पत्तिर्भवति। यदाह **ऋष्यशृंगः**—

"प्रथमेऽहनि यत् पिंडः तेन मूर्धाऽभिजायते। चक्षुः श्रोत्रे नासिके च द्वितीयेऽहनि जायते॥
"भुजौ वक्षस्तथा ग्रीवा तृतीयेऽहनि जायते। नाभिस्थानं गुदं लिंगं चतुर्थेऽहनि जायते॥
"ऊरू तु पंचमे ज्ञेयौ षष्ठं चर्म प्रजायते। सप्तमे तु सिराः सर्वा जायंते नात्र संशयः॥
"अष्टमे तु कृते पिंडे सर्वरोमाण्यनंतरम्। नवमे वीर्यसंपत्तिर्दशमे क्षुत्परिक्षयः॥
"दशमेन तु पिंडेन तृप्तिः प्रेतस्य जायते। आशौचांते ततः सम्यक् पिंडदानं समाप्यते॥
"ततः श्राद्धं प्रदातव्यं सर्ववर्णेष्वयं विधिः। एकोद्दिष्टात्पिशाचत्वं पितृत्वं पिंडयोगतः"॥ इति।

आतुराश्वासनविधिः। पिंडोदकदानानंतरं बांधवैराश्वासनं कार्यम्। तथा च **याज्ञवल्क्यः** (प्रा.७)-

"कृतोदकान्समुत्तीर्णान् मृदुशाद्वलसंस्थितान्। स्नातानपवदेयुस्तानितिहासैः पुरातनैः"॥ इति।

इतिहासस्तु **तेनैव दर्शितः** (प्रा. ८–१०)—

"मानुष्ये कदलीस्तंभे निःसारे सारमार्गणम्। करोति यः स मूढो वै जलबुद्बुदसन्निभे॥
"पंचधा संभृतः कायो यदि पंचत्वमागतः। कर्मभिः स्वशरीरोत्थैस्तत्र का परिदेवना॥
"गंत्री वसुमती नाशं उदधिर्दैवतानि च। फेनप्रख्यः कथं नाशं मर्त्यलोको न यास्यति"॥ इति।

कात्यायनोऽपि—

"एवं कृतोदकान्सम्यक् सर्वान्शाद्वलसंस्थितान्। आप्लुतान्पुनराचांतान्वदेयुस्तेऽनुशायिनः॥
"मा शोकं कुरुतानित्ये सर्वस्मिन्प्राणधर्मिणि। धर्मं कुरुत यत्नेन यो वः सह करिष्यति"॥

रामायणेऽपि—

"सर्वे क्षयांता निचयाः पतनांता समुच्छ्रयाः। संयोगा विप्रयोगांता मरणांतं च जीवितम्।
"यथा फलानां पक्कानां नान्यत्र पतनाद्भयम्। एवं नरस्य जातस्य नान्यत्र मरणाद्भयम्।
"यथाऽगारं दृढस्थूणं जीर्णं भूत्वाऽवसीदति। तथाऽवसीदंति नरा जन्ममृत्युवशं गताः॥
"अहोरात्राणि गच्छन्ति सर्वेषां प्राणिनामिह। आयूंषि क्षपयंत्याशु ग्रीष्मे जलमिवाशयात्॥
"यथा काष्ठं च काष्ठं च समेयातां महार्णवे। समेत्य च व्यपेयातां कालमासाद्य कंचन॥
"एवं भार्याश्च पुत्राश्च ज्ञातयश्च वसूनि च। समेत्य व्यवधावन्ति ध्रुवो ह्येषां विना भवः"॥ इति।

भारतेऽपि (शां. प. अ. भ. गी.)—

"जातस्य हि ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य च। तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि"॥ इति।

शोके दोषोऽपि **याज्ञवल्क्येन दर्शितः** (प्रा. ११)—

"श्लेष्माश्रु बांधवैर्मुक्तं प्रेतो भुंक्ते यतोऽवशः। अतो न रोदितव्यं हि क्रियाः कार्याः प्रयत्नतः"॥ इति।

आतुराश्वासनानंतरकृत्यं तेनैवोक्तम् (प्रा. १२–१३)—

"इति संश्रित्य गच्छेयुर्गृहं बालपुरःसराः। विदश्य निंबपत्राणि नियता द्वारिवेश्मनः॥
"आचम्याग्न्यादिसलिलं गोमयं गौरसर्षपान्। प्रविशेयुः समालभ्य कृत्वाऽश्मनि पदं शनैः"॥ इति।

अपरो विशेषः **शंखेन** दर्शितः—"दूर्वां प्रवालमग्निं वृषभं चालभ्य गृहद्वारे प्रेताय पिंडं दत्वा पश्चात्प्रविशेयुः"॥ इति। **सांख्यायनः**—"यस्मिन्देशे प्राणा उत्क्रान्ताः तस्मिन्देशे गोमयेनोप-

लिप्य दूर्वा तंडुलानुदकमिश्रान्प्रकीर्य स्वस्ति वोऽस्तु गृहाणां शेषे शिवं चास्त्विति फलं समभिमृशन्ति " ॥ इति । **पैठीनसिः**—
" गृहं गत्वा स्थिता द्वारि सर्पिरग्न्यश्मगोमयान् । प्रविशेयुर्गृहं स्पृष्ट्वा संविशेयुः कटोपरि " ॥ इति ।
एकोत्तरवृद्धिनवश्राद्धानि । अथैकोत्तरवृद्धिश्राद्धं पूर्वोक्तं दद्यात् । यस्मिन्दिने यावन्त्युदकाञ्जलिदानानि तावंति श्राद्धानि आमरूपेण प्रत्यहं देयानि । अथ संकल्प्य आमरूपेण सदक्षिणं नवश्राद्धमेकं दद्यात् । एवमेकादशाहात् विषमेषु दिनेषु षण्णवश्राद्धानि दद्यात् । तदाहांगिराः—
" प्रथमेऽह्नि तृतीयेऽह्नि पंचमे सप्तमे तथा । नवमैकादशे चैव षण्णवश्राद्धमुच्यते " ॥ इति ।
वसिष्ठोऽपि—
" सप्तमेऽह्नि तृतीये च प्रथमे नवमे तथा । एकादशे पंचमे च नव श्राद्धानि षड् दिशेत् " ॥
यत्तु **देवलवचनम्**—
" तृतीये पंचमे वाऽपि सप्तमे नवमे तथा । अहन्येकादशे चैव नवश्राद्धानि पंच वै " ॥ इति तदाश्वलायनविषयम् । तथा च **शिवस्वामी**
" नव श्राद्धानि पंचाहुराश्वलायनशाखिनः । आपस्तंबाः षडित्याहुर्विभाषामैतरेयिणः " ॥
विभाषां पंचषड्वेति विकल्पमैतरेयिण आहुरिति शेषः । **बोधायनः**—"मरणादिविषमेषु दिनेषु एकैकं नव श्राद्धानि कुर्यात् । आ नवमाद्यत्र नवमं विच्छिद्यते एकादशेऽहनि तत्कुर्यात्' इति ॥
श्रीधरीये—"तृतीये पञ्चमे चैव नवमैकादशे तथा । यदत्र दीयते जंतोस्तन्नवश्राद्धमुच्यते" ।
भविष्यत्पुराणे
" नवसप्तविशां राज्ञां नव श्राद्धान्यनुक्रमात् । आद्यंतयोर्वर्णयोस्तु षडित्याहुर्महर्षयः " ॥ इति ।
कालादर्शे—
" आ द्वादशाहान्मरणात् विषमेषु दिनेषु षट् । नवश्राद्धान्यनुतिष्ठेदेकोद्दिष्टविधानतः ॥
" केचित्पंचैव नवमं भवेदंतरितं च यत् । एकादशेऽन्हि तत्कुर्यादिति स्मृतिकृतो विदुः ॥
" दैवादन्तरितं पूर्वं उत्तरेण सहाचरेत् " ॥ इति । एवं च क्षत्रियाणां नव श्राद्धानि सप्त वैश्यानां नव विप्राणां शूद्राणां च षट् । तत्राप्याश्वलायनीयानां बोधायनीयानां च पञ्च । आपस्तंबिनां षट् । ऐतरेयिणां पंच षड्वेति विकल्पः । इतरेषां सर्वेषां चत्वारि पंच षड्वेति व्यवस्था । अत्रांतराये **कण्वः**—" नवश्राद्धे मासिके च यद्यदंतरितं भवेत् । तदुत्तरत्र स्वातंत्र्यादनुष्ठेयं प्रचक्षते ॥
" नवश्राद्धममंत्रं तु पिंडोदकविवर्जितम् " ॥ इति । **स्मृत्यंतरे** च—
" नवश्राद्धं तु यत्रोक्तं दिने स्यान्न कृतं यदि । एकोद्दिष्टदिने कार्यमत्र दोषो न विद्यते " ॥ इति ।
अखंडादर्शे च—
" न तिथिर्न च नक्षत्रं न ग्रहो न च चंद्रमाः । कुर्यादेव नवश्राद्धं प्राप्तमेकादशेऽहनि " ॥ इति ।
नवश्राद्धे वर्ज्यनक्षत्राण्याह **वसिष्ठः**—
" विशाखारोहिणीयाम्यपौष्णादित्योत्तरात्रयम् । अष्टौ वर्ज्या नवश्राद्धे पुनर्मरणदा यतः " ॥ इति ।
गार्ग्यः—
" नंदायां भार्गवदिने चतुर्दश्यां त्रिजन्मसु । यदि कुर्यान्नवश्राद्धं कुलक्षयकरं भवेत् " ॥
सुबोधे च—
" स्वातीजन्मसुनंदायां चतुर्दश्यां भृगोर्दिने । यदि कुर्यान्नवश्राद्धं कर्ता यमपुरं व्रजेत् " ॥

---

१ ख–अव । २ ग–पाठः; क्ष–तन्तव । ३ क्ष–आहुति । ४ ख–पंचमे नवमे चैव तृतीये । ५ ग–यदि । ६ गख–यिनः । ७ गक्ष–स्वत्रि ।

गार्ग्यश्च—

" शौक्रे च बुधवारे च गुरोः सोमस्य वारयोः । एतेषु कुर्वतः श्राद्धं कर्तुर्मरणमादिशेत् ॥

" स्वजन्मर्क्षत्रिपदर्क्षेषु नंदायां भृगुवासरे । धातृपौष्णुभयोः श्राद्धं न कर्त्तव्यं कुलक्षयात् ॥

" प्रत्यरंवधनक्षत्रं कर्तुस्तु विपदं तथा । चंद्राष्टमं च शंसंति जन्मादीनि विवर्जयेत् " ॥ इत्यादि सर्वं मातृपितृव्यतिरिक्तविषयं कालातिक्रमविषयं च

" परोक्षे सूक्ष्मतः पश्येत्प्रत्यक्षे तु न किंचन । वैधे कर्मणि तु प्राप्ते कालदोषं न चिंतयेत् " ॥ इति **स्मरणात्** । अत्रायं क्रमः—दाहानंतरं स्नात्वा केशानुप्त्वाऽऽप्लुत्य गृहं समेत्य नग्नप्रछादनं दत्वा निमज्ज्योदकं तीरकुंडे प्रदाय उदकुंभमाहृत्य गृहद्वारकुंडे वास उदकपिंडबलीन्प्रदाय स्नात्वा गृहं समेत्य निंबपत्रं विदश्याश्मादीन्स्पृष्ट्वा एकोत्तरवृद्धिश्राद्धं नवश्राद्धं च दद्यात् । इति । **आशौचिनां नियमाः** । आशौचिनां नियमो **मनुना** दर्शितः (५।७३)—

"अक्षारलवणान्नाः स्युर्निमज्जेयुश्च तेऽन्वहम् । मांसाशनं च नाश्नियुः शयीरंश्च पृथक् क्षितौ" ॥ इति **मार्कंडेयः**—

" क्रीतलब्ध्वाशनाश्चैव भवेयुः सुसमाहिताः । न चैव मांसमश्नीयुर्वर्जेयुश्च न योषितम् " ॥ इति । **गौतमोऽपि** (१४।३४-३९)—" अधःशय्यासना ब्रह्मचारिणः सर्वे न मार्जयीरन् । न मांसं भक्षेयुः । आ प्रदानान्नवमे वाससां त्यागोऽन्त्ये त्वन्त्यानाम्" इति । **माधवीये** व्याख्यातम्—प्रदानमिहैकोद्दिष्टश्राद्धं वाससां त्यागस्तु प्रक्षालनार्थं रजकार्पणं अंत्यं दशममहः । तत्रान्त्यानामत्यन्तपरित्याज्यानां वाससां त्याग इति । तथा च **बृहस्पतिः**—" नवमे वाससां त्यागो नखरोम्णां तथाऽन्तिमे " ॥ इति । **देवलोऽपि**—

"दशमेऽहनि संप्राप्ते स्नातुं ग्रामाद्बहिर्व्रजेत् । तत्र त्याज्यानि वासांसि केशश्मश्रुनखानि च" ॥ इति । **याज्ञवल्क्यः** (प्रा. १६)—

" क्रीतलब्धाशना भूमौ स्वपेयुस्ते पृथक्पृथक् । पिंडयज्ञावृता देयं प्रेतायान्नं दिनत्रयम् " ॥ इति । **मरीचिः**—

" प्रथमेऽन्हि तृतीये च सप्तमे नवमे तथा । ज्ञातिभिः सह भोक्तव्यं एतत्प्रेतेषु दुर्लभम् " ॥ इति । **विष्णुपुराणे** (३।१३।११-१२)—" दिवा च नक्तं भोक्तव्यं अमांसं मनुजर्षभ ।

" दिनानि तावदिच्छातः कर्त्तव्यं ज्ञातिभोजनम् । प्रेतस्तृप्तिं तथा याति बंधुवर्गेण भुंजता " ॥ इति । **अंगिराः**—" नाश्नीयुस्तद्दिने सर्वे औरसाद्याः सपिंडकाः ।

" दशरात्रं भवंत्येते लवणक्षारवर्जिताः । तैलतांबूलहीनाश्च एकभुक्ता जितेंद्रियाः " ॥ इति । **वसिष्ठश्च** (४।१४-१५)—

" गृहात्प्रव्रजित्वा अधप्रस्तरे त्र्यहमनश्नंत आसीरन् क्रीतेनोत्पन्नेन वा वर्त्तेरन्" ॥ इति । अधप्रस्तर आशौचिनां शयनासनार्थं कृतस्तृणमयः करः । उत्पन्नमयाचितलब्धम् । **आश्वलायनोऽपि** (४।४।१४-१६)—

" नैतस्यां रात्र्यामन्नं पचेरन्क्रीतेनोपलब्धेन वा वर्त्तेरन् । त्रिरात्रमक्षारलवणाः स्युर्द्वादशरात्रं वा महागुरौ " ॥ इति । **आपस्तंबः**—" अनशनानध्ययनाधःशय्योदकोपस्पर्शनान्याकालिका-

---

१ **ख**-वपनं । २ **क्ष**-+ हातच्च । ३ **खग**-न्ते । ४ **ग**-समासिरन् । ५ **कख**-यज्ञव्र-
६ **ख**-दिवा निशि भवेच्छान्तः; **क्ष**-दशानि दश चेच्छातः ।

न्यनूचानेषु च त्र्यहं त्र्यहं षडहं द्वादशाहं वा महागुरुष्वनशनवर्जं संवत्सरं मातरि पितर्याचार्य इत्येके न अशयनानध्ययनवर्जं यावज्जीवं प्रेतपत्न्युदकोपस्पर्शनमेकभक्तमधःशय्यां ब्रह्मचर्यं क्षारलवणमधुमांसवर्जनं च ” ॥ इति । **बोधायनश्च**—

“ संवत्सरं मातरि पितर्याचार्ये ”। इति । “ त्रिरात्रमक्षारलवणान्नभोजनमधःशयनं ब्रह्मचर्यं त्र्यहं षडहं द्वादशाहं वा संवत्सरं गुरुष्वेवमघोदकमितरेषु त्रिरात्रं यावज्जीवं प्रेतपत्नी ” इति ।

अस्थिसंचयनम् । तत्र **पारस्करः**—

“ चतुर्थेऽहनि विप्रस्य षष्ठे वै क्षितिपस्य तु । अष्टमे दशमे वाऽस्थिसंचयः शूद्रवैश्ययोः ” ॥ इति ।

श्रीधरीये तु—“चतुर्थे पंचमे चैव नवमैकादशे तथा । अस्थिसंचयनं कार्यं वर्णानामनुपूर्वशः ” ॥

स्मृत्यंतरेऽपि—

“ चतुर्थे पंचमे चैव सप्तमे नवमे तथा । अस्थिसंचयनं कार्यमित्येवं विष्णुरब्रवीत् ” ॥

संग्रहेऽपि—

“ चतुर्थे संचयः कार्यो ब्राह्मणस्याथ पंचमे । राज्ञो वैश्यस्य सप्ताहे शूद्रस्य नवमे दिने ” ॥ इति ।

विष्णुरपि (१९।१०-११)–“चतुर्थे दिवसे अस्थिसंचयनं कुर्युः । तेषां गंगांभसि प्रक्षेपः”॥ इति ।

स्मृतिरत्नेऽपि—

“ एकाहमुपवासः स्यादग्नियुर्लब्धमेव वा । गत्वाऽरण्ये चतुर्थेऽन्हि पूर्वाह्णे त्वस्थिसंचयः ” ॥ इति ।

स्मृतिरत्नेऽपि—

“ दिवैव तर्पणं कुर्यान्नापराह्णेऽस्थिसंचयः । न रात्रौ न च संध्यायां तस्मात्पूर्वाह्ण एव सः ” ॥ इति ।

संग्रहे—

“ चतुर्थेऽहनि विप्राणामस्थिसंचयनं मतम् । पूर्वाह्णः शुभदः प्रोक्तो मध्यान्हे मध्यमः स्मृतः ॥

“ अपराण्हं च रात्रिं च वर्जयेदस्थिसंचये ” ॥ **अन्यत्रापि**—

“ वर्णाशौचं त्रिधा कृत्वा प्रथमे संचयः स्मृतः । द्वितीयभागे विप्राणां संचयो मध्यमः स्मृतः ॥

“ तृतीयभागे हीनं स्यादस्थिसंचयनं तथा ” ॥ **श्रीधरीये**—

“ अस्थिसंचयनं कार्यं पूर्वाह्णे तु शुभावहम् । मध्यान्हे मध्यमं प्रोक्तमपराह्णे विनाशनम् ” ॥ इति ।

विष्णुपुराणे (३।१३।१४)—“ चतुर्थेऽह्नि च कर्तव्यं भस्मास्थिचयनं नृप ” ॥ इति ।

आपस्तंबः—“ अपरेद्युस्तृतीयस्यां पंचम्यां सप्तम्यां वाऽस्थीनि संचिन्वंति ” इति । अपरेद्युः परस्मिन्दिवस इत्यर्थः । तृतीयस्यामित्यादि चानन्तरोक्तद्वितीयदिवसापेक्षया[1] वेदितव्यम् । न त्वाद्यदिवसापेक्षया । अत एव **भाष्यकारेण** तृतीयस्यामित्यादिषु व्युष्टायामित्यध्याहारः कृतः ।

तथा **बोधायनः** (गृ. सू. १।१४।१)—

“ संचयनमेकस्यां व्युष्टायां तिसृषु वा पंचसु वा सप्तसु वा ” इति । एवं बहुस्मृतिविहितत्वात् ब्राह्मणस्य चतुर्थेऽहन्येव संचयो युक्तः । कथंचित्तदसंभवे **कात्यायनः**—

“ अपरेद्युस्तृतीये वा चतुर्थे पंचमेऽपि वा । अस्थिसंचयनं कुर्याद्दिने तद्गोत्रजैः सह ” ॥ इति ।

आश्वलायनः—“ चतुर्थे पंचमे वाऽस्थिसंचयः सप्तमेऽन्हि वा ” ॥ इति ।

संग्रहे—“अस्थिसंचयनं युग्मे दिने प्राक्नवमाद्भवेत् । केचिद्विषम एवात्र व्युष्टे तत्रेत्यनुक्तितः”॥

व्यासः—“बुधसोमौ शुभौ ज्ञेयौ मध्यमौ गुरुभार्गवौ । अकारमंदा निंद्याः स्युः प्रशस्तं विषमेऽहनि ॥

१ ख–वचनान्तरोक्त ।

" द्वितीयश्च चतुर्थश्च शुभदौ युग्मवासरौ ॥
" प्रशस्तातिथिवाराणां नक्षत्राणामसंभवे । अस्थिसंचयनं कार्यं द्विजवाक्यानुशासनात् ॥
" यस्मिन्कस्मिन्दिने वाऽपि नैवाशौचं विलंघयेत् । आशौचादूर्ध्वभावी चेत्पुनर्दहनमाचरेत् " ॥ इति ।
स्मृत्यंतरे—
" अस्थिसंचयनं कर्म दशाहादूर्ध्वभावि चेत् । अस्थीनि पुनराहृत्य दाहयेच्चाग्निकैः पुनः ॥
" पिंडोदकं नवश्राद्धं पुनः कुर्याद्यथाविधि " ॥ इति । एतत्पुनर्दहनविधानं द्वादशाहसपिंडीकरणाभिप्रायम् । द्वादशाहादिव्यतिरिक्तकालांतरसापिंड्ये तु दशाहादूर्ध्वमपि सपिंडीकरणात् प्राक्शुभदिने संचयः कार्यः । " सपिंडीकरणात्पूर्वमस्थिसंचयनं भवेत् " इति **स्मरणात्** । तथा **चाश्वलायनः** (४।५।१)—"संचयनमूर्ध्वं दशम्यां कृष्णपक्षस्यायुजास्वेकनक्षत्रे" इति ।
बोधायनोऽपि (१।१४।१)—
" एकस्यां व्युष्टायां त्रिषु पंचसु वा सप्तसु वा नवसु वैकादशसु वा युग्मा रात्रीरर्धमासान्मासानृतून्संवत्सरं वा संपाद्यास्थि संचिनुयुः " ॥ इति । **गृह्यपरिशिष्टे** (३।७)—
" अस्थिसंचयनं संवत्सरांते चेत्सापिंड्यमूर्ध्वं दशम्या अयुजासु तिथिष्वपि वा द्वादशाहे सापिंड्यं चेदंतर्दशाहे चतुर्थषष्ठाष्टमदशमाहे[2]ष्वेकनक्षत्रे " इति । अत्र दाहादिदिनसंख्याऽहिताग्नेः । अन्येषां मरणादि दाहादि वा । तथा च **ब्राह्मपुराणे**—
" अनाहिताग्नेर्मरणादाहिताग्नेस्तु दाहतः । अस्थिसंचयनं कुर्युः स्वशाखोक्तविधानतः " ॥ इति ।
"अनग्निमत उत्क्रान्तेः साग्नेः संस्कारकर्मणः । शुद्धिः संचयनं दाहान्मृताहस्तु तिथिः[3] स्मृता" ॥ इति ।
स्मृत्यंतरे च—
" अनग्नेर्मरणात्साग्नेराशौचं दाहतः परम् । तयोः संचयनं दाहान्मृताहस्तु तिथिः स्मृता " ॥ इति ।
अस्थिदाहे प्रतिकृतिदाहे वा सद्यः संचयः कार्यः
" चतुर्थेऽहनि विप्राणामस्थिसंचयनं भवेत् । अस्थ्नां प्रतिकृतेर्दाहे सद्यः संचय इष्यते ॥
"यदा पलाशवल्काद्यैः कृत्वा प्रतिकृतिं दहेत् । भस्मास्थिवत्संचिनुयात् सद्योमंत्रान् जपेत्तु वा" ॥ इति **स्मरणात्** । **विष्णुः**—" पलाशशरीरं दग्ध्वा समूह्यांभसि क्षिपेत् " इति । सद्य एव मंत्रजपं कृत्वा भस्मोद्धृत्यांभसि क्षिपेदित्यर्थः ।
पुनःसंस्कारविषयविशेषे संचयनिषेध उक्तः **स्मृत्यंतरे**—
" अतीते द्वे तु संस्कारे एकाहात्पिंडमर्पयेत् । श्राद्धं दद्यात् द्वितीयेऽह्नि तृतीयेऽह्नि सपिंडनम् ॥
" नास्थिसंचयनं कुर्यान्न च चर्माधिरोहणम् । पुत्रादीनां[4] तु कर्तव्यं पुनःसंस्कारकर्मणि " ॥ इति ।
अत्र आदिशब्देन दौहित्रादयो गृह्यंते । तद्व्यतिरिक्तसंस्कर्तृविषये अब्दात्परतः पुनःसंस्कारे सति संचयनमंत्रजपोऽपि न कार्य इति गम्यते । **स्मृत्यंतरे**[5]—
" त्रिवर्षादि दहेदेनमेकर्चाव्रतबंधनात् । पंचमाद्यस्थिचयनं श्राद्धं कुर्याच्चतुर्दिने " ॥ इति ।
पंचमाब्दात्पूर्वं नास्थिसंचयनमित्यार्थिकोऽर्थः ।
गर्गः—" अंतर्दशाहे संप्राप्ते दर्शे पिंडान्समापयेत् । अस्थिसंचयनं चैव दर्शात्पूर्वं समाचरेत् ॥
"प्रथमेऽन्हि द्वितीयेऽन्हि यदि दर्शस्तदैव हि । अस्थिसंचयनं कुर्यादित्येषा वैष्णवी स्मृतिः " ॥ इति ।
दर्शग्रहणं संक्रांतेरप्युपलक्षणम् ।

---

१ **खग**-युग्मासु । २ ' दशमाहवर्ज्यमेकनक्षत्रेषु ' इति मुद्रितपाठः । ३ **क्ष**-यथातिथि ।
४ **क्ष**-दीनां । ५ **ग**-त्य ।

अत्र श्वादिदूषणे **स्मृत्यंतरम्**—

" श्वसूकरशृगालाद्यैर्ग्रामसूकरकुक्कुटैः । शवास्थिभस्मदेहानां स्पर्शनं चेत्प्रमादतः ॥

" गव्यैः प्रक्षाल्य कृच्छ्राणां त्रितयं च समाचरेत् " ॥ इति । **अन्यत्र तु**—

"श्वभिर्गर्दभचंडालैः शवास्थि स्पृश्यते यदि । पंच पंच चतुःपंच कृच्छ्राणां त्रितयं चरेत्" ॥ इति । पंचपंचेति पंचविंशतिः । चतुःपंचेति विंशतिः । पंचविंशतिं विंशतिं त्रीन्प्राजापत्यकृच्छ्रान्श्वादिस्पर्शे यथाक्रममाचरेदित्यर्थः । अन्यत्राशौचिस्पर्शे कृच्छ्रत्रयं " अस्थ्नामाशौचिसंस्पर्शे कृच्छ्राणां त्रितयं चरेत् " इति **स्मरणात्** ।

अस्थिनिक्षेपः । खननप्रकारमाह **बोधायनः**—"पुरुषसंमितं गजसंमितं वा गर्तं खात्वा तस्मिन्नस्थिकुंभमवधाय पुनरभ्यर्च्य पुरीषमृत्तिकाभिः[3] प्रच्छादयेत् । तद्यावद्वसति तावत्स्वर्गे महीयते" इति ।

कात्यायनः—

" शमीपलाशशाखाभ्यां उद्धृत्यास्थि तु भस्मतः । आज्येनाभ्यज्य गव्येन सेचयेत् गंधवारिणा ॥

" मृत्पात्रसंपुटे कृत्वा वस्त्रेण परिवेष्ट्य वा । देशे तु कुशदर्भाढ्ये निखनेद्दक्षिणामुखः " ॥ इति ।

वैखानसे—"चिताया दक्षिणे पार्श्वे जानुदघ्नं खात्वा गर्ते कुम्भं निदध्यात्" इति । **स्मृत्यन्तरे** च—"प्रेतस्यास्थीनि संचित्य कुम्भे तानि निधाय च । घृतेन गंधतोयैश्च सिक्त्वा कुंभं निधापयेत्" ॥ इति ।

ब्राह्मे—" अस्थीन्यादाय कुंभे तु स्थाप्य गर्ते विनिक्षिपेत् ।

" आविकाजिनवस्त्रैश्च क्षौमकौशेयपट्टकैः । कुशरज्वा दृढं बध्वा गंगांभसि विनिक्षिपेत् ॥

" अघमर्षणसूक्तं तु यावन्मज्जति तज्जपेत् ॥

" यावदस्थि मनुष्याणां गंगातोयेषु तिष्ठति । तावद्वर्षसहस्राणि स्वर्गलोके महीयते " ॥ इति ।

पाद्मे च—

" अस्थ्नां कृत्वाऽथ च संशुद्धिं केशवाद्यैश्च नामभिः । पंचगव्येषु निक्षिप्य गंधाद्यैः संप्रपूजयेत् ॥

" द्विजानुज्ञामवाप्यैव गंगायां सुसमाहितः । संकल्प्य प्रयतस्तस्य चोच्चरन्गोत्रनामनी ॥

" अघमर्षणसूक्तेन धर्मायैव नमोऽस्त्विति । विसर्जयेत्ततोऽस्थीनि यावन्मज्जति तज्जपेत्" ॥ इति ।

ब्राह्मपुराणे—" अस्थीनि मातापितृमातुलादेर्दशाश्वमेधे तु नरो नभस्ये ।

" कृष्णाष्टम्यां पंचगव्यैर्निषिच्य हिरण्यमध्वाज्यतिलैर्विकीर्य ॥

" पुण्ये तु मृत्पिंडपुटे निधाय नमोऽस्तु धर्माय इति ब्रुवंश्च ।

" क्षिपेज्जले पितृतीर्थे[4] निमज्य स्नात्वाऽथ सूर्यं प्रयतः प्रपश्येत् ॥

" यथाशक्त्या दक्षिणां चापि दत्वा पितॄन्सर्वान्ब्रह्मलोकं नयेत्सः " ॥ इति । **मात्स्ये**—

"गृहीत्वाऽस्थीनि गंगायां निक्षिपेत् भुवि वा क्षिपेत् । तीर्थांतरे कुरुक्षेत्रे देशे वा सकुशे शुचौ" ॥ इति ।

योगयाज्ञवल्क्यः—

" गंगायां यमुनायां च कावेर्यां वा शुतद्रुतौ । सरस्वत्यां विशेषेण अस्थीनि विसृजेत्सुतः" ॥ इति ।

ब्रह्मवैवर्ते—

"कावेरीतीरवासी च तत्र दग्धो मृतोऽपि वा । कृतांबुसिंचितास्थिर्वा[5] धूतपाप्मा दिवं व्रजेत्" ॥ इति ।

शांडिल्यः—

"द्वारवत्यां सेतुबंधे गोदावर्यां च पुष्करे । अस्थीनि विसृजेद्यस्य स मृतो मुक्तिमाप्नुयात्" ॥ इति ।

संग्रहे—

" स्त्रिया अनाहिताग्नेश्च कुंभांतस्थोऽस्थिसंचयः । निवापांतो हविर्यज्ञयाजिनः सोमयाजिनः ॥

---

१ क्ष–वह्नि । २ ग–त्यादि । ३ क–पुरीषेण । ४ ग–तीर्थेन भक्त्या । ५ क्ष–संचिता ।

"पुनर्दाहावधिर्लोष्ठा[1]चितेर[2]ग्निर्चितेः पुनः। निवापो न पुनर्दाहो[3] लोष्ठचित्यां न चोभयम्॥

"केचिन्निवापमिच्छंति ह्युभयत्राविरोधि[4] तत्" इति। अयमर्थः। अनाहिताग्नेः आहिताग्न्या[5]हिताग्निपत्नीनां च पलाशमूले वा कुंभं निधायेत्येवमंतमेव कर्तव्यम्। कर्ष्वादि तदंगत्वात्क्रियत एव। हविर्यज्ञयाजिनो निवपनांतं सोमयाजिनः पुनर्दहनांतं कर्तव्यम्। महाग्निचितः काटकाग्निचितश्च लोष्ठचयनांतमिति।

अस्थिसंचयने वारादिदोषः। अस्थिसंचयने वारनक्षत्रनिषेधो **यमेनोक्तः**—

"आर[6]भौमार्कवारेषु तिथियुग्मेषु वर्जयेत्। वर्जयेदेकपादृक्षे द्विपादृक्षेऽस्थिसंचयम्॥

"प्रदातृजन्मनक्षत्रे त्रिपादृक्षे विशेषतः"॥

स्मृतिरत्ने—"नन्दायां भार्गवेऽर्के च चतुर्दश्यां त्रिजन्मसु। बार्हस्पत्ये तथा श्रेष्ठे पुष्ये हस्ते तथैव च॥

"नास्थिसंचयनं कुर्यात्कुलक्षयकरं हि तत्॥

"फल्गुनीद्वयमाषाढद्वयं प्रोष्ठपदद्वयम्। षड्भ्योऽन्यत्र तु नक्षत्रे ह्यस्थिसंचयनं भवेत्"॥ इति।

गार्ग्यः—

"भद्रे त्रिपदनक्षत्रे भृग्वंगारबृहस्पतौ। दहनं मरणं चास्थिचयनं त्रिगुणं भवेत्"॥

स्मृत्यंतरे—

"गुरुशुक्रारशन्यर्के नंदायां च त्रिजन्मसु। उत्तराहस्तचित्रासु पुष्ये नैवास्थिसंचयः"॥ इति।

श्रीधरीये—

"अस्थिसंचयनं कार्यं जन्मत्रयविवर्जितम्। पूर्णायां च विशेषेण नंदायां च विवर्जयेत्"॥ इति। प्रतिपद्षष्ठ्येकादश्यो नंदाः।

आत्रेयः—"कालेऽल्पदोषे कुर्वीत त्याज्यं दोषाधिके शुभम्" इति। **श्रीधरीये** च—

"दिवसं गुणदोषाभ्यां संपृक्तं हि परस्परम्। केवलं गुणयोगो हि देवानामपि दुर्लभः"॥

हारीतः—

"कुर्वीत सर्वकर्माणि ब्राह्मणानामनुज्ञया। ब्राह्मणैरभ्यनुज्ञानात् दोषो नश्येदसंशयम्"॥ इति।

गार्ग्यः—

"शुक्रादिशुभवाराश्च नंदाश्चैव चतुर्दशी। उत्तरात्रयरोहिण्यः पूर्णचंद्रश्च जन्म च॥

"एतेष्वपि च कर्तव्यं मातापित्रोर्विशेषतः। अन्येषां नातिदोषः स्यात् प्रत्यक्षमरणे नृणाम्"॥ इति।

स्मृत्यंतरे—

"जन्मत्रयं संचयने श्राद्धे[7] च दहने गुरोः। नैव दोषावहं प्रोक्तं अन्येषामपि सर्वदा"॥ इति। प्रत्यक्षं तु मातापितृव्यतिरिक्तविषये शौक्रं[8] वर्ज्यमेव। "शौक्रं पित्रोर्न दोषाय" इति पित्रोरेवावर्जनीयत्वस्मरणात्। "सर्वदा शुक्रवारस्तु वर्जनीयः प्रयत्नतः" इति **स्मरणाच्च**।

स्मशानाग्न्यनुगतौ प्रायश्चित्तम्। स्मशानाग्न्यनुगतिप्रायाश्चित्तमाह **संग्रहकारः**—

"नष्टे शावानले भस्म संस्पृष्टा[9]रणिमन्थनम्। लौकिकाग्न्याहुतिः स्मार्ते सर्वचित्तं द्वयोः[10]समम्"॥ इति। आहिताग्नेर्मथिताग्निरनाहिताग्नेर्लौकिकाग्निः। उभयत्र सर्वप्रायाश्चित्तं सममित्यर्थः।

अत्र विशेषमाह **बोधायनः**—"अथ यद्युपनयनाग्निर्विवाहाग्निर्जातकर्माग्निः श्मशानाग्निरा चतुर्थादा पंचमादा दशाहादास्थिसंचयनारुद्वासि तस्य 'अपहता असुरा' इति प्रोक्ष्य क्षिप्रं भस्म-

---

१ ग–ति। २ ग–तः। ३ ग–हे। ४ ग–धतः। ५ ग–ग्न्यनाहिता। ६ खग–भौमार्कमन्द। ७ ग–द्राच। ८ क्ष–शोक्रियम्। ९ क्ष–ष्ट्वारणिबंधनम्। १० क्ष–द्विधा।

समारोपणं ' अयं ते योनिर्ऋत्वियः ' इति समिधि समारोप्य लौकिकाग्निमाहृत्य समिधमादधाति आजुव्हान " उद्बुध्यस्वाग्ने " इति द्वाभ्यां संपरिस्तीर्याथाश्चाग्ने पंचहोता ब्राह्मण एकहोता च मनस्वती मिंदा च महाव्याहृतिभिर्व्याहृतयश्च प्रायश्चित्तं जुहुयादिति "।

सूत्रमिदं व्याख्यातं **पितृमेधसारकृता**—" यदि स्मशानाग्निरनुगतः स्यात्ततः संकल्प्य अपहता असुरा इति तद्भस्म प्रोक्ष्य 'अयं ते योनिर्ऋत्विय' इति समिधि समारोप्य लौकिकाग्निं प्रतिष्ठाप्य आजुव्हान ' उद्बुध्यस्वेति ' द्वाभ्यां तां समिधमाधाय परिस्तीर्याज्यं दर्वीं च संस्कृत्य परिषिच्य ' अयाश्चाग्निर्होतेति ' द्वाभ्यां ' ब्राह्मण एकहोता ' इत्यनुवाकेन च प्रतिवाक्यचतुष्टयं 'मनोज्योतिर्जुषतां' ' यन्म आत्मन ' इति द्वाभ्यां ' भूरग्नये चेति ' चतुर्व्याहृतिभिश्च हुत्वाऽग्निं परिषिच्य ततः कर्म प्रतिपद्यत " इति ।

कारिका च—" उपायनाग्नौ च विवाहवन्हौ शावानले सूतकपावके च ।
" शांतेपहृत्यापहृतेति मंत्रात् शंनोदेव्याद्भिरवोक्ष्य भस्म ॥
" तद्भस्म चारोप्य समिध्ययंत आजुव्ह उद्बुध्य ऋचोर्द्वयेन ।
" लौक्यानले तां समिधं निधाय परिस्तराज्योत्पवनानि कृत्वा ॥
" अयाश्च पंच होता च ब्राह्मण एकहोता दश । मनस्वती च मिंदा च महाव्याहृतयस्तथा ॥
" वारुणस्तंतुमत्यश्च हुत्वा तंत्रं प्रयोजयेत् " ॥ इति ।

यद्यस्थिप्रवाहहृतं प्रतिकृतिदाहो वा तत्रास्थ्यभावात्कथं संचय इत्यपेक्षायामुक्तं **संग्रहे**—
" अस्थिसंचयनात्पूर्वं प्रवाहेण हृतं यदि । अस्थिप्रतिकृतिं कृत्वा तद्देशान्मृद्माहरेत् ॥
"अस्थिवत्संचयेद्विद्वान्लोष्टं वा भस्म वा ततः । प्रमाणमस्थिवत्कृत्वा तन्मंत्रं तु जपेद्बुधः" ॥ इति ।

स्मृत्यंतरे च—
"जले प्रवाहे कूले वा तीरे वाऽथ सरिद्भृते । जलौघे वाऽस्थिनाशे तु तन्मंत्रं तु जपेद्बुधः" ॥ इति ।

विज्ञानेश्वरीये—" अस्थिसंचयने योगो देवानां परिकीर्तितः ।
" प्रेतीभूतं तथोद्दिश्य यः शुचिर्न करोति चेत् । देवतानां तु यजनं तं शपेत्यथ देवताः " ॥ इति ।

देवताश्चात्र श्मशानवासिनः । तत्र पूर्वदग्धाः " श्मशानवासिनो देवाः शवानां परिकीर्तिता " इत्यंगिरःस्मरणात् । अतः तान् देवान् चिरमृतं प्रेतं चोद्दिश्यापूपादिभिः पूजाकार्येत्युक्तं भवति । प्रेतीभूतमित्युक्तेः सपिंडीकरणात् प्रागेव संचयः कार्य इति सिद्धम् ।

प्रभूतबलिः । दशमेऽन्हि प्रेतस्य महती क्षुद्भवति । तन्निवृत्तिः प्रभूतेन बलिना भवति । स च दशमदिनपिंडोदकदानात्पूर्वं कार्यः

" तिलोदके च पिंडे च प्रदत्ते दशमेऽहनि । अश्मनोत्थापनं कृत्वा ततः प्रेतं विसर्जयेत् " ॥ इति पिंडदानादनंतरमेव अश्मोत्थापनस्मरणात् । दशमे क्षुत्परिक्षयः " दशमेन तु पिंडेन तृप्तिः प्रेतस्य जायते" इति **स्मरणात्**। भुक्तभोजनवत्तृप्यस्य बलिदानायोगादित्याहुः। **अखंडादर्शे** तु— "अत्रोदकपिंडबलिप्रदानात्प्रेततृप्तिः । प्रेततृप्त्या संततिवृद्धिर्भवति " इति । प्रत्यहं यत्पिंडोदकदानं दशमाहे यच्च प्रभूतबलिदानं ताभ्यां प्रेतस्य तृप्तिर्भवतीत्यर्थः । एवं च प्रभूतबलिदानेनापि प्रेतस्य तृप्तेः पिंडोदकदानप्रभूतबलिदानयोः पौर्वापर्ये अनियम इति केचित् ।

---

१ क्ष-ती । २ क-तीकृत्य ।

यत्तु केश्चिदुच्यते—" मंदारगुरुवारेषु दशाहे समुपस्थिते । बलिं प्रभूतं दद्याच्चेत्कुलक्षयकरं भवेत् "॥ इति तन्मातापितृव्यतिरिक्तविषयमित्येके । **पितृमेधसारे** विशेषः–"नात्र वारादिदोषचिंताबलेः क्षुन्निवृत्त्यर्थत्वाद्दशाह एव तद्भावात्तत्पूर्वं प्रभूतबलिप्रदानस्य निरर्थकत्वात्पिंडोदकदानाददोषात् स्मृतिष्वनिषेधाच्च सर्वेषां दशाहे एव प्रभूतबलिर्देयः । प्रेतस्य क्षुन्निवृत्त्या कुलं वर्धते । अतः प्रत्यक्षविषये शुक्रादिवासरेऽपि पिण्डोदकदानवत् सर्वेषां दशाहे प्रभूतबलिर्देय एव । 'वैधे कर्मणि तु प्राप्ते कालदोषं न चिंतयेत्' इति **वसिष्ठ**स्मरणात् ॥ इति । यत्तु **कौलदापे**ऽभिहितम्

" आरवारे च सौरे च गुरुवारे च भार्गवे । पाषाणस्थापनोत्थानं संचयश्च कुलक्षयः "॥ इति तन्मातापितृव्यतिरिक्तविषयमिति । अतिक्रांतोर्ध्वदेहिकविषयं च

" पाषाणस्थापने श्रेष्ठा मन्दार्कगुरुवासराः । उत्थापने न शौक्रीया मातापित्रोर्गुरोः शुभाः ॥

" परोक्षे सूक्ष्मतः पश्येत्प्रत्यक्षे न विचारयेत् " इति ॥ **स्मरणात्** ।

अन्तर्दशाहे दर्शादिसंभवे । यदा दशाहमध्ये दर्शपातः तदा दर्शे एवोत्तरतंत्रं पिंडोदकदानादिरूपं समापयेत् । तदाह **ऋष्यशृंगः**—

" आशौचमंतरा दर्शो यदि स्यात्सर्ववर्णिनः । समाप्तिं प्रेततंत्रस्य कुर्युरित्याह गौतमः " ॥

पैठीनसिरपि—

" आद्यंतावेव कर्तव्याः प्रेतपिंडोदकक्रियाः । द्विरंदवे तु कुर्वाणः पुनःशावं समश्नुते "॥ इति ।

भविष्यत्पुराणे च—

" प्रवृत्ताशौचतंत्रस्तु यदि दर्शः प्रपद्यते । समाप्य चोदकं पिंडं स्नानमात्रं समाचरेत् "॥ इति ।

एतत्सूर्यसंक्रांतेरप्युपलक्षणम् । तथा च **श्रीधरीये**—

" त्यजेत्संक्रमणं भानोः मध्यतः प्रेतकार्यतः । नो चेतत्कर्तृनाशः स्याद्दर्शश्चेत्तत्कुलक्षयः " ॥ इति ।

स्मृतिरत्ने—

" दर्शः संक्रमणं वापि दशाहांतर्यदा भवेत् । तावदेवोत्तरं तंत्रं समाप्यमिति निश्चयः "॥ इति ।

स्मृत्यन्तरे च—

" दशाहमध्ये दर्शश्चेत्तत्र सर्वं समापयेत् । द्विचंद्रदर्शने दोषो महानित्यवधार्यताम् ॥

" चंद्रद्वये यदाऽज्ञानात्प्रेतकर्म समापयेत् । नोपतिष्ठति तत्सर्वं दातुः कुलविनाशनम् "॥ इति ।

अन्यत्रापि—

" चंद्रद्वये बलिर्नैव देयः प्रेतस्य तृप्तये । यदि दद्यात् द्विचंद्रे तत् दातुः कुलविनाशनम् "॥ इति ।

पद्धतौ—

" अंतर्दशाहे संप्राप्ते दर्शे पिंडान्समापयेत् । अस्थिसंचयनं तत्र दर्शात्पूर्वं विधीयते "॥ इति ।

स्मृत्यंतरे च—

" अथोर्ध्वं कृष्णपक्षस्य दशम्यां संस्थिते सति । तदानीं संचयेदस्थीं न चतुर्थेऽह्नि संचयः ॥

" त्रयोदशी कलामात्रातिथौ यस्य मृतिर्भवेत् । नातिक्रम्य सिनीवालीं कुर्यात्पिंडोदकक्रियाम् " ॥

चतुर्दशीयुक्तामावास्यादिने चतुर्दशीसमयमरणेऽपि अमावास्यायां दाहसंचयोदकादि समापनीयम् ।

तदुक्तम्—

" चतुर्दशीक्षणमृतिस्तदा दर्शो भवेद्यदि । पिण्डोदकं दशाहान्तं तस्मिन्नेव दिने क्षिपेत् "॥ इति ।

स्मृत्यंतरे च—

" उदयं याति चादित्ये पर्वमिश्रां चतुर्दशीम् । संप्राप्य संस्थिते विप्रे कृष्णपक्षस्य तं दहेत् ॥
"अमायां वा मृतिर्यस्य तस्यां संस्कारकल्पना । तस्यां संचयनं कुर्यात् शेषं चैव यथायथम्" ॥ इति ।

स्मृतिरत्ने—

" चतुर्दशीमृतः कश्चित्ततः प्राप्नोत्यमातिथिः । पिंडोदकं दशाहांतं तस्मिन्नेवाहनि क्षिपेत् " ॥ इति ।

स्मृत्यंतरेऽपि—

" इंदुक्षये यदा मृत्युः स्त्रिया वा पुरुषस्य वा । उदकं पिंडदानं च तदा सर्वं समापयेत् " ॥ इति ।

प्रचेताः—

" प्रथमेऽहन्यमावास्या तत्रोदकबलिं हरेत् । अथवा तत्प्रभृत्येव जलं पिंडांस्तु दापयेत् " ॥ इति । दर्शमरणे तदुत्तरदिनमारभ्य वा पिंडोदकदानं कुर्यात् । दर्शसंक्रमयोर्दुष्टत्वादिति व्याख्यातारः । अन्ये तु अंतर्दशाहे यदा कदाचिद्दर्शसंभवे उदकादि समापनीयं तदुत्तरदिनमारभ्य वा कार्यमिति व्याचक्षते । तदयुक्तम् । ' प्रथमेऽहन्यमावास्या ' इति प्रकृतत्वादमावास्यामरणविषयस्यैव विकल्पस्य प्रतीतेः 'प्रथमेऽन्ह्यंजलित्रयम्' इत्यादिना प्रथमदिनप्रभृति अविशेषेण उदकदानादिविधानाद्दर्शादेः पूर्वमेवारभ्य दर्शादौ समापनीयम् । तत्रालस्यादिनारब्धे सति दर्शसंक्रान्त्यनंतरदिनमारभ्य दिनत्रयेणैकेन वा दिनेन समापनीयमित्याहुः । दर्शसंक्रमयोस्तु संचयनं कृत्वैव समापनीयम् । **तथा कात्यायनः—**

"प्रथमेऽन्हि तृतीये वा यदा दर्शो भवेत्तदा । अस्थिसंचयनं कुर्यादिति विष्णुस्मृतौ स्मृतम्" ॥ इति । दशाहमध्ये संक्रांतिरित्यादिभिः संक्रमणस्यापि त्याज्यत्वस्मरणेन दर्शतुल्ययोगक्षेमत्वात् संक्रमणेऽप्येवमेव ग्राह्यम् । दशाहमध्ये तयोर्यौगपद्ये दर्शे समापयेत् " प्राप्ते दर्शे संक्रमे च दर्श एव समापयेत् " इति **स्मरणात्** । **संग्रहेऽपि—**

" यदि संक्रमदर्शौ तु दशाहाभ्यंतरे यदा । मातापित्रोर्विनाऽन्येषां दर्शेनैव समापयेत् " ॥ इति ।

स्मृत्यंतरे—

" अमाया च मृतिर्यस्य तद्दिने दहनं भवेत् । चंद्रस्य दर्शनात्पूर्वं दर्शे पिंडान्समापयेत् ॥
" अमायां च मृतं देहं प्रथमायां दहेद्यदि । उदकं पिंडदानं च सदशाहं समापयेत् " ॥ **यत्तु—**
"अमायां मरणं यस्य तस्य पिंडोदकक्रिया । आ दशाहात्प्रतिदिनं कारयेत्स्मृतिशासनात्" ॥ इति तदपि प्रथमाहनाभिप्रायं अन्यथा पूर्वोक्तवचनविरोधापत्तेः । **उशना** अपि—

" द्विचंद्रदर्शनं यावद्बलिपिंडक्रिया भवेत् । द्विचंद्रदर्शने दोषो महानित्यवधार्यताम् " ॥ इात ।

अखंडादर्शे—

" अष्टमांशे चतुर्दश्याः क्षीणो भवति चंद्रमाः । अमावास्याष्टमांशे च पुनः क्षीणो[4] भवेदणुः " ॥ तेन अमावास्याष्टमांशात्प्रागेव पिंडोदकापकर्षः कार्यः । अन्यथा द्विचंद्रत्वप्रसंगात् । दिनद्वयेऽप्यमावास्यासद्भावे मध्यान्हव्यापिन्यां तस्यां श्राद्धदिने वा अष्टमांशात्प्राक्कर्तव्यः । संक्रांतावपि तत्समयात्पूर्वं मध्यान्हे वा समापनीयम् । अनाथविषयेऽपि **स्मृत्यंतरे—**

" चंद्रक्षये मृतोऽनाथो दग्धश्चेदुदकार्थिनः । संचयोदकदानानि तस्मिन्नन्हि समापयेत् " ॥ इति । एतानि वचनानि मातापितृव्यतिरिक्तविषयाणि ।

---

१ क्ष—वास्या । २ ग—वा; क्ष—वर्ज । ३ क्ष—स्यैव । ४ ग—कीलो । ५ ग—अस्मिन् ।

दशाहमध्ये दर्शादिसंभवे मातापितृविषये—

" मातापितृविषये तु पितुर्मातुर्गुरोर्मृतौ । पिण्डं दद्यात् दशाहान्तं इतरेषां समापयेत् " ॥

श्रीधरीयेऽपि—" द्विचन्द्रदर्शने दोषो मातापित्रोर्न विद्यते " । **श्लोकगौतमः**—

" अंतर्दशाहे दर्शश्चेत्तत्र सर्वं समापयेत् । पित्रोस्तु यावदाशौचं दद्यात्पिंडान् जलाञ्जलीन्" ॥ इति ।

यमोऽपि—

"अर्वाग्दशाहात्पित्रोस्तु कुहूर्यदि तदा भवेत् । द्विचंद्रदोषो नास्त्यत्र कर्तव्या तु क्रिया सुतैः" ॥ इति ।

स्मृतिरत्ने—

" दशाहाभ्यन्तरे पित्रोः सिनीवाली यदा भवेत् । अतीत्यैव च कर्तव्यं पुत्रेणान्येन नेष्यते " ॥

बृहस्पतिः—

" अन्तर्दशाहे दर्शश्चेत्पितुर्मातुर्गुरोर्मृतौ । पिण्डं दद्यात् दशाहान्तमितरेषां समापयेत् " ॥

श्रीधरीये—

" द्विचन्द्रदर्शने दोषो मातापित्रोर्न विद्यते । मध्ये पिंडं समाप्तिश्चेत्कुलक्षयकरी भवेत् " ॥

अन्यत्रापि—

" दशाहमध्ये संक्रांतिर्दर्शो वाऽथ भवेद्यदि । तोयं पिंडं समाप्यैव तद्दिने नौरसेतरैः ॥

" बलिर्द्विचंद्रदृष्टश्चेद्दिनस्ति शवदाहकम् । चंद्रद्वयेऽपि कर्तव्या मातापित्रोर्बलिक्रिया " ॥

वरदराजीये—" दर्शे प्रेतदिनेषु सत्यपि तथा दद्याद्दशाहं सुतः " इति । **स्मृत्यंतरे—**

" अंतर्दशाहे दर्शश्चेत्पिंडनिर्वापणादिकम् । सपिंडो वर्जयेत्पुत्रः कुर्यात्पिंडोदकक्रियाम् " ॥ इति

संग्रहे—

" अंतर्दशाहे दर्शश्चेच्छिष्टं पिंडोदकादिकम् । मातापित्रोर्विनाऽन्येषां दर्श एव समापयेत् " ॥

अन्यदपि—

" दशाहाभ्यंतरे दर्शः संक्रमो वा भवेद्यदि । मातापित्रोर्दशाहांतं यथाविधि समापयेत् " ॥

विश्वादर्शे—" आशौचमध्ये विधुसंक्षयश्चेत् दद्युर्दशाहं तिलवारिपिंडम् ।

" पुत्रीसुतो दत्तक औरसश्च शेषाः सुतास्तत्र समापयेयुः " ॥ इति ।

मातापितृविषये विशेषो **गालवेनोक्तः—**

" पित्रोराशौचमध्ये तु यदि दर्शः समापयेत् । तावदेवोत्तरं तंत्रं पर्यवस्येत्त्र्यहात्परम् " ॥ इति । पित्रोराशौचमध्ये तु त्रिरात्रात् परम् यदि दर्शः समापतेत् तदैवोत्तरं तंत्रदर्शं समापयेत् नार्वाक् दर्शपात इत्यर्थः । **स्मृतिरत्ने कालादर्शेऽपि—**

" दर्शो दशाहमध्ये स्यादूर्ध्वं तंत्रं समापयेत् । त्रिरात्रादुत्तरं पित्रोर्मृताविति विनिश्चयः " ॥ इति । तथा " दशाहमध्ये दर्शश्चेत्तत्र सर्वं समापयेत् । अस्थिसंचयनादूर्ध्वं पित्रोरपि समापयेत्" ॥ इति ।

अत्र **चंद्रिकास्मृतिरत्नमाधवीयकालादर्शादिषु** प्रौढनिबंधनेषु व्यवस्था कृता— मातापितृव्यतिरिक्तविषये यदा कदा वा दर्शपाते ऊर्ध्वतंत्रं समापयेत् । मातापितृविषये तु त्रिरात्रादुत्तरं दर्शपाते ऊर्ध्वतंत्रं समापयेत् " पित्रोस्तु यावदाशौचं दद्यात्पिंडं जलांजलीन् " इत्यादीनि दशाहसमापनप्रतिपादकवचनानि त्रिरात्रात् पूर्वं दर्शपाते वेदितव्यानि । त्र्यहात्परमिति **गालवादिभिर्विशेषितत्वादिति** । अत्र **चंद्रिकादौ** औरसादिसर्वपुत्रसाधारण्येन अविशेषेण व्यवस्थोक्ता । अन्यैस्तु **पितृमेधसारकृदादिभिर्नवीनै**र्व्यवस्थान्तरमुक्तम् । पर्यवस्येत्त्र्यहात्परमित्यादीनि मातापितृविषयेऽपि

त्रिरात्रादुत्तरं दर्शसंभवे समाप्तिप्रतिपादकानि गालवादिवचनानि दत्तौरसपुत्रिकापुत्रव्यतिरिक्तगौणपुत्रकर्तृकोदकसमाप्तिपराणि ।

"तोयं पिंडं समाप्येतत्तद्दिने नौरसेतरैः" "शेषाः स्तुः तास्तत्र समापयेयुः" इत्यादिभिस्त्र्यहमध्ये दर्शसंभवे तेषामपि पिंडोदकसमापने प्राप्ते "पर्यवस्येत् त्र्यहात्परम्" इत्यादीनि तद्विषयाण्येवावतिष्ठंते । एवं च " द्विचंद्रदर्शने दोषो मातापित्रोर्न विद्यते । मध्ये पिंडसमाप्तिश्चेत्कुलक्षयकरी भवेत् ॥

" पित्रोस्तु यावदाशौचं दद्यात्पिंडं जलांजलीन् " ॥ इत्यादीनि त्रिरात्रादर्वाग्विषयाणीति संकोचोऽपि न कर्तव्यः । तेन दशाहमध्ये त्रिरात्रादर्वागूर्ध्वं वा दर्शसंक्रमणसंभवे पुत्रव्यतिरिक्तस्य कर्तुः ज्ञातीनां च दर्शसंक्रमणयोरेव समापनम् । दत्तौरसपुत्रिकापुत्रव्यतिरिक्तपुत्राणां त्रिरात्रादूर्ध्वं दर्शादौ सति समापनं त्रिरात्रादर्वाक् दर्शपाते तु तेषां न समापनम् । दत्तौरसपुत्रिकापुत्राणां तु यदाकदाचिद्दर्शादौ सति न तत्र समापनं किंतु दशाह एव पिंडोदकादिसमापनमिति यथोचितमिह द्रष्टव्यम् । ज्ञातीनां पुत्रेण सह समापनमुक्तं **रत्नावल्याम्**—

"संक्रातिर्वाऽथ दर्शो वा मध्ये चेत् ज्ञातिभिः सुतः । उदकं पिंडदानं च दशाहांते समापयेत्" ॥ इति । तथाऽन्यदपि—

" कर्ता यदा समाप्नोति तदानीं तु सपिंडकाः । ज्ञातिभिस्तत्समाप्तिश्चेन्मध्ये तेषां कुलक्षयः" ॥ इति । सपिंडकाः समाप्नुयुरिति शेषः ।

पुत्रव्यतिरिक्तकर्तृविषये ज्ञातीनां समापनमाह **शंखः**—"प्रथमेऽहन्यनारभ्य कर्त्रा सह तिलोदकम् । " यदि पश्चाच्च कर्तारस्तेऽन्तर्दशे तु संक्रमे । कुर्युर्नान्तर्गते दर्शे संक्रमे दशमेऽहनि " ॥ इति । अयमर्थः—प्रथमेऽहन्यनारभ्य कुर्वता कर्त्रा सह यदा ज्ञातयः क्रियारंभं न कुर्वंति यदा च कर्तारः दर्शादेरूर्ध्वं क्रियारंभं कुर्वंति तत्र उभयत्र ज्ञातयः अंतर्दशाहे दर्शे संक्रमे वा समापनं कुर्युः । दर्शादूर्ध्वमारभ्य कुर्वता कर्त्रा सह न दशमेऽहनीति **स्मृत्यंतरे**—

" प्रथमेऽहनि कर्त्रा ये न कुर्वन्ति तिलोदकम् । तैर्ज्ञातिभिश्च दर्शादौ समाप्येतौरसेतरः " ॥ औरसेतरैः कर्तृभिः सह ज्ञातीनां समापनमित्यर्थः । **संग्रहेऽपि**—

" दशाहमध्ये संक्रांतौ प्रेतकर्म समापनम् । सहैव ज्ञातिभिः कुर्यादौरसाऽन्यैश्च कर्तृभिः " ॥ इति । प्रेतकर्मसमापनमित्युक्तत्वादेकोत्तरवृद्धिश्राद्धं नवश्राद्धमपि दर्शे अपकृष्य समापनीयमिति केचित् । **अन्ये** तु " तोयं पिंडं समाप्येतत्तद्दिने नौरसेतरैः " इत्यादिभिः पिंडोदकयोरेवापकर्षणस्मरणान्नास्ति नवश्राद्धापकर्षः । तत्तद्दिनेष्वेकादशे वा दिने नवश्राद्धानि कर्तव्यानि । एकोत्तरवृद्धिश्राद्धानि तु अपकृष्य समापनीयानि ।

" श्राद्धमेकोत्तरं वृध्या कर्तव्यं तु दिने दिने । अवसानाद्धलीनां तु द्विगुणं प्रत्यहं परे " ॥ इति पिंडोदकोपक्रमावसानाविशिष्टत्वात्संनियोगशिष्टन्यायाच्चेत्याहुः । शिष्टाचारादिह व्यवस्था । किंच " प्रथमेऽहनि कर्त्रा ये न कुर्वंति तिलोदकम् । तैर्ज्ञातिभिश्च दर्शादौ समाप्येतौरसेतरैः " ॥ इति कर्तृभिः सह ज्ञातीनां समापनमित्यर्थश्च ज्ञायते ।

पाषाणोत्थापनम् । पाषाणोत्थापनं दशाह एव कुर्यादित्याह **शंखः**—

" आदौ मध्ये तथाऽन्ते च उदकादि समापयेत् । स एव दशमे कुर्यात्पाषाणोत्थापनादिकम् " ॥

षट्त्रिंशन्मते—

" प्रेतकार्याणि सर्वाणि मध्ये यदि समापयेत् । तथापि दशमेऽन्ह्येव पाषाणोत्थापनं स्मृतम्" ॥ इति ।

प्रचेताः—

" उदकं पिंडदानं च प्रतिकृष्य समापयेत् । उत्थापनं दशाहे स्यादन्यथा कुलनाशनम् " ॥ इति ।

उत्थापनं प्रभूतबलेरप्युपलक्षणम् । यदाह **संग्रहकारः**—

" दशाहमध्ये त्वथ दर्शे आगते समापिते कर्मणि पारलौकिके ।

" उत्थापनं भूतबलिर्दशाहे मध्ये कृतं चेत्कुलनाशहेतुः " ॥ इति । **स्मृत्यंतरे**—

" अंतर्दशाहे दर्शश्चेत्पिंडशेषं समापयेत् । उत्थापनं शांतिहोमं दशमेऽन्हि समाचरेत् " ॥ इति ।

जाबालिः—

" अंतर्दशाहे दर्शे वा संक्रमे वा समाप्य तु । वपनं शांतिहोमं च दशाहांते समाचरेत् ॥

" तस्मात्सर्वप्रयत्नेन दशाहे वपनं विदुः " इति । ज्ञातीनामपि वपनमाह **प्रचेताः**—

" ज्ञातयः सप्तमादर्वाक्कनिष्ठा दशमेऽहनि । वापयेयुश्च ते सर्वे कर्तृभिः सह सर्वदा " ॥ इति ।

शांतिहोमकाले वपनमाहा**पस्तंबः** ( )—"नापितकर्माणि च कारयंत एव प्रथमोऽलंकारः" इति। अंतर्दशाहे समापने केशवपनपूर्वमेवोदकं देयम् । "प्रद्युर्ज्ञातयः सर्वे क्षौरं कृत्वा तिलोदकम्" इति **स्मरणात्** । " वपनं कृत्वा स्नात्वैकवस्त्रा जलांजलीन् दद्युः " इति **प्रचेतः**स्मरणात् ।

" अकृत्वा वपनं मूढः प्रेतकर्म प्रवर्तते । उदकं पिंडदानं च श्राद्धं चैव च निष्फलम् " ॥ इति **स्मरणाच्च** । एवं चांतर्दशाहसमापने ज्ञातीनां प्रथमदिने कंठादुपरि वपनाकरणे तर्पणात्पूर्वं कर्तव्यमेव । दशमदिनेऽपि शांतिहोमकाले शेषवपनं सर्वांगवपनं कार्यम् । बालादेः संस्कारादिप्रेतकृत्यं बालाद्याशौचनिरूपणे सविस्तरं प्रतिपादितम् । **अन्तर्दशाहागतपुत्रविषये** । **पारस्करः**—

" पुत्रस्यासंनिधाने यः पिंडदाने प्रवर्तते । तत्संनिधौ प्रवृत्तोऽपि संत्याज्यः पिंडदस्ततः[१] " ॥ इति ।

अत्र पिंडशब्दः नवश्राद्धैकोत्तरवृद्धिश्राद्धोपलक्षकः । तथा च **स्मृत्यंतरेऽपि**—

" मुख्यकर्त्रागमेऽन्यस्तु प्रवृत्तोऽपि क्रियां त्यजेत् । ततस्तु कर्म कुर्वीत संस्कर्ता विसृजेत्ततः ॥

" पुनस्तिलोदकं पिंडं नग्नप्रच्छादनं तथा । नवश्राद्धप्रदानादि सर्वं कर्म समाचरेत् " ॥ इति ।

श्रीधरीये—

"दशाहकर्मण्यारब्धे संस्कारादौ कनीयसा । ज्येष्ठोऽथ त्वंतरागच्छेत्सोऽस्य शेषं समापयेत्" ॥ इति ।

कनिष्ठेन सोदरेण भिन्नोदरेण वा दाहादिप्रेतकृत्ये आरब्धे संचयात्पूर्वं परं वा आगतो ज्येष्ठः पुत्रः कनिष्ठकृतस्य प्रेतकृत्यस्य शेषं समापयेदित्यर्थः । तत्र संचयात्पूर्वमागतश्चेद्वप्तकेशः संचयनमतीतकालोदकपिंडांश्च एकदा कृत्वा ततस्तात्कालिकपिंडोदकनवश्राद्धाद्येकोद्दिष्टांतं स्वकाले कृत्वा द्वादशाहे सापिंड्यं च कुर्यात् । संचयात्परमागतश्चेदतीतकालपिंडोदकमात्रमेकदा कृत्वा तत्कालपिंडोदकाद्येकोद्दिष्टांतं स्वस्वकाले कृत्वा श्रवणादिनमारभ्य दशाहाशौचमनुष्ठायानंतरमावृत्ताद्यमासिकादीन्युक्तकाले कृत्वा त्रिपक्षादौ सापिंड्यं कुर्यात् । न द्वादशाहे । तत्र तस्याशौचसंभवात् । तथा च **स्मृत्यंतरे**—

" शृणोत्यनिर्दशं पुत्रः पित्रोस्तु मरणं यदि । मृताहात्प्रेतकार्यं स्यात्तस्य शुद्धिर्दशाहतः " ॥ इति ।

दशाहमध्ये संचयादूर्ध्वं यदि पितृमरणं शृणोति तद्विषयमिदं दशाहाशौचम् ।

" पित्रोर्मृतौ चेद्दूरस्थः श्रुत्वा पितृविपर्ययम् । पुत्रः शुध्येद्दशाहेन संचयात्प्राक्तु शेषतः[२] " ॥ इति **स्मरणात्** । अन्येन संस्कारे कृते संचयात्पूर्वमागतः पुत्रः पुनर्दहनादि सर्वं कृत्वा दशाहशेषेण

१ ग—स्तुतः । २ क्ष—य ।

शुध्येत् । कनिष्ठेन कृते दाहे न पुनर्दाहः किं तु संचयादि सर्वं कृत्वा शेषेणैव शुध्येत् । तदुक्तं **स्मृतिरत्ने**—

"अन्येन यस्य संस्कारः कृतस्तस्यात्मजः पुनः । कुर्यादेव यथाशास्त्रमन्यथा किल्बिषी भवेत्"॥ इति । **देवलश्च**—

" पुनर्दहनमारभ्य श्राद्धांतं पैतृमेधिकम् । कृत्वांते प्रेतरूपस्य सपिंडीकरणं चरेत् "॥ इति । अत्र पुनर्दाहे चिताग्निनाशे तदनुगतप्रायश्चित्तविधिनाग्निमुत्पाद्य पुनर्दहनविधिनास्थ्याऽदि संस्कृत्य एकादशाहे एकोद्दिष्टं द्वादशाहे सपिंडीकरणं च कुर्यादित्यर्थः । **स्मृत्यंतरे च**—

" मंत्रवत्संस्कृतस्यापि ह्यसमाप्तोदकस्य तु । अस्थिसंचयनादर्वाक्पुनर्दाहो विधीयते ॥

" अस्थिसंचयनादूर्ध्वमसमाप्तोदकस्य तु । पुनर्दाहं विना तत्र पिंडदानोदकक्रिया "॥ इति । **अन्यत्रापि**—

" अस्थिसंचयनादर्वागागतो यदि पुत्रकः । ततस्तु कर्म कुर्वीत संस्कर्ता विसृजेत्तदा ॥

" विसृष्टो भोजयित्वांऽते ब्राह्मणांश्च विशुध्यति " ॥ इति । कर्म पुनर्दहनादिकर्म । अंते संस्कर्तुः स्वाशौचांते विसृष्टः शुध्यर्थं ब्राह्मणान्भोजयेदित्यर्थः । अर्थादन्येन संस्कारे संचयने च कृते संचयनात्परमागतेन पुत्रेण दाहादि न कार्यम् । अतीतपिंडोदकदानं नग्नप्रच्छादनादिकं अवशिष्टदिनप्रेतकृत्यं चेत्युक्तं भवति । अन्येन कृते दाहे संचयात्पूर्वमागतोऽपि पुत्रव्यतिरिक्त-मुख्यकर्ता पुनर्दाहं न कुर्यात् । संचयनोदकाद्येव कुर्यात् ।

" पुनर्दाहक्रियाः सर्वा मातापित्रोर्विशेषतः । इतरेषां तु सर्वेषां पुनर्दाहस्तु नेष्यते "॥ इति **पराशरस्मरणात्** ।

असपिण्डादिदाहकानां मुख्यकर्तृसमागमे विधिः । असपिंडश्चेद्दाहकर्ता तस्य संचयनात्पूर्वं मुख्यकर्तृसमागमे सत्यनंतरमाशौचमुदकदानं च नास्ति । संचयनात्परं मुख्यकर्तृदर्शने प्रेतान्नभोजने च दशाहाशौचमुदकदानं च कार्यम् । पक्षिण्याशौचिनस्तु असपिंडदाहे संचयात्पूर्वं मुख्यकर्तृदर्शने त्रिरात्रमाशौचम् । संचयनानंतरं तद्दर्शने दशरात्रमाशौचमुदकदानं चास्ति । समानोदकादिषु त्रिरात्राशौचिषु सपिंडेषु वा दहनं कर्तृषु सत्सु संचयनात्पूर्वं परं वा मुख्यकर्तृदर्शने दशाहमाशौच-मुदकदानं च भवति । अन्यत्सर्वं निवर्तते । अत्र संवादवचनानि । **मनुः** (५।१०१-१०२)—

" असपिंडं द्विजं प्रेतं विप्रो निर्हृत्य बंधुवत् । अनदन्नन्नमह्नैव न चेत्तस्मिन्गृहे वसन् ॥

"यद्यन्नमत्यघवतः स दशाहेन शुध्यति"॥ इति । **शंखः**—"त्र्यहं योनिबंधूनामाशौचं दहनादिषु" आशौचमुदकस्याप्युपलक्षणम् । यावदाशौचमुदकमिति संस्कर्तुरुदक**स्मरणात्** । **स्मृत्यंतरे च**—

"अज्ञातिं च नरं दग्ध्वा त्रिरात्रमशुचिर्भवेत् । ज्ञातीनां दर्शनाच्छुद्धिः संचिते दशरात्रकम् "॥ इति । **मांडव्यः**—

" शावे च सूतके चैव त्र्यहादुदकदायिनः । शवदाहं तु कुर्याच्चेद्दशाहांता भवेत् क्रिया " ॥ **भरद्वाजः**—

" यः समानोदकं प्रेतं वहेद्वाऽथ दहेत्तु वा । तस्याशौचं दशाहं स्यादन्येषां च त्र्यहं विदुः " ॥ अन्येषां योनिबंधूनामित्यर्थः ।

गृह्यपरिशिष्टे—

"असगोत्रः सगोत्रो वा यदि स्त्री वा यदि पुमान्। प्रथमेऽहनि यः कर्ता स दशाहं समापयेत्"॥ इति दशाहमध्ये मुख्यकर्तर्यागतेऽपि दौहित्रः समानोदकादिः सपिंडो वा संस्कर्ता दशाहमुदकमात्रं समापयेत्। पिंडादिकमन्यत् सर्वं विसृजेदित्यर्थः। अतः संस्कर्ता विसृजेत्तत इत्यनेनास्य न विरोधः। तथा च **पारस्करः**—

"पुत्रो भ्राताऽथ शिष्यो वा अन्यो वा ब्राह्मणः सदा। प्रथमेऽहनि यः कर्ता कुर्यादिवाप्रदानतः॥

"एतैरारब्धपिंडस्य यद्यागच्छंति वै सुताः। तेऽपि कुर्युस्तु पूर्वोक्तपिंडदानं जलं तथा"॥ इति।

पुत्रः कनिष्ठपुत्रः। अन्यो वा सपिंडः समानोदकादिः। अपां प्रदानं अप्प्रदानम्। आ अप्प्रदानादाऽप्रदानतः। अभिविधावाकारः। दशमदिने देयोदकदानपर्यंतमिति यावत्। पूर्वोक्तपिंडदानं संस्कर्ता पूर्वदत्तानां पिंडानां दानं तथा जलं तिलवारीति। एतदुक्तं भवति। कनिष्ठपुत्रभ्रात्रादिः संस्कर्ता स्वस्वाशौचपर्यंतं मुख्यकर्त्रागमेऽप्युदकदानमात्रं दद्यात्। अंतरासमागतो मुख्यकर्ता तु अतीतदिनविहितपिंडोदकान्येकदा दत्वा तात्कालिकानि शेषाणि प्रेतकार्याणि च तत्काले कुर्यादिति। ननु "तेऽपि कुर्युस्तु पूर्वोक्तपिंडदानं जलं तथा" इति **पारस्कर**वचनस्य 'ज्येष्ठोऽथ वांतरा गच्छेत् सोऽस्य शेषं समापयेत्' इति **श्रीधरीय**वचनेन विरोध इति चेन्नैवम्। **श्रीधरीय**वचनप्राप्तातीतपिंडोदकदाननिषेधस्य आर्थिकत्वेन दौर्बल्यांतेऽपि कुर्युरिति पिंडोदकदानस्य कंठोक्तत्वेन प्राबल्यात्।

"उत्तरीयशिलापात्रद्रव्यकर्तृविपर्यये। पूर्वदत्तांजलीन्पिंडान्पुनरित्याह गौतमः"॥ इति कर्तृविपर्यये दत्तपिंडोदकानां पुनर्विधानाच्च। यत्तु **शातातपः**—

"अन्यगोत्रोऽप्यसंबंधः प्रेतस्याग्निं ददाति यः। उदकं पिंडदानं च स दशाहं समापयेत्"॥ इति।

तस्यार्थः—दशाहनिर्वर्तनीयं पंचसप्ततिसंख्याकं उदकं पिंडदशकं च मुख्यकर्त्रभावे स्वाशौचान्ते समापयेदिति। यद्वा प्रेतान्नभोजने सति दशाहेन उदकादि समापयेदिति। अत एव **स्मृत्यन्तरम्**—

"असपिंडो यदि दहेत् द्वितीये त्वस्थिसंचयः। एकोद्दिष्टं तृतीयेऽन्हि मरणात्तु विधीयते"॥ इति।

अस्थिसंचयग्रहणं तिलोदकादेरप्युपलक्षणम्। एतच्च प्रेतान्नभोजनरहितासपिंडविषयम्।

"यः प्रमीतमलंकुर्याद्वहेद्वाथ दहेत् द्विजम्। स शुद्ध्यत्येककालेन कालशेषं बहिर्वसेत्॥

"ग्रामे वसन् दिनाच्छुध्येत् त्र्यहात्प्रेतगृहे वसन्। निर्हृत्य यो मृतान्नं च भुंक्ते स तु दशाहतः"॥ इति **स्मरणात्**—'ग्रामे वसन् दिनाच्छुध्येत्' इत्येतद्दहनानंतरं मुख्यकर्तृसमागमे सति संचयनादिप्रेतक्रियाया अकरणे वेदितव्यम्। मुख्यकर्तुरभावे प्रेतक्रियाया करणे तृतीयदिनविहितैकोद्दिष्टेन शुद्धिः। "एकोद्दिष्टांत एव स्यात्संस्कर्तुः शुद्धता त्वघात्" इति **बोधायनेन** संस्कर्तुरेकोद्दिष्टांतेनैव शुद्धिस्मरणात्। प्रेतान्नभोजनेन तु दशाहतः शुद्धिः क्रिया चेति ज्ञेयम्।

दशमदिनागतमुख्यकर्तृविषयः। कनिष्ठादिना संस्कारादिनवदिनपर्यंतप्रेतकृत्ये कृते सति दशमदिनेवागते[1] मुख्यकर्ता उप्तकेशो नवभिर्दिवसैर्देयांस्तिलोदकपिंडानेकदैव दत्वा प्रभूतबलिं दत्वा तत्कालोदकं दशमपिंडं च दत्वा सर्वांगवपनं शेषवपनं वा कृत्वा शांतिहोमं परिसमापयेत्। ततः श्रवणदिनमारभ्य दशाहाशौचस्य सत्त्वेऽपि मरणदिनमारभ्य एकादशदिने आद्यश्राद्धं कृत्वा आशौचानंतरमुक्तकाले आवृत्ताद्यश्राद्धादीनि कृत्वा त्रिपक्षे सपिंडनं कुर्यात्।

---

१ क–दिने दिवगतो।

तथा च **स्मृत्यंतरम्**—

" नवभिर्दिवसैर्दद्यान्नवपिंडान्समागतः । दशमं पिंडमुत्सृज्य रात्रिशेषेण शुध्यति "॥ इति । दशमदिने समागतो मुख्यकर्ता नवभिर्दिवसैर्दद्यान्नवपिंडान् दत्वा दशमं च पिंडं दत्वा रात्रिशेषेणं पुत्रव्यतिरिक्तकर्ता विशुध्यतीति । पुत्रोऽपि आशौचस्य सत्वेऽपि एकोद्दिष्टाधिकारी भवतीत्यर्थः । यदाह **शंखः**—

" आद्यश्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि । कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः " ॥ इति । रात्रिशेषेण शुध्यतीत्यन्यथा कैश्चिद्व्याख्यातम् । रात्रिशेषेण शुद्धिस्मरणादिदं संचयात्प्रागागतज्येष्ठपुत्रविषयं ' संचयात्प्राक्तु शेषतः ' इति दशाहशेषेण तस्यैव शुद्धिस्मरणादिति । तदसाधु । संचयात्प्रागागतज्येष्ठपुत्रविषयत्वरूपविशेषस्य तत्राप्रतीतेः । संचयात्पूर्वं परं वा दशमदिने आगतमुख्यकर्तृमात्रस्याविशेषेण पिंडोदकसमापनप्रतीतेः । ' रात्रिशेषेण शुध्यतीति ' एतस्य च दशमदिनागतस्य मुख्यकर्तुः पुत्रव्यतिरिक्तस्य

" विगतं तु विदेशस्थं शृणुयाद्यो ह्यनिर्दशम् । यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत् "॥ इति दशमदिनोत्तरकालमाशौचाभावेन मुख्यार्थत्वसंभवात्पुत्रस्य श्रवणादिदशाहाशौचसत्वेऽपि दशाहपिंडोदकसमापनेन एकोद्दिष्टार्थे शुद्धिप्रतिपादनपरत्वेनाप्युपपत्तेः । अतः सर्वोऽपि दशमदिनागतो मुख्यकर्ता स्वोचितं प्रेतकर्म तस्मिन्नहनि कृत्वा मरणाद्येकादशदिने आद्यैकोद्दिष्टमाशौचापगमानंतरं विहितकालेषु आवृत्ताद्यमासिकादीनि च कुर्यात् । ननु

" श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेत् । पुत्रः शुध्येद्दशाहेन संचयात् प्राक् तु शेषतः " ॥ इत्यादिना संचयात्परं मृतिश्रवणे पुत्रस्य दशाहमाशौचविधानाद्यावदाशौचं पिंडोदकविधानाच्च दशमदिनश्रवणे तदादिदशाहोदकदानप्रसंगः । ततश्च 'नवभिर्दिवसैर्दद्यात्' इति दशाहे पिंडसमापनवचनं पुत्रव्यतिरिक्तमुख्यकर्तृविषयं वा अकृतास्थिसंचयनविषयं वा स्यात्

" सपिंडीकरणात्पूर्वमस्थिसंचयनं भवेत् । एकादशाहे मासांते वाऽस्थिसंचयनं भवेत् " ॥ इत्यादिभिः सपिंडीकरणात्पूर्वमस्थिसंचयनस्य विहितत्वादिति चेन्न

"शृणोत्यनिर्दशं पुत्रः पित्रोस्तु मरणं यदि । मृताहात्प्रेतकार्यं स्यात्तस्य शुद्धिर्दशाहतः"॥ इति वचनेन अंतर्दशाहश्रवणे तदादिदशदिनाशौचस्य सत्त्वेऽपि मृतदिनादिदशाहत एव प्रेतकार्यसमापनस्य कंठतः प्रतिपादनात् । अपवादभूतेन " यावदाशौचं प्रेतस्योदकम् " इति (१९।१३) **विष्णुवचनस्य** दशाहानंतरश्रवणादिविषयांतरसंभवादुत्सर्गस्य बाधनात् ।

एकादशेऽह्नि अपराह्णात्पूर्वमागतपुत्रविषये । **पैठीनसिः**—

"दशरात्रे व्यतीते तु पित्रोश्चैवौर्ध्वदेहिकम् । पुत्रः कुर्यात्तदाशौचं दशरात्रमिति स्मृतम् " ॥ इति । अत्र **पितृमेधसारकृत्**—"कृते दशाहकृत्ये श्रुत्वैकादशाहे त्वागतः पुत्रः उप्तकेशः एकोद्दिष्टं कृत्वा दशाहतिलोदकं दद्यात् । अकृते दशाहकृत्येऽनिर्दशाहे पित्रोर्मृतिश्रुतौ श्रुताहादिदशाहांतमुदकादि कृत्वा एकादशाहे एकोद्दिष्टं कृत्वा त्रिपक्षे सपिंड्यं कुर्यात् " इति । अकृते दशाहकृत्ये दशदिनरात्रावागतोऽपि

"शुक्रवारेऽप्यतिक्रांते मातापित्रोस्तथैव च । संध्याराज्योस्तथा क्षौरं प्रेतकार्यं च नाचरेत्"॥ इति ।

" दिवैव तर्पणं कुर्यान्नापराह्णे तु संचयः" इति दाहदिनव्यतिरिक्तदिने रात्रौ उदकदानादिनिषेधात्तत उत्तरं दशाहकृत्यं परिसमाप्य एकादशाहे आद्यश्राद्धं कुर्यात् ।

अयमत्र **पितृमेधसारकृतो**ऽभिमतः **पैठीनसि**वचनार्थनिष्कर्षः—अन्येन सपिंडादिना कृते दहनादिदशाहकृत्ये संचयात् प्रागेकादशाहे पितृमृतिं श्रुत्वा समागतः पुत्रः पुनर्दहनादि सर्वं तदा कृत्वा एकोद्दिष्टं च कृत्वा तदारभ्य दशरात्राशौचानुष्ठानमुदकं च कुर्यात् । संचयनात्परमेकादशाहे आगतः वृषोत्सर्जनपूर्वकाद्यैकोद्दिष्टं कृत्वा तदारभ्याशौचमुदकमात्रं च कुर्यात् । कनिष्ठेन तु दशाहकृत्ये कृते संचयात्पूर्वं परं वा आगतो ज्येष्ठपुत्रः

"प्रेतकृत्ये तु निर्वृत्ते पुत्र एकादशेऽहनि । आगते तद्दिने त्वाद्यं पिंडोदकसमापनात्" ॥ इति **वचनेन** वृषोत्सर्जनमेकोद्दिष्टं च कृत्वा तत् आरभ्य दशाहाशौचानुष्ठानमुदकमात्रं च कुर्यान्न पिंडदानम् ।

"मुख्यकर्ता विदेशस्थः काले काले श्रुतो यदि । तिलवारि प्रकुर्वीत पिंडदानं विवर्जयेत्" ॥ इति **स्मरणात्** । काले एकोद्दिष्टकाले एकादशाह इति यावत् । अकाले एकादशाहानंतरकाल इत्यर्थः । अत्र सर्वत्र त्रिपक्षादौ सपिंडीकरणम् । अकृते दशाहकृत्ये आगतदिनमारभ्य दशाहकृत्यं परिसमाप्य एकादशाहे एकोद्दिष्टं त्रिपक्षादौ सापिंड्यं कुर्यादिति । अन्ये तु **पैठीनसि**वचनमन्यथा व्याचक्षते—दशरात्रे व्यतीते एकादशदिने पित्रोर्मृतिश्रवणे पुत्रः तदा तस्मिन्नेवाहनि और्ध्वदेहिकं वपनपूर्वकं परिसमाप्य एकोद्दिष्टं कृत्वा एकादशाहमारभ्याशौचमात्रमनुतिष्ठेन्न तिलोदकमिति । तन्मंदं[1] "कनीयसा कर्मसमापितं चेच्छ्राद्धात्पुरो ज्येष्ठसमागतिश्चेत् ।

"तस्मिन्दिने श्राद्धमेकं समाप्य पश्चाद्दशाहात्तु तिलोदकं च ॥

"कृतक्रियेऽपि पितरि दशाहं सूतकी भवेत् । दद्यात्तिलोदकं पुत्रः सपिंडीकरणं पुनः ॥

"मुख्यकर्ता विदेशस्थः काले काले श्रुतो यदि" इत्यादिभिः **षट्त्रिंशन्मता**दिवचनैरेकोद्दिष्टानंतरमप्युदकदानविधानात् ।

"**कनिष्ठादिकृतसापिंडस्य ज्येष्ठेन पुनःकरणम्** । यद्येकोद्दिष्टांतं पुत्रोऽन्यो वा कुर्यात् विदेशस्थः पुत्रः श्रुत्वा वपनं कृत्वा दशाहमुदकमात्रं दद्यात् । सपिंडीकरणं चान्यकृतं कनिष्ठकृतं वा पुनः कुर्यात् । अत्र **गार्ग्यः**—

"कृतक्रियेऽपि पितरि दशाहं सूतकी भवेत् । दद्यात् तिलोदकं पुत्रः सपिंडीकरणं पुनः" ॥

वृद्धशातातपः—

"अग्रजो वाऽनुजो वाऽपि पित्रोरवगतो मृतिम् । वापयित्वाऽथ केशादीन्सचैलमवगाहयेत् ॥

"आ दशाहं ब्रह्मचारी दत्वा चैव तिलोदकम् । सपिंडीकरणं कुर्यादन्येन च कृतं यदि" ॥ इति । अग्रजस्तिलोदकं दशाहं दत्वा अन्यकृतमपि सपिंडीकरणमेकादशाहे पुनः कुर्यात् । अनुजस्तु दशाहं तिलोदकमात्रं दद्यादित्यर्थः । **माधवीये**—

"देशांतरे स्थितः पुत्रः श्रुत्वा पितृविपर्ययम् । कृत्वा तु वपनं दत्वा दशाहांतं तिलोदकम् ॥

"सपिंडीकरणश्राद्धं कुर्यादेकादशेऽहनि" ॥ इति । एकोद्दिष्टस्य पूर्वमन्येन कृतत्वादेकादशाहे पुनस्तस्य विधानाभावात्तत्र सपिंडीकरणमेव कुर्यात् । न पुनः षोडशश्राद्धानीत्यर्थः । एतच्च एकादशाहे सपिंडनं पुनःकरणविषयम् । अन्यथा त्रिपक्षादावेव कुर्यात् । **षट्त्रिंशन्मते**—

"आगतो ज्येष्ठपुत्रस्तु प्रेतकृत्ये समापिते । एकादशेऽह्नि सापिंड्यमुक्तकालव्यतिक्रमे" ॥ इति प्रेतकृत्ये सपिंडीकरणांतकृत्य इत्यर्थः । **चंद्रिकायाम्**—

"ज्येष्ठेन वा कनिष्ठेन सपिंडीकरणे कृते । देशांतरगतानां तु पुत्राणांहि कथं भवेत् ॥

"श्रुत्वा तु वपनं कृत्वा दशाहांतं तिलोदकम् । ततः सपिंडीकरणं कुर्यादेकादशेऽहनि ।

---

१ क्ष–मतं । २ ग–पिण्डदानं ।

" द्वादशाहेन कर्तव्यमिति शातातपोऽब्रवीत् " । सर्वज्येष्ठः पुनः कुर्यादित्यर्थः । **शातातपः**—
" श्रवणाहे न कुर्वीत भोजनं मैथुनं तथा । दशाहांतेऽनुजः कुर्यात्पार्वणश्राद्धमादरात् ॥
" ज्येष्ठः सपिंडीकरणं पुनः कुर्यात् कृतं यदा " ॥ इति । अन्येन कृते एकोद्दिष्टांतकृत्ये अनंतरमागतोऽनुजः दशाहमुदकं दत्वा दशाहांते एकादशाहे अग्रजासंनिधाने पार्वणं सपिंडीकरणं कुर्यात् । तत्कृतमपि सापिंड्यमग्रजः पुनः कुर्यादित्यर्थः । **स्मृत्यंतरे**—
" कृते श्राद्धे ज्येष्ठपुत्र आगच्छेत्तु कथं भवेत् । तिलोदकं तु निर्वर्त्य त्रिपक्षे तु सपिंडनम् ॥
" कनिष्ठेनैव विधिवत् सपिण्डीकरणे कृते । ज्येष्ठेनापि च कर्तव्यं सपिण्डीकरणं पुनः ॥
"विभक्तो वाऽविभक्तो वा मातापित्रोः सपिंडनम् । कथंचिदनुजः कुर्याद्भूयः कुर्यात्तदग्रजः" ॥ इति ।
ज्ञात्यादिना सापिण्ड्यान्ते कृते ज्येष्ठासंनिधाने सर्वे विभक्ताः पुत्राः एकादशाहे सापिंड्यं पुनः कुर्युः । पश्चादागतो ज्येष्ठोऽपि पुनः कुर्यात् इत्याह **बृहस्पतिः**—
" सपिण्डीकरणं पित्रोः पितृयज्ञविधानतः । पुत्राः सर्वे पृथक्कुर्युर्यदा ज्येष्ठो न कारयेत् ।
" अग्रजेन कृतं कर्म नानुजेन पुनः कृति " इति । सर्वे ज्येष्ठसंनिधाने विभक्ता अपि पृथक् न कुर्युः । ज्येष्ठ एक एव कनिष्ठानुमत्या संपृक्तद्रव्येण सापिंड्यं पुनः कुर्यात्
" नवश्राद्धं सपिंडत्वं श्राद्धान्यपि च षोडश । एकेनैव तु कार्याणि संविभक्तधनेष्वपि " ॥ इति **स्मरणात्** । अविभक्तविषये तु अन्यकृते सपिंडीकरणे सर्वज्येष्ठासंनिधाने विद्यमानेषु ज्येष्ठ एव पुनः कुर्यान्न सर्वे । ज्येष्ठोऽपि श्रुत्वा पुनः कुर्यात्
" ज्येष्ठे संनिहिते वार्ते वर्तमाने क्रियांतरे । पित्रोः पुत्रेण कर्तव्यं द्वितीयेनानुजेन वा ॥
" सर्वैरनुमतिं कृत्वा ज्येष्ठेनैव तु यत्कृतम् । द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेत् ॥
" ज्येष्ठः सापिंडीकरणं पुनः कुर्यात्कृतं यदा " ॥ इत्यादि**स्मरणात्** ।

वत्सरान्ते मातापितृमृतिश्रवणम् । स्मृत्यंतरम्—

" पितरि प्रोषिते प्रेते पुत्रः कुर्यात्क्रियादिकम् । संवत्सरेऽप्यतीतेऽपि दशरात्रं यथाविधि " ॥ इति ।
पुराणे—
"पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः । श्रुत्वा तद्दिनमारभ्य दशाहं सूतकी भवेत्" ॥ इति ।
विज्ञानेश्वरीये च (पृ. १७९ पं. १२-१३)—
"महागुरुनिपाते तु आर्द्रवस्त्रोपवासिना । अतीतेऽब्देऽपि कर्तव्यं प्रेतकार्यं दशाहतः " ॥ इति ।
स्मृत्यर्थसारे च—"मातापितृमरणे दूरदेशेऽपि वत्सरादूर्ध्वमपि पुत्रः श्रुत्वा श्रवणदिनादि स्वजात्युक्तदशाहाद्याशौचं कुर्यात् । अतीतवत्सरप्रेतस्य प्रथमवत्सरविहितसोदकुंभानुमासिककेशधारणादीनां द्वितीयवत्सरे कर्तव्यताविधानादर्शनात्तानि न कार्याणि । मृतमासे मृततिथौ वाऽऽब्दिकश्राद्धमेव । मृतमासाद्यज्ञाने तत्तत्काले कार्यम् । अनतीतवत्सरप्रेतकृत्ये त्वाब्दिकपर्यंतं स्वे स्वे काले शिष्टानि ऊर्ध्वभावीनि सोदकुंभानुमासिकानि कृत्वा मृतमासतिथावाब्दिकं कुर्यात् ।
" अस्थ्नापलाशवृंतैर्वा दग्ध्वा तु विधिपूर्वकम् । एकादशे द्वादशे वा मासिकानि सपिंडनम् ॥
"कृत्वा तु पुनरावृत्त्या मासिकानि तु तद्दिने । यावदाब्दिकपर्यंतमिति शातातपोऽब्रवीत् " ॥ इति ।
शातकेऽपि—
" दशरात्रं सदा पित्रोः परोक्षमरणश्रुतौ । त्र्यहं मातृसपत्न्यास्तु दशाहं वत्सरादधः ॥
" कृतौर्ध्वदेहिकेऽप्यब्दे दिनं तस्यास्त्र्यहं तयोः " ॥ इति ।

शतकक्रुतैवैतत् व्याख्यातम्—वत्सरमध्ये तत्परं वा मातापित्रोरसंनिधानमरणे सर्वेषामपि पुत्राणां दशाहमाशौचम् । सपत्नीमातुस्तु असमक्षमृतौ श्रुतायां वर्षात्परं त्र्यहमेव । तत्पूर्वं तु दशाहम् । अत्र विशेषः । ज्येष्ठेन कृते और्ध्वदेहिके अब्दे चातिक्रांते तस्याः सपत्नीमातुः परोक्षमरणश्रवणे दिनम् । तयोर्मातापित्रोस्तच्छ्रुतौ कनिष्ठस्य त्र्यहम् ।

"पितरि प्रोषिते प्रेते पुत्रो देशांतरं गतः । कृतक्रिये त्रिरात्रं स्याद्दशाहमकृतक्रिये " ॥ इति वत्सरादूर्ध्वश्रवणे कृतक्रिये त्रिरात्रविधिः कनिष्ठविषय एव । ज्येष्ठस्य तु

" कृतक्रियेऽपि पितरि दशाहं सूतकी भवेत् । दद्यात्तिलोदकं पिंडं सपिंडीकरणं पुनः " ॥ इति दशाहविधानात् कृतस्यापि सपिंडीकरणस्य पुनःकरणविधानसामर्थ्याज्ज्येष्ठविषयत्वमस्यावगम्यते । तथा च **पैठीनसिः**—

" प्रोषितभ्रातृमरणे दत्तपिंडोदकक्रिये । त्रिरात्रं सूतकं तत्र दशाहं पुत्रभार्ययोः " ॥ इति । कृतक्रियेऽपि पितरि भर्तरि च ज्येष्ठपुत्रभार्ययोर्दशाहमित्यर्थः । एवं च वत्सरादूर्ध्वं पितृमृतिश्रवणे ज्येष्ठपुत्रः दशाहमाशौचमुदकं चानुष्ठाय कृतमपि सपिंडीकरण पुनः कुर्यात् । कनिष्ठपुत्रस्तु कृतक्रिये त्रिरात्रमाशौचं उदकमात्रं च कुर्यादिति ।

अत्र केचिदाहुः—"संवत्सरे व्यतीतेऽपि दशरात्रं यथाविधि" इत्यादीनि वत्सरादूर्ध्वं श्रवणे दशाहप्रतिपादकवचनानि अकृतक्रियपितृविषयाणि । 'कृतक्रिये त्रिरात्रं स्यात्' इति वचनं वत्सरादूर्ध्वं पितृमरणश्रवणे कृतक्रिये पितरि ज्येष्ठादीनां सर्वेषामपि पुत्राणामविशेषेण त्रिरात्राशौचोदकदानप्रतिपादनपरम् । "कृतक्रियेऽपि पितरि दशाहं सूतकी भवेत् । अग्रजो वाऽनुजो वाऽपि" इत्यादीनि कृतक्रियविषये दशाहाशौचप्रतिपादकानि वत्सरात्पूर्वं पितृमरणश्रवणविषयाणि ।

यच्चोक्तम्—"सपिंडीकरणं पुनः" इति पुनःकरणविधानसामर्थ्येन कृतक्रियेऽपि पितरीति दशाहाशौचज्येष्ठपुत्रविषयत्वमवगम्यत इति तदपि न । अन्येन कृतक्रियपितृविषये पुत्रमात्रस्य पुनःसपिंडीकरणविधानोपपत्तेः । सामर्थ्याभावेन ज्येष्ठैकविषयत्वाप्रतीतेः । एवं च वत्सरादूर्ध्वं कृतक्रियपितृमरणश्रवणे ज्येष्ठपुत्रोऽपि त्रिरात्राशौचमुदकं चानुष्ठाय चतुर्थदिने सापिंड्यं कुर्यात् । वत्सरात् पूर्वं मृतिश्रवणे सर्वेऽपि पुत्रा दशाहाशौचमुदकं च कुर्युः । ज्येष्ठपुत्रस्तु कृतमपि सापिंड्यं एकादशाहे पुनः कुर्यादिति यथोचितमत्र द्रष्टव्यम् ।

सपत्नीमातृविषये । सपत्नीमातुर्वर्षात्पूर्वं मृतिश्रवणे सर्वेऽपि पुत्रा दशाहमाशौचमुदकं च कुर्युः । वर्षात्परं मृतिश्रवणे त्र्यहम् । तथा **वरदराजीये**—

" प्रागब्दाज्जननीसमं दिशतु तत्प्रेतोदकादिक्रियाम् ।

"तस्मात्तूपरि गौणमातृमरणं श्रुत्वा सदाघं त्र्यहम्"॥इति । **विज्ञानेश्वरीये** च (पृ.१७९ पं.१५-१६)—

" पितृपत्न्याममतातायां मातृवच्च द्विजोत्तमः । संवत्सरेऽप्यतीतेऽपि त्रिरात्रमशुचिर्भवेत् " ॥ इति ।

सपत्नीमातुरौरसपुत्रासंनिधाने भिन्नोदरेण कृते दाहादौ तदागतौरसपुत्रः स्वकनिष्ठकृते यावत्तावदेव कुर्यात् ।

" बह्वीनामेकपत्नीनामेका चेत्पुत्रिणी भवेत् । सर्वास्तास्तेन पुत्रेण पुत्रिणीर्मनुरब्रवीत् " ॥ इति तेन तस्याः पुत्रित्वाभिधानात् । **संग्रहेऽपि**—

" भिन्नोदरकृते कृत्ये दाहाद्ये त्वागतौरसः । स्वकनिष्ठकृते यावत्तावदेवाचरेत्तदा" ॥ इति । सपिंडीकरणं भिन्नोदरज्येष्ठकृतमपि कनिष्ठोऽप्यौरसः पुनः कुर्यात् स्वकनिष्ठकृते यावदित्युक्तत्वात् ।

प्रोषितभ्रातृविषये ।

भ्रातृविषये **पैठीनसिः**—

" प्रोषितभ्रातृमरणे दत्तपिंडोदकक्रिये । त्रिरात्रं सूतकं तत्र दशाहं पुत्रभार्ययोः "॥ इति । अत्र विशेषमाह **गालवः**—

"कृतोदके तु षण्मासात्पक्षिण्याशौचमिष्यते। अघं[1] च त्रिदिनं ग्राह्यं अकृतोदे दशाहिकम्"॥ इति । षण्मासादूर्ध्वं भ्रातुरघं पक्षिणीत्यर्थः । तथा च **स्मृत्यंतरे**—

" भ्रातुर्देशांतरमृतौ षण्मासाद्वत्सरादघः । दशरात्रं त्रिरात्रं स्याद्दशाहं दाहकस्य तु "॥ इति । दाहकस्य भ्रातुः । **अन्यत्रापि**—

" देशांतरमृतिर्यत्र त्वनुजाग्रजयोः श्रुता । षण्मासाद्वत्सरादर्वाग्दशाहं त्र्यहमाचरेत् " ॥ इति । ज्ञात्यादिविषये ' मासत्रये त्रिरात्रं स्यात् ' इत्युक्तमाशौचमुदकं च ज्ञेयम् ।

अपुत्रसपिण्डमरणविषये । अपुत्रस्य सपिंडस्याकृतसंस्कारस्यैकादशाहात्परं मरणश्रवणे पुनर्दहनं कृत्वा यावत् स्वाशौचं उदकं च पिंडं च दत्वा आशौचान्तेएकोद्दिष्टं परदिने सापिंड्यं च कुर्यात् । अब्दात्परं श्रवणे एकाहेन पुनर्दहनपिंडोदकानि समाप्य द्वितीये श्राद्धं तृतीये सपिंडनं च कुर्यात्

" अतीतेऽब्दे तु संस्कारे एकाहात्पिंडमर्पयेत्। श्राद्धं दद्यात् द्वितीयेऽन्हि तृतीयऽन्हि सपिंडनम्" ॥ इति **स्मरणात्**—

कृतप्रेतकृत्यविषये पिण्डनिषेधः । कृतप्रेतकृत्यस्य सपिंडस्य मरणश्रवणे उदकमात्रं दद्यात् । न तु पिंडान् । एकोद्दिष्टसापिंड्ये च कुर्यात् । कृतैकोद्दिष्टस्य सपिंडादेर्मरणश्रवणे उदकं सापिंड्यं च कुर्यात् । अन्येन कृतमपि सपिंडीकरणं सपिंडदौहित्रादिः पुनः कुर्यात् । कनिष्ठादिना निर्वृत्तपिंडोदकादिदशाहकृत्यस्य पित्रादेरेकादशदिनादौ मरणश्रवणे ज्येष्ठादिर्मुख्यकर्ता यावत्स्वाशौचमुदकमात्रं दद्यात् । न तु कनिष्ठादिकृतपिंडादिदशाहकृत्यं पुनः कुर्यात्

" मुख्यकर्ता विदेशस्थः काले काले श्रुतौ यदि । तिलवारि प्रकुर्वीत पिंडदानं विसर्जयेत् ॥

" कृतक्रियेऽपि पितरि दशाहं सूतकी भवेत् । दद्यात्तिलोदकं पुत्रः सपिंडीकरणं पुनः" ॥ इत्यादिपूर्वोदाहृतवचनैरुदकमात्रस्य पुनर्विधानात् पिंडदानस्य च निषेधात् ।

ननु "मुख्यकर्ता विदेशस्थो मातापित्रोर्मृतौ यदि। संवत्सरे व्यतीतेऽपि कुर्यात्प्रेतक्रियां तदा"॥ इति **वचनात्** दाहादि सर्वं मुख्यकर्त्रा कर्त्तव्यमिति चेन्न । अन्यकृतस्यात्र पुनःकर्तव्यत्वाप्रतीतेः । चिरकालातिक्रमेऽपि पित्रोर्दशाहोदकक्रियाविधिपरत्वात्

" देशान्तरस्थौ पितरौ मृतौ चेदन्योऽपि कुर्यादखिलं च पित्र्यम् ।

" दाहं विना तानि पुनस्तु पित्रोर्ज्येष्ठस्तु कुर्याद्नुजैः सपिण्डम् " इति **वचनात्**दाहव्यतिरिक्तं सर्वं पुनःकरणीयमिति चेन्न । अस्यातिक्रांतविषयत्वाप्रतीतेर्दशाहमध्यागतमुख्यकर्तृविषयत्वेन चरितार्थत्वात् । तथा च **स्मृत्यंतरे**—

" मुख्यकर्त्रागमेऽन्यस्तु प्रवृत्तोऽपि क्रियां त्यजेत् । ततस्तु कर्म कुर्वीत संस्कर्ता विसृजेत्ततः ॥

" पुनस्तिलोदकं पिंडं नग्नप्रच्छादनं तथा । नवश्राद्धप्रदानानि सर्वं कर्म समाचरेत् " ॥ इति । **पारस्करोऽपि**—

" एतैरारब्धपिंडस्य यद्यागच्छंति वै सुताः । तेऽपि कुर्युस्तु पूर्वोक्तपिंडदानं जलं तथा" ॥ इति ।

---

१ गख-अघश्चेत् । २ ख-स्य । ३ क्ष-यत् ।

अतो दशाहमध्ये मुख्यकर्त्रागमे वचनबलाद्दाहव्यतिरिक्तं पूर्वकृतं सर्वं कृतं तेन पुनः कार्यम् । संचयनं तु न पुनः कार्यम् । कृतेनैवास्थिसंचयनेन उत्तिष्ठ प्रेत प्रेहीत्यादिमंत्रार्थसिद्धेः पुनःकरणस्य निरर्थकत्वात् ! पिण्डादिवत्तस्य पुनःकरणे वचनाभावाच्च । दशाहमध्ये कनीयसा कृतस्यापि पिण्डोदकव्यतिरिक्तनग्नप्रच्छादनादेर्न पुनःकरणम्

"दशाहकर्मण्यारब्धे संस्कारादौ कनीयसा । ज्येष्ठोऽथ त्वंतरागच्छेत्सोऽस्य शेषं समापयेत् "॥ इति **स्मरणात्** । दशाहानंतरमागतेन तु मुख्यकर्त्रा पिंडदानादि वर्ज्यमुदकमात्रं यावदाशौचं देयम् । एकोद्दिष्टादिकमूर्ध्वकृत्यं च तेन कार्यम् । तथा **पितृमेधसारे**—"प्रारब्धे केनचित्प्रेतकृत्ये मुख्यकर्तान्तरागतो दाहं विना सर्वं कुर्यात् । कृतं नास्थिसंचयनं पूर्वप्रवृत्तश्चोदकमात्रं अन्योऽपि दद्यात् । यद्येकोद्दिष्टांतं पुत्रोऽन्यो वा कुर्याद्विदेशस्थः पुत्रः श्रुत्वा वपनं कृत्वा दशाहमुदकमात्रं दद्यात् । ज्येष्ठः कृतमपि सापिंड्यमेकादशाह एव पुनः कुर्यात् " इति । **स्मृत्यंतरे**—

" कनिष्ठेन कृतं सर्वं श्राद्धांतं च यथाक्रमम् । ज्येष्ठपुत्रः समायातः तद्दिनानि दशाहतः ॥
" पाषाणस्थापनं पिंडं विनैवोदकमाचरेत् " ॥ इति ।
विश्वादर्शे —" यः कुर्यात्प्रथमेऽन्हि संस्कृतिविधिं ज्ञातेस्तदन्यस्य वा ।
" श्राद्धांतं सकलं स एव चरतु ज्ञात्यादिकेऽप्यागतेः ।
"ज्येष्ठासंनिधितः कनीयसि पितुः कुर्वाण एव क्रियाः ।
" श्रुत्वोपस्थित एव चेदथ चरेज्ज्यायांस्तदूर्ध्वक्रियाः ॥
" यत्पित्रोर्मरणादिकं दशदिने तस्मिन् गते ज्यायसः । पश्चात्तच्छ्रवणप्रभृत्युपरताशौचप्रवृत्तावपि ॥
" ज्यायानेव तदूर्ध्वमाचरतु तच्छ्राद्धादिमिश्रांतकं । तत्तत्कर्मणि शुद्धिमस्मरदसौ तात्कालिकीं देवलः " ॥ इति । मिश्रं सपिण्डीकरणम् । उक्तेषु सर्वेषु वचनेषु दशमदिनादूर्ध्वं कृतदशाहकृत्यस्य पित्रादेर्मरणश्रवणे पिण्डदानादेरविधानादुदकदानमात्रमेकोद्दिष्टादूर्ध्वकृत्यं चेति **बहुस्मृतिसंमतम्** । **शातकव्याख्यानादौ** तु देशांतरस्थौ पितरौ मृतौ चेदिति वचनमन्यथा व्याख्यातम् । पुत्रव्यतिरिक्तेनान्येन सपिंडादिना दाहादिसापिंड्यान्तकृत्ये कृते अनंतरमागतः पुत्रः दाहं संचयनं च विना पाषाणस्थापनं नग्नप्रच्छादनं प्रेतशब्दनवश्राद्धैकोत्तरवृद्धिश्राद्धवासउदकतिलोदकपिंडबलिप्रदानषोडशसपिंडादीनि पुनश्च कुर्यात् ' दाहं विना तानि पुनश्च सर्वम् ' इत्यविशेषेणाभिधानात् ।

" कृतक्रियेऽपि पितरि दशाहं सूतकी भवेत् । दद्यात्तिलोदकं पिंडं सपिण्डीकरणं पुनः " ॥ इति पुनःपिण्डदानस्य विधानाच्च अनुजैः कृते सपिण्डीकरणान्तकृत्ये ज्येष्ठपुत्रः उदकमात्रं सपिण्डनं च पुनः कुर्यात् । न तु सपिंडादीनि । कनिष्ठकृतदशाहकृत्यादिविषये उदकदानसपिंडीकरणव्यतिरिक्तं पिंडादिकं न कर्तव्यमिति । अत्रैवार्थे

" मुख्यकर्ता विदेशस्थः काले काले श्रुतो यदि । तिलवारि प्रकुर्वीत पिण्डदानं विवर्जयेत् " ॥ ' कृतक्रियेऽपि पितरि ' इत्यादीनि पूर्वोक्तानि वचनानि योजितानि । **स्मृत्यंतरे च**—

"न शिला न मृदा स्नानं न प्रेतं न च वासकम् । नग्नं पिंडं न दातव्यं दर्भस्तंबे तिलोदकम्"॥ इति । प्रेतं प्रेतशब्दोच्चारणम् । वासकं वास उदकम् । नग्नं नग्नप्रच्छादनम् । दर्भस्तंबे तिलोदकं न कार्यम् । दर्भस्तंबास्तरणरहितस्थले कर्तव्यमित्यर्थः । तथा **चंद्रिकायाम्**—

" ज्येष्ठेन वा कनिष्ठेन सपिंडीकरणे कृते । देशांतरगतानां तु पिंडदानं कथं भवेत् ॥

---

१ खग–आदशाहं ।

" श्रुत्वा तु वपनं कृत्वा दशाहांतं तिलोदकम् । ततः सपिंडीकरणं कुर्यादेकादशेऽहनि " ॥ इति । पिंडदानं सपिंडीकरणं ज्येष्ठेन पितुः सपिंडीकरणांतप्रेतकृत्ये कृते कनिष्ठः पितृमृतिं श्रुत्वा दशाहांतं तिलोदकं दद्यात् । कनिष्ठकृते तु तस्मिन् ज्येष्ठः श्रुत्वा वपनं कृत्वा दशाहांतं तिलोदकमात्रं दद्यात् । न तु पिंडान् । तत एकादशाहे सपिंडीकरणमेव कुर्यात् । न त्वेकोद्दिष्टमित्यर्थः । एवं स्मृत्यर्थविप्रतिपत्तौ शिष्टाचाराद्व्यवस्था ।

अयमत्र निष्कर्षः—अन्येन संस्कारादौ कृते अंतर्दशाहे संचयात्पूर्वमागतः पुत्रः पुनर्दाहविधिनाऽस्थ्यादि दग्ध्वा शिरोवपनं कारयित्वा संचयननग्नप्रच्छादनातीतदिनकृतवास उदकतिलोदकापिंडदानैकोत्तरवृद्धिनवश्राद्धानि तदानीमेव पुनः कृत्वा तात्कालिकमुदकापिंडाद्येकोद्दिष्टांतं तत्तत्काले कृत्वा स्वकाले पंचदश श्राद्धानि सपिंडीकरणं च कुर्यात् । संस्कर्ता तु यावत्स्वाशौचमाशौचांत्यदिने वा दशाहशेषे देयं तिलोदकमात्रं दत्वा आत्मशुध्यर्थं ब्राह्मणान्भोजयेत् । संचयात्परमागतश्चेद्दाहसंचयनवर्ज्यं नग्नप्रच्छादनातीतपिंडोदकनवश्राद्धादि कृत्वा तात्कालिकोदकाद्येकोद्दिष्टांतं कृत्वा श्रवणदिनमारभ्य दशाहाशौचमनुष्ठायावृत्ताद्यमासिकादीनि उक्तकाले कृत्वा त्रिपक्षादौ सापिंड्यं कुर्यात् । संस्कर्ता तु पूर्ववदेव कुर्यात् । कनिष्ठेन तु दाहादिप्रेतकृत्ये कृते संचयनात्पूर्वं परं वा आगतो ज्येष्ठपुत्रः अतीतकाली नोदकपिंडमात्रमेकदा दत्वा तात्कालिकोदकाद्येकोद्दिष्टांतं कुर्यात् । संचयनात्पूर्वमागतश्चेत् द्वादशाहेसापिंड्यं कुर्यात् । तत्परमागतश्चेच्छ्रवणदिनमारभ्य दशाहाशौचमनुष्ठाय त्रिपक्षादौ सापिंड्यं कुर्यात् । संस्कर्ता कनिष्ठस्तु पक्षद्वयेऽपि तिलवारिमात्रं दशाहांतं कुर्यात् । कनिष्ठेन कृते दशाहकृत्ये दशमदिनरात्रावेकादशाहे वाऽपराण्हात्पूर्वमागतो ज्येष्ठपुत्रः सर्वांगवपनं कृत्वा वृषोत्सर्जनाद्येकोद्दिष्टं च कृत्वा तदारभ्य दशाहाशौचमनुष्ठाय उदकमात्रं च दत्वा त्रिपक्षादौ सापिंड्यं कुर्यात् । कनिष्ठेनासमापिते तु दशाहकृत्ये गतदिनमारभ्य दशाहकृत्यं सर्वं परिसमाप्य एकादशे एकोद्दिष्टं त्रिपक्षादौ सापिंड्यं कुर्यात् । अन्येन सपिंडादिना दशाहकृत्ये कृते संचयात्पूर्वं दशमदिनरात्रौ एकादशदिने वा समागतः पुत्रः पुनर्दहनवपनाद्येकोद्दिष्टांतान्येकादशाहे कृत्वा दशाहाशौचानंतरं उक्तकाले आवृत्ताद्यमासिकादीनि कृत्वा त्रिपक्षादौ सापिंड्यं च कुर्यात् । संचयात्परमागतश्चेद्वपनं कारयित्वा वृषोत्सर्जनाद्येकोद्दिष्टं च कृत्वा दशाहाशौचमुदकमात्रं चानुष्ठाय त्रिपक्षादौ सापिंड्यं कुर्यात् । अपुत्रस्य कृतसंस्कारस्य अंतर्दशाहे संचयात्पूर्वं परं वा समागतो दायभाग् मुख्यकर्ता अतीतकालीनोदकपिंडमात्रमेकदा पुनर्दत्वा तात्कालिकोदकपिंडदानसंचयननवश्राद्धानि सपिंडीकरणांतानि उक्तकाले कुर्यात् । अत्र संचयनात्पूर्वमागतस्य मुख्यकर्तुः दहनव्यतिरिक्तस्य नग्नप्रच्छादनादेः कृतस्य पुनःकरणमस्तीति केचित् । अत्र पक्षद्वयेऽपि संस्कर्ता दशाहांते तद्देयं तिलोदकमात्रं स्वाशौचांते कृत्वा शुध्यर्थं ब्राह्मणभोजनं कारयेत् । स च दायभागेकादशाहे आगतः अन्येन दशाहकृत्ये कृते तात्कालिकैकोद्दिष्टं वृषोत्सर्गपूर्वकं कृत्वा अत्याशौचविधिना आशौचमुदकं चानुष्ठाय त्रिपक्षादौ सापिंड्यं कुर्यात् । अत्रापि संचयात्पूर्वमागतविषये नग्नप्रच्छादनादि पूर्वकमेकोद्दिष्टमिति केचित् । अकृते तु दशाहकृते दाहव्यतिरिक्तं सर्वं तदैव कृत्वा तात्कालिकवृषोत्सर्गैकोद्दिष्टे च कृत्वा स्वाशौचमनुष्ठाय उक्तकाले सापिंड्यं कुर्यात् । अकृतेऽप्यस्थिसंचयने यत्र पुनर्दाहाभावः तद्विषये संनिहिते पूर्वचितिदेशे तं समीक्ष्यांतर्दशाह आगतो मुख्यकर्ता तत्संचयनमंत्रान्स्रोतोऽपकृतास्थिन्यायेन पठेत् । यद्येकोद्दिष्टांतं पुत्रोऽन्यो वा कुर्याद्विदेशस्थः पुत्रः श्रुत्वा वपनं कृत्वा दशाह-

मुदकमात्रं दद्यात्सपिंडीकरणं चान्यकृतं कनिष्ठकृतं वा एकादशाहे पुनः कुर्यात् । संचयात्परमागतश्चेत् वपनं कारयित्वा वृषोत्सर्जनाद्येकोद्दिष्टं च कृत्वा दशाहाशौचमुदकदानं चानुष्ठाय त्रिपक्षादौ सपिण्डनं कुर्यात् । अग्रजासंनिधाने अनुजः सपिंडीकरणं कुर्यात् । अग्रजः कृतमपि पुनः कुर्यात् । अग्रजासंनिधाने विभक्ताः कनिष्ठाः पृथक्कुर्युः । अग्रजोऽपि पुनः कुर्यात् । अविभक्ताश्चेद्विद्यमानेषु ज्येष्ठः कुर्यात् । सर्वज्येष्ठः पुनः कुर्यात् । वत्सरानंतरं मातृपितृमरणश्रावणे पुत्रवत् दशाहं सपत्नीमातुर्दाहे कृतक्रिये पितरि पुत्राणां त्रिरात्रं अकृतक्रिये तु दशरात्रं कृतक्रिये ज्येष्ठस्य दशरात्रं कनिष्ठानां दशरात्रमिति केचित् । पत्न्या भर्तृमरणश्रवणेऽपि पुत्रवद्दशाहं सपत्नीमातुर्दाहादिकृत्ये भिन्नोदरेण कृते अंतर्दशाहागतौरसपुत्रः स्वकनिष्ठकृते यावद्विहितं तावदेव कुर्यात् । सपत्नीमातुः वर्षात्पूर्वं मृतिश्रवणे दशाहमाशौचमुदकं च वर्षात्परं तु श्रवणं त्र्यहं भिन्नोदरज्येष्ठकृतं सपिंडीकरणं च औरसः पुनः कुर्यात् । भ्रातुर्देशांतरमरणश्रवणे षण्मासात्पूर्वं दशरात्रं ततः परं त्रिरात्रं कृतोदके तु तस्मिन्षण्मासात्पूर्वं त्रिरात्रं ततः पक्षिणी उदकं च वर्षात्परं तु श्रवणे दाहकस्य तु भ्रातुर्दशाहं कनिष्ठादिना कृतक्रियस्य पित्रादेरेकादशदिनादौ मरणश्रवणे मुख्यकर्तुरुदकमात्रमेव अतीतप्रेतकृत्यं कार्यं न पिंडादिकं सर्वमिति केचित् कनिष्ठकृतपिंडादेर्निवृत्तिः दहनसंचयव्यतिरिक्तस्यान्यकृतस्य प्रेतकृत्यस्य पुनः करणमस्तीत्याहुः ।

पुनर्दाहविधिः । अथ पुनर्दाहविषयः । **अपरार्के**—

“मंत्रवत्संस्कृतस्यापि असमाप्तोदकस्य तु । अर्वाग्दशदिनादूर्ध्वं पुनर्दाहो विधीयते”॥ दशदिनादर्वागसमाप्तोदकस्येत्यन्वयः । **शातातपः**—

“ एकोद्दिष्टं सुतः कुर्यान्मृतस्यैकादशेऽहनि । तत्र श्राद्धं न कुर्याच्चेत्पुनः संस्कारमर्हति ” ॥ इति । **बृहस्पतिः**—

“ एकादशेऽन्हि यच्छ्राद्धमेकोद्दिष्टं समाचरेत् । यदि कौर्यान्न कुर्वीत पुनः संस्कारमर्हति ” ॥ इति । **वसिष्ठः**—

“यत्कृतं प्रेतमुद्दिश्य नवश्राद्धादिकं क्वचित् । अकृतं तद्विजानीयादेकोद्दिष्टं विना कृतम्”॥ इति । एतत्सर्वमकृतास्थिसंचयनविषयम् । तथा च **स्मृत्यंतरे**—

“ मन्त्रवत्संस्कृतस्यापि ह्यसमाप्तोदकस्य तु । अस्थिसंचयनादर्वाक्पुनर्दाहो विधीयते ॥

“ अस्थिसंचयनादूर्ध्वमसमाप्तोदकस्य तु । पुनर्दाहं विना तत्र पिंडदानोदकक्रिया ” ॥ इति । **संग्रहेऽपि**—

“ मंत्रवत्संस्कृतस्यापि ह्यकृतास्थिचयस्य तु । आद्यश्राद्धस्य विच्छेदे पुनर्दाहो विधीयते ”॥ इति । निमित्तांतरमुक्तं **स्मृत्यंतरे**—

“ अमन्त्रपूर्वं दग्धानामङ्गवैकल्यशेषिणाम् । चण्डालादिहतानां च पुनर्दहनमाचरेत् ”॥ इति । आदिशब्दान्नाखिदंष्ट्रिस्वेच्छादयो गृह्यन्ते । **नारदश्च**—

“ मंत्रं विना तु यद्दग्धं प्रेतं तस्य पुनःक्रिया । मन्त्रसंस्कारयुक्तस्य न कुर्यात् दहनं पुनः” ॥ न कुर्यादित्येतत्कृतास्थिसंचयनविषयम् । **पितृमेधसारे**—“ विधिवत्संस्कारेऽप्यनस्थिसंचये यद्युदकक्रिया विच्छिद्येतैकोद्दिष्टं वा तदा पुनर्दाहः । यद्यस्थिसंचयः कृतः स्यान्न पुनर्दाहः । अन्यत्सर्वं कुर्यात् । तथांगदाहवैकल्येऽपि पुनर्दाहः । यदि गृह्याग्निनाऽप्यमंत्रवद्दाहोऽन्याग्निना वा

१ क्ष-त्रि । २ क्ष-र्ना । ३ क्ष-कु । ४ क-ह्यसमाप्तोदकस्य ।

विधिवत्पुनर्दाहोऽस्थीन्याहृत्य कार्य इति । अस्थिसंचयने कृते उदककियाया एकोद्दिष्टस्य च स्वस्वकाले अकरणेऽपि न पुनर्दाह इत्यर्थः । तथा **सुधीलोचने**—" अनाहिताग्नेर्दाहस्य कुंभनिधानांतत्त्वादुत्तिष्ठ प्रेहि प्रद्रवौकः कृणुष्व परमे व्योमन्निति मंत्रार्थसिद्धेर्विधिवत्कृतस्य पुनर्दाहायोगाच्च अनस्थिसंचय एव पुनर्दाहः । अत एव कृतेऽस्थिसंचये त्र्यहात्प्रेतक्रिया **स्मर्यते**— "अस्थिसंचयनादूर्ध्वं विच्छिन्ने तर्पणादिके । आरब्धे[1] यदि पित्रोश्च पुनः संक्षिप्यते त्र्यहात् " ॥ इति गृह्याग्निना अमंत्रवद्दाहे पूर्वोदाहृतवचनेन अयथाकृतमकृतमिति **न्यायेन** च पुनर्दाहः सिद्धः । औपासनेनाहिताग्निं दहेदिति नियमात् " अनौपास्येन यो दग्धः तं दहेद्वह्निना पुनः " ॥ इति वचनाच्च लौकिकाग्निना विधिवद्दाहेऽपि तस्याकिंचित्करत्वात् सत्यौपासने तेन पुनर्दाहः कार्यः । असति तस्मिन्विधिवदग्निं संधाय पुनर्दाहः कार्यः । " अथ यद्याहिताग्निरन्यत्र प्रेयाद् दीप्यमानैर्हूयमानैरग्निभिरासीरन्यावदेवास्याग्निभिः समागमयेरन्ना संस्कारादग्निं जुहुयात् । अग्निसंरक्षणार्थम् " इति **बोधायनापस्तंबादि**भिर्दाहांतमग्निसंरक्षणस्मरणेन पुनर्दाहसिद्धेः । ' शरीरदायाद्दाहाय वाऽग्नयो भवंति ' इति **श्रुते**र्विनियोगांतराभावाच्च स्वाध्यायाग्नित्यागस्य चोपपातकत्वोक्तेश्च तेनैव दाहः कर्तव्यः । यच्चान्यद्वक्तव्यं तदग्निनिरूपणावसरे प्रतिपादितमधस्तात् । "अनात्मीयेन शास्त्रेण यो दग्धस्तं च शास्त्रतः " इति **वचनं**

" अलब्धात्मीयसूत्रस्य श्राद्धांतं परसूत्रतः । कुर्यात् सपिंडीकरणं स्वसूत्रेणैव नान्यतः " ॥ इति **भरद्वाजादि**बहुस्मृतिविरोधादुपेक्ष्यमिति पूर्वमेवोक्तम् ।

तंत्रप्रविष्टस्य तंत्रमार्गेण पुनः संस्कार उक्तः **आगमे**—

" सर्वेषामेव वर्णानामाशौचांतं यथाक्रमम् । अन्त्येष्टिं विधिवत्कुर्युः तत्पुत्राश्चौरसादयः "॥ इति ।

तत्रैव—

" वैदिकं तु पुरा कृत्वा पश्चाच्छेषं समाचरेत् । ये मृता दीक्षितास्तेषां श्राद्धद्वयमुदाहृतम् ॥

" पूर्वं तु वैदिकं श्राद्धं कुर्यात्तांत्रं ततः परम् " ॥ इति । आहिताग्नेर्मंत्रवद्दाहाभावे पुत्रादीनामाशौचमुदकादिकं च नास्ति । किं तु पुनर्दाहसमय एव तेषामाशौचमुदकादि: च उक्तं **चंद्रिकायाम्**—

" आहिताग्नेस्तु विधिवद्दाहांतं नास्ति चेत्तदा । आशौचग्रहणं नास्ति दाहाद्याशौचमिष्यते "॥ इति । दाहाद्याशौचं पुनर्दाहाद्याशौचम् । तच्च दशाहम् । तथा **पारस्करः**—

" आहिताग्नेस्तु दहनाद्दशाहाशौचमिष्यते । अनाहिताग्नेर्मरणात्पुनर्दाहो यदा भवेत् " ॥

पैठीनसिः—" आहिताग्निश्चेत्प्रवसन्म्रियते पुनःसंस्कारं कृत्वा शाववच्छौचमिष्यते " ॥ इति ।

स्मृत्यंतरेऽपि—

" दशाहांतं सपिंडानां मृतौ प्रेतक्रिया भवेत् । पुनर्दाहे त्रिरात्रं स्याद् यष्टुः पित्रोर्दशाहतः "॥ इति । अनाहिताग्नेः पुनःसंस्कारे सपिंडानां त्रिरात्रम् । यष्टुः आहिताग्नेः पुनःसंस्कारे सपिंडानां दशाहं पित्रोश्च पुनःसंस्कारे पुत्राणां दशाहतः क्रियेत्यर्थः । **स्मृत्यर्थसारेऽपि**—" आहिताग्नेर्विधिद्दहनाभावे आशौचग्रहणं नास्त्येव । पुनःसंस्कारे दाहाद्याशौचमपि पूर्णम् । यावद्विधिना न संस्कारः तावत्पुत्रादीनां मुख्यकर्तॄणां संध्यादिकर्मलोपो नास्ति । शुभं कर्म न कर्तव्यम् । मुख्यकर्त्रसंभवे शेषदिनाच्छुद्धिः । अतीते सूतके पुनःसंस्कारश्चेत् तदितरज्ञातीनां शुभं कर्म च कर्तव्यम् ।

---

१ **क**—त्र्यब्दे; **क्ष**-अब्दे । २ **क**—हरणं । ३ **क**—दशाहा ।

अनाहिताग्नेर्विधिवद्दहनाभावे तदानीमाशौचग्रहणं कृताकृतं दशाहानंतरमरणश्रवणे दाहात्पूर्वं त्र्यहाद्याशौचं नास्ति । पुनःसंस्कारः सूतकमध्ये चेच्छेषदिनाच्छुद्धिः । अतीते सूतके पुनःसंस्कारश्चेत्पूर्वमगृहीताशौचस्य पुत्रस्य पत्न्याश्च दशाहमाशौचम् । गृहीताशौचयोः पुत्रपत्न्योस्त्रिरात्रम् । पत्न्योः पुनःसंस्कारे पत्युश्चैवं सपत्न्योर्मिथश्चैवं गृहीताशौचानां कृतोदकानां सपिंडानां पुनराशौचं नास्ति । अकृतोदकानां पुनरेकाहमिति । **चंद्रिकायाम्**—

" विदेशस्थो गृही यावद्विधिना नैव संस्कृतः । पुत्रादीनां तु संध्यादि कर्मलोपो न विद्यते " ॥ इति ।

यत्तु—

" अकृत्वा प्रेतकार्याणि नित्यनैमित्तिकान्यपि । न कुर्यात्तावदाशौचं यावत्प्रेतस्य मोक्षणम् " ॥ इति तत् नित्यनैमित्तिकशुभकर्मव्यतिरिक्तविषयम्

" अकृते ज्ञातिसंस्कारे न कुर्याद्दात्मनः शुभम् । कुर्यादेव शुभं कर्म मुख्यसंस्कर्तृसंभवे " ॥ इति

स्मरणात् । दाहमंतरेणाप्याशौचाचरणमुक्तं **स्मृत्यंतरे**—

" पुत्रः पित्रोस्तु संस्कारं प्रमादान्न करोति चेत् । ज्ञातीनां दशरात्रं स्यात्तदूर्ध्वं सूतकं न हि ॥

" नित्यकर्माणि कुर्वीत स्मृत्युक्तानि तथैव च " । इति । **अन्यच्च**—

" वंशजानामसंस्कारे सूतकं तु कथं भवेत् । दशाहात्परतः शुद्धिर्ज्ञातीनां च विशेषतः" ॥ इति ।

एतत् द्वयं दत्ततिलोदकज्ञातिविषयम् । पुत्रविषये **वसिष्ठः**—

" प्रमीतपितृकः पित्रोरौर्ध्वदेहिकमाचरेत् । यदि कर्तुमशक्तश्चेदाशौचानियमान्वितः ॥

" आदशाहादथोर्ध्वं वा यदा कार्यक्षमस्तदा । त्रिरात्रं समतिक्रम्य श्राद्धं कुर्याद्यथाविधि ॥

" दाहकस्य तदाशौचमितरेषां न विद्यते " ॥ इति । इतरेषां दत्तोदकसपिंडानामित्यर्थः । गृहीताशौचानां अदत्तोदकानां सपिंडानामुदकदाननिबंधनमाशौचमुक्तं **स्मृत्यंतरे**—

" पूर्वगृहीताशौचानां पुनर्दहने त्वघम् । तस्मिन्नुदकदातॄणामाशौचं मनुरब्रवीत् " ॥ इति ।

"मरणादिगृहीतस्य त्रिरात्राच्छुद्धिरिष्यते॥" इति पुत्रस्य त्रिरात्राशौचविधानात् ज्ञातीनामेकरात्रमिति न्यायतः सिद्धमिति व्याख्यातारः । कृते तु मन्त्रसंस्कारे आरब्धे चोदके कर्त्रा दैवादसमापिते सति तदानीं ज्ञातिभिरुदकाशौचयोर्गृहीतयोः पुनर्दहनसमये ज्ञातीनामाशौचं नास्ति । पुनस्तर्पणमात्रमस्तीति केचित् । **पारस्करः**—" आशौचे वर्तमाने तु तच्छेषेण विशुध्यति ॥

" गते त्वाशौचदिवसे पुनर्दाहो यदा भवेत् । मरणादिगृहीतस्य त्रिरात्राच्छुद्धिरिष्यते ॥

" अगृहीतस्य पुत्रस्य संपूर्णाशौचमेव हि " ॥ इति ।

संग्रहे—" अशौचांतः कीकसादेः प्रदाहे शेषाच्छुद्धिस्तद्बहिश्चेत्त्रिरात्रम् ।

" पुत्रस्यापि प्रागघस्य ग्रहश्चेन्नो चेत्तस्याप्यत्र संपूर्णमाहुः " ॥ इति । कीकसमस्थि । आदिशब्देन पर्णादिप्रकृतिर्गृह्यते । तथा

" अस्थ्ना पलाशवृन्तैर्वा[1] दग्ध्वा तु प्रतिरूपकम् । पित्रोर्दशाहमाशौचमन्येषां तु त्रिरात्रकम्"॥ इति ।

अन्यच्च—"नरं पर्णमयं दग्ध्वा त्रिरात्रमशुचिर्भवेत् । मातापित्रोर्दशाहं स्यादस्थिदाहे तथैव च"॥ इति।

" संस्कृताग्नौ दहेत्पश्चाद्दशरात्रं तु सूतकम् । इतरेषां त्रिरात्रं स्यात् ज्ञातीनामपि सूतकम्"॥ इति ।

देवलः—

" दग्ध्वास्थि पित्रोः पुत्रस्तु दशाहमशुचिर्भवेत् । तयोः प्रतिकृतिं दग्ध्वा शाववच्छौचमिष्यते"॥

१ क–वृन्दै ।

शाववद्दशाहाशौचमित्यर्थः । पुत्रस्य दशाहविधानं अगृहीताशौचविषयम् । गृहीताशौचस्य पुत्रस्य मरणादिगृहीतस्य 'त्रिरात्राच्छुद्धिरिष्यते' इति त्रिरात्रस्मरणात् । **स्मृत्यंतरे**—

"दग्ध्वाऽस्थि पित्रोः पुत्रस्तु दशाहं सूतकी भवेत् । तयोः प्रतिकृतिं दग्ध्वा त्रिरात्रमशुचिर्भवेत्" ॥

अस्थिदाहे पुत्रस्य दशाहविधानमगृहीताशौचविषयम् । प्रतिकृतिदाहे त्रिरात्रविधानं गृहीताशौचविषयम् । अन्ये तु पुत्रस्य गृहीताशौचस्यास्थिदाहे दशाहं प्रतिकृतिदाहे त्रिरात्रमिति व्याचक्षते । **पुराणेऽपि**—

"अस्थ्यभावे पलाशोत्थैः पर्णैः कार्यं शरीरकम् । एवं पूर्णमयं दग्ध्वा त्रिरात्रमशुचिर्भवेत्" ॥

षडशीतौ—

"अंतर्दशाहे दाहे तु शेषतः शुचयोऽखिलाः । बहिर्दशाहदाहे तु दाहादित्रिदिनं मतम् ॥
"प्रागाशौचग्रहाभावे ज्ञातीनां त्रिदिनं समम् । प्राग्ग्रहे तु त्र्यहं कर्तुरन्येषां तु न विद्यते ॥
"कर्ता च तनयः पूर्वं ग्रहे पूर्णं तथोदितम्" इति ।

अयमत्र निष्कर्षः—आहिताग्नेः पुनर्दाहादेव पुत्रस्य सपिंडानां चाशौचग्रहणमुदकदानादि प्रेतकृत्यं च भवति । दाहात्पूर्वं नास्त्येव । अनाहिताग्नेस्तु पुनर्दाहात्पूर्वमाशौचग्रहणमुदकदानं च विकल्पितम् । दशाहमध्ये आहिताग्न्यनाहिताग्न्योः पुनः संस्कारे सति संस्कारदिनादूर्ध्वं दशरात्रावशिष्टमेवाशौचमुदकादिकं च भवति । न पुनर्दाहादिदशाहम् । यदि दशाहात्परं पुनर्दाहः स्यात्तत्राहिताग्नेः पुनर्दाहादिदशाहमाशौचमुदकं च पुत्रस्य सपिंडानां च समानम् । अनाहिताग्नेस्तु पुनर्दाहे पूर्वमगृहीताशौचस्य पुत्रस्य दशाहमाशौचं उदकादिक्रिया च भवति । गृहीताशौचस्य पुत्रस्यास्थिदाहे प्रतिकृतिदाहे च त्रिरात्रमाशौचमुदकक्रिया च अगृहीताशौचानां सपिंडानामस्थिदाहे प्रतिकृतिदाहे च त्रिरात्राशौचमुदकं च भवति । गृहीताशौचानां[1]मदत्तोदकानां सपिंडानामुदकदाननिमित्तमेकाहमाशौचं दत्तोदकानां तु न पुनराशौचोदकदाने भवतः । कर्ता पश्चादुदकसमापने क्रियमाणे पूर्वम[3]गृहीताशौचानां[2] अदत्तो[4]दकानां सपिंडानामुदकदानमात्रं भवति । नाशौचमिति केचित् । अन्ये तु दशाहादूर्ध्वमस्थिदाहे अगृहीताशौचानां सपिंडानां दशाहं गृहीताशौचानां त्रिरात्रं प्रतिकृतिदाहे अगृहीताशौचानां त्रिरात्रम् । गृहीताशौचानां नाशौचं अस्थिदाहे पुत्राणां गृहीताशौचानामगृहीताशौचानां च दशरात्रमित्याहुः । तथा च **संग्रहकारः**—

"यज्वायज्वपुनर्दाहे शिष्टाहं यद्यघाद्वहिः । दशाहं त्र्यहमाशौचं पूर्णं प्राक्चेदघाग्रहः ॥
"अस्थिदाहे प्रतिकृतिदाहे तु त्र्यहमित्यघम् । सपिंडानां सुतानां तु दशरात्रमिहेष्यते" ॥ इति
"भ्रातुर्देशांतरमृतौ षण्मासाद्वत्सरादधः । दशरात्रं त्रिरात्रं स्याद्दशाहं दाहकस्य तत्" ॥ इति

दाहकस्य भ्रातुः दशाहाशौचविधानात् द्वादशाहे सापिंड्यम् ।

अनेकसपिण्डपुनर्दाहविधिः । **संग्रहकारः**—

"मृतानां तु सपिंडानां काले बहुतिथे गतौ । तान्सर्वान्सह संस्कुर्यात् त्रिरात्रेण यथाविधि ॥
"एकोद्दिष्टं चतुर्थेऽन्हि तेषां पिंडं पृथक् पृथक् । सपिंडीकरणं तेषां सहैव पृथगेव वा" ॥ इति ।

संघातमृतानां कालभेदेन वा मृतानां सपिंडानां एकचित्यां समानतंत्रेण पुनःसंस्कारः कार्यः । सापिण्ड्यं तु उद्देश्यभेदे पृथक् कुर्यात् । अन्यथा सह कुर्यादित्यर्थः । एतच्च पितृव्यतिरिक्तविषयम् । त्रिरात्रेण समापनविधानात्पित्रोः सपिंडानां च देशांतरमरणश्रवणे पूर्वं पित्रोः सापिंड्यांतं कृत्वा अनंतरमन्येषां पुनर्दाहारंभं क्रमेण कुर्यात् ।

१ ग–र्वा । २ ग–नां । ३ ग–मगृ । ४ क्ष–दत्तो ।

स्मृतिचंद्रिकायाम्—

" यद्येककर्तृकं श्राद्धमनेकं चैकवासरे । दैवं पित्र्यं च तंत्रं स्यान्निमित्तं प्रतिपूरुषम् " ॥ इति ।

स्मृत्यंतरे—

" बहूनामेकवंश्यानामेको यदि च दाहकः । एकस्मिन्दिवसे कुर्यादेकतंत्रमिहेष्यते " ॥ इति ।

तथा—

" भिन्नकाले मृता ये च वंश्याः पूर्वमसंस्कृताः । एकस्मिन्नन्हि चैतेषां सह संस्कारमाचरेत् " ॥ पूर्वमसंस्कृताः अनुपनीताः[1] ।

दुर्मृतपुनःसंस्कारः । संघातदुर्मृतपुनःसंस्कारविषये **स्मृत्यंतरे—**

" दुर्मृतानां च वंश्यानां काले बहुतिथे गते । तान्सर्वान्सह संस्कुर्यादेकचित्यां पुनः सुधीः " ॥ इति ।

दुर्मृतस्य पुनःसंस्कारकालमाह **देवलः—**

" ये मृताः पापमार्गेण तेषां संवत्सरात्परम् । नारायणबलिं कृत्वा कुर्यात्तत्रौर्ध्वदेहिकम् ॥

"अब्दान्ते वाथ षण्मासे पुनः कृत्वा तु संस्कृतिम् । त्रिरात्रमशुचिर्भूत्वा श्राद्धं कुर्याच्चतुर्दिने" ॥ इति ।

एतत् दुर्मृतपुनर्दाहे त्रिरात्रविधानं मातापितृविषयम् । अन्येषां दुर्मृतानां पुनर्दाहे एकरात्रम् । तदाह **गर्गः[2]—**

" वर्षातीतपुनर्दाहे एकाहात्पिंडमर्पयेत् । श्राद्धं दद्याद्द्वितीयेऽन्हि तृतीयेऽन्हि सपिंडनम् ॥

"नास्थिसंचयनं कुर्यान्न च चर्माधिरोहणम् । पुत्रादीनां तु कर्तव्यं पुनः संस्कारकर्मणि " ॥ **संग्रहे—**

" असंस्कारे कुलीनस्य पुनरन्यस्य चेन्मृतिः । यस्य स्यात्तस्य संस्काराद्येकोद्दिष्टांतमाचरेत् ॥

" ततः पूर्वं मृतस्यात्र कुर्याद्वै संस्क्रियादिकम् । सपिंडीकरणं तत्र पूर्वशेषं तु कारयेत् ॥

" दुर्मृतस्य क्रियाहीनकाले पुंसवनं चरेत् । पित्रोराब्दिककालस्तु यदा वाऽपि भवेत्तदा ॥

"तयोस्तदेव कुर्वीत नान्येषां पुरतो भवेत्" ॥ इति । दुर्मृतिमध्ये मृतस्यैकोद्दिष्टांतं कृत्वा दुर्मृतस्य सपिण्डनं कृत्वा पश्चादेतस्य सपिण्डनं कुर्यात् । संस्कारात्पूर्वं पुंसवनं पित्रोराब्दिकं च कर्तव्यमित्यर्थः । दुर्मृतिलक्षणं पुनःसंस्कारकालस्तत्प्रायश्चित्तं च दुर्मृताशौचनिरूपणे प्रतिपादितम् ।

प्रोषितस्य द्वादशाब्दादूर्ध्वं संस्कारविधिः ।

यस्य प्रोषितस्य वृत्तान्तो न श्रूयते तस्य द्वादशाब्दादूर्ध्वं प्रतिकृतिदाहपूर्वकं विधिवदौर्ध्वदेहिकं कुर्यात् । प्रतिकृतिस्वरूपमधस्तात्प्रतिपादितम् । अत्र **बृहस्पतिः—**

" यस्य न श्रूयते वार्ता यावद्द्वादशवत्सरम् । कुशपुत्रै[3]कदाहेन तस्य स्यादवधारणम् " ॥ इति ।

तच्च नारायणबलिपूर्वकं कर्तव्यम् । **स्मृत्यंतरे—**

" द्वादशाब्दात्परं तेषां तृतीयादब्दतोऽपि वा । नारायणबलिं कृत्वा कुर्याद्देहेऽथ संस्कृतिम् " ॥ कुर्यादिति शेषः । त्र्यहादेव सा क्रिया कार्या । " नरं पर्णमयं दग्ध्वा त्रिरात्रमशुचिर्भवेत् " ॥ इति **स्मरणात्** । पितृविषये विशेषमाह **जातुकर्णिः—**

" पितरि प्रोषिते यस्य न वार्ता नैव चागतिः । ऊर्ध्वं पंचदशाद्वर्षात्कृत्वा तत्प्रतिरूपकम् ॥

" कुर्यात्तस्य च संस्कारं यथोक्तविधिना ततः । तदानीमेव सर्वाणि प्रेतकार्याणि संचरेत्" ॥ इति ॥

प्रतिरूपकं पलाशवृंतादिनिर्मितप्रतिकृतिः । यथोक्तविधिना दशरात्रं पिंडोदकदानादिविधिपरशास्त्रक्रमेण तदानीमेव पंचदशसु वर्षेषु गतेषु षोडशे वर्षे उक्तकाल एव प्रेतकार्याणि कुर्यात् । न कालविलंबः कार्य इति केचिद्व्याचक्षते ।

---

१ क–संस्कृता–उपनीता । २ ग–गार्ग्यः । ३ ग–पत्रक ।

तथा च **स्मृत्यंतरम्**—

" पितरि प्रोषिते प्रेते पुत्रः कुर्यात्क्रियादिकम्। संवत्सरे व्यतीतेऽपि दशरात्रं यथाविधि" ॥ इति। **तथा** च—" अतीतेऽब्देऽपि कर्तव्यं प्रेतकार्यं दशाहतः " इति। **पितृमेधसारेऽपि**—'पित्रोस्तु पंचदशाद्बूर्ध्वं दशाहादिविधिवदौर्ध्वदेहिकं कुर्यात् ' इति। अन्ये तु

" कुर्यात्तस्य च संस्कारं यथोक्तविधिना ततः। तदानीमेव सर्वाणि प्रेतकार्याणि संचरेत् " ॥ इति **जातुकर्णि**वचनमन्यथा व्याकुर्वते। यथोक्तविधिना पितृमेधविधिना प्रतिकृतिसंस्कारं कुर्यात्। सर्वाणि प्रेतकार्याणि नग्नप्रच्छादनादीनि प्रभूतबलिपाषाणोत्थापनान्तानि तदानीमेव तस्मिन्नेव दिने संचरेत्। कुर्यादिति 'संवत्सरे व्यतीतेऽपि दशरात्रं यथाविधि' इत्यादिवचनं अनाकर्णित-वार्ताव्यतिरिक्तपितृमृतिविषयं तस्मिन्नेव दिने सर्वाणि प्रेतकार्याणि कुर्यादित्येतत्पितृव्यतिरिक्त-विषयेऽपि समानमिति वदन्ति तदयुक्तं ' कृतक्रिये त्रिरात्रं स्याद्दशाहमकृतक्रिये ' इत्यादिदशाह-प्रतिपादकपूर्वोक्तवचनविरोधात्। अतः पितृविषये दशाहं इतरविषये त्रिरात्रमित्येव युक्तम्। पितृविषयेऽपि नारायणबलिपूर्वं और्ध्वदेहिकं कार्यम्। **कालादर्शे**—

" अनाकर्णितवार्तस्य प्रोषितस्य पितुः सुतः। ऊर्ध्वं पंचदशाद्वर्षादौर्ध्वदैहिकमाचरेत् ॥

" अन्येषां द्वादशादब्दात्पूर्वमुक्तैव या तिथिः "॥ इति। अनाकर्णितवार्तस्य अश्रुतकुशल-वार्त्तस्य प्रोषितस्य देशांतरगतस्य पितुः और्ध्वदेहिकं सुतः पंचदशाद्वर्षादूर्ध्वं पंचदशसंवत्सरेषु गतेषु कुर्यात्। अन्येषां पितृव्यतिरिक्तानां पितृव्यभ्रातृपुत्रादीनां द्वादशाब्दादूर्ध्वं पैतृमेधिकमा-चरेत्। पूर्वमुक्तैव या तिथिरिति प्रोषितस्य प्रत्याब्दिकश्राद्धे या तिथिः पूर्वमुक्ता पैतृमेधिका-नुष्ठानेऽपि तस्य सैव ग्राह्येत्यर्थः।

मासाद्यज्ञाने विधिः। तथा च **कालादर्शे**—

" मासाज्ञाने दिनज्ञाने[1] कार्यमाषाढमाघयोः। मृताहे तद्दिनाज्ञाने मासाज्ञाने[2] तु तत्कुहूः ॥

" कृष्णा चैकादशी ग्राह्या त्वज्ञाने ह्युभयोरपि। प्रवासमासदिवसौ ग्राह्यावेकैकशस्तयोः ॥

" अज्ञानेनंतरो न्यायः सर्वाज्ञानं यदा भवेत्। श्रवणाहे तदा कुर्यात्तन्मासेंदुक्षयेऽपि वा " ॥ इति। यदा मरणमासो न ज्ञातः मरणदिनं तु ज्ञातं तदा आषाढे माघमासि वा मृताहे प्रत्याब्दिकं कुर्यात्। तदाह **बृहस्पतिः**—

" यदा मासो न विज्ञातो विज्ञातं दिनमेव तु। तदा ह्याषाढके मासि माघे वा तद्दिनं भवेत् "॥ इति।

भविष्यत्पुराणे तु—

"दिनमेव विजानाति मासं नैव तु यो नरः। मार्गशीर्षेऽथ वा भाद्रे माघे वाऽथ समाचरेत् " ॥ इति।

आश्वलायनः—

" मासे त्वज्ञायमाने तु माघः कार्यो मनीषिभिः। पक्षे त्वज्ञायमाने तु दैवे[3] पित्र्ये सितासितौ" ॥ इति। यदा मासो विज्ञातः मरणदिनं तु न ज्ञातं तदा तत्कुहूः तन्माससंबंधिन्यमावास्या वा कृष्णैकादशी वा ग्राह्या। तदाह **बृहस्पतिः**—

" अज्ञातो हि मृताहश्चेत्प्रोषिते संस्थिते सति। मासश्चेत्प्रतिविज्ञातः तद्दर्शे स्यात्तदाऽब्दिकम्" ॥ इति

स्मृत्यंतरे—

" प्रत्यब्दं प्रतिमासं च मृतेऽहनि तु या क्रिया। तदहर्विस्मृतिप्राप्तौ दर्शे वा श्रवणेऽपि वा "॥ इति अत्र श्रवणनक्षत्रविधानं क्षत्रियविषयं ' नक्षत्रे क्षत्रियाणां स्यात् ' इत्याश्वलायनस्मरणात्।

---

१ क्ष-ना। २ ग-सा। ३ ग-व।

मरीचिरपि–" श्राद्धविघ्ने समुत्पन्ने अविज्ञाते मृतेऽहनि । एकादश्यां तु कर्तव्यं कृष्णपक्षे मृतेऽहनि " ॥ इति । मृतेऽहनि यत् कर्तव्यं तत्कृष्णैकादश्यां कर्तव्यमित्यर्थः । उभयोर्मरणमासदिनयोरप्यज्ञाने प्रवासमासदिवसौ ग्राह्यौ । तदाह **बृहस्पतिः**—

" दिनमासौ न विज्ञातौ मरणस्य यदा पुनः । प्रवासमासदिवसौ ग्राह्यौ पूर्वोक्तया दिशा " ॥ इति । पूर्वोक्तयेति तयोरेकैकशः अज्ञाने अनंतरोक्तन्यायः स्वीकार्यः । अयमर्थः—यदा प्रवासमासो न विज्ञातः दिवसस्तु ज्ञातः तदाषाढादौ मृताहे कार्यम् । यदा प्रवासमासो विज्ञातः दिवसस्तु न विज्ञातः तदा प्रवासमाससंबंधिनि दर्शे तत्कृष्णैकादश्यां वा कुर्यात् । यदा सर्वाज्ञानं भवेन्मरणमासो मरणदिवसः प्रवासमासः प्रवासदिवसश्च न ज्ञातो भवेत् तदा मरणश्रवणदिने कुर्यात् । तत्रासंभवे श्रवणमाससंबंधिनि दर्शे कुर्यात् तथा **प्रचेताः**—" अपरिज्ञाते अमावास्यायां श्रवणदिने वा " इति । **स एव**—" अपरिज्ञातेर्मृताहे श्रवणतिथौ तिथिविस्मरणे तन्मासवर्तिन्याममावास्यायां सांवत्सरिकं कुर्यात् । श्रवणतिथिस्मरणे मासास्मरणे च मार्गशीर्षे माघे वा तस्यामेव तिथौ कुर्यात् । यत्र श्रवणमपि नास्ति अनाकर्णितवार्तस्य द्वादशाब्दात्पञ्चदशाब्दाद्वापरं क्रियमाणे दाहादिप्रेतकृत्ये तद्विषये उक्तं **चंद्रिकायाम्**—

"मासस्थितिर्वा प्रस्थानदिनं वा श्रवणे न चेत् । यस्मिन्दिने तु संस्कारः क्षयाहस्तद्दिनं भवेत्"॥ इति । सर्वाज्ञाने संस्कारकालीनमासपक्षतिथयो ग्राह्या इत्यर्थः । तत्राषाढादीनामन्यतममासो ग्राह्यः । तिथिश्चामावास्या कृष्णैकादशी च पूर्वोक्ता ग्राह्या । कृष्णाष्टम्यामपि दहनं प्रत्याब्दिकं च कार्यमित्याह **पराशरः** (३।१४)—

" देशांतरगतो विप्रः प्रवासात्कालकारितात् । देहनाशमनुप्राप्तस्तिथिर्न ज्ञायते यदि ॥

"कृष्णाष्टमी त्वमावास्या कृष्णा चैकादशी च या । उदकं पिंडदानं च तत्र श्राद्धं च कारयेत्"॥ इति । तीर्थयात्रादिना केनचिन्निमित्तेन देशांतरगतस्य विप्रस्य चिरकालं बहुदेशपर्यटनादि संपादितायासबाहुल्याद्यत्र क्वापि देहनाशो भवति । अत एव तन्मरणतिथिर्न ज्ञायते मरणवार्ता यदाकदाचिच्छ्रुता भवति । तत्र तदीयाशौचस्वीकारो दहनतिलोदकपिंडदानोपक्रमादिकं चेत्येतदुभयं कृष्णाष्टम्यादितिथिषु तिसृष्विच्छया कस्यांचित्तिथौ कर्तव्यम् । तस्यामेव तिथौ प्रत्याब्दिकं च कर्तव्यम् । द्वादशाहौ[३]त्यं च दशाब्दादूर्ध्वं क्रियमाणेऽप्येता एव तिथय इत्यर्थः ।

कृतौर्ध्वदेहिकस्य पुनरागममने पंचदशाब्दं द्वादशाब्दं वा वार्तानाकर्णने मरणनिश्चयादौर्ध्वदेहिके कृते जीवन्यदि समागच्छेत्तदा कर्तव्यमाह **वृद्धमनुः**—

" जीवन्यदि समागच्छेद्घृतकुंभे नियोज्य तम् । उद्धृत्य स्नापयित्वाऽस्य जातकर्मादि कारयेत् ॥

" द्वादशाहं व्रतं च स्यात्त्रिरात्रमथवाऽस्य तु । स्नात्वोद्वहेत तां भार्यामन्यां वा तदभावतः ॥

" अग्नीनाधाय विधिवद्व्रात्यस्तोमेन याँ[४]जयेत् ॥

" तथैंद्राग्नेन पशुना गिरिं गत्वा च तत्र तु । इष्टिमायुष्मतीं कुर्यादीप्सितांश्च क्रतूंस्ततः " ॥ इति । जातकर्मादीत्यादिशब्देन नामकरणान्नप्राशनचौलानि गृह्यंते । व्रतं ब्रह्मचर्यं स्नानं समावर्तनं आयुष्मतीष्टिः ' अग्नय आयुष्मते पुरोडाशमष्टकपालम् ' **इत्याम्नायते** ।

पितृमेधसारे—" यदि प्रेतकृत्यसंस्कृतः कश्चिदागच्छेत्तं घृतपूर्णकुंभे त्रिरात्रमेकरात्रं वा निधाय शुभे लग्ने समुत्थाप्य जातकर्माद्यैर्विधिवत्संस्कृत्य मेखलाजिनदंडभिक्षाचर्याव्रतवर्ज्यं

---

१ ग–र्णं । २ ग–हं त । ३ ख–ब्दा । ग–याजयेत् ।

यथावदुपनीतः कस्मिंश्चिद्गिरौ द्वादशाहं त्र्यहं वा नियत उपोष्यागत्य पूर्वभार्यां तदभावेऽन्या-मुद्वहेत् । अथास्मच्चरुणाऽनाहिताग्निमायुष्मत्येष्ट्या आहिताग्निं संस्कुर्यात् ” इति ।

गृह्यपरिशिष्टे—

“ य एवाहिताग्नेः पुरोडाशास्त एवानाहिताग्नेश्चरवः ” इति । **कालादर्शेऽपि**—

“ यद्यागच्छेत्पुमान्जीवन्पैतृमेधिकसंस्कृतः । घृतकुंभे स्थापयित्वा तमुत्थाप्य शुभक्षणे ॥

“ संस्कृतं जातकर्माद्यैरुपनीतं विधानतः । द्वादशाहं त्रिरात्रं वा विहितोपोषणव्रतम् ॥

“गिरावागत्य पूर्वां वा तदभावेऽपरां स्त्रियम् । ऊद्वं तं च संस्कुर्याच्चरुणायुष्मतेन च” ॥ इति ।

आयुष्मदग्निदेवताकेन चरुणा अनाहिताग्निं संस्कुर्यादित्यर्थः । **स्मृत्यंतरेऽपि**—

“ घृतकुंभे निषाद्यैनं त्र्यहमेकाहमेव वा । समुत्थाप्य शुभे लग्ने जातकर्मादि कारयेत् ” ॥ इति ।

आपस्तंबः “ यद्येतस्मिन्कृते पुनरागच्छेद्घृतकुंभादुन्मग्नस्य जातकर्मप्रभृति द्वादशरात्रव्रतं चरित्वा तयैव जाययाग्निनाधाय पूर्वभुक्ताया भार्याया पाणिग्रहणं विधीयते अग्न्याधेयं कुर्वन्ति व्रात्यपशुना वा यजेत गिरिं वा गत्वा अग्नये कामायेष्टिं निर्वपेदीप्सितैः क्रतुभिर्यजेत् ” इति ।

शौनकः—

“ दहनादिसपिंड्यंते कृते सत्यागते पुनः । यज्ञकाष्ठान्मथित्वाऽग्निं कृत्वा चाग्निमुखं तथा ॥

“ विष्णुर्योनिमिति द्वाभ्यां चरुं हुत्वा यथाविधि । हुत्वा पुरुषसूक्तेन स्रुवेणाज्येन प्रत्यृचम् ॥

“ आश्वलायनगृह्येण कृत्वा पुंसवनादिकम् । विवाहमपि कुर्वीत पूर्वया भार्यया सह ॥

“आधानं पूर्ववत्कृत्वा सायंप्रातर्हुतं तथा । सदर्शपूर्णमासाभ्यामिष्ट्वा विष्णुं सदा स्मरेत्” ॥ इति ।

आश्वलायनः—“ उपेतपूर्वस्य कृताकृतं केशवपनं मेधाजननं चानिरुक्तं परिदानं कालश्च तत्सवितुर्वृणीमह इति सावित्री ” इति । **बोधायनः**—

“ वपनं मेखलादंडौ भैक्षाचर्यव्रतानि च । निवर्तन्ते द्विजातीनां पुनः संस्कारकर्मणि ” ॥ इति ।

पुनःसंस्कारः पुनरुपनयनम् । पुनर्विवाहविषये **स्मृत्यंतरम्**—

“ न दानं नैव वरणं न प्रतिग्रहणं तथा । त्रिरात्रं च व्रतं न स्यात्पुनरुद्वाहकर्मणि ” ॥ इति ।

एकस्मिन्नेव दिने शेषहोमांतं कर्तव्यमित्यर्थः ।

पुनःसंस्कारकालः । **नारदः**—“ मृत्यनंतरतो नृणां बलिर्दातुं न शक्यते ।

“ यैः कैश्चित्कारणैर्विद्वान्दद्यात्तत्र बलिं क्रमात् । प्रोष्ठपर्न्मासि माघे वा बलिं दद्याद्यथोदितम्” ॥ इति ।

स्मृत्यंतरे तु—

“ अकालमरणे मुक्त्वा षाण्मासात्कुंभकार्मुकौ । कन्याकुलीरप्राप्तेऽर्के पुनःसंस्कार इष्यते” ॥ इति ।

अकालमरणं दुर्मरणम् । **अन्यत्रापि**—

“ आषाढप्रोष्ठपान्माघांमार्गशीर्षौ विशेषतः । चत्वार ईरिता मासाः पुनःसंस्कारकर्मणि ” ॥ इति ।

चापमासस्य निषेधमाह **गार्ग्यः**—

“ रवौ चापगते नृणां पुनःसंस्कारकर्म चेत् । पितरो नरकं यान्ति कर्ता तु क्षयमश्नुते ” ॥ इति ।

अन्यच्च—

“ दुष्टेष्वेतेषु मासेषु पुनःसंस्कारकर्म चेत् । आत्मस्त्रीपुत्रवित्तानां हानिर्भवति हि ध्रुवम् ” ॥ इति एतेषु कर्कटकन्याकुंभमासव्यतिरिक्तमासेष्वित्यर्थः । नक्षत्रादीन्याह **गार्ग्यः**—

---

१ ग–दृश । २ ग–सह भार्यया । ३ ग–पा । ४ क्ष–धान् ।

"अनूराधे च मूले च श्रविष्ठावारुणे तथा । हस्ते च त्वाष्ट्रनक्षत्रे पुनःसंस्कारमाचरेत् ॥
"कुजवारे च सौरे च जीववारे च भार्गवे । नंदायां चैव भद्रायां रिक्तायां पर्वणोस्तथा ॥
"न कुर्यात्पुनःसंस्कारं कुर्याच्चेत्कुलनाशनम् " ॥ इति ।
नृसिंहश्च—
"कन्यां कुंभगते सूर्ये कृष्णपक्षे विशेषतः । पंचम्याः परतः श्रेष्ठा आ पंचम्याः सितेऽपि च" ॥ इति ।
बृहस्पतिः—
"कृष्णपक्षः शुभः प्रोक्तः पंचम्यापरतस्तथा । अंत्यत्रिविभागः शस्तः स्याद्विशेषात्प्रेतकर्मणि ॥
"आद्यभागे च कर्तव्यं सितपक्षे च संकटे " ॥ इति । संकटो विहितकालालाभः ॥
स्मृत्यंतरे—
"अब्दादुपरि संस्कार उत्तरायणमिष्यते । सर्वदा कृष्णपक्षः स्यात्पुनःसंस्कारकर्मणि " ॥ इति ।
गार्ग्यः—
"चित्रा श्रविष्ठा हस्तश्च स्वाती श्रवणमश्वयुक् । मघा मैत्रं च तिष्यं च वारुणं सोमदैवतम् ॥
"एकादशैताः कथिताः प्रशस्ताः प्रेतकर्मणि । प्रेताधिपविदैवत्वाद्भरणी कैश्चिदिष्यते ॥
"ज्येष्ठा च मंगलाभावात् संकटेषु तयोः क्रिया " ॥ इति ।
श्रीधरीये— " भरणी यमदैवत्वात्प्रशस्तात्प्रेतकर्मणि । अमंगलसमग्रत्वाज्ज्येष्ठाऽप्यत्र विधीयते ॥
"नंदायां भार्गवदिने चतुर्दश्यां त्रिजन्मसु । कुर्वतः प्रेतकार्याणि कुलक्षयकराणि तु " ॥
वसिष्ठश्च—
"आग्नेयमार्द्रा सार्पं च त्रयः पूर्वाश्च नैर्ऋतम् । ज्येष्ठा च भरणी चैव निंदितास्तत्त्वदर्शिभिः ॥
"एतत्सर्वमतिक्रांते तत्काले न तु दोषकृत् " ॥ इति । **पद्धतौ—**
"नंदां भद्रां कलितिथिमिलापुत्रशुक्रार्यवारान्नक्षत्रं च त्रिपदममराचार्यशुक्रेन्दुलग्नम् ॥
"त्यक्त्वा पापग्रहबलवशात्प्रेतकार्याणि सर्वाण्याहुर्दोषो न हि बहुमतः प्राप्तकाले मृतस्य "॥ इति ।
कलितिथिः चतुर्दशी । इलापुत्रः भौमः । आर्यः बृहस्पतिः ।
तत्रैव—" नक्षत्राण्यमृतान्याहुरास्थिताः शुभैर्ग्रहैः । शुक्रवीक्षितराश्यादि किंचित्सर्वं विगर्हितम् " ॥
" सर्वदा शुक्रवारगुरुवारश्च गर्हितः " । इति अतीतपिंडोदकास्थिसंचयनादौ प्रातिस्विकनिषेधोऽपि तत्र तत्रोक्तः । **स्मृत्यंतरे—**
"प्रत्यक्षमरणे पित्रोर्न पश्येत्तिथिवारभम् । परोक्षे सूक्ष्मतः पश्येत्स्वजन्मतिथिवारभम् ॥
"अन्येषां नातिदोषः स्यात्प्रत्यक्षमरणे नृणाम् " ॥ इति । **अन्यत्रापि—**
"जन्मत्रयं संचयने श्राद्धे च दहने पितुः । नैव दोषावहं प्रोक्तमन्येषामपि सर्वदा " ॥ इति ।
अन्येषां पितृव्यतिरिक्तानामपि तत्काले दहनादिप्रेतकृत्येषु न दोष इत्यर्थः । यदि कालादिक्रमे प्रेतकृत्यं चिकीर्षेत्तत्र तिथिवारादिकं सूक्ष्मतः पश्येत् । तदाह **गार्ग्यः—**
"प्राप्तकालमतिक्रम्य कुर्याद्यदि बलिक्रियाम् । तस्यैव वारनक्षत्रातिथिराश्यंशकादयः " ॥ इति ।
संग्रहेऽपि—
"अधिमासे हरेः सुप्तौ मौढ्ये च गुरुशुक्रयोः । नातीतपितृमेधः स्यात् गंगां गोदावरीं विना " ॥

अन्यच्च—
"सुरासुरगुरोर्मौढ्ये कृष्णस्वापे मलिम्लुचे । नातीतपितृमेधः स्यात्तत्काले न तु दोषकृत्" ॥ कृष्णस्वाप इति कन्यार्ककर्कटव्यतिरिक्तविषयम् । "कन्या कुलीरे प्राप्तेऽर्के पुनःसंस्कार इष्यते" इति शृंगग्राहितया तत्रातीतप्रेतकार्यविधानात् ।
सर्वोऽपि निषेधस्त्रिपक्षादूर्ध्वविषयः । **संग्रहकारः**—
"अर्वाक् त्रिपक्षात् प्रेतस्य पुनर्दहनकर्मणि । न कालनियमो ज्ञेयो न मौढ्यं गुरुशुक्रयोः" ॥ इति ।
ततश्च त्रिपक्षादर्वाक्पुनर्दहनकर्म मृतिश्रवणदिने कार्यमिति सिद्धम् । यत्तु **स्मृत्यंतरवचनम्**—
"प्रेतस्य वत्सरादर्वाग्यदा संस्कारमिच्छति । न कालनियमो ज्ञेयो न मौढ्यं गुरुशुक्रयोः" ॥ इति ।
अत्र संस्कारशब्दः सपिण्डीकरणविषयः न पुनःसंस्कारवाचीति व्याख्यातारः ।
स्मृतिसंग्रहे—"पुनर्दाहे दिनं शोध्यमाशौचात्परतो बुधैः । नन्दात्रयोदशी शुक्रशनिवारौ च वर्जयेत् ॥ "पातान्त्यपरिघान् घोरान् विष्टिं चैव विवर्जयेत्" ॥ इति ।
पुनः संस्कारादौ विहितकालातिक्रमे प्रायश्चित्तमुक्तं **स्मृत्यंतरे**—
"संस्काराणां तु सर्वेषां कालो यद्यतिपद्यते । प्राजापत्यं चरेन्मासे ततोऽप्येवं प्रकल्पयेत्" ॥ इति ।
मासद्वये प्राजापत्यद्वयम् । एवं मासत्रयादौ कल्प्यम् । मासाभ्यन्तरेऽपि प्राजापत्य कर्तव्यम् ।
तथा **स्मृत्यर्थसारे**—"निमित्तश्राद्धे हीने संस्कारकालातिक्रमे च प्राजापत्यं कुर्यात्" इति ।

दशाहमध्ये ज्ञातिमरणे संस्कर्तुर्विशेषः । दशाहमध्ये पुनर्ज्ञातिमरणे संस्कर्तुर्विशेषमाह **नारदः**—
"अन्तर्दशाहे चेत्कर्तुः पुनः प्रेतस्य संस्कृतिः । तस्माच्छुद्धिः पूर्वशेषादेकोद्दिष्टं यथोदितम्" ॥ इति ।
अंतर्दशाहे चेत्कर्तुरिति **स्मरणात्** त्र्यहाद्याशौचमध्ये दशाहाशौचिदाहे पूर्वेण न समाप्तिरिति गम्यते ।
हारीतोऽपि—
"दाहकार्यद्वयं स्याच्चेत्कर्तुरैक्ये विशेषतः । तोयं पिंडं समाप्येत पूर्वेणैव द्वितीयकम्" ॥ इति ।
स्मृत्यंतरेऽपि—
"अंतर्दशाहे तत्कर्तुः पुनः प्रेतस्य कर्माणि । पूर्वेणैव समाप्तिः स्यादेकोद्दिष्टं यथोदितम्" ॥ इति ।
तत्तदेकादशदिने एकोद्दिष्टमित्यर्थः । **अन्यत्रापि**—
"कर्ता दशाहे प्रेतस्य शवदाहं चरेत्पुनः । पूर्वेण शुद्धिः स्यादेव पित्रोरन्यत्र तद्भवेत्" ॥ इति ।
तथा **चांगिराः**—
"दाहकस्त्वा दशाहात्तु शवदाहं चरेद्यदि । पूर्वेणैव विशुद्धिः स्यात्पित्रोस्तद्दिवसाद्भवेत्" ॥
संग्रहे च—
"पित्रान्यनंतरानेकान्दग्ध्वा पूर्वाघतः शुचिः । पितरौ च दहेत्तत्र दशाहाच्छुद्धिरग्निदे" ॥ इति ।
दक्षः—"मृताशौचनिमित्ते द्वे दहनं मरणं तथा । ज्ञातीनां मरणादेव दहनाद्दाहकस्य तु ॥ "अन्यं दग्ध्वा दशाहांतः शुद्धिः पूर्वाघशेषतः" ॥ इति ।
संवर्तः—
"पूर्वकर्ता दशाह तु पितरौ चेद्दहेत्पुनः । पूर्वेण शुद्धिर्नैव स्यात्पित्रोस्तद्दिवसाद्भवेत्" ॥ इति ।
एवं च ज्ञात्यघमध्ये ज्ञातिदाहे कृते सति दाहकस्य दाहादिदशाहेन उदकपिंडदानसमाप्तिः ।

---

१ क्ष-कर्कटविषयम् । २ क-कृ पुनः । ३ खग-अतिर्दशाहे ।

दाहादिदशाहमाशौचं च । दाहकव्यतिरिक्तसपिंडानां पूर्वाद्यशेषत एव शुद्धिरुदकसमाप्तिश्च । दाहकस्य पुनर्ज्ञात्यंतरदाहे पूर्वदाहादिदशाहशेषेण एव शुद्धिः । दशमदिने तदन्त्ययामे वा दाहे सति ' अहःशेषे द्वाभ्यां प्रभाते तिसृभिः " इति **स्मरणात्** पूर्वदशाहानंतरं द्वित्रिदिनाशौचस्य सत्वेन तदाशौचान्ते उदकादिसमाप्तिः । " अशौचांते ततः[1] सम्यक् पिंडदानं समाप्यते " इति **मरीचिस्मरणात्** । एकोद्दिष्टं तत्तदेकादशाहे ' एकोद्दिष्टमशुद्धोऽपि ' इति **स्मरणात्** । सपिंडीकरणं तु त्रिपक्षे कार्यम् । दशाहात्पूर्वमृतौ दाहकस्य सपिंडस्य द्वादशदिने आशौचाभावेऽपि आद्यश्राद्धपर्यन्तस्य एककर्मत्वात् पश्चान्मृतैकोद्दिष्टात्पूर्वं पूर्वमृतस्य द्वादशाहे सपिंड्यं न कार्यम् । पित्रोस्तु दाहे दाहकस्यान्येषामपि पुत्राणां पितृमरणादिदशाहेनैव शुद्धिरुदकदानादिसमाप्तिश्च न पूर्वदाहकदशाहशेषेणेति । **दीपिकायां तु**—

" जनकस्य जनन्याश्च भार्याया भर्तुरेव च । पुत्रस्य दुहितुश्चैव जनने मरणेऽपि च ॥
" स्वकालेनैव शुद्धिः स्यात् शेषं न्यायो न विद्यते " ॥ इति । ज्ञात्यघमध्ये पुत्रजनने पित्रोर्दशाहत एव शुद्धिः । भार्यादिमरणे तत्प्रतियोगिनामपि स्वकालत एव शुद्धिः । न पूर्वशेषेणेत्यर्थः ।

अन्तर्दशाहे मातापितृमरणसंनिपाते । मातापितृमरणयोरन्यदिनात् पूर्वं अन्त्यदिने वा मिथः संनिपाते विशेषमाह **शंखः**[2]—

" मातर्यग्रे प्रमीतायामशुद्धे म्रियते पिता । पितुः शेषेण शुद्धिः स्यान्मातुः कुर्यात्तु पक्षिणीम् " ॥ मात्राशौचमध्ये पितृमरणे सति पितृदशाहेन शुद्धिः पित्राशौचमध्ये मात्राशौचसंनिपाते पूर्वाशौचानन्तरं मात्राशौचं पक्षिणीमात्रमुदकादिकं च कुर्यादित्यर्थः । तथा च **स्मृत्यंतरे**—

" मात्राशौचस्य मध्ये तु पिता च म्रियते यदि । पितुर्मरणमारभ्य पुत्राणां दशरात्रकम् ॥
" पित्राशौचस्य मध्ये तु यदि माता प्रमीयते । दशाहात्पैतृकादूर्ध्वं मात्रं पक्षिणी भवेत्" ॥ इति ।

मातर्यग्रे प्रमीतायां तदाशौचमध्ये यदि पित्रा म्रियेत तदा पितृमरणादिनमारभ्य दशाहत एव उदकदानादिप्रेतकृत्यं पित्र्यं निर्वर्त्य पितृमरणाद्येकादशदिने आद्यश्राद्धं कुर्यात् । पित्राशौचमध्ये मातृमरणाद्येकादशदिने मातुराद्यश्राद्धं अशुद्धोऽपि कुर्यात्

" आद्यश्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि । कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः "॥ इति **देवलस्मरणात्** । पितर्यग्रे मृते सति तदाशौचमध्ये यदि माता म्रियते तदा

"जनकस्य मृतेर्मध्ये जननी मरणं यदि। पित्राशौचं समाप्तिः स्यान्मात्राशौचं तु पक्षिणीम्" ॥ इति पित्राशौचांत्यदिन एव मातुरपि पिंडोदकसमाप्ति**स्मरणात्** । पित्राशौचमध्ये मातुरपि दशाहकृत्यं परिसमाप्य पितुरेकादशदिने आद्यश्राद्धं निर्वर्त्य पित्राशौचानंतरमपि मातुः पक्षिण्याशौचमनुष्ठाय मातृमरणाद्येकादशदिने तस्या आद्यश्राद्धं कुर्यात् । ननु

" आशौचांते ततः सम्यक्पिंडदानं समाप्यते । ततः श्राद्धं प्रदातव्यं सर्ववर्णेष्वयं विधिः" ॥ इति **मरीचिस्मरणात्** । तथा " आशौचापगमे एकोद्दिष्टम् " इति **विष्णुवचनाच्च** मातुः पक्षिण्याशौचानंतरदिने एकोद्दिष्टं कर्तव्यमिति चेन्न " एकोद्दिष्टं यथोदितम् " इति **स्मरणात्** । तथा च **माधवीयकालादर्शादौ**[3] ततः आशौचानंतरमेकादशेऽहनि ब्राह्मण एकोद्दिष्टश्राद्धं कुर्यादिति मरीच्यादिवचनार्थोऽभिहितः । तथा च **पैठीनसिः**—

"एकादशेऽह्नि यच्छ्राद्धं तत्सामान्यमुदाहृतम्। चतुर्णामपि वर्णानां सूतकं तु पृथक्पृथक्" ॥ इति।

---

१ ग–पुनः । २ कखग–शङ्ख । ३ ग–दर्शटीकादौ ।

याज्ञवल्क्यश्च (आ. २५६)—

“ मृतेऽहनि तु कर्तव्यं प्रतिमासं तु वत्सरम् । प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि ” ॥ इति । अतः पितृमृतिदशाहमध्ये मातृमरणे पितृदशाहानंतरं पक्षिण्याशौचमनुष्ठाय मातृमरणाद्येकादशाहे मातुरेकोद्दिष्टमिति निर्णयः । पूर्वमृतयोः पित्रोः त्रिपक्षे सपिण्डीकरणविधिः । सपिंडीकरणं तु पूर्वमृतयोर्द्वयोरपि त्रिपक्षे कार्यम् । तथा च द्वादशाहे सापिंड्यं निषेधति **लौगाक्षिः**—

“ पितर्युपरते पुत्रो मातुः श्राद्धं निवर्तयेत् । मातुर्यपि च वृत्तायां पितुः श्राद्धं निवर्तयेत् ” ॥

मात्राशौचमध्ये पितरि मृते मातुः श्राद्धं सपिंडीकरणं द्वादशाहे नं कुर्यात्। पितुस्तु तद्द्वादशाहे कुर्यात्।

“ मातुर्दशाहमध्ये तु पिता यस्य प्रमीयते । पैतृकं तु यथाकालं पितुः सर्वं समापयेत् ॥

“ततो मातुस्त्रिपक्षादौ शेषं कर्म समाचरेत्” इति **स्मरणात्**। तथा पितृदशाहमध्ये मातृमृतौ पितुः सापिण्ड्यं निवर्तयेत् । द्वादशाहे न कुर्यात् । किंतु त्रिपक्ष एव मातुः सापिंड्यं पक्षिण्याशौचापगमे द्वादशाहे कुर्यादित्यर्थः । **देवलोऽपि**—

“ एकाग्रमरणे पित्रोरन्यस्यान्यदिने मृतौ । सपिंडनं त्रिपक्षे स्यादनुयानमृतिं विना ” ॥ इति । पित्रोरेकस्याग्रे मृतौ अन्यस्यान्यदिने मृतौ पूर्वमृतस्य पूर्वमृताया वा सापिंड्यं त्रिपक्षे कुर्यात् । अनुयानमृतिं विना अनुमरणं विनेत्यर्थः ।

अनुमरणे सापिण्ड्यकालः। अनुमरणे तु पतिमरणदिनादुत्तरदिनमरणे तद्द्वादशाह एव सापिंड्यं कुर्यात् । तथा च **कालादर्शे**—

“ पित्रोः संघातमरणे मातुरन्यत्र वा दिने । अनुयानमृतौ श्राद्धं यथाकालं समाचरेत् ” ॥ इति । दिनांतरे मातुरनुमरणे द्वादशाहं सापिंड्यं कुर्यादित्यर्थः । **पितृमेधसारेऽपि**—“ संघातानुमृत्योरन्यत्र न पित्रोस्तंत्रतः कुर्यान्नान्यैः सह वा पित्राशौचे माता मात्राशौचे पिता वा संस्थितः सन्मृतिः पूर्वं स्यात्तत्सापिंड्यं त्रिपक्ष एवेति **देवल**” इति । तथैवैकाग्रमरणे पित्रोरिति **देवलवचनं** तेन व्याख्यातम् । पित्रोरन्यतरदशाहमध्येऽन्यतरमृतौ पूर्वमृतस्य पूर्वमृताया वा सपिण्डनं त्रिपक्ष एव भवति । अनुमरणे तु पितुर्द्वादशाहे सहैवेत्यर्थः । इति ।

दम्पत्योः सहमृतौ क्रमः। यदि दंपत्योः सह मृतिः स्यात्प्राक्दाहाद्वाऽन्यतरमृतिः स्यात्तदा सहैव दाहादिक्रियाः कुर्यात् । यदाह **हारीतः**—

“दंपत्योः सह मृत्यौ तु सह दाहादिकाः क्रियाः। प्राग्दाहाद्यग्निनाशे च तदूर्ध्वं तु पृथक् क्रिया ”॥इति।

त्रिकांडी च—

“ मृते भर्तरि दाहात्प्राक् तत्पत्नी च मृता यदि । पत्न्यां वा प्राक् प्रमीतायां दाहादर्वाक्पतिर्मृतः ॥

“ तत्र तंत्रेण दाहः स्यात् तन्मंत्रे द्वित्वमूहयेत् ” ॥ **पुलस्त्यः**—

“ दुर्मृतः सुमृतो वापि पिताग्रे यद्यसंस्कृतः । कालांतरे मृता माता तस्या दाहादिकाः क्रियाः ॥

“ पत्या सहैकचित्यां तु दहेदौपासनाद्गुभौ ” ॥ इति । **स्मृत्यंतरेऽपि**—

“दम्पत्योः सह मृत्यौ तु पितृमेधक्रिया सह । कुंडमेकं पृथक्पिंडे जलांजलिशिला मता ” ॥ इति।

संग्रहेऽपि—

“ एककाले मृतौ पित्रोः पितृमेधक्रिया सह । उदकं पिंडदानं च श्राद्धं कुर्यात्पृथक् पृथक् ॥

“ सपिंडीकरणं चैव सहैव पृथगेव वा । एकगर्ते जले दद्याच्छ्राद्धं चैकदिने द्वयोः ॥

---

१ क्ष-कुर्यात् । २ क-मातृ । ३ क-पितृ । ४ कख-पितृ ।

" सह चर्माधिरोहश्च शांतिहोमं समाचरेत् । तंत्रेण श्रवणं कुर्यात् श्राद्धं कुर्यात्पृथक् पृथक् ॥
" तत्र द्वयोर्निमित्तौ द्वौ ब्राह्मणावितरैः सह ” ॥ इति ।

स्मृत्यंतरेऽपि—" दंपत्योः सह संस्कारो मृतावनुमृतावपि ।
" उदकादिसपिंडांतं प्रेतकार्याणि यान्यपि । कुर्यात्समानतंत्रेण सांवत्सरिकमेव च ” ॥ इति ।

संग्रहे च सांवत्सरिकस्य समानतंत्रत्वस्मरणमापद्विषयम् । तदग्रे वक्ष्यते । **अन्यत्रापि**—

" प्रदक्षिणमुपस्थानं चरुकार्यं चितिस्तथा । संचयस्तर्पणं गर्तः सपिंडीकरणं सह ” ॥ इति ।

संग्रहे च—

" पित्रा सहैव मातुश्च मात्रा सह पितुस्तथा । सापिंड्यं तनयैः कार्यं निमित्तार्थं[1] पृथग्भवेत् ” ॥ इति ।

तथा—

" समानपिंडयोगानां सपिंडीकरणं सह । तंत्रेण पितृवर्गस्य निमित्तं प्रतिपूरुषम् ” ॥ इति बहुस्मृतिसंमतत्वात्सपिंडीकरणमपि सहैव कर्तव्यम् । अतः पृथगेवेत्येतदनादरणीयम् । निमित्तोद्देशेन क्रियमाणं प्रैतकप्रयोजनं[2] निमित्तभोजनं पृथग्भवति । एतच्चोपलक्षणम् । क्षुत्तृष्णानिवर्तकं जलांजलिपिंडप्रदानसोदककुंभश्राद्धनवश्राद्धैकोत्तरवृद्धिश्राद्धषोडशश्राद्धवृषोत्सर्गादिकं प्रेततृप्तिकरं प्रेतहोमार्घ्यभोजनपिण्डदानदक्षिणादिकं च पृथक् कर्तव्यम् । तंत्रोपकारकं चितिकुंडशांतिहोमपाकवैश्वदेवपितृविष्णुवरणादिकं पृथक् न कर्तव्यम् । तथा **चांगिराः**—

" दंपत्योः सह मृत्यौ तु सह स्याद्दहनक्रिया । पृथक्पिंडोदकादीनि यथाविधि समाचरेत् ॥
" चरुकुंडचिताशांतिसंचयान् तंत्रतश्चरेत् । अग्निं श्रवणहोमौ चेत्युपस्थानं च तंत्रतः ” ॥ इति ।

पितृमेधसारेऽपि—" हिरण्यकलशनग्नप्रच्छादनवासास्तिलोदकपिंडैकोत्तरवृद्धिनवश्राद्धसोदकुंभवृषोत्सर्गषोडशश्राद्धानीति पृथक्पृथक्भवन्ति । चरुकुंडं[5] चितिः कुंडमस्थिसंचयनं शांतिहोमश्च तंत्रम् । एकोद्दिष्टसापिंडीकरणादिषु निमित्तवरणहोमौ पृथग्भवतः । पाकहोमवैश्वदेवतादि तंत्रम्” इति ।

यमः—"अस्थिसंचयनादर्वाग्भर्तुः पत्नी मृता यदि । तस्मिन्नेवानले दाह्या[4] यदि चाग्निर्न शाम्यति ॥
"उदकादि सपिंड्यंतं तयोः कार्यं सहैव तु । शांतेऽग्नौ पुनरेवास्याः पृथक् चित्यादि कारयेत्” ॥ इति ।

पितामहपितामह्योर्मरणेऽपि सह संस्कारादिकमाह **संवर्तः**—

" पितामहो यस्य मृतः चिरकालमसंस्कृतः । पितामही च प्रमीता तयोर्दाहादिकं सह ” ॥ इति ।

हिरण्यशकलनिधानादिकं सर्वं पितुः पूर्वं कृत्वा प्राक्मृताया अपि मातुः पश्चात् कुर्यात् । तथा च **कार्ष्णाजिनिः**—

" पित्रोः श्राद्धे समं प्राप्ते नवे पर्युषितेऽपि वा । पितुः पूर्वं सुतः कुर्यादन्यत्रासत्तियोगतः” ॥ इति ।

अत्रासत्तिग्रहणं दाहाद्युपलक्षणम् । तत्पूर्वकत्वाच्छ्राद्धस्य अन्यत्रासत्तियोगतः पितृभ्यामन्यत्र ज्ञात्यादिषु आसत्तियोगतः प्रत्यासत्तिक्रमात्कुर्यादित्यर्थः ।

पितृव्यतिरिक्तानां संघातमरणे दाहादिक्रमः । अत्र **ऋष्यशृंगश्च**—

" भवेद्यदि सपिंडानां युगपन्मरणं तदा । संबंधासक्तिमालोच्य तत्क्रमाच्छ्राद्धमाचरेत् ” ॥ इति ।

स्मृतिरत्नेऽपि—

" सकृन्म्रियंते बहवः कर्ता चैकस्तथैव च । अंतरंगक्रमेणैषामुदकादि समाचरेत् ” ॥ इति ।

---

१ क्ष–निमित्तं पृथगेव वा । २ ग–नं । ३ कग–कार्यं । ४ कग–दद्यात् । ५ क्षखग–श्राद्ध ।

कालादर्शे—

" पत्नीभ्रातृसुतादीनां सपिंडानां यदि क्रमात् । संघातमरणं तत्र तत्क्रमाच्छ्राद्धमाचरेत् ॥

"युगपन्मरणं तत्र संबंधासत्तियोगतः" ॥ इति । आदिशब्देन पुत्रपौत्रभ्रातृपुत्रस्नुषास्वसॄणां ग्रहणम् । पत्न्यादीनां मध्ये बहूनां द्वयोर्वा एकस्मिन्दिने संघातमरणं यदि स्यात् तत्र तत्क्रमान्मरणक्रमाद्दाहादिकं कुर्यात् ।

"कृत्वा पूर्वमृतस्यादौ द्वितीयस्य ततः पुनः । तृतीयस्य ततः कुर्यात् संनिपाते त्वयं क्रमः" ॥ इति[1] **ऋष्यशृंगस्मरणात्** ।

पत्न्यादीनां सपिंडानां युगपन्मरणं यदि स्यात्तत्र संबंधस्यासत्तिवशात्क्रमेण श्राद्धं कुर्यात् । पत्नीपतिलक्षणसंबंधस्यासन्नत्वात्पत्न्याः प्रथमं कुर्यात् । अनंतरमुभयप्रतियोगिकसंबन्धभाजः पुत्रस्य अनंतरं पितृव्यवहितसंबंधभाजः पौत्रस्य तदनंतरं भ्रातुः । अत्र पौत्रभ्रात्रोर्यद्यपि पितृव्यवधानं समानं तथापि पौत्रस्य स्वशरीरावयवान्वयस्य विद्यमानत्वाद्भ्रातृतोऽपि प्रत्यासत्तिः । ततो भ्रातृपुत्रस्य ततः पुत्रद्वारासंबंधभाजः स्नुषायाः । तदनु गोत्रान्तरप्रवेशेन व्यवधानभाजः स्वसुः । एवं च एकस्मिन्दिने क्रमेणैतेषां संघातमरणे मृतिक्रमेण दाहादिकाः क्रियाः पृथक्कुर्यात् । युगपन्मरणे तु उक्तसंबंधक्रमेण दाहादिकं पृथक्कुर्यादिति **कालादर्शटीका**यां व्याख्यातम् । **स्मृतिरत्ने** मरणानुक्रमपरिज्ञाने मृतिक्रमेण तदपरिज्ञाने संबंधासत्तिक्रमेणेति व्यवस्था दर्शिता । तथा च **तत्रैव**—

" अंतरंगक्रमेणैषामुदकादि समाचरेत् । मरणं क्रमशो दृष्ट्वा मरणानुक्रमेण तु ॥

" समानमिदमुद्दिष्टमन्येषामग्रजं विना । अन्येषामग्रजस्यापि समवायेऽग्रजः प्रभुः ॥

" अग्रजस्यापि पित्रोश्च संपाते पितरौ प्रभू " ॥ इति ।

मृतिक्रमापरिज्ञाने संबंधासत्त्यपरिज्ञाने च वयोऽधिकसपिंडादेर्दाहादिक्रियाः प्रथमतः कार्याः

" यद्येककाले पुरतः संस्कार्यास्तु वयोऽधिकाः । बहुत्वेऽप्येवमेव स्यादुदकं च दिने दिने " ॥ इति **स्मरणात्** । अनेन पुरतः संस्कारविधानात् मातापितृव्यतिरिक्तानां सर्वेषां दाहादिकृत्यं सपिंडीकरणं च सर्वं पृथक्पृथगेवेत्युक्तं भवति । तथा च **देवलः**—

" पित्रोरुपरतौ पुत्रः श्राद्धं कुर्यात् द्वयोरपि । अनुवृत्तौ च नान्येषां संघातमरणेऽपि च " ॥ इति।

पित्रोर्मरणे अनुमरणविषये संघातमरणे च दाहादिकं सहैव कुर्यात् । अन्येषां संघातमरणे सह न कुर्यादित्यर्थः । अन्ये तु ज्ञात्यादिसंघातमृतिविषये सहैव दाहादिक्रियां वदन्तः **स्मृत्यंतर**मुदाहरन्ति—

"मृतानामेकवंश्यानामेको यदि च दाहकः । एकस्मिन् दिवसे कुर्यादेकचित्यां समाहितः" ॥ इति ।

अन्यच्च—

" एककाले गतासूनां बहूनामथवा द्वयोः । एककुण्डे शिलाभेदे तेषां पिण्डं पृथक् पृथक् ॥

" सपिण्डीकरणं तेषां सहैव पृथगेव वा । निमित्तार्थं पृथक्कुर्यादन्यत्सर्वं सह क्रिया " ॥ इति ।

सहसापिण्ड्यमेकोद्दिश्यत्वविषयम्

" समानपिण्डयोगानां सपिण्डीकरणं सह । निमित्तपिण्डमेकैकं दत्वा तैः संसृजेत्क्रमात् " ॥ इति **स्मरणात्** । **पितृमेधसारे**—"यद्यनेकेषामेकदिने मृतिः स्यात्पत्नीपुत्रपौत्रभ्रातृतत्पुत्रस्नुषास्वसॄणां संख्यातक्रमाद्दाहादिक्रियाः पृथक् पृथक् कुर्यादन्येषां मृतिक्रमात् " इति ।

---

१ क्ष–भुः ।

तत्रैव—

“पत्न्यादीनामन्येषां च संघातमरणे पत्न्यादिपूर्वमन्येषामुभयेषामपि पितृपूर्वं पित्रोर्मृताब्दे पत्न्यादिसापिण्ड्यं त्रिपक्षे” इति । **लोकाक्षिः**— “ पित्रोर्द्वयोर्दशाह एव सापिण्ड्यमन्येषामेकोद्दिष्टान्तं कृत्वा तत्तद्वत्सरान्ते मासिकैः सह सापिण्ड्यं कुर्यात् इति **भृगुः** ”। पत्न्यादीनां तद्व्यतिरिक्तानां च मृतौ पूर्वोक्तन्यायेन पत्न्यादीनां पूर्वं कृत्वा तद्व्यतिरिक्तानां पश्चान्मृतिक्रमेण कुर्यात् । पित्रोः पत्न्यादीनां तद्व्यतिरिक्तानां च संघातमरणे पितृपूर्वं पत्न्यादीनां कुर्यात् । ‘ पितृपूर्वं सुतः कुर्यादन्यत्रासत्तियोगतः ’ इति । **लोकाक्षिः**—‘ पत्नीपुत्रस्नुषापौत्रभ्रातृतत्पुत्रका अपि ।

“ पितरौ च यदैकस्मिन्म्रियेरन् वासरे तदा । आद्यमेकादशे कुर्यात् त्रिपक्षे तु सपिण्डनम्” ॥ इति ।

अत्र व्यवस्थामाह **वृद्धहारीतः**—

“संघातमरणे पित्रोर्द्वादशाहे सपिण्डनम् । कुर्यात्पुत्रस्तदन्येषां त्रिपक्षे कारयेद्बुधः” ॥ अन्येषां पत्न्यादीनामित्यर्थः । तेषामेव मातापितृमृतिवत्सरमध्ये त्रिपक्षादौ सापिण्ड्यं विदधाति **ऋष्यशृङ्गः**—

“ पत्न्याः पुत्रस्य तत्पुत्रभ्रात्रोस्तत्तनयस्य च । स्नुषास्वस्रोश्च पित्रोश्च संघातमरणं यदि ॥

“ अर्वागब्दान्मातृपितृपूर्वं सापिण्ड्यमाचरेत् ” ॥ इति । **भृगुरपि**—

“माता भ्राता च तत्पुत्रः पत्नी पुत्रः स्नुषा स्वसा । एषां मृतौ चरेच्छ्राद्धमन्येषां न पुनः पितुः”॥ इति । पितुर्मृताब्दे एषामेव श्राद्धं सपिंडीकरणं कुर्यात् । नान्येषामित्यर्थः । **ऋष्यशृंगोक्त**पत्न्यादिसप्तव्यतिरिक्तानां पित्रोर्मृताब्दे पितृभ्यां सहैकदिने वा मृतानां दाहाद्येकोद्दिष्टांतं तत्तत्काले मृतिक्रमात्कृत्वा तत्तद्वत्सरांतदिने मासिकैः सह सापिंड्यं कुर्यात् । अत्र **भृगुः**—

“ पित्रोर्मृताब्दे श्राद्धांतं कृत्वाऽन्येषां यथाविधि । मासिकैः सह सापिंड्यं वत्सरांते समाचरेत् ” ॥ वत्सरांत इति नियमात्ततोऽर्वाक् न मासिकानुष्ठानम् । **कालादर्शे**—

“ पत्न्यादीनां च पित्रोश्च संघातमरणं यदि । अर्वाक्संवत्सरात्पित्रोः सापिंड्यं न समाचरेत् ॥

“ संघातमरणेऽन्येषां पित्रोश्च दहनादिकम् । कृत्वा संवत्सरस्यांते कुर्वीत सह पिंडनम् ” ॥ इति ।

तथा **देवलः**—

“ महागुरुनिपाते तु प्रेतकार्यं यथाविधि । कुर्यात्संवत्सरादर्वाग् नैकोद्दिष्टं न पार्वणम् ” ॥

पित्रोर्मृतौ संवत्सरादर्वाक्पत्न्यादिव्यतिरिक्तानां प्रेतकार्यं दाहाद्येकोद्दिष्टांताः पूर्वाः क्रियाः यथाविधि कुर्यात् । एकोद्दिष्टमासिकानि पार्वणं सपिंडीकरणं च न कुर्यादित्यर्थः । एतदेवाभिप्रेत्य **स्मृत्यंतरे**—

“ पितरौ प्रमीतौ यस्य देहस्तस्याशुचिर्भवेत् । न दैवं नापि पित्र्यं च यावत्पूर्णो न वत्सरः ” ॥

लौकाक्षिरपि—

“ अन्येषां प्रेतकार्याणि महागुरुनिपातने । कुर्यात्संवत्सरादर्वाक् श्राद्धमेकं तु वर्जयेत् ” ॥ श्राद्धं मासिकं सपिंडीकरणम् । ननु

“ पत्नी चैव सुतो भ्राता स्नुषा चैव विपद्यते । तत्र श्राद्धानि कुर्वीत न पित्रोर्मृतयोरपि ” ॥ इति **जाबालिस्मरणात्** पत्न्यादीनामपि सापिंड्यनिषेध इति चेन्न । द्वादशाहे तन्निषेधपरत्वात्संवत्सरादर्वाक्निषेधपरत्वे त्रिपक्षे तु सपिंडनमिति **लौकाक्ष्यादि**वचनविरोधापत्तिः । अतः पत्न्यादीनां पित्रोर्मृताब्दे पितृसपिंडनानंतरमरणे तत्तद्द्वादशाहे सपिंडीकरणम् । पत्न्यादीनां पित्रोश्च संघात-

१ **कखग**–पूर्वं सापिण्ड्यमाचरेत् । २ **ग**–स्य ।

मरणे पत्न्यादीनां त्रिपक्षे। पित्रोस्तु द्वादशाहे। अन्येषां पित्रोर्मृताब्दे मरणे तत्तद्वत्सरांते मासिकानि सपिंडीकरणं चेति निर्णयः ।

अनुमरणविधिः । अनुमरणविषये **विष्णुः** (अ. २५ सू. ४)—
" भर्तरि प्रेते ब्रह्मचर्यं तदन्वारोहणं वा " इति ॥ **स्मृत्यंतरे** च—
" साध्वीनामेव नारीणामग्निप्रपतनादृते । नान्यो धर्मोऽस्ति विज्ञेयो मृते भर्तरि कर्हिचित् "॥ इति ।
हारीतोऽपि—
"मातृतः पितृतश्चैव यत्र चैषा प्रदीयते । कुलत्रयं पुनात्येषा भर्त्तारं याऽनुगच्छति"॥ **स्मृत्यंतरे**—
" सार्तवा सूतिका वाऽपि भर्तानुमरणोत्सुका । सद्यः शुद्धिमवाप्नोति भर्तुः पापापहारिणी " ॥
अन्यच्च—
"बालापत्या तु या नारी सूतिका वा रजस्वला। सर्वासामपि च स्त्रीणां एष साधारणो विधिः"॥ इति ।
यत्त्वौर्ववचनम्
"बालापत्याश्च गर्भिण्यो ह्यदृष्टार्तव एव च । रजस्वला राजसुते नारोहंति चितां शुभे"॥ इति । यदपि
"बालापत्या तु या नारी भर्त्रा सह न सा व्रजेत् । रजस्वला न गच्छेत्तु गर्भं तु गर्भिणी इति "॥
अत्र **पितृमेधसारकृ**ता व्यवस्थापितं षोडशीग्रहणाग्रहणवत् विधिनिषेधदर्शनात् यद्यपि तुल्यविकल्पः प्राप्नोति तथापि भर्तानुमरणोत्सुकेति **वचनात्** पुत्रक्षेत्रधनधान्यादिमनस्कायाः पातिव्रत्यधर्महीनायाः संसारदुःखबन्धुनियोगाद्युपाधितो विषण्णाया वा प्रतिषेधो द्रष्टव्यः इति ।

अन्ये तु भर्तानुमरणोत्सुका " नमस्कृत्य चितारूढं भर्तारं तु प्रसन्नधीः" "आरुह्य पत्नी निधनं गता चेदेकां चितिं निर्मलधीः स्वभर्त्रा " इत्यादिवचनेषूपात्तेर्मरणोत्सुका प्रसन्नधीर्निर्मलधीरित्यादिपदैर्देहादिवियोगकलंकरहिताया एवानुमरणाधिकारप्रतिपादनात् बालापत्या रजस्वलेत्यादिविशेषणोपादानवैय्यर्थ्यप्रसंगाच्च **पितृमेधसारोक्तं** न युक्तं निषेधवचनं तु भिन्नचित्यारोहणविषयं तच्च क्षत्रियादिविषयम् । तथा च क्षत्रियादिस्त्रीणां रजस्वलादीनामनुमरणनिषेधः " रजस्वला राजसुता " इति राजसुतां प्रत्येव तन्निषेधादित्याहुः ।

अपरे तु बालापत्यारजस्वलादेः सामान्येन विधानात्प्रतिषेधाच्च रजस्वलायाः तुल्यविकल्पः । भिन्नचित्यारोहणविषयत्वे प्रमाणाभावाद्रजस्वला राजसुता इति राजसुतासंबोधनमात्रेण विषयविशेषात्प्रतीतेरित्याहुः । गर्भिण्यास्तु निषेध एव । ततश्च गर्भिणीं विना बालापत्या सूतिका रजस्वला दृष्टार्तवाश्च ब्राह्मण्य एकचित्यारोहणं कुर्युः । सूतिका रजस्वला च तत्तदुक्तशुद्धिप्रकारेण शुद्धाः कुर्यात् । यत्तु **चंद्रिकायामुक्तम्**—
" भर्त्तारमनुगच्छंत्या रज उत्पद्यते यदि । तैलद्रोण्यां विनिक्षिप्य लवणे वा मृतं पतिम् ॥
" त्रिरात्राद्दहनं कुर्युर्बांधवास्तु तया सह । श्राद्धं चैकदिने कुर्यात् द्वयोरपि हि निर्णयः"॥ इति ।
तद्बांधवा इत्यभिधानादपत्यहीनसंस्कर्तृविषयमित्येके । **अपरे तु**—

" भर्तारमनुगच्छन्ती पत्नी चेत्सार्तवा यदि । तैलद्रोण्यां विनिक्षिप्य लवणे वा मृतं पतिम् ॥
" चतुर्थेऽहनि संस्कुर्यात्पुत्रादिस्तं सहैतया । शवः पर्युषितस्तस्य प्रायश्चित्तं तदा भवेत्" ॥

अस्मिन्पक्षेऽप्ययं भर्तुर्दशाहेनापि गच्छन्तीति पुत्रवत्त्वेऽपि चतुर्थेऽहनि पित्रोः संस्कारविधानात्समविकल्प इत्याहुः । **स्मृत्यंतरे**—

" मृतं पतिमनुव्रज्य पत्नी चेत् ज्वलनं गता । न तत्र पक्षिणी कार्या पैतृकादेव शुध्यति ॥

" सार्तवा सूतिका चैव भर्त्रानुमरणोत्सुका । पूर्ववस्त्रं परित्यज्य शवकर्माणि कारयेत् ॥
" सपत्न्योरनुगच्छन्त्योरेका यदि रजस्वला । चतुर्थेऽह्नि सहैवाभ्यां तस्य दाहो विधीयते ॥
" एकचित्यां समारूढा यदि भार्या दिनान्तरे । भर्तुर्मृताहे कर्तव्यमभिन्नं मनुरब्रवीत् " ॥ इति ।

वसिष्ठः—
" दह्यमानं तु भर्तारं या नारी त्वनुगच्छति । मरणादि भवेच्छ्राद्धं दहनादि तयोर्न तु ॥
" भर्त्रा सहैव शुद्धिः स्याच्छ्राद्धं चैकदिने भवेत् " ॥ यत्तु
" या स्त्री ब्राह्मणजातीया मृतं पतिमनुव्रजेत् । सा स्वर्गमात्मघातेन नात्मानं न पतिं नयेत्"॥ इति

यदपि— " मृतानुगमनं नास्ति ब्राह्मण्या अनुशासनात् " इत्यादि तत्सर्वमपि ब्राह्मण्या अनुगमननिषेधप्रतिपादकवचनं पृथक्चित्यारोहणविषयम् । " पृथक् चितिं समारुह्य न विप्रा गंतुमर्हति " इति विशेष**स्मरणात्** । तथा च

हारीतः—
"भर्त्रा सहानुमरणमा चंडालं विधीयते । पृथक् चितिर्वा राजादेर्न विप्रायाः पृथक् चितिः "॥ इति । क्षत्रियादीनां पृथक्चित्यारोहणं देशांतरविषयम् । संनिधौ तु एकचित्यारोहणमेव
" देशांतरमृते पत्यौ साध्वी तत्पादुकाद्वयम् । निधायोरसि सश्रद्धा प्रविशेज्जातवेदसम् " ॥ इति **स्मरणात्** । इदं च मुमुक्षुविषये त्याज्यमेव । तथा च **श्रुतिः**–"तस्माद्वैयो न प्रागायुषः स्वः कामी प्रेयात् " इति । अस्यार्थो **विज्ञानेश्वरे**णाभिहितः (पृ. २४ पं. १६)—" स्वर्गफलोद्देशेनायुषः प्रागायुःक्षयो न कर्तव्यो मोक्षार्थिना इति । अतः मोक्षमनिच्छंत्या स्वर्गार्थिन्या अनुगमनं युक्तम् । इतरकाम्यानुष्ठानवत् " इति । सर्वमेतत्स्त्रीधर्मनिरूपणे सविस्तरमधस्तात्प्रतिपादितम् ।

एकचित्यारोहणक्रमः । एकचित्यारोहणप्राकारस्तु **हेमाद्रा**दावुक्तः—
" अथानुमरणे पत्नी स्नात्वा भर्त्रा सहैव तु । पथस्तुरीयमासाद्य सिग्वातैरुपवीज्य च ॥
" नमस्कृत्य चितारूढं भर्तारं तु प्रसन्नधीः । प्रदक्षिणं परीत्याथ भर्तुर्दक्षिणमाविशेत् ॥
" इयं नारीति मंत्रेण शाययेन्मातरं सुतः । ऊहेन वा दहेदूर्ध्वमास्नानात्पतिना समम् ॥
" यद्वा पत्नी तु संकल्प्य प्रयोगे त्वखिले कृते । दह्यमाने पतौ मंत्रान्जपेदध्वर्युणा सह ॥
" पावकं प्रविशेत्तत्र भर्तुश्चोर्ध्वं पृथग्विधिः । उभयोः सह संकल्पः कुंडमेकं पृथक् शिला ॥
" वासस्तिलोदकं पिंडं नग्नप्रच्छादनं नवम् । षोडशं च वृषोत्सर्गः सोदकुंभं पृथक् पृथक् ॥
" सहचर्माधिरोहश्च सपिंडीकरणं तथा । निमित्तहोमवरणे श्राद्धमेकोत्तरं पृथक् ॥
" वैश्वदेवं च पाकश्च होमोऽन्नाद्यैः सहेष्यते " इति ॥

स्मृत्यंतरे च—" आरूह्य पत्नी निधनं गता चेदेकां चितिं निर्मलधीः स्वभर्त्रा ।
"दशाहहोमं श्रपणं च तंत्रात्पिंडोदकादीन्पृथगेव कुर्यात्" ॥ **पितृमेधसारे**—" स्नात्वा शक्तितो दत्वा ब्राह्मणैरभ्यनुज्ञाता प्रीता पथस्तुरीयमासाद्य सिग्वातैरुपवीज्य चितिगतं भर्तारं प्रदक्षिणीकृत्य प्रगम्य चितिमारुह्य भर्तुर्दक्षिणपार्श्वे शयीतात्र कर्ता पत्नीमुपनिपातयति इयं नारीति समानमत ऊर्ध्वं सद्यः पापं निर्धूय दंपती विहरत " ॥ इति । **स्मृतिरत्ने**—
" अनुयाने मृतौ पित्रोरेकशय्याचितिस्तथा । प्रत्येकमञ्जलेर्भेदो नग्नप्रच्छादनादिकम् ।
" एकमेवाग्निदानं स्यादेकग्रावा तिलाञ्जलिः " ॥ इति । एकस्यां शिलायां तिलोदकमित्यर्थः । तिलाञ्जल्यर्था शिला द्वयोरेकेति यावत् । कुंडमेकं पृथक् शिलेत्यनेनास्य विकल्पः ।

१ स–द्वयोः; ग–व्ययोः ।

तत्रैव—
" अस्थिसंचयनं चैव नवश्राद्धं पृथक् पृथक् । वृषोत्सर्जनभेदश्च मासिकानां पृथक् क्रिया ॥
" सपिंडीकरणं चैवं सुतः सर्वं समाचरेत् " ॥
स्मृत्यंतरे—" सहैव भर्त्रा मरणं स्त्रियाश्चेत्सहैव कुर्यात्पितृमेधकृत्यम् ॥
" पिंडोदकादीन्पृथगेव कुर्यात्पिंडस्य संयोजनमत्र भर्त्रा ॥
" मृते भर्तरि या पूर्वं परेऽहन्यनुगच्छति । तस्याः पतिदिने श्राद्धं शालभेदं न कारयेत् ॥
" अग्निकार्ये न भेदोऽस्ति अस्थिसंचयने तथा । एकगर्ते जलं दद्यात्पिंडांश्चैकदिने द्वयोः॥
" एकोद्दिष्टं पृथक्कुर्यात्सपिंडीकरणं सह । तत्र द्वयोर्निर्मितौ द्वौ ब्राह्मणावितरैः सह " ॥
देवलः—" परेद्युरनुयाने तु मरणाहःक्रमेण तु । दहनादिसपिंड्यंतं श्राद्धं कुर्याद्यथाविधि " ॥
क्रियाकल्पैकारिकायाम्—" पतिव्रता त्वन्यदिनेऽनुगच्छेद्या स्त्री पतिं चित्यधिरोहणेन ।
" दशाहके[3] भर्तुरधस्य शुद्धिः श्राद्धद्वयं स्यात्पृथगेककाले ॥
" मृते भर्तरि पूर्वेद्युपरेद्युरनुगच्छति । तस्याः पतिदिने श्राद्धं मृताहस्तु यथातिथि " ॥
स्मृत्यंतरे—"अस्थिसंचयनं चैकं नवश्राद्धं पृथक्पृथक् । वृषोत्सर्जनभेदश्च मासिकानां पृथक्क्रिया ॥
" उपस्थानं तदेकं स्यात्परं तस्याः पृथक् क्रिया । पृथक् श्राद्धं तयोः कुर्यात् गोदानंच पृथक् पृथक् ॥
" सपिण्डीकरणे प्राप्ते सर्वं तद्दिवसे चरेत् ॥
" बहुपत्नीकपक्षे तु मन्त्रावृत्तिः पुनः पुनः । विभज्य पिण्डं दद्यात्तु गार्ग्यस्य वचनं यथा " ॥ इति ।
अन्यत्रापि—" दिनान्तरे यानि सहैव भर्तुः कुर्यन्मृताहे सति कर्म कार्यम् ।
" हिरण्यशल्काः पृथगेव कार्याः पात्राणि भेदद्वयभाञ्जि कुर्यात् " ॥ इति । **अन्यत्रापि**—
" अन्येद्युरप्यनुगतौ शुद्धिः पतिदशाहतः । सहास्थिसंचितिं चैव काले श्राद्धद्वयं भवेत् ॥
"पृथक् पिंडोदकादि स्यात्पत्या पिंडस्य योजनम् । तच्च पिंडं द्विधा कृत्वा पितृपिंडेषु योजयेत्" ॥
वसिष्ठः—
" अनुयाने च पत्या च सपिंडीकरणं सह । अंतर्धाय तृणं मध्ये भर्तुः श्वशुरयोरपि ॥
" स्त्रीपिंडं भर्तृपिंडेन संयोज्ये च पुनः सुतः । पितामहादिभिः सार्धं पितृपिंडं तु योजयेत् " ॥
यमः—
" पत्या चैकेन कर्तव्यं सपिंडीकरणं स्त्रियाः । सा मृतापि हि तेनैक्यं गता मंत्राहुतिव्रतैः " ॥
शातातपः—
" या मृता सुभगा नाथं सा तेन सह पिंडताम् । अर्हति स्वर्गवासेऽपि यावदा भूतसंप्लवम् " ॥
यत्तु **सुमन्तु**वचनम्—
" चित्यारोहणकाले तु षोडशानि पृथक्पृथक् । सपिंडीकरणं तस्या नैव भर्तुः कृते सति " ॥ इति तत्स्त्रियाः पृथक्सपिंडीकरणनिषेधपरम् । **देवलः**—
" तद्दिने वा परादिने भर्तारमनुगच्छति । नवश्राद्धं षोडशं च सपिंडीकरणं तथा ॥
" यथाकाले तु कर्तव्यं प्रतिसंवत्सरं तथा " ॥ इति । यथाकाले भर्तुर्विहिते काले कर्तव्यम् । स्त्रिया अपि कर्तव्यमित्यर्थः । यत्तु **गौतम**वचनं
" एकचित्यां समारूढौ दंपती निधनं गतौ । मासिकानि नवश्राद्धं सपिंडीकरणं पृथक् " ॥ इति

---

१ ग–कं । २ क–काम । ३ क–शवदाहके; ग–तो । ४ ग–तृ ।

यद्पि **व्याघ्रवचनं**—

"पतिव्रता तु या नारी भर्त्तारमनुगच्छति । पिंडदानादिकं श्राद्धं सपिंडीकरणं पृथक्" ॥ इति एतादृशं वचनं निमित्तभेदप्रतिपादनपरम् । अन्यथा सपिंडीकरणं चैकं तत्र द्वयोर्निमित्तौ द्वौ ब्राह्मणावितरैः सह सपिंडीकरणं सहेत्यादिपूर्वोक्तबहुस्मृतिविरोधप्रसंगात् । दुर्मरणाद्युपाधिवशेन काष्ठवदमंत्रकदाहेनानुमृतिः कार्या । दह्यमानतंत्रेण "नानुरोहेत्पतिव्रता" इति **स्मरणात्** । तथा च **कल्पकारिकायाम्**—

"पत्युर्वेदाग्निसंस्कारे पत्न्या अनुगमो मतः। अन्यथा त्वात्मघातः स्यादिति वेदविदो विदुः"॥ इति। चितिभ्रष्टायाः प्रायश्चित्तमुक्तं **स्मृत्यंतरे**—

"चितिभ्रष्टा यदा नारी मोहाच्चलति वा तदा। प्राजापत्यं भवेत्कृच्छ्रं शुद्धा भवति नान्यथा" ॥ इति।

अथ गर्भिणीसंस्कारः ।अत्र **बोधायनः**—" अथ गर्भिण्यंतर्वत्नी म्रियेतात ऊर्ध्वं म्रियेत स्मशानं नीत्वा दहनदेशं जोषयेत्तु सम्यक् चितामपरेण सव्येन प्रेताया उदरं विलिखेत् । 'हिरण्यगर्भः समवर्ततात्र' इत्यनुलेखनदृष्टं कुमारमनुमंत्रयते 'जीवतु मम पुत्रो दीर्घायुत्वाय वर्चस' इति । अथ बालं संस्नापयेयुर्हिरण्यमंतर्धाय जीवंतं ग्राममानयन्ती 'यस्ते स्तनः शशय' इति स्तनं प्रदाय तस्मिन्नुदरे आज्यानि जुहोति । 'शतायुधाय शतवीर्याय' इति पंचभिः 'प्रयासाय स्वाहायासाय स्वाहेत्यनुवाकेन प्राणाय स्वाहा व्यानाय स्वाहा इत्यनुवाकेन पूष्णे स्वाहा पूष्णे शिरसे स्वाहा' इत्यनुवाकेन सूच्या जठरमव्रणं कुर्यात् । प्रेतां चितिमध्यारोप्य विधिना दाहयेत् । अष्टौ[2] धेनुर्भूमिं धेनुमिति च दद्यादिति । **संग्रहे**—

" षण्मासादूर्ध्वमासूते म्रियते यदि गर्भिणी । चितेः पश्चान्निधायैनां सव्योदरमथालिखेत् ॥
" हिरण्यगर्भमंत्रेण समुल्लिख्य तमुद्धरेत् ॥
" मृतश्चेदुद्धृतो गर्भो घृताक्तं निखनेद्भुवि । जीवेच्चेज्जीवतु मम पुत्र इत्यनुमंत्रयेत् ॥
" अंतर्धाय हिरण्यं तमभिषिच्य जलैः शिशुम् । ग्रामं गत्वा शिशोर्दद्याद्यस्ते स्तन इति स्तनम् ॥
" सुरक्षितं कुमारं तं कृत्वा गत्वा शवादिकम् । शतायुधाय इत्याज्यानि जुहुयादुदरे ततः ॥
" प्रयासाय स्वाहेति हुत्वा च प्राणायेत्यनुवाकतः । पूष्णे स्वाहेति हुत्वा च संधायोदरमव्रणम् ॥
" चितिमारोप्य तां प्रेतां शेषं पूर्ववदाचरेत् " ॥ इति ।

शौनकः—"गर्भिणीमरणे प्राप्ते गोमूत्रेण जलैः सह।आपोहिष्ठाभिरब्लिंगैः प्रोक्ष्य भर्ता समाहितः ॥
" प्रेतां श्मशाने नीत्वाथोल्लिख्येत्सव्योदरे ततः । पुत्रमादाय जीवंतस्यान्स्तनं दत्वा सुताय तु ॥
" यस्ते स्तन इत्येतया ग्रामं नीत्वा निधाय च । उदरं चाव्रणं कुर्यात्पृषदाज्येन पूर्य च ॥
" मृद्भस्मकुशगोमूत्रैरापोहिष्ठादिभिस्त्रिभिः । स्नात्वाऽऽच्छाद्यैव वासांसि पितृमेधेन दाहयेत् ।
" मृतो यदि तु पुत्रः स्याद्व्याहृत्या निखनेत्ततः " ॥ इति । **चंद्रिकायाम्**—

" मृता चेद्गर्भिणी नारी तस्याः संस्कार उच्यते । बोधायनभरद्वाजशौनकाद्यैर्यथोदितः ॥
" संकल्प्य पितृमेधं तु कृत्वा दारुचितेः क्रियाम् । पश्चाद्दारुचितेः प्रेतां दक्षिणे वाऽथ गर्भिणी ॥
" निधाय वाऽग्रतंत्राणि कृत्वा दर्व्यादिमार्जनम् । हिरण्यगर्भमंत्रेण विलिखेदसिनोदरम् ॥
" आगर्भदर्शनाद्ग्रामे मृतः स्याच्चरणे क्षिपेत् । दृष्ट्वा जीवतु मम पुत्र इति जीवन्तमभिमंत्रयेत् ॥
" अंतर्धाय हिरण्यं तदभिषिच्य जलैः पुनः । नीत्वा ग्रामं शिशोर्दद्याद्यस्ते स्तन इति स्तनम् ॥

---

१ ग–णेरि । २ ग–अष्टकाधेनुं नीलधेनुं भूमि– ।

" सुरक्षितं कुमारं तं कृत्वा गत्वा शवान्तिकम् । शतायुधाय स्योनांतैः पंचभिरुदरे घृतम् ॥
"यजुर्भिस्तु प्रयासाय स्वाहेती द्वादशाहुतीः । प्राणायेत्यादिभिः पंच चक्षुषेत्यादि पंचभिः"॥ इति।

दशाहानन्तरकृत्यम् । अथ दशाहानंतरकृत्यम् । तत्र **संवर्तः**—
" आशौचे निर्गते कुर्याद्गृहमार्जनलेपने । वाससा जलमाप्लुत्य शुध्येत्पुण्याहवाचनैः " ॥
आप्लुतिश्चैकादशाहे संगवे[१] कार्या । 'अघांते संगवे स्नायात्' इति **स्मरणात्** ॥
वसिष्ठः—" आशौचांते तु कर्तव्यं ब्राह्मणैरभिषेचनम् ॥
" ऋग्भिर्यजुर्भिश्छंदोभिरब्लिंगैः पावमानिकैः । आशिषं च गृहीत्वाथ श्राद्धकर्म समाचरेत् " ॥
व्यासः—
" संपूज्य गंधपुष्पाद्यैः ब्राह्मणान्स्वस्ति वाचयेत् । धर्मकर्मणि संकल्पे संग्रामेऽद्भुतदर्शने ॥
" यज्ञार्थेऽपि प्रतिष्ठादौ सर्वसंस्कारकर्मसु । शुद्धिकामस्तुष्टिकामः श्रेयस्कामश्च नित्यशः " ॥ इति

अथ **वृषोत्सर्गः** । **चंद्रिकायाम्**—
" उत्सृजेत् वृषभं नीलं लोहितं कृष्णमेव वा । मृतो न पश्येन्नरकं गोघाती ब्रह्महा ह्यपि ॥
" पुत्रो वा भ्रातृपुत्रो वा मृतस्यैकादशेऽहनि । उत्सृज्येत् वृषभं नीलं यथावर्णमसंभवे ॥
" प्रेतत्वात्प्रतिमुच्यंते महापातकिनो नराः " ॥ **व्यासः**—
" एकादशेऽन्हि संप्राप्ते प्रेतस्य स्वर्गसाधनम् । वृषमेकं समुत्सृज्य श्राद्धे विप्रांस्तु भोजयेत् " ॥
काश्यपः—" नीलं वाऽप्यथ वा कृष्णं मृतस्यैकादशेऽहनि ।
" वृषं पापविशुध्यर्थं रुद्राणामनुशासनात् । होमकर्मसमायुक्तं रुद्रप्रीतिकरं त्यजेत् ॥
" एकादशेऽन्हि संप्राप्ते यस्य नोत्सृज्यते वृषः । प्रेतत्वान्न विमुच्येत दत्तैः श्राद्धशतैरपि ॥
" विप्रो वा क्षत्रियो वाऽपि वैश्यः शूद्रोऽपि वा तथा । वृषहीनो मृतो याति रौरवं तमसावृतम् ॥
" सप्तजन्मकृतं पापं यद्बाल्ये यच्च वार्धके । तत्क्षणादेव नश्येत वृषोत्सर्गे पितुः कृते ॥
" पितॄनुद्दिश्य रुद्राय होमकर्मसमन्वितम् । उत्सर्गमात्रे रुद्रस्य लोकं यात्यत्र मानवः " ॥
स्मृतिरत्ने—
" एकादशेऽन्हि संप्राप्ते स्नात्वा पुण्याहवाचनम् । कृत्वा चरेद्वृषोत्सर्गं कुर्याच्छ्राद्धं ततः परम् ॥
" शूलं चक्रमथान्यद्वा लांछनं कारयेत्ततः । यस्य देवस्य यो भक्तस्तस्य चिन्हं समालिखेत् " ॥
हेमाद्रौ—" स्वस्वेष्टदेवताचिन्हं पश्चिमदक्षिणपादमूले तप्तेनायसेन विलिखेत् " ॥ इति ।
बोधायनः—"अथ वृषोत्सर्जनम्। तच्च द्विविधं काम्यं नैमित्तिकमिति। नैमित्तिकमेकादशाह्निकमिति। काम्यं कार्तिक्यां वैशाख्यां ग्रहणे संक्रमे वा " इति । **स्मृत्यर्थसारे**—"सपिंडीकरणात्प्रागेवोक्तकाले नैमित्तिकवृषोत्सर्गस्तत्र न मासादिदोषः " इति । **स्मृत्यंतरे** च—
" एकादशाहे षण्मासे त्रिपक्षेऽब्दे तथैव च । वृषोत्सर्गं तु कुर्वीत परस्तादुक्तकालिकः " ॥ इति
कालश्च **पद्धतावुक्तः**—" पूर्वभागेऽथवा मध्ये दिनस्य वृषमुत्सृजेत् ।
" कार्तिक्यां पौर्णमास्यां वा वैशाख्या वाऽपि वा वृषम् । उत्सृजेल्लक्षणैर्युक्तं देवर्षिपितृतृप्तये " ॥
आश्वलायनपरिशिष्टे (३।१८)—" अथ वृषोत्सर्गः । कार्तिक्यां पौर्णमास्यां वैशाख्यां वा जीववत्सायाः पयस्विन्याः पुत्रं द्विहायनमेकहायनं वा नीलं बभ्रुं पिंगलं वा"॥ इति ।

---

१ क्ष–स्मृतम् । २ खग–चामेत् ।

स्मृत्यंतरे—

" उत्सृजेद्वृषभं नीलं पौर्णमास्यां तु वत्सकम् । कार्तिक्यामाश्वयुज्यां वा वैशाख्यां प्रातरेव तु ॥
" एकादशाहादन्यत्र प्रोक्तकालेषु यत्नतः । वृषोत्सर्गे तदा शुक्रबाल्यमौढ्यं न दोषकृत् " ॥ **तथा**—
"प्रेतस्य वत्सरादर्वाग्यदा संस्कारमिच्छति । न कालनियमो ज्ञेयो न मौढ्यं गुरुशुक्रयोः " ॥ इति ।

यत्तु—

" पतिपुत्रवती नारी म्रियते चोभयाग्रतः । वृषं नैवोत्सृजेत्पुत्रो यावत्स्वपितृजीवितम् " ॥ इति तत्केवलवृषोत्सर्गनिषेधपरम् । अत एव **जाबालिः**—

" पतिव्रता सुशीला च पुत्रिणी सुभगा मृता । नोत्सृजेद्वृषमेकं तु सह गामुत्सृजेद्वृषम् ॥
" पुत्रादन्यो यदा तस्याः श्राद्धकर्ता भवेद्यदि । तदैव वृषमुत्सृज्य पश्चाच्छ्राद्धं समाचरेत् " ॥ इति ।

अत एव **स्मृत्यंतरम्**—

" या नारी भर्तृसुतयोरग्रे तु प्रमितिं गता । तस्या अपि वृषोत्सर्गः कर्तव्यस्तु यथाविधि ॥
" अपुत्रा तु यदा नारी म्रियते भर्तुरग्रतः । वृषोत्सर्गो न कर्तव्यः एका गौर्दीयते तदा " ॥

अन्यत्रापि—

" पतिपुत्रवती नारी मृता चेज्जीवभर्तृका । पातिव्रत्येन तल्लोकं वृषहीना न गच्छति ॥
" जीवभर्त्र्यास्तु कर्तव्यं संकल्पश्राद्धमेव हि । पार्वणं च वृषोत्सर्गं कुर्यादायुःक्षयो भवेत्" ॥

जीवभर्त्र्याः अपुत्राया इति शेषः । **लोकाक्षिः**—

" न स्त्रियाश्च वृक्षोत्सर्गः भर्ता कुर्यात्कदाचन । वृषं रुद्रान्वसूंस्त्यक्त्वा सपिंडीकरणावधि" ॥ इति । वृषं रुद्रार्थब्राह्मणभोजनं वस्वर्थब्राह्मणभोजनं च त्यक्त्वा अन्यत्सर्वं सपिंडीकरणावधि कुर्यादित्यर्थः । **अनुमृतिविषये** तु

" पितुरूर्ध्वविधिं सम्यक् कृत्वा मातुस्तु पुत्रकः । वृषमुत्सृज्य पश्चाद्धि पित्रा सह सपिंडनम् " ॥ इति ।

प्रेतत्वविमोचकवृषोत्सर्गे नांदीश्राद्धनिषेधमाह **शातातपः**—

" स्वर्गकामो वृषोत्सर्गे नांदीमुखविधानतः । श्राद्धं कुर्यात्तदन्यस्तु न कुर्यात्प्रेतमोचकः " ॥ इति ।

विज्ञानेश्वरः—

"एकादशेऽन्हि संप्राप्ते यस्य नोत्सृज्यते वृषः । पिशाचत्वं स्थिरं तस्य दत्तैः श्राद्धशतैरपि " ॥ इति ।

स्मृत्यंतरे—

" वृषहीनो मृतो याति रौरवं तमसा वृतम् । उत्सर्गमात्रे रुद्रस्य लोकं यात्यत्र मानवः " ॥

बृहस्पतिः—" कांक्षंति पितरः पुत्रा नरके पातभीरवः ।
"गयां यास्यति यः कश्चित्सोऽस्मान् संतारयिष्यति । करिष्यति वृषोत्सर्गमिष्टापूर्तं तथैव च" ॥ इति ।

पितृगाथा च—

" एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् । यजेत वाऽश्वमेधेन नीलं वा वृषमुत्सृजेत् " ॥

नीलवृषलक्षणमुक्तं **स्मृतिरत्ने**—

" लोहितो यस्तु वर्णेन मुखे पृष्ठे[3] च पांडरः । श्वेतः खुरविषाणाभ्यां स वृषो नील उच्यते " ॥

अत्र वृषालाभे **प्रचेताः**—

" विहिते च वृषोत्सर्गे त्वलाभे शक्त्यसंभवे । प्रेतत्वस्य विमोकार्थं रुद्रानेकादशाशयेत् " ॥

---

१ क्ष-यदि । २ क्ष-कर्ता । ३ ग-पुच्छे ।

बोधायनश्च (३।१७।११) "तासां पयसि पायसं श्रपयित्वा पृथगेकादश ब्राह्मणान्भोजयेत्" इति ।
व्यासोऽपि—
" एकादशभ्यो विप्रेभ्यो दद्यादेकादशेऽहनि । रुद्रानुद्दिश्य कर्तव्यं रुद्रप्रीतिकरं हि तत् "॥
शातातपः—
" एकादशसु विप्रेषु रुद्रानुद्दिश्य भोजयेत् । प्रेतत्वस्य विमोकार्थं मधुक्षीरघृताशनैः " ॥ इति ।
स्मृत्यंतरे तु—
" प्रेतत्वस्य विमोक्षार्थं रुद्रान्वा विधिरूपतः । ब्राह्मणान्भोजयेदष्टौ हिरण्येनौदनेन वा " ॥ इति

अथैकोद्दिष्टम् । तत्र **याज्ञवल्क्यः** (आचारे २५५।२५६)—
" मृतेऽहनि तु कर्तव्यं प्रतिमासं च वत्सरम् । प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि " ॥ इति ।
पैठिनसिरपि—" एकादशेऽन्हि यच्छ्राद्धं तत्सामान्यमुदाहृतम् " इति ।
बृहन्मनुः—" एकादशेऽन्हि कर्तव्यमेकोद्दिष्टं सदा द्विजैः " । **व्याघ्रः**—

" एकादशेऽन्हि संप्राप्ते श्राद्धं दद्याद्यथाविधि । कुर्यादेवात्र वारादितिथिभान्यनिरीक्ष्य वै " ॥
स्मृत्यंतरे—"एकादशेऽहनि श्राद्धं कुर्यादेवाविचारयन् " । इति क्षत्रियादीनामप्याद्यश्राद्धमेकादशेऽहन्येवेति **माधवीयादौ** व्यवस्थापितम् । **चंद्रिकायां** तु—
" आशौचांते ततः सम्यक् पिंडदानं समापयेत् । तत्र श्राद्धं प्रदातव्यं सर्ववर्णेष्वयं विधिः " ॥
वसिष्ठसंहितायां च—" अथातः संप्रवक्ष्यामि श्राद्धं गार्ग्यमतेन वै ।
"एकादशेऽन्हि विप्राणां नृपाणां षोडशेऽहनि । वैश्यानां विंशतिदिने शूद्राणां मासि पूरिते " ॥ इति ।
अगस्त्यः—" एकादशेऽन्हि संप्राप्ते द्विजानामुत्तमं विदुः । एकोद्दिष्टं प्रकुर्वीत भूपतिर्द्वादशात्परे ॥

" षोडशाहात्परे वैश्यः शूद्रस्त्रिंशद्दिनात्परे " ॥ इति । सर्वेष्वेषु वचनेषु ब्राह्मणानामेकादशदिने एकोद्दिष्टविधानात् तेषामेकादशदिन एवैकोद्दिष्टं क्षत्रियाणां तु विकल्पः ।

अत्राहिताग्नेर्विशेषो **जातुकर्णिनोक्तः**—

" ऊर्ध्वं त्रिपक्षाद्यच्छ्राद्धं मृतेऽहन्येव कीर्तितम् । अतस्तु कारयेद्दाहादाहिताग्नेर्द्विजन्मनः " ॥
त्रिपक्षादर्वाक् यत् प्रेतकर्म तद्दाहदिवसादारभ्याहिताग्नेः कार्यम् । त्रिपक्षादूर्ध्वं यच्छ्राद्धं तन्मरणदिवस एव कार्यमित्यर्थः । अतः दशाहकृत्यमेकोद्दिष्टमूनमासिकं च दाहदिनादि कुर्यात् । द्वितीयमासिकं च दाहदिने कुर्यात् । **कालादर्शेऽपि**—

" त्रिपक्षात् पूर्वतः साग्नेर्भवेत्संस्कारवासरे । ऊर्ध्वं मृतदिनेऽनाग्नेः[3] सर्वाण्येव मृताहतः " ॥
पूर्वतः पूर्वत्र कर्तव्यं संस्कारवासरे दाहदिनादि भवेदित्यर्थः ।
व्यासः—" सूतकांते नरः कुर्यादेकोद्दिष्टद्वयं बुधः । सूतके पतिते चापि स्वतंत्रं नातिलंघयेत् " ॥
एकोद्दिष्टद्वयमिति महैकोद्दिष्टमावृत्ताद्यं च तद्द्वयं सूतकांते एकादशाहे कुर्यात् । मध्ये सूतकांतरापातेऽपि स्वतंत्रं महैकोद्दिष्टं नातिलंघयेत्तदैव कुर्यादित्यर्थः । अत एवाह **विष्णुः**—
" आद्यश्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि " इति । तदाह **बृहस्पतिः**—
" एकादशाहे यच्छ्राद्धमेकोद्दिष्टं समाचरेत् । यदि कार्यं न कुर्वीत पुनःसंस्कारमर्हति " ॥ इति ।
अत एव च तत्राकरणे पुनःसंस्कारमाह । एतच्चास्थिसंचयाभावविषयम् । कृते त्वस्थिसंचयने पुनःपिंडोदकमात्रमधस्तात्प्रतिपादितम् । आवृत्ताद्यं तु आशौचसंनिपाते रोगादिना आद्यस्य विघ्ने सति द्वादशाहादि कालांतरे कार्यम् ।

---

१ खग-रुद्र । २ ग-दीनां । ३ क्ष-साग्नेः ।

तथा च **व्यासः**—

" एकादशाहे त्वाद्यस्य संकटं तु यदा भवेत् । द्वादशाहेऽपि कर्तव्यं त्रयोविंशद्दिनेऽपि वा" ॥ इति ।

चंद्रिकायाम्—

" आशौचनिर्गमात्कार्यमाद्यमेकादशेऽहनि । त्रयोविंशद्दिने वाऽपि सप्तविंशद्दिनेऽपि वा " ॥

स्मृत्यर्थसारे—"आद्यश्राद्धस्य विघ्ने तु भार्गववारनंदाचतुर्दशी त्रिजन्मानि त्यक्त्वा ऊनमासिकात्पूर्वमनुष्ठेयम् " इति । **बृहन्मनुः**—

" एकादशेऽन्हि संप्राप्ते यदि चन्द्रस्तु रोहिणीम् । आवसेदुत्तराख्यां वा कुर्यात्तत् द्वादशेऽहनि " ॥

स्मृत्यंतरे—" एकादशाहे यदि शुक्रवारो रोहिण्यथाप्यर्यमतारका वा ।

" भवेच्च कृत्वोदकपिंडदानं श्राद्धं प्रकुर्यादपरेद्युरेव " इति । एवं च एकादशाहे आवृत्ताद्यविघ्ने सति द्वादशाहादावुक्तकाले तत्कृत्वोनमासिकादीनि पंचदश कृत्वा सापिंड्यं कुर्यात् । **पितृमेधसारे**—" सर्ववर्णानां मृताहादेकादशेऽन्हि मध्यान्हे एकोद्दिष्टं कुर्यात् । साग्नेः संस्काराहादेकादशाहे ऽयहतर्पणे चतुर्थेऽहन्येकोद्दिष्टं पंचमे सापिंड्यं एकादशाहे तर्पणे द्वितीयेऽहन्येकोद्दिष्टं तृतीये सापिंड्यं दशाहाभ्यंतरमनेकेषां मरणे तत्तन्मृताहादेकादशाहतिथिभेदेऽपि संघातानुभूत्योः पत्न्या भर्त्रैकादशाह एव सहश्राद्धं कुर्यात् । अत्र संवादवचनानि पूर्वमेवोक्तानि । **स्मृत्यंतरे**—

" एकादशाहे संप्राप्ते त्रीणि कर्माणि कारयेत् । नवश्राद्धं तु पूर्वाण्हे हेम्ना वामेन वा भवेत् ॥

" प्रेतत्वस्य विमोकार्थं वृषभं विसृजेत्ततः । स्नात्वा मध्यान्हवेलायां विप्रानेकादशावरान् ॥

" अशक्तश्चैकविप्रं वा श्रोत्रियं गुणशालिनम् । आमंत्र्य विप्रमाहूय दद्यादभ्यंजनादिकम् ॥

" पादप्रक्षालनं कुर्यात्कुंडे वा मंडले शुभे । गोत्रं नाम च निर्दिश्यासनादीनि कल्पयेत् " ॥

देवलः—

"पूर्वाण्हे दैविकं कार्यं अपराण्हे तु पैतृकम् । एकोद्दिष्टं तु मध्यान्हे प्रातर्वृद्धिनिमित्तिकम्" ॥ इति ।

अत्र **व्यासः**—

" आद्यमासिकमेकश्चेद्भुंक्ते ब्राह्मात् स हीयते । तदेकादशधा भित्वा विप्रेष्वग्नावथापि वा " ॥

तदाह **सत्यव्रतः**—" एकादशेऽन्हि प्रेतार्थं ब्राह्मणानेकादशामंत्र्य मध्यान्हे नानाभक्ष्यान्नरसविन्यासैराशयित्वा विधिवत्पिंडदानवासोहिरण्यदारयुपाच्छत्रोदकुम्भदक्षिणा गुणवति विप्रे[3] पात्रे दद्याच्छय्यां च । तस्य स्वस्त्ययनादिधर्माः प्रवर्तंते" इति । एवं च दशब्राह्मणान्प्रेतत्वविमोकार्थं गुणवंतमेकमाद्यश्राद्धं निमित्तार्थं भोजयित्वा गुणवति तस्मिन्दक्षिणां दद्यात् । अशक्तौ एकं वा भोजयेत् । तथा च **अत्रिः**—

"प्रेतार्थं सूतकांते तु ब्राह्मणान्भोजयेद्दश । आद्यश्राद्धनिमित्तं तु एकमेकादशेऽहनि ॥

" वस्त्रालंकारशय्यादि पितुर्यद्वाहनादिकम् । गंधमाल्यैः समभ्यर्च्य श्राद्धभोक्त्रे प्रदापयेत् ॥

" अशक्त एकं संभोज्य शक्त्या दद्याच्च दक्षिणाम् " ॥ इति ।

एकोद्दिष्टस्वरूपनिरूपणम् । एकोद्दिष्टस्वरूपमाह **याज्ञवल्क्यः** (आचारे २५१।२५२)— ।

" एकोद्दिष्टं दैवहीनमेकार्घ्यैकपवित्रकम् । आवाहनाग्नौकरणरहितं ह्यपसव्यवत् ॥

" उत्तिष्ठतामित्यक्षय्यस्थाने विप्रविसर्जने । अभिरम्यतामिति वदेत् ब्रूयुस्तेऽभिरताः स्म ह" ॥ इति ।

एक उद्दिष्टो यस्मिन्श्राद्धे तदेकोद्दिष्टमिति कर्मनामधेयम् । दैवहीनं विश्वेदेवैरहितम् । एकार्घ्यपात्रं एकदर्भपवित्रं च आवाहनेनाग्नौकरणेन होमेन च समंत्रकेण रहितं अपसव्यवत् प्राचीनावीत-

१ ग-एकाह । २ ग-रण्यदारयु । ३ क्ष-ब्राह्मणे । ४ ग-विश्व ।

ब्रह्मसूत्रवदक्षय्योदकस्थाने उत्तिष्ठतामिति वदेद्विप्रविसर्जने अभिरम्यतामिति ब्रूयात् । ते च अभिरतास्महे इति ब्रूयुरित्यर्थः । **पराशरः**—

" आवाहनक्रियादैवनियोगरहितं हि यत् । एकोऽर्घ्यस्तत्र दातव्यस्तथैवैकं पवित्रकम् ॥
" प्रेताय पिंडो दातव्यो भुक्तवत्सु द्विजातिषु । प्रश्नश्च तत्राभिरतिर्यजमानद्विजन्मनाम् " ॥ इति ।

पद्धतौ—

" एकमुद्दिश्य यच्छ्राद्धं एकोद्दिष्टं प्रकीर्त्यते । एकादशेऽन्हि मध्यान्हे तत्कर्तव्यं विधाय च ॥
" पिंडमेकं प्रदातव्यमाऽऽशौचं च प्रदानतः । एकादशेऽह्नि कुर्वीत दानं होमादिकं तपः "॥ इति ।

स्मृत्यंतरे—

" आद्यश्राद्धं निमित्तं तु एकमेकादशेऽहनि । प्रेतार्थे सूतकान्ते तु ब्राह्मणान्भोजयेद्दश ॥
"अशक्त एकं संभोज्य शक्त्या दद्याच्च दक्षिणाम् । हिरण्यं मेदिनीं गां च वस्त्राणि विविधानि च ॥
" यद्यदिष्टतमं लोके गंधाश्च कुसुमानि च । शय्याप्युपानहौ छत्रं यद्भुक्तं मृत्युकालतः ॥
" यदिष्टं जीवितस्य स्यात्तद् दद्यात्तस्य यत्नतः । तं विसृज्य द्विजं भुक्तं स्नायादनवलोकितः ॥
" श्राद्धं कुर्याद्यथाकालं सपिंडीकरणं तथा " ॥ इति । **बोधायनः**—" अथैकोद्दिष्टेषु नाग्नौकरणं नाभिश्रवणं न पूर्वं न दैवं न धूपं न दीपं न स्वधा न नमस्कारो"॥ इति **रत्नावल्यां**—

" अनुज्ञाद्विगुणौ दर्भौ जपादिस्वस्तिवाचनम् । पितृशब्दः ससंबंधः शर्मशब्दस्तथैव च ॥
" पात्रालंभोपपात्रं च उल्मुकोल्लेखनादिकम् । पितृप्रश्नः सविकिरः शेषप्रश्नस्तथैव च ॥
" प्रदक्षिणं विसर्गश्च सीमांतगमनं तथा । अष्टादशपदार्थांश्च प्रेतश्राद्धे विवर्जयेत् " ॥ इति ।

स्मृत्यर्थसारे—

" श्रोत्रियं वेदविद्विप्रं अहरेव नियोजयेत् । तस्यैव श्मश्रुकर्माणि स्नानमभ्यज्य कारयेत् ॥
" एकोद्दिष्टे भवेदेक उद्देश्यो ब्राह्मणस्तथा । अर्घ्यपात्रं भवेदेकं पाणावेकाहुतिर्भवेत् ॥
" एकपिंडो भवेत्तस्मिंस्तदहरेव निमंत्रणम् । दैवं धूपं तथा दीपं स्वधाशब्दं च वर्जयेत् "॥ इति ।

तदहरेव तस्मिन्नेवाहनि निमंत्रणं कुर्यात् । **स्मृत्यन्तरे**—

" प्रेतकार्येषु सर्वत्र सद्य एव निमंत्रणम् । पितृकार्येषु सर्वेषु पूर्वेद्युः स्यान्निमंत्रणम् "॥ इति **स्मृतेः**। पाणावेकाहुतिरिति पाणिहोमविधानादावाहनाग्नौकरणरहितमिति । अग्नौ होमनिषेधः । तथा **चाश्वलायनीयकारिका**—

" चरुमुद्धृत्याज्यसिक्तमन्नं मेक्षणदारुणा । हस्तेऽवदानमात्रेण तूष्णीं हुत्वाऽऽहुतिद्वयम् " ॥ इति । प्रेतार्थविप्रहस्ते तूष्णीं जुहुयात् । पित्रर्थविप्रहस्ते तु समंत्रकमेव पितृयज्ञाहुतिं पाणौ जुहुयान्मंत्रपूर्वकमिति **वृद्धमनुस्मरणात्तत्रै**कोद्दिष्टे पाणौ हुतमन्नं न प्राश्नीयात् । किंतु लौकिकाग्नौ प्रक्षिपेत् । तथा **पारिजाते**—

" हस्ते हुतं तु नाश्नीयादब्दं भुक्तानुमासिकम् । अग्नौ प्रक्षेपणं कार्यं सपिंडीप्रेतकर्मसु " ॥ इति । अत्र **बोधायनेन** तु विशेषेण लौकिकेन होम उक्तः—"अथैकोद्दिष्टेष्वादित एव प्राचीनावीतं कृत्वा दक्षिणाप्रत्यक्प्रवणे स्थंडिलं कृत्वाऽद्भिरवोक्ष्याग्निं प्रतिष्ठापयति तत्रैवाथैनं पृच्छति करिष्यामीति कुरुष्वेति इतरः प्राहाभ्यनुज्ञातो दर्व्यामुपस्तीर्य सर्वस्मात्सकृदवदायाभिघार्य दक्षिणतो भस्ममिश्रांगारान्निरूह्य तेषु जुहुयात् । प्रेतायामुष्मै यमाय च स्वाहेति तद्धुतमहुतं च भवति" इति ।

१ ग-पनं । २ कख-न्मु । ३ ग-त्रै । ४ खग-धर्मेण ।

स्मृत्यंतरे—

"एकादशेऽन्हि मध्यान्हे एकोद्दिष्टं कृतं च यत् । प्रेतस्य च यमस्यापि द्वयोः प्रीतिकरं भवेत्" ॥ इति । एकोद्दिष्टप्रयोगस्तु स्वस्वगृह्योक्तप्रकारो द्रष्टव्यः । **आपस्तंबादि**भिरनुक्ते प्रयोगे तु **बोधायनोक्त** आश्रयणीयः ।

" स्वसूत्रेऽविद्यमाने तु परसूत्रेण वर्तते । बोधायनमतं कृत्वा स्वसूत्रफलभाग्भवेत् " ॥ इति नियमात् । अत्र नूतनभांडेषु पाकमाह **वैखानसः**—" सूतकप्रेतयोर्वापयित्वा मृन्मयानि भांडानि पुराणानि त्यक्त्वा नवानि परिगृह्य पाचयित्वा श्राद्धं कुर्यात् " इति । अर्घ्यादिसत्कारे भोजने च प्रेतार्थब्राह्मणः प्रत्यङ्मुखो निवेशनीयः । तथा **गौतमः**—"दक्षिणाग्रेषु दर्भेषु प्रेतार्थमेकं विप्रं प्रत्यङ्मुखमासादयेत्" इति । **वैखानसः**—"तिलदर्भास्तृते विष्टरे प्रत्यङ्मुखमासादयेदेकोद्दिष्टः" इति । **सुंदरराजीये**—" प्राङ्मुखौ विश्वेदेवावुदङ्मुखौ प्रागंतान्पितॄन्प्रेतं प्रत्यङ्मुखमासादयेत् " इति । 'प्रत्यङ्मुखनिमित्तं निवेश्य' इति **सरण्यादौ** च दर्शनात् प्रत्यङ्मुखत्वमेव तस्य सिद्धम् ।

" एकोद्दिष्टे तु यद्भोक्तुरभोज्यं शिष्टभोजनम् । चंद्रसूर्योपरागे वा शिष्टमन्नं च वर्जयेत् " ॥ इत्यादिना एकोद्दिष्टान्ननिषेधात् नात्र शेषाभ्यनुज्ञा कार्या । **मनुः**—

" असपिंडक्रियाकर्म द्विजातेः संस्थितस्य तु । अदैवं भोजयेच्छ्राद्धं पिंडमेकं च निर्वपेत्" ॥ इति । असपिंडक्रियाकर्म सपिंडीकरणात्प्राक् श्राद्धकर्मेति यावत् । तदेकोद्दिष्टविधिना कृत्वा एकं पिंडं च दत्वा तदप्सु विसर्जयेत् । **पितृमेधसारे**—" भुक्तशिष्टमन्नं पिंडं सर्वाणि दर्भहोमपात्राणि चाप्सु प्रक्षिप्य स्नात्वा गृहमेत्य पुण्याहं वाचयेत् " इति । **बोधायनः**—

"एकोद्दिष्टान्त एव स्यात्संस्कर्तुः शुद्धता त्वघात् । पिंडोदकप्रदानेन पुण्याहोक्त्या विशुध्यति" ॥ इति । अत्र तु ब्राह्मणालाभे लौकिकाग्निं प्रतिष्ठाप्य दक्षिणामुखो यमाय सोमं सुनुतेति ऋचा घृतमिश्रेण पायसेन ग्राससंमिता द्वात्रिंशद्वाहुतीर्हस्तेन जुहुयात् " ।

आवृत्ताद्यमासिकम्

एवमिदमाद्यस्वतंत्रैकोद्दिष्टं ब्राह्मणेऽग्नौ वा कृत्वा पुनरपि ब्राह्मणे कर्तव्यम् । तथा च **स्मृत्यंतरे**—

" एकादशेऽन्हि संप्राप्ते विप्राभावे कथं भवेत् ॥

" पायसं घृतसंमिश्रं हस्तेन ग्राससंमितम् । यमाय सोममित्येव द्वात्रिंशज्जुहुयाच्चरुम् ॥

" अध्वर्युर्वाग्यतो भूत्वा प्रसव्यं दक्षिणामुखः । श्राद्धसिद्धिमवाप्नोति नात्र कार्या विचारणा" ॥ इति ।

काश्यपः—

" एकोद्दिष्टे तु संप्राप्ते विप्राभावे कथं भवेत् । आवाह्य सुसमिद्धेऽग्नौ पायसं जुहुयाद्धविः ॥

" पौरुषेण तु सूक्तेन त्वावृत्या ग्राससंमितम् । अभ्यर्च्य गंधवस्त्राद्यैरुदकुंभं च दक्षिणाम् ॥

" ततः स्नात्वा पुनश्श्राद्धं कुर्यात्तु ब्राह्मणो बुधः " ॥ इति । परितोऽग्निं गन्धादिभिरभ्यर्च्य दक्षिणामुदकुंभं चाग्निसमीपे निधाय तानि ब्राह्मणेभ्यो दद्यादित्यर्थः । **चंद्रिकायां** तु—

" एकोद्दिष्टे तु संप्राप्ते विप्राभावे कथं भवेत् । उदीरतामितिमंत्रेण जुहुयाद्घृतपायसम् ॥

" स्वगृह्योक्तविधानेन सूक्तेन पुरुषस्य च" ॥ इति । 'उदीरतामवर उत्परास' इत्यादीनामष्टानामृचां चतुरावृत्त्या द्वात्रिंशदाहुतयो भवंति । पुरुषसूक्तस्य षोडशर्चस्य द्विरावृत्त्या तथा भवंति । यथास्वकुलाचारमिह मंत्रव्यवस्था । अत्र पिंडदानमुक्तं **श्रीधरीये**—

" एकोद्दिष्टे तु संप्राप्ते विप्राभावे हुते सति । पिंडमेकं प्रदातव्यं आशौचं चाप्रदानतः " ॥ इति ।

अत्र गोभिलः[1]—"ब्राह्मणं भोजयेदाद्ये होमः कार्योऽथ[2] वाऽनले। पुनश्च भोजयेद्विप्रं द्विरावृत्तिर्भवेदिति"॥
व्यासोऽपि—" सूतकांते नरः कुर्यात् एकोद्दिष्टद्वयं बुधः ।
" ब्राह्मणं भोजयेदाद्ये होमः कार्योऽथवाऽनले । पुनश्च भोजयेद्विप्रं आवृत्तिद्वयसिद्धये " ॥ इति ।
कालादर्शेऽपि—" आद्यश्राद्धं द्विजेऽग्नौ वा कुर्यात्पुनरपि द्विजः " ॥ इति ।
ननु 'सापिंड्यात्प्राङ्मासिकानि स्वस्वकाले कृतानि तु। न पुनस्तानि वै कुर्यादकृतानि पुनश्चरेत्'॥ इति गर्गस्मरणात्कथमाद्यैकोद्दिष्टस्यावृत्तिरिति चेन्न तद्वचनस्य द्वादशाहव्यतिरिक्तकाले कर्तव्यसापिंड्यविषयत्वात् । ननु द्वादशाहे सापिंड्येऽपि तस्य पूर्वभावित्वे न सदोषस्तदवस्थ इति चेन्न । तस्य सर्वदा सापिंड्यात्पूर्वभावित्वेऽपि

" अर्वाक्संवत्सराद्यस्य सपिंडीकरणं कृतम् । षोडशानां द्विरावृत्तिं कुर्यादित्याह गौतमः" ॥
इत्याद्यावृत्तिस्मरणात् ।

" एकादशे कृतानां तु मासिकानां पुनः कृतिः । सूतिकांते पुनः कुर्यदेकोद्दिष्टद्वयं बुधः ॥
" पुनश्च भोजयेद्विप्रं द्विरावृत्तिर्भवेत् इति ॥

" सपिंडीकरणश्राद्धं द्वादशाहे यदा भवेत् । तदापकृष्य रुद्राहे श्राद्धान्येव तु षोडश " ॥
इत्यादिस्मरणात् । आर्थिकात् कण्ठोक्तस्य बलीयस्त्वाच्च । यत्तु
" आवृत्तिरन्यमास्यानां द्वादशाहे सपिंडने । तथा नावर्त्तयेदाद्यं मले त्वावृत्तिरिष्यते " ॥ इति
तस्यायमर्थः । द्वादशाहसपिंड्ये अन्यमास्यानां ऊनमासिकादिपंचदशमासिकानां पुनः सपिंड्यानंतरं स्वे स्वे काले यथावृत्तिः क्रियते तथा आद्यमेकोद्दिष्टं सापिंड्यानंतरं नावर्तयेत् । किंतु मलमासमृतिश्चेत् द्वादशाहसापिंड्यानंतरं शुद्धमासे मृततिथौ तदावर्तयेदिति । तच्चाग्रे वक्ष्यते ।
यदपि जाबालिवचनं—" श्राद्धं कृत्वा तु तस्यैव पुनः श्राद्धं न तद्दिने " इति ।
यच्चान्यत्—" नैकश्राद्धद्वयं कुर्यात् समानेऽहनि कस्यचित् " इति तदेकोद्दिष्टव्यतिरिक्तविषयम् । तस्य एकस्मिन्दिने आवृत्तिविधानात् । द्वादशाहेतरकाले सापिंड्ये अद्यैकोद्दिष्टमेकमेव न तु द्वयमिति त्रिपक्षादौ सापिंड्ये स्वकाले कृतस्य ऊनमासिकादेर्न पुनःकरणम्
"सापिंड्यात् प्राक् मासिकानि स्वस्वकाले कृतानि तु। न पुनस्तानि वै कुर्यादकृतानि पुनश्चरेत्"॥ इति
गर्गस्मरणात् ।
" अर्वागब्दाद्यत्र यत्र सपिंडीकरणं कृतम् । तदूर्ध्वमासिकानां तु यथाकालमनुष्ठितिः " ॥ इति
कार्ष्णाजिनिस्मरणात् ।
" वत्सरांते तु सापिंड्यं यश्चिकीर्षति स द्विजः । मासिकानि यथाकालं कुर्यादेव यथाविधि ॥
" त्रिपक्षाद्येषु कालेषु सापिंड्यं यश्चिकीर्षति । अब्दावशिष्टमास्यानामपकर्षस्तदा भवेत् ॥
" अपकृष्य कृतानां च यथाकालं पुनः कृतिः " ॥ इति स्मृतिरत्ने अभिधानाच्च ।
यत्तु "द्वादशाहे कृतानां तु यथाकालं पुनः कृतिः" इति तस्यार्थः । द्वादशाहे कृतानामूनमासिकादीनां पुनः कृतिरिति । एवं च द्वादशाहे सापिंड्ये आद्यश्राद्धादिषोडशमासिकानामप्यावृत्तिः । आद्यस्य तु एकादशाह एवावृत्तिः । इतरेषां तु एकादशाहे द्वादशाहे वा कृतानामूनमासिकादीनां स्वस्वकाले पुनः करणम् । त्रिपक्षे तु सापिंड्ये ऊनद्वितीययोः स्वस्वकाले कृतयोः न पुनः करणम् । तदुत्तरभाविनि तु मासिकानि अपकृष्य कृत्वा सपिंडीकरणात् परमपि स्वस्वकाले पुनः

---

१ कखग–गौतमः । २ क–होमः कार्योऽथ वाऽनले ।

कुर्यात् । एवं त्रिमासादौ सापिंड्येऽपि तत्पूर्वकृतानां नावृत्तिः । तदुत्तरभाविनामेव पुनःकरणम् । एवं वत्सरांतसपिंडीकरणे आद्यश्राद्धादीनां षोडशानामपि मासिकानां स्वस्वकाले कृतानां न पुनः कृतिः । एतदेवाभिप्रेत्य **गालवः**—

"त्रिपक्षादिषु कालेषु सापिंड्यं यश्चिकीर्षति । शिष्टानां मासिकानां च यथाकालं पुनः क्रिया "॥ इति । **गोभिलः**—

" यस्य संवत्सरादर्वाग् विहिता तु सपिंडता । विधिवत्तानि कुर्वीत पुनः श्राद्धानि षोडश " ॥

अंगिराः—

" यस्य संवत्सरादर्वाक्सपिंडीकरणं कृतम् । मास्यानि सोदकुंभं च देयं तस्यापि वत्सरम् " ॥

विज्ञानेश्वरीये—

"श्राद्धानि षोडशाकृत्वा न तु कुर्यात्सापिंडता । श्राद्धानि षोडशापाद्य विदधीत सपिंडनम्" ॥ इति । "प्रेतसंस्कारकार्याणि यानि श्राद्धानि षोडश । यथाकाले तु कार्याणि नान्यथा मुच्यते तु सः"॥इति ।

स्मृत्यंतरेऽपि—

" यदा संवत्सरादर्वाक्सापिंड्यं कर्तुमिष्यते । आवर्तं षोडशादीनां तदा कर्तव्यमेव हि " ॥

संग्रहे—

"स्वकाले तानि कुर्वीत सपिंडीकरणादधः । सापिंड्येऽब्दादधस्तानि कुर्यात्काले स्वके पुनः" ॥ इति ।

पैठीनसिः—" अर्वाक्सपिंडीकरणात्कुर्याच्छ्राद्धानि षोडश " । इति ॥

षोडशश्राद्धानि । षोडशश्राद्धान्याह **विज्ञानेश्वरः**—

"एकादशे त्रिपक्षे च षण्मासे मासिकाब्दिके । षोडशैतानि श्राद्धानि संस्मृतानि मनीषिभिः"॥ इति । एकादशाहे विहितमाद्यश्राद्धम् । एतच्च ऊनमासिकस्याप्युपलक्षकम् । षण्मासे ऊनषाण्मासे विहितमूनषाण्मासिकम् । मासिकं प्रतिमासं विहितम् । आब्दिकशब्दः ऊनाब्दिकपरः । तथा च **जातुकर्णिः**—

"द्वादशप्रतिमास्यानि आद्यषाण्मासिके तथा । त्रैपक्षिकाब्दिके चेति श्राद्धान्येतानि षोडश" ॥ इति । आद्यषण्मासिकाब्दिकशब्दा ऊनमासिकोनषाण्मासिकोनाब्दिकपराः । एकादशेऽन्हिकेनाद्येन सह द्वादश प्रतिमास्यानि । **गालवः**—

" ऊनषाण्मासिकं षष्ठे मास्यूने तूनमासिकम् । त्रैपक्षिकं त्रिपक्षे स्यादूनाब्दं द्वादशे तथा" ॥ इति ।

कालादर्शे—

" एकादशेऽन्हि मास्यूने आद्ये षष्ठे तथांतिमे । प्रतिमासं मृतेऽन्ह्यब्दं स्युस्त्रिपक्षं च षोडश " ॥ एकादशेऽन्हि मरणादेकादशेऽन्हि । अब्दशब्दसमभिव्यहारादंतिमशब्देन संवत्सरांतिमो मास उच्यते। आद्ये मास्यूने षष्ठे मास्यूने संवत्सरांतिमे मासि द्वादशे मासि ऊने अब्दमिति "कालाध्वनोरत्यंतसंयोगः " इति द्वितीया संवत्सरपूर्तिपर्यंतम् । प्रतिमासं मासे मासे मृतेऽहनि मरणादिने त्रिपक्षे च मरणदिनतृतीयपक्षे च षोडशमासिकाख्यानि श्राद्धानि स्युः । एतेषु षोडशेषु कालेषु षोडशमासिकानि कार्याणीत्यर्थः । **स्मृत्यंतरे**—'एकादशे भवेदाद्यं मास्यूने ह्यूनमासिकम् । " त्रैपक्षिकं त्रिपक्षे स्यादूनषाण्मासिकं तथा । प्रतिमासं मृताहेषु ऊनाब्दं चेति षोडशम् " ॥

---

१ ग–तंनं । २ क्ष–तुह्यूनमाद्ये ।

[illegible]—
"द्वादशाहे यदा कुर्यात्सपिंडीकरणं सुतः । मध्यान्हे चैव सर्वाणि कुर्याच्छ्राद्धानि षोडश ॥
"सपिंडीकरणात्पूर्वं मासिकेषु कृतेषु च । अपकृष्यैकोद्दिष्टेन पिंडमेकं विधीयते" ॥
एकमिति प्रतिमासिकमेकैकमित्यर्थः । तथा च **स्मृत्यंतरे**—
"मासिकानां तु सापिंड्यात् पूर्वं तु युगपत्कृतौ । प्रत्येकं पिंडदानं स्यादग्नौ प्रेताहुतिः सकृत्" ॥ पंचदशावदानं कृत्वा एकां प्रेताहुतिं कुर्यादित्यर्थः । **पैठीनसिः**—
"षाण्मासिकाब्दिकश्राद्धे स्यातां पूर्वेद्युरेव ते । मासिकानि मृताहे स्युर्दिवसे द्वादशेऽपि वा ॥
"त्रिपक्षादौ तु सापिंड्ये मासिकानि मृताहनि" ॥ त्रिपक्षादौ सापिंड्ये तत्पूर्वमृततिथौ तदुत्तरमासिकान्यपकृष्य कृत्वा सापिंड्यं कुर्यान्न त्वेकादशाहे द्वादशाहे वा । द्वादशाहे सापिंड्ये तस्मिन्नेव दिने मध्यान्हे पंचदश श्राद्धानि कृत्वा अनंतरं सपिंडीकरणं कुर्यात् । संवत्सरांतसापिंड्ये तत्तन्मासमृततिथौ तत्तन्मासिकानि कुर्यात् । ऊनमासिकादीनि च मृततिथेः पूर्वं यथोक्तकाले कुर्यादित्यर्थः । द्वादश इत्येकादशदिनस्याप्युपलक्षणम् ।
"नवश्राद्धं च तत्रैव षोडशश्राद्धमेव च । न कृतं चेत् परे कुर्यात् सपिंडीकरणाहनि" ॥ इति स्मरणादेकादशदिने षोडशश्राद्धाकरणे द्वादशदिने कुर्यादित्यर्थः । **यत्तु**—
"एकोद्दिष्टं नवश्राद्धं श्राद्धान्यपि च षोडश । एकस्मिन्दिवसे कुर्यादेकोद्दिष्टं तु निष्फलम्" ॥ इति द्वादशाहसपिंडीकरणे एकोद्दिष्टादीन्येकादशाहे कुर्यात् । अन्यथा एकोद्दिष्टं निष्फलमिति । तथा च **प्रचेताः**—
"षोडशानीह सर्वाणि कुर्यादेकादशाहनि । सपिंडीकरणं चापि कुर्याद्वा द्वादशेऽहनि" ॥ इति ।
गौतमोऽपि—
"देशकालादिवैषम्यान्मृत्युरोगादिशंकया । एकादशेऽन्हि कार्याणि ह्यपकृष्यापि षोडश" ॥ इति ।
गालवोऽपि—"एकचित्यां समारूढौ दंपती निधनं गतौ ।
"एकोद्दिष्टं षोडशं च भर्त्तुरेकादशेऽहनि । द्वादशाहे तु संप्राप्ते पिंडमेकं द्वयोः क्षिपेत्" ॥ इति ।
स्मृतिरत्नेऽपि—
"एकादशेऽन्हि कुर्वाणः पूर्वाण्हे सर्वमाचरेत् । अपराण्हे तु सापिंड्यं कुर्यादित्याह **शालंकः** ॥
"अन्यस्मिंस्तु दिने कुर्वन्पूर्वपूर्वदिने चरेत् । अथवा यदि तत्रापि सर्वं चैकदिने भवेत्" ॥ इति । अन्यस्मिन्निति द्वादशाहादौ सापिंड्यं कुर्वन् ततः पूर्वदिने षोडशश्राद्धं कुर्यादित्यर्थः ।
"एकादशे कृतानां तु मासिकानां पुनः कृतिः । सपिंडीकरणश्राद्धं द्वादशाहे यदा भवेत् ॥
"तदापकृष्य रुद्राहे श्राद्धान्येव तु षोडश" ॥ इत्यादि **बहुस्मृतिसंमतत्वात्** शिष्टाचाराच्च द्वादशाहे सपिंडीकरणे एकादशे वा द्वादशे वाऽहनि षोडशश्राद्धकरणं युज्यते । यत्तु **संग्रहवचनम्**—
"एकोद्दिष्टस्य दिवसे सपिंडीकरणं विना । श्राद्धं कुर्यात्पितृक्रोधात्क्षयमाप्नोति संततिः" ॥ इति अत्र सांगं सपिंडीकरणं गृह्यते । षोडशश्राद्धं सपिंडीकरणं नवश्राद्धं च विना एकोद्दिष्टदिने कर्तव्यं श्राद्धांतरमंतरितं स्वदेयं च श्राद्धं तत्र न कुर्यादित्यर्थः । एतच्चैकोद्दिष्टदिने सपिंडीकरणमाहिताग्निविषयम् । तदग्रे वक्ष्यते । यत्तु **जाबालिवचनं**—"श्राद्धं कृत्वा तु तस्यैव पुनःश्राद्धं न तद्दिने" इति यदपि **दक्षवचनम्**—"नैकः श्राद्धद्वयं कुर्यात्समानेऽहनि कस्यचित्" इति तदेकोद्दिष्टषोडश-

---

१ क–शाण्डिल; ख–शक्रयः । २ क्षु–त्य ।

श्राद्धव्यतिरिक्तविषयम् । तयोस्तत्र विधानादुद्देश्यैक्येऽपि नवश्राद्धैकोद्दिष्टश्राद्धसमुच्चयवदेकोद्दिष्टद्वयवच्च न दोषः । तदेवमेकादशाहे द्वादशाहे वा मासिकानि सर्वाण्यपकृष्य कृत्वा द्वादशाहे सापिंड्यं कुर्यात् । सापिंड्योत्तरकालभावीनि स्वस्वकाले पुनश्च कुर्यात् ।

आशौचाद्यन्तरितमासिकादिविषयम् । आशौचाद्यंतरितं मासिकमुत्तरमासिकाह एव तंत्रतः कुर्यात् । न पृथक् । पाकहोमादिः पिंडदानं तु पृथगेव । **कालादर्शे**—

“आपदाद्यकृतं यत्तु कुर्यादूर्ध्वं मृताहतः । न पृथक् पाकहोमादिः पिण्डदानं पृथक्पृथक्” ॥ इति। आदिशब्देनाशौचोपसंग्रहः । आपदादिनाकृतमंतरितं यन्मासिकं तदूर्ध्वंमृताहतः उत्तरमासमृतदिने कुर्यादित्यर्थः । उत्तरमासमृततिथौ विधानादंतरितमासिकमूनमासिकदिने न कार्यम् । ऊनदिनमतिक्रम्य मृततिथावेव कार्यम् । **ऋष्यशृंगोऽपि**—

“एकोद्दिष्टे तु संप्राप्ते यदि विघ्नः प्रजायते । मासेऽन्यस्मिंस्तिथौ तस्यां कुर्यादंतरितं च तत्” ॥इति। **कालादर्शटीकायामिदं** व्याख्यातम्—एकोद्दिष्टपदमुभयविधमासिकोपलक्षणम् । अंतरितं तदुत्तरमाससंबंधि च मासिकमुत्तरमृताहे कुर्यादिति । एतच्चाद्यश्राद्धव्यतिरिक्तविषयम् । आद्यश्राद्धांतराये तु अकृतसंचयस्य दहनादिदशमदिनपर्यंतं प्रेतकार्याणि पुनरप्येकाहे न कर्तव्यानि । कृतसंचयस्य दहनसंचयव्यतिरिक्तनवश्राद्धादि पुनः कर्तव्यमिति पूर्वमेवोक्तम् । **कण्वः**—

“नवश्राद्धं मासिकं च यद्यदंतरितं भवेत् । तदुत्तरत्र सातंत्र्यादनुष्ठेयं प्रचक्षते” ॥ इति । **माधवीये चंद्रिकायां** च विशेषोऽभिहितः—अंतरितं मासिकमुत्तरमासतिथौ सांतत्र्येण कर्तव्यमित्येतत्सूतकव्यतिरिक्तनिमित्तांतरेण विघ्ने समुत्पन्ने सपिंडीकरणात्पूर्वं प्रतिमासं मृताहे विहितैकोद्दिष्टमासिकश्राद्धविषयम् । आशौचनिमित्तविघ्ने तु एकोद्दिष्टमासिकश्राद्धमपि सूतकानंतरमेव ‘तान्येव तु पुनः कुर्यात्’ इति विहितोनमासिकश्राद्धं[3] च सूतकेनांतरितं सूतकानंतरमेव । सूतकव्यतिरिक्तनिमित्तांतरेण विघ्ने सति उत्तरमासमृततिथौ कर्तव्यम् । यत्तु **स्मृत्यंतरम्**—

“तदहश्चेत्प्रदुष्येत केनचित्सूतकादिना । सूतकानंतरं कुर्यात्पुनस्तदहरेव वा” ॥ इति। अत्र श्राद्धाहे सूतकेन दुष्टे[4] सति सूतकानंतरं कुर्यादिति पक्षः । पुनस्तदहरेव वेति पक्षस्तु आदिशब्दोक्तनिमित्तांतरेण दुष्टमासिश्राद्धविषयः । तथा **षट्त्रिंशन्मतम्**—

“मासिकाब्दे तु संप्राप्ते ह्यंतरामृतसूतके । वदंति शुद्धौ तत्कार्यं दर्शे वापि विचक्षणाः” ॥ इति । एतदुक्तं भवति—आशौचमनंतरकालो मुख्यकालः संनिकृष्टत्वाच्छ्रेष्ठः । दर्शकालस्तु मुख्यकालप्रत्यासत्यभावात्ततो जघन्य इति । दर्शग्रहणं शुक्लकृष्णैकादश्योरुपलक्षणार्थम् । अत एव **मरीचिः**—

“श्राद्धविघ्ने समुत्पन्ने न विज्ञाते मृतेऽहनि । एकादश्यां तु कर्तव्यं कृष्णपक्षे विशेषतः” ॥ **देवस्वामिना**ऽप्येवं विषयव्यवस्था कृता—‘एकोद्दिष्टे तु संप्राप्ते यदि विघ्नः प्रजायत’ इत्यादिवचनं सूतकाशौचव्यतिरिक्तनिमित्तांतरतस्तदहर्विघाते सूतकाशौचविघाते तु सूतकानंतरं कुर्याद्वदंति शुद्धौ तत्कार्यमित्यावगंतव्यमिति । अन्ये तु उत्तरमासमृततिथौ कर्तव्यताप्रतिपादकवचनमेकोद्दिष्टमासिकविषयं सूतकानंतरदिने दर्शादौ वा कर्तव्यताप्रतिपादकवचनं सपिंडीकरणानंतरभाव्यनुमासिकविषयमित्याहुः । यथोचितमिह द्रष्टव्यम् ।

आशौचाद्यन्तरितोनमासिकविधिः । ऊनमासिकान्यतिक्रांतानि ‘मासिकाब्दे तु संप्राप्ते’ इति षट्त्रिंशन्मतवचनानुसारेण परमासे दर्शादौ कार्याणीति केचिदाहुः ।

---

१ क्ष-वि । २ क्ष-श्राद्धविषयम् । ३ क्ष-तानु । ४ ग-नष्टे ।

अपरे तु—

" त्रैपक्षिकोनषाण्मास्ये ऊनाब्दिकमथाचरेत् । एतेषामेव काले तु न पुनःकरणं भवेत् ॥ "ऊनानां नापकर्षः स्यात्पुनरप्यपकर्षणे । उत्कर्षश्चापि न भवेत्प्रमादांतरितेषु तु" । इति वचनमात्रमुदाहरंत ऊनानां स्वस्वकाले अकृतानामुत्कर्षो नास्ति किंतु लोप एवेत्याहुः । ऊनान्यूनेषु कुर्वीतेतिवचनमपि व्याकुर्वते । द्वित्रिदिनैरूनेषु कालेषु ऊनानि कुर्यात् । अंतरितमूनमूनांतरे योजयेदिति नार्थ इति ।

ऊनमासिककालः । ऊनानां कालमाह **गालवः**—

"ऊनषाण्मासिकं षष्ठे मासार्धे तूनमासिकम् । त्रैपक्षिकं त्रिपक्षे स्यादूनाब्दं द्वादशे तथा " ॥ इति ।

स एव—

" त्रिभिर्वा दिवसैरून एकेन द्वितयेन वा । आद्यादिषु च मासेषु कुर्यादूनानि वै द्विजः"॥ इति ।

गौतमश्च[1]—

"एकद्वित्रिदिनैरूने त्रिभागेनोन एव वा । श्राद्धान्यूनाब्दिकादीनि कुर्यादित्याह गौतमः" ॥ इति ।

कार्ष्णाजिनिः[2]—

" ऊनान्यूनेषु मासेषु विषमेषु दिनेषु च । त्रैपक्षिकं त्रिपक्षे स्यान्मृताहेष्वितराणि तु " ॥ इति ।

भविष्यत्पुराणे—

"षष्ठे षाण्मासिकं कार्यं द्वादशे मासि चाब्दिकम् । त्रैपक्षिकं भवेद्वृत्ते[3] त्रिपक्षे विषमे दिने "॥ इति । वृत्ते प्रवृत्त इत्यर्थः । **पितृमेधसारे**—"प्रथमषष्ठद्वादशमासेषु द्वित्रिदिनैरूनेषूनमासिकानि कुर्यात् । त्रिभागशेषेष्वित्येके । द्वादशाहे वाऽर्धमासे वा ऊनमासिकमित्यपरे " इति ।

कालादर्शे—" त्रिभिर्द्वाभ्यामुतैकेन मास्यूनेषूनमासिकम् । ऊनषाण्मासमूनाब्दमन्नेनैव समाचरेत् ॥ " त्रिभागशेषमासे तु कुर्यादिति हि केचन । त्रैपक्षिकं त्रिपक्षे तु प्रवृत्ते विषमे दिने ॥ "मासिकान्यपि चोनानि चाष्टाविंशतिमे दिने"॥ इति । अन्नेनैवेति अन्नेनैव मासिकानि कुर्यात् नामेन । " श्राद्धविघ्ने द्विजातीनामामश्राद्धं प्रकीर्तितम् । अमावास्यादिनियतं माससांवत्सराहृते " ॥ इति **हारीतस्मरणात्** । मासं मासिकं सांवत्सरं मृताहे प्रत्याब्दिकम् । **पद्धतौ**—

" सप्तविंशदिनादूर्ध्वं त्र्यहःसूनमासिकम् । चत्वारिंशद्दिनादूर्ध्वं पंचाहःसु त्रिपक्षिकम् ॥
" तथा दशसु षाण्मासं सप्तत्यतिशतात्परम् । ऊर्ध्वं पंचादशाहःसु चत्वारिंशच्छतत्रयात् ॥
" ऊनाब्दिकं प्रकुर्वीत तथा चाब्दिकमाचरेत् " ॥

ऊनमासिकवर्ज्यकालः । अत्र वर्ज्यमाह **गार्ग्यः**—

" नंदायां भार्गवदिने चतुर्दश्यां त्रिपुष्करे । ऊनश्राद्धं न कुर्वीत गृही पुत्रधनक्षयात् " ॥

मरीचिः—"द्विपुष्करेषु नंदासु सीनिवाल्यां भृगोर्दिने । चतुर्दश्यां च नोनानि कृत्तिकासु त्रिपुष्करे"॥ इति । त्रिपुष्करं नाम—

"यदा भद्रातिथीनां स्यात्पापवारेण संयुतिः । खण्डक्षितीशयोगश्चेत् स त्रियोगस्त्रिपुष्करः " ॥

द्वयोर्मेलने द्विपुष्करम् । द्वितीयासप्तमीद्वादशीनां भद्रतिथीनां पुनर्वसूत्तरफल्गुनीविशाखोत्तराषाढपूर्वाभाद्रपदनक्षत्राणां भानुभौमशनैश्चरवाराणां च त्रयाणां मेलने त्रिपुष्करम् । " भद्रा त्रिपदनक्षत्रं भानुभौमार्किवासराः । त्रिपुष्करा इति ख्यातास्तत्र नूनं न कारयेत् " ॥ इति **स्मरणात्** । द्वयोर्मेलनं द्विपुष्करम् । प्रतिपत्षष्ठ्येकादश्यो नंदाः । **कालादर्शे**—

" त्रिपुष्करे च नंदासु दर्शे भार्गववासरे । चतुर्दश्यां न कुर्वीत ऊनानि त्रीणि वन्हिभे " ॥ इति । वन्हिभं कृत्तिकानक्षत्रम् । **स्मृत्यंतरे**—

---

१ ग-श्र । २ खग-व्यासः । ३ क्ष-मैत्रे ।

"आग्नेयमैन्द्रं सार्पं च तिस्रः पूर्वाश्च नैर्ऋतम् । यद्येषूनत्रयं कुर्याज्ज्येष्ठपुत्रो विनश्यति" ॥ इति ।

वत्सरान्तसापिण्ड्ये अत्यब्दसापिण्ड्ये च निर्णयः ।

वत्सरांतसापिण्ड्ये उपाधिवशात्प्रागकृतान्यूनादीनि सर्वाणि मासिकानि द्वादशमासिकाहे ऊनाब्दिकाहे वा आब्दिकात्पूर्वदिने सपिंडीकरणाहे वा कुर्यात् । एवं पित्रोः पत्न्यादिव्यतिरिक्तानां च संघातमरणे एकोद्दिष्टांतकृत्यव्यतिरेकेण मासिकसापिंड्यादिनिषेधाद्वत्सरांते सापिंड्यविधानाच्चाब्दिकात्पूर्वं सापिंड्याहे मासिकानि कुर्यात् । अत्यब्दसापिण्ड्ये कृतान्यकृतानि च मासिकादीनि कृष्णैकादश्यां दर्शे मृताहे सपिंडीकरणाहे वा कुर्यात्

"श्राद्धानि षोडशापाद्य विदधीत सपिंडताम्" इति **लोकाक्षिवचनात्**

"कृतेषु मासिकेष्वेषु सपिंडीकरणं विना । संवत्सरे व्यतीते तु पुनस्तानि समाचरेत्" ॥ इति **शंखस्मरणाच्च** । मासिकानां सपिंडीकरणांगत्वात्स्वकाले सपिंडीकरणाकरणे कालान्तरे तत्करणे कृतैरप्यंगभूतैर्मासिकैः सह सापिंड्यं कुर्यात् । तथा च **कात्यायनः**—

"प्रधानस्याक्रियायां तु सांगं तत्क्रियते पुनः । तदंगस्याक्रियायां तु नावृत्तिर्नैव तत्क्रिया" ॥ इति ।

ननु तर्हि प्रधानभूतसापिंड्यमात्रानुष्ठानेन कृतं मासिकानुष्ठानमिति चेन्मैवम्

"यस्यैतानि न दत्तानि प्रेतश्राद्धानि षोडश । पिशाच्यत्वं स्थिरं तस्य दत्तैः श्राद्धशतैरपि" ॥ इति तदकरणे प्रत्यवायस्मरणात् । कालं विदधाति **गर्गः**—

"कृष्णपक्षे तु पंचम्यामष्टम्यां दर्श एव वा । एकादश्यां तु कर्तव्यं स्वकालाकरणे सति" ॥ इति ।

वत्सरांतसापिंड्येऽत्यब्दसापिंड्ये च मासिकानामावृत्तिर्नास्ति । किं तु सपिंडीकरणात्पूर्वं सकृदेव कुर्याद्यस्य संवत्सरादर्वाक्सपिंडीकरणमित्यादिभिर्वत्सरात्प्रागेव सपिंडीकरणे तदूर्ध्वमासिकानां पुनःकरणविधानाद्विज्ञानेश्वरेण तु वत्सरादर्वाक्सपिंड्येऽपि मासिकानां पुनःकरणं नांगीकृतम् । तथा हि यदा प्राक् संवत्सरात्सपिंडीकरणं तदा षोडशश्राद्धानि कृत्वा सपिंडीकरणं कार्यमिति वा सपिंडीकरणं कृत्वा स्वकालेषु वा तानि कर्तव्यानीति संशयः । उभयथावचनदर्शनात्

"श्राद्धानि षोडशाकृत्वा न तु कुर्यात्सपिंडताम् । श्राद्धानि षोडशापाद्य विदधीत सपिंडताम्" ॥ इति ।

तथा—

"यस्य संवत्सरादर्वाक्सपिंडीकरणं भवेत् । मासिकं सोदकुंभं च देयं तस्यापि वत्सरात्" ॥ इति ।

तत्र सपिंडीकरणं कृत्वा स्वकाल एव तानि कर्तव्यानीति प्रथमः कल्पः । अप्राप्तकालत्वेन प्रागनधिकारात् । यदपि वचनं षोडशश्राद्धानि कृत्वैव सपिंडीकरणं संवत्सरात्प्रागपि कर्तव्यमिति सोऽयमापत्कल्पः । एतद्विज्ञानेश्वरेणोक्तम्—

"यदा संवत्सरादर्वाक्सपिंडीकर्तुमिच्छति । आवर्तनं षोडशानां तदा कर्तव्यमेव हि" ॥

इत्यादिपूर्वोक्तबहुस्मृतिविरोधात् शिष्टाचारीविरोधाच्चोपेक्षणीयम् ।

शुभागमे मासिकापकर्षणम् । सपिंडीकरणात्पूर्वं कृतान्यपि मासिकानि शुभागमे तत्पूर्वमेव तदुत्तरभावीनि पुनरपकृष्य कुर्यात् । न स्वकाले पुनः कुर्यात् । यदाह **शाट्यायनिः**—

"सपिंडीकरणादर्वागपकृष्य कृतान्यपि । पुनरप्यपकृष्यंते वृध्युत्तरनिषेधनात् ॥

"जन्मत्रयेनापकर्षो न नंदासु भृगोर्दिने । न भानुभौमदिवसे न दोषोऽस्ति मृतेऽहनि" ॥ इति ।

मृतेऽहनि जन्मत्रयादावपि अपकर्षदोषो नास्तीत्यर्थः । **स एव**—

"प्रेतश्राद्धानि शिष्टानि सपिंडीकरणं तथा । अपकृष्यापि कुर्वीत कर्ता नांदीमुखे द्विजः" ॥ इति ।

---

१ क्ष–त्त्याब्दि । २ क्ष–त्काले । ३ क्ष– + करणं ।

कालादर्शे—"वृद्धौ तान्यपकृष्यापि कुर्यात्तन्मृतिवासरे" इति । वृद्धिः शुभं तत्तस्मिन्नुपस्थिते आगामिमासिकान्यपकृष्या वृद्धेः पूर्वं मरणदिने कुर्यादित्यर्थः । **कात्यायनः**—

" निर्वर्त्य वृद्धितंत्रं तु मासिकानि न तंत्रयेत् । अयातयामं मरणं न भवेत्पुनरप्यनु " ॥

अयातयामं नवम् ।

" प्रेतसंस्कारकार्याणि यानि श्राद्धानि षोडश । यथाकाले तु कार्याणि नान्यथा मुच्यते ततः " ॥

इत्यादीनि वचनानि द्वादशाहादौ सापिंड्यार्थमपकृष्टमासिकानां स्वे स्वे काले पुनःकरणपराणि त्रिपक्षादौ सापिंड्ये उत्सवार्थमपकृष्टानां न पुनःकरणं उत्सवार्थान्येव सापिंड्यार्थानि च भवंतीति च वचनादावृत्तिर्बाध्यते । सपिंडीकरणात्परं तु शुभागमे सापिंड्यार्थमपकृष्टानां शुभार्थं पुनरप्यपकर्षः । न स्वकाले पुनःकरणमिति ज्ञेयम् । मातापितृविषये तु शुभागमे अपकृष्य पुनः कृतान्यपि मासिकानि पुनः स्वकाले त्रिरावृत्त्या पुत्रः कुर्यात् । तथा च **विश्वादर्शे**—

" शुभकर्म न कुर्वीत मासिकान्यसमाप्य तु । समाप्य च पुनः कुर्यात्पित्रोः सांवत्सरं[1] ततः ॥

" मृतस्य तृप्तये कुर्यात् द्विस्त्रिरावृत्तिभेदतः । द्विस्त्रिरावृत्तिदोषोऽत्र नास्ति मासिककर्मणि" ॥ इति ।

अत्र मातापितृविषये " निर्वर्त्य वृद्धितंत्रं तु मासिकानि न तंत्रयेत् " इति निषेधो नास्तीत्यर्थः ।

शिवस्वामिमतेऽपि—" न मासिकश्राद्धविधिः पुनः स्यात् नांदीमुखानंतरमुक्तकाले ।

" समाप्य पित्रोस्तु पुनश्च कुर्यात् सांवत्सरं मासिककर्मकाले ॥

" प्राप्तेऽवश्ये मासिकं कर्म चेष्टं कुर्यात्पूर्वं शोभने शोभनात्तु ।

" पश्चात्पित्रोः शेषकार्याणि कुर्यान्मासि श्राद्धान्यब्दपूर्तेर्न चान्यः " ॥ इति । **पारिजातेऽपि**—

"मासिकान्यसमाप्यैव नांदीश्राद्धं न कारयेत् । समाप्य च पुनः काले पित्रोर्मासिकमाचरेत्" ॥ इति ।

स्मृत्यंतरे—

" शुभागमेऽपकृष्टानां न पुनः कृतिरिष्यते । द्विस्त्रिरावृत्तिदोषस्तु मातापित्रोर्न विद्यते " ॥

अन्यत्रापि—

" व्रतसीमंतचौलेषु विवाहे च द्वितीयके । अलभ्ययोगयज्ञेषु प्राप्तेषु यदि मध्यतः ॥

" अपकृष्य तदा कुर्यान्मासिकानि मृतेऽहनि । मासिकानि पुनः कुर्यात्पित्रोरेव विचक्षणः " ॥ इति ।

तथा—

" अपकृष्य यदा कुर्यान्मासिकानि शुभागमे । तदा मृतेऽन्हि कर्तव्यं शुभात्पूर्वदिनेऽपि वा" ॥ इति ।

प्रयोगपारिजाते तु—

" ऊनानां नापकर्षः स्यात्पुनरप्यपकर्षणे । उत्कर्षश्चापि न भवेत्प्रमादांतरितस्य तु ॥

" मासिकान्यवशिष्टानि मातापित्रोः परस्य वा । वृद्धिपूर्वदिने कुर्यात्पित्रोः काले पुनः कृतिः" ॥ इति ।

हेमाद्रौ—

" जातके नामकरणे तथान्नप्राशनेऽपि च । आयतौ दयितानां च मासिकं नापकर्षयेत् " ॥ इति ।

एतच्च ज्ञातिविषयम्—

" गर्भादिप्राशनांतानि प्राप्तकालं न लंघयेत् । ज्ञातीनां प्रेतकार्यं तु कुर्वन्नपि च कारयेत् " ॥ इति **स्मरणात्** ।

---

१ क्ष-रांततः ।

गर्भादिव्यतिरिक्तविषये तु **चतुर्विंशतिमते**—

" भ्राता वा भ्रातृपुत्रो वा सपिंडः शिष्य एव वा । सपिंडीकरणं कृत्वा कुर्यादभ्युदयं ततः " ॥ इति । मातापितृ[illegible]वर्गाणां त्वभ्युदयोद्देश्यत्वे प्रेतकार्यं पूर्वमेव कर्तव्यम्

" पित्रादीनां प्रमीतानां त्रयाणां तु सपिंडनम् । कृत्वा तु मंगलं कुर्यान्नेतरेषां कथंचन " ॥ इति स्मृतेः । एवं च जातकर्मादिव्यतिरिक्तपुंसवनाद्यावश्यकशुभागमे मुख्यकर्तुर्मासिकापकर्षः स्वकाले नास्ति पुनःकरणम् । मातापित्रोस्तु पुनःकरणमिति निर्णयः ।

शुभागममंतरेण मासिकापकर्षे दोषमाह **गार्ग्यायणिः**—

" अंतरेणैव यो वृद्धिं प्रेतश्राद्धानि कर्षति । स श्राद्धी नरके घोरे पितृभिः सह मज्जति " ॥ इति । अनेन मासिकोत्सवयोः कर्तुरेकस्यैव शुभागममंतरेण मासिकापकर्षे प्रत्यवायविधानात्

" अपकृष्यापि कुर्वीत कर्ता नांदीमुखे द्विजः " ॥ इति

" नांदीश्राद्धे तु संप्राप्ते मासिकान्यकृतानि तु । शुभकर्तैवापकृष्य कुर्यान्नान्य इति स्थितिः" ॥ इति

" मासिकानि यथाकालं कुर्वाणस्य यथाविधि । यदि वृद्धिस्तथा भूयः शिष्टमप्यपकर्षतः " ॥ इति च कर्तुरेवाभ्युदये मासिकापकर्षविधानात् " निर्वर्त्य वृद्धितंत्रं तु मासिकानि न तन्त्रयेत् " इति वृद्धितन्त्रमासिकयोरेककर्तृकत्वस्मरणाच्च य एव मासिककर्ता स एवोत्सवकर्ता चेत्तदा मासिकापकर्षः । न तु भ्रात्रादेः पुंसवनादिशुभागमे मासिकापकर्षः । यत्त्विदं वचनं

" नांदीमुखे देवतात्वं येषां पितृगणस्य तु । मासिकान्यपकृष्यैव कृत्वा तेषां शुभं भवेत्" ॥ इति । अत्र बहुवचनं द्वादशविधपुत्राभिप्रायं येषामौरसादीनां संस्कर्तॄणां पितृगणस्य नांदीश्राद्धे देवतात्वं तेषां शुभागमे मासिकापकर्ष इत्यर्थः । तथा हि **पितृमेधसारे**—" तच्चैतदेके भ्रात्राद्युत्सवेऽप्यपकृष्य कुर्वते । तन्न तथा कुर्यात् । मासिककर्तुरेवोत्सवे मासिकापकर्षवचनात्समानकर्तृकत्वस्मरणाच्च कर्तुरेवाभ्युदये मासिकापकर्षः " इति ।

मासिकानां पार्वणैकोद्दिष्टविधानव्यवस्था । मासिकानि सपिंडीकरणात् प्रागेकोद्दिष्टविधानेन कुर्यात् । सपिंडनात्परमनुमासिकानि यो यथा प्रत्याब्दिकश्राद्धं करोति पार्वणमेकोद्दिष्टं वा स तथा कुर्यात् । यदाह **पैठीनसिः**—

" सपिंडीकरणादर्वाक् कुर्वन् श्राद्धानि षोडश । एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि तु ॥

"सपिंडीकरणादूर्ध्वं यदा कुर्यात्तदा पुनः । प्रत्यब्दं यो यथा कुर्यात्तथा कुर्यात्स्वतान्यपि" ॥ इति ।

स्मृतिरत्नेऽपि—

" यस्य संवत्सरादर्वाक्सपिंडीकरणं कृतम् । प्रतिमासं तथा तस्य प्रतिसंवत्सरं तथा " ॥ इति ।

प्रत्याब्दिके पार्वणविधिः । प्रत्याब्दिके पार्वणविधानमाह **जमदग्निः**—

" आपाद्य सह पिंडत्वमौरसो विधिवत्सुतः । कुर्वीत दर्शवच्छ्राद्धं मातापित्रोः क्षयेऽहनि" ॥ इति ।

शातातपोऽपि—

"सपिंडीकरणं कृत्वा कुर्यात्पार्वणवत्सदा । प्रतिसंवत्सरं विद्वान् शाकलेयोदितो विधिः " ॥ इति । त्रिपुरुषोद्देशेन क्रियमाणं पार्वणम् ।

" एकमुद्दिश्य यच्छ्राद्धमेकोद्दिष्टं प्रकीर्तितम् । त्रीनुद्दिश्य तु यत्तद्धि पार्वणं मुनयो विदुः " ॥ इति **कण्वस्मरणात्** ।

---

१ क्ष-पु । २ क्ष-पित्रा । ३ **कखग-शाट्यायनिः** । ४ क्ष-कृत्ये । ५ क्ष-पितॄणां ।

जातूकर्णिः—"अत ऊर्ध्वं न कर्तव्यमेकोद्दिष्टं कदाचन । सपिंडीकरणांतं च तत्प्रोक्तमिति **मुद्गलः** ॥
" प्रेतत्वाच्चैवमुत्तीर्णः प्राप्तः पितृगणं तु सः । च्यवते पितृलोकात्तु पृथक्पिंडेन योजितः ॥
" सपिंडीकरणादूर्ध्वं पृथक्त्वं नोपपद्यते । पृथक्त्वे तु कृते पश्चात्पुनः कार्या सपिंडता "॥ इति ।
स एव—
" पितुः पितृगणस्थस्य कुर्यात्पार्वणवत्सुतः । प्रत्यब्दं प्रतिमासं च विधिर्ज्ञेयः सनातनः" ॥ इति ।
पितृगणस्थस्य सपिंडीकृतस्येत्यर्थः । **कार्ष्णाजिनिरपि**—
" अत ऊर्ध्वं न कर्तव्यमेकोद्दिष्टं कदाचन । सपिंडीकरणांतं च प्रेतस्यैतदमंगलम् " ॥ इति ।
यमः—
" यः सपिंडीकृतं प्रेतं पृथक्पिंडेन योजयेत् । विधिघ्नस्तेन भवति पितृहा चोपजायते " ॥ इति ।
माधवीये—
" प्रदानं यत्र यत्रैषां सपिंडीकरणात्परम् । तत्र पार्वणवच्छ्राद्धं एकोद्दिष्टं त्यजेद्बुधः " ॥ इति ।
मनुरपि (३।२४७-२४८)—
" आ सपिंडक्रियाकर्म द्विजातेः संस्थितस्य तु । अदैवं भोजयेच्छ्राद्धं पिंडमेकं च निर्वपेत् ॥
" सहपिंडक्रियायां तु क्रियायामस्य धर्मतः । अनयैवावृता कार्यं पिंडं निर्वापणं सुतैः " ॥ इति ।
असपिंडक्रियाकर्म सपिंडीकरणात्प्राक्श्राद्धकर्म अदैवमेकोद्दिष्टविधानेनेति यावत् । सहपिंडक्रियायां सपिंडीकरणे कृते अनयैवावृता उक्तेन मासिकश्राद्धप्रकारेण पार्वणविधानेनेत्यर्थः । **स्मृतिरत्नेऽपि**—
" एकोद्दिष्टं तु कर्तव्यं प्रतिमासं मृतेऽहनि । सपिंडीकरणादूर्ध्वं मातापित्रोस्तु पार्वणम् ॥
" यत्र यत्र प्रदातव्यं सपिंडीकरणात्परम् । तत्र पार्वणवच्छ्राद्धं कार्यमभ्युदयादृते " ॥ इति ।
एवमादीन्यन्यान्यपि वचनान्यूनमासिकेष्वाब्दिके प्रत्याब्दिके च पार्वणप्रतिपादकानि संति ।
याज्ञवल्क्यस्तु मासिकाब्दिकप्रत्याब्दिकेषु एकोद्दिष्टविधानमाह (आचारे २५५-२५६)-
" मृतेऽहनि तु कर्तव्यं प्रतिमासं तु वत्सरम् । प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि " ॥ इति ।
एकोद्दिष्टपदं पूर्वस्मादिहानुवर्तते । तथा च **विज्ञानेश्वरेण** व्याख्यातम्—(पृ. ७७ पं. १)
"मृतेऽहनि प्रतिमासं यावत्संवत्सरमेकोद्दिष्टं कार्यं सपिंडीकरणादूर्ध्वं प्रतिसंवत्सरं एकोद्दिष्टं कार्यम् । आद्यं सर्वैकोद्दिष्टं प्रकृतिभूतमेकोद्दिष्टमेकादशेऽहनि कार्यम्" इति । **स्मृत्यंतरमपि** तेनोदाहृतम्—
"वर्षे वर्षे तु कर्तव्या मातापित्रोस्तु सत्क्रिया । अदैवं भोजयेच्छ्राद्धं पिंडमेकं च निर्वपेत् "॥ इति ।
यमोऽप्याह—
" सपिंडीकरणादूर्ध्वं प्रतिसंवत्सरं सुतैः । मातापित्रोः पृथक्कार्यमेकोद्दिष्टं कृतेऽहनि " ॥ इति ।
व्यासस्तु पार्वणं प्रतिषेधति—
" एकोद्दिष्टं परित्यज्य पार्वणं कुरुते तु यः । अकृतं तद्विजानीयाद्भवेच्च पितृघातकः " ॥ इति ।
एवमेकोद्दिष्टविधिवचनानि बहूनि सन्ति । इत्येवं वचनविप्रतिपत्तौ मतांतरनिरासपूर्वकं व्यवस्थापितं **विज्ञानेश्वरेण**[2] (पृ. ७७पं. २०-२४) तथा हि " **दाक्षिणात्या** व्यवस्थामाहुः—' औरसक्षेत्रजाभ्यां मातापित्रोः क्षयाहे पार्वणमेव कर्तव्यम् । दत्तादिभिरेकोद्दिष्टम् ' इति **जातुकर्ण्य**वचनात् ।
" प्रत्यब्दं पार्वणेनैव विधिना क्षेत्रजौरसौ । कुर्यातां इतरे कुर्युरेकोद्दिष्टं सुतादयः " ॥ इति तदसत् । न ह्यत्र क्षयाहवचनमस्ति अपि । तु प्रत्यब्दमिति सन्ति । च क्षयाहव्यतिरिक्तानि प्रत्यब्दश्राद्धानि अक्षयतृतीयावैशाखीप्रभृतिषु । अतो न क्षयाहविषयपार्वणैकोद्दिष्टव्यवस्थापना ।

१ क्ष-स्त । २ पृ. ७७ पं. २०-३३, पृ. ७८ पं. १-६ ।

तथा च–"एकोद्दिष्टं हि कर्तव्यमौरसेन मृतेऽहनि। सपिंडीकरणादूर्ध्वं मातापित्रोर्न पार्वणम्" ॥ इति पैठीनसिना "औरसेनाप्येकोद्दिष्टमेव कर्तव्यम्" इत्युक्तम्। **उदीच्याः** पुनरेवं व्यवस्थापयन्ति अमावास्यायां भाद्रपदकृष्णपक्षे मृताहे पार्वणमन्यत्र मृताहे एकोद्दिष्टमेवेति

"अमायां वा क्षयो यस्य प्रेतपक्षेऽथ वा पुनः। पार्वणं तत्र कर्तव्यं नैकोद्दिष्टं कदाचन" ॥ इति **स्मरणात्**। एतदपि नाद्रियंते वृद्धाः। अनिश्चितमूलेनानेन वचनेन निश्चितमूलानां बहूनां क्षयाहमात्रपार्वणविषयाणां वचनानाममावास्याप्रेतपक्षमृताहविषयत्वेन संकोचस्यायुक्तत्वात्। सामान्यवचनानर्थक्याच्च। अतोऽत्र पाक्षिकैकोद्दिष्टनिवृत्तिफलतया 'अमायां वा क्षयो यस्य' इति नियमविधानं युक्तम्। न चैकोद्दिष्टविधिवचनानां मातापितृक्षयाहविषयत्वेनातिसंकोचस्यायुक्तत्वात् सामान्यवचनानर्थक्याच्च पार्वणवचनानां च तदन्यक्षयाहविषयत्वेन व्यवस्था युक्ता। उभयत्रापि मातापितृसुतग्रहणस्य विद्यमानत्वात्।

"मातापित्रोः पृथक्कार्यमेकोद्दिष्टं मृतेऽहनि। कुर्वीत दर्शवच्छ्राद्धं मातापित्रोः क्षयेऽहनि" ॥ इति।

यदपि **कैश्चिदुच्यते** मातापित्रोः क्षयाहे साग्निः पार्वणं कुर्यान्निरग्निरेकोद्दिष्टम्

"वर्षे वर्षे सुतः कुर्यात्पार्वणं योऽग्निमान् द्विजः। पित्रोरनग्निमान् धीर एकोद्दिष्टं मृतेऽहनि" ॥ इति **सुमंतस्मरणादिति** तदपि सत्प्रतिपक्षत्वादुपेक्षणीयम्

"बह्वग्नयस्तु ये विप्रा ये चैकाग्नय एव वा। तेषां सपिंडनादूर्ध्वमेकोद्दिष्टं न पार्वणम्" ॥ इति **स्मरणात्तत्रैव** निर्णयः। संन्यासिनां क्षयाहे सुतेन पार्वणमेव कर्तव्यम्। तच्चाग्रे वक्ष्यते। अमावास्यायां क्षयाहे च पार्वणमेव। 'अमायां वा क्षयो यस्य' इत्यादिवचनस्योक्तरीत्या नियमपरत्वादन्यत्र क्षयाहे पार्वणैकोद्दिष्टयोर्व्रीहियववद्बृहद्रथंतरवद्विकल्प एव। तत्र वंशसमाचारव्यवस्थायां न विकल्पः। अव्यवस्थायां सत्यां ऐच्छिको विकल्प" इति। अयं **विज्ञानेश्वरोक्तप्रकारः**। **अन्यैस्तु** व्यवस्थापितम्—एकोद्दिष्टवचनानि **बोधायनीय**विषयाणि

"वर्षे वर्षे तु कर्तव्या मातापित्रोस्तु सत्क्रिया। अदैवं भोजयेच्छ्राद्धं पिंडमेकं च निर्वपेत्" ॥ इति **बोधायनस्मरणात्पार्वणवचनानि** तदितरविषयाणीति सामान्येन प्रवृत्तानामुभयविधवचनानामेवं व्यवस्था प्रमाणं वेत्युक्तम्। **अपरैः** अत्र शिष्टाचारबाहुल्यादनुमासिकाब्दिकप्रत्याब्दिकेषु पित्रोः पार्वणमेव। सपिंडीकरणात्प्राक्तनेषु एकोद्दिष्टमेवेति निर्णयः। अत एव **सुमंतुः**—

"कर्तव्यं पार्वणं राजन्नेकोद्दिष्टं कथंचन।

"सुबहून्यत्र वाक्यानि मुनिगीतानि चक्षते। अल्पेतराणि राजेंद्र एकोद्दिष्टं प्रचक्षते" ॥ इति।

अत्र पार्वणपक्षे सुबहूनि बहुतराणि वाक्यानि प्रचक्षते धर्मशास्त्रज्ञाः। अल्पेतराणि कतिपयानि वाक्यान्येव एकोद्दिष्टं प्रचक्षत इत्यर्थः। तेनैकोद्दिष्टं परित्यज्य पार्वणपक्ष एव परिग्राह्य इत्याह **स एव**—

"तस्माद्वचनसामर्थ्यात्सपिंडीकरणात्परम्। मासिकाब्दिकवृध्यादि कुर्यात्पार्वणधर्मतः" ॥ इति।

पितामहादीनां पार्वणविधिः। एवं सपिंडीकरणात्परं पौत्रादयश्च पार्वणं कुर्युः

"पुत्रः पौत्रः प्रपौत्रश्च दौहित्रो दुहिता स्नुषा। दंपती च क्रमादेते श्राद्धं कुर्युः त्रिपूरुषम्" ॥ इति **स्मरणात्**। अपुत्रपितृव्यादीनामपि पार्वणमेव

"अपुत्रस्य पितृव्यस्य भ्रातुश्चैवाग्रजन्मनः। मातामहस्य तत्पत्न्याः श्राद्धं पितृवदाचरेत्" ॥ इति **स्मरणात्**।

१ पृ. ७८ पं. १-१८।

तथा **चंद्रिकायाम्**—"पितृमात्रग्रजादीनां पार्वणेन पुनः क्रिया" इति। पार्वणविधानेन मासिकानां पुनःकरणमित्यर्थः। **स्मृत्यंतरे च**—"पत्न्यग्रजपितृव्याणां पितृवत्कल्प इष्यते।
"स्त्रीश्राद्धे वृणुयात् भर्ता पत्नीमातृपितामहीः। पितृव्याग्रजयोः श्राद्धे तत्तत्पितृपितामहान्"॥इति। भगिन्यादीनां सापिण्ड्यात्परमेकोद्दिष्टविधानेन मासिकादिः। उक्तव्यतिरिक्तानामेकोद्दिष्टमाह **कात्यायनः**—" संबंधिबांधवादीनामेकोद्दिष्टं तु सर्वदा " इति। **गार्ग्योऽपि**—
"अपुत्रा ये मृताः केचित्स्त्रियो वा पुरुषास्तथा। तेषामपि च देयं स्यादेकोद्दिष्टं न पार्वणम्"॥ इति।
स्त्रियो भगिन्यादयः। पुरुषाः कनिष्ठभ्रात्रादयः। तथा च **सुमंतुः**—
" सपिंडीकरणादूर्ध्वं यत्र यत्र प्रदीयते। भ्रात्रे भगिन्यै पुत्राय स्वामिने मातुलाय च॥
" मित्राय गुरवे श्राद्धमेकोद्दिष्टं न पार्वणम् " इति। **शातातपः**—
" अनाद्यगर्भो न ज्येष्ठो भ्राता सद्भिर्निगद्यते। ऋते सपिंडनात्तस्य नैव पार्वणमाचरेत् "॥
वृद्धगार्ग्यः—
" मातुः सहोदरो यश्च मातुः सहभवा च या। तयोश्च नैव कुर्वीत पार्वणं पिंडनादृते "॥ इति।
पिंडनात्सपिंडनात्। **कालादर्शे**—
" गुरोरज्येष्ठभ्रातुश्च मित्रस्य स्वामिनः स्वसुः। पुत्रस्य मातुलस्यापि नैव कुर्वीत पार्वणम्"॥ इति।
पराशरः—
"पितुर्गतस्य देवत्वमौरसस्य त्रिपूरुषम्। सर्वत्रानेकगोत्राणामेकस्यैव मृतेऽहनि "॥ **विज्ञानेश्वरेणेदं** व्याख्यातम्—" देवत्वं गतस्य सपिंडीकृतस्य पितुः सर्वत्र औरसेन पार्वणं कार्यम्। अनेकगोत्राणां भिन्नगोत्राणां मातुलादीनां क्षयेऽहनि यच्छ्राद्धं तदेकस्यैव एकोद्दिष्टमेव " इति। **स्मृत्यंतरेऽपि**—
" मातुलानुजपुत्राणामेकोद्दिष्टं। स्वसुर्गुरोः। मित्रस्य स्वामिनश्चैव बंधुसंबंधिनां तथा " ॥ इति।
चंद्रिकायाम्—
" पत्नीभ्रातृसुतादीनां सपिंडीकरणात्परम्। एकोद्दिष्टविधानेन मासिकानां पुनः क्रिया "॥ इति।
अत्र पत्न्या एकोद्दिष्टविधानात् "पत्न्यग्रजपितृव्याणां पितृवत्कल्प इष्यते।
"स्त्रीश्राद्धे वृणुयाद्भर्ता पत्नीमातृपितामहीः। दंपती च क्रमादेते श्राद्धं कुर्युस्त्रिपूरुषम्"॥ इत्यादिना पार्वणविधानाच्च यथाशिष्टाचारमिह व्यवस्था द्रष्टव्या। सापिण्ड्यात्परमेकोद्दिष्टे देववरणनियमः **स्मृत्यंतरे**—
" एकोद्दिष्टं यत्र यत्र सपिंडीकरणात्परम्। दैवयुक्तं तु तत्कार्यं दैवहीनं न तद्भवेत्।
" सपिंडीकरणादूर्ध्वं दैवहीनं करोति यः। मातापितृगुरुघ्नः स्यादात्मघाती च जायते॥
" विप्रलुंपंति रक्षांसि श्राद्धमा रक्षवर्जितम्। तत्पालनाय विहिता विश्वेदेवाः स्वयंभुवा"॥ इति।
स्मृत्यर्थसारे तु " नवमिश्रपुराणानि त्रिविधान्येकोद्दिष्टानि। सर्वैकोद्दिष्टेषु दैवं नास्ति "।
नवादिस्वरूपमाह **प्रजापतिः**—" नवश्राद्धं दशाहांतं मिश्रं संवत्सरावधि।
" एकादशाहमारभ्य कार्यमेकस्य तृप्तये। अब्दादुपरि यच्छ्राद्धं पुराणं तत्प्रकीर्तितम् "॥ इति।
माधवीये तु " एकोद्दिष्टं त्रिविधं नवं नवमिश्रं पुराणं च " इति। अत्र प्रथमाद्येकादशाहान्तं विषमदिनेषु षट्सु विहितं नवश्राद्धं नवम्। षण्णवश्राद्धानामुपरिकर्तव्यं मासिकं नवमिश्रम्। **तथाऽश्वलायनः**—"नवमिश्रं षडुत्तरम्" इति। मासिकानामुपरि कर्तव्यं प्रत्याब्दिकादि पुराणम्।

१ ग-दृधः। २ ग-प्रेतस्य।

अत एव **हारीतेन** प्रायश्चित्तकाण्डे नवश्राद्धं मासिकयोः प्रायश्चित्तमभिधाय उत्तरकालीनं श्राद्धं पुराणशब्देन व्यवहृत्य प्रायश्चित्तमभिहितम् ।

" चांद्रायणं नवश्राद्धे प्राजापत्यं तु मासिके । एकाहस्तु पुराणेषु प्रायश्चित्तं विधीयते " ॥ इति ।

चंद्रिकायाम् " एतेषु सर्वेषु एकोद्दिष्टेषु आदावंते च दैवं नास्तीति शिष्टाचारादिह व्यवस्था " ।

शस्त्रादिहतानां महालयचतुर्दश्यामेकोद्दिष्टम् ।

अत्र **विशेषः स्मृत्यंतरे** दर्शितः—

" प्रेतपक्षे चतुर्दश्यामेकोद्दिष्टविधानतः । दैवयुक्तं तु तच्छ्राद्धं पितॄणामक्षयं भवेत् " ॥

प्रेतपक्षः भाद्रपदकृष्णपक्षः । तत्रैकोद्दिष्टविधानमाह **सुमंतुः**—

" समत्वमागतस्यापि पितुः शस्त्रहतस्य तु । एकोद्दिष्टं सुतैः कार्यं चतुर्दश्यां महालये " ॥ इति ।

समत्वमागतस्य सपिंडीकृतस्येत्यर्थः । शस्त्रेति विषाद्यपमृत्यूपलक्षणम् । तदाह **मरीचिः**—

"विषशस्त्रश्वापदादितिर्यग्ब्राह्मणघातिनाम् । चतुर्दश्यां क्रिया कार्या अन्येषां तु विगर्हिता" ॥ इति ।

स्मृत्यंतरे—

" प्रेतपक्षे चतुर्दश्यां एकोद्दिष्टविधानतः । दैवयुक्तं तु तच्छ्राद्धं पितॄणामक्षयं भवेत् " ॥

प्रचेता अपि—

" वृक्षारोहणलोहाद्यैर्विद्युदग्निविषादिभिः । नखिदंष्ट्रिविपन्नानामेषां शस्ता चतुर्दशी ॥

" तच्छ्राद्धं दैवहीनं चेत्पुत्रदारधनक्षयः " ॥ इति । यस्य पिता पितामहोऽपि शस्त्रादिना हतः तेन द्वयोरपि चतुर्दश्यामेकोद्दिष्टश्राद्धं कार्यम् । तथा **स्मृत्यंतरम्**—"एकस्मिन्द्वयोर्वैकोद्दिष्टविधिः" इति । अयमर्थः । एकस्मिन्पितरि शस्त्रादिना हते द्वयोश्च हतयोः पुत्रेण तयोः प्रत्येकमेकोद्दिष्टश्राद्धं कार्यम् । **अन्यत्रापि**—

" मृते शस्त्रादिनैकस्मिन् द्वयोर्वापि महालये । एकोद्दिष्टं विधातव्यं चतुर्दश्यां सदैवतम् " ॥ इति । यस्य पितृपितामहप्रपितामहास्त्रयोऽपि शस्त्रहतास्तेन चतुर्दश्यां पार्वणेनैव विधिना श्राद्धं कार्यम् । एकस्मिन् द्वयोर्वा एकोद्दिष्टविधिरिति विशेषोपादानादिति **चंद्रिकाकारापरार्कयोर्मतम्** । त्रिष्वपि पित्रादिषु शस्त्रहतेषु त्रयाणामपि पृथगेकोद्दिष्टं कार्यमिति **देवस्वामिमतम्** । अत्र त्रयाणां शस्त्रहतत्वे पार्वणश्राद्धस्य साक्षाद्विधायकवचनाभावादेकस्मिन् द्वयोर्वेत्यस्योपलक्षणार्थत्वेनाप्युपपत्तेरेकोद्दिष्टत्रयमेव कार्यमिति **देवस्वामिमतं** युक्तमिति **माधवीये** व्यवस्थापितम् । "शस्त्रहतस्य पितुर्महालये चतुर्दश्यामेकोद्दिष्टश्राद्धे कृतेऽपि दिनादनंतरे पितामहादितृप्त्यर्थं पार्वणविधिना महालयश्राद्धं कर्तव्यम् । एकोद्दिष्टश्राद्धे पितामहादितृप्तेरभावात् 'तस्मिंस्तांस्तत्र विधिना तर्पयेत्पायसेन तु' इति **पितामहादेरपि** तर्पणीयत्वस्मरणात्तत्तृप्तये दिनांतरे पार्वणश्राद्धं कार्यमेवेति **चंद्रिकामाधवीयादौ** निर्णीतम् । शस्त्रादिहतानामपि मृताहादौ यच्छ्राद्धं तत्पार्वणविधानेनैव कर्तव्यम् । तथा च **गर्गः**—

" चतुर्दश्यां तु यच्छ्राद्धं सपिंडीकरणात्परम् । एकोद्दिष्टविधानेन कुर्याच्छ्राद्धं तदौरसः " ॥

कालादर्शे—" न तत्संन्यासिनां कुर्यात् पार्वणं द्वादशेऽहनि " इति । तत्सपिंडीकरणं न । किंतु पार्वणमित्यर्थः । **शातातपः**—

" एकोद्दिष्टं जलं पिण्डमाशौचं प्रेतसंस्क्रियाम् । न कुर्यात्पार्वणादन्यत् तत्कार्यं शस्त्रघातिनः ॥

शस्त्रघातिनो यदाऽपरपक्षिकश्राद्धं चतुर्दश्यां क्रियते तत्रैवैकोद्दिष्टविधानं नान्यदेत्यर्थः ।

---

१ खग-जल ।

संन्यासिविषये पार्वणव्यवस्था—

संन्यासिनां नवश्राद्धानि एकोद्दिष्टं सपिंडीकरणं च नास्ति । एकादशेऽन्हि द्वादशेऽन्हि वा पार्वणमेव सुतेन कर्तव्यं क्षयाहे दर्शमहालयादावपि पार्वणं कर्तव्यम् । तथा **प्रचेताः—**

" एकोद्दिष्टं यतेर्नास्ति त्रिदंडग्रहणादिह । सपिंडीकरणाभावात्पार्वणं तस्य सर्वदा " ॥ इति ।

सुमंतुरपि—

" दंडग्रहणमात्रेण नैव प्रेतो भवेद्यतिः । अतः सुतेन कर्तव्यं पार्वणं तस्य सर्वदा " ॥ इति ।

वृद्धवसिष्ठः—

" यतीनां तु न संसर्गः कर्तव्योऽत्र सुतैः सदा । त्रिदंडग्रहणादेव प्रेतत्वं नोपपद्यते " ॥ इति ।

संसर्गः पिंडसंसर्गः । सपिंडीकरणमिति यावत् । **प्रजापतिरपि—**

" सपिंडीकरणं न स्याद्यतीनां चैव सर्वदा । अहन्येकादशे प्राप्ते कुर्यात्तेषां तु पार्वणम् " ॥ इति ।

उशना अपि—

" एकोद्दिष्टं न कुर्वीत यतीनां चैव सर्वदा । अहन्येकादशे प्राप्ते पार्वणश्राद्धमाचरेत् " ॥ इति ।

यमः—" सपिण्डीकरणं नैव कुर्यादेवौरसः सुतः ।

" एकोद्दिष्टं न कुर्वीत यतीनां चैव सर्वदा । अहन्येकादशे प्राप्ते पार्वणश्राद्धमचरेत् " ॥ इति ।

वसिष्ठः—

"चतुर्विधानां भिक्षूणां ज्ञातिबंधुसुतादिभिः । द्वादशेऽहनि कर्तव्यं तेषां श्राद्धं तु पार्वणम्"॥ इति ।

पुलस्त्यः—

" कुटीचको बहूदश्च हंसः परमहंसकः । चतुर्विधानां भिक्षूणां एकदंडित्रिदंडिनाम् ॥

" षोडशानि नवश्राद्धं सपिंडीकरणं न च । एकादशेऽहनि प्राप्ते यदि वा द्वादशेऽहनि ॥

"पार्वणेन विधानेन श्राद्धं कुर्यात्तदौरसः" ॥ इति । **कालादर्शे**—" न तत्संन्यासिनां कुर्यात्पार्वणं द्वादशेऽहनि " इति । तत् सपिण्डीकरणं न । किंतु पार्वणमित्यर्थः ।

शातातपः—

"एकोद्दिष्टं जलं पिण्डमाशौचं प्रेतसंस्क्रियाम् । न कुर्यात् पार्वणादन्यद्ब्रह्मीभूताय भिक्षवे" ॥ इति।

प्रेतसंस्क्रिया दहनम् । **ब्रह्मांडपुराणे—**

"त्रयाणामाश्रमाणां च कुर्याद्दाहादिकाः क्रियाः । यतेः किंचिन्न कर्तव्यं यच्चान्येषां करोति तत् ॥

" एकादशे द्वादशे वा पार्वणश्राद्धमाचरेत् । प्रत्यब्दे दार्शिकश्राद्धे तीर्थे चैव महालये " ॥ इति ।

वसुरुद्रादित्यस्वरूपाः पित्रादयः " वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः " (आ. २६९) इति **याज्ञवल्क्यस्मरणात्** । **आश्वलायनश्च—**

" देवपूर्वं तु यच्छ्राद्धमक्षय्यं तत्फलं भवेत् । देवपूर्वास्तु पितरो वसुरुद्रादयः स्मृताः " ॥ इति ।

हरिब्रह्ममहेश्वरात्मकाः पित्रादयो दर्शिताः **नंदिपुराणे महेश्वरेण—**

" विष्णुः पिताऽस्य जगतो दिव्यो यज्ञः सदैव च । ब्रह्मा पितामहो ज्ञेयो ह्यहं च प्रपितामहः ॥

" उद्दिश्य विष्णुर्यैरिष्टः पितरस्तैस्तु तर्पिताः । ब्रह्मासमिष्टः प्रीणाति पुंसः सर्वान्पिता महान् ॥

"प्रपितामहान्समुद्दिश्य त्विष्टोऽहं यैर्महामुने । न यांति नरके घोरे तेषां वै प्रपितामहाः"॥ इति ।

वराहपुराणे पितॄन्प्रति **यमः—**

" ब्रह्मा विष्णुश्च रुद्रश्च भवतामादिपूरुषाः । आदित्या वसवो रुद्राः भवतां मूर्त्तयस्त्विमे " ॥ इति ।

अत्र ब्रह्माविष्णुमहेश्वरस्थाने केचिदात्मांतरात्मपरमात्मेति त्रिपुरुषोद्देशं कुर्वन्ति। **तथा च पाद्मे**—
" अंतरात्मा भवेद्विष्णुः परमात्मा महेश्वरः। सर्वेषामपि भूतानामात्मा ब्रह्मा चतुर्मुखः "॥ इति।
विश्वदेवविषये **शंखः**—
" पुरूरवार्द्रवौ चैव पार्वणे सुरसत्तमौ । नैमित्तिके कालकामावेवं सर्वत्र कीर्तयेत् "॥ इति।
नैमित्तिकं सपिंडीकरणादिसंस्कारं गृह्योक्तप्रकारेण प्राचीनावीती पार्वणं कुर्यात्। **यत्तु वचनं**—
" एकादशे द्वादशेऽन्हि नारायणबलिक्रिया । प्रतिसंवत्सरं चैव मृततिथ्यादिकं भवेत् "॥ इति तच्छिष्यकर्तृकविषयम्। पुत्रकर्तृकत्वेऽपि विकल्प इत्यन्ये। 'मृततिथ्यामिदं भवेत्' इति विशेष**स्मरणात्**। अन्यत्रामावास्यादौ पार्वणमेव। **सुमंतुस्तु**—
" कुटीचके तु दर्शादौ पार्वणश्राद्धमाचरेत्। नारायणबलिं चैव पार्वणं तु बहूदके॥
" हंसे मृते सुतः कुर्यात् पार्वणं पितृयज्ञवत् । नारायणबलिं चैव तथा परमहंसके "॥ इति।
स्मृत्यंतरे—
" वृत्ते पितरि संन्यस्ते ताते च पतिते सति। येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः"॥ इति। संन्यासात्पूर्वं स येभ्य एव पित्रादिभ्यः करोति तस्मिन्मृते तत्पुत्रोऽपि तेभ्य एव दद्यादित्यर्थः। तथा **पारिजाते**—
" चंडालादिहते ताते पतिते संगवर्जिते। व्युत्क्रमाच्च मृते देयं येभ्य एव ददात्यसा "॥ इति। संगवर्जितः संन्यासी अस्य च प्रेतत्वाभावात्केशधारणब्रह्मचार्यादिनियमो नास्ति। वत्सरांते पार्वणमेवेति निर्णयः।

सपिंडीकरणविधिः। अथ सपिंडीकरणम्। तस्य कालमाहाश्वलायनः (गृ. प. ३।११) "अथ सपिंडीकरणं संवत्सरे पूर्णे द्वादशाहे वा" इति। **कात्यायनः**—"अथ सपिंडीकरणं संवत्सरे पूर्णे त्रिपक्षे वा यदहर्वृद्धिरापद्यते " इति। **बोधायनश्च**— " संवत्सरे सपिंडीकरणं एकादशे मासि षष्ठे चतुर्थे द्वादशेऽन्हि वा " इति। खंडान्तरेऽपि **स एव**
" अथ संवत्सरे पूर्णे सपिंडीकरणं त्रिपक्षके तृतीये मासि षष्ठे वैकादशे वा मासि द्वादशाहे"॥ इति।
गृह्यपरिशिष्टेऽपि—" अथ संवत्सरे सपिंडीकरणम् " इति। **कात्यायनस्मृतौ** च—
" ततः संवत्सरे पूर्णे सापिंडीकरणं भवेत् । द्वादशाहे त्रिपक्षे वा यदा वा वृद्धिरापतेत् " ॥ इति।
यदा संवत्सरांते तु सपिंडीकरणं तदा
"प्रेतसंस्कारकार्याणि यानि श्राद्धानि षोडश। यथाकाले तु कार्याणि नान्यथा मुच्यते ततः "॥ इति **हारीतस्मरणात्** तत्तत्काले एकोद्दिष्टविधानेन मासिकानि कृत्वा सोदकुंभश्राद्धान्यनुष्ठाय ऊनाब्दिकात्परमाब्दिकात्पूर्वदिने तत्कुर्यात्। संवत्सरान्ते सपिंडीकरणमनाहिताग्नेर्मुख्यम्
"सपिंडीकरणं कुर्याद्यजमानस्त्वनग्निमान्। अनाहिताग्नेः प्रेतस्य पूर्णेऽब्दे भरतर्षभ"॥ इति **भविष्यत्पुराणवचनात्**। "वत्सरांते ततः प्रेतः पितृत्वमुपपद्यते" इति **बोधायनस्मरणाच्च** संवत्सरे पूर्ण इत्यभिधानात्। द्वित्रिदिनैरूनेन कर्तव्यं वत्सरस्य तदा अपूर्णत्वात्। न चात्र वारादिदोषः
" सपिंडीकरणं कुर्याद्वत्सरान्ते यदा पुनः। ऊनाब्दिकात्परं कुर्यादाब्दिकात्पूर्ववासरे॥
" वत्सरांते यदा कुर्यात्सपिंडीकरणं सुतः । तदा तु तिथिवारादीन्कुर्यादेवाविचारयन् "॥ इति **स्मरणात्**।

---

१ क्ष–ध्रुवश्चैव। २ क्ष–काम्य (म) काम्यौ।

आब्दिकात्पूर्ववासरे सपिंडीकरणासंभवे आब्दिकदिनेऽपि कुर्यात् । तदा न पृथगाब्दिकं कुर्यात्
" सापिंड्यं यदि वर्षांते मृतमासे मृतेऽहनि । कुर्वीत विधिवत्पुत्रः तदेव प्रथमाब्दिकम् " ॥ इति
स्मरणात् । द्वादशाहे सपिंडीकरणं षोडशश्राद्धपूर्वकं कर्तव्यम् । तदेव प्रशस्तम् । 'संवत्सरप्रतिमा
वै द्वादशरात्रयः ' इति **श्रुतेः** (तै. ब्रा. I. i. 9)—
" आनंत्यात्कुलधर्माणां पुंसां चैवायुषः क्षयात् । अस्थिरत्वाच्छरीरस्य द्वादशाहः प्रशस्यते" ॥ इति
स्मरणात् । एकपुत्रस्य द्वादशाह एव मुख्यः । 'कः संवत्सरं जीविष्यति ' इति
श्रुतेः (तै. ब्रा. I. viii. 5) ।
" एकपुत्रोऽग्निमांश्चैव कुर्वीत द्वादशेऽहनि । सपिंडीकरणश्राद्धं तयोरेक इति स्थितिः ॥
" सपिंडीकरणं पित्रोः कुर्यादेको हि यः सुतः । अस्थिरत्वाच्छरीरस्य द्वादशाहः प्रशस्यते " ॥
इत्यादि **स्मरणाच्च** । न चात्र वारादिदोषः । तथा च **सायणीये**—
" श्राद्धं सपिंडनं कुर्यात्तिथिवारं न चिंतयेत् । वर्षांते द्वादशाहे वा सपिंडीकरणं यदि " ॥ इति ।
मातापितृव्यतिरिक्तविषये **स्मृत्यंतरम्**—
" द्वादशेऽहनि संप्राप्ते यदि शुक्रदिनं भवेत् । मातापितृभ्यामन्यस्य नैव कुर्यात्सपिंडनम् " ॥
अन्यत्रापि—
" नांगारे च चतुर्दश्यां भृगुवारे गुरोर्दिने । सपिंडीकरणं कुर्यात्कुलक्षयकरं भवेत् ॥
" श्वोभूते तत्तु कुर्वीत सापिंड्यं षोडशेऽथ वा । त्रयोविंशद्दिने वाऽपि त्रिपक्षादावनंतरे " ॥ इति ।
द्वादशाहे सपिंडीकरणासंभवे त्रिपक्षादिषु वारादिकं परीक्ष्य कुर्यात् । तदुक्तं **स्मृतिरत्ने**—
" एकादशातीतदिने वर्षांते वापि यश्चरेत् । संलग्नग्रहतारादि बलं न प्रतिशोधयेत् ॥
" त्रिपक्षादिषु कालेषु सपिंडीकरणं यदि । तत्र प्रशस्तं नक्षत्रं प्रविशोध्य समाचरेत् " ॥
हारीतः—
" एकादशे द्वादशे वा यदि न स्यात्सपिंडनम् । उत्तरोत्तरकालेषु यथासंभवमाचरेत् " ॥ इति ।
ते **चांगिरसा** दर्शिताः—
"द्वादशाहे त्रिपक्षे च तृतीये मासि षष्ठके । एकादशे वा मास्यब्दे वृद्धौ कुर्यात्सापिण्डताम्"॥ इति ।
पद्धतौ च—" अथ द्वादशाहे तृतीये चतुर्थे षष्ठे वा एकादशे मासि सपिण्डीकरणम् " ॥ इति ।
कालादर्शेऽपि—" एकादशे द्वादशेऽब्दि त्रिपक्षे वा त्रिमासिके ।
" षष्ठे वैकादशे वाऽब्दे संपूर्णे वा शुभागमे । सपिंडीकरणस्येत्थमष्टौ कालाः प्रकीर्तिताः " ॥ इति ।
अष्टौ काला इत्युपलक्षणम् । तथा च **स्मृतिरत्ने**—
" एकादशे द्वादशेऽन्हि त्रयोदशादिनेऽथ वा । त्रिपक्षे वा त्रिमासे वा षष्ठे वैकादशेऽपि वा ॥
" संवत्सरांतेऽपि वा कुर्यात्त्रयोदशादिनेऽपि वा । वृद्धिपूर्वदिने वैति दशकालाः सपिंडने"॥ इति ।
गर्गश्च—
" अथवा त्वकृतं यत्तु द्वादशाहे सपिंडनम् । त्रयोदशादिने कुर्यात्त्रयोविंशद्दिनेऽथ वा"॥ इति ।
श्रीधरीये—
" एकादशाहमारभ्य वा यदा षोडशात् दिनात् । सपिंडीकरणं कार्यं ततः सप्तदशेऽहनि"॥ इति ।
बृहस्पतिः—"द्वादशाहादिकालेषु सपिंडीकरणं न चेत् । तदा प्रशस्तनक्षत्रे त्रिपक्षादिषु कारयेत्"॥

१ ग-दित्य । २ ग-वा । ३ ग- विशाद्दिने ।

व्यासः—"प्रमादादकृते तस्मिन् द्वादशैकादशेऽहनि । त्रयोविंशद्दिने वापि त्रिपक्षाद्युत्तरेषु वा ॥
" तत्र प्रशस्तनक्षत्रं परिशोध्य समाचरेत् ।
" त्रिपदृर्क्षं विना जन्म भानुभौमशनैश्चरात् । शुक्रवारं तदंशं च विनाऽन्यत्र समाचरेत् " ॥ इति ।
शंखः—"चतुर्दश्यां तु यत्पूर्वं सपिंडीकरणं स्मृतम् । एकोद्दिष्टविधानेन तत्कार्यं शस्त्रघातिनः" ॥ यदेतत्सपिण्डीकरणं तच्छस्त्रहतस्य एकोद्दिष्टं चतुर्दश्यां कार्यं न सपिंडीकरणमित्यर्थः ।
स्मृतिरत्ने—
" सपिंण्डीकरणे त्रीणि ऋक्षाण्याहुर्मनीषिणः । प्राजापत्यं तथा रौद्रं नक्षत्रं त्विंद्रदैवतम् " ॥
ऋष्यशृंगः—
"सपिंडीकरणं येन प्रमादादकृतं तदा । अनुराधार्द्रहस्तेषु रोहिण्यां वा समाचरेत् "॥ **गालवश्च**—
" सपिंडीकरणश्राद्धमुक्तकाले न चेत्कृतम् । रौद्रे हस्ते च रोहिण्यां मैत्रभे वा समाचरेत् "॥ इति ।
वत्सरातिक्रमे सपिण्डीकरणप्रकारः । संवत्सरात्यये तु पुनः षोडशश्राद्धानुष्ठानपूर्वकं कर्तव्यम् ।
" कृतेऽपि षोडशश्राद्धे सपिंडीकरणं विना । संवत्सरे व्यतीते तु पुनः षोडशमर्हति " ॥ इति **स्मरणात्** । अत्र कालमाह **बृहस्पतिः**—
" अकृते प्राप्तकाले तु श्राद्धकालोऽत्र वक्ष्यते । कन्याकुंभगते भानौ कृष्णपक्षे विधीयते " ॥ इति ।
गर्गश्च—
" कृष्णपक्षे तु पंचम्यामष्टम्यां दर्श एव च । एकादश्यां च कर्तव्यं स्वकालाकरणे सति"॥ इति ।
स्मृतिरत्ने—
" अमायां च क्षयाहे च प्रेतपक्षे तथैव च । सपिंडीकरणं कुर्यात्तिथिवारान् न शोधयेत् "॥ इति ।
श्रीधरीये—
" कन्याकुंभगते सहस्रकिरणे तामिस्रपक्षे भृगोर्वारर्क्षोदयमंगनातनययोर्जन्मत्रयं चात्मनः ॥
"हित्वानंदकरीं चतुर्दशतिथिं श्राद्धं विदध्याद्वसुत्वाष्ट्रार्काश्वि[1]समीरमांत्रिमखमित्राख्यंद्रुविष्णवम्बुषु"॥
नृसिंहः—
" कन्याकुंभगते सूर्ये कृष्णपक्षे विशेषतः । पंचम्याः परतः श्रेष्ठ आपंचम्याःसितेऽपि[2] च " ॥
बृहस्पतिः—
"अंत्यात्रिभागः शस्तः स्यात्कृष्णपक्षे सपिंडने । आद्यभागे च कर्तव्यं सिते पक्षे च संकटे" ॥ इति ।
"प्रेतस्य वत्सरादर्वाग्यदा संस्कारमिच्छति । न कालनियमो ज्ञेयो न मौढ्यं गुरुशुक्रयोः"॥ इति वत्सरादर्वागेव कालदोषाभावविधानादर्थाद्वत्सरात्परमधिमासमौढ्यदोषाश्च परिहार्याः ।

वर्णभेदेन सापिण्ड्यकालनियमः । वर्णभेदेन कालव्यवस्थामाह **वृद्धमनुः**—
" द्वादशेऽहनि विप्राणामाशौचांते तु भूभृताम् । वैश्यानां च त्रिपक्षादावथवा स्यात्सपिंडनम् ॥
" शूद्राणां द्वादशाहे तु कर्ता तत्कालतः शुचिः " ॥ इति । अथवा स्यादिति विप्रक्षत्रियविशां त्रिपक्षादिषु कालेषु वा सपिंडनमित्यर्थः । **विष्णुश्च** (२१।२०)—" मंत्रवर्जं हि शूद्राणां द्वादशाहे सपिंडनम् " इति । एतत् सच्छूद्रविषयम् । अत एव **प्रजापतिः**—
"शूद्राणां द्वादशाहे वा आशौचांतेऽथ वा भवेत् । कुर्यादाशौचमध्येऽपि सच्छूद्राणां सपिंडनम्"॥ इति ।

---
१ ख-मि; ग-श । २-ग-यावधि ।

सच्छूद्रलक्षणमाह व्याघ्रपादः—
" संस्कृतायां तु शूद्रायां ब्रह्मबीजसमुद्भवः । स्वकर्मनिरतश्चैव सच्छूद्रः स प्रकीर्तितः " ॥ इति ।
संस्कृतायां ब्राह्मणेन विधिवदूढायामित्यर्थः । असवर्णाविवाहस्य कलौ निषेधाद्युगांतरविषयम् ।
शूद्राणां द्वादशाहे सपिंडनम् । आपस्तंबश्च—
" शूद्राणां हीनजातीनामाशौचांते सपिंडनम् । पक्वान्नेन न कर्तव्यमामेन श्राद्धमाचरेत् " ॥
कात्यायनः—
" सर्वेषामेव वर्णानामाशौचांते सपिंडनम् । न पक्वं भोजयेद्विप्रान् सच्छूद्रोऽपि कदाचन ।
" भोजने त्वश्नतां पापं तस्यापि प्रभवेत्सताम् "॥ इति । सतां शूद्रान्नभोक्तॄणां शूद्रस्य चेत्यर्थः ।
एवं च ब्राह्मणानां महागुरुपितृविषये त्रयोदशदिने सापिंड्यम्
"उत्पाद्य पुत्रं संस्कृत्य वेदमध्याप्य यः पिता । कुर्याद्वृत्तिं मृते तस्मिन् द्वादशाहं महागुरौ"॥ इत्यादि-द्वादशाहाशौचविधानात् ।

दर्शापाते एकादशाहे आहिताग्निकर्तृकसापिण्ड्यम् । " यत्तु द्वादशाहे वैकादशाहे वा " इति बोधायनादिभिरेकादशाहे सपिंडीकरणमुक्तं तदेकादशाहे दर्शापाते सत्याहिताग्निकर्तृकविषयम् । तथा च हारीतः—
"या तु पूर्वममावास्या मृताहाद्दशमी भवेत् । सपिंडीकरणं तस्यां कुर्यादेव सुतोऽग्निमान्"॥ इति ।
वृद्धवसिष्ठोऽपि—
" प्रथमा स्यादमावास्या मृताहात् दशमेऽहनि । सपिण्डीकरणं तत्र कुर्यादेव सुतोऽग्निमान्"॥ इति ।
मृताहादिति मर्यादायां पंचमी मृताहादूर्ध्वदिनमारभ्येत्यर्थः । 'या तु पूर्वममावास्या' इति विशेषणसामर्थ्यादेकादशदिने प्राथमिकदर्शापाते सपिंडनं न द्वितीयादाविति केश्चिद्व्याख्यातम् ।
माधवीयादौ विशेषानभिधानाद्दूषिवाक्ये लाघवानादरात् तदुपेक्ष्यम् । अत एव कार्ष्णाजिनिः—

" सपिंडीकरणं कुर्यात्पूर्ववच्चाग्निमान्सुतः । परतो दशरात्राच्चेत्कुहूरब्दोपरीतरः" ॥ इति ।
दशरात्रात्परतः कुहूश्चेत् एकादशेऽन्हि अमावास्या चेदित्यर्थः । इतरः अनग्निः । एवं च एकादशान्ह्यमावास्यागमे मध्यान्हे आद्यमासिकादि अपराण्हे सपिंडीकरणमपराण्हे सायान्हे वा पिंडपितृयज्ञ इति विवेकः । सपिंडीकरणं विना पिंडपितृयज्ञासिद्धेरेकादशदिन एव सपिंडनं कुर्यात् ।
तथा स्मृत्यंतरे—
" सपिंडनं विना पुत्रः पितृयज्ञं न चाश्रयेत् । न पार्वणं नाभ्युदयं कुर्वन्न लभते फलम्"॥ इति ।
गालवः—

" सपिंडीकरणात्प्रेते पैतृकं पदमास्थिते । आहिताग्नेः सिनीवाल्यां पितृयज्ञः प्रवर्तते " ॥
जाबालिः –
" सपिंडीकरणं कुर्यात्पूर्वदर्शेऽग्निमान्सुतः । परतो दशरात्रस्य पूर्णेऽब्दे तु तथापरः ॥
" नासपिंड्यग्निमान्विप्रः पितृयज्ञं समाचरेत् । पापी स्यादसपिंडी तु पितृहा चोपजायते"॥ इति ।
व्यासोऽपि–
" अतीते दशरात्रे तु पूर्वामासाग्निकस्य तु । तत्रैव च सपिंडत्वं कृत्वा पार्वणमाचरेत् " ॥
पार्वणं पिंडपितृयज्ञः । एकादशदिने एकाग्निना सपिंडीकरणं न कर्तव्यम् ।

१ क्ष-भिप्राता ।

"क्वचिद्विप्रक्षत्रिययोर्नैकोद्दिष्टस्य वासरे। सपिंडीकरणं कुर्यादन्येषामिति रोमशः" इति स्मरणात्। क्वचित्क्वचिदपि अन्येषामनाहिताग्नीनामित्यर्थः। आपदि तु न दोषः

" एकादशदिनेऽप्येतान्येकोद्दिष्टानि षोडश। सपिंडीकरणं चापि कुर्यादापदि नान्यदा "॥ इति स्मरणात्।

एवं चानापदि एकाग्निना द्वादशाहादिष्वेव सपिंडीकरणं कार्यम्। आहिताग्निना एकादशदिने दर्शागमे सति तत्रैव सपिंडीकरणं कर्तव्यम्। आपदि तु तत्रासंभवे द्वादशाहादौ सपिंडीकरणं कार्यम्। तथा च **कर्मप्रदीपिकायाम्**—

" अनंतरममावास्या दशरात्रस्य या भवेत्। सपिंडीकरणं तस्यां कुर्यादिवाग्निमान्सुतः॥

" अभावे द्वादशाहादौ सपिण्डीकरणं स्मृतम् "।

दर्शानागमे तु साग्निर्द्वादशाहे सपिंण्डनं कुर्यात्। तदुक्तं **भविष्यत्पुराणे**—

"यजमानोऽग्निमान् राजन् प्रेतश्चानग्निमान् भवेत्। द्वादशाहे भवेत् कार्यं सपिंडीकरणं सुतैः"॥ इति।

गोभिलः—

" साग्निकस्तु यदा कर्ता प्रेतश्चानग्निमान्भवेत्। द्वादशाहे तदा कार्यं सपिंडीकरणं सुतैः"॥ इति।

पितुरग्निमत्त्वेऽपि पुत्रस्याग्निमत्वं पितुर्वैधुर्यादिना अग्न्याधानासंभवे वेदितव्यम्। तच्च यजमानप्रकरणे निरूपितम्। प्रेतश्चाग्निमान्भवेदिति कैश्चित्पठितं **तन्माधवीयादिविरोधादुपेक्ष्यम्**। तथाहि तत्र कर्तुः साग्नित्वे वचनद्वयमिदमुदाहृत्य उभयोः साग्नित्वे वचनान्तरमुदाहृतं तच्च वक्ष्यते।

कात्यायनः—

" एकादशाहं निर्वर्त्य पूर्वं दर्शाद्यथाविधि। प्रकुर्वीताग्निमान्विप्रो मातापित्रोः सपिंडनम् "॥ इति।

पैठीनसिः—

" सपिंडीकरणं पुत्रः पितुः कुर्वीत योऽग्निमान्। अनग्नेस्तु विजानीयादेकोद्दिष्टात्परेऽहनि "॥ इति

प्रेतस्य साग्निकत्वे कर्तुरनग्निकत्वे तृतीये पक्षे सपिंडीकरणं कार्यम्। तदाह **सुमंतुः**—

" प्रेतश्चेदाहिताग्निः स्यात्कर्ताऽनग्निर्यदा भवेत्। सपिंडीकरणं तस्य कुर्यात्पक्षे तृतीयके"॥ इति।

अत्र विशेषः। द्वादशाहेऽपि विहितम्। **भविष्यत्पुराणे**—

" अनग्निस्तु यदा वीर भवेत्कुर्यात्तदा गृही। प्रेतश्चेदग्निमांस्तत्र द्वादशाहे सपिंडनम् " ॥ इति।

उभयोः साग्निकत्वे द्वादशाहे सपिंडी कार्या। तदुक्तं **विज्ञानेश्वरीये**—

"साग्निकस्तु यदा कर्ता प्रेतश्चाप्यग्निमान्भवेत्। द्वादशाहे तदा कार्यं सपिंडीकरणं पितुः"॥ इति।

उभयोरग्नित्वे द्वादशाहादयः काला विकल्प्यंते। तदुक्तं **भविष्यत्पुराणे**—

" सपिंडीकरणं कुर्याद्यजमानस्त्वनग्निमान्। अनाहिताग्नेः प्रेतस्य पूर्णेऽब्दे भरतर्षभ॥

" द्वादशेऽहनि षष्ठे वा त्रिपक्षे वा त्रिमासि वा। एकादशेऽपि वा मासि मंगलं स्यादुपस्थितम् "॥ इति

कालादर्शे—

" साग्नौ कर्तर्युभावादौ प्रेते साग्नावनंतरः। अनग्नेस्तु द्वितीयाद्याः सप्त काला उदीरिताः "॥ इति। कर्तरि पुत्रे साग्नौ आहिताग्नौ सति

"एकादशे द्वादशे च त्रिपक्षे वा त्रिमासिके। षष्ठे वैकादशे वाऽब्दे संपूर्णे वा शुभागमे "॥ इति उक्तेष्वष्टसु कालेषु मध्ये आद्यौ एकादशाहो द्वादशाहश्चेति द्वौ कालौ स्याताम्। एकादशाहे दर्शागमे सत्येकादशाह अन्यथा द्वादशाहः। अनग्नौ कर्तरि आहिताग्नौ प्रेते सत्यनंतरः कालः त्रिपक्षः। अनाहिताग्नेस्तु द्वितीयाद्द्वादशाहाद्याः सप्त काला इत्यर्थः। सप्तकाला इति पूर्वोक्तत्रयोदशाहादिकालानामुपलक्षणम्।

---

१ ख-साग्नित्वे। २ ग- + या

साग्निः कर्ता चेत् द्वादशाह एव सापिंड्यं कुर्यान्नान्यत्र । अनग्निः कर्ता चेत्साग्नौ प्रेते त्रिपक्ष-द्वादशाहयोरेव नान्यत्र । अनग्नौ तु प्रेते अनग्निः कर्ता द्वादशादिषूक्तेषु कालेष्वेव नान्यत्रेति कर्तृनियमोऽभिप्रेतः । द्वादशाहे यदि कुर्यात्साग्निरेवेत्येवंविधः कालनियमो नाभिप्रेतः ।

" द्वादशाहादिकालेषु सपिंडीकरणेष्विमे । साग्न्यनग्नित्वविधयः कर्तुरेव नियामकः" ॥ इति **स्मरणात्** । एवं सत्यपि नियमे दैवात् द्वादशाहे त्रिपक्षे वा सापिंड्ये अकृते सति न तस्य लोपः । किंतु तदुत्तरकाले कर्तव्यम् । तदुक्तं **कालादर्शे**

" प्रमादादकृते तस्मिन् त्रिपक्षे द्वादशेऽह्नि[1] वा । उत्तरोत्तरकालेषु यथा संभवमाचरेत्" ॥ इति । उत्तरोत्तरकालेषु यत्र संभवति तत्र कुर्यादित्यर्थः । **प्रचेताः**—

"एकादशेऽन्हि कुर्वीत साग्निकस्तु सपिंडनम् । द्वादशाहादिकालेषु साग्निकोऽनग्निकोऽपि वा"॥ इति । **गोभिलः**—

" द्वादशाहादिकालेषु प्रमादादननुष्ठितम् । सपिंडीकरणं कुर्यात्कालेषूत्तरभाविषु " ॥ इति । **पितृमेधसारे**—" साग्निः कर्ता द्वादशाह एव सापिंड्यं कुर्यात् । तद्विना पिंडपितृयज्ञासिद्धेः पुत्रोऽनग्निः पिता चेत्साग्निस्त्रिपक्ष एव सापिंड्यं कुर्यात् । तयोर्द्वादशाहादौ प्रमादादकृते कालेषूत्तरभाविषु सापिंड्यं कुर्यात् " इति । तयोराहिताग्न्यनाहिग्न्योरित्यर्थः ।

सापिण्ड्याकरणे शुभानधिकारः—सपिंडीकरणकर्तुः शुभागमे सपिंडीकरणं कृत्वैव शुभकर्म कर्तव्यम् । तदाह **शाट्यायनिः**—

" प्रेतश्राद्धानि शिष्टानि सपिंडीकरणं तथा । अपकृष्यापि कुर्वीत कर्ता नांदीमुखे द्विजः ॥

" सपिंडीकरणश्राद्धमकृत्वा शुभकर्मकृत् । ध्रुवमाप्नोति नरकं सपिंडानां मृतौ क्रमात् " ॥ इति । **स्मृत्यंतरे**—

" सपिंडीकरणात्पूर्वं शोभनं न विधीयते । यदि चेत्तत्कृतं कर्म कर्तृनाशाय कल्पते " ॥ **चतुर्विंशतिमते**—

"भ्राता वा भ्रातृपुत्रो वा सपिंडः सोदकोऽपि[3] वा । सपिंडीकरणं कृत्वा कुर्यादभ्युदयं ततः"॥ इति । **गौतमः**—

" अग्रजो वाऽनुजो वाऽपि सपिंडः सोदकोऽपि वा । सपिंडीकरणं कुर्यात्पुत्रो वा वृध्द्युपस्थितौ ॥

" सपिंडीकरणं हित्वा वृद्धिश्राद्धमुपक्रमेत् । अयातयाममरणं भवेत्तस्य न संशयः " ॥ इति । मुख्यकर्तुरेवायं दोषः । नेतरेषाम् " कुर्यादेव शुभं कर्म मुख्यकर्तुश्च संनिधौ " इति **स्मरणात्** ।

सापिण्ड्याधिकारिनिरूपणम् ।

सपिंडीकरणे अधिकारी निरूपितः **स्मृत्यन्तरे**—

" औरसो दत्तको वापि सपिंडीकरणं चरेत् । परित्यज्यैव जीवन्तं[4] पुत्रं नान्यैस्तु कारयेत् ॥

" अथ शिष्यब्रह्मचारिबंधुभृत्यपुरोहितैः । कारयीत दशाहांतं सपिंडीकरणं विना ॥

" सपिंडीकरणं श्राद्धं पुत्रैः कार्यं प्रयत्नतः " ॥ **प्रजापतिः**—

" दाहाद्यैकादशाहांतं गौणपुत्रः समाचरेत् । पित्रोः सपिंडीकरणं प्रकुर्यादौरसः सुतः ॥

" भ्राता वा भ्रातृपुत्रो वा सपिंडः शिष्य एव वा । सपिंडीकरणं कुर्यात् पुत्रहीनस्य सर्वदा ॥

" अथवा प्रेतभूतस्य पत्नी कुर्यादमन्त्रकम् । ऋत्विजा कारयेत् यद्वा सपिंडीकरणं तथा ॥

---

१ क्ष—पि । २ क्ष—पि भवेदिति । ३ क—शिष्य एव वा । ४ क्ष—सीमन्त ।

“ऋत्विगादिर्यदा कुर्यात् होमं श्राद्धक्रियां क्वचित्। उपवीत्येव कुर्वीत कर्तुः स्याद्[1]पसव्यकम्”॥ इति। आदिशब्देन सगोत्रादि गृह्यते। **विष्णुः**—

“ज्येष्ठो वाऽप्यनुजो वापि सपिंडः शिष्य एव वा। यत्तु संनिहितस्तस्य त्वधिकारः सापिंडने”॥ इति।

शंखश्च—

“अपुत्रायाः पतिर्दद्यात्सपुत्राया न तु क्वचित्। पत्युः पिंडं तथा भार्या भर्तृभार्ये परस्परम्”॥ इति।

लोकाक्षिः—

“सर्वाभावे स्वयं पत्न्यः स्वभर्तॄणाममंत्रकम्। सपिंडीकरणं कुर्युस्ततः पार्वणमेव च”॥ इति। पार्वणं दर्शमहालयादि। सर्वाभावे स्वयं पत्न्यः इत्येतदासुरादिविवाहोढाविषयम्। ब्राह्मादिविवाहोढा तु पुत्रपौत्राभावे स्वयं कुर्यात्। तथा **माधवीये**—

“पुत्रः कुर्यात्पितुः श्राद्धं पत्नी तु तदसंन्निधौ। धनहार्यथ दौहित्रः ततो भ्राता च तत्सुतः”॥ इति।

शंखोऽपि—

“पितुः पुत्रेण कर्तव्यं पौत्रेणापि सपिंडनम्। तदभावे तु पत्नी स्यात्पत्न्यभावे तु सोदरः”॥ इति। पत्न्यभावे तु सोदर इत्ययं क्रमः पत्न्या दायहरत्वे द्रष्टव्यः

“अपुत्रा शयनं भर्तुः पालयंती व्रते स्थिता। पत्न्येव दद्यात्तत्पिंडं कृत्स्नमंशं लभेत च”॥ इति **वृद्धमनु**स्मरणात्। अन्यथा यो दायहरः स तत्कुर्यात्। अत **एवापस्तंबः**—“यश्चार्थहरः स पिंडदायी” इति। सर्वमेतदधस्थान्निरूपितम्।

विवाहाद्यनंतरम्।

“विवाहोपनयादूर्ध्वं वर्षं वर्षार्धमेव वा। न कुर्यात्पिंडनिर्वापं न कुर्यात्करकाणि च”॥ इति पिंडनिर्वापनिषेधः सपिंडिव्यतिरिक्तविषयः।

“मौंजीबंधाद्विवाहाच्च वर्षं वर्षार्धमेव वा। पिंडान्सपिंडा नो दद्युः सपिंडीकरणादृते”॥ इति **कार्ष्णाजिनि**स्मरणात्। **कालादर्शे**—

“मौंजीबंधाद्वत्सरार्धं वत्सरं पाणिपीडनात्। पिंडनिर्वापकरणविहीनं श्राद्धमाचरेत्॥

“नैमित्तिकमहालयप्रत्याब्दिकादृते” इति। नैमित्तिकं सपिंडीकरणम्। **स्मृत्यंतरेऽपि**—

“महालये गयाश्राद्धे मातापित्रोर्मृतेऽहनि। द्वादशाहेऽपि कुर्वीत पिंडनिर्वापणं सुतः”॥ इति।

यत्तु **स्मृत्यंतरे**—

“अपुत्रस्य परेतस्य नैव कुर्यात्सपिंडनम्। आशौचमुदकं पिंडमेकोद्दिष्टं न पार्वणम्”॥ इति। यद्यपि वचनांतरम्—

“अपुत्रा ये मृताः केचित्स्त्रियो वा पुरुषोऽपि वा। तेषां सपिंडनाभावादेकोद्दिष्टं न पार्वणम्”॥ इति तत्पुत्रोत्पादानप्रशंसापरमिति **कालादर्शमाधवीयादौ** व्याख्यातम्। तथा च पूर्वोक्त**शंखादि**वचनान्युपपन्नानि भवंति। **पैठीनसिरपि**—“अपुत्रायां मृतायां तु पतिः कुर्यात्सपिंडनम्” इति। **सुमंतुरपि**—

“अपुत्रे संस्थिते कर्ता न भवेच्छ्राद्धकर्मणि। तत्र पत्न्यपि कुर्वीत सापिंड्यं पार्वणं तथा”॥ इति।

अपुत्रगृहस्थब्रह्मचारिणोः सापिण्ड्यम्।

तथा चापुत्रस्य गृहस्थस्य ब्रह्मचारिणश्च सापिंड्यमाह **यमः**—

“अष्टमात् द्वादशादूर्ध्वं गृहस्थब्रह्मचारिणोः। सपिंडीकरणं कुर्यान्न प्रागिति यमोदितम्”॥ इति।

---

१ **क**–दुपवीतकम्। २ **कग**–गया।

अष्टमादिति 'अष्टमे वर्षे ब्राह्मणमुपनयेत्' (१।१९।१) इत्याश्वलायनोक्तत्वात्ततः पूर्वमुपनयाभावेन विवाहस्याभाव इत्यभिप्रायेण उक्तम् । 'गर्भाष्टमेषु ब्राह्मणमुपनयीत' इत्यापस्तंबादिवचनानुसारेण गर्भषष्ठादौ कृतोपनयनस्य एकदेशाध्ययनानंतरं कृतविवाहस्याष्टमात्प्रागपि सापिंड्यं कार्यम् । तथा च **स्मृत्यर्थसारे**—" वयोवस्थाविशेषमनादृत्य सर्वत्र पुरुषाणां स्त्रीणां च विवाहादूर्ध्वं सपिंडीकरणं कार्यमेव " इति । **स्मृत्यंतरे**—

" ऊनद्विवत्सराद्वर्वागूढायाः खननं ततः । उत्थाप्य संदहेत्तस्याः सापिंड्यांतं समाचरेत् ॥

" द्वादशाब्दादधश्चोर्ध्वं कन्यकायाः सपिंडनम् । स्वाम्यभावाद्धि नास्त्येव नारायणबलिं चरेत् " ॥

एवमसंपूर्णद्वादशवर्षाणां ब्रह्मचारिणां नारायणबलिरेव कार्यः । निषिद्धसपिंडानां तद्विधानात् ।

पतितादीनां सापिण्ड्यनिषेधः । तथा च **वृद्धवसिष्ठः**—

" सपिंडीकरणं नैव मृतानां ब्रह्मचारिणाम् । क्लीबानां पतितानां च दुष्टस्त्रीणां तथैव च ॥

" नैष्ठिकानां यतीनां च श्राद्धं नारायणार्पणम् । उपकुर्वाणकस्यैव सपिंडीकरणं विदुः " ॥ इति ।

नारायणार्पणं नारायणबलिः । **स्मृत्यंतरे**—

" अपूर्णद्वादशाब्दानां मृतानां ब्रह्मचारिणाम् । दाहादिषोडशांतं तु निर्वर्त्यैव यथाविधि ॥

" द्वादशेऽहनि संप्राप्ते नैव कुर्यात्सपिंडनम् । नारायणं समुद्दिश्य विप्रानष्टौ तु भोजयेत् ॥

" एकोद्दिष्टविधानेन श्राद्धं वा कारयेत् द्विजः "॥ इति । अस्य प्रत्याब्दिकादिश्राद्धमपि नास्ति । " नासपिंडीकृते प्रेते पितृकार्यं प्रवर्तते " इति **स्मरणात्**—

व्युत्क्रममृतसापिण्ड्यविधिः । अपुत्रायाः पत्न्याः पतिः सापिंड्यं कुर्यात् " अपुत्राया मृतायास्तु पतिः कुर्यात्सपिंडनम् " इति **स्मृतेः** । ननु " व्युत्क्रमेण प्रमीतानां नैव कार्या सपिंडता " इति निषेधात् पत्न्याः कथं भर्ता सपिंडीकरणं कुर्यादिति चेन्न तस्य मातापितृभर्तृपत्नीव्यतिरिक्तविषयत्वात् । तथा च **स्कांदे**—

"अक्रमेण मृतानां नं सपिंडीकृतिरिष्यते । यदि माता यदि पिता भर्ता नैष विधिः स्मृतः "॥ इति । यदि माता व्युत्क्रममृता यदि पिता व्युत्क्रममृतः यदि भर्त्ता वा व्युत्क्रममृतः तदा एष निषेधो न किंतु विधिः स्मृतः । सपिंडीकरणविधिरेव मन्वादिभिः स्मृतः इत्यर्थः ।

तथा च **मनुः** (३।२२०-२२१)—" ध्रियमाणे तु पितरि पूर्वेषामेव निर्वपेत् ।

"पिता यस्य तु वृत्तः स्याज्जीवेच्चापि पितामहः । पितुः स्वनाम संकीर्त्य कीर्तयेत्प्रपितामहम् " ॥

इति । जीवेच्चापि पितामह इत्यस्यापि पूर्वेषामेव निर्वपेदित्यन्वयः । कथं निर्वपेदित्याह ' पितुः स्वनाम संकीर्त्य ' इति । एवं च ध्रियमाणे पितरि जीवत्पितृकर्तृकवृद्ध्यादिषु श्राद्धेषु पितुः सापिंड्ये च पितुः पितृभ्यः पितुः पितामहेभ्यः पितुः प्रपितामहेभ्यः पितृभ्यः इति वा । पितामहे ध्रियमाणे पितामहस्य पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यः पितामहेभ्यः पितृपितामहप्रपितामहेभ्य इति वा कीर्तयेदित्यर्थः । **सुमंतुश्च**—

" त्रयाणामपि पिंडानामेकेनापि सपिंडने । पितृत्वमश्नुते प्रेत इति धर्मव्यवस्थितिः " ॥ इति ।

ब्राह्मेऽपि—

" मृते पितरि यस्याथ विद्यते च पितामहः । तेन देयास्त्रयः पिंडाः प्रपितामहपूर्वकाः ॥

" तेभ्यश्च पैतृकः पिंडो नियोक्तव्यश्च पूर्ववत् " ॥

---

१ क्ष-एवं संपूर्णं । २ ग-तु ।

कात्यायनः—"व्युत्क्रमाच्च मृते देयं येभ्य एव ददात्यसौ" इति। असौ व्युत्क्रममृतो जीवद्दशायां येभ्यो ददाति तेभ्य एव तत्सपिंडीकरणे व्युत्क्रममृतपितृको ददातीत्यर्थः।

यत्तु **विष्णुवचनम्** (७५-४)—" यस्य पिता प्रेतः स्यात्स पितृपिंडं निधाय पितामहान् द्वाभ्यां पराभ्यां दद्यात् " इति। तस्यायमर्थः—पितामहे म्रियमाणे प्रेते च पितरि पितुरेकं पिंडमेकोद्दिष्टविधानेन विधाय पितुर्यः पितामहः ततः पराभ्यां द्वाभ्यां दद्यात्। पितुः पितामहस्त्वात्मनः प्रपितामहः संप्रदानभूत एवेति प्रपितामहाय ततः पराभ्यां द्वाभ्यां च दद्यादिति। तथा **विज्ञानेश्वरे** (पृ. ७४ पं. ४)—

" चतुर्णां निर्वपेत्पिंडान्पूर्वं तेषु समापयेत्। ततः प्रभृति वै प्रेतः पितृसामान्यमश्नुते " ॥ इति।

एवं च व्युत्क्रममृतस्य पितुः सपिंडीकरणं तत्पितृपितामहप्रपितामहेष्वन्यतमस्य जीवने द्वयोर्वा जीवनेऽपि प्रेतोद्देशेन जीवद्व्यतिरिक्तत्रिपुरुषोद्देशेन पार्वणैकोद्दिष्टसमुच्चयात्मकं सपिण्डीकरणं कर्तव्यम्। तथा च **कालादर्शे**—

"पितुर्मृतस्य सापिंड्यं मृतयोरूर्ध्वयोर्द्वयोः। एकस्मिन्वा द्वयोर्वाऽपि जीवतः सुत आचरेत्"॥ इति। एकस्मिन् द्वयोर्वेत्यभिधानात्पितामहादिषु त्रिषु जीवत्सु न सापिंड्यं 'पिता यस्य तु वृत्तः स्याज्जीवेच्चापि पितामहः' इति 'त्रयाणामपि पिंडानामेकेनापि सपिंडनम्' इति पूर्वोक्तमन्वादिवचनैर्द्वयोरेकस्य वा जीवने सापिंड्यप्रतिपादनात्। वत्सरांते प्रेताय तत्पित्रे तत्पितामहाय तत्प्रपितामहाय च ब्राह्मणान्भोजयेत् 'त्रिषु पिंडः प्रवर्तते' इति पितुः पित्रादीनां त्रयाणां श्राद्धे पिंडदानस्मरणात्। तेषु त्रिषु जीवत्सु तदयोगाच्च। तथा च **दक्षः**—

" पितामहं च जीवंतमतिक्रम्य तदा सुतः। अतिक्रम्य द्वयं वापि सपिंडीकरणं चरेत् "॥ इति।

तथा पिंडपितृयज्ञं प्रकृत्याह **सुमंतुः**—

" येभ्य एव पिता दद्यात्तेभ्यः कुर्वीत साग्निकः। पितामहेऽप्येवमेव कुर्याज्जीवति साग्निकः"॥ इति।

यत्तु—"म्रियमाणे तु पितरि पूर्वेषामेव निर्वपेत्। पूर्वेषु त्रिषु दातव्यं जीवेच्चेत्त्रितयं यदि" ॥ इति। तज्जीवपितृकश्राद्धविषयमिति व्याख्यातारः। **यच्च**—

" जीवमानेऽपि पितरि पूर्वेषामेव निर्वपेत्। विप्रवद्वापितं श्राद्धे स्वकं पितरमाशयेत् ॥

" उभौ यस्य व्यतीतौ तु जीवेच्च प्रपितामहः। द्वौ पिंडौ निर्वपेत्तत्र भोजयेत्प्रपितामहम् " ॥ इति

पिंडद्वयमुक्तं तज्जीवपित्रादिमरणविषयं ततश्च ' पूर्वेषामेव निर्वपेत् ' ' चतुरो निर्वपेत्पिंडान् त्रिभिः पिंडैर्नियोजयेत् ' इति **मन्वादिवचनविरोधादुपेक्ष्यमित्याहुः**। यच्च

" सपितुः पितृकृत्येषु ह्यधिकारो न विद्यते। न जीवंतमतिक्रम्य किंचित् दद्यादिति श्रुतिः " ॥ इति

तत् "पित्र्येष्ट्यां पितृयज्ञे च वृद्धौ मातुर्मृतेऽहनि। विप्रसंपादितार्थेषु सोऽपि श्राद्धं समाचरेत् ॥

" पितुर्या देवताः प्रोक्तास्ता एवात्रापि देवताः। षडन्ते जीवतः पितुः " इति जीवपितृकस्य श्राद्धविधानात् तद्व्यतिरिक्तदर्शादिश्राद्धविषयम्। तथा च **लोकाक्षिः**—

" अमाश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षिकम्। न जीवपितृकः कुर्यात्तिलैः कृष्णैश्च तर्पणम्"॥इति।

ततः पितुः व्युत्क्रममरणे जीवद्व्यतिरिक्तानां त्रयाणां वरणं तेषां पिंडदानं तत्पिंडैः सह प्रेतपिंडसंसर्ग इति **निर्णयः**।

---

१ ग-परं।

ननु—"लेपभाजश्चतुर्थाद्याः पित्राद्याः पिंडभागिनः" इति **स्मरणात्** । प्रपितामहात्परेषां पिंडभाक्त्वमनुपपन्नमिति चेन्मैवम् । पित्रादिजीवने तेषां पिंडभाक्त्वात्पूर्वपूर्वात्रये क्रमेणोत्तरोत्तरस्य लेपभाक्तात् । अन्यथा व्युत्क्रममरणाभावे पितुः सपिंडीकरणे लेपभाजश्चतुर्थस्य पिंडभाक्त्वं न स्यात्तत्तश्च 'त्रिभिः पिंडैस्तु संसृजेत्' इत्यादिबहुस्मृतिव्याकोपप्रसंगः । एवं मातरि मृतायां पितामह्यादिष्वन्यतमत्यये मातुः सापिंड्यं कर्तव्यम् । तथा च **ब्रह्मा**—

"मातर्यपि च वृत्तायां विद्यते च पितामही । प्रपितामहिपूर्वं तु कार्यस्तत्राप्ययं विधिः स्मृतः"॥ इति ।

भर्तुर्व्युत्क्रममरणेऽपि पत्नीसापिंडनं कुर्यात्

" व्युत्क्रमेण मृतानां च सपिंडीकृतिरिष्यते । यदि माता यदि पिता भर्त्ता चैष विधिः "॥ इति **स्मरणाद्**भार्यामरणेऽपि पतिः कुर्यात्

"अपुत्राया मृतायास्तु पतिः कुर्यात्सपिंडनम् । श्वश्र्वादिभिः सहैवास्याः सपिंडीकरणं भवेत्" ॥ इति **स्मरणात्** । अतः व्युत्क्रममरणे पुत्रः पत्नी पतिश्च अन्नेन सापिंड्यं कुर्यात् । तद्व्यतिरिक्तानां व्युत्क्रममरणे सापिंड्यं न कुर्यात् । आमेन हेम्ना वा कुर्यात् । तदाह **गोभिलः**—

"अनुक्तकालेष्वपितुर्व्युत्क्रमेण मृतावपि । आमेन वाऽपि सापिंड्यं हेम्ना वाऽपि प्रकल्पयेत्" ॥ इति सपिंडीकरणस्य द्वादशाहादयो वत्सरांताः काला उक्ताः । तेषु प्रमादादकृते सपिंडीकरणे व्युत्क्रम-मृतावपि पुत्रव्यतिरिक्तः कर्त्ता आमेन हेम्ना वा कुर्यादित्यर्थः । **स्मृत्यन्तरे**—

" व्युत्क्रमाच्च प्रमीतानां नैव कार्या सपिंडता । अथवाऽऽमेन कर्त्तव्या हेम्ना वा तदसंभवे ॥

" गृहादाहृत्य पक्वान्नं पिंडं दद्यात्तिलैः सह । पिंडं दत्वा यथान्यायं पिंडं संयोजनं चरेत् "॥

यथान्यायं जीववंतमतिक्रम्य । अत्र सपिंडीकरणमात्रस्यामादिविधानेऽपि तन्नांतरीयकतया श्राद्धांतं पिण्डमिति केचित् । अन्ये तु व्युत्क्रममृतौ सपिंडीकरणमात्रस्यामादिविधानात्तत्पूर्ववर्ति-श्राद्धानां सत्यां शक्तौ नामादिनियम इत्याहुः । एवं च मातापितृव्यतिरिक्तव्युत्क्रममृतौ सापिंड्यनिषेधः पाक्षिकः । पक्षे आमेन हेम्ना वा विधानादेवं विहितामश्राद्धाभिप्रायेण

" ज्येष्ठो वाऽप्यनुजो वाऽपि कुर्याद्भ्रातुः सपिंडनम् । न पुत्रस्य पिता कुर्यान्नानुजस्य तथाऽग्रजः ॥

" यदि स्नेहेन कुर्यातां सपिंडीकरणं विना । अन्याभावे पिता माता ज्येष्ठो वाऽपि सपिंडनम् ॥

" कुर्याज्जीवंतमाक्रम्य पिंडभागं नियोजयेत् । सर्वाभावे पिता वाऽपि कुर्याद्भ्राताऽथ वाऽग्रजः "

इत्यादीनि व्युत्क्रमसापिंड्यप्रतिपादकानि द्रष्टव्यानि ।

क्रमसापिण्ड्यनिरूपणम् । अत्र व्युत्क्रममृतानां मातापितृभर्तृपत्नीनामन्नेन सापिंड्ये कृते इतरेषामामेन हेम्ना वा कृतेऽपि तदंतर्हिते मरणे तत्सापिंडनानंतरमेतेषां पुनरन्येन सपिंडीकरणं विदधाति **काश्यपः**—

" व्युत्क्रमेण प्रमीतानां सपिंडीकृतिरिष्यते । अंतर्हिते मृते पश्चात्पुनः कुर्यात्सपिंडनम् "॥ इति ।

दक्षश्च—

" पितामहं च जीवंतमतिक्रम्य यदा सुतः । अतिक्रम्य द्वयं वाऽपि सपिंडीकरणं चरेत् ॥

" तयोरापन्नयोः काले पुनः कुर्यात्सपिंडनम् " ॥

वसिष्ठश्च—" व्युत्क्रमेणापि सापिंड्यं कर्त्तव्यमृषिसंमतम् ।

"ततोऽप्यूर्ध्वं तु सापिंड्ये कृतेऽस्य पुनराचरेत् । भ्राता वा भ्रातृपुत्रो वा सपिंडः शिष्य एव वा ।

---

१ ग–सिद्ध ।

" अथवा प्रेतभूतस्य पत्नी कुर्यादमंत्रकम् । ऋत्विजा कारयेद्वा सपिंडीकरणं पुनः " ॥ इति । अत्र अमंत्रकविधानं मंत्रोच्चारणाशक्तपत्नीविषयमिति अधस्तान्निरूपितम् ।

पतितैः सह सापिण्ड्यनिषेधः । पतितैः साह सापिंड्यनिषेधमाह **शातातपः**-

" क्लीबैर्न पतितैश्चैव दुष्टाभिस्त्रीभिरेव च । सपिंडीकरणं कुर्यादेकोद्दिष्टं समाचरेत् " ॥

पतितमतिक्रम्य तदूर्ध्वगतैः सापिंड्यं कृत्वा अनुमासिकादावेकोद्दिष्टं समाचरेदित्यर्थः । **पारिजाते** च-"पितुर्न नाम निर्देश्यं महापातकदोषिणः । आवाहनादिकार्येषु किंतु तत्परभाविनाम् ॥

" पितामहपुरोगाणां त्रयाणां नाम निर्दिशेत् । पितामहेऽपि दुष्टश्चेत्प्रपितामहपूर्वकः ॥

" निर्देष्टव्यास्त्रयो मर्त्यास्तस्मिन्नपि विदूषिते । प्रपितामहपित्राद्यास्त्रयो वाच्या यथाक्रमम् ॥

" दुष्टश्चेन्मध्यमः कश्चित्तद्वर्जान् पूर्वपश्चिमान् । त्रीनेव निर्दिशेन्मर्त्यान्किं त्वत्रैतद्विशिष्यते ॥

" चण्डालादिहते ताते पतिते संगवर्जिते । व्युत्क्रमाच्च मृते देयं येभ्य एव ददात्यसौ "॥ इति ।

स्मृत्यंतरे च—

" वृद्धे पितरि संन्यस्ते ताते च पतिते सति । येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुतः "॥ इति । तथा "येभ्यो ददाति पित्रादिस्तेभ्यः पित्रादिजीवने । दद्यात्तथा सुतः ताते पतिते व्युत्क्रमान्मृते"॥ इति पितृव्यतिरिक्तस्य पतितस्य सपिंडनं नास्ति ।

" सपिंडीकरणं नैव मृतानां ब्रह्मचारिणाम् । क्लीबानां पतितानां च दुष्टस्त्रीणां तथैव च ।

" नैष्ठिकानां यतीनां च श्राद्धं नारायणार्पणम् " ॥ इति **वृद्धवसिष्ठस्मणात्** ।

सपिण्डीकरणप्रकारः । सपिंडीकरणे इतिकर्तव्यतामाह **याज्ञवल्क्यः** (आ. २५३ पृ. २५४)—

" गंधोदकतिलैर्युक्तं कुर्यात्पात्रचतुष्टयम् । अर्घ्यार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत् ॥

" ये समाना इति द्वाभ्यां शेषं पूर्ववदाचरेत् "॥ इति । **विज्ञानेश्वरेणा**स्यार्थोऽभिहितः (पृ. ७३ पं. १३-१६) " गंधोदकतिलैर्युक्तं पात्रचतुष्टयं अर्घ्यार्थं अर्घ्यसिध्यर्थं कुर्यात् । तिलैर्युक्तं पात्रचतुष्टयं वदता पितृवर्गे चत्वारो ब्राह्मणा दर्शिताः । वैश्वदेवे द्वौ स्थितास्तावेव तत्र प्रेतपात्रोदकं किंचिदवशिष्टं त्रिधा विभज्य पितृपात्रेषु सेचयेत् । 'ये समाना' इति द्वाभ्यां शेषं विश्वेदेवावाहनादिविसर्जनांतं पूर्ववत् पार्वणवदेवाचरेत् । प्रेतार्घ्यपात्रावशिष्टेनोदकेन प्रेतस्थानब्राह्मणहस्ते अर्घ्यं दत्वा शेषमेकोद्दिष्टवत्समापयेत् । "पित्र्येषु त्रिषु पार्वणम्" इति । **कात्यायनः**—"चत्वारि पात्राणि सतिलगंधोदकैः पूरयित्वा त्रिस्त्रिः पितृपात्रेष्वासिंचति 'ये समाना' इति द्वाभ्यां एतेन पिंडा व्याख्याता " इति । **विष्णुः**—वत्सरांते प्रेताय तत्पित्रे तत्पितामहाय च ब्राह्मणान् देवपूर्वं भोजयेत् " इति । **गालवश्च**—

" सपिंडीकरणं कुर्यात्पितुः प्रेतत्वमुक्तये । विश्वान्देवान्नियोज्यादौ कामकालकसंज्ञकान्[2] ॥

" प्रेतं पितामहादींश्च[3] मंत्रैरर्घ्यादिभिः श्रयेत् । अनुसंधीयते पूर्वः परो विच्छिद्यते ततः " ॥ इति । उक्तेष्वेतेषु प्रथमतो विश्वेदेववरणं ततः प्रेतवरणं ततः पितृपितामहप्रपितामहवरणमिति क्रमः प्रतीयते । क्रमान्तरं तु स्मृत्यन्तरेऽभिहितम्

" श्राद्धद्वयमुपक्रम्य सपिण्डीकरणं भवेत् । पार्वणं तत्र पूर्वं स्यादेकोद्दिष्टं तथा चरेत् " ॥

तथा—

" सपिंडीकरणश्राद्धे दैवं पूर्वं नियोजयेत् । पितॄन् नियोजयेत्पश्चात्ततः प्रेतं विनिर्दिशेत् " ॥ इति ।

---

१ क्ष-द । २ ग-कालकामुक । ३ ग-पितामहादि ।

चंद्रिकायामपि—
"कामकालौ वैश्वदेवे निर्दिष्टौ तु सापिंडने । पितामहादीन्निर्दिश्य पितुरुच्चारणं ततः" ॥ इति ।
बृहद्विष्णुः—
"पितुर्मरणमारभ्य द्वादशे दिवसे चरेत् । प्रेतभावविनिर्मोकद्वारा प्रेतस्य वै पितुः ॥
"पितामहादिभिः सार्धं सापिंड्यस्य प्रसिद्धये । समानोदकभावस्य सिध्यर्थं च पितुः सुतः ॥
"एषां पितामहादीनां विधिना पावर्णेन तु । स्वपितुः प्रेतभूतस्य एकोद्दिष्टविधानतः" ॥
इत्थं च पार्वणात्मकैकोद्दिष्टात्मकोभयरूपकम् ।
"पितामहादीन्निर्दिश्य पितुरुच्चारणं ततः । संबंधगोत्रनामानि वस्त्रादित्यं च कीर्तयेत् ॥
"दद्यात्कुसरतांबूलं गंधाद्यभ्यंजनादिकम् । ततः स्नातान् समाहूय स्नातस्तानुपवेश्य च ॥
"दर्भं विप्रकरे दत्वा वृणुयाद्देवपूर्वकम् । सपिंडीकरणादर्वागृजुदर्भैः पितुः क्रियाः ॥
"परतो द्विगुणैरेव दैवकर्म सदर्जुभिः । पित्रे ह्येकपवित्रादौ द्वौ दर्भौ देवकर्मणि ॥
"द्वौ निमंत्रयते दर्भौ वैश्वदेवार्थमादितः । कामकालौ वैश्वदेवे देवते हि प्रकीर्तिते ॥
"पितामहादिसंबंधांस्त्र्यवरान्श्रोत्रियान्द्विजान् । प्रेतस्थाने त्वेकविप्रं यद्वा पैतामहादिषु ॥
'एवं वा प्रेतमेकं वा दैवेऽप्येकं निमंत्रयेत् । पितामहादीनभ्यर्च्य ततः प्रेतं समर्चयेत् ॥
"सपिंडीकरणश्राद्धं पितृपूर्वमुदीरितम् । प्रेतपूर्वं वदंत्येके तदसांप्रतमीरितम् ॥
"वैश्वदेवार्चनं कृत्वानंतरं प्रेतपूजनम् । पार्वणस्य हि तंत्रस्य मध्ये तंत्रांतरं भवेत् ॥
"पार्वणैकोद्दिष्टयोश्च पार्वणं पूर्वभाग्भवेत् ॥
"पादान्प्रक्षालयेद्दर्भास्तिलानोप्यावटत्रये । देवार्थानामुत्तरे तु पित्रर्थानां तु मध्यमे ॥
"दक्षिणे तु निमित्तस्य पादप्रक्षालनक्रमः ।
"कुंडानि निखनेच्छ्राद्धे येन केनापि शंकुना । आयसेन खनेद्यस्तु निराशाः पितरो गताः ॥
"श्राद्धस्य चेककुंडं स्याद्गजपादसुसंमितम् । सापिंड्येषु त्रिकुंडं स्याद् वृत्ताकारं तु दक्षिणे ॥
"त्रिकोणं मध्यमं कुंडमुत्तरं चतुरश्रकम् । आयामस्तस्य विस्तारस्तदर्थं खननं भवेत् ॥
"न्यूनातिरिक्तं तु यः कुर्याद्भवेत्स पितृघातकः ।
"पादान् वा जानु वा जंघमपि वा चरणद्वयम् । कूर्परान्तं करौ सम्यक् क्षालयेत् प्रथमं बुधः ॥
"आचांतान्वैश्वदेवार्थान् प्राङ्मुखानुपवेशयेत् । आसनेषु च कूर्चेषु ततः पैतामहान्द्विजान् ॥
"उदङ्मुखान्निवेश्यैव ततः प्रेतार्थमुत्तमम् । प्रत्यङ्मुखं निवेश्यैनं सर्वं पित्र्यवदाचरेत् ॥
"एकोद्दिष्टनिषेधं तु यद्यदावाहनादिकम् । तत्सपिंडीकृतौ प्रेते सर्वं पित्र्यवदाचरेत् ॥
"करिष्ये पिंडसंयोगमिति पृष्ट्वा तदाज्ञया । दक्षिणाग्रेषु दर्भेषु अर्घ्यपात्रचतुष्टयम् ॥
"सादयेत्प्रथमं तत्र पित्र्यं पैतामहं ततः । प्रपितामहदैवत्यं ततः प्रेतार्थमुत्तमम् ॥
"पात्रेषु त्रिदलान्कूर्चानंतर्धाय तिलोदकम् । शं न इत्यादिभिर्मंत्रैर्निनयेत्तेषु च क्रमात् ॥
"प्रेतशब्दं पितृस्थाने यथालिंगं स्त्रिया अपि । पित्रर्घ्यं पितृहस्तेषु दत्वा प्रेतार्थमुत्तमम् ॥
"प्रेतविप्रकरे दत्वा या दिव्या इति मंत्रतः । देवपूर्वं तु गंधाद्यैर्विप्राणां पूजनं परम् ॥
"प्रेतोद्दिष्टे विशेषेण दद्यादाच्छादनादिकम् । अग्नौकरणहोमं च यथाशास्त्रं समाचरेत् ॥
"यथेष्टं भोजयेद्विप्रानन्नव्यंजनसंयुतम् । राक्षोघ्नाच्छ्रावयेन्मंत्रान्वैष्णवान्पैतृकानपि ॥

१ ग—दींश्च । २ ग—त्रं तु । ३ ग—भोजनम् । ४ क—पितृंश्चैव । ५ ग—षिद्धं । ६ ग—मन्तिमम् ।

"तृप्ताः स्थेति च पृष्टास्ते तृप्ताः स्मो ब्रुवते द्विजाः । अन्नं तु विकिरेद्भूमौ दद्यादाचमनं ततः ॥
"होमभोजनशेषाभ्यां पिंडान्कृत्वा तिलान्वितान् । पितामहादिपिंडांस्त्रीन्दद्यात्तु पितृयज्ञवत् ॥
"प्रेताय दक्षिणे दद्यात्पिंडं चोभययोदकम् । ये समाना इति द्वाभ्यां पितृपिंडेषु योजयेत् ॥
"पिंडसंयोजनादूर्ध्वं प्रेतत्वस्य निवृत्तितः । मार्जनादिषु कृत्येषु चतुर्थं विनिवर्तयेत् ॥
"अभ्यर्थयेत् द्विजांस्तेऽपि प्रतिब्रयूर्यथोचितम् । अन्नशेषमनुज्ञाप्य नमस्कृत्य निवर्तयेत्" ॥ इति
स्मृतिरत्ने—"इति बोधायनः प्राह सपिंडीकरणं ब्रवन् । अर्घ्योपस्थानमात्रं तु प्रेतपूर्वं महामुनिः ॥
"आवाहनादावन्यत्र पितृपूर्वत्वमूचिवान् । प्रेतपूर्वत्वशास्त्राणामयमर्थो व्यवस्थितः ॥
"एकं प्रेतस्य हि त्रीणि पितृणां चैकमेव वा । इत्यापस्तंबवाक्यं च न विरोधीति दृश्यते ॥
"भुंजानानाभिमुख्येन पुण्यसूक्तानि कीर्तयेत् । तदभिश्रवणं नाम तदप्यत्रोचिवान्मुनिः" ॥ इति ।
पुण्यसूक्तानि पुरुषसूक्तादीनि । पितृसूक्तमत्र वर्जयेत्
"नांदीमुखे गयाश्राद्धे नित्यश्राद्धे च मासिके । सपिंडीकरणश्राद्धे न जपेत्पितृसूक्तकम्" इति ।
स्मृतेः । **याज्ञवल्क्यः** (आ. २२८)—"द्वौ दैवे प्राक् त्रयः पित्र्ये उदगेकैकमेव वा" ॥
स्मृतिसारसमुच्चये तु—
"पूर्वं निमंत्र्य दैवे द्वौ त्रीन् विप्रान्पितृकर्मणि । दैवे पित्र्येऽपि वैकैकं सपिंडीकरणं विना" ॥ इति
ततश्च 'द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा' इत्यादौ एकैकवचनं सापिंड्यव्यतिरिक्तपार्वण विषयम् । **सायणीये**—
"सपिंडीकरणेऽवश्यं विष्णुमभ्यर्चयेत् द्विजे । सप्तकं तु तदा स्यातां विना विष्णुः कथं तथा" ॥
इति । विष्णुवरणाभावे सापिंड्यस्य सप्तकत्वख्यातिर्भज्येतेत्यर्थः । **तत्रैव**—
"इति वै देवलः प्राह शाण्डिल्यश्च महामुनिः । यत्किंचित्पार्वणश्राद्धं तत्र सर्वत्र वै द्विजे ॥
"पूजयेद्विष्णुमित्येवं श्राद्धं सिध्यति नान्यथा" ॥ इति ।

एवं विष्णुवरणाभावे दोषमाह **मनुः** (३।२०५)—
"दैवाद्यंतं भवेच्छ्राद्धं पित्राद्यंतं न तद्भवेत् । पित्राद्यंतं तदीहानः श्राद्धमाप्नोति निष्फलम्" ॥ इति
चंद्रिकायाम्—
"स्वधाशब्दं धूपदीपौ नमः शब्दं प्रयोजयेत् । नैवं प्रेते नमः शब्द उपतिष्ठपदं भवेत् ॥
"विप्रपाणावथाग्नौ वा जुहुयादाहुतिद्वयम् । निरूह्य वह्नेरंगारान्प्रेतस्य च यमस्य च ॥
"स्वाहेति जुहुयादन्नमुक्तैतद्गोत्रनामनी । प्रेतहस्तेऽपि वा हुत्वा भोजयेच्च यथाक्रमम् ॥
"संबुध्यानिर्दिशेन्नाम पित्रादीनामसाविति । यज्ञशर्मन्निमं पिंडमुपतिष्ठेति चांततः ॥
"पिंडं चतुर्थं प्रेताय दद्याद्दक्षिणहस्ततः । प्रेतपात्रस्थमुदकं पित्राद्यर्घेष्वथानयेत् ॥
"समानो मंत्र इत्याभ्यामृग्भ्यां चैव यथाक्रमम् । मधुत्रयेण चादाय प्रेतपिंडं त्रिधा कृतम् ॥
"संगच्छध्वमिति द्वाभ्यां पितृपिंडेषु योजयेत् । ये समाना इति द्वाभ्यां पिंडोपस्थानमिष्यते ॥
"पिंडसंयोजनादूर्ध्वं प्रेतत्वस्य निवृत्तितः । मार्जनादिषु सर्वत्र चतुर्थो विनिवर्तते ॥
"केवलः पितृशब्दस्तु पितृसामान्यवाचकः । पितामहादिसंबंधं तत्तन्मंत्रादिषूहयेत्" ॥
बोधायनः—"मधुत्रयेण संगच्छध्वं समानो मंत्र इति त्रिभिर्द्वाभ्यां वा अर्घ्यसंसर्गः संगच्छध्वं

१ ग-तस्यो ।

समानो मंत्र इति द्वाभ्यां पिंडसंसर्गः" इति। **आश्वलायनः**–"समानो मन्त्रः समानीव इति द्वाभ्यामर्घ्यसंसर्गो मधुमती त्रिः संगच्छध्वं समानो मन्त्र इति त्रिभिः पिण्डसंसर्गः" इति। **गौतमः**—"ये समाना इत्यर्घ्यसंसर्गो ये सजाता इति पिंडसंसर्गः" इति। **वैखानसः**–"समानो मन्त्रः समानीव इति द्वाभ्यामर्घ्यसंसर्गः संगच्छध्वं समानो मन्त्र इति द्वाभ्यां पिण्डसंसर्गः" इति। **शातातपः**—"निर्वपेच्चतुरः पिंडाञ्श्रद्धया पितृनामतः। पिंडान्दत्वा पितॄणां तु पश्चात्प्रेतस्य पार्श्वतः॥ "तं च पिंडं त्रिधा कृत्वा आनुपूर्व्याच्च सत्तमः। निदध्यात् त्रिषु पिंडेषु एष संसर्जने विधिः"॥इति। संसृज्यमानपिंडाभिप्रायेण चतुरः पिंडानित्युक्तम्। यथास्वसूत्रं पिंडसंख्या द्रष्टव्या। "द्वेधा दक्षिणाग्रान्" इत्यादिना **आपस्तंबेन** पितृमातृवर्गयोरुभयोरपि पिंडदानविधानादापस्तंबिनः प्रेतपिंडेन सह सप्तपिंडान्दद्युः। तथा **पितृमेधसारे**—"हुतशेषमिश्रैरन्नैस्तिलयुक्तैः सप्तपिण्डाननुमरणेऽष्टौ पिण्डाननेकसापिण्ड्ये तावतो निमित्तपिण्डान् कृत्वोच्छिष्टसन्निधावग्ने दक्षिणतस्त्रेधा दक्षिणाग्रान् दर्भान् संस्तीर्य दक्षिणामुखः सव्यं जान्वाच्य तेषु मध्यमदर्भेषु मार्जयन्तां मम पितुः पितरः पश्चिमदर्भेषु मार्जयन्तां मम पितुर्मातर इत्याभिर्दक्षिणापवर्गं मार्जयेत्। अत्र पूर्वं मातृमृतौ मार्जयन्तां मम मातर इति मार्जयित्वा मार्जनक्रमेण एतत्ते पितुस्ततेत्यादिभिः षट् पिण्डान् दत्वा ये च त्वामनु याश्च त्वामन्विति प्रतिपिण्डं दर्भमूलेषु लेपं निमृज्य मार्जयतां मम प्रेतः मार्जयतां मम प्रेतेत्यपो दत्वा अमुकगोत्रामुकशर्मन् प्रेतैतं पिण्डमुपतिष्ठेति प्रेतपिण्डं प्रदाय अमुकगोत्रे अमुकनाम्नि प्रेते इति स्त्रियाः ब्राह्मणाभ्यनुज्ञातः समानो मन्त्रः समानीव इति द्वाभ्यां प्रेतार्घ्यं पित्राद्यर्घ्यपात्रेषु निनीय तूष्णीं प्रेतपिण्डमादाय त्रेधा विभज्य तद्भागत्रयं पित्रादिपिण्डानां पुरस्तान्निधाय वैतरणीगोदानं कृत्वाऽनुज्ञातो मधुमतीभिः सङ्गच्छध्वं समानो मन्त्रः समानीव इति चतुर्भिस्तत्पिण्डैःसह त्रयं हस्ताभ्यां युगपत्संसृजेत्। एवं प्रेतपिण्डं पित्रादिपिण्डैः संसृज्य ये समाना ये सजाता इति द्वाभ्यां पिण्डानुपस्थाय संसृष्टेनार्घ्योदकेन मन्त्रानूहेन पूर्ववन्मार्जयेत्×" इति॥+ "सव्यंजनैः सप्तपिंडाननुमरणेऽष्टौ पिंडान्दद्युः" इति। अत्र **याज्ञवल्क्यः** (आ. २४२)—"सर्वमन्नं समादाय सतिलं दक्षिणामुखः। उच्छिष्टसंनिधौ पिंडान्दद्यात् वै पितृयज्ञवत्"॥ इति। सर्वमन्नमिति पायसापूपफलादीत्यर्थः। **बोधायनः**—"सर्वोपकरणैर्यथोपपादनं संपूज्याक्षय्यं वाचयित्वा स्वधां वाचयित्वोत्थाप्योपसंगृह्य प्रसाद्य प्रदक्षिणीकृत्यानुव्रज्य यथेतमेत्य दक्षिणेनाग्निं दर्भान्संस्तीर्य तेष्वन्नशेषैः पिंडान् ददाति नोच्छिष्टं परिसमूहत्यत्र पिंडान्ददाति" इति।

आपस्तंबः–"भुक्तवतोऽनुव्रज्य प्रदक्षिणीकृत्य द्वेधा दक्षिणाग्रान्दर्भान्संस्तीर्येत्यादि"॥

आश्वलायनः—"भुक्तवत्स्वनाचांतेषु पिण्डं निदध्यात्। आचान्तेष्वित्येके" इति।

जमदग्निः—"नदी वैतरणी नाम दुर्गन्धरुधिरावहा। कृष्णतोयवहा वेगिन्यस्थिकेशतरङ्गिणी॥
"दत्ता गौर्येन सापिंड्ये स तां तरति नेतरः। अकृते तत्र पच्यन्ते प्रायश्चित्ते तु पापिनः॥
"विभक्तं प्रेतपिंडं तु पितृपिंडेषु योजयेत्। तृचेन[२] मधुवातेति संगच्छध्वं तृचेन तु"॥ इति।

स्मृत्यर्थसारे—

"सपिंडीकरणेष्वेतान्पिंडानप्स्वेव निक्षिपेत्। अन्यथा करणे तेषां पितृदेवा रुदंति हि"॥

आश्वलायनोऽपि—

"पत्न्यां रजस्वलायां च व्याधितायामथापि वा। प्रक्षिपेन्मध्यमं पिंडं जले गव्यथवानले॥

× क्ष- + अत्र याज्ञवल्क्यः। १ क्ष-तं। २ ग-त्रि।

" पतितायां च वा पत्न्यां मृतायां च तथा द्विजः। सपिण्डीकरणे चैव मध्यं पिण्डं तथाचरेत् ॥
" वृद्धिश्राद्धे सपिण्ड्यां च प्रेतश्राद्धेऽनुमासिके। संवत्सरविमोके च न कुर्यात्तिलतर्पणम् ॥
"नवश्राद्धानि मिश्राणि सपिंडीकरणं तथा। कृत्वा तु विधिवत्स्नायान्नैव स्नायान्मृतेऽहनि"॥ इति। मिश्राणि सपिंडीकरणात्पूर्वभावीनि षोडशश्राद्धानीति **व्याख्यातारः**।

मातृसापिण्ड्यविधिः। मातुः सपिंडीकरणमाह **शंखः**—
" मातुः सपिंडीकरणं कथं कार्यं भवेत्सुतैः। पितामह्यादिभिः सार्धं सपिंडीकरणं स्मृतम् "॥ इति।
विज्ञानेश्वरोऽपि (पृ. ७५ पं. १२)—
"पितामह्यादिभिः सार्द्धं सपिंडीकरणं सुतः। मातुः कुर्वीत पित्राद्यैः पितुः कुर्याद्यथाविधि"॥ इति। मातुः पितामह्यादिभिः सार्धमिति संबंधः। **काश्यपः**—
"योजयेन्मातुरर्घ्यं च ऋग्भ्यां[1] मात्रादिषु त्रिषु। एवं त्रिधा कृतं पिंडं त्रिषु पिंडेषु योजयेत्"॥ इति। मात्रादिषु पितामह्यादिषु। प्रमीतपितृकस्य विकल्पमाह **यमः**—
" जीवत्पिता पितामह्या मातुः कुर्यात्सपिंडताम्। प्रमीतपितृकः पित्रा पितामह्याऽथ वा सुतः " ॥
लोकाक्षिरपि—
" पितामह्यादिभिः सार्धं मातरं तु सपिंडयेत्। पितरि म्रियमाणे तु तेन वोपरते सति " ॥ इति।
अन्वारोहणे तु भर्त्रैव सापिंड्यं नियतम्। तदाह **शातातपः**—
" मृता याऽनुगता नाथं सा तेन सह पिण्डताम्। अर्हति स्वर्गवासेऽपि यावदाभूतसंप्लवम् " ॥ इति।
यमः—
" पत्या चैकेन कर्तव्यं सपिंडीकरणं स्त्रियाः। सा मृताऽपि हि तेनैक्यं गता मंत्राहुतिव्रतैः"॥ इति।
अत्रैकशब्दः पितामह्यादिविकल्पस्य व्यावृत्त्यर्थः। **षट्त्रिंशन्मतेऽपि**—
" मातुः सपिंडीकरणं पत्या सार्धं विधीयते। यस्मात्पतिव्रतानां तु सैव संततिरिष्यते "॥ इति।
शंखश्च—" अन्वारोहे तु भर्त्रैव मातुः सह सपिंडनम् "। **स्मृतिसारसमुच्चये**—
" परेद्युरनुयाने तु मरणाहःक्रमेण तु। दहनादिसपिंड्यंतं सह कुर्याद्यथाविधि ॥
" पिंडं दत्वा स्वधां तस्या भर्तृपात्रे निनीय तु। मंत्रेणैव तु तत्पात्रं पितृपात्रेषु सेचयेत् ॥
" भर्तृपिंडेन संसृज्य पितृपिंडैस्तु संसृजेत् " ॥ इति ॥
विश्वादर्शे—"स्त्रीपिंडे पतिपिंडगे तदनु तं पित्रादिभिर्मिश्रयेत्" इति। **चंद्रिकायां** विशेषोऽभिहितः-
" दशाद्द्वादशान्विप्रान्निमंत्र्य द्वादशेऽहनि। द्विधास्तृतेषु दर्भेषु त्वर्घ्यपात्रं प्रकल्पयेत् ॥
" पित्रादेश्च पुनश्चैव मात्रादेस्तदनंतरम्। पित्रर्घ्यपात्रमुदकं क्रमात्पैतामहादिषु ॥
" ये समाना इति द्वाभ्यां मंत्राभ्यां योजयेत्क्रमात्। योजयेन्मातुरर्घ्यं च ऋग्भ्यां मात्रादिषु त्रिषु ॥
" एवं त्रिधा कृतं पिंडं पिंडेषु त्रिषु योजयेत्। पित्रोः संघातमरणे त्वनुयानविधिः स्मृतः "॥ इति।
एतत् " दैवं पित्र्यं च तंत्रं स्यान्निमित्तं प्रतिपूरुषम्। पिंडं दत्वा स्वधां तस्या भर्तृपात्रे निनीय च"॥ इत्यादि **वचन**विरोधाच्छिष्टाचाराभावाच्चानादरणीयम्।
गालवः—" एकचित्यां समारूढौ दंपती निधनं गतौ। एकोद्दिष्टं षोडशं च भर्तुरेकादशेऽहनि ॥
" द्वादशेऽहनि संप्राप्ते पिंडमेकं द्वयोः क्षिपेत्। पितृपिंडेन संयोज्यं मातृपिंडं पुनस्त्रिधा ॥
" पितामहादिपिंडेषु विभज्य विनियोजयेत् " ॥ इति। **वसिष्ठस्तु**—
" अनुयाने तु पतिना सपिंडीकरणं सह। अंतर्धाय तृणं मध्ये भर्तुः श्वशुरयोरपि " ॥ इति।

---

१ क्ष-मातामह्यादिक।

यमोऽपि—" तूष्णीं दंपतिपिंडाभ्यां कुशैरंतरयेत्पितॄन् ।
"श्वशुरस्याग्रतो यस्माच्छिरः प्रच्छादनक्रिया । पुत्रैर्द्वर्भेण सा कार्या मातुरभ्युदयार्थिभिः" ॥ इति । बहुपत्न्यनुमरणे तु " निमित्तपिण्डमेकैकं दत्वा तैः संसृजेत्क्रमात् " इति **स्मरणात्** प्रतिपत्न्येकैकं पिंडं दत्वा ज्येष्ठक्रमाद्विभज्य मंत्रावृत्त्या संसृजेत् ।

" बहुपत्नीकपक्षे तु मंत्रावृत्तिः पुनःपुनः । विभज्य पिंडं दद्यात्तु गार्ग्यस्य वचनं तथा " ॥ इति **स्मरणात्** । मातापित्रोः सहमरणेऽपि मातृपिंडं पितृपिंडेन संयोज्य तं पिंडं त्रिधा विभज्य पितामहादिपिंडेषु त्रिषु संसृजेत्

" पित्रोः संघातमरणे त्वनुयानविधिः स्मृतः । पृथगेवान्यथा कुर्यादिति प्राह पितामहः " ॥ इति **स्मरणात्** । तथा **स्मृत्यर्थसारे**—" अनुमरणे सहमरणे च तस्या अर्घ्यपिंडौ पत्युरर्घ्यपिंडाभ्यां पूर्वं संसृज्य पश्चादर्घ्यपिंडौ त्रिधा विभज्य पित्राद्यर्घ्यपिंडैः पूर्ववत्संसृजेत् " इति विवेकः । एवं च पितुः सपिंडीकरणे प्रेतार्घ्यपिंडं त्रिधा विभज्य पित्राद्यर्घ्यपिंडैः संसृजेत् । मातुः सपिंडीकरणे प्रेतार्घ्यं पित्राद्यर्घ्यैः संसृज्य प्रेतपिंडं पितामह्यादिपिंडैः संसृजेत् । प्रमीतपितृकस्तु पित्रादिपिंडैः पितामह्यादिपिंडैर्वा संसृजेत् । पितामह्यादिपिंडसंसर्गः शिष्टाचारानुगुणः । अनुमरणे सहमरणे च तस्या अर्घ्यपिंडौ पत्युरर्घ्यपिंडाभ्यां संसृज्य त्रिधा विभज्य पित्राद्यर्घ्यपिंडैः संसृजेदिति विवेकः । तथा च " पितामह्यादिभिः सार्धं सपिंडीकरणं स्मृतम् " इति पूर्वोक्त**शंखा**दिवचनानि तत्तत्सपिंड्यसंसर्गाभिप्रायाणि । न तु श्राद्धदेवताप्रतिपादनपराणि । श्राद्धदेवतास्तु सर्वत्र पित्रादय एव भोजनीयाः । तथा **विज्ञानेश्वरः** (पृ. ७३ पं. १९)—

" सपिंडीकरणश्राद्धं देवपूर्वं नियोजयेत् । पितॄनेवाशयेत्तत्र पुनः प्रेतं च निर्दिशेत् " ॥ इति ।

स्मृत्यंतरे च—

"मातुः पितुश्च सापिंड्ये पित्रादीनेव भोजयेत् । पितामह्यादिभिः सार्धं मातुः कुर्यान्मृतेऽहनि"॥ इति।

अन्यत्रापि—

"सापिंड्ये ह्युभयत्रापि पितरश्चैव देवताः । स्त्रीणामर्घ्यं तु पित्रंशे नयेत्पिंडान् स्त्रियादिषु"॥इति । पित्रादीनां भोजनविधानात्तेषामेवार्घ्यसद्भावात्स्त्रीमृतौ प्रेतार्घ्यं पित्राद्यर्घ्यैः संसृजेत् । पितामह्यादेर्भोजनाभावेऽपि पिंडदानविधानात्स्त्रीपिंडं पितामह्यादिपिंडेष्वेव योजयेदित्यर्थः । तथा च **स्मृत्यंतरे**—

"स्त्रीमृताहे स्त्रियो भोज्याः पितरस्त्रीसपिंडने । पित्रादेरेव होमः स्यात्पिंडदानं तु वर्गयोः "॥ इति । पितरः जीवपितृकस्य पितामहादयस्त्रयः प्रमीतपितृकस्य पित्रादयस्त्रयः श्राद्धदेवताः । तेषां भोजनं होमश्च होममंत्रेषु चोहोऽस्ति । पिंडदानं तु पित्रादीनां पितामह्यादीनां तिसृणां चेत्यर्थः । **रुद्रस्कंदे** च—

" स्त्रीणां सापिंड्ये भर्तुः पित्रादिभ्यः पिंडं दद्यात् । तथैव तेषां स्त्रीभ्यः " इति । अतः पितामह्यादीनां भोजनाभावे पिंडदानसद्भावात्पितामह्यादिपिंडैर्मातृपिंडसंयोगो युज्यते । तथा च **पितृमेधसारे**—" पुंसः स्त्रिया वा सापिंड्ये पित्रादीनेव वृणुयात्पुंसः पिंडं पित्रादिपिंडैः संसृजेत्स्त्रियाः पिंडं श्वश्र्वादिपिंडैरेवानुमृतौ पत्या " इति । **अत्र केचिदाहुः**—" पितामह्यादिभिः सार्धं सपिंडीकरणं स्मृतम् " इति **शंखा**दिवचनानि मातृसापिंड्ये पितामह्यादिभोजनपराणि न तु पिंडसंसर्गमात्राभिप्रायाणि ' पितॄनेवाशयेत्तत्र ' इत्यादीनि त्वनुमृतिविषयाणि । अनुयाने पित्रादिपिंडेष्वेव तत्पिंडसंयोगविधानाद्भोजनमपि तेषां तत्र युज्यत इति ।

अपरे पुनराहुः—

" सपिंडीकरणं पित्रोः पितृयज्ञविधानतः " इति **स्मरणात्पिंडपितृयज्ञे** पिंडत्रयविधानात्

"तिलयुक्तेन चान्नेन पिंडांस्त्रीनेव पुत्रकः । पितॄनुद्दिश्य दर्भेषु कुर्यादुच्छिष्टसनिधौ" ॥ इति **स्मरणात्कात्यायनाश्वलायनादिभिश्च** पिण्डपितृयज्ञप्रकरणे पार्वणपिंडविधानात्तत्र पित्रादीनां भोजने पितामह्यादीनां पिंडदानस्यानौचित्यात्पिंडपितृयज्ञविधानेनानुष्ठातॄणां मातृसापिंड्ये पितामह्यादीनामेव भोजनम् । पितामह्यादिपिंडैरेव मातृपिंडसंसर्गः । " पितामह्यादिभिः सार्धं सपिंडीकरणं स्मृतम् " इत्यादीनि च पिंडत्रयवतां पितामह्यादिभोजनपिंडदानतत्संसर्गपराणि ' पितॄनेवाशयेत्तत्र ' इत्यादीनि तु पिंडषट्कवतां पित्रादिभोजनपराणि । ' पितामह्यादिभिः सार्धम् ' इति वचनात्पितामह्यादिभिः सह पिंडसंसर्ग इति । यथाकुलाचारमिह व्यवस्था

" यत्र शास्त्रगतिर्भिन्ना सर्वकर्मसु भारत । उदितेऽनुदिते चैव होमभेदो यथा भवेत् ॥

" तस्मात् कुलक्रमायातमाचारं त्वाचरेद्बुधः । स गरीयान्महाबाहो सर्वशास्त्रोदितादपि " ॥ इति **सुमंतुस्मरणात्** । पुत्रिकासुतो मातृसपिंडनं मातामहादिभिः सह कुर्यात् । तथा च **बोधायनः**—

" आदिशेत्प्रथमे पिंडे मातरं पुत्रिकासुतः । द्वितीये पितरं तस्यास्तृतीये च पितामहः " ॥ इति ।

व्याघ्रः[2]—

"मातुः प्रथमतः पिंडं निर्वपेत्पुत्रिकासुतः । द्वितीयं तु पितुस्तस्यास्तृतीयं तु पितुः पितुः" ॥ इति ।

सुमंतुरपि—

" पिता पितामहे योज्यः पूर्णे संवत्सरे सुतैः । माता मातामहे[3] तद्वदित्याह भगवाञ्छिवः[4] " ॥ इति ।

उशना अपि—

" पितुः पितामहे यद्वत्पूर्णे संवत्सरे सुतैः । मातुर्मातामहे तद्वदेषा कार्या सपिंडता " ॥ इति ।

व्याघ्रः—

" पत्न्या सहैकता तावत् यावत्पुत्रोऽनुजायते । पुत्रिकासुत उत्पन्ने पत्न्येकत्वं निवर्त्तते " ।

बोधायनः—

" कोकिलस्य यथा पुत्रा अन्यसंबंधजीविनः । पुष्टास्ते स्वकुलं यांति सपुत्रा पुत्रिका तथा ॥

" मातुर्मातुः पितुर्नित्यं तस्याश्चैव पितुःपितुः । प्रदद्यात्पुत्रिकापुत्रः पिंडदाने त्वयं विधिः" ॥ इति ।

एतत्सर्वं ब्राह्मादिविवाहेषु द्रष्टव्यम् । आसुरादिविवाहेषु विकल्पमाह **शातातपः**—

"तन्मात्रा तत्पितामह्या तच्छ्वश्र्वा वा सपिंडनम् । आसुरादिविवाहेषु वर्णानां योषितां भवेत्" ॥ इति । तद्भवेद्योषितामिति । **स्मृत्यंतरे**—

" मातुः सपिंडीकरणं मातामह्यादिभिः स्मृतम् । मातामह्यादिभिर्वाऽपि ह्यासुराद्यागतः सुतः " ॥

विज्ञानेश्वरः (पृ. ७५. पं. २७–३२)—" मातामहेन मातुः सापिंड्ये मातामहश्राद्धं पितृश्राद्धवन्नित्यमेव । पत्न्या वा पितामह्या वा मातुः सापिंड्ये मातामहश्राद्धमनित्यम् । कृते त्वभ्युदयः । अकृते न प्रत्यवायः " इति । **यमश्च**—

" मातुः सपिंडीकरणं पित्रैकेन त्रिभिश्च वा । आसुराद्यागतः पुत्रः पितामह्यादिभिस्तु वा" ॥ इति पित्रैकेनेत्यनुमृतिविषयम् । तच्चोक्तप्रकारं द्रष्टव्यं **चंद्रिकायाम्**—

" पितामह्यादिभिर्धर्म्यविवाहोढस्त्रियाः सुतः । पितृपक्षैर्मातृपक्षैरासुराद्यागतः सुतः ॥

" विवाहपुत्रभेदेन तद्गोत्रं च व्यवस्थितम् " इति ।

---

१ क्ष–पितृयज्ञ । २ **खग**–व्याघ्रपादः । ३ **कखग**–योज्या । ४ **कखग**–भार्गवः । ५ **क**–वेधाः ।
६ **क्ष**–हाणां तदमवेद्योषितामिति । ७ **ग**–ता ।

पितृमेधसारे तु—" आसुरादिविवाहेऽपि पितामह्यादिभिरेव वचनादाचाराद्विकल्पस्मरणाच्चेति पितामह्यादिपिंडैरेव मातृपिंडं शिष्टाः संयोजयंति। किं **चापस्तंबेन**—" दुहितृमते अधिरथं गवां शतं देयम् " इति कन्याधिगमार्थद्रव्यदानविधानाद्दक्षिणे निमित्तमाचार्यो विवाह इति द्रव्यार्जननिमित्तेषु विवाहस्य परिगणनाद्गौतमेन च (४।१३) ' षडित्येक ' इति पंचमविवाहस्यासुरस्य धर्म्यत्वस्मरणात् " पितामह्यादिभिर्धर्म्यविवाहोढस्त्रियाः सुतः " इति वचनात्पितामह्यादिपिंडैरेव मातृपिंडसंयोगः। " पितृपक्षैर्मातृपक्षैरासुराद्यागतः सुतः " इति विकल्पस्मरणेऽपि वैकल्पिकधर्मेष्वाचारस्यैव व्यवस्थापकत्वात्पितृपक्षैः पितामह्यादिभिरेव पिंडसंयोग इत्याहुः।

मातु. सापिण्ड्ये गोत्रनियमः। मातुः सापिंड्ये गोत्रनियममाह **मार्कंडेयः**—

" ब्राह्मादिषु विवाहेषु या तूढा कन्यका भवेत्। भर्तृगोत्रेण कर्त्तव्यास्तस्याः पिंडोदकक्रियाः॥
" आसुरादिविवाहेषु पितृगोत्रेण धर्मवित् "॥ इति। ब्राह्मादिविवाहाभिप्रायेणाह **शातातपः**—

"स्वगोत्राद्भ्रश्यते नारी विवाहात्सप्तमे पदे। स्वामिगोत्रेण कर्त्तव्यास्तस्याः पिंडोदकक्रियाः"॥ इति।

बृहस्पतिरपि—

पाणिग्रहणका मंत्राः पितृगोत्रापहारकाः। तस्याः स्वभर्तृगोत्रेण देयं पिंडोदकं तथा "॥ इति।

मनुः—"पितृगोत्रं कुमारीणामूढानां भर्तृगोत्रतः"। इति आसुरादिविवाहाभिप्रायेण **विज्ञानेश्वरीये** (पृ. ७५ पं. ५)

" पितृगोत्रं समुत्सृज्य न कुर्याद्भर्तृगोत्रतः। जन्मन्यपि विपत्तौ च नारीणां पैतृकं कुलम्"॥ इति।

लोकाक्षिः—"मातामहस्य गोत्रेण मातुः पिंडोदकक्रियाम्। कुर्वीत पुत्रिकापुत्र एवमाह प्रजापतिः"॥

कालादर्शे—" विवाहपुत्रभेदेन तद्गोत्रं च व्यवस्थितम् " इति।

ब्राह्मादिविवाहभेदेन औरसपुत्रिकापुत्रभेदेन च तद्गोत्रं स्त्रीगोत्रव्यवस्थितम्। ब्राह्मादिविवाहचतुष्टयोढायाः स्त्रियाः भर्तृगोत्रेणौर्ध्वदैहिकं कार्यम्। आसुरादिविवाहचतुष्टयोढायाः स्त्रियाः पितृगोत्रेण औरसपुत्रो भर्तृगोत्रेण पुत्रिकापुत्रो मातामहगोत्रेण कुर्यादित्यर्थः। एतच्च

" अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम्। अस्यां यो जायते पुत्रः स मे पुत्रो भविष्यति"॥
इति (१७।१७) **वसिष्ठोक्त**प्रकारेण दाने मातामहगोत्रत्वम्

" अपुत्रोऽहं प्रदास्यामि तुभ्यं कन्यां भवानपि। पुत्रार्थी चेदिहोत्पन्नः स नौ पुत्रो भवेदिति।
कात्यायनोक्तप्रकारेण ऊढाया मातुः मातामहगोत्रेण पितृगोत्रेण वा कुर्यात्। एवं पुत्रिकापुत्रस्यापि मातामहसंबंधे तद्गोत्रत्वमुभयसंबंधे गोत्रविकल्पश्च सिद्धः। तथा **कालादर्शे**—

" कुर्यान्मातामहश्राद्धं नियमात्पुत्रिकासुतः। उभयोरपि संबंधे कुर्यात्स उभयोरपि "॥

वृद्धहारीतश्च

"मातामहपितृभ्यां च प्रदद्यात्पुत्रिकासुतः। उभयोरपि संबंधे यस्मादुभयगोत्रताम् "॥ इति
दत्तस्य प्रतिगृहीतृगोत्रमेव।

" गोत्रांतरप्रविष्टानां दायमाशौचमेव च। ज्ञातित्वं च निवर्त्तन्ते तत्कुले सर्वमिष्यते "॥
इति **स्मरणात्**। यत्तु **पैठीनसि**वचनं "अथ दत्तकृतकृत्रिमपुत्रिकापुत्रक्षेत्रजाः परिग्रहेणार्षेण जाता ह्यामुष्यायणका भवंतीति " तदुपनयनांतरं गोत्रांतरे यो दत्तस्तद्विषयमित्यधस्तान्निरूपितम्।

१ ग-ता।

धारापूर्वं दत्ताया विवाहात्पूर्वं मृताया भर्तृगोत्रेण पितृगोत्रेण वा क्रिया कार्या
"दत्ताऽनूढा च या कन्या संस्कार्या भर्तृगोत्रतः" इति ।
"स्वगोत्राद्भ्रश्यते नारी विवाहात्सप्तमे पदे" इति उभयथा **स्मरणात्** ।
अनेकभर्तृकाया आद्यभर्तृगोत्रेण कर्तव्यम् । तदाह **ऋष्यशृङ्गः**—
"स्त्रीणामाद्यस्य वै भर्तुर्यद्गोत्रं तेन निर्वपेत् । यदि त्वक्षतयोनिः स्यात् पतिमन्यं समाश्रिता"॥
"तद्गोत्रेण तदा देयं पिण्डं श्राद्धं तथोदकम् ।
स्मृत्यंतरे—
"गोत्रस्य त्वपरिज्ञाने काश्यपं गोत्रमिष्यते । यस्मादाह श्रुतिः सर्वाः प्रजाः काश्यपसंभवाः ॥
"पित्रादीनां यदा नाम पुत्रैर्न ज्ञायते तदा । पृथिवीषत्पिता वाच्यस्तत्पिता चांतरिक्षसत् ॥
"अभिधानापरिज्ञाने दिविषत्प्रपितामहः" ॥ इति ।
राजविशोः पुरोहितगोत्रेण कार्यम् । तथा च **कात्यायनः**—
"पुरोहितस्य गोत्रेण कार्या राजविशोः क्रियाः । दद्यात्पिंडोदके श्राद्धं तुष्टिं शूद्रस्य नामतः"॥ इति ।
तच्च नाम शूद्रस्य दासांतमित्याह **बोधायनः**
"शर्मांतं ब्राह्मणस्योक्तं वर्मांतं क्षत्रियस्य तु । पोषांतं चैव वैश्यस्य दासांतं शूद्रजन्मनः" ॥ इति ।
सपिंडीकरणं स्वसूत्रेणैव कार्यम्
"अलब्धात्मीयसूत्रस्य श्राद्धांतं परसूत्रतः । कुर्यात्सापिंडीकरणं स्वसूत्रेणैव नान्यथा ॥" इति **भरद्वाजस्मरणात्** ।
अपुत्रायाः पत्न्याः सापिंड्ये भर्ता स्वपित्रादीन्भोजयित्वा स्वमात्रादिपिंडैः सह तत्पिंडं योजयेत्
"स्त्रीमृताहे स्त्रियो भोज्याः पितरस्त्रीसपिंडने । पित्रादेरेव होमः स्यात्पिंडदानं तु वर्गयोः ॥
"अपुत्रायां मृतायां तु पतिः कुर्यात्सपिंडनम् । श्वश्र्वादिभिः सहैवास्याः सपिंडीकरणं भवेत् ॥
"पत्न्याः कुर्यादपुत्रायाः पतिर्मात्रादिभिः सह" ॥ इति **स्मरणात्** । पत्नीमृताहश्राद्धे तु पत्नीमातृपितामहीर्भोजयेत्
"स्त्रीश्राद्धे वृणुयाद्भर्ता पत्नीमातृपितामहीः । पितृव्याग्रजयोः श्राद्धे तत्तात्पितृपितामहान्[1]" ॥ इति **स्मरणात्** । **स्मृतिरत्ने**—
"अभर्तुर्योषितः पिंडं भर्तृपिंडेन योजयेत् । यदि जीवति भर्ता तु श्वश्र्वादिषु नियोजयेत् ॥
"पत्यौ जीवति संसर्गं स्त्रीपिंडेषु स्त्रिया भवेत् । मृते भर्तरि पत्यौ[2] च सर्वत्रेति विनिर्णयः ॥
"अनपत्या यदा नारी पतिपिंडेन योजयेत् । यदा पुत्रवती नारी पितामह्यादिभिः सह ॥" इति ।
संग्रहेऽपि—"मृतप्रियायाश्च तथैव लोके पठंति संतः पतिपिंडयोगम् ।
"जीवप्रियायाश्च तथैव पिंडं श्वश्र्वादिपिंडैः सह संसृजेद्धि"॥ इति । पतिपिण्डं संसृष्टं पुनस्त्रेधा कृत्वा तत्रैकमंशमवस्थाप्यावशिष्टमंशद्वयं पितृपितामहपिंडाभ्यां योजयेदिति **पूर्णसंग्रहे** ।
एवं च भोजनं होमश्च पतिपितृपितामहानाम् । पित्रोः सपिंडीकरणं ज्येष्ठेनैव कार्यम्
"सर्वैरनुमतिं कृत्वा ज्येष्ठेनैव तु यत्कृतम् । द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेत् ॥
"सपिंडीकरणं पित्रोर्न कार्यमखिलैः सुतैः । एकेनापि कृते सम्यक्पुत्रत्वगुणसंभवात् ॥

१ ग–ह्रौ । २ ख–त्वा ।

" ज्येष्ठपुत्रस्य सद्भावे कनिष्ठः कुरुते क्रियाम्। प्रेतत्वान्न विमुच्येत पितृत्वं च न गच्छति॥
" ज्येष्ठपुत्रे तु दूरस्थे कनिष्ठश्च यथोदितम्। कुर्यात् पित्रोस्तु संस्कारं सपिंडीकरणं न तु॥
" यवीयसा कृतं कर्म प्रेतशब्दं विहाय तु। तदग्रजेन कर्त्तव्यं सपिंडीकरणं पुनः॥
" नवश्राद्धं सपिंडत्वं श्राद्धान्यपि च षोडश। एकेनैव तु कार्याणि संविभक्तधनेष्वपि"॥
इत्यादिवचनान्यत्रावगंतव्यानि। **स्मृत्यन्तरे** तु—
" मासिकं सोदकुम्भं च सपिण्डीकरणं तथा। पृथग्विभक्ताः कुर्वीरन् मिलित्वा वा ह्यशक्तितः"॥
एतच्चाधस्तात्प्रतिपादितम्। ज्येष्ठस्यापत्नीकत्वे कनिष्ठ एव सपिंडनं कुर्यात्। तस्यैव साग्निकत्वात्।
तथा **पैठीनसिः**—
" सपिंडीकरणं पुत्रः पितुः कुर्वीत योऽग्निमान्। अनग्नेस्तु क्रिया नान्या एकोद्दिष्टादृते क्वचित्"॥
स्मृत्यंतरे च—
" यद्यग्निर्दूरतो विप्रः सापिंड्ये समुपस्थिते। भ्रातृभिः कारयेच्छ्राद्धं साग्निकैर्विधिवत्ततः॥
"औपासनाग्नौ दूरस्थे समीपे भ्रातरि स्थिते। यद्यग्नौ जुहुयाद्वापि पाणौ वा स हि पातकी॥
"ज्येष्ठपुत्रोऽग्निमान्न स्यात्कनिष्ठस्त्वग्निमान्यदि। कनिष्ठ एव कुर्वीत सपिंडीकरणं पितुः"॥ इति।
उद्वाहानंतरं पुनःसपिंडीकरणं कर्त्तव्यम्—
"ज्यायस्यनग्नावन्यस्तु साग्निः पित्रोः सपिंडनम्। कुर्यात् त्यक्त्वा प्रेतशब्दं सत्यग्नावग्रजः पुनः"॥इति।

पुनःसपिंडीकरणप्रकारश्चंद्रिकायामभिहितः

" यवीयसा कृते श्राद्धे प्रेतशब्दं विहाय च। तदग्रजेन कर्तव्यं सपिंडिकरणं पुनः॥
" सपिंडीकरणं नाम पुनः पार्वणवद्भवेत्। अर्घ्यसंयोजनं कुर्यात्पिंडसंयोजनं तथा॥
" प्रेतत्वात्तु विनिर्मुक्तः पुनस्तेन न निर्दिशेत्। प्रेतशब्दं विना सर्वं कार्यमित्याह गौतमः"॥ इति।
हेमाद्रौ तु " सपिंडीकरणं नाम पुनः पार्वणधर्मवत्।
" पितृशब्देन कर्तव्यं प्रेतशब्दं विहाय च। अर्घ्यसंयोजनं नास्ति पिंडसंयोजनं तथा॥
" एकादशेऽन्हि कर्त्तव्यं सपिंडीकरणं पुनः। द्वादशाहे न कर्त्तव्यमिति शातातपोऽब्रवीत्॥
" यः सपिंडीकृतं प्रेतं पुनः पिंडेन योजयेत्। विधिघ्नस्तेन भवति पितृहा चोपजायते" इति॥
एवं चार्घ्यपिंडसंयोगतदभावयोर्विकल्पः। अत्र **केचिदाहुः** पुनः पिंडसंयोगनिषेधश्रवणात्
" सपिंडीकरणे वृत्ते पृथक्त्वं नोपपद्यते। पृथक्त्वे तु कृते पश्चात्पुनः पित्रोः सपिंडनम्"॥ इति एकोद्दिष्टनिषेधस्मरणाच्च पुनः पार्वणधर्मवदिति पार्वणधर्ममात्रस्मरणाच्च पुनःसपिंडीकरणं पार्वणविधानेन कर्त्तव्यमिति। अत्र पुनःसपिंडीकरणे ततः पूर्वं न मासिकानि पुनः कर्त्तव्यानि सपिंडीकरणमात्रस्य पुनःकरणविधानात् " सपिंडीकरणादूर्ध्वं नैकोद्दिष्टं समाचरेत्" इति एकोद्दिष्टरूपमासिकनिषेधस्मरणाच्च।

सपिण्डीकरणादावग्निनिर्णयः। अथ सपिंडीकरणादिश्राद्धेष्वग्निनिर्णयः।

तत्र **याज्ञवल्क्यः** (आ. ९७)—" कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही"। इति।
श्रीधरीये—"द्वादशाहे त्रिपक्षे वा षण्मासे मासिकाब्दिके। सपिंडीकरणं कुर्यात्पित्रोरौपासने सुतः"॥
विष्णुः-"सपिंडीकरणं पित्रोः कुर्यादौपासने सुतः। अभावे लौकिके ह्यग्नौ सर्वं संपादयेद् बुधः"॥इति।
लौकिकेऽग्नाविति विधुरादिविषयम्।

---

१ ग-शब्दात्। २ ग-चा।

तथा च **स्मृत्यंतरे**—

" औपासनाग्नौ कर्त्तव्यं मातापित्रोर्गुरोरपि । अन्येषां लौकिकाग्नौ तु विधुरस्य च लौकिके ॥

" बटुश्चेत् समिदग्नौ वा कुर्यात्पित्रोः सापिंडनम् " ॥ इति । **अन्यत्रापि**—

" कुर्यादौपासने श्राद्धं मातापित्रोर्यथाविधि । अन्येषां लौकिके तद्वद्ब्रह्मचार्यप्यनग्निकः " ॥ इति । तथा—

" सपिंडीकरणं कुर्यादग्नावौपासने द्विजः । मातापित्रोर्गुरोश्चैवमितरेषां तु लौकिके " ॥ इति।

अखंडादर्शे —

" पित्रोः सपिंडीकरणं कुर्यादौपासनाग्निना । इतरेषां सपिंडानां लौकिकाग्नाविति स्थितिः " ॥ इति ।

सायणीये—

" सपिंडीकरणं कुर्यात्पित्रोरौपासनेऽनले । तथा मातामहस्यापि मातामह्याश्च निर्णयः ॥

" तथा सीमंतजातस्य ज्येष्ठस्यापि सपिंडनम् । औपासनाग्नौ कर्त्तव्यं जनकस्य समो हि सः ॥

" पितामहस्य तत्पत्न्याः कार्यमौपासनेऽनले " ॥ इति । **स्मृत्यंतरे**—

" मातुः पित्रोर्मातुलादेर्मरणे तु स्ववन्हिना । सापिंड्यं मासिकादींश्च तत्तत्सूत्रेण कारयेत् ॥

" अपुत्रस्य पितृव्यस्य ज्येष्ठस्याप्यसुतस्य च । सपिंडीकरणं कुर्यात्स्वस्यौपासनवन्हिना " ॥ इति

अन्यत्रापि—

"मातुः पित्रोर्मासिकादीन् दौहित्रः स्वीयवह्निना । तथा महालयादींश्च कुर्यात्पार्वणतः शुचिः" ॥ इति । तदेवं मातापित्रोर्मातामहमातामह्योः पितामहपितामह्योर्मातुलस्यापुत्रस्य ज्येष्ठभ्रातुः पितृव्यस्याचार्यस्य च स्वौपासने सापिंड्यादिपार्वणश्राद्धं कुर्यादिति स्थितम् ।

यत्तु **केश्चिदुक्तम्** पित्रोर्मातामहयोश्च श्राद्धमौपासने इतरेषां श्रोत्रियागारादाहृते लौकिकाग्नौ कर्त्तव्यमिति तत्पूर्वोक्तस्मृत्यनभिज्ञानविलसितत्वादुपेक्ष्यम् ।

अग्नौकरणं द्विविधम् । कात्यायनाश्वलायनाद्युक्तं पितृयज्ञधर्मकं एकम् । आपस्तंबाद्युक्तं तद्रहितमन्यत् । तत्स्वरूपं चाग्रे वक्ष्यते । उभयविधमप्यग्नौकरणमनाहिताग्नेरौपासनवत एव । आहिताग्नेरप्यर्धाधानेन औपासनवत औपासन एव । सर्वाधानेन औपासनवत्त्वासंभवे त्वापस्तंबोक्ताग्नौकरणस्य लोपः । न तु वैतानिकाग्नावनुष्ठानम् । 'श्रौतं वैतानिकाग्निषु ' इत्यभिधानात् । लौकिकाग्नौ देवतादेरिवाग्नेरपि प्रतिनिध्यभावादत एव सर्वाधानेनौपासनाभावविषये **धूर्तस्वामिना भाष्यकारेणोक्तं** श्राद्धं ऊर्ध्वं होमात्कर्तव्यम् । ब्राह्मणा आहवीनायार्थास्तस्यापि.प्रधानत्वादिति । तस्यापि होमादूर्ध्वं क्रियमाणस्यान्नाशनलक्षणस्य श्राद्धस्यापीत्यर्थः । पितृयज्ञधर्मकाग्नौकरणस्य तु सर्वाधानेनौपासनाभावेऽपि न निवृत्तिः । ' कर्म स्मार्त्तं विवाहाग्नौ ' इत्यादिनोपदिष्टौपासनाग्न्यभावेऽपि पितृयज्ञवदित्यतिदेशतः प्राप्तदक्षिणाग्नेः संभवद्दक्षिणाग्नावनुष्ठानम् । अनेनैवाभिप्रायेण **मार्कण्डेयेनोक्तम्** " आहिताग्निस्तु जुहुयाद्दक्षिणाग्नौ समाहितः " इति । **आपस्तंबो**क्ताग्नौकरणे तु पिंडपितृयज्ञातिदेशाभावान्न दक्षिणाग्निप्राप्तिरिति सर्वाधाने **धूर्तस्वाम्युक्ताग्नौकरणा**भाव एव युक्तः । पूर्वोक्ताभिप्रायेण **वायुपुराणे**ऽप्युक्तम्—

"आहृत्य दक्षिणाग्निं तु होमार्थं वै प्रयत्नतः। अग्न्यर्थं लौकिकं वापि जुहुयात्कर्मसिद्धये"॥इति। अस्यायमर्थः—अग्नौकरणहोमार्थं गृह्याग्न्यभावे दक्षिणाग्निं लौकिकाग्निं वा आहृत्य होमकर्मसिद्धये जुहुयादिति । अत्र दक्षिणाग्निपक्षस्य प्रवासादिना असंभवे लौकिकाग्निपक्षः। तस्योपदेशातिरूपशातिदेशरूप-

---

१ क–परः, ख–विधुरश्चेल्लौकिकाग्नौ; ग–बटुश्चेल्लौकिकाग्नौ । २ क्ष–औपासना– ३ ग– + न । ४ ग–यज्ञवदित्यति—

प्रमाणद्वयावगतदक्षिणाग्न्यबाधकत्वेनागत्याश्रयणीयत्वादत एव प्रयत्नतो दक्षिणाग्निमाहृत्येत्युक्तम्। दक्षिणाग्न्यसंनिधाने पाणौ वा होमः कर्त्तव्यः। तथा हि **स्मृत्यंतरम्**—

"हस्तेऽग्नौकरणं कुर्यादग्नौ वा साग्निको द्विजः" इति। साग्निकः सर्वाधानाहिताग्निर्दक्षिणाग्न्यसंनिधाने हस्ते वा लौकिकाग्नौ वा अग्नौकरणं कुर्यादित्यर्थः। अत्रापि प्रवासादिना दक्षिणाग्न्यसंभवे लौकिकाग्न्यादिपक्षे पूर्वोक्तन्यायावगंतव्यौ। लौकिकाग्नेस्तु तादृशविशेषानवगमात्पाणिना सह समविकल्प एव। यद्यपि न्यायतोऽग्नेः प्रतिनिध्यभावः तथापि प्रतिनिधिन्यायेनात्र दक्षिणाग्न्यादेरुपादानं किंतु गृह्याग्न्यभावेन तत्साध्यकर्मणोऽननुष्ठाने प्राप्ते वचनेन अगृह्याग्न्यादावपि गृह्याग्निसाध्यं कर्म विधीयते इति न कश्चिद्दोषः। तथा **नारदीये**—

" अग्न्यभावे तु विप्रस्य पाणौ होमो विधीयते। यथाचारं प्रकुर्वीत पाणावग्नौ तु वा द्विजः"॥ इति।

यत्तु **स्मृत्यंतरे**—

" हस्तेऽग्नौकरणं कुर्यात्सर्वाधानी न लौकिके। अर्धाधानी तु गृह्याग्नौ जुहुयात्पितृयज्ञवत्"॥

अत्र न लौकिक इति विधुरादिविषयम्। तथा **स्मृत्यंतरम्**—

"साग्निरग्नावनग्निस्तु द्विजपाणावथाप्सु वा। कुर्यादग्नौ क्रियां नित्यं लौकिकेनेति निश्चितम्"॥ इति।

अस्यायमर्थः—अग्निमान्पुरुषः औपासाग्नौ दक्षिणाग्नौ लौकिकाग्नौ वा पूर्वोक्तव्यवस्थया अग्नौकरणं कुर्यात्। भार्याविधुरतया दायात् प्रागस्वीकृतौपासनतया वा योऽग्निरहितः स तु द्विजपाणावप्सु वाग्नौकरणं कुर्यात्। न जातु लौकिकाग्नौ कुर्यादिति।

यत्तु **मनुनोक्तम्** (३।२१२)—"अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत्" इति तद्ब्रह्मचारिविषयम्। तदाह **जातुकर्णिः**—

"अग्न्यभावे तु विप्रस्य पाणौ दद्यात्तु दक्षिणे। अग्न्यभावः स्मृतस्तावद्यावद्भार्यां न विंदति"॥ इति।

" अन्येषां लौकिके तद्वत् ब्रह्मचार्यप्यनग्निकः"॥ इति वचनं सपिंडीकरणविषयम्। तत्पूर्वमुक्तमापस्तंबादिविषयं वा। तथा वक्ष्यते **वृद्धमनुः**—

"कुर्यादनुपनीतोऽपि श्राद्धमेको हि यः सुतः। पितृयज्ञाहुतिं पाणौ जुहुयान्मंत्रपूर्वकम्"॥ इति।

विद्यमानेऽप्यग्नौ काम्यादिषु चतुर्षु श्राद्धेषु पाणावेव होमः। तदाहुर्गृह्यकाराः—

" अन्वष्टक्यं च पूर्वेद्युर्मासिमास्यथ पार्वणम्। काम्यमभ्युदयेऽष्टम्यामेकोद्दिष्टमथाष्टमम्॥

" चतुर्ष्वाद्येषु साग्नीनां वन्हौ होमो विधीयते। पित्र्यं ब्राह्मणहस्ते स्यादुत्तरेषु चतुर्ष्वपि"॥ इति।

अष्टकाश्राद्धदिनादुत्तरदिने क्रियमाणं श्राद्धमन्वष्टक्यं पूर्वदिने सप्तम्यां क्रियमाणं श्राद्धं पूर्वेद्युरिति पदेनोक्तं मासि मासीत्यनेन मासिश्राद्धमुक्तं पार्वणं त्रिपुरुषोद्देशेन क्रियमाणं अमावास्यादिश्राद्धं काम्यं फलकामनया क्रियमाणं अभ्युदय इत्यनेन अभ्युदयिकमुक्तम्। अष्टम्यामिति पदेनाष्टकाख्यं श्राद्धमुक्तम्। एकमुद्दिश्य क्रियमाणमेकोद्दिष्टम्। एतेषामष्टविधानां श्राद्धानां आद्येषु चतुर्षु साग्नीनां बह्वग्नीनामेकाग्नीनां च पूर्वोक्तव्यवस्थयाऽग्नौ होमो विधीयते। उत्तरेषु चतुर्षु स होमः पित्र्यब्राह्मणहस्ते स्यादित्यर्थः। आद्येषु चतुर्षु विप्रवासादिना औपासनाग्नौ[1] औपासनाग्न्यसंनिधाने द्विजपाणावप्सु वा कर्त्तव्यम्। तदाहुर्विष्णुधर्मोत्तरे[2] **मार्कंडेयः**—

" अनाहिताग्निश्चौपसदे[3]ऽग्न्यभावे द्विजेऽप्सु वा " इति। औपसदो गृह्याग्निः।

विज्ञानेश्वरे (पृ. ६८ पं. २०-२१)—

"आहिताग्निस्तु जुहुयाद्दक्षिणाग्नौ समाहितः। अनाहिताग्निरौपासने अग्न्यभावे द्विजेप्सु वा"॥ इति।

---

१ **क्ष**–अन्यत्रापि। २ **क्ष**–स्युरु। ३ **खग**–पासने।

अप्स्वग्नौकरणं जलसमीपे श्राद्धकरणे वेदितव्यम् । तदाह **कात्यायनः**—
"विष्णुधर्मोत्तरे चाप्सु मार्कंडेयेन यः स्मृतः । स यदापां समीपे स्याच्छ्राद्धे ज्ञेयो विधिस्तदा" ॥ इति ।
यदा तु पाणिहोमपक्षः तदैकस्यैव विप्रस्य पाणौ होमे न तु सर्वविप्राणामिति **कात्यायनः**—
"पित्र्ये यः पङ्क्तिमूर्धन्यस्तस्य पाणावनग्निकः । हुत्वा मंत्रवदन्येषां तूष्णीं पात्रेषु निक्षिपेत्" ॥ इति ।
मनुः— (३।२१२)
" अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत् । पर्युक्ष्य दर्भानास्तीर्य यतो ह्यग्निसमो द्विजः" ॥ इति ।
अग्निसमत्वात्पित्र्यं ब्राह्मणं पर्युक्ष्य परिस्तीर्य जुहुयादित्यर्थः । यत्तु **यमेनोक्तम्**—
" दैवविप्रकरेऽनग्निः कृत्वाऽग्नौकरणं द्विजः " इति तत्र विकल्पेन व्यवस्था द्रष्टव्या ।
अत्रापत्नीककर्तृकपाणिहोमे विशेषमाह **कात्यायनः**—
" अपत्नीको यदा विप्रः श्राद्धं कुर्वीत पार्वणम् । पित्र्यविप्रैरनुज्ञातो विश्वेदेवेषु हूयते " ॥ इति ।
वायुपुराणे च—
"अभार्यो दैविके कुर्याच्छेषं पित्र्ये निवेदयेत् । न हि स्मृताः शेषभाजो विश्वेदेवाः पुराणगैः" ॥ इति ।
विश्वेदेवकरहोमपक्षे हुतशेषं पित्रर्थभोजनपात्रेष्वेव निक्षिपेदित्यर्थः ।
स्मृत्यंतरे च—" दैवविप्रकरेऽभार्यः कृत्वाऽग्नौकरणं द्विजः ।
" शेषयेत्पितृविप्रेभ्यः पिंडार्थे शेषयेत्तथा । अग्नौकरणशेषं तु न दद्याद्वैश्वदेविके " ॥ इति ।
यमः—"अग्नौकरणवत्तत्र होमो देवकरे भवेत् । पर्युक्ष्य दर्भानास्तीर्य यतो ह्यग्निसमो हि सः " ॥
यदा दैवविप्रकरे होमस्तदा महालयादौ पितृमातामहश्राद्धार्थं वैश्वदेवविप्रभेदेऽपि सकृदेवानुष्ठेयम्।
यदा ब्राह्मणकरे होमस्तदा मातामहब्राह्मणकरेऽपि पृथगनुष्ठेयम्
" वैश्वदेवे यदेकस्मिन्भवेयुर्ब्राह्मादयो द्विजाः । तदेकपाणौ होतव्यं स्याद्विधिर्विहितस्तथा ॥
" मातामहस्य भेदेन कुर्यादिति विनिर्णयः " ॥ इति **स्मरणात्** । पाणौ यत्कर्त्तव्यं तदाह
शौनकः—"अनग्निश्चेदाद्यं गृहीत्वा भवत्स्वेवाग्नौकरणामिति पूर्वं तथास्त्विति" । अयमर्थः—आद्यं घृताक्तमन्नं गृहीत्वा भवत्स्वेवाग्नौकरणहोमं करिष्य इति पूर्वं पृष्ट्वा तथास्त्विति तैरनुज्ञातो जुहुयादिति । पाणितले हुतस्यान्नस्य विनियोगमाह **गृह्यपरिशिष्टकारः**—
" यच्च पाणितले दत्तं यच्चान्यदुपकल्पितम् । एकीभावेन भोक्तव्यं पृथग्भावो न विद्यते ॥
" अन्नं पाणितले दत्तं पूर्वमश्नन्त्यबुद्धयः । पितरस्तेन तृप्यंति शेषान्नं न लभंति ते " ॥ इति ।
यत्तु **शौनकवचनम्**—" तेषु तद्भुक्तवत्स्वन्नमन्यदन्नं च भोजयेत् " इति पात्रस्थापितं पाणिहुतं पूर्वं भुक्तवत्सु ब्राह्मणेष्विति तस्यार्थः । **कालादर्शेऽपि**—
" दैवार्थे पाणौ जुहुयादभार्योऽन्यो यथार्हतः । पाणौ हुतं यदन्नं तत् पृथङ्नाश्नाति कुत्रचित्" ॥ इति ।
अनेनैवाभिप्रायेण **कात्यायनः**—
"हस्ते हुतं यदश्नीयात् ब्राह्मणो ज्ञानदुर्बलः । नष्टं भवति तच्छ्राद्धमिति शातातपोऽब्रवीत्" ॥ इति ।
पारिजाते तु—
"हस्ते हुतं तु नाश्नीयादब्दं मुक्त्वाऽनुमासिकम् । अग्नौ प्रक्षेपणं कार्यं सपिंडीप्रेतकर्मसु" ॥ इति ।

---

१ क्ष-दद्याद्वैश्व-

तदेवमनाहिताग्नेरौपासनवत आहिताग्नेरप्यर्धाधानेनौपासनवत औपासन एव सपिंडीकरणादिश्राद्धं कर्त्तव्यम्। सर्वाधानेनौपासनासंभवे त्वापस्तंबोक्ताग्नौकरणस्य लोपः। पितृयज्ञधर्मकाग्नौकरणस्य न निवृत्तिः। किंतु दक्षिणाग्नावनुष्ठानम्। दक्षिणाग्न्यसंनिधाने लौकिकाग्नौ पाणौ वा जले वा होमः कर्त्तव्यः। एवमनाहिताग्निरप्यौपासनासंनिधाने पितृयज्ञधर्मकाग्नौकरणं लौकिकाग्नौ द्विजेऽप्सु वा कुर्यात्। दायात्प्रागगृहीताग्निः ब्रह्मचारी विधुरश्च पाणौ कुर्यात्। न लौकिकाग्नौ। काम्यादिचतुष्टयेऽपि पाणावेव होमः। आपस्तंबोक्तमग्नौकरणं त्वनाहिताग्निर्दूरस्थाग्निश्चेत् लौकिकाग्नौ कुर्यात्। ब्रह्मचारी विधुरश्च लौकिकाग्नौ कुर्यात्

"औपासनाग्नौ दूरस्थे केचिदिच्छंति सत्तमाः। पाणावेव तु होतव्यमिति नैतत् समंजसम्॥
"प्राचीनावीतिना होमः कार्योऽग्नौ द्विजसत्तमाः। तच्छेषं विप्रपात्रेषु विकिरेत्संस्मरेद्धरिम्॥
"अभार्यो दूरभार्यश्च ब्रह्मचारी च लौकिके। अग्नौकरणमेतेषां वन्हावेवोचितं भवेत्॥
"देशान्तरगते विप्रे प्रमादाल्लुप्यतेऽनलः। असंनिहितभार्योऽपि संदधीतानलं पुनः"॥ इति **वचनात्**।

संधाय विसृजेदित्यपरे "अग्निमुखा वै देवा पाणिमुखा वै पितरः" इति अविशेषेण **स्मरणा**दापस्तंबोक्तमग्नौकरणमपि विधुरादयः पाणौ वा कुर्युरिति **अपरे**। तच्च पित्र्यं ब्राह्मणकरे वैश्वदेविकब्राह्मणकरे वा विकल्पेन भवति। अभार्यकर्तृकं तु वैश्वदेविकब्राह्मणकर एव कर्त्तव्यमिति **माधवीयस्मृतिचंद्रिकाद्युक्तार्थनिष्कर्षः**। सर्वाधानेनौपासनासंभवे आपस्तंबोक्ताग्नौकरणास्यापि न निवृत्तिः। किंतु लौकिकाग्नावनुष्ठानमिति मतांतरमन्यत्सर्वमत्रापि समानम्। पत्न्या रजस्वलायां सत्यामौपासनेन तामनादृत्य सपिंडीकरणादिश्राद्धं कुर्यात्

"ऋतुमत्स्वपि दारेषु विदेशस्थोऽप्यनग्निकः। अन्नेनैवाब्दिकं कुर्याद्धेम्ना वामेन न क्वचित्"॥ इति **स्मरणात्**। प्रत्याब्दिके पत्न्यै मध्यमपिण्डदानविधाने तामनादृत्य श्राद्धं कुर्यात्। किमुत सापिंडे पत्न्यै पिंडदानाभावात् निषेधाभावाच्च। अग्निविच्छेदे तु

"द्वयोः साधारणो वन्हिः सह संस्कारसंस्कृतः।
"विशोध्य कायं विविधैश्च कृच्छ्रैर्द्रव्यप्रदानं कुरुते यथार्थम्।
"अतः परस्तात्सह भार्यया च यतासुरग्नौकरणं वदेत्सः"॥ इत्यादिवचनैः संधाने पत्न्याः सापेक्षत्वावगमात् कालांतरे अग्निं संधाय औपासनाग्नौ सापिंड्यं कुर्यात्। तस्य कालांतरे सावकाशत्वात्।

"सावकाशं तु यत्कार्यं न तत्कुर्याद्विदूषिते" इति **स्मरणात्**। तथा च **गृह्यपरिशिष्टे**—

"ऋतुमत्स्वपि दारेषु धार्याग्निस्तु भवेद्यदि। सपिंडीकरणश्राद्धं कुर्यादेवाविचारयन्"॥ इति।

स्मृत्यंतरे—

"सपिंडीकरणे प्राप्ते भार्या यदि रजस्वला। सपिंडीकरणं न स्यादग्नावनुगते सति"॥ इति।

अन्यत्रापि—

"श्राद्धकर्तुर्यदा भार्या आशौचान्ते रजस्वला। श्राद्धशेषं प्रकुर्वीत वर्जयित्वा सपिंडनम्"॥ इति।

श्लोकगौतमोऽपि—

"श्राद्धीयेऽहनि संप्राप्ते यस्य भार्या रजस्वला। श्राद्धं तत्र न कर्त्तव्यं कर्त्तव्यं पंचमेऽहनि"॥ इति।

श्राद्धमत्र सपिंडीकरणम्। मृतपत्न्यां रजस्वलायामपि पंचमदिने भर्तृसपिंडीकरणमुक्तं **स्मृत्यंतरे**—"सपिंडीकरणे प्राप्ते प्रेतपत्नी रजस्वला। सपिंडीकरणं न स्यात्पंचमेऽहनि कारयेत्"॥ इति।

---

१ क्ष–गाहिता। २ खग–पैतृके। ३ आश्वला. गृ. सू. ४।८।२। ४ ग–तद्द्वयं। ५ क्ष–सद्वासिराग्नः। ६ क–भार्यायां।

एतदपुत्रे भर्त्तरि प्रेतपत्नीकर्तृकसपिंडनविषयमित्येके।पुत्रादिकर्तृकविषयमपीत्यन्ये।शिष्टाचाराद्व्यवस्था। तत्रैव—

"मृते भर्तरि या नारी आशौचांते रजस्वला। श्राद्धशेषं प्रकुर्वीत स्नाता सूत्रं विसर्जयेत्"॥ इति। यत्तु **नारदीयवचनम्**

" नष्टाग्निर्दूरभार्यश्च पार्वणे समुपस्थिते। अग्निं संधाय विधिवच्छ्राद्धं कृत्वा विसर्जयेत् "॥ यच्च **त्रिकांडीयवचनम्**

"यस्य भार्या विदूरस्था पतिता व्याधिताऽपि वा। अनिच्छुः प्रतिकूला वा तस्याः प्रतिनिधि[१]क्रिया॥इति "श्राद्धेऽहनि तु संप्राप्ते यस्य भार्या रजस्वला। अग्निं संधाय विधिवच्छ्राद्धं कृत्वा विसर्जयेत्"॥इति तन्निरवकाशमृताहश्राद्धविषयम्

" पुष्पवत्स्वपि दारेषु विदेशस्थोऽप्यनग्निकः। अन्नेनैवाब्दिकं कुर्याद्धेम्ना वामेन न क्वचित्॥ " मृताहं समतिक्रम्य चंडालः कोटिजन्मसु "॥ इति **लोकाक्ष्यादि**स्मरणात्। " आमश्राद्धं प्रकुर्वीत यस्य भार्या रजस्वला।

"अपत्नीकः प्रवासी च यस्य भार्या रजस्वला। सिद्धान्नेन न कर्त्तव्यं आमं तस्य विधीयते"॥ इति **कात्यायना**दिवचनं सपिंडीकरणादिव्यतिरिक्तविषयम्।

"सपिंडीकरणश्राद्धमन्नेनैव समाचरेत्। नैवामेन न हेम्ना वा मातापित्रोर्विशेषतः"॥ इति **स्मरणात्**। यस्य द्वादशाहे एव सपिंडीकरणं विहितम्

" सापिंडीकरणं पित्रोः कुर्यादेको हि यः सुतः। अस्थिरत्वाच्छरीरस्य द्वादशाहः प्रशस्यते॥ "एकपुत्रोऽग्निमांश्चैव कुर्वीत द्वादशेऽहनि "॥ इत्यादिना तस्यापि " यस्य भार्या विदूरस्था " इति **न्यायेना**ग्निसंधानपूर्वकं कर्तव्यम्। एवं वत्सरांते सापिंड्ये पत्न्यां रजस्वलायां पत्न्याः प्रतिनिधिं विधाय

"श्राद्धीयेऽहनि संप्राप्ते यस्य भार्या रजस्वला। अग्निं संधाय विधिवच्छ्राद्धं कृत्वा विसर्जयेत्"॥ इति **न्यायात्त**स्य निरवकाशत्वेनाग्निं संधाय सापिंड्यं कुर्यात्। तत्र सापिंड्याकरणे पुनः षोडशप्रसक्तेः " कुर्यान्निरवकाशं तु नित्यं नैमित्तिकं तथा " इति **शंख**स्मरणात्। तदेवं पत्न्यां रजस्वलायां औपासने विद्यमाने तामनादृत्य द्वादशाहादौ सपिंडीकरणं कुर्यात्। अग्निविच्छेदे त्वेकोद्दिष्टांतं स्वकाले कृत्वा पंचदशदिनादावुक्तकाले अग्निं संधाय सापिण्ड्यं कुर्यात्। एकपुत्रोऽग्निमांश्च कुशादिना पत्न्याः प्रतिनिधिं कृत्वाऽग्निं संधाय द्वादशाहे सपिंडनं कृत्वा तमग्निं विसर्जयेत्। वत्सरांतसापिंड्यमग्निसंधानपूर्वकं कालांतराभावाद्रजस्वलायामपि पत्न्यां कुर्यान्मासिकाब्दिकादिकं चाग्निं संधाय स्वकाले कृत्वा तमग्निं विसृजेत्। प्रेतपत्न्यां रजस्वलायां सापिंड्यं पंचमदिने कुर्यात्। अपुत्रे भर्त्तरि प्रेते यदि पत्नी कुर्यात् तदैव पंचमेऽहनि अन्यश्चेत्कुर्यात्। प्रेतपत्न्यां रजस्वलायामपि स्वकाले कुर्यादित्य**परे**। अयमत्र निष्कर्षः। अनाहिताग्निर्द्वादशाहे त्रिपक्षे वा तृतीये वा मासे षष्ठे वैकादशे वा मासे संवत्सरांते वा पुंसवनाद्यावश्यकशुभागमे वा सपिंडीकरणं कुर्यात्। द्वादशाहप्रभृतिषु षट्सु दिनेषु सप्तदशदिन-पर्यंतेषु त्रयोविंशदिने वा कुर्यात्। आहिताग्निश्चेत्कर्त्ता आहिताग्नेरनाहिताग्नेर्वा मृतस्य सापिंड्यं

---

१ ग-धौ।

द्वादशाह एव कुर्यात् । एकादशदिने दर्शपाते सति एकादशदिने सापिंड्यं कृत्वा पिंडपितृयज्ञं कुर्यात् । अनग्निः कर्ता साग्नेः प्रेतस्य त्रिपक्षे द्वादशाहे वा कुर्यात् । महागुरुपितृमरणे त्रयोदशदिने कुर्यात् । साग्निरनग्निश्च द्वादशाहादौ प्रमादादकृतं सापिंड्यमुत्तरभाविषु कालेषु कुर्यात् । द्वादशाहसापिंड्ये वत्सरांतसापिंड्ये च न वारादिदोषः । तत्रापि द्वादशाहसापिंड्ये पितृव्यतिरिक्तानां शुक्रदिनमेकं वर्ज्यम् । वत्सरात्यये तु पुनः षोडशश्राद्धपूर्वकं कन्याकुंभयोरन्यतरमासस्य कृष्णपक्षे पंचम्यामष्टम्यामेकादश्यां दर्शे वा कर्तव्यम् । पितामहादिषु त्रिषु जीवत्सु न सापिंड्यं अन्यतमात्यये पुत्रः कुर्यात् । एवं मातुः पितुः भर्तुः पत्न्याश्च व्युत्क्रममरणे पत्नी पतिश्च[1] कुर्यात् । नान्येषां व्युत्क्रममरणे सापिंड्यं कुर्यात् । आमेन हेम्ना वा कुर्याद्व्युत्क्रममृतानां मातापितृभर्तृपत्नीनामन्नेन सापिंड्यम् । इतरेषामामेन हेम्ना वा कृत्येऽपि तदंतर्हितमरणे तत्सपिंड्यनंतरमेतेषां पुनरन्नेन सपिंडीकरणं कर्तव्यम् । पुंसः स्त्रिया वा सापिंड्ये पित्रादीनामेव वरणम् । वैश्वदेवार्थे द्वौ पितृपितामहप्रपितामहार्थे त्रीन्निमित्तार्थे एकं विष्ण्वर्थमेकमनेन क्रमेण वृणुयाद्वैश्वदेवार्थे पित्राद्यर्थे चाशक्त एकमेकं वा वृणुयात् । पुंसः पिंडं पित्रादिपिंडैः सह संसृजेत् । स्त्रियाः पिंडं श्वश्र्वादिपिंडैः संसृजेत् । अनपत्यायाः पतिपिंडेनेत्येके । अनुमृतौ सह मृतौ च पतिपिंडेन संसृज्य पुनस्तत्पित्रादिपिंडैः संसृजेत् । पिंडत्रयवताम् **आश्वलायना**दिसूत्रानुसारिणां स्त्रीसापिंड्ये श्वश्र्वादीनामेव वरणं तत्पिंडैरेव संसर्गः । समानपिंडयोगानां कर्त्रैक्ये तंत्रतः कुर्यात् । निमित्तवरणं पृथक् पृथक् कुर्यात् । मरणक्रमापरिज्ञाने तु ज्येष्ठक्रमेण पिंडसंसर्गं कुर्यात् । पित्रोः पत्नीपुत्रपौत्रभ्रातृतत्पुत्रस्नुषास्वसॄणां च संघातमरणे पित्रोर्द्वादशाहे सापिंडीकरणं पत्न्यादीनां त्रिपक्षे पित्रोर्मृताब्दे पत्न्यादिव्यतिरिक्तानामन्येषां मरणे पितृवत्सरांते तेषां सपिंडीकरणं समानोदकदौहित्रादित्रिरात्राशौचिकर्तृकसंस्कारद्वादशाहे सपिंडीकरणम् । पक्षिण्याशौचिकर्तृकदाहे तु चतुर्थदिन एकोद्दिष्टं पंचमे दिने सापिंड्यं कुर्याद्बंधुकर्तृके तु चतुर्थेऽन्हि सापिंडनं कुर्यात् । दुर्मृतयोः पित्रोः पुनःसंस्कारे पंचमे दिने सापिंड्यं कुर्यात्

"ये मृताः पापमार्गेण तेषां संवत्सरात्परम् । नारायणबलिं कृत्वा कुर्यात्तत्रौर्ध्वदेहिकम् ॥

"अब्दांते वाऽथ षण्मासे पुनः कृत्वा तु संस्कृतिम् । त्रिरात्रमशुचिर्भूत्वा श्राद्धं कृत्वा चतुर्दिने ॥

"सापिंड्यं पंचमदिने मातापित्रोः समाचरेत्" ॥ इति **स्मरणात्** । मातापितृव्यतिरिक्तदुर्मृतपुनर्दाहे तृतीयदिने सापिंडनं कुर्यात् । केवलपुनःसंस्कारविषयेऽकृतक्रिययोर्मातापित्रोर्द्वादशेऽह्नि सापिंडनं भ्रातुः पुनःसंस्कारे षण्मासमध्ये द्वादशेऽह्नि सापिंडनं षण्मासात्परं वत्सरात्पूर्वं पंचमदिने सपिंडनं कुर्यात् । ततः परं तृतीयदिने सपिंडनं कुर्यादन्येषां पुनःसंस्कारे यस्य यावदाशौचं तस्य तदाशौचानंतरदिने एकोद्दिष्टं तदुत्तरदिने सापिंड्यं च कार्यम् । मातापित्रोर्मातामहमातामह्योर्मातुलस्यापुत्रस्य ज्येष्ठभ्रातुः पितृव्यस्याचार्यस्य च स्वौपासने सापिंड्यं कुर्यात् । आहिताग्निरप्यर्धाधानेनौपासनवानौपासने कुर्यात् । सर्वाधानेन तदसंभवे **आपस्तंबोक्ताग्नौकरणस्य** लोपः । लौकिकाग्नाविति मतांतरम् । पितृयज्ञधर्मकस्य तु दक्षिणाग्नौ तदसंभवे लौकिकाग्नौ पाणौ जले वा होमः । रजस्वलायां पत्न्यामौपासने विद्यमाने सापिंड्यं तदैव कुर्यात् । औपासनविच्छेदे कालांतरे कुर्यात् । संवत्सरांतसापिंड्यं तु तत्काल एव कुर्यादिति सपिंडीकरणनिर्णयः । इति ।

वैद्यनाथदीक्षितविरचिते स्मृतिमुक्ताफले श्राद्धकांडे सापिंडीकरणं समाप्तम् ॥

---

१ ग—सापिण्ड्यं ।

" सपिण्डनात्परेद्युश्च यतो ब्रह्मणतर्पणात् । अष्टौदेवाश्च पितरः कर्तुः कुर्वन्तु संपदः "॥

अथ **सोदकुंभश्राद्धम्** । अत्र **गौतमः**—

"अद्वैवं पार्वणश्राद्धं सोदकुंभमधर्मकम् । कुर्यात्प्रत्याब्दिकश्राद्धं संकल्पविधिनाऽन्वहम् " ॥ इति । अद्वैवं विश्वेदेवविष्णुरहितं पार्वणं त्रिपुरुषात्मकं सोदकुंभमुदकुंभसहितं अधर्मकं दंतधावनतांबूलादिवर्जनपुनर्भोजनादिविवर्जनरूपकर्तृभोक्तृधर्मरहितं संकल्पविधिना

" आवाहनाग्नौकरणं स्वधानिनयनं तथा । विकिरं पिंडदानं च संकल्पे पंचै वर्जयेत् "॥ इति उक्तप्रकारेण आब्दिकश्राद्धात्पूर्वं प्रत्यहं कुर्यादित्यर्थः । एतच्च अर्वाक्संवत्सरात्सपिंडीकरणे । ततः परं पार्वणविधानेन कर्तव्यम् । ततः पूर्वमेकोद्दिष्टविधानेन कार्यम् । संवत्सरांतसापिंड्ये तु एकोद्दिष्टविधानेनैव कार्यम्

"कृते सपिंडीकरणे पार्वणं तु विधीयते । सपिंडीकरणादर्वागेकोद्दिष्टं विधीयते" ॥ इति सामान्येन

" सोदकुंभं च कर्तव्यं नवश्राद्धानि षोडश । एकोद्दिष्टविधानेन सपिंडीकरणादधः " ॥ इति विशेषतश्च **स्मरणात्** । तद्द्वादशदिनमारभ्य कार्यम् । तदुक्तं **श्रीधरीये**

" द्वादशाहप्रभृत्यस्य तृप्तये चान्नसंयुतम् । दद्यादहरहः कुंभं जलपूर्णं तु वत्सरम् " ॥ इति ।

कारिकारत्ने तु

"आद्याहात् द्वादशाहाद्वा तत्पूर्वाहादथापि वा । विप्रायान्नं सोदकुंभं दद्यादन्वहमाब्दिकात्" ॥ इति । मृतदिवसमेकादशाहं द्वादशाहं वारभ्येत्यर्थः । **मार्कंडेयः**—

" यस्य संवत्सरादर्वाक्सपिंडीकरणं कृतम् । मासिकं सोदकुंभं च देयं तस्यापि वत्सरम् "॥ इति ।

स्मृत्यंतरे—

" आब्दमंबुघटं दद्यादन्नमाज्येन संयुतम् । संवत्सरे प्रवृद्धे तु प्रतिमासं च मासिकम् " ॥ इति ।

कालादर्शेऽपि—

" द्वादशाहत्रिपक्षाद्यौ कृतं यस्य सपिंडनम् । कुर्वीत पार्वणश्राद्धं सोदकुंभमदैवतम् ॥

" संकल्पेनास्य नियमं प्रत्यहं त्वाब्दिकावधिः " ॥ इति । **व्यासः**—

" अतिथिं भोजयेद्विद्वान्सोदकुंभविशेषतः । अभ्यागतं भोजयेद्वा नियतं न तु भोजयेत् ॥

" नियतं भोजयेद्यस्तु लोभान्मोहाद्विमूढधीः । त्रयस्ते नरकं यांति कर्ता भोक्ता तथा पिता "॥

संग्रहे—

"कर्तुः सगोत्रिणश्चैव भोक्तॄणां च सगोत्रिणः । न निमन्त्र्याः किल श्राद्धे सोदकुम्भं विनैव तु" ॥

स्मृत्यन्तरे भोक्तॄणामुद्दिश्य पितॄणाम् । **याज्ञवल्क्यः** (आ. २५५)—

" अर्वाक्सपिंडीकरणं यस्य संवत्सराद्भवेत् । तस्याप्यन्नं सोदकुंभं दद्यात्संवत्सरं द्विजः " ॥ इति ।

अत्र **विज्ञानेश्वरः** (पृ.७६ पं. १-२)—"संवत्सरादर्वाग्यस्य सपिंडीकरणं कृतं तस्य कृतेऽपि तस्मिन्प्रतिदिवसं प्रतिमासं वा यावत्संवत्सरं शक्त्यनुसारेणान्नमुदकुंभसहितं ब्राह्मणाय दद्यात् " इति ॥

पितृमेधसारे—" न द्वादशाहादौ सापिंड्ये सोदकुंभश्राद्धान्याहत्य दद्याद्विध्यभावात्प्रत्यहमाब्दं तद्विधिवैयर्थ्यापत्तेः। मासिकवद्विरनुष्ठाने प्रमाणाभावाच्च प्रागब्दात्कृतान्यब्दसापिंड्येन पुनः कुर्यात् । अकृतानि कृत्वा सापिंड्यं कुर्यात् । शक्तविषये द्वादशाहप्रभृत्या संवत्सरात्प्रत्यहमेकं त्रिपुरुषोद्देशेन अदैवकमधर्मकं सदक्षिणं संकल्पविधिना सोदकुंभश्राद्धं दद्यात् । प्रतिमासं दर्शादौ वा मासिकाहान्य-

१ क्ष–परि । २ ग–धर्मे । ३ क्ष–विधिषु ।

दिने वातीतसोदकुंभश्राद्धान्याहृत्य दद्यात्प्राक्सपिंडीकरणादेकोद्दिष्टवन्न सांवत्सरिकाहे तानि दद्यात्। कालातीतत्वात्

"अकाले चेत्कृतं कर्म कालं प्राप्य पुनः क्रिया। कालातीतं तु यः कुर्यादकृतं तद्विनिर्दिशेत्"॥ इति **कात्यायनः**। न सांवत्सरिकाह इति

"प्रेतलोके तु वसतिर्नृणां वर्षं प्रकीर्तितम्। क्षुत्तृष्णे प्रत्यहं तस्य भवेतां भृगुनंदन"॥ इति **स्मरणात्**। वर्षांते प्रेतलोके वासं क्षुत्तृष्णे च विहाय स्वकर्मफलं प्राप्तस्य सांवत्सरिकाहस्य द्वितीयवत्सरादित्वात्तत्र क्षुत्तृष्णाशांत्यर्थं सोदकुंभश्राद्धं निष्प्रयोजनमित्यर्थः। ननु

"सपिंडीकरणात्प्रेते पैतृकं पदमास्थिते। चतुरो निर्वपेत्पिंडान्पूर्वं तेषु समापयेत्॥

"ततः प्रभृति वै प्रेतः पितृसामान्यमश्नुते"॥ इत्यादिभिः कृते सापिंड्ये पितृत्वप्राप्त्यवगमात् द्वादशाहादौ सापिंड्ये कथं प्रेतलोकवासः। प्रत्यहं तस्य कथं क्षुत्तृष्णे च भवेतामिति चेत्सत्यम्। तस्य प्रेतलोकवासाभावेऽपि प्रथमाब्दिकपूर्वदिनपर्यंतं क्षुत्तृष्णाविनाभूतस्य प्रेतभावस्यात्मन्यहं ब्राह्मण इत्यादिभाववद्विद्यमानत्वात्। अत एव स्मृत्यंतरम्

"श्राद्धानि क्रमशो लब्ध्वा सपिंडीकरणे कृते। प्रेतभावाद्विनिर्मुक्तः स्वकर्मफलभाग्भवेत्"॥ इति। ततश्च कृतेऽपि सपिंडीकरणे प्रेतभावयुक्तस्य क्षुत्तृष्णाशांत्यर्थमनुष्ठेयम्

"यस्य संवत्सरादर्वाक् सपिंडीकरणं कृतम्। मासिकं सोदकुंभं च देयं तस्यापि वत्सरम्"॥ इत्यादिपूर्वोक्तवचनबलाच्च सोदकुंभश्राद्धं प्रत्यहमाब्दिकपूर्वदिनावधि कार्यमिति सिद्धम्। अत्र सोदकुंभश्राद्धेषु यद्यदंतरितं तदुत्तरदिनसोदकुंभश्राद्धेन सह नवश्राद्धमासिकांतरीयन्यायेन समानतंत्रतया कार्यम्। अस्यावश्यकर्तव्यत्वान्मध्ये कर्तरि मृतेऽपि पौत्रादिनाऽप्यवशिष्टं सोदकुंभश्राद्धमवशिष्टं मासिकं अनुष्ठेयम्

"प्रेतसंस्कारकार्याणि यानि श्राद्धानि षोडश। यथाकाले तु कार्याणि नान्यथा मुच्यते ततः"॥ इति **स्मरणात्**। **पितृमेधसारकृत्**—"एकोत्तरवृद्धिश्राद्धोदकदानैर्दाहजनितक्षुत्तृष्णानिवृत्तिः। पिंडैराकारावाप्तिः। एकोद्दिष्टेन पिशाचत्वनिवृत्तिः। सोदकुंभश्राद्धैः प्रेतलोकवासजनितक्षुत्तृष्णाशांतिः। वृषोत्सर्गनवश्राद्धैः प्रेतत्वनिवृत्तिः। सपिंडीकरणात्पितृत्वप्राप्तिः। क्षुत्तृष्णाजनितात्यंतदुःखानुभवावस्था प्रेतत्वं वस्वादिश्राद्धदेवतासंबंधः पितृत्वप्राप्तिः। अतस्तन्निवृत्तये तत्प्राप्तये च यथाकालमविलंबेन प्रेतकार्यं कार्यम्। अन्यथा महान् दोषः। नास्य किंचित्कर्मण्यधिकारः" इति। **शतकेऽपि**—

"मुख्यकर्तुरघं तावद्यावत्प्रेतत्वमोचनम्। पुत्राणामप्ययं तावन्मुख्यकर्तर्यपि स्थिते"॥ इति।

प्रेतत्वमोचनं सापिंडीकरणम्। अत्र मुख्यकर्तुः दशाहात्परमघविधानं सूतिकाया इव कर्मानर्हत्वमात्राभिप्रायम्

"अकृत्वा प्रेतकार्याणि नित्यनैमित्तिकान्यपि। न कुर्यात्तावदाशौचं यावत्प्रेतत्वमोक्षणम्"॥ इति **स्मरणात्**। मुख्यकर्तृव्यतिरिक्तज्ञातीनां दशाहात्परं कर्मानर्हता नास्ति

"पुत्रैः पित्रोस्तु संस्कारः प्रमादादकृतो यदि। ज्ञातीनां दशरात्रं स्यात्तदूर्ध्वं सूतकं न हि॥

"नित्यकर्माणि कुर्वीत स्मृत्युक्तानि तथैव च"॥ इति **स्मरणात्**। **संग्रहे**—

"अकृते प्रेतकार्ये तु न कुर्यादात्मनः शुभम्। कुर्यादेव शुभं कर्म मुख्यकर्तुश्च संनिधौ"॥ इति।

---

१ ग—ह। २ क्ष—तर।

यदा पुत्राद्यभावे भ्रात्रादिः करोति तथा **चतुर्विंशतिमते**—

" भ्राता वा भ्रातृपुत्रो वा सपिंडः शिष्य एव वा । सपिंडीकरणं कृत्वा कुर्यादभ्युदयं ततः" ॥ इति ।

अत्रापवादः **स्मृत्यंतरे**ऽभिहितः

" गर्भादिप्राशनांतानि प्राप्तकालं न लंघयेत् । ज्ञातीनां प्रेतकार्याणि कुर्वन्नपि च कारयेत्" ॥ इति । पुंसवनसीमंतोन्नयनजातकर्मनामकरणान्नप्राशनानि ज्ञातिसापिंड्यात्पूर्वमपि कर्त्ता कुर्यादित्यर्थः । मातापितृमातामहमातामहीनां तु सापिंड्यं कृत्वैव गर्भादिप्राशनांतानि कार्याणि

" पित्रादीनां प्रमीतानां त्रयाणां तु सपिंडनम् । कृत्वा तु मंगलं कुर्यान्नेतरेषां कथंचन " ॥ इति **स्मरणात्** । मंगलं पुंसवनाद्यावश्यकं शुभकर्म । तथा च **शंखः**—

"सावकाशं तु यत्कार्यं न कुर्यान्मासि दूषिते । कुर्यान्निरवकाशं तु नित्यं नैमित्तिकं तथा" ॥ इति । **अत्रिश्च**—

" मासप्रोक्तेषु कार्येषु मूढत्वं गुरुशुक्रयोः । अधिमासादिदोषाश्च न स्युः कालविधेर्बलात् " ॥ **ऋष्यशृंगः**—"जातकर्माणि जातेष्टिं यथाकालं समाचरेत्" इति । ऋतुशांतिश्च कालांतराभावात्कर्तव्या

"जातके नामकरणे तथान्नप्राशनेऽपि च । आपत्तौ दयितानां च मासिकं नापकर्षयेत् " ॥ इति मासिकापकर्षनिषेधेन तद्विधानात्—

" यो यदीच्छेद्द्विजन्मत्वमष्टमाब्दं न लंघयेत् । अतिक्रांते तु सावित्र्याः कालऋतुं त्रैविद्यकं ब्रह्मचर्यं चरेत् " इत्यादि **स्मरणात्** पुंसवनादिवत्सपिंडीकरणानंतरं पित्रोर्मृताब्दे मासिकापकर्षणपूर्वकं पुत्रादीनां यद्युपनयनं कर्त्तव्यं तथापि " तमसो वा एष तमः प्रविशति यमविद्वानुपनयते यश्चाविद्वान् " इति **ब्राह्मणम्** । " तस्मिन्नभिजनविद्यासमुतं समाहितं संस्कर्त्तारमीप्सेत् " इति **स्मरणा**दन्यकर्तृकत्वसंभवादन्येन कारयितव्यम् । मृतपितृकस्य "अष्टमे अष्टवर्षं ब्राह्मणमुपनयीत" इति **श्रुतिबला**च्छ्रुतिस्मृत्योर्विरोधे श्रुतेर्बलीयस्त्वादुपनयनं कर्त्तव्यमेव । तथा च यदनन्यकर्तृकमनवकाशं पुंसवनादिकं यत्सपिंडीकरणमासिकापकर्षणपूर्वकं प्रथमाब्देऽपि कर्तव्यम् । यत्तु कालांतरे कर्तुं शक्यं स्नानविवाहादि तत्तु तत्र न कर्तव्यम् । अनवकाशं यदन्यसाध्यं तत्र तदन्येन कारयितव्यम् । एतदेवाभिप्रेत्य **देवलः**

" प्रमीतौ पितरौ यस्य देहस्तस्याशुचिर्भवेत् । न दैवं नापि पित्र्यं च यावत्पूर्णो न वत्सरः ॥

" स्नानं चैव महादानं स्वाध्यायश्चाग्निपूजनम् । प्रथमेऽब्दे न कर्तव्यं महागुरुनिपातनम् " ॥ इति । दैवं देवतास्थापनादि । पित्र्यं अन्येषां सापिंड्यम् । "पित्रोर्मृताब्दे चान्येषां वत्सरांते सपिंडनम्" इति **स्मरणात्** ।

एवं च पितृमृताब्दे ज्ञातिसंस्कारे कृते सति अकृत्वाऽपि ज्ञातिसापिंड्यमावश्यकं शुभकर्म कर्त्तव्यम् । स्नानं समावर्तनम् । महादानं कनकाश्वादिप्रसिद्धम् । स्वाध्याय उपनयनम् । तदर्थत्वादुपनयनस्य 'उपनयनं विद्यार्थस्य श्रुतितः' संस्कारः **इत्यापस्तंबस्मृतेः** (१।१।११) ।

" उपाकर्मेत्यन्ये । अग्निपूजनमग्न्याधानादि । ततश्च वत्सरांते ततः प्रेतः पितृत्वमुपपद्यते" इति **बोधायनस्मरणात्** । " प्रेतलोके तु वसतिर्नृणां वर्षं प्रकीर्तिता " इति **विज्ञानेश्वरे**णोक्तत्वात् ।

" सपिंडीकरणादूर्ध्वं प्रेतत्वस्य निवृत्तितः । तावद्भस्म न धार्यं स्याद्यावदब्दो न पूर्यते " ॥ इति **लोकाक्षिणा** प्रेतत्वानिवृत्तिनिबंधनभस्मधारणनिषेधस्योक्तत्वाच्च । अशुचित्वेन मातापित्रो-

द्वादशाहादौ कृते सपिंडीकरणे प्रथमाब्दिकपर्यंतं पुंसवनाद्यनवकाशकर्मव्यतिरिक्तशुभकर्म न कर्तव्यमित्याहुः। **अन्ये त्वाहुः**—
"आनंत्यात्कुलधर्माणां पुंसां चैवायुषः क्षयात्। अस्थिरत्वाच्छरीरस्य द्वादशाहः प्रशस्यते"॥ इति **व्याघ्रपादवचनेन** कुलधर्माणामानंत्यादित्यनेन द्वादशाहसापिंड्यानंतरं कर्मानुष्ठानप्रतिपादनात्प्रेतभावनिवृत्तावपि
"प्रेतश्राद्धानि शिष्टानि सपिंडीकरणं तथा। अपकृष्यापि कुर्वीत कर्ता नांदीमुखे द्विजः" ॥ इति। नांदीमुखमात्र उपस्थिते मासिकापकर्षविधानान्निषेधाभावाच्च 'प्रमीतौ पितरौ यस्य' इति श्लोकद्वयोक्तकर्मव्यतिरिक्तानि सर्वाणि शुभकर्माणि विवाहादीन्यपि कर्तव्यानीति शिष्टाचारादिह व्यवस्था।

पित्रोर्मरणाब्दे दर्शादिश्राद्धनिषेधः। पित्रोर्मृताब्दे दर्शादिश्राद्धनिषेध उक्तः **षट्त्रिंशन्मते**—
"सपिंडीकरणादूर्ध्वं वर्षं वर्षार्धमेव वा। न कुर्यात्पार्वणश्राद्धमष्टका न विहन्यते" ॥ इति। अष्टकाव्यतिरिक्तदर्शमहालयमन्वादिश्राद्धं न कार्यमित्यर्थः। तथा च **स्मृत्यंतरे**—
"अमाश्राद्धं गयाश्राद्धं श्राद्धं चापरपाक्षिकम्। प्रथमाब्दे न कुर्वीत केशानां वपनं तथा"॥ इति। 'प्रमीतपितृकः कुर्यान्न कुर्यादाब्दिकावधि' इति पाठांतरम्। **आश्वलायनस्तु**—
"यन्मास्येवाब्दिकं श्राद्धं यस्य पुत्रो भवेदिह। प्राक् पिंडदानात्तन्मासि पार्वणं न समाचरेत्"॥ इति। यस्मिन्मासे प्रथमाब्दिकं तत्राब्दिकात्पूर्वं पार्वणं दर्शादिश्राद्धं न कुर्यादित्यर्थः।
स्मृत्यंतरे—
"सपिंडीकरणादूर्ध्वं षण्मासाभ्यंतरेऽपि च। न कुर्यात्पार्वणश्राद्धमष्टका न विहन्यते" ॥ इति। पार्वणं दर्शादि। **अत्र केचिदाहुः**—एतानि वचनानि भोजनपर्यंतश्राद्धनिषेधपराणि। संवत्सराषण्मासाद्वा अर्वागपि तिलोदकमात्रं कर्तव्यम्

"सपिंडीकरणादूर्ध्वममासंक्रमणादिषु। पुत्रस्तिलोदकं दद्यात्क्षेत्रपिंडांस्तदाचरेत्" ॥ इति तिलोदकमात्रविधानादिति। **अन्ये** तु सपिंडीकरणादूर्ध्वमिति वत्सरांतसापिंड्यपरं तिलोदकमिति श्राद्धस्याप्युपलक्षणं तेन संवत्सरात्परं दर्शश्राद्धादिकं कुर्यादिति व्याचक्षते। **शतकव्याख्याकारस्तु** दर्शादिश्राद्धं सपिंडीकरणात्प्राङ् नास्त्येव
"नासपिंडीकृते प्रेते पितृकार्यं प्रवर्तते। सपिंडीकरणं कृत्वा कुर्यात्पित्र्यं शुभानि च" ॥ इति **स्मृतेरिति**। एतदपि सपिंडीकरणात्परं दर्शादिश्राद्धविधानं वत्सरांतसापिंड्याभिप्रायम्। अन्यथा "सपिंडीकरणादूर्ध्वं वर्षं वर्षार्धमेव वा" इति पूर्वोक्तवचनविरोधः स्यादित्याहुः
"सपिंडीकरणात्प्रेते पैतृकं पदमास्थिते। आहिताग्नेः सिनीवाल्यां पितृयज्ञः प्रवर्तते" ॥ इत्यादि**स्मरणादा**हिताग्नेरेकादशदिनादिसापिंड्यानंतरदर्शश्राद्धेन विवादः। अन्येषां शिष्टाचारानुसारेण व्यवस्था द्रष्टव्या।

एकस्मिन् दिने एककर्तृकैकोद्दिश्यकश्राद्धद्वयनिषेधः। एकः कर्ता एकस्मिन्दिने श्राद्धद्वयमेकोद्दिश्यं न कुर्यात्। नैमित्तिकश्राद्धयोः संनिपाते तु तद्द्वयमेकदिने कुर्यात्। तदाह **दक्षः**—
"नैकः श्राद्धद्वयं कुर्यात् समानेऽहनि कस्यचित्। न यज्ञं न बलिं नैव देवर्षिपितृतर्पणम्" ॥ इति।

---

१ क्ष-वा। २ क्ष-आम। ३ क्ष-पि।

जाबालिः—

" श्राद्धं कृत्वा तु तस्यैव पुनः श्राद्धं न तद्दिने। नैमित्तिकं तु कर्त्तव्यं निमित्तानुक्रमोदयम्"॥ इति।

ऋतुरपि—

" श्राद्धं कृत्वा पुनः श्राद्धं न कुर्यादेकवासरे । यदि नैमित्तिकं न स्यादेकोद्देशं भवेद्यदि " ॥ इति। एकदैवत्यं श्राद्धद्वयं नैकदिने कुर्यादित्यस्य निषेधस्य विषयो दर्शितः **पितृमेधसारे**—"नैकश्राद्धद्वयमेकोद्देश्यमेकवासरे कुर्यात् । देवतैक्यात् । तद्यथा नित्येन दार्शिकस्य सोदकुंभेन मासिकस्य दार्शिकेन मन्वादियुगादिग्रहणादिश्राद्धानां संनिपाते प्रसंगात् पूर्वसिद्धेरुत्तरदार्शिकादिश्राद्धमेव कुर्यादनियतस्य बलीयत्वात् " इति।

" एकमप्याशयेन्नित्यं पित्रर्थं पांचयाज्ञिके " इत्युक्तेन नित्यश्राद्धेन सह

"न निर्वपति यः श्राद्धं प्रमीतपितृको द्विजः । इंदुक्षये मासि मासि प्रायश्चित्तीयते द्विजः"॥ इत्युक्तदर्शश्राद्धस्य सन्निपाते संमेलने तथा सोदकुंभश्राद्धेन सह मासिकस्य संनिपाते दर्शश्राद्धेन मन्वादियुगादिग्रहणादिश्राद्धानां संनिपाते सत्युत्तरदर्शादिश्राद्धेन नानियतेन नियतनित्यश्राद्धादिसिद्धेर्न नित्यश्राद्धादिपृथगनुष्ठेयम् । प्रत्यहं क्रियमाणनित्यश्राद्धापेक्षया दर्शश्राद्धमनियतम् । एवं सोदकुंभात्प्रत्यहं विहितान्मासिमासि मृताहे विहितं मासिकमनियतम् । एवं दर्शश्राद्धं प्रातिमासं नियतं मन्वादिकं तु कचित्कचिन्मासे भावादनियतम् । अस्य बलीयस्त्वात्तदेवानुष्ठेयामित्यर्थः । दर्शसंक्रातिश्राद्धयोः संनिपाते तु द्वयोस्तुल्यत्वाद्देवताभेदाभावाच्च दर्शश्राद्धं संक्रांतिश्राद्धं वा अन्यतरदनुष्ठेयम् । **कालादर्शेऽपि—**

" नित्यदार्शिकयोः सोदकुंभमासिकयोरपि । दार्शिकस्य युगादेश्च दार्शिकालभ्ययोगयोः " ॥ दार्शिकस्य मन्वादेः संपाते श्राद्धकर्मणः प्रसंगादितरस्यापि सिद्धेरुत्तरमाचरेदिति। अलभ्ययोगशब्देन चंद्रसूर्यग्रहार्धोदयादीनामुपसंग्रहः । ग्रहणार्धोदययोरमावास्याकालिकत्वाद्दार्शिकेन संपातः । **तत्रैव**—" नैकः श्राद्धद्वयं कुर्यादेकस्यैवेकवासरे । नैमित्तिकं त्वनेकेषां निमित्तानां च संकरे ॥

" नैमित्तिकानि तुल्यत्वात् दैवतैक्येऽपि कृत्स्नशः " ॥ इति एकः कर्ता एकदिने एकमेव पित्रादिकमुद्दिश्य श्राद्धद्वयं न कुर्यात् । नैमित्तिकश्राद्धद्वयं तु कुर्यात् । अनेकेषां निमित्तानां च सन्निपाते सति बहूनि नैमित्तिकानि श्राद्धानि देवतैक्येऽपि कृत्स्नानि कुर्यात् । निमित्तानां तुल्यत्वादित्यर्थः । तदाह **कात्यायनः**

" द्वे बहूनि निमित्तानि जायेरन्नेकवासरे। नैमित्तिकानि कार्याणि निमित्तोपत्यनुक्रमात्" ॥ इति ।

देवताभेदे एकस्मिन् दिने श्राद्धद्वयानुष्ठानम् । "नैकः श्राद्धद्वयं कुर्यादेकस्यैवेकवासरे" इति उद्देश्यैक्ये श्राद्धद्वयनिषेधाद्देवताभेदे श्राद्धद्वयं कुर्यात् । **पितृमेधसारे तदुदाहृतं** तद्यथा—

" नित्यदार्शिकाभ्यां सोदकुंभमासिकाब्दिकानां संयोगे आब्दिकेन संक्रांतिमासिकसोदकुंभानां संयोगे सोदकुंभादि पूर्वमनुष्ठेयम् । अनियतत्वात् । ततो दर्शादीति नित्यश्राद्धेन दर्शश्राद्धेन च सोदकुंभश्राद्धं मासिकं मातुःपितुर्वा क्षयाहश्राद्धं च यदा संयुक्तं तदा श्राद्धद्वयं कुर्यादेव । तत्रानियतनिमित्तं सोदकुंभमासिकाब्दिकादि पूर्वं कृत्वा नित्यदर्शश्राद्धे कुर्यात् । एवं मातुः पितुर्वा क्षयाहश्राद्धेन संक्रांत्यादिनैमित्तिकश्राद्धसांनिपाते श्राद्धद्वयं कुर्यात् । तत्र संक्रात्यादीनि अनियत-

निमित्तानि पूर्वं कृत्वा आब्दिकं कुर्यादित्यर्थः । एवं च देवताभेदे सति नित्ययोर्नित्यनैमित्तिकयोर्वा संनिपाते श्राद्धद्वयमवश्यं कर्तव्यम् । तत्र चानियतनिमित्तं पूर्वं कर्त्तव्यम् । तथा च **कालादर्शकारः**—

" नित्यस्य सोदकुंभस्य नित्यमासिकयोरपि । दर्शस्य सोदकुम्भस्य दर्शमासिकयोरपि ॥
" नित्यस्य चाब्दिकस्यापि दार्शिकाब्दिकयोरपि । युगाद्याब्दिकयोश्चापि मन्वाद्याब्दिकयोरपि ॥
" प्रत्याब्दिकस्य चालभ्य योगेषु विहितस्य तु । संपाते देवताभेदाच्छ्राद्धयुग्मं समाचरेत् ॥
" निमित्तानियतिश्चात्र पूर्वानुष्ठानकारणम् " ॥ इति ।

एषु द्वंद्वेषु यस्य श्राद्धस्य निमित्तमनियतं तत्पूर्वमनुष्ठेयम् । अनियतनिमित्तस्य बलीयस्त्वात्तेनोदकुंभमासिकाब्दिकादि पूर्वं कृत्वा नित्यश्राद्धदार्शिके कुर्यात् । दार्शिकाब्दिकयोः संनिपाते आब्दिकं क्षयाहश्राद्धं पूर्वं कृत्वा दर्शश्राद्धं कुर्यादेतेषु द्वंद्वेषु पश्चाद्यदुक्तं तत्पूर्वमनुष्ठेयमित्युक्तं भवति । तथा **स्मृत्यंतरे**—

" दर्शे क्षयाह आपन्ने श्राद्धं तत्र कथं भवेत् । क्षयाहं तु विनिर्वर्त्य दर्शश्राद्धं समाचरेत्" ॥ इति ।

आश्वलायनस्तु—

" यन्मास्येवाब्दिकं श्राद्धं यस्य पित्रोर्भवेदिह । प्राक्पिंडदानात्तन्मासि पार्वणं न समाचरेत् " ॥ इति।

पिंडदानादाब्दिकश्राद्धीयपिंडदानात् प्राक्पार्वणं दर्शादिश्राद्धं न समाचरेदित्यर्थः ।

मातृपितृश्राद्धद्वयसंनिपाते विधिः । मातृपितृश्राद्धद्वयसंपाते पितृश्राद्धं पूर्वं कुर्यात् ।

" मातापित्रोर्मृताहैक्यं कालेनापि भवेद्यदि । पितृश्राद्धं पुरा कृत्वा कुर्यान्मातुरनंतरम् " ॥ इति **स्मरणात्** । तथा च **कालादर्शे**—" पित्रोस्तु पितृपूर्वत्वं सर्वत्र श्राद्धकर्मणि " इति ।

सर्वत्र सपिंडीकरणांते । तदुत्तरभाविनि प्रत्याब्दिकादौ च **कार्ष्णाजिनिः**—

" पित्रोः श्राद्धे समं प्राप्ते नवे पर्युषितेऽपि वा । पितृपूर्वं सदा कुर्यादन्यत्रासक्तियोगतः" ॥ इति ।

अन्यत्र मातापितृव्यतिरिक्तश्राद्धे । **स्मृत्यंतरे**—

" मातापित्रोर्मृताहैक्ये पाकादीन्सह कारयेत् । कुर्यादग्रे पितृश्राद्धं पश्चान्मातुर्यथाविधि" ॥ इति ।

सायणीये—

" श्राद्धद्वये च युगपत्प्राप्ते पित्रोर्मृतेऽहनि । एकपाकेन तत्कुर्यादिति स्मृतिकृतो विदुः " ॥ इति ।

हेमाद्रौ—

" मातापित्रोरेकदिने श्राद्धं च प्रकृतं भवेत् । एकपाकेन तत्कुर्याद्वरणादि पृथक् पृथक् ॥
" नान्नादिशेषदोषोऽत्र कालैक्यात्तु पृथग्विधौ । रोहिणांते पितुः कृत्वा वैरिंचे मातुरारभेत्" ॥ इति ।

आश्वलायनोऽत्र विशेषमाह—

" एकत्रैव दिने श्राद्धद्वयं प्राप्तं यदा तदा । चरेदेव पुरा वर्षात्पित्रोरेकस्तु तत्सुतः ॥
"तावत्पूर्वं मृतस्यादौ कृत्वा स्नात्वा यथाविधि । पश्चात्पश्चान्मृतस्यैव पृथक्पाकैः समाचरेत्" ॥ इति ।

एकस्यां तिथौ संघातानुमरणसंबंधव्यतिरिक्तं पित्रोः श्राद्धद्वयं यदा प्राप्तं तदा बहुषु विभक्तेष्वपि पुत्रेषु सत्सु एको ज्येष्ठ एव पुरा वर्षान्नवश्राद्धाद्यूनाब्दिकपर्यंतं मरणक्रमेण कुर्यादित्यर्थः । एवं च वर्षात्पूर्वं कर्तव्यं श्राद्धं पृथक्पाकेन पितृपूर्वं वा मरणक्रमेण वा कुर्यात् । आब्दिकादीनि सह पाकेन पितृपूर्वमेव कुर्यादिति स्थितम् । मासिकाब्दिकयोर्युगपत्प्राप्तौ तु मातुः पितुर्वा आब्दिकं प्रथमं कर्तव्यम् । मासिकं तु पृथक्पाकेन पश्चात्कार्यम्

"एकाहे मासिकाब्दौ चेत्पूर्वं प्रत्याब्दिकं भवेत् । पश्चात्तु मासिकं कार्यं पृथक्पाकपरिक्रिया " ॥ इति **स्मरणात्** ।

---

१ क्ष-स्मृत्यर्थसारे ।

अनेकश्राद्धसन्निपाते विधिः। पित्रोर्ज्ञात्यादेश्च श्राद्धत्रयसंपाते **आश्वलायनः**—
"नैकत्रदिवसे श्राद्धत्रयं जात्वपि विद्यते । एकः कुर्यात्तथा प्राप्ते अन्यो भ्राताऽपरं चरेत् ॥
"भ्रातर्यविद्यमाने तु तत्परेऽन्हि समाचरेत् । पश्चादागतयोस्तावत्पित्रोः पूर्वेऽन्हि शस्यते ॥
"एवं विमृश्य कर्तव्यं संप्राप्ते धीमता तदा। अन्यथा श्राद्धहंता स्याच्छ्राद्धसंकरकृद्भवेत्"॥ इति।
एककर्तृकं श्राद्धत्रयमेकस्मिन्दिवसे न विद्यते। एको भ्राता पित्रोः प्राप्ते श्राद्धे कुर्यात् । अन्यो भ्राता ज्ञातिश्राद्धं चरेद्विद्यमाने तु भ्रातरि मरणक्रमात्पश्चात्प्राप्तं पित्रोः श्राद्धद्वयं पूर्वदिवसे मृततिथौ कुर्यात् । पूर्वं मृतस्यापि ज्ञात्यादेः श्राद्धं मृततिथेः परदिवसे कुर्यादित्यर्थः । अर्थात्पित्रो-रन्यतरश्राद्धस्य ज्ञात्यादिश्राद्धस्य च संनिपाते श्राद्धद्वयं पितृपूर्वकं तस्यां तिथौ कुर्यादित्युक्तं भवति।
स्मृत्यंतरे—
"आब्दिकं प्रथमं कुर्यान्मासिकं तु ततः परम् । दर्शश्राद्धं तृतीयं स्याच्चतुर्थं तु महालयः"॥ इति ।
महालये कारुणिकवरणस्य सत्वाद्दर्शमहालययोर्देवताभेदात् पृथक्करणम् ।
अनुमरणाब्दिकविषये भृगुः—
"या समारोहणं कुर्याद्भर्तृचित्यां पतिव्रता। तन्मृताहनि संप्राप्ते पृथक्पिंडे नियोजयेत्" ॥ इति ।
पृथक्पिंडनियोजनं पृथक्श्राद्धकरणम् । तथा च **स्मृत्यंतरे**—
"एकचित्यां समारूढौ दंपती निधनं गतौ । पृथक् श्राद्धं तयोः कुर्यादोदनं च पृथक्पृथक्" ॥ इति ।*
लोकाक्षिस्तु—
"मृतेऽहनि समासेन पिंडनिर्वापणं पृथक् । नवश्राद्धं तु दंपत्योरन्वारोहण एव तु"॥ इति ।
मृतेऽहनि पिंडनिर्वापणं मृताहश्राद्धं समासेन पाकैक्येन प्रथमं पृथक्कुर्यादित्यर्थः । मातृभिरेकचित्या-मन्वारोहणे कृते पाकैक्येन प्रथमं पितुः तदनंतरं साक्षान्मातुः ततो ज्येष्ठादिक्रमेण सपत्नी-मातॄणां कुर्यात् । **तदाह भृगुः**—
"एककाले गतासूनां बहूनामथवा द्वयोः । तंत्रेण श्रपणं कृत्वा कुर्याच्छ्राद्धं पृथक्पृथक् ॥
"पूर्वकस्य मृतस्यादौ द्वितीयस्य ततः परम् । तृतीयस्य ततः कुर्यात्संनिपातेष्वयं क्रमः" ॥ इति ।
माधवीये व्याख्यातमेतत्—"पूर्वकस्य मुख्यस्य पितुः द्वितीयस्य ततो जघन्यायाः साक्षान्मातुः तृतीयस्य ततो जघन्यायाः सपत्नीमातुरिति। एवं च "नैकत्र दिवसे श्राद्धत्रयं जात्वपि विद्यते" इति निषेधः मातापितृव्यतिरिक्तश्राद्धसंपातविषयः । "दंपत्योः सह संस्कारो मृतावनुमृतावपि ।
"उदकादिसपिंड्यंतप्रेतकार्याणि यान्यपि । कुर्यात् समानतंत्रेण सांवत्सरिकमेव च" ॥ इति
संघातानुमरणविषये सांवत्सरिकस्य समानतंत्रत्वस्मरणमापद्विषयम्
"एकचित्यां समारुह्य मृतयोरेकबर्हिषि । पित्रोः पिंडान्पृथग्दद्यात्पिंडं वाऽपत्सु तत्सुतः" ॥ इति
अग्निस्मरणात् । पिंडमित्येकोद्दिष्टाभिप्रायम् । अनापदि तु पृथगेव कार्यम् । अन्यथा "पृथक् श्राद्धं तयोः कुर्यात्" इति पूर्वोक्तस्मृतिविरोधः स्यात् । एवं च पित्रोः संघातमरणे अनुमरणे च सपिंडीकरणांतं सह कुर्यात् । तदुत्तरभाविश्राद्धं सर्वपाकैक्येन पृथक्कुर्यादिति निर्णयः ।

सपिण्डानां श्राद्धसंनिपाते विधिः । सपिंडानां सह मरणे श्राद्धसंपाते **ऋष्यशृंगः**—
"भवेद्यदि सपिंडानां युगपन्मरणं तथा । संबन्धासत्तिमालोच्य तत्क्रमाच्छ्राद्धमाचरेत्" ॥ इति।

---

१ क्ष-पुनः ।

मरणक्रमपरिज्ञाने तु तत्क्रमादेव कुर्यात्

" पत्नीभ्रातृसुतादीनां सपिंडानां यदि क्रमात् । संघातमरणं तत्र तत्क्रमाच्छ्राद्धमाचरेत् " ॥ इति **स्मरणात्** । **ऋष्यशृंगश्च**—

" कृत्वा पूर्वं मृतस्यादौ द्वितीयस्य ततः परम् । पुनस्तृतीयस्य तथा संनिपाते त्वयं क्रमः" ॥ इति । पार्वणैकोद्दिष्टयोः संनिपाते **जाबालिः**—

" यद्येकत्र भवेतां वै एकोद्दिष्टं च पार्वणम् । पार्वणं त्वभिनिर्वर्त्य एकोद्दिष्टं समाचरेत् " ॥ इति ।

" भ्रात्रे भगिन्यै पुत्राय स्वामिने मातुलाय च । मित्राय गुरवे श्राद्धमेकोद्दिष्टं न पार्वणम् " ॥ इत्यादिभिर्विहितस्यैकोद्दिष्टस्य

" पुत्रः पौत्रः प्रपौत्रश्च दौहित्रो दुहिता स्नुषा । दंपती च क्रमादेते श्राद्धं कुर्युस्त्रिपूरुषम् " ॥ इत्यादिभिर्विहितस्य पार्वणस्य च संनिपाते पार्वणं कृत्वा तत एकोद्दिष्टं कुर्यादित्यर्थः । आद्यैकोद्दिष्ट-दिवसे कर्ता स्वदेयश्राद्धमागतमंतरितं च न कुर्यात्

' एकोद्दिष्टस्य दिवसे सपिंडीकरणं विना । श्राद्धं कुर्यात्पितृक्रोधात्क्षयमाप्नोति संततिः " ॥ इति **स्मरणात्** । एकादशदिने एकोद्दिष्टव्यतिरिक्तश्राद्धांतरं यदि कुर्यात्तदा दोषः । विषयविशेषेण एकादशाहविहितं सपिण्डीकरणं तत्पूर्वभावि च षोडशश्राद्धमेकोद्दिष्टदिवसे कुर्यादित्यर्थः । अत्र केचिदाहुः–" एकोद्दिष्टांत एव स्यात्संस्कर्तुः शुद्धता त्वघात् " इति संस्कर्तुरेकोद्दिष्टानंतरं शुद्धिस्मरणात्

"कार्यं प्रत्याब्दिके श्राद्धे त्वंतरा मृतसूतके । आशौचानंतरं कार्यमिति वासिष्ठभाषितम्" ॥ इत्याशौचानंतरमेव तत्करणविधानादेकोद्दिष्टं कृत्वा तस्मिन्नेव दिने कुर्यादिति तदसाधु । एकोद्दिष्टस्य दिवसे सपिण्डीकरणं विनेत्यनेन पूर्वोक्तेन एकोद्दिष्टदिनमात्रे श्राद्धांतरनिषेधप्रतीतेः । यत्तु—

" एकादशेऽन्हि संप्राप्ते एकोद्दिष्टे च पार्वणे । कृत्वा तु पार्वणश्राद्धमेकोद्दिष्टं समाचरेत् " ॥ इति तदपि ' एकोद्दिष्टांत एव स्यात् ' इत्युक्तानेकस्मृतिविरोधात् शिष्टाचाराभावाच्चोपेक्ष्यम् । तत एव **पितृमेधसारकृत्**—" दाहकस्तु[१] स्वदेयं श्राद्धमंतरितं द्वादशाह एव कुर्यात् नैकादशाहे " । तत्र शुध्यभावान्निषेधाच्चेति तेनैव तद्व्याख्यातम्—"अंतरितमागतं च स्वदेयं श्राद्धं द्वादशाहे एव कुर्यात् । सपिण्डीकरणं तु सावकाशत्वात् त्रयोदशाहादौ कुर्यात् " इति । **यत्तु**—

" द्वादशेऽहनि संप्राप्ते पार्वणे च सपिण्डने । पार्वणं प्रथमं कृत्वा पश्चात्कुर्यात्सपिण्डनम् " ॥ इति एतदेवं व्याचक्षते—पार्वणं प्रथमं पूर्वदिने कृत्वा पश्चात्त्रयोदशदिने सपिण्डनं कुर्यादिति । **अन्ये** त्वाहुः—द्वादशाहे सपिण्डनं कृत्वा त्रयोदशदिनेऽन्हि अंतरितं द्वादशाहप्राप्तं च प्रत्याब्दिकं कर्तव्यम्

" नासपिण्डीकृते प्रेते पितृकार्यं प्रवर्तते । सपिण्डीकरणं कृत्वा कुर्यात्पित्र्यं शुभानि च" ॥ इति **स्मरणादिति** । **स्मृत्यंतरे**ऽपि—

" अकृत्वा प्रेतकार्याणि नित्यनैमित्तिकान्यपि । न कुर्यात्तावदाशौचं यावत्प्रेतत्वमोक्षणम्" ॥ इति । **तथा**—

" ग्रहणे तु द्वितीयेऽन्हि रजोदृष्टौ तु पंचमे । त्रयोदशेऽन्हि मृतके[२] जन्मन्येकादशेऽहनि " ॥ इति ।

---

१ क्ष–एकं । २ ख–वृ ।

" ग्रहणे तु द्वितीयेऽन्हि रजो दृष्टौ तु पंचमे " इत्यनयोर्विषयोऽग्रे वक्ष्यते । मृतके मरणाशौचे अंतरितं त्रयोदशेऽन्हि कुर्यात् । जननाशौचे त्वेकादशे कुर्यादित्यर्थः ।

न च वाच्यं त्रयोदशेऽन्हि मृतके इत्येतन्महागुरुपितृसंस्कर्तृविषयम्

"उत्पाद्य पुत्रं संस्कृत्य वेदमध्याप्य यः पिता । कुर्याद्वृत्तिं च नष्टेऽस्मिन्द्वादशाहं महागुरौ"॥ इति वचनेन तत्र द्वादशाहमाशौचस्मरणादिति । केचित्तु पूर्वापरपर्यालोचनया मृतके च त्रयोदश इत्यंशस्याप्यंतरितश्राद्धमात्रविषयत्वप्रतीतेः । महागुरुविषये त्रयोदशेऽन्हि सापिंड्ये सत्युक्तन्यायेन चतुर्दशदिन एवांतरितश्राद्धकरणस्य युक्तत्वाच्च । एवं च द्वादशाहसपिंडीकरणविषयेंऽतरितं श्राद्धमेकोद्दिष्टदिने सपिण्डीकरणदिने वा प्राप्तं च त्रयोदशेऽन्हि कर्तव्यम् । एतदेवाऽभिप्रेत्य **स्मृत्यंतरम्**–

"आशौचं द्वादशाहांतं न कुर्याद्देवतार्चनम् । न कुर्यात्पितृकार्याणि दानं होमं जपं तथा"॥ इति । त्रिपक्षादौ सपिण्डीकरणविषये तु अंतरितं श्राद्धं द्वादशाहे कार्यम् । द्वादशाहादिषु सपिण्डीकरणपर्यंतं तद्दिनेषु च प्राप्तं पित्रोः प्रत्याब्दिकं यथातिथ्येव कर्तव्यम् । ननु—

" अकृत्वा प्रेतकार्याणि नित्यनैमित्तिकान्यपि । न कुर्यात्तावदाशौचं यावत्प्रेतत्वमोक्षणम् "॥ इति सपिण्डीकरणपर्यंतं कर्मानधिकारित्वस्मरणात् कथं तत्र पितृश्राद्धमिति चेन्न । तस्य पितृश्राद्धव्यतिरिक्तकर्मनिषेधपरत्वात् । तथा च **स्मृत्यंतरम्**

" नासपिण्डीकृतेः पित्रोरन्येषां श्राद्धमाचरेत् । नित्यं नैमित्तिकं काम्यमिष्टापूर्तादिकं च न ॥

"मासिकान्याब्दिकं पित्रोरशुद्धोऽप्यौरसः सुतः । कुर्यादेव तिथिप्राप्तमिति शातातपोऽब्रवीत्"॥ इति । आऽसपिण्डीकृतेरित्याभिविधावाकारः । पित्रोः सपिण्डीकरणपर्यंतमन्येषां प्रत्याब्दिकं न कुर्यात् । मातापित्रोरन्यतरस्य प्रत्याब्दिकमन्यतरसापिंड्यात्पूर्वं कुर्यादित्यर्थः । एवं च पितृसापिंड्यानंतरमन्येषां प्रत्याब्दिकश्राद्धं कर्त्तव्यमित्यर्थादुक्तं भवति । यत्तु **देवलवचनम्**

"पितरौ प्रमीतौ यस्य देहस्तस्याशुचिर्भवेत् । न दैवे नापि पित्र्यं च यावत्पूर्णो न वत्सरः" ॥ इति । अत्र पित्र्यशब्देनान्येषां सापिंड्यमुच्यते । " पित्रोर्मृताब्दे चान्येषां वत्सरांते सपिंडनम् " इति **स्मरणात्** । एतच्चाधस्तान्निरूपितम् । पूर्वपक्षेऽप्येवमेव अनयोः श्लोकयोरर्थ इति तस्मात्पूर्वपक्ष एव युक्तः । यत्र देवतैक्यं तत्र काम्यानुष्ठानान्नित्यं च श्राद्धं प्रसंगात्सिध्यति

" काम्यं तंत्रेण नित्यस्य तंत्रं श्राद्धस्य सिध्यति । स्यादेकत्वं तु निर्देशाद्देवतैक्यं भवेद्यदि "॥ इति **स्मरणात्**

तथा च **कालदर्शे**—" देवतैक्ये काम्यानुष्ठानान्नित्यत्वं च सिध्यति " इति ।

आब्दिकनिरूपणम् । अथाब्दिकं निरूप्यते । तत्र **याज्ञवल्क्यः** (आ. २५६)

"मृतेऽहनि तु कर्त्तव्यं प्रतिमासं च वत्सरम् । प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि" ॥ इति ।

लोकाक्षिः—

" श्राद्धं कुर्यादवश्यं तु प्रमीतपितृकः स्वयम् । इंदुक्षये मासि मासि वृद्धौ प्रत्यब्दमेव च" ॥ इति ।

जातुकर्णिः[२]—

" पितुः पितृगणस्थस्य कुर्यात्पार्वणवत्सुतः । प्रत्यब्दं प्रतिमासं च विधिर्ज्ञेयः सनातनः " ॥ इति । पितृगणस्थस्य कृतसपिंडीकरणस्य पितुः प्रत्यब्दं प्रतिमासामाब्दिकं मासिकं च श्राद्धं पार्वणवत्पितृपितामहप्रपितामहात्मकत्रिपुरुषोद्देशेन सुतो मृताहे कुर्यादित्यर्थः ।

१ ख–तृ । २ ग–र्णः ।

कात्यायनः—

"प्रत्यब्दं यो यथा कुर्यात्पुत्रः पित्रोः सदा द्विजः । तथैव मातुः कर्त्तव्यं पावर्णं तु विधीयते"॥ इति ।

स्मृतिचिंतामणौ—

" मृताहे मासिकं कार्यं व्यहोने तूनमासिकम् । आब्दिकं प्रथमं कुर्यान्मृतमासे मृतेऽहनि"॥ इति ।

सुधानिधौ—

"यस्मिन्मासे मृतिः पक्षे यस्य यस्यां तिथौ भवेत् । तस्यामेव तिथौ कुर्यादाब्दिकं तु विचक्षणः"॥ इति।

स्मृत्यंतरे—

"यस्मिन्मासि मृतिः पूर्वं तस्मिन्मासि च तद्दिने । प्रथमाब्दिकमारभ्य कुर्यादामरणांतिकम्"॥ इति ।

नारदः—

"यस्यां तिथौ मृतिः प्राप्ता तस्यामेवाब्दिकं भवेत् । तिथिनक्षत्रवाराणां तिथिरेव बलीयसी " इति ।

चंद्रिकायाम्—

"मासपक्षातिथिस्पृष्टे यो यस्मिन्म्रियतेऽहनि । प्रत्यब्दं तु तथाभूतं क्षयाहं तस्य तं विदुः"॥ इति । अत्र सर्वत्र मृताहस्य मासनिरूप्यत्वं प्रतीयते । मासश्च सौरचान्द्रसावनभेदेन त्रिविधो भवति । 'मसी परिमाणे' इत्यस्माद्धातोर्निष्पन्नोऽयं मासशब्दः । सूर्यस्य राशिगतिर्यत्र परिमीयते स सौरः । यस्येते परिमीयेते यावता कालेन चंद्रवृद्धिक्षयौ स चांद्रो मासः । अहोरात्राणां त्रिंशत्संख्या यत्र परिमीयते स सावनः । तदुक्तं **ब्रह्मसिद्धांते—**

" चांद्रः शुक्लादिदर्शान्तः सावनस्त्रिंशता दिनैः । एकराशौ रविर्यावत्कालं मासः स भास्वतः"॥ इति । शुक्लादिः शुक्लप्रतिपदादिः दर्शांतश्चांद्रः । तथा **स्मृत्यंतरे—**

" मेषादिस्थे सवितरि यो यो दर्शः प्रवर्तते । चांद्रमासास्तत्तदंताश्चैत्राद्या द्वादश स्मृताः" ॥ इति ।

चंद्रिकायाम्—

" दर्शाद्दर्शश्चांद्रस्त्रिंशद्दिवसस्तु सावनो मासः । रविसंक्रमाचिन्हः सौरो मासो निगद्यते तज्ज्ञैः " ॥ इति । चांद्रस्तु द्विविधः दर्शांतः पौर्णमासान्त इति । तथा च **श्रूयते**–(तै. सं. ७।५।६)

" अमावास्यया हि मासान् संपाद्याह उत्सृजन्ति । अमावास्यया हि मासान् संपश्यन्ति । पौर्णमास्या मासान् संपाद्याह उत्सृजन्ति । पौर्णमास्या हि मासान्संपश्यंति" इति । तत्र प्रथमपक्षे चांद्रः शुक्लादिदर्शांत इत्यादि **स्मृतय** उदाहार्याः । शिष्टाचारबाहुल्यं च तत्र प्रसिद्धम् । द्वितीयपक्षस्योपोद्बलकं स्मृतिलिंगं च । तथाहि **महालयप्रकरणे** पठ्यते–"आश्वयुक् कृष्णपक्षे तु श्राद्धं कार्यं दिने दिने " इति । तत्र यदि दर्शांतो मासो विवक्ष्येत तदा भाद्रपदकृष्णपक्ष इत्युच्येत । न त्वेवमुक्तम् । आश्वयुजमासांतर्गतं त्विहोच्यते । तत्र कृष्णपक्षप्रतिपदादिपूर्णमांतत्वे संभवति । तथा **जयंतीप्रकरणे स्मर्यते—**

" मासि भाद्रपदेऽष्टम्यां कृष्णपक्षेऽर्धरात्रके । भवेत् प्रोष्ठपदे मासि जयंती नाम सा स्मृता"॥ इति । अत्रापि जयंत्या भाद्रपदांतर्गतत्वं मासस्य पूर्णिमांततां गमयति । यतिधर्मप्रकरणे च **स्मर्यते—**

" संधिषु वापयेत् " इति । तत्र यदि दर्शान्तविवक्षा स्यात् तदा दर्शस्यैव संधित्वात्तत्रैव वपनं कुर्युः । कुर्वीति च पूर्णमायां तस्माद्दर्शांतत्वपूर्णमांतत्ववचोर्व्यवस्थितो विकल्पः । तथा च **ब्रह्मसिद्धांते—**

"अमावास्यापरिछिन्नो मासः स्यात् ब्राह्मणस्य तु । संक्रातिपौर्णमासिभ्यां तथैव नृपवैश्ययोः ॥ इति ।

ज्योतिःशास्त्रे—

"दर्शांतः पूर्णिमांतश्च चांद्रमासो द्विधा मतः। जातिभेदाद्देशभेदात्तौ च मासौ व्यवस्थितौ॥
"नर्मदादक्षिणे भागे दर्शांतो मास इष्यते। नर्मदोत्तरभागे तु पूर्णिमांत इति स्थितिः"॥ इति।

चंद्रिकायामपि—शुक्लप्रतिपदादिदर्शांतश्चांद्रो मास इत्येतद्दक्षिणापथे द्रष्टव्यं उत्तरापथे तु कृष्णपक्षप्रतिपदादि पौर्णमास्यांतश्चांद्रो मास इति द्रष्टव्यमिति। तदेवं सौरचांद्रसावनभेदेन मासस्त्रिविधः। तत्र चांद्रो मासो दर्शांतःपूर्णमांतो वा देशभेदेन जातिभेदेन च व्यवस्थितः। नाक्षत्रमपि मासं केचिदिच्छिन्ति "सर्वर्क्षैः परिवृत्तैस्तु नाक्षत्रो मास इष्यते" इति **विष्णुधर्मोत्तरे**ऽभिधानात्।

ऋतुनिर्णयः—प्रसंगादृतुर्निर्णयते। ऋतुर्वसंतादिः कालविशेषः। स च षड्विधः "षड्वा "ऋतव" इति **श्रुतेः** (तै. ब्रा. १।३।१०)। यत्तु 'द्वादशमासाः पंचर्त्तव' इति **श्रुतं** (तै. ब्रा. ३।८।९)। तत्र हेमंतशिशिरयोरेकीकरणं विवक्षितम्। तथा च **बहृचब्राह्मणे** पठ्यते "द्वादशमासाः पंचर्त्तवः हेमंतशिशिरयोः समासेन" इति। तथा च पंचमप्रयाजानुमंत्रणमंत्रः **श्रूयते** (तै. सं. १।५।२)—'हेमंतशिशिरावृतूनां प्रीणामि' इति। एवं च स्वरूपेण ऋतवः षोढा भिद्यंते॥ "तत्रैकैकर्त्तुर्मासद्वयात्मकं द्वंद्वमुपदधाति। तस्मात् द्वंद्वमृतव" **इत्युपधानब्राह्मणे** श्रवणात् (तै. सं. ५।४।२)। कस्मिन्[1] ऋतौ कयोर्मासयोर्द्वंद्वं गृहीतव्यमित्याकांक्षायां वसंताद्यृतुषु क्रमेण चैत्रमासादिद्वंद्वं ग्राह्यमिति **श्रुतिरेवाह**—(तै.सं.४।४।२) "मधुश्च माधवश्च वासंतिकावृतू। शुक्रश्च शुचिश्च ग्रैष्मावृतू। नभश्च नभस्यश्च वार्षिकावृतू। इषश्चोर्जश्च शारदावृतू। सहश्च सहस्यश्च हैमंतिकावृतू। तपश्च तपस्यश्च शैशिरावृतू"॥ इति। एषु च वाक्येषु ऋतू इतिद्विवचनमृत्ववयमासाभिप्रायं अन्यथा "षड्वा ऋतव" इति **श्रूयमाणा** षट्संख्या बाध्येत। अवयविनः ऋतोर्वसंतादेरेकैकात्मकत्व**माधानब्राह्मणे** (तै. ब्रा. १।१।२) एकवचनेन व्यवहारादवगंतव्यम्। "वसंतो वै ब्राह्मणस्यर्तुः। ग्रीष्मो वै राजन्यस्यर्त्तुः। शरद्वै वैश्यस्यर्तुः" इति। संवत्सरोपक्रमरूपत्वेन वसंतस्य प्राधान्यं द्रष्टव्यम्। "मुखं वा एदद्दतूनां यद्वसंतः" इति **श्रुतेः** (१।१।२)। ते च वसंताद्य ऋतवो द्विविधाश्चांद्राः सौराश्च। चैत्राद्यश्चांद्रास्ते चोदाहृताः। मधुश्च माधवश्चेत्यादिना। न च तत्र चैत्राद्यो नोक्ता इति शंकनीयं मध्वादिशाब्दादीनां चैत्रादिपर्यायत्वात्। अत एवाहुः

"चैत्रो मासो मधुः प्रोक्तो वैशाखो माधवो भवेत्। ज्येष्ठो मासस्तु शुक्रः स्यादाषाढः शुचिरुच्यते॥
"नभो मासः श्रावणः स्यान्नभस्यो भाद्र उच्यते। इषश्चाश्वयुजो मासो कार्तिकश्चोर्जसंज्ञकः॥
"सहो मासो मार्गशीर्षः सहस्यः पुष्यनामकः। माघमासस्तपः प्रोक्तस्तपस्यः फाल्गुनः स्मृतः"॥इति।

चांद्रमासानां चैत्रादिसंज्ञा नक्षत्रप्रयुक्ता। यस्मिन्मासे पूर्णिमा चित्रानक्षत्रेण युज्यते स चैत्रः। एवं वैशाखादिषून्नेयम्। चित्राविशाखादियोगस्योपलक्षणत्वात्कचित्स्वित्रादिप्रत्यासन्नस्वात्यनूराधादियोगेऽपि चैत्रवैशाखादिसंज्ञा न विरुध्यते। एतेषां चैत्राद्यात्मकानां वसंतादीनां चंद्रपरिकल्प्यत्वाच्चांद्रत्वम्। अत **एवाम्नायते** (तै. आ. ३।३।७)—"चंद्रमाः षड्ढोता। स ऋतून्कल्पयाति" इति। ननु अस्त्वेवं मध्वादीनां द्वादशानां चांद्रमासानां वसंताद्यृतुत्वं मलमासस्य तु त्रयोशदशस्य चांद्रमासस्य कथमृतुषु निर्वाहः। उच्यते। ययोर्मासयोर्मध्ये मलमासो दृश्यते तयोरुत्तरस्मिंस्तस्यांतर्भावः।

---

१ क्ष-एकस्मिन्।

तथा च—असौ षष्टिदिनात्मको मलिनशुद्धभागद्वयात्मक इति मध्वादिशब्दवाच्यत्वेन उक्तेष्वंतर्भावात् न काऽप्यनुपपत्तिः । सौरे त्वृतुषु **बोधायनेन** मीनमेषयोर्मेषवृषभयोर्वा वसंत इत्यभिधानान्मीनादित्वं मेषादित्वं च वैकल्पिकं वसंतस्यांगीकृतम् ।

वृद्धगार्ग्योऽपि—" मीनमेषौ रविर्यावद्वसंतस्तावदिष्यते " इति । **वृद्धवसिष्ठः**—"यावन्मेषर्षभौ भानुर्वसंतस्तावदुच्यते " इति । **कालनिर्णये**—

" वसंतादृतवो द्वेधा चांद्राः सौराश्च चांद्रगाः । चैत्राद्या अथ मीनाद्या मेषाद्या वा विवस्वतः" ॥ इति ।

तदेवं " वसंते ब्राह्मणोऽग्निमादधीत ग्रीष्मे राजन्य आदधीत शरदि वैश्य आदधीत । वसंते ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं शरदि वैश्यं वसंते ज्योतिष्टोमेन यजेत " इत्यादि **श्रुतिस्मृतिपुराण**विहितेषु कर्मसु चांद्रः सौरो वा ऋतुः देशाचारानुसारेण विकल्पितो द्रष्टव्यः ।

अयननिरूपणम् ॥ **अथायनम्** । यात्यनेन ऋतुत्रयेण सूर्यो दक्षिणाशामुत्तराशां वेत्यृतुत्रयमयनम् । तथा च **श्रुतिः** (तै सं. ६।५।२)—" तस्मादादित्यः षण्मासो दक्षिणेनैति षडुत्तरेणेति " । अत्र **कालनिर्णयकारः**—" आदित्यगतिमुपजीव्यायननिष्पत्तेः सौरमेवैतत् " ॥ अत एव **विष्णुधर्मोत्तरे**—सौरमासमधिकृत्योक्तमृतुत्रयं चायनं स्यादिति । केचित्तु चांद्रमासेनायनद्वयमभ्युपगच्छति । मार्गशीर्षमासादिकैस्त्रिभिः ऋतुभिः कल्पितः कालः षण्मासात्मक उत्तरायणम् । ज्येष्ठमासादिको दक्षिणायनमिति । तत्र प्रमाणं ज्योतिःशास्त्रादौ मृग्यम् । श्रौतस्मार्तकर्मानुष्ठाने तु मकरकर्कटसंक्रात्यादिक एवायनद्वयकाल इति ।

संवत्सरनिरूपणम् । अथ संवत्सरः । संवत्सरो नाम अयनाद्यवयवयुक्तोऽवयवी कालविशेषः । सम्यग्वसंत्यस्मिन्नयनर्तुमासादय इति व्युत्पत्तेः । स च द्वादशमासात्मकः "द्वादशमासाः संवत्सर " (तै. ब्रा. ३।८।९) इति **श्रुतेः** । चांद्रसावनसौरमासभेदेन संवत्सरस्त्रिविधः । तदुक्तं **ब्रह्मसिद्धांते**—

" चांद्रसावनसौराणां मासानां तु प्रभेदतः । चांद्रसावनसौरास्तु त्रिधा संवत्सरा अपि " ॥ इति ।

तत्र चांद्रः सांवत्सरश्चैत्रशुक्लप्रतिपदादिकः फाल्गुनदर्शांतः । सौरस्तु मेषादिर्मीनांतः । सावनः षष्ट्युत्तरशतत्रयाहोरात्रात्मकः । पंचविधात्मकं संवत्सरस्योक्त**मायुर्वेदे**—

"सौरबृहस्पतिसावनशशधरनाक्षत्रिकाः क्रमेण स्युः । मातुलपातालातुलविमलवरांगा[१] वत्सराः पंच"॥

इति । अस्यायमर्थः—गणकप्रसिद्धयाक्षरसंख्यया मातुलशब्दः पंचषष्ट्यधिकशतत्रयमाचष्टे । तावद्दिवसपरिमितः सौरः संवत्सरः पातालशब्दः एकषष्ट्यधिकशतत्रयमाचष्टे । तावद्दिवसपरिमितः काल्पे बृहस्पतेः संवत्सरः । अतुलशब्दः षष्ठ्यधिकशतत्रयमाह । तावद्दिवसपरिमितः सावनः संवत्सरः । विमलशब्दः चतुःपंचाशदधिकशतत्रयमाचष्टे । तावद्दिवसपरिमितः चांद्रसंवत्सरः । वरांगशब्दश्चतुर्विंशत्यधिकशतत्रयमाह । तावद्दिवसपरितो नाक्षत्रिकसंवत्सर इति तत्र नाक्षत्रिकस्य ज्योतिःशास्त्रप्रसिद्धेः आयुर्दायादावुपयोगः । बार्हस्पत्यस्तु सिंहबृहस्पतिरित्यादिविशेषमुपजीव्यगोदावर्यादिस्नानादौ विनियुक्तः सौरः संवत्सरः मेषादिराशिपुरस्कारेण प्रवृत्तेः सांवत्सरिके व्रतादौ द्रष्टव्यः । तथा च व्रतं **विष्णुधर्मोत्तरे** अभिहितम्—

"भगवन् कर्मणा केन तिर्यग्योनौ न जायते । म्लेंछदेशे[२] च पुरुषस्तमाचक्ष्व च वै मुने "॥

---

१ ग-धत्वं । २ ग-गैस्तु ।

मार्कंडेयः—

"मेषसंक्रमणे भानोः सोपवासो नरोत्तमः। पूजयेत् भार्गवं देवं रामं शक्त्या यथाविधि"॥ इत्यारभ्य " मीने संक्रमणे मत्स्यं वासुदेवं च पूजयेत् " इत्यनेन ग्रंथेन व्रतं विधायांते तदुपसंहृतं " कृत्वा व्रतं वत्सरमेतदिष्टं म्लेंच्छेषु तिर्यक्षु च नापि जायते " इति। षष्ठ्यधिकशतत्रयसंख्याकैर्दिनैर्निर्वर्त्ये गवामयनादौ सावनो द्रष्टव्यः। पक्षविशेषे तिथिविशेषे वा प्रतिसंवत्सरं विहितं यत्कर्म तत्र चान्द्रः संवत्सरो द्रष्टव्यः। तथा च **निरूढपशुबंधप्रकरणे श्रूयते**—" तेन संवत्सरे संवत्सरे यजेत " इति। **आपस्तंबः**—" सर्वान्लोकान्पशुबंधयाज्यभिजयति तेन यक्ष्माणोऽमावास्यायां पौर्णिमास्यां वा " इति। अत्र चांद्रो वत्सरो ग्राह्यः। चांद्रतिथौ तदनुष्ठानविधानात्। " तदाद्यास्तिथयो द्वयोः " (१।४।१) इत्य**मरसिंहेन** चांद्राहोरात्रेष्वेव तिथिशब्दानुशासनात् ' पक्षपरिग्रह ' इत्यस्माद्धातोः चांद्रस्य पंचदशानां कालानां पूरणं अपक्षयो वा यत्र परिगृह्यते स पक्ष इति निर्वचनाच्छुक्लपक्षादिपक्षाः पुरस्कारेण प्रवृत्ते कर्मणि चांद्र एव द्रष्टव्यः। तथा शुक्लपक्षेऽनंतव्रतं विहितं ' नववर्षाणि पंच च ' इति संवत्सरस्य चानंतव्रतांगत्वं प्रतीयते। तत्र चांद्रः संवत्सरः। यत्र " गुरुता शिष्यता चैव तयोर्वत्सरवासतः। संवत्सरमेतद्व्रतं चरेत् " इत्यादौ नियामकं नास्ति। तत्र चांद्रादीनामन्यतम इच्छया ग्रहीतव्यः।

प्रकृतमनुसरामः

"यस्मिन्मासे मृति पक्षे यस्य यस्यां तिथौ भवेत्। तस्यामेव तिथौ कुर्यादाब्दिकं तु विचक्षणः"॥ इत्यादिभिः पूर्वोक्तवचनैः पक्षतिथिसंबंधेनाब्दिकस्य विधानाच्चांद्रस्याब्दस्य ग्राह्यत्वं प्रतीयते। अत्र **गार्ग्यः**

"विवाहादौ स्मृतः सौरो यज्ञादौ सावनः स्मृतः। आब्दिके पितृकार्येऽपि चांद्रो मासः प्रशस्यते"॥ इति। **चंद्रिकायामिदं** व्याख्यातम्—यज्ञादौ माससंवत्सरसाध्ययज्ञव्रतप्रायश्चित्तक्रियादौ तत्र माससाध्ययज्ञः ' मासं वैश्वदेवेन ' इत्यादिवाक्यैर्विहितः। माससाध्यव्रतानि मासोपवासादीनि माससाध्यप्रायश्चित्तक्रियास्तु

" गोष्ठे वसन्ब्रह्मचारी मासमेकं पयोव्रतः। गायत्रीजाप्यनिरतो मुच्यतेऽसत्प्रतिग्रहात् "॥

इत्यादि**वाक्यैर्**विहिताः संवत्सरसाध्ययज्ञाः गवामयनादयः। संवत्सरसाध्यव्रतानि ' संवत्सरमेतद्व्रतं चरेत् ' इत्यादिविहितानि संवत्सरसाध्याः प्रायश्चित्तक्रियाः द्वादशवार्षिकाद्या द्रष्टव्याः। आब्दिके सांवत्सरिकश्राद्धे पितृकार्ये मासिकादौ। अपिशब्दान्माससंवत्सरसाध्ये यज्ञव्यतिरिक्ते सर्वस्मिन् देवकार्ये चांद्रो मासः प्रशस्यते इति। उक्तं च **पितामहेन**—" दैवे कर्मणि पित्र्ये च मासश्चांद्रमसः स्मृतः " इति। **आत्रेये**—

" अभिषेकेऽपि नाक्षत्रं सावनं वेतनादिषु। पित्र्ये चांद्रमसं शस्तं सौरं स्मार्तेषु कर्मसु[१] "॥ इति। अभिषेके राज्याभिषेके। स्मार्तेषु विवाहादिष्वित्यर्थः। **लघुहारीतः**—

"प्रत्यब्दं द्वादशे मासि कार्या पिंडक्रिया सुतैः। क्वचित्त्रयोदशेऽपि स्यादाद्यं मुक्त्वा तु वत्सरम्"॥ इति। द्वादशे मासि अतीत इति शेषः। अत्र त्रयोदशग्रहणसामर्थ्याच्चांद्रो मास इति ज्ञेयम्। सौरवत्सरे त्रयोदशमासासंभवात्। **हारीतोऽपि**—"असंक्रांतेऽपि कर्तव्यमाब्दिकं प्रथमं द्विजैः " इति। अत्रापि संक्रांतिरहितसौरमासासंभवाच्चांद्र एव गृहीतः। **वृद्धगार्ग्योऽत्र** विशेषमाह—

---

१ ग–ज। २ याज्ञवल्कीये प्रा. २९०। ३ ग–ष्वनिन्दितम्।

" अन्वष्टक्यं च पूर्वेद्युरष्टकामायुगादयः । मन्वाद्योऽक्षया पंचम्यादौ चांद्रौ प्रकीर्तितौ ॥
"मासिके चाब्दिके वस्त्रधान्यस्वर्णादिवृद्धिषु । भृत्योपकल्पनादौ च मासाब्दौ सौरसावनौ" ॥ इति ।

मासिके आब्दिके च मासा द्वौ सौरौ धान्यस्वर्णादिवृद्धिषु भृत्योपकल्पनादौ च मासाब्दौ सावनाविति व्याख्यातारः । **कालादर्शे**—

" अष्टकापरपक्षामावास्यादौ चांद्रमानतः । मासिकाब्दिकवृध्यादौ मासाब्दौ सौरसावनौ" ॥ इति ।

अपरपक्षो भाद्रपदकृष्णपक्षः । आदिशब्दात्पूर्वेद्युरन्वष्टक्याक्षयतृतीयामन्वादियुगादिपंचम्यादीनामुपसंग्रहः । वृद्धिः ऋणीकृतसुवर्णादेर्वृद्धिः । आदिशब्देन भृत्युपकल्पनाद्युपसंग्रहः । **त्रिकांडी** च—

"चांद्रो मासः श्रुतिस्मृत्योः कर्मणोर्मासिकाब्दिके । विहाय भृतिवृध्यादौ इतरौ परिकीर्तितौ" ॥ इति ।

मासिकाब्दिकव्यरिक्तश्रौतस्मार्तकर्मणोश्चांद्रो मासः । मासिकाब्दिकयोर्भृतिवृध्यादौ च इतरौ सौरसावनावित्यर्थः । **स एव**—

"यस्मिन्राशौ स्थिते सूर्ये यो मृतिं प्रतिपद्यते । पुनस्तद्राशिमापन्ने भानावाब्दिकमाचरेत्" ॥ इति ।

हेमाद्रौ—

"यस्मिन्राशौ स्थितौ सूर्ये विपत्तिं याति मानवः । तद्राशावेव कर्त्तव्यं पितृकार्यं मृतेऽहनि" ॥ इति ।

स्मृत्यंतरे—

"व्रते चांद्रमासं शस्तं न श्राद्धेषु प्रशस्यते । अस्थिरश्चान्द्रमासः स्यात्स्थिरः सौरोऽत्र कारणम्" ॥ इति ।

चांद्रो मासोऽधिमाससंभवादस्थिरः । तदसंभवात्सौरः स्थिरः । अत्र सौरपरिग्रहे स्थिरत्वं कारणमित्यर्थः । अत्र केचिदमूलं श्लोकमिमं वर्णयंतो व्याचक्षते

" चांद्रमानाविधानेन मामले दिवसे सति । आद्याब्दिकं प्रकुर्वीत सौरेण पुनराब्दिकम् " ॥ इति ।

सौरमानानुवर्त्यपि चांद्रमानविधानेन मृतदिवसान्मामले दिवसे पंचपंचाशदुत्तरशतत्रयदिवसे प्रथमाब्दिकं कुर्वीत । द्वितीयाब्दिकं सौरमानेन प्रकुर्वीत । प्रथमाब्दिकस्य चांद्रमानेन कर्त्तव्यत्वविधानसामर्थ्यान्मासिकान्यपि तेनैव मानेन कर्त्तव्यानीति । तत्तु " मासिके चाब्दिके वस्त्रधान्यस्वर्णादिवृद्धिषु " इति पूर्वोक्त**वृद्धगार्ग्या**दिवचनविरोधादुपेक्ष्यम् । तदेवं मासिकाब्दिकविषये सौरविधिपराणां चांद्रविधिपराणां तत्तत्प्रशंसापराणां च बहूनां वचनानां सत्त्वात् " तुल्यबलविरोधे विकल्प " इति (१।५) **गौतमस्मरणाद्व्रीहियववद्विकल्पः** । स च देशकुलाचारानुरोधेन व्यवस्थितो विज्ञेयः । तथा च **मनुः** (१।१७८–१७९)

" येनास्य पितरो याता येन याताः पितामहाः । तेन यायात्सतां मार्गं तेन गच्छन्न रिष्यति ॥
" सद्भिराचरितं यस्माद्धार्मिकैश्च द्विजातिभिः । तद्देशकुलजातीनामविरुद्धं प्रकल्पयेत् " ॥ इति ।

सुमंतुरपि—"यत्र शास्त्रगतिर्भिन्ना सर्वकर्मसु भारत । उदितेऽनुदिते चैव होमभेदो यथा भवेत् ॥
" तस्मात्कुलक्रमायातमाचारं त्वाचरेद्बुधः । स गरीयान्महाबाहो सर्वशास्त्रोदितादपि " ॥ इति ।

सौरमासे तिथिद्वयसंभवे मासिकाब्दिकयोः परा तिथिर्ग्राह्या । यदाह **बृहस्पतिः**—

"मासे संवत्सरे चैव तिथिद्वैधं यदा भवेत् । तत्रोत्तरोत्तमा ज्ञेया पूर्वा स्यात्तु मलिम्लुचा" ॥ इति ।

मासे मासिके संवत्सरे सांवत्सरिके इत्यर्थः । तथा च **संवर्त्तः**—

" उत्तरे दिवसे कुर्यादाब्दिकं मासिकं तथा । प्रत्याब्दिकं तथा कुर्यात्छ्रेयस्कामो भवेद्यदि " ॥

१ क्ष–योः क्षयः । २ क्ष–सा । ३ **कखग**–वृद्धवसिष्ठः ।

स्मृत्यंतरे—

"मासे संवत्सरे चैव तिथिद्वैधं यदा भवेत् । तत्रोत्तरा तिथिर्ग्राह्या न पूर्वा तु मलिम्लुचा" ॥ इति ।

आपस्तंबः—

" आब्दिके मासिके चापि पूर्वस्मिन्दिवसे कृते । तदानीं कुलहानिः स्यादुत्तरे गोत्रवर्धनम्"॥ इति ।

बृहस्पतिः—

" मासिकाब्दिककृत्ये तु तिथिद्वैधं यदा भवेत् । पूर्वत्र दोषजननमुत्तरे भाग्यसाधनम् " ॥ इति ।

स्मृत्यंतरे—

" एकमासि तिथिद्वैधे परत्राब्दिकमासिके । तद्वत्प्रत्याब्दिकं कुर्यादित्याह भगवान्मनुः[1] ॥

" यदि पूर्वदिने कुर्यात्कुलक्षयकरं भवेत् " ॥ इति ।

नारदः–" पितृकार्ये तु सर्वेषामृद्धिभाजनमुत्तरे । दिवसद्वितये प्राप्ते पूर्वत्र तु कुलक्षयः " ॥ इति। तत्र परतिथेः संक्रांत्युपरागदुष्टत्वे पूर्वा ग्राह्या । उभयत्र तथात्वे तु परातिथिर्ग्राह्या । यदाह **संग्रहकारः**—" मास्येकस्मिन् द्वौ तिथी चेत्परा स्यात् पूर्वस्तस्मिन्सूर्यसंक्रांतियुक्ते ।

" द्वावप्येवं संगतौ चेत्परा स्यात्सर्वं चैवं चंद्रसूर्योपरागे " ॥ इति । **स्मृत्यंतरे** विशेषोऽभिहितः—

" यस्मिन्नहनि संक्रांतिः परं मध्यं दिनं भवेत् ।आब्दिकं तत्र कुर्वीत अन्यथा ग्राह्यमुत्तरम्"॥ इति ।

उभयत्रापि संक्रांतिदोषे आवर्तनादर्वाग्यदि संक्रांतिस्तदा पूर्वत्र आवर्तनात्परं चेत्परत्रेत्यर्थः। अस्तमयात् परं नास्ति संक्रांतिदोष इति केचित् । अर्धरात्रात्परं चेत्संक्रांतिदोषो नास्तीत्यपरे । एतदेव युक्तम् । उपरागसाहचर्यात् । उपाकर्मणि

" अर्धरात्रादधस्ताच्चेत्संक्रान्त्यां ग्रहणेऽपि वा । न कर्तव्यमुपाकर्म परतश्चेन्न दोषभाक् ".॥ इति ।

पूर्वापरदिने यत्र याऽधिका सा मता इत्यादि । तथा मास्येकस्मिन् तिथिद्वयेऽपि तुल्यद्वयोरपि तुल्यबलत्वे परिग्राह्यम् । उभयोः कर्मकालस्य दुष्टत्वे यत्र तन्माससंबंधभूयस्त्वं तत्र कुर्यात् ।

तदुक्तं संग्रहे–

" सौरमासे तिथिद्वैधे मासिकाब्दिकयोः परा । सा चोपरागसंक्रांतिर्दुष्टा चेत्पूर्विका मता ॥

" द्वयोर्दोषेऽर्कसंक्रातिरर्वागावर्त्तनाद्यदि । पूर्वापरान्यथा ग्राह्या कर्मकाले द्वयोरपि ॥

" दुष्टे तन्माससंबंधभूयस्त्वं यत्र सा मता " ॥ इति ।

संक्रमदोषनिर्णयः । **हेमाद्रौ**—

" रवेरस्तमयात्पूर्वं यदि संक्रमणं भवेत् । सा तिथिः संक्रमाद्दुष्टा परतश्चेन्न दोषभाक् " ॥

किञ्च" सौरमासे तिथिद्वैधे मासिकाब्दिकयोः परा । सा चोपरागसंक्रान्तिर्दुष्टा चेत्पूर्विका मता ॥

" द्वयोर्दोषेऽर्कसंक्रान्तिरर्वागावर्तनाद्यदि । पूर्वापरान्यथा ग्राह्या कर्मकाले द्वयोर्यदि ॥

" दुष्टे तन्माससंबन्धभूयस्त्वं यत्र सा मता " ॥

आवर्तनात्पूर्वं चेदेवमावर्तनात्परं चेदेवं कर्मकाले पराह्णे चेदेवमिति वचनैर्दिवा संक्रमण एव दोषप्रतीतेर्न रात्रौ दिवासंक्रमणरहिततिथावेव श्राद्धं कर्तव्यम् ।

---

१ कखग–यमः । २ ग–त्याज्यं ।

माधवीये—
"या तिथिः संक्रमादुष्टा निशीथात्पूर्वमेव तु । आब्दिके मासिके त्याज्या सा तिथिः कव्यकर्मणि ।
" मास्येकस्मिन् तिथौ पित्रोर्दिवा संक्रमणे सति । अपराह्णात्परं दोषो न भवेच्छ्राद्धकर्मणि" ॥ इति ।
अखण्डादर्शे—'एकस्मिन् मासे एकस्मिन् दिने तिथौ संक्रमदुष्टायां सत्यामपराह्णात्परं न संक्रमदोषः' इत्यर्थः ।
किञ्च—" उभयोः कर्मकाले च संक्रमो न भवेद्यदि । परत्रैव तु कर्तव्यमाब्दिकं मासिकं तथा "॥
ब्रह्मयामके विशेषः । ऋषीन् प्रति **व्यासः**—
" उत्तरे षडशीत्यां च प्रातश्चेदपि संक्रमः । पश्चात्पुण्यतया दोषः सायाह्ने तु न दूष्यति" ॥ इति ।

अयमर्थः—मकरसंक्रान्तौ षडशीतिसंक्रान्तौ च प्रातःकाले संक्रमेऽपि आवर्तनात्पूर्वं संक्रम इति दोषाभावशंका न कार्या । किन्तु अनयोः संक्रान्त्योः पश्चादेव पुण्यकालतया " यदहः पुण्यकालः स्यात्तदहर्दोष इष्यते" इति परिभाषामनुस्मृत्य तदहः प्रत्याब्दिकं न कर्तव्यम् । अपि तूत्तरसंक्रान्तिः सायाह्ने चेत्तत्र यथोक्तदोषाभावात्तत्रैव कर्तव्यमिति । एवं च प्रकृते चापसंक्रान्तेः षडशीतित्वेन पूर्वाह्णसंक्रमेऽपि दोष एव । मकरसंक्रान्ते षडशीतित्वेन पूर्वाह्णसंक्रमेऽपि दोष एव । मकरसंक्रान्तेः सायन्तनत्वेन दोषाभावात्तत्रैव श्राद्धं कर्तव्यमिति निर्णयः ।

सौरतिथ्यलाभे चान्द्रतिथिग्रहणम् । सौरमासे मृततिथ्यभावे चांद्रमासमृततिथिर्ग्राह्या । तदाह **हारीतः**—
"सौरे यदि दिनं शून्यं तदा चांद्रविधानतः। पूर्वमासे कृतं चेत्स्यात्पितॄणां तृप्तिकारणम् "॥ इति ।
पराशरः—
" सौरालाभे ततः पूर्वं कृतं चेत्सफलं भवेत् । उत्तरस्मिन्कृते मासि तच्छ्राद्धमसुरालयम् " ॥ इति ।
संवर्त्तः—
" सौरमानविधाने तु मृतमासे तिथिर्न चेत् । पूर्वमासे तदा कुर्यादुत्तरे मासि दुःखदम् " ॥ इति ।
स्मृत्यंतरेऽपि—
" वृश्चिकादित्रिमासेषु मृताहो न भवेद्यदि । पूर्वमासि तिथौ कुर्यान्मासिकं चाब्दिकं तथा"॥ इति ।
वसिष्ठोऽपि—
"आब्दिकं सौरमासे स्यात्संक्रांतिरहिते तिथौ । सौरमासे यदि तिथिर्न स्याच्चांद्रमसे स्मृता " ॥इति ।
पितृमेधसारे—"सौरमास्येकस्मिंस्तिथिद्वयसंभवे परस्यामेव श्राद्धं कुर्यात् । तत्र संक्रांत्युपरागदोषे पूर्वस्यां तत्रैवं चेत्परस्याम् । उभयत्राप्येवं चेत्परस्यां क्वचित्सौरे तिथ्यभावे चांद्रे मासि कुर्यात्" इति । तस्मिन् चांद्रे क्षयं गते सति तदुत्तरमासतिथिर्ग्राह्या । तदुक्तं **स्मृत्यंतरे**—
" सौरमासे तिथ्यभावे मासिकाब्दिकयोरपि । चांद्रो मासो भवेद्ग्राह्यस्तस्मिंश्चांद्रे क्षयं गते ॥
"तदुत्तरे मासि तिथिर्ग्राह्या पूर्वत्र नेष्यते" ॥ इति । यदा शुक्लप्रतिपदि धनुःसंक्रांतिर्दर्शमध्ये मकरसंक्रांतिश्च तदा धनुस्थे रवौ दर्शस्यासमाप्त्या न तस्य मार्गशीर्षत्वं मकरस्थे रवौ तत्समाप्त्या तस्य पौषत्वमेव मार्गशीर्षस्तु लुप्त इत्येवं कदाचित्संभाविते क्षयमासे सति धनुर्मासामावास्या मृततिथिस्तदुत्तरमासे ग्राह्येत्यर्थः ।

---

१ ग–स ।

आब्दिकपरित्यागे प्रत्यवायः। आब्दिकश्राद्धपरित्यागे प्रत्यवायमाह **मरीचिः**—
" पंडिता ज्ञानिनो मूर्खाः स्त्रियोऽथ ब्रह्मचारिणः। मृताहं समतिक्रम्य चंडालाः कोटिजन्मसु"॥ इति।
देवलः—
" मृताहं समतिक्रम्य चण्डालः कोटिजन्मसु। अतो विप्रैर्न तत् त्याज्यं प्राणैः कण्ठगतैरपि "॥
भविष्यत्पुराणे प्रभासखंडयोश्च—
"मृताहं समतिक्रम्य चण्डालाः कोटिजन्मसु। अतो विप्रैर्न तत् त्याज्यं प्राणैः कण्ठगतैरपि॥
" मृतेऽहनि पितुर्यस्तु न कुर्याच्छ्राद्धमादरात्। मातुश्चैव वरारोहे वत्सरांते मृतेऽहनि॥
" नाहं तस्य महादेवि पूजां गृह्णामि नो हरिः "॥ इति। **आश्वलायनः**—
" मन्वादिभ्यो युगादिस्तु सहस्रगुणतोऽधिकः। युगादेश्चायनद्वन्द्वं चायनात् विषुवद्वयम्॥
"विषुवद्वयात् व्यतीपातो व्यतीपाताच्च द्वादशी।द्वादश्याश्च तथा दर्शो दर्शात् पित्रोस्तु वार्षिकम्"॥इति।
अन्यत्रापि—" भोजको यस्तु वै श्राद्धं न करोति खगाधिप।
" मातापितृभ्यां सततं वर्षे वर्षे मृतेऽहनि। स याति नरकं घोरं तामिस्रं नाम नामतः "॥ इति।
कार्ष्णाजिनिः—
" ऊषरे तु यथा क्षिप्तं बीजं न प्रतिरोहति। तथा च तद्भवेत्तेषां यन्न दत्तं मृतेऽहनि "॥ इति।
मृताहे यन्न दत्तमन्यत्र दत्तं निष्फलं भवेत्। अतो मृताहेऽवश्यं दातव्यमित्यभिप्रायः।
तथा—" पंडिता ज्ञानिनो वाऽपि मूर्खा योषित एव वा। मृताहं समतिक्रम्य चंडालेष्वभिजायते॥
" अध्वगश्चातुरश्चैव विहीनश्च धनैस्तथा। आमश्राद्धं प्रकुर्वीत हेम्ना वा द्विजसत्तमः॥
" द्रव्याभावे द्विजाभावे अन्नमात्रं तु पाचयेत्। पैतृकेन तु सूक्तेन होमं कुर्याद्विचक्षणः॥
" अत्यन्तद्रव्यशून्यश्चेत् शक्त्या दद्यात् गवां तृणम्। स्नाता च विधिवद्विप्रः कुर्याद्वा तिलतर्पणम्॥
" अथवा रोदनं कुर्यात् अत्युच्चैर्विजने वने। दरिद्रोऽहं महापापी वदन्निति विचक्षणः "॥ इति।
कौर्मेऽपि
" नैमित्तिकं तु कर्तव्यं ग्रहणे चंद्रसूर्ययोः। बांधवानां च मरणे नरकं स्यादतोऽन्यथा "॥ इति।
श्राद्धीयतिथ्यादिनिरूपणम्। कर्मकालव्यापिनी तिथिरत्र ग्राह्या। यदाह **वृद्धयाज्ञवल्क्यः**—
"कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः। तया कर्माणि कुर्वीत ह्रासवृद्धिर्न कारणम्"॥ इति।
गार्ग्योऽपि—"यो यस्य विहितः कालस्तत्कालव्यापिनी तिथिः"॥ इति। कर्मकालश्च सपिंडीकरणात्पूर्वविन्येकोद्दिष्टे तु मध्यान्हः। तदुत्तरभाविनि मासिकादौ अपराह्णस्तथा च **वृद्धगौतमः**—
"मध्यान्हव्यापिनी या स्यात्सैकोद्दिष्टे तिथिर्भवेत्। अपराण्हव्यापिनी या स्यात्पार्वणे सा तिथिर्भवेत्"॥
व्यासः "एकमुद्दिश्य यच्छ्राद्धं दैवहीनं विधीयते। एकोद्दिष्टं तु तत्प्रोक्तं मध्यान्हे तत्प्रकीर्तितम्"॥इति।
कालादर्शेऽपि—" एकोद्दिष्टं तु मध्यान्हे नवश्राद्धादिकं चरेत्" इति। मध्यान्हश्च सप्तमाष्टमनवममुहूर्तात्मकः। ते च मुहूर्ताः गांधर्वकुतपरौहिणसंज्ञकाः। तथा चान्हः पंचदशमुहूर्ताः **स्मर्यते**—
" रौद्रः श्वेतश्च मैत्रश्च तथा सारभटः स्मृतः। सावित्रो वैश्वदेवश्च गांधर्वः कुतपस्तथा॥
" रौहिणस्तिलकश्चैव विभवो निर्ऋतिस्तथा। शंबरो विजयश्चैव बोधः पंचदश स्मृताः "॥ इति।
एते पंचदश सूर्योदयादारभ्य क्रमाद्दिवा मुहूर्ताः क्रमशो निश्यपि। तथा च **विष्णुधर्मोत्तरे**—
" त्रिंशन्मुहूर्ताश्च तथा अहोरात्रेण कीर्तिताः। तत्र पंचदश प्रोक्ता राम रात्रौ दिवा तथा॥

---

१ ख—विदः; ग—पालविंदः।

" दिवसश्च यथा राम वृद्धिं समधिगच्छति । तदाश्रितमुहूर्तानां तथा वृद्धिः प्रकीर्त्तिता ॥
" दिनवृद्धिर्यथा राम दोषहानिस्तथा भवेत् । तदाश्रितमुहूर्तानां हानिर्ज्ञेया तदा तदा " ॥ इति ।
यथोक्तनानात्मकत्रिंशन्मुहूर्तोपेतस्य सावनाहोरात्रस्य यदहः पंचदशमुहूर्तात्मकं तस्यान्हो भागा मतभेदेन पंचधा विकल्प्यंते । द्वेधा त्रेधा चतुर्धा पंचधा पंचदशधा इति पंच मतभेदाः । तत्र द्वेधा विभागः **स्कांदपुराणे** दर्शितः—" आवर्त्तनात्तु पूर्वाण्हो ह्यपराण्हस्ततः परः " इति । एतदेवाभिप्रेत्य **मनुराह** (३।२७८)—
" यथा चैवापरः पक्षः पूर्वपक्षाद्विशिष्यते । तथा श्राद्धस्य पूर्वाण्हादपराण्हो विशिष्यते" ॥ इति ।
त्रेधा विभागः **शातातपेन** दर्शितः " तस्मादहरहः पूर्वाण्हे देवा अशनमभ्यवहरंति । मध्यंदिने मनुष्या अपराण्हे पितरः " इति । एतमेव विभागमभिप्रेत्य समाम्नायते **ऋग्भिः**—" पूर्वाण्हे दिवि देव ईयते । यजुर्वेदे तिष्ठति मध्ये अन्हः । सामवेदे नास्तमये महीयते । वेदैरशून्यस्त्रिभिरेति सूर्यः " इति । **श्रुत्यंतरेऽपि**—" पूर्वाण्हो वै देवानां मध्यंदिनो मनुष्याणामपराण्हः पितृणाम् " इति । चतुर्धा विभागमाह **गोभिलः**
"पूर्वाण्हः प्रहरः पूर्वो मध्यान्हः प्रहरस्ततः । अपराण्हस्तृतीयः स्यात्सायान्हश्च ततः परम्" ॥ इति ।
पंचधाविभागं **व्यास** आह—" मुहूर्तत्रितयं प्रातस्तावानेव तु संगवः ।
" मध्यान्हस्त्रिमुहूर्तः स्यादपराण्होऽपि तादृशः । सायान्हस्त्रिमुहूर्तस्तु सर्वकर्मबहिष्कृतः " ॥ इति ।
वृद्धपराशरः—
" लेखाप्रभृतिसूर्यस्य मुहूर्तास्त्रय एव तु । प्रातस्तु संस्मृतः कालो भागश्चान्हः स पंचमः ॥
" संगवस्त्रिमुहूर्त्तोऽथ मध्यान्हस्तत्समः स्मृतः । ततस्त्रयो मुहूर्त्ताश्च अपराण्होऽभिधीयते ॥
" पंचमोऽथ दिनांशो यः सायान्ह इति स स्मृतः" ॥ इति ।
साधिष्ठातृदेवताः पंचभागाः **समाम्नायंते** च—
"देवस्य सवितुः प्रातः मित्रस्य संगवः बृहस्पतेर्मध्यंदिनम् । भगस्यापराण्हः वरुणस्य सायम्" ॥ इति ।
पंचदशधा विभागः **शंखेन** दर्शितः—
" रौद्रश्चैत्रस्तथा मैत्रस्तथा सालकटः स्मृतः । सावित्रश्च जयंतश्च गांधर्वः कुतपस्तथा ॥
" रौहिणश्च विरिंचश्च विजयो नैर्ऋतस्तथा । महेंद्रो वरुणश्चैव बोधः पंचदश स्मृतः " ॥ इति ।

अत्र **कालनिर्णयकारः**—"तत्र पंचधा विभागपक्षस्य बहुश्रुतिस्मृतिसंदृब्धत्वात्प्रायेणैतमेव पक्षमाश्रित्य विधिनिषेधशास्त्राणि प्रवर्त्तंते । त्रेधा विभागस्तु सोमयागे सवनत्रये उपयुज्यते । यथोक्तेषु पंचसु कालेषु यानि विहितानि कर्माणि तानि दैवपित्र्यरूपेण राशिद्वयं कृत्वा तयोर्गौणकालाभ्यनुज्ञया द्वेधा विभागो दर्शितः । चतुर्धा विभागस्तु प्रकरणबलाद्गोभिलस्मृत्युक्तकर्मविशेषेषु द्रष्टव्यः । पंचदशधा विभागो मुहूर्तकर्मविशेषोपजीवनेन विधिनिषेधप्रवृत्तेः ज्योतिःशास्त्रे द्रष्टव्यः " इति ।
कालादर्शे तु—
" पंचधा पंचदशधा त्रेधा द्वेधा च वासरम् । विभक्तं मुनयः प्राहुस्तत्राद्यौ संमतौ मम" ॥ इति ।
तत्र तेषु पक्षेषु आद्यौ पंचधा पंचदशधा पक्षौ मम संमतौ इत्यर्थः । यस्तु नवधा विभाग आत्रेयो प्रदर्शितः
" प्रातरार्त्तः संगवश्च रुग्णो मध्यान्हसंतपौ । अपराण्हः खनिः सायं नवधा भिद्यते त्वहः " ॥ इति तत्रार्त्तरुग्णसंतापखनीनां स्मृतिषु विनियोगादर्शनान्नवधा विभाग उपेक्ष्यः । एवं च सति प्रकृतेषु

१ क–त्वत्वा ।

पंचस्वन्हो भागेषु तृतीयो मध्यान्हो भागः एकोद्दिष्टे ग्राह्यः । तत्रैकोद्दिष्टस्योपक्रमे कुतपस्य पूर्वोत्तरभागाविच्छया विकल्पितौ । तदाह **व्यासः**—

" कुतपप्रथमे भागे एकोद्दिष्टमुपक्रमेत् । आवर्त्तनसमीपे वा तत्रैव नियतात्मवान्" ॥ इति । समाप्तिकालमाह **श्लोकगौतमः**—

" आरभ्य कुतपे श्राद्धं कुर्यादा रौहिणं बुधः । विधिज्ञो विधिमास्थाय रौहिणं तु न लंघयेत् ॥

" रौहिणं लंघयेद्यस्तु ज्ञानादज्ञानतोऽपि वा । आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठते " ॥ इति । यद्यपि पार्वणश्राद्धस्यापि कुतपे प्रारंभः समानस्तथापि समापनं तस्य कालांतर एव । तदुक्तं **मत्स्यपुराणे**—

" अन्हो मुहूर्ता विख्याता दश पंच च सर्वदा । तत्राष्टमो मुहूर्तो यः स कालः कुतपः स्मृतः ॥

" अष्टमे भास्करो यस्मान्मन्दीभवति सर्वदा । तस्मादनंतफलदस्तत्रारंभो विशिष्यते ॥

" ऊर्ध्वं मुहूर्त्तात्कुतपाद्यन्मुहूर्त्तचतुष्टयम् । मुहूर्तपंचकं ह्येतत् स्वधाहवनमिष्यते" ॥ इति । एवं च रौहिणसमापनप्रतिपादकं यद्वचनमस्ति तत्सर्वमेकोद्दिष्टविषयं वेदितव्यम् । तदेवमेकोद्दिष्टश्राद्धे मध्यान्हस्य कर्मकालत्वात् "मध्यान्हव्यापिनी या स्यात्सैकोद्दिष्टे तिथिर्भवेत् " इति **स्मरणात्** मुहूर्त्तव्यापिनी तिथिर्ग्रहीतव्येति स्थितम् । अत्र निर्णेतव्यो विषयः षोढा भिद्यते । पूर्वेद्युरेव[1] मध्यान्हव्यापित्वं अपरेद्युरेव तद्व्यापित्वं उभयत्र तद्व्यापित्वं उभयत्र तदव्यापित्वं उभयत्र साम्येन तदेकदेशव्यापित्वं वैषम्येण तदेकदेशव्यापित्वं चेति । तत्र पूर्वेद्युरेव वा परेद्युरेव वा मध्यान्हव्याप्तिरित्येतयोः पक्षयोर्मध्यान्हव्यापित्वस्यैव निर्णायकत्वान्न कोऽपि संदेहः "मध्यान्हव्यापिनी या स्यात्तिथिः पूर्वा परापि वा । तत्र कर्माणि कुर्वीत ह्रासवृद्धी न कारणम् " ॥ इति **स्मरणात्** । उभयत्र तद्व्यापित्वतदव्यापित्वरूपयोः पक्षयोः पूर्वेद्युरेवानुष्ठानम् । तथा च सति " अपराण्हस्तथा ज्ञेयः पित्र्येषु तु शुभावहः ।

" दिनांते पंचनाड्यस्तु पुण्याः प्रोक्ता मनीषिभिः । उदये च तथा पित्र्ये दैवे चैव तु कर्मणि ॥

" दैवकार्ये तिथिर्ज्ञेया यस्यामभ्युदितो रविः । पितृकार्ये तिथिर्ज्ञेया यस्यामस्तमितो रविः " ॥ इत्यादीन्यपराण्हसायान्हास्तमयव्यापिविषयाणि पित्र्यसामान्यवचनान्यनुगृहीतानि भवति । उभयत्र सामान्येनैकदेशव्याप्तौ खर्वादिवाक्यं द्रष्टव्यम् । तच्च पार्वणप्रस्तावे योजयिष्यते । वैषम्येणैकदेशव्याप्तौ तु यदा पूर्वेद्युर्महती तदा महत्त्वानुग्रहात्सामान्यानुग्रहाच्च पूर्वेद्युरेवानुष्ठानम् । यदा तु परेद्युरेव महती तदा सामान्यशास्त्रमुपेक्ष्यापि महत्वमेवादरणीयम् । यदाह **मरीचिः**—

" ह्यपराण्हव्यापिनी चेदाब्दिकस्य यदा तिथिः । महतीं तत्र तद्विद्धां प्रशंसंति महर्षयः" ॥ इति । अनेनैव न्यायेनात्रापि परेद्युरेवानुष्ठानं द्रष्टव्यमिति **कालनिर्णया**दावुक्तोऽयमेकोद्दिष्टनिर्णयः । एतच्च "सपिंडीकरणात्पूर्वं दैवहीनं विधीयते" इति सपिंडीकरणात्पूर्वं यदेकोद्दिष्टं तत्रैव माध्यान्हव्यापिनी तिथिः । न तु " अपुत्रस्य पितृव्यस्य भ्रातुश्चैवाग्रजन्मनः " इत्यादिना सपिंडीकरणात्परमपि विहिते एकोद्दिष्टश्राद्धे पितॄणामपराण्हे स्यादित्यादिना सपिंडीकरणेन पितृत्वं प्राप्तस्य सर्वस्याप्यविशेषेणापराण्हविधानादित्याहुः । अत्र **कश्चित्संग्रहकारः**—

" ग्राह्या वर्तनकालिकीद्विदिवसे यद्येवमत्राधिका शस्ता तत्र समा क्षये यदि तदा पूर्वा तु वृद्धौ परा ।

"वृद्धिर्ह्रासवियुक्समापि च परा मध्यान्हयोः सा न चेत्पूर्वैवेति तिथिः सपिंडनकृते प्राङ्मासिके नित्यशः " ॥ इति ।

---

१ क्ष–पूर्वेद्यु ।

पार्वणश्राद्धकालनिर्णयः । अथ पार्वणश्राद्धकालस्य निर्णयः । तस्यापराण्हः कर्मकालः । तथा च **शातातपः**—“ अपराण्हे पितॄणां तु तत्प्रदानं विशिष्यते ” इति ।

मनुरपि—(३।२७८) “ तथा श्राद्धस्य पूर्वाण्हादपराण्हो विशिष्यते ” इति । **शंखोऽपि**—

“पूर्वाण्हे दैविकं कृत्यमपराण्हे पितृक्रिया । ग्रहणे निशि वा कार्या न रात्रौ पैतृकं पुनः”॥ इति ।

हारितोऽपि—

“अपराण्हः पितॄणां तु याऽपराण्हानुयायिनी । सा ग्राह्या पितृकार्ये तु न पूर्वाण्हानुयायिनी”॥ इति ।

बृहन्मनुरपि—

“ यस्यामस्तं रविर्याति पितरस्तामुपासते । तिथि[1]स्तेभ्यो यतो दत्तो ह्यपराण्हः स्वयंभुवा” ॥ इति ।

स्मृत्यंतरे—“अपराण्हे तु पैतृकम्” इति । **श्रुतिरपि**—“अपराण्हः पितृणाम्” इति । **कालादर्शे**—

“ चोदनादपराण्हस्य गजच्छायोपदेशनात् ” इति श्रुत्या स्मृत्या चापराण्हस्य पार्वण-श्राद्धांगत्वेन विधानात् तथा स्मृत्या गजच्छायायाः पार्वणांगत्वेन विधानात् सा त्वपराण्हे भवतीति अपराण्हादर इत्यर्थः । तदुक्तं **भरद्वाजेन**—

“वनस्पतिगते सोमे या छाया पूर्वतोमुखी । गजछाया हि सा प्रोक्ता पितॄणां दत्तमक्षयम्” ॥ इति ।

स्मृत्यंतरेऽपि—

“द्विगुणा यामनरछाया दर्शे स्यादपराण्हिकी । गजच्छाया हि सा प्रोक्ता पितॄणां तृप्तिकारिणी” ॥ इति ।

देवलः—

“ पूर्वाण्हे दैविकं कर्म अपराण्हे तु पैतृकम् । एकोद्दिष्टं तु मध्यान्हे प्रातर्वृद्धिनिमित्तकम् ”॥ इति ।

ननु । सायान्हव्यापिनः कर्मकालत्वं क्वचित्स्मर्यते—

“दिनांते पंचनाड्यस्तु पुण्याः प्रोक्ता मनीषिभिः । उदये च तथा पित्र्ये दैवे चैव हि कर्मणि” ॥इति ।

मैवम् । **यमेन** प्रतिषिद्धत्वात्

“ सायाह्नस्त्रिमुहूर्तः स्यात् श्राद्धं तत्र न कारयेत् । राक्षसी तामसी वेला गर्हिता सर्वकर्मसु”॥ इति । तर्थाहि पंचनाडीवचनं निर्विषयं स्यादिति केनापि निमित्तेनापराण्हासंभवे गौणकालत्वाभ्यनुज्ञा-परत्वात् । अत एव **व्यासः**—“ स्वकालातिक्रमे कुर्याद्रात्रेः पूर्वं तया विधिः ” इति ।

व्याघ्रपादोऽपि—

“ विधिज्ञः श्रद्धयोपेतः सम्यक्पात्रे नियोजकः । रात्रेरन्यत्र कुर्वाणः श्रेयः प्राप्नोत्यनुत्तमम्” ॥ इति ।

ननु सायान्हेऽपि यथाकथंचित्प्रत्यूहः । तदा किं श्राद्धस्य लोप एव किं वा रात्रावपि कर्तुं शक्यते । तत्र लोप एवेति तावत्प्राप्तः । कुतः? मुख्यकालगौणकालत्वयोरुभयोरपि निषेधात् । मुख्यकालत्वं प्रतिषेधति **मनुः** (३।२८०)—

“ रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्तिता हि सा । संध्ययोरुभयाश्चैव सूर्ये चैवाचिरोदिते” ॥ इति ।

न चैवं सति ग्रहणश्राद्धमपि तत्र निषिध्यते इति शंकनीयम् । **शातातपेन** विशेषितत्वात् ;

“ रात्रौ श्राद्धं न कुर्वीत राहोरन्यत्र दर्शनात् । सूर्योदयमुहूर्ते च संध्ययोरुभयोस्तथा” ॥ इति ।

गौणकालत्वमपि **व्यासव्याघ्रपादाभ्यां** पर्युदस्तम् । रात्रेः पूर्वं राहोरन्यत्रेति ताभ्यामुक्तत्वात्

---

१ ग–र्थि । २ खग–तर्हि ।

तस्मादह्नि श्राद्धासंभवे लोप एवेति प्राप्ते ब्रूमः । न तावद्रात्रौ श्राद्धस्य सर्वात्मना निषेधो वक्तुं शक्यः । आपस्तंबेन रात्रौ श्राद्धसमाप्त्यभ्युपगमात् । न च नक्तं श्राद्धं कुर्वीतारब्धे चाभोजनमासमापनात् । इति । ननु संध्यासमीपे प्रारब्धस्य रात्रौ समाप्तिः प्रसक्ता । तादृशस्तु प्रारंभस्कंदे न निषिद्धः ।

" उपसंध्यं न कुर्वीत पितृपूजां कथंचन । स काल आसुरः प्रोक्तः श्राद्धं तत्र विसर्जयेत्" ॥ इति । मैवम् । संध्यासामीप्यस्य मुख्यकालत्वस्य निषेधात् । गौणकालत्वं तु पूर्वमभिहितम् । तत्र प्रारब्धस्य रात्रौ समाप्तिः संभाव्यते । नन्वेवमपि रात्रौ समाप्तिरेवाभ्यनुज्ञायते न त्वारंभ इति चेन्मैवम् । आरंभस्यापि समाप्त्या उपलक्षणीयत्वादाब्दिकश्राद्धपरित्यागे प्रत्यवायबाहुल्यस्मरणात् । तथा **जाबालिः**—

" रात्रावपि च शंसंति श्राद्धं केचन सूरयः । पितॄणां दिनभागित्वात्त्यागे दोष इति स्मृतः" ॥ इति ।

देवलश्च—

" पितृकर्माणि सर्वाणि प्रेतकर्माणि यानि च । रात्रावपि च कर्त्तव्यान्यत्र भुक्त्यादिनाचरेत्" ॥ इति ।

मनुस्तु—

" पितॄणां तु दिवाभावे यदि रात्रावपीरितम् । पैतृकं कर्म मुनिभिर्ग्राह्यमेतच्च संकटे ॥

" श्राद्धकर्म निशाकाले कर्तव्यं मनुजैर्भुवि । मध्यपिंडाशनं पत्न्या स्वभुक्तिं च न कारयेत् ॥

" यथाकथंचित्कर्त्तव्यं नित्यं कर्म विजानता । न प्राप्तस्य विलोपोऽस्ति पैतृकस्य विशेषतः" ॥ इति ।

अन्यत्रापि—

" दिवोदितानि कर्माणि प्रमादादकृतानि वै । यामिन्याः प्रथमे यामे तानि सर्वाणि कारयेत् " ॥ इति ।

" दिवा श्राद्धक्रियाया असंभवे रात्रावारंभसमापने कार्ये" इति **कालनिर्णयकृन्मतम्** । **अन्ये तु** रात्रिश्राद्धवचनानि सर्वाणि दिवारब्धविषयाणि । आपस्तंबेन रात्रिश्राद्धं प्रतिषिध्य तत्समापनमात्रस्य विधानादित्याहुः । **अपरे तु**—" संध्यारात्र्योर्न कर्त्तव्यं श्राद्धं खलु विचक्षणैः " इत्यादिभिः रात्रिश्राद्धमात्रस्य निषेधात् दिवारब्धस्यापि श्राद्धस्य रात्रौ समापनं नास्ति । अपरेद्युर्दिवैव श्राद्धशेषकरणमिति वदंति । तथैव **आपस्तंबवचनं हरदत्तेनान्यथा** व्याख्यातम् । न च नक्तंश्राद्धं कुर्वीत श्राद्धकर्मण्यारब्धे करणविलम्बेन मध्ये यद्यादित्योऽस्तं वियात्तदा श्राद्धशेषं न कुर्वीत अपरेद्युर्दिवैव कुर्वीतेति । आरब्धे चाभोजनमासमासमाप्तेरन्यत्र राहुदर्शनादिति । पूर्वेद्युर्निवेदनप्रभृति आपिंडनिधानान्मध्ये कर्त्तुर्भोजनप्रतिषेधः । अन्यत्र राहुदर्शनादिति । न च नक्तमित्यस्यापवादः । राहुदर्शने नक्तमपि कुर्वीतेति । केचित्तु—

" श्राद्धविघ्ने समुत्पन्ने अविज्ञाते मृतेऽहनि । एकादश्यां तु कर्तव्यं कृष्णपक्षे विधुक्षये " ॥ इति **मरीचिस्मरणाद्दिवा** श्राद्धारम्भासंभवे तद्दिने श्राद्धप्रतिनिधीनामन्यतमं कृत्वा तन्मासि कृष्णैकादश्याममावास्यायां वा श्राद्धं कर्त्तव्यमित्याहुः । यथोचितमत्र ग्राह्यम् ।

ननु " रात्रेरन्यत्र कुर्वाणः श्रेयः प्राप्नोत्यनुत्तमम् " इति **स्मरणादपराह्णवन्मुख्यत्वेन** वा सायाह्नवद्गौणत्वेन वा प्रातःसंगवावपि कर्मकालौ प्रसज्येयाताम् । नायं दोषः । **शिवराघवसंवादे** प्रातःकालस्य निषिद्धत्वात्

" प्रातःकाले तु न श्राद्धं प्रकुर्वीत द्विजोत्तमः । नैमित्तिकेषु श्राद्धेषु न कालनियमः स्मृतः " ॥ इति ।

यद्यपि संगवो न साक्षान्निषिद्धः तथापि कुतपमुहूर्ते मुख्योपक्रमस्य गांधर्वमुहूर्ते गौणोपक्रमस्याभिधाने सति अर्थान्निषेधः परिशिष्यते । तथा **शिवराघवसंवाद** एव

" ग्रहादिव्यतिरिक्तस्य प्रक्रमे कुतपः स्मृतः । कुतपाद्थवाऽप्यर्वाग्भासनं[1] कुतपे भवेत् " ॥ इति ।

ग्रहो ग्रहणं आदिशब्देन संक्रान्त्यादिनिमित्तमुच्यते । तस्य च निमित्ताधीनत्वान्न कुतपे[2] नियंतुं शक्यते । इतरस्य तु सांवत्सरादिकादेरस्ति कुतपनियमः । स च मुख्य उपक्रमकालः कदाचित्कार्यवशाच्छ्राद्धस्य सहसा करणीयत्वे सति कुतपादर्वाचीनो गांधर्वोऽप्युपक्रमकालतयाऽभ्यनुज्ञायते । कुतपस्य मुख्यत्वमनेकवचनविहितत्वादवगन्तव्यम् ।

तत्र कुतपस्वरूपं **भविष्यत्पुराणे**ऽभिहितम्

"प्रविश्य भानुः स्वां छायां शङ्कुर्वयत्र तिष्ठति । स कालः कुतपो नाम मंदीभूतस्य संज्ञया" ॥ इति ।

नारदः—

" संत्यज्य सप्तमं भागमष्टमं क्रमते यदा । स कालः कुतपो ज्ञेयो मंदीभूतस्य संज्ञया" ॥ इति ।

आपस्तंबः—

" सप्तमात्परतो यस्तु नवमात्पूर्वतः स्थितः । उभयोरपि मध्यस्थः कुतपः समुदाहृतः " ॥ इति ।

स च कुतपो मुख्यत्वाद्वायुपुराणे प्रशस्यते—

" दिवसस्याष्टमे भागे मंदीभवति भास्करः । स कालः कुतपो नाम पितॄणां दत्तमक्षयम्" ॥ इति ।

कुतपात्पूर्वोक्तयोः गान्धर्वरौहिणयोः गौणोपक्रमकालत्वं सूचयितुं **छत्रिन्यायेन** मुहूर्तत्रयं कुतपशब्देन व्याजहार **नारदः**—

" मध्यान्हे त्रिमुहूर्ते तु यदा चलति भास्करः । स कालः कुतपो नाम पितॄणां दत्तमक्षयम्" ॥ इति ।

कुतपे प्रक्रांतस्य सायान्हादर्वाचीनः सर्वोऽपि मुख्यानुष्ठानकालः । तदुक्तं **मत्स्यपुराणे**—

" अन्हो मुहूर्ता विख्याता दश पंच च सर्वदा । तत्राष्टमो मुहूर्तो यः स कालः कुतपः स्मृतः ॥

" अष्टमे भास्करो यस्मान्मंदीभवति सर्वदा । तस्मादनंतफलदस्तत्रारंभो विशिष्यते ॥

"ऊर्ध्वं मुहूर्तात्कुतपाद्यन्मुहूर्तचतुष्टयम् । मुहूर्तपंचकं ह्येतत्स्वधाहवनमिष्यते" ॥ इति ।

ननु अपराण्हस्यांतिमो भागो निषिद्धः । तथा च **यमः**—

" चतुर्थे प्रहरे प्राप्ते यच्छ्राद्धं कुरुते नरः । आसुरं तद्भवेच्छ्राद्धं दाता च नरकं व्रजेत्" ॥ इति ।

स्मृत्यंतरेऽपि—

" चतुर्थे प्रहरे प्राप्ते यच्छ्राद्धं कुरुते द्विजः । तदन्नं राक्षसो भुंक्ते निराशाः पितरो गताः " ॥ इति ।

अपराण्हस्यांतिमेन पादन्यूनमुहूर्तेन सह सायान्हश्चतुर्थप्रहरो भवति । सत्यम् । तत्र सायान्हभागकटाक्षेणायं निषेधः । न त्वपराण्हभागकटाक्षेण । तामेतां विवक्षां विशदीकर्तुं **यमो** वचनांतरेण सायान्हं निराचकार—" सायान्हस्त्रिमुहूर्तः स्याच्छ्राद्धं तत्र न कारयेत् " ॥ इति ।

ननु अपराण्हस्य मुख्यकालत्वं न प्रतिनियतम् । शुक्लपक्षे व्यभिचारात् । तथा च **मार्कंडेयः**—

" शुक्लपक्षे तु पूर्वाण्हे श्राद्धं कुर्याद्विचक्षणः । कृष्णपक्षेऽपराण्हे तु रौहिणं तु न लंघयेत्" ॥ इति ।

नैष दोषः । अत्र शुक्लकृष्णपक्षशब्दयोर्दैवपित्र्यपरत्वाद्देवानुद्दिश्य क्रियमाणं श्राद्धं दैवं तत्तु फलकामिन उत्साहहेतुतया चित्तप्रसादं जनयतीति शुक्लशब्देनाभिधीयते । पित्र्यं तु पितृमरणादिस्मारकतया चित्तकालुष्यं जनयतीति कृष्णशब्देनाभिधीयते । शुक्लस्य देवस्य कर्मणः पक्षः

१ ग-पे । २ क-पंगु । ३ ग-भ ।

शुक्लपक्षः । यदा दैवं श्राद्धं करिष्यामीति बुद्धिस्तदेत्यर्थः । एवमितरत्रापि योजनीयम् । एवं च सत्यपराण्हेन पार्वणं श्राद्धं व्यभिचरति । ' रौहिणं तु न लंघयेत् ' इत्येकोद्दिष्टविषयम् । यथापातप्रतीत एवार्थो वचनस्यास्य परिगृह्येत तदा पूर्वोदाहृतं वचनजातं निखिलमपि व्याकुलीभवेदिति **कालनिर्णये** व्याख्यातम् । **अन्ये**: त्वाहुः **मार्कंडेय**वचनमिदं युगादिश्राद्धविषयम् । तदाह **बृहस्पतिः**—

"द्वौ शुक्लौ द्वौ तथा कृष्णौ युगादीन्मुनयो विदुः । शुक्ले पौर्वाण्हिकी ग्राह्या कृष्णे चैवापराण्हिकी"॥इति । तस्माद्युगादिश्राद्धं पूर्वपक्षे विहितम् । पूर्वाण्हे संगवात्परं पंचदशनाड्यभ्यंतरे कुर्यात् । अपरपक्षे विहितमपराण्हे आवर्त्तनात् परं सार्धमुहूर्ताभ्यंतरे कुर्याद्रौहिणं तु न लंघयेदित्युक्तत्वादनेनैव न्यायेन पूर्वपक्षविहितश्राद्धस्य सर्वस्यापि पूर्वाण्हे सार्धमुहूर्तः काल इति । तदेवं पार्वणश्राद्धस्य ग्रहणादिश्राद्धवर्जितस्य अपराण्हः कर्मकालः कुतपः प्रारंभकाल इति स्थितम् ।

आब्दिकादौ किंपूर्वविद्धा तिथिर्ग्राह्या उतोत्तरविद्धेति विवक्षायां **देवस्वामी** ब्रूते—"यस्मिन्काले यद्विहितं कर्मोपक्रमोपसंहारयुक्तं तस्मिन्काले तस्यां तिथौ यस्मिन्नहनि संभावयितुं शक्यते तदुत्तरं पूर्वं वा ग्रहीतव्यम्" इति ।

एवं च कुतपापराण्होभयव्यापिनी तिथिर्ग्राह्येत्युक्तं भवति । यदा तदुभयव्यापिनी न संभवति तदा केवलापराण्हव्यापिन्यपि ग्रहीतव्या । "पित्रर्थे चापराण्हिकी । अपराण्हः पितॄणां तु याऽपराण्हानुयायिनी" इत्यादि **स्मरणात्** । ननु केवलापराण्हव्याप्तिवत्केवलकुतपव्यापिन्यपि **स्मृत्यंतरे** प्रतीयते

"मध्यान्हव्यापिनी या स्यात्तिथिः पूर्वाऽपरापि वा । तत्र कर्माणि कुर्वीत ऱ्हासवृद्धी न कारणम्"॥इति । मैवम् । वचनांतरसंवादेनास्यैकोद्दिष्टविषयत्वेनोपपत्तेः । अपराण्हव्याप्तिरपि एकोद्दिष्टन्यायेन षोढा भिद्यते । तत्र पूर्वेद्युरेवापराण्हव्याप्तौ यथोक्तवचनेन

"क्षयाहस्य तिथिर्विप्रा यदि खंडतिथिर्भवेत् । व्याप्तापराण्हिकायां तु श्राद्धं कार्यं विजानता"॥ इति **नारद**वचनेन सा ग्राह्या । अपरेद्युरेवापराण्हव्याप्तौ यथोक्तवचनात्प्रारंभकालसंभवाच्च प्रशस्ततरः । उभयत्रापराण्हव्यापित्वे **बोधायन** आह—

"अपराण्हद्वयव्यापिन्यतीतस्य च या तिथिः । क्षये पूर्वा तु कर्तव्या वृद्धौ कार्या तथोत्तरा"॥ इति । अतीतस्य मृतस्य अत्र ग्राह्यतिथेः वृद्धिक्षयाभ्यां न निर्णयः । किंतु तदुत्तरतिथिवृद्धिक्षयाभ्यां कुतः अपराण्हद्वयव्यापित्वाभिधानात्पूर्वेद्युरा मध्यान्हावसानं पूर्वतिथिः प्रवृत्ता । ततोऽपराण्होपक्रममारभ्यापरेद्युरपराण्हावसानपर्यंतत्वे सति मृताहतिथेः ह्यपराण्हव्यापित्वं भवति । तच्च त्रिमुहूर्तवृद्ध्या संपद्यते । न तु क्षयेण । तथा सति ' क्षये पूर्वा तु कर्तव्या ' इत्येतन्नोपपद्यते । उत्तरतिथिगतवृद्धिक्षयस्वीकारे त्विदं वचनमुपपद्यते । यदोत्तरतिथिः सायान्हं प्रविशति तथा तिथिवृद्धिः । तत्रापरेद्युरनुष्ठानं न्याय्यम् । कुतपमारभ्य त्वविशेषमुख्यकालव्यापित्वाद्यदा उत्तरतिथिरपराण्हेऽपि अपक्षीयते कियती क्षियते तदा मृततिथिः पूर्वविद्धा कर्तव्या । उत्तरविद्धायास्तस्या ज्योतिशास्त्रप्रक्रियया अपराण्हव्यापित्वेऽपि पारिभाषिक्या स्मार्तप्रक्रियया तदव्यापित्वात् । तथा च **स्मर्यते**—

"तिथ्यादौ तु भवेद्यावद्ऱ्हासो वृद्धिः परेऽहनि । तावद्ऱ्हासश्च पूर्वेद्युरदृष्टोऽपि स्वकर्मणि"॥ इति

तिथ्याद्याविल्यादिशब्देन नक्षत्रयोगौ गृह्येते[१]। तिथिनक्षत्रयोगेषु क्षीयमाणेषु क्षयो यावद् घटिकापरिमितो भवति तावद् घटिकापरिमितः क्षयः तेभ्यः पूर्वेषु तिथिनक्षत्रयोगेषु ज्योतिःशास्त्रेऽदृष्टोऽपि स्मार्तपरिभाषया ग्रहीतव्यः । एवं वृद्धिरपि द्रष्टव्या । तथा सति प्रकृते उत्तरतिथेरपराह्णे यावान् क्षयः तावान्पूर्वेद्युर्ग्राह्यतिथौ योजनीयः । तथा सत्युत्तरविद्धा मृततिथिः नापराह्णव्यापिनी पूर्वविद्धा तु तद्व्यापिनीति सैव ग्रहीतव्या भवति । उत्तरतिथेः साम्ये तु **देवस्वामि**वचनादुत्तरविद्धैव ग्राह्येति तिथिनिर्णयः ।

यदा दिनद्वयेऽप्यपराह्णस्पर्शाभावः तदा पूर्वविद्धा ग्राह्या । तदाह **मनुः**—
"या ह्यहर्व्यापिनी चेत्स्यान्मृताहे तु यदा तिथिः । पूर्वे विद्धैव कर्तव्या त्रिमुहूर्ता भवेद्यदि"॥ इति ।

सुमंतुरपि—
"न ह्यहर्व्यापिनी चेत्स्यान्मृताहस्य च या तिथिः । पूर्वेऽस्यां निर्वपेत्पिंडानित्यांगिरसभाषितम्"॥इति ।
ननु अपराह्णस्पर्शाभाव उभयोः समानः । प्रारंभकाले तु कुतपेऽपरेद्युस्तिथिसद्भावो विशिष्यते । तत्र परविद्धैव कुतो न ग्राह्येति चेद्गुणाधिक्यात् पूर्वविद्धैव ग्राह्या । परेद्युः कुतपव्याप्तिरेको गुणः पूर्वेद्युस्तिथिमूलसंबंधः त्रिमुहूर्तमस्तमयव्याप्तिश्चेति गुणद्वयम् ।
तिथिमूलसंबंध्यस्य प्राशस्त्यं **नारदीयपुराणे** दर्शितम्—
" पित्र्ये मूलं तिथेः प्रोक्तं शास्त्रज्ञैः कालकोविदैः । तथैव देवकार्येषु तिथेरंत्यं प्रशस्यते "॥ इति ।
सौरपुराणे—"मूलं हि पितृतृप्त्यर्थं तिथेरुक्तं मनीषिभिः " इति ।
अस्तमयव्याप्तेः प्राशस्त्यमाह **मनुः**
" यस्यामस्तं रविर्याति पितरस्तामुपासते । सा पितृभ्यो यतो दत्ता ह्यपराह्णः स्वयंभुवा" ॥इति ।
व्यासः—
" अन्ह्यस्तमयवेलायां कलामात्राऽपि या तिथिः । सैव प्रत्याब्दिके श्राद्धे नेतरा पुत्रहानिदा" ॥ इति ।
न चापराह्णवेलायामविद्यमानतया कर्मकालव्याप्तिरहितायाः तिथेरनुपादेयत्वं शंकनीयम् । आद्यापायास्तद्व्याप्तेर्विद्यमानत्वात् । अत एव **वसिष्ठः**—" पित्र्येऽस्तमयवेलायां स्पृष्टा पूर्णा निगद्यते " इति । **नारदीयपुराणेऽपि**—
"पारणे मरणे नृणां तिथिस्तात्कालिकी स्मृता । पित्र्येऽस्तमयवेलायां स्पृष्टा पूर्वा निगद्यते" ॥ इति ।
सुमंतुः—
" उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ । द्विमुहूर्तास्त्रिरन्हो या सा तिथिर्हव्यकव्ययोः"॥ इति ।
यथाक्रमं उदये द्विमुहूर्ता तिथिर्दैवकर्मणि ग्राह्या । सायं त्रिमुहूर्ता कव्ये ग्राह्येत्यर्थः । एवं च सति " दर्शं च पूर्णमासं च पितुः संवत्सरं दिनम् । पूर्वविद्धामकुर्वाणो नरकं प्रतिपद्यते "॥ इति **नारद**वचनं " यस्यामस्तं रविर्याति" इत्यादिपूर्वोक्त**मन्वादि**वचनजातं च अपराह्णद्वयस्पर्शाभावे सायं त्रिमुहूर्तव्यापितिथिग्रहणपरं द्रष्टव्यम् । त्रिमुहूर्तव्यापित्वाभावे तु **गोभिलः**—
" त्रिमुहूर्ता न चेद् ग्राह्या परैव कुतपे हि सा । कुर्वीत कुतपे श्राद्धं सायान्हव्यापिनी न च"॥ इति ।
यदा तु दिनद्वयेऽप्यपराह्णैकदेशव्यापिनी तदाऽपि वैषम्येण तद्व्याप्तौ महत्त्वेन निर्णेतव्यम् ।
तदाह **मरीचिः**—
" ह्यपराह्णव्यापिनी चेदाब्दिकस्य यदा तिथिः । महतीं तत्र तद्विद्धां प्रशंसंति महर्षयः[२]"॥ इति ।

---

१ क्ष–गो गृह्यते । २ ग–र्णा ।

साम्येनोभयत्र व्याप्तिश्च ऊर्ध्वे[1]तिथिगतैः वृद्धिक्षयसाम्यैस्त्रिधा भिद्यते। तत्र **गोभिलः**—
"खर्वादर्वा तथा हिंस्रा द्विविधं तिथिलक्षणम्। खर्वादर्वात्परा कार्या हिंस्रा स्यात्पूर्वकालिकी"॥ इति।
"खर्वा वृद्धिक्षयरहिता। अपराण्हद्वये समा दर्वा[2]।
वृद्धिपक्षे अपराण्हस्य व्यापिका गृह्यतां तिथिः। क्षये पूर्वोत्तरा वृद्धौ व्याप्तिश्चेदपराह्णयोः।
"न ग्राह्या तिथिगोवृद्धी क्षयावूर्ध्वतिथेस्तु तौ। साम्ये तूर्ध्वतिथिर्ग्राह्या परविद्धैव वृद्धिवत्"॥
न द्वये समा हिंस्रा क्षयपक्षे अपराण्हद्वये पक्षे समेतीह विवक्षतोऽर्थः। उक्तं च **कालनिर्णयसंग्रहे**—
"कुतपाद्यपराण्हांतव्याप्तिराब्दिक उत्तमा। तदभावेऽपराण्हस्य व्यापिका गृह्यतां तिथिः॥
"क्षये पूर्वोत्तरा वृद्धौ व्याप्तिश्चेदपराण्हयोः। न ग्राह्यतिथिगौवृद्धिक्षयावूर्ध्वतिथेस्तु तौ॥
"साम्ये तूर्ध्वतिथिर्ग्राह्या परविद्धैव वृद्धिवत्। न स्पृशत्यपराण्हौ चेत्पूर्वा स्यात्कुतपोऽन्यथा॥
"वैषम्येणैकदेशस्य व्याप्तौ ग्राह्या महत्त्वतः। साम्येन चेत्क्षये पूर्वा परा स्याद्वृद्धिसाम्ययोः॥
"वृद्धिसाम्यक्षया ग्राह्या तिथिगा नोर्ध्वगा इह"॥ इति। **षड्धर्मीये**—
"सायंतन्यपरत्र चेन्मृततिथिः सैवाब्दिके मासिके। ग्राह्या सा ह्यपराण्हयोर्यदि तदा यत्राधिका सा मता।
"तुल्या चेदुभयेऽपराण्हसमये पूर्वा न चेत्सा द्वयोः। पूर्वैव त्रिमुहूर्तगास्तसमये नो चेत्परैवोदिते"॥ इति।
कालादर्शेऽपि—
"प्रत्याब्दिकेऽप्येवमेव तिथिर्ग्राह्याऽपराण्हिकी। उभयत्र तथात्वे तु महत्त्वेन विनिर्णयः॥
"समत्वे पूर्वविद्धैव ह्ययथात्वेऽपि सा यदि। त्रिमुहूर्ता भवेत्सायं सर्वेष्वेवं विनिर्णयः"॥ इति।
इत्याब्दिकतिथिनिर्णयः।

प्रथमाब्दिकादीनां विभक्तैः पृथगनुष्ठानम्। प्रथमाब्दिकादीनि श्राद्धानि विभक्तैः पुत्रैः सर्वैरपि पृथगेव कार्याणि

"नवश्राद्धं सपिंडत्वं श्राद्धान्यपि च षोडश। एकेनैव तु कार्याणि संविभक्तधनेष्वपि"॥
इत्येवकारेण ऊनाब्दिकपर्यंतस्यैव अनेककर्तृकत्वव्यावृत्तिप्रतीतेः। तत्रापि
"मासिकं सोदकुम्भं च सपिण्डीकरणं तथा। पृथग्विभक्ताः कुर्वीरन् मिलित्वा वाऽप्यशक्तितः"॥ इति गौणत्वोक्तेः।
"एकपाके निवसतां पितृदेवद्विजार्चनम्। एकं भवेद्विभक्तानां तदेव स्याद् गृहे गृहे॥
"विभक्ता भ्रातरः सर्वे स्वस्वार्जितधनाशनैः। दर्शाब्दिकादिकं पित्रोः श्राद्धं कुर्युः पृथक्पृथक्"॥
इत्यादि **स्मरणाच्च**। अत एव **पैठीनसिः**—
"विभक्तैस्तु पृथक्कार्यं प्रतिसांवत्सरादिकम्। एकेनैवाविभक्तेषु कृते सर्वैस्तु तत्कृतम्"॥ इति।
स्मृत्यंतरे—
"भिन्नस्थानगतैः पुत्रैरविभक्तधनैरपि। प्रत्याब्दिकं पृथक्कार्यमन्यश्राद्धानि संभवे"॥ इति।
अन्नेनैवाब्दिकादिविधिः। एतच्च सांवत्सरिकश्राद्धमन्नेनैव कार्यम्। तदाह **लोकाक्षिः**—
"पुष्पवत्स्वपि दारेषु विदेशस्थोऽप्यनग्निकः। अन्नेनैवाब्दिकं कुर्याद्धेम्ना वाऽऽमेन न क्वचित्"॥ इति।
मरीचिरपि—
"अनग्निश्च प्रवासी च यस्य भार्या रजस्वला। आमश्राद्धं प्रकुर्वीत न तत्कुर्यान्मृतेऽहनि"॥ इति।
केचिन्मातापित्रोः क्षयाहत इति चतुर्थपादं पठित्वा पितृग्रहणादन्येषामाब्दिकमामेन कुर्यादिति व्याचक्षते।

---

१ खग—गाह्यतिथिगतैः। २ ग—र्पा।

हारीतोऽपि—

“ श्राद्धविघ्ने द्विजातीनामामश्राद्धं प्रकीर्तितम् । अमावास्यादिनियतं माससंवत्सरादृते ” ॥ इति ।

माधवीये वचनमिदं व्याख्यातम्—मासं मासिकं संवत्सरं सांवत्सरिकम् । एतद्व्यतिरिक्तं यद्-मावास्यादिनियतमस्ति तत्र भार्यारजोदर्शादिना श्राद्धविघ्ने सति आमश्राद्धं प्रकीर्तितमिति । **अन्यैस्तु व्याख्याततम्**–नियतं अमावास्यादिश्राद्धं मासिकं सांवत्सरिकं च वर्जयित्वा अन्यत्र श्राद्धे आपदादिना विघ्ने[1] सति तत्रामश्राद्धं कर्तव्यमिति । तथा च **कालादर्शे**—

“रजस्वलांगनोऽनग्निः विदेशस्थोऽपि वाब्दिके । दर्शादावपि नामेन त्वन्नेन श्राद्धमाचरेत्”॥ इति ।

रजस्वला अंगना यस्य स तथाविधः। अनग्निरौपासनाग्निरहितः। विदेशस्थः प्रवासी । एवंविधोऽपि वा द्विजः मृताहे दर्शादावपि नामेन श्राद्धमाचरेत् । किंतु अन्नेनैव कुर्यादित्यर्थः । **संग्रहे**—

“ विदेशगो वाऽपि गताग्निको वा रजस्वलायामपि धर्मपत्न्याम् ।

“ श्राद्धं मृताहे विदधीत पक्वैर्न चामदाने न च पंचमेऽहनि ” ॥ इति ॥

मृताहव्यतिरिक्तश्राद्धस्य विघ्ने त्वामश्राद्धमाह **उशनाः**—

“अपत्नीकः प्रवासी च यस्य भार्या रजस्वला । सिद्धान्नेन न कुर्यात्स आमं तत्र विधीयते”॥ इति ।

गालवः—

“तीर्थेऽनग्नावापदि च देशभ्रंशे रजस्यपि । हेमश्राद्धं द्विजैः कार्यं शूद्रैः कार्यं सदैव हि” ॥ इति ।

कात्यायनोऽपि—

“ आपद्यनग्नौ तीर्थे च प्रवासे पुत्रजन्मनि । आमश्राद्धं प्रकुर्वीत यस्य भार्या रजस्वला ” ॥ इति ।

व्याघ्रपादः—

“आर्तवे[2] देशकालानां विप्लवे समुपस्थिते । आमश्राद्धं द्विजैः कार्यं शूद्रः कुर्यात्सदैव हि” ॥ इति।

न चैतादृशवचनैर्मासिकाब्दिकयोरप्यामश्राँद्धत्वं प्राप्नोतीति वाच्यम् । “माससंवत्सरादृते न तत्कुर्यान्मृतेऽहनि” इति विशेषवचनैरामश्राद्धस्य तद्व्यतिरिक्तविषयतावगमात् । यत्तु **स्मृत्यंतरे** भार्यायां रजस्वलायां मृतेऽहनि श्राद्धनिषेधवचनम्

“मृतेऽहनि तु संप्राप्ते यस्य भार्या रजस्वला । श्राद्धं तदा न कर्तव्यं कर्तव्यं पंचमेऽहनि”॥ इति ।

यदपि **मरीचिवचनम्**—

“ आब्दिके समनुप्राप्ते यस्य भार्या रजस्वला । पंचमेऽहनि तच्छ्राद्धं न तत्कुर्यान्मृतेऽहनि ”॥ इति

एतादृशस्य वचनस्यायं विषयः । अपुत्रायाः पत्न्या एव पत्युर्मृताहश्राद्धेऽधिकाराद्यदा सा रजस्वला स्यात्तदा मृतेऽहनि श्राद्धं न कर्तव्यं किंतु पंचमेऽहनि कर्तव्यमिति । तथा च **श्लोकगौतमः**—

“ अपुत्रा तु यदा भार्या संप्राप्ते भर्तुराब्दिके । रजस्वला भवेत्सा तु तत्कुर्यात्पंचमेऽहनि ” ॥ इति।

प्रभासखंडेऽपि—

“ सा शुद्धा स्याच्चतुर्थेऽन्हि स्नानान्नारी रजस्वला। दैवे कर्मणि पित्र्ये च पंचमेऽहनि शुध्यति” ॥ इति

माधवीयादौ विशेषोऽभिहितः । **अन्ये तु**—

“ श्राद्धीयेऽहनि संप्राप्ते यस्य भार्या रजस्वला । श्राद्धं तत्र न कर्तव्यं कर्तव्यं पंचमेऽहनि ” ॥ इति।

श्लोकगौतमवचनमन्यथा पठित्वा श्राद्धादौ कर्मणि भार्यायाः सहैवाधिकारश्रवणात्तस्यां रजोदर्शनदूषितायामधिकारे निवृत्ते मुख्यकालमतिक्रम्य पंचमेऽहनि श्राद्धं कर्तव्यमिति मन्यंते । तत्रैकभार्येण मृताहश्राद्धं रजोदर्शनरूपविघ्नोपरमकाल एव कर्तव्यम् । भार्यांतरयुक्तेन त्वधिकारानपायान्मुख्य एव काले कर्तव्यमिति । यदत्र युक्तं तद्ग्राह्यमिति ।

---

१ ग–विघ्निते । २ क–वते । ३ क्ष–द्धं । ४ ग–यैया । आशौचांतरिते ।

“ रजस्वलायां भार्यायां क्षयाहं यः परित्यजेत् । स वै नरकमाप्नोति यावदा भूतसंप्लवम् ॥

“ पित्रोः क्षयदिने प्राप्ते यस्य भार्या रजस्वला । अग्निं संधाय विधिवच्छ्राद्धं कृत्वा विसर्जयेत्” ॥

इत्यादि **स्मरणादे**कपत्नीकोऽपि भार्यायां रजस्वलायां पित्रोर्मृताह एवान्नेन सांवत्सरिकं कुर्यादिति युक्तमित्याहुः । आपदादिना विघ्ने सति विशेषमाह **मरीचिः**—

“ श्राद्धविघ्ने समुत्पन्ने चाविज्ञाते मृतेऽहनि । कुर्यादन्नेन कृष्णायामेकादश्यां विधुक्षये ” ॥ इति ।

विधुक्षये अमावास्यायाम् । **कार्ष्णाजिनिरपि**—

“ आपन्नोऽप्याब्दिकं नैव कुर्यादामेन कर्हिचित् । अन्नेन तदमायां तु कृष्णे वा हरिवासरे” ॥ इति ।

कालादर्शेऽपि—

“ आपद्यपि च नामेन तन्मासि हरिवासरे । कृष्ण इंदुक्षये वापि कुर्यादन्नेन वार्षिकम् ” ॥ इति ।

आशौचान्तरितश्राद्धे विशेषः । आशौचेन विघ्ने सति विशेषमाह **देवलः**—

“देये प्रत्याब्दिके श्राद्धे त्वन्तरा मृतसूतके । आशौचानंतरं कुर्यात्तन्मासींदुक्षयेऽपि वा” ॥ इति ।

आशौचानंतरकरणासंभवे दर्शे वा कुर्यादित्यर्थः । अत एव **ऋष्यशृंगः**—

“ शुचीभूतेन दातव्यं या तिथिः प्रतिपद्यते । सा तिथिस्तस्य कर्तव्या न त्वन्या वै कदाचन” ॥ इति ।

शुचिना तावच्छ्राद्धं कर्तव्यम् । तत्र मुख्यकाले शुद्ध्यभावे शुद्ध्यनन्तरं या तिथिः प्रतिपद्यते लभ्यते सा ग्राह्या । आशौचदुष्टा तु न ग्राह्येत्यर्थः । एतदेवाभिप्रेत्य **व्यासोऽपि**—

“ श्राद्धविघ्ने समुत्पन्ने त्वन्तरा मृतसूतके । अमायां वा प्रकुर्वीत शुद्धावेके मनीषिणः ” ॥ इति ।

अमायामिति कृष्णैकादश्या अप्युपलक्षणम् । तथा च ‘ श्राद्धविघ्ने समुत्पन्ने ’ इति पूर्वोक्त-**मरीचि**वचनं द्रष्टव्यम् । **ऋष्यशृंगः**—

“आब्दिके चैव संप्राप्ते आशौचं जायते यदि । आशौचे तु व्यतिक्रांते तेभ्यः श्राद्धं प्रदीयताम्” ॥ इति ।

आब्दिके चैव संप्राप्ते इति विशेषणाद्दर्शादिश्राद्धस्य नित्यत्वेऽपि कालांतरे विधानाभावेन लोप एव ।

यत्तु—

“ वर्षश्राद्धे तु संप्राप्ते पित्रोराशौचसंभवे । तदानीमशुचिर्न स्यात्कुर्याच्छ्राद्धं मृतेऽहनि ” ॥ इति

तच्छ्राद्धोपक्रमानंतरमागताशौचविषयम्

“ निमंत्रितेषु विप्रेषु प्रारब्धे श्राद्धकर्मणि । देहे पितृषु तिष्ठत्सु नाशौचं विद्यते क्वचित् ” ॥ इति

स्मरणात् । श्राद्धोपक्रमश्च कुतपकाले द्वितीयवरणम्

“ प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः । नांदीमुखं विवाहादौ श्राद्धे पाकपरिक्रिया ” ॥ इति

वचनं कुतपकालवरणादूर्ध्वमारब्धपाकविषयमित्येतत्सर्वमधस्तान्निरूपितम् । विस्मृतिविषये

“ अज्ञानाद्वा प्रमादाद्वा मोहाद्वा न करोति यः । कुर्वीत पश्चात् स्वपितॄन् प्रतिज्ञानागते सुतः” ॥ इति

वचनस्यापि स्मरणे सति पश्चाद्विहिते काले कृष्णैकादश्यादावित्यर्थः ।

ग्रहणादिसंभवे सांवत्सरिकश्राद्धविधिः । सांवत्सरिकश्राद्धे चंद्रग्रहणादिसंभवे **संग्रहकारः**—

“चंद्रसूर्योपरागे तु पित्रोः श्राद्ध उपस्थिते । हेम्ना वाऽऽमेन वा कृत्वा श्राद्धं कुर्यात्परेऽहनि”॥इति ।

स्मृत्यंतरे तु—

“ आब्दिके समनुप्राप्ते ग्रहणे चंद्रसूर्ययोः । उपोष्य तद्दिनं सम्यक् परेऽन्हि श्राद्धमाचरेत्” ॥ इति ।

---

१ ग–त्र ।

वसिष्ठश्च—

" दर्शे रविग्रहे पित्रोः प्रत्याब्दिकमुपस्थितम् । आमश्राद्धं तु कर्तव्यं हेमश्राद्धमथापि वा " ॥

स्मृत्यंतरे—" ग्रहणे तु द्वितीयेऽन्हि रजोदृष्टौ तु पंचमे " इति । **तथा**—

" श्राद्धविघ्ने समुत्पन्ने सूतकान्मृतकादपि । सोमसूर्योपरागाभ्यां श्राद्धं कुर्यात्परेऽहनि " ॥ इति ।

अत्र विशेषमाह **संग्रहकारः**—

" भुजेर्निषेधकाले तु श्राद्धकालो भवेत्तदा । आमश्राद्धं तु कर्तव्यं हेमश्राद्धमथापि वा " ॥ इति ।

भोजननिषेधकालश्च **वृद्धवसिष्ठोक्तः**—

" सूर्यग्रहे तु नाश्नीयात्पूर्वयामचतुष्टयम् । चंद्रग्रहे तु यामांस्त्रीन्बालवृद्धातुरैर्विना ॥

" संध्याकाले यदा राहुर्ग्रसते शशिभास्करौ । तदहर्नैव भुंजीत रात्रावपि कदाचन " ॥ इति ।

एतच्च सविस्तरं प्रतिपादितमधस्तात् । यत्तु **स्मृत्यन्तरवचनम्**—

" दर्शे रविग्रहे पित्रोः प्रत्याब्दिकमुपस्थितम् । अन्नेनासंभवे हेम्ना कुर्यादामेन वा सुतः " ॥ इति तस्याप्ययमर्थः—निषेधादन्नेनासंभवे सति हेम्ना आमेन वा कुर्यादिति । एवं च कर्मकालात्प्रागेवमुक्ते सूर्यग्रहे अपराण्हे श्राद्धमन्नेन कार्यमित्युक्तं भवति । एतमेव विषयमभिप्रेत्य **कालादर्शकारः**—

"प्रत्याब्दिकस्य चालभ्य योगेषु विहितस्य च । संपाते देवताभेदात् श्राद्धयुग्मं समाचरेत्"॥ इति । ग्रहणार्धोदयादिरलभ्ययोगः रात्रौ यामद्वयादूर्ध्वं चन्द्रग्रहे पितृश्राद्धं कर्तव्यं द्वितीययामे ग्रहणेऽपि यामत्रयात्पूर्वं गान्धर्व उपक्रम्य दिवा पञ्चदश नाड्याः पूर्वं कर्तव्यम् । तत्र भुजेरनिषेधादित्याहुः । ग्रहणनिमित्तं श्राद्धमाह **मनुः**—

"संध्याराञ्योर्न कर्तव्यं श्राद्धं खलु विचक्षणैः । तयोरपि च कर्तव्यं यदि स्याद्राहुदर्शनम्"॥ इति ।

महाभारतेऽपि—

"सर्वस्वेनापि कर्तव्यं श्राद्धं वै राहुदर्शने । अकुर्वाणस्तु नास्तिक्यात्पंके गौरिव सीदति" ॥ इति ।

आश्वमेधिके—" उपप्लवे चन्द्रमसो रवेश्च श्राद्धस्य कालो ह्ययनद्वये च ।

" पानीयमप्यत्र तिलैर्विमिश्रं दद्यात् पितृभ्यः प्रयतो मनुष्यः " ॥ इति । **अंगिराः**—

" सर्वो वर्णः सूतके च मृतके राहुदर्शने । स्नात्वा श्राद्धं प्रकुर्वीत वित्तशाठ्यविवर्जितम्" ॥ इति । अत्र राहुदर्शनग्रहणात्संक्रांत्यादिष्वाशौचे श्राद्धं न कर्तव्यमित्युक्तं भवति । इदं ग्रहणादिश्राद्धमामेनैव कार्यम् । तथा **बोधायनः**—

" संक्रमेऽन्नद्विजाभावे प्रवासे पुत्रजन्मनि । आमश्राद्धं संग्रहे च द्विजः शूद्रवदाचरेत् " ॥ इति । संक्रमे चान्नाभावे द्विजाभावे च प्रवासादौ संग्रहे ग्रहणे चेत्यर्थः । "हिरण्ये तूदकं पश्चान्मृतेऽहनि परेऽहनि" इति **वचनात्** तदनन्तरमेव तर्पणं कार्यम् । प्रतिनिधित्वेन तिलतर्पणमात्रे क्रियमाणेऽपि तर्पणानन्तरं क्षेत्रपिण्डदानमिति **पूर्णसंग्रहे** ।

श्राद्धोद्देश्यनिरूपणम् । पितुर्मृताहे पितृपितामहप्रपितामहास्त्रय एवोद्देश्याः । मातुर्मृताहे मातृपितामहीप्रपितामह्य एव देवताः । तदुक्तं **सायणीये**—

" पितुः प्रत्याब्दिकं कार्यमुद्दिश्यैव त्रिपूरुषम् । वर्गान्तरं न वृणुयाद्वृत्तं चेन्निष्फलं भवेत् ॥

"पुंसां मृताहे पुरुषा एव भोज्या न तु स्त्रियः । एवं स्त्रीणां मृताहेऽपि स्त्रिय एव न चापरे" ॥ इति ।

प्रयोगसारे—
" पितुरेव पितुः कुर्यान्मातुरेव मृतेऽहनि । मोहाच्चेदन्यथा कुर्याद्रौरवं नरकं व्रजेत् " ॥ इति ।
पाद्मेऽपि—
" पितुरेव पितुः कुर्यान्मातुरेव मृतेऽहनि । यदि कुर्यात्सपत्नीकं तच्छ्राद्धमसुरालयम् " ॥ इति ।
पितुर्मृताहे पित्रादीनामेव कुर्यान्न सपत्नीकानाम् । मातुर्मृताहे मात्रादीनामेव कुर्यादित्यर्थः । तथा च **शंखः**—
" पित्रादित्रयपत्नीनां भोज्या मातॄः प्रति द्विजाः। स्त्रीणामेव तु तस्मात्तु मातृश्राद्धमिहोच्यते" ॥ इति ।
मातॄः प्रति मातृपितामहीप्रपितामहीरुद्दिश्य भोज्या द्विजाः । पित्रादित्रयपत्नीनां स्त्रीणामिह पृथगेवैतच्छ्राद्धं यस्मात्तस्मान्मातृश्राद्धमुच्यत इत्यन्वयः ।
शातातपः—" सपिंडीकरणं कृत्वा कुर्यात्पार्वणवत्सदा ॥
" प्रतिसंवत्सरं विद्वान् शाकलेयोदितो विधिः । सपिण्डीकरणादूर्ध्वं पितामह्यादिभिः सह " ॥ इति
हारीतः—
" अनुयानेन सापिण्ड्यं जनकेन सहात्मजः । पितामह्यादिभिः सार्धं आब्दिकश्राद्धमाचरेत्" ॥ इति ।
स्मृत्यन्तरे—
" नांदीमुखेऽष्टकाश्राद्धे गयायां च मृतेऽहनि । पितामह्यादिभिः सार्द्धं मातुः श्राद्धं समाचरेत्" ॥ इति ।
यमः—
" मातुर्मृताहे पित्रादीन्पूजयेद्यदि नाशयेत् । तथा पितुर्मृताहेऽपि न पूज्या मातरः स्मृताः" ॥ इति ।
अन्यत्रापि—
" मातुर्मृताहे पित्रादीन्नाशयेद्द्विजसत्तमः । तथा पितुर्मृताहेऽपि न भोज्याः तत्स्त्रियः स्मृताः" ॥ इति ।
नाशयेन्न भोजयेदित्यर्थः । **पारिजाते**—
" पित्रोः श्राद्धे समायाते तत्तद्वर्गं निमंत्रयेत् । वर्गांतरं न वृणुयाद्वृत्तं चेन्निष्फलं भवेत् ॥
" मातुः श्राद्धं मातृवर्गवरणेनैव कारयेत् । तत्र पित्रादिवर्गस्य वरणे मातृहा भवेत् " ॥ इति ।
स्मृत्यंतरे—
" प्रत्यब्दाङ्गं तिलं दद्यान्निषिद्धेऽपि परेऽहनि । वर्गैकस्य वचो येषामन्येषां तु विवर्जयेत्"॥ इति ।
येषां पितृपितामहप्रपितामहानां मातृपितामहीप्रपितामहीनां वा वचः उद्देश्यत्वोक्तिः तेषामेकस्य वर्गस्य निषिद्धेऽपि परदिने तिलोदकं दद्यादनुद्दिष्टानां वर्जयेदित्यर्थः । ततश्चैकस्य वर्गस्य तिलोदक विधानात् " यानुद्दिश्य भवेच्छ्राद्धं तेभ्यस्तर्पयति द्विजः " इति **विष्णुस्मरणाच्च** ।
"कर्षूसमन्वितं मुक्त्वा तथाद्यश्राद्धषोडशम् । प्रत्याब्दिकं च शेषेषु पिंडाः स्युः षडिति स्थितिः" ॥ इति **कात्यायनेन** प्रत्याब्दिकपर्युदासेन षट्पिंडविधानाच्चैकस्य वर्गस्योद्देश्यत्वम् ।
अत्र **पितृमेधसारकृत्**—' मातृमृताहे मात्रादय एव भोज्याः न पित्रादयो निषेधादयुग्मत्वविरोधात्पार्वणत्वभंगादाचाराभावाच्च ' इति ।

" निमंत्रयेत त्र्यवरान्समविप्रान्यथोदितान् । अयुग्मांस्त्र्यवरानर्थापेक्षो भोजयेत् " । इति **मन्वापस्तंबा**दिभिरयुग्मब्राह्मणभोजनं विहितम् । तत्र पित्रादीनामपि भोजने अयुग्मत्वविरोध इत्यर्थः। अत्र **विज्ञानेश्वरः**—येनकेनापि मातुः सापिण्ड्ये यत्राष्टकादिषु मातुः श्राद्धं पृथग्विहितम्।

---

१ क्ष—मातुः श्राद्धं । २ क्ष—तु । ३ ग—छाग । ४ ग—म्यपि । ५ ग—ननर्था ।

"अष्टकासु च वृद्धौ च गयायां च मृतेऽहनि। मातृश्राद्धं पृथक्कुर्यादन्यत्र पतिना सह"॥ इति। तत्र पितामह्यादिभिरेव पार्वणश्राद्धं कर्तव्यमिति। एवं पितृश्राद्धे पित्रादय एव भोज्याः। न मात्रादयः। अत्र **तात्पर्यदर्शनम्**—अत्र यद्यपि मात्रादिभ्यः पृथगेव पिंडदानदर्शनं तथापि तासां पृथग् ब्राह्मणभोजनं न भवति। होमाभिमर्शनयोः पृथक्त्वादर्शनात्पितृमात्रर्थब्राह्मणसंख्या-संकलने सत्ययुग्मत्वविरोधादाचाराभावाच्च। **अपि** च—"अष्टकासु च वृद्धौ च" इति **वचनादष्ट**-कादिभ्योऽन्यत्र मासिश्राद्धौ पृथक्त्वाभावः स्पष्ट एवावगम्यत इति पृथगुद्देशाभावेऽपि मातृवर्गस्यापि तत्र तृप्तिर्भवतीत्युक्तं **चंद्रिकायाम्**। **बृहस्पतिरपि**—

"स्वेन भर्त्रा समं श्राद्धं माता भुंक्ते सदैवतम्। पितामही तथा स्वेन स्वेनैव प्रपितामही"॥ इति। सदैवतं पार्वणश्राद्धमित्यर्थः। **शातातपः**—

"एकमूर्तित्वमायाति सपिंडीकरणे कृते। पत्नीपतिपितॄणां तु तस्मादंशेषु भागिनी"॥ इति। **स्मृत्यंतरेऽपि**—

"सपिंडीकरणादूर्ध्वं यत्पितृभ्यः प्रदीयते। सर्वत्रांशहरा माता इति धर्मेषु निश्चयः"॥ इति। **मनुः**—

"स्नेहाद्भर्त्रा समं श्राद्धं माता भुंक्ते स्वधाशनम्। पितामही स्वधां स्वेन तथैव प्रपितामही"॥ इति। **चंद्रिकायाम्**—एभिर्वचनैः सपिंडीकरणोत्तरकालं पत्यादिदैवत्ये श्राद्धे पृथगुद्देशाभावेऽपि मातॄणां सहभावेन देवतात्वं भवतीत्येतावन्मात्रमभिधीयते। न तु येन सह सपिंडीकरणं कृतं तद्दैवत्ये श्राद्धे सह भावेन देवतात्वमिति। एषु वचनेषु तथाविधविशेषानवगमात्ततश्च पितामह्यादिभिः सह सपिंडीकृतायामप्यष्टकादिभ्योऽन्यत्र मातुर्न पृथक्श्राद्धमिति। **पितृमेधसारेऽपि**—श्वश्र्वादि-सापिंड्येऽपि दर्शमासिश्राद्धादौ पित्रादिभिरेव सह मात्रादयो भुंजते। अर्घ्यसंसर्गेण भर्तृ-साहित्यात्स्नेहाच्च। तदर्थं हि पित्रर्घ्येषु मात्रर्घ्यसंसर्गं कुर्वीतेति। एवं चाष्टकादिष्वेव पृथक्त्व-विधानात्तद्व्यतिरिक्तेषु युगादिमन्वादिदर्शमासिश्राद्धादिषु पृथगुद्देशाभावोऽवगम्यते। यत्तु **चतुर्विंशतिमतेऽभि**हितम्—"केचिदिच्छन्ति नारीणां पृथक्श्राद्धं महर्षयः" इति तदष्टकाश्राद्धविषयम्। अत्राष्टकासु च वृद्धौ चेतिवचनं पूर्वमुक्तम्। तथा **जातुकर्णिः**—

'अन्वष्टक्यं तथा वृद्धिं मातुः श्राद्धं मृतेऽहनि। एकोद्दिष्टं तथा मुक्त्वा स्त्रीणां नास्ति पृथक् क्रियाः'॥ इति। **चंद्रिकायाम्**—

"अन्वष्टकासु वृद्धौ च प्रतिसंवत्सरे तथा। अत्र मातुः पृथक्श्राद्धमन्यत्र पतिना सह"॥ इति। **तत्रैव**—

"क्षयाहं वर्जयित्वैकं स्त्रीणां नास्ति पृथक् क्रिया। केचिदिच्छन्ति नारीणामन्यत्रापि महर्षयः"॥ इति। अन्यत्राष्टकादिषु। **पारिजातेऽपि**—"अन्वष्टकासु वृद्धौ च प्रतिसंवत्सरे तथा।

"महालये गयायां च सपिण्डीकरणात्पुरा। एषु मातुः पृथक् कुर्यादन्यत्र पतिना सह"। **स्मृत्यन्तरे**—"अन्वष्टकासु वृद्धौ च गयायां च महालये।

"चन्द्रसूर्योपरागे च व्यतीपाते मृतेऽहनि। मातुः श्राद्धं पृथक्कुर्यादन्यत्र पतिना सह"॥ इति। अन्वष्टकादौ मातृपितामहीप्रपितामह्यः पृथक् तत्र विहितदेवताभिः सहोद्देश्याः। मातृश्राद्धे तु ता एवोद्देश्याः। अष्टकावृद्धिगयामहालयोपरागव्यतीपातव्यतिरिक्तेषु पतिभोजनेन तासां सह तृप्ति-रित्यर्थः। **शातातपोऽपि**—"मासिके चाब्दिके श्राद्धे मातुः कुर्यात्पृथग्विधिम्"॥ इति।

१ ग-वन्ती।

यत्तु "सपत्नीकत्वहानेऽपि पितुर्दर्शं समाचरेत् । पितामहादिषु तथा सपत्नीकत्वसंभवात्" ॥ इति तस्यार्थः । मातरि स्थितायामपि पितामह्यादीनां दार्शं पिंडं तिलोदकं च समाचरेदिति । एवं च पितुर्मृताहे पितृपितामहप्रपितामहानामेवोद्देश्यत्वं । मातृमृताहे मातृपितामहीप्रपितामहीनामुद्देश्यत्वं न पित्रादीनामिति स्थितम् । ननु मा भूत् । पितुर्मृताहे मातुरुद्देश्यता तद्विधायकवचनाभावात् । मातृर्मृताहे तु

" मातुर्मृताहे संप्राप्ते पितरं तत्र पूजयेत् । अपूजिते तु पितरि मात्रा पिंडो न गृह्यते " ॥ इति ।

विधिबलेन पितुरप्युद्देश्यता स्यादिति चेदत्र **केचिदाहुः** । वचनमेतदापस्तंबिनां मातृमृताहे पित्रादेर्होमापिंडदानविधिपरम् । अत्र एव ' मात्रा पिंडो न गृह्यते ' इत्युक्तम् । **तथा च स्मृत्यंतरे**—

"स्त्रीमृताहे स्त्रियो भोज्याः पितरः स्त्रीसपिंडने । पित्रादेरेव होमः स्यात्पिंडदानं तु वर्गयोः"॥ इति ।

मातुर्मृताहे पित्रादेरेव होमो मात्रादेरेव भोजनम् । स्त्रीसपिंडने पित्रादेरेव भोजनं उभयत्र वर्गद्वयस्यापि पिंडदानमित्यर्थः । एतच्चापस्तंबिनाम् । अन्येषां तु यथासूत्रं द्रष्टव्यम् । **विष्णुः**—" मातुर्मृताहे पित्रादीन्होमपिंडैः प्रपूजयेत् " ॥ इति ।

संग्रहेऽपि—" मातुः श्राद्धे तु पित्रादीन्होमपिंडैः प्रपूजयेत् ।

" पिंडहोमौ परित्यज्य श्राद्धं च कुरुते यदि । संततेश्च विनाशाय संपदां हरणाय च " ॥ इति ।

अन्यत्रापि—

" पिता जीवेन्मृता माता तद्दिने होमदेवताः । पितामहादयो ह्येव तदुद्देशात्कृतार्थता ॥

" मंत्रे अमुष्मा इति बलात्पितरो होमदेवताः । ये च त्वामनुयाश्चेति बलात्पिंडास्तु वर्गयोः ॥

" पत्नीपतीनां श्रुत्युक्तभेदराहित्यवैभवात् । सप्ताहुतीनां पित्रादेः उद्देशाच्चरितार्थता ॥

" पित्रोः श्राद्धे समायाते पार्थक्येनाथवा सह । सप्ताहुतीश्च जुहुयान्नोद्देशो मातुरिष्यते " ॥ इति ।

अपरे पुनराहुः—" मातुर्मृताहे संप्राप्ते पितरं तत्र पूजयेत् " इति **वचनं** होमपिंडदानमात्रविधिपरं न भवति किंतु पित्राद्युद्देशेन भोजनमपि तेन विधीयते । तथा च **स्मृत्यंतरे**—

" मातुर्मृतेऽन्हि संप्राप्ते पितरं भोजयेत्पुरा । मातरं भोजयेत्पश्चात् द्वयोः पिंडान्पृथक्पृथक् " ॥ इति ।

शिवधर्मोत्तरे—

" मासिके चाब्दिके वाऽपि मातुर्मरणसंभवे । पित्रा सहैव यद्भुक्तं तस्यास्तृप्तिकरं भवेत् ॥

"पित्राहीनान् जनन्यास्तु मासिकादीन्करोति यः । तत्कुलस्य विनाशः स्यात् तस्यास्तृप्तिर्न जायते"॥

हारीतः—

" पित्र्यं तूभयसामान्यं मातुर्मृतदिने सति । भर्तुराधिक्यभावेन ह्युभौ च परिपूजयेत् ॥

" गरीयसी तु पुत्रस्य माता संभरणाद्यथा । पालनाद्भरणाद्भर्ता गरीयान् सर्वदा तथा " ॥ **नारदः**—

" भर्तुराधिक्यभावेन तस्यास्तृप्तिर्हि शाश्वती । मातृप्रीतिं समन्विच्छन्पितृप्रीतिं तथाचरेत् " ॥

व्यासः—

" मातरं पितरं चैव समत्वेनैव पूजयेत् । न्यूनातिरेकं कुर्वाणः तामसीं गतिमाश्रयेत् " ॥ इति ।

संग्रहेऽपि—" पितुर्मृताहे पितरो हि भोज्याः पिंडप्रदानं तु सहैव मात्रा ॥

" मातुर्मृताहे पितृवर्गपूर्वं भोज्याः स्त्रियः पिंडविधौ षडत्र " इति ।

जीवपितृकस्य मातृश्राद्धे विशेषमाहतुः **शंखलिखितौ**—

" म्रियमाणे तु पितरि माता चेन्निधनं गता। पितृस्थाने स्वपितरं तत्स्थानेऽन्यन्नियोजयेत्" ॥ इति । अस्यार्थः—"वर्गादिर्यदि जीवेत्तु तं वर्गं परिवर्जयेत्" इति **वचना**त्पितरि जीवति सति मातृश्राद्धे पितृवरणमकृत्वा तत्स्थाने स्वपितरं तूष्णीं भोजयेत् । मातृस्थाने च वरणपूर्वकमन्यं भोजयेदिति ।

चंद्रिकायाम्—

" म्रियमाणे तु पितरि पूर्वेषामेव निर्वपेत् । विप्रवद्वापितं श्राद्धे स्वकं पितरमाशयेत् ॥

"पिता यस्य तु वृत्तः स्याज्जीवेच्चापि पितामहः । पितामहो वा तच्छ्राद्धं भुंजीतेत्यब्रवीन्मनुः" ॥

तथा च **स्मृत्यंतरे**—

" जीवतस्तु पिता यस्य माता चेन्निधनं गता । तूष्णीं निवेश्य पितरं वरयेन्मातृवर्गजाः ॥

" होमकार्यं तदा तासां नास्त्येव पितृवर्गतः। पिंडप्रदानमूहेन वर्गयोरुभयोरपि "॥ इति । होमकार्यं तासां नास्ति पितृवर्गस्यैव होमः ।

" पिता जीवेन्मृता माता तद्दिने होमदेवताः । पितामहादयो ह्येव तदुद्देशात् कृतार्थता " ॥ इति **स्मरणात्** । **निगमेऽपि**—"यो जीवति पितॄणां तं न भोजयेत्पितृस्थाने इत्येके । जीवतामजीवतां वा देयमेवेति **हिरण्यकेतुः** " इति । एतदेवाभिप्रेत्योक्तं **पाद्मे**—

" मातुर्मृताहे संप्राप्ते पितरं तत्र पूजयेत् । न जीवंतमिति प्राहुर्गार्ग्यगौतमभार्गवाः " ॥ इति । जीवंतं पितरं वरणपूर्वकं न पूजयेदित्यर्थः । यत्तु **कैश्चिदुक्तम्**—जीवपितृकस्य श्राद्धे पितुः पित्रादिभ्यो होमवर्गद्वयस्य पिंडदानं कार्यं पित्रादीनां होमपिंडदाननिषेधपरमेतदिति तत्पिता जीवेन्मृता माता पिंडप्रदानमूहेनेति पूर्वोक्तवचनविरोधादुपेक्ष्यम् । तथा च **पितृमेधसारकृत्** " जीवपितृकस्य मातुः श्राद्धे पितुः पित्रादिभ्यो होमो वर्गद्वयस्य पिंडदानं कार्यम्" । इति । **अपरे तु**—पितरं तत्र पूजयेदित्यादिवचनानामजीवपितृकमातृश्राद्धविषयत्वाद्योनिगोत्रमंत्रान्तेवास्यसंबंधानिति सगोत्रस्य निमंत्रणनिषेधादनिमंत्रस्य श्राद्धपंक्तौ भोजनदाने श्राद्धकर्ता आवृत्तानां त्वित्यादिना दोषाभिधानात् " न जीवन्तमिति प्राहुर्गार्ग्यगौतमभार्गवाः " इति **पाद्मपुराण**-वचनात् " प्रत्यक्षमर्चनं श्राद्धे निषिद्धं मनुरब्रवीत् " इति **भविष्यत्पुराण**वचनात् पितृस्थाने स्वपितरमित्यादेः शिष्टाचाराभावेनोपेक्ष्यत्वात् जीवपितृकस्य मातृश्राद्धमातृपितामहीप्रपितामहीनामेव भोजनम् । होमः पितामहादेः । पितृवर्गस्य पिंडदानमुभयोरित्याहुः ।

सामसूत्रप्रयोगवृत्तौ तु—

" मातुर्मृताहे संप्राप्ते सामतित्तिरिशाखिनाम् । पितरं भोजयेदग्रे सह तंत्रेण मातरम् " ॥ इति । एवं च " पितुरेव पितुः कुर्यान्मातुरेव मृतेऽहनि " **इत्याश्वलायन**स्मरणादाश्वलायनानां मातृश्राद्धे मात्रादीनामेवोद्देश्यत्वं " मातुर्मृताहे संप्राप्ते पितरं तत्र पूजयेत् " इति **भरद्वाज**स्मरणात् यजुःशाखिनां भरद्वाजीयानां पित्रादीनां मात्रादीनां चोद्देश्यत्वं तथा सामशाखिनामपि । इतरेषां स्वकुलाचाराद्व्यवस्था ।

अनुमरणादिकविषये भृगुः—

"या समारोहणं कुर्याद्भर्तुश्चित्यां पतिव्रता । तां मृतेऽहनि संप्राप्ते पृथक्पिंडे नियोजयेत् "॥ इति पृथक्पिंडनियोजनं पृथक्श्राद्धकरणम् ।

---

१ ग-जीव ।

अत एव **स्मृत्यंतरम्**—

" एकचित्यां समारूढौ दंपती निधनं गतौ । पृथक्श्राद्धं तयोः कुर्यादोदनं च पृथक्पृथक् " ॥ इति । ओदनमत्र पिंडदानं सहपाकस्य पूर्वमुक्तत्वात् । " कुर्यात्समानतंत्रेण सांवत्सरिकमेव च " इति संघातानुमृत्योः सांवत्सरिकस्य समानतंत्रत्वस्मरणमापद्विषयमिति पूर्वमेवोक्तम् । यत्तु **वचनम्**—

" पत्या सह सपिंडत्वे तन्मृताहे सहत्वभाक् " इति तस्यार्थः भिन्नतिथ्यनुमरणविषये पितुराब्दिकं पूर्वदिने कृत्वा परदिने पितृवरणपूर्वकं मातृश्राद्धं कुर्यादिति । **स्मृत्यंतरे**—

" पितृव्याग्रजयोः श्राद्धे तत्तत्पितृपितामहान् । स्त्रीश्राद्धे वृणुयाद्भर्ता पत्नीमातृपितामही " ॥ इति । एवं यस्य मृताहे पार्वणमुक्तं तत्तत्पितृपितामहौ च तत्र वृणुयात् । **कारिकारत्ने**—

" मातुः पित्रोर्मासिकादीन् दौहित्रः स्वीयवह्निना । तथा महालयादींश्च कुर्यात्पार्वणतः शुचिः ॥
" सपिंडनस्य पश्चात्तु दौहित्रः स्वीयवह्निना । तत्सूत्राद्वत्सरादर्वाक्कुर्यात्पश्चात्स्वसूत्रतः " ॥ इति ।

यत्तु

" मातामहस्य सूत्रेण सपिंडीकरणात्पुरा । सूत्रांतरेण यः कुर्याच्छुनां योनिं स गच्छति " ॥ इति तद्वत्सरांतसपिंडीकरणाभिप्रायम् । **संग्रहे**—

" कर्तुः सगोत्रिणश्चैव भोक्तॄणां च सगोत्रिणः । न निमंत्र्याः किल श्राद्धे सोदकुंभं विनैव तत् " ॥ इति । अत्र भोक्तृपदं भोक्तृदेवतापरम् ।

" श्राद्धे निमंत्रयेद्विद्वान्पितॄणामसगोत्रिणः । कर्तुस्तु गोत्रिणश्चैव विशेषेण विवर्जयेत् " ॥ इति **स्मरणात्** । पुत्रिकापुत्रस्य धनहारिणो दौहित्रस्य च मातामहमृताहश्राद्धं नित्यं तच्च प्रतिपादितं **विज्ञानेश्वरे** । " मातामहेन मातुः सापिंड्ये मातामहश्राद्धं पितृश्राद्धवन्नित्यमेव पत्न्या पितामह्या वा मातुः सापिंड्ये मातामहश्राद्धं तदनित्यं कृते त्वभ्युदयः अकृते न प्रत्यवायः " इति । न च वाच्यम्—

" पितरो यत्र पूज्यंते तत्र मातामहा अपि । अविशेषेण पूज्याः स्युः विशेषान्नरकं व्रजेत् ॥
" पार्वणं कुरुते यस्तु केवलं पितृहेतुतः । मातामहान्न कुरुते पितृहा चोपजायते " इत्यादिवचनात्पितृमृताहे मातामहादीनामपि श्राद्धं कार्यमिति । " पितुर्गतस्य देवत्वमौरसस्य त्रिपूरुषम् " । इति विशेष**स्मरणात्** । तथा **चंद्रिकायाम्**—" याज्ञवल्क्येन कालस्तु अमावास्यादिनोदितः ॥

" अविशेषेण पित्र्यस्य तथा मातामहस्य च । युगपच्च स विज्ञेयो वचनाद्वक्ष्यमाणकात् ॥

" कालभेदेन तंत्रं स्याद्देशभेदेन चैव हि । तस्मात् तंत्रविधानात्तु यौगपद्यं विधीयते ॥

" अमावास्यादिकालेषु कालैकत्वात्सहक्रिया । मृतेऽहनि तु तद्भेदान्न युज्येत सह क्रिया " ॥ इति । अस्यार्थः । " अमावास्याष्टका वृद्धिः कृष्णपक्षोयनद्वयम् " इत्यादिवचनेन श्राद्धकालः सामान्येन पितृश्राद्धस्य मातामहश्राद्धस्य च **याज्ञवल्क्येनो**दितः स च कालः । पितृयज्ञश्राद्धयोरिव न भागक्रमेण किंतु " मातामहानामप्येवं तंत्रं वा वैश्वदेविकम् " इति वक्ष्यमाणाद्वचनाद्युगपदेवावगंतव्यः । यौगपद्यमेव समर्थयते कालभेद इत्यादिना । समानतंत्रतया विधानात् पैतृकस्य मातामहश्राद्धस्य च यौगपद्यं प्रतीतम् । तच्च समानतंत्रत्वममावास्यादिकाले एव न पुनर्मृताहे इति । एवं च पितुर्मृताहे पित्रादीनामेवोद्देश्यत्वमिति स्थितम् । संकल्पविधानेन पितृश्राद्धं न कार्यम्

१ ग-त्न्या । २ क्ष-दि । ३ खग-प्रती । ४ क-मृताहस्य ।

" मातापित्रोर्मृतदिने संकल्पं कुरुते तु यः । संततेस्तु विनाशं स्यात्संपदामपि संक्षयः " ॥ इति **स्मरणात्** । एकादश्यामपि मृताहश्राद्धमुक्तं **स्मृत्यंतरे**—

" मातापित्रोः क्षयाहे च भवेदेकादशी यदा । संभाव्य पितृदेवांश्च त्वाजिघ्रेत्पितृसेवितम्" ॥ इति । **कात्यायनोऽपि**—

"उपवासे यदा नित्यः श्राद्धं नैमित्तिकं भवेत् । उपवासं तदा कुर्यादाघ्राय पितृसेवितम्"॥ इति । यत्तु **पुराणवचनम्**—

" ये कुर्वंति महीदेवाः श्राद्धमेकादशीदिने । त्रयस्ते नरकं यांति दाता भोक्ता पिता तथा ॥

" यथाशौचगतं श्राद्धमाशौचांते विधीयते । तथैवेकादशीं मुक्त्वा द्वादश्यामेव कारयेत् " ॥ इति तत्तांत्रिकविषयम् । अन्यथा कात्यायनादिस्मृतिविरोधप्रसंगात् ।

प्रथमाब्दिके श्राद्धांगतर्पणं नास्ति

" एकोद्दिष्टेषु सर्वेषु सपिंडीकरणे तथा । मासिकेष्वाब्दिके चैव न कुर्यात्तिलतर्पणम् " ॥ इति **स्मरणात्** । **इत्याब्दिकनिर्णयः**

अथ **मलमासः** । तस्य स्वरूपं **ब्रह्मसिद्धांते**ऽभिहितम्—

" चांद्रमासो ह्यसंक्रांतो मलमासः प्रकीर्तितः " इति । **पराशरः**—

"रविणा लंघितो मासश्चांद्रः ख्यातो मलिम्लुचः । तत्र यद्विहितं कर्म उत्तरे मासि कारयेत्"॥ इति । **लघुहारितोऽपि**—

" इंद्राग्नी यत्र हूयेते मासादिः स प्रकीर्तितः । अग्नीषोमौ स्थितौ मध्ये समाप्तौ पितृसोमकौ ॥

"तमतिक्रम्य तु यदा रविर्गच्छेत्कदाचन । आद्यो मलिम्लुचो ज्ञेयो द्वितीयः प्राकृतः स्मृतः" ॥ इति । अयमर्थः । दर्शपूर्णमासयाजिनां शुक्लप्रतिपदादिदर्शेष्टिदेवाविंद्राग्नी हूयेते । कृष्णप्रतिपदि पूर्णमासेष्टिदेवावग्नीषोमौ । अमावास्यायां पिंडपितृयज्ञदेवौ पितृसोमकौ । तत्रैवं सति शुक्लप्रतिपदादिदर्शांतो मासः संक्रांतिरहितो मलिम्लुचः इति । मलिम्लुचत्वं च तस्य राक्षसैस्तस्करैराक्रांतत्वात् तदाह **शातातपः**—

" वत्सरांतर्गतः पापो यज्ञानां फलनाशकृत् । नैर्ऋतैर्यातुधानाद्यैः समाक्रांतो विनाशकैः ॥

" मलिम्लुचैः समाक्रांतं सूर्यसंक्रांतिवर्जितम् । मलिम्लुचं विजानीयात् गर्हितं सर्वकर्मसु "॥ इति **मैत्रेयः**—"मासद्वये यद्येकराशिं संक्रमेतादित्यस्तत्राद्यो मलमासः शुद्धोऽन्यः" इति । मलत्वं च कालाधिक्यात् । तथा च **गृह्यपरिशिष्टे**—"मलं वदंति कालस्य मासं कालविदोऽधिकम्" इति । अधिकमासं कालस्य मलं वदंतीत्यन्वयः । **श्लोकगौतमः**—

" द्वौ मासावेकनामानावेकस्मिन्वत्सरे यदि । तत्राद्ये देवकार्याणि पितृकार्याणि चोभयोः" ॥ इति राशिद्वयनिबन्धनात् द्वावित्युक्तिः । चैत्राद्येकसंज्ञकत्वात् । एकनामानाविति तत्र आद्ये देवकार्याणीत्यस्य व्यवस्था वक्ष्यते **चंद्रिकायाम्**—

" अमावास्याद्वयं यत्र सूर्यसंक्रांतिवर्जितम् । एवं षष्टिदिनो मासस्तदर्धं तु मलिम्लुचः ॥

" त्यक्त्वा तमुत्तरे कुर्यात्पितृदेवादिकाः क्रियाः " ॥ इति ।

व्यासः—

" षष्ट्या तु दिवसैर्मासः कथितो बादरायणैः । पूर्वार्धं तु परित्यज्य उत्तरार्धः प्रशस्यते "॥ इति । **गार्ग्यः**—" अधिमासः स विज्ञेयो मासः शुद्धाख्य उत्तरः " ॥ इति ।

---

१ ग-द्वौ ।

नारदः—"नष्टेंदुपर्वकालः स्यात्सूर्यसंक्रमणं यदि । तस्मिन्मासि पुनः पर्व स मासोऽधिकमासकः" ॥ नष्टेंदुकलायुक्तदर्शकाले दर्शांतकाल इत्यर्थः । दर्शांतयुक्ते तस्मिन्नेव मासि पुनरपि दर्शांतश्चेत्सोऽधिकमास इत्यर्थः । **वसिष्ठसिद्धांते**—

" द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा । घटिकानां चतुष्केण पतत्यधिकमासकम् " ॥ इति ।

विष्णुधर्मोत्तरेऽपि—

" सौरसंवत्सरस्यांते मासेन शशिजेन तु । एकादशातिरिच्यंते दिनानि भृगुनंदन ॥

"समाद्वये साष्टमासे तस्मान्मासोऽतिरुच्यते । स चाधिमासकः प्रोक्तः काम्यकर्मसु गर्हितः"॥ इति ।

सौरसंवत्सरं चान्द्रात् वत्सरादेकादशदिनैरधिकम् । तथा च सति चान्द्रवत्सरद्वयात् सौरवत्सरद्वयं द्वाविंशत्यादिनैरधिकं भवति । तत ऊर्ध्वं सौरमासाष्टकं चान्द्रमासाष्टकैः सार्धैः सप्तदशभिर्दिनैरतिरिच्यते । अवशिष्टदिनार्धं च यथाकालादूर्ध्वं पूर्वोक्तषोडशभिर्दिनैः संपद्यते । तथा च मिलित्वा मासो भवति । सोऽयमधिको मास इत्यर्थः ।

स्मृत्यंतरेऽपि—" सौरे वर्षे पंचमे पंचभिः स्यान्मासैर्युक्ते चाधिमासद्वयं हि ॥

" द्वात्रिंशद्भिर्मासकैस्तत्र चैकः शिष्टैर्मासैः स्यात्तथैवापरोऽपि " ॥ इति ।

ज्योतिःशास्त्रेऽपि—

"अब्दद्वयं चाष्टमासाः षोडशाहं त्रिनाडिका । विनाड्यः पंचपंचाशदधिमासान्तरं स्फुटम्"॥ इति ।

न च कालाधिक्यमात्रेण तिथ्यादिवृद्धेरपि मलत्वं प्रसज्येतेति शंकनीयम् । कालाधिक्ये सति नपुंसकत्वेन मलत्वांगीकारात् । नपुंसकत्वं च ज्योतिःशास्त्रेऽभिहितम्—

" असंक्रो हि यो मासः कदाचित्तिथिवृद्धितः । कालांतरात्समायाति स नपुंसक इष्यते " ॥ इति ।

पुरुषस्य सूर्यस्य तत्राभावान्नपुंसकत्वम् । तदपि **तत्रैवोक्तम्**—

" अरुणः सूर्यो भानुस्तपनश्चंद्रो रविर्गभस्तिश्च । अर्यमा हिरण्यरेता दिवाकरो मित्रविष्णू च ॥

" एते द्वादशसूर्या माघाद्येषूदयंति मासेषु । निःसूर्योऽधिकमासो मलिम्लुचाख्यस्ततः पापः ॥

" मासेषु द्वादशादित्यास्तपंति हि यथाक्रमम् । नपुंसकेऽधिको मासि मंडलं तपते रविः " ॥ इति ।

संक्रातिरहितमासवत् संक्रांतिद्वययुक्तोऽपि चांद्रो मलमासः । तथा च **काठकगृह्यम्**—

" यस्मिन्मासे न संक्रांतिः संक्रांतिद्वयमेव वा । मलमासः स विज्ञेयो मासे त्रिंशत्तमे भवेत्"॥ इति ।

'द्वात्रिंशद्भिर्गतैः मासैः' इति पूर्वोक्तेन मासे त्रिंशत्तमे भवेदित्यस्य विरोधे सति समाहितं **माधवीये**—ज्योतिःशास्त्रप्रसिद्धं मध्यमं मानमाश्रित्य द्वात्रिंशद्भिरिति वचनं प्रवृत्तम् । यस्मिन्मास इति त स्फुटमानमाश्रित्य प्रवृत्तमिति । **चंद्रिकायां** तु ' मासे त्रिंशत्तम ' इत्येतत् त्रिंशन्मासादर्वाक् न संभवतीत्येवंपरमिति । **महाभारते**—

" पंचके पंचके वर्षे द्वौ मासावधिमासकौ । तेषां कालातिरेकेण ग्रहाणामधिचारतः" ॥ इति ।

माधवीये त्वाक्षिप्य परिहृतम् । नन्वधिकमासः क्वचित्त्रिंशत्तमत्वं व्यभिचरति । न्यूनाधिकसंख्याया अपि दर्शनात् । नायं दोषः त्रिंशत्तमत्वस्य लक्षणत्वेनानंगीकारादुदाहरणप्रदर्शनार्थमेतदुक्तमित्यविरोधः " इति । **सत्यव्रतः**—

" राशिद्वयं यत्र मासे संक्रमेत दिवाकरः । नाधिमासो भवेद्दोषो मलमासस्तु केवलम् " ॥ इति ।

ज्योतिःसिद्धांते—" असंक्रांतिमासोऽधिमासः स्फुटः स्याद्विसंक्रांतिमासः क्षयाख्यः कदाचित् ।

" कार्तिकादित्रये यो नान्यदा स्यात्तदा वर्षमध्येऽधिमासद्वयं च " ॥ इति ।

अयमर्थः—

स्फुटमानेन योऽयमसंक्रांतः स स्फुटोऽधिमासः। तेनैव मानेन यो द्विसंक्रांतियुक्तः स क्षयमासः। स च कार्तिकमार्गशीर्षपौषमासेष्वेव त्रिष्वन्यतमेऽवतिष्ठते। नान्येषु माघादिनवसु। एवंविधक्षयमासयुक्ते वर्षे क्षयमासात्पूर्वं द्वित्रिमासेषु मध्ये कश्चिदधिमासो भवति। क्षयमासादूर्ध्वमपि मासत्रयमध्ये परोऽधिमासः। तदेवंविधमेकवर्षस्थं मलमासत्रयं चिरेण कालेन यदाकदाचिदायाति। न त्वेकाधिकमासवत्पुनः पुनः सहसा समायाति। द्विसंक्रांतियुक्तोऽयं क्षयमासः। एकमासत्वादंहसः पापस्य पतिरिति व्युत्पत्त्यांहस्पतिसंज्ञयापि व्यवह्रियते। तथा च **बार्हस्पत्ये**—

"यस्मिन्मासेन संक्रांतिः संक्रांतिद्वयमेव वा। संसर्पांहस्पती मासावधिमासश्च निंदितः"॥ इति। तत्र क्षयमासात्प्राचीनो योऽसंक्रांतः स संसर्पः। असंक्रांतत्वेनेतराधिमासवत्कर्मानिर्हतायां प्राप्तायां तदपवादेन कर्मार्हः सन् सम्यक्संसर्पतीति संसर्पः।

"मासद्वयेऽब्दमध्ये तु संक्रांतिर्न यदा भवेत्। प्राकृतस्तस्य पूर्वः स्यादधिमासस्तथोत्तरः"॥ इति **स्मरणात्**। संक्रांतिरहितयोर्मासयोर्मध्ये यः पूर्वः स प्राकृतः शुद्धः सर्वकर्मार्ह इत्यर्थः। अस्मिन्नेवार्थे **जाबालिः**—

"एकस्मिन्नपि वर्षे चेत् द्वौ मासावधिमासकौ। प्राकृतस्तत्र पूर्वः स्यादधिमासस्तथोत्तरः"॥ इति। **ब्रह्मसिद्धांतेऽपि**—

"मासत्रये त्रिंशदूर्ध्वं संक्रांतिर्न यदा भवेत्। प्राकृतस्तत्र पूर्वः स्यादधिमासस्तथोत्तरः"॥ इति। **चंद्रिकायामिदं** व्याख्यातम्—त्रिंशन्मासादूर्ध्वं योऽसंक्रांतो मासः सोऽधिमासस्ततोऽवाग्यः संक्रान्तो मासः स प्राकृतः। नाधिमास इति। ततः ससंसर्पत्वं तस्योपपन्नम्। असंक्रांतिमासद्वयमध्यवर्तिनः क्षयमासस्यांहस्पतित्वात्तदुत्तरभाविनोऽसंक्रांतस्य कालाधिक्येनाधिमासत्वान्मासद्वयमेतन्निंदितम्। त एते त्रयोऽपि **ज्योतिःशास्त्रे** विवाहादौ क्वचिन्निंदिताः। अत एवोक्तम्—"संसर्पांहस्पतीमासावधिमासश्च निंदिताः" इति। यदा तु संक्रांतिद्वययुक्तः क्षयमास एक एव वा असंक्रांतिरेक एव वाधिमासो भवति तदा तदुभयं वर्ज्यमित्युक्तं **केशवीये**—

"यस्मिन्मासि न संक्रांतिः संक्रान्तिद्वयमेव वा। संसर्पांहस्पती मासौ सर्वकर्मबहिष्कृतौ"॥ इति। **नारदश्च**—"संक्रांतिरहितो मासो यो वा संक्रांतियुग्मयुक्।

"पूर्वः संसर्पमासः स्यादंहस्पतिरथापरः। मलमासाविमौ प्रोक्तौ सर्वकर्मबहिष्कृतौ"॥ इति। **कालादर्शेऽपि**—

"संक्रांतिरहितो मासो मलमासः प्रकीर्तितः। मलिम्लुचापराख्यं च संक्रांतिद्वययुक्तया"॥ इति। मलिम्लुच इत्यपराख्या संज्ञा यस्येति विग्रहः। संक्रांतिद्वययुगपि मासस्तथा मलिम्लुचो मास इत्यर्थः। एवं च यस्मिन्संवत्सरे संक्रांतिरहितो मासः केवलो भवेत् तदाधिमासो वर्ज्यः। तदुत्तरो मासः शुद्धस्तत्र यद्विहितं कर्म "उत्तरे मासि कारयेत्" इति **स्मरणात्**। यदा द्विसंक्रांतियुक्तो मासो भवेत्तदा क्षयमासो वर्जनीयः। तत्पूर्वमासः शुद्धः

"दर्शद्वयं यदैकस्मिन्सौरे संसर्पको भवेत्। अंहस्पतिर्यदैकस्मिंश्चांद्रे द्वौ संक्रमौ तथा॥

"संसर्पांहस्पतिश्चेति द्विविधावधिमासकौ। मतौ पूर्वापरौ दुष्टौ परपूर्वौ शुभावहौ"॥ इति **स्मरणात्**। संसर्परूपोऽधिमासाख्यः पूर्वो दुष्टः। तदुत्तरः कर्मार्हः। अंहस्पतिरूपोधिमासाख्य

इत्युत्तरो दुष्टः। तत्पूर्वो मासः शुभावह इत्यर्थः। संक्रांतिद्वययुक्तस्य क्षयमासस्य षष्टिदिनात्मकत्वाभावेन दिनाधिक्याभावेऽपि संक्रांतेरपि मासव्यपदेशकप्रयोजकतया तदाधिक्येनात्राधिमासत्वव्यपदेशः। **पितृमेधसारे**—"चांद्रात् सौरातिरेकेण संवत्सरः कदाचित्त्रयोदशमासः स्यात्सोऽधिमासः। तत्र द्वौ मासावेकनामानौ षष्टिदिनात्मकौ। तत्राद्यः कर्मसु निंदितः। उत्तरस्तु शुद्धश्चांद्रे मास्येकस्मिन् द्वेधा संक्रमश्चेदंहस्पतिरत्रोत्तरो दुष्टः। सौरे चेत् द्वौ दर्शौ संसर्पो मलिम्लुचश्चाद्यो दुष्टः। तान्मलमासानाचक्षते। वर्षेऽप्येकस्मिन्यदि द्वौ मलमासौ पूर्वोऽसंक्रांतोऽपि कर्मण्यः परो मलमासः इति। नन्वेकाधिकमासोपेतसंवत्सरस्य त्रयोदशमासात्मकत्वं यथा तथा अधिमासद्वयोपेतसंवत्सरस्य चतुर्दशमासात्मकत्वं प्राप्तम्। न च तद्युक्तम्। अस्ति त्रयोदशो मास इत्याहुरितिवच्चतुर्दशमासस्याश्रूयमाणत्वान्नैष दोषः। असंक्रांतित्वेनाधिकप्रसक्तियुक्तयोर्मध्ये पूर्वस्याधिकमासत्वनिषेधात्। उक्तं **ज्योतिःसिद्धान्ते**—

"यदा कन्यागते सूर्ये वृश्चिके वाथ धन्वनि। मकरे वाथ कुंभे वा नाधिमासो विधीयते"॥ इति।

अयमर्थः—वृश्चिकादिषु चतुर्मासेषु यदा मलमासः प्राप्नोति तदा सूर्ये तुलाकन्ययोर्वर्त्तमाने सत्यसंक्रांतेऽपि नाधिमास इति। यदा कन्यागत इत्युपलक्षणम्। पूर्वेषु प्रसक्तोऽसंक्रांतो नाधिमासः। तदुक्तं **ब्रह्मसिद्धांते**—"चैत्रादर्वाक् नाधिमासः परतस्त्वधिको भवेत्"। चैत्रादारभ्य उपरितनेषु मासेषु यदा यौ कौ चित् द्वौ मासावसंक्रान्तौ तदा तयोरर्वाचीनः पूर्वो नाधिमासः। उत्तरस्तु भवत्यधिमास इत्यर्थः।

स्मृत्यंतरे च— "एकत्र मासद्वितयं यदि स्याद्वर्षेऽधिकं तत्र परोधिमासः।

"त्रयोदशं तु श्रुतिराह मासं चतुर्दशः क्वापि न चैव दृष्टम्"॥ इति।

नन्वेवमपि द्विसंक्रांतियुक्तक्षयमासोपेतवत्सरस्य एकादशमासत्त्वं प्रसज्येत। तच्च "द्वादशमासाः संवत्सरः। अस्ति त्रयोदशो मास इत्याहुः" इत्यादि **श्रुत्या** विरुद्धमिति चेत् द्विसंक्रांतियुक्तस्य क्षयस्य मासद्वयत्वेन परिगणनात्। तथा च **कालनिर्णये**—

"तिथ्यर्धे प्रथमे पूर्वो द्वितीयेऽर्धे तदुत्तरः। मासाविति बुधैश्चिंत्यौ क्षयमासस्य मध्यगौ"॥ इति।

क्षयमासस्य स्वतंत्रत्वेऽपि "परपूर्वौ शुभावहौ" इति **वचनान्**मासप्रयुक्तं कर्म पूर्वत्रमासे कर्त्तव्यम्। शुद्धमासवत्स्वतंत्रत्वात्तत्रैव कर्त्तव्यमिति केचित्। तदसाधु। "संसर्पांहस्पतीमासौ सर्वकर्मबहिष्कृतौ" इति **स्मरणात्**। असंक्रांतेरधिमासस्य तु "एवं षष्टिदिनो मासः पूर्वार्धं तु मलिम्लुचः" इति **स्मरणेन** उत्तरशेषत्वात् उत्तरमास एव कर्त्तव्यमिति **चंद्रिकाकालादर्शकालनिर्णयपितृमेधसारादौ** निरूपितम्।

मलमासस्वरूपमभिहितम्। अत्र परस्परविरुद्धानि वचनानि संति तान्यप्यत्रैवार्थे कथंचिद्योजनीयानि। दुर्योजनानि च त्याज्यानि। ननु **श्रीधरीयादौ** पूर्णिमाद्वययोगे तदयोगे च मलमासत्वमुक्तम्। तथा हि—

"अमा च पूर्णिमा चैव यन्मासि युगलं भवेत्। यस्मिन्न दृश्यते वापि चौलकर्मादि वर्जयेत्॥

"द्वितीयपूर्णिमायुक्तं विषमासं वदंति हि। पूर्णिमा च न दृश्येत मलमासः प्रकीर्तितः॥

"एकमासे द्वे च पूर्णे दर्शस्यैकस्य संभवे। अग्निज्वालेति विख्याता शुभकर्मविनाशिनी"॥ इति।

---

१ ख–घट × ख–माय

अत्र व्यवस्थाभिहिता **ज्योतिःशास्त्रे**—
" दर्शांतः पूर्णिमांतश्च चांद्रो मासो द्विधा मतः। जातिभेदाद्देशभेदात्तौ च मासौ[1] व्यवस्थितौ ॥
" दर्शांतमासौ यद्देशे तत्र दर्शप्रयुक्तितः। मलमासादिदोषः स्यान्नान्यदेश इति स्थितिः॥
" पौर्णमास्यंतमासोऽपि यस्मिन् देशे प्रवर्त्तते। तत्र तन्मलमासादिदोषो नान्यत्र विद्यते ॥
" नर्मदादक्षिणे भागे दर्शांतो मास इष्यते। नर्मदोत्तरभागे तु पूर्णिमांत इति स्थितिः॥
"अमावास्यापरिछिन्नो मासः स्याद् ब्राह्मणस्य तु। संक्रांतिपौर्णमासाभ्यां तथैव नृपवैश्ययोः"॥ इति। यत्तु " अंहस्पतिरवंतीषु संसर्पः **कोसलेषु** च। अधिमासस्तु पांचाले समद्दष्टिस्तु भारते " ॥ इति तत् " तस्मादाहिताग्निर्नानृतं वदेत् " इतिवद्दोषाधिक्यप्रदर्शनपरम्। उक्तं च **कालदीपे**—
" सर्वत्रदोषा दोषाः स्युर्दोषकालव्यवस्थिताः। तेषां तु तत्र तत्रैषा दोषाधिक्याय केवलम् " ॥ इति। दर्शांतचांद्रमासानुष्ठातॄणामेव श्राद्धादौ मलमासदोषः। न तु सौरानुवादिनां तत्रैकसंज्ञमासद्वयाभावात्।

मलमासे कर्तव्यानि। मलमासे कर्तव्यान्याह **यमः**—
" गर्भे वार्धुषिके भृत्ये श्राद्धकर्मणि मासिके। सपिंडीकरणे नित्ये नाधिमासं विसर्जयेत् ॥
" तीर्थस्नानं जपो होमो यवव्रीहितिलादिभिः। जातकर्मान्त्यकर्माणि नवश्राद्धं तथैव च ॥
" मघात्रयोदशीश्राद्धं श्राद्धान्यपि च षोडश। चंद्रसूर्यग्रहे स्नानं श्राद्धदानजपादिकम् ॥
" कार्याणि मलमासेऽपि नित्यं नैमित्तिकं तथा " ॥ इति। गर्भे गर्भयुक्ते पुंसवनसीमंत इति यावत्। वार्धुषिके " अशीतिभागो वृद्धिः स्यान्मासिमासि सबंधके " इत्यादिवचनोक्तवृद्धिग्रहणे। भृत्ये संवत्सरादिपर्यंतकालकृते भृत्ये। नित्ये नित्यदाने। होमोऽत्रौपासनहोमः। अंत्यकर्माणि दहनोदकपिंडदानास्थिसंचयनादीनि। **गौतमः**—
" जातकर्माणि यच्छ्राद्धं नवश्राद्धं तथैव च। ग्रहणे पुंसुवादौ च तत्पूर्वत्रपरत्र च " ॥ इति। निमित्तवशादिति वाक्यशेषः। **कालनिर्णये**—
" जातकर्म च पुंसूतिसीमंतोन्नयनव्रतम्। मलिम्लुचेऽपि कुर्वीत निमित्तं यदि जायते " ॥ इति।
मरीचिः—
" रोगे चालभ्ययोगे च सीमंते पुंसुवेऽपि च। यद्ददाति समुद्दिष्टं पूर्वत्रापि न दुष्यति " ॥ इति। रोगे रोगशांतौ। अलभ्ययोगे अर्धोदयादिविहितश्राद्धादौ। **मत्स्यपुराणे**—
" चंद्रसूर्यग्रहे चैव मरणे पुत्रजन्मनि। मलमासेऽपि देयं स्याद्दत्तमक्षयकारकम् " ॥ इति।
सत्यतपाः—
" मलिम्लुचाव्हये मासे विपत्तिर्यदि जायते। तस्मिन्नपि च कर्तव्या पिंडदानोदकक्रिया " ॥ इति।
चंद्रिकायाम्—
" जातकर्माणि यच्छ्राद्धं दर्शश्राद्धं तथैव च। प्रतिसंवत्सरं यच्च पूर्वमासे प्रकीर्तितम् " ॥ इति।
तत्रैव—
" श्राद्धजातकनामानि ये च संस्कारसङ्गताः[2]। रोगशान्तिरलभ्यैश्च योगैः श्राद्धं व्रतानि च ॥
" मलिम्लुचेऽपि कर्तव्या इष्टीः काम्याश्च वर्जयेत् "॥ इति। संस्काराः अन्नप्राशनादयः। सङ्गता[3]-श्चातुर्मास्यव्रतादयः। **कालादर्शे**—
" द्वादशाहसपिंड्यंतं कर्मग्रहणजन्मनोः। सीमंते पुंसुवे श्राद्धं द्वावेतौ जातकर्म च ॥
" रोगशांतिरलभ्ये च योगो श्राद्धव्रतानि च। प्रायश्चित्तनिमित्तस्य वशात्पूर्वे परत्र च " ॥ इति।

१ ख-माघ। २ ख-काम्य ३ ग-सप्रताः।

द्वादशाहसपिंड्यंतं कर्म द्वादशाहकालीनम्। यत्सपिंडीकरणं तदंतं यस्येति विग्रहः। मरणादारभ्य दहननग्नप्रच्छादनतिलोदकपिंडदाननवश्राद्धदशाहहोमषोडशश्राद्धसपिंडीकरणात्मकं कर्मेति यावत्। ग्रहणे पुत्रादिजन्मनि सीमंते पुंसुवे च विहितं श्राद्धं एतौ द्वौ पुंसवनसीमंतौ जातकर्म च आहिताग्नेरिष्टिः अनाहिताग्नेर्होमः प्रायश्चित्तं संध्यातिक्रमादा प्रायश्चित्तं तन्निमित्तस्य वशाद्यदा पूर्वमासे निमित्तमुत्पद्यते तदा पूर्वमासे कुर्यात्। यदा परमासे निमित्तमुत्पद्यते तदा परत्र। यदा मासद्वये निमित्तमुत्पद्यते तदोभयत्रेत्यर्थः। अत्र द्वादशाहग्रहणं वत्सरांतसपिंडीकरणस्याप्युपलक्षणम्

" श्राद्धं सपिंडनं कुर्यात्कालदोषं न चिंतयेत्। वर्षांते द्वादशाहे वा सपिंडीकरणं यदि ॥

" गुरुभार्गवयोर्मौढ्ये बाल्ये वा वार्धकेऽपि वा। मलमासेऽपि कर्तव्याः क्रियाः पूर्वाश्च मध्यमाः "॥

इत्यादि **स्मरणात्**। अन्ये तु

" प्रेतस्य वत्सरादर्वाक् यदा संस्कारमिच्छति। न कालनियमो ज्ञेयो न मौढ्यं गुरुशुक्रयोः "॥इति **स्मरणात्**। प्रागेवोक्तकाले त्रिपक्षादिसापिंड्येऽपि न कालनियम इत्याहुः। एवं च वत्सरात्पूर्वं यत्कर्त्तव्यं तत्र नाधिमासदोष इति गम्यते। **स्मृत्यर्थसारे**—सपिंडीकरणात्प्रागेवोक्तकाले नैमित्तिकवृषोत्सर्गस्तत्र न मासादिदोष इति। यत्तु **वसिष्ठवचनम्**—

" अग्न्याधेयं प्रतिष्ठां च यज्ञदानव्रतानि च। वेदव्रतवृषोत्सर्गचूडाकरणमेखलाः ॥

" मांगल्यमभिषेकं च मलमासे विसर्जयेत् " ॥ इति तत् " कार्तिक्यां वैशाख्यां ग्रहणे संक्रमे वा" इति **बोधायनो**क्तकाम्यवृषोत्सर्गविषयम्। तथा च तत्र वर्जनीयेषु मध्ये **कालादर्शकारेण** संग्रहीतम्—" आश्रमस्वीकृतिः काम्यवृषोत्सर्गश्च निष्क्रमः " इति। तथा आद्यैकोद्दिष्टं मलमासे कुर्यादाद्यमेकादशेऽहनि।

" एकादशेऽन्हि यच्छ्राद्धं तत्सामान्यमुदाहृतम्। एकादशेऽहनि श्राद्धं कुर्यादेवाविचारयन् " ॥

इत्यादिभिः मृताहादेकादशाह एवाद्यैकोद्दिष्टविधानात्। तथा च **जाबालिः**—

" एकराशौ स्थिते सूर्ये यदि मासो द्विधा भवेत्। एकोद्दिष्टं तु पूर्वत्र न परत्र कदाचन " ॥ इति। **कालादर्शकारेणेदं** व्याख्यातम्—" पूर्वमासस्थनिमित्ताधीनमेकोद्दिष्टं तत्र कृत्वा उत्तरत्र न कुर्यात् " इति। एवं च

" सूतकांते नरः कुर्यादेकोद्दिष्टद्वयं बुधः। सूतके पतिते चापि स्वतंत्रं नातिलंघयेत् " ॥ इति **व्यास**स्मरणात्। मध्ये सूतकांतरापाते स्वतंत्रं महैकोद्दिष्टमेकादशे कृत्वा आशौचापगमानंतरमावृत्ताद्यं यथा क्रियते तद्वन्मलमासेऽप्येकादशाहे आद्यश्राद्धं कृत्वा शुद्धमासे त्वावृत्ताद्यमूनमासिकात्पूर्वं कुर्यात्। तथा च **स्मृत्यर्थसारे**–" आद्यश्राद्धविघ्ने तु भार्गववारनंदाचतुर्दशीत्रिजन्मानि त्यक्त्वा ऊनमासिकात्पूर्वमनुष्ठेयम् " इति। तथा च **पराशरः**—

" अधिमासमृतानां तु आद्यमेकं समाचरेत्। शुद्धमासे तदावृत्तं शुद्धे चैवोनमासिकम् " ॥ इति। एवं च षष्टिदिनात्मकमृतमासस्थद्वितीयातिथौ द्वितीयमासिकं कर्त्तव्यम्। तदा मृतमासात्पूर्वमासे प्रथमाब्दिकं भविष्यति

" बुधश्चांद्रमासस्यैवमामलेदिवसे सति। आद्याब्दिकं प्रकुर्वीत " इति **स्मरणात्**।

स्मृत्यंतरे—

" आवृत्तिरन्यमास्थानां द्वादशाहे सपिंडने। तथा नावर्त्तयेदाद्यं मले त्वावृत्तिरिष्यते " ॥ इति।

गभस्तिरपि—

" एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते । तत्कार्यं पर्वमासे च कालाधिक्येऽपि धर्मतः "॥ इति । अस्यार्थः **चंद्रिकायामुक्तः**—" एततसपिंडीकरणात्प्राक्तनमासिकविषयं च शब्दादुत्तरमासेऽपि कार्यम् " इति । एवं सापिंडीकरणादुत्तरभावीनि मासिकान्युभयत्र कार्याणि । तथा च **हारीतः**—

" अधिमासे न कर्त्तव्यं श्राद्धमभ्युदयं तथा । तथैव काम्यं यत्कर्म वत्सरात्प्रथमादृते ॥

" सपिंडीकरणादूर्ध्वं यत्किंचिच्छ्राद्धिकं भवेत् । इष्टं वाऽप्यथवा पूर्त्तं तन्न कुर्यान्मलिम्लुचे "॥ इति । अस्यार्थः **चंद्रिकायामुक्तः**—" सपिंडीकरणादूर्ध्वं यत्प्रथमवत्सरे प्रतिमासं क्रियमाणं त्रैपुरुषकं मासिकं श्राद्धं तन्मलिम्लुचेऽपि मासे कार्यमितिवक्तुं " वत्सरात्प्रथमादृत " इत्युक्तम् इति । अस्मिन्विषये **वसिष्ठोऽपि**—" संवत्सरमध्ये यद्यधिकमासो भवेन्मासिकार्थं दिनमेकं वृद्धिं नयेत् " इति । **सत्यव्रतः**—

" आब्दमंबुघटं दद्यादन्नमाज्येन संयुतम् । संवत्सरे विवृद्धेऽपि प्रतिमासं च मासिकम् " ॥ इति ।

गभस्तिः—

" न कुर्यान्मलमासे तु कर्म किंचित्कथंचन । मुक्त्वा नैमित्तिकश्राद्धं तद्धि तत्रैव कीर्तितम्"॥ इति ।

मरीचिरपि—

"प्रतिमासं मृताहे च यच्छ्राद्धं प्रतिवत्सरम् । मन्वादौ च युगादौ च तच्छ्राद्धमुभयत्र च"॥ इति ।

संग्रहेऽपि—

"यौगादिकं मासिकं च श्राद्धं चापरपाक्षिकम् । मन्वादिकं तैर्थिकं च कुर्यान्मासद्वयेऽपि च" ॥ इति । तैर्थिकमिति पूर्वदृष्टतीर्थविषयम् । अपूर्वदर्शनस्य निषिद्धत्वात् । **तथा**

" मासिके समनुक्रांते चांद्रमाने तिथिद्वयम् । यदि स्यात्तत्र कुर्वीत मासिकद्वितयं क्रमात्" ॥ इति । एकमेव मासिकं पूर्वत्र च परत्र च कुर्यादित्यर्थः । तथा च **स्मृत्यंतरे**—

" अन्यमासे प्रमीतानां मलमासे समागमे । एकनाम्ना तु कर्त्तव्यं मासिकद्वयमीरितम्" ॥ इति । अन्यमासे अधिमासव्यतिरिक्तमासे । **वृद्धवसिष्ठः**—

" श्राद्धीयेऽहनि संप्राप्ते अधिमासो भवेद्यदि । मासद्वयेऽपि कुर्वीत श्राद्धमेकं न दुष्यति" ॥ इति ।

व्यासः—

" षष्टिभिर्दिवसैर्मासः कथितो बादरायणैः । उत्तरे देवकार्याणि पितृकार्याणि चोभयोः "॥ इति ।

श्लोकगौतमश्च—

" द्वौ मासावेकनामानावेकस्मिन्वत्सरे यदि । उत्तरे देवकार्याणि पितृकार्याणि चोभयोः "॥ इति । एषु श्राद्धपितृकार्यशब्दो मासिकादिश्राद्धपरः । त्रैपक्षिकोनमासिकविषये **पितृमेधसारे** अभिहितम्—" तत्तन्मासवृद्धौ त्रैपक्षिकमूनानि च पूर्वत्रैव परत्र न पुनः कुर्यात् " इति । **सुधीविलोचने** व्याख्यातमेतत्—द्वितीयमासवृद्धौ मृताहास्त्रिपक्ष एव त्रैपक्षिकं कुर्यात् । न च परत्रमासे आत्रिपक्षत्वादेवं षष्ठमासवृद्धौ ऊनषाण्मासिकं षष्ठमास एव कुर्यात् । न च परमासे तस्य सप्तमत्वात् । एवं द्वादशमासवृद्धावूनाब्दिकं द्वादशमास एव कुर्यात् । न त्रयोदशमासे । " मृतेऽहनि तु कर्तव्यं प्रतिमासं तु मासिकम् " इति मृताहविहितमासिकस्यैव प्रतिमासं कर्त्तव्यत्वविधानात् ।

"त्रैपक्षिकोनषाण्मास्ये ऊनाब्दिकमथाचरेत्। एतेषामेव काले तु न पुनःकरणं भवेत्" ॥ इति ऊनानां पुनःकरणनिषेधात्। इति। अन्ये तु 'षष्टिभिर्दिवसैः' इति षष्टिदिनानामेकमासत्वस्मरणेन उत्तरमासानामपि आद्यषष्ठद्वादशमासत्वाद्वित्रिदिनैरूनेषु तु ऊनानां करणसंभवात्

" संवत्सरे प्रवृद्धे च प्रतिमासं तु मासिकम्" इति मासिकमात्रस्य प्रतिमासं कर्तव्यत्वविधानात्

"माघत्रयोदशीश्राद्धं श्राद्धान्यपि च षोडश। कार्याणि मलमासेऽपि नित्यं नैमित्तिकं तथा" ॥ इति षोडशानामपि मासिकानामुभयत्र कर्तव्यत्वविधानात्

"एकादशेऽन्हि मास्यूने आद्ये षष्ठे तथांतिमे। प्रतिमासं मृतेऽन्ह्याब्दं स्युस्त्रिपक्षे च षोडश"॥ इति त्रैपक्षिकोनमासिकानामपि षोडशमध्यपातित्वात्

" श्राद्धं दर्शेऽप्यहरहः श्राद्धमूनादिमासिकम्। तर्पणं च निमित्तस्य नित्यत्वादुभयत्र च" ॥ इति कालादर्शकारेण ऊनादीनामुभयत्र विधानात्त्रैपक्षिकोनषाण्मास्ये इति पुनः करणनिषेधस्य ऊनानां नापकर्षः स्यात्पुनरप्यपकर्षणे इति वचनेन उत्सवार्थापकर्षविषयत्वप्रतीतेः पुनःकरणमात्र विषयत्वे

" अर्वाक्संवत्सराद्यस्य सपिंडीकरणं कृतम्। षोडशानां द्विरावृत्तिं कुर्यादित्याह गौतमः" इत्यादिवचनविरोधप्रसंगात्। अतः आद्यश्राद्धादीनि षोडशमासिकानि मलमासे तदुत्तरमासे चावृत्य कार्याणीत्याहुः।

प्रथमाब्दिकविषये **हारीतः**—"असंक्रांतेऽपि कर्तव्यमाब्दिकं प्रथमं द्विजैः"॥ इति। **स एव**—

"असंक्रमे तु कर्तव्यमाब्दिकं मासिकं तथा। एवं सपिंडनांतं च वत्सरोऽथ घटादिकम्" ॥ इति।

लघु **हारीतोऽपि**—

"प्रत्यब्दं द्वादशे मासि कार्या पिण्डक्रिया सुतैः। क्वचित् त्रयोदशेऽपि स्यात् आद्यं मुक्त्वा तु वत्सरम्"॥ इति। पिण्डक्रिया मृताहश्राद्धे क्रिया। द्वादशे मासि पूर्णे सति त्रयोदशे मासीति यावत्। क्वचिदधिमासयुक्तवत्सरे त्रयोदशे मासि परिपूर्णे सति चतुर्दशमासीति यावत्। आद्यमाब्दिकं त्वधिमासवत्यपि संवत्सरे द्वादशे मासि पूर्णे सति कार्यं त्रयोदशे मासि कार्यमित्यर्थः।

चंद्रिकायाम्—

" आब्दिकं प्रथमं यत्स्यात्तत्कुर्वीत मलिम्लुचे। त्रयोदशे च संप्राप्ते कुर्वीत पुनराब्दिकम्"॥ इति। पुनराब्दिकं प्रत्याब्दिकम्। उत्तरे मासि संप्राप्ते कुर्वीतेत्यर्थः। अतः शुद्धमासमृतानां प्रथमाब्दिकं मलमासागमे सति तत्र कर्तव्यम्। द्वितीयाद्याब्दिकं तु तदुत्तरे शुद्धमासे कर्तव्यम्। न पूर्वत्र मलमासे। तथा च **सत्यव्रतः**—

"वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेऽहनि। मलमासे न कर्तव्यं व्याघ्रस्य वचनं यथा" ॥ इति।

स्मृत्यंतरे—

" मासे संवत्सरे चैव तिथिद्वैधं यदा भवेत्। तत्रोत्तरा तिथिर्ग्राह्या न पूर्वा तु मलिम्लुचा" ॥ इति। एवं च " मलिम्लुचस्तु यो मासः स मासः पापसंज्ञकः।

" त्यक्त्वा तमुत्तरे कुर्यात्पितृदेवादिकाः क्रियाः। वर्जितः पितृदेवाभ्यां स मासः पापसंज्ञितः" ॥ इत्यादीनि वचनानि शुद्धमासमृतानां प्रत्याब्दिकविषयतया योजनीयानि। मलमासमृतानां तु प्रत्याब्दिकं मलमासागमे सति तत्रैव कर्तव्यम्। तथा च **भृगुः**—

"मलमासे मृतानां तु यच्छ्राद्धं प्रतिवत्सरम्। मलमासे तु तत्कुर्यान्नान्येषां तु कथंचन" ॥ इति। अन्येषां शुद्धमासमृतानां मलमासे न कार्यम्। किंतु शुद्धमास एवेत्यर्थः।

सत्यतपाश्च—
" वर्षे वर्षे तु यच्छ्राद्धं मृताहे तु मलिम्लुचे। कुर्यात्तत्र प्रमीतानामन्येषामुत्तरत्र तु " ॥ इति।
पैठीनसिरपि—
" मलमासमृतानां तु श्राद्धं यत्प्रतिवत्सरम्। मलमासे तु कर्तव्यमन्येषां तु कदाचन " ॥ इति।
एवं च
" गर्भे वार्धुषिके भृत्ये प्रेते नित्येऽनुमासिके। आब्दिके च तथा श्राद्धे नाधिमासं विसर्जयेत् ॥
" प्रतिसंवत्सरश्राद्धं मलमासे न वर्जयेत्। नित्यानि यानि कर्माणि निमित्तार्थानि यानि च ॥
" एकसंज्ञौ यदा मासौ स्यातां संवत्सरे क्वचित्। तत्राद्ये पितृकार्याणि देवकार्याणि चोत्तरे ॥
" द्वौ मासावेकनामानौ स्यातां संवत्सरे यदि। पूर्वत्र पितृकार्याणि देवकार्याणि चोत्तरे " ॥ इति।
कात्यायनप्रचेतःशातातपपैठीनसिवचनानि मलमासमृतविषयाणि। यत्तु **गालववचनम्**—
" वर्षे वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेऽहनि। मासद्वयेऽपि तत्कुर्याद्व्याघ्रस्य वचनं यथा " ॥ इति।
यदपि **मरीचिवचनम्**—
"प्रतिमासं मृताहे यच्छ्राद्धं च प्रतिवत्सरम्। मन्वादौ च युगादौ च मासयोरुभयत्र च " ॥ इति।
यदपि **कालादर्शे वचनम्**—
"मलिम्लुचान्यमासेषु मृतानां श्राद्धमाब्दिकम्। तर्पणं च निमित्तस्य नित्यत्वादुभयत्र च"॥ इति।
एवमादीन्युभयत्र सांवत्सरिकश्राद्धप्रतिपादकवचनानि मलमासे मृतानां प्रत्याब्दिकं मलमास एव कर्तव्यम्। शुद्धमासमृतानां प्रथमाब्दिकं मलमासे द्वितीयाद्याब्दिकं तु शुद्धमासे इत्येतन्निर्णयमभिप्रेत्य पितृकार्याणि चोभयोरित्यादिवचनानि प्रवृत्तानि। **अपरार्के**—
" अधिमासमृतानां तु मृताहं तत्र नोत्तरे। अन्येषामुत्तरे कुर्यात्प्रथमं त्वधिके चरेत् " ॥ इति।
अन्यान्यपि वर्ज्यावर्ज्यकार्याणि **कालादर्शकारः** संग्रह्योदाजहार—
" आब्दोदकुंभमन्वादि महालययुगादिषु। श्राद्धं दर्शेऽप्यहरहः श्राद्धमूनादिमासिकम् ॥
" मलिम्लुचान्यमासेषु मृतानां श्राद्धमाब्दिकम्। श्राद्धं च पूर्वदृष्टेषु तीर्थेषु च युगादिषु ॥
" मन्वादिषु च यद्दानं दानं दैनंदिनं च यत्। तिलगोभूहिरण्यानां संध्योपासनयोः क्रियाः ॥
" पर्वहोमाश्चाग्रयणं साग्नेरिष्टिश्च पर्वणोः। नित्याग्निहोत्रहोमश्च देवतातिथिभोजनम् ॥
" स्नानं च स्नानविधिना चाभक्ष्यापेयवर्जनम्। तर्पणं च निमित्तस्य नित्यत्वादुभयत्र च ॥
" अनित्यमनिमित्तं च दानं च महदादिकम्। अग्न्याधानाध्वरापूर्वतीर्थयात्रामरेक्षणम् ॥
" देवारामतटाकादिप्रतिष्ठामौंजिबंधनम्। आश्रमः स्वीकृतिः काम्यवृषोत्सर्गश्च निर्गमः ॥
" राज्ञोभिषेकप्रथमचूडाकर्मव्रतानि च। अन्नप्राशनमारंभो ग्रहाणां च प्रवेशनम् ॥
" स्नानं विवाहो नामातिपन्नदेवमहोत्सवः। व्रतारंभसमाप्ती च काम्यं कर्म च पाप्मनः ॥
" प्रायश्चित्तं च सर्वस्य मलमासे विसर्जयेत् ॥
" उपाकर्मोत्सर्जने च पवित्रदमनार्पणम्। अवरोहश्च हैमंतः सर्पाणां बलिरिष्टकाः ॥
" ईशानस्य बलिर्विष्णोः शयनं परिवर्तनम्। दुर्गेंद्रस्वापनोत्थाने ध्वजोत्थानं च वज्रिणः ॥
" पूर्वत्र प्रतिषिद्धानि परत्रान्यच्च दैविकम् " इति। अत्र नित्यत्वादुभयत्र च इत्यंतेन ग्रंथेन कर्त्तव्यं संगृहीतम्। अनित्यमनिमित्तं च इत्यारभ्य वर्जयेत् इत्यंतेन वर्जनीयसंग्रहः। उपाकर्मेत्यारभ्य परत्रान्यच्च दैविकम् इत्यंतेन मलमासे वर्जितानां शुद्धमासेऽवश्यकर्त्तव्यत्वेन संग्रहः। अत्र केषुचित्साक्षिवचनान्युक्तानि अवशिष्टेष्वप्युच्यंते।

ननूदाहृते संग्रहवचने भाद्रपदापरपक्षश्राद्धस्याप्युभयत्र कर्त्तव्यता प्रतीयते । महालययुगादिष्विति तत्र पठितत्वात् । अन्यत्रापि " यौगादिकं मासिकं च श्राद्धं चापरपक्षिकम् " इति उभयत्र कर्त्तव्यता प्रतीयते । सा च स्मृतिविरुद्धा । तथा च **काठकगृह्ये**—

" महालयाष्टकाश्राद्धोपक्रमाद्यपि कर्म यत् । स्पष्टमासविशेषाख्यविहितं वर्जयेन्मले " ॥ इति ।

भृगुरपि—

"वृद्धिश्राद्धं तथा सोममग्न्याधेयं महालयम् । राज्याभिषेकं काम्यं च न कुर्याद्भानुलंघिते"॥ इति ।

पराशरः—

"यातुधानप्रियो मासः कन्यार्के जायते यदि । पित्र्यं दैवं तथा कर्म ह्युत्तरे मासि युज्यते" ॥ इति । यातुधानप्रियः अधिमास इत्यर्थः । **पितामहश्च**—

" सोमयागादिकर्माणि षष्ठीष्ट्याग्रयणं तथा । महालयाष्टकाश्राद्धे मलमासे विसर्जयेत् " ॥ इति । षष्ठीष्टिः काठकशाखादौ प्रसिद्धा । **ज्योतिःपराशरः**—

" सिनीवालीमतिक्रम्य यदा कन्यां व्रजेद्रविः । तदा कालस्य वृद्धत्वादतीतैव पितृक्रिया" ॥ इति । अतीतैव पंचमपक्षातिक्रांतैवेत्यर्थः । **नागरखंडे**—

" नभो वाथ नभस्यो वा मलमासो यदा भवेत् । सप्तमे पितृपक्षः स्यादन्यत्रैव तु पंचमः " ॥इति । एवं चोभयत्रानुष्ठानमयुक्तम् । **कालनिर्णयादौ** परिहृतमेतत् । **संग्रहवाक्ये** महालयापरपक्षिकशब्देन मघात्रयोदश्याविवक्षितत्वान्न दोष इति । ' मघात्रयोदशीश्राद्धं श्राद्धान्यपि च षोडश ' इति । तस्योभयत्रानुष्ठानमभिहितम् । यत्तु **पराशरवचनम्**—

"मासः कन्यागते भानावसंक्रांतो यदा भवेत् । पित्र्यं दैवं तदा कर्म तुलास्थे कर्तुरक्षयम्" ॥ इति तत्पूर्वोक्तकाले श्राद्धानुष्ठानासंभवे द्रष्टव्यं तस्य गौणकालत्वात् । दर्शश्राद्धमधिमासेऽपि कर्तव्यम्

" जातकर्मणि यच्छ्राद्धं दर्शश्राद्धं तथैव च । प्रतिसंवत्सरं यच्च पूर्वमासे प्रकीर्तितम् " ॥ इति **स्मरणात्** । यत्तु **ऋष्यशृंगवचनम्**—

"संवत्सरातिरेकेण मासो यः स्यान्मलिम्लुचः । तस्मिन् त्रयोदशे श्राद्धं न कुर्यादिंदुसंक्षये " ॥ इति । अत्र विरोधः परिहृतः **कालादर्शे** नास्ति विरोधः काम्यश्राद्धविषयत्वादस्य निषेधस्य । संभवति हि दर्शे काम्यश्राद्धं ' कन्यां कन्यादिन ' इत्यादिना तिथिवारनक्षत्रविहितम् । तेन काम्यश्राद्धविषयोऽयमृष्यशृंगनिषेध इति । **चंद्रिकायां तु** ऋष्यशृंगवचनमन्यथापठितम् " तस्मिंस्त्रयोदशे श्राद्धं न कुर्यान्नोपतिष्ठते " इति । **मत्स्यपुराणे**—

" दर्शे चाहरहःश्राद्धं दानं च प्रतिवत्सरम् । गोभूतिलहिरण्यानां मासे च स्यान्मलिम्लुचे " ॥ इति। **मैत्रेयसूत्रे**—" मासद्वये यद्येकराशिं संक्रमेतादित्यस्तत्राद्यो मलिम्लुचः शुद्धोऽन्यः पार्वणेष्टिरग्निहोमः अग्निहोत्राग्रयणं संध्योपासनं पार्वणस्थालीपाकश्च यान्यन्यानि नित्यानि इहापि यत्नेन क्रियंते " ॥ इति । यत्तु **पैठीनसिवचनम्**—

" श्रौतस्मार्तक्रियाः सर्वा द्वादशे मासि कीर्तिताः । त्रयोदशे तु सर्वास्ता निष्फला इति विश्रुताः ॥
" तस्मात् त्रयोदशे मासि कुर्यात्तान्न कथंचन । कुर्वन्ननर्थमेवाशु कुर्यादात्मविनाशनम् " ॥ इति अत्र निष्फला इत्यभिधानात्फलकामनया प्रवृत्तं कर्म निषिद्धं इति गम्यते । तथा च **स्मृत्यंतरम्**—
" इष्ट्यादि सर्वं काम्यं तु मलमासे विसर्जयेत् " ॥ इति । न च सर्वास्ता इत्यभिधानात्

नित्यनैमित्तिकयोरपि निषेधः शंकनीयः—" नित्यनैमित्तिके कुर्यात्प्रयतः स मलिम्लुचे " इति **बृहस्पतिवचनात्** । **जाबालिना**पि तथैवोक्तम्— " नित्यं नैमित्तिकं चैव श्राद्धं कुर्यान्मलिम्लुचे । तिथिनक्षत्रवारोक्तं काम्यं नैव कदाचन"॥ इति । योऽयं मलमासे काम्यनिषेधः असावारंभसमाप्तिविषयः " असूर्या नाम ये मासा न तेषु मम संमता । व्रतानां चैव यज्ञानां आरंभश्च समाप्तये "॥ इत्यारंभसमाप्त्योरेवाधिमासे प्रतिषेधादारंभसमाप्त्योर्मध्यपातिन्यधिमासेऽपि तदारब्धं काम्यमनुष्ठेयम् । " अधिमासे निपतितेऽप्येष एव विधिः स्मृतः " इति **स्मरणात्** । यत्तु **काठकगृह्ये** समाप्तिप्रतिपादकवचनम्— " प्रवृत्तं मलमासात्प्राक्काम्यं कर्म समापितम् । आगते मलमासेऽपि तत्समाप्यं न संशयः " ॥ इति तत्सावनमासप्रवृत्तकृच्छ्रचांद्रायणादिविषयं तत्रावश्यकं तु यत्काम्यं कर्म तन्मलमासेऽप्यनुष्ठेयम् । **तद्यथा**—"प्रक्रांते मलमासे यदि कश्चिद्बालग्रहब्रह्मराक्षसादिना गृह्यते तदा ' अग्नये रक्षोघ्ने पुरोडाशमष्टाकपालं निर्वपेत् ' इति विहिता रक्षोघ्नेष्टिः सद्य एव कर्तव्या । मलमाससमाप्तिप्रतीक्षायां बालादिमरणप्रसंगात् । यदा वृष्ट्यभावात्सस्यानि शुष्यंति मलमासश्चागतः तदा ' कारीर्या वृष्टिकामो यजेत ' इति विहितेष्टिर्न कालविलंबं सहते । एवमन्या इष्टयः स्मार्तान्यप्यावश्यकान्युदाहरणीयानि । नित्यनैमित्तिकयोरपि यदनन्यगतिकं यस्यातिक्रमे प्रायश्चित्तप्राप्तिर्यस्य च मासांतरे विहितकालालाभः तदेव मलमासे कार्यम् " अनन्यगतिकं नित्यं कुर्यान्नैमित्तिकं तथा " इति **स्मरणात्** । **काठकगृह्येऽपि** — " मलेऽनन्यगतिं नित्यां कुर्यान्नैमित्तिकीं क्रियाम् " इति । **चंद्रिकायाम्**— " मलं वदंति कालस्य कालं कालविदोऽधिकम् । नेह कुर्याद्विशेषेज्यामन्यत्रावश्यकद्विधेः " ॥ इति । अनन्यगतिकानि च नित्यानि **गृह्यपरिशिष्टे** उदाहृतानि " अवषट्कारहोमश्च पर्व चाग्रयणं तथा । मलमासे तु कर्त्तव्यं काम्या इष्टीस्तु वर्जयेत् " ॥ इति । अवषट्कारहोमः अग्निहोत्रौपासनवैश्वदेवादयः । पर्व दर्शपूर्णमासौ पार्वणस्थालीपाकश्च । दर्शादीनां नित्यत्वं अकरणे प्रत्यवायश्रवणात् । कालांतरनिमित्तप्रायश्चित्ताम्नानादवगंतव्यम् । तथा **चाथर्वणिका** आमनंति " यस्याग्निहोत्रमदर्शमपौर्णमासमनाग्रयणं न तिथिवर्जितं चाहुतं वैश्वदेवम् । विधिना हुतमासप्तमांस्तस्य लोकान् हिनस्ति " ॥ इति । **तैत्तिरीयकेऽपि**— " अग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेद्यो दर्शपूर्णमासयाजी सन्नमावास्यां पौर्णमासीं वातिपादयेत " इति । गत्यंतरयुक्तानि तु नित्यानि तत्र वर्ज्यानि । तदुक्तं **काठकगृह्यपरिशिष्टे**— " सोमयागादिकर्माणि नित्यान्यपि मलिम्लुचे । षष्ठीष्ट्याग्रयणाधानचातुर्मास्यादिकान्यपि ॥ " महालयाष्टकाश्राद्धोपाकर्माद्यपि कर्म यत् । स्पष्टमासविशेषाख्यविहितं वर्जयेन्मले " ॥ इति । न चाग्रयणस्य सगतिकागतिकयोरुदाहरणं विरुद्धमिति शंकनीयम् । तस्य मलमासे विकल्पितत्त्वात् । तदाह **पैठीनसिः**–"संक्रांतिरहिते मासि कुर्यादाग्रयणं न वा" इति । अनन्यगतिकानि नैमित्तिकानि ग्रहणस्नानादीनि । तेषां मलमासेऽपि कर्त्तव्यतामाह **यमः**— " चंद्रसूर्यग्रहे स्नानं श्राद्धं दानं जपादिकम् । कार्याणि मलमासेऽपि नित्यं नैमित्तिकं तथा " ॥ इति । **सगतिकानि** नैमित्तिकानि जातेष्ट्यादीनि ' वैश्वानरं द्वादशकपालं निर्वपेत्पुत्रे जाते ' इति

---

१ **क**–नित्य ।

विहिताया इष्टेराशौचेऽवसिते यथानुष्ठानं तद्वन्मलमासेऽप्यवसितेऽनुष्ठानं तु शक्यत्वात्सगतित्वम्। **शंखोऽपि**—

"सावकाशं तु यत्कार्यं न कुर्यान्मासि दूषिते। कुर्यान्निरवकाशं तु नित्यं नैमित्तिकं तथा"॥ इति।

वृद्धगार्ग्योऽपि—

"नामान्नप्राशनं चौलं विवाहो मौंजिबंधनम्। निष्कामजातकर्मापि काम्यं व्रतविसर्जनम्॥
"अस्तगे च गुरौ शुक्रे वृद्धे बाले मलिम्लुचे। उद्यापनमुपारंभं व्रतानां नैव कारयेत्"॥ इति।

जातकर्मादीनां चौलात्पूर्वभाविनां निषेधः स्वकालातिपत्तिविषयः। **तथा गार्ग्यः**—

"नामकर्म च जातेष्टिं यथाकालं समाचरेत्। अतिपाते तु कुर्वीत प्रशस्ते मासि पुण्यभे"॥

अत्रिः—

"मासप्रोक्तेषु कार्येषु मूढत्वं गुरुशुक्रयोः। अधिमासादिदोषाश्च न स्युः कालविधेर्बलात्॥
"गर्भादिप्राशनांतानि प्राप्तकालं न लंघयेत्"॥ **बृहस्पतिः**—

"बाले वा यदि वा वृद्धे शुक्रे चास्तंगते गुरौ। मलमास इवैतानि वर्जयेद्देवदर्शनम्"॥ इति।

गार्ग्यः—

"अनादिदेवताद्दष्ट्याशुचि स्यान्नष्टभार्गवे। मलमासेऽप्यनावृत्ततीर्थयात्रां विसर्जयेत्"॥

मात्स्येऽपि—

"आधानं यज्ञकर्मापि प्रायश्चित्तं व्रतानि च। न कुर्यान्मलमासेऽपि शुक्रगुर्वोरुपप्लवे"॥ इति।

दर्शपूर्णमासाग्निहोत्राणां यज्ञत्वेऽपि प्रथमानुष्ठानमेव तेषां निषिद्धम्। तथा च **स्मृत्यंतरे**—

"आरंभदर्शपूर्णेष्ट्योरग्निहोत्रस्य चोदितम्। प्रतिष्ठापनकर्माद्या मलमासे विवर्जयेत्"॥ इति।

ज्योतिःशास्त्रे—

"तत्र दत्तमदत्तं स्याद्धुतं न हुतमेव च। सुजप्तमप्यजप्तं स्यान्नोपवासः कृतो भवेत्॥
"न यात्रा न विवाहं च न च वास्तुनिवेशनम्। न प्रतिष्ठां च देवानां प्रासादग्रामभूरुहाम्॥
"न हिरण्यं सुवासांसि धारयेदिति निश्चयः"॥ इति। **वृद्धवसिष्ठः**—

"वापीकूपतटाकानां प्रतिष्ठा यज्ञकर्म च। न कुर्यान्मलमासे तु महादानव्रतानि च"॥ इति।

महादानानि तुलापुरुषादीनि षोडश कनकादीनि दश। एतच्च पूर्वं निरूपितम्। **हारीतः**—

"उपक्रमं वृषोत्सर्गं काम्यमुत्सवमष्टकाः। मासि वृद्धौ पराः कार्या वर्जयित्वा तु पैतृकम्"॥ इति।

मरीचिः—"गृहप्रवेशगोदानस्नानाश्रममहोत्सवान्। न कुर्यान्मलमासे तु गुरौ शुक्रे तथास्तगे"॥

शुक्रबृहस्पत्योर्मौढ्यादिप्रतिपादनपूर्वकं मलमासवर्ज्यानि। तत्रातिदिशति **कालादर्शकारः**—

"मिहिरेण सहात्यंतं संनिकर्षाद्बृहस्पतेः। कवेश्चादर्शनं यत्तन्मौढ्यमाहुर्महर्षयः॥
"ततोऽर्वाग्वार्धकं मौढ्यादूर्ध्वं बाल्यं प्रकीर्तितम्। पक्षः प्राक् दिशि वृद्धत्वं पश्चात् पंचदिनं कवेः॥
"शैशवं प्राक् पंचाहं पश्चाद्दशदिनं स्मृतम्। शैशवं वार्धकं पक्षः प्राक्पश्चाच्च बृहस्पतेः॥
"मलिम्लुचे निषिद्धानि कर्माण्यत्रापि वर्जयेत्"। इति। मिहिरः सूर्यः। कवेः शुक्रस्य। प्राग्दिशि-वृद्धत्वं पक्षः पंचदशदिनानि पश्चात् प्रतीच्यां दिशि पञ्चदिनं वृद्धत्वं स्मृतम्। शैशवं बाल्यं प्राक् प्राच्यां दिशि पंचदिनं स्मृतम्। पश्चात् प्रतीच्यां दिशि दशदिनं स्मृतम्। प्राच्यां प्रतीच्यां दिशि च वार्धकं शैशवं च बृहस्पतेः पक्षः। "मलिम्लुचे निषिद्धानि कर्माणि गुरुशुक्रयोः" मौढ्ये

वार्धकशैशवयोरपि वर्जयेदित्यर्थः । " दशाहं शुक्रवार्धक्ये सप्ताहं वार्धकं भवेत् । शुक्रः पञ्चदिनं वृद्धः " इत्यादिभेदस्तु गणितभेदापेक्षया । वाक्यकरणं गणितसारं परहितस्फुटं दृग्गणितं चेति गणितभेदाः । तेषु भेदेषु दश दिनानि पौर्वापर्येणास्तमयानि भवन्ति क्रमेण दिनत्रयतारतम्यम् । मलमासस्यैव द्विराषाढासंज्ञकं विशेषमाह **वृद्धमिहरः**—

" माधवाद्येषु षट्स्वेकमासि दर्शद्वयं यदा । द्विराषाढः स विज्ञेयः शेते कर्कटकेऽच्युतः ॥
" मेषादिमिथुनांतेषु यदा दर्शद्वयं भवेत् । अब्दांतरे तदाऽवश्यं मिथुनार्थे हरिः स्वपेत् ॥
" कर्कटादित्रिके वापि यदा दर्शद्वयं भवेत् । अब्दान्तरे तदावश्यं कर्कटाके हरिः स्वपेत्"॥ इति ।

अधिमासे क्षयमासेऽपि वर्ज्यावर्ज्यविवेकसमान इत्युक्तं **काठकगृह्ये**—

" रविसंक्रमहीने यो वर्ज्यावर्ज्य विधिः स्मृतः । स एव तद्विसंक्रांतौ मलमासेऽप्युदीरितः " ॥ इति ।

कालादर्शेऽपि—

" मलमासे द्विसंक्रांतौ संक्रांतिरहिते तथा । कार्यवर्ज्यविवेकः स्यादिति शास्त्रविदो विदुः "॥ इति ।

तदेवं कार्याकार्यविवेकः पंचधा संपन्नः । तत्र किंचिन्मलमास एव कर्त्तव्यम्[1] । तद्यथा मलमासमृतानां यदाकदाचित्प्रत्याब्दिकमन्यमासमृतानां प्रथमाब्दिकं च किंचित्तु शुद्धमास एव कर्त्तव्यं तद्यथोपाकर्मादि । किंचिदुभयत्रापि कर्तव्यं तद्यथाब्दोदकुंभादि । किंचिदुभयोरन्यतरस्मिंन्निमित्तवशात्कर्त्तव्यं तद्यथा द्वादशाहादिसपिंडादि । किंचिन्मलमासे वर्ज्यं तद्यथा नित्यमनित्यं चेत्यादि अनित्यमनिमित्तम् । **इति मलमासनिर्णयः** ॥

दर्शश्राद्धनिर्णयः । अथामावास्याश्राद्धम् । तत्र **लोकाक्षिः**—

"श्राद्धं कुर्यादवश्यं तु प्रमीतपितृको द्विजः । इंदुक्षये मासि मासि वृद्धौ प्रत्यब्दमेव च" ॥ इति ।

मनुः (३।१२७)—

"प्रथिता प्रेतकृत्यैषा पित्र्यं नाम विधुक्षये । तस्मिन्युक्तस्यैति नित्यं प्रेतकृत्या हि लौकिकी"॥ इति ।

विधुक्षये अमावास्यायां यत्पित्र्यं नाम कर्म क्रियते सैषा प्रेतकृत्येति प्रथिता लोके । प्रेताः पितृपितामहादयः तदर्था क्रिया प्रेतकृत्या लौकिकी लोकविदिता प्रेतकृत्या तस्मिन्विधुक्षये युक्तस्य श्रद्धधानस्य नित्यं प्रतिमासमेति आगच्छति कर्त्तव्यत्वेनोपतिष्ठते इत्यर्थः । **गौतमोऽपि (१४।१०२)**–" अथ श्राद्धममावास्यायां पितृभ्यो दद्यात् " इति । **हारीतोऽपि**—

" यथाकथंचिन्नित्यानि कुर्यादिंदुक्षयादिषु " इति । **विष्णुपुराणे**—

"श्राद्धं श्रद्धान्वितः कुर्वन्प्रीणयत्यखिलं हि तत् । मासि मास्यसिते पक्षे पंचदश्यां नरेश्वर"॥ इति ।

स्मृत्यंतरे—

" प्रमीतपितृकः कुर्याद्दर्शाब्दिकमहालयान् । जनन्यामपि जीवंत्यामेष धर्मः सनातनः " ॥

व्याघ्रोऽपि—

" न निर्वपति यः श्राद्धं प्रमीतपितृको द्विजः । इंदुक्षये मासि मासि प्रायश्चित्तीयते हि सः "॥ इति ।

कार्ष्णाजिनिः—

" दर्शे स्नात्वा पितृभ्यस्तु दद्यात्कृष्णतिलोदकम् । अन्नं च विधिवद्दद्यात्संततिस्तेन वर्धते ॥
" दर्शश्राद्धमतिक्रम्य यो भुंक्ते तु नराधमः । चंडालत्वमवाप्नोति जन्मानि नव पंच च " ॥ इति ।

पितामहोऽपि—

१ **कखग**–कर्तव्यम् ।

" अमावास्याव्यतीपातपौर्णमास्यष्टकासु च। विद्वान् श्राद्धमकुर्वाणः प्रायश्चित्तीयते तु सः "॥ इति। व्यतीपातलक्षणमुक्तं **माधवीये**--

" श्रवणाश्विधनिष्ठार्द्रानागदैवतमस्तकैः। यद्यमा रविवारेण व्यतीपातः स उच्यते"॥ इति। नागदैवतमाश्लेषानक्षत्रम्। मस्तकं मृगशिरः। यद्यमावास्या श्रवणादीनामन्यतमनक्षत्रेण रविवारेण च युक्ता स व्यतीपात इत्यर्थः। एतेषु वचनेषु नित्यत्वसाधकनित्यादिपदश्रवणाद्दर्शाष्टकादिश्राद्धं नित्यम्। नित्यत्वसाधकानि च **कालनिर्णये** दर्शितानि--

" नित्यं सदा यावदायुर्न कदाचिदतिक्रमेत्। इत्युक्त्यातिक्रमे दोषश्रुतेरत्यागचोदनात्॥
" फलश्रुतेर्वीप्सया च तन्नित्यमिति कीर्तितम् "॥ इति। अत्र चोद्देश्यदेवताः पितृपितामहाप्रपितामहाः। मातामहमातृपितामहमातृप्रपितामहाश्च

" दर्शश्राद्धं तु यत्प्रोक्तं पार्वणं तत्प्रकीर्तितम्। सपिंडीकरणं कृत्वा कुर्यात्पार्वणवत्सदा "॥ इति **शातातपस्मरणात्**। " त्रीनुद्दिश्य तु यत्तद्धि पार्वणं मुनयो विदुः " इति **कण्वस्मरणाच्च** दर्शश्राद्धस्य पार्वत्वेन तत्र पित्रादीनां त्रयाणामुद्देश्यत्वम्।

" पितॄन्मातामहांश्चैव द्विजः श्राद्धेन तर्पयेत्। अनृणः स्यात्पितॄणां तु ब्रह्मलोकं स गच्छति॥
" कृत्वा तु पैतृकं श्राद्धं पितृप्रभृतिषु त्रिषु। कुर्यान्मातामहानां च तथैवानृण्यकारणात्॥
" पितरो यत्र पूज्यंते तत्र मातामहा अपि। अविशेषेण पूज्याः स्युर्विशेषान्नरकं व्रजेत्॥
" पार्वणं कुरुते यस्तु केवलं पितृहेतुतः। मातामहान्न कुरुते पितृहा स प्रजायते "॥
याज्ञवल्क्येन कालास्तु अमावास्यादिनोदितः

" अविशेषेण पित्र्यस्य तथा मातामहस्य च। अमावास्यादिकालेषु तद् ज्ञेयं न मृतेऽहनि॥
" अमावास्यादिकालेषु कालैकत्वात्सह क्रिया। मृताहनि तु तद्भेदान्न युज्येत्तु सह क्रिया॥
" कर्षूसमन्वितं मुक्त्वा तथाद्यश्राद्धषोडश। प्रत्याब्दिकं च शेषेषु पिंडाः स्युः षडिति स्थितिः "॥

इत्यादि**स्मरणा**द्दर्शमहालयादिषु मातामहादीनां त्रयाणामप्युद्देश्यत्वं सिद्धम्। न चात्र मात्रादीनां मातामह्यादीनां च पृथगुद्देश्यत्वमस्ति। ' अष्टकासु च वृद्धौ च ' इत्यादिना अष्टकादिभ्योऽन्यत्र दर्शादिश्राद्धे तन्निषेधस्योक्तत्वात्। न च ' अन्यत्र पतिना सह ' इति वचनात्सपत्नीकानां वरणं कार्यमिति वाच्यम्। तासामुद्देश्यत्वाभावेऽपि पतिभोजनेन सह तासामपि तृप्तिर्भवतीति **चंद्रिकादौ** तस्य व्याख्यातत्वात्। अतोऽष्टकादिभ्योऽन्यत्र दर्शादौ पृथगुद्देश्यत्वं सपत्नीकत्वेनोद्देश्यत्वं च नास्तीति **निबंधनेषु** निर्णीतम्। यत्तु

" सपत्नीकत्वहानेऽपि पितुर्दर्शे समाचरेत्। पितामहादिषु तथा सपत्नीकत्वसंभवात् "॥ इति तन्मातरि जीवंत्यामपि पित्रादीनां पितामह्यादीनां तिसृणां च दर्शे पिंडतिलोदकदानं कार्यमित्येवं परम्। तदुक्तं **चंद्रिकायाम्**—

" न मातृषु पृथक्श्राद्धं मुनिभिर्यत्र कीर्तितम्। पत्युः पिंडोदकं साध्वी भुंक्ते याऽनपकारिणी "॥ यत्तु **विष्णुवचनम्**—" यानुद्दिश्य भवेच्छ्राद्धं तेभ्यस्तर्पयति द्विजः " इति तत्प्रत्याब्दिकविषयम्।

" प्रत्यब्दांगं तिलं दद्यान्निषिद्धेऽपि परेऽहनि। वर्गैकस्य वचो येषामन्येषां तु विसर्जयेत्"॥ इति **स्मरणात्**। येषां वच उद्देश्यत्वोक्तिरित्यर्थः। एवं चामावास्यायां मात्रादीनामुद्देश्यत्वं नास्ति।

पित्रादीनां भोजने सपत्नीकत्वेन वरणमपि नास्ति । तिलोदकं पिंडदानं च अस्ति मात्रादीनां मातामह्यादीनां च । शिष्टाचारोऽपि तथैवेत्याहुः । **स्मृत्यंतरे**—
"स्वभर्तृप्रभृतित्रिभ्यः स्वपित्रादिभ्य एव च । विधवा कारयेच्छ्राद्धं नित्यं नैमित्तिकं तथा" ॥ इति ।
तिलोदकं दर्शे श्राद्धात्पूर्वं कार्यम्
" अमाष्टकासु संक्रांतौ पातादौ ग्रहणेषु च । स्नात्वा तिलोदकं दत्वा ततः श्राद्धं समाचरेत् ॥
" दर्शे तिलोदकं पूर्वं पश्चाद्द्यान्महालये । प्रत्यब्दे तु कृते श्राद्धे परेऽहनि तिलोदकम् " ॥
इत्यादि **स्मरणात्** । दर्शप्रत्याब्दिके सति विशेष उक्तः **स्मृत्यन्तरे**—
" आब्दिके समनुप्राप्ते दर्शश्चेत्तर्पणं न हि । ब्राह्मणान्भोजयेत्पूर्वं पिंडात्पूर्वं तु तर्पणम् " ॥ इति ।
हारीतः—
" वसित्वा वसनं शुक्लं स्थल आस्तीर्णबर्हिषि । विधिज्ञस्तर्पणं कुर्यात्सर्वान्पितृगणांस्तथा " ॥ इति ।
स्मृत्यंतरे—
" दर्शे तिलोदकं दद्याच्छुष्कवासा जलाद्बहिः । तर्पयेदार्द्रवासाश्चेत् त्रिरात्रमशुचिर्भवेत् " ॥
मरीचिः—"उपरागे पितृश्राद्धे तीर्थेऽमायां च संक्रमे । निषिद्धेऽपि हि सर्वत्र साक्षतैस्तर्पयेत्तिलैः" ॥
कात्यायनः—" सव्यान्वारब्धेन पाणिना तर्पयेत्तिलाभावे सुवर्णेन दर्भैर्वा यत्राशुचिस्थलं वा दर्भहीनं वा काममप्सु तर्पयेत् । तिलग्रहणे तर्जन्यंगुष्ठयोगं वर्जयेत् । सा राक्षसी मुद्रा । दक्षिणांगुष्ठेनैवांजलौ तिलान्प्रक्षिपेत् " । इति । **योगयाज्ञवल्क्यः**—
" आवाह्य पूर्वं तन्मंत्रैरास्तीर्य च कुशाञ्छुभान् । गोत्रनामस्वधाकारैस्तर्पयेदनुपूर्वशः " ॥ इति
" आयात पितरः " इति पितॄनावाह्य " सकृदाच्छिन्नम् " इति दर्भानास्तीर्य तेषु वत्सगोत्रान् यज्ञशर्मणः पितॄन्स्वधा नमस्तर्पयामि इति तर्पयेदित्यर्थः । **चन्द्रिकायाम्**—
"सव्यं जानु ततोऽन्वाच्य पाणिभ्यां दक्षिणामुखः । तल्लिङ्गैस्तर्पयेन्मन्त्रैः सर्वान् पितृगणांस्तथा ॥
"उदीरतामंगिरस आयंत्वित्यूर्जम् इत्यपि । पितृभ्य इति ये चेह मधुवाता इतित्यृचम् ॥
"पितॄन्ध्यायन्प्रसिंचेद्वै जपेन्मंत्रान्यथाक्रमम् । तृप्यध्वमिति च पठेत्ततः प्रांजलिरानतः ॥
" नमो व इति जप्त्वा वै ततो मातामहानपि । तर्पयेदात्मवंशस्यार्थं परमं धर्ममास्थितः ॥
" गोत्रनामस्वधाकारैस्तर्पयेदनुपूर्वशः " ॥ इति । **स्मृत्यन्तरे**—
"तर्पयेत् तिलसंमिश्रं पितॄनुद्दिश्य वाग्यतः । आसीनः प्राङ्मुखः कुर्याद्दक्षिणाभिमुखोऽञ्जलिम्" ॥ इति ।
अत्र प्राङ्मुखत्वदक्षिणाभिमुखत्वयोर्विकल्पः । सर्वमेतन्निरूपितमधस्तात् । जीवपितृको मातरि मृतायामपि दर्शादिश्राद्धं तर्पणं च न कुर्यात् । प्रमीतपितृकस्तु जीवंत्यामपि मातरि कुर्यात् ।
तत्र **लौकाक्षिः**—
" अमाश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षिकम् । न जीवपितृकः कुर्यात्तिलैः कृष्णैश्च तर्पणम् ॥
" प्रमीतपितृकः कुर्याद्दर्शाब्दिकमहालयान् । जनन्यामपि जीवंत्यामेष धर्मः सनातनः " ॥
क्रतुश्च—"अन्वष्टकासु संक्रांतौ मन्वादिषु युगादिषु । चंद्रसूर्यग्रहे पाते स्वेच्छया पूज्ययोगतः ॥
" जीवत्पिता नैव कुर्याच्छ्राद्धं काम्यं तथाखिलम् " ॥ इति । **कात्यायनः**—
" सपितुः पितृकृत्येषु ह्यधिकारो न विद्यते । न जीवन्तमतिक्रम्य किंचिद्दद्यादिति श्रुतिः " ॥ इति ।
कालादर्शेऽपि—"न जीवपितृकः कुर्यात् श्राद्धं दर्शादि चोदितम्" ॥ इति । अस्यापवाद उक्तस्तत्रैव—

---

१ क–कथम् । २ क्ष–अमाष्टकासु ।

" पित्रेष्ट्यां पितृयज्ञे च वृद्धौ मातुर्मृतेऽहनि । विप्रसंपदि तीर्थेषु सोऽपि श्राद्धं समाचरेत् ॥
" पितुर्या देवता प्रोक्तास्ता एवात्र च देवताः । मृताहे मातरः शेषे सर्वा एव प्रकीर्त्तिताः"॥ इति ।
पित्र्येष्ट्यां चातुर्मास्येषु पित्र्येष्टिर्नामास्ति । तस्यां पितृयज्ञे पिंडपितृयज्ञे । वृद्धौ विवाहादिनिमित्ताया मातृमृताहे । विप्रसंपदि त्रिमधुस्त्रिसुपर्ण इत्यादिगुणयुक्तविप्रसंभवे । तीर्थेषु महानदीस्नानेषु च गयास्थानस्य तीर्थत्वेऽपि निषेधान्न तत्र कुर्यात् । सोऽपि जीवत्पिता पितृश्राद्धं कुर्यात् । पितृकर्तृके श्राद्धे या देवताः प्रोक्तास्ता एवात्र पुत्रकर्तृकेऽपि श्राद्धे देवताः । मातुर्मृताहे मातरो देवताः । शेषे पित्र्येष्ट्यादिश्राद्धकर्मणि सर्वा देवता इत्यर्थः । तदुक्तं **मैत्रेयगृह्यपरिशिष्टे**—

" उद्वाहे पुत्रजनने पित्र्येष्ट्यां सौमिके मखे । तीर्थे ब्राह्मण आयाते षडेते जीवतः पितुः ॥
" महानदीषु तीर्थेषु सर्वासु च गयामृते । जीवत्पिताऽपि कुर्वीत श्राद्धं पार्वणधर्मवत् " ॥ इति ।

हारीतः—

" येभ्य एव पिता दद्यात्तेभ्यः कुर्वीत साग्निकः । अनग्निकोऽपि कुर्वीत जन्मादौ वृद्धिकर्मणि " ॥ इति ।
व्याध्यादिनिमित्ताशक्त्या सर्वांगयुक्तं श्राद्धं कर्त्तुमक्षमो दर्शादौ संकल्पश्राद्धं कुर्यात् ।
कालादर्शे—

" अशक्त्या पार्वणं श्राद्धं यथावत्कर्त्तुमक्षमः । पिंडार्घ्यादिविहीनं तु संकल्पश्राद्धमाचरेत् " ॥ इति ।

स्मृत्यंतरेऽपि—

"अङ्गानि यस्तु दर्शादिर्यदा कर्त्तुं न शक्नुयात् । संकल्पश्राद्धमेवासौ कुर्यादर्घ्यादिवर्जितम्"॥ इति ।
आपस्तंबेऽपि—" संकल्पश्राद्धे अर्घ्यावाहनाग्निकरणपिंडदानानि वर्जयेत् " ॥ इति । **संग्रहे**—
" संकल्पं तु यदा कुर्यान्न कुर्यात्पात्रपूरणम् । विकिरश्च न दातव्यः पिंडांश्चैव न निर्वपेत्"॥ इति ।
शातातपः—" पिंडनिर्वापरहितं यत्तु श्राद्धं विधीयते । स्वधानयनलोपोऽत्र विकिरश्च विलुप्यते ।
" अक्षय्यदक्षिणास्वास्ति सौमनस्यं यथास्थितम् " ॥ इति । **स्मृत्यंतरे**—

" आवाहनाग्नौकरणं स्वधानिनयनं तथा । विकिरं पिंडदानं च संकल्पे पंच वर्जयेत् " ॥ इति ।
" अन्नश्चेदप्यवेलायामापदि ब्रह्मवित्तमः । संकल्पेन विधानेन कुर्याच्छ्राद्धं न पार्वणम् " ॥ इति

आवाहनशब्देन मंत्रावाहनमुच्यते । मानसावाहनस्य न निषेधः । स्वधानिनयनमर्घ्यदानम् । शेषं व्यक्तम् ।

दर्शश्राद्धकालनिर्णयः । अथ दर्शश्राद्धकालः । पार्वणत्वात्तस्य कर्मकालत्वमपराह्णस्य कुतपस्य प्रारंभकालत्वमित्येतदाब्दिके निर्णये प्रपंचितम् । तथा सत्यपराह्णस्य मुख्यकर्मकालत्वात्पूर्वेद्युरेव वापरेद्युरेव वाऽपराण्हव्यापिन्यमावास्या ग्रहीतव्या । पूर्वेद्युरेवापराण्हव्याप्तौ **जाबालिः**—
" पूर्वाण्हे चेदमावास्या नापराण्हे भवेद्यदि । भूतविद्धैव सा ग्राह्या पितृकार्येषु सर्वदा " ॥ इति ।
प्रतिपदि पूर्वाण्हे भवेच्चेदपराण्हे यदि न भवेदित्यर्थः । **तथा**—
" प्रतिपद्यप्यमावास्या पूर्वाण्हव्यापिनी यदि । भूतविद्धैव सा ग्राह्या पित्र्ये कर्मणि सर्वदा" ॥ इति ।
हारीतोऽपि—

"सस्यां संध्यागतः सोमो मृणाल इव दृश्यते । अपराण्हे तदा तस्यां पिंडानां करणं ध्रुवम्"॥ इति ।
याज्ञवल्क्यः—"यो यस्य विहितः कालस्तत्कालव्यापिनी तिथिः " ॥ इति ।

यत्तु **कार्ष्णाजिनिनोक्तम्**—

" भूतविद्धाममावास्यां मोहादज्ञानतोऽपि वा । श्राद्धकर्माणि ये कुर्युस्तेषामायुः प्रहीयते " ॥ इति । तदपराण्हव्याप्त्यभावविषयं द्रष्टव्यम् । अपराण्हव्यापिन्या उत्तरतिथेर्ग्राह्यतामाह **हारीतः**—

" अपराण्हः पितॄणां तु याऽपराण्हानुयायिनी । सा ग्राह्या पितृकार्ये तु न पूर्वाण्हानुयायिनी " ॥ अस्तमयकालव्यापिनी पूर्वा न ग्राह्येत्यर्थः । उभयत्रापराण्हव्यापित्वं द्वेधा भिद्यते । एकदेशेन कार्त्स्न्येन वेति । एकदेशव्याप्तिश्च द्वेधा भिद्यते । वैषम्येण साम्येन चेति । तत्र वैषम्येणैकदेशव्याप्तौ महत्त्वेन निर्णयः

"अपराण्हद्वयव्यापिन्यमावास्या यदा भवेत् । तत्राल्पत्वमहत्वाभ्यां निर्णयः पितृकर्मणि " ॥

इति **स्मरणान्**महत्येव ग्राह्येत्यभिप्रायः । तथा च **शिवराघवसंवादे**—

"अल्पापराण्हे त्याज्याऽमा ग्राह्या स्यादधिका भवेत्"॥ इति । साम्येनोभयत्रैकदेशव्याप्तिस्तत्तिथिगतैर्वृद्धिक्षयसाम्यैस्त्रिधा भिद्यते । तत्र खर्वादिशास्त्रेण निर्णयः । खर्वादिवाक्यं च पूर्वमुक्तम् । तच्च सर्वतिथिसाधारण्येन प्रवृत्तत्वादमावास्यायामपि वर्त्तते । तथाऽमावास्यायामेव विशेषेण **शिवराघवसंवादे** स एवार्थो दर्शितः—

"अमावास्या तु या हि स्यादपराण्हद्वये समा । क्षये पूर्वा परा वृद्धौ साम्येऽपि च परा स्मृता"॥ इति ।

स्मृत्यंतरेऽपि—

"तिथिक्षये सिनीवाली तिथिवृद्धौ कुहूर्मता । साम्येऽपि च कुहूर्ज्ञेया वेदवेदांगवेदिभिः" ॥ इति । चतुर्दशीमिश्रा सिनीवाली प्रतिपन्मिश्रा कुहूः । तथा च **व्यासः**—

" दृष्टचंद्रा सिनीवाली नष्टचंद्रा कुहूर्मता " ॥ इति । **नारदो**ऽपि—

"अपराण्हद्वयव्यापिन्यमावास्या यदा भवेत् । क्षये पूर्वा तु कर्त्तव्या वृद्धौ साम्ये तथोत्तरा"॥ इति। कात्स्न्र्येनोभयत्रापराण्हव्याप्तावपि तिथिवृद्धित्वात्कुहूरेव ग्राह्या । यदा दिनद्वयेऽप्यपराण्हं न स्पृशति तदा साग्न्यनग्निभेदेन व्यवस्था द्रष्टव्या । तथाह **जाबालिः**—

"अपराण्हद्वयव्यापी यदि दर्शः तिथिक्षये । आहिताग्नेः सिनीवाली निरग्न्यादेः कुहूर्मता" ॥ इति । आदिशब्दात्स्त्रीशूद्रयोर्ग्रहणम् । तथा च **लोकाक्षिः**—

"सिनीवाली द्विजैः कार्या साग्निकैः पितृकर्मणि । स्त्रीशूद्रैश्च कुहूर्ज्ञेया तथा चानग्निकैर्द्विजैः"॥ इति । एवं शास्त्रार्थे व्यवस्थिते सति अन्यानि बहुविधानि सर्वाणि वचनानि प्रोक्तेषु अमावास्याभेदेष्वन्यतमविषयत्वेन यथायोग्यं योजनीयानि । तथा हि तत्र तावद्बोधायन आह—

" मध्यान्हात्परतो यत्र चतुर्दश्यनुवर्त्तते । सिनीवाली तु सा ज्ञेया पितृकार्येषु निष्फला" ॥

बृहस्पतिरपि—

"मध्यान्हाद्या त्वमावास्या परस्तात्संप्रवर्तते । भूतविद्धा तु सा ज्ञेया न सा पंचदशी भवेत्"॥ इति । अत्र मध्यान्हादूर्ध्वमपराण्हमतिक्रम्य परस्तादमावास्या प्रवर्तत इति व्याख्येयम् । तदेतद्वचनद्वयं परेद्युरेवापराण्हव्याप्तौ योजनीयम् । यत्तु **बोधायनवचनम्**—

" घटिकैकाऽप्यमावास्या प्रतिपत्सु न चेत्तदा । भूतविद्धैव सा ग्राह्या दैवे पित्र्ये च कर्मणि"॥इति । प्रतिपत्सु घटिकैकापि कर्मकालसंबंधिनी यदि न स्यादित्यर्थः । तदेतद्वचनं पूर्वेद्युरेवापराण्हव्याप्तौ द्रष्टव्यम् । यच्च **हारीतेनोक्तम्**—

"पूर्वाण्हे चेदमावास्या अपराण्हे न चेत्तु सा । प्रतिपद्यपि कर्त्तव्यं श्राद्धं श्राद्धविदो विदुः "॥ इति ।

दिनद्वयेऽप्यपराण्हव्यापित्वाभावे सति कुतपकालव्यापित्वेन अनग्निकेन परदिने कर्तव्यमित्येवंपरम्। तथा च **तेनैवोक्तम्**—

"भूतविद्धा त्वमावास्या प्रतिपन्मिश्रिताऽपि वा। पित्र्ये कर्मणि विद्वद्भिर्ग्राह्या कुतपकालिकी"॥ इति।

श्लोकगौतमोऽपि—

"पूर्वाण्हे चेत्प्रतिपदो भूते सायममा यदि। आरभ्य कुतपे श्राद्धं रौहिणं नैव लंघयेत्"॥ इति।

भृगुरपि—

"मध्यंदिनं पितॄणां यदमावास्यांत्यलिप्तिका। तस्माद्यदन्हि पर्वांतस्तत्र श्राद्धं समाचरेत्"॥ इति।

यत्र मध्यान्हे दर्शावसानं तत्र श्राद्धमित्यर्थः। यत्तु **भरद्वाजवचनम्**—

"यदि संगवकालस्पृगमावास्यांत्यनाडिका। तदा तस्मिन्दिने श्राद्धं कुर्यात्पूर्वेद्युरन्यथा"॥ इति।

यदपि **नारदवचनम्**—

"संगवस्पृगमावास्या चेदहन्येव पार्वणम्। ऊना चेद्धटिकाषट्काद्भवेत् पूर्वदिने विधिः"॥ इति।

तदमाश्राद्धविषयम्। तच्च **वक्ष्यते**। यत्तु **हारीतवचनम्**—

"कन्यामकरमीनेषु तुलायां मिथुने तथा। भूतविद्धैव सर्वेषां पूज्या भवति यत्नतः"॥ इति।

तद्व्रतविषयम्। तथा च **जाबालिः**—

"तुलायां मकरे मीने कन्यायां मिथुनेऽप्यमा। भूतविद्धा व्रते ग्राह्या शेषेषु प्रतिपद्युता"॥ इति।

सर्वमेतत्संगृहीतं **कालनिर्णये**—

"श्राद्धेऽपराण्हकालीनो दर्श आब्दिकवन्मतः। दिनद्वयेऽप्येकदेशवृद्धौ ग्राह्यो महत्त्वतः॥
"तुल्यत्वे चेदेकदेशे क्षये पूर्वोऽन्यथोत्तरः। कृत्स्नव्याप्तौ द्वयोरन्होरुत्तरास्तिथिवृद्धितः॥
"साग्न्यनग्निव्यवस्था स्यान्न स्याच्चेदपराण्हयोः। पूर्वेद्युः साग्निकः कुर्यादुत्तरेद्युरनग्निकः"॥ इति।

अत्र दिनद्वयेऽप्यपराण्हे स्पर्शाभावपक्षे साग्न्यनग्निव्यवस्था कृता **षड्धर्मीये**—

"दर्शो यत्रापराण्हं स्पृशति स दिवसः श्राद्धकालो द्वयोश्चेत्
"यत्रानल्पः स तु स्याद्यदि भवति समः क्षीयमाणे तु पूर्वः।
"वृद्धौ साम्येऽप्यनग्नेर्युवतिवृषलयोश्च श्व एवाहिताग्नेः
"पूर्वो न त्वापराण्हं स्पृशति स कुतपः श्राद्धकालः प्रशस्तः"॥ इति। पूर्वदिने परदिने वाऽपराण्हस्पर्शे तदेव दर्शस्पर्शयुक्तं दिनं ग्राह्यम्। उभयत्र स्पर्शे यत्रापराण्हे दर्शस्पर्शोऽनल्पः अधिकः तदेव दिनं ग्राह्यम्। द्वयोरपराण्हयोः स्पर्शसाम्ये क्षयपक्षे सर्वैः पूर्वदिनं ग्राह्यम्। वृद्धौ साम्ये च साग्नेः पूर्वं निरग्नेस्त्रीशूद्रयोश्च परदिनं ग्राह्यमित्यर्थः। प्रकारान्तरमुक्तं **कालादर्शे**—

"अमावास्या द्विधा शुद्धा भूतविद्धा च सा पुनः। चतुर्थी प्रतिपद्येव भूत एवापराण्हिकी॥
"तथा विद्धोभयत्र स्यादुभयत्र तथाविधा। शुद्धा निःसंशया विद्धा प्रथमा परकालिकी॥
"द्वितीया तु भवेत्पूर्वा तृतीया तु तिथेः क्षये। साग्न्यनग्निस्त्रीशूद्राणां पौर्वापर्यात् व्यवस्थिता॥
"वृद्धौ परैव सर्वेषां सैव साम्येऽपि संमता। चतुर्थ्यपि परा ग्राह्या यत्सा कुतपकालिकी"॥ इति।

उभयत्रापराण्हिकी तृतीया सा अमावास्याक्षये आहिताग्नेः पूर्वा अनग्न्यादीनां परा तिथिवृद्धौ साम्ये च परैवेत्यर्थः। अत्र कृत्स्नापराण्हव्यापित्वे तदेकदेशव्यापित्वेऽप्ययमेव निर्णय इति स्पर्शाधिक्यमनादृत्योक्तम्। एतत् "तत्राल्पत्वमहत्त्वाभ्यां निर्णयः पितृकर्मणि" इत्यादि**स्मरणादुपेक्ष्यम्**।

---

१ क–यात्वमा।

एवं च पूर्वत्र वा परत्र वैकस्मिन्दिने अमावास्यास्पर्शे अपराण्हे सति तदेव ग्राह्यम् । दिनद्वयेऽप्येकदेशवैषम्येणापराण्हव्याप्तौ यत्राधिकव्याप्तिस्तदेव ग्राह्यम् । साम्येनैकदेशव्याप्तौ अमावास्याक्षये पूर्वदिनं वृद्धौ उत्तरदिनं दिनद्वयेऽपि कृत्स्नापराण्हव्याप्तावुत्तरदिनं दिनद्वयेऽप्यपराण्हस्पर्शाभावे आहिताग्नेः पूर्वदिनमनाहिताग्नेः स्त्रीशूद्राणां परादिनमिति **कालनिर्णयोक्तदर्शनिर्णयः** शिष्टसंमतः । आहिताग्नेर्दर्शश्राद्धमेव मासिश्राद्धं नापरमित्याह **मनुः** (३।१२२)—

" पितृयज्ञं तु निर्वर्त्य विप्रश्चंद्रक्षयेऽग्निमान् । पिंडान्वाहार्यकं श्राद्धं कुर्यान्मासानुमासिकम् ॥
" पिंडानां मासिकं श्राद्धमन्वाहार्यं विदुर्बुधाः । न दर्शेन विना श्राद्धमाहिताग्नेर्द्विजन्मनः "॥ इति ।

अग्निमान्विप्रः आहिताग्निः द्विजश्चंद्रक्षये अमावास्यायां पितृयज्ञं श्रौतं पिंडपितृयज्ञं निर्वर्त्य पिंडान्वाहार्यकं पिण्डपितृयज्ञांगभूतानां पिंडानामनु पश्चाद्राहार्यं प्रयोज्यम् । आहार्यमेवाहार्यकं मासानुमासिकं प्रतिमासं कुर्यान्मासिकं श्राद्धं मासिश्राद्धमेव पिंडानामन्वाहार्यं पश्चात्प्रयोज्यं विदुर्बुधाः । दर्शश्राद्धेन विना मासिश्राद्धं नापरमित्यर्थः । अस्य कालमाह **कात्यायनः**—

" पिंडान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते । वासरस्य तृतीयेंऽशे नातिसंध्यासमीपतः ॥
" अष्टमेंऽशे चतुर्दश्याः क्षीणो भवति चंद्रमाः । अमावास्याष्टमांशे च पुनः कीलो भवेद्गुरुः"॥ इति ।

अत्र 'नातिसंध्यासमीपतः' इति सायंकालस्य निषेधादपराण्हः कर्मकाल इति **कालनिर्णये** व्याख्यातम् । यत्तु **गौतमवचनम्**—

" अमावास्योदये यत्र विद्यते तत्र वासरे । प्रतिपद्यपि कुर्वीत श्राद्धकर्म विशेषतः "॥ इति ।

यच्च **बृहस्पतिवचनम्**—

" अमावास्या कलामात्रमुदये यत्र विद्यते । तत्र स्नानजपश्राद्धव्रतहोमादि कारयेत् "॥ इति ।

तत्र श्राद्धशब्दः पिंडपितृयज्ञपरः । अन्यथा " सिनीवाली द्विजैर्ग्राह्या साग्निकैः पितृकर्मणि "। इतिवचनविरोधप्रसंगात् । एवं च प्रतिपद्दिने किंचिद्मावास्यासंबंधेऽपि तत्र पिंडपितृयज्ञः पूर्वदिने श्राद्धं कर्त्तव्यम् । न चैवं " पितृयज्ञं तु निर्वर्त्य " इति पितृयज्ञस्य पूर्वभावित्ववचनं विरुध्येतेति शंकनीयम् । तस्य प्रायिकाभिप्रायत्वात् । न पुनः सर्वत्र कृतपिंडपितृयज्ञस्यैवाग्निमतः श्राद्धाधिकार इति **मनुना** नियम्यते । परमार्थतस्तु पितृयज्ञशब्दस्तर्पणपरः । तथा च **मत्स्यपुराणे**—

"पितृयज्ञं तु निर्वर्त्य तर्पणाख्यं तु योऽग्निमान् । पिंडान्वाहार्यकं कुर्याच्छ्राद्धमिंदुक्षये सदा" ॥ इति ।

आहिताग्नेर्ब्राह्मणभोजनात्मकमपि श्राद्धं नावश्यकं तत्फलस्यान्यथासिद्धत्वादित्याह **मनुः** (३।२८३)—

" यदेवं तर्पयत्यद्भिः पितॄन् स्नात्वा द्विजोत्तमः । तेनैव सर्वमाप्नोति पितृयज्ञक्रियाफलम्" ॥ इति ।

तेन आहिताग्निविहितेन पितृयज्ञेनैव ब्राह्मणभोजनात्मकश्राद्धफलमाप्नोतीत्यर्थः । एवं चाहिताग्नेस्तिलतर्पणं पिंडपितृयज्ञश्चावश्यकः । ब्राह्मणभोजनात्मकं पिंडान्वाहार्यकश्राद्धं तु वैकल्पिकमित्युक्तं भवति ।

पिंडान्वाहार्यकश्राद्धं प्रकृत्य जीवपितृकस्य पिंडदाने विशेषमाह **मनुः** (३।२२०)—

" ध्रियमाणे तु पितरि पूर्वेषामेव निर्वपेत् । विप्रवद्वापि तच्छ्राद्धे स्वकं पितरमाशयेत् ॥
" पिता यस्य तु वृत्तः स्याज्जीवेच्चापि पितामहः । पितुः स्वनाम संकीर्त्य कीर्तयेत्प्रपितामहम् ॥
" पितामहोऽपि तच्छ्राद्धं भुंजीतेत्यब्रवीन्मनुः । कामं वा तदनुज्ञातो युक्तमेव समाचरेत्" ॥ इति ।

---

१ ख–किल ।

विप्रवन्निमंत्रितविप्रवद्वृत्तः मृतपितुः पितामहस्य वा भोजनपक्षे द्वयोरेव पिंडदानम्। पिंडदानस्थाने भोजनविधानात्

“ जीवमानेन देयं स्याद्यस्मात् भरतसत्तम। तस्माज्जीवपिता कुर्यात् द्वाभ्यामेव न संशयः ”॥ इति **भविष्यत्पुराण**वचनाच्च। “पितुः स्वनाम संकीर्त्य कीर्तयेत्प्रपितामहम्’ इत्यस्मिन्पक्षे प्रपितामहपितुरपि पिंडं दद्यात्। ‘त्रिषु पिंडः प्रवर्त्तते’ इति **नियमात्**। “कामं वा तदनुज्ञात” इत्यनेन पक्षांतरमुक्तम्। तदनुज्ञातः युक्तसमाचरणं चात्र पितामहस्यापि पिंडदानं समस्तपिंडविलोपो वा कुतः पक्षांतरस्यासंभवादिति **मानवे** व्याख्यानेऽभिहितम्। तथा **निगमे**—“ यो वा जीवति पितॄणां तं भोजयेत्पितृस्थान इत्येके जीवतामजीवतां वा देयमेवेति हिरण्यकेतुः ” इति। ततश्च “ सपितुः पितृकृत्येषु ह्यधिकारो न विद्यते। न जीवन्तमतिक्रम्य किंचिद्द् दद्यादिति श्रुतिः ” इति **कात्यायन**वचनं आहिताग्निकर्तृकपिंडान्वाहार्यकश्राद्धे न प्रवर्त्तते। तथा च **सुमंतुः**—

“ न जीवपितृकः कुर्याच्छ्राद्धमग्निमृते द्विजः। येभ्य एव पिता दद्यात् तेभ्यः कुर्वीत साग्निकः॥

“ साग्निकोऽपि न कुर्वीत जीवति प्रपितामहे ”॥ इति प्रपितामहग्रहणं पितृपितामहोपेतप्रपितामहप्रदर्शनार्थम्। अत एव **विष्णुः** (७५।२)—“ पितरि पितामहे प्रपितामहे च जीवति नैव दद्यात्” इति। **स एव** (७१।१)—“ पितरि जीवति श्राद्धं कुर्यात्। स येषां पिता कुर्यात्तेषां कुर्यात्पितरि पितामहे च येषां पितामहः ”। इति पित्रादिषु द्वयोरेकस्य वा मरणेऽपि **तेनैवोक्तम्** (७५।४-७)—“ यस्य पिता प्रेतः स्यात्स पित्रे पिंडं निधाय प्रपितामहात्परं द्वाभ्यां दद्यात्। यस्य पितामहः प्रेतः स्यात्स तस्मै पिंडं निधाय प्रपितामहात्परं द्वाभ्यां दद्यात्। यस्य पितामहः प्रपितामहश्च प्रेतौ स्यातां स पित्रे पिंडं निधाय पितामहात्परं द्वाभ्यां दद्यात् ” इति। **पिंडपितृयज्ञे**ऽप्याह। **यज्ञपार्श्वः**—

“ होमांतः पितृयज्ञः स्याज्जीवे पितरि जानतः। पितरं भोजयित्वाऽपि पिंडौ निर्वृणुयात्परौ॥

“ उभौ यस्य व्यतीतौ तु जीवेच्च प्रपितामहः। पिंडौ निर्वृणुयात्पूर्वौ भोजयेत्प्रपितामहम्”॥ इति **यमो** विशेषमाह—

“ पित्र्यं जीवपितुर्नोक्तमग्नौ होमोऽपि पाक्षिकः। येभ्यो वाऽपि पिता तेभ्यो दद्याद्वैतानकर्मणि॥

“दद्यात्तेभ्यः परेभ्यस्तु जीवेच्च त्रितयं यदि”॥ इति। पित्र्यं पिंडदानम्। वैतानकर्मणि पिंडपितृयज्ञे इत्यर्थः। **भविष्यत्पुराणे** तु निषेधः कृतः—

“ प्रत्यक्षमर्चनं श्राद्धे निषिद्धं मनुरब्रवीत्। पिंडनिर्वापणं चापि महापातकसंमितम् ” ॥ इति। मनुरत्र ज्ञानवान्। मनुना प्रत्यक्षार्चनस्योक्तत्वात्। **आपस्तंबः**—“ यदि जीवपिता न दद्यादा होमात्कृत्वा विरमेत् ”॥ इति। **आश्वलायनस्तु**—“ पिंडान्निर्वृणुयात्पराचनिपाणिः पित्रे पितामहाय प्रपितामहायैतत्तेऽसौ ये च त्वामन्विति तस्मै ययेषां प्रेताः स्युः ” ॥ इति। **गणकारिकः**[1]—

‘ प्रत्यक्षमितरानर्चयेत्तदर्थत्वात्सर्वेभ्य एव निर्वृणुयात् ” इति। **तौल्वलिः**—“ क्रियागुणत्वादपि जीवान्त आदिभ्यः प्रेतेभ्य एव वृणुयात् ” इति। **गौतमः**—“ क्रिया ह्यर्थकारिता उपायविशेषो जीवमृतानां न परेभ्योऽनधिकारात् पिंडं दद्यादितरांस्तु जीवतः प्रत्यक्षं न जीवेभ्यो वृणुयान्न जीवांतर्हितेभ्यो जुहुयाज्जीवेभ्यः सर्वहुतं सर्वजीवनः ” इति। एषां पित्रादीनां

---

१ कखग-गौणकारिक।

त्रयाणां मध्ये यो यः प्रेतस्तस्मै तस्मै निर्वृणुयात्पिंडं दद्यादितरांस्तु जीवतः प्रत्यक्षमर्चयेत्तर्पयेत्। तदर्थत्वात्पित्रादितृप्तिकरपिंडार्थत्वात्प्रत्यक्षार्चनस्येति **गौणकार्ष्णिमतम्**। सर्वेभ्यः पित्रादिभ्यस्त्रिभ्या जीवेभ्यः प्रेतेभ्यश्च निर्वृणुयात्। क्रियां प्रति तेषां पित्रादीनां गुणभूतत्वादिति **तौल्वलिमतम्**। अपि जीवान्ते पित्रादिषु त्रिषु मध्ये यो जीवति तदंते आ त्रिभ्यः प्रेतेभ्यः जीवाव्यवहितेभ्यः निर्वृणुयात्। क्रिया ह्यर्थकारिता। अर्थो मरणं तत्प्रवर्तिता यतः क्रियेति **गौतममतम्**। उपायेत्यादि। जीवतां मृतानां च पिंडदाने उपायशेषो वक्ष्यत इत्यर्थः। अत्रोपन्यस्तेषु पक्षेषु तावद्गौतममतं दूषयति 'न परेभ्यः' **इति**। पित्रादिभ्यस्त्रिभ्यः परेभ्यो न निर्वृणुयादनधिकारात्पित्रे ददाति पितामहाय ददाति प्रपितामहाय ददाति इति **श्रुतेः**। तेभ्यः परेषां पिंडदानेऽनधिकार आहिताग्नेरित्यर्थः। सर्वप्रतिषेधेऽप्यनधिकारादित्ययमेव हेतुः **गौणकार्ष्णिमतं** दूषयति। न प्रत्यक्षमिति। प्रेतेभ्यो दद्यादिति **श्रुतेः**। 'प्रत्यक्षमर्चनं श्राद्धे निषिद्धं मनुरब्रवीत्' इति **स्मृतेश्च**। **तौल्वलि**—मतं दूषयति न जीवेभ्य इति। सर्वपक्षानुगतं दूषणमाह 'न जीवांतर्हितेभ्य' इति। अथोपायविशेष उच्यते। 'जुहुयाज्जीवेभ्य' इति। पिंडनिर्वापमन्त्रेण स्वाहांतेन जीवेभ्यो जुहुयात्। प्रेतेभ्यो निर्वृणुयात्। सर्वे जीवनश्चेत्सर्वेषां पिंडानां हवनमित्यर्थः। यथास्वसूत्रमिह व्यवस्था।

अमायां योगविशेषः। अथान्यान्यप्यमावास्याविषयाणि **वचनानि लिख्यंते**।

विष्णुपुराणे—

"अमावास्या यदा मैत्रविशाखास्वातियोगिनी। श्राद्धे पितृगणस्तृप्तिमवाप्नोत्यष्टवार्षिकीम्॥
"अमावास्या यदा पुष्ये रौद्रेऽथर्क्षे पुनर्वसौ। द्वादशाब्दं तथा तृप्तिं प्रयांति पितरेऽर्चिताः॥
"वासवाजैकपादर्क्षे पितॄणां तृप्तिमिच्छताम्। वारुणे चाप्यमावास्या देवानामपि दुर्लभा॥
"न वस्वर्क्षेष्वमावास्या यदेतेष्ववनीपते"॥ इति। मैत्रमनूराधानक्षत्रं रौद्रमार्द्रानक्षत्रं वासवं धनिष्ठा अजैकपादृक्षं पूर्वाभाद्रपदा वारुणं शतभिषङ्नक्षत्रम्। **तत्रैव—**

"माघासिते पंचदशी कदाचिदुपैति योगं यदि वारुणेन।
"ऋक्षेण कालः स परः पितॄणां न ह्यल्पपुण्यैर्नृप लभ्यतेऽसौ॥
"गायंति चैतत्पितरः कदानु वर्षामघातृप्तिमवाप्य भूयः।
"माघासितांते शुभतीर्थतोयैः यास्याम तृप्तिं तनयादिदत्तैः॥
"काले धनिष्ठा यदि नाम तस्मिन्भवेत्तु भूपाल तदा पितृभ्यः।
"दत्तं जलान्नं प्रददाति तृप्तिं वर्षायुतं तत्कुलजैर्मनुष्यैः"॥ इति। तस्मिन्काले माघासितपंचदश्यामित्यर्थः। **महाभारतेऽपि—**

"तत्रैव चेद्भाद्रपदस्तु पूर्वः काले तदा यत्क्रियते पितृभ्यः।
"श्राद्धं परां तृप्तिमुपेत्य तेन युगान्सहस्रं पितरः पिबंति[१]"॥ इति। तत्रैव माघासितपंचदश्यामित्यर्थः। **महाभारत एव—**

"श्रवणाश्विधनिष्ठार्द्रा नागदैवतमापतेत्। रविवारयुतामायां व्यतीपातः स उच्यते॥
"व्यतीपाताख्ययोगोऽयं शतार्कग्रहसंनिभः॥
"अमार्कपातश्रवणैर्युक्ता चेत्पुष्यमाघयोः। अर्धोदयः स विज्ञेयः कोटिसूर्यग्रहैः समः॥
"बुधवारेण योगोऽयं महोदय इति स्मृतः"। इति। अर्कः आदित्यवारः। पातः व्यतीपातः।

---

१ ग-स्वपन्ति।

संग्रहे—" पातस्यान्ते पूर्वभागस्त्वमायाः श्रोणामध्यं भास्करस्योदयश्च ।
" भानोर्वारे त्वेष चार्धोदयः स्यात्सौम्ये वारे तमन्हा पूर्वमाहुः " इति । एष भानुवारः । एषा अमातिथिर्वा न तु भास्करोदयमात्रं पूर्वोक्तभारतवचनात् । भास्करोदयसमये एतादृग्योगश्चेद्विशेषः । उदयानन्तरममा चेदपि भारतवचनानुरोधेन योगे अर्धोदय एव । **व्यासः**—
"अमा वै सोमवारेण रविवारेण सप्तमी । चतुर्थी भौमवारेण विषुवैः सदृशं फलम्"॥ इति। **शंखोऽपि**—
" अमावास्या तु सोमेन सप्तमी भानुना सह । चतुर्थी भूमिपुत्रेण सोमपुत्रेण चाष्टमी ॥
" चतस्रस्तिथयस्त्वेताः सूर्यग्रहणसंनिभाः " ॥ इति । **कालादर्शे** संगृह्यैतदुक्तम्—
" मैत्रेंद्राग्निस्वातियुक्ते दर्शे श्राद्धं करोति यः । प्रीतिं पितॄणामादध्यात्सोऽलभ्यामष्टवार्षिकीम् ॥
" आदित्यपुष्यरौद्रर्क्षयुक्तो दर्शो यदा तदा । श्राद्धदः प्रीतिमादध्यात्पितॄणां द्वादशाब्दिकम् ॥
" वारुणाजैकपादृक्षवासवैर्यद्यमा युता । तदा श्राद्धकृदादध्यात्पितॄणां तृप्तिमुत्तमाम् ॥
" पूर्वभाद्रपदं प्राप्तामाध्यमाश्राद्धदो नरः । योगसाहस्रिकीं तृप्तिं पितॄणामुपकल्पयेत् ॥
" वासवेन यदा युक्ता सैवास्यामन्नमंबु वा । दत्तं वर्षायुतं तृप्तिं पितॄणां जनयेत् ध्रुवम् ॥
" रविवारसमेतायाममायां यदि वासवम् । वैष्णवं रौद्रमाहेयमाश्विनं च भवेदुडु ॥
" यस्माद्व्यतीपातयोगः शतार्कग्रहसंनिभः । अर्कश्रुतिव्यतीपातयुक्तामापुष्यमाघयोः ॥
" असावर्धोदयो योगः कोट्यर्कग्रहसंनिभः । सोमवारयुतो दर्शः सूर्यग्रहणसंनिभः " ॥ इति ।

स्मृत्यंतरे—
" अमा सोमेन भौमेन गुरुणा वा युता यदि । सा तिथिः पुष्कला नाम सूर्यग्रहणसंनिभा"॥ इति ।

इत्यमावास्यानिर्णयः ।

अष्टकाश्राद्धनिरूपणम् । अथाष्टकाः । ताश्चतस्रः मार्गशीर्षादिमासचतुष्टयापरपक्षाष्टम्यः । तथा च **शौनकः**—" हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाः " इति । अत्र विशेषमाह **विष्णुः** (७४)—" अष्टकास्तिस्रः अष्टम्योऽन्वष्टक्याः पूर्वेद्युः प्रौष्ठपदे हेमंतशिशिरयोरपरपक्षेषु " इति । अन्वष्टक्या नवम्यः पूर्वेद्युः सप्तम्यः । **कालादर्शे** च—
" मार्गशीर्षे च पौषे च माघे प्रौष्ठे च फाल्गुने । कृष्णपक्षेषु पूर्वेद्युरन्वष्टक्यं तथाष्टमी " ॥
" इति तिस्रोष्टकास्तासु श्राद्धं कुर्वीत पार्वणम्"॥ इति। अत्र पार्वणोक्त्या पित्रादीनां त्रयाणामुद्देश्यत्वम् । ' अष्टकासु च वृद्धौ च ' इति पूर्वोक्तवचनेन मात्रादीनामपि तिसृणामुद्देश्यत्वम् । तथा च **पितृमेधसारे**—" अष्टकास्वष्टौ विप्रा द्वौ विप्रौ विश्वेदेवौ पित्रादयस्त्रयो मात्रादयस्त्रयः " इति । " पितरो यत्र पूज्यन्ते तत्र मातामहा अपि " इति **वचनात्** मातामहादीनामपि त्रय एको वेति केचित् । तन्न । अष्टानामेव विधानात् । **आपस्तंबः**—" तमष्टधा कृत्वा ब्राह्मणेभ्य उपहरति" इति । **तात्पर्यदर्शने** व्याख्यातमेतत्— अष्टधा कृत्वेति अष्टभ्यो ब्राह्मणेभ्य इति विधानम् । तेनेह ब्राह्मणैकत्वबाध इति । **यस्त्वापस्तंबेनोक्तम्**—" या माघ्याः पौर्णमास्या उपरिष्टाद्व्यष्टका तस्यामष्टमी ज्येष्ठया संपद्यते तामेकाष्टकेत्याचक्षते " इति । व्यष्टकाकृष्णपक्ष इत्यर्थः । ' एतदपूपं चतुःशरावम् ' इति इत्यादेर्वक्ष्यमाणप्रयोगस्य माघकृष्णाष्टम्यामेव प्रापणार्थम् । न त्वष्टकांतरान्वष्टक्यादिनिरासार्थम् । तथा च **तेनैवोक्तं**—" श्वोभूतेन्वष्टकां तस्या मासि श्राद्धेन कल्पो व्याख्यातः " इति । **आश्वलायनः**—
"हेमन्तशिशिरर्तोस्तु चतुर्णामपि सत्तमः । समर्थैरष्टका कार्या कृष्णानामष्टमीषु च " ॥

१ ग-न्तः । २ क-शिवोऽपि ।

" एकस्यां ह्यशक्तेन कार्या गृह्यस्य वर्त्मना " ॥ **बोधायनोऽपि**—" उपरिष्टान्माघ्याः पौर्णमास्या अपरपक्षस्य सप्तम्यामष्टम्यां नवम्यामिति क्रियेतापि वाष्टम्यामेव" इति । एतच्चाष्टकाश्राद्धं नित्यम् ।
" अमावास्याव्यतीपातपौर्णमास्यष्टकासु च । विद्वान् श्राद्धमकुर्वाणः प्रायश्चित्तीयते हि सः" ॥ इति **पितामहस्मरणात्** । तथा चानुकल्पमाहाश्वलायनः—" अप्यनुडुहो यवसमाहरेदग्निना वा कक्षमुपोषेदेषाष्टकेति न त्वेवानष्टकः स्यात् " इति । **स्मृत्यंतरेऽपि**—
" अपि वानूचानेभ्य उदकुंभमाहरेदपि वा श्राद्धमंत्रानधीयीत न त्वेवानष्टकः स्यात् " ॥ इति ।
आश्वलायनस्मृतौ—

" तिलोदकं प्रदातव्यं निर्धनेनातिभक्तितः । अष्टकाश्राद्धसिद्ध्यर्थं प्रोष्ठपन्माघमासयोः ।
"अष्टकां ये न कुर्वन्ति स्वशक्त्या मासयोस्तयोः । अन्त्यायां मध्यमायां वा सिताष्टम्यां यतात्मना॥
" ते विरूपा दरिद्राश्च भविष्यन्ति भवे भवे " ॥

अथ **महालयश्राद्धं निरूप्यते** ॥ तत्र **वृद्धमनुः**—
" नभस्यस्यापरः पक्षो यत्र कन्यां व्रजेद्रविः । स महालयसंज्ञः स्याद्गजछायाह्वयस्तथा" ॥ इति ।
मार्कंडेयः—
" कन्यागते सवितरि दिनानि दशपंच च । पार्वणेनैव विधिना तत्र श्राद्धं विधीयते ॥
" प्रतिपद्धनलाभाय द्वितीया हि प्रजाप्रदा । वरार्थिनां तृतीया च चतुर्थी शत्रुनाशिनी ॥
" श्रियं प्राप्नोति पंचम्यां षष्ठ्यां पूज्यो भवेन्नरः । गणाधिपत्यं सप्तम्यामष्टम्यां बुद्धिमुत्तमम् ॥
" स्त्रियो नवम्यां प्राप्नोति दशम्यां पूर्णकामताम् । वेदांस्तथाप्नुयात्सर्वानेकादश्यां क्रियापरः ॥
" द्वादश्यां हेमलाभं च प्राप्नोति पितृपूजकः । प्रजा मेधां पशून्पुष्टिं स्वातंत्र्यं बुद्धिमुत्तमाम् ॥
" दीर्घमायुरथैश्वर्यं कुर्वाणस्तु त्रयोदशीम् । अवाप्नोति न संदेहः श्राद्धं श्राद्धपरो नरः ॥
" युवानः पितरो यस्य मृताः शस्त्रेण वै हताः । तेन कार्यं चतुर्दश्यां तेषामृद्धिमभीप्सता ॥
" श्राद्धं कुर्वन्नमावास्यामन्नेन पुरुषः शुचिः । सर्वान्कामानवाप्नोति स्वर्गे चात्यंतमश्नुते" ॥ इति ।
यत्तु शाट्यायनिनोक्तम्—
"नभस्यस्यापरे पक्षे तिथिषोडशकं च तत् । कन्यास्थार्कान्वितं चेत्स्यात्स कालः श्राद्धकर्मणः"[1] ॥ इति ।
तदाश्वयुक्शुक्लप्रतिपदा सह नभस्यापरपक्षस्य षोडशत्वाभिप्रायेण तस्यापि क्षीणचंद्रत्वाविशेषेणापरपक्षानुप्रवेशसंभवात् । तदाह **देवलः**—
" अहः षोडशकं यत्तु शुक्लप्रतिपदा सह । चंद्रक्षयाविशेषेण सापि दर्शात्मिका स्मृता " ॥ इति ।
कालादर्शेऽपि—
" नभस्यस्यापरः पक्षः शुक्लप्रतिपदा सह । महालय इति प्रोक्तो गजछायाह्वयस्तथा " ॥ इति ।
श्लोकगौतमः—
" कन्यागते सवितरि यान्यहानि तु षोडश । क्रतुभिस्तानि तुल्यानि संपूर्णवरदक्षिणैः" ॥ इति ।
अत्र पंचदशदिवसषोडशदिवसविध्यो व्रीहियववद्विकल्प इति **माधवीये** अभिहितम् । नभस्यापरपक्षस्य कन्यास्थार्कान्वितत्वेन प्रशस्ततरत्वमुच्यते । तदभावेऽपि प्रशस्तत्वात् । तदाह **जाबालिः**
" आगतेऽपि रवौ कन्यां श्राद्धं कुर्वीत सर्वथा । आषाढ्याः पंचमः पक्षः प्रशस्तः पितृकर्मसु ॥

१ ख–मानन्य ।

"पुत्रानायुस्तथारोग्यमैश्वर्यमतुलं तथा। प्राप्नोति पंचमे दत्वा श्राद्धं कामांस्तथा वरान्"॥ इति **बृहन्मनुः**—"आषाढीमवधिं कृत्वा पंचमं पक्षमाश्रिताः।

"कांक्षंति पितरः क्लिष्टा अन्नमप्यन्वहं जलम्। तस्मात्तत्रैव दातव्यं दत्तमन्यत्र निष्फलम्॥

"आषाढीमवधिं कृत्वा यः पक्षः पंचमो भवेत्। तत्र श्राद्धं प्रकुर्वीत कन्यास्थार्को भवेन्न वा"॥ इति। **जातूकर्णिश्च**—

"नैयोगिकी तिथिर्येषा पक्षो वै पंचमः स्मृतः। तस्मिन् हुतं हविर्दत्तं पितॄणामक्षयं भवेत्॥" इति। **कौत्सः**—

"उत्तराहस्तचित्रासु कन्यायां भास्वति स्थिते। कृष्णपक्षे गजच्छायासमानः पितृकर्मसु॥

"पार्वणस्यावृता कुर्यादक्रोधः श्राद्धमत्वरः"॥ इति। आवृता प्रकारेण। **आदित्यपुराणे**—

"पक्षांतरेऽपि कन्यास्थे रवौ श्राद्धं प्रशस्यते। कन्यागते पंचमे तु विशेषेणैव कारयेत्"॥ इति। **शाट्यायनिः**—

"पुण्यः कन्यागतः सूर्यः पुण्यः पक्षश्च पंचमः। कन्यास्थार्कान्वितः पक्षः सोऽत्यंतं पुण्यमुच्यते"॥ आदिमध्यावसानेषु यत्र क्वचन कन्यार्कस्थार्कान्वितत्वेन कृत्स्नः पक्षः पूज्य इत्यर्थः। अत एव **कार्ष्णाजिनिः**—

"आदौ मध्येऽवसाने वा यत्र कन्यां व्रजेद्रविः। स पक्षः सकलः पूज्यः श्राद्धषोडशकं प्रति"॥ इति। **कालादर्शेऽपि**—

"रवेः कन्यागतत्वेन पक्षोऽयं पूज्य इष्यते। आदावेवान्तरान्ते वा शस्तः कन्यागते रवौ"॥ इति। **पितृमेधसारे**—"सिंहांतं कृष्णपक्षस्यादौ मध्येंऽते वा कन्यार्कसंक्रमे तु कृत्स्नः पक्षो महालये प्रशस्तः। पंचम्यादि दशम्यादि अष्टम्यादि वा दर्शांतं क्वचिद्दिने वा यथाशक्ति महालयश्राद्धं कुर्यात्"॥ इति। प्रतिपदादिदर्शांतं शुक्लप्रतिपदन्तं वा श्राद्धं कर्तुमशक्तश्चेत्पंचम्यादिदर्शांतमष्टम्यादिदर्शांतं दशम्यादिदर्शान्तं वा चतुर्थ्या ऊर्ध्वमनिषिद्धे एकस्मिन् दिने वा यथाशक्ति कुर्यादित्यर्थः। तदाह **गौतमः** —"अपरपक्षे श्राद्धं पितृभ्यो दद्यात्पंचम्यादिदर्शांतमष्टम्यादि-सर्वस्मिन्वा" इति। **ब्रह्मांडपुराणे**—

"नभस्य कृष्णपक्षे तु श्राद्धं कुर्याद्दिने दिने। त्रिभागपक्षहीनं वा त्रिभागं चार्धमेव वा"॥ इति। पंचम्यादिदशम्याद्यष्टम्यादि वेत्यर्थः। **तथा कालादर्शे**—

"पक्षाद्यादि च दर्शांतं पंचम्यादि दिगादि च। अष्टम्यादि यथाशक्ति कुर्यादापरपक्षिकम्"॥ इति। पक्षादिः प्रतिपद्दिगादि दशम्यादि। अत्र सर्वत्र दर्शांतमिति संबध्यते। **कात्यायनः**—

"अपरपक्षे श्राद्धं कुर्वीत ऊर्ध्वं चतुर्थ्यां च यदहः संपद्यते सप्तम्या ऊर्ध्वं यदहः संपद्यते ऋते चतुर्दशी शाकेनापि अपरपक्षं नातिक्रमेत्" इति। चतुर्थ्याः सप्तम्या वा ऊर्ध्वं यस्मिन्नहनि द्रव्यादि संपद्यते तस्मिन्वा कुर्यादित्यर्थः। अनेन एकस्मिन्नहनि श्राद्धं कुर्यादित्युक्तं भवति। तथा च **गौतमः**—

"सर्वस्मिन्वा द्रव्यदेशब्राह्मणसंनिधाने वा कालनियमः शक्तितः" इति। **नागरखंडेऽपि**—

"आषाढ्याः पंचमे पक्षे कन्यासंस्थे दिवाकरे। यो वै श्राद्धं नरः कुर्यादेकस्मिन्नपि वासरे॥

"तस्य संवत्सरं यावत्तृप्ताः स्युः पितरो ध्रुवम्"॥ इति। **वसिष्ठः**। "ऊर्ध्वं चतुर्थ्याः पितृभ्यो दद्यात्" इति।

मनुरपि (३।२७६)—

"कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम्। श्राद्धे प्रशस्ताः तिथयो यथैता न तथेतराः"॥ इति। पक्षमहालये नैव चतुर्दश्यादि वर्ज्यम्

"नभस्य कृष्णपक्षे तु श्राद्धं कुर्याद्दिने दिने। नैव नंदादि वर्जं स्यान्नैव वर्ज्या चतुर्दशी"॥ इति **कार्ष्णाजिनिः** स्मरणादत एव च **माधवीये** अभिहितम्

" प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीम्। शस्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदीयते" ॥ इति **याज्ञवल्क्यवचनं** (आ. २६४) पंचम्यादिपक्षविषयम्। अन्यथा **कार्ष्णाजिनिवचनस्यानर्थक्यं** प्रसज्येतेति । तथा **कालादर्शे**—" मुक्त्वाद्यपक्षं नंदादिवर्ज्यमाहुर्महालयः" इति। प्रतिपदादिः दर्शान्तः पक्ष आद्यः। तं मुक्त्वाऽन्येषु पक्षेषु नंदा शुक्रवारचतुर्दश्यादि वर्ज्यमाहुरित्यर्थः। अपरपक्षे यदहः संपद्यते साममावास्यायां विशेषेणेति **वचनात्** यदामावास्यायां सकृन्महालयः क्रियते यदा च पक्षमहालयादि क्रियते तदा अमावास्याश्राद्धं पृथगेव कार्यम्।

"आब्दिकं प्रथमं कुर्यान्मासिकं तु ततः परम्। दर्शश्राद्धं तृतीयं स्याच्चतुर्थं तु महालयः" ॥इति। एकस्मिन्दिने दर्शमहालयश्राद्धयोः पौर्वापर्यविधानाद्दैवतभेदाच्च। तच्च वक्ष्यते **चंद्रिकायाम्**—यदैकस्मिन्नहनि तथा पृथगेवामावास्याश्राद्धं अमावास्याष्टकावृद्धिः कृष्णपक्षोऽयनद्वयम् इति पृथगुपादानादतो यत्कैश्चिदुक्तं अमावास्याश्राद्धमापरपक्षिकेन श्राद्धेन विकल्पित इति तदपास्तमिति। तदेवं कृत्स्नः पंचमः पक्षः पंचम्यादिदर्शांतमष्टम्यादिदर्शांतदशम्यादिदर्शांतपंचमीदर्शयोर्मध्ये अनिषिद्धमेकं वा दिनं महालयश्राद्धकालः। अत्राप्यसामर्थ्ये पंचमपक्षस्य पंचमीमारभ्यानंतरपक्षपंचमीपर्यंतासु तिथिषु अनिषिद्धायामेकस्यां तिथौ यथासंभवं गृही श्राद्धं कुर्यात्। **तदाह यमः**—

" हंसे वर्षासु कन्यास्थे शाकेनापि गृहे वसन्। पंचम्योरंतरे दद्यादुभयोरपि पक्षयोः" ॥ इति। अत्राप्यशक्त्या श्राद्धाकरणे यावत्कन्याराशौ सूर्यस्तिष्ठति तावच्छ्राद्धं कुर्यात्। तत्राप्यकरणे यावद्वृश्चिकदर्शनमिति। तदाह **सुमंतुः**—

" कन्याराशौ महाराज यावत्तिष्ठेद्विभावसुः। तस्मात्कालात् भवेद्देयं वृश्चिकं यावदागतः॥

" येयं दीपावली राजन्ख्याता पंचदशी भुवि। तस्यां दद्यान्न चेद्दत्तं पितॄणां वै महालये"॥ इति।

पुराणेऽपि " पितृपक्षं प्रतीक्षंते गुरुवांछासमन्विताः।

" प्रेतपक्षे व्यतिक्रांते यावत्कन्यागतो रविः। ततस्तुलागतेऽप्येते सूर्ये वांछंति मानेव॥

"तस्मिन्नपि व्यतिक्रांते काले वृश्चिकगे रवौ। निराशाः पितरो दीनास्ततो यांति निजालयम्"॥ इति।

माधवीये—

" कन्यागते सवितरि पितरो यांति वै सुतान्। शून्या प्रेतपुरी सर्वा यावद्वृश्चिकदर्शनम्॥

"ततो वृश्चिकसंप्राप्तौ निराशाः पितरो गताः। पुनः स्वभवनं यान्ति शापं दत्वा सुदारुणम्"॥ इति।

कार्ष्णाजिनिः—

" हस्तर्क्षस्थे दिनकरे प्रेतराजस्य शासनात्। तावत्प्रेतपुरी शून्या यावद्वृश्चिकदर्शनम्॥

" वृश्चिके समनुप्राप्ते पितरो दैवतैः सह। निश्वस्य प्रतिगच्छंति शापं दत्वा सुदारुणम्" ॥इति।

आदित्यपुराणे—

" प्रावृड्ऋतौ यमः प्रेतान् पितॄंश्चाथ यमालयात्। विसर्जयित्वा मानुष्ये कृत्वा शून्यं स्वकं पुरम्॥

" क्षुधार्त्ताः संस्मरंतश्च दुष्कृतं तु स्वयं कृतम्। कांक्षंतः पुत्रपौत्रेभ्यः पायसं मधुसंयुतम्॥

---

१ क्ष–मेत। २ ग–पार्थिव।

" तस्मात्तां तत्र विधिना तर्पयेत्पायसेन तु । मध्वाज्यतिलमिश्रेण तथा शीतेन चांभसा ॥
" ग्रासमात्रं परगृहादन्नं यः प्राप्नुयान्नरः । भैक्षमात्रेण यः प्राणान्संधारयति वा स्वयम् ॥
" यो वा संवर्धयेद्देवं प्रत्यहं स्वात्मविक्रयात् । श्राद्धं तेनापि कर्त्तव्यं तैस्तैर्द्रव्यैः सुसंचितैः "॥ इति ।
यमालयाद्विसर्जयित्वा स्वपुरं शून्यं कृत्वा मनुष्यलोके पितॄन्वासयतीत्यध्याहृत्य योजना । पायसं कांक्षंतः पितरस्तिष्ठंतीत्यध्याहरः ।
विशेषमाह **कालादर्शकारः**—" अस्मिन्या भरणी सा तु महाभरणिरुच्यते ॥
" त्रयोदशी गजच्छाया गयामध्याष्टमीति च । आसु श्राद्धं गयाश्राद्धसममाहुर्महर्षयः " ॥ इति ।
अस्मिन्महालयपक्ष इत्यर्थः । तथा **मत्स्यपुराणे**—
" भरणी पितृपक्षे तु महती परिकीर्त्तिता । अस्यां श्राद्धं कृतं येन स गयाश्राद्धकृद्भवेत् " ॥ इति ।
ब्रह्मांडपुराणे—
" आषाढ्याः पंचमे पक्षे गयामध्याष्टमी स्मृता । त्रयोदशी गजच्छायां गयातुल्या तु पैतृकी" ॥ इति ।
हेमाद्रौ—
" अमापाते भरण्यां च द्वादश्यां पक्षमध्यके । तथा तिथिं च नक्षत्रं वारं च न विशोधयेत्" ॥ इति ।
तत्र वर्ज्यान्याह **गार्ग्यः**—
" नन्दायां भार्गवदिने त्रयोदश्यां त्रिजन्मसु । एषु श्राद्धं न कुर्वीत गृही पुत्रधनक्षयात् " ॥ इति ।
त्रयाणां जन्मनि श्राद्धकर्तुस्तत्पत्न्या ज्येष्ठपुत्रस्य च जन्मनक्षत्रे न कुर्यादिति कैश्चिद्व्याख्यातम् ।
तथा च **स्मृत्यंतरे**—" कर्तुश्च पुत्रदाराणां जन्मर्क्षाणि विवर्जयेत् ।
" विपदि प्रत्यरे चैव वधे चंद्राष्टमे तथा । वैनाशिके तदंशे च श्राद्धकर्म प्रशस्यते " ॥ इति ।
संग्रहेऽपि—" वर्ज्यं पौष्णमथांगनातनययोर्जन्मत्रयं चात्मनः " । इति । **वृद्धगार्ग्योऽपि**—
" प्राजापत्ये च पौष्णे च पित्रर्क्षे भार्गवे तथा । यस्तु श्राद्धं प्रकुर्वीत तस्य पुत्रो विनश्यति" ॥ इति ।
प्राजापत्यं रोहिणी । पौष्णं रेवती । पित्रर्क्षं मघानक्षत्रम् । यत्तु **बृहन्मनुवचनम्**—
" रेवत्यादिषु ऋक्षेषु स्वात्यंतेषु यदा शशी । अर्के नभस्यकन्यास्थे श्राद्धकर्म प्रकीर्तितम्" ॥ इति
तद्विशेषवचनेन बाधितत्वाद्रेवतीरोहिणीमघाव्यतिरिक्तविषयम् । **कालादर्शे**—
" न नंदासु भृगोर्वारे रोहिण्यां च त्रिजन्मसु । रेवत्यां च मघायां च कुर्याद्दापरपक्षिकम् " ॥ इति ।
" नंदायां भार्गवदिने त्रयोदश्यां त्रिजन्मसु । एषु श्राद्धं न कुर्वीत गृही पुत्रधनक्षयात् " ॥
हेमाद्रौ—
" दर्शपाते भरण्यां च द्वादश्यां पक्षमध्यके । तथा तिथिं च नक्षत्रं वारं च न विशोधयेत् " ॥
स्मृत्यंतरे—
" अपुत्रोऽनग्निकश्चैव विधवाब्रह्मचारिणः । दर्शे महालयं कुर्युः पुत्रवान्वर्जयेद् गृही " ॥ इति ।
गार्ग्यः—" मघासु कुर्वतः श्राद्धं ज्येष्ठपुत्रो विनश्यति " । **कार्ष्णाजिनिस्तु**—
"ऋते नैमित्तिकं काम्यं श्राद्धं यस्तु मघादिने । कुर्यात्तज्ज्येष्ठपुत्रस्य नाशः स्यादिति निश्चितम्"॥ इति
अङ्गिराश्च—
"त्रयोदश्यां कृष्णपक्षे यः श्राद्धं कुरुते नरः । पञ्चत्वं तस्य जानीयात् ज्येष्ठपुत्रस्य निश्चितम् "॥
अत्र त्रयोदश्यां निषेधः केवलपितृवर्गश्राद्धविषयः ।

तथा च **कार्ष्णाजिनिः**—

" श्राद्धं तु नैकवर्गस्य त्रयोदश्यामुपक्रमेत् । अतृप्तास्तत्र ये च स्युः प्रजां हिंसंति तेऽग्रजान्"॥ इति ।

" इच्छेत्त्रयोदशीश्राद्धं पुत्रवान्यः सुतायुषोः । एकस्यैव तु नो दद्यात्पार्वणं स समाचरेत्"॥ इति । यः पुत्रवान्सुतायुषोरभिवृद्धिमिच्छेत्स एकस्य एकवर्गस्य श्राद्धं नो दद्यात् । अपि तु मातामहवर्गोद्देशेनापि पार्वणं समाचरेदित्यर्थः । अत्राक्षिप्य समाहितं **माधवीये**—" ननु केवलपितृवर्गोद्देशेन श्राद्धप्राप्तौ सत्यां तन्निषेधो युक्तः " पितरो यत्र पूज्यंते तत्र मातामहा ध्रुवम् " इति **धौम्य**-वचनेन केवलैकवर्गोद्देशेन श्राद्धनिषेधात्प्राप्तिरेव नास्ति । अतो नैवं व्यवस्था युक्ता । मैवम् । सत्यामपि **धौम्यस्मृतौ** व्यामोहादिना प्राप्तस्यैकवर्गश्राद्धस्य निषेधाद्यथारागप्राप्तस्य कलंजभक्षणस्य न कलंजं भक्षयेत् इति निषेधः । तस्मादेकवर्गोद्देशेन मघात्रयोदश्यां श्राद्धनिषेधः । न तु श्राद्धस्यैव तत्र श्राद्धस्य प्रशस्तत्वात् " इति । मघायुक्तत्रयोदश्यामेकवर्गोद्देशेन श्राद्धं कर्तव्यम् । वर्गद्वयोद्देशेन तु श्राद्धं तत्र प्रशस्तम् । वर्गद्वयोद्देशेनापि केवलत्रयोदश्यां केवलमघायां वा श्राद्धं न कर्तव्यमिति **चंद्रिकामाधवीयादौ** निर्णीतम् । **कालादर्शपितृमेधसारयोस्तु** केवलत्रयोदश्यामपि वर्गद्वयोद्देशेन श्राद्धं प्रशस्तमित्युक्तम् । तथा च **वृद्धगार्ग्यः**—

" नभस्यापरपक्षे या तिथिः स्यात्तु त्रयोदशी । गजच्छायेति सा प्रोक्ता पितॄणां तृप्तिकारिणी" ॥

महाभारतेऽपि—

"ज्ञातीनां तु भवेच्छ्रेष्ठः कुर्वंच्छ्राद्धं त्रयोदशीम् । नावश्यं तु युवानोऽस्य प्रमीयंते नरा गृहे"॥ इति ।

शंखः—"प्रोष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीम् । प्राप्य श्राद्धं तु कर्तव्यं मधुना पायसेन च ॥

"प्रजामिष्टां यशः स्वर्गमारोग्यं च धनं तथा । नृणां श्राद्धे सदा प्रीताः प्रयच्छंति पितामहाः"॥ इति ।

याज्ञवल्क्योऽपि(आ. २६१)—

" यद्ददाति गयास्थश्च सर्वमानंत्यमश्नुते । तथा वर्षात्रयोदश्यां मघासु च विशेषतः " ॥ इति । अत्र **विज्ञानेश्वरः** (पृ. ७९ पं. २१–२२)—" तथा वर्षात्रयोदश्यां भाद्रपदकृष्णपक्षत्रयोदश्यां विशेषतो मघायुक्तायां यत्किंचिद्दीयते तत्सर्वमानंत्यमश्नुते इति गतेन संबंधः " इति ।

मनुरपि (३।२७४)—

"अपि नः सकुले भूयाद्यो नो दद्यात्त्रयोदशीम् । पायसं मधुसर्पिर्भ्यां छायायां कुंजरस्य च"॥ इति ।

स्मृत्यंतरे—

" यदेंदुः पितृदेवत्ये हंसश्चैव करे स्थितः । याम्या तिथिर्भवेत्सा हि गजच्छाया प्रकीर्तिता"॥ इति । पितृदैवत्यं मघा । हंसः सूर्यः । करो हस्तनक्षत्रम् । याम्या त्रयोदशी । **चंद्रिकायामपि**—

" हंसे हस्तस्थिते या तु मघायुक्ता त्रयोदशी । तिथिर्वैवस्वती नाम सा छाया कुंजरस्य तु" ॥ इति ।

तत्रैव—

" त्रयोदशी भाद्रपदी कृष्णा मुख्या पितृप्रिया । तृप्यंति पितरस्तस्यां वदंति च शतं समाः ॥

" मघायुतायां तस्यां तु जलाद्यैरपि तोषिताः । कृष्णायां पितरस्तद्वद्वर्षाणामयुतायुतम्" ॥ इति ।

हेमाद्रौ—

"विभक्ता वाऽविभक्ता वा कुर्युः श्राद्धं पृथक्सुताः । मघायुक्तत्रयोदश्यां विभक्ता एव चान्यदा" ॥ इति । अत्र मघात्रयोदश्यां श्राद्धे पिण्डनिर्वापणं न कुर्यात् । तस्या युगादित्वेन पिण्डदाननिषेधात् ।

---

१ ख–स्वर्ग ।

तथा च **पुलस्त्यः**—

"अयनद्वितये श्राद्धं विषुवद्वितये तथा । युगादिषु च सर्वासु पिण्डनिर्वापणादृते" ॥ कर्तव्यमित्यध्याहार्यम् । मघान्वितत्वेन पिंडनिर्वापणं नास्ति । तथा **चादिपुराणे**—

"संक्रांतावुपवासेन पारणेन च भारत । मघायां पिंडदानेन ज्येष्ठः पुत्रो विनश्यति" ॥

स्मृतिरत्ने—"अत्र मघात्रयोदश्यां त्रयोदशीनिबंधनं एकवर्गश्राद्धनिषेधः । मघानिबंधनः पिंडदाननिषेधश्च द्रष्टव्यः" इति । एतन्मघात्रयोदशीश्राद्धं मलमासेऽपि कर्त्तव्यम् । महालयश्राद्धं तु मलमासे न कर्त्तव्यमिति प्रतिपादितमधस्तात् । चतुर्दश्यां महालयनिषेधोऽप्यशस्त्रहतविषयः । अपमृत्युहतानां तु चतुर्दश्यामेव महालयश्राद्धमेकोद्दिष्टं कार्यम् । यदाह **सुमंतुः**—

"समत्वमागतस्यापि पितुः शस्त्रहतस्य तु । एकोद्दिष्टं सुतैः कार्यं चतुर्दश्यां महालये" ॥ इति । समत्वमागतस्य सपिंडीकृतस्य उभयतो नियमोऽत्राभिप्रेतः । शस्त्रादिहतस्यैव चतुर्दश्यां चतुर्दश्यामेव शस्त्रादिहतस्येति च महालयग्रहणान्महालयविषय एवायं नियमः । अतः शस्त्रहतस्य मृताहादौ यथातिथि पार्वणमेव कार्यम् । शस्त्रहतस्यैवेति दुर्मरणोपलक्षणम्

"विषशस्त्रश्वापदादितिर्यक्ब्राह्मणघातिनाम् । चतुर्दश्यां क्रिया कार्या अन्येषां तु विगर्हिता" ॥ इति **मरीचिस्मरणात्** । यत्तु **गार्ग्यवचनम्**—

"चतुर्दश्यां तु यच्छ्राद्धं सपिंडीकरणात्परम् । एकोद्दिष्टविधानेन तत्कार्यं शस्त्रघातिनः" ॥ इति । अस्यार्थश्चंद्रिकायामुक्तः—"शस्त्रघातिनो यदाऽपरपक्षिकश्राद्धं चतुर्दश्यां क्रियते तदैवैकोद्दिष्टविधानेन नान्यदेत्यर्थः" ॥ इति । अत एव **सुमंतुः**—

"एकपिंडकृतानां तु पृथक्त्वं नोपपद्यते । सपिंडीकरणादूर्ध्वमृते कृष्णचतुर्दशीम्" ॥ इति । एतच्च सदैवतं कार्यम्—

"प्रेतपक्षे चतुर्दश्यामेकोद्दिष्टं सदैवतम् । तच्छ्राद्धं दैवहीनं चेत्कुलक्षयकरं भवेत्" ॥ इति **स्मरणात्** । **माधवीये** दिनांतरेऽपि पितामहादितृप्त्यर्थं महालयश्राद्धं कार्यम् । चतुर्दश्यां महालयश्राद्धस्य एकोद्दिष्टत्वेन विहितत्वात्तेन तत्र पितामहादितृप्तेरभावादिति । यस्य पितृपितामहप्रपितामहास्त्रयोऽपि शस्त्रादिना हताः तेषां मध्ये द्वौ वा शस्त्रादिहतौ तेषां चतुर्दश्यां प्रत्येकमेकोद्दिष्टश्राद्धं कार्यमिति पूर्वं प्रतिपादितम् । त्रिदंडिन एकदंडिनो वा यतेर्महालयश्राद्धं द्वादश्यामेव पार्वणविधानेन कुर्यान्न तिथ्यंतरे । तदुक्तं **वाराहे**—

"संन्यासिनोऽप्याब्दिकादि पुत्रः कुर्याद्यथाविधि । महालये तु यच्छ्राद्धं द्वादश्यां पार्वणेन तु" ॥ इति । **संग्रहेऽपि**—

"द्वादश्यां पार्वणेनैव श्राद्धं कुर्यान्महालये । सुतः संन्यासिनोऽन्यत्र यथातिथि समाचरेत्" ॥ इति । संन्यासिनो द्वादश्यामेव महालयश्राद्धमिति नियमः । न तु द्वादश्यां संन्यासिन एवेति । तेन द्वादश्यामन्येषामपि महालयश्राद्धं भवति । **तथा च** "अमापाते भरण्यां च द्वादश्यां पक्षमध्यके" इति वचनं पूर्वमुदाहृतम् । इममेवार्थ मभिप्रेत्य **कालादर्शकारः**—

"श्राद्धं शस्त्रहतस्यैव चतुर्दश्यां महालये । द्वादश्यामेव कुर्वीत यतेरिति विनिश्चयः" ॥ इति । तिथिविशेषात्फलविशेषमाह **याज्ञवल्क्यः** (आ. २६२–२६४)—

"कन्यां कन्यावेदिनश्च पशून्वै सत्सुतानपि । द्यूतं कृषिं वणिज्यां च द्विशफैकशफांस्तथा ॥

"ब्रह्मवर्चस्विनः पुत्रान्स्वर्णरूप्ये सकुप्यके । ज्ञातिश्रैष्ठ्यं सर्वकामानाप्नोति श्राद्धदः सदा ॥

---

१ ग–त्य ।

" प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीम् । शस्त्रेण तु हता ये वै तेभ्यस्तत्र प्रदीयते" ॥ इति । कन्यावेदिनः जामातारः । कुप्यं त्रपुसीसादि । एतन्न नित्यत्वनिराकरणार्थं किंतु कालविशेषात्फलविशेषो भवतीत्येवंपरम् । अयं कृष्णप्रतिपक्षादितिथिषु श्राद्धविधिः सर्वेष्वेवापरपक्षेषु न भाद्रपदापरपक्ष एव । अत एव **शौनकः**— " प्रौष्ठपद्यापरपक्षे मासि मासि चैवम् " इति । मासिमासीति वीप्सया मासिश्राद्धस्य नित्यत्वमवगम्यते । **आपस्तंबः**—" मासि मासि कार्यमपरपक्षस्यापराण्हः श्रेयांस्तथाऽपरपक्षस्य जघन्यान्यहानि सर्वेष्वेवापरपक्षस्याहःसु क्रियमाणे पितॄन्प्रीणाति । कर्तुः कालनियमात्फलविशेषः प्रथमेऽहनि क्रियमाणे स्त्रीप्रायमपत्यं जायते । द्वितीये स्तेनाः । तृतीये ब्रह्मवर्चसिनश्चतुर्थे क्षुद्रपशुमान्पंचमे पुमांसो बव्हपत्यो न चानपत्यः प्रमीयते । षष्ठे अध्वशीलो अक्षशीलश्च । सप्तमे कृषेराद्धिः । अष्टमे पुष्टिर्नवमे एकखुरः । दशमे व्यवहारराद्धिरेकादशे कृष्णायसं त्रपुसीसं द्वादशे पशुमांस्त्रयोदशे बहुपुत्रो बहुमित्रो दर्शनीयापत्यो युवमारिणस्तु भवंति । चतुर्दश्याम् आयुधेराद्धिः पंचदशे पुष्टिम् " इति । "अमावास्याष्टका वृद्धिः कृष्णपक्षोऽयनद्वयम्" इति **स्मृतिश्च** । अत्र मासिश्राद्धे उद्देश्याः **आपस्तंबोक्ताः**—"पितृपितामहप्रपितामहा उद्देश्याः । महालये इति उद्देश्याः कारुणिकाः । महालये तु पित्रादयस्त्रयः मात्रादयस्तिस्र अशक्तौ सपत्नीकाः पित्रादयस्तिस्रः मातामहादयश्च त्रय उद्देश्याः । **कालादर्शे**—

" वर्गद्वयं समुद्दिश्य श्राद्धमाद्यन्तदैविकम् । कुर्यात्पार्वणमार्गेण नो चेद्दोषो महान्भवेत् " ॥ इति । वर्गद्वयं पितृवर्गं मातामहवर्गं च समुद्दिश्य आद्यंतदैविकं आदौ वैश्वदेविकं अंते वैष्णवं यस्येत्यर्थः । तदाह **देवलः**—

" दैवाद्यं नैव कुर्वीत दैवांतं नैव कुत्रचित् । दैवाद्यंतं हि कुर्वीत श्राद्धरक्षणहेतुना "॥ इति ।

" पितरो यत्र पूज्यंते तत्र मातामहा अपि " । इति **वचनेन** मातामहानामप्युद्देश्यता ।

" अन्वष्टकासु वृद्धौ च प्रतिसंवत्सरे तथा । महालये गयायां च सपिंडीकरणात्पुरा ।

" एषु मातुः पृथक्कुर्यादन्यत्र पतिना सह " इति **वचनान्**मात्रादीनामप्युद्देश्यत्वमिति प्रतिपादितमधस्तात् । पितरि मृते मातरि जीवंत्यां पितामह्यादीनामत्र वरणं नास्ति " जीवेद्यदि तु वर्गादिस्तद्वर्गं परिवर्जयेत् " इति **स्मरणात्** ।

पिंडदानं तु कर्त्तव्यं तत्सहभावात्तिलोदकमपि कार्यमित्याहुः । तथा च **स्मृत्यंतरे**— "जीवन्त्यां मातरि श्राद्धं तद्वर्गस्य न कारयेत् । सपत्नीमातरि तथा जीवेन्मातामहोऽपि च" ॥ इति । उभयविधमात्रोरपि जीवन्त्योरयं निषेध इत्यर्थः । तथा च **पूर्णसंग्रहे**—" महालयादिषु सपत्नीमातरमारभ्य वरणं कर्तव्यम्" इति । कारुणिकसंज्ञानां पितृव्यादीनामप्युद्देश्यत्वमुक्तं **स्मृत्यंतरे**—

" दैवं पिता ततो माता सपत्नी जननी तथा । मातामहाः सपत्नीकाः पितृव्या भ्रातरः सुताः ॥

" पितृष्वसा मातुलश्च तद्भगिन्यश्च जामयः । भगिनी दुहिता भार्या श्वशुरो भावुकः स्नुषा ॥

"स्यालको गुरुराचार्यः स्वामी सख्यादयः क्रमात् । भोज्या महालयश्राद्धे एते कारुणिकाव्हयाः" ॥ इति ।

मनुः—

" अपुत्राः स्वकुले ये च स्त्रियो वा पुरुषा मताः । एकोद्दिष्टेन तेभ्योऽपि दद्यादापरपक्षिकम् " ॥

अन्यच्च—

" श्राद्धं कुर्यादपुत्रस्य नित्यश्राद्धं महालये । एकोद्दिष्टेन विधिना न कुर्यात्पुत्रिणे क्वचित् " ॥ इति ।

चतुर्विंशतिमतेऽपि—

" आचार्यगुरुशिष्येभ्यः सखिज्ञातिभ्य एव च । तत्पत्नीभ्यश्च सर्वाभ्यस्तथैव च जलांजलीन् ॥
" एतेभ्यस्तु सदा पिंडान्दद्याच्छ्राद्धपदे नरः । एकस्मिन्ब्राह्मणे सर्वानाचार्यादीन्प्रपूजयेत् " ॥ इति ।

स्वयमकृत्वा परमहालये नाश्नीयात्—

"अकृत्वाऽन्यत्र नाश्नीयाच्छ्राद्धं चापरपक्षिकम् । पश्चात्कृतेऽपि श्राद्धेऽस्मिंस्तच्छ्राद्धं निष्फलं भवेत्" ॥ इति **स्मृतेः** । **स्मृत्यंतरे**—

" पित्रोर्मृतदिनात्पूर्वं न तन्मासे महालयम् । पित्रोः श्राद्धं तु निर्वर्त्य महालयमथाचरेत् " ॥ इति । एतच्च महालयश्राद्धं नित्यम् । शाकेनाप्यपरपक्षं नातिक्रामेत्

" सूर्ये कन्यागते श्राद्धं यो न कुर्याद् गृहाश्रमी । धनं पुत्राः कुतस्तस्य पितृनिश्वासपीडनात् " ॥ इत्यादि **स्मृतेः** । तथा च **कार्ष्णाजिनिः**—

" मृताहेऽहरहर्दर्शे श्राद्धं यच्च महालये । तन्नित्यमुदितं सद्भिर्नित्यवत्तद्विधानतः " ॥ इति । अहरहः अहन्यहनि यच्छ्राद्धं तदपि नित्यमित्यर्थः । तत्र **भास्करः**—

" अहन्यहनि यच्छ्राद्धं तन्नित्यमिति कीर्तितम् । वैश्वदेवविहीनं तु अशक्तावुदकेन तु " ॥ इति । अस्य पार्वणत्वेन प्राप्तं वैश्वदेवं निरस्यति वैश्वदेवविहीनमिति । अहन्यहनीत्येतदत्यन्तश्रद्धालुविषयं सुसमृद्धविषयं वा । यदाह **देवलः**—

" एतेन विधिना श्राद्धं कुर्यात्संवत्सरं सकृत् । त्रिश्चतुर्वा यथा श्राद्धं मासे मासे दिने दिने" ॥ इति । एतेन विधिना पार्वणविधिना प्रतिसंवत्सरमेकवारं विशिष्टेऽन्हि प्रतिसंवत्सरं त्रिवारं वा चतुर्षु चतुर्षु मासेषु विशिष्टेऽन्हि प्रतिसंवत्सरं चतुर्वारं वा त्रिषु त्रिषु मासेषु विशिष्टेऽन्हि मासे मासे वा विशिष्टेऽन्हि दिने दिने वा यथाश्रद्धं श्रद्धानुसारेण शक्त्यनुसारेण च नित्यश्राद्धं कुर्यादित्यर्थः । अस्य च नित्यश्राद्धस्य कल्पः **सम्यगान्हिके**ऽस्माभिः प्रपंचितः ।

वृद्धिश्राद्धनिरूपणम् । अथ वृद्धिश्राद्धम् । तच्च नैमित्तिकम्

" प्रेतश्राद्धं सपिंड्यंतं संक्रांतिग्रहणेषु च । संवत्सरोदकुंभं च वृद्धिश्राद्धं निमित्ततः " ॥ इति **गालवस्मरणात्** । **कात्यायनः**—

" स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु । पिंडानोद्वाहनात्तेषां तस्याभावे तु तत्क्रमत् "॥ इति । अयमर्थः—सुतसंस्कारकर्मसु जातकर्मादिषु तेषां सुतानामोद्वाहनाद्विवाहपर्यंतेषु पार्वणेषु पिता स्वपितृभ्यः पिंडान्दद्याद्वृद्धिश्राद्धं दद्यात्तस्याभावे तु तत्क्रमात् " असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः"इत्यादि **वचनेषु** जातकर्मादिषु यो गम्यमानः कर्तुः क्रमस्तेन क्रमेण ज्येष्ठभ्रात्रादिः कुर्यात्पूर्वसंस्कृतमात्राद्यसंभवे व्रतसमावर्त्तनादौ स्वयं कुर्यादिति ।

" असगोत्रः सगोत्रो वा य आचार्य उपायने । तदोपनेयपित्रादीनुद्दिश्याभ्युदयं चरेत् ॥
" कन्यकानामयं मार्गो मुनिभिः परिकीर्तितः । उपनीतस्तु पित्रादेरभावेऽन्यं नियोजयेत् ।
" आचार्यपितरस्तत्र वृद्धिश्राद्धे तु देवताः " ॥ इति ।

विष्णुपुराणेऽपि—

" जातस्य जातकर्मादिक्रियाकांडमशेषतः । पुत्रस्य कुर्वीत पिता श्राद्धं चाभ्युदयात्मकम्" ॥ इति ।

---

१ कख-क्वचित् । २ याज्ञ. व्य. १२४

वसिष्ठोऽपि—
“ जन्मन्यथोपनयने विवाहे **पुत्रकस्य** च । पितॄन्नांदीमुखान्नाम तर्पयेत् विधिपूर्वकम् ” ॥ इति ।
सायणीये—
“ नांदीश्राद्धं पिता कुर्यादाद्यपाणिग्रहावधि । अत ऊर्ध्वं प्रकुर्वीत स्वयमेव तु नांदिकम् ” ॥ इति ।
आद्यपाणिग्रहावधि प्रथमविवाहपर्यन्तामित्यर्थः ।
“ नान्दीश्राद्धं पिता कुर्यात्पुत्रीपुत्रविवाहयोः । उत्तरेषु विवाहेषु स्वयं कुर्यात्तु नान्दिकम् ” ॥ इति ।
द्वितीयादिविवाहे तु जीवत्पितापि स्वयमेव कुर्यात्
“ उद्वाहे पुत्रजनने पित्र्येष्ट्यां सौमिके मखे । तीर्थे ब्राह्मण आयाते षडेते जीवतः पितुः ” ॥ इति **स्मरणात्** । नांदीमुखश्राद्धस्यानुष्ठानं क्वचिद्विषये तंत्रेण कार्यं न त्वावृत्त्येत्याह **कात्यायनः**—
“ गणशः क्रियमाणेषु मातृभ्यः पूजनं सकृत् । सकृदेव भवेच्छ्राद्धमादौ न पृथगादिषु ” ॥
अस्यार्थः—उपनयनात्प्राक् स्वकाले कथंचिदकृतचौलपर्यंतसंस्कारस्य यानि जातकर्मादीनि उपनयनात्पूर्वं संभूय क्रियंते तथा व्रतानि यदा संभूय क्रियंते तथा देशांतरगतस्य मृत इति बुद्ध्या कृतप्रेतकार्यस्य कालांतरे आगतस्य यानि जातकर्मादीनि पुनः संभूय क्रियंते तथा पतितस्य कृतप्रायश्चित्तस्य यानि जातकर्मादीनि पुनः संभूय क्रियंते तेषु गणशः संभूय क्रियमाणेषु जातकर्मादिषु संस्कारेषु प्रथमं क्रियमाणस्य संस्कारक्रमेण आदौ मातृपूजायां नांदीश्राद्धस्य सकृत् तंत्रेणानुष्ठानं न पृथगादिषु संस्कारकर्मणामादिषु न पृथगनुष्ठानम् ” इति । **स्मृत्यंतरेऽपि**—
“ एकदा क्रियमाणानामनेकशुभकर्मणाम् । वृध्द्यंकुरप्रतिसरान्सकृदेव समाचरेत् ” ॥ इति ।
आश्वलायनः—“सहैवाभ्युदयश्राद्धं स्वस्तिवाचनमेव च । सहकर्माणि कुर्याद्वा पृथग्वा क्रमतश्चरेत् ॥
“ नामनिष्क्रामणौ कार्यौ सहापदि विजानता । तथा पुंसवसीमन्तौ बालिसीमन्तकौ च वा ॥
“ जातकृत्ये त्वतीते तु नाम्ना वा सह संचरेत् । अकृतानामतीतानां निष्कृतिः स्याद्धि **कर्मणाम्** ॥
“ चौलोपनयने चैव समावर्तविवाहकौ । सह कर्मत्रयं जातु सामस्वपि समाचरेत् ॥
“ एतेभ्योऽन्यानि कर्माणि द्वावकार्यौ सहैव तु ” ॥ यत्तु **कात्यायनोक्तम्**—
“ मातृयागक्रियापूर्वं कार्यं श्राद्धं तु मंगले । ऋतुत्रयेऽपि कर्तव्यं न चान्यल्लघुमंगलम् ” ॥ इति तद्यथाकालं क्रियमाणसंस्कारविषयम् । मातृपूजाऽपि **तेनोक्ता**—
“ कर्मादिषु च सर्वेषु मातरः सगणाधिपाः । पूजनीयाः प्रयत्नेन पूजिताः पूजयंति ताः ।
“ प्रतिमासु च शुद्धासु लिखिता वा पटादिषु । गंधपुष्पाक्षतैश्चैव नैवेद्यैश्च पृथग्विधैः ।
“ गौरी पद्मा शची मेधा सावित्री विजया जया । देवसेनाः स्वधा स्वाहा मातरो लोकमातरः ॥
“ धृतिः पुष्टिस्तथा तुष्टिः आत्मदेवतया सह । आभ्योऽर्घ्यं गंधपुष्पं च धूपदीपं निवेदयेत् ।
“आयुष्याणि च शांत्यर्थं जप्त्वा तत्र समाहितः । षड्भ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमेत् ” ॥ इति ।
आत्मदेवता आत्मनोऽभीष्टदेवताः आयुष्याणि च ‘आ नो भद्राः क्रतव’ इत्यादिसूक्तानि । षड्भ्यः पितृभ्यः पित्रादिभ्यः मातामहादिभ्यश्च मातृश्राद्धपूर्वकं श्राद्धदानमुपक्रमेदित्यर्थः । तत्र **शातातपः**—
“ मातृश्राद्धं तु पूर्वं स्यात्पितॄणां तदनंतरम् । ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतम् ।
“ नान्दीश्राद्धे तु पितृश्राद्धे कर्म वैदिकमाचरेत् ” ॥ इति । मातुः मातृपितामहीप्रपितामहीनां पितॄणां पितृपितामहप्रपितामहानां मातामहानां मातामहमातृपितामहमातृप्रपितामहानां क्रमेण पार्वणविधिना श्राद्धत्रयं कुर्यादित्यर्थः ।

तथा **चंद्रिकायाम्**—

" वृद्धौ समर्चयेद्विद्वान्नित्यं नांदीमुखान् पितॄन् । संपादितो विशेषस्तु शेषं पार्वणवद्भवेत्" ॥ इति । वृद्धिश्राद्धे नांदीमुखसंज्ञान् समर्चयेदिति विशेषः । नांदीमुखसंज्ञारूपो वैशेषिको धर्मः संपादितः प्रतिपादितः । शेषं वैशेषिकधर्मादन्यद्धर्मजातं पार्वणवदित्यर्थः ।

उक्तश्राद्धत्रयस्य कालभेदमाह **गार्ग्यः**—

" मातृश्राद्धं तु पूर्वेद्युः कर्माहन्येव पैतृकम् । मातामह्यं चोत्तरेद्युः वृद्धौ श्राद्धत्रयं स्मृतम्" ॥ इति । अत्र विशेषमाह **शातातपः**—

" पूर्वाण्हे मातृकं श्राद्धं मध्यान्हे पैतृकं तथा। ततो मातामहानां तु वृद्धौ श्राद्धत्रयं स्मृतम्" ॥ इति । एवं **दिनत्रयपक्षो** यदा दुष्करः तदा त्वाह **शातातपः**—

" पृथक् दिने त्वशक्तश्चेदेकस्मिन्पूर्ववासरे । श्राद्धत्रयं तु कुर्वीत वैश्वदेवं तु तांत्रिकम्" ॥ इति । फलदेशकालद्रव्यदेवतासाधारण्यादत्र वैश्वदेविकं तंत्रेणैव कार्यमित्यर्थः । एतच्च पूर्वाण्हे कर्त्तव्यम् " पूर्वाण्हे दैविकं कार्यमपराण्हे च पैतृकम् । एकोद्दिष्टं तु मध्यान्हे प्रातर्वृद्धिनिमित्तकम् " ॥ इति **प्रचेतःस्मृतेः** । प्रातः शब्देनात्र पूर्वाण्ह उच्यते " पूर्वाण्हे वै भवेद्वृद्धिः विना जन्मनिमित्तकम् " इति **स्मरणात्** । तथा च **गार्ग्यः**—

"ललाटसंमिते भानौ प्रहरः प्रथमः स्मृतः। स एवाध्यर्धसंयुक्तः प्रातरित्यभिधीयते "॥ **भरद्वाजोऽपि** " पूर्वाण्ह एव नांदी स्यादपराण्हे तु पैतृकम्" ॥ इति । अग्न्याधाननिमित्तं त्वपराण्हे कार्यम्— "आमश्राद्धं तु पूर्वाण्हे सिद्धान्नेन तु मध्यतः। पार्वणं चापराण्हे तु वृद्धिश्राद्धं तथाग्निकम् " ॥ इति **गालवस्मरणात्तत्र** । नियतकालसीमन्तान्नप्राशनचौलोपनयनादिनिमित्तं ब्राह्मणभोजनमुपनयनवद्ब्राह्मणान्भोजयित्वेत्यादिना कर्मादिषु विहितं श्राद्धं तस्मिन्नेव दिने पूर्वाण्हे अनुष्ठेयं विवाहादावंते विहितमभ्युदयश्राद्धं पूर्वाण्हे विवाहादौ सति तस्मिन्नेव दिने पूर्वाण्हे कर्त्तव्यम् । रात्रौ विवाहादौ सति श्वः प्रातः कर्त्तव्यम् । अनियतनिमित्तं पुत्रजन्मग्रहणादिश्राद्धं निमित्तानंतरं कुर्यात् । यदाह **लोकाक्षिः**—

" नियतेषु निमित्तेषु प्रातर्वृद्धिनिमित्तकम् । पुत्रजन्मनि कुर्वीत श्राद्धं तात्कालिकं बुधः " ॥ इति । तथा **कार्ष्णाजिनिः**—

" प्रादुर्भावे पुत्रपुत्र्योर्ग्रहणे चंद्रसूर्ययोः । स्नात्वाऽनंतरमात्मीयान्पितॄन् श्राद्धेन तर्पयेत् "॥ इति । उक्तमर्थमभिप्रेत्य **कालादर्शकारः**—

" नैमित्तिकं तु यच्छ्राद्धं निमित्तानंतरं भवेत्। नांदीमुखाह्वयं प्रातः आन्हिकं त्वपराह्णके "॥इति । नांदिमुखनिमित्तान्याह **स एव**—

" सीमंतव्रतचौलनामकरणान्नप्राशनोपायनस्नानाधानविवाहयज्ञतयोत्पत्तिप्रतिष्ठासु च । "पुंसूत्यावसथप्रवेशनसुताद्यास्यावलोकाश्रमस्वीकारक्षितिपाभिषेकदयिताद्यर्त्तौ च नांदीमुखम्"॥इति। व्रतानि प्राजापत्यादीनि। उपायनमुपनयनं स्नानं समावर्तनं प्रतिष्ठा देवताप्रतिष्ठा वापीकूपतटाकादि प्रतिष्ठा च । पुंसूतिः पुंसवनम् । आवसथप्रवेशनं गृहप्रवेशनं । सुताद्यास्यावलोकः सुतस्य सुतायाश्च आद्यः प्रथमः आस्यावलोको मुखप्रेक्षणं दयितायाः भार्यायाः आद्यर्तुः प्रथमरजः प्रादुर्भावः। एतेषु निमित्तेषु नांदीमुखं कार्यमित्यर्थः । तत्र **लोकाक्षिः**—

"नामान्नचौलगोदानसोपानयनपुंसवे । स्नानाधानविवाहेषु नांदीश्राद्धं विधीयते"।

कार्ष्णाजिनिः–
" कन्यापुत्रविवाहेषु प्रवेशे नववेश्मनः । नामकर्मणि बालानां चूडाकर्मादिके तथा ॥
"सीमंतोन्नयने चैव पुत्रादिमुखदर्शने । नांदीमुखान्पितृगणान्पूजयेत्प्रयतो गृही"॥ इति । **कात्यायनः**–
" पुत्रोत्पत्तिप्रतिष्ठासु तन्मौंजीत्यागबंधयोः । चूडायां च विवाहे च वृद्धिश्राद्धं समाचरेत्"॥ इति ।
वृद्धगार्ग्यः—
" अग्न्याधानाभिषेकादाविष्टापूर्ते स्त्रिया ऋतौ । वृद्धिश्राद्धं प्रकुर्वीत आश्रमग्रहणे तथा" ॥ इति ।
पारस्करः—
" निषेककाले सोमे च सीमंतोन्नयने तथा । ज्ञेयं पुंसवने श्राद्धं कर्मांगं वृद्धिवत्कृतम् " ॥ इति ।
निषेककाले गर्भाधानकाले सोमशब्दोऽत्राधानाग्निहोत्रादिकर्मणामुपलक्षणार्थः ।
" गर्भाधाने विवाहे च सुवने जातकर्मणि । नामोपाकर्मस्नानेषु व्रतेषु च समापने ॥
" ब्राह्मणान् भोजयेदादौ " इति । **तत्रैव**—
" सीमन्तोन्नयने चैव अन्नप्राशनचौलयोः । उपायने च गोदाने चादावेव समाचरेत् " ॥ इति ।
एतच्च कर्मांगश्राद्धमसकृत्क्रियमाणे अग्निहोत्रादिषु कर्मसु प्रथमप्रयोग एव कर्त्तव्यम् ।
यदाह **कात्यायनः**—
" नानिष्ट्वा तु पितॄन् श्राद्धे कर्म वैदिकमाचरेत् । असकृद्यानि कर्माणि क्रियेरन्कर्मकारिभिः ॥
"प्रतिप्रयोगं नैताः स्युर्मातरः श्राद्धमेव च " ॥ इति **स एव**—

" आधाने होमयोश्चैव वैश्वदेवे तथैव च । बलिकर्मणि दर्शे च पौर्णमासे तथैव च ॥
"नवयज्ञे च यज्ञादौ वदन्त्येव मनीषिणः । एकमेव भवेच्छ्राद्धमेतेषु न पृथक्पृथक्"॥ इति ।

होमयोरित्यनेनाधानसमभिव्याहारात् द्विवचनाच्च सायंप्रातरग्निहोत्रहोमावुक्तौ अष्टकादिश्राद्धेषु पृथक्प्रयोगेऽपि कर्मांगश्राद्धं न कर्त्तव्यं यतोऽनंतरमाह **स एव** " नाष्टकादौ भवेच्छ्राद्धं न श्राद्धे श्राद्धमिष्यते "। **वृद्धशातातपोऽत्र** विशेषमाह—
" त्रिष्वप्येतेषु युग्मांस्तु ब्राह्मणान्नियतः शुचिः । प्रदक्षिणं तु सव्येन पूजयेद्देवपूर्वकम् " ॥ इति ।
अयमर्थः– दैवे द्वौ ब्राह्मणौ मातृश्राद्धे द्वौ पितृश्राद्धे द्वौ सपत्नीकमातामहश्राद्धे द्वौ एवमष्टावरान्ब्राह्मणान्निमंत्रणादिविसर्जनांतं सर्वमुपचारजातं प्रदक्षिणं यथा भवति तथा कुर्वन्सव्येन सव्यांसगतेनैव यज्ञसूत्रेणोत्तरवाससा चान्वितः श्राद्धकर्त्ता भोजयेत्" इति । **याज्ञवल्क्य**—(आ.२५)
"एवं प्रदक्षिणावृत्को वृद्धौ नांदीमुखान्पितॄन् । यजेत दधिकर्कंधुमिश्रान्पिंडान्यवैः क्रियाः" ॥ इति ।
कर्कंधुः बदरीफलम् । **प्रचेताः**—
" न जपेत्पैतृकं जप्यं न मांसं तत्र दापयेत् । प्राङ्मुखो दैवतीर्थेन क्षिप्तं देशविमार्जनम् " ॥ इति ।
आश्वलायनः– " अथाभ्युदयिके युग्मा ब्राह्मणा अमूला दर्भाः प्राङ्मुखो यज्ञोपवीती स्यात् । प्रदक्षिणमुपचारो यवास्तिलार्था गंधादिदानं च ऋजुदर्भा वासने दद्यात् ' ॥
"यवोऽसि सोमदेवत्यो गोसवो देवनिर्मितः । प्रत्नवभ्द्यः प्रत्तः पुनर्नांदीमुखान्प्रीणयाहि नः स्वाहा"इति॥
यववापनमिति । **मुद्गलः**—" देवेषु द्वावेको वा पित्रेष्वेको द्वौ वा ब्राह्मणौ श्राद्धे कल्पयेत् " इति ।
कात्यायनः– यवस्तिलार्थः । तत्र यवोसीऽति ऊहो न स्वधां प्रयुंजीत ।
" सदा परिचरेद्भक्त्या पितॄनप्यत्र देववत् । निपातो हि न सव्यस्य जानुनो विद्यते क्वचित् "॥ इति ।

---

१ क्ष–आब्दिकादि । २ कखग–प्रथम । ३ ख–मधु ।

स एव—"नांदीमुखान्पितॄनावाहयिष्य 'इति पृच्छति'। अस्तु स्वधेत्यस्य स्थाने नांदीमुखः पितरः प्रीयंतामिति संपन्नमिति तृप्तिप्रश्ने दधिबदराक्षतमिश्राः पिंडाः" ॥ इति ।

वृद्धवसिष्ठोऽपि—

"दधिकर्कंधुसंमिश्राः पिण्डाः कार्या यथाक्रमम् । प्राङ्मुखो देवतीर्थेन प्राक्कूलेषु कुशेषु च" ॥

"दत्वा पिंडान्न कुर्वीत पिंडपात्रमधोमुखम्" ॥ इति । पिंडदानमत्र भोजनशालायाः बहिः-कार्यम् । यदा **प्रचेताः** "बहिस्तु प्राक्कूलेषु च दध्यक्षतकर्कंधुमिश्रान्पिंडान् निर्वापयेत्" इति । **चतुर्विंशतिमते**—"एकं नाम्नापरं तूष्णीं दद्यात्पिंडान्पृथक्पृथक्" इति । पृथक्पृथगेऽस्मिन्द्वौ द्वौ पिंडौ दद्यात् । तत्र प्रथमपिंडं नाम्ना गोत्रसहितेन दद्यात् । द्वितीयं तूष्णीं दद्यादित्यर्थः । **आश्वलायनोऽपि**—"प्राचीनाग्रान्दर्भान्संस्तीर्य तेषु पृषदाज्यमिश्रेण भुक्तशेषेणैकैकस्य द्वौ द्वौ पिंडौ दद्यात्" इति । पिंडदानं वैकल्पिकमित्युक्तं **भविष्यत्पुराणे**—

"पिंडनिर्वापणं कुर्यान्न वा कुर्यान्नराधिप । वृद्धिश्राद्धे महाबाहो कुलधर्मानवेक्ष्य तु" ॥ इति ।

एतच्चाभ्युदयश्राद्धमापदादिनिमित्तेषु आमेन हेम्ना वा कुर्यात् । तत्र **मरीचिः**—

"अनग्निश्च प्रवासी च यस्य भार्या रजस्वला । आमश्राद्धं प्रकुर्वीत मातापित्रोः क्षयाहृते" ॥ इति ।

व्याघ्रपादः—

"आर्त्तवेऽन्नद्विजाभावे ग्रहणे देशविप्लवे । आमश्राद्धं द्विजः कुर्याच्छूद्रः कुर्यात्सदैव हि" ॥ इति ॥

गालवः—

"तीर्थेऽनग्नावापदि च देशभ्रंशे रजस्यपि । हेमश्राद्धं द्विजैः कार्यं शूद्रैः कार्यं सदैव हि" ॥ इति ।

पराशरः—

"असमर्थोऽन्नदानस्य धान्यमामं स्वशक्तितः । प्रदास्यति द्विजाग्रेभ्यः स्वल्पामपि च दक्षिणाम्" ॥ इति ।

पुराणेऽपि—

"आमं ददातु कौंतेय दद्यादन्नाच्चतुर्गुणम् । सिद्धान्ने तु विधिर्यः स्यादामश्राद्धेऽप्ययं विधिः" ॥ इति ।

अत्र **विज्ञानेश्वरः**—

"यद्यद्ददाति विप्रेभ्यः श्रुतं वा यदि वाऽश्रुतम् । तेनाग्नौ करणं कुर्यात्पिंडास्तेनैव निर्वपत्" ॥ इति ।

चतुर्विंशतिमते—

"आमश्राद्धं यदा कुर्यात्पिंडदानं कथं भवेत् । गृहादाहृत्य पक्कान्नं पिंडं दद्यात्तिलैः सह ।

"येनाग्नौकरणं कुर्यात्पिंडांस्तेनैव निर्वपेत्" ॥ इति । हेमपिंडदानयोः संनियोगशिष्टत्वाद्‌वधारणत्वाच्च । संकल्पविधानेन त्वग्नौहोमाभावे पिंडदानं नास्ति इति गम्यते । तथा **पितृमेधसारे**—"यद्यद्विप्रेभ्यो दद्यात्तेनैव होमस्तेन वा गृहादाहृतान्नेन वा पिंडान् दद्याद्यदा होमस्तदा पिंडदानं होमाभावे पिंडदानाभावः । आमश्राद्धे चरोरभावात्तद्धर्माणामभावे भोजनाभावात्तत्संबंधिनां चाभावः । संकल्पो वरणं पादप्रक्षालनं गंधपुष्पादिदानतंडुलादिप्रदानं दक्षिणेत्यामश्राद्धं कार्यम्" इति । तद्धर्माणामुपस्तरणावदानादीनां तत्संबंधिनां पात्राभिमंत्रणादीनामित्यर्थः ।

"हिरण्ये तूदकं पश्चान्मृतेऽहनिपरेऽहनि" इति **वचनात्** तर्पणं तदैव कार्यम् ।

इति **वृद्धिश्राद्धं निरूपितम्** ।

---

१ क्ष—व ।

श्राद्धभेदाः ॥ अथ **श्राद्धभेदाः** । प्रेतोद्देशेन पित्रुद्देशेन वा द्रव्यत्यागः श्राद्धम् । तदाह **मरीचिः**—
"प्रेतं पितॄंश्च निर्दिश्य भोज्यं यत्प्रियमात्मनः । श्रद्धया क्रियते यत्तु तच्छ्राद्धं परिकीर्तितम्" ॥ इति ।
ब्रह्मांडपुराणेऽपि—
"देशे काले च पात्रे च श्रद्धया विधिना च यत् । पितॄनुद्दिश्य विप्रेभ्यो दत्तं श्राद्धमुदाहृतम्" ॥ इति ।
तच्च पुनः पार्वणैकोद्दिष्टभेदेन द्विविधम् । त्रिपुरुषोद्देशेन यत्क्रियते तत्पार्वणम् । एकपुरुषोद्देशेन क्रियमाणमेकोद्दिष्टम् । तदाह **कण्वः**—
"एकमुद्दिश्य यच्छ्राद्धमेकोद्दिष्टं प्रकीर्तितम् । त्रीनुद्दिश्य तु यत्ताद्धि पार्वणं मुनयो विदुः" ॥ इति ।
एतद्विविधमपि श्राद्धं नित्यनैमित्तिककाम्यभेदेन त्रिधा भिद्यते । तदुक्तं **कालादर्शे**—
"श्राद्धद्वयं तथोद्दिष्टमेकोद्दिष्टं च पार्वणम् । नित्यं नैमित्तिकं काम्यमिति तच्च पुनस्त्रिधा" ॥ इति ।
तत्र नियतोपाधौ चोदितं नित्यम् । यथा अमावास्यादौ विहितं श्राद्धम् । अनियतनिमित्तं हि न नैमित्तिकम् । यथा उपरागादौ कामनोपाधिकं काम्यम् । यथा तिथिनक्षत्रादिषु ।
तदुदाहरति **कार्ष्णाजिनिः**—
"मृताहेऽहरहर्दर्शे श्राद्धं यच्च महालये । तन्नित्यमुदितं सद्भिर्नित्यवत्तद्विधानतः ॥
"प्रेतश्राद्धं सपिंडत्वं संक्रांतिग्रहणेषु च । संवत्सरोदकुंभं च वृद्धिश्राद्धं निमित्ततः ॥
"तिथ्यादिषु च यच्छ्राद्धं मन्वादिषु युगादिषु । अलभ्येषु च योगेषु तत्काम्यं समुदाहृतम्" ॥ इति
यत्तु **विश्वामित्रेण** द्वादशविधत्वमुक्तम्
"नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धं सापिंडनम् । पार्वणं चेति विज्ञेयं गोष्ठ्यं शुध्यर्थमष्टम ॥
"कर्मांगं नवमं प्रोक्तं दैविकं दशमं स्मृतम् । यात्रास्वेकादशं प्रोक्तं पुष्ट्यर्थं द्वादशं स्मृतम्" ॥
इति तत् नित्यनैमित्तिककाम्यावांतरविवक्षयैव न तु ततः पार्थक्यविवक्षया ।
तथा च **वृद्धवसिष्ठः**—
"अहन्यहनि यच्छ्राद्धं तन्नित्यमिति कीर्तितम् । एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते ॥
"अभिप्रेतार्थसिध्यर्थं काम्यं पार्वणवत्स्मृतम् । पुत्रजन्मविवाहादौ वृद्धिश्राद्धमुदाहृतम् ॥
"नवानीतार्घ्यपात्रं च पिंडं च परिकीर्त्यते । पितृपात्रेषु पिण्डेषु सपिंडीकरणं तु तत् ॥
"प्रतिपर्व भवेद्यस्मात्प्रोच्यते पार्वणं तु तत् । गोष्ठ्यां यत्क्रियते श्राद्धं गोष्ठीश्राद्धं तदुच्यते ॥
"बहूनां विदुषां प्राप्तौ सुखार्थं पितृतृप्तये । क्रियते शुद्धये यत्तु ब्राह्मणानां तु भोजनम् ॥
"शुध्यर्थमिति तत्प्रोक्तं श्राद्धं पार्वणवत्कृतम् ।
"निषेककाले सोमे च सीमंतोन्नयने तथा । ज्ञेयं पुंसवने श्राद्धं कर्मांगं विधिवत्कृतम् ॥
"देवानुद्देश्य क्रियते यत्तद्दैविकमुच्यते । तन्नित्यश्राद्धवत्कुर्यात् द्वादश्यादिषु यत्नतः ॥
"गच्छन् देशांतरं यद्धि श्राद्धं कुर्यात्तु सर्पिषा । तद्यात्रार्थमिति प्रोक्तं प्रवेशे च न संशयः" ॥ इति ।

श्राद्धदेशाः । अथ **श्राद्धदेशाः** । **रत्नावल्याम्**—
"देशः कालस्तथा पात्रं द्रव्यं कर्ता पितामहाः । निष्पत्तिकारणान्याहुः कर्मणोस्य विपश्चितः" ॥ इति ।
विष्णुः—
"दक्षिणाप्रवणे देशे तीर्थादौ वा गृहेऽपि वा । भूसंस्कारादिसंयुक्ते श्राद्धं कुर्यात्प्रयत्नतः" ॥ इति ।
तीर्थं देवर्षिसेवितं जलम् । आदिशब्देन पुण्याश्रमादि गृह्यते । भूसंस्कारो गोमयादिनोपलेपः । आदिशब्देन अशुचिद्रव्यापसरणम् ।

---

१ क्ष-तीर्थां । २ क-मुत्तमम् । ३ क्ष-वर्ष ।

स एव

" गोमयेनोपलिप्तेषु विविक्तेषु गृहेषु च। कुर्याच्छ्राद्धमथैतेषु नित्यमेव यथाविधि "॥ इति।

याज्ञवल्क्योऽपि—(आ. २२७) " परिश्रिते शुचौ देशे दक्षिणाप्रवणेतथा " इति। परिश्रिते परितः प्रच्छादिते दक्षिणावनते देशे श्राद्धं कुर्यादित्यर्थः। स्वतो दक्षिणाप्रवणत्वासंभवे देशस्य यत्नतो दक्षिणाप्रवणत्वं कार्यम्। तथा च **मनुः**— (३।२०६)

" शुचिदेशं विविक्तं तु गोमयेनोपलिप्य च। दक्षिणाप्रवणं चैव प्रयत्नेनोपपादयेत् "॥ इति।

विष्णुधर्मोत्तरे—

" तस्माच्छ्राद्धानि देयानि पुण्येष्वायतनेषु च। नदीतीर्थेषु तीर्थेषु स्वभूमौ च प्रयत्नतः "॥ इति।

देवलः–

" स्थलीषु गिरिपृष्ठेषु तीर्थेष्वायतनेषु च। विविक्तेषु च तुष्यंति श्राद्धेषु पितरः सदा" ॥इति। स्थलीषु अकृत्रिमभूमिष्वित्यर्थः। तथा च **शंखः**–

" गोगजाश्वादिपृष्ठेषु कृत्रिमायां तथा भुवि। न कुर्याच्छ्राद्धमेतेषु पारक्यासु च भूमिषु" ॥ इति। कृत्रिमायां भुवि वेदिकादावित्यर्थः। **यमः**—

" परकीयप्रदेशेषु पितॄणां निर्वपेत्तु यः। तद्भूमिस्वामिपितृभिः श्राद्धकर्म विहन्यते "॥ इति।

भारते च–

" पारक्ये भूमिदेशे च पितॄणां निर्वपेत्तु यः। तद्भूमिस्वामिपितृभिः श्राद्धकर्म विहन्यते॥

"तस्मात् क्रीत्वा महीं दत्वा स्वल्पामपि विचक्षणः।पिण्डः पितृभ्यो दत्तो वै तस्यां भवति शाश्वतः"॥इति।

परकीयप्रदेशाः परपरिगृहीतगृहगोष्ठारामादयः । न पुनस्तीर्थादीनि ।

तथा **चादित्यपुराणे**–

" अटवी पर्वताः पुण्या नदीतीराणि यानि च। सर्वाण्यस्वामिकान्याहुर्न हि तेषु परिग्रहः ॥

" वनानि गिरयो नद्यस्तीर्थान्यायतनानि च। देवखाताश्च गर्ताश्च न स्वामी तेषु विद्यते" ॥इति।

" कृमिकीटाद्युपहतं देशं श्राद्धे विवर्जयेत्" । तदाह **यमः**—

" रुक्षं कृमिहतं क्लिन्नं संकीर्णानिष्टगंधिकम्। देशं त्वनिष्टशब्दं च वर्जयेच्छ्राद्धकर्मणि" ॥ इति। क्लिन्नं सकर्दमम्। संकीर्णमन्येनाकीर्णम्। **मार्कंडेयः**–

" वर्ज्या जंतुमया रुक्षा क्षितिः प्लुष्टा तथाग्निना। अनिष्टदुष्टशब्दोग्रा दुर्गंधा श्राद्धकर्मणि"॥ इति। तीर्थक्षेत्रविशेषेषु कृतं श्राद्धं फलातिशयप्रदं भवति। तदाह **देवलः**–

" श्राद्धस्य पूजितो देशो गया गंगा सरस्वती। कुरुक्षेत्रं प्रयागश्च नैमिशं पुष्कराणि च॥

" नदीतीरेषु तीर्थेषु शैलेषु पुलिनेषु च। विविधेष्वेव तुष्यंति दत्तेनेह पितामहाः" ॥ इति।

आश्वलायनः—

" गङ्गा गोदावरी वेण्णा गौतमी कौशिकी तथा। नर्मदा शरयूश्चैव कावेरी च सरस्वती॥

" गया प्रयागः श्रीशैलं गोकर्णं पुष्करं शुभम्। नैमिशं च कुरुक्षेत्रं केदारं सेतुबन्धनम्॥

"द्वारका बदरी कौब्जं मुख्या वाराणसी तथा। पुरुषोत्तमस्वामिवेश्म सर्वोत्कृष्टमहोदधिः॥

"एतेषु तीर्थमुख्येषु क्षेत्रेषु च शुभाशुभम्। कृतमक्षयमाप्नोति मनुष्याणां न संशयः"॥

व्यासः—

“ पुष्करेष्वक्षयं श्राद्धं जपहोमतपांसि च । महोदधौ प्रयागे च काश्यां च कुरुजांगले” ॥ इति ।

शंखोऽपि— “ वाराणस्यां कुरुक्षेत्रे भृगुतुंगे हिमालये ।
“ गंगाद्वारे प्रयागे च नैमिशे पुष्करे तथा । संनिहत्यां गयायां च दत्तमक्षयतां व्रजेत् ॥
“ नदीसमुद्रतीरे वा ऱ्हदे गोष्ठे च पर्वते । समुद्रगानदीतीरे सिंधुसागरसंगमे ॥
“ नद्योर्वा संगमे राजन्सालग्रामशिलांतिके । शालग्रामे च गोकर्णे गयायां च विशेषतः ॥
“ क्षेत्रेष्वेषु तु यः श्राद्धं पितृभक्तिसमन्वितः । करोति विधिवन्मर्त्यः कृतकृत्यो विधीयते ” ॥ इति ।

स एव “ यत्रक्वचन नर्मदातीरे यमुनातीरे गंगायां विशेषतो गंगाद्वारे प्रयागे गंगासागरसंगमे कुशावर्ते बिल्वके नीलपर्वते । कुब्जाहे भृगुवृन्दे केदारे लिङ्गायां सुगन्धायां फल्गुतीर्थे महागङ्गायां तण्डुलिकाश्रमे कुमारधारायां प्रभासे यत्रक्वचन सरस्वत्यां विशेषतो नैमिषारण्ये वाराणस्यामगस्त्याश्रमे कण्वाश्रमे कौशिक्यां सरयूतीरे शोणायां भागीरथ्याश्च संगमे श्रीपर्वते कल्पोदके उत्तरमानसे वडवायां सतर्चे विष्णुपदे स्वर्गप्रदेशे गोदावर्यां गोमत्यां वेत्रवत्यां विपाशायां वितस्तायां मरुद्वृधायां शतद्रुति चंद्रभागायां ऐरावत्यां सिंधोस्तीरे दक्षिणे पंचनदे औजसे चैवमादिष्वन्येषु तीर्थेषु सरिद्वरासु पुष्करेषु[1] प्रस्रवणेषु पर्वतेषु निकुंजेषु वनेषूपवनेषु च गोमयेनोपलिप्तेषु मनोज्ञेषु चेति ” । **अत्र पितृगाथा—**

“ कुलेऽस्माकं स जंतुः स्याद्यो नो दद्याज्जलाञ्जलिम् । नदीषु बहुतोयासु शीतलासु विशेषतः ॥
“ अपि जायेत सोऽस्माकं कुले कश्चिन्नरोत्तमः । गयाशीर्षे वटे श्राद्धं यो नो दद्यात्समाहितः ॥
“एष्टव्या बहवः पुत्राः यद्येकोऽपि गयां व्रजेत् । यजेत वाऽश्वमेधं वा नीलं वा वृषमुत्सृजेत्” ॥इति ।

ब्रह्मकैवर्ते—

“ गयाशीर्षे यदा पिंडं नाम्ना येषां प्रकुर्वते । नरकस्था दिवं यांति स्वर्गस्था मोक्षमाप्नुयुः ॥
“तत्राक्षय्यवटो नाम त्रिषु लोकेषु विश्रुतः । पितॄणां तत्र वै दत्तमक्षय्यं भवति प्रभो ॥
“ वटवृक्षं समासाद्य शाकेनाप्युदकेन वा । एकस्मिन्भोजिते विप्रे कोटिर्भवति भोजिताः ॥
“ आत्मनस्तु महाबुद्धे गयायां तु तिलैर्विना । पिंडनिर्वापणं कार्यं मृतानां तु तिलैःसह ” ॥

नद्यादिषु तीर्थश्राद्धमुक्तं **मत्स्यपुराणे—**

“ स्नात्वा नदीषु सर्वासु पितृदेवांश्च तर्पयेत् । तत्र तत्र यथावित्तं कुर्याच्छ्राद्धादिकं तथा ” ॥
“अकालेऽप्यथ काले वा तीर्थश्राद्धं तथा नरः । श्राद्धं कृत्वा तदा तीर्थे कर्त्तव्यं पितृतर्पणम्” ॥ इति ।

पाद्मेऽपि —

“ तीर्थे तु ब्राह्मणं नैव परीक्षेत कथंचन । अनर्थिनमनुप्राप्तं भोजयेन्मनुशासनात् ॥
“ सक्तुभिः पिंडदानं स्यात्संयावैः पायसेन वा । कर्त्तव्यमृषिभिर्दृष्टं पिण्याकेनैंगुदेन वा ॥
“ पिण्याकेन तिलानां वा भक्तिमद्भिर्नरैः सदा । श्राद्धं तत्र तु कर्त्तव्यमर्घ्यावाहनवर्जितम् ॥
“श्वध्वांक्षदृष्टाः काका वा घ्नंति दृष्टा न तैः क्रियाः ” ॥ इति । ‘तीर्थेऽनग्नावापदि च’ इति पूर्वोक्तं हिरण्यश्राद्धं कर्तव्यम् ।

“ क्षेत्रे स्नात्वा शुष्कवासाः प्रदाय तिलवार्यथ । भोजयेद्ब्राह्मणान् श्राद्धे हिरण्यश्राद्धमेव वा ॥
“ कृत्वा समविधानेन पिण्डान्ते क्षेत्रपिण्डनात् । अन्नेनामेन मांसेन सक्तुभिर्दिन आचरेत् ”॥

गयाव्यतिरिक्तस्थानेषु जीवपितृकेनापि तीर्थे श्राद्धं कर्तव्यं इत्यधस्तात्प्रतिपादितम् ।

---

१ खग-पुलिनेषु ।

श्राद्धकालाः ॥ अथ श्राद्धकालाः । तत्र याज्ञवल्क्यः– (आ. २१७–२१८)

“ अमावास्याष्टका वृद्धिः कृष्णपक्षोऽयनद्वयम् । द्रव्यब्राह्मणसंपत्तिः विषुवत्सूर्यसंक्रमः ॥ “ व्यतीपातो गजच्छाया ग्रहणं चंद्रसूर्ययोः । श्राद्धं प्रतिरुचिश्चैव श्राद्धकालाः प्रकीर्तिताः” ॥इति । द्रव्यं कृसरमांसादि । ब्राह्मणः श्रुताध्ययनसंपन्नस्तयोः संपत्तिर्लाभो यस्मिन्काले स तथोक्तः **अत्र हारीतः**—

“ तीर्थद्रव्योपपत्तौ तु न कालमवधारयेत् । पात्रं च ब्राह्मणं प्राप्य सद्यः श्राद्धं विधीयते ”॥ इति । तीर्थं गंगादि । विषुवं मेषतुलासंक्रांतिः । अयनविषुवयोः संक्रांतित्वे सिद्धेऽपि पृथगुपादानं फलातिशयज्ञापनार्थम् । गजच्छायालक्षणं “ यथेंदुः पितृदेवत्य ” इत्यादिना पूर्वमुक्तं ग्रहणमुपरागः । अत्र विशेषमाह **वृद्धवसिष्ठः**–

“ त्रिदशाः स्पर्शसमये तृप्यंति पितरः सदा । मनुष्या मध्यकाले तु मोक्षकाले तु राक्षसाः ” ॥ इति श्राद्धं प्रति रुचिः यदा श्राद्धं प्रतीच्छा तदैव कर्त्तव्यमिति । चकारेणान्येऽपि श्राद्धकालाः संगृह्यंते । अत एव **यमः**—

“आषाढ्यामथ कार्तिक्यां माघ्यां त्रीन्पंच वा द्विजान् । तर्पयेत्पितृपूर्वं तु तदस्याक्षयमुच्यते” ॥इति। **जातुकर्णिः**—“ ग्रहोपरागे विषुवे च जाते कृष्णे मघायामयनद्वये च । “नित्यं च शंखे च तथैव पद्मे दत्तं भवेन्निष्कसहस्रतुल्यम्”॥ इति । शंखादिस्वरूपमपि **तेनैवोक्तम्**–

“ शंखं प्राहुरमावास्यां क्षीणसोमा द्विजोत्तमः । अष्टका तु भवेत्पद्मं तत्र दत्तं तथाक्षयम् ” ॥ इति ।

“ यदा विष्टिव्यतीपातो भानुवारस्तथैव च । पद्मकं नाम तत्प्रोक्तमयनाच्च चतुर्गुणम् ” ॥ इति **शंखोक्तमपि** पद्मं ग्राह्यम्।**काठकीश्रुतिः**‘एतद्धि देवपितृणामयनं यद्धस्तिच्छायायां श्राद्धं दद्यात्’।इति। **शंखोऽपि**—

“ हस्तिच्छायासु यद्दत्तं यद्दत्तं राहुदर्शने । विषुवत्ययने चैव सर्वमानंत्यमश्नुते ” ॥ इति । अनेकविधा गजच्छायाः स्मृतिषु प्रतिपाद्यंते—

“ हंसे हस्तस्थिते या तु मघायुक्ता त्रयोदशी । तिथिर्वैवस्वती नाम सा छाया कुंजरस्य तु ॥

“ हंसे करस्थिते या तु अमावास्या करान्विता । सा ज्ञेया कुंजरछाया इति बोधायनोऽब्रवीत् ” ॥ करो हस्तनक्षत्रम् ।

“वनस्पतिगते सोमे या च्छाया प्राङ्मुखी भवेत् । गजच्छाया तु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत् ॥ अमावास्यायामपराह्ण इत्यर्थः ।

“सैंहिकेयो यदा सूर्यं ग्रसते पर्वसंधिषु । गजच्छाया तु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत्”॥ संहिकेयो राहुः ।

“ घृतेन भोजयेद्विप्रान्घृतं भूमौ समुत्सृजेत् । ग्रहणाख्ये गजच्छाये श्राद्धं दत्वा न शोचति”॥ भोक्तुरपि दोषस्तेनैव दर्शितः । युगादिकालं सूचयति

“ वैशाखे कार्तिके माघे शुद्धाग्निग्रहपूर्णिमाः । नभस्यकृष्णपादूरोमामा वा तु युगादयः” ॥ **अग्निः तृतीया । ग्रहाः नवमी । पादूरः त्रयोदशी । मामावा माघामावास्या ।**

"कृष्णाजिनप्रतिग्राही विक्रयी वा हरेत यः । गजच्छायाश्रितो भुक्त्वा न भूयः पुरुषो भवेत्" इति ॥

देवलः—

" तृतीया रोहिणीयुक्ता वैशाखस्य सिता तु या । मघाभिः सहिता कृष्णा नभस्ये तु त्रयोदशी ॥
" तया शतभिषग्युक्ता कार्तिके नवमी तथा । इंदुक्षये गजच्छाया वैधृतेषु युगादिषु ॥
" एते कालाः समुद्दिष्टाः पितॄणां प्रीतिवर्धनाः " ॥ इति ।

युगादिश्राद्धनिरूपणम् ।

युगादयो **मत्स्यपुराणे** दर्शिताः—"वैशाखस्य तृतीया तु नवमी कार्तिकस्य तु ।
"माघे पंचदशी चैव नभस्ये च त्रयोदशी । युगादयः स्मृता ह्येता दत्तस्याक्षयकारकाः" ॥ इति ।

विष्णुपुराणेऽपि—

" वैशाखमासस्य च या तृतीया नवम्यसौ कार्तिकशुक्लपक्षे
" नभस्य मासस्य च कृष्णपक्षे त्रयोदशी पंचदशी च माघे ॥
" पानीयमप्यत्र तिलैर्विमिश्रं दद्यात्पितृभ्यः प्रयतो मनुष्यः ।
" श्राद्धं कृतं तेन समासहस्रं रहस्यमेतत्पितरो वदंति " ॥ इति । अत्र शुक्लपक्षे या तृतीया पंचदशी कृष्णपक्ष इत्यन्वयः । अत एव **नारदीयपुराणम्**— " द्वे तु शुक्ले द्वे तु कृष्णे युगाद्याः कवयो विदुः " ॥ इति । **ब्राह्मपुराणे तु** माघस्य पौर्णमासी युगादिरित्युक्तम्—

" वैशाखशुक्लपक्षस्य तृतीयायां कृतं युगम् । कार्तिके शुक्लपक्षे च त्रेता तु नवमेऽहनि ॥
"अथ भाद्रपदे कृष्णे त्रयोदश्यां द्वापरं युगम् । माघे तु पौर्णमास्यां तु घोरं कलियुगं तथा ॥
" युगारंभास्तु तिथयो युगाद्यास्तेन मिश्रितान् " ॥ इति ।

अत्र कल्पभेदेन व्यवस्थेति **चंद्रिकायाम्** । **पुलस्त्यो** विशेषमाह—

" अयनद्वितये श्राद्धं विषुवद्वितये तथा । युगादिषु च सर्वासु पिंडनिर्वापणाहृते " ॥ इति ।

स्मृत्यंतरे—

" सूर्यस्य सिंहसंक्रांत्यामंतः कलियुगस्य तु । तथा वृश्चिकसंक्रांत्यामंतस्त्रेतायुगस्य तु ॥
" ज्ञेयस्तु वृषसंक्रांत्या द्वापरान्तश्च संख्यया । तथा च कुंभसंक्रांत्यामंतः कलियुगस्य च ॥
" युगादिषु युगांते तु श्राद्धमक्षय्यमश्नुते" ॥

मन्वादिश्राद्धनिरूपणम् । मन्वादयोऽपि श्राद्धकालाः ॥

" तथा मन्वंतरादौ च देयं श्राद्धं विजानता" ॥ इति **स्मरणात्** ।

मन्वंतरादयो **मत्स्यपुराणे** दर्शिताः—

" आश्वयुक्शुक्लनवमी कार्तिकी द्वादशी सिता । तृतीया चैत्रमासस्य सिता भाद्रपदस्य च ॥
" फाल्गुनस्याप्यमावास्या पुष्यस्यैकादशी सिता । आषाढस्यापि दशमी माघमासस्य सप्तमी ।
"श्रावणस्याष्टमी कृष्णा तदाषाढी च पूर्णिमा । कार्तिकी फाल्गुनी चैत्री ज्येष्ठी पंचदशी सिता ॥
" मन्वंतरादयश्चैते दत्तस्याक्षयकारकाः" ॥ इति । **तत्रैव**—

" कृतं श्राद्धं विधानेन मन्वादिषु युगादिषु । हायनानि द्विसाहस्रं पितॄणां तृप्तिदं भवेत् ॥
" आसु स्नानं जपो होमः पुण्यानंत्याय कल्पते" ॥ इति ।

महाभारतेऽपि—

"या मन्वाद्या युगाद्याश्च तिथयस्तासु मानवाः । स्नात्वा हुत्वा च दत्त्वा च तदनंतफल भवेत्"॥ इति ।

कालादर्शेऽपि—

" मन्वाद्यासु युगाद्यासु प्रदत्तः सलिलांजलिः । सहस्रवार्षिकीं तृप्तिं पितृणामावहेत्पराम् ॥

" द्विसहस्राब्दिकीं तृप्तिं कृतं श्राद्धं यथाविधि । स्नानं दानं जपो होमः पुण्यानंत्याय कल्पते"॥ इति ।

संग्रहकारः—

"तिथ्यग्नीनतिथिस्तिथ्याशे कृष्णेभोऽनलो ग्रहाः। तिथ्यर्कौ न शिवोश्वोमातिथी मन्वाद्यो मताः"॥इति चैत्रमासमारभ्य द्वादशमासानामेकैकस्य एकैकं पदं योजनीयम् । तिथिः पौर्णिमा अग्निस्तृतीया । चैत्रे पौर्णिमा शुक्लतृतीया चेत्यर्थः । वैशाखे नास्ति । ज्येष्ठे तिथिः पौर्णमासी । आषाढे तिथ्यांशे पौर्णमासी । शुक्लदशमी च । श्रावणे कृष्णेभः कृष्णाष्टमी । अत्र कृष्णेति विशेषणादितरत्र सर्वत्र शुक्लतिथेर्ग्रहणम् । भाद्रपदे अनलः तृतीया । आश्वयुजे ग्रहा नवमी । कार्त्तिक्यां तिथ्यर्कौ पूर्णा द्वादशी च । मार्गशीर्षे पूर्णाद्वादशी न नास्ति । पुष्ये शिवः एकादशी । माघे अश्वः सप्तमी । फाल्गुने अमातिथी अमावास्या पौर्णमासी चेत्यर्थः । **स्मृत्यंतरे—**

" अमापातश्च संक्रांतिस्तथा वैधृतिरेव च । अष्टका चैव मन्वादि युगादिश्च महालयः ॥

"चंद्रसूर्योपरागश्च गजच्छाया तथैव च । द्रव्यब्राह्मणसंपत्तिः श्राद्धकालाः प्रकीर्तिताः"॥ इति ।

" अमाष्टकाव्यतीपातमन्वादिषु युगादिषु । विद्वान् श्राद्धमवकुर्वाणः प्रायश्चित्तीयते द्विजः" ॥ इति **वचनान्मन्**वादियुगादिव्यतिपातेषु श्राद्धं नित्यम् ।

" तिथ्यादिषु च यच्छ्राद्धं मन्वादिषु युगादिषु । अलभ्येषु च योगेषु तत्काम्यं समुदाहृतम्" ॥ इति **गालवः** । वचनं तु न नित्यत्वापाकरणार्थं वचनद्वयेनाग्निहोत्रादिवन्नित्यत्वकाम्यत्वयोरविरोधादित्याहुः । एवमेव–" प्रेतश्राद्धं सापिंडत्वं संक्रांतिग्रहणेषु च" इति । प्रतिपादितस्य नैमित्तिकस्य

" संक्रांतिर्विषुवच्चैव विशेषेणायनद्वयम् । व्यतीपातोऽथ जन्मर्क्षं चंद्रसूर्यग्रहस्तथा ॥

" इत्येतान् श्राद्धकालांस्तु काम्यानाह प्रजापतिः । श्राद्धमेतेषु यद्दत्तं तदानंत्याय कल्पते" ॥ इति ।

विष्णूक्तस्य काम्यत्वस्य च न विरोधः । अत एव **कूर्मपुराणे—**

" नैमित्तिकं तु कर्त्तव्यं ग्रहणे चंद्रसूर्ययोः । बांधवानां च मरणे नरकी स्यादतोऽन्यथा ॥

" काम्यानि चैव श्राद्धानि शस्यंते ग्रहणादिषु " । तथा च **शातातपः—**

" सर्वस्वेनापि कर्त्तव्यं श्राद्धं वै राहुदर्शने । अकुर्वाणस्तु यः श्राद्धं पंके गौरिवसीदिति"॥

" राहुदर्शनदत्तं हि श्राद्धमा चंद्रतारकम् । गुणवत्सर्वकामीयं पितृणामुपतिष्ठते " ॥ इति

मार्कंडेयोऽपि—

" विशिष्टब्राह्मणप्राप्तौ सूर्येंदुग्रहणेऽयने । विषुवे रविसंक्रांतौ व्यतीपाते च पुत्रक ॥

" श्राद्धार्हद्रव्यसंप्राप्तौ तथा दुस्वप्नदर्शने । जन्मर्क्षग्रहपीडासु श्राद्धं कुर्वीत चेच्छया"॥ इति ।

यदापि इच्छा कामः तदापि श्राद्धं कुर्वीतेत्यर्थः । एवं च नित्यनैमित्तिकयोः फलेच्छायां सत्यां काम्यत्वं न विरुध्यते ।

काम्यश्राद्धकालः । कृत्तिकादिनक्षत्राणि काम्यश्राद्धकालः । तदाह **याज्ञवल्क्यः** (आ. २६५-२६८)
" स्वर्गं ह्यपत्यमोजश्च शौर्यं क्षेत्रं बलं तथा । पुत्रं श्रेष्ठ्यं च सौभाग्यं समृद्धिं मुख्यतां शुभम् ॥
" प्रवृत्तचक्रतां चैव वाणिज्यप्रभृतीनपि । अरोगित्वं यशो वीतशोकतां परमां गतिम् ॥
" धनं वेदान्भिषक्सिद्धिं कुप्यं गामप्यजाविकम् । अश्वानायुश्च विधिवद्यः श्राद्धं संप्रयच्छति ॥
" कृत्तिकादिभरण्यंतं स कामानाप्नुयादिमान् । आस्तिकः श्रद्दधानश्च व्यपेतमदमत्सरः " ॥ इति ।
प्रवृत्तचक्रता अप्रतिहताज्ञता । कुप्यं सुवर्णरजतव्यतिरिक्तताम्रादि । **विष्णुरपि** (७८।८) " स्वर्गं कृत्तिकासु अपत्यं रोहिणीषु ब्रह्मवर्चसं सौम्ये कर्मणां सिद्धिं रौद्रे भुवं पुनर्वसौ पुष्टिं पुष्ये सार्पे सर्वान्कामान्श्रैष्ठ्यं पित्र्ये सौभाग्यं फाल्गुनीषु धनमर्यम्णे ज्ञातिश्रैष्ठ्यं हस्ते रूपवतः सुतान् त्वाष्ट्रे वाणिज्यवृद्धिं स्वातौ कनकं विशाखासु मित्राणि मैत्रे शाक्रे राज्यं कृषिमूले समुद्रयानसिद्धिमाप्ये सर्वान्कामान्वैश्वदैवे वेदश्रैष्ठ्यमभिजिति सर्वान्कामान्छ्रवणे बलं वासवे आरोग्यं वारुणे रूपद्रव्यमाजे गृहमहिर्बुध्न्ये गाः पौष्णे तुरंगानाश्विने जीवितं याम्ये " इति । आदित्यादयो वाराश्च काम्यश्राद्धकालाः । तदाह **विष्णुः**— (७८।१) " सततमादित्येऽन्हि श्राद्धं कुर्वन्नारोग्यमवाप्नोति । सौभाग्यश्चांद्रे समरविजयं कौजे सर्वान्कामान्बौधे विद्यामभीष्टां जीवे धनं शौक्रे जीवितं शनैश्चरः " इति ।

कूर्मपुराणेऽपि —
" आदित्यवारे त्वारोग्यं चान्द्रे सौभाग्यमेव च । कुजे सर्वत्र विजयं सर्वान्कामान् बुधस्य तु ।
" विद्यामभीष्टां च गुरौ धनं वै भार्गवे पुनः । शनैश्चरे भवेदायुरारोग्यं च सुदुर्लभम् "॥ इति ।

विष्णुधर्मोत्तरे— " अथ काम्यानि वक्ष्यामि श्राद्धानि तव पार्थिव ।
" आरोग्यमथ सौभाग्यं समरे विजयं तथा । सर्वान्कामांस्तथा विद्यां धनं जीवितमेव च ॥
" आदित्यादिदिनेष्वेवं श्राद्धं कुर्वन्सदा नरः । क्रमेणैतान्यवाप्नोति नात्र कार्या विचारणा " ॥ इति ।
अत्र विशेषमाह **मनुः** (३।२७७)—
"युक्षु कुर्वन् दिनर्क्षेषु सर्वान्कामानवाप्नुयात् । अयुक्षु तु पितॄनर्च्य प्रजां प्राप्नोति पुष्कलाम्" ॥ इति ।
युक्षु युग्मेषु दिनेषु सूर्यादिवारेषु । ऋक्षेषु कृत्तिकादिनक्षत्रेषु । कुर्वन्श्राद्धमिति शेषः । प्रतिपदादितिथयोऽपि काम्यश्राद्धकालाः । तदाह **मनुः**—
"कुर्वन्प्रतिपदि श्राद्धं सुरूपान्विंदते सुतान् । कन्यकां तु द्वितीयायां तृतीयायां तु वंदिनः ॥
"पशून्क्षुद्रां चतुर्थ्यां च पंचम्यां शोभनान् सुतान् । षष्ठ्यां द्यूतं कृषिं चापि सप्तम्यां लभते नरः ॥
" अष्टम्यामपि वाणिज्यं लभते श्राद्धदो नरः । स्यान्नवम्यामेकखुरं दशम्यां द्विखुरं बहु ॥
" एकादश्यां तथा रूप्यं ब्रह्मवर्चसिनः सुतान् । द्वादश्यां जातरूपं च रजतं रूप्यमेव च ॥
' ज्ञातिश्रैष्ठ्यं त्रयोदश्यां चतुर्दश्यां तु सुप्रजाः । प्रीयंते पितरश्चास्य ये शस्त्रेण रणे हताः ॥
"श्राद्धदः पंचदश्यां तु सर्वान्कामानवाप्नुयात्"॥ इति । **कात्यायनोऽपि**– "सुरूपाः सुताः प्रतिपदि स्त्रियोऽप्रतिरूपा द्वितीयायां वंदिनस्तृतीयायां चतुर्थ्यां क्षुद्रपशवः पुत्राः पंचम्यां द्यूतं षष्ठ्यां कृषिः सप्तम्यां वाणिज्यमष्टम्यामेकशफं नवम्यां दशम्यां वा गावः परिचारकाः एकादश्यां द्वादश्यां धनधान्यरूप्यं ज्ञातिश्रैष्ठ्यं हिरण्यानि त्रयोदश्यां युवानस्तत्र म्रियंते शस्त्रहतस्य चतुर्दश्याममावास्यायां सर्वम् " ॥ इति ।

एतच्च तिथिश्राद्धं कृष्णपक्षे कर्तव्यम्—

"पित्र्यं श्राद्धं कृष्णादिनेऽस्तमययोगिनि" इति **स्मरणात्**। तथा च **मनुः** (३।२७८)— "यथैव चापरः पक्षः पूर्वपक्षाद्विशिष्यते। तथा श्राद्धस्य पूर्वाण्हादपराण्हो विशिष्यते"॥ इति। कामश्राद्धं प्रकृत्य **स्मृत्यंतरेऽपि** "कृष्णपक्षेऽपराण्हे तु रौहिणं तु न लंघयेत्" इति। अपराण्हः द्वेधा विभक्तस्यान्हो द्वितीयभागः। रौहिणोऽन्हो नवमो मुहूर्तः। एवं कुतपादिघटिकात्रययुक्तायां प्रतिपदादितिथौ काम्यश्राद्धं कार्यं न तु कुतपाद्यसंयुक्तायामिति मंतव्यमिति। **चंद्रिकायाम्**—काम्यश्राद्धं काम्यासिद्धिपर्यन्तमेकसंवत्सरपर्यंतं वा यथाकाममुक्तदिनेऽवश्यमनुष्ठेयम्। तथा **देवस्वामिना** नक्षत्रश्राद्धमुदाहृत्योक्तम्—"नक्षत्रेषु तु काम्यश्राद्धेषु तत्कामप्रदनक्षत्रप्राप्तौ आ तत्कामप्राप्तेरब्दमेकं वा तस्मिन् ऋक्षे श्राद्धं कुर्यात्" इति। **हारीतः**—

"काम्यश्राद्धानि काम्यार्थं सम्यग्यत्नेन साधयेत्। शरीरारंभहेतुत्वान्न मुहुस्तानि कारयेत्॥

"यथाकथंचिन्नित्यानि कुर्यादिंदुक्षयादिषु। पात्रद्रव्यादिसंपत्सु सत्सु काम्यफलं भवेत्"॥ इति। विष्कंभादियोगाश्च काम्यश्राद्धकालाः। तत्र कृत्तिकादिनक्षत्रेषूक्तं फलं क्रमात् ज्ञेयम्। तदाह **मरीचिः**—

"कृत्तिकादिषु ऋक्षेषु श्राद्धे यत्फलमीरितम्। विष्कंभादिषु योगेषु तदेव फलमिष्यते"॥ इति। रव्यादिवारश्राद्धफलं बवादिकरणेषु श्राद्धकरणेऽपि द्रष्टव्यम्। तदाह **बृहस्पतिः**—

"सूर्यादिवासरेष्वेतत् श्राद्धकृल्लभते परम्। बवादिकरणेष्वेतच्छ्राद्धकृच्चाश्नुते फलम्"॥ इति। संगृह्य दर्शयति **कालादर्शकारः**—

"पक्षाद्याद्यासु तिथिषु वर्जयित्वा चतुर्दशीम्। कन्यादिकामिनः कुर्युः श्राद्धं पार्वणरूपवत्॥

"कृत्तिकादिषु ऋक्षेषु भरण्यंतेषु पार्वणम्। कुर्युः श्राद्धं श्रद्धानाः स्वर्गादिफलगामिनः॥

"विष्कंभादिषु योगेषु फलं नक्षत्रवत्स्मृतम्।

"श्राद्धं रव्यादिवारेषु ह्यारोग्यादिफलेप्सवः। कुर्युः फलमिदं ज्ञेयं बवादिकरणेष्वपि"॥ इति। काम्यश्राद्धस्य कालांतरमप्याह **गार्ग्यः**—

"मासंसंज्ञे यथा ऋक्षे चंद्रः संपूर्णमंडलः। गुरुणा यदि संयुक्तः सा तिथिर्महती स्मृता"॥ इति। पौर्णमास्यां चंद्रस्तन्मासनक्षत्रे चित्रादौ गुरुणा युक्तश्चेत्सा पौर्णमासी महाचैत्र्यादिसंज्ञेत्यर्थः। **स एव**—

"मेषराशौ यदा सौरिः सिंहे चन्द्रबृहस्पती। भास्करः श्रवणर्क्षे च महामाघी च सा स्मृता"॥ सौरिः शनैश्चरः मेषे यदि स्याद्गुरुश्चंद्रश्च सिंहे यदि स्याद्भास्करः श्रवणनक्षत्रे यदि स्यात्तदा पूर्णिमा माहामाघीत्यर्थः। **स एव**—

"वृषे वा मिथुने भानौ जीवचंद्रौ तथेंदुभे। पौर्णमासी गुरोर्वारे महाज्यैष्ठी प्रकीर्त्तिता॥

"महाचैत्र्यादिषु कृतं दानं श्राद्धमुपोषणम्। अनंतफलदं प्राहुर्मुनयो धर्मवेदिनः"॥

इति **श्राद्धकालः**।

---

१ क्ष-क

अथ श्राद्धे भोजनीयवर्जनीयब्राह्मणनिरूपणम् । तत्र **मनुः**— (३।१२४)
"तत्र ये भोजनीयाः स्युर्ये च वर्ज्या द्विजोत्तमाः । यावंतश्चैव यैश्चान्नैस्तांश्च वक्ष्याम्यशेषतः" ॥इति ।
द्विजोत्तमा द्विजेषु त्रैवर्णिकेषूत्तमाः ब्राह्मणा इति यावत् । भोजनीयानभोजनीयांश्च ब्राह्मणान्वेत्तुं गुणदोषपरीक्षणं कार्यमित्याह **स एव**—(३।१००)
" दूरादेव परीक्षेत ब्राह्मणं वेदपारगम् । तीर्थं तद्धव्यकव्यानां प्रदाने सोऽतिथि स्मृतः " ॥ इति ।
पात्रपरिग्रहकालात्पूर्वमेतत्पितृपितामहपरीक्षा कार्या । तीर्थमुत्तमं पात्रमतिथितुल्यश्चेत्यर्थः । वेदपारगग्रहणमुपादेयगुणानामुपलक्षणार्थम् । अत एव **छागलेयः**—
" सर्वलक्षणसंयुक्तैर्विद्याशीलगुणान्वितैः । पुरुषत्रयविख्यातैः सर्वं श्राद्धं प्रकल्पयेत् " ॥ इति ।
यमोऽपि—
" पूर्वमेव परीक्षेत ब्राह्मणान् वेदपारगान् । शरीरप्रभवैर्दोषैः शुद्धांश्च चरित्रव्रतान्" ॥ इति ।
शरीरप्रभवा दोषाः कुष्ठापस्मारकादयः । तद्रहितान्पितामहादारभ्य भोजनीयब्राह्मणपर्यंतं परीक्षेतेत्यर्थः । अत एव पितुः श्रोत्रियत्वेन पुत्रस्य श्रैष्ठ्यमाह **मनुः** (३।१३६)—
" अश्रोत्रियः पिता यस्य पुत्रः स्याद्वेदपारगः । अश्रोत्रियो वा पुत्रः स्यात्पिता स्याद्वेदपारगः ॥
" ज्यायांसमनयोर्विद्यस्य स्याच्छ्रोत्रियः पिता । मंत्रसंपूजनार्थं तु सत्कारमितरोऽर्हति " ॥ इति ।
इतरः अश्रोत्रयपितृकः श्रोत्रिय इत्यर्थः । **स एव**—(३।१४९)
" न ब्राह्मणं परीक्षेत दैवे कर्मणि धर्मवित् । पित्र्ये कर्मणि तु प्राप्ते परीक्षेत प्रयत्नतः " ॥ इति ।
प्रयत्नत इति दैवेऽप्यपकृष्य योजनीयम् । दैवे कर्मणि प्रयत्नतो न परीक्षेत । अनेन किंचित्परीक्षणं कार्यमित्युक्तं भवति । तथा च **स एव**—(३।१२८)
" श्रोत्रियायैव देयानि हव्यकव्यानि दातृभिः । अर्हत्तमाय विप्राय तस्मै दत्तं महत्फलम् ॥
"एकैकमपि विद्वांसं दैवे पित्र्ये च भोजयेत् । पुष्कलं फलमाप्नोति नामंत्रज्ञान्बहूनपि ॥ (१२९)
" सहस्राणि सहस्राणामनृचां यत्र भुञ्जते । एकस्तान्मंत्रविद्विप्रः सर्वानर्हति धर्मतः ॥(१३१)
"ज्ञानोत्कृष्टाय देयानि कव्यानि च हवींषि च । न हि हस्तावसृग्दिग्धौ धाव्येते रुधिरेण वै ॥(१३२)
" यत्नेन भोजयेच्छ्राद्धे बह्वृचं वेदपारगम् । शाखांतगं वाऽप्यध्वर्युं छंदोगं वा समाप्तिकम् ॥ (१४५)
" एषामन्यतमो यस्य भुंजीत श्राद्धमर्चितः । पितॄणां तस्य तृप्तिस्याच्छाश्वती साप्तपौरुषी ॥ (१४६)
" ब्राह्मणो ह्यनधीयानस्तृणाग्निरिव शाम्यति । तस्मै व्यं न दातव्यं न हि भस्मनि हूयते" ॥ (१६८)
बृहस्पतिः—
"यद्येकं भोजयेच्छ्राद्धे छंदोगं तत्र भोजयेत् । ऋचो यजूंषि सामानि त्रयं तत्र तु विद्यते ॥
"अटेत पृथिवीं सर्वां सशैलवनकाननाम् । यदि लभ्येत पित्र्यर्थे साम्नामक्षरचिंतकः " ॥
"ऋचा तु तृप्यति पिता यजुषा तु पितामहाः । पितुः पितामहः साम्ना छंदोगो ह्यधिकस्ततः" ॥ इति ।
शातातपः—
" भोजयेद्यस्त्वथर्वाणं दैवे पित्र्ये च कर्मणि । अनंतमक्षयं चैव फलं तस्येति वै श्रुतिः " ॥
यमः—" वेदविद्याव्रतस्नाताः श्रोत्रिया वेदपारगाः । स्वकर्मनिरताः शांताः क्रियावंतस्तपस्विनः ॥
" तेभ्यो हव्यं च कव्यं च प्रसन्नेभ्यः प्रदीयते " ॥
"येसोमपा विरजसो ब्रह्मज्ञाः शांतबुद्धयः । व्रतिनो नियमस्थाश्च ऋतुकालाभिगामिनः ॥
" पंचाग्निरप्यधीयानो यजुर्वेदविदेव च । बह्वृचश्च त्रिसौपर्णस्त्रिमधुर्वाऽथ यो भवेत् ॥

" त्रिणाचिकेतो विरजाश्छंदोगो ज्येष्ठसामगः। अथर्वशिरसोऽध्येता सर्वे ते पंक्तिपावनाः॥
" शिशुरप्यग्निहोत्री च न्यायविच्च षडंगवित्। मंत्रब्राह्मणविच्चैव यश्च स्याद्धर्मपारगः॥
" ब्रह्मदेयासुतश्चैव भावशुद्धः सहस्रदः। चांद्रायणव्रतचरः सत्यवादी पुराणवित्॥
" निष्णातः सर्वविद्यासु शांतो विगतकल्मषः। गुरुवेदाग्निपूजासु प्रसन्नो ज्ञानतत्परः॥
" विमुक्तश्च सदा धीरो ब्रह्मभूतो द्विजोत्तमः। न मित्रो नैव चामित्रो मैत्र आत्मविदेव च॥
" स्नातको जप्यनिरतः सदा पुष्पबलिप्रियः। ऋजुर्मृदुः क्षमी दांतः शांतः सत्यव्रतः शुचिः॥
" वेदज्ञः सर्वशास्त्रज्ञ उपवासपरायणः। गृहस्थो ब्रह्मचारी च चतुर्वेदविदेव च॥
" वेदविद्याव्रतस्नाता ब्राह्मणाः पंक्तिपावनाः"॥ इति। "ब्रह्म मे तुमाम्" इत्यादयस्त्रयोऽनुवाकाः प्रत्येकं त्रिसुपर्णसंज्ञास्तांस्त्रीनेकं वाऽयोधीते स त्रिसुपर्णः। 'मधुवाता ऋतायते' इत्याद्यास्तिस्रः ऋचो योऽधीते स त्रिमधुः। 'उशन्ह वै वाजःश्रवस" इत्यादिभिस्त्रिभिरनुवाकैर्विहितानां नाचिकेतसंज्ञानामग्नीनां चेतावेत्ता वा त्रिणाचिकेतः। ब्रह्मदेयासुतः ब्राह्मविवाहोढायाः पुत्र इत्यर्थः। **शंखः**—

" ब्रह्मदेयानुसंतानो ब्रह्मदेयाप्रदायकाः। ब्रह्मदेयापतिश्चैव ब्राह्मणाः पंक्तिपावनाः॥
"यजुषां पारगो यश्च साम्नां यश्चापि पारगः। अथर्वशिरसोऽध्येता ब्राह्मणः पंक्तिपावनः"॥ इति।

बोधायनोऽपि—"त्रिमधुस्त्रीणा चिकेतस्त्रिसुपर्णः पंचाग्निः षडङ्गवित् त्रिशीर्षगो ज्येष्ठसामगा" इति। पङ्क्तिपावनाः इति। 'सहस्रशीर्षा पुरुषः' 'अभ्द्यः संभूतः' 'सहस्रशीर्षं देवम्' इत्यनुवाकत्रयस्याध्येता। **हारीतोऽपि** स्थितिरविच्छिन्नवेदिर्वेदिता आर्षेयवत्वं चेति कुलगुणाः। वेदा अंगानि धर्मोऽध्यात्मवित्त्वं विज्ञानं स्मृतिश्चेति षड्विधं श्रुतं ब्रह्मण्यता देवपितृभक्तिता समता सौम्यता अपरोपतापिता अनसूयता अनुद्धतता अपारुष्यं मित्रता प्रियवादित्वं कृतज्ञता शरण्यता प्रशांतिश्चेति त्रयोदशविधं शीलम्।

"क्षमा दमो दया दानमहिंसा पूजनं तथा। शौचं स्नानं जपो होमस्तपः स्वाध्याय एव च॥

" सत्यवचनं संतोषो दृढव्रतत्वमुपव्रतत्वमिति षोडशगुणं वृत्तम्। तस्मात्कुलीनाः श्रुतशीलवंतो व्रतस्थाः सत्यवादिनोऽव्यंगाः पांक्तेया द्वादशोभयत्र श्रोत्रियस्त्रिणाचिकेतास्त्रिसुपर्णस्त्रिमधुत्रिशीर्षगो ज्येष्ठसामगः पंचाग्निषडंगविद्रुद्रजाप्यूर्ध्वरेता ऋतुकालगामी तत्त्वविच्चेति पंक्तिपावना भवंतीति स्थितिरविच्छिन्नसंतानत्वं अविच्छिन्नवेदवेदितेति। हविरासादनार्थं देशविशेषवाची वेदिशब्दो हविः साध्ययागं लक्षयति। आर्षेयत्वं प्रवरगतऋषिज्ञातृत्वं धर्मो धर्मशास्त्रं विज्ञानं वैशेषिकादिशास्त्रज्ञानं स्मृतिः वेदशास्त्राद्यविस्मरणम्"॥ **विष्णुरपि**—

"ये क्षांतदांताः श्रुतिपूर्णकर्णा जितेंद्रियाः प्राणिवधे निवृत्ताः।
"प्रतिग्रहे संकुचिता गृहस्थास्ते ब्राह्मणास्तारयितुं समर्थाः"॥ इति। **मत्स्यपुराणेऽपि**—

" अर्थज्ञो वेदवित्सत्री ज्ञातवंशः कुलान्वितः। पुराणवेत्ता सर्वज्ञः स्वाध्यायजपतत्परः॥
" शिवभक्तः पितृपरः सूर्यभक्तोऽथ वैष्णवः। ब्रह्मण्यो योगविच्छान्तो विजितात्मार्थशीलवान्॥
" श्राद्धे नियोजनीयाः स्युर्यदेते पंक्तिपावनाः" इति॥ **याज्ञवल्क्यः** (आ. २१९)
"अग्र्यः सर्वेषु वेदेषु श्रोत्रियो ब्रह्मविद्युवा। वेदार्थविज्ज्येष्ठसामा त्रिमधुस्त्रिसुपर्णकः॥

---

१ ग–दि

" कर्मनिष्ठास्तपोनिष्ठाः पंचाग्निर्ब्रह्मचारिणः । पितृमातृपराश्चैव ब्राह्मणाः श्राद्धसंपदा " ॥ इति ।

मनुः (३।१८३–१८६)–

"अपांक्त्योपहता पंक्तिः पाव्यते यैर्द्विजोत्तमैः । तान्निबोधत कात्स्न्येन द्विजाग्र्यान्पंक्तिपावनान् ॥

" अग्र्याः सर्वेषु वेदेषु सर्वप्रवचनेषु च । श्रोत्रियान्वयजाश्चैव विज्ञेयाः पंक्तिपावनाः ॥

" त्रिणाचिकेतः पंचाग्निस्त्रिसुपर्णः षडंगवित् । ब्रह्मदेयानुसंतानः छंदोगो ज्येष्ठसामगः ॥

" वेदार्थवित्प्रवक्ता च ब्रह्मचारी सहस्रदः । शतायुश्चैव विज्ञेया ब्राह्मणाः पंक्तिपावनाः " ॥ इति ।
सहस्रदः गवां सुवर्णानां वा । **व्यासोऽपि**—

" अग्निहोत्रपरो विद्वान् न्यायविच्च षडंगवित् । मंत्रब्राह्मणविच्चैव यश्च धर्मस्य पालकः ॥

" गुरुदेवाग्निपूजासु प्रसक्तो ज्ञानतत्परः । महादेवार्चनरतो वैष्णवः पंक्तिपावनः " ॥ इति ।
मनुः (२।११८)—

" गायत्रीमात्रसारोऽपि वरं विप्रः सुयंत्रितः । नायंत्रितश्चतुर्वेदी सर्वाशी सर्वविक्रयी " ॥

मत्स्यः—

" गायत्रीजप्यनिरतं हव्यकव्ये नियोजयेत् । पापं तिष्ठति नो तस्मिन्न बिंदुरिव पुष्करे " ॥ इति ।
पुष्करं पद्मपत्रम् । **आश्वलायनः**—

" अविप्लुतब्रह्मचर्यौ पितरौ यस्य तिष्ठतः । सन्ध्याग्निहोत्रनिष्ठश्चेत् श्राद्धे सोऽर्हो न वेदवित् ॥

" त्यक्ताग्निस्त्यक्तसन्ध्यो यो वेदविच्चापि सद्द्विजः । स्वपित्रोरात्मनः शुद्धिविहीनस्तं च वर्जयेत्" ॥

व्यासोऽपि—

" चीर्णव्रता गुणैर्युक्ता भवेयुर्ये च कर्षकाः । सावित्रीज्ञाः क्रियावंतस्ते राजन्वचनक्षमाः ॥

" सावित्रीं तु जपन्यस्तु त्रिकालं भरतर्षभ । भैक्षवृत्तिः क्रियावांश्च स राजन्केतनक्षमः " ॥ इति ।
केतनं निमंत्रणम् । क्षमो योग्य इत्यर्थः । **यमः**—

" गृहस्थो ब्रह्मचारी च यजुर्वेदविदेव च । वेदविद्याव्रतस्नाता ब्राह्मणाः पंक्तिपावनाः " ॥ इति ।
चशब्दाद्यतिरप्युक्तः । उक्तं च **साक्षाद्वसिष्ठेन**—" यतीन्साधून्वेति " । भोजयेदिति शेषः । **ब्रह्मांडपुराणे**—" शिखिभ्यो धातुरक्तेभ्यः त्रिदंडिभ्यश्च दापयेत् " ॥ इति । शिखिनो ब्रह्मचारिणः । धातुरक्ताः धातुरक्तवस्त्रधारिणो वानप्रस्थाः । त्रिदंडिनो वाक्कायमनोदंडैरुपेता यतयः । अत्र परः परः श्रेष्ठः । अत एव **नारदः**—

"यो वै यतीननादृत्य भोजयेदितरान्द्विजान् । विजानन्वसतो ग्रामे कव्यं तद्याति राक्षसान्" ॥ इति ।

नागरखंडे—

" आमंत्रयेद्यतीन्पूर्वं वनस्थान्वा त्रिकर्मणः । तदभावे गृहस्थांश्च ब्रह्मज्ञानपरायणान् " ॥ इति ।
त्रिकर्मणः ब्रह्मचारिणः । **ब्रह्मपुराणे**—

" अलाभे ध्यानिभिक्षूणां भोजयेद्ब्रह्मचारिणः । तदलाभे ह्युदासीनं गृहस्थमपि भोजयेत् " ॥ इति ।
ध्यानी वानप्रस्थः । उदासीनो दातुरसंबंधी । तथा **चापस्तंबः**—" ब्राह्मणान्भोजयेद्ब्रह्मविदो योनिगोत्रमंत्रांतेवास्यसंबंधान् " इति । योनिसंबंधः मातुलादयः । गोत्रसंबंधाः सपिंडाः । मंत्रसंबंधा वेदाध्यापकादयः । अंतेवासिसंबंधाः शिल्पिशास्त्रोपाध्यायाः । एवंविधसंबंधव्यतिरिक्तान्ब्राह्मणान् गृहस्थादीन्भोजयेदित्यर्थः ।

चंद्रिकायाम्—
" गृहस्थानां सहस्रेण वानप्रस्थशतेन च। ब्रह्मचारिसहस्रेण वानप्रस्थशतेन च॥
" ब्रह्मचारिसहस्रेण यो योगी स विशिष्यते "॥ **पद्मपुराणेऽपि**—
" सांगान्यश्चतुरो वेदानधीते संस्कृतोऽर्थवित्। कर्मवान्कर्मसंशुद्धः स श्राद्धे प्रथमो मतः॥
" तादृशाद्युताच्छ्रेयानेको योगसमाश्रयः॥ " **वृद्धशातातपः**—
" ज्ञानी यस्य सदाश्नाति उदकं वा पिबेद्यदि। कृतं तेनेह तत्कृत्यं तारितं च कुलत्रयम्॥
" योगिनं समतिक्रम्य गृहस्थं यदि पूजयेत्। न तत्फलमवाप्नोति स्वर्गस्थमपि पातयेत्॥
" योगिनं तु व्यतिक्रम्य पूजयंति परस्परम्। भोक्तारस्तु सदातारो नरके स्युः सबांधवाः"॥ इति।
एतत्सर्वं वृत्तस्थदृष्टतत्वयोनिविषयम्। तथा च **शातातपः**—
" योगिनं भोजयेन्नित्यं दृष्टतत्वं मनीषिणम्। तेषां तु दत्तमक्षय्यं भवतीति न संशयः "॥
चंद्रिकायामपि—" भोजनीयास्तथा नित्यं ज्ञानिनो ध्यानिनस्तथा "॥ इति।
एवं च " यथाकथंचिदपि यो योगधर्मं समाश्रितः। सम्यग्वर्णाश्रमस्थेभ्यस्तत्पात्रं परमं मतम् "॥
इत्युशनसो वचनं योगिप्रशंसापरम्। तथा **आश्वलायनः**—
" त्यक्तसंगं मुनिं शांतं सुनिर्विण्णममत्सरम्। शुद्धमेकाकिनं भिक्षुं सश्रद्धं च निराशिषम्॥
" ईषणात्रयनिर्मुक्तं लोकवर्त्माविदूषकम्। यतिमेतादृशं यत्नात् श्राद्धे सम्यक्प्रपूजयेत्॥
" आहुतं वाप्यनाहूतं सिद्धं वा ब्राह्मणाज्ञया। आत्मना विदितं विप्रं यतिं सिद्धं च योगिनम्॥
" पूजयेदेव मतिमान्श्राद्धेनाविदितं बुधः॥
"ये चाप्यविदिताः काले सिद्धाद्याः स्वयमागताः। शिवबुद्ध्याऽर्चयेदेतान् सिद्धान्विप्राननुमोदितान्"॥
हेमाद्रौ—
" भिक्षार्थमागतांश्चापि काले संयमिनो यतीन्। भोजयेत्प्रणिपाताद्यैः प्रसाद्य यतमानसः "॥
यमः—
" भिक्षुको ब्रह्मचारी च भोजनार्थमुपस्थितः। उपविष्टेष्वनुप्राप्तः कामं तमपि भोजयेत् "॥
वरणानंतरं प्राप्तमतिथिवद्भोजयेदित्यर्थः। **छागलेयः**—
" पूजयेच्छ्राद्धकालेऽपि यतिं च ब्रह्मचारिणम्। विप्रानुद्धरते पापात्पितृमातृगणानपि "॥ इति।
उपवेशनस्थानविशेषमाह **बृहस्पतिः**—
" अभावे स्नातकानां तु व्रतिनं श्राद्धकर्मणि। देवार्थे केतयेद्योग्यं न पित्रर्थे कदाचन॥
" श्राद्धकाले यतिं प्राप्तं पितृस्थाने तु भोजयेत्। देवस्थानेन वृणुयात्प्रथमं परिवेषयेत् "॥ इति।
व्रतिनं ब्रह्मचारिणमित्यर्थः। यत्तु **ब्रह्मकैवर्त्तवचनम्**—" मुंडान् जटिलकाषायान् श्राद्धकाले विवर्जयेत् " इति तदाश्रमाचाररहितव्यर्थमुंडिविषयम्।
" वर्णाश्रमविरुद्धानां धर्माणां ये तु सेवकाः। मुंडान् वसनकाषायांस्तांस्तु श्राद्धे विवर्जयेत्॥
"अनाश्रमी तु यो विप्रो जटी मुंडी वृथाचयः। वृथाकाषायधारी च श्राद्धे तं दूरतस्त्यजेत्"॥ इति
स्मरणात्। ब्रह्मचारिणः श्राद्धे एकान्नभोजनमनुजानाति **मनुः** (२।१८९)—
" व्रतवद्देवदैवत्ये पित्र्ये कर्मण्यथर्षिवत्। काममभ्यर्थितोऽश्नीयाद्व्रतमस्य न लुप्यते "॥ इति।
देवदैवत्ये दैविके कर्मण्यभ्यर्थितो ब्रह्मचारी व्रतवद्व्रताविरोधेन मधुवर्जं भुंजीत। पित्र्ये पितृकर्मणि ऋषिवत् ऋषिरिव मधुमांसादि वर्जयन् कामं इच्छया भुंजीत। एवमस्य ब्रह्मचर्यव्रतं न लुप्यते। अन्यथा लुप्यत इत्यर्थः।

याज्ञवल्क्योऽपि (आ. ३२)—

" ब्रह्मचर्ये स्थितो नैकमन्नमद्यादनापदि । ब्राह्मणः काममश्नीयाच्छ्राद्धे व्रतमपीडयन् " ॥ इति । व्रतपीडाकरं मधुमांसादिविवर्जयन्भुंजीतेत्यर्थः । परानुग्रहार्थं यतेः एकान्नभोजनमनुजज्ञे **कार्ष्णाजिनिः**—" अशक्तानुग्रहार्थं वा यतिरेकान्नभुग्भवेत् " ॥ इति । **वसिष्ठोऽपि**—

" ब्राह्मणकुलेऽभ्यर्थितो यतिर्भुंजीत " इति । **स्मृत्यंतरे**—

" मधुमांसं न दातव्यं यतीनां ब्रह्मचारिणाम् । गंधं माल्यं च तांबूलमनुज्ञाप्यान्यतो दिशेत्" ॥ इति ।

मनुः—(३।१४७-१४८)

" एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः । अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः ॥

"मातामहं मातुलं च स्वस्रीयं श्वशुरं गुरुम् । दौहित्रं विट्पतिं बंधुमृत्विग्याज्यौ च भोजयेत्" ॥ इति ।

एष इति त्रिणाचिकेतः पंचाग्निरित्याभिरुक्तस्य परामर्शः । अयमिति मातामहं मातुलं चेति वक्ष्यमाणस्य प्रथमः श्रेष्ठः कल्पः । अनुकल्पः प्रथमकल्पादधमः । " मुख्यः स्यात् प्रथमः कल्पो ह्यनुकल्पस्ततोऽधमः " (२।७।४०) इत्य**मरसिंहे**नाभिधानात् । प्रथमकल्पाभावे अनुकल्पोऽप्यनुष्ठेय इत्युक्तम् । सदा सद्भिरनुष्ठेत इति । विट्पतिर्जामाता भोजयितुर्मातामहादय इह गृह्यंते । न तु भोक्तुः पित्रादेः तेषां संबंधिशब्दत्वात् । **आश्वलायनः**—

" सत्पात्राणामलाभे तु पात्रभूतान् स्वबान्धवान् । कृतोपकारिणश्चापि श्राद्धे पूजितुमर्हति ॥

नियतैर्दोषनिर्मुक्ता गुणैश्चोक्तैः समन्विताः । अनुकल्पेऽर्चनीयाः स्युः बान्धवाश्चोपकारिणः ॥

"एतान्मोहात्तु यः श्राद्धे निर्गुणान् बान्धवान् द्विजान् । कृतोपकारिणश्चार्चेत् श्राद्धहा स भवेन्नरः ॥

" दौहित्रस्तु गुणैर्युक्तो विद्वान्प्रेतस्य संस्कृतः । अर्च्यः प्रथमकल्पेऽपि निर्गुणो न तु गृह्यते "॥

संभवति मुख्यकल्पे अनुकल्पो नानुष्ठेयः ।

" प्रभुः प्रथमकल्पस्य योऽनुकल्पेऽनुवर्तते । न सांपरायिकं तस्य दुर्मतेर्विद्यते फलम् " ॥ इति । **मनु**स्मरणात् (११।३०)—सांपरायिकमुत्तरकालीनं स्वर्गादिफलमित्यर्थः ।

याज्ञवल्क्येनाप्यनुकल्पो दर्शितः (आ. २२०)—

" स्वस्रीयऋत्विग्जामातृयाज्यश्वशुरमातुलाः । त्रिणाचिकेतदौहित्रशिष्यसंबंधिबांधवाः" ॥ इति ।

बोधायनः—" तदभावे रहस्यविदो यजूंषि सामानीति श्राद्धस्य महिमा तस्मादेवंविधं सपिंडमप्याशयेत् " इति । त्रिभ्य ऊर्ध्वं यः सपिंडस्तद्विषयमेतत् । तथा च सपिंड इत्यनुवृत्तौ **गौतमः** (१५।२१-२२)—" भोजयेदूर्ध्वं त्रिभ्यो गुणवंतम् " इति । **अत्रिस्तु**—

'षड्भिस्तु परतो भोज्याः श्राद्धे स्युर्गोत्रजा अपि । षड्भ्यस्तु पुरुषेभ्योऽर्वाक् अश्राद्धेयाः सगोत्रिणः' ॥ इति ।

यत्तु—

" पितृव्यगुरुदौहित्रानृत्विक्स्वस्रीयमातुलान् । पूजयेद्धव्यकव्येन वृद्धानतिथिबांधवान् " ॥ इति । **विष्णुपुराणे**–पितृव्यस्य भोजनीयत्वमुक्तं तत्तस्य गुणवत्तरत्वे वैश्वदेविकस्थाने भोजनीयत्वाभिप्रायेण । तथा **चात्रिः**—

" पिता पितामहो भ्राता पुत्रो वाऽथ सपिंडकः । न परस्परमर्घ्याः स्युर्न श्राद्धे ऋत्विजस्तथा ॥

"ऋत्विक्पुत्रादयो ह्येते सकुल्या ब्राह्मणा द्विजाः । वैश्वदेवे नियोक्तव्या यद्येते गुणवत्तराः" ॥ इति

एवं च—

"आत्मानं वा नियुंजीत पुत्रं वाऽपि गुणान्वितम् । सोदर्यमेव वा श्राद्धे भोजयेत्तु द्विजोत्तमः"॥ इति। **पराशरवचनं**

" योनिगोत्रसंबंधानामपि कामं श्रुतवृत्तये हि स्वधानिधीयते " इति **बोधायनवचनं**—"भोजयेद्ब्राह्मणान्ब्रह्मविदो योनिगोत्रमंत्रांतेवास्यसंबंधान् गुणहान्यां तु परेषां समुदेतः सोदर्योऽपि भोजयितव्य एतेनांतेवासिनो व्याख्याता " **इत्यापस्तंबवचनमपि** वैश्वदेविकस्थानाभिप्रायम् । अंतेवासिनामपि तत्स्थान एव निवेशः । तथा चामंत्रयीतेत्युवृत्तौ **कात्यायनः**—

" अभावे शिष्यान्स्वाचारान्वैश्वदेवार्थम् " इति । सगुणानामनुकल्पानां मातामहादीनामभावे निर्गुणानामनुकल्पतया ग्रहणमुक्तं **चंद्रिकायाम्**—

" यस्त्वासन्नमतिक्रम्य ब्राह्मणं पतिताहृते । दूरस्थं भोजयेन्मूर्खो गुणाढ्यं नरकं व्रजेत् ॥
" तस्मात्संपूजयेदेनं गुणं तस्य न चिंतयेत् । केवलं चिंतयेज्जातिं न गुणान्विततां द्विजः ॥
" सन्निकृष्टं द्विजं यस्तु युक्तजातिं प्रियंवदम् । मूर्खं वा पंडितं वापि वृत्तहीनमथापि वा ॥
" नातिक्रमेन्नरो विद्वान्दारिद्र्याभिहतं तथा " ॥ इति । संनिकृष्टं शरीरतः संनिकृष्टं दौहित्रादिमित्यर्थः । तथा च **पुराणे**—

" संबंधिनस्तथा सर्वान्दौहित्रं विटपतिं तथा । भागिनेयं विशेषेण तथा बंधुं खगाधिप ॥
" नातिक्रमेन्नरस्त्वेतान्न मूर्खानपि गोपते । अतिक्रम्य महारौद्रं रौरवं नरकं व्रजेत् " ॥ इति । **मनुरपि** (३।२३४)—" व्रतस्थमपि दौहित्रं श्राद्धे यत्नेन भोजयेत् " ॥ इति । व्रतस्थं केवलव्रतस्थमध्ययनादिरहितमित्यर्थः ।

" दौहित्रस्तु गुणैर्युक्तो विद्वान् प्रयतसंयतः । अर्च्यः प्रथमकल्पेऽपि निर्गुणो न तु गृह्यते " ॥ **इत्याश्वलायनः** । शरीरतः सन्निकृष्टदौहित्राद्यभावे तु **चंद्रिकायामुक्तम्**—

" गायत्रीमात्रसारोऽपि ब्राह्मणः पूज्यतां गतः । गृहासन्नो विशेषेण न भवेत्पतितः स चेत्"॥ इति। द्विविधसंनिकृष्टविषयेऽपि गुणादिभिः श्रेष्ठेऽतिक्रांते सति भवत्येव दोषातिशयः । तदप्युक्तं **तत्रैव**—

" सप्तपूर्वान्सप्तपरान्पुरुषानात्मना सह । अतिक्रम्य द्विजवरं नरके पातयेत्खग ॥
" तस्मान्नातिक्रमेत्प्राज्ञो ब्राह्मणान्प्रातिवेशिकान्। संबंधिनस्तथा सर्वान्दौहित्रं विट्पतिं तथा" ॥ इति। **षट्त्रिंशन्मते**—

" संनिकृष्टमधीयानं ब्राह्मणं यो व्यतिक्रमेत् । भोजने चैव दाने च हन्यात् त्रिपुरुषं कुलम्" ॥ इति। यस्तु संनिकृष्टोऽनधीयानस्तस्यातिक्रामे न दोषः । तथा च **तत्रैवोक्तम्**—

"यस्य त्वेकगृहे मूर्खो दूरस्थश्च गुणान्वितः । गुणान्विताय दातव्यं न हि मूर्खे व्यतिक्रमः" ॥ इति। व्यतिक्रमदोषो नास्तीत्यर्थः । **भविष्यत्पुराणेऽपि**—

" ब्राह्मणातिक्रमो नास्ति मूर्खे मंत्रविवर्जिते । ज्वलन्तमग्निमुत्सृज्य न हि भस्मनि हूयते " ॥ इति । मूर्खग्रहणं निर्गुणमात्रोपलक्षणार्थम् । अत एवोक्तं **तत्रैव**—"व्यतिक्रांते न दोषोऽस्ति निर्गुणं प्रति कर्हिचित् " इति । आसन्नस्यैवातिथेरपि गुणपरीक्षणं न कार्यमित्याह **शातातपः**—" अविज्ञातं द्विजं श्राद्धे न परीक्षेत्सदा बुधः ।

" सिद्धा हि विप्ररूपेण चरंतीह महीतले । अतिथिर्यस्य नाश्नाति तच्छ्राद्धं न प्रशस्यते"॥ इति। "अज्ञातकुलनामानं तत्कालसमुपस्थितम्" इत्युक्तलक्षणातिथिः ।

अनुकल्पांतरमाह **वसिष्ठः**—

“ आनृशंस्यं परो धर्मः याचते यत्प्रदीयते । अयाचतः सीदमानान्सर्वोपायैर्निमंत्रयेत् ” ॥ इति ।

आनृशंस्यमुत्कृष्टो धर्मः । तेन सगुणानामनुकल्पानामभावे याचनशीलान् निर्गुणानपि सर्वोपायैर्निमन्त्रयीत यथा ते निमन्त्रणमङ्गीकुर्वन्ति तादृशैरुपायैर्निमन्त्रयीत । अयाचनशीलानामभावे याचमानाय निर्गुणायापि दीय इत्यर्थः । अनुकल्पांतरमाह **मनुः** (३।१४४)—

“ कामं श्राद्धेऽर्चयेन्मित्रं नाभिरूपमपि त्वरिम् । द्विषता हि हविर्भुक्तं भवति प्रेत्य निष्फलम्” ॥ इति ।

अभिरूपं विद्वांसमपीत्यर्थः । अयं त्वनुकल्पः पूर्वोक्तानामप्यलाभे द्रष्टव्यः । स्वेनैव निषिद्धस्य काममर्चयेदिति सानुशयमेवाभ्यनुज्ञानात् । तथाहि श्राद्धे मित्रं निषेधति **मनुः** (३।१३८)—

“न श्राद्धे भोजयेन्मित्रं धनैः कार्योऽस्य संग्रहः । नारिं न मित्रं यं विद्यात्तं श्राद्धे भोजयेत् द्विजम्” ॥इति।

धनैः कार्य इति वचनाद्गुणवत्तामात्रहेतुकस्य मित्रभोजनस्यानुज्ञानमर्थात् सिद्धम् । यदाह **स एव** (३।१३९-१४१)—

“ यस्य मित्रप्रधानानि श्राद्धानि च हवींषि च । तस्य प्रेत्य फलं नास्ति श्राद्धेषु च हवींषि च ॥

“यः संगतानि कुरुते मोहात् श्राद्धेन मानवः । स स्वर्गाच्च्यवते लोकात् श्राद्धमित्रो विनश्यति ॥

“ संभोजनी साभिहिता पैशाची दक्षिणा द्विजैः । इहैवास्ते तु सा लोके गौरंधे वैकवेश्मनि” ॥ इति ।

सा दक्षिणा तन्मित्रश्राद्धं संभोजनी बहूनामेकत्र भोजनम् । तद्रूपा पैशाची पिशाचैरुपभोग्येति द्विजैरभिहिता इहैवास्ते इह लोके मित्रमेव संगृण्हाति नामुत्र पितॄन् । अन्यत्र गमनाशक्तौ दृष्टांत उक्तः गौरंधे वैकवेश्मनीति । **स्मृत्यंतरेऽपि**—

“ संभोजनी नाम पिशाचभिक्षा नैषा पितॄन् गच्छति नोत देवान् ॥

“ इहैव सा चरति क्षीणपुण्या शालांतरे गौरिव नष्टवत्सा” ॥ इति ।

अथ भोजनीयतयोक्तश्रोत्रियादिषु ये वर्जनीयास्ते निरूप्यंते । तत्र **क्रमदीपिकायाम्**—

“रजस्वला च या नारी प्रसूता याश्च योषितः । दैवे कर्मणि पित्र्ये च तासां भर्तुरशुद्धता ॥

“पूर्वेद्युः श्राद्धकर्त्तारं तत्कर्त्तारं परेऽहनि । शवानुगामिनं चैव वर्जयेच्छ्राद्धकर्मणि ” ॥ इति ।

“ श्राद्धे निमन्त्रयेद्विद्वान् पितॄणां न सगोत्रिणः । कर्तुस्तु गोत्रिणश्चैव विशेषेण विवर्जयेत् ।

“सहोदराणां पुत्राणां पितुरेकदिने तथा । श्राद्धे निमन्त्रणं वर्ज्यं क्षुरकर्म तथैव च ” ॥ इति ।

शंखः— मातामहादेर्ज्ञातींश्च स्वस्य ज्ञातींश्च वर्जयेत् ।

“ गृह्येत यदि कर्त्ता च भोक्ता च नरकं व्रजेत् । तच्छ्राद्धमासुरं प्रोक्तं पितॄणां नोपतिष्ठते ” ॥

वृद्धमनुः–“मासिके आब्दिके प्राप्ते वरणे परिवर्जयेत् । योनिजान् गोत्रजांश्चैव ह्युभयोर्वंशजांस्तथा ॥

“ वर्जयेत्पितृकृत्येषु देवकार्ये यथामति । मातामहादेर्वरणादूर्ध्वं ज्ञातीन्नियोजयेत्”॥ इति ।

नारदः—

“ श्राद्धं दद्यात्सगोत्रे चेत्समानप्रवरे तथा । दातुः प्रतिग्रहीतुश्च कुलक्षयकरं तु तत् ” ॥ इति ।

कारिकारत्ने–“अनग्निं गर्भिणीनाथं पितरं पुत्रमेव च । श्राद्धे निमंत्रयेन्नैको भ्रातॄनपि च सोदरान् ॥

“ नित्यश्राद्धे गयाश्राद्धे सोदकुंभे तथैव च । सगोत्रं भोजयेत्प्राज्ञ इत्युवाच बृहस्पतिः ” ॥ इति ।

“ आब्दिके त्वघमेकाहं मासिकेषु च षड्दिनम् । षाण्मासिके सपिण्डे च एकोद्दिष्टे च वत्सरम्”॥इति ।

याज्ञवल्क्यः (आ २२२)—

" रोगी हीनातिरिक्तांगः काणः पौनर्भवस्तथा । अवकीर्णी कुंडगोलौ कुनखी श्यावदंतकः ॥
" भृतकाध्यापकः क्लीबः कन्यादूष्यभिशस्तकः । मित्रध्रुक्पिशुनः सोमविक्रयी परिविंदकः ॥
" मातापितृपरित्यागी कुंडाशी वृषलात्मजः । परपूर्वापतिः स्तेनः कर्मदुष्टाश्च निंदिताः " ॥ इति ।

रोगी उन्मादादिरोगवान् । उन्मादादिरोगाश्च **देवलेन** दर्शिताः— " उन्मादस्त्वक्दोषो राजयक्ष्मा कासो मधुमेहो भगंदरो महोदरोऽश्मरीत्यष्टौ पापरोगाः " इति । हीनमतिरिक्तं वांऽगं यस्यासौ हीनातिरिक्तांगः । एकोनाक्ष्णा यः पश्यति स काणः । तेन च बधिरमूकांधादयो लक्ष्यंते । द्विरूढा पुनर्भूः । तस्य जातः पौनर्भवः । अवकीर्णी स्खलितब्रह्मचर्यो ब्रह्मचारी ।

"व्रती यः स्त्रियमभ्येति सोऽवकीर्णी निरुच्यते । गूढलिङ्ग्यवकीर्णी स्यात् यश्च भग्नव्रतस्तथा" ॥ इति ।

" स्त्रीगूढं यवकीर्णः स्याद्यश्च भिन्न व्रतस्तथा" **देवलस्मरणात्** । कुंडगोलौ—

" परदारेषु जायेते द्वौ सुतौ कुंडगोळकौ । पत्यौ जीवति कुंडस्तु मृते भर्तरि गोलकः " ।

इत्येवमुक्तलक्षणौ । कुनखी दुष्टनखः । श्यावदंतः स्वभावकृष्णदंतः । " स्वर्णचोरस्तु कुनखी सुरापः श्यावदंतकः " इति पूर्वजन्मनि महापातकित्वात्तयोः प्रतिषेधः । वेतनं गृहीत्वा योऽध्यापयति स भृतकाध्यापकः । तेन भृतकाध्यापितोऽपि लक्ष्यते । तावुपपातकिनौ

"भृतकाध्यापको यश्च भृतकाध्यापितश्च यः । उपपातकिनौ द्वौ च स्वाध्यायक्रयविक्रयात्" ॥ इति ।

देवलस्मरणात् । सता असता वा दोषेण कन्यां दूषयिता कन्यादूषी । महापातकाभिशस्तोऽभिशस्तकः । मित्रद्रोही मित्रध्रुक् । परदोषसंकीर्तनशीलः पिशुनः । परिविंदकः परिवेत्ता । कुंडस्यान्नं योऽश्नाति स कुंडाशी । एवं गोलकस्यापि ' यस्तयोरन्नमश्नाति स कुंडाशी प्रकीर्त्तितः " इति **वचनात्** । विहितकर्मपरित्यागी वृषलः । तत्सुतो वृषलात्मजः । परपूर्वापतिः पुनर्भूपतिः । अदत्तादायी स्तेनः । कर्मदुष्टाः शास्त्रविरुद्धकारिणः । एते श्राद्धे निंदिता वर्ज्या इत्यर्थः ।

मनुरपि (३।१५०–१६७)—

" ये स्तेनाः पतिता विप्रा ये च नास्तिकवृत्तयः । तान्हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत् ॥
" जटिलं चानधीयानं दुर्बालं कितवं तथा । याचयंति च ये पूगांस्तांस्तान् श्राद्धे न भोजयेत् ।
" चिकित्सका देवलका मांसविक्रयिणस्तथा । विपणेन च जीवंतो वर्ज्याः स्युर्हव्यकव्ययोः ।
" प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदंतकः । प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्धुषिस्तथा ॥
" यक्ष्मी च पशुपालश्च परिवेत्ता निराकृतिः । ब्रह्मद्विट् परिवित्तिश्च गणाभ्यंतर एव च ॥
" कुशीलवोऽवकीर्णी च वृषलीपतिरेव च । पौनर्भवश्च काणश्च यस्य चोपपतिर्गृहे ॥
" भृतकाध्यापको यश्च भृतकाध्यापितस्तथा । शूद्रशिष्यो गुरुश्चैषां वाग्दुष्टः कुंडगोलकौ ॥
" अकारणे परित्यक्ता मातापित्रोर्गुरोस्तथा । ब्राह्मैर्यौनैश्च संबंधैः संयोगं पतितैर्गतः ॥
" अगारदाही गरदः कुंडाशी सोमविक्रयी । समुद्रयायी वंदी च तैलिकः कूटकारकः ॥
" पित्रान् विवादमानश्च केकरो मद्यपस्तथा । पापरोग्यभिशस्तश्च डांभिको रसविक्रयी ॥
" धनुःशराणां कर्त्ता च यश्चाग्रेदिधिषूपतिः । मित्रध्रुक् द्यूतवृत्तिश्च पुत्राचार्यस्तथैव च ॥
" भ्रमरी गंडमाली च श्वित्र्यथो पिशुनस्तथा । उन्मत्तोऽन्धश्च वर्ज्याः स्युर्वेदनिंदक एव च ॥
" हस्तिगोश्वोष्ट्रदमको नक्षत्रैर्यश्च जीवति । पक्षिणां पोषको यश्च युद्धाचार्यस्तथैव च ॥
" स्रोतसां भेदकश्चैव तेषामावरणे रतः । गृहसंवेशको दूतो वृक्षारोहक एव च ॥

१ ग–क्लीबा । २ क्ष–स्यह ।

" श्वक्रीडी श्येनजीवी च कन्यादूषक एव च । हिंस्रो वृषलपुत्रश्च गणानां चैव याजकः॥
" आचारहीनः क्लीबश्च नित्ययाचनकस्तथा । कृषिजीवी शिल्पजीवी सद्भिर्निंदित एव च ॥
" औरभ्रको माहिषिकः परपूर्वापतिस्तथा । प्रेतनिर्यातकश्चैव वर्जनीयाः प्रयत्नतः ॥
" एतान्विगर्हिताचारानपाङ्क्तेयान् नराधमान् । द्विजातिप्रवरो विद्वानुभयत्र विवर्जयेत् " ॥ इति ।

एतद्व्याख्यायते पारलौकिकफलदं कर्म नास्तीति मन्यमाना नास्तिकाः तेभ्यो वृत्तिर्जीविका येषां श्रोत्रियादीनां ते नास्तिकवृत्तयः । जटिलो ब्रह्मचारी । अनधीयानः इति तस्य विशेषणम् । न चाध्ययनरहितस्य ब्रह्मचारिणोऽश्रोत्रियत्वेन श्राद्धे प्रसक्त्यभावात्प्रतिषेधोऽनुपपन्न इति मंतव्यम् । यतो "व्रतस्थमपि दौहित्रं श्राद्धे यत्नेन भोजयेत् " इति । अनधीयानस्यापि दौहित्रस्य ब्रह्मचारिणो भोजनीयत्वप्रसक्तौ प्रतिषेध इति । दुर्बालः खल्वाटः कपिलकेशः । अत्यंतकोपनो वा । तदुक्तं **संग्रहे**—" खल्वाटकश्च दुर्बालः कपिलश्चंड एव च" इति । कितवो द्यूतसक्तः । पूगयाजकः गणयाजकः । चिकित्सकाः जीवनार्थं दृष्टार्थं च भैषज्यकारिणः । तस्माद् ब्राह्मणेन भेषजं न कार्यम् ' अपूतो ह्येषोऽमेध्यो यो भिषक् ' इति निंदार्थवाददर्शनात् ।
देवलकस्वरूपं **देवलेन** दर्शितम्—
" देवार्चनपरो विप्रो वित्तार्थी वत्सरत्रयम् । असौ देवलको नाम हव्यकव्येषु वर्जितः ॥
" देवकोशोपजीवी च नाम्ना देवलको भवेत् । अपांक्तेयः स विज्ञेयः सर्वकर्मसु सर्वदा " ॥ इति ।
अनापदि वाणिज्येन जीवंतो विपणजीवनः । न त्वापद्यपि "क्षात्रेण कर्मणा जीवेद्विशां वाऽप्यापदि द्विजः" इति वाणिज्यस्यापत्कल्पतया विहितत्वात् गुरोः प्रतिरोद्धा गुरुस्पर्धी । त्यक्ताग्निः विहितत्यागकारणं विना श्रौतस्मार्त्ताग्निपरित्यक्ता । अल्पवृध्द्या धनं स्वीकृत्य अधिकवृध्द्या धनप्रयोजको वार्धुषिः । तथा च **यमः**—
" समार्घं धनमुद्धृत्य महार्घं यः प्रयच्छति । स वै वार्धुषिको नाम ब्रह्मवादिषु गर्हितः " ॥
यक्ष्मी क्षयरोगी 'ब्रह्महा क्षयरोगी स्यात्' इति तस्य पूर्वजन्मनि ब्रह्महन्तृत्वात्प्रतिषेधः । अनापदि वृत्त्यर्थं यः पशून्पालयति स पशुपालः । परिवेत्तृपरिवित्तिस्वरूपमुक्तं **मनुनैव** (३।१७१।१७२)—
" दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते । परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ॥
" परिवित्तिः परिवेत्ता यया च परिविद्यते । सर्वे ते नरकं यांति दातृयाजकपंचमाः" ॥इति ।
परिवित्त्यादयः पंच वर्जनीया इत्यर्थः । अधीतविस्मृतवेदो निराकृतिः । तथा च **देवलः**—
" अधीतविस्मृते वेदे भवेद्विप्रो निराकृतिः " ॥ इति । **कात्यायनस्तु**—
" यस्त्वाधायाग्निमालस्याद्देवादीन्यस्तु नेष्टवान् । निराकर्ताऽमरादीनां स विज्ञेयो निराकृतिः" ॥ इति ।
गणाभ्यंतरो गणस्य नेता । कुशीलवो गायकादिः । वृषलीपतिस्तु रजस्वलायाः कन्यायाः पतिः । तदुक्तं **देवलेन**—
" वंध्या तु वृषली ज्ञेया वृषली च मृतप्रजा । अपरा वृषली ज्ञेया कुमारी या रजस्वला ॥
" यस्त्वेनामुद्वहेत्कन्यां ब्राह्मणो ज्ञानदुर्बलः । अश्राद्धेयमपांक्तेयं तं विद्यात् वृषलीपतिम् " ॥ इति ।
उपपतिस्वरूपमुक्तं **देवलेन**—
" परदाराभिगो मोहात्पुरुषो जार उच्यते । स एवोपपतिर्ज्ञेयो यः सदा संवसेद्गृहे " ॥ इति ।
वाग्दुष्टो निष्ठुरवाक् । अगारदाही द्वेधा **देवलेन** दर्शितः—

---

१ १ **खग**-श्लीपदी । २ **क्ष**-भक्तार्थी ।

"अगारदाही स ज्ञेयः प्रेतदग्धा धनेन यः । स चाप्यगारदाही स्यात् द्वेषाद्यो वेश्मदाहकः" ॥ इति । तैलिकश्चक्री । कूटकारकः तुलामानादिषु वंचनाकारकः । केकरोऽध्यर्धदृष्टिः । अग्रेदिधिष्वाः पतिरग्रेदिधिषूपतिः । ज्येष्ठायामूनूढायामूढा या कनिष्ठिका साऽग्रेदिधिषुः । तदुक्तं **देवलेन**—

"ज्येष्ठायां यद्यनूढायां कन्यायामूह्यतेऽनुजा । सा चाग्रेदिधिषूर्ज्ञेया पूर्वा तु दिधिषूर्मता" ॥ इति । पुत्राचार्योऽक्षरपाठकः पुत्राद्गृहीतविद्यो वा । तथा **चंद्रिकायाम्**—

"पुत्राचार्यः स विज्ञेयो ग्रामे योऽक्षरपाठकः । पुत्रादवाप्तविद्यो वा पुत्राचार्यो निगद्यते" ॥ इति । भ्रामरी वृत्त्यर्थमेव भ्रमरवदर्थार्जकः । अपस्मारीत्यन्ये । गंडमाली गंडमालाख्यरोगवान् । श्वित्री श्वेतत्वक् । हस्त्यादिदमकः शिक्षकः । गृहसंवेशकः गृहाणां निर्माता । नानाजातीया अनियतवृत्तयः । संहता गणाः । तेषां यांजकः[1] यांजयिता । औरभ्रिकः अवीनां पालकः । माहिषिको व्यभिचारिणीपुत्रः । तदाह **देवलः**—

"महिषीत्युच्यते भार्या सा चैव व्यभिचारिणी । तस्यां यो जायते पुत्रः स वै माहिषिकः स्मृतः" ॥ इति । एतान्पूर्वोक्तानुभयत्र दैवे पित्र्ये च वर्जयेदित्यर्थः । **मनुरेव** (३।१६९-१७०)—

"अपांक्त्यदाने यो दातुर्भवत्यूर्ध्वफलोदयः । दैवे कर्मणि पित्र्ये च तं प्रवक्ष्याम्यशेषतः ॥
"अवृत्तैर्यद्द्विजैर्भुक्तं परिवेत्रादिभिस्तथा । अपांक्तेयैर्यदन्यैश्च तद्वै रक्षांसि भुंजते ॥
"अपांक्त्यो यावतः पांक्त्यान्भुंजानाननुपश्यति । तावता न फलं तत्र प्रदाताप्नोति बालिशः ॥ १७६
"वीक्ष्यांधो नवतेः काणः षष्टेः श्वित्री शतस्य तु । पापरोगी सहस्रस्य दातुर्नाशयते फलम् ॥ १७७
'यावतः संस्पृशेदंगैः ब्राह्मणान् शूद्रयाजकः । तावतां न भवेत् दातुः फलं दानस्य पौर्तिकम् ॥ १७८
"सोमविक्रयिणे विष्ठा भिषजे पूयशोणितम् । अप्रतिष्ठं वार्धुषिके नष्टं देवलके भवेत् ॥ १८०
"यत्तु वाणिजके दत्तं नेह नामुत्र तद्भवेत् । भस्मनीव हुतं हव्यं तथा पौनर्भवे द्विजे ॥ १८१
"इतरेषु त्वपांक्तेषु यथोद्दिष्टेष्वसाधुषु । मेदोऽसृङ्मांसमज्जास्थि वदंत्यन्नं मनीषिणः" १८२ ॥ इति ।

वीक्ष्यांधो दृश्यमानांधः नवतेर्भुंजानानां दातुर्दानं फलं नाशयते । पौर्तिकं पूर्तश्राद्धादि । तत्र भवतीत्यर्थः । **यमः** —

"काणाः कुब्जाश्च कुणपाः कृतघ्ना गुरुतल्पगाः । ब्रह्मघ्नाश्च सुरापाश्च स्तेना गोघ्नाश्चिकित्सकाः ॥
"राष्ट्रकामास्तथोन्मत्ताः पशुविक्रयिणश्च ते । मानकूटास्तुलाकूटाः शिल्पिनो ग्रामयाजकाः ॥
"राजभृत्यांधबधिरमूकाः खल्वाटपंकवः । वृषलीफेनपीताश्च खञ्जाश्च श्रेणियाजकाः ॥
"कालोपजीविनश्चैव ब्रह्मविक्रयिणस्तथा । दग्धपूजाश्च ये विप्रा ग्रामकृत्यकराश्च ये ॥
"अगारदाहिनश्चैव गरदाः शवदाहकाः । कुंडाशिनो देवलकाः परदाराभिमर्शकाः ॥
"श्यावदंताः कुनखिनः शिल्पिनः कुष्ठिनश्च ये । वणिजो मधुहर्तारो हस्त्यश्वदमका द्विजाः ॥
"कन्यानां दूषकाश्चैव ब्राह्मणानां च दूषकाः । सूचकाः प्रेषकाश्चैव कितवाश्च कुशीलवाः ॥
"समयानां च भेत्तारः प्रदाने ये च बंधकाः[2] । अजाविका माहिषिकाः सर्वविक्रयिणश्च ये ॥
"धनुःकर्ता द्यूतवृत्तिर्मित्रध्रुक् शस्त्रविक्रयी । गंडमाली च यक्ष्मी च दीर्घरोगी वृथाश्रमी ॥
"प्रव्रज्योपनिवृत्तश्च वृथाप्रव्रजितश्च यः । तथा प्रव्रजिताजातः प्रव्रज्यावसितश्च यः ॥
"तावुभौ ब्रह्मचंडालौ प्राह वैवस्वतो यमः ।
"राज्ञः प्रेष्यकरो यश्च ग्रामस्य नगरस्य च । समुद्रयायी वांताशी केशविक्रयिणश्च ये ॥

---

१ ग–यौ । २ क्ष–बांधवाः ।

" अवकीर्णी च वीरघ्नो गुरुघ्नः पितृदूषकः । गोविक्रयी च दुर्वालः पूगानां चैव याजकः ॥
" मद्यपश्च कदर्यश्च सह पित्रा विवादकृत् । दाम्भिको वर्धकीभर्ता त्यक्तात्मा दारदूषकः ॥
" सद्भिश्च निंदिताचारः स्वकर्मपरिवर्जकः । परिवित्तिः परिवेत्ता भृत्याचारो निराकृतिः ॥
" शूद्राचार्यः सुताचार्यः शूद्रशिष्यस्तु नास्तिकः । इष्वस्त्रदारकाचार्यो मानकृत्तैलिकस्तथा ॥
" चोरा वार्धुषिका दुष्टाः परस्वानां च दूषकाः । चतुराश्रमबाह्यश्च सर्वे ते पंक्तिदूषकाः " ॥
इत्येतैर्लक्षणैर्युक्तान तान् द्विजान् न निमंत्रयेदिति । **ब्रह्मपुराणे**ऽपि—
"षंढो मूकश्च कुनखी खल्वाटो दंतरोगवान् । श्यावदंतः पूतिनासो हीनांगश्चाधिकांगुलिः॥
" गलरोगी गंडमाली स्फुटितांगश्च सज्वरः । खंजतूबरमंदाश्च गंडुमान् दीर्घरोगवान् " ॥ इति ।
तूबरः[1] श्मश्रुरहितः । **यमो**ऽपि—
" न खरैरुपयातस्य न रक्तोल्बणवाससः । द्व्यंगुलातीतकर्णस्य भुंजते पितरो हविः " ॥ इति ।
कर्णवेधस्थाने तालपत्रादिप्रवेशेन विवर्धनं द्व्यंगुलाधिकं निषिद्धम् । अतः द्व्यंगुलातीतकर्णः श्राद्धानर्ह इत्यर्थः । **शंखो**ऽपि—
" अनध्यायेष्वधीयानाः शौचाचारविवर्जिताः । शूद्रान्नरसपुष्टांगा ब्राह्मणाः पंक्तिदूषकाः" ॥ इति ।
आपस्तंबः—
" नीलकर्षणकारी तु नीलवस्त्रोपधारकः । किंचित्तस्मै न दातव्यं चंडालसदृशो हि सः "॥ इति
नीलीसंसर्गजदोषवान्वर्ज्य इत्यर्थः । **स्मृत्यंतरे**—
" स्तेनाभिशस्तनग्नाखुषंढमार्जारकुक्कुटाः । कुंडगोलौ देवलकौ काणांधाः शिष्टगर्हिताः ॥
" न वार्यपि प्रयच्छेत्तु बैडालव्रतिके द्विजे । न बकवृत्तिके चैव नावेदविदि धर्मवित् ॥
" न भ्रातरं नियुंजीत श्राद्धे पितृसुतानपि । विधुरं गर्भवंतं च विशिष्टमपि वर्जयेत् ॥
" विद्याचोरो गुरुद्रोही नास्तिको वेदनिंदकः । एते ब्राह्मणचंडाला जातिचंडालपंचमाः ॥
" प्रतिगृह्य तु धर्मार्थं संचयं कुरुते तु यः ।धर्मार्थं नोपयुंजीत तस्करं तं विवर्जयेत्" ॥ इति ।
नग्नादीनां लक्षणं निरूपितमधस्तात् । **मनुः**—(४।३०)
" पाषंडिनो विकर्मस्थान्बैडालव्रतिकान् शठान् । हैतुकान्बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत् " ॥
न केवलं भोजयित्रैव ज्ञानहीनो वर्जनीयः । किंतु स्वयमेव तेन वर्जनीया इत्याह स एव (३।१६३)
"यावतो ग्रसते पिंडान् हव्यकव्येष्वमंत्रवित् । तावतो ग्रसते प्रेत्य दीप्ताच्छूलर्ष्टयोगुळान्॥"[2] इति ।
दीप्तानग्निमयान् हुळद्विफलपत्राग्रम्[3] । **ब्रह्माण्डपुराणे**—
"अस्मान् वृणीष्व श्राद्धार्थं यो वदेत्स द्विजाधमः । तं वृंके श्राद्धकर्ता चेत् तावुभौ नरकालये ।
"एतावद्दक्षिणां देहि श्राद्धार्थमिति यो वदेत् । तं वृंके श्राद्धकर्ता चेत् तावुभौ नरकालयौ" ॥
उक्तानामेतेषां विद्यादिगुणयोगेऽपि वर्जनीयत्वमुक्तं **ब्रह्मांडपुराणे**[4]—
"श्राद्धार्हगुणयोगेऽपि नैतान् जातु कथंचन । निमंत्रयेत श्राद्धेषु सम्यक्फलमभीप्सता " ॥ इति ।
आपत्स्वगत्या स्वीकृताः काणादयः सर्ववेदाग्न्यादिभिः पंक्तिपावनैर्यथा मिश्रिता भवंति तथा नियोक्तव्या इत्याह **सुमंतुः**—
"काणाः कुब्जाश्च खंजाश्च शिपिविष्टाः खलैर्विना । सर्वे श्राद्धे नियोक्तव्या मिश्रिता वेदपारगैः"॥ इति ।
अत एवोक्तं **मनुनापि** (३।१८३)—अपांक्त्योपहता पंक्तिः पाव्यते यैर्द्विजोत्तमैः " ॥ इति ।

---

१ क्ष–कूपर– ! २ क्ष–दीप्तशूलर्ष्ट्ययोगुडान् इति मुद्रितपाठः । ३ क–दिपलपत्रा । ४ ग–तत्रैव ।

मिश्रणे विशेषः उक्तः चंद्रिकायाम्—"काणादीन्भोजयेद्दैवे श्राद्धे पित्र्ये तु वर्जयेत् " ॥ इति । पैठीनसिरपि—" त्रिमधुस्त्रिसुपर्णस्त्रिणाचिकेतश्छंदोगो ज्येष्ठसामगो ब्रह्मदेयानुसंतानः सहस्रदो रुद्राध्यायी चतुर्वेदः षडंगविदथर्वशिरसोऽध्यायी पंचाग्निर्वेदजापीति पंक्तिपावनाः । तेषामेकैकः पुनाति युक्तः पंक्तिमूर्ध्नि सहस्रैरप्युपहताम् " इति । गयाश्राद्धे तु जातिमात्रोपजीविनोऽपि तत्रत्या एव ब्राह्मणार्थे परिग्राह्याः । तदुक्तं चंद्रिकायाम्—

" यदि पुत्रो गयां गच्छेत्कदाचित्कालपर्ययात् । तानेव भोजयेद्विप्रान् ब्राह्मणा ये प्रकल्पिताः ॥
" ब्रह्मकारितसंस्थाना विप्रा ब्रह्मसमाः स्मृताः । अमानुषा गयाविप्रा ब्राह्मणा ये प्रकल्पिताः ॥
" तेषु तुष्टेषु संतुष्टाः पितृभिः सह देवताः " ॥ इति ।

श्राद्धदिनात्पूर्वदिनकृत्यमुक्तम् वराहपुराणे—

" वस्त्रशौचादि कर्त्तव्यं श्वः कर्ताऽस्मीति जानता । स्थानोपलेपनं कृत्वा भूमिं विप्रान्निमंत्रयेत् ॥
" दंतकाष्ठं च विसृजेत् ब्रह्मचारी शुचिर्भवेत् " ॥ इति । श्राद्धभूमिं परिगृह्य गोमयादिना तत्स्थाने लेपनं कृत्वा वस्त्रशुध्यादिकमन्हि कृत्वा रात्रौ विप्रान्निमंत्रयेदित्यर्थः । माधवीयेऽपि—" पूर्वेऽह्नि रात्रौ विप्राग्र्यान्कृतसायंतनाशनान् । गत्वा निमंत्रयेद्दैवपितृद्देशसमान्वितः " ॥ इति । चंद्रिकायाम्—

" निमंत्रयीत पूर्वेद्युः पूर्वोक्तं द्विजसत्तमान् । दैवे नियोगे पित्र्ये च तांस्तथैवोपकल्पयेत्" ॥ इति।

हारीतः—"यतेतैवंविधं श्राद्धमाहरिष्यन्पूर्वेद्युर्निमंत्रयेत् " ॥ इति । देवलः—

"श्वः कर्ताऽस्मीति निश्चित्य दाता विप्रान् निमंत्रयेत् । निरामिषं सकृद्भुक्त्वा सर्वभुक्तजने गृहे"॥ इति । स्वगृहे यज्जनजातमस्ति तास्मिन्सर्वस्मिन्भुक्तवति सति पश्चान्निमंत्रयेदित्यर्थः । यमोऽपि—

" जातिक्रियावबोधार्थैर्गुणैर्युक्तानलोलुपान् । प्रार्थयेत प्रदोषांते भुक्तानशयितान् द्विजान्" ॥ इति ।

निमंत्रणप्रकारः प्रचेतसा दर्शितः

" कृतापसव्यः पूर्वेद्युः पितॄन्पूर्वं निमंत्रयेत् "॥ भवाद्भिः पितृकार्यं नः संपाद्यं च प्रसीदत ॥
" सव्येन वैश्वदेवार्थं प्रणिपत्य निमंत्रयेत् " ॥ अत्र पूर्वशब्दस्य वैश्वदेवार्थं निमंत्रयेदिति व्यवहितेनान्वयः ।

" उपवीती ततो भूत्वा देवार्थं हि द्विजोत्तमान् । अपसव्येन पित्र्येऽथ स्वयं शिष्योऽथवा सुतः" ॥ इति बृहस्पतिस्मरणात् । अत्र "शिष्योऽथ वा सुत" इत्युक्तत्वात् "सवर्णं प्रेषयेदाप्तं द्विजानामुपमंत्रणे"॥ इति प्रचेतःस्मरणाच्च कदाचिन्निमंत्रणमन्येनापि कारयेत् ।

प्रणतिपूर्वं निमंत्रणं शूद्रविषयम् । तथा च पुराणम्—

" दक्षिणं चरणं विप्रः सव्यं वै क्षत्रियस्तथा । पादावादाय वैश्यो द्वौ शूद्रः प्रणतिपूर्वकम् "॥ इति । दक्षिणचरणस्पर्शो जानुप्रदेशे कर्त्तव्यः । तथा च मत्स्यः—

" दक्षिणं जानुमालभ्य त्वं मयाऽत्र निमंत्रितः " इति । स्मृत्यंतरे—

" पितृकार्येषु सर्वेषु पूर्वेद्युः स्यान्निमंत्रणम् । प्रेतकार्येषु सर्वत्र सद्य एव निमंत्रणम् "॥ इति । आश्वलायनः— कृतसायमग्निकार्यः कृतसायमाशेभ्यो ब्राह्मणेभ्यो निवेदयेत् " इति । आपस्तंबोऽपि (२।७।१७।११-१२) " पूर्वेद्युर्निवेदनं परेद्युर्द्वितियं तृतीयमामंत्रणम् " ॥ इति ।

याज्ञवल्क्योऽपि—(आ. २२५)
" निमंत्रयीत पूर्वेद्युर्ब्राह्मणानात्मवाञ्छुचिः । तैश्चापि संयतैर्भाव्यं मनोवाक्कायकर्मभिः " ॥ इति । पूर्वेद्युः कथंचिन्निमंत्रणासंभवे परेद्युर्निमंत्रयेत् । तथा च **देवलः**—"असंभवे परेद्युर्वा ब्राह्मणांस्तन्निमंत्रयेत् " इति ।

चंद्रिकायाम्—" निमंत्रयीत पूर्वेद्युस्तदहर्वा द्विजोत्तमान् " ॥ इति । **स्मृत्यंतरेऽपि** ।
" तस्मात्तु प्रथमं कार्यं प्राज्ञेनोपनिमंत्रणम् । अप्राप्तौ तद्दिने वापि वर्ज्या योषित्प्रसंगिनः" ॥ इति ।

मनुरपि: (३।१८७)—
" पूर्वेद्युरपरेद्युर्वा श्राद्धकर्मण्युपस्थिते । निमंत्रयेत त्र्यवरान्सम्यग्विप्रान्यथोदितान्" ॥ इति ।

याज्ञवल्क्यः (आ. २२७)—
" युग्मान्दैवे यथाशक्तिः पित्र्येऽयुग्मांस्तथैव च । परिश्रिते शुचौ देशे दक्षिणाप्रवणे तथा " ॥ इति । **पैठीनसिः**—" ब्राह्मणान्सप्त पंच वा श्रोत्रियान्निमंत्रयेत्" इति । यदा पंच ब्राह्मणास्तदा " द्वौ दैवे पित्र्ये त्रय " इति विभागः । " द्वौ देवे पितृकार्ये त्रीन् " इति **मनुस्मरणात्** । यदा सप्त तदा दैवे चत्वारः पित्र्ये त्रयः । " अयुजो भोजयेच्छ्राद्धे न समान् दैविके समान् " **इत्यंगिरस्मरणात्** । नन्वेतद्वचनं दैवे द्वौ पित्र्ये पंचेति विभागेऽप्युपपद्यते इति चेत् । **मैवं** त्रिषु पंचानामयुग्मसंख्यया विभागानुपपत्तेः । " दैवे युग्मान् यथाशक्ति पित्र्ये एकैकस्य " इति । **कात्यायनेन** पितृपितामहप्रपितामहानां प्रत्येकम् युग्म ब्राह्मणविधानात् । न चैकत्र त्रयः इतरत्रैकैक इति विभाग उपपद्यत इति वाच्यम् । ' समं स्यादश्रुतत्वात् ' इति **न्यायेन** विषमविभागस्यान्याय्यत्वात् तस्मादयुग्मसंख्यया समविभागार्थं पित्र्ये त्रय इत्युक्तम् । पित्र्यादिस्थानेषु सति सामर्थ्ये एकैकस्य त्रीन्विप्रान्भोजयेत् । तथा च **शौनकः**—"एकैकस्य द्वौ द्वौ त्रींस्त्रीन्" इति । अत्र द्वौ द्वाविति वृद्धिश्राद्धाभिप्रायम् । पार्वणश्राद्धे त्वयुजो भोजयेत् श्राद्धे न समान् इति समसंख्याया निषेधात् । अत्यंतविभवे सत्येकैकस्य पंच सप्त वा ब्राह्मणान्भोजयेत् । तथा च **गौतमः** (१५।७-८)—
" नवावरान्भोजयेदयुजो यथोत्साहम् " ॥ इति । **अस्यार्थः**—यथोत्साहं यथाविभवं पित्रादिस्थानेषु प्रत्येकमयुजः पंच सप्त वा ब्राह्मणान्भोजयेदिति । अयुजो भोजयेदिति सामान्योक्तावपि पित्र्ये सप्तस्वेव पर्यवसानम्—
"सामर्थ्येऽपि नवभ्योऽर्वाग्भोजयीत सति द्विजान् । नोर्ध्वं कर्त्तव्यमित्याहुः केचित्तद्दोषदर्शिनः"॥ इति **वचनात्** । एवं **शौनकगौतमाभ्यामुक्तोऽयं** श्राद्धविस्तारः । **मनुना** तु संकोच आश्रितः—
(३।१२५–१२६)
" द्वौ देवे पितृकार्ये त्रीनेकैकमुभयत्र वा । भोजयेत्सुसमृद्धोऽपि न प्रसज्जेत विस्तरे ॥
"सत्क्रियां देशकालौ च शौचं ब्राह्मणसंपदम् । पंचैतान्विस्तरो हंति तस्मान्नेहेत विस्तरम्" ॥ इति ।

याज्ञवल्क्योऽपि (आ. २२८)
" द्वौ दैवे प्राक् त्रयः पित्र्ये उत एकैकमेव वा । मातामहानामप्येवं तंत्रं वा वैश्वदेविकम्" ॥ इति । प्राक् प्राङ्मुखौ उदगुदङ्मुखा उपवेश्योः । एकैकमेव वा वैश्वदेवे पित्र्ये च एकैकमुपवेशयेत् ॥ मातामहश्राद्धमपि एवं पितृश्राद्धवत्कर्त्तव्यम् । पितृपितामहदैवत्ये तु श्राद्धे पृथक् तंत्रेण वा वैश्वदेविकं कर्त्तव्यमित्यर्थः । **बृहस्पतिरपि**—
"एकैकमथ वा द्वौ त्रीन्दैवे पित्र्ये च भोजयेत् । सत्क्रियाकालपात्रादि न संपद्येत विस्तरे"॥ इति ॥

चंद्रिकायाम्—

" देशकालबलाभावादेकैकमुभयत्र वा। शेषान्वित्तानुसारेण भोजयेदन्यवेश्मनि॥

" यस्माद्ब्राह्मणबाहुल्याद्दोषो बहुतरो भवेत्। श्राद्धनाशो मौननाशः श्राद्धतंत्रस्य विस्मृतिः॥

"उच्छिष्टोच्छिष्टसंस्पर्शो निंदा चाप्यन्यभोक्तृषु। वितंडा च परीवादो जल्पास्ते ते पृथग्विधाः"॥ इति।
अत्र व्यवस्था कृता **चंद्रिकायाम्**—समृध्यापि यस्य ब्राह्मणबाहुल्ये सत्क्रियादिसंपादनासामर्थ्यं तद्विषयं मन्वादिवचनं यस्य तु संपादनसामर्थ्यमस्ति तद्विषयं शौनकादिवचनमिति। यत्तु **शंखेनोक्तम्**—" भोजयेदथ वाऽप्येकं ब्राह्मणं पंक्तिपावनम्" इति तद्ब्राह्मणालाभविषयम्।

" पिशाचा राक्षसा यक्षा भूता नानाविधास्तथा। विप्रलुंपंति सहसा श्राद्धमा रक्षवर्जितम्॥

"तत्पालनाय विहिता विश्वेदेवाः स्वयंभुवा। महालये चाब्दिके च सापिंड्ये मासिके तथा॥

" व्यर्थं भवति तच्छ्राद्धं वासुदेवविना कृतम्"। इति **स्मृतेः**।

यदा त्वेक एव भोक्ता तदैवमाह **वसिष्ठः** (८।३०-३१) "यद्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत्।

" अन्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य तु। देवतायतने कृत्वा तत्र श्राद्धं प्रकल्पयेत्॥

" प्रास्येदग्नौ तदन्नं तु दद्याद्वा ब्रह्मचारिणे"॥ **स्मृत्यंतरे**—

" एकश्चेद्ब्राह्मणो लब्धः श्राद्धं च प्रकृतं भवेत्। पितरश्च त्रयः प्रोक्ताः कथं तृप्यंति ते त्रयः॥

"उरस्यश्नंति पितरो वामभागे पितामहाः। प्रपितामहा दक्षिणतः पृष्ठतस्त्वनुयायिनः"॥ इति।

निमंत्रणे नियमांतरमाह मत्स्यः। " एव निमन्त्र्य नियमाञ्श्रावयेत्पैतृकान्बुधः।

" अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः। भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा"॥

अत्रिरपि—

" प्रथमेऽन्हि निवासस्थान् छ्रोत्रियादीन्निमंत्रयेत्। कथयेत्तु तदैवेषां नियमं पितृदैविकम्॥

" सर्वायासविनिर्मुक्तैः कामक्रोधविवर्जितैः। भवितव्यं भवद्भिर्नः श्वोभूते श्राद्धकर्मणि"॥ इति।
प्रथमेऽन्हि पूर्वेद्युर्निवासस्थान्स्वीयनिवासस्थितानित्यर्थः।

निमंत्रितब्राह्मणकृत्यम्। निमंत्रितैर्यत्कर्तव्यं तदाह **अत्रिः**—

" ते तं तथेत्यविघ्नेन गतेयं रजनी यदि। यथाश्रुतं प्रतीक्षेरञ्छ्राद्धकालमतंद्रिताः"॥ इति।
ते निमंत्रिता विप्राः तं निमंत्रिणकर्त्तारं तथास्तु यद्यविघ्नेनेयं रजनी गतेत्युक्त्वा धर्मशास्त्रादौ यथा नियमजातं श्रुतं तथैव तं नियमजातं प्रतीक्षेरन् परिपालयेयुः श्राद्धकालस्वादितान्नपरिणामपर्यंतम् इत्यर्थः। तथा च **प्रचेताः**— " स्यादन्नपरिणामात्तु ब्रह्मचर्यं तयोः स्मृतम्।

" निमंत्रितास्तु ये विप्राः श्राद्धकाल उपस्थिते। वसेरन्नियताहारा ब्रह्मचर्यपरायणाः॥

" अहिंसासत्यमक्रोधो दूरे च गमनक्रिया"॥

वृद्धमनुः— " निमंत्र्य विप्रास्तदहर्वर्जयेन्मैथुनक्षुरे।

" प्रमत्ततां च स्वाध्यायं क्रोधं शोकं तथाऽनृतम्। अभारोद्वहनं क्षांतिः श्राद्धस्यौपयिको विधिः॥

" ऋतुकाले नियुक्तोऽपि नैव गच्छेत्स्त्रियं क्वचित्। तत्र गच्छन्समाप्नोति ह्यनिष्टं फलमेव तु"॥ इति।

नारदः—

" पूर्वेद्युश्चापरेद्युश्च वर्जयेत् स्त्रीनिषेवणम्। व्यवायी रेतसो गर्तेन्मज्जयेदात्मनः पितॄन्॥

" श्राद्धे निमंत्रितो यश्च मैथुनं कुरुते यदि। ब्रह्महत्यामवाप्नोति नात्र कार्या विचारणा"॥

---

१ क्ष–पठन्निमंत्रणनियमा।

वृषलीगमने दोषाधिक्यमाह **मनुः** (३।१९१)—

" निमंत्रितस्तु यः श्राद्धे वृषल्या सह मोदते । दातुर्यत् दुष्कृतं किंचित्तत्सर्वं प्रतिपद्यते"॥

यमस्तु—

" आमंत्रितस्तु यः श्राद्धे वृषल्या सह मोदते । भवंति पितरस्तस्य मांसासृक् शुक्रभोजनाः "॥ इति **गौतमः** (१५।२३)—" सद्यःश्राद्धीशूद्रातल्पगस्तत्पुरीषे मासं नयति पितॄन् " इति । श्राद्धी श्राद्धकर्ता । सद्यस्तत्क्षणमारभ्येत्यर्थः । **यमः**—

" आमंत्रितस्तु यः श्राद्धे अध्वानं प्रतिपद्यते । भवंति पितरस्तस्य तन्मासं पांसुभोजनाः ।

" आमंत्रितस्तु यः श्राद्धे कलहं कुरुते द्विजः । भवंति पितरस्तस्य तन्मासं त्वश्रुभोजनाः ।

" आमंत्रितस्तु यः श्राद्धे भारमुद्वहते द्विजः । भवंति पितरस्तस्य तन्मासं स्वेदभोजनाः ॥

" आमन्त्रितस्तु यः श्राद्धे हिंसां वै कुरुते द्विजः । भवन्ति पितरस्तस्य तन्मासं रक्तभोजनाः "॥

उशनाः—"आमंत्रितस्तु यः श्राद्धे द्यूतं संसेवते द्विजः । भवंति पितरस्तस्य तन्मासं मलभोजनाः" इति ॥ **मनुः** (३।१८८)—

" निमंत्रितो द्विजः पित्र्ये नियतात्मा भवेत्सदा । न च च्छंदांस्यधीयीत यस्य श्राद्धं च तद्भवेत् "॥ इति । **स्मृत्यंतरे**—

"श्राद्धे निमंत्रितो विप्रो मंत्रमुच्चारयेद्यदि । त्रयस्ते नरकं यांति दाता भोक्ता पिता तथा "॥ इति । **कात्यायनः**— " अनिंद्येनामंत्रितो नापक्रामेच्छक्तेन न प्रत्याख्यानं कर्तव्यम् " इति । अनेनार्थान्निंद्यामंत्रणे भोक्तुमसामर्थ्ये च प्रत्याख्यानं कर्तव्यमेवेत्यवगम्यते । निमंत्रणानंतरं भोक्तुमसामर्थ्ये सति प्रत्याख्याने न दोष इत्याह **स एव** " विधिवत्केतनं प्रतिगृह्य शक्तः सन्नापक्रमेत् " इति । केतनं प्रतिगृह्य आमंत्रणमंगीकृत्येत्यर्थः ।

अनिंद्येनामंत्रितस्य शक्तस्यांगीकृतश्राद्धातिक्रमे दोषमाह **मनुः** (३।१९०)

" केतितस्तु यथान्यायं हव्यकव्ये द्विजोत्तमः । कथंचिदप्यतिक्रामन् पापी सूकरतां व्रजेत्"॥इति। **यमः**—

"आमंत्रितस्तु यो विप्रो भोक्तुमन्यत्र गच्छति । नरकाणां शतं गत्वा चंडालेष्वभिजायते" ॥ इति । **नारायणः**—

"आमंत्रितस्तु यः श्राद्धे कुर्वीतान्यस्य तु क्षणम् । संवत्सरकृतं पुण्यं तत्र नश्यति दुर्मतेः"॥ इति । **स्मृत्यंतरेऽपि**—

" विद्यमानधनो विद्वान् भोज्यान्नेन निमंत्रितः । कथंचिदप्यतिक्रामन्पापः सूकरतां व्रजेत् "॥ इति । विद्यमानधनविशेषणादाढ्यविषयमेतदिति केचिद्वर्णयंति । तदसाधु

" निमंत्रितास्तु गुणिना निर्धनेनापि सद्द्विजाः । नान्यमृष्टान्नलोभेन तमतिक्रामयंति हि ॥

" निमंत्रितास्तु येनादौ तस्माद्गृण्हंतु नान्यतः "॥ इति **मत्स्यपुराणात्** । **कात्यायनः**—

"आमंत्रितोऽन्यन्न प्रतिगृण्हीयात्"इति । पूर्वमन्येन निमंत्रितः तदीयादन्नादन्यदन्नं पश्चान्निमंत्रितस्य तंडुलादिरूपमपि न प्रतिगृण्हीयादित्यर्थः । यः पुनः प्रतिगृण्हाति तस्य दोषमाह **देवलः**—

" आमश्राद्धं गृहीत्वा तु योऽन्यश्राद्धेऽतिमोहतः । पतंति पितरस्तस्य लुप्तपिंडोदकक्रियाः ॥

" पूर्वं निमंत्रितोऽन्येन कुर्यादन्यप्रतिग्रहम् । भुक्ताहारोऽथ वा भुंक्ते सुकृतं तस्य न दृश्यति "॥

स्मृत्यंतरे—

" श्राद्धे निमंत्रितो यस्तु यदि कुर्यात्प्रतिग्रहम् । भक्षयेत् किंचिदप्यन्यत्सुकृतं तस्य नश्यति " ॥ एवं च "इक्षूनपः फलं मूलं तांबूलं पय औषधम् । भक्षयित्वाऽपि कर्तव्या स्नानदानोदकक्रिया"॥ इति **वचनं** श्राद्धव्यतिरिक्तविषयम् । यस्त्वामंत्रितो विप्र आहूतोऽपि श्राद्धोपक्रमकालातिपत्तिं करोति तस्य प्रत्यवाय **आदित्यपुराणे**ऽभिहितः—

" आमंत्रितश्चिरन्नैव कुर्याद्विप्रः कदाचन । देवतानां पितॄणां च दातुरन्यस्य चैव हि ॥
" चिरकारी भवेद्रोगी पच्यते नरकाग्निना " ॥ इति ।

निमंत्रितब्राह्मणपरित्यागे प्रत्यवायमाह **नारायणः**—

" केतनं कारयित्वा तु निवारयति दुर्मतिः । ब्रह्महत्यामवाप्नोति शूद्रयोनौ च जायते ॥
" निवार्यामंत्रितं कर्त्ता ब्राह्मणं नियतं शुचिम् । यतिचांद्रायणं कृत्वा तस्मात्पापात्प्रमुच्यते " ॥

यतिचांद्रायणं चांद्रायणविशेषः । **यमः**—

" ब्राह्मणं तु मुखं कृत्वा देवताः पितृभिः सह । तदन्नं समुपाश्नंति तस्मात्तं न व्यतिक्रमेत् "॥ इति ।

मनुरपि (३।१८९)—

" निमंत्रिता हि पितर उपतिष्ठंति तान्द्विजान् । वायुभूतास्तु गच्छंति तथासीनानुपासते " ॥ इति ।

श्राद्धदिनकृत्यम् । अथ **श्राद्धदिनकृत्यम्** । **प्रचेताः**—

" श्राद्धभुक् प्रातरुत्थाय प्रकुर्याद्दंतधावनम् । श्राद्धकर्त्ता न कुर्वीत दंतानां धावनं बुधः " ॥ इति । **देवलः**— " तथैव यंत्रितो दाता प्रातः स्नात्वा सहांबरः । आरभेत नवैः पात्रैरन्नारंभं च बांधवैः" इति । तथैव श्राद्धकर्त्तुरुक्तनियमातिक्रमेणैव यंत्रितः नवैः अनुपहतैः पाकयोग्यैः पात्रैः अन्नारंभं श्राद्धार्थान्नस्य पाकारंभं पाकोपयोगिभिर्बांधवैरुपेतः कुर्यादित्यर्थः । **स्मृत्यंतरे च**—

" पुराणपात्रपक्वं यद्धविस्तु श्राद्धकर्मणि । भुंजते नैव पितरो न देवाश्चासुरं भवेत् " ॥ इति ।

तत्रैव—

" पचेदन्नानि सुस्नातः पात्रेषु शुचिषु स्वयम् । स्वर्णादिधातुजातेषु मृन्मयेष्वपि वा पुनः ॥
" नायसेषु न भिन्नेषु दूषितेष्वपि कर्हिचित् । पूर्वं कृतोपयोगेषु मृन्मयेषु न तु क्वचित् ॥
" पचमानस्तु भांडेषु भक्त्या ताम्रमयेषु तु । समुद्धरति वै घोरात् पितॄन्दुःखमहार्णवात् ॥
" न कदाचित् पचेदन्नमयःस्थालीषु पैतृकम् । अयसो दर्शनादेव पितरो विद्रवंति हि ॥
"घण्टानादं च लोहं च विभूतिं च विशेषकम् । रुद्राक्षमालां मुद्रां च निराशाः पितरो गताः"॥ इति ।

स्मृत्यन्तरे—

"कर्त्ता भोक्ता च सर्वत्र नैकवस्त्रो द्विजो भवेत् । तस्माद्वस्त्रादिना श्राद्धे सोत्तरीयः सदा भवेत्" ॥ इति ।
" दंतधावनतांबूलक्षौराभ्यंगमभोजनम् । रत्योषधिपरान्नं च श्राद्धकर्त्ता विवर्जयेत्" ॥ इति ।
" पितृशेषाशनान्न पूर्वं श्राद्धकर्तुश्च कर्तृता । प्रत्याब्दिके मासिके च परेऽह्नि स्यात् तिलोदकम् ॥
" कर्ता वा स्यादकर्ता वा पुनर्भोजनमैथुने । वर्जयेत् कर्मसिद्ध्यर्थं पितृद्रोह्यन्यथा भवेत् " ॥

न केवलं तद्दिने क्षौरनिषेधः किंतु पूर्वमपि पक्षाभ्यंतरे न कार्यम्—

"यस्मिन्मासि मृताहः स्यात्तन्मासं पक्षमेव वा । क्षुरकर्म न कुर्वीत परान्ने च रतिं त्यजेत्" ॥ इति **स्मरणात्** । अशक्तौ दिनत्रयं परान्नं वर्जयेत्—

" पूर्वेद्युश्च परेद्युश्च कर्त्ता श्राद्धदिनेऽपि च । परस्यान्नं तु नाश्नीयादश्नीयात्पितृघातकः " ॥ इति ।

---

१ क–श्राद्धेतु । २ कख–कृच्छ्रतः ।

अत्यंताशक्तौ सुहृदाद्यन्नभक्षणेऽपि न दोषः। तथा **चात्रिः**—

" सुहृदन्नं गुरोरन्नं यदन्नं मातुलस्य च। स्वसृश्वशुरयोरन्नं परान्नं न विदुर्बुधाः" ॥ इति।

श्राद्धं कृत्वा परश्राद्धे नाश्नीयात्—

"श्राद्धं कृत्वा परश्राद्धे यस्तु भुंजीत लोलुपः। पतंति पितरस्तस्य लुप्तपिंडोदकक्रियः" ॥ इति **स्मरणात्**। गोमयलेपनेन महानसादिभूमिशुद्धिमुदकेन भाजनभांडशुद्धिं च कुर्यादित्याह **उशनाः**—"गोमयोदकैर्भूमिभाजनभांडशौचं कुर्यात्" इति। महानसादिभूमिसंस्कारानंतरकृत्यमाह **देवलः**—" तिलानवकिरेत्तत्र सर्वतो बंधयेच्च तान्। असुरोपहतं सर्वं तिलैः शुध्येज्जलेन च ॥

" ततोऽन्नं बहुसंस्कारं नैकव्यंजनभक्ष्यवत्। चोष्यपेयसमृद्धं च यथाशक्ति प्रकल्पयेत्" ॥ इति।

श्राद्धद्रव्याणि। अत्र द्रव्याण्याह **प्रचेताः**—

" कृष्णमाषास्तिलाश्चैव श्रेष्ठाः स्युर्यवशालयः। महायवा व्रीहियवा गोधूमा मुद्गसर्षपाः ॥

"कृष्णश्वेता लोहिताश्च ग्राह्याः स्युः श्राद्धकर्मणि" ॥ इति। यवाः सितशूकाः। शालयः कडमाद्याः। महायवाः व्रीहियवाश्च लोहिता यवविशेषाः। कृष्णाः स्थलजाः रक्तशालयः। कृष्णवर्णा व्रीहियवाः।

मार्कंडेयोऽपि—

" यवव्रीहिसगोधूमास्तिलमुद्गाः ससर्षपाः। प्रियंगवः कोविदारा निष्पावाश्चात्र शोभनाः" ॥ इति।

अत्र निष्पावः कृष्णेतरः। **चतुर्विंशतिमते** तु—

" कोद्रवान्राजमाषांश्च कुलुत्थांश्चणकांस्तथा। निष्पावांस्तु विशेषेण पंचैतांस्तु विवर्जयेत्" ॥ इति।

अत्र निष्पावः कृष्णनिष्पावः

" कृष्णधान्यानि सर्वाणि वर्जयेच्छ्राद्धकर्मणि। न वर्जयेत्तिलांश्चैव मुद्गमाषांस्तथैव च" ॥ इति **स्मरणात्**। **अत्रिः**—

" अगोधूमं च यच्छ्राद्धं कृतमप्यकृतं भवेत्। विना माषेण यच्छ्राद्धं कृतमप्यकृतं भवेत् ॥

" क्रव्यादाः पितरो यस्मादभावे पायसादिनः" ॥ इति। **वायुपुराणे**—

" बिल्वामलकमृद्वीकाः पनसाम्रकडाडिमाः। चव्यैपालेयकाक्षोटखर्जूराणां फलानि च ॥

" कशरुः कोविदारश्च तालकंदस्तथा बिसम्। कालेयं कालशाकं च सुनिषण्णं सुवर्चला ॥

" खट्टफलं कौंकिणी द्राक्षा लकुचं मोचमेव च। कर्कंधूग्रावकं चारुतिंदुकं मधुसाव्हयम् ॥

" वैकंकतं नालिकेरं शृंगाटकपरूषकम्। पिप्पली च मरीचं च पटोलं बृहतीफलम् ॥

" सुगंधिमत्स्यमांसं च कालेयाः सर्व एव च ॥

" एवमादीनि चान्यानि स्वादूनि मधुराणि च। नागरं चात्र वै देयं दीर्घमूलकमेव च" ॥ इति। मृद्वीका द्राक्षा। लकुचो लिकुचः। मोचं कदलीफलम्। कर्कंधूः बदरी। बृहती कंटकारिका "निदिग्धिका स्पृशी व्याघ्री बृहतीकण्टकारिका" (२।४।९३) **इत्यमरसिंहेना**भिधानात्। नागरं शुंठी। दीर्घमूलफलं तुंडिकेरफलम्। बिल्वामलकादीनि प्रसिद्धानि। इतराण्यप्रसिद्धानि। **शंखः**—

" आम्रांश्च कदलीभेदान्मृद्वीकांचन्यडाडिमे। बर्दर्यांश्च सुरंडांश्च श्राद्धकालेऽपि दापयेत् ॥

"लाक्षां मधु घृतं दद्यात्सक्तून् शर्करया सह। दद्याच्छ्राद्धे प्रयत्नेन शृंगाटककशेरुकान्" ॥

आदित्यपुराणे—

" मधुकं रामठं चैव कर्पूरं मरिचं गुडम्। श्राद्धकर्मणि शस्तानि सैंधवं त्रापुषं तथा" ॥ इति।

---

१ क-म्य। २ ग-कट्फलं। ३ ग-किंकिणी। ४ ग-व। ५ खग-विदा।

चंद्रिकायाम्—

"उर्वारुकं कारवल्ली पटोलं कालपत्रिका । कदाली कन्दली चैव श्राद्धे ह्यत्यंतशोभनाः ॥
"गवां क्षीरं घृतं शाकं क्षौद्रमिक्षुरसो गुडम् । कालिंगं द्रोणपुष्पी च तंडीली चक्रवर्तिका ॥
"वालुका चर्मवलयं कोशातकिफलं शिशुः । श्राद्धे ह्येतानि देयानि तथा पितृरुचीनि च ॥
"नागरं वै सदा देयं दीर्घमूलकमेव च । घृतेन भोजयेद्विप्रान्घृतं भूमौ समुत्सृजेत् ॥
"शर्कराक्षीरसंयुक्ता पृथुका नित्यमक्षय्याः । सर्पिः स्नातानि सर्वाणि पाके संस्कृत्य योजयेत् ॥
"मुन्यन्नानि च सर्वाणि वन्यमूलफलानि च । श्राद्धे ह्येतानि यो दद्यात्पितरः प्रीणयंति तम्" ॥ इति ।

स्मृत्यंतरे—

"निर्माल्यमपि गंगाभं उच्छिष्टमपि माक्षिकम् । निर्यासमपि वा हिंगुं गुग्गुलुं न परित्यजेत् ॥
"उत्तमं चैव गोक्षीरं माहिषं चैव मध्यमम् । औष्ट्र[1]मजाविकं चैव सर्वथा परिवर्जयेत्" ॥ इति ।

विष्णुपुराणेऽपि (३।१६।५-६)—

"प्रशातिकाः सनीवाराः श्यामाका विविधास्तथा । वन्यौषधिप्रधानास्तु श्राद्धार्हाः पुरुषर्षभ ॥
"यवाः प्रियंगवो मुद्गाः गोधूमा व्रीहयस्तिलाः । निष्पावाः कोविदाराश्च सर्षपाश्चात्र शोभनाः ॥
"सकण्टकं च वार्ताकं पितृभ्यो दत्तमक्षयम्" ॥

वायुः—"जीरकं मरिचं श्राद्धे पटोलं बृहती शिशुः । कशेरुः कोविदारश्च पनसोर्वारुदाडिमाः ॥
"कूष्मांडं रक्तनालं च प्रदेयं श्राद्धकर्मणि" ॥ इति । **मनुः** (३।२२६-२२७)—
"गुणांश्च सूपशाकाद्यान् पयोदधिघृतं मधु । विन्यसेत्प्रयतः सर्वं भूमावेव समाहितः ॥
"भक्ष्यं भोज्यं च विविधं मूलानि च फलानि च । हृद्यानि चैव मांसानि पानानि सुरभीणि च ॥
"यद्यद्रोचेत विप्रेभ्यो तत्तद्द्यादमत्सरः" ॥ इति । **विज्ञानेश्वरः**-(पृ.६९पं२६-२७)"श्राद्धयोग्यं व्रीहियवशालिगोधूममुद्गमाषमुन्यन्नकालशाकशुंठीमरीचहिंगुकर्पूरगुडसैंधवसागरपनसनालिकेरबदरगव्यपयोदधिघृतपायसमधुप्रभृति" ॥ इति । **स्मृत्यन्तरे**—
"कदलीजातयः पंच चूतं च पनसद्वयम् । उर्वारुकं च जंबीरं पटोलद्रोणपत्रकम् ॥
"कारवल्लीफलं चैव श्राद्धे चात्यंतमुन्नतम् । अलर्कस्य फलं पुष्पमार्द्रकं सूरणद्वयम् ॥
"धात्रीफलं चाच्युतं च श्राद्धे चात्यंतमुन्नतम्" ॥ इति । **पितृमेधसारे**—कादलीजातिभेदकारवल्लीत्रयपनसोर्वारूकनिष्पावपटोलमुद्गत्रयनालिकेरफलानि हिंगुकालशाकमहाशाकक्षुद्रीकंदानि मुन्यन्नानि च प्रशस्यते इति । **मनुः**—(३।२६७; २७१-२७२)
"तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेन वा । दत्तेन मासं प्रीयंते पितरो विधिवन्नृणाम्" ॥ इति ।
"संवत्सरं तु गव्येन पयसा पायसेन वा । कालशाकं महाशाकं खड्गंलोहामिषं मधु ॥
"आनंत्यायैव कल्पंते मुन्यन्नानि च सर्वशः" ॥ इति । **स्मृत्यंतरे**-
"अन्नेन मासं तृप्तिः स्यान्मांसैः षण्मासमेव च । आज्येन वत्सरं तृप्तिर्गोधूमाद्वत्सरत्रयम्" ॥ इति ।
याज्ञवल्क्यः (आ. २५८,२६०-२६१)—"हविष्यान्नेन वै मासं पायसेन तु वत्सरम् ।
"खड्गामिषं महाशल्कं मधु मुन्यन्नमेव च । लोहामिषं महाशाकं मासं वाध्राणसस्य च ।
"यद्ददाति गयास्थश्च सर्वमानंत्यमश्नुते" ॥ इति ।

मत्स्यपुराणे—

"अन्नं तु सदधिक्षीरं गोघृतं शर्करान्वितम् । मासं प्रीणाति सर्वान्वै पितॄनित्याह केशवः" ॥ इति

---

१ क्ष-मा । २ ग-धि 'प्रसातिभाः' इति मुद्रितपाठः । ३ ग- डां । ४ क-मभावे ।

कात्यायनः—" ग्राम्याभिरोषधीभिर्मासतृप्तिस्तदलाभे मूलफलैरद्भिर्वा सहान्नेनोत्तरास्तर्पयंति "॥ इति। उत्तराः मूलफलादयः। ते सहैव किंचिदन्नेन मासं तर्पयंति न केवला इत्यर्थः।

मार्कंडेयोऽपि—" गोधूमैरिक्षुभिर्मुद्गैः सतिलैश्चणकैरपि। श्राद्धेषु दत्तैः प्रीयंते मासमेकं पितामहाः।
" विदार्या चैव चूतैश्च बिसैः शृंगाटकैस्तथा। केबुकैश्च तथा कंदैः कर्कंधुबदरैरपि॥
" पालेवतैरारुचिकैर्वाक्षौदैः पनसैस्तथा। काकोल्याक्षीरकाकोल्या तथा पिंडालकैः शुभैः॥
" लाक्षाभिश्च शलाभिश्च पुरुषोवारुचिद्भिलैः। सर्षपाराजशाकाभ्यामिंगुदैराजजंबुभिः॥
" प्रियालामलकैर्मुख्यैः फल्गुभिश्च तिलंबुकैः। वेत्रांकुरैस्तालकंदैश्चक्रिकाक्षीरिकाचवैः॥
" वोवैः समोचैर्लिकुचैस्तथा वै बीजपूरकैः। मुंजातकैः पद्मफलैर्भक्ष्यभोज्यैः सुसंस्कृतैः॥
" रागषाडवचाष्यैश्च त्रिजातकसमन्वितैः। दत्तैस्तु मासं प्रियंते श्राद्धेषु पितरो नृणाम् "॥ इति।

विदारी कृष्णपर्णभूकूष्मांडफलम्। केबुकं खर्जूराख्यं शाकम्। कंदः सूरणः। उवारुः स्वादुकर्कटी। चिद्भिलस्तिक्तकर्कटी। सर्षपा इति दीर्घश्छांदसः। राजशाकं कृष्णसर्षपः। इंगुदी तापसतरुः। प्रियालं राजादनम्। चक्रिका चिंचा। क्षीरिका फलाध्यक्षः। मोचा कदली। लिकुचो जंबीरफलतुल्यखर्वफलवान्गुल्मविशेषः। रागषाडवः पानविशेषः। त्रिजातकमेलालवंगगंधपत्राणि।

प्रचेताः—" हारितमुद्गकृष्णमाषश्यामाकप्रियंगुगोधूमेक्षुविकारांश्च दद्यात् "॥ इति।

विष्णुरपि (८०।१)—

" शाकश्यामाकप्रियंगुनीवारमुद्गैर्मासं प्रीयंते संवत्सरं तु पयसा तद्विकारैश्च "॥ इति।

पयसा गव्यपयसा। यत्तु प्रीणातीत्यनुवृत्तौ **पैठीनसिनोक्तम्**—" पायसेन षण्मासानि " इति तन्नीरसपयःसिद्धपायसविषयमिति **चंद्रिकायाम्**। **तत्रैव**—

" कालशाकं महाशाकं मांसं वाध्राणसस्य च। विषाणवर्जं ये खड्गा आसूर्यं तांस्तु भुंजते "॥ इति।

उक्तानां तृप्तितारतम्याभिधायकस्मृतीनां तत्तारतम्यानुसारेण श्राद्धकर्तुः फलेऽपि तारतम्यं भवतीत्येवं तात्पर्यमवगंतव्यम्। अत एव **हारीतेनै**कमुदाहृत्योक्तम्— " मधुना परमप्रीताः सर्वान्कामान्दिशंति च " इति। अत्र व्यवस्थामाह **पुलस्त्यः**—

" मुन्यन्नं ब्राह्मणस्योक्तं मांसं क्षत्रियवैश्ययोः। मधुप्रधानं शूद्रस्य सर्वेषां चाविरोधि यत् "॥ इति।

मुन्यन्नं नीवारादि। मधु माक्षिकं प्रधानं समग्रफलदम्। एतात्रितयव्यतिरिक्तं यदविरोधि अप्रतिसिद्धं तत्सर्वेषामित्यर्थः। श्राद्धे मांसस्य कलौ निषिद्धत्वान्नेह तदभिधीयते। तच्च युगधर्मप्रकरणे प्रतिपादितम्।

श्राद्धे वर्ज्यद्रव्याणि। अथ **श्राद्धे वर्ज्यद्रव्याणि महाभारते** मदालसावाक्यम्

" यच्चोत्कोचादिना प्राप्तं पतितायदुपार्जितम्। अन्यायकन्याशुल्कोत्थं द्रव्यं चात्र विगर्हितम्॥
"पित्रर्थं मे प्रयच्छेति ह्युक्त्वा यच्चाप्युपाहृतम्। वर्जनीयं सदा सद्भिः तत्तद्वै श्राद्धकर्मणि "॥ इति।

वेदव्यासोऽपि—

" वेदविक्रयजं दुष्टं स्त्रिया यच्चार्जितं धनम्। न देयं पितृदेवेभ्यो यच्चक्लीबदुपार्जितम्॥
" अश्राद्धेयानि धान्यानि कोद्रवाः पुलकास्तथा। हिंगुद्रव्येषु शाकेषु कालानलशुभास्तथा "॥ इति।

कोद्रवः कोलदूषकः। पुलकः पुलाकः। छांदसो ह्रस्वः। संस्कारद्रव्येषु हिंग्वाख्यद्रव्यमश्राद्धेयम्। कालः कृष्णार्जकः अनलश्चित्रकः। शुभः शुभाशुभाख्यः शाकविशेषः। शाकेषु एतानि शाकान्यश्राद्धेयानीत्यर्थः। हिंगुद्रव्यस्य विधिप्रतिषेधयोर्दर्शनाद्विकल्पः। एवमन्यत्रापि।

---

१ क–कालेयकैः। ग–पारेवतैः। २ ग–च। ३ ग–श्वाक्षोटैः। ४ ग–त्रपु। ५ ग–त्क। ६ क–व्योचैः। खग–वोचैः। ७ ग–क्षी। ८ ग–त्क। ९ ग–र।

यत्र विधिप्रतिषेधावेकस्य दृश्येते तत्र विकल्पो वेदितव्यः इति **चंद्रिकामाधवीयादौ** व्यवस्थापितम् । **भरद्वाजोऽपि**—"मुद्गाढकीमाषवर्जं विदलानि दद्यात् " इति । यानि पाषाणयंत्रभ्रमणेन प्रायशो द्विधा भिद्यंते तानि धान्यानि विदलानि[1] । मुद्गः कृष्णहरितेतरः । आढकी तूवरी । माषो राजमाषः । अलसान्द्रनाम्ना प्रसिद्धः । तथाहि " अलसांद्रो राजमाषः " इति **वैजयंती निघंटुः** । एतैर्विना विदलानि दद्यादित्यर्थः ।

"कुलुत्थावरकाः श्राद्धे न देयाश्चैव कोद्रवाः । कटुकानि च सर्वाणि विरसानि तथैव च ॥
"यवनालानपि तथा वर्जयंति विपश्चितः " ॥ इति । **चंद्रिकायाम्**—

"श्राद्धे न देयाः पालक्यास्तथा निष्पावकोद्रवाः । मसूरक्षारवार्ताकाः कुलुत्थशणशिग्रवः "॥ इति । पालक्या गंधद्रव्यविशेषः । क्षारो यवक्षारादिः । वार्ताकं क्षुद्रवार्त्ताकीसंज्ञकबृहतीफलं कंटकारिकाख्यबृहतीफलात्किंचित्स्थूलम् । **विष्णुरपि**—(७९।२) "भूतृणं शिग्रुराजसर्षपसुरसार्जककूष्मांडालाबुवार्त्ताकपालंक्यातंडुलीयककुसुंभमहिषीक्षीराणि वर्जयेत् " ॥ इति । भूतृणं शाकविशेषः । सुरसः[2] निर्गुंडी । **मत्स्योऽपि**—

"कुसुंभं बीजपूरं च कपित्थं मधुकातसी । श्राद्धे नैतानि देयानि पितृभ्यः प्रीतिमिच्छता " ॥ इति । बीजपूरो मातुलुंगकः । कपित्थं कपित्थफलम् । मधुकं यष्टिमधुकः । **विष्णुपुराणे**(३।१६।७-९;११)—

" अकृताग्रयणं यच्च धान्यजातं नरेश्वर । राजमाषानणूंश्चैव मसूरांश्च विवर्जयेत् ॥
" अलाबुं गृंजनं चैव लशुनं पिंडमूलकम् । गांधारककरंभाणि लवणान्यौषराणि च ॥
" आरक्ताश्चैव निर्यासाः प्रत्यक्षलवणानि च । वर्ज्यान्येतानि वै श्राद्धे यच्च वाचा न शस्यते ॥
" क्षीरमेकशफानां यदौष्ट्रमाविकमेव च । मा[3]तंगं माहिषं चैव वर्जयेच्छ्राद्धकर्मणि" ॥ इति ।

शंखः—

" शीतपाकीमपि श्राद्धे कृष्णजीरकमेव च । वर्जयेल्लवणं सर्वं तथा जंबूफलानि च " ॥ इति । लवणं कृतलवणम् ।

" सैंधवं लवणं चैव तथा मानससंभवम् । पवित्रे परमे ह्येते प्रत्यक्षमपि नित्यशः ॥
"कृतं तु लवणं सर्वं वंशाग्रं च विवर्जयेत् " ॥ इति तेनैवाभिधानात् । **सुमंतुः**—
" वर्ज्याश्चाभिषवा नित्यं शतपुष्पं गवेधुका । जंबीरकं फलं वर्ज्यं कोविदारं च नित्यशः"॥

अभिषवाः शुष्काः संतः क्लिन्नाः । **स्मृत्यंतरे**— " गांधारिकापटोलानि श्राद्धकर्मणि वर्जयेत् ।
" औषरं लवणं श्राद्धे कूष्मांडं बृहतीफलम् । श्लेष्मातकं च शिग्रूं च प्रत्यक्षलवणं त्यजेत् ॥
" ताम्रपात्रे स्थितं गव्यं क्षीरं च लवणान्वितम् । घृतं लवणसंयुक्तं सर्वदा परिवर्जयेत् ॥
" पायसे लवणैर्योगे न दोषस्तद्युतं पचेत् " ॥ इति ।

पाद्मेऽपि—" पयसा पाचयेदन्नं लवणं तत्र योजयेत् " ॥ इति ।

पायसे लवणसंयोगः शिष्टाचारविरोधादुपेक्ष्य इत्याहुः । **उशनाः**—

" नालिकाशणछत्राककुसुंभालाबुविड्भवान् । कुंभीकंबुकवृंताककोविदारांश्च वर्जयेत् ॥
" वर्जयेच्च गृही श्राद्धे कांजिकां पिंडमूलकम् । करंजं येऽपि चान्ये वै रसगंधोत्कटास्तथा"॥ इति ।

पुराणे—

" वांशं करीरं सुरसासर्ज्जकं भूतृणानि च । अवेदोक्ताश्च निर्यासा लवणान्यौषराणि च ।

---

१ ग-द्वि । २ ग-सा । ३ ग-मार्ग इतिमुद्रितपाः ।

"श्राद्धकर्मणि वर्ज्यानि याश्च नार्यो रजस्वला"॥ इति। वांशं करीरं वंशांकुरम्। अवेदोक्ता निर्यासाः वेदे ग्राह्यत्वेनोक्तनिर्यासव्यतिरिक्तिनिर्यासाः लोहितनिर्यासाः। व्रश्चनप्रभवाश्चेति यावत्। "अथो खलु य एव लोहितो यो वा व्रश्चनान्निर्येषति तस्य नाश्यं काममन्यस्य" इति श्रुतेः। लवणान्यौषराणि कृतलवणानीति यावत्। याश्च नार्यो रजस्वलाः। या नार्यस्त्रिरात्रादूर्ध्वमप्यनिवृत्तरजस्कास्ताश्च वर्ज्या इत्यर्थः। भरद्वाजोऽपि—

" नक्तोद्धृतं तु यत्तोयं पल्वलांबु तथैव च। स्थलीकूश्मांडफलकं बहुकंदं च पिप्पली॥
" तंडुलीयकशाकं च माहिषं च पयोदधि। शिंबुकानि करीराणि कोविदारं गवेधुकम्॥
" कुलुत्थशणजंबीरिकरंबाणि तथैव च। कूश्मांडमार्द्रपुष्पं च शिग्रुक्षारं तथैव च॥
" नीरसानि च सर्वाणि भक्ष्यभोज्यानि यानि च। एतानि नैव देयानि सर्वस्मिञ्छ्राद्धकर्मणि "॥

माहिषं तु घृतं देयं पयोदधीति विशेषितत्वादिति चंद्रिकायाम्। स्मृत्यंतरे—

" अतिशुंक्तोग्रलवणं विरसं भावदूषितम्। राजसं तामसं चैव हव्यकव्येषु वर्जयेत् "॥

ब्रह्मांडपुराणे—

" आसनारूढमन्नाद्यं पादोपहतमेव च। अमेध्यादागतैः स्पृष्टं शुक्तं पर्युषितं च यत्॥
" द्विः स्विन्नं परिदग्धं च तथैवाग्रेऽवलेहितम्। शर्कराकीटपाषाणैः केशैर्यच्चाप्युपद्रुतम्॥
" पिण्याकं मथितं चैव तथातिलवणं च यत्। सिद्धाः कृताश्च ये भक्षाः प्रत्यक्षलवणीकृताः॥
" दग्धावदुष्टाश्च तथा दुष्टैश्चोपहतास्तथा। वाससा चावधूतानि वर्ज्यानि श्राद्धकर्मणि "॥ इति।

यदन्नमां[3]स्रावणांतया पचिक्रियया सिद्धं मार्दवार्थं पुनरुदकं निनीयावस्राणांतं पच्यते तद् द्विस्विन्नं न तु यत्सिद्धमौष्ण्यार्थमग्नावधिश्रियते 'अत्युष्णं सर्वमन्नं स्यात्' इति वचनादौष्ण्यार्थं पुनराधिश्रवणाभ्यनुज्ञानात्। अग्रावलेहितं यदर्थमुत्पादितं तन्निर्वृत्तेः प्रागन्येनास्वादितम्। सिद्धाः कृता इति अभक्ष्यतया सिद्धाः आमलकादयः। वटकादिरूपेण भक्षतया कृताः प्रत्यक्षलवणेन लवणीकृताः। एतत्कृतभक्षविशेषणम्। प्रत्यक्षग्रहणाद्दध्यादिना वस्त्वंतरेण प्रच्छादितलवणेन लवणीकृता ग्राह्या इति गम्यते। श्राद्धे कूष्मांडादिनिषिद्धद्रव्योपादाने प्रत्यवाय उक्तः स्मृत्यंतरे—

" कूष्मांडं माहिषं क्षीरमाढक्यो राजसर्षपाः। चणका राजमाषाश्च घ्नंति श्राद्धमसंशयम्"॥ इति।

चंद्रिकायाम्—

" पिंडालुकं च तुंडीरं करमर्दाश्च नालिकम्। कूश्मांडं बहुबीजानि श्राद्धे दत्वा व्रजत्यधः "॥इति।

बहुबीजानि मातुलुङ्गफलानि। षट्त्रिंशन्मते—

" क्षीरादिमाहिषं वर्ज्यं अभक्ष्यं यच्च कीर्तितम् "॥ इति। आदिशब्देन महिषीदधि गृह्यते। अभक्ष्यं यच्च कीर्तितं नित्यभोजने यदभक्ष्यं प्रकीर्तितं तच्च सर्वं श्राद्धकर्मणि न देयमित्यर्थः। नित्यभोजने यद्वर्ज्यं तन्नित्यभोजनप्रकरणे प्रतिपादितम्

" पित्रोः श्राद्धे तु संप्राप्ते दद्यात्तक्रं समूढधीः। तत्तक्रं रक्तमित्याहुर्गर्गकाश्यपगौतमाः " ॥ इति।

देवलः—"इष्टापूर्तमृताहेषु दर्शवृध्यष्टकासु च। पात्रेभ्यस्तेषु कालेषु देयं नैव कुभोजनम्"॥ इति। चशब्दान्महालयादिविशिष्टकालेष्वपि कुभोजनं न देयमिति समुच्चीयते। एवं च नित्यश्राद्धादौ दरिद्रकर्तृके कुभोजनाभ्यनुज्ञा गम्यते। यमः—

" भक्ष्यं भोज्यं तथा पेयं यत्किंचित्पच्यते गृहे। न भोक्तव्यं पितॄणां तदनिवेद्य कथंचन "॥ इति।

१ ग-ब्रह्म। २ ग-शू। ३ ग-मवस्रा।

पक्वान्नोपहतिपरिहाराय पाकस्थानाद्दितो बहिष्कार्यानाह **स एव**—

" मद्यपः स्वैरिणी या च परपूर्वापतिस्तथा । नैव श्राद्धे निरीक्षेरन्नावापात्प्रभृति क्वचित् " ॥ इति आवापः पाकं कर्तुं तंडुलादीनां पिठरादौ प्रक्षेपः । तत्प्रभृतिभोजननिष्पत्तिपर्यंतं क्वचिद्भोजनस्थाअन्यत्रावस्थितान् भोज्यपदार्थान्भुंजानांश्च विप्रान्श्राद्धकर्मणि यथा मद्यपाद्यो नाभिवीक्षेरन् तथा दूरत एवापसरणीया इत्यर्थः। **मनुरपि**—(३।२३९–२४०)

" चंडालश्च वराहश्च कुक्कुटश्च तथैव च । रजस्वला च षंढश्च नेक्षेरन्नश्नतो द्विजान् ॥
" होमे प्रदाने भोज्ये च यदेभिरवलोकितम् । दैवे कर्मणि पित्र्ये वा तद्गच्छत्ययथातथम् " ॥ इति ।

उशना अपि–"विड्वराहमार्जारकुक्कुटनकुलशूद्ररजस्वलाशूद्राभर्त्तारश्च दूरतो नेतव्याः " ॥ इति ।

चंद्रिकायाम्—

"कुक्कुटो विड्वराहश्च काकः श्वा च विलालकः । वृषलीपतिश्च वृषलः षंढो नारी रजस्वला ॥
" एते तु श्राद्धकाले वै वर्जनीयाः प्रयत्नतः " ॥ इति ।

व्यासः–

"काषायवासाः कुष्ठी वा पतितो भ्रूणहाऽपि वा । संकीर्णयोनिर्विप्रश्च संबंधी पतितस्य वा ॥
" वर्जनीयास्तथैवैते निवापे समुपस्थिताः " ॥ इति । निवापः पितृभ्यो दानं ' पितृदानं निवापः स्यादि' त्यमरेणाभिधानात् उपस्थितशब्दात् (२।७।३१) पाकोपक्रमप्रभृतिवर्जनीया इति गम्यते ।

स्मृत्यंतरे–

" उदक्यासूतिकाशौचमृताहारैश्च वीक्षिते । श्राद्धे सुरा न पितरो भुंजते पुरुषर्षभ ॥
" आदौ माहिषकं दृष्ट्वा मध्ये तु वृषलीपतिम् । अंते वार्धुषिकं दृष्ट्वा निराशाः पितरो गताः ॥
" नीचैर्दृष्टास्तथा स्पृष्टान् पतितैः प्रतिलोमजैः । आशौचवद्भिरपरैः शूद्रान्नं चैव वर्जयेत् ॥
" शूद्रैः स्पृष्टं च दृष्टं च तद्भृतं तन्निमंत्रितम् । तद्दत्तं च तदुच्छिष्टं शूद्रान्नं षड्विधं स्मृतम् " ॥इति ।

यमः—

" खंजः काणः कुणिः श्वित्री दातुः प्रेष्यकरो भवेत् । न्यूनांगो वातिरिक्तांगस्तमप्यपनयेत्ततः " ॥इति ।

देवलोऽपि—

" बीभत्सुमशुचिं नग्नं मत्तं धूर्तं रजस्वलाम् । नीलकाषायवसनं छिन्नकर्णं च वर्जयेत् " ॥ इति ।

ब्रह्मांडपुराणेऽपि—

" नग्नाद्यो न पश्येयुः श्राद्धमेतत्कदाचन । श्राद्धे गच्छंति तैर्दृष्टे पितरोऽथ पितामहाः " ॥ इति । नग्नो वेदपरित्यागी । आदिशब्देन वैदिककर्मानुष्ठानत्यागिनो गृह्यंते । **तथा च तत्रैवोक्तम्**—

"सर्वेषामेव वर्णानां त्रयी संवरणं यतः । ये वै त्यजंति तां मोहात्ते वै नग्ना इति स्मृताः ॥
"वृथाजटी वृथामुंडी वृथाचारश्च यो नरः । महापातकिनो ये च ते वै नग्नादयः स्मृताः " ॥ इति ।

यदि तु नग्नादयः श्राद्धार्थं संपादितमन्नादिकं पश्येयुः तदा किं कार्यमित्यपेक्षायां **तत्रैवोक्तम्**–

"अन्नं पश्येयुरेते तु यदि वै हव्यकव्ययोः । उत्स्रष्टव्यं प्रधानार्थं संस्कारस्त्वापदि स्मृतः" ॥ इति ।

प्रधानार्थमग्नौकारणब्राह्मणभोजनपिंडप्रदानात्मकप्रधानसंपत्त्यर्थमन्नमेतैर्वीक्षितमुत्सृज्यान्यदन्नं संपाद्यम् । **अन्नांतरसंपादनासामर्थ्ये तु नोत्स्रष्टव्यम्** । **किं तु नग्नादिदर्शनजनितदोषापाकरणार्थं स्मृतः संस्कारः कर्त्तव्य इत्यर्थः** ।

संस्कारोऽपि तत्रैवोक्तः—

“ हविषामथ पक्कानां शक्तौ स्यादपवर्जनम्। मृत्संपृक्ताभिरद्भिश्च प्रोक्षणं तु विधीयते ॥

“ सिद्धार्थकैः कृष्णतिलैः कार्यं चाप्यवकीरणम्। गुरुसूर्याग्निबस्तानां दर्शनं तु प्रयत्नतः ” ॥ इति।

शुध्यंतरमाह **जमदग्निः**—

“ शुद्धवत्योऽथ कूष्मांड्यः पावमान्यस्तरत्समाः। पूतेन वारिणा दर्भैरन्नदोषानपानुदेत् ” ॥ इति। ‘एतोऽन्विन्द्रंस्तावाम’ इत्याद्याः ऋचः शुद्धवत्यः। ‘यद्देवा देवहेळणम्’ इत्याद्याः कूष्मांड्यः। ‘पवमानः सुवर्जन’ इत्याद्याः पावमान्यः। ‘तरत्समंदी धावती’ इत्याद्यास्तरत्समाः। शुद्धवत्यादिमंत्राभिमान्त्रितमुदकं दर्भैरुपादायान्नदोषापनोदनार्थमवोक्षणं कुर्यादित्यर्थः। **सुमंतुरपि**—“ चंडालाद्यवेक्षितमन्नमभोज्यमन्यत्र मृद्भस्माभिरस्योदकस्पर्शनात् ” ॥ इति। केशाद्युपहतौ तु नित्यभोजनप्रकरणोक्ता शुद्धिर्द्रष्टव्या। अलं प्रसक्त्यानुप्रसक्त्या।

निमन्त्रितेभ्यो देयद्रव्याणि। निमंत्रितेभ्यो यद्देयं तदाह **कात्यायनः**—

“ तैलमुद्वर्त्तनं स्नानं दंतधावनमेव च। कृत्तरोमनखेभ्यस्तु दद्यात्तेभ्यः परेऽहनि ” ॥ इति। उत्तरेद्युः पूर्वाह्णे कृत्तरोमनखेभ्यो निमंत्रितेभ्यः स्नानसाधनं तैलादिकं दंतकाष्ठं च दद्यादित्यर्थः। **बोधायनोऽपि**—“ श्वः करिष्यामीति ब्राह्मणान्निमंत्रयेत् तान्छ्वोभूते श्मश्रुकर्माभ्यंजनस्नानैर्यथोपपातं संपूज्य स्वयमाप्लुत्य शुचौ देशे ” ॥ इति। यत्तु **प्रचेतसोक्तम्**—

“ तैलमुद्वर्त्तनं स्नानं दद्यात्पूर्वाण्ह एव तु। श्राद्धभुग्भ्यो नखश्मश्रुछेदनं तु न कारयेत् ” ॥ इति तन्निषिद्धक्षुरकर्मतिथिविषयमिति **चंद्रिकामाधवीयादौ** व्यवस्थापितम्। **सुधीविलोचने** तु श्मश्रुकर्मैकोद्दिष्टविषयमित्येके। अष्टकायामित्यपरे। विहितमपि शिष्टाचाराभावान्नान्यश्राद्धेषु वपनमिति वृद्धाः। अनेन निमंत्रितः स्वयमेव क्षौरी चेच्छ्राद्धार्हं एव “मृता वा एषा त्वगमेध्या यत्केशश्मश्रुमृतामेव त्वचममेध्यामपहत्य यज्ञियो भूत्वा मेधमुपैति ” इति **श्रुतेः** त्रयोदशवारं तूष्णीं निमज्ज्य शुष्कवस्त्रं परिधाय विधिवत्पुनः स्नात्वा शुद्धो भवति इति। **आश्वलायनः**—“तांबूलकृसरादीनि दत्वा अभ्यज्य स्नातेष्वेतेषु स्नातः ” इति। अभ्यज्य स्नापयित्वा एतेषु निमंत्रितेषु स्नातेषु कर्त्ता स्नात इत्यर्थः। अभ्यंगस्यावश्यकत्वमुक्तं **पुराणेऽपि**—

“ पादशौचं विनाभ्यंगं मुद्गमाषं विनाकृतम्। तत्सर्वं त्रिजटेतुल्यं यत्तु श्राद्धमदक्षिणम् ” ॥ इति।

मार्कंडेयः—

“ अह्नःषट्सु मुहूर्त्तेषु गतेषु त्वथ तान्द्विजान्। प्रत्येकं प्रेषयेत्प्रेष्यान्प्रदायामलकोदकम् ” ॥ इति। द्वादशघटिकाभ्य ऊर्ध्वं निर्मंत्रितब्राह्मणानां स्नानार्थं परिचारकाणां हस्तेष्वामलककल्कं प्रदाय निर्मंत्रितब्राह्मणेभ्यः प्रत्येकं दीयतामिति तान्द्विजान्प्रति परिचारकान्प्रेषयेदित्यर्थः। **चंद्रिकामाधवीययोरत्र** व्यवस्था कृता—एतदामलककल्कदानं प्रतिषिद्धतैलासु तिथिषु द्रष्टव्यम्। तास्वप्यमावास्याव्यतिरिक्तासु देयम्। ‘धात्रीफलैरमावास्यायां न स्नायात्’ इत्यामलकोदकस्नानस्याप्यमावास्यायां निषेधादनिषिद्धतैलायां तिथौ तैलादिदानमिति। तथा च **स्मृत्यंतरे**—

“ निर्मंत्रितानां श्राद्धेषु निषिद्धदिवसेषु तु। अभ्यंजनं नैव दद्याद्दद्यात् धात्रीफलोदकम् ॥

“ तच्चामायां भानुवारे सप्तम्यां परिवर्जयेत् ” ॥ इति। **अत्र केचित्**—

“ अष्टकायामथाष्टम्याममायां श्राद्धकर्मणि। पित्र्यस्य तु विकारेषु तैलाभ्यंगो विधीयते ” ॥ इति वचनमनुसरंतः श्राद्धेषु निषिद्धदिनेऽपि तैलाभ्यंगमाचरंति। यथोचितमत्र ग्राह्यम्।

तैलदाने विशेषो **देवलेन** दर्शितः—

" तैलमुद्वर्तनं स्नानं स्नानीयं च पृथग्विधम्। पात्रैरौदुंबरैः दद्याद्वैश्वदेविकपूर्वकम् "॥ इति। उदुंबरं ताम्रम्।

श्राद्धदेशे प्रकल्प्यद्रव्याणि। श्राद्धदेशे प्रकल्प्यानि द्रव्याणि **पुराणे**ऽभिहितानि—

" उपमूलं सकृल्लूनान् कुशांस्तत्रोपकल्पयेत्। यवांस्तिलान् ब्रसीः कांस्यमापः शुद्धैः समाहृताः॥

" पार्णराजतताम्राणि पात्राणि स्युः समिन्मधु। पुष्पधूपसुगंधादिक्षौमसूत्रं च मेक्षणम् "॥ इति। ब्रसीः निमंत्रितानामुपवेशनार्थान्यासनानि। ' व्रतिनामासनं ब्रसी ' **इत्यमरेणा**भिहितत्वात्। कांस्यं कांस्यमयं भाजनम्। कांस्यपार्णराजतताम्रभाजनेषु यथासामर्थ्यमुपकल्पनं कार्यम्। सुगंधादीत्यादिग्रहणादक्षतदीपादिकं गृह्यते। मेक्षणं काष्ठमयी दर्वी। तिला जर्त्तिला ग्राह्यास्तदसंभवे ग्राम्या ग्राह्याः। जर्त्तिललक्षणमुक्तं **सत्यव्रतेन**– " जर्त्तिलास्तु तिलाः प्रोक्ताः कृष्णवर्णा वनेभवाः " ॥ इति। **स्मृत्यंतरे**–' जर्त्तिलाश्चैव ते ज्ञेया अकृष्टोत्पादितास्तु ये ' इति। **सत्वापस्तंबेनोक्तम्**—

" अटव्यां ये समुत्पन्ना अकृष्टफलितास्तथा। ते वै श्राद्धे पवित्रास्तु तिलास्ते जर्त्तिला इति "॥

' तदपशवो वा अन्ये गोऽश्वेभ्यः पशवः असत्रं वा एतद्यदच्छंदोमम् ' इत्यादिवत्तेषां प्रशंसापरम्। अत एव **ब्रह्मांडपुराणे**—

" यतिस्त्रिदंडी करुणारजतं पात्रमेव च। दौहित्रः कुतपः कालः छागः कृष्णाजिनं तथा॥

"गौराः कृष्णास्तथारण्यास्तथैव त्रिविधास्तिलाः। पितॄणां तृप्तये सृष्टाः दर्शते ब्रह्मणा स्वयम्"॥ इति। दौहित्रलक्षणमुक्तं **याज्ञवल्क्येन**—

" वनस्पतिगते सोमे या गौः संचतरेत्तृणम्। तत्क्षीरसंभवघृतं दौहित्रमिति कथ्यते "॥ इति।

बृसीषु विशेषमाह **मनुः** (३।२३४)—" कुतपं चासनं दद्यात् " इति। कुतपो नेपालदेशप्रभवरोमादिनिर्मितः कंबलः। तदुक्तं **स्मृत्यंतरे**—

" मध्यान्हः खड्गपात्रं च तथा नेपालकंबलः। रूप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृतः॥

" पापं कुत्सितमित्याहुस्तस्य संतापकारणम्। अष्टावेते यतस्तस्मात्कुतपा इति विश्रुताः "॥ इति **चंद्रिकायाम्**—नेपालकंबलाभावे मेषादिलोमनिर्मितकंबलमात्रमपि पीठाद्यपेक्षया प्रशस्तम्। आसनोपकल्पनं भोजनार्थोपवेशनस्थानेषु कार्यम्। उपकॢप्तासनेषु दर्भास्तरणं च कार्यमिति।

तथा च **मनुः** (३।२०८)—

" आसनेषूपकॢप्तेषु बर्हिष्मत्सु पृथक् पृथक्। उपस्पृष्टोदकान्सम्यक् विप्रास्तेषूपवेशयेत् "॥ इति।

बर्हिष्मत्सु दर्भवत्सु। **स्मृत्यंतरेऽपि**—" आसनेषु सदर्भेषु विविक्तेषूपवेशयेत् "॥ इति। **हेमाद्रौ**—

" यस्त्वासनोपभोगार्थं प्रदद्यात्कंबलं नवम्। अष्टांगयोगसंसिद्धिस्तस्य पुंसोऽभिजायते॥

" यस्तृणैर्मृदुभिः श्लक्ष्णं निर्माय शुभमासनम्। दद्याच्छ्राद्धेषु तस्यापि सुस्थिराः सर्वतः श्रियः"॥ इति। कांस्यपार्णराजतताम्रपात्राणि भोजनार्थमर्घ्यार्थं चोपकल्प्यानि। अत्र राजतस्य रजतमिश्रस्य च वैशिष्ट्यमाह **मनुः** (३।२०२)—

" राजतैर्भाजनैरेषामपि वा रजतान्वितैः। वार्यपि श्रद्धया दत्तमक्षयायोपकल्प्यते "॥ इति।

---

१ क्ष–ब्राह्मणाः। २ क्ष–ने।

बैजावपः—

" राजतानि प्रशस्तानि पित्र्ये हैमानि दैविके । अथवा ताम्रपात्राणि पित्र्ये हैमानि दैविके" ॥ इति ।

राजतमधिकृत्य **मत्स्यः**—

" शिवनेत्रोद्भवं यस्मादतस्तत्पितृवल्लभम् । अमंगलं तद्यत्नेन देवकार्येषु वर्जयेत् " ॥ इति । अमंगलं रुद्रनेत्रजलप्रभवत्वादिति भावः । पार्णेषु भोजनार्थे पलाशपत्रपात्राण्येवोपकल्प्यानि न त्वन्यानि पर्णपात्राणि । तथा **चात्रिः**—

"न मृन्मयानि कुर्वीत भोजने दैवपित्र्ययोः । पालाशेभ्यो विना न स्युः पर्णपात्राणि भोजने" ॥ इति । एवं च " पालाशपद्मपत्रेषु गृही भुक्त्वैंदवं चरेत् " इति पलाशपत्रनिषेधवचनं श्राद्धव्यतिरिक्त-भोजनविषयम् ।

" सदंडं कदलीपत्रं वामभागाग्रमायतम् । अग्रं चेदन्यदिग्भागे निराशाः पितरो गताः ॥

" निर्दण्डं च निरग्रं च पशुचर्मसमं स्मृतम् । तस्मादग्रं च दण्डं च श्राद्धेषु न निकृन्तयेत् ॥

" श्राद्धेऽहनि तु संप्राप्ते रम्भापृष्ठं न कृन्तयेत् । कृन्तयेद्यदि मूढात्मा निराशाः पितरो गताः " ॥

इत्यादिवचनैः श्राद्धे कदलीपत्रं भोजनाभ्यनुज्ञानां " न जातिकुसुमानि न कदलीपत्रम् " इति प्रचेतसा निषेधाच्च कदलीपत्रभोजनं श्राद्धे वैकल्पिकमित्याहुः । अर्घ्यार्थे त्वन्यपर्णपात्राण्यपि अनिषिद्धानि । अत एव **बैजावापः**—

" खादिरौदुंबराण्यर्घ्यपात्राणि श्राद्धकर्मणि । अप्यश्ममृन्मयानि स्युरपि पर्णपुटास्तथा " ॥ इति ।

कात्यायनः—" सौवर्णराजतौदुंबरखड्गमणिमयानां पात्राणामन्यतमेषु यानि वा विद्यंते पर्ण-पुटेषु वा " इति । यानि तैजसादीनि तेषु वेत्यर्थः ।

अत्रोपकल्पनीयानि पुष्पाणि **ब्रह्माण्डपुराणे** दर्शितानि—

" शुक्लाः सुमनसः श्रेष्ठास्तथा पद्मोत्पलानि च । गंधरूपोपपन्नानि यानि चान्यानि कृत्स्नशः" ॥ इति ।

" जातीचंपकलोध्रांश्च मल्लिकाबाणबर्बरीः । चूतांशोका अरूषं च तुलसी तिलकं तथा ॥

"पारंतीं शतपत्रं च भृंगराजं च केतकीम् । यूथिकामतिमुक्तं च दद्यात्पुष्पाण्यमूनि च " ॥ इति ।

मार्कंडेयः—

"जात्यश्च सर्वा दातव्या मल्लिकाश्वेतयूथिकाः । जलोद्भवानि सर्वाणि कुसुमानि च चंपकम्" ॥ इति ।

जात्यः मालत्यः । यत्त्वंगिरसोक्तम् " न जातिकुसुमानि " इति यच्च **क्रतुनोक्तम्**—

" असुराणां कुले जाता जातिः पूर्वपरिग्रहे । तस्यादर्शनमात्रेण निराशाः पितरो गताः " ॥ इति अत्र जातिकुसुमनिषेधो वैकल्पिकः । **सायणीये**—

" तुलसी शतपत्रं च भृंगराजं तथैव च । मरुकं मल्लिकाश्चैव पितॄणामक्षयं भवेत् " ॥ इति ।

संग्रहे—

"तुलसी श्राद्धकाले तु यदा शिरसि धारिता । दाता भोक्ता पिता तस्य विष्णुलोके महीयते" ॥ इति **स्मृत्यर्थसारे** तुलस्या वर्ज्यत्वमुक्तं तत्र मूलं चिंत्यमिति **चन्द्रिकायाम्** ।

श्राद्धे वर्जनीयानि पुष्पाण्याह **शंखः**—

" उग्रगंधीन्यगंधीनि चैत्यवृक्षोद्भवानि च । पुष्पाणि वर्जनीयानि रक्तवर्णानि यानि च ॥

"जलोद्भवानि देयानि रक्तान्यपि विशेषतः" ॥ इति । चैत्यवृक्षः श्मशानवृक्षः ।

---

१ ख-कोशादर्रं । २ ग-न्तीं ।

विष्णुः (६६।७)—" न कंटकिजं दद्यात्कंटकिजमपि शुक्लं सुगंधि यत्तद्द्यान्न रक्तं दद्याद्रक्तमपि कुंकुमं जलं च दद्यात् " इति। **मत्स्यः**—

" पद्मबिल्वार्कधत्तूरपारिभद्राटरूषकाः । न देयाः पितृकार्येषु पयश्चैवाविकं तथा "॥ इति पारिभद्रो मंदारः। **ब्रह्मांडपुराणेऽपि**—

"जपादिकुसुमं भंडी रूपिका सकुरंटका। पुष्पाणि वर्जनीयानि श्राद्धकर्मणि नित्यशः"॥ इति। आदिग्रहणेन जपाकुसुमवद्रक्तकरवीरादिकुसुमानां वर्ज्यत्वमुक्तम्। भण्डी मंजिष्ठाधूपद्रव्येषूपकल्पनीयानि **विष्णुधर्मोत्तरे** दर्शितानि—

" धूपो गुग्गुलुजो देयस्तथा चंदनसारजः। अगरुश्च सकर्पूरतुरुष्कस्त्वक् तथैव च "॥ इति। तुरुष्कः सल्लकीवृक्षः। त्वक् लवंगम्। **मरीचिरपि**—"चंदनागरुणी चोभे तमालो शीरपद्मकम् "॥ इति। वर्जनीयं धूपद्रव्यमाह **विष्णुः** (७९।९)– " जीवजं च सर्वं न धूपार्थे " इति। जीवजं कस्तूर्यादि। अनुलेपनार्थमुपकल्पनीयं द्रव्यमाह **मरीचिः**—

" कर्पूरकुंकुमोपेतं सुगंधि सितचंदनम्। दैविकेऽप्यथ पित्र्ये च गंधदाने प्रशस्यते "॥ इति। **विष्णुरपि** (७९।११)—" चंदनं कुंकुमकर्पूरागरुपद्मकान्यनुलेपनार्थम् " इति। **मार्कंडेयः**—

" चंदनागरुकर्पूरकुंकुमानि प्रदापयेत्। अश्वमेधमवाप्नोति पितॄणामनुलेपनात् "॥ इति। **ब्रह्मांडपुराणेऽपि**—

" श्वेतचंदनकर्पूरकुंकुमानि शुभानि च। विलेपनार्थं दद्यात्तु प्रीतिजं पितृवल्लभम् "॥ इति। वर्ज्यानाह **मरीचिः**—" श्राद्धेषु विनियोक्तव्या न गंधा देवदारुजाः।

" कल्कीभावं समासाद्य न च पर्युषिताः क्वचित्। न विगंधाश्च दातव्या भुक्तशेषावशेषिताः॥

"पूतिं च मृगनाभिं च रोचनं रक्तचंदनम्। कालेयं जांगकं चैव तुरुष्कं चादि वर्जयेत्"॥ इति। पूती तृणविशेषः। मृगनाभी कस्तूरी। रोचनं गोरोचनम्। दीपार्थस्नेहद्रव्येषु उपकल्पनीयमाह **मरीचिः**—" घृताद्वा तिलतैलाद्वा नान्यद्रव्यात्तु दीपकम् "। अत्र चान्यद्रव्यनिषेधो वसामेदोरूपद्रव्यविशेषे विषयो न पुनः कुसुंभादितैलविषयः। यत आह **शंखः**—

" घृतेन दीपो दातव्यस्त्वथवाप्योषधीरसैः। वसामेदोद्भवं दीपं प्रयत्नेन विवर्जयेत् "॥ इति। आच्छादनार्थमुपकल्पनीयानि **चंद्रिकायां** दर्शितानि

" आच्छादनं तु यो दद्यादहतं श्राद्धकर्मणि। आयुः प्रकाम्यमैश्वर्यं रूपं च लभते शुभम्॥

" कौशेयं क्षौमकार्पासं दुकूलमहतं तथा। श्राद्धेष्वेतानि यो दद्यात्कामानाप्नोति पुष्कलान् "॥ इति।

अहतलक्षणमाह **प्रचेताः**—

" ईषत् धौतं नवं श्वेतं सदशं यन्न धारितम्। अहतं तु विजानीयात्सर्वकर्मसु पावनम्॥

" स्वयं धौतं च देयं स्यात्सवर्णैः क्षालितं च यत्। प्रदेयं पितृकार्येषु कारुधौतं न जातुचित् "॥ इति।

स्मृत्यंतरे—

" वासांसि वाससी वासो यो न दद्यान्मृतेऽहनि। सप्तजन्मसु नग्नः स्याद्दरिद्रश्च प्रजायते "॥ इति।

---

१ क–चोङ्ककं; क्ष–कालेयांजकं।

शंखः—" यथाविभवसारेण वस्त्रं दद्यात्तु पैतृके । उत्तरीयमभावे तु शोभनं दर्भनिर्मितम्" ॥ इति । **शातातपः** " युवा सुवासा इति वस्त्रं तदभावे यज्ञोपवीतम् " इति । **पुराणेऽपि**—"यज्ञोपवीतं दातव्यं वस्त्राभावे विजानता । पितॄणां वस्त्रदानस्य फलं तेनाप्नुतेऽखिलम् ॥
" यज्ञोपवीतदानेन विना श्राद्धं तु निष्फलम् । तस्माद्यज्ञोपवीतस्य दानमावश्यकं स्मृतम्" ॥ इति । एवं दर्भादिमेक्षणांतं द्रव्यमुपकल्प्य स्नात्वा शुक्लं वासः परिदध्यात् । "स्नातोऽधिकारी भवति दैवे पित्र्ये च कर्मणि । श्राद्धकृच्छुक्लवासा स्यात् " । इति च **स्मरणात्**—

श्राद्धप्रकारः—स्नानानंतरं यत्कर्त्तव्यं तदाह **मार्कंडेयः**—"स्नातः स्नातान्समाहूतान्स्वागतेनार्चयेत्पृथक् " इति । पृथक्पृथक्स्वागतमिति ब्रूयादित्यार्थः । **शंखश्च** । " प्रयतोऽपराण्हे शुचिः शुक्लवासा दर्भहस्तः स्वागतमिति ब्रुयात् " इति । अपराण्हशब्दोऽत्रावर्त्तनादुपरितनभागे प्रयुक्तः "ऊर्ध्वं मुहुर्त्तात्कुतपाद्यन्मुहूर्त्तचतुष्टयम् । मुहूर्त्तपंचकं वाऽपि स्वधाहवनमिष्यते" ॥ इति **स्मरणात्** । **यमोऽपि**-"ततःस्नात्वा निवृत्तेभ्यःप्रत्युत्थाय कृतांजलिः।पाद्यमाचमनीयं च संप्रयच्छेद्यथाक्रमम्"॥इति। स्वागतमित्युक्त्वा मार्गकृतोपहतिशुध्यर्थं पादप्रक्षालनार्थमुदकमाचमनार्थमुदकं च क्रमेण प्रयच्छेदित्यर्थः । तत आसनं दत्वा पुनर्निमंत्रयीत । तदुक्तं **आश्वलायने**—" पुनरपो दत्वा निमंत्रयेत् दैवे क्षणः क्रियतां ॐ तथेऽति विप्रो ब्रूयात् । प्राप्नोतु भवान इति कर्त्ता ब्रूयात् । 'प्राप्नुवानि ' इति पुनर्विप्रो ब्रूयात्" इति । निमंत्रणं च निरंगुष्ठहस्तं गृहीत्वा कर्तव्यम् । " निरंगुष्ठं गृहीत्वा तु विश्वान्देवान्समाव्हयेत् " इति **स्मरणात्**—

मण्डलकरणम् । तदनंतरं गृहांकणे मंडलद्वयं कार्यम् । तथा च **स्मृत्यंतरे**—

" संमार्जितोपलिप्तेषु द्वारि कुर्वीत मंडले । प्रांकणे मंडले कुर्याद्दैवे पित्र्ये च कर्मणि ॥
" अंतरेण प्रकर्त्तव्यं तयोर्मध्ये षडंगुलम् । पादोदकस्य संयोगात्पितृघाती प्रजायते" ॥

अत्रिः—" एकोद्दिष्टे सपिंडे च कुंडं कुर्याद्यथाविधि । अन्नश्राद्धेषु सर्वत्र मंडलं तु विधीयते " ॥
दक्षः—" सपिंडीकरणादूर्ध्वं मंडलं तु विधीयते । यावत्कालं प्रेतनाम तावत्कुंडं प्रकीर्तितम् ॥
" सपिंडीकरणादूर्ध्वं कुंडेषु क्षालितं यदि । कुलक्षयकरं तस्मान्नरके पातयेत् ध्रुवम् ॥
"तदूर्ध्वं क्षालनं कुंडे स्त्रीपुत्रगृहनाशनम् " ॥ इति ।

मत्स्यः—"गृहद्वारसमीपे तु भवनस्याग्रतो भुवि । गोमयेनोपलिप्तायां गोमूत्रेण तु मंडले " ॥ इति । गोमयसहितेन गोमूत्रेण मंडले कार्ये इत्यर्थः । **स्मृत्यंतरे**—

" प्रांकणे मंडले कुर्याद्देवानां चतुरश्रकम् । वितस्तिमात्रं पित्रर्थं वर्तुलं दक्षिणं भवेत् ॥
" नांतः प्रक्षालयेत्पादौ दैवे पित्र्ये च कर्मणि । नोत्तरे दक्षिणेनैव पश्चिमे न गृहांतरे ॥
" द्वारस्य पूर्वतः कुर्याद्गोमयैर्मंडलद्वयम् " ॥ इति । **स्मृत्यर्थसारे**—

" प्रादेशमात्रं देवानां मंडलं चतुरश्रकम् । वितस्तिमात्रं पित्रर्थं मंडलं वर्त्तुलं भवेत् ॥
" देवानामुत्तरे कार्यं पित्रर्थं दक्षिणे तथा । अंतरालं तु कर्तव्यं तयोर्मध्ये षडंगुलम् " ॥ इति ।

अत्र विशेषमाह **शंभुः**—" उदक्प्लवमुदीच्यं स्याद्दक्षिणं दक्षिणाप्लवम् " इति । उदीच्यां वैश्वदैविकं चतुरश्रं मंडलमुदक्प्रवणं दक्षिणं पित्र्यं वर्तुलमंडलं दक्षिणाप्रवणं कुर्यादित्यर्थः ।

मंडलकरणानंतरं यत्कर्तव्यं तदाह शंभुः—

"उत्तरे क्षतसंयुक्तान्पूर्वाग्रान्विन्यसेत्कुशान्। दक्षिणे दक्षिणाग्रांस्तु सतिलान्विन्यसेत् द्विजः"॥ इति।

पादप्रक्षालनम्। मत्स्योऽपि—

" अक्षताभिः सपुष्पाभिस्तदभ्यर्च्यापसव्यतः। विप्राणां क्षालयेत्पादानभिवंद्य पुनः पुनः" ॥ इति। अपसव्यतः पूर्वमुदङ्मंडलं पश्चाद्दक्षिणमंडलमभ्यर्चेत्यर्थः। एवं च मंडलकरणं तदर्चनं च पदार्थानुसमयेन कार्यम्। न तु कांडानुसमयेनेत्युक्तं भवति। **व्यासः**—

" अक्षताभिः सपुष्पाभिर्दर्भाग्रैरद्भिरेव च। विप्राणां क्षालयेत्पादान्दैवे चैव पुरोमुखः॥

" तिलैर्दर्भैस्तथा पुष्पैरद्भिर्गंधादिमिश्रितैः। पितॄणां क्षालयेत्पादांस्तथा प्रत्यङ्मुखः शुचिः" ॥ पुरोमुखः प्राङ्मुख इत्यर्थः। अत्र केचित्

" अप्रवाहोदकस्नानं विप्रपादावनेजनम्। गायत्र्या जपमर्घ्यं च ह्यादित्याभिमुखं भवेत्" ॥ इति **वचनाद्**देवपित्रोरुभयोरपि पादप्रक्षालनमादित्याभिमुखः कुर्यादित्याहुः। **अपरे तु**—

"दिवा वा यदि वा रात्रौ न कुर्यात्प्राङ्मुखः शुचिः। प्रत्यङ्मुखस्तु कुर्वीत विप्रः पादावनेजनम्"॥ इति **वचनात्**। आदित्याभिमुखयोर्देवपित्रोः पादक्षालनं तदभिमुखः कुर्यादिति। शिष्टाचारादिह व्यवस्था। घृतयुक्तेन गोमयेनालिप्य पादशौचं विशिष्यते

"आज्यं गोमयसंयुक्तं पादयोर्लेपयेद्यदि। पितरस्तस्य कल्पांतममृतेनाभिषेचिताः"॥ इति **स्मरणात्**। न पवित्रपाणिः प्रक्षालयेत्

" सर्वदा दर्भपाणिः स्याद्दैवे पित्र्ये च कर्मणि। पादशौचं गंधलेपं न कुर्याद्दर्भपाणिना॥

" सपवित्रेण हस्तेन विप्रपादावनेजनात्। तथा वज्रहतो वृत्रस्तथैव पितृदेवताः।

" ग्रंथिर्यस्य पवित्रस्य विप्रपादाभिषेचने। यथा वज्रहतो वृक्षो देवताः पितरस्तथा" ॥ इत्यादि **स्मरणात्**। अत्र **भरद्वाजः**—

" पादावाजानु वा जंघमपि वा चरणद्वयम्। कूर्परांतं करौ सम्यक्क्षालयेत्प्रथमं बुधः" ॥ इति। **पारिजाते तु**—

" नान्तः प्रक्षालयेत्पादौ कर्ता पित्र्यादिकर्मसु। अज्ञानाद्यदि कुर्वीत पातयेदुभयं कुलम्॥

" पादप्रक्षालनं श्राद्धे परं गुल्फद्वयाद्यदि। कुर्वीत रोमसंस्पर्शात्तत्तोयं रुधिरं भवेत्॥

" तिष्ठन्न क्षालयेत्पादौ क्षालयेत्तु तथा यदि। नरश्चंडालयोनिः स्याद्यदि गंगां न पश्यति"॥ इति। देवपूर्वकं पादप्रक्षालनं कुर्यात्। तथा च **बृहन्निरुक्ते**—

" पाद्यं चैव तथैवार्घ्यं दैवमादौ प्रपूजयेत्। शंनोदेवीति मंत्रेण पाद्यं चैव प्रपूजयेत्" ॥ इति। पाद्यार्घ्ययोर्देवपूर्वानुष्ठानं निमंत्रणादीनां सर्वेषां प्रदर्शनार्थं—

" सदैवं भोजयेच्छ्राद्धं तत्पूर्वं च प्रवर्तयेत्। अन्यथा ह्यवलुंपंति सहैवासुरराक्षसाः॥

" देवकार्यात् द्विजातीनां पितृकार्यं विशिष्यते। दैवं हि पितृकार्यस्य पूर्वमाप्यायनं स्मृतम्॥

" तेषामारक्षभूतं तु दैवं पूर्वं नियोजयेत्। उपचारानपि तथा दैवान्पूर्वं प्रयोजयेत्" ॥ इति **क्रतुस्मरणात्**। पादप्रक्षालनं कर्ता स्वयमेव कुर्यात् " पादप्रक्षालनं कुर्यात् स्वयमेव विनीतवत्" इति **यमस्मरणात्**। शं नो देवीरिति मंत्रांते पुरूरवार्द्रवसंज्ञका विश्वेदेवा इदं वः पाद्यमिति

सामान्यनाम्ना विशेषनाम्ना च निर्दिश्य वैश्वदेविकब्राह्मणपादयोः पाद्योदकं प्रक्षिप्य समस्तसंपत्समवाप्तिहेतव इत्यादिभिर्मन्त्रैः पादप्रक्षालनं कुर्यात् । विश्वेदेवा इति सामान्यनामनिर्देशः । विशेषनामानि बृहस्पतिना दर्शितानि—

" क्रतुर्दक्षो वसुः सत्यः कालः काम्यस्तथैव च । धुरिश्च रोचनश्चैव तथा चैव पुरूरवाः ॥
" आर्द्रवश्च दशैते तु विश्वेदेवाः प्रकीर्तिताः " ॥ इति । विभज्य दर्शयति शंखः—
" इष्टिश्राद्धे क्रतुर्दक्षः संकीर्त्यौ वैश्वदेविके । नांदीमुखे सत्यवसू काम्ये च धुरिरौचनौ ।
" पुरूरवार्द्रवौ चैव पार्वणे समुदाहृतौ । नैमित्तिके कालकाम्यावेवं सर्वत्र कीर्तयेत् " ॥ इति

इष्टिश्राद्धं यागादिकर्मांगश्राद्धमित्यर्थः । एवं पित्रर्थब्राह्मणपादप्रक्षालनम् । शंनोदेवीरिति मंत्रांते 'पितरमुकगोत्र देवदत्तशर्म इदं ते पाद्यं पितामहामुकगोत्र यज्ञदत्तशर्मन्निदं ते पाद्यं प्रपितामहामुकगोत्र विष्णुमित्रशर्मन्निदं ते पाद्यम्' इति एकब्राह्मणपक्षे तु पितृपितामहप्रपितामहा अमुकगोत्रा अमुकशर्मण इदं वः पाद्यमिति वा विशेषः । पाद्यादिसमर्पणे पितॄणां नामगोत्रं च वक्तव्यम् । तथा च मत्स्यः—" नामगोत्रं पितॄणां तु प्रापकं हव्यकव्ययोः " इति । हव्यकव्यग्रहणं पाद्यादीनामपि प्रदर्शनार्थम्

" आवाहनेऽर्घ्ये संकल्पे पिंडदाने तिलोदके । अक्षतासनयोः पाद्ये गोत्रं नाम प्रकीर्तयेत् " ॥ इति स्मरणात् । स्मृत्यंतरे—

" आवाहनासने पाद्ये ह्यन्नदाने तथैव च । अक्षय्ये पिंडदाने च गोत्रं नाम च कीर्तयेत् " ॥ इति । हेमाद्रौ—

" वसुरुद्रा दितिसुताः पितरः श्राद्धदेवताः । वस्वादिनामभिः सार्धं ये कुर्वंति समाहिताः ॥
" श्राद्धे पितॄन्समभ्यर्च्य ते यांति फलमक्षयम् " ॥ इति ।

पैठीनसिः—" वसवः पितरो रुद्राः पितामहा आदित्याः प्रपितामहाः य एवं विद्वान्पितॄन्यजते वसवो रुद्रा आदित्याश्चास्य प्रीता भवंति " इति । अवश्यं नामगोत्रमंत्राद्युच्चारणवद्वस्वादिरूपेण पित्राद्यो ध्यातव्या इत्युक्तं भवति । निमंत्रणप्रभृत्या श्राद्धपरिसमाप्तेर्वैश्वदेविकं प्रदक्षिणं यज्ञोपवीतिना कार्यं पित्र्यमपसव्य प्राचीनावीतिना कार्यम्

" यज्ञोपवीती देवानां कुर्यात्सर्वं प्रदक्षिणम् । अपसव्यं ततः कृत्वा पितॄणामप्रदक्षिणम् ॥
" दक्षिणाग्राश्च दर्भाः स्युः स च वै दक्षिणामुखः " ॥ इति स्मरणात् । पितृमेधसारकृत्सर्वं देवार्थमुपचारमुपवीती प्राङ्मुखः प्रदक्षिणं प्रागग्रैर्दर्भैर्देवतीर्थपूर्वं कृत्वा पितृभ्यः सर्वं दक्षिणामुखः कुर्यात् । पित्रनंतरं देववत्सर्वं विष्णोः कुर्यात् " ॥ इति । स्मृत्यंतरे—

" उदङ्मुखस्तु देवानां पितॄणां दक्षिणामुखः । प्रदद्यात्पार्वणे सर्वं देवपूर्वं विधानतः" ॥ इति । बोधायनः—"आचमने चाग्निमुखे चाभिश्रवणे चानुव्रजनप्रदक्षिणेषु च पश्चाद्धोमेषु यज्ञोपवीतमन्यत्र प्राचीनावीतम्" ॥ इति । पश्चाद्धोमः प्रायश्चित्तहोमः । अत्र कपर्दी—

" आधारदार्वाग्निमुखाज्यभागौ प्रदक्षिणानुव्रजनेषु तद्वत् ।

" आधारयोः स्विष्टकृति प्रसिद्धं यज्ञोपवीतं हि कपर्दिनः स्यात्" । पितृमेधसारेऽपि "आ समाप्तेः प्राचीनावीतमन्यत्र प्राणायामाधारहोमाज्यभागाग्निमुखस्विष्टकृद्धोमप्रायश्चित्ताहुत्यभिश्रवणाचमनप्रदक्षिणनमस्कारानुव्रजनेभ्यः" इति । भाष्यकारः "निरूहोद्वासनपरिध्याधानलेखोल्लेखनादिकं पित्र्येऽपि समानम्" इति दैवसमानमित्यर्थः ।

---

१ क–नि ।

स्मृत्यंतरे—

“ सूक्तस्तोत्रजपं त्यक्त्वा विना च परिवेषणम् । विसर्जनं सौमनस्यं स्वागतं प्रार्थनां तथा ॥
“ विप्रप्रदक्षिणं चैव स्वस्तिवाचनकं विना । पिंडाघ्राणं दक्षिणां च प्रत्युत्थानादिकं विना ॥
“ पित्र्यमन्यत्प्रकर्तव्यं प्राचीनावीतिना सदा ” ॥ इति । **मनुः** (३।२७९)—
“ प्राचीनावीतिना सम्यगपसव्यमतंद्रिणा । पित्र्यमा निधनात्कार्यं विधिवद्दर्भपाणिना ” ॥ इति ।

आ निधनादाश्राद्धपरिसमाप्तेरित्यर्थः । विशेषांतरमाह **कात्यायनः**—

“ दक्षिणं पातयेज्जानु देवान्परिचरन्सदा । पातयेदितरं जानु पितॄन्परिचरन् सदा ” ॥ इति ।

बोधायनः—

“ प्रदक्षिणं तु देवानां पितॄणामप्रदक्षिणम् । देवानामृजवो दर्भाः पितॄणां द्विगुणाः स्मृताः ” ॥ इति । द्विगुणाः मध्यभंगेन द्विगुणीकृता इत्यर्थः ॥ **शौनकः**—“ दर्भान् द्विगुणभुग्नानासनं प्रदाय ” इति । आसनग्रहणं दर्भसाध्यपितृकर्मोपलक्षणार्थम् ।

आचमनविधिः—

पादप्रक्षालनानंतरं कर्त्ता मंडलस्योत्तरभागे ईशानदिग्भागे वा पूर्वमाचामेत् । ततो निमंत्रित आचामेत्

“ मंडलस्योत्तरे भागे विप्रस्याचमनं भवेत् । अमृतं स्याद्धि तत्तोयमन्यत्र रुधिरं भवेत् ॥
“ कुंडस्योत्तरपूर्वे वा द्विजस्याचमनं भवेत् । दक्षिणे तु सुरातुल्यं पश्चिमे रुधिरं भवेत् ॥
“ कर्त्तुराचमनात्पूर्वं भोक्तुराचमनं यदि । शुनो मूत्रसमं तोयमित्येवं मनुरब्रवीत् ॥
“कर्त्तुराचमनं पूर्वं कुंडस्योत्तरतो भवेत्। अपि वेशानदिग्भागे कार्यमाचनं तदा”॥ इति **स्मरणात्—**

आचमनानन्तरं कर्तव्यम् । आचमनानंतरं कर्त्तव्यमाह **क्रतुः**—

“ दर्भपाणिर्द्विराचम्य शुक्लवासा जितेंद्रियः । परिश्रिते शुचौ देशे गोमयेनोपलेपिते ॥
“दक्षिणाप्रवणे सम्यगाचांतान्प्रयतान्छुचीन् । आसनेषु सदर्भेषु विविक्तेषूपवेशयेत् ” ॥ इति ।

याज्ञवल्क्यः (आ. २२६–२२८)—

“ अपराण्हे समभ्यर्च्य स्वागतेनागतांस्तु तान् । पवित्रपाणिराचान्तानासनेषूपवेशयेत् ॥
“द्वौ दैवे प्राक् त्रयः पित्र्ये उदगेकैकमेव वा ” इति । दैवे वैश्वदेवे द्वौ प्राङ्मुखौ ब्राह्मणावुपवेश्यौ । पित्र्ये पित्र्यादिस्थाने त्रय उदङ्मुखा उपवेश्याः । वैश्वदेवे पित्र्ये च एकैकं वा उपवेशयेदित्यर्थः ।

चंद्रिकायाम्—

“विप्रौ तु प्राङ्मुखे दैवे द्वौ तु पूर्वं निवेशयेत् । उत्तराभिमुखान्विप्रान् त्रीन् पितृभ्यश्च सर्वदा”॥ इति।

विज्ञानेश्वरः—‘ पित्रादीनां त्रयाणामयुग्मान्कुशान्द्विगुणभुग्नानप्रदक्षिणं वामतो विष्टरार्थमासनेषूदकपूर्वं दत्वा पुनरुदकं दद्यात् । अपः प्रदाय द्विगुणभुग्नान् कुशान्दत्वा ‘ अपः प्रदाय ’ **इत्याश्वलायनस्**मरणात् । “एतच्चाद्यंतयोरुदकदानं वैश्वदेवे पित्र्ये च प्रतिपादनार्थं द्रष्टव्यम्” इति।

पितृमेधसारेऽपि—“ प्राङ्मुखावुदगपवर्गौ वैश्वदेवे पित्र्ये तु उदङ्मुखान्प्रागपवर्गान्प्राङ्मुखान्वा दक्षिणापवर्गान्विप्रान्वा सदर्भोपक्लृप्तेष्वासनेषूदकदानपूर्वं द्विगुणदर्भान्वामतो विष्टरार्थं दत्वा निवेश्यापः प्रदाय ” ॥ इति ।

---

१ क्ष—भवति ।

बोधायनोऽपि—
" अयुग्मान्ब्राह्मणान्सुप्रक्षालितपाणिपादानप आचमय्य सदर्भोपक्लृप्तेष्वासनेषु प्राङ्मुखानुपवेशयत्युदङ्मुखान्वा यदि प्राङ्मुखान् दक्षिणापवर्गंयत्युदङ्मुखान्प्रागपवर्गम् " इति । **स एव**— "प्रदक्षिणं तु देवानाम्" इति । देवानां ब्राह्मणाः प्रदक्षिणं दक्षिणदिगुपक्रममुदपवर्गं यथा भवति तथा आसीरन्नित्यर्थः । **यमः**— "दक्षिणासंस्था आसीरन्नस्पृशंतः परस्परम्" इति । "दक्षिणासंस्थता ह्येषां पितॄणां श्राद्धकर्मणि" इति । निष्ठा समाप्तिः । असंस्पृशंत इति अनुच्छिष्टदशायामपि परस्परस्पर्शो यथा न भवति तथा आसीरन्नित्यर्थः ॥ तथा च **गार्ग्यः**—
" स्पर्शे स्पर्शे भवेत्पापमेकपंक्तिनियोगतः । हीनवृत्तादिपंक्तौ तु युक्तं तस्माद्विवेचनम् " ॥ इति ।
चंद्रिकायाम्—
" आसनेष्वासनं दद्यान्न तु हस्ते कदाचन । दीयते यदि मूढात्मा निराशाः पितरो गताः" ॥ इति ।

प्रचेताः—" दर्भाश्चैवासने दद्यान्न तु पाणौ कदाचन " इति ।

पुराणेऽपि—
" आसने चासनं दद्याद्वामे वा दक्षिणेऽपि वा । पितृकर्मणि वामे वै दक्षिणे देवकर्मणि " ॥

उपवेशनक्रमः । उपवेशनक्रममाह **विष्णुः**—" विप्रान् स्वागतान्स्वाचांतान्यथाभूयोविद्यं[1]कुशोत्तरेष्वासनेषूपवेशयेत् " इति । यथाभूयोविद्यं विद्यातारतम्यानुसारेण वैश्वदेविकब्राह्मणपंक्तौ पैतृकब्राह्मणपंक्तौ च प्रथमद्वितीयादिक्रमेणोपवेशयेदित्यर्थः ।
पैठीनसिरपि—"विद्यातपोधिकानां वै प्रथमासनमुच्यते ।
"एकपङ्क्त्युपविष्टानां भोजनादि समं स्मृतम् । अयुक्तोऽग्रासनं गच्छन् पंक्त्या हरति दुष्कृतम्" ॥इति। नियुक्त एव गच्छेदित्यर्थः । **हारीतोऽपि**—
" संतिष्ठमानेष्वर्हसु योऽनर्होऽग्रासनं श्रयेत् । गृण्हाति स मलं पंक्तेरायुषा च वियुज्यते " ॥ इति । तस्माम्मान्यानतिक्रमेणैवाग्रासनं समश्रयेदित्यभिप्रायः । **चन्द्रिकायाम्**—
" पाणिपादमुखार्द्राश्च स्वाचान्ताः सुसमाहिताः । तेष्वासनेषु संस्थाप्य विप्रास्ते क्रमेण तु " ॥ इति। येन क्रमेणोपवेशने कृते मान्यानतिक्रमः तेन क्रमेणेत्यर्थः ।

पूर्वमासनोपक्लृप्त्यभावे **स्मृत्यंतरे**ऽभिहितम्—
" तत्रासनानि देयानि तिलाश्चापि कुशैः सह । पृथक्पृथक्च्चासनेषु तिलतैलेन दीपिका " ॥ इति । स्थापनीया इति शेषः

उपवेशनप्रकारः । उपवेशनप्रकारमाह **यमः**—"आसनं संस्पृशन्सव्येन पाणिना दक्षिणेन ब्राह्मणमुपसंगृह्य समाध्वमिति चोक्त्वोपवेशयेत् " । इति । आस्यतामित्युक्त्वा वोपवेशयेत् । "आस्यतामिति तान्ब्रूयात् आसनं संस्पृशन्नपि" इति **स्मृत्यंतरे** विधानात् । **यमः**—
" जान्वालभ्य ततो देवानुपवेश्य ततः पितॄन् । समस्तान्निर्व्याहृतिभिरासनेषूपवेशयेत् " ॥ इति ॥

उपविष्टनियमाः । उपविष्टब्राह्मणनियमाश्च **स्मृत्यंतरे** दर्शिताः—
" पवित्रपाणयः सर्वे ते च मौनव्रतान्विताः । उच्छिष्टोच्छिष्टसंस्पर्शं वर्जयंतः परस्परम्" ॥ इति । मौनित्वं च ब्रह्मोद्यकथाव्यतिरिक्तविषयम् ।

---

१ क—यथाविद्यं ।

अत एव **यमः**—" ब्रह्मोद्याश्च कथाः कुर्युः पितॄणामेतदीप्सितम् " ॥ इति

दर्भासनदानात्पूर्वकृत्यम्। कंबलाद्यासनेषूपवेशनानंतरं दर्भासनदानात्पूर्वकृत्यमुक्तं **स्मृत्यंतरे**—

"श्राद्धभूमिं गयां ध्यात्वा ध्यात्वा देवगदाधरम्। ताभ्यां चैव नमस्कृत्य ततः श्राद्धं प्रवर्त्तयेत्"॥ इति। श्राद्धं करिष्ये इत्येवमुपविष्टान्ब्राह्मणान्पृच्छेदित्यर्थः । अत एवोक्तं **तत्रैव** —

"उभौ हस्तौ समौ कृत्वा जानुभ्यामंतरे स्थितौ। सप्रश्रयश्चोपविष्टान्सर्वान्पृच्छेत् द्विजोत्तमान्" ॥ इति। कुरुष्वेति तैरनुज्ञातो देवताभ्यः पितृभ्यश्चेति मंत्रं त्रिः पठेत् । तदुक्तं **ब्रह्मांडपुराणे**—

" श्राद्धं करिष्य इत्येवं पृच्छेद्विप्रान्समाहितः । कुरुष्वेति स तैरुक्तो मंत्रमेतं त्रिरुच्चरेत् ॥
" देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च । नमः स्वधायै स्वाहायै नित्यमेव नमो नमः ॥
" आद्येऽवसाने श्राद्धस्य त्रिरावृत्तं जपेत्सदा ।
" पठ्यमानमिमं श्रुत्वा श्राद्धकाल उपस्थिते । पितरः क्षिप्रमायांति राक्षसाः प्रद्रवंति च" ॥ इति।

अत्र कर्त्तव्यांतरमाह **निगमः**—'अपहता' इति 'तिलान्विकिरेत्' इति । ' अपहता असुरा रक्षांसि पिशाचा ये क्षयंति' इति मंत्रेण तिलान्विकीर्य ब्राह्मणासनेषु पूर्वोक्तप्रकारेण दर्भासनं दद्यात् ।

" कुरुष्वेति स तैरुक्तो दद्याद्दर्भासनं ततः " इति **स्मरणात्** । दर्भासनं च ब्राह्मणहस्ते अप आसिच्य कार्यम्

" पाणिप्रक्षालनं दत्वा विष्टरार्थान्कुशानपि । आवाहयेदनुज्ञातो ' विश्वे देवास' इत्यृचा " ॥ इति **याज्ञवल्क्यस्मृतेः** (आ. २२९) । देवकर्मणि यवसहितं दर्भासनं दद्यात् ' देवानां सयवा दर्भाः ' इति **काटकगृह्ये**ऽभिधानात् । कंबलाद्यासनस्य दक्षिणभागे पुरूरवार्द्रवसंज्ञकानां विश्वेषां देवानामिदमासनमिति वामे तु पितृपितामहप्रपितामहानामिदमासनमिति दर्भासनं दद्यात् । तथा **चंद्रिकायाम्**—

"अक्षय्यासनयोः षष्ठी द्वितीयावाहने स्मृता । अन्नदाने चतुर्थी स्याच्छेषाः संबुद्धयः स्मृताः" ॥ इति।

आसनदानानन्तरकृत्यम् । अनंतरकृत्यमाह **यमः**—

" यवहस्तस्ततो देवान् विज्ञाप्यावाहनं प्रति । आवाहयेदनुज्ञातो विश्वेदेवा स इत्यृचा " ॥
"विश्वेदेवासः शृणुतेति मंत्रं जपित्वा ततोऽक्षतान्॥ ओषधय इति मंत्रेण विकिरेत्तु प्रदक्षिणम्"॥ इति ।

अस्यार्थः **चंद्रिकायामुक्तः**—"श्राद्धकर्ता गृहीतयवः पुरूरवार्द्रवसंज्ञकान् विश्वान् देवानावाहयामीति विज्ञाप्य तैरावाहयेत्यनुज्ञातो विश्वे देवास आगतेत्यनया ऋचा विश्वान् देवान्ब्राह्मणेष्वावाह्य यवान्ब्राह्मणस्य दक्षिणपादे सव्यपादे च दक्षिणजानुनि सव्यजानुनि च दक्षिणांसे वामांसे च शिरसि च समारोप्य विश्वेदेवाः शृणुतेतेमं हवं म इति मंत्रं जपित्वा प्रदक्षिणं दक्षिणपादादि मस्तकांतमोषधयः प्रतिमोदध्वमिति मंत्रेणाक्षतानारोपयेत् " ॥ इति । तथा च **हेमाद्रौ**—

" देवार्चा दक्षिणादिः स्यात्पादजान्वंसमूर्धसु । शिरोंसजानुपादेषु वामांगादिषु पैतृके " ॥ इति ।

स्मृत्यंतरेऽपि—

" देवेभ्यो निखिलं दद्यात्पादजान्वंसमूर्धसु । शिरोंसजानुपादेषु वामांगादिषु पैतृके ॥
" पितृभ्यो निखिलं दद्यात्स्वधाकारेण सर्वदा । अक्षय्यमासनं चैव वर्जयित्वाऽर्घ्यमेव च" ॥ इति।

कात्यायनस्तु—" विश्वान् देवानावाहयिष्यामीति पृच्छत्यावाहयेत्यनुजानाति " ॥ इति। अत्र क्रतुदक्षसत्यादीनां च दक्षप्रजापतेर्दुहितरि विश्वाख्यायां लोकविश्रुतायामुत्पत्तिः समभूदिति उत्पत्तिमपि ज्ञात्वाऽवाहनं कर्तव्यम्। उत्पत्तिश्च तेषां पुराणेऽभिहिता—

"दक्षस्य दुहिता साध्वी विश्वा नाम परिश्रुता। तस्याः पुत्रा महाभागाः विश्वेदेवाः प्रकीर्तिताः" ॥ इति उक्त्वोत्पत्तिरावाहनसमये ज्ञातव्या। अत एव क्रतुदक्षादिसंज्ञां[1] दक्षदुहितर्युत्पत्तिचयेन विदुरावाहानकर्त्तारः। तेषामनुकल्पमाह **शंखः**—

" नाम चैव तथोत्पत्तिं न विदुर्ये द्विजातयः। श्लोकमेतं पठेयुस्ते ब्राह्मणानां समीपगाः ॥
" आगच्छंतु महाभागा विश्वेदेवा महाबलाः। ये अत्र विहिताः श्राद्धे सावधाना भवंतु ते " ॥ इति।

' विश्वेदेवाः शृणुतेमं हवं मे ' इति मंत्रजपानंतरमेतं श्लोकं जपेयुरित्यर्थः। तथा च **बोधायनेन** ' विश्वेदेवाः शृणुत आगच्छंतु ' इति मंत्रद्वयं विश्वेदेवावाहने विहितम्। आपस्तंबिनामपि बोधायनोक्तमेव ग्राह्यम्। " बोधायनमतं कृत्वा स्वसूत्रफलभाग्भवेत् " इति **स्मरणात्**। यात्विदं वचनम्

" ततो मंत्रं जपेन्मौनी विश्वेदेवास आगत। विश्वेदेवाः शृणुतेति द्वितीयं तदनंतरम् ॥
" तृतीयं तु जपेन्मंत्रं आगच्छंत्वित्यतः परम् "॥ इति तदाश्वलायनादिविषयम्। यद्यपि न क्वापि दश विश्वेदेवा देवतात्वेनोक्ताः किंतु द्वौ द्वावेकस्मिन्श्राद्धे देवतात्वेनोक्तौ तथाप्यावाहनादौ पुरूरवार्द्रवसंज्ञकान्विश्वेदेवानावाहयामीत्येवं बहुवचनांततयैव प्रयोगः कार्यः। " विश्वान्देवानावाहयिष्यामीति पृच्छति। निरंगुष्ठं गृहीत्वा तु विश्वान्देवान्समाव्हयेत् " इति बहुवचनांततयैव प्रयोगदर्शनात्। एवं पित्रादिषु पितरः पितामहाः प्रपितामहा इति सर्वोपचारेषु बहुवचनांतप्रयोगो युज्यते। **चंद्रिकायाम्**—वैश्वदेविकब्राह्मणानेकत्वेऽपि न प्रतिब्राह्मणमावाहनावृत्तिः। सकृदावाहनेनैवानेकाधिष्ठानदेवताध्याससंभवात्। यद्यद्देवताराधनार्थं यवारोपणादि तत्प्रतिब्राह्मणमावर्त्तनीयं संनिपत्योपकारकेष्वावृत्तिं विना ब्राह्मणांतरे कार्यासिद्धेः। 'विश्वेदेवाः शृणुते'ति मंत्रजपस्तु नावर्त्तते सकृज्जपेनैव जपसाध्यादृष्टसिद्धेरिति।

पैतृकावाहनमाह **आश्वलायनः**—"पितॄनावाहयिष्येति ब्राह्मणान्पृष्ट्वावाहयेति तैरनुज्ञात उशंतस्त्वेति मंत्रेणावाह्य नमो वः पितर इति मंत्रेणोपतिष्ठते " इति

प्रचेताश्च—" शिरःप्रभृति पादांतं नमो व इति पैतृकम्" इति। **याज्ञवल्क्यः** (आ. २३३)—
"द्विगुणांस्तु कुशान् दत्वा ह्युशंतस्त्वेत्यृचा पितॄन्। आवाह्य तदनुज्ञातो जपेदायंतु नस्ततः" ॥ इति।

पुराणे—

" जपेदायंतु न इति मंत्रं सम्यगशेषतः। शुद्ध्यर्थं पितृसत्रस्य त्रिः कृत्वा सर्वतो दिशम् " ॥
" तिलांस्तु प्रक्षिपेन्मंत्रमुच्चार्यापहता इति "। बोधायनादिभिरायात पितर इति पित्रावाहनं ऊर्जं वहंतीरिति तिलोदकप्रक्षेपणं च विहितम्।

अर्घ्यपरिकल्पनम्। अनंतरकृत्यमाह **याज्ञवल्क्यः** (आ. २३०)—

"यवैरन्ववकीर्याथ[2] भाजने सपवित्रके। शन्नो देव्या पयः क्षिप्त्वा यवोसीति यवांस्तथा" ॥ इति।

मत्स्यपुराणे—

" विश्वान् देवान्यवैः पुष्पैरभ्यर्च्यासनपूर्वकम्। पूरयेत्पात्रयुग्मं तु स्थाप्यं दर्भपवित्रके " ॥ इति।

---

१ क्ष–ज्ञानां। २ करव–सयवैरन्वकीर्या।

प्रचेताः—

" एकैकस्य तु विप्रस्य अर्घ्यपात्रं विनिक्षेपेत्। यवोऽसीति यवान्नीत्वा गंधपुष्पैः सुपूजितम्"॥ इति। अर्घ्यपात्रं प्रतिपात्रं भेदेन कार्यम्। तदुक्तं **चतुर्विंशतिमते**—

" द्वे द्वे शलाके देवानां पात्रे कृत्वा पयः क्षिपेत् " इति। प्रतिदैवं पात्रं साग्रौ द्वौ द्वौ दर्भौ निधाय जलं निक्षिपेदित्यर्थः। **कात्यायनीये तु**—"विश्वेषां देवानामेकमर्घ्यपात्रं पितॄणां त्रीणि" इति।

पवित्रकरणप्रकारमाह योगयाज्ञवल्क्यः—

" पवित्रे स्थ इति मंत्रेण द्वे पवित्रे च कारयेत्। अंतर्दर्भे कुशच्छिन्ने कौशे प्रादेशसंमिते"॥ इति। कुशच्छिन्ने कुशमंतर्धाय छिन्ने। कौशे कुशमय इत्यर्थः। तथा च **यज्ञपार्श्वः**—

" ओषधीमंतरे कृत्वा अंगुष्ठांगुलिपर्वणोः। छिंद्यात्प्रादेशमात्रं तु पवित्रं विष्णुदैवतम्॥

" न नखेन न काष्ठेन न लोहेन न मृन्मयात्। नखेन तु भवेद्व्याधिः काष्ठेनार्थो न सिध्यति॥

" आयसेन भवेन्मृत्युर्मृन्मये कलहो ध्रुवम् "॥ इति। अनंतरं 'स्वाहार्घ्या' इति मंत्रेण दैवतार्थब्राह्मणसमीपे अर्घ्यपात्रं स्थापयेत्। तथा च **गार्ग्यः**—" स्वाहेति चैव देवानां होमकर्मण्युदाहरेत् "॥ इति **चंद्रिकामाधवीययो**रिदं व्याख्यातम्—" देवानां होमकर्माणि अर्घ्यदानकर्मण्युपस्थिते अर्घ्यपात्रं स्थापयितुं स्वाहार्घ्या इति मंत्रमुच्चारयेदिति प्रकरणादवगम्यते " इति। पैतृकार्यविधिमाह **विष्णुः**—" दक्षिणापवर्गेषु चमसेषु पवित्रांतर्हितेषु अप आसिंचति शन्नोदेवीरिति "। **प्रचेता अपि**—" यज्ञीयवृक्षचमसेषु पवित्रान्तर्हितेषु एकैकस्मिन्नप आसिंचेत् " इति। **शौनकोऽपि**—" तैजसाश्ममयमृन्मयेषु पात्रेषु एकद्रव्येषु अनेकद्रव्येषु वा दर्भान्तर्हितेषु शंनोदेवीरितिमंत्रेणापो निनीय तासु तिलानावपति 'तिलोसि सोमदैवत्य' इति। अत्र पात्रेष्विति बहुवचनं त्रिष्वेवावतिष्ठते 'त्रीण्येवोदपात्राणि' इति **प्रचेताः** स्मरणात्। तथा च **बैजावापः**—

" कीर्त्वा[1] पितॄणां त्रीण्येव कुर्यात्पात्राणि धर्मवित्। एकस्मिन्वा बहुषु वा ब्राह्मणेषु यथाविधि"॥ इति। पित्रादीनां त्रयाणामेकैकस्यानेकब्राह्मणनिमंत्रणे सर्वेषामेकब्राह्मणनिमंत्रणेऽपि त्रीण्येवार्घ्यपात्राणि तिलान् कीर्त्वा प्रक्षिप्य कुर्यान्न तु ब्राह्मणसंख्ययेत्यर्थः।

" मृत्पात्रेणार्घ्यतोयं च मृद्गन्धेनानुलेपनम्। घृतधूपं तु यद्दत्तं निराशाः पितरो गताः "॥ इति। **स्मृत्यंतरम्**। **स्मृत्यर्थसारे**—

" द्रव्याभावे द्विजाभावे यद्येको ब्राह्मणो भवेत्। पात्राणि सादयेत्त्रीणि न तु ब्राह्मणसंख्यया"॥ इति। अत्र विशेषमाह **बोधायनः**—" त्रीणि पितॄणामेकमथवा " इति। अर्घ्यपात्राणि विवृतानि न कुर्यात्। न पुनः पूरयेत्। तानि नोद्धरेत्। दर्व्या आदाय अर्घ्यं दद्यात्। तथा च **शौनकः**—

" यदा चैवोद्धृतं पात्रं निवृतं वा यदा भवेत्। अभोज्यं तद्भवेच्छ्राद्धं क्रुद्धैः पितृगणैर्गतैः॥

" नोद्धरेत्प्रथमं पात्रं पितॄणामर्घ्यपूरितम्। अवृतास्तत्र गच्छंति पितरः शौनकोऽब्रवीत्॥

" आपोशनं करे कृत्वा पात्रे कृत्वा तिलोदकम्। पूरणं तु पुनः कृत्वा सुरापानसमं भवेत्" ॥ इति। **पितृमेधसारे**—"कृत्स्नस्कंदने प्रणीतावन्मंत्रवत्पुनरर्घ्यं गृण्हीयात्" इति। एकदेशस्कंदने न दोष इत्यर्थः। पैतृकार्घ्यपवित्रे विशेषोऽभिहितश्चतुर्विंशतिमते—"तिस्रस्तिस्रः[2] शलाकास्तु पितृपात्रेषु

१ क्ष–क्रीत्वा। २ ग–आ।

पार्वणे"॥ इति । शलाकाः अभिन्नाग्रा दर्भा इति यावत् । अर्घ्यपात्रेषु तिलप्रक्षेपणानंतरं कर्त्तव्यमुक्तं **ब्रह्मपुराणे**—"अर्घ्याः पुष्पैश्च गंधैश्च ताः प्रपूज्याश्च शास्त्रवत्" इति । तिलमिश्रा या अर्घ्या आपस्तासु गंधपुष्पाणि प्रक्षिपेदित्यर्थः। अनंतरं कर्तव्यमाह **शौनकः**—"ताः प्रतिग्राहयिष्यन्स्वधार्घ्या" इति। ता आपो ब्राह्मणैः प्रतिग्राहयिष्यन्स्वधार्घ्यमंत्रेण स्थापयेदित्यर्थः । **कात्यायनः**—

" पैतृकं प्रथमं पात्रं ततः पैतामहं न्यसेत् । प्रपैतामहं ततोऽन्यस्य नोद्धरेन्न च चालयेत्"॥ इति । **अर्घ्यदानम्** । अर्घ्यपात्रं स्थापयित्वा विप्रहस्तेऽर्घ्यं दद्यात् । तदाह **गार्ग्यः**—" दत्वा हस्ते पवित्रं तु हस्तेष्वर्घ्यं विनिक्षिपेत्" इति । **याज्ञवल्क्योऽपि** (आ. २३१)—

"'या दिव्या' इति मंत्रेण हस्तेष्वर्घ्यं विनिक्षिपेत्" इति।'या दिव्या आपः पयसा संबभूवुः' इति मंत्रांते 'पुरूरवार्द्रवसंज्ञका विश्वेदेवा इदं वोऽर्घ्यम्' इत्युक्त्वा वैश्वदेविकब्राह्मणस्यैकैकस्य दक्षिणहस्ते पवित्रेणांतर्हिते एकैकपात्रस्थमुदकं दद्यादित्यर्थः । पैतृकार्घ्यदानमाह **कात्यायनः**—" सपवित्रेषु हस्तेषु 'या दिव्या' इति पितरेतत्तेऽर्घ्यं पितामहैतत्ते अर्घ्यं प्रपितामहैतत्ते अर्घ्यमिति ब्राह्मणांजलिषु पात्राणि निनीय पितृभ्योऽक्षयमस्त्विति शेषं दर्भेष्ववनेजयति" इति । पात्राणि पात्रस्थोदकानीत्यर्थः । **पैठीनसिः**—"ततो ब्राह्मणहस्तेषूदकपूर्वं दर्भान्प्रादायोदकपूर्वमर्घ्योदकं ददाति" ॥ इति । या दिव्या इत्युक्त्वाऽसावेतत्ते अर्घ्योदकमिति अपसव्यैवमेवेतरयोरिति । अत्र विशेषमाह **यमः**—

"या दिव्या आप इति पात्रं पाणिभ्यामुद्धृत्य नामगोत्रं च गृहीत्वा सपवित्रमर्घ्यं हस्ते दद्यात्"॥ इति। पात्रं पात्रस्थं जलमिति यावत्

" स्पृष्टमुद्धृतमन्यत्र नीतमुद्धाटितं तथा । पात्रं दृष्ट्वा व्रजंत्याशु पितरः प्रशपंति च " ॥ इति **कात्यायनस्मरणात्** । **प्रचेता अपि**—

" अप्रदक्षिणमेतेषामेकैकं तु पितृक्रमात् । संबोध्य नाम गोत्राभ्यामेष तेऽर्घ्यं इतीरयेत् " ॥ इति । ब्राह्मणहस्ते प्रथममपो निनीयार्घ्यं पवित्रं दक्षिणाग्रतया क्षिप्त्वा या दिव्या इति मंत्रांते अमुकगोत्र अमुक शर्मन्वसुरूप अस्मत्पितुः इदं ते अर्घ्यं रुद्ररूपास्मत्पितामह आदित्यरूपास्मत्प्रपितामह इदं ते अर्घ्यमिति दक्षिणहस्ते पितृतीर्थेनार्घ्यं दत्वा अप उपस्पृशेदित्यर्थः । श्लोक**गौतमः**— " पूर्ववत्पृथगेकैकमेकैकेनार्घ्ययेत्क्रमात् " इति ।

अनंतरं कर्त्तव्यमाह **याज्ञवल्क्यः** (आ. २३५)—

"दत्वार्घ्यं संस्रवांस्तेषां पात्रे कृत्वा विधानतः । पितृभ्यस्थानमसीति न्युब्जं पात्रं करोत्यधः" ॥ इति। एवमर्घ्यं दत्वा तेषामर्घ्याणां संस्रवान्ब्राह्मणहस्तगलितार्घ्योदकानि पितृपात्रे संगृह्य पितृभ्यः स्थानमसीत्यनेन मंत्रेण तत्पात्रं न्युब्जमधोमुखं कुर्यादित्यर्थः । तथा च **प्रचेताः**—

" प्रथमे पितृपात्रे तु सर्वान्संभृत्य संस्रवान् । पितृभ्यः स्थानमसीति[1] कुर्याद्भूमावधोमुखम्" ॥ इति । **गोभिलस्तु**— " न्युब्जं कुर्यात्पवित्रवत्[3] " इति अर्घ्यपवित्राण्यादाय पितृपात्रे निधाय तैः सह भूमौ न्युब्जं कुर्यादित्यर्थः । **कात्यायनः**—" कुशवत्यां भूमावधोमुखं कुर्यात्तस्योपरि च कुशम् " इति । निदध्यादिति शेषः । कुशग्रहणं गंधादेरपि प्रदर्शनार्थम् । न्युब्जं पात्रं प्रकृत्य 'गंधमाल्यैः पात्रमभ्यर्च्य' इति **शौनकस्मृतेः** । न्युब्जीकरणस्य कालांतरमाहात्रिः—

"अपसव्यं ततः कृत्वा पिंडपार्श्वे समाहितः । क्षिप्त्वा दर्भपवित्राणि मोचयेत्संस्रवांस्ततः "॥ इति।

---

१ ग-थ । २ क्ष-न्युक्त्वा । ३ क्ष-पितृवत् ।

एवं च पिंडपार्श्वे सपवित्रसंस्रावमोचनविधानान्न्युब्जकरणमपि पिंडप्रदानानंतरमिति **गम्यते**। शिष्टाचारानुगुणो विकल्पोऽत्र द्रष्टव्यः।

गन्धादिदानम्। न्युब्जीकरणानंतरं कर्त्तव्यमाह **बैजावापः**—

"तस्योपरि कुशान्दत्वा प्रदद्याद्देवपूर्वकम्। गंधपुष्पाणि धूपं च दीपं वस्त्रोपवीतके"॥ इति। तस्य न्युब्जीकृतस्योपरि कुशगंधपुष्पाणि दत्वा वैश्वदेविकब्राह्मणपूर्वकं गंधादि दद्यादित्यर्थः। अनेनैतदुक्तं भवति—वैश्वदेविकासनदानानंतरं पैतृकासनदानं वैश्वदेविकावाहनानंतरं पैतृकावाहनमित्येवं पदार्थानुसमयेनैवासनावाहनार्घ्यगंधपुष्पधूपदीपाच्छादनादयः पदार्था वैश्वदेविकाः पैतृका अनुष्ठेयाः। न तु वैश्वदेविकासनाद्याच्छादनांतपदार्थकांडादूर्ध्वं पैतृकासनादिपदार्थाः इति पदार्थानुसमयेनानुष्ठानं कार्यम्। एवं हि तेषां प्रधानप्रत्यासत्तिर्भवति। न वैषम्यं च। अन्यथा केषांचित्प्रधानभूतपैतृकपदार्थप्रत्यासत्तिः केषांचिन्नेति वैषम्यमापद्येत। **अत्र केचिदाहुः**—"अपसव्यं ततः कृत्वा पितॄणामप्रदक्षिणम्" इति **याज्ञवल्क्येन** वैश्वदेविकपदार्थकांडादूर्ध्वं पैतृकार्चनविधानात्कांडानुसमयो युक्त इति। यथाशिष्टाचारमिह व्यवस्था।

विष्णुनापि गंधादिदानमुक्तम्। "अनुलेपनवस्त्रालंकरणपुष्पधूपदीपादि पित्र्यर्थब्राह्मणहस्ते अपो निनीय"॥ इति। विलेपनं विप्राः स्वयं कुर्युः श्राद्धकर्ता वा। तत्र **व्यासः**—

"दत्वा विप्रकरे गंधान्गंधद्वारेति पूजयेत्" इति। **शातातपः**—

"पवित्रं तु करे कृत्वा यः समालभते द्विजान्। राक्षसानां भवेच्छ्राद्धं निराशाः पितरो गताः"॥ इति। समालंभनं गंधैर्विलेपनम्। **देवलः**—

"यज्ञोपवीतं विप्राणां स्कंधान्नैवावतारयेत्। गंधादिपूजासिध्यर्थं दैवे पित्र्ये च कर्मणि"॥ इति। **शंखः**—

"उपवीतं कटौ कृत्वा यः कुर्याद्गात्रलेपनम्। एकवासाश्च योऽश्नीयान्निराशाः पितरो गताः"॥ इति। **क्रतुः**—

"ललाटे वर्तुलं दृष्ट्वा स्कंधे मालां तथैव च। निराशाः पितरो यांति दृष्ट्वा च वृषलीपतिम्"॥ इति। एवं च

"वर्जयेत्तिलकं फाले श्राद्धकर्मणि सर्वदा। तिर्यग्वाऽप्यूर्ध्वपुंड्रं वा धारयेच्छ्राद्धकर्मणि"॥ इति वर्तुलाकारपुंड्रस्य निषेधात् "चंदनं तु यथारुचि" इति **स्मरणादूर्ध्वपुंड्रं** त्रिपुंड्रं वा यथारुचि कर्त्तव्यम्। मृद्भस्मादिधारणनिषेधस्तु पुंड्रनिरूपणावसरे प्रतिपादितः। स्कंधे मालाधारणे दोषस्मरणाच्छिरस्येव विप्रेण माला धार्या। तत्रापि शिखायामेव धार्या "न नियुक्तः शिखावर्जं माल्यं शिरसि वेष्टयेत्" इति **वृद्धमनुस्मरणात्**। पुष्पदाने मंत्रमाह **विष्णुः** (६५।९)

"पुष्पावतीरिति पुष्पं दद्यात्"॥ इति।

"ओषधयः प्रतिमोदध्वमेनं पुष्पावतीः सुपिप्पलाः। अयं वो गर्भ ऋत्वियः प्रत्नः सधस्थमासदत्"॥ इति **मंत्रस्य** मध्यप्रतीकोपादानमेतत्। धूपदाने मंत्रमाह **व्यासः**—

"धूपार्थे धूरसीत्युक्त्वा दद्यात् सघृतगुग्गुलम्"॥ इति। हस्तवातप्रापितो धूपो न विप्रेण सेव्यः। तथा च **शातातपः**—

"हस्तवाताहतं धूपं ये पिबंति द्विजोत्तमाः। वृथा भवति तच्छ्राद्धं तस्मात्तं परिवर्जयेत्"॥ इति।

स्मृत्यंतरे—
" पाददेशे तु यद्दीपं धूपं च मुखदेशतः। यो ददाति च मूढात्मा सोंऽधे तमसि मज्जति "॥
हेमाद्रिः—
" प्रतिपात्रं द्विजे दीपाः स्थापनीयाः प्रयत्नतः। पितृयानेषु मार्गेषु सदा लोकः प्रजायते"॥ इति।
व्यासोऽपि—

" स्थाप्याः प्रतिद्विजं दीपाः श्वेतसूत्रजवर्त्तयः। गव्येण माहिषेणापि घृतेन कृततेजनाः॥
" अथवा तिलतैलेन पूरिता विमलार्चिनः। पितृनुदिश्य दातव्याः प्रत्येकं च यथाविधि॥
" तेन लोकेनं पितरो दीप्यंते दिवि सर्वतः।
" श्राद्धभोजनकाले तु दीपो यदि विनश्यति। पुनरन्नं न भोक्तव्यं भुक्त्वा चांद्रायणं चरेत्॥
" कर्त्तुरायुष्यहानिः स्यात्पुनः श्राद्धं समाचरेत् "॥ इति। **विष्णुधर्मोत्तरे—**

"यथा विहंति ध्वांतानि दीपः प्रज्वलितोऽभितः। तथैव सर्वपापानि श्राद्धदत्तो निहंति सः"॥ इति। **संग्रहे**—"आसनेष्वासनं ब्रूयादर्घ्येष्वर्घ्यं द्विजो वदेत्। सुगंधश्च सुपुष्पाणि सुमाल्यानि सुधूपकः"॥ " सुज्योतिश्च सुदीपश्च स्वाध्यापनमिति क्रमात् "॥ इति। इदं व आसनमिदं वोऽर्घ्यमित्येवमासनादिषु कर्त्रा दत्तेषु स्वासनमित्यादि निमंत्रितो ब्रूयादित्यर्थः। **स्मृत्यंतरे—**
" अर्चयेद् ब्राह्मणान्पूर्वं प्रतिसंवत्सरादिके। भूमिशुद्धिं ततः कुर्यात्पश्चात्पात्रं तु निक्षिपेत्॥
" पूर्वं पात्रं तु निक्षिप्य पश्चादभ्यर्चने कृते। यदन्नं पात्रनिक्षिप्तं सुरामांससमं हि तत् "॥ इति। गंधादिभिर्ब्राह्मणानभ्यर्च्याग्नौकरणं कृत्वा भूशुद्धिं कृत्वा पश्चाद्भोजनपात्रं निक्षिपेदित्यर्थः। अपेतवीतेति मंत्रेण भूमिशुद्धिमाचरंति शिष्टाः। अन्ये तु अपेतवीतेति मंत्रेण भूशुद्धेर्बोधायनादिभिरत्रानुक्तत्वात् ' अपहता असुरा रक्षांसि ' इति तिलप्रक्षेप एव भूशुद्धिरित्याहुः।

अग्नौकरणम्—गंधपुष्पादिभिर्ब्राह्मणानभ्यर्च्याग्नौकरणाख्यं कर्म कुर्यात्। तदाह **कात्यायनः—**
" गंधान् ब्राह्मणसात्कृत्वा पुष्पाण्यृतुभवानि च। धूपं चैवानुपूर्व्येण अग्नौ कुर्यादतः परम् "॥ इति। ऋतुभवानि स्वोद्भवकालत्वेन प्रसिद्धवसंतादिकालभवानि पुष्पाणि चशब्देन दीपादिकं गृह्यते। **हारीतः**— " अथोद्धृत्यान्नं पंक्तिमूर्धन्यं सर्वान्वा पृच्छत्याग्नौकरिष्ये " इति। **पारस्करः—**
" दत्वा गंधादिधूपांश्च सर्पिष्मद्धविरुद्धरेत्। पैतृकैरभ्यनुज्ञातो जुहोति पितृयज्ञवत् "॥ इति। पैतृकैर्ब्राह्मणैरिति शेषः। तथा च **मनुः**—(३।२१०)
" तेषामुदकमानीय सपवित्रं तिलोदकम्। अग्नौ कुर्यादनुज्ञातो ब्राह्मणो ब्राह्मणैः सह "॥ इति। सहपैतृकैर्ब्राह्मणैः सर्वैर्युगपदनुज्ञात इत्यर्थः। **आश्वलायनः** (४।७।२-५)—"उद्धृत्य घृताक्तमन्नं पृच्छत्यग्नौ करिष्ये करवै करवाणीति वा। प्रत्यनुज्ञा क्रियतां कुरुष्व कुर्विति। अथाग्नौ जुहोति यथोक्तं पुरस्तात्"॥ इति। **कात्यायनः**—"उद्धृत्य घृताक्तमन्नं पृच्छत्यग्नौ करिष्य इति कुरुष्वेत्यनुज्ञातः पिंडपितृयज्ञवद्धुत्वा" इति। **प्रचेताः**—"ओं कुरुष्वेत्यनुज्ञातो हुताग्नौ पितृयज्ञवत्" इति। 'उध्द्रियतामग्नौ च क्रियताम्' इत्यामंत्रयते। ' काममुध्द्रियतांकामग्नौ च क्रियताम् ' इत्यतिसृष्ट उद्धरेज्जुहुयाच्चेत्येवं **बोधायनोऽपि**। **याज्ञवल्क्यः** (आ. २३६–३७)—
" अग्नौकरिष्यन्नादाय पृच्छेदन्नं घृतप्लुतम्। कुरुष्वेत्यभ्यनुज्ञातो हुत्वाग्नौ पितृयज्ञवत्॥
" हुतशेषं प्रदद्यात्तु भोजनेषु समाहितः। यथालाभोपपन्नेषु रौप्येषु तु विशेषतः "॥ इति।

अत्र **विज्ञानेश्वरः**—(पृ. ६८)

" अग्नौ करिष्यन्घृताप्लुतमन्नमादायाग्नौकरिष्य " इति ब्राह्मणान्पृच्छेत् । घृतग्रहणं सूपशाकादिनिवृत्त्यर्थम् । ततस्तैः कुरुष्वेत्यनुज्ञातः समिधमुपसमाधाय मेक्षणेनादायावदानसंपदा 'सोमाय पितृमते स्वधा नमोऽग्नये कव्यवाहनाय स्वधा नम ' इति पिंडपितृयज्ञकल्पेनाग्नौ जुहुयात्ततो मेक्षणमग्नौ प्रहृत्य हुतशेषं मृन्मयवर्जं यथालाभोपपन्नेषु विशेषतो रौप्येषु पित्रादिभाजनेषु दद्यात् । न वैश्वदेवभाजनेष्वित्यर्थः" इति । **हारीतः**—"कुरुष्वेत्यनुज्ञातः पूर्वोद्धृतेग्नौ सकृदाच्छिन्नैरुपमूललूनैः परिस्तीर्णे समित्तन्त्रेण प्राङ्मुखो मेक्षणेनाहुतिद्वयं हुत्वा मेक्षणमग्नावेव कुर्यात् " इति । पूर्वोद्धृते परिस्तरणात्पूर्वमेवोद्दीपिते समित्तंत्रेण आहुतिद्वयार्थमेकामेव समिधमाधायेत्यर्थः ।

बैजावापः—

" आज्यमासिच्योद्वास्य यज्ञोपवीती द्वे आहुती जुहोत्यग्नय इति पूर्वां सोमायेत्युत्तराम् " ॥ इति । **आश्वलायनः**—प्राचीनावीतीध्ममुपसमाधाय मेक्षणेनावदायावदानसंपदा जुहुयात् । सोमाय पितृपते स्वधा नमोऽग्नये कव्यवाहनाय स्वधा नम" इति । अत्र पितृयज्ञधर्मकाग्नौकरणे प्राचीनावीत्वोपवीतितित्वयोर्यथास्वसूत्रं व्यवस्था द्रष्टव्या । अत्राहुतित्रयमाह **मनुः**—(३।२११)

"अग्निसोमयमानां च कृत्वा चाप्यायनं द्विजः । हविर्दानेन विधिवत्पश्चात्संतर्पयेत् पितॄन् " ॥ इति । आप्यायनहोममिति यावत् । **स्मृत्यंतरेऽपि**—" अन्नं निधाय समिधं जुहुयाज्जातवेदसि ।

" अग्नये कव्यवाहनाय स्वधा नम इति ब्रुवन् । सोमाय पितृमते स्वधा नम इति ब्रुवन् ।

" इत्येते होममंत्रास्तु त्रयाणामनुपूर्वशः । जुहुयाद्व्यंजनक्षारवर्जमन्नं ततो द्विजः ॥

" अनुज्ञातो द्विजैस्तैस्तु त्रिः कृत्वो भरतर्षभ" ॥ इति । अत्र व्यवस्थामाह **कात्यायनः**—

"स्वाहा स्वधा नमः सव्यमपसव्यं तथैव च । आहुतीनां च या संख्या सावगम्या स्वसूत्रतः"॥ इति ।

पराशरोऽपि—

"अग्नौकरिष्य इत्युक्त्वा तैरुक्तः क्रियतामिति । गृह्योक्तेनैव विधिना हुत्वा पात्रे प्रदापयेत्" ॥ इति । हुत्वा हुतशेषं पितृब्राह्मणभोजनपात्रेषु दद्यान्न वैश्वदेविकब्राह्मणपात्रेष्वित्यर्थः । तथा **च पुराणे**—

" हुतावशिष्टमल्पाल्पं विप्रपात्रेषु निक्षिपेत् । अग्नौकरणशेषं तु न दद्याद्वैश्वदेविके " ॥ इति । गृह्योक्तेनैव विधिनेत्युक्तत्वादापस्तंबेन पार्वणप्रकृतिभूते मासिश्राद्धे यन्मे मातेत्यादिमंत्राणामाम्नातत्वादन्नस्योत्तराभिर्जुहोत्याज्याहुतीरुत्तरा इति चोदितत्वाच्चापस्तंबसूत्रिणामन्यसूत्रिणामिव पितृयज्ञधर्मकाग्नौकरणहोमो न युक्तः । तथा च **संग्रहकारः**—

" अग्नीन्धनादि प्रतिपद्य कर्म कृत्वाज्यभागांतमथावदाय यन्मेति मंत्रैः प्रतिमंत्रमग्नौ कार्यस्तथा सप्तभिरेव होमः । स्वाहादिमंत्रैरपि सर्पिषा स्युर्होमास्ततः स्विष्टकृतं तु हुत्वा । भस्मव्यपोह्योत्तरतोऽन्नहोमो लेपे तु दर्भस्य संमार्जनादि शेषं च हुत्वा परिषेचनांतं पात्रेषु दद्याद्धुतशेषमन्नमिति । सप्तभिरन्नहोम इत्येकवर्गोद्देशपार्वणाभिप्रायेणोक्तम् । दर्शमहालयादौ तु ऊहितमंत्रसाहित्यात्त्रयोदशसंख्यासंपत्तेः । तत्र च यन्मे मातामही प्रलुलोभ तन्मे रेतो मातामहो वृंक्ताम् । अंतरन्यं मातामहाद्ध्ये । यन्मे मातुः पितामही इत्येवमूहः कार्यः । आमुष्मान् इत्यत्र मातामहादेश्चतुर्थ्यंततया नामग्रहणं कर्त्तव्यम् । मातामहमातामह्योर्मृताहश्राद्धे चोहेन होमः कर्त्तव्यः ।

---

१ करवक्ष-दौहित्र ।

तथा च **संग्रहकारः**—

" योज्यः पित्रादिशब्दानां स्थाने मातामहादिकः । अन्नाहुतौ तथा स्पर्शे जलपिंडादिदानके "॥

" यन्मे मातामहीत्यादि तत्रोदाहरणं भवेत् " ॥ इति । स्पर्शे एष ते तमधुमाऽऊर्मिरित्यादिभिरन्नस्पर्शे मार्जयतामितिजलदाने एतत्ते ततेति पिंडदाने च पित्रादिशब्दस्थाने मातामहादिशब्द ऊह्य इत्यर्थः । पितृसपिंडीकरणे जीवपितृकर्तृकश्राद्धे च यन्मे पितामही प्रलुलोभ पितामहो वृंक्ताम् । यन्मे पितुः पितामही पितुः प्रपितामहीत्येवमूहः । तस्माद्यच्चं नोहेदित्यूहप्रतिषेधः प्रकृतिभूतमासिश्राद्धविषयः । ' न प्रकृतावूहो विद्यते ' इति प्रकृतावूहनिषेधात् मासिश्राद्धव्यतिरिक्तेषु द्विपितृकेणोहः कार्य इत्येके । एतदग्नौकरणं च प्राचीना वीतिना कार्यं पैतृकत्वात् । तथा **आपस्तंबः**-"अपरपक्षे पित्र्याणि प्राचीनावीतिना प्रसव्यं दक्षिणतोऽपवर्गः" ॥ इति । **स्मृत्यंतरे**—

"अकृत्वा पार्वणं होमं श्राद्धं कुर्यात् द्विजोत्तमः । तच्छ्राद्धमासुरं ज्ञेयं कर्ता च नरकं व्रजेत्"॥ इति ।

अथ **परिवेषणादिविधिः** ।

" तत्र तावदमत्राणि देयानि सति संभवे । भोजने हैमरूप्याणि दैवे पित्र्ये यथाक्रमम् "॥ इति । प्रतिपादितानि श्रेष्ठानि संपाद्यानि । तेषामलाभे तैजसानीति उपकल्पनिरूपणे प्रतिपादितम् । तानि पात्राणि द्भिः प्रक्षालयेत् । तथा च **ब्रह्मांडपुराणे**—

"प्रक्षाल्य हस्तपात्रादि पश्चाद्द्भिर्विधानवित् । प्रक्षालनजलं दर्भास्तिलैर्मिश्रं क्षिपेच्छुचौ " ॥ इति । हस्तनिर्मृष्टपात्रादीति मध्यमपदलोपि समासः । प्रथममपो निनीय हस्तेन निर्मृज्ज्यानंतरं जलेनैव प्रक्षालयेदित्यर्थः । आदिशब्देन घृतादिधारणार्थानि गृह्यंते । एवं प्रक्षालितेषु पात्रेषु चतुरश्रमंडलस्थापितेषु हुतशेषं किंचित्प्राचीनावीतिना पितृपात्रेषु निधाय संपादितान्पदार्थान्परिवेषयेत् । तथा च **शौनकः**—

" हुत्वाग्नौ परिशिष्टं तु पितृपात्रेष्वनंतरम् । निवेद्यैवापसव्येन परिवेषणमाचरेत् " ॥ इति । अपसव्येनेति हुतशेषनिवेशनेनान्वेति न परिवेषणेन । तथा च **कार्ष्णाजिनिः**—

"अपसव्येन कर्त्तव्यं पित्र्यं कर्म विशेषतः । अन्नदानादृते सर्वमेवं मातामहेष्वपि" ॥ इति । अन्नदानं परिवेषणमित्यर्थः । **स्मृत्यंतरे**—

" अपसव्येन यस्त्वन्नं ब्राह्मणेभ्यः प्रयच्छति । विष्ठामश्नंति पितरो दाता च नरकं व्रजेत् "॥ इति । होमाद्यशेषेण नोपस्तरणाभिधारणे कुर्यात्

" अग्नौकरणशेषेण यदन्नमभिघारितम् । निरंगुष्ठं च यद्दत्तं न तत्प्रीणाति वै पितॄन्"॥ इति । **स्मरणात्** । परिवेषणप्रकारो **मनुना** (३।२२४) दर्शितः—

" पाणिभ्यामुपसंगृह्य स्वयमन्नस्य वर्धितम् । विप्रान्तिके पितॄन् ध्यायन् शनकैरुपनिक्षिपेत् ॥

" एकेनैव तु हस्तेन यदन्नमुपनीयते । तद्विप्रलुम्पन्त्यसुराः सहसा दुष्टचेतसः " ॥ इति । अन्नस्य वर्धितमन्नस्य पूर्णं परिवेषणार्थं पात्रमित्यर्थः । स्वयमिति वचनात्स्वयं परिवेषणं मुख्यम् । अत एव **वायुपुराणे** " फलस्यानंतता प्रोक्ता स्वयं तु परिवेषणे " इति । यत्तु **तत्रैवोक्तम्**

" परिवेषणं प्रशस्तं हि भार्यया पितृतृप्तये । पितृदेवमनुष्याणां स्त्री सहाया यतः स्मृता" ॥ इति । तदितरापेक्षया वेदितव्यम् । भार्ययापि सवर्णयैव परिवेषणं कार्यम् । तथा च **नारायणः**—

"यद्द्रव्यं यत्पवित्रं च यत्पित्र्यं यत्सुखावहम् । द्विजातिभ्यः सवर्णाया हस्तेनैव तु दीयते"॥ इति ।

हस्तेन हस्तद्वयेनेत्यर्थः । ‘ उभाभ्यामपि हस्ताभ्यामाहृत्य परिवेषयेत् ’ इति **स्मरणात्** । हस्तद्वयेनापि न साक्षाद्देयं किंतु दर्व्यादिद्वारा । अत एव **वृद्धशातातपः**—

“ हस्तदत्तास्तु ये स्नेहलवणव्यंजनादयः । दातारं नोपतिष्ठंति भोक्ता भुंजीत किल्बिषम् ॥
“ नापवित्रेण हस्तेन नैकेन न विना कुशम् । नायसेनायसे नैव श्राद्धे तु परिवर्जयेत् ” ॥ इति ।

आयसे अयोमये नैव परिवेषयेदित्यर्थः । प्रशस्तानि परिवेषणपात्राण्याह **विष्णुः** (७९।२२) “ घृतादिदाने तैजसानि पात्राणि फल्गुपात्राणि वा प्रशस्तानि ” अत्र च **पितृगाथा** भवति—

“सौवर्णराजताभ्यां च खाड्गेनौदुंबरेण वा । दत्तमक्षयतां याति फल्गुपात्रेण या पुनः” ॥इति ।

खाड्गेन खड्गमृगशृंगकृतदर्व्यादिना फल्गुपात्रेण काकोदुंबरिकाख्यदारुकृतदर्व्यादिनान्तरितं कृत्वा देयमित्यर्थः । **शौनकः**—“पाकं सर्वमुपानीय संवेद्य च पृथक् पृथक् ”॥ अनिषिद्धदर्व्याद्यसंभवे **चंद्रिकायामुक्तं** ‘ विधिना देवपूर्वं तु परिवेषणमारभेत् ’ इति संवेद्य । भोक्तॄणामन्नगुणान्संविदितान्कृत्वेत्यर्थः । “भक्ष्यभोज्यगुणानुक्त्वा भोजयेद्ब्राह्मणान् शनैः” इति **बृहस्पतिस्मरणात्** । **पुराणे**—

“ तप्यमानास्तपस्तीव्रं प्रेषिता ब्रह्मशासनात् । विश्वेदेवास्तु रक्षार्थं पितृयज्ञेषु सर्वदा ॥
“ अतः पूर्वं प्रदातव्यं तेभ्योऽन्नं पितृकर्मणि ” ॥ इति । **मनुः** (३।२२६)—
“ गुणांश्च सूपशाकाद्यान्पयो दधि घृतं मधु । विन्यसेत्प्रयतः सम्यग्भूमावेव समाहितः ” ॥ इति

गुणान् अन्नानुग्राहकतया गुणभूतान्सूपादीन्भूमौ निहितेषु स्वल्पभाजनेषु प्रक्षिपेत् । न प्रधानान्नार्थं महाभोजने निहितेष्वित्यर्थः । तथा च **हारीतः**—“ भूमावेव निदध्यान्नोपर्युपरिपात्राणि ” इति । **चंद्रिकायामिदं** व्याख्यातम्—यान्युपरि पात्राणि महाभाजनोपरि निधेयानि घृताद्याधारभूतानि स्वल्पपात्राणि तानि श्राद्धे भूमावेव निदध्यात् । न भाजनस्योपरि” इति । **स्मृत्यंतरे**—

“भोज्यपात्रेणाज्यपात्रमुपपात्रे तु निक्षिपेत् । भोज्ये निक्षिप्य चेद्भुंक्ते सुरापानसमं हि तत् ॥
“ अन्ने च पायसे चैव सूपे च स्थापितं घृतम् । मोहाद्यदि च भुंजीत सुरापानसमं भवेत् ॥
“ सूपं च पायसं चाज्यं दद्याद्भोक्तुश्च दक्षिणे । तैलपक्वं तथा वामे शेषेष्वनियमः स्मृतः ”॥ इति ।

पात्राभिमंत्रणादि । संपादितं सर्वं पात्रेषु निक्षिप्य पात्राभिमंत्रणं कुर्यात् । तदाह **प्रचेताः**—“ सर्वं प्रकृतं दत्वा पात्रमालभ्य जपेत् ” इति । अत्र विशेषमाह **याज्ञवल्क्यः** (आ. २३८)—

“ दत्वान्नं पृथिवीपात्रमिति पात्राभिमंत्रणम् । कृत्वेदं विष्णुरित्यन्ने द्विजांगुष्ठं निवेशयेत् ”॥ इति ।

‘पृथिवी ते पात्रम्’ इत्यादिना मंत्रेण पात्राभिमंत्रणं कृत्वा ‘ इदं विष्णुः ’ इत्यनया ऋचा द्विजांगुष्ठं अन्ने निवेशयेदित्यर्थः । **कात्यायनः**— “ वैष्णव्यर्चा यजुषा चांगुष्ठमन्नेऽवगाह्य ” इति । **यमस्तु** सार्थवाहिकमंगुष्ठनिवेशनविधिं वदन् अत्र विनियुक्तयजुर्मंत्रस्वरूपमाह—

“ अंगुष्ठमात्रो भगवान् विष्णुः पर्यटते महीः । राक्षसानां वधार्थाय कोपवान्प्रहरिष्यति ॥
“तस्माच्छ्राद्धेषु सर्वेषु अंगुष्ठग्रहणं स्मृतम् । विष्णो हव्यं च कव्यं च ब्रूयाद्रक्षेति च क्रमात्”॥ इति ।

तत्र दैवेऽन्ने अंगुष्ठनिवेशनात्प्राक् विष्णो हव्यं रक्षस्वेति यजुर्ब्रूयात् । पित्र्येऽन्ने विष्णो कव्यं रक्षस्वेति यजुर्ब्रूयादित्यर्थः । अत्र वृद्धाचारानुसारी प्रयोगः । भोजनपात्रेषूपस्तीर्य पित्रादिपात्रेषु हुतशेषं निधाय सर्वेषु पात्रेष्वन्नानि दत्वाभिघार्य पात्रस्याधस्तादुपरिष्टाच्च दर्भान्निक्षिपेत् । एष ते ततेत्यादिमंत्रैः प्रतिपुरुषं क्रमात् पित्रादिपात्रदत्तपदार्थोपस्पर्शनं केचिदिच्छंति ।

अपरे तु होमानंतरमेष ते ततेत्यादिभिः सर्वान्नाभिमर्शनमाहुः । ‘सर्वमुत्तरैरभिमृशेत् कृतान्वा’ प्रतिपुरुषमित्यापस्तंबस्मरणात् । तत उपवीती दक्षिणं जान्वाच्य उदङ्मुखः प्रथमं देवार्थमन्नमभ्युक्षणेन अवोक्ष्य पात्रमालभ्य ‘पृथिवी ते पात्रम्’ इत्याभिमन्त्र्य ‘ इदं विष्णुर्विचक्रम ’ इत्यृचा ‘ विष्णो हव्यं रक्षस्व ’ इति यजुषा च द्विजाङ्गुष्ठं निवेश्य च प्राचीनावीती जान्वाच्य सव्यं दक्षिणामुखः पित्र्यं परिविष्टमन्नमभ्युक्षणेनावोक्ष्य पात्रमालभ्य जपाद्यंगुष्ठनिवेशनांतं कुर्यात् । एतच्च दैवे पित्र्ये च ब्राह्मणानेकत्वे प्रतिब्राह्मणपात्रं “कार्यम् एकैकविप्रस्य गृहीत्वांगुष्ठमादरात्” इति **स्मृतेः** । अनंतरं कर्त्तव्यमाह **विष्णुः**—नमो विश्वेभ्यो देवेभ्यो इत्यन्नमादौ प्राङ्मुखयोर्निवेदयेत् । पित्र्ये पितामहाय च प्रपितामहाय नामगोत्राभ्यामुदङ्मुखेष्विति । **चतुर्विंशतिमतेऽपि**—

“ पात्रालंभं द्विजः कुर्यादिदं वोऽन्नमितीरयेत् ” इति । पात्रालंभनं वामहस्तेन कृत्वा अन्नत्यागात्पात्रमनुसृजन्नेव विश्वेदेवा इदं वोऽन्नमित्युच्चारयन्नन्नत्यागं कुर्यादित्यर्थः । वैश्वदेविकान्न त्यागप्रकारमाहात्रिः—

“ हस्तेन मुक्तमन्नाद्यमिदमन्नमुदीरयेत् । स्वाहेति च ततः कुर्यात्स्वसत्ताविनिवर्त्तनम् ”॥ इति । परिवेषकहस्तेन मुक्तं परिविष्टमन्नाद्यमिदमन्नमिति विश्वेभ्यो देवेभ्य इति देवतोद्देशकशब्दोच्चारणानंतरमुच्चारयेत् । इदमन्नमित्युदीरणानंतरं हविर्दानप्रकाशकं स्वाहेति मंत्रमुच्चारयेत् । ततो न ममेति सत्वपरित्यागं कुर्यादित्यर्थः । पित्रादिभ्योन्नत्यागप्रकारमपि स एवाह—

“ गोत्रसंबंधनामानि इदमन्नं नमः स्वधा । पितृक्रमादुदीर्येति स्वसत्तां विनिवर्तयेत् ” ॥ इति । पित्रादिक्रमाद्गोत्रसंबंधनामोच्चारणपूर्वकं देवतोद्देशं कृत्वा इदमन्नमिति प्रदेयद्रव्यं निर्दिश्य स्वधेति कव्यदानप्रकाशकं मंत्रमुच्चार्य न ममेति स्वत्वपरित्यागं कुर्यादित्यर्थः । **संग्रहे**—

“ अन्नब्रह्मात्मकं ध्यात्वा द्विजमात्मानमेव च । श्राद्धभूमिं गयां ध्यात्वा भोक्तारं च गदाधरम् ॥
“ उदीर्य गोत्रसंबंधनामानि च ततः परम् । इदमन्नं ततः स्वाहा स्वधाशब्दौ यथोचितम् ॥
“उदीर्य च नमःशब्दं न ममेति ततो वदेत्”॥ इति । अत्र प्रयोगश्चंद्रिकायामुक्तः—अन्नमंगुष्ठनिवेशनानंतरं दक्षिणहस्तेन यवसहितमुदकमादाय सव्यहस्तेन पात्रमालभ्य इदमन्नं हविर्ब्राह्मण आहवनीयार्थे इदं भूर्गया अयं भोक्ता ब्राह्मणो गदाधरः पुरुरवार्द्रवसंज्ञकविश्वेभ्यो देवेभ्य इदं परिविष्टमन्नमातृप्तेः परिवेक्ष्यमाणं च स्वाहा नमो न ममेत्युक्त्वा भाजनसमीपे यवसहितमुदकं निनीय भक्त्या प्रणामं कुर्यात् । ततः पैतृकब्राह्मणसंनिधौ दक्षिणामुखे उपविश्य दक्षिणहस्तेन तिलानुदकं चादाय वामहस्तेन पात्रमालभ्य ब्राह्मणो गदाधर इत्यंतमुक्त्वा अस्मत्पित्रे अमुकगोत्रायामुकशर्मणे वसुरूपाय इदं परिविष्टमन्नमातृप्तेः परिवेक्ष्यमाणं च स्वधा नमो न ममेतीत्युक्तभाजनसमीपं तिलसहितं सलिलं निनीय प्रणामं कुर्यात् । पितामहायामुकशर्मणे रुद्ररूपाय प्रपितामहायामुकशर्मणे आदित्यरूपायेति विशेषतः इति ।

“ अदत्तमन्नं विप्रस्तु पाणिना स्पृशते यदि । त्रयस्ते नरकं यान्ति दाता भोक्ता तथा पिता”॥ इति । **स्मृत्यन्तरम्** । अत्र **विष्णुपुराणे** (३।१५।३४,३६)—

“ पिता पितामहश्चैव तथैव प्रपितामहः । तृप्तिं प्रयांतु मे भक्त्या यन्मयैतदुदाहृतम् ।
“ यज्ञेश्वरो हव्यसमस्तकव्यभोक्ताऽव्ययात्मा हरिरीश्वरोऽत्र ।
“ तत्संनिधानादपयांतु सद्यो रक्षांस्यशेषाण्यसुराश्च सर्वे” ॥ इति । **पुराणांतरे**—

" ईशानविष्णुकमलासनकार्तिकेयवन्हित्रयार्करजनीशगणेश्वराणाम् ।
" क्रौंचामरेंद्रकलशोद्भवकाश्यपानां पादान्नमामि सततं पितृमुक्तिहेतोः ॥
" एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः । त्रीन्लोकान्व्याप्य भूतात्मा भुंक्ते विश्वभुगव्ययः" ॥ इति ।
अनंतरकृत्यमाह **लघुयमः**—

"अन्नहीनं क्रियाहीनं मंत्रहीनं च यद्भवेत् । सर्वमच्छिद्रमित्युक्त्वा ततो यत्नेन भोजयेत्" ॥ इति ।
अच्छिद्रं जायतामित्येतावदेव **बोधायनेनोक्तम्** । एतच्च प्रागेवापोशनदानाद्वक्तव्यम्
" आपोशनकराग्राणामच्छिद्रस्य तु भाषणात् । निराशाः पितरो यांति देवैः सह न संशयः " ॥ इति **प्रचेतःस्मरणात्** । अनंतरकृत्यमाह **पारस्करः**—

" गायत्रीं त्रिः सकृद्वाऽपि जपेद्व्याहृतिपूर्वकम् । मधु वाता इतित्यृचं मध्वित्येतत्त्रिकं तथा" ॥

प्रचेताः—
" आपोशनं प्रदायाथ सावित्रीं त्रिर्जपेत्तथा । मधु वाता इति तृचं मध्वित्येतत्रिकं तथा" ॥ इति ।
आपोशनदानविधानान्नित्यभोजनाश्रितनियमाः परिषेचप्राणाहुत्यादयो भोक्तृणामत्रापि संतीति गम्यते । अत एव कस्यचिद्भोजननियमस्यात्र प्रतिषेधार्थं तदनुष्ठाने दोषमाह **भरद्वाजः**—
" पितृणामन्नमादाय बलिं यस्तु प्रयच्छति । स्तेयेन ब्राह्मणस्तेन स सर्वस्तेयकृद्भवेत्" ॥ इति ।
बलिः भोजनात्किंचिदन्नाग्रं धर्मराजाय वै बलिरित्युक्तमित्यर्थः । **अत्रिरपि**—
" दत्ते वाऽप्यथवाऽदत्ते भूमौ यो निक्षिपेद्बलिम् । तदन्नं निष्फलंयाति निराशैः पितृभिर्गतैः " ॥ इति ।
स्मृत्यंतरे—
" आपोशने धार्यमाणे यस्तु भूमौ जलं क्षिपेत् । तदन्नमासुरं प्रोक्तं न दातुः पारलौकिकम्" ॥ इति ।
" आपोशनं न गृण्हीयात् स्वयमेव नृपोत्तम । अन्यैर्दक्षिणपार्श्वस्थैरन्नस्योपरि गृह्यता" ॥ इति **ब्रह्माण्डपुराणम्** । प्राणाहुत्यनंतरकर्तव्यमाह **याज्ञवल्क्यः** (आ. २३९)—
"सव्याहृतिकां गायत्रीं मधुवाता इति तृचम् । जप्त्वा यथासुखं वाच्यं भुंजीरंस्तेऽपि वाग्यताः" ॥ इति ।
यथासुखमत्र जुषध्वमित्यध्याहारः । अत एव **व्यासः**—
" जुषध्वमिति ते चोक्त्वा सम्यग्विधृतभाजनाः । कृतमौनाः समश्नीयुरापोशानादनंतरम् " ॥ इति ।
विधृतभाजनाः वामहस्तधृतभोजनपात्रा इत्यर्थः । एतच्चान्ननिवेदनप्रभृति कर्तव्यम् यदाह **वसिष्ठः**—

" उभयोर्हस्तयोर्मुक्तं पितृभ्योऽन्नं निवेदितम् । तदन्नं संप्रतीच्छंति ह्यसुरा नष्टचेतसः ॥
" तस्मादशून्यं हस्तेन कुर्यादन्नमुपस्थितम् । भोजनं तु समालभ्य तिष्ठेदोच्छेषणात् द्विजः" ॥ इति ।
अंगुष्ठनिवेशनप्रभृतिभोजनसमाप्तिपर्यंतं वामहस्तेन भाजनम् परित्यज्यन्नेव वर्तेत । कंडूशमनाद्यर्थं वामहस्तव्यापारसमये तु दक्षिणहस्तेन भाजनं समालभ्य वर्तेतेत्यर्थः । अंगुष्ठनिवेशनात्पूर्वं भोक्त्रा अन्नस्पर्शो न कर्त्तव्यः । " अन्नस्पर्शो न कर्तव्यः प्रागंगुष्ठनिवेशनात् " इति **स्मृतेः** ।
विष्णुपुराणे (३।१५।२८-२९)—
" ततोऽन्नमृष्टमत्यर्थमभीष्टमतिसत्कृतम् । दत्वा जुषध्वमिच्छातो वाच्यमेतदनिष्ठुरम् ॥
" भोक्तव्यं तैश्च तच्चित्तैर्मौनिभिः सुमुखैः सुखम् । अक्रुध्यता चात्वरता देयं तेनापि भक्तितः" ॥ इति ।

---

१ ग-यमः ।

पारस्करः—

" संकल्प्य पितृदेवेभ्यः सावित्रीमधुमज्जपः । श्राद्धं निवेद्यापोशनं जुषप्रैषोऽथ भोजनम् "॥ इति ।

अभिश्रवणम् । भोजनोपक्रमानंतरं कर्त्तव्यमाह **कात्यायनः**—"अश्नत्सु जपेत् व्याहृतिपूर्वां गायत्रीं सप्रणवां सकृत्त्रिर्वा रक्षोघ्नीः पित्र्यमंत्रान्पुरुषसूक्तमप्रतिरथमन्यानि च पवित्राणि " इति । रक्षोघ्नीः " कृणुष्वपाजः प्रसितिं न पृथ्वीम् " इत्याद्या ऋचः । पित्र्यमंत्राः ' उदीरतामवर उत्परास ' इत्याद्याः । अप्रतिरथम् ' आशुः शिशान ' इति सूक्तम् । **मनुरपि** (३।२३२)—

"स्वाध्यायं श्रावयेत्पित्र्ये धर्मशास्त्राणि चैव हि । आख्यानानीतिहासांश्च पुराणान्यखिलानि च"॥ इति ।

याज्ञवल्क्यः (आ. २४०)—

" अन्नमिष्टं हविष्यं च दद्यादक्रोधनोऽत्वरः । आतृप्तेस्तु पवित्राणि जप्त्वा पूर्वजपं तथा " ॥ इति ।

अत्र **विज्ञानेश्वरः** (पृ. ७० पं. ३)—" पवित्राणि श्रीपुरुषसूक्तपवमानप्रभृतीनि जपित्वा तृप्तान्ज्ञात्वा पूर्वोक्तजपं च सव्याहृतिकां गायत्रीं मधुवाता इति तृचामित्युक्तं जपेत् " इति ।

सायणीये—

" श्राद्धभोजनकाले तु कर्त्ता भ्राता सुतोऽपि वा । दौहित्रो वाऽथ पौत्रो वा सपिंडो वा विचक्षणः ॥

"यस्त्वभिश्रावयेद्भोक्तॄन् तच्छ्राद्धं पावनं भवेत् । अन्यं वाहूय तं वृत्त्या श्रावयेत्तं निरीक्षयेत् ॥

" श्राद्धक्रियासमाप्तौ तु प्रदद्याज्जपदक्षिणाम् । अत्युच्चैरतिशीघ्रं च हित्वैव श्रावयेद्बुधः ॥

" रक्षोघ्नं पैतृकं चैव दिवाकीर्त्येयुतं तथा । वैष्णवं त्रिसुपर्णं च नाचिकेतं तथा पठेत् ॥

" रक्षोघ्नादिजपाशक्तो जपेत्पुरुषसूक्तकम् । तत्राप्यशक्तो गायत्रीमा तृप्ते रसकृज्जपेत् ॥

" एकोद्दिष्टे च सापिंड्ये षोडशेष्वनुमासिके । एषु श्रावयेत्सूक्तमन्यत्र श्रावयेद्बुधः " ॥ इति ।

"अभिश्रवणहीनो यः श्राद्धं कुर्वीत मूढधीः । तदन्नं मांसतुल्यं स्यात् तद्गेहमसुरालयम् " ॥ इति

स्मृत्यन्तरम् । **स्मृत्यर्थसारे**—

" नांदीमुखे गयाश्राद्धे नवश्राद्धे च मासिके । सपिंडीकरणश्राद्धे न जपेत्पितृसूक्तकम् " ॥ इति ।

जपोऽयमुपवीतिना कर्त्तव्यः । अत एव **जमदग्निः**—

"अपसव्येन कर्त्तव्यं सर्वं श्राद्धं यथाविधि । सूक्तस्तोत्रजपं मुक्त्वा विप्राणां च विसर्जनम्" ॥ इति ।

दातृभोक्तृनियममाह वृद्धशातातपः—

" अपेक्षितं यो न दद्याच्छ्राद्धार्थमुपकल्पितम् । कृपणो मंदबुद्धिस्तु न च श्राद्धफलं लभेत् ।

" अपेक्षितं याचितव्यं श्राद्धार्थमुपकल्पितम् । न याचते द्विजो मूढः स भवेत्पितृघातकः "॥ इति ।

स्मृत्यंतरेऽपि—

"अपेक्षितं द्विजो मोहाद्भुंजानो यो न याचते । अपेक्षितं यो न दद्यात्तावुभौ पितृघातकौ " ॥ इति ।

निगमेऽपि—

" अवश्यमर्थयेच्छ्राद्धे पित्रर्थमुपकल्पितम् । न याचते द्विजो मूढः स भवेत् पितृघातकः ॥

" अपेक्षितं यो न दद्यात् श्राद्धार्थमुपकल्पितम् । अथ कृच्छ्रासु घोरासु तिर्यग्योनिषु जायते"॥ इति ।

यत्तु **यमेनोक्तम्**—

" कृच्छ्रद्वादशरात्रेण मुच्यते कर्मणस्ततः । तस्माद्विद्वान्नैव दद्यान्न याचेन्न च दापयेत् " ॥ इति ।

---

१ ग-पि । २ क-घः । ३ क्ष-त् ।

यदप्युक्तं वायुपुराणे—

"याचते यदि दातारं ब्राह्मणो ज्ञानदुर्बलः । पितरस्तस्य कुप्यंति दातुर्भोक्तुर्न संशयः" ॥ इति । तच्छ्राद्धार्थमकल्पितविषयम् । सामान्येनाभिधानात् । श्राद्धार्थमुपकल्पितवस्तुविषयेऽपि अत्यन्ताधिकं दाता न दद्यात् । भोक्ता च न प्रतिगृह्णीयात् । तथा च शङ्खलिखितावपि— "नात्यधिकं दद्यान्न प्रतिगृह्णीयात् " इति । अनपेक्षितवस्तुनो निवारणप्रकारमाह निगमः—

"नान्नपानादिकं श्राद्धे वारयेन्मुखतः क्वचित् । अनिष्टत्वाद्बहुत्वाद्वा वरणं हस्तसंज्ञये " ॥ इति । शंखलिखितावपि—"अन्नपानं प्रभूतमिति न ब्रूयुरन्यत्र हस्तसंज्ञया" इति । एवं याचमानोऽपि न मुखतः कुर्यात् "याचनप्रतिषेधश्च कर्तव्यो हस्तसंज्ञया" इति स्मृतेः । मौनभंगप्रसंगाच्च अपेक्षितं वस्तु ददामीत्युक्त्वा नो दद्यात् । तथा च यमः—

"यावद्धविष्यं भवति यावदिष्टं प्रमीयते । तावदश्नंति पितरो यावन्नाह ददाम्यहम् " ॥ इति । परिविष्टवस्तुषु यन्निरवशेषतया भुक्तं यच्च भोक्तुं पुनर्गृह्यते तत्तस्येष्टमित्यनुमाय तस्य प्रतिषेधसूचनाभावे देयम् । तथा च स एव—"यद्यद्रोचेत विप्रेभ्यः तद्दद्यादविमत्सरी " । देवलः—

" अन्नपानकशीतोदं दद्यादेवाविलोकितम् । वक्तव्ये कारणे संज्ञां कुर्वन्भुंजीत पाणिना" ॥ इति । ब्रह्मांडपुराणे—

"निराशो नित्यभुग्विप्रः श्राद्धकर्ताऽथ याचितः । विष्णुः सर्वात्मको भुङ्क्ते इति मत्वा न दोषभाक् ।

" न चाश्रु पातयेज्जातु न शुक्तां गिरमीरयेत् । न चोदीक्षेत भुंजानं न च कुर्वीत मत्सरम् ॥

" न दीनो नापि वा क्रुद्धो न चैवान्यमना नरः । एकाग्रमाधाय मनः श्राद्धं कुर्यात्सदा बुधः "॥ इति । शुक्तां निष्ठुराम् । मनुः (३।२२९-२३०)—

" नास्रमा पातयेज्जातु न कुप्येन्नानृतं वदेत् । न पादेन स्पृशेदन्नं न चैनमवधूनयेत् ॥

" अस्रं गमयति प्रेतान्कोपोऽरीननृतं शुनः । पादस्पर्शो तु रक्षांसि दुष्कृतीनवधूननम् " ॥ इति । अस्रं बाष्पः । तदन्नं प्रेतान्पिशाचान् गमयति पितॄनित्यर्थः । व्यासः—

" क्रोधेनैव च यद्दत्तं यद्दत्तं त्वरया पुनः । यातुधाना विलुंपंति जल्पयवाचोपपादितम् ॥

" खिन्नगात्रो न तिष्ठेत्तु संनिधौ च द्विजन्मनाम् " ॥ इति । कार्ष्णाजिनिः—

" भक्ष्यभोज्यानि चोष्याणि पेयलेह्ययुतानि च । सर्वश्रेष्ठानि यो दद्यात्सर्वश्रेष्ठो भवेन्नरः " ॥ इति । स्मृत्यंतरे—

" अदत्तमन्नं विप्रस्तु पाणिना स्पृशते यदि । त्रयस्ते नरकं यांति दाता भोक्ता तथा पिता ॥

" मृत्पात्रगतमर्घ्यं च मृत्तिकागंधलेपनम् । मार्जारोच्छिष्टशेषं च निराशाः पितरो गताः ॥

" न वदेन्मानुषीं वाचं न चैवाश्रूणि पातयेत् ॥

"तर्जन्यां रजतं धृत्वा यत्पितृभ्यः प्रदीयते । अन्तोस्ति परमाणूनामस्यांतो न हि विद्यते ॥

"श्राद्धकर्ता वृतानां चेत्पंक्तावन्यं तु भोजयेत् । पितरस्तस्य षण्मासं चंडालोच्छिष्टभोजिनः" ॥ इति । यत्तु मनुवचनम् (३।२४३)

" ब्राह्मणं भिक्षुकं वापि भोजनार्थमुपस्थितम् । ब्राह्मणैरभ्यनुज्ञातः शक्तितः प्रतिपूजयेत् " ॥ इति

यदपि **स्मृत्यंतरवचनम्**—

" उपविष्टेषु विप्रेषु यद्यागच्छेत् द्विजोऽतिथिः । निमंत्रितैरनुज्ञातः कामं तमपि भोजयेत् "॥ इति।

तत्पंक्त्यंतरे तदैव भोज्यत्वपरम् । अत एव **चंद्रिकायाम्**—" यदा अतिथिर्भोजनार्थमुपविष्टः तदा तं गंधपुष्पादिभिरर्चयित्वा पितृभ्योऽन्नत्यागानंतरमस्मै ब्राह्मणाय विष्णुरूपाय शिवरूपायेदमन्नं परिविष्टमातृप्तेः परिवेक्ष्यमाणं च न ममेति तदर्थं परिविष्टमन्नं त्यजेत्" इति । अन्नपानदाता लवणादिन्यूनत्वाधिक्याभावेन हविषः साद्गुण्यं पुनः प्रदानार्थं न गच्छेदित्याह **शंखः**—

" श्राद्धे नियुक्तान् भुंजानान्न पृच्छेल्लवणादिषु । उच्छिष्टाः पितरो यांति पृच्छतो नात्र संशयः ॥

" बाहुः पतति दातुर्वै जिव्हा भोक्तुश्च भिद्यते " ॥ इति ।

भोक्तृनियमाः । भोक्तृनियममाह **प्रचेता**—

" पीत्वापोशनमश्नीयात्पात्रे दत्तमगर्हितम् । सर्वेन्द्रियाणां चापल्यं न कुर्यात्पाणिपादयोः" ॥ इति ।

भोजनार्थव्यापाराद्धिकव्यापारः इंद्रियाणां चापल्यम् । तत्र दोषमाह **हारीतः**—

"उद्धृत्य पाणिं विहरन् सक्रोधो विस्मयान्वितः । श्राद्धकाले तु यद्भुंक्ते न तत्प्रीणाति वै पितॄन्"॥ इति

बोधायनः—

" पादेन पादमाक्रम्य यो भुंक्तेऽनापदि द्विजः । नैवासौ भोज्यते श्राद्धे निराशाः पितरो गताः" इति ।

निगमेपि—" तुष्णीं भुंजीरन्नविलोकयमाना अनुद्धृत्य पात्रम्" इति । तूष्णीं वाग्व्यापारमंतरेण अविलोकयमाना दिश इत्यर्थः । **मनुरपि** (३।२३६-२३७)—

" अत्युष्णमन्नं सर्वं स्याद्भुंजीरंश्चैव वाग्यताः । न च द्विजातयो ब्रुयुर्दात्रा पृष्टा हविर्गुणान् ॥

" यावदुष्णं भवत्यन्नं यावदश्नंति वाग्यताः । तावद्धि पितरोऽश्नंति यावन्नोक्ता हविर्गुणाः "॥ इति

वाग्यमनविधानादेव हविर्गुणावचने सिद्धे पुनर्निषेधो हस्तसंकेतेनापि हविर्गुणसूचननिषेधार्थः । यदाहात्रिः—

" हुंकारेणापि यो ब्रूयात् हस्ताद्वापि गुणान्वदेत् । भूतलाच्चोद्धरेत्पात्रं मुंचेद्धस्तेन वाऽपि तत् ॥

" प्रौढपादो बहिःकक्षो बहिर्जानुकरोऽथ वा । अंगुष्ठेन विनाश्नाति मुखशब्देन वा पुनः ॥

" पीतावशिष्टं तोयादि पुनरुद्धृत्य वा पिबेत् । खादितार्धं पुनः खादेन्मोदकादि फलादि वा ॥

"मुखेन वाधमेदन्नं निष्ठीवेद्भोजनेऽपि वा । इत्यन्नं तु द्विजः श्राद्धे भुक्त्वा गच्छत्यधोगतिम्"॥ इति

भूतलात्पात्रोद्धरणे दोषोऽन्नाधारमाह भाजनविषयः । प्रौढपाद आसनाद्यारोपितपादः । बहिः कक्षः उत्तरवासो बहिर्भूतकक्ष इत्यर्थः । **वृद्धशातातपः**—

"आसने पादमारोप्य यो भुंक्ते तु द्विजोत्तमः । हंति दैवं च पित्र्यं च तदन्नं च प्रजां पशून्"॥ इति।

प्रचेताः—

"न स्पृशेद्वामहस्तेन भुंजानोऽन्नं कदाचन । न पादौ न शिरे वस्तिं न पदा भाजनं स्पृशेत्"॥ इति।

निगमेऽपि—

" मांसापूपफलेक्ष्वादि दंतच्छेदैर्न भक्षयेत् । ग्रासशेषं नो निरस्येत्पीतशेषं तु नो पिबेत् " ॥ इति ।

ग्रासशेषं अस्यार्पितग्रासशेषं भोजनपात्रे न निक्षिपेदित्यर्थः । **सुमंतुः**—

"अक्रोधनो रसान् सम्यगद्याद्यत्स्वस्य रोचते । आतृप्ति भोजनं तेषां कामतोऽनवशेषणम्" ॥ इति ।

---

१ ग--न पात्रेस्य ।

स्मृत्यंतरे—

"श्राद्धे भुंजन् द्विजो यस्तु बहुभाषी मिताशनः। स पापी नरकं याति श्राद्धहंता भवेद्ध्रुवम्"॥ इति।
" भोक्ता भोजयिता श्राद्धे मौनी स्याच्चासमापितेः। न ह्युक्तपाणिरुक्त्वा तु शनैर्दोषो न विद्यते "॥
इत्याश्वलायनः । **व्यासः**—

"न किंचिद्वर्जयेत् श्राद्धे नियुक्तस्तु द्विजोत्तमः। न मांसं प्रतिषेधेत न चान्यस्यान्नमीक्षयेत्"॥ इति।

प्रचेताः—"दंतच्छेदं हस्तपानं वर्जयेच्चातिभोजनम्" इति । हस्तपानं हस्तेन पेयादिपानं वर्जयेत्। अपि तु लघुपात्रेणैव कुर्यात् । अतिभोजनं तृप्तौ सत्यामपि भोजनमित्यर्थः ॥ **उशनाः**—

'भोजनं तु न निःशेषं कुर्यात् प्राज्ञः कथंचन। अन्यत्र दध्नः क्षीराद्वा क्षौद्रात् सक्तुभ्य एवच"॥ इति।

यत्तु **जमदग्निनोक्तम्**-'न निंद्युर्नावशेषयेयुः' इति तदधिकावशेषविषयम्। यतोऽनंतरमाह **स एव**
"अल्पं पुनरुत्स्रष्टव्यं तस्यासंस्कृतप्रमीतानां भागधेयत्वात्" ॥ इति। असंस्कृतप्रमीतानामनुपनीतमृतानामित्यर्थः । उच्छिष्टस्यासंस्कृतप्रमीतादिभागधेयत्वं च **मनुराह**—(३।२४५)

" असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम् । उच्छिष्टं भागधेयं स्याद्दर्भेषु विकिरेश्च यत्" ॥ इति ।

त्यागिनां संन्यासिनाम् किंचिदुच्छिष्टं दासवर्गतृप्तये भूमिगतं कुर्यात्। यत आह **स एव** —(३।२४६)

" उच्छेषणं भूमिगतमजिह्मस्याशठस्य च । दासवर्गस्य तत्पित्र्ये भागधेयं प्रचक्षते "॥ इति ।

आश्वलायनः—

"शेषयेद्भोजने भुक्त्वा सर्वान्किंचित्ततस्ततः । यत्तु शिष्टं भोजनेषु तदश्नंत्यति हर्षिताः ॥
" दाता मृतस्य योन्नादि तस्मात्तत्परिशेषयेत् " ॥ इति । प्रमादाद्भोक्तृणां परस्परस्पर्शे उच्छिष्टस्पर्शेऽपि भोजनोपरमो न कार्य इत्याह **शंखः**—

" श्राद्धपंक्तौ तु भुंजानो ब्राह्मणो ब्राह्मणं स्पृशेत् । तदन्नमत्यजन् भुक्त्वा गायत्र्यष्टशतं जपेत् ॥
"उच्छिष्टलेपनस्पर्शे प्रक्षाल्यान्येन वारिणा । भोजनांते द्विजः स्नात्वा गायत्रीत्रिशतं जपेत्"॥ इति।

पात्रेऽन्योच्छिष्टपतनेऽपि **स एव**—

" उच्छिष्टस्पर्शनं ज्ञात्वा तत्पात्रं परिहृत्य च । अस्पृष्ट्वा पाणिना पात्रं भूमिं समनुलिप्य च ॥
"अन्यत्पात्रं निधायात्र सर्वान्नं परिवेषयेत् । परिषिच्य ततः पश्चाद्भोजयेच्च न दोषकृत्" ॥ इति।

व्यासोऽपि—

"उच्छिष्टोच्छिष्टसंस्पर्शे स्पृष्टपात्रं विसृज्य च। सर्वान्नपूर्ववत् दत्वा भोजयेत्तु द्विजोत्तमः" ॥ इति।

उच्छिष्टस्पर्शे पात्रद्वयं परित्यज्य पात्रांतरयोर्द्वावपि भोजयेदित्यर्थः । अत्र भोक्तुरुच्छिष्टस्पर्शाभावे उच्छिष्टपात्रं परित्यज्य पात्रांतरे भोजयेत्स्पर्शे भोजनांते द्विजाः स्नात्वा गायत्र्याः त्रिशतं जपेदित्युक्तं प्रायश्चित्तमपि कुर्यात् । **स्मृत्यंतरे**—

"श्राद्धपंक्तौ तु भुंजानो विण्मूत्रोत्सर्जनं प्रति। व्रजेद्यदि हि मूढात्मा श्राद्धघाती भवेद्ध्रुवम् ॥
" उपोष्य तद्दिने कर्त्तापरेद्युः श्राद्धमाचरेत् " ॥ इति ।

पितृस्थानीयव्यतिरिक्तस्य वमने **स्मृत्यंतरे**—

" विश्वेदेवाद्द्वितीयो वा तृतीयो वांतिकृद्भवेत्। प्राणादिपंचभिर्मंत्रैर्यावत् द्वात्रिंशसंख्यकम् ॥

होमशेषं समाप्याथ श्राद्धशेषं समापयेत् ” ॥ इति । **अन्यत्रापि**—

“ एक एव यदा विप्रो भोजने छर्दितो यदि । तदैवाग्निं समाधाय होमं कुर्याद्यथाविधि ॥

“ तत्स्थाननामगोत्रेण चासनादिभिरर्चयेत् । अन्नत्यागं प्रकुर्वीत ततोऽग्नौ जुहुयाच्चरुम् ॥

“ प्राणादिपंचकैर्मंत्रैर्यावत् द्वात्रिंशसंख्यकम् । होमशेषं समाप्याथ श्राद्धशेषं समापयेत् ” ॥ इति ।

छर्दितब्राह्मणभोजने पात्रं त्यक्त्वा लौकिकाग्निं समाधाय तत्स्थाननामगोत्रोच्चारणपूर्वकमासनादिभिरभ्यर्च्य हुतशेषं चरुं प्राणादिपंचभिर्मंत्रैः षडावृत्तैः पुनरुपादानसमानाभ्यां च हुत्वा श्राद्धशेषं समापयेदिति व्याख्यातारः । **संग्रहे**—

“श्राद्धपङ्क्तौ तु भुंजानो ब्राह्मणो वमयेद्यदि । लौकिकाग्निं प्रतिष्ठाप्य त्वर्चयेच्च हुताशनम्” ॥ इति ।

पितृस्थानायस्य वमने त्रयाणां वमने पुनःश्राद्धमुक्तं **तत्रैव**—

“ पितृणां तत्र सर्वेषां पितुर्वा वमनं यदि । तद्दिनो[1] चोपवासश्च पितुः श्राद्धं परेऽहनि ” ॥ इति ।

एतच्च पिंडदानात्प्राग् वमने वेदितव्यम् ।

“ अकृते पिंडदाने तु पिता यदि वमेत्तदा । पुनः पाकं प्रकुर्वीत श्राद्धं कुर्याद्यथाविधि ” ॥ इति **स्मरणात्** । यत्तु **वचनम्**—

“ अकृते पिंडदाने तु भुंजानो ब्राह्मणो वमेत् । पुनः पाकात्तु कर्तव्यं पिंडदानं यथाविधि ” ॥ इति ।

अत्र द्वितीयः पिंडदानशब्दः श्राद्धपरः । तस्मिन्नहनि पुनःपाकेन श्राद्धविधायकमिदं वचनद्वयं दर्शादिश्राद्धविषयम् । क्षयाहश्राद्धस्य परादिने विहितत्वात् । दर्शादौ पुनःपाकेन श्राद्धकरणासंभवे आमेन वा कार्यम् ।

“ श्राद्धविघ्ने द्विजातीनामामश्राद्धं प्रकीर्तितम् । अमावास्यादिनियतं माससंवत्सराहते ” ॥ इति **मरीचिस्मरणात्** । संकल्पश्राद्धेऽपि त्रयाणां वमने पितुरेकस्य वा वमने पुनः श्राद्धमुक्तं **स्मृत्यंतरे**—

“ भुक्तिक्रियायाः प्राधान्यं श्राद्धे संकल्पसंज्ञके । अत्रैव पितृविप्राणां उपघाते पुनःक्रिया ” ॥ इति ।

यत्तु **वचनम्**—

“ प्राधान्यं पिंडदानस्य भोजनस्य तदंगताम् । अतो भुक्तिक्रियाहानौ श्राद्धवृत्तिं न मन्यते ” ॥ इति तत्संकल्पव्यतिरिक्तपार्वणश्राद्धे पितृस्थानीयव्यतिरिक्तब्राह्मणभुक्तिक्रियाहानिविषयम् ।

ऋग्विधाने तु—

“ इंद्राय सोमसूक्तेन श्राद्धविघ्नो यदा भवेत् । अग्न्यादिभिर्भोजनेन श्राद्धं संपूर्णमेव वा ॥ ” इति ।

अत्र इंद्राय त्र्यसोमसूक्तजपेन होमेन भोजने न चेति विधानमुक्तम् । तत्र व्यवस्था व्याख्यातृभिर्दर्शिता-पिंडदानात्परं वमनेन श्राद्धविघ्ने सूक्तजपेन श्राद्धं संपूर्णतामेति । पिंडदानात्प्राक्तु पितृव्यतिरिक्तस्यैकस्य वमनेन श्राद्धविघ्ने होमेन अनेकस्य वमनेन तद्विघ्ने होमसूक्तजपाभ्यां पितृस्थानोपवेशितस्य वमनेन तद्विघ्ने तु परदिने पुनः श्राद्धभोजनेन नेति । तथा च **शौनकः**—

“ भोजनोपरमात्पूर्वं प्रक्रमात्परतो यदि । श्राद्धविघ्ने पुनः कार्यं जपहोमौ न तृप्तिदौ ” ॥ इति ।

“ अग्निनाशे यदा श्राद्धे ज्योतिर्यत्र विनश्यति । तद्दिने चोपवासश्च पुनः श्राद्धं परेऽहनि ” ॥

अथ **विकिरणविधिः** । तत्र **प्रचेताः**—

“ तृप्तिं बुध्वाऽन्नमादाय सतिलं पूर्ववज्जपेत् । तृप्तिं पृच्छेत्ततः पृष्टा ब्रूयुस्तृप्ताः स्म इत्यपि ” ॥ इति ।

---

१ ग–णादि । क्ष–नौ ।

पूर्ववज्जपेदित्यस्यार्थः **कात्यायनेन** प्रपंचितः " गायत्रीं मधुमतीं मधु मध्विति जप्त्वा तृप्ताः स्थ इति पृच्छति " इति । **व्यासः**—

" तृप्ताः स्थ इति पृष्टास्ते ब्रूयुस्तृप्ताः स्म इत्यर्थः " ॥ इति । अनंतरकर्त्तव्यमाह **मनुः** (३।२४४)-

" सार्ववर्णिकमन्नाद्यं संनीयाप्लाव्य वारिणा । समुत्सृजेद्भुक्तवतां अग्रतो विकिरन् भुवि " ॥ इति ।

संनीय व्यंजनैः सह संयोज्य सार्ववर्णिकं सर्ववर्णिहितार्थमुत्सृजेदित्यर्थः । **मत्स्यपुराणे**—

" भुक्तवत्सु ततस्तेषु भोजनोपांतिके नृप । प्रोक्ष्य भूमिमथाद्भिस्तु भूमौ पितृपरायणः ।

" ततो विकिरणं कुर्याद्विधिदृष्टेन कर्मणा " इति । **मार्कंडेयः**—

" उदङ्मुखानां विप्राणां पुरतः सोदकं ततः । अन्नं तु विकिरेद्भक्त्या पुनर्दद्यात्तिलोदकम् " ॥ इति **विष्णुपुराणे** (३।१५।१७)—

" तृप्तेष्वेतेषु विकिरेदन्नं विप्रेषु भूतले । दद्याच्चाचमनार्थाय तेभ्यो वारि सकृत्सकृत् " ॥ इति । आचमनार्थाय नित्यभोजननियमेषूक्तं अमृतापिधानमसीति मन्त्रपूर्वकं यत् गण्डूषं तदर्थं वैश्वदेविक-विप्रपूर्वकं प्रतिविप्रं सकृत् सकृत् जलं दद्यादित्यर्थः । **याज्ञवल्क्यः** (२४१)—

" अन्नमादाय तृप्ताः स्थ शेषं चैवानुमान्य च । तदन्नं प्रकिरेद्भूमौ दद्याच्चापि सकृत्सकृत् " ॥ इति । व्याख्यातमेतद्विज्ञानेश्वरेण (पृ. ७० पं ७)– सर्वमन्नमादाय तृप्ताः स्थेति पृष्टास्तृप्ताः स्म इति तैः प्रत्युक्तः शेषमस्ति किं क्रियतामिति पृष्ट्वा इष्टैः सह भुज्यतामित्यभ्युपगमय्य तदन्नं पितृस्थानीयस्य ब्राह्मणस्य पुरस्तादुच्छिष्टसंनिधौ दक्षिणाग्रदर्भांतर्हितायां भूमौ तिलोदकप्रक्षेपपूर्वं ये अग्निदग्धा इत्यनयर्चा निक्षिप्य पुनस्तिलोदकं प्रक्षिपेत् । तदनंतरं ब्राह्मणहस्तेषु गंडूषार्थं सकृदपो दद्यात्" इति । **बोधायनस्तु**— उत्तरापोशनानंतरं विकिरदानमाह– " स्वधायुक्तानि ब्राह्मणान्यभिश्रावयिष्यन् रक्षोघ्नानि च नैर्ऋतानि च तृप्तानप आचमय्याशनेष्वन्नशेषान्प्रकिरति " ये अग्निदग्धा येऽनग्निदग्धा " इति । **प्रचेताश्च**–" ये अग्निदग्धेति भुवि क्षिपेत् " । **स्मृत्यंतरे**—

" पितृदैवतयोर्मध्ये भुवं प्रोक्ष्य तिलान्क्षिपेत् । ततो दर्भान्समास्तीर्य तूष्णीं दत्वा तिलोदकम् ॥

" उच्छिष्टं तिलमिश्रेण पिंडं दद्यात्समाहितः । ये अग्निदग्धा येऽनेति दद्यादुच्छिष्टसंनिधौ " ॥ इति । अत्र केचिदाहुः—" **मनुयाज्ञवल्क्यबोधायनचंद्रिकामाधवीयविज्ञानेश्वरादिषु** ' ये अग्निदग्धा' इत्यनेन विकिरदानविधानादन्यस्यानुक्तेस्तावन्मात्रमेव विकिरदानं कार्यमिति । एतदुच्छिष्टपिण्डं काकेभ्यो विशस्तिकाकपिण्डमिति च व्यवहरन्ति । काकस्वीकारे च यत्नं कुर्वन्ति ।

" वायसा स्वीकृते पिण्डे शुना शूद्रेन दूषिते । तद्दिने चोपवासश्च पुनः श्राद्धं परेऽहनि ॥ इति

पठन्ति । **अन्ये तु**—प्रतिब्राह्मणमुच्छिष्टसंनिधौ मंत्रांतरेण विकिरदानं कृत्वा ये अग्निदग्धा येऽनग्निदग्धा इत्यनेनोच्छिष्टपिंडदानं च कार्यमित्याहुः । तदाह **आश्वलायनः**—"श्रावयित्वा च पृष्ट्वा च देवानां विकिरं चरेत् " इति । मधुमती अक्षन्नमीमदंत इति च श्रावयित्वा संपन्नं पृष्ट्वाऽनंतरं वैश्वदेविकं विकिरं चरेदित्यर्थः । **स्मृत्यंतरे** " मंत्रेण विकिरं कुर्यान्मुख्यब्राह्मणसंनिधौ ॥

"असोमपाश्च ये देवा यज्ञभागविवर्जिताः । **तेषामन्नं प्रदास्यामि विकिरं वैश्वदेविकम्** "॥ इति विश्वेदेवार्थब्राह्मणयोर्मुख्यः प्रथमं वृत इत्यर्थः ।

रत्नावल्याम्—

"उच्छिष्टैरेव विकिरं सदैवं प्रतिपादयेत् । अन्यथा कुरुते यस्तु निराशास्तस्य देवताः"॥ इति।

स्मृत्यंतरे तु " पात्रे यवकुशास्तीर्णे देवानां विकिरं चरेत् " इति **प्राप्ते**—

" अनंतरं सुतृप्तेषु तेषु विप्रेषु भक्तितः । अन्नशेषं प्रविकिरेद्दर्भेषु विधिवन्नृप ॥

" असोमपेति मंत्रेण विकिरं वैश्वदेविकम् । असंस्कृतेति मंत्रेण पैतृकं विकिरं क्षिपेत् ॥

" असंशयो भवेद्विष्णुमनुना वैष्णवं क्षिपेत् " ॥ इति । **स्मृत्यंतरे**—

" असंस्कृतप्रमीता ये त्यागिन्यो याः कुलस्त्रियः । दास्यामि तेभ्यो विकिरमन्नं ताभ्यश्च पैतृकम् ॥

"एतेन विकिरेत्पित्र्ये मुख्यब्राह्मणसन्निधौ" ॥ इति । तथा विकिरभागिनो दर्शयति **मनुः** (३।२४५)

" असंस्कृतप्रमीतानां त्यागिनां कुलयोषिताम् । उच्छिष्टं भागधेयं स्याद्दर्भेषु विकिरे च ये " ॥ इति।

मार्कंडेयस्तु-'ये चापमृत्युना केचिन्मृत्युं प्राप्ताः स्ववंशजाः।विकिरेण प्रदानेन तृप्तिं यांति च तेऽखिलाः'॥

"ये चादंताः कुले बालाः क्रियायोग्या ह्यसंस्कृताः । सपिंडास्ते तु विकिरे संमार्जनजलाशिनः"॥ इति।

विकिरदानानंतरमुपवीती भूत्वा आचामेत् । अत एव **मरीचिः**—

"श्राद्धेषु विकिरं दत्वा यो नाचामेन्मतिभ्रमात् । पितरस्तस्य षाण्मासं भवंत्युच्छिष्टभोजिनः"॥ इति।

अनंतरमुत्तरापोशनार्थमुदकं दद्यात् । तथा च **मदालसावाक्यम्**—

" तदन्वाचमनार्थाय दद्याच्चापः सकृत्सकृत् " इति । अत्र **मरीचिः**—

" हस्तं प्रक्षाल्य गंडूषं यः पिबेदविचक्षणः । आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठते " ॥ इति । गंडूषं यः पिबेद्भोजनांते अमृतापिधानमसीति मंत्रेणापो यः पिबेदित्यर्थः । गंडूषकरणात्पूर्वं हस्तलेपनिमार्जनं तत्क्षालनं आसनादुत्थानं च न कार्यमित्याह **आश्वलायनः**—

" प्राग्गंडूषजलाद्भुक्त्वाऽन्नहस्तं निमृजेद्बुधः । प्रक्षालयेच्च नोत्तिष्ठेत्पीठाद्विप्रः सदैव हि ॥

"यो भुक्त्वोत्थायाचामति पीठाद्विप्रः सदाऽशुचिः। स्नात्वा शुचिर्भवेच्छ्राद्धे श्राद्धहा च नराधमः"॥इति।

अस्यार्थः **प्रयोगसारकृताभिहितः**-यो भुक्त्वा पीठादुत्थायोत्तरापोशनार्था अप आचामति तदा अशुचिर्भवेत् । स्नात्वैव श्राद्धे शुचिर्भवेदिति । गंडूषकरणप्रकारश्च तेनैवोक्तः—

" अर्धं पिबति गंडूषं अर्धं त्यजति भूतले । प्रीणंति पितरः सर्वे ये चान्ये भूमिदेवताः " ॥ इति ।

उच्छिष्टपिंडं वायसेभ्यो दद्यात्

" बलिं बलिभुजो यत्र प्रदत्तं नैव भुंजते । नैव तृप्ताः प्रयास्यंति पितरस्तस्य सानुगाः " ॥ इति **शंखलिखितस्मरणात्** । हस्तप्रक्षालने विशेषमाह **शातातपः**—

" विश्वदेवानिविष्टानां चरमं हस्तधावनम् । विसर्जनं च निर्दिष्टं तेषु रक्षा यतः स्थिता ॥

" दैवपूर्वं तु यो दद्याद्धस्तप्रक्षालनोदकम् । निराशाः पितरो यांति देवरक्षाविवर्जिताः " ॥ इति ।

विष्णुरपि (७३।२४-२५)-"उदङ्मुखेष्वाचमनमादौ दद्यात् । ततः प्राङ्मुखेषु ततः सुप्रोक्षितमिति श्राद्धदेशं प्रोक्ष्य दर्भपाणिः सर्वं कुर्यात्" ॥ इति । अस्यार्थ**श्चंद्रिकायामु**क्तः-पैतृकब्राह्मणेषु प्रथम-हस्तप्रक्षालनपूर्वकाचमनार्थमपो दत्वा पश्चाद्वैश्वदेविकब्राह्मणेषु दत्वा सुप्रोक्षितमिति मंत्रेण श्राद्ध-देशं प्रोक्ष्य दर्भपाणिः सर्वमुपरितनं कर्मजातं कुर्यादिति ।

हस्तप्रक्षालनानन्तरविधिः । अनंतरकर्तव्यमाह **अगस्त्यः**—"अथाचांतेषु चाचम्य वारि दद्यात्सकृत्सकृत् " ॥ इति । **मार्कंडेयः**—

" पितॄणां नामगोत्रेण जलं देयमनंतरम् । ब्राह्मणानां द्विजैर्वाच्यमिदमक्षय्यमस्त्विति " ॥

स्मृत्यंतरे—"रोचत इति वैश्वदेवान्वाचयित्वा पितॄन्स्वदितमिति वाचयेत् " ॥ इति । **मत्स्यः**—

" स्वस्तिवाचनकं दद्यादक्षय्योदकमेव च । सलिलं नामगोत्रेण दद्याच्छक्त्या च दक्षिणाम् ॥

" गोभूहिरण्यवासांसि नवानि शयनानिव । दद्याद्यदिष्टं विप्राणामात्मनः पितुरेव हि ॥

" वित्तशाठ्येन रहितः पितृभ्यः प्रीतिमाचरन्निति " ॥ इति । **जमदग्निः**—

"सलिलं नामगात्रेण दद्याच्छक्त्या च दक्षिणाम् । हिरण्यधनवासांसि हर्म्याणि शयनानि च " ॥ इति । **चंद्रिकायाम्**—"ब्राह्मणान्भोजयित्वा तु दद्याच्छक्त्या च दक्षिणम् ॥

" यद्यदिष्टतमं लोके यच्चास्य दयितं गृहे । तत्तद्गुणवते देयं तदेवाक्षय्यमिच्छता " ॥ इति । **पारस्करः**–"हिरण्यं विश्वेभ्यो देवेभ्यो रजतं पितृभ्यः अन्यच्च गोकृष्णाजिनादिकं यावच्छक्नुयात्

" एकपंक्त्युपविष्टानां विप्राणां श्राद्धकर्मणि । भक्ष्यभोज्यं समं देयं दक्षिणा त्वनुसारतः" ॥ इति । निमंत्रितब्राह्मणविद्यागुणतारतम्येनेत्यर्थः । अनिमंत्रितविप्रेभ्योऽपि दक्षिणादानमाह **बृहस्पतिः**—

" ज्ञातयो बांधवा निःस्वास्तथैवाथ च येऽपरे । प्रदद्याद्दक्षिणां तेषां सर्वेषामनुरूपतः " ॥ इति । **देवलः**—" आचांतेभ्यो द्विजेभ्यस्तु प्रयच्छेदथ दक्षिणाम् " ॥ इति । **स एव**—

" दक्षिणां पितृविप्रेभ्यो दद्यात्पूर्वं ततो द्वयोः । सर्वं कर्मापसव्येन दक्षिणादानवर्जितम् " ॥ इति ।

जमदग्निस्तु—" अपसव्यं तु तत्रापित्स्योऽपि भगवान्यमः " ॥ इति । अत्र व्यवस्था दर्शिता **माधवीये**–ब्राह्मणोद्देशेन दक्षिणादाने पितृपूर्वक्रमः । उपवीतं च पित्रुद्देशेन दक्षिणादानं प्राचीनावीतिना कार्यम् । तच्च वैश्वदेविकब्राह्मणपूर्वकमिति । **ब्रह्माण्डपुराणे**—

"श्राद्धभुग्दक्षिणां नेच्छेत् कर्ता दद्यात्तु दक्षिणाम् । तावुभौ पूर्णकर्माणौ श्राद्धभुङ् न तु दोषभाक् ॥

" श्राद्धभुक् श्राद्धमध्ये यो नालं मे दक्षिणेति च । तस्मिंस्तत्र प्रदातव्यं दत्ते तौ नरकालयौ ॥

" अदत्वा दक्षिणां श्राद्धे श्वो दास्यामीति यो वदेत् । दिने दिने भवेद्वृद्धिर्दक्षिणापरिमाणतः ॥

" तस्मादवश्यं दातव्यमदाता रौरवं व्रजेत् । श्राद्धभुक् श्राद्धकर्तारं सवृद्धिं दक्षिणां ततः ॥

" एकवारं त्रिवारं वा पृच्छेच्च दिनपञ्चकम् । ततः परं न पृच्छेत्तु कर्तारं हन्ति दक्षिणा ॥

" पुनः श्राद्धं चरेत्कर्ता षष्ठेऽह्न्यायुर्विवृद्धये । अथवायुष्यहोमं वा चरेत्प्रोक्तं महर्षिभिः ॥

" यत्किंचिद्दक्षिणाकाले स्वस्वशक्त्यनुसारतः । तदक्षयं भवेत्तृप्तिं ददाति स्वपितॄन् प्रति ॥

" लक्षं लक्षपतिर्दद्यात् दरिद्रस्तु वराटिकाम् । वित्तशाठ्यं न कुर्वीत श्राद्धकाले समाहितः ॥

" सत्यां संपदि लोभाद्यः श्राद्धं न कुरुते द्विजः । स विज्ञेयो नरपशुर्गार्दभीं योनिमाविशेत् ॥

" तस्य पङ्क्तौ न भोक्तव्यं भुक्त्वा चान्द्रायणं चरेत् " ॥ इति ।

अनंतरं कर्तव्यमाह **याज्ञवल्क्यः** (आ. २४४–२४९)—

" दत्वा तु दक्षिणां शक्त्या स्वधाकारमुदाहरेत् । वाच्यतामित्यनुज्ञातः प्रकृतेभ्यः स्वधोच्यताम् ॥

" ब्रूयुरस्तु स्वधेत्युक्ते भूमौ सिंचेत्ततो जलम् । विश्वेदेवाश्च प्रियंतां विप्रैश्चोक्ते इदं जपेत् ॥

---

१ क्ष–मत्स्यो भगवान्हि मेने ।

" दातारो नोभिवर्धंतां वेदाः संततिरेव च । श्रद्धा च नो मा व्यपगाद्बहु देयं च नोऽस्त्विति ॥
" इत्युक्त्वा च प्रिया वाचः प्रणिपत्य विसर्जयेत् । वाजे वाज इति प्रीतः पितृपूर्वं विसर्जयेत् ॥
" प्रदक्षिणमनुव्रज्य भुंजीत पितृसेवितम् । ब्रह्मचारी भवेत्तां तु रजनीं ब्राह्मणैः सह " ॥ इति ।

मत्स्यः—

" दक्षिणां दिशमाकांक्षन्पितॄन्याचेत मानवः । दातारो नोभिवर्धंतां नोभिदेयं च नोऽस्त्विति ॥
" अन्नं च नो बहु भवेदतिथींश्च लभेमहि । याचिताश्च नः संतु मा च याचिष्म कंचन ॥
" एवमस्त्विति तैर्वाच्यं मूर्ध्ना ग्राह्यं च तेन तत् । पश्चाद्विसर्जयेद्देवान् पूर्वं पैतामहान्द्विजान् " ॥ इति ।

षट्पिण्डदानविधिः । विप्रविसर्जनानंतरं पिंडदानमाह **आपस्तंबः** (८।२।९)—

" भुक्तवतोऽनुव्रज्य प्रदक्षिणीकृत्य द्वैधं दक्षिणाग्रान्दर्भान्संस्तीर्य तेषूत्तरैरपो दत्वोत्तरैर्दक्षिणापवर्गान्पिडान्दत्वा पूर्ववदुत्तरैरपो दत्वोत्तरैरुपस्थायोदपात्रेण त्रिः प्रसव्यं परिषिच्य न्युब्जपात्राण्युत्तरं यजुरनवानं त्र्यवरार्धमावर्त्तयित्वा प्रोक्ष्य पात्राणि द्वन्द्वमभ्युदाहृत्य सर्वतः समवदायोत्तरेण यजुषा शेषस्य ग्रासावरार्धं प्राश्नीयात् " । इति । भुक्तवतो व्रजतो ब्राह्मणान् यज्ञोपवीती आग्रहसीमांतमनुव्रज्य प्रदक्षिणीकरोति । अथ प्रत्येत्य प्राचीनावीती । पिंडप्रदानदेशे दक्षिणाग्रान्दर्भान्द्वेधा संस्तृणाति । तत्र पुरस्तात्पित्राद्यर्थं पश्चान्मात्राद्यर्थं ततस्तेषु मार्जयंतां मम पितर इत्यादिभिस्त्रिभिर्मार्जयंतां मम मातर इत्यादिभिश्च यथादर्भं दक्षिणापवर्गमपो दत्वा अनंतरमुत्तरैरेतत्ते ततासावित्यादिभिः षड्भिः षट्पिंडान् ददाति । अथ पूर्ववन्मार्जयंतामित्यादिभिरेवापो ददाति । अथोत्तरैर्यं च वोत्रेत्यादिभिः षड्भिर्मंत्रैर्यथालिंग पितॄन्मातॄश्च त्रिरुपतिष्ठते । तृप्यतेत्यनेन त्रिरावावृत्तेनोभयांस्तंत्रेण । तत उत्तरया पुत्रान्पौत्रानभितर्पयंतीरित्युभयेषां पिंडान्युगपदुदपात्रेण त्रिः प्रसव्यमविच्छिन्नं परिषिंचति । अनंतरं पात्राणि होमार्थानि च पिण्डार्थानि च न्युब्ज अधोबिलानि कृत्वा उत्तरं यजुः तृप्यत तृप्यतेत्याम्नान एव त्रिरभ्यस्तमनवानं अनुच्छ्वसं त्र्यवरार्ध्यं त्रिरभ्यावृत्तिरवमामात्रा यस्यावर्त्तनस्य तत्र्यवरार्घ्यं यथा भवति तथा आवर्त्तयति ततश्चावमयापि मात्रया तृप्यतेति नव कृत्वोभ्यसितव्यं भवति । एवमनवानं यावच्छक्यावर्त्य ततः पात्राणि न्यग्भूतानि प्रोक्ष्य द्वंद्वमभ्युदाहरति । अथ शेषस्यान्नस्य ग्रासावरार्धं सर्वतः सर्वेभ्योऽन्नभेदेभ्यः समवदाय उत्तरेण यजुषा प्राणे निविष्ट इत्यनेन प्राश्नीयात् । इदं प्राशनं भोजनेच्छायामसत्यामपि कार्यम् । कर्मांगत्वादिति । तात्पर्यदर्शनेऽस्यार्थोभिहितः ।

कात्यायनादीनां त्रिपिण्डादिदानविधिः ।

पिंडत्रयदानमवघ्राणं चाह **मनुः** (३।२१५–२१६, २१८)

" त्रींस्तु तस्माद्धविःशेषान् पिंडान्कृत्वा समाहितः । औदकेनैव विधिना निवपेद्दक्षिणामुखः ।
" न्युब्ज पिंडांस्ततस्तांस्तु प्रयतो विधिपूर्वकम् । तेषु दर्भेषु तं हस्तं निमृज्याल्लेपभागिनाम् ॥
"उदशेषं तु निनयेच्छनैः पिंडांतिकं पुनः । अवजिघ्रेच्च तान्पिंडान्यथान्यूनान्समाहितः" ॥ इति ।

आचमनात्पूर्वं पिंडत्रयदानमाह **याज्ञवल्क्यः** (आ. २४२)—

" सर्वमन्नमुपादाय सतिलं दक्षिणामुखः । उच्छिष्टसंनिधौ पिंडान्दद्याद्वि पितृयज्ञवत् ॥
" मातामहानामप्येवं दद्यादाचमनं ततः" ॥ इति ।

अत्र **विज्ञानेश्वरः** (पृ. ७० पं. १३)—पिंडपितृयज्ञकल्पातिदेशेन चरुश्रपणसद्भावे अग्नौकरणाशिष्टचरुशेषेण सह सर्वमन्नमुपादायाग्निसंनिधौ पिंडान्दद्यात् । तदभावे ब्राह्मणार्थसाधितमन्नमुपादाय तिलमिश्रं दक्षिणामुख उच्छिष्टसंनिधौ पिंडपितृयज्ञकल्पेन पिंडान् दद्यात् । मातामहानामपि तच्छ्राद्धे वैश्वदेवावाहनादि पिंडप्रदानपर्यंत कर्मैवमेव कर्त्तव्यम् । अनंतरं ब्राह्मणानामप्याचमनं ददाति । **आश्वलायनः**—

"भुक्तवत्स्वाचांतेषु पिंडान्निदध्यादनाचांतेष्वित्येके" ॥ इति **मनुस्तु** (३।२६१)—

"पिंडनिर्वापणं केचित्पुरस्तादेव कुर्वते" इति । **चंद्रिकामाधवीययोरिदं** व्याख्यातम्—भोजनात्पुरस्ताद्ब्राह्मणानामर्चनानंतरं अग्नौकरणानतरं वा पिंडनिर्वापणं केचिदिच्छंति । केचिदिति वचनादपरे ब्राह्मणभोजनानंतरमाचमनादर्वाग्वा ब्राह्मणविसर्जनात् पश्चाद्वा पिंडनिर्वापणं कुर्वत इत्यवगम्यते इति । अत्र यथास्वशाखं व्यवस्था । तथा च **स्मृत्यंतरम्**—

"मुनिभिर्भिन्नकालेषु पिंडदानं तु यत्स्मृतम् । तत्तु शाखामतं यत्र तत्र कुर्याद्विचक्षणः" ॥ इति ।

लौगाक्षिस्तु—"अप्रशस्तेषु श्राद्धेषु भोजनात्पूर्वं पिंडानिर्वापणं सपिंडीकरणादिषु प्रशस्तश्राद्धेषु पश्चादेवोकल्पयेत्" ॥ इति ।

अप्रशस्तेषु सपिंडीकरणात्प्राग्विहितेषु श्राद्धेषु भोजनात्पूर्वं पिंडनिर्वापणं सपिंडीकरणादिषु प्रशस्तश्राद्धेषु पश्चादेव पिंडनिर्वापणमित्यर्थः । एतच्च येषां स्वगृह्येषु पिंडदानकालो नोक्तस्तद्विषयमित्याहुः । **पराशरः**—

"सुतृप्तैस्तैरनुज्ञातः सर्वेणान्नेन भूतले । सतिलेन ततः पिंडान् सम्यक् कृत्वा समाहितः ॥

"पितृतीर्थेन सलिलं तत्र सिंचेद्यथाक्रमम् । दक्षिणाग्रेषु दर्भेषु पुष्पधूपादिपूजितम् ॥

"स्वपित्रे प्रथमं पिंडं दद्यादुच्छिष्टसंनिधौ । पितामहाय चैवान्यत्तत्पित्रे च तथापरम् ॥

"दर्भमूले लेपभुजः प्रीणयेल्लेपकर्षणम्" ॥ इति **स्मृत्यंतरे**—

"उपमूलान्समास्तीर्य दर्भानुच्छिष्टसंनिधौ । कृत्वावनेजनं दद्यात् त्रींस्त्रीन्पिंडान्यथाक्रमम्" ॥ इति ।

भारतेऽपि—

"सतिलेन ततोऽन्नेन पिंडान्स्त्रीनेव पुत्रकः । पितॄनुद्दिश्य दर्भेषु दद्यादुच्छिष्टसंनिधौ" ॥ इति ।

देवलः—

"ततः सर्वाशनं पात्रे गृहीत्वा विधिवत्स्वयम् । तेषामुच्छेषणस्थाने तेन पात्रेण निक्षिपेत् ॥

"पात्राणां खड्गपात्रेण पिंडदानं विधीयते । राजतौदुंबराभ्यां वा हस्तेनैवाथवा पुनः ॥

"मधुसर्पिस्तिलयुतांस्त्रीन्पिंडान् निर्वपेद् बुधः । जानु कृत्वा तथा सव्यं भूमौ पितृपरायणः" ॥ इति ।

यथास्वगृह्यं पिंडसंख्या अवगंतव्या । आपस्तंबसूत्रिणां तु मासिकश्राद्धकल्पनानुष्ठातॄणां पिंडषट्कं पिण्डपितृयज्ञकल्पेनानुष्ठातॄणां पिंडत्रयमिति विवेकः ।

ननु उच्छिष्टसंनिधिरशुचिदेशो भवति तत्र कथं पिंडदानं विधीयत इत्याशंक्याहात्रिः—

"पितॄणामासवस्थानाद्यतस्त्रिष्वरत्निषु । उच्छिष्टसन्निधानं तन्नोच्छिष्टासनसंनिधौ" ॥ इति ।

त्रिष्वरत्निष्वित्युच्छिष्टसंपर्करहितासन्नदेशोपलक्षणार्थम् । अत एव **जातुकर्णिः**—

"व्याममात्रं समुत्सृज्य पिंडांस्तत्र प्रदापयेत्" इति ॥

भास्करोऽपि—" पात्राणां बाहुमात्रे वा पिंडदानं विधीयते " इति ॥ **व्यासोऽपि**—

" अरत्निमात्रमुत्सृज्य पिंडांस्तत्र प्रदापयेत् । यत्रोपस्पर्शनं वापि प्राप्नोति न हि पिंडदः "॥ इति । **व्याघ्रः**—" गंधपुष्पाणि धूपं च दीपं चैव निवेदयेत् ॥

" यत्किंचित्पच्यते गेहे भक्ष्यं भोज्यमगर्हितम् । अनिवेद्य न भोक्तव्यं पिंडमूले कथंचन " ॥ इति ।

द्वितीयावनेजनमध्यमपिण्डप्राशनादिविधिः । अनंतरकृत्यमाह **बृहस्पतिः** -

" समभ्यर्च्योदपात्रं तु तेषामुपरि निक्षिपेत् " इति । **विष्णुः**—" पिंडानां निर्वपणं कृत्वा अर्घ्यपुष्पधूपानुपलेपनान्नादिभक्ष्याणि निवेदयेदुपपात्रमासिंचेत् " इति । एतच्च द्वितीयावनेजनं पिंडपात्रप्रक्षालनोदकेन कार्यम् । " पात्रनिर्णेजनेनैव पुनः प्रत्यवनेजयेत्" ॥ इति **स्मरणात्** । पुत्रार्थी मध्यमं पिंडं पत्न्यै दद्यात् । तथा च **वायुपुराणे**—"पत्न्यै प्रजार्थं दद्यात्तु मध्यमं मंत्रपूर्वकम् " इति । मध्यमं पिंडमित्यर्थः । मंत्रस्तु **मत्स्येन** दर्शितः—

" आधत्त पितरो गर्भमत्र संतानवर्धनम् " इति । **मनुः** (३।२६२–२६३)—

" पतिव्रता धर्मपत्नी पितृपूजनतत्परा । मध्यमं तु ततः पिंडमद्यात्सम्यक्सुतार्थिनी ॥

" आयुष्मंतं सुतं विंदेद्यशोमेधासमन्वितम् । धनवंतं प्रजावंतं धार्मिकं सात्विकं तथा" ॥ इति । **यमः**—

" यत्तथा मध्यमं पिंडं पत्नी प्राश्नाति वाग्यता । पुत्रकामा सपुत्रां तां कुर्वंति प्रपितामहाः" ॥ इति । **शंखलिखितौ**—" पत्नी मध्यमं पिंडमश्नीयादार्त्तवस्नाता " इति । अगृहीतगर्भा अत्रार्तवस्नातेत्युच्यते । ततश्च गृहीतगर्भा पत्नी नाश्नीयात् ।

अत एवैवंविधे विषये मध्यमपिंडस्य प्रतिपत्त्यन्ततरमाह **बृहस्पतिः**—

" अन्यदेशगता पत्नी गर्भिणी रोगिणी तथा । तदा तं जीर्णवृषभः छागो वा भोक्तुमर्हति" ॥ इति । जीर्णो गतरेताः । अत एव **वायुपुराणे**—

" गतवीर्यश्च यो ह्यश्वोऽनड्वांश्चैव तथाविधः । तयोः पिंडः प्रदातव्यो यथा वीर्यं न रोहति "॥ इति । प्रतिपत्त्यंतरमाहापस्तंबः—

" यदि पत्नी विदेशस्था उच्छिष्टा यदि वा मृता । दुरात्माऽननुकूला च तस्य पिंडस्य का गतिः ॥

"आकाशं गमयेत्पिंडं जलस्थो दक्षिणामुखः । पितॄणां स्थानमाकाशं दक्षिणा दिक् तथैव च"॥ इति । यत्तु **देवलेनोक्तम्**—

" ततः कर्मणि निर्वृत्ते पिंडांश्च तदनंतरम् । ब्राह्मणोऽग्निरजो गौर्वा भक्षयेदप्सु वा क्षिपेत् " ॥ इति । तत्पुत्रार्थित्वाभावविषयम् । तत्सद्भावे मध्यमपिंडव्यतिरिक्तपिंडांतरविषयं च । तीर्थश्राद्धे पिंडानामप्स्वेव प्रक्षेपः । तदुक्तं **विष्णुधर्मोत्तरे**—

"तीर्थश्राद्धे सदा पिंडान्क्षिपेत्तीर्थे समाहितः । दक्षिणाभिमुखो भूत्वा पित्र्या दिक्सा प्रकीर्तिता"॥ इति ।

उच्छिष्टसंमार्जनादि। अनंतरं उच्छिष्टदेशं संमार्जयेत्। अत एव **याज्ञवल्क्यः** (आ. २२५)—
"पिंडांस्तु गोऽजविप्रेभ्यो दद्यादग्नौ जलेऽपि वा। प्रक्षिपेत्सत्सु विप्रेषु द्विजोच्छिष्टं न मार्जयेत्"॥ इति। अयमर्थः। सत्सु विप्रेषु विप्रविसर्जनात्प्रागुच्छिष्टं न मार्जयेत्। किंतु तेषु विसर्जितेषु पिंडप्रतिपत्तौ च कृतायां शोधयेदिति। यत्तु **व्यासेनोक्तम्**—
"उच्छिष्टं न प्रमृज्यात्तु यावन्नास्तमितो रविः" इति यच्च **वसिष्ठेनोक्तम्**—
"श्राद्धे नोद्वासनीयानि उच्छिष्टान्या दिनक्षयात्। श्च्योतंते वै स्वधाकारास्तान् पिबंत्यकृतोदकाः"॥ इति तद्गृहासंभवविषयम्। अत एव **प्रचेताः**—
"भुक्तवत्सु ततो भुंक्ते कव्यशेषं स्वगोत्रजैः। आ सायं श्राद्धशालायां द्विजोच्छिष्टं न मार्जयेत्"॥ इति। बंधुभिः सह पितृसेवितशेषभोजनार्थं गृहांतरसद्भावे आसायमुच्छिष्टदेशशोधनं न कार्यम्। गृहांतराभावे ब्राह्मणेषु विसर्जितेषु पिंडप्रतिपत्तौ च कृतायां कर्तव्यमित्युक्तं भवति।

पात्रचालनादि। पात्रचालनमात्रं सत्सु विप्रेषु स्वस्तिवाचनात्पूर्वमवश्यं कर्तव्यम्। अन्यथा दोषस्मरणात्। तथा च **नारायणः**—
"अचालयित्वा तत्पात्रं स्वस्ति कुर्वंति ये द्विजाः। निराशाः पितरस्तेषां शप्त्वा यांति यथागतम्"॥ इति। **बृहस्पतिरपि**—
"भाजनेषु च तिष्ठत्सु स्वस्ति कुर्वंति ये द्विजाः। तदन्नमसुरैर्भुक्तं निराशैः पितृभिर्गतैः"॥ इति। पात्रचालने विशेषमाह **जातुकर्णिः**—
"पात्राणि चालयेच्छ्राद्धे स्वयं शिष्योऽथ वा सुतः। न स्त्रीभिर्न च बालेन नासजात्या कथंचन"॥ इति। भुक्तिपात्राणि निखनेत्
"भुक्तिपात्रं समुद्धृत्य निखनेत्तु प्रयत्नतः। अलब्धप्रेतकार्येषु तस्य त्यागो विधीयते"॥ इति **स्मरणात्**। यत्नत इति यथा श्वादिभिः स्पर्शाभावः तथा निखनेदित्यर्थः। श्राद्धे तूच्छिष्टपात्राणि गर्ते निक्षिप्य गोपयेत्। मृद्भिराच्छादयेत्। श्वादि "यथा न स्पृशते तथा" इति **स्मरणात्**। न शूद्राय श्राद्धशेषं दद्यात्—
"श्राद्धं दत्वा य उच्छिष्टं वृषलाय प्रयच्छति। पितरस्तय षण्मासं भवंत्युच्छिष्टभोजनाः"॥ इति **स्मृतेः**। **स्मृत्यंतरेऽपि**—
"भुक्तिपात्रस्थमुच्छिष्टं बालेभ्यो यः प्रयच्छति। भृत्येभ्यो वृषलेभ्यो वा स श्राद्धं हंत्यसंशयम्"॥ इति।
"भुक्तिपात्रस्थमुच्छिष्टं पशुभ्यो यः प्रयच्छति। अजेभ्यो महिषीभ्यो वा स श्राद्धं हन्त्यसंशयम्"॥ इति। **आश्वलायनः**—
"न शूद्रं भोजयेत्तस्मिन् गृहे यत्नेन तद्दिने। श्राद्धशेषं न शूद्रेभ्यो ददाति च खलेष्वपि"॥ श्राद्धदिने नित्यश्राद्धमधिकृत्यं **मार्कंडेयेनोक्तम्**—'पृथक्पाकेन नेत्यन्ये' इति। पृथक्पाकेन नित्यश्राद्धं कार्यं नेत्यन्ये न पृथक्पाकेन कार्यं किंतु श्राद्धशेषेणैव कार्यमित्यन्ये मन्यन्त इत्यर्थः। एतच्च नित्यश्राद्धं श्राद्धांतरे कृते सत्यनियतम्। यदाह **स एव**—
"नित्यक्रियां पितॄणां च केचिदिच्छंति मानवाः। न पितॄणां तथैवान्ये शेषं पूर्ववदाचरेत्"॥ इति। पितॄणां नित्यक्रियां नित्यश्राद्धं केचिदिच्छंति। अन्ये नेच्छंति। शेषे वैश्वदेवादिकं पूर्ववदाचरेत् नियमेनैव कुर्यादित्यर्थः।

अत्र **पैठीनसिः**—

"श्राद्धं निर्वर्त्य विधिवद्वैश्वदेवादिकं ततः । कुर्याद्भिक्षां ततो दद्यात् हन्तकारादिकं तथा" ॥ इति ।
ततः पितृपाकसमुद्धृतादन्नादित्यर्थः । **आश्वलायनः**—

" दानाध्ययनदेवार्चाजपहोमादिकान् क्रमात् । न कुर्याच्छ्राद्धदिवसे प्राग्विप्राणां विसर्जनात् ॥
" श्राद्धेऽह्नि भोजयेद्दास्तौ न बालानपि यत्नतः । प्राक्पिण्डदानाद्गन्धाद्यैर्नालंकुर्यात् स्वविग्रहम्" ॥

यत्तु **पैठीनसिवचनम्**—

" पितृपाकात्समुद्धृत्य वैश्वदेवं करोति यः । आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठते " ॥ इति तच्छ्राद्धस्यादौ पृथक्पाकादेव वैश्वदेवकरणं न पितृपाकादित्येवंपरम् । अत एव श्राद्धे भोजनात्पूर्वं पितृपाकाद्वैश्वदेवकरणे दोषोऽभिहितः **पुराणे**

" प्रातिवासरिको होमः श्राद्धादौ क्रियते यदि । देवा हव्यं न गृण्हंति कव्यं च पितरस्तथा" ॥ इति ।

आनुशासनिके—

" यदा श्राद्धं पितृभ्यश्च दातुमिच्छति मानवः । तदा पश्चात्प्रकुर्वीत निर्वृत्ते श्राद्धकर्मणि " ॥ इति
"ततोऽन्नेनावशिष्टेन पूजयेदतिथीनपि" । ब्राह्मणभोजनात्पूर्वं वैश्वदेवकरणं च **स्मृत्यंतरे**ऽभिहितम्—

" वैश्वदेवाहुतीरग्नावर्वाग्ब्राह्मणभोजनात् । जुहुयाद्भूतयज्ञादि श्राद्धं कृत्वा ततः स्मृतम् " ॥ इति ।
एतच्चाहिताग्निविषयम् । एवं च श्राद्धादौ अग्नौकरणानंतरं वा पृथक्पाकादेव वैश्वदेवहोमः । निर्वृत्ते तु श्राद्धे पितृपाकात् इति **चंद्रिकादौ** निर्णीतम् । यत्तु **लोकाक्षिणोक्तम्**—

" पित्रर्थं निर्वपेत्पाकं वैश्वदेवार्थमेव च । वैश्वदेवं न पित्रर्थं न दार्शं वैश्वदेविकम् " ॥ इति ।
अस्यार्थः—पैतृकब्राह्मणभोजनार्थं वैश्वदेविकब्राह्मणभोजनार्थं च पृथक्पाकं कुर्यात् ।
दार्शममावास्याश्राद्धार्थं निरुप्तमन्नं कृतेऽपि श्राद्धेन वैश्वदेवहोमार्थं भवतीति । अत्र न दार्शं वैश्वदेविकमित्येतदाहिताग्निदर्शश्राद्धविषयं तस्य दर्शश्राद्धात्प्रागेव वैश्वदेवविधानेन श्राद्धांते श्राद्धशिष्टेन वैश्वदेवायोगात् । अग्निमतां दर्शश्राद्धात्प्रागेव वैश्वदेवविधिश्च **तेनैव** दर्शितः—

" पक्षांतं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः । पिंडयज्ञं ततः कुर्यात्ततोऽन्वाहार्यकं बुधः" ॥ इति ।
पक्षांतकर्माग्न्यन्वाधानं अन्वाहार्यकं अमावास्याश्राद्धमित्यर्थः । एवं च साग्निकामावास्याश्राद्धे वैश्वदेवार्थं पृथगेव पाकः इति **चंद्रिकायाम्** । अत्र यच्चान्यद्वक्तव्यं **तद्वैश्वदेवप्रकरणे**ऽभिहितम् ।

पितृशेषभोजनम् । वैश्वदेवार्थं पृथक्पाके कृतेऽपि पितृपाकशेषादेव भोजनम्

" प्रदक्षिणमनुव्रज्य भुंजीत पितृसेवितम् " (आ. २४९) इति **याज्ञवल्क्य**स्मरणात् ।
अभोजने दोषमाह **देवलः**—

" श्राद्धं कृत्वा तु यो विप्रो न भुंक्ते तु कदाचन । देवा हव्यं न गृण्हंति कव्यानि पितरस्तथा " ॥ इति ।
एतच्च पितृसेवितभोजनं सर्वविधात्पितृसेवितादुपादाय कर्त्तव्यम् । तथा च **मत्स्यः**—

" ततश्च वैश्वदेवांते सभृत्यसुतबांधवः । भुंजीतातिथिसंयुक्तः सर्वं पितृनिषेवितम् " ॥ इति ।
अतिथ्यादीनामपि शेषभोजने न दोष इति **चन्द्रिकादा**वनेकवचनपुरःसरं प्रतिपादितम् ।
"पितृशेषं तु यो भुङ्क्ते सोऽन्यज्ञातिकुलोद्भवान् । प्रदाय कर्त्रे स्वं पुण्यं पापमादाय गच्छति" ॥ इति ।
यथा शिष्टाचारस्तथा कर्तव्यम् । अतिथ्यादीनां वैश्वदेवशिष्टान्नं व्यञ्जनं च पितृशेषमेव दातव्यम् ।
" फलशाकव्यञ्जनानि पयो दधि घृतं मधु । पक्वापक्वानि यानि स्युस्तेषां शेषो न विद्यते " ॥

यदापि क्षुन्न विद्यते तदापि शेषभोजनस्यावश्यकत्वात्सर्वमेव पितृसेवितं लेशतो भोक्तव्यम्। अत एवापस्तंबः-(२।७।१७।१६) " सर्वतः समवदायोत्तरेण यजुषा शेषस्य ग्रासवराध्यं प्राश्नीयात् " ॥ इति। असति तु पितृशेषे पाकांतरं कृत्वा भोक्तव्यम् " भुंजीतैव कृते श्राद्धे पुत्री नोपवसेद्गृही[१] " ॥ इति। स्मरणात्। अत एवैकादश्यादौ भोजनप्रत्याम्नायः स्मर्यते—

" उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत्। उपवासं तदा कुर्यादाघ्राय पितृसेवितम् " ॥ इति। एतदाघ्राणं च कर्तृव्यतिरिक्तविषयम्।

" कर्तृभ्योन्यैर्न भोक्तव्यं श्राद्धे प्राप्ते हरेर्दिने। पितृशेषं तथाघ्राय उपवासफलाप्तये " ॥ इति।

" कर्ता नोपवसेच्छ्राद्धे पित्र्येऽप्येकादशीदिने। तयोरप्याधिकं ब्रूयुः पितृशेषं महर्षयः " ॥ इति।

एकादशीव्यतिरिक्तदिने ज्ञातिभिरपि अवश्यं पितृशेषं भोक्तव्यमित्याह—

" पितृशेषं न यो भुङ्क्ते को वा ज्ञातिकुलोद्भवः। पितृद्रोही स विज्ञेयः पुत्रपौत्रविना कृतः ॥
" अकिंचनोऽपि कर्ता स्यात् स्वान्नमादाय तद्गृहे। भोक्तव्यमेव सत्पुंभिः पुत्रपौत्रादिवृद्धये" ॥ इति।
" पितृशेषं तु यो भुङ्क्ते कर्ता तु ज्ञातिभिर्विना। यमस्य शमलं भुङ्क्ते दाता प्राशयते पितॄन् " ॥

पितृसेवितभोजननियमोऽनुज्ञापेक्षा एव। अत एव शातातपः—

" शेषमन्नमनुज्ञातं भुंजीत तदनंतरम्। इष्टैः श्राद्धं तु विधिवद्बुद्धिमान्सुसमाहितः " ॥ इति।

निगमोऽपि-" अनुज्ञातो गृह्यान् बालवृद्धांश्च परितोष्य भुंजीत "।

श्राद्धदिने दातृभोक्तृनियमाः। दातृभोक्तृनियममाह बृहस्पतिः—

"तां निशां ब्रह्मचारी स्याच्छ्राद्धकृच्छ्राधिकैः सह। अन्यथा वर्त्तमानौ तु स्यातां निरयगामिनौ"॥इति।

मत्स्यः—

" पुनर्भोजनमध्वानं यानमायासमैथुने। श्राद्धकृच्छ्राद्धभुक् चैव सर्वमेतद्विवर्जयेत् ॥
" स्वाध्यायं कलहं चैव दिवा स्वापं च स्वेच्छया " इति।

यमः-" पुनर्भोजनमध्वानं भाराध्ययनसंगमम्। संध्या प्रतिग्रहं होमं श्राद्धभुक् त्वष्ट वर्जयेत् ॥
" दंतधावनतांबूलं क्षौराभ्यंगमभोजनम्। रत्यौषधपरान्नानि श्राद्धकर्त्ता विवर्जयेत् " ॥ इति।

संध्याहोमयोः प्रतिषेधस्त्वकृतप्रायश्चित्तस्य कृते तु प्रायश्चित्ते कुर्यात्। अत एव भविष्यत्पुराणम्-

" दशकृत्वः पिबेच्चापो गायत्र्या श्राद्धभुक्द्विजः। ततः संध्यामुपासीत जपेच्च जुहुयादपि " ॥ इति।

जुहुयादित्येतदन्यस्य होतुरलाभे द्रष्टव्यम्। तल्लाभे तु तेनैव हावयेत्। यदाह कात्यायनः—

" सूतके च प्रवासे च अशक्तौ श्राद्धभोजने। एवमादिनिमित्तेषु हावयेद्वा नियोजयेत् " ॥ इति।

हावयेद्वेति यद्गोभिलादिभिरुक्तं तदेवमादिनिमित्तेषु योजयेदित्यर्थः।

यथाशक्ति श्राद्धानुष्ठानम्। यथाशक्ति श्राद्धानुष्ठानमाह शातातपः—

" यथाकथंचिन्नित्यं यत्कुर्यादिंदुक्षयादिषु। पात्रद्रव्यादिसंपत्सु निन्ये काम्यफलं लभेत् " ॥ इति।

अमावास्यादिषु चोदितं श्राद्धं पात्रद्रव्यादिसंपत्त्यभावेऽपि यथाशक्ति कुर्यादिति पूर्वार्धस्यार्थः।

देवलः—

" पात्रालाभेऽपरं कृत्वा पितृयज्ञविधिं नरः। निर्दिश्याप्यन्नमुद्धृत्य यत्र पात्रं ततो गतिः ॥
" पात्राभावे क्षिपेदग्नौ गवे दद्यादथाप्सु वा। न तु प्राप्तस्य लोपोऽस्ति पैतृकस्य विशेषतः" ॥ इति।

---

१ ग–द्वेतिः, क्ष–द्वे ति।

अस्यार्थः–"पात्राभावे अनुकल्पतयाऽप्युक्तपात्रस्याप्यलाभे पितृयज्ञविधिं अग्नौकरणं कृत्वा अन्नं भाजने उद्धृत्य निर्दिश्य चतुर्थ्यंतशब्देन देवान्पितृंश्चोद्दिश्य उद्धृतमन्नं त्यक्त्वा अदूरे विप्रोऽस्ति चेत्तत्र नीत्वा तस्मै तदन्नं समर्पयेत् । दूरस्थे तु पात्रे निर्दिष्टमन्नमग्नौ क्षिपेत् । अथवा गवे भक्षणार्थं प्रयच्छेन्नद्याचुदके वा क्षिपेत् । न तु पात्राभावमात्रेण कर्मणो लोपः कार्यः इति"।

संकल्पश्राद्धविधिः । विस्मृतपार्वणानुष्ठानासंभवे तु **व्यासेनोक्तम्**—

"त्यक्ताग्नेः पार्वणं नैव नैकोद्दिष्टं सपिंडनम् । अत्यक्ताग्नेस्तु पिंडोक्तिस्तस्मात्संकल्प्य भोजयेत्" ॥ इति ।

त्यक्ताग्नेः अविधानेनोत्सृष्टाग्नेः पार्वणैकोद्दिष्टसपिंडीकरणात्मकश्राद्धकर्मणि नैवाधिकारः । पिंडोक्तिः श्राद्धं कर्त्तव्यमित्युक्तिः । अत्यक्ताग्नेरेव श्राद्धाधिकारः इति यावत् । तस्मादत्यक्ताग्निरेवाशक्तौ संकल्पविधानेन श्राद्धं कुर्यादित्यर्थः । तत्स्वरूपमधस्तात्प्रतिपादितम् ।

आमश्राद्धविधिः–पक्वद्रव्यसंपादनासंभवे तु **सुमंतुः**—

"पाकाभावेऽधिकारः स्याद्विप्रादीनां नराधिप । अपत्नीनां महाबाहो विदेशगमनादिभिः ॥
"सदा चैव तु शूद्राणामामश्राद्धं विदुर्बुधाः । आत्मनो देशकालाभ्यां विप्लवे समुपागते ॥
"आपद्यनग्नौ तीर्थे च प्रवासे पुत्रजन्मनि । चंद्रसूर्यग्रहे चैव दद्यादामं विशेषतः" ॥ इति ।

विप्रादीनां त्रैवर्णिकानां पत्नीरहितानां विदेशगमनादिभिश्च कारणैः पाकसंपादनासंभवे आमश्राद्धे अधिकारः स्यात् । चंद्रसूर्यग्रहेऽपि यस्य पाकासंभवः भोक्तुर्ब्राह्मणस्य वा अलाभः स आमं दद्यादित्यर्थः । **उशनाः**—

"अपत्नीकः प्रवासी च यस्य भार्या रजस्वला । सिद्धान्नेन न कुर्वीत आमं तस्य विधीयते" ॥ इति ।

सिद्धान्नेन लब्धक्रीतादिपक्वान्नेन न कुर्वीतेति **चंद्रिकायां** व्याख्यातम् । **जमदग्निः**—

"न भवेद्यस्य सामग्री दारा वा गृहमेव च । आमश्राद्धं प्रकुर्वीत वृद्धो बालश्च यो भवेत् ।
"यावत्स्यान्नाग्निसंयुक्त उत्सन्नाग्निरथापि वा । आमश्राद्धं सदा कुर्याद्धस्तेऽग्नौकरणं भवेत्" ॥ इति ।

हारीतः—

"श्राद्धविघ्ने द्विजातीनामामश्राद्धं प्रकीर्तितम् । अमावास्यादिनियतं माससंवत्सरादृते" ॥ इति ।

अनेन मासिकमाब्दिकं च श्राद्धमवश्यं पक्वेन कार्यमित्युक्तं भवति । एतच्च प्रतिपादितमधस्तात् । यत्तु **जमदग्निनोक्तम्**—

"आब्दिकं श्रद्धया श्राद्धं श्राद्धकाले यथाविधि । पक्वेन वा शृतेनापि नूनं कुर्यात्सुतः पितुः" ॥ इति

तच्छ्रद्धयावश्यं कार्यमित्येवंपरम् । अन्यथा

"माससंवत्सरादृते न तत्कुर्यान्मृतेऽहनि । आपद्यपि च नामेन तन्मासि हरिवासरे—
"कृष्णा इंदुक्षये वापि कुर्याद्न्नेन वार्षिकम्" ॥ इत्यादि **बहुस्मृतिविरोधप्रसंगः** ।

आमश्राद्धे विशेषमाह **व्यासः**—

"चतुर्थस्यैव पाथेयं सपिंडीकरणात्परम् । आमेनैव तु कर्त्तव्यं पुनः श्राद्धं न सोऽर्हति" ॥
"आमं ददतु कौंतेय दद्यादन्नं चतुर्गुणम् । सिद्धान्ने तु विधिर्यः स्यादामश्राद्धेऽप्यसौ विधिः ॥
"आवाहनादिसर्वः स्यात्पिंडदानं च भारत । दद्याद्यच्च द्विजातिभ्यः शृतं वाऽशृतमेव वा ॥
"तेनाग्नौकरणं कुर्यात्पिंडांस्तेनैव निर्वपेत् ।
"आमश्राद्धं यदा कुर्याद्विधिज्ञः श्राद्धदस्तदा । हस्तेऽग्नौ करणं कुर्याद् ब्राह्मणस्य विधानतः" ॥ इति ।

---

१ गं–वन्ही ।

षट्त्रिंशन्मते तु—
" आमश्राद्धं यदा कुर्यात्पिंडदानं कथं भवेत्। पिंडपाकात्समुद्धृत्य सक्तुभिः पायसेन वा॥" इति।
हिरण्यश्राद्धादिविधिः। " आमश्राद्धासंभवे तु हेमश्राद्धमाह **व्यासः**—
" द्रव्याभावे द्विजाभावे प्रवासे पुत्रजन्मनि। हेमश्राद्धं प्रकुर्वीत यस्य भार्या रजस्वला "॥ इति।
अत्राप्यामश्राद्धोक्ता विशेषा यथासंभवमनुसंधेयाः। हेमद्रव्यालाभेऽप्युक्तं **स्मृत्यंतरे**—
" तृणानि वा गवे दद्यात्पिंडान्वापि च निर्वपेत्। तिलोदकैः पितॄन्वापि तर्पयेत्स्नानपूर्वकम्॥
" अग्निना वा दहेत्कक्षं श्राद्धकाले समागते। तस्मिंश्चोपवसेदह्नि जपेद्वा श्राद्धसंयुतान्॥
" अंगानि पितृयज्ञस्य यदा कर्तुमशक्नुयात्। स तदा वाचयेद्विप्रान् सकला सिद्धिरस्त्विति "॥
एवमनुकल्पानुष्ठानेऽपि शाठ्याभावे सति मुख्यकल्पानुष्ठानफलं भवति
"श्राद्धानुकल्पं यः कुर्याज्जात्यवस्थाद्यपेक्षया। श्राद्धांगांशेऽप्यवाप्नोति मुख्यश्राद्धफलं नरः"॥
इति **स्मरणात्**। श्राद्धांगांशे यथाशक्ति कतिपयांगानुष्ठानेऽपि कृत इत्यर्थः।
श्राद्धप्रशंसा। श्राद्धं प्रशंसति **सुमंतुः**—
" श्राद्धात्परतरं नान्यच्छ्रेयस्करमुदाहृतम्। तस्मात्सर्वप्रयत्नेन श्राद्धं कुर्याद्विचक्षणः "॥ इति
देवलः—
" अरोगः प्रकृतिस्थश्च चिरायुः पुत्रपौत्रवान्। अर्थवानर्थकामी च श्राद्धकामो भवेदिह॥
" परत्र च परां तुष्टिं लोकांश्च विविधाञ्छुभान्। श्राद्धकृत्समवाप्नोति यशश्च विपुलं नरः "॥ इति
यमोऽपि—
" ये यजंति पितॄन्देवान्ब्राह्मणान्सहुताशनान्। सर्वभूतान्तरात्मानं विष्णुमेव यजंति ते॥
"आयुः पुत्रान्पशूस्वर्गं कीर्तिं पुष्टिं बलं श्रियम्। पशून्सुखं धनं धान्यं प्राप्नुयात्पितृपूजनात्"॥ इति।
बृहस्पतिः—
" य एवं वेत्ति मतिमांस्तस्य श्राद्धफलं भवेत्। उपदेष्टाऽनुमंता च लोके तुल्यफलौ स्मृतौ "॥
हारीतोऽपि—
" इमं श्राद्धविधिं पुण्यं कुर्याद्वाऽपि पठेत्तु यः। सर्वकामैः स मृध्नोति अमृतत्वं च गच्छति "॥ इति।
अकरणेऽपि दोष **स्तेनैव** दर्शितः—
"न तत्र वीरा जायंते नारोगा न शतायुषः। न च श्रेयोऽधिगच्छंति यत्र श्राद्धं विवर्जितम्"॥ इति।
आदित्यपुराणेऽपि—
" वसंति पितरश्चेति कृत्वा मनसि यो नरः। श्राद्धं न कुरुते तत्र तस्य रक्तं पिबंति ते "॥
मार्कंडेयः—
" अन्यायोपार्जितद्रव्यैर्यच्छ्राद्धं क्रियते नरैः। तृप्यंति तेन चंडालाः पुल्कसाद्याश्च योनयः "॥इति।
ननु प्रातिस्विकशुभाशुभकर्मवशेन स्वर्गनरकादिगतानां दूरस्थकव्यभोक्तृत्वसामर्थ्यरहितानां मनुष्याणां पुत्रादिभिर्दत्तैरन्नपानादिभिस्तृप्त्यसंभवात् संभवेऽपि स्वयमात्मनामप्यनीशानाः कथं स्वर्गादिफलं प्रयच्छंतीत्यत्राह। **याज्ञवल्क्यः** (आ. २६९–२७०)—
" वसुरुद्रादितिसुताः पितरं श्राद्धदेवताः। प्रीणयंति मनुष्याणां पितॄन् श्राद्धेन तर्पिताः
"आयुः प्रज्ञां धनं धान्यं स्वर्गं मोक्षं सुखानि च। प्रयच्छंति तथा राज्यं प्रीता नृणां पितामहाः"॥इति

१ कखग- गृह.

अत्र विज्ञानेश्वरः— न ह्यत्र देवदत्तादय एव श्राद्धे कर्मणि संप्रदानभूताः पित्रादिशब्दै-रुच्यंते । किंतु अधिष्ठातृवस्वादिदेवतासहिता एव यथा देवदत्तादिशब्दैर्न शरीरमात्रं नाप्यात्म-मात्रं किंतु शरीरविशिष्ट आत्मान उच्यंते एवमधिष्ठातृदेवतासहिता एव देवदत्तादयः पित्रादि-शब्दैरुच्यंते । अतश्च अधिष्ठातृदेवतावस्वादयः पुत्रादिभिर्दत्तान्नपानादितुष्टाः संतस्तानपि देवदत्तादींस्तर्पयंति कर्तॄंश्च पुत्रादीन्फलेन संयोजयंतीति । **शातातपः**—

"वसवः पितरो ज्ञेया रुद्रा ज्ञेयाः पितामहाः । प्रपितामहास्तथादित्या इत्येषा वैदिकी श्रुतिः" ॥ इति ।

पैठीनसिः— "वसवः पितरो रुद्राः पितामहा आदित्या प्रपितामहा य एवं विद्वान्पितॄन्यजते वसवो रुद्रा आदित्याश्चास्य प्रीता भवंति" ॥ इति । **मनुरपि**— (३।२८४)

"वसून्वदंति तु पितॄन्रुद्रानेव पितामहान् । प्रपितामहांस्तथादित्यान्श्रुतिरेषा सनातनी" ॥ इति ।

व्यासः—

"यथा गोषु प्रनष्टो वै वत्सो विंदंति मातरम् । एवं श्राद्धेऽन्नमुद्दिष्टं मंत्रः प्रापयते पितॄन्" ॥

मत्स्योऽपि— "नाम गोत्रं पितॄणां तु प्रापकं हव्यकव्ययोः ।

"नाममंत्रास्तथा देशा भावांतरगतानपि । प्राणिनः प्रीणयंत्येते तदाकारत्वमागतान् ॥

"देवो यदि पिता जातः शुभकर्मानुयोगतः । तस्यान्नममृतं भूत्वा देवत्वे ह्युपगच्छति ॥

"देवत्वे भोग्यरूपेण पशुत्वे तु तृणं भवेत् । श्राद्धान्नं वायुरूपेण नागत्वेऽप्युपतिष्ठति ॥

"पानं भवति यक्षत्वे गृध्रत्वे च तथामिषम् । दनुजत्वे तथा मांसं प्रेतत्वे रुधिरोदकम् ॥

"मानुषत्वेऽन्नपानादि नानाभोगकरं तथा । रतिः शक्तिः स्त्रियः कांता भोज्यं भोजनशक्तिता ॥

"दानशक्तिः सविभवा रूपमारोग्यमेव च । श्राद्धपुष्पमिदं प्रोक्तं फलं ब्रह्मसमागमे" ॥ इति ।

नामानि देवदत्तदयज्ञदत्तादीनि । मंत्राः पृथिवी ते पात्रम् इत्यादयः । आदेशाः इदमन्नादिकममुष्मै भवत्वित्येवमादिनिर्देशः । पुष्पमवांतरफलं ब्रह्मसमागमे ब्रह्मप्राप्तिः परमफलं प्रोक्तमित्यर्थः ।

हारीतः—

"कालेऽन्यथा गतं पात्रे विधिना प्रतिपादितम् । प्राप्नोत्यन्नं तथा दत्तं जंतुर्यत्रोपतिष्ठते ।

"यन्नाम्ना पातयेत्पिंडं तं नयेद्ब्रह्म शाश्वतम्" ॥ इति ।

"परेद्युरपि तत्प्रीत्यै ब्राह्मणान् भोजयेत् द्विजः । अनपेक्षस्थितस्यैव शापं दत्वा व्रजन्ति ते" ॥ इति ।

॥ इति **वैद्यनाथदीक्षित**विरचिते **स्मृतिमुक्ताफले श्राद्धनिरूपणं** नाम चतुर्थः परिच्छेदः ।

हरिः ओम् । श्रीयवतेश्वरार्पणमस्तु । श्री शके १७६४ शुभकृन्नाम संवत्सरे मार्गशीर्ष-कृष्णपक्षे नवम्यां तद्दिने गुरुवासरे समाप्तं । स्वार्थं परार्थं च ।

"तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबंधनात् । मूर्खहस्ते न दातव्यं एवं वदति पुस्तकम् ॥ श्रीकालभैरवप्रसन्न । श्री । श्रीगणेशायनमः । वैद्यनाथीय श्राद्धकांड अनुक्रमणिका प्रारंभः । ऊर्ध्वो-च्छिष्टादौ । विधुरविधवाविषये पर्युषितशवप्रायश्चित्तं । "सर्पाशन्यादिमरणे आहिताग्निविधवाविषये । संस्कर्त्तारः । अग्निनिर्णयः । उत्तपनलक्षणं कपालाग्निलक्षणं । भार्याद्वयेग्निसंसर्गात्पूर्वमृतौ परमृतौ ॥

COLLECTION OF HINDU LAW TEXTS
No. 25 (5)

Śrî VAIDYANÂTHA DĪKṢHITA'S

SMṚTIMUKTĀPHALAM

(PART V)

KĀLA KĀṆḌA (5) and PRĀYAŚCHITTA KĀṆḌA (6)

EDITED BY

J. R. GHARPURE, B. A., LL. B. (Honours-in-Law), F. R. S. A.
Principal, Law College, Poona; Senior Advocate, Federal Court of India, Fellow of the University of Bombay.

BOMBAY.

First Edition

1940

Printed at the Aryabhushan Press, 915/1 Bhamburda Peth,
Poona City, by Mr. V. H. Barve and
Published by Mr. V. J. Gharpure, M. A., LL. B. at the Office
of the Collection of Hindu Law Texts,
Angre's Wadi, Vithalbhai Patel Road, Bombay 4.

धर्मशास्त्रग्रन्थमाला.

[ग्रन्थाङ्कः २५ (५)]

श्री

वैद्यनाथदीक्षितीय-

स्मृतिमुक्ताफलम्

(पञ्चमः खण्डः)

कालकाण्डम् (५), प्रायश्चित्तकाण्डः (६)

जगन्नाथ रघुनाथ घारपुरे,

बी. ए., एल्एल्. बी., (ऑनर्स–इन्–लॉ)

पुण्यपत्तनस्थव्यवहारशालाया आचार्यः, मुम्बईविश्वविद्यालयसदस्यः

भारतसङ्घन्यायसभासदस्यः, लंदनराजकलासंघसदस्यः

इत्यनेन संशोधितं, मुद्रापितं, प्रकाशितं च ।

Digitized and Uploaded by:
Hari Parshad Das (HPD)
on 06 July 2013.

प्रथमावृत्तिः

शकाब्दाः १८६२ क्रिस्ताब्दाः १९४०

पुण्यपत्तने 'आर्यभूषण' मुद्रणालये 'विठ्ठल हरि बर्वे' इत्यनेन मुद्रितः,
मोहमय्यां 'विश्वनाथ जगन्नाथ धारपुरे,' इत्यनेन प्रकाशितश्च ।

श्री

विषयानुक्रमणिका

कालकाण्डम् (५)

विषयः	पृष्ठम्
कालनिरूपणम्	८२५
निमिषादिलक्षणम्	,,
तिथिस्वरूपम्	,,
खण्डतिथिलक्षणम्	,,
तत्र निर्णयः	,,
,, विधिनिषेधादि	,,
प्रतिपन्निर्णयः	,,
सा द्विविधा, शुद्धा विद्धा च ...	,,
पूर्वविद्धायाः पूज्यत्वम् ...	,,
संमुखत्वम्	८२६
उत्तरविद्धाया निषेधः	,,
खर्वादर्पाहिंस्रादितिथिभेदाः ...	,,
तिथीनां वेधः	८२७
कार्तिकशुक्लप्रतिपदि बल्युत्सवः ...	,,
ज्योतिःशास्त्रप्रसिद्धाभावे स्मृत्यापादितग्रहणम्	,,
तत्रापवादः	८२८
एकभक्तव्रतम्	,,
नक्तव्रतम्	८२९
तत्र कालभेदेनाधिकारव्यवस्था ...	,,
त्रिमुहूर्तात्मकप्रदोषव्यापिन्यां तिथौ कार्यम्	,,
दानव्रतादीनां क्रमः	८३०
द्वितीयानिर्णयः	,,
परविद्धाया उपोष्यत्वम्	,,
तृतीयानिर्णयः	८३१
परविद्धैव ग्राह्या	,,
चतुर्थी– ,, ...	,,
विनायकव्रतानुष्ठाने मध्यान्हव्यापिनी ...	,,
पंचमी–पूर्वविद्धा ग्राह्या ,, ...	,,
षष्ठी–परविद्धा– ,, ...	,,
सप्तमी–पूर्वविद्धा–ग्राह्या	८३१
पूर्वविद्धाया अलाभे उत्तरविद्धा ,, ...	,,
अष्टमीनिर्णयः	,,
शुक्लाष्टमी परविद्धा ग्राह्या	,,
दूर्वाष्टमीव्रते ,, ,, ...	८३२
कृष्णजन्माष्टमी	,,
अस्मिन्व्रते तिथिरेव निमित्तम् ...	,,
अत्र श्रावण इति मुख्यकल्पः ...	,,
तत्स्वरूपम्	,,
जयंतीव्रतम्	,,
तत्करणे फलम्	,,
अकरणे प्रत्यवायः	,,
जयंतीव्रते फलविशेषः	८३३
ग्राह्या तिथिः	,,
चत्वारः कल्पाः	८३४
पारणानिर्णयः	८३५
नवमीनिर्णयः	,,
दुर्गासरस्वतीव्रतादौ पूर्वविद्धा ग्राह्या ...	,,
रामनवमीनिर्णयः	८३६
दशावतारकालाः	८३७
दशमीनिर्णयः	,,
एकादशीनिर्णयः	,,
उपवासः ,, ...	८३८
वैष्णवानां विशेषाः	८३९
वैष्णवशब्दार्थः	,,
स्मार्तैकादशीनिर्णयः	८४०
अष्टादशभेदपूर्वकमुपवासनिश्चयः ...	८४१
एकादश्या ह्रासवृद्धिः	८४२
दिनत्रयविषये	८४३

विषयः	पृष्ठम्
दिनक्षये	८४४
नैमित्तिककाम्यौ	८४५
श्रवणद्वादशीनिर्णयः	८४६
द्वादश्यां माध्यान्हकालः	८४७
एकादश्युपवासे अधिकारिणः	,,
पतिमत्या उपवासनिषेधः	,,
उपवासासमर्थविषयः	८४८
सूतकादावुपवासविचारः	,,
एकादश्यां नित्यनैमित्तिकश्राद्धे उपवासभेदः	,,
काम्यैकादशीव्रतानुष्ठानक्रमः	८४९
नित्योपासविषयः	८५०
द्वादशीनिर्णयः	,,
त्रयोदशीनिर्णयः	८५०
चतुर्दशी ,,	८५१
अनन्तव्रतम्	,,
शिवरात्रिव्रतनिर्णयः	८५२
दिनद्वयव्यापिन्याम्	८५३
तत्र विवेकः	,,
इष्टिकालनिर्णयः	८५४
संधिमत्यां तिथौ	८५५
तिथिक्षयवृध्द्योः संधौ	८५६
बौधायनमतानुसारिणाममावास्यायां विशेषः	८५७
नक्षत्रादिनिर्णयः	८५८

प्रायश्चित्त काण्डः (६)

विषयः	पृष्ठम्
प्रायश्चित्ताधिकारिणः	८५९
अकरणे दोषः	,,
एकविंशति **नरकाः**	,,
पापफलानि	८६०
रहस्यकृतपापफलम्	८६०
नरकानुभवानन्तरं जन्मान्तराणि	८६१
नवविधपापानि	८६२
ब्रह्महत्यादिमहापातकानि	,,
प्रयोजकादीनां फलतारतम्यम्	,,
अतिपातकानि	८६३
ब्रह्महत्यासमानि	८६४
सुरापानसमानि	८६५
स्वर्णस्तेय ,,	,,
गुरुतल्प ,,	,,
उपपातकानि	८६६
कामाकामकृतपापविचारः	८६७
प्रकाशरहस्यप्रायश्चित्तम्	८६८
परिषल्लक्षणम्	८६९
परिषद्योग्याः	८७०
प्रायश्चित्तविधानस्थलम्	८७१
ब्रह्महत्याप्रायश्चित्तम्	८७१
वधोद्यमे ,,	८७२
प्रायश्चित्ताकरणे ,,	,,
जनकादिहत्यायाम् ,,	८७३
क्षत्रियादिकृतब्रह्महत्याप्रायश्चित्तम्	,,
क्षत्रियादिवधे ,,	,,
शस्त्रग्रहणविचारः	८७४
गोवधप्रायश्चित्तम्	८७५
गोवधनिमित्तकानि	,,
दण्डलक्षणम्	८७६
द्विगुणप्रायश्चित्तस्य निमित्तान्तरम्	,,
गृहे बद्धस्य गोर्मरणे	,,
क्वचित्प्रायश्चित्ताभावः	,,
शृङ्गभङ्गादौ	,,
प्राण्यन्तरहनने	८७६,८७७
वृक्षच्छेदादिप्रायश्चित्तम्	८७७
सुरापानादिप्रायश्चित्तम्	८७८
प्रायश्चित्ताकरणे दण्डः	८७९

विषयः	पृष्ठम्
प्रमादतः पाने	८८०
कामकारे ,,	,,
विण्मूत्रादिभक्षणे प्रायश्चित्तम्	,,
चंडालघटस्थजलपाने	८८१
,, वाप्यादिजलपाने	,,
उच्छिष्टविषयापवादाः	,,
निषिद्धक्षीरपाने	८८२
सुवर्णस्तेये	,,
स्तेयस्वरूपम्	८८३
मनसापहारे	,,
अल्पस्वर्णापहरणे	,,
क्षत्रियादीनां स्तेयप्रायश्चित्तम्	८८४
रजतस्तेये ,,	,,
ताम्रस्तेये ,,	,,
कांस्यादिस्तेये ,,	,,
धनधान्यादिस्तेये ,,	,,
भूम्यपहारे ,,	८८५
वस्त्रादिस्तेये ,,	,,
अजादिहरणे ,,	,,
गृहोपकरणहरणे ,,	,,
सालग्रामादेः पूजोपकरणस्य च हरणे	,,
मध्यस्थेन धनग्रहणे ,,	,,
अगम्यागमनप्रायश्चित्तानि	८८६
गुरुतल्पगमने ,,	,,
,, तत्समानि ,,	,,
रेतस्सेकात्पूर्वनिवृत्तौ ,,	,,
कामकृतगमने प्रायश्चित्तम्	८८७
सवर्णागमने ,,	,,
सम्बन्ध्यादिस्त्रीगमने ,,	८८८
स्वैरिणीगमने ,,	,,
गर्भोत्पादने ,,	,,
चण्डाल्यादिगमने ,,	,,
षोडशविधचण्डालीगमने प्रायश्चित्तम्	८८९
चर्मकारस्त्रीगमने ,,	,,
ब्रह्मचण्डालीगमने ,,	८९०
रजस्वलागमने प्रायश्चित्तम्	८९०
विधवागमने ,,	८९१
दास्यादिगमने ,,	,,
मुखमैथुने ,,	,,
पश्वादिगमने ,,	,,
अवकीर्णिप्रायश्चित्तम्	८९२
ब्रह्मचारिणो रेतस्स्खलने	,,
नैष्ठिकादीनां तु कृतप्रायश्चित्तानामपि न व्यवहारः	,,
ऋतुकालातिक्रमे	,,
स्त्रीबालातुराणामर्धप्रायश्चित्तम्	८९३
शपथोल्लंघने ,,	,,
क्षत्रियादीनां ब्राह्मणीगमने ,,	,,
स्त्रियाः परपुरुषगमने ,,	,,
व्यभिचारिस्त्रीणां त्यागविचारः	८९४
अनिमित्ततया भर्तृभार्यापरित्यागे ,,	,,
विधवाया गर्भत्यागः	८९५
शङ्कितव्यभिचारे स्त्रीणां कर्तव्यम्	,,
बन्धुराहित्येन गमने	,,
पुनरागमने प्रतीक्षणकालः	,,
स्वातन्त्र्येण गताया अत्यागे भर्त्रादीनां प्रायश्चित्तम्	,,
ताडनादिना निर्गच्छन्त्याः त्यागविचारः	८९६
व्यभिचारिण्या गृहप्रवेशे शुद्धिप्रकारः	,,
ब्राह्मण्याश्चाण्डालादिगमने प्रायश्चित्तम्	,,
,, म्लेच्छरजकादिगमने ,,	८९७
संसर्गस्य महापातकविचारः	,,
कर्मण एव पातित्यहेतुत्वम्	,,
कलौ संसर्गस्य पापमात्रहेतुत्वम्	८९८
तत्र प्रायश्चित्तम्	,,
गोचर्मक्षेत्रलक्षणम्	८९८
मिथ्याभिशंसने प्रायश्चित्तम्	८९८,८९९
ब्राह्मणापगुरणे ,,	८९९
ब्राह्मणतिरस्कारे ,,	,,
,, ताडना ,,	,,

विषयः	पृष्ठम्
गुरुपित्राद्यधिक्षेपे प्रायश्चित्तम् ...	९००
पतनीये समुद्रयानादौ ,, ...	,,
दुर्जनसेवाप्रायश्चित्तम्	,,
शूद्रसेवा ,, ,, ...	,,
अशुचिकराणाम् ,, ...	९०१
अभिचारशापादि ,, ...	,,
भृतकाध्यापनाध्ययने ,, ...	,,
ब्रह्मोज्झे ,, ,, ...	९०२
अनाश्रमवासे ,, ...	,,
पञ्चाशद्वत्सरादुपरि विवाहनिषेधः ...	,,
ऊढायाः पुनरुद्वाहे प्रायश्चित्तम् ...	,,
सगोत्रादिविवाहे ,, ,, ...	,,
परिवित्त्यादेः ,, ,, ...	९०३
उष्ट्रादियुक्तयानारोहणे ,,... ...	,,
खराद्यारोहणे ,, ,, ...	,,
कारागृहवासप्रायश्चित्तम्	,,
कुग्रामवासे ,, ...	९०४
दुर्देशगमने ,, ...	,,
श्वशृगालादिदंशने ,, ...	,,
शरीरे कृम्युत्पत्तौ ,, ...	९०५
दुर्ब्राह्मणगृहभोजने ,, ...	९०६,९०७
राजाद्यन्नभोजने ,, ...	९०६
व्यतीपातादिभोजने ,, ...	९०७
अयुतसहस्रभोजने ,, ...	९०८
शूद्रादिगृहे स्वयंपाकभोजनेऽपि ...	,,
संघान्नभोजने	,,
क्रीतान्नभोजने प्रायश्चित्तम् ...	९०८
यागान्नभोजने ,, ...	९०९
अस्नात्वा भोजने ,, ...	,,
अशुचिकालभोजने ,, ...	,,
पर्युषितान्नभोजने ,, ...	,,
ओदनवटकमाषवटकादिभक्षणे ,, ...	,,
परमान्नकृसरभक्षणे नियमाः ...	९१०
व्रात्यकुष्ठ्याद्यन्नभोजने	,,
अन्तःशवग्रामभोजने ,, ...	,,

विषयः	पृष्ठम्
उपरागभोजने प्रायश्चित्तम्... ...	९१०
भिन्नपात्रभोजने ,, ...	९११
रजस्वलापक्वान्नभोजने ,, ...	,,
निषिद्धदिने द्विर्भोजने ,, ...	,,
ब्रह्मयज्ञानकरणे ,, ...	,,
स्वस्वकाले गर्भाधानाद्यकरणे ,, ...	,,
उष्णोदकस्नाने ,, ...	९१२
यज्ञोपवीतादिना विना भोजने ,, ...	,,
शिखोपवीतभ्रंशे ,, ...	,,
भोजनकाले क्षुतादौ ,, ...	,,
शिवनिर्माल्यभोजने ,, ...	,,
पत्न्या सह भोजने ,, ...	९१३
नीलवस्त्रधारणनिषेधः ,, ...	,,
परान्नभोजने प्रायश्चित्तम् ,, ...	,,
नवश्राद्धादिभोजने ,, ,, ...	,,
श्राद्धभोजने ब्रह्मचारिणः ,, ...	९१४
क्षत्रियादिश्राद्धभोजने ,, ...	,,
नान्दीश्राद्धभोजने ,, ...	,,
श्राद्धशिष्टान्नभोजननिषेधः ...	९१५
चौलाद्यन्नभोजने	,,
अविक्रेयविक्रये	९१६
ऋणादि कृत्वा व्रताद्याचरणनिषेधः ...	९१७
ब्राह्मणादिविक्रये प्रायश्चित्तम् ...	९१७
श्रुतिस्मृत्यादेः विक्रये ,, ...	९१८
जलाग्न्यादिषु मर्तुमुद्यम्य निवृत्तस्य ,,...	,,
पारिव्राज्यात् प्रच्युतौ ,, ...	९१९
आत्मघातिनः शवदहनादौ ,, ...	,,
अनृतभाषणे ,, ,, ...	९२०
मिथ्याभूतचतुर्वर्णवधशपथे ,, ...	,,
क्वचित्तु निमित्तविशेषे अनृतमपि वक्तव्यम्	९२१
श्रौताग्नित्यागे प्रायश्चित्तम्... ...	,,
नास्तिक्यप्रायश्चित्तम्	९२२
एकपंक्तौ वैषम्येण दाने ,, ...	,,
अपाङ्क्तेयपङ्क्तिभोजनादौ ,, ...	,,
पलाशदारुशयनादौ ,, ...	,,

विषयः	पृष्ठम्
श्राद्धे निमन्त्रितस्य कालातिक्रमे प्रायश्चित्तम्	९२३
क्षत्रियाद्यभिवादनादौ ,, ...	,,
शूद्रस्य वेदवाक्यश्रवणे ,, ...	,,
प्रतिग्रहविचारः	
वृत्त्यर्थं सत्प्रतिग्रहे न प्रायश्चित्तापेक्षा ...	,,
तत्र व्यवस्था	९२४
तुलापुरुषादिप्रतिग्रहे प्रायश्चित्तम् ...	,,
ब्रह्माण्डघटविषये ,, ...	९२५
हिरण्यगर्भविषये ,, ...	,,
कल्पतरुविषये ,, ...	९२६
गोसहस्रप्रतिग्रहे प्रायश्चित्तम् ...	९२७
हिरण्यकामधेनुप्रतिग्रहे ,, ...	,,
हिरण्याश्वप्रतिग्रहे ,, ...	,,
हिरण्याश्वरथप्रतिग्रहे ,, ...	९२८
हिरण्यहस्तिप्रतिग्रहे ,, ...	,,
पञ्चलाङ्गलप्रतिग्रहे ,, ...	,,
धराप्रतिग्रहे प्रायश्चित्तम्	९२९
विश्वचक्रप्रतिग्रहे ,, ...	,,
कल्पलता ,, ,, ...	,,
सप्तसागर ,, ,, ...	,,
चर्मधेनुप्रतिग्रहे ,, ...	,,
महाभूतघट ,, ,, ...	९३०
साधारणप्रायश्चित्तम्	,,
अतिपातकिप्रायश्चित्तम् ...	९३१
संकरीकरणादौ ,, ...	,,
उपपातकिप्रायश्चित्तम्	,,
रहस्यपापप्रायश्चित्तानि ...	९३२,९३३
तत्र प्रतिपदोक्तप्रायश्चित्तम् ...	९३४
रहस्यसुरापानादौ ,, ...	९३५
उपपातकरहस्यप्रायाश्चित्तम् ...	,,
अधिकारभेदेन प्रयोगान्तरम् ...	९३६
पादकृच्छ्राः	९३६
तत्र वर्णभेदेन व्यवस्था	९३६
अतिकृच्छ्रलक्षणम्	९३७
कृच्छ्रातिकृच्छ्र ,, ...	,,
तप्तकृच्छ्र ,, ,, ...	,,
सांतपनकृच्छ्र ,, ...	,,
महासांतपनम्	९३८
पराकलक्षणम्	,,
पर्णकृच्छ्र ,, ,, ...	,,
फलकृच्छ्रादि ,, ...	,,
वारुणश्रीसौम्यकृच्छ्रादि ,, ...	,,
तुलापुरुषकृच्छ्राः ,, ...	९३९
अघमर्षणकृच्छ्रलक्षणम्	,,
दैवतकृच्छ्र ,, ,, ...	,,
यज्ञकृच्छ्र ,, ,, ...	,,
यावककृच्छ्र ,, ,, ...	,,
प्रसृतियावककृच्छ्र,, ...	,,
चांद्रायणकृच्छ्र ,, ,, ...	९४०
तत्र पिपीलिकामध्यम ,, ...	,,
वपनादिक्रमः	,,
चान्द्रायणानि	९४१
तेषां स्वरूपम्	,,
तत्र ग्रासपरिमाणम्	,,
चान्द्रायणफलम्	,,
व्रतग्रहणप्रकारः	,,
असमापने प्रत्यवायः	,,
ब्रह्मकूर्चस्वरूपं तत्परिमाणं च ...	९४२
देशविशेषाः ,, ...	,,
प्राजापत्यादिप्रत्याम्नायाः	,,
चान्द्रायणादीनां ,, ...	९४३
महानदीपरिगणनम्	,,
गोदानादावशक्तेन तेभ्यस्तूपदानम् ...	९४४

स्मृतिमुक्ताफलम्

कालकाण्डम् (५)

श्रीगणेशाय नमः ॥ अथ कालो निरूप्यते ॥ स च कर्मण्यंगभूतः । तदाह **गार्ग्यः**—
" तिथिनक्षत्रवारादि साधनं पुण्यपापयोः । प्रधानगुणभावेन न स्वातंत्र्येण ते क्षमाः " ॥ इति ।
व्यासोऽपि—" यत्तिथौ यच्च नक्षत्रे वारे यत्र च यद्यथा ।
" विहितं वा निषिद्धं वा पालयंस्त्रिदिवं व्रजेत् । अपालयन् पुनर्मोहादपवित्रं पदं व्रजेत् " ॥ इति ।

निमेषादिलक्षणम् । काल एकोऽप्युपाधिभेदादनेकप्रकारः । तथा च **गार्ग्यः**—

" अक्षिपक्ष्मपरिक्षेपो निमेषः परिकीर्तितः । द्वौ निमेषौ त्रुटिर्नाम द्वौ त्रुटी तु लवः स्मृतः ॥

" द्वौ लवौ क्षण इत्युक्तः काष्ठा प्रोक्ता दश क्षणाः ।
"त्रिंशत्काष्ठाः कलाः प्रोक्ताः कलास्त्रिंशन्मुहूर्तकः । ते तु त्रिंशदहोरात्र इत्याह भगवान्हरः "॥ इति ।

तिथिस्वरूपम् । तिथिस्वरूपमुक्तं **कालादर्शे**—
" रवीन्द्वोर्योगविरहौ क्रमाद्दर्शश्च पूर्णिमा । कलाः प्रवेशनिर्याणैस्तिथयोऽन्याश्च पक्षयोः " ॥ इति ।
सूर्याचंद्रमसोः सन्निकर्षो दर्शः । विप्रकर्षः पूर्णिमा भवति । इंदोः कलानां रवौ प्रवेशनिर्याणैः सूर्याचंद्रमसोः कृष्णशुक्लपक्षयोः प्रतिपदादयः तिथयो भवेयुरित्यर्थः ।

खण्डतिथिलक्षणम् । तत्र संपूर्णतिथौ नास्ति संदेहः । यदा ऱ्हासवृद्धिवशेन खंडतिथिर्भवति तदा निर्णयोऽपेक्ष्यते । ऱ्हासवृद्धी च **गार्ग्येण** दर्शिते—
" खर्वा दर्पा तथा हिंस्रा त्रिविधं तिथिलक्षणम् । धर्माधर्मवशादेव तिथिस्त्रेधा विवर्तते " ॥ इति ।
खर्वा समतिथिः । दर्पा वृद्धियुक्ता । हिंस्रा क्षययुक्ता ।
खंडतिथौ विधिनिषेधव्यवस्थामाह **वृद्धगार्ग्यः**—
" निमित्तं कालमादाय वृत्तिर्विधिनिषेधयोः । विधिः पूज्यतिथौ तत्र निषेधः कालमात्रके ॥
" तिथीनां पूज्यता नाम कर्मानुष्ठानयोग्यता । निषेधस्तु निवृत्त्यात्मा कालमात्रमपेक्षते " ॥ इति ।
" दर्शे स्नात्वा पितृभ्यस्तु दद्यात्कृष्णतिलोदकम् " इत्यादिविधिः कर्मानुष्ठानयोग्यतिथिमपेक्षते ।
" अमावास्यायां न गच्छेत्प्राप्तकालामपि स्त्रियम् । तैलं च न स्पृशेदामं वृक्षादींश्च न छेदयेत् " ॥
इत्यादिको निषेधस्तिथिमात्रमपेक्षत इत्यर्थः । एवं च सति खंडतिथौ पूज्यत्वं निर्णेतव्यं भवति । तत्र प्रतिपदमारभ्य पंचदश्यंतास्तिथयः क्रमेण निर्णीयन्ते ।

प्रतिपन्निर्णयः । प्रतिपत् द्विविधा । शुद्धा विद्धा चेति । या सूर्योदयमारभ्य पुनरुदयपर्यंता भवति सा शुद्धा
" सर्वा ह्येताश्च तिथय उदयादोदयस्थिताः । शुद्धा इति विनिश्चेयाः षष्टिनाड्यो हि वै तिथिः " ॥ इति **स्मृतेः** । शुद्धत्वात्प्रतिपदादिविहितं सर्वं निःशंकैस्तत्रानुष्ठेयम् । विद्धा च द्विविधा । पूर्वदिने दर्शयुक्ता उत्तरदिने द्वितीयायुक्ता चेति । तत्र पूर्वविद्धायाः पूज्यत्वमाह **पैठीनसिः**—
" पंचमी सप्तमी चैव दशमी च त्रयोदशी । प्रतिपन्नवमी चैव कर्तव्या संमुखा तिथिः " ॥ इति ।

संमुखत्वं च **स्कांदपुराणे** विवेचितम्—

" संमुखा नाम सायाह्नव्यापिनी दृश्यते यदा । प्रतिपत्संमुखा कार्या या भवेदापराह्णिकी" ॥ इति ।

व्यासोऽपि—" प्रतिपत्सैव विज्ञेया या भवेदापराह्णिकी " ॥ इति ।

एतस्यैव पक्षस्यानुग्राहक उत्तरविद्धाया निषेधो **बृहद्वसिष्ठेन** स्मर्यते—

" द्वितीया पंचमी वेधाद्दशमी च त्रयोदशी । चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे तिथी " ॥ इति । द्वितीयादयः स्ववेधेन पूर्वामुत्तरां च तिथिं हन्युरित्यभिधानादुत्तरविद्धा प्रतिपदुपवासे निषिद्धा भवति । तथा च **ब्रह्मकैवर्ते**—

" प्रतिपत्पंचमीभूतसावित्रव्रतपूर्णिमा । नवमी दशमी चैव नोपोष्याः परसंयुताः " ॥ इति । सावित्रव्रतपूर्णिमा सावित्रव्रतयुक्ता पौर्णमासी । एतच्च पूर्वविद्धायाः प्रतिपदः पूज्यत्वाभिधानं शुक्लप्रतिपद्विषयम् । अत एवोक्तं **निगमे**—

" युग्माग्नियुगभूतानां षण्मुन्योर्वसुरंध्रयोः । रुद्रेण द्वादशी युक्ता चतुर्दश्या च पूर्णिमा ॥

" प्रतिपद्यप्यमावास्या तिथ्योर्युग्मं महाफलम् " ॥ इति । युग्मं द्वितीया । अग्निस्तृतीया । युगं चतुर्थी । भूतं पंचमी । षट् षष्ठी । मुनिः सप्तमी । वसुरष्टमी । रंध्रं नवमी । रुद्र एकादशी । अत्र युग्माग्न्यादिसप्तयुग्मेषु पूर्वा तिथिरुत्तरविद्धा ग्राह्या । उत्तरा तु पूर्वविद्धेत्युक्तं भवति । **स्मृत्यंतरेऽपि**—

" एकादशी तथा षष्ठी अमावास्या चतुर्थिका । उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुताः "॥ इति ।

अन्यत्रापि—

" षष्ठ्यष्टमी अमावास्या कृष्णपक्षे त्रयोदशी । एताः परयुताः पूज्याः पराः पूर्वेण संयुताः"॥ इति । अत्र ' प्रतिपद्यप्यमावास्या पराः पूर्वेण संयुता ' इति चामावास्यायुतायाः प्रतिपदः उपोष्यत्वाभिधानात् शुक्लप्रतिपद्विषयत्वं स्फुटमवगम्यते । न ह्येतानि वचनानि कृष्णपक्षविषयतायाः कथंचिदपि योजयितुं शक्यन्ते । एतदनुसारेण " प्रतिपत्सद्वितीया स्यात् द्वितीया प्रतिपद्युता " **इत्यापस्तम्ब**वचनं कृष्णपक्षविषयत्वेनैव संकोचनीयम् । एवं च ' नोपोष्याः परसंयुता ' इति द्वितीयायुतोपवासनिषेधः शुक्लपक्षविषयतया योजनीयः । यत्तु **गोभिलवचनम्**—

" खर्वो दर्पो तथा हिंस्रा त्रिविधं तिथिलक्षणम् । खर्वदर्पे परे कार्ये हिंस्रा स्यात्पूर्वकालिकी"॥ इति । यदपि **बोधायनवचनम्**—

"वर्धमानस्य पक्षस्य उदया पूज्यते तिथिः । यदा पक्षः क्षयं याति तदा स्यादापराह्णिकी "॥ इति । उदया उदयंगतेत्यर्थः । यदपि **स्मृत्यंतरवचनम्**—

"सा तिथिस्तदहोरात्रं यस्यामभ्युदितो रविः । वर्धमानस्य पक्षस्य ऱ्हासे त्वस्तमया तिथिः"॥ इति । वृद्धौ तिथिरुदयगता पूज्या क्षये त्वस्तगता पूज्येत्यर्थः । एतान्येकोद्दिष्टा[2]दिविषयाणि । तथाह **व्यासः**—

"द्वितीयादिकयुग्मानां पूज्यतानियमादिषु । एकोद्दिष्टादिवृध्यादौ ऱ्हासवृध्यादिचोदना ॥ " इति । नियमादिष्वित्यादिशब्देन पितृ[3]कर्मव्यतिरिक्तव्रतोपवासादिसकलकर्मणां ग्रहणम् । एकोद्दिष्टादीत्यादिशब्देन पार्वणश्राद्धस्य ग्रहणम् ।

---

१ ख-र्ध । २ खगघ-ष्ट । ३ खग-ञ्य ।

कालादर्शेऽपि—

"प्रत्याब्दिकादिश्राद्धादौ वृद्धि-ह्रासादिचोदना। द्वितीयादिकयुग्मानां व्रतादौ पूज्यता भवेत् ॥"इति।

तदेवं वृद्धि-ह्रासानादरेण उपवासे शुक्लप्रतिपत् पूर्वविद्धा ग्राह्या कृष्णप्रतिपदुत्तरविद्धेति स्थितम्। तिथीनां वेधः **पैठीनसिना** दर्शितः—

"पक्षद्वयेऽपि तिथयस्तिथिं पूर्वां तथोत्तराम्। त्रिभिर्मुहूर्तैर्विध्यंति सामान्योऽयं विधिः स्मृतः" ॥ इति।

पूर्वेद्युरुदयानंतरममावास्या त्रिमुहूर्त्ता ततोऽधिका वा सा प्रतिपदं विध्यति । परेद्युरस्तमयात्प्राक् द्वितीया त्रिमुहूर्ता ततोधिका वा साऽपि पूर्वां प्रतिपदं विध्यतीत्येवं सर्वतिथिसाधारणो वेधो विशेषवचनाभावविषये द्रष्टव्यः। वेध्यापि प्रतिपद्दिवा त्रिमुहूर्ता ततोधिका वा भवेत् सा वेधार्हा भवेत् । न न्यूना । तदुक्तं **कालनिर्णये**—

"शुद्धा विद्धा तिथिः शुद्धा हीना तिथ्यान्ययाहनि। उदये पूर्वया तिथ्या विध्यते त्रिमुहूर्तकैः ॥
" सायं तूत्तरया तद्वन्न्यूनया तु न विध्यते । वेध्यापि त्रिमुहूर्तैव न न्यूना वेधमर्हति ॥
" शुक्लपक्षे दर्शविद्धा कृष्णे विद्धा द्वितीयया । उपोष्या प्रतिपच्छुक्ले मुख्या स्यादापराह्णिकी ॥
" तदभावे तु सायान्हव्यापिनी परिगृह्यताम् । प्रातः संगवमध्यान्हापराह्णाः सायमित्यसौ ॥
" अत्रान्हः पंचधा भागो मुख्यो द्वित्र्यादिभागतः " ॥ इति ।

पूर्वाण्होऽपराण्ह इति द्वेधा विभागः । पूर्वाण्हो मध्यान्होऽपराह्ण इति त्रेधा विभागः। पूर्वाण्हो मध्यान्हः अपराण्हः सायान्ह इति चतुर्धा विभागः। प्रातः संगवो मध्यान्होऽपराण्हः सायान्ह इति पंचधा विभागः। द्वित्र्यादिविभागात् पंचधाविभागस्य बहुश्रुतिस्मृतिसंमतत्वात् स एव मुख्य इत्यंतिमश्लोकार्थः। एवं च सत्युक्तेषु पंचस्वन्हो भागेषु पंचमं सायान्हभागं व्याप्य ततः पूर्वं चतुर्थमपराण्हभागं या शुक्लप्रतिपत्स्पृशति तादृशी पूर्वविद्धोपवासे पूज्या । स चोपवासः **भविष्योत्तरपुराणे** कार्तिकमासांतदर्शे पायसभोजनादिनियमं विधाय प्रतिपदि विहितः—

" मार्गशीर्षे ततो मासि प्रतिपद्यपरेऽहनि । स्पृष्ट्वा गुरुं चोपवसेन्महादेवं स्मरन्मुहुः " ॥ इति

स्कंदपुराणे कार्तिकशुक्लप्रतिपदि बल्युत्सवो विहितः। एवमन्यत्रापि द्रष्टव्यम्। पूर्वविद्धायां शुक्लप्रतिपदि योऽयमुपवासो विहितः तस्य प्रातरेव संकल्पः कार्यः। तदानीं ज्योतिःशास्त्रप्रसिद्धप्रतिपदभावेऽपि स्मृतिभिरापादितायाः प्रतिपदः सत्वात् । अत एव **देवलः**—

"यां तिथिं समनुप्राप्य त्वस्तं याति दिवाकरः। सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु" ॥ इति।

अत्र कर्मस्विति बहुवचनादुपवासादिनिखिलदैवकर्मपरिग्रहः । अत्रास्तमयात्पूर्वं मुहूर्तत्रयव्यापिनीं तिथिं समनुप्राप्येति व्याख्येयम्। न तु ततोऽल्पव्याप्तिर्न विवक्षिता ।

तथा च **वृद्धवसिष्ठः**—

" यस्यां तिथावस्तमियात्सूर्यस्तु त्रिमुहूर्तकैः । यागदानजपादिभ्यस्तामेवोपक्रमेत्तिथिम् " ॥ इति।

स्कांदेऽपि—

"यां तिथिं समनुप्राप्य यात्यस्तं पद्मिनीप्रियः। सा तिथिस्तद्दिने प्रोक्ता त्रिमुहूर्ता यदा भवेत्"॥ इति।

सौरेऽपि—

" यां प्राप्यास्तमुपेत्यर्कः स्याच्चेत्सा त्रिमुहूर्तगा। धर्मकृत्येषु सर्वेषु संपूर्णां तां विदुर्बुधाः " ॥ इति।

एवं च सायंतनत्रिमुहूर्त्तशुक्लप्रतिपदुपेतायां तिथौ प्रातरेव संकल्प्य प्रतिपदुपवासः कर्तव्य इति निश्चयः। पूर्वविद्धायां शुक्लप्रतिपदि उपवासं कृत्वा परेद्युः तिथ्यन्ते पारणं कुर्यात्। तदाह **सुमंतुः**—

" तिथिनक्षत्रनियमे तिथिभान्ते च पारणम्। अतोऽन्यथा पारणे तु व्रतभंगमवाप्नुयात्" ॥ इति।

निगमे—"पूर्वविद्धासु तिथिषु भेषु च श्रवणं विना । उपोष्य विधिवत्कुर्यात्तत्तदंते तु पारणम्"॥ इति । **स्कांदेऽपि**—

" तिथीनामेव सर्वासामुपवासव्रतादिषु । तिथ्यंते पारणं कुर्याद्विना शिवचतुर्दशी " ॥ इति । अस्य तिथिभांतपारणस्यापवादः क्वचित् **स्मर्यते**—

" तिथ्यंते चैव भांते च पारणं यत्र चोद्यते । यामत्रयोर्ध्ववर्तिन्यां प्रातरेव हि पारणम् " ॥ इति । यत्तु **देवलवचनम्**—

" उपवासेषु सर्वेषु पूर्वाह्णे पारणं भवेत् । अन्यथा तत्फलस्यार्धं धर्ममेवोपसर्पति " ॥ इति । धर्मो यमः । तत्पूर्वविद्धाव्यतिरिक्तपरविद्धाशुद्धतिथ्युपवासविषयम् । पूर्वविद्धायां विहितस्योपवासस्य केनापि निमित्तेन तत्रानुष्ठानासंभवे सत्युत्तरविद्धा गौणकालत्वेन ग्राह्या । "पौर्वाह्णिकास्तु तिथयो दैवकार्ये फलप्रदा " इति सामान्येन **स्मरणात्** । उक्तं च **कालनिर्णयसंग्रहे**—

" अभावेऽपि प्रतिपदः संकल्पः प्रातरिष्यते । तिथिस्त्रियामतोऽर्वाक् चेत् तिथ्यंते पारणं भवेत् ॥ " मुख्यातिथ्यंतरत्वे तु तिथिशेषोऽपि गृह्यताम् " ॥ इति ।

एकभक्तव्रतनिर्णयः । अथैकभक्तं निर्णीयते । तच्च त्रिविधम् । स्वतंत्रमन्यांगं उपवासप्रतिनिधिरूपं चेति । तेषु स्वतंत्रं **ब्रह्मपुराणे** पठ्यते—"प्रतिपद्येकभक्ताशी समाप्ते कपिलाप्रदा"॥ इति । तत्र कर्मकालव्यापिनी तिथिर्ग्राह्या " यो यस्य विहितः कालस्तत्कालव्यापिनी तिथिः " इति **स्मृतेः** । कर्मकालस्तत्कर्मस्वरूपं चेत्युभयं **स्कंदपुराणे** दर्शितम्—

" दिनार्धसमयेऽतीते भुज्यते नियमेन यत् । एकभक्तमिति प्रोक्तमतस्तत्स्याद्दिवैव हि " ॥ इति । **देवलोऽपि**—

" दिनार्धसमयेऽतीते भुज्यते नियमेन यत् । एकभक्तमिति प्रोक्तं न्यूनं ग्रासत्रयेण तु " ॥ इति । अत्र दिनार्धस्योपरि सार्धमुहूर्तपरिमितः काल एकभक्तस्य मुख्यः । दिनार्धेऽतीते सति समनन्तरभावित्वादस्तमयात् प्राचीनो गौणः कालः । दिवेत्यभ्यनुज्ञानात् । अत्र मुख्यकालव्यापिनी तिथिर्ग्राह्या । अत एव **पाद्मे**—"मध्यान्हव्यापिनी ग्राह्या एकभक्ते सदा तिथिः " ॥ इति । **बोधायनोऽपि**—

" मध्यान्हव्यापिनी ग्राह्या एकभक्तव्रते तिथिः " ॥ इति । अत्र निर्णेतव्यो विषयः षोढा भिद्यते । पूर्वेद्युरेव मध्यान्हव्यापित्वं परेद्युरेव तद्व्यापित्वम् उभयत्र साम्येन तदेकदेशव्यापित्वं वैषम्येण तदेकदेशव्यापित्वं चेति । तत्र प्रथमद्वितीययोर्मध्यान्हव्यापित्वस्यैव निर्णायकत्वम् । तृतीये पूर्वविद्धा ग्राह्या । मुख्यकालव्याप्तेः समत्वेऽपि गौणकालव्याप्तेः आधिकत्वात् । चतुर्थेऽपि पूर्वविद्धैव । उभयत्र मुख्यकालव्याप्त्यभावेऽपि गौणकालव्याप्तिलाभात् । पंचमेऽप्ययमेव न्यायो योज्यः । षष्ठे तु यस्मिन् दिने अधिकव्याप्तिः सैव ग्राह्या । एवं स्वतंत्रैकभक्तं निर्णीतम् । अन्यांगं त्वपराण्हादौ कार्यम् । " पूजाव्रतेषु सर्वत्र मध्यान्हव्यापिनी तिथिः " इति ' मध्यान्हे पूजयेन्नृप ' इत्यादिशास्त्रैरंगिनः पूजादेर्मध्यान्हे विहितत्वेन एकभक्तस्य मुख्यकालासंभवात् उपवासप्रतिनिधिरूपमेकभक्तमुपवासतिथौ कार्यम् । तस्य गौणोपवासत्वात् ।

अत एव **सुमंतुः**—" तिथौ यत्रोपवासः स्यादेकभक्तेऽपि सा तिथिः " ॥

१ ख–त्वा ।

नक्तव्रतम् । अथ नक्तं निरूप्यते । तच्च **वराहपुराणे** पठ्यते—
"मार्गशीर्षे सिते पक्षे प्रतिपद्या तिथिर्भवेत् । तस्यां नक्तं प्रकुर्वीत रात्रौ विष्णुं च पूजयेत्"॥ इति । नक्तं कुर्वीत दिवा अभुंजानो रात्रिभोजनं कुर्वीतेत्यर्थः । तस्य काल उक्तः **कालादर्शे**—
" त्रिमुहूर्तास्तमानात्[1]प्राक् परतश्च तथाविधा । तस्या नक्तव्रतं कुर्याद्धरिनिक्तव्रताद्दते "॥ इति ।
कौर्मेऽपि—
" प्रदोषव्यापिनी यत्र त्रिमुहूर्ता यदा दिवा । तदा नक्तव्रतं कुर्यात्स्वाध्यायस्य निषेधवत् "॥ इति । एतत्प्रदोषव्याप्तिर्मुख्यः कल्पः सायंकालव्याप्तिरनुकल्प इत्येवंपरम् । तथा च कालद्वयं **भविष्यत्पुराणे** दर्शितम्—"मुहूर्तोनंदिनं[2] नक्तं प्रवदंति मनीषिणः । नक्षत्रदर्शनान्नक्तमहं मन्ये गणाधिप"॥ इति । अस्य च कालद्वयस्याधिकारिभेदेन व्यवस्थामाह **देवलः**—
" नक्षत्रदर्शनान्नक्तं गृहस्थस्य बुधैः स्मृतम् । यतेर्दिनाष्टमे भागे तस्य रात्रौ निषिध्यते "॥ इति ।
स्मृत्यंतरेऽपि—
" नक्तं निशायां कुर्वीत गृहस्थो विधिसंयुतः । यतिश्च विधवा चैव कुर्यात्तत्सदिवाकरम् ॥
"दिवा नक्तं तु तत्प्रोक्तमंतिमे घटिकाद्वयम् । निशा[3] नक्तं तु विज्ञेयं प्रवदन्ति मनीषिणः ॥
" नक्षत्रदर्शनान्नक्तं यामार्धे प्रथमे सदा "॥ इति । रात्रिनक्तभोजने कालमाह **व्यासः**—
" त्रिमुहूर्तः प्रदोषः स्याद्भानावस्तंगते सति । नक्तं तत्र तु कर्तव्यमिति शास्त्रविनिश्चयः "॥ इति । नक्तं त्रिमुहूर्तात्मकप्रदोषव्यापिन्यां तिथौ कार्यम् । यदाह **वत्सः**—
" प्रदोषव्यापिनी ग्राह्या सदा नक्तव्रते तिथिः । एकादशीं विना सर्वा शुक्लकृष्णे तथा स्मृता "॥ इति । अयमपि विषयः षोढा भिद्यते । पूर्वेद्युरेव प्रदोषव्याप्तिः परेद्युरेव तद्व्याप्तिः उभयत्रापि तद्व्याप्तिः उभयत्र तदभावः । उभयत्र साम्येन तदेकदेशव्याप्तिः । उभयत्र वैषम्येण तदेकदेशव्याप्तिरिति । तत्र प्रथमद्वितीययोः प्रदोषव्याप्तिर्नियामिका । उभयत्र तद्व्याप्तौ परतिथिरेव । तदाह **जाबालिः**—
" सदैव तिथ्योरुभयोः प्रदोषव्यापिनी तिथिः । तत्रोत्तरत्र नक्तं स्यादुभयत्रापि सा तिथिः "॥ इति । उभयत्रापि दिवारात्रावपि सा तिथिर्विद्यते इत्यर्थः । उभयत्र प्रदोषव्याप्त्यभावेऽपि परैव । तदाह **जाबालिः**—" अतथात्वे परत्र स्यादर्वागस्तंगते हि सा " इति । प्रदोषे तदभावेपि अस्तमयादर्वाग्यतः सा विद्यते सा ग्राह्येत्यर्थः । ईदृशे विषये गृहस्थोऽपि यतिवत् दिवा नक्तमाचरेत् । तदुक्तं **स्कांदे**—" प्रदोषव्यापिनी न स्याद्दिवा नक्तं विधीयते ।
" आत्मनो द्विगुणच्छायामतिक्रामति भास्करे । तन्नक्तं नक्तमित्याहुर्न नक्तं निशिभोजनम् ॥
"एवं ज्ञात्वा ततो विद्वान्सायान्हे तु भुजिक्रियाम् । कुर्यान्नक्तव्रती नक्तफलं भवति निश्चितम्"॥ इति । प्रदोषव्यापिन्यां तिथौ भानुवारसंक्रांत्यादिना गृहस्थस्यापि यदा रात्रिभोजननिषेधः तदा दिवैव नक्तं कुर्यात् । तथा च **भविष्यत्पुराणे**—
" ये त्वादित्यदिने ब्रह्मन्नक्तं कुर्वंति मानवाः । दिनांते तेऽपि कुर्वीरन्निषेधाद्रात्रिभोजने "॥ इति । अस्मिंश्च दिवाभोजने उत्तमोऽतिममुहूर्तः । मध्यम उपान्त्यः । ततः प्राचीनो जघन्यः । एवं च सति अन्तिमाष्टमभागत्रिमुहूर्तवचनान्युपपद्यन्ते । रात्रिभोजनेऽपि घटिकात्रयमुत्तमः कालः । घटिकाषट्कं मध्यमः कालः
"प्रदोषोऽस्तमयादूर्ध्वं घटिकात्रयमिष्यते । त्रिमुहूर्तः प्रदोषः स्याद्रवावस्तंगते सति"॥ इति च **स्मृतेः**।

---

१ क्ष–म । २ ख–नं दि । ३ क्ष–दिवा ।

निशीथपर्यंतो जघन्यः कालः। नक्तं प्रकुर्वीत रात्रौ कुर्वीतेति सामान्येनाभिधानात्। असौरनक्तेषु साम्येन वैषम्येण वा दिनद्वये प्रदोषैकदेशव्याप्तौ परेद्युरेव नक्तं कार्यं सायंकालस्य गौणस्य तिथिव्याप्तत्वात्सौरनक्तेषु सायंकालैकदेशव्याप्तौ पूर्वपूर्वतिथिर्ग्राह्या प्रदोषकालस्य तत्तिथिव्याप्तत्वात्। "अर्कद्विपर्वरात्रौ च चतुर्दश्यष्टमी दिवा" इत्यनेन दिवाचतुर्दश्यष्टमीयोगे सति भोजने प्रायश्चित्तविधानात् दिवा तत्संबंधसमये भोजननिषेधो गम्यते "निषेधस्तु निवृत्त्यात्मा कालधर्ममपेक्षते" इति स्मृतेः। तत्संबंधाभावसमये तु भोजनं न निषिध्यते। अत एव रात्रौ पर्वयोगे भोजने निषिद्धे तद्विगमे सति क्वचिद्भोजनमभ्यनुज्ञायते

मनुना—"चंद्रसूर्यग्रहे नाद्यादद्यात् स्नात्वा विमुक्तयोः" इति।

व्यासोऽपि—"नाद्यात्सूर्यग्रहात्पूर्वमन्हि सायं शशिग्रहात्।

"ग्रहकाले च नाश्नीयात्स्नात्वाऽश्नीयाच्च मुक्तयोः॥ मुक्ते शशिनि भुंजीत यदि न स्यान्महानिशा"॥ इति।

वृद्धगौतमोऽपि—

"चंद्रसूर्यग्रहे नाद्यात्तस्मिन्नहनि पूर्वतः। राहोर्विमुक्तिं विज्ञाय स्नात्वा कुर्वीत भोजनम्"॥ इति।

चतुर्दश्यष्टमी दिवेत्यस्य नक्तव्रतत्वाभावान्नक्तन्यायोऽप्यत्र नावतरति। तदेवं प्रतिपद्युपवास एकभक्तनक्तानि निर्णीतानि। तत्र शुक्लप्रतिपत्पूर्वविद्धैवोपोष्या कृष्णप्रतिपदुत्तरविद्धा। एकभक्तनक्तयोस्तु सर्वासु तिथिषु मध्यान्हप्रदोषव्याप्त्या निर्णयः।

दानव्रतादीनां कालः। दानव्रतादीनि उत्तरविद्धायां प्रतिपदि कर्तव्यानि। तेषां दैवत्वात्। तदाह **वृद्धयाज्ञवल्क्यः**—"पौर्वाह्णिकास्तु तिथयो दैवकार्ये फलप्रदाः" इति। अन्हः पूर्वो भागः पूर्वाण्हः। स च मुहूर्तत्रयात्मकः प्रातःकालः। कर्मकालव्याप्तिं च **वृद्धयाज्ञवल्क्य** आह—

"कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः। तथा कर्माणि कुर्वीत ह्रासवृद्धी न कारणम्"॥ इति।

गार्ग्यश्च—

"यो यस्य विहितः कालस्तत्कालव्यापिनी तिथिः। तथा कर्माणि कुर्वीत ह्रासवृद्धी न कारणम्"॥

एवं च उदयानंतरं मुहूर्तत्रयव्यापिनी दानादौ तिथिर्ग्राह्या।

"यां तिथिं समनुप्राप्य उदयं याति भास्करः। सा तिथिः सकला ज्ञेया स्नानदानजपादिषु॥

"व्रतोपवासस्नानादौ घटिकैका यदा भवेत्। उदये सा तिथिर्ग्राह्या श्राद्धादावस्तगामिनी"॥

इति **देवलादिवचनं** वैश्वानराधिकरणन्यायेन त्रिमुहूर्तव्याप्तिप्रशंसापरम्। अत्रापि षोढा भिद्यते। उदयकाले पूर्वेद्युरेव त्रिमुहूर्तव्यापिनी परेद्युरेव तद्व्यापिनी उभयत्रापि त्रिमुहूर्तव्यापिनी नोभयत्र त्रिमुहूर्तव्यापिनी साम्येन वैषम्येण वा त्रिमुहूर्तैकदेशव्यापिनीति। तत्र प्रथमद्वितीययोर्नास्ति संदेहः। तृतीयादिषु चतुर्षु पक्षेष्वस्तमयव्याप्तेः कर्मकालबाहुल्यस्य च लाभात् पूर्वेद्युरेवानुष्ठानमिति निर्णयः। पित्र्यकालस्तु **श्राद्धकांडे** निरूपितः। इति प्रतिपन्निर्णयः। अयमेव निर्णय उत्तरासु सर्वासु तिथिषु सामान्येन संचारयितव्यः। विशेषस्तु तत्र तत्राभिधास्यते।

द्वितीयानिर्णयः। तत्र द्वितीयायाः परविद्धायाः उपोष्यत्वं **भृगुराह**—

"एकादश्यष्टमी षष्ठी द्वितीया च चतुर्दशी। त्रयोदशी त्वमावास्या उपोष्याः स्युः परान्विताः"॥ इति।

व्यासः—"तृतीयया युता कार्या द्वितीया न तु पूर्वया" इति। यदा तु पूर्वेद्युरुदयमारभ्य परेद्युरुदयस्योपरि त्रिमुहूर्तं वर्तते तदा पूर्वेद्युरेव संपूर्णतिथित्वादुपवासः। तदुक्तं **कालनिर्णये**—

"पूर्वेद्युरसती प्रातः परेद्युस्त्रिमुहूर्तगा। सा द्वितीया परोपोष्या पूर्वविद्धा ततोऽपरा"॥ इति।

---

१ **खगघ**-मात्र। २ जैमिनीय न्या.। १।४।१२ (सू. १७-२२) जातेष्टिन्यायः। ३ पृ. ७२३-७५१

तृतीयानिर्णयः । तृतीया परविद्धैव ग्राह्या । रंभाख्यव्रते तु पूर्वविद्धा ग्राह्या । तदुक्तं **ब्रह्मवैवर्ते**—

" रंभाख्यां वर्जयित्वा तु तृतीयां द्विजसत्तम । अन्येषु सर्वकार्येषु गणयुक्ता प्रशस्यते " ॥ इति । गणश्चतुर्थी । **स्मृत्यंतरे**ऽपि—

" द्वितीयया तु विद्धा चेत्तृतीया न कदाचन । कर्तव्या व्रतिभिस्तात धर्मकामार्थतत्परैः ॥

" विहायैकां च रंभाख्यां तृतीयां पुण्यवर्धिनीम् "॥ इति ।

चतुर्थीनिर्णयः । चतुर्थ्यपि परविद्धैव ग्राह्या । यदाह **बृहद्वसिष्ठः**—

" एकादशी तथा षष्ठी अमावास्या चतुर्थिका । उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुताः" ॥ इति । विनायकव्रतानुष्ठाने तु मध्यान्हव्यापिनी चतुर्थी ग्राह्या । तदाह **बृहस्पतिः**—

" चतुर्थीगणनाथस्य मातृविद्धा प्रशस्यते । मध्यान्हव्यापिनी चेत्स्यात्परतश्चेत्परेऽहनि " ॥ मातृविद्धा तृतीयाविद्धा । **स्मृत्यंतरे**ऽपि—

" मातृविद्धा प्रशस्ता स्याच्चतुर्थीगणनायके । मध्यान्हे परतश्चेत्स्यान्नागविद्धा प्रशस्यते "॥ इति । नागः पंचमी । **एकभक्तन्यायेन** मध्यान्हव्याप्तेः षोढा भेदे सति यदा परेद्युरेव मध्यान्हव्याप्तिः तदा परा । इतरेषु पंचसु भेदेषु जयायोगस्य प्रशस्तत्वात्पूर्वेद्युरेव सा भवति ।

पञ्चमीनिर्णयः । पंचमी पूर्वविद्धैव ग्राह्या । तदाह **हारीतः**—

" चतुर्थीसंयुता कार्या पंचमी परया न तु । दैवे कर्मणि पित्र्ये च शुक्लपक्षे तथाऽसिते" ॥ इति ।

षष्ठीनिर्णयः । षष्ठी परविद्धा ग्राह्या । तदुक्तं **विष्णुधर्मोत्तरे**—

"एकादश्यष्टमी षष्ठी शिवरात्रीचतुर्दशी । अमावास्या तृतीया च ता उपोष्याः परान्विताः"॥ इति । स्कंदव्रते तु षष्ठ्याः पूर्वविद्धाया ग्राह्यत्वमाह **वसिष्ठः**—

"कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिश्चतुर्दशी[२] । एताः पूर्वयुताः कार्यास्तिथ्यंते पारणं भवेत् "॥ इति । यदि कदाचित्तिथिक्षयवशादुत्तरविद्धा न लभ्यते तदा स्कांदव्रतवदन्यान्यपि व्रतानि पंचमीविद्धायां कर्तव्यानि । तदाह **वसिष्ठः**—

"एकादशी तृतीया च षष्ठी चैव त्रयोदशी । पूर्वविद्धा तु कर्तव्या यदि न स्यात्परेऽहनि"॥ इति ।

सप्तमीनिर्णयः । सप्तमी पूर्वविद्धैव ग्राह्या । "षष्ठ्या युता सप्तमी च कर्तव्या तत्र सर्वदा"॥ इति **स्मृतेः** । उत्तरविद्धाप्रतिषेधः **स्कंदपुराणे** दर्शितः—

" षष्ठ्येकादश्यमावास्या पूर्वविद्धा तथाऽष्टमी । सप्तमी परविद्धा च नोपोष्यं तिथिपंचकम् "॥ इति । पूर्वविद्धायाः सप्तम्या अलाभे तूत्तरविद्धा ग्राह्या । तदुक्तं **कालनिर्णये**—

" सप्तमी पूर्वविद्धैव व्रतेषु निखिलेष्वपि । अलाभे पूर्वविद्धायाः परविद्धापि गृह्यताम् " ॥ इति ।

अष्टमीनिर्णयः । अथाष्टमी निर्णीयते । तत्र शुक्लाष्टमी परविद्धा ग्राह्या । तथा च **निगमे**—

" शुक्लपक्षेऽष्टमी चैव शुक्लपक्षे चतुर्दशी । पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुता ॥

" उपवासादिकार्येषु ह्येष धर्मः सनातनः " ॥ इति । **स्कांदे**ऽपि—

"अष्टमी नवमी मिश्रा कर्तव्या भूतिमिच्छता । सप्तम्या चाष्टमी चैव न कर्तव्या शिखिध्वज"॥ इति । कृष्णपक्षे पूर्वविद्धायाः परिग्रहः परविद्धायाः प्रतिषेधश्च **निगमे** पठ्यते—

" कृष्णपक्षेऽष्टमी यत्र कृष्णपक्षे चतुर्दशी । पूर्वविद्धा तु कर्तव्या परविद्धा न कस्यचित् ॥

" उपवासादिकार्येषु ह्येष धर्मः सनातनः " ॥ इति । व्रतविशेषे तु तत्र तत्रोक्तं द्रष्टव्यम् ।

---

१ खगघ-पौर्णमासी । २ क्ष-यत्तु ।

तथा दूर्वाष्टमीसंज्ञकव्रतविशेषविषये **भविष्यत्पुराणम्**—

" श्रावणी दुर्गनवमी तथा दूर्वाष्टमी च या । पूर्वविद्धैव कर्तव्या शिवरात्रिर्बलेर्दिनम् " ॥ इति ।

कृष्णजन्माष्टमी । कृष्णजन्माष्टमीव्रतात् जयन्तीव्रतं भिन्नम् । जन्माष्टमीव्रते तिथिरेव निमित्तम् । जयंतीव्रते तु रोहिणीयोगः । तथा च **स्मर्यते**—

" श्रावणे बहुले पक्षे कृष्णजन्माष्टमीव्रतम् । न करोति नरो यस्तु भवति क्रूरराक्षसः ॥

"श्रावणस्य च मासस्य कृष्णाष्टम्यां नराधिप । रोहिणी यदि लभ्येत जयंती नाम सा तिथिः" ॥ इति ।

वसिष्ठसंहितायाम्—

" श्रावणे वा नभस्ये वा रोहिणी सहिताऽष्टमी । यदा कृष्णा नरैर्लब्धा सा जयंतीति कीर्तिता ॥

" श्रावणेन भवेद्योगो नभस्ये तु भवेद्ध्रुवम् । तयोरभावे योगस्य तस्मिन् वर्षे न संभवः" ॥ इति ।

अत्र श्रावण इति मुख्यकल्पः । नभस्य इत्यनुकल्पः । एतदेवाभिप्रेत्य **विष्णुरहस्येऽपि**—

"अष्टमी कृष्णपक्षस्य रोहिणी ऋक्षसंयुता । भवेत्प्रोष्ठपदे मासि जयंती नाम सा स्मृता " ॥ इति ।

हरिवंशे—

" अभिजिन्नाम नक्षत्रं जयन्ती नाम शर्वरी । मुहूर्तो विजयो नाम यत्र जातो जनार्दनः " ॥ इति ।

अत्र श्रावणनभस्यप्रोष्ठपदशब्दाः सिंहश्रावणादिपराः । तथा च **ज्योतिषार्णवे**—

" श्रावण्यां प्रौष्ठपद्यां वा यदा सिंहगतो रविः । जयंत्याराधनं कुर्यान्न तु कर्कटकन्ययोः " ॥ इति ।

वाराहेऽपि—" सिंहराशिगते सूर्ये गगने जलदाकुले । मासि प्रौष्ठपदेऽष्टम्यामर्धरात्रे विधूदये ॥

" बुधवारे वृषे लग्ने रोहिण्याश्चरमांशके । शुभे हर्षणयोगे च कौलवेन युते तथा ॥

" वसुदेवेन देवक्यामहं जातोऽस्मि पद्मजे " ॥ इति । यस्मिन्वर्षे श्रावणे वा नभस्ये वा जयंती न संभवति तस्मिन्वर्षे श्रावणमास एव कृष्णाष्टमीव्रतमनुष्ठेयम् ! तस्य स्वरूपमुपवासमात्रम्—

"केवलेनोपवासेन तस्मिन्जन्मदिने मम । सप्तजन्मकृतात्पापान्मुच्यते नात्र संशयः " ॥ इति **स्मृतेः** । यदि शिष्टास्तत्रापि जागरणदानादिकमनुतिष्ठन्ति अनुतिष्ठन्तु नाम । अविरुद्धैः पुण्यविशेषैः व्रतस्योपोद्बलनसंभवाच्छास्त्रेण तु प्रापितमुपवासमात्रम् । जयंतीव्रतस्य तु दानादिसहित उपवासः स्वरूपम् । तथा च **भविष्योत्तरे**—" मासि भाद्रपदेऽष्टम्यां निशीथे कृष्णपक्षके ।

" शशांके वृषराशिस्थे ऋक्षे रोहिणिसंज्ञके । योगेऽस्मिन्वसुदेवाद्धि देवकी मामजीजनत् ॥

" तस्मान्मां पूजयेत्तत्र शुचिः सम्यगुपोषितः । ब्राह्मणान्भोजयेद्भक्त्या ततो दद्याच्च दक्षिणाम् ॥

" हिरण्यं मेदिनीं गावो वासांसि कुसुमानि च । यद्यदिष्टतमं तत्तत्कृष्णो मे प्रीयतामिति " ।

जयंतीं प्रकृत्य नारदीयसंहितायां **स्मर्यते**—

" उपोषणं जन्मदिने कुर्याज्जागरणं च यः । अर्धरात्रयुताष्टम्यां सोऽश्वमेधफलं लभेत्" ॥

शुद्धं नित्यं जन्माष्टमीव्रतं करणे फलविशेषस्मरणात् अकरणे प्रत्यवायस्मरणाच्च । नित्यं काम्यं च जयंतीव्रतं अकरणे प्रत्यवायस्मरणात्फलविशेषस्मरणाच्च ।

तथा हि जन्माष्टम्या अकरणे प्रत्यवायः **स्मर्यते**—

" कृष्णजन्मदिने प्राप्ते यो भुंक्ते तु द्विजोत्तमः । त्रैलोक्यसंभवं पापं तेन भुक्तं द्विजोत्तम " ॥ इति ।

स्कंदपुराणेऽपि—

"ये न कुर्वंति जानंतः कृष्णजन्माष्टमीव्रतम् । ते भवन्ति नराः पापा व्याला व्याघ्राश्च कानने" ॥ इति ।

तथा जयंतीव्रतस्याकरणे **स्कान्दे** प्रत्यवायः स्मर्यते—

" शूद्रान्नेन तु यत्पापं शवहस्तस्थभोजने । तत्पापं लभते कुन्ति जयन्त्यां भोजने कृते ॥

" ब्रह्मघ्नस्य सुरापस्य स्त्रीवधे गोवधेऽपि वा । न लोको यदुशार्दूल जयंतीविमुखस्य च ॥

" न करोति यदा विष्णोर्जयंतीसंभवं व्रतम् । यमस्य वशमापन्नः सहते नारकीं व्यथाम् ॥

" जयंतीवासरे प्राप्ते करोत्युदरपूरणम् । संपीड्यतेऽतिमात्रं तु यमदूतैः कलेवरम् " ॥ इति ।

जयंतीव्रते फलविशेषोऽभिहितो **भविष्योत्तरे**—

" प्रतिवर्षं विधानेन मद्भक्तो धर्मनंदन । नरो वा यदि वा नारी यथोक्तं फलमाप्नुयात् ॥

" पुत्रसंतानमारोग्यं सौभाग्यमतुलं भवेत् । सदा धर्मरतिर्भूत्वा मृतो वैकुंठमाप्नुयात् ॥

" तत्र दिव्येन मानेन वर्षलक्षं युधिष्ठिर । भोगान् नानाविधान्भुक्त्वा पुण्यशेषादिहागतः ॥

" सर्वकामसमृद्धे तु कुले महति जायते " ॥ इति । **पाद्मे**ऽपि—

" प्रेतयोनिगतानां तु प्रेतत्वं नाशितं नरैः । यैः कृता श्रावणे मासि अष्टमे रोहिणी युता " ॥ इति ।

" किं पुनर्बुधवारेण सोमेनापि विशेषतः " ॥ इति ।

ननु जन्माष्टमीव्रतेऽपि फलं **स्मर्यते** " सप्तजन्मकृतात् पापान्मुच्यते नात्र संशयः " इति अतस्तदपि नित्यं काम्यमिति चेन्मैवम् । उपात्तदुरितक्षयमात्रेण काम्यत्वे संध्यावंदनादेरपि काम्यत्वप्रसंगात्सत्यपि पापक्षये फलांतरास्मरणात् । अतः केवलं नित्यं जन्माष्टमीव्रतम् । नित्यं काम्यं च जयंतीव्रतम् ।

नन्वेवं व्रतभेदे सति यदा दिनद्वयेऽष्टमी वर्तते रोहिणी तूत्तरदिन एव तदा पूर्वदिने जन्माष्टम्युपवासः परेद्युर्जयंत्युपवास इति नैरंतर्येणोपवासद्वयं प्रसज्येतेति चेन्न । रोहिणीयोगसंभवे जन्माष्टम्या अपि तत्रैव कर्तव्यत्वात् । सर्वतिथिष्वलभ्ययोगस्य केवलतिथेरुत्कृष्टत्वेन केवलायास्तिथेस्तत्रोपेक्षणीयत्वात् । यदा त्वेकस्मिन्नेव दिने अष्टमी वर्तते रोहिण्या च युज्यते तदा जन्माष्टमीजयंत्योः सह प्रयोगस्यावश्यंभावित्वेन जयंतीव्रत एव जन्माष्टमीव्रतमंतर्भवतीति न पृथगुपवासप्रसंगः । तदुक्तं **कालनिर्णये**—

"यस्मिन्वर्षे जयंत्याख्यो योगो जन्माष्टमी तदा । अंतर्भूता जयंत्यां स्यादृक्षयोगः प्रशस्यते " ॥ इति

ग्राह्या तिथिर्निरूप्यते । जन्माष्टम्या जयंत्याश्चार्धरात्रप्रधानत्वात् तद्योगोऽतिप्रशस्तः । तदुक्तं **वसिष्ठसंहितायाम्**—

" अष्टमी रोहिणीयुक्ता निश्यर्धे यदि दृश्यते । मुख्यकाल इति ख्यातस्तत्र जातो हरिः स्वयम् " ॥

विष्णुरहस्येऽपि—

"रोहिण्यामर्धरात्रे तु यदा कृष्णाष्टमी भवेत् । तस्यामभ्यर्चनं शौरेर्हंति पापं त्रिजन्मजम्" ॥ इति ।

एवं च सत्यर्धरात्रसद्भाव एवात्र कर्मकालव्याप्तिः । तत्र **योगीश्वरः**—

" रोहिणीसहिता कृष्णा मासे च श्रावणेऽष्टमी । अर्धरात्रादधश्चोर्ध्वं कलयाऽपि यदा भवेत् ॥

" जयंती नाम सा प्रोक्ता सर्वपापप्रणाशिनी " ॥ इति । पक्षांतरमाह **स** एव—

" अर्धरात्रादधश्चोर्ध्वमेकार्धघटिकान्विता । रोहिणी चाष्टमी ग्राह्या उपवासव्रतादिषु " ॥ इति ।

---

१ क्ष-पूर्वत्र ।

एकघटिकान्विता वा अर्धघटिकान्विता वा । तत्रायमर्थः संपद्यते । पूर्वभागावसन एका घटिका उत्तरभागाद्द्विका मिलित्वा निशीथशब्दवाच्यं मुहूर्तं तावत्परिमाणं मुख्यः कल्पः । तदसंभवे उभयत्र अर्धघटिका तस्या अप्यसंभवे कलेति । एवं चार्धरात्रे कलामात्रमष्टमीसद्भावेऽपि जयन्तीयोगस्य प्रतिपादनात् "अह्नि चेत् सप्तमी विद्धा तस्यां नाराधयेद्धरिम्" इति **वचनं** निर्मूलम् । सोऽयमर्धरात्रयोगो मुख्यः कल्पः । कृत्स्नाहोरात्रयोगोऽत्यंतमुख्यः ।

यदा कदाचित् मुहूर्तयोगः स्वल्पयोगश्चानुकल्पः तदा **वसिष्ठसंहितायाम्**—

"अहोरात्रं तयोर्योगो ह्यसंपूर्णो भवेद्यदि । मुहूर्तमप्यहोरात्रे योगश्चेत्तामुपोषयेत् ॥

"वासरे वा निशायां वा यत्र स्वल्पाऽपि रोहिणी। विशेषेण नभोमासे सैवोपोष्या मनीषिभिः" ॥इति ।

यो जयंतीव्रते योगनिर्णयः स एव जन्माष्टमीव्रतेऽपि द्रष्टव्यः

"दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणीकला । रात्रियुक्तां प्रकुर्वीत विशेषेणेन्दुसंयुताम् ॥

"अष्टमी शिवरात्री च अर्धरात्रादधो यदि । दृश्यते घटिका या सा पूर्वविद्धा प्रकीर्तिता" ॥ इति **स्मृतेः** ।

तत्र जन्माष्टमी द्विविधा । शुद्धा सप्तमीविद्धा चेति । सूर्योदयमारभ्य प्रवर्तमानाष्टमी शुद्धा । निशीथादर्वाक्सप्तम्या कियत्यापि युक्ता विद्धा । शुद्धापि पुनर्निशीथव्याप्त्यव्याप्तिभ्यां द्विविधा । तत्र "निशीथव्यापिनी मुख्या विशेषेणेंदुसंयुताम्" इति **वचनात्** "निशीथव्याप्तिरहितापि रात्रियुक्तां प्रकुर्वीत" इति **वचनात्** गृहीतव्या भवति ।

ननु पूर्वेद्युर्निशीथादूर्ध्वमारभ्य परेद्युर्निशीथादर्वाग्या समाप्यते तस्यामुभयत्र रात्रिसंबंधसत्वात् कुत्रोपवास इति चेत्परेद्युरेवोपवासः कार्यः । प्रातः संकल्पकालमारभ्य प्रवर्तमानत्वात् ।

सप्तमी विद्धापि त्रिविधा । पूर्वेद्युरेव निशीथव्यापिनी परेद्युरेव तद्व्यापिनी उभयत्रापि निशीथव्यापिनी चेति । तत्र प्रथमद्वितीययोः पक्षयोर्निशीथव्याप्तेः प्रयोजकत्वेन "या निशीथव्यापिनी सा विशेषणेन्दुसंयुताम्" इति **वचनेन** ग्रहीतव्या भवति । तृतीये तु पक्षे परेद्युरुपवासः प्रातःसंकल्पमारभ्य तिथिव्याप्तिसंभवात् ।

रोहिणीसहिताष्टमी चतुर्विधा । शुद्धा विद्धा शुद्धाधिका विद्धाधिका चेति । तत्र शुद्धायां संपूर्णयोगो निशीथयोगो यत्किंचिन्मुहूर्तयोग इति त्रैविध्यं भवति । एवं विद्धायामपि त्रैविध्यं । एतेषु षट्सु पक्षेषु दिनांतरे योगाभावादुपवासे संदेहो नास्ति । किन्तु योगतारतम्यात् प्राशस्त्यतारतम्यं भवति । यत्किंचिन्मुहूर्तयोगः प्रशस्तः । निशीथयोगः प्रशस्ततरः । संपूर्णयोगः प्रशस्ततमः । शुद्धाधिका तु सूर्योदयमारभ्य प्रवृत्ता परेद्युः सूर्योदयमतिक्रम्य एषा वर्धते । सा च त्रिविधा । पूर्वेद्युरेव रोहिणीयुक्ता परेद्युरेव तद्युक्ता दिनद्वयेऽपि रोहिणीयुक्ता चेति । तत्राद्ययोर्नास्ति संदेहः । रोहिणीयोगस्य नियामकत्वात् । तृतीये तु रोहिणीयोगस्य उभयत्र समानत्वेऽपि गुणाधिक्यात्पूर्वैवोपोष्या । तथा हि सा रोहिणीयोगभेदात् त्रिधा भिद्यते । अष्टमीवत्सूर्योदयमारभ्य प्रवृत्ता रोहिणी कदाचित्परेद्युरपि कियती वर्धते । कदाचित् पूर्वेद्युर्निशीथमारभ्य रोहिणी प्रवर्त्तते । कदाचिन्निशीथादूर्ध्वमारभ्य प्रवर्तते । तत्र प्रथमद्वितीययोर्निशीथयोगस्य सत्वात्पूर्वेद्युरेवोपवासः । तृतीयपक्षे दिनद्वयेऽपि निशीथे जयंतीयोगो नास्ति । पूर्वेद्युर्निशीथे केवलाष्टमी परेद्युः केवलरोहिणी । तत्र निशियोगाभावेऽपि रात्रियोगस्य सत्वादष्टम्याः प्राधान्याच्च पूर्वेद्युरुपवासः । तदेवं शुद्धाधिका पूर्वैवोपोष्या । निशीथादर्वाक्सप्तम्या युक्ता परेद्युरपि विद्यमाना विद्धाधिका । सा च त्रिविधा । पूर्वेद्युरेव रोहिणीयुक्ता विद्धाधिका परेद्युरेव रोहिणीयुक्ता उभयत्र

रोहिणीयुक्ता विद्धाधिकेति । प्रथमद्वितीययोस्तु रोहिणीयोगो नियामकः । या तूभयत्र रोहिणीयुक्ता विद्धाधिका साऽपि निशीथे जयंतीयोगमपेक्ष्य चतुर्धा भिद्यते । पूर्वेद्युरेव निशीथयोगवती परेद्युरेव निशीथयोगवती उभयत्रापि तादृशी उभयत्रापि निशीथयोगरहिता चेति । तत्र प्रथमद्वितीययोः निशीथयोगो नियामकः । तृतीयचतुर्थयोः परदिन एवोपवासः । परेद्युः संकल्पकाले तिथिनक्षत्रयोगस्य सत्वात् । जयंतीभेदेषूपवासदिने यदि सोमवारो बुधवारो वा भवति तदा फलाधिक्यं भवति । तदुक्तं **ब्रह्मपुराणे**—

" प्रेतयोनिगतानां तु प्रेतत्वं नाशितं नरैः । यैः कृता श्रावणे मासि अष्टमी रोहिणीयुता ॥
" किं पुनर्बुधवारेण सोमेनापि विशेषतः । किंपुनर्नवमी युक्ता कुलकोट्यास्तु मुक्तिदा " ॥ इति ।

दिनद्वयेऽप्यर्धरात्रसंबन्धाभावे **स्कांदेऽपि**—

" उदये वाष्टमी किंचिन्नवमी सकला यदि । भवेत्तु बुधसंयुक्ता प्राजापत्यर्क्षसंयुता ।
" अपि वर्षशतेनापि लभ्यते वाऽथ वा न वा " ॥ इति ।

पारणनिर्णयः । यथोक्तरीत्या विहिततिथावुपवासं कृत्वा परेद्युः

" पूर्वाह्णे पारणं कृत्वा उपवासं समापयेत् । उपवासेषु सर्वेषु पूर्वाह्णे पारणं भवेत् ॥
"पारणान्तं व्रतं ज्ञेयं व्रतान्ते द्विजभोजनम् । असमाप्ते व्रतं पूर्वे नैव कुर्याद्व्रतांतरम्"॥ इति **स्मृतेः** ।

एवं सामान्यतः पूर्वाह्णे पारणप्राप्तौ क्वचिदपवादः **स्मर्यते**—

" अष्टम्यामथ रोहिण्यां न कुर्यात्पारणं क्वचित् ।
" तिथिरष्टगुणं हंति नक्षत्रं तु चतुर्गुणम् । तस्मात्प्रयत्नतः कुर्यात्तिथिभांते च पारणम् "॥ इति ।

नारदीये—"तिथिनक्षत्रसंयोगे उपवासो यदा भवेत् । पारणं तु न कर्तव्यं यावन्नैकस्य संक्षयः ॥
" सांयोगिके व्रते प्राप्ते यश्चैकोऽपि वियुज्यते । तत्रैव पारणं कुर्यादेवं वेदविदो विदुः " ॥ इति ।

ब्रह्मकैवर्ते—

" सर्वेष्वेवोपवासेषु दिवा पारणमिष्यते । अन्यथा पुण्यहानिः स्याद्दते धारणपारणम् " ॥ इति ।

स्मृत्यंतरे—

" तिथ्यर्क्षयोर्यदा च्छेदो नक्षत्रांतमथापि वा । अर्धरात्रेऽपि वा कुर्यात्पारणं च परेऽहनि" ॥ इति ।

उपवासदिनादपरेऽहनि दिवसे यद्युभयांतः तदा पारणमिति मुख्यः कल्पः । नक्षत्रांतमित्यनेन एकतरांतत्वमभिहितम् । सोऽयमनुकल्पः । यदि रात्रौ निशीथादर्वागुभयांत एकतरांतो वा भवति तदा दिवसे मुख्यानुकल्पयोरुभयोरप्यसंभवाद्रात्रौ पारणस्य निषिद्धत्वाच्च तत्राप्युपवासप्रसक्तौ पारणस्य प्रतिप्रसवः क्रियते । "अर्धरात्रेऽपि वा कुर्यात्" इति । अशक्तस्य तिथिनक्षत्रयोरुभयोरनुवर्त्तमानयोरपि प्रातर्देवं संपूज्य क्रियमाणं पारणं नैव दुष्यति

" जयन्त्यां पूर्वविद्धायामुपवासं समाचरेत् । तिथ्यंते वोत्सवांते वा व्रती कुर्वीत पारणम् " ॥ इति वचनात्—

नवमीनिर्णयः । अथ नवमी निर्णीयते । सा च दुर्गासरस्वतीव्रतादौ पूर्वविद्धैव ग्राह्या

" अष्टम्या नवमी युक्ता कर्तव्या फलकांक्षिभिः । न कुर्यान्नवमीं तात दशम्यां तु कदाचन " ॥ इति **स्मरणात्** । महानवम्यां तु—

" आश्वयुक्शुक्लनवमी तथा नक्तं चतुर्दशी । जयायुक्ता न कर्तव्या पूर्णायुक्ता प्रशस्यते " ॥
जया अष्टमी । पूर्णा दशमी ।

श्रीरामनवमीनिर्णयः।

श्रीरामनवमीव्रतमुक्तमगस्त्य**संहितायाम्**—" श्रीरामनवमी प्रोक्ता कोटिसूर्यग्रहाधिका।

" तस्मिन्दिने महापुण्ये राममुद्दिश्य भक्तितः। यत्किंचित्क्रियते कर्म तद्भवक्षयकारणम्।

" उपोषणं जागरणं पितॄनुद्दिश्य तर्पणम्। तस्मिन्दिने तु कर्तव्यं ब्रह्मावाप्तिमभीप्सुभिः "॥ इति।

तत्रोपवासो जयंतीवन्नित्यकाम्यरूपः। द्वैरूप्यं च तस्य द्विविधप्रमाणबलादवसीयते। उपवासविधिवाक्येषु नित्यशब्दसदाशब्दादीनां नित्यत्वसाधकानां श्रवणान्नित्यत्वसिद्धिः। तानि च साधकानि **संग्रहकारेण** संगृहीतानि—"नित्यं सदा यावदायुर्न कदाचिदतिक्रमेत्" इत्युक्त्वाऽतिक्रमे दोषश्रुतेरत्यागचोदनात्। " फलश्रुतेर्वीप्सया च तन्नित्यमिति कीर्तितम् " इति।

अत्र नित्यादिपदान्यभिधीयंते। अकरणे प्रत्यवायश्च स्मर्यते **अगस्त्यसंहितायाम्**—

" नित्यमेव तु कर्तव्यं श्रीरामनवमीव्रतम्।

" चैत्रे मासि नवम्यां तु शुक्लायां रघुनंदनः। प्रादुरासीत्पुरा ब्रह्मन् परं ब्रह्मैव केवलम्॥

" तस्मिन्दिने तु कर्तव्यमुपवासव्रतं सदा।

" प्राप्ते श्रीरामनवमीदिने मर्त्यो विमूढधीः। उपोषणं न कुरुते कुंभीपाकेषु पच्यते "॥ इति।

स्मृत्यंतरेऽपि—

" यस्तु रामनवम्यां तु भुंक्ते मोहाद्विमूढधीः। कुंभीपाकेषु घोरेषु पच्यते नात्र संशयः "॥ इति।

काम्यत्वं च फलश्रवणादवसीयते। तथा च **तत्रैव**—

" कुर्याद्रामनवम्यां य उपोषणमतंद्रितः। न मातुर्गर्भमाप्नोति स वै रामो भवेत्स्वयम्॥

" तस्मात्सर्वात्मना सर्वे कृत्वैव नवमीव्रतम्। मुच्यंते सर्वपापेभ्यो यांति ब्रह्मसनातनम् "॥ इति।

अन्ये त्वाहुः व्रतमिदं केवलं नित्यं न तु काम्यमपि पशुपुत्रस्वर्गादिफलस्याश्रवणात्।

" संध्यामुपासते ये तु सततं संशितव्रताः। विधूतपापास्ते यांति ब्रह्मलोकं सनातनम् "॥ इति।

फलश्रवणेऽपि संध्योपासनस्य यथा नित्यत्वं तथा पापक्षयद्वारा मोक्षार्थस्यास्य नित्यत्वमिति। अत्र मध्यान्हव्यापिनी तिथिर्ग्राह्या।

" झषं पूषणि संप्राप्ते लग्ने कर्कटकाव्हये। आविरासीत्स्वकलया कौसल्यायाः परः पुमान्॥

"चैत्रशुद्धा तु नवमी पुनर्वसुयुता यदि। सैव मध्यान्हयोगेन महापुण्यतमा भवेत्"॥ इति **स्मृतेः**।

यस्मिन्वर्षे पुनर्वसुयोगो नास्ति तस्मिन्वत्सरे केवलनवम्युपोष्या। " केवलाऽपि सदोपोष्या नवमीशब्दसंग्रहात् " इति **वचनात्**। सा च द्विविधा। शुद्धा विद्धा वेति। सूर्योदयमारभ्य प्रवर्त्तमाना शुद्धा। त्रिमुहूर्तया तदधिकया वाऽष्टम्या युक्ता विद्धा। तत्र शुद्धा त्रिविधा। शुद्धाधिका शुद्धसमा शुद्धन्यूना चेति। अत्र नास्ति संशयः। दिनांतरे मध्यान्हव्याप्त्यभावात्। सा च पुनः प्रत्येकं द्विविधा पुनर्वसुनक्षत्रयुक्ता तद्रहिता चेति। तत्र पुनर्वसुयुक्तशुद्धाधिका त्रिविधा। पूर्वेद्युरेव नक्षत्रयुक्ता परेद्युरेव तद्युक्ता उभयत्र तद्युक्ता चेति। तत्र प्रथमद्वितीययोर्नक्षत्रयोगो नियामकः।

"पुनर्वस्वृक्षसंयोगः स्वल्पोऽपि यदि दृश्यते। चैत्रशुक्लनवम्यां तु सा तिथिः सर्वकामदा"॥ इति **स्मृतेः**।

तृतीये तु मध्यान्हे पुनर्वसुयुक्तदिनं ग्राह्यम्। तथाऽ**गस्त्यः**—

" चैत्रशुद्धा तु नवमी पुनर्वसुयुता यदि। सैव मध्यान्हयोगेन महापुण्यतमा भवेत् "॥ इति।

एवं विद्धायामपि कृष्णाष्टम्यादिवत् पक्षभेदो निर्णयश्च द्रष्टव्यः । विद्धानिषेधस्तु वैष्णवविषयः । “नवमी चाष्टमी विद्धा त्याज्या विष्णुपरायणैः। तदन्येषां तु सर्वेषां व्रतं तत्रैव निश्चितम्”॥ इति **स्मृतेः**।

दशावतारकालाः । दशावतारकालाः **संग्रहकारेण** संगृहीताः—

“ चैत्रे मास्यसिते पक्षे त्रयोदश्यां तिथौ विभुः । उद्भून्मत्स्यरूपेण रक्षार्थमवनेर्हरिः ॥

“ ज्येष्ठमासे तथा कृष्णद्वादश्यां भगवानजः । मंदरं पृष्ठतः कृत्वा कूर्मरूपी हरिर्दधौ ॥

“ चैत्रकृष्णे तु पंचम्यां जज्ञे नारायणः स्वयम् । भुवं वराहरूपेण शृंगाभ्यामुदधेर्जलात् ॥

“ वैशाखे शुक्लपक्षे तु चतुर्दश्यामिनेऽस्तगे । उद्बभूवासुरद्वेषी नृसिंहो भक्तवत्सलः ॥

“ मासि भाद्रपदे शुक्लद्वादश्यां वामनो विभुः । अदित्यां काश्यपाज्जज्ञे नियंतुं बलिमोजसा ॥

“ मार्गशीर्षे द्वितीयायां कृष्णपक्षे तु भार्गवः । दुष्टक्षत्रियविद्वेषी रामोऽभूत्तापसाग्रणीः ॥

“ चैत्रशुक्लनवम्यां तु मध्यान्हे रघुनंदनः । दशाननवधाकांक्षी जज्ञे रामः स्वयं हरिः ॥

“ वैशाखे शुक्लपक्षे तु तृतीयायां हलायुधः । संकर्षणो बलो जज्ञे रामः कृष्णाग्रजो हरिः ।

“ मासि तु श्रावणाष्टम्यां निशीथे कृष्णपक्षके । प्राजापत्यर्क्षसंयुक्ते कृष्णं देवक्यजीजनत् ।

“ मासे भाद्रपदे शुक्लद्वितीयायां जनार्दनः । म्लेच्छाक्रांते कलावंते कल्किरूपो भविष्यति ।

“ अवतारदिने पुण्ये हरिमुद्दिश्य भक्तितः । उपवासादि यत्किंचित्तदानंत्याय कल्पते ” ॥ इति ।

दशमीनिर्णयः । अथ दशमी निर्णीयते । तस्याश्च न तिथ्यंतरवद्धेयोपादेयविभागोऽस्ति । तथा **चांगिराः**—

“ संपूर्णा दशमी कार्या परया पूर्वयाऽथवा । युक्ता न दूषिता यस्मात्तिथिः सा सर्वतोमुखी”॥ इति।

यथा संपूर्णा तिथिर्दोषरहिता तथा पूर्वविद्धा परविद्धा चेत्यर्थः । अत्र व्यवस्थामाह **शंखः**—

“ शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः। कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविः”॥ इति।

“ नवमी दशमी चैव नोपोष्या परसंयुता ” इति वचनं कृष्णपक्षविषयतया योजनीयम् ।

एकादशीनिर्णयः । अथैकादशी निर्णीयते । तत्रोपवासो नित्यकाम्यरूपः उपवासविधिषु नित्यत्वसाधकानां नित्यादिपदानां श्रवणात् । सायुज्यादिफलश्रवणाच्च ।

नित्यशब्द उदाहृतो **गारुडपुराणे**–“उपोष्यैकादशी नित्यं पक्षयोरुभयोरपि ” ॥ इति ।

सदाशब्द उक्तः **सनत्कुमारसंहितायाम्**–“एकादशी सदोपोष्या पक्षयोः शुक्लकृष्णयोः ” ॥ इति।

एवमन्यान्यपि वचनानि—“ उपोष्यैकादशी राजन्यावदायुः सुवृत्तिभिः ।

“ न करोति हि यो मूढ एकादश्यामुपोषणम् । स नरो नरकं याति रौरवं तमसा वृतम् ।

“ समादाय विधानेन द्वादशीव्रतमुत्तमम् । तस्य भंगं नरः कृत्वा रौरवं नरकं व्रजेत् ॥

“ मातृहा पितृहा चैव भ्रातृहा गुरुहा तथा । एकादश्यां तु यो भुंक्ते पक्षयोरुभयोरपि ”॥

इत्यादीनि नित्यसाधकानि द्रष्टव्यानि । काम्यत्वसाधकं फलं च श्रूयते **विष्णुरहस्ये**—

“ यदीच्छेत् विष्णुसायुज्यं सुखं संपदमात्मनः । एकादश्यां न भुंजीत पक्षयोरुभयोरपि” ॥ इति ।

स्कांदेपि—

“ यदीच्छेद्विपुलान्भोगान्मुक्तिं चात्यंतदुर्लभाम् । एकादश्यामुपवसेत्पक्षयोरुभयोरपि ” ॥ इति ।

नारदोऽपि—“ एकादशीसमं किंचित्पापत्राणं न विद्यते ।

“ स्वर्गमोक्षप्रदा ह्येषा राज्यपुत्रप्रदायिनी । सुकलत्रप्रदा ह्येषा शरीरारोग्यदायिनी ” ॥ इति ।

---

१ क्ष–जि ।

कौर्मेऽपि—

" यदीच्छेद्विष्णुसायुज्यं श्रियं संततिमात्मनः । एकादश्यां न भुंजीत पक्षयोरुभयोरपि " ॥ इति ।

तदेवं नित्यादिशब्दश्रवणान्नित्यत्वं फलश्रवणात् काम्यत्वं च सिद्धम् । उक्तं च **कालादर्शे**—

" सर्वस्मृतिपुराणेतिहासादिषु विनिश्चितम् । एकादशीव्रतं तच्च नित्यं काम्यमिति द्विधा"॥ इति।

सर्वासु स्मृतिषु सर्वेषु पुराणेषु इतिहासेषु भारतादिषु च एकादशीव्रतं विनिश्चितं विशेषेण प्रमितम्। अनेन निर्मूलत्वभ्रान्त्या ये मूढाः संदिहते निरस्तास्ते वेदितव्याः । स्मृतयस्तावदुदाह्रियंते ।

विष्णुस्मृतौ—" एकादश्यां न भुंजीत कदाचिदपि मानवः " ॥ इति ।

कात्यायनः—" एकादश्यामुपवसेत्पक्षयोरुभयोरपि " इति ।

कण्वः—" एकादशीमुपवसेन्न कदाचिदतिक्रमेत् " इति । **सनत्कुमारः**—

" निष्कृतिर्मद्यपस्योक्ता धर्मशास्त्रे मनीषिभिः । एकादश्यन्नकामस्य निष्कृतिः क्वापि नोदिता"॥ इति।

नारदेऽपि—" एकादशीसमं किंचित्पापत्राणं न विद्यते " इति । **प्रचेताः**—

" एकादशीविवृद्धा चेच्छुक्ले कृष्णे तथैव च । उत्तरां तु यतिः कुर्यात्पूर्वामुपवसेद् गृही " ॥ इति ।

बृहद्वसिष्ठः—

"द्वादशी घटिकाऽल्पा वा यदि न स्यात्परेऽहनि । दशमीमिश्रिता कार्या महापातकनाशिनी" ॥ इति।

हारीतोऽपि—

" त्रयोदश्यां यदा न स्यात् द्वादशी घटिकाद्वयम्। दशम्यैकादशी विद्धा सैवोपोष्या कदाचन"॥ इति।

ऋष्यशृंगः—

" एकादशी न लभ्येत सकला द्वादशी भवेत् । उपोष्या दशमी विद्धा ऋषिरुद्दालकोऽब्रवीत्" ॥ इति ।

काम्योपवासमधिकृत्य**ांगिराः**—

" सायमाद्यन्तयोरन्होः सायंप्रातश्च मध्यमे । उपवासफलप्रेप्सुर्जह्याद्भक्तचतुष्टयम् " ॥ इति ।

देवलोऽपि—

" दशम्यामेकभक्ताशी मांसमैथुनवर्जितः । एकादशीमुपवसेत्पक्षयोरुभयोरपि " ॥ इति ।

पुलस्त्यः—" एकादश्यां न भुंजीत नारी दृष्टे रजस्यपि " इति ॥ **गोभिलः**—

" न शंखेन पिबेत्तोयं नाश्नीयात्कूर्मसूकरौ । एकादश्यां न भुंजीत पक्षयोरुभयोरपि " ॥ इति ।

एवमादीनि **स्मृतिवचनानि** द्रष्टव्यानि । **पुराणवचनान्युदाह्रियंते । नारदीये वसिष्ठः**—

" एकादशीसमुत्थेन वन्हिना पातकेन्धनम् । भस्मतां याति राजेंद्र अपि जन्मशतोद्भवम् ॥

" नेदृशं पावनं किंचिन्नराणां भूप विद्यते । यादृशं पद्मनाभस्य दिनं पातकहानिदम् ॥

" न गंगा न गया भूप न काशी न च पुष्करम् । न चापि कौरवं क्षेत्रं न देवा न च देविका ॥

" यमुना चंद्रभागा च तुल्या नृप हरेर्दिनात् । अनायासेन राजेंद्र प्राप्यते वैष्णवं पदम् ॥

" प्रसंगादथवा दंभाल्लोभाद्वाऽथ नराधिप । एकादश्यामनश्नन्यः सर्वदुःखाद्विमुच्यते " ॥ इति ।

कौर्मेऽपि—

" वदंतीह पुराणानि भूयो भूयो वरानने । न भोक्तव्यं न भोक्तव्यं संप्राप्ते हरिवासरे " ॥ इति ।

विष्णुरहस्येऽपि—

" परमापदमापन्नो हर्षे वा समुपस्थिते । सूतके मृतके चैव न त्यजेत् द्वादशीव्रतम् " ॥ इति ।

एवमादीन्युपवासपराणि वचनानि बहूनि संति । तानि विस्तरभयान्न लिख्यंते ।

वैष्णवानामुपवासाङ्गतिथिनिर्णयः । अथ वैष्णवानामुपवासांगतिथिर्निर्णीयते । तन्निर्णयस्य च वेधाधीनत्वात्प्रथमं दशमीवेधो निरूप्यते । स च वेधः त्रिविधः । अरुणोदयवेधः सूर्योदयवेधः पंचदशनाडीवेधश्चेति । तत्रारुणोदयवेधो **भविष्यत्पुराणे** दर्शितः—

" अरुणोदयकाले तु दशमी यदि दृश्यते । सा विद्धैकादशी तत्र पापमूलमुपोषणम् " ॥ इति ।

अरुणोदयस्य प्रमाणं **स्कंदनारदाभ्यामुक्तम्**—"उदयात् प्राक्चतस्रस्तु नाडिका अरुणोदयः " इति ।

गोभिलः—

" अरुणोदयवेलायां दशमीसंयुता यदि । संपृक्तैकादशीं तां तु मोहिन्यै दत्तवान्विभुः " ॥ इति ।

सौरधर्मे—

"आदित्योदयवेला या प्राङ्मुहूर्तद्वयान्विता । सैकादशीति संपूर्णा विद्धाऽन्या परिकीर्तिता" ॥ इति ।

सूर्योदयवेधः **कण्वेन** दर्शितः—

" उदयोपरि विद्धा तु दशम्यैकादशी यदा । दानवेभ्यः प्रीणनार्थं दत्तवान्पाकशासनः " ॥ इति ।

स्मृत्यंतरेऽपि—

" दशम्याः प्रांतमादाय यत्रोदेति दिवाकरः । तेन स्पृष्टं हरिदिनं दत्तं जंभासुराय तु " ॥ इति ।

पंचदशनाडीवेधस्तु **स्कांदे** दर्शितः—

" नागो द्वादशनाडीभिः दिक्पंचदशभिस्तथा । भूतोष्टा दशनाडीभिर्दूषयत्युत्तरां तिथिम् " ॥ इति ।

नागः पंचमी । दिक् दशमी । पंचदशनाडीबोधस्य वेधांतरस्य च विषयव्यवस्था **निगमे** दर्शिता—

" सर्वप्रकारवेधोऽयमुपवासस्य दूषकः । सार्धः सप्तमुहूर्तं तु वेधोऽयं बाधते व्रतम् " ॥ इति ।

यत्तु **स्मर्यते**—

" अर्धरात्रात्परा यत्र एकादश्युपलभ्यते । तत्रोपवासः कर्तव्यो दशमी न तु वै कला " ॥ इति ।

न तद्वेधाभिप्रायेण किं तु अर्धरात्रवेधोऽपि यदा वर्ज्यः तदा किमु वक्तव्यमरुणोदयवेध इति कैमुत्यप्रदर्शनपरम् । तथा **ब्रह्मवैवर्ते**—

" अर्धरात्रे तु केषांचिद्दशम्या वेध इष्यते । अरुणोदयवेलायां नावकाशो विचारणे " ॥ इति ।

विद्धानिषेध उक्तो **नारदीये**—

"कलावेधेऽपि विप्रेन्द्र दशम्यैकादशीं त्यजेत् । सुराया बिन्दुना स्पृष्टं गंगांभ इव निर्मलम् " ॥ इति ।

स्मृत्यंतरेऽपि—

"कलार्धेनापि विद्धा स्याद्दशम्यैकादशी यदि । तदाप्येकादशीं त्यक्त्वा द्वादशीं समुपोषयेत्" ॥ इति ।

सोऽयं कलादिवेधः अरुणोदये सूर्योदये च समानः । तत्रारुणोदयवेधे वैष्णवविषयः । तच्च **गारुडपुराणे** स्पष्टमवगम्यते—

" दशमीशेषसंयुक्तो यदि स्यादरुणोदयः । नैवोपोष्यं वैष्णवेन तद्धि नैकादशीव्रतम् " ॥ इति ।

वैष्णवशब्दार्थः । वैखानस[2] पांचरात्रादिवैष्णवागमोक्तदीक्षां प्राप्तो वैष्णवः ।

" पांचरात्राद्यागमोक्तदीक्षां प्राप्तस्तु वैष्णवः " इति स्मृतेः । **स्कांदेऽपि**—

" परमापद्मापन्नो हर्षे वा समुपस्थिते । नैकादशीं त्यजेद्यस्तु यस्य दीक्षा तु वैष्णवी ॥

"समात्मा सर्वजीवेषु निजाचारादविप्लुतः । विष्णवर्पिताखिलाचारः स हि वैष्णव उच्यते " ॥ इति

उक्तलक्षणं वैष्णवं प्रति तिथिरेवं निर्णेतव्या । एकादशी द्विविधा । अरुणोदयवेधवती शुद्धा चेति ।

---

१ क्ष-डि । २ खगघ-पाठः ।

तत्र वेधवती सर्वथा त्याज्या 'तद्धि नैकादशीव्रतम्' इत्यादिभिः प्रतिषेधात् । तत्रारुणोदयवेधस्य प्रतिषेधे सूर्योदयवेधस्य त्याज्यत्वमर्थसिद्धम् । कण्ववचनं चात्र पूर्वमुदाहृतम् । या तु वेधरहिता अरुणोदयमारभ्य प्रवृत्ता शुद्धैकादशी सा द्विविधा । आधिक्येन युक्ता तद्रहिता चेति । आधिक्यं चतुर्विधम् । एकादश्याधिक्यं द्वादश्याधिक्यमुभयाधिक्यमुभयानाधिक्यं । तत्राद्येषु त्रिषु पक्षेषु शुद्धामप्यरुणोदयमारभ्य प्रवृत्तां परित्यज्य परेद्युरुपवासः कर्तव्यः । तत्रैकादश्याधिक्ये **स्मृत्यंतरम्**—

" एकादशी यदा पूर्णा परतः पुनरेव सा । पुण्यं क्रतुशतस्योक्तं त्रयोदश्यां तु पारणम् " ॥ इति ।

नारदोऽपि—

" संपूर्णैकादशी यत्र द्वादश्यां वृद्धिगामिनी । द्वादश्यां लंघनं कार्यं त्रयोदश्यां तु पारणम्" ॥ इति ।

द्वादश्याधिक्ये **व्यास** आह—

" एकादशी यदा लुप्ता परतो द्वादशी भवेत् । उपोष्या द्वादशी तत्र यदीच्छेत्परमां गतिम्" ॥ इति ।

स्मृत्यंतरेऽपि—

" एकादशी तु संपूर्णा द्वादशी वृद्धिगामिनी । वंचुळी नाम सा प्रोक्ता कोटियज्ञफलप्रदा ॥

" वंचुळीं द्वादशीं त्यक्त्वा यः कुर्यात्पूर्ववासरे । सप्तजन्मार्जितं पुण्यं तत्क्षणादेव नश्यति" ॥ इति ।

उभयाधिक्ये तु **नारद** आह—

" संपूर्णैकादशी यत्र प्रभाते पुनरेव सा । सर्वैरेवोत्तरा कार्या परतो द्वादशी यदि " ॥ इति ।

गुरुरपि—

" संपूर्णैकादशी यत्र प्रभाते पुनरेव सा । तत्रोपोष्या द्वितीया तु परतो द्वादशी यदि " ॥ इति ।

उभयाधिक्यरहितायां तु शुद्धायां न कोऽपि संदेहः । इति वैष्णवदीक्षायुक्तानामेकादशी निर्णीता ।

स्मार्तैकादशीनिर्णयः । अथ श्रौतस्मार्तपर्यवसितानां आगमोक्तदीक्षारहितानामेकादशी निर्णीयते । अरुणोदयवेधस्य वैष्णवविषयत्वे व्यवस्थिते सत्युदयवेधः स्मार्तविषयत्वेन परिशिष्यते । अत एव **स्मर्यते**—

" अतिवेधा महावेधा ये वेधास्तिथिषु स्मृताः । सर्वेऽप्यवेधा विज्ञेया वेधः सूर्योदये मतः " ॥ इति ।

वेधादीनां स्वरूपमुक्तं **ब्रह्मकैवर्ते**—

" चतस्रो घटिकाः प्रातररुणोदयसंज्ञिताः । चतुष्टयविभागोऽत्र वेधादीनां किलोदितः ॥

" अरुणोदयवेधः स्यात्सार्धं तु घटिकात्रयम् । अतिवेधोऽपि घटिका प्रभासंदर्शनाद्रवेः ॥

" महावेधोऽपि तत्रैव दृश्यतेऽर्को न दृश्यते । तुरीयस्तत्र विहितो योगः सूर्योदये बुधैः " ॥ इति ।

अरुणोदयकाले घटिकार्धे दशमीसद्भावो वेधः घटिकाव्याप्तिरतिवेधः । उदयात्पूर्वं कृत्स्नारुणोदयकालव्याप्तिर्महावेधः । सूर्योदयकाले दशमीसद्भावो योगः उदयवेध इति यावत् । वेधातिवेधमहावेधयोगाश्चत्वार उपवासस्य दूषकाः । तत्र

" दशमीशेषसंयुक्तो यदि स्यादरुणोदयः । नैवोपोष्यं वैष्णवेन तद्धि नैकादशीव्रतम् " ॥ इति

वचनेनारुणोदयवेधस्य वैष्णवविषयत्वे निश्चिते सति पारिशेष्यात् ' सर्वेऽप्यवेधा विज्ञेया ' इति वचनाच्च सूर्योदयवेधः स्मार्तविषय इति निश्चीयते । एवं च सूर्योदयवेधमपेक्ष्य द्वेधा भिद्यते । शुद्धा विद्धा चेति । शुद्धैकादशी वृद्धिसाम्यह्रासैस्त्रिविधा । शुद्धाधिका शुद्धसमा शुद्धहीनेति ।

एवं विद्धापि त्रिधा । विद्धाधिका विद्धसमा विद्धहीनेति । तत्र शुद्धाप्रकारेषु त्रिषु विद्धाप्रकारेषु त्रिषु च एकैका एकादशी द्वादशी वृद्धिसाम्यहीनतागुणैर्भूयस्त्रिविधा । शुद्धाधिका द्वादश्यधिका शुद्धाधिका द्वादशीसमा शुद्धाधिका द्वादशीहीना शुद्धसमा द्वादश्यधिका शुद्धसमा द्वादशीसमा शुद्धसमा द्वादशीहीना शुद्धहीना द्वादश्यधिका शुद्धहीना द्वादशीसमा शुद्धहीना द्वादशीहीना विद्धाधिका द्वादश्यधिका विद्धाधिका द्वादशीसमा विद्धाधिका द्वादशीहीना विद्धसमा द्वादश्यधिका विद्धसमा द्वादशीहीना विद्धहीना द्वादश्यधिका विद्धहीना द्वादशीसमा विद्धहीना द्वादशीहीनेति । एवमष्टादशधा भिन्नैकादशी । तदुक्तं **ब्रह्मसिद्धांते**—

" शुद्धा विद्धा दशम्या क्वचिदपि च ततो द्वैधमेकादशीयं
" प्रत्येकं च त्रिधाऽसौ पुनरपि समतान्यूनताधिक्ययोगात् ।
" पक्षाः प्रत्येकभिन्नाः पुनरपि षडमी द्वादशीन्यूनताद्यैः
" संबंधादेवमष्टादश खलु मिलिताः कल्पनाः संभवन्ति " ॥ इति ।

अष्टादशभेदप्रतिपादनपूर्वकं यथाक्रममुपवासनिश्चयमाह **कालादर्शकारः**—

" शुद्धा विद्धा द्विधा वृद्धिसाम्यह्रासैः पुनस्त्रिधा । तत्रैकैका द्वादशीस्था वृद्धिसाम्योनतागुणैः ॥
" आद्योपोष्या परोर्ध्वे द्वे पौर्वपर्यात् व्यवस्थिते । गृहियत्योरुत्तरासु षट्सु पूर्वैव संमता ॥
"तिसृष्वंत्यासु विद्धैव तत्पूर्वे तु व्यवस्थिते । अविद्धैव तु शेषासु तृतीयासु व्यवस्थिता"॥ इति ।

आद्योपोष्या परेति द्वादश्याधिक्ययुक्ता शुद्धाधिकैकादशी परैवोपोष्या । तदाह **नारदः**—

" संपूर्णैकादशी यत्र प्रभाते पुनरेव सा । तत्रोपोष्या द्वितीया तु पुत्रपौत्रविवर्धनी " ॥ इति ।

गारुडपुराणे—"संपूर्णैकादशी यत्र प्रभाते पुनरेव सा । तत्रोपोष्या परा पुण्या परतो द्वादशी यदि"॥

स्मृत्यंतरे—"संपूर्णैकादशी यत्र प्रभाते पुनरेव सा । वैष्णवी चेत्त्रयोदश्यां घटिकैकाऽपि दृश्यते ॥
"गृहस्थोऽपि परां कुर्यात्पूर्वां नोपवसेत्तदा । पूर्णाऽप्येकादशी त्याज्या वर्धतो द्वितयं यदि "॥ इति ।

वैष्णवी द्वादशी । **वाराहेऽपि**—

"एकादशी विष्णुना चेत् द्वादशी परतः स्थिता । उपोष्या द्वादशी तत्र यदीच्छेत्परमं पदम्"॥ इति।

ऊर्ध्वे द्वे एकादश्यौ । द्वादशीसाम्ययुक्ता शुद्धाधिका द्वादशीहानियुक्ता शुद्धाधिकेति द्वे एकादश्यौ पौर्वापर्यात्पूर्वा गृहस्थानां परा यतीनामिति व्यवस्थिते । तदाह **स्कंदः**—

" संपूर्णैकादशी यत्र प्रभाते पुनरेव सा । उत्तरां तु यतिः कुर्यात्पूर्वामुपवसेद् गृही" ॥ इति ।

स्कांदेऽपि—" प्रथमेऽहनि संपूर्णा व्याप्त्याऽहोरात्रसंयुता ।
"द्वादश्यां च तथा किंचिद् दृश्यते पुनरेव च । पूर्वा कार्या गृहस्थैस्तु यतिभिश्चोत्तरा विभो "॥ इति।

स्मृत्यंतरे—" पुनः प्रभातसमये घटिकैका यदा भवेत् ।
" अत्रोपवासो विहितः चतुर्थाश्रमवासिनाम् । विधवायाश्च तत्रैव परतो द्वादशी न चेत् " ॥

गारुडपुराणेऽपि—

" पुनः प्रभातसमये घटिकैका यदा भवेत् । अत्रोपवासो विहितो वनस्थस्य यतेस्तथा ॥
" विधवायाश्च तत्रैव परतो द्वादशी न चेत् । पुण्यं क्रतुशतस्योक्तं त्रयोदश्यां तु पारणम्"॥ इति।

मार्कंडेयः—

" संपूर्णैकादशी यत्र प्रभाते पुनरेव सा । पूर्वामुपवसेत् कामी निष्कामस्तूत्तरां सदा " ॥ इति ।

कामिपदं गृहस्थोपलक्षणं निष्कामपदं यत्युपलक्षणम् ।

केचिद्गृहस्थस्यापि निष्कामित्वे उत्तरा तिथिरुपोष्येत्याहुः । तथा **विष्णुरहस्ये—**

" निष्कामस्तु गृही कुर्यादुत्तरैकादशीं सदा । सकामस्तु सदा पूर्वामिति बोधायनो मुनिः "॥ इति ।

यत्तु **स्मृत्यंतरवचनम्—**

" संपूर्णैकादशी यत्र प्रभाते पुनरेव सा । लुप्यते द्वादशी तस्मिन्नुपवासः कथं भवेत् ॥

" उपोष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्परैः "॥ इति तत् गृहियत्योर्व्यवस्थितं यत्पौर्वापर्यं तदभिप्रायेण । अत एवोक्तं **कालनिर्णये—**

"एकादशीमात्रवृद्धौ गृहियत्योर्व्यवस्थितिः । उपोष्या गृहीभिः पूर्वा यतिभिस्तूत्तरा तिथिः"॥ इति ।

उत्तरासु षट्सु पूर्वेव द्वादश्याधिक्ययुक्ता शुद्धसमा द्वादशीसाम्ययुक्ता शुद्धसमा द्वादशीहानियुक्ता शुद्धसमा द्वादश्याधिक्ययुक्ता शुद्धहीना द्वादशीसाम्ययुक्ता शुद्धहीना द्वादशीहानियुक्ता शुद्धहीनेति षट्स्वेकादशीषु पूर्वेवोपोष्या । तदाह **स्कंदः—**

" शुद्धा यदा समा हीना समा क्षीणाऽधिकोत्तरा । एकादशीमुपवसेन्न शुद्धां वैष्णवीं सदा " ॥ इति ।

यत्तु **स्मृत्यंतरेऽ**भिहितम्—"शुद्धाऽप्येकादशी त्याज्या परतो द्वादशी यदि " इति यदपि वचनांतरं

" द्वादशी तु त्रयोदश्यां कलामात्रापि दृश्यते । द्वादशद्वादशीर्हन्ति पूर्वस्यां पारणं कृतम् " ॥ इति ।

यदपि **स्कांदवचनम्—**

" एकादशी भवेत्पूर्णा परतो द्वादशी यदि । तदा ह्येकादशीं त्यक्त्वा द्वादशीं समुपोषयेत् " ॥ इति ।

यदपि **कालिकापुराणवचनम्—**

"एकादशी यदा पूर्णा परतो द्वादशी भवेत् । उपोष्या द्वादशी तत्र तिथिवृद्धिः प्रशस्यते "॥ इति ।

यदपि **स्मृत्यंतरवचनम्—**

" एकादशी तु संपूर्णा द्वादशी वृद्धिगामिनी । वंचुली नाम सा प्रोक्ता कोटियज्ञफलप्रदा ॥

" वंचुलीं द्वादशीं त्यक्त्वा यः कुर्यात्पूर्ववासरे । सप्तजन्मार्जितं पुण्यं तत्क्षणादेव नश्यति"॥ इति ।

एवमादीनि द्वादशीमात्रवृद्धौ परदिनोपवासविधायीनि वचनानि वैष्णवविषयाणि । स्मार्तानामपि विद्धैकादशीविषयाणि । तथा च **स्मर्यते—**

" आदित्योदयमारभ्य भवेदेकादशीतिथिः । परेऽह्नि द्वादशी पूर्णा त्रयोदश्यां च वर्धते ॥

" उपोष्या द्वादशी तत्र वैष्णवैर्मोक्षकाङ्क्षिभिः " ॥

व्यासः—

"एकादशी यदा लुप्ता परतो द्वादशी भवेत् । उपोष्या द्वादशी तत्र यदीच्छेत्परमां गतिम् " ॥ इति ।

लुप्ता आदौ दशमीमिश्रितत्वात्परतो वृद्ध्यभावाच्च क्षयं गतेति यावत् । उक्तं च **कालनिर्णये—**

" द्वादशीमात्रवृद्धौ तु शुद्धाविद्धे व्यवस्थिते । शुद्धा पूर्वोत्तरा विद्धा स्मार्तनिर्णय ईदृशः"॥ इति ।

विद्धाधिका द्वादश्यधिका विद्धाधिका द्वादशीसमा विद्धासमा द्वादश्यधिका इति पक्षत्रयेऽपि परदिन एवोपवासः । तथा **भविष्यत्पुराणे—**

" एकादशीं दशायुक्तां वर्धमाने विवर्जयेत् । क्षयमार्गस्थिते सोमे कुर्वीत दशमीयुता " ॥ इति ।

---

१ घ–विद्धाधिका द्वादशीहीनेति ।

स्मृत्यंतरेऽपि—

" एकादशी यदा लुप्ता परतो द्वादशी भवेत् । उपोष्या द्वादशी तत्र यदीच्छेत्परमां गतिम् ॥

"कलार्धेनापि विद्धा स्याद्दशम्यैकादशी यदा । तदा त्वेकादशीं त्यक्त्वा द्वादशीं समुपोषयेत्" ॥ इति ।

पक्षत्रयेऽपि पूर्वत्रोपवासं निषेधति **नारदः—**

" नोपोष्या दशमी विद्धा सदैवैकादशी तिथिः । तामुपोष्य नरो जह्यात्पुण्यं वर्षशतोद्भवम्" ॥ इति ।

तथा—

" दशमीशेषसंयुक्ता गांधार्या समुपोषिता । तस्याः पुत्रशतं नष्टं तस्मात्तां परिवर्जयेत् " ॥ इति ।

एवमन्यान्यपि वचनानि विद्धानिषेधपराण्यत्रैव विषये योजनीयानि ।

विद्धादिका द्वादशीहीनेति पक्षे पूर्ववत् गृहियत्योर्व्यवस्था द्रष्टव्या । तदाह **प्रचेताः—**

" एकादशी विवृद्धा चेच्छुक्ले कृष्णे विशेषतः । उत्तरां तु यतिः कुर्यात्पूर्वामुपवसेद्गृही " ॥ इति ।

न चैतच्छुद्धाधिक्ये चरितार्थमिति शंकनीयं बाधकाभावेन विद्धाधिक्येऽपि तद्वचनप्रवृत्तेर्निवारयितुमशक्यत्वात् । विद्धसमा द्वादशीसमा विद्धसमा द्वादशीहीना विद्धहीना द्वादश्यधिका विद्धहीना द्वादशीसमा विद्धहीना द्वादशीहीनेति पंचसु पक्षेषु विद्धैकादश्येवोपोष्या । तथा च **स्मृत्यंतरे—**

"एकादशी न लभ्येत सकला द्वादशी भवेत् । उपोष्या दशमी विद्धा ऋषिरुद्दालकोऽब्रवीत्" ॥ इति ।

ऋष्यशृंगः—

" सर्वत्रैकादशी कार्या दशमीमिश्रिता नरैः । प्रातर्भवतु वाऽमा वा तस्यां नित्यमुपोषणम्" ॥ इति ।

तथा—

" त्रयोदश्यां न लभ्येत द्वादशी यदि किंचन । उपोष्यैकादशी तत्र दशमीमिश्रिता त्वपि " ॥ इति ।

विष्णुरहस्येऽपि—

" एकादशी भवेत्काचिद्दशम्या दूषिता तिथिः । वृद्धिपक्षे भवेद्दोषः क्षयपक्षे तु पुण्यदा " ॥ इति ।

विद्धैकादश्याः क्षये सति पूर्वैवोपोष्येत्यर्थः । अत्र पक्षपंचके परदिनोपवासे सति त्रयोदश्यां पारणं प्रसज्येत । तच्च निषिद्धम् । तथा च **भविष्यत्पुराणे—**

" पारणं तु त्रयोदश्यां यः करोति नृपोत्तम । द्वादशद्वादशीर्हंति नात्र कार्या विचारणा " ॥ इति ।

ऋष्यशृंगः—

" पारणाय न लभ्येत द्वादशी यदि कुत्रचित् । तदानीं दशमी विद्धाऽप्युपोष्यैकादशी तिथिः " ॥ इति ।

विष्णुरहस्येऽपि—

"द्वादशीतिथिरल्पाऽपि यदि न स्यात्परेऽहनि । दशमीमिश्रिता कार्या न दोषोऽस्तीति वेधसः" ॥ इति ।

वचनमिति शेषः । विद्धसमा द्वादशीसमा विद्धसमा द्वादशीहीनेति पक्षद्वये पौर्वापर्येण गृहियत्योर्व्यवस्था **कालादर्शकारेण** प्रतिपादिता 'तत्पूर्वे तु व्यवस्थिते' इति । अत्र प्रमाणं चिंत्यम् । सर्वमेतत्संगृह्य दर्शयति **कालनिर्णयकारः—**" शुद्धाविद्धयोरुभयोरप्येष निर्णयसंग्रहः । एकादशीद्वादश्योरुभयोरपि वृद्धौ परेद्युरुपवासः द्वयोरप्यवृद्धौ पूर्वेद्युः । एकादशीमात्रवृद्धौ गृहियत्योर्व्यवस्था पूर्वेद्युर्गृहस्थः उत्तरेद्युर्यतिः । द्वादशीमात्रवृद्धौ शुद्धायां सर्वेषां पूर्वेद्युः विद्धायां परेद्युरिति । दिनत्रयविषयाणि कानिचिद्वचनान्युपलभ्यंते । तदाह **नारदः—**

"यदि दैवात्तु संसिध्येदेकादश्यां तिथित्रयम् । तत्र क्रतुशतं पुण्यं द्वादशीपारणे भवेत् " ॥ इति ।

कौर्मे—

" द्विस्पृगेकादशी यत्र तत्र संनिहितो हरिः । तामेवोपवसेत्काममकामो विष्णुतत्परः " ॥ इति ।

अत्राद्यंतयोर्दशमीद्वादश्योर्मध्ये एकादशीत्येतादृशं दिनत्रयं यदा प्राप्नोति तदा परतो द्वादशी वृद्धिरवृद्धिश्चेत्युभयं संभवति । तत्र यद्यवृद्धिः तदा यथोक्तं दिनत्रयमुपोष्यम् । तदुक्तं **पुराणांतरे**—

" दिनत्रयमृते देवि नोपोष्या दशमीयुता । सैवोपोष्या सदा पुण्या परतश्चेत्त्रयोदशी " ॥ इति ।

द्वादशीवृद्धौ एकादशी यदा लुप्तेत्यनेन **व्यासवचनेन** परेद्युरुपवासः कर्तव्यः । यदा त्वाद्यंतयोरेकादशीत्रयोदश्योर्मध्ये द्वादशीत्येतादृशं दिनत्रयं तदा गृहस्थानां पूर्वदिन उपवासः । परदिने निषेधात् । तथा **कौर्मे**—

" एकादशी द्वादशी च रात्रिशेषे त्रयोदशी । उपवासं न कुर्वीत पुत्रपौत्रसमन्वितः " ॥ इति ।

पाद्मेऽपि—

" एकादशी द्वादशी च रात्रिशेषे त्रयोदशी । त्र्यहस्पृक्तद्दहोरात्रं नोपोष्यं तु सुतार्थिभिः " ॥ इति ।

पुत्रपौत्रसमन्वितः सुतार्थिभिरिति विशेषणाद्यतीनामत्र विषये परदिन एवोपवासः । एतदेवाभिप्रेत्याह **नारदः**—

" एकादशी द्वादशी च रात्रिशेषे त्रयोदशी । तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणम् ॥

"एकादशी द्वादशी च रात्रिशेषे त्रयोदशी । त्रिस्पृशी नाम सा प्रोक्ता ब्रह्महत्यां व्यपोहति" ॥ इति ।

कौर्मेऽपि—

" द्विस्पृगेकादशी यत्र तत्र संनिहितो हरिः । पुण्यं क्रतुशतस्योक्तं त्रयोदश्यां तु पारणम् " ॥ इति ।

वैष्णवानामपि परदिन एवोपवासः " नैवोपोष्या वैष्णवेन " इति पूर्वदिनोपवासस्य निषिद्धत्वात् । यत्तु **स्मर्यते**—

"आदित्येऽहनि संक्रांत्यां व्यतीपाते दिनत्रये । पारणं चोपवासं च न कुर्यात्पुत्रवान्गृही" ॥ इति ।

यदपि **मत्स्यवचनम्**—

" दिनक्षये तु संक्रांत्यां ग्रहणे चंद्रसूर्ययोः । उपवासं न कुर्वीत पुत्रपौत्रसमन्वितः ॥

" द्वौ तिथ्यंतावेकवारे यस्मिन्स स्याद्दिनक्षयः " ॥ इति । अत्र दिनक्षयादिषूपवासनिषेधो दिनक्षयादिनिमित्तकः नैकादशीनिमित्तकः । तदुक्तं **कालादर्शे**—

" संक्रात्यादिनिषेधश्च संक्रात्यादिनिमित्तकः । उपवासं निषेधन्ति न ते त्वैकादशीव्रतम् " ॥ इति ।

कात्यायनः—

" तत्प्रयुक्तोपवासस्य निषेधोऽयमुदाहृतः । प्रयुक्त्यंतरयुक्तस्य न विधिर्न निषेधनम् " ॥ इति ।

जैमिनिरपि—

" तन्निमित्तोपवासस्य निषेधोऽयमुदाहृतः । नानुषंगकृतो ग्राह्यो यतो नित्यमुपोषणम् " ॥ इति ।

अयमर्थः—एकादश्युपवासस्य नित्यत्वात्संक्रान्त्याद्युपवासस्य काम्यत्वात्काम्योपवासनिषेधेन नित्योपवासनिषेधो न सिध्यतीति । काम्योपवासश्च **वसिष्ठेनोक्तः**—

" एकस्मिन्सावने त्वन्हि तिथीनां त्रितयं यदा । तदा दिनक्षयः प्रोक्तस्तत्र साहस्रिकं फलम् ॥

" अमावास्या द्वादशी च संक्रांतिश्च विशेषतः । एताः प्रशस्तास्तिथयो भानुवारस्तथैव च ॥

" अत्र स्नानं जपो होमो देवतानां च पूजनम् । उपवासस्तथा दानमेकैकं पावनं स्मृतम् " ॥ इति ।

पितामहस्तु दिनक्षय एकादश्युपवासं निषेधति—
“ एकादश्यां दिनक्षय उपवासं करोति यः । तस्य पुत्रा विनश्यंति मघायां पिंडदो यथा ”॥ इति ।
ईदृशे विषये व्यवस्था दर्शिता **कालनिर्णये**—
“ उपवासे निषिद्धे तु भक्ष्यं किंचित् प्रकल्पयेत् । न दूष्यत्युपवासोऽत्र उपवासफलं भवेत् ॥
“ नक्तं हविष्यान्नमनोदनं वा फलं तिलाः क्षीरमथांबुवाऽऽज्यम् ।
“ यत्पंचगव्यं यदि वाऽपि वायुः प्रशस्तमत्रोत्तरमुत्तरं च ” ॥ इति । **स्मृत्यंतरे**—
“ अष्टैतान्यव्रतघ्नानि आपो मूलं घृतं पयः । हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् ” ॥ इति ।
एवं कृष्णैकादश्यां गृहस्थस्योपवासे निषिद्धे भक्ष्यं प्रकल्पनीयम् । तत्रोपवासं निषेधति **कात्यायनः**—
“ एकादशीषु कृष्णासु रविसंक्रमणे तथा । चंद्रसूर्योपरागे च न कुर्यात्पुत्रवान्गृही ” ॥ इति ।
गौतमः—
“ आदित्येऽहनि संक्रात्यामसितैकादशीषु च । व्यतीपाते कृते श्राद्धे पुत्री नोपवसेत् गृही ”॥ इति।
पाद्मेऽपि—
“ संक्रात्यामुपवासेन पारणेन युधिष्ठिर । एकादश्यां च कृष्णायां ज्येष्ठपुत्रो विनश्यति ” ॥ इति ।
नारदोऽपि—
“ इंदुक्षयेऽर्कसंक्रांतौ एकादश्यसिते रवेः । उपवासं न कुर्वीत यदीच्छेत्संततिं ध्रुवम् ” ॥ इति ।
यत्तु **कौर्मवचनम्**—“एकादश्यां न भुंजीत पक्षयोरुभयोरपि ” ॥ इति । यदपि **विष्णुधर्मोत्तरे वचनम्**—
“ स ब्रह्महा स गोघ्नश्च स्तेयी च गुरुतल्पगः । एकादश्यां तु यो भुंक्ते पक्षयोरुभयोरपि”॥ इति ।
यत्तु **कूर्मवचनम्**—
“ यथोत्तरे दक्षिणे वा अयने चैव कीर्तिते । तुल्यं पुण्यमवाप्नोति द्वादश्योरुभयोरपि ” ॥ इति ।
“ सायंप्रातर्यथा सन्ध्ये सायंप्रातर्यथाहुती । तथा सितासिते पुण्ये द्वादश्यौ धर्मतः समे” ॥ इति ।
यानि चान्यान्येतादृशानि शुक्लकृष्णैकादश्युपवासप्रतिपादकानि तानि सर्वाणि वानप्रस्थयतिविधवाविषयाणि । तदुक्तं **कालादर्शे**—
“ उपोष्यैकादशी कृष्णा शुक्लावदिति वादिनः । विधवाविपिनस्थादिविषयत्वेन सार्थकम्”॥ इति ।
कौर्मेऽपि—“एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि । वनस्थयतिधर्मोऽयं शुक्लामेव सदा गृही” ॥
स्कान्देऽपि–“एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि । वानप्रस्थो यतिश्चैव शुक्लामेव सदा गृही”॥ इति
नैमित्तिककाम्योपवासौ कृष्णायामपि कर्तव्यौ । तत्र नैमित्तिकं **स्मृत्यंतरे** पठ्यते—
“ शयनिबोधनी मध्ये या कृष्णैकादशी भवेत् । सैवोपोष्या गृहस्थेन नान्या कृष्णा कदाचन ”॥ इति।
काम्योपवासस्तु **मात्स्ये** दर्शितः—
“ एकादश्यां तु कृष्णायामुपोष्य विधिवन्नरः । पुत्रानायुः समृद्धिं च सायुज्यं च समृच्छति ” ॥ इति ।
स्कांदेऽपि—“ पितॄणां गतिमन्विच्छन् कृष्णायां समुपोषयेत् ” ॥ इति । **सनत्कुमारोऽपि**—
“ भानुवारेण संयुक्ता कृष्णा संक्रांतिसंयुता । एकादशी सदोपोष्या सर्वसंपत्करी तिथिः ”॥ इति ।

श्रवणद्वादशीनिर्णयः। यदा द्वादश्यां श्रवणनक्षत्रं भवेत्तदा शुद्धैकादशीमपि परित्यज्य द्वादश्यामेवोपवसेत्। तथा च **नारदः**—

"शुक्ला वा यदि वा कृष्णा द्वादशी श्रवणान्विता। तयोरेवोपवासश्च त्रयोदश्यां तु पारणम्॥
"एकादश्यां त्वविद्धायां द्वादश्यां श्रवणं यदि। उपोष्या द्वादशी पुण्या सर्वपापक्षयावहा"॥ इति।

स्मृत्यंतरेऽपि—

"एकादशीं परित्यज्य द्वादशीं समुपोषयेत्। पूर्वोपवासजं पुण्यं सर्वं प्राप्नोत्यसंशयम्"॥ इति।

शक्तस्तूपवासद्वयं कुर्यात्

"एकादशीमुपोष्यैव द्वादशीं समुपोषयेत्। तत्र द्विधोपवासः स्यादुभयोर्देवता हरिः"॥ इति।

अत्र देवतैक्यात्पूर्वोपवासस्य पारणं नास्तीत्युक्तं भवति।

विद्धायामपि द्वादश्यां फलाधिक्यमुक्तं **स्मृत्यंतरे**—

"द्वादश्येकादशीयुक्ता तत्र च श्रवणं यदि। सा विष्णुशृङ्खला ज्ञेया सायुज्यफलदायिनी"॥

गौतमोऽपि—

"द्वादशीं श्रवणर्क्षं च स्पृशेदेकादशी यदि। स एव वैष्णवो योगो विष्णुशृङ्खलसंज्ञकः"॥ इति।

इयं च श्रवणद्वादशी नित्या

"द्वादशीं श्रवणोपेतां यो नोपोष्यति दुर्मतिः। पञ्चसंवत्सरकृतं पुण्यं तस्य विनश्यति"॥

इत्यकरणे प्रत्यवाय**स्मरणात्**। काम्यत्वमपि **मार्कण्डेय** आह—

"द्वादश्यामुपवासेन सिद्धार्थो भूप सर्वशः। चक्रवर्तित्वमखिलं संप्राप्नोत्यखिलां श्रियम्"॥

यत्तु **वचनम्**—

"नभस्यशुक्लद्वादश्यां नक्षत्रं श्रवणं यदि। श्रवणद्वादशी नाम सा प्रोक्ता मुनिपुंगवैः"॥ इति।

तद्वामनजयंत्यभिप्रायम्

"मासि भाद्रपदे शुक्लद्वादशी श्रवणान्विता। उपोष्या वामनप्रीत्यै जातस्तत्र यतो हरिः"॥ इति **स्मरणात्**। "शुक्ला वा यदि वा कृष्णा द्वादशी श्रवणान्विता" इति **वचनाद्य**दाकदाचिदपि श्रवणद्वादशीसंभवे तत्रोपवासः कार्य एव। एतच्च श्रवणद्वादशीव्रतं न तिथिप्रधानं
"याः काश्चित्तिथयः पुण्याः प्रोक्ता नक्षत्रयोगतः।तास्वेव तद्व्रतं कुर्याच्छ्रवणद्वादशीं विना"॥इति **स्मृतेः**। नक्षत्रप्राधान्येऽपि इतरनक्षत्रोपवासवन्नस्तमयव्यापि नक्षत्रं ग्राह्यम्

"यस्मिन्नस्तंगतः सूर्यो निशि यद्युतमिंदुना। तदैवोपवसेदृक्षे नक्षत्रं श्रवणं विना"॥ इति श्रवणपर्युदासात्। अतः "उदये त्रिमुहूर्तस्थं नक्षत्रं व्रतदानयोः" इति **वचना**दुदयादित्रिमुहूर्तव्यापिश्रवणनक्षत्रं किंचित् द्वादशीस्पृष्टं यदि ग्राह्यम्। त्रिमुहूर्तव्याप्त्यभावे पूर्वेद्युरेवोपवासः। द्वादशीयुक्तस्य श्रवणस्य दिनद्वये त्रिमुहूर्तव्यापित्वे पूर्वदिन उपवासः। तत्र नक्षत्रस्य पूर्णत्वात्। श्रवणद्वादश्युपवासे त्रयोदश्यामेव पारणं कार्यं "त्रयोदश्यां तु पारणम्" इत्युक्तत्वात्। एकादश्युपवासे तु हरिवासरवर्जितद्वादश्यां पारणं कार्यम्

"चतुर्मुहूर्तं द्वादश्यामाद्यमेकादशीतिथौ। अन्ते चतुर्मुहूर्तं यत् तत्कालं हरिवासरम्॥
"महादोषकरं चान्नं संप्राप्ते हरिवासरे। न कार्यं पारणं तत्र विष्णुप्रीणनतत्परैः"॥ इति **स्मृतेः**।

यदा त्रयोदश्यां द्वादश्याः कलाद्वयं कलात्रयं वा संभवति तदा द्वादशीकाल एव पारणं कुर्यात्तदुक्तं

नारदीये—

"एकादश्याः कला ह्येका द्वादश्यास्तु कलाद्वयम् । द्वादशद्वादशीर्हंति त्रयोदश्यां तु पारणम्" ॥ इति ।

स्मृत्यंतरेऽपि—

"कलाद्वयं त्रयं वापि द्वादशीं न त्वतिक्रमेत् । पारणे मरणे नृणां तिथिस्तात्कालिकी स्मृता"॥ इति ।

द्वादश्यां माध्याह्निककालः । द्वादशीकाले यदा पारणं तदा तत्प्रागेव सर्वाः क्रियाः कर्तव्याः । तदुक्तं **नारदीये—**

" अल्पायामपि विप्रेंद्र द्वादश्यामरुणोदये । स्नानार्चनक्रियाः कार्या दानहोमादिसंयुताः "॥ इति ।

गारुडपुराणेऽपि—

"यदा त्वल्पा द्वादशी स्यादपकर्षो भुजेर्भवेत् । प्रातर्मध्यान्हिकस्यापि तत्र स्यादपकर्षणम्"॥ इति ।

स्कांदेऽपि—

"यदा भवेदतीवाल्पा द्वादशी पारणादिने । उषःकाले द्वयं कुर्यात्प्रातर्माध्यान्हिकं च तत्"॥ इति । उदितहोमिनोऽग्निहोत्रिणो अग्निहोत्रहोमानंतरं पारणं कार्यम् 'विप्रतिषेधे श्रुतिलक्षणं बलीय' इति **स्मरणात्** । न च वाच्यम्

" आहिताग्निरनड्वांश्च ब्रह्मचारी च ते त्रयः । अश्नंत एव सिध्यंति नैषां सिद्धिरनश्नताम् " ॥

*इत्यापस्तंबस्मरणादाहिताग्नेरुपवास एव नास्तीति "ब्रह्मचार्याहिताग्निश्च त्यजेन्नैकादशीव्रतम्"इति **स्मृतेः** । **आपस्तंबवचनस्य** एकादशीव्यतिरिक्तविषयत्वावगमात् कालयोर्भोजनमिति वचनप्राप्तं यत्कालद्वयभोजनं तत्र नियमाभावप्रतिपादनपरत्वाच्च द्वादशीकाले पारणासंभवे अद्भिः पारणं कुर्यात् । तदाह **कात्यायनः—**

"संध्यादिकं भवेन्नित्यं पारणं तु निमित्ततः । अद्भिस्तु पारयित्वाऽथ नैत्यकांते भुजिर्भवेत्"॥ इति ।

देवलोऽपि—

"संकटे विषमे प्राप्ते द्वादश्यां पारणं कथम् । अद्भिस्तु पारणं कुर्यात् पुनर्भुक्तं न दोषकृत् ॥ इति ।

" अशितानशिता यस्मादापो विद्वद्भिरीरिताः । अम्भसा केवलेनैव करिष्ये व्रतपारणम् " ॥ इति संकल्प्य गायत्र्या अभिमन्त्र्य त्रिवारं चुलकोदकं " प्रणवेन पिबेत् तोयं जलपारणमुच्यते ॥

" आपः पवित्रममलं पावनाः सर्वकर्मसु । व्रतलोपभयादेतत्पारणार्थं पिबाम्यहम् " ॥ इति ।

एकादश्युपवासे अधिकारिणः । एकादश्युपवासे अधिकारिणं दर्शयति **कात्यायनः—**

" अष्टवर्षाधिको मर्त्यो ह्यसंपूर्णाशीतिवत्सरः । एकादश्यामुपवसेत्पक्षयोरुभयोरपि " ॥ इति ।

नारदः—

"अष्टाब्दादधिको मर्त्यो ह्यपूर्णाशीतिहायनः । भुंक्ते यो मानवो मोहादेकादश्यां स पापकृत्"॥ इति ।

पतिमत्या उपवासनिषेधः । पतिमत्यासूपवासं निषेधति **विष्णुः** (२५।१६)—

" पत्यौ जीवति या नारी उपोष्य व्रतमाचरेत् । आयुष्यं हरते भर्तुर्नरकं चैव गच्छति " ॥ इति ।

मनुरपि (५।१५४)—" नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम् " ॥ इति । पत्युरनुमत्या पत्नी व्रतादिष्वधिकारिणी भवेत् । तदाह **कात्यायनः—**

" भार्या भर्त्तुर्मतेनैव व्रतादीनाचरेदिति " ॥ **मार्कंडेयः—**

" नारी खल्वननुज्ञाता भर्त्रा पित्रा सुतेन वा । निष्फलं तु भवेत्तस्या यत्करोति व्रतादिकम्"॥ इति ।

---

*ध. सू. २।४।१।१३ । १ घ-धि ।

पराशरोऽपि—
" अपृष्ट्वा चैव भर्तारं या नारी कुरुते व्रतम् । सर्वं तद्राक्षसान् गच्छेदित्येवं मनुरब्रवीत् "॥ इति ।

उपवासासमर्थविषयः । उपवासासमर्थस्तु एकभक्तादीनि कुर्यात्। तथा च **कात्यायनः—**
" उपवासे त्वशक्तानामशीतेरूर्ध्वजीविनाम् । एकभक्तादिकं कार्यमाह बोधायनो मुनिः " ॥ इति ।

मार्कंडेयः—
" एकभक्तेन नक्तेन तथैव याचितेन च । मुन्यन्नेन च दानेन न निर्द्वादशिको भवेत् " ॥ इति ।

स्मृत्यन्तरेऽपि—
" एकभक्तेन नक्तेन बालवृद्धातुरः क्षपेत् । पयोमूलं फलं वाऽपि न निर्द्वादशिको भवेत् " ॥

भविष्यत्पुराणेऽपि—
" एकादश्यामुपवसेन्नक्तं वापि समाचरेत् । अथवा विप्रमुख्येभ्यो दानं दद्यात्स्वशक्तितः" ॥ इति ।
एकभक्तादावप्यशक्तः प्रतिनिधिना कारयेत् । तथा च **विष्णुरहस्ये—**
" असामर्थ्ये शरीरस्य व्रते च समुपस्थिते । कारयेद्धर्मपत्नीं वा पुत्रं वा विनयान्वितम् " ॥ इति ।

पैठीनसिः—
" भार्या भर्तुर्व्रतं कुर्याद्भार्यायाश्च पतिर्व्रतम् । असामर्थ्ये परस्ताभ्यां व्रतभंगो न जायते " ॥ इति ।

स्कांदेऽपि—" पुत्रं वा विनयोपेतं पत्नीं वा भ्रातरं तथा ।
"एषामभाव एवान्यं ब्राह्मणं विनियोजयेत् । भगिनीमथवा शिष्यं ब्राह्मणं दक्षिणादिभिः"॥ इति ।

कात्यायनः—"पितृमातृस्वसृभ्रातृगुर्वर्थे च विशेषतः । उपवासं प्रकुर्वाणः पुण्यं क्रतुशतं लभेत् ॥
" दक्षिणा नात्र दातव्या शुश्रूषा विहिता च सा । नारी च पतिमुद्दिश्य एकादश्यामुपोषिता ॥
" पुण्यं क्रतुशतं प्राहुर्मुनयः पारदर्शनाः । उपवासफलं तस्य पतिः प्राप्नोत्यसंशयम् " ॥ इति ।

स्मृत्यंतरेऽपि—
" पितृमातृपतिभ्रातृश्वश्रूगुर्वादिभूभुजाम् । अदृष्टार्थमुपोषित्वा स्वयं च फलभाग्भवेत् ॥
" मातामहादीनुद्दिश्य एकादश्यामुपोषणे । कर्त्ता दशगुणं पुण्यं प्राप्नोत्यत्र न संशयः ॥
" यमुद्दिश्य कृतं सोऽपि संपूर्णफलमाप्नुयात् " ॥ इति । प्रतिनिधौ कश्चिद्विशेषः **स्मर्यते—**
"काम्ये प्रतिनिधिर्नास्ति नित्ये नैमित्तिके च सः। काम्येऽप्युपक्रमादूर्ध्वं केचित्प्रतिकृतिं विदुः"॥ इति

उपवासाकरणे प्रायश्चित्तं **स्मर्यते—**
" अर्के पर्वद्वये रात्रौ चतुर्दश्यष्टमी दिवा । एकादश्यामहोरात्रं भुक्त्वा चांद्रायणं चरेत् " ॥

सूतकादावुपवासविचारः । सूतकादौ उपवासमात्रं कार्यमाह **पुलस्त्यः—**
" सूतके च नरः स्नात्वा प्रणम्य मनसा हरिम् । एकादश्यां न भुंजीत व्रतमेतन्न लुप्यते ॥
" मृतकेऽपि न भुंजीत ह्येकादश्यां सदा नरः । एकादश्यां न भुंजीत नारी दृष्टे रजस्यपि" ॥ इति ।

काम्येऽपि दानार्चनरहितमुपवासमात्रं कार्यम् । एतदुक्तं **कौर्मे—**
" काम्योपवासे प्रक्रांते त्वन्तरा मृतसूतके । तत्र काम्यव्रतं कुर्यात् दानार्चनविवर्जितम् ॥
" सूतकांते नरः स्नात्वा पूजयित्वा जनार्दनम् । दानं दत्वा विधानेन व्रतस्य फलमश्नुते ॥
" संप्रवृत्तेऽपि रजसि न त्याज्यं द्वादशीव्रतम् । पंचमेऽहनि शुद्धा स्याद्दैवे पित्र्ये च कर्मणि " ॥

एकादश्यां नित्यनैमित्तिकश्राद्धे उपवासभेदः । एकादश्यां सांवत्सरिकश्राद्धे संप्राप्ते श्राद्धं कृत्वा पितृसेवितशेषं समाघ्रायोपोषणं कुर्यात् । तदाह **कात्यायनः—**
" उपवासो यदा नित्यः श्राद्धं नैमित्तिकं भवेत् । उपवासं ततः कुर्यादाघ्राय पितृसेवितम् "॥ इति ।

ननु "भुंजीतैव कृते श्राद्धे पुत्री नोपवसेद् गृही" ॥ इति। तथा—
"श्राद्धं कृत्वा तु यो विप्रो न भुंक्ते तु कदाचन। देवा हव्यं न गृह्णंति कव्यानि पितरस्तथा"॥
इत्यादिवचनविरोधः स्यात्। मैवम्। आघ्राणेनापि भोजनकार्यस्य सिद्धेः तस्य भोजनकार्ये विधानात्। अनुकल्पं कुर्वन्नशक्तस्तु भुंजीत
"अनुकल्पं यदा कुर्वन्नशक्तः पक्षयोर्द्वयोः। एकादश्यां तु भुंजीत श्राद्धं कृत्वा दिवैव च"॥ इति **स्मृतेः**। कृष्णैकादश्यां गृहस्थस्य ओदनव्यतिरिक्तपितृशेषभोजनेऽप्यदोषः। तस्य शुक्लैकादश्यामेव नित्योपवासविधानात्। कृष्णैकादश्यामुपवासनिषेधेन भक्ष्यविधानाच्च। **ब्रह्माण्डपुराणे** तु—
"कर्ता नोपवसेच्छ्राद्धे पित्र्येऽप्येकादशीव्रते। तयोरप्यधिकं ब्रूयुः पितृशेषं महर्षयः"॥ इति। कर्तृग्रहणात् ज्ञातीनामाघ्राणमेव
"कर्तृभ्योऽन्यैर्न भोक्तव्यं श्राद्धे प्राप्ते हरेर्दिने। पितृशेषं तमाघ्राय उपवासफलाप्तये"॥ इति भोक्तुरपि दोषो नास्तीत्युक्तं **तत्रैव**—
"पात्राभावे द्विजः श्राद्धे भुञ्जीयाद्धरिवासरे। नोपवासव्रतघ्नं तन्नो चेत्तच्छ्राद्धहा भवेत्॥
"परदिने तु कर्तव्या पारणा द्वादशीदिने। उपवासफलं सम्यक् प्राप्नोति व्रतभाङ् नरः॥
"एकादश्यां न भुंजीत कदाचिदपि मानवः। स्वयं प्राथ्य न भुङ्क्ते चेत् प्रार्थितोऽन्यैर्न दोषभाक्"॥ इति।

काम्यैकादशीव्रतानुष्ठानक्रमः। अयमिह काम्यव्रतानुष्ठानक्रमः। प्रथमं दशम्यामेकभुक्तं कृत्वा दंतधावनं कुर्यात्। "दशम्यामेकभुक् भूत्वा खादयेद्दंतधावनम्" इति **स्मरणात्**। दशम्यां रात्रौ नियम उक्तो **ब्रह्मकैवर्ते**—
"प्राप्ते हरिदिने सम्यक् विधाय नियमं निशि। दशम्यामुपवासस्य प्रकुर्याद्वैष्णवं व्रतम्"॥
नारदीये—
"अक्षारलवणाः सर्वे हविष्यान्ननिषेवणाः। अवनीतल्पशयनाः प्रियासंगविवर्जिताः"॥ इति। ततः प्रातरुत्थायैकादश्यां बाह्यांतरशुद्धिं विदध्यात्। तत्प्रकारस्तु **कालनिर्णये**ऽभिहितः—
"शरीरमंतःकरणोपघातं वाचश्च विष्णुर्भगवानशेषम्।
"शमं नयत्वस्तु ममेह शर्म पापादनंते हृदि संनिविष्टे॥
"अंतःशुद्धिं बहिःशुद्धिं शुद्धो धर्ममयोऽच्युतः। स करोतु ममैतस्मिन् शुचिरेवास्मि सर्वदा॥।
"बाह्योपघातादनघो बोद्धा च भगवानजः। शमं नयत्वनंतात्मा विष्णुश्चेतसि संस्थितः"॥ इति। अनंतरं व्रतसंकल्पं कुर्यात्। तत्र मंत्रमाह **विष्णुः**—
"एकादश्यां निराहारः स्थित्वाऽहमपरेऽहनि। भोक्ष्यामि पुंडरीकाक्ष शरणं मे तवाच्युत।
"इत्युच्चार्य ततो विद्वान्पुष्पांजलिमथार्पयेत्"॥ इति।
अनंतरकृत्यमाह **कात्यायनः**— "गृहीत्वौदुंबरं पात्रं वारिपूर्णमुदङ्मुखः।
"अष्टाक्षरेण मंत्रेण त्रिर्जप्तेनाभिमंत्रितम्। उपवासफलप्रेप्सुः पिबेत्पात्रगतं जलम्"॥ इति। औदुंबरं ताम्रपात्रम्। **ब्रह्मपुराणे**—
"संपूज्य विधिवद्विष्णुं श्रद्धया सुसमाहितः। गंधैः पुष्पैस्तथा धूपैर्दीपैर्नैवेद्यकैः वरैः।
"एवं संपूज्य विधिवद्रात्रौ कृत्वा तु जागरम्। याति विष्णोः परं स्थानं नरो नास्त्यत्र संशयः"॥ इति।

द्वादश्यां कर्तव्यमाह **कात्यायनः**—"प्रातः स्नात्वा हरिं पूज्य उपवासं समापयेत्।
"अज्ञानतिमिरांधस्य व्रतेनानेन केशव। प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव॥
"मंत्रं जपित्वा हरये निवेद्योपोषणं व्रती। द्वादश्यां पारणं कुर्याद्वर्जयित्वा ह्युपोतकीम्"॥ इति।
बृहस्पतिः—
"सायमाद्यंतयोरन्होः सायं प्रातश्च मध्यमे। उपवासफलप्रेप्सुर्जह्याद्भुक्तचतुष्टयम्"॥ इति।

नित्योपवासविषयः। नित्योपवासप्रकारमाह **कात्यायनः**—
"नित्योपवासी यो मर्त्यः सायंप्रातर्भुजिक्रियाम्। वर्जयेन्मतिमान्विप्रः संप्राप्ते हरिवासरे।
"विशेषनियमाशक्तोऽहोरात्रं भुक्तवर्जितम्। शक्तिमांस्तु पुनः कुर्यान्नियमं सविशेषणम्"॥ इति।
कालादर्शेऽपि—"जह्याद्भक्तं द्वयं नित्ये काम्ये भक्तचतुष्टयम्"॥ इति।

उपवासे वर्ज्यानि। उपवासे वर्ज्यानाह **विष्णुः**—
"असकृज्जलपानं च दिवा स्वापं च मैथुनम्। तांबूलचर्वणं मांसं वर्जयेद्व्रतवासरे"॥ इति।
वसिष्ठः—
"उपवासे तथा श्राद्धे न खादेद्दन्तधावनम्। दंतानां काष्ठसंयोगो हंति सप्त कुलानि च"॥ इति।
दंतधावने प्रायश्चित्तमुक्तं **विष्णुरहस्ये**—
"श्राद्धोपवासदिवसे खादित्वा दंतधावनम्। गायत्र्याः शतसंपूतमंबु प्राश्य विशुध्यति"॥ इति।
हारीतः—"पतितपाषंडनास्तिकसंभाषणमनृताश्लीलादिकमुपवासे वर्जयेत्"॥ इति।
विष्णुधर्मे—"असंभाष्यांस्तु संभाष्य तुलस्यतसिकादलम्॥
"द्वादश्यामच्युतफलमागस्त्यं पत्रमेव वा। आमलक्याः फलं वापि पारणे प्राश्य शुध्यति"॥ इति।
बृहस्पतिः—
"दिवा निद्रां परान्नं च पुनर्भोजनमैथुने। क्षौद्रं कांस्यामिषे तैलं द्वादश्यामष्ट वर्जयेत्॥
"कृत्वा चैवोपवासं तु योऽश्नाति द्वादशीदिने। नैवेद्यं तुलसीमिश्रं हत्याकोटिविनाशनम्॥
"द्वादश्यामाद्यपादस्तु कीर्तितो हरिवासरः॥
"महादोषकरं चान्नं संप्राप्ते हरिवासरे। न कार्यं पारणं तत्र विष्णुप्रीणनतत्परैः"॥
स्मृत्यंतरे—"चतुर्मुहूर्तं द्वादश्यामाद्यमेकादशीतिथौ। अंते चतुर्मुहूर्तं यत् तत्कालो हरिवासरः"॥ इति।
इत्येकादशीनिर्णयः। **द्वादशीनिर्णयः**। अथ द्वादशी निर्णीयते। सा च पूर्वविद्धा ग्रहीतव्या। तदुक्तं **स्कांदे**—
"द्वादशी च प्रकर्तव्या एकादश्या युता विभो। सदा कार्या च विद्वद्भिर्विष्णुभक्तैश्च मानवैः"॥ इति।
उत्तरविद्धां प्रतिषेधति **बृहद्वसिष्ठः**—
"द्वितीया पंचमी चैव दशमी च त्रयोदशी। चतुर्दशी चोपवासे हन्युः पूर्वोत्तरे तिथी"॥ इति।
द्वादश्यां च काम्योपवासो **मार्कंडेयेन** दर्शितः—
"द्वादश्यामुपवासेन सिद्धार्थो भूप सर्वशः। चक्रवर्तित्वमतुलं संप्राप्तो अतुलां श्रियम्"॥ इति।

त्रयोदशीनिर्णयः। अथ त्रयोदशी निर्णीयते। सा च शुक्लकृष्णपक्षभेदेन व्यवतिष्ठते। तत्र शुक्लत्रयोदशी पूर्वविद्धा ग्राह्या। तदुक्तं **ब्रह्मवैवर्ते**—
"त्रयोदशी प्रकर्तव्या द्वादशीसहिता मुने। भूतविद्धा न कर्तव्या दर्शः पूर्णा कदाचन"॥ इति।

१ घ-द्।

निगमे—

“षष्ठ्यष्टमी अमावास्या कृष्णपक्षे त्रयोदशी। एताः परयुताः पूज्याः पराः पूर्वयुतास्तथा ” ॥ इति। अत्र कृष्णपक्ष इति विशेषणात् पूर्वविद्धावचनस्य शुक्लपक्षविषयत्वं परिशिष्यते ।

चतुर्दशीनिर्णयः । अथ चतुर्दशी निर्णीयते । नृसिंहचतुर्दशी रात्रिव्यापिनी ग्राह्या । नृसिंहस्य सायंकाले आविर्भावात् ।

“ मधुश्रवणमासस्य शुक्ला या च चतुर्दशी । सा रात्रिव्यापिनी ग्राह्या परा पूर्वाह्णगामिनी” ॥ इति **वचनात्** । परा अनन्तचतुर्दशी । त्रिमुहूर्तमेव पूर्वाह्णः । तत्र शुक्लचतुर्दशी परविद्धा ग्राह्या । तथा **व्यासः**—“ शुक्ला चतुर्दशी ग्राह्या परविद्धा सदा व्रते ” इति । **नारदीयेऽपि**—

“ तृतीयैकादशी षष्ठी शुक्लपक्षे चतुर्दशी । पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुता ” ॥ इति ।

अनन्तव्रतम् । यत्तु भाद्रपदशुक्लचतुर्दश्यामनंतव्रतमुक्तं **भविष्योत्तरे**—तत्र ‘[1]दैवे ह्यौदयिकी ग्राह्या ” इति वचनेन युग्मशास्त्रादिभिश्चोदयव्यापिनी ग्राह्या । तत्र तिथ्यंतरव्रतत्रिमुहूर्तव्याप्तिर्मुख्यः कल्पः । द्विमुहूर्तव्याप्तिरनुकल्पः । यत्तु—

“ मध्यान्हे भोज्यवेलायां समुत्तीर्य सरित्तटे । ददर्श लीला सा स्त्रीणां समूहं रक्तवाससाम् ॥

“ चतुर्दश्यामर्चयंतं भक्त्या देवं जनार्दनम् ” ॥ इति तत्तु अर्थवादत्वान्न स्वातंत्र्येण कस्यचिदर्थस्य प्रापकं न चात्र मध्याह्नः कर्मांगकालो विहितः । सति प्रमाणांतरे तस्योपोद्बलकमर्थवादवाक्यं भवति । न चात्र प्रमाणांतरमस्तीति **कालनिर्णये** निरूपितम् । कृष्णचतुर्दशी तु पूर्वयुतैव ग्राह्या । तथा **चापस्तंबः**—

“ कृष्णपक्षेऽष्टमी चैव कृष्णपक्षे चतुर्दशी । पूर्वविद्धा तु कर्तव्या परविद्धा न कस्यचित्”॥ इति ।

शिवरात्रिव्रतनिर्णयः । अथ शिवरात्रिव्रतं निर्णीयते । शिवस्य रात्रिः शिवरात्रिरिति तत्पुरुषसमासेन योगेन प्रवर्तमानः शब्दो रूढ्या माघकृष्णचतुर्दशीरूपे कालविशेषे नियम्यते । शिवप्रिया रात्रिर्यस्मिन्व्रत इति बहुव्रीहिसमासेन योगेन प्रवृत्तः शब्दो रूढ्या व्रतविशेषे नियम्यते । यथा पंकजशब्दः पंकाज्जायत इति योगं स्वीकृत्य भेकादीष्वतिप्रसंगो रूढिस्वीकारेण निवार्यते तद्वदत्रापि यौगिकत्वे सति शिवव्रतोपेतेषु त्रयोदश्यादितिथ्यंतरेषु शिवरात्रित्वं प्रसक्तं रूढिपरिग्रहेण निवार्यते । अतः कालविशेषे व्रतविशेषे च योगरूढोऽयं शिवरात्रिशब्दः ।

तथा च **स्कांदे**—

“ माघस्य कृष्णपक्षे या तिथिश्चैव चतुर्दशी । तस्या रात्रिः समाख्याता शिवरात्रिः शिवप्रिया ॥

“ तस्यां सर्वेषु लिंगेषु तदा संक्रमते हरः । यानिकान्यत्र लिंगानि चराणि स्थावराणि च ॥

“ तेषु संक्रमते देवि तस्यां रात्रौ यतो हरः । शिवरात्रिस्ततः प्रोक्ता तेन सा हरवल्लभे ”॥ इति ।

कामिकेऽपि—

“ माघमास्यसिते पक्षे विद्यते या चतुर्दशी । तद्रात्रिः शिवरात्रिः स्यात्सर्वपुण्यशुभावहा ”॥ इति ।

ईशानसंहितायाम्—

“ शिवरात्रिव्रतं नाम सर्वपापहरं नृणाम् । आचंडालं मनुष्याणां भुक्तिमुक्तिप्रदायकम् ”॥ इति । अनेनास्य सर्वाधिकारित्वमुक्तम् । तच्च शिवरात्रिव्रतमेकादशीवन्नित्यं काम्यं चेत्युभयविधिम् । तत्र नित्यत्वमकरणे प्रत्यवायवीप्सानित्यशब्दैरवगंतव्यम् ।

---

१ खग-र्शी ।

ते च **स्कांदे** पठ्यन्ते— " परात्परतरं नास्ति शिवरात्रिः परात्परा ।
" न पूजयंति भक्त्येशं रुद्रं त्रिभुवनेश्वरम् । जंतुर्जन्मसहस्रेण भ्रमते नात्र संशयः ॥
" वर्षे वर्षे महादेवि नरो नारी पतिव्रता । शिवरात्रौ महादेवं कामं भक्त्या प्रपूजयेत् ॥
" माघकृष्णचतुर्दश्यां यः शिवं संशितव्रतः । मुमुक्षुः पूजयेन्नित्यं स लभेतेप्सितं पदम् " ॥ इति ।
काम्यत्वं च फलश्रवणादवगंतव्यम् । तच्च **स्कांदे** पठ्यते—
" शिवं च पूजयित्वा यो जागर्ति च चतुर्दशीम् । मातुः पयोधररसं न पिबेत्स कदाचन ॥
" सर्वान्भुक्त्वा महाभोगान्स मृतो न प्रजायते" ॥ इति ।
काम्यव्रतस्ये**शानसंहितायां** वर्षसंख्या पठ्यते—
" एवमेतत् व्रतं कुर्यात् प्रतिसंवत्सरं प्रति । द्वादशाब्दिकमेतत्स्याच्चतुर्विंशाब्दिकं तु वा ॥
" सर्वान्कामानवाप्नोति प्रेत्य चेह च मानवः " ॥ इति ।
उपवासे जागरणं पूजा चेति त्रयं समप्राधान्येन व्रतस्वरूपम् । तदुक्तं **नागरखंडे**—
" उपवासप्रभावेन बलादपि च जागरात् । शिवरात्रेस्तथा तत्र लिंगस्यापि प्रपूजनात् ॥
" अक्षयांल्लभते भोगाञ्छिवसायुज्यमाप्नुयात् " ॥ इति ।
यत्तु **स्कांदपुराणे** द्वयमेकैकं वा पठ्यते " अथवा शिवरात्रिं च प्रजा जागरणैर्नयेत् ।
" अखंडितव्रतो यो हि शिवरात्रिमुपोषयेत् । सर्वान्कामानवाप्नोति रुद्रेण सह मोदते ॥
" कश्चित्पुण्यविशेषेण व्रतहीनोऽपि यः पुमान् । जागरं कुरुते तत्र स रुद्रसमतां व्रजेत् ॥
" यः पूजयति भक्त्येशमनेकफलतां व्रजेत् " ॥ इति तत् अथवेत्यनुकल्पोपक्रमादशक्तविषयम् ।
प्रदोषनिशीथवेधावत्र ग्राह्यौ । प्रदोषवेधो **वायुपुराणे** दर्शितः—
" त्रयोदश्यस्तगे सूर्ये चतसृष्वेव नाडिषु । भूतविद्धा तु या तत्र शिवरात्रिव्रतं चरेत् " ॥ इति ।
कामिकेऽपि—
"आदित्यास्तमये काले त्वस्ति चेद्या चतुर्दशी । तद्रात्रिः शिवरात्रिः स्यात्सा भवेदुत्तमोत्तमा" ॥ इति ।
स्मृत्यन्तरेऽपि
" प्रदोषव्यापिनी ग्राह्या शिवरात्रिश्चतुर्दशी । रात्रौ जागरणं यस्मात्तस्मात्तां समुपोषयेत् " इति ॥
निशीथवेधो **नारदीयसंहितायां** दर्शितः—
" अर्धरात्रियुता यत्र माघकृष्णचतुर्दशी । शिवरात्रिव्रतं तत्र सोऽश्वमेधफलं लभेत् " ॥ इति ।
ईशानसंहितायाम्—
" पूर्वेद्युरपरेद्युर्वा महानिशि चतुर्दशी । व्याप्ता सा दृश्यते यस्यां तस्यां कुर्याद्व्रतं नरः ॥
" मम प्रियकरी ह्येषा माघकृष्णचतुर्दशी । महानिश्यन्विता यत्र तत्र कुर्यादिदं व्रतम् " इति ॥
एवं च सति पूर्वेद्युरेव वाऽपरेद्युरेव वा यत्र प्रदोषनिशीथोभयव्याप्तिः तत्र व्रतमाचरणीयम् ।
तथा च **स्कांदे**—
" त्रयोदशी यदा देवि दिनमुक्तिप्रमाणतः । जागरे शिवरात्रिः स्यान्निशि पूर्णा चतुर्दशी ॥
" निशाद्वये चतुर्दश्यां पूर्वा त्याज्या शुभान्विता " ॥ इति दिनमुक्तिरस्तमयः । दिनद्वयेऽप्युभयव्याप्तिस्तु न संभाव्यते । यामद्वयवृध्यभावात् । दिनद्वयेऽप्युभयव्याप्त्यभावोऽपि न संभवति

यामद्वयक्षयस्याभावात् । एकैकस्मिन्दिने यद्येकैकव्याप्तिः तत्र पूर्वेद्युर्निशीथव्याप्तिः परेद्युः प्रदोषव्याप्तिरित्यत्रैकैकव्याप्तेर्दिनद्वये समानत्वेऽपि जयायोगस्य प्रशस्तत्वाद्दर्शयोगस्य निंदितत्वाच्च पूर्वेद्युरेवोपवासः । त्रयोदशीयोगप्राशस्त्यं दर्शयोगनिंदा च **स्कांदे** पठ्यते—

“ कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिश्चतुर्दशी । एताः पूर्वयुताः कार्याः तिथ्यन्ते पारणं भवेत् ॥
“महतामपि पापानां दृष्टा वै निष्कृतिः पुरा । न दृष्टा कुर्वतां पुंसां दर्शयुक्तां तिथिं पराम्” ॥ इति ।

यदा पूर्वेद्युर्निशीथादूर्ध्वं प्रवृत्ता चतुर्दशी परेद्युः क्षयवशात् निशीथादर्वागेव समाप्ता तदा पूर्वेद्युः प्रदोषनिशीथव्याप्त्योरुभयोरप्यसंभवात्परेद्युः प्रदोषव्याप्तेरेकस्याः संभवाच्च परविद्धैव ग्राह्या । एतदेवाभिप्रेत्य **स्मर्यते**—

“ माघासिते भूतदिनं कदाचिदुपैति योगं यदि पंचदश्याः ।
“ जयाप्रयुक्तां न तु जातु कुर्यात् शिवस्य रात्रिं प्रियकृच्छिवस्य ” ॥ इति ।

यदा पूर्वेद्युः प्रदोषादूर्ध्वं प्रवृत्ता चतुर्दशी परेद्युः क्षयवशात्प्रदोषादर्वागेव समाप्ता तदा परेद्युर्व्याप्तिद्वयाभावात् पूर्वेद्युर्निशीथव्याप्तेः सद्भावेन जयायोगाच्च पूर्वेद्युरेवोपवासः ।

अत्रायं विवेकः—दिनद्वयेऽपि निशीथव्याप्तौ तदव्याप्तौ च प्रदोषव्याप्तिर्नियामिका । तथा दिनद्वयेऽपि प्रदोषव्याप्तौ तदव्याप्तौ च निशीथव्याप्तिर्नियामिका । एकैकस्मिन्दिने एकैकव्याप्तौ जयायोगो नियामक इति ।

वारविशेषेण योगविशेषेण च युक्ता त्रिस्पृशी च शिवरात्रिः प्रशस्ता । तथा च **स्कांदे**—

“ माघकृष्णचतुर्दश्यां रविवारो यदा भवेत् । भौमो वाऽथ भवेद्देवि कर्तव्यं व्रतमुत्तमम् ॥
“ शिवयोगस्य योगो वै तद्भवेदुत्तमोत्तमम् । त्रयोदशी कलाऽप्येका मध्ये चैव चतुर्दशी ।
“ अंते चैव सिनीवाली त्रिस्पृश्यां शिवमर्चयेत् ” ॥ इति ।

ननु यदा पूर्वविद्धायामुपवासः तदा परेद्युः किं तिथ्यंते पारणं उत तिथिमध्ये । शास्त्रं तु पक्षद्वयेऽपि समानम् । तत्र तिथ्यंते पारणवचनानि पूर्वोदाहृतानि । तिथिमध्ये पारणवचनं तु **स्कांदे** पठ्यते—

“ उपोषणं चतुर्दश्यां चतुर्दश्यां तु पारणम् । कृतैः सुकृतलक्षैश्च लभ्यते वाऽथ वा न वा ।
“ ब्रह्मांडोदरमध्ये तु यानि तीर्थानि संति वै । संस्थितानि भवंतीह भूतायां पारणे कृते ।
“ तिथीनामेव सर्वासामुपवासव्रतादिषु । तिथ्यंते पारणं कुर्याद्विना शिवचतुर्दशीम् ” ॥ इति ।

बाढं अस्ति द्विविधं शास्त्रम् । तस्य च द्विविधशास्त्रस्य प्रतिपत्प्रकरणोक्तन्यायेन व्यवस्था द्रष्टव्या । यदा यामत्रयादर्वागेव चतुर्दशी समाप्यते तदा तिथ्यंते पारणम् । यदा चतुर्दशी यामत्रयमतिक्रामति तदा चतुर्दशीमध्ये पूर्वाह्णे पारणं कुर्यात् । इति **शिवरात्रिनिर्णयः** ।

पञ्चदशीनिर्णयः । अथ पंचदशी निर्णीयते । सा च व्रतादौ परविद्धैव ग्राह्या । तथा च **ब्रह्मकैवर्ते**—

“ भूतविद्धा न कर्तव्या अमावास्या च पूर्णिमा । वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तमम् ” ॥ इति

स्कांदेऽपि—

“ भूतविद्धा सिनीवाली न तु तत्र व्रतं चरेत् । वर्जयित्वा तु सावित्रीव्रतं तु शिखिवाहन ” ॥ इति

सावित्र्या राजकन्यया चीर्णं सावित्रीव्रतम् । तच्च **भविष्योत्तरे** दर्शितम्—

“कथयामि कुलस्त्रीणां महिम्नो वर्धनं परम् । यथा चीर्णं व्रतं पूर्वं सावित्र्या राजकन्यया ” ॥ इति ।

तच्च पौर्णमास्याममावास्यायां च विहितम् । तस्मिन्व्रते पूर्वविद्धा ग्राह्या ।

एतदेवाभिप्रेत्य **नारदीये**—

" दर्शं च पौर्णमासं च पितुः सांवत्सरं दिनम् । पूर्वविद्धामकुर्वाणो नरकं प्रतिपद्यते " ॥ इति । दर्शादिश्राद्धकालः श्राद्धकांडे निरूपितः* ।

इष्टिकालनिर्णयः । इष्टिकालस्तु निर्णीयते । अत्र **गोभिलः**—

" पक्षांता उपवस्तव्याः पक्षादयो हि यष्टव्याः" इति । अत्रोपवासशब्देनाग्न्युपस्तरणं विवक्षितम् । तस्मिन्क्रियमाणे यजमानसमीपे देवतानां निवासात् । तथा च **श्रुतिः** (तै. सं. १।६।७)— " उपास्मिञ्छ्वो यक्ष्यमाणे देवता वसंति एवं विद्वानग्निमुपस्तृणाति " ॥ इति । उपवासशब्दाभिधेयाग्न्युपस्तरणांतस्य पर्वदिनकर्तव्यस्यान्वाधानादेश्चतुरंशवति पर्वणि आद्यास्त्रयोंऽशाः कालाः पर्वणश्चतुर्थोंऽशः प्रतिपद आद्यास्त्रयोंऽशाश्च यागस्य कालः । तदाह **लोकाक्षिः**—

" त्रीनंशानौपसथ्यस्य यागस्य चतुरो विदुः । द्वावंशावत्सृजेदंत्यौ यागे च व्रतकर्मणि " ॥ इति । यागकालं **यज्ञपार्श्वोऽप्याह**—

" पंचदश्याः परः पादः पक्षादेः प्रथमास्त्रयः । कालः पार्वणयागे स्यादथांते तु न विद्यते " ॥ इति ।

वृद्धशातातपोऽपि—

" पर्वणो यश्चतुर्थोंऽश आद्याः प्रतिपदस्त्रयः । यागकालः स विज्ञेयः प्रातरुक्तो मनीषिभिः " ॥ इति । अत्र प्रातरिति विशेषणात् "सूर्योदयस्योपरि मुहूर्तत्रयं यागस्य मुख्यः कालः" इति **कालनिर्णये** । प्रतिपदश्चतुर्थांशं निषेधति **कात्यायनः**—

" न यष्टव्यं चतुर्थेंऽशे यागैः प्रतिपदः क्वचित् । रक्षांसि तद्विलुंपंति श्रुतिरेषा सनातनी" ॥ इति । यदा पर्वप्रतिपदावुदयमारभ्य संपूर्णतिथी भवतः तदा न कोऽपि संदेहः । यदा तु खंडतिथी तदा निर्णयमाह **गोभिलः**—

" आवर्तने यदा संधिः पर्वप्रतिपदोर्भवेत् । तदहर्याग इष्येत परतश्चेत्परेऽहनि ॥
" पर्वप्रतिपदोः संधिरर्वागावर्तनाद्यदि । तस्मिन्नहनि यष्टव्यं पूर्वेद्युस्तदुपक्रमः ॥
" आवर्तनोत्तरः संधिर्यदि तस्मिन्नुपक्रमः । परेद्युरिष्टिरित्येष पर्वद्वयविनिश्चयः " ॥ इति ।

लोकाक्षिरपि—

" पूर्वाह्णे वाऽथ मध्याह्ने यदि पर्व समाप्यते । उपोष्य तत्र पूर्वेद्युस्तदहर्याग इष्यते ॥
" अपराण्हेऽथ वा रात्रौ यदि पर्व समाप्यते । उपोष्य तस्मिन्नहनि श्वोभूते याग इष्यते " ॥ इति ।

अन्हो मध्यं मध्याह्न इति व्युत्पत्तेरावर्तनमत्र मध्यान्हशब्देनाभिधीयते । एवमपराह्णशब्दोऽप्यत्र यौगिकः । न तु पंचधाविभागमाश्रित्य प्रवृत्तः । अत एव **गोभिलेना**वर्तनशब्दः प्रयुक्तः । **शातातपोऽपि**—

" पूर्वाह्णे मध्यमे वापि यदि पर्व समाप्यते । तदोपवासः पूर्वेद्युः तदहर्याग इष्यते " ॥ इति । अह्नः पूर्वो भागः पूर्वाह्णः । अन्होऽपरो भागोऽपराण्हः । अतस्ताभ्यां शब्दाभ्यामावर्तनात् पूर्वोत्तरभागावभिधीयेते **कालादर्शेऽपि**—" पूर्वप्रतिपदोः संधिर्मध्याह्ने पूर्वतोऽपि वा ।
" अन्वाधानं पूर्वदिने तद्दिने याग इष्यते । परतश्चेत्परेह्नीष्टिस्तद्दिनेऽन्वाहितिर्भवेत् " ॥ इति ।

वाजसनेयिनां पौर्णमास्यां विशेष उक्त**स्तत्रैव**—

" आवर्तनादधः संधिर्यद्यन्वाधाय तद्दिने । परेद्युरिष्टिरित्याहुर्विप्रा वाजसनेयिनः " ॥ इति ।

---

*७३६–७४४ पृष्ठ

यदि मध्यान्हात्पूर्वं संधिः स्यात् तदा संधिदिने अन्वाधाय परेद्युरिष्टिः कार्येति वाजसनेयिमतानुवर्तिन आहुरित्यर्थः । तदाह **भाष्यार्थसंग्रहकारः**—

" मध्यंदिनात्स्यादहनीह यस्मिन् प्राक्पर्वणः सन्धिरियं तृतीया ।

" सा खर्विका वाजसनेयिमत्यस्तिस्यामुपोष्याथ परेद्युरिष्टिः " ॥ इति । आवर्तनादूर्ध्वमस्तमयादर्वाग्यदा संधिर्भवति तदा संधिमती तिथिः प्रथमा रात्रौ संधिश्चेत्सा तिथिर्द्वितीया । ते उभे अपेक्ष्य पूर्वाण्हे संधिमतीतिथिस्तृतीया । तत्र पूर्वकालस्याल्पत्त्वात्सारवर्तिकेत्युच्यते । एवं च सति वाजसनेयिनां न क्वापि संधिदिनात्पूर्वेद्युरन्वाधानादिकमस्ति । वाजसनेयिव्यतिरिक्तानामावर्तने ततः पूर्वं वा यदा संधिर्भवति तदा संधिदिने पूर्वचतुर्थांशे इष्टिर्भवति । तत्र विशेषमाह **गर्गः**—

" प्रतिपद्यप्रविष्टायां यदि चेष्टिः समाप्यते । पुनः प्रणीय कृत्स्नेष्टिः कर्तव्या यागवित्तमैः" ॥ इति । पर्वणश्चतुर्थोऽशप्रतिपदत्रयोंऽशाश्च यागकालत्वेन विहिताः । तत्र पर्वचतुर्थांशस्य विषय उदाहृतः । प्रतिपदंशानां तु विषय उदाह्रियते । उषःकाले सन्धौ प्रतिपदः प्रथमांशो यागकालः । निशीथे संधौ द्वितीयांशः । रात्रिप्रारंभे संधौ तृतीयांशः । नन्वनेन न्यायेनापराह्णे संधौ प्रतिपच्चतुर्थांशस्य यागकालत्वं प्राप्नोति । तच्च प्रतिषिद्धं ' न यष्टव्यं चतुर्थांशः ' इति **स्मृतेः** । अतस्तादृशे विषये याग एव लुप्यते इति चेन्मैवम् । **वृद्धशातातपेन** प्रतिप्रसवाभिधानात्—

" संधिर्यद्यपराह्णे स्याद्यागं प्रातः परेऽहनि । कुर्वाणः प्रतिपद्भागे चतुर्थेऽपि न दूष्यति " ॥ इति । **कालादर्शेऽपि**—

"चतुर्थः पर्वणो योंऽशो येंऽशाः प्रतिपदस्त्रयः । आद्यास्तस्याश्चतुर्थोऽपि यागकाल उदाहृतः" ॥ इति । तस्याः प्रतिपदः चतुर्थोऽप्यंशो यागकाल इत्यर्थः । एवं तर्हि चतुर्थांशे यागप्रतिषेधो निर्विषयः स्यादिति चेन्मैवम् । सद्यःकालविषये चरितार्थत्वात् । तं च विषयं दर्शयति **कात्यायनः**—

" संधिश्चेत्संगवादूर्ध्वं प्राक्चेदावर्तनाद्रवेः । सा पौर्णमासी विज्ञेया सद्यःकालविधौ तिथिः " ॥ इति । **भाष्यार्थसंग्रहकारोऽपि**—

" अन्वाहितिश्चास्तरणोपवासः पूर्वेद्युरेते खलु पौर्णमास्याम् ।

" आवर्तनात्प्राग्यदि पर्वसंधिः सद्यस्तदा वा क्रियते समस्तम् " ॥ इति । **कालादर्शेऽपि**—

" पूर्णिमा प्रतिपत्संधिः यदि संगवमंतरा । आवर्तनं च स्यात्तर्हि सद्यस्कालविधिर्भवेत् " ॥ इति । **आपस्तंबोऽपि**—"पौर्णमास्यां त्वन्वाधानपरिस्तरणोपवासः सद्यो वा सद्यःकालायां सर्वं क्रियते" इति । संगवावर्तनयोर्मध्ये पौर्णमासी प्रतिपदोः संधौ सति संधिदिनात्पूर्वेद्युर्वा अन्वाधानादिपरिस्तरणांतं संधिदिने वा अन्वाधानादिकं सर्वं क्रियत इत्यर्थः । एवं सति प्रतिपच्चतुर्थांशप्रतिषेधवचनमत्र विषये सावकाशम् । विकृतिरूपाया इष्टेस्तु कालमाह **कात्यायनः**—

" आवर्तनात्प्राग्यदि पर्वसंधिः कृत्वा तु तस्मिन्प्रकृतिं विकृत्याः ।

" तत्रैव यागः परतो यदि स्यात्तस्मिंन्विकृत्या प्रकृतेः परेद्युः " ॥ इति । आवर्तने ततः पुरा वा पर्वसंधौ तस्मिन्संधिदिने प्रथमं प्रकृतियागं कृत्वा पश्चाद्विकृतेः संबंधि यागः कर्तव्यः । यदि आवर्तनात्परतः संधिः तदा केवलविकृतियागः संधिदिने कर्तव्यः । प्रकृतियागस्तु केवलसंधिदिनात्परेद्युरनुष्ठेय इत्यर्थः । आवर्तने ततः पूर्वकाले ततः परकाले वा संधिरित्येतेषु त्रिष्वपि पक्षेषु संधिदिन एव विकृतेरनुष्ठानं प्रकृतेस्तु पूर्वोक्तरीत्या संधिदिने परेद्युश्चानुष्ठानं व्यवतिष्ठते ।

तदेवं संपूर्णतिथौ इष्टिपशुसोमविकृतीनां केवलपर्वैव कालः। खंडतिथौ तु पूर्वोक्तः कालः। तदेतदापस्तंब आह "यदीष्ट्या यदि पशुना यदि सोमेन यजेतामावास्यायां पौर्णमास्यां वा यजेत"॥ इति। पर्वप्रतिपदोः संधिमुपजीव्यान्वाधानेष्टिकालौ व्यवस्थापितौ। अत्र तिथिक्षयवृध्द्योः सन्धिविषयं कंचिद्विशेषमाह **कात्यायनः**—

"परेऽन्हि घटिका न्यूनास्तथैवाभ्यधिकास्तु याः। तदर्धक्लृप्त्या पूर्वस्मिन् ह्रासवृध्द्या प्रकल्पयेत्"॥ इति।

लोकाक्षिरपि—"तिथेः परस्या घटिकास्तु या स्युर्न्यूनास्तथा वाऽभ्यधिकास्तु तासाम्। "अर्धं वियोज्यं च तथा प्रयोज्यं ह्रासे च वृद्धौ प्रथमे दिने स्यात्"॥ इति।

कालादर्शेऽपि—

"पर्वणि क्षयगे वृद्धौ परस्यान्हः क्षयोर्जिती। अर्धक्लृप्त्या यथान्यायं दिने पूर्वत्र योजयेत्"॥ इति। पर्वणि पूर्णिमायाममायां च क्षयगे क्षयगामिनि सति वृद्धौ वृद्धिगामिनि सति परस्याह्नः प्रतिपदः क्षयोर्जिती ह्रासवृद्धी अर्धक्लृप्त्या अर्धकल्पनेन यथान्यायं यथासंख्यक्रमेण पूर्वत्रदिने योजयेदित्यर्थः। पूर्वेद्युः पूर्णिमा अमावास्या वा पंचदशघटिका परेद्युः प्रतिपदपि तावती तदा यथास्ति तामेवोपजीव्य सन्धिर्विज्ञेयः। यदा तु प्रतिपदि षड्घटिकाः क्षीयन्ते तदा घटिकात्रयक्षयः पर्वणि योजनीयः। तस्मिन् योजने द्वादशघटिकामावस्या भवति। अनेन न्यायेन षड्घटिकावृद्धौ घटिकात्रये योजिते अष्टादशघटिका अमावास्या भवति। तथा सत्यावर्तनादूर्ध्वं संधिर्भवति। तदेवं संधिं विज्ञाय तदनुसारेणान्वाधानेष्टी अनुष्ठातव्ये।

बोधायनमतानुसारिणाममावास्यायां विशेषः। बोधायनकात्यायनमतानुसारिणाममावास्यायां विशेषमाह **कात्यायनः**—

"सिनीवाल्यपराह्णे चेदृगापस्तंबसामिनाम्। सायाह्ने द्वित्रिनाडी चेत्सा बोधायनकण्वयोः"॥ इति। श्राद्धेऽप्येवमेव तिथिर्ग्राह्या। यतः **स** एवमाह—

"चतुर्दशीदिनांते तु चतुस्त्रिघटिका यदि। अमाभूते च कर्तव्यं श्राद्धं वाजसनेयिभिः"॥ इति।

कालनिर्णये-"अस्तमयादर्वाक् स्वल्पामावास्योपेतायामपि चतुर्दश्यां श्राद्धान्वाधाने कर्तव्ये" इति। एतच्च तिथिसाम्ये द्रष्टव्यम्। तिथिक्षये तु अस्तमयात्परं चतुर्दश्यनुवृत्तावपि तस्मिन्नेव दिने श्राद्धान्वाधाने। तथा च **बोधायनः**—

"चतुर्दशी तु संपूर्णा द्वितीया क्षयकारिणी। चरुरिष्टिरमायां स्याद्भूते कव्यादिका क्रिया"॥ इति। अस्यार्थः—चतुर्दशी संपूर्णा अस्तमयपर्यंतवर्तिनी अधिका वा द्वितीया क्षयकारिणी प्रतिपद्दिने सायाह्नवर्तिनी अत्रामायां चरुः स्थालीपाक इष्टिश्च स्याद्भूते चतुर्दश्यां कव्यादिका श्राद्धान्वाधाने इत्यर्थः। **स** एव—

"चतुर्दशीचतुर्यामे त्वमावास्या न दृश्यते। श्वोभूते प्रतिपद्यत्र भूते कव्यादिका क्रिया"॥ इति। अस्यार्थः—चतुर्दशीदिनचतुर्थयामे अमावास्या न दृश्यते श्वोभूते अमावास्यायामस्तमयात्प्रागेव प्रतिपद् दृश्यते। तदा भूते चतुर्दश्यां कव्यादिका क्रियेत्यर्थः। **स्मृत्यंतरेऽपि**—

"अमायां तु दिवा युक्ता प्रतिपद्घटिकाऽपि वा। तत्रैवेष्टिसमाप्तिः स्यात्तिथिवृद्धिर्भवेन्न चेत्"॥ इति।

"द्वितीयास्तमये काले घटिकैकाऽपि दृश्यते। अत्र यागं न कुर्वीत विश्वेदेवाः पराङ्मुखाः॥

"द्वितीया तु दिवा युक्ता नाड्येका प्रतिपत्तिथौ । अमावास्या चतुर्थेंऽशे यागस्तत्र समाप्यते"॥ इति । पूर्वेद्युरन्वाधानं अमावास्यायां यागसमाप्तिरित्यर्थः । **बोधायनः**—

" यदा चतुर्दशीयामं तुरीयमनुपूरयेत् । अमावास्या क्षीयमाणा तदैव श्राद्धमाचरेत् " ॥ इति । **अस्यार्थः**—चतुर्दश्यास्तुरीयं यामं यद्यमावास्या अनुपूरयेत् स्पृशेत् सा च पुनः क्षीयमाणा परेद्युः चतुर्थयामे प्रतिपद्युक्ता तदैव अमावास्यास्पृष्टचतुर्दशीदिन एव श्राद्धान्वाधाने कुर्यादित्यर्थः । **बोधायनवृद्धशातातपौ**—

"द्वितीया त्रिमुहूर्ता चेत्प्रतिपद्याऽपराण्हिकी । अन्वाधानं चतुर्दश्यां परतः सोमदर्शनात्" ॥ इति । प्रतिपद्दिने सोमदर्शनादमायामिष्टिरित्यर्थः । **कालादर्शेऽपि**—

" द्वितीया त्रिमुहूर्ता चेत् प्रतिपद्यापराह्णिकी । भूतेन्वाहितिरिष्टिस्तु श्वश्चन्द्रस्य दर्शनात् " ॥ इति । प्रतिपद्यस्तमयात्पूर्वं द्वितीया त्रिमुहूर्ता चेत्तदा भूते चतुर्दश्यामन्वाधानं इष्टिस्तु श्वः चतुर्दश्याः परेद्युर्भवेत् । तस्माच्छ्वश्चंद्रस्य दर्शनात् चतुर्दश्युत्तरदिने चंद्रस्य दर्शनात् तत्रेष्टिर्न कर्तव्येत्यर्थः । त्रिमुहूर्तेति घटिकामात्रस्याप्युपलक्षणम्—

"अर्वागस्तमयाद्यत्र द्वितीया घटिका भवेत् । तत्र यागं न कुर्वीत तदा चंद्रस्य दर्शनात्"॥ इति **स्मृतेः**। चंद्रदर्शनराहित्यमेवाभिप्रेत्य **बोधायनकारिकासु** पठ्यते—

" इष्टेरलं प्रतिपदोऽन्हि तदैव नाड्यः सप्ताष्ट वा यत्र भवंति तस्मात् ।

" क्षीणासु नाडीषु दिनस्य पूर्वः कल्पोऽथ वृद्धौ तु भवेत् द्वितीया " ॥ इति । अयमर्थः–अमावास्यातिथेः संबंधिनीषु नाडीषु क्षीणासु सतिषु तस्मिन्दिने अस्तमयात्पूर्वं प्रतिपदः संबंधिन्यो नाड्यः सप्ताष्ट वा यदि भवंति तदा तद्दिनमिष्टेरलं योग्यम् । सोऽयमेकः पक्षः । अमावास्याप्रतिपदौ यदा वर्धेते अस्तमयात्परं प्रतिपदमनुवर्तते तदा द्वितीयः कल्पो भवेत् । अमावास्यायामन्वाधाय सोमदर्शनरहिते प्रतिपद्दिने यागः कर्तव्य इति । एवं च तिथिवृद्धिप्रक्रमे चतुर्दश्यामस्तमयात्पूर्वममावास्यायोगे अमावास्यायां चास्तमयात्पूर्वं प्रतिपद्योगे च प्रतिपद्दिने अस्तमयात्परं प्रतिपदनुवृत्तौ तिथिवृद्धिर्भवेन्न चेदिति पूर्वोक्तवचनात् प्रतिपद्युतामावास्यायामन्वाधानं प्रतिपदि यागः कर्तव्यः । तिथिसाम्ये तिथिक्षये च चतुर्दश्यामन्वाधानं पर्वणि यागः । **स्मृत्यंतरेऽपि**—

" आदित्येऽस्तमिते चंद्रः प्रतीच्यामुदियाद्यदा । प्रतिपद्यतिपत्तिः स्यात्पंचदश्यां यजेत्तदा ॥

" अमावास्याऽस्य पूर्वेद्युः अदृष्टेंदुः प्रशस्यते । दृष्टचंद्रेन कर्तव्यो यागस्तत्र परेऽहनि ॥

" दृष्टचंद्रदिने चेत्स्याद्देवा यांति पराङ्मुखाः " ॥ इति । प्रतिपद्दिने अस्तमयात्पूर्वं घटिकामात्रद्वितीयासंभवे चंद्रस्य दर्शनात् तत्र यागो न कर्तव्य इत्यर्थः ।

कात्यायनोऽपि—" अन्वाधानं भूततिथ्यां तु कुर्यात्सायादौ चेत्संप्रविष्टा द्वितीया ।

" तस्यां तिथ्यां दर्शनात्प्रत्यगिंदोः पर्वण्युक्तो यागकालो नितांतः " ॥ इति ।

वृद्धवसिष्ठः—

" इंदौ निरुप्ते हविषि पुरस्तादुदिते विधेः । यद्वैगुण्यं हुते तस्मिन्पश्चादपि हि तद्भवेत् " ॥ इति । अयमर्थः—संपूर्णचतुर्दश्यामविचारेणामावास्याबुद्धिं कृत्वा हविर्निर्वापे कृते तस्मिन्दिने उषःकाले पूर्वस्यां दिशि चंद्रमा उदेति तदा दर्शकालस्याप्राप्तत्वात्कालापराधं निमित्तीकृत्य दर्शदेवता अपनीय दात्रादिगुणविशिष्टान्यग्न्यादिदेवतांतराण्युद्दिश्य यागो विहितस्**तैत्तिरीयब्राह्मणे**-

"यस्य हविर्निरुप्तं पुरस्ताच्चंद्रमा अभ्युदेति त्रेधा तंडुलान्विभजेद्ये मध्यमाः स्युस्तानग्नये दात्रे पुरोडाशमष्टाकपालं कुर्यात्" इत्यादिना (तै. सं. २।५।५)। सोऽयं दृष्टांतः। हविषि निरुप्ते सति तत ऊर्ध्वं पूर्वस्यां दिशि चंद्रमस्यभ्युदिते यद्वैगुण्यं तदेव वैगुण्यं होमदिने पश्चिमदिशि चंद्रोदये भवतीति। एतदेव **बोधायन**मतमुपोद्बलयति **श्रुतिः**—"यस्मिन्नहनि पुरस्तात्पश्चात्सोमो न दृश्यते तदहर्यजेत" इति। चंद्रदर्शनोपेतायां शुक्लप्रतिपदि यागानुष्ठाने प्रायश्चित्तमाह **कात्यायनः**—
"यजनीयेऽन्हि सोमश्चेत् वारुण्यां दिशि दृश्यते। तत्र व्याहृतिभिर्हुत्वा दंडं दद्यात् द्विजातयः"॥ इति।
यत्तु **बोधायनवचनम्**—
"मध्याह्नात्परतो यत्र चतुर्दश्यनुवर्तते। सिनीवाली तु सा ज्ञेया पितृकार्ये तु निष्फला"॥ इति तद्बोधायनीयव्यतिरिक्तविषयम्। अन्यथा पूर्वोक्तवचननिचयविरोधः स्यात्। पौर्णमासे बोधायनमतावलंबिनां विशेषादर्शनात् वाजसनेयिनामेव विशेषदर्शनात् वाजसनेयिव्यतिरिक्तानां सर्वेषां पूर्वोक्त एव प्रकारोऽवगंतव्यः। इति **इष्टिनिर्णयः**—

नक्षत्रादिनिर्णयः। अथ नक्षत्रादिनिर्णयः। तत्र **मार्कंडेयः**—
"तन्नक्षत्रमहोरात्रं यस्मिन्नस्तमितो रविः। यस्मिन्नुदेति सविता तन्नक्षत्रं दिनं भवेत्"॥ इति।
अयमर्थः—द्विविधो नक्षत्रसंबंधिकालविशेषः। अहोरात्रौ दिनं च। अनुष्ठेयं कर्मापि द्विविधम्। अहोरात्रसाध्यं दिनसाध्यं च। उपवासैकभक्तादिकमहोरात्रसाध्यम्। यद्यप्यल्पकालनिष्पाद्यं भोजनमेकभक्तनक्तयोः स्वरूपं तथाप्यहोरात्रे भोजनांतरस्य एकभुक्तादिनिघातितया भोजनांतरपरित्यागसहितस्यैव भोजनस्यैकभक्तादिस्वरूपत्वादहोरात्रसाध्यत्वं विरुद्धम्। दानव्रतश्राद्धानामहन्येव कर्तव्यतया दानादिकं दिनसाध्यम्। तत्रोपवासादौ निशीथव्यापि अस्तमयव्यापि वा नक्षत्रं ग्राह्यम्। व्रतदानादौ तु सूर्योदयव्यापि नक्षत्रं ग्राह्यमिति। तदुक्तं **स्कान्दपुराणे**—
"तत्रैवोपवसेदृक्षे यन्निशीथे यदा भवेत्। उपोषितव्यं नक्षत्रं यस्मिन्वास्तमियाद्रविः॥
"उपवासे यदृक्षं स्यात् तद्धि नक्तैकभुक्तयोः"॥ इति। अस्तमययोगो मुख्यः। निशीथयोगोऽनुकल्पः। **विष्णुधर्मोत्तरे**—
"सा तिथिस्तच्च नक्षत्रं यस्मिन्नभ्युदितो रविः। तथा कर्माणि कुर्वीत ह्रासवृद्धी न कारणम्"॥ इति।
एतदुपवासव्यतिरिक्तव्रतादिविषयम्। यद्यप्यत्र सूर्योदयकाले नक्षत्रसद्भावमात्रं प्रतीयते न तु परिमाणविशेषः तथापि त्रिमुहूर्तपरिमाणस्य तिथिषु कॢप्तत्वात् तन्न्यायेनोदये 'त्रिमुहूर्तस्थं नक्षत्रं व्रतदानयोः' इति **वचनेन** चोदयादित्रिमुहूर्तव्यापि नक्षत्रं ग्राह्यम्। नक्षत्रश्राद्धे तु अपराह्णस्य पार्वणश्राद्धकालत्वेन तद्व्यापिताश्रयणीया। एवं विष्कम्भादियोग उपवासादौ अस्तमयव्यापी ग्राह्यः। दानव्रतयोरुदयादित्रिमुहूर्तव्यापी ग्राह्यः। श्राद्धे तु कर्मकालव्यापी ग्राह्यः। एवं बवादिकरणानां तिथ्यर्धपरिमितत्वेन दिनद्वयव्यापित्वसंदेहाभावादुदयेऽस्तमये वा यस्मिन्दिने करणसद्भावस्तास्मिन्नेव दिने तत् कर्मानुष्ठेयम्। संक्रांतिग्रहणादिकालो नैमित्तिकस्नानादिप्रकरणे निरूपितः[1]॥

इति वैद्यनाथदीक्षितविरचिते स्मृतिमुक्ताफले कालनिरूपणं नाम पंचमः परिच्छेदः
तिथिनिर्णयकाण्डः समाप्तः॥ हरिः ओम्।

(श्रीयवतेश्वरार्पणमस्तु। शके १७८७ विश्वावसूनामाब्दे भाद्रपदकृष्णदशम्यां भृगुवासरे तद्दिने इदं पुस्तकं यवतेश्वरस्थशङ्करनारायणद्रविडेन लिखितम्। स्वार्थपरार्थं च। यदक्षरप)

१ २६४–२७६ पृ.

प्रायश्चित्तकाण्डः षष्ठः ।

॥ शुभमस्तु ॥

श्रीरामचरणाम्भोजलीनमानसषट्पदः । वैद्यनाथाध्वरी प्रायश्चित्तं संगृह्य भाषते ॥

अथ प्रायश्चित्तकाण्डमार[1]भते । प्रायो नाम तपः चित्तं निश्चयः । अनुष्ठितेन द्वादशवार्षिकादिना अवश्यं पापं निवर्तत इति विश्वासयुक्तव्रतानुष्ठानलक्षणं तपः प्रायश्चित्तम् । **तदाहाङ्गिराः**—

" प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते । तपो निश्चयसंयुक्तं प्रायश्चित्तमिहोच्यते" ॥ इति । तच्च विहिताकरणादिनिमित्तवन्तं प्रति चोदनानैमित्तिकम् । **तथा च बृहस्पतिः**—

" विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् । प्रायश्चित्तं यत्क्रियते तन्नैमित्तिकमुच्यते" ॥ इति । **विज्ञानेश्वरः** (पृ. २३५ पं. २४)—"प्रायश्चित्तशब्दः पापक्षयार्थे नैमित्तिके कर्मविशेषे रूढः" इति । तदेवं प्रायश्चित्तशब्दः योगेन रूढ्या च पापनिवर्तनक्षमं धर्मविशेषमाचष्टे ।

प्रायश्चित्ताधिकारिनिरूपणम् । तत्र अधिकारिणं दर्शयति **मनुः** (११।४४)—

" अकुर्वन्विहितं कर्म निन्दितं च समाचरन् । प्र[2]सृजंश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः " ॥ इति । **याज्ञवल्क्योऽपि** (प्रा. २१९–२२०)—

" विहितस्याननुष्ठानान्निन्दितस्य च सेवनात् । अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति " ॥ प्रत्यवायीभवति ।

" तस्मात्तेनेह कर्तव्यं प्रायश्चित्तं विशुद्धये । एवमस्यान्तरात्मा च लोकश्चैव प्रसीदति " ॥ एवं प्रायश्चित्ते कृते अस्यान्तरात्मा शुद्धतया प्रसीदति लोकश्च संव्यवहर्तुं प्रसीदतीत्यर्थः ।

एकविंशति नरकाः । प्रायश्चित्ताकरणे दोषमाह **स** एव (प्रा. २२१–२२५)—

" प्रायश्चित्तमकुर्वाणाः पापेषु निरता नराः । अपश्चात्तापिनः कष्टान्नरकान्यान्ति दारुणान् ॥
" तामिस्रं लोहशङ्कुं च महानिरयशल्मली । रौरवं कुड्[3]मलं पूतिं[4] मृत्तिकां कालसूत्रकम् ॥
" संघातं लोहितोदं च सविषं संप्रतापनम् । महानरकका[5]कोलं सञ्जीवनमहाप[6]थम् ॥
" अवीचिमन्धतामिस्रं कुम्भीपाकं तथैव च । असिपत्रवनं चैव त[7]पनं चैकविंशकम् " ॥
" महापातकजैर्घोरैरुपपातकजैस्तथा । अन्विता यान्त्यचरितप्रायश्चित्ता नराधमाः " ॥ इति ।

एकविंशकमित्येतत् प्रधाननरकापेक्षयोक्तम् । महापातकजैरिति उ[8]पपापमात्रोपलक्षणम् । तथा च पापतारतम्यात् फलतारतम्यं दर्शितं **विष्णुधर्मोत्तरे**—

" अष्टाविंशतिकोट्यः स्युर्घोराणि नरकाणि वै । महापातकिनश्चात्र सर्वे स्युर्नरकाब्धिषु ॥
" आ चन्द्रतारकं यावत्पीड्यन्ते विविधैर्वधैः । अतिपातकिनश्चान्ये निरयार्णवकोटिषु ॥
" एकविंशतिसंख्येषु पादोनब्रह्मकल्पकम् । चतुर्दशसु पच्यन्ते कल्पार्धं समपापिनः ॥
" उपपातकिनश्चापि तदर्धं यान्ति मानवाः । शेषैः पापैस्तदर्धं च कालक्लृप्तिरियं स्मृता " ॥ इति ।

---

१ **ग**–भ्य । २ **ग**–सक्त । ३ **क**–कश्मल । ४ **ग**–पूतिमृत्तिकं । ५ **क्ष**–लोकं च । ६ **क्ष**–वशि । ७ तापनमिति मुद्रिते पाठः । ८ **ग**–पाप ।

रहस्यकृतपापफलनिरूपणम् । रहस्यकृतपापफलमाह **पराशरः**—

"पातके तु सहस्रं स्यान्महति द्विगुणं तथा । उपपातके तुरीयं स्यान्नरकं वर्षसंख्यया"॥ इति ।

नरकानुभवानन्तरं तिर्यगादिजन्मनिरूपणम् । एवं नरकमनुभूय कर्मशेषात्पुनरिह संसारे दुःखबहुलतिर्यगादिषु योनिषु जायन्ते । तदाह **याज्ञवल्क्यः** (प्रा. २०६–२०८)—

"महापातकजान् घोरान्नरकान्प्राप्य दारुणान् । कर्मक्षयात्प्रजायन्ते महापातकिनस्त्विह ॥

"मृगाश्वसूकरोष्ट्राणां ब्रह्महा योनिमृच्छति । खरपुल्कसवेणानां सुरापो ब्राह्मणो व्रजेत् ॥

"कृमिकीटपतङ्गत्वं स्वर्णहारी समाप्नुयात् । तृणगुल्मलतात्वं च क्रमशो गुरुतल्पगः" ॥

एतच्चाकामकारविषयम् । कामकारे तु अन्यास्वपि दुःखबहुलयोनिषु संसरति । यथाह **मनुः** (१२।२४–२८)—

"बहुवर्षगणान् सर्वान्नरकान्प्राप्य तत्क्षणात् । संसारान्प्रतिपद्यन्ते महापातकिनस्त्विह ॥

"श्वसूकरखरोष्ट्राणां गोमायुमृगपक्षिणाम् । चण्डालपुल्कसानां च ब्रह्महा योनिमृच्छति ॥

"कृमिकीटपतङ्गानां विड्भुजां चैव पक्षिणाम् । हिंस्राणां चैव सत्त्वानां सुरापो ब्राह्मणोऽसकृत् ॥

"लूताहिसरटानां च तिरश्चां चांबुचारिणाम् । हिंस्राणां च पिशाचानां स्तेनो विप्रः सहस्रशः ॥

"तृणगुल्मलतानां च क्रव्यादां दंष्ट्रिणामपि । क्रूरकर्मकृतां चैव शतशो गुरुतल्पगः" ॥ इति ।

लूता ऊर्णनाभिः[4] । सरटः कृकलासः । एवं रौरवादिनरकेषु श्वसूकरादियोनिषु च दारुणं दुःखमनुभूयानन्तरं दुरितशेषेण जननमरणसमय एव क्षयरोगादिलक्षणयुक्तो दुःखप्रचुरेषु मानुषशरीरेषु संसरति । तथा च **याज्ञवल्क्यः** (प्रा. २०९–२१०)—

"ब्रह्महा क्षयरोगी स्यात्सुरापः श्यावदन्तकः । हेमहारी तु कुनखी दुश्चर्मा गुरुतल्पगः ॥

"यो येन संवसत्येषां स तल्लिङ्गो हि जायते" ॥ इति । श्यावदन्तकः स्वभावतः कृष्णदशनः । दुश्चर्मा कुष्ठी । एतेषां ब्रह्महादीनां मध्ये येन पुरुषेण यः संवसति स तल्लिङ्गो जायते इत्यर्थः । एवं महापातकव्यतिरिक्तेष्वन्येष्वपि पापेषु अकृतप्रायश्चित्तानां नरकानुभवानन्तरं तिर्यगादिषु जननम् । **स** एवाह (प्रा. २१७)—

"यथाकर्मफलं प्राप्य तिर्यक्त्वं कालपर्ययात् । जायन्ते लक्षणभ्रष्टा दरिद्राः पुरुषाधमाः" ॥ इति ।

तथान्यत्र—

"चरितव्यमतो नित्यं प्रायश्चित्तं विशुद्धये । निन्द्यैर्हि लक्षणैर्युक्ता जायन्तेऽनिष्कृतैनसः" ॥ इति ।

मनुरपि (११।४८)—

"इह दुश्चरितैः केचित् केचित्पूर्वकृतैस्तथा । प्राप्नुवन्ति दुरात्मानो नरा रूपविपर्ययम्" ॥ इति ।

इह दुश्चरितैरस्मिन् जन्मन्यार्जितैः उत्कटैः पापैरिह तत्फलं पूर्वमनुभूय पश्चान्नरकादिकमनुभवन्ति । "अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते । त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभिः पक्षैस्त्रिभिर्दिनैः"॥ इति **स्मृतेः** । पूर्वकृतैस्तु पापैर्नरकाद्यनुभवानन्तरं रूपविपर्ययं प्राप्नुवन्तीत्यर्थः । **स** एव (१२।६०–६८)—

"संयोगं पतितैर्गत्वा परस्यैव च योषितम् । ब्रह्मस्वमपहृत्यापि भवन्ति ब्रह्मराक्षसाः ॥

"पिशुनः पूतिनासत्वं सूचकः पूतिवक्त्रताम् । धान्यचोरोऽङ्गहीनत्वमातिरेक्यं तु मिश्रतः[6] ॥

"अन्नहर्तामयावित्वं मत्स्यं वागपहारकः । वस्त्रापहारकः श्वैत्र्यं पङ्गुतामश्वहारकः ॥

"एवं कर्मविशेषेण जायन्ते सद्विगर्हिताः । जडमूकान्धबधिरा विकृताकृतयस्तथा ॥

"मणिमुक्ताप्रवालानि हृत्वा लोभेन मानवाः । विविधानि च रत्नानि जायन्ते लोहकर्तृषु ॥

---

१ क्ष–त्यियं । २ क्ष–कृमि । ३ ग–क्रमशो; क्ष–चमरो । ४ ग–भः । ५ ग–पतितेन । ६ अ. ११।५०–५२; ६१–६८; । ७ क–स्यं; क्ष–वयं । ८ ग–पङ्गु ।

"धान्यं हृत्वा भवत्याखुः कांस्यं हंसो जलं प्लवः। मधु दंशः पयः काको रसं श्वा नकुलो घृतम्॥
"मांसं गृध्रो वसां मद्गुस्तैलं तैलपकः खगः। चि[1]रिवाकस्तु लवणं बलाकः[1] शकुनिर्दधि॥
"कौशेयं तित्तिरिर्हृत्वा क्षौमं हृत्वा तु दर्दुरः। कार्पासं तान्तवं क्रौञ्चो गोधा गां वाग्गदो गुडम्॥
"चु[2]चुन्दरिः शुभान् गन्धान् पत्रशाकं तु बर्हिणः। श्वावित् कृतान्नं विविधमकृतान्नं तु शल्यकः॥
"बको भवति हृत्वाग्निं गृहकारी ह्युपस्करम्। रक्ता[3]नि हृत्वा वासांसि जायते जीवजीवकः॥
"वृको मृगेभं व्याघ्रोऽश्वं फलपु[4]ष्पं तु मर्कटः। स्त्रीमृक्षः स्तोकको वारि या[5]नान्युष्ट्रः पशूनजः॥
"यद्वा तद्वा परद्रव्यमपहृत्य बलान्नरः। अवश्यं याति तिर्यक्त्वं जग्ध्वा चैवाहुतं हविः"॥
"यादृशेन हि भावेन यद्यत्कर्म निषेवते। तादृशेन शरीरेण तत्तत्फलमुपाश्नुते" (१२।८१)॥ इति।

याज्ञवल्क्योऽपि (प्रा. २१०–२१५)—"अन्नहर्ताऽमयावी स्यान्मूको वागपहारकः।
"धान्य[6]हर्ताऽतिरिक्ताङ्गः पिशुनः पूतिनासिकः। तैलहृत्तैलपायी स्यात् पूतिवक्त्रस्तु सूचकः॥ (२१०)
"हीनजातौ प्रजायेत रत्नानामपहारकः॥ (२१३)
"श्वित्री वस्त्रं श्वा रसं तु चीरी लवणहारकः। आमयावी अजीर्णान्नो मौक्यं वागपहारकः"॥
पुस्तकहारी अननुज्ञाताध्यायी च। तैलपायी कीटविशेषः। सूचकः सद्दोषसंकीर्तकः।
"पत्रशाकं शिखी हृत्वा गन्धान् चुचुन्दरी शुभान्।
"मूषको धान्यहारी स्याद्यानमुष्ट्रः फलं कपिः। जलं प्लवः पयः काको गृहकारी ह्युपस्करम्॥ (२१४)
"मधु दंशः फलं गृध्रो गां गोधाग्निं बकस्तथा"। चुचुन्दरिः राजदुरिताख्यो मूषकविशेषः। गृहकारि कीटविशेषः। उपस्करः मुसलादि। चीरी उच्चैस्स्वरः कीटविशेषः। **शङ्खो** विशेषमाह—
"ब्रह्महा कुष्ठी तैजसहारी मण्डली देवब्राह्मणाक्रोशकः खलतिर्गरदाग्निदावुन्मत्तौ गुरुप्रतिहन्तापस्मारी गोघ्नश्चान्धः धर्मपत्नीमृतौ त्यक्त्वाऽन्यत्र प्रवृत्तः शब्दवेधी प्राणिविशेषः। कुण्डाशी दंशभक्षः। देवब्राह्मणस्वापहारी पाण्डुरोगी। न्यासापहारी काणः। स्त्रीवश्योपजीवः षण्डः कौमारदारत्यागी दुर्भगो मृष्टैकाशी वातगुल्मी अभक्ष्यभक्षको गण्डमाली ब्राह्मणीगामी निर्बीजः क्रूरकर्मा वामनः वस्त्रापहारी पतङ्गः शय्यापहारी क्षपणकः शङ्खशुक्त्यहारी कपाली दीपापहारी कौशिकः मित्रध्रुक् क्षयी मातापित्रोराक्रोशकः कारण्डकः" इति।

वृद्धगौतमोऽपि क्वचित् विशेषमाह—"अनृतवाक् खलः मुहुर्मुहुः संचलनवाक् जलोदरो दारत्यागी श्लीपदी कूटसाक्षी उच्छ्रितजंघाचरणः। विवाहविघ्नकर्ता छिन्नोष्ठः गोर[10]क्षणे च्छिन्नहस्तः मातृघ्नोऽन्धः। स्नुषागामी वातवृषणः। चतुष्पथे विण्मूत्रविसर्जनो मूत्रकृच्छ्री। कन्यादूषकः षण्डः। ईर्ष्यालुः मशकः। पित्रा विवदमानोऽपस्मारी। न्यासापहारी अनपत्यः। रत्नापहारी अत्यन्तदरिद्रः। विद्याविक्रयी पुरुषमृगः। वेदविक्रयी [11]द्वीपी। बहुवा[12]चको जलप्लवः। अयाज्ययाजको वराहः। अनि[13]मन्त्रितभोजी वायसः। मृष्टैकभोजी वानरः। यतस्ततोऽन्नमश्नन्मार्जारः। कक्षवनदाहकः खद्योतः। दारकाचार्यो मुखविट्गन्धः। पर्युषितभोजी कृमिः। अदत्तादायी बलीवर्दः। मत्सरी भ्रमरः। अग्न्युत्सादी मण्डलकु[14]क्षी। शूद्राचार्यः श्वपाकः। गोहर्ता सर्पः। स्नेहापहारी क्षयी। अन्नापहारी अजीर्णी। ज्ञानापहारी मूकः। चण्डालीपुल्कसीग[15]मकः रजकः। प्रव्रजितागमने मरुपिशाचः शूद्रागमने दी[16]पर्धटः। सवर्णागमने दरिद्रः। जलहारी मत्स्यः। पञ्चमहापातकानि मिथ्यः। क्षारहारी

१ ग–काश; 'चीरी' मु. पाठः। २ 'छुछु'। ३ क्ष–त्ना। ४ 'मूलं' क्ष–मु। ५ क्ष–धा; ग–धाम्या। ६ 'मिश्रो' मु. पाठः। ७ क्ष–रिरु। ८ क्ष–नि। ९ ग–वाक्यो। १० ग–गोरवगूर। ११ ग–द्वि। १२ ग–याज। १३ क्ष–य। १४ ग–ष्टी। १५ ग–गामी। १६ ग–दीर्घकीटः।

बलाकः । वार्धुषिकोऽङ्गहीनः । अविक्रेयविक्रयी गृध्रः । राजमहिषीगामी नपुंसकः । दुराक्रोशी गर्दभः । गोगामी मण्डूकः । अनध्यायाध्यायी मृगालः । परद्रव्यापहारी परप्रेष्यः । मत्स्यवेधो गर्दभः" इति । स्त्रियोऽप्येतेषु पूर्वोक्तास्वेव जातिषु स्त्रीत्वमनुभवन्ति । यथाह **मनुः** (१२।६९)—

"स्त्रियोप्येतेन कल्पेन हृत्वा दोषमवाप्नुयुः । एतेषामेव जन्तूनां भार्यात्वमुपयान्ति ताः" ॥ इति ।

स एव (१२।७८–८१)—

"असकृत् गर्भवासेषु[1] वसन् जन्म च दारुणम् । बन्धनानि च कष्टानि परप्रेष्यत्वमेव च" ॥ इति ।
"बन्धुप्रियवियोगं च संसर्गं चाप्रियैर्जनैः । द्रव्यं जनं च नाशं च मित्रामित्रस्य चार्जनः ॥
"जरां चैवाप्रतीकारां व्याधिभिश्चोपपीडनम् । क्लेशांश्च विविधांस्तांस्तान्मृत्युमेव च दुर्जयम् ॥
"यादृशेन हि भावेन यद्यत्कर्म निषेवते । तादृशेन शरीरेण तत्तत्फलमुपाश्नुते" ॥ इति ।

दुर्लक्षणमनुष्यजन्मानन्तरं प्राक्भवीयसुकृतविशेषेण महाकुले भोगविद्याधनधान्यसंपन्नो जायते । तदाह **याज्ञवल्क्यः** (प्रा. २१८)—

"ततो निष्कल्मषीभूताः कुले महति भोगिनः । जायन्ते विद्ययोपेता धनधान्यसमन्विताः" ॥ इति ।

निष्कल्मषीभूताः नरकाद्युपभोगद्वारेण क्षीणपापा इत्यर्थः ।

नवविधपापानि । प्रायश्चित्तनिमित्तानि तानि पापानि नवविधानि । महापातकान्यतिपातकानि समपातकान्युपपातकानि सङ्करीकरणानिम लिनीकरणान्यपात्रीकरणानि जातिभ्रंशकराणि प्रकीर्णकानीति । यथाह **विष्णुः** (३३।१-५) "पुरुषस्य कामक्रोधलोभाख्यं रिपुत्रयं सुघोरं भवति तेनायमाक्रान्तो महापातकातिपातकसमपातकोपपातकेषु प्रवर्तते सङ्कीर्णकरणेषु मलापहेषु[2] अपात्रीकरणेषु जातिभ्रंशकरणेषु प्रकीर्णकेषु च" इति ।

ब्रह्महत्यादिमहापातकानि । तत्र महापातकान्याह **मनुः** (११।५४)—

"ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः । महान्ति पातकान्याहुः संयोगैश्चैव[3] तैः सह" ॥ इति ।

याज्ञवल्क्योऽपि (प्रा. २२७)—

"ब्रह्महा मद्यपः स्तेनः तथैव गुरुतल्पगः । एते महापातकिनो यश्च तैः सह संवसेत्" ॥ इति ।

यद्व्यापारसमनन्तरं वा कालान्तरे वा कारणान्तरनिरपेक्षः प्राणवियोगो भवति स ब्राह्मणं हतवानिति ब्रह्महा । मद्यपः निषिद्धसुरायाः पाता । स्तेनो ब्राह्मणस्वर्णहारी । गुरुतल्पगो गुरुभार्यागामी । यश्च तैर्ब्रह्महादिभिः प्रत्येकं संवत्सरं सह वसति सोऽपि महापातकीत्यर्थः ।

प्रयोजकादीनां फलतारतम्यम् । अनुग्राहकस्यापि हिंसाफलसंबन्धमाह **मनुः**—

"बहूनामेककार्याणां सर्वेषां शस्त्रधारिणाम् । यद्येको घातयेत्तत्र सर्वे ते घातकाः[4] स्मृताः" ॥ इति ।

विष्णुः—

"आक्रुष्टस्ताडितो वापि धनैर्वा विप्रयोजितः । यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकम् ॥
"ज्ञातिमित्रकलत्रार्थं सुहृत्क्षेत्रार्थमेव च । यमुद्दिश्य त्यजेत्प्राणान् तमाहुर्ब्रह्मघातकम् ॥
"रागद्वेषात्प्रमादाद्वा स्वतः परत एव वा । घातयेत् ब्राह्मणं कंचित्स भवेत् ब्रह्मघातकः ।
"भृतको यस्य तं हन्यात्सोऽपि च ब्रह्मघातकः" ॥ इति ।

हेमाद्रौ—"धनार्थं क्षेत्रदारार्थं पश्वर्थं वा जनेश्वर । यमुद्दिश्य त्यजेत्प्राणान् तमाहुर्ब्रह्मघातकम् ॥
"नारी वा पुरुषो वाऽथ विधवा वा मनस्विनी । यमुद्दिश्य त्यजेत्प्राणान् तमाहुर्ब्रह्मघातकम्" ॥ इति ।

---

१ ग–वासं । २ ग–मलिनीकरणेषु । ३ ग–संसर्गश्चापि । ४ ग–तु ।

स्मृत्यन्तरेऽपि—

" हन्ता मन्त्रोपदेष्टा च तथा संप्रतिपादकः । प्रोत्साहकः सहायश्च तथा मार्गानुदेशकः ॥
" आश्रयः शस्त्रदाता च भक्तदाता च कर्मिणाम् । उपेक्षकः शक्तिमांस्तु दोषवक्ताऽनुमोदकः ॥
" अकार्यकारिणां तेषां प्रायश्चित्तं प्रकल्पयेत् " ॥ इति । **आपस्तम्बः** (२।११।२९।१-२)—
"प्रयोजयिता मन्ता कर्तेति स्वर्गनरकफलेषु कर्मसु भागिनो यो भूय आरभते तस्मिन् फलविशेषः"॥इति। प्रयोजकादीनां प्रत्यासत्तिव्यवधानापेक्षया व्यापारगतगुरुलाघवापेक्षया च फले गौरवलाघववात् प्रायश्चित्तेऽपि गौरवलाघवं बोध्यम् । तथा **सुमन्तुः**—

" तिरस्कृतो यदा विप्रो हत्वाऽऽत्मानं मृतो यदि । निर्गुणः सहसा क्रोधात् गृहक्षेत्रादिकारणात् ॥
" त्रैवार्षिकं व्रतं कुर्यात्प्रतिलोमां सरस्वतीम् । गच्छेद्वाऽपि विशुद्ध्यर्थं तत्पापस्येति निश्चितम् ॥
" क्रोधाद्वै म्रियते यस्तु निर्निमित्तं च भर्त्सितः । वत्सरत्रितयं कुर्यान्नरः कृच्छ्रं विशुद्धये ॥
" भर्त्सको यः स विद्वांश्चेद्वर्षेणैकेन शुध्यति । केशश्मश्रुनखादीनामकृत्वा वपनं वने " ॥ इति ।

उपकारार्थं प्रवृत्तौ दोषाभावः । परोपकारार्थं प्रवृत्तौ दोषाभावमाह **संवर्तः**—

" औषधं स्नेहमाहारं ददद्गोब्राह्मणादिषु । दीयमाने विपत्तिः स्यान्न स पापेन लिप्यते ॥
" दाहच्छेदसिराभेदप्रयत्नैरुपकुर्वताम् । प्राणसन्त्राणसिद्ध्यर्थं प्रायश्चित्तं न विद्यते " ॥ इति ।

एतच्च निपुणभिषग्विषयम् । इतरस्तु ' भिषङ्मिथ्याचारं दाप्य ' इति दोष**स्मरणात्** । यत्र मन्युनिमित्ताक्रोशादिकमकुर्वतोऽपि नाम गृहीत्वा उन्मादादिना आत्मानं व्यापादयति तत्रापि न दोषः

" अकारणात्तु यः कश्चित् द्विजः प्राणान्परित्यजेत् । तस्यैव तत्र दोषः स्यान्न तु यं परिकीर्तयेत्[1]" ॥ इति **स्मरणात्** । तथा यत्राक्रोशादिजनितमन्युरात्मानं खड्गादिना प्रहृत्य मरणादर्वागाक्रोशादिकर्त्रा धनादिना सन्तोषितो यदि जनसमक्षमुच्चैः श्रावयति नात्राक्रोशकस्यापराध इति तत्रापि वचनान्न दोषः । यथाह **विष्णुः**—

"उद्दिश्य कुपितो भूत्वा तोषितः श्रावयेत्पुनः । तस्मिन् मृते न दोषोऽस्ति तस्य चोच्छ्रावणे कृते"॥इति।

अतिपातकानि । अतिपातकान्याह **मनुः** (११।८७-८८)—

" हत्वा गर्भमविज्ञातमेतदेव व्रतं चरेत् । राजन्यवैश्यावीजानावात्रेयीमेव च स्त्रियम् ॥
" उक्त्वा चैवानृतं साक्ष्ये प्रतिरुद्ध्य गुरुं तथा । अपहृत्य च निक्षेपं कृत्वा च स्त्रीसुहृद्वधम् " ॥

ईजानौ यागदीक्षामध्यवर्तिनौ । आत्रेयी अत्रिगोत्रजानिक्षेपं ब्राह्मणसंबन्धिनम् । स्त्री आहिताग्निपत्नी पातिव्रत्यादिगुणयुक्ता वा । अविज्ञातगर्भहननादीनामतिपातकत्वम्

" अतिदिष्टं तु यत्पापमतिपातकमुच्यते । अतिदुष्टेषु सर्वत्र पादोनं तत् व्रतं चरेत् " ॥ इति वचनादवगम्यते । **यमः**—

"मातृष्वसा मातृसखी दुहिता च पितृष्वसा । मातुलानी स्वसा श्वश्रूर्गत्वा सद्यः पतेत् द्विजः" ॥ इति ।

गौतमः (२१।१-२)—"मातृपितृयोनिसंबन्धागस्तेननास्तिकनिंदितकर्माभ्यासिपतितात्यागयपतितत्यागिनः पतितापातकसंयोजकाश्च " इति । **बोधायनोऽपि** (२।१।४१)—"अथ पतनीयानि । समुद्रयानं ब्रह्मस्वन्यासापहरणं भूम्यनृतवदनं सर्वापण्यैर्व्यवहरणं शूद्रसेवनं शूद्राभिगमनं यश्च शूद्रायामभिप्रजायते तदपत्यं च भवति " इति । **आपस्तम्बोऽपि** (१।९।२४।२३)—

" धर्मार्थसंन्निपातेऽर्थग्राहिण एतदेव " इति

---

१ क्ष-तन्तु संकीर्तयेत् ।

याज्ञवल्क्यः (प्रा. २५२)—“ चरेद्व्रतं महत्त्वापि घातार्थं चेत्समाहितः ।
“ पितुः स्वसारं मातुश्च मातुलानीं स्नुषामपि । मातुः सपत्नीं भगिनीमाचार्यतनयां तथा ।
“ आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पगः” ॥ इति (प्रा. २३२–२३३) ।
विष्णुः (३४।१)—“ मातृगमनं दुहितृगमनं स्नुषागमनम् ” इति अतिपातकानीति ।
नारदः (१२।७३–३५)—
“ माता मातृ[1]ष्वसा श्वश्रूर्मातुलानी पितृष्वसा । पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी स्नुषा ॥
“ दुहिताचार्यभार्या च सगोत्रा शरणागता । राज्ञी प्रव्राजिता साध्वी धात्री वर्णोत्तमा च या ॥
“ आसामन्यतमां गच्छन् गुरुतल्पग उच्यते । आश्रितां विदुषः पत्नीमाहिताग्नेश्च योगिनः ॥
“एषां पत्नीं स्वपुत्रीं च गत्वा तल्पव्रतं चरेत् । चण्डाल्यां गर्भमाधाय गुरुतल्पव्रतं चरेत्”॥ इति ।
अत्र माता मातृसपत्नी । **भविष्यत्पुराणे**—
“ अग्निहोत्रार्थकपिलां हत्वा ब्रह्महणो व्रतम् । दुस्थितं संस्थितं वापि शिवलिङ्गं न चालयेत् ॥
“ अन्यथा तु कृते लिङ्गे अतिपातकमाप्नुयात् । उत्तमानां चामराणामन्यथाकरणे सति ॥
“ विप्रस्यैव व्रतं कुर्यात् विप्रदेवौ समौ स्मृतौ ।
“गर्भिण्युदक्या विज्ञाताः कन्यामार्तामनिच्छतीम् । गुरुतल्पं चरेत् गत्वा गामयोनिं सखीं स्त्रियम्”॥इति ।
याज्ञवल्क्यः (प्रा. २९८)—
“ नीचाभिगमनं गर्भपातनं भर्तृनाशनम् । विशेषपतनीयानि स्त्रीणामेतान्यपि ध्रुवम्” ॥
व्याघ्र[3]पादः—
“ अतिदेशस्योपदेशान्न्यूनत्वात्तद्व्रतं न हि । अतिदिष्टेषु सर्वत्र पादोनं तद्व्रतं चरेत् ” ॥ इति ।
एवं महापातकातिदेशादन्यान्यप्यतिपातकानि द्रष्टव्यानि ।
ब्रह्महत्यासमपातकानि । ब्रह्महत्यासमपातकान्याह **मनुः** (११।५५)—
“ अनृतं च समुत्कर्षे राजगामि च पैशुनम् । गुरोश्चालीकनिर्बन्धः समानि ब्रह्महत्यया ” ॥
याज्ञवल्क्यः (प्रा. २२८)—
“ गुरूणामध्यधिक्षेपो वेदनिन्दा सुहृद्वधः । ब्रह्महत्यासमं ज्ञेयमधीतस्य च नाशनम् ” ॥ इति गुरूणामाधिक्येनाधिक्षेपोऽनृताभिशंसनं “कौटसाक्ष्यं राजगामि च पैशुनं गुरोरनृताभिशंसनं पातकसमानि ” इति **गौतम**स्मरणात् (२१।१०) । एतच्च लोकाविदितदोषाभिशंसनविषयम् । “दोषं बुद्ध्वा न पूर्वः परेभ्यः पतितस्य समाख्याने स्यात्” **इत्यापस्तम्बस्मरणात्** (१।७।२१।२०) । नास्तिक्याभिनिवेशेन वेदकुत्सनं सुहृन् मित्रं तस्याब्राह्मणस्यापि वधः । अधीतस्य वेदस्यासच्छास्त्रविनोदेनालस्यादिना वा नाशनं विस्मरणम् । **पराशरः**—
“ भुञ्जानेषु तु विप्रेषु योऽग्रे पात्रं परित्यजेत् । स मूढः स च पापिष्ठः ब्रह्मघ्नः स खलूच्यते ” ॥ इति ।
विष्णुधर्मोत्तरे—
“ यस्तु विद्याभिमानेन नीचो जयति सद्द्विजम् । उदासीनं सभामध्ये ब्रह्महा स प्रकीर्तितः ॥
“ परदोषमविज्ञाय नृपकर्णे जपेत्तु यः । पापीयान् पिशुनः क्षुद्रः स चैवं ब्रह्महा स्मृतः ।
“ देवद्विजगतां भूमिं पूर्वभुक्तां हरेत यः । प्रणष्टामपि कालेन तमाहुर्ब्रह्मघातकम् ” ॥ इति ।

---

१ ग–पितृ । २ ग–पौ । ३ कग–व्याघ्रः ।

विष्णुः (३३।१)—"यागस्थस्य क्षत्रियस्य वैश्यस्य रजस्वलायाश्चान्तर्वत्न्याश्चात्रिगोत्रजाया अविज्ञातगर्भस्य शरणागतस्य च घातनं ब्रह्महत्यासमम्" इति ।
यागस्थक्षत्रियादीनामतिपातकत्वेन परिगणितानां समपातकत्वाभिधानमकामकृताभिप्रायम् । कामकारे तु तेषामतिपातकत्वम् ।

सुरापानसमपातकानि । सुरापानसमान्याह **मनुः** (११।५६)
"ब्रह्मोज्झता वेदनिन्दा च कौटसाक्ष्यं सुहृद्वधः । गर्हितानाद्ययोर्जग्धिः सुरापानसमानि षट्"॥ इति । गर्हितं लशुनादि । अनाद्यममेध्यादि । **याज्ञवल्क्यः** (प्रा. २२९)—
"निषिद्धभक्षणं जैह्म्यमुत्कर्षे च वचोऽनृतम् । रजस्वलामुखास्वादसुरापानसमानि तु"॥ इति ।
निषिद्धं लशुनादिकं तस्य मतिपूर्वभक्षणम् । 'पलाण्डुं गृञ्जनं चैव मत्या जग्ध्वा पतेद्द्विजः' इति **स्मरणात्** । जैह्म्यं कौटिल्यम् । अन्याभिसंधानेनान्यवादित्वमन्यकर्तृत्वं च । तच्च गुरुविषयमिति **विज्ञानेश्वरः** (पृ. २४०, पं. २४–२५) । तथा समुत्कर्षनिमित्तं राजकुलादावचतुर्वेद एव चतुर्वेदोऽहमित्यनृतभाषणम् । **स्मृत्यन्तरे**—
"नालिकेरोदकं कांस्ये गोक्षीरं लवणान्वितम् । स्नानं रजकतीर्थे च ताम्रे गव्यं सुरासमम्"॥ इति ।
अत्रिः—
"तोयं पाणिनखाग्रेषु ब्राह्मणो न पिबेत् क्वचित् । सुरापानेन तत्तुल्यमित्येवं मनुरब्रवीत्" ॥
शातातपोऽपि—
"उद्धृत्य वामहस्तेन यत्तोयं पिबति द्विजः । सुरापानेन तत्तुल्यं मनुराह प्रजापतिः" ॥ इति ।

स्वर्णस्तेयसमपातकानि । स्वर्णस्तेयसमान्याह **मनुः** (११।५७)—
"निक्षेपस्यापहरणं नराश्वरजतस्य च । भूमिवस्त्र[1]मणीनां च रुक्मस्तेयसमं स्मृतम्" ॥ इति ।
याज्ञवल्क्यः (प्रा. २३०)—
"अश्वरत्नमनुष्यस्त्रीभूधेनुहरणं तथा । निक्षेपस्य च सर्वं हि स्वर्णस्तेयसमं मतम्"॥ इति ।
विष्णुः (३३।३)—"ब्राह्मणभूम्यपहरणं स्वर्णस्तेयसमम्" इति ।
हेमाद्रौ—"हृत्वा शतपलं ताम्रं स्वर्णस्तेयसमं विदुः" ॥ इति ।

गुरुतल्पसमपातकानि । गुरुतल्पसमान्याह **मनुः** (११।५८)—
"रेतःसेकः स्वयोनीषु कुमारीष्वन्त्यजासु च । सख्युः पुत्रस्य च स्त्रीषु गुरुतल्पसमं विदुः" ॥
स्वयोनिषु भगिनीषु । **याज्ञवल्क्यः** (प्रा. २३१)—
"सखिभार्याकुमारीषु स्वयोनिष्वन्त्यजासु च । सगोत्रासु सुतस्त्रीषु गुरुतल्पसमं स्मृतम्" ॥ इति ।
पुराणसारे—
"अपि वा मातरं गच्छेन्न गच्छेद्देवदारिकाम् । यदि गच्छेत्प्रमादेन गुरुदारसमं स्मृतम्" ॥ इति ।
विष्णुः (३३।४-७)-"पितृव्यमातामहमातुलश्वशुरनृपपत्न्यभिगमनं गुरुदारगमनसदृशम् । पितृष्वसृमातृष्वसृगमनं च । श्रोत्रियर्त्विगुपाध्यायमित्रपत्न्यभिगमनं च । स्वसुः सख्युः[2] पत्न्याः सगोत्राया उत्तमवर्णायाः कुमार्याः रजस्वलायाः शरणागतायाः प्रव्रजितायाः निक्षिप्तायाश्च गमनम्" इति ।
अतिपातकेषु परिगणितानां केषाञ्चिदिह ग्रहणमकामकारविषयम् ।

---

१ ग–ज्ञ । २ ग–सख्याः ।

उपपातकानि। उपपातकान्याह **याज्ञवल्क्यः** (प्रा. २३४–२४२)
" गोवधो व्रात्यता स्तेयमृणानां चानपक्रिया। अनाहिताग्निता पण्यविक्रयः परिवेदनम्॥
" भृताद्ध्ययनादानं भृतकाध्यापनं तथा। पारदार्यं पारिवित्त्यं वार्धुष्यं लवणक्रिया॥
" स्त्रीशूद्रविट्क्षत्रवधो निन्दितार्थोपजीवनम्। नास्तिक्यं व्रतलोपश्च सुतानां चैव विक्रयः॥
" धान्यकुप्यपशुस्तेयमयाज्यानां च याजनम्। पितृमातृगुरुत्यागस्तटाकारामविक्रयः॥
" कन्याया दूषणं चैव परिविन्दकयाजनम्।
" आत्मनोऽर्थे क्रियारंभो मद्यपस्त्रीनिषेवणम्। स्वाध्यायाग्निसुतत्यागो बान्धवत्याग एव च॥
" इन्धनार्थं द्रुमच्छेदः स्त्रीहिंसौषधजीवनम्। हिंस्रयन्त्रविधानं च व्यसनान्यात्मविक्रयः॥
" शूद्रप्रेष्यं हीनसख्यं हीनयोनिनिषेवणम्। तथैवानाश्रमे वासः परान्नपरिपुष्टता॥
" असच्छास्त्राधिगमनमाकरेष्वधिकारिता। भार्याया विक्रयश्चैषामेकैकमुपपातकम्" ॥ इति।
काले अनुपनीतत्वं व्रात्यता। सत्यधिकारेऽनाहिताग्निता। ज्येष्ठे सति कनीयसो दाराग्निहोत्रसंयोगः परिवेदनम्। गुरुदारव्यतिरिक्तं पारदार्यम्। कनीयसि कृतविवाहे ज्येष्ठस्य विवाहराहित्यं पारिवित्त्यम्। वार्धुष्यं निषिद्धवृद्धिप्रयोगः। लवणक्रिया लवणोत्पादनम्। निन्दितार्थोपजीवनम् अराजस्थापितार्थोपजीवनम्। व्रतलोपः ब्रह्मचारिणः स्त्र्यादिप्रसङ्गः। कन्याया दूषणं अङ्गुल्यादिना योनिविदारणं न तु संयोगः। हिंस्रयन्त्रस्य तिलेक्षुपीडाकरस्य प्रवर्तनम्। व्यसनानि मृगयादीनि अष्टादश। आकरेषु स्वर्णाद्युत्पत्तिस्थानेषु। **मनुरपि** (११।५९-६६)—
" गोवधोऽयाज्यसंयाज्यं पारदार्यात्मविक्रयौ। गुरुमातृपितृत्यागः स्वाध्यायाग्न्योः सुतस्य च॥
" परिवित्ता चानुजेन परिवेदनमेव च। तयोर्दानं च कन्यायास्तयोर्याजनमेव च॥
" कन्याया दूषणं चैव वार्धुषिक्यं व्रताच्च्युतिः। तटाकारामदाराणामपत्यस्य च विक्रयः॥
" व्रात्यता बान्धवत्यागो भृताध्यापनमेव च। भृत्या चाध्ययनादानमपण्यानां च विक्रयः॥
" सर्वाकरेष्वधीकारो महायन्त्रप्रवर्तनम्। हिंस्रौषधस्त्र्युपजीवोऽभिचारो मूलकर्म च॥
" इन्धनार्थमशुष्काणां द्रुमाणामवपातनम्। आत्मार्थे च क्रियारम्भो निन्दितान्नादनं तथा॥
" अनाहिताग्निता स्तेयमृणानामनपक्रिया। असच्छास्त्राधिगमनं कौटिल्यं व्यसनक्रिया॥
"धान्यरौप्यपशुस्तेयं मद्यपस्त्रीनिषेवणम्। स्त्रीशूद्रविट्क्षत्रवधो नास्तिक्यं चोपपातकम्" ॥ इति।
बोधायनः (२।१।४३-४४)–"अथोपपातकान्यगम्यागमनं गुर्वीं सखीं गुरुसखीमपपात्रां पतितां च गत्वा भैषज्यकरणं ग्रामयाजनं रङ्गोपजीवनं नाट्याचार्यता गोमहिषरक्षणं यच्चान्यदप्येवमयुक्तं कन्यादूषणमिति"। **स्मृत्यन्तरेऽपि**–" विद्वद्ब्राह्मणव्रतभेदाचरणविधवादेवदासीवेश्यावार्धकीदासीगमनान्युपपातकानि" इति। **शङ्खलिखितौ**—" कृतघ्नः कूटव्यवहारी ब्राह्मणवृत्तिघ्नो मिथ्याभिशंसी पतितात्यागी अभोज्यभोजी असत्प्रतिग्रही" इति। **बृहद्विष्णुः**—" अभोज्यानां च भक्षणं परस्वापहरणं परदाराभिगमनमयाज्यानां च याजनं द्रुमगुल्मलतौषधीनां हिंसया जीवनमभिचारमूलकर्मसु प्रवृत्तिर्देवर्षिपितॄणामृणानपक्रिया कुशीलवता" इति।
संकरीकरणादीन्याह **मनुः** (११।६८)—
" खरोष्ट्राश्वमृगेभाणामजाविकवधस्तथा। संकीर्णकरणं ज्ञेयं मीनाहिमहिषस्य च॥
" क्रिमिकीटवधोहत्यामद्यानुगतभोजनम्। फलैधःकुसुमस्तेयमधैर्यं च मलावहम्॥ (७०)

---

१ क्ष–तका। २ क्ष–स्थैण्य। ३ कग–पङ्क्ति। ४ क्ष–पाकी।

"निन्दितेभ्यो धनादानं वाणिज्यं शूद्रसेवनम्। अपात्रीकरणं ज्ञेयमसत्यस्य च भाषणम् ॥ (६९)
"ब्राह्मणस्य रुजः कृत्याघ्रातिरघ्रेयमद्ययोः । जैह्म्यं च पुंसि मैथुन्यं जातिभ्रंशकरं स्मृतम्" (६७)॥ इति।
विष्णुः–(३८।१-६) "ब्राह्मणस्य रुजः करणमघ्रेयमद्ययोर्घ्रातिः जैह्म्यं पशुष्वयोनिषु पुंसि च मैथुनम्" इति । एतानि जातिभ्रंशकराणि । ग्रामारण्यपशूनां हिंसनं संकरीकरणं निन्दितेभ्यो धनादानं वाणिज्यं कुसीदजीवनमसभ्यभाषणं शूद्रसेवनमित्यपात्रीकरणानि । पक्षिणां जलचराणां जलजानां च घातनं क्रिमिकीटघातनं मद्यानुगतभोजनमिति मलावहानि । यदनुक्तं तत् प्रकीर्णकम्" (३९-१; ४०।१,४१।१-४१४२।१) इति । तदेवं नवविधानि पापानि । यत्तु **कात्यायनेनोक्तम्**—

"महापापं चातिपापं तथा पातकमेव च । प्रासङ्गिकोपपापमित्येवं पञ्चको गणः"॥ इति ।

अत्र पातकमिति समपातकान्युक्तानि । उपपातकेषु कानिचिदगम्यागमनादीन्यवान्तरभेदाविवक्षया प्रासङ्गिकमित्युक्तानि । अतिपातकाद्यवान्तरभेदाविवक्षया त्रैविध्यमुक्तं **विज्ञानेश्वरीये** (पृ. २४२ पं. १९–२०)—

"महापातकतुल्यानि पापान्युक्तानि यानि वै । तानि पातकसंज्ञानि तन्न्यूनमुपपातकम्" ॥ इति।

कामाकामकृतपापविचारः । अकामकृतानां पापानां प्रायश्चित्तैर्नाश इह व्यवहारश्च भवति । कामकृतानां त्विह व्यवहार्यत्वमात्रम् । तथा च **याज्ञवल्क्यः** (प्रा. २२६)—

"प्रायश्चित्तैरपैत्येनो यदज्ञानकृतं[3] भवेत् । कामतो व्यवहार्यस्तु वचनादिह जायते" ॥

छागलेयः—"प्रायश्चितमकामानां कामावाप्तौ न विद्यते"।

वसिष्ठोऽपि (१८।१)—"नाभिसन्धिकृते प्रायश्चित्तम्" इति । **मनुः** (११।४६)—

"अकामतः कृते पापे प्रायश्चित्तं विदुर्बुधाः । कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनात्" ॥

जाबालिः—

"अकामकृतपापानां ब्रुवन्ति ब्राह्मणा व्रतम् । कामकारकृतेऽप्येके द्विजानां वृषलस्य च" ॥ इति ।

देवलोऽपि—

"अभिसन्धिकृते पापेऽसकृद्वा नेह निष्कृतिः । अपरे निष्कृतिं ब्रूयुरभिसन्धिकृतेऽपि च" ॥

अङ्गिरास्तु कामकृते द्विगुणं प्रायश्चित्तमाह—

"अकामतः कृते पापे प्रायश्चित्तं न कामतः । स्यादकामकृते यत्तत् द्विगुणं बुद्धिपूर्वकम्" ॥ इति ।

स्मृत्यन्तरेऽपि—"विहितं यदकामानां कामात्तु द्विगुणं भवेत्" ॥ इति । तथा—

"म्लेच्छेनाधिगता शूद्रा ह्यज्ञानात्तु कथंचन । कृच्छ्रत्रयं प्रकुर्वीत ज्ञाने तु द्विगुणं भवेत्"॥ इति।

अत्र **माधवीये** व्यवस्थापितम्—अकामकृते न विप्रतिपत्तिः । कामकृतस्य तु विप्रतिपत्तौ केचिन्निर्णयमाहुः । द्विविधा पापस्य शक्तिः । नरकोत्पादिका व्यवहारनिरोधिका चेति । तन्निवर्तकस्यापि प्रायश्चित्तस्य शक्तिर्द्विविधा । नरकनिवारिका व्यवहारजननी चेति । तत्र प्रायश्चित्ताभाववादिनां मुनीनां नरकनिवारणाभावः अभिप्रेतः । सद्भाववादिनां तु व्यवहारजननी शक्तिरभिप्रेता । द्विगुणप्रायश्चित्तेन इह लोके व्यवहारः सिध्यति । अपरे पुनः–'कामतोव्यवहार्यस्तु वचनादिह जायते' (प्रा. २२६) इति **याज्ञवल्क्यवचने** अव्यवहार्य इति पदं छित्वा कृतप्रायश्चित्तोऽपि अव्यवहार्यः नरकस्य निवृत्तिरस्तीति वदन्ति। अत्र चोपोद्बलकं **मनु**वचनम् (११।१९०)—

"बालघ्नां च कृतघ्नांश्च विशुद्धावपि धर्मतः । शरणागतहन्तॄंश्च स्त्रीहन्तॄंश्च न संवसेत्" ॥ इति ।

---

१ क्ष–रजः कृत्यं । २ ग–त्य । ३ क्ष–काम ।

अन्ये तु पूर्वोक्ताङ्गिरःस्मृत्यन्तरवचने कामकृते विशेषेण द्विगुणप्रायश्चित्तावगमात् **मनुना** (११।४५)—"कामकारकृतेऽप्याहुरेके श्रुतिनिदर्शनात्" इति। तत्र विशेषेण प्रायश्चित्ताङ्गीकारात्, **आपस्तम्बेन** च (१।९।२६।७)—"दोषवच्च कर्माभिसन्धिपूर्वं कृत्वानभिसन्धिपूर्वं वाऽब्लिङ्गाभिरप उपस्पृशेद्वारुणीभिर्वा" इति व्यवहारादिविशेषानभिधानेन कामाकामयोः शुध्यभिधानात्, **गौतमेन** च (१०।२-९) "शिष्टस्याक्रियाप्रतिषिद्धसेवनमिति च। तत्र प्रायश्चित्तं कुर्यान्न कुर्यादिति मीमांसते न कुर्यादित्याहुः। न हि कर्म क्षीयत इति। कुर्यादित्यपरे। पुनःस्तोमेनेष्ट्वा पुनस्सवनमायान्तीति विज्ञायते। व्रात्यस्तोमैश्चेष्ट्वा तरति सर्वं पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजते" इति पूर्वोत्तरपक्षभंग्या पापक्षयस्य दर्शितत्वात्, अकामकृतानां सर्वेषां पापानां तत्तदुक्तप्रायश्चित्तैरिहामुत्र च शुद्धिर्भवति। कामकृतानां च पतनीयव्यतिरिक्तानां द्विगुणप्रायश्चित्तैर्नरकनिवृत्तिरिह व्यवहारश्च सिध्यति। "नाभिसन्धिकृते प्रायश्चित्तम्" इति **वसिष्ठा**दिस्मरणं (१८।१) पतनीयपापविषयम्। तथा च **मनुः** (११।४६)—

"अकामतः कृतं पापं वेदाभ्यासेन शुध्यति। कामतस्तु कृतं मोहात्प्रायश्चित्तैः पृथग्विधैः॥

"इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजम्। कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते"(८९)॥ इति। ब्राह्मणवध इति सुरापानादेरप्युपलक्षणम्

"ब्रह्महत्यासुरापानस्वर्णस्तेयेषु कामतः। कृतेषु निष्कृतिर्नास्ति विहितान्मरणादृते"(५५)॥ इति। "यः कामतो महापापं नरः कुर्यात्कथञ्चन। न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते"॥ इति **स्मृतेः**। एवं च पतनीये कर्मणि कामकृते मरणान्तिकप्रायश्चित्तेषु कल्मषक्षयो भवत्येव। फलान्तराभावात् "नास्यास्मिन् लोके प्रत्यापत्तिर्विद्यते। कल्मषं तु निर्हण्यत" (१।९।२४।२५) **इत्यापस्तंब**स्मरणात्। एतच्च मरणान्तिकप्रायश्चित्तं ब्राह्मणानां कलौ निषिद्धम्

"प्रायश्चित्तविधानं च विप्राणां मरणान्तिकम्। भृग्वग्निपतनं चैव वृद्धादिमरणं तथा"॥ इति **कलियुगनिषिद्धधर्ममध्ये** परिगणनात्। "मिथ्यैतदिति **हारीतः**। यो ह्यात्मानं परं वाभिमन्यते अभिशस्त एव स भवति" **इत्यापस्तंब**स्मरणात् (१।१०।२८।१६-१७)। अयमर्थः—एतन्मरणान्तिकप्रायश्चित्तं मिथ्या न कर्तव्यम्। य आत्मानं परं वाऽभिमन्यते मारयति सोऽभिशस्त एव ब्रह्महैव भवतीति। अतः कामकृतमहापातकानां मरणान्तिकप्रायश्चित्तस्य कलौ निषेधात् द्वादशवार्षिकादिप्रायश्चित्तैः पापक्षयाभावादिह व्यवहार्यत्वमात्रं सिध्यति। "कामतो व्यवहार्यस्तु" इति **याज्ञवल्क्य**वचनं च महापापविषयम्। उपपातकादावपतनीये पुनः कामकृतेऽपि प्रायश्चित्ते कृते पापक्षयो भवत्येव **मनु**वचनात् (११।४६)—

"अकामतः कृतं पापं वेदाभ्यासेन शुध्यति। कामतस्तु कृतं पापं प्रायश्चित्तैः पृथग्विधैः"॥ इत्याहुः।

प्रकाशरहस्यपापप्रायश्चित्तम्। द्विविधानि पापानि। प्रकाशकृतानि रहस्यकृतानि चेति। तत्र प्रकाशकृतानां परिषदोऽनुमत्या प्रायश्चित्तं कार्यम्। तथा च **याज्ञवल्क्यः** (प्रा. ३०१)—

"विख्यातदोषः कुर्वीत परिषदोऽनुमते व्रतम्"॥ इति। **पराशरः** (८।१२)—

"वेदवेदाङ्गविदुषां धर्मशास्त्रं विजानताम्। स्वकर्मरतविप्राणां स्वकं पापं निवेदयेत्"॥ इति। यत्पापं कर्तृव्यतिरिक्तेन केनचिदपि न ज्ञातं तद्रहस्यं तस्य प्रायश्चित्तमपि रहस्येव कर्तव्यम्।

---

१ कग-मकृतयोः। २ ग-मेने।

तथा च हारीतः—"रहस्ये रहस्यं प्रकाशे प्रकाशम्" इति। रहस्यत्वादेव नास्ति तत्र परिषदनुमत्यपेक्षा। **मनुः** (११।२२६–२२९)—

" एतैर्द्विजातयः शोध्या व्रतैराविष्कृतैनसः। अनाविष्कृतपापांस्तु मन्त्रैर्होमैश्च शोधयेत् ॥
" ख्यापनेनानुतापेन तपसाऽध्ययनेन च। पापकृन्मुच्यते पापात्तथा दानेन चापदि ॥
" यथा यथा नरोऽधर्मं स्वयं कृत्वाऽनुभाषते। तथा तथा त्वचेवाहिस्तेनाधर्मेण मुच्यते ॥
" यथा यथा मनस्तस्य दुष्कृतं कर्म निन्दति। तथा तथा शरीरं हि तेनाधर्मेण मुच्यते"॥ इति।

परिषल्लक्षणमाह **मनुः** (१२।११०–११३)—

" दशावरा वा परिषद्यं धर्मं परि[2]कल्पयेत्। त्र्यवरा वापि वृत्तस्था तद्धर्मं न विचालयेत्।
" त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठ[3]कः। त्रयश्चाश्रमिणः पूर्वे परिषत्स्या[4]त् दशावरा ॥
" ऋग्वेदविद्यजुर्विच्च सामवेदविदेव च। त्र्यवरा परिषत् ज्ञेया धर्मसंशयनिर्णये ॥
" एकोऽपि वेदविद्धर्मं यं व्यवस्येद्विचक्षणः। स विज्ञेयः परो धर्मो नाज्ञानां गदितोऽयुतैः"॥ इति।

याज्ञवल्क्यः (आ. ९)—

" चत्वारो वेदधर्मज्ञाः पर्षत्त्रैविद्यमेव वा। सा ब्रूते यं स धर्मः स्यादेको वाऽध्यात्मवित्तमः" ॥ इति।

पराशरः (८।१५–३४)—

" चत्वारो वा त्रयो वापि यं ब्रूयुर्वेदपारगाः। स धर्म इति विज्ञेयो नेतरैस्तु सहस्रशः॥ (१५)
" चत्वारो वा त्रयो वापि वेदवन्तोऽग्निहोत्रिणः। ब्राह्मणानां समर्था ये[5] परिषत्सा विधीयते ॥
" अनाहिताग्नयो येऽन्ये वेदवेदाङ्गपारगाः। पञ्च त्रयो वा धर्मज्ञाः परिषत्सा प्रकीर्तिता॥(१९)
" मुनीनामात्मविद्यानां द्विजानां यज्ञयाजिनाम्। वेदव्रतेषु स्नातानामेकोऽपि परिषत् भवेत्॥ (२०)
" प्रमाणमार्गं मार्गन्तो यं धर्मं प्रवदन्ति ये। तेषामुद्विजते पापं सद्भावैर्गुणवादिनाम् ॥ (१६)
" यथाश्मनि स्थितं तोयं मारुतार्केण शुष्यति। एवं परिषदादेशान्नाशयेत्तत्र दुष्कृतम् ॥ (१७)
"नैव गच्छति कर्तारं नैव गच्छति पर्षदम्। मारुतार्कादिसंयोगात्पापं नश्यति तोयवत्॥ (१८)
" अमेध्यानि तु सर्वाणि प्रक्षिप्यन्ते यथोदके। तथैव किल्बिषं सर्वं प्रक्षिपेच्च द्विजानले॥ (३०)
" ये पठन्ति द्विजा वेदं पञ्चयज्ञरताश्च ये। त्रैलोक्यं तारयन्त्येते पञ्चेन्द्रियरता अपि ॥ (२८)
" धर्मशास्त्ररथारूढा वेदखड्गधरा द्विजाः। क्रीडार्थमपि यं ब्रूयुः स धर्मः परमो मतः॥ (३३)
"चातुर्विद्यो विकल्पी चाङ्गविद्धर्मपाठकः। वृद्धाश्चाश्रमिणो मुख्याः पर्षदेषा दशावरा"॥ (३४) इति।

चतुर्णां वेदानां पारगश्चातुर्वैद्यः। विकल्यादिकस्वरूपमुक्तमङ्गिरसा—

" धर्मस्य संपदश्चैव प्रायश्चित्तक्रमस्य च। त्रयाणां यः प्रमाणज्ञः स विकल्पी भवेत् द्विजः ॥
"शब्दे छन्दसि कल्पे च शिक्षायां च सुनिश्चितः। ज्योतिषां गणिते चैव स नैरुक्तोऽङ्गविद्भवेत् ॥
" वेदविद्याव्रतस्नातः कुलशीलसमन्वितः। अनेकधर्मशास्त्रज्ञः पठ्यते धर्मपाठकः" ॥ इति।

" ब्रह्मचर्याश्रमादूर्ध्वं विप्रो वृद्धः प्रकीर्त्यते"। चातुर्वैद्यत्वादिकथितविशेषविशिष्टा गृहस्थाश्रमवर्तिनो दशसंख्याकः पर्षच्छब्दवाच्याः। चत्वारो वापीति ये पूर्वपक्षाः पूर्वमुक्ताः ते सर्वे महापापेभ्योऽर्वाचीनविषया वा युगान्तरविषया वा। यदाह **देवलः**—

" पापानां तारतम्येन विप्राणां गुरुलाघवम्। एको नार्हति तत्कर्तुमनूचानोऽप्यनुग्रहम् ॥

---

१ क्ष–त्तत्र। २ ग–प्र। ३ क्ष–ल। ४ क्ष–देषा। ५ क्ष–र्थे। ६ ग–र्भूत। ७ क्ष–धर्मपाठक।

" शान्तानां च विदुषां कलौ सङ्घः प्रशस्यते । धर्मज्ञा बहवो विप्राः कर्तुमर्हन्त्यनुग्रहम् " ॥
यत्तूक्तमङ्गिरसा—
" पातके तु शतं पर्षत्सहस्रं महदादिषु । उपपातके तु पञ्चाशत् स्वल्पे स्वल्पं तथा भवेत् " ॥ इति तदभ्यासविषयम् । अङ्गिराः—
" आर्तानां मार्गमाणानां प्रायश्चित्तानि ये द्विजाः । जानन्तो न प्रयच्छन्ति ते तेषां समभागिनः ॥
" तस्मादार्तं समासाद्य ब्राह्मणं तु विशेषतः । जानद्भिर्धर्मपन्थानं न भाव्यं तु पराङ्मुखैः ॥
" अनर्थितैरनाहूतैरपृष्टैश्चैव संसदि । प्रायश्चित्तं न दातव्यं जानद्भिरपि सर्वदा ॥
" यत्पुण्यमुद्धृते विप्रे म्रियमाणे जलादिषु । तत्पुण्यं तारिते पापात्प्रायश्चित्तैस्तु मानवैः ॥
" प्रायश्चित्तविधानेन दुष्कृतान्मोचयेन्नरम् । इहामुत्र सुखं विन्देद्विद्वानायुर्यशो बलम् " ॥ इति ।

परिषद्योग्याः ।

नामधारकविप्राणां परिषत्त्वं नास्तीत्याह **पराशरः** (८।२२)—
" अत ऊर्ध्वं तु ये विप्राः केवलं नामधारकाः । परिषत्त्वं न तेष्वस्ति सहस्रगुणितेष्वपि" ॥ इति । अत ऊर्ध्वं वर्णितेभ्यो गुणवद्भ्यो ब्राह्मणेभ्यः ऊर्ध्वं तद्व्यतिरिक्ता गुणवद्भ्य ऊर्ध्वमन्ये गुणरहिता इति यावत् । **स** एव (८।११)
"सावित्र्याश्चापि गायत्र्याः सन्ध्योपास्त्यग्निकार्ययोः । अज्ञानात्कृषिकर्तारो ब्राह्मणा नामधारकाः ॥
" यथा काष्ठमयो हस्तिर्यथा चर्ममयो मृगः । ब्राह्मणोऽप्यनधीयानस्त्रयस्ते नामधारकाः ॥
" प्रायश्चित्तं प्रयच्छन्ति ये द्विजा नामधारकाः । ते द्विजाः पापकर्माणः समेता नरकं ययुः " ॥
ययुः यान्तीत्यर्थः । **स** एव (८।१२-१४,३५)—
" अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम् । सहस्रशः समेतानां परिषत्त्वं न विद्यते ॥
" यद्वदन्ति तमोमूढा मूर्खा धर्ममतद्विदः । तत्पापं शतधा भूत्वा तद्वक्तॄनधिगच्छति ।
" अज्ञात्वा धर्मशास्त्राणि प्रायश्चित्तं ददाति यः । प्रायश्चित्ती भवेत् पूतः किल्बिषं पार्षदं व्रजेत् ॥
" राज्ञश्चानुमते स्थित्वा प्रायश्चित्तं विनिर्दिशेत् । स्वयमेव न कर्तव्यं कर्तव्या स्वल्पनिष्कृतिः "॥

प्रायश्चित्तविधानस्थलम् । **स एव** (८।३७)—
" प्रायश्चित्तं यदा दद्याद्देवतायतनाग्रतः । आत्मकृच्छ्रं ततः कृत्वा जपेद्वै वेदमातरम् " ॥ इति । देवतायतनाग्रत इति शैवस्य वैष्णवस्य वा पुरः स्थित्वा निर्देष्टव्यम् । एतत् पुण्यतीर्थादेरप्युपलक्षणम्
"देवालये नदीतीरे शुचौ देशे सभास्थले । उपविश्य यथाशास्त्रं प्रायश्चित्तं विनिर्दिशेत्" ॥ इति **स्मृतेः** । एवं प्रायश्चित्तं विनिर्दिश्यानन्तरं निर्देष्टारः सर्वे स्वात्मशुध्द्यर्थं तत्प्रायश्चित्तानुसारेण किंचित् कृच्छ्रं चरित्वा अनन्तरं वेदमातरं गायत्रीं यथाशक्ति जपेयुः । **अङ्गिराः**—
" उपस्थानं व्रतादेशः चर्याशुद्धिः प्रकाशनम् । प्रायश्चित्तं चतुष्पादं विहितं धर्मकर्तृभिः "॥ इति ।
पराशरः—" पापं प्रख्यापयेत्पापी दत्वा धेनुं तथा वृषम् । तिस्रो धेनुर्महापापे दत्वा प्रख्यापयेन्नरः ॥
" द्विगुणे व्रत आदिष्टे दक्षिणा द्विगुणा भवेत् । यावद्व्रतं तु कर्तव्यं दक्षिणा तावती भवेत् ॥
" वित्तशाठ्यं न कुर्वीत सति द्रव्ये फलप्रदम् । विज्ञाप्य पापं सभ्यानां किञ्चिद्दत्वा व्रतं चरेत्" ॥ इति ।

ब्रह्महत्याप्रायश्चित्तम् । अथ प्राणिहननप्रायश्चित्तमुच्यते । तत्र ब्रह्मवधस्य महापातकस्य प्रायश्चित्तमाह **पराशरः** (१२।५८)—

" चातुर्विद्योपपन्नस्तु विधिवद्ब्रह्मघातके । समुद्रसेतुगमनं प्रायश्चित्तं विनिर्दिशेत् " ॥ इति ।

चातुर्विद्योपपन्नः वेदाध्ययनानुष्ठानवान् । अनेन सर्वा परिषदुपलक्ष्यते । समुद्रे दाशरथिना बद्धसेतुः समुद्रसेतुः । तद्यात्रां ब्राह्मणघातके पुरुषे यथाविध्यनुष्ठेयत्वेन निर्दिशेदिति विधिवदित्युक्तम् । कोऽसौ विधिरित्याकांक्षायां तदितिकर्तव्यतामाह **स** एव (१२।५९–६३)—

" सेतुबन्धपथे भिक्षां चातुर्वर्ण्यात् समाचरेत् । वर्जयित्वा विकर्मस्थां छत्रोपानद्विवर्जितः ॥
" अहं दुष्कृतकर्मा वै महापातककारकः । गृहद्वारेषु तिष्ठामि भिक्षार्थी ब्रह्मघातकः ॥
" गोकुलेषु वसेच्चैव ग्रामेषु नगरेषु च । तपोवनेषु तीर्थेषु नदीप्रस्रवणेषु च ॥
" एतेषु ख्यापयन्नेनः पुण्यं गत्वा तु सागरम् ।
" दशयोजनविस्तीर्णं शतयोजनमायतम् । रामचन्द्रसमादिष्टं नलसञ्चयसञ्चितम् ॥
" सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहति । सेतुं दृष्ट्वा विशुद्धात्मा अवगाहेत सागरम् " ॥ इति ।

छत्रोपानद्विवर्जित इति न केवलं भिक्षावेलायां किन्तु मार्गगमनेऽपीति द्रष्टव्यम् । अहं दुष्कृतकर्मेति भिक्षमानेन वक्तव्य इति उक्तिप्रकारोऽभिहितः । अध्वशान्तः तपोवनादिषु निवसेत् । तत्र व्याघ्रादिभये सति ग्रामे नगरे वा प्रविश्य गोशालादेवतायतनादौ पुण्यप्रदेशे निवसेत् । एतेषु ख्यापयन्निति न केवलं भिक्षागृहेष्वेव पापप्रख्यापनं किन्तु निवासस्थानेष्वपीत्यर्थः । सेतुयात्रां समाप्य पुनः कर्तव्यमाह **स** एव (१२।६४–६६)—

" पुनः प्रत्यागतो वेश्म वासार्थमुपसर्पति । सपुत्रः सह भृत्यैश्च कुर्याद्ब्राह्मणभोजनम् ॥
" गाश्चैवैकशतं दद्याच्चतुर्वेद्येऽथ दक्षिणाम् । ब्राह्मणानां प्रसादेन ब्रह्महा तु विमुच्यते " ॥ इति ।

सेतुं द्रष्टुमशक्नुवतो भूपतेः प्रायश्चित्तान्तरमाह **स** एव (१२।६४)—" यजेत वाश्वमेधेन राजा तु पृथिवीपतिः " इति । कलौ **पराशरोक्तं** प्रायश्चित्तमेव मुख्यम् (१।२३)—

" कृते तु मानवा धर्मास्त्रेतायां गौतमाः स्मृताः । द्वापरे शंखलिखिताः कलौ पाराशराः स्मृताः "॥

इति **स्मरणात्** । **व्यासोऽपि**—

" गत्वा सेतुं समुद्रस्य स्नात्वा तत्र महोदधौ । दृष्ट्वा रामेश्वरं लिङ्गं ब्रह्महा तु विशुध्यति"॥ इति ।

श्रीरामायणे—

" सेतुबन्ध इति ख्यातं त्रैलोक्येनाभिपूजितम् । एतत्पवित्रं परमं महापातकनाशनम् " ॥ इति ।

प्रायश्चित्तान्तरमाह **याज्ञवल्क्यः** (प्रा. २४३)—

"शिरःकपाली ध्वजवान् भिक्षाशी कर्म वेदयन् । ब्रह्महा द्वादशाब्दानि[2] मितभुक् शुद्धिमाप्नुयात्"इति।

मनुः (११।७२)—

"ब्रह्महा द्वादशसमाः[1] कुटीं कृत्वा वने वसेत् । भैक्षाश्यात्मविशुध्यर्थं कृत्वा शवशिरोध्वजम्"॥ इति ।

हेमाद्रौ—

" अज्ञानात् ब्राह्मणं हत्वा चीरवासा जटी भवेत् । स्वेनैव हतविप्रस्य कपालं धारयेन्मुदा ॥
" तदभावेऽन्यदीयं वा पानार्थं बिभृयात्सदा । तद्वस्त्रं ध्वजदण्डे तु धृत्वा वनचरो भवेत् ॥
" वन्याहारो भवेन्नित्यमेकाहारो मिताशनः । सम्यक् सन्ध्यामुपासीत त्रिकालं स्नानमाचरेत् ॥

---

१ क्ष-कादशं । २ क्ष-शाब्दानि ।

“ अध्यापनं चाध्ययनं वर्जयन् संस्मरेद्धरिम् । ब्रह्मचर्यव्रतं नित्यं चरेत् गन्धादिवर्जितः ॥
“ तीर्थान्युपवसेच्चैव पुण्यक्षेत्राश्रमाणि च । यदि वन्यैर्न जीवेत ग्रामे भिक्षां समाचरेत् ॥
“ अखण्डेन शरावेण रक्तवर्णेन वर्णतः । वदेच्च ब्रह्महाऽस्मीति सर्वागाराणि पर्यटेत् ॥
“ चतुर्वर्णेषु वा भैक्षं त्रिवर्णेष्वथ वा चरेत् । मृष्टामृष्टाविवेकेन तदन्नं चाविकुत्सयन् ॥
“ द्वादशाब्दं व्रतं कुर्यादेवं हरिपरायणः । व्रतमध्ये मृगैर्वाऽपि रोगैर्वाऽपि हतो यदि ॥
“ गोनिमित्तं द्विजार्थं वा नार्यर्थं यदि वा म्रियेत् । ब्रह्महा शुद्धिमाप्नोति द्वादशाब्दव्रतेन वै ” ॥ इति ।

आपस्तंबः (१।९।२४।२०)—“ द्वादशवर्षाणि चरित्वा सिद्धः सद्भिः संप्रयोगः ” ॥ इति । अत्र **हरदत्तः**—सद्भिः संप्रयुज्यते येन विधिना स कर्तव्यः स उच्यते । कृतप्रायश्चित्तः स्वहस्ते यवसं गृहीत्वा गामाह्वयेत् । सायमागत्य श्रद्दधाना भक्षयति तदा सम्यगनेन व्रतं चरितमिति जानीयात् । अन्यथा नेति । प्रायश्चित्तान्तरमाह **मनुः** (११।७६–७९)—

“ सर्वस्वं वा वेदविदे ब्राह्मणायोपपादयेत् । धनं वा जीवनायालं गृहं वा सपरिच्छदम् ।
“ ब्राह्मणार्थे गवार्थे वा सम्यक् प्राणान् परित्यजेत् । मुच्यते ब्रह्महत्याया गोप्ता गोब्राह्मणस्य च ”॥ इति

स्वमरणमभ्युपगम्य गोब्राह्मणरक्षणे प्रवृत्तो यदि कथञ्चिज्जीवेत्तदा गोब्राह्मणयोः स गोप्ता जीवन्नपि ब्रह्महत्याया मुक्तो भवति । **स एव** (११।७४–७५,७७)—

“ यजेत वाऽश्वमेधेन स्वर्जिता गोसवेन वा । अभिजिद्विश्वजिद्भ्यां वा त्रिवृताग्निष्टुतापि वा ॥
“ जपन्वान्यतमं वेदं योजनानां शतं व्रजेत् । ब्रह्महत्यापनोदाय मितभुङ्नियतेन्द्रियः ॥
“ हविष्यभुग्वा सुतरेत्[1] प्रतिस्रोतां सरस्वतीम् । जपेद्वा नियताहारस्त्रिर्वै वेदस्य संहिताम् ” ॥

याज्ञवल्क्यः (प्रा. २४४–४५)—

“ ब्राह्मणस्य परित्राणाद्गवां द्वादशकस्य वा । तथाऽश्वमेधावभृथस्नानाद्वा शुद्धिमाप्नुयात् ॥
“ दीर्घतीव्रामयग्रस्तं ब्राह्मणं गामथापि वा । दृष्ट्वा पथि निरातङ्कं कृत्वा वा ब्रह्महा शुचिः ” ॥ इति ।

आवृत्त्या ब्रह्मवधे आचतुर्थाद्व्रतमावर्तनीयम् । तदाहतुर्मनुगालवौ—

“वधे[2] प्राथमिकादस्मात् द्वितीये द्विगुणं चरेत् । तृतीये त्रिगुणं चैव चतुर्थे नास्ति निष्कृतिः”॥ इति ।

वधोद्यमे प्रायश्चित्तम् । वधोद्यमेऽपि[3] वधप्रायश्चित्तमाह **याज्ञवल्क्यः** (प्रा. २५२)—
“चरेद्व्रतमहत्त्वाऽपि घातार्थं चेत्समाहितः ” ॥ इति । **स्मृत्यन्तरेऽपि**—“ अहत्वाऽपि यथावर्णं ब्रह्महत्याव्रतं चरेत् ” ॥ इति । यत्तु **वशिष्ठवचनं** ‘द्वादशरात्रमब्भक्षो द्वादशरात्रमुपवसेत् ” इति, तन्मनोध्यवसितब्रह्महत्यस्य तदैवोपरतजिघांसस्य वेदितव्यमिति **माधवीये** ।

उक्तप्रायश्चित्ताकरणे **राजकृत्यमुक्तम्**—

“ पट्टणे[6] वा स्वराष्ट्रे वा यो विप्रो ब्रह्महा भवेत् । ब्रह्महत्यां विनिश्चित्य त्रुटित्वा तच्छिखां ततः ॥
“ ब्रह्मसूत्रं तथा छित्वा पिशिताशनवाहनम् । आरोहयित्वा तु तत्काले शवं तन्मयं लिखेत् ॥
“ गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः । स्तेये तु श्वपदं कार्यं ब्रह्महण्यशिराः पुमान् ॥
“ एवं कृत्वा तु शास्त्रेण निर्वास्यो विषयाद्बहिः ।
“ तत्पुत्रा ब्रह्महनने सहायास्ते यदाऽभवन् । तानप्येवं पुनः कृत्वा निर्वास्याः पूर्ववद्बहिः ॥
“ तत्क्षेत्रं बहुलं धान्यं पश्वारामादिकं च यत् । तत्सर्वं देवताप्रीत्यै राजा कुर्यात्समाहितः ॥

---

१ ग–स्वा । २ ग–नुसरेत् । ३ क्ष–कृत्वा । ४ कगघ–विधेः । ५ क्ष–विविध । ६ ग–त्तने ।
७ क्ष–विहित । ८ क्ष–तले श्वानं ।

" विचार्य बहुधा राजा तत्पत्नी पुत्रकान् बहून् । दोषवन्तस्तथा तेऽपि कर्तव्या राजवल्लभैः ॥
" नो चेत्तद्वृत्तिधान्यादीन् तेभ्यो दत्वाऽथ शिक्षयेत् " ॥ इति । पुत्रादीनां दोषाभावे तद्द्रव्यं तेभ्य एव दत्वा ब्रह्महन्त्रा सह संभाषणादिकं न कार्यमिति पुत्रादीन् शिक्षयेदित्यर्थः । **स्मृत्यन्तरे**—
" अयोरूपं द्विजं कृत्वा मूर्धहीनं प्रतापयेत् । अङ्कयित्वा ललाटे तु देशान्निर्वासयेद्बहिः ॥
" द्वादशाब्दविधानेन शुद्धो भवितुमर्हति । अशक्तो व्रतमाचर्तुमेवं कृत्वा विशुध्यति " ।
जनकादिहत्यायां प्रायश्चित्तान्तरमुक्तम् **स्कान्दे**—
" अज्ञानाज्जनकं हन्यान्निमित्तैर्बहुभिर्द्विजः । चतुर्विंशति वर्षाणि व्रतं कृत्वा विशुध्यति ॥
" द्विगुणं च गवां दानं कृत्वा शुद्धिमवाप्नुयात् । दीक्षितं ब्राह्मणं हत्वा द्विगुणं व्रतमाचरेत् ॥
" मातामहं मातुलं च स्यालं जामातरं तथा । आचार्यस्य वधे चैव व्रतमुक्तं चतुर्गुणम्" ॥ इति ।
स एव—" स्नातकं ऋत्विजं हत्वा द्विगुणं व्रतमाचरेत् " ॥ इति । चत्वारिंशत्संस्कारपूतः स्नातकः । उत्पाद्य पुत्रं संस्कृत्येत्युक्तलक्षण आचार्यः । **दक्षः** (३।२६)—
" सममब्राह्मणे देयं द्विगुणं ब्राह्मणब्रुवे । आचार्ये शतसाहस्रं सोदर्ये दत्तमक्षयम् " ॥ इति प्रतिपाद्योक्तवान्
" समद्विगुणसाहस्रमानन्त्यं च यथाक्रमम् । दाने फलविशेषः स्याद्धिंसायां तद्वदेव हि " ॥ इति ।
आपस्तम्बः (१।९।२४।२४)—" गुरुं हत्वा श्रोत्रियं वा कर्मसमाप्तमेतेनैव विधिनोत्तमादुच्छ्वासाच्चरेन्नास्यास्मिन् लोके प्रत्यापत्तिर्विद्यते कल्मषं तु निर्हण्यते " इति । गुरुः पित्राचार्यादिः । श्रोत्रियोऽधीतवेदः । सोमान्तानि कर्माणि समाप्तानि यस्य स कर्मसमाप्तः । तौ हत्वा एतेन कुटिं कृत्वेत्यनन्तरोक्तेन । ओत्तमादुच्छ्वासादाप्राणवियोगादित्यर्थः । भ्रूणहत्याया अपि यावज्जीवं व्रतधारणमुक्तमापस्तम्बेन (१।९।२४।२४)—" एतेनैव विधिनोत्तमादुच्छ्वासाच्चरेत् " । इति । "भ्रूणहा द्वादशसमाः कपाली" **बोधायन**वचनं भ्रूणहत्यासमपापविषयम् । भ्रूणः साङ्गवेदीति निश्चयः ।

क्षत्रियादिकृतब्रह्महत्याप्रायश्चित्तम् । क्षत्रियादीनां ब्राह्मणवधे प्रायश्चित्तमाह **व्यासः**—
" अज्ञानात् बाहुजो विप्रं हत्वा विविधसाधनैः । पश्चात्तापसमायुक्तो द्विगुणं व्रतमाचरेत् ॥
" अज्ञानादूरुजो हत्वा ब्राह्मणं त्रिगुणं चरेत् । पादजो ब्राह्मणं हत्वा मुसलैर्वधमर्हति ॥
" केचित्कारीषदाहेन वधमिच्छन्ति पावनम् । ब्राह्मणीं स्थविरां हत्वा विधवां च सुवासिनीम् ॥
" बालं कन्यां यदा हन्यात्कारीषेणैव दाहयेत् " ॥ **स्मृत्यन्तरेऽपि**—
" द्विगुणं क्षत्रियस्योक्तं त्रिगुणं तद्विशः स्मृतम् । ब्राह्मणं हन्ति यः शूद्रस्तस्य दण्डो वधः स्मृतः ॥
" कन्याबालवधे गर्भबाधने विप्रयोषिताम् । पूर्ववद्दण्डयेद्राजा ह्यन्यथा नरकं व्रजेत् " ॥ इति ।
गौतमः (१२।१)—"शूद्रो द्विजातीनतिसन्धायाभिहत्य च वाक्दण्डपारुष्याभ्यामंगमोच्यो येनोपहन्यात् " ॥ इति । क्षत्रियादिवधे प्रायश्चित्तमाह **मनुः** (११।१२९-१३०)—
" तुरीयो ब्रह्महत्यायाः क्षत्रियस्य वधे स्मृतः । वैश्येऽष्टमांशो वृत्तस्थे शूद्रे ज्ञेयस्तु षोडशः ॥
" अकामतस्तु राजन्यं विनिपात्य द्विजोत्तमः । ऋषभैकसहस्रां गां दद्याच्छुध्यर्थमात्मनः ॥
" प्रमाप्य वैश्यं वृत्तस्थं दद्याच्चैकंशतं गवाम् । एतदेव व्रतं कृत्स्नं षाण्मासाच्छूद्रहा चरेत् ॥
" ऋषभैका दश वापि दद्याद्विप्राय गास्तथा " ॥ इति ।

---

१ क्ष-धो । २ ग-त्त । ३ क-व्रत ।

अज्ञानादपहृतस्य सुवर्णस्य पुनर्दाने तु प्रायश्चित्तं स एवाह—

" ब्रह्मस्वं यस्तु हृत्वा च पश्चात्तापमवाप्य च । पुनर्दत्वा तु विप्रेभ्यः प्रायश्चित्तमिदं चरेत् ॥
" कृच्छ्रं सान्तपनं कृत्वा द्वादशाहोपवासतः । शुद्धिमाप्नोति विप्रेन्द्र अन्यथा पतितो भवेत् " ॥ इति ।

क्षत्रियादीनां स्तेयप्रायश्चित्तम् । राज्ञां स्तेयप्रकारोऽभिहितः **शिवरहस्ये**—

" अन्यायाद्विप्रग्रामेषु अनाथेभ्यो धनं च यत् । अदण्ड्येभ्योऽपि यद्वित्तं स्तेयं तद्भूभुजामिह ॥
" स्तेयं कृत्वा सुरां पीत्वा मृत्वा राजा विशुध्यति " । **नागरखण्डे**—
"ऊरुजस्तु सुरां पीत्वा हृत्वा स्वर्णं द्विजन्मनाम् । राजा च शुद्धिमाप्नोति यच्छेद्वा ह्ययुतं गवाम् ।
"पादजस्तु सुरां पीत्वा हृत्वा हेम द्विजन्मनाम् । राज्ञा दण्ड्यः स्वधर्मेण मुसलेन हतः शुचिः" ॥ इति ।

कात्यायनः—

" विप्रादीनां तु नारीणां स्तेयं वा पानमेव वा । संभवेद्यदि दैवेन नेच्छन्ति मरणं बुधाः ॥
" त्याज्या एव स्त्रियस्ताश्च न पोष्या धर्मलिप्सुभिः " ॥ इति ।

रजतस्तेयप्रायश्चित्तम् । रजतस्तेये **नारदः**—

" सुवर्णमानं यस्मिन्वै रजतं स्तेयकर्मणि । कुर्यात्सान्तपनं सम्यगन्यथा पतितो भवेत् ॥
" दशनिष्कान्तपर्यन्तमूर्ध्वनिष्कचतुष्टयात् । हृत्वा तु रजतं विद्वान् कुर्याच्चान्द्रायणं द्विजः ॥
" ततो विंशतिनिष्कान्तं रजतस्तेयकर्मणि । चान्द्रायणद्वयं प्रोक्तं तत्पापं परिशोधनम् ॥
" शतादूर्ध्वं सहस्रान्तं प्रोक्तं चान्द्रायणद्वयम् । सहस्राद्धिकस्तेये ब्रह्महत्याव्रतं चरेत् " ॥

ताम्रस्तेये प्रायश्चित्तम् । ताम्रस्तेये **हैमाद्रौ**—

" पलद्वये पञ्चगव्यं पीत्वा शुद्धिमवाप्नुयात् । प्राजापत्यं पञ्चपले तप्तं दशपले स्मृतम् ।
" विंशत्पले तु चान्द्रं स्यात्स्यात्पञ्चाशति तु त्रयम् । ताम्रं षष्टिपले प्रोक्तं मासं कृत्वाऽघमर्षणम् ॥
" कण्ठदघ्नजले स्थित्वा शुद्धिमाप्नोति पूर्वजः । ताम्रेऽशीतिपले तत्र स्तेयं कृत्वा तु पूर्वजः ॥
" भूपरिक्रमणं कृत्वा भूयश्चान्द्रं ततः परम् । हृत्वा शतपलं ताम्रं स्वर्णस्तेयसमं विदुः " ॥ इति ।

स्वर्णचतुष्टयपरिमितं पलम्

"पलं सुवर्णं चत्वारि तच्चत्वारि ध्रुवो भवेत् । चत्वारिंशद्ध्रुवाणां च भार इत्युच्यते बुधैः" ॥ इति **स्मृतेः** ।

कांस्यादिस्तेये प्रायश्चित्तम् । **चतुर्विंशतिमते**—

" कांस्यपित्तलमुख्येष्वयस्कान्तेषु पञ्चसु । सहस्रनिष्कमानं तु पारक्यं परिकीर्तितम् ॥
" प्रायश्चित्तं तु लोहानां स्तेये रजतवत्स्मृतम् " ॥ इति ।

धनधान्यादिस्तेयप्रायश्चित्तम् । **मनुः** (११।१६२-१६९)—

" धान्यान्नधनचौर्याणि कृत्वा कामाद् द्विजोत्तमः । स्वजातीयगृहादेव कृच्छ्राब्देनैव शुध्यति ॥
" मनुष्याणां तु हरणे स्त्रीणां क्षेत्रगृहस्य च । कूपवापीजलानां च शुद्धिश्चान्द्रायणं स्मृतम् ॥
" द्रव्याणामल्पसाराणां स्तेयं कृत्वाऽन्यवेश्मनः । चरेत्सान्तपनं कृच्छ्रं निर्यात्यात्मविशुद्धये ॥
" भक्ष्यभोज्यापहरणे यानशय्यासनस्य च । पुष्पमूलफलानां च पञ्चगव्यं विशोधनम् ॥
" तृणकाष्ठद्रुमाणां च शुष्कान्नस्य गुडस्य च । चेलचर्मामिषाणां च त्रिरात्रं स्याद्भोजनम् ॥
" मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च । अयःकांस्योपलानां च द्वादशाहं कणान्नता ॥
" कार्पासकीटजीर्णानां द्विखुरैकखुरस्य च । पक्षिगन्धौषधीनां च रज्ज्वाश्च त्र्यहः पयः ॥
" एतैर्व्रतैरपोहेत पापं स्तेयकृतं द्विजः " ॥

---

१ क्ष- द्विशतं । २ क-कान्तो ।

भूम्यपहारप्रायश्चित्तम् । भूम्यपहारे दोषाधिक्यमाह **पराशरः** (७।५)—
" वापिकूपतटाकाद्यैर्वाजपेयशतैरपि । गवां कोटिप्रदानेन भूमिहर्ता विशुध्यति " ॥
नारदः—" केदारे तप्तकृच्छ्रं स्याद्गृहादेश्चान्द्रमीरितम् " ॥ इति ।
राजदण्डमाहापस्तम्बः (२।१०।२७।१६-१७)"अयमस्य दण्डः। पुरुषवधे स्तेये भूम्यादान इति । चक्षुर्निरोधस्त्वेतेषु ब्राह्मणस्य " इति । भूम्यादानं भूम्यपहारः । पुरुषवधादिषु शूद्रो वध्यः । ब्राह्मणस्य तु पट्टबन्धादिना चक्षुषी निरोद्धव्ये न तत्पाटयितव्ये 'न शारीरो ब्राह्मणे दण्ड' इति 'अक्षतो ब्राह्मणो व्रजेत्' इत्यादिस्मरणात् । **वस्त्रादिस्तेयप्रायश्चित्तम्** । **देवस्वामी**—
" स्थूलतन्तुकृते वस्त्रे स्तेयं कृत्वा तु पूर्वजः । पश्चात्तापसमायुक्तः प्राजापत्यं समाचरेत् ॥
" सूक्ष्मतन्तुकृते वस्त्रे पराकं मुनिचोदितम् । पीतवस्त्रं मुषित्वा तु तप्तकृच्छ्रद्वयं चरेत् ॥
" नीलमये सूक्ष्मवस्त्रे चरेच्चान्द्रायणत्रयम् ।
" मूल्याधिके पट्टवस्त्रे कौशेये च मुनीश्वराः । सद्यः पतति पापात्मा घृताक्तोऽग्निं विशेत्तदा " ॥

अजादिहरणे प्रायश्चित्तम् । **जाबालिः**—
" अजं बस्तं गृहेऽरण्ये पारक्यं गर्वितो द्विजः । मुषित्वा निष्कृतिं तत्र प्राजापत्यं समाचरेत् " ॥
मार्कण्डेयः—
" मार्जारं नकुलं सर्पं भारद्वाजं कपिं तथा । कृच्छ्रार्धमाचरेद्धृत्वा ज्ञात्वा तद्द्विगुणं चरेत् ॥
" द्विजानां तल्पहरणे प्रायश्चित्तं प्रजापतिः । प्राह चान्द्रं पराकं च तप्तं चैव यथाक्रमम्" ॥ इति ।
मरीचिः—
" यो विप्रः पापमज्ञात्वा उपानत्पादुके हरेत् । स तु देहविशुध्यर्थं प्राजापत्यं समाचरेत् ॥
" छत्रं हरेद्द्विजो यस्तु महातपनिवारणम् । वस्त्रावृते पराकं स्यात्केतकीपर्णसंवृते ॥
" यावकं तालपत्रैश्च निर्मितं राजवल्लभे । पञ्चगव्यं पिबेत्पश्चात्सर्वपापविनाशनम् ॥
" पुष्पजालं हि पारक्यं देवपूजार्थमौदरात् । सुगन्धिकरवीरादि हृत्वा विप्रः स पापभाक् ॥
" देवार्थं पुष्पहरणे चान्द्रं वत्सरसेवनात् । पराकं ब्रह्मनिर्माणे कार्यं क्षत्रियवैश्ययोः " ॥ इति ।
देवलः—
" कदलीमातुलुङ्गं च नालिकेरं च पानसम् । द्राक्षाखर्जूरजम्बीरचूतजम्बूफलानि च ॥
" फलानि विविधानीह देवप्रियकराणि वै । हृत्वा विप्रस्तु पारक्यं प्रायश्चित्तमिदं चरेत् ॥
" ऋतुत्रये पराकं स्याद्वत्सरे चान्द्रमुच्यते " ॥ इति ।
गृहोपकरणहरणे प्रायश्चित्तमाह **गौतमः**—" मुसलं दृषदं चैव ह्युलूखलमनन्तरम् ।
" वेणुपात्रं तथा शूर्पं मृन्मयं भाण्डमेव च । गृहोपकरणं हृत्वा पुनः संस्कारमर्हति " ॥ इति ।

सालग्रामादेः पूजोपकरणस्य च हरणे प्रायश्चित्तम् । **देवलः**—
" सालग्रामं शैवलिङ्गं प्रतिमां चक्रपाणिनः । घण्टामुपस्करं विप्रो यो हरेत्पापबुद्धिमान् ॥
" सालग्रामे तु चान्द्रं स्याच्छिवलिङ्गे तथैव च । प्राजापत्यं चक्रपाणेरितरेषु तथैव च ॥
" शतादूर्ध्वं तु रुद्राक्षं हृत्वा चान्द्रत्रयं स्मृतम् । शते पराकमल्पे तु गायत्रीजपमाचरेत् " ॥
नारदः—" लेखनीं बन्धसूत्रं च पुस्तकं फलकं तथा ।
" हृत्वा दत्वा तु तद्द्रव्यं पश्चात्तापसमन्वितः । प्राजापत्यं चरेत्कृच्छ्रं तदा देहविशुद्धये " ॥

माध्यस्थ्येन धनग्रहणे प्रायश्चित्तम् ।
देवलः—"व्यवहारादिकलहे प्रायश्चित्तादिकर्मसु । धनं गृहीत्वा यो विप्रः कौटसाक्ष्यं वदेत चेत् ॥
" तस्य पुत्राश्च पौत्राश्च तदा नाशमवाप्नुयुः । तस्य देहविशुद्ध्यर्थं महाचान्द्रमुदीरितम् " ॥ इति ।

---
१ ग-क ।

बुद्धिः कामः । व्यर्थचेष्टामात्रमकामः । ताभ्यामुत्पादितः । क्रोधो यस्यासौ दण्डादिभिर्यदि हन्यात्तदा मरणमन्तरेण केवलं प्रहृता स्यात् कामकृतस्संप्रहारो घातः । अकामकृतं तु मारणं घात इत्यर्थः । दण्डलक्षणमुक्तं तेनैव (९।२)—

" अङ्गुष्ठमात्रस्थूलस्तु बाहुमात्रप्रमाणकः । आर्द्रस्तु स पलाशश्च दण्ड इत्यभिधीयते " ॥

अधिकप्रमाणदण्डादिभिर्मारणे तु प्रायश्चित्तद्वैगुण्यमाह स एव (९।३)—

" दण्डादूर्ध्वं यदाऽन्येन प्रहाराद्यदि पातयेत् । प्रायश्चित्तं तदा प्रोक्तं द्विगुणं गोवधे चरेत् " ॥

दण्डाधिकमानेन लगुडादिना मारणे अकामकृतेऽपि द्विगुणं चरेदित्यर्थः ।

द्विगुणस्य प्रायश्चित्तस्य निमित्तान्तरमाह स एव (९।४६)

"व्यापन्नानां बहूनां च बन्धने रोधनेऽपि च । द्विगुणं विहितं तस्य प्रायश्चित्तं विशुद्धये " ॥ इति ।

कामकृते गोवधे निमित्तविशेषानुपजीव्यप्रायश्चित्तविशेषान् दक्षिणासहितानाह स एव (९।२०)–

" काष्ठलोष्टकपाषाणैः शस्त्रेणैवोद्धतो बलात् । व्यापादयति यो गां तु तस्य शुद्धिं विनिर्दिशेत् ॥
" चरेत्सान्तपनं काष्ठे प्राजापत्ये तु लोष्टके । तप्तकृच्छ्रं तु पाषाणे शस्त्रपातेऽतिकृच्छ्रकम् ।
" पञ्च सान्तपने गावः प्राजापत्ये तथा त्रयः । तप्तकृच्छ्रे भवत्यष्टावतिकृच्छ्रे त्रयोदश " ॥ इति ।

सान्तपनादीनां स्वरूपमग्रे वक्ष्यते ।

गृहे बन्धस्य गोर्बन्धनिमित्ते मरणे प्रायश्चित्तमाह स एव (९।३२)—

" बन्धपाशनिबद्धाङ्गो म्रियेत यदि गोपशुः । भवने तस्य पापी स्यात् प्रायश्चित्तार्धमर्हति " ॥ इति ।

शृङ्गभङ्गादौ स एवाह (९।१७)—

" पाषाणेनैव दण्डेन गावो येनाभिघातिताः । शृङ्गभङ्गे चरेत्पादं द्वौ पादौ नेत्रघातने ॥
" लाङ्गूले पादकृच्छ्रं तु द्वौ पादावस्थिभञ्जने । त्रिपादं चैव कर्णे तु चरेत्सर्वं निपातने ॥
" अतिदाहे चरेत्पादं द्वौ पादावतिवाहने । नासिक्ये पादहीनं तु चरेत्सर्वं निपातने ॥
" एका चेद्बहुभिः काचिद्दैवाद्व्यापादिता यदि । पादं पादं तु हत्यायाश्चरेयुस्ते पृथक् पृथक् ॥
" वाहनात्तु विपद्येत अनड्वान्योक्त्रयन्त्रितः । उक्तं पराशरेणैव ह्येकं पादं यथाविधि ॥
" प्रेरयन् कूपवापीषु वृक्षच्छेदेषु पातयन् । गवाशनेषु विक्रीणन् ततः प्राप्नोति गोवधम् " ॥ इति ।

अङ्गुष्ठप्रमाणदण्डेन सञ्चारणाय प्रहारे क्वचित्प्रायश्चित्ताभावमाह स एव (९।११)—

" मूर्च्छितः पतितो वापि दण्डेनाभिहतः स तु । उत्थितस्तु यदा गच्छेत्पञ्च सप्त दशैव वा ॥
"ग्रासं वा यदि गृह्णीयात्तोयं वापि पिबेद्यदि । पूर्वं व्याध्युपसृष्टश्चेत्प्रायश्चित्तं न विद्यते " ॥ इति ।

अन्यत्रापि क्वचित्प्रायश्चित्ताभावमाहाङ्गिराः–" सायं सङ्गोपनार्थं तु न दुष्येद्रोधबन्धयोः " इति ।

पराशरोऽपि (९।१)—

" गवां संरक्षणार्थाय न दुष्येद्रोधबन्धयोः । तद्वधं तु न तं विद्यात्कामाकामकृतं तथा ॥
" कूपखाते तटाखाते नदीखाते तथैव च । अन्येषु धर्मखातेषु प्रायश्चित्तं न विद्यते ॥
" सङ्ग्रामप्रहृता ये च ये दग्धा वेश्मकेषु च । दवाग्निग्रामघातेषु प्रायश्चित्तं न विद्यते ॥
" ग्रामघाते शरौघेण वेश्मभङ्गान्निपातने । अतिवृष्टिहतानां च प्रायश्चित्तं न विद्यते ॥
" यन्त्रिता गौश्चिकित्सार्थं गूढगर्भविमोचने । यत्ने कृते विपद्येत्तु प्रायश्चित्तं न विद्यते ॥
" केशानां रक्षणार्थाय द्विगुणं व्रतमाचरेत् । द्विगुणे व्रत आदिष्टे द्विगुणां दक्षिणां भवेत् ॥

---

१ क्ष–द्विगुणस्य प्रायश्चित्तमाह । २ गघख–दह । ३ क्ष–घा ।

“ राजा वा राजमात्रो वा ब्राह्मणो वा बहुश्रुतः । अकृत्वा वपनं तस्य प्रायश्चित्तं विनिर्दिशेत् ॥
“ सर्वान् केशान् समुच्छित्य छेदयेदङ्गुलिद्वयम् । एवं नारीकुमारीणां शिरसो मुण्डनं स्मृतम् ॥
“ न स्त्रिया केशवपनं न दूरे शयनासनम् । गृहेषु नियतं तिष्ठेच्छुचिर्नियममाचरेत् ।
“ इह यो गोवधं कृत्वा प्रच्छादयितुमिच्छति । स याति नरकं घोरं कालसूत्रमसंशयः ॥
“ विमुक्तो नरकात्तस्मान्मर्त्यलोकेषु जायते । क्लीबो दुःखी च कुष्ठी च सप्तजन्मनि वै नरः ॥
“ तस्मात्प्रकाशयेत्पापं स्वधर्मं सततं चरेत् । स्त्रीबालनृपगोविप्रेष्वतिकोपं विवर्जयेत् ” ॥
हेमाद्रौ—“यो विप्रो वृषभं हन्याच्छिवलिङ्गाङ्कितं तनौ । त्रिवारं क्ष्मां परिक्रम्य ब्रह्मचर्यव्रते स्थितः ॥
“ धनुष्कोटिं ततो गत्वा गन्धमादनपर्वते । तत्र स्नात्वा त्रिरात्रं च रामलिङ्गं निरीक्ष्य च ॥
“ कृत्वा चान्द्रायणं कृच्छ्रमथ शुध्येन्न संशयः ” ॥ **तत्रैव**—
“ अनड्वान् हन्यते विप्रैरश्मदण्डशिलादिभिः । तप्तकृच्छ्रत्रयं कृत्वा पिबेयुः पञ्चगव्यकम् ॥
“ शुद्धिमाप्नुयुरेतेन नान्यथा शुद्धिरिष्यते ” ॥ इति ।

प्राण्यन्तरहनने प्रायश्चित्तम् । प्रसङ्गात्प्राण्यन्तरहननस्यापि प्रायश्चित्तमुच्यते । तत्र **मनुः** (११।१३१–१३२, १४०)—

“ मार्जारनकुलौ हत्वा चाषं मण्डूकमेव च । श्वगोधोलूककाकांश्च शूद्रहत्याव्रतं चरेत् ॥
“ पयः पिबेत् त्रिरात्रं वा योजनं वा वने व्रजेत् । उपस्पृशेत्स्रवन्त्यां वा सूक्तं वाग्दैवतं जपेत् ॥
“ अस्थिमतां तु सत्त्वानां सहस्रस्य प्रमापणे । पूर्णे चानस्यानस्थ्नां तु शूद्रहत्याव्रतं चरेत् ” ॥

पक्षिषु कुम्यादिषु च अस्थिमत्सहस्रवधे शकटपरिमितानस्थिमद्वधे च शूद्रहत्याव्रतं चरेदित्यर्थः । **आपस्तम्बः**—(१।९।२५।१३) “ वायसप्रचलाकबर्हिणचक्रवाकहंसभासमण्डूकनकुलडेरिका-श्वहिंसायां शूद्रवत्प्रायश्चित्तम् ” इति । प्रत्येकवधे तु **स एव**—

“ किञ्चिदेव तु विप्राय दद्यादस्थिमतां वधे । अनस्थ्नां चैव हिंसायां प्राणायामेन शुध्यति ” ॥

पराशरः (६।३)—

“ हत्वा मूषिकमार्जारसर्पाजगरडुण्डुभान् । कृसरं भोजयेद्विप्रान् लोहदण्डश्च दक्षिणा ” ॥ इति ।

कृसरं तिलमुद्गमिश्रमन्नम् । लोहं कृष्णायसम् । **याज्ञवल्क्यः** (प्रा. २७०–२७६)—

“ मार्जारगोधानकुलमण्डूकांश्च पतत्त्रिणः । हत्वा त्र्यहं पिबेत्क्षीरं कृच्छ्रं वा पादकं चरेत् ॥
“ गजे नीलवृषाः पञ्च शुकवत्सो द्विहायनः । खराजमेषेषु वृषो देयः क्रौञ्चे द्विहायनः ॥
“ हंसश्येनकपिक्रव्याज्जलस्थलशिखण्डिनः । भासं च हत्वा गां दद्यात्क्रव्यादं तु सवत्सकाम् ॥
“ उरगेष्वायसो दण्डः पण्डके त्रपुसीसकम् । कोले घृतघटो देय उष्ट्रे कुञ्जो हयेंऽशुकम् ॥
“ तित्तिरौ तु तिलद्रोणं गजादीनामशक्नुवन् । दातुं दानं चरेत्कृच्छ्रमेकैकस्य विशुद्धये ॥
“ किञ्चित्सास्थिवधे देयं प्राणायामस्त्वनस्थिके । वृक्षगुल्मलतावीरुच्छेदने जप्यमृक्शतम् ॥
“ स्यादौषधिवृथाच्छेदे क्षीराशीगोनुगो दिनम् ” ॥ इति ।

पराशरः—“ गजस्य चतुरङ्गस्य महिषोष्ट्रनिपातने । प्रायश्चित्तमहोरात्रं त्रिसन्ध्यामवगाहनम् ॥
“ कुरङ्गं वानरं सिंहं चित्रं व्याघ्रं तु घातयन् । शुध्यतेऽथ त्रिरात्रेण विप्राणां तर्पणेन च ॥
“ वृकजम्बूकऋक्षाणां तरक्षुश्वानघातकः । तिलप्रस्थं द्विजे दद्याद्वायुभक्षो दिनत्रयम् ॥
“ मृगरोहिद्वराहाणां वधे बस्तस्य घातकः । अफालकृष्टमश्नीयादहोरात्रमुपोष्य सः ॥

---

१ क्ष–डि । २ क्ष–सृ । ३ गघ–मने ।

" शिंशुमारं तथा गोधां हत्वा कूर्मं च शल्यकम् । वृन्ताकफलभक्षी चाप्यहोरात्रेण शुध्यति ॥
" एवं चतुष्पदानां च सर्वेषां वनचारिणाम् । अहोरात्रोषितस्तिष्ठेज्जपन्वै जातवेदसम् ॥
" क्रौञ्चसारसहंसांश्च चक्रवाकांश्च कुक्कटम् । जालपादं च शरभमहोरात्रेण शुध्यति ॥
" बला[1]कटिट्टिभौ वापि शुकपारावतावपि । अहिनक्र[2]विघाती च शुध्यते नक्तभोजनात् ॥
" वृककाककपोतानां शारीतित्तिरिघातकः । अन्तर्जले उभे सन्ध्ये प्राणायामेन शुध्यति ॥
" गृध्रश्येनशशादानामुलूकस्य च घातकः । अपक्वाशी दिनं तिष्ठेत्त्रिकालं मारुताशनः ॥
" वल्गुलीटिट्टिभानां च कोकिलाखञ्जरीटके । लाविकारक्तपक्षेषु शुध्यते नक्तभोजनात् ॥
" कारण्डवचकोराणां पिङ्गलाकुररस्य च । भारद्वाजादिकं हत्वा शिवं पूज्य विशुध्यति ॥
" भेरुँण्डचाषभासांश्च पारावतकपिञ्जलौ । पक्षिणां चैव सर्वेषामहोरात्रमभोजनम् " ॥

हेमाद्रौ—"महिषीहनने विप्रो महासान्तपनं चरेत् । स चेद्दोग्ध्री बालवत्सा महासान्तपनद्वयम् " ॥

वृक्षच्छेदादिप्रायश्चित्तम् ।

" इन्धनार्थं द्रुमच्छेदी तद्दोषस्योपशान्तये । प्राजापत्यं सकृत्कृत्वा शुद्धिमाप्नोत्यनुत्तमाम् ॥
" कृष्यर्थमिन्धनार्थं वा यज्ञवृक्षविभेदने । पराकं तत्र कुर्वीत शुद्धो भवति वृक्षहा ॥
" बिल्वाश्वत्थौ यदा छिंद्यात्तदा चान्द्रायणं चरेत् । पुष्पारामस्य विच्छेदी वनद्रो[3]हीति गद्यते ॥
" तद्दोषपरिहारार्थं गायत्र्या लक्षमुच्यते ।
" तिन्तिणीचूतयोश्छेदे बहुजन्तूपकारकात् । कपित्थामलकच्छेदे सम्यक् चान्द्रायणं चरेत् ॥
" कोविदारतरौ निम्बे प्राजापत्यं विशोधनम् । खर्जूरे नालिकेरे च तालहिन्तालयोस्तथा ॥
" तप्तकृच्छ्रं चरेद्विद्वान् छेददोषोपशान्तये ।
" जम्बीरमातुलङ्गादि च्छित्वा पापविशुद्धये । सम्यक् स्नात्वा शुचिर्भूत्वा गीताशास्त्रं पठेत्क्रमात् ।
" तटाककूपकासारच्छेदने विप्रसत्तमः । पूर्ववत्तं दृढं कृत्वा प्राजापत्यं समाचरेत् ।
" विष्ण्वालयादिविच्छेदे तद्वद्धैन्दवमाचरेत् । शून्यालयस्य विच्छेदे पराकं द्विजसत्तमः " ॥ इति ।

याज्ञवल्क्यः (प्रा. २९६)—

" वृक्षगुल्मलतानां तु छेदने जप्यमृक्शतम् । स्याद्दोषधीवृथाछेदी क्षीराशी गोनुगो दिनम्" ॥ इति ।

अत्र वृथाछेदीति विशेषणाद्यज्ञार्थछेदने न दोषः । यत्तु **शङ्खवचनम्**—" संवत्सरं व्रतं कुर्याच्छित्वा वृक्षं फलप्रदम् " इति तत् छेदनावृत्तिविषयम् । दृष्टार्थत्वेऽपि कर्षणाङ्गभूतहलाद्यर्थत्वे न दोषः । " फलपुष्पोपवनादीन्न हिंस्यात् । पादपान् कर्षणार्थमुपहन्यात् " इति **स्मृतेः** । महातटाकछेदे विशेषमाह **देवलः**—" बहुधान्योद्भवस्याथ तटाकस्य विभेदने ।
" ब्रह्महत्याव्रतं कृत्वा कपालध्वजवर्जितः । पुनः संस्कारकृत्पश्चाच्छुद्धिमाप्नोत्यसंशयः " ॥

सुरापानादिप्रायश्चित्तम् । अथ सुरापानादेः प्रायश्चित्तमुच्यते । पिष्टादिजन्यो द्रव्यविशेषः सुरा । तथा च **मनुः** (११।९४,९३,९५)—

" गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा । यथैवैका न पातव्या तथा सर्वा द्विजोत्तमैः ॥
" सुरा वै मलमन्नानां पाप्मा च मलमुच्यते । तस्माद्ब्राह्मणराजन्यौ वैश्यश्च न सुरां पिबेत् ॥
" यक्षरक्षःपिशाचान्नं मद्यं मांसं सुरासवम् । तद्ब्राह्मणेन नात्तव्यं देवानामन्नमर्हति " ॥ इति ।

---

१ ग—का । २ क्ष—अदीनबकघाती । ३ क्ष—हे । ४ क्ष—गायत्र्याहितगम्यते ।

राजन्यवैश्ययोः सुरापाननिषेधः पैष्टीविषयः। गौडीमाध्व्योरेकादशसु मद्येष्वनुक्रमणात्तत्पाने तयोर्दोषाभावात्। अत एव ‘सुरासवं सुरारूपं मद्यं ब्राह्मणेन नाक्तव्यम्’ इति ब्राह्मणस्य तन्निषेधः। पैष्ट्या अकामकृते सकृत्पाने गौडीमाध्व्योरसकृत्पाने कामकृते च ब्राह्मणस्य प्रायश्चित्तं तुल्यम्। **श्रुतिरपि**—“न सुरां पिबेत् न कलञ्जं भक्षयेत्। न तस्य वै प्रायश्चित्तम्। मरणान्तमेव” इति। मरणान्तमेव प्रायश्चित्तमन्यत्तु नास्तीत्यर्थः। तथा **चापस्तम्बः** (१।९।२५।३)—“सुरापोऽग्निस्पर्शां सुरां पिबेत् मृतः शुद्धो भवति” इति। **पराशरः**—

“सुरापानं सकृत्कृत्वाऽग्निवर्णां सुरां पिबेत्। स पावयेदथात्मानमिह लोके परत्र च”॥ इति।

मनुः (११।९०–९१)—

“सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेत्। तया काये विनिर्दग्धे मुच्यते किल्बिषात्ततः॥

“गोमूत्रमग्निवर्णं वा पिबेदुदकमेव वा। पयोघृतं वा मरणात् गोशकृद्रसमेव वा”॥ इति।

कलौ मरणान्तप्रायश्चित्तस्य निषिद्धत्वात् तदभिप्रायेण प्रायश्चित्तान्तरमाह **स एव** (११।९२)—

“कणान्वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि। सुरापानापनुत्यर्थं वालवासा ध्वजी जटी”॥

एतज्जिह्वास्पृष्टमात्रविषयमित्यन्ये। **याज्ञवल्क्यः** (प्रा. २५३–२५६)—

“सुराम्बुघृतगोमूत्रपयसामग्निसन्निभम्। सुरापोऽन्यतमं पीत्वा मरणाच्छुद्धिमाप्नुयात्॥

“वालवासा जटी वापि ब्रह्महत्याव्रतं चरेत्। पिण्याकं वा कणान्वापि भक्षयेत्तु समा निशि॥

“अज्ञानात्तु सुरां पीत्वा रेतोविण्मूत्रमेव च। पुनःसंस्कारमर्हन्ति त्रयोवर्णा द्विजातयः॥

“पतिलोकं न सा याति ब्राह्मणी या सुरां पिबेत्। इहैव सा शुनी गृध्री सूकरी वापि जायते”॥ इति।

गौतमः (२३।१-३)—“सुरापस्य ब्राह्मणस्योष्णामासिञ्चेयुः सुरामास्ये मृतः शुद्धेदमत्या पाने पयोघृतमुदकम्” इति। “ततोऽस्य संस्कारो मूत्रपुरीषरेतसा च प्राशने” इति च।

यत्वङ्गिरोवचनम्—

“भूमिप्रदानं कुर्यात्तु सुरां पीत्वा द्विजोत्तमः। पुनर्न च पिबेज्जातु संस्कृतः स विशुध्यति”॥ इति

तत् गौडीमाध्व्योः सकृत्पानविषयमिति **माधवीये**। **यत्तु बृहस्पतिनोक्तम्**—

“गौडीं माध्वीं सुरां पीत्वा पैष्टीं विप्रः समाचरेत्। तप्तकृच्छ्रं पराकं च चान्द्रायणमनुक्रमात्”॥ इति

तत्सङ्कल्पमात्रविषयम्। प्रायश्चित्ताकरणे दण्डनमुक्तं **हेमाद्रौ**—

“सुरापं दण्डयेद्राजा मरणं यदि नेच्छति। ब्रह्मसूत्रं शिखां सम्यक् त्रुटित्वा वापयेच्छिरः॥

“सुराभाण्डं ललाटे तु तापयित्वाऽङ्कयेत्सुधीः। आनीय मृन्मयं भाण्डं सुरापूरितमादरात्॥

“बध्वा कण्ठे खरं यानमारोप्य नगरात्ततः। निस्सार्य ध्वनयन् भृत्यैरटित्वा नगराद्बहिः।

“प्रतार्य सद्यो निर्वास्य शुद्धिमाप्नोति नान्यथा”॥ इति। “प्रोत्सार्य सहसा राजा न दुष्टस्तेन कर्मणा॥

“स पापी द्वादशाब्दं तु कपालध्वजवर्जितम्। ब्रह्महत्याव्रतं कृत्वा शुद्धिमाप्नोति नान्यथा”॥

तत्रैव—“यदि रोगनिवृत्त्यर्थमौषधार्थं सुरां पिबेत्।

“रोगे[1] तस्मिन्निवृत्ते तु तस्य चान्द्रद्वयं विदुः। उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति”॥ इति।

पराशरः (१०–२७)—

“पतत्यर्धं शरीरस्य यस्य भार्या सुरां पिबेत्। पतितार्धशरीरस्य निष्कृतिर्न विधीयते”॥ इति।

उक्तादन्येन शुद्धिरित्यर्थः।

---

१ ग–तस्योपनयनं भूयः।

प्रायश्चित्तमाह **स** एव (१०।२८)—
" गायत्रीं जपमानस्तु कृच्छ्रं सान्तपनं चरेत् । गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ॥
" एकरात्रोपवासश्च कृच्छ्रं सान्तपनं स्मृतम् " । इति । एतच्च त्रिविधसुरापानविषयम् ।
मद्यपाने तु प्रायश्चित्तमाह **बृहस्पतिः**—
" पीत्वा प्रमादतो मद्यमतिकृच्छ्रं चरेद्द्विजः । कारयेत्तस्य संस्कारं शक्त्या विप्रांस्तु भोजयेत् " ॥
कामकारे **पराशरः** (१२।६७)—
" मद्यपश्च द्विजः कुर्यान्नदीं गत्वा समुद्रगाम् । चान्द्रायणे ततश्चीर्णे कुर्याद्ब्राह्मणभोजनम् ॥
" अनडुत्सहितां गां च दद्याद्विप्रेषु दक्षिणाम् " ॥ इति ।
पनसादिजन्यमदकरणद्रव्यं मद्यम् । तदाह **पुलस्त्यः**—" पानसद्राक्षमाधूकखार्जूरं तालमैक्षवम् ।
" मधूत्थं सैरमारिष्टं मैरेयं नालिकेरजम् । समानानि विजानीयान्मद्यान्यकोदशैव तु " । इति ।
द्विजो ब्राह्मणः ।
" कामादपि च राजन्यो वैश्यो वाऽपि कथंचन । मद्यमेव सुरां पीत्वा न दोषं प्रतिपद्यते " ॥ इति ।
बृहद्याज्ञवल्क्यस्मरणात् । मद्यं सुरा गौडी माध्वी च पैष्टी निषिद्धैव । एकादशानामन्यतमपाने विप्रो महानदीतीरे चान्द्रायणं चरित्वा ब्राह्मणभोजनं कृत्वा दक्षिणां दद्यात् । **हेमाद्रौ**—
" माधूकं शैलमारिष्टमैरेयं नालिकेरजम् । तालं हिन्तालजं चैव द्राक्षाखर्जूरसंभवम् ॥
" वृक्षोद्भवमिदं मद्यं नवधा परिकीर्तितम् । एषामन्यतमं पीत्वा द्विजो गच्छेन्महानदीम् ॥
" चान्द्रायणं चरित्वाऽथ कुर्याद्ब्राह्मणभोजनम् । सुरापस्पृष्टमन्नं च सुराभाण्डोदकं तथा ॥
" सुरापानसमं प्राहुः तत्र चान्द्रस्य भक्षणम् । तस्योपनयनं भूयो पञ्चगव्यस्य सेवनम्" ॥ इति ।
मनुः (११।९७)—
" यस्य कायगतं ब्रह्म मद्येनाप्लाव्यते सकृत् । तस्य व्यपैति तद्ब्रह्म शूद्रत्वं च स गच्छति ॥
" अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुध्यति । मतिपूर्वमनिर्देश्यं प्राणान्तिकमिति स्थितिः ॥
" अपः सुराभाजनस्था मद्यभाण्डस्थितास्तथा । पञ्चरात्रं पिबेत्पीत्वा शंखपुष्पीशृतं पयः ॥
" स्पृष्ट्वा दत्वा च मदिरां विधिवत् प्रतिगृह्य च । शूद्रोच्छिष्टाश्च पीत्वाऽपः कुशवारि पिबेत्त्र्यहम् ॥
" ब्राह्मणस्य सुरापस्य गन्धमाघ्राय सोमपः । प्राणानप्सु त्रिरायम्य घृतं प्राश्य विशुध्यति ॥
" अज्ञानात्प्राश्य विण्मूत्रसुरासंसृष्टमेव च । पुनस्संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः " ॥
देवलः—
" हिन्तालतालखर्जूरनालिकेरमधूद्भवम् । गन्धं वायुवशात्प्राप्तं घ्रात्वा विप्रस्य दक्षिणम् ॥
" हस्तमाघ्राय सहसा शुद्धिमाप्नोति तत्क्षणात् । अभावे भास्करं दृष्ट्वा स्पृष्ट्वा कर्णं स्मरेद्धरिम् " ॥

विण्मूत्रादिभक्षणप्रायश्चित्तम् । **पराशरः** (१२।२-३)—
" अज्ञानात्प्राश्य विण्मूत्रं सुरासंसृष्टमेव च । पुनस्संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ॥
" अजिनं मेखला दण्डो भैक्षचर्या व्रतानि च । निवर्तन्ते द्विजातीनां पुनस्संस्कारकर्मणि ॥
" विण्मूत्रस्य च शुध्यर्थं प्राजापत्यं समाचरेत् । पञ्चगव्यं प्रकुर्वीत स्नात्वा पीत्वा शुचिर्भवेत् "॥
स्नात्वा पञ्चगव्येन । एतच्च पुनस्संस्कारात्प्रागेव कार्यम् । कामकारे तु **स** एव (११।१)—
" अमेध्यरेतोगोमांसं चण्डालान्नमथापि वा । यदि भुक्तं तु विप्रेण कृच्छ्रं चान्द्रायणं चरेत् " ॥
अमेध्यं विण्मूत्रादि । तथा च **मनुः** (११।१५४)—"प्राश्य मूत्रपुरीषादि द्विजश्चान्द्रायणं चरेत् " ।

१ गद्य-सैर ।

यत्तु **चतुर्विंशतिमते**ऽभिहितम्—
"विण्मूत्रभक्षणे विप्रश्चरेच्चान्द्रायणद्वयम्। श्वादीनां चैव विण्मूत्रे चरेच्चान्द्रायणत्रयम्"॥ इति तदेतदभ्यासविषयमिति **माधवीये**।
यमः—"द्विजोऽज्ञानान्मलं मूत्रं खरमानुषयोः कपेः। मयूरहंसगृध्राणां सकृत् भुक्त्वा तु पातकी॥
"पुनःकर्म प्रकुर्वीत तप्तकृच्छ्रं विशोधनम्।
"रोगिणो न पुनःकर्म कृच्छ्रमात्रमुदीरितम्। सुखी भूत्वा पिबेद्गव्यं नारीणामर्धमीरितम्"॥ इति।

चंडालघटस्थजलपाने प्रायश्चित्तम्।

पराशरः (६।२३,२६)—
"चंडालघटसंस्थं तु यत्तोयं पिबति द्विजः। तत्क्षणात् क्षिपते यस्तु प्राजापत्यं समाचरेत्॥
"यदि न क्षिप्यते तोयं शरीरे यस्य जीर्यते। प्राजापत्यं न दातव्यं कृच्छ्रं सान्तपनं चरेत्"॥ इति।
प्रथममज्ञानात्पीत्वा पश्चात्तदानीमेव यदि वमेत् तदा प्राजापत्यम्। तज्जरणे सान्तपनं कृच्छ्रं परिषदा दातव्यम्। न तु प्राजापत्यम्।

बुद्धिपूर्वं तत्पाने वर्णभेदेन प्रायश्चित्तभेदमाह **स एव** (६।२७)—
"चरेत्सान्तपनं विप्रः प्राजापत्यमनन्तरः। तदर्धं तु चरेद्वैश्यः पादं शूद्रस्य दापयेत्"॥ इति।
रजकाद्यन्त्यजभांडोदकादिपाने प्रायश्चित्तमाह **स एव** (६।२८)—
"भाण्डस्थमन्त्यजानां तु जलं दधि पयः पिबेत्। ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव प्रमादतः॥
"ब्रह्मकूर्चोपवासेन द्विजातीनां तु निष्कृतिः। शूद्रस्य चोपवासेन तथा दानेन शक्तितः"॥ इति।
ब्रह्मकूर्चस्वरूपमग्रे वक्ष्यते। तत्सहित उपवासः त्रैवर्णिकस्य चतुर्थस्य ब्रह्मकूर्चस्थाने दानं द्रष्टव्यम्।

चण्डालवाप्यादिजलपाने प्रायश्चित्तम्।

पराशरः (६।२३,२४)—
"चण्डालखातवापीषु पीत्वा सलिलमग्रजः। अज्ञानाच्चैकभुक्तेन त्वहोरात्रेण शुध्यति।
"चण्डालभाण्डसंस्पृष्टं पीत्वा कूपगतं जलम्। गोमूत्रयावकाहारः त्रिरात्राच्छुद्धिमाप्नुयात्"॥ इति।
चण्डालस्वामिकवाप्युदकपाने एकभुक्तं कामकारे तु उपवासः। चण्डालभाण्डसंस्पृष्टकूपस्थजलपाने गोमूत्रसहितयवपिष्टादिकं दिनत्रयमाहारत्वेन स्वीकुर्यादित्यर्थः।

उच्छिष्टविषयतदपवादौ।

देवलः—
"विप्रस्य पीतशेषं यत्तोयमन्यः पिबेद्यदि। मद्यपानसमं प्रोक्तं तत्तोयं मुनिपुंगवैः॥
"पीत्वाऽज्ञानात् द्विजः कुर्यात्प्राजापत्यं विशुद्धये"॥ इति। पृथक्पात्राभावे तु **मार्कण्डेयः**—
"पात्राभावे तृषार्तस्तु पीतशेषं पिबेत् द्विजः। भूमौ किञ्चिन्निपात्याथ पीत्वा विप्रो न दोषभाक्"॥ इति।

वृद्धशातातपः—
"पीतशेषं तु यत्किञ्चित् भाजने मुखनिःसृतम्। अभोज्यं तत् विजानीयात् भुक्त्वा चान्द्रायणं चरेत्॥
"पीतोच्छिष्टं च पानीयं पीत्वा तु ब्राह्मणः क्वचित्। त्रिरात्रं तु व्रतं कुर्याद्वामहस्तेन वा पुनः"॥ इति।
एतत् स्वोच्छिष्टविषयम्। **हारीतः**—
"स्त्र्युच्छिष्टस्थिता आपो यदि कश्चित्पिबेत् द्विजः। शंखपुष्प्या विपक्वेन त्र्यहं क्षीरेण शुध्यति॥
"शूद्रोच्छिष्टजलं पीत्वा त्रिरात्रं यावकं पिबेत्"॥

निषिद्धक्षीरपानप्रायश्चित्तम्। स एव—

"मृतवत्सापयः पीत्वा मुखेनापि जलं द्विजः। उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति"॥ इति।

चतुर्विंशतिमते—

"स्त्रीक्षीरं तु द्विजः पीत्वा कथञ्चित्काममोहितः। पुनः संस्कृत्य चात्मानं प्राजापत्यं समाचरेत्॥

"अजोष्ट्रीसंधिनीक्षीरं मृगाणां वनचारिणाम्। अनिर्दशाया गोश्चैव पीत्वा दिनमभोजनम्"॥ इति।

अत्रिः—

"अविकोष्ट्र्याश्च यत्क्षीरं मृगाणां वनचारिणाम्। छागजं गार्दभं क्षीरं भुक्त्वा दिनमभोजनम्"॥ इति

विष्णुः (५१–३८)—"गोऽजामहिषीवर्जं सर्वपयांसि प्राश्योपवसेत्"॥ इति।

अयं चैकदिनोपवासो ज्ञानकृते सकृत्पाने वेदितव्यः। असकृत्पाने तु **पराशरः** (११।१०)—

"पीयूषं श्वेतलशुनं वृन्ताकफलगृञ्जनम्। पलाण्डुं वृक्षनिर्यासं देवस्वकवकानि च॥

"उष्ट्रीक्षीरमविक्षीरमज्ञानाद्भुञ्जते द्विजः। त्रिरात्रमुपवासेन पञ्चगव्येन शुध्यति"॥ इति।

पीयूषः अभिनवं पयः। पयसोऽभिनवत्वं दशाहान्तःपातित्वम्। कामकृते तु **शंखः—**

"क्षीराणि यान्यपेयानि तद्विकाराशने बुधः। सप्तरात्रं व्रतं कुर्यात्प्रयत्नेन समाहितः"॥ इति।

कामतोऽभ्यासे तु—

शातातपः—"सन्धिन्या अन्तर्दशाहाया अवत्सायाश्च गोक्षीरप्राशने वृथामांसे प्राजापत्यमुष्ट्रीखरीमानुषीक्षीरप्राशने चान्द्रायणं पुरुषस्य पुनरुपनयनं च"॥ इति।

स्मृतिसारे—"क्षीरं लवणसम्मिश्रमुच्छिष्टेऽपि च यत् घृतम्। पानं[1] रजकतीर्थेषु ताम्रे गव्यं सुरासमम्"॥

यमः—"ताम्रपात्रस्थितं गव्यं नालिकेरोदकं तथा। लवणाक्तं पयश्चैव मद्यगन्धं तथैव च॥

"पीत्वा द्विजश्चरेच्चान्द्रं प्राजापत्यमकामतः"॥ इति।

पराशरः—

"सकांस्यं नालिकेराम्बु कांस्ये च रसमैक्षवम्। नालिकेररसं पक्वमभूमिष्ठं जलं तथा॥

"नालिकेरोदकं ताम्रपात्रस्थं गव्यमेव च। लवणाक्तं पयश्चैव मद्यघ्राणं तथैव च॥

"द्विजः कामाच्चरेच्चान्द्रं पीत्वा ज्ञानात्प्रजापतिम्"॥

देवलः—"ताम्रपात्रस्थितं दुग्धं गोमूत्रं तक्रमेव च। नालिकेरोदकं तत्स्थं पीत्वा चान्द्रायणं चरेत्"॥

निमित्तान्तरे च भोजनप्रकरणे प्रायश्चित्तमुक्तम्।

सुवर्णादिस्तेयप्रायश्चित्तम्। अथ स्तेयप्रायश्चित्तमुच्यते।

तत्र स्वर्णस्तेयप्रायश्चित्तमाह **मनुः** (११।९९–१०२)—

"सुवर्णस्तेयकृद्विप्रो राजानमभिगम्य तु। स्वकर्म ख्यापयन् ब्रूयान्मां भवाननुशास्त्विति॥

"गृहीत्वा मुसलं राजा सकृद्धन्यात्तु तं स्वयम्। वधेन शुध्यति स्तेनो ब्राह्मणस्तपसैव वा॥

"तपसापनुनुत्सुस्तु सुवर्णस्तेयजं मलम्। चीरवासा द्विजोऽरण्ये चरद्ब्रह्महणो व्रतम्॥

"एतैर्व्रतैरपोहेत तत्पापं स्तेयकृत् द्विजः"॥ वधपक्षो नामधारकमात्रविप्रविषयः तपःपक्षस्तु वनस्थत्वादिगुणोपेतब्राह्मणविषय इति **माधवीये।**

अत्र सुवर्णशब्दः परिमाणविशेषोपेतहेमवचनः। तथा च **याज्ञवल्क्यः** (आ. ३६२–३६३)—

"जालसूर्यमरीचिस्थं त्रसरेणुरजः स्मृतम्। तेऽष्टौ लीक्षा तु तास्तिस्रो राजसर्षप उच्यते।

---

१ ग–स्नानं।

" गौरस्तु ते त्रयः षट् ते यवमध्यस्तु ते त्रयः । कृष्णलः पञ्च ते माषस्ते सुवर्णं तु षोडश" ॥ इति ।

स्तेयस्वरूपमाह व्यासः—

" समक्षं वा परोक्षं वा बलाच्चौर्येण वा पुनः । परस्वानामुपादानं स्तेयमित्युच्यते बुधैः " ॥

अपहृतं धनं स्वामिने दत्त्वैव स्तेयप्रायश्चित्तं कर्तव्यम्

" स्तेये ब्रह्मस्वभूतस्य सुवर्णादेः कृते पुनः । स्वामिनेऽपहृतं दत्वा हत्यांनिष्कृतिमाचरेत् " ॥ इति **स्मरणात्** ।

यदा सुवर्णमपहृत्य तदभुक्त्वा तदानीमेवानुतापेन प्रत्यर्पयेत् तदा **आपस्तम्बोक्तं** द्रष्टव्यम् (१।२५।१०)—" चतुर्थकालं मिताशनेन त्रिवर्षमवस्थानम् " इति ।

मनसापहारे तु **सुमन्तुराह**—" स्वर्णस्तेयी द्वादशरात्रं वायुभक्षः पूतो भवति " ॥ इति ।

याज्ञवल्क्यः (प्रा. २५७–२५८)-

" ब्राह्मणः स्वर्णहारी तु राज्ञे मुसलमर्पयेत् । स्वकर्म ख्यापयंस्तेन हतो मुक्तोऽपि वा शुचिः ॥

" अनिवेद्य नृपे शुध्येत् सुरापव्रतमाचरेत् । आत्मतुल्यं सुवर्णं वा दद्याद्विप्राय तुष्टिकृत् " ॥ इति ।

पराशरः (१२।६९–७०)—

" अपहृत्य सुवर्णं तु ब्राह्मणस्य ततः स्वयम् । गच्छेन्मुसलमादाय राजानं स्वयमेव तु ॥

" ततः शुद्धिमवाप्नोति राज्ञाऽसौ मुक्त एव च । कामतस्तु कृतं यत्स्यान्नान्यथा वधमर्हति " ॥ इति ।

आपस्तम्बः (१।९।२५।४)—" स्तेनः प्रकीर्णकेशोंऽसे मुसलमादाय राजानं गत्वा कर्माचक्षीत । तेनैनं हन्याद्वधे मोक्षः " ॥ इति ।

हेमाद्रौ–"हत्वा ब्रह्मस्वमज्ञात्वा द्वादशाब्दं तु पूर्ववत् । कपालध्वजहीनं तु ब्रह्महत्याव्रतं चरेत् ॥

" यद्वांऽसे मुसलं धृत्वा विस्रस्यात्मशिरोरुहान् । गत्वा राजानमाचष्टे प्रहृतस्तेनमस्तके ॥

" मृत्वा शुद्धिमवाप्नोति नान्यथा शुद्धिरिष्यते ॥

" गुरूणां यज्ञकर्तॄणां धर्मिष्ठानां तथैव च । श्रोत्रियाणां द्विजानां तु हृत्वा हेम कथं भवेत् ॥

" तच्छुध्यर्थं स्वदेहे तु संपूर्णं लेपयेत् घृतम् । कारीषाच्छादितो दग्धः स्तेयपापात्प्रमुच्यते " ॥

अल्पस्वर्णापहरणे प्रायश्चित्तमाह **गौतमः**—

" त्रसरेणुसमं हेम हृत्वा कुर्यात्समाहितः । प्राणायामद्वयं सम्यक् तेन शुध्येन्न संशयः ॥

" प्राणायामत्रयं कृत्वा हृत्वा लीक्षाप्रमाणकम् । प्राणायामाश्च चत्वारो राजसर्षपमात्रतः ॥

" गौरसर्षपमात्रं तु हृत्वा हेम विचक्षणैः । स्नात्वा च विधिवत्कार्यं गायत्र्यष्टसहस्रकम् ॥

" यवमध्यसुवर्णस्य स्तेये शुद्धो जपेद्द्विजः । आ सायं प्रातरारभ्य गायत्रीं वेदमातरम् ॥

" हेम्नः कृष्णलमात्रस्य हृत्वा सान्तपनं चरेत् । माषमात्रसुवर्णस्य प्रायश्चित्तं तु कथ्यते ॥

" गोमूत्रपक्वयवभुक् देवार्चनपरायणः । मासत्रयेण शुद्धिः स्यान्नारायणपरायणः ॥

" रूप्यमात्रसुवर्णस्य स्तेयं कृत्वा प्रमादतः । जपेद्वै लक्षगायत्रीमन्यथा दोषमाप्नुयात् ॥

" निष्कमात्रस्य हेम्नस्तु हरणे विप्रसत्तमः । ब्रह्महत्याव्रतं कृत्वा षडब्दं शुद्धिमाप्नुयात् ॥

" किञ्चिन्न्यूनसुवर्णस्य स्तेये तु द्विजसत्तमः । गोमूत्रपक्वयवभुगब्देनैकेन शुध्यति ।

" संपूर्णस्य सुवर्णस्य स्तेयं कृत्वा मुनीश्वरैः । ब्रह्महत्याव्रतं कुर्याद्द्वादशाब्दान्समाहितः " ॥

---

१ क्ष–पश्चान्नि । २ ग–बंधाय । ३ ग–न । ४ कग–द्व । ५ ग–लि । ६ ग–मात्र । ७ ग–रा ।

अज्ञानादपहृतस्य सुवर्णस्य पुनर्दाने तु प्रायश्चित्तं स एवाह—

" ब्रह्मस्वं यस्तु हृत्वा च पश्चात्तापमवाप्य च । पुनर्दत्वा तु विप्रेभ्यः प्रायश्चित्तमिदं चरेत् ॥
" कृच्छ्रं सान्तपनं कृत्वा द्वादशाहोपवासतः । शुद्धिमाप्नोति विप्रेन्द्र अन्यथा पतितो भवेत्" ॥ इति ।

क्षत्रियादीनां स्तेयप्रायश्चित्तम् । राज्ञां स्तेयप्रकारोऽभिहितः **शिवरहस्ये**—

" अन्यायाद्विप्रग्रामेषु अनाथेभ्यो धनं च यत् । अदण्ड्येभ्योऽपि यद्वित्तं स्तेयं तद्भूभुजामिह ॥
" स्तेयं कृत्वा सुरां पीत्वा मृत्वा राजा विशुध्यति " । **नागरखण्डे**—
"ऊरुजस्तु सुरां पीत्वा हृत्वा स्वर्णं द्विजन्मनाम् । राजा च शुद्धिमाप्नोति यच्छेद्वा ब्युतं गवाम् ।
"पादजस्तु सुरां पीत्वा हृत्वा हेम द्विजन्मनाम् । राज्ञा दण्ड्यः स्वधर्मेण मुसलेन हतः शुचिः" ॥ इति ।

कात्यायनः—
" विप्रादीनां तु नारीणां स्तेयं वा पानमेव वा । संभवेद्यदि दैवेन नेच्छन्ति मरणं बुधाः ॥
" त्याज्या एव स्त्रियस्ताश्च न पोष्या धर्मलिप्सुभिः " ॥ इति ।

रजतस्तेयप्रायश्चित्तम् । रजतस्तेये **नारदः**—

" सुवर्णमानं यस्मिन्वै रजतं स्तेयकर्मणि । कुर्यात्सान्तपनं सम्यगन्यथा पतितो भवेत् ॥
" दशनिष्कान्तपर्यन्तमूर्ध्वनिष्कचतुष्टयात् । हृत्वा तु रजतं विद्वान् कुर्याच्चान्द्रायणं द्विजः ॥
" ततो विंशतिनिष्कान्तं रजतस्तेयकर्मणि । चान्द्रायणद्वयं प्रोक्तं तत्पापं परिशोधनम् ॥
" शतादूर्ध्वं सहस्रान्तं प्रोक्तं चान्द्रायणद्वयम् । सहस्रादधिकस्तेये ब्रह्महत्याव्रतं चरेत् " ॥

ताम्रस्तेये प्रायश्चित्तम् । ताम्रस्तेये **हैमाद्रौ**—
" पलद्वये पञ्चगव्यं पीत्वा शुद्धिमवाप्नुयात् । प्राजापत्यं पञ्चपले तप्तं दशपले स्मृतम् ।
" विंशत्पले तु चान्द्रं स्यात्स्यात्पञ्चाशति तु त्रयम् । ताम्रं षष्टिपले प्रोक्तं मासं कृत्वाऽघमर्षणम् ॥
" कण्ठदघ्नजले स्थित्वा शुद्धिमाप्नोति पूर्वजः । ताम्रेऽशीतिपले तत्र स्तेयं कृत्वा तु पूर्वजः ॥
" भूपरिक्रमणं कृत्वा भूयश्चान्द्रं ततः परम् । हृत्वा शतपलं ताम्रं स्वर्णस्तेयसमं विदुः " ॥ इति ।
स्वर्णचतुष्टयपरिमितं पलम्
"पलं सुवर्णं चत्वारि तच्चत्वारि ध्रुवो भवेत् । चत्वारिंशद्ध्रुवाणां च भार इत्युच्यते बुधैः" ॥ इति **स्मृतेः** ।

कांस्यादिस्तेये प्रायश्चित्तम् । **चतुर्विंशतिमते**—

" कांस्यपित्तलमुख्येष्वयस्कान्तेषु पञ्चसु । सहस्रनिष्कमानं तु पारक्यं परिकीर्तितम् ॥
" प्रायश्चित्तं तु लोहानां स्तेये रजतवत्स्मृतम् " ॥ इति ।

धनधान्यादिस्तेयप्रायश्चित्तम् । **मनुः** (११।१६२-१६९)—
" धान्यान्नधनचौर्याणि कृत्वा कामाद् द्विजोत्तमः । स्वजातीयगृहादेव कृच्छ्राब्देनैव शुध्यति ॥
" मनुष्याणां तु हरणे स्त्रीणां क्षेत्रगृहस्य च । कूपवापीजलानां च शुद्धिश्चान्द्रायणं स्मृतम् ॥
" द्रव्याणामल्पसाराणां स्तेयं कृत्वाऽन्यवेश्मनः । चरेत्सान्तपनं कृच्छ्रं निर्यात्यात्मविशुद्धये ॥
" भक्ष्यभोज्यापहरणे यानशय्यासनस्य च । पुष्पमूलफलानां च पञ्चगव्यं विशोधनम् ॥
" तृणकाष्ठद्रुमाणां च शुष्कान्नस्य गुडस्य च । चेलचर्मामिषाणां च त्रिरात्रं स्यादभोजनम् ॥
" मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च । अयःकांस्योपलानां च द्वादशाहं कणान्नता ॥
" कार्पासकीटजीर्णानां द्विखुरैकखुरस्य च । पक्षिगन्धौषधीनां च रज्ज्वाश्च त्र्यहः पयः ॥
" एतैर्व्रतैरपोहेत पापं स्तेयकृतं द्विजः " ॥

---

१ क्ष- द्विशतं । २ क- कान्तो ।

भूम्यपहारप्रायश्चित्तम् । भूम्यपहारे दोषाधिक्यमाह **पराशरः** (७।५)—
" वापिकूपतटाकाद्यैर्वाजपेयशतैरपि । गवां कोटिप्रदानेन भूमिहर्ता विशुध्यति " ॥
नारदः—" केदारे तप्तकृच्छ्रं स्याद्गृहादेश्चान्द्रमीरितम् " ॥ इति ।
राजदण्डमाह**आपस्तम्बः** (२।१०।२७।१६-१७)"अयमस्य दण्डः। पुरुषवधे स्तेये भूम्यादान इति । चक्षुर्निरोधस्त्वेतेषु ब्राह्मणस्य " इति । भूम्यादानं भूम्यपहारः । पुरुषवधादिषु शूद्रो वध्यः। ब्राह्मणस्य तु पट्टबन्धादिना चक्षुषी निरोद्धव्ये न तत्पाटयितव्ये 'न शारीरो ब्राह्मणे दण्ड' इति 'अक्षतो ब्राह्मणो व्रजेत्' इत्यादिस्मरणात् । **वस्त्रादिस्तेयप्रायश्चित्तम्** । **देवस्वामी**—
" स्थूलतन्तुकृते वस्त्रे स्तेयं कृत्वा तु पूर्वजः । पश्चात्तापसमायुक्तः प्राजापत्यं समाचरेत् ॥
" सूक्ष्मतन्तुकृते वस्त्रे पराकं मुनिचोदितम् । पीतवस्त्रं मुषित्वा तु तप्तकृच्छ्रद्वयं चरेत् ॥
" नीलमये सूक्ष्मवस्त्रे चरेच्चान्द्रायणत्रयम् ।
" मूल्याधिके पट्टवस्त्रे कौशेये च मुनीश्वराः । सद्यः पतति पापात्मा घृताक्तोऽग्निं विशेत्तदा " ॥

अजादिहरणे प्रायश्चित्तम् । **जाबालिः**—
" अजं बस्तं गृहेऽरण्ये पारक्यं गर्वितो द्विजः । मुषित्वा निष्कृतिं तत्र प्राजापत्यं समाचरेत् " ॥
मार्कण्डेयः—
" मार्जारं नकुलं सर्पं भारद्वाजं कपिं तथा । कृच्छ्रार्धमाचरेद्धत्वा ज्ञात्वा तद्द्विगुणं चरेत् ॥
" द्विजानां तल्पहरणे प्रायश्चित्तं प्रजापतिः । प्राह चान्द्रं पराकं च तप्तं चैव यथाक्रमम्" ॥ इति ।
मरीचिः—
" यो विप्रः पापमज्ञात्वा उपानत्पादुके हरेत् । स तु देहविशुध्यर्थं प्राजापत्यं समाचरेत् ॥
" छत्रं हरेद्द्विजो यस्तु महातपनिवारणम् । वस्त्रावृते पराकं स्यात्केतकीपर्णसंवृते ॥
" यावकं तालपत्रैश्च निर्मितं राजवल्लभे । पञ्चगव्यं पिबेत्पश्चात्सर्वपापविनाशनम् ॥
" पुष्पजालं हि पारक्यं देवपूजार्थमादरात् । सुगन्धिकरवीरादि हृत्वा विप्रः स पापभाक् ॥
" देवार्थं पुष्पहरणे चान्द्रं वत्सरसेवनात् । पराकं ब्रह्मनिर्माणे कार्यं क्षत्रियवैश्ययोः " ॥ इति ।
देवलः—
" कदलीमातुलुङ्गं च नालिकेरं च पानसम् । द्राक्षाखर्जूरजम्बीरचूतजम्बूफलानि च ॥
" फलानि विविधानीह देवप्रियकराणि वै । हृत्वा विप्रस्तु पारक्यं प्रायश्चित्तमिदं चरेत् ॥
" ऋतुत्रये पराकं स्याद्वत्सरे चान्द्रमुच्यते " ॥ इति ।
गृहोपकरणहरणे प्रायश्चित्तमाह **गौतमः**—" मुसलं दृषदं चैव ह्युलूखलमनन्तरम् ।
" वेणुपात्रं तथा शूर्पं मृन्मयं भाण्डमेव च । गृहोपकरणं हृत्वा पुनः संस्कारमर्हति " ॥ इति ।

सालग्रामादेः पूजोपकरणस्य च हरणे प्रायश्चित्तम् । **देवलः**—
" सालग्रामं शैवलिङ्गं प्रतिमां चक्रपाणिनः । घण्टामुपस्करं विप्रो यो हरेत्पापबुद्धिमान् ॥
" सालग्रामे तु चान्द्रं स्याच्छिवलिङ्गे तथैव च । प्राजापत्यं चक्रपाणेरितरेषु तथैव च ॥
" शतादूर्ध्वं तु रुद्राक्षं हृत्वा चान्द्रत्रयं स्मृतम् । शते पराकमल्पे तु गायत्रीजपमाचरेत् " ॥
नारदः—" लेखनीं बन्धसूत्रं च पुस्तकं फलकं तथा ।
" हृत्वा दत्वा तु तद्द्रव्यं पश्चात्तापसमन्वितः । प्राजापत्यं चरेत्कृच्छ्रं तदा देहविशुद्धये " ॥

माध्यस्थ्येन धनग्रहणे प्रायश्चित्तम् ।
देवलः—"व्यवहारादिकलहे प्रायश्चित्तादिकर्मसु । धनं गृहीत्वा यो विप्रः कौटसाक्ष्यं वदेत चेत् ॥
" तस्य पुत्राश्च पौत्राश्च तदा नाशमवाप्नुयुः । तस्य देहविशुद्ध्यर्थं महाचान्द्रमुदीरितम् " ॥ इति ।

---

१ ग-क ।

मनुः—"द्विजवादे महाचान्द्रं धर्मशास्त्रे तदर्धतः । इतरेषु विवादेषु कायकृच्छ्रं समाचरेत् " ॥ इति ।
देवलः—" ग्रामणीः प्राड्विवाकश्च राजद्वारे पुरोहितः ।
"प्रजाभ्यः कार्यसिद्ध्यर्थं यो हरेत्तस्य निष्कृतिः । एकवारे तु चान्द्रं स्यान्महाचान्द्रं द्विवारतः"॥इति ।
मनुः (८।३४०)—
" वानस्पत्यं फलं मूलं दार्वग्न्यर्थं तृणानि च । तृणं च गोभ्यो गृह्यार्थमस्तेयं मनुरब्रवीत् ॥
" चणकव्रीहिगोधूमयवानां मुद्गमाषयोः । अनिषिद्धो ग्रहीतव्यो मुष्टिरेकोऽध्वनिस्थितैः " ॥ इति ।
आपस्तम्बः (१।१०।२८।१-५)—" यथाकथा च परपरिग्रहमभिमन्यते स्तेनोह भवतीति कौत्सहारीतौ तथा कण्वपौष्करसादी । सन्त्यपवादाः परिग्रहेष्विति वार्ष्यायणिः । शम्योषा युग्यघासो न स्वामिनः प्रतिषेधयन्त्यभिव्यपहारो भवति । सर्वत्रानुमतिपूर्वमिति हारीतः " इति । शम्योषाः कोशधान्यानि माषमुद्गादयः । ध्वनिस्थितैः **गौतमः** (१२।२५)—
" गोग्न्यर्थे तृणमेधान्वीरुद्वनस्पतीनां च पुष्पाणि स्ववदाददीत फलानि चापरिवृतानाम् " ॥ इति ।
मनुः (८।३४२)—
" द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके । आददानः परक्षेत्रान्न हस्तच्छेदमर्हति " ॥ इति ।
अत्र द्विज इति विशेषणाच्छूद्रस्तु दण्ड्य एव । तथा च **स्मृत्यन्तरेऽपि**—
"तृणं वा यदि वा काष्ठं मूलं वा यदि वा फलम् । अनापृष्ट्वस्तु गृह्णानो हस्तच्छेदनमर्हति"॥ इति ।

अथागम्यागमनप्रायश्चित्तम् । गुरुतल्पगमने प्रायश्चित्तम् ।

गुरुतल्पगमनस्य प्रायश्चित्तमाह **मनुः** (११।१०३-१०७)—
" गुरुतल्प्यभिभाष्यैनस्तप्ते स्वप्यादयोमये । सूर्मीं ज्वलन्तीमाश्लिष्य मृत्युना स विशुध्यति ॥
" स्वयं वा शिश्नवृषणावुत्कृत्याधाय चाञ्जलौ । नैर्ऋतीं दिशमातिष्ठेदा निपातादजिह्मगः ॥
" खट्वाङ्गी चीरवासा वा श्मश्रुलो निर्जने वने । प्राजापत्यं चरेत् कृच्छ्रमब्दमेकं समाहितः ॥
" चान्द्रायणं वा त्रीन्मासानभ्यस्येन्नियतेन्द्रियः । हविष्येण यवाग्वा वा गुरुतल्पापनुत्तये ॥
" एतैर्व्रतैरपोहेयुर्महापातकिनो मलम् " ॥ इति । **याज्ञवल्क्यः** (प्रा. २५९-२६०)—
" तप्तेऽयःशयने सार्धमायस्या योषिता स्वपेत् । गृहीत्वोत्कृत्य वृषणौ नैर्ऋत्यां वोत्सृजेत्तनुम् ॥
" प्राजापत्यं चरेत्कृच्छ्रं समा वा गुरुतल्पगः । चान्द्रायणं वा त्रीन्मासानभ्यसेद्वेदसंहिताम्" ॥ इति ।
पराशरः (१०।१०-११)—
" मातरं यदि गच्छेत्तु भगिनीं स्वसुतां तथा । एतास्तु मोहितो गत्वा त्रीणि कृच्छ्राणि सञ्चरेत् ।
"चान्द्रायणत्रयं कुर्यात् शिश्नच्छेदेन शुध्यति " ॥ एतद्व्याख्यातं **माधवीये**—मातरं जननीं भगिनीमेकोदराम् । अत्र त्रीणि प्रायश्चित्तानि । प्राजापत्यत्रयमेकं चान्द्रायणत्रयं द्वितीयं शिश्नच्छेदस्तृतीयम् । तच्च त्रयं मैथुनप्रकारभेदविषयतया योजनीयम् । मैथुनं चाष्टविधम्—
" स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम् । सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृत्तिरेव च ॥
" एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः " ॥ इति **स्मरणात्** । तत्र आद्यं व्रतमल्पत्वादप्रवर्तकस्मरणादिपञ्चविधापराधविषयम् । द्वितीयं तु सङ्कल्पाध्यवसायविषयम् । तृतीयं त्वतिमहत्वात् क्रियानिर्वृत्तिविषयम् इति । रेतस्सेकात्पूर्वं तु निवृत्तौ ब्रह्महत्याव्रतं कार्यम्
" रेतःसेकात्पूर्वमेव निवृत्तो यदि मातरम् । ब्रह्महत्याव्रतं कुर्यात् कपालध्वजवर्जितम् ॥

१ ग-निर्जितः । २ ग-यैहो । ३ क-ति । ४ क-यसो । ५ क्ष-वदन्ति ब्रह्मचारिणः ।

"रेतस्सेकान्तनिर्वृत्तौ मुष्कच्छेदनमर्हति" । इति **स्मृतेः** । **वसिष्ठः** (अ. २० सू. १३)—"सवृषणं शिश्नमुत्कृत्याञ्जलावाधाय दक्षिणामुखो गच्छेत् यत्रैव प्रतिहतस्तत्रैव तिष्ठेदाप्रलयात्" इति । **आपस्तम्बः** (१।९।२५।१)—"गुरुतल्पगामी सवृषणं शिश्नं परिवास्याञ्जलावाधाय दक्षिणां दिशमनावृत्तिं व्रजेत् ज्वलितां वा सूर्मिं परिष्वज्य समाप्नुयात्" इति । अत्र **हरदत्तः**—गुरुरत्र पिता नाचार्यादिः । तल्पशब्देन शयनवाचिना भार्या लक्ष्यते । सा च साक्षाज्जननी । न तत्सपत्नी । तां गत्वा साण्डं शिश्नं क्षुरादिना छित्वाऽञ्जलावाधाय दक्षिणां दिशमनावर्तमानो गच्छेत् । आयसी ताम्रमयी वाऽन्तस्सुषिरा स्त्रीप्रतिकृतिसूर्मिः । तामग्नौ तप्तां परिष्वज्य समाप्नुयात् म्रियेत वा ।

संवर्तः—

"पितृदारान् समारुह्य मातृवर्जं नराधमः । भगिनीं मातुराप्तां वा स्वसारं वाऽन्यमातृजाम् ॥
"एतां गत्वा स्त्रियो मोहात् तप्तकृच्छ्रं समाचरेत्" इति । **पराशरः** (१०।१३-१४)—
"पितृदारान् समारुह्य मातुराप्तां च भ्रातृजाम् । गुरुपत्नीं स्नुषां चैव भ्रातृभार्यां तथैव च ॥
"मातुलानीं सगोत्रां च प्राजापत्यत्रयं चरेत् । गोद्वयं दक्षिणां दत्वा शुध्यते नात्र संशयः" ॥ इति ।

माधवीये व्याख्यातमेतत्—मातुराप्ता मातुः सखी । भ्रातृजा ज्येष्ठस्य कनिष्ठस्य वा सुता । गुरवः आचार्यविद्यादातृज्येष्ठभ्रातृऋत्विजः । अभयदाताऽन्नदाता च । अकामतः सकृत् गमने इदं प्रायश्चित्तमिति । अकामकृतगमने रेतस्सेकात् प्राङ्निवृत्तौ तु **शंखः**—

"चण्डालीं पुल्कसीं म्लेच्छीं स्नुषां च भगिनीं सखीम् । मातापित्रोः स्वसारं च निक्षिप्तां शरणागताम् ॥
"मातुलानीं प्रव्रजितां सगोत्रां नृपयोषितम् । शिष्यभार्यां गुरोर्भार्यां गत्वा चान्द्रायणं चरेत्" ॥ इति ।

कामकृतगमने रेतःसेकान्तनिर्वृत्तौ **नारदः** (१२।७३-७५)—

"माता मातृष्वसा श्वश्रूर्मातुलानी पितृष्वसा । पितृव्यसखिशिष्यस्त्री भगिनी तत्सखी स्नुषा ॥
"दुहिताचार्यभार्या च सगोत्रा शरणागता । राज्ञी प्रव्रजिता धात्री साध्वी वर्णोत्तमा च या ॥
"आसामन्यतमां गत्वा गुरुतल्पग उच्यते । शिश्नस्योत्कर्तनं तत्र नान्यो दण्डो विधीयते" ॥ इति ।

पराशरोऽपि—

"मातृष्वसृगमेऽप्येवमात्ममेढ्रनिकृन्तनम् । अज्ञानेन तु यो गच्छेत् चरेच्चान्द्रायणद्वयम् ॥
"दश गोमिथुनं दद्याच्छुद्धिं पाराशरोऽब्रवीत्" । इति । अत्र मातृष्वसृग्रहणं श्वश्र्वादेरुपलक्षणम् । कलौ मरणान्तप्रायश्चित्तस्य निषेधात् । "खट्वाङ्गी चीरवासा वा" इति (११।१०५) **मन्वाद्युक्तं** प्रायश्चित्तान्तरं कर्तव्यम् ।

सवर्णागमने प्रायश्चित्तम् । सवर्णागमने प्रायश्चित्तमाह **आपस्तम्बः** (२।१०।२७।११-१३)—"सवर्णायामन्यपूर्वायां सकृत्सन्निपाते पादः पततीत्युपदिशन्त्येवमभ्यासे पादः पादश्चतुर्थे सर्वमिति" ॥ अत्र **हरदत्तः**—अन्यः पूर्वः पतिर्यस्याः सा अन्यपूर्वा परभार्या । तस्यां सवर्णायां सकृदभिगमने पादः पतति । पतितस्य द्वादशवार्षिकं प्रायश्चित्तम् । तस्य तुरीयोंऽशस्त्रीणि वर्षाणि । एतच्च श्रोत्रियभार्यायां ऋतुकाले कामतः प्रथमदूषकस्य ब्राह्मणस्य । एवमभ्यासे प्रत्यभ्यासं पादः पादः पतति । अतश्चतुर्थे सन्निपाते सर्वमेव पतति । ततश्च पूर्णं द्वादशवार्षिकं कर्तव्यम् । तृतीये नववर्षाणि द्वितीये षडिति" । **संवर्तः**—

"ब्राह्मणो ब्राह्मणीं गत्वा प्राजापत्यं समाचरेत् । एवं शुद्धिः समाख्याता संवर्तवचनं यथा" ॥ इति ।

व्याघ्रः—"ब्राह्मणो ब्राह्मणीं गच्छेदकामां यदि कामतः। कृच्छ्रं चान्द्रायणं कुर्यादर्धमेव प्रमादतः॥
"अर्धकृच्छ्रं सकामायां तप्तकृच्छ्रं सकृद्रतौ। अर्धमर्धं नृपादीनां दारेषु ब्राह्मणश्चरेत्॥
"एतद्व्रतं चरेत्सार्धं श्रोत्रियस्य परिग्रहे। अश्रोत्रियश्चेद्द्विगुणमगुप्तामर्धमेव च"॥

क्षेत्रिणः प्रायश्चित्तविशेषानादेशात्सामान्यप्रायश्चित्तं द्रष्टव्यम्। तच्च **याज्ञवल्क्येन** दर्शितम् (प्रा. ३०६)—

"प्राणायामशतं कुर्यात्सर्वपापापनुत्तये। उपपातकजातानामनादिष्टस्य चैव हि"॥ इति।

संबन्ध्यादिस्त्रीगमने प्रायश्चित्तम्।

चतुर्विंशतिमते—"संबन्धिनः स्त्रियं गत्वा सपादं कृच्छ्रमाचरेत्॥
"विधवागमने कृच्छ्रमहोरात्रसमन्वितम्। व्रतस्थागमने कृच्छ्रं सपादं तु समाचरेत्॥
"सखिभार्यां समारुह्य ज्ञातिस्वजनयोषितः। स कृत्वा प्राकृतं कृच्छ्रं पादं कुर्यात्ततः पुनः।
"कुमारीगमने विप्रश्चरेच्चान्द्रायणं व्रतम्। पतितां तु द्विजो गत्वा तदेव व्रतमाचरेत्"॥

स्वैरिणीगमने प्रायश्चित्तम्। स्वैरिणीगमने **शंखलिखितौ**—"स्वैरिण्यां वृषल्यामवकीर्णः सचेलः स्नात उदकुंभं दद्यात्। ब्राह्मणाय वैश्यायां चतुर्थकालाहारो ब्राह्मणान् भोजयेत्। क्षत्रियायां त्रिरात्रोषितो यवाढकं दद्यात्। ब्राह्मण्यां त्र्यहमुपोष्य घृतपात्रं दद्यादिति"। वर्धकीगमने **षड्त्रिंशे** प्रायश्चित्तमुक्तम्—

"ब्राह्मणीं वार्धकीं गत्वा किञ्चिद्दद्यात् द्विजातये। राजन्यां तु धनुर्दद्यात् वैश्यां गत्वा तु चेलकम्।
"शूद्रां गत्वा तु वै विप्र उदकुंभं द्विजातये। दिवसोपोषितो वा स्यात् दद्याद्विप्राय भोजनम्"॥ इति।

तल्लक्षणं **स्मृत्यन्तरे**ऽभिहितम्—"चतुर्थे स्वैरिणी प्रोक्ता पञ्चमे वर्धकी भवेत्"॥ इति। इदं च गर्भानुत्पत्तिविषयम्। तदुत्पत्तौ तु **उशनाः**—"गमने तु व्रतं यत्स्यात् गर्भे तद् द्विगुणं चरेत्"।

गर्भोत्पादने प्रायश्चित्तम्। जातिभेदेन गर्भाधाने **चतुर्विंशतिमते**ऽभिहितम्—
"ब्राह्मणीगमने कृच्छ्रं गर्भे सान्तपनं स्मृतम्। राज्ञीगर्भे पराकं स्याद्विड्गर्भे तु त्र्यहाधिकम्॥
"शूद्रागर्भे द्विजः कुर्यात्तद्वच्चान्द्रायणव्रतम्। चण्डाल्यां गर्भमारोप्य गुरुतल्पव्रतं चरेत्"॥ इति।

चण्डाल्यादिगमने प्रायश्चित्तम्। चण्डालीगमने **पराशरः** (५।१०)—
"चण्डालीं वा श्वपाकीं वाऽप्यनुगच्छति यो द्विजः। त्रिरात्रमुपवासित्वा विप्राणामनुशासनात्॥
"सशिखं वपनं कृत्वा प्राजापत्यद्वयं चरेत्। गोद्वयं दक्षिणां दद्याच्छुद्धिं पाराशरोऽब्रवीत्"॥ इति।

ब्राह्मण्यां शूद्राज्जाता चण्डाली। आरूढपतिताज्जाता सगोत्राज्जाता च। एतत्त्रिविधचण्डालसन्ततौ जाता स्त्री चण्डाली। उग्रात् क्षत्तायां[3] जाता श्वपाकी। द्विजो ब्राह्मणः। **यमः**—
"चण्डालपुल्कसानां तु गत्वा भुक्त्वा च योषितम्। कृच्छ्राब्दमाचरेत् ज्ञानादज्ञानादैन्दवद्वयम्"॥

एतदभ्यासविषयम्। **नारदः**—
"चण्डालीं तु द्विजः पूर्वमज्ञात्वा कामपीडितः। पश्चात् ज्ञात्वा तु चण्डालीं शुद्धिमिच्छन्मनस्यथ॥
"रामसेतुमुपागम्य चापाग्रे प्रत्यहं शुचिः। प्रातः स्नात्वा मासमात्रं पूर्ववच्छुद्धिमाप्नुयात्"॥ इति।

गौतमः—"द्विजः कामातुरो गच्छन्नविचार्य च सङ्गमम्॥
"पश्चाच्चाण्डालजातीयां ज्ञात्वा शुद्धिं परायणः। रामेश्वरधनुष्कोट्यां प्रातः स्नात्वा विशुध्यति"॥

---

१ ग–मेव। २ क्ष–कुर्यात्। ३ गघ–क्षत्तुरुग्रायां।

यमः—
" रेतः सिक्त्वा कुमारीषु स्वयोनिष्वन्त्यजासु च । सपिण्डापत्यदारेषु प्राणत्यागो विधीयते" ॥ इति।
एतत्संवत्सराभ्यासविषयम् । **जाबालिः**—
" चण्डालीं रूपसंपन्नां दृष्ट्वा विप्रोऽसकृद् व्रजन् । स चण्डालसमो ज्ञेयः कारीषवधमर्हति ॥
" चापाग्रे मासमात्रं तु प्रातःस्नानाद्विशुध्यति । तद्गर्भधारणे विप्रो मुष्कच्छेदनमर्हति " ॥ इति ।
देवलः—
" चण्डालश्च तुलुष्कश्च द्वावेतौ तुल्यपापिनौ । तदङ्गना तथा ज्ञेया विप्रैः पापभयातुरैः ॥
"ज्ञात्वाऽज्ञात्वा तुलुष्कीं यो द्विजः कामातुरः सकृत् । गत्वा शुद्धिमवाप्नोति चण्डालीगमने यथा"॥इति।
संवर्तः—
" पुल्कसीगमनं कृत्वा कामतोऽकामतोऽपि वा । कृच्छ्रं चान्द्रायणं कुर्यात्ततो मुच्येत किल्बिषात् ॥
" नटीं शैलूषकीं चैव रजकीं बुरुडीं तथा । एतासु गमनं कृत्वा चरेच्चान्द्रायणद्वयम् " ॥
चान्द्रायणद्वयमभ्यासविषयं बलात्कारविषयं च । तथा **जाबालिः**—
" द्विजः कामातुरो ग्रामचण्डालीं रजकाह्वयाम् । अज्ञानाद्रमयेत्पापी प्रायश्चित्तं समाचरेत् ॥
" उभयोरैकमत्यं चेत्तत्र चान्द्रं विदुर्बुधाः । बलात्कारेण द्वैगुण्यमभ्यासे च तथा स्मृतम् "॥ इति ।
" रेतःसेकात्पूर्वमेव प्राजापत्यं विशोधनम् । नटिनीं च द्विजो गच्छन् चरेच्चान्द्रायणव्रतम् ॥
" तां गत्वाऽनेकवारं तु चरेच्चान्द्रायणद्वयम् । केशसंवपनं कृत्वा पुनःसंस्कारमर्हति ॥
" वर्षादूर्ध्वं तु पतितः स्यादेवात्र न संशयः " ॥ नटिनीस्वरूपमुक्तं **हेमाद्रौ**—
" देवालये राजगृहे गृहीत्वा भृतिमादरात् । मासि मासि च वर्षे वा प्रत्यहं वाऽथ नृत्यति ॥
"सोऽयं नट इति ख्यातः सर्वधर्मबहिष्कृतः । तस्य संबन्धिनी नारी नटिनीति स्मृता जनैः" ॥ इति ।
स्मृत्यन्तरे—
" अपि वा मातरं गच्छेन्न गच्छेद्देवदारिकाम् । तां गत्वा तु सकृन्मोहाद्विजश्चान्द्रायणं चरेत् " ॥
नागरखण्डे—
" ये वै कटकुटीरस्था भाषावर्णविभेदिनः । मद्यमांसं निषेवन्ते बुरुडास्ते समीरिताः ॥
" तदङ्गनेयं बुरुडी सर्वपापालया सदा । एकवारं द्विवारं वा दिनत्रयमथापि वा ॥
" तां गत्वा मासमात्रं वा वत्सरं वा विशेषतः । यावकं तप्तकृच्छ्रं च प्राजापत्यं तथैन्दवम् ॥
" वत्सरे पतितो भूयाद्गर्भे तद्वर्णवान् भवेत् "॥ इति ।

षोडशविधग्रामचण्डालीगमने प्रायश्चित्तम् । **पराशरः**—
" रजकश्चर्मकारश्च नटो बुरुड एव च । कैवर्तमेदभिल्लाश्च स्वर्णकारश्च सौचिकः ॥
" तक्षकस्तिलयन्त्री च सूनश्चक्री तथा ध्वजी । नापितः कारुकश्चैवं षोडशैते जघन्यजाः ॥
" तत्स्त्रियो ग्रामचण्डाल्यो विप्रैर्वर्ज्याः प्रयत्नतः " ॥ इति ।

तत्र चर्मकारस्त्रीगमने **देवस्वामी**—
" चर्मकारस्त्रियं गत्वा पराकं दिनमात्रतः । दिनत्रये तु चान्द्रं स्यात् षण्मासात् त्रिंशदाचरेत् ॥
" वत्सरे पतितं विद्यात्कुर्यात्पातितवत्तदा । गर्भे तु निष्कृतिर्नास्ति कारीषदहनादृते " ॥
मार्कण्डेयः—
" कैवर्तस्य स्त्रियं गत्वा बुरुडीगमनोदितम् । प्रायश्चित्तं द्विजः कुर्यात्पुनःसंस्कारमर्हति ॥

---
१ ग–नु ।

" मेदस्त्रीगमनेऽप्येवं प्रायश्चित्तं समाचरेत् "। मेदः वेणुकारः।

नागरखण्डे—

" चण्डालवत्पशून् निघ्नन् प्रत्यहं भावभेदनः। स भिल्ल इति विख्यातः सर्ववर्णबहिष्कृतः॥
" भिल्लस्त्रियं द्विजो गत्वा चण्डालीगन्तृवच्चरेत्।
" स्वर्णकारस्त्रियं गच्छेत् यो विप्रः काममोहितः। एकवारं द्विवारं वा त्रिवारं मासमेव वा॥
" यावकं च पराकं च प्राजापत्यं तथैन्दवम्। यथाक्रमं योजनीयं देहशुद्ध्यर्थमादरात्॥
" तस्योपनयनं भूयो वर्षान्ते पतितो भवेत् "॥ इति। **नारदः**—
" सौचिको वस्त्रसन्धानी यदि तस्य स्त्रियं रमेत्। दिनं दिनत्रयं मासं वर्षं वा गर्भधारणात्॥
" यावकं च पराकं च तप्तमैन्दवमेव च। यथाक्रमं प्रकुर्वीत पतितो गर्भधारणे "॥ इति।

जाबालिः—" तक्षा च तिलयन्त्री च ग्रामचण्डालसंज्ञिकौ॥
" तयोर्यदि रमेन्नारीं ब्राह्मणः कामपीडितः। रामचन्द्रधनुष्कोट्यां स्नानान्मासेन शुद्ध्यति "॥

मार्कण्डेयः—

" सौचिकस्य स्त्रियं गत्वा प्राजापत्यं समाचरेत्। मासत्रये तु चान्द्रं स्यात्तदूर्ध्वं पतितो भवेत्॥
" कुलालस्य स्त्रियं गच्छेद्द्विजो यः काममोहितः। तस्यैषा निष्कृतिर्दृष्टा पूर्ववन्मुनिसत्तमैः॥
" मद्यविक्रयिणो नारीं यो द्विजः कामपीडितः। तस्योपनयनं भूयः प्राजापत्यं दिनत्रये॥
" मासे चान्द्रमृतौ तत्तु द्विगुणं मुनिभिः स्मृतम्। अतः परं न शुद्धिः स्यात्कारीषदहनादृते॥
" अयस्कारस्त्रियं गत्वा क्षौरकस्य तथैव च "॥ इति।

ब्रह्मचण्डालीगमने प्रायश्चित्तम्। ब्रह्मचण्डालस्त्रीगमने प्रायश्चित्तमाह **मनुः**—

" अस्थीनि परकीयानि भृत्यर्थं यो हरेद्द्विजः। पादप्रस्थानमात्रेण स चण्डालसमो भवेत्॥
" मूल्यं गृहीत्वा दाहादिप्रेतकृत्यं करोति यः। काशीं गच्छेत्परार्थं यस्तौ चण्डालसमौ स्मृतौ॥
" एतेषां यः स्त्रियो गच्छेच्चण्डालीगमनोदितम्। प्रायश्चित्तं प्रकुर्वीत कारीषवधवर्जितम्॥
" पुनःसंस्कारविधिना कर्तव्यं विधिचोदनात् "॥ इति।

रजस्वलागमने प्रायश्चित्तम्। रजस्वलागमने **पराशरः** (७।१९)—

" प्रथमेऽहनि चण्डाली द्वितीये ब्रह्मघातिनी। तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुध्यति "॥

चण्डाल्यादिगमने यदुक्तं तद्रजस्वलागमनेऽपीत्यर्थः। तथा च **मार्कण्डेयः**—

" यो विप्रः पञ्चबाणार्तो यमेत्पत्नीं रजस्वलाम्॥
" प्रथमेऽहनि चेत् गच्छेच्चण्डालीगमने च यत्। तत्कृत्वा शुद्धिमाप्नोति ह्यन्यथा दोषभाक् भवेत्॥
" द्वितीयेऽहनि ब्रह्मघ्नी गमने यदुदाहृतम्। तदत्रापि नियोक्तव्यं नान्यथा शुद्धिमाप्नुयात्॥
" तृतीये रजकी सङ्गे प्रायश्चित्तं तदत्र हि। कृत्वा शुद्धिमवाप्नोति इह लोके परत्र च "॥ इति

अज्ञानकृते रजस्वलागमने **मनुः** (११।१७३)—

" अमानुषीषु पुरुषे उदक्यायामयोनिषु। रेतः सिक्त्वा जले चैव कृच्छ्रं सान्तपनं चरेत्।

संवर्तः—

"रजस्वलां च यो गच्छेत् गर्भिणीमष्टमासिकीम्। तस्य पापविशुध्यर्थमतिकृच्छ्रं विशोधनम्"॥ इति।

गौतमः—

" यदा रहः पुष्पवतीं द्विजस्तामुद्वहेद्यदि। कालान्तरे यदा गच्छेत्[3]तदा तां परिवर्जयेत्॥

१ **गघ**-नि। २ **कगघ**-ऋतु। ३ **क्ष**-पश्ये।

"यद्देहे तन्मनःशुद्धिं तदा चान्द्रायणं चरेत्। कामातुरस्तदा वर्तेत्स चण्डालसमो भवेत् ॥
"पुत्रोत्पत्तिर्यदा भूयात्तदा पतित एव सः। माता पिता च पुत्रश्च त्रयस्ते वृषलाः स्मृताः" ॥

विधवागमने प्रायश्चित्तम्। विधवागमने **देवलः**—
"ब्राह्मणो मदलोभेन विधवां विप्रनन्दिनीम्। यभेत्कामातुरः पश्चात् ज्ञात्वाऽसौ पतिवर्जिता ॥
"इति तत्र व्रजेद्गन्धमादनं पर्वतोत्तमम्। तत्र चापाग्रमासाद्य प्रातः स्नायाद्दिनेदिने।
"मासमात्रेण शुद्धिः स्यादन्यथा दोषभाक् भवेत्" ॥ ज्ञानपूर्वके तु गमने **पराशरः**—
"ज्ञात्वा विप्रः सकृद्गत्वा विधवां कामपीडितः। न तस्य निष्कृतिर्दृष्टा कारीषदहनादृते ॥
"उभयोरपि सम्मत्या गच्छेत्तु विधवां द्विजः। त्रिवारं क्ष्मां परिक्रम्य पुनस्संस्कारपूर्वकम् ॥
"पञ्चगव्यं पिबेत् पश्चाच्छुद्धिमाप्नोति पौर्विकीम्" ॥
एतद्गर्भानुत्पत्तिविषयम्। गर्भोत्पाते तु पतितप्रायश्चित्तम्। तथा **हेमाद्रौ**—
"यो विप्रो विधवां साध्वीं गच्छेद्गर्भधारणात्। स चण्डालसमो ज्ञेयः पतितः स्यान्न संशयः" ॥
यत्तु **चतुर्विंशतिमते**ऽभिहितम्— "विधवागमने कृच्छ्रमहोरात्रसमन्वितम्" इति तद्रेतःसेकात्प्राङ्निवृत्त्यभिप्रायम्। **मार्कण्डेयः**—
"दासी मानधनं हन्ति वेश्या हन्ति वयो यशः। विधवाऽऽयुः श्रियं हन्ति सर्वं हन्ति पराङ्गना" ॥

दास्यादिगमने प्रायश्चित्तम्।
"एकस्मिन्नह्नि यो दासीं यभेत्कामातुरः सकृत्। यावकं तत्र कर्तव्यं पराकं तु दिनत्रये ॥
"प्राजापत्यं तथा मासे वर्षे चान्द्रं प्रकल्पितम्। अतःपरमवाप्नोति चण्डालत्वं विगर्हितम् ॥
"द्विजः कामातुरोऽभीक्ष्णं वेश्यां यदि यभेद्भुवि। यदीच्छेच्छुद्धिमतुलां षडब्दं कृच्छ्रमाचरेत् ॥
"पाषण्डशूद्रपतितबौद्धस्त्रीभिर्यभेद्यदि। दिनत्रये यावकं स्यात्तप्तं मासे प्रकीर्तितम् ॥
"गर्भे वा पुत्रजनने बहिष्कारो विधीयते। मद्यपानरतां नारीं द्विजः कामातुरो यभेत् ॥
"मासमात्रे तु चान्द्रं स्यात् षाण्मासे तु षडब्दकम्। वत्सरे पतितो भूयात्तत्प्रायश्चित्तमाचरेत् ॥
"तस्योपनयनं भूयः प्रायश्चित्तं ततः परम्"॥ इति। प्रायश्चित्ताकरणे **आपस्तम्बः** (२।१०।२७।८)—
"नाश्य आर्यः शूद्रायाम्" इति। आर्यस्त्रैवर्णिकः शूद्रायां परभार्यायां प्रसक्तो नाश्यः राज्ञा राष्ट्रान्निर्वास्य इत्यर्थः। **संवर्तः**—
"शूद्रीं तु ब्राह्मणो गत्वा मासं मासार्धमेव वा। गोमूत्रयावकाहारो मासार्धेन विशुध्यति" ॥
आपस्तम्बः (१।१०।२७।१०)—
"अनार्यां शयने बिभ्रद्ददद्वृद्धिं कषायपः। अब्राह्मण इव वन्दित्वा तृणेष्वासीत पृष्ठतः" ॥
अनार्यां शूद्रामुपगच्छन् ददद्वृद्धिं वृध्या जीवन् सुराव्यतिरिक्तं मद्यं कषायः तस्य पाता कषायपः। यश्चाब्राह्मण इव सर्वान् वन्दित्वा स्तौति सः सर्वोऽपि तृणेषूदयादारभ्यासीत यावदादित्यः पृष्ठं तपति पश्चाद्भागं तपतीत्यर्थः। अभ्यासे एवमभ्यासो यावता शुद्धिं मन्यते।

मुखमैथुने प्रायश्चित्तम्। मुखेमैथुने **उशनाः**—"यस्तु ब्राह्मणो धर्मपत्नीं मुखे मैथुनं सेवेत स दुष्यति प्राजापत्येन शुध्यति"।

पश्वादिगमने प्रायश्चित्तम् ॥ पश्वादिगमने **पराशरः** (१०।१५)—
"पशुवेश्यादिगमने महिष्युष्ट्रीकपीस्तथा। खरिणीं सूकरीं गत्वा प्राजापत्यं समाचरेत्" ॥ इति।

---

१ ग-तपो। २ कग-बौद्ध। ३ कग-शूद्र। ४ कग-पञ्चगव्यं। ५ ग-खरीं च।

सकृद्गमने त्वाह **स** एव (१०।१६)—"महिष्युष्ट्रीखरीगामी त्वहोरात्रेण शुध्यति"॥ इति । **स** एव (१०।१६)—"गोगामी च त्रिरात्रेण गामेकां ब्राह्मणे ददत्" ॥ इति । इदं रेतःसेकात्पूर्वनिवृत्तौ वेदितव्यम्

"रेतःसेकान्तगमने कुर्यात्सान्तपनं बुधः । तप्तकृच्छ्रं चरेद्गत्वा गां द्विजो मदनातुरः" ॥ इति स्मरणात् । **मनुः** (११।१७४)—

"मैथुनं तु समासेव्य पुंसि योषिति वा द्विजः । गोयानेऽप्सु दिवा चैव सवासा स्नानमाचरेत्" ॥ इति। गोयाने शकटादौ रेतःस्खलने प्रायश्चित्तम् । रेतःस्खलने **पराशरः** (१२।५७)—

"गृहस्थः कामतः कुर्यात् रेतसः स्खलनं भुवि । सहस्रं तु जपेद्देव्याः प्राणायामैस्त्रिभि सहः"॥ इति । भुवीत्येतद्वस्त्रादेरुपलक्षणम्

"वस्त्रे जले तथा मार्गे कटादौ रेत उत्सृजेत् । परेद्युर्वा तदानीं वा सचेलः स्नानमाचरेत् ॥
"जपेत्सहस्रं गायत्रीं ततः शुद्धिमवाप्नुयात्" ॥ इति **स्मृतेः** । अकामकृते **याज्ञवल्क्यः** (प्रा. २७८)—

"यन्मेऽद्य रेत इत्याभ्यां स्कन्नं रेतोऽभिमन्त्रयेत् । स्तनान्तरं भ्रुवोर्मध्यं तेनानामिकया स्पृशेत्"॥ इति। "यन्मेऽद्य रेतः पुनर्मामैत्विन्द्रियम्" इति द्वाभ्यामनामिकया रेत आदाय स्तनयोर्भ्रुवोर्मध्यमुपस्पृशेत्। **कण्वः**—"यत्नोत्सर्गं गृहीत्वा च वारुणीभिरुपस्पृशेत् । वानप्रस्थो यतिश्चैव चरेच्चान्द्रायणव्रतम्"॥

शाण्डिल्यः—

"वानप्रस्थो यतिश्चैव स्खलने सति कामतः । पराकत्रयसंयुक्तमवकीर्णिव्रतं चरेत्" ॥ इति ।

काश्यपः—

"सूर्यस्य त्रिर्नमस्कारं स्वप्ने सिक्त्वा गृही चरेत् । वानप्रस्थो यतिश्चैव त्रिः कुर्यादघमर्षणम्" ॥ इति।

अवकीर्णिप्रायश्चित्तम् । ब्रह्मचारिणो रेतःस्खलने **मनुः** (११।१२०-१२२-१२३)—

"कामतो रेतसः सेकं व्रतस्थस्य द्विजन्मनः । अतिक्रमं व्रतस्याहुर्धर्मज्ञा ब्रह्मवादिनः ॥
"एतस्मिन्नेनसि प्राप्ते वसित्वा गर्दभाजिनम् । सप्तागारं चरेद्भैक्षं स्वकर्म परिकीर्तयन् ॥
"तेभ्यो लब्धेन भैक्षेण वर्तयन्नैककालिकम् । उपस्पृशंस्त्रिषवणमब्देनैकेन शुध्यति ॥
"अवकीर्णीविशुध्यर्थं चान्द्रायणमथापि वा" ॥ (११७)
"अवकीर्णी तु काणेन गर्दभेन चतुष्पथे । स्थालीपाकविधानेन यजन्नैर्ऋतिभिर्निशि" ॥ (११८) इति।

संवर्तः—

"ब्रह्मचारी तु यः स्कन्देत् कामतः शुक्रमात्मनः।अवकीर्णीव्रतं कुर्यात्स्नात्वा शुद्ध्येदकामतः"॥ इति। **बोधायनः** (२।१।२९-३१)—"यो ब्रह्मचारी स्त्रियमुपेयात्सोऽवकीर्णी । स गर्दभं पशुमालभेत, नैर्ऋतः पशुः पुरोडाशश्च रक्षोदैवतो यमदैवतो वा" ॥ इति । **जातुकर्णिः**—

"खण्डितं व्रतिना रेतो येन स्यात् ब्रह्मचारिणा । कामतोऽकामतः प्राहुरवकीर्णीति तं बुधाः ॥
"आलभेत विशुध्यर्थं नैर्ऋतं गर्दभं पशुम्" इति ।

कौशिकस्तु नैष्ठिकादीनां कृतप्रायश्चित्तानामपि इह व्यवहारो नास्तीत्याह—

"नैष्ठिकानां व्रतस्थानां यतीनां चावकीर्णिनाम् । शुद्धानामपि लोकेऽस्मिन्प्रत्यापत्तिर्न विद्यते" ॥ इति।

ऋतुकालातिक्रमे प्रायश्चित्तम् । ऋतुकालातिक्रमे **पराशरः** (४।१४)—

"ऋतौ न गच्छेद्यो भार्यां सोऽपि कृच्छ्रार्धमाचरेत्" ॥

---

१ **गघ**–कृत्वा । २ **गघ**–यजेत निर्ऋतिं निशि ।

कात्यायनः—
" ऋतुस्नातां द्विजो भार्यां व्रतश्राद्धविवर्जितः । स्वयं च रोगरहितो यभेत्सन्तानकाम्यया ॥
" अनिमित्ततया विप्रः पत्नीमृतुमतीं त्यजेत् । भ्रूणहत्यामवाप्नोति प्राजापत्यार्धमाचरेत् " । इति ।
बोधायनः—
"ऋतौ न गच्छेद्यो भार्यां नियतां धर्मचारिणीम् । नियमातिक्रमे तस्य प्राणायामशतं स्मृतम्"॥ इति ।
कृच्छ्रार्धप्रत्याम्नायत्वेन प्राणायामशतं कार्यमिति भावः ।

स्त्रीबालवृद्धातुराणामर्धप्रायश्चित्तम् ।

ऋतुस्नातायाः स्त्रिया अनुपसर्पणे तदर्धं प्रायश्चित्तमुन्नेयम् । तथा च **भृगुः**—
" अशीतिर्यस्य वर्षाणि बालो वाऽप्यूनषोडशः । प्रायश्चित्तार्धमर्हन्ति स्त्रियो व्याधित एव च"॥ इति ।

शपथोल्लङ्घने प्रायश्चित्तम् ।

" केनचिन्निमित्तेन शपथमुल्लंघितवतः प्रायश्चित्तमाह **पराशरः** (१२।५०–५२)—
" यस्तु क्रुद्धः पुमान् ब्रूयात् जायायास्तु अगम्यताम् । पुनरिच्छति चेदेनां विप्रमध्ये तु श्रावयेत् ॥
"श्रान्तः क्रुद्धस्तमोऽन्धो वा क्षुत्पिपासाभयार्दितः । दानं पुण्यं कृतं कृत्वा प्रायश्चित्तं दिनत्रयम् ॥
" उपस्पृशेत्त्रिषवणं महानद्युपसङ्गमे । चीर्णान्ते चैव गां दद्यात् ब्राह्मणान् भोजयेद्दश " ॥ इति ।
विप्रमध्ये परिषन्मध्ये स्वपापं निवेदयेत् । अहं शपथप्रतिज्ञावेलायां श्रान्त आसन् । अतः श्रमादिदोषप्रयुक्तमिदम् । अगम्यता प्रतिज्ञानं न तु विवेकपूर्वकम् । तस्मादस्य पापस्य प्रायश्चित्तमनुगृह्णन्तु भवन्त इति । यश्च दानं काशीयात्रादिपुण्यं च प्रतिज्ञाय पश्चादश्रद्धया न करोति तेषु त्रिषु निमित्तेषु विप्रैर्निर्दिष्टमिदं प्रायश्चित्तं कुर्यादित्यर्थः ।

क्षत्रियादीनां ब्राह्मणीगमने प्रायश्चित्तम् । क्षत्रियादीनां ब्राह्मणीगमने **संवर्तः**—
" कथञ्चित् ब्राह्मणीं गच्छेत्क्षत्रियो वैश्य एव वा । गोमूत्रयावकाहारो मासार्धेन विशुध्यति ॥
" शूद्रस्तु ब्राह्मणीं गत्वा कथंचित्काममोहितः । गोमूत्रयावकाहारो मासेनैकेन शुध्यति " ॥
एतदत्यन्तव्यभिचारिब्राह्मणीविषयम् । इतरविषये वधस्मरणात् । तथा च **वसिष्ठः** (२१।१)—
" शूद्रश्चेत् ब्राह्मणीमुपगच्छेद्वीरणैर्वेष्टयित्वा शूद्रमग्नौ प्रास्येत् । ब्राह्मण्याः शिरसि वपनं कारयित्वा सर्पिषाऽभ्यज्य नग्नां कृष्णं खरमारोप्य महापथमनुसंव्राजयेत् पूता भवतीति विज्ञायते " ॥
आपस्तम्बः (२।१०।२७।९)—" वध्यः शूद्र आर्यायामिति " । त्रैवर्णिकायामित्यर्थः । एतच्च योऽन्तःपुरादिष्वधिकृतो भवति रक्षकस्तद्विषयम् । अन्यत्र शिश्नच्छेदनम् । तथा च **गौतमः** (१२।२–३)—" आर्यस्त्र्यभिगमने लिङ्गोद्धारः स्वहरणं च गोप्ता चेद्वधोऽधिकः " इति ।
कात्यायनः—" वर्णत्रयस्य विप्राणां भार्यामातेति गीयते । तद्दारे यदा गच्छेद्वर्णत्रयमकामतः ॥
" शिश्नछेदस्वहरणं कार्यं क्षत्रियवैश्ययोः । शूद्रस्य मौसलं प्राहुरिति शास्त्रेषु निश्चितम्"। इति ।

स्त्रियाः परपुरुषगमने प्रायश्चित्तम्—

स्त्रियाः परपुरुषगमने प्रायश्चित्तमुक्तं **चतुर्विंशतिमते**—
" रजसा शुध्यते नारी परपुंसाभिगामिनी । तथापि मुनिना प्रोक्तं प्रायश्चित्तं समाचरेत् ॥
" कृच्छ्रार्धं ब्राह्मणी कुर्याद्विप्रस्य गमने सति । क्षत्रियस्य चरेत्कृच्छ्रं वैश्ये सान्तपनं चरेत् ॥
" शूद्रस्य गमने चैव पराकं च समाचरेत् " ॥ इति । एतत्सकृद्गमनविषयम् ।
अभ्यासे तु **उशनाः**—" व्यभिचारिणीं भार्यां कुचेलपिण्डपरिभूतां निवृत्ताधिकारां चान्द्रायणप्रायश्चित्तं प्राजापत्यं वाचारयेत् " ॥ इति ।

---

१ **कग**-जन् । २ **गघ**-ण्यमकृत्वा वा ।

मनुः (११।१७६।१७७)—
" विप्रदुष्टां स्त्रियं भर्ता निरुन्ध्यादेकवेश्मनि । यत्पुंसः परदारेषु तच्चैनां चारयेद्व्रतम् ॥
" सा चेत्पुनः संप्रदुष्येत्सदृशेनोपमन्त्रिता । कृच्छ्रं चान्द्रायणं चैव तदस्याः पावनं स्मृतम् "॥ इति ।
संवर्तः—
" ब्राह्मण्याः शूद्रसंपर्के कथंचित्समुपागते । कृच्छ्रं चान्द्रायणं तस्याः पावनं परमं स्मृतम् " ॥
याज्ञवल्क्यः (व्य. २८६)—" प्रातिलोम्ये वधः पुंसां स्त्रीणां नासादिकृन्तनम् " ॥
मनुः (९।१५५)—
" ब्राह्मणक्षत्रियविशां स्त्रियः शूद्रेण सङ्गताः । अप्रजाता विशुध्यन्ति प्रायश्चित्तेन नेतराः " ॥
गर्भे पाते च ब्राह्मण्याः प्रायश्चित्तम् । **स्मृत्यन्तरेऽपि**—
" विप्रगर्भे पराकं स्यात् ब्राह्मण्या क्षत्रियस्य तु । गर्भे चान्द्रं वैश्यगर्भे पराकेण समन्वितम् ॥
" चान्द्रायणं शूद्रगर्भे तस्यास्त्यागो विधीयते " ॥ इति । गर्भो द्विविधः । पतिजन्योऽन्यै[1]-जन्यश्च । सवर्णजोऽसवर्णजश्च । तत्र सर्वत्र गर्भपाते प्रायश्चित्तमुक्तं **चतुर्विंशतिमते**—
" गर्भपाते समुद्दिष्टं यथावर्णविधिव्रतम् । राजगर्भे विशेषः स्यात् यथोक्तमृषिभिः पुरा ॥
" ब्रह्मगर्भवधे कृच्छ्रमब्दं सान्तपनादिकम् । क्षत्रगर्भवधे चैव चरेच्चान्द्रायणद्वयम् ॥
" वैश्यस्य चैन्दवं प्रोक्तं पराकं शूद्रघातने । प्रायश्चित्तमिदं प्रोक्तं गर्भपाते विशेषतः " ॥ इति ।

व्यभिचारिस्त्रीणां त्यागविचारः । याज्ञवल्क्यः (आ. ७२)—
" व्यभिचारादृतौ शुध्येत् गर्भे त्यागो विधीयते । गर्भभर्तृवधादौ च तथा महति पातके " ॥
ऋतौ शुद्धिरिति मानसव्यभिचाराभिप्रायम् । " रजसा स्त्री मनोदुष्टा " इति **स्मृतेः** । शूद्रगर्भे तस्यास्त्यागः । तथा गर्भवधे भर्तृवधे महापातके च । आदिग्रहणेन शिष्यादिगमने च त्यागः । तथा च **वसिष्ठः** (२१।१०)—
"चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या । पतिघ्नी तु विशेषेण जुङ्गितोपगता च या" ॥ इति ।
जुङ्गितः श्वपाकादिः । **चतुर्विंशतिमते**—
" चतस्र एव सन्त्याज्याः पतने सत्यपि स्त्रियः । श्वपाकोपहताया तु भर्तृघ्नी पितृपुत्रगा" ॥ इति ।
त्यागश्च उपभोगधर्मकार्ययोः । न तु सर्वथा तस्याः । तथा **चतुर्विंशतिमते**—
" स्त्रीणां नास्ति परित्यागो ब्रह्महत्यादिभिर्विना । तत्रापि ग्रहमध्ये तु प्रायश्चित्तानि कारयेत् ॥
" परित्यक्ता चरेत्पापं ब्रह्मघ्नं वापि किञ्चन । तत्पापं शतधा भूत्वा बान्धवानधिगच्छति " ॥
माधवीये तु परित्यागनिषेधोऽनुतापोपेतप्रायश्चित्ताधिकारिस्त्रीविषयः ' प्रायश्चित्तानि कारयेत् ' इत्यभिधानात् । अनुतापरहितायाः शूद्रगर्भादौ सर्वथा त्याग एवेत्युक्तम् ।

अनिमित्ततया भर्तृभार्यान्यतरपरित्यागे प्रायश्चित्तम् । अनिमित्ततया भार्यापरित्यागे भर्तृपरित्यागे **चापस्तंबः** (१।१०।२८।१९--२०)—" दारव्यतिक्रमी खराजिनं बहिर्लोम परिधाय दारव्यतिक्रमिणे भिक्षामिति सप्तागाराणि चरेत्[2] । सा वृत्तिः षाण्मासान् । स्त्रियास्तु भर्तृव्यतिक्रमे कृच्छ्रद्वादशरात्राभ्यासः तावन्तं कालम्" ॥ इति । षाण्मासान्प्राजापत्याभ्यासः इत्यर्थः ।

आपन्नायाः बलाच्छूद्रादिसंपर्के सति रेतःसेकासेकयोः प्रायश्चित्तद्वयमाह **पराशरः** (१०।२५-२६)—
"बन्दीग्रहेण या भुक्ता हत्वा बध्वा भयाद्बलात् । कृत्वा सान्तपनं कृच्छ्रं शुध्येत्पाराशरोऽब्रवीत् "॥इति ।

---

१ **कगघ**-जारजन्यो । २ मनुस्मृतेः ५।१०७

" सकृद्भुक्ता तु या नारी नेच्छन्ती पापकर्मभिः । प्राजापत्येन शुध्येत ऋतुप्रस्रवणेन च " ॥ इति भयाद्द्वयमुत्पाद्येत्यर्थः ।

विधवाया गर्भे त्यागः । विधवागमने पुरुषस्य यत्प्रायश्चित्तं तदर्धं विधवायाः द्रष्टव्यम् । विधवायाः गर्भधारणे परित्यागमाह **पराशरः** (१०।२०)—

" जारेण जनयेद्गर्भं मृते व्यक्ते गते पतौ । तां त्यजेदपरे राष्ट्रे पतितां पापकारिणीम् " ॥ इति ।

नागरखण्डे—

" वर्णत्रयाद्वा विधवा स्ववर्णाद्वाऽथ गर्भिणी । विप्रैस्तस्याः परित्यागः कार्यो धर्मपरायणैः ॥

" तद्दर्शनान्महापापमवाप्नोतीह पूर्वजः " ॥

विष्णुधर्मे—

" वर्णत्रयात्स्ववर्णाद्वा गर्भिणी विधवा यदि । तस्या दर्शनमात्रेण ब्रह्महत्यामवाप्नुयात् ॥

" अतस्त्यागो मुनिश्रेष्ठैर्विधवाया विधीयते " ॥ इति ।

शङ्कितव्यभिचारे स्त्रीणां कर्तव्यम् । शङ्कितव्यभिचारां ब्राह्मणीं प्रत्याह **पराशरः** (१०।३५)–

"ब्राह्मणी तु यदा गच्छेत्परपुंसा समन्विता । सा तु नष्टा विनिर्दिश्या न तस्या गमनं पुनः"॥ इति। पित्रादिभ्यो व्यतिरिक्तः पुमान्पर इत्युच्यते । तेन पुंसा समन्विता प्रीत्यतिशयद्योतकहास्यादिपुरस्सरं सम्यगन्विता ब्राह्मणस्त्री केनचिद्व्याजेन ग्रामान्तरं देशान्तरं वा गत्वा चिरं निवसेत् सा बन्धुमध्ये नष्टेति प्रख्यापनीया । न तस्याः पुनः गृहगमनमस्ति । स्वगृहं प्रत्यागतापि निर्वासनीयेत्यर्थः ।

परपुरुषेण यथोक्तसमन्वयाभावेऽपि स्वातन्त्र्येण चिरं निर्गता स्त्री परित्याज्येत्याह **स एव** (१०।३२)–

"कामान्मोहात्तु या गच्छेत्त्यक्त्वा बन्धून्सुतान् पतिम् । सा तु नष्टा परे लोके मानुषेषु विशेषतः"॥ इति। बन्ध्वादीनामन्यतमस्य समीपे स्थातव्यं इति स्त्रीधर्मः । तथा च **याज्ञवल्क्यः** (आ. ८६)—

" पितृमातृसुतभ्रातृश्वश्रूश्वशुरमातुलैः । हीना न स्याद्विना भर्त्रा गर्हणीयाऽन्यथा भवेत् " ॥ इति । एवं च सति या स्त्री कामाद्वा यथोक्तस्त्रीधर्मापरिज्ञानाद्वा बन्ध्वादीन्परित्यज्य ग्रामान्तरादौ चिरं वस्तुं गच्छेत्सा परलोके नष्टा नरकं प्राप्नोति । बन्ध्वादिषु च प्रवेशं न लभते ।

बन्धुराहित्येन गमनेऽपि त्यागापवादः । उक्तार्थस्य निमित्तविशेषेणापवादमाह **स एव**–"मदमोहहता नारी क्रोधाद्दण्डादिताडिता । अद्वितीयागता चैव पुनरागमनं भवेत् "॥ इति । मदः पतिश्वशुरादितिरस्कारजनको मानसो दोषः । पतिशुश्रूषणं स्त्रीणां परमो धर्म इति विवेकाभावो मोहः । उक्तदोषद्वयोपेतां नारीं शिक्षितुं पत्यादयो यदा दण्डादिभिस्ताडयेयुः तदा व्यथिता सा यथोक्तबन्ध्वादिसहायं विना स्वयमेकाकिन्येव यद्यपि निर्गच्छेत्तथापि स्वगृहे पुनरागमनं प्राप्नुयादित्यर्थः । पुनरागमने प्रतीक्षणकालविधिमाह **पराशरः** (१०।३३)—

" दशमे तु दिने प्राप्ते प्रायश्चित्तं न विद्यते । दशाहं न त्यजेन्नारीं त्यजेन्नष्टश्रुतां तथा " ॥ इति । पुनरागमने प्रतीक्षां दश दिनानि कुर्यात् । दशमदिने तया गृहे प्राप्ते सति नेयं प्रायश्चित्तभाग्भवेत् । ऊर्ध्वं तु व्यभिचारोचितप्रायश्चित्तभाग्भवति । दशाहमध्ये तदीयव्यभिचाराश्रवणे तां न परित्यजेत् । यदि नष्टत्वेन सा श्रूयेत् तदा दशाहमध्ये त्वकृतप्रायश्चित्तां तां परित्यजेदित्यर्थः ।

स्वातन्त्र्येण गताया अत्यागे भर्त्रादीनां प्रायश्चित्तम् । नष्टां श्रुत्वापि यदि भर्त्रादयस्तां न परित्यजेयुः तदा तेषां प्रायश्चित्तमाह **स एव** (१०।३४)—"भर्ता चैव चरेत्कृच्छ्रं कृच्छ्रार्धं चैव

बान्धवाः” इति । अकृतप्रायश्चित्तानां तेषां गृहे भोजनादिकमाचरन्नुपवासेन शुध्यतीत्याह **स** एव (१०।३४)—“ तेषां भुक्त्वा च पीत्वा चाहोरात्रेण शुध्यति ” ॥ इति ।

ताडनादिना निर्गच्छन्त्याः त्यागविचारः । ताडनादिना निर्गच्छन्त्याः पुरुषान्तरसमन्वयाभावेऽपि दशाहादूर्ध्वं त्यागे को हेतुरित्यत आह **स** एव (१०।३५)—

“ ब्राह्मणी तु यदा गच्छेत्परपुंसा विवर्जिता । गत्वा पुंसः शतं याति त्यजेयुस्तां तु गोत्रिणः ” ॥ इति ।

यद्यपि क्रोधादिना निर्गच्छन्ती न तदानीं पुरुषान्तरेण समवैति तथापि गत्वा कालान्तरेण शतसंख्याकेषु पुरुषेषु सञ्चरतीति मत्वा बान्धवास्तां परित्यजेयुः । ब्राह्मण्या अपि बहुपुरुषसञ्चारिण्या गणिकात्वं भवति । तदाह **प्रजापतिः**—

“अभिगच्छति या नारी बहुभिः पुरुषैर्मिथः । व्यभिचारिणीति सा ज्ञेया प्रत्यक्षं गणिकेति च ” ॥ इति ।

व्यभिचारिण्या गृहप्रवेशे शुद्धिप्रकारः । सा यद्गृहं प्रविशति तस्य शुद्धिप्रकारमाह **पराशरः** (१०।३६–४२)—

“ पुंसां यदि गृहं गच्छेत्तदशुद्धं गृहं भवेत् । पितृमातृगृहं यच्च जारस्यैव तु तद्गृहम् ॥
“ उल्लिख्य तद्गृहं पश्चात्पञ्चगव्येन सेचयेत् । त्यजेच्च मृन्मयं पात्रं वस्त्रं काष्ठं च शोधयेत् ॥
“ संभारान् शोधयेत्सर्वान् गोवालैश्च फलोद्भवान् । ताम्राणि पञ्चगव्येन कांस्यानि दश भस्मभिः ॥
“ प्रायश्चित्तं चरेद्विप्रो ब्राह्मणैरुपपादितम् । गोद्वयं दक्षिणां दद्यात्प्राजापत्यद्वयं चरेत् ॥
“ इतरेषामहोरात्रं पञ्चगव्येन शोधनम् ॥
“ उपवासैर्व्रतैः पुण्यैः स्नानसन्ध्यार्चनादिभिः । जपहोमदयादानैः शुध्यन्ते ब्राह्मणादयः ॥
“ आकाशं वायुरग्निश्च मेध्यं भूमिगतं जलम् । न दुष्यन्ति च दर्भाश्च यज्ञेषु चमसा यथा ” ॥ इति ।

सेयं दुर्ब्राह्मणी स्वनिवासाय पत्युर्मातुर्वा जारस्य वाऽन्यस्य वा दाक्षिण्यवतः यस्य कस्यचिद्गृहं प्रविशति तद्गृहं चण्डालाध्युषितगृहमिवात्यन्तमपवित्रं भवति। तत्रोल्लेखनं भूमेस्तेन कुड्यादिलेपनादिकमुपलक्ष्यते । वस्त्रकाष्ठयोर्धान्यादीनां संभाराणां च यथोक्तं शोधनं कुर्यात् । नालिकेरादिफलसंभूतानां पात्राणां गोवालैर्मार्जनम् । ताम्रस्याम्लादिना शुद्धिरुक्ता पूर्वम्* । अत्र तु पञ्चगव्येनेति विशेषः। कांस्यपात्राणां दशकृत्वो भस्मनाऽघषर्मणम्। गृहस्वामी तु परिषन्निर्दिष्टं सदक्षिणं प्राजापत्यद्वयं चरेत्। अन्येषां तु तद्गृहवासिनामुपवासः पञ्चगव्यप्राशनं च। तद्गृहवासिभिः सह व्यवहर्तॄणां गृहान्तरवासिनां निर्दिष्टेनोपवासादीनामन्यतमेन शुद्धिः। तद्गृहसंबन्धिनामाकाशादीनां निर्लेपत्वात् न यत्नसंपादनीया शुद्धिः । तत्र दृष्टान्तो यज्ञेष्विति । चिरकालवासविषयमिदं परिशोधनम् । सकृत्प्रवेशे तु मार्जनादिभिः शुद्धिरिति **माधवीये** ।

ब्राह्मण्याश्चण्डालादिगमने प्रायश्चित्तम् । अकामकृते चण्डालसंसर्गे ब्राह्मण्याः प्रायश्चित्तमाह **पराशरः** (१०।१८–२३)—

“ चण्डालैः सह संपर्कं या नारी कुरुते ततः । विप्रान् दशावरान् कृत्वा स्वकं दोषं प्रकाशयेत् ॥
“ आकण्ठसम्मिते कूपे गोमयोदककर्दमे । तत्र स्थित्वा निराहारा त्वहोरात्रेण निष्क्रमेत् ॥
“ सशिखं वपनं कृत्वा भुञ्जीयाद्यावकौदनम् । त्रिरात्रमुपवासित्वा त्वेकरात्रं जले वसेत् ॥
“ शङ्खपुष्प्यालतामूलं पत्रं च कुसुमं फलम् । सुवर्णं पञ्चगव्यं च क्राथयित्वा पिबेज्जलम् ॥

---

* पृष्ठे

" एकभुक्तं चरेत्पश्चाद्यावत्पुष्पवती भवेत् । व्रतं चरति तद्यावत्तावत्संवसते बहिः ॥
" प्रायश्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोजनम् । गोद्वयं दक्षिणां दद्याच्छुद्धिं **पाराशरो**ऽब्रवीत्" ॥ इति ।
कामकृते सकृद्गमने त्वब्दकृच्छ्रमसकृद्गमने अग्निप्रवेशः ।
"सकृच्चण्डालगमने कामतस्तु कृते स्त्रियः । अब्दकृच्छ्रं स्मृतं तस्या अभ्यासेऽग्निप्रवेशनम्" ॥ इति **स्मृतेः** ।

रेतस्सेकान्तचण्डालगमनस्य प्रायश्चित्तमभिधाय रेतस्सेकात्प्राङ्निवृत्तौ प्रायश्चित्तमाह **पराशरः** (१०।२४)—
" चातुर्वर्ण्यस्य नारीणां कृच्छ्रं चान्द्रायणं स्मृतम् । यथा भूमिस्तथा नारी तस्मात्तां न तु दूषयेत्" ॥
दूषणं त्यागः । चातुर्वर्ण्यस्येति ब्राह्मणीव्यतिरिक्तस्त्रीविषयम्
" रेतस्सेकात्प्राङ्निवृत्तौ चण्डालगमने सति । ब्राह्मणी निष्कृतिं कुर्याच्चान्द्रायणचतुष्टयम्" ॥ इति **स्मृतेः** ।

ब्राह्मण्या म्लेच्छरजकादिगमने प्रायश्चित्तम् । **संवर्तस्तु**—
" चण्डालं पुल्कसं म्लेच्छं श्वपाकं पतितं तथा । एतान् श्रेष्ठा तु या गच्छेत्कुर्याच्चान्द्रायणत्रयम् ॥
" रजकव्याधशैलूषवेणुचर्मोपजीविनः । ब्राह्मण्येतान् समागच्छेत्कुर्याच्चान्द्रायणत्रयम् " ॥ इति ।
गर्भधारणे **जाबालिः**—
" विप्राङ्गनायाश्चण्डालगर्भे तां दण्डयेन्नृपः । निकृत्य कर्णनासं तु निर्वास्य पतनाद्बहिः ॥
" राज्ञा कार्यस्त्याग एव न वधस्त्रीषु सम्मतः । क्षत्रवैश्यस्त्रियो राजा कारीषवधमाचरेत् " ॥ इति ।
तदेवं ब्रह्महत्यासुरापानस्वर्णस्तेयगुरुतल्पगमनानां महापातकानां प्रायश्चित्तानि निरूपितानि । प्रसङ्गादितरहननस्यापेयान्तरपानस्य स्तेयान्तरस्यागम्यागमनमात्रस्य च प्रायश्चित्तमुक्तम् ।

अथ संसर्गस्य महापातकत्वविचारः । महापातकिसंसर्गस्य प्रायश्चित्तमुच्यते । तस्य च महापातकित्वमुक्तं **मनुयाज्ञवल्क्यादिभिः** (मनुः ११।५४)—
" ब्रह्महत्यासुरापानं स्तेयं गुर्वङ्गनागमः । महान्ति पातकान्याहुः संयोगं चैव पञ्चमम् " ॥ इति ।
" संवत्सरेण पतति पतितेन समाचरन् (१८०) । ब्रह्महा मद्यपस्तेनस्तथैव गुरुतल्पगः ॥
" एते महापातकिनो यश्च तैः सह संवसेत् " ॥ इति । तत्तत्प्रायाश्चित्तं च संसर्गिण उक्तम् ॥
"यो येन पतितेनैषां संसर्गं याति मानवः । स तस्यैव व्रतं कुर्यात्संसर्गस्य विशुद्धये" ॥ (१८१) इति ।
एतद्युगान्तरविषयम् । अत एव कलियुगधर्माभिधाने प्रवृत्तः **पराशरः** ब्रह्महत्यादिमहापातकचतुष्टयस्य प्रायश्चित्तमुक्तवान् । कलियुगे संसर्गदोषाभावमभिप्रेत्य संसर्गप्रायश्चित्तं नाभ्यधात् ।

कर्मण एव पातित्यहेतुत्वम् । तथा कर्मणा पातित्यं कण्ठरवेणाह **पराशरः** (१।२५)—
" कृते संभाषणादेव त्रेतायां स्पर्शनेन च । द्वापरे त्वन्नमादाय कलौ पतति कर्मणा ॥
" त्यजेद्देशं कृतयुगे त्रेतायां ग्राममुत्सृजेत् । द्वापरे कुलमेकं तु कर्तारं तु कलौ युगे " ॥ इति ।
सुमन्तुः—"ब्रह्महत्त्या सुरापानं स्तेयं गुर्वङ्गनागमः । महापातकसंज्ञानि चत्वार्येव कलौ युगे" ॥ इति ।
अत्र चतुर्ग्रहणादेवकाराच्च संसर्गिणो न महापातकित्वम् । **स्मृतिकामधेनौ**—
" संसर्गदोषो नैव स्यान्महापातकिभिः कलौ । संसर्गदोषः स्तेनाद्यैर्न महापापनिष्कृतिः" ॥
तथा **स्मृत्यन्तरे** कलौ वर्जनीयानामनुक्रमे संसर्गदोषः पापेष्विति पठितम् ।

---

१ गघ-दकामादैंद्वद्वयम् ।

कलौ संसर्गस्य पापमात्रहेतुत्वम् । संसर्गदोषस्य पातित्यापादकत्वाभावेऽपि पापमात्रापातकमस्तीत्याह **पराशरः** (१२।७१)—

"आसनाच्छयनाद्यानात्संभाषात्सहभोजनात् । सङ्क्रामन्ति हि पापानि तैलबिन्दुरिवांभसि" ॥ इति ।

तत्र प्रायश्चित्तमाह **स** एव (४।८)—

" यो वै समाचरेद्विप्रः पतितादिष्वकामतः । पञ्चाहं वा दशाहं वा द्वादशाहमथापि वा ॥
" मासार्धमासमेकं वा मासद्वयमथापि वा । अब्दार्धमब्दमेकं वा तदूर्ध्वं चैव तत्समः ॥
" त्रिरात्रं प्रथमे पक्षे द्वितीये कृच्छ्रमाचरेत् । तृतीये चैव पक्षे तु कृच्छ्रं सान्तपनं चरेत् ॥
" चतुर्थे दशरात्रं स्यात्पराकः पञ्चमे ततः । कुर्याच्चान्द्रायणं षष्ठे सप्तमे चैन्दवद्वयम् ॥
" शुध्यर्थमष्टमे चैव षण्मासान् कृच्छ्रमाचरेत् । पक्षसंख्याप्रमाणेन सुवर्णान्यपि दक्षिणा" ॥ इति ।

समाचरणं सहशयनादि ।

" एकशय्यासनं पङ्क्तिभाण्डपक्वान्नमिश्रणम् । याजनाध्यापने योनिस्तथैव सहभोजनम् ॥
" नवधा सङ्करः प्रोक्तो न कर्तव्योऽधमैः सह " ॥ इति **बृहस्पतिस्मरणात्** ।

पतितादिष्वित्यादिशब्देन तत्पुत्रादयो गृह्यन्ते " पतितोत्पन्नः पतितो भवति " इति **वसिष्ठेन** (१३।५१) तन्निन्दनात् । प्रथमः पक्षः पञ्चाहसंसर्गः । तत्र त्रिरात्रोपवासमाचरेत् । द्वितीये पक्षे प्राजापत्यम् । तृतीये सान्तपनम् । अत्र सान्तपनं सप्तरात्रं गृह्यते । अर्धमाससंसर्गश्चतुर्थः पक्षः । तत्र दशरात्रोपवासमाचरेत् । ऐन्दवद्वयं चान्द्रायणद्वयम् । किंचिदूनसंवत्सरसंसर्गः अष्टमः पक्षः । अत्र षाण्मासान् कृच्छ्रमाचरेत् । षट्सु मासेषु प्राजापत्यकृच्छ्राणि पञ्चदश संपद्यन्ते । तदूर्ध्वं संसर्गे समपापे 'तदर्धं स्यात्' इति **वचनेन** तत्तत्प्रायश्चित्तार्धं द्रष्टव्यम् । सर्वेषु पक्षेषु यथोक्तं प्रायश्चित्तमनुष्ठाय तदङ्गत्वेन दक्षिणा दातव्या । तत्र प्रथमपक्षे सुवर्णमेकम् । एवमपरेष्वपि पक्षेष्ववगन्तव्यम् । **कूर्मपुराणेऽपि**—

" सङ्गं कृत्वाऽर्धमासे तु उपवासान् दशाचरेत् । पराकं माससंसर्गे चान्द्रं मासत्रये व्रतम् ।
"कृत्वा षाण्माससंसर्गं कुर्याच्चान्द्रायणद्वयम् । किञ्चिन्न्यूनाब्दसंसर्गे षण्मासं कृच्छ्रमाचरेत्" ॥ इति ।

गोचर्मक्षेत्रलक्षणम् । महापातकानां साधारणं प्रायश्चित्तमाह **पराशरः** (१२।४३)—

" गवां शतं सैकवृषं यत्र तिष्ठत्ययन्त्रितम् । तत्क्षेत्रं दशगुणितं गोचर्मपरिकीर्तितम् ॥
" ब्रह्महत्यादिभिर्युक्तो मनोवाक्कायकर्मजैः । एतद्गोचर्मदानेन मुच्यते सर्वकिल्बिषैः " ॥ इति ।

एकवृषेण सहितं गोशतं यन्त्रणा रहितं विश्रमाय यावन्तं प्रदेशमाक्रम्य व्यवतिष्ठते तावान् भूप्रदेशो दशगुणितः सन् गोचर्मशब्देनाभिधीयते ।

मिथ्याभिशंसनप्रायश्चित्तम्—अभिशंसने दोषं प्रायश्चित्तं च दर्शयति **याज्ञवल्क्यः** (प्रा. २८५–२८७)—

" मिथ्याभिशंसने दोषो द्विः समोऽनृतवादिनः । मिथ्याभिशस्तदोषं च समादत्ते मृषा वदन् ॥
" महापापोपपापाभ्यां योऽभिशंसेन्मृषा परम् । अब्भक्षो मासमासीत स जापी नियतेन्द्रियः ॥
" अभिशस्तो मृषा कृच्छ्रं चरेदाग्नेयमेव वा । निर्वपेत्तु पुरोडाशं वायव्यं पशुमेव वा "॥ **मनुः**—
" पतितं पतितेत्युक्त्वा जारं चोरेति वा पुनः । वचनात्तुल्यदोषः स्यान्मिथ्या द्विर्दोषभाग्भवेत् " ॥

गौतमः (२१।१७–१९)—

" ब्राह्मणस्याभिशंसने दोषस्तावान् । द्विरनेनसि । दुर्बलहिंसायां चाविमोचने शक्तश्चेत् " ॥ इति ।

---

१ **क**-असा । २ **कगघ**-भूत ।

बोधायनः—" मिथ्याभिशंसने कृच्छ्रस्तदर्धमभिशंसितुः " ॥ इति । **मरीचिः**—

"स्तेयं वा व्यभिचारो वा हत्या वाऽप्यस्ति सर्वदा । इति यो वदते साधून् स मिथ्यावादवान् द्विजः ॥
" देवकार्येषु पित्र्येषु निगर्ह्यो मिथ्यया वदन् । अस्ति चेत्तुल्यपापी स्यान्मिथ्यात्वे द्विगुणं भवेत् ॥
" तस्य पापविशुद्ध्यर्थं प्रायश्चित्तं महत्तरम् । विप्रेषु तप्तकृच्छ्रं स्यादङ्गनास्त्विह च कायिकम् ॥
" बालावृद्धातुरेष्वेवं वदन्पाराकमाचरेत् । क्षत्रियादिषु सर्वेषु प्राजापत्यमुदीरितम् " ॥ इति ।

गालवः—

" मिथ्यापापेन वा बद्धो ह्यभिशस्त इतीरितः । पापमस्ति न वा लोके वार्ता सर्वत्र गण्यते ।
" अयोग्यो हव्यकव्येषु निन्दितः सर्वदा जनैः । तस्माद्देहविशुध्यर्थं प्राजापत्यं चरेद्द्विजः ।
" ततः शुद्धो भवत्येवं मिथ्यात्वे विप्रपुङ्गवः । दोषस्तु विद्यते यत्र तत्रोक्तां निष्कृतिं चरेत् "॥ इति ।

दोषस्य सत्वे प्रतिपदोक्तं प्रायश्चित्तं कुर्यादित्यर्थः । असकृदभिशंसने **शङ्खः**—" नास्तिको नास्तिकवृत्तिः कृतघ्नः कूटव्यवहारी मिथ्याभिशंसीत्येते पञ्चवत्सरं ब्राह्मणगृहे भैक्षं चरेयुः"॥ इति। यत्तु नास्तिकविषये **वसिष्ठ**वचनम् (२१।२९–३०) " नास्तिकः कृच्छ्रद्वादशरात्रं चरित्वा विरमेन्नास्तिक्यान्नानास्तिकवृत्तिस्त्वनिकृच्छ्रम् " । इति तत्सकृत्करणविषयमिति **माधवीये** ।

ब्राह्मणापगुरणादि प्रायश्चित्तम् । ब्राह्मणापगुरणादौ **पराशरः** (११।५१)—

" अपगूर्य त्वहोरात्रं त्रिरात्रं क्षितिपातने । अतिकृच्छ्रं च रुधिरे कृच्छ्रेऽभ्यन्तरशोणिते " ॥ इति ।

अपगूर्य वधार्थं दण्डमुद्यम्य दिनमेकमुपवसेत् । भूमौ निपात्य त्रिरात्रं उपवसेत् । प्रहारे रुधिरे निर्गते अतिकृच्छ्रं चरेत् । निर्गतं रुधिरमन्तरेव एकत्र घनीभूतं चेत्कृच्छ्रं चरेदित्यर्थः । एतत्कलियुगाभिप्रायम् । " कलौ पाराशराः स्मृताः " इति **स्मरणात्** ।

युगान्तरे तु **मनुः** (११।२०६–२०८)—

" अपगूर्य त्वब्दशतं सहस्रमभिहत्य तु । जिघांसया ब्राह्मणस्य नरकं प्रतिपद्यते ॥
" शोणितं यावतः पांसून् संगृह्णाति द्विजन्मनः । तावंत्यब्दसहस्राणि तत्कर्ता नरके वसेत् ॥
" अपगूर्य चरेत्कृच्छ्रमतिकृच्छ्रं निपातने । कृच्छ्रातिकृच्छ्रे कुर्वीत विप्रस्योत्पाद्य शोणितम् " ॥

याज्ञवल्क्यः (प्रा. २९३)—

"विप्रदण्डोद्यमे कृच्छ्रो ह्यतिकृच्छ्रो निपातने।कृच्छ्रातिकृच्छ्रोऽसृक्पाते कृच्छ्रोऽभ्यन्तरशोणिते"॥इति।

बोधायनोऽपि (२।१।७)—

" अपगूर्य चरेत्कृच्छ्रमतिकृच्छ्रं निपातने । कृच्छ्रं चान्द्रायणं चैव लोहितस्य प्रवर्तने ॥
" तस्मान्नैवापगुर्वीत न च कुर्वीत शोणितम् " ॥ इति ।

ब्राह्मणतिरस्कारे प्रायश्चित्तम् । ब्राह्मणस्य तिरस्कारे **पराशरः** (११।४९)—

" हुङ्कारं ब्राह्मणस्योक्त्वा त्वंकारं च गरीयसः । स्नात्वा तिष्ठन्नहःशेषमभिवाद्य प्रसादयेत् " ॥

ब्रह्मविदं प्रति हुङ्कारं यः प्रयुङ्क्ते यश्च वयसा विद्यया वा ज्येष्ठं प्रति त्वमित्येकवचनं प्रयुङ्क्ते तावुभौ स्नात्वा यावदस्तमयं निराहारौ स्थित्वा रात्रावभिवादनेन तं क्षमापयेतामित्यर्थः ।

ब्राह्मणताडनादौ प्रायश्चित्तम् । ताडनादौ प्रायश्चित्तमाह **स** एव (११।५०)—

" ताडयित्वा तृणेनापि कण्ठे बद्ध्वा च वाससा । विवादेन विनिर्जित्य प्रणिपत्य प्रसादयेत्" ॥ इति ।

---

१ ग–अनर्हो ।

प्रणिपातेन उपवासोऽप्युपलक्ष्यते । तथा च **मनुः** (११।२०४-२०५)—
" हुंकारं ब्राह्मणस्योक्त्वा त्वंकारं च गरीयसः । स्नात्वाऽनश्नन्नहःशेषमभिवाद्य प्रसादयेत् ॥
" ताडयित्वा तृणेनापि कण्ठे वाऽवध्य वाससा । विवादे वा विनिर्जित्य तमुपोष्य[1] प्रसादयेत् " ॥
याज्ञवल्क्यः (प्रा. २९२)—
" गुरुं त्वंकृत्य हुंकृत्य विप्रं निर्जित्य वादतः । बद्ध्वा वा वाससा क्षिप्रं प्रसाद्योपवसेद्दिनम् " ॥ इति

गुरुपित्राद्यधिक्षेपप्रायश्चित्तम् । पित्राद्यधिक्षेपे **स्कान्दे**—
" पुत्रादिर्जनकं ज्येष्ठं गुरुं वापि न पीडयेत् । एकशब्देन नामोक्त्या त्वंकारं हुंकृतिं च वा ।
" तद्दोषपरिहारार्थं नाचिकेतव्रतं चरेत् ॥
" नाचिकेतः पुरा राजन् गुरुमुद्दालकं प्रति । परिभाष्य ततो गत्वा दृष्ट्वा यमपुरं महत् ॥
" पुनर्गत्वा भुवः पृष्ठं पितरं प्रणिपत्य च । तद्वाक्येन ततः पश्चाद्देहशुध्यर्थमादरात् ॥
" अपिबन्मण्डलं तत्र गवां क्षीरं दिने दिने । पीत्वा शुद्धिमनुप्राप्तो मण्डलाद्विप्रसत्तमः ॥
" असकृत् गुर्वधिक्षेपे व्रतमेतच्चरेद्विजः । अथवा देहशुद्ध्यर्थं षडब्दं कृच्छ्रमाचरेत् " ॥ इति ।
वसिष्ठः (२१।२८)—" गुरोरलीकनिर्बन्धे कृच्छ्रं द्वादशरात्रं चरित्वा सचैलस्नातो गुरुप्रसादात्पूतो भवति " ॥ इति । तदेतदमतिपूर्वे मतिपूर्वे सकृदनुष्ठाने वेदितव्यम् इति **माधवीये** ।
विष्णुः (५४।१४)—"समुत्कर्षे गुरोरलीककनिर्बन्धे क्षीरेण पयसा वा मासं वर्तेत " ॥ इति ।

पतनीये समुद्रयानादौ प्रायश्चित्तम् ।

पतनीयानां प्रायश्चित्तमाह—**बोधायनः** (२।१।४१)—
" समुद्रयानं ब्रह्मस्वन्यासापहरणं भूम्यपां हरणमनृतवदनं सर्वपण्यै[2]र्व्यवहरणं शूद्राभिगमनं[3] यश्च
" शूद्रायामभिप्रजायते तदपत्यं च भवति तेषां निर्वेशः चतुर्थकालं मितभोजिनः स्युरपोऽभ्यपेयुः
" सवनानुकल्पम् । स्थानासनाभ्यां विहरन्त एते त्रिभिर्वर्षैस्तदपहन्ति पापम् " इति । चतुर्थः कालो येषां तथाद्य दिवा भुक्त्वा श्वो रात्रौ भुञ्जते तथोक्ताः । तथा मितभोजिनः अमृष्टाशिनः । अपोऽभ्यपेयुः भूमिगतास्वप्सु स्नानं कुर्युः । सवनानुकल्पं त्रिषवणं स्थानासनाभ्यां तिष्ठेयुः । अहनि रात्रौ चासीरन् । एवं विहरन्तः कालं क्षिपन्तः एते त्रिभिर्वर्षैस्तत्पापमपनुदन्तीत्यर्थः । शूद्राभिगमने इदं महत्प्रायश्चित्तं ऋतुप्रगमने अपत्योत्पत्तौ द्रष्टव्यम्
"वृषलीफेनपीतस्य निश्वासोपहतस्य च । तस्यां चैव प्रसूतस्य निष्कृतिर्न विधीयते"॥ इति **स्मृतेः** ।

दुर्जनसेवाप्रायश्चित्तम् । दुर्जनसेवायां प्रायश्चित्तमाह—**देवलः**—
" पिशुनश्च खलश्चैव मद्यपः कितवस्तथा । स्तेयी च दुर्जना एते सेवामेषां करोति यः ॥
" पराकस्त्वेकदिवसे पक्षे तप्तमुदीरितम् । प्राजापत्यं ततो मासे वर्षे चान्द्रस्य भक्षणम् ॥
" कृत्वा शुद्धिमवाप्नोति वर्षादूर्ध्वं पतत्यसौ " ॥ इति ।

शूद्रसेवाप्रायश्चित्तम् । शूद्रसेवायां **बोधायनापस्तम्बौ** (आप. १।९।१०।११; बौधा. २।१।४२)—
" यदेकरात्रेण करोति पापं कृष्णं वर्णं ब्राह्मणः सेवमानः ॥
" चतुर्थकाल उदकाभ्यवायी त्रिभिर्वर्षैस्तदपहन्ति पापम् " ॥ इति । कृष्णवर्णः शूद्रः तदाज्ञाकरो भूत्वा वृत्त्यर्थं सेवमानो ब्राह्मणः त्रिभिर्वर्षैर्मितमेव चतुर्थकाले मितं भुञ्जानः त्रिषवणस्नायी एकदिनसेवाकृतं पापं हन्तीत्यर्थः । **बोधायनः** (२।१।४४-४५)—" भैषज्यकरणं ग्रामयाजनं

---

१ ग-प्रणिपत्य । २ ग-र्वै । ३-' जननं ' मुद्रितपाठः ।

रङ्गोपजीवनं नाट्याचार्यता गोमहिषीरक्षणं यच्चान्यदप्येवं युक्तं कन्यादूषणमिति। तेषां तु निर्वेशः पतितवृत्तिर्द्वौ संवत्सराविति " अन्यदप्येवं युक्तमिति अन्यदपि उपपातकमित्यर्थः ।

अशुचिकराणां प्रायश्चित्तम् । **स** एव (२।१।४६–४८) " अथाशुचिकराणि । द्यूतमभिचारोनाहिताग्नेरुञ्छवृत्तिता समावृत्तस्य भैक्षचर्या तस्य चैव गुरुकुले वास ऊर्ध्वं चतुर्भ्यो मासेभ्यस्तस्य चाध्यापनं नक्षत्रनिर्देशश्चेति । तेषां तु निर्वेशो द्वादशमासान् द्वादशार्धमासान् द्वादशद्वादशाहान् द्वादशषडहान् द्वादशत्र्यहान् द्वादशाहं षडहं त्र्यहमहोरात्रमेकाहमिति यथाकर्माभ्यासः " इति । द्वादशमासाद्येकाहान्तकालविकल्पः यथाकर्माभ्यासः तथा वेदितव्यः । बुद्धिपूर्वे सानुबन्धेऽभ्यासे च भूयांसं कालं प्रायश्चित्तं कुर्याद्विपरीते विपर्यय इत्यर्थः ।

अभिचारशापादिप्रायश्चित्तम् । **आपस्तंबः**–(१।१०।१९।१५–१६) " अभीचारानुव्याहारावशुचिकरावपतनीयौ पतनीयाविति **हारीतः** " ॥ इति । अभिचारः श्येनेनेत्यादि । अनुव्याहारः शापः । तौ ब्राह्मणविषये क्रियमाणावित्यर्थः । **स** एव (१।१०।२९।१७-१८)— " पतनीयवृत्तिस्त्वशुचिकराणां द्वादशमासान् द्वादशार्धमासान् द्वादशद्वादशाहान् द्वादशसप्ताहान् द्वादशत्र्यहान् द्वादशद्व्याहान् द्वादशाहं सप्ताहं त्र्यहव्यहमेकाहमिति " । अशुचिकराणां कर्मणां येषां प्रातिस्विकं प्रायश्चित्तं नोक्तं तेषामपि कर्मणां पतनीयेषु कर्मसु या वृत्तिः प्रायश्चित्तं सैव । शिष्टं स्पष्टम् । अशुचिकराणि **तेनोक्तानि** (१।७।२१।१२–१७)—" अथाशुचिकराणि शूद्रगमनमार्यस्त्रीणां प्रतिषिद्धानां मांसभक्षणं शुनो मनुष्यस्य च कुक्कुटसूकराणां ग्राम्याणां क्रव्यादसां मनुष्याणां मूत्रपुरीषप्राशनं शूद्रोच्छिष्टमपपात्रागमनं चार्याणामिति " । क्रव्यादसः गृध्रादयः । शूद्रोच्छिष्टं भुक्तमशुचिकरम् । अपपात्राः प्रतिलोमस्त्रियः । **मनुः** (११।१९७–१९८,१९१)—

" व्रात्यानां याजनं कृत्वा परेषामन्त्यकर्म च । अभिचारमहीनं च त्रिभिः कृच्छ्रैर्विशुध्यति ॥
" शरणागतं परित्यज्य वेदं विप्लाव्य च द्विजः । संवत्सरं यवाहारस्तत्पापमपसेधति ॥
" येषां द्विजानां सावित्री नानूच्येत यथाविधि । तांश्चारयित्वा त्रीन् कृच्छ्रान्यथाविध्युपनाययेत्" ॥

याज्ञवल्क्यः (प्रा. २८९)—

"त्रीन् कृच्छ्रानाचरेद्व्रात्ययाजकोऽभिचरन्नपि । वेदप्लावी यवाश्यब्दं त्यक्त्वा च शरणागतम्" ॥ इति ।

पैठीनसिः—'शूद्रयाजकः तद्द्रव्यत्यागात्पूतो भवति। प्राणायामसहस्रेषु दशकृत्वोऽभ्यस्तेष्विति॥

यत्तु **मनुराह**—

" पुरोधाः शूद्रवर्णस्य ब्राह्मणो यः प्रवर्तते । स्नेहादर्थप्रसङ्गाद्वा तप्तकृच्छ्रं विशोधनम् " ॥ इति

तदशक्तविषयम् । **पराशरः**—

"गृहीत्वा दक्षिणां यस्तु शूद्रस्य जुहुयाद्धविः । ब्राह्मणस्तु भवेच्छूद्रः शूद्रस्तु ब्राह्मणो भवेत्" ॥ इति । जुहुयात् वैदिकैर्मन्त्रैः । " शूद्रस्तु ब्राह्मणो भवेत् " इति तत्कर्मफलप्राप्नोतीत्यर्थः ।

भृतकाध्यापनाध्ययनप्रायश्चित्तम् । भृतकाध्यापनं निन्दति **शौनकः**—

" वेदाक्षराणि यावन्ति नियुङ्क्ते त्वर्थकारणात् । तावतीर्भ्रूणहत्या वै लभते नात्र संशयः " ॥ इति ।

व्यासोऽपि—

" यो विप्रो भृतकं हृत्वा मासि मासि प्रचोदितम् । शिष्यानध्यापयेद्वेदं साक्षान्नारायणात्मकम् ॥
" स वै नारायणद्रोही सर्वदा सूतकी भवेत् । अयोग्यो हव्यकव्येषु सर्वथा तं परित्यजेत् " ॥ इति ।

---

१ **गघ**–षी । २ **क्ष**–द्रानां । ३ **ग**–वृ ।

तस्य प्रायश्चित्तमाह **जाबालिः**—

“ अब्दं यो भृतकं हृत्वा वेदपाठं द्विजातये। तस्य चान्द्रत्रयं प्रोक्तमब्दमात्रप्रपूरणे ॥
“ अब्दद्वयं नदेद्यस्तु हृत्वा[2] मूल्यं द्विजन्मने। तस्य पापविशुद्ध्यर्थं प्रोक्तं चान्द्रचतुष्टयम् ॥
“ अब्दत्रये चान्द्रषट्कं कुर्यादिहविशुद्धये।
“ अत ऊर्ध्वं ब्रह्महन्ता ललाटे तापवर्जितः। ब्रह्महत्याव्रतं कुर्यात्कपालध्वजवर्जितः ” ॥ इति।

भृतकाध्ययने **व्यासः**—

“ भृतकाध्यापितो यश्च भृतकाध्यापकश्च यः। अनुयोगप्रदानेन त्रीन् पक्षांस्तु पयः पिबेत् ” ॥

ब्रह्मोज्झप्रायश्चित्तम्। ब्रह्मोज्झे **वसिष्ठः** (२०।१२)—“ ब्रह्मोज्झः कृच्छ्रं द्वादशरात्रं चरित्वा पुनरुपयुञ्जीत वेदमाचार्यात् ” इति। एतत्प्रामादिकत्यागविषयम्। नास्तिकतया त्यागे सुरापानसमामिति **मनोर्मतम्**।

अनाश्रमवासे प्रायश्चित्तम्। अनाश्रमवासे **हारीतः**—“ अनाश्रमी संवत्सरं प्राजापत्यं चरित्वाऽऽश्रममुपगच्छेत्। द्वितीयेऽतिकृच्छ्रं तृतीये कृच्छ्रातिकृच्छ्रमत ऊर्ध्वं चान्द्रायणम्” इति।

गौतमः—

“ अग्निपूतो गृहस्थः स्यात्सोमयाजी विशेषतः। तयोर्यदि मृता भार्या तज्जन्म विफलं भवेत् ॥
“ अनाश्रमी द्विजो यस्तु यावज्जीवति भूतले। मासि मासि स कुर्वीत प्राजापत्यं विशुद्धये ॥
“ अशक्तश्चेत्तथा कर्तुं कुर्याद्वा मृत्यनन्तरम्। मासि मासीह तावन्ति गणयित्वा तदात्मजः ॥
“ ततः शुद्धिमवाप्नोति परलोकं च विन्दति ” ॥

पञ्चाशद्वत्सरादुपरि विवाहनिषेधः। **स** एव—

“ पञ्चाशद्वत्सरादूर्ध्वं न कार्यं पाणिपीडनम्। कलेर्युगस्य दुष्टत्वात् त्याज्यमाहुर्मनीषिणः ॥
“ युवानं प्रेक्षते नारी स्वयं जीर्णापि सर्वदा। व्यभिचारात्कुलं नश्येत्कुलनाशात्कुलाङ्गनाः ॥
“ भ्रश्यन्ति सङ्करो भूयात्सङ्करो नरकाय च ” ॥ इति।
“ यस्तु सन्त्यज्य गार्हस्थ्यं वानप्रस्थो न जायते। परिव्राड्वापि मैत्रेय स नग्नः परिकीर्तितः ”॥ इति

विष्णुपुराणवचनमधिकारिविषयम्।

ऊढायाः पुनरुद्वाहे प्रायश्चित्तम्। ऊढायाः पुनर्विवाहे **जाबालिः**—

“ पूर्वमुद्वाहितां कन्यां पिता भ्राता धनेच्छया। अन्यस्मै चेत्पुनर्दद्यात्पितरो यान्त्यधोगतिम् ॥
“ सा कन्या पांसुला ज्ञेया तत्पुत्राः कुण्डसंज्ञिताः। एतद्दोषविशुद्ध्यर्थं प्रायश्चित्तं समाचरेत् ॥
“ दाता रामधनुष्कोट्यां प्रत्यहं स्नानमाचरेत्। वर्षमात्रेण संशुद्धो नान्यथा शुद्धिरिष्यते ॥
“ तद्भर्ता तां परित्यज्य कुर्याच्चान्द्रायणत्रयम्। तस्योपनयनं भूयः शुद्धिमाप्नोति पौर्विकीम् ॥
“ सा कन्या पूर्वकं चान्यं त्यक्त्वा चान्द्रायणं चरेत्। पुत्रोत्पादे तु पुत्राणां तस्यां च त्याग इष्यते”॥इति

सगोत्रादिविवाहे प्रायश्चित्तम्। सगोत्रविवाहे **बोधायनः** (२।१।३८)—“ सगोत्रां
“ चेदमत्योपयच्छेन्मातृवदेनां बिभृयात्। प्रजाता चेत् कृच्छ्राब्दपादं चरित्वा यन्म आत्मनो
“ मिन्दाभूत्पुनरग्निश्चक्षुरदादित्येताभ्यां जुहुयात् ” इति। **कल्पसारे**—

“ अमत्योढा सगोत्रा चेन्मातृवद्बिभृयात्तु ताम्। चान्द्रायणं चरित्वाऽन्यामुपयच्छेत कन्यकाम् ॥
“ कृच्छ्राब्दपादं कुर्वीत प्रजाता यदि सा भवेत्। मिन्दाहुती द्वे जुहुयात्तस्यान्ते चरितव्रतः ॥

१ ग–वृ। २ ग–मृ।

" तस्यां प्रसूतो निर्दोषः काश्यपो गोत्रतः स्मृतः ।
" ऊढा चेद्बुद्धिपूर्वं स्याद्गुरुतल्पव्रतं चरेत्[1] । तस्यां प्रसूतश्चण्डालः सर्वकर्मबहिष्कृतः " ॥

स्मृत्यर्थसारे—

" यदि कश्चित् ज्ञानतस्तां कन्यामूढ्वोपगच्छति । गुरुतल्पव्रताच्छुद्धो गर्भस्तज्जोऽऽन्त्यतां व्रजेत् ॥
" भोगतस्तां परित्यज्य पालयेज्जननीमिव । अज्ञानाच्चेदैन्दवेन शुद्ध्येद्गर्भस्तु काश्यपः " ॥ इति ।

शातातपः—

" समानप्रवरां कन्यां सगोत्रामुपयम्य च । उत्सृज्य तां ततो भार्यां मातृवत्परिपालयेत् ॥
" कृत्वा तस्यां समुत्सर्गमतिकृच्छ्रं विशोधनम् " इति । **देवलः**—

" समानगोत्रजामूढ्वा समानप्रवरां तथा ।
" यदि पुष्पवतीं गच्छेल्लोभात्कामातुरः सकृत् । मातृगामी स विज्ञेयः सर्वकर्मबहिष्कृतः ॥
" गुरुतल्पव्रतं कुर्यान्मुष्कच्छेदविवर्जितम् । पुत्रोत्पत्तौ तयोः पुत्रा अन्त्यजत्वमवाप्नुयुः " ॥ इति ।

परिवित्त्यादेः प्रायश्चित्तम् । परिवेदनादौ **पराशरः** (४।२०-२१)—

" परिवित्तिः परीवेत्ता च यया च परिविद्यते । सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः ॥
"द्वौ कृच्छ्रौ परिवित्तेस्तु कन्यायाः कृच्छ्र एव च । कृच्छ्रातिकृच्छ्रौ दातुस्तु होता चान्द्रायणं चरेत्"॥इति।

यत्र ज्येष्ठो नोद्वहति कनिष्ठश्च उद्वहति तत्र ज्येष्ठः परिवित्तिः कनिष्ठः परिवेत्ता कन्या परिवेदिनी तस्याः पित्रादिर्दाता याजको विवाहहोमस्य कारयिता अत्र परिवित्तेः परिवेत्तुश्च द्वौ कृच्छ्रौ । यत्र कुब्जादौ विषयविशेषे पूर्वमपवादा उक्ताः तत्र न प्रायश्चित्तापेक्षा । **बोधायनस्तु** (२।१।३९)—

" परिवित्तिः परिवेत्ता दाता यश्चापि याजकः । कृच्छ्रद्वादशरात्रेण त्रिरात्रेण विशुध्यति " ॥ इति ।

शङ्खलिखितौ—" परिवित्तिः परिवेत्ता च संवत्सरं ब्राह्मणगृहे भैक्षं चरेयुः " इति । अत्र ज्ञाताज्ञातभेदेन प्रायश्चित्तगौरवलाघवव्यवस्था ।

प्रायश्चित्तानन्तरं परिवेत्तुः कर्तव्यमाह **वसिष्ठः** (२०।८)—"परिविविदानः कृच्छ्रातिकृच्छ्रौ चरित्वा तस्मै दत्वा निवेद्य पुनस्तामेवोपयच्छेत् " ॥ इति । तस्मै ज्येष्ठाय निवेद्य पुनस्तामेवोद्वहेदित्यर्थः । अयमेव न्याय आधानव्युत्क्रमे भगिन्योर्विवाहव्युत्क्रमे चेति **माधवीये** ।

उष्ट्रादियुक्तयानारोहणे प्रायश्चित्तम् । उष्ट्रादियुक्तशकटाद्यारोहणे **मनुः** (११।२०१)—

" उष्ट्रयानं समारुह्य खरयानं च कामतः । स्नात्वा च विप्रो दिग्वासाः प्राणायामेन शुद्ध्यति" ॥ इति ।

याज्ञवल्क्यः (प्रा. २९१)—

"प्राणायामं जले स्नात्वा खरयानोष्ट्रयानगः । नग्नः स्नात्वा च भुक्त्वा च गत्वा चैव दिवा स्त्रियम् "॥ इति।

खराद्यारोहणे प्रायश्चित्तम् । खराद्यारोहणे **मार्कण्डेयः**—

" खरमारुह्य विप्रोऽसौ योजनं यदि गच्छति । तप्तकृच्छ्रत्रयं कुर्याच्छुद्धिमाप्नोति वै द्विजः ॥
" उष्ट्रं च महिषं चैव ह्यनड्वाहं द्विजः सकृत् । आरुह्य योजनं गच्छेत्प्राजापत्यमुदीरितम् " ॥ इति ।
" अजं बस्तं समारुह्य पूर्ववद्यदि गच्छति । तत्र सान्तपनं प्रोक्तं शरीरस्य विशोधनम् ॥
" पुनः कर्म प्रकुर्वीत तेन शुध्येन्न संशयः " ॥ इति । पुनःकर्म पुनरुपनयनम् ।

कारागृहवासप्रायश्चित्तम् । कारागृहवासे **गौतमः**—

" बलाद्बन्दीकृतो यस्तु म्लेच्छचण्डालदस्युभिः ।
" कारागृहे मासमात्रमुषित्वा कायमाचरेत् । प्राजापत्यं च चान्द्रं च चरेत्संवत्सरोषितः "

---

१ ग-समं । २ ग-ग । ३ क-वेत्तुः ।

यमः—"कारागृहाद्विनिर्गत्य प्रायश्चित्तं यथोदितम् । कृत्वा विप्रः पुनः कर्म कृत्वा शुद्धिमवाप्नुयात् ॥
" बलाद्बन्दीकृता नारी तत्रैव निवसेद्यदि । पक्षमासमृतुं चाब्दमुत्सृष्टा चेत्तदा पतिः ॥
" षष्टिभिर्मृत्तिकाभिश्च धूतशौचमनन्तरम् । कारयित्वा विधानेन स्नापयित्वा नदीजलैः ॥
" कारयेत्पूर्ववद्विप्रः प्रायश्चित्तमनुक्रमात् ॥
" अर्धमुक्तं तु नारीणां प्रायश्चित्तं विशोधनम् । तस्या दोषनिवृत्तिः स्यात् जनयोगेन हीयते ॥
" अतस्तत्पोषणं कुर्यात्संसर्गादीन् न कारयेत् । तत्रैव गर्भसंपत्तौ परित्यागो विधीयते " ॥ इति ।

कुग्रामवासप्रायश्चित्तम् । कुग्रामवासे **मरीचिः**—
" श्रोत्रियश्च तटाकादिस्तृणं पर्णं तथेन्धनम् । बान्धवः स्वकुलीनाश्च विद्या चैवोपकारिणी ॥
" न सन्ति यत्र ग्रामे तु स कुग्राम इतीरितः ॥
" तत्र ग्रामे द्विजो यस्तु हव्यकव्यपराङ्मुखः । एकत्र दिवसे तिष्ठन्महाचान्द्रायणं चरेत् " ॥

दुर्देशगमने प्रायश्चित्तम् । दुर्देशगमने **बोधायनः** (१।१।२९)—
" सिन्धुसौवीरसौराष्ट्रांस्तथा प्रत्यन्तवासिनः । अङ्गवङ्गकलिङ्गांश्च गत्वा संस्कारमर्हति " ॥
प्रत्यन्तवासिनः चण्डालादिवासप्रदेशान् । **स एव** (१।१।३०)—
" पद्भ्यां स कुरुते पापं यः कलिङ्गान्प्रपद्यते । ऋषयो निष्कृतिं तस्य प्राहुर्वैश्वानरं हविः " ॥ इति ।

श्वशृगालादिदंशने प्रायश्चित्तम् । श्वादिदंशे **याज्ञवल्क्यः** (आ. २७७)—
" पुंश्चलीवानरखरैर्दष्टः श्वोष्ट्रादिवायसैः । प्राणायामं जले कृत्वा घृतं प्राश्य विशुध्यति " ॥
मनुः (११।१९९)—
" श्वशृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च । नराश्वोष्ट्रैर्वराहैश्च प्राणायामेन शुध्यति ॥
एतन्नदीस्नानादेरप्युपलक्षणम् । तथा च **बोधायनः** (१।५।१२६)—
" शुना दष्टस्तु यो विप्रो नदीं गत्वा समुद्रगाम् । प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यति ॥
" सुवर्णरजताभ्यां वा गवां शृङ्गोदकैश्च वा । नवैर्वा कलशैः स्नात्वा सद्य एव शुचिर्भवेत् " ॥ इति ।
हारीतः—"श्वानो वा क्रोष्टुको वापि नारी वा यदि वानरः । आखुर्नकुलमार्जारवायसग्राम्यसूकराः ॥
" एतैर्दष्टे द्विजस्याङ्गे प्रायश्चित्तं कथं भवेत् ॥
" स्नानं कृत्वा सचेलं तु विप्राणामनुशासनात् । प्रोक्षणीभिः त्रिभिर्वाग्भिः कारयेन्मार्जनं द्विजः ॥
"प्राणायामत्रयं कुर्यात् दद्याद्गोभ्यस्तृणं नरः । सह द्विजैश्च भुक्तेन शुध्यते नात्र संशयः" ॥ इति ।
अङ्गिराः—
" ब्रह्मचारी शुना दष्टस्त्र्यहं सायं पयः पिबेत् । गृहस्थस्तु द्विरात्रं वा एकाहं वाऽग्निहोत्रवान् ॥
" नाभेरूर्ध्वं तु दष्टस्य तदेव द्विगुणं भवेत् । स्यादेतत्त्रिगुणं वक्त्रे मस्तके तु चतुर्गुणम् ॥
"अव्रती सव्रती वापि शुना दष्टस्तथा द्विजः । दृष्ट्वाऽग्नीन् हूयमानांस्तु सद्य एव शुचिर्भवेत् " ॥ इति ।
पराशरः (५।१-९)—
" वृकश्वानशृगालाद्यैर्दष्टो यस्तु द्विजोत्तमः । स्नात्वा जपेत्स गायत्रीं पवित्रां वेदमातरम् ॥
" गवां शृङ्गोदकस्नानं महानद्योस्तु सङ्गमे । समुद्रदर्शनाद्वापि शुना दष्टः शुचिर्भवेत् ॥
" वेदविद्याव्रतस्नातः शुना दष्टो द्विजो यदि । सहिरण्योदकैः स्नात्वा घृतं प्राश्य विशुध्यति ॥

---

१ ग-वादो । २ क्ष-यस । ३ गघ-श्च तिसृभिः ।

" सव्रतस्तु शुना दष्टः यस्त्रिरात्रमुपावसेत् । घृतं कुशोदकं पीत्वा व्रतशेषं समापयेत् ॥
" अव्रतः सव्रतो वापि शुना दष्टो भवेत् द्विजः । प्रणिपाताद्भवेत्पूतो विप्रैश्चक्षुर्भिरीक्षितः ॥
" शुनाघ्रातावलीढस्य नखैर्विलिखितस्य वा । अद्भिः प्रक्षालनं प्रोक्तमग्निना चोपचूलनम् ॥
" शुना तु ब्राह्मणी दष्टा जम्बुकेन वृकेण वा । उदितं ग्रहनक्षत्रं दृष्ट्वा सद्यः शुचिर्भवेत् ॥
" कृष्णपक्षे यदा सोमो न दृश्येत कदाचन । या दिशं व्रजते सोमस्तान्दिशं वाऽवलोकयेत् ॥
" असद्ब्राह्मणके ग्रामे शुना दष्टो भवेद्द्विजः । वृषं प्रदक्षिणीकृत्य सद्यः स्नात्वा विशुध्यति " ॥ इति ।

वृकशुनोरारण्यकत्वग्राम्यत्वाभ्यां भेदः । शृगालो जम्बुकः । आदिशब्देन वराहादया गृह्यन्ते । तैर्दष्टः स्नात्वा गायत्र्यष्टशतं जपेत् । जपसंख्याविशेष **उशनसा** दर्शितः ' दंष्ट्र्यादिदष्टे गायत्र्यष्टशतं प्राणायामशतं वा " इति । एतच्चासमर्थविषयम् । समर्थस्तु गोशृङ्गोदकस्नानादिकमाचरेत् । तत्र गोशृङ्गोदकस्नानं नाम शृङ्गपूरितेनोदकेन गायत्र्या शतवारमभिमन्त्रितेन सेचनम् ' गोशृङ्गेण शतं स्नानम् " इति **हारीत**स्मरणात् । शृङ्गोदकस्नानसङ्गमस्नानसमुद्रदर्शनानामधममध्यमोत्तमाङ्गभेदेन वा दंशतारतम्येन वा व्यवस्था। वेदाध्ययनं वा सौम्यप्राजापत्यादिव्रतानि वा समाप्य स्नातो वेदविद्याव्रतस्नातः । स यदि शुना दष्टः तथा हिरण्यमुदके निधाय तेनोदकेन स्नात्वा घृतं प्राश्य विशुध्यति । तत्रापि ब्राह्मणश्चेत् गायत्रीं शतकृत्वो जपेत् । तदाह **बोधायनः**—

" वेदविद्याव्रतस्नातः शुना दष्टस्तु ब्राह्मणः। शतपर्यायमावृत्य गायत्रीं शुद्धिमाप्नुयात् " ॥ इति ।

चान्द्रायणादिव्रतेन सहितः सव्रतः । स त्रिरात्रमुपोष्य चतुर्थेऽह्नि घृतं प्राश्य कुशोदकं च पीत्वा पश्चाद्व्रतशेषं समापयेत् । सव्रताव्रतावुभावपि विप्रान् प्रणिपत्य तैर्निरीक्षितौ यथोक्तप्रायश्चित्ताचरणेन पूतौ भवतः। यदा ब्राह्मणी श्वादिभिर्दष्टा तदा सा रात्रावुदितान् ग्रहान् सोमादीन्नक्षत्राणि कृत्तिकादीनि दृष्ट्वा शुद्धा स्यात् । सोमदर्शनासंभवे तदवस्थितियोग्यां दिशां वा पश्येत् । तच्च दर्शनं पञ्चगव्यप्राशनस्य चोपलक्षणम् । अत **एवाङ्गिराः**—

" ब्राह्मणी तु शुना दष्टा सोमे दृष्टिर्निपातयेत् । समुद्रदर्शनाद्वाऽपि शुना दष्टा शुचिर्भवेत् ॥
" सोममार्गेण सा पूता पञ्चगव्येन शुध्यति " ॥ इति ।

सोमादर्शनासंभवे समुद्रदर्शनं दिगवलोकनं वा कार्यम् । यत्र ब्राह्मणा न सन्ति तत्र ब्राह्मणप्रणिपातनिरीक्षणयोः स्थाने वृषभप्रदक्षिणं द्रष्टव्यम् । एतेषु वचनेषु यत्र यत्र प्रायश्चित्तबाहुल्यं तत्रोत्तमाङ्गविषयत्वं दंशनावृत्तिविषयत्वं चोहनीयम् । ब्रह्मचारिगृहस्थाग्निहोत्रिषूत्तरोत्तरं तपोबाहुल्यात्प्रायश्चित्तह्रास इति **माधवीये** ।

शरीरे क्रिम्युत्पत्तौ प्रायश्चित्तम् । शरीरे क्रिमिजनने **शातातपः**—

" ब्राह्मणस्य व्रणद्वारे यदा संपद्यते क्रिमिः । प्रायश्चित्तं तदा कार्यमिति शातातपोऽब्रवीत् "॥ इति ।
"गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । स्नात्वा दत्वा च भुक्त्वा च क्रिमिदष्टा शुचिर्भवेत्"॥ इति ।

बोधायनः (१।५।१२३)—

" ब्राह्मणस्य व्रणद्वारे पूयशोणितसंभवे । क्रिमिरुत्पद्यते तत्र प्रायश्चित्तं कथं भवेत् ॥
"गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । त्र्यहं स्नात्वा च पीत्वा च क्रिमिदष्टः शुचिर्भवेत् " ॥

एतच्च नाभेरधोभागे द्रष्टव्यम् । उपरिभागे तु **भानुराह** । नाभेरुपरिचेद्भानुराह—

" नाभिकण्ठान्तरोद्भूते व्रणे चोत्पद्यते क्रिमिः । षड्रात्रं तु तदा प्रोक्तं प्राजापत्यं शिरोव्रणे " ॥

१ क्ष—र्निरीक्षितः । २ ग—षं । ३ क—वानरा । ४ क्ष—स्थो । ५ गघ—त्र्यहं स्नात्वा च पीत्वा च ।

दुर्ब्राह्मणगृहभोजने प्रायश्चित्तम्। अभोज्यभोजने प्रायश्चित्तमुच्यते। तत्र दुर्ब्राह्मणगृहे भोजने **भरद्वाजः**—

"निराचारस्य विप्रस्य निषिद्धाचरणस्य च। अन्नं भुक्त्वा द्विजः कुर्याद्दिनमेकमभोजनम्" ॥ इति। तदशक्तौ **पराशरः** (१२।५४)—

"सदाचारस्य विप्रस्य तथा वेदान्तवेदिनः। भुक्त्वाऽन्नं मुच्यते पापादहोरात्रान्तरान्नरः" ॥ इति। एतदनभ्यासविषयम्। अभ्यासे तु **स** एव (११।४२)—

"परपाकनिवृत्तस्य परपाकरतस्य च। अपचस्य च भुक्त्वाऽन्नं द्विजश्चान्द्रायणं चरेत्" ॥ इति। तेषां लक्षणं **स** एवाह (११।४५-४७)—

"गृहीत्वाऽग्निं समारोप्य पञ्चयज्ञान्न निर्वपेत्। परपाकनिवृत्तोऽसौ मुनिभिः परिकीर्तितः।
"पञ्चयज्ञान् स्वयं कृत्वा परान्नेनोपजीवति। सततं प्रातरुत्थाय परपाकरतस्तु सः।
"गृहस्थधर्मा यो विप्रो ददातिः परिवर्जितः। ऋषिभिर्धर्मतत्त्वज्ञैरपचः परिकीर्तितः" ॥ इति।

ददातिरन्नदानपरः। तद्वर्जितः स्वयमेव यो भुङ्क्ते सोऽपच इत्युच्यते। **तस्य निन्दा प्रत्यक्षश्रुतावाम्नायते** (उदकशान्तिः)—'नार्यमणं पुष्यति नो सखाऽयं केवलाघो भवति केवलादी' ॥ **शातातपबृहस्पती**—

"यो हि हित्वा विवाहाग्निं गृहस्थ इति मन्यते। अन्नं तस्य न भोक्तव्यं वृथापाको हि स स्मृतः ॥
"वृथापाकस्य भुञ्जानः प्रायश्चित्तं चरेद्द्विजः। प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यति" ॥ इति।

वृथापाके यत्प्रायश्चित्तं तदेव ब्राह्मणनिन्दकादावपि द्रष्टव्यम्। निन्दावचनेन सह पाठात्। तथा च **व्यासः**—"पङ्क्तिभेदी वृथापाकी नित्यं ब्राह्मणनिन्दकः। आदेशी वेदविक्रेता पञ्चैते ब्रह्मघातकाः" ॥ इति। **शौनकः**—"कनिक्रदं जपेन्मन्त्रं दशवारं यदा तदा। वेदविक्रयिणो गेहे भुक्त्वा पापात्प्रमुच्यते" ॥ इति। **हारीतः**—

"यदन्नं प्रतिलोमस्य शूद्रजस्योत्तमस्त्रियाम्। महापातकिनां चैव यदन्नं स्त्रीकृतघ्नयोः ॥
"आरूढपतितस्यैव सगोत्राभर्तुरेव च। पाषण्डानाश्रितानां च यतेश्चैव तथैव च ॥
"अतिकृच्छ्रं चरेद्भुक्त्वा प्रमादाद्ब्राह्मणः सकृत्। मत्या चान्द्रायणं कुर्यादामं चेदर्धमेव च ॥
"तद्धस्तभोजने वापि त्रिगुणं सह भोजने। चतुर्गुणं तदुच्छिष्टे पानीये त्वर्धमेव च ॥
"कृच्छ्राब्दपादमुद्दिष्टमभ्यासात् ज्ञानभोजने। मत्याभ्यासे तथा कुर्यात् त्रिंशत्कृच्छ्रं द्विजोत्तमः" ॥

उत्तमस्त्री ब्राह्मणी। तस्यां प्रातिलोम्येन शूद्रादुत्पन्नश्चण्डालः। सत्यपि सामर्थ्ये नास्तिक्येन किञ्चिदप्याश्रममप्राप्तः अनाश्रितः।

राजाद्यन्नभोजनफलानि। सुमन्तुः—

"राजान्नं तेज अदत्ते शूद्रान्नं ब्रह्मवर्चसम्। आयुः सुवर्णकारान्नं यशश्चर्मविकृत्तिनः[1]।
"कारुकान्नं प्रजा हन्ति बलं निर्णेजकस्य च। गणान्नं गणिकान्नं च लोकेभ्यः परिकृन्तति ॥
"रूपं चिकित्सकस्यान्नं पुंश्चल्यास्त्वन्नमिन्द्रियम्। विष्ठा वार्धुषिकस्यान्नं शस्त्रविक्रयिणो मलम् ॥
"एवमेते त्वभोज्यान्नाः क्रमशः परिकीर्तिताः ॥
"भुक्त्वाऽतोऽन्यतमस्यान्नममत्या क्षपणं त्र्यहम्। मत्या भुक्त्वाऽऽचरेत्कृच्छ्रं रेतोविण्मूत्रमेव च" ॥ इति।

---

१ क-पृथक्। २ ग-नः। ३ ग-कर्ति।

विष्णुः (४८।२१)—" गणकगणिकास्तेनगायकान्नानि भुक्त्वा सप्तरात्रं पयसा वर्तेत । तक्ष्णोऽन्नं चर्मकर्तुश्च श्वपाकवार्धुषिककदर्यदीक्षितबद्धनिगलाभिशस्तपाषण्डानां च पुंश्चलीदांभिकचिकित्सकलुब्धकक्रूरोच्छिष्टभोजिनां चावीरस्त्रीसुवर्णकारसपत्नपतितानां च क्रतुधर्मसोमविक्रयिणां च शैलूषतन्तुवायकृतघ्ननिषादरङ्गावतारिवेदशस्त्रविक्रयिणां च श्वजीविशौण्डिकतैलिकचेलनिर्णेजकानां च रजकानां च रजस्वलासहोपपतिवेश्मनां च भ्रूणघ्नावेक्षितमुदक्यासंस्पृष्टं पतत्रिणावलीढं शुना स्पृष्टं गोघ्रातं च कामतः पादस्पृष्टमवक्षुतं च मत्तक्रुद्धातुराणां चानर्चितं वृथामांसं च त्रिरात्रमुपवसेत् " इति । त्रिरात्रोपवासः अकामकृतसकृद्भोजनविषयः ।

अत्रैव विषये **लिखितोऽपि**—

"भुक्त्वा वार्धुषिकस्यान्नं सव्रतस्याव्रतस्य वा । शूद्रस्य च तथा भुक्त्वा त्रिरात्रं स्यादभोजनम्"॥ इति ।

अस्मिन्नेव विषये अशक्तस्य **पराशरः** (११।४-५)—

" शूद्रान्नं सूतकस्यान्नमभोज्यस्यान्नमेव च । शङ्कितं प्रतिषिद्धान्नं शूद्रोच्छिष्टं तथैव च ॥

" यदि भुक्तं तु विप्रेण चाज्ञानादापदापि वा । ज्ञात्वा समाचरेत्कृच्छ्रं ब्रह्मकूर्चं तु पावनम्" ॥ इति ।

अज्ञाने आपदि च ब्रह्मकूर्चमेव ज्ञाने प्राजापत्यमिति योज्यम् ।

अकामकृतसकृद्भोजनविषये अशक्तस्य **हारीतः**—

" मृतसूतकशूद्रान्नं सदोषेणापि संस्कृतम् । शङ्कितं प्रतिषिद्धान्नं विद्विषोऽन्नमथापि वा ॥

" यदि भुञ्जीत विप्रो यः प्रायश्चित्तं कथं भवेत् । एकरात्रोपवासश्च गायत्र्यष्टशतं भवेत् ।

" प्राशयेत्पञ्चभिर्मन्त्रैः पञ्चगव्यं पृथक् पृथक् । एतेन शुध्यते विप्रो ह्यन्यैश्चाभोज्यभोजनैः " ॥

अकामकृताभ्यासे तु **विष्णुनोक्तं** सप्तरात्रं पयोव्रतम् । **मनुस्तु** यवयवागूपानमाह (११।१५२)—

"अभोज्यानां तु भुक्त्वाऽन्नं स्त्रीशूद्रोच्छिष्टमेव च । जग्ध्वा मांसमभक्ष्यं च सप्तरात्रं यवान् पिबेत्"॥इति ।

कामकृताभ्यासे **हारीतोक्तं** चान्द्रायणम् । तथा **शंखोऽपि**—

" शूद्रान्नं ब्राह्मणो भुक्त्वा तथा रङ्गावतारिणः । चिकित्सकस्य क्रूरस्य तथा स्त्रीमृगजीविनः ॥

" अभिशस्तस्य चोरस्य अवीरायाः स्त्रियस्तथा । चर्मकारस्य वैणस्य क्लीबस्य पतितस्य च ॥

" रुक्मकारस्य तक्ष्णश्च रजकस्य च वार्धुषेः । कदर्यस्य नृशंसस्य वेश्यायाः कितवस्य च ॥

" गणान्नं भूमिपालान्नं मृगजीविश्ववृत्तिनाम् । सौनिकान्नं सूतकान्नं भुक्त्वा मासव्रतं चरेत् ॥

" गणान्नं सूतकान्नं च भुक्त्वा मासव्रतं चरेत् " ॥ मासव्रतं चान्द्रायणमित्यर्थः ।

शुक्तादिभक्षणे **मनुः** (११।१५३)—

" शुक्तानि च कषायांश्च भुक्त्वाऽमेध्यान्यपि द्विजः । तावद्भवत्यप्रयतो यावत्तन्न व्रजत्यधः " ॥

आपस्तम्बः (१।९।२७।३-४)—' अभोज्यं भुक्त्वा नैष्पुरीष्यन्तत्सप्तरात्रेण वाप्यत ' इति ॥

अभोज्यमांसादिभक्षणे निष्पुरीषभावः कर्तव्यः । यावदुदरं निष्पुरीषं भवति तावदुपवस्तव्यम् । तच्च सप्तरात्रेणावाप्यते । येषां त्रिरात्रेण नैष्पुरीष्यं तेषां तावदेव शुद्धिः ॥ तथा च **गौतमः** (२३।२३-२४)-

" अभोज्यभोजने निष्पुरीषभावस्त्रिरात्रमभोजनं सप्तरात्रं वा " ॥ इति ।

व्यतीपातादिभोजने प्रायश्चित्तम् । व्यतीपातादिभोजने **देवलः**—

" व्यतीपाते यदन्नं च महापुरुषभोजनम् । कर्मण्यरजिने भुक्तिर्दशाहे बलिभोजनम् ॥

" भूतप्रेतपिशाचानां यदन्नं परिकल्पितम् । कलुषं वर्जनीयं तत् ब्रह्मराक्षसभोजनम् ॥

१ ग-च । २ ग-पिशुनावृतवादि । ३ ग-तुन्न । ४ क्ष-अव्रतस्याग्नुतस्य । ५ ग-पीत्वा ।

"एतेष्वदंस्तु यो विप्रो धनलोभपरायणः । तदानीं मृत्युमाप्नोति जीवेद्वा पापकार्यसौ ॥
"तत्र दोषोपशान्त्यर्थं प्रायश्चित्तमिदं स्मृतम् ।
"प्राजापत्यद्वयं कृत्वा पुनस्संस्कारपूर्वकम् । पञ्चगव्यं पिबेत्पश्चाच्छुद्धो भवति भूतले" ॥

अयुतसहस्रभोजने प्रायश्चित्तम् । अयुतसहस्रभोजनादौ **मार्कण्डेयः**—

"अयुते वा सहस्रे वा द्विजो ब्राह्मणभोजने । जिह्वाचापल्यतः क्षिप्रं भुञ्जीतापः पिबेत्तु वा ॥
"पक्षं वा मासमथ वा भुक्त्वा विप्रो निरन्तरम् । कृच्छ्रं पराकं चान्द्रं च कृत्वा शुद्धिमवाप्नुयात् ॥
"वर्षोपरीह शूद्रत्वमवाप्नोतीति निश्चितम्" ॥

देवलः—"अयुते वा सहस्रे वा नानावर्णसमागमे । पतितक्लीबबैडालव्रात्यतस्करपूरिते ॥
"कुण्डगोलकसंघाते[1] नटगायकसङ्कुले । पाषण्डजनसंसर्गे सर्वपातकिसङ्कुले ॥
"भाण्डोच्छिष्टस्वयंपाके स्त्रीजनैरुपशोभिते । यो विप्रो लोभमन्विच्छन्नभुञ्जीयात्कदाचन" ॥

सत्रभोजनेऽप्येवम् । दीर्घसत्रे तु देवलः—

"वर्षद्वयं वा वर्षं वा यो वा को वा द्विजो भुवि । सङ्कल्प्य भोजयेद्विप्रान् तद्दीर्घं सत्रमुच्यते ॥
"विप्रस्तत्र न भुञ्जीयात् पूर्ववत् दुष्टसंगमात् । पक्षं वा मासमथवा भुक्त्वा निष्कृतिमाचरेत् ॥
"पक्षभुक्तौ पराकं स्याच्चान्द्रं स्यान्मासभोजने ।

शूद्रसत्रे तु **स एव**—

"शूद्रसत्रे न भुञ्जीत प्राणैः कण्ठगतैरपि । भुञ्जन्नरकमासाद्य वायसत्वमवाप्नुयात् ॥
"पक्षे मासे ऋतावब्दे भोजने तु यथाक्रमम् । यावकं तप्तकृच्छ्रं च प्राजापत्यमथैन्दवम् ॥
"कृत्वा शुद्धिमवाप्नोति द्विजः पापक्रिया[2]क्रमात्" इति ।

शूद्रादिगृहे स्वयंपाकादिना भोजनेऽपि प्रायश्चित्तम् । शूद्रादिगृहे स्वयं पक्त्वा भोजने **पराशरः**—

"शूद्रालये वा वैश्या वा गृहे वाऽन्नं तदर्पितम् । पक्त्वा भुक्त्वा स पापीयान्महान्तं नरकं व्रजेत् ॥
"तद्दोषपरिहारार्थं प्रायश्चित्तमिदं स्मृतम् ॥
"परेद्युर्वा तदानीं वा वापयित्वा शिरोरुहान् । स्नानं कृत्वा ततः पश्चात्तप्तकृच्छ्रं समाचरेत् ॥
"पञ्चगव्यं पिबेत्पश्चाच्छुद्धो भवति नान्यथा" ॥ इति ।

सङ्घान्नभोजने प्रायश्चित्तम् । सङ्घान्नभोजने **गौतमः**—

"सङ्घीभूय द्विजा ये तु मार्गे तीर्थगमेऽपि वा । स्वद्रव्यमेलनं कृत्वा पक्त्वा भुक्त्वैकदेशतः ॥
"ते सर्वे नरकं यान्ति शूद्रतुल्या न संशयः । तेषामिदं मुनिप्रोक्तं प्रायश्चित्तं विशुद्धिदम् ॥
"एकरात्रे पञ्चगव्यं द्विरात्रे यावकं पिबेत् । प्राजापत्यं त्रिरात्रे च पक्षे चान्द्रायणं स्मृतम् ॥
"मासे तु शूद्रतुल्याः स्युः स्त्रीणामर्धं समीरितम्" ॥

क्रीतान्नभोजने प्रायश्चित्तम् । क्रीतान्नभोजने **देवलः**—

"देवालयेषु मार्गेषु ग्रामेषु नगरेषु च । विप्रः क्रीतान्नभोक्ता चेत्तदा नरकमाप्नुयात्" ॥

महाभारतेऽपि—

"क्रीतान्नं देवतागारे ग्रामे वा पत्तने[3] पथि । यो भुङ्क्ते पूर्वजो ज्ञानान्नरकं स समाप्नुयात्" ॥

---

१ ग-कीर्णे । २ गघ-क्षयात् । ३ क्ष-हृणे ।

हेमाद्रौ—
" विप्रः कण्ठगतप्राणः क्रीतान्नं यदि भुञ्जते । ग्रामे वा नगरे तीर्थे महादेवालयेऽपि वा ॥
" स गत्वा नरकं घोरं नानायोनिषु जायते । तस्मात्तस्य विशुध्यर्थं प्रायश्चित्तमुदीरितम् ।
" त्रिरात्रभोजने कार्यं पक्षे तप्तं समाचरेत् । महातप्तं तु मासे च वत्सरे चान्द्रमुच्यते ॥
" अतःपरं शूद्रतुल्यो विद्वानपि न संशयः । विप्रस्त्रीणामेतदर्धं यतीनां द्विगुणं भवेत् ॥

यागान्नभोजने प्रायश्चित्तम् । यागान्नभोजने **कण्वः**—
" यज्ञेषु पशुबन्धेषु अन्नमत्ति यदा द्विजः । स वै नरकमाप्नोति स बिडालसमो भवेत् ॥
" भुङ्क्ते यदि वपाहोमात्प्राक् पापं महदश्नुते । पुनस्तस्योपनयनं प्राजापत्येन शुध्यति ॥
" वपायागात्परं विप्रो यो भुङ्क्ते दीक्षितालये । प्राजापत्यं विशुध्यर्थं मुनिभिः परिकीर्तितम् " ॥ इति ।

कात्यायनः—
" ऋत्विजां च परस्त्रीणां भोक्तॄणां यागसद्मनि । उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति ॥
" सुवासिनी चेत्तद्भर्तुः पिबेत्पादोदकं तथा । विधवा वपनं कृत्वा प्रपिबेद्ब्रह्मकूर्चकम् ॥
" यतिश्च ब्रह्मचारी च पूर्वं यागान्नभक्षणे । चान्द्रं कुर्याद्वपाहोमात्परं कार्यं समाचरेत् " ॥

अस्नात्वा भोजने प्रायश्चित्तम् । अस्नात्वा भोजने **गौतमः**—
" अस्नात्वा भोजनं विप्रो नीरोगः कुरुते यदि । स मलाशी सदा ज्ञेयः सर्वकर्मबहिष्कृतः ।
" श्राद्धकालेषु चान्द्रं स्यात् ग्रहणे तद्द्वयं स्मृतम् । पञ्च पर्वसु तप्तं स्यादितरत्र तु यावकम् ॥
" द्विगुणं विधवानां तु यतीनां ब्रह्मचारिणाम् " ॥

अशुचिकालभोजने प्रायश्चित्तम् । **शातातपः**—
" मूत्रोच्चारं द्विजः कृत्वा शौचहीनः कथंचन । मोहाद्भुक्त्वा त्रिरात्रं स्यान्मत्या सांतपनं चरेत् ॥
" मूत्रयित्वा व्रजन्मार्गे स्मृतिभ्रंशाज्जलं पिबेत् । अहोरात्रोषितः स्नात्वा जुहुयात्सर्पिषा हविः " ॥

व्याघ्रः—
" अस्पृश्यस्पर्शनं कृत्वा यदा भुङ्क्ते गृहाश्रमी । अकामतस्त्रिरात्रं स्यात् षड्रात्रं कामतश्चरेत् " ॥
प्रजापतिः—" अस्नात्वा तु यदा भुङ्क्ते पिण्डं दत्वा पितुर्व्रती ॥
" स्पृष्ट्वा शवमुदक्यां वा चण्डालं सूतिकां तथा । अकामतस्त्रिरात्रं स्यान्मत्या सांतपनं चरेत् "॥
पिण्डं प्रेतपिण्डम् ।

पर्युषितान्नभोजने प्रायश्चित्तम् । पर्युषितभोजने **स एव**—
" जले निधाय पूर्वेद्युर्यदन्नं पिठरो[1]द्धृतम् । तत्पर्युषितसंज्ञं स्याद्भुक्त्वा चान्द्रायणं चरेत् ॥
" त्रिरात्रं पञ्चरात्रं वा भुक्त्वा पर्युषितं द्विजः । तस्योपनयनं भूयश्चान्द्रायणमथाचरेत् ॥
" हिङ्गुजीरकसंमिश्रं तिन्तिणीरसवेष्टितम् । दुर्गन्धरहितं यत्तु भोक्तव्यं द्विजपुङ्गवैः ॥
" दध्ना घृतेन तैलेन यदन्नं संस्कृतं भवेत् । दुर्गन्धरहितं भोज्यमन्यथा चान्द्रमुच्यते " ॥

ओदनवटकमाषबटकादिभक्षणे प्रायश्चित्तम् । **गालवः**—
" ओदनान्निर्मितं वस्तु शुष्कीभूतं यदा भवेत् । अभोज्यं भक्षयित्वा तद्यावकं कृच्छ्रमाचरेत् ॥
" दुर्गन्धरहितं भक्ष्यं तथा पर्युषितं च यत् । वटकं माषसंभूतं शष्कुल्यादि तथैव च ॥
" तैलादिपाके[2]हीनं च भक्ष्यमाहुर्मनीषिणः ॥

---

१ क–रे स्थितम् । २ क्ष–न ।

“ माषसंभूतवटकान् शष्कुलीं च तथाविधाम् । निष्कारणतया विप्रो न भुञ्जीत कदाचन ॥
“ पित्रर्थं देवकार्यार्थं पक्त्वा भुक्त्वा न दोषभाक् । वृथा तानीह भक्षित्वा यावकं कृच्छ्रमाचरेत् ”॥

परमान्नकृसरभक्षणे कालनियमः । देवलः—

“ परमान्नं च कृसरं वृथा पक्त्वा द्विजोत्तमः । भुञ्जीत यदि छर्दित्वा उपोष्य रजनीं ततः ॥
“ पञ्चगव्यं पिबेत्पश्चाच्छुद्धो भवति नान्यथा ।
“ रवौ धनुः समायाते गृहे कन्या रजस्वला । पितृदेवनिमित्तं च परमान्नं प्रशस्यते ”॥ इति ।

गौतमः—

“ धनुर्मासि गृहे कन्या यदि स्यात्प्रथमार्तवा । तथैव देवयात्रायां कृसरान्नं न दोषभाक् ॥
“ पितृकार्येषु सर्वेषु दैवे बन्धुसमागमे । पक्त्वा भोज्यं तदन्नं स्यात् प्रभूतक्षीरसंभवम् ॥
“ निमित्तेन विना भुक्त्वा दिनमेकमभोजनम् । पञ्चगव्यं पिबेत्पश्चाच्छुद्धो भवति निश्चितम् ” ॥

कन्या दुहिता भगिनी स्नुषा च । धनुर्मासे च दुहितरि भगिन्यां स्नुषायां च प्रथमार्तवायां पितृदेवकार्ये बन्धुसमागमे च पायसकृसरान्नभोजने न दोषः । उक्तनिमित्तादन्यत्र दिनमुपवासः पञ्चगव्यप्राशनं च कर्तव्यमित्यर्थः ।

व्रात्यकुष्ठ्याद्यन्नभोजने प्रायश्चित्तम् । व्रात्यान्नभोजने देवलः—

“व्रात्यान्नं यदि कुष्ठ्यन्नं भुङ्क्ते विप्रः क्षुधातुरः । एकादश्यन्नभुक् चैव शुद्ध्यै चान्द्रायणं चरेत् ॥
“ कुण्डगोलकयोरन्नं परिवित्तेस्तथैव च । परिवेत्तुर्यदन्नं च भुक्त्वा चान्द्रायणं चरेत् ॥
“ देवार्चकस्य यो भुङ्क्ते तथा गणकवेश्मनि । उभौ तौ पापिनौ प्रोक्तौ प्रायश्चित्तमथार्हतः ॥
“ एकरात्रे पञ्चगव्यं द्विरात्रे यावकं स्मृतम् । मासमात्रे पराकं स्यादब्दे चान्द्रमुदीरितम् ॥
“ ततः परं तत्समः स्यात् स्त्रीणामर्धमुदीरितम् ।
“ यतेराराधने भूत्वा यत्यन्नं भोजनोपरि[1] । दम्पत्योर्भुक्तशिष्टं यत् भुक्त्वा चान्द्रायणं चरेत् ॥
“ उल्लङ्घितं[2] पादहतं बिडालादिविमर्दितम् । देवपूजाविहीनं यद्वैश्वदेवविवर्जितम् ।
“ देवालयेषु यद्भुक्तं यदन्नं मूल्यसंभवम् । शीतीकृतं यदन्नं च शूर्पेण वदनेन वा ।
“ तुषपाषाणसंयुक्तं फलीकरणमिश्रितम् । असाक्षिकं यदन्नं च यदन्नं जीवतण्डुलम् ॥
“ एतद्भुक्त्वा विशुध्यर्थं पराकं कृच्छ्रमाचरेत् ” ॥ इति ।

भोक्तुरागमनात्पूर्वं भोजनपात्रे यत्परिवेषितं तदसाक्षिकम् ।

अन्तःशवग्रामभोजने प्रायश्चित्तम् । अन्तःशवग्राम[3]भोजने **संवर्तः**—

“ यत्र ग्रामे तु कुणपो विप्रो वर्तेत तत्र वै । पाकयज्ञं तथा भुक्तिं जलाहरणमेव च ॥
“ न कुर्यात्तावता विप्रो यावन्नान्यत्र नीयते । कुणपेनाश्रिते ग्रामे विप्रो भुक्त्वा स पापकृत् ॥
“ प्राजापत्यं तु कुर्वीत पञ्चगव्यमतः परम् । द्विजानां क्षीरपाने तु न दोषो गृहमेधिनाम् ” ॥

उपरागभोजने प्रायश्चित्तम् । उपरागभोजने **मनुः**—

“ सूर्योपरागे यो भुङ्क्ते तस्य पापं महत्तरम् । तस्य पापविशुध्यर्थं तप्तकृच्छ्रमुदीरितम् ॥
“ चन्द्रोपरागकाले तु भुक्त्वा कार्यं समाचरेत् । उभयोर्भोजने विप्रः पुनः संस्कारमर्हति ” ॥

मरीचिरपि—

“ सूर्यग्रहे तु नाश्नीयात्पूर्वं यामचतुष्टयम् । चन्द्रग्रहे तु यामांस्त्रीन् भुक्त्वा पापं समश्नुते ॥

---

१ ग-भा । २ ग-ड्ड । ३ क्ष-गृह ।

" इमं धर्मं परित्यज्य यो विप्रस्त्वन्यथा चरेत् । तस्योपनयनं भूयस्तप्तं सांतपनं स्मृतम् " ॥
सूर्यग्रहे तप्तम् । अन्यत्रान्यदित्यर्थः । उभयोः पुनःसंस्कारे इत्यर्थः ।

भिन्नपात्रभोजने प्रायश्चित्तम् । भिन्नपात्रादिभोजने **गालवः**—
" स्वर्णपात्रं तथा कांस्यं राजतं भिन्नमेव यत् । तत्र भुक्त्वा चरेत्कृच्छ्रमन्यथा दोषमाप्नुयात् ॥
" येषु पर्णेषु यो भुङ्क्ते यदा तत्र भुजिं चरेत् । पर्णान्तरं न भुञ्जीत तदा चैन्द्रवमाचरेत् ॥
गौतमोऽपि—
" एकजातीयपर्णेषु कांस्ये चाभिन्नभाजने । भोजनं कुरुते यस्तु संपूर्णायुर्भवेदिह " ॥

रजस्वलापक्वान्नभोजने प्रायश्चित्तम् । रजस्वलापक्वभोजने **मार्कण्डेयः**—
" अज्ञात्वा पुष्पिणी नारी कृत्वा वै पचनक्रियाम् । पश्चाच्छुष्कं रजो दृष्ट्वा यदा तस्मादपक्रमेत् ॥
" तां दृष्ट्वा भाषणं कृत्वा भुक्तवन्तो यदि द्विजाः । चान्द्रायणेन शुद्धाः स्युः पञ्चगव्येन चेत्तथा ॥
" पुनः कर्म प्रकुर्वीरन् भवेयुः पापिनोऽन्यथा " ॥ इति ।

निषिद्धदिने द्विर्भोजने ब्रह्मयज्ञानकरणे च प्रायश्चित्तम् ।

निषिद्धदिने द्विर्भोजने **स** एव—
" अर्कद्विपर्वरात्रौ च मृताहात्पूर्ववासरे । तथा चतुर्दश्यष्टम्योः संक्रान्तौ च महोत्सवे ।
" पितरौ व्याधिनाक्रान्तौ गुरूणां दुःखसंभवे । श्रोत्रिये मरणं प्राप्ते महाराजनिपातने ।
" न द्विवारं समश्नीयान्नश्येत् द्विर्वारभोजनात् " ॥
" न द्विवारं समश्नीयात् विप्रो धर्ममनुस्मरन् । तस्य पापस्य शुध्यर्थं सहसा निष्कृतिं चरेत् ॥
" पञ्चगव्येन शुद्धः स्यात् विप्रो द्विर्वारभोजने " ॥ इति ।

एतदनभ्यासविषयम् । अभ्यासे तु भोजनप्रकरणोक्तं द्रष्टव्यम् । **स** एव—
" वैश्वदेवं देवतार्चां नित्यहोमं तथाविधम् । ब्रह्मयज्ञं पितॄणां च तर्पणं द्विजवल्लभः ॥
" त्यक्त्वा भुक्त्वा तथा विप्रः सुरापीत्युच्यते बुधैः । तप्तकृच्छ्रं चरेत्पापी तस्मात्पापात्प्रमुच्यते ॥
" पञ्चगव्येन पूतात्मा नान्यथा शुद्धिरिष्यते " ॥ इति । एतदसकृत्करणविषयम् । सकृत्करणे तु
" वेदोदितानां नित्यानां कर्मणां समतिक्रमे । स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम् " ॥ इति
मनूक्त (११।२०३) एकरात्रोपवासो द्रष्टव्यः ।

स्वस्वकाले गर्भाधानाद्यकरणे प्रायश्चित्तम् । स्वस्वकाले गर्भाधानाद्यकरणे **हेमाद्रौ**—
" स्नातवत्यामृतौ पत्न्यां चतुर्थे पञ्चमेऽह्नि वा । कृत्वाऽभ्युदयिकं प्रातस्तद्रात्रौ मन्त्रपूर्वकम् ॥
" गर्भाधानं ततः कुर्यात् प्रतिगर्भं न तत् स्मृतम् । अन्यथा गर्भघाती स्याद्यथा जारः तथैव सः ॥
" प्राजापत्यत्रयं कुर्यात् द्वितीये पुनरार्तवे ।
" सीमन्तपुंसवनयोः स्वकालाकरणे सति । प्राजापत्यद्वयं कृत्वा शुद्धो भवति नान्यथा "॥ इति।
" जातकर्म न कुर्वीत नास्तिक्याद्यदि पूर्वजः । प्राजापत्यद्वयं कुर्यान्नास्ति चौले तथा व्रते ॥
" एकादशे द्वादशे वा नामकर्म विधीयते । अतिपत्तौ पिता कुर्यात् प्राजापत्यद्वयं ततः ॥
" अन्नप्राशनचौलादिकाले कुर्याद्व्रतेऽपि वा ।
" मुख्यकालपरित्यागादन्नप्राशनकर्मणः । व्रतबन्धे तु गौणं स्यात्प्राजापत्यमुदीरितम् ॥
" देशकालानुरोधेन यदि चौलं विलम्ब्यते । प्राजापत्यद्वयं कृत्वा तत्पापं परिशोधयेत् ॥

---

१ गघ–त्कार्यं । २ क्ष–च । ३ ग–श्रु ।

" पञ्चमाब्दं विलम्ब्यांशु शिशोरक्षरसंग्रहे । कायिकं तत्र कर्तव्यमन्यथा दोषमाप्नुयात् ॥
" यदि कामादष्टमाब्दं लङ्घयित्वा चरेद्व्रतम् । नवमे तप्तकृच्छ्रं स्याद्दशमे तच्च कायिकम् ॥
" एकादशे द्वादशे वा ह्यतिक्रम्यैन्दवं चरेत् । तत आ षोडशात्कुर्यादैन्दवत्रयमेव च ॥
" अजिनं मेखलां दण्डं ब्रह्मचारी यदि त्यजेत् । प्राजापत्यं पक्षमात्रे मासे तप्तं समाचरेत् ॥
" अब्दमात्रपरित्यागे कुर्याच्चान्द्रायणव्रतम् ।
" अग्निकार्यं ब्रह्मयज्ञं देवर्षिपितृतर्पणम् । अकृत्वा वत्सरे चान्द्रं तत्परं पतितो हि सः " ॥

उष्णोदकस्नाने प्रायश्चित्तम् । उष्णोदकस्नानादौ **देवलः**[2]—

" कूपोदकेन सप्ताहं स्नानमुष्णेन वारिणा । मृत्तिकाभिर्विना शौचं कृत्वा सप्ताहमेव च ॥
" प्राजापत्यं विशुध्द्यर्थं चरेत् पूतो भवेद्द्विजः । पञ्चगव्यं ततः पीत्वा शुद्धो भवति नान्यथा "॥ इति ।

यज्ञोपवीतादिना विना भोजने प्रायश्चित्तम् । यज्ञोपवीतादिनाविना भोजने **स**[3] एव—

" विना यज्ञोपवीतेन शिखया च द्विजोत्तमः । उच्छिष्टो यदि मोहात्मा पापकृत्स भवेद्द्विजः ॥
" उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति " ॥ इति । शिखया शिखाबन्धेनेत्यर्थः ।

शिखोपवीतभ्रंशे प्रायश्चित्तम् । शिखानाशे तु **गौतमः**—

" शिखां विना द्विजश्रेष्ठः कण्ठे गोवालरोमभिः । भूत्वा तद्दोषशान्त्यर्थं प्राजापत्यं समाचरेत् ॥
" यावच्छिखा पुनर्जाता तावत्कण्ठेण[4] धारयेत् । ब्रह्माविष्णुमहेशाख्या ब्रह्मसूत्रस्य तन्नव ॥
" एकस्मिंस्त्रुटिते विप्रः पुनर्धृत्वा नवं मुदा । नित्यकर्म प्रकुर्वीत त्रुटितं निक्षिपेज्जले ॥
" ब्रह्मसूत्रं तु वामांसात् भ्रष्टं स्याच्चतुरङ्गुलम् । प्राणायामत्रयं कृत्वा स्वस्थाने पूर्ववत् क्षिपेत् ॥
" मणिबन्धे यदा भ्रष्टं प्राणायामसहस्रकम् । कृत्वा शुद्धिमवाप्नोति वामहस्तादधोगतम् ॥
" यत्सूत्रं सहसा त्यक्त्वा धारयेदन्यसूत्रकम् ।
"जले भ्रष्टं परित्यज्य सहस्रं वेदमातरम् । जप्त्वा शुद्धिमवाप्नोति नान्यथा शुद्धिरीरिता "॥ इति ।

भोजनकाले क्षुतादौ प्रायश्चित्तम् । भोजनकाले क्षुतादौ **विष्णुः**—

" द्विजो भोजनकाले तु जृम्भणं क्षुतमेव च । अपानवायुमोक्षं वा कुर्वन्निष्कृतिमाचरेत् ॥
" अन्यो दोर्भ्यां जलं धृत्वा तस्य मूर्धनि विन्यसेत् । पृच्छेत जन्मसदनं दिवा वा यदि वा निशि ॥
" क्षुते च जृम्भणे चैव कृत्वैवं स विशुध्यति ।
" अपानवायोरुत्सर्गे जातेऽन्नं परिवर्जयेत् । लोभेन भुक्त्वा तद्भक्तं स्नात्वा कायं समाचरेत् " ॥

शिवनिर्माल्यभोजने प्रायश्चित्तम् । शिवनिर्माल्यभोजने **देवलः**—

" शम्भोर्निवेदितं भक्तं तत्तीर्थं शाकमेव वा । विप्रः सकृन्न भुञ्जीयात् भुक्त्वा तप्तं समाचरेत्" ॥

मार्कण्डेयः—

"शिवे निवेदितं भक्तं प्रत्येकं देवतां विना । द्विजोऽज्ञानाद्यदा भुङ्क्ते तप्तकृच्छ्रं समाचरेत्"॥ इति ।

सालग्रामादिसाहित्ये **जाबालिः**—

" शिवे विष्ण्वादिभिर्देवैर्वेष्टिते यत्समर्पितम् । तद्भुक्त्वा विप्रवर्योऽसौ न भवेद्दोषभाग्जनः " ॥

हारीतः—

"सालग्रामादिभिः शम्भोर्वेष्टितस्य यदर्पितम् । तद्भोक्तव्यं द्विजैर्नित्यं तत्तोयं च पिबेद्द्विजः"॥ इति ।

फलाधिक्यमाह **योगयाज्ञवल्क्यः**—

" शिवे निवेदितं भक्तं सालग्रामादिवेष्टिते। तद्भक्तभोजने चान्द्रं कृतवान्नात्र संशयः ।
" अन्यथा मांसतुल्यं स्यात्तत्तोयमसृजासमम् " ॥ इति ।

---

१ ग–ङ्घ्या । २ ग–जाबालिः । ३ ग–देवलः । ४ ग–र्णेन । ५ ग–जनम् ।

पत्न्या सहभोजने प्रायश्चित्तम् । पत्न्या सहभोजने **देवलः**—
"द्विजः कामातुरो यस्तु पत्न्या सह यदान्नभुक्। पश्चाच्चान्द्रायणं कृत्वा शुद्धिमाप्नोति पौर्विकीम्"॥इति।
गालवः—"एकयाने समारोहमेकपात्रे तु भोजनम्। विवाहे पथि यात्रायां कृत्वा विप्रो न दुष्यति॥
"अन्यथा दोषमाप्नोति पश्चाच्चान्द्रायणं चरेत् । अभ्यासे द्विगुणं चैव कृत्वा शुद्धिमवाप्नुयात्"॥
गौतमः—" पिताऽनुजस्य पुत्रस्य तयोः प्रीतिं समुद्वहन् ।
"निक्षिपेत्कवलं तत्र न दोषस्तस्य भोजने । ताभ्यां सह न भुञ्जीत भुक्त्वा दोषमवाप्नुयात्"॥ इति ।

नीलवस्त्रधारणनिषेधः । नीलवस्त्रादिधारणे **आपस्तम्बः**—
" नीलीरक्तं यदा वस्त्रं ब्राह्मणोऽङ्गेषु धारयेत् । अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥
" रोमकूपे यदा गच्छेद्रसो नील्यास्तु कस्यचित् । त्रिवर्णेषु तु मासान्त्यं तप्तकृच्छ्रं विशोधनम् ॥
" पालनं विक्रयं चैव तद्वृत्त्या तूपजीवनम्। पतनं तु भवेद्विप्रः त्रिभिः कृच्छ्रैर्व्यपोहति ॥
" स्नानं दानं तपो होमः स्वाध्यायः पितृतर्पणम् । वृथा तस्य महायज्ञा नीलीसूत्रस्य धारणात् ॥
" नीलीमध्ये तु गच्छेद्यः प्रमादाद्ब्राह्मणः क्वचित् । अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥
" नीलीदारुर्यदा भिन्द्याद्ब्राह्मणस्य शरीरकम् । शोणितं दृश्यते यत्र द्विजश्चान्द्रायणं चरेत् ॥
" स्त्रीणां क्रीडार्थसंभोगे शयनीयं न दुष्यति ।
" नीलरक्तेन वस्त्रेण यदन्नमुपजीव्यते । दातारं नोपतिष्ठेत भोक्ता भुञ्जीत किल्बिषम् ।
" कम्बले पट्टवस्त्रे च नीलीरागो न दुष्यति "॥ नीलीवस्त्रं धृत्वा भोजने **देवलः**—
" नीलीवस्त्रं तु तच्चिह्नं धृत्वा कर्म करोति यः । स विप्रस्तु न कर्मार्हस्तत्कर्म विफलं भवेत् ॥
" एकस्मिन् दिवसे भुक्त्वा धृत्वा रक्तमयं पटम् । कुर्याद्देहविशुध्यर्थं यावकं मुनिचोदितम् ॥
" अभ्यासे तु पराकं स्यात् वत्सरे चान्द्रमुच्यते"॥ इति । तच्चिह्नं वस्त्रान्ते मध्ये वा नीलतन्तुभिश्चिह्नितमित्यर्थः । **गौतमः**—
" नीलीमयं पटं धृत्वा विप्रस्तच्चिह्नमेव वा । कृत्वा कर्माणि भुक्त्वा वा न तत्कर्मफलं लभेत् ॥
" भोजने मांसभुग्विप्रः सर्वथा परिवर्जयेत् " । **देवलः**—
"नीलवस्त्रं तु तच्चिह्नं धृत्वा ज्ञानात्तु यश्चरेत् । स विप्रस्त्वशुचिर्नित्यं न कर्मार्हो भवेदिह "॥ इति।

परान्नभोजने प्रायश्चित्तम् । परान्नभोजने **शौनकः**—
" यस्मिन्वयं जपेन्मन्त्रं शतवारं दिने दिने । सदा परान्नभोक्ता च विमुच्येत हि किल्बिषात् " ॥
यमः—
" न पङ्क्तौ विषमं दद्यान्न याचेन्न च दापयेत्। प्राजापत्येन कृच्छ्रेण मुच्यते कर्मणस्ततः "॥ इति।

नवश्राद्धादिभोजने प्रायश्चित्तम्। श्राद्धभोजने **विष्णुः**—
" प्राजापत्यं नवश्राद्धे पादोनं त्वाद्यमासिके । त्रैपक्षिके तदर्धं स्यात्पञ्चगव्यं च मासिके "॥ इति ।
एतच्चापद्विषयम्। अनापदि तु—
" चान्द्रायणं नवश्राद्धे प्राजापत्यं तु मिश्रके । एकाहस्तु पुराणेषु प्रायश्चित्तं विधीयते " ॥
इति **हारीतोक्तं** द्रष्टव्यम् ।

---

१ क्ष-त्र । २ क्ष-तः । ३ **कगघ**-गालवः । ४ **क्ष**-श्च । ५ **ग**-द्वि ।

'प्राजापत्यं तु मिश्रक' इति आद्यमासिकविषयम् । ऊनमासिकादिषु तु पादोनप्राजापत्यादीनि कर्तव्यानि । तदुक्तं **चतुर्विंशतिमते**—

"प्राजापत्यं नवश्राद्धे पादोनं त्वाद्यमासिके । त्रैपक्षिके तदर्धं स्यात् द्वौ पादौ मासिके ततः ॥

"पादोनं कृच्छ्रमुद्दिष्टं षण्मासे चाब्दिके तथा । त्रिरात्रं चान्यमासेषु प्रत्यब्दं चेदहः स्मृतम्"॥ इति ।

अत्र 'प्राजापत्यं नवश्राद्ध' इत्ययमंश आपद्विषयः । अनापदि चान्द्रायणम् । तथा **मरीचिः**—

"नग्नश्राद्धं नवश्राद्धमाशौचाभ्यन्तरे द्वयम् । तत्रामं प्रतिगृह्याशु महारौरवमश्नुते ॥

"नग्नश्राद्धे नवश्राद्धे चान्द्रायणमुदीरितम् ॥

"आद्यश्राद्धे तथा चान्द्रं सपिण्डीप्रेतभोजने । चान्द्रायणं पराकं वा कुर्यात्तद्दोषशान्तये" ॥ इति ।

'प्राजापत्यं तु मिश्रक' इत्येतदावृत्ताद्यमासिकविषयम् । तत्र चान्द्रायणं महैकोद्दिष्टविषयम् । तदनावृत्तौ तु चान्द्रायणत्रयं कार्यम् ।

"आद्यमासिकमेकश्चेद्भुङ्क्ते ब्राह्मात्स हीयते । चान्द्रायणत्रयं कृत्वा कूष्माण्डैर्जुहुयात्ततः ॥

"पुनः कर्म प्रकुर्वीत ततः पूतो भवेद्द्विजः" ॥ इति **स्मृतेः** । यत्तु **शङ्खवचनम्**

"चान्द्रायणं नवश्राद्धे पराको मासिके स्मृतः । पक्षत्रये तु कृच्छ्रं स्यात् षण्मासे कृच्छ्र एव तु ॥

"आब्दिके पादकृच्छ्रं स्यात् एकाहः पुनराब्दिके" ॥ इति । अत्र यत्पराकादिविधानं तत्सर्पादिहतविषयम् आपङ्क्तेयविषयं च ।

"चण्डालादुदकात्सर्पात् ब्राह्मणाद्वैद्युतादपि । दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मणाम् ॥

"पतनानशनैश्चैव विषोद्बन्धनतस्तथा । भुङ्क्ते यः षोडशश्राद्धे कुर्यादिन्दुव्रतं द्विजः ॥

"आपाङ्क्तेयान्यदुद्दिश्य श्राद्धमेकादशेऽहनि । ब्राह्मणस्तत्र भुक्त्वाऽन्नं शिशुचान्द्रायणं चरेत् ॥

"मासश्राद्धे तथा भुक्त्वा तप्तकृच्छ्रेण शुध्यति । संकाल्पिते तथा भुक्त्वा त्रिरात्रं क्षपणं स्मृतम्" ॥ इति **भारद्वाजेन** प्रायश्चित्तविशेषाभिधानात् ।

श्राद्धभोजने ब्रह्मचारिणः प्रायश्चित्तम् । ब्रह्मचारिणस्तु **बृहद्यमो** विशेषमाह—

"मासिकादिषु योऽश्नीयात् असमाप्तव्रतो द्विजः । त्रिरात्रमुपवासोऽत्र प्रायश्चित्तं विधीयते ॥

"प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यति" ॥ इदमज्ञानविषयम् । ज्ञानपूर्वके तु **स** एव—

"मधु मांसं तु योऽश्नीयाच्छ्राद्धे सूतक एव वा । प्राजापत्यं चरेत्कृच्छ्रं व्रतशेषं समापयेत्" ॥ इति ।

क्षत्रियादिश्राद्धभोजने प्रायश्चित्तम् । क्षत्रियादिश्राद्धभोजने **चतुर्विंशतिमते**—

"चान्द्रायणं नवश्राद्धे पराको मासिके स्मृतः । त्रैपक्षिके सांतपनं कृच्छ्रं मासद्वये स्मृतम् ॥

"क्षत्रियस्य नवश्राद्धे व्रतमेतदुदाहृतम् । वैश्यस्यार्धाधिकं प्रोक्तं क्षत्रियात्तु मनीषिभिः ॥

"शूद्रस्य तु नवश्राद्धे चरेच्चान्द्रायणद्वयम् ।

"सार्धं चान्द्रायणं मासे त्रिपक्षे त्वैन्दवं स्मृतम् । मासद्वये पराकं स्यादूर्ध्वं सान्तपनं स्मृतम्" ॥ इति ।

यत्तु शातातपोक्तम्

"दशकृत्वः पिबेदापो गायत्र्या श्राद्धभुग्द्विजः । ततः सन्ध्यामुपासीत शुध्येत्तु तदनन्तरम्" ॥ इति तदनुक्तप्रायश्चित्तश्राद्धविषयम् ।

नान्दीश्राद्धभोजने प्रायश्चित्तम् । संस्काराङ्गश्राद्धभोजने **व्यासः**—

"प्रवृत्ते चूडाहोमे तु प्राङ्नामकरणात्तथा । चरेत्सान्तपनं भुक्त्वा जातकर्माणि चैव हि ॥

---

१ ग–दा । २ गघ–ति । ३ क्ष–निमित्त ।

"अतोऽन्येषु तु भुक्त्वान्नं संस्कारेषु द्विजोत्तमः। नियोगादुपवासेन शुध्यते नित्यभोजनात्" ॥ इति।
सीमन्तोन्नयनादिषु **धौम्यो** विशेषमाह—
"ब्रह्मौदने च सोमे च सीमन्तोन्नयने तथा। जातश्राद्धे नवश्राद्धे भुक्त्वा चान्द्रायणं चरेत्"॥ इति।
ब्रह्मौदनाख्यं कर्माग्न्याधानाङ्गभूतम्। यत्तु **भारद्वाजेनोक्तम्**—
"भुक्तश्चेत्पार्वणश्राद्धे प्राणायामान् षडाचरेत्। उपवासस्त्रिमासादिवत्सरान्तं प्रकीर्तितम्"॥
एतदप्यापद्विषयम्। अनापद्यधिकप्रायश्चित्तस्योक्तत्वात्। आमश्राद्धे सर्वत्रार्धम्। "आमश्राद्धे भवेदर्धम्" इति **षट्त्रिंशन्मते**ऽभिधानात्।

श्राद्धशिष्टान्नभोजननिषेधः। श्राद्धशिष्टान्नभोजनं प्रतिषेधति **देवलः**—
"अमायां पैतृकश्राद्धे मासिश्राद्धे महालये।
"श्राद्धे च षण्णवत्याख्ये सपिण्डीकरणे तथा। मासिकेषु तथा विप्रो न कुर्याच्छेषभोजनम्"॥
महाभारते—
"श्राद्धकर्मणि भोक्तारो भोक्तारो यज्ञकर्मणि। श्राद्धशिष्टान्नभोक्तारस्ते वै निरयगामिनः॥
"सगोत्राणां सकुल्यानां न दोषः शिष्टभोजने। पुत्रिणामन्यगोत्राणां विधवानां तु दुष्यति"॥
जाबालिः—
"श्वशुरस्य गुरोर्वापि मातुलस्य महात्मनः। एतेषां श्राद्धशिष्टान्नं भुक्त्वा दोषो न विद्यते॥
"पित्रोश्च ब्रह्मनिष्ठस्य ज्येष्ठभ्रातुश्च ज्ञानिनः। पैतृकेषु न भोक्तव्यं विधवानां तु सर्वदा॥
"विप्रस्त्वन्यकुले श्राद्धे कुर्याच्चेच्छेषभोजनम्। प्राजापत्यं विशुद्धिः स्यात् ज्ञातीनां तु न दोषभाक्।
"व्रतिनां च स्वपित्रादौ न दोषः शिष्टभोजने। विधवा केशवपनं कृत्वा तत्तं समाचरेत्॥
"यतिश्च ब्रह्मचारी च पराकं कृच्छ्रमाचरेत्। संन्यासी वपनं कृत्वा लक्षं च प्रणवं जपेत्"॥ इति।
चन्द्रिकादावनेकस्मृतिवचनाभिधानपूर्वकं श्राद्धशिष्टान्नभोजनं न दोषावहमित्युक्तम्। तच्च प्रतिपादितमधस्तात्। **हेमाद्रौ** तु विशेषवचनमुदाहृत्य श्राद्धशिष्टान्नभोजने प्रायश्चित्तं चाभिहितम्। अत्र निषेधस्य प्राबल्यात् श्राद्धशिष्टान्नभोजने प्रायश्चित्तोपदेशात् शिष्टाचारबाहुल्याच्च तद्वर्जनमेव युक्तमित्याहुः।

चौलाद्यन्नभोजने **देवलः**—
"चौलकर्मणि सीमन्ते मुहूर्ताद्भोजने परम्। सुरापानसमं प्रोक्तमतो नेच्छन्ति सूरयः"॥
गौतमः—"सीमन्ते पुंसवे चैव चौले कर्मणि यो द्विजः। असगोत्रस्तदन्नादः सुरापीत्युच्यते बुधैः"॥
मार्कण्डेयः—
"चौले कर्मणि सीमन्ते पुंसवे योऽसगोत्रजः। मुहूर्तादूर्ध्वभुक्पापी सुरापानमवाप्नुयात्॥
"प्रायश्चित्तं द्विजैः प्रोक्तमत्र शिष्टान्नभोजने। मुहूर्तात्परतस्तत्तं तत्पूर्वं भोजनं चरन्॥
"जप्त्वा शुद्धिमवाप्नोति सहस्रं वेदमातरम्। स्त्रीणामर्धं यतीनां च व्रतिनां चान्द्रमुच्यते॥
"चौलकर्मणि पूर्वत्रापरत्र च समं भवेत्"॥ **स्मृत्यन्तरे** च—
"चौलोपनयने चैव सीमन्ते पुंसवे तथा। ऋतूत्सवेऽप्यहःशेषं भुक्त्वा चान्द्रायणं चरेत्"॥
अहःशेषमिति वचनात् रात्रौ तद्गृहभोजने नैतत् प्रायश्चित्तम्। उच्छिष्टभोजनादीनां प्रायश्चित्तमाह्निकपरिच्छेदे भोजनप्रकरणे निरूपितम्। तत एवावधार्यम्।

---

१ क्ष-रु। २ क्ष-सौ। ३ ग-त्री। ४ क्ष-ति। ५ कग-+न। ६ ग-निषेध। ७ पृ. ४३१

अनुक्तप्रायश्चित्तेषु शङ्खलिखितौ—

" क्रयविक्रयदुष्टभोजनप्रतिग्रहेषु अनुद्दिष्टप्रायश्चित्तेषु सर्वेषु चान्द्रायणं प्राजापत्यं वा "॥ इति।

मनुः (११।१६०)—

"अभोज्यमन्नं नात्तव्यमात्मनः शुद्धिमिच्छता। अज्ञातभुक्तमुद्गार्यं शोध्यं वाप्याऽशु शोधनैः "॥

स्मृत्यन्तरे तु—

" भक्ष्याभक्ष्याण्यशेषाणि ब्राह्मणानां विशेषतः। तत्र शिष्टा यथा ब्रूयुस्तत्कर्तव्यमिति स्मृतम् "॥

अविक्रेयविक्रये प्रायश्चित्तम्। अविक्रेयविक्रये हारीतः—" गुडतिलपुष्पमूलफलपक्वान्नविक्रये सोमलाक्षालवणमधूनां तैलक्षीरतक्रदधिघृतगन्धचर्मवाससामन्यतमविक्रये चान्द्रायणं तथोर्णाकेशकेसरिभूधेनुवेश्माश्मशस्त्रविक्रये च मत्स्यमांसास्थिशृङ्गनखशुक्तिविक्रये तप्तकृच्छ्रं हिङ्गुगुग्गुलुहरितालमनःशिलाञ्जनगैरिकलाक्षालवणमणिमुक्ताप्रवालवैणवमृन्मयेषु च आरामतटाकोपवनपुष्करिणीसुकृतविक्रये त्रिषवणस्नाय्यधःशायी चतुर्थकालाहारो दशसहस्रं जपेद् गायत्रीं वत्सरेण पूतो भवति हीनमानोन्मानोन्मापनसंकरसंकीर्णविक्रये च " इति।

चतुर्विंशतिमते—

" सुराया विक्रयं कृत्वा चरेत्सौम्यचतुष्टयम्। लाक्षालवणमांसानां चरेच्चान्द्रायणत्रयम्॥
" मध्वाज्यतैलसोमानां चरेच्चान्द्रायणद्वयम्। पयःपायसापूपानां चरेच्चान्द्रायणव्रतम्॥
" दध्याज्येक्षुरसानां च गुडखण्डादिविक्रये। सर्वेषां स्नेहपक्वानां पराकं तु समाचरेत्॥
" सिद्धान्नविक्रये विप्रः प्राजापत्यं समाचरेत्। उपवासं तु तक्रस्य नक्तं काञ्जिनविक्रये॥
" पूगीफलानि मञ्जिष्ठां राजखर्जूरमेव च। एतेषां विक्रये कृच्छ्रं पनसस्य दिनद्वयम्।
" कदलीं नारिकेलं च नारङ्गं बीजपूरकम्। एतेषां पादकृच्छ्रं स्यात् जम्बीरादेस्तथैव च॥
" कस्तूरिकादिगन्धानां विक्रये कृच्छ्रमाचरेत्। कर्पूरादेस्तदर्धं स्याद् दिनं हिंग्वादिविक्रये॥
" तिलानां वि यं कृत्वा प्राजापत्यं समाचरेत्। यज्ञार्थं कृषिजातानां दानलब्धस्य विक्रये॥
" रक्तपीतानि वस्त्राणि कृष्णाजिनमथापि वा। एतेषां विक्रये कृच्छ्रं गर्गस्य वचनं यथा॥
" गोविक्रयं द्विजः कुर्याल्लाभार्थं धनमोहितः। प्राजापत्यं प्रकुर्वीत गजानां त्वैन्दवं स्मृतम्॥
" खराश्वाजादिकानां च करभाणां च विक्रये। पराकं तत्र कुर्वीत शुनि द्विगुणमाचरेत्॥
" नारीणां विक्रयं कृत्वा चरेच्चान्द्रायणं व्रतम्। द्विगुणं पुरुषाणां च व्रतमाहुर्मनीषिणः॥
" चान्द्रायणं प्रकुर्वीत एकाहं वेदविक्रये। अङ्गानां तु पराकं स्यात् स्मृतीनां कृच्छ्रमाचरेत्॥
" इतिहासपुराणानां चरेत्सांतपनं द्विजः। रहस्यपाञ्चरात्राणां कृच्छ्रं तत्र समाचरेत्॥
" गाथानां नीतिशास्त्राणां प्राकृतानां तथैव च। सर्वासामेव विद्यानां पादकृच्छ्रं समाचरेत् "॥ इति।

नारदः—" तण्डुलांश्च तिलान्माषान् फलपुष्पगुडाद्यपि। नागवल्लीदलं पूगंपर्णं कर्पूरमेव च॥
" कस्तूरीं कुङ्कुमं मूलं मुद्गं दधि घृतं पयः। कृष्णाजिनं च रुद्राक्षं ब्रह्मसूत्रं कमण्डलुम्॥
" ताम्रं कांस्यं तथा वस्त्रं कम्बलं रोचनं तथा। तिन्तिणीं लवणं मूलं पक्वमन्नं द्विजो यदि॥
"विक्रयित्वा तु यो जीवेत् स तु शूद्रो न संशयः। एतानि विक्रयित्वा तु हव्यकव्यानि नाचरेत्॥
" एतानि विक्रयित्वा तु प्राजापत्यं समाचरेत्। धनस्य संग्रहार्थं तु द्विगुणं कृच्छ्रमाचरेत्॥
" विप्रस्तु पक्षमात्रं च गोरसं विक्रयेद्यदि। तस्य देहविशुध्यर्थं तप्तकृच्छ्रमुदीरितम्॥
" मासमात्रं विक्रयित्वा चरेच्चान्द्रायणव्रतम्। ऋतुद्वयं विक्रयित्वा मण्डलं यावकं चरेत्॥

१ ग-नादि। २ ग-सोमायनं। ३ ग-ञ्जिक। ४ गघ-पूगं चूर्णं।

" ऋतुत्रयं विक्रयित्वा ब्रह्महन्ता भवेद् ध्रुवम् । षण्मासं गोरसं पक्कं पीत्वा शुद्धिमवाप्नुयात् ॥
" लवणं पक्कमन्नं च यदि मासं तु विक्रयेत् । तस्यैव निष्कृतिरियं यावकं वत्सरं चरेत् ॥
" तस्योपनयनं भूयः कर्तव्यं शुद्धिमिच्छता " ॥
कूर्मपुराणे—"अश्वधेनुमनुष्याश्च रासभः कुञ्जरस्तथा । कन्या नारी च मेषश्च पुस्तकं ब्रह्मसूत्रकम् ॥
" लवणं पललं चर्म लशुनं गृञ्जनं तथा । पिप्पली च मरीचाश्च हरिद्राश्च लवङ्गिकाः ॥
" औषधानि च यावन्ति मत्स्यकुक्कुटसूकराः । हिङ्गुजीरकवस्तूनि ताम्रं कांस्यादिकं तथा ॥
"एतानि मूल्यैः कृत्वा तु स्वल्पैर्वापि ततोऽधिकैः । विक्रयित्वाऽत्मभरणं कुर्याद्यदि स पापभाक् ॥
" मृत्वा नरकमासाद्य क्रिमिरूपे पतत्यधः । तस्मादेतद्विशुध्यर्थं प्रायश्चित्तमिहोच्यते ॥
" एकवारं द्विवारं वा बहुवारमनेकशः । तप्तं पराकं चान्द्रं च यावकं वर्षमाचरेत् ॥
" तस्योपनयनं भूयः पञ्चगव्येन शुध्यति ।
" वृद्धेरपि च या वृद्धिश्चक्रवृद्धिरुदाहृता । मासिमासि च या वृद्धिः सा शिखावृद्धिरिष्यते ॥
" ताभ्यां जीवेद्यदा विप्रः स वार्धुषिक उच्यते ।
" मासं जीवेद्यदा विप्रः पराकं कृच्छ्रमाचरेत् । मासद्वये तु तप्तं स्याच्चान्द्रं मासत्रये स्मृतम् ॥
" षण्मासे तु महाचान्द्रं वत्सरे द्विगुणं स्मृतम् । पतितः स्यात्परं विप्रः सर्वकर्मबहिष्कृतः " ॥

ऋणादि कृत्वा व्रताद्याचरणनिषेधः । **हेमाद्रौ**—

" स्वस्याकिंचन्यमज्ञात्वा ऋणं कृत्वा व्रतं चरेत् । भोगासक्तश्च यः स्वात्मविक्रयीत्युच्यते बुधैः ॥
" नित्यकर्माणि काम्यानि इष्टापूर्तादिकानि च । सर्वं तस्यैव भवति स्वयं वै निष्फलो भवेत् ॥
"अर्वाग्धनस्य द्वैगुण्यात् तस्माद्द्यात्सवृद्धिकम् । ऊर्ध्वं तु कर्मणां भ्रंशात् पतितः स्यान्न संशयः ॥
" हिरण्यगर्भं तस्योक्तं प्रायश्चित्तं महर्षिभिः । धनिने च धनं दत्वा प्रायश्चित्तं समाचरेत्"॥ इति ।
" कल्पान्ते भ्रूणहा मुच्येतर्णी तु न कदाचन " इति वचनमकृतप्रायश्चित्तविषयम् ।
यत्तु **संवर्त** आह—
" अग्निहोत्री तपस्वी च ऋणवान्म्रियते यदि । अग्निहोत्रं तपश्चैव सर्वं तद्धनिनां धनम् " ॥
इति तद्द्वैगुण्यादूर्ध्वं मरणे धनग्राहिपुत्राद्यभावे चावगन्तव्यम् ।

ब्राह्मणादिविक्रये प्रायश्चित्तम् । **हेमाद्रौ**—

" पूर्वजः पूर्वजं वापि बाहुजोरूजपादजान् । वशीकृत्यौषधैर्मन्त्रैर्विक्रयेद्यदि पापधीः ।
" बाले चान्द्रं द्विजे प्रोक्तं पौगण्डे तद्द्वयं चरेत् । तरुणे तु महाचान्द्रं प्रौढे प्रोक्तं तु तत्त्रयम् ॥
" भिन्नवर्णे विक्रये तु सहस्रं कृच्छ्रमाचरेत् ।
" विप्रं यः क्षत्रियो हृत्वा विक्रयेद्यदि पापधीः । ब्रह्महत्याव्रतं कृत्वा शुद्धिमाप्नोति पौर्विकीम् ॥
" तदर्धेनैव शुद्धः स्यादूरुजो विप्रविक्रये । शूद्रस्तु विक्रयेद्विप्रं मौसलं वधमर्हति ॥
" जारजं वाऽत्मजं वापि विक्रीणीयात्सुतं यदि । तद्दोषपरिहारार्थं महासान्तपनं चरेत् ॥
" बाले सान्तपनं प्रोक्तं पौगण्डे तद्द्वयं स्मृतम् । कौमारे प्रौढकाले च महासान्तपनत्रयम् ॥
" स्वपत्नीं विक्रयेद्यस्तु सतीं दुष्टामथापि वा । सतीं विक्रीय चान्द्रं स्यात्पराकं दुष्टचारिणीम् ॥
"बालिकायां षडब्दं स्यात् वृद्धायां नास्ति निष्कृतिः । ज्ञात्वा विक्रयते यस्तु द्विगुणं व्रतमाचरेत् ॥
" विवाहार्थं धनं गृह्णन् यत्किंचिद्द्विजमाश्रितः । स कन्याविक्रयी तस्य शुद्धिश्चान्द्रायणत्रयात् ॥

१ क्ष-च । २ ग-र्धे । ३ क्ष-द्विज ।

"द्विजः संपाद्य यो दासीं गृहकर्मसुखाप्तये। युवतिं विक्रयित्वा तां षडब्दं कृच्छ्रमाचरेत्॥
"स्नानादिनित्यकर्माणि इष्टापूर्तादिकानि च। उपोषणव्रतादीनि श्रौतस्मार्तादिकानि च॥
"विक्रीणीयात्तु यो विप्रो माघस्नानं तथैव च। चान्द्रयणत्रयं कृत्वा पुनःसंस्कारकृत्तथा॥
"पञ्चगव्यं ततः पीत्वा शुद्धिमाप्नोति नैष्ठिकीम्"॥

श्रुतिस्मृत्यादेः विक्रये प्रायश्चित्तम्। **वसिष्ठः**—
"श्रुतिं स्मृतिं धर्मशास्त्रं पुराणं ज्योतिषं तथा। पुस्तकं फलकं वापि तत्साधनमथापि वा॥
"विक्रयेद्यदि लोभात्मा महान्तं नरकं व्रजेत्। चान्द्रायणं पराकं वा कृत्वा शुद्धिमवाप्नुयात्"॥ इति।
मार्कण्डेयः—"सालग्रामशिलां यो वै तत्तच्चक्राङ्कितां द्विजः।
"शिवलिङ्गं चक्रपाणिप्रतिमां यदि विक्रयेत्। चान्द्रायणं प्रकुर्वीत पश्चात्तापसमन्वितः॥
"लक्ष्मीनृसिंहं वामनं च गोपालं श्रीधरं तथा। लक्ष्मीनारायणं चैव दधिवामनमेव च॥
"हिरण्यगर्भमित्यादिमूर्तीः पापापहारिणीः। रामादिविक्रये विप्रश्चरेच्चान्द्रायणत्रयम्॥
"लक्ष्मीनारायणं चैव तद्वयं दधिवामने। महाचान्द्रं प्रकुर्वीत लक्ष्मीनृसिंहविक्रये॥
"पराकं देहशुद्ध्यर्थं चरेद्विप्रो विचारयन्। लिङ्गे तु स्फाटिके चैव तथा मारकते द्विजः॥
"मासं दीक्षामुपागम्य प्रातः स्नात्वा यथाविधि।
"सूर्योदयं समारभ्य यावदस्तंगतो रविः। प्रत्यहं दशसाहस्रं जपेच्चैवं षडक्षरम्॥
"फलाहारं प्रकुर्वीत यदा मन्दायते रविः। स्थण्डिले शयनं कृत्वा मासान्ते शुद्धिमाप्नुयात्"॥ इति।

जलाग्न्यादिषु मर्तुमुद्यम्य निवृत्तस्य प्रायश्चित्तम्। चतुर्वर्णेषु यः कोऽपि स्वात्मघातार्थमुपक्रम्य कथंचित् वातात्प्रागेव निवर्तेत तस्य प्रायश्चित्तं प्रश्नपूर्वकमाह **पराशरः** (१२।५-८)—
"जलाग्निपतने चैव प्रव्रज्यानशनेषु च। प्रत्यावसितवर्णानां कथं शुद्धिर्विधीयते॥
"प्राजापत्यद्वयेनैव तीर्थाभिगमनेन च। वृषैकादशदानेन वर्णाः शुध्यन्ति ते त्रयः॥
"ब्राह्मणस्य प्रवक्ष्यामि वनं गत्वा चतुष्पथे। सशिखं वपनं कृत्वा प्राजापत्यद्वयं चरेत्॥
"गोद्वयं दक्षिणां दद्यात् शुद्धिं पाराशरोऽब्रवीत्। मुच्यते तेन पापेन ब्राह्मणत्वं च गच्छति"॥ इति।

नद्यादिप्रवेशनमग्निप्रवेशनं भृगुपतनं महाप्रस्थानगमनमनशनं चेति जलाग्न्यादयः पञ्च मरणहेतवः। जलादिमरणं द्विविधम्। विहितं प्रतिषिद्धं चेति। तत्र विहितमपि द्विविधम्। काम्यतपोरूपं प्रायश्चित्तरूपं चेति। तत्तु कलौ वर्जनीयम्। युगान्तरेष्वपि विहितत्वेन न प्रायश्चित्तार्हम्। क्रोधादिना यज्जलादिमरणं तत् प्रतिषिद्धम्। तदेवात्र परिशिष्यते। जलाग्नीति विषबन्धनोद्बन्धनादेरप्युपलक्षणम्। तत्र मर्तुमुद्यम्य मृतस्य प्रायश्चित्तं नास्ति। तत्कर्तुरभावात्। यस्तूद्यम्य मरणान्निवर्तते तस्योद्यमनिमित्तमिदं प्रायश्चित्तम्। प्रत्यवसिता निवृत्ताः। क्षत्रियस्य प्रायश्चित्तद्वयं वैश्यस्य तीर्थयात्रा शूद्रस्य वृषसहितगोदशकदानं ब्राह्मणस्य वनगमनादि व्रतम्। आत्मनो हननोद्यमेन ब्राह्मणत्वमपगतं चण्डालत्वमागतम्। पुनर्व्रतचरणेन चण्डालत्वनिवृत्तौ पुनः पूर्वसिद्धं ब्राह्मण्यं प्रतिपद्यते। तदाह **वृद्धपराशरः**—
"अनाशकान्निवृत्तस्तु चातुर्वर्ण्यव्यवस्थितः। चण्डालः स तु विज्ञेयो वर्जनीयः प्रयत्नतः॥
"ब्राह्मणानां प्रसादेन तीर्थाभिगमनेन च। गवां च दश दानेन वर्णाः शुध्यन्ति ते त्रयः॥
"ब्राह्मणस्य प्रवक्ष्यामि गत्वारण्यं चतुष्पथम्। सशिखं वपनं कृत्वा त्रिसन्ध्यमवगाहनम्॥

१ **कग**-च। २ **गघ**-रामं। ३ **क्ष**-णः। ४ **कग**-यम्य।

" सावित्र्यष्टसहस्रं तु जपेच्चैव दिने दिने । मुच्यते सर्वपापेभ्यो ब्राह्मणत्वं च गच्छति ।
"भैक्षार्थं विचरेद् ग्रामं गृहान् सप्त वने वसन् । धौतां भिक्षां समश्नीयादब्दार्धेन विशुध्यति" ॥ इति ।
तत्रैव व्रतान्तराण्याह **वसिष्ठः** (२३।१९–२२)—"जीवन्नात्मत्यागी कृच्छ्रं वा द्वादशरात्रं चरेत् ।
त्रिरात्रं वोपवसेत् । नित्यं स्निग्धेन वाससा । " प्राणानात्मनि संयम्य त्रिः पठेदघमर्षणम् ।
"अपि वैतेन कल्पेन गायत्रीं परिवर्तयेत् । अपि वाग्निमुपाधाय कूष्माण्डैर्जुहुयात् घृतम् " ॥ इति ।

तत्र जपहोमौ विद्वद्विषयौ कल्पनीयौ । द्वादशरात्रत्रिरात्रौ त्वविद्वद्विषये शक्ताशक्तभेदेन व्यवस्थिताविति **माधवीये** ।

पारिव्राज्यात् प्रच्युतौ प्रायश्चित्तम् । " प्रव्रज्यानशकेन च " इति **पराशरवचने** यः प्रव्रज्याशब्दः तस्यार्थान्तरमप्युक्तं **तत्रैव** । परिवृज्यते विवर्ज्यते । तथा च सति पारिव्राज्यात् प्रच्युतस्य ब्राह्मणस्य प्राजापत्यं प्रायश्चित्तमुक्तं भवति । तदिदं श्रद्धालोः पुनरुपनयनादिपुरःसरं पारिव्राज्यं जिघृक्षोर्वेदितव्यम् । मोहान्निवृत्तौ **संवर्तः**—
" संन्यस्य दुर्मतिः कश्चित् प्रत्यापत्तिं व्रजेद्यदि । स कुर्यात्कृच्छ्रमश्रान्तः षण्मासान् प्रत्यनन्तरम् ॥
" पुनः परिव्रजेद्विप्रो यथाविधि समाहितः " ॥ इति । अत्यन्ताशक्तमुग्धविषये **वृद्धपराशरः**—
" यः प्रत्यवसितो विप्रः प्रव्रज्यातो विनिर्गतः । अनाशकनिवृत्तश्च गार्हस्थ्यं चेच्चिकीर्षति ॥
"चरेत् त्रीणि च कृच्छ्राणि त्रीणि चान्द्रायणानि च। जातकर्मादिभिः सर्वैः संस्कृतः शुद्धिमाप्नुयात्"॥इति।
शक्तो यस्तु पुनः पारिव्राज्यं न जिघृक्षति तस्य मरणान्तिकं राजदासत्वादिकम् ।
अत्र **नारदः**—
"राज्ञ एव तु दासः स्यात् प्रव्रज्यावसितो द्विजः । न तस्य प्रतिमोक्षोऽस्ति न विशुद्धिः कथंचन"॥ इति।
कात्यायनः—
" प्रव्रज्यावसिता यत्र त्रयो वर्णा द्विजातयः । निर्वासं कारयेद्विप्रं दास्यं क्षत्रविशोर्नृपः " ॥
दक्षः—
" पारिव्राज्यं गृहीत्वा तु यः स्वधर्मे न तिष्ठति । श्वपदेनाङ्कयित्वा तं राजा शीघ्रं प्रवासयेत् " ॥
याज्ञवल्क्यः (व्य. १८३)—" प्रव्रज्यावसितो राज्ञो दासः स्यान्मरणान्तिकम्" ॥ **अङ्गिराः**—
" संन्यासं चैव यः कृत्वा पुनरुत्तिष्ठते द्विजः । न तस्य निष्कृतिर्दृष्टा स्वधर्मात् प्रच्युतस्य तु ॥
" आरूढो नैष्ठिकं कर्म पुनरावर्तयेद्यतिः । आरूढपतितो ज्ञेयः सर्वकर्मबहिष्कृतः ॥
" चण्डालाः प्रत्यवसिताः परिव्राजकतापसाः । तेषां जातान्यपत्यानि चण्डालैः सह वासयेत् ॥
" नैष्ठिकानां वनस्थानां यतीनामवकीर्णिनाम् । शुद्धानामपि लोकेऽस्मिन् प्रत्यापत्तिर्न विद्यते"॥ इति ।
बह्वृचपरिशिष्टे—
" धीपूर्वं रेत उत्सर्गो द्रव्यसंग्रह एव च । पतत्यसौ ध्रुवं भिक्षुर्यस्य भिक्षोर्द्वयं भवेत् " ॥

आत्मघातिनः शववहनादौ प्रायश्चित्तम् । आत्महननस्यातिकष्टत्वमुक्त्वा तच्छववहनादौ प्रायश्चित्तमाह **पराशरः** (४।१–४)—
" अतिमानादतिक्रोधात् स्नेहाद्वा यदि वा भयात् । उद्बध्नीयात् स्त्रीपुमान्वा गतिरेषा विधीयते ॥
" पूयशोणितसंपूर्णे त्वन्धे तमसि मज्जति । षष्टिं वर्षसहस्राणि नरकं प्रतिपद्यते ।

---

१ गघ–पारिव्राज्यं तेन विवक्ष्यते । २ क्ष–क्षाद्व्य ।

" नाशौचं नोदकं नाग्निं नाश्रुपातं च कारयेत् ।
" वोढारोऽग्निप्रदातारः पाशच्छेदकरास्तथा । तप्तकृच्छ्रेण शुध्यन्तीत्येवमाह प्रजापतिः ॥
" तप्तकृच्छ्रेण शुद्धास्ते कुर्युर्ब्राह्मणभोजनम् । अनडुत्सहितां गां च दद्याद्विप्राय दक्षिणाम्"॥ इति । अन्धतमस्तीव्रो नरकविशेषः । यत्तु **स्मृत्यन्तरे**—

"एतानि पतितानां तु यः करोति विमोहितः । तप्तकृच्छ्रद्वयेनैव तस्य शुद्धिर्न चान्यथा"॥ इति । एतानि दहनादीनि तेषां प्रकृतत्वात् तत् कामकारविषयम् । "विहितं यदकामानां कामतो द्विगुणं भवेत् " इति **स्मरणात्** । यच्च **बृहस्पतिनोक्तम्**—

" विषोद्बन्धनशस्त्रेण यः स्वात्मानं प्रमापयेत् । मृते मेध्येन लेप्तव्यो नान्यं संस्कारमर्हति ॥
"पाशच्छेत्ता तु यस्तस्य वोढा चाग्निप्रदस्तथा । सोऽतिकृच्छ्रेण शुध्येत पिण्डदो वा नराधमः "॥ इति ।

यच्च **यमेनोक्तम्**—

"गोब्राह्मणहतं दग्ध्वा मृतमुद्बन्धनेन च । पाशं छित्वा तथा तस्य कृच्छ्रं सान्तपनं चरेत्"॥ इति तत् देशकालादितारतम्यापेक्षयोक्तम् । देशादितारतम्यस्य प्रायश्चित्ततारतम्यहेतुत्वात् ।

तथा च **व्याघ्रः**—

"देशं कालं वयः शक्तिं ज्ञानं बुद्धिकृतं तथा । अबुद्धिकृतमभ्यासं ज्ञात्वा निष्क्रयणं वदेत्"॥ इति । शक्त्यादितारतम्यवत् निमित्ततारतम्यमपि प्रायश्चित्ततारतम्ये कारणम् । अत एव स्पर्शाद्यल्पनिमित्ते स्वल्पं प्रायश्चित्तमाह **प्रजापतिः**—

"तच्छवं केवलं स्पृष्ट्वा पातयित्वाश्रु वा तथा । एकरात्रं तु नाश्नीयात् त्रिरात्रं बुद्धिपूर्वकम्"॥ इति। निमित्तभूयस्त्वेऽधिकं प्रायश्चित्तमाह **वसिष्ठः**—

"य आत्मत्यागिनां कुर्यात् स्नानं प्रेतक्रियां द्विजः । तप्तकृच्छ्रं तु सहितं चरेच्चान्द्रायणव्रतम्" ॥ इति । प्रमादादिकरणे पातित्याभावात् नैतत्प्रायश्चित्तम् । तच्चाधस्तात् प्रतिपादितम् ।

अनृतभाषणे प्रायश्चित्तम् । अनृतभाषणे **मनुः** (८।१०६–१०७)—

" वाग्दैवत्यैस्तु चरुभिर्यजेरंस्ते सरस्वतीम् । अनृतस्यैनसस्तस्य कुर्वाणो निष्कृतिं पराम् ॥
" कूश्माण्डैर्वापि जुहुयात् घृतमग्नौ यथाविधि । उदित्यृचा वा वारुण्या तृचेनाब्दैवतेन वा ॥
" अनृती सोमपः कुर्यात् त्रिरात्रं परमं तपः । पूर्णाहुतिं वा जुहुयात् संततेन घृतेन तु " ॥ इति ।

याज्ञवल्क्यः (प्रा. २७९)—

"मयि तेज इति च्छायां स्वां दृष्ट्वाम्बुगतां जपेत् । सावित्रीमशुचौ दृष्टे चापले चानृतेऽपि च" ॥ इति । एतत्कामकारे द्रष्टव्यम् । अकामकृते अनृतवचने **मनुः** (५।१४४)—

" सुप्त्वा क्षुत्वा च भुक्त्वा च निष्ठीव्योक्त्वानृतानि च । पीत्वापोऽध्येष्यमाणश्च आचामेत्प्रयतोऽपि सन् " ॥ इति ।

मिथ्याभूतचतुर्वर्णवधशपथे प्रायश्चित्तम् । एतस्य कार्यस्याकरणे चतुर्वर्णेष्वन्यतमं हतवानस्मीति शपथं कृत्वा यस्तत् कार्यं न करोति तस्य प्रायश्चित्तमाह **यमः**—

" विप्रस्तु वधसंयुक्तं कृत्वा तु शपथं मृषा । ब्राह्मणो यावकान्नेन व्रतं चान्द्रायणं चरेत् ॥
" क्षत्रियस्य पराकं तु प्राजापत्यं तथा विशः । वृषलस्य त्रिरात्रं तु व्रतं शूद्रहणश्चरेत् ॥
" केचिदाहुरपापं तु वृषलस्य वधं मुधा । न ममैतन्मतं यस्माद्धतस्तेन भवत्यसौ " ॥ इति ।

---

१ **गघ**–कृत्स्नां । २ **ग**–च्छ्रेण । ३ **गघ**–सप्तवत्या ।

प्रतिश्रुत्यानृतोक्तौ **हारीतः**—
“ प्रतिश्रुत्यानृतं ब्रूयान्मिथ्यासत्यमथापि वा । स तप्तकृच्छ्रसहितं चरेच्चान्द्रायणव्रतम् ” ॥ इति ।
ब्रह्मचार्यादिविषये **गार्ग्यः**—
“ त्रिरात्रमेकरात्रं वा ब्रह्मचार्यनृतं चरेत् । मासं भुक्त्वा ब्रह्मचारी पुनः संस्कारमाचरेत् ॥
“ अभ्यासे चैन्दवं कुर्यान्नैष्ठिको द्विगुणं चरेत् । वनस्थस्त्रिगुणं कुर्याद्यतिः कुर्याच्चतुर्गुणम् ॥
“ मांसाशने चानृतोक्तौ शवनिर्वहणे तथा ” ॥ इति ।
क्वचित्तु निमित्तविशेषेऽनृतमपि बुद्धिपूर्वं वक्तव्यं तदाह **याज्ञवल्क्यः** (व्य. ८३)—
“ वर्णिनां तु वधो यत्र तत्र साक्ष्यनृतं वदेत् । तत्पावनाय निर्वाप्यश्चरुः सारस्वतो द्विजैः ”॥ इति । स्वोत्कर्षेऽनृतवचनं **मनुना** (११।५५)—“ अनृतं च समुत्कर्षे राजगामि च पैशुनम् ” इति ब्रह्महत्यासमेषु मध्ये पठितम् ।
“ निषिद्धभक्षणं जैह्म्यमुत्कर्षस्य वचोऽनृतम् ” इति **याज्ञवल्क्येन** (प्रा. २२९) सुरापानसमेषु पठितम् । **विष्णुना** तु (३७।१) ‘अनृतवचनमुत्कर्षे’ इत्युपपातकत्वमुक्तम् । अत्र च विषयभेद उक्तो **माधवीये**—‘ द्वेष्यं पुरुषं राजादिभिर्मारयितुं तस्मिन्नविद्यमानमपि महान्तमपराधमारोप्यानृतं चेत् ब्रूयात् तत् ब्रह्महत्यासमं वधपर्यवसायित्वात् । यस्तु लाभपूजाख्यातिकामो राजसभादौ स्वस्मिन्नविद्यमानमपि चतुर्वेदाभिज्ञत्वादिकं प्रथयितुमनृतं ब्रूते तत्सुरापानसममतिगर्हितत्वात् । यस्तु सुखगोष्ठ्यादौ परोपकारमन्तरेण वृथानृतं ब्रूते तस्यैतदुपपातकमिति । तत्राद्ययोः प्रायश्चित्तं **विष्णुनो**क्तम् (५४।१४)–‘ समुत्कर्षेऽनृते गुरोरलीकनिर्बन्धे तदवज्ञानकरणे च मासं पयसा वर्तेत ” इति । तृतीये तु **याज्ञवल्क्याद्युक्तं** द्रष्टव्यम्–‘ शतमश्वानृते हन्ति सहस्रं तु गवानृते ’ इत्यादिना* प्रतिपादिते दोषतारतम्ययुक्तेऽनृते उक्तप्रायश्चित्तेषु तारतम्यं द्रष्टव्यम् ।

श्रौताग्नित्यागे प्रायश्चित्तम् । श्रौताग्नित्यागे प्रायश्चित्तमाह **विष्णुः** (५४।१३)— “ अग्न्युत्सादी त्रिषवणस्नाय्यधःशायी संवत्सरं सकृद्भैक्षेण वर्तेत ” इति । **वसिष्ठः** (१।२३)– “योऽग्नीनपविध्येत् स कृच्छ्रं द्वादशरात्रं चरित्वा पुनराधानं कारयेत्” इति । **मनुः** (११।४१)–
“ अग्निहोत्र्यपविध्याग्नीन् ब्राह्मणः कामकारतः । चान्द्रायणं चरेन्मासं वीरहत्यासमं हि तत् ॥
“अग्निहोत्र्यपविध्याग्नीन् मासादूर्ध्वं तु कामतः । कृच्छ्रं चान्द्रायणं चैव कुर्यादेवाविचारयन्”॥ इति ।
हारीतः—“ संवत्सरोत्सन्नेऽग्निहोत्रे चान्द्रायणं चरित्वा पुनरादध्यात् । द्विवर्षोत्सन्ने चाद्रायणं सोमायनं च कुर्यात् । त्रिवर्षोत्सिन्ने संवत्सरं कृच्छ्रमभ्यस्य पुनरादध्यात् ” इति । **शंखोऽपि**— “ अग्न्युत्सादी संवत्सरं प्राजापत्यं चरेत् गां च दद्यात् ”। इति । **भारद्वाजः**—“ द्वादशाहातिक्रमे त्र्यहमुपवासो मासातिक्रमे द्वादशाहमुपवासः संवसरातिक्रमे मासोपवासः पयोभक्षणं च ” इति । एतत् सर्वमालस्यादिनिमित्तत्यागविषयम् । यत्तु **भारद्वाजगृह्येऽ**भिहितम्—
“ प्राणायामशतमा दशरात्रं कुर्यादुपवासः स्यात् आ विंशतिरात्रमत ऊर्ध्वमा षष्टिरात्रात् तिस्रो रात्रीरुपवसेत् । अत ऊर्ध्वं मासं वत्सरात् प्राजापत्यं चरेत् । अत ऊर्ध्वं कालबहुत्वे दोषबहुत्वं इति तत् प्रामादिकत्यागविषयम् । यत्तु **जातुकर्णिराह**—“ अतिकालं च जुहुयादग्नौ विप्राय वा यवम् । नष्टेऽग्नौ विधिवद्दद्यात् कृत्वाऽऽधानं पुनर्द्विजः ” ॥ इति । तदौपासनाग्निविषयम् ॥

---

१ घ–निःसारणे । *मनु स्मृ. ८।९९ ।

नास्तिक्यप्रायश्चित्तम् । नास्तिक्यप्रायश्चित्तमाह **वसिष्ठः** (६५।२९)—“ नास्तिकः कृच्छ्रं द्वादशरात्रं चरित्वा विरमेन्नास्तिक्यात् ” इति । तदेतदुपपातकनास्तिक्यविषयम् । पातकनास्तिक्ये तु **शङ्खः**–“ नास्तिको नास्तिकवृत्तिः कृतघ्नः कूटव्यवहारी मिथ्याभिशंसीत्येवं पञ्च संवत्सरं ब्राह्मणगृहे भैक्षं चरेयुः ” इति । नास्तिकस्य त्रैविध्यमुक्तं **माधवीये**—

“ नास्तिकस्त्रिविधः प्रोक्तो धर्मज्ञैस्तत्त्वदर्शिभिः । क्रियादुष्टो मनोदुष्टो वाग्दुष्टश्च तथैव च ॥

“ उपपातकस्तु वाग्दुष्टो मनोदुष्टस्तु पातकः । अभ्यासात्तु क्रियादुष्टो महापातक उच्यते ” ॥ इति ।

महापातकनास्तिके तु **हारीतः**—“ कन्यादूषी सोमविक्रयी वृषलीपतिः कौमारदारत्यागी सुरामद्यपः शूद्रयाजको गुरोः प्रतिहन्ता नास्तिको नास्तिकवृत्तिः कृतघ्नः कूटव्यवहारी ब्राह्मणमित्रघ्नो मिथ्याभिशंसी पतितसंव्यवहारी मित्रध्रुक् शरणागतघाती प्रतिरूपकवृत्तिरित्येते पञ्चतपोऽभ्रावकाशजलशयनान्यनुतिष्ठेयुः क्रमेण ग्रीष्मवर्षाहिमन्तेषु मासं गोमूत्रयावकमश्नीयुः ” ॥ इति ।

एकपङ्क्तौ वैषम्येण दाने । एकपङ्क्त्युपविष्टानां वैषम्येण दानादौ **यमः**—

“न पङ्क्त्यां विषमं दद्यान्न याचेन्न तु दापयेत् । प्राजापत्येन कृच्छ्रेण मुच्यते कर्मणस्ततः”॥ इति ।

अपाङ्क्तेयपङ्क्तिभोजनादौ प्रायश्चित्तम् । अपाङ्क्तेयपङ्क्तिभोजने **मार्कण्डेयः**—

“ आपाङ्क्तेयस्य यः कश्चित् पङ्क्तौ भुङ्क्ते द्विजोत्तमः । अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ” ॥

पतितादिसंभाषणे **गौतमः** (९।१७–१९)—“ न म्लेच्छाशुच्यधार्मिकैः सह संभाषेत । संभाष्य पुण्यकृतो मनसा ध्यायेत् । ब्राह्मणेन वा संभाषेत ” इति अप्सु मूत्रपुरीषकरणे **सुमन्तुः**—

“ अप्स्वग्नौ वा मेहतस्तप्तकृच्छ्रम् ” इति । आर्तविषये **मनुः** (११।२०२)—

“ विनाद्भिरप्सु वाऽप्यार्तः शारीरं संनिवेश्य तु । सचेलो मुहुराप्लुत्य गामालभ्य विशुध्यति ” ॥

कामकारे तु **यमः**—

“ आपद्गतो विना तोयं शारीरं यो निषेवते । एकाहं क्षपणं कृत्वा सचेलः स्नानमाचरेत् ” । इति ॥

ब्रह्मसूत्रं विना मूत्रपुरीषादिकरणे प्रायश्चित्तमुक्तं **स्मृत्यंतरे**—

“ विना यज्ञोपवीतेन यद्युच्छिष्टो भवेत् द्विजः । प्रायश्चित्तमहोरात्रं गायत्र्यष्टशतं तु वा ॥

“ अकामतस्तु पिबतो मेहतश्चैव भुञ्जतः । प्राणायामत्रिकं षट्कं नक्तं च त्रितयं क्रमात् ” ॥ इति ।

संवर्तः—

“ अनाचान्तः पिबेद्यस्तु अपि वा भक्षयेत् द्विजः । गायत्र्यष्टसहस्रं तु जपं कृत्वा विशुध्यति” ॥ इति ।

पलाशदारुशयनादौ प्रायश्चित्तम् । **शङ्खः**—

“ अध्यास्य शयनं यानमासनं पादुके तथा । द्विजः पलाशवृक्षस्य त्रिरात्रं तु व्रती भवेत् ॥

“ द्वौ विप्रौ ब्राह्मणाग्नी वा दंपती गोद्विजोत्तमौ । अन्तरेण यदा गच्छेत् कृच्छ्रं सांतपनं चरेत् ॥

“ होमकाले तथा दोहे स्वाध्याये दारसंग्रहे । अन्तरेण यदा गच्छेत् द्विजश्चान्द्रायणं चरेत् ॥

“ क्षत्रियस्तु रणे पृष्ठं दत्वा प्राणपरायणः । संवत्सरं व्रतं कुर्यात् छित्वा वृक्षं फलप्रदम् ” ॥ इति

स एव—“ दुःस्वप्नारिष्टदर्शनादौ हिरण्यं घृतमर्पयेत् ” ॥ इति ।

---

१ गघ–शाहं । २ घ–श्राद्द्यात् ।

श्राद्धे निमन्त्रितस्य कालातिक्रमे प्रायश्चित्तम् । श्राद्धे निमन्त्रितस्य कालातिक्रमे **यमः**—

" केतनं कारयित्वा तु योऽतिपातयते द्विजः । ब्रह्महत्यामवाप्नोति शूद्रयोनौ प्रजायते ॥

" एतस्मिन्नेनसि प्राप्ते ब्राह्मणो नियतव्रतः । यतिचान्द्रायणं चैर्त्वा ततश्चान्द्रायणं चरेत् " ॥ इति ।

क्षत्रियाद्यभिवादनादौ प्रायश्चित्तम् । क्षत्रियाद्यभिवादने **हारीतः**—" क्षत्रियस्याभिवादनेऽहोरात्रमुपवसेत् । वैश्यस्य द्विरात्रं शूद्रस्य त्रिरात्रमुपवासः । शय्यारूढपादुकोपानदारोपितपादोच्छिष्टान्धकारस्थश्राद्धकृज्जपदेवपूजादिरनाभिवादने त्रिरात्रमुपवासः । अन्यत्र निमन्त्रितस्यान्यत्र भोजने त्रिरात्रमुपवासः " ॥ इति ।

शूद्रस्य वेदवाक्यश्रवणे प्रायश्चित्तम् । शूद्रस्य वेदवाक्यश्रवणादौ **गौतमः (१२।४)**—"अथ हास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणमुदाहरणे जिह्वाच्छेदो धारणे शरीरभेदः"॥इति ।

प्रतिग्रहविचारः । अथ प्रतिग्रहो निरूप्यते । वृत्त्यर्थं सत्प्रतिग्रहे न प्रायश्चित्तापेक्षा ।

" विहितात् प्रतिगृह्णीयात् गृहधर्मप्रसिद्धये । आत्मनो वृत्तिमन्विच्छन् गृह्णीयात्साधुतः सदा ॥

" अनापद्यपि गृह्णीयात् याज्यतः शिष्यतस्तथा । धर्मतस्तु द्विजो गृह्णन् न धर्मात् परिहीयते" ॥ इति **स्मृतेः** । असत्प्रतिग्रहे प्रायश्चित्तं कर्तव्यम् । स पञ्चविधः—

" असत्प्रतिग्रहः प्रोक्तः कालतो देशतस्तथा । स्वरूपतो जातितश्च कर्मतश्चेति पञ्चधा " ॥ इति **स्मरणात्** । कालो ग्रहणादिः । देशः कुरुक्षेत्रादिः । स्वरूपं मेषीकृष्णाजिनतुलोभयतोमुख्यादिकम् । जातिः शूद्रादिः । कर्म पतनीयवृत्तिः । **मनुः** (१०।१०९)—

"प्रतिग्रहः प्रत्यवरः प्रेत्यं विप्रस्य गर्हितः । प्रतिग्रहेण विप्राणां ब्राह्मं तेजो विनश्यति (४।१८६) ।

" प्रतिग्रहीतुर्यत्पुण्यं दातारमधिगच्छति । दातुश्चैव हि यत्पापं प्रतिग्राहिणमृच्छति ॥

" प्रायश्चित्तमतः कार्यं भीरुणा चानुतापिना ॥

"यद्गर्हितेनार्जयन्ति कर्मणा ब्राह्मणा धनम् । तस्योत्सर्गेण शुध्यन्ति जपेन तपसैव च (११।१९३)"॥ इति । उत्सर्गेण त्यागेन । जपेन वेदपारायणगायत्र्यादिजपेन । तपसा कृच्छ्रचान्द्रायणादिना च शुध्यन्तीत्यर्थः । **वृद्धमनुः**—

" कृषेस्तु विंशकं भागं वाणिज्यात् षष्ठमंशकम् । प्रतिग्रहे तुरीयांशं त्यक्त्वा पापात्प्रमुच्यते " ॥ इति । **व्यासः**—

" वाणिज्यस्याष्टमं भागं भागं विंशतिमं कृषेः । प्रतिग्रहे चतुर्थांशं त्यक्त्वा पापैः प्रमुच्यते ॥

" अन्यथा निष्कृतिर्नास्ति जपैस्तीर्थनिषेवया " ॥ इति । **चतुर्विंशतिमते**—" प्रतिषिद्धेषु दानेषु षष्ठांशं परिकल्पयेत् " इति । **हेमाद्रौ**—" अथ चेत्प्रतिगृह्णाति ब्राह्मणो वृत्तिकर्शितः ॥

" दशांशमार्जितात् दद्यादेवं तत्र न हीयते । गृहीतात् षोडशांशं तु पञ्चमांशमथापि वा " ॥ अत्राभियुक्तैर्व्यवस्था दर्शिता—पञ्चदोषदुष्टप्रतिग्रहे साङ्गं द्रव्यत्यागं कुर्यात् ।

" अज्ञानाद्यदि वा मोहादसद्द्रव्यं प्रगृह्य तु । सर्वं द्रव्यं परित्यज्य चान्द्रायणमथाचरेत् ॥ " इति **स्मरणात्** । त्यक्तं च द्रव्यं ब्राह्मण एव गृह्णीयात् । 'प्रहीणं ब्राह्मणस्येति' **स्मरणात्** । एवं कृत्वा जपतपोभ्यां शुद्धिः कार्या । त्रिचतुरदोषदुष्टस्य दरिद्रस्य चतुर्थांशत्यागः । आढ्यस्य त्वर्धत्यागः कार्यः । 'असत्प्रतिग्रहे तु त्वर्धं त्यक्त्वा पापात्प्रमुच्यते' इति **स्मरणात्** । दोषद्वययुक्तस्य पञ्चमांशत्यागः ।

---

१ **ख**–ती । २ **क्ष**–मास । ३ **गघ**–ब्रात्ये ।

एकदोषदुष्टस्य षष्ठांशत्यागः। दरिद्रस्योभयत्रापि दशांशत्यागः षोडशांशत्यागो वा कार्यः। सर्वत्र द्रव्यत्यागानन्तरं जपादिरूपं प्रायश्चित्तं च कर्तव्यम्। कृष्णाजिनकालपुरुषतिलधेनूभयतोमुखीमहिषीमेषीदानादीनां निषिद्धप्रधानद्रव्याणां प्रधानद्रव्यं दक्षिणाद्यङ्गद्रव्यस्य चतुर्थांशं च त्यक्त्वा प्रायश्चित्तं च कार्यम्। **अन्ये** तु प्रधानद्रव्यं परित्यज्य दक्षिणाद्यङ्गद्रव्यं स्वीकृत्य प्रायश्चित्तं कार्यमिति। स्वल्पद्रव्यपरिग्रहे प्रायश्चित्तमुक्तं **षट्त्रिंशन्मते** "भिक्षामात्रे गृहीते तु पुण्यं मन्त्रमुदीरयेत्" ॥ इति। **हारीतः**—"मणिवासोगृहादीनां प्रतिग्रहे सावित्र्यष्टसहस्रं जपेत्" ॥ **याज्ञवल्क्यः**—(प्रा. २९०)

"गोष्ठे वसन् ब्रह्मचारी मासमेकं पयोव्रतः। गायत्रीजप्यनियतः शुध्यतेऽसत्प्रतिग्रहात्" ॥ इति।

अत्र जपसंख्या **मनुना** दर्शिता (११,१९४)

"जपित्वा त्रीणि गायत्र्याः सहस्राणि समाहितः। मासं गोष्ठे पयः पीत्वा मुच्यतेऽसत्प्रतिग्रहात्"॥ इति। एतच्च दातृद्रव्ययोरुभयोरसत्त्वे वेदितव्यम्। अन्यतरस्यासत्त्वे तु **षट्त्रिंशन्मते** दर्शितम्—

"ऐन्दवेन मृगारेष्ट्या कदाचिन्मित्रविन्दया। पवित्रेष्ट्या विशुध्यन्ति सर्वे घोराः प्रतिग्रहाः" ॥ इति।

"देव्या लक्षजपेनैव शुध्यन्तेऽसत्प्रतिग्रहात्" ॥ इति।

यत्तु **वृद्धहारीतवचनम्**—"राज्ञः प्रतिग्रहं कृत्वा मासमप्सु सदा वसेत् ॥
"षष्ठे काले पयोभक्षः पूर्णे मासे प्रमुच्यते। तर्पयित्वा द्विजान् कामैः सततं नियतव्रतः" ॥ इति तत् पञ्चदोषदुष्टप्रतिग्रहविषयमिति **माधवीये**।

तुलापुरुषादिप्रतिग्रहे। तुलादिषोडशमहादानप्रतिग्रहे प्रातिस्विकं प्रायश्चित्तमुक्तं **हेमाद्रौ**। तदिदानीं निरूप्यते। तत्र **देवस्वामी**—"तुलाप्रतिग्रहीता च पूर्वजो विषयातुरः।

"सोऽरण्ये निर्जले देशे भवति ब्रह्मराक्षसः। नास्त्येव निष्कृतिस्तस्य नवलक्षजपादृते" ॥

देवलः—"ऋणापकरणार्थं वा तथा यागार्थमेव वा। द्विजः प्रतिग्रहं कृत्वा तदर्धं विनियोजयेत् ॥

"सुवर्णरत्नरजतैस्तुलाश्च त्रिविधाः स्मृताः। तासां प्रतिग्रहे विप्रः ऋणयागादिभिर्विना ॥

"रौरवे नरके घोरे ऋत्विग्भिः सह मज्जति"॥ इति। ऋत्विजो ब्रह्मा सदस्यो होतारो जापकाश्च।

देवीपुराणे—

"आत्मतुल्यसुवर्णं यः प्रतिगृह्य धनातुरः। अकृत्वा निष्कृतिं तस्य ऋत्विग्भिः सह राक्षसः"॥ इति।

गारुडपुराणे—

"श्रीशैले हेमकूटे वाऽप्यचले गन्धमादने। अहोबिले वेंकटाद्रौ काश्यादिषु विशेषतः ॥

"सूर्योपरागकालेषु अन्यकालेषु पर्वसु। प्रतिगृह्य तुलां विप्रो राज्ञो यो भोगलालसः ॥

"सोऽरण्ये निर्जले देशे दृष्टिहीनो निराश्रयः। सहस्राब्दं भवेद्रक्षो नवलक्षजपादृते" ॥ इति।

ब्रह्माण्डे—

"सेत्वादिपुण्यतीर्थेषु उपरागादिपर्वसु। पूर्वजः प्रतिगृह्णाति तुलां राज्ञो विशेषतः ॥

"भवेद्रक्षः सहस्राब्दं दृष्टिहीनो निराश्रयः। निष्कृतिस्तस्य गायत्र्या नवलक्षजपादिह ॥

"यदा प्रतिग्रहस्तस्यास्तदा पातित्यमर्हति। सन्ध्यादिनित्यकर्माणि विफलानि न संशयः ॥

"सावित्रीपतितं विद्यात् पुनःसंस्कारमर्हति" ॥

---

१ **गघ**–गवा।

स्कान्देऽपि—
“ प्रतिगृह्य तुलामाशु नवलक्षं जपेद्बुधः । चतुर्थांशव्ययं कृत्वा यज्ञं वा सर्वदक्षिणम् ॥
“ तदर्धं ब्रह्मणः प्रोक्तं तदर्धं सदसस्पतेः । होतॄणां द्वारपालानां पाठकानां महामुने ॥
“ जापकानामिदं प्रोक्तं तयोरर्धं विचक्षणैः ”॥ तयोः ब्रह्मसदस्ययोः । अर्धं सर्वेषां प्रायश्चित्तमित्यर्थः।
मार्कण्डेयपुराणे तु—“ तुलाप्रतिग्रहीता च प्रायश्चित्तमिदं चरेत् ।
“ चतुर्थार्धांशभागेन परिषद्विधिपूर्वकम् । चतुर्थांशं धनं सर्वं चतुर्धा भागमाचरेत् ॥
“ अनुवादे भागमेकं भागमेकं विधायके । भागः परिषदि प्रोक्तः शेषं कृच्छ्रादिषु न्यसेत् ” ॥
मार्कण्डेयपुराणे तु—
“ प्रधानं संपरित्यज्य यागार्थं दक्षिणां वहन् । तस्यैव निष्कृतिरियं मुनिभिः परिकीर्तिता ॥
“ परेद्युर्वा तदानीं वा स्नात्वा शुचिरलंकृतः । नीलवर्णां च गामेकां श्यामां वाऽऽदाय निर्गदाम् ॥
“ आपोहिष्ठादिभिर्मन्त्रैः प्राङ्मुखीं मार्जयेज्जलैः । रक्तेन वाससाच्छाद्य त्रिः परिक्रम्य यत्नतः ॥
“ तन्मूत्रस्नानमासाद्य जपेन्मन्त्रमिदं सुधीः । हिरण्यगर्भ इत्येनामृचमान्तं समुच्चरन् ॥
“ विष्णुर्योनिमित्येताभिरान्ताभिरनुमन्त्रयेत् ॥
“ स्थित्वा मुहूर्तं गोगर्भे स्वमूर्धानं निधाय च । अष्टयोनिमष्टपुत्रामनुवाकं जपेद्बुधः ॥
“ ततः परं पुनर्जातं मन्येतात्मानमादृतः । स्वयं पिताथ वाचार्यो जातकर्मादि भावयेत् ।
“ व्रतान्नं तत्र तद्द्रव्यं दत्वाचार्यं क्षमापयेत् । ततः पूतो भवेदेषु दक्षिणामात्रसंग्रहे ” ॥
प्रधानत्यागाभावे पूर्वोक्तैरष्टलक्षजपादिभिः पूतो भवति । तथा च **हेमाद्रौ**—
“ अन्यथा निष्कृतिर्नास्ति ह्यकृत्वा निष्कृतीरिमाः । सहस्राब्दं भवेद्रक्ष आचार्यो द्रव्यलोभतः ॥
“ ब्रह्मा सदस्पतिश्चैव तदर्धं राक्षसो भवेत् । द्वारपा ऋत्विजश्चैव होतारो जापका अपि ॥
“ तयोरर्धं भवेयुस्ते राक्षसा घोररूपिणः ॥
“ आचार्यार्धं जपः प्रोक्तो ब्रह्मणः सदसस्पतेः । तयोरर्धं तु होतॄणामितरेषामिति स्थितिः ” ॥
नागरखण्डे—“एवं हिरण्यगर्भस्य ग्रहणे निष्कृतिः पुरा । दृष्टा मन्वादिभिर्विप्रैर्धर्मशास्त्रपरायणैः ॥
“ अन्यथा निष्कृतिर्नास्ति प्रायश्चित्तैर्जडोदितैः ” ॥

ब्रह्माण्डघटविषये—
“ ततः परं विशुध्यर्थादिह लोके परत्र च । पुनः संस्कारविधिना ह्यभ्यसेद्वेदमातरम् ॥
“ ब्रह्मोपदेशं तत्रापि कुर्यादाचार्यवाक्यगैः । ततः परं जपेद्वेदमातरं प्रत्यहं सुधीः ॥
“ प्रतिग्रहपरान्नेषु विमुखो विष्णुमादरात् । चिन्तयन्वर्तयन् विप्रः सुखी भव परत्र च ॥
“ एवं कृत्वा द्विजो यस्तु निष्कृतिं शुद्धमानसः । तुलाप्रतिग्रहे राजन् शुद्धो भवति नान्यथा ॥
“ अकृत्वा निष्कृतीरेता एकां वापि नरेश्वर । सन्ध्यादि नित्यकर्माणि पितृकर्माणि यानि च ॥
“ न फलन्तीह सर्वाणि भस्मनि न्यस्तहव्यवत् । पुनःसंस्कारमात्रेण पुनरायान्ति तानि वै ॥
“ ततः प्रतिग्रहीता तु आत्मदेहविशुद्धये । कुर्याद्वै विरजाहोमं पञ्चगव्यमनन्तरम् ” ॥ इति ।
हिरण्यगर्भविषये **हेमाद्रौ**—
“ पूर्वजो द्रव्यलोभेन ऋणयागादिभिर्विना । गर्भं स्वर्णमयं धृत्वा ऋत्विग्भिः सह राक्षसः ”॥
पाद्मे—“ हिरण्यगर्भं भूपालात् पूर्वजो भोगलालसः । प्रतिगृह्य स शीघ्रेण नक्तंचारी भवेद्भुवि ॥
“ ऋत्विजः कीकसा नाम पिशाचाः संभवन्त्यथ । कथंचिन्निष्कृतीर्दृष्ट्वा पुनर्गर्भान्न चान्यथा ” ॥

---

१ गघ-तथैव । २ गघ-जलाप्लुवैः ।

देवीपुराणे—

" दक्षिणामात्रमालम्ब्य प्रधानं संपरित्यजेत् । तथापि धर्मयागादिं कृत्वा शुद्धिमवाप्नुयात् ॥
" शेषयेद्यस्तु मोहेन वृत्त्यर्थं भोगलालसः । तस्योपनयनं भूयो जननं गर्भगोलतः ॥
" पञ्चायुतेन शम्भोर्वा ह्यभिषेकेण मुच्यते । अष्टलक्षजपो देव्याः कूष्माण्डायुतहोमतः ॥
" चतुर्भागव्ययो वापि यज्ञो वा सर्वदक्षिणः । एवं कुर्यात् द्विजो यस्तु तस्माद् दोषात्प्रमुच्यते " ॥

देवलः—

" ब्रह्माण्डं यस्तु गृह्णाति द्विजः ऋत्वादिभिर्विना । ऋत्विग्भिः सह दुष्टात्मा राक्षसो भवति ध्रुवम् " ॥

मार्कण्डेयः—

" ब्रह्माण्डं पुण्यतीर्थेषु प्रतिगृह्णाति यो द्विजः । निष्कृतिस्तस्य नास्तीह वसुलक्षजपादृते " ॥

ब्रह्मवैवर्ते—

" ब्रह्माण्डघटसंज्ञं तु प्रतिगृह्णाति यो द्विजः । अष्टलक्षजपादस्य निष्कृतिर्ब्रह्मराक्षसात् " ॥ इति ।

गालवः—

" ब्रह्माण्डं यो द्विजो धृत्वा वसुलक्षं जपेदिह । पूतो भवति दुष्टात्मा इह लोके परत्र च ॥
" नियुतेनाभिषेकस्य शम्भो रुद्रविधानतः । चतुर्भागव्ययं कृत्वा यज्ञं वा बहुदक्षिणम् ॥
"एषैव निष्कृतिस्तस्य ऋत्विग्भिः सहितस्य च । अन्यथा निष्कृतिर्नास्ति सहस्राब्दं पिशाचता " ॥

भविष्योत्तरे—

" आचार्यार्धं तयोः प्रोक्तं प्रायश्चित्तमिदं प्रभो । द्वाःस्थानां हि तदर्धं स्यादितरेषां हि पूर्ववत् ॥
" अथवा तच्चतुर्भागव्ययं तु कुरुते द्विजः । अन्यथा निष्कृतिर्नास्ति दानैस्तीर्थावगाहनैः ॥
" आचार्यं प्रविशेत्पापं राज्ञो दानाधिकारिणः । पादहीनं तयोः प्रोक्तं शेषं सर्वेषु संविशेत् ॥
" प्रायश्चित्तैर्विना राजन्न पुनन्ति प्रतिग्रहात् । तस्मादिदं प्रकर्तव्यं प्रायश्चित्तं द्विजातिभिः" ॥ इति ।

कल्पतरुविषये **मार्कण्डेयः**—" आपत्स्वपि सदा विप्रो न गृह्णीयादिमं तरुम् ।
" यान्यस्य सन्ति पर्णानि फलानि कुसुमानि च । तावतीस्तु समा भूयाद्राक्षसो निर्जने वने ॥
ऋत्विग्भिः ब्रह्मणा सार्धमधःपादविवर्जितः " ॥ इति ।

गारुडे—

" न द्विजः क्वापि गृह्णीयात् बहुभिः कारणैर्विना । तरुमेनं पर्णवन्तं रक्षो भवति कानने ॥
"दृष्ट्या पभ्यां विना राजन् ऋत्विग्भिः सह निर्जले । यावन्ति तस्य पर्णानि तावदब्दं नराधिप "॥ इति ।

गौतमः—

" द्विजो ऋणविमुक्त्यर्थं गृह्णीयात्कल्पभूरुहम् । यागार्थं स्वकृतग्रामतटाकादिविनाशने ॥
" सर्वं तदर्धं सहसा व्ययं कृत्वा न दोषभाक् । शुद्धो भवति मानुष्ये न भवेद्ब्रह्मराक्षसः " ॥ इति ।

मार्कण्डेयपुराणे—

" प्रतिगृह्य द्विजो मोहात् तरुमेनं सुखाप्तये । निष्कृतिस्तस्य नास्तीह नरकादेकविंशतेः ॥
" कथंचिन्निष्कृतिर्दृष्टा मनुनारदगालवैः । अष्टलक्षाद्वेदमातुश्चतुर्थांशव्ययेन वा ॥
" अभिषेकेण वा शम्भोर्भूमेर्वा त्रिः परिक्रमात् । रामसेत्वादितीर्थेषु त्र्यब्दाब्दस्नानतोऽपि वा ॥
" एता निष्कृतयो दृष्टास्तरोरेतस्य संग्रहे " ॥

तत्रैव—" बाहुजादेकगुणितं पादजाद्द्विगुणं चरेत् । मुखजादुक्तमानेन ऊरुजात् क्षत्रबन्धुप ॥

" एताभ्यो निष्कृतिभ्यश्च गतिर्नान्यत्र विद्यते " ॥ इति ।

गोसहस्रप्रतिग्रहे प्रायश्चित्तम् । गोसहस्रप्रतिग्रहे **देवलः**—
" तुलायां गोसहस्रेषु आचार्यस्य पुनर्भवः । आब्रह्मणोऽब्दपर्यन्तं नास्ति भूमौ पिशाचतः " ॥
पिशाचत्वान्निवृत्तिर्नास्तीत्यर्थः । **मार्कण्डेयः**—
" धृत्वाग्रजो गोसहस्रं राज्ञोऽन्यस्मात् द्विजन्मनः । नवलक्षं जपेद्देव्याः पुनःसंस्कारमर्हति " ॥
मत्स्यपुराणे—
" पुण्यक्षेत्रे पुण्यतीर्थे सूर्याचन्द्रमसोर्ग्रहे । धेनूनां यः सहस्रं च प्रतिगृह्य धनातुरः ॥
" भुवः प्रदक्षिणं कृत्वा नवलक्षं जपेद्बुधः । केशानां वपनं कृत्वा पुनःसंस्कारमर्हति " ॥
राजविषये—
" सहस्रधेनुदाने तु आचार्यत्वं यदि व्रजेत् । तस्यैव निष्कृतिर्नास्ति नवलक्षजपादृते ॥
" भूमेः प्रदक्षिणं कृत्वा केशानां वपनं पुनः । प्रायश्चित्तेन पूतात्मा पुनःसंस्कारमर्हति " ॥
कूर्मपुराणे—
" सहस्रधेनुदाने तु आचार्यो यदि लोभतः । भूमेः प्रदक्षिणं कृत्वा नवलक्षं जपेद् द्विजः ॥
" तदशक्तो महाशम्भोर्नमकैश्चमकैः शुभैः । कृत्वाऽभिषेकं विधिवत् अयुतं प्रयुतं तु वा ॥
" सर्वव्ययं च यागे वा कृत्वा शुद्धिमवाप्नुयात् " ॥

नागरखण्डे—" ब्रह्मा सदस्यः पूर्वोक्तप्रायश्चित्तार्धमर्हति ।
" तदर्धं द्वारपालानां पाठकानां तथैव च । होतॄणां जापकानां च पूर्ववन्मुनिभिः स्मृतम् " ॥
लिङ्गपुराणे—
" तुलायां गोसहस्रे च आचार्यो यद्धनं हरेत् । अकृत्वा तद्व्ययं धर्म्यं पत्नीपुत्रपरिष्कृतः ॥
" तत्पत्नीनां च पुत्राणां मनुजानां जनाधिप । हव्यकव्येषु यो भोक्ता ये वा संबन्धिबान्धवाः ॥
" ते वै कृच्छ्रद्वयं कुर्युः निष्कृतिः कथितोत्तमैः " ॥

हिरण्यकामधेनुप्रतिग्रहे प्रायश्चित्तम् । हिरण्यकामधेनुविषये **महाभारते**—
" राज्ञां पापनिबद्धानां सर्वदा पापचेतसाम् । पापनिर्मोचनी तेषां कामधुक् पुण्यवर्धनी ॥
" एतादृशीं पुण्यरूपां स्वर्णकामदुहं द्विजः । प्रतिगृह्णाति यो लोभात् स सद्यः पतितो भवेत् ॥
" अष्टलक्षजपाद्राजन् व्ययाद्वा अष्टभागतः । अभिषेकेण वा शम्भोः यज्ञाद्वा सर्वदक्षिणात् ॥
" एतैः शुद्धिमवाप्नोति ह्युभयोर्लोकयोरपि " ॥
कौर्मे—"स्वर्णकामदुहं राज्ञा स्वर्चितां शास्त्रवर्त्मना । प्रत्यगृह्णाद् द्विजो यस्तु स सदा सूतकी भवेत् ॥
" प्रायश्चित्ती भवेत्सद्यः पुनर्ब्रह्मोपदेशतः । अष्टलक्षं जपं कृत्वा प्रत्यहं विधिपूर्वकम् ॥
" धनस्याष्टमभागेन प्रायश्चित्तिं समाचरेत् । अभिषेकेण वा विप्रो यज्ञात्सर्वस्वदक्षिणात् ॥
" एतेषूक्तेषु राजेन्द्र प्रायश्चित्तेन बुद्धिमान् । इह लोके परत्रापि शुद्धिमाप्नोत्यनुत्तमाम् " ॥

हिरण्याश्वप्रतिग्रहे प्रायश्चित्तम् । हिरण्याश्वप्रतिग्रहे **कौर्मे**—
" हिरण्यवाजिनं गृह्णन् द्विजो लोभपरायणः । जन्मत्रये राक्षसत्वमनुभूय पिशाचताम् ॥
" तदन्ते भुवमासाद्य रासभत्वमवाप्नुयात् । तदन्ते रोगवान् भूत्वा नरकं याति पाण्डव " ॥ इति

---

१ गघ-ष्टम ।

वामनपुराणे—
" हिरण्याश्वं द्विजो लोभात् राज्ञः पुण्यदिनेष्विह । प्रतिगृह्यात्मभोगार्थं स भवेद्ब्रह्मराक्षसः ।
" ततः खरत्वमासाद्य रोगवान् जन्मनां त्रये । ततो नरकमासाद्य तिष्ठत्या चन्द्रतारकम् ॥
" तस्यैव निष्कृतिर्नास्ति ह्यष्टलक्षजपादृते " ॥ इति ।
ब्रह्मकैवर्ते—"हिरण्याश्वं द्विजो धृत्वा तस्य निष्कृतिरीरिता । अष्टलक्षजपाद्वापि नियुताद्वाभिषेकतः ॥
" अष्टमांशव्ययेनापि यागैर्वा सर्वदक्षिणैः । ततः शुद्धिमवाप्नोति पुनर्मौञ्जीविधानतः ॥
" तद्ब्रह्मा च सदस्यश्च प्रायश्चित्तार्धमर्हतः । द्वाःस्थास्तज्जापका राजन्नर्हन्त्यर्धार्धमंशतः ॥
"अन्यथा दोषवन्तस्ते न संभाष्याः कदाचन । न संस्पृश्यास्त्वपाङ्क्तेया नालपेत्तानिह द्विजान् " ॥

हिरण्याश्वरथप्रतिग्रहे प्रायश्चित्तम् । हिण्याश्वरथप्रतिग्रहे **ब्रह्मकैवर्ते**—
" हिरण्याश्वरथं यस्तु द्विजो गृह्णन्नराधिपात् । सोऽरण्ये निर्जले देशे ऋत्विग्भिः सह राक्षसः ॥
" तस्यैषा निष्कृतिर्दृष्टा मुनिभिस्तत्त्वदर्शिभिः । नवलक्षजपाद्वापि नियुताद्वाभिषेकतः ॥
" अष्टमांशव्ययेनापि प्रायश्चित्तविधानतः । तदन्ते वपनं कृत्वा पुनःसंस्कारमर्हति ॥
" एवं चेच्छुद्धिमाप्नोति प्रायश्चित्तेन भूयसा । अन्यथा तु न शुद्धः स्यान्न संभाष्यः कदाचन ॥
" ब्रह्मादीनां तदर्धांशन्यायः पूर्वोक्त इष्यते " ॥ इति ।

हिरण्यहस्तिप्रतिग्रहे प्रायश्चित्तम् । हिरण्यहस्तिप्रतिग्रहे **ब्रह्माण्डपुराणे**—
" हिरण्यहस्तिनं धृत्वा पुण्यकालेषु पर्वसु । यो विप्रो लोभमोहेन राज्ञो दानार्थिनो नृप ॥
" न तस्य निष्कृतिर्दृष्टा दशलक्षजपादृते । लक्षहोमेन कूष्माण्डैः शुद्धिमाप्नोत्यनुत्तमाम् " ॥ इति ।
ब्रह्मकैवर्ते—
" हिरण्यहस्तिनं भूपात् द्विजो लोभविमोहितः । पुण्यकालेषु पुण्येषु तीर्थेष्वायतनेषु च ॥
" प्रतिगृह्य ततो लोभादकृत्वा निष्कृतिं नृप । सोऽरण्ये निर्जले देशे राक्षसोऽम्बरचारवान् ॥
" तस्यैव निष्कृतिर्नास्ति नवलक्षजपाद्विना । लक्षहोमेन कूश्माण्डैः शुद्धिमाप्नोति दैहिकीम्[1] ।
" अष्टमांशव्ययेनापि प्रायश्चित्तविधानतः । केशानां वपनं कृत्वा पुनःसंस्कारमाचरेत् ॥
" तदर्धं ब्रह्मणः प्रोक्तं तथैव सदसस्पतेः । तदर्धं द्वारपालानां जापकानां तदर्धतः ॥
" प्रायश्चित्तमिदं प्रोक्तं हेमहस्तिप्रतिग्रहे " ॥ इति ।

पञ्चलाङ्गलप्रतिग्रहे प्रायश्चित्तम् । पञ्चलाङ्गलप्रतिग्रहे **वसिष्ठसंहितायाम्**
" लाङ्गलं मुखजो धृत्वा पञ्च वाप्येकमेव वा । तस्यैव निष्कृतीर्वक्ष्ये शृणु नान्यमनाः प्रभो ॥
" दशलक्षजपं वाथ प्रयुतं वाभिषेचनम् । चतुर्भागव्ययं कुर्याद्यज्ञं वा सर्वदक्षिणम् ॥
" एतत्पापविशुद्ध्यर्थं परेद्युर्वाप्यन्यतोऽपि वा । मार्तण्डस्योदयादर्वाक् स्नानं कृत्वा यथार्हतः ॥
" नित्यकर्म समाप्याशु यावत्सूर्योदयो भवेत् । तावद्गत्वा जलाधारं नदीं पुष्करिणीमपि ॥
" कण्ठदघ्नजले स्थित्वा स्मरन्नारायणं विभुम् । मुखमुद्धृत्य मार्तण्डं पश्यन्नुत्तानपाणिकः ॥
" अघमर्षणसूक्तं च जपन् पापविमुक्तये । यावदस्तं गतो भानुस्तावत्कालं जपेत्सुधीः ॥
" मध्ये माध्याह्निकं कृत्वा ब्रह्मयज्ञं च तर्पणम् । मनसा देवमाराध्य पुनर्गत्वा जलं जपेत् ॥
" सायं सन्ध्यामुपासित्वा सायं होममनन्तरम् । मौनं त्यक्त्वा तदा राजन् मिताहारं समाचरेत् ॥
" ओदनं यावकं भक्षेदथवा मुद्गभक्षणम् । अधःशायी भवेत्तत्र पापं कृतमनुस्मरन् ॥
" प्रभातायां तु शर्वर्यां पूर्ववद्व्रतमाचरेत् ॥

---

१ गघ-वैदिकीम् ।

" एवं तु मण्डले पूर्णे विरजाहोममाचरेत् । उपोष्य दिनमेकं च पञ्चगव्यं पिबेत्ततः ।
"ब्राह्मणान् भोजयेत्पश्चात् तेभ्यो दद्याच्च दक्षिणाम् । पश्चात्स्वयं प्रभुञ्जीयात् तद्विप्रानुज्ञया सह"॥इति।
एतत् प्रायश्चित्तमाचार्यस्य । सर्वेषां प्रायश्चित्तमुक्तं **मात्स्ये**—
" ब्रह्मा सदस्पतिश्चैव तदर्धं भागमर्हतः । द्वारस्थानां तदर्धं स्यात्तदर्धमितरेषु वै ॥
" प्रायश्चित्तविधिश्चैष नान्यथा गतिरस्ति हि " ॥ इति ।

धराप्रतिग्रहे प्रायश्चित्तम् । धराप्रतिग्रहे **शिवपुराणे**—
" धरामभ्यर्च्य गन्धाद्यैर्यो राजा पुण्यकालतः । विप्रसात्कुरुते तत्र पुण्यस्यान्तो न विद्यते ।
" गृह्णीयाद्यो धरामेनां पुण्यकालेषु पर्वसु । तस्य विप्रस्य चास्तीह न पुनर्जन्म राक्षसात् ॥
" ब्रह्मोपदेशः कर्तव्यः सावित्रीदानमेव च । ततः परं जपेद्देव्या दशलक्षमतन्द्रितः " ॥ इति ।
पाद्मे—" धरामभ्यर्चितां राज्ञा धर्मशास्त्रानुसारतः । यो विप्रः प्रतिगृह्णीयात् द्रव्यलोभपरायणः ॥
" यज्ञादिकमकृत्वा चेत् भवति ब्रह्मराक्षसः । दशलक्षजपाद्देव्यास्तस्य निष्कृतिरीरिता ॥
" सदस्यब्रह्मणोरर्धं द्वारपानां तदर्धकम् । तदर्धं जापकानां च होतॄणां च तथैव च ॥
" मार्जनं सर्वदानानामाचार्याणां स्वयंभुवा । उक्तं पुरा देवमध्ये लोकस्यास्य हितैषिणा ॥
" अन्यथा मृत्युमाप्नोति कुर्यादेतत्प्रयत्नतः " ॥ इति ।

विश्वचक्रप्रतिग्रहे प्रायश्चित्तम् । विश्वचक्रप्रतिग्रहे **मार्कण्डेयः**—
" विश्वचक्रं द्विजो धृत्वा निर्निमित्तेन लोभतः । अरण्ये निर्जले देशे भवति ब्रह्मराक्षसः ॥
" न तस्य पुनरावृत्तिः सहस्राब्दं महाभयात् । एषा वै निष्कृतिर्दिष्टा वसिष्ठेन महात्मना ।
" चतुर्भागव्ययं कृत्वा प्रायश्चित्तविधानतः । पुनःसंकारविधिना पुनःसंस्कारमाचरेत् ॥
" ब्रह्मोपदेशं सावित्रीमभ्यसेद् द्विजपुङ्गवात् । प्रयुतेनाभिषेकस्य निष्कृतिस्तस्य नान्यथा ॥
" तदर्धं ब्रह्मणः प्रोक्तं तथैव सदसस्पतेः । द्वारपानां जापकानां तयोरर्धं प्रकल्पयेत् " ॥ इति ।

कल्पलताप्रतिग्रहे प्रायश्चित्तम् । कल्पलताप्रतिग्रहे **लिङ्गपुराणे**[1]—
" दत्तामिमां कल्पलतां राजभिः पूजितां शुभाम् । यो गृह्णीयात् द्विजः कामात् स भवेद्ब्रह्मराक्षसः ॥
" यावज्ज्योतींषि तिष्ठन्ति तावत्तिष्ठति राक्षसः । तद्ब्रह्मा च सदस्यश्च द्वारपा जापका अपि ॥
" राक्षसाः क्रूरकर्माणो भवन्त्येव न संशयः । सहस्राब्दं तदर्धं च तदर्धं च यथाक्रमम् ॥
" प्रायश्चित्तं कल्पतरोर्यत्तदेव समाचरेत् " ॥ इति ।

सप्तसागरप्रतिग्रहे प्रायश्चित्तम् । सप्तसागरप्रतिग्रहे **लिङ्गपुराणे**—
" मुखजो धनलोभेन गृह्णीयात्सप्तसागरम् । कुलेन सह संयुक्तो राक्षसो निर्जले भवेत् ॥
" यागार्थं दक्षिणां गृह्णन् प्रधानत्यागमाचरेत् । योगे सर्वव्ययं कृत्वा नास्ति तस्य पिशाचता ।
" प्रायश्चित्तेन पूतात्मा इह लोके परत्र च । चतुर्भागव्ययं वापि प्रायश्चित्तं समाचरेत् ॥
" तस्योपनयनं भूयः सावित्रीदानमेव च ॥
" ब्रह्मा सदस्यस्तस्यार्धं प्रायश्चित्तमिहार्हतः । द्वारस्थानां तयोरर्धं जापकानां यथाक्रमम् " ॥ इति ।

चर्मधेनुप्रतिग्रहे प्रायश्चित्तम् । चर्मधेनुप्रतिग्रहे **वामनपुराणे**—
" धृत्वा चर्ममयीधेनुं धनलोभपरायणः । सप्तजन्मसु राजेन्द्र विपिने निर्जनेऽजले ॥
" कृतं पापमनुस्मृत्य स भवेद्ब्रह्मराक्षसः ।
" तस्यैषा निष्कृतिर्दिष्टा देव्या द्वादशलक्षतः । तस्योपनयनं भूयः पुनःसंस्कारकर्मणा " ॥ इति ।

---

१ **गघ**–गारुड ।

पराशरः—
" मुखजो यस्तु गृह्णीयात् चर्मधेनुं नृपात्मजात् । ग्रहणादिषु कालेषु पुण्यतीर्थेषु येषु च ॥
" चतुर्भागव्ययं कुर्यात् प्रायश्चित्तविधानतः । देव्या द्वादशलक्षेण नियुतेनाभिषेकतः ॥
" एषामन्यतमेनैव पुनःसंस्कारतः शुचिः । सदस्यब्रह्मणोरर्धमृत्विजामपि पूर्ववत् " ॥ इति ।
गारुडपुराणे—"तुलायां गोसहस्रे च लाङ्गले सप्तसागरे । विश्वचक्रे चर्मधेनौ महाभूतघटे तथा ॥
" हेमहस्तिरथे चैव आचार्यं मृत्युराविशेत् । तस्मात्तन्मार्जनं कर्म मृत्यूत्तरणहेतवे ॥
" तदानीं वा परेद्युर्वा पक्षे वा पञ्चमे दिने । मासमात्रे त्रिमासे वा वत्सरे पूर्णतां गते ॥
" प्रायश्चित्तेन पूतात्मा पुनःसंस्कारमर्हति ॥
" व्यवहारक्षमो भूयादुभयोर्लोकयोरपि । अन्यथा दोषमाप्नोति न मुक्तिर्ब्रह्मराक्षसात् " ॥ इति ।

महाभूतघटप्रतिग्रहे प्रायश्चित्तम् । महाभूतघटप्रतिग्रहे **देवलः**—
" पञ्चभूतघटं गृह्णन् विप्रो भवति राक्षसः । सहस्राब्दं वने घोरे निर्जले निर्जने वसेत् ॥
" पक्षमात्रं जपेद्देवीं द्विजः पापविशुद्धये । तस्योपनयनं भूयः पुनःसंस्कारकर्मणा ॥
" नियुतेनाभिषेकेण चतुर्भागव्ययेन च । नान्यथा शुद्धिमाप्नोति ब्रह्मराक्षसदेहतः ॥
" तदर्धं ब्रह्मणः प्रोक्तं तथैव सदसस्पतेः । द्वाःस्थानां जापकानां च तयोरर्धं प्रकल्पयेत् " ॥ इति ।
स्कान्दे तु—"प्रतिगृह्य तुलादीनि राज्ञः पापपरायणात् । प्रायश्चित्तेन पूतात्मा पुनःसंस्कारमर्हति ॥
"गङ्गायां मौसलस्नानाच्छुद्धिमाप्नोति दैहिकीम् । रेवायां तु तथा स्नात्वा शुद्धिमाप्नोति पौर्विकीम्॥
" प्रातरारभ्य गण्डक्यामा सायं स्नानमाचरेत् । वर्षद्वयेन पूतात्मा ह्युभयोर्लोकयोः शुचिः ॥
" तथैव शोणभद्रायां पूर्वजः शुद्धिमाप्नुयात् । गौतम्यां नियतः स्नात्वा नित्यकर्मपरायणः ॥
" विंशत्या मौसलस्नानैरब्दमात्रेण शुध्यति । भीमरथ्यां महानद्यामर्धरात्रे जितेन्द्रियः ॥
" जानुदघ्ने जले स्थित्वा जपेन्मन्त्रं त्रियम्बकम् । सहस्रं पूर्णतां याति यावत्तावद्विरम्यते ॥
" एवं मासत्रयं कृत्वा शुद्धिमाप्नोति पौर्विकीम् । अखण्डायां तु कावेर्यां प्रातः स्नात्वा यथाविधि ॥
" नित्यकर्म समाप्याशु कण्ठदघ्ने जले वसन् । जपेच्च पौरुषं सूक्तमष्टोत्तरशतं द्विजः ॥
" यदा समाप्तिर्भवति तदा मौनं परित्यजेत् । एवं कुर्यात्प्रतिदिनं शुद्धः स्यादृतुमात्रतः ॥
" ताम्रपर्णीनदीतोये अवगाह्य दिनत्रयम् । त्रियम्बकं जपेन्नित्यं संख्यामनुपधारयन् ॥
" दिनत्रये तु पूर्णेऽस्मिन् निर्विघ्नेन जनाधिप । पूतो भवति विप्रोऽसौ तुलादीनां प्रतिग्रहात् ॥
" धनुष्कोट्यां तुलादीनां ग्रहीता धनलोभतः । स्नात्वा मध्याह्नवेलायां गत्वा रामेश्वरालयम् ॥
" औपासनाग्नौ जुहुयाद्विरजाहोममादितः । अधःशायी भवेन्नित्यं मासमेकं निरन्तरम् ॥
" दुग्धाहारं फलाहारं द्वयोरेकं समाचरेत् । सेतुदर्शनमात्रेण ब्रह्महत्या विनश्यति ॥
" अर्वाचीनानि पापानि नश्यन्तीत्यत्र का कथा "॥ इति । आहिताग्निः संपूर्णदक्षिणेन पुनःस्तोमेन वा यजेत । 'यो वा बहु प्रतिगृह्य गरगीर्णमिव मन्येत पुनःस्तोमेन यजेत' इति **श्रुतेः** । 'उशनसः स्तोमेन गरगीर्णमिवात्मानं मन्यमानो यजेत' **इत्याश्वलायन**सूत्रम् । (श्रौतसू. ३.५।१) उशनसस्तोमो नाम एकाहः पुनःस्तोम इति चास्यैव संज्ञा । गरः विषं गरो गीर्णो येन स गरगीर्णः । यो बहुप्रतिग्रहादिना पापादिभयादात्मानं गरगीर्णमिव मन्येत स एतेन यजेतेति **नारायणीयवृत्तिः** ।

इति **प्रतिग्रहप्रायश्चित्तम्** ।

यत्र प्रतिपदं प्रायश्चित्तं नोक्तं नोपलभ्यते वा तत्र **साधारणं प्रायश्चित्तमुच्यते ।**

अतिपातकिप्रायश्चित्तम् । तत्रानुपातकप्रायाश्चित्तं **विष्णुराह** (३६।८)—

" अनुपातकिनस्त्वेते महापातकिनो यथा । अश्वमेधेन शुध्यन्ति तीर्थानुसरणेन वा " ॥ इति । तत्राश्वमेधः सार्वभौमराजविषयः " राजा सार्वभौमोऽश्वमेधेन यजेत " इति **श्रुतेः** (आप. श्रौ. सू. २०।२; सत्याषाढसू. १४।१) । तीर्थस्नानमितरविषयम् ।

उपपातकिप्रायश्चित्तम् । उपपातकप्रायाश्चित्तमाह **स एव** (३७।३६)

" उपपातकिनस्त्वेते कुर्युश्चान्द्रायणं नराः । पराकमथवा कुर्युर्यजेयुर्गोसवेन वा " ॥ इति ।

याज्ञवल्क्योऽपि (प्रा. २६५)—

" उपपातकशुद्धिः स्यादेवं चान्द्रायणेन वा । पयसा वापि मासेन पराकेणाथ वा पुनः" ॥ इति ।

संकरीकरणादिप्रायश्चित्तम् । संकरीकरणादेः प्रायश्चित्तमाह **विष्णुः** (३९।२२–४०।२)—

" संकरीकरणं कृत्वा मासमश्नीत यावकम् । कृच्छ्रातिकृच्छ्रमथवा प्रायश्चित्तं तु कारयेत् ॥

" अपात्रीकरणं कृत्वा तप्तकृच्छ्रेण शुध्यति । शीतकृच्छ्रेण वा शुद्धिः महासान्तपनेन वा । (४१।५)–

" मलिनीकरणीयेषु तप्तकृच्छ्रं विशोधनम् । कृच्छ्रातिकृच्छ्रमथवा प्रायश्चित्तं विशोधनम् ॥ " इति ।

मनुः (११।१२५)—

" संकरापात्रकृत्यासु मासं शोधनमैन्दवम् । मलिनीकरणीयेषु तप्तः स्याद्यावकं त्र्यहम् "॥ इति ।

अनुक्तानां सर्वेषां पापानां साधारणं प्रायश्चित्तमाह **पराशरः** (१२।७२)—

" चान्द्रायणं यावकं च तुलापुरुष एव च । गवां चैवानुगमनं सर्वपापप्रणाशनम् " ॥ इति ।

तुलापुरुषः कृच्छ्रविशेषः। पापगौरवलाघवानुसारेण चान्द्रायणादीन्यावृत्तान्यनावृत्तानि वा अनुष्ठेयानि ।

स एव (११।५३)—

" सर्वेषामेव पापानां संकरे समुपस्थिते । दशसाहस्रमभ्यस्ता गायत्री शोधनी परम् " ॥ इति ।

शङ्खलिखितौ—" क्रयविक्रयदुष्टभोजनप्रतिग्रहेष्वनादिष्टप्रायश्चित्तेषु सर्वेषु चान्द्रायणं प्राजापत्यं वा " ॥ इति ।

शातातपः—"अनुक्तेषु विधिं ज्ञात्वा प्राजापत्यं समाचरेत् । सर्वत्र सर्वपापेषु द्विजश्चान्द्रायणं चरेत्"॥

उशनाः—

" यत्रोक्तं यत्र वा नोक्तमिह पातकनाशनम् । प्राजापत्येन कृच्छ्रेण शुध्यते नात्र संशयः " ॥ इति ।

मनुविष्णुविश्वामित्राः (११।२०९)—

" अनुक्तनिष्कृतीनां तु पापानामपनुत्तये । शक्तिं चावेक्ष्य पापं च प्रायश्चित्तं प्रकल्पयेत्" ॥ इति ।

याज्ञवल्क्यः (प्रा. २७५)—

" देशं कालं वयः शक्तिं पापञ्चावेक्ष्य यत्नतः । प्रायश्चित्तं प्रकल्प्यं स्याद्यत्र चोक्ता न निष्कृतिः "॥

स एव—

" यदा यदा तु संकीर्णमात्मानं मन्यते द्विजः । तदा तदा तिलैर्होमो गायत्र्या वाचनं तथा"॥ इति ।

गौतमः (१९।१७–२०)—" संवत्सरं षण्मासाश्चत्वारस्त्रयो द्वावेकश्चतुर्विंशत्यहो द्वादशाहाः षडहस्त्र्यहो[3]होरात्रः " इति कालाः । एतान्येवानादेशे विकल्पेन क्रियेरन्नेनःसु गुरुषु गुरूणि लघुषु लघूनि कृच्छ्रातिकृच्छ्रौ चान्द्रायणमिति सर्वप्रायश्चित्तम् " ॥ इति ।

---

१ गघ–तिपातकसमपातकयोः । २ घ–दशा । ३ गघ–षडहस्त्रहः अहोरात्र ।

स्मृत्यन्तरे—"सर्वजन्मार्जितानीह भ्रूणहत्यादिकान्यपि। सर्वपापानि नश्यन्ति कृच्छ्रैर्द्वादशवार्षिकैः॥
"जन्मप्रभृति यत् किंचित्पातकं चोपपातकम्। अर्वाक्तु भ्रूणहत्यायाः षडब्दान्नश्यति ध्रुवम्॥
"अब्दात्तु सकृदभ्यस्तं बुद्धिपूर्वमसन्महत्। तच्छुध्यत्यब्दकृच्छ्रेण महतः पातकादृते"॥ इति। त्रिंशत्कृच्छ्रा अब्दकृच्छ्रः कृच्छ्रः प्राजापत्यः। स च प्रतिनिधिना कार्यः।

रहस्यपापप्रायश्चित्तानि। अथ रहस्यप्रायश्चित्तानि। यत्पापं कर्तृव्यतिरिक्तेनान्येन केनापि न ज्ञातं तद्रहस्यम्। तस्य प्रायश्चित्तमपि रहस्येव कर्तव्यम्। तथा च **यमहारीतौ**—'रहस्ये रहस्यं प्रकाशे प्रकाशम्' इति। रहस्यत्वादेव नास्ति तत्र परिषदनुमत्यपेक्षा। तदाहतुर्**बृहस्पतियाज्ञवल्क्यौ** (प्रा. ३०१)—
"प्रख्यातदोषः कुर्वीत पर्षदोऽनुमतं व्रतम्। अनभिख्यातदोषस्तु रहस्यं व्रतमाचरेत्"॥ इति। न च विना परिषदं व्रतज्ञानाभाव इति शङ्कनीयम्। शास्त्रज्ञस्य तद्विज्ञानसंभवात्। इतरेणापि बुद्धिमता विद्वद्गोष्ठ्यां केनचित् व्याजेनावगन्तुं शक्यत्वात्। रहस्यकृतं पापं स्वल्पेनापि जपादिना निवर्तते। अत एव प्राजापत्यादिव्रतानां जपादीनां च व्यवस्थामाह **मनुः** (११-२२६)—
"एतैर्द्विजातयः शोध्या व्रतैराविष्कृतैनसः। अनाविष्कृतपापांस्तु मन्त्रैर्होमैश्च शोधयेत्"॥ इति। तत्र रहस्यानां साधारणं प्रायश्चित्तमाह **स** एव (११।२४५-२४६, २४८)—
"वेदाभ्यासोऽन्वहं शक्त्या महायज्ञक्रिया क्षमा। नाशयन्त्याशु पापानि महापातकजान्यपि॥
"यथैधस्तेजसा वह्निः प्राप्तं निर्दहति क्षणात्। तथा ज्ञानाग्निना पापं कृत्स्नं दहति वेदवित्॥
"सव्याहृतिकाः सप्रणवाः प्राणायामास्तु षोडश। अपि भ्रूणहनं मासात् पुनन्त्यहरहः कृताः"॥
बोधायनः (२।४।१८)—
"यदुपस्थकृतं पापं पद्भ्यां वा यत्कृतं भवेत्। बाहुभ्यां मनसा वाचा श्रोत्रघ्राणेन[1] चक्षुषा॥
"सर्वं दहति निःशेषं प्राणायामैस्त्रिभिः कृतैः"॥
गौतमः (२५।७-१०) "अनार्जवपैशुनप्रतिसिद्धाचारानाद्यप्राशनेषु शूद्रायां च रेतः सिक्त्वा अयोनौ च दोषवति च कर्मणि अभिसन्धिपूर्वेऽपि अब्लिङ्गाभिरप उपस्पृशेत्। वारुणीभिरन्यैर्वा पवित्रैः। प्रतिषिद्धवाङ्मनसापचारे व्याहृतयः पञ्च। सर्वास्वपो वा आचामेदहश्च माऽऽदित्यश्च पुनात्विति। प्राता रात्रिश्च मा वरुणश्च पुनात्विति सायमष्टौ वा समिध आदध्यात्। देवकृतस्येति हुत्वैवं सर्वस्मादेनसो मुच्यते मुच्यत" इति। अनार्जवमनृजुत्वं मानसं कर्मशाठ्यं वा। पैशुनं परपरिवादः। वाचिकं प्रतिसिद्धाचारः। नियमलोपः कायिकं अनाद्यस्यानेकविधस्योपभोगः अनाद्यप्राशनम्। एतदादौ दोषवति कर्मणि च।

आपस्तम्बः (१।९।२६।७)—"अनाद्यानपयःप्रतिषिद्धभोजनेषु दोषवच्च कर्माभिसन्धिपूर्वकं कृत्वाऽनभिसन्धिपूर्वं वा शूद्रायां च रेतः सिक्त्वा योनौ चाब्लिङ्गाभिर्वारुणीभिश्चोपस्पृश्य प्रयतो भवति। ओंपूर्वाभिर्व्याहृतिभिः सर्वाभिः सर्वपापेष्वाचामेत्। आचमनादेव सर्वस्मात्पापात् प्रमुच्यते। अष्टौ वा समिध आदध्यात्। देवकृतस्यैनसोऽवयजनमसि स्वाहा। मनुष्यकृतस्यैनसोऽवयजनमसि स्वाहा। पितृकृतस्यैनसोऽवयजनमसि स्वाहा। आत्मकृतस्यैनसोऽवयजनमसि स्वाहा। यद्दिवा च नक्तं चैनश्चकृम तस्यावयजनमसि स्वाहा। यत् स्वपन्तश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वाहा। यद्विद्वांसश्चाविद्वांसश्चैनश्चकृमतमस्यावयजनमसि स्वाहा। एनस

---

१ गघ—त्वग्घ्राणचक्षुषा।

एनसोऽवयजनमसि स्वाहा । इत्येतैरष्टाभिर्हुत्वा सर्वस्मात् पापात्प्रमुच्यते । ऋतं च सत्यं चेत्यघमर्षणं त्रिरन्तर्जले पठेत् । सर्वस्मात्पापात् प्रमुच्यते । आयंगौः पृश्निरक्रमीदिति तृचं च त्रिरन्तर्जले पठेत् । सर्वस्मात् पापात् प्रमुच्यते । द्रुपदादिवेन्मुमुचान इति एनामृचं त्रिरन्तर्जले पठेत् । सर्वपापात् प्रमुच्यते । हंसः शुचिषदित्येतामृचं त्रिरन्तर्जले पठेत् । सर्वपापैः प्रमुच्यते । अपि वा सावित्रीं गायत्रीं पच्छोऽर्धर्चशः समस्तामिति त्रिरन्तर्जले पठेत् । सर्वपापैः प्रमुच्यते । अपि वा व्याहृतीर्व्यस्ताः समस्ताश्चेति त्रिरन्तर्जले पठेत् । सर्वस्मात्पापात् प्रमुच्यते । अपि वा प्रणवमेव त्रिरन्तर्जले पठेत् । सर्वस्मात् पापात् प्रमुच्यते । पवित्रैर्मार्जनं कुर्वन् रुद्रैकादशिनीं जपन् । मुच्यते सर्वपापेभ्यो महतःपातकादृते" ॥ इति ।

आपस्तम्बः (१।९।२६।७)--" अनार्जवपैशुनप्रतिषिद्धाचारेषु अभक्ष्याभोज्यापेयप्राशने शूद्रायां च रेतः सिक्त्वायोनौ च दोषवत्कर्माभिसन्धिपूर्वं कृत्वानभिसन्धिपूर्वं वा अब्लिङ्गाभिरप उपस्पृशेत् वारुणीभिर्वान्यैर्वा पवित्रैर्यथाकर्माभ्यासः " इति ।

यमः—" विरजाद्विगुणं जप्त्वा तदह्नैव विशुध्यति । पौरुषं सूक्तमावृत्य मुच्यते सर्वकिल्बिषात् ॥
" ऋषभं शतशो जप्त्वा तदह्नैव विशुध्यति । वेदमेकगुणं जप्त्वा तदह्नैव विशुध्यति ॥
" रुद्रैकादशकं जप्त्वा तदह्नैव विशुध्यति । जपेद्वाप्यस्य वामीयं पावमानीरथापि वा ॥
"कुन्तापं वालखिल्यांश्च निवित्प्रैषं वृषाकपिम् । होतॄन् रुद्रान् पितॄन् जप्त्वा मुच्यते सर्वपातकैः[1]" ॥ इति ।

होतॄन् चित्तिः स्रुगादीन् । पितॄन् परे युवांसमित्यादीन् । **चतुर्विंशतिमते**—
" पावमानीस्तथा काष्ठं पौरुषं सूक्तमेव च । सपुत्रं माधुच्छन्दसं जप्त्वा पापैः प्रमुच्यते ।
" मण्डूकं ब्राह्मणं रुद्रं शुक्रियं मोक्षकं तथा । वामदेव्यं बृहत्साम जप्त्वा पापैः प्रमुच्यते ॥
" यज्ञायज्ञियमादित्यज्येष्ठसाम च राजनम् । पौरु[2]च्छेपं च सामानि जप्त्वा पापैः प्रमुच्यते ॥
" अथर्वशिरसं चैव पौरुषं सूक्तमेव च । नीलरुद्रांस्तथैवैन्द्रं जप्त्वा पापैः प्रमुच्यते ॥
" आथर्वणाश्च ये केचित् मन्त्राः कामविवर्जिताः । ते सर्वे पापहन्तारो याज्ञवल्क्यवचो यथा ॥
" अग्नेर्मन्वेऽनुवाकं तु जपेदेनमनुत्तमम् । सिंहे मे मन्युरित्येतमनुवाकं जपेद् द्विजः ॥
" जप्त्वा पापैः प्रमुच्येत बोधायनवचो यथा ।
" ऋग्वेदमभ्यसेद्यस्तु यजुःशाखामथापि वा । सामानि सरहस्यानि अथर्वाङ्गिरसस्तथा ॥
" यत्किंचित्पातकं कुर्यात् किंचे[3]त्माता च तं जपेत् । हंसः शुचिषदित्येतां जपेद्वापि त्रियम्बकम् ॥
" ब्राह्मणानि च कल्पांश्च षडङ्गानि तथैव च । आख्यानानि तथान्यानि जप्त्वा पापात्प्रमुच्यते ॥
" इतिहासपुराणानि देवतास्तवनानि च । जप्त्वा पापैः प्रमुच्येत धर्मस्थानैस्तथापरैः " ॥ इति ।

विष्णुः (५६।१–२७)—"अथातः सर्ववेदपवित्राणि भवन्ति । येषां जपैश्च होमैश्च द्विजातयः पापैश्च पूयन्तेऽघमर्षणं देवकृतं शुद्धवत्यस्तरत्समन्दीधावति कूश्माण्डाः पावमान्यः दुर्गा सावित्री अतिषङ्ग्यः पदस्तोभा व्याहृतयो भारुण्डानीन्द्रसामं पुरुषव्रतं दैवतं भासमब्लिङ्गं बार्हस्पत्यं वाक्सूक्तं गोसूक्तं अश्वसूक्तं मध्वृचः सामानि चेन्द्रशुद्ध शतरुद्रीयमथर्वशिरः त्रिसुपर्णो महाव्रतं नारायणीयं पुरुषसूक्तम् । " त्रीण्याज्यस्तोमानि रथंतरं चाग्नेर्व्रतं वामदेव्यं बृहच्च ।
" तानि जप्त्वा पुनन्ति जन्तून् जातिस्मरत्वं लभते य इच्छेत् " इति । **पैठीनसिः**—
" सर्वपापप्रसक्तोऽपि ध्यायन्निमिषमच्युतम् । पुनस्तपस्वी भवति पङ्क्तिपावनपावनः " ॥

---

१ क्ष-व । २ घ-या । ३ गघ-यत्किंचेदमृतं ।

वसिष्ठः—
"हित्वा सकलपापानि लब्ध्वा सुकृतसंचयम्। स पूतो जायते धीमान्मुरजिन्नामकीर्तनात्" इति।
भृगुः—"कोटिशो मनुजानां वै भीतिदं समुपस्थितम्। रामरामेति संकीर्त्य तं नाशयति मानवः॥
"सर्वेषामेव पापानां प्रायश्चित्तमिदं स्मृतम्। नातः परतरं पुण्यं त्रिषु लोकेषु विद्यते"॥ इति।
योगयाज्ञवल्क्यः—
"न तावत्पापमेधेत यन्नाम्ना न हतं हरेः। अतिरेकभयादाहुः प्रायश्चित्तान्तरं वृथा"॥ इति।
ब्रह्मकैवर्ते—
"सर्वपापयुतो वापि कीर्तयन्ननिशं हरिम्। शुद्धान्तःकरणो भूत्वा जायते पङ्क्तिपावनः"॥

रहस्यब्रह्महत्यादिपापानां प्रतिपदोक्तप्रायश्चित्तम्। अथ प्रतिपदोक्तानि।

व्यासः—"योऽनूचानं द्विजं मर्त्यो हतवानर्थलोभतः। स जपेत्पौरुषं सूक्तं जलस्थश्चिन्तयन् हरिम्॥
"तथैव ब्रह्महत्याया मुच्यते नात्र संशयः"॥ इति।

यमः—"ब्रह्महत्यासुरापानस्वर्णस्तेयगुरुतल्पेषु प्राणायामैः श्रौताघमर्षणं जपेत्"॥ इति।

याज्ञवल्क्यः (प्रा. ३०२)—
"त्रिरात्रोपोषितो जप्त्वा ब्रह्महा त्वघमर्षणम्। अन्तर्जले विशुध्येत गां दत्त्वा तु पयस्विनीम्"॥

शङ्खलिखितौ—"त्रिरात्रोपोषितोऽन्तर्जलेऽघमर्षणं त्रिरावर्तयेत्"॥ इति। **चतुर्विंशतिमते**—
"त्रिमधुत्रिसुपर्णं च नाचिकेतत्रयं तथा। नारायणं जपेत्सर्वं मुच्यते ब्रह्महत्यया"॥ इति।

बोधायनः (३।९।४)—"ग्रामात् प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य स्नातः शुचिः शुचिवासा उदकान्ते स्थण्डिलमुपलिप्य सकृत्क्लिन्नवासा गोशकृत्पूतेन पाणिनादित्याभिमुखोऽघमर्षणं स्वाध्यायमधीयीत प्रातःशतं मध्याह्ने शतमपराह्णे शतमपरिमितं चोदितेषु नक्षत्रेषु प्रसृतियावकं प्राश्नीयात्। ज्ञानकृतेभ्योऽज्ञानकृतेभ्यश्चोपपातकेभ्यः सप्तरात्रात् प्रमुच्यते। द्वादशरात्रान्महापातकेभ्यः ब्रह्महननं गुरुतल्पगमनं स्वर्णस्तैन्यं सुरापानमिति च वर्जयित्वा एकविंशतिरात्रात् तान्यतितरति"॥ इति। **बृहद्विष्णुः**—"ब्रह्महत्यां कृत्वा प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य प्रभूतेनेन्धनेनाग्निं प्रज्वाल्याघमर्षणेनाष्टसहस्रमाज्यैर्जुहुयात्। तेनैव तस्मात् पूतो भवति"॥ इति।

मनुः (११।२४९–२५१)—
"कौत्सं जप्त्वाऽपनोत्येतद्वासिष्ठं च तृचं प्रति। माहित्रं शुद्धवत्यश्च सुरापोऽपि विशुध्यति॥
"सकृज्जप्त्वास्य वामीयं शिवसंकल्पमेव च। सुवर्णमपहृत्यापि क्षणात् भवति निर्मलः॥
"हविष्मन्तीयमभ्यस्य न तमं ह इतीति च। जप्त्वा च पौरुषं सूक्तं मुच्यते गुरुतल्पगः॥
"मन्त्रैः शाकलहोमीयैरब्दं हुत्वा घृतं द्विजः। सर्वमप्यपहन्त्येनो जप्त्वा वा नम इत्यृचम्। (२५६)
"महापातकसंयुक्तोऽनुगच्छेद् गाः समाहितः। अभ्यस्याब्दं पावमानीः भैक्षाहारो विशुध्यति। (२५७)
"अरण्ये वा त्रिरभ्यस्य प्रयतो वेदसंहिताम्। मुच्यते पातकैः सर्वैः पराकैः शोधितस्त्रिभिः। (२५८)
"त्र्यहं तुपवसेद्युक्तः त्र्यहं तूपनयन्नपः। मुच्यते पातकैः सर्वैः त्रिर्जप्त्वा वाघमर्षणम्"॥

यमः (२-५)—"सुरापः कण्ठमात्रमुदकमवतीर्य सुतसोमात् प्रसृतिमादाय ओंकारेणाभिमन्त्र्य पिबेत्। ततोऽप्सु निमग्नो मानस्तोकीयं जपेत्। ब्राह्मणः स्वर्णस्तेयं कृत्वा हिरण्यशालायां प्रक्षिप्याप्सु निष्णातो ग्रीवामात्र उदके हिरण्यवर्णाभिश्चतसृभिरात्मानमभ्युक्ष्य त्रीन् प्राणायामान् कृत्वा तदेतस्मात् पूतो भवति। गुरुतल्पगमनं कृत्वाऽघमर्षणमन्त्रं जले त्रिरावृत्य तदेतस्मात् पूतो भवति"॥

१ घ–स्तेयं। २ घ–प्रतीत्यृचं। ३ गघ–वत्यश्च। ४ घ–ष्या। ५ घ–नम। ६ घ–चम्।

रहस्यसुरापानादिप्रायश्चित्तम् । सुरापानादौ **याज्ञवल्क्यः** (प्रा. ३०४-३०५)—
" त्रिरात्रोपोषितो हुत्वा कूश्माण्डीभिर्घृतं शुचिः । ब्राह्मणः स्वर्णहारी तु रुद्रजापी जले स्थितः ॥
" सहस्रशीर्षा जापी तु मुच्यते गुरुतल्पगः । गौर्देया कर्मणोऽस्यान्ते पृथगेव पयस्विनी " ॥ इति ।
शातातपः—" मद्यं पीत्वा गुरुदारांश्च गत्वा स्तेयं कृत्वा ब्रह्महत्यां च कृत्वा ॥
" भस्म[1]च्छन्नो भस्मशय्याशयानो रुद्राध्यायी मुच्यते सर्वपापैः " ॥ इति ।

जपश्चैकादशकृत्वः कार्यः । तदाहात्रिः—
" एकादशगुणान्वापि रुद्रानावर्त्य धर्मवित् । महापापैरपि स्पृष्टो मुच्यते नात्र संशयः " ॥ इति ।
बोधायनः—
" अघमर्षणं [2]देवकृतं शुद्धवत्यस्तरत्समाः । कूश्माण्डः पावमान्यश्च विरजामृत्युलाङ्गलम् ।
" दुर्गयाहुतयो रुद्रा महापातकनाशनाः " ॥ इति । **आश्वलायनः**—
" कुन्तापं वालखिल्यांश्च जप्त्वा पापैः प्रमुच्यते । ब्रह्महत्यादिपापेभ्यः पावमानात्प्रमुच्यते " ॥
संवर्तः—
" षण्मासं पञ्चमासं वा नियतो नियताशनः । जप्त्वा तु पौरुषं सूक्तं मुच्यते सर्वपातकैः " ॥ इति ।
बोधायनः—" मातृदुहितृस्नुषास्वसृसवर्णाविधवागमनं कृत्वा यः पुरुषसूक्तं त्रिरुच्चारयेत् तदानीमेव पूतो भवति " इति । **कूर्मपुराणे**—
" जपस्तपस्तीर्थसेवा दानं ब्राह्मणपूजनम् । ग्रहणादिषु कालेषु महापातकशोधनम् ॥
" उपोषितश्चतुर्दश्यां कृष्णपक्षे समाहितः ।
" यमाय धर्मराजाय मृत्यवे चान्तकाय च । वैवस्वताय कालाय सर्वभूतक्षयाय च ॥
"प्रत्येकं तिलसंयुक्तान् दद्यात् सप्तोदकाञ्जलीन् । स्नात्वा नद्यां तु पूर्वाह्णे मुच्यते सर्वपातकैः"॥ इति ।
अत्र ज्ञानाज्ञानाभ्यासानभ्यासैर्व्यवस्था द्रष्टव्या । संसर्गी तदीयमेव प्रायश्चित्तं कुर्यात् । 'स तस्यैव व्रतं कुर्यात्' इत्यादिना पूर्वमेवोक्तत्वात् ।

उपपातकरहस्यप्रायश्चित्तम् । उपपातकरहस्यप्रायश्चित्तमाह **याज्ञवल्क्यः** (प्रा. ३०६)—
" प्राणायामशतं कार्यं सर्वपापापनुत्तये । उपपातकजातानामनादिष्टस्य चैव हि " ॥ इति ।
स्मृत्यन्तरेऽपि—
" दशप्रणवसंयुक्तैः प्राणायामैश्चतुःशतैः । मुच्यते ब्रह्महत्यायाः किं पुनः शेषपातकैः " ॥ इति ।

प्राजापत्यकृच्छ्रलक्षणम् । अथ कृच्छ्रलक्षणम् । तत्र प्राजापत्यस्य **बोधायनः** (४।५।६)—
" प्राजापत्यो भवेत्कृच्छ्रो दिवा रात्रावयाचितम् । क्रमशो वायुभक्षश्च द्वादशाहं त्र्यहं त्र्यहम् " ॥
आपस्तम्बः (१।९।२७।७)—" त्र्यहमनक्ताशी अदिवाशी ततस्त्र्यहं त्र्यहमयाचितव्रतस्त्र्यहं नाश्नाति किं च नेति कृच्छ्रद्वादशरात्रस्य विधिः " ॥ इति ।

मनुः (११।२११)—
" त्र्यहं प्रातस्त्र्यहं सायं त्र्यहमद्यादयाचितम् । त्र्यहं परं तु नाश्नीयात् प्राजापत्यं चरन्व्रतम्" ॥ इति ।

---

१ क्ष—हस्तच्छन्नो । २ गघ—देव ।

अस्यैवाधिकारिभेदेन प्रयोगान्तरमाह **वसिष्ठः** (७०।४२)—

“ अहःप्रातरहर्नक्तमहरेकमयाचितम् । अहः परं चोपवास एवं चतुरहौ परौ ॥

“ अनुग्रहार्थं विप्राणां मनुर्धर्मभृतां वरः । बालवृद्धातुराणां च शिशुकृच्छ्रमुवाच ह ” ॥

बोधायनः (४।५।७)—

“ अहरेकं तथा नक्तमज्ञातं वायुभक्षितम् । त्रिवृदेष परावृत्तो बालानां कृच्छ्र उच्यते ” ॥

याज्ञवल्क्यः (प्रा. ३१९।३२०)—

“ एकभुक्तेन नक्तेन तथैवायाचितेन वा । उपवासेन चैकेन पादकृच्छ्रः प्रकीर्तितः ।

“ यथाकथंचित् त्रिगुणः प्राजापत्योऽयमुच्यते ” ॥ इति । एकभुक्तेन दिवा सकृद्भोजनेन नक्तेन रात्रौ सकृद्भोजनेन अयाचितेन न विद्यते याचितं यस्मिन् भोजने तेनात्र कालविशेषाप्रतीतेः दिवा रात्रौ वा सकृद्भोजनेनायाचितेनोपवासेनानाशनेन पादकृच्छ्रो भवति । अयमेव पादकृच्छ्रः स्वस्यावृत्त्या स्वस्थानविवृद्ध्या वा यथाकथंचित् त्रिगुणः त्रिरभ्यस्तः प्राजापत्य इत्युच्यत इत्यर्थः ।

एकभुक्तादिषु ग्राससंख्यां परिमाणं **चापस्तम्बो** दर्शितवान्—

“ सायं द्वाविंशतिर्ग्रासाः प्रातः षड्विंशतिः स्मृताः । चतुर्विंशतिरयाचिते परं निरशनं स्मृतम् ॥

“ कुक्कुटाण्डप्रमाणं तु यथावास्यं विशेत्स्वयम् ” ॥ **चतुर्विंशतिमते**—

“ प्रातस्तु द्वादशग्रासाः सायं पञ्चदशैव तु । अयाचितेन द्वावष्टौ त्रिदिनं मारुताशनः ” ॥ इति । अत्र शक्त्यपेक्षया व्यवस्था द्रष्टव्या ।

पादकृच्छ्राणां वर्णभेदेन व्यवस्था ।

आपस्तम्बः चतुरः पादकृच्छ्रानुक्त्वा तेषां वर्णभेदेन व्यवस्थामाह—

“ त्र्यहं निरशनं पादः पादश्चायाचितं त्र्यहम् । सायं त्र्यहं तथा पादः प्रातः पादस्तथा त्र्यहम् ॥

“ प्रातः पादं चरेच्छूद्रः सायं वैश्यस्य दापयेत् । अयाचितं तु राजन्ये त्रिरात्रं ब्राह्मणे स्मृतम् ” ॥

अर्धकृच्छ्रपादोनकृच्छ्रयोः स्वरूपमाह **स** एव—

“ सायंप्रातर्विनार्धं स्यात् पादोनं नक्तवर्जितम् ” ॥ अयमर्थः—अयाचितोपवासयोः त्र्यहद्वयानुष्ठानेनार्धकृच्छ्रो भवति । नक्तत्रयव्यतिरिक्तत्र्यहत्रयानुष्ठानेन पादोनकृच्छ्रो भवतीति । अन्यथा अर्धकृच्छ्रस्तेनैवोक्तः—

“ सायं प्रातस्तथैवोक्तं दिनद्वयमयाचितम् । दिनद्वयं तु नाश्नीयात् कृच्छ्रार्धं तद्विधीयते ” ॥ इति ।

यत्तु जपहोमादिबाह्याङ्गविहितं प्राजापत्यकृच्छ्रं **गौतमेना**भिहितं (२६।१–१७)—“ हविष्यान्प्रातराशान् भुक्त्वा तिस्रो रात्रीर्नाश्नीयात् । अथापरं त्र्यहं नक्तं भुञ्जीताथापरं त्र्यहं न [3]किंचन याचयेत् । अथापरं त्र्यहमुपवसेत् । तिष्ठेदहनि रात्रावासीत क्षिप्रकामः । सत्यं वदेदनार्यैर्न संभाषेत । रौरवयौधाजपे नित्यं प्रयुञ्जीतानुसवनमुदकोपस्पर्शनमापो हि ष्ठेति तिसृभिः पवित्रवतीभिर्मार्जयीत हिरण्यवर्णाः शुचयः पावका इत्यष्टाभिरथोदकतर्पणं नमोऽहमाय मोहमाय मंहमाय [4]विधून्वते तापसाय पुनर्वसवे नमो नमो मौञ्ज्यायोर्म्याय वसुविन्दाय सार्वविन्दाय नमो नमः पाराय सुपाराय महापाराय पारयिष्णवे नमो नमो रुद्राय पशुपतये महते [5]दैवताय त्र्यम्बकायैकचरायाधिपतये हराय शर्वायेशानायोग्राय वज्रिणे घृणिने कपर्दिने नमो नमः सूर्यायादित्याय नमोनमो नीलग्रीवाय शितिकण्ठाय नमो नमः कृष्णाय पिङ्गलाय नमो नमो ज्येष्ठाय श्रेष्ठाय वृद्धायेन्द्राय हरिकेशायोर्ध्वरेतसे नमो नमः सत्याय पावकाय पावकवर्णाय कामाय कामरूपिणे नमो नमो दीप्ताय

१ घ-क्षता । २ घ-भ । ३ घ-कं । ४ घ-धू । ५ घ-देवाय ।

दीप्तरूपिणे नमो नमस्तीक्ष्णाय तीक्ष्णरूपिणे नमो नमः सौम्याय सुपुरुषाय महापुरुषाय मध्यम-पुरुषायोत्तमपुरुषाय ब्रह्मचारिणे नमो नमश्चन्द्रललाटाय कृत्तिवाससे नमः। इत्येतदेवादित्योपस्थान-मेता एवाज्याहुतयो द्वादशरात्रस्यान्ते चरुं श्रपयित्वैताभ्यो देवताभ्यो जुहुयादग्नये स्वाहा सोमाय स्वाहाऽग्नीषोमाभ्यामिन्द्राग्निभ्यामिन्द्राय विश्वेभ्यो देवेभ्यो ब्रह्मणे प्रजापतयेऽग्नये स्विष्ट-कृते स्वाहेत्यन्ते ब्राह्मणभोजनम् " इति। हविष्यानित्याद्युपवसेदित्यन्तेन प्राजापत्यस्वरूपमुक्तम्। तिष्ठेदित्यादिना तस्येतिकर्तव्यतोच्यते। क्षिप्रकामः शीघ्रं शुद्धिकामः। भोजनाद्यविरुद्धकालेषु अहनि तिष्ठेत् रात्रौ निद्रामप्यासीन एव सेवेत। एवं सत्यं वदेदित्याद्यङ्गकलापे क्षिप्रकाम इत्यधिकारि-विशेषणमनुषञ्जनीयम्। अनेन यः शनैः शुद्धो भवामीति मन्यते तस्य नायं नियम इति गम्यते। रौरवयौधाजये सामनी नमोऽहमायेत्यादयस्त्रयोदशमन्त्रास्तर्पणसूर्योपस्थानाज्यहोमेषु द्रष्टव्याः। अथवा संप्रदानविभक्त्यन्ताः षट्पञ्चाशन्मन्त्राः। एतन्मन्त्राद्युक्तजपहोमाद्यङ्गरहितप्राजापत्यद्वय-स्थाने वेदितव्यमिति **माधवीये**।

अतिकृच्छ्रलक्षणम्। अतिकृच्छ्रस्य **मनुः** (११।२१३)—

" एकैकं ग्रासमश्नीयात् त्र्यहाणि त्रीणि पूर्वतः। त्र्यहं चोपवसेदन्त्यमतिकृच्छ्रं चरन् द्विजः "॥ इति। एकभुक्तनक्तायाचितदिवसेषु नवस्वेकैकं ग्रासमश्नीयात्। त्र्यहं चोपवसेत्। अयमतिकृच्छ्रो भवतीत्यर्थः। **यमः**—"एकैकं पिण्डमश्नीयात् त्र्यहं काले त्र्यहं निशि। अयाचितं त्र्यहं चैव वायुभक्षः परे त्र्यहम्॥ " अतिकृच्छ्रं चरेदेतत्पवित्रं पापनाशनम् "॥ **बोधायनः** (४।५।८)—

" एकैकं ग्रासमश्नीयात् पूर्वोक्तेन त्र्यहं त्र्यहम्। वायुभक्षस्त्र्यहं चान्यदतिकृच्छ्रोऽघनाशनः "॥ यत्तु **याज्ञवल्क्येनोक्तम्** (प्रा.—३२०)—" अयमेवातिकृच्छ्रः स्यात् पाणिपूरान्नभोजने " इति अयमेव प्राजापत्यकृच्छ्र एव एकभुक्तनक्तायाचितदिवसेषु नवसु पाणिपूरान्नभोजनयुक्तोऽतिकृच्छ्रो भवतीत्यर्थः। तथा च **पराशरः** (११।५२)—

"नवाहमतिकृच्छ्रः स्यात् पाणिपूरान्नभोजनः। त्रिरात्रमुपवासः स्यादतिकृच्छ्रः स उच्यते "॥ इति तदेतदशक्तविषयम्। पाणिपूरान्नस्य ग्रासपरिमितान्नादधिकपरिमाणत्वात्।

कृच्छ्रातिकृच्छ्रलक्षणम्। कृच्छ्रातिकृच्छ्रस्य **बोधायनः** (४।५।९)—

" अब्भक्षस्त्र्यहानेतान्वायुभक्षस्ततः परम्। एष कृच्छ्रातिकृच्छ्रस्तु विज्ञेयः सोऽतिपावनः "॥ एकभुक्तनक्तायाचितदिवसेषु यो भोजनकालः तस्मिन्नेव काले केवलमुदकेनैव वर्तनं त्रिरात्रमुपवासश्च कृच्छ्रातिकृच्छ्र इत्यर्थः। यत्तु एकविंशतिदिनपर्यन्तं क्षीरेणैव वर्तनमुक्तं **याज्ञवल्क्येन** (प्रा. ३२१) " कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिम् " इति तदशक्तविषयम्।

तप्तकृच्छ्रलक्षणम्। तप्तकृच्छ्रस्य **मनुः** (११।२१४)—

" तप्तकृच्छ्रं चरन् विप्रो जलक्षीरघृतानिलान्। प्रतित्र्यहं पिबेदुष्णान् सकृत्स्नायी समाहितः "॥

बोधायनः (४।५।१०)—

" त्र्यहं त्र्यहं पिबेदुष्णं पयः सर्पिः कुशोदकम्। वायुभक्षस्त्र्यहं चान्यत् तप्तकृच्छ्रः स उच्यते "॥

सांतपनकृच्छ्रलक्षणम्। सांतपनस्य **मनुबोधायनौ** (११।२१२; ४।५।११)—

" गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्। एकरात्रोपवासश्च कृच्छ्रः सांतपनः स्मृतः "॥ इति।

एतस्य द्विरात्रसाध्यत्वमाह **याज्ञवल्क्यः** (३१५)—

"गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । जग्ध्वा परेऽह्न्युपवसेत् कृच्छ्रं सांतपनं चरन्" ॥ इति ।

महासांतपनलक्षणम् । महासांतपनं त्रिविधं सप्तरात्रं पञ्चदशरात्रमेकविंशतिरात्रं चेति । तत्र सप्तरात्रस्य स्वरूपमाह **याज्ञवल्क्यः** (प्रा. ३१६)—

"पृथक् सांतपनद्रव्यैः षडहः सोपवासकः । सप्ताहेन तु कृच्छ्रोऽयं महासांतपनः स्मृतः" ॥ इति ।

यमः पञ्चदशाहमाह—

" त्र्यहं पिबेत्तु गोमूत्रं त्र्यहं वै गोमयं पिबेत् । त्र्यहं दधि त्र्यहं क्षीरं त्र्यहं सर्पिस्ततः शुचिः ॥

" महासांतपनं ह्येतत् सर्वपापप्रणाशनम् " ॥ इति । **जाबालिस्त्वाह**—

" षण्णामेकैकमेतेषां त्रिरात्रमुपयोजयेत् । त्र्यहं चोपवसेदन्ते महासांतपनं विदुः " ॥ इति ।

एतत् त्रयं पापतारतम्यविषयं द्रष्टव्यम् । **पराकलक्षणम्** । पराकस्य **मनुः** (११।२१५)—

" यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम् । पराको नाम कृच्छ्रोऽयं सर्वपापप्रणाशनः " ॥ इति ।

पर्णकृच्छ्रलक्षणम् । पर्णकृच्छ्रस्य **याज्ञवल्क्यः** (प्रा. ३१७)—

" पर्णोदुम्बरराजीवबिल्वपत्रकुशोदकैः । प्रत्येकं प्रत्यहं पीतैः पर्णकृच्छ्र उदाहृतः " ॥ इति । पलाशोदुम्बरारविन्दबिल्वपर्णानामेकैकेन क्वथितमुदकं प्रत्यहं पिबेत् । कुशोदकं चैकस्मिन्नहनीति पञ्चाहसाध्यः पर्णकृच्छ्रः । पर्णकृच्छ्रस्य लक्षणान्तरमाह **यमः**—

" एतान्येव समस्तानि त्रिरात्रोपोषितः शुचिः । क्वाथयित्वा पिबेदद्भिः पर्णकृच्छ्रस्य लक्षणम्" ॥ इति । पलाशपर्णान्येकीकृत्याम्भसा क्वाथयित्वा त्रिरात्रोपवासान्ते क्वथितं तत्पयः पिबेत् । अयं पर्णकृच्छ्रो भवतीत्यर्थः ।

फलकृच्छ्रादिलक्षणम् । फलकृच्छ्रादीनां स्वरूपमाह **मार्कण्डेयः**—

" फलैर्मासेन कथितः फलकृच्छ्रो मनीषिभिः । श्रीकृच्छ्रः श्रीफलैः प्रोक्तः पद्माक्षैरपरस्तथा ॥

" मासेनामलकैरेवं श्रीकृच्छ्रः परमः स्मृतः । पत्रैर्मतः पत्रकृच्छ्रः पुष्पैस्तत्कृच्छ्र उच्यते ॥

" मूलकृच्छ्रः स्मृतो मूलैस्तोयकृच्छ्रो जलेन तु " ॥ इति । यदा बिल्वादिफलान्यम्भसा क्वाथयित्वा मासमेकं तदम्भः पिबति तदा फलकृच्छ्रो भवति । यदा बिल्वपद्माक्षामलकानामन्यतमस्य क्वाथं मासमेकं पिबेत् तदा श्रीकृच्छ्रो भवति । यदा त्वेषां पत्रपुष्पमूलानां क्वाथं पिबेत् तदा पत्रपुष्पमूलकृच्छ्राणि भवन्ति ।

वारुणस्त्रीसौम्यकृच्छ्रलक्षणम् । वारुणस्त्रीकृच्छ्रयोर्लक्षणमाह **यमः**—

" ब्रह्मचारी जितक्रोधो मासेऽप्युदकसक्तुकान् । पिबेच्च नियताहारः कृच्छ्रं वारुणमुच्यते ॥

" त्र्यहं पिबेत्तु गोमूत्रं त्र्यहं वै गोमयं पिबेत् । त्र्यहं वै यावकेनैव स्त्रीकृच्छ्रं ह्येतदुच्यते " ॥ इति ।

सौम्यकृच्छ्रस्य **याज्ञवल्क्यः** (प्रा. ३२२)—

" पिण्याकाचामतक्राम्बुसक्तूनां प्रतिवासरम् । एकरात्रोपवासश्च कृच्छ्रः सौम्योऽयमुच्यते "॥ इति । आचामः ओदननिष्यावः । पिण्याकादीनां पञ्चानां एकैकं प्रतिदिनमुपभुज्य षष्ठेऽहन्युपवसेत् । स एष सौम्यकृच्छ्रः । यत्तु **जाबालेन** चतुरहव्यापी सौम्यकृच्छ्र उक्तः—

"पिण्याकं सक्तवस्तक्रं चतुर्थेऽहन्यभोजनम् । वासो वै दक्षिणां दद्यात् सौम्यो वै कृच्छ्र उच्यते" ॥ इति तदेतदशक्तविषयम् ।

तुलापुरुषकृच्छ्रलक्षणम् । अथ तुलापुरुषकृच्छ्रमाह **जाबालिः**—
"पिण्याकं च तथाचामस्तक्रं चोदकसक्तवः । त्रिरात्रमुपवासश्च तुलापुरुष उच्यते" ॥ इति सोऽयमष्टदिवससाध्यः । **याज्ञवल्क्यः** पञ्चदशाहसाध्यमाह (प्रा. ३२३)—
"एषां त्रिरात्रमभ्यासात् एकैकस्य यथाक्रमम् । तुलापुरुष इत्येवं ज्ञेयः पञ्चदशाहिकः" ॥ इति । एषां पिण्याकादीनां पञ्चानाम् । **यमस्तु** एकविंशतिदिनसाध्यमाह—
"आचामाचितपिण्याकं तक्रं चोदकसक्तुकान् । त्र्यहं त्र्यहं प्रयुञ्जानो वायुभक्षस्त्र्यहद्वयम् ॥
"एकविंशतिरात्रस्तु तुलापुरुष उच्यते" ॥ इति । तदेतत् त्रयं पापतारतम्यविषयतया व्यवस्थापनीयम् ।

अघमर्षणकृच्छ्रलक्षणम् । अघमर्षणकृच्छ्रस्य **शङ्खः**—
"त्र्यहं त्रिषवणस्नायी मुनिः स्नात्वाऽघमर्षणम् । मनसा त्रिः पठेदप्सु न भुञ्जीत दिनत्रयम् ॥
"अघमर्षणमित्येतद्व्रतं सर्वाघसूदनम्" ॥ इति । प्रकारान्तरमाह **विष्णुः** (४६।२-९)—
"त्र्यहं नाश्नीयात् त्र्यहं त्रिषवणस्नानमाचरेदप्सु त्रिरघमर्षणं जपेत् । दिवा तिष्ठेद्रात्रावासीत कर्मणोऽन्ते पयस्विनीं गां दद्यादित्यघमर्षणम्" इति ।

दैवतकृच्छ्रलक्षणम् । दैवतकृच्छ्रमाह **यमः**—
"यवागूं यावकं शाकं क्षीरं दधि घृतं तथा । त्र्यहं त्र्यहं तु प्राश्नीयात् वायुभक्षः परं त्रयम् ॥
"कृच्छ्रं दैवं तु तन्नाम सर्वकल्मषनाशनम्" ॥ इति ।

यज्ञकृच्छ्रम् । यज्ञकृच्छ्रस्या**ङ्गिराः**—
"युक्तस्त्रिषवणस्नायी संयतो मौनमास्थितः । प्रातः स्नानं समारभ्य कुर्याज्जप्यं च नित्यशः ॥
"सावित्रीं व्याहृतीश्चैव जपेदष्टसहस्रकम् । ओंकारमादितः कृत्वा रूपे रूपे तथादितः ॥
"भूमौ वीरासने युक्तः कुर्याज्जप्यं तु संयतः । आसीनश्च स्थितो वापि पिबेद् गव्यं पयः सकृत् ॥
"गव्यस्य पयसोऽलाभे गव्यमेव भवेद् दधि । दध्नोऽभावे भवेत्तक्रं तक्रालाभे तु यावकम् ॥
"एषामन्यतमं यत्तु उपपद्येत तत् पिबेत् । गोमूत्रेण समायुक्तं यावकं चोपयोजयेत् ।
"सर्वपापहरो दिव्यो नाम्ना यज्ञ इति स्मृतः । एकाहेन तु कृच्छ्रोऽयमुक्तस्त्वङ्गिरसा स्वयम् ॥
"एतत्पातकयुक्तानां तथा चाप्युपपातकैः । महद्भिश्चापि युक्तानां प्रायश्चित्तमिदं शुभम्" ॥ इति ।

यावककृच्छ्रलक्षणम् ।
यावककृच्छ्रस्य **देवलः**—"यावकानामप्सु साधितानां सप्तरात्रं पक्षं मासं वा प्राशनं यावकम् । एतेन यावकपायसोदकानि व्याख्यातानि" । **शङ्खः**—
"गोपुरीषं यवाभ्यासो मासमेकं समाहितः । व्रतं तु यावकं कुर्यात् सर्वपापापनुत्तये" ॥ इति ।

प्रसृतियावककृच्छ्रलक्षणम् । प्रसृतियावककृच्छ्रमाह **हारीतः**—"य आत्मकृतैः कर्मभिः गुरुमात्मानं पश्येत् । आत्मार्थं प्रसृतियावकं श्रपयेत् । ततोऽग्नौ जुहुयात् । तेन दैवबलिकर्म । श्रुतमभिमन्त्रयेत ।
"यवोऽसि धान्यराजोऽसि वारुणो मधुसंयुतः । निर्णोदः सर्वपापानां पवित्रमृषिभिः स्मृतम् ॥
"घृतं यवा मधु यवा आपोहिष्ठामृतं यवाः । सर्वं पुनन्तु मे पापं यन्मया दुष्कृतं कृतम् ॥
"वाचा कृतं कर्मकृतं मनसा दुर्विचिन्तितम् । अलक्ष्मीं कालकण्ठीं च सर्वं पुनीतं मे यवाः" ॥

---

१ घ-मंत । २ गघ-ममथ । ३ घग-यवा । ४ क्ष-खण्डन् । ५ क्ष-न ।

श्रप्यमाणं रक्षां कुर्यात् । नमो रुद्राय भूतपतये सावित्री मानस्तोकेति पात्रे त्रिः निषिच्य ये देवा मनोजातो मनायुजः सुदक्षा दक्षपितरस्ते नः पान्तु ते नोऽवन्तु तेभ्यो नमस्तेभ्यो नमः स्वाहेति आत्मनि जुहुयात् । त्रिरात्रमेवात्रातिपापकृत् षड्रात्रं पीत्वा पूतो भवति सप्तरात्रं महापातकी द्वादशरात्रं पीत्वा सर्वं पुरुषकृतं पापं निर्दहति । निर्वृत्तानां यवानामेकं विंशतिरात्रं पीत्वा गणान् पश्यति गणाधिपं पश्यति विद्यां पश्यति विद्याधिपं पश्यति योऽश्नीयाद्यावकं पक्वं गोमूत्रेष्वसकृत् दधिक्षीरसर्पिःषु मुच्यते सोंहसः क्षणात् इत्याह भगवान् मैत्रायणिः " इति ।

चान्द्रायणकृच्छ्रलक्षणम् । अथ चान्द्रायणस्य प्रकार उच्यते । तच्च द्विविधं पिपीलिकामध्यं यवमध्यं चेति । यथा पिपीलिकायाः शिरःपृष्ठभागौ स्थूलौ मध्यं शून्यं तथा यस्य चान्द्रायणस्य मध्ये अमावास्यादिने सर्वग्रासह्रासः तस्य मध्यमभागसौक्ष्म्यात् पिपीलिका-मध्यत्वम् । तद्यथा कृष्णप्रतिपदि व्रतं संकल्प्य चतुर्दश ग्रासान् भुञ्जीत । ततो द्वितीयामारभ्य प्रतिदिनमेकैकग्रासस्य ह्रासे सति अमावास्यायामुपवासः संपद्यते । पुनः शुक्लप्रतिपदि ग्रासमेक-मुपक्रम्य प्रतिदिनमेकैकग्रासवृद्ध्या पूर्णिमायां पञ्चदशग्रासाः संपद्यन्ते । स एष पिपीलिकामध्य-चान्द्रायणस्यानुष्ठानप्रकारः । तथा यवं मध्यस्थूलमुभावन्तौ शून्यौ । तथाहि—शुक्लप्रतिपदमारभ्य प्रतिदिनमेकैकग्रासवृद्ध्या पूर्णिमायां पञ्चदशग्रासाः संपद्यन्ते । कृष्णप्रतिपदमारभ्यैकैकग्रासह्रासे सति अमावास्यायामुपवासः इति मध्यभागस्थौल्याद्यवमध्यत्वम् ।

तत्र पिपीलिकामध्यमाह **वसिष्ठः** (प. ७०।४५)—

" मासस्य कृष्णपक्षादौ ग्रासानद्याच्चतुर्दश । ग्रासापचयभोजी सन् पक्षशेषं समापयेत् ॥

" तथैव शुक्लपक्षादौ ग्रासं भुञ्जीत चापरम् । ग्रासोपचयभोजी सन् पक्षशेषं समापयेत् " ॥

पराशरः (१०।२)—

"एकैकं ह्रासयेद् ग्रासं कृष्णे शुक्ले तु वर्धयेत् । अमावास्यां न भुञ्जीत ह्येष चान्द्रायणो विधिः" ॥ इति ।

चान्द्रायणद्वयमाह **देवलः**—"चान्द्रायणं द्विविधं यवमध्यं पिपीलिकामध्यं चेति । एकग्रासममा-वास्यादि यवमध्यं पञ्चदशग्रासं पौर्णमास्यादि पिपीलिकामध्यम् " इति ।

मनुरपि (११।२१६–२१७)—

" एकैकं ह्रासयेद् ग्रासं कृष्णे शुक्ले च वर्धयेत् । उपस्पृशंस्त्रिषवणमेतच्चान्द्रायणव्रतम् ॥

" एवमेव विधिं कृत्स्नमाचरेद्यवमध्यमे । शुक्लपक्षादिनियतश्चरेच्चान्द्रायणव्रतम् " ॥ इति ।

वपनादिक्रमः । वपनादीतिकर्तव्यतामाह **गौतमः** (२७।३–१५)—"वपनादिव्रतं चरेत् । श्वोभूतां पौर्णमासीमुपवसेदाप्यायस्व सं ते पयांसि नवो नव इति चैताभिस्तर्पणमाज्यहोमो हविषां चानुमन्त्रणमुपस्थानं चन्द्रमसो यद्देवा देवहेलनमिति चतसृभिराज्यं जुहुयात् । देवकृतस्येति चान्ते समिद्भिः । ओं भूर्भुवः सुवर्महर्जनस्तपः सत्यं यशः श्रीरूर्गिडौजास्तेजः पुरुषो धर्मः शिव इत्येतैर्ग्रासानुमन्त्रणं प्रतिमन्त्रं मनसा । नमः स्वाहेति वा सर्वानेतैरेव ग्रासाननुभुञ्जीत । ग्रास-प्रमाणमास्याविकारेण । चरुभैक्षसक्तुकणयावकशाकपयोदधिघृतमूलफलोदकादीनि हवींष्युत्तरोत्तरं प्रशस्तानि । द्वादशैतानि पौर्णमास्यां पञ्चदशग्रासान् भुक्त्वा एकैकापचयेनापरपक्षमश्नीयात् । अमावास्यायामुपोष्यैकैकोपचयेन पूर्वपक्षं विपरीतमेकेषामेष चान्द्रायणो मासः " इति ।

---

१ घ–नं । २ क्ष–कैवि ।

पुनरपि प्रकारान्तरेण त्रिविधं ऋषिचान्द्रायणं शिशुचान्द्रायणं यतिचान्द्रायणं चेति। तेषां स्वरूपमाह **यमः**—

"त्रींस्त्रीन् पिण्डान् समश्नीयात् नियतात्मा दृढव्रतः[1]। हविष्यान्नस्य वै मासमृषिचान्द्रायणं स्मृतम्॥
" चतुरः प्रातरश्नीयात् चतुरः सायमेव च। पिण्डानेतद्धि बालानां शिशुचान्द्रायणं स्मृतम्॥
"पिण्डानष्ट समश्नीयात् मासं मध्यंदिने रवौ। यतिचान्द्रायणं ह्येतत् सर्वकल्मषनाशनम्"॥ इति।

विष्णुः पञ्चविधमाह (४७।१-९)—" अथातश्चान्द्रायणं ग्रासानास्याविकारमश्नीयात्। तांश्च कलाभिवृद्धौ क्रमेण वर्धयेत्। हानौ च ह्रासयेत्। अमावास्यायां च नाश्नीयात्।"

दक्षः—"चान्द्रायणो यवमध्यः पिपीलिकामध्यो वा यस्यामावास्या मध्या भवति स पिपीलिकामध्यः। " यस्य पौर्णमासी स यवमध्यः। अष्टौ ग्रासान् प्रतिदिनमश्नीयात् स यतिचान्द्रायणः। सायं " प्रातश्चतुरश्चतुरः स शिशुचान्द्रायणः। यथाकथंचित् पिण्डानां तिस्रोऽशीतीर्वा समश्नीयात् " ससामान्यचान्द्रायणः" इति।

चान्द्रायणे ग्रासपरिमाणम्। चान्द्रायणेऽभिहितस्य पिण्डस्य परिमाणमाह **पराशरः** (१०।३)—

" कुक्कुटाण्डप्रमाणं तु ग्रासं वै परिकल्पयेत्। अन्यथाभावदोषेण न धर्मो न च शुध्यति"॥

व्रताचरणानन्तरं कर्तव्यमाह **स** एव (८।४८)—

"प्रायश्चित्ते ततश्चीर्णे कुर्यात् ब्राह्मणभोजनम्। गोद्वयं वत्ससंयुक्तं दद्याद्विप्राय दक्षिणाम्"॥ इति।

संख्याविशेषानुपादानात् शक्त्यनुसारेण ब्राह्मणभोजनम्।

चान्द्रायणफलनिरूपणम्। चान्द्रायणस्य फलं दर्शयति **यमः**—

"यत् किंचित् क्रियते पापं कर्मणा मनसा गिरा। द्विजश्चान्द्रायणं कृत्वा तस्मात्पापात् प्रमुच्यते॥
"एतानि विधिवत् कृत्वा षड्भिर्मासैर्हविष्यभुक्। व्यपेतकल्मषो विप्रश्चन्द्रस्यैति सलोकताम्"॥

व्रतग्रहणप्रकारः। व्रतग्रहणप्रकारमाह **विष्णुः**—

" सर्वपापेषु सर्वेषां व्रतानां विधिपूर्वकम्। ग्रहणं संप्रवक्ष्यामि प्रायश्चित्ते चिकीर्षिते॥
" दिनान्ते नखरोमादीन् प्रवाप्य स्नानमाचरेत्। भस्मगोमयमृद्वारिपञ्चगव्यादिकल्पितैः॥
" मलापकर्षणं कार्यं बाह्यशौचोपसिद्धये"॥ इति।

जाबालिः—

"आरम्भे सर्वकृच्छ्राणां समाप्तौ च विशेषतः। आज्येनैव हि शालाग्नौ जुहुयाद् व्याहृतीः[2] पृथक्॥
"कायाभ्यङ्गं शिरोभ्यङ्गं ताम्बूलमनुलेपनम्। व्रतस्थो वर्जयेत्सर्वं यच्चान्यत् बलरागकृत्"॥ इति।

गृही तस्य व्रतस्यासमापने प्रत्यवायमाह **छागलेयः**—

"पूर्वं व्रतं गृहीत्वा तु नाचरेत् कामतो हि यः। जीवन् भवति चण्डालो मृतः श्वा चाभिजायते"॥

ब्रह्मकूर्चस्वरूपं तत्परिमाणं च। ब्रह्मकूर्चस्य स्वरूपमाह **पराशरः** (११।२७-३७)—

" गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्। निर्दिष्टं पञ्चगव्यं तु पवित्रं पापनाशनम्॥
" गोमूत्रं कृष्णवर्णायाः श्वेतायाश्चैव गोमयम्। पयश्च ताम्रवर्णाया रक्ताया गृह्यते दधि॥
" कपिलाया घृतं ग्राह्यं सर्वं कापिलमेव वा। मूत्रमेकपलं दद्यादङ्गुष्ठार्धं तु गोमयम्॥

---

१ घ—दृढव्रतः। २ क्ष—दाहुतिः।

" क्षीरं सप्तपलं दद्यात् दधि त्रिपलमुच्यते । घृतमेकपलं दद्यात् पलमेकं कुशोदकम् ॥
" गायत्र्यादाय गोमूत्रं गन्धद्वारेति गोमयम् । आप्यायस्वेति च क्षीरं दधिक्रावृणस्तथा दधि ॥
" तेजोऽसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकम् । पञ्चगव्यमृचा पूतं स्थापयेदग्निसंनिधौ ॥
" आपो हि ष्ठेत्यृचालोड्य मानस्तोकेति मन्त्रयेत् । सप्तावरास्तु ये दर्भा अच्छिन्नाग्राः शुकत्विषः ॥
" एतैरुद्धृत्य होतव्यं पञ्चगव्यं यथाविधि । इरावती इदं विष्णुर्मानस्तोकेति शर्वेति[1] ॥
" एताभिश्चैव होतव्यं हुतशेषं पिबेद् द्विजः । आलोड्य प्रणवेनैव निर्मथ्य[2] प्रणवेन तु ॥
" उद्धृत्य प्रणवेनैव पिबेच्च प्रणवेन तु । मध्यमेन पलाशस्य पद्मपत्रेण वा पिबेत् ॥
" स्वर्णपात्रेण रौप्येण ब्रह्मतीर्थेन वा पुनः । यत्त्वगस्थिगतं पापं देहे तिष्ठति देहिनाम् ॥
" ब्रह्मकुर्चो दहेत्सर्वं प्रदीप्तोऽग्निरिवेन्धनम् । पवित्रं त्रिषु लोकेषु देवताभिरधिष्ठितम् ॥
" वरुणश्चैव गोमूत्रे गोमये हंसवाहनः । दध्नि वायुः समुद्दिष्टः सोमः क्षीरे घृते रविः " ॥

यथोक्तपरिमाणानि द्रव्याणि पलाशादि पात्रे गायत्र्याभिः संयोज्य स्थापयित्वा आपो हि ष्ठेति त्र्यृचेनालोड्य मानस्तोकेत्यभिमन्त्र्य सप्तावरैः हरितवर्णैः दर्भैरादाय[3] इरावति इदं विष्णुर्मानस्तोके शंनो देवीरिति चतसृभिरग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा ओं स्वाहा अग्नये स्विष्टकृते स्वाहा । इति प्राजापत्योक्तैर्मन्त्रैश्च पलाशपत्रेण हुत्वा हुतशेषं हस्तेन काष्ठेन वा निर्मन्थ्य पिबेत् । गोमूत्रादीनां परिमाणान्तरमाह **प्रजापतिः**—

" गोमयात् द्विगुणं मूत्रं सर्पिर्दद्याच्चतुर्गुणम् । क्षीरमष्टगुणं देयं दधि पञ्चगुणं तथा " ॥ इति । अत्र गोमयस्य परिमाणविशेषानभिधानात् वचनान्तरादङ्गुष्ठार्धपरिमितं ग्राह्यम् । पर्वद्वयोपेतमङ्गुष्ठ तत्रोपरितनपर्वणा समानपरिमाणं गोमयं स्वीकृत्य यथोक्तोत्तराभिवृध्द्या गोमूत्रादीनि योजयेत् । एतच्च पूर्वोक्तपरिमाणेन सह विकल्प्यते । **स एव**—

" पालाशं पद्मपात्रं वा ताम्रं वाऽथ हिरण्मयम् । गृहीत्वा सादयित्वा तु ततः कर्म समारभेत् ॥
" स्थापयित्वाऽथ दर्भेषु पालाशैः पत्रकैरथ । तत्समुद्धृत्य होतव्यं देवताभ्यो यथाक्रमम् ॥
" अग्नये चैव सोमाय सवित्रे च तथैव च । प्रणवेन तथा हुत्वा स्विष्टकृत्वा तथैव च " ॥ इति ।

ब्रह्मकूर्चस्य कालविशेषमाह **स एव**—" चतुर्दश्यामुपोष्याथ पौर्णमास्यां समाचरेत् " ॥ इति । **जाबालिरपि**—

" अहोरात्रोषितो भूत्वा पौर्णमास्यां विशेषतः । पञ्चगव्यं पिबेत्प्रातर्ब्रह्मकूर्चमिति स्मृतम् " ॥

देशविशेषमाह **शातातपः**—

" नदीतीरेषु गोष्ठेषु पुण्येष्वायतनेषु वा । तत्र गत्वा शुचौ देशे ब्रह्मकूर्चं समाचरेत् " ॥ इति ।

प्राजापत्यादिप्रत्याम्नायः । अथ पूर्वोक्तानां व्रतानां केनचिन्निमित्तेनानुष्ठानाशक्तौ यथायोगं प्रत्याम्नाया उच्यन्ते । तत्र प्राजापत्यप्रत्याम्नायाश्चतुर्विंशतिमते दर्शिताः—

" कृच्छ्रोऽयुतं तु गायत्र्या उदवासस्तथैव च । धेनुप्रदानं विप्राय सममेतच्चतुष्टयम् ॥
" तिलहोमसहस्रं तु वेदपारायणं तथा । विप्रा द्वादश वा भोज्याः पावकेष्टिस्तथैव च ॥
" अन्या वा पावमानेष्टिः समान्याहुर्मनीषिणः " ॥ तिलहोमसहस्रं गायत्र्या ।

१ गघ-शंवती । २ घ-प्रणवेनाभिमन्त्रयेत् । ३ घ-रव ।

पराशरः (१२।५६-५७)—

" कृच्छ्रे देव्ययुतं चैव प्राणायामशतद्वयम् । पुण्यतीर्थेनार्द्रशिरः स्नानं द्वादशसंख्यया ॥

" द्वियोजनं तीर्थयात्राकृच्छ्रमेकं प्रकल्पितम् " ॥ इति । अनार्द्रं शिरो यस्यासावनार्द्रशिराः तस्य स्नानमनार्द्रशिरःस्नानम् । सकृत् स्नात्वा तदङ्गानुष्ठानं च कृत्वा केशान् शोषयित्वा ततो द्वितीयस्नानमाचरेत् । एवंविधस्नानद्वादशकं पुण्यतीर्थे कृतमित्यर्थः । **हेमाद्रौ**—

" कृच्छ्रोऽयुतं तु गायत्र्या विप्रद्वादशभोजनम् । तिलहोमसहस्रं वा सममेतच्चतुष्टयम् " ॥ इति । द्वादशब्राह्मणभोजनं निर्धनविषयम् । धनिकस्य प्रतिदिनं पञ्चपञ्चेति द्वादशसु दिवसेषु षष्टिर्ब्राह्मणा भोजनीयाः । अत एव **स्मृत्यन्तरम्**—

" प्राजापत्यं चरन् विप्रो यद्यशक्तः कथंचन । प्रत्यहं पञ्च विप्राग्र्यान् भोजयेत्सम्यगीप्सितान्" ॥

अन्यत्रापि—

" षष्टिश्चतुर्विंशतिर्वा भोज्या द्वादश वा द्विजाः । तावद्भोजनपर्याप्तं धान्यं तन्मूल्यमेव वा ॥

" तत्समृद्ध्यसमृद्धिभ्यां संख्यावैषम्यभाषणम् " ॥ इति । **माधवीये**—

" प्राजापत्यक्रियाशक्तौ धेनुं दद्यात् द्विजोत्तमः । धेनोरभावे दातव्यं मूल्यं तुल्यं न संशयः " ॥ इति । मूल्यं च यथाशक्ति देयम् ।

" गवामभावे निष्कं स्यात् तदर्धं पादमेव वा । पादहीनं न कर्तव्यमिति **शातातपो**ऽब्रवीत् " ॥ इति **स्मरणात्** । **स्मृत्यन्तरेऽपि**—

" कृच्छ्रोऽयुतं तु गायत्र्या उदवासस्तथैव च । समुद्रगानदीस्नानं सममेतच्चतुष्टयम् " ॥ इति[1] नदीस्नानं मृत्तिकास्नानम् ।

चान्द्रायणादीनां प्रत्याम्नायाः । चान्द्रायणादीनां प्रत्याम्नायाश्चतुर्विंशतिमते दर्शिताः-

" चान्द्रायणं मृगारेष्टिः पवित्रेष्टिस्तथैव च । मित्रविन्दाकृतिश्चैव कृच्छ्रं मासत्रयं तथा ॥

" तिलहोमायुतं चैव पराकद्वयमेव च । गायत्र्या लक्षजप्यं च समान्याह प्रजापतिः[2] ॥

" नित्यनैमित्तिकानां च काम्यानां चैव कर्मणाम् । इष्टीनां पशुबन्धानामभावे चरवः स्मृताः ॥

"पराकतप्तकृच्छ्राणां स्थाने कृच्छ्रत्रयं चरेत् । व्रतहोमादिकान्वापि कल्पयेत् पूर्वकल्पवत्"॥ इति ।

स्मृत्यन्तरे—

" चान्द्रायणं त्रयः कृच्छ्रा गायत्र्या अयुतत्रयम् । तथा महानदीस्नानं सममेतच्चतुष्टयम् " ॥ इति ।

महानदीपरिगणनम् । महानद्यः परिगणिताः

देवलः—" अथ गङ्गा सरस्वती यमुना नर्मदा विपाशा वितस्ता कौशिकी नन्दा विरजा चन्द्रभागा सरयूः शरावती सिन्धुः कृष्णवेणी शोणा तापिनी पाषाणगा गोमती गण्डकी बाहुदा पम्पा देविका कावेरी ताम्रपर्णी चर्मण्वती वेत्रवती गोदावरी तुङ्गभद्रा सुचक्षुररुणा चेति महानद्यः पुण्यतमाः " ॥ इति । **चतुर्विंशतिमते**—

" प्राजापत्ये तु गामेकं दद्यात् सांतपने द्वयम् । पराकतप्तकृच्छ्रेषु तिस्रस्तिस्रस्तु गाः स्मृताः ॥

" अष्टौ चान्द्रायणे देयाः प्रत्याम्नायविधौ सदा । यथावित्तानुसारेण दानं दद्याद्विशुद्धये " ॥ इति ।

---

१ घ–पशु । २ घ–बृहस्पति ।

यत्तु स्मृत्यन्तरे चान्द्रायणस्य गोदानत्रयमभिहितम्

" प्राजापत्ये तु गामेकामतिकृच्छ्रे द्वयं स्मृतम् । चान्द्रायणे पराके च तिस्रस्ता दक्षिणास्तथा "॥ इति तन्निर्धनविषयम् । गोदानादावशक्तो गोभ्यस्तृणं दद्यात् । तदाह **कण्वः**—

" एकमध्ययनं कुर्यात् प्राजापत्यमथापि वा । दद्यात् द्वादशसाहस्रं गवां मुष्टिं विचक्षणः " ॥ इति ।

चतुर्विंशतिमते—" कृच्छ्रे पञ्चातिकृच्छ्रे त्रिगुणमहरहस्त्रिंशदेवं तृतीये ।

" चत्वारिंशच्च तप्ते त्रिगुणनगुणिता विंशति स्यात्पराके ॥

" कृच्छ्रे संतापनाख्ये भवति षडधिका विंशतिः सैव हीना ।

" द्वाभ्यां चान्द्रायणे स्यात्तपसि कृशबलो भोजयेद्विप्रमुख्यान् " ॥ इति । अहरहरिति सर्वत्र संबध्यते । तृतीयः कृच्छ्रातिकृच्छ्रः । अध्ययनजपादीनां पुरुषविशेषेण व्यवस्था **तत्रैव** दर्शिता—

" धर्मनिष्ठास्तपोनिष्ठाः कदाचित्पापमागताः । जपहोमादिकं तेभ्यो विशेषेणाभिधीयते ॥

" नामधारकविप्रा ये मूर्खा धर्मविवर्जिताः । कृच्छ्रचान्द्रायणादीनि तेभ्यो दद्याद्विशेषतः ॥

" धनिना दक्षिणा देया प्रयत्नविहिता तु या । एवं नरविशेषेण प्रायश्चित्तानि पार्तयेत् " ॥ इति । यत्र यावत्संख्यया प्राजापत्यान्यावर्तनीयानि भवन्ति तत्र तावत्संख्यया गोदानादीन्यावर्तनीयानि । तदपि **चतुर्विंशतिमते दर्शितम्**—

" जन्मप्रभृति पापानि बहूनि विविधानि च । अर्वाक्तु भ्रूणहत्यायाः षडब्दं कृच्छ्रमाचरेत् ॥

" प्रत्याम्नाये गवां देयं साशीति धनिना शतम् । तथाष्टादशलक्षाणि गायत्र्या वा जपेद्बुधः " ॥ इति ।

इति श्रीवाधूलवंशमुक्ताफलवैद्यनाथदीक्षितविरचिते **स्मृतिमुक्ताफले**
प्रायश्चित्तनिरूपणं नाम **षष्ठः** परिच्छेदः ॥

---

१ घ–श्रीर्वि । २ घ–णवि । ३ घ–दाप । ४ घ–कृत्वार्वाक् ।

स्मृतिमुक्ताफलपुस्तकोध्दृतऋषिवचनानाम् अकारादिवर्णतः सूचिः ।

ऋषिः — पृष्ठम्

अखण्डादर्शः

अत्रोदकपिण्ड ६११
अनुप्तकेशो यः ५८७
अप्रायत्यं निहन्त्येव २४६
अब्दान्ते वाथ ४८९
अष्टमांशे चतुर्दश्याः ६१३
असपिण्डो यदि ५९९
उच्छिष्टेन तु संयुक्ता २७८
एकस्मिन्मासे ७०५
कूटस्थमन्तराले १२६
जननमरणयोः ५३३
ज्ञातीनां स्नानमेव ५१०
ततो गृहं समागम्य ६००
त्रीनतीत्य मातृतः १२८
दम्पती शिशुना ५९०
दायप्राप्तैः स्वकृष्या २३
दाहं विनालंकरणं ५४४
न तिथिर्न च ६०५
पित्रोः सपिण्डीकरणं ६८४
भुक्त्वा तु सुखमासीनः ४५५
रजस्वलाया भोजनं २७९
वाग्यतः प्राङ्मुख ३३७
सायमासीनः ३२३
शूर्पवायुर्नखा २५६
सोदकवाससो ५९६
– १२९,४९९,५०१,५०६,५११

अगस्त्यः

अथाचान्तेषु ८१३
एकादशेऽन्हि ६४७
चैत्रशुद्धा तु ८३६
नित्यमेव तु ८३६
यो देवः सविता ३२७
राजकार्यनियुक्तानां ६०३
श्रीरामनवमी ८३६

अग्निः

एकचित्यां समारूह्य ६९६

अग्निवेश्यः

बोधायनमापस्तम्बं ९

अग्निवैश्वायनिः

त्रिपुण्ड्रं ब्राह्मणो २९३

अग्निस्मृतिः

त्र्याहादेकोदकानां ४९८
पुंजन्मनि सपिण्डानां ४९८
स्त्रीषु त्रिपुरुषं ४९८

आङ्गिराः

अतिक्रान्ते दशाहे ५४०
अनग्निमत उत्क्रान्ते ५३९
अनिर्दशाहे जनने ५०४
अनुजातस्य तावत् ५०७
अन्नसत्रप्रवृत्तानां ४८०
अयुजो भोजयेत् ७७७
अविशेषेण वर्णानां ५११
आतुराणां विशेषो ३७५
आ द्वादशाहात् २७७
आममेवाददीत ९६
आम्रपुंनागबिल्वानां २४१
आर्तानां मार्गमाणानां ८७०
आशौचं यस्य ५४०
उत्थाय पश्चिमे यामे २११
उत्पन्ने संकटे १७४
उद्वाह्य पुत्रीं १४५
उपस्थानं व्रतादेशः ८७०
एकमातृप्रसूतानां १४५
एकादशगुणान् ३४९
कामतो मरणं ४८९
कृत्वा मूत्रपुरीषं वा २१३, २६७
कृत्वा यज्ञोपवीतं तु २१२
गृहे यस्य मृतः ५२५
चण्डालपतितादीनां ४३२
चित्रकर्म यथा ७३
जनने मरणे चैव ४८१
जाबालिर्नाचिकेतश्च ८
तिस्रः कोट्यर्धं १६१
त्रयोदश्यां कृष्णपक्षे ७४८
दम्पत्योः सह ६३८
दासी दासश्च सर्वे ४८६
दाहकस्तु दशाहान्तः ५३३
दाहकस्त्वा दशाहात्तु ६३५
दाहयित्वा तथा ५१४
द्वादशाहे त्रिपक्षे ६६५
द्विविधं गर्हितं ४३३
धर्मस्य संपदश्चैव ८६९
न जातिकुसुमानि ७८९
नारायणबलिः कार्यो ४९०
नाशौचं सूतके ५०२
नाश्नीयुस्तद्दिने ६०६
पातके तु शतं ८७०
पिण्डं काकादिपक्षिभ्यो ६०३
पुराणश्रवणात् २०४
प्रच्छन्नानि ३२१
प्रथमा प्रसूतिर्ज्ञेया २१८
प्रमाणानि प्रमाणज्ञैः २

ऋषिः पृष्ठम्

अंगिराः

प्राक् स्नानात् ४९९
प्राप्ते वेदानुवचने ११३
प्रायो नाम तपः ८५९
प्रथमेऽह्नि तृतीये ६०५
बहिः पिण्डप्रदानं ६०१
ब्रह्मचारी शुना २७०,९०४
ब्रह्मवर्चसकामस्य ८७
ब्राह्मणी तु शुना ९०५
भूमिप्रदानं ८७९
मातामहमातुल- ५२६
मौंजीनिबन्धव्रत १४७
यज्ञोपवीतं कर्णे च २१२
यत्तु क्षेत्रगतं ४८०
यत्तु राशीकृतं ५६
यत्पूर्वं मनुना ६
यदा मनसि १७३
यदि कश्चित्प्रमादेन ४८७
यद्यप्यकृतचूडो ५०९
यस्तु छायां श्वपाकस्य २६६
यस्य संवत्सरात् ६५२
या स्त्री ब्राह्मणजातीया १६२
युक्तस्त्रिषवण ९३९
यो दद्यात्कांचनं ३६६
यः कश्चिन्निर्हरेत् ५४६
रजश्चतुर्विधं ज्ञेयं २७७
लौकिके वैदिके ३९६
वयोधिकां नोपयच्छेत् १२५
विप्रे न्यूने ५०९
विरक्तः संन्यसेत् १७३
शयनासनयानानि ४६९
शवस्पर्शमथोदक्याम् २६४
शालाग्नौ तु पचेत् ३९६
शुद्धा भर्तुश्चतुर्थेऽह्नि २७७
शूद्रस्य प्रेतस्य ५४२
षष्टिं कुलान्यतीतानि १७५
षष्ठे तथा द्वादशे ८७
संन्यसेद् ब्रह्म १७२
संन्यासं चैव २०७, ९१९
संपूर्णा दशमी ८३७
सतिलं दर्भेष्वसावेतत् ५९७
सद्यःशौचे तु ४८१
सर्वे वर्णाः सूतके २७२, ४८५
सर्वेषामेव वर्णानां ४९५
सर्वो वर्णः सूतके ७१७
साध्वाचारा न तावत् २७७
साध्वीनामेव १६२
सायं सगोपनार्थं ८७६
सायमाद्यन्तयो ८३८
सूतके मृतकं चेत् ५३०
सूतके सूतिकावर्ज ४९९
सूत्रांतरेण यत् ५७८
स्नानं रजस्वलायास्तु २७६
स्वपात्रे यत्तु ४४६
स्वसूत्रे विद्यमाने ५७८
स्वाभिप्रायकृतं ३६४
— ५०९, ५५४

अङ्गिरा स्मृतिः ८६८

अत्रिः

अंगुलीमूलदेशे तु २३०
अंगुल्या दन्तकाष्ठं च २४१
अगोधूमं च ७८१
अनित्यं वै २०२
अपसव्यं ततः ७९९
अपः पाणिनखाग्रेभ्यः २२३
अविकोष्ट्र्योश्च ४३८
अविकोष्ट्र्याश्च ८८२
अशुद्धः स्वयमप्यन्नं ४२८
असति प्रतिबन्धे २०६
अस्नाताशी मलं भुंक्ते २४५
अहिंसा सत्यम् १९०
आकेशाग्रात् ३२४
आचांतोऽप्यशुचिः ४५३
आर्त्तवा यदि २७९
आस्येन न पिबेत् ४२९
उभाभ्यामेव पाणिभ्यां २३०
उभाभ्यामेव हस्ताभ्यां २३०
ऊर्ध्वपुंड्र विहीनं २९३
एकादशगुणान् ३४९,९३५
एकोद्दिष्टे सपिण्डे ७६१
कौपीनयुगुलं १९५
क्षमं पात्रं च २०३
क्षीरं लवणसंयुक्तं ४२७
गोत्रसंबंध ८०५
घृतं वा यदि वा ४३०
चतुरोऽयं वसेत् २०५
जन्मभे जन्मदिवसे १४७
ते तं तथेत्य ७७८
तोयं पाणि ८६५
दत्ते वाऽप्यथवा ८०६
दिवा स्वापं न ४५४
दैवमार्षे ततो १७७
न तावन्मुच्यते १७६
न मृन्मयानि ७८९
न व्रतेनोपवासेन १५८
नोपतिष्ठन्ति ये ३१४
पार्वणं च यथा १७७
पिता पितामहो ७६९
पिता भ्राता स्वसा २०६
पुत्रो भ्राताथ ३९९
प्रथमेह्नि निवास ७७८
प्राणाहुतौ घृताभावे ४२७
प्रेतार्थं सूतकान्ते ६४८
भिन्नमातृष्वसुः ५२८
भूम्यां पादौ प्रतिष्ठाप्य ४१८
मधुपर्के च सोमे २३९
मातामहपितृव्याणां ५८९
मासप्रोक्तेषु ७३४
मासप्रोक्तेषु कार्येषु ६९२
मुखे पर्युषिते २४०
मौनव्रतं महाकष्टं ४२३
यदि कर्ता व्रतस्थः ५९४
रजस्वलायां स्नातायां २७७
वपनानंतरं २०५

ऋषिः पृष्ठम्
विवाहे वितते १३७
शब्देनापः पयः ४२२
शाकभक्षाः पयोभक्षा ९६
शिखिनस्तु श्रुतः १८४
शुचौ देशे तथा १९१
शूद्रान्नं सूतकान्नं ४४८
षड्भिस्तु परतो ७६९
षोडशोद्वाहगर्भाब्दे ५९३
संध्यात्रयं तु ३१२, ३१५
संपर्काज्जायते ५००
साग्निकः पितृयज्ञान्तं ३९८
सिंहकर्कटयोर्मध्ये २८७
सुहृदन्नं गुरोरन्नं ७८१
स्नानं त्रिषवणं १९३
हस्तदत्ता तु ९७
हस्तेन मुक्तं ८०५
हितं मितं सदा २०२
हुंकारेणापि ८०९,
— ३२, ४७५, ५२८

अथर्वशिरस्
— ३०१

अनुमृतिविषयः
पितुरूर्ध्वविधिं ६४६

अन्नगीतिः
यो मामदत्वा ४०९

अपरार्कः
आधिमासमृतानां ७३१
अनार्यता निष्ठुरता १३५
अभोज्यं ब्राह्मणस्यान्नं ४४५
अष्टाक्षरेण देवेशं ३८७
आचार्यो ब्रह्मलोकेशो ४१७
कांसिकस्य तु ४१९
गर्भिण्यौ यस्य भार्ये ५९२
छाया स्याद्दासवर्गः ४६४
जातिदुष्टं क्रियादुष्टं ४३३
दिवा कपित्थ- ४३८
दुर्मृतौ सद्य एव ४९०

ऋषिः पृष्ठम्
देशांतरमृते १६२
नष्टे चन्द्रेऽष्टमे ८८
न स्वपद्येषु ७७
निन्दा मृत्युपदं ४६४
मंत्रवत्संस्कृतस्यापि ६२६
विभवे चाग्निहीनस्य ४४३
शुचिं देवाश्च रक्षन्ति २२०
— ६६२

अमरसिंहः (अमरकोशः)
१।४।१ ७०२
१।४।५ ५२६
२।४।१३ १०
२।४।९३ ७८१
२।७।३१ ७८६
२।७।४० ७६९
व्रतीनामासनं ७८८

अमृतबिन्दूपनिषद्
मनो हि द्विविधं १९३
तद्व निष्फलं १९५

अर्णलः
अन्नप्राशनवैवाहे १४७

अर्णवः
अशक्तौ वा जलाभावे २३६

आगमः
वैदिकं तु पुरा ६२७
सर्वेषामेव वर्णानां ६२७

आचारसारः
प्रातस्तीर्थावगाहन- २४६
मालती मल्लिका ३८७
शुचिं देशं विविक्तं ४५७

आत्रेयः
अंतःशवो यदा ५४१
अभिषेकेऽपि नाक्षत्रं ७०२
कालेऽल्पदोषे ६१०
मृन्मयान्यश्ममयानि १७९
— ३४

ऋषिः पृष्ठम्

आथर्वणम्
प्रणवं देवा २९
यस्याग्निहोत्र २१
हरेः पादाकृति- २९२

आथर्वणिकम्
यस्याग्निहोत्रं ७३३

आथर्वणी श्रुतिः
ब्रह्मसूत्रमहम् १७९
सखा मा गोपाय १८०

आथर्वसंहिता
४।३९।९ १४३

आदित्यपुराणम्
अटवी पर्वताः ७५८
आमंत्रितश्चिरन् ७८०
चापं गते ततः ३९१
त्रिपुंड्रधारी सततं ३०३
दुर्वाससो मुनेः ३०५
पक्षान्तरेऽपि कन्यास्थे ७८६
पितॄन्संतर्प्य ४०७
प्रावृड्तौ यमः ७४७
ब्राह्मण्या भार्यया ४२६
भगिन्यो बांधवाः ४४०
मधुकं रामठं ७८१
लिंगे स्वायंभुवे ४४०
वसन्ति पितरः ८२२
सौराष्ट्रसिन्धु ११७
स्त्रीशूद्रयोरर्धमानं २१९

आदिपुराणम्
अधर्मदेश ९
जातश्राद्धे न दद्यात् ७९
संक्रान्तावुपवासेन ७५०
सूतके तु मुखं ४९९

आनुशासनिकम्
आचाराल्लभते ५
कल्मषं गुरुशुश्रूषा ७७
गृहानाश्रयमाणस्य ४२६
यदा श्राद्धं पितृभ्यः ८१९

ऋषिः	पृष्ठम्
आनुशासनिके	
अ. १०१।६४	४४
अ. १०२।१९	५०
आपस्तम्बः (ध. सू.)	
१।१।३।२६	४११
१।१।४-५	६९
१।१।४।१२	४२६
१।१।६	१०१
१।१।६-८	६८
१।१।९-१०	१००
१।१।११	६९२
१।१।११-१२	९९
१।१।१४-१५	१०४
१।१।१६-१८	८८
१।१।२७	८९
१।१।२७-३१	८९
१।१।३३	२८
१।२-३	२
१।२।१०	९४
१।२।११-१६	११९
१।२।१२	१४८
१।२।१९-२४	११५
१।२।३०	११३
१।२।३८	९३
१।२।४०-४१	९४
१।३।१-२	९४
१।३।९।१४-१५	५४३
१।३।१०।५	५८५
१।३।११-२१	११५
१।३।११।२३-२४	३६८, ३७०
१।३।१२	१३७
१।३।१५-१८	१४४
१।३।२५-२६	९७
१।३।३१-३६	९७
१।४।१२।१-२	३७०
१।४।१२।३-७	३७१
१।४।१२।९	३७२
१।४।१२।१५	४०३
१।४।१३।१	४०३, ४०५
१।४।१४।१८-२०	५४७
१।४।१५	९८
१।४।१६-१७	९८
१।४।२०-२१	२२४
१।४।२१	११४
१।५।१-४	११६
१।५।१२-१६	१०८
१।५।१५।२-६	२२४
१।५।१५।८	२८०
१।५।१५।११	२३५
१।५।१५।१३-१४	२६६
१।५।१५-१२	३६०
१।५।१५।१६-१७	२६७
१।५।१६।२-८	२२६
१।५।१६।८	२२६
१।५।१६।८-१५	२३६
१।५।१६।९	२३६
१।५।१६।१०	२३७
१।५।१६।११	२३८
१।५।१६।१२-१३	२३८
१।५।१६।१४	२३५
१।५।१६।१९-२०	५०३
१।५।१७।११-१३	४६८
१।५।१७	११२
१।५।१७।१४-१९	४३७
१।५।१७।२०	४३७
१।५।१६।९	४१८
१।५।१७।२१-२५	४३७
१।५।१८-१९	१११
१।५।२१-२२	१११
१।६।१८।१०-१३	४४३
१।६।१९।२-१०	४४२
१।६।१९।१४-१५	४४४
१।६।३५	१११
१।७।११।१२-१७	९०१
१।७।२१।२०	८६४
१।८।१९-२०	१११
१।९।१-३	३२
१।९।४	३८
१।९।६-८	३८
१।९।१०।११	९००
१।९।२०।२१	३८
१।९।२२	३८
१।९।२३-२४	३८
१।९।२४।२०	८७२
१।९।२४।२४	८७३
१।९।२४।२५	८६८
१।९।२५।१	८८७
१।९।२५।३	८७९
१।९।२५।४	८८३
१।९।२५।१३	८७७
१।९।२६।४-५	४३१
१।९।२६।७	८६८, ९३२, ९३३
१।९।२७।३-४	९०७
१।९।२७।७	९३५
१।९।३४।२३	८६३
१।१०।२७।१०	८९१
१।१०।२८।१-५	८८६
१।१०।१९।१५-१६	९०१
१।१०।२८।१६-१७	८६८
१।१०।२८।१९-२०	८९४
१।१०।२९।६	८७४
१।१०।२९।७	८७४
१।१०।२९।१७-१८	९०१
१।११।३०।७	४६२
१।११।३०।८	३३६
१।११।३०।८-९	३१५
१।११।३०।९	३३८
१।११।३०।१०	२५१
१।११।३०।१०-१४	४६२
१।११।३१।९-१७	४६२
१।११।३१।१९-२१	४६३
१।११।३१-३२	४३१
१।११।३१।१	४१९
१।११।३१।४	४२३, ४७८
१।११।३२।९	२४३
१।११।३२।२१-२७	४६२
१।११।३२।७	२५६
१।१२।९	३८

ऋषिः	पृष्ठम्
आपस्तंबः	
१।१३-२२	२१
१।१३।६-७	२९
१।१४।१-२	२१
१।१४।१४-२२	१०८
१।१४।२१	५८९
१।१४।२६-३१	११०
१।१५।१	९२
१।१५।१२	९८
१।१५।२२	९
१।१५।२३	२१७
१।१८।१	५७
१।१९।६	५५३
१।२०।६-७	३
१।२०।८-९	३
१।२०।१०-११	६१
१।२०।१२-१३	२८६
१।२०।१२-१६	६१
१।२१।१-४	६१
१।२१।२७, २९	३८
१।२१।५	२८, १५३
१।२५।१०	८८३
१।२६।८-९	१२२
१।२७।११	६९
१।२८।३-५	५८
१।२८।१९-२	१६४
१।२९।८-१८	१५३
१।३०।१५-२०	२१४
१।३०।२१	२१५
१।३१।२	२११
१।३१।३१	२१२
१।३२।२	७७
१।३७।४१	९७
२।१।१।२	४१७
२।१।४-६	३४९
२।१।१।१३-१४	३५४
२।१।२।२-३	३
२।१।१५	४६२
२।१।२३	७७
२।२।३१	३९९
२।२।३।४	३९९
२।२।३।१०।१३-१४	३९९
२।२।३।१२-१४	३९८
२।२।३।१५	४००
२।२।३।१६-१७	३९७
२।२।३।१९	४००
२।२।३।२०-२३	३९९
२।२।४।१-९	३९९
२।२।४-१४	४१५
२।२।४।८	३९७
२।२।४।११-१२	४०८
२।२।४।१६-१९	४०९
२।२।४।२१-२२	२५३
२।४।४।२३	४५४
२।२।८-९	२६५
२।३।६।३	४१२
२।३।६।५	४१२
२।३।६।७-८	४१४
२।३।६।१४-१५	४१४
२।३।७।१-३	४१६
२।३।७।१७	४१३
२।४।८।५-९	४१५
२।४।९।५-६	४१२
२।४।९।१०-१३	४१२
२।४।९।१३	४२४
२।४।९।७	४२६
३।४।२१-२२	९२
२।५।१८	३१
२।६।१५।२	५२९
२।६।१५।१३	४०५
२।७।१७।११-१२	७७६
२।७।१७।१६	८२०
२।८।१८।१-२	४३६
२।८।१९।७-८	४२४
२।८।१९।३-४	४२०
२।८।१९।५-६,	४२४
२।८।१९।९-११	४२४
२।९।८-९	४३
२।९।२३।१०-१२	१६७
२।९।२३।११	५७९
२।९।२४।१-८	१६७
२।१०।१-२	४३
२।१०।३	४४
२।१०।४	१८
२।१०।१८-१९	५०
२।१०।२७।८	८९१
२।१०।२७।९	८९३
२।१०।२७।११-१३	८८७
२।१०।२७।१६-१७	८८५
२।११।५-९	१०७
२।११।१५-१६	१२७
२।११।१७	१३४
२।११।२९।१-२	८६३
२।१२।१३-१५	२१०
२।१३।१	१८
२।१३।७-९	५
२।१३।१०	४८, १०३
२।१३।११	१४२
२।१५।१२	४८
२।१५।१४-१८	३९८
२।१५।१९-२५	८५, ८६,
२।२०।२२	७६
२।२१।२	१७२
२।२१।६	१२१
२।२१।१०-१७	१९१
२।२१।१२-१३	१५१
२।२४।२	१२४
२।२५।१५	६५
२।२६ १-४	६५
२।२७।२-६	१४
२।२७।१५	६८
३।७।१७-१८	१५०
३।७।१९-२२	३५४
३।९।१	७४
४।१०।२-४	८७
५।१६।१	८२
६।१५।८	८१
६।१५।९-१०	८२

ऋषिः	पृष्ठम्
आपस्तंबः	
६।१५।११	८२
६।१६।६-७	८३
८।२।९	८१५
अग्नीनग्निभाण्ड	५८१
अग्नीनाधायैतस्मिन्	२४
अचूडायां तु	५१४
अजिनं मेखला	११७
अटव्यां ये	७८८
अथास्य दक्षिणेन	५८०
अथैनं चितावुपर्य-	५८३
अथैनमुपोषति	५८३
अध्वर्युरुप	४८२
अनशनान-	६०६
अनुपेतान् कन्याश्च	५१३
अन्नदाने न	५२
अपरपक्षे पित्र्याणि	८०३
अपरेद्युस्तृतीयस्यां	६०७
अपाङ्क्तेयैर्हता	३४८
अपि वृक्षसूर्यं	३५७
अष्टवर्षा भवेद्गौरी	१३५
अस्पृश्यस्पर्शने	२४७
अहरहर्यजमानः	३५५
अद्भि शौचं तु	२१८
आकाशं गमयेत्	६०२
आब्दिके मासिके	७०४
आत्मारूढेष्वग्निषु	५७३
आहिताग्निं विजने	५७५
आहिताग्निनर-	८४७
आहिताग्निरनड्वान्	९७
उत्तरं पितृमेधं	५७९
उपर्यग्मावरणी	३६५
उपस्युपोदयं	३५७
ऊर्ध्वं प्राणा	१०८
ऋत्विक् श्वशुर	११०
एकशाखां समारूढ	२६६
एवं गोदान-	११९
एवमहरहरञ्जलि	५९७
औदुंबर्यामासंद्यां	५८१
औपसनेनाहिताग्निं	५६९

ऋषिः	पृष्ठम्
किञ्चिदेव तु	८७७
कृष्णपक्षेऽष्टमी	८५१
केशान्प्रकीर्य	५९७
क्षत्रविट् क्षत्रियाणां	४९५
घृतं तैलं च	४३०
छन्दूरां साधनार्थं	११७
तमष्टधा कृत्वा	७४४
तयोर्यः पूर्वं	५७२
तृतीयेऽह्नि नवं	५१३
तेषामुत्सन्नाः	१
त्र्यहः निरशनं	९३६
दहनदोषं जोषयते	५८२
दारकर्मणि	२५
दुहितृमते अधिरथं	६८१
द्वादशगृहीतेन	५७६
द्वावेवाश्रमिणौ	४४१
द्वेधा दक्षिणाग्रान्	६७७
धून्वते अन्वारंभणे	५८४
न ग्राममध्यात्	२४
नापितकर्माणि च	५८६, ५९१
नालिकाभिर्न	३५३
निमंत्रयेत त्र्यवरान्	७१८
निर्मथ्येन पत्नीम्	५६९
नीलकर्षणकारी	७७५
नीलीरक्तं यदा	९१३
नोर्ध्वं नाधो न तिर्यक् च	२१२
पयसा पशुकामस्य	३६०
पर्वणि केशश्मश्रूणि	५९४
पितृपितामह	७५१
पुंसवनं व्यक्ते	७८
पुमांसं जनयति	७८
पौर्णमास्यां तु	८५५
प्रतिपत्सद्वितीया	८२६
प्राजापत्यं सौम्य	११७
ब्रह्मविदाप्नोति	५५२
ब्राह्मणान्भोजयेत्	७६७
भस्म स्यादग्नि	२९०
भुक्तवतोऽनुव्रज्य	६७७
भूमौ निक्षिप्य तद्द्रव्यं	२४०

ऋषिः	पृष्ठम्
भोजयेद्ब्राह्मणान्	७७०
मासि मासि कार्यं	७५१
यत्नेन धारयेत्	४१९
यदंगारेषु व्यवशांतेषु	३६३
यदि जीवपिता	७४२
यदि पत्नी विदेशस्था	८१७
यदीष्ट्या यदी	८५६
यदुदिते जुहोति	३५८
यद्याहिताग्निः	५५६, ५७०, ५७४
यद्येतस्मिन्कृते	६३३
यश्चार्थहरः	५६३, ६७०
यादृच्छिकं तु	२८३
या माघ्याः पौर्णमास्या	७४४
यायावरा ह	३५९
यावज्जीवं	१६१
येषां परंपरा	१३१
लौकिकानां पाक	६८
विना तु सततस्नानं	२८३
व्यापादयेद्	४८९
शरोंगारा अभ्यूहते	३६३
शूद्राणां हीनजातीनाम्	६६७
शिरः परिवेष्टनं प्रथमं	२१३
श्वोभूतेन्वष्टकां	७४४
संकल्पश्राद्धे	७३८
स न मन्येत	३५८
सप्तमात्परतो यस्तु	७११
समानप्रवरां कन्यां	१२७
समित्पुष्पकुशा	१०९
समुद्रो वा एष	३५७
सर्वान्लोकान्	७०२
सर्वेषामनु	४९६
सायं द्वाविंशतिः	९३६
सायं प्रातर्विनार्धे	९३६
सायं प्रातस्तयोवोक्तं	९३६
सीमंतोन्नयनं	७८
सौम्यव्रतं प्रकुर्वीत	११७
हवींषि च	५८१
-८७, १२१, ५०४, ५६९, ५७०, ५७२, ५७३, ५७६, ५७८	

ऋषिः	पृष्ठम्
आपस्तम्बः	
५८४, ६२७, ६५०, ६८४, ६८७, ६८९, ७१०, ८०५,	
आपस्तम्बगृह्यसूत्रम्	
२।५।१५-१८	३६४
३।७।१९	१५०
४।१०।१०	९४
१६।३	८३
आपस्तम्बपरिशिष्टम्	
वैश्वदेवबलि	४०३
आपस्तम्बस्मृतिः	
अथ वक्षे ह्याचमनं	२२१
आयुर्वेदः	
सौरबृहस्पति	७०१
आरण्यकोपनिषद्	
उपवीतं भूमा	१७९
गृहस्थो ब्रह्मचारी	१७२
आरण्युपनिषद्	
अरणि प्राजापत्यः	१८६
ब्रह्मचर्यमहिंसा	१९२
आरुणिश्रुतिः	
काममेकं वैणवं	१८०
यतयो भिक्षार्थं	२०१
वर्षासु ध्रुव	१९१
दाने सुतोदये	४८१
आश्वमेधिकम्	
अर्कपुष्पाणि	३७४
उत्थाय च पुनः	४२६
उदक्यामपि चण्डालं	४२८
उपप्लुवे चन्द्रमसो	७१७
दूराध्वगं श्रान्तम्	४१२
पचनाग्निं न गृह्णीयात्	४६६
पाणिना जलमुद्धृत्य	४२१
पादाभ्यंगाम्बु	४१४

ऋषिः	पृष्ठम्
वेदनादौ समारभ्य	३६९
शृणु पाण्डव	३८६
श्रुतिः स्मृतिर्ममैवाज्ञा	४
सांगोपांगान् तथा	४१६
स्नातः शुचिः शुचौ	४१८
हरिरचिन्त्यात्मा	२८७
आश्वलायनसूत्रम्	
१।२।१	४०५
१।२।१-२	३९७
१।२।८-९	४००
१।५।४-६	१४८
१।१९।१	६७१
३।१।४	४०५
३।४।१	३६७
३।११	६६४
४।१।६	५८२
४।२।१-३	५८१
४।२।९	५८४
४।२।९-१०	५८१
४।४।९	५९८
४।४।१४-१६	६०६
४।४।६	५२९
४।४।२६-२७	५२९
४।४।२६-२७	५२९
४।५।१	६०८
४।७।२-५	८०१
४४।१९	५२५
अथाभ्युदयिके	७५५
अदंतजाते पर्याते	५०८
अनवेक्षमाणा	५८४
अपराह्णे प्रातः	३५७
अध्यनुडुहो	७४५
आ दन्तजाते च	५१०
आपन्नश्चाशुचिः	४७८
अविप्लुतब्रह्म	७६७
अस्थ्नां संचयनात्	५०२
आपन्नश्चाशुचिः	३३८
आहार्येणानाहिताग्निः	२५

ऋषिः	पृष्ठम्
उपभोगादन्यत्र	२१४
उपेतपूर्वस्य	६३३
एकत्रैव दिने	६९५
एकरात्रं वसेत्	१९१
कुलमग्रे परीक्षेत	१३४
कुन्तापं वालखिल्यं	३८८
कृतसायमाग्नि	७७६
क्षत्रवृत्या वैश्यवृत्तिः	६०
गंगा गोदावरी	७५८
चतुर्थे पञ्चमे	६०७
चत्वारि वेदव्रतानि	११७
जपेच्च रुद्रवत्	१६१
तांबूलकुसरा	७८७
त्यक्तसंगं मुनिं	७६८
त्यागान्मूत्रपुरीषस्य	२१५
ज्ञानाध्ययन	८१९
देवपूर्वं तु यच्छ्राद्धं	६६३
दौहित्रस्तु गुणैः	७७०
नक्षत्रे क्षत्रियाणां	६३१
नवमिश्रं षडुत्तरम्	६६१
न शूद्रं भोजयेत्	८१८
नैकत्रदिवसे	६९६
पत्न्यां रजस्वलायां च	६७७
पयसा नित्यहोमो	३६०
पिण्डान्निर्वृणुयात्	७४२
पितुरेव पितुः	७२१
पितॄनावाह	७९७
प्रदोषान्तो होमकालः	३५८
प्रधानस्य क्रियायां	१५
प्राग्गंडूषजलात्	८१३
प्राग्वोदङ्मुख आसीनः	२४३
प्राचीनाग्रान्	७५६
प्राचीनावीती	८०२
प्रातर्मुहूर्त्तादर्वाक्	५९५
बांधवानां स्वजातीनां	१५६
भुक्तवत्स्वना	६७७
भुक्तवत्स्वाचांतेषु	८१६
भोक्ता भोजयिता	८१०

ऋषिः — पृष्ठम्

मन्वादिभ्यो युगादिस्तु ७०६
मासे त्वज्ञायमाने ६३१
मृते भर्तर्यपुत्रा १६०
यन्मास्येवाब्दिकं ६९३, ६९५
यत्र स्युर्बहवः ६०१
यया कयाऽपि ५७
लाक्षां लशुनं २०३
वरस्योदक् स्थितां १४९
वामं वामेन १०८
विप्राणां दासवृत्तिः ६४
शर्मान्तं ब्राह्मणस्योक्तं ८१
शेषयेद्भोजने ८१०
श्रौतं वा यत्र १५
सकृन्निमज्ज्य ५९७
सतिलं तण्डुलं ५८३
सत्पात्राणामलाभे ७६९
समानो मन्त्रः ६७७
सर्वाश्चेदनुगता २४
सहैवाभ्युदय ७५३
साग्राभ्यामृजु २३३
सार्वकालिकं १४८
स्मार्ताग्नेर्नाग्निभिः ५६९
स्वयं पर्वणि ३५६
हेमन्तशिशिरर्तौ ७४४
— ६२, ७८, ४००, ५२९, ५८२, ५९१, ६०५, ६८०, ६८९, ७९४, ८९२

आश्वलायनकारिका
आधायाश्मानमेकं ६०३
चरुमुद्धृत्याज्य ६४९
स्नातः पवित्रपाणिः ५७७

आश्वलायनपरिशिष्टम्
३।१८ ६४५

आश्वलायनस्मृतिः
तिलोदकं प्रदातव्यं. ७४५

ईशानसंहिता
एवमेतत् व्रतं ८५२
पूर्वेद्युरपरेद्युर्वा ८५२
शिवरात्रिव्रत ८५१

उज्वला
पृ. २७।८ ३७२
अपरेणाग्निं ४०३

उत्तररामायणम्
ये च मद्विषया ६०१

उपमन्युः
अनपत्या च १६२
शिवलिंगं तु ४४

उपनिषद्
दश वा नव वा ४९४

उशनाः
अग्निसमीप ३९६
अत्यक्त्वा जुहुयात् ३९८
अनुगम्य मृतं ५८५
अपत्नीकः प्रवासी ७१५, ८२१
अर्धमण्डलसंप्राप्ते ३५८
आचार्येणाभ्य १७२
आमन्त्रितस्तु यः ७७९
एकोद्दिष्टं न ६६२
कुसुंभं नालिकाशाकं ४३४
गमने तु व्रतं ८८८
गोमयोदकैः ७८१
ज्वराभिभूता या नारी २७९
तेनोदकेन ३५३
दक्षिणाभिमुखो २४२
दशकृत्वः पिबेत् ९१४
द्विचन्द्रदर्शनं ६१३
न वेष्टिताशिरः २५२
नाङ्गुलीभिर्दन्तान् २४१
नादत्वा मृष्टमश्नीयात् ४२७
नालिकाशण ७८४
परान्नं परवस्त्रं ४४५
पितुः पितामहे ६८०
पृथक् चितिं समा १६२
भोजनं तु न ८१०
माधूकरम्- २००
माषमज्जनमात्रा २२२
मूत्रपुरीषरेतः ४६७
यत्रोक्तं यत्र वा ९३१
यथाकथंचिदपि ७६८
यस्तु ब्राह्मणो ८९१
विड्वराह ७८६
व्यभिचारिणीं १६३
व्यभिचारिणीं भार्या ८९३
शयनस्य शिरस्थाने ४००
सच्छूद्रः स्नायात् ६८
स्नात्वाऽनुपहतं वस्त्रं २५२
स्वल्पाशौचस्य ५३१
— ९०५

ऋग्विधानम्
इन्द्राय सोमसूक्तेन ८११
यदादीध्ये जपेत् ३१४

ऋग्वेदसंहिता
२।२।२४ ३९०
२।२।२५ ३९१
२।३।१४ ३४७
४।३।२८ ३००
५।१।२२ ८३
७।४।९ ३००
७।६।१४ ३४७
७।८।३ ३१४
१०।११७-६ ४०९

ऋतुः
श्राद्धं कृत्वा पुनः ६९४

ऋष्यशृंगः
आब्दिके चैव ७१६
आशौचमन्तरा ६१२
एकादशी न ८३८
एकोद्दिष्टे तु ६५४
कृत्वा पूर्वं मृतस्यादौ ६९७
कृत्वा पूर्वमृतस्यादौ ६३९
जातकर्मणि ६९२

ऋषिः पृष्ठम्

ऋष्यशृंगः
धाराशौचं न कर्त्तव्यं २१६
पत्न्याः पुत्रस्य ६४०
पारणाय न लभ्येत ८४३
पुत्राणां मध्यमो वाऽपि ५५६
पुत्रेषु विद्यमानेषु ५५८
प्रथमेऽह्नि यत् ६०४
भवेद्यदि सपिण्डानां ६३८,६६६
यत्र त्रिरात्रं ५११
यस्मिन् स्थाने कृतं २१६
वाससा यज्ञोपवीतार्थान् ९२
शुचीभूतेन दातव्यं ७१६
संवत्सराति ७३२
सपिण्डीकरणं येन ६६६
सर्वत्रैकादशी ८४३
स्त्रीणामाद्यस्य वै ६८२
— ६४०, ७३२

ऐतरेयब्राह्मणम्
७।५।५ ९३

और्वः
आस्यं प्रक्षाल्य ४५३
बालापत्याश्च १६२
बालापत्याश्च गर्भिण्यो ६४१

कठवल्ली
अशरीरं शरीरेषु १९५

कठशाखा
धृतोर्ध्वपुंड्रो २९२

कठश्रुतिः
त्रिगुप्सातमश्नीयात् ४४०

कण्वः
अग्निमतोपि ३९६
अग्निहोत्रहवं ४७९
अथ वेदेतिहास- २२६
उदयोपरिविद्धा ८३९
एकमध्ययनं ९४४
एकमुद्दिश्य यत् ६५८
एकमुद्दिश्य ७५७

ऋषिः पृष्ठम्
एकरात्रं वसेत् १९०
एकादशीमुपवसेत् ४४९, ८३८
तृतीयात्क्षत्रियो १२८
त्रीनुद्दिश्य तु ७३६
नमस्कृत्य तथा २०२
नवश्राद्धं मासिकं ६५४
नवश्राद्धे मासिके ६०५
यज्ञेषु पशु ९०९
यत्नोत्सर्गं गृहीत्वा ८९२
शौचमाचमनं ४७९
श्लेष्माद्युपहतानां ४६७

कपर्दिः
अधोभागस्य ५९१
अपत्नीको २५
आधारदार्वाग्नि ७९३
अस्ति स्वामित्व २६
आहिताग्निः पूर्वमृतां ५६९
नष्टोत्सृष्टानल ५७१
पत्नीदाहोपयुक्ता २६
प्रजापतिमुखान् ३५
यदि त्वनेक २५

कपर्दिभाष्यम्
ब्रह्मविद्भ्यः कर्तव्यो ५७९
नष्टोत्सृष्टा २५
विच्छिन्नाग्नेः २५

कपिलः
अद्भ्यः स्वाहा १७९

कर्मप्रदीपः
देवार्चने जपे ३२३
वामहस्तेन गणयन् ३२३

कर्मप्रदीपिका
अनन्तरममा ६६८
कन्याबालकयोः ५०८

कल्पकारिका
पत्युर्वेदाग्निसंस्कारे ६४४
लोकाग्नावितरौ ५७२

ऋषिः पृष्ठम्

कल्पपरिशिष्टम्
मृताहिताग्नेः ५७०

कल्पसारः
अमत्योढा सगोत्रा १२७,९०२

कल्पसूत्रकाराः ३००

कवषः
प्रवेशनादिकं ५८५
पित्रोः प्रत्याब्दिकं ३८२
मनुष्यवर्जं विप्राणां ४९०
अनुगम्य शवं ५४२

काठकम्
यज्ञोपवीतं १८६

काठकगृह्यम्
प्रवृत्ते मलमासात् ७३३
मलेऽनन्यगतिं ७३३
महालयाष्टका ७३२
यस्मिन्मासे न ७२४
रविसंक्रमहीने ७३५
विवाहदिवसात् १२३
सोमयागादि ७३३,७९६

काठकब्राह्मणम्
चतुर्वर्णेषु २०१

काठकश्रुतिः
एताद्धि देवपितृणां ७६०
सशिखान् केशान् १७९

कात्यायनः
अकाले चेत्कृतं ६९१
अक्रिया त्रिविधा ५७८
अग्निहोत्रादि १५७
अथ सपिण्डीकरणं ६६४
अथानवेक्ष ५८४
अनन्तर्गर्भितं २३३
अनिर्देनामंत्रितो ७७९
अनिवृत्ते दशाहे ५०३,५०६
अनुजा वाऽग्रजा वापि ५६६
अन्वाधानं भूततिथ्यां ८५७

ऋषिः	पृष्ठम्
कात्यायनः	
अपत्नीको यदा	६८६
अपत्नीकः प्रवासी	६८८
अपत्यार्थं स्त्रियः	१३४
अपरपक्षे श्राद्धं	७४६
अपरेद्युस्तृतीये	६०७
अपुत्रस्याथ कुलजा	५६३,५६६
अपुत्रोऽहं प्रदास्यामि	६८१
अभावे शिष्यान्	७७०
अर्थवादं हरेः	३५१
अल्पत्वाद्धोम	२४६
अव्यक्तलिंगा	१९३
अश्मन्सु जपेत्	८०७
अष्टवर्षाधिको	४४६,८४७
असंस्कृतोऽनपत्यश्च	५५९
असमक्षं तु	३५६
आधाने होमयोः	७५५
आपद्यनग्नौ	७१५
आपोहिष्ठादिभिः	२९०
आमंत्रितोऽन्यन्न	७७९
आमपात्रेऽन्नमादाय	५८२
आवर्तनात्प्राक्	८५५
उत्थायार्कं प्रतिप्राच्य	३२०
उद्धृत्य घृताक्त	८०१
उद्धृत्य हविरासिच्य	३९९
उन्मत्तः पतितः	१३५
उपन्यस्तेन	५५
उपवासेष्व शक्ता	८४८
उपवासे यदा नित्यः	७२३
उपवासो यदा	८४८
उपाकर्मणि चोत्सर्गे	२८९
ऋतुस्नातां द्विजो	८९३
ऋत्विजां च	९०९
एकदण्डधरा	१८६
एकादशाहं निर्वर्त्य	६६८
एकादशीषु कृष्णासु	८४५
एकादश्यामुष	८३८
एवं कृतोदकान्	६०४
कर्कटादौ रजोदुष्टा	२८८

ऋषिः	पृष्ठम्
कात्यायनः	
कर्मादिषु च	७५३
कर्पूरसमन्वितं मुक्त्वा	५६२,७१८
कालातीतेषु	९९
कुशवत्यां भूमा	७९९
कृच्छ्रांस्तु चतुरः	१७६
गणशः क्रियमाणेषु	७५३
गन्धान् ब्राह्मण	८०१
गायत्रीं मधुमतीं	८१२
गृहीत्वोदुंबरं	८४९
ग्राम्याभिरोषधीः	७८३
घृतेनाभ्यक्त	५८०
चंडालपतितौ	४२८
चण्डालसूतिको	२६५
चतुर्दशी दिनान्ते तु	८५६
चत्वारि पात्राणि	६७४
चेतोवद्भिर्हते	४९०
छायां यथेच्छेच्छ	३८०
जान्हव्यादित्यसम्भूता	२८८
जुहूषुश्च हुते	३६२
तत्प्रयुक्तोपवासस्य	८४४
तथानवेक्षमेत्यापः	५९७
तर्जन्याद्विभूयाद्रोर्ध्वं	२३२
तेषामभावे तु	५६४
तैलमुद्वर्तनं	७८७
त्रिकालमेक	१९८
त्रिवृतं चोपवीतं	९०
त्रिवृदूर्ध्वं वृतं	९०
दक्षिणं पातयेत्	७९४
दक्षिणाशिरसं	५८३
दत्तानूढा च	१०३
दुर्बलं स्नापयित्वा	५५३
देशान्तरस्थक्लीबे	१५२
द्वे बहूनि निमित्तानि	६९४
धनुः सहस्राण्यष्टौ	२५५
ध्वजाकारं निराकारं	४०१
नभो नभस्ययोर्मध्ये	२८७
न यष्टव्यं चतुर्थेऽशे	८५४
नांगुष्ठादधिका	९८

ऋषिः	पृष्ठम्
कात्यायनः	
नानिष्ट्वा तु	७५५
नान्दीमुखान्	७५६
नाष्टकादौ भवेत्	७५५
निक्षिप्याग्निं	३५६
नित्योपवासी	८५०
निर्वर्त्य वृद्धितंत्रं	६५७
नृणां भोजनकाले	४३०
परेऽह्नि घटिका	८५६
पालाशः समिधः	३६०
पिंडान्वाहार्यकं	७४१
पितृमातृस्वसृ	८४८
पितृवंश्या मातृवंश्या	३८०
पित्रा श्राद्धं न	५६६
पित्र्ये यः पङ्क्ति	६८६
पुत्रः शिष्योऽथवा	५६७
पुत्रोत्पत्तिप्रतिष्ठासु	७५५
पुरोहितस्य गोत्रेण	६८२
पूर्वं मृतस्य	५७०
पूर्वदत्ता तु या	१३८
पूर्वामुखो धृतिं	२४३
पैतृकं प्रथमं	७९९
प्रत्यब्दं यो यथा	६९९
प्रथमेऽह्नि तृतीये वा	६१३
प्रधानस्याक्रियायां	६५६
प्रवृत्ते श्रावणे	२८८
प्रवेशाद्वरुणस्याप्सु	२७१
प्रत्यक्षशवसंस्कारे	५५५
प्रत्यब्दं यदुपाकर्म	३५
प्रवरैरेषामविवाहः	१२७
प्रव्रज्यावसिता	९१९
प्रातः स्नात्वा	८५०
प्रावृट्काले महानद्य	२८८
ब्रह्मचर्याद्गृहात्	१७२
भार्या भर्तुर्मतेनैव	१५६
भार्या भर्तुर्मते–	८४७
महापापं चातिपापं	८६७
मातृयागक्रिया–	७५३
मुखे वक्त्रं	५८०

ऋषिः — पृष्ठम्

कात्यायनः
यजनीयेऽह्नि ८५८
यत्र दिङ्नियमो १५
यथाह्नि तथा २४६
यन्नाम्नातं स्व- १५
यवास्तिलार्थः ७५५
यस्त्वाधायाग्नि ७७३
यावत्सम्यङ्न ३५७
याः शोषमुपगच्छन्ति २५८
रजस्वलां चतुर्थेऽह्नि ७४
रजस्वला चतुर्थेऽह्नि २७७
रात्रौ दृष्ट्वा तु ५९६
वरयित्वा तु यः १३८
वर्णत्रयस्य विप्राणां ८९३
वस्त्रं संशोधयेत् ५८४
विद्ध्यादौरसः ५६४
विधिवत्केतनं ७७९
विप्रादीनां तु ८८४
विश्वान् देवान् ७९७
विश्वेषां देवानां ७९८
विष्णुधर्मोत्तरे चाप्सु ६८६
विहायाग्निं सभार्यः २४
वैष्णव्यर्चा ८०४
व्युत्क्रमाच्च मृते ६७०
शमीपलाश ६०९
शिरसो मार्जनं ३१९
शिरः प्रावृत्य कुर्वीत २११
शेषस्य कर्मणः १७८
श्राद्धं वा पितृयज्ञः ४०२
श्राद्धे यज्ञे जपे ३०२
श्रोत्रियं सुभगं गां च २११
षष्टिप्रस्थमितं ३५६
संधिश्चेत्संगवात् ८५५
संध्यादिकं भवेत् ८४७
संप्राप्ते श्रावणे मासि २८७
संबंधिबान्धवा ६६१
संस्कारा अतिपद्येरन् ८४
स तु यद्यन्यजातीयः १३८
सपवित्रेषु ७९९
सपितुः पितृकृत्येषु ७३७, ७४२
सप्त दर्भाः शुभा २३१
सर्वप्रायश्चित्तं च ८४
सर्वेषामेव वर्णानां ६६७
सव्यान्वारब्धेन ७३७
सशिखं वपनं ११५
सायं प्रातर् ४०५
सायंप्रातर्वैश्वदेवः ३९७
सिनीवाल्यपराह्ले ८५६
सुरूपाः सुताः ७६३
सूतके च प्रवासे ८२०
सूतके प्रेतके च ४७७
सूर्येऽस्तशैलमप्राप्ते ३५७
सौवर्णराज ७८९
स्त्रीधर्मचारिणी २५
स्पृष्टमुद्धृत ७९९
स्मृतेर्वेदविरोधे तु १२८
स्वपितृभ्यः पिता ७५२
स्वशाखाविधिं ५७८
स्वाहाकारवषट् ४०४
स्वाहाकारैर्जुहुयात् ३९७
स्वाहा स्वधा नमः ८०२
हरिता यज्ञिया दर्भाः २३१
हविष्येषु यवा ३६१
हविस्तु त्रिविधं ३६०
हस्ते हुतं यदश्नीयात् ६८६
-५१०,५७०,५७७,६८०,७३१,
७७७

कात्यायनस्मृतिः
ततः संवत्सरे पूर्णे ६६४
मृतं दृष्ट्वा त्रिरात्रेण ५१२

कामिकः
आदित्यासामये ८५२
माघमास्यसिते ८५१
उपायनाग्नौ ६११

कारिकाकारः
अग्ने भिक्षेत ९६

कारिकारत्नम्
अग्याहात् द्वादशाहात् ६९०
अनग्निं गर्भिणीनाथं ७७१
मातुः पित्रोर्मासिकादीन् ७२२

कार्ष्णाजिनिः
अत ऊर्ध्वं न ६५९
अपसव्येन कर्त्तव्यं ८०३
अर्वागब्दाद्यत्र ६५१
अशक्तानुग्रहार्थं ७६९
आदौ मध्येऽवसाने ७४६
आपन्नोऽप्याब्दिकं ७१६
ऊनान्यूनेषु ६५५
ऊषरे तु यथा ७०६
ऋते नैमित्तिकं ७४८
कन्यापुत्रविवाहेषु ७५५
दर्शे स्नात्वा ७३५
देवानां च पितॄणां ३७७
नभस्यकृष्णपक्षे ७४७
नाभिमात्रजले स्थित्वा २४८
नाभिमात्रे जले २४८
पित्रोः श्राद्धे समं ६३८, ६९५
पुत्रमुत्पाद्य १९
प्रत्ताप्रत्तासु ५१५
प्रादुर्भावे पुत्र ७५४
भक्ष्यभोज्यानि ८०८
भिक्षां वा पुष्कलं ४०४
भूतविद्धाममा ७३९
मृताहेऽह्नर ७५२, ७५७
मौञ्जीबन्धाद्विवाहाच्च ६७०
ये के चास्मत्कुले २५०
श्राद्धं तु नैक ७४९
श्राद्धे विवाहकाले २४७
सपिण्डीकरणं कुर्यात् ६६७
हस्तर्क्षस्थे दिनकरे ७४७

कालदीपे
आरवारे च सौरे ६१२
भ्रातृद्वये स्वसृयुगे १४६

ऋषिः — पृष्ठम्

कालनिर्णयः

अस्तमयादर्वाक् ८५६
आदित्यगतिं ७०१
उपवासे निषिद्धे तु ८४५
एकादशीमात्र ८४२
ग्रस्यमाने भवेत् २७३
तत्र पञ्चधा ७०७
तिथ्यर्धे प्रथमे ७२६
दिवा श्राद्धक्रियाया ७१०
द्वादशीमात्रवृद्धौ ८४२
नित्यं सदा यावत् ८३६
नैमित्तिकं तु कर्त्तव्यं २७२
पूर्वेद्युरसती ८३०
यस्मिन्वर्षे ८३३
रात्रौ संक्रमणे २७६
वसंतादृतवो ७०१
शरीरमंतःकरण- ८४९
शुद्धाविद्धयो ८४३
शुद्धा विद्धा तिथिः ८२७
श्राद्धेऽपराह्ण ७४०
सप्तमी पूर्वविद्धैव ८३१
सूर्यग्रहो यदा २७३
सूर्योदयस्योपरि ८५४
— ७०८, ७१२, ७२६, ७३२, ७४१

कालनिर्णयसंग्रहः

अभावेऽपि प्रतिपदः ८२८
कुतपाद्यपरा- ७१४

कालाग्निरुद्रोपनिषद् ३०१

कालादर्शः

अध्यायानाम् ३२
अनाकर्णितवार्तस्य ६३१
अनुव्रज्य च २७०
अपुत्रो भ्राता १०२
अमावास्या द्विधा ७४०

ऋषिः — पृष्ठम्

अलाभे वा निषिद्धे वा २४४
अशक्त्या पार्वणं ७३८
अष्टकापरपक्षा ७०३
अस्मिन्या भरणी ७४८
आद्यगर्भोऽस्थ १४७
आद्वादशाहात् ६०५
आपदाद्यकृतं ६५४
आपद्यपि च ७१६
आब्दोदकुम्भ ७३१
आद्यश्राद्धं द्विजेऽग्नौ ६५१
आवर्तनादधः ८५४
आश्रमस्वीकृतिः ७२८
उपोष्यैकादशी ८४५
एकादशे द्वादशे ६६५
एकादशेऽन्हि ६५२
एकोद्दिष्टं तु ७०६
कुर्यान्मातामह ६८१
गुरोरज्येष्ठ ६६१
चतुर्थः पर्वणो ८५५
चोदनादपराण्हस्य ७०९
जह्याद्धकं द्वयं ८५०
तिथिवारसमायोगे २८४
तृतीये वा चतुर्थे ७८
त्रिपक्षात्पूर्वतः ६४७
त्रिपुष्करे च नन्दासु ६५५
त्रिभिर्द्वाभ्यां ६५५
त्रिमुहूर्तास्तमानात् ८२९
दर्शो दशाहमध्ये ६१४
दाहात् दशाहपर्यन्ताः ५६२
दाहादि मंत्रवत् ५६०
देवतैक्ये काम्या ६९८
दैवार्थे पाणौ ६८६
द्वादशाहत्रिपक्षादौ ६९०
द्वादशाहसपिण्डचन्तं ७२७
द्वितीया त्रिमुहूर्ता ८५७
न जीवपितृकः ७३७
न तत्संन्यासिनां ६६२, ६६३

ऋषिः — पृष्ठम्

न नन्दासु भृगोर्वारे ७४८
नभस्यस्यापरः ७४५
नित्यदार्शिकयोः ६९४
नित्यस्य सोदकुम्भस्य ६९५
निमित्ततोऽपि २७१
नैकः श्राद्धद्वयं ६९४
नैमित्तिकं तु ७५४
पंचधा पंचदशधा ७०७
पक्षाद्यादि च ७४६
पक्षाद्याद्यासु ७६४
पत्नीभ्रातृसुता- ६३९
पत्न्यादीनां च पित्रोश्च ६४०
पर्वणि क्षयगे वृद्धौ ८५६
पितुर्मृतस्य ६७२
पित्रोस्तु पितृपूर्वत्वं ६९५
पित्रोः संघातमरणे ६३७
पूर्णिमा प्रतिपत्सन्धिः ८५५
पूर्वं चोर्ध्वमन- ३९
पूर्वप्रातिपदोः ८५४
पूर्वमासस्थ ७२८
प्रत्याब्दिकस्य ७१७
प्रत्याब्दिकादि ८२७
प्रत्याब्दिकेष्येव ७१४
प्रत्यूष आश्वयुक् २८४
प्रमादादकृते ६६९
प्रातर्मध्यंदिनं ३६८
बलीनां वैश्वदेवस्य ४०३
भौमार्कशुक्रवारेषु २८४
भ्रातृद्वये स्वसृद्वये १००
मन्वाद्यासु युगाद्यासु ३८१, ७६२
मलमासे द्विसंक्रान्तौ ७३५
मालिम्लुचान्य ७३१
मार्गशीर्षे च पौषे ७४४
मासाज्ञाने दिनज्ञाने ६३१
मिहिरेण सहात्यन्तं ७३४
मुक्त्वाद्यपक्षं ७४७
मैत्रेंद्राग्निस्वाति ७४४
मौंजीबन्धाद्वत्सरार्धं ६७०

ऋषिः पृष्ठम्

कालादर्शः
यद्यागच्छत् ६३३
रजस्वलांगनो ७१५
रजो दृष्टेश्चतुर्थ्यांया ७७
रवीन्द्वोर्यो ८२५
रवेः कन्यागतत्वेन ७४६
वर्गद्वयं समुद्दिश्य ७५१
विवाहपुत्रभेदेन ६८१
वृद्धो तान्यप ६५७
वैश्वदेवे बलिहृता ४०४
शुद्धा विद्धा द्विधा ८४१
श्राद्धं दर्शेऽप्यह ७३०
श्राद्धं शस्त्रहतस्यैव ७५०
श्राद्धद्वयं तथोद्दिष्टं ७५७
संक्रातिरहितो ७२५
संक्रांत्यादिनिषेधश्च ८४४
सप्तमी नवमी दर्श २८३
सर्वस्मृतिपुराणोति– ८३८
साग्नौ कर्तर्युभावाद्वौ ६६८
सिंहकर्कटयोर्नद्यः २८८
सीमन्तव्रत ७५४
सीमन्तोन्नयनं ७८
स्नेहाद्विप्रादिकैः ५६७
-- २७६,
५६०, ५६१, ६१४, ६३६, ६७०, ७२६, ७४९, ८४३,

कालादर्शटीका
एकोद्दिष्टपदम् ६५४
-- ६३९

कालिकापुराणम्
एकादशी तु ८८२
एकोद्दिष्टे तु ६५०
कुलशीलविहीनस्य १३८
कुविवाहैः क्रियालोपैः १४४

काश्यपः
गर्भधारणमारभ्य १५९
नीलं वाऽप्यथ ६४५
बालानामदन्त– ५०९
बालानामदन्तजातानां ५१०
ब्रह्मणो हृदयं ३१०
योजयेन्मातुरर्घ्यं ६७८
व्युत्क्रमेण प्रमीतानां ६७३
षष्ठे वा सप्तमे ७८
संत्यज्य विधिवत् ५८५
सप्तपौनर्भवाः १३७
सूर्यस्य त्रिर्नमस्कारं ८९२

कुण्डिन्यः
दीक्षितोऽप्येकपुत्रश्चेत् ५६०

कुत्सः
आचांतो नाभिदेशं ४३३

कूर्मपुराणम्
उ ११।१५ ९३
अ. उ. १४।८२–८३ ३९
१४।८४–८७ २९
उ. १५।११ ७६
उ. १५।१२ ७८
उ. १८।५२–५४ ३७४
उ. १८।८८–८९ ३८३
उत्त. १९।१९ ४२५
उ. २६।४–८ ४०
३।१८।२०–२२ ४२६
अकृत्वा तु द्विजः ४०६
अथवा देवमीशानं ३९१
अप्रायत्ये समुत्पन्ने २९१
अश्वधेनुमनुष्याः ९१७
आदित्यवारे ७६३
उच्छिष्टोऽद्भिरनाचान्त २६८
गोदोहमात्रकालं ४०८
गोपीचन्दनधारी २९६
चण्डालसूतिका २६५
जपस्तपस्तीर्थं ९३५
तस्मात्तु वेदबाह्यानां २९७
न विष्ण्वाराधनात् ३९१
नैमित्तिकं तु ७६२
प्रक्षाल्य पाणी पादौ २३७
प्राणस्तु देहजो २०७
प्रातस्तु दन्तकाष्ठं वै २४५
यथोत्तरे दक्षिणे ८४५
राजानः शूद्रभूयिष्ठा १२
विनिन्दन्ति महादेवं ३१०
सङ्गं कृत्वार्ध ८९८
सृष्टासृष्टिच्छलेनाह ३०४

केशवीयम्
यस्मिन्मासि न ७२५

कैवल्यश्रुतिः
२४ ३४९
उमासहायं १९५

कौटिल्यअर्थशास्त्रम्
२।२५ १०७

कौत्सः
उत्तराहस्त ७४६

कौर्मे
अंकितो यः २९९
अथैव सात्वता २९७
अन्यानि चैव २९७
एकादशी द्वादशी ८४४
एकादश्यां न ८४५
एकादश्यां न भुंजीत ८४५
कापालिकाः पाशुपताः ३०६
काम्योपवासे ८४८
द्विस्पृगेकादशी ८४४
नैमित्तिकं तु ७०६
प्रदोषव्यापिनी ८२९
बुद्धश्रावक २९९
मद्भक्तः शंकरद्वेषी ३१०
यदीच्छेद्विष्णु ८३८
वदन्तीह पुराणानि ८३८
सर्वागमेषु निष्ठानां २९६
सृष्ट्वा तानूचतुः २९८
स्वर्णकामदुहं ९२७
हिरण्यवाजिनं ९२७

ऋषिः	पृष्ठम्
कौशिकः	
कुशासनं परं पूतं	२३०
गवां वालपवित्रेण	२३३
न ब्रह्मग्रन्थिनाचामेत्	२३१
नैष्ठिकानां व्रतस्थानां	८९२
प्रातःस्नाने विशेषो	२४९
भिन्नासनं योगपदं	४१९
वामहस्ते स्थिते	२३२
विधिदृष्टं तु यत्कर्म	२५४
क्रतुः	
अन्वष्टकासु	७३७
असुराणां कुले	७८९
अहमेवाक्षरं	१७३
तेषामारक्षभूतं	७९२
दर्भपाणिर्द्वि	७९४
देवरान्न सुतोत्पत्तिः	१३९
पंचसप्त	२०४
पूर्वसंकल्पितद्रव्यं	४८४
ललाटे वर्तुलं	८००
विवाहोत्सव	४८४
संप्रार्थितम्	२०१
क्रमदीपिका	
रजस्वला च या	७७१
क्रियाकल्पकारिका	
पतिव्रता त्वन्यदिने	६४३
क्रियासारः	
मध्यांगुलित्रयेणैव	३०३
शूद्रहस्तस्थितं	३०५
गणकारिका	
प्रत्यक्षमितरान्	७४२
गभस्तिः	
एकोद्दिष्टं तु	७२९
न कुर्यान्मल	७२९
गर्गः	
अतीतेऽब्दे तु	५३८
अथवा त्वकृतं	६६५
अन्तर्दशाहे संप्राप्ते	६०८
एकमातृप्रसूतानां	१४५
कुशं काशं पलाशं	२४२
कृतदारो न वै	३५६
कृष्णपक्षे तु	६५६,६६६
गुरौ सिंहस्थिते	१४७
गृही स्यादेकपत्नीकः	१५३
चतुर्दश्यां तु	६६२
जन्मनः षोडशे	११९
ज्येष्ठस्य ज्येष्ठकन्यया	१४७
तैलस्नानं सदा	२८३
त्रिसंध्यं वाग्यतो	३५३
दशांगुलं तु विप्राणां	२४२
दिव्यं वायव्यमाग्नेयं	२८९
न च स्पृश्या	२८२
परेन्हि संगवात्	३३
पुत्रचूडाकृतौ	८३
पुत्रजन्मनि संक्रान्तौ	२८३
पुत्रीपरिणयात्	१४६
प्रतिपद्यप्रविष्टायां	८५५
प्रत्यावृत्तेऽभसि	२५८
प्रधानं वैदिकं	१९
मलव्यपोहनफलं	२८३
यो वैदिकमनादृत्य	३५५
व्रतं कुर्यात्तु	११७
षट्त्रिंशदाब्दिकं	११९
सर्जे धैर्ये वटे	२४२
सापिण्ड्यात् प्राक्	६५१
सोदर्यो तिष्ठति	१५२
—	२८२, २८३, ३१३,
गर्भोपनिषद्	
ऋतुकाले प्रयोग	५५९
एतत्षाट्कौशीकं	१२४
गायत्रीसारः	
तत्सवितुर्ब्रह्मा	३३१
गारुडपुराणम्	
उपोष्यैकादशी	८३७
तुलायां गोसहस्रे	९३०
दशमीशेषसंयुक्तो	८३९
न द्विजः क्वापि	९२६
पुनः प्रभातसमये	८४१
भस्मना तूर्ध्वपुंड्रं	२६५
यदा त्वल्पा	८४७
श्रीशैले हेमकूटे	९२४
श्रुतयः स्मृतयः	३०४
—	९२९ टीप
गार्ग्यः	
आक्षिपक्ष्म	८२५
अधिमासः स	७२३
अनादिदेवता	७३४
अनूराधे च मूले	६३४
अपुत्रा ये मृताः	६६१
अर्धरात्राद्धः	३३
कुर्यान्नैमित्तिकं	२६४
कुर्यान्नैमित्तिकं स्नानं	२८५
कृतक्रियेऽपि पितरि	६२०
खर्वो दर्पा तथा	८२५
चतुर्दश्यां तु	७५०
चित्रा श्रविष्ठा	६३४
तिथिनक्षत्र	८२५
त्रयोदश्यां तृतीयायां	२८२
त्रिरात्रमेक	९२१
दत्त्वा हस्ते	७९९
दन्तकाष्ठे त्वमावास्या	२४४
दृश्चिकित्सैर्महारोगैः	४८८
नन्दायां भार्गवदिने	६०५,६५५, ७४८
नामकर्म च	७३४
पंचविंशघटी	५५५
पर्वण्योदयिके	३२
प्राप्तकालमतिक्रम्य	६३४
भद्रे त्रिपदनक्षत्रे	६१०
भद्रे भूमिप्रदानं स्यात्	५५३
भार्यान्तरविवाहः	१५२

ऋषिः — पृष्ठम्
मघासु कुर्वतः ७४८
मातृश्राद्धं तु ७५४
मासंसंज्ञे यथा ७६४
मेषराशौ यदा ७६४
मैत्रर्क्षात्षोडश ३७
यदि सीमंततः ७९
यो यस्य विहितः ७०६,८३०
रवौ चापगते ६३३
ललाटसंमिते ७५४
विवाहादौ स्मृतः ७८२
वृषे वा मिथुने ७६४
शुक्रादिशुभवाराश्च ६१०
शौक्रे च बुधवारे ६०६
शौक्रे वारे निशायां ५८६
सुखानुकूले ४५७
स्पर्शे स्पर्शे भवेत् ७९५
स्वाहेति चैव ७९८

गार्ग्यायणिः
अन्तरेणैव यो ६५७
सोपानत्कः ३५३

गालवः
आमश्राद्धं तु ७५४
ऊनषाण्मासिकं ६५२,६५५
एकचित्यां समारूढौ ६५३,६७८
एकयाने समारोहम् ९१३
ओदनान्निर्मितं ९०९
कृतोदके तु ६२३
कृतोदके तु षण्मासात् ५३६
तिथ्यादिषु च ७६२
तीर्थेऽनग्न्यावापदि ७१५,७५६
त्रिपक्षादिषु कालेषु ६५२
त्रिभिर्वा दिवसैः ६५५
दौहित्रः पुत्रिकापुत्रो ५२२
पित्रोराशौचमध्ये ६१४
पुरोहिते मृते ५२६
प्रेतश्राद्धं सपिण्ड्यन्तं ७५२
ब्रह्माण्डं यो ९२६

ऋषिः — पृष्ठम्
मध्ये विषुवति दानं २७६
मिथ्यापापेन वा ८९९
वधे प्राथमिकात् ८७२
वर्षे वर्षे तु ७३१
सपिण्डीकरणं ६७४
सपिण्डीकरण ६६६
सपिण्डीकरणात् ६६७
सर्वक्लेशयुतो ३५१
स्थिरभे विष्णुपदं २७४
स्वर्णपात्रं तथा ९११
— ९१३ टीप

गीता
३।१३ ४०८
२।२० १६७

गुरुः
संपूर्णैकादशी ८४०

गृह्यकारः
अन्वष्टक्यं च ६८५
शूद्रस्यापि निषेक ६७

गृह्यपरिशिष्टम्
१।५ ३३१
१।५ ३३७
१।६ ३३३
१।१० २५९
१।१२ ३९६,३९७
१।२१ २९१
३।७ ६०८
अथ गृहस्थो ३८४
अथ संवत्सरे ६६४
अनस्तमित ३५७
अवषट्कारहोमश्च ७३३
अष्टमाद्वत्सरात् ५१४
असगोत्रः सगोत्रो ६०२,६१८
उत्तानेन तु ३६२
उपवीतमयुग्मम् ९०
ऋतुमत्स्वपि ६८७
एतद्वपनं संस्कर्तृ ५८६

ऋषिः — पृष्ठम्
गान्धर्वासुरपैशाच १४५
धर्म्येष्वेव विवाहेषु १४८
पितामहस्य तत्पत्न्या ५६२
प्रोषितोप्यात्म ४०५
मलं वदन्ति कालस्य ७२३
य एवाहिताग्नेः ६३३
यच्च पाणितले ६८६
यज्ञोपवीतं परमं ९०
येन सार्यं ३६०
शाकं वा यदि १९८
संप्राप्ते पार्वणश्राद्धे ४०७
स्वगृह्योक्तेन विधिना ३६३

गृह्यरत्नम्
अंगवंगकलिङ्ग ११८

गृह्यवृत्तिः
पवित्रपाणिर्नव ३७८

गृह्यसंग्रहकारः
अथातः प्रेताधान ५७६

गोपालभाष्यम्
उपोषणं दहनं ५८३
औपासनं हि ५८०

गोभिलः
१।३।१६ ३५५
१।४।२२–२४ ४०५
१।९।१२–१३ ३५८
अंतश्चरसि भूतेषु ४२२
अगस्तिर्माधव ४५७
अग्निहोत्रे तु ४७८
अनुक्तकालेष्वपि ६७३
अरुणोदयवेलायां ८३९
आयातु वरदा ३२६
आवर्तने यदा ८५४
उपमूलं लूनाः २३१
उभयत्र स्थितैर्दर्भैः २३२
एकचित्यां समारूढौ ५३२
एकपंक्त्युपविष्टानां ४२७

ऋषिः	पृष्ठम्
गोभिलः	
एकवस्त्रो न भुञ्जीत	२५३
कुशमूले स्थितो ब्रह्मा	२२९
खर्वां दूर्वां तथा	८२६
खर्वां दूर्वां तथा	७१४
छांदोगाभिहिताः	३३
तूष्णीमेताः क्रियाः	८४
दशरात्राच्छत-	८१
द्वादशाहादिकालेषु	६६९
न शंखेन पिबेत्	८३८
नागन्धां स्रजं	१२३
नित्यं सततनिर्वर्त्यं	२५४
नोदकेषु न पात्रेषु	३७६
न्युब्जं कुर्यात्	७९९
पक्षांता उपवस्तव्याः	८५४
पर्वण्यौदयिके	३३
पिबन्ति शिरसो	२५०
पूर्वाण्हः प्रहरः	७०७
प्राङ्मुखावस्थितो	४१८
प्राणाहुतौ हुतायां	४२४
प्रातर्गायत्री	३३३
ब्राह्मणं भोजयेत्	६५१
मतिमान्न कदाचित्तु	३४१
यज्ञोपवीतं कुरुते	९१
यस्य संवत्सरात्	६५२
वज्रो यथा सुरेन्द्रस्य	२२९
विरिंचेन सहोत्पन्न	२३४
व्याहृतीभिर्गायत्र्या	४२१
शुचौ देशे शुचिर्भूत्वा	२३४
श्रौतस्मार्तक्रियो	२९८
संध्या येन न	३११
साग्निकस्तु यदा	६६८
—	४८३, ७०७, ८२०, ८५४
गोविन्दस्वामी	१४२
गौणकारिका	७४२ टिप्.७४३
गौतमः	
१।१	२
१।३-४	५
१।५	७, ७०३
१।६।८	८७
१।७	८७
१।१३	८९
१।१५	९५
१।१६	९३
१।१७-१८	९४
१।१९-२०	९४
१।२१	९३
१।२४-२५	९३
१।२८-३३	४७०
१।३४	२१५
१।३५-३९	२२६
१।४१-४३	२३८
१।४४	२३७
१।४५	४६८
१।४६	४६८
१।५३	११९
१।६०	३६
२।१	१०१
२।१।२	८४
२।१-१०	८५
२।७	८६
२।८	८६
२।१२	९८
२।१५	१२५
२।१७	३३६
२।१९-२१	११४
२।२५	८५
२।३८	११४
२।४१	९६
२।४२	९५
—	७४२ टीप
२।४६	९७
२।५६	१०५
३।१	१७२
३।३	१६७
३।४-८	१२१
३।१०-१२	१९१
३।१७-२४	१९१
३।२०	१९१
३।२१	१८५
३।२८	११६
३।२९	११६
३।५१-५३	११९
३।५४-५५	१२०
४।१।३	१२५
४।२-३	१२९
४।४	१३४
४।४-१३	१४२
४।९	१४३
४।१३	६८१
५।१-२	७६
५।४-५	३६७
५।६-७	३५४
५।९	३९७
५।१०-१५	४००
५।१६	४१०
५।१८	४९
५।१९-२२	४४
५।२१	१३७
५।२३	४०८
५।२५-२९	४१५
५।२७	२४०
५।३०-३३	४१४
५।३४-३५	४१४
५।३६	४१२
५।३९-४२	४१२
६।५	१०८
६।९	११०
७।१	३१
७।६-७	६०
७।८-२३	६२

ऋषिः	पृष्ठम्
गौतमः	
७।१८–२०	१०७
७।२१–२२	१०७
८।१४–२४	७३
८।१५	१४४
८।१८–२४	१९
८।२५	७३,८७४
९।२–३	१२३
९।४	२५२
अ. ९ पं. ५	२५२
९।८, ९, १५–२५	४६३
९।१५	२१५
९।१७–१९	९२२
९।२६	७७
९।४५–५५,	४६३
९।६३–६४	३७५
९।६५	१०,४६३
९।६८	३१
१०।१–३	१८
१०।२–९	८६८
१०।५	६२
१०।७–१८	६५
१०।४३–४४	६५
१०।५१–५८	६७
१०।६०–६७	६७
११।२०	१२८
१२।१	८७३
१२।१–५	६८
१२।२–३	८९३
१२।४	९२३
१२।२५	५९,८८६
१४।५–६	५३०
१४।५–७	५०४
१४।८–११	४८७
१४।१२	४९७
१४।१७–१८	५२७
१४।२५	५२५
१४।२६	५४५

ऋषिः	पृष्ठम्
१४।२७	८६,२६४,२६७
१४।३१	५२१
१४।३१–३३	५१६
१४।३४	५४७
१४।३४–३९	६०६
१४।३६	५९८
१४।३७	२६४,५८७
१४।१०२	७३५
१५।७–८	७७७
१५।१३–१४	५६३
१५।२१–२२	७६९
१५।२३	७७९
१५।२९	३४८
१६।१	३२
१६।५–१३, १४	३८
१६।३७–३८	३९
१७।१	४४२
अ. १७ सू. १–५	५७
१७।८–९	४३३
१७।१२–१४	४३७
१७।१८–२१	४३७
१७।२५	४३६
१७।२७	४५१
१८।१७–१८	१५२
१९।१७–२०	९३१
२१।१–२	१२७,८६३
२१।१०	८६४
२१।१७–१९	८९८
२३।१–३	८७९
२३।१७–१९	१२२
२३।२३–२४	९०७
२५।७–१०	९३२
गौतम धर्मसूत्रः	
२५।९	३१८
२६।१–१७	९३६
२७।३–१५	९४०
२८।१७	१२६
५९।११	२२८

ऋषिः	पृष्ठम्
अंगुल्या जपसंख्यानं	३४२
अंगुष्ठं मोक्षदं	३४३
अग्निपूतो गृहस्थः	९०२
अग्रजो वाऽनुजो	६६९
अग्रे भिक्षेत	९६
अदैवं पार्वणश्राद्धं	६९०
अनेन विधिना	३४३
अपरपक्षे श्राद्धं	७४६
अपुत्रस्य पितृव्यस्य	५५८,५८९
अमावास्योदये	७४१
अस्नात्वा भोजनं	९०९
आग्नेय्यां वाथ	५८२
आचांतः पुनराचामेत्	४५३
आदित्येऽहनि	८४५
आस्ये चक्षुषोः	५८३
उद्धृतस्नेह–	४३६
एकचित्यां समारूढौ	६४३
एकजातीयपर्णेषु	९११
एकद्वित्रिदिनैः	६५५
काहलभ्रामण	४३१
क्रिया ह्यर्थकारिता	७४२
गच्छतस्तिष्ठतो	३४२
गण्डूषस्याथ समये	३२१,४५३
गायत्रीं पच्छोर्धर्चशः	२६१
गायत्रीं यस्य यो	१२९
ज्येष्ठस्य चानपत्यस्य	५५८
त्रसरेणुसमं	८८३
दक्षिणाग्रेषु	६५०
दक्षिणाग्रेषु दर्भेषु	६५०
दातृगोत्रसमुद्भूतां	१४६
दिवोत्तरायणे शुक्ल	५५३
देशकालादि	६५३
द्वादशीं श्रवणर्क्षे	८४६
द्विजो रणविमुक्त्यर्थं	९२६
द्विजः कामातुरो	८८८
धनुर्मासे गृहे	९१०
नीलीमयं पटं	९१३
पश्चमाद्दुत्तरात्	५१२

ऋषिः	पृष्ठम्
गौतमः	
पञ्चाशद्वत्सरात्	९०२
पत्नी जुहुयात्	३५५
पाकयज्ञस्य	१५०
पितानुजस्य पुत्रस्य	९१३
पितृपत्न्याः सर्वा	५६५
प्रथमेऽह्नि तृतीये	५९८
प्राङ्नाभिवर्धनात्	८०
प्राणानां ग्रंथिरसि	४५३
प्राधान्येन विधानाच्च	३४
बलाद्वन्दीकृतो	९०३
ब्रह्मस्वं यस्तु	८८४
ब्राह्मणान्नं ददत्	४४५
मन्त्रब्राह्मण उच्चारयतो	२३८
मातामहे च तत्पत्न्याः	५८९
मृतं दग्ध्वा	५१३
मुसलं दृषदं चैव	८८५
यदा रहः पुष्पवतीं	८९०
ये समाना इत्यर्घ्यं	६७७
शशाप तान्	३०६
शिखां विना द्विज	९१२
शिवालिंगसमीपे तु	२५९
श्वश्रूश्वशुर–	५२६
सङ्गीभूय द्विजा	९०८
सर्वस्मिन्वा द्रव्य–	७४६
सीमन्ते पुंसवे	९१५
सूत्वा नारी मृता	५५४
स्नापयित्वाऽलंकृत्य	५८०
हविः प्राश्य यथा	२०१
— ५२, ६९, १३१, १७२, २६५, ३०१, ४००, ५०९, ५२७, ५५४, ६५१ टीप, ७४३, ७७७	
गौतमसूत्रम्	
४।२०	४९६
चक्रोपनिषद्	
तस्माच्छूद्रां मामेव	२९९
चतुर्विंशतिमतम्	
अग्नेर्मन्वेनुवाकं	३४८

ऋषिः	पृष्ठम्
अधस्तान्नवमान्	४९४
अर्हच्चार्वाक	७
अलाभे येन	३९८
आचार्यं गुरु	७५२
आमश्राद्धं यदा	७५६
आरनालं तथा	४४६
उपव्युषसि यत्स्नानं	२४७
एकं नाम्नापरं	७५६
कंदमूलफलादीनि	४३५
कांस्यपित्तल	८८४
कृच्छ्रे पञ्चाति	९४४
कृच्छ्रोऽयुतं	९४२
कृष्णसर्पं द्विजं	४६४
केचिदिच्छन्ति	७११
कोद्रवान् राजमाषांश्च	७८१
गर्भपाते समुद्दिष्टं	८९४
चतस्र एव	८९४
चान्द्रायणं नव	८१४
चान्द्रायणं मृगारेष्टिः	९४३
जन्मप्रभृति पापानि	९४४
जीवे पितरि	२३
ज्येष्ठभ्रात्रा	२३
तिस्रस्तिस्रः शलाका	७९८
तृतीयां वा चतुर्थीं	१३०
त्रिमधु त्रिसुपर्णं	९३४
दीर्घं तक्रमपेयं	४३७
द्वे द्वे शलाके	७९८
धर्मनिष्ठास्तपो	९४४
पात्रालंभं द्विजः	८०५
पावमानीस्तथा	३५०, ९३३
प्रतिषिद्धेषु दानेषु	९२३
प्राजापत्यं नव	४४८, ९१४
प्राजापत्ये तु	५५५, ९४३
प्रातस्तु द्वादशग्रासाः	९३६
बौद्धान्पाशुपतान्	२६७, ३०६
ब्राह्मणीगमने	८८८
भ्राता वा भ्रातृपुत्रो	६५८, ६६९, ६९२

ऋषिः	पृष्ठम्
मृतजातकयोः	५३०
यद्विवा विहितं	२१८
यस्य धान्यसमृद्धिः स	५५५
रजसा शुध्यते	४७५, ८९३
विण्मूत्रभक्षणे	४४८, ८८१
विधवागमने कृच्छ्र	८९१
शूद्रस्य तु नवश्राद्धे	४४८
श्वकाकोच्छिष्ट	४३२
सम्बन्धिनः स्त्रियं	८८८
सावित्र्यास्तु	३३५
सीदंश्चेत्प्राति	५६
सुराया विक्रयं	९१६
स्त्रीक्षीरं च	४३८
स्त्रीक्षीरं तु	८८२
स्त्रीणां नास्ति परित्यागो	८९४
स्नानमब्दैव	२४६
स्नानादनन्तरं तावत्	२४७, २५०
स्मृतेर्वेदविरोधेन	७
चन्द्रिका	
पृ. २४ पं. ७	८४
पृ. ९८ पं. ३०	२३५
पृ. ९९ पं. १	२३५
पृ. १०५ पं. ७	२४३
पृ. १०६।१९	२४२
पृ. १११ पं. २६	२८२
पृ. ११२	२५१
पृ. ११३ पं. ४	२५०
पृ. ११३ पं. २९	२५२
पृ. ११४ पं. २८	२५३
पृ. ११६ पं. १३	२६५
पृ. ११७ पं. २०	२६६
पृ. ११८ पं. १	२७७
पृ. ११८ पं. २०	२६७
पृ. १२३ पं. ७	२८०
पृ. १२५ पं. १०	२८३, २८४
पृ. १२५ पं. १४	२८३
पृ. १२६ पं. २	२८०

ऋषिः	पृष्ठम्
पृ. १२९ पं. २	२५९
पृ. १२९ पं. १२	२५६
पृ. १२९ पं. ३०	२५६
पृ. १३२ पं. २९	२५७
पृ. १३५ पं. १०	३३७
पृ. १३९ पं. ८	३४४
पृ. १३९ पं. १३	३४५
पृ. १४० पं. १–१२	४७८
पृ. १४३ पं. २३	३३४
पृ. १४४	३३०
पृ. १४४ पं. २०	३२९
पृ. १४५	३३१
पृ. १४९ पं. २०	३३९
पृ. १५१ पं. ४	३३८
पृ. १५२ पं. १९	३४२
पृ. १६३ पं. १	३६०
पृ. ६४ पं. १,४,६	३६५
पृ. १६८ पं. १५	३६६
पृ. १९४ पं. ६	३८२
पृ. १९४ पं. २४	३८१
पृ. २०१ पं. २६	३८८
पृ. २०९ पं. २१६	४०४
पृ. २२१ पं. १८	४१८
पृ. २२३ पं. २१	४२४
पृ. २२६ पं. १९	४२५
पृ. ३३८ पं. ३	५६१
पृ. ४८७ पं. २२	४०६
पृ. ४८७ पं. २५	४०७
पृ. ४८८ पं. ८–११	४०६
आ. ६७२ पं. १८	१२७
अंगुष्ठे चैव	३३१
अक्षय्यासनयोः	७९६
अग्नौकरणानन्तरं	४०७
अचिरगर्भस्रावे	४९२
अजीर्णेऽभ्युदिते	५८५
अतीते सूतके	५३४
अथ देवप्रतिष्ठायां	४८१
अदत्वा कर्षको	६३

ऋषिः	पृष्ठम्
चंद्रिका	
अद्य श्राद्धं करिष्य	४८३
अनतीतद्विवर्षः	५०९
अन्नमंगुष्ठ	८०५
अन्वष्टकासु वृद्धौ	७१९
अमावास्याद्वयं	७२३
अर्धं तु श्मशान	५८३
अस्पृश्यस्पृष्टमरणे	५५४
आच्छादनं तु	७९०
आत्मपितृष्वसुः	५२६
आब्दिकं प्रथमं	७३०
आर्यावर्त्तमतिक्रम्य	९
आशौचनिर्गमात्	६४८
आशौचमस–	५२९
आशौचान्ते ततः	६४७
आसनेष्वासनं	७९५
आहिताग्नेस्तु	६२७
आहिताग्नेस्तु विधिवत्	५३८
उत्सृजेत् वृषभं	६४५
उन्मत्तः किल्बिषी	१५३
उपमूलं तथा लूनाः	२३१
उपरागसहस्राणि	५५४
उपास्य पश्चिमां	३११
उरसा मनसा	३८९
उर्वारुकं कारवल्ली	७८२
ऋतुर्वसन्तः	८७
एकदेशं तु वेदस्य	५२९
एकोद्दिष्टे तु	६५०
एतत् सपिण्डीकरणात्	७२९
एतेषु सर्वेषु	६६२
एभिर्वचनैः	७१९
एवं देवान्	४४०
करकालाबुकांस्येन	२२४
करेण दक्षिणोर्ध्वे	९०
कर्तुरन्येषां च	५७८
कर्माण्यत्रादृष्टार्थानि	४९३
कामकालौ वैश्वदेवे	६७५
काणादीन्भोजयेत्	७७६
काम्यश्राद्धं काम्यसिद्धिः	७६४

ऋषिः	पृष्ठम्
चंद्रिका	
कार्ताधिकारसिद्ध्यर्थं	५५४
कालशाकं महाशाकं	७८३
कुक्कुटो विड्वराहः	७८६
क्रीता द्रव्येण	१४४
क्षयाहं वर्जयित्वैकं	७१९
गायत्रीं चिन्तयेत्	३१३
गायत्रीमात्र	७००
गृहस्थानां सहस्रेण	७६८
गोदोहकालं कांक्षेत	४०८
चण्डालादीन्जपे	२३६
चत्वारो ब्राह्मणस्याद्याः	१४२
जनने मरणे चैव	५४७,५९०
जन्मनाम्नोर–	४९७
जानुमात्रजले तिष्ठन्	२२८
जैनान्पाशुपतान्	३०६
ज्यायानपि कनीयांसं	१०९
ज्येष्ठेन वा कनिष्ठेन	६२०,६२४
ततः तस्मात्	५१४
तीर्थायतनसंपूर्णं	३६२
त्रयोदशी भाद्रपदी	७४९
त्रिंशन्मासादूर्ध्वं	७२५
त्रिरात्राद्याशौचिनां	५३५
दग्ध्वा रात्रौ तु	५८६
दध्यादियुक्तं	४३७
दर्शादर्शश्चान्द्र	६९९
दशाष्टद्वादशान्	६७८
दाने विशिष्ट	४८०
दिवा शौचस्य निश्यर्धं	२१८
दीक्षितस्य यज्ञ–	४८२
देवरेण सुतोत्पत्तिं	१३९
देशकालबला-	७७८
द्विजाते सूतिकाया	५०१
धर्मशास्त्रं तु	११६
धार्योऽनामिकया दर्भौ	२३०
ध्रियमाणे तु	७२१
नग्नप्रच्छादन	५९६
न मातृषु पृथक्	७३६
नरेन्द्रसत्रिव्रतिनां	४८२

ऋषिः	पृष्ठम्
चंद्रिका	
नासनारूढपादस्तु	४२६
निमंत्रयीत	७७७
निमंत्रयीत पूर्वेद्युः	७७६
नीवीमध्ये तु	२३४
नैपालकम्बला	७८८
नोदन्वदंभसि	४६७
पंग्वादीनाम्	१२१
पत्नीभ्रातृसुतादीनां	६६१
पाणिपादमुखा	७९५
पिण्डालुकं च	७८५
पितामह्यादिभिः	६८०
पितृमात्रग्रजा	६६१
पुत्राचार्यः स	७७४
पुत्राभावे सपिण्डास्तु	५६६
पैतृकब्राह्मणेषु	८११
पौत्राभावे प्रपौत्रो	५८६
प्रत्यक्षे चाप्रतिहतौ	५५४
प्रेतस्य पुत्रो दाहादि	५५६
ब्राह्मणान्भोजयित्वा	८१४
भक्ष्यं भोज्यं च	४३९
भर्तारमनुगच्छन्त्या	६४१
भोजनीयास्तथा	७६८
मलं वदन्ति कालस्य	७३३
मातापित्रोः	५१७
मातुले श्वशुरे	५२६
मातृष्वस्रादिषु	५२५
माधूकरं य आदाय	४११
मासपक्षतिथि	६९९
मासस्थितिर्वा	६३२
मासे त्रिंशत्तम	७२५
मृता चेद्गर्भिणी	६४४
मेखलामजिनं	११३
यज्ञादौ माससंवत्सर	७०२
यदा अतिथिः	८०९
यदि पुत्रो गयां	७७६
यदैकस्मिन्नहनि	७४७
यद्यपि नाशौचम्	४८१
यस्त्वासन्नम्	७७०
यस्मिन्देशे स्थितो	५७३
यस्मिन्नग्नौ भवेत्	३९६
याज्ञवल्क्येन कालस्तु	७२२
यान्युपरि पात्राणि	८०४
लिंगस्य दर्शनं	३९२
लोहे मृन्मये वा	९७
वर्णत्वमेक	४
वानप्रस्थाश्रम	५१९
विदेशस्थो गृही	६२८
विधिना देवपूर्वं	८०४
विप्रौ तु प्राङ्मुखे	७९४
विष्णोरायतनं	२६१
वृद्धौ समर्चयेत्	७५४
वैश्वदेविक	७९७
व्रात्यस्याकृत	८९
शस्त्रघातिनो यदा	७५०
शिष्ये दशरात्रा-	५२५
शुक्लप्रतिपदादि	७००
श्राद्धकृता गृहीत	७९६
श्राद्धे न देयाः	७८४
श्रुत्वेत्यत्र तु	५२३
श्रौतस्मार्तक्रियाः	३०८
श्रौतानामप्यग्नि	४७९
संभृतसंभार	४८३
सन्देहेषु च सर्वेषु	२३५
सन्ध्या सावित्री	३७४
सपिण्डस्य जनने	४९९
सपिण्डीकरणात्	७२९
सप्तपूर्वान्	७७०
समृद्ध्यपि यस्य	७७८
सव्यं जानु ततो	७३७
सार्धयामादूर्ध्वं	३७६
साशीति पण-	१४०
सौराष्ट्रं सिंधु-	१०
स्त्रीणां तु पतितो	५०७
स्वधाशब्दं धूपदीपौ	६७६
स्वशाखोक्तक्रियां	३८३
स्वशाखोक्तेन	३९९
हंसे हस्तस्थिते	७४९
हृदि रूपं मुखे	३८९
—	१२९, १३१,१३३,१३८,३१३,३३७, ४८५,४९२,४९४,४९९,५०४, ५०५,५०६,५०९,५१०,५१५, ५१६,५२४,५२५,५२६,५३०, ५३१,५३५,५६०,५६१,५६३, ५७०,५७८,६१४,६५४,६६२, ७१९,७२६,७३२,७३६,७४९, ७६१,७८३,७८४,७८५,७८७, ७८९,७९८,८१२,८१६,८१९, ८२१,९१५.
चर्यापादः	
पादौ हस्तौ च	३१८
च्यवनः	
श्रुतिस्मृतिपुराणेषु	३५१
छागलेयः	
पूजयेच्छ्राद्ध	७६८
पूर्वं व्रतं गृहीत्वा	९४१
प्रख्यापनं प्राध्ययनं	३१
प्रायश्चित्तमकामानां	८६७
यः शूद्राद् द्विजो	२२
सर्वलक्षणसंयुक्तैः	७६५
छन्दोगब्राह्मणम्	
यो ह वा	२८
छान्दोग्यम्	
कस्माद्ब्रह्मणः	३३७
छान्दोग्यश्रुतिः	
अन्यैः शतहुता	३५६
आहारशुद्धौ	२०३
ब्रह्मवादिनो वदन्ति	३११
जमदग्निः	
अपसव्यं तु	८१४
अपसव्येन कर्तव्यं	८०७
अलं पुनरुत्सृष्ट	८१०

ऋषिः	पृष्ठम्
जमदग्निः	
आपाद्य सह	६५८
आब्दिकं श्रद्धया	८२१
कन्यां वामकरे	१४९
ज्येष्ठपुत्रेण कर्तव्या	५५७
दण्डात्मनोस्तु	१८६
दर्भमुष्टिं प्रदीप्याग्नौ	५६८
दीक्षितस्याहिताग्नेः	५६८
नदी वैतरणी नाम	६७७
न निन्देयुर्नाव	८१०
न भवेद्यस्य	८२१
पितुः पुत्रेण कर्तव्याः	५५६
पितृदेवक्रियां	४४४
मध्यंदिनकृतो	३६७
यो नामकरणात्	५०७
वैश्वदेवं दिवा रात्रा	४०३
शुद्धवत्योऽथ	७८७
सलिलं नाम-	८१४
जयन्तकारिका	
शरीराणि न	५७४
जातिनिर्णयसंग्रहः	
ब्राह्मणात् द्विजकन्यायां	३०७
जातुकर्णिः	
अग्न्यभावे तु	६८५
अत ऊर्ध्वं न	६५९
अतिकालं च	९२१
अन्वष्टक्यं तथा	७१९
अलाभे कन्यायाः	१३३
ऊर्ध्वं त्रिपक्षाद्यच्छ्राद्धं	६४७
ऊर्ध्वं नाभेः	२६८
काषायं कृष्णवस्त्रं	२५२
कुर्यात्तस्य च	६३१
खण्डितं व्रतिना	८९२
ग्रहोपरागे विषुवे	७६०
तिलोदकं तथा	५९६
द्वादश प्रतिमास्यानि	६५२
द्वितीये वा तृतीये	७८

ऋषिः	पृष्ठम्
नैयोगिकी तिथिर्येषा	७४६
पात्राणि चालयेत्	८१८
पितरि प्रोषिते	६३०
पितुः पितृगण	६५९,६९८
प्रत्यब्दं पार्वणेनैव	६५९
मूत्रपुरीषाद्	४७३
मृताशौचे समुत्पन्ने	८०
वस्त्रोत्तरीयाभावे	२५३
व्याममात्रं समुत्सृज्य	८१६
शंखं प्राहुरमा	७६०
सूतके तु समुत्पन्ने	४७९
जाबालशाखा	
रुद्रेणात्तमश्नंति	४४०
जाबालश्रुतिः	
अथ परिव्राड्	१७६
अथ पुनरव्रती	१७३
अथ हैनं	३४९
ब्रह्मचर्यं समाप्य	१७२
जाबालिः	
अकामकृतपापानां	८६७
अजं बस्तं गृहे	८८५
अतथात्वे	८२९
अन्तर्दशाहे दर्शे	६१६
अपराह्णद्वय	७३९
अब्दं यो भृतकं	९०२
अशिरस्कं भवेत्	२९१
अशिरस्कं भवेत्स्नानं	२८९
अहोरात्रोषितो	९४२
आगतेऽपि रवौ	७४५
आचरेदुषसि स्नानं	२४७
आरम्भे सर्वकृच्छ्राणां	९४१
एकराशौ स्थिते	७२८
एकस्मिन्नपि	७२५
कुर्यान्नैमित्तिकं	७९
कुशान्काशांश्च	२३४
चण्डालीं रूपसंपन्नां	८८९
तक्षा च तिलयन्त्री च	८९०

ऋषिः	पृष्ठम्
तुलायां मकरे	७४०
त्रयोदश्यां तृतीयायां	२८२
त्र्यहं समानो	५१८
दशाहेन सपिण्डानां	४९६
देवान्ब्रह्मऋषींश्चैव	२६४
द्विजः कामातुरो	८८९
न पारक्ये जले	२५६
न भाषेत स्त्रियं	१९२
नाधीयीत नरो	३७
नित्यं न हापयेत्	२८३
नित्यं नैमित्तिकं	७३३
निमन्त्रितस्तु	२०४
निष्पीडितं धौतवस्त्रं	२५०
पतितेऽनशने प्रेते	४८९
पतिव्रता सुशीला	६४६
पत्नी चैव सुतो	६४०
पिण्याकं च	९३९
पिण्याकं सक्तवस्तकं	९३८
पूर्वाह्णे चेदमावास्या	७१८
पुत्रस्वीकारमात्रेण	१०३
मासं शूद्रस्य	४९६
मृतं बालं च	५४२
यतिहस्तगतं	५८
यदि गृहमेव	१२१
यद्येकत्र भवेतां	६९७
रात्रावपि च शंसंति	७१०
वैतानासौ स्वयं	४७९
शिवे विष्णवादिभिः	९१२
श्राद्धं कृत्वा तु	६५१,६५३,६९४
श्वशुरस्य गुरोः	९१५
षण्णामेकैक	९३८
संक्रान्तौ पुण्यकालस्तु	२७३
संध्ययोरुभयोः	३३०
संध्या पंचमहा-	४७७
संन्यासनिश्चयं	५७४
सततं प्रातरुत्थाय	२४५
सदैव तिथ्योरुभयोः	८२९
सपिण्डीकरणं	६६७
समानोदकानां	४९७

ऋषिः — पृष्ठम्

स्नात्वा निरस्य २५१
स्नानं कृत्वार्द्रवासा २५०
हरेर्नामपरं ३५१
—— २८२,९८२

जाबालोपनिषद्म्

अग्निरिति भस्म ३०१

जैमिनिः

१।१ १६७
अवश्यं तु त्यजेत् ३९८
आहिताग्निश्चेत् २५
तन्निमित्तोप ८४४
नातिषोडश- ९०
यावद् ब्रह्मोप ९८
यावन्न छिद्यते ५०५
सेतुर्नापेक्षते कालं २५७
—— ५०६

ज्योतिषार्णवः

श्रावण्यां प्रौष्ठपद्यां ८३२

ज्योतिःपराशरः

सिनीवाली माति ७३२

ज्योतिःशास्त्रम्

अब्दद्वयं चाष्टमासाः ७२४
अरुणः सूर्यो भानुः ७१४
तत्र दत्तमदत्तं ७३४
दर्शान्तः पूर्णिमान्तश्च ७००,७२७
माघादिषु तु ८८
संतापः कान्तिरल्पायुः २८३
—— ७२५

ज्योतिःसिद्धान्तः

असंक्रान्तिमासो ७२४
यदा कन्यागते ७२६

तन्त्रम्

चतुर्दश्यष्टमी ७८

तात्पर्यदर्शनम्

अत्र यद्यपि ७१९
अष्टधा कृत्वेति ७४४

ऋषिः — पृष्ठम्

ऋते महायज्ञेभ्यः ३९७
पंचमहायज्ञेभ्यः ४०४

तिथिदर्पणम्

औदयिके संगवस्पर्शे ३३

तुण्डीरमण्डलीयम्

त्रियामायास्तृतीयांशे ५४०

तैत्तिरीयक

अग्नये पथिकृते ७३३
वेदान्तविज्ञान १७६

तैत्तिरीयकोपनिषद्

धर्म इति धर्मेण ३
धर्मो विश्वस्य ३

तैत्तिरीयब्राह्मणम्

१।१।२ ७००
१।१।३ ९३
१।१।९ ६६५
१।३।१० ७००
१।८।५ ६६५
१।१२,२,७ २४
२।१।१० ३६३
२।२।९।३ २५७
२।८।३ ४०८
२।८।८, ४०८
३।८।९ ७००,७०१
३।९।७ ३१७
३।९।७।५ ३१७
हस्य हविर्निरुप्तं ८५८
—— ९३ टीप

तैत्तिरीयश्रुतिः

ब्राह्मणोऽस्य १७

तैत्तिरीयसंहिता

१।४।९ ४१७
१।५।१ २४
१।५।२ ७००
१।५।१० ८१
१।६।७ ८५४
१।६।९ २०
२।२।१ ५७९

ऋषिः — पृष्ठम्

२।१।८ ९३
२।२।५ ८०
२।३।१।५ ९३
२।५।१ ७४
२।५।१०।३ ८७
२।५।११।१ ९२
३।२।९ ५५१
३।४।९।७ ८७
३।४।१० २५
४।४।२ ७००
५।२-३ ५८०
५।४।२ ७००
५।४।७।७ ९३
६।१।३ २१९
६।२।१ २६
६।५।२ ७०१
७।१।१।४ ८६
७।५।६ ६९९

तैत्तिरीयारण्यकम्

१।१।१ ३००
२।२।२ ३१२
२।२ ३१३
२।११ २२७,३६७
२।१३।१ ३७०
९।१।४ ३७०
१०।१ ३४७
१०।१४ ३२७
दाने सर्वं प्रतिष्ठितम् ५५३
न कंचन वसतौ ४१६
—— ३६९
—— ५८४ टीप

तैत्तिरीयाः

अथ यदि ते ८

तैत्तिर्यक्श्रुतिः १९५

तौल्वलिः

क्रियागुणत्वात् ७४३
मतं दूषयति न ७४३

ऋषिः	पृष्ठम्
त्रिकाण्डी	
२।९।६९	६३६
अनाहिताग्निः	५६८
अपि दुष्कृत	१६१
चान्द्रो मासः श्रुति	७०३
तदेवं कुमारस्य	९४
नष्टेष्वग्निष्वथा-	५७३
मृते भर्तरि दाहात्	६३७
यस्मिन्राशौ स्थिते	७०३
यस्य भार्या	२५
यस्य भार्या विदूरस्था	५७७,६८८
वैश्वदेवं दिवा	३९७
सपिण्डीकरणार्थं	५९५
—	५२२, ५५४
दक्षः	
अ. २	२४५
२।१०	२४३
२।२०	३५४
२।२१	३७५
२।२२	३६६
२।२५	३७४
२।२८	३७४
२।२९–३२	३७५
३।१–१९	१६४
३।२६	८७३
५।५	२१८
५।७	२१८
५।८	२१८
५।१२	१६५
५।१३	२१७
६।२	४८१
६।५	४८२
६।९	४८८
६।१८	४८३
६।१९	४८०
अनाश्रमी न तिष्ठेत	१२३
अयने विषुवे	४५०

ऋषिः	पृष्ठम्
दक्षः	
अशिरस्कं भवेत्	२८९
अहोरात्रस्य यः	३१०
आग्नेयं वारुणं	२८९,२९०
आपद्यपि च कष्टायां	१०३
इतिहासपुराणाभ्यां	२०४,४५४
एकाहात्परतो	११०
कुशपाणिः सदा	२९३
कृष्णपक्षे चतुर्दश्यां	३८१
ग्रन्थार्थतो विजानाति	५१८
गृहाश्रमात्परो	१५५
चतुर्थे तु तथा	२४९,३७५
चान्द्रायणो यवमध्यः	९४१
जातमात्रः शिशुः	८५
तस्मात्त्यक्त	१७४
तीर्थे शौचं न कुर्वीत	२१५
त्रिंशत्परान्	१७५
द्विविधो ब्रह्मचारी	१२०
ध्यायेन्नारायणं	२४६
नगरं हि न	१८८
न शौचं वर्षधारा	२१६
नामगोत्रे समुच्चार्य	१४९
नैकः श्राद्धद्वयं	६५३,६९३
पंचमे च तथा	३९५
पंचापाने दशैकस्मिन्	२१७
परिव्रज्यां गृहीत्वा	२०८
पारिव्राज्यं गृहीत्वा	९१९
पितामहं च	६७२
पितामहं च जीवन्तं	६७३
पितृगृहे तु	५१
पूर्वं प्रादेशिकां	३६०
पैशून्यममृतं	४६५
प्रथमा धर्मपत्नी	१५१
प्रदोषपश्चिमौ	४५७
प्रातर्मध्यान्हयोः	११३
बुधो ह्याभरणं	१८९
ब्रह्मा मुरारिस्त्रिपुरान्तकश्च	२१०
महागुरुनिपाते	५२३

ऋषिः	पृष्ठम्
मातापित्रोर्गुरो	५०
मृताशौचनिमित्ते	५३३,६३५
मृद्गोमयादिभिः	२६०
मेखलाजिनदण्डेन	४६६
यज्ञोत्सवे व्रते	४८४
यद्दिवा विहितं	१९६
यस्तु जापी सदा	५९
राक्षसासुर	१४८
रात्र्यंत्ययाम	३१०
वाग्दण्डो मौनमेव	१८४
वृत्तिभेदेन भिन्नाः	१८३
वेदस्वीकरणं	२९
शुध्येद्विप्रो दशाहेन	४९४
संध्यात्रयेऽपि	३२३
संहृत्यांगुष्ठमूलेन	२२६
सपिण्डीकरणात्	७९१
समं द्विगुण	४९
सर्वेऽपि क्रमशः	१७१
सूतकं तु प्रवक्ष्यामि	५३९
स्नात्वाऽऽचमेद्यदा	२४७
स्नात्वाऽऽचामेद्यदा	२२९
स्नानमूलाः क्रियाः	२४७
स्नानाङ्गतर्पणं कृत्वा	२४९
स्वकं कर्म परित्यज्य	१५
स्वीकरोति यदा	११९
होमे च फलं	३५५
—	२४७,३१३
दत्तात्रेयः	
निर्माल्यं भक्षयित्वैव	४४०
ब्रह्मरात्रौ ततो	१७९
भैक्षादन्यं न	२०४
वेदव्रतानि	११७
दशकम्	
अल्पात्पंचदिना	५३१
उत्पन्ने त्रिदिनं	५२६
जातमरणे पित्रोः	५१०
मातुर्गर्भविपत्स्वर्धं	४९१
—	४९४

ऋषिः	पृष्ठम्
दशकटीका	५१९
दीपिका	
अनुपेत उपेते	५१७
अष्टमात्प्राक्	४९७
गर्भनाशादि	४९१
जनकस्य जनन्याश्च	५३३,६३६
पक्षिण्यामुभया–	५२६
पितृगेहे मृतायां	५१६
पुत्री पौत्री तथा	४९८
पुरुषाणां सपिंडानां	४९१
मातापित्रोरघे	५३७
स्रावपातावप्रसवो	४९१
—	५६०
देवणभट्टः	१३२
देवरातः	
नाम्नो दन्तोद्गमात्	५०८
देवलः	
अंगुष्ठमूलदेशे	३७७
अंगारतुषकीटास्थि	२१६
अगारदाही	७७४
अग्नेर्वृषलभुक्तस्य	४६६
अघृतं भोजयेत्	४१४
अतः परामष्टा	११९
अथ गङ्गा सरस्वती	९४०
अधीतविस्मृते	७७३
अन्नपानक	८०८
अपुत्रकस्य स्वं	५६५
अप्स्वीक्षितास्तु	२२२
अभिसन्धिकृते	८६७
अभोज्यं प्राहुराहारं	४३६
अमायां पैतृक	९१५
अयुते वा सहस्रे	९०८
अरोगः प्रकृतिस्थश्च	८२२
अर्वाक् त्रिपक्षात्	५३५
अवलीढं श्वमार्जारं	४३१
असंभवे परेद्युः	७७७
अहः षोडशकं	७४५
आचान्तेभ्यो द्विजेभ्यः	८१४
आचार्यं स्वमुपाध्यायं	५४५
आत्मानं न शपेत्	४६२
आ त्रिपक्षात्	५३५
आददीत प्रवृत्तेभ्यः	१८६
आद्यश्राद्धमशुद्धोऽपि	६३६
आमश्राद्धं गृहीत्वा	७७९
आशौचान्नोत्सृजेच्छिश्नं	२१५
आशौचाहः	५३४
आसनानि न कुर्वीत	२४३
आसन्नसंक्रमं	२७५
इत्येवमद्भिराजानु	२२१
इष्टापूर्तमृताहेषु	७८५
उद्धृताश्चापि	२८५,४७३
उन्मादस्त्वक्	७७२
उपवासेषु सर्वेषु	८२८
उपाकर्म तथोत्सर्गं	३४
उपाध्यायः पिता	१०४
ऋणापकरणार्थं	९२४
एकां नदीं समासाद्य	२५७
एकाग्रमरणे पित्रोः	६०७
एकेन ग्रंथिना	९८
एतेन विधिना	७५२
ओंकारः प्रथमस्तंतु	९०
और्णकौशेय	४६९
कंडूरं श्वेतवृंताकं	४३४
कदली मातुलुङ्गं	८८५
कार्पासक्षौम	९१
कूपोदकेन सप्ताहं	९१२
क्लिन्नं भिन्नं	४७४
गान्धर्वादिविवाहेषु	१४५
यौगपद्ये तु	७५
ग्रामणीः प्राड्विवाकश्च	८८६
चण्डालश्च तुलुष्कश्च	८८९
चण्डालाग्निः	५११
चत्वार्यधीत	५१८
चान्द्रायणं द्विविधं	९४०
चौलकर्मणि	९१५
ज्येष्ठायां यद्यनू	७७४
ततः कर्मणि	८१७
ततः सर्वाशनं	८१६
तथैव यंत्रितो	७८०
तद्दिने वा परदिने	६४३
तद्भैक्षं गृहीत्वा	२०२
तर्जन्यङ्गुष्ठ	३७७
तिलानवकिरेन्	७८१
तुलायां गोसहस्रेषु	९२७
तृतीया रोहिणी	७६१
तृतीये पञ्चमे	६०५
तेषां सवर्णजः	७०
तैलमुद्वर्त्तनं	७८८
दाक्षिणां पितृविप्रेभ्यो	८१४
दग्ध्वास्थि पित्रोः	५३७,६२८
दशमेऽहनि संप्राप्ते	५१०,६०६
दशम्यामेक	८३८
दिवाहृतैर्जलैः	२७१
देये प्रत्याब्दिके	७१६
देवार्चनपरो	७७३
देवार्थे ब्राह्मणार्थे	४०८
देवालयेषु मार्गेषु	९०८
द्वाद्यं नैव	७५१
देवोत्सवे प्रवृत्ते	१४८
द्विजः कामातुरो	९१३
द्वितीयां वै तु	५७१
द्विविधो गृहस्थो	६०
द्व्यामुष्यायणका	५६१
धमनीमन्तरे कृत्वा	३६२
धर्मविद्दक्षिणं हस्तं	२१६
धर्म्यं वै दक्षिणं	१९६
ध्रुवमजस्रकं	४०
नक्षत्रदर्शनात्	८२९
नाशौचं प्रसव–	५३६
नास्ति मातृसमं दैवं	१०६
निशुद्धमपि चाहारं	४३२

ऋषिः	पृष्ठम्
नीलवस्त्रं तु	९१३
पञ्चभूतघटं	९३०
परतः परतो	५३१
परदाराभिगो	७७३
परमान्नं च	९१०
परेद्युरनुयाने	६४३
पात्रालाभेऽपरं	८२०
पादौ प्रक्षाल्य	४१७
पापानां तारतम्येन	९६९
पितरौ प्रमीतौ	६९८
पितृकर्माणि सर्वाणि	७१०
पित्रोरुपरतौ पुत्रः	६३९
पिशुनश्च खलः	९००
पुनर्दहनमारभ्य	६१७
पुनः प्राप्तं दशाहात्	५३०
पूर्वाण्हे दैविकं	६४८,७०९
पूर्वे विवाहाश्चत्वारः	१४२
प्रमीतौ पितरौ	६९२
बहुधान्योद्भव–	८७८
बीभत्सुमशुचिं	७८६
ब्रह्मचारिणं एकं	९१
ब्रह्मचारी न कुर्वीत	५४५
ब्रह्माण्डं यस्तु	९२६
ब्राह्मणानां कुले	४९
ब्राह्मणो मद्लोभेन	८९१
ब्राह्मण्यां ब्राह्मणात्	१८
भुक्तोच्छिष्टं समादाय	४५२
भुक्त्वाऽऽचामेत्	४५३
भुक्त्वाचामेद्यथोक्तेन	२३९
भृतकाध्यापको	७७२
भोजने दत्तलग्नानि	२३८
मन्वादयः प्रयोक्तारो	२
मरणोत्पत्तियोगे	५३०
महागुरुनिपाते तु	६४०
महिषीत्युच्यते	७७४
मातुश्च ब्राह्मणश्चैव	४९
मानुषास्थिवसां	२१९
मुत्रोच्चारे कृते	२१५

ऋषिः	पृष्ठम्
मृतं पतिमनुव्रज्य	५३२
मृताहं समतिक्रम्य	७०६
यज्ञोपवीतं कुर्वीत	९०
यज्ञोपवीतं विप्राणां	८००
यत्र प्रसूयते	४७१
यथा स्नानं च	२७२
यस्मिन्देशे य	१३१
यः शूद्रान्पातितान्	२८
यां तिथिं समनु–	८२७,८३०
यागाध्ययन	६०
याजनं योनि–	२८
याजनं योनिसंबंधं	१५३
यावकानामप्सु	९३९
यावत्तु शुद्धिं मन्येत	२१७
यावत्पिता च	१०६
ये मृताः पापमार्गेण	६३०
वंध्या तु वृषली	५२,१३५,७७३
वर्षद्वयं वा वर्षं	९०८
वल्लीमुपोतकीं	४३४
वस्त्रेण वाथ	३६२
विना यज्ञोपवीतेन	९१२
विप्रस्य पतिशेषं	८८१
विहितं तु सपिण्डानां	५४४
व्यतीपाते यदन्नं	९०७
व्यवहारादिकलहे	८८५
व्रात्यान्नं यदि	९१०
शम्भोर्निवेदितं	९१२
शिखां बध्वा वसित्वा	२२३
शुक्लैस्तु तर्पयेत्	३७७
शूद्रसत्रे न	९०८
शौद्रोऽयं धर्मो	६७
श्राद्धं कृत्वा तु	८१९
श्वपाकं पतितं	२६८
श्वः कर्ताऽस्मीति	७७६
संकटे विषमे	८४७
संक्रान्तिसमयः	२७३
संस्कार्यश्च पिता	५६६

ऋषिः	पृष्ठम्
संस्पृश्याशुचि	२६५
सकृच्च संस्कृता	७८
सप्तम्यां रविवारे	३७७
सदैवादङ्मुखः कुर्यात्	२१२
समानगोत्रजां	९०३
समानोदकानां	४९६
सम्यक् कृतोपलेपः	४१८
सालग्रामं शैवलिङ्गं	८८५
स्तनादूर्ध्वमधो	९१
स्त्रीगूढं यवकीर्णः	७७२
स्थलीषु गिरी	७५८
स्वदासो नापितो	४४७
स्वयं दारान्	७६
स्वयै धातेनं कर्तव्या	२५२
स्वल्पत्वं वा बहुत्वं	४३
स्वाशौचकालात्	५१०
हिन्तालताल	८८०
—	५०२,५३५,६३७
देवस्वामी	
एकोद्दिष्टे तु	६५४
चर्मकारस्त्रियं	८८९
तुलाप्रतिग्रहीता	९२४
नक्षत्रेषु तु	७६४
यस्मिन्काले यद्विहितं	७१२
स्थूलतन्तुकृते	८८५
—	६६२,७१३
देवीपुराणम्	
अर्धरात्रे त्वसंपूर्णे	२७५
आत्मतुल्यसुवर्णं	९२४
गोत्रं नाम तु	१४९
दक्षिणामात्र	९२६
धर्मदीपः	
ब्राह्मणस्य पूर्वाशौच	५३०
धर्मशास्त्रसारः	
चान्द्रायणानि कृच्छ्राणि	१०

ऋषिः	पृष्ठम्
धर्मशास्त्रसुधानिधिः	
गोत्रान्मातृ	१३
धर्मसारः	
खगवाताः शूर्पवातो	४६४
गोविप्रयोब्राह्मणा–	४६५
यद्गृहे कलहो	१५७
सालग्रामशिला	३८८
धर्मसारसुधानिधिः	
अलाबुं गृञ्जनं	४३४
त्रिपुंड्रकं सदा	३०३
विप्रं वसन्ते क्षितिपं	८८
धर्मोद्योतः	
अस्नाताशी मलं	४१७
काले साम्यं	४२४
तृतीये पुंसवः	७८
सौराणां रौद्रमंत्राणां	४५६
धारेश्वरः	५११
धूर्तस्वामी	६८४
धौम्यः	
पितरो यत्र पूज्यन्ते	७४९
ब्रह्मौदने च	४४९,९१५
नन्दिकेश्वरः	
यः प्रयच्छेद्गवां	३९२
नन्दिपुराणम्	
विष्णुः पितास्य	६६३
नन्दिसूरिः	
नूत्नोपवीतविन्यासे	२३५
वामहस्तस्थदर्भो	२३२
नन्दिसूरिस्मृतिः	
स्नानखादनपानेषु	२३६
नागरखण्डम्	
आमन्त्रयेद्यतीन्	७६७
आषाढ्याः पञ्चमे	७४६

ऋषिः	पृष्ठम्
उपवासप्रभावेन	८५२
ऊरुजस्तु सुरां	८८४
एवं हिरण्यगर्भस्य	९२५
चण्डालवत्पशून्	८९०
नभो नाथ नभस्यो	७३२
ब्रह्मा सदस्यः	९२७
ये वै कटकुटीरस्था	८८९
वर्णत्रयाद्वा	८९५
नारदः	
१२।५–६	१३३
१२।७	१२३
१३।२०–२३	१४०
१२।२६	१३६
१२।३३	१३९
१२।४६	१३९
१२।७३–७५	८६४,८८७
१२।९७	१३९
१३।१०–१३	१३४
१३।२४	१३८
१३।३१	१३८
१३।३२	१३७
अन्तर्दशाहे	५३३,६३५
अयने विषुवे	३७
अविद्याग्रहणात्	११५
अष्टाब्दादधिकां	८४७
अपराह्णद्वय	७३९
आपत्स्वपि हि	६३
इंदुक्षयेऽर्के	८४५
उदयात् प्राक्	८३९
उद्वाहिताऽपि	१३९
एकादशी द्वादशी	८४४
एकादशीसमं	८३७,८३८
केदारे तप्तकृच्छ्रं	८८५
क्षयाहस्य तिथिः	७१२
गुरौ तु सिंहराशिस्थे	१४७
चण्डालीं तु द्विजः	८८८
चतस्रो घटिकाः	२४७

ऋषिः	पृष्ठम्
जननात्सप्तमे	५०२
जन्ममासे च	१४७
तण्डुलांश्च तिलान्	९१६
तृतीयां मातृपक्षाच्च	१३०
दर्शं च पूर्णमासं	७१३
दीर्घकुत्सित	१२४
द्यूतं पुराणशुश्रूषा	११६
धनमूलाः क्रियाः	५५
धिग्जन्माचार	५
नष्टेन्दुपर्वकालः	७२४
नोपोष्या दशमी	८४३
पितृकार्ये तु	७०४
पुस्तकप्रत्ययाधीतं	३०
पूर्वेद्युश्चापरेद्युः	७७८
प्राणो वायुः	३२४
बृहस्पतिर्मनुर्दक्षः	३८५
ब्राह्मणाय यदुद्दिष्टं	४८
भर्त्तुराधिक्यभावेन	७२०
मंत्रं विना तु	६२६
मध्यान्हे त्रिमुहूर्तं	७११
महादेव विरूपाक्ष	३५२
मृत्यनन्तरतो	६३३
यदि दैवात्तु	८४३
यस्यां तिथौ मृतिः	६९९
यो वै यतीन्	७६७
योऽहेरिव गणाद्भीतः	११६
राज्ञ एव तु	९१९
लेखनीं बन्धसूत्रं	८८५
लोकेऽस्मिन्मंगला–	३६६
विप्राणां वपुराश्रित्य	३८४
विवाहास्त्वष्टधा	१४४
वेदे तु पौरुषं	३८४
शुक्ला वा यदि	८४६
शुभकृत्पुत्रिको	१४६
श्राद्धं दद्यात्	७७१
श्वशूद्रपतितां	३४०
षंढस्य पुत्रहीनस्य	१५
संक्रान्तिरहितो	७२५

ऋषिः	पृष्ठम्
नारदः	
संगवस्पृक्	७४०
संत्यज्य सप्तमं	७११
संपूर्णैकादशी	८४०,८४१
संपूर्णैकादशी यत्र	८४०
सुवर्णमानं यस्मिन्	८८४
सूनोर्मापरि	४३
सौचिको वस्त्रसन्धानी	८९०
स्त्रीशूद्रपूजितं	३९०
स्नात्वा दग्ध्वा पुनः	५९६
हस्तहीनस्तु	३०
हीनाङ्गमधिका	१२५
नारदीयम्	
अक्षारलवणाः	८४९
अग्न्यभावे तु	६८५
अल्पायामपि	८४७
ऊर्ध्वपुंड्रं यः	२९४
एकादश्याः कला	८४७
कलावेधेऽपि	८३९
तिथिनक्षत्रसंयोगे	८३६
तृतीयैकादशी	८५१
तैलाभ्यंगं महाराज	
दर्शं च पौर्णमासं	८५४
नष्टाग्निर्दूरभार्यश्च	६८८
स्वकर्मत्यागिनो	२९९
हरिपादोदकं	५४९
—	८३८
नारदीयपुराणम्	
द्वे तु शुक्ले	७६१
पारणे मरणे	७१३
पित्र्ये मूलं तिथेः	७१३
शैवान् पाशुपतान्	३०६
संप्राप्ते माघमासे	२८२
नारदीयसंहिता	
अर्धरात्रियुता	८५२
नारायणः	
अचालयित्वा	८१८
आमंत्रितस्तु यः	७७९
आसत्येनोद्धृयं	३४४
उपवीती बद्धशिखः	२४७
केतनं कारयित्वा	७८०
प्राङ्मुखोदङ्मुखो	३१५
यद्द्रव्यं यत्पवित्रं	८०३
वारुणीभिः आदित्यम्	३४४
सभार्यस्तु शुचिः	३९६
स्पृष्ट्वा चाभिप्लुता	३१९
नारायणीयम्	
ओंकारेण सह	२२६
नारायणीयवृत्तिः	
—	९३०
नारायणोपनिषद्	
अथ पुरुषो ह	१७
न कर्मणा न	१७५
— ३ टीप १८ टीप ४० टीप	
निगमः	
अनुज्ञातो गृह्यान्	८२०
अपहतां इति	७९६
अवश्यमर्थयेत्	८०७
कृष्णपक्षेऽष्टमी	८३१
तुष्णीं भुंजीरन्	८०९
नान्नपानादिकं	८०८
पूर्वविद्धासु	८२८
मांसापूपफले-	८०९
युग्माग्नियुग	८२६
यो जीवति पितॄणां	७२१
यो वा जीवति	७४२
शुक्लपक्षेऽष्टमी	८३१
षष्ठ्यष्टमी	८५१
सर्वप्रकारवेधो	८३९
निरुक्तम्	
१।८	२९
१।१८	३१७
निरुक्तभाष्यम्	
यद्ब्रह्म नित्यं	३२७
नृसिंहः	
कन्यां कुंभगते	६३४
कन्या कुंभगते	६६६
नृसिंहपुराणम्	
गंगा च यमुना	२८८
गंगा यमुना	५२३
पौरुषेण तू सूक्तेन	३०५
भिक्षां च भिक्षवे	४१०
पतञ्जलिः	
अविद्वांसः प्रत्यभि	११२
पद्धतिः	
अथ द्वादशाहे	६६५
अन्तर्दशाहे संप्राप्ते	६१२
ऊर्ध्वपुंड्रं त्रिपुंड्रं	३०९
एकमुद्दिश्य	६४९
त्रिरात्रं च व्रतं	२७७
नन्दां भद्रां कलितिथिम्	६३४
पूर्वभागेऽथवा	६४५
मलमासे निपतिते	३३
मातापित्रोर्द्विजः	५९२
श्राद्धे च शावक्षौरे	५८७
षष्ठ्यष्टमी प्रतिपद्	५९५
सत्पविंशदिनात्	६५५
पद्धतिग्रंथः	
—	३४
पद्मपुराणम्	
सांगान्यश्चतुरो	७६८
परमहंसोपनिषद्	
असौ स्वपुत्र	१८६
सौवर्णादीनां	१९३
पराशरः	
१।२०	८
१।२१	८
१।२३	११,८७०,
१।२५	११,८९७,
१।२९	११

ऋषिः	पृष्ठम्
पराशरः	
१।३०–३१	११
१।३४	१३
१।३७	६२
१।३९–४०	४११
१।४३–४५,	४१०
१।४४–४७	४१०
१।४६	४१०,४११
१।५६।५७,५९	६६
१।६०	६६
१।६१	६६
१।६२	६६
२।१–२	६२
२।४–५	६३
२।६	६३
२।७	६४
२।८	६१
२।९	६३
२।१३	६३
३।३	-७७
३।५–६	५१८
३।१०–११	४९७
३।१२	४८५
३।१३।३०–३३	५६३
३।१४	४९०,५२२,६३२
३।१६	५०८
३।३५	५३०
३।४५–४७	५४६
३।४८	५४१
३।४९–५२	
४।१–४	९१९
४।८	८९८
४।१३–१४	१५९
४।१४	७५,८९२
४।२०	१५३
४।२०–२१	९०३
५।१–९	९०४
५।१०	८८८
६।१	१२
पराशरः	
६।३	४, ८७७
६।७	४३२
६।१६	८७४
६।१७	८७४
६।१८	४४२
६।१८–२०	८७४
६।२३	८८१
६।२४	४७०,८८१
६।२६	८८१
६।२७	८८१
६।२८	८८१
६।३२	४७२
६।३४–३५	४७२
६।३७–४०	४७२
६।४१–४२	४७२
६।४३।४५	४७२
६।४५–४६	४७४
६।५०	५५०
६।५१	५५०
६।५२	५५१
६।६०–६१	५५१
६।६२	४३३
६।६३,	४२५
६।६४	४२५,५५१
६।६६–६७	४३२
६।६७–६८	४३२
६।६९	४३२
७।५	८८५
७।११	२७१
७।१३–१६	२७८
७।१७	२७७
७।१७–१९	७४
७।१९	८९०
७।२०	२७९
७।२१–२२	२६८
७।२३	४६७
७।२४–२५, २७	४६८
७।३०	४७०
पराशरः	
७।३१	४७०
७।३२	४७०
७।३३	२६८
७।३६–३७	४७५
८।११	८७०
८।१२	८६८
८।१२–१४	८७०
८।१५	३
८।१५–३४	८६९
८।२२	८७०
८।२८	२९
८।३५	८७०
८।३७	८७०
८।४८	९४१
९।१	८७६
९।२	८७६
९।३	८७६
९।४	८७६
९।११	८७६
९।१७	८७६
९।२०	८७६
९।३२	८७६
९।४६	८७६
१०।२	९४०
१०।३	९४१
१०।१०–११	८८६
१०।१३–१४	८८७
१०।१५	८९१
१०।१६	८९२
१०।१८	४७३
१०।१८–२३	८९६
१०।२०	८७५,८९५
१०।२३	८७५
१०।२४	८९७
१०।२५–२६	८९४
१०।२७	८७९
१०।२८	८८०
१०।३२	८९५

ऋषिः	पृष्ठम्
पराशरः	
१०।३३	८९५
१०।३४	८९६,८९५
१०।३५	८९६,८९५
१०।३६–४२	८९६
११।१	८८०
११।४–५	४४६, ९०७
११।८–९	४२७
११।१०	८८२
११।१०–११	४३४
११।१४	४४६
११।१५–१७	४४८
११।१८, १९	४४६
११।२०–२३	४४७
११।२४–२६	४४७
११।२७–३७	९४१
११।३८–४२	४४७
११।४३	९०६
११।४९	८९९
११।५०	८९९
११।५१	८९९
११।५२	९३७
११।५३	९३१
१२।१	२६५
१२।२–३	८८०
१२।९–११	२८९
१२।१६	२२९
१२।२०	२७१
१२।२२	८०, ४८०
१२।२३	२७१
१२।२४	२७०
१२।२५	२६५
१२।२६	२६९
१२।२७	२७१
१२।३२	६९
१२।४१	२५७
१२।४३	८९८
१२।४७	२६६
१२।५४	९०६

ऋषिः	पृष्ठम्
पराशरः	
१२।५५	५५४
१२।५६–५७	९४३
१२।५७	८९२
१२।५८	८७१
१२।५९–६३	८७१
१२।६४	८७१
१२।६४–६६	८७१
१२।६७	८८०
१२।६९–७०	८८३
१२।७१	८९८
१२।७२	९३१
१३।५०–५२	८९३
१९।५–८	९१८
२१।१५।१	४४७
अग्निकार्यपरिभ्रष्टाः	५२
अग्निना भस्मना	४२७
अग्नौ करिष्य	८०२
अतिथिं तत्र	४१३
अधिमासमृतानां	७२८
अपृष्ट्वा चैव	८४८
अभावे तु सपिण्डानां	५६६
अर्धभुक्ते तु यो	४२९
अवधूनोति यः	२२९
अवृता ह्यन	९७,४११
असमर्थोऽन्न	७५६
आ चतुर्थात् भवेत्	४९१
आत्मानं वा वियुञ्जीत	७७०
आमं वा यदि	४४५
आयसेन तु	४३०
आवाहनक्रिया	६४९
आहिताग्निर्द्विजः	५७४
ऊढायाः पुनरुद्वाहो	१३
एकपादं चरेत्	८७५
एकपिण्डास्तु दायादाः	४९५
ऋतौ तु गर्भ	२६५
कामं क्रोधं तथा	१८७
कालोऽग्निः कर्म मृद्	४६७

ऋषिः	पृष्ठम्
पराशरः	
कृतं त्रेता द्वापरं	११
कृत्वा तु शौचं प्रक्षाल्य	२२०
ग्रामैकरात्र	२०१
क्षत्रियस्तु दशाहेन	४९५
गजस्य चतुरङ्गस्य	८७७
गोवाटे वा	८७५
गृहीत्वा दक्षिणां	९०१
चंडालखात	४७४
जातदन्तेऽनुजाते	५०९
ज्ञात्वा विप्रः सकृत्	८९१
ज्येष्ठो भ्राता यदा	२३
ततः प्रक्षाल्य	४२२
तत्र परमहंसा	१८५
तस्मिन्नाचमनं	२६९
तिस्रः कोट्यर्धं	१६१
दरिद्रं व्याधितं	१५६
दिनत्रयेण शुध्यंति	४९६
दुर्भिक्षे राष्ट्रसंभ्रान्तौ	४८६
द्वादशैव तु	१५२
द्वा इमौ पुरुषौ	१७५
धर्मविघ्नकरीं (माधवीय)	१५१
नदी वेगेन शुध्येत	४७३
निवापेन पितॄन्	१६५
परिव्रज्या तु	१७३
पातके तु सहस्रं	८६०
पापं प्रख्यापयेत्	८७०
पिण्डं प्रदीयते	६०२
पितुर्गतस्य देवत्वम्	६६१
पितृव्यपुत्रः	२३
पुण्यतीर्थेनार्द्रशिरः	५५०
पुत्रः पौत्रः प्रपौत्रो वा	५६०
पुनर्दाहक्रियाः	६१७
पूर्वाः क्रिया मध्यमाश्च	५६२
प्रभासादीनि तीर्थानि	२३६
बाले देशान्तरस्थे	८८७
बालैर्नकुल	४३२
ब्राह्मणानां प्रसूतौ	५००
भास्करस्य करैः	२७०

ऋषिः	पृष्ठम्
पराशरः	
भुञ्जानेषु तु	८६४
मद्यमांसरतं	४४६
मर्त्यबुद्धिर्गुरौ	३९५
मातृष्वसृगमे	८८७
मासः कन्यागते	७३२
मुखजो यस्तु	९३०
मृतसूतकमध्ये	२७८
मृते भर्त्तरि	१६१
यतीनामातुराणां	२०१
यदि गर्भो विपद्येत	४९१
यदि गेहे न	२७१
यदि पत्न्यां प्रसूतायां	५००
यस्तु वेदमधीयानः	९६
यस्य छत्रं हयः	४१४
यातुधानप्रियो	७३२
युक्तिछलेन	५१
रजकश्चर्मकारश्च	८८९
रजसा शुध्यते	४७५
रविणा लंघितो मासः	७२३
विण्मूत्रभक्ष्य	११८
वृकश्वानशृगाला	२६९
वैतानं प्रक्षिपेदप्सु	४८९
व्यालग्राही यथा	१६१
शूद्रालये वा	९०८
शूद्राहृतैस्तु नाचामेत्	२२४
सदाचारस्य विप्रस्य	४४५
सन्ध्या स्नानं	३१२
सव्यादंसाद्भ्रष्टपटं	२५३
सीरखातप्रपातोयं	४७४
सुतृप्तैस्तैरनु	८९६
सूतकं मातुरेव	५०१
सौरालाभे ततः	७०५
स्नाने नैमित्तिके	२७८
होमदेवार्चनाद्यासु	२५३
—	१३, १४६, २६६, ४९७, ५०८, ५५४, ८९७, ९१९
पाञ्चरात्रम्	
एकांतिनो महाभागा	२९६
पाणिनीयस्मृतिः	
८।२।८३	११२
पाण्ड्यकुलोदयः	
स्थापिते सदसि	१०
पाद्मम्	
अन्तरात्मा भवेत्	६६४
अस्थ्नां कृत्वाऽथ	६०९
आचम्य भस्मना	३०७
आपो नारायणो देवः	२८२
ऊर्ध्वपुंड्रविहीनं	३०८
ऊर्ध्वपुंड्रस्य माहात्म्यं	२९४
एष मोहं सृजाम्याशु	२९७
कपालकेशभस्मास्थि	३०६
गृहे यस्य सदा	२९४
ततः स्वयं तु	४४०
तिलपूर्णं ताम्रपात्रं	४५
तीर्थे तु ब्राह्मणं	७५९
देवालयसमीपस्थान्	२८०
धरामभ्यर्चितां	९२९
न जीवन्तमिति	७२१
नैवेद्यपात्रं	३८८
पयसा पाचयेत्	७८४
पितुरेव पितुः	७१८
प्रेतयोनिगतानां	८३३
बाणलिंगे स्वयं भूते	४४०
मद्भक्तः शंकरद्वेषी	३१०
मध्यान्हव्यापिनी	८२८
मातुर्मृताहे संप्राप्ते	७२१
यस्यांतकाले	५४९
संक्रान्त्यामुपवासेन	८४५
सामिदादिहुतानां	२९५
हिरण्यगर्भं	९२५
श्रौतं वैखानसं	२९५
पारस्करः	
१।१४।१।२	७८
१।१७।१	८१
१।१७।४	८२
२।५।१६–१८	९४
३।१०	६०३
३।१०।१६	४९६
अन्तः सूतके	५०३
अस्थिसंचयनाद्	५४३
आशौचे वर्तमाने	५३७, ६२८
आहिताग्नेस्तु दहनात्	५३८, ६२७
उपनीतस्य पूर्णाघम्	५१८
एतैरारब्धपिण्डस्य	६२३
गर्भे यदि विपत्तिः	५०५
गायत्रीं त्रिः	८०६
गृहीत्वा प्रेतपाषाणं	६०३
चतुर्थेऽह्नि	६०७
जीवन् जातो यदि	५०३
तेऽपि कुर्युस्तु	६१८
दत्तोऽपि न	५२२
दत्वा गन्धादि	८०१
द्विजातिः सूतिका या	४९३
द्विजाते सूत्रिका या	५०१
न ब्राह्मणेन कर्त्तव्यं	५६७
नाभिकृन्तनतः	५०६
निषेककाले	७५५
पुत्रस्यासंनिधाने	६१६
पुत्रो भ्राताऽथ शिष्यो	६१८
प्रथमे दिवसे देयाः	५९९
ब्राह्मणे दशपिण्डास्तु	६०१
या सपत्नीसुता	५२८
संकल्प्य पितृदेवेभ्यः	८०७
सीमन्तोन्नयने	७५५
हिरण्यं विश्वेभ्यो	८१४
पारस्कर गृह्यसूत्रम्	
२।६।३२	२५३
पाराशरः (see **पराशर** above)	
१।३३	१३
तंत्रनिष्ठः शिवे	२९६

ऋषिः पृष्ठम्

पाराशरः
भस्मना वेदमंत्रेण ३०४
मृदं मंत्रेणाभिमंत्र्य २९५
विनिवर्त्य यदा ५४३
श्रुतिभ्रष्टः स्मृतिप्रोक्त २९८
श्रौतधर्मैक ३०५
षड्रात्रं स्यात् ४९५
सपिण्डता तु ४९७

पाराशरोपपुराणम्
श्रौतं लिंगं २९५

पारिजातः
अग्नौ च गच्छन् २१३
अन्वष्टकासु ७१९
अपवित्रेण ३०७
ईषन्नत्रः प्रभाते ३२०
चण्डालादिहते ६६४
तर्जन्यंगुष्ठयोरग्रं २३३
तृणराजसमुत्पन्नैः २४३
दूरे साग्निः पतिः ५७४
नान्तः प्रक्षालयेत् ७९२
पितुर्नं नाम ६७४
पित्रोः श्राद्धे समायाते ७१८
पुत्रो दूरगतः ५७५
मासिकान्यसमा- ६५५
सदाचारेण देवत्वं ७
हस्ते हुतं तु ६४९,६८६

पिङ्गलः
जात उभयोः कृते ५०३

पितामहः
अकृत्वा वपनं यस्तु २९५
अत्रिर्भृगुश्च ३२४
अमावास्या व्यतीपात ७३६,७४५
अयाचित २००
आयाविवत्यनु ३२६
उभाभ्यां तोयमादाय ३१९
एकादश्यां दिनक्षय ८४५
एतत् ज्ञात्वा तु ५१८
एवं जप्त्वा यथाशक्ति ३४३

ऋषिः पृष्ठम्

ॐ भूर्विन्यस्य ३३१
गायत्र्यास्तु त्रयः ३३४
चतुरश्रं ब्राह्मणस्य ४१८
दैवे कर्मणि पित्र्ये ७०२
द्वापारादियुगे २०३
नक्षत्रज्योतिरारभ्य ३१०
नैवेद्यं तुलसी ३९०
पद्ममुद्रा सौरभेयी ३३३
पाणिना जलमादाय ३२०
पात्राद्वा जलमादाय ३७७
प्रणवव्याहृती ३३८
प्रणवस्य ऋषिः ३२४
बहूदकः स १८४
मित्रस्येति तृचस्येह ३४४
य एतन्नाभिजानाति ९१
शूद्राज्येऽपि १०
सविता देवता ३२६
सूर्यश्चेत्यनुवाकेन ३१७
सोमयागादि ७३२
हंसस्तृतीयो १८४
— ३४४

पितृगाथा
अपिनः स कुले ३८०
एष्टव्या बहवः ६४६
कुलेऽस्माकं स ७५१

पितृमेधसारः
अग्नेग्निमथ ५८१
अथोदकुम्भ ६००
अष्टकास्वष्टौ ७८४
आदित्याभिमुखः ५८३
आनुपूर्व्यात् यथावृद्धं ५८४
आसमाप्तेः प्राचीन ७९३
आसुरादिविवाहे ६८१
उद्धृत्यावोक्ष्य ५८२
एकोत्तरवृद्धिश्राद्ध ६९१
कादलीजाति ७८२
कृते दशाहकृत्ये ६१९
कृत्स्नस्कन्दने ७९८

ऋषिः पृष्ठम्

तच्चैतदेके ६५८
चांद्रात् सौराति ७२६
जीवपितृकस्य ७२१
तत्तन्मासवृद्धौ ७२९
दशाहान्तस्त्र्यह ५९९
दाहकस्तु स्वदेयं ६९७
दूरभार्ये प्रेते ५७७
द्वादशाद्यदिवसे ५९९
न द्वादशाहादौ ६९०
नित्यदार्शिकाभ्यां ६९४
नैकश्राद्धद्वयम् ६९४
पत्न्यादीनामन्येषां ६४०
पित्रोर्मृताब्दे ५८८
पित्रोस्तु पञ्चदशात् ६३१
पुंसः स्त्रिया वा ६७९
प्रथमषष्ठ ६५५
प्राङ्मुखावुद ७९४
प्रारब्धे केनचित् ६२४
भुक्तशिष्टमन्नं ६५०
मातृमृताहे ७१८
मृतिजन्मनोर्दशाहे ५९२
यदि प्रेतकृत्य ६३२
यदि श्मशानाग्निः ६११
यद्यग्निप्रेभ्यो ७५६
यद्यनेकेषान् ६३९
योषितस्तु स्नात्वा ५८५
विधिवत्संस्कारे ६२६
श्वश्र्वादिसापिण्ड्येऽपि ७१९
संकटेष्वयुग्माहेषु ५९८
संघातानुमृत्योः ६३७
सर्ववर्णानां मृताहात् ६४८
साग्निः कर्ता द्वादशाह ६६९
सिंहान्तं कृष्णपक्षस्य ७४६
सौरमास्येक ७०५
स्नात्वा शक्तितो ६४२
हिरण्यकलशान्न ६३८
हुतशेषमिश्रैः ६७७
— ५७८,५७९,५८७,५९१, ५९४,६१४,६२०,६४१,७२६, ७४९,७९३.

ऋषिः पृष्ठम्

पिप्पलादशाखा

सशिखं वपनं १८५

पुराणम्

अतसी तुलसी ४३९
अश्वथ्यभावे पलाशोऽथ: ५३७,६२९
आमं ददातु ७५६
आसने चासनं ७१५
उपमूलं सकृत् ७८८
चतुर्दश्यष्टमी २८३
जपेद्दार्यंतु ७१७
तप्यमानास्तप- ८०४
तिथिनक्षत्रवारेषु २८५
दक्षिणं चरणं विप्रः ७७६
दिने दिने तु ११९
देवालये तु परितः २१४
धर्मो मित्रं प्रमीतस्य ४६६
पादशौचं विना ७८७
पितरौ चेन्मृतौ ६२१
पितृपक्षं प्रतीक्षन्ते ७४७
प्रातिवासरिको ८१९
प्रापणेन महाविष्णोः ४४०
यज्ञोपवीतं दातव्यं ७९१
यथा व्रतस्थोऽपि ५५९
ये कुर्वन्ति मही- ७२३
वांशं करीरं ७८४
विष्णुपूजाविहीनस्य ३९१
संबंधिनस्तथा ७७०
सूतके तु नरः ५४७
सेतौ कवेरकन्याया २५७
हुत्वावशिष्ट ८०२

पुराणसारम्

अपि वा मातरं ८६५
पापं यदि कृतं १६३

पुराणान्तरम्

ईशानविष्णु ८०६
ऊर्ध्वपुंड्रं त्रिशूलं २९६

ऋषिः पृष्ठम्

दिनत्रयमृते ८४४
वेदमूलतया ३००

पुरुषार्थबोधः

विभूतिधारणविधिं ३०५

पुलस्त्यः

अयनद्वितये ७६१,७३०
ईषद्धौतं नवं २५२
एकादश्यां न ८३८
कामः कामप्रदः ३५०
कुटीचको बहूदश्च ६६३
कृत्वा तर्पणमेवं २५०
तेन द्रव्याण्यशेषाणि ३५३
दध्यादीनां विकाराणां ३८७
दुर्मृतः सुमृतो वापि ६३७
पानसद्राक्ष ८८०
पुष्पजातिषु ३८७
पुष्ये च जन्मनक्षत्रे २८०
भोजनं तु न ४३१
मुन्यन्नं ब्राह्मणस्य ७८३
संध्यामिष्टिं ३१४,४७८
सूतके च नरः ८४८
सूतके मृतके ३१४

पूर्णसंग्रहः

एवं च भोजनं ६८२
ग्रहणे चैव गंगायां ८०
महालयादिषु ७५१
-- १२९,७१०

पैठिनसिः

अकृतचूडानां ५१०
अग्निरंगुष्ठतः २२६
अथ दत्तकृत ६८१
अथ दत्तक्रीत १२९
अनभिमत उत्क्रान्ते ५३९
अनूदकमूत्रपुरीष २१२
अपसव्यं ततः ३७६
अपुत्रायां मृतायां ६७०
अर्वाक्सपिण्डीकरणात् ६५२

ऋषिः पृष्ठम्

अलाभे विप्रकन्यायाः १३३
असमानार्षेयां १२५
आद्यन्तावेव ६१२
आहिताग्निश्चेत् ५३८,५३९,६२७
उद्वहेत सगोत्रां १२७
एकादशेऽह्नि ६३६,६४७
एकोद्दिष्टं हि ६६०
काकोलूकस्पर्शने २६७
गृहं गत्वा स्थिता ६०५
जनौ सपिण्डाः ४९९
ततो ब्राह्मणहस्तेषु ७९९
तृणपर्णोदके २४४
त्रीनतीत्य मातृतः १२८
त्रिमधुत्रिसु ७७६
दक्षिणामुखस्त्रीन् ५९८
दत्तक्रीतकृत्रिम ५२१
दत्ता कन्या ५१६
दशरात्रे व्यतीते ६१९,६२०
ध्रुवो धर्मश्च ३७८
नित्यानि तु निवर्तेरन् ४७९
पंचमी सप्तमी चैव ८२५
पक्षद्वयेऽपि ८२७
पायसेन षण्मासानि ७८३
पितरौ चेन्मृतौ ५२३
पितृपाकात् ८१९
पितृपाकात् समुद्धृत्य ४०७
पितृमातृष्वसृ १२७
प्रतिकृतिं कुशमयीं २८६
प्रबलीकृतधर्मस्य ३५६
प्रशस्तशुद्धपात्रेषु ४१९
प्रेतं मनसा ५९७
प्रोषितभ्रातृमरणे ५३६,६२२,६२३
ब्राह्मणान्सप्त ७७७
भार्या भर्तुर्व्रतं ८४८
मलमासमृतानां ७३१
मातृष्वसृतत्सुत ५२७
मृतानुगमनं १६२
मौंजी मेखला ९५

ऋषिः	पृष्ठम्
पैठीनसिः	
युग्मान्देवे यथाशक्तिः	७७७
वसवः पितरो	७९३
विद्या तपोधिकानां	७९५
विभक्तैस्तु पृथक्	७१४
विवाहकाले यज्ञेषु	४८१
वृंताकनाळिका	४३४
शूद्रयाजकः	९०१
श्राद्धं निर्वर्त्य	४०७,८१९
श्रौतस्मार्तक्रियाः	७३२
षण्मासिकाब्दिक	६५३
षोडशांशं स लभते	२८६
संक्रान्तिरहिते	७३३
सपिंडीकरणं पुत्रः	६६८, ६८३
सपिण्डीकरणात्	६५८
सर्वपापप्रसक्तो	३५२
सर्वपापप्रसक्तोऽपि	९३३
सव्ये पाणौ शेषा	२२६
सूतके सावित्र्यांजलिं	४७८
सूतके सावित्र्या	३१४
सूतिकां पुत्रजननीं	४९३
सौवर्णं राजतं	४२०
स्त्रीमुखं रतिसंसर्गे	४७५
स्वशाखाध्ययनं	३६९
—	१२८, ४०७, ४१९, ५०१, ५२३, ६२०, ७३१,
पैङ्गवः	
गर्भस्थे प्रेते	५१०
जात उभयोः	५०४
प्रचेताः	
अनुष्णाभिरफेनाभि	२२३
अपरिज्ञाते अमावास्यायां	६३२
अपरिज्ञातेमृंताहे	६३२
अप्रदाक्षिणम्	७९९
अमीमांसा बर्हिः	७
अलाबुताम्रपात्रं	२२४
असंस्कृतानां भूमौ	६०१
आपोशानं प्रदायाथ	८०६

ऋषिः	पृष्ठम्
प्रचेताः	
आपोशनकरा	८०६
ईषद्धौतं नवं	९४,७९०
उदकं पिंडदानं च	६१६
एकादशी विवृद्धा	८३८,८४३
एकादशेऽन्हि	६६९
एकैकस्य तु	७९८
एकोद्दिष्टं यते	६६३
ओं कुरुष्वेत्य	८०१
कृतापसव्यः	७७६
कृष्णमाषास्तिलाः	७८१
गोदानं षोडशे	११९
गोभूतिलहिरण्याज्य	५५२
गोशकृन्मृन्मयं	४१९
ज्ञातयः सप्तमात्	६१६
ताम्बूलाभ्यञ्जने	४१९
तृप्तिं बुध्वाऽन्न	८११
तैलमुद्वर्त्तनं	७८७
त्रिगुणं प्रदक्षिणा	९५
त्रीण्येवोदपात्राणि	७९८
दंतच्छेदं हस्तपानं	८१०
दक्षिणाग्राश्च दर्भाः	६०१
दर्भाश्चैवासने	७९५
दिने दिनेऽञ्जलीन्	५९८
न जपेत्पैतृकं	७५५
नदीकूलं ततो	५९७
न नग्नं तु दहेत्	५८३
न स्पृशेद्वाम	८०९
नान्तर्वाससा बहिर्वाससा	२२३
नावाहनाग्नौ	४०२
नाहरेदेकजाति	३५३
पीत्वापोशान	८०९
पूर्वाण्हे दैविकं	७५४
प्रथमेऽहन्यमावास्या	६१३
प्रथमे पितृपात्रे	७९९
बर्हिस्तु प्राक्कूलेषु	७५६
भुक्तवत्सु ततो	८१८
मातृष्वसामातुलयो	५२५

ऋषिः	पृष्ठम्
प्रचेताः	
मृन्मये पर्णपृष्ठे वा	४२०
मौंजीबन्धदिने	९८
यज्ञीयवृक्ष	७९८
यः सायं वैश्व–	४१३
ये अग्निदग्धेति	८१२
वपनं कृत्वा	५९७,६१६
वस्त्रांतरितसंस्पर्शः	२६६
विहिते च वृषोत्सर्गे	६४६
वृक्षारोहण	६६२
वैश्वानरेण यत्किंचित्	३५३
शिरःप्रभृति	७९७
श्राद्धभुक् प्रातर्	७८०
षोडशानीह सर्वाणि	६५३
संगृह्याभ्युक्षणं	३५३
सर्वं प्रकृतं	८०४
सवर्णं प्रेषयेत्	७७६
सार्षपं गन्धतैलं	२८५
सूतिका सर्ववर्णानां	४९३
स्त्रीशूद्रश्वपचश्चैव	७९
स्नानं प्रेतस्य	५८०
स्यादन्वपरि	७७८
हारीतमुद्र--	७८३
—	७३१
प्रजापतिः	
अग्निहोत्रफला	२१
अत्याहृतेषु दारेषु	५२१
अभिगच्छति	८९६
अष्टोत्तरशतं	३४२
अस्नात्वा तु	९०९
आशौचे तु	८०
आशौचे तु समुत्पन्ने	५३३
उदक्यायाः करेणान्नं	४२८
उपक्रम्यावशिष्टस्य	२३५
क्षौमं वासः प्रशंसन्ति	२५२
गोमयात् द्विगुणं	९४२
ग्रासमात्रं भवेत्	४०५
चतुर्दश्यामुपोष्याथ	९४२

ऋषिः	पृष्ठम्
प्रजापतिः	
जलपूर्णं तथा	९१३
जले निधाय	९०९
तच्छवं केवलं	९२०
दाहाद्यैकादशा-	६६९
द्विवर्षात्प्राक्	१३६
नवश्राद्धं दशाहान्तं	६६१
पालाशं पद्मपात्रं	९४२
पुत्रं गृहीत्वा	१०३
प्रमादात्कुर्वतां	३४१
प्रसूतिका तु	२७७
ब्राह्मैरानंत्यमाप्नोति	३४३
वैश्वदेवं बलिहृतिं	३९७
शूद्राणां द्वादशाहे	६६६
शद्धधानस्य भोक्तव्यं	४४१
सपिण्डीकरणं	६६३
स्वधर्मस्य परित्यागी	५१
—	५२४
प्रत्यवायस्मृतिः	
अग्निकार्यपरिभ्रष्टः	३७२
प्रदीपिका	
जले मध्ये यदा	२५०
निशायां तु	३५८
संहतांगुलिना तोयं	२२१
प्रपञ्चसारः	
काननवृत्त	३२२
प्रभासखण्डम्	
सा शुद्धा स्यात्	७१५
प्रयोगक्रमः	
पादौ हस्तौ च	३२०
प्रयोगपारिजातः	
ऊनानां नापकर्षः	६५७
न विवाहोपनयने	९९
प्राङ्मुख उपवीती	२४८
प्रयोगसारः	
पितुरेव पितुः	७१८

ऋषिः	पृष्ठम्
मातुलस्य पितृव्यस्य	५८९
यो भुक्त्वा पीठाद्	८१३
प्रल्हादसंहिता	
शरीरं दह्यते यस्य	५८३
फलहः	
शिरः प्रावृत्य कण्ठं	२२३
बह्वृचम्	
अपत्नीको	२५
बह्वृचपरिशिष्टम्	
अथ पुत्रान्	१७९
अथ सक्तून्	१७८
अथास्मै नाम	१८२
अथास्य शिरसि	१८२
अन्तर्धाय तृणैः	१९६
जननाद्दशरात्रे	८१
धीपूर्वं रेत	९१९
पतत्यसौ ध्रुवं	२०८
पवित्रं विष्णुनैवेद्यं	३९०
प्राङ्मुखस्तिष्ठन्	१७९
मुमुक्षुरात्म	१७६
—	१९३
बह्वृचब्राह्मणम्	
द्वादशमासाः पंचर्तवः	७००
पर्वण्यपत्यिपर	३५५
—	४८
बादरायणः	
चण्डालोदकसर्पाद्यैः	४९०
पार्श्वयोः संस्थितौ	१४६ ५५७
बार्हस्पत्यम्	
मातुलानां पितृव्याणां	५८९
यस्मिन्मासेन संक्रान्तिः	७२५
बृहत्प्रचेताः	
मुहूर्तं जीवितो	५०५
एतमेव प्रव्राजिनो	१७६

ऋषिः	पृष्ठम्
बृहद्यमः	
उत्पलत्रयकंदं	४३५
मधुमांसंच च योऽश्नीयात्	४४९
मधु मांसं तु	९१४
माता वा भगिनी	४२६
मासिकादिषु	४४९
मासिकादिषु यो	९१४
बृहद्याज्ञवल्क्यः	
कामादपि च	८८०
बृहद्वसिष्ठः	
एकादशी तथा	८३१
द्वादशी घटिका	८३८
द्वितीया पंचमी	८२६
द्वितीया पंचमी चैव	८५०
बृहद्विष्णुः	
अभोज्यानां च	८६६
ब्रह्महत्यां कृत्वा	९३४
पितुर्मरणमारभ्य	६७५
ब्राह्मणो ब्राह्मणोच्छिष्ट	४३१
संस्कृत्य वन्हौ	५८५
बृहन्निरुक्तः	
पाद्यं चैव	७९२
बृहन्मनुः	
आषाढीमवधीं	३८१,७४६
एकादशेऽन्हि	६४८
चत्वारीमानि कर्माणि	२०९
जीवन् जातो यदि	५०५
दशाहाभ्यन्तरे	५०३,५०५
देशनामनदी	५२३
यस्यामस्तं रविः	७०९
रेवत्यादिषु ऋक्षेषु	७४८
—	५०५
बृहस्पतिः	
१५।३	४७

ऋषिः	पृष्ठम्
बृहस्पतिः	
अंत्यत्रिभागः	६६६
अकृते प्राप्तकाले	६६६
अग्न्यगारे गवां	४२६
अज्ञातो हि मृताहः	६३१
अतीतान्न स्मरेत्	१७४
अतोयं सात्विकं	४३
अधो वायुसमुत्सर्गे	२३६
अन्तर्दशाहे दर्शः	६१४
अन्यदेशगता	८१७
अन्यदेशे मृतं	५३४
अभावे स्नातकानां	७६८
अमावास्या कलामात्रं	७४१
अयने विंशतिः	३७४
अरण्येऽनुदके रात्रौ	२४०
अवकीर्णिव्रतं	९८
आशौचे वर्त्तमाने	५३६
उद्वाह्यते दाक्षिणात्यैः	१३०
उपकाराय यो	४६५
उपवीती ततो	७७६
ऋतुकालाभिगमनं	७४
ऋषिं छंदो	३२६
एकशय्यासनं	८९८
एकस्मिन्दिवसे	१०६
एकादशाहे यच्छ्राद्धं	६४७
एकादशेऽह्नि	६२४
एकैकमथ वा	७७७
एवं दंडादिभिः	१०४
कांक्षंति पितरः	६४६
कार्पासिकं सदा	९०
कुसीदं कृषिवाणिज्यं	६२
कृते यद्वद्धर्मः	१३
कृष्णपक्षः शुभः	६३४
क्रतुर्दक्षो वसुः	७९३
खादितार्धं पुनः	४२५
गर्भाधानमृतौ	७८
गौडीं माध्वीं	८७९
च चार्वाक्तर्पणात्	३६७
चतुर्थीगणनाथस्य	८३१

ऋषिः	पृष्ठम्
बृहस्पतिः	
जन्मतः पंचमं	५०२
जातमात्रे मृते	५०३, ५१०
जाते मृते मृते	५०३
ज्ञातयो बान्धवाः	८१४
तां निशां ब्रह्मचारी	८२०
तीर्थे विवाहे	२८०
त्रिंशद्वर्षो दशाब्दां	१२५
त्रिरात्रेण विशुध्येत	५१८
त्र्यहं मातामहा–	५२५
दशाहेन सपिण्डास्तु	४९६,५१८
दानं यज्ञः सतां	३
दिनमासौ न विज्ञातौ	६३२
दिवा निद्रां परान्नं	८५०
द्वादशाहादि	६६५
द्वौ शुक्लौ द्वौ	७१२
न तीर्थवासी	१९०
नवमे वाससां	६०६
नवश्राद्धस्य	४३१
नष्टे शौचे	४११
नित्यनैमित्तिके	७३३
नियोगमुक्त्वा	१०२
नैष्ठिकानां वनस्थानां	४८१
नोच्छिष्टं ग्राहयेत्	४२७
पंचशाद्दिवसात्	८३
पतितांत्यश्वपाकैश्च	२७८
परे वा बंधुवर्गे	७३
पर्णपृष्ठे न भुञ्जीयात्	४३०
पाणिग्रहणका	६८१
पादौ शुची ब्राह्मणानां	४७५
पितुर्गृहे तु	१३६
पित्रोर्मृतौ तदारभ्य	५९३
पीत्वा प्रमादतो	८८०
पौत्रश्च पुत्रिकापुत्रः	५६१
प्रख्यातदोषः	९३२
प्रचरन्नन्नपानेषु	२४०
प्रमीतस्य पितुः	५६१, ५६७
प्रस्थधान्यचतुःषष्ठे	३६२

ऋषिः	पृष्ठम्
बृहस्पतिः	
बध्वासनं नियम्या	३२३
बन्धान्मोक्ष	२०५
बह्वीनामेकपत्नीनां	५६५
बाले वा यदि	७३४
ब्राह्मणस्याजिनं	९४
भक्ष्यभोज्यगुणान्	८०४
भाजनेषु च	८१८
भिन्नोदराणां	५२२
भुञ्जानस्य तु	२१९
मध्यान्हाद्या त्वया	७३९
महानयन्तरं	५२३
मातापित्रोर्मृति	५५३
मार्जारमूषकस्पर्शे	४२९
मार्जालमूषिकस्पर्शे	२६८
मासिकाब्दिक	७०४
मासे संवत्सरे	७०३
य एवं वेत्ति	८२२
यथा विद्या यथा	४६५
यदा मासो तु	६३१
यद्येकं भोजयेत्	७६५
यस्तैः सह सपिण्डोऽपि	५४०
यस्य न श्रूयते	६३०
यो हि हित्वा	९०६
वायव्यं गोरज	२९१
विवाहोत्सव	४८४
विषोद्बन्धनशस्त्रेण	४८९
विषोद्बन्धन	१२०
विहितस्यानु–	८५९
शस्त्रेणाभिमुखो	४८७
शान्तिं कृत्वा	३४
शावाशौचं तु	५००
शिल्पिनः कारवो	४८६
शुक्रवर्गा विवर्ज्याः	५८७
शौर्यवीर्यार्थं	४
श्रोत्रिये चैव	४९
श्वशूद्रपतितांश्चैव	२३६
संसारमेव	१७३
सद्यो गृहीत	१५९

ऋषिः	पृष्ठम्
बृहस्पतिः	
सन्ध्याऽग्निकार्ये	१२०
सपिण्डीकरणं पित्रोः	६२१
समभ्यर्च्यर्योद्-	८१७
सायंप्रातस्तनौ	३५९
सायमाद्यन्तयोः	८५०
सूतके मृतके	३५६
सूतके मृतके चैव	४७९
सूर्यादिवासरे	७६४
स्त्रियाः शुक्रे	७५
स्वेन भर्त्रा समं	७१९
बृहस्पतिस्मृतिः	
वृद्धो च माता	५६
बैजावापः	
कीर्त्वा पितॄणां	७९८
खादिरौदुम्बर	७८९
तस्योपरि कुशान्	८००
बोधायनः	
१।१।५	३
१।१।१८-१९	४२६
१।१।२३-२४	१३१
१।१।२९	९०४
१।१।२९-३१	१०
१।१।३०	९०४
१।२।१-६	११९
१।२।६	१९
१।२।१३-१४	९५
१।२।१६	९३
१।२।२७-२८	१११
१।२।३१-३४	१०८
१।२।४२-४३	३१
१।२।४६	११०
१।२।४९-५०	३१
१।२।५२-५४	९८
१।३।२-६	१२३
१।४।२३	४७४
१।५।९	२१५
१।५, ९, १०, १४, १५,	२२३

ऋषिः	पृष्ठम्
बौधायनः	
१।५।११-१२	२२५
१।५।१७-२२	१३१
१।५।१८	२२२
१।५।१९	२३८
१।५।२०	२३९
१।५।२२-२४	२३९
१।५।४६	२२०
१।५।४६,४८	४६७
१।५।४७	२१८
१।५।५८-५९	४७१
१।५।६८	२१२
१।५।७४	२३६
१।५।७५	३४१
१।५।८२	१९
१।५।८५	६४
१।५।८७	४६६
१।५।८९	२३८
१।५।९०	४९४,५३३
१।५।९१	४९६
१।५।१०२	६५
१।५।१०४	५३०
१।५।१०५-१०६	४९९
१।५।११६	५२५
१।५।१२३	९०५
१।५।१२६	९०४
१।५।१४३	३२
१।६।३३-३४	४७०
१।६।४७	४६८
१।११।१-१७	१४२
१।११।९	३७८
१।१४।१	६०७,६०८
२।१।७	८९९
२।१।२८-२९	८२
२।१।२९-३१	८९२
२।१।३८	९०२
२।१।३९	१५३,९०३
२।१।४१	८६३,९००
२।१।४२	९००

ऋषिः	पृष्ठम्
बौधायनः	
२।१।४३-४४	८६६
२।१।४४-४५	९००
२।१।४६-४८	९०१
२।१।४९-५१	१५४
२।१।५३	६१
२।१।६२	२८,१५४
२।२।१	१६६
२।२।२९-३२	१२२
२।२।५९	१५१
२।३।११-१८	४०९
२।३।२८-३१	४६४
२।३।४०	४६४
२।३।६०	४१९
२।३।६१-६२	४०९
२।४।५-१०	३३७
२।४।५	३४४
२।४।७	३३९
२।४।९-१०	३४४
२।४।१६	३१४
२।४।१८	९३२
२।४।१९-२४	३४४
२।५।५-६	८७
२।५।१४	३३८
२।६।२९	१६७
२।६।५८-५९	१६
२।७।२-४,६	४२१
२।७।३	४२४
२।७।५	४३२
२।७।७-८	४२५
२।७।९-१४	४५२
२।७।१२-१४	४२४
२।७।१९	४०९
२।७।२४	४१७
२।८	४००
२।८।१९।१६	४२५
२।१०।२-७	१७२
२।१०।१४-२१	१७८
२।१०।४६-५०	२०३

ऋषिः	पृष्ठम्
बौधायनः	
२।१०।५४	२००
२।१४	३८६
२।१७	३९२
३।२।६	१८०
३।३।५९	२५३
३।९।४	९३४
३।१०।११	३४८
३।१७।११	६४७
३।३५	१७२
४।१।१२	१३५,१३६
४।१।१३–१६	१३६
४।३।२–५	२२७
४।३।६	३५५
४।४।७	३४८
४।५।६	९३५
४।५।७	९३६
४।५।८	९३७
४।५।९	९३७
४।५।१०	९३७
४।५।११	९३७
४।६।४, ३	३४९
९।५।१०	२६२
१६।३४–३८	४६८
२३–६१	४४
अङ्कुरं च प्रतिसरं	१४९
अंगारान् भस्म	३९८
अग्नये स्वाहेत्यादि	४०३
अघमर्षणं देव	९३५
अचोदितेन पाकेन	२४
अत ऊर्ध्वं पतित	८९
अथ गर्भिण्यन्तर्वत्नी	६४४
अथ चेदौपासना	१४९
अथ निवीति	५८१
अथ ब्राह्मे मुहूर्ते	१७९
अथ यज्ञोपवीतं	१७९
अथ यदि यदि	५७६
अथ यद्युपनय–	१४९
अथ यद्युप	६१०

ऋषिः	पृष्ठम्
बौधायनः	
अथ वृषोत्सर्जनम्	६४५
अथ संवत्सरे पूर्णे	६६४
अथाग्नयोऽथ	५८१
अथाग्नेर्विपत्ति	३६५
अथातो द्विजातीनां	३०१
अथातो विभूति–	३०२
अथादित्यम्	३६७
अथान्तर्वेदि	१८०
अथास्य भार्याः	५८१,५८४
अथैकोद्दिष्टे	६४९
अथैकोद्दिष्टेषु	६४९
अथोपनीतस्य	११७
अनाश्रमी चतुरः	१७७
अन्नाभावे द्विजाभावे	७९
अपराण्हद्वय	७१२
अपोवगाहनं स्नानं	२५४
अप्रत्तासु च	५१६
अमत्या वारुणीं	११७
अयुग्मान् ब्राह्मणान्	७९५
अयोवर्णोदके	२५८
अरणिं कृष्णमार्जारं	३६७
अष्टम्यां च	२८३
अस्थीनि यद्यलब्धानि	५७४
आचमने चाग्नि	७९३
आत्मारूढो निमज्जेद्वा	३६५
आददीत मृदोऽपश्च	२१९
आदिशेत्प्रथमे	६८०
आमश्राद्धे तु	४४९
आम्रं च शृंगिबेरं	४३९
आऽर्वाक् त्रिरात्राद्य	३६४
आसनं शयनं	४७६
आहिताग्निमग्निभिः	५६८
इष्टापूर्तानि कर्माणि	३५१
इष्टेरलं प्रतिपदो	८५७
उक्तयोः कालयोः	३५८
उत्तरापोशना	८१२
उत्थाय नेत्रे प्रक्षाल्य	२४०
उदपानोदके	१०

ऋषिः	पृष्ठम्
बौधायनः	
उपरिष्टान्माघ्याः	७४५
उपलिप्ते समस्थाने	४१८
उपाकर्मेत्यन्ये	६९२
उषःकाले समुत्थाय	१८७
ऋतुस्नातां तु	७६
ऋतौ न गच्छेत्	८९३
एक एव ऋषिः	१२६
एकाग्नेस्त्रिविधं	३६४
एकोद्दिष्टान्त एव	६१८,६५०
एतस्मिन् काले	५८१,५८८
एष एव व्यञ्जनानां	४००
ओदनं तु	४३८
कक्कुटाण्डप्रमाणं	६०२
कमण्डलुर्द्विजातीनां	१३९
कार्तिक्यां वैशाख्यां	७२८
कुटीचकस्तु	१८३
कृत्वा तु पञ्च	५४४
केशानोप्य ततः	५९७
कोकिलस्य यथा	६८०
क्षत्रविट्शूद्र	४९५
क्षुरकर्मपूर्वकत्वात्	५८६
घटिकैकाप्य	७३९
चतुर्दशी चतुर्यामे	८५६
चतुर्दशी तु संपूर्णा	८५६
चतुर्वेदस्य चत्वारि	९२
चत्वारि वेदव्रतानि	११७
जघन्ये रात्रिपर्याये	४५८
जलावगाहनं	२९०
जातकर्मादिसंस्कारे	१००
ततो मध्यान्हसमये	२५४
तदभावे रहस्य	७६९
तेषां ग्रहणे	३९९
त्रिमधुस्त्रिणा	७६६
त्रिवर्षाद्युदकं	५१३
त्रिषु वर्णेषु	७२
त्रीणि पितॄणां	७९८
दध्याज्यतण्डुल	५८३

ऋषिः	पृष्ठम्
बौधायनः	
दारूचितिं	५८३
दैवं चैवार्षकं	१७७
द्वितीया त्रिमुहूर्ता	८५७
द्व्यार्षेयसंनिपाते	१२६
धर्मशास्त्ररथा	३
न च माता न च	५६६
न जीवपितृकः	३७८
निशि कृष्णे च	५५६
पंथा देयो ब्राह्मणाय	१०७
पादेन पादमाक्रम्य	८०९
प्रदक्षिणं तु	७१४,७१५
पुरुषसंमितं	६०९
प्रजामुत्पादयेत्	५५७
प्रणवव्याहृति	४८४
प्रवासं गच्छतो	४०५
प्राचीनावीतिना	५७९
प्रायश्चित्तैरप	४७४
प्रेताहुत्यनंतरं	५८०
फालकृष्टेनले	२१३
बालान् मृतान्	५१३
ब्रह्मचारिणः शवकर्मणो	५५८
ब्राह्मणकन्यकया	९२
ब्राह्मणक्षत्रिय	२०१
भर्तृहिते यतमानाः	१५९
भवति भिक्षां देहि	९५
भिक्षां न दद्युः	२०२
भिक्षापात्र	२०२
भूमौ दर्भास्तृतायां	५५२
भोजने हवने	२३७
मंत्रेणैव द्विराचम्य	४१८
मधुत्रयेण	६७६
मध्यान्हव्यापिनी	८२८
मध्यान्हात्परतो	७३९,८५८
मरणादिविषमेषु	६०५
मातृदुहितृस्नुषा	९३५
मिथ्याभिशंसने	८९९
मुण्डः काषायवासा	१८४
मेरुकांचन	४५५

ऋषिः	पृष्ठम्
बौधायनः	
म्रियमाणस्य चेत्	५७७
यज्ञोपवीतं प्रति	९१
यत्तु द्वादशाहे	६६७
यदा चतुर्दशीयामं	८५७
यद्यनध्याय	३९
यवीयान्यवीयान्	५८४
यस्तु पाणिगृहीताया	७६
यस्मिन्काले विरोधो	१४८
यस्मिन्नग्नौ कर्म	३०४
यस्य नित्यानि	२१
योनिगोत्रसंबंधानां	७७०
रजस्वला तु भुञ्जाना	२७८
रजस्वला तु संस्पृष्टा	२७८
वत्सरान्ते ततः	६६४
वपनं मेखलादण्डौ	६३३
वर्धमानस्य पक्षस्य	८२६
वर्षे वर्षे तु	६६०
वाग्दत्ता मनोदत्ता	१३७
विधवाविधुराग्नौ	५६९
विधिर्योऽनुष्ठितः	१३९
विरमेद् ब्राह्मणे	३४०
विश्वेदेवाः शृणुत	७९७
वृक्षमूलिको	१९८
वेदविद्याव्रत	६०५
वेदानां किंचित्	४९
व्रीहीणां वा यवानां	३६२
शर्मान्तं ब्राह्मणस्योक्तं	६८२
शौचे यत्नः सदा कार्या	२२०
शोणितशुक्रसंभवो	१०३
श्रान्तोऽदृष्टपूर्वः	४१२
श्वः करिष्यामीति	७८७
संक्रमेऽग्निद्विजाभावे	७१७
संवत्सरे मातरि	६०७
संवत्सरे सपिण्डीकरणं	६६४
संस्कार्यश्च पिता	५६६
सचैला दक्षिणाभिमुखाः	५८५
सन्ध्ययोरुभयोः	३४१
सप्तम्यां रविवारे	३७७

ऋषिः	पृष्ठम्
बौधायनः	
सर्वत एव सहसा	५८४
सर्वत्र एव सहसा	५८२
सर्वसंगनिवृत्तस्य	५४६
सर्वोपकरणैः	६७७
सायंप्रातः संध्ययोः	३७
सूतकं मातुरेव	५०१
स्वसूत्रेऽविद्यमाने	६५०
स्वाध्यायिनं कुले	८७४
हंसः कमण्डलुं	१८४
—	२५,१०१,१०३,१८५, ३०१, ३१३,३४८, ४४१, ४७५, ५६९, ५७३,५७६,५७८,५९१, ६२७, ६६०,७०१, ८०१, ८०६, ८१२, ८५६, ८५८.
बौधायनगृह्यम्	
—	१४९,१५०
बौधायनगृह्यसूत्रम्	
२।६।१७–२१	३५४
२।२२।१–२	३९४
२।२२।८	३९४
५।४	२५३
बौधायनगृह्यशेषसूत्रम्	
५।४	२६२
बौधायनधर्मसूत्रम्	
२।४।१–२	३१७
२।५।१६–३१	३७८
२।१०।४२,४४,५०	२००
बौधायनस्मृतिः	
सद्येन गो शकृत्	३०२
ब्रह्मकैवर्तम्	
अर्धरात्रे तु	८३९
गयाशीर्षे यदा	७५९
चतस्रो घटिकाः	८४०
तिर्यग्भस्ममृदं	३०७
त्रयोदशी प्रकसंख्या	८५०

ऋषिः	पृष्ठम्
ब्रह्मकैवर्तम्	
धार्यं भस्म	३०५
प्रतिपत्पञ्चमी	८२६
प्राप्ते हरिदिने	८४९
ब्रह्माण्डघट	९२६
भूतविद्धा न कर्त्तव्या	८५३
मुण्डान् जटिल	७६८
रंभाख्यां वर्जयित्वा	८३१
सर्वपापयुतो	९३४
सर्वेष्वेवोप	८३५
हिरण्याश्वं द्विजो	९२८
हिरण्याश्वरथं	९२८
ब्रह्मपुराणम्	
अनाहिताग्नेर्मरणात्	५३९
अनाहिताग्नेः	६०८
अर्घ्यैः पुष्पैश्च	७९९
अलाभे ध्यानि	७६७
अस्थीनि माता	६०९
उपमर्दे लक्षगुणं	२७३
गोदावरी भीमरथी	२८७
ग्रामाद्बहिः शुचौ	६०१
तप्तमुद्रा त्वंत्यजाय	२९९
दाहाद्यशौचं विज्ञेयं	५३९
दुर्भिक्षे प्राणरक्षार्थं	४८६
नामगोत्रे समुच्चार्य	५९८
प्रतिपद्येक	८२८
प्रेतयोनिगतानां	८३५
ब्राह्मणार्थे गवार्थे	४८७
यद्वा शताञ्जलीन्	५९८
वैशाखशुक्ल	७६१
शृङ्गिदंष्ट्रिनखि	४८७
षण्ढो मूकश्च	७७०
संपूज्य विधिवत्	८४९
सपिण्डता तु	४९८
ब्रह्मरातनम्	
ब्राह्मणस्योर्ध्वपुंड्रं	३०६
ब्रह्मवैवर्तम्	
कावेरीतीरवासी	६०९
महापातकयुक्तोऽपि	३५२
ये पूर्वं पूजिता	४९
स्नानं स्यादुपरागादौ	२७३
ब्रह्मसिद्धान्तः	
अमावास्या परिच्छिन्नो	६९९
चान्द्रमासो ह्यसंक्रान्तौ	७२३
चान्द्रसावन	७०१
चान्द्रः शुक्लादिदर्शान्तः	६९९
चैत्रादर्वाक्	७२६
तिथिरेकगुणा प्रोक्ता	२८४
मासत्रये त्रिंशदूर्ध्वं	७२५
यावान्कालः	२७३
शुद्धा विद्धा दशम्या	८४१
ब्रह्मा	
अथातो दर्शयेत्	३३१
ऋगंते मार्जनं	३१६
कृत्वा चैवाक्षर	३२९
गायत्र्या न परं	३३५
दक्षिणांगुष्ठमारभ्य	३३०
धाराच्युतेन	३१६
नद्यां तीर्थे ह्रदे	३१६
भुवि मूर्ध्नि तथाकाशे	२९१
मंत्रपूतं जलं	३१६
मातर्यपि च वृत्तायां	६७३
संमुखं संहतौ	३३२
चापं गते दिवानाथे	३९१
सेत्वादिपुण्य	९२४
ब्रह्माण्डपुराणम्	
पृ. १७९-पं. १०	२३१
अनापद्यपि	५६
अन्नं पश्येयुः	७८६
अशौचं जायते	२७२
अस्मान् वृणीष्व	७७५
आपोशनं न	८०६
आषाढ्याः पंचमे	७४८
आसनारूढ	७८५
ऊर्ध्वपुंड्रप्रमाणानि	२९३
कर्ता नोपवसेत्	८४९
जपादिकुसुमं	७९०
त्रयाणामाश्रमाणां	६६३
त्रिपुंड्रं शूद्रकल्पानां	३०६
देशे काले च	७५७
नग्नाद्यो न	७८६
नभस्यकृष्णपक्षे	७४६
निराशो नित्यभुक्	८०८
पात्राभावे द्विजः	८४९
प्रक्षाल्य हस्तपात्रादि	८०३
महिषीं वत्ससंयुक्तां	४५
मृत्तिकाचंदनं भस्म	२९५
यतिस्त्रिदण्डी	७८८
शिखिभ्यो धातु	७६७
शुक्लाः सुमनसः	७८९
श्राद्धं करिष्य	७९६
श्राद्धभुग्दक्षिणां	८१४
श्राद्धार्हगुणयोगेऽपि	७७५
श्वेतचन्दन	७९०
सर्वेषामेव	७८६
हविषामथ पक्वानां	७८७
हिरण्यहस्तिनं	९२८
—	२६७
ब्राह्मम्	
अकालमृत्योः	४८०
अनाथं ब्राह्मणं	५४६
अनाथं ब्राह्मणं दग्ध्वा	५६७
अस्थीन्यादाय	६०९
तावद् गृहीत	४८२
प्रमादादेव निःशङ्कं	४८८
ब्राह्मणी क्षत्रिया	५०१
मृते पितरि यस्याथ	६७१
विवाहकाले कन्यायाः	४८३
शौचाशौचं	४९६
ब्राह्मणः	
तमसो वा एष	६९२

ऋषिः	पृष्ठम्
भगवद्गीता	
३।१०–१२	१९
३।३७	३१८
४।२४	३६६
४।३७	१९५
६।२४–२६	१९२
१०।४१	४१४
१३।१०–११	१८९
१७।११–१३	१९
१७।२३	३२७
१७।२५ (२)	५५२
१८।२	१६५
भगवान्	
वर्णानामाश्रमाणां	४
वर्णाश्रमविधिं	१६६
भट्टाचार्यः	
पापक्षयो हि	४७७
भरद्वाजः	
अंगुष्ठादिक	३३१
अज्ञाता यदि वा	१६
अथ यज्ञोपवीतस्य	३४
अथातो व्रतादेश	११७
अथापकृष्णविण्मूत्रं	२१५
अपांक्तेयान्	४४९
अपि वा स्त्री	३५५
अभ्यंगस्नपने	२८२
अलब्धात्मीय	५७८,६२७,६८२
अशक्यः स्याद्यदि	३२३
असपिण्डशवस्य	५४४
अस्पृश्यस्पर्शने	२६६,५८५
आयतं दक्षिणं कृत्वा	२२२
आयात्वित्यनु	३२६
आ सायमाहुति	३५८
उत्तरायण आपूर्य–	११७
उद्धृत्वा भूधरेऽम्भोधिं	२८८
अपस्थाय नमस्कुर्यात्	३४५,३७६
एकाग्निर्द्वादशाहं	३६४
कंडूय पृष्ठतो	१०८,३६५
कर्मावसाने कर्मादौ	५७९
कूर्चेन वा पवित्रेण	२३३
कृष्णांगारचतुर्दश्यां	२५७
क्षौरं च सागरस्नानं	२५७
ग्रन्थियुक्तपवित्रेण	२३१
चण्डालैरन्त्यजैरुक्तौ	२१२
जंघान्तं जानुपर्यन्तम्	२२१
ततः प्रदक्षिणीकृत्य	३२०
तर्पणं देवतादिभ्यः	२२५,२४८
ताम्रपात्राश्ववालैश्च	२२४
दंपत्योरुभयोः	२६
नक्तोद्धृतं तु	७८५
नदीमहानदीस्रोतः	२५६
निराचारस्य	४४५,९०६
निर्मथ्येन पत्नीम्	५६९
निष्ठीवजृंभणे	३४१
पङ्कं सफेनकलुषं	२२२
पादावाजानु वा	७९२
पितॄणामन्न	८०६
पुन्त्यास्त्रिरात्रं	५२४
पूर्वाण्ह एव नान्दी	७५४
प्रक्षाल्य चरणौ	२४०
प्रणवस्य ऋषिः	३२४
प्राङ्मुखश्चरणौ	२९०,३०२
बद्धचूडः कुशकरो	२२९
ब्रह्मयज्ञे विशेषोस्ति	२२७
ब्राह्मणान्सम्यगभ्यर्च्य	५५३
भुक्त्वा अमृता––	४५२
मंत्रं सदैवमुच्चार्य	९१
मलमूत्रं त्यजेद्यस्तु	२१३
महानदीनद	२५५
मातुर्मृताहेसंप्राप्ते	७२१
मुद्राढकीम्	७८४
यदि संगवकाल	७४०
यद्यात्मरण्योर्वा	५७३
यस्मिन्सूत्रे विवाहः	५७८
यावन्तो नियमाः	२४४
यः समानोदकं	६९८
वनस्पतिगते सोमे	७०९
वस्त्रनिष्पीडनं	३८३
वस्त्रोदकमपेक्षन्ते	२४९,२५३
विद्धे पर्वाणि	२५८
विष्णुकांतां शर्मी	३६८
व्यतिपाते वैद्धृतौ	४८
शावे शवगृहं	२६९
षोडशे वर्षेऽस्य	११९
संकल्परहितं कर्म	२६४
सप्तैव व्याहृतीरेताः	३२४
सर्वेषु पाकयज्ञेषु	३९८
सूर्यानुवाकस्याग्नि	३१७
स्नानपानक्षुतस्वाप	२३७
भविष्यत्पुराणम्	
अग्निहोत्रार्थं	८६४
अथापि प्रजापतेः	१६७
अनग्निस्तु यदा	६६८
अरुणोदयकाले	८३९
आदौ कर्कटके सर्वा	२८७
एकादशी दिशा	८४२
एकादश्यामुपवसेत्	८४८
कृत्वा श्राद्धं महाबाहो	४०६
गृहीतविद्यो गुरवे	१७२
जीवमानेन देयं	७४२
तथा व्रतस्थोऽपि सुतः	५६३
दंडं तु वैणवं	१८६
दशकृत्वः पिबेत्	८२०
दिनमेव विजानाति	६३१
नव सप्तविंशां	६०५
पलद्वयं तु प्रसृतिः	४३२
पापानामपि बाहुल्यात्	३०५
पारणं तु त्रयोदश्यां	८४३
पिण्डनिर्वापणं	७५६
प्रत्यक्षमर्चनं	७२१
प्रत्यक्षमर्चनं श्राद्धे	७४२
प्रविश्य भानुः	७११
प्रवृत्ताशौचतंत्रस्तु	६१२

ऋषिः	पृष्ठम्
भविष्यत्पुराणम्	
ब्राह्मणः सर्ववर्णानां	११०
ब्राह्मणातिक्रमो	७७०
भोजनात्किंचिदन्नात्	४२१
मुहूर्तो न दिनं	८२९
मृताहं समतिक्रम्य	७०६
यजमानोऽग्निमान्	६६८
यथा व्रतस्थोऽपि सुतः	५६२
ये त्वादित्यदिने	८२९
व्यतिक्रान्ते न दोषो	७७०
श्रावणी दुर्गनवमी	८३२
षष्ठे षाण्मासिकम्	६५५
सपिण्डीकरणं कुर्यात्	६६४,६६८
सर्वं वा विचरेद्	९६
—	१६८
भविष्योत्तर (पुराणम्)	
आचार्यार्धं तयोः	८२६
कथयामि कुलस्त्रीणां	८५३
दशार्वाङ्नाडिकाः	२७४
दैवे त्वौदयिकी ग्राह्या	८५१
प्रतिवर्षं विधानेन	८३३
मार्गशीर्षे ततो	८२७
मासि भाद्रपदे	८३२
संक्रमस्तु निशीथे	२७५
सुवर्णयाचकानां	४४
भागवतम्	
कोदण्डस्थे सवितरि	३९१
गृहं श्मशानं	३९१
त्रिवक्त्राया उपश्लोकः	२९७
प्रजापतिर्नाम तयोः	५५७
स लिंगानाश्रमान्	१९४
भानुः	
नाभिकण्ठान्तरो-	४७४
—	९०५
भारतम्	
अन्नं पूर्वं	४२१
अश्वत्थसागरौ	२५७
गुणास्तु षणिमत-	४२४

ऋषिः	पृष्ठम्
भारतम्	
जातस्य हि ध्रुवो	६०४
तुलसीपत्रमादाय	३७५
दिने द्विरभिषेकश्च	४०८
पारक्ये भूमिदेशे	७५८
य इच्छत्यूर्ध्व-	४१९
यो मृत्युकाले संप्राप्ते	५५२
सतिलेन ततोऽन्नेन	८१६
स्यादुत्तरायणे	५५३
भारद्वाजः	
अष्टाचत्वारिंशत्	११९
आधाय विधिवत्	२७
आसनं स्वस्तिकं	१५
चण्डालादुदकात्	९१४
जननमरणयोः	३५९
द्वादशाहाति	९२१
बन्धूनां मातुलादीनां	५१६
भार्यासंभोगसमये	७७
भुक्तश्चेत्पार्वण	९१५
यजमानस्यैवा-	५७०
यज्ञोपवीतमाजिनं	९५
यद्यपत्नीकः	२५
यः समानोदकं प्रेतं	५४५
सहस्रपरमां	३३७
स्त्री चैवं भर्तरि	५७२
—	५७०
भारद्वाजगृह्यम्	
प्राणायामशतमा	९२१
भाष्यम्	
अथ चेद्बहुपत्नीको	५७२
भाष्यकारः	
निरूह्योद्वासन	७९३
यदि त्वनेक	५७१
यद्याहिताग्निः	५७०
स्वमूर्ध स्वं सेषुव	५८२
—	३०१, ६०७

ऋषिः	पृष्ठम्
भाष्यान्तरम्	
ब्रह्मशब्देन	५७९
भाष्यार्थसंग्रहकारः	८५५
अन्वाहितिश्चाः	८५५
माध्यन्दिनात्	८५५
भास्करः	
अहन्यहनि	७५२
कालातिपत्तिः	३५८
दश द्वादश	९९
पात्राणां बाहुमात्रे	८१७
भास्करीयम्	
अयनं दक्षिणं	३९१
भृगुः	
अत ऊर्ध्वं प्रवक्ष्यामि	३९३
अशीतिर्यस्य	१६४,८९३
आरनालद्वयं	४३५
उपवीतं बटोरेकं	९१
उपवीतविहीनेन	२९२
एककाले गतासूनां	६९६
एकादश्यष्टमी	८३०
कोटिशो मनुजानां वै	३५१
ग्रस्तावेवास्तमानं	२७३,४५०
त्रिः पीत्वापो	२२६
न रक्तमुल्बणं वासो	२५२
नैकवासा न च	२६४
पंचयज्ञांस्तु	४०६
पित्रोर्मृताब्दे	६४०
ब्राह्मणस्य सितं वस्त्रं	२५१
मेदैस्तु कारवल्यानि	४३९
मंत्रपूतं स्थितं	९१
मध्यंदिनं पितृणां	७४०
मलमासे मृतानां	७३०
माता भ्राता च	६४०
मातामहं मातुलं	५४५,५५८
यत्फलं सोमयागेन	४०५
या समारोहणं	६९६,७२१

ऋषिः	पृष्ठम्
भृगुः	
वृद्धिश्राद्धं तथा	७३२
नैक वृषभैकशतं यत्र	२६४
शावाशौचे समुत्पन्ने	५०२
शावे च सूतके	६००
सदोपवीतिना	९१
सूतकं प्रेतकं	२७८
सूत्रं सलोमकं	९१
सोष्णीषो बद्धपर्यङ्कः	२२३
—	२५३,५१९,५२८,५५४,
भृगूपनिषद्	
९।१।१०	४१६
मञ्जरी	
त्रिवर्षादि दहेत्	५१३
मत्स्यः	
अक्षताभिः सपुष्पाभिः	७९२
आधानं यज्ञकर्मापि	७३४
एकादश्यां तु	८४५
एवं निमन्त्र्य	७७८
कुसंभं बीजपूरं	७८४
गायत्रीजप्य	७६७
गृहद्वारसमीपे	७९१
गृहीत्वास्थीनि	६०९
ततश्च वैश्वदेवान्ते	८१९
दक्षिणं जानुमालभ्य	७७६
दक्षिणां दिशं	८१५
दिनक्षये तु	८४४
नामगोत्रं पितॄणां	७९३
नामं गोत्रं पितॄणां	८२३
पद्मबिल्वार्क	७९०
पुनर्भोजनम्	८२०
ब्रह्मा सदस्पतिश्चैव	९२९
सिंहस्थिते सुरगुरौ	१४७
स्वस्तिवाचनकं	८९४
शिवनेत्रोद्भवं	७८९
मत्स्यपुराणम्	
१७।६८	३७

ऋषिः	पृष्ठम्
मत्सपुराणम्	
पृ. १०८ पं. ११	२३०
अन्नं तु सदधि	७८२
अन्हो मुहूर्ता	७०८,७११
अर्थज्ञो वेदवित्	७६६
आश्वयुक् शुक्ल	७६१
एवं स्नात्वा ततः	२५१
कृतं श्राद्धं	७६१
जाताशौचस्य मध्ये	५३१
ततश्च वैश्वदेवांते	४०६
दर्शे चाहरहः	७३२
नित्यं तावत्प्रवक्ष्यामि	४०२
निमंत्रितास्तु	७७९
पानीयमप्यत्र	३८१
पितृयज्ञं तु निर्वर्त्य	७४१
पुण्यक्षेत्रे पुण्यतीर्थे	९२७
भरणी पितृपक्षे	७४८
भुक्तवत्सु ततस्तेषु	८१२
विश्वान् देवान्	७९७
वैशाखस्य तृतीया	७६१
मदालसा	
तदन्वाचमनार्थाय	८१३
मनुः	
१।७	१६
१।१४–१६	१७
१।६७, ६९	११
१।८३	११
१।८८	१८
१।९०	६६
१।९३–९५	६९
१।९६–९७	७०
१।९९–१००	४८
१।१०३	६
१।१०८	२
१।११०	४
१।१२४	१०७
१।१९६–१९७	११३

ऋषिः	पृष्ठम्
मनुः	
२।१	२
२।५	७
२।६	१
२।९	१६६
२।११	२
२।१२	८१
२।१४	७
२।१५	३५७
२।१६	६
२।१७	८८
२।१७–१८	९
२।१९–२३	९
२।२६	७२,५८०
२।२७	७२
२।२८	४०५
२।२९	७९
२।३०	८१
२।३१	८१
२।३३	८२
२।३४	८२
२।३५	८३,५०९
२।३६	८५,८६
२।३७	८७
२।३८	८८
२।३९	८९
२।४०	८९
२।४१	९३,९४
२।४२–४३	९५
२।४४	९०
२।४५	९३
२।४६–४७	९३
२।४९	९५
२।५०	९५
२।५१	९७
२।५२	४१९
२।५४–५५	४२१
२।५८	२२५

ऋषिः	पृष्ठम्	ऋषिः	पृष्ठम्	ऋषिः	पृष्ठम्
मनुः		**मनुः**		**मनुः**	
२।५९	२२५	२।१२७–१२९	११०	३।१	११८
२।६०	२२५	२।१३०	११०	३।४	१२३
२।६१	२२२	२।१३३	१०५	३।५	१२४
२।६२	२२२	२।१३४	११०	३।६–७	१३२
२।६३	९२	२।१३५	१०६	३।११	१२५
२।६४	९१	२।१३६–१३७	१०६	३।१२–१३	१३३
२।६६	८४	२।१३८–१३९	१०७	३।१४	१३३
२।६७	८४	२।१४०–१४१	१०४	३।१५	१३३
२।७०	३०	२।१४२	१०२	३।१७–१८	१३३
२।७१	१७८	२।१४२	१०४	३।१९	१३४
२।७२	१११	२।१४३	४८१	३।२०–२१	१४०
२।७४	११३	२।१४३–१४५	९६	३।२३–२४	१४१
२।७६–७८	३३४	२।१४६–१४८	१०५	३।२५	१४१
२।८०	३३४	२।१५०–१५६	१०५	३।२७	१४०
२।८१	३१९	२।१५७–१५८	२९	३।४३–४४	१४५
२।८३	३३४	२।१६५	२८	३।४५–४९	७४
२।८५, ८७	३५२	२।१६६	२८	३।४९	७५
२।८६	३३६	२।१६९–१७०	८८	३।५१–५२	१४३
२।९८	१२१	२।१७१–१७२	८६	३।५३	१४२
२।१००	१८७	२।१७१	५५९	३।५४	१४३
२।१०१	३३६,३३७	२।१८१	१२१	३।५५–६२	१४३
२।१०२	३३६	२।१८२	५६५	३।६५	२८
२।१०३	३३६	२।१८५–१८६	९८	३।६७	३९६
२।१०४	३६८	२।१८७	९६,९८	३।६८–७१	३९६
२।१०५	३८	२।१८८	९६	३।७२	४०६
२।१०५–१०६	३७१	२।१८९	७६८	३।७३–७४	३९६
२।१०६	३७२	२।१९१–१९३	११३	३।७६	३६६
२।११६	३०	२।२०५	१११	३।८१	३९६
२।११७	१०८	२।२०८	१०६	३।८०	४०६
२।११८	७६७	२।२०९	११४	३।८२	४०२
२।११९	१०८	२।२१०	१०९,१११	३।८४–८६	३९७
२।१२१	१०८	२।२१९	११४	३।८७–९१	४०१
२।१२२	१०७	२।२२०–२२१	२१०	३।९०	४००
२।१२३	११२	२।२३३–२३७	१०६	३।९२	४०१
२।१२४	३७०	२।२३८	३०	३।९३	४०६
२।१२५	१११	२।२४३–२४४	१२०	३।९४	४०८
२।१२६	११२	२।२४६	१२०	३।९५–९६	४०९

ऋषिः	पृष्ठम्
मनुः	
३।९७, ९८	४११
३।१००	४१६,७६५
३।१०१	४१५
३।१०२–१०३	४१२
३।१०४	४४४,५१५
३।१०५	४१३
३।१०६	४१४
३।१०७	४१४
३।१०८	४०४
३।१०९	४१५
३।११०	४०९
३।१११–११६	४०९
३।११८	४०८
३।११९–१२०	४१५
३।१२१	३९७
३।१२२	७४१
३।१२४	७६५
३।१२७	७३५
३।१२८	७६५
३।१३४–१३५	४११
३।१२५–१२६	७७७
३।१३६	७६५
३।१३८	७७१
३।१३९–१४१	७७१
३।१४४	४११,७७१
३।१४७–१४८	७६९
३।१४९	७६५
३।१५०–१६७	७७२
३।१६७–१७०	७७४
३।१७१	१५३
३।१७१–१७२	७७३
३।१८३	७७५
३।१८३–१८६	७६७
३।१८७	७७७
३।१८८	७७९
३।१८९	७८०
३।१९०	७७९

ऋषिः	पृष्ठम्
मनुः	
३।१९१	७७९
३।२०२	७८८
३।२०५	६७६
३।२०६	७५८
३।२०८	७८८
३।२१०	८०१
३।२११	८०२
३।२१२	६८५,६८६
३।२१५,२१६,२१८	८१५
३।२२०	७४१
३।२२०–२२१	६७१
३।२२३	८०७
३।२२४	८०३
३।२२६	८०४
३।२२६–२२७	७८२
३।२२९–२३०	८०८
३।२३४	७७०,७८८
३।२३६–२३७	८०९
३।२३९–४०	७८६
३।२४३	८०८
३।२४४	८१२
३।२४५	८१०,८१३
३।२४६	८१०
३।२४७–२४८	६५९
३।२६१	८१६
३।२६२–२६३	८१७
३।२६५	४०६
३।२६७	७८२
३।२७१–७२	७८२
३।२७४	७४९
३।२७६	७४७
३।२७७	७६३
३।२७८	७०७,७०९,७६४
३।२७९	५७९,७९४
३।२८०	७०९
३।२८४	८२३
३।२८९	४०८

ऋषिः	पृष्ठम्
मनुः	
३।२९९	७४१
३।३१३	७७५
४।२–३	५९
४।२–६	५९
४।३	३७५
४।९	५९
४।१०	२१
४।११–१२	५९
४।१४	२३५,३५५,४५७
४।२५	३५५
४।२५–२६	२१
४।२८	२२
४।३०	७७५
४।३२	४०९
४।३३–३६	१२२
४।३४	२५२,४२४
४।३५–३६	४५८
४।३७	२१४,४५८
४।४३	४२६
४।४५	२१३
४।४९	२११
४।५०–५१	२१२
४।५३–५४	३६२
४।६०–६१	१०
४।६२	४१७,४२५,४३६
४।६५	४२०
४।७६	४१७
४।८४	५५
४।८५	५५
४।८७, ९१	५५
४।९२	२०६
४।९३	३३७
४।९४	३११
४।९५–९६	३२
४।९७	३५
४।९९	३१
४।१०२–१०३	३६

ऋषिः	पृष्ठम्
मनुः	
४।१०४	३६
४।११४	३५
४।११७	३६
४।१२४	३७
४।१२९	२७०
४।१४४	२३५
४।१४६	३६६
४।१५१	२११
४।१५६–१५८	४
४।१६२	१०६
४।१७८	
४।१८७	५८
४।१८८–१८९	५८
४।१९५–१९६	४१
४।१९७	४१
४।२००	१८६
४।२०१–२०२	२५५
४।२०३	२५३
४।२०५–२०६	४४२
४।२०७,२०९–२२३	४४२
४।२२४–२२६	४४१
४।२३१	४०
४।२३२–२३७	४१
४।२३८–२४०	४१
४।२३८–२४३	४
४।२४७	१३२
४।२५०	५६
४।२५३	५७
४।२५४–२५५	५७
५।४	४३३
५।५	४३३
५।१८	४५१
५।१९	४३४
५।२०	४३५
५।३०	४५२
५।३५	४५१
५।३९–४०	४५१

ऋषिः	पृष्ठम्
मनुः	
५।१४१	४५१
५।१५३–५४	४५१
५।१५८	४९४
५।१५९	५१४,५१७,५१८
५।१६०	१२५,४९६
५।१६१–६२	५००
५।१६२	५१०
५।१६३	५१४
५।१६४	५२५
५।१६५	२७७,४९१
५।१६६	५०७
५।१६७–६९	५०८
५।१६९	५०८
५।१७०	४९६,५२७
५।१७१	५१५
५।१७२	५४७
५।१७३	६०६
५।१७४	५३४
५।१७५	५३४
५।१७६	५३६
५।१७७	४८५,५०७,५३५
५।१७९	५२५
५।१८०	५१७,५२५,५२६
५।१८२	५१८,५२९
५।१८३	५२२
५।१८४	२६४
५।१८५	
५।१८६	२६७
५।१८७	५१९,५२०
५।१८९	४८९
५।१९०	५५८
५।१९१	५८१
५।१९२–९३	४८६
५।१९४	४८७
५।१९५–९६	४८६
५।१९७	४८७
५।१९८	५४८

ऋषिः	पृष्ठम्
मनुः	
५।१००–१०१	५४४
५।१०१–१०२	५१४,६१७
५।१०४	४६७,५४५
५।१०६	४६७
५।१०७	१७५,४७५
५।१०८	४६७
५।११०–१११	४६७
५।११४	४५९,४६८
५।११७	४६९
५।१२२	४७१
५।१२४	४३३
५।१२७	२२४,४७३
५।१२९–१३०	४७५
५।१३१	२१९
५।१३२	४७६
५।१३३	२१७, २१९
५।१३४	२१९
५।१३५–१३६	२१६
५।१३८	६८
५।१४०	२३८
५।१४१	२३८
५।१४२	२३९
५।१४४	९२०
५।१४५	२३६
५।१५४	१५७
५।१५८	१४०
५।१५४	८४७
५।१५६	१६१
५।१६०	१६३
५।१६६, १६७	२४
५।१६७	२६
६।१	१६९
६।६–२३	१६९
६।२५–३०	१७०
६।३१–३२	१७०
६।३३–३४	१७१
६।३५–३७	१७१

ऋषिः	पृष्ठम्
मनुः	
६।४४	१८९
६।४९	१८७
६।५१	१९९
६।५३-५४	२०२
६।५५-५७	१९९
६।५८-६०	१९९
६।७०	३२५
६।७२	२०६
६।७४	१९५
६।८९	१६४
६।९०	१६५
६।९४	१७४
६।९५	३६६
७।१३४	६६
८।७९	६०
८।८१-८२	६०
८।८६-८९	६१
८।९०	६१
८।९२-९३	६१
८।१०३	५४
८।१०६-१०७	९२०
८।११२	५४
८।१४१	६३
८।२२८	१३८
८।३००-३०१	११६
८।३४०	८८६
८।३४२	५९,८८६
८।३४९-३५०	८७४
९।२-१७	१५४
९।४७	१३७
९।५९-६०	१०२
९।८०-८३	१५१
९।८८	१३४
९।८९	१३६
९।९०	१३६
९।९४	१३६
९।९७	१३८
मनुः	
९।९८-१००	१४३
९।९९	१३७
९।१०५	७६
९।१०७	७६
९।१०८	१३४
९।१२५	५५७
९।१२५-१२६	१४६
९।१२६	५५७
९।१२७	१२६
९।१३९	५६२
९।१४१-१४२	१०२
९।१४२	५२१
९।१५५	८९४
९।१५९-१६०	५२०
९।१६६-१७७	१०१
९।१८०	१०१
९।१८०	५६१
९।१८२	१०२
९।१८३	५६५
९।१८६	४९७
९।१८७	१२५
९।१८७-१८९	५६७
९।१९६	५६४
९।३०१-३१९	६४
९।३२६	६६
९।३३४, ३३५	६७
१०।५-६	७०
१०।८	७०
१०।११	७१
१०।२०	७२
१०।४१	४९५
१०।७७	१८
१०।७७-७८	६४
१०।८३-८४	६२
१०।९५	६३
१०।१०२	५६
१०।१०४	४२६
मनुः	
१०।१०९	९२३
१०।१११	५९
११।११६ (?)	५६
११।१०	...
११।२०	३१५
११।२१-१	९३५
११।२४	२२
११।२७	२२
११।३०	२९२,७६९
११।३६-३७	३५५
११।४१	२२
११।४१	९२१
११।४२,४३	२२
११।४४	८५९
११।४५	८६८
११।४५-४७	९०६
११।४८	८६०
११।६८	८६६
११।४६	८६७,८६८
११।४६	८६८
११।५४	८६२,८९७
११।५५	८६४,९२१
११।५६	८६५
११।५७	८६५
११।५८	८६५
११।५९-६६	८६६
११।७२	८७१
११।७४-७५	८७६
११।७६-७९	८७२
११।७६	८७६
११।८७-८८	८६३
१।९०-९१	८७९१
११।९३, ९४, ९५	८७८
११।९७	८८०
११।९९-१०२	८८२
१२।१००	२९
११।१०३-१०७	८८६

ऋषिः	पृष्ठम
मनुः	
११।१०५	८८७
११।१२०, १२२	८९२
११।१२३	१२२,८९२
११।१२५	९३१
११।१२६–१३०	८७३
११।१३१–१३२	८७७
११।१४०	८७७
११।१४८	४३२
११।१५२	४३१
११।१५२	९०७
११।१५३	९०७
११।१५४	८८०
११।१६२–१६९	८८४
११।१६०	९१६
११।१७१–१७२	१२७
११।१७३	८९०
११।१७४	८९२
११।१७६–१७७	८९४
११।१७८–१७९	७०३
११।१८९	१६४
११।१९०	८६७
११।१९१	९०१
११।१९३	४७५
११।१९७	९०१
११।१९८	२९,९०१
११।१९९	९०४
११।२०१	९०३
११।२०२	९२२
११।२०३	३७०
११।२०३	९११
११।२०४–२०५	९००
११।२०६–२०८	८९९
११।२०९	९३१
११।२११	५५०
११।२१२	९३७
११।२१३	९३७
११।२१४	९३७

ऋषिः	पृष्ठम्
मनुः	
११।२१५	९३८
११।२१६–२१७	९४०
११।२२६	९३२
११।२२६–२२९	८६९
११।२४५–४६	९३२
११।२४८	३२५,९३२
११।२५०–२५१	३५०
१२।१०	१८४
१२।६९	८६२
१२।२४–२८	८६०
१२।६०–६८	८६०
१२।७८–८१	८६२
१२।९२	१९८
१२।११०–११३	८६९
१२।११८	१२२
१२।१२४	११६
१२।१३८	८७४
१२।१५१	११८
१२।२४९–२५१	९३४
१२।२९४	९२४
अग्निहोत्रस्य	३५५
अग्निहोत्र्यप	३५६
अज्ञानात्प्राश्य	११८
अनंतरः सपिण्डो यः	५६६
अनर्हते यत्	७२
अनिन्द्यन्भक्षयेत्	४२३
अपुत्राः स्वकुले	७५१
अमुक्तयोरस्त	४५०
अलाभे देवखातानां	२५५
अवरात्तूत्तमात्	७०
असपिण्डक्रियाकर्म	६५०
अस्थीनी परकीयानि	८९०
अस्वर्ग्यं लोकविद्विष्टं	१३१,५१८
आचार्यं स्वमुपाध्यायं	५४५
आदित्यमथ वा	३८४
आदिष्टी नोदकं	५१९
आहिताग्निर्यथा	५६८

ऋषिः	पृष्ठम्
मनुः	
उत्सर्गे प्रथमाध्याये	३५
उपवीती स्त्रियं	७७
उभयत्र दशाहानि	४७८
ऊर्ध्वं नाभेः	२६७
एतदक्षरमेत्यं	३३८
एवं निर्वपणं	४४०
कुत्सिते वामहस्तः	१४
कुर्वन्प्रतिपदि	७६३
कुसीदं कृषिवाणिज्यं	६२
गुरोरप्यवलिप्तस्य	१०६
गृह्णन् गो भू	५६
गोत्रान्तरप्रविष्टानां	५२४
गोरसं चैव सक्तूंश्च	४४६
चतुरो निर्वपेत्	६७२
चतुर्दशैते मन्त्राः	३८१
चन्द्रसूर्यग्रहे	८३०
त्रीण्याहुरति–	४३
दन्तवद्दन्तलग्नेषु	२३८
दर्शे च पौर्णमासं	४७९
दहनं वहनं वापि	५४५
द्विजवादे महाचान्द्रं	८८६
द्वौ देवे पितृकार्ये	७७७
धर्मव्यतिक्रमो	५
नष्टे मृते प्रव्रजिते	१३९
नाद्यादन्तःशवे	५४०
नारं स्पृष्ट्वास्थि	५४७
नित्यं स्नात्वा शुचिः	२६४
निमन्त्रयेत त्र्यवरान्	७१८
नियतो विचरेत्	१८६
पक्षादौ च रवौ	२८३
पतितं पतितेत्युक्त्वा	८९८
पितृगोत्रं कुमारीणां	६८१
पितॄणां तु	७१०
पित्रोरुपरमे स्त्रीणां	५२४
पीत्वाऽपोशन	४३१
पुच्छे बिडालकं	२६८,४२९
पुरोधाः शूद्रवर्णस्य	९०१

ऋषिः	पृष्ठम्
मनुः	
पुष्पालंकारवस्त्राणि	२४४
प्रत्यवान्तरकल्पं	८
बहूनामेककार्याणां	८६२
बह्वृचः खण्डवस्त्रेण	५८०
ब्राह्मणक्षत्रियविशां	१६३
ब्राह्मण्यां सधवायां	७१
मातापित्रोर्दशाहं	४९४
मार्जारश्चैव	२६८
यज्ञार्थं भिक्षितं	२२
यदधीतमविज्ञातं	३१६
यदि पूर्वदिने	७०४
यस्मिन्देशे तु	२१६
यस्य देशं न	१०९
यस्यामस्तं रविः	७१३
यः कामतो	४८८
या ह्यह्व्यापिनी	७१३
येनांगेनावरो वर्णो	६८
राहुदर्शन	२७०
राहुदर्शनसंक्रान्ति	२७६
वटार्काश्वत्थपत्रेषु	४२०
वधे प्राथमिकात्	८७२
वापीकूपतटाकेषु	२१६
विधाय पितृयज्ञांतं	४०३
वीर्यहानिर्यशोहानिः	४३८
वेदश्च वेदमूलानि	२९७
व्याधितस्यार्थं	४१०
शास्त्रसज्जन	१९४
शिष्टाचारस्मृतिः	१३१
शुक्तानि हि	४३६
संध्यारात्र्योर्न	७१७
सव्याहृतिकां	३२३
सुवर्णं चंदनं	३६६
सूर्योपरागे यो	९१०
स्नास्यतो वरुणः	४२३
स्नेहाद्वत्रीं समं	७१९
— १३,२१,४८,७३,८१,१०२, ११२,१२८,१४४,१४६,१७६,	
मनुः	
२०१,३३८,४४१,४९७,५०९, ५१९,५२२,५६०,५६१,७१३, ७४१, ८१२	
मन्त्रः	
आयुर्बलं यशो	२४१
मंत्रदीपिका	
देवस्य सवितुः	३२७
मन्त्रदेवताप्रकाशिका	
आसनमन्त्रस्य	३२२
विष्णुं भास्वत्	३२५
मरीचिः	
अथ हविर्विधिं	३९४
अनग्निश्च प्रवासी	७१४
आदित्यदुहिता	२८८
आब्दिके समनुप्राप्ते	७१५
आशौचान्ते ततः	६३६
उपरागे पितृश्राद्धे	७३७
उपस्पर्शेच्चतुर्थस्तु	२६५
एकाहस्तु सपिण्डानां	५२१
कदलीचूतपनस	४३९
कर्कटे सरितः सर्वा	२८७
कर्पूरकुंकुमो	७९०
कृत्तिकादिषु	७६४
गर्भस्तुल्यां यथा	४९१
गृहप्रवेशगोदान	७३४
गोत्रांतरप्रविष्टानां	५२१
घृताद्वा तिल	७९०
चन्दनागरुणी	७९०
चूडायाः करणे	५१४
तिसृभिश्चातलात्	२१७
दिवाहृतं तु यत्तोयं	२७१
दुर्बोधा वैदिकः	२
द्विपुष्करेषु	६५५
द्विरश्मिमत्यां	३५७
ह्यपराह्णव्यापिनी	७०८,७१३
नग्नश्राद्धं नव	९१४
मरीचिः	
न बहिर्जानुराचामेत्	२२३
पक्षहोमानतो	३५९
पञ्चपर्वसु नन्दासु	९८३
पञ्चमे सप्तमे चैव	१२७
पंडिता ज्ञानिनो	७०६
पुत्रः पौत्रश्च तज्जश्च	५६०,५६१
प्रतिमासं मृताहे	७२९,७३१
प्रथमेऽह्नि तृतीये	६०६
प्रेतं पितृंश्च	७५७
ब्राह्मणो ह्यन्यवर्णस्य	५६७
भूमिष्ठमुद्धृतं	२५५
मात्रैकया द्विपुत्रकौ	५२१
यो विप्रः पापमज्ञात्वा	८८५
लवणे मधुमांसे	४८०
वारिपूर्वं प्रदत्ता	५१५
विधेया देवता पूजा	३८३
विना रूप्यसुवर्णेन	३७७
विप्रे शुक्ला तु	२१६
विषशस्त्रश्वापदादि	६६२
विषशस्त्रश्वापदि	७५०
श्राद्धविघ्ने द्विजातीनां	८११
श्राद्धविघ्ने समुत्पन्ने	६३२,६५४, ७१०,७१६
श्राद्धेषु विकिरं	८१३
श्राद्धेषु विनि–	७९०
श्रोत्रियश्च तटाकादि	९०४
स पवित्रकरः	२९३
सर्पं दृष्ट्वा यथा	५४९
सामान्येन निषेधेऽपि	२८२
सूतके कर्मणां	३१४,४७७
सूतके मृतके	५२०
सूर्यग्रहे तु	९१०
सौवर्णेन च पात्रेण	३७७
स्तेयं वा व्यभिचारो	८९९
स्रावे मातुस्त्रिरात्रं	४९२
हस्तं प्रक्षाल्य	८१३
— ४७८, ४९२, ७१६	

ऋषिः	पृष्ठम्
महाभारतम्	
१२४।६८ (शां. प.)	१
अग्निहोत्रफला	७६
आयुष्कामोऽथ वा	३०३
इतिहासपुराणाभ्यां	२९२
क्रीतान्नं देवनागारे	९०८
गंगास्नानं प्रकुर्वीत	२७१
गृहस्थो ब्रह्मचारी वा	१७२
ज्ञातीनां तु	७४९
तत्रैव चेद्भाद्रपद	७४३
ते तथैव महाराज	३१३
पंचके पंचके वर्षे	७२४
पंचरात्रविदो	२४०
पादाभ्यंगं शिरोभ्यंगं	२८५
ब्राह्मणैः क्षत्रियैः	३९०
महानद्यो देविका	२८७
माघे ह्यर्धोदिते	२८१
यच्चोत्क्रोचादि	७८३
यमोऽथ लोकपालान्	१५६
या मन्वाद्या	७६२
यावद्यावद्भूत्	११
ये च मद्विषया	६०१
राज्ञां पापनिबद्धानां	९२७
विद्या प्रसवतो मित्रं	५५१
श्रवणाश्विध	७४३
श्राद्धकर्मणि भोक्तारो	९१५
सर्वस्वेनापि कर्त्तव्यं	७१७
—	२८९
महोपनिषद्	
एको ह वै	१७
धृतोर्ध्वपुण्ड्रः	२९२
माण्डव्यः	
योनिसंबंध	५२७
शावे च सूतके	५४४,६१७
सपिण्डो वाऽसपिण्डो	६००
सुरापो ब्रह्महा	३५१
माधवीयम्	
अकामकृते	८६७

ऋषिः	पृष्ठम्
माधवीयम्	
अत्यापदि	६२
अत्र सुवर्णशब्दः	८८२
अनतीतद्विवर्षे	५०९
अनस्थिसंचये विप्रो	५४३
अनुज्ञातः कनिष्ठो	२३
अबुद्धिपूर्वसंस्पर्शे	२६५
आचम्य च ततो	३८३
आचार्यं स्वमुपाध्यायं	५४५
आ ब्रह्मस्तंबपर्यंतं	३८०
ऊर्ध्वपुंड्रं त्रिपुंड्रं	३०७
एकोद्दिष्टं त्रिविधं	६६१
एवं यः सर्वं	३८०
कण्ठं शिरोग्रं प्रावृत्य	२२३
कन्यागते सवितरि	७४७
कृते चतुष्पात्	१२
खड्गमौक्तिक	३७७
गुरुवारेऽप्यमायां च	२८०
ग्रामाद्दंडशतं	४७३
चण्डालादिव्यतिरिक्ता	२६५
ज्योतिःशास्त्रप्रसिद्धं	७२४
त एते देवयज्ञ—	४०३
ततो गोदोहमात्रं	४०८
ततो महाव्याहृतिभिः	४२१
तत्सूर्याभिमुख्य	२१२
तिर्यग्यवोदरा	५२३
दशाहीनेन वस्त्रेण	२५९
देवानां होमकर्मणि	७९८
देवांश्चैव पितृंश्चैव	३८०
देशान्तरे स्थितः	६२०
दूष्यं पुरुषं	९२१
ननु केवलपितृ	७४९
नन्वेवं कलौ	१३
नादर्शं चैव	११४
नास्तिकस्त्रिविधः	९२२
नास्तिक्यादथ वा	१९
नित्यं नैमित्तिकं	२४७
नैऋत्यामिषुविक्षेपम्	२११
पितुः पितृष्वसुः	१२७

ऋषिः	पृष्ठम्
माधवीयम्	
पुत्रः कुर्यात्पितुः	६७०
पुनरपो दत्वा	७९१
पूर्वकस्य मुख्यस्य	६९६
पूर्वेऽह्नि रात्रौ	७७६
पौरुषेण तु	३८५
प्रतिपत्प्रभृतिष्वेकां	७४७
प्रदानं यत्र	६५९
प्रागग्रेषु सुरान्	३७६
प्राजापत्यक्रिया	९४३
ब्राह्मणोद्देशेन	८१४
मातरं जननीं	८८६
मासं मासिकं	७१५
यज्ञोपवीतं कुर्वीत	९०
यत्र क्वचनसंस्थानां	३८०
यदा तु विदितं	१८५
यदुच्चनीच	३३९
या तिथिः संक्रमात्	७०५
लेपभाजश्चतुर्थाद्याः	४९६
वाचिकाख्य उपांशुः	३३९
शिवविद्या गुरूणां	३९४
श्रवणाश्विध	७३६
श्राद्धे यज्ञे च नियमे	२४४
होमं च कृत्वा	३६६
—	४,१६२, २२९,२४७,२५९,२६६,२६९, ३१३,३१६,३६७,३७६,४०५, ४३२,४४६,४४९,४९४,४९७, ४९९,५०१,५०५,५०६,५१८, ५३१,५३५,५८५,५८९,६०३, ६०६,६१४,६३६,६४७,६५४, ६६२,६६७,६६८,६७०,६८७, ७१५,७२४,७४५,७४९,७५०, ७८४,७८७,८१२,८१६,८७२, ८७९,८८१,८८७,८९४,८९६, ८९९,९००,९०३,९०५,९१९, ९२४,९३७.
माधवीयपराशरः	
परिभोगात्	१७४

ऋषिः	पृष्ठम्
माधवीयपराशरः	
बहूदकश्च संन्यस्य	१८४
सूर्योदयात्प्राक्	२०९
—	११२
माध्यन्दिनगृह्यम्	
भस्मना ललाटे	३०३
मानवम्	
अतश्च वेदा	२९७
आयुधैः शंखचक्राद्यैः	२९९
ब्राह्मणैश्च पुरा	२९८
वेदप्रस्खलितो	२९८
—	५१९
मानवीयसंहिताम्	
प्रातःकाले च	३०५
मानवोपपुराण	
ऊर्ध्वपुंड्रं च शूलं	२९५
त्रिपुंड्रधारिणं	३०४
मार्कण्डेयः	
२७।२३–२४	७६४
अग्न्यंबुहीने	५०२
अज्ञात्वा पुष्पिणी	९११
अनाहिताग्निः	६८५
अन्यायोपार्जित–	८२२
अप्रत्तायां मृतायां	५१५
अमंत्रेण कृतं	२९३
अयुते वा सहस्रे	९०८
अर्कद्विपर्वरात्रौ	५११
अश्नीयात्तन्मना	४२४
अह्नः षट्सु	७८७
आपत्स्वपि सदा	९२६
आपाङ्क्तेयस्य	९२२
आम्रेक्षुखण्डताम्बूल	२३९
आम्रेक्षुखण्ड	३८९
आहिताग्निस्तु	६८४
उच्छिष्टेन तु संस्पृष्टो	२३९
उत्तरापोशनात्	४५२
उत्तरायणगे सूर्ये	५५३
मार्कण्डेयः	
उदङ्मुखः प्राङ्मुखो	२४३
उदङ्मुखानां	८१२
एकभक्तेन नक्तेन	८४८
एवं गृहबलिं	४०१
कन्यागते सवितरि	७४५
कालिन्दी गौतमी	२८८
कुशपाणिः सदा तिष्ठेत्	२२९
कुशवृस्यां	३२७
कैवर्तस्य स्त्रियं	८८९
क्रीतलब्धाशनाः	६०६
खरमारुह्य विप्रो	९०३
गोधूमैरिक्षु	७८३
ग्रहणं तु भवेत्	४५०
चतुर्भिर्दर्भै	२३०
चन्दनागरु	७९०
चंद्रस्य यदि वा	४५०
चौले कर्माणि	९१५
जात्यश्च सर्वा	७८९
ततः शनैर्बलिं	४०२
ततो नित्यक्रियां	४०६
तन्नक्षत्रमहोरात्रं	८५८
तस्याग्रतोऽथ	८३
दशाहं ब्राह्मणः	४७८
दासी मानधनं	८९१
देवतापुरतस्तस्य	८३
द्वादश्यामुपवासेन	८४६,८५०
द्विमासं सरितः सर्वा	२८७
धृत्वाग्रजो गोसहस्रं	९२७
नारी खल्वननु–	१५४
नारी खल्वनुज्ञाता	८४७
नित्यक्रियां पितॄणां	८१८
पक्वान्नं तु समादाय	२४०
पात्राभावे तृषार्तस्तु	८८१
पिता पितामहश्चैव	१२९
पितॄणां नामगोत्रेण	८१३
पितॄनुद्दिश्य	४०२
पुराणानां नरेन्द्राणां	२५५
पूजयित्वाऽतिथीन्	४१०
मार्कण्डेयः	
पूजयित्वा हरिं	८५
प्रतीचि दक्षिणाशां	२४३
प्रातर्भुक्त्वा च यतवाक्	२४३
प्राप्ते तु पंचमे	८४
फलैर्मांसेन	९३८
ब्रह्माण्डं पुण्यतीर्थेषु	९२६
ब्राह्मादिषु विवाहेषु	१२९,६८१
भुक्त्वा तु ब्राह्मणाशौचे	४४८
भूयोऽप्याचम्य	४५४
मार्जारं नकुलं	८८५
मेषसंक्रमणे भानोः	७०२
यवव्रीहिस	७८१
यस्य संवत्सरात्	६९०
ये चापमृत्युना	८१३
यो विप्रः पश्च	८९०
रक्षणीया तथा	५०२
रौरवेऽपुण्यनिलये	४५२
वटासनार्कखदिर	२४२
वर्ज्या जन्तुमया	७५८
विशिष्टब्राह्मण	७६२
विश्वचक्रं द्विजो	९२९
वैश्वदेवं देवतार्चा	९११
शाल्मल्यश्वत्थभव्यानां	२४२
शिवे निवेदितं	९१२
शीतमुष्णोदकात्	२७२
शुक्लपक्षे तु	७११
संपूर्णैकादशी	८४२
सख्युरुत्सुज्य	५६७
सपवित्रेण हस्तेन	२३१
सम्यगाचम्य तोयेन	२३६
सर्वकालं तिलैः स्नानं	२८०
सर्वे कण्टकिनः	२४२
सर्वेषामपि	३३५
सालग्रामशिलां	९१८
सौचिकस्य स्त्रियं	८९०
सौरभेय्यः सर्वहिताः	४०८
स्त्रीणामुपनयन	५१६
स्नातः स्नातान्	७९१
—	७१२,८१८

ऋषिः	पृष्ठम्
मार्कण्डेयपुराणम्	
२७।१९–२४	५६३
तुलाप्रतिग्रहीता	९२५
पुत्रो भ्राता च तत्पुत्रः	५६३
प्रतिगृह्य द्विजो	९२६
प्रधानं संपरित्यज्य	९२५
बाहुजादेकगुणितं	९२६
मिताक्षरा	
—	८५
मुण्डकम्	
तद्विज्ञानार्थं	१८१
मुण्डकोपनिषद्	
३–१–१०	५५०
तमेवैकं जनिथा.	१९५
पाणिपात्रम्	२०१
मुद्गलः	
देवेषु द्वावेको	७५५
मृकुण्डुः	
पंच चूडा आंगीरसो	८३
मेधातिथिः	
न स्नायादुत्सवे	२७०
बह्वन्नं पच्यते	२०४
भिक्षाटनं जपो	१८८
यावन्न स्युस्त्रयो	१८४
संरक्षणार्थं	१९०
—	५११
मैत्रायणीश्रुतिः	
इन्द्रस्य वज्रोऽसीति	१८०
त्रिषु वर्णेष्वेका	२०१
यस्तु स्वैरमिभिः	२५,५७०
भिक्षार्थं ग्रामं	२०१
मैत्रेयः	
मासद्वये यद्येकराशिं	७२३
मैत्रेयगृह्यपरिशिष्टम्	७३८
उद्वाहे पुत्रजनने	७३८

ऋषिः	पृष्ठम्
मैत्रेयसूत्रम्	
मासद्वये यद्येक	७३२
मौद्गल्यः	
अवालुकायुतं	३७४
सकृदभ्यर्च्य	३८७
यजुष्	
२।४।८–९	३९१
यज्ञपार्श्वः	
ओषधीमन्तरे	७१८
दुहित्रा स्नुषया	३५५
पंचदश्याः परः	८५४
होमान्तः पितृयज्ञः	७४२
यतिधर्मसमुच्चयः	
आस्येन तु	२०१
क्षौमं शाणमयं	१८६
देवं कृष्णं मुनि	२०६
यमः	
२।५	९३४
अंके नारोपयेत्	४२६
अंगुष्ठमात्रो भगवान्	८०४
अग्नौ करणवत्	८८६
अघवृद्धिमदा	५३१
अदन्तजाते तनये	४९३,५०७
अन्तर्जले जपेन्मग्नः	२६१
अन्तर्वतापि कर्तव्यं	५८९
अपचन्तमतिक्रम्य	४११
अपः परनखं स्पृष्ट्वा	२२३
अब्बिन्दुर्यः	२०४
अर्वाग्दशाहात्	६१४
अल्पानामेव पयसां	४४७
अव्रतानाम्	५२
अशुद्धौ तु परित्यागः	१०६
अष्टमात् द्वादशात्	६७०
अष्टमे तु भवेत्	१३५
अस्थिसंचयनात्	५६८,६३८
आचामाचित	९३९

ऋषिः	पृष्ठम्
यमः	
आदित्यस्य करैः	२५८
आ निपाताच्छरीरस्य	१२१
आपद्गतो विना	९२३
आमंत्रितस्तु यः	७७९
आरभोमार्कवारेषु	६१०
आषाढ्यामथ	७६०
आसनं संस्पृशन्	७९५
आहरेन्मृत्तिकां प्राज्ञः	२१५
आहारमात्रात्	९७
आहारमात्रादधिकं	४११
आहारस्य चतुर्भागं	२०३
उत्तीर्योदकमाचामेत्	२३५
उदकं च तृणं	४२७
उद्धृत्य वामहस्तेन	२२४
उभे मुत्रपुरीषे	१९६
ऊनद्विवार्षिकं	५०८
एकवासा अवासा	१८१
एकैकं पिण्ड	९३७
एकोद्दिष्टे कुशाः कार्याः	२३१
एतान्येव समस्तानि	९३८
ओंकारपूर्विकाः	३२३
कन्या द्वादशमे वर्षे	१३६
कपिलां विप्रमुख्याय	३८७
काणाः कुब्जाश्च	७७४
कारागृहाद्विनिर्गत्य	९०४
कार्तिक्यां पुष्करे	२८८
कार्पासं क्षौम–	९४
किल्बिषं हि	४४४
कुतूहलेन वा शूद्रं	२३०
कुलं च शीलं च	१३४
कुलानामान्यपि	१३२
कुशाः काशास्तथा	२३४
कृच्छ्रद्वादश	८०७
केतनं कारयित्वा	९२३
खंजः काणः	७८६
गंगा धर्मोद्भवा	२८८
गायत्रीं चैव	३३४
गायत्रीं तु जपेत्	३८३

ऋषिः	पृष्ठम्
यमः	
गुर्वधीनोऽस्वतंत्रः	११५
गृहस्थो ब्रह्मचारी	७६७
गोब्राह्मणहतं	९२०
घृतं च सार्षपं तैलं	२८५
चक्रोपजीवी	४४३
चक्षुर्दद्यात्	४१३
चण्डालपुल्कसानां	८८८
चतुर्थे प्रहरे	७११
चतुर्दश्यष्टमी	२४३
चन्द्रसूर्यग्रहे	७३३
चीर्णवेदव्रतो	१७२
जपेद्वाध्यस्य	३४७
जातिक्रियाव	७७६
जान्वालभ्य ततो	७९५
जीवत्पिता पितामह्या	६७८
ज्ञानेन मुच्यते	१७५
ततस्तृतीये कर्तव्यं	८२
ततोऽन्नप्राशनं	८२
ततः संवत्सरे पूर्णे	८३
ततः स्नात्वा	७९१
तथा क्षोभ्यतटाकादि	४७३
तस्मादस्याधिकारो	६
तस्मादुद्वाहयेत्	१३६
ताम्रपात्रस्थितं	८८२
तावन्नोपस्पृशेद्विद्वान्	२२४
तिलदर्भसमायुक्तं	२६४
तुषाङ्गारकपालाग्नि	२१३
तूष्णीं दम्पति	६७९
त्रींस्त्रीन् पिण्डान्	९४१
त्र्यहं पिबेत्तु	९३८
दक्षिणासंस्था	७८५
दण्डं कमण्डलुं	११३
दत्वा तोयांजलिं	१८०
दर्व्यां देयं शृतान्नं	४३०
दशप्रणवसंयुक्तैः	३२६
दशवर्षा भवेत्कन्या	१३६
दैवविप्रकरेऽनाग्निः	६८६
द्विजोऽज्ञानान्मलं	८८१

ऋषिः	पृष्ठम्
यमः	
द्वे लिंगे मृत्तिके	२१६
द्वौ हस्तौ युग्मतः	२४८
धर्मविद्ब्राह्मणः	२२
न खरैरुपयातस्य	७७५
न पङ्क्तौ विषमं	९१३
न पङ्क्त्यां विषमं	९२२
न पृच्छेद्गोत्रचरणे	४१३
न शूद्रो यजमानं वै	५४५
न हस्तेन पिबेत्	४३०
नांकयेन्न दहेद्गात्रं	२९९
नाध्यापयति	१०४
नाभेरधः स्वकायं	३४१
नामधेयं दशम्यां	८१
नाशौचं नोदकं	४८१
नित्यं नैमित्तिकं	२५८
नोदकेन न वाचा	१३८
पंचसूना गृहस्थस्य	३९५
पत्न्या चैकेन कर्तव्यं	६४३
पत्न्या चैकेन	५३२,६७८
परकीयप्रदेशेषु	७५८
परकीयरहस्यानि	४६५
परपाकं सदा	४४४
पात्राद्बहिर्हितं	३५३
पादप्रक्षालनं	७९२
पापोपकल्पनात्	४८२
पितृव्यपुत्रान्	१५२
पित्र्यं जीवपितुर्नोक्तं	७४२
पुनर्भोजन	८२०
पुराकल्पे तु नारीणां	८४
पूर्वं जलेन प्रक्षाल्य	२१७
पूर्वमेव परीक्षेत	७६५
प्रतिग्रहाध्यायन	२८
प्रतिश्रुताप्रदानेन	४८
प्रत्यङ्मुखस्तु पूर्वाह्णे	२१२
प्रत्यादित्यं न मेहेत	२१३
प्रयान्त्याचामतो	२३८
प्रोक्षितं प्रणवे	२०३
ब्रह्मचारी जितक्रोधो	९३८

ऋषिः	पृष्ठम्
यमः	
ब्रह्महत्यासुरापान	९३४
ब्रह्मा विष्णुश्च	६६३
ब्रह्मोद्याश्च कथाः	७१६
ब्राह्मणं तु मुखं	७८०
भक्ष्यं भोज्यं	७८५
भिक्षुको ब्रह्मचारी	७६८
भूसुरो मद्यपाने	११८
मद्यपः स्वैरिणी	७८६
मसूरमाषसंयुक्तं	४३६
मातुर्मृताहे पित्रादीन्	७१८
मातुः सपिण्डीकरणं	६८०
मातृष्वसा मातृमुखी	८६३
मूत्रे तिस्रः पादयोस्तु	२१९
यजमाने चितारूढे	५८२,५८४
यज्ञार्थमर्थं	२२
यत् किञ्चित् क्रियते	९४१
यत्तथा मध्यमं	८१७
यत्रक्वचन	३८१
यत्रक्वचन नद्यां	३८१
यत्सुखं त्रिषु लोकेषु	११०
यदि संयोगकाले	७५
यद्यद्रोचेत विप्रेभ्यः	८०८
यवहस्तस्ततो	७९६
यवागूं यावकं	९३९
यश्चरेत्सर्वं	२०१
यस्तु प्रव्रजितात्	२०८
यस्त्वेकपंक्तौ	४२७
यः सपिण्डीकृतं	६५९
या दिव्या आप	७९९
यावद्धविष्यं	८०८
ये च संतानजा	१७५
ये यजन्ति पितॄन्	८२२
यो न वेत्त्यभि-	११२
यो मनुष्यां हि	१४४
रहस्ये रहस्यं	९३२
रात्राववीक्षितेनापि	२२३
रक्षं कृमिहतं	७५८
रेतः सिक्त्वा कुमारीषु	८८९

ऋषिः	पृष्ठम्
यमः	
विद्यायुक्तो धर्मशीलः	४८
विप्रस्तु वध	९२०
विप्रस्य दंडः	९३
विप्रस्य मेखला	९५
विप्रः स्पृष्टो निशायां	२७१
विरजाद्विगुणं	३५०,९३३
विवाहे चोपनयनं	१३६
वेदविद्याव्रत	७६१
वैश्वदेवं पुरोडाशं	८६
शर्मा देवश्च	८१
शीलं संवासतो	४९
शुना चैव श्वपाकेन	२६७
संध्यामुपासते	३११
संवत्सरोषिते	११६
सततं प्रातरुत्थाय	३०,११६
सत्कृत्य भिक्षवे	४१०
सपिण्डीकरणं नैव	६६३
सपिण्डीकरणात्	६५९
समतिक्रान्तकालाश्च	८९
समर्घं धनमादाय	५१
समार्धं धनमुद्धृत्य	७७३
समुत्थितस्तु यो	४२४
समूलस्तु भवेद्धर्मः	२३१
सहस्रपरमां	३३७
सायाह्नास्त्रिमुहूर्त्ते	७११
सायाह्नास्त्रिमुहूर्त्तः	७०९
स्त्री यदा बालभावेन	१५३
स्वस्तीति ब्राह्मणो	११०
हंसे वर्षासु	७४७
हस्तदत्ता तु या	४३०
होमायदान	४०५
—	२२ टीप, ५०, ५०४, ५३१, ७०४ टीप, ८०६ टीप
याज्ञवल्क्यः	
११२	९
आ. ३	६
आ. ४–५	८

ऋषिः	पृष्ठम्
याज्ञवल्क्यः	
११६	२
आ. ७	१
आ. ८	१९४
११८	३
११९	३
आ. ९	१९६,८६९
आ. १०	७२
आ. ११	७८
आ. १२	८१,८३
आ. १३	७३,८४
आ. १४	८७
आ. १६	२१२
आ. १८	२२१
आ. १९	२२५
आ.	२२२,२२५
आ. २१	२२२
आ. २३	३२३
आ. २४–२५	३३६
आ. २५	९८,७५५
आ. २६	१०७,११३
आ. २८	३१
आ. २९–३०	९६
आ. ३१	९७
आ. ३२	९६,७६९
आ. ३३	११४
आ. ३४–३५	१०४
आ. ३६	११८
आ. ३७	८९
आ. ३८	८९
आ. ३९	८८
आ. ४०	२९
आ. ४१–४८	३७३
आ. ४९–५०	१२०
आ. ५१	११९
आ. ५२–५३	१२५
आ. ५३	४९७
आ. ५५	१३४
आ. ५७	१३२,१३३
आ. ५८–६१	१४१

ऋषिः	पृष्ठम्
याज्ञवल्क्यः	
आ. ६३–६४	१४०
आ. ६४	१३६
आ. ६५	१३७
आ. ६६	१३९
आ. ६७	१३९
आ. ७०	१६३
आ. ७१	४७५
आ. ७२	१६३,८९४
आ. ७३	१५१
आ. ७५	१५६
आ. ७८	१५४
आ. ७९	७४,१५९
आ. ८०	७५
आ. ८१	७४
आ. ८४–८८	१५६
आ. ८६	१६०,८९५
आ. ८९	२४,५६९
आ. ९०	१८,८५
आ. ९१–९२	७०
आ. ९३–९४	७१
आ. ९५	७२
आ. ९६	७२
आ. ९७	६८३
आ. ९७	३५४
आ. ९८	२४१,३१५
आ. ९९	३७४
आ. १०१	३७१
आ. १०२	३९६
आ. १०३	४०१
आ. १०४,१०५,१०८	४०९
आ. १०६	४२२
आ. १०७	४०९,४१३
आ. १०९	४१५
आ. ११०	४१५
आ. १११	४१२
आ. ११२	४१५
आ. ११३	४१५,४५४
आ. ११४	४५५

ऋषिः	पृष्ठम्
याज्ञवल्क्यः	
आ. ११५	२०९
आ. ११६	१०६
आ. ११७	१०७
आ. ११८	१८
आ. ११९	६४
आ. १२०	३८३
आ. १२०।१२१	६७
आ. १२३	४६५
आ. १२४	२१,६०
आ. १२५	२२
आ. १२७	२२
आ. १२८	६०
आ. १३०	५५
आ. १३१	२५१,४२६
आ. १३४–१३५	२१४
आ. १३८	४३०
आ. १४०	५६
आ. १४१	५५
आ. १४२	३२
आ. १४८–१५१	३५
आ. १५२–१५३	४६०
आ. १५६	५
आ. १६१	४४३
आ. १६४–१६५	४४३
आ. १६५	४२५
आ. १६७–१६८	४३१
आ. १६९–१७०	४३६
आ. १७६	४३४
आ. १७७	४५१
आ. १७८	४७१
आ. १७९	४५१
आ. १८४–८५	४६९
आ. १८६–१८७	४६९
आ. १८७	४७५
आ. १८९	४३३
आ. १९०	४६८
आ. १९१	४६८
आ. १९२	४७३

ऋषिः	पृष्ठम्
याज्ञवल्क्यः	
आ. १९६	२३६
आ. १९८	६९
आ. २००	४८
आ. २०२	५८
आ. २०३	४०
आ. २०४।२०५	४१
आ. २१३	५४
आ. २१५	५७
आ. २१७–२१८	७६९
आ. २१९	७६६
आ. २२०	७०६
आ. २२२	७७२
आ. २२५	८१८
आ. २२६–२२८	७९४
आ. २२७	७५८,७७७
आ. २२८	७७७
आ. २२९	७९६
आ. २३०	७९७
आ. २३१	७९९
आ. २३३	७९७
आ. २३५	७९९
आ. २३६–२३७	८०१
आ. २३८	८०४
आ. २३९	८०६
आ. २४०	८०७
आ. २४१	८१२
आ. २४२	८१५
आ. २४४–२४९	८१४
आ. २४९	८१९
आ. २५१।२५२	६४८
आ. २५३	६७४
आ. २५५	६९०
आ. २५५-२५६	६४७,६५९
आ. २५६	६३७,६९८
आ. २५८, २६०	७८२
आ. २६१	७४९,७८२
आ. २६२–२६४	७५०
आ. २६४	७४७,७८२

ऋषिः	पृष्ठम्
याज्ञवल्क्यः	
आ. २६५–२६८	७६३
आ. २६९	६६३
आ. २६९–२७०	८२२
आ. २७७	९०४
आ. २९५	२३७
आ, ३०९–३११	६४
आ. ३२५	७७७
आ. ३२८	६७६
आ. ३४२	६७७
आ. ३५९	२५६
आ. ३६२–३६३	८८२
२।३७	६४
व्य. ८३	९२१
व्य. ११७	१२९
व्य. १२८–१३२	१०१,५६१
व्य. १३२	५६३
व्य. १३५	५६५
व्य. १४५	५६४
व्य. १७५	४७,४८,१०३
व्य. १८३	९१९
व्य. २८६	८९४
प्रा. १–२	५०८
प्रा. ३–४	५९८
प्रा. ४	६००
प्रा. ७	६०४
प्रा. ८–१०	६०४
प्रा. ११	६०४
प्रा. १२–१३	६०४
प्रा. १४	५४६
प्रा. १५	५५८
प्रा. १६	५४७
प्रा. १६	६०६
प्रा. १७	४७८,६०३
प्रा. १८	५०१,५१८
प्रा. १९	८०,५००
प्रा. २०	४९१,५३०
प्रा. २१	५३४
प्रा. २२	४९४

ऋषिः	पृष्ठम्
याज्ञवल्क्यः	
प्रा. २३	५०७,५१७
प्रा. २४	५२८
प्रा. २५	५२१,५२९
प्रा. २६	५४२
प्रा. २७	४८७
प्रा. २८–२९	४८१
प्रा. ३०	२६५
प्रा. ३२	१७५
प्रा. ३५	६०
प्रा. ३६–४०	६२
प्रा. ४१	४८०
प्रा. ५५	१७०
प्रा. ५६–५७	१७१
प्रा. ५८	१८८
प्रा. ५९	१९९
प्रा. ६०	२०२
प्रा. ६५–६६	१९२
प्रा. ७५	१६०
प्रा. ८३	४९४
प्रा. १९०–१९३	१६६
प्रा. २०६–२०८	८६०
प्रा. २०९–२१०	८६०
प्रा. २१०–२१५	८६१
प्रा. २१७	८६०
प्रा. २१८	८६२
प्रा. २१९–२२०	८५९
प्रा. २२१–२२५	८५९
प्रा. २२६	८६७
प्रा. २२७	८६२
प्रा. २२८	८६४
प्रा. २२९	८६५,९२९
प्रा. २३०	८६५
प्रा. २३१	८६५
प्रा. २३४–२४२	८६६
प्रा. २३५	३१
प्रा. २४३	८७१
प्रा. २४४–४५	८७२
प्रा. २५२	८६४,८७२

ऋषिः	पृष्ठम्
याज्ञवल्क्यः	
प्रा. २५३–२५६	८७९
प्रा. २५७–२५८	८८३
प्रा. २५९–२६०	८८६
प्रा. २६१	१५४
प्रा. २६३-२६४	८७५
प्रा. २६५	९३१
प्रा. २६८–२६९	८७४
प्रा. २७०–२७६	८७७
प्रा. २७५	९३१
प्रा. २७८	८९२
प्रा. २७९	९२०
प्रा. २८५–२८७	८९८
प्रा. २८९	९०१
प्रा. २९०	७०२ टी, ९२४
प्रा. २९१	९०३
प्रा. २९२	९००
प्रा. २९३	८९९
प्रा. २९६	८७८
प्रा. २९८	८६४
प्रा. ३०१	८६८,९३२
प्रा. ३०२	९३४
प्रा. ३०४–३०५	९३५
प्रा. ३०६	३९५,८८८
प्रा. ३१०	३३५
प्रा. ३१५	९३७
प्रा. ३१७	९३८
प्रा. ३१९–३२०	९३६
प्रा. ३२०	९३७
प्रा. ३२१	९३७
प्रा. ३२२	९३८
प्रा. ३२३	९३९
अनार्तश्चोत्सृजेत्	३१३
अमत्रं वाथ	४१९
अमावास्याष्टका	७२२
अविशेषेण पित्र्यस्य	७३६
अशक्ताविष्ट	१८२
गृहीतशिश्नश्चोत्थाय	२१५
गोवालं दर्भसूत्रं च	२३२

ऋषिः	पृष्ठम्
जपयज्ञो हि	३४८
जलमध्ये स्थितो	२६१
त्रिरात्रं दशरात्रं	५१०
देशांतरमृतिं	४८५,५२२
द्वादशाहमनाग्निस्तु	३५६
पारंपर्यागतो	२९
प्रोषिते कालशेषः	५३४
ब्राह्मणं विनियोगं	३१६
मत्स्यकच्छपमण्डूका	२५४
मदमोहहता	८९५
मृते स्नानेन	४९२
मृत्तिका गोमयं	२५९
य एष विस्तरः	२६३
यत्पुंसां पर	१६४
यथा कथंचित्	४२
यदा यदा तु	९३१
या संध्या सा	३१३
यो यस्य विहितः	७३८
वनस्पतिगते	७८८
वृथा तूष्णोदकस्नानं	२५८
शतमिंदुक्षये	४७
सुरापः स्वर्णहारी	३४९
—	१२८, १३९, २३८, ४४१,४४७,५१४,५१९,५२०, ५२१,५६१,८००,८१२,८६८, ८९७,९२१
योगयाज्ञवल्क्यः	
अग्न्यगारे जलान्ते	३२१
अग्राह्यास्त्वधमा	२५८
अलाभे धौतवस्त्रस्य	२५२
असामर्थ्यात्	५४९
असामर्थ्याच्छरीरस्य	२८९
आगम्यागमनात्	२४५
आचमनं स्वकीय	३१५
आवाह्य पूर्वं	७३७
आसत्यर्क्षु च पूर्वे	३७६
उत्थायावश्यकं	३३७

ऋषिः	पृष्ठम्
योगयाज्ञवल्क्यः	
एवं संपूज्य	३९०
एवं संमार्जनं	३२३
ओंकारं पूर्वमुच्चार्य	३३८
कव्यवाहोऽनलः	३७९
गंगायां यमुनायां	६०९
गत्वोदकान्तं	२५९
ग्रहणोद्वाहसंक्रान्ति-	२७०
घृतयुक्तैः	३३६
तिसृभिर्मध्यमाभि	२२६
तूष्णीमेवावगाहेत	२१९
त्रिंशत्कोट्यस्तु	३१२
त्रिरात्रफलदा	२५५
देवानामर्चनं	३८४
धात्रीफलैः	२८०
न तावत्पाप	३५१,९३४
नद्यामस्तमिते	२५७
नव प्रणव	३१५
नास्तिक्यभावात्	३८०
पवित्रे स्थ इति	७९८
पादयोर्जंघयो	३२५
परकीयनिपानेषु	२५६
पूरकः कुंभको	३२४
पूरके विष्णुसायुज्यं	३२४
प्रथमं कर्कटादौ तु	२८८
प्रदक्षिणं समावृत्य	३६९
प्राणायामत्रयं	३२५
प्रातस्तिष्ठन् जपेत्	३३७
प्रातः सह गोमयेन	२४७
बाह्यानि करणानि	३२०
ब्रह्मचार्याहिताग्नि	३३८
ब्रह्माणं तर्पयेत्	३७८
भूर्भुवस्वर्मह	३२३
मांत्रं भौमं तथाऽऽग्नेयं	५४९
य एता व्याहृतीः	३२६
यदि वाग्यमलोपः	३४१
यद्युद्धृतान्	३७७
यावद्देवानृषीन्	३८३
यावद्देवानृषींश्चैव	२४९
योगयाज्ञवल्क्यः	
यावन्नोदेति भगवान्	२८७
रजो दृष्टैर्भसि	२८७
रात्र्यन्तयामनाडी द्वे	२४७
वसून् रुद्रान्	३७८
वायुभक्षो दिनं	३३५
व्याहृतीनां तु	३२५
शं न आपस्तु	२९१
शिवे निवेदितं	९१२
संधौ संध्यामुपासीत	३१०
संध्ययोरुभयोः	३२०
सवर्णेभ्यो जलं	३७८
सहस्रकृत्वः	३३८
सौवर्णे राजतं	३५३
स्नात्वैवं वाससी	२५१
स्नानं दानं जपं	२५३
स्फटिकेन्द्राक्ष	३४२
हस्तेऽश्वीयात्	२७७
हत्वा लोकानपीमांस्तु	२६१
—	२८१
योगवासिष्ठम्	
संसारान्मोक्ष	३५०
योगीश्वरः	
आर्धरात्रादधः	८३३
रोहिणीसहिता	८३३
स्वर्णयुक्तं ताम्रपात्रं	४५
रत्नकोशः	
हस्तो मूलश्रवण	७८
रत्नमाला	
जन्ममासि न च	१४७
रत्नावली	
अनुज्ञा द्विगुणो	६४९
अपक्वं स्नेहपक्वं	४३०
अपि स्यात्सकुले	४०२
उच्छिष्टैरेव	८१३
कर्पूरागरु	३९३
चण्डालाशुचि	३४०
रत्नावली	
दंतानां शोभनं	४५३
दर्शे स्नानं न	२६३
देशः कालस्तथा	७५७
धार्याणि शिरसा	३६७
न पिता नात्मजो	१५७
नैवेद्यस्य त्वलाभे	३८९
पर्वभिश्च जपः	३४३
पर्वभिस्तु जपेद्देवी	३४३
पित्रोर्मृतान्तराले	५३३
प्रवासिनोऽग्नि	३५९
भक्ष्यं चेच्छिशु	४३१
मंगल्यं पूर्णकुंभं	४५७
मुकुलैर्नार्चयेद्देवं	३८८
वल्लीपलाशपत्रेषु	४१९
विकिरे पिण्डदाने	३८३
संक्रांतिर्वाथ दर्शो	६१५
सर्वे तु तरितुं	४४५
राजाविषयः	
सहस्रधेनुदाने	९२७
रामायणम्	
सर्वे क्षयान्ता निचयाः	६०४
सा स्वभावेन	३७४ टीप
सेतुबन्ध इति	८७१
रुद्रस्कन्दः	
स्त्रीणां सापिण्ड्ये	६७९
लोमशः	
निर्घातो बन्धनाग्न्याद्यैः	४९०
लघुयमः	
अन्नहीनं क्रियाहीनं	८०६
लघुव्यासः	
ऋगादिकम्	११९
वेदस्याध्ययनं	१२६
लघुहारीतः	
इन्द्राग्नी यत्र	७२३
एकमप्यक्षरं	१२०
प्रत्यब्दं द्वादशे	७०२

ऋषिः	पृष्ठम्
लिखितः	
छिद्राण्येतानि	३९
भुक्त्वा वार्धुषिकं	९०७
भुक्त्वोपस्थाय	४५४
लिखितपराशरः	
परपाकनिवृत्तस्य	४४५
लिंगपुराणम्	
इशानेन शिरोदेशं	२९०
तुलायां गोसहस्रे	९२७
दत्तामिमां कल्पलतां	९२९
मुखजो धनलोभेन	९२९
ततो विष्णोः प्रसादेन	२९७
त्रिपुंड्रं सुरविप्राणां	२९६,३०४
भस्म विद्धि परं	३०३
केचित्कापाल	३०६
लौकाक्षिः	
अन्येषां प्रेतकार्याणि	६४०
अप्रशस्तेषु	८१६
अमाश्राद्धं गयाश्राद्धं	६७२,७३७
गृहाग्निद्विजदेवानां	४०७
तिथेः परस्या	८५६
तूष्णीमथोदकं	५१२
तूष्णीमेवोदकं	५९९
तृतीयस्य वर्षस्य	८३
तृतीये गर्भमासे	७८
त्रीनंशानौपसथ्यस्य	८५४
न स्त्रियाश्च वृषोत्सर्गः	६४६
नामान्नचौल	७५४
नियतेषु निमित्तेषु	७५४
पक्षान्तं कर्म	४०७,८१९
पत्नीपुत्रस्नुषा	६४०
पितामह्यादिभिः	६७८
पित्रर्थं निर्वपेत्	४०७
पित्रर्थे निर्वपेत्पाकं	८१९
पित्रोर्द्वयोर्दशाह	६४०
पुष्पवत्स्वपि	६८८,७१४
पूर्वाह्णे वाथ	८५४

ऋषिः	पृष्ठम्
लौकाक्षिः	
प्रत्यक्षे तु न	५५३
मध्यमानामिकां	३०२
मातामहस्य गोत्रेण	६८१
मृतेऽहनि समासेन	६९६
श्राद्धं कुर्यात्	६९८
श्राद्धं कुर्यादवश्यं	७३५
श्राद्धानि षोडश	६५६
षष्ठे मासेऽन्नप्राशनं	८२
सपिण्डीकरणात्	६९२
सर्वाभावे स्वयं	६७०
सिनीवाली द्विजैः	७३९
—	५०९
लौगाक्षिः	
त्रिपुंड्रधृग्विप्रवरो	३०८
पितर्युपरते पुत्रो	६३७
मातामहस्य गोत्रेण	९२९
श्रुतिस्मृतिविरोधे	७
सायमेवाग्निं	९८
वत्सः	
प्रदोषव्यापिनी	८२९
सर्वोपायैरसाध्यः	१४२
वरदराजीयम्	
ईडाकरणपूर्वं	९९
करणे ग्रात्यतां	९९
तच्छब्दश्रुते-	३२७
दर्शे प्रेतदिनेषु	६१४
प्रागब्दाज्जननी	५२४,६२२
मृतजाते जातमरणे	५०३
संपातात्पितु-	४९२
— १२८, १२९,	४९४
वराहपुराणम्	
मार्गशीर्षे सिते	८२९
वस्त्रशौचादि	७७६
—	६६३
वराहमिहिरः	
एकोदरप्रसूतानां	१४५
देशाचारस्तावद्	१३१

ऋषिः	पृष्ठम्
वासिष्ठः	
१।४–५	७,१२८
१।१७	१३१
१।२३	९२१
१।२५–२७	१३४
२।३	८८
२।६	८६
२।७	८६
२।३७–३९	६१
३।१६–१७	८७४
३।३५	२२४
३।३६	२२२
३।३८	२१६
३।५७	४७१
४।१८	१२६
४।१४–१५	५४७,६०६
४।१८	४९८
४।२८–२९	४९५
४।३४	४९२,५०९
६।३	४,९७
६।१८	२१६
७।७–१७	१२०
८।१–२	१२५
८।३०–३१	७७८
१०।२४	२०१
११।३	३९६
१२।२०	४२५
१२।५५–५७	९३
११।६४–६६	९४
११।७६–७९	८९
१३।५१	८९८
१४।२०	११४
१४।२३	४३२
१४।२८–२९	४३७
१४।३७	४३६
१५।३–६	४८,१०३
१५।९	५६१
१६।२३	४९९

ऋषिः	पृष्ठम्
वसिष्ठः	
१७।१-२	७६
१७।१७	१२६,६८१
१७।५१-५३	१५४
१७।७०	१३५
१७।७२	१३८
१७।७३	१४५
१७।७४	१३९
१८।१	८६७,८६८
२०।८	९०३
२०।१२	९०२
२०।१३	८८७
२१।१	८९३
२१।१०	८९४
२१।२८	९००
२१।२९	४४५
२१।२९-३०	८९९
२१।५८-६०	९५
२३।१-२	१२२
२३।७-८	५४६
२३।१९-२२	९१९
२३।२५-२६	५४७
२३।३१	२६९
४१।२०	२४०
६५।२९	९२२
७०।४२	९३६
७०।४५	९४०
अकृत्वा वैश्वदेवं	४०६
अग्निक्षेपो नातिशवं	५८३
अग्न्याधेयं प्रतिष्ठां	७२८
अज्ञातपूर्वाणि न	२४२
अनाहिताग्निः	५६८
अनुयाने च पत्या	६४३
अनुयाने तु	५३२
अनुयाने तु पतिना	६७८
अप्रत्याख्यायिनं	९६
अप्रामाण्यं च	६
अर्धप्रसृतिमात्रा तु	२१८
अवश्यं ब्राह्मणो	१९

ऋषिः	पृष्ठम्
वसिष्ठः	
अव्रता ह्यनधीयाना	९७
अष्टौ दश द्वादश	१५२
आनृशंस्यं परो	७७१
आपोशनं सर्वतीर्थं	४२२
आपोहिष्ठेदमापश्च	२६०,२६१
आब्दिकं सौरमासे	७०५
आमंत्रितो योऽन्त्यः	११२
आशौचान्ते तु	६४५
आ सप्तमात्	४९७
उपवासे तथा	८५०
उपवासे तथा श्राद्धे	२४४
उपस्थानं स्वकैर्मन्त्रैः	३४४
उभयोर्हस्तयोः	८०६
ऊर्ध्वं चतुर्थ्याः	७४६
ऊर्ध्वं दशाहात्	५३४
ऋक्सामाथर्व	३७४
एकस्मिन्सावने	८४४
एकादशी तृतीया	८३१
एकादशीसमुत्थेन	८३८
औदुंबर्यामथा	५८१
कांस्यपात्रे हविर्दृष्ट्वा	३०९
किंचिद्वेदमयं	४९
कृष्णाष्टमी स्कंदषष्ठी	८३१
केचित्कापाल	३०६
क्षुते निष्ठीविते	२३६
गुरोरवज्ञया	३९५
गृहस्थ एव	१६९
ग्रस्तोदये विधोः	४५०
ग्रहणे संक्रमे वाऽपि	२७२
चतुर्विधानां भिक्षूणां	६६३
चतुर्हस्तसमायुक्तं	२६३
चन्द्रसूर्यग्रहे	२७२
चीर्णब्रह्मचर्यो	१७२
जन्मन्यथोप	७५३
ज्ञातयः सप्तमात्	५९०
ततो विष्णोः प्रसादेन	२९७
त्रिर्विल्वपूर्णां	३६६
दर्शे रविग्रहे	७१७

ऋषिः	पृष्ठम्
वसिष्ठः	
दह्यमानं तु	६४२
द्वादशरात्रम्	८७२
न निःशेषकृत्	४३१
नासाग्रवर्तनाद्दोषैः	५५५
नास्तिक्यभावात्	२४७
पञ्चमीं सप्तमीं	१२८
पवित्रकर एकाग्रः	२५४
पितुर्मरणकाले तु	५५३
पित्र्येऽस्तमयवेलायां	७१३
पुत्रजन्मनि यज्ञे	७९
प्रचरन्नभ्यवहार्येषु	२४०
प्रणवेनैव	२०७
प्रमीतपितृकः	५३८,६२८
प्राक्प्रत्यङ्मुख	१४९
प्राक्प्रत्यङ्मुखयोः	१४९
प्राणाहुतीषु सोमे च	२३९
ब्रह्मचारिणः शवकर्मणो	५५८
ब्राह्मणकुले	७६९
भस्म विद्धि परं	३०३
भार्याहीनस्तु	१५२
मांसमन्नं तथा	४१४
मृदैकया शिरः	२५९
य आत्मत्यागिनां	९२०
यच्छाखीयैस्तु	११६
यतीन्साधून्वेति	७६७
यत्कृतं प्रेतमुद्दिश्य	६२६
यदा यदा तु	३३६
यां तिथिं समनु-	३३
यावन्न लज्जयाऽङ्गानि	१३५
ये ते शतम्	२६०
वाराणस्यां मृतो	४८८
विशाखा रोहिणी	६०५
वैधे कर्मणि	३५
वैधे कर्मणि तु	५५३,५९२,६१२
व्युत्क्रमेणापि	६७३
श्राद्धे नोद्वासनीयानि	८१८
श्रुतिं स्मृतिं	९१८
संवत्सरमध्ये	७२९

ऋषिः	पृष्ठम्
वसिष्ठः	
सन्तर्पर्येन्निषिद्धे	३८२
सप्तमेऽह्नि तृतीये	६०५
सप्तागाराण्य	२०१
सर्ववेदपवित्राणि	३४७
सव्योत्तराभ्यां	५९७
सूतकांते भवेन्नारी	४९३
स्त्रीपुंसयोस्तु	१३८
स्नानंशाख्यां	२५०
स्वाध्यायिनं कुले	८७४
हरिपूजापरो	३५२
हित्वा सकल	९३४
हित्वा सकलपापानि	३५१
--	११०, १४६, ४७५, ४८३
वसिष्ठधर्मसूत्रम्	
३।४	४११
२६।१०	३५२
वसिष्ठशातातपौ	
नाभेरूर्ध्वमना-	९१
वसिष्ठसंहिता	
अथातः संप्रवक्ष्यामि	६४७
अष्टमी रोहिणीयुक्ता	८३३
अहोरात्रं तयोर्योगो	८३४
यत्तु रुद्रार्चनं	३०६
लाङ्गलं मुखजो	९२८
श्रावणे वा नभस्ये	८३२
वसिष्ठसिद्धान्तः	
द्वात्रिंशद्भिर्गतैः	७२४
वाजसनेयिगृह्यम्	
वनं प्रवेक्ष्यन्	४६३
वाधूलः	
यत्र यत्र कर्म	३५०
वामनपुराणम्	
गोदावरी भीमरथी	२८८, ५२३
देशानुशिष्टं	४६६
धृत्वा चर्ममयीं	९२९
श्रुतिस्मृत्युक्त	२९४

ऋषिः	पृष्ठम्
वामनपुराणम्	
सत्यात्प्रमदितव्यं	३०१
सरस्वती नदी	२८८
सरस्वती नदी पुण्या	२८८
हिरण्याश्वं द्विजो	९२८
--	२८३
वायुपुराणम्	
अभार्यो दैविके	६८६
आहृत्य दक्षिणाग्निं	६८४
गतवीर्यश्च यो	८१७
जीरकं मरिचं	७८२
ततस्त्रिपुंड्रं रचयेत्	३०१
त्रयोदश्यस्तगते	८५२
दिवसस्याष्टमे भागे	७११
पत्न्यै प्रजार्थं	८१७
परिवेषणं प्रशस्तं	८०३
फलस्यानंतता	८०३
बिल्वामलक	७८१
याचते यदि	८०८
एकादशी विष्णुना	८४१
संन्यासिनोऽप्याब्दि	७५०
सिंहराशिगते	८३२
--	३०६
वाल्मीकिः	
३।३७-३८	१४१
उत्पन्नापि चाकाशं	४८
तीक्ष्णकामास्तु	१४१
न पिता नात्मजो	१५८
वासिष्ठम्	
४।३	८७
ऊर्ध्वपुंड्रं तु	२९४
धर्माधर्मौ सुखं	१९४
वासुदेवोपनिषद्	
गोपीचन्दन पापघ्न	२९२
वाहटः	
तांबूलं कटुतिक्तम्	४५५
भुक्त्वोपविशतः	४५४

ऋषिः	पृष्ठम्
विज्ञानेश्वरः	
पृ. ५ पं. ३०	२१७
पृ. १२ पं. २१-३०	१२४
पृ. १३ पं १-५	१२४
पृ. १३ पं. २५-२६	१२६
पृ. १४ पं. ७५	१२८
पृ. २० पं. १-३	७४
पृ. २३ पं. २७-२८	१६२
पृ. २४ पं. १८-२०	१६२
पृ. २५ पं. १४	२५
पृ. २५ पं. १५	५७१
पृ. २६ पं. २२	७०
पृ. २८ पं. २१	३५४
पृ. ३१ पं. १४	४१५
पृ. ३२ पं. २४	२०९
पृ. ३४ पं. १६	६४२
पृ. ३९ पं. १६-१७	३८३
पृ. ३८ पं. ६९	४२६
पृ. ४१ पं. १९	३५
पृ. ४२ पं. ११	३६
पृ. ४४ पं. २३-२४	२५६
पृ. ५२ पं. १९-२०	४६९
पृ. ५४ पं. १५-१९	४७१
पृ. ५४ पं. २५	४३३
पृ. ६८ पं. २०-२१	६८५
पृ. ६९ पं. २६-२७	७८२
पृ. ७० पं. ३	८०७
पृ. ७० पं. ७	८१२
पृ. ७० पं. १३	८१६
पृ. ७३ पं. १३-१६	६७४
पृ. ७३ पं. १९	६७९
पृ. ७४ पं. ४	६७२
पृ. ७५ पं. ५	६८१
पृ. ७५ पं. १२	६७८
पृ. ७५ पं. २७-३२	६८०
पृ. ७६ पं. १-२	६९०
पृ. ७७ पं. २०-२४	६५९
पृ. ७८ पं. १-१८	६६०

ऋषिः	पृष्ठम्
विज्ञानेश्वरः	
पृ. ७९ पं. २१-२२	७४९
पृ. ९० पं. १६-१७	१०२
पृ. ९० पं. १७।१८	५६५
पृ. १४१	१२९
पृ. १४४ पं. ३१-३३	५३९
प्रा. पृ. १६१ पं. ६-७	४७७
पृ. १६७ पं. १२	५५६
पृ. १७० पं. १८-१९	६०३
पृ. १७३ पं. ५-१०	५१८
पृ. १७३ पं. २०	५११
पृ. १७३ पं. २८	५००
पृ. १७६ पं. ९	५०३
पृ. १७६ पं. १६	५०६
पृ. १७६ पं. १९-२५	५८५
प्रा. पृ. १७६ पं. ३२	२७७
पृ. १७८ पं. ४-५	५३९
पृ. १७९ पं. ६-७	५३४
पृ. १७९ पं. १२-१३	६२१
पृ. १७९ पं. १५-१६	६२२
पृ. १८० पं. ६-७	४९५
पृ. १८२ पं. १२	५११
पृ. १८२ पं. २७-२८	५२४
पृ. १८३ पं. २०-२१	५२६
पृ. १८३ पं. २४	५२१
पृ. १८५ पं. १९	८८१
पृ. १८७ पं. ८-१०	५४८
पृ. १९९ पं. २४-२६	१७६
पृ. १९९-२००	१७२
पृ. २३५ पं. २४	८५९
पृ. २४० पं. २४-२५	८६५
पृ. २४२ पं. १९-२०	८६७
पृ. ३१४ पं. २३	४४८
पृ. ३४२ पं. ५	५५०
पृ. ३४३ पं. २०-२५	५५०
अग्नौ करिष्यन्	८८२
अनु पश्चाज्जायन्ते	५८६
अस्थिसंचयने	६११
आब्दिके स्व स्व	३८३

ऋषिः	पृष्ठम्
विज्ञानेश्वरः	
इदमेकरात्राशौचं	५३५
एकादशे त्रिपक्षे	६५२
एकादशेऽह्नि संप्राप्ते	६४६
कृच्छ्रपादोऽसपिण्डस्य	५४४
दर्पादिना चण्डालादीन्	४८८
देवत्वं गतस्य	६६१
नवभिर्दिवसैः	६०१
न ह्यत्र देवदत्तादयः	८२३
नालिकाशणछत्राक	४३५
नित्यमन्नप्रद्—	४८१
पित्रादीनां त्रयाणां	७९४
प्रतिव्याहृति पृ. ७ पं. १-३	३२३
प्रपासरण्ये घटके	४७४
प्रेतलोके तु वसतिः	६९२
भगिन्यां संस्थितायां	५२७
माता शुध्येद्द्व्यहेन	४९३
मातामहेन मातुः	७२२
मृतस्य बान्धवैः सार्धं	५४३
यज्ञे संभृतसंभारे	४८३
यदा संवत्सरात्	६५६
यद्यद्ददाति	७५६
यस्तु नयादि	५२३
यस्यानयाति	५८१
यस्यामंतःकुंडिकायां	४३५
येन केनापि मातुः	७१८
श्राद्धानि षोडशाकृत्वा	६५२
सद्यःशौचं सपिण्डानां	४९२
साग्निकस्तु यदा	६६८
सूतकं जन्म—	५०१
सूतके मृतके चापि	४८०
—	१०७
१२६, १४४, १६३, १८८, १९०, ४८५, ४४१, ४९३, ४९४, ४९६, ४९७, ४९९, ५०३, ५०६, ५१०, ५१८, ५१९, ५२०, ५२६, ५२८, ५३५, ५४०, ५४२, ५८३, ६५६, ८१२	

ऋषिः	पृष्ठम्
विराटः	
अनुवर्त्तेत	१६२
विवस्वान्	
पर्वमात्रप्रमाणस्तु	११८
अरत्निमात्रं जलं	२१६
मंत्रसंभारसंयुक्तं	२५९
एकतः सर्वतीर्थानि	२५५
अविदित्वेव यः	२५४
विश्वरूपः	
—	५११
विश्वादर्शः	
आशौचमध्ये	६१४
यः कुर्यात्प्रथमे	६२४
शुभकर्म न कुर्वीत	६५७
स्त्रीपिण्डे पतिपिण्डगे	६७८
विश्वामित्रः	
अथ तत्वानि वक्ष्यामि	३२९
आदावस्त्रेण संशोध्य	३२९
एतैस्त्रिभिः	३२०
देवस्य सवितुः	३२७
धिया यदक्षर	३३९
नित्यं नैमित्तिकं	७५७
पित्रोरनुपनीतोऽपि	५५९
प्रणवे नित्ययुक्तस्य	३३५
प्रणवोऽप्यत्र	३३९
यमार्थाः क्रियमाणं	२
विश्रुतानि बहून्येव	३५१
—	९३१
विष्णुः	
१५।३९	५६१, ५६३
१९।७	६०१
१९।१०-११	६०७
१९।१३	५२२, ६१९
१९।१४	५८६
१९।२३	५९७
२१।२०	६६६

ऋषिः	पृष्ठम्
विष्णुः	
२२।७	४४८
२२।२२-२६	४९५
२२।२६-२८	५०७
२२।३१-३३	५१६
२२।३४	५३०
२२।४१	५२५
२२।४२	५२०
२२।४३	५२९
२२।४५	५२९
२२।५२	४८२
२२।६९	२६७
२२।७२	२७९
२२।७४, ७५	२३७
२२।७६-७७	२१९
२४।९-१०	१२५
२५।४	६४१
२५।१४	१६१
२५।१६	८४७
२६।५	१३३
२८।३२	४५२
२९।२	१०४
३३।१	८६५
३३।१-५	८६२
३३।३	८६५
३३।४-७	८६५
३३।६	१७०
३४।१	८६४
३६।८	९३१
३७।१	९२१
३८।१-६	८६७
३९।२२-४०।२	९३१
४६।२-९	९३९
४७।१-९	९४१
४८।२१	९०७
५१।३-५	११८
५१।४	४४८
५१।३८	८८२
५१।३९	४३८
विष्णुः	
५१।३९-४२	४३७
५२।५-८	४७८
५४।२	४७३
५४।१३	९२१
५४।१४	९००,९२१
५६।१-२७	९३३
६०।३, ७, १६, १७	२१४
६०।२२	२१३
६४।९	२४७
६४।१९	२६२
६४।२४	२४७
६४।३६-३९	३५०
६४।४०	२४७
६५।९	८००
६६।१-९	३८८
६६।७	७९०
६७।३३	४१६
६८।१६	२२९
६८।४६	४२६
७१।१	७४२
७३।२४-२५	८१३
७५।२	७४२
७५।४	६७२
७५।४-७	७४२
७८।१	७६३
७८।८	७६३
७९।२	७८४
७९।९	७९०
७९।११	७९०
७९।२२	८०४
८०।१	७८३
९८।६२	६
अच्छिन्नपादा	३३९
अनुच्छिष्टेन संस्पृष्टे	२६८
अनुलेपनवस्त्रा	८००
अन्नं व्याहृतिभिः	३९८
अपुत्रपौत्रसंताने	५६२
अप्रबुद्धेऽविधूमे	३६२
विष्णुः	
अर्वाक् त्रिपक्षात्	५३५
अश्वं पित्रा परीक्षेत	१३३
अष्टकास्तिस्रः	७४४
असकृज्जलपानं	८५०
अस्पृष्टानां च	४८४
आक्रुष्टस्ताडितो	८६२
आ जानुभ्यां भवेत्	२६८
आद्यश्राद्धमशुद्धो	६४७
आवृत्य गणयेत्	३४३
आशौचापगमे	६३६
उत्थायोत्थाय	२१०
उद्दिश्य कुपितो	८६३
ऊर्ध्वपुंड्रधरो	५४९
एकरात्रोषित	१७५
एकादश्यां न	४४९
एकादश्यां निराहारः	८४९
कण्टकीक्षीर	१९६
कराभ्यामंजलिं	३२०
कुब्जवामन	१२१
कुशाभावे कुशस्थाने	२३४
कृच्छ्रत्रयं चोपनेता	९९
कौपीनाच्छादनार्थं	१८५
क्षत्रवैश्यगृहे	९६
गोभिर्युक्तेन	२८६
गोमयेनोप	७५८
ग्रामान्ते निर्जने	१९०
जन्मप्रभृति	१०८
जानुभ्यानु	३१९
जानुभ्यामुपरिष्टाचु	२२९
जानोरूर्ध्वं जले तिष्ठन्	२२८
ज्येष्ठो वाऽप्यनुजो	६७०
ततः कृत्वा	३७६
तिस्रोऽष्टकाः	३५
तृचाभिमंत्रितं	२९०
दंडवन्मज्जनम्	११३
दक्षिणापवर्गेषु	७९८
दक्षिणाप्रवणे	७५७
दानादौ ग्रहणे	४८५

ऋषिः	पृष्ठम्
विष्णुः	
द्विजो निषिद्धया	४४१
द्विजो भोजनकाले	९१२
नमो विश्वेभ्यो	८०५
नवमे दशमे वाऽपि	४९४
नाभेरधः	२६७
नीते त्वाशौचे	५३५
पञ्चमात्सप्तमात्	१२६
पलाशशरीरं	६०८
पिण्डानां निर्वपणं	८१७
पूर्वाह्णे वाऽपराह्णे	५१४
पौषफाल्गुनयोर्मध्ये	२८१
प्रतिपत्पर्वषष्ठीषु	२४३
प्राजापत्यं नव	९१३
प्राजापत्यं नवश्राद्धे	४४८
प्रातःस्नातोऽपि	२५४
बालाश्च तरुणा	२८१
बाले समानवयसि	१०५
ब्रह्मक्षत्रविशां	२५४
ब्राह्मणस्य कुलं	१३४
ब्राह्मणस्य सपिण्डानां	४७४
ब्राह्मणः अनार्द्रेण	२११
भुक्त्वोपविष्टो	४५४
भैक्षं यवागुं	२०३
मंटपे गोपुरे खट्वा	५५४
मातुर्मृताहे पिण्डादीन्	७२०
मृतायामपि	२५
मृतायामपि भार्यायां	५७०
मृत्पिण्डतृणकाष्ठानां	४७१
यज्ञोपवीतं दण्डं	१८५
यत्राशुचि स्थलं	३७७
यदि भैक्ष्यं	२०४
यानुद्दिश्य भवेत्	७१८,७३६
यावदाशौचं तावत्	५९९
ये क्षान्तदान्ताः	७६६
रजस्वलासंस्पृष्टो	२७९
वत्सरान्ते प्रेताय	६७४
वर्जयेच्छ्वेत	४३४
वर्षैरेकगुणां	१२५

ऋषिः	पृष्ठम्
विष्णुः	
वितस्तिमात्रमृजु	२४१
विप्रान् स्वागतान्	७९५
वृद्धानामातुराणां	१९३
वेदानधीत्य यत्नेन	१२३
वैश्वदेवान्तिके	४१६
शिष्याणां चाशिषं	१०८
श्रावयेत्पुण्यसूक्तानि	५५२
श्रौतं स्मार्तं च	३५६
श्वश्वादीनां तथा	५६७
संन्यस्तमिति	१७४
सपिण्डीकरणं	६८३
सभासु चैव	१०९
सर्वपापेषु सर्वेषां	९४१
सीमंतोन्नयनं	७९
सुप्रक्षालित	४५७
सुसूक्ष्मं सूक्ष्मदन्तस्य	२४१
स्थले स्थित्वा	३७७
स्नानार्हस्तु निमित्तेन	२७९
स्मार्तमौपासने	३५४
—	४८३
	५२१,५६५,९०७,९३१
विष्णुधर्मम्	
असंभाष्यांस्तु	८५०
अहोरात्रं न भुञ्जीत	४५०
वर्णत्रयात्सवर्णाद्वा	८९५
विष्णुधर्मोत्तरम्	
अथ काम्यानि	७६३
अष्टाविंशतिकोट्यः	८५९
एकादश्यष्टमी	८३१
ग्राह्यं प्राणप्रदानं	५९
तस्माच्छ्राद्धानि	७५८
तीर्थश्राद्धे सदा	८१७
त्रिंशन्मुहूर्तश्च	७०६
न दद्यात्कुणपं	५८३
धूपो गुग्गुलुजो	७९०
परस्थाने वृथादानं	५१
बिभर्ति निटिले	२०४

ऋषिः	पृष्ठम्
विष्णुधर्मोत्तरम्	
भगवन् कर्मणा केन	७०१
यथा विहन्ति	८०१
यस्तु विद्याभिमानेन	८६४
स ब्रह्महा स	८४५
सा तिथिस्तच्च	८५८
सौरसंवत्सर-	७२४
सौरमासमाधि-	७०१
—	६८५,७००
विष्णुपुराणम्	
३।९।२५-२८	१९२
३।११।५	२०९
३।११।१७	२१७
३।११।२७-२८	३७६
३।११।२९-३७	३८०
३।११।३९	३८४
३।११।४८-५३	४०१
३।११।६०	४१३
३।११।६८-६९	४१०
३।११।७७	४१९
३।११।७३	४१७
३।११।७५-७६	४१७
३।११।८२	४३१
३।११।८६-९५	४५४
३।११।१०१-१०९	४५५
३।१२।८-१०	४६१
३।१३।११-१२	६०६
३।१३।१४	६०७
३।१३।३४-३७	५६२
३।१४।१२	३७
३।१५।१७	८१२
३।१५।२८-२९	८०६
३।१५।३४, ३६	८०५
३।१६।५-६	७८२
३।१६।७-९, ११	७८४
३।१६-१३	४८४
अ. ११।२-३	५
अमावास्या यदा	७४३
अमावास्यासु न छिंद्यात्	२३४

ऋषिः	पृष्ठम्
विष्णुपुराणम्	
उपतिष्ठान्ति वै	३१४
गृहीतवियो	१७२
जातस्य जात	७५२
तिलैः सप्ताष्टभिः	६००
दुष्टानां शासनात्	६६
नदीनदतटाकेषु	२५५
पितृव्यगुरुदौहित्रा	७६९
पुत्रो भ्राता च	५६५
प्रेतस्य तापोप	५९८
माघासिते पञ्चदशी	७४३
यस्तु संत्यज्य	९०२
यागी दानं जपो	३०४
येनकेनापि	३०७
वैशाखमासस्य	७६१
शुशि वस्त्रधरः स्नातो	२४८
श्राद्धं श्रद्धान्वितः	७३५
श्राद्धोपवासदिवसे	२४४
सर्वं कालमुप–	४७७
स्वातिस्थिते	२८५
—	१२,५६३
विष्णुरहस्यम्	
अष्टमी कृष्णपक्षस्य	८३२
असामर्थ्ये शरीरस्य	८४८
एकादशी भवेत्काचित्	८४३
द्वादशीतिथि–	८४३
निष्कामस्तु गृही	८४२
परमापदमापन्नो	८३८
यदीच्छेत् विष्णु	८३७
रोहिण्यामर्धरात्रे	८३३
श्राद्धोपवासदिवसे	८५०
सूतके मृतके वाऽपि	५४७
विष्णुस्मृतिः	
उपवीतं शिखाबंधं	२९२
एकादश्यां न	८३८
शंखचक्राद्यंकनं	२९८
वृद्धगार्ग्यः	
अग्न्याधानाभि–	७५५

ऋषिः	पृष्ठम्
वृद्धगार्ग्यः	
ऋक्षेषूद्वाहनक्षत्रे	३७
एकादश्यां दशम्यां	२८३
घटीपरिमितः	३३
ज्येष्ठस्य तु क्रतोः	४८४
दशमी पुत्रनाशाय	२८२
नभस्यापरपक्षे	७४९
नामान्नप्राशनं	७३४
निमित्तं कालमादाय	८२५
प्राजापत्ये च पौष्णे	७४८
बुधत्रयेंदुवाराणि	८८
मातुः सहोदरो	६६१
मीनमेषौ रविः	७०१
यदास्तमयवेलायां	२७६
रात्रौ यामद्वयात्	३९
वर्षादौ सरितः सर्वा	२८७
शाखाधिपे बलिनिके	८८
स्वाध्यायवियुजो	८८
—	४८८,७३
वृद्धगौतमः	
अनृतवाक् खलः	८६१
चंद्रसूर्यग्रहे	४५०,८३०
मध्याह्नव्यापिनी	७०६
यायाद्वर्जोंतरे	३८
सेचनान्मार्जनात्	४७२
वृद्धपराशरः	
अनाशकान्	९१८
कृत्वाथ शौचं प्रक्षाल्य	२२१
तावत्तत्सूतकं	४९७
प्रेतस्पर्शनसंस्कारैः	५४६
यः प्रत्यवसितो	९१९
योऽसवर्णां तु मूल्येन	५४५
लेखाप्रभृति	७०७
—	५४०
वृद्धमनुः	
अन्यायोपात्त	२५६
अपुत्रा शयनं भर्तुः	५६३,६७०
अभिवादने तु	११०

ऋषिः	पृष्ठम्
वृद्धमनुः	
आरनालं च तक्रं	४५०
अराध्यं देवमाराध्य	२७०
कुर्यादनुपनीतो	६८५
कुर्यादनुपनीतोऽपि	५५९
कृषेस्तु विंशकं	९२३
क्लीबाद्या नोदकं	५३७
गुरुभार्गवयोः	३४
ग्रामेश्वरे कुलपतौ	५२९
जाते कुमारे	४८०
जाते कुमारे तदहः	८०
जीवन् जातो	५०५
जीवन्यदि समागच्छेत्	६३२
ततः सम्यग्द्विराचम्य	३५३
त्रयोदश्यां च	३९
दहनं वपनं वापि	५८९
दीपोत्सवचतुर्दश्यां	३८०
द्वादशेऽह्नि विप्राणां	६६६
न पिबेन्न च	४२९
न प्रातर्न प्रदोषे च	३९३
नभस्यस्यापरः	७४५
नाहरेदेकवस्त्रस्तु	३५३
नित्याग्निहोत्रं	२०
निमन्त्र्य विप्राः	७७८
न नियुक्तः शिखा	८००
निष्पीड्य स्नानवस्त्रं	२५३
पात्रभूतोऽपि	५१
बहुपत्नीकपक्षे	५७१
भार्यापुत्रकनिष्ठानां	५८८
मनुष्यतर्पणे स्नान–	२४८
मासिके आब्दिके	७७१
मृते जन्मनि	२५८
यस्य त्रैवार्षिकं	२०
रात्रौ यामद्वयात्	३९
वपनं दहनं वापि	५५८
वस्त्रं त्रिगुणितं	२५०
श्वशुरयोश्च भगिन्यां	५२६
षडोंकारान् जपेत्	३३९
संस्थिते पक्षिणी	५२४

ऋषिः	पृष्ठम्
वृद्धमनुः	
सोंकारा चतुरावृत्या	३३९
स्त्रीभिर्जितेषु	५१
स्वसूत्रेऽविद्यमाने	५
वृद्धमनुः	५०६,६४९
वृद्धमिहरः	
माधवाद्येषु	७३५
वृद्धयाज्ञवल्क्यः	
अध्यात्मपुस्तकं	१८७
आवसथ्यमनादृत्य	२४
आहिताग्निर्यथा	५६८
इष्टकालोष्टपाषाणैः	२४४
कर्मणो यस्य यः	७०६,७३०
कुमारजन्मदिवसे	७९,५०३
पौर्वाह्णिकास्तु	८३०
मित्रे जामातरि	४८५
वृद्धवसिष्ठः	
अग्रजस्तु यदा	२३
अनग्निकस्तु	३९८
अयने कोटिपुण्यं	२७६
अयने द्वे	२७४
अह्निसंक्रमणे	२७४
अहन्यहनि यत्	७५७
इंदौ निरुप्ते	८५७
कुशाभावेऽश्ववालो	२३४
गर्भवता ज्येष्ठेन	५५८
गर्भस्रावे मासतुल्या	४९२
गवां कोटिप्रदानेन	२७२
चौलवत्सकलं	१२३
तुषाग्निना दहेत्	५६८
त्रिदशाः स्पर्शसमये	७६०
दधिकर्कन्धु	७५६
दन्तकाष्ठे त्वमावास्या	२८३
पितरं मातरं वापि	२८६
पिता पितामहो	९९
प्रथमा स्यादमावास्या	६६७
भगिन्यां संस्थितायां	५२६
वृद्धवसिष्ठः	
मासत्रये त्रिरात्रं	५३५
भुक्त्वा मकरकर्कटौ	२७५
मृते च सूतके	४८५
यतीनां तु न	६६३
यस्यां तिथावस्त-	८२७
यावन्मेषर्षभौ	७७१
वापीकूपतटाकानां	७३४
विप्रस्य क्षत्रियस्यापि	८८
श्राद्धीयेऽहनि	७२९
सपिण्डीकरणं	६७४
सपिण्डीकरणं नैव	६७१
सर्वेषामपि वर्णानां	२७२
सूर्यग्रहे तु	७१७
सूर्यादि सौर्यन्तदिने	२८४
स्नानार्थमभिगच्छन्तं	२४९
--	४९२, ५३५
वृद्धविष्णुः	
रजस्वलां हीनवर्णा	२७९
वृद्धशातातपः	
अग्रजो वाऽनुजो	६२०
अपेक्षितं यो न	८०७
अशुचिं यः स्पृशेत्	२६५
आपोशनं परीधानं	४२२
आसने पादमारोप्य	८०९
उपविष्टस्तु विण्मूत्रं	२१९
ज्ञानी यस्य	७६८
त्रिष्वप्येतेषु	७५५
द्वितीया त्रिमुहूर्ता	८५७
पर्वणोयश्चतुर्थांशः	८५४
पीतशेषं तु	८८९
प्रीत्या श्राद्धं तु	५६७
मातुलो भागिनेयस्य	५६७
मुखे पर्युषिते	१९६
शावे च सूतके	५९०
संधिर्यपराह्णे	८५५
हस्तदत्तास्तु	८०४
वृद्धहारीतः	
देवानां तर्पणं	३६२
मातामहपितृभ्यां	६८१
राज्ञः प्रतिग्रहं	९२४
शुक्रवारेऽप्यति--	५८७
संघातमरणे पित्रोः	६४०
सकास्यं नालिकेराम्बु	४३८
सुपुत्रकामो यः	४५८
वृद्धात्रेयः	
यातुधानाः पिशाचाश्च	४१८
वेदव्यासः	
वेदविक्रयजं	७८३
वैखानसः	
आतुरे बाले	४७५
क्षुरकर्म न	३५
चिताया दक्षिणे	६०९
तिलदर्भास्तृते	६५०
सूतकप्रेतयोः	६५०
समानो मन्त्रः	६७७
अग्निर्यजुर्भिः	५८३
शावेऽन्याशौचयुक्ते	५५६
समिद्भिर्गोमयैः	२९५
वैजयन्ती	
अलसान्द्रो राजमाषः	७८४
वैजावापः	
अथ सीमंतोन्नयनं	७८
छिन्ने नाले ततः	८०
जन्मनोऽनन्तरं	७९
त्रिवर्षे चूडाकरणं	८३
पिता नाम करोति	८२
पुरास्तमयात्प्राक्	९८
मासि द्वितीये	७८
राजतानि प्रशस्तानि	७८९
वैयाघ्रपादः	
चण्डालं पतितं	२६६

ऋषिः	पृष्ठम्
त्रिविधो जपयज्ञः	३४०
प्रातःस्नायी भवेन्नित्यं	२४६
स्मार्तकर्मपरित्यागो	४७९
वैवस्वतः	
द्वादशवर्तितं	२०७
व्याख्यातारः	
—	३६४
व्याघ्रः	
अन्तर्दशाहे जातस्य	५०३,५०४
अवरश्चेत्परं वर्णं	५४५
अस्पृश्यस्पर्शनं	९०९
आदित्यांकिरणैः पूतं	२७१
उच्छिष्टमन्नं	६७
उपेते विषमं	५३६
उभाभ्यामपि हस्ताभ्यां	२४८
एकादशेऽन्हि	६४०
गन्धपुष्पाणि	८१७
चतुरंगुल	२०३
तुल्यं वयसि	५११
दहनायेव कार्यं	५३९
देशं कालं वयः	९२०
धात्रीफलं सदा	४३९
पतिव्रता तु या	६४४
पत्या सहैकता	६८०
बाले मृते	५१०
बाले मृते सपिण्डानां	५०४
ब्राह्मणो ब्राह्मणीं गच्छेत्	८८८
मातुः प्रथमतः	६८०
स्नाने चैव तु	२४७
—	५०४,५०५
व्याघ्रपादः	
असौ स्पृष्ट्वा कराग्रेण	२२६
आनन्त्यात्कुल	६९३
उपायनोदितः कालः	१३६
गंगातोयेन कृत्स्नेन	२२०
अतिदेशस्योप-	८६४
अभावे कूपवापीनां	२८९

ऋषिः	पृष्ठम्
आर्तवे देशकालानां	७१५
आर्तवेऽन्न	७५६
कृतचौलस्तु कुर्वीत	५६०
ततो वस्त्रद्वयं शुद्धं	२५१
न म्रियेत समं	१६२
नवश्राद्धे मासिके च	५५९
नाधोमुखं न	५८३
प्रातः संक्षेपतः	२४६
बाले मृते	५१०
य एवं ब्राह्मणो	२४०
वपनं यो न	५९०
विधिज्ञः श्रद्धयोपेतः	७०९
शावे च सूतके	५९१
संस्कृतायां तु	६६७
सिंहकर्कटयोर्मध्ये	२८७
स्मार्तकर्मपरित्यागो	२७२
व्यासः	
३।३६–३७	३७५
४।३५	५०
१।१।१	६५
२५।१५	१६०
अंगुष्ठमूलांतरतो	२२५
अङ्गुष्ठाङ्गुलिभिश्चैव	२६१
अंगुष्ठानामिकाभ्यां	२३०
अक्षताभिः स	७९२
अग्निहोत्रपरो	७६७
अग्नेः पश्चिमतो	३९६
अग्न्याधेयं गवा-	१७६
अच्छिन्ननाभ्यां	७९
अज्ञानात् बाहुजो	८७३
अतिथिं पूजयेत्	४१६
अतिथिं भोजयेत्	६९०
अतीते दशरात्रे	६६७
अथवा मन्त्रतः	३९८
अथागम्य गृहं	३५४
अथोपदिश्येत्	३४४
अधर्म्या ये विवाहाः	१४८

ऋषिः	पृष्ठम्
अधीत्य विधिवत्	११९
अधीयीत गृहस्थोऽपि	३४
अनध्यायेष्वधीतं	३१
अनुत्सृष्टे तु	२५६
अनृतावृतुकाले	७६
अन्नं दृष्ट्वा प्रणम्यादौ	४२१
अन्नप्राशनमातिथ्यं	१४७
अन्नहीनो दहेत्	२१
अन्यानीतैश्च	१९८
अन्ह्यस्तमयवेलायां	७१३
अपराण्हे तु मध्यान्हे	४५०
अपवित्रः पवित्रो वा	२२०
अपां द्वादश गंडूषान्	२२०
अभक्षस्य निवृत्या	४३३
अभुक्तवति	११५
अमा वै सोमवारेण	७४४
अयने विषुवे	४७
अयाचितं यथा	१९४
अरत्निमात्रं	१९६,८१७
अर्थानामुदिते	४४
अवमत्य च	१६३
अविमुक्ते	१९०
अवेक्षेत च	६
अशक्तावशिरस्कं	२८९
अश्विनीश्रवण	८३
आचम्य च ततः	४०८
आचम्य च यथाशास्त्रं	३७६
आचम्यांगुष्ठ-	४५३
आच्छाद्यालंकृतां	१४९
आजन्मनस्तु	४५१
आत्मार्थं भोजनं	३१
आ दन्तजन्मनः	५०७
आद्यमासिकमेव	६४८
आपद्यनग्नौ तीर्थे	२७२
आपो नारा इति	२४६
आपो हि ष्ठाः	३१७
आपोहिष्ठेत्यृचैः	३१५
आवाहयेत्तु	३२६

ऋषिः	पृष्ठम्
व्यासः	
आशौचं तु त्रिरात्रं	५२५
इत्येतदखिले	४५८
उच्छिष्टं न	८१८
उच्छिष्टोऽद्भिः	४२९
उत्तरे षडशीत्यां	७०५
उदक्यामपि चण्डालं	४२८
उद्धृत्य दक्षिणं बाहुं	९२
उपवीती बद्धशिखः	३१६
उपस्पृशेत्तृणं	२३६
उपाध्यायं पितरं	१०६
उपासते तु यां	३११
ऊढायाः पुनरुद्वाहं	१३९
ऊर्ध्वपुंड्रं त्रिपुंड्रं	३०७
ऋणत्रयमपा	१७६
ऋत्विक्पुत्रोऽथ	३५५
ऋषीन्देवान्	४०६
एकं तु भोजयेत्	४०२
एकपंक्त्युपविष्टानां	४२७
एकपादेन	१७०
एकमुद्दिश्य यच्छ्राद्धं	७०६
एकादशभ्यो विप्रेभ्यो	६४७
एकादशाहे त्वाद्यस्य	६४८
एकादशी यदा	८४०,८४२
एकादशेऽन्हि	६४५
एकैकमञ्जलिं	३७६
एकोद्दिष्टं परित्यज्य	६५९
एवं वनाश्रमे	१७१
औपनायनिकः	८९
कदाचित्कवचं	११०
कन्थाकौपीन	१८९
कन्याऽन्यस्मै	१३८
कपिलायास्तु	३६०
कराभ्यां तोयमादाय	३३९
करे कर्पटके चैव	४२०
काम एव मनुष्याणां	१९९
काषायवासाः	७८६
किं नु मे स्यादिदं कृत्वा	२१०
कुटुम्बार्थे तु	२२,५६
व्यासः	
कुतपप्रथमे	७०८
कुरुक्षेत्रं गयां	२५७
कुरूपो वा	१५७
कुर्वीतैवं दिवा	२१९
कुशैः पूतं भवेत्	२२९
कृतघ्नश्च तथाऽद्रोही	३१
कृष्णाजिनं	५३
कौपीनाच्छादनं	१८५
क्रोधेनैव च	८०८
क्षत्रवृत्तिं पराम्	६०
खट्वासंज्ञे च	४३४
गत्वा सेतुं समुद्रस्य	८७१
गवाह्निकं परगवे	४०८
गाण्डूषिकं जलं	३८९
गान्धर्वासुरयोः	१४९
गायत्रीं तु गुरोः	९७
गायत्री नाम	३१२
गुरुमूलाः क्रियाः	१९३
गुरुरग्निर्द्विजातीनां	१०६
गुरुशुश्रूषया	१२०
गुह्यका राक्षसाः	३२१
गृहस्थो वैश्वदेवाख्यं	४०५
गृहीत्वा वामहस्तेन	२३२
गृह्योक्तविधि-	९६
गोकर्णाकृतिहस्तेन	२२२
गोभूहिरण्य	४५
ग्रामान्ते वृक्षमूले	१९३
चण्डालपतितौ	२६६
चतस्रो घटिका	१९६
चतुर्थस्यैव	८२१
चत्वार आश्रमाः	१७६
चीर्णव्रता गुणैः	७६७
छत्रं च हरते	२८६
जन्मनाम्नोरविज्ञान	१२७
जलदेवान्नमस्कृत्य	३८३
जान्हवीतीरसंभूतां	२९३
जुषध्वमिति	८०६
जुहुयात् सर्पिषा	३९७
व्यासः	
ततस्तृप्तः सन्	४५२
ततो मध्यान्हसमये	२५९
तर्पणं तु शुचिः	२४८
तिष्ठन् प्रातर्	३३७
तिस्रः कोट्यर्धकोटी	२५०
तुरीयं तु पदं	३३४
तृतीयया युता	८३०
तृप्ताः स्थ इति	८९२
ते देशास्ते जनपदाः	१०
तेन स्मार्तमनु-	६
त्यक्ताग्नेः पार्वणं	८२१
त्रिमुहूर्तः प्रदोषः	८२९
त्रिरात्रमृतमध्ये	५३१
त्रिसंध्यासु जपेत्	३३९
त्रिः पिबेद्दक्षिणे	२२५
दत्ता नारी पितुः	५१६
दत्वा विप्रकरे	८००
दद्यात्पूर्वमुखः	१४९
दशकृत्वः	३३५
दशाहं शावमाशौचं	४९५
दिव्यतेजोमयः	१७५
दुर्विप्रा गणिका	५२
दृष्टचन्द्रा सिनीवाली	७३९
देयं पितृभ्यो	१७७
देव देव जगन्नाथ	३८९
देवयज्ञं पितृयज्ञं	३९५
देवाश्च पितरश्चैव	८०
देवासुरनरैः	४४०
देशक्षोभे	३१३
द्रव्याभावे द्विजाभावे	८२२
द्वाविमौ पुरुषौ	४११
द्वारोपवेशनं	१५७
द्वावेतौ समवीर्यौ	२०७
द्विजातिभ्यो धनं	५५
द्वितीयादिक	८२६
द्विविधस्तु गृही	६०
द्विहायनस्य वत्सस्य	६०२
द्वे रूपे वासुदेवस्य	१७५

ऋषिः	पृष्ठम्
व्यासः	
धर्मं यो बाधते	७
धर्ममूलं वेदमाहुः	१
धर्मार्थकाम–	६२
धूपार्थे धूरसी	८००
न किंचिद्वर्जयेत्	८१०
न कुर्याद्बहुभिः	४६१
नक्षत्रज्योतिरारभ्य त्वा	२११
न तस्य विद्यते	१९३
नद्यां देवालये	२४४
नद्या यत्र परिभ्रष्टं	२५८
न निर्वपति	७३५
न पृच्छेद्गोत्रचरणं	४१३
न प्रकाशं	३४०
न भिन्नां प्रतिपद्येत	३३४
न मेहेतजल–	२५५
नर्मदोत्तरदेशे तु	१४७
नाचामेद्वर्षधाराभिः	२२८
नाजीर्णे भोजनं	४२४
नाद्यात्सूर्यग्रहात्	४५०,८३०
नान्यतो ज्ञायते	३७४
नाभिमध्ये स्थितं	३२४
नामधेयं दशम्यां	८१
नास्नातां तु	७७
नित्यं स्वाध्याय	१६५
नित्यश्राद्धे तु	४०२
निर्वृत्ते चूडहोमे तु	४४९
निहन्त्यन्नं मनः	४४४
नैवेद्यमन्नं	३९०
नैवेद्यार्थं पृथग्	३९५
नैष्ठिकानां वनस्थानां	४८५
नोत्तरीयमधः	२५१
न्यस्तपात्रे तु भुंजीत	४२०
पंग्वंधबधिरा	५२
पंचार्द्रो भोजनं	४१७,४२०
पंथा देयो ब्राह्मणाय	१०७
पक्वाभावे प्रवासे	३९८
पक्षिणीं योनि–	५२७
पङ्क्तिभेदी वृथा	९०६
व्यासः	
पञ्चमीं दशमीं चैव	२८२
पञ्चमीं मातृपक्षात्तु	१२६
पतिव्रता तु	१५९
पतिव्रता संप्रदिष्टं	१६२
परदारान्न गच्छेत्तु	७६
परपूर्वासु भार्यासु	५२०
परमहंसस्त्रिदण्डं	१८५
परस्थाने वृथा	५१
परित्यजन्ति ये	१०६
पलाशपद्मपत्रेषु	४१९
पाठमात्रावसान	३१६
पानीयं पायसं	४३१
पानीयानि पिबेत्	४३०
पापदेशाश्च	१०
पालाश्यः समिधः	९८
पितॄन् मातामहांश्चैव	५६२
पुरीषं यदि वा	२१४
पृथ्वीं ससागरां	३४९
पुष्करेष्वक्षयं	७५९
प्रक्षाल्य च शुचौ	२४२
प्रक्षाल्य दन्तकाष्ठं वा	२४१
प्रक्षाल्य पात्रे	२०३
प्रक्षाल्य पादौ हस्तौ	२२१,२४१
प्रक्षिपेत्सूतके	३१४,४७८
प्रणवव्याहृति	३३८
प्रतिगृह्य द्विजो	५९
प्रतिपत्स्वेव	८२६
प्रतिपद्दर्शषष्ठीषु	२४४
प्रतिश्रयाद्दक्षिण	२११
प्रत्तानां तु तथा	४९८
प्रथमं तु	४९
प्रथमा गतिरात्मैव	४६५
प्रमादादकृते	६६६
प्रवृत्तिलक्षणं	१७४
प्रवृत्ते चूडाहोमे	९१४
प्राक्कूलेषु	३१३,३२३
प्राक्पश्चात्संक्रमे	२७३
प्राङ्मुखोऽन्नानि	४१८
व्यासः	
प्राचीनावीतिनो	५९७
प्राणयात्रानिमित्तं	२००
प्राणाग्निहोत्रं	४२३
प्रातरुत्थान	३४०
प्रातः काले तु संप्राप्ते	२४५
प्रातः स्नानेन संशुद्धा	२४५
बुधसोमौ शुभौ	६०७
ब्रह्मावर्त्तः परो	९
ब्राह्मणक्षत्रिय	९६
ब्राह्मे मुहूर्त्ते उत्थाय	२०९
भासवानरमार्जार	२६८
भुक्त्वा वै सुखम्	४५४
भृतकाध्यापितो	९०२
भोज्यमन्नं पर्युषितं	४३७
मधुपर्के च सोमे	२३९
मध्यान्हसमये	३६७
मनसैव जपं	३४०
मन्त्रपूतैर्जलैः	२५४
महाप्रस्थानिकं	१७१
मातरं पितरं	७२०
मातापित्रोश्च	५०
मातामहो मातुलश्च	१०४
मार्जनं वामहस्तेन	२१५
मार्जयेद्वस्त्रशेषेण	२५१
मासान् दशोदरस्थे	१०५
मुहूर्तत्रितयं	७०७
मृद्गोमयाभ्यामालिप्य	२६१
मौंजी त्रिवृत्समा	९५
मोक्षाश्रमं यः	२०८
मौनं वाचो निवृत्तिः	४२३
मौनी वाप्यथवा	४२३
यज्ञोपवीती भुञ्जीत	४१६
यतिश्च ब्रह्मचारी	४१०
यत्कृते दशाभिः	१३
यत्तिथौ यच्च	८२५
यथा गोषु प्रनष्टौ	८२३
यदि निर्हरति प्रेतं	५४५
यदि मासमहोमी	३५६

ऋषिः	पृष्ठम्
व्यासः	
यदि स्यात्क्लिन्नवासा	३४१
यदि स्यात्तर्पणात्	३६७
यदि स्याल्लौकिके	३९६
यद्यमन्त्रं समादाय	२३९
यस्तु पाणितले	४२५
यस्य यावत्	३९७
यस्य हस्तौ च पादौ	२८६
यस्यैतानि सुगुप्तानि	१७३
यः पात्रपूरणीभिक्षां	४१०
यः सूर्यसहितां	३११
यावद्वर्णविभागो	१७६
ये त्वेकजाता	४९७
ये मृताः पापमार्गेण	४८९
योगपट्टोत्तरीयं च	२३३
योऽनूचानं	३५०
योऽनूचानं द्विजं	९३४
यो मोहात्स्नानवेलायां	२४३
यो विप्रो भृतकं	६०१
रविग्रहे सूर्यवारे	२७३
रवेरस्तमयात्	५५५
रागद्वेषविमुक्तात्मा	१८७
रागांधो हि	१९२
रात्रेः षोडशके	३५७
रात्रौ चतुर्थ्यां	७५
रात्रौ विवाह उत्पन्ने	१५०
रात्रौ स्नानं न	७९
वक्त्रप्रमाणं पिण्डांश्च	४२५
वर्ज्जयेद्दन्तकाष्ठानि	२४२
वसंते ब्राह्मणस्य	२४
वाणिज्यस्याष्टमं	९२३
वासस्तण्डुलमप्पात्रं	५९६
विट्शौचं प्रथमं	२१८
विद्याग्रहणशक्तस्य	१००
विना यच्छिखया	९१
विन्यस्यैवं	३३१
विप्रश्चातीतकालः	८८
विप्राणां चरणस्पृष्टं	२३३
विरक्तिश्च द्विधा	१८३

ऋषिः	पृष्ठम्
व्यासः	
विशीर्णायुः क्षयं	३६०
विश्वामित्रऋषि	३२६
विष्णोः प्रस्थापनोत्थान	१४८
वेदशास्त्रविनोदेन	४६५
वेदाभ्यासं ततः	२९
वेदाभ्यासोऽन्वहं	४१६
वेदो वृक्षस्तथा	१९८
वैणवा ये स्मृता	१८४
वैणवीं धारयेत्	१२३
वैश्वदेवस्तु कर्त्तव्यो	४०२
व्याधितो बन्धनस्थो	७६
शवं दग्ध्वा यथान्यायं	५९७
शालाग्नौ लौकिके	३९६
शिरोललाट	९३
शिल्पिनश्चित्रकारायाः	४८६
शिवो वह्निगुरुः	३९४
शीतास्वप्सु निषिच्योष्णा	२५९
शुक्लाष्टम्यां तु	३८१
शुक्लाष्टम्यां तु	३८१
शुचौ देशे	२९१
शूद्रायोनौ पतद्द्विजं	१३४
श्राद्धे यज्ञे च	२४३
श्लेष्मशृंघाणिको	४३१
श्राद्धविघ्ने समुत्पन्ने	७१६
श्रावण्यामथवा	३३
श्लेष्मातकस्य	३७
श्वभ्यश्च श्वपचेत्	४०१
षष्ठ्या तु दिवसैः	७२३
षष्टिभिर्दिवसैः	७२९
षष्ठ्यष्टमी पञ्चदशी	२८३
षाड्गुः पादौ	२६०
षण्मासान्वर्जयेत्	५९३
संज्ञाहानौ मरणेऽपि	५५२
संनिकृष्टमधीयान	५०
संपूज्य गन्धपुष्पाद्यैः	६४५
संवत्सरस्यैकमपि	४५१
संवत्सरेण पतति	२८,१५३
संशुद्धैर्यजमानैः	२३

ऋषिः	पृष्ठम्
व्यासः	
सजलं भाजनं स्थाप्य	२१३
समक्षं वा परोक्षं	८८३
समानोदकभावः	४९६
समुद्रयानं मांसस्य	४५२
सर्वं गंगासमं	२७१
सव्याहृतिकां	३२६
ससूतकं समृतकं	२६५
सहस्रपरमां	३३७
सहस्रपरमां नित्यं	३३८
सायंप्रातर्मनुष्याणां	४१७
सायमग्निश्च	३१७
सुक्षेत्रे वापयेत्	४१५
सुदूरादाशया	४१२
सूतकान्ते नरः	६५१,७२८
सूतके तु	५०१
सूतिकापतितौ	२६६
सूतिकावासनिलया	५०२
सूर्येऽस्तशिखरं	४५५
सोपानत्को	२२९
स्नानं मध्यंदिने	२५४
स्नानमब्दैव	२९०
सगोत्रां मातुरप्येके	१२६
सिन्धुसौवीर	११७
सूतकान्ते नरः	६४७
स्थाप्याः प्रतिद्विजं	८०१
स्वकालातिक्रमे	७०९
स्वयं प्रक्षाल्य	४१९
स्वयमेवोपसन्नाय	२९१
स्वाध्यायं चान्वहं	१८३
हंतकारमथाग्रं	४०४
हरिद्रां कुंकुमं	१५८
हरिरोमिति	२९
हव्यार्थे गोघृतं	३६१
हस्ते च विद्यमाने	४२९
हुत्वाग्निं विधिवत्	४५५
हृदि तत्सवितुः	३३१
हैमेन सर्वदा सर्वं	२३२
होमः प्रतिग्रहो	३४१

ऋषिः	पृष्ठम्
होमे भोजनकाले	२३७
—	४०
१२१, १२५ टीप, २६६, ३३८,	
५०२, ६५५, टीप, ८४४,	
व्याससूत्रम्	
७।१।३९	३१८,३४६
व्रतचतुष्टयम्	
मेखलामजिनं	३५
शक्तितन्त्रम्	
आर्द्रं ज्वलति	३००
शङ्करसंहिता	
यत्र भुञ्जीत	३०५
शङ्खः	
१६।२०–२१	२१७
अग्निहोत्रार्थं	४७६,५०५
अग्न्युत्सादी	९२१
अङ्गुलिनां चतुष्कोणं	२२६
अंगुष्ठमूलस्यान्तरतः	२२५
अजातदन्ते तनये	५०७
अतीते दशरात्रे	५३४
अथांगुलीनां	३४३
अध्यास्य शयनं	९२२
अनध्यायेष्वधीयान्	७७५
अन्वारोहे तु	६७८
अपुत्रायाः पतिः	६७०
अपूपाः सक्तवो	४३७
अद्भिः समुद्धृताभिस्तु	२२२
अनौरसेषु पुत्रेषु	५२०
अभ्यवहार्याणां	४६८
अमावास्या तु	७४४
अमाश्राद्धं प्रकुर्वीत	३८२
अलाबुशिग्रु	४३६
अस्नातस्तु पुमान्	२५४
आदित्या वसवो	४१८
आदौ मध्ये तथाऽन्ते	६१५
आद्यश्राद्धम्	६१९

ऋषिः	पृष्ठम्
शङ्खः	
आम्रांश्च कदली	७८१
इष्टिश्राद्धे क्रतुः	७९२
ईकारांतं स्त्रीणामेवं	८२
उग्रगन्धीन्य	७८९
उच्छिष्टस्पर्शनं	८१०
उपलिप्ते शुचौ	४१७
उपवीतं कटौ	८००
ऊर्ध्वं दशाहात्	५३५
ऊर्ध्वं वार्षिकाभ्यां	१९०
काशहस्तस्तु नाचामेत्	२३४
कुमारप्रसवे	८०
कुर्यान्निरवकाशं	६८८
कुलदेवतानक्षत्राभि	८१,८२
कुशबृस्यां	३३६
कुशालाभे द्विजः श्रेष्ठः	२३४
कृतेषु मासिकेष्वेव	६५६
कृष्णरुरुबस्तानि	९४
केशावधिललाटान्	९३
क्रियास्नानं प्रवक्ष्यामि	२८६
क्षीराणि यान्यपेयानि	४३८,८८२
गर्भस्पंदने	७८
गृहाश्वरथ–	४४६
गोगजाश्वादि	७५८
गोदोहमात्र	४०८
गोपुरीषं यवाभ्यासो	९३९
घृतेन दीपो दातव्यः	७९०
चण्डालीं पुल्कसीं	८८७
चतुर्थे दशरात्रे	५१८
चतुर्थे मासि कर्त्तव्यं	८२
चतुर्दश्यां तु	६६६
चांद्रायणं नव	९१४
चांद्रायणं नवश्राद्धे	४४९
ज्येष्ठे तिष्ठत्यनूढे	१५३
तिस्रः कोट्यर्ध	१६१
तृतीये वर्षे चूडाकर्म	८३
त्रियहं योनिबन्धूनाम्	६१७
त्र्यहं च योनिबन्धूनाम्	५४५

ऋषिः	पृष्ठम्
शङ्खः	
त्र्यहं त्रिषवण	९३९
दधि भक्ष्यं च	४३७
दन्तवद्दन्तलग्नेषु	२३८
दर्भाः कृष्णाजिना	२४३
दशमान्तर्गते	५०४
दशम्यामुत्थाप्य	८१
दानं प्रतिग्रहो	४७७
दारानाहरेत्	१२५
दीपाग्निं दीपतैलं	३०७
दुःस्वप्नारिष्ट	९२२
दूर्वां प्रवालमग्निं	६००,६०४
देशान्तरगतं	५३४
न पुत्रः पितुः	१०५
न वेदमनधी–	११५
नाघमर्षणात्	३३५
नानुक्ता गृहान्	१५६
नानुदको नामृत्तिको	२१२
नाम चैव तथोत्पत्तिं	७९७
नाल्पोदके निमज्जेत्	२५६
नास्तिको नास्तिक	८९९,९२२
नोदकुंभहस्तो	१०९
पर्यटनशीलः	१९३
पितुः पुत्रेण	६७०
पितुः पुत्रेण कर्त्तव्याः	५६३
पितृवेश्मनि या	५१५
पित्रादित्रयपत्नीनां	७१८
पीतावशोषितं	४२९
पुत्राणामसवर्णानां	४९८
पुत्राभावे तु	५६५
पुरुरवार्द्रवौ	६६४
पूर्वाह्ने दैविकं	७०९
प्रथमेऽह्न्यारभ्य	६१५
प्रपद्ये वरुणं देवं	२६०
प्रयतोऽपराह्णे	७११
प्राङ्नामकरणात्	५०३
प्रातः संध्यां सनक्षत्रां	३१०,३७५
प्रोष्ठपद्यामतीतायां	७४९
बालवृद्धमत्तोन्मत्त	१०७

ऋषिः	पृष्ठम्
शङ्खः	
ब्रह्मदेयानु	७६६
ब्रह्महा कुष्ठी	८६१
ब्राह्मणेन क्षत्रियायां	७०
ब्राह्मणोच्छिष्टाशने	४३१
भूमौ माल्यं पिण्डं	६०१
भृतकाध्यापको	१०४
भोजयेद्‌थ वा	७७८
मनुयमदक्ष	८
मातर्यग्रे प्रमीतायाम्	५३२,६३६
मातामहादेः	७७१
मातुः सपिण्डीकरणं	६७८
यत्रक्वचन	७५९
यथाविभव	७९१
यदा विष्टिव्यतीपात	७६०
ययकेजाता बहव	१२८
रथ्याकर्दम	२६७
रथकारस्तस्येज्या	७१
रागद्रव्याणि	४७०
रौद्रश्चैत्रस्तथा	७०७
लशुनपलाण्डु	४३४
वापीकूपतटाकेषु	२७१
वाराणस्यां कुरु	७५९
विचार्य च पुराणार्थान्	४५४
शतिपाकीमपि	७८४
शुक्लपक्षे तिथिर्ग्राह्या	८३७
शूद्रस्य सूतके भुक्त्वा	४४८
शूद्रान्नं ब्राह्मणो	९०७
श्राद्धपंक्तौ तु	८१०
श्राद्धपंक्तौ तु भुंजानो	४२९
श्राद्धे नियुक्तान्	८०९
संध्यादिनित्य	३१५
संवत्सरं व्रतं	८७८
संवत्सरात्प्राक्	८३
संस्कारैः संस्कृतः	७३
समानाशौचसंपाते	५३१
सर्वासां द्विस्तनीनां	४३६
सर्वेषां सकुल्यानां	७९
सहस्रं भोजयेत्	२२

ऋषिः	पृष्ठम्
शङ्खः	
सावकाशं तु	६९२,७३४
सूर्यायैव तु	३१९
स्नातस्य वह्नितप्तेन	२५८
स्नानं तु द्विविधं	२५३
स्नाने भोजनकाले च	२३७
स्वरवर्णपदैः	३३८
हस्तिच्छायासु	७६०
—	१२७ टीप, ५०४
	५०५, ६७९
शङ्खलिखितौ	
अथ चेदन्तरा	५३०
अन्नपानं प्रभूतं	८०८
आपत्स्वपि च	४६५
आहारं मैथुनं	४७
उभाभ्यामपि हस्ताभ्यां	३७६
कृतघ्नः कूट	८६६
क्रयविक्रय	९१६,९३१
गुप्तायां वेश्यायां	१२२
त्रिरात्रोपोषितो	९३४
द्रव्यहस्त उच्छिष्टो	२४०
म्रियमाणे तु	७२१
नात्यधिकं दद्यात्	८०८
नार्तवे दिवा	७४
पत्नी मध्यमं	८१७
परिवित्तिः परिवेत्ता	९०३
बलिं बलिभुजो	८१३
रागद्वेषाग्नि	६
सपिंडता तु सर्वेषां	४९६
स्वैरिण्यां वृषल्यां	८८८
शंभुः	
उत्तरे क्षतसंयुक्तान्	७९२
उदक्प्लवमुदीच्य	७९१
शातकम्	
आ त्रिपूरुष	४९८
कृच्छ्रादीनां समाप्तिः	५२०
दशरात्रं सदा	६२१

ऋषिः	पृष्ठम्
पाते सद्यस्तु कठिने	४९२
मुख्यकर्तुरघं	६९१
वत्सरमध्ये तत्परं	६२२
—	४९४, ५०२, ६२४
शातकव्याख्याकारः	
—	६९३
शाकटायनः	
बालस्त्वन्तर्दशाहे	५०६
शाट्यायनिः	
आब्जं हिरण्मयं	३५३
ततः सूर्यमुपस्थाय	३५३
नद्यादौ सम्यगाचान्तः	३५३
नभस्यास्यपरे	७४५
पुण्यः कन्यागतः	...
प्रेतश्राद्धानि शिष्टानि	६५६,६६९
यावत्कालमहोमी	३५६
सपिण्डीकरणात्	६५६
—	६५८ टीप
शाण्डिल्यः	
अग्नैः प्रभूतैः	४५५
अयाचितानि	४३
अयाचितोप	६०
अवकीर्णी द्विजो	१२२
आर्द्रवासा न कुर्वीत	३५
उच्चैः स्वरेण यः प्रातः	२११
एकादश्यां सिते	३९१
कुटुंबिनो विनाऽन्येषां	२८७
ग्रहादिसेविते रूक्षे	२५८
जीवनार्थं हृतं	२८७
दीक्षितोप्येक	४८४,५६०
द्वारवत्यां सेतुबन्धे	६०९
न गच्छेद्गर्भिणीं	७७
न हुंकुर्यान्न	३९०
नातिदोषावहं	४२०
नावश्यं भोजने	४२३
पिबेत् भोजनपात्रेण	४३०
प्रदक्षिणे प्रणामे	१६

ऋषिः	पृष्ठम्
शाण्डिल्यः	
प्रदक्षिणे प्रणामे	३४१
बाहू जान्वन्तरा कृत्वा	२४१
भुवं स्पृष्ट्वा तु	४१८
मासादिचूर्णैः	४५३
वानप्रस्थो यतिः	८९२
वासो भूषणमाल्यादि	४४०
शुद्धिं कुर्यात्तथा	४६१
शातातपः	
अंगेषु नांकयेत्	२९९
अग्न्युत्सादी	३५७
अग्रासनोपविष्टस्तु	४२७
अतिथिर्यस्य	४१६
अनग्निरपि यो	२७
अनाद्यगर्भो	६६१
अनुक्तेषु विधिं	९३१
अनृतं मद्यगन्धं	३१५
अन्त्यैरपि कृते	२५६,४७४
अन्नपानाश्व	५५१
अन्यगोत्रोऽप्यसंबंधः	६१८
अपराह्णे पितॄणां	७०९
अभिवाद्यो नमस्कार्यः	१०९
अमायां च नवम्यां च	२८३
अमावास्या भवेद्द्वारे	२८०
अर्धं पीत्वा तु	४५२
अवमत्य च या	१६३
अविज्ञातं द्विजं	७७०
आचम्य पात्रमुत्सृज्य	४५३
आभाकासित	३७
आर्द्रामलकमात्रा	२१८
आशौचस्यापि	६०२
उद्धृत्य वामहस्तेन	४२९,८६५
उष्ट्रीक्षीरं मृगीक्षीरं	४३८
एकमातृप्रसूतानां	१४६
एकमूर्तितमायाति	७१९
एकादशसु विप्रेषु	६४७
एकादशाहात्	४९५
एका लिंगे करे	१९६,२१८
एकोद्दिष्टं जलं	६६२,६६३

ऋषिः	पृष्ठम्
शातातपः	
एकोद्दिष्टं सुतः	६२६
कुर्यात्सदायने	२७६
क्लीबे देशान्तरस्थे	१५२
क्लीबैर्न पतितैः	६७४
गवां शृङ्गोदक	२६९
गोकुले यज्ञ-	४७५
गोवालतृण	३५३
ग्रासमात्रं भवेत्	४०४
चतुर्थेऽहनि	९४
चितौ दहनमेतेषां	५८४
चित्ते विभावयेत्	४१३
जन्मनैव महाभागो	६९
जपे होमे तथा दाने	२३०
तन्मात्रा तात्पिता	६८०
तपो दमो दया	१८
तिलान् ददत्	४२
तैलं घृतं दधि	४४६
दन्तलग्ने फले मूले	२३९
दर्भहीना तु या	३२०
दर्शश्राद्धं तु	७३६
दाराग्निहोत्र	२३,१५३
नदीतीरेषु गोष्ठेषु	९४२
न यावदुपनीयंते	२१९
नष्टं देवलके	५१
नाग्नयः परिविंदंति	२३
निगृहीतेन्द्रिय	२०६
नित्यश्राद्धमदैवं	४०२
निर्वपेच्चतुरः	६७७
पलांडुलशुन	४३४
पवित्रं तु करे	८००
पिण्डनिर्वापरहितं	७३८
पुत्राणामसपिण्डानां	४९७
पूर्वाह्णे मध्यमे	८५४
पृथक् दिने	७५४
पूर्वाह्णे मातृकं	७५४
प्रश्नपूर्वं तु यो	३१
बहुल्पं वा स्व	१५

ऋषिः	पृष्ठम्
शातातपः	
बालानां पंचम	८६
ब्राह्मणस्य व्रण	१०५
भिक्षा माधुकरी	२०४
भोजयेद्यस्त्वथ	७६५
मण्डनं मुण्डनं चैव	१४५
मद्यं पीत्वा	६३५
मद्यपानप्रवृत्ता	१५१
मातुलस्य सुताम्	१२६
मातृश्राद्धं तु	७५३
मार्गे तु यत्र	२७९
मासिके चाब्दिके	७१९
मूत्रोच्चारं द्विजः	९०९
मृता याऽनुगता	६७८
मूल्यकर्मकराः	४८६
यथाकथंचित्	८२०
यथाश्वा रथ-	४९
यद्येकजाता	४९७
या मृता सुभगा	६४३
युवा सुवासा	७९१
योगिनं भोजयेत्	७६८
यो हि हित्वा	४४५,९०६
रजकश्चर्मकृत्	२६८
रात्रिशेषे व्यहात्	५३०
रात्रौ धाना दधि	४३८
रेणवः शुचयः	४६५
लशुनं गृंजनं	११८
वत्सरान्तर्गतः पापो	७२३
वनस्पतिगते सोमे	४४९
वरश्चेत्कुलशीलाभ्यां	१३८
वरो वरयितव्यो	१३४
वसवः पितरो	८२३
विश्वदेवनिविष्टानां	८१३
वेदाक्षराणि	३१
शुचिदेशात्तु	१९६,२५९
शेषमन्नमनु-	८२०
श्रवणाहे न कुर्वीत	६२१
श्राद्धे कृते तु	३८२

ऋषिः	पृष्ठम्
शातातपः	
श्रौतं यत्तत्स्वयं	३५५,३६५
संक्रान्त्यां यानि	२७३
संधिन्या अंतर्दशाया	४३७,८८२
संनिकृष्टमधीयानं	५०
सत्यं शौचं तपो	३०३
सद्यः पतति	६२
सपिण्डीकरणं	६५८
सपिण्डीकरणं कृत्वा	७१८
समानप्रवरां	९०३
समानप्रवरां कन्यां	१२७
सर्वस्वेनापि कर्तव्यं	७६२
सुरां पीत्वा	३४९
सूर्यसंक्रमणे	२७३
स्नानं दानं तथा	२७२
स्वगोत्राद्भ्रश्यते	६८१
स्वर्गकामो वृषोत्सर्गे	६४६
स्वाध्यायेनाग्नि	४१५
हंसस्वरां मेघवर्णा	१२४
हस्तदत्तानि	४३०
हस्तवाताहतं	८००
—	४७५,४८३,७३१
शालंकायनः	
कुशाग्रस्तर्पयेद्देवान्	२३१
शिक्षोपानिषद्	
—	७३
शिवः	
—	७४४ टीप
शिवधर्मोत्तरम्	
मासिके चाब्दिके	७२०
शिवपुराणम्	
धरामभ्यर्च्य	९२९
शिवरहस्यम्	
अन्यायाद्विप्र	८८४
शिवराघवसंवादः	
अमावास्या तु	७३९
अल्पापराह्णे	७३९
ग्रहादिव्यतिरिक्तस्य	७११
प्रातःकाले तु	७१०
शिवसर्वस्वम्	
यावन्न कीर्तयेत्	१३
शिवस्वामी	
न मासिकश्राद्धं	६५७
नव श्राद्धानि	६०५
शुद्धिनिर्णयः	
ऊर्ध्वोच्छिष्टाधोच्छिष्टं	५५३
इह केचिदनभिज्ञाः	५९१
दशादिनपर्याप्त	५९६
महागुरुमरणे	५९३
व्रतान्ते विधिवत्	५९३
—	५५२
शुनःपुच्छः	
पैतृके प्रेतकृत्येषु	५७९
शालिना सक्तुभिः	६०२
शैवः	
ऊर्ध्वपुंड्रं त्रिपुंड्रं	३०७
चापराशौ स्थिते	३९१
शौनकः	
अग्नावनुगते	२४,३६४
अग्निमुत्तपनं	५६९
अग्निर्विष्णुः	३७८
अग्निश्चेत्यनुवाकेन	३१७
अथ बलिहरणम्	३९९
अथाग्न्योर्गृह्य-	५७१
अनग्निश्चेद्दायं	६८६
अन्त्यजैः खानिताः	२५६
अमायां तु न	२४४
अष्टम्यां च चतुर्दश्यां	४४९
आ ब्रह्मलोकाद्‌ा	३२१
आयुष्कामो दिवारात्रौ	४०१
आवाहनं तैत्तिरीये	३२६
शौनकः	
उत्तमेत्यनुवाकेन	३४४
उभयोः सन्ध्ययोः	२४६
ऋण्यादीनि	३३६
एकं पादमथैकस्मिन्	३२१
एकर्चविधिना	५१२
एकैकस्य द्वौ	७७७
ॐ भूर्भुवः सुवः	१७९
कनिक्रदं जपेत्	९०६
कल्केनामलके-	२८०
कृत्वोत्तानौ करौ	३४०
कृष्णाजिने तु	५७४
केचित् गणपतिं	३९४
गर्भिणीमरणे	६४४
गर्भिणी यदि	९९
गायत्र्या वाऽऽदाया	२६०
चण्डालसूतिको	५४७
जलमध्ये स्थितो विप्रः	२४६
ज्ञानं महेश्वरादि	१९८
तत उद्धृततोयेन	२१८
तर्जनी मध्यमांगुष्ठ	४२३
ताः प्रतिग्राह	७९९
तृतीये वर्षे चौलं	८३
तेजसाश्ममय	७९८
तेषु तद्रुकवत्	६८६
दन्तानां धावनं कुर्यात्	२४३
दर्भान् द्विगुण	७९४
दहनादि सपिण्ड्यन्ते	६३३
देवादींस्तर्पयेत्	२४९
दैवं च वार्षिकं	१७७
धनुः सहस्राण्यष्टौ	२५५
न नदीषु नदीं	२५७
नवप्रणवयुक्तेन	३१६
नातानमिति सूक्तं	५५२
निरुद्धासु न कुर्वीरन्	२५६
निशायाः प्रथमे	४५६
नैकपुत्रेण कर्त्तव्यं	१०३
पाकं सर्वमुपानीय	८०४

ऋषिः	पृष्ठम्
शौनकः	
प्रक्षाल्य पादौ हस्तौ च	२२७
पाणिग्रहणात्	३५५
पीडयित्वा य	२०२
पाणिपात्रं चरन्	२०१
पुरुषस्य हरेः	३५०
पूर्वेद्युर्नान्दीमुखं	१७७
प्रभूते विद्यमाने	२५६
प्रयतो मृदमादाय	२५९
प्राग्वोदग्वा	३६९
प्राजापत्ययेष्ट्वा	१७९
प्राणायामान्	३२६
प्राणायामैर्दग्ध-	३६९
प्रातराचमनं कृत्वा	२४५
प्रौष्ठपद्यापर	७५१
ब्राह्मणानां सपिंडेषु	१०२
ब्राह्मे मुहूर्ते	१७९
ब्राह्मे मुहूर्ते उत्थाय	२०९
भोजनोपरमात्	८११
मनः संतोषणं	३४०
महत्तत्प्रजपेत्	२७
यदा चैवोद्धृतं	७९८
यश्च श्रुतिजपः	३६९
यस्मिन्वयं जपेत्	९१३
वक्ष्ये पुरुषसूक्तस्य	३८५
वापिकूपतटाकेषु	२५६
विच्छिन्नवन्हि-	३६४
विजातवृक्षं क्षुण्णाग्रम्	२४१
वेदाक्षराणि यावंति	३१,९०१
व्याहृत्या सह	३१९
श्रुतिषु प्रबला	३४९
समावृत्तो ब्रह्मचारी	३४
स्नानवस्त्रेण यो विप्रः	२५१
स्मार्तोऽग्निर्विविधो	३५४
स्वर्धुन्या तु समानी	२७२
स्वाहांताः प्रणवाद्याश्च	४२२
हुतशेषेण पृथक्	३९५
हुत्वाग्नौ परिशिष्टं	८०३
हेमन्तशिशिरयोः	७४४,

ऋषिः	पृष्ठम्
शौनकः	
— १७९, ३३८, ५७१, ५७४, ५७७, ७७७.	
शौनकपरिशिष्टम्	
यावत्यो रेचकम्	२०७
शौनकस्मृतिः	
गन्धमाल्यैः पात्रं	७९९
श्रीधरीयम्	
अस्थिसंचयन	६०७
अस्थिसंचयनं कार्यं	६१०
एकादशाहमारभ्य	६६५
एकोद्दिष्टे तु	६५०
कन्या कुम्भगते	६६६
केशान् मासत्रयात्	५९४
चतुर्थे पंचमे चैव	६०७
तृतीये पञ्चमे	६०५
त्यजेत्संक्रमणं	६१२
दशाहकर्मण्यारब्धे	६१६
दशाहान्तः सपिण्डानां	५९९
दिवसं गुणदोषाभ्यां	६१०
द्वादशाहप्रभृत्यस्य	६९०
द्वादशाहे त्रिपक्षे	६८३
द्विचन्द्रदर्शने	६१४
नग्नप्रच्छादनं दद्यात्	५९६
नर्मदोत्तरभागेषु	१४७
पुत्रस्य पाणिग्रहणात्	१४५
भरणी यमदेवत्वात्	६३४
मृताहे केशवपनं	५९१
रात्रावपि	५८६
रात्रौ यामद्वयात्	५८७
वामपार्श्वे गृहद्वारे	६००
श्राद्धमेकोत्तरं	५९८
षष्ठाब्दे द्वादशाब्दे	५९३
— ५५७, ६१८, ७२६	
श्रीपतिः	
आज्ञया नरपतेः	५९०

ऋषिः	पृष्ठम्
श्रुतिः	
१।६।९	२०
अपराण्हः पितॄणां	७०९
अपां वा एष	३६८
एतच्चं योऽनूत्सृज-	३७२
उत्तमं नाकं	३७२
कुटीचको	१८३
जायमानो वै	१५२
ग्रामे मनसा	३७०
तद्यदिदमाहुः	३६०
तस्माद्वेचो न	६४२
तस्य वा एतस्य	३७१,३७२
तिस्रो रात्रीर्व्रतं	७५
त्याग एव हि	१७५
त्रीनेव प्रायुङ्क्त	३६८
दक्षिणत उपवीय	९२
दक्षिणत उपवीयोप	३६८
दक्षिणोत्तरौ पाणी	३६८
दर्भाणां महदुपस्तीर्यो-	३६८
दानमिति सर्वाणि	४०
दिवा न रात्रौ	४४९
नव वै त्रिवृत्	९०
न सुरां पिबेत्	८७९
नामावास्यायां	७४
ब्राह्मणो वै	७०
मध्यंदिने प्रबल	३७०
यच्चिराचामति	३६८
यदृचोऽधीते	३७३
यद्वै किं च	६
विष्णुनात्तमश्नंति	४४०
वीरहा वा	२२
स वा एष	३७०
श्रुतिरत्नम्	
आपोशनमकृत्वा	४२३
श्रुत्यन्तरम्	
आत्मानं चेत्	१९५
पूर्वाह्णो वै	७०७

ऋषिः	पृष्ठम्
श्लोकगौतमः	
अन्तर्दशाहे दर्शः	६१४
अपुत्रा तु यदा	७१५
आरभ्य कुतपे	७०८
कन्यागते सवितरि	७४५
द्वौ मासावेक	७२३,७२५
पूर्ववत्पृथगे	७११
पूर्वाह्णे चेत्	७४०
श्राद्धीयेऽहनि	६८७
षट्त्रिंशन्मतम्	
अपेयं हि सदा	२७०
अपेयं हि सदा तोयं	२३७
आगतो ज्येष्ठपुत्रस्तु	६२०
आपः स्वभावतो	२५८
आमश्राद्धं यदा	८२२
आमश्राद्धे भवेत्	९१५
उदिते विमले	३८२
उभाभ्यामपरि-	४८०
ऐन्द्वेन मृगा	६२४
गोब्राह्मणहतानां	४८९
तस्मिन्दिने श्राद्धमेकं	६२०
ताम्बूले चैव सोमे	२३९
तृतीयां मातृतः	१३०
दशकृत्वः पिबेदापो	४४९
देवयात्राविवाहेषु	२८०
पापमार्गमृतौ नृणां	४९०
प्रेतकार्याणि सर्वाणि	६१५
भिक्षामात्रे गृहीते	९२४
भुंजानेषु तु	४८४
मातुः सपिण्डीकरणं	६७८
मासिकाब्दे तु	६५४
यद्यप्यजात-	५०९
यस्य त्वेकगृहे	७७०
विवाहोत्सव-	४८४
शावाशौचे समुत्पन्ने	५३०
षण्डं तु ब्राह्मणं	८७४
संनिकृष्टमधी-	७७०
सपिण्डीकरणात्	६९३

ऋषिः	पृष्ठम्
षट्त्रिंशन्मतम्	
सर्वेषामेव वर्णानां	४५०
—	७८५
षडशीतिः	
अन्तर्दशाहे दाहे	६२९
एवं पित्रोर्भगिन्यौ	५२६
ज्ञातेर्मृतौ यदा	५२३
त्रिदिनं त्रिषु	४९६
देशकालादिभेदे	५२३
द्वितीये प्रथमे	५०९
नाभिकृंतनतः	५०६
पूर्वाशौचेन	५३३
पूर्वेण चापरेणापि	५३२
यत्र तूद्वाहिता	५१७
यावत्सूतक	५००
शावादल्पा समा	५३१
सूतकात्प्राक्	४८२
षड्धर्मीयम्	
गर्भिणीष्वसवर्णासु	५९२
दर्शो यत्रापराह्णं	७४०
सायंतन्यपरत्र	७१४
षड्विंशम्	
ब्राह्मणीं वार्धकीं	८८८
संग्रहः	
अकृते प्रेतकार्ये तु	६९१
अग्निवेदाश्रयः	५९९
अग्निहोत्रपरिभ्रष्टः	२१
अघान्तं स्पर्शमेव	५०१
अजखरकरभा	४६२
अद्ये भोक्तुर्धिया	४४८
अत्याशौचं दिनं	५३५
अधिमासे हरेः	६३४
अधिसंपर्कतोऽशौचं	५४०
अन्तर्दशाहदाहे तु	५३७
अन्तर्दशाहे दर्शः	६१४
अन्तः शवोऽशुचिः	५४१
अन्नब्रह्मात्मकं	८०५
अन्वक्षं शृंगि-	४८८
अमृतापिधानम्	४५२

ऋषिः	पृष्ठम्
संग्रहः	
अर्कशुक्र	३७७
अल्पं जपेत्	३८
अष्टाशीतिसहस्राणि	८
असंस्कारे कुलीनस्य	६३०
अस्थिसंचयनं	६०७
अस्थिसंचयनात्पूर्वं	६११
आ चौलात्सद्य	५१५
आत्मार्थमपि	३५४
आद्योराश्रमिणो	५८५
अशौचान्तः कीकसादेः	६२८
आतुराणां संन्यासे	१७४
आदित्यमंबिकां	३८४
आन्तं शावेङ्ग	५००
आपोशनमकृत्वा	४२१
आर्तवाभिप्लुता नारी	२७८
आशौचांते कृतस्नानः	५४८
आसनेष्वासनं	८०१
उत्तमं द्वादशाहेषु	१०३
उद्धृत्य वह्निं	३६५
एककाले मृतौ	६३७
एकगर्भप्रसूतौ	१००
एकोद्दिष्टस्य दिवसे	६५३
कन्यकाजनने	४९८
करे कर्पटके चैव	४२०
कर्तुः सगोत्रिणः	७२२
कार्तिकाश्वयुजौ	१४८
कूपस्नानं तु	१०
कृच्छ्रदेवोत्सव	४८२
कृते नामादि	५११
कर्तुः सगोत्रिण	६९०
केचित्तु पत्न्यः	२४
खननं दहनं	५८०
खल्वाटकश्च दुर्वालः	७७३
गयां गंगं कुरुक्षेत्रं	२५८
गृहीत्वाऽपोशनं	४२२
गृह्योक्तविधिना हुत्वा	३६४
गोध्याश्च स्पर्शमात्रे	२६७

ऋषिः	पृष्ठम्
संग्रहः	
गोविप्रस्त्रीकृते	४८७
ग्रहर्क्षयुक्तो	३५७
ग्रामश्मशानयोः	५८२
चण्डालान्नं द्विजो	११८
चतुर्थे संचयः	६०७
चतुर्थेऽह्नि	६०७
चौलात्परं भवेत्	५०७
जनने क्षेत्रजादीनां	५२१
जाते च सूतके	४९६
ज्येष्ठा विवाहवन्हौ	५७२
तथा नैव क्रिया	५४०
तिलपिष्टं गृंजनं	४३५
तुलसी श्राद्धकाले	७८९
तेषामभावे तु	५६४
त्यजेदनुपनीतान्	४४३
त्र्यहं मासत्रये	४९६
दधिक्षीरं घृतं	४८०
दशरात्रं सदा	५३६
दशाहं द्वादशाहं	४९५
दशाहमध्ये संक्रान्तौ	६१५
दारकर्मणि मृतौ च	५८८
देशान्तरगते	१५३
द्वादश्यां पार्वणेनैव	७५०
द्वौ हस्तौ युग्मतः	३२०
न देयं न प्रतिग्राह्यं	४८०
न विशेद्देवतागारं	५४७
नाभेरधस्तात्	२१६
निमित्तं पिंडदानादेः	४७७
निर्माल्यं च निवेद्यं	४४०
निशा व्यतीयात्	३५८
पक्कतैलं गन्धतैलं	२८५
पत्युर्मृताह्यन्य-	५३२
पराश्रिताया भार्याया	५२१
परोक्षे पक्षिणी नो	५२४
पातस्यान्ते पूर्वभागे	७४४
पितुर्दीक्षान्तरे	५८८
पितुर्मृताहे पितरो	७२०

ऋषिः	पृष्ठम्
संग्रहः	
पितृणां तत्र सर्वेषां	८११
पित्रान्यनन्तरा-	५३३,६३५
पित्रा सहैव मातुश्च	६३८
पुण्यत्वात्पुत्र	८०
पित्रोर्भ्रातुर्भवेत्	५३६
पुत्र्याः सापत्नकौ	५२८
पूर्वमौपासनारंभ	१४९
प्रत्यब्दं प्रतिमासं	३८१
प्रथमेऽह्नि चण्डाली	२७८
प्राङ्नामकरणात्	५०८
बन्धुष्वहस्त्र्यहं	५१७
भक्ष्यजातं तथा	४८०
भर्तुर्यद्यदघं	५२८
भिन्नपित्रोः जार-	५२८
भिन्नोदरकृते	६२३
भ्रातरस्त्वनुजाः	५८६
भ्राता वा भ्रातृपुत्रो	५८६
मंत्रवत्संस्कृतस्यापि	६२६
मातापित्रोर्मृताब्दे	५९३
मातुः श्राद्धे	७२०
मातृष्वसृसुता	५२७
मासेषु कन्या-	५९५
मृतप्रियायाश्च	६८२
मृतस्य तु यदा	५०९
मृते च सूतके	२७७
यतीन्द्रानाथनिर्हारे	५४६
यदि संक्रमदर्शौ	६१३
यदि स्याल्लौकिके	३९६
यमयोर्जातयोः	१४६
यः प्रमीतमलंकुर्यात्	५४४
याजुषाः सामगाः	४०७
यौगादिकं मासिकं	७२९
रात्रौ प्रहरपर्यन्तं	१४
राष्ट्रक्षोभे नृपाक्षिप्ते	३१४
वर्जयेत्तिलकं	३०८
वर्ज्यं पौष्णमथांगना	७४८
विदेशगो वाऽपि	७१५

ऋषिः	पृष्ठम्
संग्रहः	
वृद्धावादौ क्षये	४०७
वेत्रचर्मकृतं	४३०
शय्याया वेत्रासने	४२६
शावे च सूतके	४७९
शिलाविनाशे सति	६०३
शिलान्तरे स्थापिते	६०३
शिष्टाहमेव सर्वेषां	५३४
शूद्राह्नानि	३७४
श्राद्धपंक्तौ तु	८११
श्राद्धाहे जन्मदिवसे	२८४
श्राद्धोत्सवादौ	४८४
श्रुतिस्मृतिपुराणेषु	७
श्रौतस्मार्तक्रियाः	२९३
श्वश्रूस्वशुर	५२६,५२९
श्वश्रूश्वशुरतत्पुत्र	४८५
षंडपाषंडपतित-	४८९
षण्मासादूर्ध्वम्	६४४
संकल्पं तु यदा	७३८
संपातात्पितु	४९२
सपिण्डा ज्ञातयः	५९८
सब्रह्मचारिणि	५२९
सभूमिजाकृष्ण	२५७
साधु वाऽसाधु	३९०
सायं प्राप्तायातिथये	४९३
सूतकान्तस्तु	५०४
सूतके तत्पुनः	५३१
सौरमासे तिथिद्वैधे	७०४
स्त्रिया अनाहिताग्नेः	६०९
स्नातस्तूपयमात्	१२३
स्नात्वा दूराज्जले	२४९
स्नानं कृत्वार्द्रवस्त्रं	२५१
स्पर्शे तु धार्यमाणं	३६५
स्वकाले तानि	६५२
स्वाशौचकालतः	५३३
हैयंगवीनं	४४६
हस्तर्क्षेऽनुदये	३३
—	२६०,६३८,७३२

ऋषिः	पृष्ठम्
संग्रहकारः	
अग्नीन्धनादि	८०२
अन्याभावे पिता	५६६
अर्वाक् त्रिपक्षात्	६३५
आचांतो विधिवत्	३१४
एकोदराणां पुंसां	१४५
औपासनाग्नौ	५७२
ग्राह्या वर्तनकालिकी	७०८
चन्द्रसूर्योपरागे	७१६
चैत्रे मास्यसिते	८३७
तिथ्यग्नीनतिथि	७६२
त्रिरात्रं त्रिषु	५३५
दशाहं दर्शनं	५०१
दशाहमध्ये त्वथ	६१६
नष्टे शावानले	६१०
नित्यं सदा	८३६
पुत्रः कुर्यात्पितुः श्राद्धं	५६३
भुक्तां समुद्वहेत्	१४९
भुजेर्निषेधकाले	७१७
श्राद्धोत्सवादौ	४८४
श्रुतिस्मृतिपुराणेषु	७
श्रौतस्मार्तक्रियाः	२९३
श्वश्रूश्वशुर	५२६,५२९
श्वश्रूश्वशुरतत्पुत्र	४८५
मास्येकस्मिन्	७०४
मृतानां तु सपिण्डानां	५३८,६२९
यज्वा मृतश्चेत्क	५७३
यज्वायज्व पुनर्दाहे	५३७
यज्वायज्वपुनः	६२९
योज्यः पित्रादि	८०३
रजोमध्ये तु भार्याया	५६४
स त्री गृहीतनियमो	४८१
--	४९९,५१४,५३५,५३७,५४०,
संग्रहान्तरम्	
नित्यादर्धं चतुर्थीव	४५६
पुंसि जाते	४९८

ऋषिः	पृष्ठम्
संग्रहान्तरम्	
प्राजापत्यं तीर्थकृच्छ्रं	५६४
मातामहो पिता	५२७
संवर्त्तः	
अकृत्वा पादशौचं तु	२२३
अग्निहोत्री तपस्वी	९१७
अजा गावो महिष्यश्च	४९३
अनाचान्तः पिबेत्	९२२
अपो निशि न	२७१
अयने विषुवे	४७
अर्घ्यप्रदानतः	३१४
अष्टौ भिक्षाः	२०१
आचम्यैव तु भुञ्जीत	४१८
आशौचे निर्गते	५४८,६४५
उत्तरीयं पीडयेद्वस्त्रं	२५०
उत्पत्तिप्रलयौ	४९
उदक्यामपि चण्डालं	४२८
उपासिता न चेत्	३१४
उभाभ्यामपि	२३०
उषित्वैवं वने	१७१
एकाकी चिन्तयेत्	१८९
ऐहिकामुष्मिकं	३३५
उत्तरे दिवसे	७०३
औषधं स्नेहमाहारं	८६३
कटिसूत्रं विना	९५
कथञ्चित् ब्राह्मणीं	८९३
कन्याविक्रयिणो	१४४
कपालैर्भिन्न	३५७
कृते मूत्रे पुरीषे	२६८,४२९
केशैः पिपीलिका	४३२
क्रियाहीनस्य मूर्खस्य	४८८
गच्छेदेवं वनं	१६९
गृहस्थो ब्रह्मचारी	३३८
चण्डालं पतितं	२६५
चण्डालं पुल्कसं	८९७
चतुर्विधा भिक्षवस्तु	१८३
जलं जलस्थो नाचामेत्	२२९
जातस्यापि विधिः	४९५

ऋषिः	पृष्ठम्
संवर्त्तः	
जाते पुत्रे पितुः	७९
जानुभ्यानुपरिष्टात्तु	२२९
ततोऽधीयीत वेदं	११३
तिथिपर्वोत्सवाः	४१२
दशवर्षा भवेत्कन्या	१३६
दिवा स्वपिति चेत्	११५
देवागारे द्विजानां	३८८
पंचयज्ञविधानं	४०६,४७९
पाकयज्ञं तथा	५४१
पितामहो यस्य	६३८
पितृदारान् समारुह्य	८८७
पुल्कसीगमनं	८८९
पूर्वकर्ता दशाहं	६३५
पूर्वाह्ने वाऽपराह्ने	५१४,६०२
प्रणवाद्यां तु	३३९
प्रणवेन तु	३२३
प्राणायामैस्त्रिभिः	३२३
प्रातःसन्ध्यां सनक्षत्रां	३१०
प्राप्ते तु द्वादशे वर्षे	१३५
ब्रह्मचारी तु	१२२
ब्रह्मचारी तु यः	८९२
ब्राह्मणो ब्राह्मणीं गत्वा	८८७
ब्राह्मण्याः शूद्रसंपर्के	८९४
मंत्रवत्प्राशनं	७९
महापातकसंयोगी	२८
माता शुध्येत्	५०१
मानसं वाचिकं	३२५
यत्र ग्रामे तु	९१०
यस्तु जापी सदा	५९
यावन्न लज्जते कन्या	१३५
योगाभ्यासपरो	१९९
रजस्वला च	८९०
लोकवार्तादिकं	३४०
वापीकूपतटाकानां	४७४
विप्रो दशाहम्	४७८
वेदं चैवाभ्यसेत्	२९
शुना पुष्पवती	२७९

ऋषिः	पृष्ठम्
संवर्त्तः	
शूद्राणां भाजने	४२०
शूद्रा शुद्वैकहस्तैश्च	२२४
शूद्रीं तु ब्राह्मणो	८९१
शूद्रोच्छिष्टं जलं	४३२
श्रोत्रियाय कुलीनाय	४२
श्वकाकोच्छिष्ट	४३२
श्ववराहखरा	२६७
षण्मासं पञ्चमासं वा	३५०,९३५
संकटे विषमे चैव	२६६
संन्यस्य दुर्मतिः	२०८,९१९
सचैलं तु पितुः	४९९
समित्पुष्पकुशादीनि	३७४
सहस्रपरमां	३३७
सीरखातप्रपातोयं	४७४
सूतके तु यदा	५०१
सौरमानविधाने	७०५
स्नात्वा पीत्वा	२३५
स्नानवस्त्रेण हस्तेन	२५१
स्वभावायत्र	९
हृद्धानाभिरफेरनाभिः	२२६
होमे पर्युक्षणे	३६४
—	४३२
संस्कारमञ्जरी	
अथ पुनःसंस्कारं	११८
यस्मिन्देशे य आचारः	५
सत्यतपाः	
अहतं यंत्रनिर्मुक्तम्	२५२
वर्षे वर्षे तु	७३१
सत्यव्रतः	
आदद्मंबुघटं	७२९
एकादशेऽह्नि	६४८
कृतोपवीती देवेभ्यो	३७८
जर्त्तिलास्तु तिलाः	७८८
पिष्टपकारनालेन	२८५
पुत्रजन्मन्या	८०
पितृभ्यः प्रत्यहं	३७८
बलं रूपो यशो	२४५
सत्यव्रतः	
मन्त्रवन्मंत्रहीनं च	२८५
राशिद्वयं यत्र	७२४
वर्षे वर्षे तु	७३०
सिलोञ्छिनां	२०
स्त्री यदाऽकृत	७९
सत्याषाढसूत्रम्	
१४।१	९३१
सनत्कुमारः	
एकादश्यां मुनिश्रेष्ठ	४४९
निष्कृतिर्मयप—	८३८
भानुवारेण संयुक्ता	८४५
सनत्कुमारसंहिता	
एकादशी सदोपोष्या	८३७
सप्तर्षिसंवादः	
धर्मार्थः संचयो	५५
सरणी	
—	६५०
सांख्यायनः	
गृहद्वारे वामपार्श्वे	६००
दिवा यदाहृतं	७९
यस्मिन्देशे प्राणा	६०४
सप्तमे मासि	७८
सांख्यायनगृह्यम्	
त्र्यायुषमिति	३०३
येयकवस्त्रो यज्ञोपवीतं	२१२
सामसूत्रप्रयोगवृत्तिः	
मातुर्मृताहे संप्राप्ते	७२१
सायणीयम्	
इति वै देवलः	६७६
उत्तरायणगे सूर्ये	८४
कार्तिके पौषमासे	८२
गर्भाधानर्क्षे	७७
गुरोः कवेर्लोहितस्य	८८
तुलसीशतपत्रं	७८९
सायणीयम्	
नान्दीश्राद्धं पिता	७५३
पितुः प्रत्याब्दिकं	७१७
पुंसां दीपप्रशमनात्	४६६
श्राद्धं सपिण्डनं	६६५
श्राद्धद्वये च	६९५
श्राद्धभोजनकाले	८०७
षष्ट्यष्टमीं पंचदशीं	७५
सपिण्डीकरणं कुर्यात्	६८४
सपिण्डीकरणेऽवश्यं	६७६
सारसंग्रहः	
चतुर्दशी याऽश्वयुजस्य	२८५
सारसमुच्चयः	
एकतः क्रतवः	४३
गिरिकर्णिकया	३८८
बिंबं च श्वेतवृंताकं	४३५
बीजानां वापनं	४६६
यो दर्भपाणिस्तोयेन	२३२
सार्वभौमः	
एकोद्दिश्याव	१२५
सार्वभौमीयम्	
ऋग्यजुः सामाथ	३४
पाणिग्रहणात्	२७
—	१२८
सुदर्शनाचार्यः	
वेदार्थनिर्णयविधौ	२९२
सुधानिधिः	
यस्मिन्मासे मृतिः	६९९
सुधीलोचनः	
अनाहिताग्नेर्दाहस्य	६२७
सुधीविलोचनः	
द्वितीय मासवृद्धौ	७२९
—	७८७
सुन्दरराजीयम्	
प्राङ्मुखौ विश्वेदेवा	६५०
तस्मात्तमः संजायते	१७

ऋषिः	पृष्ठम्
सुबालोपनिषद्	
शांतो दान्त	१९५
सुबोधः	
स्वजातीजन्म	६०५
सुमतिः	
सार्धमासात् द्विजानां	४९०
सुमन्तुः	
अक्रोधनो रसान्	८०९
अग्निविद्युत्पयः	४९०
अनुपेतोऽपि कुर्वीत	५५९
अन्नं निधाप्य	४२१
अपुत्रे संस्थिते	६७०
अपुत्रे संस्थिते कर्ता	५६३
अप्स्वग्नौ वा	९२२
अभ्यागतो ज्ञातपूर्वः	४१२
आकाशे निक्षिपेद्वारि	२४९
आपत्काले तु	१७४
उदिते दैवतं	७१३
एकपिण्डकृतानां	७५०
एतान्यातुरस्य	४३६
कन्याराशौ महाराज	७४०
कर्तव्यं पार्वणं	६६०
कमशूद्रः स्मृतो विप्रो	५५९
काणाः कुब्जाश्च	७७५
कुटीचके तु	६६४
खण्डवस्त्रावृत	३४१
गर्भमासतुल्या	४९२
चण्डालाद्यवेक्षित	७८७
चित्यारोहणकाले	६४३
तस्माद्वचन	६६०
तिथिनक्षत्रनियमे	८२७
तिथौ यत्रोपवासः	८२८
तिरस्कृतो यदा	८६३
त्रयाणामपि पिण्डानां	६७१
दण्डग्रहणमात्रेण	६६३
दूरस्थोऽपि हि	५०
धर्मशास्त्रगति	७

ऋषिः	पृष्ठम्
सुमन्तुः	
न जीवपितृकः	७४२
न ह्यहर्व्यापिनी	७१३
नान्यथोक्तिः	३४१
नाभि व्याहारयेत्	५५९
पाकाभावेऽधिकारः	८२१
पिता पितामहे	६८०
पितृपत्न्यः सर्वा	१२८
पितृष्वसृसुतां	१२७
पित्रस्योत्पत्तिमात्रेण	५६०
प्रेतश्चेदाहिताग्निः	६६८
ब्रह्मचर्यं ततो	९८
ब्रह्मचर्यं तपो	११५
ब्रह्महत्या सुरापानं	८९७
मातुरेव सूतकं	५००
मातुः पितश्च कुर्वीत	५५६,५५८
यत्र शास्त्रगतिः	६८०,७०३
यद्येकवस्त्रः स्याद्विप्रः	२१२
येभ्य एव पिता	६७२
राजान्नं तेज	९०६
रात्रौ स्नानं न कुर्वीत	२७६
लशुनपलांडु	४३६
वर्ज्याश्चाभिषवा	७८४
वर्षे वर्षे सुतः	६६०
वानप्रस्थस्य पक्वान्नं	४७
व्यसनासक्तचित्तो	२३
श्राद्धात्परतरं	८२२
सपिण्डीकरणात्	६६१
समत्वमागत	६६२,७५०
स्वर्णस्तेयी द्वादश-	८८३
हंसः शुचिषत्	२६१
सुश्रुतः	
ततः प्रभृति	१५९
सद्यो गृहीत	१५९
सूतसंहिता	
अनन्तशाखा	२९२
ललाटे चैव	३०५
शैवागमोक्ता	२९६

ऋषिः	पृष्ठम्
सूतसंहिता	
श्रेयान्वेदोदितो	२९७
स्वमातुः सोदरायां	२९६
सूत्रकारः	
त्रयाणां वर्णानां	१७६
ब्राह्मणभोजनार्थात्	४०७
समावप्रच्छिन्नाग्नौ	२३३
सौरधर्मः	
आदित्योदयवेला	८३९
सौरपुराणम्	
मूलं हि पितृ-	७१३
भस्मना छन्नसर्वांग	३०५
स्कन्दपुराणम्	
अथवा शिवरात्रिं च	८५२
आवर्त्तनात्तु	७०७
तत्रैवोपवसेत्	८५८
दक्षिणाभिमुखो भूत्वा	३८१
दिनार्धसमये	८२८
ये न कुर्वन्ति	८३३
लक्षकोटिसहस्रस्य	३४३
षष्ठ्येकादश्य-	८३१
संमुखा नाम	८२६
—	८२७
स्कान्दम्	
अज्ञानाज्जनकं	८७३
अक्रमेण मृतानां	६७१
अत्यंतस्खलितानां	२९८
अयमेव परो	१९७
अष्टमी नवमी	८३१
आत्मा पुत्रः पुरोधा	१४
उदयात् प्राक्	२४७,८३९
उदये वाष्टमी	८३५
उपोषणं चतुर्दश्यां	८५३
एकादशी भवेत्पूर्णा	८४२
एकादश्यां न	८४५
कृष्णाष्टमी स्कंदषष्ठी	८५३
तिथीनामेव	८२८

ऋषिः	पृष्ठम्
स्कान्दम्	
त्रिमुहूर्त्तः प्रदोषः	३९
त्रयोदशी यदा	८५२
द्वादशी च प्रकर्तव्या	८५०
नागो द्वादश	८३९
नामगोत्रे समुच्चार्यं	१४९
परमापदमापन्नो	८३९
परात्परतरं	८५२
पितृणां गति–	८४५
पुत्रं वा विनयोपेतं	८४८
पुत्रादिर्जनकं	९००
पुराणैरेव विस्पष्टो	२९२
प्रतिगृह्य तुलां	९२५
प्रतिगृह्य तुलादीनि	९३०
प्रथमेऽह्नि संपूर्णा	८४१
प्रदोषव्यापिनी	८२९
भस्मना वै त्रिसंध्यं	३०३
भस्मरुद्राक्षधारी	५४९
भूतविद्धा सिनीवाली	८५३
मरुदेशे निरुदके	५६
माघकृष्णचतुर्दश्यां	८५३
माघस्य कृष्णपक्षे	८५१
यदा भवेत्	८४७
यदीच्छेद्विपुलान्	८३७
यां तिथिं समनु–	८२७
शिवं च पूजयित्वा	८५२
शुद्धा यदा समा	८४२
संपूर्णैकादशी यत्र	८४१
स्नातकं ऋत्विजं	८७३
स्मृतिः	
धनुर्मीनयुग्म	२७५
स्मृतिकामधेनुः	
संसर्गदोषो नैव	८९७
स्मृतिचन्द्रिका	
पृ. ३८ पं. २	१११
पृ. ६७ पं. ११	१२४
पृ. ९२ पं. १७–२५	२१७
पृ. ९५	२२८
स्मृतिचंद्रिका	
पृ. ९९ पं. २१	२४०
पृ. १०६ पं. २५	२४४
पृ. १११ पं. १४	२४७
पृ. १२५ पं. २६	२८३
पृ. १२९	३८५
अंत्यकालेऽपि यस्यास्ये	५४९
अधीत्य विधिवत्	१७३
आद्यन्तयोस्तु	२१७
कृष्णसारैः	९
तद्धस्तशौचाभिप्रायं	२१८
द्वादशेऽह्नि कर्तव्यं	८२
नावस्करेषु	१५९
मनःप्रसादात्	१५
यद्येककर्तृकं	६३०
सपिंडादिजनने	४७७
—	८६, ११२, ११९, १३२, ३६७, ४८२, ४९३, ६८७
स्मृतिचिन्तामणिः	
एक एव तु	४१९
मासिमास्युद्धृत	२३३
मृताहे मासिकं	६९९
स्मृतिदीपिका	
यस्यां राज्यां व्यतीतायाम्	२१०
अनुद्धृतैरुद्धृतैर्वा	२८५
उद्धृतोदकमादाय	२१२
चित्रभानुमनड्वाहं	३६७
स्मृतिभास्करः	
आमं शूद्रस्य	४४६
चतुरंगुलमग्रं च	२३३
तादित्येतत्परं	३२७
तावदन्नं विना	२३
दक्षिणं तु करं	२२१
निर्धनो धनसाध्येषु	२२
रात्रेस्तु पश्चिमे यामे	२८९
वनस्पतिगते	३०३
वाजपेये क्रतौ	२२
विवाहहोमे प्रक्रान्ते	१३७
स्मृतिभास्करः	
शिष्टस्याभाव	३६१
सप्तभिर्दर्भपुञ्जीलैः	२३०
सर्वे चापि	११०
स्मृतिरत्नम्	
अंगुल्यग्रैर्न	३६२
अंगुष्ठं घर्षयेदूर्द्ध्वं	२३३
अंगुष्ठमूलेनाचामेत्	२२५
अकृत्वा तर्पणं	३८०
अक्षिरोगी ह्यपस्मारी	४५७
अत्र मघा त्रयोदश्यां	७५०
अनुयाने मृतौ	६४२
अन्तरङ्गक्रमेणैषा	६३९
अन्तर्जलगता ग्राह्या	२१६
अन्येन यस्य	६१७
अह्नोऽष्टधा	३७५
अपसव्ये ततः	५९७
अप्रजायामतीतायां	५६४
अब्रह्मचारिदाराद्यैः	१३०
अभर्तुर्योषितः	६८२
अमायां च	६६६
अयुतं यो	३९३
अवलिप्तस्य	४४३
अस्थिसंचयनं	६४३
आगम्य राक्षसीमाशां	२१२
आचार्यं चैव	११२
आपोशानं तु	४२२
आश्वयुक् कृष्णपक्षे	२८४
इति बोधायनः प्राह	६७६
उत्क्रान्तिवैतरण्यो	५५२
उद्धृतोदकमादाय	२१५
उपावरोहणं कृत्वा	३६३
ऋत्विक्पितृव्य–	११०
एकभर्तृकपत्नीनाम्	५६४
एकस्मिन्शोभने	१४५
एकादशातीत	६६५
एकादशे द्वादशेऽह्नि	६६५
एकादशेऽह्नि	६५३

ऋषिः	पृष्ठम्
स्मृतिरत्नम्	
एकादशेऽह्नि संप्राप्ते	६४५
एकामुत्क्रम्य	१५१
एकाहमुपवासः	६०७
एकाहात् क्षत्रिये	५४२
एकेऽभ्युदितहोमाः	३५९
एकोद्दिष्टं तु	६५९
औरसः पुत्रिकापुत्रः	१०१
कदलीगर्भपत्रे	४१९
कन्यां लक्षणसंपन्नां	४५
काथे रूपैस्तथा	३६१
किंचिद्देयमिति	५८३
कुंकमागुरु	३८७
कुशं पवित्रं ताम्रं	२३२
कोविदारं करंजं च	३६०
कौपीनयुगुलं	१८५
गायत्री मूल्यमादाय	३३६
गोमूत्रं गोमयं	३६७
घृतात्फेनं घृतात्	४३७
चंडालं पतितं	४२८
चतुर्दशीमृतः	६१३
चतुर्भुजं महादेवं	२९०
छन्दो गायत्री	३२८
छायामन्त्यश्वपाकादेः	२६६
जनो सपिण्डाः	५०१
जलजानां च सर्वेषां	३७४
जानुभ्यामूर्ध्वमाचम्य	२२८
ततस्तु नाम	८१
तैलयंत्रेक्षु	४३१
त्रेधा कृत्वा यामिनीं	१५०
दंतशोधनकाष्ठं	४५३
दक्षिणे रेचकं	३२४
दर्शः संक्रमणं	६१२
दर्शो दशाहमध्ये	६१४
दशाहाभ्यन्तरे	६१४
दिवा तिथौ तु	४१३
द्विवैव तर्पणं	६०७
देशान्तरगतो विप्रः	२१६
धर्मोऽयं सर्व	१६२
स्मृतिरत्नम्	
धौतवस्त्रैः	१२३
नन्दायां भार्गवेऽर्के च	६१०
न पादौ धावयेत्	४५९
न सोपानत्पादुको	२१४
नित्यं नैमित्तिकं	४७९
पिता माता तथा	१०४
प्रणवव्याहृतीनां	४५६
प्राणाहुत्यूर्ध्वं	४२०
प्रेतश्राद्धं सपिण्डयन्तं	५६६
प्रेतेभ्यस्तु स्वर्णेभ्यः	६०१
प्रोक्षितं भक्षयेत्	४५१
बालानामदन्त	५१०
ब्राह्मणं त्वनधीयान	४०९
ब्राह्मणस्य सदाश्नीयात्	४४२
ब्राह्मणानां नृपाणां	३०८
ब्राह्मे स्नानेन सूर्यार्घे	२२९
भूदेवस्तप्तमुद्रा	२९९
भोक्ष्यमाणो द्विराचामेत्	२३७
मकारं मन	३३६
मनुर्बृहस्पतिः	८
मन्त्रैर्वैष्णव	३८४
महाभारतमाख्यानम्	२१०
मृतस्य यावदस्थीनि	५४३
यवानां व्रीहिशालीनां	४०४
यस्य संवत्सरात्	६५८
याजानाध्यापने	३०
यावन्मासत्रयं	४९१
लशुनं गृजरं चैव	४३३
लोकाग्नावितरौ	५७२
लोहितो यस्तु	६४६
वत्सरान्ते तु	६५१
वामहस्ते स्थिते दर्भे	२३२
वासस्तिरोहितं	४६४
शयनस्थो न भुंजीत	४२८
शरावे भिन्नपात्रे	३५७
शुद्ध्यैव तु	३३८
शुभमिच्छन्नरः	३९०
श्वचण्डालादिभिः	६०३
स्मृतिरत्नम्	
षंढांधबधिर	१००
षष्ठी च द्वादशी	४५६
संपर्कमशनं पानं	५४०
सकर्दमं तु	२१९
सक्रुन्म्रियन्ते बहवः	६३८
सत्यामाचमना	२३६
सन्ध्ययोर्नैव	१५९
सपिण्डीकरणे त्रीणि	६६६
सप्तमे चाष्टमे	८७
सर्वैः स्वजन्मदिवसे	८१
सुवर्णा कनका	३६३
सूतके होमवत्कर्म	४७९
सूर्याग्निरुद्रदेवानां	३२१
स्नात्वा शुचिः	२००
स्रुक्पाणिकमना–	११०
हर्तं वित्तमदानेन	३५६
हस्तं प्रक्षालयेत्	४२२
हस्तयोरुभयोर्द्वौ	२३५
हुताग्निर्विदितगुरुः	४५५
—	१६२, १७६, २३४, ३४३, ४१८, ४१९, ४२०, ४५२, ४५३, ४०४, ४९४, ४९७, ४९९, ५०५, ५०८, ५१९, ५३१, ५३५, ५६१, ५८५, ५९८, ६१४, ६३९
स्मृतिरत्नसारम्	
अज्ञातकुलगोत्र–	४१३
स्मृतिरत्नावलिः	
अच्छिन्नपादं	३३९
गृहमेधिनि यत्प्रोक्तं	२०९
देवतार्चनमंत्राणां	३७२
प्राणाग्निहोत्रात्	४२३
भोक्तुकामे यदा	४१८
मध्यमानामिकां	३०३
वर्षैर्वयोऽधिका	१०९
संपुटैकषडोंकारा	३३९
सप्तवाताहतं	२५२

ऋषिः	पृष्ठम्
क्षुरया लिप्तदेहस्य	२८४
स्नात्वा यज्ञोपवीती	३६९
स्मृतिं विना	६
स्वकालादुत्तरो	१४
—	२२
—	३४३

स्मृतिसंग्रहः

ऋषिः	पृष्ठम्
एकपाकेन वसतां	४०५
कौपीनाच्छन्नं	९४
गायत्रीं मूल्यमादाय	३१
त्रिपुंड्रं भस्मना	२९५
देवार्चनपरो	५१
निमज्ज्य देवर्षि	२५१
पुनर्दाहे दिनं	६३५
ब्रह्मचारी तु	९७

स्मृतिसारम्

ऋषिः	पृष्ठम्
अप्रबुद्धे तु	३९७
आब्दिके समनुप्राप्ते	३८२
एकवेदस्य चैकं	९१
एलालवंगकर्पूर	२२६
कराग्रे करपृष्ठे	२१७
कुर्याच्चत्वारि	१७७
कुशाः काशा यवा	२३४
कृत्वावकुण्ठनं चात्र	२१२
क्षीरं लवणसम्मिश्रम्	८८२
क्षीरे तु लवणं	४३८
ग्रन्थीकृतपवित्रेण	२३१
च्छेदे विनाशे वा	९०
पत्नी भ्राता च	५६६
मध्यमानामिकां	४२३
मातुलस्य सुतां	१३०
मौंजीयज्ञोप—	३५
यज्ञोपवीतिना	३८१
रक्तमाल्यं न	४६५
विप्रस्य दक्षिणे भागे	२२०
श्रावण्यां पौर्णमास्यां	३२
सर्वस्य प्रभवो	४८
सूर्यस्याग्नेर्गुरो	३२१
स्वाध्याये भोजने	२९३

स्मृतिसारसमुच्चयः

ऋषिः	पृष्ठम्
अशक्तः समयाचारे	३०३
उत्सन्नबान्धवं प्रेतं	५६६
गृहस्थो ब्रह्मचारी	३३९
त्र्यायुषश्चैव	२९०
परेद्युरनुयाने	६७८
पूर्वं निमन्त्र्य	६७६
मुहूर्ते चतुर्थे	३५८

स्मृतिसारसुधानिधिः

ऋषिः	पृष्ठम्
अग्निभिर्वाग्निना	५८३

स्मृत्यन्तरम्

ऋषिः	पृष्ठम्
अज्ञानि यस्तु	७३८
अंगारेण भवेत्	४७०
अकालमरणे मुक्त्वा	६३३
अकाले यत्कृतं	१५
अकृत्वा पार्वणं	८०३
अकृत्वा प्रेतकार्याणि	६९७
अग्निना भस्मना	४२७
अग्निरित्यादिभिः	३०२
अग्न्यभावे घृताभावे	५४२
अच्युताद्यैः समाचामेत्	२२८
अज्ञातिं च नरं	६१७
अतिशुक्तोग्र	७८५
अतीते द्वे तु	६०८
अतीते पाक्षिणीकाले	५३५
अथानुगतवह्निः	५७०
अथोर्ध्वं कृष्णपक्षस्य	६१२
अदत्तमन्नं	८०८
अदत्तमन्नं विप्रस्तु	८०५
अनग्नेर्मरणात्	५३९,६०८
अनाथमनुपेतं च	५४२
अन्तर्दशाहे तत्कर्तुः	६३५
अन्तर्दशाहे दर्शः	६१४,६१६
अन्नं निधाय	८०२
अन्नस्य क्षुधितं	५०
अन्नेन मांसं	७८२
अन्यदीयेन वस्त्रेन	५७४
अन्यमासे प्रमीतानां	७२९
अन्वष्टकासु	७१९
अपराह्ने तु	७०९
अपसव्येन यस्त्वन्नं	८०३
अपि वानूचानेभ्य	७४५
अपि वा मातरं	८८९
अपुत्रस्य परे	६७०
अपुत्रायाः सपत्नीजः	५६४
अपुत्रोऽनाग्निक	७४८
अपूपभक्षणे भुक्तौ	२२०
अपूर्णद्वादशाब्दानां	६७१
अपेक्षितं द्विजो	८०७
अब्दादुपरि संस्कार	६३४
अभिश्रवणहीनो	८०७
अमन्त्रपूर्वं दग्धानां	६२६
अमापातश्च	७६२
अमायां तु दिवा	८५६
अमाया च मृतिर्यस्य	६१३
अमाश्राद्धं गयाश्राद्धं	६९३
अमा सोमेन	७४४
अयोरूपं द्विजं	८७३
अर्कद्विपर्वरात्रौ	४४९
अर्घयेद् ब्राह्मणान्	८०१
अर्धांजलिमपः	५८५
अवर्जयित्वा	५९३
अष्टम्यां च चतुर्दश्यां	२४४
अष्टैतान्यव्रत	८४५
अष्टोत्तरशतैर्माला	३४२
असंस्कृतप्रमीता	८९३
असपिण्डो यदि	६१८
असामर्थ्याच्छरीरस्य	२९१
अस्थिसंचयनं	६०८
अस्थिसंचयनं चैकं	६४३
अस्थ्ना पलाशवृन्तैर्वा	५३७
अहत्वाऽपि यथा	८७२
आग्नेयमैन्द्रं	६५६

ऋषिः	पृष्ठम्
आत्मपुत्रापितृ	४९८
आदित्येऽस्तमिते	८५७
आद्यश्राद्धं निमित्तं	६४९
आधाने यज्ञदीक्षायां	५८९
आपोशने धार्यमाणे	८०६
आद्रमम्बुघटं	६९०
आब्दिकं प्रथमं	६९६
आब्दिके समनु	७३७
आब्दिके समनुप्राप्ते	७१६
आमलक्याः फलं	४३८
आरम्भदर्शे	७३४
आरुह्य पत्नी	६४२
आर्द्रवस्त्रो बहिः	५५४
आवाहनाग्नौकरणं	७३८
आवाहनासने	७९३
आवाहनेऽर्घ्ये	५७९
आवृत्तिरन्य	७२८
आशौचं कर्ममध्ये	४८३
आशौचं द्वादशाहान्तं	६९८
आशौचमध्ये	६०२
आशौचान्तः कीकसादेः	५३७
आशौचान्ते तु	५९१
आशौचे तु	४७८
आसनेषु सदर्भेषु	७८८
आस्यतामिति	७९५
इन्दुक्षये यदा	६१३
इष्ट्यादि सर्वं काम्यं	७३२
उत्थाय वामहस्तेन	२१५
उत्सृजेद् वृषभं	६४६
उदक्या सूतिका	७८६
उदङ्मुखस्तु देवानां	७९३
उदयं याति चादित्ये	६१३
उदुत्यं चित्रं	३२०
उद्वाहांकुर आरब्धे	४८४
उपनेतुर्भजेत्	५२१
उपमूलान् समास्तीर्थ	८१६
उपविष्टेषु विप्रेषु	८०९
उपायनो हि	९८
उभौ हस्तौ समौ	७९६
ऊनद्विवत्सरात्	६७१
ऊर्ध्वं पंचसु	४९६
ऊह्यमानं शवं दृष्ट्वा	५४६
एकचित्यां समारूढौ	६९६,७२२
एकत्र निक्षिपेत्	६०२
एकत्र मासद्वितयं	७२६
एकदा क्रियमाणानां	७५३
एकपंक्तौ तु	४२८
एकभक्तेन नक्तेन	८४८
एकमासि तिथि	७०४
एकश्चेद्ब्राह्मणो	७७८
एकस्मिन्द्वयोः	६६२
एकादशाहे यदि	६४८
एकादशाहे षण्मासे	६४५
एकादशाहे संप्राप्ते	६४८
एकादशीं परित्यज्य	८४६
एकादशी तथा	८२६
एकादशी तु	८४०
एकादशी तु संपूर्णा	८४२
एकादशी न लभ्येत	८४३
एकादशी यदा	८४०,८४३
एकादशे भवेत्	६५२
एकादशेऽहनि	६४७
एकादशेऽह्नि	६५०,६५०
एकोत्तरं यथाशक्ति	५९८
एकोद्दिष्टं यत्र यत्र	६६१
एकोद्दिष्टेषु	३८१
एकोद्दिष्टेषु सर्वेषु	३८१
एतानि पतितानां	९२०
औपासनाग्नि	३६५
औपासनाग्नौ	६८४
औरसे तु समुत्पन्ने	१४६
औरसो दत्तको वापि	६६९
कण्ठादूर्ध्वं वपेदाद्ये	५९१
कदली जातयः पंच	७८२
कनिष्ठायां मृतायां	५७१
कनिष्ठेन कृतं	६२४
कन्याऽन्यस्मै प्रदातव्या	१३९
कन्यामनुपनीतं	५६८
कपालोऽन्यः	५६८
कपित्थफलवच्छ्राद्धे	६०२
कर्णे जपेदीशवाक्यं	५५२
कर्ता भोक्ता च	७८०
कर्तुश्च पुत्रदाराणां	७४८
कलाद्वयं त्रयं	८४७
कलार्धेनापि	८३९
कुर्याद्ग्रामनवम्यां	८३६
कूष्माण्डं माहिषं	७८५
कृच्छ्रादिकरणाशक्तौ	५५०
कृच्छ्रो देव्ययुतं	५५०
कृच्छ्रोऽयुतं तु	९४३
कृतचौडस्य विप्रस्य	५१०
कृतचौलोऽनुपेतस्तु	५६०
कृते श्राद्धे	६२१
कृते सपिण्डीकरणे	५९४
कृष्णपक्षे तृतीयायां	४०
कृष्णपक्षेऽप	७६४
केशानाश्रित्य	५९०
गर्भादिप्राशनान्तानि	६९२
गवामभावे निष्कं	५५४
गान्धारिका पटोलानि	७८४
गुरुशुक्रारश-	६१०
गृहस्थस्तु स्ववंतीषु	२५७
गोत्रस्य त्वपरिज्ञाने	६८२
गोत्रान्तरप्रविष्टास्तु	१०३,५२१
ग्रस्यमाने रवौ	२७३
ग्रहणे तु द्वितीयेऽह्नि	७१७
ग्रामस्थे शवचण्डाले	५४१
घृतकुम्भे निषाद्यैनं	६३३
चण्डालं पतितं	२६९
चण्डालस्य चतुःषष्टि	२६६
चण्डालादुदकात्	४८८
चतुरश्रं तीर्थपीठं	२६३
चतुर्थमर्घ्यं	३१४
चतुर्थे प्रहरे	७११

ऋषिः	पृष्ठम्
चतुर्थे स्वैरिणी	८८८
चतुर्मुहूर्त्ते द्वादश्याम्	८५०
चतुः शकाधिकैर्विप्रैः	५४१
चतुःसंवेष्ट्य	२५०
चन्द्रक्षये मृतोऽनाथो	६१३
चान्द्रायणं त्रयः	५५५
चितिभ्रष्टा यदा	६४४
चौलार्द्धे च विवाहार्द्धे	५९३
चौलोपनयने चैव	९१५
जननेप्येतन्	४९९
जन्मत्रयं संचयने	६१०
जर्त्तिलाश्चैव	७८८
जले प्रवाहे कूले	६११
जीवतस्तु पिता	७२१
जीवन्त्यां मातरि	७५१
ज्ञातिभिश्चार्द्रवासोभिः	५९८
ज्येष्ठस्य तु कृतोमध्ये	५६०
ज्येष्ठस्वसॄणां	५८०
ज्येष्ठानां तु सपिण्डानां	५८६
ज्येष्ठाभार्या मृता	५७१
ज्येष्ठा विवाहवन्हौ	५७२
ज्येष्ठो वाऽपि कनिष्ठो वा	५५७
ततः समाप्ते	५९४
तत्रासनानि देयानि	७९५
तथायुष्यहितार्थाय	३७४
तदहश्चेत्	६५४
तर्पयेत्तिलसंमिश्रं	७३७
तस्मात्तु प्रथमं	७७७
तस्मादुभयसंबद्धः	५६१
तावद्भिः पलाशपर्णैः	५७४
तिथिक्षये सिनी	७३९
तिथ्यर्क्षयोर्यदा	८३५
तीर्थे पापं न	५५
तृणं वा यदि वा	८८६
तृणपर्णैः सदा	२४४
तृणराजाव्ह य	२४३
तृणानि वा गवे	८२२
तृतीयमासादारभ्य	४६६,५४३

ऋषिः	पृष्ठम्
त्रयोविंशति	५१३
त्रिवर्षादि दहेत्	६०८
दंपत्योः सह	६३७,६३८
दग्ध्वास्थि पित्रोः	५३७,६२९
दत्तस्य पुत्रजनने	५२४
दत्तस्वसरि	५२८
दत्ताऽनूढा च	५१५
दर्शे क्षयाह	६९५
दर्शे तिलोदकं	७३७
दर्शे रविग्रहे	७१७
दशप्रणवसंयुक्तैः	९३५
दशम्याः प्रान्तमादाय	८३९
दशाहमध्ये दर्शः	६१२
दशाहान्तं सपिण्डानां	५३८,६२७
दह्यमाने शवे	५८४
दारकर्मण्यशक्तः	५६९
दिगंबरं मुक्तकच्छं	४६२
दुर्मृतानां च	६३०
दूरे पिताऽनग्नि	५७१
देवतान्तरनामानि	४२३
देवर्षितर्पणं कृत्वा	२४९
देशान्तरे प्रमीतस्य	५७४
देशान्तरे स्थितः	५८८
दैवं पिता ततो	७५१
दैवविप्रकरे	६८६
द्वादशाब्दात्परं	६३०
द्वादशाहे यदा	५९५,६५३
द्वादशेऽहनि	६६५
द्वादश्येकादशी	८४६
द्वारस्य दक्षिणे	६००
द्विगुणं क्षत्रियस्योक्तं	८७३
द्विगुणा यामनश्छाया	७०९
द्विजभोजन	२३
द्वितीयया तु	८३१
नक्तं निशायां	८२९
नग्नप्रच्छादनं कर्म	५९६
न दानं नैव वरणं	६३३
नद्यादि देवखातेषु	२५१

ऋषिः	पृष्ठम्
न पुत्रस्य पिता	५६६
नमो ब्रह्मण	३७०
नरं पर्णमयं	५३७
नवभिर्दिवसैः	६१९
नवश्राद्धं तु	६०५
नवश्राद्धं सपिण्डत्वं	५५६
न शिला न मृदा	६२४
नाड्यः षोडश पूर्वेण	२७३
नान्दीमुखेऽष्टका	७१८
नालिकेरोदकं	८६५
नासपिण्डीकृतेः	६९८
निमंत्रितानां	७८७
निर्माल्यमपि	७८२
निवीतिनो वहेयुः	५८१
निशायां कृष्णपक्षे	५५६
निशावशेषे	५३०
पचेदन्नानि	७८०
पच्छोप्यर्धर्चं	२९१
पतितस्योदकं	६००
पत्नी भ्राता च	५६५
पत्न्यग्रजपितृव्याणां	६६१
पत्न्योरेका यदि	५७१
परस्याशौचिनः	५०२
पवित्रपाणयः सर्वे	७५५
पश्चिमाभिमुखो	५८३
पाते पर्वणि	२८४
पात्रे यवकुशाः	८१३
पाददेशे तु	८०१
पादमात्रमवच्छाद्य	५८०
पादेन स्थापयेत्	२५०
पितरि प्रोषिते	६३१
पितरि प्रोषिते प्रेते	६२१
पितरौ प्रमीतौ	६४०
पिता पितामहः	५२४
पितुर्दशाहमध्ये	५८८
पितृकार्येषु सर्वेषु	७७६
पितृदीक्षान्तराले	५८८
पितृदैवतयोः	८१२

ऋषिः	पृष्ठम्
पितृमातृपाति	८४८
पितृव्याग्रजयोः	७२२
पित्रोर्मृतदिनात्	७५२
पित्रोर्मृताद्धे गर्भाद्धे	५९४
पित्रोर्मृतौ चेत्	५३४
पित्रोश्चैव पितुः	५५८
पुत्रश्च दुहिता चैव	५६२
पुत्रस्त्वकृतचौलोऽपि	५५९
पुत्रस्त्वनुपनीतोऽपि	५५९
पुत्रः पित्रोस्तु	५३८,६२८
पुनः प्रभातसमये	८४१
पुराणपात्रपङ्कं	७८०
पुष्पैस्तु गन्धमाल्यां	५८०
पूर्वं गृहीताशौचानां	५३८
पूर्वगृहीताशौचानां	६२८
पूर्वमेव मृता	५६८
प्रतिष्ठादिषु कालेषु	५४१
प्रत्यक्षमरणे पित्रोः	५५३,५८८, ६३४
प्रत्यद्धं प्रतिमासं	६३१
प्रत्यद्वाङ्गं तिलं	७१८
प्रत्याह्निके तिलं	३८३
प्रथमाह्निकमारभ्य	३८२
प्रथमेऽहनि यः	५९१
प्रदोषव्यापिनी	८५२
प्रमीतपितृकः	७३५
प्रांकणे मण्डले	७९१
प्राचीः पूर्वमुदक्संस्थं	३५४
प्राजापत्यं चरन्	९४३
प्राजापत्ये तु	९४४
प्रातः प्रतिदिनं	४७१
प्रायः पित्र्येषु	६०१
प्रेतकर्माणि वक्तृणां	५४०
प्रेतकर्मोपदेशित्वं	५४०
प्रेतकार्येषु सर्वत्र	६४९
प्रेतत्वस्य विमोक्षार्थं	६४७
प्रेतपक्षे चतुर्दश्यां	६६२
प्रेतस्य पार्श्वयोः	५८१

ऋषिः	पृष्ठम्
प्रेतस्य वत्सरात्	६३५
प्रेतस्य वासः स्त्रक्	५४४
प्रेतस्यास्थीनि	६०९
बहूनामेकवंश्यानां	६३०
बालापत्या तु	१६२
बीजानां वापनं	५८६
बीजिनः क्षेत्रिणश्चैव	१२९
ब्राह्मणानां विना	५५३
ब्राह्मान्मुहूर्त्ताद्यः	५५५
भक्ष्याभक्ष्याण्य	९१६
भाषाभेदो महा	५२३
भिन्नस्थानगतैः	७१४
भुक्तिक्रियायाः	८११
भुक्तिपात्रस्थं	८१८
भुक्त्वोच्छिष्टः	४५३
भोज्यपात्रेणाज्य	८०४
भ्रातरः पितरः	५९०
भ्रातुर्देशान्तर	५३६,६२३
भ्रातुस्तु पत्नीभगिनीं	१२९
मंत्रवत्संस्कृतस्यापि	६१७,६२६
मंत्रेण विकिरं	८१२
मधुमांसं न दातव्यं	७६९
मध्यान्हव्यापिनी	७१२
मध्याह्नः खङ्ग	७८८
महालयं चाह्निकं	३८२
महालये गयाश्राद्धे	६७०
मातापित्रोर्मृतौ	५३२
मातापित्रोर्व्रती	५५९
मातापित्रोः	६९५
मातापित्रोः क्षयाहे	७२३
मातामहस्य तत्पत्न्याः	५८९
मातुर्मृतेऽन्हि	७२०
मातुलानुज	६६१
मातुः पितुश्च	६७९
मातुः पित्रोर्मातुलस्य	५६७
मातुः पित्रोर्मातुलादेः	६८४
मातुः सपिण्डीकरणं	६८०
मातृविद्धा प्रशस्ता	८३१

ऋषिः	पृष्ठम्
मातृष्वसामातुलयोः	५२५
मात्राशौचस्य मध्ये	६३६
मानस्तोकेति	३०१
मासिकं सोदकुम्भं	६८३
मासिकानां तु	६५३
मासे संवत्सरे	७०४,७३०
मुख्यकर्त्रागमे	६२३
मुख्यकर्त्राऽगमेऽन्यस्तु	६१६
मुनिभिर्भिन्न	८१६
मूकोन्मत्तौ न	१००
मृतं पतिमनुव्रज्य	६४१
मृतायां तु	५७१
मृते च सूतके	५४७
मृते भर्तरि	६८८
मृतेऽहनि तु	७१५
मृत्पात्रेणार्घ्यं	७९८
मेषादिस्थे सवितरि	६९९
यज्ञे संभृतसंभारे	४८३
यत्रकुत्रस्थितः	५२३
यथेक्षुहेतोः	४
यथैवात्मा तथा	५६५
यदाग्निर्दूरतो	६८३
यदा संवत्सरात्	६५२
यदि कन्या पितुः	५१७
यदि नष्टो मृतो	६०३
यदेन्दुः पितृदेवत्ये	७४९
यद्यमान्तर्दशाहे	५२२
यमला चैकगर्भे तु	५५७
यवीयसां पितृव्याणां	५८९
यस्तु रामनवम्यां	८३६
यस्मिन्नहनि संक्रान्तेः	७०४
यस्मिन्मासि मृतिः	६९९
या नारी भर्तृसुतयोः	६४६
यानि शास्त्राणि	२९९
यावत्षण्मास–	४९०
रवौ पुष्यं गुरौ	२८५
राष्ट्रक्षोभे नृपाक्षिप्ते	४७७
रात्रौ प्रहरपर्यंतं	३५९

ऋषिः	पृष्ठम्
रोचत इति	८१४
वत्सरान्तेऽथ मध्ये	५९४
वर्षश्राद्धे तु संप्राप्ते	४८३
वर्षे वर्षे तु	६५९
वस्त्रधान्यादि	४६९
वस्त्रपाषाणकुम्भानां	६०२
वासांसि वाससि	७९०
विद्यमानधनो	७७१
विद्वद्ब्राह्मण	८६६
विना यज्ञोपवीतेन	९२२
विप्रगर्भे पराकं	८९४
विश्वेदेवा द्वितीयो	८१०
विहितं यदकामानां	८६७
वैश्वदेवाहुतीः	८१९
विष्ण्वर्पणविहीनं	२९३
वृत्ते पितरि	६६४
वृद्धे पितरि संन्यस्ते	६७४
वृश्चिकादित्रिमासेषु	७०५
वृषहीनो मृतो	६४६
वैदिकैर्मन्त्ररहितं	३०८
वैश्वदेवाहुती	४०७
व्याधितां स्त्रीप्रजां	१५१
व्युत्क्रमाच्च प्रमीतानां	६७३
व्रते चान्द्रमासं	७०३
शयनिबोधनी	८४५
शवं दग्ध्वा यथा	५८५
शवचण्डालपतित	२६४
शवानुगमने	५८५
शाखां विदार्य तस्यास्तु	२४१
शाखाशौचे दहेत्प्रेतं	५४५
शावमाशौचं	४९५
शिरोवारि शरीराम्बु	२५०
शुक्रवारे च रात्रौ	५८७
शुची वो हव्या	२५२
शुद्धाऽप्येकादशी	८४२
शुभागमेऽप्रकृष्टानां	६५७
शूद्रं हन्ति द्विजो	८७३

ऋषिः	पृष्ठम्
श्राद्धं मातामहानां च	५६२
श्राद्धपंक्तौ तु	८१०
श्राद्धभूमिं गयां	७९६
श्राद्धे च भान्वर्क-	५९५
श्राद्धे निमंत्रितो	७७९, ७८०
श्राद्धे भुंजन्	८१०
शृणोत्यनिर्दशं	६१६
श्वसूकरशृगालाद्यैः	५५६, ६०९
श्वोभूते नित्यकर्माणि	३०८
षोढा विभज्य रजनीं	...
संकल्पः सूक्तपठनं	२४६
सन्धिः संगवतः	३३
संनिधाने सपिण्डानां	५८८
संपूर्णैकादशी	८४२
संपूर्णैकादशी यत्र	८४१
संभोजनी नाम	७११
संमार्जितोप	७९१
संस्काराणां तु	६३५
सकृत्प्रसिञ्चत्	५९९
सद्यः स्पृश्यो गर्भदासो	४८६
सपत्न्याः पुत्रवत्त्वेऽपि	५६५
सपिण्डनं विना	६६७
सपिण्डीकरणात्	६६९, ६९३, ७१९
सपिण्डीकरणादूर्ध्वं	५९३
सपिण्डीकरणे	६८७
सपिण्डीकरणे प्राप्ते	६८७
सप्तव्याहृतिसंयुक्तां	३२४
सब्रह्मचारिणि	५२९
समानोदक-	४९६
समानोदका कुर्वीरन्	६००
सर्वजन्मार्जिता-	९३२
सर्वसंगनिवृत्तस्य	४८५
सर्वाभावे पिता	५६६
सर्वेषामेव वर्णानां	४९६
सहैव भर्त्रा	६४३
साग्निरभावन	६८५
सा तिथिस्तदहो-	८२६

ऋषिः	पृष्ठम्
साध्वीनामेव	६४१
साश्रमं नैव	१०३
सूक्तस्तोत्रजपं	७९४
सूत्रं तु दक्षिणे कर्णे	२१२
सूर्यश्चेत्यनुवाकस्य	३१८
सूर्यस्य सिंह	७६१
सोदर्याश्च सुतायाश्च	५२७
सौरमासे तिथ्यभावे	७०५
सौरे वर्षे पंचमे	७२४
स्तेनाभिशस्त	७७५
स्त्रीमृताहे स्त्रियो	६७९, ७२०
स्त्रीशुद्धिरर्थं	४७५
स्नात्वा स्वशक्त्या	५७९
स्पृष्टस्पृष्टिं भाषणं	५००
स्पृष्ट्वा रुद्रस्य	२६७
स्मृतानामेक	६३९
स्रावे चैव पितुः	४९३
स्वगोत्राद्भ्रश्यते	४९८
स्वभर्तृप्रभृति	७३७
स्वमातृपितृदीक्षायां	५९२
हन्ता मन्त्रोपदेष्टा	८६३
हस्तेऽग्नौकरणं	६८५
हिरण्ये तूदकं	३८२
होमस्तत्र न कर्तव्यः	४०६
—	२२४, ४२३, ४५५, ४९७, ६९०,

स्मृत्यर्णवः

ऋषिः	पृष्ठम्
अङ्गेभ्यो ग्रंथिनः	४८
सर्वेषां ब्राह्मणो	४६५

स्मृत्यर्थसारम्

ऋषिः	पृष्ठम्
अग्निस्तीर्थानि	२३६
अङ्गुल्या धावयेद्दन्तान्	२४४
अतीताशौचं तु	५३५
अनुपनीत	५११
अनुपनीतमरणे	५१०
अनुमरणे सहमरणे	६७९

ऋषिः	पृष्ठम्
अन्ततस्तरुणौ साग्नौ	२३०
अन्धः श्वित्री च	१४८
अभिवादे नमस्कारे	११०
अमृतापिधानम्	४५३
अस्नेह औषधे	२३९
अस्पृश्यस्पर्शन	५८५
अस्पृश्यस्पर्शनस्नाने	२४७
आद्यदेशादन्यदेशे	६०२
आद्यश्राद्धविघ्ने	७२८
आद्यश्राद्धस्य विघ्ने	६४८
आपोशनं गृहीत्वा	४२३
आपोशनं वामभागे	४२२
आपोहिष्ठेत्यृचा	३१६
आरंभो वरणं	४८२
आसूर्यदर्शनात्	३३७
आस्यगतश्मश्रु	२३७
आस्ये चान्नस्य	४२३
आहिताग्नेर्विधि	६२७
उच्छिष्टस्पर्शनं	४२८
उच्छिष्टाद्युप-	२६४
उत्तरीयशिलापात्र	६०२
उत्तानदेवतीर्थेन	३१६
उदक्यां सूतिकां	४०९
उपनयनं गर्भात्	९०
उपनयनात्	११७
उपनयनात्प्राक्	८६
उपसंग्रहणं नाम	१११
उपात्ते तु	१६
उपात्ते तु प्रतिनिधौ	५७८
एकपंक्तिषु भुंजानो	४२८
एका तु मृत्तिका	२१९
एते संस्कारा	८४
कनिष्ठा देशिन्यङ्गुष्ठ	२२५
कन्यामरणे	५१५
कुक्कुटाण्डप्रमाणं	६०१
कृच्छ्रं तस्या यया	२७९
कोद्रवं वरकं	३९८
कोविदारशमीक्षा	२४३

ऋषिः	पृष्ठम्
गायत्र्यान्नम्	४२२
गुप्तमग्नचाम्बु	३५४
चतुर्थ्यां पूर्वरात्रौ	३९
चतुर्दश्यष्टमी	३८
चतुर्मासाभ्यन्तरे	४९२
जपान्ते प्रातः	३४५
जलादुत्तीर्य वस्त्रप्रान्तं	२५०
जाताशौचे मृताशौचे	४७९
जाते पुत्रे पिता	८०
तैलाभ्यंगनिषेधेषु	२८४
तैलाभ्यङ्गे निषिद्धाः	२८५
दंडः पलाशन्यग्रोध	९५
दन्तवद्दन्तलग्नं	२३८
दशाहस्थाने	५१९
दिवोदितानि कर्माणि	३५८
देवयज्ञो वैश्वदेवाख्यं	४०३
देवरेण सुतो	१३
देशान्तरादर्वाक्	५२२
द्रव्याभावे द्विजाभावे	७९८
न जले शुष्कवस्त्रेण	२२९
न महानिशि	२७०
नवमिश्रपुराणानि	६६१
न सर्वरक्तं कृष्णं	२५२
नात्मानं पश्यन्नाचामेत्	२२३
नान्दीमुखे गया-	८०७
नान्योदग्न्युदक्शेष-	२२२
नान्योन्यं पृष्ठतो	२६३
नाभिच्छेदात्	५०५
नाशुष्कपाणिपादो	४२८
निमित्तश्राद्ध	६३५
नित्यश्राद्धमदैवं	४०२
निवीती सनकादिभ्यो	४०४
निषिद्धदिवसे वारे	२८५
निष्क्रामणं चन्द्र	८२
पवित्रकर आचामेत्	२३१
पादौ प्रक्षाल्य	४२०
पादौ हस्तौ प्रक्षाल्य	२२१
पालाशः खादिरो	३६०

ऋषिः	पृष्ठम्
प्रणवव्याहृती	३७१
प्रतिमा लोहजा	४७६
प्रभात उत्थाय इष्टं	२०९
प्राचीदिशामनुक्तौ	१५
प्रातर्होमे संगवान्तः	३५८
प्रातः स्नानं सदा	२४६
प्रादेशमात्रं देवानां	७९१
बर्हिः काशमयं	२३४
बाल उपनयनात्	४७६
ब्रह्मचारी गृहस्थश्च	३३८
ब्रह्माणमीशं विष्णुं	३८४
ब्राह्मतीर्थेन त्रिश्चतुर्वा	२२७
भूतयज्ञबलि-	४०१
भूतलं नारी	४७२
भोजने केशकीटादि	४३३
मातापितृमरणे	५२३,६२१
मुखजा विप्रुषः सूक्ष्माः	२३८
मूत्रं पुरीषं समुत्सृजन्	२१४
मृन्मयानां	४७१
यदि कश्चित्	६०३
यदि कश्चित् ज्ञानः	१२७
यस्यां हतश्चतुर्दश्यां	२८४
रजस्वला चतुर्थेऽह्नि	२७७
वयोवस्थाविशेषम्	६७१
वसंतकालेऽपि	१५०
वस्त्रं यज्ञोपवीतार्थे	९२
वस्त्रादिसहित	२४०
वामेन पात्रमुद्धृत्य	२२४
वायसैः सेविते	६०३
वासस्तण्डुलमप्पात्रं	५९६
विण्मूत्रशुक्र	४६७
विप्राग्न्यर्का	३६६
विवाहात्परमाधाय	२१
वैश्वदेवाख्यं	४०५
शालिः श्यामाक	३६१
शाल्मल्यरिष्ट	२४३
शुक्लैस्तिलैर्देवान्	२४९
श्रोत्रियं वेदवित्	६४९

ऋषिः	पृष्ठम्
षंढांधादिषु	१०१
संनिधौ यजमानः	३५७
संशोध्य दन्तानाचम्य	२४५
संस्काराणामयोग्योऽपि	३६१
सपिण्डीकरणात्	६४५,७२८
सपिण्डीकरणेष्वेतान्	६७७
समस्येदग्नि	३५९
सर्वदा नित्यकामार्थे	२५९
सर्वेषां वा भवेत्	२३०
सायं सन्ध्यामुपास्य	४५६
सावित्र्यादिक्रियाः	३४५
सूतिकास्ववर्णा–	४९३
सौवर्णं राजतं	४६८
स्त्रीषु सापिण्ड्यं	४९८
स्नेहादिना जातिपूत्कृष्ट–	५४२
स्पृष्टे रजस्वले	२७९
स्वकर्महानौ	३६६
हस्तेनावर्तयेत्	३४२
हृत्कण्ठतालुगाभिस्तु	२२२
होमे मुख्यो	३५५
— ३२ टीप, ३६५, ३६७, ५००,५३६,५४६,५६१,७८९,	

हरदत्तः

ऋषिः	पृष्ठम्
अन्यः पूर्वः पतिः	८८७
अभिवादनस्य यत्	११२
गुरुरत्र पिता	८८७
जाते कुमारे	८०
तस्मिन्विषय	२६७
परिसंख्येयं भोजनस्य	४१७
वाक्कर्मजन्यो	२
शौचेऽपि यथा स्यात्	२१५
सागं सकल्पं	४९
— ८६, ८९, ९४, १०८, ११२, १४३,१९२,२२४, ३१७,३६८, ३९७, ३९९, ७१०	

हरिवंशः

ऋषिः	पृष्ठम्
अभिजिन्नाम	८३२

हारीतः

ऋषिः	पृष्ठम्
१।९–१३	१७
१।१५	१८
१।१६	९
१।१७–१८	१८
अकृते वैश्वदेवे	४१०
अग्निं स्वात्मनि	१७१
अतिथीनागतान्	४०८
अथोद्धृत्यान्नं	८०१
अदृष्टपूर्वमज्ञातम्	४१३
अधिमासे न	७२९
अध्यापनं च	३१
अनाश्रमी संवत्सरं	९०२
अनुयानेन सापिण्ड्यं	७१८
अन्तरूर्वोररत्नी	२२१
अन्नपतये नमः	४२१
अपराह्णः पितॄणां	७०९,७३९
अप्रावृत शिरा यस्तु	२१२
अवकीर्णी नैर्ऋत्यै	१२२
अवेक्षेत च	६
अष्टागवं धर्म्यहलं	६३
असंक्रमे तु	७३०
असंक्रान्तेऽपि	७३०
आदित्येन सह	३१२
आर्द्रवस्त्रं परित्यज्य	५४२
आर्द्रवासा जले	३४५
आर्द्रवासा जले कुर्यात्	२२८
आहारं च रहः	२१५
इमं श्राद्धविधिं	८२२
उच्छिष्टेन तु संस्पृष्टो	२४०
उद्धृत्य पाणिं	८०९
उपक्रमं वृषोत्सर्गे	७३४
उपनीतो माणवको	११५
उपास्य विधिवत्	३५४
एकवस्त्रो न भुंजीत	४२६
एकादशे द्वादशे	६६५
एका लिंगे तिस्रोऽपाने	२१७
एवं वनाश्रमे	१७१
ऐशान्यभिमुखो	२२१
कंदुपक्वं स्नेहपक्वं	४४६
कन्यादूषी सोम	९२२
कन्यामकरमीनेषु	७४०
काम्यश्राद्धानि	७६४
कालेऽन्यथा गतं	८२३
कालेयपालाशको	२४२
कुरुष्वेत्यनु	८०२
कुर्वीत देवतापूजां	३८३
कुर्वीत सर्वकर्माणि	५५३,६१०
कुशहस्तेन यज्जप्तं	२२९
कृतहोमस्तु भुञ्जीत	४१७
क्लिन्ने भिन्ने	४७४
क्लिन्ने भिन्ने शवे	४४७
क्षत्रियस्याभि	९२३
गर्भाष्टमेऽब्दे	८५
गुडतिलपुष्प	९१६
गृहस्थः पुत्रपौत्रादि	१६९
गोरक्षां कृषि–	६६
गोशृङ्गेण शतं	९०५
ग्रन्थिर्यस्य पवित्रस्य	२३१
चतुर्थीसंयुता कार्या	८३१
चतुर्थेह्नि स्नाताया	७४
चत्वरोपद्वारयोर्न	२१४
चाटकं कुक्कुटं	२६७
चान्द्रायणं नव	९१३
चांद्रायणं नवश्राद्धे	४४८
चिकित्सकस्य	५७
छंदःसु पादाक्षर	८७
जपेन देवता	३५२
जातपुत्रे मृतजाते	५०५
जलात्तीरं समासाद्य	२५१
जातमृते मृतजाते	४९४
ततः संध्यामुपासीत	३१५
ततो देवान्	३८३
तस्य तु कुमारीं	१५४
तीर्थद्रव्योप	७६०
त्रयः स्नातका	११९

ऋषिः	पृष्ठम्
त्रयोदश्यां यदा	८३८
त्रिदण्डं वैणवं	१८३
त्रिः पिबेद्वीक्षितं तोयं	२२७
दंपत्योः सह	६३७
दर्भासीनो दर्भपाणिः	३६९
दशाह एव	५१९
दशाहाच्छुध्यते विप्रो	४९५
दाहकार्यद्वयं	५३३,६३५
दृष्टार्थे द्विगुणं	५४५
देवता पितरश्चैव	३८०
द्विजः पुरुषसूक्तस्य	३९५
द्विविध एव	७३,५८०
द्विविधा स्त्रियो	८४
न कार्ष्णायसे मृन्मये	४२०
न ग्रामाभिमुखं	५८१
न तत्र वीरा	८२२
न यस्य वेदा	२
न रक्तमुल्बणं	२५१
न रूप्यं केवलं	२३२
न शूद्रप्रति-	४९६
नष्टे जलपवित्रे	१८४
नाग्निहोत्रात्परो	२०
नोत्तरेदनुपस्पृशेत्	२३५
पंचप्राणाहुतीः	४२३
पतितपाषंड	८५०
पथि दर्भाश्रितो	२३४
परपूर्वासु भार्यासु	५२०
पाषण्डानाश्रितात्	४८८
पित्रादीन् मात्रादीन्	३७८
पित्रोस्तत्सह	५२७
पित्र्यं तूभय	७२०
पुरा जग्राह वै	९८
पूर्वाह्णे चेद्	७३९
प्रतिपत्सु चतुर्दश्यां	३५
प्रतिश्रुत्यानृतं	९२१
प्रत्यब्दं द्वादशे मासि	७३०
प्रत्युद्वाहो नैव	१४८
प्राङ्नाभिच्छेदनात्	८०
प्रेतनिर्हरणं कृत्वा	५४४
प्रेतसंस्कारकार्याणि	६६४
ब्राह्मणेन वधे	४१०
भक्त्या च शक्तितो	४१०
भर्त्रा सहानुमरणं	६४२
भूतविद्धा त्वमा	७४०
भूमावेव निदध्यात्	८०४
भैक्ष्यमपेक्षितं	९७
भ्रष्टशौचं नरं दृष्ट्वा	२२०
मंत्रमुच्चारयेत्	३३९
मंत्रार्थज्ञो जपन्	३०
मणिवासो गृहा-	९२४
मधुना परमप्रीताः	७८३
महानवम्यां	३७
माघे नभस्यमा या	२३३
मातृतः पितृतः	६४१
मार्जनार्चन	३१६
मुक्तामयोपवीतं	९२
मृतजातेऽपि वा	४९४
मृतवत्सापयः	८८२
मृतसूतक	९०७
मृते भर्त्तरि या	१६१
मृत्योः परस्तात्	१२१
य आत्मकृतैः	९३९
यज्ञेन लोका	१९
यतेतैवंविधं	७७६
यथा कथंचित्	७३५
यथा हि वेदाध्ययनं	६
यदन्नं प्रतिलोमस्य	९०६
यद्देवेभ्यो जुहोति	४०६
यस्यैतानि सुगुप्तानि	१२०
या तु पूर्वममावास्या	६६७
येभ्य एव पिता	७३८
यो मोहादथवा	३९०
रहस्ये रहस्यं	८६९,९३२
लोष्ठेन परिमृंजीत	२१५
वसित्वा वसनं	३७६,७३७
वस्त्रनिष्पीडनं	२५३
वामहस्ते कुशान् कृत्वा	२३२
वस्तुपालनभूतेभ्यो	३९९
विदितात्पति	५६
विरक्तः प्रव्रजेत्	१७३
विवर्णं गन्धवत्तोयं	२२२
वेदाः प्रमाणं	२
वेदो विद्या ब्राह्मणस्य	११५
वैश्वदेवो देवयज्ञो	४०३
शंखरूप्यमयी	३४२
शङ्खैः शतगुणं	३४२
श्राद्धविघ्ने द्विजातीनां	६५५, ७१५, ८२१
श्रौतस्मार्तेषु	२३७
श्वानो वा क्रोष्टुको	९०४
श्वोनध्यायेऽद्य	३९
संचिन्त्य पोष्यवर्गस्य	३७५
संतिष्ठमानेष्व	७९५
संवत्सरोत्सन्ने	९२१
सकृत्संस्कृत	७८
सर्वे कण्टकिनः	२४१
सर्वेषामाश्रमाणां	२०६
सस्यां सन्ध्यागतः	७३८
सायंकाले तु	२००
सालग्रामादिभिः	९१२
सावित्र्याभिमंत्रित	३१९
सुषुप्सुर्भोक्ष्यन्	२३५
सोदराणां तु	२३
सोन्तर्जलं प्रविश्याथ	२४६
सौरे यदि दिनं	७०५
स्त्र्युच्छिष्टस्थिता	४३२,८८१
स्वल्पकाले मृताशौचे	५३१
हयरथगज	११५
हस्तदत्तभोजने	४४८
—	१३२, १५४, ५०३, ५०६,६६२,७६६,८६८,९०७
हिरण्यकेशी	
पाणिग्रहणादि	३५४

ऋषिः	पृष्ठम्
हेमाद्रिः	
अज्ञानात् ब्राह्मणं	८७१
अथ चेत्प्रति-	९२३
अथानुमरणे पत्नी	६४२
अनड्वान् हन्यते	८७७
अन्यथा निष्कृतिः	९२५
आमापाते भरण्यां	७४८
असत्प्रतिग्रहः	५८
कृच्छ्रोयुतं तु गायत्र्या	५५०
जपे होमे तथा	३०८
जातके नामकरणे	६५७
तिर्यक्पुंड्रं	३०९
दर्शपाते भरण्यां	७४८
देवार्चा दक्षिणादिः	७९६
देवालये राजगृहे	८८९
धनार्थं क्षेत्रदारार्थं	८६२
न्यायार्जितस्य	५०
पलद्वये पञ्चगव्यं	८८४
पूर्वजः पूर्वजं	९१७
पूर्वजो द्रव्यलोभेन	९२५
प्रतिपात्रं द्विजे	८०१
भिक्षार्थमागतां	७६८
महिषीहनने	८७८
मातापित्रोरेक-	६९५
माधूकं शैल-	८८०
मेषीं च महिषीं	५८
यथा पुष्पवती नारी	५५४
यदि रोगनिवृत्त्यर्थं	८७९
यस्त्वासनोप	७८८
यो विप्रो विधवां	८९१
यो विप्रो वृषभं	८७७
रवेरस्तमयात्	७०४
वसुरुद्रा दितिसुता	७९३
वामहस्ते तु	३०८
विप्रः कण्ठगत	९०९
विभक्ता वाऽविभक्ता	७४९
सपिण्डीकरणं नाम	६८३
सुरापं दंडयेत्	८७९
स्नातवत्यामृतौ	९११
स्वस्याकिंचन्य	९१७
स्वस्वेष्टदेवता	६४५
हत्वा ब्रह्मस्व	८८३
हत्वा शतपलं	८६५
--	९१५, ९२४, ९४३

ADDENDA

ऋषिः	पृष्ठम्
आपस्तम्बः	
२।५।१२।३-४	१४१
आपस्तम्बगृह्यसूत्रम्	
१।३।२०	१२५
पराशरः	
उच्छिष्टोच्छिष्ट	४२८
प्रजापतिः	
सर्वसंस्थाधिकारी	१९
बैजावापः	
आज्यमासिच्य	८०२
बोधायनः	
१।५।१५।१६-२१	२२७
अनुष्ठितं तु	५
अन्नाभावे द्विजाभावे	२७२
मातृदुहितृ	३५०
भरद्वाजः	
वसन्ते ब्राह्मणं	८७
समाहितमनाः	३२४
भविष्योत्तरः	
मिथुनात्कर्क	२७६
मनुः	
५।१३७	२३५
मरीचिः	
सर्पं दृष्ट्वा यथा	५४९
मार्कण्डेयः	
देवार्चनादि कार्याणि	२३५
यमः	
नारद	१२४
याज्ञवल्क्यः	
आ. ६५	१३७
आ. २१६	५६
प्रा. ४५	१६९
योगयाज्ञवल्क्यम्	
असामर्थ्याच्छरीरस्य	५४९
मांत्रं भौमं तथा	५४९
वसिष्ठः	
आग्नेयमाद्रां	६३४
विष्णुः	
ऊर्ध्वपुंड्रधरो	५४९
व्यासः	
गृहे त्वेकगुणा	३१५
न श्मश्रुव्यंजन	१२४
स्नास्यतो वरुणः	३६४
स्वस्वोक्तवर्णं	३२५
व्यासस्मृतिः	
तथा बालस्य	५१३

ऋषिः	पृष्ठम्
शङ्खः	
गृहे त्वेक गुणं	३२१
गृहे मृतासु	५१७
शातातपः	
तस्माद्दहरहः	७०७
शौनकः	
अप नः शोशुच	३४८
त्वं सुमेषं	४४९
संवर्तः	
रजस्वलां च	७७
सुमन्तुः	
कूष्मांडं बृहतीं	४३८
स्मृत्यन्तरम्	
उपवासादिने यो वै	२४४
प्रथमेऽह्नि कर्त्ता ये	६१५